GOVERNMENT OF INDIA

DEPARTMENT OF ARCHAEOLOGY

CENTRAL ARCHAEOLOGICAL LIBRARY

CALL NO. Sa2Vu / Mah

D.G.A. 79.

THE
SĀMĀNYA VEDĀNTA UPANISHADS
WITH THE COMMENTARY OF
SRI UPANISHAD-BRAHMA-YOGIN

7941

EDITED BY

PANDIT A. MAHADEVA SASTRI, B.A.

DIRECTOR, ADYAR LIBRARY, ADYAR, MADRAS

Sa2Vu
Mah

PUBLISHED FOR THE ADYAR LIBRARY

(THEOSOPHICAL SOCIETY)

1931

891.7008 A9
Fa XXVI
no 28. A.R.S.
44
5.2.44.
Fa I. XXVI
T.S.A.

CENTRAL ARCHAEOLOGICAL
LIBRARY NEW DELHI
Acc. No. 7941
Date. 10-12-58
Call No. 52 Vu
Mah

अष्टोत्तरशतोपनिषत्सु

Sāmānya Vedānta Upanishads

सामान्यवेदान्त–उपनिषदः

श्री उपनिषद्ब्रह्मयोगिविरचितव्याख्यायुताः

अडयार्–पुस्तकालयाध्यक्षेण

अ. महादेवशास्त्रिणा

संपादिताः

अडयार्–पुस्तकालयार्थं

प्रकटीकृताश्च

ॐ नमो
ब्रह्मादिभ्यो
ब्रह्मविद्यासंप्रदायकर्तृभ्यो
वंशऋषिभ्यो
नमो गुरुभ्यः

DEDICATED TO
Brahma and the Rishis,
The Great Teachers
Who handed down Brahmavidya
through Generations

THE EDITOR'S NOTE

The materials on which is based the edition of The Sāmānya Vedānta Upaniṣads comprised in this volume are the same as those described in the preceding volume treating of *The Yoga Upaniṣads*.

16th Dec., 1921 A. M. S.

अस्मिन् सम्पुटे अन्तर्गतानामुपनिषदां सूची

संख्या	उपनिषन्नाम	ईशादिसंख्या	पुटसंख्या
१.	अक्ष्युपनिषत् . .	७२	१
२.	अध्यात्मोपनिषत् . .	७३	१२
३.	अन्नपूर्णोपनिषत् . .	७०	२६
४.	आत्मोपनिषत् . .	७६	९०
५.	आत्मबोधोपनिषत् . .	४२	९८
६.	एकाक्षरोपनिषत् . .	६९	१०६
७.	कौषीतकिब्राह्मणोपनिषत् .	२५	१११
८.	गर्भोपनिषत् . .	१७	१६८
९.	निरालम्बोपनिषत् . .	३४	१८१
१०.	पैङ्गलोपनिषत् . .	५९	१९२
११.	प्राणाग्निहोत्रोपनिषत् .	९४	२१७
१२.	मन्त्रिकोपनिषत् . .	३२	२२५
१३.	महोपनिषत् . .	६१	२३४
१४.	मुक्तिकोपनिषत् . .	१०८	३४५
१५.	मुद्गलोपनिषत् . .	५७	३७८
१६.	मैत्रायण्युपनिषत् . .	२४	३८८

१७.	वज्रसूचिकोपनिषत् . .	३६	४१६
१८.	शारीरकोपनिषत् . .	६२	४२३
१९.	शुकरहस्योपनिषत् . .	३९	४२९
२०.	सर्वसारोपनिषत् . .	३३	४४४
२१.	सावित्र्युपनिषत् . .	७९	४९९
२२.	सुबालोपनिषत् . .	३०	४६०
२३.	सूर्योपनिषत् . .	७१	९०२
२४.	स्कन्दोपनिषत . .	९१	९०८

विषयसूचिका

अक्ष्युपनिषत्

प्रथमः खण्डः

चाक्षुष्मतीविद्या १

द्वितीयः खण्डः

ब्रह्मविद्यास्वरूपम् ३
ब्रह्मविद्योपायो योगः ३
योगस्य प्रथमभूमिका ४
,, द्वितीयभूमिका ९
,, तृतीयभूमिका ९
द्विविधः असंसर्गः ६
प्रथमभूमिकास्तुतिः ७
योगस्य चतुर्थभूमिका ८
,, पञ्चमभूमिका ८
,, षष्ठभूमिका ९
,, सप्तमभूमिका ९
ओङ्कारब्रह्मनिष्ठाविधिः १०

अध्यात्मोपनिषत्

सर्वभूतान्तरात्मनारायणस्वरूपम् . . . १२
ब्रह्मनिष्ठया स्वाध्यासापनयविधिः . . . १३
अनात्मनिरसनपूर्वकं केवलात्मानुसंधानम् . . १४
वासनाक्षयोपायः १५
ब्रह्मनिष्ठायां प्रमादनिरसनविधिः . . . १६
समाध्यभ्यासस्यावधिः १७
सर्वोपाधिमृषात्वानुसन्धानपूर्वकं केवलब्रह्मात्मदर्शनम् . १७
द्वैतासंभवनिरूपणम् १७
परात्मनि चित्तसमाधानविधिः . . . १८
वैराग्यबोधोपरतिशान्तीनां मिथो हेतुफलत्वम् . . १८
श्रवणमननिदिध्यासनसमाधिलक्षणम् . . . १९
समाधेः धर्ममेघत्वम् २०
समाधिना अपरोक्षबोधसिद्धिः . . . २०
वैराग्यबोधोपरतीनां अवधिः . . . २०
स्थितप्रज्ञलक्षणम् २१
जीवन्मुक्तलक्षणम् २१
जीवन्मुक्तस्य प्रारब्धसत्त्वं, सञ्चितक्षयः, आगाम्यश्लेषश्च . २२
प्रारब्धसत्त्वासत्त्वपक्षयोः निरूपणम् . . . २२
कर्मत्रयविरळब्रह्मस्वरूपम् २३
गुरवे स्वानुभवप्रकटनम् २४
विद्यासंप्रदायपरम्परा २५

अन्नपूर्णोपनिषत्

प्रथमाध्यायः

ब्रह्मविद्यातत्साधनजिज्ञासा . . . २६
अन्नपूर्णामन्त्रानुष्ठानेन आत्मज्ञानोदयः . . २७

पञ्चविधभ्रमनिवृत्तिः २८
स्वस्वरूपानुसंधानम् २९
सत्तासामान्यदृष्टिः ३१
वस्तुतत्त्वज्ञानार्था समाधिः . . . ३३
विचारेण समाधिसिद्धिः ३५

द्वितीयाध्यायः

बन्धहेतुसङ्गलक्षणम् ३८
असङ्गत्वं मोक्षसाधनम् ३८
संकल्पवर्जनेन आत्मरतिप्राप्तिः . . . ३९
जाग्रत्येव सुषुप्तता ४०
तुरीया स्थितिः जीवन्मुक्तिः . . . ४०
तुरीयातीता स्थितिः विदेहमुक्तिः . . . ४१
प्रत्यगभिन्नब्रह्मदृष्टिविधानम् . . . ४१
मोक्षलक्षणम् ४३
जीवन्मुक्तसमाचारः ४४
कैवल्यलक्षणं सम्यग्दर्शनम . . . ४५

तृतीयाध्यायः

विदेहमुक्तिस्वरूपजिज्ञासा ४८
जीवन्मुक्तस्य इन्द्रियमनोनिग्रहप्रकारः . . . ४८
तुरीयावस्थितिः ४९
तुरीयतुरीयावस्थितिः ५०

चतुर्थाध्यायः

जीवन्मुक्तस्य सिद्धिषु उदासीनता . . . ५३
जीवन्मुक्तस्य नष्टचित्तता ५५

सरूपारूपौ मनोनाशौ ९५
विदेहमुक्तस्थितिः ९६
ब्रह्मविद्या तत्फलं च ९८
ब्रह्मविद्यासाधनानि ६०
प्राणसंरोधनेन चित्तशमः ६०
वासनारोधनेन चित्तजयः ६२
तत्त्वज्ञानमनोनाशवासनाक्षयोपायानां युगपदनुष्ठेयता . ६७

पञ्चमाध्यायः

जीवन्मुक्तिसिद्धये सङ्गत्यागविधिः . . . ६९
चित्तादिविभ्रमनिवृत्त्यर्थं आत्मदृष्टिविधिः . . ७०
ब्रह्मात्मबोधेन सर्ववासनानिवृत्तिः . . . ७१
अनात्मभ्रमनिवृत्त्यर्थं सहजप्राणायामविधिः . . ७३
सर्वचैत्यकलनात्यागेन ब्रह्मज्ञानप्राप्तिः . . . ७५
साङ्ख्ययोगाभ्यां परमपदप्राप्तिः . . . ७७
गुरोः स्वानुभवप्रकटनम् ७९
ब्रह्मभावाय चित्तनाशविधानम् . . . ८०
शास्त्रार्थज्ञानध्यानादिभिः अद्वैतात्मलाभः . . ८१
सप्तभूमिकाज्ञानतो मोक्षप्राप्तिः . . . ८२
जीवन्मुक्तस्य शोकाभावः ८४
अनात्मभावनात्यागपुरस्सरं आत्ममात्रभावनाविधिः . ८४
तुरीयावस्था ८६
अध्यात्मशास्त्रसिद्धान्तः ८७
वेदान्तसम्प्रदायविधिः ८९

आत्मोपनिषत्

पुरुषत्रैविध्यम् ९०
आत्मस्वरूपम् ९०

अन्तरात्मस्वरूपम् ९१
परमात्मस्वरूपम् ९१
वस्तुतो ब्रह्मणः अद्वयत्वनिरूपणम् . . . ९२
आत्मनः नित्यसिद्धत्वम् ९३
केवलात्मरतस्य कृतार्थत्वम् . . . ९४
ब्रह्मविदो ब्रह्मत्वम् ९६
ब्रह्मविदः सर्वविकल्पासंभवः . . . ९६

आत्मबोधोपनिषत्

प्रथमखण्डः

प्रणवाष्टाक्षरीमन्त्रोपासना ९८
प्रणवाभिन्नब्रह्मपदस्वरूपम् ९९
प्रणवज्ञानेन अमृतत्वप्राप्तिः . . . ९९
प्रत्यगभिन्नब्रह्मज्ञानं तत्फलं च . . . १००

द्वितीयखण्डः

उत्तमाधिकारिब्रह्ममात्रानुभूतिप्रकाशः . . . १०१
मध्यमाधिकारिमननप्रकारः १०२
उपनिषदभ्यासफलम् १०५

एकाक्षरोपनिषत्

सर्वात्मकतया नारायणस्तुतिः . . . १०६
सर्वात्मज्ञानफलम् ११०

कौषीतकिब्राह्मणोपनिषत्

प्रथमाध्यायः

क्रतुसामान्यस्य गौणमुख्यफलजिज्ञासा . . . १११
गौणफलं—स्वर्गप्राप्तिः पुनरावृत्तिश्च . . . ११३

मुख्यफलं—ब्रह्मलोके ब्रह्मभावापत्तिः . . . ११७
ब्रह्मविदुषो ब्रह्मैश्वर्यप्राप्तिः ११८
सविशेषब्रह्मविदो विभूतिविशेषलाभः . . . १२०
आत्मनः सत्यत्वं सर्वात्मत्वं ब्रह्ममात्रत्वं च . . १२२

द्वितीयाध्यायः

प्राणब्रह्मोपासनं तत्फलं च . . . १२४
दुर्लभार्थलाभकरं एकधनावरोधनकर्म . . . १२६
सर्वार्थसिद्धिकरं दैवं कर्म १२७
प्राणब्रह्मप्रापकं अग्निहोत्रोपासनम् . . . १२८
सर्वजयप्रदं अमावास्योपासनम् . . . १३१
प्रजामरणदुःखनिवारकं चन्द्रोपासनम् . . . १३२
पुत्रदीर्घायुःसंपादकं कर्म १३३
परिमराख्यं अध्यात्माधिदैवोपासनम् . . . १३४
निःश्रेयसादानं नाम मुख्यप्राणविद्या . . . १३६
पुत्राभ्युदयफलं संप्रदानाख्यं उपासनम् . . १३८

तृतीयाध्यायः

मनुष्यहिततमं प्रज्ञाऽऽत्मप्राणोपासनम् . . . १४०
मुख्यप्राणस्य अमृतत्वोपासनम् . . . १४३
प्राणस्य उक्थत्वोपासने सर्वोज्जीवनहेतुत्वदर्शनम् . . १४५
पुरुषस्य उत्क्रमणानन्तरावस्था . . . १४७
प्रज्ञायां सर्वभूतानामेकीभावः . . . १४८
प्रज्ञाऽधिष्ठितैरेव वागादिभिः नामाद्याप्तिः . . १५०
प्रज्ञाऽपेतानां वागादीनां असाधकत्वम् . . १५०
वागादीनां मिथ्यात्वदृष्टिपूर्वकं केवलब्रह्मात्मप्रज्ञानविधिः . १५१
सर्वभेदरहितप्रज्ञाऽऽत्मवेदनविधिः . . . १५२

चतुर्थाध्यायः

ब्रह्मोपदेशप्रतिज्ञा १९५
आदित्यब्रह्मोपासनम् १९६
चन्द्रब्रह्मोपासनम् १९७
विद्युद्ब्रह्मोपासनम् १९७
स्तनयित्नुब्रह्मोपासनम् १९७
आकाशब्रह्मोपासनम् १९८
वायुब्रह्मोपासनम् १९८
अग्निब्रह्मोपासनम् १९९
अब्ब्रह्मोपासनम् १९९
प्रतिरूपपुरुषोपासनम् १९९
प्रतिध्वनिपुरुषोपासनम् १६०
शब्दपुरुषोपासनम् १६०
तमःपुरुषोपासनम् १६०
शारीरपुरुषोपासनम् १६१
सुप्तपुरुषोपासनम् १६१
दक्षिणाक्षिपुरुषोपासनम् १६२
सव्याक्षिपुरुषोपासनम् १६२
अनात्मज्ञं प्रति आत्मबोधनप्रकारः . . . १६२
आत्मनः सर्वशरीरव्याप्तिः १६४
आत्मज्ञानेन विदेहमुक्तिप्राप्तिः . . . १६६

गर्भोपनिषत्

शरीरलक्षणसूत्रम् १६८
शरीरस्य पञ्चभूतात्मकत्वम् . . . १६८
शरीरस्य पंचसु वर्तमानत्वम् . . . १६९

करणजातस्य प्रातिस्विकविनियोगः . . . १६९
शरीरस्य षडाश्रयत्वं षड्गुणयोगश्च . . . १७०
शरीरस्य सप्तधातुकत्वम् १७०
मासक्रमेण गर्भव्यक्तिभेदः १७२
पुंस्त्र्यादिभेदनियामकः १७३
अष्टममासे जीवस्य अतीतार्थवेदनसामर्थ्यम् . . १७३
नवममासे जीवस्य पूर्वजातिस्मरणम् . . . १७४
जीवस्य प्राक्तनकर्मवेदनपूर्वकं परिदेवनम् . . १७४
भूपतने पूर्ववृत्तविस्मरणम् १७६
शरीरस्य त्रिमलत्वादिनिर्वचनम् . . . १७७
शरीरस्य यज्ञत्वसम्पादनम् . . . १७८
शरीरमाननिरूपणम् १७९
उपसंहारः १८०

निरालम्बोपनिषत्

एकचत्वारिंशत्प्रश्नाः १८१
ब्रह्मस्वरूपम् १८२
ईश्वरस्वरूपम् १८३
जीवस्वरूपम् १८३
प्रकृतिस्वरूपम् १८३
परमात्मस्वरूपम १८४
ब्रह्मादीनां ब्रह्ममात्रत्वम् १८४
जातिस्वरूपम १८४
कर्माकर्मणोः स्वरूपम् १८५
ज्ञानाज्ञानयोः स्वरूपम् १८५
सुखदुःखयोः स्वरूपम् १८६

स्वर्गनरकयोः स्वरूपम् १८६
बन्धमोक्षयोः स्वरूपम् १८७
उपास्यशिष्ययोः स्वरूपम् . . . १८८
विद्वन्मूढयोः स्वरूपम् १८८
आसुरस्वरूपम् १८८
तपःस्वरूपम् १८९
परमपदस्वरूपम् १८९
ग्राह्याग्राह्ययोः स्वरूपम् १८९
सन्न्यासिस्वरूपम् १९०
विद्याफलम् १९१

पैङ्गलोपनिषत्

प्रथमाध्यायः

परमरहस्यकैवल्यजिज्ञासा . . . १९२
अद्वितीयब्रह्म १९३
मूलप्रकृतिः साक्षिचैतन्यं च . . . १९३
अव्यक्तं, ईश्वरचैतन्यं च १९४
महत्, हिरण्यगर्भचैतन्यं च . . . १९४
अहङ्कारः, विराट्चैतन्यं, तन्मात्रसंभूतिश्च . . १९५
अण्डभुवनशरीराणां सृष्टिः . . . १९५
कर्मेन्द्रियसृष्टिः १९५
ज्ञानेन्द्रियसृष्टिः १९६
इन्द्रियपालकसृष्टिः १९६
ईशस्य शरीरेन्द्रियप्रवेशः १९६
ईशस्य जीवत्वप्राप्तिः १९६

द्वितीयाध्यायः

ईशः कथं जीवत्वमगमत् ? . . . १९७
स्थूलशरीरसृष्टिः १९७
सूक्ष्मशरीरसृष्टिः १९८
पञ्चकोशात्मकं शरीरत्रयम् . . . १९९
पुर्यष्टकम् १९९
विराजो विश्वत्वम् १९९
सूत्रात्मनस्तैजसत्वम् २००
मायोपाधेः प्राज्ञत्वम् २००
प्राज्ञस्यैव श्रवणादिजन्यज्ञानफलम् . . . २००
प्रतिबिम्बितचैतन्यस्यैवावस्थावत्त्वम् . . . २०१
जाग्रदवस्था २०१
स्वप्नावस्था २०१
सुषुप्त्यवस्था २०२
मूर्च्छावस्था २०२
मरणावस्था २०२
जीवस्य ससारगतावविश्रान्तिः . . . २०२
सत्कर्मपरिपाकतो बन्धमोक्षजिज्ञासा . . . २०२
विचारस्य मोक्षसाधकत्वम् . . . २०३

तृतीयाध्यायः

महावाक्यजिज्ञासा २०४
महावाक्यानुसन्धानविधिः . . . २०४
प्रत्यगभिन्नब्रह्मणः वाक्यार्थत्वम् . . . २०४
श्रवणमननिदिध्यासनसमाधीनां स्वरूपम् . . २०५
निर्विकल्पसमाधिमहिमा २०६

विराडादीनां परमात्मनि लयः . . . २०६
विश्वादीनां परमात्मनि लयः . . . २०७
ऐक्यानुसन्धानेन आत्माविर्भावः . . . २०७
ध्यानप्रकारः वेदनफलं च. . . . २०८

चतुर्थाध्यायः

ज्ञानिमाहात्म्यजिज्ञासा २०९
ज्ञानिनः कुलतारकत्वम् २०९
नारायण एव शारीर आत्मा . . . २०९
ज्ञानिनः शरीरपातपर्यन्तो व्यवहारविशेषः . . २१०
ज्ञानिनः शरीरपाते कैवल्यम् . . . २१०
ज्ञानिमरणे श्राद्धादि न कर्तव्यम् . . . २१०
गुरुशुश्रूषायामनुसन्धानविशेषः . . . २११
ज्ञानिनो वेदादिना प्रयोजनाभावः . . . २१२
ब्रह्मदर्शनोपायो ध्यानयोगः . . . २१२
ब्रह्मध्यानमहिमा २१३
विद्यापाठफलम् २१९
विद्याज्ञानफलम् २१९
उपसंहारः २१६

प्राणाग्निहोत्रोपनिषत्

शारीरयज्ञाधिकारः २१७
बाह्यप्राणाग्निहोत्रप्रयोगः २१८
शारीराग्निदर्शनं नाम अपरब्रह्मविद्या . . . २२१
शारीराग्निविद्यायाः शारीरयज्ञत्वम् . . . २२३
विद्यापठनफलम् २२४

मन्त्रिकोपनिषत्

परमात्मस्वरूपम् २२५
परमात्मदर्शनोपायः २२६
मायावशगतस्य अज्ञस्य संसारः . . . २२६
जीवेशयोः लक्षणम् २२८
परमात्मन एव कालादिबहुरूपत्वम् . . . २२९
परमात्मनो नानादर्शनविकल्पितत्वम् . . . २३०
सर्वलयाश्रयब्रह्मज्ञानेन ब्रह्मभावापत्तिः . . . २३१

महोपनिषत्

प्रथमाध्यायः

उपनिषदधिकारः २३४
नारायणस्य अद्वितीयत्वं ईशत्वं च . . . २३५
यज्ञस्तोमोत्पत्तिः २३५
चतुर्दशपुरुषाणां पञ्चविंशतितत्त्वात्मकपुरुषस्य चोत्पत्तिः . २३६
रुद्रोत्पत्तिः २३७
चतुर्मुखब्रह्मोत्पत्तिः २३७
व्याहृतिछन्दोवेददेवतानामुत्पत्तिः . . . २३८
नारायणस्य विराड्रूपत्वम् २३८
नारायणोपलब्धिस्थानं हृदयम् . . . २३९

द्वितीयाध्यायः

शुकस्य स्वयमुद्भूतं पारमार्थिकज्ञानम् . . . २४०
ज्ञाततत्त्वस्यापि शुकस्याविश्रान्तिः . . . २४४
व्यासोपदेशेऽप्यनादरः २४४
शुकस्य जनकं प्रति गमनम् २४५

जनककृता शुकपरीक्षा २४५
शुकजनकसंवादः २४६
बन्धमोक्षविवेकः २४७
जीवन्मुक्तस्थितिः २४८
विदेहमुक्तस्थितिः २५०
शुकभ्रमनिवृत्तिः २५२
शुकविश्रान्तिः २५३

तृतीयाध्यायः

निदाघस्य विचारः २५४
प्रपञ्चस्य अनित्यत्वम् २५५
अहङ्कारमनस्तृष्णानामनर्थकरत्वम् . . . २५७
देहतदवस्थाकुत्सनम् २५८
संसारस्य दुःखमयत्वम् २५९
स्त्रीजनकुत्सनम् २६०
दिगादीनां क्षणभङ्गुरत्वम् . . २६२
वैराग्यात् तत्त्वजिज्ञासा २६२

चतुर्थाध्यायः

मोक्षोपायचतुष्टयम् २६३
शास्त्रादिद्वारा आत्मावलोकनविधिः . . . २६४
समाधिस्वरूपम् २६४
जीवन्मुक्तस्थितिः २६७
विचारस्वरूपम् २६८
शमस्वरूपं, तत्फलं च २७०
सन्तोषः २७१
आत्मविश्रान्तस्य कृतकृत्यता . . . २७१

दृश्यस्य मिथ्यात्वम् . . . २७३
दृश्यसङ्गासङ्गाभ्यां बन्धमोक्षौ . . . २७३
प्रपञ्चस्य मनोमयत्वम् २७४
दृश्यासंभवज्ञाने ब्रह्मताऽवशेषः . . . २७५
चिदात्मावस्थितिरूपः समाधिः . . . २७६
जगतो मृषात्वम् २७७
संसारस्य मनोविलासत्वम् . . . २७७
शान्तमनसो ब्रह्मप्राप्तिः २७८
जीवेशवादत्यागपूर्वस्य ब्रह्मविचारस्य कर्तव्यता . . २७९
निर्विशेषब्रह्मज्ञानमहिमा २८०
संविन्मात्रपरत्वविधिः २८१
मनःप्रशमनेन ब्रह्मसम्पत्तिः . . . २८२
वासनापरिहारेण मोक्षसिद्धिः . . . २८५
चैत्यासंभवज्ञानेन चित्तत्वसाक्षात्कारः . . . २८७
सङ्कल्पस्य बन्धमोक्षमूलत्वम् . . . २८८
अनात्माभिमानत्यागविधिः . . . २८९

पञ्चमाध्यायः

अज्ञानज्ञानयोः भूमिकासंख्या . . . २९०
स्वरूपस्थितिर्मोक्षः स्वरूपभ्रंशो बन्धः . . २९१
अज्ञानभूमिकासप्तकविवरणम् . . . २९२
ज्ञानभूमिकासप्तकविवरणम् . . . २९४
जीवन्मुक्तस्वरूपचर्ये २९७
ज्ञानभूमिकाऽधिकारी २९८
ज्ञानगम्यं ब्रह्मपदम् २९९
ब्रह्मवेदनमेव ब्रह्माधिगमोपायः . . . ३००
मनोलयात् चिन्मात्रस्फुरणम् . . . ३०१

जगद्भ्रमशमनोपायः ३०२
अमनस्कब्रह्माधिगमनम् ३०३
विषयेषु नीरागप्रवृत्तिः ३०५
मनोजयस्य कर्तव्यता ३०६
मनसः सर्वार्थसाधकत्वम् ३०७
तृष्णाछेदनसाधनं अहंभावत्यागः . . . ३०८
मनोऽभ्युदयनाशावेव बन्धमुक्ती . . . ३१०
चिद्विद्याऽधिकारिनिरूपणम् . . . ३११
मायाहननेन ब्रह्मप्राप्तिः ३१२
ब्रह्मचिच्छक्तेः संसारिजीवत्वम् . . . ३१४
मायाऽधीनाः ब्रह्मणः सृष्टिः . . . ३१८
प्रजासृष्टिः अनन्तशास्त्रकल्पनं च . . . ३२०
विकल्पितस्य असत्यत्वेनोपेक्षाऽर्हत्वम् . . ३२२
संकल्पछेदनेन संसारमूलोच्छेदः . . . ३२४

षष्ठाध्यायः

समाध्यभ्यासेन परमेश्वरभावापत्तिः . . . ३२६
व्युत्थानकालीनो मुक्तव्यवहारः . . . ३२८
चरमजन्मनि ज्ञानाधिकारः . . . ३२९
ज्ञानिनां आत्मोपासनाप्रकारः . . . ३३०
अज्ञानिपरिदेवनम् ३३१
मनोनाशप्रकारः ३३१
वासनात्यागोपायः ३३२
जीवन्मुक्तमहिमा ३३५
तृष्णात्यागविधिः ३३६
चतुर्विधो निश्चयः ३३७

ब्रह्मणो लोकायतिकादिभिः बहुधा विकल्पनम् . . ३३८
अद्वैतनिष्ठस्य संसाराभावः . . . ३३९
मुमुक्षोः ब्रह्मनिष्ठाविधिः ३३९
शास्त्रार्थपठनपाठनफलम् ३४३

मुक्तिकोपनिषत्

प्रथमाध्यायः—प्रथमखण्डः

परमात्मस्वरूपजिज्ञासा ३४५
वेदान्तज्ञानेन सायुज्यप्राप्तिः . . . ३४६
मुक्तिभेदतत्साधनजिज्ञासा . . . ३४७
सालोक्यादिमुक्तिसाधनं उपासनम् . . . ३४८
कैवल्यमुक्तिसाधनं औपनिषदं ज्ञानम् . . . ३४९
अष्टोत्तरशतोपनिषदां क्रमः . . . ३४९
उपनिषदर्थज्ञानात् मुक्तिलाभः . . . ३५०
उपनिषत्संप्रदानविधिः ३५१

द्वितीयखण्डः

अष्टोत्तरशतोपनिषदां पृथक् शान्तिः . . . ३५३
औपनिषदज्ञानादेव कैवल्यमुक्तिः . . . ३५४

द्वितीयाध्यायः

जीवन्मुक्तिविदेहमुक्त्योः स्वरूपप्रमाणसाधनप्रयोजननिरूपणम् . ३५५
शुभाशुभवासनाविषये पुरुषकर्तव्यता . . . ३५८
वासनाक्षयविज्ञानमनोनाशानां युगपदभ्यसनीयत्वम् . ३६०
वासनाक्षयप्रकारः तत्प्रयोजनं च . . . ३६१
चित्तनाशप्रकारः तत्फलं च . . . ३६३
सरूपारूपभेदेन द्विविधः चित्तनाशः . . . ३६५

मनोनिग्रहोपायः ३६६
चित्तनिग्रहोपायो ध्यानम् ३६८
सहजकुंभकाभ्यासात् समाधिसिद्धिः . . . ३६८
वासनासामान्यं स्वरूपावरणम् . . . ३७०
शुद्धमलिनवासनयोः मोक्षबन्धहेतुत्वम् . . . ३७१
सर्ववासनात्यागपूर्वकं परमात्मभजनम् . . . ३७५

मुद्गलोपनिषत्

प्रथमखण्डः

पुरुषसूक्तार्थसंग्रहः ३७८

द्वितीयखण्डः

परमरहस्योपदेशः ३८०
महापुरुषस्य रूपस्वीकरणम् . . . ३८१
महापुरुषस्य चतुर्धा भवनम् . . . ३८२
चतुर्मुखब्रह्मणे सृष्टियज्ञोपदेशः . . . ३८२

तृतीयखण्डः

उपासकैरनेकधा दृष्टस्य महापुरुषस्य वस्तुतः एकत्वम् . ३८४

चतुर्थखण्डः

ब्रह्मण एव तापत्रयादियोगेन जीवत्वम् . . ३८५
एतदुपनिषदध्ययनफलम् ३८६
पुरुषसूक्तार्थोपदेशविधानम् . . . ३८६

मैत्रायण्युपनिषत्

प्रथमप्रपाठकः

संसारविरक्तस्य आत्मजिज्ञासा . . . ३८८
संसारनिर्वेदगाथा ३८९

द्वितीयप्रपाठकः

संसारनिर्विण्णाय परापरब्रह्मोपदेशः . . . ३९२
आत्मनः शरीरप्रवर्तकत्वम् . . . ३९३
आत्मनः सर्वाधिष्ठातृपुरुषत्वम् . . . ३९५
आत्मनः प्रजासु प्राणात्मना प्रवेशः . . . ३९६
पञ्चप्राणस्वरूपम् ३९७
वैश्वानरस्वरूपम् ३९८
परमात्मनः शारीरात्मत्वम् . . . ३९९
परमात्मनः आभासत एव संसारित्वम् . . ४०१
आत्मनः शुद्धस्वरूपम् ४०१

तृतीयप्रपाठकः

संसारिणो भूतात्मनः स्वरूपम् . . . ४०२
भूतात्मसत्वे प्रमाणान्तरम् . . . ४०५
भूतात्मनानात्वे प्रमाणान्तरम् . . . ४०६
भूतात्मैव शरीरमित्यत्र प्रमाणान्तरम् . . . ४०६

चतुर्थप्रपाठकः

धर्मानुष्ठानेन विना संसारानिवृत्तिः . . . ४०७
संसारप्रतिक्रियारूपं स्वधर्मानुष्ठानम् . . . ४०९
प्रसन्नचित्तस्यैव मोक्षः ४१०
चित्तप्रशमनार्थं भगवदुपासनम् . . . ४१३
उपाधिवशात् आत्मनः जगद्रूपत्वम् . . . ४१४

वज्रसूचिकोपनिषत्

वज्रसूचीप्रस्तावः ४१६
को वा ब्राह्मणो नाम ४१६

न जीवो ब्राह्मणः ४१७
न देहो ब्राह्मणः ४१७
न जातिर्ब्राह्मणः ४१८
न ज्ञानं ब्राह्मणः ४१८
न कर्म ब्राह्मणः ४१९
न धार्मिको ब्राह्मणः ४१९
अद्वितीयात्मसाक्षात्कारवानेव ब्राह्मणः . . . ४१९

शारीरकोपनिषत्

पञ्चभूतात्मकं शरीरम् ४२३
ज्ञानेन्द्रियतद्विषयाणां भौतिकत्वम् . . . ४२४
कर्मेन्द्रियतद्विषयाणां भौतिकत्वम् . . . ४२४
अन्तःकरणचतुष्टयम् ४२४
शरीरावयवानां भौतिकत्वप्रपञ्चनम् . . . ४२४
भूतगुणाः ४२५
सत्त्वादिगुणत्रयकार्याणि ४२५
अवस्थाचतुष्टयम् ४२६
क्षेत्रज्ञस्वरूपम् ४२७
क्षेत्रस्वरूपम् ४२७
प्रकृतिपुरुषौ ४२८

शुकरहस्योपनिषत्

रहस्योपनिषत्प्रस्तावः ४२९
शुकाय शिवकृतप्रणवब्रह्मोपदेशः . . . ४३०
रहस्योपनिषन्महिमा ४३२
साङ्गो महावाक्यजपः ४३३

साङ्गस्तत्पदजपः ४३४
साङ्गस्त्वंपदजपः ४३५
साङ्गः असिपदजपः ४३६
महावाक्यानामर्थः ४३७
शुकस्य स्वानुभवप्रकटनम् . . . ४३९
जीवेशयोः ऐक्योपपत्तिः ४४०
कैवल्यसाधनज्ञानोपायः ४४१
ब्रह्मज्ञानेन सर्वात्मभावप्राप्तिः . . . ४४२

सर्वसारोपनिषत्

बन्धादिविषयाः प्रश्नाः ४४४
बन्धमोक्षयोः स्वरूपम् ४४४
विद्याऽविद्ययोः स्वरूपम् ४४५
अवस्थाचतुष्टयनिरूपणम् . . . ४४५
पञ्चकोशनिरूपणम् ४४६
उपहितजीवस्वरूपम् ४४७
जीवोपाधिस्वरूपम् ४४८
क्षेत्रज्ञस्वरूपम् ४४८
साक्षिस्वरूपम् ४४९
कूटस्थस्वरूपम् ४४९
अन्तर्यामिस्वरूपम् ४४९
प्रत्यगात्मस्वरूपम् ४५०
परमात्मस्वरूपम् ४५१
परब्रह्मस्वरूपम् ४५१
मायास्वरूपम् ४५१
ब्रह्मात्मानुभवप्रकटनम् ४५३

सावित्र्युपनिषत्

सवितृसावित्र्योः मिथः कार्यकारणत्वादि . . ४९५
सावित्र्याः पादत्रयम् ४९७
सावित्रीवेदनफलं पुनर्मृत्युजयः . . . ४९८
बलाऽतिबलामन्त्रौ ४९८
विद्याफलम् ४९९

सुबालोपनिषत्

प्रथमानुशासनम्—सर्वप्रपञ्चलयस्थितिप्रकारः

प्रथमखण्डः

निर्विकल्पकब्रह्मावस्थितिः. . . . ४६०
तमआदिपृथिव्यन्तजननम् . . . ४६१
विराट्पुरुषोत्पत्तिः ४६१
मृत्युसृष्टिः ४६२
सप्तमानसप्रजापतिसृष्टिः ४६२
पुरुषात् ब्राह्मणादिसृष्टिः ४६३

द्वितीयखण्डः

पुरुषात् निषादादिसृष्टिः ४६३
वेदादिशास्त्राविर्भावः ४६४
स्त्रीपुंरूपसृष्टिः ४६४
प्रपञ्चोपसंहारक्रमः ४६५

द्वितीयानुशासनम्—तुरीयतत्त्वम्

तृतीयखण्डः

निर्विकल्पकब्रह्ममन्तुः शोकाभावः . . . ४६६

निर्विकल्पकब्रह्मणि प्राणाद्यभावः . . . ४६७
ब्रह्मावगत्युपायः, फलं च . . . ४६८

चतुर्थखण्डः

हृदयस्थनाडीस्वरूपम् ४६९
स्थूलकोशे जाग्रदनुभवः ४६९
सूक्ष्मकोशे स्वप्नानुभवः ४७०
हृदयाकाशे सुषुप्त्यनुभवः ४७१

पञ्चमखण्डः

कोशत्रयगतात्मनः तुरीयब्रह्मत्वम् . . . ४७३
ईश्वरस्य तुर्यानतिरेकः ४७६

तृतीयानुशासनम्—स्वमात्रतत्त्वम्

षष्ठखण्डः

ब्रह्मण एव सर्वसृष्टिः ४७८
सर्वप्रपञ्चस्य नारायणानतिरेकः . . . ४७८
परागतिप्रापकसुषुम्नानामानि . . . ४७९
नारायणस्यैव सर्वत्र कर्तृत्वम् . . . ४८०

चतुर्थानुशासनम्—अन्तर्यामिस्वरूपम्

सप्तमखण्डः

नारायणस्य सर्वान्तर्यामित्वम् . . . ४८१
एतद्विद्यावंशः ४८३

पञ्चमानुशासनम्—शरीरस्थात्मतत्त्वम्

अष्टमखण्डः

शरीरस्थस्याप्यात्मनः शुद्धत्वम् ४८३

नवमखण्डः

निर्बीजब्रह्मणः सर्वाप्ययाश्रयत्वम् . . . ४८४
निर्बीजब्रह्मवेदनफलम् . . . ४८९
ब्रह्मात्मलाभोपायः . . . ४९०

दशमखण्डः

सर्वलोकानां ब्रह्मात्मनि प्रतिष्ठितत्वम् . . ४९१
तादृशब्रह्मवेदनफलम् ४९२

षष्ठानुशासनम्—उत्क्रान्तिमार्गः

एकादशखण्डः

हृदयनाड्याः उत्क्रान्तिप्रकारः . . . ४९३

सप्तमानुशासनम्—समाधिविधिः

द्वादशखण्डः

आहारशुद्धिः ४९५

त्रयोदशखण्डः

ब्रह्मज्ञानसाधनं सपरिकरसमाधिः . . . ४९६
सन्मात्रावगत्युपायः सप्तभूमिका . . . ४९८

अष्टमानुशासनम्—सर्वात्मधिष्ठानं ब्रह्म

चतुर्दशखण्डः

सर्वात्मधिष्ठानं ब्रह्म ४९९

नवमानुशासनम्—तत्त्वदहनम्

पञ्चदशखण्डः

उत्क्रान्तस्य ब्रह्मसमापत्तौ तत्त्वदहनक्रमः . . ४९९

दशमानुशासनम्—ब्रह्मविद्यासम्प्रदानम्

षोडशखण्डः

ब्रह्मविद्यासंप्रदानविधिः ९००

सूर्योपनिषत्

सूर्योपनिषदः ऋष्यादिध्यानान्तम् . . . ९०२
सूर्यप्रत्यगभेदः ९०३
सूर्यभर्गस्य जगत्कारणत्वम् . . . ९०३
आदित्यस्तुतिः ९०४
आदित्यस्य सर्वात्मकब्रह्मत्वम् . . . ९०४
सूर्यं प्रति प्रार्थना ९०५
सूर्याष्टाक्षरी ९०६
मन्त्रजपफलम् ९०७

स्कन्दोपनिषत्

ब्रह्मात्मैक्ये विद्वदनुभवः ९०८
जीवपरयोरभेदः ९०९
शिवकेशवयोरभेदः ९०९
आत्मज्ञानान्तरङ्गसाधनं मानसिकपूजा . . ९१०
स्वस्त्यायुःप्रार्थनापुरस्सरं परमपदानुसंधानम् . . ९११

नामधेयपदसूची ५१३
विशेषपदसूची ५१५

अक्ष्युपनिषत्

सह नाववतु—इति शान्तिः

चाक्षुष्मतीविद्या

अथ ह सांकृतिर्भगवानादित्यलोकं जगाम । तमादित्यं नत्वा चाक्षुष्मतीविद्यया तमस्तुवत् । ॐ नमो भगवते श्रीसूर्यायाक्षितेजसे नमः । ॐ खेचराय नमः । ॐ महासेनाय नमः । ॐ तमसे नमः । ॐ रजसे नमः । ॐ सत्त्वाय नमः । असतो मा सद्गमय । तमसो मा ज्योतिर्गमय । मृत्योर्माऽमृतं गमय । उष्णो भगवान् [1]शुचिरूपः हंसो भगवान् शुचिरूपः प्रतिरूपः ।

विश्वरूपं घृणिनं जातवेदसं इरामयं [2]ज्योतीरूपं तपन्तम् ।
सहस्ररश्मिः शतधा वर्तमानः [3]प्राणः प्रजानामुदयत्येष सूर्यः ॥

ॐ नमो भगवते श्रीसूर्यायादित्यायाक्षितेजसेऽहो [4]वाहिनी [5]वाहिनी वा स्वाहेति । एवं चाक्षुष्मतीविद्यया स्तुतः सूर्यनारायणः

[1] शुची—क, अ २, उ १.
[2] ज्योति—अ १, उ १.
[3] पुरुषः—अ, अ १, अ २, क.
[4] वाहिनि—क, अ १, उ.
[5] वाहिनि—उ, उ १.

सुप्रीतोऽब्रवीत् चाक्षुष्मतीविद्यां ब्राह्मणो यो नित्यमधीते न तस्याक्षि-
रोगो भवति । न तस्य कुलेऽन्धो भवति । अष्टौ ब्राह्मणान्
ग्राहयित्वाऽथ विद्यासिद्धिर्भवति । य एवं वेद स महान् भवति ॥

यत्सप्तभूमिकाविद्यावेद्यानन्दकळेबरम् ।
विकळेबरकैवल्यरामचन्द्रपदं भजे ॥

इह खलु कृष्णयजुर्वेदप्रविभक्तेयं अक्ष्युपनिषत् चाक्षुष्मतीविद्याप्रकटन-
पूर्वकं सप्तभूमिकाविभातपरमाक्षरपर्यवसन्ना विजयते । अस्याः स्वल्पग्रन्थतो
विवरणमारभ्यते । सांकृत्यादित्यप्रश्नप्रतिवचनरूपेयं आख्यायिका विद्यास्तुत्यर्था ।
आख्यायिकामवतारयति—**अथेति** । **अथ** स्वातिरिक्तप्रपञ्चनैराश्यानन्तरं आदित्य-
मण्डलासनादित्यं प्रणिपत्य अथ **चाक्षुष्मतीविद्यया** स्तुतवानित्यर्थः । केयं
चाक्षुष्मतीविद्येत्यत आह—**ओमिति** । हे आदित्य **अक्षितेजसे** तुभ्यं **नमोऽस्तु** ।
त्वं **मा** मां **असतः** स्वातिरिक्तात् उद्धृत्य स्वमात्रावस्थानलक्षणं **सद्गमय** । तथा
तमसः स्वाज्ञानात् **मा** मां उद्धृत्य **ज्योतिः** स्वज्ञानं **गमय** । तथा स्वनिष्ठप्रमाद-
रूपात् **मृत्योः मा** मां उद्धृत्य स्वनिष्ठाफलरूपं **अमृतं** विकळेबरकैवल्यं **गमय** ।
प्राणिसामान्यस्वातिरिक्ताज्ञानकर्दमशोषकोष्णकिरणत्वात् **उष्णो भगवान् शुचि-
रूपः** । **हंसः** प्रत्यगभिन्नपरमात्मरूपो **भगवान्** शुचिरूपः जीवात्मना
प्रतिरूपश्चासि । यस्त्वं **सहस्ररश्मिः** स्वप्रकाश्यभेदानुरोधेन **शतधा** बहुधा
वर्तमानोऽसि य एष भगवान् **प्रजानां प्राणो** भूत्वा अहन्यहनि उदयति तं त्वां
विश्वरूपधरं घृणिनं दयावन्तं विराड्रूपेण **जातवेदसं इरामयं** अमृतमयं स्वेन
तेजसा **तपन्तं ज्योतीरूपं हंसः** सोऽहमिति सदा अनुसंधानं करोमि । किंच—
ओं नमो भगवते श्रीसूर्याय आदित्याय अदितिजाय **अक्षितेजसे** अक्ष्यालोक-
शक्तिदाय सदा नमोऽस्तु । तव किरणसेनाऽऽवृतत्वात् ते **अहोवाहिनी** किरण-
सेना दुस्सहा मम संतापं न करोतु । द्विरुक्तिरादरार्था । स्वातिरिक्तभ्रमं **मे** शान्तं
कुरु **स्वाहा**, "नमः सम्पत्तिपूरणे स्वाहा शान्तौ" इति स्मृतेः । यद्वा—

स्वाहाशब्दः अक्षिविद्यासमाप्तिद्योतकः । अनया स्तुतः किं करोतीत्यत्र—एवमिति । किमब्रवीदित्यत्र—स्वविद्याफलं स्तौति—ॐनमइत्यादिस्वाहेत्यन्तकळेवरां चाक्षुष्मतीविद्याम् ॥

इति प्रथमः खण्डः

ब्रह्मविद्यास्वरूपम्

अथ ह सांकृतिरादित्यं पप्रच्छ भगवन् ब्रह्मविद्यां मे ब्रूहीति। तमादित्यो होवाच ।

सांकृते शृणु वक्ष्यामि तत्त्वज्ञानं सुदुर्लभम् ।
येन विज्ञानमात्रेण जीवन्मुक्तो भविष्यसि ॥ १ ॥
सर्वमेकमजं शान्तमनन्तं ध्रुवमव्ययम् ।
पश्य भूतार्थचिद्रूपं शान्त आस्स्व यथासुखम् ॥ २ ॥

ततः किमित्यत्र चाक्षुष्मतीविद्यास्तुतितो भगवन्तं प्रसन्नं ब्रह्मविद्यार्थं पृच्छतीत्याह—अथेति । किमिति ? भगवन्निति । शिष्याभिमुख्याय वक्ष्यमाणविद्यां स्तौति—सांकृत इति ॥ १ ॥ आदौ ब्रह्मस्वरूपं प्रतिपाद्य शान्तस्वातिरिक्तभ्रमः सन् मदुक्तार्थे सुखं तिष्ठ इत्याह—सर्वमिति । ब्रह्माहमस्मीति पश्यन् ॥ २ ॥

ब्रह्मविद्योपायो योगः

अवेदनं विदुर्योगं चित्तक्षयमकृत्रिमम् ।
योगस्थः कुरु कर्माणि नीरसो वाऽथ मा कुरु ॥ ३ ॥

केनोपायेन सुखं तिष्ठेयमित्यत्राह—**अवेदनमिति** । इत्थंभूत-**योगस्थः** ॥ ३ ॥

योगस्य प्रथमभूमिका

विरागमुपयात्यन्तर्वासनास्वनुवासरम् ।
क्रियासूदाररूपासु क्रमते मोदतेऽन्वहम् ॥ ४ ॥
ग्राम्यासु जडचेष्टासु सततं विचिकित्सते ।
नोदाहरति मर्माणि पुण्यकर्माणि सेवते ॥ ५ ॥
अनन्योद्वेगकारीणि मृदुकर्माणि सेवते ।
पापाद्बिभेति सततं न च भोगमपेक्षते ॥ ६ ॥
स्नेहप्रणयगर्भाणि पेशलान्युचितानि च ।
देशकालोपपन्नानि वचनान्यभिभाषते ॥ ७ ॥
मनसा कर्मणा वाचा सज्जनानुपसेवते ।
यतः कुतश्चिदानीय नित्यं शास्त्राण्य[1]वेक्षते ॥ ८ ॥
तदाऽसौ प्रथमामेकां प्राप्तो भवति भूमिकाम् ।
एवं विचारवान् यः स्यात् संसारोत्तारणं प्रति ॥ ९ ॥
स भूमिकावानित्युक्तः शेषस्त्वार्य इति स्मृतः ।

कोऽयमवेदनयोगः तत्सोपानः कीदृशः इत्याशङ्क्य तूष्णींभावलक्षणविदेह-मुक्तिसौधसोपानरूपेयं सप्तभूमिकेत्यत्र प्रथमभूमिकां प्रकटयति—**विरागमिति** । अनन्तकोटिजन्मसुकृतपरिपाकलब्धसज्जनसंगत्यादिसुकृततो निष्कामधीः जायते, ततो ब्रह्म सत्यं ब्रह्मातिरिक्तं मिथ्या इत्यापाततो ज्ञानमुदेति, ततो ब्रह्मातिरिक्त-

[1] पेक्ष—अ १, क, उ १.

विषयवासनासु वान्ताशनमूत्रपुरीषादिष्विव विरागमुपयाति । ईश्वरार्पणधिया अनुष्ठेयक्रियासु ॥ ४ ॥ परेषां नोदाहरति ॥ ५–९ ॥

द्वितीयभूमिका

विचारनाम्नीमितरामागतो योगभूमिकाम् ॥ १० ॥
श्रुतिस्मृति[1]सदाचारधारणाध्यानकर्मणः ।
मुख्यया व्याख्यया ख्याताञ्छ्रयति श्रेष्ठपण्डितान् ॥ ११ ॥
पदार्थप्रविभागज्ञः कार्याकार्यविनिर्णयम् ।
जानात्यधिगतश्राव्यो गृहं गृहपतिर्यथा ॥ १२ ॥
मदाभिमानमात्सर्यलोभमोहातिशायिताम् ।
बहिरप्यास्थितामीषत्त्यजत्यहिरिव त्वचम् ॥ १३ ॥
इत्थंभूतमतिः शास्त्रगुरुसज्जनसेवया ।
सरहस्यमशेषेण यथावदधिगच्छति ॥ १४ ॥

मुमुक्षुः एवं प्रथमभूमिकामभ्यस्य अथ द्वितीयभूमिकां प्रविशतीत्याह— विचारेति ॥ १०–१४ ॥

तृतीयभूमिका

असंसर्गाभिधामन्यां तृतीयां योगभूमिकाम् ।
ततः पतत्यसौ कान्तः पुष्पशय्यामिवामलाम् ॥ १५ ॥
यथावच्छास्त्रवाक्या[2]र्थे मतिमाधाय निश्चलाम् ।
तापसाश्रमविश्रान्तैरध्यात्मकथनक्रमैः ॥ १६ ॥

[1] समा—अ २, क. [2] र्थ—अ २, क.

शिलाशय्याऽऽसनासीनो जरयत्यायुरातताम् ।
वनावनिविहारेण चित्तोपशमशोभिना ॥ १७ ॥
असङ्गसुखसौख्येन कालं नयति नीतिमान् ।
अभ्यासात् साधुशास्त्राणां करणात् पुण्यकर्मणाम् ॥ १८ ॥
जन्तोर्यथावदेवेयं वस्तुदृष्टिः प्रसीदति ।
तृतीयां भूमिकां प्राप्य बुद्धोऽनुभवति स्वयम् ॥ १९ ॥

द्वितीयभूमिकासिद्ध्यनन्तरं तृतीयभूमिकाऽभ्यासं कुर्यादित्याह—**असंसर्गेति** ॥ १९ ॥ तृतीयभूमिकाऽऽरूढः कया वृत्त्या कालं नयतीत्यत आह—**यथावदिति** ॥ १६–१९ ॥

द्विविधः असंसर्गः

द्विप्रकारमसंसर्गं तस्य भेदमिमं शृणु ।
द्विविधोऽयमसंसर्गः सामान्यः श्रेष्ठ एव च ॥ २० ॥
नाहं कर्ता न भोक्ता च न बाध्यो न च बाधकः ।
इत्यसञ्जनमर्थेषु सामान्यासङ्गनामकम् ॥ २१ ॥
प्राक्कर्मनिर्मितं सर्वमीश्वराधीनमेव [1]वा ।
सुखं वा यदि वा दुःखं [2]नैवात्र [3]मम कर्तृता ॥ २२ ॥
भोगाभोगा महारोगाः संपदः परमापदः ।
वियोगायैव संयोगा आधयो व्याधयो धियाम् ॥ २३ ॥

[1] च—अ, अ १. [2] कैवात्र—अ, अ १, क. [3] तव—मु.

कालश्च कलनोद्युक्तः सर्वभावान[1]नारतम् ।
अनास्थयेति भावानां यदभावनमान्तरम् ।
वाक्यार्थलब्धमनसः सामान्योऽसावसङ्गमः ॥ २४ ॥
अनेन क्रमयोगेन संयोगेन महात्मनाम् ।
नाहं कर्तेश्वरः कर्ता कर्म वा प्राक्तनं मम ॥ २५ ॥
कृत्वा दूरतरे नूनमिति शब्दार्थभावनाम् ।
यन्मौनमासनं शान्तं तच्छ्रेष्ठासङ्ग उच्यते ॥ २६ ॥

सामान्यश्रेष्ठभेदेन अयमसंसर्गो द्विधा भिद्यत इत्याह—**द्विप्रकारमिति** । तत् कथं? **द्विविध** इति ॥ २० ॥ तत्र सामान्यासंसर्गमाह—**नाहमिति** । **नाहं कर्ता न भोक्ता च** अज्ञानकार्यविलक्षणत्वात् ॥ २१–२४ ॥ महतामेव श्रेष्ठासंसर्ग उदेतीत्याह—**अनेनेति** । विचारादियोगभूमिसंयोगेन द्वितीयासंसर्ग उदेति । स कीदृश इत्यत्र—**नाहमिति** । इन्द्रियैः इन्द्रियार्थाग्रहणं **मौनं**, प्रत्यग्रूपेणावस्थानं **आसनं**, परागभावास्मरणं **शान्तमित्यर्थः** ॥ २५–२६ ॥

प्रथमभूमिकास्तुतिः

संतोषामोदमधुरा प्रथमोदेति भूमिका ।
भूमिप्रोदितमात्रोऽन्तरमृतांकुरिकेव सा ॥ २७ ॥
एषा हि परिमृष्टाऽन्तरन्यासां प्रसवैकभूः ।
द्वितीयां च तृतीयां च भूमिकां प्राप्नुयात्ततः ॥ २८ ॥
श्रेष्ठा सर्वगता ह्येषा तृतीया भूमिकाऽत्र हि ।
भवति प्रोज्झिताशेषसंकल्पकलनः पुमान् ॥ २९ ॥

[1] नन्तरम्—उ, उ १.

प्रथमभूमिकाया अमृतांकुरतया तामेवं स्तौति—**सन्तोषेति** ॥२७–२८॥ द्वयोर्मध्ये श्रेष्ठा। श्रेष्ठत्वं कुत इत्यत्र—**भवतीति** ॥ २९ ॥

चतुर्थभूमिका

भूमिकात्रितयाभ्यासादज्ञाने क्षयमागते ।
समं सर्वत्र पश्यन्ति चतुर्थीं भूमिकां गताः ॥ ३० ॥
अद्वैते स्थैर्यमायाते द्वैते च प्रशमं गते ।
पश्यन्ति स्वप्नवल्लोकं चतुर्थीं भूमिकां गताः ॥ ३१ ॥

चतुर्थभूमिकामवतारयति—**भूमिकेति** ॥ ३० ॥ चतुर्थभूमिकाऽनुभवमाह —**अद्वैत** इति ॥ ३१ ॥

पञ्चमभूमिका

भूमिकात्रितयं जाग्रच्चतुर्थी स्वप्न उच्यते ।
चित्तं तु शरदभ्रांशविलयं प्रविलीयते ॥ ३२ ॥
सत्ताऽवशेष एवास्ते पञ्चमीं भूमिकां गतः ।
जगद्विकल्पो नोदेति चित्तस्यात्र विलापनात् ॥ ३३ ॥
पञ्चमीं भूमिकामेत्य सुषुप्तपदनामिकाम् ।
शान्ताशेषविशेषांशस्तिष्ठत्यद्वैतमात्रकः ॥ ३४ ॥
गलितद्वैतनिर्भासो मुदितोऽन्तःप्रबोधवान् ।
सुषुप्तघन एवास्ते पञ्चमीं भूमिकां [1]गतः ॥ ३५ ॥

[1] गताः—अ, अ १, अ २, क.

अन्तर्मुखतया तिष्ठन् बहिर्वृत्तिपरोऽपि सन् ।
परिश्रान्ततया नित्यं निद्रालुरिव लक्ष्यते ॥ ३६ ॥

पञ्चमभूमिकामवतारयति—भूमिकेति ॥ ३२ ॥ सत्ताऽवशेषता कुत इत्यत्र—जगद्विकल्प इति ॥ ३३–३६ ॥

षष्ठभूमिका

कुर्वन्नभ्यासमेतस्यां भूमिकायां विवासनः ।
षष्ठीं तुर्याभिधामन्यां क्रमात् पतति भूमिकाम् ॥ ३७ ॥
यत्र नासन्न सद्रूपो नाहं नाप्यनहंकृतिः ।
केवलं क्षीणमनसं आस्तेऽद्वैतेऽतिनिर्भयः ॥ ३८ ॥
निर्ग्रन्थिः शान्तसंदेहो जीवन्मुक्तो विभावनः ।
अनिर्वाणोऽपि निर्वाणश्चित्रदीप इव स्थितः ॥ ३९ ॥

षष्ठभूमिकामवतारयति—कुर्वन्निति ॥ ३७–३९ ॥

सप्तमभूमिका

षष्ठ्यां भूमावसौ स्थित्वा सप्तमीं भूमिमाप्नुयात् ।
विदेह[1]मुक्ततोऽत्रोक्ता सप्तमी योगभूमिका ॥ ४० ॥
अगम्या वचसां शान्ता सा सीमा सर्वभूमिषु ।
लोकानुवर्तनं त्यक्त्वा त्यक्त्वा देहानुवर्तनम् ॥ ४१ ॥
शास्त्रानुवर्तनं त्यक्त्वा स्वाभ्यासापनयं कुरु ।

सप्तमीं भूमिकामनुक्रामति—षष्ठ्यामिति । प्रथमद्वितीयभूम्यारूढो मुमुक्षुः, तृतीयभूम्यारूढो ब्रह्मवित्, चतुर्थभूम्यारूढो ब्रह्मविद्वरः, पञ्चमभूम्यारूढो

[1] मुक्ति—उ.

ब्रह्मविद्वरीयान्, षष्ठभूमिकाऽऽरूढो ब्रह्मविद्वरिष्ठः, सप्तमभूमिकाऽऽरूढो विदेहमुक्तो ब्रह्मैवेत्यर्थः ॥ ४० ॥ लोकदेहशास्त्रानुवर्तिनां जीवन्मुक्तिर्विदेहमुक्तिर्वा कुत इत्याशङ्क्य यदि स्वातिरेकेण लोकादिकमस्तीति परिभ्रमसि तदा क्रमेण मयोक्तसप्तभूमिका अभ्यस्य ततः लोकानुवर्तनमिति। स्वाध्यस्तस्वातिरिक्तापवादापह्नवाभ्यां जीवन्मुक्तो विदेहमुक्तो वा भवसीत्यर्थः ॥ ४१ ॥

ओङ्कारब्रह्मनिष्ठाविधिः

ओंकारमात्रमखिलं विश्वप्राज्ञादिलक्षणम् ॥ ४२ ॥
वाच्यवाचकताऽभेदात् भेदेनानुपलब्धितः।
अकारमात्रं विश्वः स्यादुकारस्तैजसः स्मृतः ॥ ४३ ॥
प्राज्ञो मकार इत्येवं परिपश्येत् क्रमेण तु।
समाधिकालात् प्रागेव विचिन्त्यातिप्रयत्नतः ॥ ४४ ॥
स्थूलसूक्ष्मक्रमात् सर्वं चिदात्मनि विलापयेत्।
चिदात्मा[1]नं नित्यशुद्धबुद्धमुक्तसदद्वयः ॥ ४५ ॥
परमानन्दसंदेहो वासुदेवोऽहमोमिति।
आदिमध्यावसानेषु दुःखं सर्वमिदं यतः ॥ ४६ ॥
तस्मात् सर्वं परित्यज्य तत्त्वनिष्ठो भवानघ।
अविद्यातिमिरातीतं सर्वाभासविवर्जितम् ॥ ४७ ॥
आनन्दममलं शुद्धं मनोवाचामगोचरम्।
प्रज्ञानघनमानन्दं ब्रह्मास्मीति विभावयेत् ॥ ४८ ॥

इत्युपनिषत् ॥

[1] हं—अ.

यद्येवं स्वातिरिक्तविभ्रमं त्यक्तुं न पारयसि तदा ओङ्कार एवेदं सर्वं इति शब्दब्रह्म भावय । एवं त्वया शब्दब्रह्मण्योङ्कारे भाविते ततस्तदर्थरूपपरंब्रह्म प्राप्नोषि शब्दार्थयोः अविनाभूतत्वात् ।

द्वे ब्रह्मणीह मन्तव्ये शब्दब्रह्म परं च यत् ।
शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति ॥

इति श्रुतेः । ओङ्कारस्य परापरब्रह्माभिधानतया प्रसिद्धत्वात् तदवष्टभ्य ब्रह्मतत्त्वनिष्ठो भवेत्याह—**ओङ्कारेति** ॥ ४२ ॥ वाच्यवाचकयोः भेदः स्यादित्यत आह—**वाच्यवाचकताऽभेदादिति** । भेदे का हानिरित्यत आह—**भेदेनानुपलब्धित** इति । वाच्यवाचकयोरेकत्वं कुत इत्यत आह—**अकारमात्रमिति** ॥४३॥ एवमभेदेन संभाव्य वाच्यवाचककलनां विलाप्य तद्विलापनाधिकरणं ब्रह्मास्मीति विभावयेदित्याह—**समाधीति** ॥ ४४ ॥ तद्विलापनाधारं **चिदात्मानम्** ॥ ४५ ॥ यः सर्वाधारः परमात्मा तं चिदात्मानमेव **ओमिति नित्यशुद्धेत्यादिविशेषणविशिष्टतुरीयोङ्काराग्रविद्योततुर्यतुरीय एव वासुदेवोऽहमिति भावयेत्** ॥ ४५ ॥ स्वातिरिक्तास्तित्वभ्रमस्य आदिमध्यावसानेष्वपि दुःखहेतुत्वात् तदुत्सृज्य स्वमात्रनिष्ठो भवेत्याह—**आदीति** ॥ ४६ ॥ मुमुक्षुः उक्तलक्षणलक्षितं ब्रह्माहमिति भावयेदित्याह—**अविद्येति** । स्वाविद्या अस्ति नास्तीति विभ्रमातीतब्रह्मभावनात् ब्रह्मैव भवतीत्यर्थः ॥ ४७–४८ ॥ इत्युपनिषच्छब्दः अक्ष्युपनिषत्परिसमाप्त्यर्थः ॥

इति द्वितीयः खण्डः

श्रीवासुदेवेन्द्रशिष्योपनिषद्ब्रह्मयोगिना ।
सूर्याक्ष्युपनिषद्व्याख्या लिखिता ब्रह्ममात्रगा ।
सूर्याक्ष्युपनिषद्व्याख्याग्रन्थः स्यात् पञ्चसप्ततिः ॥

इति श्रीमदीशाद्यष्टोत्तरशतोपनिषच्छास्त्रविवरणे द्विसप्ततिसंख्यापूरकं
अक्ष्युपनिषद्विवरणं सम्पूर्णम्

अध्यात्मोपनिषत्

पूर्णमदः—इति शान्तिः

सर्वभूतान्तरात्मनारायणस्वरूपम्

अन्तःशरीरे निहितो गुहायामज एको नित्यमस्य पृथिवी शरीरं यः पृथिवीमन्तरे संचरन् यं पृथिवी न वेद । यस्यापःशरीरं योऽपोऽन्तरे संचरन् यमापो न विदुः । यस्य तेजः शरीरं यस्तेजोऽन्तरे संचरन् यं तेजो न वेद । यस्य वायुः शरीरं यो वायुमन्तरे संचरन् यं वायुर्न वेद । यस्याकाशः शरीरं य आकाशमन्तरे संचरन् यमाकाशो न वेद । यस्य मनः शरीरं यो मनोऽन्तरे संचरन् यं मनो न वेद । यस्य बुद्धिः शरीरं यो बुद्धिमन्तरे संचरन् यं बुद्धिर्न वेद । यस्याहंकारः शरीरं योऽहंकारमन्तरे संचरन् यमहंकारो न वेद । यस्य चित्तं शरीरं यश्चित्तमन्तरे संचरन् यं चित्तं न वेद । यस्याव्यक्तं शरीरं योऽव्यक्तमन्तरे संचरन् यमव्यक्तं न वेद । यस्याक्षरं शरीरं योऽक्षरमन्तरे संचरन् यमक्षरं न वेद । यस्य मृत्युः

शरीरं यो मृत्युमन्तरे संचरन् यं मृत्युर्न वेद । स एष सर्वभूतान्तरात्माऽपहतपाप्मा दिव्यो देव एको नारायणः ॥१–१॥

यत्रान्तर्याम्यादिभेदस्तत्त्वतो न हि युज्यते ।
निर्भेदं परमाद्वैतं स्वमात्रमवशिष्यते ॥

इह खलु शुक्लयजुर्वेदप्रविभक्तेयं अध्यात्मोपनिषत् सर्वान्तरस्वरूपप्रकटनव्यग्रा नारायणतत्त्वपर्यवसन्ना विजयते । अस्याः श्रुतेः संक्षेपतो विवरणमारभ्यते । स्वाज्ञलोकोत्तारणाय क्वचिदवान्तररूपेण क्वचिच्छिष्यादेशरूपेण प्रवृत्तेति यत् तत् विद्यास्तुत्यर्थम् । कथं पुनरवान्तररूपेण श्रुतिः प्रवृत्तेति तत्राह— **अन्तरिति** । यः सर्वप्राणिनामन्तः **शरीरे** या गुहा सर्वगूहनरूपा बुद्धिः तस्यां **गुहायां** तद्वृत्तिसहस्रप्रवृत्तिनिमित्ततया तद्भावाभावप्रकाशकतया तत्सर्वकलनासम्भवप्रबोधसिद्धनिष्प्रतियोगिकचिन्मात्रतया च वर्तते सोऽयमात्मा स्वातिरिक्तसर्वभूतेषु मायया जातेष्वपि स्वयं स्वतः परतो वा न जायत इत्यजः **एकः** परमात्मा अवशिष्यते । **नित्यमस्य** स्वाज्ञदृष्टिसमर्पितपृथिव्यादिमृत्युपर्यन्तं **शरीरं यः पृथिव्यादिमृत्युपर्यन्तमन्तरे सञ्चरन्** वर्तते **यं** पृथिव्यादिमृत्युपर्यन्तं **न वेद स एष सर्वभूतान्तरात्माऽपहतपाप्मा** । सर्वभूतेषु पापपुण्यकवळितेष्वपि तत्रासंगोदासीनपरमेश्वरतया अपहतपाप्मत्वं युज्यते । दिवि स्वे महिम्नि विराजत इति **दिव्यः** । स्वेन रूपेण प्रकाशत इति **देवः** । घटशरावादिस्थानीयस्वातिरिक्तभूतेषु अनेकेष्वपि तदनुगतव्योमवत् **अयमेक** एव अवशिष्यते । **सः नारायणः** परमात्मा भवतीत्यवान्तरवाक्यसमुदायार्थः ॥ १–१ ॥

ब्रह्मनिष्ठया स्वाध्यासापनयविधिः

अहं ममेति यो भावो देहाक्षादावनात्मनि ।
अध्यासोऽयं निरस्तव्यो विदुषा ब्रह्मनिष्ठया ॥ १ ॥

ज्ञात्वा स्वं प्रत्यगात्मानं बुद्धितद्वृत्तिसाक्षिणम् ।
सोऽहमित्येव तद्वृत्त्या स्वान्यत्रात्ममतिं त्यजेत् ॥ २ ॥
लोकानुवर्तनं त्यक्त्वा [1]त्यक्त्वा देहानुवर्तनम् ।
शास्त्रानुवर्तनं त्यक्त्वा स्वाध्यासापनयं कुरु ॥ ३ ॥

यस्मादपगतं अन्तरं अतिरिक्तं तमः सोऽयं अवान्तरवाक्यार्थतया प्रतिपादितोऽपान्तरतमो नारायणः स्वपुत्रं ब्रह्माणं व्याजीकृत्य स्वाज्ञबृन्दस्वपदप्राप्त्युपायतया यथायथा स्वातिरिक्तास्तित्वभ्रमो मार्जनीयः तथातथा स्वात्मयाथात्म्यं उपदिशति—**अहंममेत्यादिना** । तन्निष्ठया तत्प्रपञ्चात्मात्मीयदृष्टिः निराकर्तव्येत्यर्थः ॥ १ ॥ रूढमूलस्वातिरिक्तभ्रमत्यागः कथं उपपद्यत इत्यत्राह—**ज्ञात्वेति** ॥ २ ॥ स्वान्यत्र लोकदेहादिसत्त्वात् तन्मतिः कथं त्यक्तुं शक्यत इत्यत आह—**लोकेति** ॥ ३ ॥

अनात्मनिरसनपूर्वकं केवलात्मानुसन्धानम्

स्वात्मन्येव सदा स्थित्या मनो नश्यति योगिनः ।
युक्त्या श्रुत्या स्वानुभूत्या ज्ञात्वा सार्वात्म्यमात्मनः ॥ ४ ॥
निद्राया लोकवार्तायाः शब्दादेरात्मविस्मृतेः ।
क्वचिन्नावसरं दत्त्वा चिन्तयात्मानमात्मनि ॥ ५ ॥
मातापित्रोर्मलोद्भूतं मलमांसमयं वपुः ।
त्यक्त्वा चण्डालवद्दूरं ब्रह्मीभूय कृती भव ॥ ६ ॥
घटाकाशं महाकाश इवात्मानं परात्मनि ।
विलाप्याखण्डभावेन तूष्णीं भव सदा मुने ॥ ७ ॥

[1] तथा—उ, उ १.

स्वप्रकाशमधिष्ठानं स्वयंभूय सदात्मना ।
ब्रह्माण्डमपि पिण्डाण्डं [1]त्यज्यतां मलभाण्डवत् ॥ ८ ॥
चिदात्मनि सदानन्दे [2]देहरूढामहंधियम् ।
निवेश्य लिङ्गमुत्सृज्य केवलो भव सर्वदा ॥ ९ ॥
[3]यत्रैष जगदाभासो दर्पणान्तःपुरं यथा ।
तद्ब्रह्माहमिति ज्ञात्वा कृतकृत्यो भवानघ ॥ १० ॥
[4]अहंकारग्रहान्मुक्तः स्वरूपमुपपद्यते ।
चन्द्रवद्विमलः पूर्णः सदानन्दः स्वयंप्रभः ॥ ११ ॥

स्वाध्यासमूलमनोऽस्तीति यदि मन्यसे तदा **स्वात्मन्येव** । सकृदात्मनि ज्ञाते यथेच्छं विहरेदित्यत आह—**युक्त्येति** ॥ ४–५ ॥ सत्यनात्मनि आत्मचिन्तनं कथमिति यदि मन्यसे तदा **मातापित्रोरिति** ॥ ६ ॥ यदि जीवात्मपरमात्मनोः भेदं मन्यसे तदा **घटाकाशमिति** ॥ ७ ॥ तूष्णींभावावरणतया पिण्डब्रह्माण्डादिकमस्तीति यदि मन्यसे तदा **स्वप्रकाशमिति** ॥ ८ ॥ यदि ते देहादावहंधीः तां आत्मनि कृत्वा केवलो भवेत्याह—**चिदात्मनीति** । स्वज्ञान-**लिङ्गमुत्सृज्य** ॥ ९ ॥ यद्याभासतोऽपि जगदस्तीति मन्यसे तदा **यत्रैष** इति । यत्तदपवादाधिकरणं **तद्ब्रह्माहमिति** ॥ १० ॥ यदि देहादावहंभावस्त्वां आवृणोति तदा निरहम्भावमन्त्रेण **अहङ्कारग्रहान्मुक्तः** ॥ ११ ॥

वासनाक्षयोपायः

क्रियानाशाद्भवेच्चिन्तानाशोऽस्माद्वासनाक्षयः ।
वासनाप्रक्षयो मोक्षः स जीवन्मुक्तिरिष्यते ॥ १२ ॥

[1] त्यजतां—उ.
[2] देहा—अ, अ १, क.
[3] यत्रैव—अ २.
[4] अहंकारा—अ २.

सर्वत्र सर्वतः [1]सर्वब्रह्ममात्रावलोकनम् ।
सद्भावभावनादार्ढ्याद्वासनालयमश्नुते ॥ १३ ॥

तन्मुक्त्यावरणवासनाऽस्तीति यदि मन्यसे तदा **क्रियानाशादिति** ॥ १२ ॥ वासनाविलयोपायस्तु **सर्वत्र सर्वत** इति ॥ १३ ॥

ब्रह्मनिष्ठायां प्रमादनिरसनविधिः

प्रमादो ब्रह्मनिष्ठायां न कर्तव्यः कदाचन ।
प्रमादो मृत्युरित्याहुर्विद्यायां ब्रह्मवादिनः ॥ १४ ॥
यथाऽपकृष्टं शैवालं क्षणमात्रं न तिष्ठति ।
आवृणोति [2]तथा माया प्राज्ञं वाऽपि पराङ्मुखम् ॥ १५ ॥
जीवतो यस्य कैवल्यं विदेहोऽपि स केवलः ।
समाधिनिष्ठतामेत्य निर्विकल्पो भवानघ ॥ १६ ॥

सकृदात्मानमवगम्य संसारानुवर्तनेऽपि सकृदवगतज्ञानफलमाप्नोतीत्यत आह—**प्रमाद** इति । स्वात्मानुसन्धानमुत्सृज्य संसरणं **प्रमादः**, "प्रमादं वै मृत्युमहं ब्रवीमि" इति स्मृतेः ॥ १४ ॥ निष्ठाच्युतित आवृतो भवतीत्यत्र दृष्टान्तः—**यथापकृष्टमिति** ॥ १५ ॥ अतः सदाऽनुसन्धानतो विकल्पजालमुन्मूल्य निर्विकल्पो भवेत्याह—**जीवत** इति । **यस्यैवमनुसन्धानं कुर्वन् जीवतः** ते निर्विशेषब्रह्ममात्रज्ञानं जायते तत्समकालं **स त्वं केवलो विदेहोऽपि** देहो **मे** अस्ति नास्तीति विभ्रमविरळ एव भूत्वा **कैवल्यं** प्राप्नोषीत्यत्र न विवादः । अतस्त्वं निर्विशेषज्ञानहेतवे **समाधितः** स्वातिरिक्तविकल्पजालमुन्मूल्य **निर्विकल्पकज्ञानवान् भवेत्यर्थः** ॥ १६ ॥

[1] सर्व—अ २, क. [2] तथाविधा—ड, ड १.

समाध्यभ्यासस्यावधिः

अज्ञानहृदयग्रन्थेर्निःशेषविलयस्तदा ।
समाधिनाऽविकल्पेन यदाऽद्वैतात्मदर्शनम् ॥ १७ ॥

किं यावदायुषं समाधिः कर्तव्यः इत्यत्रावधिमाह—**अज्ञानेति** ॥ १७ ॥

सर्वोपाधिमृषात्वानुसन्धानपूर्वकं केवलब्रह्मात्मदर्शनम्

[1]अत्रात्मत्वं दृढीकुर्वन्नहमादिषु संत्यजन् ।
उदासीनतया तेषु तिष्ठेद्धटपटादिवत् ॥ १८ ॥
ब्रह्मादिस्तम्ब[2]पर्यन्तं मृषामात्रा उपाधयः ।
ततः पूर्णं स्वमात्मानं पश्येदेकात्मना स्थितम् ॥ १९ ॥
स्वयं ब्रह्मा स्वयं विष्णुः स्वयमिन्द्रः स्वयं शिवः ।
स्वयं विश्वमिदं सर्वं स्वस्मादन्यन्न किंचन ॥ २० ॥
स्वात्मन्यारोपिताशेषाभासवस्तुनिरासतः ।
स्वयमेव परं ब्रह्म पूर्णमद्वयमक्रियम् ॥ २१ ॥

अद्वैतावगत्यनन्तरं कदाचित् द्वैतस्फूर्तावपि तत्र उदासीनभावमेत्य तिष्ठेदित्याह—**अत्रेति** ॥ १८ ॥ ब्रह्माद्युपाधिः सत्पदमर्हति, तत्रोदासीनता कथमित्यत आह—**ब्रह्मादीति** ॥ १९ ॥ यदि स्वातिरेकेण ब्रह्मादिरस्तीति मन्यसे तदा एवं निश्चिनु इत्याह—**स्वयमिति** ॥ २० ॥ स्वस्य सर्वरूपत्वेऽपि ब्रह्मरूपत्वं कुतः इत्यत आह—**स्वात्मनीति** ॥ २१ ॥

द्वैतासम्भवनिरूपणम्

असत्कल्पो विकल्पोऽयं विश्वमि[3]त्येकवस्तुनि ।
निर्विकारे निराकारे निर्विशेषे भिदा कुतः ॥ २२ ॥

[1] यत्र—क. [2] पर्यन्ता—उ, उ १. [3] त्येव—अ, अ १.

द्रष्टृदर्शनदृश्यादिभावशून्ये निरामये ।
कल्पार्णव इवा[1]त्यन्तं [2]परिपूर्णे चिदात्मनि ॥ २३ ॥
तेजसीव तमो यत्र विलीनं भ्रान्तिकारणम् ।
अद्वितीये परे तत्त्वे निर्विशेषे भिदा कुतः ॥ २४ ॥
एकात्मके परे तत्त्वे भेदकर्ता कथं [3]वसेत् ।
सुषुप्तौ सुखमात्रायां भेदः केनावलोकितः ॥ २५ ॥

द्वैते सत्यद्वितीयत्वं कुत इत्याशङ्क्य आक्षेपतो द्वैतासम्भवमाचष्टे—असदिति ॥ २२–२४ ॥ भेदासम्भवमुक्त्वा भेदद्रष्टृसम्भवमाह—एकेति ॥२५॥

परात्मनि चित्तसमाधानविधिः

चित्तमूलो विकल्पोऽयं चित्ताभावे न कश्चन ।
अतश्चित्तं समाधेहि प्रत्यग्रूपे परात्मनि ॥ २६ ॥
अखण्डानन्दमात्मानं विज्ञाय स्वस्वरूपतः ।
बहिरन्तः सदानन्दरसास्वादनमात्मनि ॥ २७ ॥

यतः चित्तमूल इति ॥ २६ ॥ स्वावशेषधिया स्वानन्दात्मानं पश्यतः स्वानन्दाविर्भावो भवतीत्याह—अखण्डेति । बहिरन्तश्च सदा रसास्वादनं कुर्वन् स्वात्मन्येव अयं सदा मोदत इत्यर्थः ॥ २७ ॥

वैराग्यबोधोपरतिशान्तीनां मिथो हेतुफलत्वम्

वैराग्यस्य फलं बोधो बोधस्योपरतिः फलम् ।
स्वानन्दानुभवाच्छान्तिरेषैवोपरतेः फलम् ॥ २८ ॥

[1] त्यन्तः—अ, अ १. [2] भावशून्ये—उ, उ १. [3] भवेत्—अ, अ १.

यद्युत्तरोत्तराभावे पूर्वपूर्वं तु निष्फलम् ।
निवृत्तिः परमा तृप्तिरानन्दोऽनुपमः स्वतः ॥ २९ ॥

वैराग्यबोधोपरतिशान्तीनां मिथो हेतुफलतामाह—**वैराग्यस्येति** ॥ २८ ॥ उत्तरोत्तरसिद्धौ पूर्वपूर्वं तु फलवत् भवतीत्याह—**निवृत्तिरिति** ॥ २९ ॥

श्रवणमननिदिध्यासनसमाधिलक्षणम्

मायोपाधिर्जगद्योनिः सर्वज्ञत्वादिलक्षणः ।
पारोक्ष्यशबलः सत्याद्यात्मकस्तत्पदाभिधः ॥ ३० ॥
आलम्बनतया भाति योऽस्मत्प्रत्ययशब्दयोः ।
अन्तःकरणसंभिन्नबोधः स त्वंपदाभिधः ॥ ३१ ॥
मायाऽविद्ये विहायैव उपाधी परजीवयोः ।
अखण्डं सच्चिदानन्दं परं ब्रह्म [1]विलक्ष्यते ॥ ३२ ॥
इत्थं वाक्यैस्तदर्थानुसंधानं श्रवणं भवेत् ।
युक्त्या संभावितत्वानुसंधानं मननं तु तत् ॥ ३३ ॥
ताभ्यां निर्विचिकित्सेऽर्थे चेतसः स्थापितस्य तत् ।
एकतानत्वमेतद्धि निदिध्यासनमुच्यते ॥ ३४ ॥
ध्यातृध्याने परित्यज्य क्रमाद्धचेयैकगोचरम् ।
निवातदीपवच्चित्तं समाधिरभिधीयते ॥ ३५ ॥
वृत्तयस्तु तदानीमप्यज्ञाता आत्मगोचराः ।
स्मरणादनुमीयन्ते व्युत्थितस्य [2]समुत्थिताः ॥ ३६ ॥

[1] विवक्ष्यते—उ १. [2] समुज्झिताः—क.

जीवपरयोः भेदात् अखण्डार्थत्वं कुत इत्याशङ्क्य परजीवस्वरूपं तद्वाच्यार्थत्यागतो लक्ष्यैक्यमखण्डं ब्रह्मेत्याह—**मायेति** ॥ ३०–३१ ॥ **विलक्ष्यते**—तत्त्वमस्यादिमहावाक्यसमुदायार्थः ॥ ३२ ॥ एवं महावाक्यार्थ-श्रवणमननिदिध्यासनसमाधिभिः अपरोक्षसाक्षात्कारो भवतीत्याह—**इत्थमिति** ॥ ३३–४० ॥

समाधेः धर्ममेघत्वम्

अनादाविह संसारे संचिताः कर्मकोटयः ।
अनेन विलयं यान्ति शुद्धो [1]धर्मोऽभिवर्धते ॥ ३७ ॥
धर्ममेघ[2]मिमं प्राहुः समाधिं योगवित्तमाः ।
वर्षत्येष यथा धर्मामृतधाराः सहस्रशः ॥ ३८ ॥

समाधिना अपरोक्षबोधसिद्धिः

अमुना वासनाजाले निःशेषं प्रविलापिते ।
समूलोन्मूलिते पुण्यपापाख्ये कर्मसंचये ॥ ३९ ॥
वाक्यमप्रतिबद्धं सत् प्राक् परोक्षाव[3]भासते ।
करामलकवद्बोधमपरोक्षं प्रसूयते ॥ ४० ॥

वैराग्यबोधोपरतीनां अवधिः

वासनाऽनु[4]दयो भोग्ये वैराग्यस्य तदाऽवधिः ।
अहंभावोदयाभावो बोधस्य परमावधिः ॥ ४१ ॥
लीनवृत्तेरनुत्पत्तिर्मर्यादोपरतेस्तु सा ।

[1] धर्मो वि—अ, अ १, अ २, क.　　[3] मिदं—उ, उ १.
[2] भासिते—अ १. भासितं—अ.　　[4] दये—अ १, अ २.

वासनाबोधोपरतीनां अवधिमाह --**वासनेति** ॥ ४१–४२ ॥

स्थितप्रज्ञलक्षणम्

स्थितप्रज्ञो यतिरयं यः सदानन्दमश्नुते ॥ ४२ ॥
ब्रह्मण्येव विलीनात्मा निर्विकारो विनिष्क्रियः ।
ब्रह्मात्मनोः शोधितयोरेकभावावगाहिनी ॥ ४३ ॥
निर्विकल्पा च चिन्मात्रा वृत्तिः प्रज्ञेति कथ्यते ।

प्रज्ञाप्रज्ञावज्जीवन्मुक्तलक्षणमाह---**ब्रह्मेति** । शोधिततत्त्वंपदैक्यब्रह्मगोचरा वृत्तिः प्रज्ञेत्युच्यते । तद्वान् जीवन्मुक्त इत्यर्थः ॥ ४३–४४ ॥

जीवन्मुक्तलक्षणम्

सा सर्वदा भवेद्यस्य स जीवन्मुक्त इष्यते ॥ ४४ ॥
देहेन्द्रियेष्वहंभाव इदंभावस्तदन्यके ।
यस्य नो भवतः क्वापि स जीवन्मुक्त इष्यते ॥ ४५ ॥
न प्रत्यग्ब्रह्मणोर्भेदं [1]कथाऽपि ब्रह्मसर्गयोः ।
प्रज्ञया यो विजानाति स जीवन्मुक्त इष्यते ॥ ४६ ॥
साधुभिः पूज्य[2]मानेऽस्मिन् पीड्यमानेऽपि दुर्जनैः ।
समभावो भवेद्यस्य स जीवन्मुक्त इष्यते ॥ ४७ ॥
विज्ञातब्रह्म[3]तत्त्वस्य यथापूर्वं न संसृतिः ।
अस्ति चेन्न स विज्ञातब्रह्मभावो बहिर्मुखः ॥ ४८ ॥

[1] कदा—अ. [2] मानोऽस्मिन्—अ २, क. मानोऽपि—अ.
[3] भावस्य—अ.

किञ्च—देहेन्द्रियेष्विति ॥ ४५–४७ ॥ ज्ञाततत्त्वस्यापि संसारानुवृत्तौ स बहिर्मुखो भवतीत्याह—विज्ञातेति । निवृत्तपराक्प्रवृत्तिः जीवन्मुक्तोऽन्तर्मुख इत्यर्थः ॥ ४८ ॥

जीवन्मुक्तस्य प्रारब्धसत्त्वं, सञ्चितक्षयः, आगाम्यश्लेषश्च

सुखाद्यनुभवो यावत् तावत् प्रारब्धमिष्यते ।
फलोदयः क्रियापूर्वो निष्क्रियो न हि कुत्रचित् ॥ ४९ ॥
अहं ब्रह्मेति विज्ञानात् कल्पकोटिशतार्जितम् ।
संचितं विलयं याति प्रबोधात् स्वप्नकर्मवत् ॥ ५० ॥
स्वमसङ्गमुदासीनं परिज्ञाय नभो यथा ।
न श्लिष्यते यतिः किंचित् कदाचिद्भाविकर्मभिः ॥ ५१ ॥
न नभो घटयोगेन सुरागन्धेन लिप्यते ।
तथाऽऽत्मोपाधियोगेन तद्धर्मैर्नैव लिप्यते ॥ ५२ ॥

तस्य प्रारब्धानुभवोऽस्ति न वा इत्यत्र—सुखादीति ॥ ४९ ॥ विज्ञानतोऽस्य सञ्चितकर्म क्षीयत इत्याह—अहमिति ॥ ५० ॥ आगामिकर्मणा ज्ञानिनोऽश्लेषमाह—स्वमिति ॥ ५१ ॥ आगामिकर्माश्लेषे दृष्टान्तमाह—नेति ॥ ५२ ॥

प्रारब्धसत्त्वासत्त्वपक्षयोः निरूपणम्

ज्ञानोदयात् पुराऽऽरब्धं कर्म ज्ञानान्न नश्यति ।
अदत्त्वा स्वफलं लक्ष्यमुद्दिश्योत्सृष्टबाणवत् ॥ ५३ ॥
व्याघ्रबुद्ध्या विनिर्मुक्तो बाणः पश्चात्तु गोमतौ ।
न तिष्ठति भिनत्त्येव लक्ष्यं वेगेन निर्भरम् ॥ ५४ ॥

अजरोऽस्म्यमरोऽस्मीति य आत्मानं प्रपद्यते ।
तदात्मना तिष्ठतोऽस्य कुतः प्रारब्धकल्पना ॥ ५५ ॥
प्रारब्धं सिध्यति तदा यदा देहात्मना स्थितिः ।
देहात्मभावो नैवेष्टः प्रारब्धं त्यज्यतामतः ॥ ५६ ॥
प्रारब्धकल्पनाऽप्यस्य देहस्य भ्रान्ति[1]रेष हि ॥ ५७ ॥
अध्यस्तस्य कुतस्त[स]त्त्व[2]मसत्यस्य कुतो जनिः ।
अजातस्य कुतो नाशः प्रारब्धमसतः कुतः ॥ ५८ ॥
ज्ञानेनाज्ञानकार्यस्य समूलस्य लयो यदि ।
तिष्ठत्ययं [3]कथं देह इति शङ्कावतो जडान् ॥ ५९ ॥
समाधातुं बाह्यदृष्ट्या प्रारब्धं वदति श्रुतिः ।
न तु देहादिसत्यत्वबोधनाय विपश्चिताम् ॥ ६० ॥

निर्विशेषब्रह्मज्ञाने जातेऽपि प्रारब्धं कर्म न नश्यतीति सदृष्टान्तं पूर्वपक्ष-युक्तिं प्रतिपाद्याथ निर्विशेषब्रह्ममात्रभावारूढज्ञानिनः प्रारब्धासम्भवं प्रकटयति—**ज्ञानेति** ॥ ५३–५४ ॥ सिद्धान्तस्तु—**अजरोऽस्मीति** ॥ ५५ ॥ स्वात्मनः प्रारब्धाभावेऽपि देहस्य स्यादिति पूर्वपक्षीकृत्य तस्यापि न सम्भवतीति निराकरोति—**प्रारब्धमिति** ॥ ५६–५८ ॥ इयं प्रारब्धकल्पना स्वाज्ञसमाधानार्थं प्रवृत्ता न तु देहादेः ब्रह्मातिरेकेण सत्यत्वमंगीकृत्य प्रवृत्तेत्याह—**ज्ञानेनेति** ॥५९–६०॥

कर्मत्रयविरळब्रह्मस्वरूपम्

परिपूर्णमनाद्यन्तमप्रमेयमविक्रियम् ।
सद्घनं चिद्घनं नित्यमानन्दघनमव्ययम् ॥ ६१ ॥

[1] रेव—अ, क. [2] मसत्वस्य—उ. [3] कुतो—अ, अ १.

प्रत्यगेकरसं पूर्णमनन्तं सर्वतोमुखम् ।
अहेयमनुपादेयमनाधेयमनाश्रयम् ॥ ६२ ॥
निर्गुणं निष्क्रियं सूक्ष्मं निर्विकल्पं निरञ्जनम् ।
अनिरूप्यस्वरूपं यन्मनोवाचामगोचरम् ॥ ६३ ॥
सत्समृद्धं स्वतःसिद्धं शुद्धं बुद्धमनीदृशम् ।
एकमेवाद्वयं ब्रह्म नेह नानाऽस्ति किंचन ॥ ६४ ॥

कर्मत्रयकलनाविरळं ब्रह्म कीदृशमित्यत आह—परिपूर्णमिति ॥६१–६४॥

गुरवे स्वानुभवप्रकटनम्

स्वानुभूत्या स्वयं ज्ञात्वा स्वमात्मानमखण्डितम् ।
स सिद्धः सुसुखं तिष्ठन् निर्विकल्पात्मनाऽऽत्मनि ॥ ६५ ॥
क्व गतं केन वा नीतं कुत्र लीनमिदं जगत् ।
अधुनैव मया दृष्टं नास्ति किं महदद्भुतम् ॥ ६६ ॥
किं हेयं किमुपादेयं किमन्यत् किं विलक्षणम् ।
अखण्डानन्दपीयूषपूर्णब्रह्ममहार्णवे ॥ ६७ ॥
न किंचिदत्र पश्यामि न शृणोमि न वेद्म्यहम् ।
स्वात्मनैव सदानन्दरूपेणास्मि [1]स्वलक्षणः ॥ ६८ ॥
असङ्गोऽहमनङ्गोऽहमलिङ्गोऽहमहं हरिः ।
प्रशान्तोऽहमनन्तोऽहं परिपूर्णश्चिरन्तनः ॥ ६९ ॥
अकर्ताऽहमभोक्ताऽहमविकारोऽहमव्ययः ।
शुद्धबोधस्वरूपोऽहं केवलोऽहं सदाशिवः ॥ ७० ॥

[1] विल—अ, अ १.

परिपूर्णमित्यादिविशेषणविशिष्टं ब्रह्माहमस्मीति **स्वानुभूत्या** ॥ ६५ ॥ एवं स्वगुरोः सकाशात् परमं इमं उपदेशं लब्ध्वा गुर्वनुज्ञया निर्विकल्पसमाधौ चिरं स्थित्वा बहिष्प्राणिसंवातपुण्योद्रेकानुरोधेन समाधितो व्युत्थाय स्वान्तेवासिगोष्ठ्यां स्वानुभवसिद्धं अर्थं प्रकटयति—**क गतमिति** ॥ ६६–६७ ॥ **स्वातिरिक्तं न किञ्चिदत्र** ॥ ६८–६९ ॥ ब्रह्मैवं घोरांगिरसे स्वानुभवं प्रकटयित्वा उपरामेत्यर्थः ॥ ७० ॥

विद्यासम्प्रदायपरम्परा

[1]एतां विद्यामपान्तरतमाय ददौ । अपान्तरतमो ब्रह्मणे ददौ । ब्रह्मा घोराङ्गिरसे ददौ । घोराङ्गिरा रैक्काय ददौ । रैक्को रामाय ददौ । रामः सर्वेभ्यो भूतेभ्यो ददावित्येतन्निर्वाणानुशासनं वेदानुशासनं वेदानुशासनमित्युपनिषत् ॥ ७१ ॥

रामाय परशुरामायेत्यर्थः । अस्या विद्यायाः स्वातिरिक्तभ्रममोक्षप्रकाशकत्वात् **निर्वाणानुशासनत्वं** अस्याः समस्तवेदार्थत्वेन वेदानां अत्रैव पर्यवसन्नत्वात् **वेदानुशासनत्वं** च । आवृत्तिः अयमेव वेदार्थो नान्यः इति प्रकटनार्था, "वेदार्थः परमाद्वैतं नेतरत् सुरपुंगवाः" इति स्मृतेः । **इत्युपनिषच्छब्दः** अध्यात्मोपनिषत्परिसमाप्त्यर्थः ॥ ७१ ॥

श्रीवासुदेवेन्द्रशिष्योपनिषद्ब्रह्मयोगिना ।
अध्यात्मोपनिषद्ब्रह्माख्या लिखिता ब्रह्मबोधिनी ।
अध्यात्मोपनिषद्ब्रह्माख्याग्रन्थजातं शतं स्मृतम् ॥

इति श्रीमदीशाद्यष्टोत्तरशतोपनिषच्छास्त्रविवरणे त्रिसप्ततिसंख्यापूरकं अध्यात्मोपनिषद्विवरणं सम्पूर्णम्

---

[1] सदाशिव एतां—उ, उ १.

अन्नपूर्णोपनिषत्

भद्रं कर्णेभिः—इति शान्तिः

प्रथमोऽध्यायः

ब्रह्मविद्यातत्साधनजिज्ञासा

निदाघो नाम योगीन्द्रः ऋभुं ब्रह्मविदां वरम् ।
प्रणम्य दण्डवद्भूमावुत्थाय स पुनर्मुनिः ॥ १ ॥
आत्मतत्त्वमनुब्रूहीत्येवं पप्रच्छ सादरम् ।
कयोपासनया ब्रह्मन्नीदृशं प्राप्तवानसि ॥ २ ॥
तां मे ब्रूहि महाविद्यां मोक्षसाम्राज्यदायिनीम् ।

सर्वापह्नवसंसिद्धब्रह्ममात्रतयोज्ज्वलम् ।
त्रैपदश्रीरामतत्त्वं स्वमात्रमिति भावये ॥

इह खलु अथर्वणवेदप्रविभक्तेयं अन्नपूर्णोपनिषत् समस्तवेदान्तसिद्धान्तप्रकटनव्यग्रा स्वयं ब्रह्ममात्रपर्यवसन्ना विजयते । अस्याः स्वल्पग्रन्थतो विवरणमारभ्यते । निदाघऋभुप्रश्नप्रतिवचनरूपेयं आख्यायिका विद्यास्तुत्यर्था । आख्यायिकामवतारयति—निदाघ इति ॥ १–२ ॥

अन्नपूर्णामन्त्रानुष्ठानेन आत्मज्ञानोदयः

निदाघ त्वं कृतार्थोऽसि शृणु विद्यां [1]सनातनाम् ॥ ३ ॥
यस्या विज्ञानमात्रेण जीवन्मुक्तो भविष्यसि ।
मूलशृङ्गाटमध्यस्था बिन्दुनादकलाऽऽश्रया ॥ ४ ॥
नित्यानन्दा निराधारा विख्याता विलसत्कचा ।
विष्टपेशी महालक्ष्मीः कामस्तारो नतिस्तथा ॥ ५ ॥
भगवत्यन्नपूर्णेति ममाभिलषितं ततः ।
अन्नं देहि ततः स्वाहा मन्त्रसारेति विश्रुता ॥ ६ ॥
सप्तविंशतिवर्णात्मा योगिनीगणसेविता ॥ ७ ॥
ऐं ह्रीं सौः श्रीं क्लीं ओं नमो भगवत्यन्नपूर्णे ममाभिलषितमन्नं
देहि स्वाहा ॥
इति पित्रोपदिष्टोऽस्मि तदादि नियमस्थितः ।
कृतवान् स्वाश्रमाचारो मन्त्रानुष्ठानमन्वहम् ॥ ८ ॥
एवं गते बहुदिने प्रादुरासीन्ममाग्रतः ।
अन्नपूर्णा विशालाक्षी स्मयमाननुखाम्बुजा ॥ ९ ॥
तां दृष्ट्वा दण्डवद्भूमौ नत्वा प्राञ्जलिरास्थितः ।
अहो वत्स कृतार्थोऽसि वरं वरय मा चिरम् ॥ १० ॥
एवमुक्तो विशालाक्ष्या मयोक्तं मुनिपुङ्गव ।
आत्मतत्त्वं मनसि मे प्रादुर्भवतु पार्वति ॥ ११ ॥

[1] सनातनीम्—अ, अ १.

तथैवास्त्विति मामुक्त्वा तत्रैवान्तरधीयत ।
तदा मे मतिरुत्पन्ना जगद्वैचित्र्यदर्शनात् ॥ १२ ॥

योग्याधिकारिणा निदाघेन एवं पृष्टो मुनिः यथावत् सोपायं कथयामासेत्याह—**निदाघेति** । ब्रह्मचर्यप्रळयकालाग्निना निर्दग्धाघोऽसि अतस्त्वं निदाघ इत्यन्वर्थनामा भवसीत्यर्थः ॥ ३ ॥ स्वेनोपासितमन्त्रमुद्धरति—**मूलेति** । सर्वाभिधेयमूलशृंगं ब्रह्म, तत्र मूलशृंगे अभिधानरूपेण अटति सोऽयं **मूलशृङ्गाटः** प्रणवः, तन्मध्ये तिष्ठतीति तन्मध्यस्था ऐ इति बिन्दुनादकळायोगात् ऐं इति वाग्भवबीजमुद्धृतम् ॥ ४ ॥ तथा **नित्यानन्दा निराधारा** इति शब्दतः बिन्दुनादसहितेकाराद्यवियद्बीजमुद्धृतं भवति ह्रीं इति । विलसत्कचशब्देन सविसर्गौंकाराद्यसकार उच्यते **सौः** इति । तद्बीजशक्तिरेव **विष्टपेशी** भुवनेशीत्युच्यते **महालक्ष्मीः** श्रीं इति । **कामः** क्लीं इति । **तारो नतिः** इत्यादि विस्पष्टमवगम्यते । विशिष्टमूलमन्त्रस्तु—ऐं ह्रीं **सौः** इत्यादि ॥ ५–७ ॥ अयं मन्त्रः ते केनोपदिष्टः? त्वया किं कृतम्? ततः किं फलं प्राप्तवानसि? इति प्रष्टुकाममालक्ष्याह—**इतीति** ॥ ८–९ ॥ ततः प्रसन्ना भगवती एवमाह—**अहो** इति ॥ १० ॥ तदा त्वया किं कृतं? इत्यत्र—**एवमिति** ॥ ११ ॥ तया किं कृतं? इत्यत्र—**तथैवास्त्विति** । यदा एवं प्रसादो जातः **तदा मे मतिरुत्पन्ना** ॥ १२ ॥

पञ्चविधभ्रमनिवृत्तिः

भ्रमः पञ्चविधो भाति तदेवेह समुच्यते ।
जीवेश्वरौ भिन्नरूपाविति प्राथमिको भ्रमः ॥ १३ ॥
आत्मनिष्ठं कर्तृगुणं वास्तवं वा द्वितीयकः ।
शरीरत्रयसंयुक्तजीवः सङ्गी तृतीयकः ॥ १४ ॥

जगत्कारणरूपस्य विकारित्वं चतुर्थकः ।
कारणाद्भिन्नजगतः सत्यत्वं पञ्चमो भ्रमः ।
पञ्चभ्रमनिवृत्तिश्च तदा स्फुरति चेतसि ॥ १५ ॥

बिम्बप्रतिबिम्बदर्शनेन भेदभ्रमो निवृत्तः । स्फटिकलोहित-दर्शनेन पारमार्थिककर्तृत्वभ्रमो निवृत्तः । घटमठाकाशदर्शनेन सङ्गीति भ्रमो निवृत्तः । रज्जुसर्पदर्शनेन कारणाद्भिन्नजगतः सत्यत्वभ्रमो निवृत्तः । कनक[1]रुचकदर्शनेन विकारित्वभ्रमो निवृत्तः ॥ १५–१ ॥

तदा प्रभृति मच्चित्तं ब्रह्माकारमभूत् स्वयम् ।
निदाघ त्वमपीत्थं हि तत्त्वज्ञानमवाप्नुहि ॥ १६ ॥

तत्प्रकारस्तु—जीवेश्वराविति ॥ १३–१५ ॥ तन्निवृत्तिप्रकारः कः? इत्यत्र—बिम्बप्रतिबिम्बदर्शनेन जीवेशयोः मिथः भेदभ्रमो निवृत्तः ॥ १५–१, १६ ॥

स्वस्वरूपानुसन्धानम्

निदाघः प्रणतो भूत्वा ऋभुं पप्रच्छ सादरम् ।
ब्रूहि मे श्रद्दधानाय ब्रह्मविद्यामनुत्तमाम् ॥ १७ ॥
तथेत्याह ऋभुः प्रीतस्तत्त्वज्ञानं वदामि ते ।
महाकर्ता महाभोक्ता महात्यागी भवानघ ।
स्वस्वरूपानुसंधानमेवं कृत्वा सुखी भव ॥ १८ ॥

[1] रुचिर—अ २, क, ड.

नित्योदितं विमलमाद्यमनन्तरूपं
ब्रह्मास्मि नेतरकलाकलनं हि किंचित् ।
इत्येव भावय निरञ्जनतामुपेतो
निर्वाणमेहि सकलामल[1]शान्तवृत्तिः ॥ १९ ॥

यदिदं दृश्यते किंचित् तत्तन्नास्तीति भावय ।
यथा गन्धर्वनगरं यथा वारि मरुस्थले ॥ २० ॥

यत्तु नो दृश्यते किंचिद्यत्तु किंचिदिव स्थितम् ।
मनःषष्ठेन्द्रियातीतं तन्मयो भव [2]वै मुने ॥ २१ ॥

अविनाशि चिदाकाशं सर्वात्मकमखण्डितम् ।
नीरन्ध्रं भूरिवाशेषं तदस्मीति विभावय ॥ २२ ॥

ततः किं इत्यत्र—निदाघः प्रणतो भूत्वा अन्नपूर्णाप्रसादतः ऋतार्थमेव भुञ्जानं परमार्थसत्यवादिनं **ऋभुं पप्रच्छ** ॥ १७ ॥ निदाघप्रश्नमंगीकृत्य **तथेत्याह ऋभुः** । किं तद्वदसि? इत्यत्र—**महाकर्तेति** । चतुर्मुखात्मना स्वसृज्यमानप्रपञ्चकलनायां आत्मात्मीयाभिमतिवैकल्येन सृष्टिकाले सर्वं करोतीति **महाकर्ता**, तथा विष्ण्वात्मना स्थितिकाले "अहमेवेदं सर्वं", "सर्वं खल्विदं ब्रह्म", "मद्व्यतिरिक्तमणुमात्रं न विद्यते", इति श्रुत्यनुरोधेन यः सर्वं भुंक्ते स **महाभोक्ता**, तथा प्रळयकाले रुद्रात्मना "सर्ववर्जितचिन्मात्रोऽस्मि" इति श्रुत्यनुरोधेन स्वातिरिक्तसर्वत्यागमपह्नवीकरोतीति **महात्यागी**, वस्तुतः कर्तृभोक्तृत्यागकलनाविरळनिष्प्रतियोगिकब्रह्ममात्रावशेषरूपो **भव** । हे **अनघ** निदाघ स्वस्वरूपानुसन्धानतः कृतकृत्यो भवेत्यर्थः ॥ १८ ॥ किं तत्स्वरूपं? तत् किंप्रकारेण अनुसन्धेयं? किं तत्फलं? इत्यत आह—

[1] शान्ति—उ. [2] सर्वदा—उ.

नित्येति । अथ "तत ऊर्ध्वं उदेता नैवोदेता नास्तमेता" इति यत् नित्योदितं इत्यादिविशेषणविशिष्टं तत् ब्रह्मास्मि इति ज्ञानतो ब्रह्मातिरिक्तभ्रमविरळो भूत्वा मुक्तो भवसीत्यर्थः ॥ १९ ॥ दृश्यप्रपञ्चे सति कथं मुक्तो भवामि इत्यत्र दृश्यं मायामात्रं इति विदित्वा तदतीतं ब्रह्म इति भावयेत्याह—यदिदमिति । दृश्यस्यासत्त्वं कुत इत्यत्र दृष्टान्तमाह—यथेति ॥ २० ॥ एवं यत्तु नो दृश्यते ॥ २१ ॥ यन्मयो भवामि तत् किं नश्वरं? इत्यत आह—अविनाशीति ॥ २२ ॥

सत्तासामान्यदृष्टिः

यदा संक्षीयते चित्तमभावात्यन्तभावनात् ।
चित्सामान्यस्वरूपस्य सत्तासामान्यता तदा ॥ २३ ॥
नूनं चैत्यांशरहिता चिद्यदाऽऽत्मनि लीयते ।
असद्रूपवदत्यच्छा सत्तासामान्यता तदा ॥ २४ ॥
दृष्टिरेषा हि परमा सदेहादेहयोः समा ।
मुक्तयोः संभवत्येव तुर्यातीतपदाभिधा ॥ २५ ॥
व्युत्थितस्य भवत्येषा समाधिस्थस्य चानघ ।
ज्ञस्य केवलमज्ञस्य न भवत्येव बोधजा ॥ २६ ॥
अनानन्दसमानन्द[1] मुग्धमुग्धमुखद्युतिः ।
चिरकालपरिक्षीणमननादिपरिश्रमः ॥
पदमासाद्यते पुण्यं प्रज्ञयैवैकया तथा ॥ २७ ॥

अस्मीति ज्ञानस्य चित्सामान्यत्वेन सविशेषत्वमाशङ्क्य चित्तासंभवबोधेन चित्सामान्यमपि विलीयते, ततः सत्तासामान्यं तुर्यातीतभावमेत्य निर्विशेषं

[1] मुग्धा—उ.

भवतीत्याह—**यदेति** ॥ २३ ॥ कीदृशी सत्तासामान्यता इत्यत्राह—**नूनमिति** । यदा चित्तचैत्यांशकलनाविरळा प्रत्यक् चित् **स्वात्मनि लीयते** पराक्सापेक्ष-प्रत्यग्भावं त्यजति तदा **असद्रूपवदत्यच्छा** निष्प्रतियोगिकनिर्विशेषस्वरूपिणी **सत्तासामान्यता** स्वमात्रमवशिष्यते इति ॥ २४ ॥ इयं सत्तासामान्यदृष्टिः जीवन्मुक्तविदेहमुक्तयोः किं विषमा कीदृशी इत्यत आह—**दृष्टिरिति** । **एषा** सत्तासामान्यदृष्टिः सर्वापह्नवसिद्धं ब्रह्म निष्प्रतियोगिकस्वमात्रमित्यखण्डनिर्विकल्पमुपेयुषो विदेहमुक्तस्य स्वातिरिक्तप्रपञ्चाधिकरणं ब्रह्मास्मीति पुनर्व्युत्थानार्हाखण्डनिर्विकल्पसमाधिभाजो जीवन्मुक्तस्य च **समा संभवति,** जीवन्मुक्तस्यापि समाध्यवस्थायां स्वातिरिक्तमस्ति नास्तीति विभ्रमाभावस्य तुल्यत्वात् सत्तासामान्यदृष्टेः **तुरीयातीततया** समत्वमुपपद्यते ॥ २५ ॥ कथं अस्याः समता? इत्यत्र लोकदृष्ट्या व्युत्थिताव्युत्थितविदेहसदेहमुक्तयोः सत्तासामान्यदृष्टिसमत्वं पुरस्तादेवोक्तम् । इयं दृष्टिः ज्ञस्यैव नाज्ञस्येत्याह—**ज्ञस्येति** । मुनेः यावद्यावत् निर्विशेषज्ञानमुदेति तावत्तावत् सत्तासामान्यदृष्टिः प्रसीदतीत्यत्र—

> यावद्यावन्मुनिश्रेष्ठ स्वयं सन्त्यज्यतेऽखिलम् ।
> तावत्तावत् परो लोकः परमात्मैव शिष्यते ॥ :

इति श्रुतेः । न हि केवलाज्ञस्य इयं दृष्टिः अस्ति नास्ति इति विभ्रमो वा भवति अस्य स्वाज्ञानावृतत्वात् इत्यर्थः ॥ २६ ॥ कोऽयं मुनिः? कस्य सत्तासामान्यदृष्टिः भवतीत्यत आह—**अनाबन्देति** । "स एको ब्रह्मणः आनन्दः" इति श्रुत्यनुरोधेन अनस्य मुख्यप्राणस्य ब्रह्मणो योऽस्ति आनन्दः चित्तप्रसादरूपः तेन समानन्दः समानानन्दो यस्याकामहतस्य मुनेः सोऽयं **अनानन्दसमानन्दश्चासौ** तद्व्यञ्जकतया **मुग्धमुग्धमुखद्युतिः** अतीव प्रसन्नमुखपङ्कजः ब्रह्मातिरिक्तं न किंचिदस्तीति **चिरकालानुसन्धानबलेन परिक्षीण**स्वातिरिक्तमननादिपरिश्रमः मुनिः यथा **प्रज्ञयैकया** यथावदेकविषयकप्रज्ञया **ब्रह्ममात्रभावारूढया पुण्यं** पावनं सत्तासामान्यं **पदं आसाद्यते** तन्मात्रज्ञानेन तद्भावमेतीत्यर्थः ॥ २७ ॥

वस्तुतत्त्वज्ञानार्था समाधिः

इमं गुणसमाहारमनात्मत्वेन पश्यतः ।
अन्तःशीतल[1]या याऽसौ समाधिरिति कथ्यते ॥ २८ ॥
अवासनं स्थिरं प्रोक्तं मनोध्यानं [2]तदेव च ।
तदेव केवलीभावं शान्ततैव च तत् सदा ॥ २९ ॥
तनुवासनमत्युच्चैः पदायोद्यतमुच्यते ।
अवासनं मनोऽकर्तृपदं तस्मादवाप्यते ॥ ३० ॥
घनवासनमेतत्तु चेतःकर्तृत्वभावनम् ।
सर्वदुःखप्रदं तस्माद्वासनां तनुतां नयेत् ॥ ३१ ॥
चेतसा संपरित्यज्य सर्वभावात्मभावनाम् ।
सर्वमाकाशतामेति नित्यमन्तर्मुखस्थितेः ॥ ३२ ॥
यथा विपणगा लोका विहरन्तोऽप्यसत्समाः ।
असंबन्धात्तथा ज्ञस्य ग्रामोऽपि विपिनोपमः ॥ ३३ ॥
अन्तर्मुखतया नित्यं सुप्तो बुद्धो व्रजन् पठन् ।
पुरं जनपदं ग्राममरण्यमिव पश्यति ॥ ३४ ॥
अन्तःशीतलतायां तु लब्धायां शीतलं जगत् ।
अन्तस्तृष्णोपतप्तानां दावदाहमयं जगत् ॥ ३५ ॥
भवत्यखिलजन्तूनां यदन्तस्तद्बहिः स्थितम् ॥ ३६ ॥
यस्त्वात्मरतिरेवान्तः कुर्वन् कर्मेन्द्रियैः क्रियाः ।
न वशो हर्षशोकाभ्यां स समाहित उच्यते ॥ ३७ ॥

[1] ता या सा—क.
[2] तथै—अ, अ १, उ.

आत्मवत् सर्वभूतानि परद्रव्याणि लोष्टवत् ।
स्वभावादेव न भयाद्यः पश्यति स पश्यति ॥ २८ ॥
अद्यैव मृतिरायातु कल्पान्तनिचये[1] न वा ।
नासौ कलङ्कमाप्नोति हेम पङ्कगतं यथा ॥ २९ ॥

तादृशपदातितः पूर्वभाव्यवस्था कीदृशी ? इत्याशङ्क्य समाधिरूपिणीत्याह—**इममिति** । मायात्रिगुणसमाहारमिमं स्वातिरिक्ताविद्यापदं **अनात्मत्वेन** शशविषाणवत् अवस्तुत्वेन **पश्यतो** मुनेः **अन्तः** हृदि स्वातिरिक्तास्तित्वतापग्रासशीतळब्रह्माकारवृत्त्या प्रज्ञया **या** संविदुदेति **असौ** समाधिरित्यर्थः ॥ २८ ॥ समाधिविभातवस्तुस्वरूपं किं ? इत्यत आह—**अवासनमिति** । **केवलीभावं** ब्रह्ममात्रावस्थानरूपं स्वातिरिक्तशान्ततैव च तत् **सदा** ॥ २९ ॥ तत्सिद्ध्युपायस्तु—**तनुवासनमिति** । मुनेः मनो वासनाक्षयानुरूपं प्रत्यङ्मुखं भवति । स्वातिरिक्तं अस्ति नास्तीति वासनारहितं **अवासनं मनस्तु** तत्पदवीमेतीत्यर्थः ॥ ३० ॥ तद्विपर्यये यतो वासना बन्धहेतुः अतः तत्तानवं कुर्यादित्याह—**घनेति** ॥ ३१ ॥ कथं वासनाजालं तनुतामेतीत्यत्र सर्वत्रात्मात्मीयाभिमानत्यागतो वासनाजालं निर्वासनपदं भजतीत्याह—**चेतसेति** ॥ ३२ ॥ स्वातिरिक्तकलनासंगासंगतैव घनतनुवासनाहेतुरित्याह—**यथेति** । अस्मिन् वासरेऽत्र जनसंघो भूयात् इति साङ्केतिकस्थानं विपणं गच्छन्तो लोक्यन्त इति **विपणगाः लोकाः** बहवो जनाः स्वस्वव्यापारव्यग्रतया **विहरन्तोऽपि** तेषु असंगपथिकदृष्ट्या एते जनाः **असत्समा** भवन्ति **तथा** ज्ञस्य कुत्राप्यसंबन्धात् **ग्रामोऽपि विपिनतुल्यो** भवतीत्यर्थः ॥ ३३ ॥ किंच—**अन्तर्मुखतयेति** ॥३४॥ स्वज्ञो जगद्ब्रह्म पश्यति स्वाज्ञस्तु ब्रह्म जगत् पश्यतीत्याह—**अन्तरिति** । **ब्रह्मदृष्टेः** ब्रह्म विभाति स्वातिरिक्तदृष्टेः स्वयमेव स्वातिरिक्तवत् भातीत्यत एवोक्तं **यदन्तः तद्बहिः स्थितमिति** ॥ ३५–३६ ॥ असमाहितदृष्टिविकल्पितं जगत् समाहितदृष्टेः

[1] यवा—अ, अ १.

ब्रह्म भवतीत्युक्तम् । कोऽयं समाहितः ? इत्यत आह—यस्त्विति । उक्तलक्षण-लक्षित एव ब्रह्मातिरिक्तोपेक्षापूर्वकं ब्रह्मणि समाहितान्तर इत्यर्थः ॥ ३७–३९ ॥

विचारेण समाधिसिद्धिः

कोऽहं कथमिदं किं वा कथं मरणजन्मनी ।
विचारयान्तरे वेत्थं महत्तत्फलमेष्यसि ॥ ४० ॥
विचारेण परिज्ञातस्वभावस्य सतस्तव ।
मनः स्वरूपमुत्सृज्य [1]शममेष्यति विज्वरम् ॥ ४१ ॥
विज्वरत्वं गतं चेतस्तव संसारवृत्तिषु ।
न निमज्जति तद्ब्रह्मन् गोष्पदेष्विव वारणः ॥ ४२ ॥
कृपणं तु मनो ब्रह्मन् गोष्पदेऽपि निमज्जति ।
कार्ये गोष्पदतोयेऽपि विशीर्णो मशको यथा ॥ ४३ ॥
यावद्यावन्मुनिश्रेष्ठ स्वयं संत्यज्यतेऽखिलम् ।
तावत्तावत् परालोकः परमात्मैव शिष्यते ॥ ४४ ॥
यावत् सर्वं न संत्यक्तं तावदात्मा न लभ्यते ।
सर्ववस्तुपरित्यागे शेष आत्मेति कथ्यते ॥ ४५ ॥
आत्माव[2]लोकनार्थं तु तस्मात् सर्वं परित्यजेत् ।
सर्वं संत्यज्य दूरेण यच्छिष्टं तन्मयो भव ॥ ४६ ॥
सर्वं किंचिदिदं दृश्यं दृश्यते यज्जगद्गतम् ।
चिन्निष्पन्दांशमात्रं तन्नान्यत् किंचन शाश्वतम् ॥ ४७ ॥

[1] सम—अ. [2] बोध—अ २, क. लोकनार्थस्तु—उ १.

समाहिता नित्यतृप्ता यथाभूतार्थदर्शिनी ।
[1]ब्रह्मन् समाधिशब्देन परा प्रज्ञोच्यते बुधैः ॥ ४८ ॥
अक्षुब्धा निरहंकारा द्वन्द्वेष्वननुपातिनी ।
प्रोक्ता समाधिशब्देन मेरोः स्थिरतरा स्थितिः ॥ ४९ ॥
निश्चिता विगताभीष्टा हेयोपादेयवर्जिता ।
ब्रह्मन् समाधिशब्देन परिपूर्णा मनोगतिः ॥ ५० ॥
केवलं चित्प्रकाशांशकल्पिता स्थिरतां गता ।
तुर्या सा प्राप्यते दृष्टिर्महद्भिर्वेदवित्तमैः ॥ ५१ ॥
अदूरगतसादृश्या सुषुप्तस्योपलक्ष्यते ।
मनोऽहंकारविलये सर्वभावान्तरस्थिता ॥ ५२ ॥
समुदेति परानन्दा या तनुः पारमेश्वरी ।
मनसैव मनश्छित्त्वा सा स्वयं लभ्यते गतिः ॥ ५३ ॥
तदनु विषयवासनाविनाशस्तदनु शुभः परमस्फुटप्रकाशः ।
तदनु च समतावशात् स्वरूपे परिणमनं महतामचिन्त्यरूपम् ॥
अखिलमिदमनन्तमात्मतत्त्वं दृढपरिणामिनि चेतसि स्थितोऽन्तः ।
बहिरुपशमिते चराचरात्मा स्वयमनुभूयत एव देवदेवः ॥ ५५ ॥
असक्तं [2]निश्चलं चित्तं युक्तं संसार्यविस्फुटम् ।
सक्तं तु दीर्घतपसा युक्त[3]मप्यतिबद्धवत् ॥ ५६ ॥
अन्तःसंसक्तिनिर्मुक्तो जीवो मधुरवृत्तिमान् ।
बहिः कुर्वन्नकुर्वन् वा कर्ता भोक्ता न हि क्वचित् ॥ ५७ ॥

[1] प्रोक्ता स—अ, अ १. [2] निर्म—अ, अ १. [3] मित्यतिबन्ध—क.

समाहितत्वासमाहितत्वमूलं विचाराविचारावित्यत्र ब्रह्मातिरिक्तयोः याथात्म्यविचारात् मुच्यते अविचारात् बद्धो भवतीत्याह—**कोऽहमिति** ॥ ४० ॥ **स्वरूपं** सङ्कल्पादिकम् ॥ ४१–४२ ॥ विचारणासमर्थं **कृपणम्** ॥ ४३ ॥ यावत्स्वातिरिक्ताशां त्यजति तावत् स्वयमेव अवशिष्यत इत्याह—**यावदिति**। **परालोकः** प्रकाशमात्रचिद्धातुः ॥ ४४ ॥ अन्यथा—**यावदिति** ॥ ४५ ॥ यस्मादेवं—**आत्मेति**। त्वं तु—**सर्वमिति** ॥ ४६ ॥ यत् दृश्यं तत् दृगतिरिक्तं नास्तीत्याह—**सर्वमिति**। **तत्** चिद्विकल्पितत्वात् चिदतिरिक्तं **नान्यत्** ॥ ४७ ॥ सर्वं चिदेव चिदतिरिक्तं नास्त्येवेति चिन्मात्रविश्रान्तिः प्रज्ञा समाधिशब्देनोच्यत इत्याह—**समाहितेति** ॥ ४८ ॥ सुखादिद्वन्द्वेषु ॥ ४९–५० ॥ सैव तुर्यदृष्टिरित्याह—**केवलमिति** ॥ ५१ ॥ **अदूरगतसादृश्या** सर्वात्मतया अदूरगतब्रह्मवस्तुगोचरा **सुषुप्तस्योपलक्ष्यते** स्वापे स्वपरवृत्त्यभावात् ॥ ५२ ॥ सा कदा प्रसीदतीत्यत्र—**मनसैवेति**। **मनश्छित्त्वा** तिष्ठतो मुनेः **सा स्वयं लभ्यते गतिः** ॥ ५३ ॥ स्वान्तर्बाह्यकलनाऽसंभवप्रबोधतोऽयमात्मा स्वयमेव अनुभूयत इत्याह—**तदन्विति**। यथायथा निर्विशेषबोधो जायते तथा तथा **तदन्विति** ॥५४॥ स्वान्तर्बाह्यवासनाक्षयानुरूपं मनो ब्रह्माकारपरिणतिमेत्य ब्रह्मात्मना अनुभूयते इत्याह—**अखिलमिति**। **चराचरात्मा** चराचरप्रपञ्चकलनां ग्रसित्वा **स्वयं अनुभूयत एव**।

विषया बाह्यदेशस्था देहस्यान्तरहंकृतिः।
स्वान्तर्बाह्योपरमतः स्वयमेवानुभूयते ॥

इति स्मृतेः ॥ ५५ ॥ यतः एवं अतः स्वान्तर्बाह्यविकल्पितपदार्थसंगासंगौ संसारित्वासंसारित्वहेतुरित्याह—**असक्तमिति** ॥ ५६ ॥ **मधुरं ब्रह्म**। न हि ध्यानं करोमीति वेषमात्रेण मुनिः ध्यानफलमेति। नाप्यन्तरात्मतत्त्वं ध्यायन् बाह्यव्यापारवत्संसारिवेषेण संसारफलमश्नुते। यतो बाह्यनटनं अकिञ्चित्करं अतः स्वान्तर्भावनैव यथोक्तफलदेत्यत्र—

कर्मेन्द्रियाणि संयम्य य आस्ते मनसा स्मरन्।
इन्द्रियार्थान् विमूढात्मा मिथ्याऽऽचारः स उच्यते ॥

यस्त्विन्द्रियाणि मनसा नियम्यारभतेऽर्जुन ।
कर्मेन्द्रियैः कर्मयोगमसक्तः स विशिष्यते ॥

इति स्मृतेः । इतिशब्दः अध्यायपरिसमाप्त्यर्थः ॥

इति प्रथमोऽध्यायः

द्वितीयोऽध्यायः

बन्धहेतुसङ्गलक्षणम्

निदाघः—

सङ्गः कीदृश इत्युक्तः कश्च बन्धाय देहिनाम् ।
कश्च मोक्षाय कथितः कथं त्वेष [1]चिकित्स्यते ॥ १ ॥
देहदेहिविभागैकपरित्यागेन भावना ।
देहमात्रे हि विश्वासः सङ्गो बन्धाय [2]कथ्यते ॥ २ ॥

संगासंगावेव संसारित्वासंसारित्वफलदाविति प्रश्नबीजमवष्टभ्य तदियत्तां पृच्छतीत्याह—सङ्ग इति ॥ १ ॥ प्रश्नोत्तरं भगवानाह—देहेति ॥ २–३ ॥

असङ्गत्वं मोक्षसाधनम्

सर्वमात्मेदमत्राहं किं वाञ्छामि त्यजामि किम् ।
इत्यसङ्गस्थितिं विद्धि जीवन्मुक्ततनुस्थिताम् ॥ ३ ॥

[1] चिकित्सितः—उ. [2] कल्प—अ २, क.

नाहमस्मि न चान्योऽ[1]स्ति न [2]चायं न च नेतरः ।
सोऽसङ्ग इति संप्रोक्तो ब्रह्मास्मीत्येव सर्वदा ॥ ४ ॥
नाभिनन्दति नैष्कर्म्यं न कर्मस्वनु[3]षज्यते ।
सुसमो यः [4]परित्यागी सोऽसंसक्त इति स्मृतः ॥ ५ ॥
सर्वकर्मफलादीनां मनसैव न कर्मणा ।
निपुणो यः परित्यागी सोऽसंसक्त इति स्मृतः ॥ ६ ॥

विशेषतोऽसंगलक्षणमाह—**नाहमिति** । यस्य ब्रह्मातिरेकेण नह्ययमहमित्यादिव्यवहारकलना स्फुरति **सोऽसङ्ग** इत्यर्थः ॥ ४ ॥ किंच—**नाभिनन्दति नैष्कर्म्यं** पारमहंस्यं, तदाश्रमविहितेषु **न कर्मस्वनुषज्यते** ॥ ५ ॥ नित्यादिकर्म नियमेन कृत्वा तत्फलं ईश्वरे योऽर्पयति सोऽपि असंसक्त इत्याह—**सर्वेति** ॥६॥

संकल्पवर्जनेन आत्मरतिप्राप्तिः

असंकल्पेन [5]संकल्पाश्चेष्टा नाना विजृम्भिताः ।
चिकित्सिता भवन्तीह श्रेयः संपादयन्ति हि ॥ ७ ॥
न सक्त[6]मिह चेष्टासु न चिन्तासु न वस्तुषु ।
न गमागमचेष्टासु न कालकलनासु च ॥ ८ ॥
केवलं चिति विश्रम्य किंचिच्चैत्यावलम्ब्यपि ।
सर्वत्र नीरसमिह तिष्ठत्यात्मरसं मनः ॥ ९ ॥

[1] स्मि—अ. [2] चाहं—उ, उ १. [3] षज्जते—अ.
[4] फल—अ, अ १, उ १. [5] सकला—अ, अ १, अ २, क.
[6] मिव—अ २.

व्यवहारमिदं सर्वं मा करोतु करोतु वा ।
अकुर्वन् वाऽपि कुर्वन् वा जीवः स्वात्मरतिक्रियः ॥ १० ॥

असङ्कल्पसंस्कृतसङ्कल्पजालं श्रेयःसम्पादकं भवतीत्याह—**असङ्कल्पेनेति** ॥ ७ ॥ एतत्कार्योद्देशेन इदं करोमीति सर्वत्रासक्तं मनः स्वात्माभिमुखं भवेदित्याह—**न सक्तमिति** ॥ ८ ॥ किंचित्प्रसक्तचैत्यावलम्ब्यपि इदं मे अस्तु माऽस्तु इत्यभिसन्धिविकलं मनः प्रत्यग्भावमेतीत्यर्थः ॥ ९ ॥ यच्चित्तमेवं जातं स कर्म कुर्वन् अकुर्वन् वाऽक्रिय एव स्यादित्याह—**व्यवहारमिति** । नित्यादिकर्म अकुर्वन् वाऽपि कुर्वन् वा ॥ १० ॥

जाग्रत्येव सुषुप्तता

अथवा तमपि त्यक्त्वा चैत्यांशं शान्तचिद्घनः ।
जीवस्तिष्ठति संशान्तो ज्वलन्मणिरिवात्मनि ॥ ११ ॥
चित्ते चैत्यदशाहीने या स्थितिः क्षीणचेतसाम् ।
सोच्यते शान्तकलना जाग्रत्येव सुषुप्तता ॥ १२ ॥

पुरा सर्वत्र निर्लेपत्वमुक्तं, यदि तद्रोचते तत्र तिष्ठतु, नो चेत् तदपि सन्त्यज्य तूष्णींभावेन तिष्ठेदित्याह—**अथवेति** ॥ ११ ॥ ज्वलन्मणिरिव यस्तिष्ठति तस्य स्थितिः कीदृशी? इति तत्राह—**चित्त इति**। **जाग्रत्येव सुषुप्तता** ग्राह्यग्राहककलनाऽस्फुरणात् ॥ १२ ॥

तुरीया स्थितिः जीवन्मुक्तिः

एषा निदाघ सौषुप्तस्थितिरभ्यासयोगतः ।
प्रौढा सती तुरीयेति कथिता तत्त्वकोविदैः ॥ १३ ॥

एवं तुरीयात्मतया स्थितिः जीवन्मुक्त इत्यर्थः ॥ १३ ॥

तुरीयातीता स्थितिः विदेहमुक्तिः

अस्यां तुरीयावस्थायां स्थितिं प्राप्याविनाशिनीम् ।
आनन्दैकान्तशीलत्वादनानन्दपदं गतः ॥ १४ ॥
अनानन्दमहानन्द[1]कालातीतस्ततोऽपि हि ।
मुक्त इत्युच्यते योगी तुर्यातीतपदं गतः ॥ १५ ॥
परिगलितसमस्तजन्मपाशः सकलविलीनतमोमयाभिमानः ।
परमरसमयीं परात्मसत्तां जलगतसैन्धवखण्डवन्महात्मा ॥१६॥

विदेहमुक्तस्थितिः कीदृशी ? इत्यत आह—अस्यामिति । अयं मुनिः ब्रह्माहमस्मीत्यनुसन्धानतः तुर्यविश्रान्तिलक्षणां जीवन्मुक्तिमनुभूय जीवन्मुक्तेः [2]आनन्दाप्रधानत्वात् अकामहतत्वोत्कर्षतः **अनानन्दपदं** मुख्यप्राणात्मक-चतुर्मुखानन्दपदं **गतः** चतुर्मुखसदृशानन्दो बभूव ॥ १४ ॥ एवं **क्रमेण अनानन्दं** तदपेक्षया उत्कृष्ट **महानन्दं** विष्णुरुद्रसेवितमेत्य **कालशब्देन** चित्सामान्यं सर्वसाक्षिनिष्ठानन्दं तदप्यतीत्य **तुर्यातीतपदं गतो योगी** विदेहमुक्त **इत्युच्यते** ॥ १५ ॥ सोऽयं निर्विशेषे ब्रह्मणि जलगतलवणवत्तन्मात्रपदवीं भजतीत्याह—**परिगलितेति** । अचित्प्रपञ्चापह्नवसिद्धनिष्प्रतियोगिक-ब्रह्ममात्रज्ञानसमकालमेव देहादावात्यन्तिकाभिमानासंभवलक्षणां **परात्मसत्तां** विकळेबरमुक्तिं विद्वानेत्य ब्रह्ममात्रतया अवशिष्यत इत्यर्थः ॥ १६ ॥

प्रत्यगभिन्नब्रह्मदृष्टिविधानम्

जडाजडदृशोर्मध्ये यत्तत्त्वं पारमार्थिकम् ।
अनुभूतिमयं तस्मात् सारं ब्रह्मेति कथ्यते ॥ १७ ॥

[1] कला—अ. [2] आनन्दप्र—उ १.

दृश्यसंवलितो बन्धस्तन्मुक्तौ मुक्तिरुच्यते ।
द्रव्यदर्शनसंबन्धे याऽनुभूतिरनामया ॥ १८ ॥
तामवष्टभ्य तिष्ठ त्वं सौषुप्तीं भजते स्थितिम् ।
सैव तुर्यत्व[1]माप्नोति तस्यां दृष्टिं स्थिरां कुरु ॥ १९ ॥
आत्माऽस्थूलो न चैवाणुर्न प्रत्यक्षो न चेतरः ।
न चेतनो न च जडो न चैवासन्न सन्मयः ॥ २० ॥
नाहं नान्यो न चैवैको न चानेकोऽद्वयोऽव्ययः ।
यदिदं दृश्यतां प्राप्तं मनःसर्वेन्द्रियास्पदम् ॥ २१ ॥

विदेहमुक्तो ब्रह्मैव भवतीत्युक्तं, तद्ब्रह्म कीदृशं ? इत्यत आह—**जडेति** । **जडाजडदृशोः मध्ये** जडबाह्यान्तःकरणवृत्तिसहस्रभावाभावप्रकाशकप्रत्यक्चैतन्यं जडदृक्, अजडविश्वविराडोत्रादिद्रष्टा ह्यजडदृक् परः, तयोः **मध्यं** ऐक्यं, तत्र प्रत्यक्परभेदसापेक्षैक्यगतसविशेषापह्नवसिद्धं **यत् तत्त्वम्** ॥ १७ ॥ यदेवं ब्रह्मस्वरूपं अभिहितं स्वाज्ञस्तद्दृश्यं पश्यन् बध्यते, दृश्यासंभवबोधेन स्वज्ञो मुच्यत इत्याह—**दृश्येति** । त्वं तु प्रत्यगभिन्ने ब्रह्मणि दृष्टिं स्थिरीकुर्विल्याह—**द्रव्येति** । **द्रव्यं** घटादिः, तत्पदं **दर्शनं** ज्ञानं, त्वंपदं द्रव्यगतनामरूपापवादाधिष्ठानं, तत्पदलक्ष्यं ब्रह्मदर्शनगतवृत्त्यवभासकं त्वंपदलक्ष्यं प्रत्यक्चैतन्यं, तयोः **ऐक्यं संबन्धः**, तत्र प्रत्यगभिन्नं ब्रह्मास्मीति **या अनुभूतिः** उदेति ॥ १८ ॥ **तामवष्टभ्य तिष्ठसि** चेत् त्वन्मनः स्वान्तर्बाह्यास्फुरणलक्षणां निर्विकल्पकसमाधिरूपां **सौषुप्तिं स्थितिं भजति** । यैवं स्थितिरुक्ता **सैव तुर्यत्वमेति** । तत्रैव **दृष्टिं** स्थिरीकुर्विल्यर्थः ॥ १९ ॥ यत्र मया दृष्टिः स्थिरीकर्तव्या सोऽयं तुर्यात्मा कीदृश इत्यत आह—**आत्मेति** । स्वमात्रत्वात् चेतनवाच्यविश्वविराडोत्रादिविलक्षणत्वात् **न चेतनः** । **न च जडः** मायातत्कार्यविलक्षणत्वात् । **न**

[1] मायाति—उ, उ १.

चैवासन्न सन्मयः करणद्वयाग्राह्यत्वात् ॥ २० ॥ स्वातिरिक्तस्थूलादिव्ययान्तमनात्मा, स यन्मात्रज्ञानतोऽपह्नवं भजति तदपह्नवसिद्धोऽयमात्मा स्वावशेषधिया त्वया ध्येय इत्यर्थः । मया अपह्नोतव्यं अनात्मरूपं किमित्यत आह—**यदिति** । मनःसर्वेन्द्रियाणां अनात्मकार्यत्वात् तदनात्मा त्वया अपह्नोतव्य इत्यर्थः ॥ २१ ॥

मोक्षलक्षणम्

दृश्यदर्शनसंबन्धे यत्सुखं पारमार्थिकम् ।
तदतीतं पदं [1]यस्मात्तन्न किंचिदि[2]वैव तत् ॥ २२ ॥
न मोक्षो नभसः पृष्ठे न पाताले न भूतले ।
सर्वाशासंक्षये चेतःक्षयो मोक्ष इतीष्यते ॥ २३ ॥
मोक्षो मेऽस्त्विति चिन्ताऽन्तर्जाता चेदुत्थितं मनः ।
मननोत्थे मनस्येष बन्धः सांसारिको दृढः ॥ २४ ॥
[3]तदमार्जनमात्रं हि महासंसारतां गतम् ।
तत्प्रमार्जनमात्रं तु मोक्ष इत्यभिधीयते ॥ २५ ॥

अनात्मविरळं पदं कीदृशं? इत्यत आह—**दृश्येति** । दृश्यदर्शनलक्ष्यप्रत्यगभिन्नब्रह्मसुखातीतं यद्ब्रह्ममात्रगोचरं परमसुखं तत् कदाऽपि तत्पदं सविशेषं न भवति, तस्य निष्प्रतियोगिकनिर्विशेषतया ब्रह्ममात्रत्वात् । तत्स्वरूपावस्थितिरेव विदेहमुक्तिरित्यर्थः ॥ २२ ॥ किं मोक्षः स्वाविद्याऽण्डोपरि विद्यते उत तदधो वेत्यत्राह—**नेति** ॥ २३ ॥ तत्रापि संगो बन्धहेतुरित्याह—**मोक्ष इति** ॥ २४ ॥ एवं—**तदमार्जनमात्रमिति** ॥ २५ ॥

[1] तस्मात्—उ. [2] हैव—उ.
[3] अयं २५ मः श्लोकः (उ, उ १) कोशयोरेव वर्तते.

जीवन्मुक्तसमाचारः

आत्मन्यतीते सर्वस्मात्सर्वरूपेऽथ वा तते ।
को बन्धः कश्च वा मोक्षो निर्मूलं मननं कुरु ॥ २६ ॥
अध्यात्मरतिराशान्तः पूर्णः पावनमानसः ।
प्राप्तानुत्तमविश्रान्तिर्न किंचिदिह वाञ्छति ॥ २७ ॥
सर्वाधिष्ठानसन्मात्रे निर्विकल्पे चिदात्मनि ।
यो जीवति गतस्नेहः स जीवन्मुक्त उच्यते ॥ २८ ॥
नापेक्षते भविष्यच्च वर्तमाने न तिष्ठति ।
न संस्मरत्यतीतं च सर्वमेव करोति च ॥ २९ ॥
अनुबन्धपरे जन्तावसंसर्गमनाः सदा ।
भक्ते भक्तसमाचारः शठे शठ इव स्थितः ॥ ३० ॥
बालो बालेषु वृद्धेषु वृद्धो धीरेषु धैर्यवान् ।
युवा यौवनवृत्तेषु दुःखितेषु सुदुःखधीः ॥ ३१ ॥
धीरधीरुदितानन्दः पेशलः पुण्यकीर्तनः ।
प्राज्ञः प्रसन्नमधुरो दैन्यादपगताशयः ॥ ३२ ॥
अभ्यासेन परिस्पन्दे प्राणानां क्षयमागते ।
मनः प्रशममायाति निर्वाणमवशिष्यते ॥ ३३ ॥
यतो वाचो निवर्तन्ते विकल्पकलनान्विताः ।
विकल्पसंक्षयाज्जन्तोः पदं तदवशिष्यते ॥ ३४ ॥

निष्प्रतियोगिकब्रह्ममात्रे न हि बन्धमोक्षकलना अस्तीति चिन्तयेत्याह— आत्मनीति । एवं मननतो मुनिः जीवन्मुक्तो भवतीत्यर्थः ॥ २६ ॥

जीवन्मुक्तलक्षणं किं इत्यत आह—**अध्यात्मेति** । **आशान्तः** आशाया अन्तं ब्रह्म अधिगच्छतीति । **प्राप्तानुत्तमविश्रान्तिः**—यस्मादुत्तमं मध्यमं अधमं अधमाधमं वा न विद्यते तदनुत्तमम् । तस्य निष्प्रतियोगिकब्रह्ममात्रत्वात् तदतिरिक्तं **न किंचिदिह** वाञ्छति ॥ २७ ॥ किंच—**सर्वेति** । स्वातिरिक्तविषये **गतस्नेहः** सन् ॥ २८ ॥ किंच—**नापेक्षत** इति । परदृष्ट्या **सर्वमेव करोति** ॥ २९ ॥ दारपुत्राद्यनुबन्धपरे । भक्तादौ भक्तादिवृत्तिं भजन्निव विभाति न स्वदृष्ट्या स्वातिरिक्तास्फूर्तेः इत्याह—**भक्त** इति ॥ ३०–३१ ॥ **पेशलः** सर्वसम्मतशीलः, तत्तद्वृत्त्या तत्तत्तुल्यवद्भानात् ॥३२॥ प्राणादिविकल्पतानवानुरूपं निर्वाणपदमवशिष्यत इत्याह—**अभ्यासेनेति** । प्रसन्नमधुरस्यापरोक्षीकृत-ब्रह्मतत्त्वस्य दैन्यात् साध्वनुष्ठितज्ञानाभ्यासात् व्याविद्धस्वातिरिक्ताशयस्य जीवन्मुक्तस्य किं अवशिष्यते इत्यत्र—यतः प्राणस्पन्दनसापेक्षं मनःस्पन्दनं, "प्राणबन्धनं हि सोम्य मनः" इति श्रुतेः, अतः प्राणमनःस्पन्दनविलयात् तद्विकल्पितसर्वविकल्पप्रळयाच्च निर्वाणपदं विदेहकैवल्यस्वरूपं ब्रह्ममात्रा-वस्थानलक्षणं निष्प्रतियोगिकमवशिष्यते इत्यर्थः ॥ ३३–३४ ॥

कैवल्यलक्षणं सम्यग्दर्शनम्

अनाद्यन्तावभासात्मा परमात्मेह विद्यते ।
इत्येतन्निश्चयं स्फारं सम्यज्ज्ञानं विदुर्बुधाः ॥ ३५ ॥
यथाभूतात्मदर्शित्वमेतावद्धुवनत्रये ।
यदात्मैव जगत्सर्वमिति निश्चित्य पूर्णता ॥ ३६ ॥
सर्वमात्मैव कौ दृष्टौ भावाभावौ क्व वा [1]गतौ ।
क्व बन्धमोक्षकल्पने ब्रह्मैवेदं विजृम्भते ॥ ३७ ॥

[1] स्थितौ—अ, अ १, अ २, क.

सर्वमेकं परं व्योम को मोक्षः कस्य [1]बन्धता ।
ब्रह्मेदं बृंहिताकारं बृहद्बृहं[2]दवस्थितम् ।
दूरादस्तमितद्वित्वं भवात्मैव त्वमात्मना ॥ ३८ ॥
सम्यगालोकिते रूपे काष्ठपाषाणवाससाम् ।
मनागपि न भेदोऽस्ति क्वासि संकल्पनोन्मुखः ॥ ३९ ॥
आदावन्ते च संशान्तस्वरूपमविनाशि यत् ।
वस्तूनामात्मन[3]श्चैतत्तन्मयो भव सर्वदा ॥ ४० ॥
द्वैताद्वैतसमुद्भेदैर्जरामरणविभ्रमैः ।
स्फुरत्यात्मभिरात्मैव चित्तैरब्धीव वीचिभिः ॥ ४१ ॥
आपत्करञ्जपरशुं पराया निर्वृतेः पदम् ।
शुद्धमात्मानमालिङ्ग्य नित्यमन्तःस्थया धिया ।
यः स्थितस्तं [4]क आत्मे[5]ह भोगो बाधयितुं क्षमः ॥ ४२ ॥
कृतस्फारविचारस्य मनोभोगादयोऽरयः ।
मनागपि न भिन्दन्ति शैलं मन्दानिला इव ॥ ४३ ॥
नानात्वमस्ति कलनासु न वस्तुतोऽन्त-
र्नानाविधासु सरसीव जलादिवान्यत् ।
इत्येकनिश्चयमयः पुरुषो विमुक्त
इत्युच्यते समवलोकितसम्यगर्थः ॥ इति ॥ ४४ ॥

[1] बद्धता—अ. [2] दिव—अ २, क. [3] श्चैव त—उ, उ १.
[4] कमात्मे—उ १. [5] हं—अ १, अ २, क, उ १. ह्या—अ.

येन कैवल्यं प्रसीदति तत् किं? इत्यत्र सम्यज्ज्ञानमित्याह—**अनादीति**। उत्पत्तिप्रळयवत् अनात्मप्रपञ्चापह्नवसिद्धपरमात्मातिरिक्तं न किंचिदस्तीति यत् तत् **इत्येतदिति** ॥ ३५ ॥ किं सम्यज्ज्ञानेन? इत्यत्र बन्धमोक्षकलनाविरळपरिपूर्णपरमात्मा निष्प्रतियोगिकं विजृंभत इत्याह—**यथेति** ॥ ३६ ॥ स्वज्ञदशाऽनुभूतौ जाग्रत्स्वापयोः स्वातिरिक्तप्रपञ्चभावाभावौ **क्व वा गतौ** तदस्ति नास्तीति ज्ञानायत्ते **क्व बन्धमोक्षकलने** ॥ ३७ ॥ यतः एवं अतः **सर्वमेकं परं व्योम चिद्व्योम्नोः** निष्प्रतियोगिकैकरूपत्वात्। तत्र **को मोक्षः कस्य बन्धता**। सर्वं **ब्रह्म**। यतः तन्निष्प्रतियोगिकाद्वैतं अतो हे निदाघ **भवान्भैव त्वमात्मना** ॥ ३८ ॥ अविचारितसिद्धोऽयं स्वातिरिक्तभ्रमः, विचार्यमाणे न हि तदस्ति, तथा सति किं संकल्पयसीत्याह—**सम्यगिति** ॥ ३९ ॥ काष्ठादिगतनामरूपापाये तद्गतसच्चिदानन्दस्य एकरूपत्वात् तन्मयो भवेत्याह—**आदाविति**। स्वातिरिक्तसामान्यस्य अदृष्टदृष्टनष्टस्वरूपत्वेन तदुत्पत्तिप्रळययोरपि यदविनाश्यवशिष्यते तदेव भवेत्यर्थः ॥ ४० ॥ द्वैतादिकलनासत्त्वे तन्मयत्वं मे कुतः इत्यत्र तद्रूपेणाप्यात्मैव विद्यत इत्याह—**द्वैतेति**। स्वातिरिक्तारोपसिद्धं **द्वैतं**, तथा तदपवादसिद्धं **अद्वैतं**, ताभ्यां सञ्जातजरामरणादिकं अस्ति नास्तीति विभ्रमैः विश्वविश्वाद्यविकल्पानुज्ञैकरसान्तैः **स्फुरति** ॥ ४१ ॥ इत्थंभूतात्मावलोकनेच्छा विषयप्रवीणानां कुत इत्यत्र निर्विषयात्मावलम्बिनं विषयो न स्पृशतीत्याह—**आपदिति**। **आपत्करञ्जपरशुं** आर्द्रवृक्षोपमापत्कुठारम् ॥ ४२ ॥ किंच—**कृतेति** ॥ ४३ ॥ वस्तुतो नानात्वं नास्तीति विदित्वा तद्वेदनसमकालमनानात्वपदं कैवल्यं यास्यसीत्याह—**नानात्वमिति**। यावत्त्वां स्वाज्ञानं न मुञ्चति तावत्त्वद्दृष्ट्या स्वातिरेकेण **नानात्वमस्ति कलनासु**। श्रुत्याचार्यप्रसादतो यदि ते स्वज्ञानं जातं तदा **न वस्तुतः** इति। **इतिशब्दोऽध्यायपरिसमाप्त्यर्थः** ॥

इति द्वितीयोऽध्यायः

तृतीयोऽध्यायः

विदेहमुक्तिस्वरूपजिज्ञासा

विदेहमुक्तेः किं रूपं तद्वान् को वा महामुनिः ।
कं योगं समुपास्थाय प्राप्तवान् परमं पदम् ॥ १ ॥

श्रुत्याचार्यप्रसादजनितसम्यज्ज्ञानसमकालं विदेहमुक्तो भवतीत्युक्तं यत् तदियत्ताबुभुत्सया पृच्छतीत्याह—विदेहेति ॥ १ ॥

जीवन्मुक्तस्य इन्द्रियमनोनिग्रहप्रकारः

सुमेरोर्वसुधापीठे माण्डव्यो नाम वै मुनिः ।
कौण्डिन्यात्तत्त्वमास्थाय जीवन्मुक्तो भवत्यसौ ॥ २ ॥
जीवन्मुक्तिदशां प्राप्य कदाचिद्ब्रह्मवित्तमः ।
सर्वेन्द्रियाणि संहर्तुं मनश्चक्रे महामुनिः ॥ ३ ॥
बद्धपद्मासनस्तिष्ठन्नर्धोन्मीलितलोचनः ।
बाह्यानाभ्यन्तरांश्चैव स्पर्शान् परिहरञ्छनैः ॥ ४ ॥
ततः स्वमनसः स्थैर्यं मनसा विगतैनसा ।
अहो नु चञ्चलमिदं प्रत्याहृतमपि स्फुटम् ॥ ५ ॥
पटाद्भटमुपायाति घटा[1]च्छकटमुत्कटम् ।
चित्तमर्थेषु चरति पादपेष्विव मर्कटः ॥ ६ ॥
पञ्च द्वाराणि मनसा चक्षुरादीन्यमून्यलम् ।
बुद्धीन्द्रियाभिधानानि तान्येवालोकयाम्यहम् ॥ ७ ॥

[1] च क—क.

[1]हन्तेन्द्रियगणा यूयं त्यजथाकुलतां शनैः ।
चिदात्मा भगवान् सर्वसाक्षित्वेन स्थितोऽस्म्यहम् ॥ ८ ॥

तदियत्तां ऋभुराह—**सुमेरोरिति** ॥ २ ॥ ततः किमित्यत्र—**जीवन्मुक्तिदशामिति** ॥ ३ ॥ केनोपायेन तदुपसंहरतीत्यत्र—**बद्धेति** । स्पृश्यन्त इति **स्पर्शान्** विषयान् ॥ ४ ॥ **स्थैर्य** कर्तुं व्यवस्थितः तच्चाश्चल्यं प्रकटयति—**अहो इति** ॥ ५–६ ॥ तन्निग्रहाय **पञ्चद्वाराणीति** ॥ ७ ॥ करणग्राममचेतनं चेतनवन्नियमयति—**हन्तेति** ॥ ८ ॥

तुरीयावस्थितिः

तेनात्मना बहुज्ञेन निर्ज्ञाताश्चक्षुरादयः ।
परिनिर्वामि शान्तोऽस्मि दिष्ट्याऽस्मि विगतज्वरः ॥ ९ ॥
स्वात्मन्येवावतिष्ठेऽहं तुर्यरूप[2]पदेऽनिशम् ।
अन्तरेव शशामास्य क्रमेण प्राणसन्ततिः ॥ १० ॥
ज्वालाजालपरिस्पन्दो दग्धेन्धन इवानलः ।
उदितोऽस्तं गत इव [3]ह्यस्तं गत इवोदितः ॥ ११ ॥
समः समरसाभासस्तिष्ठामि स्वच्छतां गतः ।
प्रबुद्धोऽपि सुषुप्तिस्थः सुषुप्तिस्थः प्रबुद्धवान् ॥ १२ ॥
तुर्यमालम्ब्य कायान्तस्तिष्ठामि स्तम्भितस्थितिः ।
सबाह्याभ्यन्तरान् भावान् स्थूलान् सूक्ष्मतरानपि ॥ १३ ॥
त्रैलोक्यसंभवांस्त्यक्त्वा संकल्पैक[4]विनिर्मितान् ।
सह प्रणवपर्यन्तदीर्घनिःस्वनतन्तुना ॥ १४ ॥

[1] हते—अ, अ १.
[2] पदेशिनि—अ.
[3] स्वस्तं—अ, अ १.
[4] विजृम्भि—उ.

जहाविन्द्रियतादात्म्यं [1]जालं खग इवानिलः ।
ततोऽङ्गसंविदं स्वच्छां प्रतिभासमुपागताम् ॥ १५ ॥
सद्योजातशिशुज्ञानं प्राप्तवान् मुनिपुङ्गवः ।
जहौ चितश्चैत्य[2]दशां स्पन्दशक्तिमिवानिलः ॥ १६ ॥
चित्सामान्यमथासाद्य सत्तामात्रात्मकं ततः ।
सुषुप्तपदमालम्ब्य तस्थौ गिरिरिवाचलः ॥ १७ ॥

परिनिर्वामि बाह्यप्रपञ्चव्यापृतिनिर्विण्णोऽस्मि । तदस्ति नास्तीति भ्रमतः **शान्तोस्मि** ॥ ९ ॥ ब्रह्मातिरेकेण प्राणबाह्यन्तःकरणजातं नास्तीति भावयत **अन्तरेवेति** ॥ १० ॥ देहेन्द्रियादिसत्त्वेऽपि लोकवद्भ्रापाराभावात् **उदित** इति ॥ ११ ॥ एवं **सम** इति ॥ १२–१३ ॥ ततो वीणादिनादेन **सहेति** ॥ १४ ॥ षोडशमात्राकालब्रह्मप्रणवनादेन **जहाविति** । इन्द्रियतादात्म्यं विहाय **तत** ईति ॥ १५ ॥ ब्रह्मातिरेकेण देहो नास्तीति देहसंविदमपि त्यक्त्वा ततः **सद्योजातेति** । सद्योजातशिशोः निर्विकल्पकं ज्ञानं भवति तथेत्यर्थः । ततस्तु **जहौ चितश्चैत्यदशां** प्रत्यक्चितः चित्तचैत्यावभासकत्वदशामपि जहौ ॥ १६ ॥ **चित्सामान्यं** गुणसाम्यसाक्षित्वम् । साक्ष्यसापेक्षसाक्षित्वमपि विहाय **सत्ता-मात्रात्मकं** सत्तासामान्यमित्यर्थः । तत् कीदृशमित्यत्र यत्र स्वातिरिक्तप्रपञ्चः सुषुप्तिमपह्नवं भजति तद्ब्रह्ममात्रं **सुषुप्तपदमालम्ब्येति** ॥ १७ ॥

तुरीयतुरीयावस्थितिः

सुषुप्तस्थैर्यमासाद्य तुर्यरूपमुपाययौ ।
निरानन्दोऽपि सानन्दः सच्चासच्च बभूव सः ॥ १८ ॥
ततस्तत्संबभूवासौ यद्विरामप्यगोचरम् ।
यच्छून्यवादिनां शून्यं ब्रह्म ब्रह्मविदां च यत् ॥ १९ ॥

[1] तन्मात्र—अ, अ १, अ २, क. [2] दशाः—उ. १.

12735

विज्ञानमात्रं विज्ञानविदां यदमलात्मकम् ।
पुरुषः सांख्यदृष्टीनामीश्वरो योगवादिनाम् ॥ २० ॥
शिवः शैवागमस्थानां कालः कालैकवादिनाम् ।
यत् सर्वशास्त्रसिद्धान्तं यत् सर्वहृदयानुगम् ॥ २१ ॥
यत् सर्वं सर्वगं वस्तु यत्त[1]त्त्वं तदसौ स्थितः ।
यदनुक्तमनिष्पन्दं दीपकं तेजसामपि ॥ २२ ॥
स्वानुभूत्येकमानं च यत्तत्त्वं तदसौ स्थितः ।
यदेकं चाप्यनेकं च साञ्जनं च निरञ्जनम् ।
यत् सर्वं चाप्यसर्वं च यत्तत्त्वं तदसौ स्थितः ॥ २३ ॥
अजममरमनाद्यमाद्यमेकं
पदममलं सकलं च निष्कलं च ।
स्थित इति स तदा नभःस्वरूपा-
दपि विमलस्थितिरीश्वरः क्षणेन ॥ इति ॥ २४ ॥

तुर्यप्रविभक्ततुर्यरूपं तुर्यतुर्यरूपमुपायय्यौ । ततो ब्रह्मैव भवतीत्यर्थः । कथं अयं ब्रह्म भवति ? इत्यत आह—**निरानन्दोऽपीति** । विषयविषयिसंयोगाभावतो **निरानन्दोऽपि** स्वाज्ञदृष्टिप्रसक्तोपाधियोगतः **सानन्दः** ॥ १८ ॥ यस्य यस्य यादृशं ज्ञानं तत्तद्दृष्ट्या तथातथैव विभाति, वस्तुतोऽयं निष्प्रतियोगिकब्रह्ममात्रमवशिष्यत इत्याह—**तत इति** । विदेहमुक्तो यदवाङ्मनसगोचरं ब्रह्मैव बभूव तत्स्वरूपं शून्यवादिनः शून्यं पश्यन्ति । यदेषां शून्यत्वेन विभातं तत् ब्रह्मविदो निष्प्रतियोगिकब्रह्ममात्रं स्वावशेषधिया मेनिरे ॥ १९ ॥ यदेभिः अवगतं तदेव विज्ञानवादिनो **विज्ञानमात्रं** जानन्ति । यत् एभिः बुद्धं तदेव पुरुषरूपं साङ्ख्याः पश्यन्ति । यदेभिः एवं दृष्टं तदेव ईश्वरतत्त्वं योगिनो वदन्ति ॥ २० ॥

[1] यत्सत्यं—अ, अ १.

7941

यत् योगिभिः ज्ञातं तदेव शिवं शैवाः आहुः । यदेभिः निश्चितं तत् काल-वादिनः कालात्मानमुद्घोषयन्ति । स्वस्वग्रहानुरोधेन शास्त्रमपि कल्पयन्ति । तत् कल्पनामात्रमेव । वास्तवं तु स्वाज्ञदृष्टिविकल्पितशून्यादिकालान्तमतसिद्धान्त-मोहे सत्यसति यत् स्वातिरिक्तकलनापह्नवसिद्धनिष्प्रतियोगिकब्रह्ममात्रं अवशिष्यते तदेव हीशाद्यष्टोत्तरशतवेदान्तपरमाशयो नान्यः इत्यत्र—"पश्यतेहापि सन्मात्र-मसदन्यत्", "ब्रह्मव्यतिरिक्तं न किंचिदस्ति", "मद्व्यतिरिक्तमणुमात्रं न विद्यते",

चिन्मात्रमेव चिन्मात्रमखण्डैकरसं रसम् ।
सर्ववर्जितचिन्मात्रं ब्रह्ममात्रमसन्न हि ॥
सिद्धान्तोऽध्यात्मशास्त्राणां सर्वापह्नव एव हि ।
नाविद्याऽस्तीह नो माया शान्तं ब्रह्मेदमक्रमम् ॥

इत्यादि,

सर्वापह्नवसंसिद्धपरमाक्षरवैभवम् ।
केचिद्देहादिरूपेण केचिज्जीवस्वरूपतः ॥
केचिदीश्वररूपेण केचित्तुर्यस्वरूपतः ।
अज्ञात्वा वस्तुयाथात्म्यं यथोलूका दिवानिशम् ॥
पश्यन्ति दृष्टिदोषेण निर्विकारमहत्पदम् ।
यस्मिन् यस्मिन् ग्रहे यस्य दृढावेशो भवेत्तराम् ॥
तत्तद्ग्रान्त्यनुरोधेन शास्त्रं भवति नान्यथा ।
भ्रान्तावस्तं गतायां तं नानाशास्त्रकदम्बकम् ॥
प्रकाशयति चिन्मात्रमचिन्मात्रस्य मृग्यतः ।
तस्मात् समस्तशास्त्राणि बोधयन्ति पराक्षरम् ॥
यतो मताभिमान्यात्मा चिन्मात्रान्नास्ति कोऽपि हि ।
अतश्चिन्मात्रमेवेदं चिन्मात्रान्नास्ति किञ्चन ॥

इत्यादिश्रुतयः स्मृतयश्च मानम् । यदेवं समस्तश्रुतिस्मृत्यभिमतं तदेवं परमोऽयं सिद्धान्तः इति श्रुतिराह—यदिति । प्रत्यग्रूपेण यत्सर्वहृदयानुगम्

॥ २१ ॥ स्वाज्ञदृष्ट्या सर्वप्रसक्तौ—**यत्सर्वमिति** । **अनिष्पन्दं** स्तिमितगम्भीरं निस्तरंगचिदर्णवत्वात् ,

ततः स्तिमितगम्भीरं न तेजो न तमस्ततम् ।
अनाख्यमनभिव्यक्तं सत् किंचिदवशिष्यते ॥

इति श्रुतेः । **दीपकं** सूर्यादितेजसामपि ॥ २२ ॥ श्रुत्याचार्यप्रसादाविर्भूत-**स्वानुभूत्येकमानम्** । स्वज्ञादिदृष्ट्या यदेकमिति ॥ २३ ॥ निष्प्रतियोगिक-चिन्मात्ररूपोऽपि विदेहमुक्तः स्वाज्ञादिदृष्ट्या सकळनिष्कळस्वरूपेण विभाति । वस्तुतस्तु ब्रह्ममात्रज्ञानसमकालं अयं तन्मात्ररूपेण अवशिष्यते इत्याह—**अजमिति** । यत् स्वतः परतो वा कदाऽपि न जायते तत् **अजं**, आदौ भवं **आद्यं**, यस्मात् आद्यं न विद्यते तत् **अनाद्यम्** । शिष्टं स्पष्टं उक्तार्थं च । **इतिशब्दोऽध्यायपरिसमाप्त्यर्थः** ॥ २४ ॥

इति तृतीयोऽध्यायः

चतुर्थोऽध्यायः

जीवन्मुक्तस्य सिद्धिषु उदासीनता

जीवन्मुक्तस्य किं लक्ष्म ह्याकाशगमनादिकम् ।
तथा चेन्मुनिशार्दूल तत्र नैव प्र[1]दृश्यते ॥ १ ॥
अनात्मविदमुक्तोऽपि नभोविहरणादिकम् ।
द्रव्यमन्त्रक्रिया[2]कालशक्त्याऽऽप्नोत्येव स द्विज ॥ २ ॥

[1] लक्ष्य—अ, अ १, अ २, क. [2] जाल—उ.

नात्मज्ञस्यैष विषय आत्मज्ञो ह्यात्ममात्रदृक् ।
आत्मनाऽऽत्मनि संतृप्तो नाविद्यामनुधावति ॥ ३ ॥
ये ये भावाः स्थिता लोके तानविद्यामयान् विदुः ।
त्यक्ताविद्यो महायोगी कथं तेषु निमज्जति ॥ ४ ॥
यस्तु मूढोऽल्पबुद्धिर्वा सिद्धिजालानि वाञ्छति ।
स सिद्धिसाधनैर्योगैस्तानि साधयति क्रमात् ॥ ५ ॥
द्रव्यमन्त्रक्रियाकालयुक्तयः साधुसिद्धिदाः ।
परमात्मपदप्राप्तौ नोपकुर्वन्ति [1]काश्चन ॥ ६ ॥
यस्येच्छा विद्यते काचित्स सिद्धिं साधयत्यहो ।
[2]निरिच्छोः परिपूर्णस्य नेच्छा संभवति क्वचित् ॥ ७ ॥
सर्वेच्छाजालसंशान्तावात्मलाभो भवेन्मुने ।
स कथं सिद्धिजालानि [3]कथं वाञ्छत्यचित्तकः ॥ ८ ॥
अपि शीतरुचावर्के सुतीक्ष्णेऽपीन्दुमण्डले ।
अप्यधः प्रसरत्यग्नौ जीवन्मुक्तो न विस्मयी ॥ ९ ॥
अधिष्ठाने परे तत्त्वे कल्पिता रज्जुसर्पवत् ।
कल्पिताश्चर्यजालेषु नाभ्युदेति कुतूहलम् ॥ १० ॥

विदेहमुक्तेयत्तामवगम्य जीवन्मुक्तलक्षणं किंसिद्धिनिमित्तं ? इति पृच्छति—जीवन्मुक्तस्येति । जीवन्मुक्तपटले कोऽप्येवंरूपो नैव प्रदृश्यते ॥ १ ॥ इत्येवं पृष्टो भगवान् जीवन्मुक्तिरन्या ज्ञानान्तराळिकफलरूपत्वात्, आकाशगमनादि-नानाविधसिद्धयस्त्वन्याः द्रव्यमन्त्रक्रियायोगादिजन्यत्वात्, नह्यनयोः कार्य-

[1] किंचन—अ. [2] निरी—अ २, उ. [3] स्वयं—अ.

कारणता स्यादित्याह—अनात्मेति ॥ २ ॥ सिद्धिजालस्य अविद्याकार्यत्वेन नैतज्जीवन्मुक्तविषयो भवतीत्याह—नात्मज्ञस्येति ॥ ३ ॥ सिद्धीनामाविद्यकत्वं कुत इत्यत्र—ये ये भावा इति ॥ ४ ॥ स्वाज्ञो यस्त्विति ॥ ५ ॥ सिद्धयोऽपि ब्रह्मात्युपायाः स्युः इत्यत आह—द्रव्येति ॥६–८॥ किंच—अपीति ॥९–१०॥

जीवन्मुक्तस्य नष्टचित्तता

ये हि विज्ञातविज्ञेया वीतरागा महाधियः ।
विच्छिन्नग्रन्थयः सर्वे ते स्वतन्त्रा[1]स्तनौ स्थिताः ॥ ११ ॥
सुखदुःखदशाधीरं साम्यान्न प्रोद्धरन्ति यम् ।
निश्वासा इव [2]शैलेन्द्रं चित्तं तस्य मृतं विदुः ॥ १२ ॥
आपत्कार्पण्यमुत्साहो मदो मान्द्यं महोत्सवः ।
यं नयन्ति न वैरूप्यं तस्य नष्टं मनो विदुः ॥ १३ ॥

सिद्धिजालोदासीना जीवन्मुक्ताः कीदृशाः ? इत्यत्र—येहीति । ज्ञेयं ब्रह्म यैः ज्ञातं ते विज्ञातविज्ञेयाः । स्वतन्त्राः उद्दामवृत्तय इत्यर्थः ॥ ११ ॥ चित्तवतां जीवन्मुक्तिः कुतः ? इत्यत्र—सुखेति । साम्यात् ब्रह्मात्मभावात् । सुखाद्यनुभूतिः चित्तसापेक्षा हि, चित्तं नास्तीति बोधेन चित्ताभावे जीवन्मुक्तिः स्यादेवेत्यर्थः ॥ १२ ॥ किंच—आपदिति ॥ १३ ॥

सरूपारूपौ मनोनाशौ

द्विविधश्चित्तनाशोऽस्ति सरूपोऽरूप एव च ।
जीव[3]न्मुक्तौ सरूपः स्यादरूपो देहमुक्तिगः ॥ १४ ॥

[1] तनौ—अ १, अ २, क, उ १. [2] शैलेन्द्रधि—उ.
[3] न्मुक्तः—उ,

चित्तसत्तेह दुःखाय चित्तनाशः सुखाय च ।
चित्तसत्तां क्षयं नीत्वा चित्तं नाशमुपानयेत् ॥ १५ ॥
मनस्तां मूढतां विद्धि यदा नश्यति साऽनघ ।
चित्तनाशाभिधानं हि तत्स्वरूपमितीरितम् ॥ १६ ॥
मैत्र्यादिभिर्गुणैर्युक्तं भवत्युत्तमवासनम् ।
भूयोजन्मविनिर्मुक्तं जीवन्मुक्तस्य तन्मनः ॥ १७ ॥
सरूपोऽसौ मनोनाशो जीवन्मुक्तस्य विद्यते ।
निदाघारूपनाशस्तु वर्ततेऽदेहमुक्तिके ॥ १८ ॥

सरूपारूपभेदेन चित्तनाशो द्विविधः इत्याह—द्विविध इति । बीजभावेन यच्चित्तं लीयते स सरूपविलयः । निर्बीजं सद्यच्चित्तं विलीयते सोऽयं अरूपलयः ॥ १४ ॥ यत एवं चित्तसत्तेति ॥ १५ ॥ मनोनाशाधिकरणं ब्रह्मेत्याह—मनस्तामिति ॥ १६–१७ ॥ मनसः सरूपनाशसिद्धा जीवन्मुक्तिः तद्विरूपनाशसिद्धा विदेहमुक्तिरित्याह—सरूप इति । खण्डाखण्डनिर्विकल्पकसमाधी जीवन्मुक्तिविदेहमुक्ती भवत इत्यर्थः ॥ १८ ॥

विदेहमुक्तस्थितिः

विदेहमुक्त एवासौ विद्यते निष्कलात्मकः ।
समग्राह्यगुणाधारमपि सत्त्वं प्रलीयते ॥ १९ ॥
विदेहमुक्तौ विमले पदे परमपावने ।
विदेहमुक्तिविषये तस्मिन् सत्त्वक्षया[1]त्मके ॥ २० ॥
चित्तनाशे विरूपाख्ये न किंचिदिह विद्यते ।
न गुणा नागुणास्तत्र न श्रीर्नाश्रीर्न लोकता ॥ २१ ॥

[1] त्मके—अ २, क, उ.

न चोदयो नास्तमयो न हर्षामर्षसंविदः ।
न तेजो न तमः किंचिन्न संध्यादि न रात्रयः ।
न सत्ता नापिचासत्ता न च मध्यं हि तत् पदम् ॥ २२ ॥
ये हि पारं गता बुद्धेः संसाराडम्बरस्य च ।
तेषां तदास्पदं स्फारं पवनानामिवाम्बरम् ॥ २३ ॥
संशान्तदुःखमजडात्मकमेकसुप्त-
मानन्दमन्थरमपेतरजस्तमो यत् ।
आकाशकोशतनवोऽतनवो महान्त-
स्तस्मिन् पदे गलितचित्तलवा भवन्ति ॥ २४ ॥
हे निदाघ महाप्राज्ञ निर्वासनमना भव ।
बलाच्चेतः [1]समाधाय निर्विकल्पमना भव ॥ २५ ॥

तद्वान् विदेहमुक्तः कीदृशः इत्यत्र—**विदेहमुक्त** इति । यत्र जीवन्मुक्तत्व-सूचकसत्ववृत्तिविलयो दृश्यते तद्वान् विदेहमुक्त इत्यर्थः ॥ १९ ॥ न हि तत्र स्वातिरिक्तगन्धोऽप्यस्तीत्याह—**विदेहमुक्ताविति** । स्वरूपे **तस्मिन्निति** ॥ २० ॥ तत्र सगुणाभावेऽपि निर्गुणादिकं स्यादित्याशङ्क्य तत्र सापेक्षसगुण-निर्गुणादिकं नास्तीत्याह—**न गुणा इति** । **श्रीः** ऐहिकसंपत् । **अश्रीः** तद्विपरीता । **लोकता** लोकव्यवहृतिः ॥ २१ ॥ किंच—**नचेति** । इदमस्तीति **सत्ता**, इदं नास्तीति **असत्ता**, तयोः मध्यं अस्तित्वनास्ति-त्वाधिकरणं आधेयत्वसापेक्षाधारत्वमपि न हि विदेहमुक्तिदशायां विद्यत इत्यर्थः ॥२२॥ तादृशी स्थितिरेव स्वातिरिक्तकलनापर्यवसानभूमिरित्याह—**ये हीति**॥२३॥ किंच—**संशान्तेति** । यत्पदं **संशान्तदुःखमित्यादिविशेषणबोधितं** तत्र **आकाश-कोशतनवो** जीवन्मुक्ताः निरवयवाकाशवत् कामादिवृत्तिविरळाः स्वात्ततत्त्वक्षयतः

[1] समादाय—अ १, अ २, क, उ.

यत्र गलितसत्वलवा भूत्वा अतनवो विदेहमुक्ता भवन्तीत्यर्थः ॥ २४ ॥ यतो विदेहमुक्तिहेतुः जीवन्मुक्तिः अतः तदर्थं जीवन्मुक्तिपदं भजेत्याह—हे निदाघेति ॥ २५ ॥

ब्रह्मविद्या तत्फलं च

यज्जगद्भासकं भानं नित्यं भाति स्वतः स्फुरत् ।
स एव जगतः साक्षी सर्वात्मा विमलाकृतिः ॥ २६ ॥
प्रतिष्ठा सर्वभूतानां प्रज्ञानघनलक्षणः ।
तद्विद्याविषयं ब्रह्म सत्यज्ञानसुखाद्वयम् ॥ २७ ॥
एकं ब्रह्माहमस्मीति कृतकृत्यो भवेन्मुनिः ॥ २८ ॥
सर्वाधिष्ठानमद्वन्द्वं परं ब्रह्म सनातनम् ।
सच्चिदानन्दरूपं तदवाङ्मनसगोचरम् ॥ २९ ॥
न तत्र चन्द्रार्कवपुः प्रकाशते न वान्ति वाताः सकला देवताश्च ।
स एष देवः कृतभावभूतः स्वयं विशुद्धो [1]विरजः प्रकाशते ॥३०॥
भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः ।
क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे ॥ ३१ ॥
द्वा [2]सुपर्णौ शरीरेऽस्मिन् जीवेशाख्यौ सह स्थितौ ।
तयोर्जीवः फलं भुङ्क्ते कर्मणो न महेश्वरः ॥ ३२ ॥
केवलं साक्षिरूपेण विना [3]भोगो महेश्वरः ।
प्रकाशते स्वयं भेदः कल्पितो मायया तयोः ।
चिच्चिदाकारतो [4]भिन्ना न भिन्ना चित्त्वहानितः ॥ ३३ ॥

[1] विरजाः—अ.
[2] सुपर्णा—अ २, क.
[3] भोगं—अ.
[4] भिन्नो—अ १, उ, उ १.

तर्कतश्च प्रमाणाच्च चिदेकत्वव्यवस्थितेः ।
चिदेकत्वपरिज्ञाने न शोचति न मुह्यति ॥ ३४ ॥
अधिष्ठानं समस्तस्य जगतः सत्यचिद्घनम् ।
अहमस्मीति निश्चित्य वीतशोको भवेन्मुनिः ॥ ३५ ॥
स्वशरीरे स्वयंज्योतिःस्वरूपं सर्वसाक्षिणम् ।
क्षीणदोषाः प्रपश्यन्ति नेतरे माययाऽऽवृताः ॥ ३६ ॥

यद्याथात्म्यज्ञानतो मुनिः कृतकृत्यो भवति तत्स्वरूपं किं ? इत्यत आह—**यदिति** । प्रत्यग्रूपेण **यज्जगद्भासकम्** । स्वयंप्रकाशत्वात् य एवं प्रकाशते **स एव जगतः साक्षी** ॥ २६ ॥ यत्स्वरूपं विश्वाधिष्ठानं तद्विद्यैकवेद्यमित्याह—तदिति ॥ २७–२८ ॥ मौनिप्राप्यं निरधिष्ठानमपि स्वाज्ञदृष्ट्या अधिष्ठेयप्रसक्तौ **सर्वाधिष्ठानमिति** ॥ २९ ॥ तस्यावाङ्मनसगोचरत्वेन सन्दिग्धार्थत्वात् तदवभासकश्चन्द्रार्कादिः स्यादित्यत आह—नेति । तेषां तत्प्रकाशजडीभूतत्वात् तस्य निष्प्रतियोगिकप्रकाशमात्रत्वात् ॥३०॥ तज्ज्ञानं हृदयग्रन्थिसर्वसंशयागाम्यादिकर्मग्रासमित्याह—**भिद्यत** इति । इयं श्रुतिः मुण्डकोपनिषद्युक्तार्था ॥ ३१ ॥ निर्विशेषब्रह्ममात्रस्य परावर इत्याख्या कुतः समजनि इत्याशङ्क्य स्वाज्ञानादेवमाख्या युज्यते स्वज्ञानेन निराख्यं ब्रह्म विभातीत्याह—द्वाविति ॥ ३२ ॥ निरशनतः कथमीश्वरो जीवन् प्रकाशते, जीवेशभेदोऽपि वास्तव एव स्यादित्यत आह—केवलमिति । **विना भोगो** भोगं विना **महेश्वरः** प्रकाशते, ईश्वरस्य निरावृताजडक्रियाज्ञानेच्छाशक्तिमत्त्वेन निर्विशेषब्रह्ममात्रानन्दतृप्तत्वात् । जीवेशयोः **प्रकाशते स्वयं भेदः**, भेदाभेदौ कथं इत्याशङ्क्य व्यक्तितो भेदः, स्वरूपतस्त्वभेदोऽपि युज्यत इत्याह—**चिदिति** । **चिच्चितोः** जीवेशयोः **आकारतो** भेदः । स्वरूपतोऽपि तयोः भेदः स्यादित्यत्र—तदुपाधिभिन्नो भेदः, **स्वरूपतः चित् न भिन्ना**, कुतः ? **चित्त्वहानितः** । स्वरूपतोऽपि यदि भिन्ना चित् तदा चित्त्वहानिः स्यात् ॥ ३३ ॥ एवं जीवेशचितोरभेदे का युक्तिः ?

किं प्रमाणं ? तदेकत्वज्ञानफलं वा किं ? इत्याशङ्क्य घटशरावाद्यनुगतव्योमवत् सर्वोपाध्यनुगता चिदेकैवेति युक्तिः, तयोरभेदे " तत्त्वमसि " आदिवाक्यजातं प्रमाणं, तज्ज्ञानतः सर्वशोकात्ययलक्षणा तद्भावापत्तिः स्यादित्याह—**तर्कत** इति ॥ ३४ ॥ केन मुनिः वीतशोको भवेदित्यत आह—**अधिष्ठानमिति** ॥३५॥ एवं सर्वेऽपि किं निश्चयं न कुर्वन्तीत्यत्र—**स्वशरीर** इति ॥ ३६ ॥

ब्रह्मविद्यासाधनानि

तमेव धीरो विज्ञाय प्रज्ञां कुर्वीत ब्राह्मणः ।
नानुध्यायाद्बहून् शब्दान् वाचो विग्लापनं हि तत् ॥ ३७ ॥
बाल्येनैव हि तिष्ठासेन्निर्विद्य ब्रह्मवेदनम् ।
ब्रह्मविद्यां च बाल्यं च निर्विद्य मुनिरात्मवान् ॥ ३८ ॥

निष्कामकर्मानुष्ठानेन चित्तशुद्धिमेत्याथ **तमेव धीरो** यथावत् **विज्ञाय** तत्रैव " ब्रह्माहं, अहमेव ब्रह्म " इत्यनुसन्धानरूपिणीं **प्रज्ञाम्** । स्वातिरिक्त-पदार्थगोचरान् **बहून् शब्दान्** ॥ ३७ ॥ ज्ञातेऽपि ब्रह्मणि बाह्यान्तर्वृत्तिरुदेति, तच्छान्त्युपायः कः इत्यत आह—**बाल्येनेति** । संशयादिपञ्चदोषशान्त्यर्थमी-शाद्यष्टोत्तरशतवेदान्तश्रवणमननिदिध्यासनानि **निर्विद्य** यथावदनुष्ठाय तद्यथा स्वान्तर्बाह्यवृत्तिभिः नाव्रीयते तथा बालस्य भावो बाल्यं वैराग्यं तेनैव स्थातुमिच्छेत् । एवं **ब्रह्मविद्यां च बाल्यं च** यावन्निष्प्रतियोगिकब्रह्ममात्रज्ञानं निरावृतं सदुदेति तावत् **निर्विद्य** अथ **मुनिरात्मवान्** जीवन्मुक्तो विदेहमुक्तो वा भवेदित्यर्थः ॥ ३८ ॥

प्राणसंरोधनेन चित्तशमः

अन्तर्लीनसमारम्भशुभाशुभमहांकुरम् ।
संसृतिव्रततेर्बीजं शरीरं विद्धि भौतिकम् ॥ ३९ ॥

भावाभावदशाकोशं दुःखरत्नसमुद्गकम् ।
बीजमस्य शरीरस्य [1]चित्तमाशावशानुगम् ॥ ४० ॥
द्वे बीजे चित्तवृक्षस्य वृत्तिव्रततिधारिणः ।
एकं प्राणपरिस्पन्दो [2]द्वितीयं दृढभावना ॥ ४१ ॥
[3]यदा प्रस्पन्दते प्राणो नाडीसंस्पर्शनोद्यतः ।
[4]तदा संवेदनमयं चित्तमाशु प्रजायते ॥ ४२ ॥
सा हि सर्वगता संवित् प्राणस्पन्देन बोध्यते ।
संवि[5]त्संरोधनं श्रेयः [6]प्राणादिस्पन्दनं वरम् ॥ ४३ ॥
योगिनश्चित्तशान्त्यर्थं कुर्वन्ति प्राणरोधनम् ।
प्राणायामैस्तथा ध्यानैः प्रयोगैर्युक्तिकल्पितैः ॥ ४४ ॥
चित्तोपशान्तिफलदं परमं विद्धि कारणम् ।
सुखदं संविदः स्वास्थ्यं प्राणसंरोधनं विदुः ॥ ४५ ॥

ब्रह्मज्ञानात् ब्रह्म भवति इत्युक्तं, तथा ब्रह्मातिरिक्तज्ञानतः सदा ब्रह्मातिरिक्तो भवतीत्यत्र न विवादः, तत्र ब्रह्मातिरिक्तज्ञानबीजं तद्बीजं वा किं? इत्यत आह—अन्तरिति । शरीरस्य स्वान्तर्लीनशुभाशुभसङ्कल्पांकुरत्वेन स्वातिरिक्तकलनाबीजत्वं, चित्तस्य तु नानायोनिजनितवासनापुञ्जसञ्चितकर्मपेटिकात्वेन नानाशरीरबीजत्वं चोपपद्यत इत्यर्थः ॥ ३९–४० ॥ चित्तस्यापि प्राणस्पन्दनभावनाभेदेन बीजद्वयमस्तीत्याह—द्वे बीज इति । तत्र—एकमिति ॥ ४१ ॥ प्राणस्पन्दतः चित्तं जायते, तन्निरोधतः चित्तमपि निरुद्धं भवति, तथा

[1] दुःख—उ, उ १.
[2] द्वितीयो—अ १, अ २, क.
[3] यथा—क.
[4] तथा—क.
[5] संबो—अ, अ २.
[6] प्राणाद्यस्प—उ, उ १.

चित्तनिरोधतः प्राणोऽपि निरुद्धो भवतीत्याह—यदेति ॥ ४२–४३ ॥ यत एवं अतः योगिन इति । प्रयोगैः युक्तिकल्पितैः सह प्राणरोधनम् ॥ ४४–४५ ॥

वासनारोधनेन चित्तजयः

दृढभावनया त्यक्तपूर्वापरविचारणम् ।
यदादानं पदार्थस्य वासना सा प्रकीर्तिता ॥ ४६ ॥
यदा न भाव्यते किंचिद्धेयोपादेयरूपि यत् ।
स्थीयते सकलं त्यक्त्वा तदा चित्तं न जायते ॥ ४७ ॥
अवासनत्वात्सततं यदा न मनुते मनः ।
अमनस्ता तदोदेति परमोपशमप्रदा ॥ ४८ ॥
यदा न भाव्यते भावः क्वचिज्जगति वस्तुनि ।
तदा हृदम्बरे शून्ये कथं चित्तं प्रजायते ॥ ४९ ॥
यदभावनमास्थाय [1]यदभावस्य भावनम् ।
यद्यथावस्तुदर्शित्वं तदचित्तत्वमुच्यते ॥ ५० ॥
सर्वमन्तः परित्यज्य शीतलाशयवर्ति यत् ।
वृत्तिस्थमपि तच्चित्तमसद्रूपमुदाहृतम् ॥ ५१ ॥
भ्रष्टबीजोपमा येषां पुनर्जननवर्जिता ।
वासना रस[2]नाहीना जीवन्मुक्ता हि ते स्मृताः ॥ ५२ ॥
सत्त्वरूपपरिप्राप्तचित्तास्ते ज्ञानपारगाः ।
अचित्ता इति कथ्यन्ते देहान्ते व्योमरूपिणः ॥ ५३ ॥

[1] यदा—उ १. [2] निर्हीना—अ, अ १.

संवेद्यसंपरित्यागात् प्राणस्पन्दनवासने ।
समूलं नश्यतः क्षिप्रं मूलच्छेदादिव द्रुमः ॥ ५४ ॥
पूर्वदृष्टमदृष्टं वा यदस्याः प्रतिभासते ।
संविदस्तत् प्रयत्नेन मार्जनीयं विजानता ॥ ५५ ॥
तदमार्जनमात्रं हि महासंसारतां गतम् ।
तत्प्रमार्जनमात्रं तु मोक्ष इत्यभिधीयते ॥ ५६ ॥
अजडो गलितानन्दस्त्यक्तसंवेदनो भव ॥ ५७ ॥
संविद्वस्तुदशा[1]लम्बः सा यस्येह न विद्यते ।
सोऽसंविदजडः प्रोक्तः कुर्वन् कार्यशतान्यपि ॥ ५८ ॥
[2]संवेद्येन हृदाकाशे मनागपि न लिप्यते ।
यस्यासावजडा संविज्जीवन्मुक्तः स कथ्यते ॥ ५९ ॥
यदा न भाव्यते किंचिन्निर्वासनतयाऽऽत्मनि ।
बालमूकादिविज्ञानमिव च स्थीयते स्थिरम् ॥ ६० ॥
तदा जाड्यविनिर्मुक्तमसंवेदनमाततम् ।
आश्रितं भवति प्राज्ञो यस्माद्भूयो न लिप्यते ॥ ६१ ॥
समस्ता वासनास्त्यक्त्वा निर्विकल्पसमाधितः ।
तन्मयत्वादना[3]द्यन्ते तदप्यन्तर्विलीयते ॥ ६२ ॥
तिष्ठन् गच्छन् स्पृशन् जिघ्रन्नपि तल्लेपवर्जितः ।
अजडो गलितानन्दस्त्यक्तसंवेदनः सुखी ॥ ६३ ॥

[1] लम्बा—अ. [2] स वे—अ. [3] यन्तं—उ, ड १.

एतां दृष्टिमवष्टभ्य कष्टचेष्टायुतोऽपि सन् ।
तरेद्दुःखाम्बुधेः पारमपारगुण[1]सागरः ॥ ६४ ॥
विशेषं संपरित्यज्य सन्मात्रं यदलेपकम् ।
एकरूपं महारूपं सत्तायास्तत्पदं विदुः ॥ ६५ ॥
कालसत्ता कलासत्ता वस्तुसत्तेयमित्यपि ।
विभागकलनां त्यक्त्वा सन्मात्रैकपरो भव ॥ ६६ ॥
सत्तासामान्यमेवैकं भावयन् केवलं विभुः ।
परिपूर्णः परानन्दी तिष्ठापूरितदिग्भरः ॥ ६७ ॥
सत्तासामान्यपर्यन्ते यत्तत् कलनयोज्झितम् ।
पदमाद्यमनाद्यन्तं तस्य बीजं न विद्यते ॥ ६८ ॥
तत्र संलीयते संविन्निर्विकल्पं च तिष्ठति ।
भूयो न वर्तते दुःखे तत्र लब्धपदः पुमान् ॥ ६९ ॥
तद्धेतुः सर्वभूतानां तस्य हेतुर्न विद्यते ।
[2]स सारः सर्वसाराणां तस्मात् सारो न विद्यते ॥ ७० ॥
तस्मिंश्चिद्दर्पणे स्फारे समस्ता वस्तुदृष्टयः ।
इमास्ताः प्रतिबिम्बन्ति सरसीव तटद्रुमाः ॥ ७१ ॥
तदमलम[3]रजं तदात्मतत्त्वं तदवगतावुपशान्तिमेति चेतः ।
अवगतविगतैकतत्स्वरूपो भवभयमुक्तपदोऽसि सम्यगेव ॥ ७२ ॥

[1] सागरं—अ.
[2] सं—अ, अ १.
[3] चरं—अ २, क.

एतेषां दुःखबीजानां प्रोक्तं यद्यन्मयोत्तरम् ।
तस्य तस्य प्रयोगेण शीघ्रं तत् प्राप्यते पदम् ॥ ७३ ॥
सत्तासामान्यकोटिस्थे द्रागित्येव पदे यदि ।
पौरुषेण प्रयत्नेन बलात् संत्यज्य वासनाम् ॥ ७४ ॥
स्थितिं वक्षासि तत्त्वज्ञ क्षणमप्यक्षयात्मिकाम् ।
क्षणेऽस्मिन्नेव तत् साधु पदमासादयस्यलम् ॥ ७५ ॥
सत्तासामान्यरूपे वा करोषि स्थितिमादरात् ।
तत्किंचिदधिकेनेह यत्नेनाप्नोषि तत् पदम् ॥ ७६ ॥
संवित्तत्त्वे कृतध्यानो निदाघ यदि तिष्ठसि ।
तद्यत्नेनाधिकेनोच्चैरासादयसि तत् पदम् ॥ ७७ ॥
वासनासंपरित्यागे यदि यत्नं करोषि भोः ।

प्राणसंरोधनवत् वासनारोधनतोऽपि चित्तं न जायते, तत्र वासना कीदृशी इत्यत आह—दृढेति। सर्वप्रकारेणापि इदं मे स्यात् अनेन इदानीं पश्चाद्वा महाननर्थो जायते इति दृढभावनया . . . ॥४६॥ सा(?)यदा ब्रह्मातिरिक्तं नास्तीति बोधेन इयं वासना यदा न भाव्यते ॥४७॥ पदार्थभावनाऽभावनातः चित्ताजनौ किं स्यादित्यत्र निर्विकल्पात्मावगतिरुदेतीत्याह—अवासनत्वादिति ॥ ४८ ॥ एवं किमप्यभावयतः तूष्णीमवस्थितस्याचित्तं ब्रह्म प्रसीदतीत्याह—यदेति ॥ ४९–५० ॥ ब्रह्माकारचित्तवृत्तौ सत्यां अचित्तत्वं कुत इत्यत आह—सर्वमिति । तापः स्वातिरिक्तं, तदग्रासं ब्रह्म शीतळं, तदस्मीत्यखण्डाकारवृत्तिस्थमपि चित्तं असदूपमुदाहृतमिति ॥ ५१ ॥ स्वातिरिक्तवासनाविरळा जीवन्मुक्ता भूत्वाऽथ विदेहमुक्ता भवन्तीत्याह—भ्रष्टेति ॥ ५२ ॥ देहान्ते देहाद्यात्यन्तिकाभिमाननिवृत्तौ चिद्व्योमरूपिणः भवन्ति विदेहमुक्ता भवन्तीत्यर्थः ॥ ५३ ॥ प्राणस्पन्द-

वासनयोः सत्त्वे विदेहमुक्तता कुतः इत्यत आह—**संवेद्येति** । यद्यत् प्रसज्यते तत्तत्**संवेद्येति** । ततो विदेहकैवल्यं निरावृतमुदेतीत्यर्थः ॥ ९४ ॥ एवं विजानता स्वातिरिक्तविषयकसंवित्सामान्यं मार्जनीयमित्याह— **पूर्वेति** ॥ ९५–९६ ॥ त्वं तु **अजड** इति । जडदेहादिविलक्षणाजडब्रह्मानन्दावबोधनात् कादाचित्कप्रसक्त-संवेदनोन्मूलनकरो भवेत्यर्थः ॥ ९७ ॥ अजडसंवित्को जीवन्मुक्तो भवतीत्याह— **संविदिति** ॥ ९८–९९ ॥ किं बहुना, स्वातिरिक्तासंभवप्रबोधतोऽजडब्रह्मावगतिः स्यादित्याह—**यदेति** । स्वातिरिक्तापह्नवसिद्धं ब्रह्म निष्प्रतियोगिकस्वमात्रमिति तन्मात्रवृत्तिरपि **विलीयते** अपह्नवं भजति, तस्या अपि स्वातिरिक्तत्वात्॥६०–६२॥ एवंविदमेव सत्तासामान्यं विदुरित्याह—**तिष्ठन्निति** ॥ ६३–६४ ॥ तद्वत**विशेषं संपरित्यज्य** स्वमात्रमिति यो वेद तं ब्रह्मविदः **सत्तायास्तत्पदं विदुः** ॥ ६५ ॥ त्वं तु स्वातिरिक्तकालादिसत्ताभ्रमं त्यक्त्वा स्वमात्रसत्तावान् भवेत्याह—**कालेति** । ब्रह्मणो निर्विभागत्वात् ॥ ६६ ॥ किंच—**सत्तेति** । स्वेतरासहसत्तासामान्य-**मेवैकं** निष्प्रतियोगिकस्वमात्रमिति **भावयन्** ॥ ६७ ॥ यद्भावनया परिपूर्णो भवामीति यत् तत् सबीजमित्यत आह—**सत्तेति** । **सत्तासामान्यपर्यन्ते** सत्तासामान्यस्वरूपे **यत्तत्** देशकालादिकलनयोज्झितम् ॥ ६८ ॥ **संवित्** चित्तवृत्तिः । यत् **भूयो न वर्तते** ॥ ६९ ॥ भूतादिस्वातिरिक्तसत्वे **तद्धेतुः** ॥७०॥ यत्सत्तासामान्यं निष्प्रतियोगिकनिर्विशेषतया अवशिष्टं तदेव स्वाज्ञविकल्पि-ताधिष्ठेयप्रसक्तौ यतः स्वज्ञदृष्ट्या अधिष्ठानतां भजति अतः तत्र स्वातिरिक्तप्रपञ्चो विकल्पित इत्याह—**तस्मिन्निति** । **समस्ताः** घटपटादिवस्तुदृष्टयः ॥ ७१ ॥ **यदेवं** कल्पनाधिकरणं **तदमलमिति** । यत् सर्वाधिकरणं तदमलमित्यादिविशेषण-विशिष्टम् । तदवगतिसमकालं विगतस्वातिरिक्तत्वत्स्वरूपो भूत्वा कृतकृत्यो भवसीत्यर्थः ॥ ७२ ॥ स्वतिरिक्तविभ्रमशान्त्यर्थं यद्यदुपायजातं प्रकटितं तत्तदनुष्ठानात् स्वातिरिक्तभ्रमविरळो भूत्वा स्वमात्रपदवीमेष्यसीत्याह— **एतेषामिति** । **एतेषां दुःखबीजानां** शान्तये ॥ ७३ ॥ **सत्तासामान्यकोटिस्थे** ईशतत्त्वे साक्षितत्वे वा । **संत्यज्य** तत्पूर्वग्रहवासनाम् ॥७४–७५॥ यदीश्वरादि-तत्त्वे तव सविशेषधीः तदा **सत्तासामान्यरूपे** ॥ ७६ ॥ यद्येवं कर्तुं अशक्तोऽसि

तदा संवित्तत्त्वे प्रतीचि ॥ ७७ ॥ प्रत्यग्भावावरणवासनासंपरित्यागे । अभ्यासतः तदपि संत्यज्य निर्वासनपदं भजसीत्यर्थः ॥

तत्त्वज्ञानमनोनाशवासनाक्षयोपायानां युगपदनुष्ठेयता

यावद्विलीनं न मनो न तावद्वासनाक्षयः ॥ ७८ ॥
न क्षीणा वासना यावच्चित्तं तावन्न शाम्यति ।
यावन्न तत्त्वविज्ञानं तावच्चित्तशमः कुतः ॥ ७९ ॥
यावन्न चित्तोपशमो न तावत्तत्त्ववेदनम् ।
यावन्न वासनानाशस्तावत्तत्त्वागमः कुतः ।
यावन्न तत्त्वसंप्राप्तिर्न तावद्वासनाक्षयः ॥ ८० ॥
तत्त्वज्ञानं मनोनाशो वासनाक्षय एव च ।
मिथः कारणतां गत्वा दुःसाधानि स्थितान्यतः ॥ ८१ ॥
भोगेच्छां दूरतस्त्यक्त्वा त्रयमेतत् समाचर ॥ ८२ ॥
वासनाक्षयविज्ञानमनोनाशा महामते ।
समकालं चिराभ्यस्ता भवन्ति फलदा मताः ॥ ८३ ॥
त्रिभिरेभिः समभ्यस्तैर्हृदयग्रन्थयो दृढाः ।
निःशेषमेव त्रुट्यन्ति बिसच्छेदाद्गुणा इव ॥ ८४ ॥
वासनासंपरित्यागसमं प्राणनिरोधनम् ।
विदुस्तत्त्वविदस्तस्मात्तदप्येवं समा[1]हरेत् ॥ ८५ ॥
वासनासंपरित्यागाच्चित्तं गच्छत्यचिच्चताम् ।
प्राणस्पन्दनिरोधाच्च यथेच्छसि तथा कुरु ॥ ८६ ॥

[1] चरेत्—अ. हरेत्—अ १, क. रभेत्—उ.

प्राणायामदृढाभ्यासैर्युक्त्या च गुरुदत्तया ।
आसनाशनयोगेन प्राणस्पन्दो निरुध्यते ॥ ८७ ॥
निःसङ्कल्पव्यवहारत्वाद्भवभावनवर्जनात् ।
शरीरनाशदर्शित्वाद्वासना न प्रवर्तते ॥ ८८ ॥
यः प्राणपवनस्पन्दश्चित्तस्पन्दः स एव हि ।
प्राणस्पन्दजये यत्नः कर्तव्यो धीमतोच्चकैः ॥ ८९ ॥
न शक्यते मनो जेतुं विना युक्तिमनिन्दिताम् ।
शुद्धां संविदमाश्रित्य वीतरागः स्थिरो भव ॥ ९० ॥
संवेद्यवर्जितमनुत्तममाद्यमेकं संवित्पदं विकलनं कलयन् महात्मन् ।
हृद्येव तिष्ठ कलनारहितः क्रियां तु कुर्वन्नकर्तृपदमेत्य शमोदितश्रीः ॥
मनागपि विचारेण चेतसः स्वस्य निग्रहः ।
[1]पुरुषेण कृतो येन तेनाप्तं जन्मनः फलम् ॥ ९२ ॥

तत्त्वज्ञानमनोनाशवासनाक्षयोपायो युगपदनुष्ठेयो नान्यथा सिद्धिमेष्यसीत्याह—**यावदिति** ॥ ७८–८० ॥ यत एवमतः **तत्त्वज्ञानमिति** ॥ ८१ ॥ तत्सिद्धये **भोगेच्छामिति** ॥ ८२ ॥ युगपदभ्यासतः को विशेष इत्यत्र—**वासनाक्षयेति** ॥ ८३–८४ ॥ प्राणनिरोधोऽपि वासनाक्षयतुल्य इत्याह—**वासनेति** ॥८५–८६॥ प्राणस्पन्दनिरोधोपायः क इत्यत्र—**प्राणायामेति** ॥८७॥ तथा वासनानिवृत्त्युपायमाह—**निस्सङ्केति** ॥ ८८–८९ ॥ त्वमादौ **शुद्धां संविदमिति** ॥ ९० ॥ यत् **संवेद्यवर्जितं** इत्यादिविशेषणविशिष्टं तदहमस्मीति ध्यायन् कृतकृत्यो भवसीत्यर्थः ॥ ९१ ॥ निर्दयं चित्तनाशं यः करोति तज्जन्म सफलं इत्याह—**मनागपीति** ॥ ९२ ॥

इति चतुर्थोऽध्यायः

---

[1] पौरु—उ.

पञ्चमोऽध्यायः

जीवन्मुक्तिसिद्धये सङ्कल्पागविधिः

गच्छतस्तिष्ठतो वाऽपि जाग्रतः स्वपतोऽपि वा ।
न विचारपरं चेतो यस्यासौ मृत उच्यते ॥ १ ॥
सम्यज्ज्ञानसमालोकः पुमान् [1]ज्ञेयः समः स्वयम् ।
न बिभेति न चादत्ते वैवश्यं न च दीनताम् ॥ २ ॥
अपवित्रमपथ्यं च विषसंसर्गदूषितम् ।
भुक्तं जरयति ज्ञानी क्लिन्नं नष्टं च मृष्टवत् ॥ ३ ॥
सङ्कल्पागं विदुर्मोक्षं सङ्कल्पागादजन्मता ।
सङ्कं त्यज त्वं भावानां जीवन्मुक्तो भवानघ ॥ ४ ॥
भावाभावे पदार्थानां हर्षामर्षविकार[2]दा ।
मलिना वासना यैषा सा सङ्क इति कथ्यते ॥ ५ ॥
जीवन्मुक्तशरीराणामपुनर्जन्मकारिणी ।
मुक्ता हर्षविषादाभ्यां शुद्धा भवति वासना ॥ ६ ॥
दुःखैर्न ग्लानिमायासि हृदि हृष्यसि नो सुखैः ।
आशावैवश्यमुत्सृज्य निदाघासङ्गतां व्रज ॥ ७ ॥
दिक्कालाद्यनवच्छिन्नमदृष्टोभयकोटिकम् ।
चिन्मात्रमक्षयं शान्तमेकं ब्रह्मा[3]स्मि नेतरत् ॥ ८ ॥

[1] ज्ञेयस—अ, अ १, अ २. [2] ता—अ, अ १.
[3] स्ति—उ.

इति मत्वाऽहमित्यन्तर्मुक्तामुक्तवपुः पुमान् ।
एकरूपः प्रशान्तात्मा मौनी स्वात्मसुखो भव ॥ ९ ॥

नास्ति चित्तं न चाविद्या न मनो न च जीवकः ।
ब्रह्मैवैकमनाद्यन्तमम्बिवत् प्रविजृम्भते ॥ १० ॥

चित्ते सति मोक्षः कथं ? इत्यत आह—**गच्छत** इति । स्वातिरिक्तमस्ति नास्तीति **न विचारपरम्** ॥ १ ॥ सम्यज्ज्ञानतो यच्चित्तमचित्तपदं भजति स निर्भयो भूत्वा ब्रह्मैव भवतीत्याह—**सम्यगिति** । **सम्यज्ज्ञानसमालोकः** सम्यज्ज्ञानदृष्टिः । कुतश्चन **न बिभेति**, किमपि **न चादत्ते**, कदाऽपि कस्यचिदपि **वैवश्यम्** ॥ २ ॥ किंच—**अपवित्रमिति** । " अन्नं ब्रह्मा रसो विष्णुः भोक्ता देवो महेश्वरः " इति स्मृत्यनुरोधेन अपवित्रमित्यादिविशेषणविशिष्टान्नादौ अन्नादिदृष्ट्युपमर्दकब्रह्मदृष्टित्वात् भोक्तृभोज्यादिदृष्टिवैकल्याच्च अयमन्नकृतदोषैः न लिप्यते ॥ ३ ॥ अन्नादिसंगाभावतो यतो मुच्यते अतः त्वमपि सर्वत्र संगं त्यक्त्वा जीवन्मुक्तो भवेत्याह—**सङ्गेति** । सर्वत्र **सङ्गत्यागम्** ॥ ४ ॥ कोऽयं संग इत्यत्र वासनैव संग इत्याह—**भावेति** ॥ ५ ॥ असंगत्वहेतुसद्वासना केत्यत्र —**जीवन्मुक्तेति** ॥ ६ ॥ तामवष्टभ्य निःसंगो भवेत्याह—**दुःखैरिति** । स्वातिरिक्तपदार्थाशावैवश्यम् ॥ ७ ॥ सर्वाधिष्टानं ब्रह्मास्मीति ज्ञात्वा सुखी भवेत्याह—**दिगिति** । यत्र स्वातिरिक्तमस्ति नास्तीत्येतदुभयमदृष्टं तत्तथोक्तम् ॥ ८ ॥ चिन्मात्रं ब्रह्माहं नेतरदहं इति **मत्वा** स्वपरदृष्टिभ्यां **मुक्तामुक्तवपुः** । " अशरीरं वाव सन्तम् " इति श्रुतेः स्वदृष्ट्या मुक्तदेहभ्रमोऽपि परदृष्ट्याऽमुक्तदेहभ्रमवद्भानात् मुक्तामुक्तवपुष्ट्वं युज्यते । तादृशः **पुमानेकरूपः** । मौनं तूष्णीभावोऽस्यास्तीति **मौनी** स्वात्ममात्रावशेषानन्दो भवेत्यर्थः ॥ ९ ॥ स्वातिरिक्तचित्तादौ सति कथं निष्प्रतियोगिकता ? इत्यत्र —**नास्तीति** ॥ १० ॥

चित्तादिविभ्रमनिवृत्त्यर्थं आत्मदृष्टिविधिः

देहे यावदहंभावो दृश्येऽस्मिन् यावदात्मता ।
यावन्ममेदमित्यास्था तावच्चित्तादिविभ्रमः ॥ ११ ॥

अन्तर्मुखतया सर्वं चिद्वह्नौ त्रिजगत्तृणम् ।
जुह्वतोऽन्तर्निवर्तन्ते मुने [1]चित्तादिविभ्रमाः ॥ १२ ॥
[2]चिदात्माऽस्मि निरंशोऽस्मि परापरविवर्जितः ।
रूपं स्मर निजं स्फारं मा स्मृत्या संमितो भव ॥ १३ ॥

यावत्स्वातिरिक्तदृष्टिः तावच्चित्तादिविभ्रमः, स्वमात्रदृष्ट्या तन्निवृत्तिः स्यादित्याह—देह इति ॥ ११–१२ ॥ अतः स्वमात्रं चिन्तयन् स्वातिरिक्तमतिं त्यजेत्याह—चिदिति । परापरविवर्जितः विशेषसामान्यविलक्षणत्वात् । निर्विशेषं रूपं स्मर ॥ १३ ॥

ब्रह्मात्मबोधेन सर्ववासनानिवृत्तिः

अध्यात्मशास्त्र[3]मन्त्रेण तृष्णाविषविषूचिका ।
क्षीयते भावितेनान्तः शरदा मिहिका यथा ॥ १४ ॥
परिज्ञाय परित्यागो वासना[4]नां य उत्तमः ।
सत्तासामान्यरूपत्वात्तत् कैवल्यपदं विदुः ॥ १५ ॥
यत्रास्ति वासना [5]लीना तत् सुषुप्तं न सिद्धये ।
[6]निर्बीजा वासना यत्र तत्तुर्यं सिद्धिदं स्मृतम् ॥ १६ ॥
वासनायास्तथा वह्नेर्ऋणव्याधिद्विषामपि ।
स्नेहवैरविषाणां च शेषः स्वल्पोऽपि बाधते ॥ १७ ॥
निर्दग्धवासना[7]बीजः सत्तासामान्यरूपवान् ।
सदेहो वा विदेहो वा न भूयो दुःखभाग्भवेत् ॥ १८ ॥

[1] संसार—उ, उ १. [2] चिदेवास्मि—उ, उ १. [3] शस्त्रेण—अ.
[4] या—उ. [5] लीनं—उ, उ १. [6] निर्बीज—अ, क. [7] बीजस—उ.

एतावदेवाविद्यात्वं नेदं ब्रह्मेति निश्चयः ।
एष एव क्षय[1]स्तस्या ब्रह्मेदमिति निश्चयः ॥ १९ ॥
ब्रह्म चिद्ब्रह्म [2]भुवनं ब्रह्म भूतपरम्परा ।
ब्रह्माहं ब्रह्म [3]चिच्छत्रुर्ब्रह्म चिन्मित्रबान्धवाः ॥ २० ॥
ब्रह्मैव सर्वमित्येव भावितं ब्रह्म वै पुमान् ।
सर्वत्रावस्थितं शान्तं चिद्ब्रह्मेत्यनु[4]भूयते ॥ २१ ॥
असंस्कृताध्वगालोके मनस्यन्यत्र संस्थिते ।
या प्रतीतिरनागस्का तच्चिद्ब्रह्मास्मि सर्वगम् ॥ २२ ॥
प्रशान्तसर्वसंकल्पं विगता[5]खिलकौतुकम् ।
विगताशेषसंरम्भं चिदात्मानं समाश्रय ॥ २३ ॥
एवं पूर्णधियो धीराः समा नीरागचेतसः ।
न नन्दन्ति न निन्दन्ति जीवितं मरणं तथा ॥ २४ ॥

तृष्णा मां स्वातिरिक्तं स्मारयति किं करोमीत्यत आह—**अध्यात्मेति** । **तृष्णैव विषविषूचिका** विषवत् विष्वगञ्चनात् परागभावपिशाचात्मिका परागभावग्रासप्रत्यगभिन्नं ब्रह्मास्मीति बोधमन्त्रेण **क्षीयते** । **यथा शरदा मिहिका** अभ्रं क्षीयते तथा वितृष्णं ब्रह्मास्मीति ज्ञानेन तृष्णा क्षीयत इत्यर्थः ॥ १४ ॥ सर्वतृष्णावासनात्यागाधिकरणस्य त्यागसापेक्षाधिकरणताऽपाये निर्विशेषत्वेन सत्तासामान्यरूपत्वात् ब्रह्मविदः तदेव कैवल्यं वदन्तीत्याह—**परिज्ञायेति** । ब्रह्मातिरिक्तं शशविषाणवत् नास्तीति **परिज्ञाय** । स्वातिरिक्तापह्नवसिद्धस्य **सत्तासामान्यरूपत्वात्** ॥ १५ ॥ सबीजनिर्बीजवासनाविलयौ बन्धमोक्षहेतू भवत

[1] स्तस्य—उ. [2] भव—अ, अ १. [3] वि—अ, अ १, अ २.
[4] भूयताम्—उ, उ १. [5] शेष—उ, उ १.

इत्याह—**यत्रेति** ॥ १६ ॥ यतो वासनाशेषोऽप्यनर्थकरः अतो निःशेषीकृतवासनो योगी तद्वीजक्षयानुरोधेन जीवन्मुक्तो विदेहमुक्तो वा स्यादित्याह—**वासनाया इति** ॥ १७–१८ ॥ अन्यथा ग्रहणं आविद्यकं, यथावद्वेदनसिद्धं ब्रह्मेत्याह—**एतावदिति** ॥ १९ ॥ स्वाज्ञदशायां यन्नानात्वेन अभिमतं स्वज्ञदशायां तत्सर्वं ब्रह्मेत्याह—**ब्रह्मेति** ॥ २० ॥ ज्ञानफलमाह—**ब्रह्मैवेति** । अतः सर्वरूपेण **सर्वत्रावस्थितं** वस्तुतः सर्वकलनाशान्तम् ॥ २१ ॥ किमिति? **असंस्कृतेति** । "पराञ्चि खानि व्यतृणत् स्वयंभूः" इति श्रुत्यनुरोधेन वेदान्तश्रवणाद्य-संस्कृताध्वानं पराग्भावं गच्छन्तीति **असंस्कृताध्वगानि** इन्द्रियाणि तेषामालोकदे **मनसि** पराग्भावात् **अन्यत्र** प्रत्यगभिन्नब्रह्मणि **संस्थिते** सति **या अनागस्का** निर्दुष्टा **प्रतीतिः** इसिः उदेति **तदेव सर्वगं ब्रह्मास्मीति** सूरिभिः अद्याप्यनुभूयत इत्यर्थः ॥ २२ ॥ त्वमपि तमेवाश्रयेत्याह—**प्रशान्तेति**। स्वावशेषधिया **समाश्रय** ॥ २३ ॥ न त्वमेव आश्रयसि, किंतु—**एवमिति** । स्वावशेषधिया चिदात्मानमाश्रित्य **न नन्दन्ति** ॥ २४ ॥

अनात्मभ्रमनिवृत्त्यर्थं सहजप्राणायामविधिः

प्राणोऽयमनिशं ब्रह्मन् स्पन्दशक्तिः सदागतिः ।
सबाह्याभ्यन्तरे देहे प्राणोऽसावूर्ध्वगः स्थितः ॥ २५ ॥
अपानोऽप्यनिशं ब्रह्मन् स्पन्दशक्तिः सदागतिः ।
सबाह्याभ्यन्तरे देहे अपानोऽयमवाक् स्थितः ॥ २६ ॥
जाग्रतः स्वपतश्चैव प्राणायामो य उत्तमः ।
प्रवर्तते ह्यभिज्ञस्य तत्तावच्छ्रेयसे शृणु ॥ २७ ॥
द्वादशाङ्गुलपर्यन्तं बाह्यमाक्रमतां ततः ।
प्राणानामङ्गसंस्पर्शो यः स पूरक उच्यते ॥ २८ ॥

[1] भीक—उ.

अपानश्चन्द्रमा देहमाप्याययति सुव्रत ।
प्राणः सूर्योऽग्निरथ वा पचत्यन्त[1]रिदं वपुः ॥ २९ ॥
प्राणक्षयसमीपस्थमपानोदयकोटि[2]गम् ।
अपानप्राणयोरैक्यं चिदात्मानं समाश्रय ॥ ३० ॥
अपानोऽस्तंगतो यत्र प्राणो नाभ्युदितः क्षणम् ।
कलाकलङ्करहितं तच्चित्तत्त्वं समाश्रय ॥ ३१ ॥
नापानोऽस्तंगतो यत्र प्राणश्चास्तमुपागतः ।
नासाग्रगमनावर्तं तच्चित्तत्त्वमुपाश्रय ॥ ३२ ॥

यदि स्वातिरिक्तं अस्ति नास्तीति विश्रमत्यागं दुष्करं मन्यसे तदा प्राणापानेयत्तापरिज्ञानपूर्वकं सहजप्राणायामं कुर्वन् प्राणापानैक्याविर्भूतं यच्चिन्मात्रमवशिष्यते तत् स्वावशेषधिया समाश्रयेत्याह—**प्राण** इति ॥२५–२६॥ जाग्रत्स्वप्नयोरपि सहजप्राणायामः श्रेष्ठः इत्याह—**जाग्रत** इति ॥ २७ ॥ पूरकादिप्रकारमाह—द्वादशेति । सहजोच्छ्वासरूपप्राणोऽयं नासापुटात् बाह्ये द्वादशांगुलावधि प्रसरतीति यत् तत् बाह्यपूरकमुच्यते । पुनः अपानव्यापारं विना क्षणमात्रावस्थानं बाह्यकुंभक उच्यते । ततः पुनः अपानव्यापारो बाह्यरेचकमुच्यते । एवमन्तः पूरकादिः योगशास्त्रप्रकाशकोपनिषत्सु बहुधा प्रपञ्चितः ॥ २८ ॥ अपानादिकार्यमाह—**अपान** इति ॥ २९ ॥ बाह्ये प्राणापानसन्ध्याधारमात्मानमाश्रयेत्याह—**प्राणे**ति । यत्र नासापुटद्वादशांगुल-परिमितबाह्यप्रदेशे प्राणः क्षीयते तत्समीपे तल्लयाधारतया तिष्ठतीति **प्राणक्षयसमीपस्थं**, तत्रैव खल्वपान उदेति । प्राणापानयोः कोटिः सन्धिः, तदपानोत्पत्त्याधारतां गच्छतीति **अपानोदयकोटिगम्** । एवमपानप्राणयोः प्रत्यक्परयोः ऐक्यसिद्धं चिदात्मानं ध्यायस्वेत्यर्थः ॥ ३० ॥ यथा बाह्ये तथा

[1] रितं—अ, अ २, क. [2] कम्—उ, भम्—अ २.

अन्तः **अपान** इति । यत्र अन्तर्हृदये **अपानोऽस्तं गतः क्षणं प्राणोऽपि नाभ्युदितः** यत्तदन्तराळावस्थं प्राणादिनामान्तषोडशकलाकळङ्करहितं **तत् चित्तत्त्वं** भावयेत्यर्थः ॥ ३१ ॥ किंच—**नापान** इति । यत्र नासाग्रे **नापानोऽस्तं गतः प्राणश्चास्तं** गतो भवति **यन्नासाग्रगमनावर्तम्** । एवं सहजोच्छ्वासनिश्वाससन्धौ हृदये नासाग्रे बाह्ये च यदि योगी चित्तत्त्वानुसन्धानं करोति तदाऽचिरादेव बाह्यन्तर्नासापरिच्छेदविरळं सन्निष्प्रतियोगिकचिन्मात्रतया योगी अवशिष्यते । तस्मात् सहजयोगः सर्वयोगेभ्यो वरीयानित्यर्थः ॥ ३२ ॥

सर्वचैत्यकलनात्यागेन ब्रह्मज्ञानप्राप्तिः

आभासमात्रमेवेदं न सन्नासज्जगत्त्रयम् ।
इत्यन्यकलनात्यागं सम्यज्ज्ञानं विदुर्बुधाः ॥ ३३ ॥
आभासमात्रकं ब्रह्मन् चित्तादर्शकलङ्कितम् ।
ततस्तदपि संत्यज्य निराभासो भवोत्तम ॥ ३४ ॥
भयप्रदमकल्याणं धैर्यसर्वस्वहारिणम् ।
मनःपिशाचमुत्सार्य योऽसि सोऽसि स्थिरो भव ॥ ३५ ॥
चिद्व्योमैव किलास्तीह परापरविवर्जितम् ।
सर्वत्रासंभवच्चैत्यं यत् कल्पान्तेऽवशिष्यते ॥ ३६ ॥
वाञ्छाक्षणे तु या तुष्टिस्तत्र वाञ्छैव कारणम् ।
तुष्टिस्त्वतुष्टिपर्यन्ता तस्माद्वाञ्छां परित्यज ॥ ३७ ॥
आशा यातु निराशात्वमभावं यातु भावना ।
अमनस्त्वं मनो यातु [1]तवासङ्गेन जीवतः ॥ ३८ ॥

[1] तथा—अ २.

वासनारहितैरन्तरिन्द्रियैराहरन् क्रियाः ।
न विकारमवाप्नोषि खवत् क्षोभशतैरपि ॥ ३९ ॥
चित्तोन्मेषनिमेषाभ्यां संसारप्रलयोदयौ ।
वासनाप्राणसंरोधादनुन्मेषं मनः कुरु ॥ ४० ॥
प्राणोन्मेषनिमेषाभ्यां संसृतेः प्रलयोदयौ ।
तमभ्यासप्रयोगाभ्यामुन्मेषरहितं कुरु ॥ ४१ ॥
मौख्यौन्मेषनिमेषाभ्यां कर्मणां प्रलयोदयौ ।
तद्विलीनं कुरु बलाद्गुरुशास्त्रार्थसंगमैः ॥ ४२ ॥
असंवित्स्पन्द[1]मात्रेण याति चित्तमचित्तताम् ।
प्राणानां वा निरोधेन तदेव परमं पदम् ॥ ४३ ॥
दृश्यदर्शनसंबन्धे यत् सुखं पारमार्थिकम् ।
[2]तदन्तैकान्तसंवित्त्या ब्रह्मदृष्ट्याऽवलोकय । ४४ ॥
यत्र नाभ्युदितं चित्तं तद्वै सुखमकृत्रिमम् ।
क्षयातिशयनिर्मुक्तं नोदेति न च शाम्यति ॥ ४५ ॥
ज्ञस्य चित्तं न चित्ताख्यं चित्तं चित्तत्त्वमेव हि ।
तदेव तुर्यावस्थायां तुर्यातीतं भवत्यतः ॥ ४६ ॥
संन्यस्तसर्वसंकल्पः समः शान्तमना मुनिः ।
संन्यासयोगयुक्तात्मा ज्ञानवान् मोक्षवान् भव ॥ ४७ ॥
सर्वसंकल्पसंशान्तौ प्रशान्तघनवासनम् ।
न किंचिद्भावनाकारं यत्तद्ब्रह्म परं विदुः ॥ ४८ ॥

[1] रूपेण—अ. [2] तदेकान्तरसं—अ.

नामरूपवज्जगतः सत्त्वात् कथं चिन्मात्रसिद्धिः इत्यत्र जगतः स्वाज्ञविकल्पितत्वेनाभासमात्रत्वात् चिन्मात्रसिद्धिः निरंकुशेत्याह—**आभासेति** । आभासतोऽपि जगन्नास्तीति वृत्तिरेव सम्यज्ज्ञानमित्याह—**इतीति** ॥ ३३ ॥ त्वं सम्यज्ज्ञानमवष्टभ्य निराभासो भवेत्याह—**आभासेति** ॥ ३४ ॥ किं च—**भयप्रदमिति** । भीहेतुमनस्तत्कार्यापह्नवतो यदवशिष्यते तदेव त्वमसीत्यर्थः ॥ ३५ ॥ यद्भवाम्यहं तत् कीदृशमित्यत्र—**चिद्वयोमैवेति** । सामान्यविशेषवच्चैत्यासंभवप्रबोधसिद्धं यदवशिष्यते तदेव त्वमसीत्यर्थः । **कल्पान्ते** कल्पनावसान इत्यर्थः ॥ ३६ ॥ चैत्यासंभवः कथं? वाञ्छाभावनादीनां विद्यमानत्वं यदि मन्यसे—**वाञ्छेति** ॥ ३७ ॥ किं च—**आशेति** । स्वातिरिक्तविषयकाशा ॥ ३८ ॥ सर्वानर्थमूलवासनात्यागतः पूर्ववत् न विकारमवाप्नोषीत्याह—**वासनेति** । पूर्ववत् **न विकारमवाप्नोषि** ॥३९॥ स्वातिरिक्तसंसारास्तित्वनास्तित्वे चित्तसत्त्वासत्त्वायत्ते, तन्नाशतः तच्छान्तिः भवतीत्याह—**चित्तेति** ॥ ४० ॥ किमप्यवेदनतः चित्तनाशवत् प्राणं कामं च निर्मूलयेत्याह—**प्राणेति** । सुषुम्नायां विलयं **कुरु** ॥ ४१ ॥ इदं कामनीयं इदं अकामनीयं इति युक्तायुक्तविकलः काम एव मूर्खः, तत्क्षयतः कर्मक्षयं कुर्वित्याह—**मौख्येति** । ब्रह्मातिरेकेण कामनीयविषयासंभवतः कामो नास्तीति **तद्विलीनं कुरु** ॥ ४२ ॥ चित्तप्राणनैश्चल्यतो यद्विभाति तदेव पदमित्याह—**असंविदिति** । अप्राणब्रह्मपदं प्राणो भजतीति यत् **तदेव परमं पदम्** ॥ ४३ ॥ तत्त्वंपदलक्ष्यैक्यजसुखं ब्रह्मेति पश्येत्याह—**दृश्येति** ॥ ४४ ॥ किं तत् प्रत्यग्ब्रह्मैक्यजं सुखं इत्यत्र—**यत्रेति** ॥ ४५ ॥ "ब्रह्मातिरिक्तं न किंचिदस्ति" इति यो जानाति तच्चित्तं ब्रह्मेत्याह—**ज्ञस्येति** ॥ ४६ ॥ स्वातिरिक्तसङ्कल्पसंन्यासतः कृतार्थो भवेत्याह—**संन्यस्तेति** ॥ ४७ ॥ यत्र सङ्कल्पप्रभवभावना समाप्यते तदेव ब्रह्मेत्याह—**सर्वेति** ॥ ४८ ॥

साङ्ख्ययोगाभ्यां परमपदप्राप्तिः

सम्यज्ज्ञानावरोधेन नित्यमेकसमाधिना ।
सांख्य एवावबुद्धा ये ते सांख्या योगिनः परे ॥ ४९ ॥

प्राणाद्यनिलसंशान्तौ युक्त्या ये पदमागताः ।
अनामयमनाद्यन्तं ते स्मृता योगयोगिनः ॥ ९० ॥
उपादेयं तु सर्वेषां शान्तं पदमकृत्रिमम् ।
एकार्थाभ्यसनं प्राणरोधश्चेतःपरिक्षयः ॥ ९१ ॥
एकस्मिन्नेव संसिद्धे संसिध्यन्ति परस्परम् ।
अविनाभाविनी नित्यं जन्तूनां प्राणचेतसी ॥ ९२ ॥
आधाराधेयवच्चैते एकभावे विनश्यतः ।
कुरुतः स्वविनाशेन कार्यं मोक्षाख्यमुत्तमम् ॥ ९३ ॥
सर्वमेतद्धिया त्यक्त्वा यदि तिष्ठसि निश्चलः ।
तदाऽहंकारविलये त्वमेव परमं पदम् ॥ ९४ ॥
महाचिदेकैवेहास्ति महासत्तेति योच्यते ।
निष्कलङ्का समा शुद्धा निरहंकाररूपिणी ॥ ९५ ॥
सकृद्विभाता विमला नित्योदयवती समा ।
सा ब्रह्म परमात्मेति नामभिः परिगीयते ॥ ९६ ॥

अभावनासिद्धं ब्रह्म केचन वेदान्तश्रवणादिना जानन्ति, ते साङ्ख्याः, केचन ज्ञानसहकृतयोगाभ्यासेन जानन्ति, ते योगिनो भवन्तीत्याह—**सम्यगिति** । स्वातिरिक्ताविद्यापदतत्कार्यजातापह्नवसिद्धं ब्रह्म निष्प्रतियोगिकस्वमात्रमिति यत् सङ्ख्यातं गणितं स्मृतं अवगतं तत् सङ्ख्यं, तदेव साङ्ख्यं निष्प्रतियोगिकब्रह्ममात्र-ज्ञानं, **साङ्ख्य एवाववुद्धाः** ये ते साङ्ख्याः, **योगिनः परे** । सांख्ये इति सप्तमी तृतीयार्था । ये स्वात्मानं साङ्ख्येन जानन्ति ते साङ्ख्याः ज्ञानयोगिन इत्यर्थः ॥ ४१ ॥ **योगयोगिनस्तु** ज्ञानसहितयमाद्यष्टांगयोगोपायेन **प्राणाद्यनिलसंशान्तौ** सुषुम्नां प्रविश्य लयं गतेऽथ स्वातिरिक्तकलनाकल्पकमनसि सरूपविलयं

विरूपविलयं वा गतेऽथ मनःप्राणापह्नवसिद्धं ब्रह्म स्वमात्रमवशिष्यत इति युक्त्या ये पदमागताः ॥ ९० ॥ साङ्ख्ययोगिगम्यं भिद्यत इत्यत आह—उपादेयमिति। साङ्ख्यैः यत्पदमाप्यं तदेव योगिभिः आप्यते नेतरत् इत्यत्र—"यत्साङ्ख्यैः प्राप्यते स्थानं तद्योगैरपि गम्यते" इति स्मृतेः । योगसाङ्ख्ययोः एकार्थ-साधकत्वेन न तयोः भेदोऽस्तीत्यत्र—एकार्थेति ॥ ९१ ॥ तयोर्मध्ये—एकस्मिन्नेवेति । प्राणचेतसोरविनाभावं तयोः एकार्थलयतो मोक्षहेतुत्वं चाह—अविनाभाविनीति ॥ ९२–९३ ॥ स्वचित्तविकल्पितस्वातिरिक्तभ्रमं त्यजसि चेत् स्वयमेव अवशिष्यस इत्याह—सर्वमिति ॥ ९४ ॥ प्रत्यक्परचितोर्भेदः स्यादित्याशङ्क्य प्रत्यक्परादिशब्दैः महाचिदेकैव गीयते, न हि अनयोः भेदोऽस्तीत्याह—महाचिदिति ॥ ९५ ॥ स्वावृत्यसंभवात् सकृद्विभाता ॥९६॥

गुरोः स्वानुभवप्रकटनम्

सैवाहमिति निश्चित्य निदाघ कृतकृत्यवान् ।
न भूतं न भविष्यच्च चिन्तयामि कदाचन ॥ ९७ ॥
दृष्टिमालम्ब्य तिष्ठामि वर्तमानामिहात्मना ।
इदमद्य मया लब्धमिमं प्राप्स्यामि सुन्दरम् ॥ ९८ ॥
न स्तौमि न च निन्दामि [1]आत्मनोऽन्यन्नहि क्वचित् ।
न तुष्यामि शुभप्राप्तौ न खिद्याम्यशुभागमे ॥ ९९ ॥
प्रशान्तचापलं वीतशोकमस्तसमीहितम् ।
मनो मम मुने शान्तं तेन जीवाम्यनामयः ॥ ६० ॥
अयं बन्धुः परश्चायं ममायमयमन्यकः ।
इति ब्रह्मन् न जानामि संस्पर्शं न ददाम्यहम् ॥ ६१ ॥

[1] ह्यात्म—उ.

शिष्यप्रत्ययार्थं स्वानुभवं प्रकटयति—सैवेति । या प्रत्यक्परविभागासह-सत्तासामान्यरूपेण महाचिदवशिष्यते सैवाहम् ॥ ५७–६१ ॥

ब्रह्मभावाय चित्तनाशविधानम्

वासनामात्रसंत्यागाज्जरामरणवर्जितम् ।
सवासनं मनो ज्ञानं ज्ञेयं निर्वासनं मनः ॥ ६२ ॥
चित्ते त्यक्ते लयं याति द्वैतमेतच्च सर्वतः ।
शिष्यते परमं शान्तमेकमच्छमनामयम् ॥ ६३ ॥
अनन्तमजमव्यक्तमजरं शान्तमच्युतम् ।
अद्वितीयमनाद्यन्तं यदाद्यमुपलम्भनम् ॥ ६४ ॥
एकमाद्यन्तरहितं चिन्मात्रममलं ततम् ।
खादप्यतितरां सूक्ष्मं तद्ब्रह्मासि न संशयः ॥ ६५ ॥
दिक्कालाद्यनवच्छिन्नं स्वच्छं नित्योदितं ततम् ।
सर्वार्थमयमेकार्थं चिन्मात्रममलं भव ॥ ६६ ॥
सर्वमेकमिदं शान्तमादिमध्यान्तवर्जितम् ।
भावाभावमजं सर्वमिति मत्वा सुखी भव ॥ ६७ ॥
न बद्धोऽस्मि न मुक्तोऽस्मि ब्रह्मैवास्मि निरामयम् ।
द्वैतभावविमुक्तोऽस्मि सच्चिदानन्दलक्षणः ।
एवं भावय यत्नेन जीवन्मुक्तो भविष्यसि ॥ ६८ ॥
पदार्थबृन्दे देहादिधिया संत्यज्य दूरतः ।
आशीतलान्तःकरणो नित्यमात्मपरो भव ॥ ६९ ॥

इदं रम्यमिदं नेति बीजं ते दुःखसंततेः ।
तस्मिन् साम्याग्निना दग्धे दुःखस्यावसरः कुतः ॥ ७० ॥

स्वानुभवं प्रकटयित्वा हे निदाघ त्वमपि नानावासनाकलितं चित्तमुन्मूलयसि चेत् अचित्तचैत्यं ब्रह्मैव भवसीत्याह—**वासनेति** ॥ ६२ ॥ सशुभाशुभवासने **चित्ते** । द्वैतप्रळयान्निष्प्रतियोगिकं अद्वैतं **शिष्यते** ॥ ६३–६५ ॥ किं तद्ब्रह्म ? इत्यत्र—**दिगिति** । त्रिपरिच्छेदशून्यत्वात् **दिक्कालाद्यनवच्छिन्नम्** । तर्हि नानार्थं ब्रह्मेत्यत्र सर्वव्यक्तीनां भिन्नत्वेऽपि तदनुस्यूतप्रतीचो नानाघटशरावाद्यनुगतव्योमवत् ब्रह्म **सर्वार्थमयमेकार्थम्** ॥ ६६ ॥ किं च—**सर्वमिति** ॥ ६७ ॥ जीवन्मुक्तिलाभोपायमाह—**नेति** ॥ ६८ ॥ किं च—**पदार्थेति** ॥६९॥ दुःखे सति आत्मपरत्वं कुत इत्यत्र दुःखबीजाभावात् आत्मपरत्वमुपपद्यत इत्याह—**इदमिति** ॥ ७० ॥

शास्त्रार्थज्ञानध्यानादिभिः अद्वैतात्मलाभः

शास्त्रसज्जनसंपर्कैः प्रज्ञामादौ विवर्धयेत् ॥ ७१ ॥
ऋतं सत्यं परं ब्रह्म सर्वसंसारभेषजम् ।
अत्यर्थममलं नित्यमादिमध्यान्तवर्जितम् ॥ ७२ ॥
तथाऽस्थूलमनाकाशमसंस्पृश्यमचाक्षुषम् ।
न रसं न च गन्धाख्यमप्रमेयमनूपमम् ॥ ७३ ॥
आत्मानं सच्चिदानन्दमनन्तं ब्रह्म सुव्रत ।
अहमस्मीत्यभिध्यायेद्देहातीतं विमुक्तये ॥ ७४ ॥
समाधिः संविदुत्पत्तिः परजीवैकतां प्रति ।
नित्यः सर्वगतो ह्यात्मा कूटस्थो दोषवर्जितः ॥ ७५ ॥
एकः सन् भिद्यते भ्रान्त्या मायया न स्वरूपतः ।
तस्माद्द्वैत एवास्ति न प्रपञ्चो न संसृतिः ॥ ७६ ॥

यथाऽऽकाशो घटाकाशो महाकाश इतीरितः ।
तथा भ्रान्तेर्द्विधा प्रोक्तो ह्यात्मा जीवेश्वरात्मना ॥ ७७ ॥
यदा मनसि चैतन्यं भाति सर्वत्रगं सदा ।
योगिनोऽव्यवधानेन तदा संपद्यते स्वयम् ॥ ७८ ॥
यदा सर्वाणि भूतानि स्वात्मन्येव हि पश्यति ।
सर्वभूतेषु चात्मानं ब्रह्म संपद्यते तदा ॥ ७९ ॥
यदा सर्वाणि भूतानि समाधिस्थो न पश्यति ।
एकीभूतः परेणासौ तदा भवति केवलः ॥ ८० ॥

मुमुक्षुः स्वात्मलाभाय श्रुत्याचार्यप्रसादतः प्रज्ञां वर्धयन् "ऋतम्" इत्यादिविशेषणविशिष्टं ब्रह्मास्मीति ध्यायेत् इत्याह—**शास्त्रेति** ॥ ७१ ॥ तया किं ध्येयं? इत्यत्र व्यावहारिकं पारमार्थिकं च अपरं परं वा **ऋतमित्यादि** ॥ ७२–७४ ॥ एवं ध्यानेन किं स्यात् इत्यत्राद्वैतात्मा प्रसीदतीत्याह—**समाधिरिति** । एवं ध्याने कृतेऽथ **समाधिः** । ध्यानतः प्रत्यक्परैक्यविषयकज्ञान-मुदेति, ततः समाधिः, परमात्मा प्रादुर्भवतीत्याह—**नित्य इति** ॥ ७५ ॥ **यस्मादेवं तस्मात्** ॥ ७६ ॥ जीवेशभेदे सति अद्वैतसिद्धिः कुतः इत्यत आह—**यथेति** । परमार्थदृष्ट्या उपाधिविनिर्मुक्तमहाकाशवदात्मा एक एवेत्यर्थः ॥ ७७ ॥ यदैवं अद्वैतात्मानं योगी जानाति तदा निर्विशेषज्ञानसमकालं अयं केवलब्रह्मैव भवतीत्याह—**यदेति** । **तदा ब्रह्म संपद्यते स्वयम्** ॥ ७८ ॥ किं च—**यदेति** ॥ ७९ ॥ किं च—**स्वातिरेकेण यदा सर्वाणीति** ॥ ८० ॥

सप्तभूमिकाज्ञानतो मोक्षप्राप्तिः

शास्त्रसज्जनसंपर्कवैरा[1]ग्याभ्यासरूपिणी ।
प्रथमा भूमिकैषोक्ता मुमुक्षुत्वप्रदायिनी ॥ ८१ ॥

[1] ग्यरस—अ २, क.

विचारणा द्वितीया स्यात् तृतीया साङ्गभावना ।
विलायिनी चतुर्थी स्याद्वासनाविलयात्मिका ॥ ८२ ॥
शुद्धसंविन्मयाऽऽनन्दरूपा भवति पञ्चमी ।
अर्धसुप्तप्रबुद्धाभो जीवन्मुक्तोऽत्र तिष्ठति ॥ ८३ ॥
असंवेदनरूपा च षष्ठी भवति भूमिका ।
आनन्दैकघनाकारा सुषुप्तसदृशी स्थितिः ॥ ८४ ॥
तुर्यावस्थोपशान्ता सा मुक्तिरेव हि केवला ।
समता स्वच्छता सौम्या सप्तमी भूमिका भवेत् ॥ ८५ ॥
तुर्यातीता तु याऽऽवस्था परा निर्वाणरूपिणी ।
सप्तमी सा परा प्रौढा विषयो नैव जीवताम् ॥ ८६ ॥
पूर्वावस्थात्रयं तत्र जाग्रदित्येव संस्थितम् ।
चतुर्थी स्वप्न इत्युक्ता स्वप्नाभं यत्र वै जगत् ॥ ८७ ॥
आनन्दैकघनाकारा सुषुप्ताख्या तु पञ्चमी ।
असंवेदनरूपा तु षष्ठी तुर्यपदाभिधा ॥ ८८ ॥
तुर्यातीतपदावस्था सप्तमी भूमिकोत्तमा ।
मनोवचोभिरग्राह्या स्वप्रकाशसदात्मिका ॥ ८९ ॥
अन्तः प्रत्याहृतिवशाच्चैत्यं चेन्न विभावितम् ।
मुक्त एव न संदेहो महासमतया तया ॥ ९० ॥

निर्विशेषब्रह्मसौधविशालसोपानोपमसप्तभूमिकालक्षणं कीदृशं इत्यत आह— शास्त्रेति ॥ ८१–८३ ॥ सैव आनन्दैकघनाकारा ॥ ८४ ॥ इयं सप्तमी भूमिका जीवन्मुक्तानां विषयो न भवति, किंतु विदेहमुक्तात्मरूपेयमित्यर्थः

॥ ८९–८६ ॥ ज्ञानिजाग्रदादेः अज्ञानिजाग्रदादिवैलक्षण्यमाह—**पूर्वेति** । अभ्यासविचारणसांगभावनात्मकं **पूर्वावस्थात्रयम्** । या विलायिनी इति ख्याता **सेयं चतुर्थी** ॥ ८७ ॥ या संविदानन्दरूपिणी **सेयं आनन्दैकघनाकारेति** ॥ ८८–८९ ॥ अभ्यासादिसप्तभूमिका सम्यक् विवेचिता । एवं सप्तभूमिकाज्ञानतो **येन** स्वातिरिक्तं न भावितं स मुक्तो भवतीत्याह—**अन्तरिति** ॥ ९० ॥

जीवन्मुक्तस्य शोकाभावः

न म्रिये न च जीवामि नाहं सन्नाप्यसन्मयः ।
[1]अहं न [2]किंचिच्चिदिति मत्वा धीरो न शोचति ॥ ९१ ॥
अलेपकोऽहमजरो नीरागः शान्तवासनः ।
निरंशोऽस्मि चिदाकाशमिति मत्वा न शोचति ॥ ९२ ॥
अहंमत्या विरहितः शुद्धो बुद्धोऽजरोऽमरः ।
शान्तः शमसमाभास इति मत्वा न शोचति ॥ ९३ ॥
तृणाग्रेष्वम्बरे भानौ नरनागामरेषु च ।
यस्तिष्ठति तदेवाहमिति मत्वा न शोचति ॥ ९४ ॥

एवंविदो जीवन्मुक्तस्यापि देहादिसत्त्वेन तद्विषयकशोकः स्यादित्यत आह—**नेति** ॥ ९१ ॥ किं च—**अलेपक इति** ॥ ९२–९३ ॥ **तदेव** स एव ॥ ९४ ॥

अनात्मभावनात्यागपुरस्सरं आत्ममात्रभावनाविधिः

भावनां सर्वभावेभ्यः समुत्सृज्य समुत्थितः ।
अवशिष्टं परं ब्रह्म केवलोऽ[3]स्मीति भावय ॥ ९५ ॥

[1] अहं तु—अ १. [2] त्वं च चि—अ. [3] स्तीति—उ.

वाचामतीतविषयो विषयाशादशोज्झितः ।
परानन्दरसाक्षुब्धो रमते स्वात्मनाऽऽत्मनि ॥ ९६ ॥
सर्वकर्मपरित्यागी नित्यतृप्तो निराश्रयः ।
न पुण्येन च पापेन नेतरेण च लिप्यते ॥ ९७ ॥
स्फटिकः प्रतिबिम्बेन यथा नायाति रञ्जनम् ।
तज्ज्ञः [1]कर्मफलेनान्तस्तथा नायाति रञ्जनम् ॥ ९८ ॥
विहरन् जनतावृन्दे देहकर्तनपूजनैः ।
खेदाह्लादौ न जानाति प्रतिबिम्बगतैरिव ॥ ९९ ॥
निस्स्तोत्रो निर्विकारश्च पूज्यपूजाविवर्जितः ।
संयुक्तश्च वियुक्तश्च सर्वाचारनयक्रमैः ॥ १०० ॥
तनुं त्यजतु वा तीर्थे श्वपचस्य गृहेऽथ वा ।
ज्ञानसंपत्तिसमये मुक्तोऽसौ विगताशयः ॥ १०१ ॥
संकल्पत्वं हि बन्धस्य कारणं तत् परित्यज ।
मोक्षो भवेदसंकल्पात् तदभ्यासं धिया कुरु ॥ १०२ ॥
सावधानो भव त्वं च ग्राह्यग्राहकसंगमे ।
अजस्रमेव संकल्पदशाः परिहरन् शनैः ॥ १०३ ॥
मा भव ग्राह्यभावात्मा ग्राहकात्मा च मा भव ।
भावनामखिलां त्यक्त्वा यच्छिष्टं तन्मयो भव ॥ १०४ ॥
किंचिच्चेद्रोचते तुभ्यं तद्बद्धोऽसि भवस्थितौ ।
न किंचिद्रोचते चेत्ते तन्मुक्तोऽसि भवस्थितौ ॥ १०५ ॥

[1] कथं—उ.

असात् पदार्थनिचयाद्यावत् स्थावरजङ्गमात् ।
तृणादेर्देहपर्यन्तान्मा किंचित्तत्र रोचताम् ॥ १०६ ॥

त्वं तु स्वातिरिक्तभावनां विहाय स्वमात्रभावारूढो भवेत्याह—**भावनामिति** ॥ ९५ ॥ एवं केवलात्मदर्शी स्वात्ममात्ररतिः स्यादित्याह—**वाचामिति** ॥ ९६ ॥ स्वात्मरतेरप्यन्तःकरणयोगतः पुण्यपापलेपः स्यादित्यत आह—**सर्वेति** । कामसङ्कल्पादिना सह **सर्वकर्मेति** ॥ ९७ ॥ उक्तार्थमेव दृष्टान्तेन स्पष्टयति—**स्फटिक इति** ॥ ९८ ॥ इत्थंभूतो विद्वान् ब्रह्मभावनादृढिम्ना खेदादिकं न जानातीति सदृष्टान्तमाह—**विहरन्निति** ॥ ९९ ॥ एवं निष्प्रपञ्चदृष्टेरपि मुक्तिः पुण्यक्षेत्रमरणनिमित्ता इत्यत्राह—**निस्स्तोत्र इति** ॥ १०० ॥ "ज्ञानसमकालमेव मुक्तः" इति श्रुतेः ॥ १०१ ॥ त्वं आदौ बन्धहेतुसङ्कल्पं त्यजन् मुक्तिहेतुनिःसङ्कल्पं भजेत्याह—**सङ्कल्पेति** ॥ १०२ ॥ किं च—**सावधान इति** ॥१०३॥ कदाऽपि **मा भव** ॥ १०४ ॥ शिष्टात्मभावापत्तौ उपायमाह—**किंचिदिति** ॥ १०५–१०६ ॥

तुरीयावस्था

अहंभावानहंभावौ त्यक्त्वा सदसती तथा ।
यदसक्तं समं स्वच्छं स्थितं तत्तुर्यमुच्यते ॥ १०७ ॥
या [1]स्वच्छा समता शान्ता जीवन्मुक्तव्यवस्थितिः ।
साक्ष्यवस्था व्यवहृतौ सा तुर्या कलनोच्यते ॥ १०८ ॥
नैतज्जाग्रन्न च स्वप्नः संकल्पाना[2]मसंभवात् ।
सुषुप्तभावो नोऽप्येतदभावाज्जडतास्थितेः ॥ १०९ ॥
शान्तसम्यक्प्रबुद्धानां यथास्थितमिदं जगत् ।
विलीनं तुर्यमित्याहुरबुद्धानां स्थितं स्थिरम् ॥ ११० ॥

[1] स्वस्था—अ. [2] मभावनात्—उ.

अहंकारकलात्यागे समतायाः समुद्गमे ।
विशरारौ कृते चित्ते तुर्यावस्थोपतिष्ठते ॥ १११ ॥

स्वातिरिक्तसामान्यस्य [शशविषाणवदवस्तुत्वेन रोंचनानर्हत्वात् किं तत् रुच्यर्हमित्यत्र तुर्यमित्याह—**अहमिति** । देहादौ **अहंभावेति** । चाक्षुषाचाक्षुषवस्तुगोचरवृत्तिं च त्यक्त्वा **यदसक्तमिति** ॥ १०७ ॥ केयं तुर्यरूपिणी स्थितिरित्यत्र—**येति** ॥ १०८ ॥ तस्या जाग्रदादिभ्रमं वारयति—**नैतदिति** ॥ १०९ ॥ स्वज्ञानदृशां जगद्ब्रह्मैव, स्वाज्ञदृशां तु ब्रह्मैव जगदित्याह—**शान्तेति**। स्वातिरिक्तशान्तसम्यक्प्रबुद्धानां सम्यज्ज्ञानिनां **यथास्थितमिदं जगत्** स्वाज्ञगोचरमिदं जगत् यथास्थितं **ब्रह्मैव** जगद्विलयाधिष्ठानत्वात् ॥ ११० ॥ केयं तुर्यावस्था इत्यत आह—**अहङ्कारेति**। देहादौ **अहङ्कारेति**। सर्वसमब्रह्मगोचरेयं समता तस्याः समुद्गमे सम्यगुद्गमो लाभः तस्मिन् समतावृत्तिप्रादुर्भावे **विशरारौ कृते चित्ते**—"प्रणवो धनुः शरो ह्यात्मा" इति श्रुत्यनुरोधेन मनो हि शरः उच्यते, शरो यत्र विलीयते स विशरः अमनीभावः निर्विकल्पकसमाधिः, विशरे निर्विकल्पकसमाधौ[आ]रोहति प्रादुर्भवतीति विशरारुः प्रत्यगभिन्नपरमात्मा, तस्मिन् **चित्ते** तु लयं **कृते** सत्यथ **तुर्यावस्थोपतिष्ठते** ॥ १११ ॥

अध्यात्मशास्त्रसिद्धान्तः

सिद्धान्तोऽध्यात्मशास्त्राणां सर्वापह्नव एव हि ।
नाविद्याऽस्तीह नो माया शान्तं ब्रह्मेदमक्रमम् ॥ ११२ ॥
शान्त एव चिदाकाशे स्वच्छे[1]शमसमात्मनि ।
[2]समस्तशक्तिखचिते ब्रह्मेति कलिताभिधे ॥ ११३ ॥
सर्वमेव परित्यज्य महामौनी भवानघ ।
निर्वाणवान् निर्मनः क्षीणचित्तः प्रशान्तधीः ॥ ११४ ॥

[1] दम—अ, अ १. [2] समग्र—अ, अ १, क.

आत्मन्येवास्व शान्तात्मा मूकान्धबधिरोपमः ।
नित्यमन्त[1]र्मुखः स्वच्छः स्वात्मनाऽन्तः प्रपूर्णधीः ॥ ११५ ॥
जाग्रत्येव [2]सुषुप्तस्थः कुरु कर्माणि वै द्विज ।
अन्तः सर्वपरित्यागी बहिः कुरु यथाऽऽगतम् ॥ ११६ ॥
चित्तसत्ता परं दुःखं चित्तत्यागः परं सुखम् ।
अतश्चित्तं [3]चिदाकाशे नय क्षयमवेदनात् ॥ ११७ ॥
दृष्ट्वा रम्यमरम्यं वा स्थेयं पाषाणवत् [4]सदा ।
एतावताऽऽत्मयत्नेन जिता भवति संसृतिः ॥ ११८ ॥

ईशाद्यष्टोत्तरशतवेदान्तपरमसिद्धान्तः कीदृशः इत्यत आह—**सिद्धान्त**-इति । **सिद्धान्तोऽध्यात्मशास्त्राणां** ब्रह्मातिरिक्तस्य स्वाज्ञविकल्पितस्य सर्वस्य शशविषाणवत् अवस्तुतया **सर्वापह्नव एव हि** । मायातत्कार्ये सति कथं सर्वापह्नव उपपद्यते इत्यत्र **नाविद्याऽस्तीह नो माया** इति । कारणमायाऽभावे तत्कार्याविद्या कुत इत्यर्थः । यद्येवं तदा तदनुगतब्रह्माप्यपह्नवं भजतीत्यत आह—**शान्तं ब्रह्मेदमक्रममिति** । मायातत्कार्यशान्तं मायातत्कार्यापह्नवतो यन्न क्रमते न हीयते इत्यक्रमं निर्विशेषं ब्रह्म स्वमात्रमवशिष्यते इत्यर्थः ॥ ११२ ॥ एवं सर्वापह्नवसिद्धब्रह्ममात्रे स्वाज्ञदृष्टिप्रसक्तसर्वापह्नवं कृत्वा तूष्णींभावमेत्य मौनी भवेत्याह—**शान्त** इति । **समस्तस्वातिरिक्तग्रसनशक्तिखचिते** ॥ ११३ ॥ किं च—**निर्वाणवानिति** ॥११४॥ स्वातिरिक्तविषयग्रहणे **मूकान्धबधिरोपमः** । यदि रोचते तदा मनसा सर्वभावं त्यक्त्वा स्वाज्ञवत् बाह्यनटनं कुर्वित्याह—**नित्यमिति** ॥ ११५–११६ ॥ किमप्यवेदनात् सर्वानर्थकरं चित्तं विलाप्य तूष्णीं तिष्ठेत्याह—**चित्तेति** । यतः **चित्तसत्ता परं दुःखम्** ॥ ११७ ॥ एवं कृते त्वया स्वातिरिक्तभ्रान्तिः जिता भवतीत्युपसंहरति—**एतावतेति** ॥ ११८ ॥

[1] मुखे स्व—उ. मुखस्व—अ १, क. [2] सुषुप्ति—अ २, क.
[3] चिदेवात्मा—अ, अ १. [4] समम्—अ, अ २, क. समः—अ १.

वेदान्तसंप्रदायविधिः

वेदान्ते परमं गुह्यं पुराकल्पप्रचोदितम् ।
नाप्रशान्ताय दातव्यं नापुत्रायाशिष्याय वै पुनः ॥ ११९ ॥
अन्नपूर्णोपनिषदं योऽधीते गुर्वनुग्रहात् ।
स जीवन्मुक्ततां प्राप्य ब्रह्मैव भवति स्वयम् ॥ १२० ॥

इत्युपनिषत् ॥

सर्ववेदान्तसम्प्रदायार्थं प्रकटयति—वेदान्त इति ॥ ११९ ॥ उपनिषत्पठनतदर्थवेदनफलमाह—अन्नपूर्णेति ॥ १२० ॥ इत्युपनिषच्छब्दः शास्त्रपरिसमाप्त्यर्थः ॥

इति पञ्चमोऽध्यायः

श्रीवासुदेवेन्द्रशिष्योपनिषद्ब्रह्मयोगिना ।
अन्नपूर्णोपनिषदो व्याख्यानं लिखितं लघु ।
अन्नपूर्णोपनिषदो व्याख्याग्रन्थस्तु षट्छतम् ॥

इति श्रीमदीशाद्यष्टोत्तरशतोपनिषच्छास्त्रविवरणे सप्ततिसङ्ख्यापूरकं अन्नपूर्णोपनिषद्विवरणं सम्पूर्णम्

आत्मोपनिषत्

भद्रं कर्णेभिः—इति शान्तिः

पुरुषत्रैविध्यम्

अथाङ्गिरास्त्रिविधः पुरुषोऽजायतात्माऽन्तरात्मा परमात्मा चेति ॥ १–१ ॥

यत्रानात्मप्रपञ्चोऽयमपह्नवपदं गतः ।
प्रतियोगिविनिर्मुक्तः परमात्माऽवशिष्यते ॥

इह खलु अथर्वणवेदप्रविभक्तेयं आत्मोपनिषत् स्वातिरिक्तेयत्ताप्रकटनव्यग्रा स्वमात्रपर्यवसन्ना विजयते । अस्याः स्वल्पग्रन्थतो विवरणमारभ्यते । श्रुतिः अवान्तररूपेण आत्मान्तरात्मपरमात्मरूपं प्रकटयतीति यत् तद्विद्यास्तुत्यर्थम् । कदेयमवान्तररूपेण प्रवृत्तेत्यत्राह—अथेति । अथ यथोक्ताधिकारिसिद्ध्यनन्तरं अङ्गं स्वातिरिक्तं अङ्गि स्वमात्रं स्वाज्ञादिदृष्ट्यनुरोधेन त्रिधेव रातीत्यङ्गिराः परमात्मा त्रिविधः पुरुषोऽजायत ॥ १–१ ॥

आत्मस्वरूपम्

त्वक्चर्ममांसरोमाङ्गुष्ठाङ्गुल्यः पृष्ठवंशनखगुल्फोदरनाभिमेढ्र-कट्यूरुकपोलश्रोत्रभ्रूललाटबाहुपार्श्वशिरोऽक्षीणि भवन्ति जायते म्रियत इत्येष आत्मा ॥ १–२ ॥

तत्र स्वाज्ञविकल्पितात्मा कीदृश इत्यत आह—त्वगिति । स्वाज्ञदृष्ट्या स्थूलशरीरस्य आत्मत्वं उपपद्यते इत्यर्थः ॥ १–२ ॥

अन्तरात्मस्वरूपम्

अथान्तरात्मा नाम पृथिव्यापस्तेजोवायुराकाशमिच्छाद्वेषसुखदुःखकाममोहविकल्पनादिस्मृति[1]लिङ्ग उदात्तानुदात्तह्रस्वदीर्घ[2]प्लुतः स्खलितगर्जितस्फुटितमुदितनृत्तगीतवादित्र[3]प्रलयाविजृंभितादिभिः श्रोता घ्राता रसयिता नेता कर्ता विज्ञानात्मा पुरुषः [4]पुराणः[5]न्यायमीमांसाधर्मशास्त्राणीति श्रवणघ्राणाकर्षणकर्म[6]विशेषणं करोत्येषोऽन्तरात्मा ॥

स्वाज्ञादिदृष्टिविकल्पितान्तरात्मा कीदृश इत्यत आह—अथेति । पृथिव्यादिव्यष्टिसमष्टिप्रपञ्चेषु जीवसूत्रान्तर्यामिरूपेण अततीत्यन्तरात्मा भवतीत्यर्थः ॥ १–३ ॥

परमात्मस्वरूपम्

अथ परमात्मा नाम यथाऽक्षर उपासनीयः स च प्राणायामप्रत्याहारधारणाध्यानसमाधियोगानुमानात्मचिन्तकवटकणिका वा श्यामाकतण्डुलो वा वालाग्रशतसहस्रविकल्पनादिभिः स लभ्यते [7]नोपलभ्यते न जायते न म्रियते न शुष्यति न क्लिद्यते न दह्यते न कम्पते न भिद्यते न [8]स्विद्यते निर्गुणः साक्षिभूतः शुद्धो

[1] लिङ्गोदा—अ २, क.
[2] प्लुतस्ख—उ.
[3] प्रलयवि—अ २, क.
[4] पुराणं—अ २, उ १, क.
[5] न्यायो—अ १, अ २, उ १, क.
[6] विशेषं—अ.
[7] सोप—अ १, अ २, उ १.
[8] स्थीयते—अ. छिद्यते—मु.

निरवयवात्मा केवलः सूक्ष्मो निर्ममो निरञ्जनो निर्विकारः शब्दस्पर्शरूपरसगन्धवर्जितो निर्विकल्पो निराकांक्षः सर्वव्यापी सोऽचिन्त्योऽ[1]निर्वर्ण्यश्च पुनात्यशुद्धान्यपूतानि निष्क्रियस्तस्य संसारो नास्ति ॥ १–४ ॥

स्वज्ञदृष्ट्यनुभूयमानपरमात्मा कीदृशः इत्यत आह—**अथेति**। **परमात्मा नाम** कीदृश इत्यत्र **यथा** जीवकोटिभिरक्षरो बीजात्मा ईश्वरः **उपासनीयः** सन् उपलभ्यते तथा **स चैवं** परमाक्षरः परमात्मा ज्ञानसहितप्राणायामादिषडंगयोगानुमानात्मचिन्तकैः बालाग्रशतसाहस्रैकभागादपि सुसूक्ष्मतया सोऽहमिति चिन्त्यमानः सन्नुपलभ्यते । जन्मादिषड्भावविकारगुणत्रयादिविकल्पवैरळ्यान्निर्गुण इत्यादिविशेषणविशिष्टोऽनिर्वर्ण्यः केनापि वर्णयितुमशक्यत्वात् "यतो वाचो निवर्तन्ते" इत्यादिश्रुतेः । इत्थंभूतोऽपि परमात्मा स्वाज्ञविकल्पितानन्तकोटिब्रह्माण्डानि अपूतान्यपि सच्चिदानन्दरूपेण तत् सर्वं व्याप्य पुनाति । तथा चेदयं सक्रियः संसारी स्यादित्यतः आह—**निष्क्रिय** इति । स्वज्ञदृष्ट्या स्वातिरिक्तलेशाभावादद्वयः परमात्मेत्यर्थः ॥ १–४ ॥

वस्तुतो ब्रह्मणः अद्वयत्वनिरूपणम्

आत्मसंज्ञः शिवः शुद्ध एक एवाद्वयः सदा ।
ब्रह्मरूपतया ब्रह्म केवलं प्रतिभासते ॥ १ ॥
जगद्रूपतयाऽप्येतद्ब्रह्मैव प्रतिभासते ।
विद्याऽविद्यादिभेदेन भावाभावादिभेदतः ॥ २ ॥
गुरुशिष्यादिभेदेन ब्रह्मैव प्रतिभासते ।
ब्रह्मैव केवलं शुद्धं विद्यते तत्त्वदर्शने ॥ ३ ॥

[1] निर्वर्ण—अ, अ १.

न च विद्या न चाविद्या न जगच्च न चापरम् ।
सत्यत्वेन जगद्भानं संसारस्य प्रवर्तकम् ॥ ४ ॥
असत्यत्वेन भानं तु संसारस्य निवर्तकम् ।

आत्मान्तरात्मेत्यादिद्वैतस्य वर्णितत्वादद्वयत्वं कथं इत्यत आह— **आत्मेति** ॥ १ ॥ जगदादिरूपेण भानात् कथं ब्रह्मरूपतया भातीत्यत आह— **जगदिति** ॥ २ ॥ वस्तुतस्तु स्वाज्ञादिदृष्टिमोहे सत्यसति **ब्रह्मैव केवलम्** ॥ ३ ॥ अतस्मिन् तद्धीः संसारहेतुः अतस्मिन् अतद्धीः संसारनिवृत्तिहेतुः इत्याह— **सत्यत्वेनेति** ॥ ४ ॥

आत्मनः नित्यसिद्धत्वम्

घटोऽयमिति विज्ञातुं नियमः को न्वपेक्षते ॥ ५ ॥
विना प्रमाणसुष्ठुत्वं [1]यस्मिन् सति पदार्थधीः ।
अयमात्मा नित्यसिद्धः प्रमाणे सति भासते ॥ ६ ॥
न देशं नापि कालं वा न शुद्धिं वाऽप्यपेक्षते ।
देवदत्तोऽहमित्येतद्विज्ञानं निरपेक्षकम् ॥ ७ ॥
तद्वद्ब्रह्मविदोऽप्यस्य ब्रह्माहमिति वेदनम् ।
भानुनेव जगत् सर्वं भास्यते यस्य तेजसा ॥ ८ ॥
अनात्मकमसत्तुच्छं किं नु तस्यावभासकम् ।
वेदशास्त्रपुराणानि भूतानि सकलान्यपि ॥ ९ ॥
येनार्थवन्ति तं किं नु विज्ञातारं प्रकाशयेत् ।

[1] स्वस्मिन्—अ, अ १.

जगदपवादाधिकरणब्रह्मवेदने कोऽयं नियम इत्याकांक्षायां प्रमाणदृष्टिलाभे चित्तशुद्ध्यादिनियमसापेक्षेऽपि प्रमाणदृष्टौ सत्यां न कोऽपि नियमोऽस्तीति सदृष्टान्तमुपपादयति—घट इति ॥ ५–७ ॥ ब्रह्मदर्शनस्य प्रमाणसापेक्षकतया ब्रह्मावभासकं प्रमाणमित्यत आह—भानुनेति ॥ ८ ॥ यत् प्रमाणमिति मन्यसे तत् अनात्मकमिति ॥ ९ ॥

केवलात्मरतस्य कृतार्थत्वम्

क्षुधां देहव्यथां त्यक्त्वा बालः क्रीडति वस्तुनि ॥ १० ॥
तथैव विद्वान् रमते निर्ममो निरहं सुखी ।
कामान्निष्कामरूपी [1]संचरत्येकचरो मुनिः ॥ ११ ॥
स्वात्मनैव सदा तुष्टः स्वयं सर्वात्मना स्थितः ।
निर्धनोऽपि सदा तुष्टोऽप्यसहायो महाबलः ॥ १२ ॥
नित्यतृप्तोऽप्यभुञ्जानोऽप्यसमः समदर्शनः ।
कुर्वन्नपि न कुर्वाणश्चाभोक्ता फलभोग्यपि ॥ १३ ॥
शरीर्यप्यशरीर्येष परिच्छिन्नोऽपि सर्वगः ।
अशरीरं सदा सन्तमिमं ब्रह्मविदं क्वचित् ॥ १४ ॥
प्रियाप्रिये न स्पृशतस्तथैव च शुभाशुभे ।
तमसा ग्रस्तवद्भानाद्ग्रस्तोऽपि रविर्जनैः ॥ १५ ॥
ग्रस्त इत्युच्यते भ्रान्त्या ह्यज्ञात्वा वस्तुलक्षणम् ।
तद्वद्देहादिबन्धेभ्यो विमुक्तं ब्रह्मवित्तमम् ॥ १६ ॥

[1] सन् चर—अ, अ १, अ २, क,

पश्यन्ति देहिवन्मूढाः शरीराभासदर्शनात् ।
अहिनिर्ल्वयनीवायं मुक्तदेहस्तु तिष्ठति ॥ १७ ॥
इतस्ततश्चाल्यमानो यत्किंचित्प्राणवायुना ।
स्रोतसा नीयते दारु यथा निम्नोन्नतस्थलम् ॥ १८ ॥
दैवेन नीयते देहो यथा कालोप[1]मुक्तिषु ।
लक्ष्यालक्ष्यगतिं त्यक्त्वा यस्तिष्ठेत् केवलात्मना ॥ १९ ॥
शिव एव स्वयं साक्षादयं ब्रह्मविदुत्तमः ।
जीवन्नेव सदा मुक्तः कृतार्थो ब्रह्मवित्तमः ॥ २० ॥
उपाधिनाशाद्ब्रह्मैव सन् ब्रह्माप्येति निर्द्वयम् ।
शैलूषो वेषसद्भावाभावयोश्च यथा पुमान् ॥ २१ ॥
तथैव ब्रह्मविच्छ्रेष्ठः सदा ब्रह्मैव नापरः ।

प्रमाणेन स्वाज्ञानावृतिः भिद्यते, ब्रह्म स्वेनैव प्रकाशते, स्वाज्ञानावृतिभेदने प्रमाणमुपयुज्यते इत्यर्थः । एवं विद्वान् स्वातिरिक्तरतिं त्यक्त्वा स्वात्मरतिः जीवन्मुक्तो भवतीत्याह—क्षुधामिति ॥ १०–११ ॥ धनसहायभोजनादिविरहस्य बलतुष्ट्यादिकं कथं सम्भवतीत्यत आह—निर्धन इति ॥ १२–१३ ॥ स्वाज्ञदृष्ट्या अस्य प्रियाप्रियादिस्पर्शनं, न स्वज्ञदृष्ट्येत्याह—अशरीरमिति ॥ १४–१६ ॥ तस्यापि व्यापारवद्देहसत्त्वादज्ञवदयमपि बध्यत इत्यत्र स्वदृष्ट्या देहोऽस्ति नास्तीति विभ्रमाभावात् अयं ब्रह्मवित् ब्रह्मैवेत्याह—अहीति । अहिनिर्ल्वयनी सर्पत्वक् ॥ १७–१८ ॥ देहो मे अस्ति नास्तीति लक्ष्यालक्ष्यगतिम् ॥ १९ ॥ आभासतोऽपि स्वातिरिक्तदेहादिकमस्तीति यो मन्यते तदा अस्य जीवन्मुक्तिः, तन्नाशात् विदेहमुक्तिः स्यादित्याह—जीवन्निति ॥ २० ॥ उक्तार्थमेव दृष्टान्तेन स्पष्टयति —शैलूष इति ॥ २१ ॥

[1] पत्तिषु—क.

ब्रह्मविदो ब्रह्मत्वम्

घटे नष्टे यथा व्योम व्योमैव भवति स्वयम् ॥ २२ ॥
तथैवोपाधिविलये ब्रह्मैव ब्रह्मवित् स्वयम् ।
क्षीरं क्षीरे यथा क्षिप्तं तैलं तैले जलं जले ॥ २३ ॥
संयुक्तमेकतां याति तथाऽऽत्मन्यात्मविन्मुनिः ।

ब्रह्मविदो ब्रह्मत्वे उपपत्तिमाह—घट इति । घटे **नष्टे** स्थिते वा ॥२२॥ **उपाधिविलये** स्थिते वा । यदि प्रत्यक्परयोः भेददृष्टिः तदा—**क्षीरमिति** ॥२३॥

ब्रह्मविदः सर्वविकल्पासम्भवः

एवं विदेहकैवल्यं सन्मात्रत्वमखण्डितम् ॥ २४ ॥
ब्रह्मभावं प्रपद्यैष यतिर्नावर्तते पुनः ।
सदात्मकत्वविज्ञानदग्धाविद्यादिवर्ष्मणः ॥ २५ ॥
अमुष्य ब्रह्मभूतत्वाद्ब्रह्मणः कुत उद्भवः ।
मायाकृतौ बन्धमोक्षौ न स्तः स्वात्मनि वस्तुतः ॥ २६ ॥
यथा रज्जौ निष्क्रियायां सर्पाभासविनिर्गमौ ।
[1]आवृतेः सदसत्त्वाभ्यां वक्तव्ये बन्धमोक्षणे ॥ २७ ॥
[2]नावृतिर्ब्रह्मणः काचिदन्याभावादनावृतम् ।
अस्तीति प्रत्ययो यश्च यश्च नास्तीति वस्तुनि ॥ २८ ॥
बुद्धेरेव गुणावेतौ न तु नित्यस्य वस्तुनः ।
अतस्तौ मायया कृतौ बन्धमोक्षौ न चात्मनि ॥ २९ ॥

[1] अवृतेः—अ१. [2] न वृतिः—अ २.

निष्कले निष्क्रिये शान्ते निरवद्ये निरञ्जने ।
अद्वितीये परे तत्त्वे व्योमवत् कल्पना कुतः ॥ ३० ॥
न निरोधो न चोत्पत्तिर्न बद्धो न च साधकः ।
न मुमुक्षुर्न वै मुक्त इत्येषा परमार्थता ॥ ३१ ॥

इत्युपनिषत् ॥

एकीकृतक्षीरादेः पृथक्करणवत् ब्रह्मण्येकीभावमापन्नविदेहमुक्तस्यापि पुनर्भवः स्यादित्यत आह— **एवमिति** ॥ २४–२९ ॥ ज्ञानाग्निदग्धशरीरस्य **अमुष्य** । **ब्रह्मविदो ब्रह्मत्वे** पुनः बन्धमोक्षादिव्यवस्था कुत इत्यत आह— **मायेति** ॥ २६–२८ ॥ यत एवं **अतस्ताविति** ॥ २९ ॥ निष्प्रतियोगिकाद्वितीयस्य तथा निर्विकल्पत्वात् विकल्पासम्भवोक्तिः युज्यत इत्यर्थः ॥३०॥ वस्तुतस्तु **न निरोध** इति । निष्प्रतियोगिकब्रह्ममात्रावगतेः मायातत्कार्यतदुत्पत्तिप्रलयबन्धमोक्षादिविभ्रमापह्नवपूर्वकत्वात् परमात्मा निष्प्रतियोगिकाद्वैत एवेति परमोऽयं सिद्धान्तः । **इत्युपनिषच्छब्दः** आत्मोपनिषत्परिसमाप्त्यर्थः ॥

श्रीवासुदेवेन्द्रशिष्योपनिषद्ब्रह्मयोगिना ।
लिखितं स्याद्विवरणमात्मोपनिषदो लघु ।
आत्मोपनिषदो व्याख्याग्रन्थः पञ्चाशदीरितः ॥

इति श्रीमदीशाद्यष्टोत्तरशतोपनिषच्छास्त्रविवरणे षट्सप्ततिसंख्यापूरकं
आत्मोपनिषद्विवरणं सम्पूर्णम्

आत्मबोधोपनिषत्

वाङ् मे मनसि—इति शान्तिः

प्रणवाष्टाक्षरीमन्त्रोपासना

प्रत्यगानन्दं ब्रह्म पुरुषं प्रणवस्वरूपं अकार उकारो मकार इति त्र्यक्षरं प्रणवं तदेतदोमिति यमुक्त्वा मुच्यते योगी जन्मसंसारबन्धनात् ॐ नमो नारायणाय शङ्खचक्रगदाधराय । तस्मात् ॐ नमो नारायणायेति मन्त्रोपासको वैकुण्ठभवनं गमिष्यति ॥१॥

श्रीमन्नारायणाकारमष्टाक्षरमहाशयम् ।
स्वमात्रानुभवात् सिद्धमात्मबोधं हरिं भजे ॥

इह खलु ऋग्वेदप्रविभक्तेयं आत्मप्रबोधोपनिषत् प्रणवाष्टाक्षरजपफलप्रकटनपूर्वकं निर्विशेषब्रह्मयाथात्म्यं प्रकटयन्ती प्रवृत्ता । तस्याः स्वल्पग्रन्थतो विवरणंमारभ्यते । आदौ तावत् प्रणवार्थप्रत्यगभिन्नब्रह्मस्वरूपमाचष्टे—**प्रत्यगानन्दमिति** । परात् दुःखप्रपञ्च[ञ्चात्]प्रातिलोम्येनाञ्चनात् **प्रत्यक् आनन्दं** आनन्दः तदभिन्नं **ब्रह्म**, स्वेन रूपेण सर्वपूरणात् **पुरुषं, प्रणवस्वरूपं** प्रत्यगभिन्नब्रह्मणः प्रणवार्थत्वात् । लिंगव्यत्ययः । किंविशेषणविशिष्टं प्रणवस्वरूपमित्यत आह—**अकार** इति । प्रणवाष्टाक्षरीमन्त्रोपासनया योगी भवबन्धात् विमुक्तः सन् तत्पदं प्राप्नोतीत्याह—**यमुक्त्वेति** । अष्टाक्षरविद्यमाननमःशब्देन

त्वंपदलक्ष्यमुच्यते, नारायणशब्देन तत्पदलक्ष्यम् । तदुपरि विद्यमानचतुर्थ्या तयोरेकत्वमवगम्यते । एवमुपासको वैकुण्ठभवनं ब्रह्मपदं प्राप्नोतीत्यर्थः ॥ १ ॥

प्रणवाभिन्नब्रह्मपदस्वरूपम्

अथ यदिदं ब्रह्मपुरं पुण्डरीकं तस्मात्तटिदाभमात्रं दीपवत्प्रकाशम् ॥ २ ॥

ब्रह्मण्यो देवकीपुत्रो ब्रह्मण्यो मधुसूदनः ।
ब्रह्मण्यः पुण्डरीकाक्षो ब्रह्मण्यो विष्णुरच्युतः ॥ ३ ॥
सर्वभूतस्थमेकं नारायणं कारणपुरुषमकारणं परं ब्रह्मोम् ॥ ४ ॥

ब्रह्मपदं कीदृशं इत्यत आह—अथेति । अथ नारायणतारकोपासनानन्तरं यस्मात् कारणात् यदिदं हृत्पुण्डरीकमेव ब्रह्मोपलब्धिस्थानतया ब्रह्मपुरं भवति तस्मात् तदेव तटिदाभमात्रं दीपवत् प्रत्यक्प्रकाशात्मकं विज्ञेयम् ॥२॥ तदधिष्ठाता क इत्यत आह—ब्रह्मण्य इति । चतुश्चत्वारिंशत्संस्कारविशिष्टब्राह्मणपटलमेव दैवं स्वरूपं वा यस्य सोऽयं ब्रह्मण्यः । "देवकी ब्रह्मविद्या सा या वेदैरुपगीयते" इति श्रुत्यनुरोधेन देवकीपुत्रः, ब्रह्मविद्याप्रादुर्भूतस्वरूपत्वात् । स्वातिरिक्तप्रपञ्चात्मकं मधुं निश्शेषं सूदयतीति मधुसूदनः । स एव पुण्डरीकाक्षो विष्णुः अच्युत इत्यर्थः ॥ ३ ॥ प्रणवार्थं ब्रह्म तद्भिन्नमित्यत आह—सर्वेति । स्वाज्ञविकल्पितसर्वभूतेषु स्वज्ञदृष्ट्या प्रत्यगभिन्नब्रह्मरूपेण तिष्ठतीति सर्वभूतस्थं एकं अद्वितीयं, नरं स्वाविद्यापदं तदेव नारं तदयनं अधिष्ठानं नारायणस्वरूपं, सर्वकारणतया सर्वपूरणात् कारणपुरुषरूपं, यत्कार्यासम्भवप्रबोधसिद्धं तदकारणं, तदेव ओङ्कारार्थतुर्यतुरीयं परं ब्रह्म ओमित्याख्यातम् ॥ ४ ॥

प्रणवज्ञानेन अमृतत्वप्राप्तिः

शोकमोहविनिर्मुक्तं विष्णुं ध्यायन् न सीदति द्वैताद्वैतमभयं भवति मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति ॥ ५ ॥

तद्याथात्म्यज्ञानाज्ञानाभ्यां अमृतत्वं तद्वैपरीत्यं चाह—शोकेति । शोकमोहविनिर्मुक्तं, तद्धेत्वन्तःकरणाभावात् । विष्णुतत्त्वं स्वमात्रमिति ध्यायन् कदाऽपि स्वातिरिक्तभ्रमतो न सीदति न नश्यति । यज्ज्ञानतः स्वातिरिक्तद्वैतं अद्वैतभावमेत्य अभयं भवति तद्यदा यो नानेव पश्यति सोऽयं मृत्योः स मृत्युमाप्नोतीत्यर्थः ॥ ९ ॥

प्रत्यगभिन्नब्रह्मज्ञानं तत्फलं च

हृत्पद्ममध्ये सर्वं तत् प्रज्ञानेत्रं प्रज्ञानेत्रे प्रतिष्ठितं प्रज्ञानेत्रो लोकः प्रज्ञा प्रतिष्ठा प्रज्ञानं ब्रह्म ॥ ६ ॥ स एतेन [1]प्रज्ञेनात्मनाऽस्माल्लोकादुत्क्रम्यामुष्मिन् स्वर्गे लोके सर्वान् कामानाप्त्वाऽमृतः समभवदमृतः समभवत् ॥ ७ ॥ [2]यत्र ज्योतिरजस्रं यस्मिन् लोकेऽभ्यर्हितं तस्मिन् मा देही स्वमानमृते लोके अक्षते अच्युते [3]लोके अक्षते अमृतत्वं च गच्छन्त्यों नमः ॥ ८ ॥

शोकमोहविनिर्मुक्तं विष्णुं ध्यायतो हृत्पद्ममध्ये—इत्येतत् ऐतरेयषष्ठाध्याये सम्यक् व्याख्यातम् ॥ ६–७ ॥ प्रज्ञानं ब्रह्मेति प्रत्यगभिन्नब्रह्मज्ञानफलमाह—यत्रेति । यत्र यस्मिन् प्रत्यगभिन्ने ब्रह्मणि तद्रूपेण लोक्यत इति लोके स्वरूपभूतं ज्योतिरभ्यर्हितं सर्वप्राण्यात्मतया सेवितं अजस्रं विजृम्भते तद्व्रतपराङ्निरूपितप्रत्यगभिन्नब्रह्मविकल्पितविशेषमात्रापह्नवसिद्धं यत् तस्मिन् स्वमानमृते स्वयंभावविरळे अक्षते स्वाविद्याद्वयतत्कार्यक्षतरहिते स्वमात्रतोऽच्युते ब्रह्ममात्रलोके निश्प्रतियोगिकाखण्डानन्दविभवे । स्वज्ञानाग्निना "दह भस्मीकरणे" इति व्युत्पत्त्या देहः स्वाविद्यापादः । तदारोपापवादाधारतया तद्वान् देही विश्वविश्वाद्यविकल्पानुज्ञैकरसान्तविभवः । जात्यभिमानयथोक्तदेह-

[1] प्रज्ञाना—अ १. [2] यस्मिन्—अ १.
[3] "लोके अक्षते"—अयं भागो (अ १.) कोशे लुप्तः.

तन्निरूपितदेहिनो निष्प्रतियोगिकाभावरूपत्वात् कालत्रयेऽपि देहदेह्यस्ति नास्तीति वा विभ्रमो न विद्यते। यदेवं स्वातिरिक्तकलनापह्नवसिद्धं ओङ्कारार्थ-तुर्यतुर्याय नम इति तुर्यतुर्यैक्यानुसन्धानं ये कुर्वन्ति ते कंचित्कालं जीवन्मुक्ता भूत्वा अथ अमृतत्वं विदेहमुक्तकैवल्यं च गच्छन्ति। यद्वा—नमःशब्दो मन्त्र-परिसमाप्त्यर्थः ॥ ८ ॥

इति प्रथमः खण्डः

उत्तमाधिकारिब्रह्ममात्रानुभूतिप्रकाशः

प्रगलितनिजमायोऽहं निस्तुलदृशिरूपवस्तुमात्रोऽहम्।
अस्तमिताहंतोऽहं प्रगलितजगदीशजीवभेदोऽहम् ॥ १ ॥
प्रत्यगभिन्नपरोऽहं विध्वस्ताशेषविधिनिषेधोऽहम्।
समुदस्ताश्रमितोऽहं प्रविततसुखपूर्णसंविदेवाहम् ॥ २ ॥
साक्ष्यहमनपेक्षोऽहं निजमहिम्नि संस्थितोऽहमचलोऽहम्।
अजरोऽहमव्ययोऽहं पक्षविपक्षादिभेदविधुरोऽहम् ॥ ३ ॥
अवबोधैकरसोऽहं मोक्षानन्दैकसिन्धुरेवाहम्।
सूक्ष्मोऽहमक्षरोऽहं विगलितगुणजालकेवलात्माऽहम् ॥ ४ ॥
निस्त्रैगुण्यपदोऽहं कुक्षिस्थानेकलोककलनोऽहम्।
कूटस्थचेतनोऽहं निष्क्रियधामाहमप्रतर्क्योऽहम् ॥ ५ ॥
एकोऽहमविकलोऽहं निर्मलनिर्वाणमूर्तिरेवाहम्।
निरवयवोऽहमजोऽहं केवलसन्मात्रसारभूतोऽहम् ॥ ६ ॥

निरवधिनिजबोधोऽहं शुभतरभावोऽहमप्रमेद्योऽहम् ।
विभुरहमनवद्योऽहं निरवधिनिःसीमसत्त्वमात्रोऽहम् ॥ ७ ॥
वेद्योऽहमागमान्तैराराध्योऽहं सकलभुवनहृद्योऽहम् ।
परमानन्दघनोऽहं परमानन्दैकभूमरूपोऽहम् ॥ ८ ॥
शुद्धोऽहमद्वयोऽहं संततभातोऽहमादिशून्योऽहम् ।
शमितान्तत्रितयोऽहं बुद्धो मुक्तोऽहमद्भुतात्माऽहम् ॥ ९ ॥
शुद्धोऽहमान्तरोऽहं शाश्वतविज्ञानसमरसात्माऽहम् ।
शोधितपरतत्त्वोऽहं बोधानन्दैकमूर्तिरेवाहम् ॥ १० ॥

परमदयावती आत्मप्रबोधोपनिषत् प्रणवाष्टाक्षरमुखेन निष्प्रतियोगिक-ब्रह्ममात्रस्वरूपमभिधाय अथ उत्तमाधिकारिणां ब्रह्ममात्रानुभूतिं मध्यमाधिकारिणां मननप्रकारं तत्फलं चोक्त्वोपररामेति श्रुतिराह—**प्रगलितेति** । **अस्तमिता-हन्तोऽहं**, अहङ्कारास्पददेहाद्यभावात् ॥ १ ॥ वृत्त्याद्याश्रमो येन सम्यगुदस्तः निरस्तः **सोऽहं समुदस्ताश्रमितः** ॥ २ ॥ **पक्षविपक्षादिभेदविधुरोऽहं**, वादि-प्रतिवादिकलनावैरळ्यात् ॥ ३–८ ॥ देशतः कालतो वस्तुतोऽन्तः परिच्छेदो येन शमितः **सोऽहं शमितान्तत्रितयः**,

न व्यापित्वाद्देशतोऽन्तः कारणत्वान्न कालतः ।
न वस्तुतोऽपि सार्वात्म्यादानन्त्यं ब्रह्मणि त्रिधा ॥

इति चन्द्रिकोक्तेः ॥ ९ ॥ इत्यादिस्वानुभूतिवाक्यानि वक्ष्यमाणमननवाक्यानि च प्रायशो महावाक्यरत्नावलीप्रभालोचने व्याख्यातानि ॥ १० ॥

मध्यमाधिकारिमननप्रकारः

विवेकयुक्तिबुद्ध्याऽहं जानाम्यात्मानमद्वयम् ।
तथाऽपि बन्धमोक्षादिव्यवहारः प्रतीयते ॥ ११ ॥

निवृत्तोऽपि प्रपञ्चो मे सत्यवद्भाति सर्वदा ।
सर्पादौ [1]रज्जुसत्तेव ब्रह्मसत्तैव केवलम् ॥ १२ ॥
प्रपञ्चाधाररूपेण वर्ततेऽतो जगन्नहि ।
यथेक्षुरससंव्याप्ता शर्करा वर्तते तथा ॥ १३ ॥
[2]अद्वयानन्दरूपेण व्याप्तोऽहं वै जगत् त्वयम् ।
ब्रह्मादिकीटपर्यन्ताः प्राणिनो मयि कल्पिताः ॥ १४ ॥
बुद्बुदादिविकारान्तस्तरङ्गः सागरे यथा ।
तरङ्गस्थं द्रवं सिन्धुर्न वाञ्छति यथा तथा ॥ १५ ॥
विषयानन्दवाञ्छा मे मा भूदानन्द[3]रूपतः ।
दारिद्र्याशा यथा नास्ति संपन्नस्य तथा मम ॥ १६ ॥
ब्रह्मानन्दे निमग्नस्य विषयाशा न तद्भवेत् ।
विषं दृष्ट्वाऽमृतं दृष्ट्वा विषं त्यजति बुद्धिमान् ॥ १७ ॥
आत्मानमपि दृष्ट्वाऽहमनात्मानं त्यजाम्यहम् ।
घटावभासको भानुर्घटनाशे न नश्यति ॥ १८ ॥
देहावभासकः साक्षी देहनाशे न नश्यति ।
न मे बन्धो न मे मुक्तिर्न मे शास्त्रं न मे गुरुः ॥ १९ ॥
मायामात्रविकासत्वान्मायातीतोऽहमद्वयः ।
प्राणाश्चलन्तु तद्धर्मैः कामैर्वा हन्यतां मनः ॥ २० ॥

[1] रज्जुसत्तैव—अ १, अ २. रज्जुसर्पैव—उ.
[2] अद्वयब्रह्म—क. अद्वयं ब्रह्म—अ १, अ २. [3] रूपकः—उ १,

आनन्दबुद्धिपूर्णस्य मम दुःखं कथं भवेत् ।
आत्मानमज्ञसा वेद्मि क्काप्यज्ञानं पलायितम् ॥ २१ ॥
कर्तृत्वमद्य मे नष्टं कर्तव्यं वाऽपि न क्वचित् ।
ब्राह्मण्यं कुलगोत्रे च नामसौन्दर्यजातयः ॥ २२ ॥
स्थूलदेहगता एते स्थूलाद्भिन्नस्य मे न हि ।
क्षुत्पिपा[1]साऽऽन्ध्यबाधिर्यकामक्रोधादयोऽखिलाः ॥ २३ ॥
लिङ्गदेहगता एते ह्यलिङ्गस्य न विद्यते ।
जडत्वप्रियमोदत्वधर्माः कारणदेहगाः ॥ २४ ॥
न सन्ति मम नित्यस्य निर्विकारस्वरूपिणः ।
उलूकस्य यथा भानुरन्धकारः प्रतीयते ॥ २५ ॥
स्वप्रकाशे परानन्दे तमो मूढस्य जायते ।
चक्षुर्दृष्टिनिरोधेऽभ्रैः सूर्यो नास्तीति मन्यते ॥ २६ ॥
तथाऽज्ञानावृतो देही ब्रह्म नास्तीति मन्यते ।
यथाऽमृतं विषाद्भिन्नं विषदोषैर्न लिप्यते ॥ २७ ॥
न स्पृशामि जडाद्भिन्नो जडदोषान् प्रकाशतः ।
स्वल्पाऽपि दीपकणिका बहुलं नाशयेत्तमः ॥ २८ ॥
स्वल्पोऽपि बोधो [2]महतीमविद्यां नाशये[3]त्तथा ।
कालत्रये यथा सर्पो रज्जौ नास्ति तथा मयि ॥ २९ ॥

[1] सान्ध—क, अ १, अ २, उ १.
[2] महति बहुलं—क, अ २. [3] ततः—उ,

अहंकारादिदेहान्तं जगन्नास्त्यहमद्वयः ।
चिद्रूपत्वान्न मे जाड्यं सत्यत्वान्नानृतं मम ॥ ३० ॥
आनन्दत्वान्न मे दुःखमज्ञानाद्भाति सत्यवत् ।

अथ मननप्रकारमाह—**विवेकेति** ॥ ११–१९ ॥ **तद्धर्मैः** उच्छ्वास-निश्वासैः ॥ २०–२१ ॥ मम देहत्रयविलक्षणतो देहत्रयधर्माः न मे सन्तीत्याह —**ब्राह्मण्यमित्यादि** ॥ २२–२५ ॥ यथा **चक्षुर्दृष्टिनिरोधे** ॥२६–३० ॥ एवं मननतः स्वानुभूतिः जायते । स्वानुभूतौ सिद्धायां सर्वापह्नवसिद्धब्रह्ममात्रज्ञान-मुदेति । तज्ज्ञानसमकालं विद्वान् तन्मात्रेण अवशिष्यते । विदेहमुक्तो भवतीत्यर्थः ॥

उपनिषदभ्यासफलम्

आत्मप्रबोधोपनिषदं मुहूर्तमुपासित्वा न च पुनरावर्तते न च पुनरावर्तत ॥ इत्युपनिषत् ॥ ३१ ॥

ग्रन्थतदर्थपठनश्रवणफलं वदन्नुपसंहरति—**आत्मेति** । यथोक्तामात्म-**प्रबोधोपनिषदं मुहूर्तमुपासित्वा** ग्रन्थतोऽर्थतो वा यः पठति सोऽयं ब्रह्मलोकं कैवल्यं वा प्राप्य **न च** कदाऽपि **पुनरावर्तते** । आवृत्तिरादरार्था । **इत्युपनिषच्छब्दः** आत्मप्रबोधोपनिषत्समाप्त्यर्थः ॥

इति द्वितीयः खण्डः

श्रीवासुदेवेन्द्रशिष्योपनिषद्ब्रह्मयोगिना ।
आत्मप्रबोधोपनिषद्व्याख्यानं लिखितं लघु ।
प्रकृतोपनिषद्व्याख्याग्रन्थो नवतिरीरितः ॥

इति श्रीमदीशाद्यष्टोत्तरशतोपनिषच्छास्त्रविवरणे द्विचत्वारिंशत्संख्यापूरकं आत्मप्रबोधोपनिषद्विवरणं सम्पूर्णम्

एकाक्षरोपनिषत्

सह नाववतु—इति शान्तिः

सर्वात्मकतया नारायणस्तुतिः

एकाक्षरं त्वक्षरे[1]तोऽसि [2]सोमे [3]सुषुम्नया चेह दृढी [4]न एकः ।
त्वं [5]विश्वभूर्भूतपतिः पुराणः पर्जन्य एको भुवनस्य गोप्ता ॥१॥
विश्वे निमग्नः पदवीः कवीनां त्वं जातवेदो भुवनस्य नाथः ।
अजातमग्रे स हिरण्यरेता यज्ञस्त्वमेवैकविभुः पुराणः ॥ २ ॥
प्राणः प्रसूतिर्भुवनस्य योनिर्व्याप्तं त्वया एकपदेन विश्वम् ।
त्वं [6]विश्वभूत्योनि[7]परा[8]सु गर्भे कुमार एको विशिखः सुधन्वा ॥
वितत्य बाणं [9]तरुणार्कवर्ण [10]व्योमान्तरे भासि हिरण्यगर्भः ।
भासा त्वया व्योम्नि कृतः सुताक्ष्यस्त्वं वै कुमारस्त्वमरिष्टनेमिः ॥
त्वं वज्रभृद्भूतपतिस्त्वमेव क्रामः प्रजानां निहितोऽसि [11]सोमे ।
स्वाहा स्वधा यच्च वषट् करोति रुद्रः पशूनां गुहया [12]निरुद्धः ॥५॥

[1] त्रास्ति—अ. [2] सोम—अ १. [3] सुषुम्नाया—अ.
[4] स—अ. [5] विश्वभूभू—अ, अ १. [6] विश्वभूर्यो—अ.
[7] परोसि—अ. परांसु—अ १. [8] स्वग—क, अ २. [9] तरुणाक्ष—अ १.
[10] योमा—अ १, क. [11] सोम—उ. [12] निमग्नः—क, अ, अ २.

धाता विधाता पवनः सुपर्णो विष्णुर्वराहो रजनी रहश्च ।
भूतं भविष्यत्प्र[1]भवः क्रियाश्च कालः क्रमस्त्वं परमाक्षरं च ॥६॥
ऋचो यजूंषि प्रसवन्ति वक्त्रात् सामानि सम्राड्सुरन्तरिक्षम् ।
त्वं यज्ञनेता हुतभुग्विभुश्च [2]रुद्रास्तथा दैत्यगणा [3]वसुश्च ॥ ७ ॥
स एष देवोऽम्बरयानचक्रे [4]अन्येऽभ्यतिष्ठेत तमो [5]निरुन्ध्यः ।
हिरण्मयं यस्य विभाति सर्वं व्योमान्तरे रश्मिमिमं सुनाभिः ॥
स सर्ववेत्ता भुवनस्य गोप्ता नाभिः प्रजानां निहिता जनानाम् ।
प्रोता त्वमोता विचितिः क्रमाणां प्रजापतिश्छन्दमयो विगर्भः ॥
सामैश्चिदन्तो विरजश्च बाहुं हिरण्मयं वेदविदां वरिष्ठम् ।
यमध्वरे ब्रह्मविदः स्तुवन्ति सामैर्यजुर्भिः ऋतुभिस्त्वमेव ॥१०॥
त्वं स्त्री पुमांस्त्वं च कुमार एकस्त्वं वै कुमारी ह्यथ भूस्त्वमेव ।
त्वमेव धाता वरुणश्च राजा त्वं [6]वत्सरोऽयम एव सर्वम् ॥११॥
मित्रः सुपर्णश्चन्द्र इन्द्रो वरुणो रुद्रस्त्वष्टा विष्णुः सविता
गोपतिस्त्वम् ।
त्वं विष्णुर्भूतानि [7]तु त्रासि [8]दैत्यात्त्वयाऽऽवृतं [9]जगदुद्भवगर्भः ।
त्वं भूर्भुवः स्वस्त्वं हि स्वयंभूरथ विश्वतोमुखः ॥ १२ ॥

[1] सवः—अ.
[2] रुद्र—अ.
[3] विभुश्च—क, अ २.
[4] अन्यो—अ, अ १.
[5] निरुन्ध्य—अ, अ १.
[6] वत्सरोग्निर्यम—अ, अ १, अ २, क.
[7] कुत्रासि—अ १, अ २, क.
[8] दैत्यांस्त्वया—अ, अ १.
[9] न विदुर्भवगर्भम्—अ.

एकाक्षरपदारूढं सर्वात्मकमखण्डितम् ।
सर्ववर्जितचिन्मात्रं [1]त्रिपान्नारायणं भजे ॥

इह खलु कृष्णयजुर्वेदप्रविभक्तेयं एकाक्षरोपनिषत् सर्वात्मभावनाप्रकटनव्यग्रा वस्तुतो निष्प्रतियोगिकब्रह्ममात्रपर्यवसन्ना विजृम्भते । अस्याः स्वल्पग्रन्थतो विवरणमारभ्यते । श्रुतिर्नानादृशामनानापदारोहाय सर्वात्मकतया भगवन्तं स्तौति—**एकाक्षरमि**त्यादिमन्त्रैः । क्षरप्रपञ्चारोपाधिकरणे **अक्षरे** उमया सहिते **सोमे** परमेश्वरे **सुषुम्नया** सुषुम्नामार्गेण च इह सहस्रारचक्रे प्रत्यगभेदेन ध्याते यतो **दृढीनः** सत्तामात्र एक एव परमात्मा अवशिष्यते **अतो** हे भगवन् यत् स्वाज्ञादिदृष्टिमोहे सत्यसति एकरूपेण न क्षरते तत्त्वेकाक्षरं परमाक्षरं त्वमसि, परमार्थदृष्टेः सर्वापह्नवसिद्धनिष्प्रतियोगिकब्रह्ममात्रतया भातत्वात्, "यदक्षरं परं ब्रह्म" इति, "अक्षरं परमं ब्रह्म त्रिपरिच्छेदवर्जितं" इति श्रुतेः स्मृतेश्च । य एवं निर्विशेषचिन्मात्रतया भातः स त्वं यदि स्वाज्ञदृष्ट्या विश्वं विभाति तदा त्वं **विश्वभूः भूतपतिः पुराणः**, स्वकार्यापेक्षया विश्वसृजश्चिरन्तनत्वात् । अयमेक एव **पर्जन्यो** भूत्वा वृष्ट्यात्मना **भुवनस्य गोप्ता** भवति ॥ १ ॥ किञ्च—**विश्व** इति । **विश्वे** विश्वस्मिन् त्वं जीवरूपेण **मन्मोऽसि कवीनां पदवीः** दृष्टीः आश्रित्य **त्वं जातवेदो** विराट् भूत्वा निखिलभुवनस्य **नाथो** भवसि । यस्त्वमजातं ब्रह्मासि **स** त्वं **हिरण्यरेता** वह्निः **यज्ञश्च** भवसि । विश्वाधिकरणात्मना त्वमेक **एव विभुः** ॥ २ ॥ त्वं सूत्रात्मना जगत्प्रसूतिः मुख्यप्राणोऽसि "पादोऽस्य विश्वा भूतानि" इति । येन त्वया एकपदेन विश्वं व्याप्तं स त्वं **भुवनस्य योनिरसि** । किञ्च—त्वमिति । सूत्रात्मना त्वं **विश्वभूत्योनिरित्यत्र** विसर्गलोपः । विश्वस्य भूतिः विश्वस्य योनिश्चेति विश्वभूत्योनिः स चासौ परासुः मुख्यप्राणश्चेति विश्वभूत्योनिपरासुः गर्भे यस्य सः **विश्वभूत्योनिपरासुगर्भो** विष्णुः तस्मिन् **कुमार** एक एव जातोऽसि जगच्चक्रनिर्वाहकत्वात् । किंविशेषणविशिष्ट इत्यत्र **करधृतविशिखः** शिलीमुखः **सुधन्वा** च ॥ ३ ॥ बाह्यन्तःकरणात्मकधनुर्बाण-

[1] नारायणपदं—क, अ २.

धरो भूत्वा तत्र **तरुणार्कवर्ण** बाणमन्तःकरणं **वितत्य** स्वसृष्टप्राणिपटलहृदयव्यापकं हृत्वा यः सूत्रात्मना **व्योमान्तरे** मायाकार्यप्राणिपटलान्तरे **भासि** स त्वं **हिरण्यगर्भोऽसि** । किञ्च—**भासेति** । हे स्वामिन् **त्वया** अधिष्ठितेन **भासा** वेगनिर्जितः **सुताक्ष्यः** सूर्यो व्योम्नि **कृतः** सर्वप्राणिचक्षुरिन्द्रियानुग्राहको दृश्यते । स्कन्दात्मना **त्वं वै कुमारः**, वैनतेयात्मना **त्वमरिष्टनेमिः** ॥ ४ ॥ किञ्च—इन्द्रात्मना त्वं **वज्रभृत्** रुद्रात्मना **भूतपतिस्त्वमेव** सोमे स्वर्गादिवाच्यचन्द्रलोके **प्रजानां निहितः** सन्निहितः **कामः** कामफलरूपोऽसि । किञ्च—**स्वाहेति** । **यच्च** यदुद्दिश्याध्वरे ऋत्विग्गणो **वषट्करोति** स त्वं देवपितृतृप्तिहेतुः **स्वाहा स्वधाऽसि** । यः **पशूनां गुहया** गुहायां अन्तर्याम्यात्मना तद्वृत्तिसहस्रप्रवृत्तिनिवृत्तिकर्मणि **निरुम्भो** निरुद्विग्नो भवसि स त्वं भक्तभवरोगद्रावक**रुद्रोऽसि** ॥ ५ ॥ किञ्च—**धातेति** । प्राणधारणजीवात्मना **धाताऽसि** विश्वसृगात्मना **विधाताऽसि** । **वराहो** भूवराहः । **क्रमः** गतिः । वस्तुतः **परमाक्षरं चासि** ॥ ६ ॥ किञ्च—**ऋच** इति । यस्य **वक्त्रात् ऋचो यजूंषि सामानि** च **प्रसवन्ति** प्रभवन्ति सः त्वं सम्यक् राजत इति **सम्राट्** । **रुद्रा** एकादशसंख्याकाः ॥ ७ ॥ किञ्च—**स एष** इति । यो दैत्यवस्वादिरूपी भवति **स एष देवो** भगवान् **अम्बरयानचक्रे** सूर्यमण्डले तदन्यप्रदेशे जीवकदम्बे च **तमो निरुन्ध्यः** स्वाज्ञानतजं तमो ग्रसन् **अभ्यतिष्ठेत** अभितिष्ठसि, यस्य विराजो हृदयव्योमान्तरे ब्रह्माण्डगर्भिणी **सुनाभिः** माया विद्यते, सूर्यादिगतं **इमं रश्मिजालं** यदंशजमाहुः, यस्यांशजं जगत् **सर्वं हिरण्मयं विभाति** ॥ ८ ॥ यः **प्रजानां जनानां** चरस्थिराणां जीवाधाररूपिणी **नाभिर्भवति** विष्ण्वात्मना **स सर्ववेत्ता भुवनस्य गोप्ता** रक्षको भवति । किञ्च—प्रोतेति । अन्तर्याम्यात्मना त्वमेव **प्रोतोताच** भवसि । त्वमेव **क्रमाणां** नानागतीनां **विचितिः** विश्रान्तिः भवसि । यस्त्वं चतुर्मुखात्मना **विगर्भो** विष्णुगर्भोऽसि स त्वं **छन्दोमयांगः प्रजापतिरसि** ॥ ९ ॥ यस्य **चित्ते विरजोऽन्तर्निश्चयः** ऋग्यजुस्सामैरपि ज्ञातुं न शक्यः तं त्वां सहस्रबाहुं **हिरण्मयं** ज्योतिर्मयं **वेदविदां वरिष्ठं** ब्रह्मविदो जानन्ति । किञ्च—**यमध्वर** इति । **यमध्वरे ब्रह्मविदो** वेदविदः ऋग्यजुःसामैः **स्तुवन्ति** स त्वं नानाक्रतुभिः

आराध्यो भवसि ॥ १० ॥ **स्त्रीपुरुषकुमारकुमारीभेदेन** त्वमेव वर्तसे **वरुणश्च** । **राजा** समुद्रराजः, **अर्यम** अर्यमा रविः ॥ ११ ॥ **त्वष्टा** प्रजापतिः, **गोपतिः** पशुपतिः । त्वं सदा दैत्यवर्गात् **भूतानि त्रासि** त्रायसे । यतः त्वं **जगदुद्भवगर्भो** विष्णुरसि अतः सच्चिदानन्दवपुषा **त्वया** अनृतजडदुःखात्मकं अविद्यापदतत्कार्यजातं **आवृतं** भूरादित्रैलोक्यम्। स्वयम्भूः विराट् च त्वमेवासि । न हि त्वत्तोऽन्यद्विश्वभूरित्यादिविश्वतोमुख इत्यन्तशब्दतद्वाच्यमस्ति । वस्तुतः परमार्थदृष्ट्या हे भगवन् त्वं स्वातिरिक्तकालनापह्नवसिद्धनिष्प्रतियोगिकब्रह्ममात्रतया अवशिष्यसे ॥ १२ ॥

सर्वात्मज्ञानफलम्

य एवं नित्यं वेदयते गुहाशयं प्रभुं पुराणं सर्वभूतं हिरण्मयम् ।
[1]हिरण्मयं बुद्धिमतां परां गतिं स बुद्धिमान् बुद्धिमतीत्य
तिष्ठति ॥ इत्युपनिषत् ॥ १३ ॥

एवं ज्ञानफलमाह—य एवमिति । एवं यो वेद **सः बुद्धिमान्** सम्यज्ज्ञानी **बुद्ध्युपलक्षितस्वाविद्यापदतत्कार्यजातमस्ति** नास्तीति विभ्रममतीत्य **तिष्ठति,** विदेहमुक्तो भवतीत्यर्थः ॥ **इत्युपनिषच्छब्दः** एकाक्षरोपनिषत्समाप्त्यर्थः ॥ १३ ॥

श्रीवासुदेवेन्द्रशिष्योपनिषद्ब्रह्मयोगिना ।
लिखितं स्याद्विवरणमेकार्णस्य स्फुटं लघु ।
एकार्णविवृतिग्रन्थश्चत्वारिंशत् प्रकीर्तितः ॥

इति श्रीमदीशाद्यष्टोत्तरशतोपनिषच्छास्त्रविवरणे एकोनसप्ततिसंख्यापूरकं
एकाक्षरोपनिषद्विवरणं सम्पूर्णम्

---

[1] द्वितीयं "हिरण्मयं" लुप्तम्—अ, अ १, अ २.

कौषीतकिब्राह्मणोपनिषत्

वाङ् मे मनसि—इति शान्तिः

प्रथमोऽध्यायः

क्रतुसामान्यस्य गौणमुख्यफलजिज्ञासा

चित्रो ह वै गार्ग्यायणिर्यक्ष्यमाण आरुणिं वव्रे। स॰ ह पुत्रं श्वेतकेतुं प्रजिघाय याजयेति। तं हासीनं पप्रच्छ गौतमस्य पुत्रास्ते संवृतं लोके यस्मिन्नाधास्य[1]स्यहो बोद्धा लोके यास्यसीति। स होवाच नाहमेतद्वेद हन्ताचार्यं पृच्छानीति। स ह पितरमासाद्य पप्रच्छेति। मा प्राक्षीत् कथं [2]ब्रवाणीति स होवाचाहमप्येतन्न वेद सदस्येव वयं स्वाध्यायमधीत्य हरामहे यन्नः [3]परे ददत्येह्युभौ गमिष्याव इति ॥ १ ॥

[1] स्यमहो—अ १, अ २, क, उ १.
[2] ब्रुवा—अ, अ १, अ २, क.
[3] परो—क.

श्रीमत्कौषीतकीविद्यावेद्यप्रज्ञापराक्षरम् ।
प्रतियोगिविनिर्मुक्तब्रह्ममात्रं विचिन्तये ॥

इह खलु ऋग्वेदप्रविभक्तेयं भगवती कौषीतक्युपनिषत् । अस्याः तावदैतरेयोपनिषद्विवरणप्रकटितोपोद्घातादि समानम् । यथोक्ताधिकारिणामपरब्रह्मप्रकाशनद्वारा परब्रह्म प्रकाशयितुं प्रवृत्तेयं कौषीतक्युपनिषत् । अस्याः संक्षेपतो विवरणमारभ्यते । गार्ग्यायण्यारुणीन्द्रप्रतर्दनप्रश्नप्रतिवचनरूपेयमाख्यायिका वक्ष्यमाणापरपरब्रह्मविद्यास्तुत्यर्था । **चित्रो ह वा** इति । नामतः **चित्रः** गर्गप्रपौत्रो **गार्ग्यायणिः** इत्यत्र गर्गशब्दात् गोत्रे यञि ततो यूनि फक् ततोऽपत्ये इञ् । गार्ग्यायणिस्तु कर्मब्रह्मयाथात्म्यवित् स्वयं कृतार्थोऽपि लोकोन्मार्गनिरसनाय महाक्रतुना **यक्ष्यमाणः** सन् अरुणस्यापत्यम**ारुणिं वत्रे** भवता अयं क्रतुवरो निर्वर्तितव्य इति । **स** हारुणिः स्वपुत्रं श्वेतकेतुमवलोक्य हे वत्स एतं क्रतुवरं **याजयेति प्रजिघाय** आज्ञापयित्वा स्वाश्रमं प्रति गतवान् । एवं पित्रा अनुज्ञातः क्रतुं निर्वर्तयामीति स्थितवान् । तदानीं गार्ग्यायणिस्तु तदियत्तापरिज्ञानाय हे **गौतमस्य पुत्रेति** सम्बोध्य **तं** हासीनं श्वेतकेतुं पप्रच्छ । **हवा** इति वृत्तार्थस्मरणार्थौ । किमिति ? **लोके** तावत् क्रतुजातं सामान्यविशेषफलसंवृतमास्ते । तत्र **यस्मिन्** सामान्यफलके विशेषफलके वा त्वं **आधास्यसि** आधातुं याजयितुं इच्छसि **अहो** श्वेतकेतो **लोके** तावन्महान्तः क्रतुसमुदायसामान्यविशेषफलेयत्तां—**बोद्धेति** वर्णव्यत्ययः छान्दसः—तदियत्तां बुद्ध्वा स्वयं यजन्ति, परान् याजयन्ति वा । तत्र किं त्वं क्रतुसामान्यफलेयत्तां पुनरावृत्तिलक्षणां जानासि, उत त्वं अं अकारार्थं अपुनरावृत्तिलक्षणफलविशेषं वैष्णवं पदं जानासि । एवं विभागशः क्रतुवरतत्फलेयत्तां बुद्ध्वा याजयिष्यसि चेत् तदनुरूपफलं **यास्यसि**, नचेदेवं विपरीतफलभागसीति गार्ग्यायणिनैवमाक्षिप्तः स्वेयत्तां **स होवाच** । किमिति ? **नाहं** त्वदुपन्यस्तमेतदर्थं वेद । ततः किं त्वया कर्तव्यमित्यत्र **हन्ताचार्यं पृच्छानीति** गार्ग्यायणिं प्रत्युक्त्वा स्वाश्रमस्थपितरमासाद्य गार्ग्यायण्युक्तार्थं पप्रच्छेति । एवं पृष्टवन्तं प्रत्याह—**स होवाचेति** । यदेतदर्थमहमपि न वेद तत्ते **कथं ब्रवाणि** अतो मामेवं **मा प्राक्षीत्**—मा प्राक्षीरिति पुरुषव्यत्ययः छान्दसः ।

तदुक्तार्थाज्ञाने हेतुमाह—**सदसीति** । स्वाचार्यपरिसरवर्त्यन्तेवासिसदस्येव **वयं स्वाध्यायमधीत्य** स्थितवन्तः । तदानीं **नोऽस्मभ्यं परे** स्वाचार्याः तत्तुल्या वा **यद्रहस्यं ददति** उपदिशन्ति **तदेव हरामहे** गृहीतवन्तः, नेतोऽधिकम् । अतो **वत्स एहि उभावपि तन्निकटं गमिष्यावः** इति पिता पुत्रमुवाचेत्यर्थः ॥ १ ॥

गौणफलं—स्वर्गप्राप्तिः पुनरावृत्तिश्च

स ह समित्पाणिश्चित्रं गार्ग्यायणिं प्रतिचक्राम उपायानीति । तं होवाच ब्रह्मार्घोऽसि गौतम यो मामुपागादेहि त्वा [1]ज्ञपयिष्यामीति । स होवाच ये वै के चास्माल्लोकात् प्र[2]यन्ति चन्द्रमसमेव ते सर्वे गच्छन्ति । तेषां प्राणैः पूर्वपक्ष आप्यायते । अथापरपक्षे न प्रजनयति । एतद्वै स्वर्गस्य लोकस्य द्वारं यश्चन्द्रमास्तं यत् प्रत्याहत[3]मति सृजते । य एनं प्रत्याहतमिह वृष्टिर्भूत्वा वर्षति । त इह कीटो वा पतङ्गो वा शकुनिर्वा शार्दूलो वा सिंहो वा मत्स्यो वा परश्वा वा पुरुषो वाऽन्यो वैतेषु स्थानेषु प्रत्याजायते यथाकर्म यथाविद्यम् । तमागतं पृच्छति कोऽसीति । तं प्रतिब्रूयात् ॥ २ ॥

ततः किं जातं इत्यत आह—**स** हेति । गौतमोऽयमारुणिः श्वेतकेतुना सह **समित्पाणिः** सन् सर्ववित्त्वेन विख्यातं **चित्रं गार्ग्यायणिं** मुनिवरं विधिवत् **प्रतिचक्राम** प्रतिगतवान् । किमिति ? क्रतुसामान्यगौणमुख्यफलेयत्ताप्रकाशकविद्यानिमित्तं भवन्निकटे ब्रह्मचर्यमुपायानीति । गौतमेन विज्ञापितो मुनिः तं

[1] ज्ञापं—अ २, क. [2] यान्ति—अ २, क. [3] मिति—अ, अ २, क.

होवाच । किमिति ? हे गौतम यो मां विद्यार्थमुपागात्—उपागाः, पुरुषव्यत्ययः—प्राप्तवान् स त्वं ब्रह्मार्घोऽसि ब्राह्मणश्रेष्ठोऽसि । यत एवं अतः त्वं एहि आस्व क्रतुगौणादिफलप्रकाशकविद्यां त्वां ज्ञपयिष्यामीति प्रतिज्ञापूर्वकं स होवाच । किमिति ? गौणमुख्यफलयोः आदौ गौणफलप्रकाशकविद्यामाचष्टे —ये वा इति । लोकेऽस्मिन् ये वै केवलकर्मिणः, "कुर्वन्नेवेह कर्माणि जिजीविषेत्" इति श्रुत्यर्थपर्यालोचनया सकामाः सन्तः कर्म कृत्वा चरमदशायां अस्मात् लोकात् प्रयन्ति ते सर्वे सकामकर्मिणः चन्द्रमसं स्वर्गाख्यं धाम गच्छन्ति । यावत् कर्मफलक्षतिः तावत् तत्रोषित्वा ततः पुनः निवर्तन्त इत्याह—तेषामिति । तेषां स्वर्गिणां प्राणैः इन्द्रियव्यापारैः पूर्वपक्षः स्वर्गः तत्रत्यभोगो वा आप्यायते भुज्यते । अथ एवमुपभोगेन स्वर्गवासनिमित्तक्षयानन्तरं तत् भुक्तशेषकर्मैव इतः परं मे क्षयिष्णु स्वर्गनरकहेतुनानाविधकर्मकरणं माऽस्त्विति तीव्रतरसंवेगो ह्यपरपक्षः तस्मिन् अपरपक्षे गतागतहेतुकुत्सितकर्मवैराग्ये मतिं न कदाऽपि जनयति, पुनःपुनः कर्मतत्फलवासनावासितो भवति, "यावत्सम्पातमुषित्वाऽथैतमेवाध्वानं पुनर्निवर्तन्ते" इति, "गतागतं कामकामा लभन्ते" इति, "ततः शेषेण जायते" इति, श्रुतिस्मृतिभ्यः । यश्चन्द्रमाः देवान्नभूतः "तद्देवानामन्नं तं देवा भक्षयन्ति" इति श्रुतेः यच्चन्द्रलोकप्रापकं कर्म चान्द्रमसं एतद्वै स्वर्गस्य लोकस्य द्वारम् । तत्र क्षीणकर्मा योऽर्वाक् पतनाभिमुखो भवति तं यत् यस्मात् प्रत्याहृतं स्वर्गात् च्युतं तच्छेषकर्मानुरोधेन विधिः अतीव सृजते सृजति । यो विधिरेनं प्रत्याहृतमिह यथोक्तकाले तेन साकं स्वयं वृष्टिर्भूत्वा वर्षति । ते वर्षबिन्दवः इह भुवं प्रविश्य व्रीहियवाः ओषधयस्तिलमाषा इत्यादिभावभाविता भवन्ति । तेषां जातिः पुनः केन रूपेण स्यादित्यत्र तत्तज्जन्तुकर्मानुरोधेन कीटो वा पतङ्गो वा इत्याद्यन्यो वा इत्यन्तग्रहणं चतुरशीतिलक्षयोन्युपलक्षणार्थम् । अयं क्षीणकर्मा यथाकर्म यथाविद्यं एतेषु नानायोनिस्थानेषु अन्यतमे प्रत्याजायते । तं एवमूर्ध्वादधःप्रदेशमागतं कोऽसीति यः कश्चन पृच्छति चेत् तं प्रत्ययं वक्ष्यमाणप्रकारेण ब्रूयात् ॥ २ ॥

मुख्यफलं—ब्रह्मलोके ब्रह्मभावापत्तिः

विचक्षणाद्दतवो रेत आभृतं पञ्चदशात् प्रसूतात् पित्र्या पतत्।
स्तनमा पुंसि कर्तयेर[1]यध्वं पुंसा कर्त्रा मातरि [2]मा निषिक्तः।
स जायमान उपजायमानो द्वादश त्रयोदश उपमासः।
द्वादशत्रयोदशेन पित्रा संतद्विदेऽहम्।
तव ऋतवो मर्त्यव [3]आरभध्वम्।

तेन सत्येन तपसर्तुरस्म्या[4]र्तवोऽस्मि कोऽसि त्वमसीति [5]तमतिसृजते। तमेतं देवयजनं पन्थानमासाद्याग्निलोकमागच्छति। स वायुलोकं स वरुणलोकं स आदित्यलोकं स इन्द्रलोकं स प्रजापतिलोकं स ब्रह्मलोकम्। तस्य ह वा एतस्य ब्रह्मलोकस्यारो ह्रदो मुह्[6]र्तोऽन्वेष्टिहा विरजा नदील्यो वृक्षः सालज्जं संस्थानमपराजितमायतनमिन्द्रप्रजापती द्वारगोपौ विभु प्रमितं विचक्षणसंध्यमितौजाः पर्यङ्कः प्रिया च मानसी प्रतिरूपा च चाक्षुषी पुष्पाण्यादायावयतौ [7]वै च जगन्यम्बा चाम्बावयवाश्चाप्सरसोऽम्बया नद्यः। तमित्थंविधा [8]गच्छन्ति। तं ब्रह्मा हाभिधावत मम यशसा विरजां पालयन्नदीं प्रापं न वाऽयं [9]जिगीष्यतीति ॥ ३ ॥

[1] युध्वं—अ, अ १, अ २, उ १.
[2] "मानिषिक्तः" इत्ययं व्याख्याऽनुसारी पाठः "मा सिषिक्तः" इति तु कोशेषु वर्तते.
[3] आभरध्वं—अ १, उ, उ १. [4] वर्तोऽस्मि—उ.
[5] तमिति—अ, अ १, उ १, क. [6] तान्ये—अ, अ १, क. तांने—अ २.
[7] चैव—क. [8] गच्छति—अ १, उ. [9] जिगि—अ, उ १, क.

कस्तत्प्रकार इत्याशङ्क्य तदुत्तरच्छलेन महाक्रतुविशेषफलेयत्तां प्रकटयति—**विचक्षणादिति** । कर्मज्ञानाक्षान्तःकरणप्राणभेदेन **पञ्चदशसंख्याऽन्वितात्** स्वाज्ञानतः **प्रसूतात्** बन्धमोक्षसाधनानुष्ठान**विचक्षणात्** लिंगशरीरात् तत्सम्पृक्तोपाधिकहिरण्यगर्भात् **ऋतवः** संवत्सरावयवाः, ऋतूनां संवत्सराद्यमानसामान्यात्, तत्तदृतुनिर्वर्त्यव्रीहियवौषधिवनस्पत्यादिभेदभिन्नं सर्वप्राण्यदनयोग्यं अन्नजातं भुवि सञ्जातम् । यदेवं सञ्जातं तदन्नं **पुंसा कर्त्रा, पित्र्येति** यकारः छान्दसः, तद्भाविपित्रा कालकर्मसंयोगात् अद्यमानं सत् **कर्तरि** कीटाद्या[द्ये] **पुंसि मातरि** योषिति, न ह्यूर्ध्वरेतसि बाले स्थविरे वा, यूनि पुंस्येव विद्यमानस्तनोपलक्षितजठरप्रदेशं **प्रत्यापतत्** । ततः तज्जाठराग्निना पच्यमानं सत् **रेत आभृतं** रेतोरूपेण परिणतं अभूत् । ततः किमित्यत आह—**ईरयध्वमिति** ।

ऋतौ स्वभार्यागमनं चरध्वं वंशवृद्धये ।
न ब्रह्मचर्यहानिः स्यान्मद्वाक्यं शृणुत प्रजाः ॥

इति प्राजापत्यस्मृत्यनुरोधेन प्रजापतिनैवमाज्ञप्ताः प्रजाः । किमिति ? **स्वसन्तद्विदे** सन्ततिवृद्धये—विदेः वृद्ध्यर्थत्वात्—ऋतुमत्स्वभार्यायां मिथुनकर्म **ईरयध्वं** चरध्वं इति । एवं अद्यापि सन्तो गार्हस्थ्येऽपि ब्रह्मचर्यं चरन्ति । तथा च स्मर्यते—" ऋतौ भार्याऽभिगमनं ब्रह्मचर्यं विदुर्बुधाः " इति । यः पितृजठरस्थरेतउपाधिको विज्ञानात्मा स पित्रा ऋतुमत्यां स्वभार्यायां उचितकाले **निषिक्तः** सन् स्वमातृजठरे " त्रयोविंशत्यहोरात्रमार्धमासमुदाहृतम् " इति स्मृतिसिद्ध**द्वादशत्रयोदशमासोपमास**पर्यन्तमुषित्वा अथ कश्चित् यथोक्तद्वादशमासेन निर्वर्तितेन **जायमानः** कश्चित् त्रयोदशमासेन **वोपजायमानो** विज्ञानात्मा क्रमेण गर्भाधानादिचतुश्चत्वारिंशत्संस्कारसंस्कृतो विवेक्यपि भवति । " तं आगतं पृच्छति कोऽसीति तं प्रतिब्रूयात् " इति पूर्वखण्डान्तसूत्रितवाक्योत्तरमाह । **कोऽसि त्वमसीति** यः कश्चित् यदि पृच्छति तदा **तं** प्रत्येवमुत्तरं **सृजते** कल्पयते वदति । किमिति ? यत् स्वेन आचरितं **तेन सत्येन तपसा** सम्यगालोच्य यतोऽहं वसन्ताद्यृतुनिर्वर्त्यान्नपरिणतकोशविशिष्टः अतोऽहं **ऋतुरस्मि**

आर्तवोऽस्मि इति स्थूलशरीरोपाधिको विज्ञानात्माऽस्मीत्यर्थः । एवं विज्ञानात्मानमुपलभ्य अपुनरावृत्तिलक्षणवैष्णवपदप्रापकक्रतुमुख्यफलेयत्ताप्रकाशकब्रह्मविद्या वक्तव्येति परमदयावती श्रुतिरेवमाह । किमिति ? हे स्वाङ्गलोकाः हन्तेदानीं यूयं ऋतुनिर्वर्त्यान्नपरिणतषड्भावविकृतिग्रस्तदेहविशिष्टत्वाद्**तवो मर्त्यवो** मर्त्याः सञ्जाताः । यस्मात् एवं **तस्मात्** यूयं आर्तवमरणधर्मवद्देहदारादावात्मात्मीयाभिमतिमुत्सृज्य निष्कामधिया ज्ञानकर्मसमुच्चयानुष्ठानं, तत्रापि यद्यलंबुद्धिः तदा स्वातिरिक्ताविद्यापदतत्कार्यापह्नवसिद्धं ब्रह्म निष्प्रतियोगिकस्वमात्रमिति ब्रह्ममात्रज्ञाननिष्ठां वा यूयं **आरभध्वं** झटिति यन्न कुरुतेत्यत्र—"इह चेदवेदीदथ सत्यमस्ति न चेदिहावेदीन्महती विनष्टिः" इति श्रुतेः । एवं असकृच्छ्रुत्वाऽपि केचित् उक्तार्थविमुखाः भवेयुः । तेषां दुर्भगत्वात् तत्र कश्चित् पुरुषधौरेयः साध्यसाधनेषणां विहाय केवलभगवदाराधनधिया ज्ञानकर्मसमुच्चयानुष्ठानं सर्वकर्मसंन्यासपूर्वकं संशयादिपञ्चदोषशान्तिपर्यन्तं यथावद्वेदान्तश्रवणादिं वा कुर्वन् यावदायुषं धरण्यां स्थित्वा यदि समुच्चयानुष्ठाता तदा देहावसानसमये योऽर्चिरादिरिति सर्वत्र प्रसिद्धः **तमेतं देवयजनं देवयानं पन्थानमासाद्याग्निलोकमागच्छति** । क्रमादथ **स वायुलोकं स वरुणलोकं स आदित्यलोकं स इन्द्रलोकं स प्रजापतिलोकं स ब्रह्मलोकं** गच्छति । किंविशेषणविशिष्टोऽयं ब्रह्मलोक इत्यत्र तदियत्तां वर्णयति—**तस्य ह वा एतस्य ब्रह्मलोकस्येति** । ह वा इति सर्वशास्त्रप्रसिद्धिद्योतकः । **तत्रारो** नाम महान् **ह्रदो** वर्तते । तद्दर्शनं आध्यात्मिकादितापत्रयं हरति, "तदैरम्मदीयं सरः" इति श्रुतेः । तत्र **मुहूर्तः** ब्रह्मानुसन्धानकालविशेषः, इष्टिः बाह्यसुखासक्तिः सैवे[वान्वे]ष्टिः तां हन्तीति इ[अन्वे]ष्टिहा । तत्र महावैकुण्ठे **नदी** तु **विरजा** । इल्यो नाम कांक्षितार्थप्रदः कल्पकवृक्षः, "तदश्वत्थः सोमसवनः" इति श्रुतेः । तत्र **संस्थानं** अवस्थानं तु ब्रह्मानुसन्धानेतरव्यापृतौ **सालञ्जं** लज्जान्वितं ब्रह्मानुसन्धानेतरव्यापृतिशून्यं इत्यर्थः । **तदायतनं** स्थानं तु परैः स्वच्छन्दवर्तिभिः केवलकर्मिभिर्वा कदाऽपि जेतुमशक्यमित्यपराजितमित्युक्तम् । सर्वत्र विख्यातेन्द्रप्रजापती तु **द्वारगोपौ** ब्रह्मलोकद्वारपालकौ भवतः । तत् केन निर्मितमित्यत्र **विभुना** व्यापकेन विष्णुना

प्रकर्षेण मितं सम्मितं निर्मितं वेत्यर्थः । तत्र पर्यङ्कः विश्रान्तिसीमा तु प्रत्यक्परचितोः सन्धिः ऐक्यं प्रत्यगभिन्नपरमात्मैवामितौजाः सर्वावभासकज्योतिरेव विश्रान्तिसीमेत्यर्थः । तत्र प्रिया जाया मानस्येव । न तु ग्राम्यभोगयोग्या जाया तत्रास्ति । प्रतिरूपा त्वलंकृतिः चाक्षुषी, तत्रत्यानां नित्यप्रत्यक्षस्वभासालंकृतत्वात् । अम्बया श्रुत्या पुष्पाणि स्वविभक्तमहावाक्यानि आदाय गृहीत्वा अवयतिः अन्तःकरणं तत्र युगपदर्थतः प्रकाशितानि भवन्ति । वैचशब्दतः तत्रत्यानां युगपन्महावाक्यार्थः स्फुरतीति द्योत्यते । ब्रह्मातिरेकेण जगत्तत्कार्यं नेतीति यया गीयते सेयं जगनी ज्ञत्यर्थाऽम्बा प्रणवात्मिका चाम्बावयवाश्च अकाराद्यर्धमात्रान्ता अप्सरसः नद्यो वा । य एवंविधज्ञानकर्मभ्यां ब्रह्मलोकं प्रविष्टः तमेतं ब्रह्मभावमापन्नमारो हृद इत्यादीत्थंविधा गच्छन्ति प्रणवमहावाक्यान्यपि सार्थतस्तं भजन्तीत्यर्थः । यः स्वभावमापन्नः तं अवलोक्य ब्रह्मा विष्णुः शिवो वा हाभिमुख्येन धावत प्रत्युद्गतवान् । किं कुर्वन् ? मम ब्रह्मणो यशसा निरावरणज्ञानेन विरजानदीतुल्यं तदखण्डाकारवृत्तिं परिपालयन् मत्कृपां विना न वाऽयं मद्धाम जिगीष्यति न हि जेतुं पारयतीति केवलकरुणया त्वद्भावं प्रापं प्राप्तवानस्मीत्यर्थः ॥ ३ ॥

ब्रह्मविदुषो ब्रह्मैश्वर्यप्राप्तिः

तं पञ्चशतान्यप्सरसां प्रतिधावन्ति शतं मालाहस्ताः शतमाञ्जनहस्ताः शतं चूर्णहस्ताः शतं वासोहस्ताः शतं [1]फणहस्ताः । तं ब्रह्मालंकारेणालंकुर्वन्ति । स ब्रह्मालंकारेणालंकृतो ब्रह्मविद्वान् ब्रह्मैवाभिप्रैति । स आगच्छत्यारं हृदं [2]तं मनसाऽत्येति । तमृत्वा संप्रतिविदो मज्जन्ति । स आगच्छति मुहूर्तान्विहेष्ठिहास्तेऽस्मादपद्रवन्ति । स आगच्छति विरजां नदीं तां मनसैवात्येति ।

[1] फणा—अ २, क. कणा—मु. [2] तन्मन—अ, अ १, अ २.

तत्सुकृतदुष्कृते धूनुते तस्य प्रिया ज्ञातयः सुकृत[1]मुपयन्त्यप्रिया दुष्कृतम्। तद्यथा रथेन धावयन् रथचक्रे पर्यवे[2]क्षत एवमहोरात्रे पर्यवेक्षते। एवं सुकृतदुष्कृते [3]धूनुते सर्वाणि च द्वन्द्वानि। स एव विसुकृतो विदुष्कृतो ब्रह्मविद्वान् ब्रह्मैवाभिप्रैति ॥ ४ ॥

एवंविदो ब्रह्मैश्वर्यं सविशेषनिर्विशेषब्रह्मवेदनफलं च प्रकटयति—**तमिति**। य एवं विद्यया ब्रह्मलोकं प्रविश्य ब्रह्मभावमापन्नः **तं अप्सरसां पञ्चशतानि प्रतिधावन्ति** अहरहः उपासते। कथं? तत्राप्सरसां **शतं** दिव्यमालाहस्ताः सत्य उपचरन्ति। तथाऽपरं **शतं** अञ्जनं नेत्राकल्पसाधनं, तदेव आञ्जनं यासां हस्तभूषणं ता हि **आञ्जनहस्ताः**। तथा शतं परिमलगन्धचूर्णहस्ताः। तथा **शतं** दिव्यवासोहस्ताः। तथा शतं, फणशब्देन तदाकल्पयोग्याभरणजातं तत्स्मरणीयविविधभोज्यद्रव्यजातं वा, यासां हस्ते अनवरतं फणमस्ति ताः **फणहस्ताः**। एवंविधानि अप्सरसां पञ्चशतानि **ब्रह्मालङ्कारेण तं अलङ्कुर्वन्ति**। **सोऽयं ब्रह्मालङ्कारेण अलङ्कृतो ब्रह्मविद्वान्** यदि निर्विशेषब्रह्मवित् तदा निर्विशेष**ब्रह्मैव अभिप्रैति**, यदि सविशेषब्रह्मवित् तदा तत्रत्यब्रह्मैव अभिप्रैति। अथ **सोऽयं** कदाचित् ब्रह्मस्थानात् बहि**रागच्छति** यदत्र **आरसंज्ञको ह्रदो** वर्तते **तं मनसा अत्येति** अतिशयेनैति अतिक्रामति वा। **तमृत्वा** तं ब्रह्माणं विना **सम्प्रतिविदो मज्जन्ति**, तेन विरजा भवन्ति। ततः **स** विद्वान् **आगच्छति मुहूर्तानुविद्धं** ब्रह्मानुसन्धानयुक्तचित्तमन्विहेष्टिहाः बाह्यतन्निरोधवृत्तिव्यापाराः **ते अस्माद्विदुष अपद्रवन्ति** पलायितुमारभन्ते, विद्वान् निर्विकल्पसमाधिपरवशो भवतीत्यर्थः। **स** विद्वान् यदि कदाचित् बहिश्चित्तः तदा-[तं आ]गच्छति **मनसैव अतिशयेन विरजां नदीं तामेति**। यस्तां दृष्ट्वा स्नाति स्नानतो निर्धूतचित्तमलो भवति, **तत्पुराकृतसुकृतदुष्कृते धूनुते** दोधूयते।

[1] मप—क. [2] क्षेतैव—क. क्षतैव—अ, अ १, अ २, उ.
[3] " धूनुते " इत्येतन्नास्ति—अ, अ १, अ २, क.

प्राणिमात्रस्य यदृच्छया पुण्यपापे सम्भवतः, तेनास्य ब्रह्मभावापत्तिः कुत इत्यत आह—**तस्येति**। **तस्य प्रिया ज्ञातयः** ईश्वरधिया समर्चयन्तः ते तत्कृतसुकृत-जातमुपयन्ति गृह्णन्ति। तदप्रियकारिणस्तु तद्देहकृतदुष्कृतमुपयन्तीत्यनुवर्तते। तेनायं व्याविद्धपुण्यपापो ब्रह्मभावापन्नो भवतीत्यत्र—

प्रियेषु स्वेषु सुकृतमप्रियेषु च दुष्कृतम्।
विसृज्य ध्यानयोगेन ब्रह्माप्येति सनातनम्॥

इति श्रुतेः। कार्यात् कारणमनुमेयं इत्यत्र दृष्टान्तमाह—**यथेति**। **यथा रथेन धावयन्** गच्छन् **रथचक्रे** विद्येत इति **पर्यवेक्षते** निश्चिनोति **तथैवमहोरात्रे** संसृतिरथचक्रस्थानीये **पर्यवेक्षते**। अहोरात्रविभागहेतुस्वाज्ञानाधिकरणाभावे कुतोऽयमहोरात्रादिकल्पनेत्यर्थः। एवं स्वाज्ञानमूलसत्त्वे स्वाज्ञानकार्यसुकृत-दुष्कृते **सर्वाणि च** सुखदुःखादिद्वन्द्वानि च विलसन्ति। तद्धेतुस्वाज्ञानापाये यत्तदधिकरणं तन्निरधिकरणब्रह्ममात्रतया निष्प्रतियोगिकमवशिष्यत इति यो वेद **स एष मुनिः विसुकृतो विदुष्कृतो** भूत्वा यदि निष्प्रतियोगिकं **ब्रह्म** स्वमात्रमिति **विद्वान्** तदा तद्वेदनसमकालं **ब्रह्मैवाभिप्रैति**॥ ४॥

सविशेषब्रह्मविदो विभूतिविशेषलाभः

स आगच्छतील्यं वृक्षं तं ब्रह्मगन्धः प्रविशति। स आगच्छति सालञ्जं संस्थानं तं ब्रह्म स प्रविशति। स आगच्छत्य-पराजितमायतनं तं ब्रह्मतेजः प्रविशति। स आगच्छतीन्द्रप्रजापती द्वारागोपौ तावस्मादपद्रवतः। स आगच्छति विमुप्रमितं तं ब्रह्मयशः प्रविशति। स आगच्छति विचक्षणामासन्दीं सा प्रज्ञा प्रज्ञया हि विपश्यति। स आगच्छत्यमितौजसं पर्यङ्कं तं स प्राणः। तस्य भूतं च भविष्यच्च पूर्वौ पादौ श्रीश्चेरा चापरौ बृहद्रथन्तरे अनूच्ये

भद्रयज्ञायज्ञीये शीर्षण्यमृचश्च सामानि च प्राचीनागानं यजूंषि तिरश्चीनानि सोमांशव उपस्तरणमुद्गीथ उपश्रीः श्रीरुपबर्हणम् । तस्मिन् ब्रह्मास्ते । तमित्थंवित्पादेनैवाग्र आरोहति । तं ब्रह्माह कोऽसीति । तं प्रतिब्रूयात् ऋतुरस्म्यार्तवोऽस्म्याकाशाद्योनेः संभूतो हाव । एतत् संवत्सरस्य तेजोभूतस्य भूतस्य त्वमात्माऽसि यस्त्वमसि सोहमस्मीति । तमाह कोऽहमस्मीति ॥ ९ ॥

सविशेषब्रह्मविदः तत्रत्यविभूतिविशेषमाह—स आगच्छतीति । इल्यं कल्पकवृक्षं प्रति स विद्वानागच्छति । यः स्वनिकटमागतः तं प्रति ब्रह्मगन्धः प्रविशति । ततो यथाव्याख्यातं सालञ्जं संस्थानं प्रति स विद्वानागच्छति । स्वनिकटमागतं स ब्रह्मबोधः प्रविशति । पुनरपराजितमायतनं प्रति स आगच्छति । स्वनिकटमागतं तं ब्रह्मतेजः प्रविशति । यत्रेन्द्रप्रजापती द्वारगोपौ तिष्ठतः तत्र स आगच्छति । अस्मादर्शनात् तावपद्रवतः प्रत्युत्थानादिभिः । यथाव्याख्यातविभुप्रमितं प्रति स आगच्छति । तं ब्रह्म यशः प्रविशति । स्वाज्ञानध्वान्तमोचनविचक्षणां समर्थां आसमन्तात् दीप्यमानामासन्दीं स्वज्ञानरूपिणीं विद्यां प्रति आभिमुख्येन स आगच्छति । सेयं प्रज्ञा, प्रज्ञया हि तमात्मतया पश्यति । यथाव्याख्यातं अमितौजसं पर्यङ्कं प्रति स आगच्छति । तं प्रति मुख्यः प्राणः प्रविशति । यद्वा—नवरत्नरचनात् अमितौजसं सुवर्णपर्यङ्कं पादचतुष्टयविशिष्टं सोपस्करं सः आगच्छति । स्वतल्पनिकटमागतं तं स प्राण आविशति । पर्यङ्कपादचतुष्टयं तत्सोपस्करं वा किमित्यत आह—तस्येति । तस्य पर्यङ्कस्य भूतं च भविष्यच्चेति भूत-भविष्यत्कालौ पूर्वौ पादौ भवतः । श्रीश्च संपत्, रलयोरभेदात् इरा इला धरणी चापरौ पादौ भवतः । बृहच्च रथन्तरं च बृहद्रथन्तरे अनूच्ये सुश्राव्यगीतिस्थानीये भवतः । पर्यङ्कस्य शीर्षण्यं शिरःप्रदेशः भद्रयज्ञायज्ञीये गीतिविषयसामनी । यद्वा—भद्रयज्ञो महाक्रतुनिचयश्च यज्ञीयं तत्सोपस्करं च

भद्रयज्ञायज्ञीये भवतः । यज्ञायज्ञीयेत्यत्र दीर्घः छान्दसः । पर्यङ्कस्य **प्राचीनागानं** प्राक्पश्चिमदण्डसूत्राणीत्यागानमुक्ति **ऋचश्च सामानि** चाशंसन्ति । पर्यङ्कतिरश्चीनदण्डसूत्राणि **यजूंषि** भवन्ति । पर्यङ्कस्योपस्तरणं मृद्वास्तरणं **सोमांशवः** सोमकिरणा भवन्ति । पर्यङ्कोपश्रीः शोभा तु सामावयवतया प्रसिद्ध **उद्गीथः**, श्रीः स्वानपायिनी लक्ष्मीस्तु **उपबर्हणं** शिरउपधानम् । योऽयमुक्तविशेषणसोपस्करः पर्यङ्कः **तस्मिन्नेव** सदा **ब्रह्मास्ते** । य एवंविधपर्यङ्कालङ्कारभूतो ब्रह्मा विराजते तं इत्थंवित् एवंविद्वान् प्राणो भूत्वा पर्यङ्कविलसद्भूतादिपादेनैवाग्रे पर्यङ्कोपर्यारोहति । य एवं स्वपर्यङ्कं प्रविष्टः **तं कोऽसीति ब्रह्माह** । तं प्रत्ययमेवं ब्रूयात् । किमिति? पुरासंवत्सरावयव**ऋतुरस्मि**, तन्निर्वर्त्यान्नमयावष्टम्भत आर्तवोऽस्मि, सर्व**योनेराकाशात्** ब्रह्मणः सकाशात् एवं **संभूतो**ऽस्मि । हावेत्यवधारणार्थः । न त्वेवं ते संभूतिरस्ति, त्वमेव सर्वकारणमित्युपदिशति—एतदिति । यदेतज्जन्म त्वयोक्तं तन्न संगच्छते, स्वस्यैव सर्वात्मत्वात् । तत् कथं? गुणसाम्यात्मकाव्यक्तकालतदवयव**संवत्सरस्य तेजोभूतस्य** महत्तत्त्वस्य **भूतस्य** पञ्चभूतभौतिकस्य च **त्वमेवात्माऽसि** । **यस्त्वं** सर्वभूतात्माऽसि **सोऽहमस्मीति** निश्चिनु । इति ब्रह्मणोक्तः पुनस्तं पृच्छति—**कोऽहमस्मीति** । न जाने, पुनः कृपयोपदिशेत्यर्थः ॥ ९ ॥

आत्मनः सत्यत्वं सर्वात्मत्वं ब्रह्ममात्रत्वं च

सत्यमिति ब्रूयात् । किं तत् सत्यमिति । यदन्यद्देवेभ्यश्च प्राणेभ्यश्च तत् सद्ध यद्देवाश्च प्राणाश्च [1]तद्यत्तदेतया वाचाऽभिव्याहियते सत्यमिति । एतावदिदं सर्वमिदं सर्वमसीत्येवैनं तदाह । तमाह केन [2]पौसानि नामान्याप्नोतीति । प्राणेनेति ब्रूयात् । केन स्त्रीनामानीति । वाचेति । केन नपुंसकनामानीति । मनसेति ।

[1] तद्यंतदे—क, अ १, अ २. [2] पौंसानि—अ. पौंस्नानि—मु.

केन गन्धानिति । घ्राणेनेति ब्रूयात् । केन रूपाणीति । चक्षुषेति । केन शब्दानिति । श्रोत्रेणेति । केनान्नरसानिति । जिह्वयेति । केन कर्माणीति । हस्ताभ्यामिति । केन सुखदुःखे इति । शरीरेणेति । केनानन्दं रतिं प्रजातिमिति । उपस्थेनेति । केनेत्या इति । पादाभ्यामिति । केन धियो विज्ञातव्यं कामानिति । प्रज्ञयेति प्रब्रूयात् । तमाहापैव खलु मे ह्यसावयं ते लोक इति । सा या ब्रह्मणि चिति या व्यष्टिस्तां चितिं जयति तां व्यष्टिं व्यश्नुते य एवं वेद य एवं वेद ॥ ६ ॥

प्रश्नोत्तरं भगवानाह—सत्यमिति । कोऽहमस्मीति प्रश्नोत्तरं—कालत्रयाबाध्यं सत्यमिति ब्रूयात्, सत्तामात्रस्वरूपोऽसीत्यर्थः । सत्यशब्दार्थं पृच्छति—किं तत् सत्यमिति । प्रतिवचनं—यद्देवेभ्यो दिग्वातादिकरणाधिपेभ्यश्च प्राणेभ्यश्च करणेभ्योऽपि यदन्यत् भिन्नतयाऽवशिष्टं तदेव सद्ब्रह्म सत्यं हि यदेव देवाश्च प्राणाश्च भवति स्वातिरिक्तानृतसामान्यस्य मृग्यत्वात् यत्तदेतया वाचा अभिव्याहियते । किमिति? सत्यमिति । एतावदिदं सर्वमिदं सर्वमसीत्येवैनं तदाह । तमुक्तवन्तमितर आह । किमिति? सर्वस्य सत्यात्मकत्वे केन पौसानि नामान्याप्नोति? इति पृष्टः प्राणेनेति ब्रूयात् । तथा पुनः केन स्त्रीनामानीति नपुंसकनामानि चाप्नोतीति पृष्टो वाचा मनसा चेति, ब्रूयादिति सर्वत्र अनुवर्तते । केन केन करणेन तत्तत्करणार्थान् गन्धादीनाप्नोतीति पृष्टो घ्राणादिकरणजालेन गन्धादिविषयजालमाप्नोतीति ब्रूयात् । शिष्टं निगदार्थमेतत् । किं बहुना—केन धीविज्ञातव्यनानाकामानाप्नोतीति पृष्टः सर्वमिदमहमात्मेति प्रज्ञया ब्रह्मभावारूढया सर्वं खल्विदं ब्रह्मेति श्रुत्यर्थसंस्कृतया आप्नोतीति ब्रूयात् । पुनस्तमाह । किमिति? लोके तावदसावयं मे मम ते तवेत्यादिशब्दगोचरमर्थजातं सर्वं "सर्वं खल्विदं ब्रह्म,"

"ब्रह्मव्यतिरिक्तं न किञ्चिदस्ति," "मद्व्यतिरिक्तमणुमात्रं न विद्यते" इत्यादिश्रुत्याचार्यसंस्कृतब्रह्माकारप्रज्ञया मयेदं सर्वं "आत्ममात्रमिदं सर्वमात्मनोऽन्यन्न किञ्चन" इति श्रुत्यनुरोधेन आप्तैव प्राप्तमेव खलु। अस्मिन्नर्थे न हि संशयोऽस्तीति विद्याफलमाचष्टे—य एवं वेदेति। य एवं—या प्रज्ञा सा ब्रह्मणि चिति चिद्ब्रह्मणि चिन्मात्रे या व्यष्टिः समष्टिश्च स्वाज्ञविकल्पिता स्वज्ञानबाधिता, यत एवं अतो ब्रह्मातिरिक्तं न किञ्चिदिति—वेद सोऽयं मुनिः तां चितिं व्यष्टिसमष्ट्यात्मकस्वाविद्यापदतत्कार्यारोपापवादाधिकरणरूपां वस्तुतो निरधिकरणात्मिकां निष्प्रतियोगिकचिन्मात्रां स्वावशेषतया जयति आप्नोति। या चिन्मात्रविकल्पिता व्यष्टिः तदुपलक्षितस्वाविद्यापदतत्कार्यजातं तां व्यष्ट्यादिकलनां *शशविषाणवदत्यन्तासत्तया व्यश्नुते। एवं ज्ञानसमकालं स्वयमेव ब्रह्ममात्रतया अवशिष्यत इति प्रकरणार्थः। आवृत्तिः प्रथमाध्यायपरिसमाप्त्यर्था ॥ ६ ॥

इति प्रथमोऽध्यायः

द्वितीयोऽध्यायः

प्राणब्रह्मोपासनं तत्फलं च

प्राणो ब्रह्मेति ह स्माह कौषीतकिः। तस्य ह वा एतस्य प्राणस्य ब्रह्मणो मनो [1]भूतं [2]वाक्यं[3]परिवेष्टृ चक्षुः श्रोत्रं [4]संश्रावयितृ। तस्मै वा एतस्मै प्राणाय ब्रह्मण एताः सर्वा देवता अयाचमानाय बलिं हरन्ति। तथो एवास्मै सर्वाणि भूतान्यायाचमानायैव बलिं

[1] भूता—क. [2] वाक्य—अ १, अ २, क. वाक्प—अ.
[3] परिवेष्ट्री—अ २. परिवेष्टय—क. [4] संश्रावयित्वा—क.

हरन्ति । य एवं वेद तस्योपनिषन्न याचेदिति तद्यथा ग्रामं भिक्षित्वा लब्ध्वोपविशेन्नाहमतो दत्तमश्नीयामिति । य एवैनं पुरस्तात् प्रत्याचक्षीरंस्त एवैनमुपमन्त्रयन्ते ददाम त इति । एष धर्मो [1]याचितो भवत्यन्यतर[2]स्त्वेवैनमुपमन्त्रयन्ते ददाम त इति । प्राणो ब्रह्मेति ह स्माह पैङ्गचः । तस्य ह वा एतस्य प्राणस्य ब्रह्मणो वाक्परस्ताच्चक्षुरारुन्धे चक्षुः परस्ताच्छ्रोत्रमारुन्धे श्रोत्रं परस्तान्मन आरुन्धे मनः परस्तात्प्राण आरुन्धे । तस्मै वा एतस्मै प्राणाय ब्रह्मण एताः सर्वा देवता अयाचमानाय बलिं हरन्ति । तथो एवास्मै सर्वाणि भूतान्ययाचमानाय बलिं हरन्ति । य एवं वेद तस्योपनिषन्न याचेदिति तद्यथा ग्रामं भिक्षित्वा लब्ध्वोप[3]विशेन्नाहमतो दत्तमश्नीयामिति । य एवैनं पुरस्तात् प्रत्याचक्षीरंस्त एवैनमुपमन्त्रयन्ते ददाम त इति । एष धर्मो [4]याचितो भवत्यन्यतरस्त्वेवैनमुपमन्त्रयन्ते ददाम त इति ॥ १ ॥

प्रथमाध्याये महाक्रतुसामान्यविशेषफलेयत्तात्प्रदर्शनच्छलेन सविशेषनिर्विशेषब्रह्मविद्या तत्फलं च सम्यक् प्रकटितम्। एतत्प्रकरणार्थस्य सामान्यप्रज्ञदुरवगाह्यत्वादिति मन्दप्रतिपत्त्यर्थं पुनः सविशेषब्रह्मविद्या प्रकटयितव्येति द्वितीयाध्याय आरभ्यते—**प्राणो ब्रह्मेत्यादि** । कुषीतकस्यापत्यं **कौषीतकिः नाम** प्राणयाथात्म्यद्रष्टा मुनिरेवमाह स्म । किमिति ? यः पञ्चमे मासि योषिद्गर्भगतपिण्डं प्रपदाभ्यां प्रापद्यत सोऽयं **प्राण** एव **ब्रह्मेति** । तस्यानिच्छतोऽप्यन्तर्बाह्यकरणानि सङ्कल्पादिबलिं हरन्तीत्याह—**तस्येति** । **तस्य ह वा एतस्य प्राणस्य**

[1] याचतो—मु.
[2] स्यैवै—क.
[3] विवेशन्ना—उ.
[4] याचतो—मु.

ब्रह्मण: मनआद्यन्तःकरणचतुष्टयं, भूतग्रहणं भविष्यद्वर्तमानज्ञानोपलक्षणार्थं, भूतादित्रिकालज्ञानं सङ्कल्पादिबलिं प्राणाय हरति । सर्वाभिधेयमभिधानरूपेण **परिवेष्टृ** व्याप्य स्थितं **वाक्यं**—वागिन्द्रियग्रहणं कर्मेन्द्रियपञ्चकोपलक्षणार्थं—कर्मेन्द्रियपञ्चकं वचनादिबलिं समर्पयति । **चक्षुः**श्रोत्रग्रहणं शिष्टज्ञानेन्द्रियोपलक्षणार्थम् । ज्ञानेन्द्रियपञ्चकमपि शब्दादिबलिं हरति । एवं **तस्मै वा एतस्मै** व्यष्टिसमष्टिप्राणाय **अयाचमानाय एताः सर्वाः देवताः** मनःश्रोत्राद्यन्तर्बाह्यकरणानि सङ्कल्पशब्दादिबलिं **हरन्ति** । **तथो** एवास्मै **सर्वाणि भूतान्ययाचमानायैव बलिं हरन्ति** । **एवं यो वेद तस्य** विदुषः इयमेव हि **उपनिषत्** उपासना व्रतम् । किं तत् ? यत्र कुत्रापि **न याचेदिति** । उक्तार्थे दृष्टान्तमाह—**तद्यथेति** । **यथा** कश्चिद्भूती यथोक्तकाले ग्रामं प्रविश्य भिक्षाऽटनं कृत्वा **नाहमतो दत्तमश्नीयामिति** प्रतिज्ञां लङ्घ्वोपविशेत् तथा प्राणवित् न याचेदित्यर्थः । **ये** पुनरेनं यत्किञ्चिद्याचमानं **पुरस्तात्** पूर्वं **प्रत्याचक्षीरन्** प्रत्याख्यानं कृतवन्तः **त एवैनमुपमन्त्रयन्ते** प्रार्थयन्ति । किमिति ? **ददाम त** इति । **एष धर्मो याचितो भवति** । एवमन्यतरस्तु अन्यतरेऽपि एनमयाचितं **ददाम त इत्युपमन्त्रयन्ते** । तथा पिंगस्यापत्यं **पैङ्ग्योऽपि प्राणो ब्रह्मेत्याह स्म** । तत्रोपपत्तिः—**तस्य हवेत्युक्तार्थम्** । **वाक्परस्तात्** वागिन्द्रियात् परं **चक्षुरारुन्धे** दीप्यते । एवं **चक्षुः** श्रोत्रम् । **मनःपरस्तात् प्राण आरुन्धे** प्राण एव सम्राट्तया दीप्यते । **तस्मै वा एतस्मा** इत्याद्युक्तार्थम् ॥ १ ॥

दुर्लभार्थलाभकरं एकधनावरोधनकर्म

अथात एकधनावरोधनम् । यदेकधनमभिध्यायात् पौर्णमास्यां वाऽमावास्यां वा शुद्धपक्षे वा पुण्ये नक्षत्रेऽग्निमुपसमाधाय परिसमूह्य परिस्तीर्य पर्युक्ष्य पूर्वदक्षिणं [1]जान्वावाच्य स्रुवेण वा चमसेन वा कंसेन वैता आज्याहुतीर्जुहोति—वाङ्नामदेवताऽवरोधिनी सा

[1] जान्ववाच्य—क. जान्वाच्य—अ २.

[1]मे तस्मादिदमवरुन्धा तस्यै स्वाहा, प्राणो नाम देवताऽवरोधिनी सा मे तस्मादिदमवरुन्धा तस्यै स्वाहा, चक्षुर्नाम देवताऽवरोधिनी सा मे तस्मादिदमवरुन्धा तस्यै स्वाहा, श्रोत्रं नाम देवताऽवरोधिनी सा मे तस्मादिदमवरुन्धा तस्यै स्वाहा, मनो नाम देवताऽवरोधिनी सा मे तस्मादिदमवरुन्धा तस्यै स्वाहा, प्रज्ञा नाम देवताऽवरोधिनी सा मे तस्मादिदमवरुन्धा तस्यै स्वाहेति । अथ धूमगन्धं प्रजिघायाज्यलेपेनाङ्गान्यनुविमृज्य [2]वाचंयतोऽभिप्रवृज्यार्थं ब्रवीत दूतं वा प्रहिणुयाल्लभेतैहैव ॥ २ ॥

एवं प्राणोपासनासामान्यफलं अयाचितत्वख्यातिः विशेषफलं तद्भावापत्तिः इत्यार्थिकतयाऽभिधाय अथ कामिनां कामपूरणाय काम्योपासनामाह—अथेति । **अथ** प्राणोपासनाऽनन्तरं यत एकधनावरोधनकर्म विना कांक्षितार्थो न सिध्यति **अत एकधनावरोधनं** कर्म **अभिध्यायात्** । सप्रकारकं तत् कर्म कीदृशं ? इत्यत्र **पौर्णमास्याद्युक्तविकल्पान्यतमे** यथाविधि **अग्निमुपसमाधाय स्रुवाद्यन्यतमेन वाङ्नामदेवतावरोधिनीत्यादिमन्त्रषट्केन आज्याहुतीः** हुत्वा **अथ** धूमगन्धमाघ्राय होमसम्पाताज्यलेपेन **अङ्गमार्जनं** कृत्वा वाङ्नियममुत्सृज्य स्वाभिलषितार्थं **ब्रवीत** स्वाभिलषितार्थो यत्र वर्तते तदानयनार्थं **दूतं वा प्रहिणुयात्** प्रेरयेत् । **इहैव** तदर्थो लभ्यते । एकधनावरोधनकर्मानुष्ठानमहिम्ना दुर्लभार्थोऽपि लभ्यत एवेत्यर्थः ॥ २ ॥

सर्वार्थसिद्धिकरं दैवं कर्म

अथातो [3]दैवं स्म वो यस्य प्रियो बभूषे यस्यैव येषां वै तेषामेवैतस्मिन् पर्वण्यग्निमुपसमाधायैतयैवावृतैता आज्याहुतीर्जुहोति

[1] अत्र सर्वपर्यायेषु "मेतस्मा" इत्यस्य स्थाने "मेऽमुष्मा" इत्यपि पाठः कोशेषु दृश्यते. [2] वाग्नायमो—उ. वाचंयमो—अ, अ १. [3] दैवस्वो—क.

—वाचं ते मयि जुहोम्यसौ स्वाहा, प्राणं ते मयि जुहोम्यसौ स्वाहा, चक्षुस्ते मयि जुहोम्यसौ स्वाहा, श्रोत्रं ते मयि जुहोम्यसौ स्वाहा, मनस्ते मयि जुहोम्यसौ स्वाहा, प्रज्ञानं ते मयि जुहोम्यसौ स्वाहेति । अथ धूमगन्धं प्रजिघायाज्यलेपेनाङ्गान्यनुविमृज्य वाचं-यतोऽभिप्रवृज्य संस्पर्शं जिगमिषेदपि वाताद्वाऽसंभाषणस्तिष्ठेत् प्रियो हैव भवति [1]स्मरन्तीहैव भवति स्मरन्तीहैव स्यात् ॥ ३ ॥

स्वपरयोः स्मरणतः सर्वार्थसिद्धिकरकर्मोपासनमुच्यते—**अथेति** । **अथ**-शब्दः उपासनाऽनन्तरारम्भार्थः । यतो दैवं कर्म विना चिन्तितार्थसिद्धिः न स्यात् **अतो** यत् कर्म—देवः प्राणः—तदुद्देशेन क्रियत इति **दैवं स्म** कर्म । यस्य **वो** यस्य कस्यचित् **प्रियः** प्रेमास्पदोऽर्थः **बभूषे** तद्गताभिलाषो वर्धते, **येषां यस्यैव** विषये स्पृहा वर्धते **तेषां** तानेवोद्दिश्य एतस्मिन् पूर्वोक्तपौर्णमास्याद्यन्यतमपर्वणि **अग्निमुपसमाधायेत्यादि** पूर्ववत् । **एतया** पूर्वोक्तविधया **आवृता** संयुक्ता **एता आहुतीर्जुहोति** । **कैः** मन्त्रैः ? इत्यत्र—**वाचं ते मयि जुहोम्यसौ स्वाहेति** मन्त्रषट्केन हुत्वा धूमगन्धं **प्रजिघायेत्यादि** पूर्ववत् । यच्चित्तं यद्वस्तु स्पृहयति तद्वस्तु पाणिना स्पृशन् जिगमिषेत् । यद्वा—यस्य सख्यमिच्छति तं स्पृशन् **जिगमिषेत्** । यद्यं स्प्रष्टुमशक्यः तदा वातो यां दिशमुद्दिश्य वाति तत्र स्वयं स्थित्वा स्वदेहस्पर्शिवाताद्वाऽपि तं स्पृशन् जिगमिषेत् इत्यनुवर्तते । ततोऽसम्भाषणस्तिष्ठेत् । एतत्प्रयोगात् दुराराध्योऽपि **प्रियो हैव** हितकृदेव **भवति** । स्वानुग्रहभाजो यद्यत् **स्मरन्ति** तत्तदिहैव **भवति** । यदन्यद्वा **स्मरन्ति** तदिहैव **स्यादित्यर्थः** ॥ ३ ॥

प्राणब्रह्मप्रापकं अग्निहोत्रोपासनम्

अथातः सायमन्नं [2]प्रातर्दनमान्तरमग्निहोत्रमिति चाचक्षते । यावद्वै पुरुषो भाषते न तावत् प्राणितुं शक्नोति प्राणं तदा वाचि

[1] अयं व्याख्यानुसारी पाठः, आकरकोशेषु तु "स्मरन्ति हैव" इत्येव वर्तते.
[2] अनन्तरमग्नि—क. अन्तरमग्नि—अ १, अ २,

जुहोति । यावद्वै पुरुषः प्राणिति न तावद्वक्तुं शक्नोति वाचं तदा प्राणे जुहोति । एतेऽनन्तेऽमृताहुती जाग्रच्च [1]स्वरूपं च संततमव्यवच्छिन्नं जुहोति । अथ या अन्या आहुतयोऽन्तवत्यस्ताः कर्ममय्यो भवन्ति । एतदु वै पूर्वे विद्वांसोऽग्निहोत्रं जुह्वांचक्रुः । अथ कथं ब्रह्मेति । शुष्कभृङ्गारमृगित्युपासीत सर्वाणि हास्मै भूतानि श्रैष्ठ्यायाभ्यर्च्यन्ते । तद्यजुरित्युपासीत सर्वाणि हास्मै भूतानि श्रैष्ठ्याय युज्यन्ते । तत् सामेत्युपासीत सर्वाणि हास्मै भूतानि श्रैष्ठ्याय संनमन्ते । [2]तच्छ्रीत्युपासीत तद्यश इत्युपासीत तत्तेज इत्युपासीत तद्यथैतच्छास्त्राणां श्रीमत्तमं यशस्वितमं तेजस्वितमं भवति । तथैवैवंविद्वान् सर्वेषां भूतानां श्रीमत्तमो यशस्वितमस्तेजस्वितमो भवति । तदेतदैष्टकं कर्म यमात्मानमध्वर्युः संस्करोति तस्मिन् यद्धर्ममयं [3]प्रभवति [4]तद्धर्ममयं [5]त्वम्मयं होतर्मयं साममयमुद्गाता स एष सर्वस्यै त्रयीविद्याया आत्मैष उत [6]एव स्यान्नैतदात्मा भवति य एवं वेद ॥ ४ ॥

विशिष्टफलमुपासनान्तरमाह—अथेति । उपासनान्तरारम्भार्थः अथशब्दः । अग्निहोत्रं यतो विशिष्टफलदं अत एव सायङ्कालनिर्वर्त्यमग्नं प्रतर्दनेन मुनिना भावितं प्रातर्दनमान्तरमग्निहोत्रमिति चाचक्षते शिष्टाः, सायंप्रातर्विहिताहुतिसामान्यात् । एवं अग्निहोत्रनिर्वर्तयिता पुरुषः आत्मा अहमेवेदं सर्वमिति

[1] स्वपंश्च सं—मु.
[2] तद्भ्री—उ.
[3] प्रवयति—अ, अ १, उ.
[4] यजुर्मयं—मु.
[5] ऋङ्मयं—क, मु.
[6] एवास्या—अ, अ १, अ २, क, मु.

भासते तदतिरेकेण न तावत् प्राणितुं चेष्टितुं शक्नोति । तदानीं पुरुषः प्राणं वाचि जुहोति । यावद्वै पुरुषः प्राणिति प्राणावष्टम्भतः चेष्टाविशिष्टो भवति पुरुषातिरेकेण न तावद्वागादि भातुं शक्नोति समर्थं भवति । तदानीं प्राणी वाचं प्राणे जुहोति । जाग्रदवस्थाया वागादिनिर्वर्त्यत्वात् वागाद्यग्नौ प्राणाख्यं हविः जुहोति । तथा स्वापावस्थायाः प्राणनिर्वर्त्यत्वेन वागादिकरणजातं प्राणे जुहोति, वागादिकरणानामुपरमादिति भावः । अहरहः कर्तव्यतया एतेऽनन्तेऽमृताहुती जाग्रच्च स्वरूपं स्वापश्चाहरहः सन्ततमव्यवच्छिन्नं जुहोति । अथ शरीरस्थित्यनन्तरं याः अन्याः आहुतयः अन्तवत्यः ताः कर्ममय्यो भवन्ति चरमाहुतित्वात् । एतदु वै पूर्वे विद्वांसः अग्निहोत्रं जुह्वांचक्रुः, जाग्रत्स्वापयोः अग्निहोत्रदृष्टिं कुर्युरित्यर्थः । कथं एतावता पुरुषार्थसिद्धिः इत्याक्षिपति—अथ कथं ब्रह्मेति । एतावता ब्रह्मोपासनं किं जातमिति ? उत्तरमाह—शुष्कभृङ्गारमिति । जाग्रदादिव्यापृतिरिक्तं शुष्कं भृङ्गारं स्फटिककरकोपमं प्राणं ऋगादिवेदत्रयतया उपासीत, प्राणे क्रमात् ऋगादिवेदत्रयदृष्टिं कुर्यात् । पर्यायत्रयोपासनाफलमेतत्—सर्वाणि भूतानि अस्मा एवं विदुषे सर्वस्मात् श्रैष्ठ्यायाभ्यर्च्यन्ते युज्यन्ते सन्नमन्ते च । किंच—तत् पूर्वोक्तशुष्कभृंगारं प्राणं श्रीत्वेन यशस्त्वेनोपासीत । दृष्टान्तपूर्वकं उपासनाफलं प्रकटयति—तद्यथेति । यथा तदेतदध्यात्मशास्त्रं तदितरशास्त्राणां श्रीमत्तमं मोक्षसंपत्प्रापकत्वात्, यशस्वितमं यशस्वी ब्रह्मवित् तत्तरो ब्रह्मविद्वरः तत्तमो ब्रह्मविद्वरीयान् सम्यज्ज्ञानप्राप्यब्रह्मविद्वरीयस्त्वप्रापकत्वात्, तथा तेजस्वितमं तथा प्रत्यक्परैक्यगमकत्वात्, तथैवैवंविद्वान् सर्वेषां भूतानां श्रीमत्तमो यशस्वितमः तेजस्वितमश्च भवति । यं आत्मानं अध्वर्युः एवं संस्करोति तदेतदैष्टकं कर्माग्निहोत्रं इष्टकास्थानीयाहोरात्राहुतिनिर्वर्त्यत्वात् । तस्मिन् इत्थंभूताग्निहोत्रकर्मणि यद्धर्ममयं फलं प्रभवति तद्धर्ममयं अम्मयं अमृतमयं होतर्मयं साममयम् । य एवंविदुद्गाता स एषः सर्वस्यै सर्वस्याः त्रयीविद्यायाः प्रतिपाद्यं प्राणाख्यं ब्रह्म । य एवं वेद स एष आत्मा प्राण उतैव स्यात् । य एवं न वेद सोऽयमात्मा न भवति, सामान्यजनो भवतीत्यर्थः ॥ ४ ॥

सर्वजयप्रदं अमावास्योपासनम्

अथातः सर्वजितः कौषीतकिस्त्रीण्युपासनानि भवन्ति । यज्ञोपवीतं कृत्वाऽप आचम्य त्रिरुदपात्रं प्रसिच्योद्यन्तमादित्यमुपतिष्ठेत् वर्गोऽसि पाप्मानं मे वृङ्ग्धीति, एतयैवावृता मध्ये सन्तं उद्वर्गोऽसि पाप्मानं म उद्वृङ्ग्धीति, एतयैवावृताऽस्तं यन्तं संवर्गोऽसि पाप्मानं मे संवृङ्ग्धीति, यदहोरात्राभ्यां पापं करोति सं तद्वृङ्क्ते । अथ मासिमास्यमावास्यायां पश्चाच्चन्द्रमसं दृश्यमानमुपतिष्ठेतैतयैवर्ता हरिततृणाभ्यां वा वृत्तः स्यात् यत्ते स्वसीमं हृदयमसि चन्द्रमसि शृतं तेनामृतत्वमस्येशानं माऽहं पौत्रमघं रुहमिति । न हास्मात् पूर्वाः प्रजाः प्रयन्तीति । नजातपुत्रस्याथ जातपुत्रस्य ह [1]यं समेत्तातु सन्ते पयांसि सस्वयन्तु राजा यमात्या अंशुमाप्याययन्तीत्येतास्तिस्र ऋचो जपित्वा नास्माकं प्राणेन प्रजया पशुभिराप्यायय्यिष्ठा योऽस्मान् द्वेष्टि यं च वयं द्विष्मः तस्य प्राणेन प्रजया पशुभिराप्याययस्वेति दैवीमावृतमावर्त आदित्यस्यावृतमन्वावर्तयति दक्षिणं बाहुमन्वावर्तते ॥ ९ ॥

अमावास्यानिर्वर्त्योपासनान्तरं विशिष्टफलमाह—**अथेति** । **अथात** इत्युक्तार्थम् । **कौषीतकिः** मन्त्रद्रष्टा ऋषिः एवमाह । किमिति ? सर्वं जेतुमिच्छोः **सर्वजितः त्रीण्युपासनानि भवन्तीति** । तानि कीदृशानि ? तत्क्रमः कीदृशः ?

[1] अत्र व्याख्याऽनुसारी मन्त्रपाठो निर्णेतुमशक्यः । मुद्रितपुस्तकपाठस्तु श्रेयान् भाति. स चैवं वर्तते—" आप्यायस्व समेतु ते . . . सं ते पयांसि समु यन्तु वाजाः . . . यमादित्या अंशुमाप्याययन्तीत्येतास्तिस्र ऋचो जपित्वा ".

इत्यत आह—**यज्ञोपवीतमिति** । नवीनयज्ञोपवीतं कृत्वा धृत्वाऽप **आचम्य त्रिरुदपात्रं** विधिवत् **प्रसिच्य** संस्थाप्य उदपात्रत्रयं स्पृशन् **वर्गोसि पाप्मानमि**-त्यादिमन्त्रत्रयेण **उद्यन्तमादित्यमुपतिष्ठेत्** उपस्थानमन्त्रान् जपेत् । तेन कर्मणाऽयं **यदहोरात्राभ्यां पापं कर्म करोति तत्** सर्वं स्वोपास्यादित्यः **सम्यक् वृङ्क्ते** कबळयति । स्वगतदुरितक्षयेच्छुभिः कदा एवं कर्तव्यमित्यत आह—**मासीति** । **मासिमासि** प्रतिमासं सम्प्राप्तामावास्यायां **पश्चात्** दृश्यमानं चन्द्र-मसमुपतिष्ठेत । **एतया** वक्ष्यमाणयैव "यत्ते सुसीमं" इत्यृता ऋचा **चकारस्थाने तकारः छान्दसः** । हरिततृणमुष्टिभ्यां वा **वृत्तो** युक्तः **स्यात्** । य इमं मन्त्रं एवं जपति **न हास्मात् पूर्वाः प्रजाः प्रयन्ति** न म्रियन्त इत्यर्थः । नजातपुत्रस्याथ जातपुत्रस्य वा **मे** मम प्राणादीन् रक्षरक्षेति "सन्ते पयांसि" इति मन्त्रेण सवितारं चन्द्रमसं वा प्रार्थयेदित्याह—**नजातपुत्रस्येति** । अपुत्रस्य सपुत्रस्य वा **मे** मम दुरितस्य **अत्ता** तु आचार्यो देवः यं मनुमाह **सोऽयं** अनेन मन्त्रेण स्तुतः सन् मत्प्राणं प्रजां पशूंश्च सदा रक्षतु इत्यर्थः । किञ्च—**यो** निरपराधिनोऽस्मान् **द्वेष्टि यं** अपराधिनं वयं द्विष्मः हे सवितः त्वं **तस्य** मद्रिपोः **प्राणेन प्रजया पशुभिश्चाप्यायस्व** तृप्तिं गच्छेति **दैवीमावृतमिति** मन्त्रं जपेदित्यर्थः ॥ ९ ॥

प्रजामरणदुःखनिवारकं चन्द्रोपासनम्

अथ पौर्णमास्यां पुरस्ताच्चन्द्रमसं दृश्यमानमुपतिष्ठेतैतयैवा-वृता—सोमो राजाऽसि विचक्षणः पञ्चममुखोऽसि प्रजापतिर्ब्राह्मणस्त एकं मुखं तेन मुखेन राज्ञोत्थितेन मुखेन मामन्ववादं कुरु । राजा त एकं मुखं तेन मुखेन विशोत्थितेनैव मुखेन मामन्ववादं कुरु । श्येनस्त एकं मुखं तेन मुखेन पक्षिणोत्थितेन मुखेन मामन्ववादं कुरु । अग्निस्त एकं मुखं तेन मुखेनेमं लोक[1]मुत्थि

[1] मधितेन—उ, उ १, मथितेन—अ, अ १, अ २.

तेन मुखेन मामन्ववादं कुरु । सर्वाणि भूतानीत्येव पञ्चममुखं तेन मुखेन सर्वाणि भूतान्युत्थितेन मुखेन मामन्ववादं कुरु । माऽस्माकं प्राणेन प्रजया पशुभिररक्षिष्ठा योऽस्मान् द्वेष्टि यं च वयं द्विष्मस्तस्य प्राणेन प्रजया पशुभिरपक्षीयस्वेति स्थितिर्दैवीमावृतमावर्त आदित्यस्यावृतमन्वावर्तन्त इति दक्षिणं बाहुमन्वावर्तते । अथ संवेश्य नु जायायै हृदयमभिमृशेत्

यत्ते स्वसीमे [1]हृदयो हितमन्तः प्रजापतौ ।
मन्येऽहं मां तद्विद्वांसं माऽहं पौत्रमघं रुहम् ॥

इति । न हास्मात् पूर्वाः प्रजाः प्रैति [प्रयन्ति] ॥ ६ ॥

पुनर्विशिष्टफलमुपासनान्तरमाह—अथेति । अथ दर्शोपासनानन्तरं **पौर्णमास्यां पुरस्तात्** पूर्वस्यां दिशि **दृश्यमानं** उदितं **चन्द्रमसं** पञ्चप्राणवृत्तिस्तावकमन्त्रैः पञ्चभिः **उपतिष्ठेत** चन्द्रमसं पश्यन् जपेत् । **एतयैवावृतेति** पूर्ववत् । ऋचा ऋग्भिः यः प्रतिपाद्यः स **सोमो राजाऽसि** मदिष्टफलदाने **विचक्षणोऽसि** प्राणापानादिभेदेन **पञ्चममुखोऽसि ब्रह्मैव ब्राह्मणः प्रजापतिरसि** तवैकं **मुखं** यत् प्राणाख्यं **तेन** राज्ञा सूर्येण सहोत्थितमुखेन **मामन्ववादं** निर्विवादकुशलं **कुरु** । शिष्टं स्पष्टम् । माऽस्माकं प्राणेनेत्यादि समानम् । **दैवीमावृतमिति** मन्त्रेणात्तारमादित्यं संस्तुत्य **अथ यत्ते स्वसीम** इति मन्त्रेण **जायायै** जायाया जठरे हस्तं **संवेश्य अभिमृशेत्** । एवं यः करोति **न हास्मात् पूर्वाः प्रजाः प्रैतीत्युक्तार्थम्** ॥ ६ ॥

पुत्रदीर्घायुःसम्पादकं कर्म

अथ प्रोष्यायनः पुत्रस्य मूर्धानमभिमृशति—अङ्गादङ्गात् संभवसि हृदयादधि जायसे । आत्मा वै पुत्र [2]माविध स जीव शरदः

[1] हृदये—क. [2] नामासि—क.

शतमसाविति नामास्य गृह्णाति । [1]मा छेत्ता मा [2]व्यथिष्ठाः शतं शरद आयुषो जीव पुत्र । ते नाम्ना मूर्धानमभिजिघ्राम्यसाविति त्रिर्मूर्धानमभिजिघ्रेत् । गवा त्वा हिंकारेणाभिहिंकरोमीति [3]त्रिर्मूर्धानमभिहिंकुर्यात् ॥ ७ ॥

अथ पुत्रस्य दीर्घायुःसम्पादनार्थेयं खण्डिका आरभ्यते—अथेति । चिरं प्रवास्य पुनरागतः प्रोष्यायनः चिरकालविरहजहर्षेण अङ्गादङ्गादिति मन्त्रद्वयार्थानुसन्धानपूर्वकं त्रिवारं मूर्धानमभिजिघ्रन् तथा त्रिवारं हिंकुर्यात् ॥ ७ ॥

परिमराख्यं अध्यात्माधिदैवोपासनम्

अथातो दैवः [4]परिमरः । एतद्वै ब्रह्म दीप्यते यदग्निर्ज्वलत्यथैतन्म्रियते यन्न ज्वलति तस्यादित्यमेव तेजो गच्छति वायुं प्राणः । एतद्वै ब्रह्म दीप्यते यथा मर्त्यो दृश्यतेऽथैतन्म्रियते यन्न दृश्यते तस्य चन्द्रमसमेव तेजो गच्छति वायुं प्राणः । एतद्वै ब्रह्म दीप्यते यद्विद्युद्विद्योततेऽथैतन्म्रियते यन्न विद्योतते तस्य वायुमेव तेजो गच्छति वायुं प्राणः । ता वा एताः सर्वा देवता वायुमेव प्रविश्य वायौ तृप्ता न मूर्च्छन्ते तस्माद्वैव पुनरुदीरत इत्यधिदैवतम् । अथाध्यात्मम् । एतद्वै ब्रह्म दीप्यते यद्वाचा वदत्यथैतन्म्रियते यन्न वदति तस्य चक्षुरेव तेजो गच्छति प्राणं प्राणः । एतद्वै

[1] मत बेत्ता—अ २, क. [2] व्यधिष्टते—क.

[3] व्याख्यानुसारीत्ययं पाठो धृतः. आकरपुस्तकपाठस्तु—"त्रिभिर्मूर्धानं" इति.

[4] यद्यपि "परिसरः" इत्याकरकोशगतः पाठः व्याख्याऽनुसारी स्यात्. तथाऽपि शाखाऽन्तरपाठस्य अत्रत्यफलवाक्यस्य चालोचने "परिमरः" इति पाठान्तरं युक्ततरं भाति.

ब्रह्म दीप्यते यच्चक्षुषा पश्यत्यथैतन्म्रियते यन्न पश्यति तस्य श्रोत्रमेव तेजो गच्छति प्राणं प्राणः । एतद्वै ब्रह्म दीप्यते यन्मनसा ध्यायत्यथैतन्म्रियते यन्न ध्यायति तस्य प्राणमेव तेजो गच्छति प्राणं प्राणः । ता वा एताः सर्वा देवताः प्राणमेव प्रविश्य प्राणे कृत्सा न मूर्च्छन्ते तस्माद्वैव पुनरुदीरते । तद्यदिह वा [1]एवं विद्वांस उभौ पर्वतावभिप्रवर्तयातां [2]तस्त्व[तौ त्व]र्षमाणौ दक्षिणश्चोत्तरश्च न हैवैनं [3]त्रीणि वीयाताम् । अथ य एनं द्विषन्ति यांश्च स्वयं द्वेष्टि त एनं सर्वे परितो म्रियन्ते ॥ ८ ॥

अधिदैवताध्यात्मपरिच्छिन्नोपासनं विशिष्टफलमाह—अथात इति । अथातःशब्दावुक्तार्थौ । दैवः आधिदैवतं परिसरः संनिहितत्वात् । एतद्वै सावित्रं ब्रह्म दीप्यते अहनि रात्रौ तु यदग्निर्ज्वलति । अथैतत् सावित्रं तेजो म्रियते अग्निं प्रविशति । पुनरहनि यदग्निः न ज्वलति तस्याग्नेस्तेज आदित्यमेव गच्छति, "उद्यन्तं वावादित्यमग्निरनु समारोहति तस्माद्धूम एवाग्नेर्दिवा ददृशे" इति श्रुतेः । तथा वायुं मुख्यप्राणं प्रति प्राणो गच्छति । एतद्वै वाग्व्याख्यं ब्रह्म दीप्यते यथा मर्त्यो दृश्यते आध्यात्मिकप्राणोऽवगम्यते । अथैतन्म्रियते मुख्यः प्राणः तिरोधत्ते यन्न मार्त्यप्राणो दृश्यते । तस्य प्राणस्य तेजश्चन्द्रमसमेव गच्छति तथा वायुं प्राण इत्युक्तार्थम् । एतद्वै ब्रह्म दीप्यते यद्विद्युत् विद्योतते अथैतन्म्रियते विद्युत अन्धकाराग्रासत्वात् यन्न विद्योतते । तस्य तेजो वायुं सूत्रात्मानमेव गच्छति । तथा वायुं प्राणः । ता वा एताः सर्वाः देवताः वायुमेव प्रविश्य वायौ सूत्रात्मनि तद्भावापत्त्या तृप्ताः सत्यो

[1] एतां विद्यां स—क. [2] तुस्तुर्ष—शंकरानन्ददीपिकाऽनुसारी पाठः.

[3] अयं पाठः व्याख्याऽनुसारीति धृतः "स्तृण्वीयातां" इति तु कोशगतः पाठः समीचीन एव स्यात्.

नहि मूर्च्छन्ते नात्यन्तिकमस्तं गच्छन्ति, बीजभावमेत्य वर्तन्ते । तस्मात् सूत्रात्मन एव पुनरुदीरते अभिव्यक्ता भवन्तीति यत्तदधिदैवतम् । अथाध्यात्मम्-उच्यते—एतद्वै प्रत्यग्ब्रह्म दीप्यते यद्वाचा वदति, बाह्यव्यापारात् । अथैतन्म्रियते प्रत्यग्भावस्तिरोहितो भवति वाक् यन्न वदति । तस्य वागिन्द्रियस्य तेजः चक्षुरेव गच्छति तथा मुख्यप्राणं वागादिप्राणः । एतद्वै ब्रह्म दीप्यते प्रत्यक् यच्चक्षुषा पश्यति । अथैतन्म्रियते रूपाद्यावृतं भवति यन्न पश्यति । तस्य चक्षुषः तेजः श्रोत्रमेव गच्छति । तथा प्राणं प्राण इत्युक्तार्थम् । एतद्वै ब्रह्म दीप्यते यन्मनसा ध्यायति । अथैतन्म्रियते यन्न ध्यायति । तस्य मनसस्तेजः प्राणमेव गच्छति । तथा प्राणं प्राणः । ता वा एताः सर्वाः वागाद्याः देवताः प्राणमेव प्रविश्य प्राणे क्लृप्ताः न मूर्च्छन्ते । तस्माद्वैव पुनरुदीरत इत्यादि समानम् । तद्यदिह वा एवं विद्वांसः अधिदैवताध्यात्मरूपौ ऋषमाणौ चरन्तौ पर्वतौ दक्षिणश्चोत्तरश्चेति द्विप्रकारौ अभिप्रवर्तयातां तदियत्तां ज्ञात्वा प्रवर्तन्ते नहैवैनं एवंविदमधिदैवाध्यात्माधिभूतानि त्रीणि वीयातां न हि स्पृशन्ति । य एनं एवंविदं द्विषन्ति यांश्च स्वयं द्वेष्टि त एनं सर्वे परितो म्रियन्ते इत्युक्तार्थम् ॥ ८ ॥

निःश्रेयसादानं नाम मुख्यप्राणविद्या

अथातो निःश्रेयसादानम् । सर्वा ह वै देवता अहंश्रेयसे विवदमाना अस्माच्छरीरादुच्चक्रुषुः । तद्दारुभूतं शिष्ये । अथ हैनद्वाक्प्रविवेश तद्वाचा वदच्छिष्य एव । अथ हैनच्चक्षुः प्रविवेश तद्वाचा वदच्चक्षुषा पश्यच्छिष्य एव । अथ हैनच्छ्रोत्रं प्रविवेश तद्वाचा वदच्चक्षुषा पश्यच्छ्रोत्रेण शृण्वच्छिष्य एव । अथ हैनन्मनः प्रविवेश तद्वाचा वदच्चक्षुषा पश्यच्छ्रोत्रेण शृण्वन्मनसा ध्यायच्छिष्य एव । अथ हैनत् प्राणः प्रविवेश तत्तत एव

समुत्तस्थौ । तद्देवाः प्राणे निःश्रेयसं [1]विजित्य प्राणमेव प्रज्ञाऽऽत्मानमभिसंस्तूय सहैतैः सर्वैरस्माल्लोकादुच्चक्रमुः । ते वायुप्रतिष्ठाकाशात्मानः स्वर्जयः । तथो एवैवं विद्वान् सर्वेषां भूतानां प्राणमेव प्रज्ञाऽऽत्मानमभिसंस्तूय सहैतैः सर्वैरस्माच्छरीरादुत्क्रामति स वायुप्रतिष्ठाकाशात्मा [2]स्वरेति सद्भवति यत्रैतद्देवास्तत् प्राप्य तदमृतो भवति यदमृतो देवाः ॥ ९ ॥

वागादिप्राणापेक्षया मुख्यप्राणस्य वैशिष्ट्यद्योतनाय इयं खण्डिका आरभ्यते—अथेति । अथात इत्युक्तार्थम् । निःश्रेयसादानं स्वकृतार्थताप्रकटनं कर्तुं सर्वा ह वै वागादिदेवता अहं श्रेयान् अहं श्रेयान् इत्यस्मिन्नर्थे मिथो विवदमानाः सत्यः अस्माच्छरीरादूर्ध्वं उच्चक्रुषुः उत्क्रमणं कृतवन्तः । तद्दारुभूतं शिष्ये शिश्ये । अथ हैनच्छरीरं वाक् प्रविवेश तच्छरीरं वाचा वदत् शिष्य एव । एवं चक्षुःश्रोत्रमनांसि तच्छरीरं प्रविश्य तद्वाचा वदत् चक्षुषा पश्यत् श्रोत्रेण शृण्वत् मनसा ध्यायत् शिष्य एव । अथ हैनच्छरीरं प्राणः प्रविवेश तत्तत एव समुत्तस्थौ उत्थितवत् । ते देवाः भग्नदर्पाः सन्तः प्राणस्य शरीरोत्थापयितृत्वसामर्थ्यमवगम्य अस्मदपेक्षया प्राण एव ज्येष्ठः श्रेष्ठो वरिष्ठश्चेति स्वानुभवप्रमाणेन यथोक्तमाहात्म्यवति प्राणे निःश्रेयसं कृतकृत्यत्वं विजित्य विचिन्त्य प्राणमेव प्रज्ञात्मानं स्वपरायणत्वेन अभिसंस्तूय सहैतैः सर्वैः एते सर्वे मिळित्वा अस्माल्लोकाच्छरीरात् उच्चक्रमुः । ये युगपदुत्क्रान्तास्ते वायुप्रतिष्ठाः सूत्रात्मपर्यवसन्नाः आकाशो ब्रह्मैवात्मा येषां ते आकाशात्मानः स्वर्जयः स्वर्जया भवन्ति, तैः स्वात्मलोकस्य जितत्वात् । तथैवं विद्वान् सर्वभूतात्मत्वेन प्रसिद्धं प्रज्ञाऽऽत्मानं प्राणमेवाभिसंस्तूय सर्वैरेतैः वागादिप्राणैः सह अस्माच्छरीरात् उत्क्रामति । स वायुप्रतिष्ठाकाशात्मा स्वः ब्रह्मलोकमेति ।

[1] विचिन्त्य—अ २, क.
[2] नः स्व—अ २. स स्व—क.

तत्र गत्वा सम्यज्ज्ञानमवाप्य सदेव भवति । यद्बोधतो देवाः अमृतत्वं गताः तथाविधं बोधमवाप्यामृतो भवति ॥ ९ ॥

पुत्राभ्युदयफलं सम्प्रदानाख्यं उपासनम्

अथातः पितापुत्रो यं संप्रदानमिति चाचक्षते । पिता पुत्रं प्रेष्याह्वयति । न नवैस्तृणैरागारं संस्तीर्याग्निमुपसमाधायोदकुम्भं सपात्रमुपनिधायाहतेन वाससा संप्रच्छन्नं ह्यत एत्य पुत्र उपरिष्टादभि-[1]निष्पद्येत इन्द्रियैरस्येन्द्रियाणि संस्पृश्यापि वाऽन्याभिमुखत एवासीत । अथास्मै संप्रयच्छति—वाचं मे त्वयि दधानीति पिता, वाचं ते मयि दध इति पुत्रः । चक्षुर्मे त्वयि दधानीति पिता, चक्षुस्ते मयि दध इति पुत्रः । श्रोत्रं मे त्वयि दधानीति पिता, श्रोत्रं ते मयि दध इति पुत्रः । मनो मे त्वयि दधानीति पिता, मनस्ते मयि दध इति पुत्रः । अन्नरसान् मे त्वयि दधानीति पिता, अन्नरसांस्ते मयि दध इति पुत्रः । कर्माणि मे त्वयि दधानीति पिता, कर्माणि ते मयि दध इति पुत्रः । सुखदुःखे मे त्वयि दधानीति पिता, सुखदुःखे ते मयि दध इति पुत्रः । आनन्दं रतिं प्रजातिं मे त्वयि दधानीति पिता, आनन्दं रतिं प्रजातिं ते मयि दध इति पुत्रः । इत्या मे त्वयि दधानीति पिता, इत्यास्ते मयि दध इति पुत्रः । धियो विज्ञातव्यं कामान् मे त्वयि दधानीति पिता, धियो विज्ञातव्यं कामांस्ते मयि दध इति पुत्रः । अथ दक्षिणाप्राक् प्राङ् परिक्रामति तं [2]पिता न मन्त्रयति—

[1] निपद्यत—अ, अ १, अ २, क. [2] पिताऽनु—क, मु.

यशो ब्रह्मवर्चसमन्नाद्यं कीर्तिस्त्वा जुषतामिति । अ[1]थेतरः सव्यमंसमन्ववेक्षते पाणिनाऽन्तर्धाय [2]वसनात्तनु वा प्रच्छाद्य स्वर्गान् लोकान् कामानवाप्नुहीति स्वयं ह्येकतः स्यात् । पुत्रस्यैश्वर्ये पिता वसेत परि वा व्रजेयुः । यद्युवै प्रयुञ्यादेवैनं समापयति तथा समापयितव्यो भवति ॥ १० ॥

स्वपुत्राभ्युदयहेतुतयेदमुपासनान्तरं प्रकटयन्नुपसंहरति—**अथेति** । **अथात** इत्युक्तार्थम् । **पितापुत्रो यं सम्प्रदानमिति चाचक्षते**—पित्रे हितकृत् पुत्रः, पुत्राय हितकृत् पितेति सम्प्रदानशब्दार्थः । **पिता पुत्रं प्रेष्याह्वयति** । नवीनतृणैरागारं कल्पयित्वा स्वगृह्योक्तविधानेन **अग्निमुपसमाधाय** अग्नेः पुरस्तादुदकुम्भमुपपात्रसहितं **उपनिधाय** धौतवाससा **संप्रच्छन्नं** कृत्वा **ह्यतः** कुम्भप्रदेशात् **उपरिष्टात्** उदक्प्रदेशे पिता पुत्रश्चाभिनिष्पद्येते निष्पन्नौ भवतः । ततः पितुः वागादीन्द्रियैः अस्य पुत्रस्य इन्द्रियाणि वक्ष्यमाणमन्त्रानुरोधेन **संस्पृश्यापि वाऽस्य** पितु**रभिमुखत एव** पुत्र **आसीत** । **अथास्मै** पुत्राय पिता स्ववागादिकरणग्रामं **सम्प्रयच्छति** । कथं? **पिता मे वाचं त्वयि दधानीति** वदति । **पुत्रस्तु ते वाचं मयि दध इति** प्रार्थयति । तथा **चक्षुर्म** इत्यादि समानम् । एवं पिता पुत्रे स्वकरणजातं विन्यस्याथ अग्न्युदकुम्भदक्षिणभागस्थप्राग्भागं स्वयं प्रागेव **परिक्रामति** । तदा तं पुत्रं पिता नाभिमन्त्रयति न वाचा वदति, **यशो ब्रह्मवर्चसमन्नाद्यं कीर्तिस्त्वा जुषतामिति** मनसा ध्यायति । **अथेतरः** पुत्रः **सव्यमंसं पाणिनाऽन्तर्धाय अन्ववेक्षते वसनाद्वाससा तनु वा** तनुं वा **प्रच्छाद्य** स्वपितरमुद्दिश्य हे पितस्त्वं **स्वर्गान् लोकान्** स्वाभिलषित-

[1] थेतरः—अ १. अ २, क, उ.

[2] अयं पाठो व्याख्यामनुसृत्य धृतः. कोशपाठस्तु—"वसनान्तनुवा" इति उ, अ १, अ २. "वसनान्तनवा" इति अ, क. कोशयोः. "वसनान्तेनवा" इति मुद्रितकोशे.

कामानवाप्नुहीति पितरं प्रेषयित्वा **स्वयं ह्येकतः** एक एव **स्यात्**। **पुत्रस्यैश्वर्ये पिता वसेत** पितैव पुत्ररूपेण वर्तते, "आत्मा वै पुत्रनामाऽसि" इति श्रुतेः। एवं एतद्वंशीयाः स्वकरणजातं पुत्रे विन्यस्य **परि वा** परितो **व्रजेयुः**, सूत्रान्तर्यामिभावमेत्य व्यापकतां भजेयुः। **यद्युवै** यद्वा तद्वंशीयः प्रकर्षेण स्वातिरिक्तापह्नवो यत्र युज्यते तत्प्रयुज्यं सम्यज्ज्ञानं तस्मात् **प्रयुज्यादेव** सम्यज्ज्ञानात् **एनं** स्वातिरिक्तं भ्रमं **समापयति** अपह्नवं करोति। परमपुरुषार्थेच्छुभिः **तथा समापयितव्यो भवति** स्वातिरिक्तास्तिताभ्रम इत्यर्थः॥

इति द्वितीयोऽध्यायः

तृतीयोऽध्यायः

मनुष्यहिततमं प्रज्ञाऽऽत्मप्राणोपासनम्

प्रतर्दनो ह वै दैवोदासिरिन्द्रस्य प्रियं धामोपजगाम युद्धेन पौरुषेण च। तं हेन्द्र उवाच प्रतर्दन वरं ते ददानीति। स होवाच प्रतर्दनस्त्वमेव वृणीष्व यं त्वं मनुष्याय हिततमं मन्यस इति। तं हेन्द्र उवाच न वै वरं परस्मै वृणीते त्वमेव वृणीष्वेति। अवरो वै तर्हि किल म इति होवाच प्रतर्दनः। अथो खल्विन्द्रः सत्या देवतेयाय सत्यं हीन्द्रः। स होवाच मामेव विजानीह्येतदेवाहं मनुष्याय हिततमं मन्ये यन्मां विजानीयां त्रिशीर्षाणं त्वाष्ट्रमहनमरुङ्मुखान् यतीन् सालावृकेभ्यः प्रायच्छं बह्वीः संधा अतिक्रम्य

दिवि प्रह्लादीनतृणमहमन्तरिक्षे पौलोमान् पृथिव्यां कालकाश्यां[1]तस्य मे तत्र न लोम च मीयते। स यो मां विजानीयान्नास्य केन च कर्मणा लोको मीयते न मातृवधेन पितृवधेन न स्तेयेन न भ्रूणहत्यया नास्य पापं च न चक्षुषो [2]मुखं नीलं वेत्तीति स होवाच प्राणोऽस्मि प्रज्ञाऽऽत्मा [3]तं मामायुरमृतमित्युपास्स्वायुः [4]प्राणः प्राणो वा आयुः प्राण [5]प्राण उवा अमृतं यावद्ध्यस्मिञ्छरीरे प्राणो वसति तावदायुः प्राणेन ह्येवामुष्मिल्लोकेऽमृतत्वमाप्नोति ॥१॥

द्वितीयाध्यायोक्तरीत्या निवृत्तकाम्यकर्मतत्फलेच्छानां सविशेषब्रह्मोपासनाद्वारा निर्विशेषं ब्रह्म प्रतिपादनीयमिति तृतीयाध्याय आरभ्यते। इन्द्रप्रतर्दनप्रश्नप्रतिवचनरूपेयमाख्यायिका विद्यास्तुत्यर्था। **प्रतर्दन इति**। नामतः **प्रतर्दनः**। **ह वा** इतिशब्दावैतिह्यार्थौ। दिवोदासस्यापत्यं **दैवोदासिः**। **युद्धेन** तत्साधनबलेन इक्ष्वाकुवत् **पौरुषेण च इन्द्रस्य प्रियं धाम स्वर्गं जगाम**। स तत्र गत्वा इन्द्रतुष्टये तदमित्रवर्गं जित्वा आवर्तमानं **तं** राजानं स्वारातिघातसन्तुष्टः सन् **इन्द्र उवाच**। किमिति? हे **प्रतर्दन** ते तुभ्यं **वरं ददानीति**। एवमुक्तवन्तं **स प्रतर्दन उवाच ह**। किमिति? हे भगवन् **त्वमेव** सर्वज्ञो **यं वरं मनुष्याय हिततमं मन्यसे** तं वरं त्वमेव मनुष्यस्य **वृणीष्व**। नह्यज्ञो मनुष्यः स्वात्यन्तिकहितं वेत्ति। **तमित्येवमुक्तवन्तमिन्द्रः उवाच**। किमिति? **न वै** कश्चिदपि लोके **परस्मै वरं वृणीते**, अतस्त्वमेवेष्टवरं मत्सकाशात् **वृणीष्वेति**। **एवमुक्तः प्रतर्दन उवाच**। किमिति? तर्हि किल मदर्थं त्वयैव वरावरणे **मे ममावरो वै** वराभाव एव प्राप्तः, स्वात्मतया वरणीयवस्त्वपरिज्ञानात्। एवमुक्तोऽथोऽनन्तरं

[1] स्तसेमे—उ. [2] मुखान्नीलंवेदेति—उ, उ १.
[3] नं मा—क. [4] प्रायुः प्राणो—अ १, अ २, उ १.
[5] प्राण इवा—अ, अ १. प्राणं व—अ २.

खल्विन्द्रः उवाचेत्यनुवर्तते । किमिति ? **सत्या** सत्यवाक्या परमार्थसत्या **देवता** त्वामियाय त्वदनुग्रहार्थं त्वां प्राप्तवती । सा च **हि** यस्मात्त्वामागतवती देवता **सत्यं** सत्यवाक्यं परमार्थतत्त्वं **इन्द्रः** यतः क्रियाज्ञानशक्तिमदात्मा अतो न वराभावस्ते भविष्यति, अतः सत्या देवताऽऽत्मा अहमेव त्वद्वरं वृण इति शेषः। एवमुक्त्वा **स होवाच** भगवानिन्द्रः । किमिति ? **मामेव** क्रियाज्ञानशक्तिविग्रहं सगुणोपासनद्वारा **विजानीहि** । **एतन्मद्याथात्म्यपरिज्ञानमेव मनुष्याय हिततमं मन्ये** । तत् कथमित्यत्र **यत्** यस्मात् मां सर्वारोपापवादाधिकरणतया **विजानीयां** सम्यक् जानामि तस्मादेवाहं निजोपग्रहैः राजभृत्यवत् अन्ततोऽयस्कान्तवद्वा प्रवर्त्यमानैः **त्रिशीर्षाणं** त्वष्टृपुत्रं **त्वाष्ट्रमहनं**—हन्तेर्लङुत्तमैकवचनं—हतवानस्मि । तत्कृतहत्यामपि निर्वर्तितवानस्मि । तथा अरुक् स्वाज्ञानमेव मुखं येषां तान् **अरुङ्मुखान् यतीन्** स्वाज्ञानपूर्वकं स्वाश्रमाचारबहिर्मुखान् वनश्वविशेष**सालावृकेभ्यः** खादनाय **प्रायच्छम्**। इदमपि ब्रह्महत्याऽन्तरम्। अथ **बह्वीः सन्धाः** कालकक्ष्याः पुरुषायुषलक्षणाः **अतिक्रम्य दिवि** स्थितान् **प्रह्लादापत्यासुरान् प्रह्लादीनतृणं** हिंसितवानस्मि । तथा **अन्तरिक्षे** पुलोमापत्यासुरान् **पौलोमानतृणं**, तथा **पृथिव्यां कालकाश्यासुरानतृणम्**। **तस्यैवं** हिंसितवतो **मे** मम तत्र तादृशदुष्कर्मणि मया अनुष्ठितेऽपि तेन कर्मणा **न मे लोम च** लोमापि **मीयते** नामीमिपत्—मिङ्हिंसायां, अस्मात् ण्यन्ताच्चङि—न हि पीडयति स्म। स्वतत्त्वनिष्ठामहिम्ना तद्दोषास्पर्शात् स्वाज्ञवन्न मे तज्जन्यसुखं दुःखं वाऽभूदित्यर्थः। तथा च स्मृतिः—

> यस्य नाहंकृतो भावो बुद्धिर्यस्य न लिप्यते ।
> हत्वाऽपि स इमान् लोकान् न हन्ति न निबध्यते ॥

इति । यथा मे स्वज्ञानमहिम्ना न कर्मलेपोऽस्ति एवमेव स यः कश्चित् मां सर्वप्रत्यगभिन्नं ब्रह्मास्मीति विजानीयात् **अस्य विदुषो लोकः केन च** केनापि पापकर्मणा **न मीयते** नहि हिंसितो भवति। उक्तार्थमेव विशदयति—**नेत्यादिना**। **मातृवधपापेनापि** लोको **न** मीयते, तथा **न पितृवधेन, न स्तेयेन, न भ्रूण-**

हत्यया लोको मीयते । अपि च पापं चक्रुषो यथाप्राप्तपापक्रियामपि करणैः पुण्यविशेषं प्रवर्तयते अस्य मुखमान्तरं बाह्यं च नीलं अज्ञानं न वेत्ति न प्राप्नोति । तथा च स्मृतिः—

प्रकाशं च प्रवृत्तिं च मोहमेव च पाण्डव ।
न द्वेष्टि संप्रवृत्तानि न निवृत्तानि कांक्षति ॥

इति । इतिशब्दो मानुषहितोपदेशसमाप्त्यर्थः । एवं स्वयाथात्म्यमेव मानुषहिततया उपदिश्य तत्सिद्धिहेतुस्वोपास्तिमुपदिशति भगवान्—स होवाचेति । प्राणवच्छरीरधात्री जीवप्रज्ञामयी ज्ञानशक्तिरात्मा स्वरूपं यस्य ममेन्द्रस्य सोऽहं प्राणोऽस्मि प्रज्ञाऽऽत्मा । तथा च श्रुतिः, "वरं ते ददामीति स होवाच त्वामेव विजानीयामिति तमिन्द्र उवाच प्राणो वा अहमस्म्यृषे" इत्यादि । यः प्रज्ञाविशिष्टप्राणोपाधिकः तं मां ज्ञानक्रियाशक्तिमूर्तिं तावकायुरमृतमिति च क्रमादुपास्स्व । एवमुपासनाफलमेतत्—आयुः प्राणः प्राणो वा आयुः, क्रियाशक्तिप्राधान्यात् । तथाऽमृतत्वोपास्तिः ज्ञानशक्तिप्रधानात् [प्राधान्यात्] । नानयोर्भिदाऽस्ति । सोऽसौ प्राण इति वै प्राण एवामृतं च । तत् कथं? यावद्ध यस्मिन् शरीरे प्राणो वसति तावदायुरुच्छ्वासनिःश्वासात्मा भवति । तथा प्राणेनैव हि यथावदुपास्यमानेन अमुष्मिन् परलोके उत्पत्तिविनाशराहित्यलक्षण-ममृतत्वमाप्नोति । अतः प्राण एवायुरमृतं च ॥ १ ॥

मुख्यप्राणस्य अमृतत्वोपासनम्

प्रज्ञया सत्यसंकल्पः स यो म आयुरमृतमित्युपास्ते सर्वमायुरस्मिल्लोक आप्नोत्यमृतत्वमक्षितिं स्वर्गे लोके । तद्धैक आहुरेक[1]भूयं वै प्राणा गच्छन्तीति । न हि कश्चन शक्नुयात् सकृद्वाचा नाम प्रज्ञापयितुं चक्षुषा रूपं श्रोत्रेण शब्दं मनसा

[1] भूया—अ २, क.

ध्यातमिति एक[1]भूयं वै प्राणा एकैकं सर्वाण्येवैतानि प्रज्ञापयन्ति । वाचं वदन्तीं सर्वे प्राणा अनुवदन्ति चक्षुः पश्यत् सर्वे प्राणा अनुपश्यन्ति श्रोत्रं शृण्वत् सर्वे प्राणा अनुशृण्वन्ति मनो ध्यायत् सर्वे प्राणा अनुध्यायन्ति प्राणं प्राणन्तं सर्वे प्राणा अनुप्राणन्तीति । एवमु हैवैतदिति हेन्द्र उवाचास्तीत्येव प्राणानां [2]निःश्रेयसमिति । जीवति वागपेतो मूकान् विपश्यामो जीवति चक्षुरपेतोऽन्धान् विपश्यामो जीवति श्रोत्रापेतो बधिरान् विपश्यामो जीवति बाहुच्छिन्नो जीवत्यूरुच्छिन्न इत्येवं हि पश्याम इति प्राण एव प्रज्ञाऽऽत्मेदं शरीरं परिगृह्योत्थापयति ॥ २ ॥

एवं मद्याथात्म्यज्ञानमिहामुत्र विशिष्टफलदमित्याह—**प्रज्ञयेति** । यः **प्रज्ञया** विज्ञानशक्त्या **सत्यसङ्कल्पो** भूत्वा **माममृतमित्युपास्ते** सोऽयं **मुनिरस्मिंश्च लोके सर्वमायुरेति स्वर्गे लोके** अमुष्मिन् लोके **अक्षितिमक्षया-मृतत्वमपवर्गमाप्नोति**। अथ प्रज्ञाऽऽत्मनो मुख्यप्राणस्य विद्वदनुभवप्रकाशद्वारेणैकी-भावमुपदिशति—**तद्वेति** । **तद्ध** प्रसिद्धप्राणतत्त्वमुपदिश्य **एके** प्राणतत्त्वविद एवमाहुः । किमिति? **एकभूयं वै**—भुवो भाव इति क्यप्—ऐक्यं वै तत्तत्प्रज्ञोन्मुखे मुख्यप्राणे अवरप्राणाः **गच्छन्ती**ति । तथात्वमेव ते प्रतिपादयन्ति —**न ही**ति । **न हि कश्चन** पुमान् **सकृद्युगपदेव** प्राणस्य प्रज्ञान्तरोन्मुखकाल एव **वाचा** वागिन्द्रियेण स्वपरनाम **प्रज्ञापयितुं शक्नुयादि**त्यनुकर्षः । एवं मुख्यप्राणे गौणप्राणा **एकभूयं** गच्छन्तीत्यनुकर्षः । यत एवमतः **एकैक**-प्रज्ञोन्मुखं प्राणं **सर्वाणी**तरप्राणाख्यानीन्द्रियाणि एकीभूय **प्रज्ञापयन्ति** । तथाहि—स्वाधिष्ठानप्राणसहितामभिवदनक्रियां कुर्वन्तीं **वाचं** वागिन्द्रियं **सर्वे** गौणप्राणा **अनुवदन्ति** वाचिकवदनक्रियामनुकुर्वाणा वदन्त इव वदन्ति, न

[1] भूया—क. [2] निःश्रेयसादानमिति—उ, उ १.

तु स्वव्यापारे प्रवर्तन्ते। तथा **चक्षुः पश्यत् सर्वे प्राणा अनुपश्यन्ति। श्रोत्रं शृण्वदित्यादि** समानम्। एवं विदुषां प्राणैकीभावसमर्थनावसाने स्वस्याप्ययमर्थः सम्मतः इति श्रुतिराह—**एवमिति**। एतद्यथोक्तप्राणैक्यं **एवमु ह एवमेवेति भगवानिन्द्र उवाच**। अन्यच्चोवाच—**अस्तीत्येव प्राणानां निःश्रेयसमिति**। यद्यप्येकैकव्यापारे वरगोष्ठिवदितराप्राधान्यमविशिष्टं, अथापि तु विशेषेण प्राणानां मध्ये निःश्रेयसं—अचतुरेत्यादिनिपातनादच् समासान्तः—नितरां श्रेयः अतितरां मुख्यमेवान्यत् प्राणतत्त्वमस्ति। तत् कथं? इन्द्रियान्तरनाशे तद्व्यापृतिमात्रोपरतिः, प्राणनाशे तु सर्वेन्द्रियतद्व्यापृतिनाशदर्शनात्। गौणप्राणापेक्षया मुख्यप्राणस्यैव प्राधान्यं वेदितव्यमित्याह—**जीवतीति**। सति प्राणे **वागपेतोऽपि जीवति** वदनव्यापृतिं विना सकलव्यापृतिमान् भवति, न हि म्रियते। तत् कथं? जीवन्मूकान्धादिदर्शनात्। तथा **जीवति चक्षुरपेत** इत्यादि समानम्। **इत्येवं हि** यस्मात् **पश्यामः** प्राणनाशे न कस्यापि जीवनं पश्यामः अतोऽखिलजीवनहेतुः क्रियाज्ञानशक्तिमान् प्राणः, अस्य सर्वप्राणमुख्यत्वात्। यत एवमतः प्रज्ञाऽऽत्मा **प्राण एवेदं** सकरणजातं **शरीरमासीनं** शयानं वा **परिगृह्योत्थापयति** ॥ २ ॥

प्राणस्य उक्थत्वोपासने सर्वोज्जीवनहेतुत्वदर्शनम्

अथ खलु तस्मादेतमेवोक्थमुपासीत। यो वै प्राणः सा प्रज्ञा या वा प्रज्ञा स प्राणः। सह ह्येतावस्मिन् शरीरे वसतः सहोत्क्रामतः। तस्यैषैव दृष्टिरेतद्विज्ञानम्। यत्रैतत् पुरुषः सुप्तः स्वप्नं न कंचन पश्यत्यथास्मिन् प्राण एवैकधा भवति तदैनं वाक् सर्वैर्नामभिः सहाप्येति चक्षुः सर्वै रूपैः सहाप्येति श्रोत्रं सर्वैः शब्दैः सहाप्येति मनः सर्वैर्ध्यातैः सहाप्येति। स यदा प्रतिबुध्यते यथाऽग्नेर्विस्फुलिङ्गा विप्रतिष्ठेरन्नेवमेवैतस्मादात्मनः प्राणा यथाऽऽयतनं

विप्रतिष्ठन्ते प्राणेभ्यो देवा देवेभ्यो लोकाः । तस्यैवैष सिद्धिरेतद्विज्ञानम् । यत्रैतत् पुरुष आर्तो मरिष्य[1]न्नाबल्यं न्येत्य मोहं ने[न्ये]ति तदाऽऽहुरुदक्रमीच्चित्तं न शृणोति न पश्यति न [2]वाचं वदति । अथास्मिन् प्राण एवैकधा भवति [3]तदैनं वाक् सर्वैर्नामभिः सहाप्येति चक्षुः सर्वै रूपैः सहाप्येति श्रोत्रं सर्वैः शब्दैः सहाप्येति मनः सर्वैर्ध्यातैः सहाप्येति । स यदा प्रतिबुध्यते यथाऽग्नेर्विस्फुलिङ्गा विप्रतिष्ठेरन्नेवमेवैतस्मादात्मनः प्राणा यथाऽऽयतनं विप्रतिष्ठन्ते प्राणेभ्यो देवा देवेभ्यो लोकाः ॥ ३ ॥

सर्वोज्जीवनहेतुमुख्यप्राणस्योक्थतयोपासनमादिशति—**अथेति** । **अथ**-शब्दः उपासनान्तरोपक्रमार्थः । यस्मात् प्राणः शरीरोत्थापनहेतुः **तस्मादेव हेतोरेतमेव** मुख्यप्राण**मुक्थमित्युपासीत** । कथं प्राणस्योक्थत्वं? गौणप्राणविशिष्टशरीरोत्थापनहेतुत्वात् । तथा च श्रुतिः—"प्राणः प्राविशत्तत्प्राणे प्रपन्न उदतिष्ठत्तदुक्थमभवत्" इति । अथ **यो वै** प्रसिद्धः उक्थरूपतया **प्राणः सा प्रज्ञा** जीवज्योतिः । **या वा प्रज्ञा** उक्थरूपा **स प्राणः** । कथमनयोरेकत्वमित्यत आह—**सह** इत्यादि । यस्मादेतौ प्रज्ञाप्राणौ स्थूलशरीरेऽस्मिन् यावत् कर्म **सहैव वसतः**, तथा **सहैवोत्क्रामतश्च** । अस्मादेवमन्योन्यसापेक्षस्थित्युत्क्रान्तिमत्त्वात् नह्यनयोः भिदा भवतीत्यर्थः । **तस्यास्योक्थप्राणस्यैषैव दृष्टिः** । किं? **एतद्विज्ञानं** यदस्यार्थाज्जीवरूपमुक्तं, एषैव क्रिया यः प्राण इति द्रष्टव्यः । एतौ किलान्धपंग्वादिन्यायेन संसरतः । अथ यथोक्तरीत्या अनयोस्तादात्म्यसिद्धये प्रथमं करणग्रामविलासप्रज्ञायाः प्राणैक्यं सुप्युत्क्रान्त्योः दृश्यते । तत् कथं? **यत्र** सुप्तिधाम्न्येतत्पुरुषः प्रज्ञोपाधिकः कूटस्थात्मा करणग्रामोपरमलक्षणां **सुप्तिं**

[1] न्नाबबल्यं—अ, अ १, अ २, क, [2] वाचा वदति—उ.
[3] तयैनं—उ,

यतः प्राप्तवानत एव न कञ्चनाभ्यन्तरस्वप्नं पश्यति मुख्यप्राणेनैकीभूतत्वात्। यदा विज्ञानोपाधिः विलीयते, तदैनं प्राणं वागिन्द्रियं सर्वैः प्रज्ञानप्रभवनामभिः सहाप्येति। तथा चक्षुः सर्वैः रूपैः सहाप्येति। तथा श्रोत्रं सर्वैः शब्दैः सहाप्येति, मनः सर्वैः ध्यातैः ध्यातव्यवस्तुगतवृत्तिभिः सहाप्येति। स यदा भगवान् प्रतिबुध्यते प्रबुद्धजीवशक्तिको भवति तदा यथा अग्नेर्विस्फुलिङ्गा विप्रतिष्ठेरन् निर्गच्छेरन् एवमेवात्मनः सकाशात् एतस्मात् प्राणादेव च वागादयः सर्वे प्राणाः यथाऽऽयतनं मुखादिस्वस्वगोळकं विज्ञानसिद्धये विप्रतिष्ठन्ते निर्गच्छन्ति। प्राणेभ्यस्तदधिष्ठातारोऽग्न्यादिदेवा विप्रतिष्ठन्ते, देवेभ्यस्तद्विषयप्रकाश्या लोका विप्रतिष्ठन्ते। एवं करणग्रामोत्पत्तिलयाधिष्ठातुः प्राणस्य शरीरस्थितिसाधनं विज्ञानमुदेति। तदा अन्नादिप्राप्त्युपायचिन्तया प्राणः प्रतिष्ठाप्यते। अथोत्क्रान्तिदशायां पुरुषो रोगादिना खिन्नो मरिष्यन् प्रज्ञाविभ्रंशं गच्छति। तदा पार्श्वस्था आहुः अस्य प्रज्ञाभ्रंशो भवेत् अत एव अयं न शृणोति न पश्यति न वाचं वदति इति। अथैवं विज्ञानमयः प्राण एवैकधा भवति, तदोत्क्रामति, तदैनं प्राणं वाक् सर्वैः नामभिः सहाप्येति। तथा चक्षुः श्रोत्रं मनश्च स्वस्वविषयैः सहाप्येति। स यदा दैवात् मन्त्रौषधादिना जीवन् प्रतिबुध्यते तदा यथाऽग्नेः विस्फुलिङ्गा विप्रतिष्ठेरन् एवमेवैतस्मादात्मनः प्राणा यथाऽऽयतनं विप्रतिष्ठन्ते प्राणेभ्यो देवाः देवेभ्यो लोकाः इत्युक्तार्थम्॥ ३॥

पुरुषस्य उत्क्रमणानन्तरावस्था

स यदाऽऽस्माच्छरीरादुत्क्रामति वागस्मात् सर्वाणि नामान्यभिविसृजते वाचा सर्वाणि नामान्याप्नोति [1]प्राणोऽस्मात् सर्वान् गन्धानभिविसृजते [2]प्राणेन सर्वान् गन्धानाप्नोति चक्षुरस्मात् सर्वाणि रूपाण्यभिविसृजते चक्षुषा सर्वाणि रूपाण्याप्नोति श्रोत्रमस्मात् सर्वान्

[1] प्राणो—क. [2] प्राणे—क.

शब्दानभिविसृजते श्रोत्रेण सर्वान् शब्दानाप्नोति मनोऽस्मात् सर्वाणि ध्यातान्यभिविसृजते मनसा सर्वाणि ध्यातान्याप्नोति । सैषा प्राणे सर्वाप्तिः । यो वै प्राणः सा प्रज्ञा या वा प्रज्ञा स प्राणः स ह ह्येतावस्मिन् शरीरे वसतः सहोत्क्रामतः । अथ खलु यथा प्रज्ञायां सर्वाणि भूतान्येकं भवन्ति तद्व्याख्यास्यामः ॥ ४ ॥

तस्योत्क्रमणानन्तरभाव्यवस्थां वर्णयति—**स यदेति** । **स** मुमूर्षुः **अस्मात् शारीरात्** स्वकर्मानुरूपं शरीरान्तरमुत्क्रामति । तथा च श्रुतिः—"तद्यथा तृणजलायुका तृणस्यान्तं गत्वा अन्यमाक्रममाक्रम्य आत्मानमुपसंहरत्येवमेवायमात्मा इदं शरीरं निहत्य अविद्यां गमयित्वा अन्यमाक्रममाक्रम्य आत्मानमुपसंहरति" इति । तदा तत्र पापपुण्यान्यतरातिवाहशरीरे **अस्मादेव** प्राणात् पुनः निर्गता **वाक् सर्वाणि नामानि अभिविसृजते वाचा सर्वाणि नामान्याप्नोति** जानाति यथापूर्वम् । तथा घ्राणाख्यप्राणोऽस्मात्—निर्गत इति सर्वत्र अनुषज्यते—**सर्वान् गन्धानभिविसृजते घ्राणेन सर्वान् गन्धानाप्नोति** इत्यादि समानम् । यैषा प्राणादुत्थितैः वागाद्यैः नामाद्यर्थाप्तिरुक्ता **सैषा प्राणे सर्वाप्तिरुच्यते** । एवं **यो वै प्राणः सा प्रज्ञा या वा प्रज्ञा स प्राणः सह ह्येतावस्मिन् शरीरे वसतः सहोत्क्रामतः** । अथ प्राणे सर्वप्राणाप्तिकथनानन्तरं **यथा** येन प्रकारेण खलु **प्रज्ञायां** जीवज्योतिषि **सर्वाणि भूतानि** वागग्न्यादिभूतमात्राण्यप्येकं **भवन्ति तद्व्याख्यास्यामः** ॥ ४ ॥

प्रज्ञायां सर्वभूतानां एकीभावः

वागेवास्या एकमङ्ग[1]मुदूढं तस्यै नाम परस्तात् प्रतिविहिता भूतमात्रा । घ्राणमेवास्या एकमङ्गमुदूढं तस्य गन्धः परस्तात् प्रतिविहि-

[1] "मदूहं" सर्वपर्यायेषु—अ, अ १, उ १.

ता भूतमात्रा । चक्षुरेवास्या एकमङ्गमुदूढं तस्य रूपं परस्तात् प्रतिविहिता भूतमात्रा । श्रोत्रमेवास्या एकमङ्गमुदूढं तस्य शब्दः परस्तात् प्रतिविहिता भूतमात्रा । जिह्वैवास्या एकमङ्गमुदूढं तस्यान्नरसः परस्तात् प्रतिविहिता भूतमात्रा । हस्तावेवास्या एकमङ्गमुदूढं तयोः कर्म परस्तात् प्रतिविहिता भूतमात्रा । शरीरमेवास्या एकमङ्गमुदूढं तस्य सुखदुःखे परस्तात् प्रतिविहिता भूतमात्रा । उपस्थ एवास्या एकमङ्गमुदूढं तस्यानन्दो रतिः प्रजातिः परस्तात् प्रतिविहिता भूतमात्रा । पादावेवास्या एकमङ्गमुदूढं तयोरित्या परस्तात् प्रतिविहिता भूतमात्रा । प्रज्ञैवास्या एकमङ्गमुदूढं तस्यै धियो विज्ञा[1]तव्यकामाः परस्तात् प्रतिविहिता भूतमात्रा ॥ ९ ॥

कथं व्याख्यास्यसि ? इत्यत आह—वागेवेति । वागेवास्या जीवप्रज्ञायाः स्वपरसर्वार्थप्रकाशिकायाः **एकमङ्गम्** । एकशब्देन प्रज्ञापनीयार्थविशेषप्रज्ञानपरिकर उच्यते । तच्चेदमंगं करचरणादि अङ्गिनि शरीर इव अङ्गिन्यां प्रज्ञायां **उदूढं** [2]उह्यैः धृतम् । **तस्यै** इति षष्ठ्यर्थे चतुर्थी । तथा अग्रेऽपि । **परस्तात्** ज्ञापिकायाः स्वस्या बहिर्भूता ज्ञाप्या **भूतमात्रा** सिद्धा अनात्मभूतपदार्थांशः **नाम** गृहीतशक्त्यैकशब्दविशेषः **प्रतिविहिता** प्रतिस्वतत्त्वविहिता कृता । तथा **घ्राण एवास्या एकमङ्गमुदूढं तस्य गन्धः परस्तात् प्रतिविहिता भूतमात्रेत्यादि** समानम् । देहात् बहिः स्त्र्यन्नपानादिरूपे **सुखदुःखे** स्थूलसूक्ष्मशरीराश्रये इत्यर्थः । **आनन्दः** सिराविकासजविकारविशेषः, पुंस्त्रीकेळिः **रतिः**, प्रजातिः पुत्रोत्पत्तिः । **इत्या** गतिः । **प्रज्ञा**शब्देन प्रकृष्टात्मा जीवज्योतिरुच्यते ।

[1] तव्यं का—उ.

[2] अद् दुहदिति प्रायः पाठः तत्पक्षे अद् दुहत् पूरयामासेत्यर्थः । पक्षान्तरे वागेवास्या इत्यादि षष्ठी सप्तमीत्वेन विज्ञेया—इति टिप्पणं (उ १) कोशे अधिकं दृश्यते.

सैवास्याः प्रज्ञायाः एकमङ्गमुदूढम् । तस्यै तस्याः आन्तरतनोः धियः अपरोक्ष-शब्दादिनिश्चयवृत्तयः, तथा विज्ञातव्यकामाः ज्ञातव्यवस्तुगोचरवृत्तयश्च, एवं द्विप्रकाराः परस्तात् प्रतिविहिता भूतमात्राः ॥ ९ ॥

प्रज्ञाऽधिष्ठितैरेव वागादिभिः नामाद्याप्तिः

प्रज्ञया वाचं समारुह्य वाचा सर्वाणि नामान्याप्नोति । प्रज्ञया [1]प्राणं समारुह्य [2]प्राणेन सर्वान् गन्धानाप्नोति । प्रज्ञया चक्षुः समारुह्य चक्षुषा सर्वाणि रूपाण्याप्नोति । प्रज्ञया श्रोत्रं समारुह्य श्रोत्रेण सर्वान् शब्दानाप्नोति । प्रज्ञया जिह्वां समारुह्य जिह्वया हि सर्वानन्नरसानाप्नोति । प्रज्ञया हस्तौ समारुह्य हस्ताभ्यां सर्वाणि कर्माण्याप्नोति । प्रज्ञया शरीरं समारुह्य शरीरेण सुखदुःखे आप्नोति । प्रज्ञयोपस्थं समारुह्योपस्थेनानन्दं रतिं प्रजातिमाप्नोति । प्रज्ञया पादौ समारुह्य पादाभ्यां सर्वा इत्या आप्नोति । प्रज्ञयैव धियं समारुह्य प्रज्ञयैव धियो विज्ञातव्यं कामानाप्नोति ॥ ६ ॥

एवं वागाद्यंगिप्रज्ञया पुरुषो वागाद्यधिष्ठाय वागादिना नामादीनाप्नोतीत्याह —**प्रज्ञयेति** । एवं वागाद्यंग[गि]भूतजीव**प्रज्ञया** युक्तः पुरुषो **वाचं समारुह्य** अधिष्ठाय स्वाधिष्ठितया **वाचा सर्वाणि नामान्याप्नोति** । **प्रज्ञया प्राणं समारुह्येत्यादि** समानमुक्तार्थं च ॥ ६ ॥

प्रज्ञाऽपेतानां वागादीनामसाधकत्वम्

न हि प्रज्ञाऽपेता वाङ्नाम किंचन [3]प्रज्ञापयेदन्यत्र मे मनोऽभूदित्याह नाहमेतन्नाम प्रज्ञासिषमिति । न हि प्रज्ञाऽपेतः प्राणो

[1] घ्राणं—क. [2] घ्राणेन—क. [3] प्रज्ञप—उ, उ १, अ, अ २.

गन्धं कंचन प्रज्ञापयेदन्यत्र मे मनोऽभूदित्याह नाहमेतं गन्धं प्रज्ञासिषमिति । न हि प्रज्ञाऽपेतं चक्षू रूपं किंचन प्रज्ञापयेदन्यत्र मे मनोऽभूदित्याह नाहमेतद्रूपं प्रज्ञासिषमिति । न हि प्रज्ञाऽपेतं श्रोत्रं शब्दं कंचन प्रज्ञापयेदन्यत्र मे मनोऽभूदित्याह नाहमेतं शब्दं प्रज्ञासिषमिति । न हि प्रज्ञाऽपेता जिह्वाऽन्नरसं कंचन प्रज्ञापयेदन्यत्र मे मनोऽभूदित्याह नाहमेतमन्नरसं प्रज्ञासिषमिति । न हि प्रज्ञाऽपेतौ हस्तौ कर्म किंचन प्रज्ञापयेतामन्यत्र मे मनोऽभूदित्याह नाहमेतत्कर्म प्रज्ञासिषमिति । न हि प्रज्ञाऽपेतं शरीरं सुखदुःखे किंचन प्रज्ञापयेदन्यत्र मे मनोऽभूदित्याह नाहमेतत्सुखदुःखे प्रज्ञासिषमिति। न हि प्रज्ञाऽपेत उपस्थ आनन्दं रतिं प्रजातिं कंचन प्रज्ञापयेदन्यत्र मे मनोऽभूदित्याह नाहमेतमानन्दं रतिं प्रजातिं प्रज्ञासिषमिति । न हि प्रज्ञाऽपेतौ पादावित्यां कांचन प्रज्ञापयेतामन्यत्र मे मनोऽभूदित्याह नाहमेतामित्यां प्रज्ञासिषमिति । न हि प्रज्ञाऽपेता धीः काचन सिद्धचेन्न प्रज्ञातव्यं प्रज्ञायेत ॥ ७ ॥

अन्वयमुक्त्वा व्यतिरेकमाह—नहीति । **प्रज्ञापेता** प्रज्ञाविरळा **वाक् न हि किञ्चन नाम प्रज्ञापयेत्** । कुतः ? **अन्यत्र मे मनः** अन्तःकरणं प्रज्ञासंसर्गद्वारभूतं विषयान्तरे अभूत्, अतो **नाहमेतन्नाम प्रज्ञासिषमित्याहेति । न हि प्रज्ञाऽपेतः प्राणः** इत्यादि समानम् ॥ ७ ॥

वागादीनां मिथ्यात्वदृष्टिपूर्वकं केवलब्रह्मात्मप्रज्ञानविधिः

न वाचं विजिज्ञासीत वक्तारं विद्यात् । न गन्धं विजिज्ञासीत घ्रातारं विद्यात् । न रूपं विजिज्ञासीत रूपविदं विद्यात् । न शब्दं

विजिज्ञासीत श्रोतारं विद्यात्। नान्नरसं विजिज्ञासीतान्नरसविज्ञातारं विद्यात्। न कर्म विजिज्ञासीत कर्तारं विद्यात्। न सुखदुःखे विजिज्ञासीत सुखदुःखयोर्विज्ञातारं विद्यात्। नानन्दं रतिं प्रजातिं विजिज्ञासीतानन्दस्य रतेः प्रजातेर्विज्ञातारं विद्यात्। नेत्यां विजिज्ञासीतैतारं विद्यात्। न मनो विजिज्ञासीत मन्तारं विद्यात्। ता वा एता दशैव भूतमात्रा अधिप्रज्ञं दश प्रज्ञामात्रा अधिभूतम्। यद्धि भूतमात्रा न स्युर्न प्रज्ञामात्राः स्युर्यद्वा प्रज्ञामात्रा न स्युर्न भूतमात्राः स्युः ॥ ८ ॥

वागादिकरणानां मिथ्यात्वदृष्टिपूर्वकं तदारोपापवादाधिकरणं ब्रह्मास्मीति ज्ञातव्यमित्याह—**न वाचमिति**। **न वाचं** वचनं **विजिज्ञासीत, वक्तारं** वागादिकरणग्रामप्रवृत्तिनिमित्तं **विद्यात्** इत्यादि समानम्। एवं दशमात्राप्रज्ञानां स्वतः सिद्ध्यभावात् तदुदयस्थितिलयाधिकरणकूटस्थचिदात्मानं सर्वानुवृत्तं स्वव्यावृत्तप्रज्ञातत्कार्यकलनास्पृष्टं वस्तुतः तत्सर्वकलनापह्नवसिद्धं ब्रह्म निष्प्रतियोगिकस्वमात्रमिति विद्यादित्यर्थः। तदुपायत्वेनाथ स्वविकल्पितमात्राणां प्रज्ञायाश्च प्राणप्रज्ञयोरिव नित्यान्वयात् नह्यतीव **भेदोऽस्तीत्यत्र ता वा एताः** वागाद्यन्तःकरणान्ताः **दशैव भूतमात्रा अधिप्रज्ञं** जीवप्रज्ञायामारूढं तत्सम्बन्धात् **दशप्रज्ञामात्राश्चाधिभूतम्**। कथमन्योन्यारोह इत्यत्र—**यद्धि** यदि हि **भूतमात्रा न स्युः** वचनादिविषयसंसृष्टवागादिप्राणमात्रा यदि प्रज्ञया न संसृज्येरन् तदा स्वतो **न प्रज्ञामात्राः स्युः**, प्रज्ञायाः निर्विकल्पत्वात्। तथा **यद्वा** वागादिसंसृष्टाः **प्रज्ञामात्राः न स्युः** तदा **भूतमात्राश्च न स्युः**, जडत्वेन स्वसत्तासाधकवैरळ्यादित्यर्थः ॥ ८ ॥

सर्वभेदरहितप्रज्ञाऽऽत्मवेदनविधिः

न ह्यन्यतरतो रूपं किंचन सिध्येत्। नो एतन्नाना। तद्यथा रथस्यारेषु नेमिरर्पिता नाभावरा अर्पिता एवमेवैता भूतमात्राः

प्रज्ञामात्रास्वर्पिताः प्रज्ञामात्राः प्राणे अर्पिताः। स वा एष प्राण एव प्रज्ञाऽऽत्माऽऽनन्दोऽजरोऽमृतो न साधुना कर्मणा भूयान् नो एवासाधुना कर्मणा कनीयान्। एष ह्येवैनं साधु कर्म कारयति तं [1]यमेभ्यो लोकेभ्य उन्निनीषते। एष उ एवैनमसाधु कर्म कारयति तं यमेभ्यो लोकेभ्यो [2]नुनुत्सते। एष लोकपाल एष लोकाधिपतिरेष [3]सर्वेश्वरः स म आत्मेति विद्यात् स म आत्मेति विद्यात् ॥ ९ ॥

उक्तार्थं विशदयन् उपसंहरति—न हीति। भूतमात्रामात्रेण वाऽसंसृष्टेन तथा प्रज्ञामात्रेण वा न किञ्चन रूपं भूतमात्रारूपं प्रज्ञामात्रारूपं वा सिध्येत्। तद्धेतुः प्रागेव उक्तः। हि यस्मादेवं तस्मान्नो एतद्भूतप्रज्ञामात्रास्वरूपं नानाभिन्नं नातिभेदवदित्यर्थः। तत्र दृष्टान्तमाह—तद्यथेति। तद्यथा रथचक्रस्यारेषु नेमिः अर्पिता। अन्तर्नेमिस्तु नाभिरित्यर्थः। तथा नाभावराश्चार्पिताः। एवमेवैताः भूतमात्राः प्रज्ञामात्रास्वर्पिताः, प्रज्ञामात्रा वागादिदशप्राणेष्वर्पिताः। योऽस्मिन् प्रकरणे प्रज्ञातव्यतया प्रकटितः स एषः प्रज्ञात्मा प्राण एव कूटस्थो महेन्द्रः स्वगतसविशेषदुःखापाये स्वयमेवानन्दः अखण्डानन्दस्वरूपत्वात्, अजरः षड्भावविकारापह्नवसिद्धत्वात्, अत एवामृतः परमामृतरूपत्वात्। तथाऽपि साध्वसाधुकर्मभिः वर्धते हीयत इत्याशङ्क्यां—परमार्थदृष्ट्या साध्वसाधुकर्ममूलस्वाज्ञानापह्नवसिद्धं निर्विशेषं ब्रह्मेत्यत्र न विवादः। (यः) स्वाज्ञदृष्टिप्रसक्तमूलाविद्याबीजांशासंगचिद्धातोरपि साध्वसाधुकृत्यतो वृद्धिहानिप्रसक्तिरपि नास्तीत्याह—नेति। सोऽयमीश्वरः शताश्वमेधादिलक्षणसाधुकर्मणा न हि भूयान् भवति। नो एवासाधुना ब्रह्महत्याऽऽदिनाऽपि कनीयान् भवति।

[1] अत्र व्याख्याऽनुसारी पाठो धृतः। सर्वकोशपाठस्तु "यमन्वानुनेषति" इति.
[2] नदत्सते—उ, उ १. [3] लोकेश्वरः—उ, उ १.

किंच—**एष ह्येवेश्वरः** स्वांशजप्राणिपटलकर्मसापेक्षमेनं स्वभक्तजनं **साधुकर्म** स्वयाथात्म्यदर्शनहेतुश्रवणादिलक्षणं कारयतीव **कारयति**। **यं** अनेकजन्मसिद्धं **एभ्यो लोकेभ्यः** ऊर्ध्वं ब्रह्मलोकं नेतुमिच्छति, **तमेव** तादृशसाधनानुष्ठाने नियोजयति। **एष उ एष एवैनं** प्राचीनवासनाऽनुरोधेन **असाधु कर्म कारयति**। तथा च स्मृतिः—

तानहं द्विषतः क्रूरान् संसारेषु नराधमान्।
क्षिपाम्यजस्रमशुभानासुरीष्वेव योनिषु॥

इति। **यं ईश्वरः एभ्यो लोकेभ्यो** नुनुत्सते—नुदेर्हलन्ताच्चेति सनः [कित्त्वम्]। एवमीश्वरस्य साध्वसाधुकारकत्वे वैषम्यादिदोषः स्यादिति चेन्न, जीवगतकर्तृता-निरसनहेतुत्वात्। जीवस्य, सर्वकर्ता ईश्वरः सोऽहमस्मीत्युपासनातः, ईश्वरज्ञानं जायते। एवं जाते निरावृतेश्वरज्ञाने स्वस्येश्वरस्य वा कर्तृत्वकारयितृत्वादिदोषो नहि सेद्धुं पारयति। यस्मादेवं तस्मात् ईश्वरे कारयितृत्वाद्यारोपो जीवगत-कर्तृत्वादिनिरासहेतुरित्यर्थः। तथा च स्मृतिः—"न कर्तृत्वं न कर्माणि लोकस्य सृजति" इति। यः स्वाङ्गदृष्टिप्रसक्तेशितव्यसापेक्षेश्वरभावमापन्न **एष** एव प्रज्ञाऽऽत्मा **लोकपालः**, सर्वलोकपालकत्वात्। **एष** हि दिग्वातादि**लोकपालानामप्यधिपतिः**। **एष एव सर्वेश्वरः**। यः एतादृशः **स** भगवान् मनुष्यपरमहितरूपो **म आत्मा** वस्तुतः स्वाङ्गदृष्ट्या स्वाङ्गदृष्टिप्रसक्तस्वाविद्याद्वयापाये तदधिकरणं कूटस्थचैतन्यं अधिष्ठेयनिरूपिताधिष्ठानत्वकलनाविरळं निरधिष्ठानं ब्रह्म निष्प्रतियोगिकस्वमात्र-मवशिष्यत **इति विद्यात्**। आवृत्तिः तृतीयाध्यायपरिसमाप्त्यर्था॥

इति तृतीयोऽध्यायः

चतुर्थोऽध्यायः

ब्रह्मोपदेशप्रतिज्ञा

गार्ग्यो ह वै बालाकिरनूचा[1]नः संस्पष्ट आस [2]सोऽयमुशीनरेषु सत्त्वमत्स्येषु कुरुपञ्चालेषु काशीविदेहेष्विति [3]स हाजातशत्रुं काश्यमेत्योवाच ब्रह्म ते ब्रवाणीति। तं होवाचाजातशत्रुः सहस्रं दद्म एतस्यां वाचि जनको जनक इति वा उ जना धावन्तीति ॥ १ ॥

परापरविद्याया दुरवगमत्वेन मन्दबुद्धिवैशद्यार्थं विद्याद्वयप्रकाशनपूर्वकमुपसंहर्तुं चतुर्थाध्याय आरभ्यते। गार्ग्याजातशत्रुसंवादरूपेयमाख्यायिका वक्ष्यमाणविद्यास्तुत्यर्था। बृहदारण्यगतचतुर्थाध्यायाद्यदृप्तबालाकिब्राह्मणव्याख्यानेनैव अयमध्यायो व्याख्यातप्राय एव, वक्तृश्रोतृप्रश्नप्रतिवचनयोरेकत्वात्। तथाऽपि वेदशाखोपनिषद्भेदात् संक्षेपतो व्याख्यायते। गर्गगोत्रजो **गार्ग्यः**। बलाकाया अपत्यं **बालाकिः**, **ह वा** इति प्रसिद्धिद्योतकौ निपातौ, सद्वंश्योऽनूचानः अनुवचनसमर्थो वाग्मी वा। **उशीनरसत्वमत्स्यकुरुपाञ्चालकाशीविदेहदेशेषु संस्पष्टो** विख्यातः **सन्नास** स्थितवानिति यः श्रुतः **सोऽयं गार्ग्योऽजातशत्रुं काश्यमेत्योवाच ह**। किमिति? **ब्रह्म ते ब्रवाणीति**। एवमुक्तवन्तं **तं होवाचाजातशत्रुः**। किमिति? ब्रह्म ते ब्रवाणीति या वागेतस्यां **वाचि** गवां **सहस्रं दद्मः**। राजाभिप्रायं श्रुतिर्व्यनक्ति—**जनको जनक इति वा उ जना धावन्तीति**। **जनकः** स्वाभिलषितार्थदाता **जनकः** सारांशश्रोतेति पदमभ्यस्यते। अत एव हि **जनाः** स्वाभिलषितार्थलाभाय तं प्रति **धावन्ति**। **वा उ** इति निपातावधारणार्थौ ॥ १ ॥

[1] नर्स—क. [2] सभ्यो न तप उशी—अ, अ १.
[3] सदाहाजा—अ २, क. सदहा—अ, अ १.

आदित्यब्रह्मोपासनम्

स होवाच बालाकिर्य एवैष आदित्ये पुरुषस्तमेवाहमुपास इति। तं होवाचाजातशत्रु[1]र्मामैवं तस्मिन् [2]समवादयिष्ठा बृहन् पाण्डरवासाधिष्ठाः सर्वेषां भूतानां मूर्धेति [3]वा [4]अहमेतद्वा उपास इति। स यो हैतमेवमुपास्तेऽधिष्ठाः सर्वेषां भूतानां मूर्धा भवति ॥ २ ॥

सर्वज्ञकल्पमपि राजानं श्रोतारं मत्वा तमुद्दिश्य **स होवाच बालाकिः**। किमिति? **य एवैष आदित्ये** चक्षुषि च **पुरुषो** दृश्यते चक्षुर्द्वारा हृदय उपलभ्यते **तमेवाहमुपासे**, मदुपदेशतः त्वमपि तमुपास्स्व। इत्युक्तवन्तं **तं होवाचाजातशत्रुः**। किमिति? यन्ममोपदेशं कर्तुमिच्छसि तस्मिन् विषये—**मामेति** द्विरुक्तिः वक्तुरपेक्षया स्वस्य ज्ञानाधिक्यद्योतनार्था—**मामैवं [तस्मिन्] समवादयिष्ठाः** संवादं मा कार्षीः। यदि त्वं जानीषे सप्रकारं तद्वदेति तत्राह—**बृहन्निति**। **बृहन् पाण्डरवासाधिष्ठाः**—प्राणस्य सूत्रत्वेन व्यापकत्वात् बृहत्त्वं, अपां पाण्डरवर्णत्वेन तत्परिधानात् पाण्डरवासस्त्वं, सर्वभूताधिष्ठातृत्वात् [अधिष्ठात्वं], **सर्वेषां भूतानां मूर्धा** शिरः दीप्तिगुणकत्वात्। **अहमेतद्वा** एतदेव **ब्रह्मोपास इति**। एवमुपासनाफलमपि जानामि। कथं? **स यो हैतमेवमुपास्ते** सोऽयं सर्वेषां भूतानामधिष्ठाः अधिष्ठानं **मूर्धा** च **भवति**। यो यद्गुणमुपास्ते स तद्गुण एव भवति, "तं यथायथोपासते तथैव भवति" इति श्रुतेः ॥ २ ॥

[1] "मामैवं स" इति व्याख्याऽनुसारी पाठः स्यात्.

[2] समवादधिष्ठाः—अ १, क, उ १. संवदिष्ठाः—अ.

[3] "वा" इत्येतत् सर्वलिखितकोशेषु लुप्तः

[4] अत्र व्याख्याऽनुसारी पाठो धृतः. कोशगतपाठास्तु, अहमेतमुपासे—उ, उ १. अहमोमुपासे—अ, अ १. सर्वपर्ययेषु एवमेव पाठभेदाः.

चन्द्रब्रह्मोपासनम्

स होवाच बालाकिर्य एवैष चन्द्रमसि पुरुषस्तमेवाहं ब्रह्मोपास इति । तं होवाचाजातशत्रुर्मामैतस्मिन् समवादयिष्ठाः सोमो [1]राजन्नस्यात्मेति वा अहमेतमुपास इति । स यो हैतमेवमुपास्तेऽन्नस्यात्मा भवति ॥ ३ ॥

एवमादित्यब्रह्मणि प्रत्याख्याते ब्रह्मान्तरमाह—स इति । स होवाच इत्यादि सर्वत्र समानम् । चन्द्रमसि मनसि चैकः पुरुषः तमेवाहं मामैतस्मिन्नित्यादि च समानम् । चन्द्रमनसोरन्नात्मत्वात् तद्भावापत्तिर्हि फलम् ॥ ३ ॥

विद्युद्ब्रह्मोपासनम्

स होवाच बालाकिर्य एवैष विद्युति पुरुष एतमेवाहं ब्रह्मोपास इति । तं होवाचाजातशत्रुर्मामैतस्मिन् समवादयिष्ठास्तेजस्यात्मेति वा अहमेतमुपास इति । स यो हैतमेवमुपास्ते [2]तेजस्यात्मा भवति ॥ ४ ॥

किं च—स होवाचेति । विद्युति त्वचि देवतैका । तेजसि आत्मोपासनात् तेजस्यात्मा भवति ॥ ४ ॥

स्तनयित्नुब्रह्मोपासनम्

स होवाच बालाकिर्य एवैष स्तनयित्नौ पुरुष एतमेवाहं ब्रह्मोपास इति । तं होवाचाजातशत्रुर्मामैतस्मिन् समवादयिष्ठाः

[1] राजानन्न—अ २, उ. [2] तेजस्व्यात्मा—उ १.

शब्दस्यात्मेति वा अहमेतमुपास इति। स यो हैतमेवमुपास्ते शब्दस्यात्मा भवति ॥ ५ ॥

किं च—स होवाचेति। स्तनयित्नौ श्रवणे चैका देवता। शब्दात्मोपासनात् तथा भवतीत्यर्थः ॥ ५ ॥

आकाशब्रह्मोपासनम्

स होवाच बालाकिर्य एवैष आकाशे पुरुषस्तमेवाहमुपास इति। तं होवाचाजातशत्रुर्मामैतस्मिन् समवादयिष्ठाः पूर्णमप्रवर्ति ब्रह्मेति वा अहमेतमुपास इति। स यो हैतमेवमुपास्ते पूर्यते प्रजया पशुभिर्नो एव स्वयं नास्य प्रजा पुरा कालात्प्रवर्तते ॥ ६ ॥

किं च—स होवाचेति। बाह्यान्तराकाशयोः देवतैका। पूर्णमप्रवर्त्तीति विशेषणद्वयं विशिष्टफलद्योतनार्थम्। पूर्यते ह प्रजया पशुभिः। एवमुपासनं विना एतत् फलं स्वयं नो एव भवति। नास्य सन्ततिविच्छेदो भवतीत्यर्थः ॥ ६ ॥

वायुब्रह्मोपासनम्

स होवाच बालाकिर्य एवैष वायौ पुरुषस्तमेवाहमुपास इति। तं होवाचाजातशत्रुर्मामैतस्मिन्समवादयिष्ठा इन्द्रो वैकुण्ठोऽपराजिता सेनेति वा अहमेतमुपास इति। स यो हैतमेवमुपास्ते जिष्णु[1]र्ई वा पराजिष्णु[2]रन्यतस्त्यजाया भवति ॥ ७ ॥

किं च—स होवाचेति। वायौ प्राणे चं देवतैका। इन्द्रः परमेश्वरः। वीतगतिकुण्ठनो वैकुण्ठः यस्य सेना परैः जेतुमशक्या सेयं तदीयाऽपराजिता सेनेति। फलं—जयशीलो जिष्णुः, परैः जेतुमशक्यः पराजिष्णुर्भवति अन्यतस्त्यानामरीणां जाया जायी जयशीलो भवति ॥ ७ ॥

[1] र्हि—अ, अ १, अ २, क, उ १. [2] रन्यतस्त्यजायान्—मु.

अग्निब्रह्मोपासनम्

स होवाच बालाकिर्य एवैषोऽग्नौ पुरुषस्तमेवाहमुपास इति। तं होवाचाजातशत्रुर्मामैतस्मिन् समवादयिष्ठा विषासहिरिति वा अहमेतमुपास इति। स यो हैतमेवमुपास्ते विषासहिर्वा एष भवति ॥ ८ ॥

किं च—स होवाचेति। अग्नौ वाच्यपि देवतैका। परान् मर्षयतीति विषासहिः ॥ ८ ॥

अब्ब्रह्मोपासनम्

स होवाच बालाकिर्य एवैषोऽप्सु पुरुषस्तमेवाहमुपास इति। तं होवाचाजातशत्रुर्मामैतस्मिन् समवादयिष्ठा नाम्नोऽस्यात्मेति वा अहमेतमुपास इति। स यो हैतमेवमुपास्ते [1]नाम्नोऽस्यात्मा भवति। इत्यधिदैवतम्। अथाध्यात्मम् ॥ ९ ॥

किं च—स होवाचेति। अप्सु रेतस्येका देवता। नामात्मोपासनात् तदेव भवति। अधिदैवतोपासनमुक्तम्। अथाध्यात्ममुच्यते ॥ ९ ॥

प्रतिरूपपुरुषोपासनम्

स होवाच बालाकिर्य एवैष आदर्शे पुरुषस्तमेवाहमुपास इति। तं होवाचाजातशत्रुर्मामैतस्मिन् समवादयिष्ठाः प्रतिरूप इति वा अहमेतमुपास इति। स यो हैतमेवमुपास्ते प्रतिरूपो हैवास्य प्रजायामाजायते नाप्रतिरूपः ॥ १० ॥

[1] नाम्नस्या—अ १, अ २, क. नामास्य—अ.

स होवाचेति । स्वच्छादर्शे खड्गादौ हार्दे च देवतैका । प्रतिरूपः छायात्मा ॥ १० ॥

प्रतिध्वनिपुरुषोपासनम्

स होवाच बालाकिर्य एवैष प्रातिश्रुत्कायां पुरुषस्तमेवाहमुपास इति । तं होवाचाजातशत्रुर्मामैतस्मिन् समवादयिष्ठा द्वितीयोऽनपग इति वा अहमेतमुपास इति । स यो हैतमेवमुपास्ते विन्दते द्वितीयं द्वितीयवान् भवति ॥ ११ ॥

किं च—सहोवाचेति । ध्वनौ प्रातिश्रुत्कायां प्रतिध्वनौ च देवतैका । सद्वितीयोपासनाफलं सद्वितीयत्वम् ॥ ११ ॥

शब्दपुरुषोपासनम्

स होवाच बालाकिर्य एवैष शब्दः पुरुषमन्वेति तमेवाहमुपास इति । तं होवाचाजातशत्रुर्मामैतस्मिन् समवादयिष्ठा आयुरिति वा अहमेतमुपास इति । स यो हैतमेवमुपास्ते नो एव स्वयं नास्य प्रजा पुराकालात् संमोहमेति ॥ १२ ॥

य एवायं शब्दः पृष्टतोऽनूदेति अध्यात्मायुश्च तयोरेका देवता । एवमायुःशब्दवाच्यप्राणोपासनात् उपासकस्य तत्कुलप्रसूतप्रजायाश्च दीर्घायुः सिध्यति ॥

तमःपुरुषोपासनम्

स होवाच बालाकिर्य एवैष छायायां पुरुषस्तमेवाहमुपास इति । तं होवाचाजातशत्रुर्मामैतस्मिन् समवादयिष्ठा मृत्युरिति वा

अहमेतमुपास इति । स यो हैतमेवमुपास्ते नो एव स्वयं नास्य प्रजा पुरा कालात् प्रमीयते ॥ १३ ॥

किं च—स होवाचेति । बाह्यतमोरूपच्छायायां स्वान्तः स्वाज्ञाने चैका देवता । सैव मृत्युः । तदतितरणं फलम् ॥ १३ ॥

शारीरपुरुषोपासनम्

स होवाच बालाकिर्य एवैष शारीरः पुरुषस्तमेवाहमुपास इति। तं होवाचाजातशत्रुर्मामैतस्मिन् समवादयिष्ठाः प्रजापतिरिति वा अहमेतमुपास इति । स यो हैतमेवमुपास्ते प्रजायते प्रजया पशुभिः ॥ १४ ॥

किं च—स होवाचेति । शारीरे विराजि चैका देवता । एवं प्रजापत्युपासनाफलं प्रजापशुवर्धकम् ॥ १४ ॥

सुप्तपुरुषोपासनम्

स होवाच बालाकिर्य एवैष प्राज्ञ आत्मा येनैतत् सुप्तः [1]स्वप्न्यया चरति तमेवाहमुपास इति । तं होवाचाजातशत्रुर्मामैतस्मिन् समवादयिष्ठा यमो राजेति वा अहमेतमुपास इति । स यो हैतमेवमुपास्ते सर्वं हास्मा इदं श्रैष्ठ्याय यम्यते ॥ १५ ॥

किं च—स होवाचेति । येनैतत् सुप्तः स्वप्न्यया चरति तस्मिन् प्राज्ञे ईश्वरे च आत्मा एकः । यमोपासनाफलं सर्वस्मादपि श्रैष्ठ्यापत्तिः ॥ १५ ॥

[1] स्वप्न—अ, अ १.

दक्षिणाक्षिपुरुषोपासनम्

स होवाच बालाकिर्य एवैष दक्षिणेऽक्षन् पुरुषस्तमेवाहमुपास इति। तं होवाचाजातशत्रुर्मामैतस्मिन् समवादयिष्ठा नाम्न आत्माऽग्नेरात्मा ज्योतिष आत्मेति वा अहमेतमुपास इति। स यो हैतमेवमुपास्त एतेषां सर्वेषामात्मा भवति ॥ १६ ॥

किं च—स होवाचेति। दक्षिणाक्षिणि मुखे चैका देवता। नामाग्निज्योतिष्ष्वात्मोपासनात् सर्वभूतात्मा भवति ॥ १६ ॥

सव्याक्षिपुरुषोपासनम्

स होवाच बालाकिर्य एवैष सव्येक्षऽन् पुरुषस्तमेवाहमुपास इति। तं होवाचाजातशत्रुर्मामैतस्मिन् समवादयिष्ठाः सत्यस्यात्मा विद्युत आत्मा तेजस आत्मेति वा अहमेतमुपास इति। स यो हैतमेवमुपास्त एतेषां सर्वेषामात्मा भवति ॥ १७ ॥

किं च—स होवाचेति। सव्येऽक्षन् तैजसे चैका देवता। सत्यविद्युत्तेजस्स्वात्मदर्शनादात्मैव भवतीत्यर्थः ॥ १७ ॥

अनात्मज्ञं प्रति आत्मबोधनप्रकारः

तत उ ह बालाकिस्तूष्णीमास। तं होवाचाजातशत्रुरेतावन्नु बालाका इति। एतावद्धीति होवाच बालाकिः। तं होवाचाजातशत्रुर्मृषा वै किल मा संवदिष्ठा ब्रह्म ते [1]ब्रवाणीति। स होवाच

[1] ब्रुवा—अ, अ २, क.

यो वै बालाक एतेषां पुरुषाणां कर्ता यस्य वैतत्कर्म [1]संवैवेंदितव्य इति । तत उ ह बालाकिः समित्पाणिः प्रतिचक्रामोपायानीति । तं होवाचाजातशत्रुः प्रतिलोमरूपमेव स्याद्यत् क्षत्रियो ब्राह्मणमुपनयेदे[2]हि व्येव त्वा ज्ञपयिष्यामीति । तं ह पाणावभिपद्य प्रवव्राज । तौ ह सुप्तं पुरुषमीयतुः । तं हाजातशत्रुरामन्त्रयांचक्रे बृहन् पाण्डरवासः सोमराजन्निति । स उ ह तूष्णीमेव शिश्ये । तत उ हैनं यष्ट्या च चिक्षेप । स तत एव समुत्तस्थौ । तं होवाचाजातशत्रुः क्वैष एतद्बालाके पुरुषोऽशयिष्ट यत्रैतदभूद्यत एतदगादिति । [3]तदुभयं बालाकिर्न [4]विजिज्ञौ ॥ १८ ॥

यावच्छ्रुतं यावदधीतं तावत् सर्वमुपन्यस्य निःशेषितविद्यो बालाकिः उपररामेत्याह—**तत इति** । **बालाकिः** मुनिः स्वेन यावदधीतं तत् सर्वमाभासत उपन्यस्य **ततः** परं अमावास्याचन्द्रवत् निष्प्रभः **तूष्णीमास** । **तं होवाचाजातशत्रुः एतावन्नु बालाका इति** । राज्ञैवं पृष्टो **बालाकिरेतावद्धीति होवाच** । एवमुक्तवन्तं **तं होवाचाजातशत्रुः—ब्रह्म ते ब्रवाणीति मां प्रति मृषा संवदिष्ठा** उक्तवानसि, किमर्थमेवं गर्वितोऽसि इति । तं प्रति राजोवाच—अपरब्रह्मापि यथावत् त्वया न विदितम् । स्वयमजातशत्रुः परापरब्रह्मयाथात्म्यवित् । अनेनायं प्रतिषेधितुं युक्त एव । यद्यमुख्यब्रह्मविज्ञानमपि प्रत्याख्यायेत तदा नैतावतेति न हि ब्रूयात् । न किञ्चित् त्वया विज्ञातमिति नानेनोक्तम् । तस्मादपरब्रह्माप्यस्त्येव, तस्य परब्रह्माधिगमद्वारभूतत्वात् । हे **बालाके यो वा एतेषां पुरुषाणां कर्ता** वागादिकरणग्रामप्रवृत्तिनिमित्ततया अवति-

[1] सवैवे—अ, अ १.
[2] हीत्येव—उ. हिवेत्येव—उ १. हिव्येत्येव—अ १, अ २.
[3] तदुह वा—उ, उ १.
[4] विजज्ञौ—उ.

ष्ठते, यस्य करणग्रामप्रवृत्तिनिमित्तस्यैतत् कर्म तत्सर्वासंस्पृष्टतया स्वयं स्थित्वा तत्प्रवृत्तिनिवृत्तिनिर्वाहकत्वं, सोऽयमात्मा स्वोपलब्ध्युपायभूतैः वागादिकरणसङ्घैः तत्प्रवृत्तिनिमित्ततया तद्वृत्तिसहस्रभावाभावप्रकाशकतया तदारोपापवादाधिकरणतया निरधिकरणनिष्प्रतियोगिकस्वमात्रतया च वेदितव्यः इत्येवमभिहितस्तत उ ह बालाकिः अपरविज्ञानोपायसिद्धपरब्रह्माधिगमाय समित्पाणिः प्रतिचक्रामोपायानीति । एवं विधिवदुपसन्नं तं होवाचाजातशत्रुः—क्षत्रियो ब्राह्मणमुपनयेदिति यत्तत्प्रतिलोमरूपमेव स्यात् । यतो मामेवं वृणीषे अतः त्वं एहीत्येव तं हर्षयन् त्वा त्वां एतत् ज्ञपयिष्यामीति यत्तद्विधिशास्त्रविरुद्धं, तस्मात् त्वमाचार्य एव सन् तिष्ठ, यद्वेदनात् मुख्यं ब्रह्म विदितं भवेत् तत् त्वां ब्रह्म ज्ञपयिष्यामि प्रतिपादयामीत्युक्त्वा सलज्जं तं ह पाणावभिपद्य प्रवव्राज । तौ ह बालाक्यजातशत्रू क्वचित् प्रदेशे सुप्तं पुरुषमीयतुः । ततः तं ह सुप्तं अजातशत्रुः आमन्त्रयांचक्रे । किमिति ? बृहन् पाण्डरवासः सोमराजन्निति नामभिराह्वानं कृतवानित्यर्थः । स उ ह सोऽयमेवमामन्त्रितोऽपि तूष्णीमेव शिश्ये । तत उ हैनं शयानं यष्ट्या दण्डेन च चिक्षेप । ततः क्षेपादेव समुत्तस्थौ समुत्थितवान् । तं होवाचाजातशत्रुः । किमिति ? हे बालाके एतत् पुरि शयनादेष पुरुषः काशयिष्ट यत्र यस्मिन् एतत् स्वापकर्मकृदभूत् पुनः यतः एतत्कर्मकृदगात् आगतवान् । यत्स्वभावेऽयमभूत् पुनः यत्स्वभावात् प्रच्युतः संसारीत्येतदुभयं गार्ग्येण प्रष्टव्यं, तत्तेनापृष्टमपि ज्ञपयिष्यामीति प्रतिज्ञातत्वात् तत्राजातशत्रुः बोधयितव्योऽसाविति प्रवर्तते । एवं व्युत्पाद्यमानोऽपि गार्ग्यस्तदुभयं प्रष्टुं अवगन्तुं न मेने न हि विज्ञातवान् न विजिज्ञौ ॥ १८ ॥

आत्मनः सर्वशरीरव्याप्तिः

तं होवाचाजातशत्रुर्यमेवैष एतद्बालाके पुरुषोऽशयिष्ट यत्रैतदभूदत एतदगात् । हिता नाम हृदयस्य नाड्यो हृदयात् पुरीततमभिप्रतन्वन्ति यथा सहस्रधा केशो विपतितस्तावदण्व्यः पिङ्गलस्यानिम्ना

तिष्ठन्ते शुक्लस्य कृष्णस्य पीतस्य लोहितस्येति । तासु तदा भवति यदा सुप्तः स्वप्नं न कंचन पश्यति । अथास्मिन् प्राण एवैकधा भवति । तथैनं वाक् सर्वैर्नामभिः सहाप्येति चक्षुः सर्वै रूपैः सहाप्येति श्रोत्रं सर्वैः शब्दैः सहाप्येति मनः सर्वैर्ध्यातैः सहाप्येति । स यदा प्रतिबुध्यते यथाऽग्नेर्विस्फुलिङ्गा विप्रतिष्ठेरन्नेवमेवैतस्मादात्मनः प्राणा यथायतनं विप्रतिष्ठन्ते प्राणेभ्यो देवा देवेभ्यो लोकाः । तद्यथा क्षुरः क्षुरधावे ह्येतस्यास्स विश्वंभरो वा विश्वंभर[1]कुलाय एवमेवैष प्राज्ञ आत्मेदं शरीरमनुप्रविष्ट आ लोमभ्य आ नखेभ्यः ॥ १९ ॥

तथाऽपि स्वप्रतिज्ञापालनाय अजातशत्रुराह—**तमिति** । **अजातशत्रुः तं होवाच** । किमिति ? हे **बालाके**—यदित्यर्थे यमिति लिंगव्यत्ययः—**यदेतच्छरीरमवष्टभ्य एष वै पुरुषोऽशयिष्ट** पुरा **यत्रैतदभूत्** पुनर्यतः एतदगादित्युक्ते **हृदयस्याश्रिताः हिता नाम नाडयो** भवन्ति । तास्तु **हृदयात् पुरीततं** स्थूलशरीरमभिप्रतन्वन्ति व्याप्नुवन्ति । शरीरापेक्षया नाडीनां सूक्ष्मत्वे दृष्टान्तमाह—**यथेति** । **यथा केशः सहस्रधा विपतितो** विदळितः सुसूक्ष्मतमो भवति तथा **तावदण्व्यः** नाडयो भवन्ति । नाडीनां श्लेष्मपित्तादियोगतः **शुक्लस्य कृष्णस्य पीतस्य लोहितस्य** इत्यादिनानावर्णः **तासु** नाडीषु **भवति** । **यदा सुप्तो** विज्ञानात्मा **स्वप्नं न कञ्चन पश्यति अथास्मिन्नयं** विज्ञानात्मा **प्राण एवैकधा भवति** एकत्वमुपैति । **तथैनं वाक् सर्वैः नामभिः सहाप्येतीति** वागादिकरणग्रामः स्वस्वविषयैः सहाप्येतीत्यादुक्तार्थम् । अत्र दृष्टान्तमाह—**यथेति** । **यथा क्षुरः क्षुरधावे** नापितक्षुरादिविन्यासपेटिकायां निक्षिप्तो मग्नः पुनस्ततो विप्रतिष्ठते एवमेव वागादिकरणजालमित्यर्थः । यद्वा—**यथा क्षुरः**

[1] कुलायैव—अ, अ १, उ, उ १.

क्षुरधावे हि यथा एतस्याः पुरीततेः मध्ये विश्वं बिभर्ति धारयतीति विश्वंभरः प्राणः तेन सह वर्तत इति **स विश्वम्भरो** विज्ञानात्मा प्राणोपाधिकः **विश्वम्भर-कुलायं** शरीरं तत्र यथा अनुप्रविश्य तत् सर्वं व्याप्नोति विश्वस्य स्थूलशरीरमात्र-व्यापकत्वात्, **एवमेवैष प्राज्ञ** आत्मा इदं स्थूलसूक्ष्मकारणभेदभिन्नशरीरत्रयं **आलोमभ्यः आनखेभ्यः** इति सप्तदशकलिंगतद्धेतुकारणशरीरोपलक्षणार्थं, तत् सर्वं प्रविष्टो भवति ॥ १९ ॥

आत्मज्ञानेन विदेहमुक्तिप्राप्तिः

तमेतमात्मानमेतमात्मनोऽन्वपश्यन्ति । यथा वा श्रेष्ठिनं स्वास्तद्यथा श्रेष्ठैस्तैर्भुङ्क्ते तद्यथा वा श्रेष्ठिनं स्वा भुञ्जन्त[न्ति] एवं श्रेष्ठिनं [1]स्वास्त एवावर्धयाः । इन्द्र एतमात्मानं न विजज्ञौ तावदेनमसुरा अभिबभूवुः । स यदा विजिज्ञावथ हत्वाऽसुरान् विजित्य सर्वेषां भूतानां श्रैष्ठ्यं स्वाराज्यमाधिपत्यं पर्येति । तथो एवैवं विद्वान् सर्वेषां भूतानां श्रैष्ठ्यं स्वाराज्यमाधिपत्यं पर्येति य एवं वेद य एवं वेद ॥ २० ॥

यत्क्रतुगौणमुख्यफलं यद्बोधाबोधतो जयाजयौ भवतः तदियत्तां विशदयन् उपसंहरति—**तमिति** । यः शरीरत्रयमनुप्रविष्टः **तं प्रज्ञाऽऽत्मानमेतं** समष्टिशरीर-त्रयारोपापवादाधिष्ठानरूपमेतं प्रत्यगभिन्नपरमात्मनः स्वरूपमित्यन्वपश्यन्ति सूरयः, "जीवभावजगद्भावबाधे प्रत्यगभिन्नं ब्रह्मैव अवशिष्यते" इति श्रुतेः । कथं पुनरन्वपश्यन्तीत्यत्र दृष्टान्तमाह—**यथेति** । **यथा स्वाः** स्वकीयाः **श्रेष्ठिनं** गुणतः श्रेष्ठं राजानं स्वस्वामित्वेन अन्वपश्यन्ति **तद्यथा** लोके ये गुणतः शीलतो जातितश्च श्रैष्ठ्यमापन्नाः **तैः श्रेष्ठैः** सहानूचानो मुनिर्भुङ्क्ते नेतरैः असमैः

[1] स्वास्सए—उ, उ १. स्वास—अ २, क. स्वास्त—व्याख्यानुसारेण.

इत्यर्थः । **यथा वा श्रेष्ठिनं स्वाः भुञ्जन्ते[न्ति], स्वाः** सन्तः स्वतुल्यमेव **श्रेष्ठिनं** भोजयन्ति । य एवं कुर्वन्ति **त एवावर्धयाः** सकलविषयकबृद्धिं यान्ति । तथैवं स्वातिरिक्तव्यष्टिसमष्टिप्रपञ्चारोपापवादाधिकरणतः श्रेष्ठिनं निरधिकरणं ब्रह्म स्वमात्रमिति सूरयोऽन्वपश्यन्ति । दर्शनसमकालं ते यत्क्रतुमुख्यफलं कैवल्यं तदेव प्रतिपद्यन्ते । **एतमेवात्मानं यदेन्द्रो** यथावत् क्रतुमुख्यफलत्वेन **न विजिज्ञौ** यावदेवं **तावदेनं** असुं स्वसत्तामात्रं पराग्वृत्तिभिः हरन्तीत्यसुराः स्वाज्ञानवृत्तयः **असुराः अभिबभूवुः** असुरा वा । **स यदा** श्रुत्याचार्यप्रसाद-लब्धसम्यज्ज्ञानेन क्रतुमुख्यफलं स्वातिरिक्ताविद्यापदतत्कार्यापह्नवसिद्धं ब्रह्म निष्प्रतियोगिकस्वमात्रमिति **विजज्ञौ** विज्ञातवान् भवति अथ तत्क्षणानन्तर-मुत्तरक्षणं स्वज्ञानवृत्तितदारूढान् **असुरान् विजित्य** स्वातिरेकेण नेतिनेतीत्य-पह्नवं कृत्वा स्वाज्ञदृष्टिविकल्पितानां **सर्वेषां भूतानां** मध्ये स्वज्ञदृष्ट्या श्रेष्ठः सन् परमार्थदृष्ट्या यत् स्वमात्रतया राजते तत्**स्वाराज्यमाधिपत्यं** पारमैश्वर्यं विकले-बरकैवल्यं **पर्येति** । यद्वा—विरोचनाद्यसुरान् विद्यायोगबलेन जित्वा स्वाराज्यं स्वर्गं क्रतुसामान्यफलं आधिपत्यं इन्द्रत्वं पर्येति । तथा क्रतुसामान्यमुख्यफल-मिन्द्रवद्य **एवं वेद** एवं विद्वान् सर्वेषां भूतानां यदिन्द्रादिभिः भुक्तपूर्वं क्रतु-सामान्यविशेषफलं स्वमात्रसिद्धितः श्रैष्ठ्यं स्वाराज्यमाधिपत्यं पर्येतीत्युक्तार्थम् । आवृत्तिरुपनिषत्समाप्त्यर्था ॥

इति चतुर्थोऽध्यायः

श्रीवासुदेवेन्द्रशिष्योपनिषद्ब्रह्मयोगिना ।
लिखितं स्याद्विवरणं कौषीतक्याः स्फुटं लघु ।
प्रकृतोपनिषद्व्याख्याग्रन्थस्त्वष्टशतं स्मृतः ॥

इति श्रीमदीशाद्यष्टोत्तरशतोपनिषच्छास्त्रविवरणे पञ्चविंशतिसंख्यापूरकं कौषीतक्युपनिषद्विवरणं सम्पूर्णम्

गर्भोपनिषत्

सह नाववतु—इति शान्तिः

शरीरलक्षणसूत्रम्

पञ्चात्मकं पञ्चसु वर्तमानं षडा[1]श्रयं षड्गुणयोगयुक्तम् ।
तं सप्तधातुं त्रिमलं [2]त्रियोनिं चतुर्विधाहारमयं शरीरम्[3] ॥ १ ॥

यद्गर्भोपनिषद्वेद्यं गर्भस्य स्वात्मबोधदम् ।
शरीरापह्नवात् सिद्धं स्वमात्रं कलये हरिम् ॥

इह खलु गर्भोपनिषदः कृष्णयजुर्वेदप्रविभक्तत्वात् उपोद्घातादिकं कठवल्ल्यादितुल्यतया चिन्त्यम् । मन्त्रब्राह्मणात्मिकेयं उपनिषत् गुरुशिष्याद्याख्यायिकां विना अवान्तररूपेण प्राण्यदृष्टवशात् स्वेनै[स्वयमे]व प्रवृत्ता हि । तत्राद्यः श्लोकः सूत्रभूतो मन्त्रो भवतीत्याह—**पञ्चात्मकमिति** । व्यष्टिशरीरोपलक्षितस्वाविद्यापदतत्कार्यजातं **पञ्चात्मकमित्यादि** ॥ १ ॥

शरीरस्य पञ्चभूतात्मकत्वम्

पञ्चात्मकमिति कस्मात्? पृथिव्यापस्तेजोवायुराकाशमिति ।

अस्मिन् पञ्चात्मके शरीरे का पृथिवी का आपः किं तेजः

[1] शयं—अ २. [2] द्वि—उ.
[3] 'भवति' इत्यधिकः—अ १, अ २, क.

को वायुः किमाकाशमिति । अस्मिन् पञ्चात्मके शरीरे यत् कठिनं सा पृथिवी यद्द्रवं [1]तदापः यदुष्णं तत्तेजः यत् सञ्चरति स वायुः यत् सुषिरं तदाकाशमित्युच्यते ॥ २ ॥

मन्त्रार्थस्तिरोभूत इति मत्वा तदर्थं ब्राह्मणरूपश्रुतिरेव व्याचष्टे—**पञ्चात्मकमिति** । पञ्चभूतान्येवात्मा स्वरूपं यस्याविद्यापदस्य तदिदं पञ्चात्मकं पञ्चभूतविकारपुञ्जं इत्यर्थः । पञ्च भूतानि कानीत्यत आह—**पृथिव्यापस्तेजो-वायुराकाशमिति** पञ्च भूतानि । तत्र प्रातिस्विकेन पञ्चभूतस्वरूपं किमित्याशङ्क्य तदियत्तां व्यनक्ति—**अस्मिन्निति** ॥ २ ॥

शरीरस्य पञ्चसु वर्तमानत्वम्

तत्र पृथिवी धारणे आपः पिण्डीकरणे [2]तेजो रूपदर्शने वायुर्गमने आकाशमवकाशप्रदाने ॥ ३ ॥

"पञ्चात्मकं" इत्यंशं व्याख्याय "पञ्चसु वर्तमानं" इति मन्त्रांशं व्याकरोति—**तत्रेति** । **तत्र** पञ्चभूतमध्ये पञ्चसु **धारणपिण्डीकरणरूपदर्शन-गमनावकाशप्रदानकर्मसु** पृथिव्यप्तेजोवाय्वाकाशात्मकं शरीरं वर्तमानमिति विज्ञेयमित्यर्थः ॥ ३ ॥

करणजातस्य प्रातिस्विकविनियोगः

पृथक् [3]चक्षुःश्रोत्रे चक्षुषी रूपे जिह्वोपस्थश्चानन्दोऽपाने चोत्सर्गो बुद्ध्या बुध्यति मनसा सङ्कल्पयति वाचा वदति ॥ ४ ॥

[1] ता आपः—उ. [2] तेजः प्रकाशने—मु.

[3] श्रोत्रं शब्दे त्वक् स्पर्शे चक्षूरूपे जिह्वा रसे घ्राणं गन्धे वाग्वचने पाणिरादाने पादो गमने पायुर्विसर्गे उपस्थ आनन्दे वर्तते । बुद्ध्या—अ.

पञ्चात्मकशरीरावयवचक्षुरादिकरणजातमपि रूपादिदर्शनादिकर्मणि पृथक् विनियुज्यते इत्याह—**पृथगिति**। चक्षुश्च श्रोत्रं च चक्षुःश्रोत्रे श्रोत्रचक्षुषी, श्रोत्रस्य ज्ञानेन्द्रियप्राथम्यात्। श्रोत्रं शब्ददर्शनकर्मणि विनियुज्यते। **चक्षू रूपे** रूपदर्शनकर्मणि **जिह्वा** रसास्वादनकर्मणि। श्रोत्रचक्षुर्जिह्वाग्रहणं त्वग्घ्राणेन्द्रियोपलक्षणार्थम्। **उपस्थश्चानन्दो** मिथुनभवानन्दपरवशो भवति। **चशब्दः** शिष्टकर्मेन्द्रियोपलक्षणार्थः। **अपाने कर्मोत्सर्गः**। चशब्दः प्राणपञ्चकोपलक्षणार्थः। करणग्रामाधिपो जीवो **बुद्ध्या** विषयजातं **बुध्यते**। तथा **मनसा सङ्कल्पयति**, तथा **वाचा** वदति। बुद्धिमनोग्रहणं चित्ताहङ्कारोपलक्षणार्थम्॥ ४॥

शरीरस्य षडाश्रयत्वं षड्गुणयोगश्च

षडाश्रयमिति कस्मात्? मधुराम्ललवणतिक्तकटुकषा[1]यरसान् विन्दत इति॥ ५॥

मन्त्रसूत्रित"षडाश्रय"इत्यंशं व्याचष्टे—**षडाश्रयमिति**। **मधुरादि**षड्रसा आश्रयो यस्य तत् शरीरं **षडाश्रयमिति विन्दते** ज्ञायते इत्यर्थः। कामाद्यरिषड्वर्ग एव **षड्गुणयोगाः**, तैर्युक्तम्॥ ५॥

शरीरस्य सप्तधातुकत्वम्

षड्जर्षभगान्धारपञ्चममध्यमधैवतनिषादाश्चेतीष्टानिष्टशब्द-संज्ञाः [2]प्रतिविधाः सप्तविधा भवन्ति॥ ६॥ शुक्लो रक्तः कृष्णो धूम्रः पीतः कपिलः पाण्डरः सप्त धातव इति। कस्मात्? यदा देवदत्तस्य द्रव्यविषया जायन्ते परस्पर[3]रसोगुणत्वात्। षड्विधो रसः। रसाच्छोणितं शोणितान्मांसं मांसान्मेदो [4]मेदसोऽस्थीनि अस्थिभ्यो

[1] यान्—क. [2] प्रणिधानाद्दशविधा भवन्ति—मु. प्रतिविविधाः—क.
[3] सौम्य—मु. [4] मेदसः स्नायवः स्नायुभ्योऽस्थीनि—मु.

मज्जा मज्जायाः शुक्रं शुक्रशोणितसंयोगादावर्तते गर्भो हृदि व्यवस्थां नयति हृदयेऽभ्यन्तराऽग्निः अग्निस्थाने पित्तं पित्तस्थाने वायुः वायुस्थाने हृदयं [1]प्राजापत्य ऋतुकाले संप्रयोगतः ॥ ७ ॥

कण्ठादिस्थानाभिव्यक्तसप्तस्वरशोभितं भवतीत्याह—**षड्जेति** । जिह्वोष्ठादिस्थानाभिव्यक्तसरिगमपधनीति स्वराः । इष्टानिष्टशब्दराशीनां तत्प्रभवत्वात् त **एवेष्टानिष्टशब्दसंज्ञाः** सन्तः **प्रतिविधाः** बहुविधाः **सप्तविधाः** सप्तप्रकाराः **भवन्ति** ॥ ६ ॥ मन्त्रगत''सप्तधातुं''इत्यंशं व्याकरोति—शुक्र इति । वातपित्तश्लेष्मादिनानानाडीप्रभवाः शुक्रादिसप्तधातवो यदायतनाः तत् सप्तधातुकं धातूनामभिवृद्धितः शुक्रशोणितसंयोगतश्च पुत्रादिगर्भोत्पत्तिः भवतीत्याह—**कस्मादिति** । धातुवृद्धिप्रभवशुक्रशोणितसंयोगतो गर्भोत्पत्तिर्भवतीत्युक्तम् । **कस्मात्** कथं एवं भवतीत्याकांक्षायां तत्प्रकार उच्यते । **यदा** यस्मिन् काले **देवदत्तस्य** एतद्द्रव्यजातं मया भोक्तव्यमिति **तद्विषयाः** स्पृहाः **जायन्ते** । कथमेवमित्यत्र **परस्परमन्योन्यं रसोगुणत्वात्** अयं मधुरादिरसो मया भोक्तव्य इति रसगुणबद्धत्वात् । **रसः** कतिविध इत्यत्र मधुरादिभेदेन **षड्विध** इत्यर्थः । **स्वभुक्तषड्विधरसपरिणामतः** किं भवतीत्यत आह—**शोणितमिति** । जाठराग्निपच्यमानषड्रसात् तच्छैकांशभूतं **शोणितं** भवति । षड्रससारांश एव शोणिताकारेण परिणमत इत्यर्थः । तथा पच्यमानशोणितात् तच्छैकांशमांसवृद्धिर्भवति । तथा **मांस**सारतः तच्छतांशमेदोवृद्धिर्भवति । तथा पच्यमानमेदसः सारात् तथाऽस्थीन्यभिवर्धन्ते । तथाऽस्थिचयसञ्जातसारात् दर्परूपेयं **मज्जा** भवति । तथा **मज्जायाः** पच्यमानायाः पुंस्त्रियोः **शुक्रं** शोणितं च भवति । एवं पुंस्त्रीनिष्टशुक्रशोणितसंयोगादैक्यात् **गर्भोऽयं आवर्तते** जठरप्रदेशे आ समन्ताद्वर्तते । **हृदि व्यवस्थां नयति** रूढमूलं भवति । आधारजठरहृदयेभ्योऽन्तरग्निरुज्वलति । **अग्निस्थाने** मूलाधारत्रिकोणे **पित्तजलं** भवति । **पित्तस्थाने** स्वाधिष्ठानप्रदेशे **वायुः** प्राणवायुः । **वायुस्थाने हृदयं** प्रतिष्ठितम् । एवमग्निपित्तवायुयोगतो गर्भो

[1] प्राजापत्यात् क्रमात् । ऋतु—मु.

हृदि व्यवस्थां नयति । कस्मादित्यत्र **प्राजापत्ये** प्रजापतिना व्यवस्थिते **ऋतुकाले** स्त्रीपुरुषसंप्रयोगतः समुत्पन्नगर्भो रूढमूलो भवति । तदितरकाले स्त्रीपुरुषयोगेऽपि गर्भो नावतरतीत्यर्थः ॥ ७ ॥

मासक्रमेण गर्भव्यक्तिभेदः

एकरात्रोषितं कलिलं भवति । सप्तरात्रोषितं बुद्बुदं भवति । अर्धमासाभ्यन्तरेण पिण्डो भवति । मासाभ्यन्तरेण कठिनो भवति । मासद्वयेन शिरः [1]कुरुते । मासत्रयेण पादप्रदेशो भवति । अथ चतुर्थे मासे जठरकटिप्रदेशो भवति । पञ्चमे मासे पृष्ठवंशो भवति । षष्ठे मासे नासाक्षिश्रोत्राणि भवन्ति । सप्तमे मासे जीवसंयुक्तो भवति । अष्टमे मासे सर्वसम्पूर्णो भवति ॥ ८ ॥

मुमुक्षूणां तीव्रतरवैराग्यहेतवे गर्भेयत्तां विशदयति—**एकरात्रेति** । यस्मिन् काले पुंस्त्रीशुक्रशोणितयोगतः स्त्रीजठरे गर्भो वसति ततः प्रभृति क्रमशो वृद्धिमुपैति । तत् कथं ? स्त्रीजठरे **एकरात्रोषितं** रेतः **कलिलं** स्वभावविपरीतं **भवति** । तथा **सप्तरात्रोषितं** रेतः **बुद्बुदा**कारतां इयात् । **अर्धमासाभ्यन्तरेणायं** गर्भः **पिण्डो भवति** । **मासमात्रतः** काठिन्यमुपैति । **मासद्वयेन शिरः**-प्रदेशाभिव्यक्तिर्भवति । तथा **मासत्रयमात्रतः पादा**भिव्यक्तिः । **अथ** मास-चतुष्टयेन **जठरकटिप्रदेशा**भिव्यक्तिः । **पञ्चमे मासे पृष्ठ**विभागः । **षष्ठे नासा-क्षिश्रोत्राणि** अभिव्यक्तानि **भवन्ति** । अयं पिण्डः **सप्तमे मासे** प्राप्ते **जीवेन संयुक्तो** भवति । तथाऽष्टमे **सर्वा**वयवाभिव्यक्तिः ॥ ८ ॥

[1] संपद्यते—मु.

पुंस्त्र्यादिभेदनियामकः

पितुः रेतोऽतिरिक्तात् पुरुषो भवति । मातुः रेतोऽतिरिक्तात् स्त्रियो भवन्ति । उभयोः बीजतुल्यत्वात् नपुंसको भवति । व्याकुलितमनसोऽन्धाः खञ्जाः कुब्जा वामना भवन्ति । अन्योन्यवायुपरिपीडितानां शुक्रद्वैधे स्त्रियो [1]योन्यां युग्माः प्रजायन्ते ॥ ९ ॥

पितृवीर्याधिक्यात् पुरुषाकृतिः । तथा मातृवीर्याधिक्यात् स्त्र्याकृतिः । उभयोः बीजसाम्ये नपुंसकाकृतिः । बीजैक्यकाले यदि तौ व्याकुलितचित्तौ स्यातां तदा तयोः वीर्यजा अन्धाः दृष्टिविकलाः खञ्जाः पङ्गवः कुब्जाः उन्नतपृष्ठोरोभागाः वामनाः ह्रस्वा वा भवन्ति । बिन्दुपतनकाले यदि तौ अन्योन्यापानमरुता पीडितौ तदा बिन्दुः स्त्रियो योन्यां द्विधा पतति, ततो युग्माः प्रजाः प्रजायन्ते ॥ ९ ॥

अष्टममासे जीवस्य अतीतार्थवेदनसामर्थ्यम्

पञ्चात्मकसमर्थः पञ्चात्मकतेज[2]सेद्धरसश्च सम्यज्ज्ञानात् ध्यानादक्षरमोङ्कारं चिन्तयति । तदेतदेकाक्षरं ज्ञात्वा अष्टौ प्रकृतयः षोडश विकाराः शरीरे ॥ १० ॥

एवं अष्टमे मासे प्राप्ते तद्गर्भावच्छिन्नो जीवः पञ्चात्मकसमर्थः प्राणादिपञ्चवृत्त्यात्मकप्राणेन स्वोपाधिभूतेन मिळित्वा अतीतार्थवेदने समर्थो भवति । तथा पञ्चात्मकप्राणतेजसा इद्धो वृद्धिं गतो रसः सारो यस्य सोऽयं

[1] योन्या—अ, अ १, उ १.
[2] साधिगन्धर—अ, अ १. सोर—क. सेर—अ २.

पञ्चात्मकतेजसेद्धरसः । चशब्दात् प्राणः क्रियाशक्तिः, प्राणारूढो जीवस्तु ज्ञानशक्तिः, ईश्वरभावापत्त्या इच्छाशक्तिरपि पिण्डपाती न स्यादिति द्योत्यते । य एवंभूतः स ह्यजडक्रियाज्ञानेच्छाशक्तिमानिव **सम्यज्ज्ञानात्** ध्यानाच्च कालत्रयेऽपि न क्षरतीत्यक्षरं **ओङ्कारं** आत्मानं अयमहमस्मीति **चिन्तयति** । एवं **तदेतदेकाक्षरं** आत्मतया **ज्ञात्वा** स्वातिरिक्ततया याः प्रकृता **अष्टौ प्रकृतयः**—

भूमिरापोऽनलो वायुः खं मनो बुद्धिरेवच ।
अहंकार इतीयं मे भिन्ना प्रकृतिरष्टधा ॥

इति स्मृतेः, प्रश्नोपनिषत्पठितप्राणादिनामान्तषोडशकला एव **षोडश विकाराः**, **शरीरे** पश्यतीति वाक्यशेषः ॥ १० ॥

नवममासे जीवस्य पूर्वजातिस्मरणम्

तस्यै[1]व[2]देहिनोऽथ नवमे मासे सर्वलक्षणसम्पूर्णो भवति । पूर्वजातिं स्मरति । कृताकृतं कर्म विभाति । शुभाशुभं कर्म [3]विन्दति ॥ ११ ॥

य एवं द्रष्टा **तस्यैव देहिनोऽथ** देहः **नवमे मासे सर्वलक्षणसम्पूर्णो भवति** । तदा शरीरासङ्गोऽपि शरीरावच्छिन्नो जीवः स्वात्तपूर्वजातिपरम्परां **स्मरति** । तस्य पूर्वजनिपरम्पराकृताकृतं कर्म पुण्यपापलक्षणकर्मजातं **विस्पष्टं भाति** भूतशुभाशुभं **कर्म विन्दति** ॥ ११ ॥

जीवस्य प्राक्तनकर्मवेदनपूर्वकं परिदेवनम्

नानायोनिसहस्राणि दृष्ट्वा चैव ततो मया ।
आहारा विविधा भुक्ताः पीताश्च विविधाः स्तनाः ॥ १२ ॥

[1] वं—अ, अ १. [2] देहिनामथ—अ, अ १, उ, उ १. [3] विभाति—क.

जातस्यैव मृतस्यैव जन्म चैव पुनः पुनः ।
अहो दुःखोदधौ मग्नो [1]न पश्यामि प्रतिक्रियाम् ॥ १३ ॥
यदि योन्यां प्रमुञ्चामि साङ्ख्यं योगं समाश्रये ।
अशुभक्षयकर्तारं फलमुक्तिप्रदायिनम् ॥ १४ ॥
यदि योन्यां प्रमुञ्चामि तं प्रपद्ये महेश्वरम् ।
अशुभक्षयकर्तारं फलमुक्तिप्रदायिनम् ॥ १५ ॥
यदि योन्यां प्रमुञ्चामि तं प्रपद्ये [2]भगवन्तं नारायणं देवम् ।
अशुभक्षयकर्तारं फलमुक्तिप्रदायिनम् ॥ १६ ॥
यन्मया परिजनस्यार्थे कृतं कर्म शुभाशुभम् ।
एकाकी तेन दह्यामि गतास्ते फलभागिनः ॥ १७ ॥

प्राक्तनशुभाशुभकर्मवेदनपूर्वकं परिदेवयतीत्याह—नानेति । अहो **मया नानायोनिसहस्राणि** दृष्ट्वा दृष्ट्वा अनेकजन्मस्वनुभूतानि । तत्तज्जन्मोचित-**विविधाहाराः** मया **भुक्ताः** । तथा तत्तज्जन्मसु **विविधाः स्तनाश्च पीताः** ॥ १२ ॥ **जातस्यैव पुनर्मृतिः मृतस्यैव पुनर्जन्म** । एवं षड्भाव-विकारकवलितः सन् **अहो** बत कष्टं एवं **दुःखोदधौ** निमग्नः सन् एतन्निवृत्त्यु-पायात्मिकां प्रतिक्रियां **न पश्यामि** ॥ १३ ॥ यदि कदाचित् कृच्छ्रात् **योन्यां** योन्याः **प्रमुञ्चामि** तदा **साङ्ख्यं** कापिलं **योगं समाश्रये** । यद्वा—यत्र स्वाविद्यापदतत्कार्यजातं निष्प्रतियोगिकाभावरूपं तत्सर्वापह्नवसिद्धं ब्रह्मापि निष्प्रतियोगिकभावरूपं न तयोः भास्यभासकभावो व्याप्यव्यापकभावो वाऽऽधाराधेयभावो वा अस्ति नास्तीति विभ्रमोऽपि सेद्धुं पारयति स हि खलु **साङ्ख्ययोगः** निष्प्रतियोगिकब्रह्ममात्रप्रबोधः, तमेव **समाश्रये** ॥ १४ ॥ यदि

[1] ना—अ २, उ, उ १. [2] जनार्दनम् ।—अ २.

मे तादृशाधिकारो न स्यात् तदा तदुपायतया **अशुभं** स्वाज्ञानं तत्क्षयकर्तारं **अशुभफलसामान्यस्य मुक्तिप्रदायिनं**—यद्वा, परमफलरूपेयं विकळेबर**मुक्तिः ब्रह्ममात्रप्रबोधोपायतः** तत्प्रदायिनं प्रदातारं—**महेश्वरं** देशिकधिया शरणं **प्रपद्ये** ॥ १५ ॥ यद्वा—षड्गुणैश्वर्यसम्पत्त्या **भगवन्तं,** यत्र सूरयो जात्वपि न रमन्ते तन्नरं स्वाज्ञानं तदेव नारं तस्यायनं अपवादाधिष्ठानं **नारायणं** स्वाधिष्ठेयसापेक्षाधिष्ठानभावविरळनिरधिष्ठानतया द्योतमानं **देवं** स्वमात्रमिति **प्रपद्ये** । अशुभक्षयमित्यादि सर्वत्र समानम् ॥ १६ ॥ एवं निश्चित्य पुनः परिदेवयन्निदमाह—**यन्मयेति** । दारपुत्रादि**परिजनपोषणहेतोः यद्यत् शुभाशुभं कर्म** नित्यकर्मवत् मया कृतं तत्फलं अनेककल्पकालं स्वर्गनरकादि भुक्तं ततोऽप्यधिकतरकष्टं कुम्भीपाकोपमगर्भनरकेऽहमेकाकी शोचामि । यन्मया पालिताः दारपुत्रादयस्ते यथागतं स्वां स्वां गतिमवष्टभ्य **गतास्ते** केवल-**फलभागिनः** न हि मत्कृतदुष्कृतभोक्तारो भवन्ति ॥ १७ ॥

भूपतने पूर्ववृत्तविस्मरणम्

जन्तुः स्त्रीयोनिशतं योनिद्वारि सम्प्राप्तो यन्त्रेण परिपीड्य-मानो महता दुःखेन जातमात्रस्तु वैष्णवेन वायुना संस्पृश्यते । तदा न स्मरति जन्ममरणादि कर्म शुभाशुभम् ॥ १८ ॥

इत्थं गर्भस्थो **जन्तुः** शोचन् एवं **स्त्रीयोनिशतं** प्राप्य निर्विण्णः सन् यथोक्तकालतः स्वपतनसमये नरकात् पातकिवत् अवाक्छिरा ऊर्ध्वपदो भूत्वा **योनिद्वारि संप्राप्तः** सन् योनियन्त्रेण **परिपीड्यमानो महता दुःखेन** जायते भूमौ पतति । भूपतनादर्वाक् शीर्षोदयवेळायां यदाऽयं **जन्तुः वैष्णवेन वायुना संस्पृश्यते तदा** स्वकृतशुभाशुभकर्मनिमित्तजातिस्मृतिविस्मरणपूर्वकं **स जन्ममरणादिमपि न स्मरति** ॥ १८ ॥

शरीरस्य त्रिमलत्वादिनिर्वचनम्

शरीरमिति कस्मात्? [1]ज्ञानाग्निः दर्शनाग्निः कोष्ठाग्निरिति। तत्र कोष्ठाग्निर्नामाशितपीतलेह्यचोष्यं पाचयति [2]रूपादीनां दर्शनं करोति[3] ॥ १९ ॥

सूत्रस्थ"त्रिमलं त्रियोनिं चतुर्विधाहारमयं शरीरं" इति पदचतुष्टयार्थ-प्रकाशनायोत्तरो ग्रन्थ आरभ्यते—**शरीरमिति**। बाल्याद्यवस्थाभिः शीर्यत इति व्युत्पत्त्या **शरीरमित्युच्यते**। **कस्मात्**? कथं? मलत्रयविशिष्टतया त्रियोनि-वत्त्वात्। कथं त्रिमलवत्त्वं? मलवत्स्त्रीपुरुषयोगशुक्रशोणितानि मलानि यस्य तत् त्रिमलम्। ओषधिपुरुषस्त्रीभेदेन तिस्रो योनयो यस्य तत् त्रियोनिम्। देहस्य यज्ञसम्पादनार्थं तत्रैवाग्नित्रयं विशिनष्टि—**ज्ञानाग्निः दर्शनाग्निः कोष्ठाग्निरिति**। स्वान्तःकरणेन तज्ज्ञाताज्ञाततया सर्वं ज्ञायत इति **ज्ञानाग्निः** अन्तःकरणं, अज्ञानकाष्ठचयदाहकत्वात्। बहिष्टरूपादीन् यद्दर्श तद्दर्शनाग्नि-श्चक्षुरादीन्द्रियम्। **कोष्ठाग्निर्नाम** यस्त्वशितपीतलेह्यचोष्यजातं **पाचयति** स एव हि मूलाधारादिकोष्ठविलसिताग्निः, "अयमग्निर्वैश्वानरो योऽयमन्तः पुरुषे येनेदमन्नं पच्यते" इति,

अहं वैश्वानरो भूत्वा प्राणिनां देहमाश्रितः।
प्राणापानसमायुक्तः पचाम्यन्नं चतुर्विधम्॥

इति श्रुतेः, स्मृतेश्च। दन्तैः अवखण्ड्यावखण्ड्य यत् भक्ष्यजातमद्यते **तदशितं**, यत् पायसादि जिह्वया आलोड्य पीयते तत् **पीतं**, यत् गुडादि जिह्वायां निक्षिप्य लेलिह्यते निगीर्यते तद्धि **लेह्यं**, यत्त्विक्षुखण्डादि दन्तैः निपीड्य

[1] "अग्नयोऽत्र त्रियन्ते" इत्यधिकः—मु.
[2] "दर्शनाग्निः" इत्यधिकः—मु.
[3] "ज्ञानाग्निः शुभाशुभं च कर्म विन्दति" इत्यधिकः—मु.

सारांशं स्वीकृत्यास्वाद्य तत्पिष्टांशः त्यज्यते तत्तु चोष्यमित्यभिधीयते । एवं कोष्ठाग्निः चतुर्विधमन्नं पक्त्वा चक्षुरादीन्द्रियं द्वारीकृत्य रूपादीनां दर्शनं करोति ॥ १९ ॥

शरीरस्य यज्ञत्वसम्पादनम्

तत्र त्रीणि स्थानानि भवन्ति हृदये दक्षिणाग्निः उदरे गार्हपत्यं मुखमाहवनीयम् । यजमानाय बुद्धिं पत्नीं निधाय दीक्षा सन्तोषं बुद्धीन्द्रियाणि यज्ञपात्राणि शिरः कपालं केशाः दर्भाः मुखमन्तर्वेदिः षोडश पार्श्वदन्तपटलान्यष्टोत्तरमर्मशतमशीतिसन्धिशतं नवस्नायुशतमष्टसहस्ररोमकोट्यः ॥ २० ॥

तत्राग्न्याधारशरीरे तस्याग्नेः त्रीणि स्थानानि भवन्ति । कानि तानीत्यत्र हृदये दक्षिणाग्निः, दक्षिणाग्निस्थानं हृदयं, उदरे गार्हपत्यं, मुखं आहवनीयं, अग्नित्रयाकृतिसामान्यात् । यजमानाय यजमानस्य—षष्ठ्यर्थे चतुर्थी व्यत्ययः छान्दसः—हृदयोदरमुखानि त्रेताग्निस्थानानि भवन्ति । यजमानस्य बुद्धिं पत्नीं निधाय तद्बुद्धिं पत्नीत्वेन सम्भाव्य बुद्धौ पत्नीदृष्टिं कृत्वेत्यर्थः । यजमानस्येति सर्वत्र अनुषज्यते । सन्तोषं तत्सन्तोष एव दीक्षा । तद्बुद्धीन्द्रियाण्येव यज्ञपात्राणि स्रुवादीनि । तच्छिरो यज्ञोपयोगिकपालम् । तत्केशा एव दर्भाः । मुखमेवान्तर्वेदिः । यजमानस्य षोडशपार्श्वदन्तपटलानि अष्टोत्तरशतकपोलमूलादिमर्मस्थानानि च तथा अशीत्यधिकशतपर्वादिसन्धिस्थानानि नवाधिकशतपिङ्गळेडादिनाड्यन्तरितस्नायूनि च अष्टसहस्ररोमकोट्यश्च यजमानयज्ञस्य ऋत्विक्सदस्यस्थानीया इत्यनुसन्धानं यः करोति योगी मानसयज्ञानुष्ठानसञ्जातचित्तशुद्धिप्राप्यज्ञानद्वारा मुक्तो भवतीत्यर्थात् लभ्यते ॥ २० ॥

शरीरमाननिरूपणम्

हृदयपलान्यष्टौ द्वादश[1]पला जिह्वा पित्तं प्रस्थं कफस्याढकं शुक्लं [2]कुडुपं मेदः प्रस्थौ द्वावेव हि तन्मूत्रपुरीषयोः अहरहः पानपरिमाणम् ॥ २१ ॥

तत्तदङ्गुल्या षण्णवत्यङ्गुलात्मकं शरीरं तत्तन्मानेन हृदयादिमानं पित्तादिमानं च मुमुक्षुविरागोत्पत्तये एतदेतावदिति निर्दिशति—हृदयेति । मांसखण्डात्मकहृदयपलान्यष्टावेव, द्वादशपलात्मिकेयं जिह्वा, तच्छरीरविद्यमानं पित्तं प्रस्थमेव, तत्रत्यकफस्य मानं आढकं, शुक्लमानं तु कुडुपं त्रिपादप्रस्थं, मेदस्तु प्रस्थौ प्रस्थद्वयपरिमितं, मूत्रपुरीषयोरपि मानं द्वावेव महाप्रस्थौ—प्रस्थद्वयं महाप्रस्थं,—स्वशरीरेण स्नानपानादिना पेयं पानपरिमाणं तत्तदाकृतिमानेन प्रस्थद्वयमेव । एतत्संघातं स्त्रीपुरुषयोगप्रभूतं सन्मूत्रद्वारेण निष्क्रान्तमिदं शरीरं पञ्चात्मकमित्यादिविशेषणविशिष्टम् । तत्र मुमुक्षुः जात्वपि न त्वात्मात्मीयभावारूढो भवेत् । तथा च श्रुतिः—" शरीरमिदं मैथुनादेवोद्भूतं संविध्यपेतं निरय एव मूत्रद्वारेण निष्क्रान्तं अस्थिभिः चितं मांसेनानुलिप्तं चर्मणा अवबद्धं विण्मूत्रवातपित्तकफमज्जामेदोवसाभिः अन्यैश्च मलैः बहुभिः सम्पूर्णं एतादृशे अस्मिन् शरीरे वर्तमानस्य किं कामोपभोगैः " इति,

सा कालसूत्रपदवी सा महावीचिवागुरा ।
सा त्याज्या सर्वयत्नेन या देहेऽहमिति स्थितिः ॥

इत्यादि । एवं विद्वान् उक्तशरीरोपलक्षितत्वाविद्यापदतत्कार्यजातारोपापवादाधिकरणगतहेयांशापह्नवसिद्धं ब्रह्म निष्प्रतियोगिकत्वमात्रमिति ज्ञानसमकालं तन्मात्रेण अवशिष्यत इति ॥ २१ ॥

[1] पलानि—क. [2] कुडुबं—क. कुटुबं—अ २. गुडुपं—अ.

उपसंहारः

पैप्पलादं मोक्षशास्त्रं परिसमाप्तं पैप्पलादं मोक्षशास्त्रं परिसमाप्तमित्युपनिषत् ॥ २२ ॥

पिप्पलादापत्यपैप्पलादमुनेः मन्त्रदृशः परमाशय इति पैप्पलादेन दृष्टं **पैप्पलादं मोक्षशास्त्रं परिसमाप्तम्** । आवृत्तिरादरार्था । **इत्युपनिषच्छब्दौ** गर्भोपनिषत्परिसमाप्त्यर्थौ ॥

श्रीवासुदेवेन्द्रशिष्योपनिषद्ब्रह्मयोगिना ।
लिखितं स्याद्विवरणं गर्भोपनिषदः स्फुटम् ।
गर्भोपनिषदो व्याख्याग्रन्थः षष्ट्युत्तरं शतम् ॥

इति श्रीमदीशाद्यष्टोत्तरशतोपनिषच्छास्त्रविवरणे सप्तदशसङ्ख्यापूरकं
गर्भोपनिषद्विवरणं सम्पूर्णम्

निरालम्बोपनिषत्

पूर्णमदः—इति शान्तिः

एकचत्वारिंशत्प्रश्नाः

[1]एषामज्ञानजन्तूनां समस्तारिष्टशान्तये । यद्यद्बोद्धव्यमखिलं तदाशङ्क्य ब्रवीम्यहम् ॥ १ ॥ किं ब्रह्म क ईश्वरः को जीवः का प्रकृतिः कः परमात्मा को ब्रह्मा को विष्णुः को रुद्रः क इन्द्रः कः [2]शमनः कः सूर्यः कश्चन्द्रः के सुराः के असुराः के पिशाचाः के मनुष्याः काः स्त्रियः के [3]पश्वादयः किं स्थावरं के ब्राह्मणादयः का जातिः किं कर्म किमकर्म किं ज्ञानं किमज्ञानं किं सुखं किं दुःखं कः स्वर्गः को नरकः को बन्धः को मोक्षः क उपास्यः कः शिष्यः को विद्वान् को मूढः किमासुरं किं तपः किं परमं पदं किं ग्राह्यं किमग्राह्यं कः संन्यासीत्याशङ्क्याह ॥ २ ॥

[1] येषा—अ, अ १, अ २, उ.

[2] शमनकः—अ.

[3] पशवः—अ २, के.

यत्रालम्बालम्बिभावो विद्यते न कदाचन ।
ज्ञविज्ञसम्यज्ज्ञालम्बं निरालम्बं हरिं भजे ॥

इह खलु शुक्लयजुर्वेदप्रविभक्तेयं निरालम्बोपनिषत् निर्विशेषब्रह्मगोचरा । ईशावास्यादिवत् अस्याः उपोद्घातादिकमूह्यम् । सर्वसारश्रुतिवदियमपि निरालम्बोपनिषत् गुरुशिष्याद्याख्यायिकां विनाऽपि स्वयमेव गुरुशिष्याविव स्वाज्ञजनोत्तारणाय तैः यद्यत् बोद्धव्यं तत्तत् स्वयमेव गुरुशिष्याविव प्रश्नप्रतिवचनं व्याकुर्वती प्रवृत्ता । अस्याः स्वल्पग्रन्थतो विवरणमारभ्यते । **एषामिति** ॥ १ ॥ एवं श्रुतिः प्रतिज्ञां कृत्वा एकचत्वारिंशत्प्रश्नान् पृच्छति—**किं ब्रह्मेत्यादिना** ॥ २ ॥

ब्रह्मस्वरूपम्

ब्रह्मेति च महदहंकारपृथिव्यप्तेजोवाय्वाकाशत्वेन बृहद्रूपेणाण्डकोशेन कर्मज्ञानार्थरूपतया भासमानमद्वितीयमखिलोपाधिविनिर्मुक्तं तत्सकलशक्त्युपबृंहितमनाद्यनन्तं शुद्धं शिवं शान्तं निर्गुणमित्यादिवाच्यमनिर्वाच्यं चैतन्यं ब्रह्म ॥ ३ ॥

एवं स्वकृतशङ्काजातोत्तरमपि स्वयमेवाह—**ब्रह्मेति चेति** । किं ब्रह्मेत्यादि कः संन्यासी इत्यन्तं यद्यत् विकल्पितं तत्तत् सर्वं **ब्रह्मेति** ज्ञेयम् । किं ब्रह्मेति प्रश्नोत्तरप्रतीकं वा **ब्रह्मेति चेति** । कीदृशं ब्रह्मेत्यत्र यन्निष्प्रतियोगिकं ब्रह्म स्वमात्रमवशिष्यते तदेव स्वाज्ञदृष्ट्या अव्यक्तमहदहङ्कारादिविशिष्टपृथिव्यादिपञ्चभूतभौतिकजुष्टाविद्याऽण्डत्वेन **कर्मज्ञानार्थ**ज्ञानफलब्रह्मादिलोकतया **च** भासमानं भवति । तदेव स्वज्ञदृष्ट्या **अद्वितीयं** पृथिव्याद्यव्यक्तान्ताखिलोपाधिविरळमपि तत्तद्वस्तुशक्त्योपबृंहितं अव्यक्तादिवदुत्पत्तिप्रळयाभावा**दनाद्यनन्तं** अशुद्धाविद्याण्डाश्रयसत्वादिगुणत्रयापह्नवात् **शुद्धं शिवं शान्तं निर्गुणमित्यादि**शब्दवाच्यमपि **अनिर्वाच्यं** यच्चैतन्यमवशिष्यते तदेव **ब्रह्मेत्यर्थः** ॥ ३ ॥

ईश्वरस्वरूपम्

ईश्वर इति च ब्रह्मैव स्वशक्तिं प्रकृत्यभि[1]धेयमाश्रित्य लोकान् सृष्ट्वा प्रविश्यान्तर्यामित्वेन ब्रह्मादीनां बुद्धीन्द्रियनियन्तृत्वादीश्वरः ॥

क ईश्वर इति प्रश्नोत्तरमाह—ईश्वर इति चेति । यत् निर्विशेषं ब्रह्म तदेव स्वाज्ञविकल्पितस्वशक्तिं मूलप्रकृत्यवच्छेदेन अभिधातुं शक्यं प्रकृत्यभिधेयमीश्वरत्वमाश्रित्य स्वातिरेकेण स्वाज्ञैः लोक्यन्त इति लोकाः तान् अनन्तकोटिब्रह्माण्डरूपान् स्वाव्यतिरेकेण सृष्ट्वा तत्रान्तर्यामित्वेन प्रविश्य वर्तमानस्य ब्रह्मादिस्तम्बान्तकरणग्रामनियामकत्वात् ईश्वरत्वं भवतीत्यर्थः ॥ ४ ॥

जीवस्वरूपम्

जीव इति च ब्रह्मविष्ण्वीशानेन्द्रादीनां नामरूपद्वारा स्थूलोऽहमिति मिथ्याऽध्यासवशाज्जीवः सोऽहमेकोऽपि देहारम्भक-भेदवशाद्बहुजीवः ॥ ५ ॥

को जीव इति प्रश्नोत्तरमाह—जीव इति । तत्तदण्डगतब्रह्म-विष्ण्वीशानेन्द्रादिजङ्गमविशिष्टनामरूपप्रपञ्चात्माध्यासवशात् सर्वस्थूला-भिमानी समष्टिजीवो विराट् यो विराडस्मीत्यभिमन्यते सोऽहमेकोऽपि व्यष्टि-देहारम्भकहेतुतूलान्तःकरणाविद्यावशात् बह्वसङ्ख्याता जीवकोटिर्भवति ॥ ५ ॥

प्रकृतिस्वरूपम्

प्रकृतिरिति च ब्रह्मणः सकाशान्नानाविचित्रजगन्निर्माण-[2]सामर्थ्या बुद्धि[3]रूपा ब्रह्मशक्तिरेव प्रकृतिः ॥ ६ ॥

[1] धेया—अ, क. [2] सामर्थ्य—अ २, क. सामर्थ्यात्—अ, अ १.
[3] रूप—अ, अ १.

का प्रकृतिः इति प्रश्नोत्तरमाह—**प्रकृतिरिति**। अयस्कान्तसंनिहितलोहवत् या **ब्रह्मणः सकाशात्** जगद्धेतुतया प्रकृता सेयं **ब्रह्मशक्तिरेव प्रकृतिः** ॥ ६ ॥

परमात्मस्वरूपम्

परमात्मेति च देहादेः परतरत्वाद्ब्रह्मैव परमात्मा ॥ ७ ॥

कः परमात्मेत्यादि के ब्राह्मणादय इत्यन्तप्रश्नोत्तरमाह—**परमात्मेति**। व्यष्टिदेहाद्यव्यक्तान्तकलना यज्ज्ञानसमकालमपह्नवतां भजति तद्देहादेः **परतरं** तद्भावः तत्त्वं तस्मात् निष्प्रतियोगिकं बृंहयतीति **ब्रह्मैव परमात्मा** स्वमात्रमवशिष्यते ॥ ७ ॥

ब्रह्मादीनां ब्रह्ममात्रत्वम्

स ब्रह्मा स विष्णुः स इन्द्रः स शमनः स सूर्यः स चन्द्रस्ते सुरास्ते असुरास्ते पिशाचास्ते मनुष्यास्ताः स्त्रियस्ते पश्वादयस्तत्स्थावरं ते ब्राह्मणादयः ॥ ८ ॥ **सर्वं खल्विदं ब्रह्म नेह नानाऽस्ति किंचन** ॥ ९ ॥

यः परमार्थदृष्ट्या स्वमात्रमवशिष्टो भवति **स** एव स्वाज्ञादिदृष्ट्या **ब्रह्मेत्यादि** ॥ ८ ॥ स्वज्ञदृष्ट्या **सर्वं खल्विदं ब्रह्म** परमार्थदृष्ट्या **नेह** निष्प्रतियोगिक चिन्मात्रे **किञ्चन** किञ्चिदपि ब्रह्मादिब्राह्मणान्तनानाऽस्ति ब्रह्मणो निष्प्रतियोगिकस्वमात्रत्वात् ॥ ९ ॥

जातिस्वरूपम्

जातिरिति च।

न चर्मणो न रक्तस्य न मांसस्य न चास्थिनः।
न जातिरात्मनो जातिर्व्यवहारप्रकल्पिता ॥ १० ॥

का जातिः इति प्रश्नोत्तरमाह—**जातिरिति**। स्पष्टोऽर्थः ॥ १० ॥

कर्माकर्मणोः स्वरूपम्

कर्मेति च क्रियमाणेन्द्रियैः कर्माण्यहं करोमीत्यध्यात्मनिष्ठतया कृतं कर्मैव कर्म ॥ ११ ॥ अकर्मेति च कर्तृत्वभोक्तृत्वाद्यहंकारतया बन्धरूपं जन्मादिकारणं नित्यनैमित्तिकयागव्रततपोदानादिषु [1]फलाभिसंधानं यत् तदकर्म ॥ १२ ॥

किं कर्म इति प्रश्नोत्तरमाह—कर्मेति । अकर्तृधिया अनुष्ठितं सत्कर्मेत्यर्थः ॥ ११ ॥ किं अकर्मेति प्रश्नोत्तरमाह—अकर्मेति । कर्मकर्तृत्वाद्यभिमानपुरस्सरं यथोक्तफलेच्छया कृतं अकर्म असत्कर्मेत्यर्थः ॥ १२ ॥

ज्ञानाज्ञानयोः स्वरूपम्

ज्ञानमिति च देहेन्द्रियनिग्रहसद्गुरूपासनश्रवणमननिदिध्यासनैर्यद्यदृग्दृश्यस्वरूपं सर्वान्तरस्थं सर्वसमं घटपटादिपदा[2]र्थ इवाविकारं विकारेषु चैतन्यं विना किंचिन्नास्तीति साक्षात्कारानु[3]भवं ज्ञानम् ॥ १३ ॥ अज्ञानमिति च रज्जौ सर्पभ्रान्तिरिवाद्वितीये सर्वानुस्यूते सर्वमये ब्रह्मणि देवतिर्यङ्नरस्थावरस्त्रीपुरुषवर्णाश्रमबन्धमोक्षोपाधिनानात्मभेदकल्पितं ज्ञानमज्ञानम् ॥ १४ ॥

किं ज्ञानमिति प्रश्नोत्तरमाह—ज्ञानमिति । देहेन्द्रियनिग्रहग्रहणं साधनचतुष्टयसम्पत्त्युपलक्षणार्थम् । यत् सद्गुरुमुखतः कृतश्रवणादिनिष्पन्नं यद्यदृग्दृश्यतया विभाति चक्षुरादिकरणं तद्विषयजातं च तयोरपि स्वरूपभूतं

[1] फलानभि—अ, अ १. फलादिसं—अ २. फलाभिधेयसं—क.
[2] र्थमिवा—उ, मु. [3] भवो—अ.

तत्तदन्तर्याम्यात्मना **सर्वान्तरस्थं** सर्वसमं मृद्विकारघटपटादिपदार्थ इव विकारं न भवतीत्यविकारं स्वाज्ञदृष्टिप्रसक्तमायातत्कार्यविकारेष्वपि **चैतन्यं** विना **न किञ्चिदस्तीति** स्वानुभव एव **ज्ञानमुच्यते** ॥ १३ ॥ किं अज्ञानं इति प्रश्नोत्तरमाह—**अज्ञानमिति** । अतस्मिंस्तद्भावनं तस्मिन्नतद्भावनं वस्तुयाथात्म्यावेदनं वा **अज्ञानमित्यर्थः** ॥ १४ ॥

सुखदुःखयोः स्वरूपम्

सुखमिति च सच्चिदानन्दस्वरूपं ज्ञात्वाऽऽनन्दरूपो यः [1]स्थितिः सैव सुखम्[2] ॥ १५ ॥

किं सुखं इति प्रश्नोत्तरमाह—सुखमिति । **सच्चिदानन्दस्वरूपमहमस्मीति ज्ञात्वा** तज्ज्ञानसमकालं तन्मात्रावस्थानं परमसुखमभिधीयत इत्यर्थः । यः स्थितिः स एव सुखं इत्यत्र लिङ्गाव्यत्ययः छान्दसः । प्रश्ने किं दुःखं इत्यत्र प्रतिवचनादर्शनात् यथोक्तसुखविपरीतं दुःखं इति ज्ञेयम् ॥ १५ ॥

स्वर्गनरकयोः स्वरूपम्

स्वर्ग इति च सत्संसर्गः स्वर्गः ॥ १६ ॥ **नरक इति च असत्संसारविषय[3]जनसंसर्ग एव नरकः** ॥ १७ ॥

कः स्वर्गः इति प्रश्नोत्तरमाह—**स्वर्ग इति** । **सत्संसर्गस्य** स्वर्गसुखतुल्यत्वात् ॥ १६ ॥ को नरकः इति प्रश्नोत्तरमाह—**नरक इति** । **असत्संसारविषयजनैः** [संसर्गस्य] नरकफलप्रापकत्वात् ॥ १७ ॥

[1] तिष्ठति—अ.

[2] "दुःखमिति च अनादिविषयसंकल्प एव दुःखं" इति नवीनपंक्तिरधिका—अ १. "अनात्मा सरूपविषयसंकल्प एव दुःखं" इत्यधिकः—अ.

[3] जननसं—अ १, उ, क. जसं—अ.

बन्धमोक्षयोः स्वरूपम्

बन्ध इति च अनाद्यविद्यावासनया जातोऽहमित्यादिसंकल्पो बन्धः ॥ १८ ॥ पितृमातृसहोदरदारापत्यगृहारामक्षेत्रममतासंसारावरणसंकल्पो बन्धः ॥ १९ ॥ कर्तृत्वाद्यहंकारसंकल्पो बन्धः ॥ २० ॥ अणिमाद्यष्टैश्वर्याशासिद्धसंकल्पो बन्धः ॥ २१ ॥ देवमनुष्याद्युपासनाकामसंकल्पो बन्धः ॥ २२ ॥ यमाद्यष्टाङ्गयोगसंकल्पो बन्धः ॥ २३ ॥ वर्णाश्रमधर्मकर्मसंकल्पो बन्धः ॥ २४ ॥ आज्ञाभयसंशयात्मगुणसंकल्पो बन्धः ॥ २५ ॥ यागव्रततपोदानविधिविधानज्ञानसंकल्पो बन्धः ॥ २६ ॥ केवलमोक्षापेक्षासंकल्पो बन्धः ॥ २७ ॥ संकल्पमात्रसंभवो बन्धः ॥ २८ ॥ मोक्ष इति च नित्यानित्यवस्तुविचारादनित्यसंसारसुखदुःखविषयसमस्तक्षेत्रममताबन्धक्षयो मोक्षः ॥ २९ ॥

को बन्धः इति प्रश्नोत्तरमाह—**बन्ध इति** ॥ १८–२६ ॥ मुक्तस्य मोक्षेच्छाऽनुपपत्तेः,

मोक्षो मेऽस्त्विति चिन्ताऽन्तर्जाता चेदुत्थितं मनः ।
मननोत्थे मनस्येष बन्धः सांसारिको मतः ॥

इति श्रुतेः ॥ २७ ॥ किं बहुना—**सङ्कल्पमात्रसम्भवो बन्ध इति** ॥ २८ ॥ को मोक्ष इति प्रश्नोत्तरमाह—**मोक्ष इति** । बन्धहेतुसङ्कल्पक्षयस्य मोक्षाविर्भावहेतुत्वात् ॥ २९ ॥

उपास्यशिष्ययोः स्वरूपम्

उपास्य इति च सर्वशरीरस्थचैतन्यब्रह्मप्रापको गुरुरुपास्यः ॥ ३० ॥ शिष्य इति च [1]विद्याध्वस्तप्रपञ्चावगाहितज्ञानावशिष्टं ब्रह्मैव [2]शिष्यः ॥ ३१ ॥

क उपास्यः इति प्रश्नोत्तरमाह—**उपास्य इति** । स्वाचार्यातिरिक्तोपास्याभावात् ॥ ३० ॥ कः शिष्यः इति प्रश्नोत्तरमाह—**शिष्य इति** । विद्यया स्वातिरिक्ते अपह्नवतां गते यो निष्प्रतियोगिकमवशिष्यते स एव शिष्यः, न तु ग्रन्थार्थावगाही, तस्य सविशेषब्रह्मवित्त्वात् ॥ ३१ ॥

विद्वन्मूढयोः स्वरूपम्

विद्वानिति च सर्वान्तरस्थस्वसंविद्रूप[3]विद्विद्वान् ॥ ३२ ॥ मूढ इति च कर्तृत्वाद्यहंकारभावनारूढो मूढः ॥ ३३ ॥

को विद्वानिति प्रश्नोत्तरमाह—**विद्वानिति** । ब्रह्मविदेव विद्वान्, न हि षड्दर्शनीवल्लभो विद्वान् भवति ॥ ३२ ॥ को मूढ इति प्रश्नोत्तरमाह—**मूढ इति** । अहं कर्तेत्याद्यभिमतिदृढपटावृतत्वात् ॥ ३३ ॥

आसुरस्वरूपम्

आसुरमिति च ब्रह्मविष्ण्वीशानेन्द्रादीनामैश्वर्यकामनया निरशनजपाग्निहोत्रादिष्वन्तरात्मानं संतापयति चात्युग्ररागद्वेषविहिंसादम्भाद्यपेक्षितं तप आसुरम् ॥ ३४ ॥

[1] अविद्याऽध्यस्त—अ, अ १. [2] शिष्यत इति—उ १.
[3] स्स विद्वान्—अ १. वद्विद्वान्—अ २.

किं आसुरं इति प्रश्नोत्तरमाह—**आसुरमिति**। **ब्रह्मविष्ण्वीशानेन्द्र-वरुणादीनुद्दिश्य** लौकिकैश्वर्यकामनया **निरशनात्मकर्शनपूर्वकं** बहिर्मुखेन कृतं **तप आसुरं**, परमार्थफलवैरळ्यात् ॥ ३४ ॥

तपःस्वरूपम्

तप इति च ब्रह्म सत्यं जगन्मिथ्येत्यपरोक्षज्ञानाग्निना ब्रह्माद्यैश्वर्याशासिद्धसंकल्पबीज[1]संतापं तपः ॥ ३५ ॥

किं तपः इति प्रश्नोत्तरमाचष्टे—**तप इति**। असत्यजगदपह्नवसिद्ध-ब्रह्ममात्रज्ञानाग्निना स्वाङ्गदृष्टिप्रसक्तस्वातिरिक्तास्तितातूलराशिसन्तापं भस्मीकरणमेव तप इत्यर्थः ॥ ३५ ॥

परमपदस्वरूपम्

परमपदमिति च प्राणेन्द्रि[2]याद्यन्तःकरणगुणादेः परतरं सच्चिदानन्दमयनित्यमुक्तब्रह्मस्थानं परमपदम् ॥ ३६ ॥

किं परमं पदं इति प्रश्नोत्तरमाह—**परमपदमिति**। अनृतजडदुःखात्मक-प्राणाद्युपलक्षिताविद्यापदात् अपह्नवतां गतात् **परतरं सच्चिदानन्दमयं** तन्मात्रावस्थानं **परमपदम्** ॥ ३६ ॥

ग्राह्याग्राह्ययोः स्वरूपम्

ग्राह्यमिति च देशकालवस्तुपरिच्छेदराहित्यचिन्मात्रस्वरूपं ग्राह्यम् ॥ ३७ ॥ अग्राह्यमिति च स्वस्वरूपव्यतिरिक्तमायामय-बुद्धीन्द्रियगोचरजगत्सत्यत्वचिन्तनमग्राह्यम् ॥ ३८ ॥

[1] संतापः—अ. [2] यान्तः—उ १.

किं ग्राह्यं इति प्रश्नोत्तरमाह—**ग्राह्यमिति** । निष्प्रतियोगिकचिन्मात्रं स्वावशेषतया **ग्राह्यं**, अचिन्मात्रस्य परमार्थदृष्टिदुर्लभत्वात् ॥ ३७ ॥ किं अग्राह्यं इति प्रश्नोत्तरमाह—**अग्राह्यमिति** । स्वमात्रसिद्धे स्वातिरिक्तजगत्सत्यताऽपह्नवपूर्वकत्वात् स्वमात्रेच्छुभिः स्वातिरिक्तं अग्राह्यमेवेत्यर्थः ॥ ३८ ॥

संन्यासिस्वरूपम्

संन्यासीति च सर्वधर्मान् परित्यज्य निर्ममो निरहंकारो भूत्वा ब्रह्मेष्टं शरणमुपगम्य तत्त्वमसि सर्वं खल्विदं ब्रह्म नेह नानाऽस्ति किंचनेत्यादिमहावाक्यार्थानुभवज्ञानाद्ब्रह्मैवाहस्मीति निश्चित्य निर्विकल्पसमाधिना स्वतन्त्रो यतिश्चरति स संन्यासी स मुक्तः स [1]पूज्यः स योगी स परमहंसः सोऽवधूतः स ब्राह्मण इति ॥ ३९ ॥

कः संन्यासी इति प्रश्नोत्तरमाह—**संन्यासीति** । स्वातिरिक्तसर्वधर्माशां **परित्यज्य** स्वात्मात्मीयकलनायां निर्गताहङ्कारममकारो **भूत्वा** यत् स्वातिरिक्तकलनापह्नवसिद्धं **ब्रह्म** सर्वावशिष्टं स्वमात्रतया **इष्टमिति शरणं** तन्निष्ठामुपगम्य तत्समकालं कृतकृत्यो भवति । यदि कदाचित् आभासतोऽपि संसृतिकष्टप्रदस्वातिरिक्तभ्रम उदेति तदा पुनस्तन्निरसनोपायतया यद्यत् स्वाज्ञदृष्ट्या सत्यतया भातं यद्यत् स्वज्ञदृष्ट्या व्यावहारिकत्वेन प्रातिभासिकत्वेन वा भातं तत्समष्ट्यष्ट्यपवादाधिकरणं **तत्त्वं**पदलक्ष्यं ब्रह्मैवाहं अहमेव ब्रह्म इत्यसिपदेन तत्त्वंपदलक्ष्यैक्यं कृत्वा यत् स्वाज्ञादिदृष्ट्या सत्यत्वादिना अनुभूतं तत् **सर्वं खल्विदं ब्रह्म नेह** सर्वापह्नवसिद्धब्रह्ममात्रे **किञ्चन** सर्वशब्दवाच्यनानाऽस्तीति **महावाक्यार्थानुभवज्ञानात् ब्रह्मैवाहमस्मीति निश्चित्य** आभासतोऽपि ब्रह्मातिरिक्तं न किञ्चिदस्ति इत्यखण्डनिर्विकल्पकसमाधिना सम्यज्ज्ञानमहिम्ना

[1] मुक्तपू—क.

स्वतन्त्रो यतिश्चरति। स हि स्वातिरिक्तसर्वस्वसंन्यासी, स हि तद्भमतो मुक्तः, स हि ब्रह्मविदादिभिरपि पूज्यः, स एव ब्रह्ममात्रज्ञानयोगी, स हि **परमहंसः** प्रत्यगभिन्नपरमात्मा, स एव मुख्यावधूतः,

अक्षरत्वाद्वरेण्यत्वाद्भूतसंसारबन्धनात् ।
तत्त्वमस्यादिलक्ष्यत्वादवधूत इतीर्यते ॥

इति मुख्यावधूतप्रतिपादकश्रुतेः । स एव **ब्राह्मणः** ब्रह्मनिष्ठ इत्यर्थः ॥ ३९ ॥

विद्याफलम्

निरालम्बोपनिषदं योऽधीते गुर्वनुग्रहतः सोऽग्निपूतो भवति स वायुपूतो भवति न स पुनरावर्तते न स पुनरावर्तते पुनर्नाभिजायते पुनर्नाभिजायत इत्युपनिषत् ॥ ४० ॥

विद्यासामान्यविशेषफलमाह—**निरालम्बेति**। अग्निवाय्वादिवत् शुद्धान्तरो भवतीत्यान्तराळिकफलं, **न स पुनरावर्तते** इति मुख्यफलम्। आवृत्तिरादरार्था। **इत्युपनिषच्छब्दः** शास्त्रपरिसमाप्त्यर्थः ॥ ४० ॥

श्रीवासुदेवेन्द्रशिष्योपनिषद्ब्रह्मयोगिना ।
लिखितं स्याद्विवरणं निरालम्बस्य वै स्फुटम् ।
निरालम्बविवरणग्रन्थस्त्वष्टोत्तरं शतम् ॥

इति श्रीमदीशाद्यष्टोत्तरशतोपनिषच्छास्त्रविवरणे चतुस्त्रिंशत्सङ्ख्यापूरकं निरालम्बोपनिषद्विवरणं सम्पूर्णम्

पैङ्गलोपनिषत्

पूर्णमदः—इति शान्तिः

प्रथमोऽध्यायः

परमरहस्यकैवल्यजिज्ञासा

अथ ह पैङ्गलो याज्ञवल्क्यमुपसमेत्य द्वादशवर्षशुश्रूषापूर्वकं परमरहस्यकैवल्यमनुब्रूहीति पप्रच्छ ॥ १ ॥

पैङ्गलोपनिषद्वेद्यं परमानन्दविग्रहम् ।
परितः कलये रामं परमाक्षरवैभवम् ॥

इह खलु शुक्लयजुर्वेदप्रविभक्तेयं पैङ्गलोपनिषत् स्वाज्ञादिदृष्टिमाश्रित्याध्यारोपापवादतदधिकरणप्रकाशनव्यग्रा निष्प्रतियोगिकब्रह्ममात्रपर्यवसन्ना विजृम्भते । अस्याः स्वल्पग्रन्थतो विवरणमारभ्यते । शिष्याचार्यपदंगतपैङ्गलयाज्ञवल्क्यप्रश्नप्रतिवचनरूपेयमाख्यायिका विद्यास्तुत्यर्था । आख्यायिकामवतारयति—अथेति ॥ १ ॥

अद्वितीयब्रह्म

स होवाच याज्ञवल्क्यः—सदेव सोम्येदमग्र आसीत्। तन्नित्यमुक्तमविक्रियं सत्यज्ञाना[1]नन्दपरिपूर्णं सनातनमेकमेवाद्वितीयं ब्रह्म ॥ २ ॥

पैङ्गलप्रश्नोत्तरं **स होवाच याज्ञवल्क्यः**। किमिति? **सदेवेति**। सृष्टेः पूर्वं **इदम**विद्यापदतत्कार्यजातं अनभिव्यक्तनामरूपात्मकं **सदेवासीत्**। यत् सत् सन्मात्रं **तत्** कालत्रयेऽपि स्वातिरिक्तकलनामुक्तं, **अनित्य**स्वातिरिक्तकार्यकारण-विक्रियाऽभावतो **नित्यमविक्रियं**, अनृतजडदुःखवैरळ्यात् **सत्यज्ञानानन्द-परिपूर्णं**, चिरन्तनत्वात् **सनातनं**, परमार्थदृष्ट्या सजातीयविजातीयस्वगतभेदा-सम्भवात् **एकमेवाद्वितीयं**, स्वमात्रतया निष्प्रतियोगिकं उपबृंहणात् **ब्रह्म** विजयत इत्यर्थः, "ब्रह्मैवैकमनाद्यन्तमब्धिवत् प्रविजृम्भते" इति श्रुतेः ॥ २ ॥

मूलप्रकृतिः, साक्षिचैतन्यं च

तस्मिन् मरुशुक्तिकास्थाणुस्फटिकादौ जलरौप्यपुरुषरेखा-ऽऽदिवल्लोहितशुक्लकृष्णा गुणमयी गुणसाम्यानिर्वाच्या मूलप्रकृति-रासीत्। तत्प्रतिबिम्बितं यत्तत् साक्षिचैतन्यमासीत् ॥ ३ ॥

यदुक्तं निष्प्रतियोगिकं ब्रह्ममात्रमिति न हि तत्राध्यारोपापवादकलना सेद्धुं पारयति। इदानीमनादिकालमारभ्याकैवल्यं स्वज्ञस्वाज्ञादिकलना विजृम्भते। तत्र परमार्थदृष्टिः सर्वापह्नवसिद्धं ब्रह्म निष्प्रतियोगिकस्वमात्रमिति पश्यति। स्वज्ञः स्वातिरिक्ताविद्यापदतत्कार्यकलनाऽस्पृष्टं ब्रह्माहमस्मीति पश्यति। स्वाज्ञस्तु स्वं विस्मृत्य स्वातिरिक्तमोहार्णवे मज्जन् देहादिरहमस्मीति मन्यते। तन्मोहनिरा-करणस्य तदियत्तापरिज्ञानपूर्वकत्वात्, न हि तत्परिज्ञानं विना तदपह्नोतुं शक्यते,

[1] नन्दं—अ १.

अतः तन्मोहनिराकरणाय निरधिकरणेऽपि ब्रह्ममात्रे स्वाज्ञदृष्ट्याऽध्यारोपः, स्वज्ञदृष्ट्या स्वातिरिक्तापवादः, परमार्थदृष्ट्या निष्प्रतियोगिकब्रह्ममात्रं सेद्धुं पारयतीति ब्रह्मण्यध्यारोपादिश्रुतिभिः उच्यत इत्याह—**तस्मिन्नित्यादिना**। रजःसत्वतमोगुणमयी । सर्वानर्थमूलत्वेन प्रकृता **मूलप्रकृतिः** विकल्पिता **आसीत्**। बिम्बकलनाविरळं यन्निर्विशेषं ब्रह्म स्वकल्पितमूलप्रकृतितत्कार्यवारिबिम्बितसाक्षीशजीववत् भातीत्याह—**तदिति**। या स्वविकल्पिता मूलप्रकृतिः **तत्प्रतिबिम्बितं यत्** ॥ ३ ॥

अव्यक्तं, ईश्वरचैतन्यं च

सा पुनर्विकृतिं प्राप्य सत्त्वोद्रिक्ताऽव्यक्ताख्याऽऽवरणशक्तिरासीत्। तत्प्रति[1]बिम्बितं यत्तदीश्वरचैतन्यमासीत्। स स्वाधीनमायः सर्वज्ञः सृष्टिस्थितिलयानामादिकर्ता जगदङ्कुररूपो भवति । स्वस्मिन् विलीनं [2]सकलं जगदाविर्भावयति। प्राणिकर्मवशादेष पटो यद्वत् प्रसारितः प्राणिकर्मक्षयात् पुनस्तिरोभावयति। तस्मिन्नेवाखिलं विश्वं [3]संकोचितपटवद्वर्तते ॥ ४ ॥

या मूलप्रकृतिः **सा पुनर्विकृतिम्** ॥ ४–६ ॥

महत्, हिरण्यगर्भचैतन्यं च

ईशाधिष्ठितावरणशक्तितो रजोद्रिक्ता महदाख्या विक्षेपशक्तिरासीत्। तत्प्रतिबिम्बितं यत्तद्धिरण्यगर्भचैतन्यमासीत्। स महत्तत्त्वाभिमानी स्पष्टास्पष्टवपुर्भवति ॥ ५ ॥

[1] बिम्बं य—अ, अ १.
[2] 'सकलं' इत्येतन्नास्ति—उ.
[3] संकोचप—उ.

अहङ्कारः, विराट्चैतन्यं, तन्मात्रसम्भूतिश्च

हिरण्यगर्भाधिष्ठितविक्षेपशक्तितस्तमोद्रिक्ताहंकाराभिधा स्थूलशक्तिरासीत्। तत्प्रतिबिम्बितं यत्तद्विराट्चैतन्यमासीत्। स तदभिमानी स्पष्टवपुः सर्वस्थूलपालको विष्णुः प्रधानपुरुषो भवति। तस्मादात्मन आकाशः संभूतः। आकाशाद्वायुः। वायोरग्निः। अग्नेरापः। अद्भ्यः पृथिवी। तानि पञ्च तन्मात्राणि [1]त्रिगुणानि भवन्ति॥ ६॥

अण्डभुवनशरीराणां सृष्टिः

स्रष्टुकामो जगद्योनिस्तमोगुणमधिष्ठाय सूक्ष्मतन्मात्राणि भूतानि स्थूलीकर्तुं सोऽकामयत। सृष्टेः परिमितानि भूतान्येकमेकं द्विधा विधाय पुनश्चतुर्धा कृत्वा स्वेस्वेतरद्वितीयांशैः पञ्च पञ्चधा संयोज्य पञ्चीकृतभूतैरनन्तकोटिब्रह्माण्डानि तत्तदण्डोचितचतुर्दशभुवनानि तत्तद्भुवनोचितगोलकस्थूलशरीराण्यसृजत्॥ ७॥

केवलसूक्ष्मभूतसृष्ट्या किं स्यादित्याशङ्क्य तत्पञ्चीकरणतः सर्वसिद्धिः स्यादित्याह—स्रष्टुकाम इति॥ ७॥

कर्मेन्द्रियसृष्टिः

स पञ्चभूतानां रजोंऽ[2]शांश्चतुर्धा कृत्वा भागत्रयात् पञ्चवृत्त्यात्मकं प्राणमसृजत्। स तेषां तुर्यभागेन कर्मेन्द्रियाण्यसृजत्॥ ८॥

ततः किमित्यत आह—स इति। तेषां पञ्चभूतानाम्॥ ८–१०॥

[1] त्रीणि गु—अ. [2] शं च—अ, अ १.

ज्ञानेन्द्रियसृष्टिः

स तेषां सत्त्वांशं चतुर्धा कृत्वा भागत्रयसमष्टितः पञ्च-वृत्त्यात्मकमन्तःकरणमसृजत् । स तेषां सत्त्वतुरीयभागेन ज्ञानेन्द्रियाण्यसृजत् ॥ ९ ॥

इन्द्रियपालकसृष्टिः

सत्त्वसमष्टित इन्द्रियपालकानसृजत् । तानि सृष्टान्यण्डे [1]प्राक्षिपत् । तदाज्ञया समष्टयण्डं व्याप्य तान्यतिष्ठन् । तदाज्ञया-ऽहंकारसमन्वितो विराट् स्थूलान्यरक्षत् । हिरण्यगर्भस्तदाज्ञया सूक्ष्माण्यपालयत् ॥ १० ॥

ईशस्य शरीरेन्द्रियप्रवेशः

अण्डस्थानि [2]तानि तेन विना स्पन्दितुं चेष्टितुं वा न शेकुः । तानि चेतनीकर्तुं सोऽकामयत । ब्रह्माण्डं ब्रह्मरन्ध्राणि व्यष्टिमस्तकान् विदार्य तदेवानुप्राविशत् । तदा जडान्यपि तानि चेतनवत् स्वस्वकर्माणि चक्रिरे ॥ ११ ॥

ईश्वरसृष्टानि कारणादीनि **अण्डस्थानि** । **मस्तकान्** मस्तकानि । स्वानुप्रविष्टचैतन्ययोगात् **चेतनवत्** ॥ ११ ॥

ईशस्य जीवत्वप्राप्तिः

सर्वज्ञेशो मायालेशसमन्वितो व्यष्टिदेहं प्रविश्य तया मोहितो जीवत्वमगमत् । शरीरत्रयतादात्म्यात् [3]कर्तृभोक्तृत्वतामगमत् ।

[1] प्राचिक्षि—अ, उ. प्रचिक्षि—क, अ १, अ २. [2] 'तानि' नास्ति—क, अ २.
[3] कर्तृभोकृता—अ. कर्तृत्वभो—क, अ २.

जाग्रत्स्वप्नसुषुप्तिमूर्च्छामरणधर्मयुक्तो घटीयन्त्रवदुद्विग्नो जातो मृत इव कुलालचक्रन्यायेन परिभ्रमतीति ॥ १२ ॥

भोक्तृत्वतामगमत्—भोक्तृताम् । निरावृतक्रियाज्ञानेच्छाशक्तेरीशितुः ईशत्वं जीवत्वं च स्वाज्ञदृष्टिनिमित्तं न स्वतः, स्वस्यैव निर्विशेषब्रह्मरूपत्वात् । निर्विशेषस्यापि विशेषयोगतो जीवत्वमुपपद्यते इत्यर्थः । इतिशब्दः प्रथमाध्यायपरिसमाप्त्यर्थः ॥ १२ ॥

इति प्रथमोऽध्यायः

द्वितीयोऽध्यायः

ईशः कथं जीवत्वमगमत्?

अथ पैङ्गलो याज्ञवल्क्यमुवाच सर्वलोकानां सृष्टिस्थित्यन्तकृद्विभुरीशः कथं जीवत्वमगमदिति ॥ १ ॥

सर्वनियामकेशितुः नियम्यजीवता कथमिति पैङ्गलो याज्ञवल्क्यं पृच्छतीत्याह—अथेति ॥ १ ॥

स्थूलशरीरसृष्टिः

स होवाच याज्ञवल्क्यः—स्थूलसूक्ष्मकारणदेहोद्भवपूर्वकं जीवेश्वरस्वरूपं विविच्य कथयामीति सावधानैनै[1]काग्रतया श्रूयताम् । ईशः पञ्चीकृतमहाभूतलेशानादाय व्यष्टिसमष्ट्यात्मकस्थूलशरीराणि

[1] काग्रय—अ १, अ २, क.

यथाक्रममकरोत् । कपालचर्मान्त्रास्थिमांसनखानि पृथिव्यंशाः । रक्तमूत्रलालास्वेदादिका अबंशाः । क्षुत्तृष्णोष्णमोहमैथुनाद्या अग्न्यंशाः । प्रचारणोत्तारणश्वासादिका वाय्वंशाः । कामक्रोधादयो व्योमांशाः । एतत्संघातं कर्मसंचितं त्वगादियुक्तं बाल्याद्यवस्थाऽभिमानास्पदं बहुदोषाश्रयं स्थूलशरीरं भवति ॥ २ ॥

उवाच, किमिति ? व्यष्टिसमष्ट्यात्मकस्थूलसूक्ष्मेति । किं तद्वक्ष्यसीत्यत्र पञ्चभूततः स्थूलदेहरचनामाचष्टे—ईश इति । यथाक्रममकरोत्, तत्र ॥ २ ॥

सूक्ष्मशरीरसृष्टिः

अथापञ्चीकृतमहाभूतरजोंशभागत्रयसमष्टितः प्राणमसृजत् । प्राणापानव्यानोदानसमानाः प्राणवृत्तयः । नागकूर्मकृकरदेवदत्तधनंजया उपप्राणाः । हृदासननाभिकण्ठसर्वाङ्गं स्थानम् । आकाशादिरजोगुण[1]तुर्य[2]भागेन कर्मेन्द्रियमसृजत् । वाक्पाणिपादपायूपस्थास्तद्वृत्तयः । वचनादानगमनविसर्गानन्दास्त[3]द्विषयाः । एवं भूतसत्त्वांशभागत्रयसमष्टितोऽन्तःकरणमसृजत् । अन्तःकरणमनोबुद्धिचित्ताहंकारास्तद्वृत्तयः । संकल्पनिश्चयस्मरणाभिमानानुसंधानास्त[4]द्विषयाः । गलवदननाभिहृदयभ्रूमध्यं स्थानम् । भूतसत्वतुरीयभागेन ज्ञानेन्द्रियमसृजत् । श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणास्तद्वृत्तयः । शब्दस्पर्शरूपरसगन्धास्त[5]द्विषयाः ।

[1] समष्टितु—अ, अ १, अ २. [2] भावेन—अ १.
[3] द्वृत्तिविष—अ, अ १. [4] द्वृत्तयः—अ. [5] द्वृत्तिविष—अ.

दिग्वातार्कप्रचेतोऽश्विवह्नीन्द्रोपेन्द्रमृत्युकाः ।
चन्द्रो विष्णुश्चतुर्वक्त्रः शंभुश्च करणाधिपाः ॥ ३ ॥

सूक्ष्मशरीरलक्षणमाह—अथेति । प्राणादिस्थानम् ॥ ३ ॥

पञ्चकोशात्मकं शरीरत्रयम्

अथान्नमयप्राणमयमनोमयविज्ञानमयानन्दमयाः पञ्च कोशाः । अन्नरसेनैव भूत्वाऽन्नरसेनाभिवृद्धिं प्राप्यान्नरसमयपृथिव्यां यद्विलीयते सोऽन्नमयकोशः । तदेव स्थूलशरीरम् । कर्मेन्द्रियैः सह प्राणादिपञ्चकं प्राणमयकोशः । ज्ञानेन्द्रियैः सह मनो मनोमयकोशः । ज्ञानेन्द्रियैः सह बुद्धिर्विज्ञानमयकोशः । एतत्कोशत्रयं लिङ्गशरीरम् । [1]स्वरूपाज्ञानमानन्दमयकोशः । तत् कारणशरीरम् ॥ ४ ॥

शरीरत्रयनिर्वचनाय पञ्चकोशस्वरूपमाचष्टे—अथेति । **पञ्च कोशाः**, तत्र **अन्नरसेनेति** । प्राणादिकोशत्रयं सूक्ष्मशरीरं भवतीत्याह—कर्मेति ॥ ४ ॥

पुर्यष्टकम्

अथ ज्ञानेन्द्रियपञ्चकं कर्मेन्द्रियपञ्चकं प्राणादिपञ्चकं वियदादिपञ्चकमन्तःकरणचतुष्टयं कामकर्मतमांस्यष्टपुरम् ॥ ५ ॥

पुर्यष्टकस्वरूपमाह—अथेति । पुर्यष्टकशब्देन समष्टिलिंगशरीरमुच्यते ॥

विराजो विश्वत्वम्

ईशाज्ञया विराजो व्यष्टिदेहं प्रविश्य बुद्धिमधिष्ठाय विश्वत्वमगमत् । विज्ञानात्मा चिदाभासो विश्वो व्यावहा-

[1] स्वरूप—उ.

रिको जाग्रत्स्थूलदेहाभिमानी कर्मभूरिति च विश्वस्य नाम भवति ॥ ६ ॥

व्यष्टिसमष्ट्योरेकत्वविवक्षया विराडादिप्रविभक्तत्वं विश्वादेराह—ईशेति। ईशाज्ञया स्वेच्छाशक्त्या ॥ ६–८ ॥

सूत्रात्मनस्तैजसत्वम्

ईशाज्ञया सूत्रात्मा व्यष्टिसूक्ष्मशरीरं प्रविश्य मन अधिष्ठाय तैजसत्वमगमत्। तैजसः प्रातिभासिकः स्वप्नकल्पित इति तैजसस्य नाम भवति ॥ ७ ॥

मायोपाधेः प्राज्ञत्वम्

ईशाज्ञया मायोपाधिरव्यक्तसमन्वितो व्यष्टिकारणशरीरं प्रविश्य प्राज्ञत्वमगमत्। [1]प्राज्ञोऽविच्छिन्नः पारमार्थिकः सुषुप्त्यभिमानीति प्राज्ञस्य नाम भवति ॥ ८ ॥

प्राज्ञस्यैव श्रवणादिजन्यज्ञानफलम्

अव्यक्तलेशाज्ञानाच्छादितपारमार्थिकजीवस्य तत्त्वमस्यादिवाक्यानि ब्रह्मणैकतां जगुः नेतरयोर्व्यावहारिकप्रातिभासिकयोः ॥ ९ ॥

विश्वस्य श्रवणाधिकारित्वेन विश्वस्यैव ब्रह्मणैकत्वं न तैजसादेः इत्याशङ्क्य विश्वस्य श्रवणादिकर्तृत्वे व्यावहारिकत्वात् तैजसस्य प्रातिभासिकत्वात् तयोः ज्ञानफलभोगावसरे मिथ्याभूतत्वात् प्राज्ञस्य पारमार्थिकत्वेन स्वांशजविश्वकृतशास्त्रश्रवणजन्यज्ञानफलभाक्त्वं प्राज्ञस्येत्याह—अव्यक्तेति ॥ ९–१० ॥

[1] प्राज्ञवि—उ १. प्राज्ञोऽव—अ, क.

प्रतिबिम्बितचैतन्यस्यैवावस्थात्रयभाग्भवति। स जाग्रत्स्वप्नसुषुप्त्यवस्थाः प्राप्य घटीयन्त्रवदुद्विग्नो जातो मृत इव स्थितो भवति ॥ १० ॥

जाग्रदवस्था

अथ जाग्रत्स्वप्नसुषुप्तिमूर्च्छामरणावस्थाः पञ्च भवन्ति । तत्तद्देवताऽनुग्रहान्वितैः श्रोत्रादिज्ञानेन्द्रियैः शब्दाद्यर्थविषयग्रहणज्ञानं जाग्रदवस्था भवति । तत्र भ्रूमध्यं गतो जीव आपादमस्तकं व्याप्य कृषिश्रवणाद्यखिलक्रियाकर्ता भवति । तत्तत्फलभुक्कं च भवति । लोकान्तरं गतः कर्मार्जितफलं स एव भुङ्क्ते । स सार्वभौमवद्व्यवहाराच्छान्त अन्तर्भवनं प्रवेष्टुं मार्गमाश्रित्य तिष्ठति ॥ ११ ॥

जाग्रदाद्यवस्थापञ्चकस्वरूपमाह—अथेति । तत्र क्रमेण जाग्रदाद्यवस्थास्वरूपमाह—तत्तदिति । य एवंविधो विश्वः स सार्वभौमवत् । अन्तर्भवनं स्थूलशरीरान्तः ॥ ११–१९ ॥

स्वप्नावस्था

करणोपरमे जाग्रत्संस्कारार्धप्रबोधवद्ग्राह्यग्राहकरूपस्फुरणं स्वप्नावस्था भवति । तत्र विश्व एव जाग्रद्व्यवहारलोपान्नाडीमध्यं चरंस्तैजसत्वमवाप्य वासनारूपकं जगद्वैचित्र्यं स्वभासा भासयन् यथेप्सितं स्वयं भुङ्क्ते ॥ १२ ॥

[1] स्कारार्थ—अ, क.

सुषुप्त्यवस्था

चित्तैककरणा सुषुप्त्यवस्था भवति । [1]भ्रमविश्रान्तशकुनिः पक्षौ संहृत्य नीडाभिमुखं यथा गच्छति तथा जीवोऽपि जाग्रत्स्वप्नप्रपञ्चे व्यवहृत्य श्रान्तोऽज्ञानं प्रविश्य स्वानन्दं भुङ्क्ते ॥ १३ ॥

मूर्च्छावस्था

अकस्मान्मुद्गरदण्डाद्यैस्ताडितवद्भयाज्ञानाभ्यामिन्द्रियसंघातैः कम्पन्निव मृततुल्या मूर्च्छा भवति ॥ १४ ॥

मरणावस्था

जाग्रत्स्वप्नसुषुप्तिमूर्च्छावस्थानामन्या ब्रह्मादिस्तम्बपर्यन्तं सर्वजीवभयप्रदा स्थूलदेहविसर्जनी मरणावस्था भवति ॥ १५ ॥

जीवस्य संसारगताविश्रान्तिः

कर्मेन्द्रियाणि ज्ञानेन्द्रियाणि तत्तद्विषयान् प्राणान् संहृत्य कामकर्मान्वित अविद्याभूतवेष्टितो जीवो देहान्तरं प्राप्य लोकान्तरं गच्छति । प्राक्कर्मफलपाकेनावर्तान्तरकीटवद्विश्रान्ति नैव गच्छति ॥१६॥

तस्य लोकान्तरगमनप्राप्तिप्रकारमाह—कर्मेति । वासनामयदेहान्तरम् ॥

सत्कर्मपरिपाकतो बन्धमोक्षजिज्ञासा

सत्कर्मपरिपाकतो बहूनां जन्मनामन्ते नृणां मोक्षेच्छा जायते । तदा सद्गुरुमाश्रित्य चिरकालसेवया [2]बन्धं मोक्षं [3]कश्चित् पृच्छति ॥ १७ ॥

[1] भ्रमणवि—अ, अ १. [2] बन्धमो—अ, अ २. बन्धान्मो—अ १.
[3] कश्चित्प्रयाति—मु. कश्चिद्गच्छति—अ, अ १.

एवमनन्तकोटिजीवेषु कल्पकोटिकालं संसरत्सु सत्सु तत्र केषांचित् **सत्कर्मपरिपाकत** इत्यादि ॥ १७ ॥

विचारस्य मोक्षसाधकत्वम्

अविचारकृतो बन्धो विचारान्मोक्षो भवति । तस्मात् सदा **विचारयेत्** । अध्यारोपापवादतः स्वरूपं निश्चयीकर्तुं शक्यते । तस्मात् सदा विचारयेज्जगज्जीवपरमात्मनः । जीवभावजगद्भावबाधे प्रत्यगभिन्नं ब्रह्मैवावशिष्यत इति ॥ १८ ॥

को बन्धः को मोक्ष इत्यत्र, देहेन्द्रियादिसंघाते ममकारास्पदे—**ममेदं** शरीरं ममेदं श्रोत्रादिज्ञानेन्द्रियं वागादिकर्मेन्द्रियं प्राणादिपञ्चकं मनआद्यन्तःकरणचतुष्टयं इत्यादि तत्र—कस्याप्यहङ्कारास्पदाभावात् अत्रास्मत्प्रत्ययालम्बनभूतः प्रत्यगात्मा अहमस्मीति **अविचारकृतो बन्धः**, प्रत्यगभिन्नं ब्रह्मास्मीति श्रुत्याचार्यमुखतो **विचारान्मोक्षः** स्वातिरिक्तास्तित्वभ्रममोक्षो **भवति** । यस्मादेवं **तस्मात् सदा विचारयेत्** । विचारतः कथं स्वयाथात्म्यं निर्धारयितुं शक्यमित्यत आह—**अध्यारोपेति** । स्वस्मिन् व्यष्टिसमष्ट्यात्मकस्वाविद्यापदतत्कार्यजातमात्मत्वेन सत्यत्वेन व्यावहारिकत्वेन प्रातिभासिकत्वेनाध्यस्य, "मच्चतिरिक्तमणुमात्रं न विद्यते", "सन्मात्रमसदन्यत्", "ब्रह्ममात्रमसन्नहि",

सिद्धान्तोऽध्यात्मशास्त्राणां सर्वापह्नव एव हि ।
नाविद्याऽस्तीह नो माया शान्तं ब्रह्मेदमक्रमम् ॥

इत्यादिश्रुत्यनुरोधेन स्वातिरिक्तापवादापह्नवतः तदपह्नवसिद्धब्रह्मस्वरूपं निष्प्रतियोगिकस्वमात्रमिति निश्चयीकर्तुं शक्यमित्यर्थः । यस्मादेवं **तस्मात्** तत्र स्वातिरिक्तं नेति **जीवभावजगद्भावबाधे** अपह्नवे सति यत्प्रसक्तप्रत्यगभिन्नं पराक्सापेक्षप्रत्यक्परभेदाभेदगतविशेषांशापाये निष्प्रतियोगिकनिर्विशेषं **ब्रह्मैव** स्वमात्रं **अवशिष्यते** । **इति**शब्दो द्वितीयाध्यायपरिसमाप्त्यर्थः ॥ १८ ॥

इति द्वितीयोऽध्यायः

तृतीयोऽध्यायः

महावाक्यजिज्ञासा

अथ हैनं पैङ्गलः पप्रच्छ याज्ञवल्क्यं महावाक्यविवरणमनुब्रूहीति ॥ १ ॥

जीवपरभेदस्य स्वानुभूतिप्रमाणसिद्धत्वात् तयोरैक्ये किं मानमित्याशङ्क्य समस्तश्रुतिमस्तकमहावाक्यं मानं यदि तदा तद्विवरणमनुब्रूहीति पैंगलो याज्ञवल्क्यं पृच्छतीत्याह—अथेति ॥ १ ॥

महावाक्यानुसन्धानविधिः

स होवाच याज्ञवल्क्यः—तत्त्वमसि, त्वं तदसि, [1]त्वं ब्रह्मास्यहं ब्रह्मास्मीत्यनुसंधानं कुर्यात् ॥ २ ॥

पृष्टः स होवाच याज्ञवल्क्यः । प्रत्यक्परैक्यावगतये यान्यनुसन्धेयानि तानि महावाक्यानि कानीत्यत आह—तदिति ॥ २ ॥

प्रत्यगभिन्नब्रह्मणः वाक्यार्थत्वम्

तत्र परोक्ष्यशबलः सर्वज्ञत्वादिलक्षणो मायोपाधिः सच्चिदानन्दलक्षणो जगद्योनिस्तत्पदवाच्यो भवति । स एवान्तःकरणसंभिन्नबोधोऽसत्प्रत्यया[2]लम्बनस्त्वंपदवाच्यो भवति । परजीवोपाधिमायाऽविद्ये विहाय तत्त्वंपदलक्ष्यं प्रत्यगभिन्नं ब्रह्म ॥ ३ ॥

[1] 'त्वं ब्रह्मासि' इत्येतन्नास्ति—अ २, क.

[2] वल—अ, अ १.

वाक्यार्थस्तु—तत्त्वंपदयोः वाच्यलक्ष्यभेदेन अर्थद्वयमस्ति। तत्र वाच्यार्थयोः ईशजीवयोः विषमोपाधित्वेन ऐक्यायोगात् तदपवादपूर्वकं तदधिकरणलक्ष्ययोः शुद्धत्वेनैक्यमिष्यते। **तत्रापनोदयितव्यवाच्यार्थस्तु परोक्ष्यशबळः** ईश्वरोऽस्ति किं तु सोपाधिक इति परोक्षत्वं शबळत्वम्। **सर्वज्ञत्वादिलक्षणः**—आदिशब्देन सर्वेश्वरत्व-सर्वकारणत्व-सर्वान्तरत्वादयो गृह्यन्ते। **मायोपाधिः**—तत्सम्बन्धाभावात् **सच्चिदानन्दलक्षणः**। ततः त्वंपदवाच्यो भिद्यत इत्यत आह—**स एवेति**। योऽयमीश्वरः तस्यैव व्यष्टिदेहान्तरनुप्रवेशश्रवणात्—"व्यष्टिमस्तकान् विदार्य तदेवानुप्राविशत्" इति—अन्तःकरणप्रतिफलनत्वमीश्वरस्येत्यर्थः। यः **अस्मत्प्रत्ययालम्बनः** देहादिरहमस्मीति प्रतीतत्वात् **त्वंपदवाच्यो भवति**। तत्र वाच्यार्थपरित्यागपूर्वकं लक्ष्ययोरैक्यं सम्भावयति—**परेति**। तथा च श्रुतिः—

मायाऽविद्ये विहायैव उपाधी परजीवयोः।
अखण्डं सच्चिदानन्दं परं ब्रह्म विलक्ष्यते॥

इति॥ ३॥

श्रवणमननिदिध्यासनसमाधीनां स्वरूपम्

तत्त्वमसीत्यहं ब्रह्मास्मीति वाक्यार्थविचारः श्रवणं भवति। एकान्तेन श्रवणार्थानुसंधानं मननं भवति। श्रवणमननिर्विचिकित्सेऽर्थे वस्तुन्येकतान[1]तया चेतःस्थापनं निदिध्यासनं भवति। ध्यातृध्याने विहाय निवातस्थितदीपवद्ध्येयैकगोचरं चित्तं समाधिर्भवति॥ ४॥

श्रवणादिलक्षणमाह—**तदिति**। **तत्त्वमसि** इत्येतदाचार्यानुभवोक्तिः। **अहं ब्रह्मास्मि** इति शिष्यानुमोदनानुभवोक्तिः। इत्थं **वाक्यार्थविचारः श्रवणं भवति। एकान्तेन** युक्तिभिः **श्रवणार्थानुसन्धानं मननं भवति। निदिध्यासनं**

[1] वत्तया—उ. त्वतया—क, उ १.

तु श्रवणेति । निदिध्यासनपाटवात् त्रिपुटीग्रासनिर्विकल्पकसमाधिरुदेतीत्याह—**ध्यातृध्यान** इति । तथा च श्रुतिः—

ध्यातृध्याने परित्यज्य क्रमाद्ध्येयैकगोचरम् ।
निवातदीपवच्चित्तं समाधिरभिधीयते ॥

इति ॥ ४ ॥

निर्विकल्पसमाधिमहिमा

तदानीमात्मगोचरवृत्तयः समुत्थिता अज्ञाता भवन्ति । ताः स्मरणादनुमीयन्ते । इहानादिसंसारे संचिताः कर्मकोटयोऽनेनैव विलयं यान्ति । ततोऽभ्यासपाटवात् सहस्रशः सदाऽमृतधारा वर्षति । ततो योगवित्तमाः समाधिं धर्ममेघं प्राहुः । वासनाजाले निःशेषमुना प्रविलापिते कर्मसंचये पुण्यपापे समूलोन्मूलिते प्राक् परोक्षमपि करतलामलकवद्वाक्यमप्रतिबद्धापरोक्षसाक्षात्कारं प्रसूयते । तदा जीवन्मुक्तो भवति ॥ ५ ॥

निर्विकल्पकसमाधिं स्तौति—तदानीमिति । वृत्तीनां साक्षिभास्यत्वेन समाधितो व्युत्थितस्य एतावन्तं कालं ब्रह्मानन्दपरवशोऽस्मीति स्मृतिः युज्यत इत्यर्थः । प्रतिबन्धकाभावात् करतलामलकवत् । तेन किं स्यादित्यत आह—**तदा जीवन्मुक्तो भवतीति** ॥ ५ ॥

विराडादीनां परमात्मनि लयः

ईशः पञ्चीकृतभूतानामपञ्चीकरणं कर्तुं सोऽकामयत । [1]ब्रह्माण्डतद्गतलोकान् कार्यरूपांश्च कारणत्वं प्रापयित्वा ततः सूक्ष्माङ्गं

[1] ब्रह्माण्डं—अ, अ १, अ २, उ १,

कर्मेन्द्रियाणि प्राणांश्च ज्ञानेन्द्रियाण्यन्तःकरणचतुष्टयं चैकीकृत्य सर्वाणि भौतिकानि कारणे भूतपञ्चके संयोज्य भूमिं जले जलं वह्नौ वह्निं वायौ वायुमाकाशे चाकाशमहंकारे चाहंकारं महति महदव्यक्तेऽव्यक्तं पुरुषे क्रमेण विलीयते । विराड्ढिरण्यगर्भेश्वरा उपाधिविलयात् परमात्मनि लीयन्ते ॥ ६ ॥

एतावता ग्रन्थेन ब्रह्मण्यध्यारोप उक्तः । तदपवादोपायोऽपि प्रकटितः । इदानीं स्वारोपापवादो निगद्यते—ईश इति । परमात्मनि लीयन्ते, परमात्मावशिष्टा भवन्तीत्यर्थः ॥ ६ ॥

विश्वादीनां परमात्मनि लयः

पञ्चीकृतमहाभूतसंभवकर्मसंचितस्थूलदेहः कर्मक्षयात् सत्कर्मपरिपाकतोऽपञ्चीकरणं प्राप्य सूक्ष्मेणैकीभूत्वा [1]कारणरूपत्वमासाद्य तत्कारणं कूटस्थे प्रत्यगात्मनि विलीयते । विश्वतैजसप्राज्ञाः स्वस्वोपाधिलयात् प्रत्यगात्मनि लीयन्ते ॥ ७ ॥

स्थूलदेहादिलयप्रकारमाह—पञ्चीकृतेति । तदारोपाधारजीवलयमाह—विश्वेति ॥ ७ ॥

ऐक्यानुसन्धानेन आत्माविर्भावः

अण्डं ज्ञानाग्निना दग्धं कारणैः सह परमात्मनि लीनं भवति । ततो ब्राह्मणः समाहितो भूत्वा तत्त्वंपदैक्यमेव सदा कुर्यात् । ततो मेघापायेंऽशुमानिवात्माऽऽवि[2]र्भवति ॥ ८ ॥

[1] कारणत्व—उ, उ १. [2] र्भावो भव—क, अ २.

ब्रह्माण्डलयमाह—अण्डमिति । यतः प्रत्यग्ब्रह्मैक्यज्ञानं स्वातिरिक्तकलनापवादहेतुः ततो ब्राह्मणः । तेन किं भवतीत्यत्र—ततो मेघापाय इति ॥८॥

ध्यानप्रकारः वेदनफलं च

ध्यात्वा मध्यस्थमात्मानं कलशान्तरदीपवत् ।
अङ्गुष्ठमात्रमात्मानमधूमज्योतिरूपकम् ॥ ९ ॥
प्रकाशयन्तमन्तःस्थं ध्यायेत् कूटस्थमव्ययम् ।
ध्यायन्नास्ते मुनिश्चैव चासुप्तेरामृतेस्तु यः ॥ १० ॥
जीवन्मुक्तः स विज्ञेयः स धन्यः कृतकृत्यवान् ।
जीवन्मुक्तपदं त्यक्त्वा स्वदेहे कालसात्कृते ।
विशत्यदेहमुक्तत्वं पवनोऽस्पन्दतामिव ॥ ११ ॥
अशब्दमस्पर्शमरूपमव्ययं तथाऽरसं नित्यमगन्धवच्च यत् ।
अनाद्यनन्तं महतः परं ध्रुवं तदेव शिन्यत्यमलं निरामयम् ॥१२॥

इति ॥

आदौ संवेदितात्मध्यानप्रकारं वेदनसामान्यविशेषफलं चाह—ध्यात्वेति । हृदयकमलमध्यस्थम् ॥ ९ ॥ नानाविधवृत्तिजातं प्रकाशयन्तम् । प्रत्यगभिन्नं ब्रह्मास्मीत्यनवरतध्यानतो मुनिः जीवन्मुक्तो भवतीत्याह—ध्यायन्निति ॥ १० ॥ विद्वद्ब्रह्मज्ञानविशेषफलमाह—जीवन्निति । स्वातिरिक्तकलनासंगलक्षणं जीवन्मुक्तत्वं विहाय स्वदेहे कालसात्कृते कालधर्मं गते परदृष्टया स्थिते वा निष्प्रतियोगिकब्रह्ममात्रज्ञानसमकालं विद्वान् अस्पन्दपवनव्योमभाववत् विदेहमुक्तो भवतीत्यर्थः ॥ ११ ॥ विदेहमुक्तः केन रूपेण अवशिष्यत इत्यत आह—अशब्दमिति । विद्वान् शब्दादिपञ्चतन्मात्रोपलक्षितव्ययाद्यन्तवदविद्याप्रदतत्कार्या-

पह्नवसिद्धं यदशब्दमित्यादिपदसमूहलक्षितं तदेव विकळेबरकैवल्यं भूत्वा अवशिष्यत इत्यर्थः । इतिशब्दः तृतीयाध्यायपरिसमाप्त्यर्थः ॥ १२ ॥

इति तृतीयोऽध्यायः

चतुर्थोऽध्यायः

ज्ञानिमाहात्म्यजिज्ञासा

अथ ह पैङ्गलः पप्रच्छ याज्ञवल्क्यं ज्ञानिनः किं कर्म का च स्थितिरिति ॥ १ ॥

इत्थंभूतज्ञानिमाहात्म्यबुभुत्सया पैंगलो याज्ञवल्क्यं पृच्छतीत्याह—अथेति । पप्रच्छ याज्ञवल्क्यं, किमिति ? ज्ञानिन इति ॥ १ ॥

ज्ञानिनः कुलतारकत्वम्

स होवाच याज्ञवल्क्यः—अमानित्वादिसंपन्नो मुमुक्षुरेकविंशतिकुलं तारयति । ब्रह्मविन्मात्रेण कुलमेकोत्तरशतं तारयति ॥ २ ॥

प्रश्नोत्तरं स होवाच याज्ञवल्क्यः । प्रश्नोत्तरं पश्चाद्विवक्षन् आदौ मुमुक्षुत्वमेव दुर्लभं, ततोऽपि ब्रह्मवित्त्वमतिदुर्लभं, एकविंशत्येकशतसन्ततितारणादिति स्तौति—अमानित्वादीति । अमानित्वादिसद्गुणसंपन्नः ॥ २ ॥

नारायण एव शारीर आत्मा

आत्मानं रथिनं विद्धि शरीरं रथमेव तु ।
बुद्धिं तु सारथिं विद्धि मनः प्रग्रहमेव च ॥ ३ ॥

इन्द्रियाणि हयानाहुर्विषयांस्तेषु गोचारान् ।
जङ्गमानि विमानानि हृदयानि मनीषिणः ॥ ४ ॥
आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहु[1]र्महर्षयः ।
ततो नारायणः साक्षाद्धृदये [2]सुप्रतिष्ठितः ॥ ५ ॥

मुमुक्ष्वधिष्ठितशरीरादिकं रथाद्युपकरणतया मुमुक्ष्वात्मानं रथस्वामितया च स्तौति—आत्मानमिति । कठवल्ल्यां व्याख्यातमेतत् ॥ ३–४ ॥ रथस्थानीयशरीरासनात्मा कीदृश इत्यत्र सर्वप्राणिहृदयासनो नारायण इत्याह—तत इति । मुमुक्षुः नारायणो भूत्वा सर्वभूतात्मा भवतीत्यर्थः ॥ ५ ॥

ज्ञानिनः शरीरपातपर्यन्तो व्यवहारविशेषः

प्रारब्धकर्मपर्यन्तमहिनिर्मोकवद्व्यवहरति ।
चन्द्रवच्चरते देही स मुक्तश्चानिकेतनः ॥ ६ ॥

किंकर्मेति प्रश्नोत्तरमाह—प्रारब्धेति । आप्रारब्धं मुनिः अनिकेतनो ग्रामैकरात्राटनशीलः व्योम्नि चन्द्रवत् सर्वत्र सञ्चरति ॥ ६ ॥

ज्ञानिनः शरीरपाते कैवल्यम्

तीर्थे श्वपचगृहे वा तनुं विहाय याति कैवल्यम् ।
प्राणानवकीर्य याति कैवल्यम् ॥ ७ ॥
एवं सञ्चरन् तीर्थे ॥ ७ ॥

ज्ञानिमरणे श्राद्धादि न कर्तव्यम्

तं पश्चाद्दिग्बलिं कुर्यादथवा खननं चरेत् ।
पुंसः प्रव्रजनं प्रोक्तं नेतराय कदाचन ॥ ८ ॥

[1] र्मनीषिणः—अ २. [2] षु—अ २. सं—अ, अ १.

नाशौचं नाग्निकार्यं च न पिण्डं नोदक[1]क्रिया ।
न कुर्यात् पार्वणादीनि ब्रह्मभूताय भिक्षवे ॥ ९ ॥
दग्धस्य दहनं नास्ति पक्वस्य पचनं यथा ।
ज्ञानाग्निदग्धदेहस्य न च श्राद्धं न च क्रिया ॥ १० ॥

यः शान्तासुः अवधूतदेहः सर्वोपकारकः पक्ष्यादितुष्टये तम् । कस्यैवं नियम इत्यत्र परिव्रजनाधिकारिणो नेतरस्येत्याह—पुंस इति । यस्य पुंसः प्रव्रजनं प्रोक्तं तस्यैव खननादिकं कार्यं नान्यस्मै कदाचन कार्यमित्यर्थः ॥ ८ ॥ यतेः देहसम्बन्धिनः सन्ति चेत् तैः आशौचादिकमाचरणीयमित्यत आह—नेति । तत्पारलौकिकहेतवे नाशौचम् । स्वाभ्युदयार्थं विना तत्परलोकाय न कुर्यात् ॥ ९ ॥ तदुद्दिश्याकर्तव्यत्वं सदृष्टान्तमाह—दग्धस्येति ॥ १० ॥

गुरुशुश्रूषायामनुसन्धानविशेषः

यावच्चोपाधिपर्यन्तं तावच्छुश्रूषयेद्गुरुम् ।
गुरुवद्गुरुभार्यायां तत्पुत्रेषु च वर्तनम् ॥ ११ ॥
शुद्धमानसः शुद्धचिद्रूपः सहिष्णुः सोऽहमस्मि सहिष्णुः सोऽहमस्मीति प्राप्ते ज्ञानेन विज्ञाने ज्ञेये परमात्मनि हृदि संस्थिते देहे लब्धशान्तिपदं गते तदा प्रभामनोबुद्धिशून्यं भवति ॥ १२ ॥

अभ्युदयार्थिना किं कर्तव्यमित्यत आह—यावदिति । यदि स्वगुर्यतिस्तदा यावदित्यादि । यावत्सोपाधिकदृष्टिः तावद्यथाविधि गुरुच्छन्दानुरोधेन शुश्रूषां कुर्यादित्यर्थः । यदि स्वाचार्यो गृही तदा गुरुवदिति । वर्तनं न्याय्यमित्यर्थः ॥११॥ मुमुक्षुः स्वाचार्यशुश्रूषां कुर्वन् एवं अनुसन्धानं कुर्यादित्याह—शुद्धेति । स्वाचा-

[1] क्रियां—ड.

इन्द्रियाणि हयानाहुर्विषयांस्तेषु गोचारान् ।
जङ्गमानि विमानानि हृदयानि मनीषिणः ॥ ४ ॥
आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहु[1]र्महर्षयः ।
ततो नारायणः साक्षाद्धृदये [2]सुप्रतिष्ठितः ॥ ५ ॥

मुमुक्ष्वधिष्ठितशरीरादिकं रथाद्युपकरणतया मुमुक्ष्वात्मानं रथस्वामितया च स्तौति—**आत्मानमिति** । कठवल्ल्यां व्याख्यातमेतत् ॥ ३–४ ॥ रथ-स्थानीयशरीरासनात्मा कीदृश इत्यत्र सर्वप्राणिहृदयासनो नारायण इत्याह—**तत इति** । मुमुक्षुः **नारायणो** भूत्वा सर्वभूतात्मा भवतीत्यर्थः ॥ ५ ॥

ज्ञानिनः शरीरपातपर्यन्तो व्यवहारविशेषः

प्रारब्धकर्मपर्यन्तमहिनिर्मोकवद्व्यवहरति ।
चन्द्रवच्चरते देही स मुक्तश्चानिकेतनः ॥ ६ ॥

किंकर्मेति प्रश्नोत्तरमाह—**प्रारब्धेति** । आप्रारब्धं मुनिः **अनिकेतनो** ग्रामैकरात्राटनशीलः व्योम्नि **चन्द्रवत्** सर्वत्र सञ्चरति ॥ ६ ॥

ज्ञानिनः शरीरपाते कैवल्यम्

तीर्थे श्वपचगृहे वा तनुं विहाय याति कैवल्यम् ।
प्राणानवकीर्य याति कैवल्यम् ॥ ७ ॥

एवं सञ्चरन् **तीर्थे** ॥ ७ ॥

ज्ञानिमरणे श्राद्धादि न कर्तव्यम्

तं पश्चाद्दिग्बलिं कुर्यादथवा खननं चरेत् ।
पुंसः प्रव्रजनं प्रोक्तं नेतराय कदाचन ॥ ८ ॥

[1] र्मनीषिणः—अ २. [2] सु—अ २. सं—अ, अ १.

नाशौचं नाग्निकार्यं च न पिण्डं नोदक[1]क्रिया ।
न कुर्यात् पार्वणादीनि ब्रह्मभूताय भिक्षवे ॥ ९ ॥
दग्धस्य दहनं नास्ति पक्वस्य पचनं यथा ।
ज्ञानाग्निदग्धदेहस्य न च श्राद्धं न च क्रिया ॥ १० ॥

यः शान्तासुः अवधूतदेहः सर्वोपकारकः पक्ष्यादितुष्टये **तम्** । कस्यैवं नियम इत्यत्र परिव्रजनाधिकारिणो नेतरस्येत्याह—**पुंस इति** । यस्य पुंसः प्रव्रजनं प्रोक्तं तस्यैव खननादिकं कार्यं नान्यस्मै कदाचन कार्यमित्यर्थः ॥ ८ ॥ यतेः देहसम्बन्धिनः सन्ति चेत् तैः आशौचादिकमाचरणीयमित्यत आह—**नेति** । तत्पारलौकिकहेतवे **नाशौचम्** । स्वाभ्युदयार्थं विना तत्परलोकाय **न कुर्यात्** ॥ ९ ॥ तदुद्दिश्याकर्तव्यत्वं सदृष्टान्तमाह—**दग्धस्येति** ॥ १० ॥

गुरुशुश्रूषायामनुसन्धानविशेषः

यावच्चोपाधिपर्यन्तं तावच्छुश्रूषयेद्गुरुम् ।
गुरुवद्गुरुभार्यायां तत्पुत्रेषु च वर्तनम् ॥ ११ ॥
शुद्धमानसः शुद्धचिद्रूपः सहिष्णुः सोऽहमस्मि सहिष्णुः सोऽहमस्मीति प्राप्ते ज्ञानेन विज्ञाने ज्ञेये परमात्मनि हृदि संस्थिते देहे लब्धशान्तिपदं गते तदा प्रभामनोबुद्धिशून्यं भवति ॥ १२ ॥

अभ्युदयार्थिना किं कर्तव्यमित्यत आह—**यावदिति** । यदि स्वगुरुर्यतिस्तदा **यावदित्यादि** । यावत्सोपाधिकदृष्टिः तावद्यथाविधि गुरुच्छन्दानुरोधेन शुश्रूषां कुर्यादित्यर्थः । यदि स्वाचार्यो गृही तदा **गुरुवदिति** । **वर्तनं** न्याय्यमित्यर्थः ॥ ११ ॥ मुमुक्षुः स्वाचार्यशुश्रूषां कुर्वन् एवं अनुसन्धानं कुर्यादित्याह—**शुद्धेति** । स्वाचा-

[1] क्रियां—उ.

योपासनया शुद्धमानसः, प्रत्यगभिन्नब्रह्मरूपेण शुद्धचिद्रूपः, सर्वात्मना यः साक्षित्वादिजीवत्वान्तकलनासहिष्णुः परमात्मा भवति **सोऽहमस्मीति** सदाऽनुसन्धानतः **प्राप्ते ज्ञानेन विज्ञाने ज्ञेये परमात्मनि** अयमहमस्मीति **हृदि संस्थिते देहे** स्वात्मात्मीयाभिमानाभावेन **लब्धशान्तिपदं गते तदा प्रभामनोबुद्धिशून्यं भवति। प्रभामनोबुद्धिशब्देन** जाग्रदाद्यवस्थात्रयोपलक्षितस्वाविद्यापदतत्कार्यमुच्यते । निष्प्रतियोगिकब्रह्ममात्रज्ञानसमकालं शून्यं अभावपदं भजतीत्यर्थः ॥ १२ ॥

ज्ञानिनो वेदादिना प्रयोजनाभावः

अमृतेन तृप्तस्य पयसा किं प्रयोजनम्? एवं स्वात्मानं ज्ञात्वा वेदैः प्रयोजनं किं भवति? ज्ञानामृततृप्तयोगिनो न किंचित् कर्तव्यमस्ति। तदस्ति चेन्न स तत्त्वविद्भवति। दूरस्थोऽपि न दूरस्थः पिण्डवर्जितः पिण्डस्थोऽपि प्रत्यगात्मा सर्वव्यापी भवति ॥ १३ ॥

वेदान्तश्रवणादिना एवंविधज्ञानमुत्पन्नं, अतो ज्ञातेऽप्यात्मनि वेदान्ताभ्यासः कर्तव्यः इत्यत आह—**अमृतेनेति** । दृष्टान्तोक्तिः **अमृतेन**। तेनापि किञ्चित् कर्तव्यं स्यादित्यत आह—**ज्ञानेति**। स्वाकर्तव्यताज्ञानी सर्वव्यापी भवतीत्याह—**दूरस्थोऽपीति**। **दूरस्थोऽपि** स्वाज्ञदृष्ट्या स्वज्ञदृष्ट्या **न दूरस्थः** ॥ १३ ॥

ब्रह्मदर्शनोपायो ध्यानयोगः

हृदयं निर्मलं कृत्वा चिन्तयित्वाऽप्यनामयम्।
अहमेव परं सर्वमिति पश्येत् परं सुखम् ॥ १४ ॥
यथा जले जलं क्षिप्तं क्षीरे क्षीरं घृते घृतम्।
अविशेषो भवेत्तद्वज्जीवात्मपरमात्मनोः ॥ १५ ॥

देहे ज्ञानेन दीपिते बुद्धिरखण्डाकाररूपा यदा भवति तदा विद्वान् ब्रह्मज्ञानाग्निना कर्मबन्धं निर्दहेत् ॥ १६ ॥

ततः पवित्रं परमेश्वराख्यमद्वैतरूपं विमलाम्बराभम् ।
यथोदके तोयमनुप्रविष्टं तथाऽऽत्मरूपो निरुपाधिसंस्थितः ॥ १७ ॥
आकाशवत् सूक्ष्मशरीर आत्मा न दृश्यते वायुवदन्तरात्मा ।
स बाह्यमभ्यन्तरनिश्चलात्मा ज्ञानोल्कया पश्यति चान्तरात्मा ॥
यत्रयत्र मृतो ज्ञानी येन वा केन मृत्युना ।
यथा सर्वगतं व्योम तत्रतत्र लयं [1]गतः ॥ १९ ॥
घटाकाशमिवात्मानं विलयं वेत्ति तत्त्वतः ।
स गच्छति निरालम्बं ज्ञानालोकं समन्ततः ॥ २० ॥

प्रत्यगभिन्नब्रह्मदर्शनोपायमाह—हृदयमिति ॥ १४ ॥ एवं पश्यतः किं स्यादित्याकांक्षायां तदात्तिप्रतिबन्धकावरणनिवृत्तिपूर्वकं क्षीरादि क्षीरादियोगवत्तदैक्यं स्यादित्याह—यथेति ॥ १५–१६ ॥ कर्मबन्धदाहात् तद्रूपेणावस्थितः स्यादित्याह—तत इति ॥ १७ ॥ निरवयवात्मसाक्षात्कारः कथमित्यत्र तज्ज्ञानदृष्ट्या स्यादित्याह—आकाशवदिति । स्वज्ञानेन स्वस्वरूपं पश्यतीत्यर्थः ॥ १८ ॥ [2]स्वज्ञदृष्ट्या स्वात्मानं यः पश्यति सोऽयमुपाधिविनिर्मुक्तघटाकाशवत् स्वमात्रमवशिष्यत इत्याह—यत्रेति ॥ १९–२० ॥

ब्रह्मध्यानमहिमा

तपेद्वर्षसहस्राणि एकपादस्थितो नरः ।
एतस्य ध्यानयोगस्य कलां नार्हन्ति षोडशीम् ॥ २१ ॥

[1] गतम्—उ, ट १. [2] स्वदृष्ट्या—उ १.

इदं ज्ञानमिदं ज्ञेयं तत् सर्वं ज्ञातुमिच्छति ।
अपि वर्षसहस्रायुः शास्त्रान्तं नाधिगच्छति ॥ २२ ॥
विज्ञेयोऽक्षरतन्मात्रो जीवितं वाऽपि चञ्चलम् ।
विहाय शास्त्रजालानि यत् सत्यं तदुपास्यताम् ॥ २३ ॥
अनन्तकर्म शौचं च जपो यज्ञस्तथैव च ।
तीर्थयात्राभिगमनं यावत्तत्त्वं न विन्दति ॥ २४ ॥
अहं ब्रह्मेति नियतं मोक्षहेतुर्महात्मनाम् ।
द्वे पदे बन्धमोक्षाय निर्ममेति ममेति च ॥ २५ ॥
ममेति बध्यते जन्तुर्निर्ममेति विमुच्यते ।
मनसो ह्युन्मनीभावे द्वैतं नैवोपलभ्यते ॥ २६ ॥
यदा यात्युन्मनीभावस्तदा तत् परमं पदम् ।
यत्रयत्र मनो याति तत्रतत्र परं पदम् ॥ २७ ॥
तत्रतत्र परं ब्रह्म सर्वत्र समवस्थितम् ।
हन्यान्मुष्टिभिराकाशं क्षुधाऽऽर्तः खण्डयेत्तुषम् ।
नाहं ब्रह्मेति जानाति तस्य मुक्तिर्न जायते ॥ २८ ॥

ज्ञानसहितध्यानयोगं सर्वोत्कृष्टतया स्तौति—**तपेदिति** ॥ २१ ॥ सर्वशास्त्राभ्यासतः सर्वात्मकं ब्रह्म जन्ममध्ये यदा कदा वा द्रष्टुं शक्यमित्यत्र जीवितस्याल्पतया प्राधान्यतो यत् ज्ञातव्यं तदेव ध्येयमित्याह—**इदमिति** ॥२२–२३॥ तत्त्वदर्शनानन्तरमपि कृत्स्नं कर्माद्यनुष्ठेयमित्यत आह—**अनन्तेति** । तावदेवानुष्ठेयं, ततः प्रयोजनाभावादित्यर्थः ॥ २४ ॥ देहादावात्मात्मीयाभिमानभावाभावौ बन्धमोक्षहेतू स्यातामित्याह—**अहमिति** ॥ २५ ॥ स्वातिरेकेण मनो नास्तीति

सिद्धोन्मनीभावतो द्वैतासम्भवाद्वैतभावः स्यादित्याह—**मनस इति** ॥ २६ ॥ योगिमनःसत्त्वासत्त्वाभ्यां तत्प्रवृत्तिनिमित्तेश्वरत्वं तद्वृत्तिसहस्रभावाभावसाक्षित्वं तदसम्भवप्रबोधतो निष्प्रतियोगिकब्रह्ममात्रतां च स्यादित्याह—**यत्रेति** ॥ २७ ॥ ज्ञानादेव मुक्तिः, अन्यथा नास्तीति शास्त्रार्थमुपसंहरति—**हन्यादिति** ॥ २८ ॥

विद्यापाठफलम्

य एतदुपनिषदं नित्यमधीते सोऽग्निपूतो भवति। स वायुपूतो भवति । स आदित्यपूतो भवति। स ब्रह्मपूतो भवति। स विष्णुपूतो भवति । स रुद्रपूतो भवति । स सर्वेषु तीर्थेषु स्नातो भवति। स सर्वेषु वेदेष्वधीतो भवति। स सर्ववेदव्रतचर्यासु चरितो भवति। तेनेतिहासपुराणानां रुद्राणां शतसहस्राणि जप्तानि फलानि भवन्ति । प्रणवानामयुतं जप्तं भवति । दश पूर्वान् दशोत्तरान् पुनाति। स पङ्क्तिपावनो भवति। स महान् भवति। ब्रह्महत्यासुरापानस्वर्णस्तेयगुरुतल्पगमनतत्संयोगिपातकेभ्यः पूतो भवति ॥ २९ ॥

विद्यापाठज्ञानफलमाह—य इति। एतदुपनिषदं एतामुपनिषदम् ॥२९॥

विद्याज्ञानफलम्

तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः।
दिवीव चक्षुराततम् ॥ ३० ॥
तद्विप्रासो विपन्यवो जागृवांसः समिन्धते।
विष्णोर्यत्परमं पदम् ॥ ३१ ॥

ज्ञानफलं तु—तद्विष्णोरिति । आरुणिकादावयं मन्त्रो व्याख्यातः ॥

उपसंहारः

ॐ सत्यमित्युपनिषत् ॥ ३२ ॥

"सदेव सोम्येदमग्र आसीत्" इत्यादिकृत्स्नशास्त्रप्रतिपाद्यं ब्रह्म ओङ्काराग्रविद्योततुर्यतुरीयं, तद्व्यतिरिक्तं असत्यं, तदेव सत्यं, निष्प्रतियोगिक-सन्मात्ररूपत्वात् । इत्युपनिषच्छब्दः पैङ्गलोपनिषत्परिसमाप्त्यर्थः ॥ ३२ ॥

इति चतुर्थोऽध्यायः

श्रीवासुदेवेन्द्रशिष्योपनिषद्ब्रह्मयोगिना ।
पैङ्गलोपनिषद्व्याख्या लिखिता ब्रह्ममात्रगा ।
पैङ्गलोपनिषद्व्याख्याग्रन्थस्तु द्विशतं स्मृतः ॥

इति श्रीमदीशाद्यष्टोत्तरशतोपनिषच्छास्त्रविवरणे एकोनषष्टिसंख्यापूरकं
पैङ्गलोपनिषद्विवरणं सम्पूर्णम्

प्राणाग्निहोत्रोपनिषत्

सह नाववतु—इति शान्तिः

शारीरयज्ञाधिकारः

अथातः सर्वोपनिषत्सारं संसारज्ञानातीतमन्नसूक्तं शारीरयज्ञं व्याख्यास्यामो यस्मिन्नेव [1]पुरुषशारीरे विनाऽप्यग्निहोत्रेण विनाऽपि सांख्येन संसार[2]निवृत्तिर्भवतीति ॥ १ ॥

शारीरयज्ञसंशुद्धचित्तसञ्जातबोधतः ।
मुनयो यत् पदं यान्ति तद्रामपदमाश्रये ॥

इह खलु कृष्णयजुर्वेदप्रविभक्तेयं प्राणाग्निहोत्रोपनिषत् चित्तशुद्धिहेतुभावनामयशारीरयज्ञप्रकटनव्यग्रा चित्तशुद्धिप्राप्यज्ञानद्वारा निर्विशेषब्रह्ममात्रपर्यवसन्ना विजयते । अस्याः स्वल्पग्रन्थतो विवरणमारभ्यते । श्रुतयः स्वाङ्गलोकमुपलभ्य तस्य ब्रह्मज्ञानहेतुचित्तशुद्धये शारीरयज्ञमुपन्यस्यन्ति—अथेति । अथ प्राणिकर्मपरिपाकानन्तरं यतः चित्तशुद्धिं विना स्वातिरिक्ताविद्यापदतत्कार्यजातासम्भवप्रबोधसिद्धं ब्रह्म निष्प्रतियोगिकस्वमात्रमिति ज्ञानं तन्मात्रावस्थानलक्षणकैवल्यं च न सिध्यति—न ह्यशुद्धचित्तं ब्रह्मज्ञानं स्प्रष्टुं पारयति—अतश्चित्तशुद्धयर्थं अपरब्रह्मगोचरसर्वोपनिषत्सारं संसारज्ञानातीतं शारीरयज्ञं कथयाम

[1] पुरुषवश—अ, अ १, अ २, क.
[2] विमुक्ति—अ १, अ २, क. विमुक्तो—अ

इत्यर्थः । किमिति ? यस्मिन्निति । यस्मिन् पुरुषाधिष्ठितशरीरे विना बाह्याग्निहोत्रेण साङ्ख्ययोगेन केवलभावनामययज्ञेन चित्तमालिन्यापादकसंसारनिवृत्तिर्भवतीत्यर्थः ॥ १ ॥

बाह्यप्राणाग्निहोत्रप्रयोगः

स्वेन विधिनाऽन्नं भूमौ निक्षिप्य या ओषधयः सोमराज्ञीरिति तिसृभिरन्नपत इति द्वाभ्या[1]मभिमन्त्रयति ॥ २ ॥

या ओषधयः सोमराज्ञीर्बह्वीः शतविच[2]क्षणाः ।
बृहस्पतिप्रसूतास्ता नो मुञ्चन्त्वंहसः ॥ ३ ॥
याः फलिनीर्या अफला अपुष्पा याश्च पुष्पिणीः ।
बृहस्पतिप्रसूतास्ता नो मुञ्चन्त्वंहसः ॥ ४ ॥
जीवला नघारिषां मा ते बक्षा[3]म्योषधीः ।
यातयायु रुपाहरादप रक्षांसि चातयात् ॥ ५ ॥
अन्नपतेऽन्नस्य नो धेह्यनमीवस्य शुष्मिणः ।
प्रप्रदातारं तारिष ऊर्जं नो धेहि द्विपदे चतुष्पदे ॥ ६ ॥
यदन्नमग्निर्बहुधा विरुद्धं रुद्रैः [4]प्रजार्धं यदि वा पिशाचैः ।
सर्वं तदीशानो अभयं कृणोतु शिवमीशानाय स्वाहा ॥ ७ ॥
अन्तश्चरसि भूतेषु गुहायां विश्वतोमुखः ।
त्वं यज्ञस्त्वं ब्रह्मा त्वं रुद्रस्त्वं विष्णुस्त्वं वषट्कार आपो ज्योती रसोऽमृतं ब्रह्म भूर्भुवः सुवरों नमः ॥ ८ ॥

[1] मनु—अ, अ १, अ २, क.
[2] क्षणैः—क.
[3] त्वोषधीः—अ. त्योषधीः—क. त्योषधीम्—अ १.
[4] प्रजार्द्धं—ड.

आपः पुनन्तु पृथिवीं पृथिवी पूता पुनातु माम् ।
पुनन्तु ब्रह्मणस्पतिर्ब्रह्म पूता पुनातु माम् ॥
यदुच्छिष्टमभोज्यं यद्वा दुश्चरितं मम ।
सर्वं पुनन्तु मामापोऽसतां च प्रतिग्रहं स्वाहा ॥ ९ ॥

अमृतम[1]स्त्वमृतोपस्तरणमस्यमृतं प्राणे [2]होम्यमाशिष्यन्तोऽसि ॐ प्राणाय स्वाहा ॐ अपानाय स्वाहा ॐ व्यानाय स्वाहा ॐ उदानाय स्वाहा ॐ समानाय स्वाहा [3]ॐ ब्रह्मणे स्वाहा ॐ ब्रह्मणि म आत्माऽमृतत्वायेति ॥ १० ॥ कनिष्ठिकाङ्गुल्याऽङ्गुष्ठेन प्राणे जुहोति अनामिकयाऽपाने मध्यमिकया व्याने सर्वाभिरुदाने प्रदेशिन्या समाने ॥ ११ ॥ तूष्णीमेकामेकऋचा जुहोति द्वे आहवनीये एकां दक्षिणाग्नौ एकां गार्हपत्ये एकां सर्वप्रायश्चित्तीये ॥ १२ ॥ अथापिधानमस्यमृतत्वायोपस्पृश्य पुनरादाय पुनः स्पृशेत् ॥ १३ ॥ सव्ये पाणावापो गृहीत्वा हृदय[4]मन्वालभ्य जपेत्—

प्राणोऽग्निः परमात्मा पञ्चवायुभिरावृतः ।
अभयं सर्वभूतेभ्यो न मे भीतिः कदाचन ॥ १४ ॥
विश्वोऽसि वैश्वानरो विश्वरूपं त्वया धार्यते जायमानम् ।
विश्वं त्वाहुतयः सर्वा यत्र ब्रह्माऽमृतोऽसि ॥ १५ ॥

[1] स्यमृ—अ. [2] जुहोम्य—क, अ १.
[3] एतद्वाक्यद्वयं नास्ति—अ, अ १, अ २, क.
[4] मुपलभ्य—उ, उ १. मनुलभ्य—अ, अ १, अ २, क.

महानवोऽयं पुरुषो योऽङ्गुष्ठाग्रे प्रतिष्ठितः ।
तमद्भिः परिषिञ्चामि सोऽस्यान्ते अमृताय च ॥ १६ ॥
अनावित्येष बाह्यात्मा ध्यायेताग्निहोत्रं जुहोति । सर्वेषामेव सूनुर्भवतु । अस्य यज्ञपरिवृता आहुतीर्होमयति ॥ १७ ॥

तदुपायत्वेनादौ बाह्यप्राणाग्निहोत्रलक्षणमाह—**स्वेनेति** । **स्वेन विधिना** भूमौ परिकल्पितामत्रे सव्यञ्जनमन्नं **निक्षिप्य** "या ओषधयः सोमराज्ञीः" इति तिसृभिः ऋग्भिः "अन्नपते" इति द्वाभ्यां ऋग्भ्यां **अभिमन्त्रयति** अभिमन्त्रयेदित्यर्थः ॥ २ ॥ कास्तास्तिस्र ऋचः? द्वावृचौ के? इत्यत्राह—**या** इति ॥ ३–७ ॥ एतैः मन्त्रैः अन्नं स्पृष्ट्वा अभिमन्त्र्य ततो दक्षिणहस्ते उदकं गृहीत्वा "अन्तश्चरसि" "आपः पुनन्तु" इति मन्त्राभ्यामभिमन्त्र्य अन्नं प्रोक्षयेत् ॥ ८–९ ॥ प्रोक्ष्य द्विवारं परिषिच्य वामहस्तेनामत्रं स्पृशन् दक्षिणहस्ते पूर्वापोशनं गृहीत्वा "अमृतमस्त्वमृतोपस्तरणमसि" इति पूर्वापोशनं पीत्वा "अमृतं प्राणे होम्यमाशिष्यन्तोसि" इत्यमृतोपमं **होम्यं आशिष्यन्तोऽसि** आस्वादितवानसि इति **प्राणे** स्वात्मानुसन्धानपूर्वकं पञ्च प्राणाहुतीः कुर्यादित्याह —**ओमिति** ॥ १० ॥ प्रातिस्विकेन प्राणाहुतिप्रकारमाह—**कनिष्ठिकेति** । **कनिष्ठिकाङ्गुल्या—अङ्गुष्ठेन** इति सर्वत्र समानं—**प्राणे जुहोति** ॥ ११ ॥ तूष्णीमेकां एकाहुतिं "प्राणाय स्वाहा" **इत्येकचा** "अपानाय स्वाहा" इति च द्वे आहुती **आहवनीये** जुहोति । **एकां दक्षिणाग्नौ एकां गार्हपत्ये एकां सर्वप्रायश्चित्तीये** ॥ १२ ॥ एवं पञ्चाहुतीः हुत्वा अथ यथानियमं भुक्त्वा "अथ पुरस्ताच्चोपरिष्टाच्च अद्भिः परिदधाति" इति श्रुत्यनुरोधेनापि **अथापिधानमिति** ॥ १३ ॥ मुख्यप्राण **एवाग्निः**, स्वगतविशेषांशापाये स एव **परमात्मा**, विराडादिस्थानीयपञ्चवायुभिः **आवृतो** भवति । तत्प्रसादतो मत्तः **सर्वभूतेभ्योऽभयमस्तु** । **कदाचन** सर्वभूतेभ्यः **न मे भीतिरस्तु** ॥ १४ ॥ किञ्च—**विश्व इति** । हे मुख्यप्राण व्यष्टिसमष्ट्युपाधियोगेन त्वमेव **विश्वो** व्यावहारिको **वैश्वानरो** विराडपि भूत्वा **विश्वरूपं त्वया धार्यते** । यत्र व्यष्टिसमष्ट्युपाधौ तदसंगविश्वविराडोत्रात्मना **ब्रह्माऽमृतोऽसि**, त्वत्तो **जायमानं विश्वं तु** तदपवा-

दाधिकरणतुरीयाग्नौ त्वयि **सर्वा आहुतयो** भवन्ति ॥ १५ ॥ "तं प्रपदाभ्यां प्रापद्यत ब्रह्मेमं पुरुषं" इति श्रुत्यनुरोधेन **यः** पादाङ्गुष्ठद्वयाग्रे प्राणात्मना **प्रतिष्ठितः स** त्वं प्रतिश्वासं **महानवोऽभिनवोऽयं पुरुषो** भवसि । **अस्य** भोजनस्यान्ते **अमृताय च** तं त्वां **अद्भिः परिषिञ्चामि** उच्छ्वासनिश्वासात्मना ॥ १६ ॥ **अनौ** चेष्टाविशिष्टाविति ध्यायेत ध्यायीत पुरुषः प्रत्यहं **प्राणाग्निहोत्रं जुहोति** । यतः सर्वे त्वां पुत्रवत् पोषयन्ति अतो भवान् **सर्वेषामेव सूनुः** पुत्रो **भवतु** भवति । इत्थंभूतस्यास्य ते स्वाङ्गलोकोऽयम**आहुतीः होमयति** ॥ १७ ॥

शारीराग्निदर्शनं नाम अपरब्रह्मविद्या

स्वे शरीरे यज्ञं परिवर्तयामीति । चत्वारोऽग्नयस्ते किं नार-**मर्धयाः** ॥ १८ ॥ तत्र सूर्याग्निर्नाम सूर्यमण्डलाकृतिः सहस्र-रश्मिपरिवृत एकऋषिर्भूत्वा मूर्धनि तिष्ठति । यस्मादुक्तो दर्शना-ग्निर्नाम चतुराकृतिराहवनीयो भूत्वा मुखे तिष्ठति । शारीरोऽग्निर्नाम जराप्रणुदा हविरवस्कन्दति अर्धचन्द्राकृतिर्दक्षिणाग्निर्भूत्वा हृदये तिष्ठति । तत्र कोष्ठाग्निरिति—कोष्ठाग्निर्नामाशितपीतलीढ[1]स्वादितं सम्यग्व्यष्टचं विषयित्वा गार्हपत्यो भूत्वा नाभ्यां तिष्ठति ॥ १९ ॥ प्रायश्चित्तयस्त्वधस्तात्तिर्यक् तिस्रो हिमांशुः प्रमुः प्रजननकर्मा ॥ २० ॥

एवं स्वबाह्ये अग्निहोत्रकल्पनां किं करोषीत्यत आह—**स्व इति** । स्वे स्वीये **शरीरे यज्ञं परिवर्तयामीति** । शारीरनिर्वर्त्याग्नयः कति सङ्ख्याका इत्यत्र—तुर्यादिभेदेन **ते चत्वारोऽग्नयो** भवन्ति । शरीरे अग्निचतुष्टयादर्शनात् किं तत्स्वरूपं अरं अत्यल्पं ? इत्यत आह—**नारमिति** । तुरीयादेः स्वविकल्पितो-पाधिग्रासत्वेन निष्प्रतियोगिकभूमरूपत्वात् । तुरीयाद्यग्निचतुष्टयोपाधयः ते

[1] स्वादितादिसम्यग्विषयं—अ.

अर्धयाः अर्धमात्रादयः ॥ १८ ॥ के वा चतुरग्नयः ? तेषां स्थानानि कानीत्यत आह—**तत्रेति** । **तत्र सूर्याग्निर्नाम** कीदृश इत्यत्र—स्वातिरिक्तं नास्तीति प्रकाशकाः सूरयः एव सूर्याः तेषां सहस्रारगताव्याकृताकाशवत् आकृतिः यस्य स **सूर्यमण्डलाग्निरिति** । **सहस्रदलान्येव** यस्य **रश्मयः** ताभिः **परिवृत** एव सन् तत्रोपलभ्यमान एक एव स्वाविद्यापदतत्कार्यनामरूपजातं ऋषति गच्छति व्याप्नोतीति चित्तुर्यादित्य **एकर्षिर्भूत्वा मूर्ध्नि तिष्ठति**, "तुरीयं मूर्ध्नि संस्थितं" इति श्रुतेः । यद्वा **सूर्यमण्डलाकृत्या सहस्ररश्मिपरिमितसूर्य** एव भूताकाशे एक एव ऋषति गच्छतीत्येकर्षिर्भूत्वा **मूर्ध्नि तिष्ठतीत्यर्थः** । **यस्मादयं** बीजात्मा सर्वज्ञेश्वरतया दृश्यते तस्मादयं **दर्शनाग्निः** तस्य ज्ञप्तिरूपत्वात् । **दर्शनाग्निर्नाम** चतुरश्राहवनीयवत् बीजविराडादिचतुराकृतिः स्वातिरिक्तप्रपञ्चहोमाधिकरणतया **आहवनीयो भूत्वा** स्वाविद्यापदबीजांशस्थानीये **मुखे तिष्ठति** । **शारीरोऽग्निर्नाम** स्वोपाधिलिंगशरीरेतरस्थूलशरीरप्रपञ्चं निर्दहतीति शारीरोऽग्निर्नाम हिरण्यगर्भः स्थूलशरीराश्रयजरादिषड्ऊर्मिविक्रियया प्रणुद्यते क्षीयत इति **प्रणुदा** प्रणुदं **हविः** स्थूलप्रपञ्चरूपं हिरण्यगर्भात्मना **अवस्कन्दति** ग्रसतीति सविशेषनिर्विशेषरूपाभ्यां **अर्धचन्द्राकृतिः** स्पष्टास्पष्टवपुः स्थूलप्रपञ्चदहनकर्मणि **दक्षिणाग्निर्भूत्वा** सर्वप्राणिहृदये **तिष्ठति** । तत्र **कोष्ठाग्निरिति** वैश्वानरो विराडुच्यते ।

अहं वैश्वानरो भूत्वा प्राणिनां देहमाश्रितः ।
प्राणापानसमायुक्तः पचाम्यन्नं चतुर्विधम् ॥

इति स्मृतिसिद्धकोष्ठाग्निर्नाम "अयमग्निर्वैश्वानरो योऽयमन्तः पुरुषे येनेदमन्नं पच्यते" इति श्रुतिसिद्धवैश्वानरोऽग्निः । दन्तैरवखण्डयावखण्डय यदद्यते भक्ष्यते तदपूपादि **अशितं** भक्ष्यं भवति । यत् पायसादि जिह्वया आलोडय निगीर्यते तत् **पीतं** भोज्यं भवति । यत्तु द्रवीभूतं गुडादि जिह्वायां निक्षिप्य निगीर्यते तत्तु **लीढं** लेह्यं भवति । यत्तु इक्षुखण्डादि दन्तैः निपीडय सारांशं स्वीकृत्य शिष्टं त्यज्यते तत् **खादितं** चोष्यं भवति । एवमशितपीतलीढखादितभेदेन चतुर्विधमन्नं **सम्यग्व्यष्टयं** व्यष्टिजीवजातादमानं **विषयित्वा** स्वविषयीकृत्य यथायोगं पक्त्वा पचनं कुर्वन् **गार्हपत्यो भूत्वा** सर्वप्राणिनाभ्यां तिष्ठति ॥ १९ ॥ प्रायशः

चित्तोपाधयो विश्वतैजसप्राज्ञाः प्रायश्चित्तवृत्तयः । ते तु विराडादेरधस्तात् प्रतिष्ठिताः तिर्यक् तिस्रः परावृत्तयः । तद्विशिष्टो व्यावहारिकजीवादिः प्रजनन-कर्मा । हि[तु ?]शब्दः प्रवृत्तिमार्गप्रवर्तकत्वद्योतकः । विश्वादितुरीयस्तु जाग्रदाद्य-वस्थात्रयतमोभावाभावप्रकाशकहिमांशुः चिच्चन्द्रः सन् प्रत्यग्रूपेण प्रभवतीति प्रभुः भवतीत्यर्थः ॥ २० ॥

शारीराग्निविद्यायाः शारीरयज्ञत्वम्

अस्य शारीरयज्ञस्य यूपरशनाऽशोभितस्य को यजमानः का पत्नी के ऋत्विजः के सदस्याः कानि यज्ञपात्राणि कानि हवींषि का वेदिः काऽन्तर्वेदिः को द्रोणकलशः को रथः कः पशुः कोऽध्वर्युः को होता को ब्राह्मणाच्छंसी कः प्रति-प्रस्थाता कः प्रस्तोता को मैत्रावरुणः क उद्गाता का धारा कः पोता के दर्भाः कः स्रुवः काऽऽज्यस्थाली कावाघारौ कावाज्यभागौ के प्रयाजाः के अनुयाजाः केडा कः सूक्तवाकः कः शंयोर्वाकः के पत्नीसंयाजाः को यूपः का रशना का इष्टयः का दक्षिणा किमवभृथमिति ॥ २१ ॥ अस्य शारीरयज्ञस्य यूपरशनाऽशो-भितस्यात्मा यजमानः बुद्धिः पत्नी वेदा महऋत्विजः अहंकारोऽध्वर्युः चित्तं होता प्राणो ब्राह्मणाच्छंसी अपानः प्रतिप्रस्थाता व्यानः प्रस्तोता उदान उद्गाता समानो मैत्रावरुणः शरीरं वेदिः नासिकाऽन्तर्वेदिः मूर्धा द्रोणकलशः पादो रथः दक्षिणहस्तः स्रुवः सव्य आज्यस्थाली श्रोत्रे [1]आघारौ

[1] आघ्वरौ—अ २, क. अध्वरौ—अ, अ १.

चक्षुषी आज्यभागौ ग्रीवा धारा पोता तन्मात्राणि सदस्याः महाभूतानि प्रयाजाः गुणा अनुयाजाः जिह्वेडा दन्तोष्ठौ सूक्तवाकः तालुः शंयोर्वाकः स्मृतिर्दया क्षान्तिरहिंसा पत्नीसंयाजाः ओंकारो यूपः आशा रशना मनो रश्मः कामः पशुः केशा दर्भाः इन्द्रियाणि यज्ञपात्राणि कर्मेन्द्रियाणि हवींषि अहिंसा इष्टयः त्यागो दक्षिणा अवभृथं मरणात् सर्वाण्यस्मिन् देवता शरीरेऽधिसमाहिताः ॥२२॥

इत्थंभूतविद्यायाः शारीरयज्ञत्वं कथमित्याक्षिप्य परिहरति—अस्येत्यादिना ॥ २१ ॥ एवमाशङ्क्य स्वकृताशङ्कां श्रुतिः स्वयमेवापाकरोति—अस्येति । आत्मा यजमान इत्यादीनि सर्वाणि सर्वा देवताश्च अस्मिन् शरीरे अधिसमाहिता भवन्ति ॥ २२ ॥

विद्यापठनफलम्

वाराणस्यां मृतो वाऽपि इदं वा ब्राह्मणः पठेत् ।
एकेन जन्मना जन्तुर्मोक्षं च प्राप्नुयादित्युपनिषत् ॥ २३ ॥

वाराणस्यां काश्यां मृतस्य जन्तोः जनिमृतिमुक्तिर्भवति । यद्वा—इदं वा शारीरयज्ञदर्शनं ब्राह्मणः पठेत् । एकेनैव जन्मना जन्तुः चित्तशुद्धिप्राप्यज्ञानं स्वातिरिक्तभ्रममोक्षं च प्राप्नुयात् । इतिशब्दः प्राणाग्निहोत्रोपनिषत्परिसमाप्त्यर्थः ॥

श्रीवासुदेवेन्द्रशिष्योपनिषद्ब्रह्मयोगिना ।
प्राणाग्निहोत्रोपनिषद्व्याख्यानं लिखितं लघु ।
प्राणाग्निहोत्रोपनिषद्व्याख्यानं पञ्चसप्ततिः॥

इति श्रीमदीशाद्यष्टोत्तरशतोपनिषच्छास्त्रविवरणे चतुर्णवतिसङ्ख्यापूरकं प्राणाग्निहोत्रोपनिषद्विवरणं सम्पूर्णम्

मन्त्रिकोपनिषत्

पूर्णमदः—इति शान्तिः

परमात्मस्वरूपम्

अष्टपादं शुचिं हंसं त्रिसूत्रमणुम[1]व्ययम् ।
त्रिवर्त्मानं तेजसोऽहं सर्वतः पश्यन् न पश्यति ॥ १ ॥

स्वाविद्याद्वयतत्कार्यापह्नवज्ञानभासुरम् ।
मन्त्रिकोपनिषद्वेद्यं रामचन्द्रपदं भजे ॥

इह खलु शुक्लयजुर्वेदप्रविभक्तेयं मन्त्रिकोपनिषत् । अस्यास्तावत् उपोद्घातादिकं ईशावास्यादिवत् ऊह्यम् । सेयमुपनिषत् आख्यायिकां विना माण्डूक्यवत् अवान्तरतया प्रवृत्ता । "अष्टपादं" इत्याद्यस्याः संहितारूपमन्त्रोपनिषदः स्वल्पग्रन्थतो विवरणमारभ्यते । निराख्यायिकतया स्वच्छन्दप्रवृत्तिस्तु वक्ष्यमाणविद्यास्तुत्यर्था । यत्स्वरूपं चिन्मात्रमपि स्वाज्ञो न पश्यति स्वज्ञः पश्यति तत् किमित्याकाङ्क्षायां श्रुतिरेव तद्विशदयति—अष्टपादमिति । स्वाज्ञदृष्ट्या व्यष्टिसमष्ट्यात्मकं स्वाविद्यापदतत्कार्यजातम् । तत्र व्यष्टिप्रपञ्चारोपापवादाधिकरणं विश्वतैजसप्राज्ञतुर्यात्मकं चतुष्पात्, समष्टिप्रपञ्चारोपापवादाधिकरणं विराट्सूत्रबीजतुरीयात्मकं तदपि चतुष्पात्, आहत्य अष्टौ पादा यस्य तं अष्टपादम् । अशुचिव्यष्टिसमष्ट्ययोगात् शुचिम । हंशब्दः परवाची, सशब्दः प्रत्यग्वाची, "हकारः परमेशः स्यात् सकारस्त्वंपदं" इत्यादि श्रुतेः । हंसशब्देन

प्रत्यगभिन्नपरमात्मोच्यते । तं हंसं त्रिसूत्रं व्यष्टिसमष्टितदुभयैक्यकलनारोपाधिकरणविश्वविराडोतृरूपेण त्रिधा सूचनात् । अणुं अत्यन्ताणुबुद्धिवृत्त्यवभासकत्वात् । अव्ययं व्ययभास्यविलक्षणत्वात् । यदधिगमोपायोपेयभेदेन कर्मोपासनाज्ञानाख्यं वर्त्मत्रयं दृश्यते सोऽयं त्रिवर्त्मा तम् । तेजसः—इत्यत्र कर्मणि षष्ठी—तेजः अहम् अस्मत्प्रत्ययवेद्यत्वात् । स्वाज्ञ एवं भेदेन पश्यन्नपि स्वात्मवस्तुयाथात्म्यं स्वमात्रमिति न हि पश्यति, स्वाज्ञानावृतत्वात् ॥ १ ॥

परमात्मदर्शनोपायः

भूतसंमोहने काले भिन्ने तमसि वै खरे ।
[1]अतः पश्यन्ति सत्त्वस्था निर्गुणं गुणगह्वरे ॥ २ ॥
अशक्यः सोऽन्यथा द्रष्टुं ध्यायमानः कुमारकैः ।

स्वज्ञास्तु सत्त्वस्थाः शुद्धसत्त्वान्तःकरणविशिष्टाः सन्तः वै स्वाज्ञदृष्टिप्रसिद्धे यथोक्तकाले भूतस्य प्राणिजातस्य सम्मोहने संवरणे विद्यमानात्मतिरस्करणात् खरे खले क्रूरे वा तमसि ईशाद्यष्टोत्तरशतवेदान्तार्थश्रवणमननिदिध्यासनप्रभवसम्यज्ज्ञानसूर्योदयात् भिन्ने विलीने सति अतः परं गुणगह्वरे प्रपञ्चे सत्यसति निर्गुणं ब्रह्माऽहमस्मीति पश्यन्ति ॥ २ ॥ उक्तोपायं विना स्वात्मा द्रष्टुं न शक्य इत्याह—अशक्य इति । कुमारकैः सनकादिभिः ब्रह्माहमस्मीति यो ध्यायमानः परमात्मा सोऽयमन्यथा वेदान्तश्रवणातिरिक्तसाधनेन द्रष्टुमशक्यो भवति ॥

मायावशगतस्य अज्ञस्य संसारः

विकारजननीं[2]मज्ञामष्टरूपामजां ध्रुवाम् ॥ ३ ॥
ध्यायतेऽध्यासिता तेन तन्यते प्रेर्यते पुनः ।
सूयते पुरुषार्थं च तेनैवाधिष्ठितं जगत् ॥ ४ ॥

[1] अन्तः—उ.
[2] माज्ञा—अ, अ १, अ २, क.

[1]गौरवाद्यन्तवती [2]स्याज्जनित्री भूतभाविनी ।
सितासिता च रक्ता च सर्वकामदुघा विभोः ॥ ९ ॥
पिबत्येनामविषयामविज्ञाता कुमारकैः ।

स्वाज्ञः स्वविकल्पितमायां ध्यायन् तद्वशमेत्य बन्धमोक्षादिसंसारकलना-कलितो भवतीत्याह—**विकारेति** । **अध्यासिता** स्वाविद्यातत्कार्याध्यासकर्ता **स्वाज्ञः** विद्याप्रपञ्च**विकारजननीं** परमार्थदृष्टिभिः **अज्ञां** तद्दृष्ट्या शशविषाणवत् अवस्तुभूतां स्वाज्ञदृष्ट्या

भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च ।
अहङ्कार इतीयं मे भिन्ना प्रकृतिरष्टधा ॥

इति स्मृत्यनुरोधेन **अष्टरूपाम्** । अजामित्युपलक्षणार्थम्—परमार्थदृष्ट्या स्वस्यावस्तुत्वेन जन्मस्थितिभङ्गशून्याम् । स्वाज्ञदृष्ट्या वज्रादपि **ध्रुवां** दृढां

अविद्यमानैवाविद्या वस्तुतत्त्वविचारिणाम् ।
अविचारेण मूढानां वज्रादपि दृढायते ॥

इति स्मृतेः ॥ ३ ॥ एवमुक्तलक्षणां स्वाज्ञततिः **ध्यायते** ध्यायति । **तेन** स्वावारकाविद्याऽस्तीति ध्यानेन **तन्यते** तन्यति तानवं याति । विद्या-ऽविद्यारूपया तया अध्यासिता जीवः स्वबन्धमोक्षोपायकर्मणि **प्रेर्यते पुनः** पुनः चोद्यते । सेयं माया स्वाज्ञदृष्ट्या धर्मादि**पुरुषार्थं, च**शब्दादपुरुषार्थमपि, **सूयते** जनयति इदं **जगत् तेनैव** पुरुषार्थेन **अधिष्ठितं** भवति ॥ ४ ॥ स्वाज्ञदृष्ट्या **गौरवा** सर्वलोकजनित्री सर्वभूतभाविनी च, स्वज्ञदृष्ट्या **आद्यन्तवती** सम्भूतिप्रळयवती **स्यात्** । किञ्च—कार्यरूपेण **सितासिता च रक्ता च** सत्त्वतमोरजोगुणात्मिका स्वकल्पकस्य **विभोर्जीवस्य** सर्वकामान् दोग्धीति **सर्वकामदुघा** पयःस्थानीयसर्वकामप्रदाने इयं कामधुक् ॥ ९ ॥

[1] गौरना—मु. [2] सा ज—मु.

प्रभुः तामेनां कारणात्मना स्वाविषयां कार्यात्मना विषयभूतां **पिबति** इयमस्तीत्यनुभवति । सर्वैरप्येवमनुभूयत इत्यत आह—**अविज्ञातेति** । **कुमारकैः** सनकादिमुनिप्रवरैः इयमविद्या सत्यत्वेव व्यावहारिकत्वेन प्रातिभासिकत्वेन वाऽस्ति नास्तीत्यविज्ञाता भवति, तेषां स्वातिरिक्तस्वाविद्याद्वयतत्कार्यापह्नवसिद्ध-निष्प्रतियोगिकब्रह्ममात्रभावारूढत्वात् ॥

जीवेशयोः लक्षणम्

एकस्तु पिबते देवः स्वच्छन्दोऽत्र वशानुगः ॥ ६ ॥
ध्यानक्रियाभ्यां भगवान् भुङ्क्तेऽसौ प्रसहद्विभुः ।
सर्वसाधारणीं दोग्ध्रीं पीयमानां तु यज्वभिः ॥ ७ ॥
पश्यन्त्यस्यां महात्मानः सुपर्णं पिप्पलाशनम् ।
उदासीनं [1]परं हंसं स्नातकाध्वर्यवो जगुः ॥ ८ ॥
शंसन्तमनुशंसन्ति बह्वृचाः शास्त्रकोविदाः ।
रथन्तरं बृहत्साम सप्तभैस्तु गीयते ॥ ९ ॥
मन्त्रोपनिषदं ब्रह्म पदक्रमसमन्वितम् ।
पठन्ति भार्गवा ह्येते ह्यथर्वाणो भृगूत्तमाः ॥ १० ॥

द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते ।
तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीति ॥

इति श्रुत्यनुरोधेन स्वाज्ञप्रमाणसिद्धौ शरीरवृक्षारूढौ जीवेशपक्षिणौ स्तः, तत्रैकः तदाविद्यकफलमनुभवति, तदितरस्तन्नानुभवन्नुदासीनो भवति, इत्यृगादिचतुर्वेदिनो जगुरित्याह—**एकस्त्विति** । स्वाज्ञदृष्ट्या कार्यकारणमायोपाधिकौ जीवेशौ स्तः । **तत्रैकस्तु भगवानसौ** जीवो **विभुः अत्रास्मिन्** देहे इयमविद्या अस्तीति

[1] ध्रुवं—अ, अ १, अ २, क.

ध्यानक्रियाभ्यामवगम्य विभुरात्मा प्रसहदवशात् भुङ्क्ते अनुभवतीत्यर्थः । स्वच्छन्दोऽपि तद्वशानुगो भूत्वा स्वाविद्यानिष्पन्नं पिप्पलरसं पिबते पिबति । एवं अस्यां अविद्यायां महात्मानः चतुर्वेदिनः सर्वाङ्गजनसाधारणीं तत्सर्वकामफलदोग्ध्रीं यज्वभिस्तु कर्मभिरेव पीयमानां स्वाविद्यां तज्जं पिप्पलं कर्मफलमश्नातीति पिप्पलाशनं सुपर्णमेकं पक्षिणं च तदज्ञानानुगुणं पश्यन्ति । तत्र केचित् यजुर्वेदोक्तकर्मानुष्ठायिनः स्नातका अध्वर्यवः जीवापेक्षया परं स्वज्ञानेन कर्मफलभोक्तृत्वादिसंसारं हन्तीति हंसं ईश्वरं अध्रुवशरीरत्रयवैलक्षण्यात् ध्रुवं स्वाविद्यापिप्पलासङ्गोदासीनं जगुः कथयन्ति ॥ ६–८ ॥ तथा सर्वशास्त्रकोविदाः पारीणाः बह्वृचाः ऋग्वेदिनः एवं शंसन्तं यजुर्वेदिनिचयं अनुशंसन्ति तदनुसारेण वदन्ति । तथा "अभि त्वा शूर नोनुमः" इत्यादिरथन्तरं साम, "त्वामिद्धि हवामहे" इत्यादिबृहत्साम, सप्तगानाष्टब्राह्मणात्मकसामवेदो यैर्विशेषेण ध्रीयते ते सामगाः सप्तवैध्राः तैरप्ययमर्थो गीयते ॥ ९ ॥ एतमेवार्थमथर्वाणोऽपि पठन्तीत्याह—मन्त्रेति । भृगुरेव उत्तमो येषां ते भृगूत्तमाः भार्गवाश्च शुक्राचार्यप्रमुखाः अथर्वाणः पदक्रमसमन्वितं ब्रह्म वेदं, जीवो भोक्ता, ईश्वरस्त्वभोक्ता, परमात्मा तु भोक्रभोक्तृकलनाविशिष्टजीवेशादिभेदाभेदकलनापह्नवसिद्ध इति यस्यां प्रतिपाद्यते तां मन्त्रोपनिषदं कदाचित् यथाश्रुतं कदाचित् पदं कदाचित् क्रमं च पठन्ति । हिशब्दद्वयं निःसंशयार्थम् ॥ १० ॥

परमात्मन एव कालादिबहुरूपत्वम्

सब्रह्मचारी व्रत्यश्च स्तम्भोऽथ फलितस्तथा ।
अनड्वान्रोहितोच्छिष्टः पश्यन्तो बहुविस्तरम् ॥ ११ ॥
कालः प्राणश्च भगवान्[1]मन्युः [2]शर्वो
भवश्च रुद्रश्च शरावान् साधुरस्तथा ॥ १२ ॥

[1] मृत्युः—अ. [2] शर्वो महेश्वरः । उग्रोभ—मु.

प्रजापतिर्विराट् चैव पूष्णः सलिल एव च ।
स्तूयते मन्त्रसंस्तुत्यैरथर्ववेदविदितैर्विभुः ॥ १३ ॥

अष्टपादमित्याद्येतावता ग्रन्थेन यदुक्तं ब्रह्म तद्ब्रह्मचारिणो मुनयो जानन्तीत्याह—**सेति** । ब्रह्मव्रतधारणात् **ब्रत्यो** नाम भृगोः **सब्रह्मचारी**, स्वात्मन्येव निरुच्छ्वासं मनसा सह प्राणवृत्तिं स्तम्भयतीति **स्तम्भो** नाम मुनिश्च, **तथा फलितो** नाम मुनिः साक्षात्कृतज्ञानफलत्वात्, तथा **अनड्वान्नाम** ऋषिः अनड्वाहवदवधूतत्वात्, तथा नामतो **रोहितः तथोच्छिष्टः** सर्वोत्कृष्टशिष्ट-ब्रह्मदृष्टित्वात्, एते ब्रत्यादयो **बहुविस्तरं** ब्रह्माहमस्मीति **पश्यन्तः** पश्यन्ति ॥ ११ ॥ ब्रह्मणो विस्तरत्वं कथमित्यत आह—**काल इति** । प्रळयकाले कालाग्निरुद्रात्मना सर्वं कालयतीति **कालः** । **प्राणः** मुख्यप्राणत्वात् । **भगवान्** षड्गुणैश्वर्यसम्पन्नत्वात् । **मन्युः** स्वातिरिक्तासहत्वात् । **शर्वः** शमादिमुनिवन्द्यत्वात् । **भवः** सदा भवतीति । तथा च **रुद्रः** संसाररुद्रावकत्वात् । शरान् जीवान् अवतीति **शरावान्**, तथाच श्रुतिः "शरा जीवाः" इति । **तथा** साधून् रातीति **साधुरः** ॥ १२ ॥ **प्रजापतिः** प्रजापालकत्वात् । तथा च स्वेन रूपेण विराजत इति **विराट्** । तथा च **पूष्णः**—प्रथमार्थे षष्ठी—पूषा सर्वपोषकत्वात् । तथा **सलिलः** सलिलं सर्वजीवनहेतुत्वात् । काल इत्यादिविम्बन्तविशेषणविशिष्टो यः परमात्मा स एव बहुविस्तरं **ब्रह्मेति** सप्तकोटिमहामन्त्रस्तुत्यैः **अथर्ववेदविदितैः** देवैः **स्तूयते** स्तुतो भवति ॥ १३ ॥

परमात्मनो नानादर्शनविकल्पितत्वम्

तं षड्विंशक इत्येके सप्तविंशं तथाऽपरे ।
पुरुषं निर्गुणं सांख्यमथर्वशिरसो विदुः ॥ १४ ॥
चतुर्विंशतिसंख्यातं व्यक्तमव्यक्तमेव च ।
अद्वैतं द्वैतमित्याहु[1]स्त्रिधा तं पञ्चधा तथा ॥ १५ ॥

[1] त्रै—क.

ब्रह्माद्यं स्थावरान्तं च पश्यन्ति ज्ञानचक्षुषः ।
तमेकमेव पश्यन्ति परिशुभ्रं विभुं द्विजाः ॥ १६ ॥

य एवं स्तुतः तं जीवत्वेन केचिदामनन्ति केचिदीश्वरत्वेन केचिज्जीवेश्वरकलनाविरळब्रह्मतया विदुरित्याह—तमिति । योऽनात्मापह्नवसिद्धः परमात्मा **तं** केचित् बुधाः वियदादिभूतपञ्चकं प्राणादिवायुपञ्चकं श्रोत्रादिज्ञानेन्द्रियपञ्चकं वागादिकर्मेन्द्रियपञ्चकं मनआद्यन्तःकरणचतुष्टयं, एवं चतुर्विंशतिसङ्ख्यातं चतुर्विंशतितत्त्वमुच्यते । व्यक्तं तूलाविद्यारूपमेकम् । आहत्य पञ्चविंशतितत्त्वं तदुपाधिकं जीवं विदुः, "जीवः पञ्चविंशकः" इति श्रुतेः । केचन मूलाविद्यात्मकं अव्यक्तं पूर्वोक्ततत्त्वैः साकं षड्विंशतत्त्वमूचिरे, **षड्विंशक** ईश्वर इत्याहुः, "षड्विंशक आत्मा भवति" इति श्रुतेः । केचित् गुणसाम्यं सप्तविंशतिसङ्ख्यापूरकं तदुपाधिकः साक्षीति विदुः । अपरे केचित् अथर्वशिरःपारीणा **अथर्वशिरसः** स्वातिरिक्तप्रपञ्चपूरणात् **पुरुषं** गुणसाम्यादितमोगुणान्तकलनाभावं **निर्गुणं** यस्मिन् सति तत्त्वानि सङ्ख्यायन्ते तं **साङ्ख्यमिति** विदुः ॥ १४ ॥ केचन **अद्वैतं** जीवब्रह्मैक्यं परमार्थमाहुः केचित् तद्विपरीतं **द्वैतम्** । केचित् ब्रह्मविष्णुरुद्रभेदेन **तं त्रिधा** आहुः । केचित् पञ्चब्रह्मात्मना **पञ्चधा** आहुः ॥ १५ ॥ स्वाज्ञदृष्टिप्रसक्तब्रह्मादिस्थावरान्तप्रपञ्चेषु नामरूपवृत्तिवैचित्र्यादनेकविधेष्वपि तदारोपापवादाधिकरणतया य आस्ते तं **विभुं** भूमात्मानं **ज्ञानचक्षुषो द्विजा** ब्रह्मविद्वराः स्वाधिष्ठेयसापेक्षाधिष्ठानताऽपह्नवसिद्धमात्मानं **शुभ्रं** निष्प्रतियोगिकस्वमात्रं **पश्यन्ति** ॥ १६ ॥

सर्वलयाश्रयब्रह्मज्ञानेन ब्रह्मभावापत्तिः

यस्मिन् सर्वमिदं प्रोतं ब्रह्म स्थावरजंगमम् ।
तस्मिन्नेव लयं [1]याति स्रवन्त्यः सागरे यथा ॥ १७ ॥

[1] यान्ति—उ.

यस्मिन् भावाः प्रलीयन्ते लीनाश्चाव्यक्ततां ययुः ।
पश्यन्ति व्यक्ततां भूयो जायन्ते बुद्बुदा इव ॥ १८ ॥
क्षेत्रज्ञाधिष्ठितं चैव कारणैर्विद्यते पुनः ।
एवं स भगवान् देवः पश्यन्त्यन्ये पुनः पुनः ॥ १९ ॥
ब्रह्म ब्रह्मेत्यथायान्ति ये विदुर्ब्राह्मणास्तथा ।
अत्रैव ते लयं यान्ति लीनाश्चाव्यक्तशालिनः ॥
लीनाश्चाव्यक्तशालिन इत्युपनिषत् ॥ २० ॥

अपह्नोतव्यमिदं जगत् कस्मिन्नुदयस्थित्यवसानं भजतीत्यत आह—**यस्मिन्निति** । **यस्मिन्**नारोपाधिकरणे परमेश्वरे **सर्वमिदं** आब्रह्मस्थावरजङ्गमं विकल्पितं **प्रोतं** स्थितं च **स्रवन्त्यः सागरे यथा तस्मिन्नेव लयं याति** ॥ १७ ॥ नित्यादिप्रळ्याधारे **यस्मिन्** स्वस्वकर्मानुरोधेन भवन्तीति **भावाः** जीवाः कर्मक्षयात् **प्रलीयन्ते** । ततः किमित्यत आह—**लीनाश्चे**ति । मधूच्छिष्टपिण्डे स्वर्णादिरेणव इव ये **लीनास्ते अव्यक्ततां ययुः** । ते पुनः सृष्टिकाले बुद्बुदा इव जले **भूयो व्यक्ततामेत्य जायन्ते** ॥ १८ ॥ किञ्च—एतत् सर्वं पुनः पुनः घटीयन्त्रवत् जन्मस्थितिभङ्गं भजतीति **कारणैरनेकहेतुभिः** एतत् सर्वं क्षेत्रं तत् स्वातिरिक्तं नास्तीति यो जानाति स हि **क्षेत्रज्ञः** परमात्मा तेनाधिष्ठितं सदिदं सर्वं **विद्यते** न स्वत इति सन्तो यं **पश्यन्ति सोऽयं भगवान् देवः** परमात्मा ॥ १९ ॥ स्वाज्ञविकल्पित-स्वातिरिक्तकलापह्नवप्रबोधसमकालं स्वमात्रमवशिष्यते इत्यन्ये **ये विदुः ब्राह्मणाः** ब्रह्मविद्वरीयांसः ते कृतकृत्याः, ब्रह्मैव भवन्तीति वाक्यशेषः । तदपेक्षया ये मन्दाधिकारिणो यद्यत् करणग्रामग्राह्यं तत् सर्वमिदं **ब्रह्म** इदं **ब्रह्मेति पुनः पुनरभ्यासं** कुर्वन्ति ते ब्रह्मविदः । **अथानन्तरं** क्रमेण सम्यज्ज्ञानिनो भूत्वा तन्मात्रतां **यान्ति** पुरा स्वात्तोपाधयः **त्वत्रैव लयं** विरूपविलयं

यान्ति । ते स्वोपाधिविकाराः एवं लीनाश्च सन्तः अव्यक्तरूपं ब्रह्म तच्छालिनस्तद्रूपा भवन्ति । अभ्यासतो नेह पुनः संसरन्तीत्यर्थः । इत्युपनिषच्छब्दः प्रकृतोपनिषत्परिसमाप्त्यर्थः ॥ २० ॥

श्रीवासुदेवेन्द्रशिष्योपनिषद्ब्रह्मयोगिना ।
मन्त्रिकोपनिषट्टीका लिखिता स्याद्यथा-स्फुटम् ।
मन्त्रिकोपनिषद्व्याख्याग्रन्थस्त्वष्टोत्तरं शतम् ॥

इति श्रीमदीशाद्यष्टोत्तरशतोपनिषच्छास्त्रविवरणे द्वात्रिंशत्सङ्ख्यापूरकं मन्त्रिकोपनिषद्विवरणं सम्पूर्णम्

महोपनिषत्

आप्यायन्तु—इति शान्तिः

प्रथमोऽध्यायः

उपनिषदधिकारः

अथातो महोपनिषदं व्याख्यास्यामः ॥ १ ॥

यन्महोपनिषद्वेद्यचिदाकाशतया स्थितम् ।
परमाद्वैतसाम्राज्यं तद्रामब्रह्म मे गतिः ॥

इह खलु सामवेदप्रविभक्तेयं महोपनिषत् श्रीशुकजनक-ऋभुनिदाघ-प्रश्नप्रतिवचनमुखेन परमतत्त्वरहस्यभूतनिष्प्रतियोगिकब्रह्ममात्रसिद्धान्तं सोपायं प्रकटयन्ती विजृम्भते । अस्याः स्वल्पग्रन्थतो विवरणमारभ्यते । आदौ तावत् मुमुक्षूनुपलभ्य श्रुतयः परमतत्त्वमुपदिशन्तीत्याह—अथेति । अथ साधन-चतुष्टयसम्पत्त्यनन्तरं यतो मुमुक्षूणां ब्रह्ममात्रप्रबोधं विना न हि पुरुषार्थो भवति अतः कारणात् मुमुक्षूणां परमपुरुषार्थसिद्धये श्रुतयो वयं—उपनिपूर्वस्य सद्धातोः (षद्लृ धातोः) अर्थानुगमात् यथोक्तसाधनसम्पन्नान् मुमुक्षून् ब्रह्मोप-सामीप्यं ब्रह्मस्वरूपं निषीदति प्रापयतीति ब्रह्मविद्योपनिषत्—उपनिषण्णं वाऽस्यां कैवल्यमिति वा उपनिषत्—ब्रह्ममात्रप्रकाशकतया इयं महती च

सोपनिषद्वेति—**महोपनिषत्** तां विशेषेण आख्यास्यामः, विस्पष्टं प्रतिपादयिष्याम इत्यर्थः ॥ १ ॥

नारायणस्य अद्वितीयत्वं ईशत्वं च

तदाहुः—एको ह वै नारायण आसीन्न ब्रह्मा नेशानो नापो नाग्नीषोमौ नेमे द्यावापृथिवी न नक्षत्राणि न सूर्यो न चन्द्रमाः ॥ २ ॥ स एकाकी न रमेत ॥ ३ ॥

यद्वयं वक्तुमुद्युक्ताः तदेव पुरा ब्रह्मवादिनोऽपि वदन्तीत्याह—**तदाहुरिति** । किमित्यत आह—**एक इति** । **ह वा** इति वृत्तस्मरणार्थौ । स्वप्रतियोगिद्वित्वासम्भवात् **एकः** । स चासौ स्वातिरेकेण नास्त्यरं अल्पं अविद्यापदतत्कार्यजातमिति नारं विकलेबरकैवल्यं अयनं धाम स्वरूपं यस्य सोऽयं **नारायणः** परमात्मा । स्वाज्ञादिदृष्टिमोहे सत्यसति स्वयं एक एव **आसीत्** स्थितवानित्यर्थः । कथं अस्यैकत्वं तदतिरेकेण ब्रह्मादिचन्द्रान्तसत्त्वादित्यत आह—**नेति** । तदतिरेकेण **न ब्रह्मा** ॥ २ ॥ परमार्थदृष्ट्या नारायणो निष्प्रतियोगिकाद्वितीयोऽपि स्वाज्ञदृष्ट्येशत्वमवलम्ब्येव स्थितवानित्याह—**स एकाकीति** । यो निर्विशेषतया अवशिष्टः **स** एव स्वाज्ञदृष्टिविकल्पितमूलाविद्यामधिष्ठाय **एकाकी** ईश्वरः स्वातिरिक्तप्रपञ्चसिसृक्षया स्वात्ममात्रे **न रमते** इत्यर्थः ॥ ३ ॥

यज्ञस्तोमोत्पत्तिः

तस्य ध्यानान्तःस्थस्य यज्ञस्तोममुच्यते ॥ ४ ॥

ततः किमित्यत आह—**तस्येति** । एकाकिना मया किं कर्तव्यमिति ध्यानाविष्टस्य, तस्य एवं ध्यायन् स्वान्तरेव तिष्ठतीति ध्यानान्तःस्थः तस्य **ध्यानान्तःस्थस्य** स्वेच्छामात्रेण सिसृक्षमाणसृष्टियज्ञसाधनं महा**यज्ञस्तोमं** अव्यक्ताख्यं सर्वानर्थकलनानिर्वाहकं प्रादुर्भूत**मुच्यते** ॥ ४ ॥

चतुर्दशपुरुषाणां पञ्चविंशतितत्त्वात्मकपुरुषस्य चोत्पत्तिः

तस्मिन् पुरुषाश्चतु[1]र्दश जायन्ते एका कन्या दशेन्द्रियाणि मन एकादशं तेजो द्वा[2]दशमहंकारस्त्रयोदश प्राणश्चतुर्दश आत्मा पञ्चदश बुद्धि [3]र्भूतानि पञ्च तन्मात्राणि पञ्च महाभूतानि स एकः पञ्चविंशतिः पुरुषः ॥ ५ ॥ तत्पुरुषं पुरुषो निवेश्य नास्य प्रधानसंवत्सरा जायन्ते संवत्सरादधिजायन्ते ॥ ६ ॥

तस्मिन् यज्ञस्तोमे सृष्टिकर्मनिर्वाहकाः **चतुर्दश पुरुषाः जायन्ते** । पञ्चब्रह्माणो ब्रह्मादिसदाशिवान्ताः दक्षादिनवप्रजापतयश्च चतुर्दशसङ्ख्यापूरकाः । **एका कन्या** सर्वानर्थमूलत्वेन प्रकृता मूलप्रकृतिः । एते ब्रह्मादयः सृष्टिकर्मप्रवर्तकाः । तत्साधनत्वेन लिंगशरीरं सहजतादात्म्यास्पदमात्मना पञ्चदशावयवकलनान्वितं जातमित्यत्र वाक्श्रोत्रादिभेदेन कर्मज्ञानेन्द्रियाणि **दश**, **एकादश**सङ्ख्यापूरकं **मनः**, **तेजः** द्वादशसङ्ख्यापूरकं बुद्धितत्त्वं बुद्धेः तैजसत्वात्, **त्रयोदश**सङ्ख्यापूरकोऽयमहङ्कारः, **चतुर्दश**सङ्ख्यापूरकः **प्राणः**, स्वयमात्मेश्वरः **पञ्चदश**सङ्ख्यापूरकः यया बुध्यते निखिलं सेयं **बुद्धिः** विद्याऽविद्या वा, एतत्सर्वाधारतया भवन्तीति **भूतानि** कामकर्मतमांसि त्रीणि, **पञ्च तन्मात्राणि पञ्चमहाभूतानि** चतुर्विंशतिसङ्ख्यापूरकाणि, तदुपाधिकः **स एको** जीवः, तेन साकं **पञ्चविंशतिः** तत्समष्ट्यभिमानी **पुरुषो** विराट् सूत्रात्मा वा ॥ ५ ॥ **तत्पुरुषं** स्थूलादिसृष्टिकर्मणि तदधिष्ठाता **पुरुषः** परमेश्वरः **निवेश्य** स्थापयित्वा स्वयं असंगोदासीनतया उदास्ते । एतावन्तं कालं अयं तिष्ठतीति शतादिसङ्ख्यया परिच्छिन्नाः **प्रधानसंवत्सरा नास्य जायन्ते**, स्वयमेव संवत्सरात्मा, "स एष कालो भुवनस्य गोप्ता" इति श्रुतेः । स्वस्मात् **संवत्सरात्** कालात्मनः सकाशात् सर्वे **अधिजायन्त** इत्यर्थः ॥ ६ ॥

[1] र्दशा—अ १, अ २, क. [2] दशाहं—अ १.
[3] भूता—अ १, अ २.

रुद्रोत्पत्तिः

अथ पुनरेव नारायणः सोऽन्यत्कामो मनसा ध्यायत। तस्य ध्यानान्तःस्थस्य ललाटात् त्र्यक्षः शूलपाणिः पुरुषो जायते बिभ्रच्छ्रियं यशः सत्यं ब्रह्मचर्यं तपो वैराग्यं मन ऐश्वर्यं सप्रणवा व्याहृतय ऋग्यजुःसामाथर्वाङ्गिरसः सर्वाणि छन्दांसि तान्यङ्गे [1]समाश्रितानि तस्मादीशानो महादेवो महादेवः ॥ ७ ॥

यज्ञस्तोमादिसृष्टिमुक्त्वा छन्दोमयांगरौद्रसृष्टिमाह — अथेति । यो नारायण इति ख्यातः सोऽयं ऋगादिचतुर्वेदांगरौद्रप्रपञ्चं स्रष्टुकामः यज्ञस्तोमादिसृष्ट्यपेक्षया अन्यत्कामोऽन्यकामः सन् मनसैवं ध्यायत। तस्य ध्यानान्तस्स्थस्य नारायणस्य ललाटात् यः सर्वातिशायिनीं श्रियं यशः सत्यं ब्रह्मचर्यं तपो वैराग्यं सत्यकामादिलक्षणं मनः निरवधिकैश्वर्यं च बिभ्रत् यस्याङ्गे ॐ भूः इत्यादिसप्रणवाः सप्तव्याहृतयः ऋग्यजुःसामाथर्वाङ्गिरसश्च तानि सर्वाणि छन्दांसि चानवरतं समाश्रितानि भवन्ति सोऽयं त्र्यक्षः शूलपाणिः पुरुषो जायते। नारायण एव रुद्ररूपेण आविरासीत् इत्यर्थः। यस्मात् एवं कर्तुं समर्थो भवति तस्मादीशानो नारायण एव महादेवः, महादेव एव नारायणः, नह्यनयोर्भेदो विद्यते इत्यत्र—"शिवाय विष्णुरूपाय शिवरूपाय विष्णवे" इत्यादि श्रुतेः ॥ ७ ॥

चतुर्मुखब्रह्मोत्पत्तिः

अथ पुनरेव नारायणः सोऽन्यत्कामो मनसा ध्यायत। तस्य ध्यानान्तःस्थस्य ललाटात् स्वेदोऽपतत्। ता इमाः प्रतता आपः। ततस्तेजो हिरण्मयमण्डम्। तत्र ब्रह्मा चतुर्मुखोऽजायत ॥ ८ ॥

[1] समग्रि—अ १.

छन्दोमयाङ्गरुद्रसृष्ट्यनन्तरं ब्रह्मसृष्टिमाचष्टे—अथेति। मनसा ध्यायत ब्रह्मसृष्टिं करवाणीति। प्रतता आपः, विस्तारं गता इत्यर्थः। अण्डं सञ्जातम्॥ ८॥

व्याहृतिछन्दोवेददेवतानामुत्पत्तिः

सोऽध्यायत्। पूर्वाभिमुखो भूत्वा भूरिति व्याहृति[1]र्गायत्रं छन्द ऋग्वेदोऽग्निर्देवता। पश्चिमाभिमुखो भूत्वा भुव इति व्याहृतिस्त्रैष्टुभं छन्दो यजुर्वेदो वायुर्देवता। उत्तराभिमुखो भूत्वा स्वरिति व्याहृतिर्जागतं छन्दः सामवेदः सूर्यो देवता। दक्षिणाभिमुखो भूत्वा मह इति व्याहृतिरानुष्टुभं छन्दोऽथर्ववेदः सोमो देवता॥ ९॥

स भूत्वा किं कृतवानित्यत आह—सोऽध्यायदिति। कथमध्यायत् तेन किं जायत इत्याशङ्क्य स पूर्वादिचतुर्मुखो भूत्वा व्याहृतिछन्दोवेददेवता भवतीत्याह—पूर्वेति॥ ९॥

नारायणस्य विराड्रूपत्वम्

सहस्रशीर्षं देवं सहस्राक्षं विश्वशंभुवम्।
विश्वतः परमं नित्यं विश्वं नारायणं हरिम्॥ १०॥
विश्वमेवेदं पुरुषस्तद्विश्वमुपजीवति।
पतिं विश्वेश्वरं देवं समुद्रे[2]कं विश्वरूपिणम्॥ ११॥

नारायण एव ब्रह्मात्मना भूरादिसोमान्तदेवताभावमेत्य विराड्रूपो बभूवेत्याह—सहस्रशीर्षमिति। श्रुतयः स्वाङ्गलोककृपया सविशेषं वैराजमात्मानं

[1] गायत्री—अ, अ १, क. [2] कविं वि—अ.

दर्शयित्वा हे स्वाङ्गलोकाः यूयं स्वहृदयमध्ये वैराजं स्वात्मेति ध्यायतेत्याह—**सहस्रेति**। सर्वप्राण्यात्मना सहस्राणि शिरांसि अस्यैवेति तथोक्तं **सहस्रशीर्षं**, देदीप्यमानरूपत्वात् **देवं**, तथा **सहस्राक्षं**, यतः स्वविभक्तविश्वानां व्यावहारिकाणां शं सुखं भवतीति तं **विश्वशंभुवं**, विश्वापेक्षया परमं **विश्वतःपरमं**, अनित्यविश्वविलक्षणत्वात् **नित्यं**, विश्वरूपत्वात् **विश्वं**, सूरयो यत्र न रमन्ते तन्नरं तदेव नारं अविद्यापदतत्कार्यजातं यः तदयनं आरोपापवादाधिकरणं तं **नारायणं**, वस्तुतः स्वाधेयनिरूपिताधारताप्रभवसविशेषतां स्वावशेषतया हरतीति **हरिम्** ॥ १० ॥ जगतः पतिं पालकं **विश्वेश्वरं** विश्वनियन्तारं, **देवं** द्योतनात्मकं, प्रत्यगभिन्नब्रह्मात्मना **सम्यक्** उद्रेकं अतिरिक्तं, **विश्वरूपिणं** विराडात्मानं अयमहमस्मीति ध्यायत। विश्वरूपत्वं कथमित्यत्र—यमाश्रित्य **तद्विश्वमुपजीवति** चेतनभावमेति। यत एवं अतः इदं विश्वं पुरुष एव ॥ ११ ॥

नारायणोपलब्धिस्थानं हृदयम्

पद्मकोशप्रतीकाशं लम्बत्याकोशसंनिभम्।
हृदयं चाप्यधोमुखं संतत्यै [1]सीत्कराभिश्च ॥ १२ ॥
तस्य मध्ये महानर्चिर्विश्वार्चिर्विश्वतो[2]मुखम्।
तस्य मध्ये वह्निशिखा अणीयोर्ध्वा व्यव[3]स्थिता ॥ १३ ॥
तस्याः शिखाया मध्ये पुरुषः परमात्मा व्यवस्थितः।
स ब्रह्मा स ईशानः सेन्द्रः सोऽक्षरः परमः स्वराट् ॥

इति महोपनिषत् ॥ १४ ॥

तदुपलब्धिस्थानं किमित्यत्र हृदयमित्याह—**पद्मेति**। **पद्मकोशप्रतीकाशं अधोमुखं** उरोभागे यत् **लम्बति** जीवनसन्तत्यै **सीत्कराभिः** शीतलोदककणैश्च

[1] सत्क—अ. सीत्का—अ १, अ २, क. [2] मुखः—अ, अ १, अ २.
[3] स्थितः—अ, अ १.

स्रवत् आकोशसन्निभं सर्वप्राणिनां हृदयं चकास्ति । चशब्दात् प्रणवेन प्राणायामेन वा हृदयमूर्ध्वमुखं कुर्यादिति द्योत्यते ॥ १२ ॥ यदेवं हृदयं प्रतिभाति तस्य हृदयस्य मध्ये महान् महत् अर्चिः । तस्य परिच्छिन्नशङ्कां शातयति—विश्वार्चिः विश्वतोमुखमिति च । प्रकाशवदव्याकृताकाशज्योतिः दीप्यत इत्यर्थः । तस्य अव्याकृताकाशस्य मध्ये योगकालीनमूलाधारत्रिकोणोत्थितवह्निशिखा अणीयोर्ध्वा अणीयसी स्वस्थानादूर्ध्वगामिनी व्यवस्थिता वर्तते ॥ १३ ॥ तस्याः शिखायाः मध्ये सच्चिदानन्दवपुषा स्वाविद्यापदतत्कार्यजातपूरणात् पुरुषः परमात्मा सर्वप्रत्यगभेदेन यो व्यवस्थितः सोऽयं नारायण एव ब्रह्मा स ईशानः सेन्द्रः सोऽक्षरः वस्तुतः परमः सर्वस्मात् परतरत्वात् । (यद्वा—) निष्प्रतियोगिकस्वमात्रतया राजत इति स्वराट् । इतिमहोपनिषच्छब्दौ विराट्तत्वप्रथमाध्यायपरिसमाप्त्यर्थौ ॥ १४ ॥

इति प्रथमोऽध्यायः

द्वितीयोऽध्यायः

शुकस्य स्वयमुद्भूतं पारमार्थिकज्ञानम्

शुको नाम महातेजाः स्वरूपानन्दतत्परः ।
जातमात्रेण मुनिराड् यत् सत्यं तदवाप्तवान् ॥ १ ॥
तेनासौ स्वविवेकेन स्वयमेव महामनाः ।
प्रविचार्य चिरं साधु स्वात्मनिश्चयमाप्नुयात् ॥ २ ॥
अनाख्यत्वादगम्यत्वान्मनःषष्ठेन्द्रियस्थितेः ।
चिन्मात्र[1]मेवायमणुराकाशादपि सूक्ष्मकः ॥ ३ ॥

[1] अयं व्याख्याऽनुसारी पाठः. आकरपाठस्तु "मेवमात्माणु" इत्येव.

चिदणोः परमस्यान्तः कोटिब्रह्माण्डरेणवः ।
उत्पत्तिस्थितिमभ्येत्य [1]लीयन्ते शक्तिपर्ययात् ॥ ४ ॥
आकाशं बाह्यशून्यत्वादनाकाशं तु चित्त्वतः ।
न किंचिद्यदनिर्देश्यं वस्तु सत्तेति [2]किंचन ॥ ५ ॥
चेतनोऽसौ प्रकाशत्वाद्वेद्याभावाच्छिलोपमः ।
स्वात्मनि व्योमनि स्वच्छे जगदुन्मेषचित्रकृत् ॥ ६ ॥
तद्भामात्रमिदं विश्वमिति न स्यात्ततः पृथक् ।
जगद्भेदोऽपि तद्भानमिति भेदोऽपि तन्मयः ॥ ७ ॥
सर्वगः सर्वसंबन्धो गत्यभावान्न गच्छति ।
नास्त्यसावाश्रयाभावात् सद्रूपत्वादथास्ति च ॥ ८ ॥
विज्ञानमानन्दं ब्रह्म रातेर्दातुः परायणम् ।
सर्वसंकल्पसंन्यासश्चेतसा [3]यत्परिग्रहः ॥ ९ ॥
जाग्रतः प्रत्यया[4]भावं यस्याहुः प्रत्ययं बुधाः ।
यत्संकोचविकासाभ्यां जगत्प्रलयसृष्टयः ॥ १० ॥
निष्ठा वेदान्तवाक्यानामथ वाचामगोचरः ।
अहं सच्चित्परानन्दब्रह्मैवास्मि न चेतरः ॥ ११ ॥

स्वोद्भूतपारमार्थिकज्ञानश्रीशुकजनकप्रश्नप्रतिवचनरूपाख्यायिकामवतार्य व्याकरोति—शुको नामेत्यादिना । अवाप्तवान् उपदेशमन्तरेणेत्यर्थः ॥ १ ॥ कथमुपदेशं विना ज्ञानमुदेतीत्यत आह—तेनेति । कीदृशोऽस्मीति प्रविचार्य

[1] जायन्ते—उ, उ १.
[2] कंचन—उ.
[3] यः परि—अ १.
[4] भावे—अ.

॥ २ ॥ विचारतः स्वात्मनिश्चयप्रकारमाह—**अनाख्यत्वादिति**। कथं पुनः श्रीशुक उपदेशमन्तरा स्वात्मनिश्चयमाप्तवानित्यत्र—स्वात्मन **अनाख्यत्वात्**। यदभिधेयं तदाख्यागोचरं, यत्तद्विरळं तदनाख्यं, अशब्दत्वात् "यतो वाचो निवर्तन्ते" इति श्रुतेः। मानसधीन्द्रियगोचरस्यानभिधेयत्वं कुत इत्यत्राह—**अगम्यत्वादिति**। मनसा सह षडिन्द्रियाणि श्रोत्रादिज्ञानेन्द्रियाणि। स्वस्वविषयज्ञानं तेषां स्थितिः। तदगम्यत्वे हेतुः स्वात्मनो निर्विषयत्वं, "अविषयं अनिन्द्रियं" इति श्रुतेः। निर्विषयत्वे स्वात्मा कीदृश इत्यत्र—**चिन्मात्रमेव** निष्प्रतियोगिकं, अचिन्मात्रासम्भवप्रबोधसिद्धत्वात्। अत एव **अयमणुः**, सूक्ष्मत्वात्, "एषोऽणुरात्मा" इति श्रुतेः। अणुत्वे परिच्छिन्नता स्यादित्यत आह—**आकाशादपि सूक्ष्मक इति**। वाय्वादिस्वकार्यापेक्षया आकाशस्य सूक्ष्मत्वेन विभुत्वात् आकाशादपि सूक्ष्मत्वं ततोऽपि व्यापकत्वम्, व्यापकं, स्वकार्यापेक्षया तत्कारणस्य व्यापकत्वप्रसिद्धेः, यदि कारणब्रह्माणोऽणुत्वं अल्पत्वं स्यात् तदा तत्र स्वकार्यसम्भूतिस्थितिभङ्गासम्भवात्। श्रूयते हि—निरङ्कुशपरमस्य चिदणोरन्तः अनन्तकोटिब्रह्माण्डरेणवो जलाशयबुद्बुदपरम्परेवोत्पत्तिस्थितिभङ्गं मुहुर्मुहुर्भजन्ति। अतश्चिदणुरात्मा सर्वव्यापक इत्यर्थः ॥ ४ ॥ तत्स्वरूपं किमित्यत्र सत्तामात्रमित्याह—**आकाशमिति**। स्वातिरिक्तं ग्रसित्वा **स्वेन रूपेणासमन्तात्** काशत इत्याकाशं ब्रह्म स्वबाह्यशून्यत्वात्। स्वबाह्यं स्वातिरिक्तमित्यर्थः। आकाशत्वे भासकता स्यादित्यत आह—**अनाकाशमिति**। स्वस्य निष्प्रतियोगिकचिन्मात्रत्वात् भास्यसापेक्षभासकताऽनुपपत्तेरनाकाशत्वं निरङ्कुशमित्यर्थः। तुशब्दार्थमाह—**न किंचनेति**। **यदनिर्देश्यमनिदं वस्तु न हि किंचित्** सप्रतियोगिकं भवति। किं तदित्यत्र—**किंचन वस्तु सत्तेति** निष्प्रतियोगिकसन्मात्रमुच्यते, "पश्यतेहापि सन्मात्रमसदन्यत्" इति श्रुतेः ॥ ५ ॥ सन्मात्रात्मा किं अचेतन इत्यत आह—**चेतनोऽसाविति**। तत्र हेतुः —**प्रकाशमात्रत्वात्**। तथात्वेऽवेद्यत्वं, वेदनसापेक्षवेद्याभावात्। **शिलोपमः** शिलावदप्रकम्प्य इत्यर्थः। शिलात्वे जडत्वं स्यादिति शङ्कायां—**स्वच्छे स्वात्मनि चिद्वयोम्नि जगदुन्मेषचित्रकृदात्मा** न हि जडो भवति ॥ ६ ॥

चित्रस्थानीयं विश्वं तद्भिन्नमित्यत्र—**इदं विश्वमिति** यद्व्यवहारास्पदं **तद्भामात्रं, ततो** भामात्राद्विश्वं **पृथक् न स्यात्**। इदंकारयोग्यस्य भामात्रत्वं कुत इत्यत्र—**जगद्भेदोऽपि तद्भानमिति**, नह्यभामात्रमिदमिति भेदविषयतामर्हति । यत एवमतो **भेदोऽपि तन्मयः** तन्मात्रपर्यवसन्नत्वात् ॥ ७ ॥ स्वाज्ञविकल्पितसर्वस्य सत्त्वे **सर्वगः सर्वसम्बन्धवत्** भवति । वस्तुतो **गत्यभावात् न गच्छति**। **स्वाश्रयाभावात् असौ नास्त्येवेति** प्रसक्तौ **सद्रूपत्वात्** सन्मात्रत्वात् **अथास्ति च**, न हि सन्मात्रमसत्पदं भजति ।

ततः स्तिमितगम्भीरं न तेजो न तमस्ततम् ।
अनाख्यमनभिव्यक्तं सत् किंचिदवशिष्यते ॥

इति श्रुतेः ॥ ८ ॥ घटादिवत् सद्रूपत्वमस्तु, चित्त्वं प्रेमास्पदत्वं व्यापकत्वं कुत इत्यत्र—यत् सन्मात्रं तदेव **विज्ञानं** चिन्मात्रं अजडमित्यर्थः । नह्यसतोऽजडता उपपद्यते, स्वरूपशून्यत्वात् । यद्विज्ञानं तदे**वानन्दरूपं**, प्रकाशवतः प्रेमास्पदत्वात्, नह्यप्रकाशं वस्तु प्रेमास्पदं भवति। एवं सच्चिदानन्दमात्रतया यत् बृंहयति तत् **ब्रह्म**, प्रेमास्पदस्य भूमत्वप्रसिद्धेः "यो वै भूमा तत् सुखं नाल्पे सुखमस्ति" इति श्रुतेः। सच्चिदानन्दब्रह्मरूपेण राजत इति रातिः जीवन्मुक्ततितिः तस्याः **रातेः**, यथोक्ताधिकारिणे ब्रह्मविद्यां ददातीति **दाता** ब्रह्मभावापन्नो देशिकः "ब्रह्मविद्योपदेशं यन्मुमुक्षोर्दानमीरितम्" इति श्रुतेः, तस्यापि **परायणं** ब्रह्म, मुक्तबृन्दात्मत्वेन प्राप्यत्वात्। न हि तत् ग्रामादिवत् आप्यं, "आप्तिः स्वमात्रावशेषो नहि ग्रामान्तरातिवत्" इति नामार्थविवेकोक्तेः। इत्थंभूतब्रह्मात्युपायमाचष्टे—**सर्वेति**। इदं कर्तव्यं इदं अकर्तव्यं इदं **मे** स्यात् इदं मा भूत् इति चेतसा **यद्यः परिग्रहः तत्सर्वसङ्कल्पसंन्यासो ब्रह्मा**प्तिहेतुः, ब्रह्ममात्रज्ञानान्तरङ्गसाधनमित्यर्थः ॥ ९ ॥ ब्रह्ममात्रज्ञानं कीदृशमित्यत्र—**जामतः** पुरुषस्य स्वातिरिक्तमस्ति नास्तीति प्रत्ययाभावमेव **बुधाः यस्याप्तिहेतु-प्रत्ययमाहुः** । सर्वसङ्कल्पसंन्यासनिष्पन्नज्ञानमेव स्वातिरिक्तविभ्रममुक्ति-जनकमित्यर्थः । यत्सङ्कोचादि स्वातिरिक्तप्रळयादिहेतुः, यन्महावाक्य-

सिद्धार्थं, यदवाङ्मनसगोचरं, तदेवास्मीत्याह—यदिति । **जगत्प्रलयसृष्टयः** भवन्ति ॥ १०–११ ॥

ज्ञाततत्त्वस्यापि शुकस्याविश्रान्तिः

स्वयैव सूक्ष्मया बुद्ध्या सर्वं विज्ञातवान् शुकः ।
स्वयं प्राप्ते परे वस्तुन्यविश्रान्तमनाः स्थितः ॥ १२ ॥
इदं वस्त्विति विश्वासं नासावात्मन्युपाययौ ।
केवलं विरमास्य चेतो विषयचापलम् ।
भोगेभ्यो भूरि[1]भङ्गेभ्यो धाराभ्य इव चातकः ॥ १३ ॥

उक्तप्रकारेण **स्वयैव** । एवमुपदेशमन्तरा विज्ञातपरमार्थतत्त्वोऽपि वेदान्त-सम्प्रदायमाननार्थमेव—न तस्याज्ञातं किंचिदस्ति, तस्य ज्ञानफलनारायणावतार-त्वात्, तथाऽपि सम्प्रदायं मानयतीत्याह—स्वयमिति । यथावत् आत्मतत्त्वं बुद्ध्वाऽपि तत्र विश्रान्तिमलब्धवानिव **धाराभ्यश्चातक इवास्य मानसं भोगेभ्यो विरराम** ॥ १२–१३ ॥

व्यासोपदेशेऽप्यनादरः

एकदा सोऽमलप्रज्ञो मेरावेकान्तसंस्थितम् ।
पप्रच्छ पितरं भक्त्या कृष्णद्वैपायनं मुनिम् ॥ १४ ॥
संसाराडम्बरमिदं कथमभ्युत्थितं मुने ।
कथं च प्रशमं याति कियत् कस्य कदा वद ॥ १५ ॥
एवं पृष्टेन मुनिना व्यासेनाखिलमात्म[2]जे ।
यथावदखिलं प्रोक्तं वक्तव्यं विदितात्मना ॥ १६ ॥

[1] तुंगे—अ. [2] जा—अ २. के—अ १.

अज्ञासिषं पूर्वमेवमहमित्यथ तत्पितुः ।
स शुकः स्वकया बुद्ध्या न वाक्यं बहु मन्यत ॥ १७ ॥

एवंभूतः शुकः कदाचित् पितरं दृष्ट्वा स्वात्मतत्त्वमनुब्रूहि इति पृष्टमुद्दिश्य यथावत् कथयामास । स्वेनैव मया यथाबुद्धं तथोक्तवान् । तस्मात् अयं यथावन्न जानातीति स्मरन्तमालक्ष्य नाहं जानामि जनकः सम्यक् जानाति तं गच्छ इति पित्रा आज्ञप्तः तं प्रति गत्वा स्थितं शास्त्रार्थमाननाय सम्यक् परीक्ष्य तच्छीलतुष्टेन यथावदुक्तमवगम्य एतावानेव शास्त्रार्थ इति निश्चित्य विश्रान्तिमापन्न इव मेरुशृङ्गमासाद्य दीर्घनिर्विकल्प-समाधिमासाद्य तत्रैव शशामेत्याह—एकदेति ॥ १४—३६ ॥

शुकस्य जनकं प्रति गमनम्

व्यासोऽपि भगवान् बुद्ध्वा पुत्राभिप्रायमीदृशम् ।
प्रत्युवाच पुनः पुत्रं नाहं जानामि तत्त्वतः ॥ १८ ॥
जनको नाम भूपालो विद्यते मिथिलापुरे ।
यथावद्वेत्त्यसौ वेद्यं तस्मात् सर्वमवाप्स्यसि ॥ १९ ॥
पित्रेत्युक्तः शुकः प्रायात् सुमेरोर्वसुधातलम् ।
विदेहनगरीं प्राप जनकेनाभिपालिताम् ॥ २० ॥

जनककृता शुकपरीक्षा

आवेदितोऽसौ याष्टीकैर्जनकाय महात्मने ।
द्वारि व्याससुतो राजन् शुकोऽत्र स्थितवानिति ॥ २१ ॥
जिज्ञासार्थं शुकस्यासावास्तामेवेत्यवज्ञया ।
उक्त्वा बभूव जनकस्तूष्णीं सप्त दिनान्यथ ॥ २२ ॥

पदार्थभावनादार्ढ्यं बन्ध इत्यभिधीयते ।
वासनातानवं ब्रह्मन् मोक्ष इत्यभिधीयते ॥ ४१ ॥

दृश्यं नास्तीति बोधेन दृश्यासंभवप्रबोधेन ॥ ३८–३९ ॥ **ज्ञातज्ञेयाः** ज्ञातं ज्ञेयं यैस्ते ज्ञातज्ञेयाः विदितात्मतत्त्वाः इत्यर्थः ॥ ४ ॥ स्वशरीरादिस्वातिरिक्तपदार्थेषु आत्मात्मीयाभिमतिरेव **बन्धः** । तद्वासनातानवं **मोक्षः** ॥ ४१ ॥

जीवन्मुक्तस्थितिः

तपःप्रभृतिना यस्मै हेतुनैव विना पुनः ।
भोगा इह न रोचन्ते स जीवन्मुक्त उच्यते ॥ ४२ ॥
आपतत्सु यथाकालं सुखदुःखेष्वनारतः ।
न हृष्यति ग्लायति यः स जीवन्मुक्त उच्यते ॥ ४३ ॥
हर्षामर्षभयक्रोधकामकार्पण्यदृष्टिभिः ।
न परामृश्यते योऽन्तः स जीवन्मुक्त उच्यते ॥ ४४ ॥
अहंकारमयीं त्यक्त्वा वासनां लीलयैव यः ।
तिष्ठति ध्येयसंत्यागी स जीवन्मुक्त उच्यते ॥ ४५ ॥
ईप्सितानीप्सिते न स्तो यस्यान्त[1]र्वर्तिदृष्टिषु ।
[2]सुषुप्तिवद्यश्चरति स जीवन्मुक्त उच्यते ॥ ४६ ॥
अध्यात्मरतिरासीनः पूर्णः पावनमानसः ।
प्राप्तानुत्तमविश्रान्तिर्न किंचिदिह वाञ्छति ।
यो जीवति गतस्नेहः स जीवन्मुक्त उच्यते ॥ ४७ ॥

[1] वृत्ति—उ. [2] सुषुप्त—अ, क.

संवेद्येन हृदाकाशे मनागपि न लिप्यते ।
यस्यासावजडा संवित् स जीवन्मुक्त उच्यते ॥ ४८ ॥
रागद्वेषौ सुखं दुःखं धर्माधर्मौ फलाफले ।
यः करोत्य[1]नपेक्ष्यैव स जीवन्मुक्त उच्यते ॥ ४९ ॥
मौनवान् निरहंभावो निर्मानो मुक्तमत्सरः ।
यः करोति गतोद्वेगः स जीवन्मुक्त उच्यते ॥ ५० ॥
सर्वत्र विगतस्नेहो यः साक्षिवदवस्थितः ।
निरिच्छो वर्तते कार्ये स जीवन्मुक्त उच्यते ॥ ५१ ॥
येन धर्ममधर्मं च मनोमननमीहितम् ।
सर्वमन्तः परित्यक्तं स जीवन्मुक्त उच्यते ॥ ५२ ॥
यावती दृश्यकलना सकलेयं विलोक्यते ।
सा [2]येन सुष्ठु संत्यक्ता स जीवन्मुक्त उच्यते ॥ ५३ ॥
कटुम्ललवणं तिक्तममृष्टं मृष्टमेव च ।
सममेव च यो भुङ्क्ते स जीवन्मुक्त उच्यते ॥ ५४ ॥
जरा मरणमापच्च राज्यं दारिद्र्यमेव च ।
रम्यमित्येव यो भुङ्क्ते स जीवन्मुक्त उच्यते ॥ ५५ ॥
धर्माधर्मौ सुखं दुःखं तथा मरणजन्मनी ।
धिया येन सुसंत्यक्तं स जीवन्मुक्त उच्यते ॥ ५६ ॥
उद्वेगानन्दरहितः समया स्वच्छया धिया ।
न शोचते न चोदेति स जीवन्मुक्त उच्यते ॥ ५७ ॥

[1] नुपे—अ, अ १. [2] सदा येन सं—अ.

[1]सर्वेच्छाः सकलाः शङ्काः सर्वेहाः सर्वनिश्चयाः ।
धिया येन परित्यक्ताः स जीवन्मुक्त उच्यते ॥ ५८ ॥
जन्मस्थितिविनाशेषु सोदयास्तमयेषु च ।
सममेव मनो यस्य स जीवन्मुक्त उच्यते ॥ ५९ ॥
न किंचन द्वेष्टि तथा न किंचिदपि काङ्क्षति ।
भुङ्क्ते यः प्रकृतान् भोगान् स जीवन्मुक्त उच्यते ॥ ६० ॥
शान्तसंसारकलनः कलावानपि निष्कलः ।
यः सचित्तोऽपि निश्चित्तः स जीवन्मुक्त उच्यते ॥ ६१ ॥
यः समस्तार्थजालेषु व्यवहार्यपि[2] निःस्पृहः ।
परार्थेष्विव पूर्णात्मा स जीवन्मुक्त उच्यते ॥ ६२ ॥

ब्रह्मविदादिचतुर्विधजीवन्मुक्तलक्षणं तद्धर्मांश्चाह—**तप** इत्यादि । **यस्मै**—चतुर्थी षष्ठ्यर्था—यस्येत्यर्थः ॥ ४२ ॥ **सुखदुःखेष्वनारतः** प्रवृत्तिनिवृत्तिशून्यः ॥ ४३–४७ ॥ **यस्यासावजडा संवित्** अजडब्रह्मगोचरवृत्तिर्भवति ॥ ४८ ॥ **तत्तत्फलं अनपेक्ष्यैव** ॥ ४९ ॥ **सर्वेन्द्रियार्थेषु मौनवान् । गतोद्वेगः** विगताभिसन्धिः ॥ ५०–५३ ॥ **यथाप्राप्तं सममेव** ॥ ५४–५६ ॥ **यत्र** कुत्रापि **उद्वेगानन्दरहितः** ॥ ५७ ॥ स्वातिरिक्तविषये **सर्वेच्छा** इति ॥ ५८ ॥ आत्मात्मीयविषयकजन्मस्थितिविनाशेषु ॥ ५९–६२ ॥

विदेहमुक्तस्थितिः

जीवन्मुक्तपदं त्यक्त्वा स्वदेहे कालसात्कृते ।
विशत्यदेहमुक्तत्वं पवनोऽस्पन्दतामिव ॥ ६३ ॥

[1] सर्वेच्छाकलनाः शंकाः—अ. [2] परिस्पृहः—अ १.

विदेहमुक्तो नोदेति नास्तमेति न शाम्यति ।
न सन्नासन्न दूरस्थो न चाहं न च नेतरः ॥ ६४ ॥
ततः स्तिमितगम्भीरं न तेजो न तमस्ततम् ।
अनाख्यमनभिव्यक्तं सत् किंचिदवशिष्यते ॥ ६५ ॥
न शून्यं नापि चाकारि न दृश्यं नापि दर्शनम् ।
न च भूतपदार्थौघसदनन्ततया स्थितम् ॥ ६६ ॥
किमप्यव्यप[1]देश्यात्मा पूर्णात् पूर्णतराकृतिः ।
न सन्नासन्न सद[2]सन्न भावो भावनं न च ॥ ६७ ॥
चिन्मात्रं चैत्यरहितमनन्तमजरं शिवम् ।
अनादिमध्यपर्यन्तं [3]यदनाधि निरामयम् ॥ ६८ ॥
द्रष्टृदर्शनदृश्यानां मध्ये यद्दर्शनं स्मृतम् ।
नातः परतरं किंचिन्निश्चयोऽस्त्यपरो मुने ॥ ६९ ॥

ब्रह्मज्ञानान्तराळफलजीवन्मुक्तस्थितिमुक्त्वा ब्रह्मज्ञानमुख्यफलविदेहमुक्तस्थितिमाह—जीवन्मुक्तेति । स्वदेहे कालसात्कृते, स्थिते वा तत्राभिमत्यभावात्, विशत्यदेहमुक्तत्वम् ॥ ६३ ॥ विदेहमुक्तस्य स्वातिरिक्तविषयकवृत्तिसामान्याभावमाह—विदेहेति । स्वमात्रावस्थितेः सदोदितत्वेन सप्रतियोगिकोदयास्तमनाभावात् । न सन् नेतरः, न हि तस्य सदसद्दूरान्तिकस्वपरवृत्तिरुदेति, विदेहमुक्तस्य निष्प्रतियोगिकब्रह्ममात्रत्वात् ॥ ६४ ॥ ततः किमित्यत आह—तत इति । ततः ब्रह्ममात्रप्रबोधानन्तरं स्तिमितगम्भीरं, निस्तरङ्गापूर्णानन्दसमुद्रत्वात् । न भौतिकं तेजः तमो वा विद्यते । यत एवमतः स्वेन रूपेण

[1] देश्या—अ.
[2] सन्ना—अ २, क.
[3] यदनादि—अ, अ २, क.

ततम् । नामरूपाभावात् **अनाख्यमनभिव्यक्तं सदेवावशिष्यते** । **किंचिच्छब्दो** निष्प्रतियोगिकत्वख्यापक (इत्यर्थः) ॥ ६५ ॥ यत् एवमवशिष्टं तत् किं शून्यं अशून्यं दृश्यं अदृश्यं वा इत्यत आह—**नेति** । स्वातिरेकेण **भूतपदार्थौघसत्त्व**पुरस्सरं **न ह्यनन्ततया** स्थितम्, परिच्छेदापरिच्छेदकलनाऽसंभवात् ॥ ६६ ॥ केन रूपेण अयं विदेहमुक्तो निर्देष्टव्य इत्यत आह—**किमपीति** । केन प्रमाणेनापि व्यपदेष्टुमशक्यत्वात् । **पूर्णात् पूर्णतराकृतिः** "पूर्णमेवावशिष्यते" इति । यत्स्वरूपं सदसदादिकलनाविरळं नातः परं किंचिदस्तीत्याह—**न सदिति** । **न सत्** अचाक्षुषत्वात् । **नासत्** सद्रूपत्वात् । **न सदसत्** तेजस्तिमिरवद्विरोधात् । **न भावः**—अभूत्वा भवतीति भावो घटादिः, तद्विलक्षणत्वात् । **न च भावनं** अन्तःकरणवैरळ्यात् ॥ ६७ ॥ **चिन्मात्रं अचिन्मात्रापह्नवतो** निष्प्रतियोगिकत्वात् । चेतोभवं **चैत्यं** विश्वं, तदपवादाधिकरणत्वात् तद्रहितम् । **अनन्तं** त्रिविधपरिच्छेदशून्यत्वात् । **अजरं** षड्ऊर्मिवर्जितत्वात् । **शिवं** स्वातिरिक्ताशिवग्रासत्वात् । स्वोत्पत्तिस्थितिप्रळयाभावात् **अनादिमध्यपर्यन्तम्** । **यदनाधि** तापत्रयाभावात् । **निरामयं** आमयास्पदशरीरवैरळ्यात् । चिन्मात्रमेव विदेहमुक्तरूपमित्यर्थः ॥ ६७ ॥ चिन्मात्रत्वं कथमित्यत आह—द्रष्टृति । स्वविकल्पितद्रष्टृदर्शनदृश्यानां **मध्ये यद्दर्शनं त्रिपुट्यवभासकं** ज्ञानस्वरूपं तदेव चिन्मात्रमिति सर्ववेदान्तनिश्चितोऽर्थः । **नातः परतरं अपरः किंचिन्निश्चयोऽस्तीत्यर्थः** ॥ ६९ ॥

शुकभ्रमनिवृत्तिः

स्वयमेव त्वया ज्ञातं गुरुतश्च पुनः श्रुतम् ।
स्वसंकल्पवशाद्बद्धो निःसंकल्पाद्विमुच्यते ॥ ७० ॥
तेन स्वयं त्वया ज्ञातं ज्ञेयं यस्य महात्मनः ।
भोगेभ्यो ह्यरतिर्जाता दृश्याद्वा सकला[1]दिह ॥ ७१ ॥

[1] दपि—उ.

प्राप्तं प्राप्तव्यमखिलं भवता पूर्णचेतसा ।
स्वरूपे [1]पतसि ब्रह्मन् मुक्तस्त्वं भ्रान्तिमुत्सृज ॥ ७२ ॥
अतिबाह्यं तथा बाह्यमन्तराभ्यन्तरं धियः ।
शुक पश्यन्न पश्येस्त्वं साक्षी संपूर्णकेवलः ॥ ७३ ॥

एवं **स्वयमेव** । स्वातिरिक्तसङ्कल्पभावाभावौ बन्धमोक्षहेतू भवत इत्याह—**स्वेति** ॥ ७० ॥ श्रीशुकं स्तुवन् प्रकरणार्थमुपसंहरति—**तेनेति** । य एवं जातमात्रेण परमार्थतत्त्ववित् **तेन त्वया स्वयमेव** आचार्योपदेशमन्तरा यत् स्वावशेषतया **ज्ञेयं** तत् स्वमात्रमिति **ज्ञातं, यस्य महात्मनः** तव **भोगेभ्यः सकलदृश्यवर्गादिहारतिः जाता** देहभूता(?) ॥ ७१ ॥ यत्प्राप्तव्यं तदखिलं अक्षतं ब्रह्म स्वमात्रमिति **प्राप्तं** हे **ब्रह्मन्** । यतः **स्वरूपे पतसि** अतः स्वातिरिक्तास्तित्वभ्रमतो **मुक्तोऽसि**, असुक्तत्वभ्रान्तिमुत्सृज ॥ ७२ ॥ बाह्यान्तःकलनाविरळं ब्रह्म स्वमात्रमिति पश्यसि स्वातिरिक्तधिया न पश्यसि, अतस्त्वं ब्रह्मैव भवसीत्याह—अतीति । स्वातिरिक्तं न किंचिदस्तीति साक्षादीक्षत इति **साक्षी** ॥ ७३ ॥

शुकविश्रान्तिः

विशश्राम शुकस्तूष्णीं स्वस्थे परमवस्तुनि ।
वीतशोकभयायासो निरीहश्छिन्नसंशयः ॥ ७४ ॥
जगाम शिखरं मेरोः समाध्यर्थमखण्डितम् ॥ ७५ ॥
तत्र वर्षसहस्राणि निर्विकल्पसमाधिना ।
देशे स्थित्वा शशामासावात्मन्यग्नेहदीपवत् ॥ ७६ ॥

[1] तपसि—अ २.

व्यपगतकलनाकलङ्कशुद्धः स्वयममलात्मनि पावने पदेऽसौ ।
सलिलकण इवाम्बुधौ महात्मा विगलितवासनमेकतां जगाम ॥

इति महोपनिषत् ॥

केवलब्रह्ममात्रोऽसीति जनकेनैवमुक्तो विशश्राम ॥ ७४–७७ ॥ इति-महोपनिषच्छब्दौ श्रीशुकजनकाख्यायिकाद्वितीयाध्यायपरिसमाप्त्यर्थौ ॥

इति द्वितीयोऽध्यायः

तृतीयोऽध्यायः

निदाघस्य विचारः

निदाघो नाम मुनिराट् प्राप्तविद्यश्च बालकः ।
विहृतस्तीर्थयात्रार्थं पित्राऽनुज्ञातवान् स्वयम् ॥ १ ॥
सार्धत्रिकोटितीर्थेषु स्नात्वा गृहमुपागतः ।
स्वोदन्तं कथयामास ऋभुं नत्वा महायशाः ॥ २ ॥
सार्धत्रिकोटितीर्थेषु स्नानपुण्यप्रभावतः ।
प्रादुर्भूतो मनसि मे विचारः सोऽयमीदृशः ॥ ३ ॥

ऋभुनिदाघाख्यायिकामवतारयन् तीर्थयात्रा सत्वशुद्धिद्वारा ज्ञानहेतुरिति प्रकटनपूर्वकं निदाघतीर्थयात्राप्रभववैराग्यप्रकटनार्थं तृतीयाध्याय आरभ्यते—निदाघ इत्यादिना ॥ १–३ ॥

प्रपञ्चस्य अनित्यत्वम्

जायते मृतये लोको म्रियते जननाय च ।
अस्थिराः सर्व एवेमे सचराचरचेष्टिताः ॥ ४ ॥
सर्वापदां पदं पापा भावा विभवभूमयः ।
अयःशलाकासदृशाः परस्परमसङ्गिनः ।
[1]श्लिष्यन्ते केवला भावा मनःकल्पनयाऽनया ॥ ५ ॥
भावेष्वरतिरा[2]याता पथिकस्य मरुष्विव ।
शाम्यतीदं कथं दुःखमिति तप्तोऽस्मि चेतसा ॥ ६ ॥
चिन्तानिचयचक्राणि नानन्दाय धनानि मे ।
संप्रसूतकलत्राणि गृहाण्युग्रापदामिव ॥ ७ ॥
इयमस्मिन् स्थितोदारा संसारे परिपेलवा ।
श्रीर्मुने परिमोहाय साऽपि नूनं न शर्मदा ॥ ८ ॥
आयुः पल्लवकोणाग्रलम्बाम्बुकण[3]भङ्गुरम् ।
उन्मत्त इव संत्यज्य यात्यकाण्डे शरीरकम् ॥ ९ ॥
विषयाशीविषासङ्गपरिजर्झरचेतसाम् ।
अप्रौढात्मविवेकानामायुरायासकारणम् ॥ १० ॥
युज्यते वेष्टनं वायोराकाशस्य च खण्डनम् ।
ग्रथनं च तरङ्गाणामास्था नायुषि युज्यते ॥ ११ ॥

[1] शिंष्य—अ, अ १. शुष्य—मु. [2] याति—उ, उ १.
[3] संनिभं—उ, उ १.

[1]प्राप्यं संप्राप्यते येन भूयो येन न शोच्यते ।
पराया निर्वृतेः स्थानं यत्तज्जीवितमुच्यते ॥ १२ ॥
तरवोऽपि हि जीवन्ति जीवन्ति मृगपक्षिणः ।
स जीवति मनो यस्य मननेनोपजीवति ॥ १३ ॥
जातास्त एव जगति जन्तवः साधुजीविताः ।
ये पुनर्नेह जायन्ते शेषा जरठगर्दभाः ॥ १४ ॥
भारो विवेकिनः शास्त्रं भारो ज्ञानं च रागिणः ।
अशान्तस्य मनो भारं भारोऽनात्मविदो वपुः ॥ १५ ॥

कोऽयं विचार इत्यत्र स्वातिरिक्तप्रपञ्चस्य अनित्यत्वं प्रकटयति—**जायत इति** । अयं लोको घटीयन्त्रवत् जन्ममरणे प्राप्नोति । अतोऽयम**स्थिर** इत्यर्थः ॥ ४ ॥ मनःकल्पितदेहादिभावा अयश्शलाकापुञ्जवत् असङ्गिनो भूत्वा श्लिष्यन्त इत्याह—**सर्वापदामिति** । **भावाः** चक्षुरादयः । एते भावाः **मनःकल्पनया** पेटिकायां अयश्शलाकापुञ्जवत् एकत्र **श्लिष्यन्ते,** संहता भवन्तीत्यर्थः ॥ ५ ॥ मम तु **भावेष्विति** । स्वातिरिक्तस्फुरणप्रभवं **इदम्** ॥ ६ ॥ दारपुत्रगृहधनादिषु सत्सु दुःखस्यावसरस्ते कथमित्यत आह—**चिन्तेति** ॥ ७ ॥ ऐहिकश्रीरपि मे न हि सुखदेत्याह—**इयमिति** । क्षणिकविभवा **श्रीः** ॥ ८ ॥ दीर्घमायुरवाप्य सुखं तिष्ठेत्यत्र अतिचञ्चलं आयासकारणं भातीत्याह—**आयुरिति** ॥ ९–१० ॥ एतावन्तं कालं देहप्राणसंयोगो भवतीत्यत्र—**युज्यत इति** ॥ ११ ॥ एवं चेत् जीवितं सफलमित्याह—**प्राप्यमिति** । **पराया निर्वृतेः स्थानं** परनिर्वृतिस्थानं ब्रह्मेति प्राप्यविशेषणम् ॥ १२ ॥ चिदस्मीति यन्मनो मननकृत् तज्जीवनं सार्थकमित्याह—**तरवोऽपीति** ॥ १३ ॥ ये न पुनः जायन्ते त एव जाताः तदितरे वृद्धखरोपमा भवेयुरित्याह—**जाता इति** ॥ १४ ॥ स्वाज्ञदेहधारणं अनर्थकारणमित्याह—**भार इति** ॥ १५ ॥

[1] प्राप्य—उ, अ २.

अहंकारस्यनस्तृष्णानामनर्थकरत्वम् :

अहंकारवशादापदहंकाराद्व्याधयः ।
अहंकारवशादीहा नाहंकारात् परो रिपुः ॥ १६ ॥
अहंकारवशाद्यद्यन्मया भुक्तं चराचरम् ।
तत्तत् सर्वमवस्त्वेव वस्त्वहंकाररिक्तता ॥ १७ ॥
इतश्चेतश्च सुव्यग्रं व्यर्थमेवा[1]भिधावति ।
मनो दूरतरं याति ग्रामे [2]कौलेयको यथा ॥ १८ ॥
क्रूरेण जडतां याता[तः] तृष्णाभार्याऽनुगामिना ।
[3]वशः [2]कौलेयकेनैव ब्रह्मन् भुक्तोऽस्मि चेतसा ॥ १९ ॥
अप्यब्धिपानान्महतः सुमेरून्मूलनादपि ।
अपि वह्न्यशनाद्ब्रह्मन् विषमश्चित्तनिग्रहः ॥ २० ॥
चित्तं कारणमर्थानां तस्मिन् सति जगत्त्रयम् ।
तस्मिन् क्षीणे जगत् क्षीणं तच्चिकित्स्यं प्रयत्नतः ॥ २१ ॥
यां यामहं मुनिश्रेष्ठ संश्रयामि गुणश्रियम् ।
तां तां कृन्तति मे तृष्णा तन्त्रीमिव कुमूषिका ॥ २२ ॥
पदं करोत्यलङ्घ्येऽपि [4]तृप्तोऽपि फलमीहते ।
चिरं तिष्ठति नैकत्र तृष्णा चपलमर्कटी ॥ २३ ॥
क्षणमायाति पातालं क्षणं याति नभस्स्थलम् ।
क्षणं भ्रमति दिक्कुञ्जे तृष्णा हृत्पद्मषट्पदी ॥ २४ ॥

[1] नु—उ.
[2] कौशे—अ, अ १.
[3] यशः—क.
[4] तृप्तो—उ १. तृष्णा—अ १.

सर्वसंसारदुःखानां तृष्णैका दीर्घदुःखदा ।
अन्तःपुरस्थमपि या योजयत्यतिसंकटे ॥ २५ ॥
तृष्णाविषूचिकामन्त्रश्चिन्तात्यागो हि स द्विज ॥ २६ ॥

अतदहंभावोऽस्य रिपुः, तद्विपरीतं वस्त्वित्याह—**अहङ्कारेति** ॥१६–१७॥ स्वातिरिक्तमनःप्रचारो व्यर्थ इत्याह—**इत इति** । **कौलेयकः श्वा** ॥ १८ ॥ तृष्णाविशिष्टचेतसा भुक्तोऽस्मीत्याह—**क्रूरेणेति** ॥ १९ ॥ तथा चेचेतोनिग्रहः कार्य इत्यत आह—**अपीति** ॥ २० ॥ उपायतः चेतो निगृहीतव्यमित्याह—**चित्तमिति** । ब्रह्मातिरेकेण चित्तं नास्तीत्युपायेन **तस्मिन् क्षीणे** ॥ २१ ॥ सर्वानर्थकरी स्वातिरिक्तवस्तुगोचरतृष्णा, चिन्तात्यागतः सा शुष्यतीत्याह—**यामिति** ॥ २२–२५ ॥ तृष्णापिशाचोत्सारणमन्त्रः ॥ २६ ॥

देहतदवस्थाकुत्सनम्

स्तोकेनानन्दमायाति स्तोकेनायाति खेदताम् ।
नास्ति देहसमः शोच्यो नीचो गुणविवर्जितः ॥ २७ ॥
कलेवरमहंकारगृहस्थस्य महागृहम् ।
लुठत्वभ्येतु वा स्थैर्यं किमनेन गुरो मम ॥ २८ ॥
पङ्क्ति[1]बद्धेन्द्रियपशुं वल्गत्तृष्णागृहाङ्ग[2]णम् ।
चित्तभृत्यजनाकीर्णं नेष्टं देहगृहं मम ॥ २९ ॥
जिह्वामर्कटिकाक्रान्तवदनद्वारभीषणम् ।
[3]दृष्टदन्तास्थिशकलं नेष्टं देहगृहं मम ॥ ३० ॥

[1] पञ्चे—अ. [2] नम्—अ १, क.
[3] दृष्टम—उ. दृष्टं—अ १.

रक्तमांसमयस्यास्य [1]सबाह्याभ्यन्तरे मुने ।
नाशैकधर्मिणो ब्रूहि कैव कायस्य रम्यता ॥ ३१ ॥
तटित्सु शरदभ्रेषु गन्धर्वनगरेषु च ।
स्थैर्यं येन विनिर्णीतं स विश्वसितु विग्रहे ॥ ३२ ॥
शैशवे गुरुतो भीतिर्मातृतः पितृतस्तथा ।
जनतो ज्येष्ठबालाच्च शैशवं भयमन्दिरम् ॥ ३३ ॥
स्वचित्तबिलसंस्थेन नानाविभ्रमकारिणा ।
बलात् कामपिशाचेन विवशः परिभूयते ॥ ३४ ॥
दासाः [2]पुत्राः स्त्रियश्चैव बान्धवाः सुहृदस्तथा ।
हसन्त्युन्मत्तकमिव नरं वार्धककम्पितम् ॥ ३५ ॥
दैन्यदोषमयी दीर्घा वर्धते वार्धके स्पृहा ।
सर्वापदामेकसखी हृदि दाहप्रदायिनी ॥ ३६ ॥

नानादुःखास्पदशरीरेण किं मे स्यात्? तत्तिष्ठतु गच्छतु वेत्याह—**स्तोकेनेति** ॥ २७–२८ ॥ कदाऽपि न मे बहुदोषास्पदशरीरमिष्टमित्याह—**पङ्कीति** ॥ २९–३२ ॥ तत्प्रविभक्तशैशवाद्यवस्थां कुत्सयति—**शैशव इति** ॥ ३३–३६ ॥

संसारस्य दुःखमयत्वम्

क्वचिद्वा विद्यते यैषा संसारे सुखभावना ।
[3]आखुः स्तम्बमिवासाद्य कालस्तामपि कृन्तति ॥ ३७ ॥

[1] न बा—क. [2] पुत्रास्य—उ. [3] आयु—अ २, उ.

तृणं पांसुं महेन्द्रं च सुवर्णं मेरुसर्षपम् ।
आत्मंभरितया सर्वमात्मसात्कर्तुमुद्यतः ।
कालोऽयं सर्वसंहारी तेनाक्रान्तं जगत्त्रयम् ॥ ३८ ॥

यद्यपि जीवतः संसारे सुखभावना स्यात्, तदा कालः तदायुरपहरति, ततः संसारे सुखलेशोऽपि नास्तीत्याह—क्वचिदिति ॥ ३७ ॥ मृत्युना सर्वं कवळितं भवतीत्याह—तृणमिति ॥ ३८ ॥

स्त्रीजनकुत्सनम्

मांसपाञ्चालिकायास्तु यन्त्रलोलेऽङ्गपञ्जरे ।
स्नाय्वस्थिग्रन्थि[1]शालिन्याः स्त्रियः किमिव शोभनम् ॥ ३९ ॥
त्वङ्मांसरक्तबाष्पाम्बु पृथक्कृत्वा विलोच[क]ने ।
समालोक[च]य रम्यं चेत् किं मुधा परिमुह्यसि ॥ ४० ॥
मेरुशृङ्गतटोल्लासिगङ्गाजलरयोपमा ।
दृष्टा यस्मिन् मुने मुक्ताहारस्योल्लासशालिता ॥ ४१ ॥
श्मशानेषु दिगन्तेषु स एव ललनास्तनः ।
श्वभिरास्वाद्यते काले लघुपिण्डमिवान्धसः ॥ ४२ ॥
केशकज्जलधारिण्यो दुःस्पर्शा लोचनप्रियाः ।
दुष्कृताग्निशिखा नार्यो दहन्ति तृणवन्नरम् ॥ ४३ ॥
ज्वलतामतिदूरेऽपि सरसा अपि नीरसाः ।
स्त्रियो हि नरकाग्नीनामिन्धनं चारु दारुणम् ॥ ४४ ॥

[1] शालिन्यः—उ १.

कामनाम्ना किरातेन विकीर्णा मुग्धचेतसः ।
नार्यो नरविहङ्गानामङ्गबन्धनवागुराः ॥ ४५ ॥
जन्म[1]पल्वलमत्स्यानां चित्तकर्दमचारिणाम् ।
पुंसां दुर्वासनारज्जुर्नारी बडिशपिण्डिका ॥ ४६ ॥
सर्वेषां दोषरत्नानां सुसमुद्रिकयाऽनया ।
दुःखशृङ्खलया नित्यमलमस्तु मम स्त्रिया ॥ ४७ ॥
यस्य स्त्री तस्य भोगेच्छा निःस्त्रीकस्य क्व भोगभूः ।
स्त्रियं त्यक्त्वा जगत् त्यक्तं जगत् त्यक्त्वा सुखी भवेत् ॥४८॥
दिशोऽपि न हि दृश्यन्ते देशोऽप्यन्योपदेशकृत् ।
शैला अपि विशीर्यन्ते शीर्यन्ते तारका अपि ॥ ४९ ॥

सर्वानर्थमूलस्त्रीजनं कुत्सयन् तद्भस्मत्यागिनः परमसुखिनो भवन्तीत्याह—**मांसेति**। **यन्त्वलोलेऽङ्गपञ्जरे** अवाच्यप्रदेशे शरीरे वा ॥ ३९ ॥ हे चेतः एवंरूपां स्त्रियं दृष्ट्वा वृथा मुह्यसीत्याह—**त्वगिति**। स्त्र्यङ्गवैशिष्ट्यं मोहहेतुः तदङ्गविश्लेषो हेयधीहेतुः इत्यर्थः ॥ ४० ॥ किंच—**मेर्विति**। **यस्मिन्** योषित्स्तनमण्डले विराजमानमुक्ताहारस्य **मेरुशृङ्गतटोल्लासिगङ्गाजलरयोपमा दृष्टा** तादृशयोषित्स्तनः कालान्तरे श्वभिः आस्वादनीयो भवति ॥ ४१–४२ ॥ किंच—**केशेति**। केशकज्जलाद्याकलपतो **लोचनप्रियाः** "स्त्रियं नपुंसकं गृध्रं" इति श्रुतितो दुःस्पर्शाः पुरुषकृतदुष्कृताग्निशिखा **नार्यः** पुरुषतृणकूटं **दहन्तीत्यर्थः** ॥ ४३ ॥ नरकाग्नीन्धनराशिः स्त्रीजन इत्याह—**ज्वलतामिति** ॥ ४४ ॥ किंच—**कामेति** ॥ ४५–४६ ॥ पुरुषवीर्यायुःक्षपणहेतुत्वात् एतादृशस्त्रिया मेऽलमिति प्राह—**सर्वेषामिति**। नानादोषरत्ननिक्षेपपेटिकया **कुस्त्रिया** इतो मेऽलं, अस्याः पादशृङ्खलात्वप्रसिद्धेरित्यर्थः ॥ ४७ ॥ विवेकी सर्वानर्थमूलभूतां स्त्रियं त्यक्त्वा स्वश्रेयः सम्पादयेदित्याह—**यस्येति** ॥ ४८ ॥

[1] पल्लव—उ.

स्वातिरिक्तदिगादिविश्वतदध्यक्षादिकलनायाः क्षणभङ्गुरत्वेन यन्नित्यं तदेव संश्रयणीयमित्याह—दिशोऽपीति ॥ ४९–५२ ॥

दिगादीनां क्षणभङ्गुरत्वम्

शुष्यन्त्यपि समुद्राश्च ध्रुवोऽप्यध्रुवजीवनः ।
सिद्धा अपि विनश्यन्ति जीर्यन्ते दानवादयः ॥ ९० ॥
परमेष्ठ्यपि निष्ठावान् हीयते हरिरप्यजः ।
भवोऽप्यभावमायाति जीर्यन्ते वै दिगीश्वराः ॥ ९१ ॥
ब्रह्मा विष्णुश्च रुद्रश्च सर्वा वा भूतजातयः ।
नाशमेवानुधावन्ति सलिलानीव बाडवम् ॥ ९२ ॥
आपदः क्षणमायान्ति क्षणमायान्ति संपदः ।
क्षणं जन्माथ मरणं सर्वं नश्वरमेव तत् ॥ ९३ ॥
अशूरेण हताः शूरा एकेनापि शतं हतम् ।
विषं विषयवैषम्यं न विषं विषमुच्यते ॥ ९४ ॥
जन्मान्तरघ्ना विषया एकजन्महरं विषम् ।
इति मे दोष[1]दावाग्निदग्धे संप्रति चेतसि ॥ ९५ ॥

यदुक्तमनुक्तं वा सर्वम् ॥ ९३ ॥ विषतो विषयाधिक्यमाह—विषमिति ॥ ९४–९५ ॥

वैराग्यात् तत्त्वजिज्ञासा

स्फुर[2]न्ति हि न भोगाशा मृगतृष्णासरःस्वपि ।
अतो मां बोधयाशु त्वं तत्त्वज्ञानेन वै गुरो ॥ ९६ ॥

[1] वार्ता—अ. [2] न्तीह—ड.

नो चेन्मौनं समास्थाय निर्मानो गतमत्सरः ।
भावयन् मनसा विष्णुं लिपिकर्मार्पितोपमः ॥ ५७ ॥

इति महोपनिषत् ॥

यत एवं जातं अतः ॥ ५६ ॥ यद्युपेक्षां करोषि तदा मौनम् । ततः किं करोषीत्यत्र—भावयन्निति ॥ ५७ ॥ इत्यादिशब्दो निदाघपरिदेवनासमाप्त्यर्थः ॥

इति तृतीयोऽध्यायः

चतुर्थोऽध्यायः

मोक्षोपायचतुष्टयम्

निदाघ तव नास्त्यन्यज्ज्ञेयं ज्ञानवतां वर ।
प्रज्ञया त्वं विजानासि ईश्वरानुगृहीतया ।
चित्तमालिन्यसंजातं मार्जयामि भ्रमं मुने ॥ १ ॥
मोक्षद्वारे द्वारपालाश्चत्वारः परिकीर्तिताः ।
शमो विचारः संतोषश्चतुर्थः साधुसङ्गमः ॥ २ ॥
एकं वा सर्वयत्नेन सर्वमुत्सृज्य संश्रयेत् ।
एकस्मिन् वशगे यान्ति चत्वारोऽपि वशं गताः ॥ ३ ॥

एवं स्वातिरिक्तकलनास्थितिमवगम्य परिदेवयन्तं स्वाभिमुखीकरणाय स्तुवन् भगवान् ऋभुः सोपायं परमार्थमुपदिशतीत्याह—निदाघेत्यादिना । अकृतार्थोऽस्मीति चित्तमालिन्यसञ्जातं भ्रमम् ॥ १ ॥ इदानीं मोक्षहेतु-

ज्ञानसाधनशमादिसाधुसङ्गमान्तेष्वेकस्मिन् साधिते तच्चतुष्टयमपि साधितं स्यादित्याह—**मोक्षेति** । **शमः** अन्तर्बाह्येन्द्रियनिग्रहः । कार्यकारणसङ्घाते कोऽहमित्यादिर्**विचारः** । प्राप्ताप्राप्तवस्तुषु अदृष्टखेदाखेदत्वं **सन्तोषः** । तथा च—

अप्राप्तं हि परित्यज्य सम्प्राप्ते समतां गतः ।
अदृष्टखेदाखेदो यः सन्तुष्ट इति कथ्यते ॥

इति श्रुतेः । ब्रह्मविदादिसमायोगः **साधुसङ्गमः** ॥ १–३ ॥

शास्त्रादिद्वारा आत्मावलोकनविधिः

शास्त्रैः सज्जनसंपर्कपूर्वं कैश्च तपोदमैः ।
आदौ संसारमुक्त्यर्थं प्रज्ञामेवाभिवर्धयेत् ॥ ४ ॥
स्वानुभूतेश्च शास्त्रस्य गुरोश्चैवैक[1]वाक्यता ।
यस्याभ्यासेन तेनात्मा सततं चावलोक्यते ॥ ५ ॥

आदौ भवमुक्त्यनुकूलप्रज्ञावृद्धिः कार्येत्याह—**शास्त्रैरिति** ॥ ४ ॥ वेदान्तश्रवणप्रज्ञाऽभिवर्धनतः किं स्यादित्याशङ्क्य श्रुत्याचार्याभिमतस्वानुभूतिरुदेति, तया स्वात्मा अवलोक्यत इत्याह—**स्वानुभूतेरिति** ॥ ५ ॥

समाधिस्वरूपम्

संकल्पाशाऽनुसंधानवर्जनं चेत् प्रतिक्षणम् ।
करोषि तदचित्तत्वं प्राप्त एवासि पावनम् ॥ ६ ॥
चेतसो यदकर्तृत्वं तत् समाधानमीरितम् ।
तदेव केवलीभावं सा शुभा निर्वृतिः परा ॥ ७ ॥

[1] वाक्यतः—अ २, उ.

चेतसा संपरित्यज्य सर्वभावात्मभावनाम् ।
यथा तिष्ठसि तिष्ठ त्वं मूकान्धबधिरोपमः ॥ ८ ॥
सर्वं प्रशान्तमजमेकमनादिमध्यमाभास्वरं स्वदनमात्रमचैत्यचिह्नम् ।
सर्वं प्रशान्तमिति शब्दमयी च दृष्टिर्बोधार्थमेव हि मुधैव तदोमितीदम् ॥ ९ ॥
सर्वं किंचिदिदं दृश्यं दृश्यते [1]चेज्जगद्गतम् ।
चिन्निष्पन्दांशमात्रं तन्नान्यदस्तीति भावय ॥ १० ॥
नित्यप्रबुद्धचित्तस्त्वं कुर्वन् वाऽपि जगत्क्रियाम् ।
आत्मैकत्वं विदित्वा त्वं तिष्ठाक्षुब्धमहाब्धिवत् ॥ ११ ॥
तत्त्वावबोध एवासौ वासनातृणपावकः ।
प्रोक्तः समाधिशब्देन न तु तूष्णीमवस्थितिः ॥ १२ ॥
निरिच्छे संस्थिते रत्ने यथा लोकः प्रवर्तते ।
सत्तामात्रे परे तत्त्वे तथैवायं जग[2]द्गणः ॥ १३ ॥
अतश्चात्मनि कर्तृत्वमकर्तृत्वं च वै मुने ।
निरिच्छत्वादकर्ताऽसौ कर्ता संनिधिमात्रतः ॥ १४ ॥
ते द्वे ब्रह्मणि विन्देते कर्तृताऽकर्तृते मुने ।
यत्रैवैष चमत्कारस्तमाश्रित्य स्थिरो भव ॥ १५ ॥
तस्मान्नित्यमकर्ताऽहमिति भावनयेद्धया ।
परमामृतनाम्नी सा समतैवावशिष्यते ॥ १६ ॥

[1] च ज—क. यज्ज—अ, अ १. चिज्ज—मु. [2] द्गुणः—क, अ २.

स्वात्मावलोकनोपायः क इत्यत आह—**सङ्कल्पेति**। इदं मे स्यात् इदं मा भूत् इति सदा सङ्कल्पक्षयं करोषि चेत् तदधिकरणं **अचित्तत्वं ब्रह्म प्राप्नोषीत्यर्थः** ॥ ६ ॥ स्वातिरिक्तविलापनं करोमीत्यनभिसन्धिरेव स्वरूपमित्याह —**चेतस इति**। सर्वारम्भपरित्यागसिद्धः समाधिः। तत्रत्यसत्ववृत्तिक्षयात् यदवशिष्यते **तदेव केवलीभावं** अशेषविशेषासम्भवसिद्धब्रह्ममात्रम्। **सा शुभा परा निर्वृतिः** परमेयं तृप्तिरित्यर्थः ॥ ७ ॥ तत्रोपायमाचष्टे—**चेतसेति**। देहादिसर्वभावेषु **आत्मात्मीयभावनां** विहाय **मूकान्धबधिरवत्** तूष्णींभावलक्षण-ब्रह्मात्मना **तिष्ठेत्यर्थः** ॥ ८ ॥ कथं पुनः तूष्णीमवस्थातुं शक्यं ब्रह्मणः प्रशान्तमित्यादिशब्दवाच्यत्वादित्यत आह—**सर्वमिति**। स्वातिरिक्तं **सर्वं प्रकर्षेण शान्तं** अपह्नवं गतं, स्वतः परतो वा न जायते इत्यजं, **एकं** निष्प्रतियोगिकैक-रूपत्वात्, **अनादिमध्यं** संभूयादिकलनाविरळं, **आ** समन्तात् **भास्वरं** स्वयं-प्रकाशं, **स्वदनं** ज्ञानं तन्मात्रं चिन्मात्रमित्यर्थः। चैत्यावष्टम्भतः तदधिगमः स्यादित्यत आह—**अचैत्यचिह्नमिति**। स्वसिद्धेः चैत्यापह्नवपूर्वकत्वात्। **सर्वं प्रशान्तंमित्यादि** या **शब्दमयी दृष्टिः** तद्बोधार्थमेव **ओमित्यादिशब्दः**। वस्तुतो नात्र शब्दप्रवृत्तिरस्ति, अशब्दत्वात्, "यतो वाचो निवर्तन्ते" इति श्रुतेः ॥ ९ ॥ स्वातिरेकेण यद्यत् दृश्यते तच्चिन्मात्रादतिरिक्तं नास्तीति भावयेत्याह — **सर्वमिति**। **चिन्निष्पन्दांशमात्रं तत्** चिद्विकल्पनामात्रं, चितो व्यतिरिक्तं **नान्यदस्तीति भावय** ॥ १० ॥ देहेन्द्रियादिव्यापृतस्य चिन्मात्रभावना कुत इत्यत आह—**नित्येति**। **जगत्क्रियां** लोकव्यापृतिम्। तत् स्वातिरिक्तं **नेति आत्मैकत्वं विदित्वा**। निस्तरंगाब्धिवत् आत्ममात्रमिदं सर्वं इति तूष्णीमा-स्वेत्यर्थः ॥ ११ ॥ जडोपि तूष्णीं तिष्ठति, अस्य को विशेषः इत्याशङ्क्य, तूष्णीमवस्थानं निर्विकल्पसमाधिः न तु जडवदवस्थितिरित्याह—**तत्त्वेति** ॥१२॥ व्युत्थितसमाधेः लोकप्रवृत्तिहेतुः क इत्यत आह—**निरिच्छ इति**। यथा **निरिच्छे** अप्रार्थिते नातिदूरे **रत्ने संस्थिते** सति **आलोकः प्रवर्तते**। यद्वा— **निरिच्छे** नितरां प्रार्थनीये **रत्ने** दिनमणौ **संस्थिते** उदिते सति **यथा लोकः** स्वे स्वे स्वकर्मणि **प्रवर्तते**। **तथा सत्तामात्रे परे तत्त्वे** करणग्रामप्रवृत्ति-

निमित्ते सति समाधितो व्युत्थितोऽयं **जगद्गुणः** कर्ताऽहं अकर्ताऽहं इति वा प्रवर्तते ॥ १३ ॥ यत एवं स्वाज्ञादिदृष्टिमाश्रित्य कर्तृत्वाकर्तृत्वे भवतः, **अतश्चात्मनि कर्तृत्वाकर्तृत्वे** विहाय निर्विकल्पात्मना तिष्ठेति वाक्यशेषः। अकर्तृत्वादिकं कथमित्यत्र एवं कर्तव्यमिति **निरिच्छत्वात्** सङ्कल्पाभावात् **अकर्ताऽसौ**। **सन्निधिमात्रतः कर्ता** च भवति, करणग्रामप्रवृत्तिनिमित्तत्वात् ॥ १४ ॥ **ब्रह्मणि** एवं **कर्तृत्वाकर्तृत्वे विन्देते**। **यत्रैष चमत्कारः** कर्तृत्वाकर्तृत्वहेतुः तमात्मानमाश्रित्य **स्थिरो** भवेत्यर्थः ॥ १५ ॥ यस्मात् निष्प्रतियोगिकाकर्तृताधीः स्थिरीभावहेतुः **तस्मात्**। अकर्तृब्रह्माहमिति धिया सत्तास्वरूपेण परमामृतं सन्मात्रं नामाभिधानं यस्याः सा **परमामृतनाम्नी सा समतैवावशिष्यत** इति ॥ १६ ॥

जीवन्मुक्तस्थितिः

निदाघ शृणु [1]सत्त्वस्था जाता भुवि महागुणाः ।
ते नित्यमेवाभ्युदिताः मुदिताः ख इवेन्दवः ॥ १७ ॥
नापदि ग्लानिमायान्ति निशि हेमाम्बुजं यथा ।
नेहन्ते प्रकृतादन्यद्रमन्ते शिष्टवर्त्मनि ॥ १८ ॥
आकृत्यैव विराजन्ते मैत्र्यादिगुणवृत्तिभिः ।
समाः समरसाः सौम्याः सततं साधुवृत्तयः ॥ १९ ॥
अब्धिवद्धृतमर्यादा भवन्ति विशदाशयाः ।
नियतिं न विमुञ्चन्ति महान्तो भास्करा इव ॥ २० ॥

यदृष्ट्या समता अवशिष्यते तेषां जीवन्मुक्तानां स्थितिमाचष्टे— **निदाघेति**। **सत्त्वस्था** निर्विकल्पसमाधिनिष्ठा **जाता भुवि महागुणाः**,

[1] तत्त्व —क.

विद्वच्छ्लाघनीयचरितत्वात्। ते नित्यमेवाभ्युदिता मुदिताः ख इवेन्दवः शरच्चन्द्रवत् प्रसन्नचित्ताः ॥ १७–१८ ॥ मैत्री करुणा मुदितोपेक्षेति जीवन्मुक्तत्वसूचकगुणाश्चत्वारः। सर्वत्र समाः ॥ १९ ॥ पुरस्तादुदितसूर्यो न पश्चादुदेतीतिवत् नियतिम् ॥ २० ॥

विचारस्वरूपम्

कोऽहं कथमिदं चेति संसारमलमाततम्।
प्रविचार्य प्रयत्नेन प्राज्ञेन सह साधुना ॥ २१ ॥
नाकर्मसु नियोक्तव्यं नानार्येण सहावसेत्।
द्रष्टव्यः सर्वसंहर्ता न मृत्युरवहेलया ॥ २२ ॥
शरीरमस्थि मांसं च त्यक्त्वा रक्ताद्यशोभनम्।
भूतमुक्तावली[1]तन्तुं चिन्मात्रमवलोकयेत् ॥ २३ ॥
उपादेयानुपतनं हेयैकान्त[2]विसर्जनम्।
यदेतन्मनसो रूपं [3]तद्ग्राह्यं विद्धि नेतरत् ॥ २४ ॥
गुरुशास्त्रोक्तमार्गेण स्वानुभूत्या च चिद्घने।
ब्रह्मैवाहमिति ज्ञात्वा वीतशोको भवेन्मुनिः ॥ २५ ॥

यत्र निशितासिशतपातनमुत्पलताडनवत्सोढव्यं, अग्निदाहो हिमसेचनमिव, अङ्गारावर्तनं चन्दनचर्चेव, निरवधिनाराच[4]विकिरपातो निदाघविनो[5]दनधारागृहशीकरवर्षणमिव, स्व[6]शिरश्छेदः सुख-

[1] तन्तु—अ, अ १.
[2] विव—अ, अ १.
[3] तद्वद्धं—अ, अ १.
[4] निकिर—उ. निकर—उ १.
[5] दधा—अ, अ १. दनोधा—उ.
[6] शरीरछे—क.

निद्रेव, मूकीकरणमाननमुद्रेव, बाधिर्यं महानुपचय इव, इदं नावहेलनया भवितव्यं, एवं दृढवैराग्याद्बोधो भवति ॥ २५–१ ॥

गुरुवाक्यसमुद्भूतस्वानुभूत्याऽतिशुद्धया ।
यस्याभ्यासेन तेनात्मा सततं चावलोक्यते ॥ २६ ॥
विनष्टदिग्भ्रमस्यापि यथापूर्वं विभाति दिक् ।
तथा विज्ञानविध्वस्तं जगन्नास्तीति भावय ॥ २७ ॥
न धनान्युपकुर्वन्ति न मित्राणि न बान्धवाः ।
न कायक्लेशवैधुर्यं न तीर्थायतनाश्रयः ।
केवलं तन्मनोमात्रजये[1]नासाद्यते पदम् ॥ २८ ॥

जीवन्मुक्तताहेतवे **कोऽहमिति** । गुरुणा साकं विचारणीयं स्वात्मतत्त्वमित्यर्थः ॥ २१ ॥ स्वमनः **नाकर्मसु नियोक्तव्यं, स्वयं नानार्येण सहावसेत्** । धीमता **द्रष्टव्यः** । स्वातिरिक्तं मृतिं नयतीति मृत्युः सर्वोपसंहर्ता साक्षी स्वात्मतया **द्रष्टव्यः नावहेळया** पृथग्दृष्ट्येत्यर्थः ॥ २२ ॥ तद्दर्शनोपायमाह— **शरीरमिति** । **भूतमुक्तावलीतन्तुं** सूत्रात्मानं तद्गतहेयांशापायसिद्धं **चिन्मात्रमवलोकयेत्** ॥ २३ ॥ किं तत् चिन्मात्रमित्यत्र, मनस्तत्कार्यबाह्यमिति जानीहीत्याह—**उपादेयेति** । **यदेतन्मनसो रूपं** तदपह्नवसिद्धं चिन्मात्रं तु **तद्ब्राह्यं विद्धि, नेतरत्** ॥ २४ ॥ तद्भेदनोपायमाह—**गुर्विति** । प्रतीचि **ब्रह्मैवाहमिति ज्ञात्वा** ज्ञानसमकालं **वीतशोको भवेन्मुनिः**, "तरति शोकमात्मवित्" इति श्रुतेः ॥ २५ ॥ एवं बोधोपायो देहनैराश्यमित्याह— **यत्नेति** । निर्विशेषब्रह्मबोधो **भवति** ॥ २५–१ ॥ विज्ञानेन आत्मसाक्षात्कारो भवतीत्याह—**गुर्विति** ॥ २६ ॥ स्वातिरिक्तप्रपञ्चे सति कथमात्मा द्रष्टुं शक्य इत्यत्र सदृष्टान्तमाह—**विनष्टेति** । स्वात्मावरणरूपं **जगत्** ॥ २७ ॥

[1] न व्याप्नु—अ.

विज्ञानातिरिक्तसाधनैरप्यात्मा द्रष्टुं शक्य इत्यत्र विज्ञानातिरिक्तसाधनादेः मनः-कल्पितत्वेन न कार्यकारित्वं, सर्वानर्थकल्पकमानसासम्भवविज्ञाने तु स्वात्मा ज्ञातुं शक्यत इत्याह—**न धनानीति** ॥ २८ ॥

शमस्वरूपं, तत्फलं च

यानि दुःखानि या तृष्णा दुःसहा ये दुराधयः ।
शान्तचेतःसु तत् सर्वं तमोऽर्केष्विव नश्यति ॥ २९ ॥
मातरीव परं [1]यान्ति विषमाणि मृदूनि च ।
विश्वासमिह भूतानि सर्वाणि शमशालिनि ॥ ३० ॥
न रसायनपानेन न [2]लक्ष्म्यालिङ्गितेन च ।
न तथा सुखमाप्नोति शमेनान्तर्यथा जनः ॥ ३१ ॥
श्रुत्वा स्पृष्ट्वा च भुक्त्वा च दृष्ट्वा ज्ञात्वा शुभाशुभम् ।
न हृष्यति [3]ग्लायति यः स शान्त इति कथ्यते ॥ ३२ ॥
तुषारकरबिम्बाच्छं मनो यस्य निराकुलम् ।
मरणोत्सवयुद्धेषु स शान्त इति कथ्यते ॥ ३३ ॥
तपस्विषु बहुज्ञेषु याजकेषु नृपेषु च ।
बलवत्सु गुणाढ्येषु शमवानेव राजते ॥ ३४ ॥

तृष्णादुःखादौ सति कथं तत्पदं आसादितुं शक्यमित्यत्र सूर्ये ध्वान्तवत् संशान्तमानसे तृष्णादुःखादिकं सर्वं विलीयत इत्याह—**यानीति** ॥ २९ ॥ शमवति योगिनि सर्वं समतां भजतीत्याह—**मातरीति** । यथा इह मातरं

[1] याति—क.
[2] लक्ष्या—अ २, उ.
[3] ग्लघयति—अ.

विश्वासपूर्वकं दुष्टादुष्टपुत्रजातं भजति तथा शमवति योगिनि दुष्टादुष्टभूतजातं समभावं भजतीत्यर्थः ॥ ३० ॥ शमादृते सुखहेतुर्नास्तीत्याह—**नेति** ॥ ३१ ॥ शान्तलक्षणमाह—**श्रुत्वेति** । इष्टानिष्टविषयकहर्षामर्षशून्यः शान्त इत्यर्थः ॥ ३२ ॥ किंच—**तुषारेति** ॥ ३३ ॥ तपस्व्यादिषु शमवतः श्रैष्ठ्यमाह—**तपस्विष्विति** ॥ ३४ ॥

सन्तोषः

संतोषामृतपानेन ये शान्तास्तृप्तिमागताः ।
आत्मारामा महात्मानस्ते महापदमागताः ॥ ३५ ॥
अप्राप्तं हि परित्यज्य संप्राप्ते समतां गतः ।
अदृष्टखेदाखेदो यः संतुष्ट इति कथ्यते ॥ ३६ ॥
नाभिनन्दत्यसंप्राप्तं प्राप्तं भुङ्क्ते यथेप्सितम् ।
यः स सौम्यसमाचारः संतुष्ट इति कथ्यते ॥ ३७ ॥
रमते धीर्यथाप्राप्ते साध्वीवान्तःपुराजिरे ।
सा जीवन्मुक्ततोदेति स्वरूपानन्ददायिनी ॥ ३८ ॥

शान्तस्वातिरिक्तविश्रमा एव महत्पदं आत्मधिया भजन्तीत्याह—**सन्तोषेति** ॥ ३५ ॥ ब्रह्ममात्रसन्तुष्टलक्षणमाह—**अप्राप्तमिति** । **अप्राप्तं स्वातिरिक्तभ्रमं, परमार्थदृष्टेरसंभवात्** ॥ ३६–३७ ॥ यथासंप्राप्तवस्तुरतिरेव जीवन्मुक्त्युदयहेतुरित्याह—**रमत इति** । **स्वान्तःपुरे साध्वीव यथाप्राप्ते वस्तुनि यस्य धीः रमते तस्य ब्रह्मानन्दकरी जीवन्मुक्तता उदेति आविर्भवतीत्यर्थः** ॥३८॥

आत्मविश्रान्तस्य कृतकृत्यता

यथाक्षणं यथाशास्त्रं यथादेशं यथासुखम् ।
यथासंभवसत्सङ्गमिमं मोक्षपथक्रमम् ।
तावद्विचारयेत् प्राज्ञो यावद्विश्रान्तमात्मनि ॥ ३९ ॥

तुर्यविश्रान्तियुक्तस्य [1]निवृत्तस्य भवार्णवात् ।
जीवतोऽजीवतश्चैव गृहस्थस्यथवा यतेः ॥ ४० ॥
नाकृतेन कृतेनार्थो न श्रुतिस्मृतिविभ्रमैः ।
निर्मन्धर इवाम्भोधिः स तिष्ठति यथास्थितः ॥ ४१ ॥
सर्वात्मवेदनं शुद्धं यदोदेति तदात्मकम् ।
भाति [2]प्रसृतिदिक्कालबाह्यं चिद्रूपदेहकम् ॥ ४२ ॥
एवामात्मा यथा यत्र समुल्लासमुपागतः ।
तिष्ठत्याशु तथा तत्र तद्रूपश्च विराजते ॥ ४३ ॥

यावद्वस्तुमात्रविश्रान्तिः तावद्यथासंभवं ब्रह्म विचारयेत्, तेन जीवन्मुक्तिर्भवतीत्याह—यथेति । यावत् स्वचित्तं ब्रह्मविश्रान्तं भवति तावत् यथाक्षणमित्यादिना "आ सुप्तेरामृतेः कालं नयेद्वेदान्तचिन्तया" इति श्रुत्यनुरोधेन सदा ब्रह्म विचारयेदित्यर्थः ॥ ३९ ॥ तुर्यपादप्रविभक्तुरीयं ब्रह्म स्वमात्रमिति तन्मात्रविश्रान्तमतेः कृतकृत्यतामाचष्टे—तुर्येति । ब्रह्मादियत्यन्तेषु स्वातिरिक्तापह्नवसिद्धब्रह्मणि यः कोऽपि स्वमात्रधिया विश्राम्यति न तस्य कर्मकरणाकरणतः प्रयोजनमस्ति । अस्यां श्रुतौ स्मृतौ वा एवमभिहितं अन्यत्र अन्यथा अभिहितमिति च नह्यस्य श्रुतिस्मृतिविरोधविभ्रमोऽस्ति, निष्प्रतियोगिकब्रह्ममात्रावगतेः ब्रह्माद्याश्रमचतुष्टयकर्मकरणाकरण-श्रुतिस्मृतिविरोधाविरोधविभ्रमापह्नवपूर्वकत्वात्, विद्वान् स्वमात्रमवशिष्यत इत्यर्थः ॥ ४०–४१ ॥ यदैवं ब्रह्म स्वमात्रमिति जानाति तदाऽयं तन्मात्रमवशिष्यते इत्युक्तार्थमेव पुनः दृढयति—सर्वेति । सर्ववर्जितसर्वात्मवेदनं निष्प्रतियोगिकब्रह्ममात्रज्ञानं यदोदेति तदा तद्रूपो भवतीत्यर्थः ॥ ४२–४३ ॥

[1] निर्वृत—अ २.
[2] प्रसृत—उ १.

दृश्यस्य मिथ्यात्वम्

यदिदं दृश्यते सर्वं जगत् स्थावरजङ्गमम् ।
तत् सुषुप्ताविव स्वप्नः कल्पान्ते प्रविनश्यति ॥ ४४ ॥
ऋतमात्मा परं ब्रह्म सत्यमित्यादिका बुधैः ।
कल्पिता व्यवहारार्थं यस्य संज्ञा महात्मनः ॥ ४५ ॥
यथा कटकशब्दार्थः पृथग्भावो न काञ्चनात् ।
न हेम कटकात्तद्वज्जगच्छब्दार्थता परा ॥ ४६ ॥
तेनेयमिन्द्रजाल[1]श्रीर्जागती प्रवितन्यते ।

दृश्यवस्तुनः सत्त्वे कथं विद्वान् स्वमात्रमवशिष्यते इत्यत आह—यदिदमिति । यथा स्वप्नः स्वापे विलीयते तथेदं जगत् स्वाज्ञदृष्ट्या कल्पान्ते नित्यादिप्रळयचतुष्टये विलीयते, परमार्थदृष्ट्या कल्पान्ते "ब्रह्ममात्रमसन्न हि" इति श्रुतिसिद्धब्रह्ममात्रज्ञानसमकालं विलीयते । अतो विद्वान् ब्रह्ममात्रमवशिष्यत इत्यर्थः ॥ ४४ ॥ ऋतमित्यादिशब्दानुविद्धं ब्रह्मेत्यत आह—ऋतमिति ॥ ४५ ॥ अभिधानं अभिधेयात् भिद्यते इत्यत्र तयोरैकत्वे दृष्टान्तमाचष्टे—यथेति । यथा कटकादयो विचार्यमाणे न हि सुवर्णादतिरिच्यन्ते, तथा अनृतानात्मजगच्छब्दार्थता, अनृतानात्मादिसापेक्ष-ऋतात्मेत्यभिधानजातमपि न ह्यभिधेयब्रह्मातिरिक्तं भवतीत्यर्थः, "पादा मात्रा मात्राश्च पादाः" इत्यभिधानाभिधेययोरैक्यश्रुतेः ॥ ४६ ॥ यदि ब्रह्मातिरेकेण विश्वमस्तीति मन्यसे तदा तत् मिथ्येति निश्चिन्वित्याह—तेनेति । येन हेतुना इयं ब्रह्मातिरिक्ता तेनेत्यर्थः ॥

दृश्यसङ्गासङ्गाभ्यां बन्धमोक्षौ

द्रष्टुर्दृश्यस्य सत्ताऽन्तर्बन्ध इत्यभिधीयते ॥ ४७ ॥

[1] श्रीजा—अ, अ २, उ १.

द्रष्टा दृश्यवशाद्बद्धो दृश्याभावे विमुच्यते ।
जगत्त्वमहमित्यादिसर्गात्मा दृश्यमुच्यते ॥ ४८ ॥
मनसैवेन्द्रजालश्रीर्जागती प्रवितन्यते ।
यावदेतत् संभवति तावन्मोक्षो न विद्यते ॥ ४९ ॥

दृश्यसङ्गासङ्गौ बन्धमोक्षहेतू भवत इत्याह—द्रष्टुरिति । द्रष्टृदृश्ययोः योग एवान्तः सत्ता बन्धः । दृश्यसत्त्वासत्त्वधीः बन्धमोक्षकलनाहेतुरित्यर्थः ॥ ४७ ॥ यदस्तित्वाभिमत्या बध्यते तद्दृश्यस्वरूपं किमित्यत्र—जगत्त्वमिति । त्वमहमित्यादिसर्गात्मा प्रपञ्च एव दृश्यमित्यर्थः, दृश्यस्य मनःकल्पितत्वात् ॥ ४८ ॥ तदेव स्फोरयति—मनसैवेति । यावत् स्वातिरिक्तधीस्तावत् स्वमात्रावस्थानलक्षणमोक्षो नोदेतीत्याह—यावदिति ॥ ४९ ॥

प्रपञ्चस्य मनोमयत्वम्

ब्रह्मणा तन्यते विश्वं मनसैव स्वयंभुवा ।
मनोमयमतो विश्वं यन्नाम परिदृश्यते ॥ ५० ॥
न बाह्ये नापि हृदये सद्रूपं विद्यते मनः ।
यदर्थप्रतिभानं तन्मन इत्यभिधीयते ॥ ५१ ॥
संकल्पनं मनो विद्धि संकल्पस्तन्न विद्यते ।
यत्र संकल्पनं तत्र मनोऽस्तीत्यवगम्यताम् ॥ ५२ ॥
संकल्पमनसी भिन्ने न कदाचन केन चित् ।
संकल्पजाते गलिते स्वरूपमवशिष्यते ॥ ५३ ॥

स्वातिरिक्तप्रपञ्चस्य मनोमयत्वं कथमित्यत आह—ब्रह्मणेति । यत एवं मनोमयम् ॥ ५० ॥ मनसः प्रपञ्चहेतुत्वेन सत्त्वं स्यादित्यत आह—

नेति । किं तत्? यदर्थवत् प्रतिभानम् ॥ ९१ ॥ वस्तुतः सङ्कल्पस्तन्न विद्यते ॥ ९२ ॥ सङ्कल्पनीयस्वातिरिक्तासम्भवप्रबोधतः सङ्कल्पजाते गलिते अपह्नवं गते ॥ ९३ ॥

दृश्यासंभवज्ञाने ब्रह्मताऽवशेषः

अहं त्वं जगदित्यादौ प्रशान्ते दृश्यसंभ्रमे ।
स्यात्तादृशी केवलता दृश्ये सत्तामुपा[1]गते ॥ ९४ ॥

महाप्रलयसंपत्तौ ह्यसत्तां समुपागते ।
अशेषदृश्ये सर्गादौ शान्तमेवावशिष्यते ॥ ९५ ॥

अस्त्यनस्तमितो भास्वानजो देवो निरामयः ।
सर्वदा सर्वकृत् सर्वः परमात्मेत्युदाहृतः ॥ ९६ ॥

यतो वाचो निवर्तन्ते यो मुक्तैरवगम्यते ।
यस्य चात्मादिकाः संज्ञाः कल्पिता न स्वभावतः ॥ ९७ ॥

दृश्यासम्भवप्रबोधसमकालं संशान्तस्वातिरिक्तं ब्रह्मावशिष्यत इत्याह—अहमिति । दृश्ये सत्तामात्रपदवीं गते केवलीभाव उदेति ॥ ९४ ॥ सर्गादावशेषदृश्ये तन्महाप्रळयसम्पत्तौ च ब्रह्मातिरिक्तहेतोरसत्तां असद्भावं समुपागते सदा शान्तस्वातिरिक्तं ब्रह्मैव अवशिष्यते इत्यर्थः ॥ ९५ ॥ यदि शान्तमवशिष्टं तदा किमपि नास्तीति प्रसक्तौ—अस्तीति । स कीदृश इत्यत्र—ईश्वरात्मना सर्वदा सर्वकृत् सर्वः । ईशनीयसापेक्षेश्वरताऽपाये स एव परमात्मेत्युदाहृतः ॥ ९६ ॥ तस्य परमात्मादिसंज्ञा वास्तवीत्यत आह—यत इति । स्वावशेषधिया अवगम्यते ॥ ९७ ॥

[1] सते—अ, अ १.

चिदात्मावस्थितिरूपः समाधिः

चित्ताकाशं चिदाकाशमाकाशं च तृतीयकम् ।
द्वाभ्यां शून्यतरं विद्धि चिदाकाशं महामुने ॥ ५८ ॥
देशाद्देशान्तरप्राप्तौ संविदो मध्यमेव यत् ।
निमेषेण चिदाकाशं तद्विद्धि मुनिपुङ्गव ॥ ५९ ॥
तस्मिन् निरस्तनिःशेषसंकल्पस्थितिमेषि चेत् ।
सर्वात्मकं पदं शान्तं तदा प्राप्नोष्यसंशयः ॥ ६० ॥
[1]उदितौदार्यसौन्दर्यवैराग्यरसगर्भिणी ।
आनन्दस्यन्दिनी यैषा समाधिरभिधीयते ॥ ६१ ॥
दृश्यासंभवबोधेन रागद्वेषादितानवे ।
रतिर्बलोदिता याऽसौ समाधिरभिधीयते ॥ ६२ ॥
दृश्यासंभवबोधो हि ज्ञानं ज्ञेयं [2]चिदात्मकम् ।
तदेव केवलीभावं ततोऽन्यत् सकलं मृषा ॥ ६३ ॥

कीदृशोऽयं स्वभावः इत्यत्र चित्तचैत्यासम्भवज्ञानसिद्धचिदाकाश इत्याह—चित्तेति । चेतोरूपेण आकाशत इति चित्ताकाशं, तद्विकल्पितं भूताकाशादि, तत्कल्पककल्पनापह्नवसिद्धं चिदाकाशं विद्धीत्यर्थः ॥ ५८ ॥ चिदाकाशाधिगमः कथमित्यत्र—देशादिति । मनः पूर्वविषयदेशं विहाय विषयदेशान्तरं यदा गच्छति तदन्तराळावस्था तन्मध्यमुच्यते । तत्र स्वातिरिक्तास्तित्वख्यापकवृत्त्यसम्भवात् तदन्तरावस्थाविभातं चिदाकाशमिति जानीहीत्यर्थः । तथा च—

[1] उदितोदार्य—उ, क. उदितोदर—अ, अ २.
[2] शिवा—उ, उ १.

पूर्वं रूपमपास्य रूपमपरं चित्ते गते स्वेच्छया
तद्रूपद्वयमध्यमेऽस्य मनसो वृत्तेरभावात्तदा ।
सूक्ष्मात् सूक्ष्मधियो विदुर्यमजडानन्दं ततं निष्कळं
दद्यान्मानसवृत्तिशून्यविभवां मुक्तिं स रामोऽद्य मे ॥

इति मुक्तिशतकोक्तेः ॥ ५९ ॥ यदि चिदाकाशदृष्टिर्भवसि तदा तदेव भवसीत्याह —तस्मिन्निति ॥ ६० ॥ तद्रूपावस्थितिः कीदृशीत्यत्र समाधिरित्याह—उदितेति । समाधिः सम्प्रज्ञातसमाधिः, स्वानन्दस्यन्दनवृत्तिविशिष्टत्वात् ॥ ६१ ॥ असंप्रज्ञातस्तु—दृश्येति । स्वातिरिक्तदृश्यासंभवप्रबोधसिद्धब्रह्ममात्रावस्थितिः असंप्रज्ञातसमाधिरित्यर्थः ॥ ६२ ॥ कथं पुनः असंप्रज्ञातसमाधिः ब्रह्म भवतीत्यत्र —स एव परमात्मा, तदतिरिक्तं मृषेत्याह—दृश्येति ॥ ६३ ॥

जगतो मृषात्वम्

मत्त ऐरावतो बद्धः सर्षपीकोणकोटरे ।
मशकेन कृतं युद्धं सिंहौघैरणुकोटरे ॥ ६४ ॥
पद्माक्षे स्थापितो मेरुर्निगीर्णो भृङ्गसूनुना ।
निदाघ विद्धि तादृक् त्वं जगदेतद्भ्रमात्मकम् ॥ ६५ ॥

तदन्यस्य मृषात्वं कुत इत्यत्र—असंभवकल्पनातः तत्सिद्धिर्निरङ्कुशेत्याह —मत्तेति ॥ ६४–६५ ॥

संसारस्य मनोविलासत्वम्

चित्तमेव हि संसारो रागादिक्लेशदूषितम् ।
तदेव तैर्विनिर्मुक्तं भवान्त इति कथ्यते ॥ ६६ ॥
मनसा भाव्यमानो हि देहतां याति देहकः ।
देहवासनया मुक्तो देहधर्मैर्न लिप्यते ॥ ६७ ॥

कल्पं क्षणीकरोत्यन्तः क्षणं नयति कल्पताम् ।
मनोविलासः संसार इति मे निश्चिता मतिः ॥ ६८ ॥
नाविरतो दुश्चरितान्नाशान्तो नासमाहितः ।
नाशान्तमानसो वाऽपि प्रज्ञानेनैनमाप्नुयात् ॥ ६९ ॥

एवं असंभवरचनामूलं चित्तं, तदसंभवज्ञानसिद्धं स्वरूपमित्याह—**चित्तमिति** ॥ ६६ ॥ मनोऽस्ति नास्तीति ज्ञानं बन्धमोक्षमूलमित्याह—**मनसेति** ॥ ६७ ॥ आविद्यकत्वेन मनसः अघटितघटनाघटनपटीयस्त्वमाह—**कल्पमिति** ॥ ६८ ॥ मनस्तत्कार्यव्यापृतोऽपि प्रज्ञानतः पदमाप्नुयादित्यत आह—**नेति** । दुश्चरिताशान्तादिमनस्तमोवृत्तिभिः यदि **नाविरतः** स्वातिरिक्तकलनातो **नाशान्तश्च** भवति तदाऽस्य प्रज्ञानमेव न जायते । यदि प्रमादतो जायेत तदा तदाभासज्ञानमेव भवति । नह्याभासज्ञानं पारमार्थिकसद्वस्तु स्प्रष्टुं पारयति । यत एवं अतः आभासज्ञानी दुश्चरितादिवृत्तिकबळितः सन्नैनं परमात्मानं प्रत्यगभेदेन आप्नुयात् ॥ ६९ ॥

शान्तमनसो ब्रह्मप्राप्तिः

तद्ब्रह्मानन्दमद्वन्द्वं निर्गुणं सत्यचिद्घनम् ।
विदित्वा स्वात्मनो रूपं न बिभेति [1]कदाचन ॥ ७० ॥
परात् परं यन्महतो महान्तं स्वरूपतेजोमयशाश्वतं शिवम् ।
कविं पुराणं पुरुषं सनातनं सर्वेश्वरं सर्वदेवैरुपास्यम् ॥ ७१ ॥
अहं ब्रह्मेति नियतं मोक्षहेतुर्महात्मनाम् ।
द्वे पदे बन्धमोक्षाय निर्ममेति ममेति च ।
ममेति बध्यते जन्तुर्निर्ममेति विमुच्यते ॥ ७२ ॥

[1] कुतश्चन—उ, उ १.

तद्विपरीतो निर्भयं ब्रह्म आमुयादित्याह—**तदिति**। यत् नित्यतृप्त्यात्मकं **तत् ब्रह्मानन्दरूपं**, सुखदुःखादिद्वन्द्वाभावात् **अद्वन्द्वं**, तमआदिगुणत्रयासंभवात् **निर्गुणं**, अनृतजडप्रपञ्चाभावात् **सत्यचिद्घनं**, **स्वात्मनो रूपं** ब्रह्माहमस्मीति **विदित्वा** वेदनसमकालं **कदाचन** स्वातिरिक्तास्तित्वभ्रमतो **न बिभेति**। न हि स्वमात्रे निष्प्रतियोगिके स्वातिरिक्तप्रसक्तिरस्ति, "ब्रह्मव्यतिरिक्तं न किंचिदस्ति," "ब्रह्ममात्रमसन्नहि," इति श्रुतेः ॥ ७ ॥ यद्विदित्वा तदेव भवति तत्स्वरूपं किं? इत्यत आह—**परात्परमिति**। **परात्परमित्यादिविशेषणविशिष्टं ब्रह्माहमस्मीति** ज्ञानतः तदेव भवतीति वाक्यशेषः ॥ ७१ ॥ ब्रह्ममात्रज्ञानं तन्मात्रावशेषहेतुः, ममेति निर्ममेति ज्ञानं तु सापेक्षबन्धमोक्षहेतुरित्याह—**अहमिति** ॥ ७२ ॥

जीवेशवादत्यागपूर्वकब्रह्मविचारस्य कर्तव्यता

जीवेश्वरादिरूपेण चेतनाचेतनात्मकम् ।
ईक्षणादिप्रवेशान्ता सृष्टिरीशेन कल्पिता ।
जाग्रदादिविमोक्षान्तः संसारो जीवकल्पितः ॥ ७३ ॥
त्रिणाचिकादियोगान्ता ईश्वरभ्रान्तिमाश्रिताः ।
लोकायतादिसांख्यान्ता जीव[1]विभ्रान्तिमाश्रिताः ॥ ७४ ॥
तस्मान्मुमुक्षुभिर्नैव मतिर्जीवेशवादयोः ।
कार्या किंतु ब्रह्मतत्त्वं निश्चलेन विचार्यताम् ॥ ७५ ॥

स्वाज्ञादिदृष्टिमोहे सत्यसति ब्रह्म निष्प्रतियोगिकं स्वमात्रमवशिष्यत इत्यत्र न विवादः, तथाऽप्यत्र स्वाज्ञाळिः तदेव ब्रह्म जीवेश्वरजगद्विशिष्टं पश्यतीत्याह—**जीवेति**। **चेतनाचेतनात्मकं** स्वाज्ञः पश्यति। तत्र ईशजीवसृष्टिः केत्यत

[1] विभ्रा—अ १, अ २, क.

आह—ईक्षणादीति। "स ऐक्षत लोकान्नु सृजै" इत्यादि "स एतमेव सीमानं विदार्यैतया द्वारा प्रापद्यत" इति श्रुत्यनुरोधेन ईक्षणादिप्रवेशान्ता। इयमीशसृष्टिः इयं जीवसृष्टिः इति विभागशः कल्पको जीव एव नेश्वरः, तस्य एवं कल्पनाहेतुत्वाज्ञानाभावात्। जीवस्य तत्सत्त्वात् अयमेव कल्पक इत्यर्थः॥ ७३॥ अत्र केचन भ्रान्ताः स्वातिरेकेण शिवजीवौ पश्यन्तीत्याह—त्रिणाचिकेति। त्रिःकृत्वो नाचिकेतो यैः कृतः ते त्रिणाचिकेताः कर्मिणो योगिनश्च। आदिशब्देन सौरशाक्तवैष्णवगाणपत्यशैवादिद्वैतिनो विशिष्टाद्वैतिनश्च गृह्यन्ते। ते स्वातिरेकेण ईश्वरोऽस्तीति ईश्वरभ्रान्त्यारूढा भवन्ति। लोकायतादिसाङ्ख्यपर्यन्ता वादिनो जीवविभ्रान्तिमाश्रिता भवन्ति॥ ७४॥ यस्मादेते भ्रान्तग्रहाः तस्मात्। किंतु सर्वापह्नवसिद्धं ब्रह्म स्वमात्रमिति ब्रह्मतत्त्वम्॥ ७५॥

निर्विशेषब्रह्मज्ञानमहिमा

अविशेषेण सर्वं तु यः पश्यति चिदन्वयात्।
स एव साक्षाद्विज्ञानी स शिवः स हरिर्विधिः॥ ७६॥
दुर्लभो विषयत्यागो दुर्लभं तत्त्वदर्शनम्।
दुर्लभा सहजावस्था सद्गुरोः करुणां विना॥ ७७॥
उत्पन्नशक्तिबोधस्य त्यक्तनिःशेषकर्मणः।
योगिनः सहजावस्था स्वयमेवोपजायते॥ ७८॥
यदा ह्येवैष एतस्मिन्नल्पमप्यन्तरं नरः।
विजानाति तदा तस्य भयं स्यान्नात्र संशयः॥ ७९॥
सर्वगं सच्चिदानन्दं ज्ञानचक्षुर्निरीक्षते।
अज्ञानचक्षुर्नेक्षेत भास्वन्तं भानुमन्धवत्॥ ८०॥

प्रज्ञानमेव तद्ब्रह्म सत्यप्रज्ञानलक्षणम् ।
एवं ब्रह्मपरिज्ञानादेव मर्त्योऽमृतो भवेत् ॥ ८१ ॥

भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः ।
क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे ॥ ८२ ॥

एवं निर्विशेषज्ञानी तदेव भवतीत्याह—**अविशेषेणेति** । चितः सर्वानुस्यूतत्वेन **सर्वं** चिन्मात्रमेवेति **यः पश्यति स एव** ॥ ७६ ॥ गुरुप्रसादं विना स्वातिरिक्तमतित्यागः स्वमात्रज्ञानं स्वावशेषतया स्थितिरपि दुर्लभेत्याह—**दुर्लभ इति** ॥ ७७ ॥ कस्येयं सहजावस्था जायते इत्यत आह—**उत्पन्नेति** । सुषुम्नां प्रविष्टकुण्डलिनीशक्तेः यतेः स्वरूपावस्थितिः **स्वयमेवोपजायते** ॥ ७८ ॥ अत्रापि किंचित् सविशेषं पश्यतो भयं भवतीत्याह—**यदेति** ॥ ७९ ॥ यदि निर्भयं ब्रह्म सर्वगं तदा सर्वैरपि द्रष्टुं शक्यमित्यत आह—**सर्वगमिति** ॥ ८० ॥ यादृशं वस्तु जानाति तादृगेव अयं भवतीत्याह—**प्रज्ञानमिति** ॥ ८१ ॥ ग्रन्थिसंशयकर्मसु सत्सु तद्वेदनं तदाप्तिः कथमित्यत आह—**भिद्यत इति** । इयं श्रुतिः मुण्डकोपनिषदि व्याख्याता ॥ ८२ ॥

संविन्मात्रपरत्वविधिः

अनात्मतां परित्यज्य निर्विकारो जगत्स्थितौ ।
एकनिष्ठतयाऽन्तःस्थसंविन्मात्रपरो भव ॥ ८३ ॥

मरुभूमौ जलं सर्वं मरुभूमात्रमेव तत् ।
जगत्त्वयमिदं सर्वं चिन्मात्रं स्वविचारतः ॥ ८४ ॥

लक्ष्यालक्ष्यगतिं त्यक्त्वा यस्तिष्ठेत् केवलात्मना ।
शिव एव स्वयं साक्षादयं ब्रह्मविदुत्तमः ॥ ८५ ॥

अधिष्ठानमनौपम्यमवाङ्मनसगोचरम् ।
नित्यं विभुं सर्वगतं सुसूक्ष्मं च तदव्ययम् ॥ ८६ ॥
सर्वशक्ते[1]र्महेशस्य विलासो हि मनो जगत् ।
संयमासंयमाभ्यां च संसारं शान्तिमन्वगात् ॥ ८७ ॥

यदि ज्ञानात् ग्रन्थिसंशयकर्माणि क्षीयन्ते स्वाज्ञदृष्ट्या सति जगति कथं ब्रह्ममात्रावस्थितिरित्यत आह—**अनात्मतामिति** । स्वाज्ञदृष्टिप्रसक्तां **अनात्मताम्** । **जगत्स्थतौ**, स्वज्ञदृष्ट्या लयं गते वा ॥ ८३ ॥ संविन्मात्रपरत्वं कुतः संभवति जगत्लयभानादित्यत्र—विचारतो जगत्लयं चिन्मात्रमेवेति सदृष्टान्तमुपपादयति—**मर्विति** ॥ ८४ ॥ यदि चिन्मात्रमिति लक्षितं तदा लक्ष्यस्य लक्षणसापेक्षतया सविशेषज्ञानफलभागयं भवतीत्यत आह—**लक्ष्येति** । लक्षणया बोधितं **लक्ष्यं**, **अलक्ष्यं** वाच्यं, तयोः **गतिं** त्यक्त्वेत्यर्थः ॥ ८५ ॥ स्वातिरिक्तलक्ष्याद्यपवादस्य **अधिष्ठानम्** । अधिष्ठेयसापेक्षाधिष्ठानादिविशेषणगत-विशेषापायसिद्धनिर्विशेषब्रह्मवित् भवतीति पूर्वेणान्वयः ॥ ८६ ॥ संसारिणो वेदनं तत्फलं वा कुत इत्यत आह—**सर्वेति** । यतः स्वविकल्पितमनस्तत्कार्यं **जगत्** स्वातिरेकेण अस्ति नास्तीति **संयमासंयमाभ्यां संसारः** तच्छान्तिः भवति अतो ब्रह्मविदसंसारी ज्ञानफलमश्नुत इत्यर्थः ॥ ८७ ॥

मनःप्रशमनेन ब्रह्मसम्पत्तिः

मनोव्याधेश्चिकित्साऽर्थमुपायं कथयामि ते ।
[2]यद्यत् स्वाभिमतं वस्तु तत्त्यजन् मोक्षमश्नुते ॥ ८८ ॥
स्वायत्तमेकान्तहितं स्वेप्सितत्यागवेदनम् ।
यस्य दुष्करतां यातं धिक् तं पुरुषकीटकम् ॥ ८९ ॥

[1] रनन्तस्य—उ, उ १. [2] यत्त—अ, अ १, अ २, क.

स्वपौरुषैकसाध्येन स्वेप्सितत्यागरूपिणा ।
मनःप्रशममात्रेण विना नास्ति शुभा गतिः ॥ ९० ॥
असंकल्पनशस्त्रेण छिन्नं चित्तमिदं यदा ।
सर्वं सर्वगतं शान्तं ब्रह्म संपद्यते तदा ॥ ९१ ॥
भवभावनया मुक्तो युक्तः परमया धिया ।
धारयात्मानमव्यग्रो ग्रस्तचित्तं चितः पदम् ॥ ९२ ॥
परं पौरुषमाश्रित्य नीत्वा चित्तमचित्तताम् ।
ध्यानतो हृदयाकाशे चिति चिच्चक्रधारया ।
मनो मारय निःशङ्कं त्वां प्रबध्नन्ति नारयः ॥ ९३ ॥
अयं सोऽहमिदं तन्मे एतावन्मात्रकं मनः ।
तदभावनमात्रेण दात्रेणेव विलूयते ॥ ९४ ॥
छिन्नाभ्रमण्डलं व्योम्नि यथा शरदि धूयते ।
वातेनाकल्पकेनैव तथाऽन्तर्धूयते मनः ॥ ९५ ॥
कल्पान्तपवना वान्तु यान्तु चैकत्वमर्णवाः ।
तपन्तु द्वादशादित्या नास्ति निर्मनसः क्षतिः ॥ ९६ ॥
असंकल्पनमात्रैकसाध्ये सकलसिद्धिदे ।
असंकल्पातिसाम्राज्ये तिष्ठावष्टब्धतत्पदः ॥ ९७ ॥
न हि चञ्चलताहीनं मनः क्वचन दृश्यते ।
चञ्चलत्वं मनोधर्मो वह्नेर्धर्मो यथोष्णता ॥ ९८ ॥
एषा हि चञ्चला स्पन्दशक्तिश्चित्तत्वसंस्थिता ।
तां विद्धि मानसीं शक्तिं जगदाडम्बरात्मिकाम् ॥ ९९ ॥

यत्तु चञ्चलताहीनं तन्मनोऽमृतमुच्यते ।
तदेव च तपः शास्त्रसिद्धान्ते मोक्ष उच्यते ॥ १०० ॥
तस्य चञ्चलता यैषा त्वविद्या वासनात्मिका ।
वासनाऽपरनाम्नीं तां विचारेण विनाशय ॥ १०१ ॥
पौरुषेण प्रयत्नेन यस्मिन्नेव पदे मनः ।
योज्यते तत् पदं प्राप्य निर्विकल्पो भवानघ ॥ १०२ ॥
अतः पौरुषमाश्रित्य चित्तमाक्रम्य चेतसा ।
विशोकं पदमालम्ब्य निरातङ्कः स्थिरो भव ॥ १०३ ॥
मन एव समर्थं हि मनसो दृढनिग्रहे ।
अराज्ञा कः समर्थः स्याद्राज्ञो निग्रहकर्मणि ॥ १०४ ॥
तृष्णाग्राहगृहीतानां संसारार्णवपातिनाम् ।
आवर्तैरुह्यमानानां दूरं स्वमन एव नौः ॥ १०५ ॥
मनसैव मनश्छित्त्वा पाशं परमबन्धनम् ।
भवादुत्तारयात्मानं नासावन्येन तार्यते ॥ १०६ ॥

मनस्सत्त्वपक्षमवष्टभ्य तत्त्यागोपायं तत्फलं चाह—**मन इति**। स्वातिरिक्ततया यद्यत् स्वाभिमतं तत्तत्त्यागतः तन्मोक्षमश्नुत इत्यर्थः ॥ ८८ ॥ एवं कर्तुं अशक्यं मन्यमानो यस्तत्रोपरमते तज्जन्म धिगिति तं कुत्सयति—**स्वायत्तमिति**। **स्वायत्तं** स्वेतरसाधनानपेक्षम् ॥ ८९ ॥ स्वेप्सितत्यागं विना उपायान्तरेणापि ज्ञानफलमाप्तुं शक्यमित्यत आह—**स्वेति** ॥ ९० ॥ तदाप्युपायः क इत्यत आह—**असङ्कल्पनेति** ॥ ९१ ॥ भवभावनावतः तत्सिद्धिः कुत इत्यत आह—**भवेति**। येन चिद्वत् अवभातं चित्तं ग्रस्तं तं **ग्रस्तचित्तं आत्मानं** उक्तसाधनसम्पन्नो

धारयेत्यर्थः ॥ ९२ ॥ स्वातिरेकेण मनःप्रसक्तौ यदि प्रयत्नात्तद्विलापनं करोषि तदा निस्सपत्नं ज्ञानफलं प्राप्नोषीत्याह—**परमिति** ॥ ९३ ॥ मनसोऽन्तर्बाह्यवृत्तिरूपेण भावनामात्रत्वात् तदभावनशस्त्रेण तच्छिद्यत इत्याह—**तदिति** ॥९४॥ किंच—**छिन्नेति** । पराक्पुरोवाततो मनोमेघ उदेति, पराक्कल्पनाविरळनैर्मल्यप्रत्यग्वातेन मनस्तत्कार्यमेघो विलीयत इत्यर्थः ॥ ९५ ॥ यन्मनो म्रियते न तस्य केनापि क्षतिरस्तीत्याह—**कल्पान्तेति** ॥ ९६ ॥ यदि निर्मनस्त्वमिच्छसि तदा तत्पदलक्ष्यमवष्टभ्य निर्विकल्पात्मना तिष्ठेत्याह—**असङ्कल्पनेति** ॥ ९७ ॥ शोधितपारदवच्चञ्चलं मनो यदा न चलति तदा अमनस्कं ब्रह्म भवतीत्याह—**न हीति** ॥ ९८ ॥ **चित्तत्त्वसंस्थिता** चिति विकल्पितेत्यर्थः । **जगदाडम्बरात्मिकां**, मन एत जगदित्यर्थः ॥ ९९ ॥ निष्पन्दवायुः आकाशवत् निष्पन्दं मनो ब्रह्मेत्यर्थः ॥ १०० ॥ मनश्चञ्चलत्वं विचारेण शाम्यतीत्याह—**तस्येति** ॥ १०१ ॥ यत्नतो मनोऽवसानपदमवलम्ब्य निर्विकल्पो भवेत्याह—**पौरुषेणेति** ॥ १०२ ॥ यतः प्रयत्नतो मनोविलापनं निर्विकल्पहेतुः **अतः चित्तमाक्रम्य चेतसा** तमोरजोवृत्तिमच्चित्तं सत्त्ववृत्तिमच्चेतसा कबळीकृत्वेत्यर्थः ॥ १०३ ॥ कथं पुनः चित्तं चेतसाऽऽक्रामितुं शक्यत इत्यत्र सदृष्टान्तमुत्तरमाह—**मन इति** ॥ १०४ ॥ तृष्णाऽऽदितमोवृत्तिग्रस्तानां सत्त्ववृत्तिः नोदेति, सत्कर्मोपासनाश्रवणादिसाधनसञ्जातसत्त्ववृत्तिमन्मनसा स्वात्मानं उद्धरेदित्याह — **तृष्णेति** ॥ १०५–१०६ ॥

वासनापरिहारेण मोक्षसिद्धिः

[1]या योदेति मनोनाम्नी वासना वासितान्तरा ।
तां तां परिहरेत् प्राज्ञस्ततोऽविद्याक्षयो भवेत् ॥ १०७ ॥
भोगैकवासनां त्यक्त्वा त्यज त्वं भेदवासनाम् ।
भावाभावौ ततस्त्यक्त्वा निर्विकल्पः [2]सुखी भव ॥ १०८ ॥

[1] ययो—उ, उ १. [2] स्थिरो—अ, अ १.

एष एव मनोनाशस्त्वविद्यानाश एव च ।
[1]यत्तत् संवेद्यते किंचित् तत्रास्थापरिवर्जनम् ।
अनास्थैव हि निर्वाणं दुःखमास्थापरिग्रहः ॥ १०९ ॥
अविद्या विद्यमानैव नष्टप्रज्ञेषु दृश्यते ।
नाम्नैवाङ्गीकृताकारा सम्यक्प्रज्ञस्य सा कुतः ॥ ११० ॥
तावत् संसारभृगुषु स्वात्मना सह देहिनम् ।
आन्दोलयति नीरन्ध्रदुःखकण्टक[2]शालिषु ॥ १११ ॥
अविद्या यावदस्या[3]स्तु नोत्पन्ना क्षयकारिणी ।
स्वयमात्मावलोकेच्छा मोहसंक्षयकारिणी ॥ ११२ ॥
अस्याः परं प्रपश्यन्त्याः स्वात्मनाशः प्रजायते ।
[4]दृष्टे सर्वगते बोधे स्वयं ह्येषा विलीयते ॥ ११३ ॥
इच्छामात्रमविद्येयं तन्नाशो मोक्ष उच्यते ।
स चासंकल्पमात्रेण सिद्धो भवति वै मुने ॥ ११४ ॥
मनागपि मनोव्योम्नि वासनारजनीक्षये ।
कालिका तनुतामेति चिदादित्यावलोकनात् ॥ ११५ ॥

यद्यद्वस्तुविषयकवासना उदेति तां तां उन्मूल्य कृतकृत्यो भवेत्याह—यायेति । स्वातिरेकेण वासना अस्ति नास्तीति तद्भावाभावौ ॥१०७–१०८॥ वासनानाशतोऽविद्याद्वयमपि नश्यतीत्याह—एष इति । स्वातिरिक्तविषयकास्थाऽनास्थे बन्धमोक्षहेतू स्याताम्मित्यत आह—यदिति ॥ १०९ ॥ स्वाविद्या स्वाज्ञस्वज्ञदृष्टेः सदसत्पदं भजतीत्याह—अविद्येति ।

[1] यद्य—उ, उ १. [2] शाखिषु—अ २. [3] स्ति—अ. [4] दृष्टेः—उ.

अविद्यमानैवाविद्या वस्तुतत्त्वविचारिणाम् ।
अविचारेण मूढानां वज्रादपि दृढायते ॥

इति स्मृतेः ॥ ११० ॥ यावद्यावदविद्या तनुतामेति तावत्तावद्विद्या उत्कर्षतीत्याह—**तावदिति** ॥ १११ ॥ ब्रह्मविद्या उदेतीत्यर्थः ॥ ११२ ॥ विद्याऽपि स्वफलसाक्षात्कारतो विलीयते इत्याह—**अस्या इति** । **दृष्टे सर्वगते बोधे** परमात्मनि विद्याऽपि **स्वयं ह्येषा विलीयते** ॥ ११३ ॥ स्वाविद्या बन्धहेतुः, तन्नाशो मोक्षहेतुः इत्याह—इच्छेति । स्वाविद्यालयाधारस्य स्वाधेयसापेक्षाधारताऽपाये निष्प्रतियोगिकब्रह्ममात्रत्वात् तत्सिद्धिः केनेत्यत आह—**स चेति** । निःशेषसङ्कल्पापाये परमात्मा आविर्भवतीत्यर्थः ॥ ११४ ॥ स्वाज्ञानध्वान्ते सति स्वात्मार्कोदयः कुत इत्यत आह—**मनागपीति** । **काळिका** स्वाज्ञानध्वान्तरूपिणी स्वोद्भूतिहेतुवासनारात्रिक्षयतः **तनुतामेति** ॥ ११५ ॥

चैत्यासंभवज्ञानेन चित्तत्वसाक्षात्कारः

चैत्यानुपातरहितं सामान्येन च सर्वगम् ।
यच्चित्तत्त्वमनाख्येयं स आत्मा परमेश्वरः ॥ ११६ ॥
सर्वं च खल्विदं ब्रह्म नित्यचिद्घन[1]मक्षतम् ।
कल्पनाऽन्या मनोनाम्नी विद्यते न हि काचन ॥ ११७ ॥
न जायते न म्रियते किंचिदत्र जगत्त्रये ।
न च भावविकाराणां सत्ता क्वचन विद्यते ॥ ११८ ॥
केवलं केवलाभासं सर्वसामान्यमक्षतम् ।
चैत्यानुपातरहितं चिन्मात्रमिह विद्यते ॥ ११९ ॥
तस्मिन् नित्ये तते शुद्धे चिन्मात्रे निरुपद्रवे ।
शान्ते शमसमाभोगे निर्विकारे चिदात्मनि ॥ १२० ॥

[1] मक्षरं—क.

यैषा स्वभावाभिमतं स्वयं संकल्प्य धावति ।
चिच्चैत्यं स्वयमम्लानं मननान्मन उच्यते ॥ १२१

सति चैत्ये चित्तत्त्वानुभवः कथमित्यत्र चैत्यासम्भवप्रबोधतः चित्तत्व-साक्षात्कारो भवतीत्याह—**चैत्येति** । अयमहमस्मीति साक्षात्कृतो भवतीत्यर्थः ॥ ११६ ॥ चिन्मात्रविकल्पितं सर्वं अतद्विकल्पक्षयतः चिन्मात्रमेवेत्याह—**सर्वमिति** । तत्र या स्वातिरेकेण विकल्पिता तादृशकल्पनाऽन्या ॥ ११७ ॥ स्वातिरेकेण **न जायते** ॥ ११८ ॥ **चिन्मात्रमिह** निष्प्रतियोगिकं **विद्यते** ॥ ११९ ॥ तत्र तदतिरिक्तमस्तीति मननान्मन उत्थितं भवतीत्याह—**तस्मिन्निति** ॥ १२० ॥ **यैषा स्वभावाभिमतं** स्वातिरिक्तमस्तीत्येवंरूपम् । चिति विकल्पितं **चिच्चैत्यम्** । सत्यमिति **मननात्** ॥ १२१ ॥

सङ्कल्पस्य बन्धमोक्षमूलत्वम्

अतः संकल्पसिद्धेयं संकल्पेनैव नश्यति ।
नाहं ब्रह्मेति संकल्पात् सुदृढाद्बध्यते मनः ।
सर्वं ब्रह्मेति संकल्पात् सुदृढान्मुच्यते मनः ॥ १२२ ॥
कृशोऽहं दुःखबद्धोऽहं हस्तपादादिमानहम् ।
इति भावानुरूपेण व्यवहारेण बध्यते ॥ १२३ ॥
नाहं दुःखी न मे देहो बन्धः को[1]ऽस्यात्मनि स्थितः ।
इति भावानुरूपेण व्यवहारेण मुच्यते ॥ १२४ ॥
नाहं मांसं न चास्थीनि देहादन्यः परोऽस्म्यहम् ।
इति निश्चितवानन्तः क्षीणाविद्यो विमुच्यते ॥ १२५ ॥

[1] वाऽऽत्मनि—उ, उ १.

मनसः स्वोत्पत्तिप्रळयमूलं सङ्कल्प एवेत्याह—**अत इति** । यतो माया स्वातिरिक्तसङ्कल्पभूः अतः । नाहं ब्रह्म, ब्रह्माहं, इति सङ्कल्पतो मनो बध्यते मुच्यते चेत्याह—**नाहमिति** ॥ १२२ ॥ कथं पुनः सङ्कल्पतो बध्यते मुच्यते इत्यत्र—**क्रशोऽहमिति** ॥ १२३–१२९ ॥

अनात्माभिमानत्यागविधिः

कल्पितेयमविद्येयमनात्मन्यात्मभावनात् ।
परं पौरुषमाश्रित्य यत्नात् परमया धिया ।
भोगेच्छां दूरतस्त्यक्त्वा निर्विकल्पः सुखी भव ॥ १२६ ॥

मम पुत्रो मम धनमहं सोऽयमिदं मम ।
इतीयमिन्द्रजालेन वासनैव विवल्गति ॥ १२७ ॥

मा भवाज्ञो भव ज्ञस्त्वं जहि संसारभावनाम् ।
अनात्मन्यात्मभावेन किमज्ञ इव रोदिषि ॥ १२८ ॥

कस्तवायं जडो मूको देहो मांसमयोऽशुचिः ।
यदर्थं सुखदुःखाभ्यामवशः परिभूयसे ॥ १२९ ॥

अहो नु चित्रं यत् सत्यं ब्रह्म तद्विस्मृतं नृणाम् ।
तिष्ठतस्तव कार्येषु माऽस्तु रागानुरञ्जनम् ॥ १३० ॥

अहो नु चित्रं पद्मोत्थैर्बद्धास्तन्तुभिरद्रयः ।
अविद्यमाना याऽविद्या तया विश्वं खिलीकृतम् ।
इदं तद्वज्रतां यातं तृणमात्रं जगत्त्रयम् ॥ १३१ ॥

इत्युपनिषत् ॥

अतस्मिन् तद्भावनेयं माया विकल्पिता, यन्नतः तद्विकल्पसर्वस्वमुन्मूल्य निर्विकल्पो भवेत्याह—**कल्पितेति** ॥ १२६ ॥ विकल्पहेतुः केत्यत्र—नानावस्तुगतवासना, तामवष्टभ्य स्वविकल्पितस्वपरे स्वात्मात्मीयाभिमत्या किं मुह्यसि, तेन त्वं परिभवं प्राप्नोषीत्याह—**ममेति**। **वासनैव विवल्गति, नेतरत्** विजृम्भते वस्तुनो निर्विकल्पत्वात् ॥ १२७ ॥ तदवष्टभ्य **मा भूवाज्ञः** ॥ १२८–१२९ ॥ अहोऽयं लोकः सम्भवार्थमनादृत्य असम्भवार्थे मुह्यति, न त्वं तत्परमो भवेत्याह—**अहो इति**। **नृणां मध्ये तिष्ठतस्तव** ॥ १३० ॥ स्वातिरिक्तकलनाया असम्भवार्थत्वं कुत इत्यत्र सदृष्टान्तमाह—**अहो इति**। **खिलीकृतं** नानात्वं प्रापितमित्यर्थः ॥ १३१ ॥

इति चतुर्थोऽध्यायः

पञ्चमाध्यायः

अज्ञानज्ञानयोः भूमिकासंख्या

[1]अथापरं प्रवक्ष्यामि शृणु तात यथातथम्।
अज्ञानभूः सप्तपदा ज्ञभूः सप्तपदैव हि ॥ १ ॥
पदान्तराण्यसंख्यानि प्रभवन्त्यन्य[2]थैतयोः।

नाहं ब्रह्मेति सङ्कल्पनं अज्ञानं, सर्वं ब्रह्मेति सङ्कल्पनं ज्ञानमित्युक्तम्। तत्राज्ञानभूः ज्ञानभूश्च कतिविधेत्याशङ्कमानमालक्ष्य तदियत्ताप्रपञ्चनाय पञ्चमाध्यायः आरभ्यते—**अथेति** ॥ १ ॥ अज्ञानज्ञानप्रविभक्तसप्तविधभूम्योः स्वाज्ञस्वज्ञदृष्ट्यनुरोधेन पदानि बहुधा भिद्यन्त इत्याह—**पदान्तराणीति**।

[1] ऋभुः। अथा—अ १, अ २, क. [2] दै—क.

स्वरूपस्थितिर्मोक्षः, स्वरूपभ्रंशो बन्धः

स्वरूपावस्थितिर्मुक्तिस्तद्भ्रंशोऽहंत्ववेदनम् ॥ २ ॥
शुद्धसन्मात्रसंवित्तेः स्वरूपान्न चलन्ति ये ।
रागद्वेषादयो भावास्तेषां नाज्ञत्वसंभवाः ॥ ३ ॥
यः स्वरूपपरिभ्रंशश्चैत्यार्थे चितिमज्जनम् ।
एतस्मादपरो मोहो न भूतो न भविष्यति ॥ ४ ॥
अर्थादर्थान्तरं [1]चित्ते याति मध्ये तु या स्थितिः ।
सा ध्वस्तमननाकारा स्वरूपस्थितिरुच्यते ॥ ५ ॥
संशान्तसर्वसंकल्पा या शिलावदवस्थितिः ।
जाग्रन्निद्राविनिर्मुक्ता सा स्वरूपस्थितिः परा ॥ ६ ॥
[2]अहन्तांऽशे क्षते शान्ते भेद[3]निष्पन्दचित्तता ।
अजडा या [4]प्रचकति तत्स्वरूपमितीरितम् ॥ ७ ॥

तत्र ज्ञानादिभूमिफलं मुक्त्यादिस्वरूपमाचष्टे—**स्वरूपेति** । अज्ञानफलं बन्ध इत्यर्थः ॥ २ ॥ ब्रह्मनिष्ठस्यापि यदि रागादिः तदा स्वरूपात् च्युतिः स्यादित्यत आह—शुद्धेति । प्रमादतः प्रसक्तरागद्वेषादयो **दोषास्तेषां नाज्ञत्वसंभवाः**, किं तु बहिष्ठप्राण्यदृष्टायत्ता इत्यर्थः ॥ ३ ॥ स्वरूपच्युतिरेव महामोह इत्याह—**य इति** । चेतोविकल्पितोऽर्थः **चैत्यार्थः** स्वातिरिक्तप्रपञ्चः तत्र **चितिमज्जनं** अन्तःकरणपतनमेव **स्वरूपपरिभ्रंशः** ॥ ४ ॥ स्वरूपस्थितिः कीदृशीत्यत आह—**अर्थादिति** । विषयात् विषयान्तरं मनसि गच्छति सति तदा विषयद्वयमध्यस्थितेः अवृत्तिकत्वात् सैव **स्वरूपस्थितिरित्यर्थः** ॥ ५ ॥ सति सङ्कल्पप्रभवावस्थाऽन्तरे स्वरूपस्थितिः कुत इत्यत आह—**संशान्तेति**

[1] चित्तैर्यात्र—क.
[2] अहंत्वेऽशेषतः शा—अ.
[3] निष्पत्ति—अ १.
[4] प्रचरति—अ. प्रकचति—अ १.

॥ ६ ॥ स्वरूपस्थितेः अवस्थाचतुष्टयापह्नवपूर्वकत्वात् किं तत्स्वरूपमित्यत आह—**अहन्तांऽश इति । अहन्तांऽशे** देहादावहंभावे ब्रह्माहमिति ज्ञानात् **क्षते शान्ते** अपह्नवं गते ततो **भेदनिष्पन्दचित्तता** भेदासंभवप्रबोधसिद्धचिन्मात्ररूपिणी **या इयं अजडा** चित् **प्रचकति** निष्प्रतियोगिकस्वमात्रतया चकास्ति **तत्स्वरूपमितीरितम् ॥ ७ ॥**

अज्ञानभूमिकासप्तकविवरणम्

बीजजाग्रत् तथा जाग्रन्महाजाग्रत् तथैव च ।
जाग्रत्स्वप्नस्तथा स्वप्नः स्वप्नजाग्रत् सुषुप्तिकम् ॥ ८ ॥
इति सप्तविधो मोहः पुनरेष परस्परम् ।
[1]श्लिष्टो भवत्यनेकाग्र्यं शृणु लक्षणमस्य तु ॥ ९ ॥
प्रथमं चेतनं यत् स्यादनाख्यं निर्मलं चितः ।
भविष्यच्चित्तजीवादिनामशब्दार्थभाजनम् ॥ १० ॥
बीजरूपं स्थितं जाग्रद् बीजजाग्रत् तदुच्यते ।
एषा ज्ञप्तेर्नवावस्था त्वं जाग्रत्संस्थितिं शृणु ॥ ११ ॥
नवप्रसूतस्य परादयं चाहमिदं मम ।
इति यः प्रत्ययः स्वच्छस्तज्जाग्रत् प्रागभावनात् ॥ १२ ॥
अयं सोऽहमिदं तन्म इति जन्मान्तरोदितः ।
पीवरः प्रत्ययः प्रोक्तो महाजाग्रदिति स्फुटम् ॥ १३ ॥
अरूढमथवा रूढं सर्वथा तन्मयात्मकम् ।
यज्जाग्रतो मनोराज्यं तज्जाग्रत्स्वप्न उच्यते ॥ १४ ॥

[1] शि—क.

द्विचन्द्रशुक्तिकारूप्यमृगतृष्णाऽऽदिभेदतः ।
अभ्यासं प्राप्य जाग्रत् तत् स्वप्नो नानाविधो भवेत् ॥ १५ ॥
अल्पकालं मया दृष्टमेतन्नोदेति यत्र हि ।
परामर्शः प्रबुद्धस्य स स्वप्न इति कथ्यते ॥ १६ ॥
चिरसंदर्शनाभावादप्रफुल्लं बृहद्वचः ।
चिरकालानु[1]वृत्तिस्तु स्वप्नो जाग्रदिवोदितः ॥ १७ ॥
स्वप्नजाग्रदिति प्रोक्तं जाग्रत्यपि परिस्फुरत् ।
षडवस्थापरित्यागे [2]जडा जीवस्य या स्थितिः ॥ १८ ॥
भविष्यद्दुःखबोधाढ्या सौषुप्तिः सोच्यते गतिः ।
जगत् तस्यामवस्थायामन्तस्तमसि लीयते ॥ १९ ॥
सप्तावस्था इमाः प्रोक्ता मयाऽज्ञानस्य वै द्विज ।
एकैका [3]शतसंख्याऽत्र नानाविभवरूपिणी ॥ २० ॥

एवं परमार्थदृष्ट्यभिमतचिन्मात्रस्वरूपं प्रतिपाद्य स्वाज्ञानुभूतिसिद्धाज्ञानभूमिकेयत्तां प्रपञ्चयति—**बीजजाग्रदिति** ॥ ८–९ ॥ तत्र प्राथमिकं बीजजाग्रत्स्वरूपमाह—**प्रथममिति** । "सदेव सोम्येदमग्र आसीत्" इति श्रुतिसिद्धं **प्रथमं चेतनं यत् स्यात्** तदतविशेषापाये तदनाख्यं **निर्मलं**, वस्तुतो निर्विशेषत्वात् । तथाऽपि स्वाज्ञदृष्ट्या **चितः** सकाशात् **भविष्यच्चित्तजीवादिनामशब्दार्थभाजनं** प्राज्ञावस्थां प्राप्तवत् भातम् ॥ १० ॥ तदेव **बीजरूपं स्थितं जाग्रत्** प्राज्ञप्रविभक्तविश्वाधिष्ठितत्वात् **तदेव बीजजाग्रदित्युच्यते** । द्वितीयं जाग्रत्स्वरूपमाह—**एषेति** । **एषा ज्ञस्य नवावस्था,**

[1] वृत्तस्तु—अ १. वृत्तस्य—अ. [2] हठाज्जी—अ.
[3] दश—अ.

स्थूलप्रज्ञायाः प्राथम्यात् ॥ ११ ॥ **नवप्रसूतस्य** बीजरूपस्य **परात्** कार्यरूपात् विश्वविश्वात्मनः **अयं चाऽहमिदं ममेति यः** स्थूलप्रत्ययः उदेति यदेवं **प्राक्** बीजावस्थायामभावनात् **सेयं जाग्रदवस्थेत्युच्यते** ॥ १२ ॥ महाजाग्रत्स्वरूपं विशदयति—**अयमिति** । अयमित्यादि **यन्मे जन्मान्तरे** विराड्भावे **उदितः** विराजो ब्रह्माण्डशरीरतया **यः पीवरः प्रत्ययः प्रोक्तः** सोऽयं वैराजकलनात्मको **महाजाग्रदिति स्फुटमित्युच्यते** ॥ १३ ॥ जाग्रत्प्रविभक्तस्वप्नकलनां प्रपञ्चयति—**अरूढमिति** । **अरूढं** मूलस्य मृग्यत्वात्, अथवा **रूढं** प्रतीतिकालमात्रप्ररूढत्वात्, **सर्वथा तन्मयात्मकं** मनोराज्याधिपतेः तन्मयत्वात्, **जाग्रदवस्थायां यन्मनोराज्यं** विकल्पितं **तदेव जाग्रत्स्वप्न उच्यते** ॥१४॥ स्वप्नस्वप्नस्वरूपमाह—**द्विचन्द्रेति**। **द्विचन्द्रेत्यादिना** प्रातिभासिककलनोच्यते । एवं **अभ्यासबलात् जाग्रत्संस्कारजस्वप्नो नानाविधो भवेत्** ॥ १५ ॥ तत्प्रविभक्तस्तु **अल्पकालमिति**। परामर्शं विना **यत्र** कालेयत्ता न स्फुरति स **स्वप्नस्वप्नः** प्रातिभासिकप्रातिभासिकनिर्वर्त्यत्वात्। तथा स्वप्न इत्युद्देशतः स्वप्नस्वप्नः उच्यते इति **वेदितव्यम्** ॥ १६ ॥ प्रातिभासिकविश्वनिर्वर्त्यस्वप्नजाग्रत्स्वरूपमाह—**चिरेति** । जागरितवत् **चिरसन्दर्शनाभावात् बृहद्वचो** बहिःप्रज्ञानिर्वर्त्य-**मप्रफुल्लम्**। **चिरकालानुवृत्तिस्तु** जागरणवत् भानात् एतत् **स्वप्नजाग्रदिति प्रोक्तम्** ॥ १७ ॥ सौषुप्तिगतिं प्रकटयति—**षडिति**। यत्रोक्तबीजजाग्रदित्यादि-**षडवस्था** न दृश्यते सेयं जडात्मिका **स्थितिः** सुषुप्तसुषुप्तिः, प्राज्ञप्राज्ञनिर्वर्त्य-त्वात् ॥ १८–१९ ॥ एवं **सप्तावस्थाः**। बीजजाग्रदित्याद्यज्ञानभूमिकाः सप्तधा उक्ताः, तासु **एकैका** वादिभ्रान्त्यनुरूपं शतधा विकल्पिता भवति, वादिस्वाज्ञान-स्यानन्तत्वात् तदियत्ता नहि विज्ञातुं शक्येत्यर्थः ॥ २० ॥

ज्ञानभूमिकासप्तकविवरणम्

इमां सप्तपदां ज्ञानभूमिमाकर्ण्यानघ ।
नानया ज्ञातया भूयो मोहपङ्के निमज्जति ॥ २१ ॥

वदन्ति बहुभेदेन वादिनो योगभूमिकाः ।
मम त्वभिमता नूनमिमा एव शुभप्रदाः ॥ २२ ॥
अवबोधं विदुर्ज्ञानं तदिदं सप्तभूमिकम् ।
[1]मुक्तिस्तु ज्ञेयमित्युक्ता भूमिका[2]सप्तकात्परम् ॥ २३ ॥
ज्ञानभूमिः शुभेच्छाऽऽख्या प्रथमा समुदाहृता ।
विचारणा द्वितीया तु तृतीया तनुमानसी ॥ २४ ॥
सत्त्वापत्तिश्चतुर्थी स्यात् ततोऽसंसक्तिनामिका ।
पदार्थभावना षष्ठी सप्तमी तुर्यगा स्मृता ॥ २५ ॥
आसामन्तः स्थिता मुक्तिर्यस्यां भूयो न शोचति ।
एतासां भूमिकानां त्वमिदं निर्वचनं शृणु ॥ २६ ॥
स्थितः किं मूढ एवास्मि प्रेक्षेऽहं शास्त्रसज्जनैः ।
वैराग्यपूर्वमिच्छेति शुभेच्छेत्युच्यते बुधैः ॥ २७ ॥
शास्त्रसज्जनसंपर्कवैराग्याभ्यासपूर्वकम् ।
सदाचारप्रवृत्तिर्या प्रोच्यते सा विचारणा ॥ २८ ॥
विचारणाशुभेच्छाभ्यामिन्द्रियार्थेषु रक्तता ।
यत्र सा तनुतामेति प्रोच्यते तनुमानसी ॥ २९ ॥
भूमिकात्रितयाभ्यासाच्चित्ते [3]तु विरतेर्वशात् ।
सत्त्वात्मनि स्थिते शुद्धे सत्त्वापत्तिरुदाहृता ॥ ३० ॥
दशाचतुष्टयाभ्यासादसंसर्गकला तु या ।

[1] मूर्ति—अ १. [2] सप्तमा—अ २. [3] र्थवि—अ.

रूढसत्त्वचमत्कारा प्रोक्ताऽसंसक्तिनामिका ॥ ३१ ॥
भूमिकापञ्चकाभ्यासात् स्वात्मारामतया [1]दृढम् ।
आभ्यन्तराणां बाह्यानां पदर्थानामभावनात् ॥३२ ॥
परप्रयुक्तेन चिरं प्रयत्नेनावबोधनम् ।
पदार्थभावना नाम षष्ठी भवति भूमिका ॥ ३३ ॥
भूमिषट्कचिराभ्यासाद्भेदस्यानुपलम्भनात् ।
यत् स्वभावैकनिष्ठत्वं सा ज्ञेया तुर्यगा गतिः ॥ ३४ ॥
एषा हि जीवन्मुक्तेषु तुर्यावस्थेति विद्यते ।
विदेहमुक्तिविषयं तुर्यातीतमतः परम् ॥ ३५ ॥

एवं स्वरूपावारकस्वाज्ञानावस्थात्यागपूर्वकं वक्ष्यमाणां सप्तधा भिन्नस्वज्ञानावस्थां श्रृण्विल्याह—**इमामिति** । **नानया ज्ञातया भूयो मुमुक्षुः मोहपङ्के निमज्जति** ॥ २१–२२ ॥ भूमिसप्तकार्थवेदनं ज्ञानं, वेद्यं कैवल्यमेवेत्याह —**अवबोधमिति** ॥ २३ ॥ शुभेच्छाऽऽदिसप्तज्ञानभूमिनामान्युद्दिशति— **ज्ञानेति** ॥ २४–२५ ॥ शुभेच्छाऽऽदिभूमिकानिर्वचनं श्रृण्विल्याह—**एतासामिति** ॥ २६ ॥ प्रथमभूमिकां विवृणोति—**स्थित इति** । वस्तुतत्त्वमज्ञात्वा **मूढ एव** सन् तूष्णीं **स्थितोऽस्मि** । ततः किं करोषीत्यत्र—श्रुत्याचार्यैः शासनीयोऽस्मीति **प्रेक्षेऽहं प्रतीक्षामीति वैराग्यपूर्वकं** या **इच्छा** उदेति सेयं बुधैः **शुभेच्छेत्युच्यते** ॥ २७ ॥ विचारणाऽऽख्यां द्वितीयां भूमिकामाह—**शास्त्रेति** ॥ २८ ॥ तृतीयभूमिं विवृणोति—**विचारणेति** । **यत्र** यस्यां भूमिकायां **विचारणाशुभेच्छाभ्यां** सह **दशेन्द्रियतदर्थेष्वनुरक्तता** अभिनिविष्टा मानसी वृत्तिः **तनुतामेति** सेयं भूमिः **तनुमानसीति प्रोच्यते** ॥ २९ ॥ चतुर्थभूमिकां विशदयति— **भूमिकेति** । **भूमित्रयाभ्यासतो** विराग उदेति ततः स्वातिरिक्तविरक्तितः **चित्ते**

[1] भृशं—अ.

विशुद्धसत्त्वमात्मोपाधिः यस्मिन् तस्मिन् ईश्वरे स्थिते सति सेयमवस्था **सत्त्वापत्तिरित्युदाहृता** ॥ ३० ॥ पञ्चमभूमिकां व्याचष्टे—**दशेति** । योगफलेशभावसंसर्गविरळा **रूढसत्त्वचमत्कारा** रूढसत्त्वं ईश्वरतत्त्वं तदवष्टभ्य तत्र संसर्गतया चिन्मये साक्षिणि स्थितिं कारयति **प्रोक्ताऽसंसक्तिनामिका** पञ्चमभूमिकोच्यत इत्यर्थः ॥ ३१ ॥ षष्ठभूमिकां प्रपञ्चयति—**भूमिकेति** । पूर्वोक्तभूमिकापञ्चकाभ्यासात् स्वातिरिक्तरतिं विस्मृत्य केवलस्वात्मारामतया **दृढम्** । तत्र हेतुः **आभ्यन्तराणामिति** । स्वान्तर्बाह्यपदार्थतः यः **परो** व्यतिरिक्तः साक्षी तत्प्रयुक्तेन तद्भावापन्नेन चेतसा **प्रयत्नेन** यदवबोधनं ब्रह्मास्मीति ज्ञानं अवगतिः सैव **पदार्थभावना** ॥ ३२–३३ ॥ सप्तमभूमिकां व्यक्तीकरोति—**भूमीति** । स्वातिरिक्तभेदस्य ॥ ३४ ॥ सेयं तुर्यावस्था कासनमर्हतीत्यत आह—**एषेति** । ततः किमित्यत आह—**विदेहेति** ॥ ३५ ॥

जीवन्मुक्तस्वरूपचर्ये

ये निदाघ महाभागाः सप्तमीं भूमिमा[1]श्रिताः ।
आत्माऽऽरामा महात्मानस्ते महापदमागताः ॥ ३६ ॥
जीवन्मुक्ता न मज्जन्ति सुखदुःखरसस्थिते ।
प्रकृतेनाथ कार्येण किंचित् कुर्वन्ति वा न वा ॥ ३७ ॥
पार्श्वस्थबोधिताः सन्तः पूर्वाचारक्रमागतम् ।
आचारमाचरन्त्येव सुप्तबुद्धवदुत्थिताः ॥ ३८ ॥

चतुर्थादिसप्तमभूमिकाऽन्तारूढब्रह्मविदादिजीवन्मुक्तगणचर्यां स्वरूपं च प्रकटयति—**य इति** । बाह्यनैरपेक्ष्येण **आत्मारामाः** । महद्भिः प्रत्यगभेदेन पश्यत इति **महापदं** प्रत्यगभिन्नं ब्रह्म तद्गताः तद्भावारूढाः इत्यर्थः ॥ ३६ ॥

[1] गताः—अ २, क.

स्वाज्ञवत् देहयोगतः तेऽपि सुखदुःखकलनासागरे मज्जन्तीत्यत आह— **जीवन्मुक्ता इति**। सुखदुःखरसतया **स्थिते** संसारसागरे इत्यर्थः। ते किं कुर्वन्तीत्यत्र—निर्विकल्पचित्ताः सन्तः **प्रकृतेनेति** ॥ ३७ ॥ तेषां देहस्थिति-निमित्तक्रियाऽऽदिकं कथमित्यत्र समाधितो व्युत्थानसमये **पार्श्वस्थबोधिताः सन्तः** ॥ ३८ ॥

ज्ञानभूमिकाऽधिकारी

भूमिकासप्तकं चैतद्धीमतामेव गोचरम् ।
प्राप्य ज्ञानदशामेतां पशुम्लेच्छाऽऽदयोऽपि ये ॥ ३९ ॥
सदेहा वाऽप्यदेहा वा ते मुक्ता नात्र संशयः ।
ज्ञप्तिर्हि ग्रन्थिविच्छेदस्तस्मिन् सति विमुक्तता ॥ ४० ॥
मृगतृष्णाऽम्बुबुद्ध्यादिशान्तिमात्रात्मकस्त्वसौ ।
ये तु मोहार्णवात्तीर्णास्तैः प्राप्तं परमं पदम् ॥ ४१ ॥
ते स्थिता भूमिकास्वासु स्वात्मलाभपरायणाः ।

मयोक्तसोपानभूमिकासप्तकाधिकारिणः के इत्यत आह—**भूमिकेति** । भूमिकाज्ञानफलमाचष्टे—**प्राप्येति**। अनन्तकोटिजन्मसुकृतमहिम्ना कर्मवैचित्र्यतो ज्ञानानधिकारजन्मवन्तोऽपि, मुसुण्डादयः **पशवः** अजामिळादयो **म्लेच्छादयोऽपि** ज्ञानाधिकारजन्मानुष्ठितश्रवणादिसिद्धामेतां **ज्ञानदशां प्राप्य** स्वात्तसविशेष-निर्विशेषज्ञानाभ्यां प्रातिभासिकतया देहादिकमस्तीति ज्ञानं येषां ते **सदेहा** जीवन्मुक्ताः, स्वातिरिक्तदेहोपलक्षिताविद्यापदतत्कार्यजातापह्नवसिद्धं ब्रह्म निष्प्रति-योगिकस्वमात्रमिति ज्ञानं यदि सञ्जातं तदा ते विदेहमुक्ता भवन्तीत्यत्र **न** हि **संशयोऽस्ती**त्यर्थः । यत एवं अतः स्वातिरिक्तमोहग्रासस्वज्ञानं मुक्तिसाधनमित्याह—**ज्ञप्तिरिति**। **ज्ञप्तिः** प्रत्यगभिन्नब्रह्मज्ञानं, तेन हृदयग्रन्थि-

विच्छेदः अतस्मिन् तद्भावनिरासः, **तस्मिन् सति** विदेहमुक्तता उदेतीत्यर्थः ॥ ३९–४० ॥ स्वमात्रज्ञानप्लवेन ये स्वातिरिक्तमोहार्णवं तरन्ति तैः सप्तभूमिकाऽऽरूढैः ब्रह्मपदं प्राप्तमेवेत्याह—**ये त्विति** ॥ ४१ ॥

ज्ञानगम्यं ब्रह्मपदम्

मनःप्रशमनोपायो योग इत्यभिधीयते ॥ ४२ ॥
सप्तभूमिः स विज्ञेयः कथितास्ताश्च भूमिकाः ।
एतासां भूमिकानां तु गम्यं ब्रह्माभिधं पदम् ॥ ४३ ॥
त्वत्ताऽहन्ताऽऽत्मता यत्र परता नास्ति काचन ।
न क्वचिद्भावकलना न भावाभाव[1]गोचरा ॥ ४४ ॥
सर्वं शान्तं निरालम्बं व्योमस्थं शाश्वतं शिवम् ।
अनामयमनाभासमनामकमकारणम् ॥ ४५ ॥
न सन्नासन्न [2]मध्यं तन्न सर्वं सर्वमेव च ।
मनोवचोभिरग्राह्यं पूर्णात् पूर्णं सुखात् सुखम् ॥ ४६ ॥

स्वातिरिक्तप्रासयोगस्ते अभिहितः, तद्गम्यं ब्रह्मेत्याह—**मन इति** ॥ ४२–४३ ॥ ज्ञानैकगम्यं ब्रह्म किंविशेषणबोधितं भवतीत्यत आह—**त्वत्तेति**। यत्र धर्मधर्मिविभागो न विद्यते स्वातिरेकेण **न क्वचिद्भावकलना** ॥ ४४ ॥ **व्योमस्थं** प्रत्यग्रूपेण हृद्व्योमासनम् । कारणस्य कार्यसापेक्षतया कार्याभावात् कारणत्वं न युज्यत इत्यत्र—"कार्यं चेत् कारणं किंचित् कार्याभावे न कारणम्" इति श्रुतेः ॥ ४५ ॥ करणग्रामाग्राह्यतया **न सदिति** ॥ ४६ ॥

[1] गोचरं—अ १, उ, उ १.
[2] मध्यां—अ, अ १.

ब्रह्मवेदनमेव ब्रह्माधिगमोपायः

असंवेदनमाशान्तमात्मवेदनमाततम् ।
सत्ता सर्वपदार्थानां नान्या संवेदनादृते ॥ ४७ ॥
संबन्धे द्रष्टृदृश्यानां मध्ये [1]दृष्टिर्हि यद्वपुः ।
द्रष्टृदर्शनदृश्यादिवर्जितं तदिदं पदम् ॥ ४८ ॥
देशाद्देशं गते चित्ते मध्ये यच्चेतसो वपुः ।
अजाड्यसंविन्मननं तन्मयो भव सर्वदा ॥ ४९ ॥
अजाग्रत्स्वप्ननिद्रस्य यत्ते रूपं सनातनम् ।
अचेतनं चा[2]जडत्वं तन्मयो भव सर्वदा ॥ ५० ॥
जडतां वर्जयित्वैकां शिलाया हृदयं हि तत् ।
अमनस्कस्वरूपं [3]तत् तन्मयो भव सर्वदा ।
चित्तं दूरे परित्यज्य योऽसि सोऽसि स्थिरो भव ॥ ५१ ॥

स्वातिरेकेण नास्तीत्यसंवेदनम् । सत्ता सर्वपदार्थानां सत्ताऽतिरेकेण इयं चित् नाऽन्या । तदधिगमोपायः तद्वेदनादृते न विद्यते ॥ ४७ ॥ कथं पुनः स्वरूपं? इत्यत्र वृत्तिरहिता दृष्टिः स्वरूपमित्याह—सम्बन्ध इति । विज्ञानात्मा द्रष्टा, दृश्यं घटादिप्रपञ्चः, तयोः आध्यासिकसम्बन्धे यन्मध्यं हृदयं तत्र या प्रत्यग्दृष्टिः प्रतिभाति सैव यस्य परमात्मनो वपुः तस्य प्रत्यगभिन्नत्वात् तदेतत्पदं द्रष्टृदर्शनसम्बन्धवर्जितं ज्ञप्तिमात्रस्वरूपत्वात् ॥ ४८ ॥ किंच—देशाद्देशमिति । वपुः निर्वृत्तिकं दृश्यते यत् अजाड्यसंविन्मननं—अजाड्या संवित् प्रत्यक् चित् ॥ ४९ ॥ किंच—अजाग्रदिति । सनातनं,

[1] दृष्टे—अ.
[2] जडं त्वं—अ २, क. जडं च—अ.
[3] यत्—अ.

जाग्रदाद्यवस्थात्रयकलनाविरळतुरीयरूपस्य चिरन्तनत्वात् । देहिदेहसम्बन्धाभावेन **अचेतनम्** ॥ ९० ॥ किंच—**जडतामिति** । स्वाविद्याद्वयतत्कार्ये नामरूपाकारेण या जडता विद्यते—स्वाङ्गदृष्टिशिलावत् दृढीभूताया मायाया **हृदयं हि तत्**—तामेकां जडतां वर्जयित्वा ततो नामरूपापवादाधिकरणतया सच्चिदानन्दरूपं यच्चैतन्यं चकास्ति **तद्धयमनस्कस्वरूपं, तन्मयो भव** तदेव भवेत्यर्थः । सर्वानर्थमूलचित्तापाये यदसि तदेव भवेत्याह—**चित्तमिति** ॥ ९१ ॥

मनोलयात् चिन्मात्रस्फुरणम्

पूर्वं मनः समुदितं [1]परमात्मतत्त्वात्
तेनाततं जगदिदं सविकल्पजालम् ।
शून्येन शून्यमपि विप्र यथाऽम्बरेण
नीलत्वमुल्लसति चारुतराभिधानम् ॥ ९२ ॥
संकल्पसंक्षयवशाद्गलिते तु चित्ते
संसारमोहमिहिका गलिता भवन्ति ।
स्वच्छं विभाति शरदीव खमागतायां
चिन्मात्रमेकमजमाद्यमनन्तमन्तः ॥ ९३ ॥

मनस्तत्कार्ये सति स्थिरीभावः कथमित्यत्र—गगननैल्यवत् स्वविकल्पितं मनः, तेन जगद्विकल्पितं, सङ्कल्पक्षयतो मनसि शान्ते तत्कार्यं विश्वमपि विलीयते, ततो निष्प्रतियोगिकचिन्मात्रतया स्वयमेव अवशिष्यस इत्याह—**पूर्वमिति** । यथा शून्याम्बरेण स्वरूपशून्यनीलत्वादिः विकल्पितः तथा निर्विशेषात्मतत्त्वे स्वरूपशून्यं मनस्तत्कार्यं विश्वं विकल्पितमित्यर्थः ॥ ९२ ॥ तच्छान्त्युपायः कथमित्यत्र—**सङ्कल्पेति** । ब्रह्मातिरिक्तास्तित्वसङ्कल्पक्षयतः

[1] परमार्थ—उ.

चित्तं विलीयते चिदाकाशे, ततश्चित्तकार्यसंसारमोहमिहिकाः हिमोपम-स्वाज्ञानवृत्तयो विलीयन्ते, ततः सर्वविलयाधिकरणं स्वाधिष्ठेयापह्नवतो निरधिष्ठानं सच्चिन्मात्रमवशिष्यते इत्यर्थः ॥ ९३ ॥

जगद्भ्रमशमनोपायः

अकर्तृक[1]मरङ्गं च गगने चित्र[2]मुत्थितम् ।
अद्रष्टृकं स्वानुभवमनिद्रस्वप्नदर्शनम् ॥ ९४ ॥
साक्षिभूते समे स्वच्छे निर्विकल्पे चिदात्मनि ।
निरिच्छं प्रतिबिम्बन्ति जगन्ति मुकुरे यथा ॥ ९५ ॥
एकं ब्रह्म चिदाकाशं सर्वात्मकमखण्डितम् ।
इति भावय यत्नेन चेतश्चाञ्चल्यशान्तये ॥ ९६ ॥
रेखोपरेखावलिता यथैका पीवरी शिला ।
तथा त्रैलोक्यवलितं ब्रह्मैकमिह दृश्यताम् ॥ ९७ ॥
द्वितीयकारणाभावादनुत्पन्नमिदं जगत् ।
ज्ञातं ज्ञातव्यमधुना दृष्टं द्रष्टव्यमद्भुतम् ॥ ९८ ॥
विश्रान्तोऽस्मि चिरं श्रान्तश्चिन्मात्रान्नास्ति किंचन ।
पश्य विश्रान्तसंदेहं विगताशेषकौतुकम् ॥ ९९ ॥
निरस्तकल्पनाजालमचित्तत्वं परं पदम् ।

कथं पुनः एतच्चिदाकाशे विकल्पितं? कोऽयं तच्छमनोपायः? इत्यत आह—अकर्तृकमिति । स्वातिरिक्तकलना कदाऽपि नास्तीति साक्षात् ईक्षितृ-

[1] मरागं—अ, अ १. [2] मुज्झ—अ, अ १.

साक्षिभूते समे इत्यादिविशेषणबोधिते चिदाकाशे चित्रकृद्भ्रमद्रव्याभावेऽप्य-**कस्माच्चित्रमुत्थितं अनिद्रस्वप्नदर्शनं अदृष्टकं**, स्वातिरिक्तद्रष्टृदर्शनवैरळ्यात्, तथाऽपि स्वाज्ञानुभूतिसिद्धम्। यथा दर्पणे जगन्ति निरिच्छं प्रतिबिम्बन्ति तथा स्वाविद्यापदतत्कार्यचित्रं दृश्यत इत्यर्थः ॥ ९४–९५ ॥ यद्येवं विद्यते इति ते भ्रान्तिस्तदा तन्निरसनाय एवं भावयेत्याह—**एकमिति** ॥ ९६ ॥ किंच—**रेखेति** ॥ ९७ ॥ यद्ब्रह्मेति सम्भाव्यं त्रैलोक्योपलक्षितं अविद्यापदतत्कार्यजातं जगत् ब्रह्मातिरेकेण किमुत्पन्नमित्यत्राह—**द्वितीयेति**। घटोत्पत्तौ मृत्पिण्ड-कुलालदण्डादिवत् कारणान्तराभावात् स्वस्यैवाभिन्ननिमित्तोपादानकारणत्वात्, यद्वा स्वातिरिक्तकार्यसत्त्वे तदपेक्षया कारणस्य द्वितीयत्वं तदभावे तन्निरूपित-**द्वितीयकारणताया अप्यभावात्**, तदतिरेकेण इदं **जगत्** जात्वपि **नोत्पन्नं** तस्यावस्तुत्वेन शशविषाणतुल्यत्वात् इत्यत्र—

इदं प्रपञ्चं नास्त्येव नोत्पन्नं नो स्थितं क्वचित्।
दृश्यरूपं च दृग्रूपं सर्वं शशविषाणवत्॥

इति श्रुतेः। एवं ब्रह्म निष्प्रतियोगिकतया स्वमात्रमवशिष्यत इति को वा जानातीत्याशङ्कमानमालक्ष्य ऋभुः स्वानुभवं प्रकटयति—**ज्ञातमिति** ॥ ९८ ॥ यथा मया अनुभूतं तथा त्वमपि पश्येत्याह—**पश्येति**। **विश्रान्तसन्देहं** निस्संशयार्थम् ॥ ९९ ॥ **अचित्तत्त्वं** चित्तापह्नवसिद्धमित्यर्थः ॥

अमनस्कब्रह्माधिगमनम्

त एव भूमतां प्राप्ताः संशान्ताशेषकिल्बिषाः ॥ ६० ॥
महाधियः शान्तधियो ये याता विमनस्कताम्।
जन्तोः कृतविचारस्य विगलद्वृत्तिचेतसः ॥ ६१ ॥
मननं त्यजतो नित्यं किंचित् परिणतं मनः।
दृश्यं संत्यजतो हेयमुपादेयमुपेयुषः ॥ ६२ ॥

द्रष्टारं पश्यतो नित्यमद्रष्टारमपश्यतः ।
विज्ञातव्ये परे तत्त्वे जागरूकस्य जीवतः ॥ ६३ ॥
सुप्तस्य घनसंमोहमये संसारवर्त्मनि ।
अत्यन्तपक्कवैराग्यादरसेषु रसेष्वपि ॥ ६४ ॥
संसारवासनाजाले खगजाल इवाखुना ।
त्रोटिते हृदयग्रन्थौ श्लथे वैराग्यरंहसा ॥ ६५ ॥
[1]कातकं फलमासाद्य यथा वारि प्रसीदति ।
तथा विज्ञानवशतः स्वभावः संप्रसीदति ॥ ६६ ॥
नीरागं निरुपासङ्गं निर्द्वन्द्वं निरुपाश्रयम् ।
विनिर्याति मनो मोहाद्विहगः पञ्जरादिव ॥ ६७ ॥
शान्तसंदेहदौरात्म्यं गतकौतुकविभ्रमम् ।
परिपूर्णान्तरं चेतः पूर्णेन्दुरिव [2]राजते ॥ ६८ ॥
नाहं न चान्यदस्तीह ब्रह्मैवास्मि निरामयम् ।
इत्थं सदसतो[3]र्मध्यं यः पश्यति स पश्यति ॥ ६९ ॥

ये अचित्तभावं गताः ते कृतकृत्या इत्याह—त एवेति ॥६०॥ अमनस्क-ब्रह्मात्युपायः क इत्यत्र वेदान्तश्रवणादिसाधनसम्पन्नस्यामनस्कं ब्रह्म प्रसीदतीत्याह —जन्तोरिति। स्वातिरिक्तविषये विगलद्वृत्तिचेतसः ॥६१॥ स्वातिरिक्तमननम्। परिणतं ब्रह्माकारेणेत्यर्थः। यत् उपादेयं तत् उपेयुषः ॥ ६२ ॥ सोऽहमिति सर्वद्रष्टारम्। अद्रष्टारं स्वातिरिक्तदेहादिकम्। ब्रह्माहमस्मीति विज्ञातव्ये ॥६३॥

[1] कातरं—अ २, उ, क.
[2] जायते—अ, अ १.
[3] र्मध्ये—अ, अ १.

संसारकलनामजानतः **अत्यन्तपक्ववैराग्यात्** ॥ ६४ ॥ **वैराग्यरंहसा** प्रवाहेण **श्लथे** विश्लेषिते ॥ ६५ ॥ अमनस्कब्रह्माहमस्मीति स्वात्मा प्रसन्नो भवतीत्यर्थः ॥ ६६ ॥ एवं साधनविकलाः स्वभावच्युता भवन्तीत्याह—**नीरागमिति**। ब्रह्म स्वात्मेत्यप्राप्य ततो **विनिर्याति** ॥ ६७ ॥ जीवन्मुक्तस्य तु—**शान्तेति**। स्वातिरिक्तं अस्ति नास्तीति **गतकौतुकविभ्रमं** ब्रह्म स्वात्मेति विदित्वा **परिपूर्णान्तरं चेतः** ब्रह्माकारेण **पूर्णेन्दुरिव राजते** ॥ ६८ ॥ को वा आत्मानं पश्यतीत्यत आह—**नाहमिति**। अतत् देहादिकं **नाहम्**। **सदसतोर्मध्यं** व्यक्ताव्यक्तप्रपञ्चाधिकरणं स्वात्मतया **यः पश्यति स** एव **पश्यति** ॥ ६९ ॥

विषयेषु नीरागप्रवृत्तिः

अयत्नोपनतेष्वक्षिदृग्द्रव्येषु यथा मनः।
नीरागमेव पतति तद्वत् कार्येषु धीरधीः ॥ ७० ॥
परिज्ञायोपभुक्तो हि भोगो भवति तुष्टये।
विज्ञाय सेवितश्चोरो मैत्रीमेति न चोरताम् ॥ ७१ ॥
अशङ्किताऽपि संप्राप्ता ग्रामयात्रा यथाऽध्वगैः।
प्रेक्ष्यते तद्वदेव ज्ञैर्भोगश्रीरवलोक्यते ॥ ७२ ॥
मनसो निगृहीतस्य लीलाभोगोऽल्पकोऽपि यः।
तमेवालम्बविस्तारं क्लिष्टत्वाद्बहुमन्यते ॥ ७३ ॥
[1]बन्धमुक्तो महीपालो ग्रासमात्रेण तुष्यति।
परैरबद्धो नाक्रान्तो न राष्ट्रं बहु मन्यते ॥ ७४ ॥

एवं पश्यतः करणग्रामोऽविदुष इव सरागं स्वस्वविषये पततीत्यत आह—**अयत्नेति**। **यथा** सामान्यजनदृष्टिः पथिगततृणादिषु **नीरागमेव**

[1] बद्ध—अ, अ १, उ १.

पतति तथा **धीरधीः** सर्वत्रेत्यर्थः ॥ ७० ॥ भोगसेवया धीरोऽपि बध्यत इत्यत्र सदृष्टान्तं निराकरोति—**परिज्ञायेति** । ब्रह्मातिरेकेण भोक्तृभोज्यादिकं नास्तीति **परिज्ञाय** । **तुष्टये** न बन्धाय ॥ ७१ ॥ किंच—**अशङ्कितोऽपि** हानिवृद्धिरस्तिनास्तीत्यस्मरणपूर्वकं **संप्राप्ता ग्रामयात्रा यथाऽध्वगैः** यथा तत्रत्यतृणवृक्षादिकमिदं ममास्त्विति माऽस्त्विति अभिसन्धिवैकल्येन **प्रेक्ष्यते तद्वदेव ज्ञैः भोगश्रीरवलोक्यते** नीरागमेव दृश्यत इत्यर्थः ॥ ७२ ॥ तदवलोकनतः तत्तृष्णा स्यादित्यत आह—**मनस इति** । यमी यदृच्छया प्राप्तप्राणधारणमात्रोपयोगिभिक्षादिकमपि **बहुमन्यते** तेनैव तृप्तो भवति, तदस्तु माऽस्त्विति सङ्कल्पाभावात् ॥ ७३ ॥ उक्तार्थे दृष्टान्तमाह—**बन्धेति** ॥ ७४ ॥

मनोजयस्य कर्तव्यता

हस्तं हस्तेन संपीड्य दन्तैर्दन्तान् विचूर्ण्य च ।
अङ्गान्यङ्गै[1]रिवाक्रम्य जयेदादौ स्वकं मनः ॥ ७५ ॥
मनसो विजयान्नान्या गतिरस्ति भवार्णवे ।
महानरकसाम्राज्ये मत्तदुष्कृतवारणाः ।
आशाशरशलाका[2]ढ्या दुर्जया ह्यिन्द्रियारयः ॥ ७६ ॥
प्रक्षीणचित्तदर्पस्य निगृहीतेन्द्रियद्विषः ।
पद्मिन्य इव हेमन्ते क्षीयन्ते भोगवासनाः ॥ ७७ ॥
तावन्निशीव वेताला वल्गन्ति हृदि वासनाः ।
एकतत्त्वदृढाभ्यासाद्यावन्न विजितं मनः ॥ ७८ ॥

राजा भटो ज्ञान्यज्ञान्यहमित्यादिविभ्रमहेतुः यतो मनः अतस्तज्जेतव्यमित्याह —**हस्तमिति** ॥ ७५ ॥ एवं जेतव्यमनसः सत्त्वे **मनसो विजयात्** । मनसा

[1] स्समाक्र—अ, उ, उ १. [2] स्स्युः—अ.

सह इन्द्रियाण्यपि जेतव्यानीत्याह—**महानरकेति** । वारणादीनां साम्राज्याङ्गत्वात् । जेतव्यारयस्तु **आशाशरशलाकाढ्याः** आशैव शरशलाकाः कृन्ता येषां ते तथोक्ताः **दुर्जया हीन्द्रियारयः** स्वस्वविषयव्यावृत्तिखड्गेन जेतव्या इत्यर्थः ॥ ७६ ॥ सर्वानर्थकारिण्याः वासनायाः सत्त्वात् किं मानसेन्द्रियजयेनेत्यत आह—**प्रक्षीणेति** । वासनाक्षयस्य—न हि ब्रह्मातिरेकेण मनः इन्द्रियं वाऽस्तीति—मानसेन्द्रियविजयपूर्वकत्वात् । मूलच्छेदतो वासनाः नश्यन्तीत्यर्थः ॥ ७७–७८ ॥

मनसः सर्वार्थसाधकत्वम्

भृत्योऽभिमतकर्तृत्वान्मन्त्री सर्वार्थकारणात् ।
सामन्तश्चेन्द्रियाक्रान्तेर्मनो मन्ये विवेकिनः ॥ ७९ ॥
लालनात् स्निग्धललना पालनात् पालकः पिता ।
सुहृदुत्तमविन्यासान्मनो मन्ये मनीषिणः ॥ ८० ॥
स्वालोकितः शास्त्रदृशा स्वबुद्ध्या [1]स्वानुभावितः ।
प्रयच्छति परां सिद्धिं त्यक्त्वाऽऽत्मानं मनःपिता ॥ ८१ ॥
सुदुष्टः सुदृढः स्वच्छः सुक्रान्तः सुप्रबोधितः ।
स्वगुणेनोर्जितो भाति हृदि हृद्यो मनोमणिः ॥ ८२ ॥
एनं मनोमणिं ब्रह्मन् बहु[2]पङ्ककलङ्कितम् ।
विवेकवारिणा सिद्ध्यै प्रक्षाल्यालोकवान् भव ॥ ८३ ॥

भृत्यमन्त्र्यादिवत् सर्वार्थसाधकं मन एवेत्याह—**भृत्य इति** । मन एव सङ्कल्पतो यदि निगृहीतं तदा **भृत्योऽभिमतकर्तृत्वात्, मन्त्री सर्वार्थसिद्धौ**

[1] स्वनु—अ १, क. [2] दोष—उ, उ १.

कारणत्वात्, सामन्तश्चेन्द्रियाक्रान्तेः यदीन्द्रियमुषितं तदा शत्रुरपि **मनो मन्ये** ॥ ७९–८० ॥ मनसः पित्रादित्वं कथमित्यत्र—स्वेति । शास्त्रदृष्टया स्वानुभवबलादपि ब्रह्मातिरेकेण मनो नास्तीति स्वेनालोकितोऽनुभावितश्च भवति। तदा **प्रयच्छति** ॥ ८१ ॥ बन्धमोक्षहेतुः मन एवेत्याह—**सुदुष्ट इति** । स्वाज्ञानप्रभवपरागवनितालम्पटत्वात् **सुदुष्टः** आभासतोऽपि मनोऽस्तीति भ्रमात् **सुदृढः** सङ्कल्पक्षयतः **स्वच्छः** ब्रह्मात्मना **सुक्रान्तः** ब्रह्मातिरेकेण नास्तीति **सुप्रबोधितः**। एवं **मनोमणिरूर्जितो भाति** ॥ ८२ ॥ अनेन बन्धमोक्षहेतुः मनोमणिरिति विदित्वा तद्गतबन्धहेत्वंशमपोह्य सारांशं गृहीत्वा सुखी भवेत्याह—एनमिति । ब्रह्मातिरिक्तं नेति **विवेकवारिणा** ॥ ८३ ॥

तृष्णाछेदनसाधनं अहंभावत्यागः

विवेकं परमाश्रित्य बुद्ध्या सत्यमवेक्ष्य च ।
इन्द्रियारीनलं छित्त्वा तीर्णो भव भवार्णवात् ॥ ८४ ॥
आस्थामात्रमनन्तानां दुःखानामाकरं विदुः ।
अनास्थामात्रमभितः सुखानामालयं विदुः ॥ ८५ ॥
वासनातन्तुबद्धोऽयं लोको विपरिवर्तते ।
सा प्रसिद्धाऽतिदुःखाय सुखायोच्छेदमागता ॥ ८६ ॥
धीरोऽप्यतित्रहुज्ञोऽपि कुलजोऽपि महानपि ।
तृष्णया बध्यते जन्तुः सिंहः शृङ्खलया यथा ॥ ८७ ॥
परमं पौरुषं यत्नमास्थायादाय सूद्यमम् ।
यथाशास्त्रमनुद्वेगमाचरन् को न सिद्धिभाक् ॥ ८८ ॥
अहं सर्वमिदं विश्वं परमात्माऽहमच्युतः ।
नान्यदस्तीति [1]संविद्या पर[प्रथ]मा सा ह्यहंकृतिः ॥ ८९ ॥

[1] संवित्त्या—उ.

सर्वस्माद्व्यतिरिक्तोऽहं वालाग्रादप्यहं तनुः ।
इति या संविदो ब्रह्मन् द्वितीयाऽहंकृतिः शुभा ॥ ९० ॥
मोक्षायैषा न बन्धाय जीवन्मुक्तस्य विद्यते ॥ ९१ ॥
पाणिपादादिमात्रोऽयमहमित्येष निश्चयः ।
अहंकारस्तृतीयोऽसौ लौकिकस्तुच्छ एव सः ॥ ९२ ॥
वर्ज्य एव दुरात्माऽसौ कन्दः संसारदुस्तरोः ।
अनेनाभिहतो जन्तुरधोऽधः परिधावति ॥ ९३ ॥
अनया दुरहंकृत्या भावात् संत्यक्तया चिरम् ।
शिष्टाहंकारवान् जन्तुः शमवान् याति मुक्तताम् ॥ ९४ ॥
प्रथमौ द्वावहंकारावङ्गीकृत्य त्वलौकिकौ ।
तृतीयाऽहंकृतिस्त्याज्या लौकिकी दुःखदायिनी ॥ ९५ ॥
अथ ते अपि संत्यज्य सर्वाहंकृतिवर्जितः ।
[1]स तिष्ठते तथाऽत्युच्चैः [2]परमेवाधिरोहति ॥ ९६ ॥

तन्मूलच्छेदं कृत्वा सुखी भवेत्याह—**विवेकमिति** । ब्रह्मातिरिक्तं न किंचिदस्तीति **विवेकम्** ॥ ८४ ॥ स्वातिरिक्तमनोमूलं किमित्यत्र तदस्ति नास्तीत्यास्थाऽनास्थारूपाविद्याविद्यात्मिका मायेत्याह—**आस्थेति** ॥ ८५ ॥ एवमविदित्वा **वासनातन्तुबद्धोऽयम्** । वासनाऽस्ति नास्तीति ज्ञानं बन्ध-मोक्षहेतुरित्यर्थः ॥ ८६ ॥ तृष्णैव बन्धकरीत्याह—**धीरोऽपीति** ॥ ८७ ॥ सर्वेषां दुःखहेतूनामपि तृष्णैव दीर्घदुःखदा, तन्मूलं स्वातिरिक्तं, स्वमात्रज्ञानतः तन्मूलोच्छेदकृत्सिद्धो भवतीत्याह—**परममिति** ॥ ८८ ॥ तृष्णोच्छेदनोपायस्तु तदहम्भावमवष्टभ्य अतदहंभावत्याग एवेत्याह—**अहमिति** । स्वातिरेकेण

[1] संति—अ २. [2] पद—उ.

नान्यदस्तीति ॥ ८९ ॥ तनुः निर्विशेषत्वात् । संविदो वृत्तिः ॥ ९०–९२ ॥ तृष्णाविजृम्भितसंसारदुस्तरोः ॥ ९३–९५ ॥ यद्यसल्लौकिकगृहदेहात्मधीत्याग-पूर्वकं ब्रह्माहमस्मीति ज्ञानमुदितं तदा तमोरजोवृत्तिमत्स्वातिरिक्तदेहाद्यहंभावं सत्ववृत्तिमद्ब्रह्माहंभावं च त्यक्त्वा यः केवलरूपेण आस्ते स ब्रह्मैव भवतीत्याह —अथेति । अथशब्दो विकल्पार्थः । तानपि पूर्वोक्तत्रिविधाहंभावानिति वक्तव्ये ते अपि इति विभक्तिव्यत्ययः । देहादिरस्मि, ब्रह्मास्मि, इति सर्वाहङ्कृतिविरळो य आस्ते सोऽयं मुनिः उच्चैः परं सर्वापह्नवसिद्धं ब्रह्म निष्प्रतियोगिकस्वमात्रमित्येव अधिरोहति तन्मात्रमवशिष्यते इत्यर्थः ॥ ९६ ॥

मनोऽभ्युदयनाशावेव बन्धमुक्ती

भोगेच्छामात्रको बन्धस्तत्त्यागो मोक्ष उच्यते ।
मनसोऽभ्युदयो नाशो मनोनाशो महोदयः ।
ज्ञमनो नाशमभ्येति मनोऽज्ञस्य हि शृङ्खला ॥ ९७ ॥
नानन्दं ननिरानन्दं नचलं नाचलं स्थिरम् ।
नसन्नासन्न चैतेषां मध्यं ज्ञानिमनो विदुः ॥ ९८ ॥
यथा सौक्ष्म्याच्चिदाभास्य आकाशो नोपलक्ष्यते ।
तथा निरंशश्चिद्भावः सर्वगोऽपि न लक्ष्यते ॥ ९९ ॥
सर्वसंकल्परहिता सर्वसंज्ञाविवर्जिता ।
सैषा चिदविनाशात्मा स्वात्मेत्यादिकृताभिधा ॥ १०० ॥
आकाशशतभागाच्छा ज्ञेषु निष्कलरूपिणी ।
सकलाऽमलसंसारस्वरूपैकात्मदर्शिनी ॥ १०१ ॥
नास्तमेति न चोदेति नोत्तिष्ठति न तिष्ठति ।
न च याति न चायाति न च नेह न चेह चित् ॥ १०२ ॥

सैषा चिदमलाकारा निर्विकल्पा निरास्पदा ॥ १०३ ॥

भङ्ग्यन्तरेण बन्धमोक्षस्थितिमाह—**भोगेति** । मनःसत्त्वासत्त्वे प्रेयःश्रेयोहेतू भवत इत्याह—**मनस इति** ॥ ९७ ॥ स्वाज्ञमनो मन एव, स्वज्ञमनस्तु ब्रह्मैव, इत्याह—**नानन्दमिति**। स्वातिरिक्तं सङ्कल्प्य न हि नन्दतीति **नानन्दं**, ब्रह्माकारेण परिणतं सत् **ननिरानन्दं**, न हि विषयात् विषयान्तरं प्रति चलतीति **नचलं**, स्वातिरिक्तसत्ताऽभावात् **नाचलं**, ब्रह्माकारेण **स्थिरं**, व्यक्ताव्यक्तकलनावैरळ्यात् **नसत् नासत्**, किंतु एतेषां **मध्यं** सर्वाधिकरणं ब्रह्मैव **ज्ञानिमनो विदुः** ब्रह्मविद इत्यर्थः ॥ ९८ ॥ ब्रह्माकारपरिणतं मनो न लक्ष्यते इत्यत्र सदृष्टान्तमाह—**यथेति**। **चिद्भावो** ब्रह्माकारवृत्तिरित्यर्थः ॥९९॥ चित्स्वरूपं कथं? इत्यत आह—**सर्वेति**। या **सर्वसङ्कल्परहिता** मनोविलक्षणत्वात् **सर्वसंज्ञाविवर्जिता** निर्विशेषत्वात् **सैषा** ॥ १०० ॥ स्वाज्ञदृष्ट्या **सकळा**, स्वज्ञदृष्ट्या **अमलसंसारस्वरूपा एकात्मदर्शिनी** जीवन्मुक्तात्मप्रकाशिनी ॥ १०१ ॥ चितो निर्विशेषतया उदयादिविकृत्यभावात् ॥ १०२ ॥ **निरास्पदा**, चितः स्वमात्रतया निरधिष्ठानत्वात् ॥ १०३ ॥

चिद्विद्याऽधिकारिनिरूपणम्

आदौ शमदमप्रायैर्गुणैः शिष्यं विशोधयेत् ।
पश्चात् सर्वमिदं ब्रह्म शुद्धस्त्वमिति बोधयेत् ॥ १०४ ॥
अज्ञस्यार्धप्रबुद्धस्य सर्वं ब्रह्मेति यो वदेत् ।
महानरकजालेषु स तेन विनियोजितः ॥ १०५ ॥
प्रबुद्धबुद्धेः प्रक्षीणभोगेच्छस्य निराशिषः ।
नास्त्यविद्या[1]मलमिति प्राज्ञस्तूपदिशेद्गुरुः ॥ १०६ ॥

[1] मलातीतः प्राज्ञस्योप—अ.

इत्थंभूतचिद्विद्या यथोक्ताधिकारिणे देया, निरधिकारिणे न देया इत्याह—**आदाविति** ॥ १०४ ॥ उपदेशमहिम्ना निरधिकार्यपि कृतार्थो भवतीत्यत्र—चित्तशुद्ध्यभावात् यथावत् ज्ञानं नोदेति, आभासज्ञानतः चित्तशुद्धिसाधनानुष्ठानश्रद्धा निवर्तते, तेनायं नारकी भवेदित्याह—**अज्ञस्येति**। **तेन** गुरुणा ॥ १०५ ॥ उपदेशाधिकारी कीदृश इत्यत्र—**प्रबुद्धेति** ॥ १०६ ॥

मायाहननेन ब्रह्मप्राप्तिः

सति दीप इवालोकः सत्यर्के इव वासरः ।
सति पुष्प इवामोदश्चिति सत्यां जगत्तथा ॥ १०७ ॥
प्रतिभासत एवेदं न जगत् परमार्थतः ।
ज्ञानदृष्टौ प्रसन्नायां [1]प्रबोधे विततोदये ॥ १०८ ॥
यथावज्ज्ञास्यसि स्वस्थो मद्वा[2]ग्वृष्टिबलाबलम् ।
अविद्ययैवोत्तमया स्वार्थनाशोद्यमार्थया ॥ १०९ ॥
विद्या संप्राप्यते ब्रह्मन् सर्वदोषापहारिणी ।
शाम्यति ह्यस्रमस्रेण मलेन क्षाल्यते मलम् ॥ ११० ॥
शमं विषं विषेणैति रिपुणा हन्यते रिपुः ।
ईदृशी भूतमायेयं या स्वनाशेन हर्षदा ॥ १११ ॥
न लक्ष्यते स्वभावोऽस्या वीक्ष्य[3]माणैव नश्यति ।
नास्त्येषा परमार्थेनेत्येवं भावनयेद्धया ॥ ११२ ॥
सर्वं ब्रह्मेति यस्यान्तर्भावना सा हि मुक्तिदा ।
भेददृष्टिरविद्येयं सर्वथा तां विसर्जयेत् ॥ ११३ ॥

[1] प्रबोध—अ २, क. [2] ग्दृष्टि—अ, अ १. [3] माणे विन—ड, उ १.

मुनें नासाद्यते तद्धि पदमक्षयमुच्यते ।
कुतो जातेयमिति ते द्विज माऽस्तु विचारणा ॥ ११४ ॥
इमां कथमहं हन्मीत्येषा तेऽस्तु विचारणा ।
अस्तं गतायां क्षीणायामस्यां ज्ञास्यसि तत् पदम् ॥ ११५ ॥
यत एषा यथा चैषा यथा नष्टेत्यखण्डितम् ।
तदस्या रोगशालाया यत्नं कुरु चिकित्सने ॥ ११६ ॥
यथैषा जन्मदुःखेषु न भूयस्त्वां नियोक्ष्यति ।
स्वात्मनि स्वपरिस्पन्दैः स्फुरत्यच्छैश्चिदर्णवः ॥ ११७ ॥
एकात्मकमखण्डं तदित्यन्तर्भाव्यतां दृढम् ।

इदं जगदवभासते न हि त्वदुपदिष्टं ब्रह्मेत्याशङ्क्यमानमालक्ष्य सदृष्टान्तं जगन्मूलं प्रतिपादयति—**सतीति** । न हि निरास्पदं जगदुदेति जगतो दृश्यमानत्वात्, तदधिष्ठानं ब्रह्म स्वयमेवेति निश्चिन्वित्यर्थः ॥ १०७ ॥ सद्वितीयं ब्रह्मेत्यत आह—**प्रतीति** । जगतः प्रतीतिकालीनत्वेन मिथ्यात्वात् तदधिष्ठानं अद्वितीयमेवेत्यर्थः । एवं व्यवसायं करोषि चेत् सम्यज्ज्ञानदृष्टिरुदेति, ततो निरधिष्ठानं ब्रह्म स्वमात्रधिया जानासीत्याह—**ज्ञानेति** ॥ १०८ ॥ यदा निरधिष्ठानं ब्रह्म साक्षात्करोषि तदा मदुपदेशसुखं वेत्सीत्यर्थः । श्रवणादेः अविद्याकार्यत्वेन तेन विद्यातत्फलसिद्धिः कुत इत्यत आह—**अविद्ययेति** । **अविद्ययैवोत्तमया** श्रवणादिरूपया ॥ १०९ ॥ त्वदाशङ्कितसर्वदोषापहारिणी । **मलं** दर्पणादेः ॥ ११०–१११ ॥ तदसंभवज्ञानमेव मुक्तिसाधनमित्याह—**नास्त्येषेति** ॥ ११२ ॥ सर्ववर्जितसर्वम् । एवं **भेददृष्टिरविद्येयम्** ॥ ११३ ॥ यद्भेददर्शनागम्यं तदेव स्वरूपमित्याह—**मुन इति** । यत् **मुने नासाद्यते** । मायामूलमविचार्य तदुन्मूलनयत्नवान् भवेत्याह—**कुत इति** ॥ ११४–११५ ॥ शशविषाणवत् माया नास्तीति तावन्मायारोगचिकित्सां कुर्वित्याह—**यत इति** ।

यत एषा जाता **यथा चैषा** ब्रह्मण्येव स्थिता ॥ ११६ ॥ तथा निर्मूलनं कुर्वित्यर्थः । ततः किमित्यत आह—**स्वात्मनीति** । यदोन्मीलिता माया तदैव **स्वात्मनि** प्रतीचि **स्वपरिस्पन्दैः अच्छैः** विश्वविश्वाद्यविकल्पानुज्ञैकरसान्तैः **चिदर्णवः** तुर्यतुर्यः स्फुरति विजृम्भत इत्यर्थः ॥ ११७ ॥ तस्य नानाऽऽत्मत्वं मन्यमानमालक्ष्य अखण्डतामाह—एकेति । तुर्यतुर्यविकल्पितविश्वविश्वादीनां तुर्यतुर्यानतिरेकात् सर्वमेकात्मकमखण्डैकरसमिति चिन्त्यतामित्यर्थः ।

ब्रह्मचिच्छक्तेः संसारिजीवत्वम्

किंचित्क्षुभितरूपा सा चिच्छक्तिश्चिन्महार्णवे ॥ ११८ ॥
[1]तन्मयैव स्फुरत्यच्छा तत्रैवोर्मिरिवार्णवे ।
आत्मन्येवात्मना व्योम्नि यथा सरति मारुतः ॥ ११९ ॥
तथैवात्माऽऽत्मशक्त्यैव स्वात्मन्येवैति लोलताम् ।
क्षणं स्फुरति सा देवी सर्वशक्तितया तथा ॥ १२० ॥
देशकालक्रियाशक्तिर्न यस्याः [2]संप्रकर्षति ।
स्वस्वभावं विदित्वोच्चैरप्यनन्तपदे स्थिता ॥ १२१ ॥
रूपं परिमितेनासौ भावयत्यविभाविता ।
यदैवं भावितं रूपं तया परमकान्तया ॥ १२२ ॥
तदैवैनामनुगता नामसंख्यादिका दृशः ।
विकल्पकलिताकारं देशकालक्रियाऽऽस्पदम् ॥ १२३ ॥
चितो रूपमिदं ब्रह्मन् क्षेत्रज्ञ इति कथ्यते ।
वासनाः कल्पयन् सोऽपि यात्यहंकारतां पुनः ॥ १२४ ॥

[1] तन्मयेव—अ, अ १, अ २, क. [2] संप्रकर्षणे—अ.

अहंकारो विनिर्णेता कल्पकी बुद्धिरुच्यते ।
बुद्धिः संकल्पिताकारा प्रयाति मननास्पदम् ॥ १२५ ॥
मनो घनविकल्पं तु [1]गच्छतीन्द्रियतां शनैः ।
पाणिपादमयं देहमिन्द्रियाणि विदुर्बुधाः ॥ १२६ ॥
एवं जीवो हि संकल्पवासनारज्जुवेष्टितः ।
दुःखजालपरीतात्मा क्रमादायाति नीचताम् ॥ १२७ ॥
इति शक्तिमयं चेतो घनाहंकारतां [2]गतम् ।
कोशकारक्रिमिरिव स्वेच्छया याति बन्धनम् ॥ १२८ ॥
स्वसंकल्पिततन्मात्रजालाभ्यन्तरवर्ति च ।
परां विवशतामेति शृङ्खलाबद्धसिंहवत् ॥ १२९ ॥
क्वचिन्मनः क्वचिद्बुद्धिः क्वचिज्ज्ञानं क्वचित् क्रिया ।
क्वचिदेतदहंकारः क्वचिच्चित्तमिति स्मृतम् ॥ १३० ॥
क्वचित् प्रकृतिरित्युक्तं क्वचिन्मायेति कल्पितम् ।
क्वचिन्मलमिति प्रोक्तं क्वचित् कर्मेति संस्मृतम् ॥ १३१ ॥
क्वचिद्बन्ध इति ख्यातं क्वचित् पुर्यष्टकं स्मृतम् ।
प्रोक्तं क्वचिदविद्येति क्वचिदिच्छेति संमतम् ॥ १३२ ॥
इमं संसारमखिलमाशापाशविधायकम् ।
दधदन्तःफलैर्हीनं वटधाना वटं यथा ॥ १३३ ॥

[1] गच्छन्ती—अ २, क.
[2] गतः—अ, अ १, अ २, क.

चिन्ताऽनलशिखादग्धं कोपाजगर[1]चर्वितम् ।
कामाब्धिकल्लोलरतं विस्मृतात्मपितामहम् ॥ १३४ ॥
समुद्धर मनो ब्रह्मन् मातङ्गमिव कर्दमात् ।
एवं जीवाश्रितो भावा भवभावनयाऽऽहिताः ॥ १३५ ॥
ब्रह्मणा [2]कल्पिताकारा लक्षशोऽप्यथ कोटिशः ।
संख्याऽतीताः पुरा जाता जायन्तेऽद्यापि चाभितः ॥ १३६ ॥
उत्पत्स्यन्तेऽपि चैवान्ये कणौघा इव निर्झरात् ।
केचित् प्रथमजन्मानः केचिज्जन्मशताधिकाः ॥ १३७ ॥
केचिच्चासंख्यजन्मानः केचिद्द्वित्रिभवान्तराः ।
केचित् किन्नरगन्धर्वविद्याधरमहोरगाः ॥ १३८ ॥
केचिदर्केन्दुवरुणाख्यक्षाधोक्षजपद्मजाः ।
केचिद्ब्राह्मणभूपालवैश्यशूद्रगणाः स्थिताः ॥ १३९ ॥
केचित्तृणौषधीवृक्षफलमूलपतङ्गकाः ।
केचित् कदम्बजम्बीरसालतालतमालकाः ॥ १४० ॥
केचिन्महेन्द्रमलयसह्यमन्दरमेरवः ।
केचित् क्षारोदधिक्षीरघृतेक्षुजलराशयः ॥ १४१ ॥
केचिद्विशालाः ककुभः केचिन्नद्यो महारयाः ।
विहरन्त्युच्चकैः केचिन्निपतन्त्युत्पतन्ति च ॥ १४२ ॥

[1] गर्वि—अ, अ १, अ २, उ. निर्मि—क.
[2] कल्पिता—अ, अ १, उ, उ १.

कन्तुका इव हस्तेन मृत्युनाऽविरतं हताः ।
भुक्त्वा जन्मसहस्राणि भूयः संसारसंकटे ॥ १४३ ॥
पतन्ति केचिदबुधाः संप्राप्या[1]पि [2]विवेकिताम् ।

चिच्छक्तिः क्व विकल्पिता? तदियत्ता कीदृशी? इत्यत आह—**किंचिदिति** । अक्षुभितात्मनि **किंचित्क्षुभितरूपा सा चिच्छक्तिः** चित्सामान्यं साक्षिरूपिणी **चिन्महार्णवे** ॥ ११८–१२० ॥ देशकालक्रियाशक्तिर्न साक्षीशसूत्रादिरूपिणी **यस्याः** चिच्छक्तेः स्वरूपं अविकल्पानुज्ञैकरसादिविश्वविश्वान्तं **संप्रकर्षति** पर्यवसाने तत् सर्वं उपसंहृत्य **स्वस्वभावं** निष्प्रतियोगिकचिन्मात्रमिति **विदित्वोच्चैरप्यनन्तपदे स्थिता** ॥ १२१ ॥ सैवानादिसिद्धस्वाज्ञादिदृष्ट्या स्वात्मरूपं **परिमितेनासौ भावयति** वस्तुतस्तु **अविभाविता** । **यदैवं भावितं रूपं तया परमकान्तया** स्वाधिष्ठेयमायया ॥ १२२ ॥ **तदैवैनां** चिच्छक्तिं **अनुगता** विश्वविश्वादिनामसङ्ख्यादिका **दृशः** तदा **विकल्पकलिताकारं देशकालक्रियाऽऽस्पदं** साक्षीशादिकल्पनास्पदम् ॥ १२३ ॥ **चितो रूपमिदं ब्रह्मन् क्षेत्रज्ञ इति कथ्यते,** क्षेत्रज्ञस्यैव स्वाज्ञानसम्पत्त्या साक्ष्यादिसर्वकल्पकत्वात् । विराडादीनामेवं स्वाज्ञानाभावात् न हि कल्पकत्वमस्ति । यत एवं अतः क्षेत्रज्ञ एव स्वातिरिक्तमस्ति नास्तीति विकल्पकः, तस्य बन्धमोक्षाधिकारित्वात् । तस्यैवं कल्पनासाधनं किं इत्यत्र स्वातिरिक्तनानावासनात्मिका बुद्धिरित्याह—**वासना** इति ॥ १२४ ॥ कीदृशोऽयमहंकार इत्यत्र—**अहङ्कार इति** । ततः **बुद्धिरिति** ॥ १२५ ॥ ततः **मन इति** ॥ १२६–१२८ ॥ अयं जीवः **परां विवशतामेति** ॥ १२९ ॥ तद्बन्धनहेतुस्वाविद्यातत्त्वं बहुधा विकल्पयति —**क्वचिदिति** । पुर्यष्टकशब्देन व्यष्टिसमष्ट्यात्मकं लिङ्गशरीरमुच्यते ॥ १३०–१३२ ॥ इत्थंभूतं स्वाविद्यातत्त्वं मनः तद्गतस्वातिरिक्तास्तित्वभ्रमार्णवात् समुद्भवेत्याह—**इममिति** ॥ १३३–१३४ ॥ इत्थंभूतो जीवः किं एकरूपः उत अनेकरूपः? इत्यत्र—एकजीवपक्षे लिङ्गोपाधिको जीवः

[1] प्यवि—अ २. [2] विवेक—अ १, अ २, क.

स्वयमेक एव स्थावरजङ्गमात्मकं जगत् तच्चित्तकल्पितं तद्दृष्ट्या एवंकल्पक-स्वाज्ञानक्षयतः स्वज्ञानं प्रादुर्भूतं स्वातिरिक्तकलनासंभवप्रबोधसमकालं ब्रह्मैव यत् पुरा नानात्वेन विभातं तन्निष्प्रतियोगिकं सत् स्वमात्रमवशिष्यते । नानाजीवसद्भावपक्षे तु मूलाविद्याया एकत्वेऽपि तत्प्रविभक्ततूलान्तःकरणाविद्याया बहुत्वात् तदुपाधिकजीवस्यापि बहुत्वं, तत्रैकस्य ज्ञानान्मुक्तिः इतरस्याज्ञानात् बन्ध इति च शास्त्रव्यवस्थासिद्धिः युज्यत इति मनसि निधाय जीवानेकत्वं प्रपञ्चयति—एवमिति ॥ १३९–१४३ ॥

मायाऽधीना ब्रह्मणः सृष्टिः

दिक्कालाद्यनवच्छिन्नमात्मतत्त्वं स्वशक्तितः ॥ १४४ ॥

लीलयैव यदादत्ते दिक्कालकलितं वपुः ।

[1]तदेव जीवपर्यायवासनावेशतः परम् ॥ १४५ ॥

मनःसंपद्यते [2]लोलं कलनाकलनोन्मुखम् ।

[3]कलयन्ती मनःशक्तिरादौ भावयति क्षणात् ॥ १४६ ॥

आकाशभावनामच्छां शब्दबीजरसोन्मुखीम् ।

ततस्तद्घनतां यातं घनस्पन्दक्रमान्मनः ॥ १४७ ॥

भावयत्यनिलस्पन्दं स्पर्शबीजरसोन्मुखम् ।

ताभ्यामाकाशवाताभ्यां दृढाभ्यासवशात्ततः ॥ १४८ ॥

शब्दस्पर्शस्वरूपाभ्यां संघर्षाज्जन्यतेऽनलः ।

रूपतन्मात्रसहितं त्रिभिस्तैः सह संमितम् ॥ १४९ ॥

[1] तदैव—उ. [2] लोकं—क.

[3] कलयन्ति—अ, अ १, अ २, क.

मनस्तादृग्गुणगतं रसतन्मात्रवेदनम् ।
क्षणाच्चेतत्यपां शैत्यं जलसंवित्ततो भवेत् ॥ १९० ॥
ततस्तादृग्गुणगतं मनो भावयति क्षणात् ।
गन्धतन्मात्रमेतस्माद्भूमिसंवित्ततो भवेत् ॥ १९१ ॥
अथेत्थंभूततन्मात्रवेष्टितं तनुतां जहत् ।
वपुर्वह्निकणाकारं स्फुरितं व्योम्नि पश्यति ॥ १९२ ॥
अहंकारकलायुक्तं बुद्धिबीजसमन्वितम् ।
तत्पुर्यष्टकमित्युक्तं भूतहृत्पद्मषट्पदम् ॥ १९३ ॥
तस्मिंस्तु तीव्रसंवेगाद्भावयद्भासुरं वपुः ।
स्थूलतामेति पाकेन मनो बिल्वफलं यथा ॥ १९४ ॥
मूषास्थद्रुतहेमाभं स्फुरितं विमलाम्बरे ।
संनिवेशमथादत्ते तत्तेजः स्वस्वभावतः ॥ १९५ ॥
ऊर्ध्वं शिरःपिण्डमयमधः पादमयं तथा ।
पार्श्वयोर्हस्तसंस्थानं मध्ये चोदरधर्मिणम् ॥ १९६ ॥
कालेन स्फुटतामेत्य भवत्यमलविग्रहम् ।

एवं जीवानां नानाविधत्वमभिधाय पुनर्जीवानां ब्रह्मानन्यत्वं प्रकटयितुं निर्विशेषं ब्रह्मैव सविशेषभावमेत्य मायामधिष्ठाय वियदादिपञ्चभूततत्कार्याविद्याऽण्डं ससर्जेत्याह—**दिक्कालेति** । स्वात्मतत्त्वस्य स्वातिरिक्तदिक्कालाद्यसंभवप्रबोधसिद्धत्वात् निष्प्रतियोगिकब्रह्ममात्रमवशिष्यत इत्यत्र न विवादः । तदेव **निर्विशेषं ब्रह्म स्वाज्ञदृष्ट्या स्वशक्तितः** ॥ १४४ ॥ यदेतन्निर्विशेषं ब्रह्म **लीलया** दिक्कालादि कल्पयित्वा तत्कलनाकलितेशादिभावनाऽऽस्पदं **वपुः** सविशेषभावम**ादत्ते तदेव परम**ीश्वरतत्त्वं नानाविधजीवपर्यायवासनाऽभिनिवेशतः सर्वकलनानिर्वाहकं

मनः संपद्यत इत्याह—**मन** इति । आदावीश्वरतत्त्वं प्रपञ्चरचनानिर्वाहाय स्वाभिन्नं शोधितपारदवत् लोलं चञ्चलं भवितव्यकलनाकलनोन्मुखं **मनः संपद्यते** ॥ १४५ ॥ ततः किमित्यत्र—ईश्वरेच्छाशक्तिरूपिणी मनश्शक्तिः आकाशादिक्रमेण पञ्चतन्मात्राणि भावयतीत्याह—**कलयन्तीति** । ईशाधिष्ठितेयं मानसी शक्तिः विश्वकलनां **कलयन्ती** सत्यादौ क्षणमात्रतः **शब्दबीजरसविषयां अच्छां** आकाशभावनां भावयति ॥ १४६ ॥ ततः किमित्यत आह—**तत इति** । ततः आकाशसृष्ट्यनन्तरं पूर्वपूर्वभूतापेक्षया उत्तरोत्तरभूतानां **घनस्पन्दक्रमात् तन्मनो-घनतां यातं** सत् **अनिलस्पन्दं भावयतीत्युक्तार्थम्** ॥ १४७ ॥ मनः परिणतभूतद्वयाभ्यां अनलो जायत इत्याह—**ताभ्यामिति** ॥ १४८ ॥ ततस्तु **रूपतन्मात्रसहितं** आकाशादिभिः **त्रिभिः** ॥ १४९ ॥ **रसतन्मात्रवेदनं** भवति । ततः **क्षणात्** ॥ १५० ॥ **तादृग्गुणगतं** शब्दादिगुणचतुष्टययुक्तं **मनो भावय**ति ॥ १५१ ॥ एवं पञ्चभूतभावनाभावितं मनस्तनुतां विहाय पुर्यष्टकरूपं भजतीत्याह—**अथेति** । स्वीयं **वपुः** ॥ १५२ ॥ ततः—**अहङ्कारेति** । **पुर्यष्टकं** तु वियदादिपञ्चभूतकामकर्मतमांसीति—

खवाय्वग्न्यम्बुक्षितयो भूतसूक्ष्माणि पञ्च च ।
अविद्याकामकर्माणि लिङ्गं पुर्यष्टकं विदुः ॥

इति वार्तिककारोक्तेः ॥ १५३ ॥ यन्मनः पुर्यष्टकाकारेण परिणतं तदेव स्थूलशरीराकारेण परिणमत इत्याह—**तस्मिन्निति** । **तस्मिंस्तु** पुर्यष्टके **तीव्रसंवेगात्** सुदृढाभिमानात् **भावयद्भासुरं वपुः** शिरःपाण्यादिमत् स्थूलं शरीरं भावयत् सत् **स्थूलतामिति** ॥ १५४–१५५ ॥ मनो यत्राभिनिविष्टं तत्स्थूलशरीरं प्रपञ्चयति—**ऊर्ध्वमिति** ॥ १५६ ॥

प्रजासृष्टिः अनन्तशाखकल्पनं च

बुद्धिसत्त्वबलोत्साहविज्ञानैश्वर्यसंस्थि[1]तः ॥ १५७ ॥

[1] तम्—अ २, क.

स एव भगवान् ब्रह्मा सर्वलोकपितामहः ।
अवलोक्य वपुर्ब्रह्मा कान्तमात्मीयमुत्तमम् ॥ १५८ ॥
चिन्तामभ्येत्य भगवांस्त्रिकालामल[1]दर्शनः ।
एतस्मिन् परमाकाशे चिन्मात्रैकात्म[2]रूपिणि ॥ १५९ ॥
अदृष्टपारपर्यन्ते प्रथमं किं भवेदिति ।
इति चिन्तितवान् ब्रह्मा सद्योजातामलात्मदृक् ॥ १६० ॥
अपश्यत् सर्गबृन्दानि समतीतान्यनेकशः ।
स्मरत्यथो स सकलान् सर्वधर्मगुणक्रमात् ॥ १६१ ॥
लीलया कल्पयामास चित्राः संकल्पतः प्रजाः ।
नानाऽऽचारसमारम्भा गन्धर्वनगरं यथा ॥ १६२ ॥
[3]तासां स्वर्गापवर्गार्थं धर्मकामार्थसिद्धये ।
अनन्तानि विचित्राणि शास्त्राणि समकल्पयत् ॥ १६३ ॥

स्वीयं हिरण्यगर्भोऽवलोक्य इतः किं कर्तव्यमिति सञ्चिन्त्य स्वसङ्कल्पतः प्रजाः सृष्ट्वा तासां अभ्युदयार्थं अनन्तशास्त्राणि च कल्पयामासेत्याह—**बुद्धीति** ॥ १५७ ॥ **य एवं प्रादुर्बभूव स एव**। "ऊर्ध्वं शिरःपिण्डमयं" इत्यादिविशेषणविशिष्टं **अवलोक्य** ॥ १५८ ॥ **त्रिकालामलदर्शनः** सर्वज्ञत्वात्। तच्चिन्ताप्रकारमाह—**एतस्मिन्निति**। यन्मुमुक्षुभिः आत्मतया ध्येयं **एतस्मिन्** ॥ १५९ ॥ **अदृष्टपारपर्यन्ते** अपरिच्छिन्नस्वरूपे। **सद्योजातामलात्मदृक्** सदा पत्यग्दृष्टिः ॥ १६० ॥ ततः किं करोतीत्यत्र --**अपश्यदिति** ॥ १६१–१६३ ॥

[1] विग्रहः—उ, उ १.
[2] रूपिणी—उ, उ १.
[3] तेषां—उ, उ १.

विकल्पितस्य असत्यत्वेनोपेक्षार्हत्वम्

विरिञ्चरूपान्मनसः कल्पितत्वाज्जगत्स्थितेः ।
तावत्स्थितिरियं प्रोक्ता तन्नाशे नाशमाप्नुयात् ॥ १६४ ॥
न जायते न म्रियते क्वचित् किंचित् कदाचन ।
परमार्थेन विप्रेन्द्र मिथ्या सर्वं तु दृश्यते ॥ १६५ ॥
कोशमाशामुजङ्घानां संसाराडम्बरं त्यज ।
असदेतदिति ज्ञात्वा [1]मातृभावं निवेशय ॥ १६६ ॥
गन्धर्वनगरस्यार्थे भूषितेऽभूषिते तथा ।
अविद्यांशे सुतादौ वा कः क्रमः सुखदुःखयोः ॥ १६७ ॥
धनदारेषु वृद्धेषु दुःखं युक्तं न तुष्टता ।
[2]वृद्धायां मोहमायायां कः समाश्वासवानिह ॥ १६८ ॥
यैरेव जायते रागो मूर्खस्याधिकतां गतैः ।
तैरेव भोगैः प्राज्ञस्य विराग उपजायते ॥ १६९ ॥
अतो निदाघ तत्त्वज्ञ व्यवहारेषु [3]संस्तुतेः ।
नष्टं नष्टमुपेक्षस्व प्राप्तं प्राप्तमुपाहर ॥ १७० ॥
अनागतानां भोगानामवाञ्छनमकृत्रिमम् ।
आगतानां च संभोग इति पण्डितलक्षणम् ॥ १७१ ॥
शुद्धं सदसतोर्मध्यं पदं [4]बुद्ध्वाऽवलम्ब्य च ।
सबाह्याभ्यन्तरं दृश्यं मा गृहाण विमुञ्च [5]मा ॥ १७२ ॥

[1] मात्र—अ १. मात्रा—अ. [2] दृढायां—अ.
[3] संहृतेः—उ. [4] बुद्धया—अ १, अ २, क. [5] न—उ १.

यस्य नेच्छा तथाऽनिच्छा ज्ञस्य कर्मणि तिष्ठतः ।
न तस्य लिप्यते प्रज्ञा पद्मपत्रमिवाम्बुभिः ॥ १७३ ॥

यदि ते नेन्द्रियार्थश्रीः [1]स्वदन्ते हृदि वै द्विज ।
तदा विज्ञातविज्ञेयः समुत्तीर्णो भवार्णवात् ॥ १७४ ॥

उच्चैःपदाय परया प्रज्ञया वासनागणात् ।
पुष्पाद्गन्ध[2]मिवोदारं चेतोवृत्तिं पृथक्कुरु ॥ १७५ ॥

संसाराम्बुनिधावस्मिन् वासनाऽम्बुपरिप्लुते ।
ये प्रज्ञानावमारूढास्ते तीर्णाः पण्डिताः परे ॥ १७६ ॥

न त्यजन्ति न वाञ्छन्ति व्यवहारं जगद्गतम् ।
सर्वमेवानुवर्तन्ते [3]पारावारविदो जनाः ॥ १७७ ॥

ब्रह्मविकल्पितं ब्रह्मवत् सत्यमित्यत्र—यावत्तन्मनः तावत्तिष्ठति, तन्नाशे नश्यतीत्याह—**विरिञ्चे**ति ॥ १६४ ॥ वस्तुमात्रदृष्ट्या इदं **न जायते** ॥ १६५ ॥ तत्र मया किं कर्तव्यमित्यत्र—**कोशमिति** । शशविषाणवत् **असदेतदिति ज्ञात्वा** पुनस्तदस्ति नास्तीति वा मातृभावं निवेशय ॥ १६६ ॥ कथं पुनः एतदसत्पदमर्हति? सत्त्वेन प्रतीयमानत्वात् नासत् इत्याशङ्क्य, परमार्थदृष्टेः निष्प्रतियोगिकब्रह्मात्मभावारूढत्वात् तद्दृष्ट्या ब्रह्मातिरिक्तं शशविषाणादप्यसदेव, स्वज्ञदृष्ट्या प्रातिभासिकतामर्हतीत्याह—**गन्धर्वे**ति ॥ १६७ ॥ प्रातिभासिकेष्वपि **धनदारेषु । वृद्धायां मोहमायायां** चरमविक्रियाऽभिमुखायां **कः समाश्वासवानिह** को वा विवेकी स्वातिरेकेण मायातत्कार्यमस्ति नास्तीति तत्प्रवृत्तौ निवृत्तौ वा समाश्वासवानिह विश्रान्तचित्तो भवति? न कोऽपीत्यर्थः ॥ १६८ ॥ यत्र स्वाज्ञानां राग उदेति तत्र स्वज्ञानां विरागो भवतीत्याह—**यैरिति** ॥ १६९ ॥

[1] स्पन्दते—अ. [2] मपो—अ १, अ २, क. [3] परापर—अ.

यत एवं **अतः** । विधिवशात् **नष्टम्** ॥ १७० ॥ यादृच्छिकलाभालाभाकृत्रिमसमत्वं हि पण्डितलक्षणमित्याह—**अनागतानामिति** ।

पण्डा परात्मविज्ञानं सञ्जाता यस्य धीमतः ।
स मुनिः पण्डितो विद्वान् जीवन्मुक्त इति स्मृतः ॥ १७१ ॥

यदि त्वं पण्डितोऽसि तदा सदसत्प्रपञ्चाधिकरणं ब्रह्माहमिति विदित्वा स्वान्तर्बाह्यकलना अस्ति नास्तीति विभ्रमं मुञ्चेत्याह—**शुद्धमिति** ॥ १७२ ॥ विदुषोऽपि कर्मलेपः स्यादित्यत आह—**यस्येति** । कर्मफले **यस्य नेच्छा** । सर्वत्र इच्छाऽनिच्छे कर्मलेपालेपहेतू भवत इत्यर्थः ॥ १७३ ॥ यस्य मनः इन्द्रियार्थे न प्रसरति स संसृतिसागरं तरतीत्याह—**यदीति** । हे **द्विज** ते तव **स्वदन्ते** स्वभावतो दान्ते **हृदि यदि इन्द्रियार्थश्रीः** विषयग्रामसम्पत् **नोदेति तदा** त्वं **विज्ञातविज्ञेयो** विदितवेद्यः सन् **भवार्णवात् समुत्तीर्णो** भवसीत्यर्थः ॥ १७४ ॥ वासनावलितचित्तानां भवार्णवतरणं कुत इत्यत्र वासनाचित्त-पृथक्करणोपायतो भवाब्धिः तरितुं शक्य इत्याह—**उच्चैरिति** ॥ १७५ ॥ एवं पृथक्करणतः प्रज्ञा उदेति, तन्नौकारूढाः भवाब्धिं तरन्तीत्याह—**संसारेति** ॥ १७६–१७७ ॥

संकल्पच्छेदनेन संसारमूलोच्छेदः

अनन्तस्यात्मतत्त्वस्य सत्तासामान्यरूपिणः ।
[1]चितश्चेत्योन्मुखत्वं यत्तत् संकल्पाङ्कुरं विदुः ॥ १७८ ॥
लेशतः प्राप्तसत्ताकः स एव घनतां शनैः ।
याति चित्तत्वमापूर्य दृढं [2]जाळ्यायमेघवत् ॥ १७९ ॥
भावयन्ति[न्ती] चितिश्चैत्यं व्यतिरिक्तमिवात्मनः ।
संकल्पतामिवायाति बीजमङ्कुरतामिव ॥ १८० ॥

[1]. चित्तश्चैत्यो—उ, उ १. [2]. जाळ्यायं—अ.

संकल्पनं हि संकल्पः स्वयमेव प्रजायते ।
वर्धते स्वयमेवाशु दुःखाय न सुखाय [1]यत् ॥ १८१ ॥
मा संकल्पय संकल्पं मा भावं भावय स्थितौ ।
संकल्पनाशने यत्तो न भूयोऽननुगच्छति ॥ १८२ ॥
भावनाऽभावमात्रेण संकल्पः क्षीयते स्वयम् ।
संकल्पेनैव संकल्पं मनसैव मनो मुने ॥ १८३ ॥
[2]छित्त्वा स्वात्मनि तिष्ठ त्वं किमेतावति दुष्करम् ।
यथैवेदं नभः शून्यं जगच्छून्यं तथैव हि ॥ १८४ ॥
तण्डुलस्य यथा चर्म यथा ताम्रस्य कालिमा ।
नश्यति क्रियया विप्र पुरुषस्य तथा मलम् ॥ १८५ ॥
जीवस्य तण्डुलस्येव मलं सहजमप्यलम् ।
नश्यत्येव न संदेहस्तस्मादुद्योगवान् [3]भव ॥ १८६ ॥

इति महोपनिषत् ॥

यतः संसारित्वासंसारित्वहेतुः सङ्कल्पः अतः सङ्कल्पं मा कुर्वित्याह—**अनन्तस्येति** ॥ १७८ ॥ यच्चितः चैत्याभिमुख्यं सङ्कल्पाङ्कुरं तदेव कालान्तरे जलस्य भवो जाळ्यं यदायतनं सोऽयं जाळ्यायः सचासौ मेघश्चेति **जाळ्यायमेघ इव मेघवत् दृढं चित्तत्वमापूर्य घनतां याति** ॥ १७९ ॥ ततः सङ्कल्पबीज-पूरितेयं **चितिः स्वातिरिक्तं चैत्यं भावयन्तीव** लक्ष्यते । ततः इयं चितिः **बीजाङ्कुरवत् सङ्कल्पतामिवायाति** ॥ १८० ॥ ततः सङ्कल्परूपेण **जायते वर्धते** इति यत् तदनर्थाय भवति ॥ १८१ ॥ यत एवं अतः त्वं कदाऽपि **मा सङ्कल्पय** । यदि प्रमादतः सङ्कल्प उदेति तदा सङ्कल्पोन्मूलने

[1] च—अ. [2] जित्वा—उ, उ १. [3] भवेत्—अ, अ १.

जागरूको भवेत्यर्थः ॥ १८२ ॥ सङ्कल्पनाशनोपायः क इत्यत आह—**भावनेति** ॥ १८३ ॥ सङ्कल्पाभावेऽपि तदाश्रयं जगत् स्यादित्यत आह—**यथेति** ॥ १७४ ॥ स्वातिरिक्तसङ्कल्पोन्मूलनयत्नः किंफलवानित्यत आह—**तण्डुलस्येति** ॥ १८५ ॥ सङ्कल्पादिमलस्य जीवसहजत्वात् तन्नाशः कथं इत्याशङ्क्याह—**जीवस्येति**। तस्मात् सङ्कल्पोन्मूलनयत्नः सफल एव। यस्मादेवं **नश्यत्येव न सन्देहः तस्मादुद्योगवान् भव** ॥ १८६ ॥ **इतिमहोपनिषच्छब्दौ** पञ्चमाध्यायपरिसमाप्त्यर्थौ ॥

इति पञ्चमोऽध्यायः

षष्ठोऽध्यायः

समाध्यभ्यासेन परमेश्वरभावापत्तिः

अन्तरास्थां परित्यज्य भावश्रीं भावनामयीम्।
योऽसि सोऽसि जगत्यस्मिन् लीलया विहरानघ ॥ १ ॥
सर्वत्राहमकर्तेति दृढभावन[1]याऽनया।
परमामृतनाम्नी सा समतैवावशिष्यते ॥ २ ॥
खेदोल्लास[2]विलासेषु स्वात्मकर्तृतयैकया।
स्वसंकल्पे क्षयं याते समतैवावशिष्यते ॥ ३ ॥
समता सर्वभावेषु याऽसौ सत्यपरा स्थितिः।
तस्यामवस्थितं चित्तं न भूयो जन्मभाग्भवेत् ॥ ४ ॥

[1] याऽनघ—उ. [2] विशेषे—अ.

अथवा सर्वकर्तृत्वमकर्तृत्वं च वै मुने ।
सर्वं त्यक्त्वा मनः पीत्वा योऽसि सोऽसि स्थिरो भव ॥ ५ ॥
शेषस्थिरसमाधानो येन त्यजसि तत्त्यज ।
चिन्मनःकलनाऽऽकारं प्रकाशतिमिरादिकम् ॥ ६ ॥
[1]वासनां वासितारं च प्राणस्पन्दनपूर्वकम् ।
समूलमखिलं त्यक्त्वा व्योमसाम्यः प्रशान्तधीः ॥ ७ ॥
हृदयात् संपरित्यज्य सर्वा[र्वी]वासनपङ्क्तयः [ङ्क्तिकाम्] ।
यस्तिष्ठति गतव्यग्रः स मुक्तः परमेश्वरः ॥ ८ ॥

पञ्चमाध्यायावसाने "उद्योगवान् भव" इत्यभिहितं बहूपायसहितम् । उद्योगलक्षणतत्सामान्यविशेषफलप्रकटनार्थं षष्ठाध्यायारम्भः—**अन्तरास्थामिति**। एतत्कृतिफलमिदं **मेऽस्तु** माऽस्त्विति **अन्तरास्थाम्** । अतस्मिंस्तद्भावनां विहाय स्वभावमवलम्ब्य यदि शिष्टरूपेण **योऽसि** तदा **सोऽसि,** आप्रारब्धं देहधारण-मात्रोपयोगिकर्मसु **लीलया विहर,** न तल्लिप्तो भवसीत्यर्थः ॥ १ ॥ एवं उद्योगवतः काऽवशिष्यत इत्यत आह—**सर्वेत्रेति** । कर्तृत्वादिवैषम्यासम्भव-प्रबोधतः निष्प्रतियोगिकनिर्विकल्परूपिणी महासमतेयं स्वमात्रमवशिष्यते इत्यर्थः ॥ २–३ ॥ केयं समतेत्यत आह—**समतेति** । स्वाज्ञदृष्टिविकल्पित-**सर्वभावेषु** विषमेष्वपि स्वज्ञदृष्ट्या **याऽसौ** चित्सत्यपरा **स्थितिः** निष्प्रतियोगिक-सन्मात्रतया अवस्थितिः सा हि समता । तद्भावभावितं चित्तं न पुनस्तद्भावं मुञ्चतीत्यर्थः । कर्तृत्वाकर्तृत्वकलनाहेतुमनो ग्रसित्वा तद्ग्रासवृत्तेरप्यपह्नवं कृत्वाऽथ यदवशिष्यते तन्मात्रपदवीं भज ॥ ४ ॥ एवं यस्तिष्ठति स एव **मुक्त** इत्याह—**अथवेति** । "**तस्यामवस्थितं चित्तं**" इति समाधिकर्तृत्वमुक्तं, **अथवेति** पक्षान्तरोक्तिः । "विक्षेपो वा समाधिर्वा मनसः स्याद्विकारिणः"

[1] वासनावा—अ, अ १.

इति, "विक्षेपवृत्तिं च समाधिवृत्तिं मत्वा समं मानसवृत्तिसाम्यात्" इति श्रुतियामळोक्त्यनुरोधेन समाध्यादिव्यापृतिकर्तृत्वाकर्तृत्वे तदनुग्राहकमनोवृत्तिं च **ग्रसित्वा**—**योऽसी**त्याद्युक्तार्थं—यत् स्वमात्रमवशेषितं तत्पर्यवसन्नो भव ॥ ९ ॥ पर्यवसानवृत्तिमपि परित्यज। यदि मनोवासनाऽऽदिकमस्तीति मन्यसे तदा **चिन्मनः चिच्छक्तिरूपं कलनाऽऽकारं**—चिन्मनसोः विशेषणं **प्रकाशतिमिरादिकमिति**—उक्तविशेषणविशिष्टम् ॥ ६ ॥ **वासितारं** चिदाभासं **च** तद्विकल्पितां स्वातिरिक्त-विषयपटलारूढां **वासनां** च ॥ ७ ॥ **योऽवतिष्ठति स** मुनिः स्वातिरिक्तभ्रमतो **विमुक्तो** भवतीत्यर्थः ॥ ८ ॥

व्युत्थानकालीनो मुक्तव्यवहारः

दृष्टं द्रष्टव्यमखिलं भ्रान्तं भ्रान्त्या दिशो दश ।
[1]युक्त्या वै चरतोऽज्ञस्य संसारो गोष्पदाकृतिः ॥ ९ ॥
सबाह्याभ्यन्तरे देहे ह्यध ऊर्ध्वं च दिक्षु च ।
इत आत्मा ततोऽप्यात्मा नास्त्यनात्ममयं जगत् ॥ १० ॥
न तदस्ति न यत्राहं न तदस्ति न तन्मयम् ।
किमन्यदभिवाञ्छामि सर्वं सच्चिन्मयं ततम् ॥ ११ ॥
समस्तं खल्विदं ब्रह्म सर्वमात्मेदमाततम् ।
अहमन्य इदं चान्यदिति भ्रान्तिं त्यजानघ ॥ १२ ॥
[2]तते ब्रह्मघने नित्ये संभवन्ति न कल्पिताः ।
न शोकोऽस्ति न मोहोऽस्ति न जराऽस्ति न जन्म वा ॥ १३ ॥

[1] युक्त्वा—क.
[2] ततो—ड.

यदस्तीह तदेवास्ति विज्वरो भव सर्वदा ।
यथाप्राप्तानुभवतः सर्वत्रानभिवाञ्छनात् ॥ १४ ॥
त्यागादानपरित्यागी विज्वरो भव सर्वदा ।

एवं परमेश्वरभावमापन्नो योगी समाधितो व्युत्थानदशायां किं मन्यत इत्यत्राह—**दृष्टमिति** । इदानीं श्रुत्याचार्यप्रसादतः **दृष्टं द्रष्टव्यमखिलम्** । पुरा स्वात्मानमलब्ध्वा **भ्रान्तं भ्रान्त्या** दिशो दश । एवं युक्त्या । **गोष्पदाकृतिः** मन्यते इत्यर्थः ॥ ९ ॥ आत्मैव सर्वं, आत्मातिरिक्तं नास्तीत्याह—**सबाह्येति** ॥ १० ॥ इदं जगदित्यनुभूतिसिद्धं कथं अभावपदं भजतीत्यत आह—**न तदिति** । यत्राहमात्मा **न** विद्यते **तदेव नास्ति** । तथा सति किमन्यदस्तीति वाञ्छामि, सर्वस्य ब्रह्मात्मरूपत्वात् ॥ ११ ॥ यथा मया स्वातिरिक्तविभ्रमस्त्यक्तः तथा त्वमपि त्यक्त्वा विज्वरो भवेत्याह—**अहमिति** ॥ १२ ॥ स्वाज्ञदृष्ट्या एते सर्वविकाराः **तते ब्रह्मघने** । स्वज्ञदृष्टेस्तु कल्पिताकल्पितरूपेण स्वातिरिक्तमस्ति नास्तीति विभ्रमो नोदेतीत्याह—**नेति** । स्वपरदेहाद्यभावात् **न जराऽस्ति** ॥ १३ ॥ हेतुद्वयाभ्यां विज्वरत्वसिद्ध्युपायमाह—**यथेति** ॥ १४ ॥ **त्यागादान-वृत्तिजातपरित्यागी** ॥

चरमजन्मनि ज्ञानाधिकारः

यस्येदं जन्म पाश्चात्यं [1]तमाश्वेव महामते ॥ १५ ॥
विशन्ति विद्या विमला मुक्ता वेणुमिवोत्तमम् ।
विरक्तमनसां सम्यक् स्वप्रसङ्गादुदाहृतम् ॥ १६ ॥

एवं ज्ञानाधिकारी चरमजन्मेत्याह—**यस्येति** । **पाश्चात्यं** चरमं भवति ॥ १५ ॥ **विद्या विमला** निर्विशेषब्रह्ममात्रगोचरा । यत एवं अतः **विरक्तमनसाम्** ॥ १६ ॥

[1] तदा—अ.

ज्ञानिनां आत्मोपासनाप्रकारः

द्रष्टुर्दृश्यसमायोगात् प्रत्ययानन्दनिश्चयः ।
[1]यस्तं स्वमात्मतत्त्वोत्थं निष्पन्दं समुपास्महे ॥ १७ ॥
द्रष्टृदर्शनदृश्यानि त्यक्त्वा वासनया सह ।
दर्शनप्रथमाभासमात्मानं [2]समुपास्महे ॥ १८ ॥
द्वयोर्मध्यगतं नित्यमस्तिनास्तीति पक्षयोः ।
प्रकाशनं प्रकाशानामात्मानं समुपास्महे ॥ १९ ॥

वयं तु स्वातिरिक्तानात्मापह्नवसिद्धमात्मानं स्वावशेषधिया सोपायमुपास्महे इत्यादि ऋभूक्ति श्रुतिः अनुवदति—द्रष्टुरिति । द्रष्टुः दृश्यसमायोगात् द्रष्टरि दृश्यजातं विकल्पितमित्याध्यासिकसम्बन्धात् द्रष्टा साक्ष्येव नित्यः तद्विकल्पितं दृश्यजातं मिथ्येति प्रत्ययानन्दनिश्चयः "विज्ञानमानन्दं ब्रह्म" इति श्रुतिसिद्धो **यस्तं स्वमात्मतत्त्वोत्थं** आत्मतत्त्वत्वेन प्रादुर्भूतं **निष्पन्दं** अचलं ब्रह्मास्मीति **समुपास्महे** ॥ १७ ॥ किंच—द्रष्टृदर्शनेति । आत्मानं प्रत्यञ्चं पराभेदेन **समुपास्महे** ॥ १८ ॥ किं च—द्वयोरिति ॥ १९ ॥

अनात्मभावनात्यागविधिः

संत्यज्य ह्यदुहेशानं देवमन्यं प्रयान्ति ये ।
ते रत्नमिवाञ्छन्ति त्यक्तहस्तस्थकौस्तुभाः ॥ २० ॥
उत्थितानुत्थितानेतानिन्द्रियारीन् पुनः पुनः ।
हन्याद्विवेकदण्डेन वज्रेणेव हरिर्गिरीन् ॥ २१ ॥

स्वं विस्मृत्य स्वातिरिक्तं ये भजन्ति ते स्वार्थाच्युता इत्याह—**संत्यज्येति** ॥ २० ॥ यतः स्वातिरिक्तविषयोपासना निष्फला अतस्तद्विषयां जातां जायमानां वृत्तिं निर्मूलयेदित्याह—उत्थितेति ॥ २१ ॥

[1] यस्त्वं—अ २, क. [2] केवलं भज—उ १.

अज्ञानिपरिदेवनम्

संसाररात्रिदुःखघ्ने शून्ये देहमये [1]भ्रमे ।
सर्वमेवापवित्रं [2]तद्दृष्टं संसृतिविभ्रमम् ॥ २२ ॥
अज्ञानोपहतो बाल्ये यौवने वनिताहतः ।
शेषे कलत्र[3]चिन्ताऽऽर्तः किं करोति नराधमः ॥ २३ ॥
सतोऽसत्ता स्थिता मूर्ध्नि रम्याणां मूर्ध्न्यरम्यता ।
सुखानां मूर्ध्नि दुःखानि किमेकं संश्रयाम्यहम् ॥ २४ ॥
येषां निमेषणोन्मेषौ जगतः प्रलयोदयौ ।
तादृशाः पुरुषा यान्ति मादृशां गणनैव का ॥ २५ ॥
संसार [4]एव दुःखानां सीमान्त इति कथ्यते ।
तन्मध्ये पतिते देहे सुखमासाद्यते कथम् ॥ २६ ॥

प्रबोधात् पुरा संसृतिविभ्रमोऽनुभूत इत्याह—**संसारेति** । इदानीं **ब्रह्मेति** सर्वं **दृष्टमित्यर्थः** ॥ २२ ॥ श्रुत्याचार्यप्रसादविरळस्वाज्ञलोकस्तु **अज्ञानोपहत इति** ॥ २३ ॥ स्वाज्ञस्तु एवं प्रलपति—**सत इति** । अनियतत्वात् इत्यर्थः ॥ २४ ॥ देहात्मदृष्ट्या स्वस्य नश्वरत्वमाचष्टे—**येषामिति** । **तादृशाः पुरुषाः ब्रह्मादयः** स्वां स्वां श्रियं त्यक्त्वा परां **यान्ति** ॥ २५ ॥ एवं दुःखहेतुसंसृतिबद्धानां कदाऽपि सुखं नास्तीत्याह—**संसार इति** ॥ २६ ॥

मनोनाशप्रकारः

प्रबुद्धोऽस्मि प्रबुद्धोऽस्मि दुष्टश्चोरोऽयमात्मनः ।
मनो नाम निहन्म्येनं मनसाऽस्मि चिरं हतः ॥ २७ ॥

[1] गृहे—अ. [2] तं दृ—अ. [3] चिन्ता—उ. [4] एवं—उ १.

मा खेदं भज हेयेषु नोपादेयपरो भव ।
हेयादेयदृशौ त्यक्त्वा शेषस्थः सुस्थिरो भव ॥ २८ ॥

एवं परिदेवयित्वा श्रुत्याचार्यप्रसादतो यदि विवेक उदेति तदा स्वाज्ञानवृत्तिमन्मन उन्मूलयितुमिच्छतीत्याह—प्रबुद्ध इति ॥ २७ ॥ एवं हेयोपादेयात्मकदेहतत्सापेक्षात्मधियं त्यक्त्वा अथ यदवशिष्यते तन्मयो भवेत्याह—मेति ॥ २८ ॥

वासनात्यागोपायः

निराशता निर्भयता नित्यता समता ज्ञता ।
निरीहता निष्क्रियता सौम्यता निर्विकल्पता ॥ २९ ॥
धृतिर्मैत्री मनस्तुष्टिर्मृदुता मृदुभाषता ।
हेयोपादेयनिर्मुक्ते ज्ञे तिष्ठन्त्यपवासनम् ॥ ३० ॥
गृहीततृष्णाशबरीवासनाजालमाततम् ।
संसारवारिप्रसृतं चिन्तातन्तुभिराततम् ॥ ३१ ॥
अनया तीक्ष्णया तात छिन्धि बुद्धिशलाकया ।
वात्ययेवाम्बुदं जालं छित्त्वा तिष्ठ तते पदे ॥ ३२ ॥
मनसैव मनश्छित्त्वा कुठारेणेव पादपम् ।
पदं पावनमासाद्य सद्य एव स्थिरो भव ॥ ३३ ॥
तिष्ठन् गच्छन् स्वपन् जाग्रन्निवसन्नुत्पतन् पतन् ।
असदेवेदमित्यन्तर्निश्चित्यास्थां परित्यज्य ॥ ३४ ॥

दृश्यमाश्रयसीदं चेत् तत् सचित्तोऽसि बन्धवान् ।
दृश्यं संत्यजसीदं चेत् तदचित्तोऽसि मोक्षवान् ॥ ३५ ॥
नाहं नेदमिति ध्यायंस्तिष्ठ त्वमचलाचलः ।
आत्मनो जगतश्चान्तर्द्रष्टृदृश्यदशाऽन्तरे ॥३६ ॥
दर्शनाख्यं स्वमात्मानं सर्वदा भावयन् भव ।
स्वाद्यस्वादकसंत्यक्तं स्वाद्यस्वादकमध्यगम् ॥ ३७ ॥
स्वदनं केवलं ध्यायन् परमात्ममयो भव ।
अवलम्ब्य निरालम्बं मध्येमध्ये स्थिरो भव ॥ ३८ ॥
रज्जुबद्धा विमुच्यन्ते तृष्णाबद्धा न केनचित् ।
तस्मान्निदाघ तृष्णां त्वं त्यज संकल्पवर्जनात् ॥ ३९ ॥
एतामहंभावमयीमपुण्यां [1]छित्त्वाऽनहंभावशलाकयैव ।
स्वभावजां भव्यभवान्तभूमौ भव प्रशान्ताखिलभूत[2]भीतिः॥४०॥
अहमेषां पदार्थानामेते च मम जीवितम् ।
[3]नाहमेभिर्विना कश्चिन्न मयैते विना किल ॥ ४१ ॥
इत्यन्तर्निश्चयं त्यक्त्वा विचार्य मनसा सह ।
नाहं पदार्थस्य न मे पदार्थ इति [4]भावित ॥ ४२ ॥
अन्तःशीतलया बुद्धया कुर्वतो लीलया क्रियाम् ।
यो नूनं वासनात्यागो ध्येयो ब्रह्मन् प्रकीर्तितः ॥ ४३ ॥

[1] त्यक्त्वा—अ २, क.
[2] भूतिः—उ.
[3] अह—उ, उ १.
[4] भाव्यते—उ.

सर्वं समतया बुद्ध्या यः कृत्वा वासनाक्षयम् ।
जहाति निर्ममो देहं नेयोऽ[1]सौ वासना[2]क्षयः ॥ ४४ ॥
अहंकारमयीं त्यक्त्वा वासनां लीलयैव यः ।
तिष्ठति ध्येयसंत्यागी स जीवन्मुक्त उच्यते ॥ ४५ ॥

निरीहताऽऽदिगुणगणो यत्र विश्राम्यति स जीवन्मुक्त इत्याह—**निराशतेति** । ज्ञस्य निर्मुक्तवासनाजालत्वात् एते गुणाः अस्य सहजा भवन्तीत्यर्थः ॥ २९–३० ॥ वासनाजालस्यापि सहजतया विद्यमानत्वात् निराशताऽऽदिगुणावसरः कुतः ? इत्यत्र—यदि तदस्तीति मन्यसे तदा निर्वासन-ब्रह्मज्ञानखड्गेन वासनाजालं छित्त्वा निराशताद्याश्रयपदे तिष्ठेत्याह—**गृहीतेति** । **तृष्णैव शबरी** भूजलचरजन्तुघातिनी तया **गृहीतं वासनाजालं आततं** संसृतिजलाशयप्रसरितं, नानाविधचिन्ता एव दृढतन्तवः **तैराततं** वासनाजालं वायुः मेघजालमिव निर्वासनब्रह्मज्ञानखड्गेन छित्त्वा निर्भयपदे **तिष्ठ** ॥३१–३२॥ मनसि सति कथं एवं स्थातुं शक्यते ? इत्यत्र—कुठारेण **पादपमिव** सत्वाकारपरिणतमनसा रजआदिपरिणतं मनः **छित्त्वा सद्य** एव ब्रह्मातिरिक्तं न किञ्चिदस्तीति ज्ञानसमकालमेव स्वे महिम्नि **स्थिरो भवेत्यर्थः** ॥ ३३ ॥ यदि पुनः स्वातिरिक्तं स्फुरति तदा त्वं स्वमात्रं तत् चिन्तयेत्याह—**तिष्ठन्निति** ॥३४॥ बन्धमोक्षकलना किंनिमित्तेत्यत्र स्वातिरिक्तमस्तिनास्तीतिवृत्त्यायत्तेत्याह—**दृश्यमिति** ॥ ३५ ॥ द्रष्टृदृश्यमध्यं दर्शनं ज्ञप्तिमात्रं स्वयमेवेति चिन्तयेत्याह—**आत्मन इति** ॥ ३६ ॥ उक्तार्थमेव भङ्ग्यन्तरेण दृढयति—**स्वाद्येति** । स्वाद्यं गुडादि, स्वादकं जिह्वादि, स्वदनं तत्सर्वावभासकं ज्ञानं, केवलशब्दतः चिन्मात्रमेव तदित्यर्थः ॥ ३७ ॥ किंच—**अवलम्ब्येति** ॥ ३८ ॥ तृष्णायां सत्यां स्थिरता मे कुतः इत्यत्र तां उन्मूलयेत्याह—**रज्ज्विति** । यस्मादेवं **तस्मात्** ॥ ३९ ॥ अतदहंभावे सति तृष्णात्यागः कथमित्यत्र यद्यतदहंभावः

[1] तो—अ. [2] क्षयं—अ.

त्वां स्पृशति तदा तं अनहंभावेन छित्त्वा वितृष्णपदं प्राप्य स्थिरीभवेत्याह—**एतामिति** ॥ ४० ॥ स्वातिरिक्तयोः अविनाभावमाशङ्क्य स्वातिरिक्तासम्भव-प्रबोधतः स्वयमेव अवशिष्यत इत्याह—**अहमिति** । **एते च मम जीवितं** एते पदार्थाः मम जीवनहेतवः ॥ ४१–४२ ॥ **अन्तःशीतळया** अन्तर्विलसित-प्रत्यग्भावापन्नया **बुद्धया** । न तस्य कदाऽपि क्रियालेपोऽस्ति अक्रियात्मदृष्टित्वात् । वासनावासितस्य अक्रियत्वं कुत इत्यत्र वासनात्यागाधारः परमात्मेत्याह—**य इति** । **यो नूनं वासनात्यागः** सोऽयं तदाधारः परमात्मेति **ध्येयो ब्रह्मन्**—आधाराधेययोः कार्यकारणयोश्च एकीभावस्तु चिद्विवर्तजगतोऽस्य कारणमिति—"मयि सर्वं लयं याति तद्ब्रह्माद्वयमस्म्यहम्" इत्यादिश्रुतिभिः **प्रकीर्तितः** ॥४३॥ वासनात्यागोपायमाह—**सर्वमिति** । साम्यब्रह्मातिरेकेण वासनावैषम्यं नास्तीति निश्चित्य **निर्ममो** यो योगी **देहोपलक्षिताविद्यापदतत्कार्यजातमस्ति** नास्तीति विभ्रमं **जहाति** सोऽयं मुनिः निर्वासनं ब्रह्मेति । यत एवं अतोऽसौ **वासनाक्षयो ब्रह्मात्यन्तरङ्गसाधनतया नेय** इत्यर्थः ॥ ४४ ॥ जीवन्मुक्तिलाभोऽपि वासनाक्षयनिमित्त इत्याह—**अहङ्कारेति** । यत् स्वातिरिक्ततया **ध्येयं तत्सर्वत्यागी सः जीवन्मुक्त उच्यते** ॥ ४५ ॥

जीवन्मुक्तमहिमा

निर्मूलं कलनां त्यक्त्वा वासनां यः शमं गतः ।
नेयत्यागमिमं विद्धि मुक्तं तं ब्राह्मणोत्तमम् ॥ ४६ ॥
द्वावेतौ ब्रह्मतां यातौ द्वावेतौ विगतज्वरौ ।
आपतत्सु यथाकालं सुखदुःखेष्वनारतौ ॥ ४७ ॥
संन्यासियोगिनौ दान्तौ विद्धि शान्तौ मुनीश्वर ।
ईप्सितानीप्सिते न स्तो यस्यान्तर्वर्तिवृत्तिषु ॥ ४८ ॥

सुषुप्तवद्यश्चरति स जीवन्मुक्त उच्यते ।
हर्षामर्षभयक्रोधकामकार्पण्यदृष्टिभिः ॥ ४९ ॥
न हृष्यति ग्लायति यः परामर्शविवर्जितः ।

तमेव ब्राह्मणतया स्तौति—निर्मूलमिति । **वासनामूलकलनानिःशेषत्यागतोऽपि यः शमं व्रजति** । स्वातिरिक्तकलनायाः त्यागाविषयत्वेन अवस्तुत्वात् वासनाक्षयो नेय इति यदुक्तं तन्न संभवति, तस्य वासनासत्त्वसापेक्षत्वात् । वासना अस्तिनास्तीतिविभ्रमापह्नवसिद्धब्रह्मविद्वरिष्ठं **इमं नेयत्यागं मुक्तं तं ब्राह्मणं** विद्धि, ब्रह्मविद्वरिष्ठस्य ब्रह्मत्वात् ,

दर्शनादर्शने हित्वा स्वयं केवलरूपतः ।
य आस्ते कपिशार्दूल ब्रह्म न ब्रह्मवित् स्वयम् ॥

इति श्रुतेः ॥ ४६ ॥ एवं साधनसंन्यासयोगवन्तौ कृतकृत्यौ स्यातामित्याह—**द्वाविति** । यथाकालं **सुखदुःखेष्वापतत्सु तत्रानारतौ** हर्षविषादरहितौ ॥ ४७ ॥ कौ तावित्यत्र—**संन्यासीति** । ईहाविशिष्टानां शान्त्यादि कुत इत्यत्र ईहानीहापोहज्ञानतः कृतकृत्यो भवतीत्याह—**ईप्सितेति** । यथा सुषुप्तावीहानीहादिमान् न भवति तथा जाग्रत्यपि **यस्य** स्वान्तर्बाह्यविषयेषु सत्त्वासत्त्वधिया **ईप्सितानीप्सिते** न भवतः सोऽयं जीवन्मुक्त उच्यते ॥ ४८ ॥ रागिणो जीवन्मुक्तता कुत इत्यत्र—हर्षेति ॥ ४९ ॥ **न हृष्यति ग्लायति यः** सोऽयं रागद्वेषमूलपदार्थाः सन्ति न सन्तीति **परामर्शविवर्जितः** । तस्य जीवन्मुक्तत्वं निरङ्कुशमित्यर्थः ॥

तृष्णात्यागविधिः

बाह्यार्थवासनोद्भूता तृष्णा बद्धेति कथ्यते ॥ ५० ॥
सर्वार्थवासनोन्मुक्ता तृष्णा मुक्तेति भण्यते ।
इदमस्तु ममेत्यन्तमिच्छां प्रार्थनयाऽन्विताम् ॥ ५१ ॥

तां तीक्ष्णां शृङ्खलां विद्धि दुःखजन्मभयप्रदाम् ।
तामेतां सर्वभावेषु सत्स्वसत्सु च सर्वदा ॥ ९२ ॥
संत्यज्य परमोदारं पदमेति महामनाः ।
बन्धास्थामथ मोक्षास्थां सुखदुःखदशामपि ॥ ९३ ॥
त्यक्त्वा सदसदास्थां त्वं तिष्ठाक्षुब्धमहाब्धिवत् ।

बन्धमोक्षहेतू बाह्यार्थतृष्णाऽतृष्णे इत्याह—बाह्येति ॥ ९० ॥ "तृष्णां छित्त्वा हेतुजालस्य मूलं" इति श्रुत्यनुरोधेन सर्वार्थविषयतृष्णात्यागी कृतकृत्यो भवतीत्याह—**इदमिति** । इच्छाऽऽस्थाऽऽदिशब्दः तृष्णापर्यायः । सतृष्णो बद्धः वितृष्णो मुक्तो भवतीत्यर्थः ॥ ९१–९३ ॥

चतुर्विधो निश्चयः

जायते निश्चयः साधो पुरुषस्य चतुर्विधः ॥ ९४ ॥
आपादमस्तकमहं मातापितृविनिर्मितः ।
इत्येको निश्चयो ब्रह्मन् बन्धायासविलोकनात् ॥ ९५ ॥
अतीतः सर्वभावेभ्यो वालाग्रादप्यहं तनुः ।
इति द्वितीयो मोक्षाय निश्चयो जायते सताम् ॥ ९६ ॥
जगज्जालपदार्थात्मा सर्वं एवाहमक्षयः ।
तृतीयो निश्चयश्चोक्तो मोक्षायैव द्विजोत्तम ॥ ९७ ॥
अहं जगद्वा सकलं शून्यं व्योम समं सदा ।
एवमेष चतुर्थोऽपि निश्चयो मोक्षसिद्धिदः ॥ ९८ ॥

एतेषां प्रथमः प्रोक्तस्तृष्णया बन्धयोग्यया ।
शुद्धतृष्णाख्यः स्वच्छा जीवन्मुक्ता विलासिनः ॥ ५९ ॥
सर्वं चाप्यहमेवेति निश्चयो यो महामते ।
तमादाय विषादाय न भूयो जायते मतिः ॥ ६० ॥

स्वाज्ञस्वज्ञनिश्चयः कतिविधः इत्यत्र चतुर्विध इत्याह—**जायत इति** ॥ ५४ ॥ तत्र स्वाज्ञनिश्चयमाह—**आपादेति** । देहादावात्मात्मीयाभिमतेः बन्धायासादिबहुदोषदुष्टत्वं दृष्टमेवेत्यर्थः ॥ ५५ ॥ स्वज्ञनिश्चयः त्रिविधः, तत्राद्यमाह—**अतीत इति** ॥ ५६ ॥ अथ द्वितीयनिश्चयमाह—**जगदिति** ॥५७॥ स्वज्ञतृतीयनिश्चयमाह—**अहमिति** ॥ ५८ ॥ चतुर्णां **एतेषां** आद्यस्तु बद्धः स्वाज्ञानावृतत्वात्, परे त्रयस्तु जीवन्मुक्ताः निरावृतत्वात् ॥ ५९ ॥ चतुर्णां **मध्ये सर्वमिति** ॥ ६० ॥

ब्रह्मणो लोकायतिकादिभिः बहुधा विकल्पनम्

शून्यं तत् प्रकृतिर्माया ब्रह्म विज्ञानमित्यपि ।
शिवः पुरुष ईशानो नित्यमात्मेति कथ्यते ॥ ६१ ॥

एवं स्वज्ञधीनिश्चितं निर्विशेषं ब्रह्म लोकायतिकादयः शून्यादित्वेन भावयन्तीत्याह—**शून्यमिति** । यद्ब्रह्मेत्यद्वैतिभिः निश्चितं तदेव बौद्धप्राकृतशैवसाङ्ख्ययोगिनः **शून्यं प्रकृतिः विज्ञानं शिवः पुरुषः ईशान** इति मेनिरे । पुनरद्वैतिनस्तु तैरात्मत्वेन यद्यन्निर्णीतं तत्सर्वं अनात्मा मायेति वदन्ति, ब्रह्मातिरिक्तसामान्यस्य अनित्यत्वात् । वस्तुतः तैः गृहीतानात्मापह्नवसिद्धात्मा तु **नित्यमिति** सर्ववेदान्तेषु **कथ्यते** । स्वात्मनो निष्प्रतियोगिकत्वात् सत्यत्वं निरङ्कुशमित्यर्थः ॥ ६१ ॥

अद्वैतनिष्ठस्य संसाराभावः

द्वैताद्वैतसमुद्भूतैर्जगन्निर्माणलीलया ।
परमात्ममयी शक्तिरद्वैतैव विजृम्भते ॥ ६२ ॥
सर्वातीतपदालम्बी परिपूर्णैकचिन्मयः ।
नोद्वेगी न च तुष्टात्मा संसारे नावसीदति ॥ ६३ ॥
प्राप्तकर्मकरो नित्यं शत्रुमित्रसमानदृक् ।
ईहितानीहितैर्मुक्तो न शोचति न काङ्क्षति ॥ ६४ ॥
सर्वस्याभिमतं वक्ता चोदितः पेशलोक्तिमान् ।
आशयज्ञश्च भूतानां संसारे नावसीदति ॥ ६५ ॥

वस्तुतस्तु **द्वैताद्वैतसमुद्भूतैः** । स्वाज्ञादिदृष्ट्यनुरोधेन स्वातिरिक्तं जगदस्ति नास्तीति तन्निर्माणग्रसनलीलया स्वातिरिक्तप्रपञ्चारोपाधिकरणं **द्वैतं** तदपवादाधिकरणं **अद्वैतं** इति च द्वैताद्वैततत्कार्यरूपैरपि निष्प्रतियोगिका**द्वैतरूपिणी परमात्ममयी** काचन शक्तिः **विजृम्भते** ॥ ६२ ॥ एतन्मार्गावलम्बी न कदाऽपि स्वातिरिक्तमोहसंसारे मुह्यतीत्याह—**सर्वे**ति । स्वातिरिक्तकलनाऽस्ति नास्तीत्यर्थे **नोद्वेगी** ॥ ६३ ॥ सोऽयं मुनिः आप्रारब्धं किं कुर्वन् वर्तत इत्याह—**प्राप्ते**ति ॥ ६४ ॥ यदि हितादिकलनाविरळः तदा युक्तायुक्तानभिज्ञो भवतीत्यत्राह—**सर्वस्ये**ति । यन्मे श्रेयःसाधनं तद्वदेति **चोदितः** । यदि भूतग्रामाशयलम्पटस्तदा संसारी स्यादित्यत्र सर्वत्राभिमानाभावात् **संसारे नावसीदति** ॥ ६५ ॥

मुमुक्षोः ब्रह्मनिष्ठाविधिः

पूर्वां दृष्टिमवष्टभ्य ध्येयत्यागविलासिनीम् ।
जीवन्मुक्ततया स्वस्थो लोके विहर विज्वरः ॥ ६६ ॥

अन्तः संत्यक्तसर्वाशो वीतरागो विवासनः ।
बहिः सर्वसमाचारो लोके विहर विज्वरः ॥ ६७ ॥
बहिः कृत्रिमसंरम्भो [1]हृदि संरम्भवर्जितः ।
कर्ता बहिरकर्ताऽन्तर्लोके विहर शुद्धधीः ॥ ६८ ॥
त्यक्ताहंकृतिराश्वस्तमतिराकाशशोभनः ।
अगृहीतकलङ्काङ्को लोके विहर शुद्धधीः ॥ ६९ ॥
उदारः पेशलाचारः स[पू]र्वाचारानुवृत्तिमान् ।
अन्तः सङ्गपरित्यागी बहिः संसारवानिव ॥ ७० ॥
अन्तर्वैराग्यमादाय बहिराशोन्मुखेहितः ।
अयं बन्धुरयं नेति [2]कलना लघुचेतसाम् ॥ ७१ ॥
उदारचरितानां तु वसुधैव कुटुम्बकम् ।
[3]भवभावनया मुक्तं जरामरणवर्जितम् ॥ ७२ ॥
प्रशान्तकलनाऽऽरम्भं नीरागं पदमाश्रय ।
एषा ब्राह्मी स्थितिः स्वच्छा निष्कामा विगतामया ॥ ७३ ॥
आदाय विहरन्नैवं संकटेषु विमुह्यति ।
वैराग्येणाथ शस्त्रेण महत्त्वादिगुणैरपि ॥ ७४ ॥
[4]यत्नोपविहरार्थं तत् स्वयमेवोन्नयेन्मनः ।
वैराग्यात् पूर्णतामेति मनोनाशवशानुगम् ॥ ७५ ॥

[1] दृष्टि—अ. सृष्टि—अ १. [2] गणना—अ, अ १, अ २, क.
[3] भावाभावविनिर्मुक्तं—अ, अ १, अ २, क.
[4] यत्नेन चिद्विहारार्थं—अ. यत्नोपद्विह—अ १, अ २, क.

आशया रिक्ततामेति शरदीव सरोऽमलम् ।
तमेव भुक्तविरसं व्यापारौघं पुनः पुनः ॥ ७६ ॥
दिवसे दिवसे कुर्वन् प्राज्ञः कस्मान्न लज्जते ।
चिच्चैत्यकलितो बन्धस्तन्मु[1]क्तौ मुक्तिरुच्यते ॥ ७७ ॥
चिदचैत्याऽखिलात्मेति सर्वसिद्धान्तसंग्रहः ।
एतं निश्चयमादाय विलोकय धियेच्छया ॥ ७८ ॥
स्वयमेवात्मनाऽऽत्मानमानन्दं पदमाप्स्यसि ।
चिदहं चिदिमे लोकाश्चिदाशाश्चिदिमाः प्रजाः ॥ ७९ ॥
दृश्यदर्शननिर्मुक्तः केवलामलरूपवान् ।
नित्योदितो निराभासो द्रष्टा साक्षी चिदात्मकः ॥ ८० ॥
चैत्यनिर्मुक्तचिद्रूपं पूर्णज्योतिःस्वरूपकम् ।
संशान्तसर्वसंवेद्यं संविन्मात्रमहं [2]महत् ॥ ८१ ॥
संशान्तसर्वसंकल्पः प्रशान्तसकलैषणः ।
निर्विकल्पपदं गत्वा स्वस्थो भव मुनीश्वर ॥ ८२ ॥

यदि जीवन्मुक्तिमिच्छसि तदा परादृष्टिप्रासप्रत्यगभिन्नब्रह्मदृष्टिमवलम्ब्य लोके विहरेत्याह—पूर्वामिति ॥ ६६ ॥ किंच—अन्तरिति ॥ ६७ ॥ बहिः कृत्रिमसंरम्भः गोपुरधारिप्रतिमावत् संसारभारवाहाभिनयः ॥ ६८ ॥ किंच—देहादौ त्यक्ताहङ्कृतिः, ब्रह्मणि आश्वस्तमतिः, आकाशशोभनः निर्मलाशयत्वात्, अगृहीतस्वाज्ञानकळङ्काङ्कः ॥ ६९ ॥ बहिर्मुखदशायां यत् पूर्वैराचरितं तत्समग्रानुवर्ती भवेत्यर्थः ॥ ७० ॥ सर्वाचारानुवर्तिनः रागसङ्गः स्यादित्यत्र—

[1] क्तिर्मु—उ, उ १. [2] महः—उ.

अन्तरिति। न हि स्त्र्यादिवेषधारी कृत्रिमस्त्रीत्वसङ्गी रागी वा भवति, पुरुषोऽस्मीति निश्चयाबाधितत्वात्, तथाऽयं लोकानुग्रहकारी न तत्र सङ्गी भवतीत्यर्थः। किमर्थं लोकानुग्रहं कुर्वन्तीत्यत्र—**अयमिति** ॥ ७१ ॥ वसुधाग्रहणं सर्वलोकोपलक्षणार्थम्। विराडात्मना अस्य लोकानुग्रहो युज्यत इत्यर्थः। यदि लोकानुग्रहकृत् विराडहं तदा ब्रह्माण्डसंसारी स्यामित्यत्र वस्तुतो वैराजं पदं निर्विशेषमिति भजेत्याह—**भवेति**। स्वावशेषधियेत्यर्थः ॥७२॥ तन्मात्रस्थितिः पुनः अतन्मात्रं न स्पृशतीत्याह—**एषेति** ॥ ७३ ॥ तामात्मधिया **आदाय**। उपायतो ब्राह्मीस्थित्यभिमुखं मनः कुर्यादित्याह—**वैराग्येणेति**। **वैराग्यशस्त्रेण** स्वातिरिक्तपाशं छित्त्वा जीवन्मुक्ताळिसेवित**महत्त्वादिगुणैः** अमानित्वादिभि**रपि** ॥ ७४ ॥ महता यत्नेन ब्राह्मीस्थित्युपविहारार्थं यत्साधनत्वेन अभिमतं **तन्मनः** स्वातिरिक्तभ्रमतः **स्वयमेव उन्नयेत्** उद्धरेत्। तदेतद्ब्राह्मीस्थितिसाधनं ज्ञानं स्वेतरप्रपञ्च**वैराग्यतः पूर्णतां** प्राप्य **मनोनाशवशानुगं** मनस्तत्कार्यनाशाधिकरणं प्रत्यगभिन्नब्रह्मपदवीं प्रापयति। तदवष्टभ्य तन्मात्रपदवीं भजेत्यर्थः ॥ ७५ ॥ अनेकवृत्तिमन्मनोनाशः कथमित्यत्र—ब्रह्ममात्रावशेष [षं?] **आशयेति**। ब्रह्मातिरिक्तं नेति ज्ञानतो मनः स्ववृत्तिभिः सह तनुतामेत्य तन्मात्रमवशिष्यत इत्यर्थः। एवं ब्राह्मीस्थित्युपाय-पराङ्मुखं लोकं कुत्सयति—**तमिति**। यदहन्यहनि स्वाज्ञजनानुभूतं स्वातिरिक्त-भ्रमं **तमेव** अनन्तकोटिजन्मसु **भुक्तविरसं**—किं तदिति—**व्यापारौघम** ॥ ७६ ॥ **कस्मादयं** लोको **न लज्जते**। अनित्यदेहादावात्मात्मीयाभिमतिमात्रान्नित्यात्म-विस्मरणं भवति। यस्यैवमनुभवो जायते सोऽयं आत्मापहारी भवति। तथा श्रुतिः—

> योऽन्यथा सन्तमात्मानमन्यथा प्रतिपद्यते।
> किं तेन न कृतं पापं चोरेणात्मापहारिणा ॥

इति। स्वातिरिक्तयोगायोगाभ्यां बन्धमोक्षौ, तदसंभवप्रबोधसिद्धः स्वात्मेति सर्ववेदान्तसिद्धान्तोऽयं इत्याह—**चिदिति** ॥ ७७ ॥ यन्मया सर्ववेदान्तसिद्धान्तः उक्तः **एतं निश्चयमादाय** ॥ ७८ ॥ शास्त्रप्रतिपाद्यपरमार्थस्वरूपं प्रतिपादयन्

शास्त्रार्थमुपसंहरति—**चिदहमिति** ॥ ७९ ॥ योऽयमात्मा चिन्मात्रतया निर्दिष्टः सोऽयं **दृश्यदर्शननिर्मुक्तः** ॥ ८० ॥ "चित्" इति स्त्रीलिङ्गतया या निर्दिष्टा तस्या एव "दृश्यदर्शननिर्मुक्तः" इत्यादिना पुल्लिङ्गतया निर्देशः कृतः, पुनस्तस्यैव नपुंसकलिङ्गतयाऽपि निर्देशः क्रियते—**चैत्येति** ॥ ८१ ॥ स्वानुभवं प्रकटयित्वा शिष्यमनुशास्तीत्याह—**संशान्तेति**। स्वातिरिक्तमस्ति-नास्तीतिसंशान्तसर्वसङ्कल्पः **निर्विकल्पपदं गत्वा** निष्प्रतियोगिकनिर्विकल्पं ब्रह्म स्वमात्रमिति निश्चित्य **स्वस्थो भव मुनीश्वर** स्वे महिम्नि स्थिरासनो भव इत्यर्थः ॥ ८२ ॥

शास्त्रार्थपठनपाठनफलम्

य इमां महोपनिषदं ब्राह्मणो नित्यमधीते अश्रोत्रियः श्रोत्रियो भवति। अनुपनीत उपनीतो भवति। सोऽग्निपूतो भवति। स वायुपूतो भवति। स सूर्यपूतो भवति। स सोमपूतो भवति। स सत्यपूतो भवति। स सर्वपूतो भवति। स सर्वैर्देवैर्ज्ञातो भवति। स सर्वेषु तीर्थेषु स्नातो भवति। स सर्वैर्देवैरनुध्यातो भवति। स सर्वक्रतुभिरिष्टवान् भवति। गायत्र्याः षष्टिसहस्राणि जप्यानि फलानि भवन्ति। इतिहासपुराणानां रुद्राणां शतसहस्राणि जप्यानि फलानि भवन्ति। प्रणवानामयुतं जप्यं भवति। आचक्षुषः पङ्क्तिं पुनाति। आसप्तमान् पुरुषयुगान् पुनाति। इत्याह भगवान् हिरण्यगर्भः। [1]जाप्येनामृतत्वं च गच्छतीति महोपनिषत् ॥ ८३ ॥

शास्त्रार्थपठनपाठनफलमाह—**य इति**। **अनुपनीतः उपनीतो भवति** इत्यत्र—अनुपनीतस्य विद्याग्रहणायोगात् अत्रानुपनीतशब्देनाज्ञत्वमुच्यते।

[1] जप्ये—अ.

केवलपठनमात्रतः आपेक्षिकामृतत्वं अर्थज्ञानतो मुख्यामृतत्वं च गच्छति ।
इतिमहोपनिषच्छब्दः उपनिषत्समाप्त्यर्थः ॥ ८३ ॥

श्रीवासुदेवेन्द्रशिष्योपनिषद्ब्रह्मयोगिना ।
लिखितं स्याद्विवरणं महोपनिषदः स्फुटम् ।
महोपनिषदो व्याख्याग्रन्थजातं सहस्रकम् ॥

इति श्रीमदीशाद्यष्टोत्तरशतोपनिषच्छास्त्रविवरणे एकषष्टिसङ्ख्यापूरकं
महोपनिषद्विवरणं सम्पूर्णम्

मुक्तिकोपनिषत्

पूर्णमदः—इति शान्तिः

प्रथमोऽध्यायः

परमात्मस्वरूपजिज्ञासा

अयोध्यानगरे रम्ये रत्नमण्टपमध्यमे ।
सीताभरतसौमित्रिशत्रुघ्नाद्यैः समन्वितम् ॥ १ ॥
सनकाद्यैर्मुनिगणैर्वसिष्ठाद्यैः शुकादिभिः ।
अन्यैर्भागवतैश्चापि स्तूयमानमहर्निशम् ॥ २ ॥
धीविक्रियासहस्राणां साक्षिणं निर्विकारिणम् ।
स्वरूपध्याननिरतं समाधिविरमे हरिम् ॥ ३ ॥
भक्त्या शुश्रूषया रामं स्तुवन् पप्रच्छ मारुतिः ।
राम त्वं परमात्माऽसि सच्चिदानन्दलक्षणः ॥ ४ ॥
इदानीं त्वां रघुश्रेष्ठ प्रणमामि मुहुर्मुहुः ।
त्वद्रूपं ज्ञातुमिच्छामि तत्त्वतो राम मुक्तये ॥ ५ ॥

अनायासेन येनाहं मुच्येयं भवबन्धनात् ।
कृपया वद मे राम येन मुक्तो भवाम्यहम् ॥ ६ ॥

ईशाद्यष्टोत्तरशतवेदान्तपटलाशयम् ।
मुक्तिकोपनिषद्वेद्यं रामचन्द्रपदं भजे ॥

इह खलु शुक्लयजुर्वेदप्रविभक्तेयं मुक्तिकोपनिषत् चतुर्वेदप्रविभक्तशाखातन्मस्तकेयत्ताप्रकटनपूर्वकं अवान्तरमुक्तिभेदप्रकटनव्यग्रा सर्वोपह्लवसिद्धनिष्प्रतियोगिकब्रह्ममात्रावशेषलक्षणविकळेबरकैवल्यपर्यवसन्ना विजृम्भते । अस्याः स्वल्पग्रन्थतो विवरणमारभ्यते । श्रीरामदूतश्रीरामचन्द्रप्रश्नप्रतिवचनरूपेयमाख्यायिका विद्यास्तुल्यर्था । आख्यायिकामवतारयति—**अयोध्येत्यादिना** ॥ १–३ ॥ केन **रूपेण** स्तुत्वा किं पृष्टवानित्यत आह—**रामेति** ॥४॥ वास्तवं **त्वद्रूपम्** ॥५–६॥

वेदान्तज्ञानेन सायुज्यप्राप्तिः

साधु पृष्टं महाबाहो वदामि शृणु तत्त्वतः ।
वेदान्ते सुप्रतिष्ठोऽहं वेदान्तं समुपाश्रय ॥ ७ ॥
वेदान्ताः के रघुश्रेष्ठ वर्तन्ते कुत्र ते वद ।
हनूमञ्छृणु वक्ष्यामि वेदान्तस्थितिमञ्जसा ॥ ८ ॥
निश्वासभूता मे विष्णोर्वेदा जाताः सुविस्तराः ।
तिलेषु तैलवद्वेदे वेदान्तः सुप्रतिष्ठितः ॥ ९ ॥
राम वेदाः कतिविधास्तेषां शाखाश्च राघव ।
तासूपनिषदः काः स्युः कृपया वद तत्त्वतः ॥ १० ॥
ऋग्वेदादिविभागेन वेदाश्चत्वार ईरिताः ।
तेषां शाखा ह्यनेकाः स्युस्तासूपनिषदस्तथा ॥ ११ ॥

ऋग्वेदस्य तु शाखाः स्युरेकविंशतिसंख्यया ।
नवाधिकशतं शाखा यजुषो मारुतात्मज ॥ १२ ॥
सहस्रसंख्यया जाताः शाखाः साम्नः परन्तप ।
अथर्वणस्य शाखाः स्युः पञ्चाशद्भेदतो हरे ॥ १३ ॥
एकैकस्यास्तु शाखाया एकैकोपनिषन्मता ।
तासामेकामृचं [मृगेकाऽपि]येन पठ्यते भक्तितो मयि ॥ १४ ॥
स मत्सायुज्यपदवीं प्राप्नोति मुनिदुर्लभाम् ।

वायुसूनुना एवं पृष्टो भगवान् तत्कृतप्रश्नमङ्गीकृत्य तं प्रोत्साहयन् तत्प्रश्नोत्तरमाह—साध्विति । किं वदसीत्यत्र—वेदान्त इति ॥ ७ ॥ वेदान्तेयत्तां पृच्छति—वेदान्ता इति । प्रश्नोत्तरं भगवानाह—हनूमन्निति ॥ ८–९ ॥ तदियत्ताबुभुत्सया श्रीरामं मारुतिः पृच्छति—रामेति ॥ १० ॥ श्रीरामः तत्प्रश्नोत्तरमाह—ऋगिति ॥ ११–१३ ॥ तदेकदेशप्रायणफलमाह—तासामिति ॥ १४ ॥

मुक्तिभेदतत्साधनजिज्ञासा

राम केचिन्मुनि[1]श्रेष्ठा मुक्तिरेकेति चक्षिरे ॥ १५ ॥
केचित्त्वन्नामभजनात् काश्यां तारोपदेशतः ।
अन्ये तु सांख्ययोगेन भक्तियोगेन चापरे ॥ १६ ॥
अन्ये वेदान्तवाक्यार्थविचारात् परमर्षयः ।
सालोक्यादिविभागेन चतुर्धा मुक्तिरीरिता ॥ १७ ॥

मुक्तिभेदं हनूमान् पृच्छति—रामेति ॥ १५–१७ ॥

[1] श्रेष्ठ—अ २, उ.

सालोक्यादिमुक्तिसाधनं उपासनम्

स होवाच श्रीरामः—

कैवल्यमुक्तिरेकैव पारमार्थिकरूपिणी ।
दुराचाररतो वाऽपि मन्नामभजनात् कपे ॥ १८ ॥
सालोक्यमुक्तिमाप्नोति न तु लोकान्तरादिकम् ।
काश्यां तु ब्रह्मनालेऽस्मिन् मृतौ मत्तारमाप्नुयात् ॥ १९ ॥
पुनरावृत्तिरहितां मुक्तिं प्राप्नोति मानवः ।
यत्र कुत्रापि वा काश्यां मरणे स महेश्वरः ॥ २० ॥
जन्तोर्दक्षिणकर्णे तु मत्तारं समुपादिशेत् ।
निर्धूताशेषपापौघो मत्सारूप्यं भजत्ययम् ॥ २१ ॥
सैव सालोक्यसारूप्यमुक्तिरित्यभिधीयते ।
सदाचारैरतो भूत्वा द्विजो नित्यमनन्यधीः ॥ २२ ॥
मयि सर्वात्मके भावो मत्सामीप्यं भजत्ययम् ।
सैव सालोक्यसारूप्यसामीप्या मुक्तिरिष्यते ॥ २३ ॥
गुरूपदिष्टमार्गेण ध्यायन् मद्रूपमव्ययम् ।
मत्सायुज्यं द्विजः [1]सम्यग्भजेद्भ्रमरकीटवत् ॥ २४ ॥
सैव सायुज्यमुक्तिः स्याद्ब्रह्मानन्दकरी शिवा ।
चतुर्विधा [2]च या मुक्तिर्मदुपासनया भवेत् ॥ २५ ॥

मारुतिप्रश्नोत्तरं श्रीभगवानाह—स होवाच श्रीराम इति ॥ १८–२४ ॥ सालोक्यादिचतुर्विधा तु या मुक्तिः ॥ २५ ॥

[1] सम्यग्भेजे भ्र—उ, उ १. [2] तु—उ.

कैवल्यमुक्तिसाधनं औपनिषदं ज्ञानम्

इयं कैवल्यमुक्तिस्तु केनोपायेन सिध्यति ।
माण्डूक्यमेकमेवालं मुमुक्षूणां विमुक्तये ॥ २६ ॥
तथाऽप्यसिद्धं चेज्ज्ञानं दशोपनिषदं पठ ।
ज्ञानं लब्ध्वाऽचिरादेव मामकं धाम यास्यसि ॥ २७ ॥
तथाऽपि दृढता नो चेद्विज्ञानस्याञ्जनासुत ।
द्वात्रिंशाख्योपनिषदं समभ्यस्य निवर्तय ॥ २८ ॥
विदेहमुक्ताविच्छा चेदष्टोत्तरशतं पठ ।
तासां क्रमं सशान्तिं च शृणु वक्ष्यामि तत्त्वतः ॥ २९ ॥

उपासनाजन्या चतुर्विधमुक्तिरिति श्रवणात् कैवल्यसिद्धिः केनेति पृच्छति —इयमिति । तदाशङ्कामपाकरोति—माण्डूक्यमिति । यत् ब्रह्मप्रणवार्थतुर्य-तुरीययाथात्म्यप्रकाशकं तत् माण्डूक्यम् ॥ २६ ॥ तेनैव ज्ञानम् ॥ २७–२८॥ यदि ते देहे सत्यपि विदेहमुक्तौ । तत् कथमित्याशङ्कमानमालक्ष्य तासाम् ॥ २९–३९ ॥

अष्टोत्तरशतोपनिषदां क्रमः

ईशकेनकठप्रश्नमुण्डमाण्डूक्यतित्तिरिः ।
ऐतरेयं च छान्दोग्यं बृहदारण्यकं तथा ॥ ३० ॥
ब्रह्मकैवल्यजाबालश्वेताश्वो हंस आरुणिः ।
गर्भो नारायणो हंसो बिन्दुनादशिरःशिखा ॥ ३१ ॥
मैत्रायणी कौषितकी बृहज्जाबालतापनी ।
कालाग्निरुद्रमैत्रेयी सुबालक्षुरिमन्त्रिका ॥ ३२ ॥

सर्वसारं निरालम्बं रहस्यं वज्रसूचिकम् ।
तेजोनादध्यानविद्यायोगतत्त्वात्मबोधकम् ॥ ३३ ॥
परिव्राट् त्रिशिखी सीता चूडा निर्वाणमण्डलम् ।
दक्षिणा शरभं स्कन्दं महानारायणाद्वयम् ॥ ३४ ॥
रहस्यं रामतपनं वासुदेवं च मुद्गलम् ।
शाण्डिल्यं पैङ्गलं भिक्षुमहच्छारीरकं शिखा ॥ ३५ ॥
तुरीयातीतसंन्यासपरिव्राजाक्षमालिका ।
अव्यक्तैकाक्षरं पूर्णा सूर्याक्ष्यध्यात्मकुण्डिका ॥ ३६ ॥
सावित्र्यात्मा पाशुपतं परं ब्रह्मावधूतकम् ।
त्रिपुरातपनं देवी त्रिपुरा कठभावना ।
हृदयं कुण्डली भस्म रुद्राक्षगणदर्शनम् ॥ ३७ ॥
तारसारमहावाक्यपञ्चब्रह्माग्निहोत्रकम् ।
गोपालतपनं कृष्णं याज्ञवल्क्यं वराहकम् ॥ ३८ ॥
शाट्यायनी हयग्रीवं दत्तात्रेयं च गारुडम् ।
कलिजाबालिसौभाग्यरहस्यऋचमुक्तिका ॥ ३९ ॥

उपनिषदर्थज्ञानात् मुक्तिलाभः

एवमष्टोत्तरशतं भावनात्रयनाशनम् ।
ज्ञानवैराग्यदं पुंसां वासनात्रयनाशनम् ॥ ४० ॥
पूर्वोत्तरेषु विहिततत्तच्छान्तिपुरःसरम् ।
वेदविद्याव्रतस्नातदेशिकस्य मुखात् स्वयम् ॥ ४१ ॥

गृहीत्वाऽष्टोत्तरशतं ये पठन्ति द्विजोत्तमाः ।
प्रारब्धक्षयपर्यन्तं जीवन्मुक्ता भवन्ति ते ॥ ४२ ॥
ततः कालवशादेव प्रारब्धे तु क्षयं गते ।
वैदेहीं मामकीं मुक्तिं यान्ति नास्त्यत्र संशयः ॥ ४३ ॥

विशिष्टविद्यासामान्यविशेषफलमाह—एवमिति । असम्भावनाऽऽदिभावनात्रयनाशनम् । देहवासनाऽऽदिवासनात्रयनाशनम् ॥ ४० ॥ किंच—पूर्वेति ॥ ४१–४३ ॥

उपनिषत्संप्रदानविधिः

सर्वोपनिषदां मध्ये सारमष्टोत्तरं शतम् ।
सकृच्छ्रवणमात्रेण सर्वाघौघनिकृन्तनम् ॥ ४४ ॥
मयोपदिष्टं शिष्याय तुभ्यं पवननन्दन ।
इदं शास्त्रं मयाऽऽदिष्टं गुह्यमष्टोत्तरं शतम् ॥ ४५ ॥
ज्ञानतोऽज्ञानतो वाऽपि पठतां बन्धमोचकम् ।
राज्यं देयं धनं देयं याचतः कामपूरणम् ॥ ४६ ॥
इदमष्टोत्तरशतं न देयं यस्य कस्यचित् ।
नास्तिकाय कृतघ्नाय दुराचाररताय वै ॥ ४७ ॥
मद्भक्तिविमुखायासच्छास्त्रगर्तेषु मुह्यते ।
गुरुभक्तिविहीनाय दातव्यं न कदाचन ॥ ४८ ॥
सेवापराय शिष्याय हितपुत्राय मारुते ।
मद्भक्ताय सुशीलाय कुलीनाय सुमेधसे ॥ ४९ ॥

सम्यक् परीक्ष्य दातव्यमेवमष्टोत्तरं शतम् ।
यः पठेच्छृणुयाद्वाऽपि स मामेति न संशयः ॥ ९० ॥

तदेतदृचाऽभ्युक्तम्—

विद्या ह वै ब्राह्मणमाजगाम
गोपाय मां शेवधिष्टेऽहमस्मि ।
असूयकायानृजवे शठाय
मा मा ब्रूया वीर्यवती तथा स्याम् ॥ ९१ ॥
यमेव विद्याश्रुतमप्रमत्तं मेधाविनं ब्रह्मचर्योपपन्नम् ।
अस्मा इमामुपसन्नाय सम्यक् परीक्ष्य दद्याद्वैष्णवीमात्मनिष्ठाम् ॥

अशीत्यधिकशतोत्तरसहस्रसङ्ख्याकानां **सर्वोपनिषदाम्** ॥ ४४–४५ ॥ केवलकृपया यद्यनधिकारिणि तुष्टोऽसि तदा तस्मै **राज्यं देयम्** ॥ ४६ ॥ किंगुणविशिष्टाय न देयमित्यत्र—**नास्तिकायेति** ॥ ४७–४८ ॥ न कस्यापि प्रशंसने विद्यासम्प्रदायविच्छित्तिः स्यादित्यत्र यथोक्ताधिकारिणे दातव्यं, तेन विद्यासम्प्रदायाविच्छित्तिः स्यादित्याह—**सेवेति** ॥ ४९–५० ॥ अनधिकारिणे न वक्तव्यं, अधिकारिणे वक्तव्यं, इत्येषोऽर्थो मन्त्राभ्यामप्युक्तो भवतीत्याह—**तदेतदृचाऽभ्युक्तमिति** । **हवा** इति वृत्तार्थस्मरणार्थौ । ब्रह्मविद्या पुरा **ब्राह्मणं** ब्रह्माणं **आजगाम** । ब्रह्माणमुपसङ्गम्य किं उक्तवतीत्यत्र—तवाहं **शेवधिष्टे** निक्षेपस्थाने **अस्मि** । तव निक्षेपभूतां **मां गोपाय** रक्षस्व । केन त्वं मया रक्षिताऽसीत्यत्र अनधिकार्यप्रदानपूर्वकं यथोक्ताधिकारिभ्यः प्रदानमित्याह—**असूयकायेति** । अनधिकार्यप्रदानतोऽहं **वीर्यवती** स्यामित्यर्थः ॥ ९१ ॥ सम्यक्परीक्षया विदितवृत्ताय **वैष्णवीं निष्ठां** दद्यादित्यर्थः ॥ ९२ ॥

इति प्रथमः खण्डः

अष्टोत्तरशतोपनिषदां पृथक् शान्तिः

अथ हैनं श्रीरामचन्द्रं मारुतिः पप्रच्छ ऋग्वेदादिविभागेन पृथक् शान्तिमनुब्रूहीति । स होवाच श्रीरामः—

ऐतरेयकौषीतकिनादबिन्द्वात्मप्रबोधनिर्वाणमुद्गलाक्षमालिका - त्रिपुरासौभाग्यबह्वृचानामृग्वेदगतानां दशसंख्याकानामुपनिषदां वाङ्मे मनसीति शान्तिः ॥ १ ॥

ईशावास्यबृहदारण्यजाबालहंसपरमहंससुबालमन्त्रिकानिरा - लम्बत्रिशिखीब्राह्मणमण्डलब्राह्मणाद्वयतारकपैङ्गलभिक्षुतुरीयातीता - ध्यात्मतारसारयाज्ञवल्क्यशाट्यायनीमुक्तिकानां शुक्लयजुर्वेदगतानामे-कोनविंशतिसंख्याकानामुपनिषदां पूर्णमद इति शान्तिः ॥ २ ॥

कठवल्लीतैत्तिरीयकब्रह्मकैवल्यश्वेताश्वतरगर्भनारायणामृतबिन्दु-मृतनादकालाग्निरुद्रक्षुरिकासर्वसारशुकरहस्यतेजोबिन्दुध्यानबिन्दुब्रह्म-विद्यायोगतत्त्वदक्षिणामूर्तिस्कन्दशारीरकयोगशिखैकाक्षराक्ष्यवधूत - कठरुद्रहृदययोगकुण्डलिनीपञ्चब्रह्मप्राणाग्निहोत्रवराहकलिसंतारणसर - स्वतीरहस्यानां कृष्णयजुर्वेदगतानां द्वात्रिंशत्संख्याकानामुपनिषदां सह नाववत्विति शान्तिः ॥ ३ ॥

केनच्छान्दोग्यारुणिमैत्रायणिमैत्रेयीवज्रसूचिकायोगचूडा - मणिवासुदेवमहत्संन्यासाव्यक्तकुण्डिकासावित्रीरुद्राक्षजाबालदर्शन - जाबालीनां सामवेदगतानां षोडशसंख्याकानामुपनिषदामाप्यायन्त्विति शान्तिः ॥ ४ ॥

प्रश्नमुण्डकमाण्डूक्यार्थर्वशिरोऽथर्वशिखाबृहज्जाबालनृसिंहतापनीनारदपरिव्राजकसीताशरभमहानारायणरामरहस्यरामतापनीशाण्डिल्यपरमहंसपरिव्राजकान्नपूर्णासूर्यात्मपाशुपतपरब्रह्मत्रिपुरातपनदेवीभावनाभस्मजाबालगणपतिमहावाक्यगोपालतपनकृष्णहयग्रीवदत्तात्रेयगारुडानामथर्ववेदगतानामेकत्रिंशत्संख्याकानामुपनिषदां भद्रं कर्णेभिरिति शान्तिः ॥ ५ ॥

ऋगादिचतुर्वेदप्रविभक्तेतरेयाद्युपनिषदां शान्तिभेदं पृच्छतीत्याह—अथेति । किमिति ? ऋग्वेदादीति ॥ १–५ ॥

औपनिषदज्ञानादेव कैवल्यमुक्तिः

मुमुक्षवः पुरुषाः साधनचतुष्टयसंपन्नाः श्रद्धावन्तं सत्कुलभवं श्रोत्रियं शास्त्रवात्सल्यं गुणवन्तमकुटिलं सर्वभूतहिते रतं दयासमुद्रं सद्गुरुं विधिवदुपसंगम्योपहारपाणयोऽष्टोत्तरशतोपनिषदं विधिवदधीत्य श्रवणमननिदिध्यासनानि नैरन्तर्येण कृत्वा प्रारब्धक्षयाद्देहत्रयभङ्गं प्राप्योपाधिविनिर्मुक्तघटाकाशवत् परिपूर्णता विदेहमुक्तिः । सैव कैवल्यमुक्तिरिति ॥ ६ ॥ अत एव ब्रह्मलोकस्था अपि ब्रह्ममुखाद्वेदान्तश्रवणादि कृत्वा तेन सह कैवल्यं लभन्ते । अतः सर्वेषां कैवल्यमुक्तिर्ज्ञान[1]मात्रेणोक्ता न कर्मसांख्ययोगोपासनादिभिरित्युपनिषत् ॥ ७ ॥

देशिकमुखात् अष्टोत्तरेशाद्युपनिषदो विधिवत् अधीत्य तदर्थश्रवणादिनिष्पन्ननिष्प्रतियोगिकब्रह्ममात्रज्ञानसमकालं मुनयो विदेहमुक्ता भवन्तीत्याह—

[1] मार्गे—क.

मुमुक्षव इति । मुमुक्षवो यथोक्तसाधनसम्पन्ना भूत्वा, " आचार्यो वेदसम्पन्नो विष्णुभक्तो विमत्सरः " इत्यादिश्रुतिप्रकटितजीवन्मुक्तलक्षणसम्पन्नं **विधिवत्** प्रणम्य, तन्मुखात् ईशाद्यष्टोत्तरशतोपनिषदो **विधिवदधीत्य**, तत्समग्रश्रवण-**मननानिदिध्यासनतः** सर्वापह्नवसिद्धं ब्रह्म निष्प्रतियोगिकस्वमात्रमिति सम्यज्ज्ञानं जायते । तत्समकालमेव आगाम्यादिकर्मत्रयं कारणदेहादिगतभ्रान्तिजादितादात्म्यादित्रयं च विलीयते । तदानीमुपाधिविनिर्मुक्तघटाकाशवत् **परिपूर्णभावो विदेहमुक्तिः** । तद्वन्तो विदेहमुक्ता भवन्ति । येयं विदेहमुक्तिरभिहिता **सैव कैवल्यमुक्तिरिति** ज्ञातव्येत्यर्थः ॥ ६ ॥ सालोक्यादिमुक्तिभाजां ज्ञाननैरपेक्ष्येण ब्रह्मणा सह कैवल्यसम्भवात् किं ज्ञानेनेत्याशङ्क्य—स्वातिरिक्तभ्रमस्य स्वाज्ञानविकल्पितत्वेन स्वज्ञानेतरानाश्यत्वात्, केवलोपासनया सालोक्यादिः सिध्यति, यतः तस्याऽपि स्वाज्ञानकार्यत्वेन स्वज्ञाननाश्यत्वं **अत एव** । **वेदान्तश्रवणादि कृत्वा** तन्निष्पन्ननिर्विशेषब्रह्मज्ञानादेव **तेन ब्रह्मणा** । **न कर्मसांख्ययोगोपासनादिभिः**, " नान्यः पन्था अयनाय विद्यते " इति श्रुतेः । **इत्युपनिषच्छब्दः** प्रथमाध्यायपरिसमाप्त्यर्थः ॥

इति द्वितीयः खण्डः

इति प्रथमोऽध्यायः

द्वितीयोऽध्यायः

जीवन्मुक्तिविदेहमुक्त्योः स्वरूपप्रमाणसाधनप्रयोजननिरूपणम्

तथा हैनं श्रीरामचन्द्रं मारुतिः पप्रच्छ । केयं जीवन्मुक्तिः विदेहमुक्तिः किं वा तत्र प्रमाणं कथं वा तत्सिद्धिः सिद्ध्या वा किं प्रयोजनमिति । स होवाच श्रीरामः । पुरुषस्य कर्तृत्वभोक्तृत्वसुखदुःख-

खादिलक्षणश्चित्तधर्मः क्लेशरूपत्वाद्बन्धो भवति । तन्निरोधनं जीवन्मुक्तिः। उपाधिविनिर्मुक्तघटाकाशवत् प्रारब्धक्षयाद्विदेहमुक्तिः। जीवन्मुक्तिविदेहमुक्त्योरष्टोत्तरशतोपनिषदः प्रमाणम् । कर्तृत्वादि-दुःखनिवृत्तिद्वारा नित्यानन्दावाप्तिः प्रयोजनं भवति । तत् पुरुषप्रयत्न-[1]साध्यं भवति । यथा पुत्रकामेष्टिना पुत्रं वाणिज्यादिना वित्तं ज्योतिष्टोमेन स्वर्गं तथा पुरुषप्रयत्नसाध्यवेदान्तश्रवणादिजनितसमाधिना जीवन्मुक्त्यादिलाभो भवति । सर्ववासनाक्षयात्तल्लाभः ॥१—१॥

एवं श्रीराममुखतः स्वस्वरूपबोधकं ईशाद्यष्टोत्तरशतवेदान्तरहस्यमवगम्य उपायोपेयात्मकपञ्चविधमुक्तिस्वरूपमपि विदित्वा निर्विशेषब्रह्मज्ञानान्तराळिक-मुख्यफलात्मकजीवन्मुक्तिविदेहमुक्तिस्वरूपं तत्प्रमाणं तत्प्रयोजनं च विशेषतो ज्ञातव्यमिति श्रीरामचन्द्रं रामदूतः पृच्छतीत्याह—**अथेति** । किमिति—**केयमिति** । मारुतिकृतप्रश्नोत्तरं—**स होवाच श्रीराम** इति । किमुवाचेत्यत्र जीवन्मुक्तेः बन्धनिरासकतया जीवन्मुक्तिनिरसनीयबन्धस्वरूपमाह—**पुरुषस्येति**। **चित्तधर्मः** सहजो भवति। तस्य जनिमृतिपरम्पराहेतुत्वेन **क्लेशरूपत्वात्** तथाविध-चित्तधर्म एव स्वाज्ञदृष्टेः **बन्धो भवति । तन्निरोधनं जीवन्मुक्तिः** । तस्य चित्तस्य कर्तृत्वादिपराग्भावतो निरोधनपूर्वकं प्रत्यगभिन्नं ब्रह्मास्मीति तावन्मात्र-स्थितिः जीवन्मुक्तिः ।

देहत्रयातिरिक्तोऽहं शुद्धचैतन्यमस्म्यहम् ।
ब्रह्माहमिति यस्यान्तः स जीवन्मुक्त उच्यते ॥

इति श्रुतेः। केयं जीवन्मुक्तिरिति प्रश्नोत्तरमभिधाय केयं विदेहमुक्तिरिति प्रश्नोत्तर-माचष्टे—**उपाधीति** । घटशरावाद्युपाधिसत्त्वासत्त्वाभ्यां यथा व्योम व्योममात्रं न

[1] साध्यो—ङ.

कदाचित् घटतां भजतीति ज्ञानमात्रेण व्योम घटोपाधिविनिर्मुक्तं भवति तथा प्रारब्धादिकर्मत्रयाश्रयशरीरत्रयोपलक्षितस्वाविद्यापदतत्कार्यसत्त्वासत्त्वाभ्यां स्वातिरिक्तकलनाऽपह्नवसिद्धं वस्तु निष्प्रतियोगिकब्रह्ममात्रमेवेति तावन्मात्रावशेषतया अवस्थितिः विदेहमुक्तिरित्यर्थः । किं वा तत्र प्रमाणमिति प्रश्नोत्तरमाह—**जीवन्मुक्ती**ति । ईशाद्यष्टोत्तरशतोपनिषदां निष्प्रतियोगिकनिर्विशेषब्रह्ममात्रपर्यवसन्नत्वात् तज्ज्ञानान्तराळिकफलं हि जीवन्मुक्तिः तन्मात्रावशेषलक्षणं विदेहमुक्तिरिति ।

यस्मिन् सर्वाणि भूतान्यात्मैवाभूद्विजानतः ।
तत्र को मोहः कः शोकः एकत्वमनुपश्यतः ॥
अन्यदेव तद्विदितादथो अविदितादधि ॥
प्रतिबोधविदितं मतममृतत्वं हि विन्दते ॥
महान्तं विभुमात्मानं मत्वा धीरो न शोचति ॥
स एषोऽकलोऽमृतो भवति नातः परमस्तीति च ॥
अप्राणो ह्यमनाः शुभ्रः ॥
यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि श्रिताः ।
अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुते ॥
शान्तं शिवमद्वैतं चतुर्थं मन्यन्ते स आत्मा स विज्ञेयः ॥
अभयं प्रतिष्ठां विन्दते । अथ सोऽभयं गतो भवति ॥
प्रज्ञा प्रतिष्ठा । प्रज्ञानं ब्रह्म ॥
तरति शोकमात्मवित् ॥
तदेतद्ब्रह्मापूर्वमनपरमनन्तरमबाह्यमयमात्मा ब्रह्म सर्वानुभूः ॥

इत्यादिश्रुतिसहस्रं निष्प्रतियोगिकब्रह्ममात्रबोधकं सत् तत्रैव पर्यवस्यति । तदस्मीत्यनुसन्धानलक्षणा जीवन्मुक्तिः, तदनुसन्धानादिसर्वव्यापृतिविरळा विदेहमुक्तिः इत्यत्र सर्वे वेदान्ताः प्रमाणपदं भजन्त इत्यर्थः । कथं वा तत्सिद्धिः इति प्रश्नं पश्चाद्विवक्ष्यन् सिद्धया वा किं प्रयोजनं इति प्रश्नमपाकरोति—**कर्तृत्वादी**ति ।

कथं तत्सिद्धिः इति प्रश्नमपाकरोति—तत्पुरुषेति। सदृष्टान्तं तदेव विशदयति—**यथेति**। **पुत्रकामेष्टिना** इष्ट्या। **पुरुषप्रयत्नसाध्यवेदान्तश्रवणादिजनितनिर्विशेषब्रह्मज्ञानसमाधिना**। निर्विकल्पकज्ञानं केन जायते इत्यत्र—**सर्ववासनाक्षयात्तल्लाभ** इति॥ १–१॥

शुभाशुभवासनाविषये पुरुषकर्तव्यता

अत्र श्लोका भवन्ति—

उच्छास्त्रं शास्त्रितं चेति पौरुषं द्विविधं मतम्।
तत्रोच्छास्त्रमनर्थाय परमार्थाय शास्त्रितम्॥ १॥
लोकवासनया जन्तोः शास्त्रवासनयाऽपि च।
देहवासनया ज्ञानं यथावन्नैव जायते॥ २॥
द्विविधो वासनाव्यूहः शुभश्चैवाशुभश्च [1]सः।
वासनौघेन शुद्धेन तत्र चेदनु[2]नीयसे॥ ३॥
तत्क्रमेणाशु तेनैव मामकं पदमाप्नुहि।
अथ चेदशुभो भावस्त्वां योजयति संकटे॥ ४॥
प्राक्तनस्तदसौ यत्नाज्जेतव्यो भवता कपे।
शुभाशुभाभ्यां मार्गाभ्यां वहन्ती वासनासरित्॥ ५॥
पौरुषेण प्रयत्नेन योजनीया शुभे पथि।
अशुभेषु समाविष्टं शुभेष्वेवावतारयेत्॥ ६॥
अशुभाच्चालितं याति शुभं तस्मादपीतरत्।
पौरुषेण प्रयत्नेन लालयेच्चित्तबालकम्॥ ७॥

[1] ते—अ, अ १, अ २, क. [2] लीय—क.

द्रागभ्यासवशाद्याति यदा ते वासनोदयम् ।
तदाऽभ्यासस्य साफल्यं विद्धि त्वमरिमर्दन ॥ ८ ॥
संदिग्धायामपि भृशं शुभामेव समाचर ।
शुभायां वासनावृद्धौ न दोषाय मरुत्सुत ॥ ९ ॥

उक्तार्थप्रकाशकाः मन्त्राः सन्तीत्याह—अत्र श्लोका भवन्तीति। वेदान्तश्रवणादिः पुरुषप्रयत्नसाध्य इत्युक्तं तत्र उच्छास्त्रादिभेदेन पौरुषं द्विधा भिद्यत इत्याह—उदिति । श्रुतिस्मृतिवर्मातिक्रमणपूर्वकं स्वच्छन्दानुवर्तित्वं उच्छास्त्रमुच्यते, तस्य स्वपुरुषार्थच्युतिहेतुतया अनर्थरूपत्वात् । तद्वैपरीत्येन श्रुतिस्मृत्यनुग्राहकभगवदाज्ञाऽनुकारित्वं **शास्त्रितं,** तस्य लोकोच्छास्त्रप्रवृत्तिनिरसनपूर्वकं स्वार्थप्रापकत्वात् । ततो मुमुक्षुः उच्छास्त्रवृत्तिं विहाय भगवदाज्ञाऽनुवर्ती भवेदित्यर्थः ।

यः शास्त्रविधिमुत्सृज्य वर्तते कामकारतः ।
न स सिद्धिमवाप्नोति न सुखं न परां गतिम् ॥ इति ॥
श्रुतिः स्मृतिर्ममैवाज्ञा यस्तामुल्लंघ्य वर्तते ।
आज्ञाच्छेदी मम द्रोही मद्भक्तोऽपि न वैष्णवः ॥

इति च स्मृतेः ॥ १ ॥ उन्मार्गप्रवृत्तिहेतुः लोकादिवासनात्रयमित्याह—**लोकेति** । यथा लोका मां सन्मार्गानुवर्तिनं वदन्ति तथा मया आचरणीयमिति धीरेव **लोकवासना** भवतीत्यत्र

यथा वदन्ति लोका मामदुष्टं शिष्टभूषणम् ।
तथा मयेह स्थातव्यमिति धीर्लोकवासना ॥

इति चन्द्रिकोक्तेः । मया शास्त्रमभ्यस्य तदर्थानुष्ठानं कार्यं इत्यादि **शास्त्रवासना** भवतीत्यत्र—

अन्यस्मादधिकं शास्त्रमध्येतव्यं मयेति च ।
यथाशास्त्रं चराम्यद्य कोऽपि मत्सदृशो न हि ।

[1] दयः—अ.

अतिलंघयेह शास्त्रोक्ताचारमन्यस्तु वर्तते ।
यथाशास्त्रं चरत्येष मया तुल्यो न संशयः ।
एवंरूपा यस्य मतिः वासना शास्त्रगेरिता ॥

इति चन्द्रिकोक्तेः । गच्छामि तिष्ठाम्यमुष्य पुत्रोऽहं इत्यादि **देहवासना** भवति, "**देहाश्रया व्यवहृतिर्वासना देहगेरिता**" इति स्मृतेः । एवं लोकादिवासनावासितचित्तानां **यथावदात्मज्ञानं न जायते** । यत एवं अतः वासनात्रय न कर्तव्यं इत्यत्र श्रुतिः—

लोकानुवर्तनं त्यक्त्वा तथा देहानुवर्तनम् ।
शास्त्रानुवर्तनं त्यक्त्वा स्वाध्यासापनयं कुरु ॥

इति ॥ २ ॥ शुभाशुभभेदेन वासनाप्रगो द्विधा भवतीत्याह—**द्विविध इति** । तत्र शुभवासनावान् मामेतीत्याह—**वासनेति** ॥ ३ ॥ यद्यशुभवासना त्वां स्पृशति सा त्वया त्याज्येत्याह—**अथेति** ॥ ४ ॥ शुभाशुभमार्गस्वभावप्रवृत्तो वासनाप्रवाहमशुभमार्गनिरोधनपूर्वकं शुभमार्गे प्रवर्तयेदित्याह—**शुभेति** ॥ ५ ॥ उक्तार्थमेव पुनः द्रढयति—**अशुभेष्विति** ॥ ६–७ ॥ यदि तेऽभ्यासपाटवेन शुभवासनैवोदेति तदा त्वदभ्यासः फलवानित्याह—**द्रागिति** ॥ ८ ॥ शुभवासना जाता न वेति संशये शुभवासनावृद्धौ न हि दोषोऽस्तीत्याह—**सन्दिग्धायामिति** ॥ ९ ॥

वासनाक्षयविज्ञानमनोनाशानां युगपदभ्यसनीयत्वम्

वासनाक्षयविज्ञानमनोनाशा महामते ।
समकालं चिराभ्यस्ता भवन्ति फलदा मताः ॥ १० ॥
[1]त्रयमेते [एते] समं यावन्नाभ्य[2]स्ताश्च पुनः पुनः ।
तावन्न पदसंप्राप्तिर्भवत्यपि समाशतैः ॥ ११ ॥

[1] त्रय एते समा—अ. [2] स्ता च—अ १, अ २, क, उ, उ १.

एकैकशो निषेव्यन्ते यद्येते चिरमप्यलम् ।
तत्र सिद्धिं प्रयच्छन्ति मन्त्राः संकीर्ण[र्णि]ता इव ॥ १२ ॥
त्रिभिरेतैश्चिराभ्यस्तैर्हृदयग्रन्थयो दृढाः ।
निःशङ्कमेव त्रुट्यन्ति बिसच्छेदाद्गुणा इव ॥ १३ ॥
जन्मान्तरशताभ्यस्ता मिथ्या संसारवासना ।
सा चिराभ्यासयोगेन विना न क्षीयते क्वचित् ॥ १४ ॥
तस्मात् सोम्य प्रयत्नेन पौरुषेण विवेकिना ।
भोगेच्छां दूरतस्त्यक्त्वा त्रयमेव समाश्रय ॥ १५ ॥

वासनाक्षयविज्ञानमनोनाशा युगपदभ्यस्ताश्चेत् यथोक्तफलदा भवन्ति न प्रातिस्विकेनाभ्यासत इत्याह—**वासनेति** ॥ १० ॥ विपर्यये—**त्रयमेते** ॥ ११ ॥ यथा विशिष्टाक्षरमन्त्रजपः फलवान् न तत्रैकैकाक्षरजपः फलवान् भवति तथा वासनाक्षयादित्रयं समकालाभ्यस्तं सत् फलवत् भवति । प्रातिस्विकेन वासनाक्षयकरणे विज्ञानाभावे वासना न क्षीयते । वासनाक्षयार्थं विज्ञानमेव आश्रयणीयमित्युक्ते मनसि सति विज्ञानं नोदेति । विज्ञानसिद्धये मनोनाशः कर्तव्य इत्युक्ते वासनासु सतीषु मनो न नश्यति । यत एवं अतः वासनाक्षयविज्ञानमनोनाशा युगपदनुष्ठेयाः । तत् कथं यौगपद्येन अनुष्ठातुं शक्यं इत्युक्ते ब्रह्मातिरेकेण सवासनं मनो नास्तीति विज्ञानमेव समकालाभ्यासः, तेन स्वातिरिक्तग्रासब्रह्मभावापत्तिः स्यादित्यर्थः ॥ १२–१३ ॥ एवं सकृदभ्यासतः सवासनं मनो विलीयत इत्यत आह—**जन्मेति** ॥ १४ ॥ यस्मादेवं **तस्मात्** । **भोगेच्छात्यागपूर्वकं** ब्रह्मातिरेकेण न किञ्चिदस्तीति चिरकालाभ्यासतः सवासनं मनो विलीयते । ततो विद्वान् कृतकृत्यो भवतीत्यर्थः ॥ १५ ॥

वासनाक्षयप्रकारः तत्प्रयोजनं च

तस्माद्वासनया युक्तं मनो बद्धं विदुर्बुधाः ।

सम्यग्वासनया त्यक्तं मुक्तमित्यभिधीयते ।
मनोनिर्वासनीभावमाचराशु महाकपे ॥ १६ ॥
सम्यगालोकनात् सत्याद्वासना प्रविलीयते ।
वासनाविलये चेतः शममायाति दीपवत् ॥ १७ ॥
वासनां संपरित्यज्य मयि चिन्मात्रविग्रहे ।
यस्तिष्ठति गत[1]व्यग्रः [2]सोऽहं सच्चित्सुखात्मकः ॥ १८ ॥
समाधिमथ कर्माणि मा करोतु करोतु वा ।
हृदयेनात्तसर्वेहो मुक्त एवोत्तमाशयः ॥ १९ ॥
नैष्कर्म्येण न तस्यार्थस्तस्यार्थोऽस्ति न कर्मभिः ।
न समाधानजाप्याभ्यां यस्य निर्वासनं मनः ॥ २० ॥
संत्यक्तवासनान्मौनादृते नास्त्युत्तमं पदम् ॥ २१ ॥
वासनाहीनमप्येतच्चक्षुरादीन्द्रियं स्वतः ।
प्रवर्तते बहिः स्वार्थे वासनामात्रकारणम् ॥ २२ ॥
अयत्नोपनतेष्वक्षि दृग्द्रव्येषु यथा पुनः ।
नीरागमेव पतति तद्वत् कार्येषु धीरधीः ॥ २३ ॥

सवासनं मनो बद्धं सत् पराक्प्रवृत्तं भवति, निर्वासनं मनः प्रत्यग्भावमेतीत्याह—**तस्मादिति** । यस्माद्वासनावान् हीयते **तस्मात्** । यत एवमतो **मनोनिर्वासनीभावमिति** ॥१६॥ कथं मनो निर्वासनीभावमेतीत्यत्र ब्रह्मातिरेकेण न किञ्चिदस्तीति **सम्यगालोकनात्** । निःस्नेहदीपवत् निर्वासनं मनो **विलीयत** इत्यर्थः ॥ १७ ॥ वासनात्यागी कृतकृत्यो भवतीत्याह—**वासनामिति** ॥ १८ ॥

[1] स्नेहः—अ, अ १; [2] सोऽयं—उ.

निर्वासनमना मुनिः समाध्यादिकरणाकरणतो न वर्धते न हीयते वृद्धिहानितोऽपि मुक्तो भवतीत्याह— **समाधिमिति** । सत्वगुणात्मकः **समाधिः** । रजोगुणात्मकं **कर्म** । निर्गुणं ब्रह्मास्मीति तद्भावापन्नो मुनिः । तस्य स्वातिरिक्तभ्रमतो मुक्तत्वात् समाध्यादिकरणाकरणयोः न का चिद्विकृतिरस्तीत्यर्थः ॥ १९ ॥ किंच—**नैष्कर्म्येणेति** । कर्मसामान्यं यतो निर्गतं तन्निष्कर्म तदेव **नैष्कर्म्यं** पारिव्राज्यं तेन कर्मणा वा मन्त्राभ्यासतः समाधितो वाऽपि न हि तस्य प्रयोजनमस्ति **यस्य मनो निर्वासनं** भवति ॥ २० ॥ तस्य देहत्रयविलक्षणत्वेन तन्निर्वर्त्यकर्ममन्त्रसंन्याससमाध्यपेक्षाऽसम्भवात् तूष्णींभावादृते न किंचित् कर्तव्यमस्तीत्याह— **सन्त्यक्तेति** ॥ २१ ॥ विदुषो निर्वासनतया कादाचित्कबाह्यान्तर्व्यापारो न दोषाय भवतीत्याह—**वासनेति** । विदुषो मनः **वासनाहीनमपि** सवासना प्रवृत्तिः बन्धहेतुः निर्वासना प्रवृत्तिः मुक्तये भवतीत्यत्र वासनाभावाभावौ प्रयोजकाविति्यर्थः ॥ २२ ॥ उक्तार्थं सदृष्टान्तमुपपादयति—**अयत्नेति** । **यथा** पथिगततृणादिषु दृष्टिः **नीरागमेव** पतति न हि तत्र लिप्यते, तथा **धीरधीः** बाह्यान्तर्व्यापृतोऽपि बाह्यान्त कलनासु न लिप्यते इत्यर्थः ॥ २३ ॥

चित्तनाशप्रकारः तत्फलं च

भावसंवित्प्रकटितामनुरूपां च मारुते ।
चित्तस्योत्पत्त्युपरमां वासनां मुनयो विदुः ॥ २४ ॥
दृढाभ्यस्तपदार्थैकभावनादतिचञ्चलम् ।
चित्तं संजायते जन्मजरामरणकारणम् ॥ २५ ॥
[1]वासनाऽऽवेशतः प्राणस्पन्दस्तेन च वासना ।
क्रियते चित्तबीजस्य तेन बीजाङ्कुरक्रमः ॥ २६ ॥

[1] वासनावश—अ, अ १, अ २, क.

द्वे बीजे चित्तवृक्षस्य प्राणस्पन्दनवासने ।
एकस्मिंश्च तयोः क्षीणे क्षिप्रं द्वे अपि नश्यतः ॥ २७ ॥
असङ्गव्यवहारत्वाद्भवभावनवर्जनात् ।
शरीरनाशदर्शित्वाद्वासना न प्रवर्तते ।
वासनासंपरित्यागाच्चित्तं गच्छत्यचित्तताम् ॥ २८ ॥
अवासनत्वात् सततं यदा न मनुते मनः ।
अमनस्ता तदोदेति परमोपशमप्रदा ॥ २९ ॥
अव्युत्पन्नमना यावद्भवानज्ञाततत्पदः ।
गुरुशास्त्रप्रमाणैस्तु निर्णीतं तावदाचर ॥ ३० ॥
ततः पक्वकषायेण नूनं विज्ञातवस्तुना ।
शुभोऽप्यसौ त्वया त्याज्यो वासनौघो निराधिना ॥ ३१ ॥

केयं वासनेत्यत आह—**भावेति** । इदमस्तीदमस्तीति **भावसंवित्प्रकटितां** भावपदार्थगोचरां तत्पदार्थानुरूपां स्वाभिलषितविषये चित्तोत्पत्तिप्रयोजनां **वासनामिति मुनयो विदुः** ॥ २४ ॥ कथं पुनः विषयवासनया चित्तं जायते इत्यत आह—**दृढेति** । इदं मे स्यादिति दृढाभिमानतो जन्मादिकारणं चित्तं जायते । विषयाभिनिवेश एव चित्तोत्पत्तिहेतुः इत्यर्थः ॥२५॥ किंच चित्तोत्पत्ति-बीजं वासनाप्राणस्पन्दाविल्याह—**वासनेति** । विषयेषु **वासनाऽऽवेशतः** । विषयवासनाऽभिनिवेशात् प्राणः स्पन्दते, प्राणस्पन्देन वासनोदेति, वासनया प्राणस्पन्दः क्रियते, प्राणस्पन्देनापि वासना क्रियते, तावेव चित्तबीजस्य चित्तांकुरस्य हेतू भवतः, तयोः वासनाप्राणस्पन्दक्रमो बीजांकु-रवत् दुर्विज्ञेयः इत्यर्थः ॥ २६ ॥ चित्तबीजयोः एकक्षयादपरमपि नश्य-तीत्याह—**द्वे इति** ॥ २७ ॥ तत्र वासनाक्षयोपायमाह—**असङ्गेति** । स्वातिरिक्त-पदार्थासङ्गरूपं ब्रह्मास्मीति भावनात् स्वातिरिक्तसंसारभावनवर्जनात् स्वाज्ञान-

विकल्पितशरीरोपलक्षितस्वाविद्यापदतत्कार्यनाशदर्शित्वाच्च यत्र कुत्रापि वासना नोदेतीत्यर्थः । वासनाऽनुदयात् प्राणोऽपि स्थिरपदं भजति ततश्चित्तं चिन्मात्र-पर्यवसन्नं भवतीत्याह—**वासनेति** । **चित्तं गच्छत्यचित्ततां ब्रह्मभावमेतीत्यर्थः** ॥ २८ ॥ चित्ताभावे मनसः सत्त्वात् तेन संसारानिवृत्तिरित्यत आह—**अवासनत्वादिति** । सदा स्वात्मनो निर्वासनत्वेन **यदा मनः स्वातिरिक्तं न मनुते तदा स्वातिरिक्तपरमोपशमप्रदा अमनस्ता** तत **उदेति** सैव अचित्ततेत्यर्थः ॥ २९ ॥ यावदेवं न जानासि तावद्गुरुवाक्यैकशरणो भव । यदैवं जानासि तदा गुरूपसदनादिशुभैर्वासनाऽपि त्वया त्याज्येत्याह—**अव्युत्पन्नेति** । यावत् स्वाज्ञानावृतो भवसि तावत् श्रुत्याचार्योक्तमार्गानुवर्तनं कुरु ॥ ३० ॥ यदि तेन ते सर्वापह्नवसिद्धं ब्रह्म निष्प्रतियोगिकस्वमात्रमिति तन्मात्रज्ञानमुदेति **ततः** ॥३१॥

सरूपारूपभेदेन द्विविधश्चित्तनाशः

द्विविधश्चित्तनाशोऽस्ति सरूपोऽरूप एव च ।
[1]जीवन्मुक्तौ सरूपः स्यादरूपो देहमुक्तिगः ॥ ३२ ॥
अस्य नाशमिदानीं त्वं पावने शृणु सादरम् ।
चित्तनाशाभिधानं हि यदा ते विद्यते पुनः ॥ ३३ ॥
मैत्र्यादिभिर्गुणैर्युक्तं शान्तिमेति न संशयः ।
भूयोजन्मविनिर्मुक्तं जीवन्मुक्तस्य तन्मनः ॥ ३४ ॥
सरूपोऽसौ मनोनाशो जीवन्मुक्तस्य विद्यते ।
अरूपस्तु मनोनाशो वैदेहीमुक्तिगो भवेत् ॥ ३५ ॥
सहस्राङ्कुरशाखात्मफलपल्लवशालिनः ।
अस्य संसारवृक्षस्य मनो मूलमिदं स्थितम् ॥ ३६ ॥

[1] जीवन्मुक्तः—उ

संकल्प एव तन्मन्ये संकल्पोपशमेन तत् ।
शोषयाशु यथा शोषमेति संसारपादपः ॥ ३७ ॥

जीवन्मुक्तिविदेहमुक्त्यापादकचित्तनाशो द्विधा भिद्यत इत्याह—द्विविध इति । चित्तनाशो द्विधा भिद्यते सरूपविरूपनाशभेदात् । जीवन्मुक्तौ जीवन्मुक्त निर्वर्त्यनिर्विकल्पकसमाधौ पुनरुत्थानार्हतया विलयः सरूपविलयः स्यात्, पुनरनुत्थानार्हतया निर्बीजचित्तविलयो विरूपविलयो विदेहमुक्तिगः स्यादित्यर्थः ॥३२॥ जीवन्मुक्तविदेहमुक्तचित्तविलयं स्पष्टयति—अस्येति । हे पावने अस्य जीवन्मुक्तस्य विदेहमुक्तस्य च चित्तनाशं सादरं इदानीं त्वं शृणु । तत्र जीवन्मुक्तचित्तसरूपनाश उच्यते । जीवन्मुक्तनिर्विकल्पसमाधौ चित्तनाश इत्यभिधानमात्रं, पुनः व्युत्थानदर्शनात्, यदा ते तव जीवन्मुक्तस्य चित्तं विद्यत इति प्रतिभाति ॥ ३३ ॥ बहिर्मुखदशायां दीनादिषु मैत्र्यादिगुणैः युक्तं सत् व्यवहरति, पुनः समाहितदशायां मैत्र्यादिवृत्तिभिः सह शान्तिमेतीत्यत्र न हि संशयोऽस्ति । जीवन्मुक्तसत्वोपाधिक्षयानन्तरं भूयोजन्मनिर्मुक्तं भवति ॥३४॥ यत एवमतो जीवन्मुक्तस्य सरूपनाशो विद्यते, विरूपचित्तनाशो विदेहमुक्तस्येत्यर्थः ॥ ३५ ॥ संसृतिवृक्षमूलं मन एव, मनः सङ्कल्पमात्रं, सङ्कल्पनाशतः संसृतिः नश्यतीत्याह—सहस्रेति ॥ ३६–३७ ॥

मनोनिग्रहोपायः

उपाय एक एवास्ति मनसः स्वस्य निग्रहे ।
मनसोऽभ्युदयो नाशो मनोनाशो महोदयः ॥ ३८ ॥
ज्ञमनो नाशमभ्येति मनोऽज्ञस्य हि शृङ्खला ॥ ३९ ॥
तावन्निशीव वेताला वल्गन्ति हृदि वासनाः ।
एकतत्त्वदृढाभ्यासाद्यावन्न विजितं मनः ॥ ४० ॥

प्रक्षीणचित्तदर्पस्य निगृहीतेन्द्रियद्विषः ।
पद्मिन्य इव हेमन्ते क्षीयन्ते भोगवासनाः ॥ ४१ ॥
हस्तं हस्तेन संपीड्य दन्तैर्दन्तान् विचूर्ण्य च ।
अङ्गान्यङ्गैः समाक्रम्य जयेदादौ स्वकं मनः ॥ ४२ ॥
उपविश्योपविश्यैकां [1]चिन्तकेन मुहुर्मुहुः ।
न शक्यते मनो जेतुं विना युक्तिमनिन्दिताम् ॥ ४३ ॥
अङ्कुशेन विना मत्तो यथा दुष्टमतङ्गजः ।
अध्यात्मविद्याऽधिगमः साधुसंगतिरेव च ॥ ४४ ॥
वासनासंपरित्यागः प्राणस्पन्दनिरोधनम् ।
एतास्ता युक्तयः पुष्टाः सन्ति चित्तजये किल ॥ ४५ ॥
सतीषु युक्तिष्वेतासु हठान्नियमयन्ति [2]ये ।
चेतसो दीपमुत्सृज्य विचिन्वन्ति तमोऽञ्जनैः ॥ ४६ ॥
विमूढाः कर्तुमुद्युक्ता ये हठाच्चेतसो जयम् ।
ते निबध्नन्ति नागेन्द्रमुन्मत्तं बिसतन्तुभिः ॥ ४७ ॥

संसारवृक्षोच्छेदकोपायः कः इत्यत आह—**उपाय इति** । सङ्कल्पक्षय **एक एवोपाय** इत्यर्थः । किंच—**मनस इति** । जीवन्मुक्तस्य **मनसः** सरूप **नाशोऽभ्युदयः** विदेहमुक्तमनोविरूपनाशो **महोदयः** । निष्प्रतियोगिकब्रह्ममात्र-सुखस्वरूपत्वात् महोदयत्वम् ॥ ३८ ॥ इत्थंभूतज्ञानिम**नो नाशमेति**, तद्विपरीत-स्य **मनः** सत्त्वं शृङ्खलावत् बन्धहेतुः ॥ ३९ ॥ ब्रह्मातिरिक्तं मनो नास्तीति यावन्न विजितं तावदज्ञस्य मनः संसरतीत्याह—**तावदिति** ॥ ४० ॥ भोगवास-नावतो मनोनाशः कुतः इत्यतः आह—**प्रक्षीणेति** । चिदतिरिक्तचित्तं नास्तीति

[1] चित्तकेन—अ, अ १, अ २, क. [2] ते—अ २.

बोधेन **प्रक्षीणचित्तदर्पस्य** ॥ ४१ ॥ वासनाक्षयार्थमादौ हठान्मनोनिग्रहं कुर्यादित्याह—**हस्तमिति** ॥ ४२ ॥ युक्तिं विना मनो जेतुं न शक्यमिति सदृष्टान्तमाह—**उपविश्येति** ॥ ४३ ॥ चित्तनिग्रहोपायभूता युक्तयः का इत्यत आह—**अध्यात्मेति** ॥ ४४–४६ ॥ हठाच्चित्तनिग्रहोद्युक्ताः साहसिकाः इत्याह— **विमूढा इति** ॥ ४७ ॥

चित्तनिग्रहोपायो ध्यानम्

द्वे बीजे चित्तवृक्षस्य वृत्तिव्रततिधारिणः ।
एकं प्राणपरिस्पन्दो द्वितीयं दृढभावना ॥ ४८ ॥
सा हि सर्वगता संवित् प्राणस्पन्देन चाल्यते ।
चित्तैकाग्र्याद्यतो ज्ञानमुक्तं समुपजायते ॥ ४९ ॥
तत्साधनमथो ध्यानं यथावदुपदिश्यते ।
विलाप्य विकृतिं कृत्स्नां संभवव्यत्ययक्रमात् ।
परिशिष्टं च चिन्मात्रं चिदानन्दं विचिन्तय ॥ ५० ॥

चित्तवृक्षबीजे द्वे इत्याह—**द्वे इति** । तत्र—**एकम** ॥ ४८ ॥ प्राणस्पन्दास्पन्दतः किं स्यादित्यत आह—**सा हीति** । प्राणचलनं चित्तचलनहेतुः, प्राणायामतः चित्तचलनशान्तिः भवति, चित्तैकाग्र्यात् ब्रह्मज्ञानं जायते ॥४९॥ चित्तैकाग्र्यसाधनं ध्यानमित्याह—**तदिति** । किं तदित्यत्र—**विलाप्येति** । सृष्टिवैपरीत्येन सर्वा विकृतीः विलाप्य यत्तद्विलापनाधिकरणं सच्चिदानन्दमात्रं स्वावशेषधिया विचिन्तय ध्यायस्वेत्यर्थः ॥ ५० ॥

सहजकुंभकाभ्यासात् समाधिसिद्धिः

अपानेऽस्तंगते प्राणो यावन्नाभ्युदितो हृदि ।
तावत् सा कुम्भकावस्था योगिभिर्याऽनुभूयते ॥ ५१ ॥

बहिरस्तंगते प्राणे यावन्नापान उद्गतः ।
तावत्पूर्णो समावस्थां बहिष्ठं कुम्भकं विदुः ॥ ९२ ॥
ब्रह्माकारमनोवृत्तिप्रवाहोऽहंकृतिं विना ।
संप्रज्ञातसमाधिः स्याद्ध्यानाभ्यासप्रकर्षतः ॥ ९३ ॥
प्रशान्तवृत्तिकं चित्तं परमानन्ददायकम् ।
असंप्रज्ञातनामाऽयं समाधिर्योगिनां प्रियः ॥ ९४ ॥
प्रभाशून्यं मनःशून्यं बुद्धिशून्यं चिदात्मकम् ।
अतद्व्यावृत्तिरूपोऽसौ समाधिर्मुनिभावितः ॥ ९५ ॥
ऊर्ध्वपूर्णमधःपूर्णं मध्यपूर्णं शिवात्मकम् ।
साक्षाद्विधिमुखो ह्येष समाधिः पारमार्थिकः ॥ ९६ ॥

उक्तध्यानसाधनत्वेन स्वान्तर्बाह्यसहजकुम्भकमाह—**अपान इति** । यदा हृदयाकाशे अपानः अस्तं गच्छति प्राणोऽपि नोदेति तदा तद्वीस्थैर्यमेव अन्तः-कुम्भकं विद्धि ॥ ९१ ॥ नासाबहिर्द्वादशांगुलपरिमितबाह्याकाशे यदा **प्राणोऽस्तं** गच्छति **यावदपानो** नोदेति तावत्तत्सन्धि बाह्यकुम्भकं विदुरित्यर्थः ॥९२॥ एवं स्वान्तर्बाह्यकुम्भकावस्थायां ब्रह्माहं अहमेव ब्रह्मेति निर्विशेषं ब्रह्म भावयंतः सम्प्रज्ञातसमाधिः उदेतीत्याह—**ब्रह्मेति** ॥ ९३ ॥ सम्प्रज्ञातसमाधितः असम्प्र-ज्ञातसमाधिः उदेतीत्याह—**प्रशान्तेति** । असम्प्रज्ञातसमाधिः केवलनिर्विकल्प इत्यर्थः ॥ ९४ ॥ प्रभाऽदिविकल्पे सति निर्विकल्पः कथमुदेतीत्यत्र प्रभाद्य-तद्व्यावृत्तितो निर्विकल्पो भवतीत्याह—**प्रभेति** । अहङ्कृतिपूर्णविकासरूपेयं जाग्रदवस्था **प्रभाशब्देनोच्यते** । **मनः**शब्देन अहंकृत्यर्धविकासरूपेयं स्वप्नावस्था भवति । **बुद्धिशब्देन** अहंकृतिमुकुळीभावरूपेयं स्वापावस्था स्यात् । जाग्रदाद्य-वस्थात्रयस्यातद्रूपत्वात् तद्व्यतिरेकेण तदवस्थात्रयं कालत्रयेऽपि शून्यं भवतीति भावनं **अतद्व्यावृत्तिः**, तस्यातद्व्यावृत्तिपूर्वकत्वात् । अतद्व्यावृत्तिरूपेयं **समाधि-**

रित्यर्थः ॥ ९५ ॥ पारमार्थिकसमाधिमाह—ऊर्द्धेति । ऊर्द्धादिपरिच्छेदासम्भव-प्रबोधसिद्धं ब्रह्म निष्प्रतियोगिकपूर्णं सत् स्वमात्रमवशिष्यत इत्यत्र—"पूर्णमेवा-वशिष्यते" इति श्रुतिसिद्धो विधिमुख इत्युच्यते । सोऽयं **समाधिः पारमार्थिकः** निर्विशेषब्रह्ममात्रपर्यवसन्नत्वात् ॥ ९६ ॥

वासनासामान्यं स्वरूपावरणम्

दृढभावनया त्यक्तपूर्वापरविचारणम् ।
यदादानं पदार्थस्य वासना सा प्रकीर्तिता ॥ ९७ ॥
भावितं तीव्रसंवेगादात्मना यत्तदेव सः ।
भवत्याशु कपिश्रेष्ठ विगतेतरवासनः ॥ ९८ ॥
तादृग्रूपो हि पुरुषो वासनाविवशीकृतः ।
संपश्यति यदैवैतत् सद्वस्त्विति विमुह्यति ॥ ९९ ॥
वासनावेगवैचित्र्यात् स्वरूपं [1]न जहाति तत् ।
भ्रान्तं पश्यति [2]दुर्दृष्टिः सर्वं मदवशादिव ॥ १०० ॥

इत्थंभूतस्वरूपावरणं किं इत्याशङ्क्य वासनासामान्यमित्याह—दृढेति । इदं स्वातिरिक्तमस्तीति **दृढभावनया** सन्त्यक्ततत्पूर्वापरविचारणं स्वातिरिक्त-सामान्यस्य स्वाज्ञानकालमारभ्य स्वज्ञानावधिकत्वात् तत्पूर्वं तदपरं च निष्प्रति-योगिकब्रह्ममात्रमित्यज्ञानपुरस्सरं स्वातिरिक्तपदार्थस्य **यदादानं** तदेव **वासनेति** फण्यते । स्वातिरिक्तगोचरवासनैव स्वमात्रावरणमित्यर्थः । स्वमात्रवत् तदा-वरणमपि सत्यमिति चेन्न; आदिमध्यान्तालब्धात्मकत्वात्, "यन्नादौ यच्च नास्त्यन्ते तन्मध्ये भातमप्यसत्" इति स्मृतेः ॥ ९७ ॥ स्वमात्रावरणस्य स्वाज्ञानविजृम्भितत्वेन स्वज्ञाननाश्यत्वमाह—**भावितमिति** । स्वातिरिक्तापह्नव-

[1] यज्जहा—उ, उ १. [2] तद्दृष्टिः—उ.

सिद्धं ब्रह्म निष्प्रतियोगिकस्वमात्रमिति तीव्रतरसंवेगसहकृतज्ञानेन स्वात्मना यत् भावितं हे कपिश्रेष्ठ विगतेतरवासनोऽयं स विद्वान् तदेव भवति, स्वज्ञानेन स्वावरणे नष्टे स्वयं स्वयमेव भवतीत्यर्थः ॥ ५८ ॥ तादृशोऽपि स्वाज्ञानमहिम्ना तद्वशमेत्य स्वात्मानं विपरीतं पश्यतीत्याह—तादृगिति ॥ ५९ ॥ तत्र स्वाति-रिक्तवासनैव हेतुरित्याह—वासनेति ॥ ६० ॥

शुद्धमलिनवासनयोः मोक्षबन्धहेतुत्वम्

वासना द्विविधा प्रोक्ता शुद्धा च मलिना तथा ।
मलिना जन्महेतुः स्याच्छुद्धा जन्मविनाशिनी ॥ ६१ ॥
अज्ञानसुघनाकारा घनाहंकारशालिनी ।
पुनर्जन्मकरी प्रोक्ता मलिना वासना बुधैः ॥ ६२ ॥
पुनर्जन्माङ्कुरं त्यक्त्वा स्थितिः संभृष्टबीजवत् ।
बहुशास्त्रकथाकन्थारोमन्थेन वृथैव किम् ।
अन्वेष्टव्यं प्रयत्नेन मारुते ज्योतिरान्तरम् ॥ ६३ ॥
दर्शनादर्शने हित्वा स्वयं केवलरूपतः ।
य आस्ते कपिशार्दूल ब्रह्म स ब्रह्मवित् स्वयम् ॥ ६४ ॥
अधीत्य चतुरो वेदान् सर्वशास्त्राण्यनेकशः ।
ब्रह्मतत्त्वं न जानाति दर्वी पाकरसं यथा ॥ ६५ ॥
स्वदेहाशुचिगन्धेन न विरज्येत यः पुमान् ।
विरागकारणं तस्य किमन्यदुपदिश्यते ॥ ६६ ॥
अत्यन्तमलिनो देहो देही चात्यन्तनिर्मलः ।
उभयोरन्तरं ज्ञात्वा कस्य शौचं विधीयते ॥ ६७ ॥

बद्धो हि वासनाबद्धो मोक्षः स्याद्वासनाक्षयः ।
वासनास्त्वं परित्यज्य मोक्षार्थित्वमपि त्यज ॥ ६८ ॥
मानसीर्वासनाः पूर्वं त्यक्त्वा विषयवासनाः ।
मैत्र्यादिवासनानाम्नीर्गृहाणामलवासनाः ॥ ६९ ॥
ता अप्यतः परित्यज्य ताभिर्व्यवहरन्नपि ।
[1]अन्तःशान्तसमस्तेहो भव चिन्मात्रवासनः ॥ ७० ॥
तामप्यथ परित्यज्य मनोबुद्धिसमन्विताम् ।
शेषस्थिरसमाधानो मयि त्वं भव मारुते ॥ ७१ ॥

मलिनशुद्धवासने बन्धमोक्षहेतू स्यातां इत्याह—**वासनेति** ॥ ६१ ॥ तत्र मलिनवासनास्वरूपमाह—**अज्ञानेति** ॥ ६२ ॥ शुद्धवासनासंस्कृतेन विदुषा स्वायुर्ग्रासनानाशास्त्रजालेन सार्कं पुनर्जन्मांकुरमलिनवासनात्यागसिद्धं ब्रह्मैव अन्वेष्टव्यमित्याह—**पुनरिति** ॥ ६३ ॥ किमित्यन्वेष्टव्यमित्यत आह—**दर्शनेति** । कं निर्विशेषब्रह्मसुखं पिबन्ति साक्षादनुभवन्तीति कपयः कवयः ब्रह्मविद्वरीयांसः तेषामपि यतो वरिष्ठोऽसि अतो हे **कपिशार्दूल** ब्रह्मविद्वरिष्ठ स्वातिरिक्ततया स्वाज्ञदृष्टिप्रसक्ताविद्यापदतत्कार्यजातारोपो दर्शनशब्देनोच्यते । अदर्शनशब्देन तत्सर्वापवाद उच्यते । एवं दर्शनं चादर्शनं चेति **दर्शनादर्शने** स्वातिरिक्ताध्यारोपापवादकलने **हित्वा** शशविषाणवत् अपह्नवं कृत्वा अथ **स्वयं केवलरूपतो** निष्प्रतियोगिकब्रह्ममात्रभावरूपतो **य आस्ते** सोऽयं विद्वान् ब्रह्मभूतो मुनिः **न ब्रह्मवित्** भवितुमर्हति, किन्तु यत् स्वातिरिक्तसामान्यापह्नवसिद्धं ब्रह्म निष्प्रतियोगिकस्वमात्रमिति ज्ञातं तत् ब्रह्ममात्रतया अवशिष्यत इत्यत्र—"स यो ह वै तत्परमं ब्रह्म वेद ब्रह्मैव भवति" इति, "य एवं निर्बीजं वेद निर्बीज एव स भवति" इत्यादि निर्विशेषब्रह्ममात्रज्ञानसमकालं तद्भावापत्तिश्रुतेः । विद्वान्

[1] अन्तःशान्तः समस्नेहो—मु.

निर्विशेषब्रह्मज्ञानसमकालं निष्प्रतियोगिकब्रह्ममात्रं अवशिष्यत इति भावः । अत्रैतच्चिन्त्यं—स्वाज्ञानकालमारभ्य स्वज्ञानफलविदेहकैवल्यावधि प्रवृत्तस्वाविद्यापदतत्कार्यविजृम्भितबन्धमोक्षादिव्यवस्थाजातस्य ब्रह्मातिरिक्तत्वेन अपह्नोतव्यत्वे तत्प्रतिपादकश्रुतिस्मृतीनां वैयर्थ्यतः तन्निबन्धनवर्णाश्रमाचारव्यवस्थावैरळ्यात् जगदान्ध्यप्रसङ्गस्स्यादिति चेन्न; ब्रह्मणो निष्प्रतियोगिकाद्वितीयत्वात् । तत्रापि पूर्वोक्तदोषापत्तेः तन्निवृत्तये त्वया स्वातिरिक्तसद्वितीयं ब्रह्म अङ्गीकार्यमिति चेन्न, ब्रह्मणः स्वातिरिक्तापह्नवसिद्धनिष्प्रतियोगिकसन्मात्रप्रकृतिकत्वात् तत् कथं स्वप्रकृतिमुत्सृज्य अन्यथा भवितुमर्हति कदाऽपि स्वातिरिक्तसद्वितीयतया

अजातं जायते यस्मादजातिः प्रकृतिस्ततः ।
प्रकृतेरन्यथाभावो न कथंचित् भविष्यति ॥

इति सर्वज्ञगौडपादाचार्योक्तेः । निष्प्रतियोगिकब्रह्ममात्रावस्थायां स्वातिरिक्तस्याप्रसक्तत्वेन न तयोः ब्रह्मातिरिक्तयोः आधाराधेयता भासकभास्यता वा सेद्धुं पारयति । तथाऽपि जगदान्ध्यनिवृत्तये यत्किञ्चित् स्वातिरिक्तमङ्गीकर्तव्यमिति यदि त्वं स्वातिरिक्तग्रहाविष्टोऽसि तदा स्वाज्ञानतारतम्यप्रभवसोपानायमानासल्लौकिकाद्यष्टदृष्टिषु स्वातिरिक्तस्य पारमार्थिकव्यावहारिकप्रातिभासिकरूपेणैव भासमानत्वात् तावत्ते बन्धमोक्षादिसर्वव्यवस्थाव्यवहारसिद्धिः । यदि ते तद्रोचते तत्रैव व्यवहरन् तिष्ठ । यदि तदपहाय निष्प्रतियोगिकब्रह्मभावापत्तिमीहसे तदा तस्याव्यवहार्यत्वात् कथं निष्प्रतियोगिकतया व्यवहार्यमद्वैतं व्यवहारीकर्तुमिच्छसि । अद्वैतं व्यवहार्यमिति वदन् विरुद्धधर्माभिधायी स्याः । निष्प्रतियोगिकाद्वैतदशायामपि व्यवहारः स्यादिति चेन्न; निर्विशेषब्रह्ममात्रगोचराद्वैतशास्त्रजन्यसमकालमेव स्वाज्ञवृन्दकल्पिताविद्यापदतत्कार्यव्यष्टिसमष्ट्यात्मकजाग्रज्जाग्रदाद्यविकल्पानुज्ञैकरसान्तचतुष्पञ्चदशकलनातत्प्रभवबन्धमोक्षादिकलनातत्प्रमाणश्रुतिस्मृतितज्जवर्णाश्रमाचारव्यवस्थानां प्रळयं गतत्वात् । न हि पुनः स्वातिरिक्तगन्धावकाशोऽस्ति । किं तत्स्वातिरिक्तं पारमार्थिकसत्यं, उत व्यावहारिकं, आहोस्वित् प्रातिभासिकम् । नाद्यः, स्वाज्ञविकल्पितस्वेतरपारमार्थिकसत्यतायाः सुषुप्तिमूर्च्छामरणादौ वेदान्तशास्त्रज्ञानिदृष्ट्या वा प्रळयं गतत्वान्न स्वातिरिक्तस्य

पारमार्थिकसत्यत्वम् । न द्वितीयः, वेदान्तशास्त्रज्ञदृग्विभातव्यावहारिकसत्यताया विज्ञानिदृष्टिपरिसमाप्तत्वात् न हि व्यावहारिकसत्यत्वम् । न तृतीयः, विज्ञानिदृग्विभातप्रातिभासिकसत्यताया अपि सम्यज्ज्ञानसमकालमभातत्वात् न हि प्रातिभासिकसत्यत्वम् । वस्तुतस्तु अज्ञज्ञविज्ञसम्यज्ज्ञदृग्विलसितपारमार्थिकव्यावहारिकप्रातिभासिकसत्त्वाऽसत्त्वविभ्रमाऽसम्भवसिद्धतत्त्वज्ञदृष्ट्या सर्वापह्नवसिद्धं ब्रह्म निष्प्रतियोगिकस्वमात्रमित्यत्र न हि विवादोऽस्तीत्यर्थः । तथा च श्रुतयः स्मृतयश्च—"पश्यतेहापि सन्मात्रमसदन्यत्," "मद्व्यतिरिक्तमणुमात्रं न विद्यते,"

चिन्मात्रमेव चिन्मात्रमखण्डैकरसं रसम् ।
सर्ववर्जितचिन्मात्रं ब्रह्ममात्रमसन्नहि ॥ इति,
सच्चिदानन्दमात्रोऽहमनुत्पन्नमिदं जगत् ॥
सिद्धान्तोऽध्यात्मशास्त्राणां सर्वापह्नव एव हि ॥
नाविद्याऽस्तीह नो माया शान्तं ब्रह्मेदमक्रमम् ॥ इति,
मत्तः परतरं नान्यत् किञ्चिदस्ति धनञ्जय ॥ इत्यादि ॥ ६४ ॥

सर्ववेदशास्त्रसम्पन्नोऽपि एवं स्वातिरिक्तसर्वापह्नवसिद्धं ब्रह्म निष्प्रतियोगिकस्वमात्रमिति न जानाति चेत् तज्जन्म व्यर्थमित्याह—अधीत्येति । स्वातिरिक्तविषयवैराग्याभावादयं **ब्रह्मतत्त्वं न जानातीत्यर्थः** ॥ ६५ ॥ तथाविधस्य वैराग्योपदेशः कर्तव्य इत्यत आह—स्वेति ॥ ६६ ॥ ब्रह्ममात्रपदमारूढेनापि स्वाश्रमोक्तानुष्ठानं कर्तव्यमेवेत्याशङ्क्य—तस्य ब्रह्ममात्रदृष्टित्वात् न तेन किञ्चिदनुष्ठेयमननुष्ठेयं वा विद्यते तस्य स्वातिरिक्तयोः याथात्म्यज्ञत्वात् । यद्ययं लोकवदाचरति तल्लोकोन्मार्गनिवृत्तये भवति । यदि स्वातिरिक्तेयत्ताज्ञानतः तूष्णीमास्ते तदा त्वयेदं कर्तव्यमिति को वा विधातुमर्हति इत्याह—अत्यन्तेति ॥ ६७ ॥ स्वाज्ञलोकोऽयं वासनया बध्यते तत्क्षयतो मुच्यते । यत एवं अतस्त्वं वासनाजालं निःशेषं त्यक्त्वा मद्भावमामुहीत्याह—बद्धो हीति । सर्ववासनाऽसम्भवप्रबोधसिद्धे मयि विश्रान्तभावो भवेत्यर्थः ॥ ६८–७१ ॥

सर्ववासनात्यागपूर्वकं परमात्मभजनम्

अशब्दमस्पर्शमरूपमव्ययं तथाऽरसं नित्यमगन्धवच्च यत् ।
अनामगोत्रं मम रूपमीदृशं भजस्व नित्यं पवनात्मजार्तिहम् ॥
दृशिस्वरूपं गगनोपमं परं सकृद्विभातं त्वजमेकमक्षरम् ।
अलेपकं सर्वगतं यदद्वयं तदेव चाहं सकलं विमुक्तॐ ॥ ७३ ॥
दृशिस्तु शुद्धोऽहमविक्रियात्मको न मेऽस्ति कश्चिद्विषयः
स्वभावतः ।
पुरस्तिरश्चोर्ध्वमधश्च सर्वतः सुपूर्णभूमाऽहमितीह भावय ॥ ७४ ॥
अजोऽमरश्चैव तथाऽजरोऽमृतः स्वयंप्रभः सर्वगतोऽहमव्ययः ।
न कारणं कार्यमतीत्य निर्मलः सदैव तृप्तोऽहमितीह भावय ॥ ७५ ॥
जीवन्मुक्तपदं त्यक्त्वा स्वदेहे कालसात्कृते ।
विशत्यदेहमुक्तत्वं पवनोऽस्पन्दतामिव ॥ ७६ ॥

तदेतदृचाभ्युक्तम्—

तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः । दिवीव चक्षुराततम् ॥ तद्विप्रासो विप[म]न्यवो जागृवांसः समिन्धते । विष्णोर्यत्परमं पदम् ॥ ७७ ॥
ॐसत्यमित्युपनिषत् ॥

"त्वद्रूपं ज्ञातुमिच्छामि तत्त्वतः" इति यत् त्वया प्रार्थितं तदिदानीं भजस्वेत्याह—**अशब्दमिति** । यदाकाशादिभूतभौतिकशब्दाद्यपह्नवसिद्धं तथा व्याविद्धनामरूपकुलगोत्रं मद्भावं भजस्वेत्यर्थः ॥ ७२ ॥ त्वद्रूपं कीदृशं इत्यत आह—**दृशीति** । निर्विशेषं ब्रह्म स्वाज्ञविकल्पितदृश्यग्रामसत्वे **दृशिस्वरूपं,**

गगनोपमं भूमरूपत्वात्, **परं** स्वातिरिक्तात्, **सकृद्विभातं** निरावृततया सदा विभातं, स्वतः परतो वा न जायत इत्यजं, निष्प्रतियोगिकैकं, केनापि न क्षरतीत्यक्षरं, निर्लेपत्वादलेपकं, स्वातिरिक्तसर्वसत्त्वे **सर्वगतं**, यदेवमद्वयतया अवशिष्टं **तदेव चाहम्**। अहं कीदृशः इत्यत्र **सकलं विमुक्तः** स्वातिरिक्तसकलविमुक्तः, अतोऽहं **ओं** ओङ्कारार्थतुर्यतुर्यत्वात् ॥ ७३ ॥ त्वमप्येवं भावयेत्याह—**दृशिस्त्विति**। पूर्वाग्नेयादिदिक्षु विदिक्षु ऊर्ध्वमधश्च सर्वत्र परिपूर्णभूमब्रह्मास्मीति भावय ॥ ७४ ॥ किञ्च—**अज इति**। एवं भावनाविशिष्टो जीवन्मुक्तो भवतीत्यर्थः ॥ ७५ ॥ यः कोऽप्येवं त्वमिव मद्भावारूढश्चेत् सोऽपि जीवन्मुक्तभावं विहाय विदेहमुक्तो भवतीत्याह—**जीवन्मुक्तेति**। **स्वदेहो**पलक्षितस्वातिरिक्तप्रपञ्चे ब्रह्ममात्रबोधेन **कालसात्कृते** अपह्नवभावं गते सति अथ यथा **पवनो**स्पन्दतो गगनस्वरूपं विशति तथा स्वदेहाद्यभिमत्या साकं जीवन्मुक्तामपि हित्वा विकलेबरकैवल्यं विशति, विदेहमुक्तो भवतीत्यर्थः ॥ ७६ ॥ उक्तार्थानुवादको मन्त्रो भवतीत्याह—**तदिति**। यत् निष्प्रतियोगिकनिर्विशेषतया अवशिष्यते **तत्** तादृशं ब्रह्म स्वाज्ञद्यद्विविकल्पितस्वाविद्यापदतत्कार्यसम्प्रसक्तौ तदारोपापवादाधारतया भातस्य **विष्णोः** व्यापकस्य स्वाधिष्ठेयसापेक्षाधिष्ठानताऽसम्भवप्रबोधसिद्धत्वेन निरधिष्ठानतया सर्वोत्तमत्वात् **परमं** सूरिभिः स्वमात्रतया पद्यत इति **पदं**, तत् विष्णोः परमं पदं "राहोः शिरः" इतिवत् विष्णुस्वरूपं **सूरयो** ब्रह्मविद्वरीयांसः स्वावशेषधिया **पश्यन्ति**। पश्यन्तीति व्यपदेशतो विष्णुपदस्य दृश्यत्वेन परिच्छिन्नता स्यादित्यत आह—**दिवीति**। **दिवि** द्योतनात्मके ब्रह्मणीव चक्षुर्दर्शनं तद्गोचरज्ञानमाततमपरिच्छिन्नम्। सूरयो विष्णुपदं स्वभेदेन पश्यन्ति चेत् तत्परिच्छेदतामर्हति। नहि तथा ते पश्यन्ति। किं तु स्वमात्रमिति पश्यन्ति। सूरयः किंविशेषणविशिष्टा इत्यत्र **तद्विप्रासः** विप्राः ब्रह्मविद्वरिष्ठाः **विमन्यवो** विगतस्वकामापूरणसञ्जातमन्यवः स्वातिरिक्तकामानां स्वमात्रतया लब्धत्वात्, अत एव ते **जागृवांसः** स्वाज्ञाननिद्रावैरळ्यात् नित्यं जागरूकाः। विष्णोः यत् परमं पदं स्वमात्रतया पश्यन्ति तद्दर्शनसमकालमेव ते तन्मात्रावशेषतया तद्विष्णुपदं **समिन्धते** तन्मात्रमवशिष्यते इत्यर्थः ॥७७॥

यद्विष्णुपदमिति ख्यातं तदेव ओमित्योङ्कारार्थतुरीयतुरीयम्। तदतिरिक्तजाग्रज्जाग्रदादिचतुष्पञ्चदशभेदजातमनित्यं, यदपह्नवसिद्धं यत् तुर्यतुरीयं तदेव **सत्यं** निष्प्रतियोगिकसन्मात्रत्वात्, "पश्यतेहापि सन्मात्रमसदन्यत्" इति श्रुतेः। **इति**-शब्दो द्वितीयाध्यायपरिसमाप्त्यर्थः। **उपनिषच्छब्दस्तु** मुक्तिकोपनिषत्समाप्त्यर्थः॥

इति द्वितीयोऽध्यायः

श्रीवासुदेवेन्द्रशिष्योपनिषद्ब्रह्मयोगिना।
मुक्तिकोपनिषद्व्याख्या लिखिता ब्रह्ममात्रगा॥
ईशाद्यष्टोत्तरशतवेदान्तविवृतेरिह।
वक्ता निरावृतज्ञानरामचन्द्रोऽखिलेश्वरः॥
पित्रा मे शिवकामीशेनेशाद्यष्टोत्तरं शतम्।
व्याकुर्व इति यत् पूर्वं प्रतिज्ञातं तथा कृतम्॥
लेखिनीदण्डरूपोऽहं लेखकोऽपि स एव हि।
कृष्णसूरिरुपद्रष्टा स्वांशजोऽस्य प्रवर्तकः॥
रामानन्देश्वरहरिकृष्णदासा हि चोदकाः।
भक्तेषु तेषु कृपया श्रीरामेणाखिलं कृतम्॥
येषु श्रीरामचन्द्रीयकटाक्षः प्रसरेदिह।
श्रीरामफणितेऽध्यात्मशास्त्रे तेषां मतिर्भवेत्॥
ये देशिकमुखात् कृत्स्नं कुर्वन्ति श्रवणं बुधाः।
तेषां करस्थं कैवल्यं रामचन्द्रानुशासनात्॥
मुक्तिकोपनिषद्व्याख्याग्रन्थजातं शतत्रयम्।
प्रजोत्पत्त्यब्दचापैकादशवत्से शुभे दिने॥
भौमाश्विन्यामिदं शास्त्रं सम्पूर्णपदवीं गतम्।
य एतच्छास्त्रमखिलं शृण्वन्ति गुरुवक्त्रतः॥
तानैहिकामुष्मिकश्रीः न विमुञ्चति विष्णुना।
ईशाद्यष्टोत्तरशतवेदान्तविवृतेस्ततिः॥
स्वात्मारामप्रणीतेन मयेयं लिखिता स्फुटम्॥

इति श्रीमदीशाद्यष्टोत्तरशतोपनिषच्छास्त्रविवरणे अष्टोत्तरशतसङ्ख्यापूरकं मुक्तिकोपनिषद्विवरणं सम्पूर्णम्

मुद्गलोपनिषत्

वाङ्मे मनसि—इति शान्तिः

प्रथमः खण्डः

पुरुषसूक्तार्थसंग्रहः

पुरुषसूक्तार्थनिर्णयं व्याख्यास्यामः । पुरुषसंहितायां पुरुषसूक्तार्थः संग्रहेण प्रोच्यते ।

सहस्रशीर्षा इत्यत्र सशब्दो[ह्स्रो]ऽनन्तवाचकः ।
अनन्तयोजनं प्राह दशाङ्गुलवचस्तथा ॥ १ ॥
तस्य प्रथमया विष्णोर्देशतो व्याप्तिरीरिता ।
द्वितीयया चास्य विष्णोः कालतो व्याप्तिरुच्यते ॥ २ ॥
विष्णोर्मोक्षप्रदत्वं च कथितं तु तृतीयया ।
एतावानिति मन्त्रेण वैभवं कथितं हरेः ॥ ३ ॥
एतेनैव च मन्त्रेण चतुर्व्यूहो विभाषितः ।
त्रिपादित्यनया प्रोक्तमनिरुद्धस्य वैभवम् ॥ ४ ॥

तस्माद्विराडित्यनया पादनारायणाद्धरेः ।
प्रकृतेः पुरुषस्यापि समुत्पत्तिः प्रदर्शिता ॥ ५ ॥
यत्पुरुषेणेत्यनया सृष्टियज्ञः समीरितः ।
सप्तास्यासन्परिधयः समिधश्च समीरिताः ॥ ६ ॥
तं यज्ञमिति मन्त्रेण सृष्टियज्ञः समीरितः ।
अनेनैव च मन्त्रेण मोक्षश्च समुदीरितः ॥ ७ ॥
तस्मादिति च मन्त्रेण जगत्सृष्टिः समीरिता ।
वेदाहमिति मन्त्राभ्यां वैभवं कथितं हरेः ॥ ८ ॥
यज्ञेनेत्युपसंहारः सृष्टेर्मोक्षस्य चेरितः ।
य एवमेतज्जानाति स हि मुक्तो भवेदिति ॥ ९ ॥

श्रीमत्पुरुषसूक्तार्थं पूर्णानन्दकळेबरम् ।
पुरुषोत्तमविख्यातं पूर्णं ब्रह्म भवाम्यहम् ॥

इह खलु ऋग्वेदप्रविभक्तेयं मुद्गलोपनिषत् पुरुषसूक्तार्थप्रकटनपूर्वकं तदर्थ-महापुरुषपर्यवसन्ना विजयते । अस्याः सङ्क्षेपतो विवरणमारभ्यते । परमपुरुषार्थदृष्टीनधिकारिण उपलभ्य श्रुतयः पुरुषसूक्तार्थं प्रकाशयन्तीत्याह—**पुरुषेति** । आदौ प्रथमखण्डेन पुरुषसूक्तगतमन्त्राणां विनियोग उच्यते—**पुरुषसूक्तेति** । कुत्रैष प्रतिपादित इत्यत आह—**पुरुषसंहितायामिति** । " सहस्रशीर्षा पुरुषः । सहस्राक्षः सहस्रपात् । स भूमिं विश्वतो वृत्त्वा । अत्यतिष्ठद्दशाङ्गुलम् । " इत्याद्यऋचा विष्णोरनन्तत्वं अभिधीयते । यस्यान्तः परिच्छेदो न विद्यते **सोऽनन्त** इत्यर्थः ॥ १ ॥ प्रथमया कस्मादस्यानन्त्यमित्यत आह—**तस्येति** । " पुरुष एवेदꣳ सर्वम् । यद्भूतं यच्च भव्यम् । उतामृतत्वस्येशानः । यदन्नेनातिरोहति । " इति **द्वितीयया** ॥ २ ॥ " एतावानस्य महिमा । अतो ज्यायाꣳश्च

पूरुषः । पादोऽस्य विश्वा भूतानि । त्रिपादस्यामृतं दिवि ।" इति **विष्णोर्मोक्ष-प्रदत्वं च कथितम्** ॥ ३ ॥ "त्रिपादूर्ध्व उदैत्पुरुषः । पादोऽस्येहाभवात् पुनः । ततो विष्वङ् व्यक्रामत् । साशनानशने अभि ।" इति **त्रिपादित्यनया प्रोक्तम्** ॥ ४ ॥ "तस्माद्विराडजायत । विराजो अधि पूरुषः । स जातो अत्यरिच्यत । पश्चाद्भूमिमथो पुरः ।" इति **तस्माद्विराडित्यनया** ॥ ५ ॥ "यत्पुरुषेण हविषा । देवा यज्ञमतन्वत । वसन्तो अस्यासीदाज्यम् । ग्रीष्म इध्मः शरद्धविः ।" इति **यत्पुरुषेणेत्यनया** । "सप्तास्यासन् परिधयः । त्रिः सप्त समिधः कृताः । देवा यद्यज्ञं तन्वानाः । अबध्नन् पुरुषं पशुम् ।" इति **सप्तास्यासन् परिधयः** ॥ ६ ॥ यज्ञद्रव्यसृष्टिः—"तं यज्ञं बर्हिषि प्रौक्षन् । पुरुषं जातमग्रतः । तेन देवा अयजन्त । साध्या ऋषयश्च ये ।" इति **तं यज्ञमिति मन्त्रेण** ॥ ७ ॥ "तस्माद्यज्ञात् सर्वहुतः" इत्यादिमन्त्रषट्केन **तस्मादिति च मन्त्रेण** ॥ ८ ॥ **यज्ञेनेति** मन्त्रेण स्वातिरिक्तसृष्ट्यादिसर्वप्रपञ्चोपसंहारः अपवादः तदपवादाधारस्य **मोक्षस्य** आधेयनिरूपिताधारताऽपाये मोक्षरूपेण परमात्मा अवशिष्यत **इतीरितः** । **च**शब्दो निष्प्रतियोगिकप्रदर्शनार्थः । एवं जानतः फलमाह—**य एवमिति** । निर्विशेषज्ञानतो निर्विशेषं ब्रह्मैव भवतीत्यर्थः, ब्रह्म वेद ब्रह्मैव भवति" इति श्रुतेः ॥ ९ ॥

इति प्रथमः खण्डः

द्वितीयः खण्डः

परमरहस्योपदेशः

अथ तथा मुद्गलोपनिषदि पुरुषसूक्तस्य वैभवं विस्तरेण प्रतिपादितं वासुदेव इन्द्राय भगवज्ज्ञानमुपदिश्य पुनरपि सूक्ष्मश्रवणाय

प्रणतायेन्द्राय परमरहस्यभूतं पुरुषसूक्ताभ्यां खण्डद्वयाभ्यामुपादिशत् ॥ १ ॥

पूर्वखण्डोक्तार्थमेव विस्तरेण प्रतिपादयितुं उत्तरखण्ड आरभ्यते—अथेति। **प्रतिपादितं** यत् तदेवार्थं परमात्मा **वासुदेव इन्द्राय भगवद्याथात्म्यज्ञानमुपदिश्य** ॥ १ ॥

महापुरुषस्य रूपस्वीकरणम्

द्वौ खण्डा[1]वुच्येते। योऽयमुक्तः स पुरुषो नामरूपज्ञानागोचरं संसारिणामतिदुर्ज्ञेयं विषयं विहाय क्लेशादिभिः संक्लिष्टदेवादिसंजिहीर्षया सहस्रकलावयवकल्पाणं दृष्टमात्रेण मोक्षदं वेषमाददे। तेन वेषेण भूम्यादिलोकं व्याप्यानन्तयोजनमत्यतिष्ठत् ॥ २ ॥ पुरुषो नारायणो भूतं भव्यं भविष्यच्चासीत्। स एष सर्वेषां मोक्षदश्चासीत्। स च सर्वस्मान्महिम्नो ज्यायान्। तस्मान्न कोऽपि ज्यायान् ॥ ३ ॥

पूर्वोत्तरभेदेन **द्वौ खण्डावुच्येते**। तत्प्रतिपाद्यतया **योऽयमुक्तः स पुरुषः नामरूपज्ञानागोचरं** निर्विशेषब्रह्ममात्रभावं **संसारिणां अतिदुर्ज्ञेयं विषयं विहाय** तद्दृष्ट्यावरणं कृत्वा "क्लेशोऽधिकतरस्तेषामव्यक्तासक्तचेतसाम्" इति स्मृत्यनुरोधेन निर्विशेषब्रह्मावगमक्लेशादिभिः **सङ्क्लिष्टदेवादिसञ्जिहीर्षया** देवादयो मयोद्धर्तव्या इति मनीषया। **मोक्षदं** ऐश्वरं **वेषमाददे**। **अत्यतिष्ठत्** अन्तर्याम्यात्मना अनन्तकोटिब्रह्माण्डगर्भितस्वाविद्यापदं व्याप्तवानित्यर्थः ॥ २ ॥ कालत्रयात्मना स्वयमेव स्थितवानित्याह—**पुरुष इति**। देशिकरूपेण **स एष सर्वेषां मोक्षदश्चासीत्**। स एव ज्यायसो विराडादेरपि ज्यायानित्याह—**स च सर्वस्मादिति** ॥ ३ ॥

[1] वद्योत्त्ये—अ.

महापुरुषस्य चतुर्धा भवनम्

महापुरुष आत्मानं चतुर्धा कृत्वा त्रिपादेन परमे व्योम्नि [1]हासीते । इतरेण चतुर्थेनानिरुद्धनारायणेन विश्वान्यासन् ॥ ४ ॥

सोऽयं विराडादिभेदेन आत्मानं चतुर्धा कृत्वा त्रिपादरूपेण स्वभावे वर्तत इत्याह—**महापुरुष इति** । प्रपञ्चकलनाऽऽरोपापवादाधिकरणरूपं विश्वविराडोत्रादिभेदेन त्रिचतुर्धा विधाय इत्थंभूतकलनाऽसम्भवप्रबोधसिद्धनिर्विभागत्रिपादेन महापुरुषः परमात्मा स्वाज्ञादिदृष्टिमोहे सत्यसति परमे व्योम्नि स्वे महिम्नि हासीते आस्ते इत्यर्थः । अयं प्रपञ्चः केनोत्पन्न इत्यत आह—**इतरेणेति** । स्वाज्ञदृष्टयेतरेण **चतुर्थेन** विश्वविराडोत्रादिभेदेन त्रिचतुर्धा भिन्नेन वस्तुतस्तत्र **अनिरुद्धनारायणेन** निरावृताजडक्रियाज्ञानेच्छाशक्तिमता स्वातिरेकेण नास्तीति विश्वसनीय**विश्वान्यासन्** बभूवुरित्यर्थः ॥ ४ ॥

चतुर्मुखब्रह्मणे सृष्टियज्ञोपदेशः

स च पादनारायणो जगत्स्रष्टुं प्रकृतिमजनयत् । स समृद्धकायः सन् सृष्टिकर्म न जज्ञिवान् । सोऽनिरुद्धनारायणस्तस्मै सृष्टिमुपादिशत् । ब्रह्मंस्त्वेन्द्रियाणि याजकानि ध्यात्वा कोशभूतं दृढग्रन्थि कलेवरं हविर्ध्यात्वा मां हविर्भुजं ध्यात्वा वसन्तकालमाज्यं ध्यात्वा ग्रीष्ममिध्मं ध्यात्वा शरद्धतुं रसं ध्यात्वैवमग्नौ हुत्वाऽङ्गस्पर्शात् कलेवरो वज्रं हीष्यते । ततः स्वकार्यान् सर्वप्राणिजीवान् पश्वाद्याः प्रादुर्भविष्यन्ति । ततः स्थावरजङ्गमात्मकं जगद्भविष्यति ॥ ५ ॥ एतेन जीवात्मनोर्योगेन मोक्षप्रकारश्च कथित इत्यनु-

[1] भासते—अ.

संधेयम् ॥ ६ ॥ य इमं सृष्टियज्ञं जानाति मोक्षप्रकारं च सर्वमायुरेति ॥ ७ ॥

जगत्सृष्टिनिर्वाहकतया किमादौ सृष्टवानित्यत आह—**स चेति**। **प्रकृति**-शब्देन चतुर्मुखब्रह्मोच्यते, उत्तरत्र चतुर्मुखविशेषणसत्त्वात्। एवं पादनारायणसृष्ट-श्चतुर्मुखः स्वावृत्यावृतः सन् प्रकृतिसृष्टिकर्म न ज्ञातवानित्याह—**स्वावृत्या स समृद्धकायः सन् सृष्टिकर्म न जज्ञिवान्**। स्वहेतुः भगवान् सृष्ट्यावरणभे-दिनीं विद्यामुपादिशदित्याह—**स इति**। केयं सृष्टिविद्येत्यत्र तत्प्रकारमाह—**ब्रह्मन्निति**। **ब्रह्मन् तवेन्द्रियाणि याजकानि** ऋत्विग्रूपाणि **ध्यात्वा पद्मकोश भूतम्**। **मां** अनिरुद्धनारायणम्। **श्रीष्मं इध्मं** अग्न्याश्रयं समिद्धारं **ध्यात्वा, शरद्दतुं रसं** षड्रसं **ध्यात्वा**, "षड्रसैः हुत्वा परमानन्दरसनिर्भरो भवति" इति श्रुतेः। **एवमग्नौ हुत्वा** तत्सम्पातेन **अङ्गस्पर्शात् कळेबरो वज्रं हीष्यते**—कळेबरं वज्रवत् दृढत्वं सृष्टिकर्मकरणपटुत्वं **इष्यते**। **हि**शब्दो निःसंशयार्थः। ततः किमित्यत आह—**तत इति**। **ततः स्वकार्यान्** कार्यभूतान् **सर्वप्राणिनो जीवान्** जीवाः **पश्वाद्याः प्रादुर्भविष्यन्ति**। ततः किमित्यत्र— **तत इति**। "तत् सृष्ट्वा। तदेवानुप्राविशत्।" इति, "स्वयमेव जगद्भूत्वा प्राविशत् जीवरूपतः" इति, सृष्टिप्रतिपादकश्रुतिस्मृतिप्रमाणतो जीवात्मपरमात्मनोरे-कत्वमवगम्यते सृष्टिप्रवेशकर्त्रोरेकत्वात्, "सदेव सोम्येदमग्र आसीत्," "अनेन जीवेनात्मना अनुप्रविश्य," "तत् सत्यं स आत्मा तत् त्वमसि" इत्युपसंहाराच्च ॥ ५ ॥ **अनुसन्धेयं, मुमुक्षुभिः** इत्यर्थः ॥ ६ ॥ सृष्टिविद्यातत्पर्य-वसानज्ञानफलमाह— **य इति** ॥ ७ ॥

इति द्वितीयः खण्डः

तृतीयः खण्डः

उपासकैरनेकधा दृष्टस्य महापुरुषस्य वस्तुत एकत्वम्

एको देवो बहुधा निविष्ट अजायमानो बहुधा विजायते ॥ १ ॥ तमेतमग्निरित्यध्वर्यव उपासते। यजुरित्येष हीदं सर्वं युनक्ति। सामेति छन्दोगाः। एतस्मिन्हीदं सर्वं प्रतिष्ठितम्। विषमिति सर्पाः। सर्प इति सर्पविदः। ऊर्गिति देवाः। रयिरिति मनुष्याः। मायेत्यसुराः। स्वधेति पितरः। देवजन इति देवजनविदः। रूप इति गन्धर्वाः। गन्ध इत्यप्सरसः ॥ २ ॥ तं यथायथोपासते तथैव भवति। तस्माद्ब्राह्मणः पुरुषरूपं परंब्रह्मैवाहमिति भावयेत्। तद्रूपो भवति। य एवं वेद ॥ ३ ॥

वस्तुतः परमपुरुष एकानेककलनाविरळनिष्प्रतियोगिकाजोऽपि स्वज्ञादिदृष्टया **एको देवो बहुधा निविष्टः** ॥ १ ॥ एकस्य बहुधा निविष्टत्वं तत्तद्दृष्टिसापेक्षं, वस्तुतोऽयं महापुरुषो निष्प्रतियोगिकैक इति ज्ञानफलं तद्भावापत्तिरित्याह—**तमिति**। तं महापुरुषं अध्वर्यवो याजका एतमनिरुद्धनारायणभावमापन्नं **त्रेताग्निरित्युपासते**। तथा याजुषा **यजुरित्येष हीदं सर्वं युनक्ति** योजयन्ति। **सामेति छन्दोगाः**। किमिति? **एतस्मिन् हीदं सर्वं प्रतिष्ठितम्**। **ऊर्गिति देवाः**, "ऊर्ग् देवान्नममृतम्", "ऊर्वा अन्नम्", इति श्रुतेः। मानुषान्नं **रयिरिति मनुष्याः**। **देवजनो** देवतासमूहः ॥ २ ॥ स्वस्वदृष्ट्यनुरोधेन अध्वर्य्वादयः **तं यथायथोपासते तथैव भवति**। यस्मादेवं **तस्मात् ब्राह्मणो** ब्रह्मविद्वरीयान् ॥ ३ ॥

इति तृतीयः खण्डः

चतुर्थः खण्डः

ब्रह्मण एव तापत्रयादियोगेन जीवत्वम्

तद्ब्रह्म तापत्रयातीतं षट्कोशविनिर्मुक्तं षड्ऊर्मिवर्जितं पञ्चकोशातीतं षड्भावविकारशून्यमेवमादिसर्वविलक्षणं भवति ॥ १ ॥ तापत्रयं त्वाध्यात्मिकाधिभौतिकाधिदैविकं कर्तृकर्मकार्यज्ञातृज्ञानज्ञेयभोक्तृभोगभोग्यमिति त्रिविधम् ॥ २ ॥ त्वङ्मांसशोणितास्थिस्नायुमज्जाः षट्कोशाः ॥ ३ ॥ कामक्रोधलोभमोहमदमात्सर्यमित्यरिषड्वर्गः ॥ ४ ॥ अन्नमयप्राणमयमनोमयविज्ञानमयानन्दमया इति पञ्चकोशाः ॥ ५ ॥ [1]प्रियत्वजननवर्धनपरिणामक्षयनाशाः षड्भावाः ॥ ६ ॥ अशनायापिपासाशोकमोहजरामरणानीति षड्ऊर्मयः ॥ ७ ॥ कुलगोत्रजातिवर्णाश्रमरूपाणि षड्भ्रमाः ॥ ८ ॥ एतद्योगेन परमपुरुषो जीवो भवति नान्यः ॥ ९ ॥

यद्ब्रह्मज्ञानात् ब्रह्मैव भवति तद्ब्रह्म कीदृशमित्याशङ्क्य यद्यद्वेद्यतया प्रतीयते तत्सर्वातीतमित्याह—तदिति ॥ १ ॥ स्वापनोद्यतापत्रयादिकं श्रुतिः स्वयमेव व्याकरोति—तापत्रयं त्विति । आत्मानं देहमधिकृत्य भवतीत्यध्यात्मं शिरोरोगादिः । भूतमधिकृत्य भवतीत्याधिभौतिकं चोरव्याघ्रादिबाधा । अक्षाधिदैवमधिकृत्य भवतीत्याधिदैविकं वर्षवातादिप्रभवपीडा । त्रिपुटीविकारोऽपि तदन्तर्गत एवेत्याह—कर्तेति । सर्वत्रैवं त्रिविधम् ॥ २ ॥ षट्कोशास्तु त्वगिति ॥ ३ ॥ षड्वर्गस्तु कामेति । प्राण्यङ्गत्वादेकवद्भावः ॥ ४ ॥ पञ्चकोशास्तु अन्नेति ॥ ५ ॥ भावविकारास्तु प्रियत्वेति ॥ ६ ॥ प्रीतेरस्तिवस्तुनिष्ठत्वात् प्रियत्वमस्तिवस्तुवाचकम् । षड्ऊर्मयस्तु अशनेति ॥ ७ ॥ एवमादीत्यादिशब्दतः

[1] अस्तित्व—अ.

कुलेति ॥ ८ ॥ परमपुरुषात् जीवो भिद्यत इत्यत आह—एतदिति । तापत्रयादिषड्भ्रमान्तकलनावैरळ्यात् जीव एव परमपुरुषो भवतीत्यर्थः ॥ ९ ॥

एतदुपनिषदध्ययनफलम्

य [1]एतदुपनिषदं नित्यमधीते सोऽग्निपूतो भवति । स वायुपूतो भवति । स आदित्यपूतो भवति । अरोगी भवति । श्रीमांश्च भवति । पुत्रपौत्रादिभिः समृद्धो भवति । विद्वांश्च भवति । महापातकात् पूतो भवति । सुरापानात् पूतो भवति । अगम्यागमनात् पूतो भवति । मातृगमनात् पूतो भवति । दुहितृस्नुषागमनात् पूतो भवति । स्वर्णस्तेयात् पूतो भवति । वेदोजन्महानात् पूतो भवति । गुरोरशुश्रूषणात् पूतो भवति । अयाज्ययाजनात् पूतो भवति । अभक्ष्यभक्षणात् पूतो भवति । उग्रप्रतिग्रहात् पूतो भवति । परदारगमनात् पूतो भवति । कामक्रोधलोभमोहेर्ष्यादिभिरबाधितो भवति । सर्वेभ्यः पापेभ्यो मुक्तो भवति । इहजन्मनि [2]पुरुषो भवति ॥१०॥

ग्रन्थतोऽर्थतः पारायणानुसन्धानफलं प्रकाशयन् विद्यामुपसंहरति—**य इति** । एतदुपनिषदं एतामुपनिषदम् । वेदोजन्महानात् वेदमधीत्य विस्मरणपातकात् । तुलापुरुषकालमृत्युमहिषादि-उग्रप्रतिग्रहात् । निर्विशेषब्रह्मज्ञानतः **इह जन्मनि पुरुषो भवति** ॥ १० ॥

पुरुषसूक्तार्थोपदेशविधानम्

तस्मादेतत्पुरुषसूक्तार्थमतिरहस्यं राजगुह्यं देवगुह्यं गुह्यादपि गुह्यतरं नादीक्षितायोपदिशेत् । नानूचानाय । नायज्ञशीलाय ।

[1] एतामुप—अ. [2] पूतो भ—अ १.

नावैष्णवाय । नायोगिने । न बहुभाषिणे । नाप्रियवादिने । नासंवत्सरवेदिने । नातुष्टाय । नानधीतवेदायोपदिशेत् । गुरुरप्येवं-विच्छुचौ देशे पुण्यनक्षत्रे प्राणानायम्य पुरुषं ध्यायन्नुपसन्नाय शिष्याय दक्षिणकर्णे पुरुषसूक्तार्थमुपदिशेद्विद्वान् । न बहुशो वदेत् । यातयामो भवति । असकृत्कर्णमुपदिशेत् । एतत्कुर्वाणोऽध्येता-ऽध्यापकश्च इह जन्मनि पुरुषो भवतीत्युपनिषत् ॥ ११ ॥

यस्मादेवं **तस्मात्** । पुरुषसूक्तकल्परीत्या **नादीक्षितायोपदिशेत्** । **नावैष्णवाय** विष्णवनन्यभक्ताय । पुरुषसूक्तार्थोपदेशक्रममाह—**गुरुरिति** । विधि-वत् **उपसन्नाय शिष्याय** तन्मस्तकहस्तसमर्पणपूर्वकं **दक्षिणकर्णे पुरुषसूक्तार्थ-मुपदिशेत्** । मुहुर्मुहुः एवमुपदेशः कार्यः इत्यत आह—**विद्वानिति** । तदर्थरहस्य-ज्ञानं यथा यथा हृदयारूढं भवेत् तथा तथा **असकृत् कर्णमुपदिशेत्** अहं ब्रह्मेति वाक्यार्थबोधो यावत् दृढीभवेत्, "शमादिसहितस्तावदभ्यसेत् श्रव-णादिकम्" इति भगवत्पादोक्तेः । एवंविधशिष्याचार्ययोः परमपुरुषार्थि वदन्नुपसंहरति—**एतदिति** । स्वातिरिक्तस्त्रीपुंभावापह्नवसिद्धपरमपुरुषः स्वमात्र-मिति प्रबोधसमकालं विद्वान् तन्मात्रमवशिष्यते इत्यर्थः । इत्युपनिषच्छब्दो मुद्गलोपनिषत्परिसमाप्त्यर्थः ॥ ११ ॥

इति चतुर्थः खण्डः

श्रीवासुदेवेन्द्रशिष्योपनिषद्ब्रह्मयोगिना ।
मुद्गलोपनिषद्व्याख्या लिखिता पुरुषार्थदा ॥
मुद्गलोपनिषद्व्याख्याग्रन्थजातं शतं भवेत् ॥

इति श्रीमदीशाद्यष्टोत्तरशतोपनिषच्छास्त्रविवरणे सप्तपञ्चाशत्सङ्ख्यापूरकं मुद्गलोपनिषद्विवरणं सम्पूर्णम्

मैत्रायण्युपनिषत्

आप्यायन्तु—इति शान्तिः

प्रथमः प्रपाठकः

संसारविरक्तस्य आत्मजिज्ञासा

बृहद्रथो वै नाम राजा राज्ये ज्येष्ठं पुत्रं निधापयित्वेदमशाश्वतं मन्यमानः शरीरं वैराग्यमुपेतोऽरण्यं निर्जगाम। स तत्र परमं तप आस्थायादित्यमीक्षमाण ऊर्ध्ववाहुस्तिष्ठति। अन्ते सहस्रस्य [1]मुनिरन्तिकमाजगामाग्निरिवाधूमकस्तेजसा निर्दहन्निवात्मविद्भगवान् शाकायन्यः। उत्तिष्ठोत्तिष्ठ वरं वृणीष्वेति राजानमब्रवीत्। स तस्मै नमस्कृत्योवाच भगवन् नाहमात्मवित् त्वं तत्त्वविच्छृणुमो वयं स त्वं नो ब्रूहीति। एतद्वृत्तं पुरस्तादशक्यं मा पृच्छ प्रश्नमैक्ष्वाकान्यान् कामान् वृणीष्वेति। शाकायन्यस्य चरणावभिमृशमानो राजेमां गाथां जगाद ॥ १ ॥

[1] मुने—अ, अ १.

वैराग्येद्धभक्तियुक्तब्रह्ममात्रप्रबोधतः ।
यत्पदं मुनयो यान्ति तत्त्रैपदमहं महः ॥

इह खलु मैत्रायण्युपनिषदः सामवेदप्रविभक्तत्वेन केन-छान्दोग्य-विवरण-विभातोपोद्घातादिकं अत्रापि समानम् । बृहद्रथशाकायन्यप्रश्नप्रतिवचनरूपाख्यायिका तपोवैराग्यभक्त्यादिसाधननिष्पन्नेयमुपनिषदिति विद्यास्तुत्यर्था । एवंविधमैत्रायण्युपनिषदोऽल्पग्रन्थतो विवरणमारभ्यते—**बृहद्रथ इति** । कस्य चिद्राज्ञो **बृहद्रथ** इति **नाम** । वा इत्यैतिह्ये । स हि **राजा राज्ये ज्येष्ठं पुत्रं निधापयित्वा इदं शरीरं अशाश्वतं नश्वरं मन्यमानः** तीव्रतरवैराग्ययुतः सन् **अरण्यं** प्रति **निर्जगाम** । **स** गत्वा **तत्रारण्ये परममुत्कृष्टं तप आस्थाय आदित्यं उदीक्षमाणः ऊर्ध्वबाहुः** पदैकेन भुवमवष्टभ्य **सहस्रं समाः तिष्ठति स्म** । अथ **सहस्रसंवत्सरान्ते मुनिः** वालखिल्यः कश्चित् **अधूमकोऽग्निरिव स्वतेजसाऽस्य स्वाज्ञानं निर्दहन्निव** अनात्मापह्नवसिद्धात्ममात्रवित् **भगवान् अस्यान्तिकमाजगाम** । तन्निकटं गत्वाऽथ भगवान् मुनिः शकायनस्यापत्यं, गर्गादि यञ्, **शाकायन्यः** हे राजन् **उत्तिष्ठोत्तिष्ठ वरं वृणीष्व इति राजानमब्रवीत्** । **स** राजा **तस्मै नमस्कृत्योवाच** । किमिति ? हे **भगवन् नाहमात्मवित्, त्वं** तु **ब्रह्मतत्त्ववित्** । अतो **वयं** त्वत्तः **ब्रह्मयाथात्म्यं शृणुमः** शुश्रुमः । " छन्दसि लुङ्लङ्लिटः " इति वर्तमानार्थे लिट् (?) । स्वकुलापेक्षया वयमिति बहुवचनम् । यतः सर्वज्ञोऽसि अतो **नो** अस्मभ्यं **स्वात्मतत्त्वं ब्रूहीत्यर्थः** । राज्ञा एवं पृष्टो मुनिराह—एतदिति । हे **ऐक्ष्वाक एतदात्मवृत्तं पुरस्तात्** प्रथमं **मा पृच्छ,** एतस्य प्रश्नानर्हत्वात् भवद्दुर्लभानपि **अन्यानेव कामान् वृणीष्वेति** मुनिनोक्तो राजा **शाकायन्यस्य चरणावभिमृशमानः**—इत्यात्मनेपदं छान्दसम्—तत्पादयोः प्रणिपत्य **राजा इमां** वक्ष्यमाणां **गाथां जगाद** ॥ १ ॥

संसारनिर्वेदगाथा

भगवन्नस्थिचर्मस्नायुमज्जामांसशुक्रशोणितश्लेष्माश्रुदूषिकाविण्मूत्रवातपित्तकफसंघाते दुर्गन्धे निःसारेऽस्मिन् शरीरे किं कामोपभोगैः ॥ २ ॥

कामक्रोधलोभमोहभयविषादेर्ष्येष्टवियोगानिष्टसंप्रयोगक्षुत्पि -
पासाजरामृत्युरोगशोकाद्यैरभिहतेऽस्मिन् शरीरे किं कामोपभोगैः ॥ ३ ॥

सर्वं चेदं क्षयिष्णु पश्यामो यथेमे दंशमशकादयस्तृणव-
न्नश्यतयोद्भूतप्रध्वंसिनः ॥ ४ ॥

अथ किमेतैर्वा परेऽन्ये महाधनुर्धराश्चक्रवर्तिनः केचित् सुद्यु-
म्नभूरिद्युम्नेन्द्रद्युम्नकुवलयाश्वयौवनाश्वबध्रियाश्वाश्वपतिः शशबिन्दुर्हरि-
श्चन्द्रोऽम्बरीषोऽननूक्तः ख्यातिर्ययातिरनरण्योक्ष[1]सेनोत्थमरुत्तभरत-
प्रभृतयो राजानो मिषतो बन्धुवर्गस्य महतीं श्रियं त्यक्त्वाऽस्माल्लो-
कादमुं लोकं प्रयान्ति ॥ ५ ॥

अथ किमेतैर्वा परेऽन्ये गन्धर्वासुरयक्षराक्षसभूतगणपिशाचोर-
गग्रहादीनां निरोधनं पश्यामः ॥ ६ ॥

अथ किमेतैर्वाऽन्यानां शोषणं महार्णवानां शिखरिणां प्रपतनं
ध्रुवस्य प्रचल[2]नमस्थानं वा तरूणां निमज्जनं पृथिव्याः [3]स्थानादप-
सरणं सुराणां सोऽहमित्येतद्विधेऽस्मिन् संसारे किं कामोपभोगैर्यै-
रेवाश्रितस्यासकृ[4]दिहावर्तनं दृश्यत इत्युद्धर्तुमर्हसी[5]त्यन्धूदपानस्थो
भेक इवाहमस्मिन् संसारे भगवंस्त्वं नो गतिस्त्वं नो गतिः ॥ ७ ॥

केयं गाथेत्यत आह—**भगवन्निति** । अस्थ्यादिकफान्तसङ्गते **दुर्गन्धे निःसारे**, दुर्गन्धराशित्वेन सारलेशवैरळ्यात्, एतादृशे **अस्मिन् शरीरे किं वा कामोपभोगैः** प्रयोजनं मेऽस्ति । विवेकी रौरवादिपरिभवदे शरीरे अहं ममाभि-
मतिमेत्य कं कामं साधयेत् । न हि कदाऽपि मे तत्र रतिरस्तीत्यर्थः ॥ २ ॥

[1] सेनोथ—अ २, क. सेनादयोथ—अ, अ १.
[2] नं स्थानं—अ, अ १, अ २, क. [3] अब्धीनामपसरं—अ २.
[4] दुपाव—अ २, क. [5] त्यन्धोद—अ, अ १, अ २, क.

किंच—कामेति । कामादिशोकाद्यैरभिहते पीड्यमाने किं कामोपभोगैरिति समानम् ॥ ३ ॥ किंच—सर्वमिति । यद्यन्मार्त्यभोज्यजातं तत्तत् सर्वं क्षयिष्णु पश्यामः । तत्रायं दृष्टान्तः—यथेमे तृणवन्नश्यतयोद्भूतप्रध्वंसिनः दंशमशकादयः तेषां क्षुद्रजन्तुत्वात् तद्वदित्यर्थः ॥ ४ ॥ किंच—अथेति । अथ किमेतैः महाराजैश्वर्यैर्वा सर्वस्य विनाशित्वात् किं प्रयोजनमस्ति । परे श्रेष्ठा अन्ये मद्व्यतिरिक्ता महाधनुर्धराः शूराग्रगण्यत्वात् चक्रवर्तिनः एकद्वीपाधिपत्यात् केचित् सार्वभौमाश्च भवन्ति सुद्युम्नप्रभृतयः सूर्यवंशराजानः अथ मरुत्तप्रभृतयः सोमवंशराजानः सन्ति सर्व एते मिषतो बन्धुवर्गस्य महतीं श्रियं देवराजतुल्यश्रियं अपि त्यक्त्वा अस्मात् लोकात् अमुं परलोकं प्रयान्ति । यत एवमतः किं कामोपभोगैः इति पूर्वेण सम्बन्धः ॥ ५ ॥ किंच—अथेति । मानुषैश्वर्यमेतत्तिष्ठतु । अपि तु अथ किमेतैः देवयोन्यैश्वर्यैर्वा किम् । तथा हि—परे विशिष्टैश्वर्यसम्पन्ना गन्धर्वासुरयक्षराक्षसभूतगणपिशाचोरगग्रहादयः सन्ति तेषां निरोधनं प्रळयं पश्यामः । तथा सति मानुषदेहमाश्रित्य किं कामोपभोगैरित्यर्थः ॥ ६ ॥ किं च—अथेति । अथ अन्यानामिति सुडाद्यभावः छान्दसः । अन्येषामैश्वर्यवद्दिक्पालानामैश्वर्यैर्वा किं, न किमपीत्यर्थः, तेषामपि विनाशित्वात्, "विनाशं कालतो याति ततोऽन्यत् सकलं मृषा" इति श्रुतेः । महार्णवादीनां शोषणं संवर्तं भवतीति शुश्रुमः हिमवदादिशिखरिणां प्रपतनं, ध्रुवस्यापि प्रचलनं चलितस्य पुनरस्थानं ध्रुवपदभ्रंशनं वा, तथा तरूणां पृथिव्याश्च महार्णवे निमज्जनं, सुराणां स्वर्गस्थानादपसरणं अपगमनं, इत्येवमाब्रह्मलोकसंसारी तद्याथात्म्यं विद्वान् सोऽहमस्मीत्येवंविधे अस्मिन् संसारे किं कामोपभोगैः यान् कामोपभोगानाश्रित्य यैरेव कामभोगैः असकृदिहावर्तनं दृश्यत इति यतः एवं अतः सर्वथैव तद्विमुखं मामुद्धर्तुमर्हसि अन्धुः कूपः तद्रूपमुदपानं जलाशयः अन्धूदपाने तिष्ठतीत्यन्धूदपानस्थः भेको मण्डूकः कूपस्थमण्डूक इव अस्मिन् संसारे पतितानां मादृशानां नोऽस्माकं त्वमेव गतिः । आवृत्तिः प्रथमप्रपाठकसमाप्त्यर्था ॥

इति प्रथमः प्रपाठकः

द्वितीयः प्रपाठकः

संसारनिर्विण्णाय परापरब्रह्मोपदेशः

अथ भगवान् शाकायन्यः सुप्रीतोऽब्रवीद्राजानं महाराज बृहद्रथेक्ष्वाकुवंशध्वजशीर्षात्मज्ञः कृतकृत्यस्त्वं मरुन्नाम्नो विश्रुतोऽसीत्ययं वाव खल्वात्मा ते कतमो भगवान्[वा ३]वर्ण्य [1]इति तं होवाच ॥ १ ॥ य एषो बाह्यावष्टम्भनेनोर्ध्वमुत्क्रा[2]न्तो व्यथमानोऽव्यथमानस्तमः प्रणुदत्येष आत्मेत्याह भगवानथ य एष संप्रसादोऽस्माच्छरीरात् समुत्थाय परं ज्योति[3]रुपसंपद्य स्वेन रूपेणाभिनिष्पद्यत एष आत्मेति होवाचैतदमृतमभयमेतद्ब्रह्मेति ॥ २ ॥

अथ एवं संसारनिर्विण्णचित्तं राजानं प्रति आदौ मुनिः अपरब्रह्मविद्यामुपदिशति—**अथेति** । अथ राज्ञः साधनचतुष्टयसम्पद्वेदनानन्तरं **भगवान् शाकायन्यः** तत्तीव्रतरवैराग्यतः **सुप्रीतो राजानमब्रवीत्**। किमिति ? हे **महाराजेति** सम्बोधनत्रयतः सम्बोध्य स **त्वं मरुद्राज्ञोऽपत्यत्वेन विश्रुतोऽसि** । त्वद्ब्रह्मविद्यासाधनपौष्कल्यदर्शनात् **आत्मज्ञप्रायः कृतकृत्यश्चासि** । इत्येवमुक्त्वा वक्ष्यमाणोऽयं **वाव खलु भगवान्** तव **आत्मा ते कतमो भगवान्** [वा ३] **वर्ण्य इति तं** राजानं प्रति **उवाच ह** । अभिपूजिते प्लुतिः ॥ १ ॥ मदात्मा कीदृश इति प्रष्टुकाममालक्ष्याह—**य इति** । **य एषोऽपरोक्षो भगवान् बाह्यावष्टम्भनेन** रथेन **ऊर्ध्वमुत्क्रान्तः** उद्गच्छन् **व्यथमानः** जलशैत्याद्युष्णादिवत् कालात्मत्वेन क्रियास्वाभाव्यात् सततसञ्चारेऽपि सञ्चरणायासेन **अव्यथमानः** सन् शार्वरं **तमः प्रणुदति** यथा सविता तथा अयमात्मा स्वाज्ञानं प्रणुदति नाशयति । य

[1] त इ—अ २.
[2] मन्तो—अ, अ १, अ २, क.
[3] स्स्वरूपं सं—क.

एष भगवान् ते तवात्मा तवात्मभूत इत्याह। **अथेति** सविशेषकथनानन्तर्यार्थः। **यः एषोऽपरोक्षः सम्प्रसादः**—स्वविकल्पितकरणग्रामोपरमात् तदधिकरणतया प्रसीदतीति कूटस्थः सम्प्रसादशब्दार्थः—**अस्माच्छरीरात्** मूर्धन्यया **नाड्या समुत्थाय** अर्चिरादिना विरजां प्राप्य तद्दर्शनस्नानतः **प्रसन्नपरंज्योतिरुपसम्पद्य** तदुपसम्पत्तितः **स्वेन रूपेण** योऽभिनिष्पद्यते अभिव्यज्यते **स एष आत्मेति होवाच**। न हि घटशरावादिः कालत्रयेऽपि मृत्त्वं व्यभिचरति। एवं यत् कारणभावमापन्नं एतदेव परंज्योतिः **अमृतं** स्वमृत्युवैरळ्यात् अत एव **अभयं** निर्भयत्वात्, एतदेव हि **ब्रह्म**, "ब्रह्माभयं वै ब्रह्म" इति श्रुतेः ॥ २ ॥

आत्मनः शरीरप्रवर्तकत्वम्

अथ खल्वियं ब्रह्मविद्या सर्वोपनिषद्विद्या वा राजन्नस्माकं भगवता मैत्रेयेण व्याख्याताऽहं ते कथयिष्यामीत्यथापहतपाप्मानस्तिग्मतेजस ऊर्ध्वरेतसो वालखिल्या इति श्रूयन्तेऽथ ते प्रजापतिमब्रुवन् भगवन् शकटमिवाचेतनमिदं शरीरं कस्यैष खल्वीदृशो महिमाऽतीन्द्रियभूतस्य येनैतद्विधमिदं चेतनवत् प्रतिष्ठापितं प्रचोदयिताऽस्य को भगवन्नेतदस्माकं ब्रूहीति तान् होवाच ॥ ३ ॥ यो ह खलु वाचोपरिस्थः श्रूयते स वा एष शुद्धः पूतः शून्यः शान्तोऽप्राणोऽनीशात्माऽनन्तोऽक्षय्यः स्थिरः शाश्वतोऽजः स्वतन्त्रः स्वे महिम्नि तिष्ठत्यनेनेदं शरीरं चेतनवत्प्रतिष्ठापितं प्रचोदयिता चैषोऽस्येति ते होचुर्भगवन् कथमनेनेदृशेनानिच्छेनैतद्विधमिदं चेतनवत् प्रतिष्ठापितं प्रचोदयिता चैषोऽस्येति कथमिति तान् होवाच ॥ ४ ॥

एवं वक्ष्यमाणवालखिल्याख्यायिकया सविशेषं निर्विशेषं च ब्रह्म प्रतिपाद्यते । तत्र ब्रह्मणः कार्यकारणात्मकविश्वतद्धेतुत्वं च प्रतिपाद्यते—**अथेति** । **अथ** एवं तदात्मोपदेशानन्तरं तदकृत्रिमत्वसिद्धये **खलु येयं** ब्रह्ममात्रविद्या **ब्रह्मविद्या सर्वोपनिषद्विद्या** कर्मोपासनाविशिष्टा **वा हे राजन् अस्माकं** ऊर्ध्वरेतसां वालखिल्यानां **भगवता मैत्रेयेण** व्याख्याता तां सर्वोपनिषद्विद्यां ब्रह्मविद्यां च **अहं ते कथयिष्यामीति** प्रतिज्ञाय स्वप्रतिज्ञार्थं प्रतिपादयति—**अपहतेति** । स्वकृततपसा **अपहतपाप्मानः** कल्मषघ्नतपः परायणत्वात्, **तिग्मतेजसः** सदा सूर्यमण्डलसञ्चारात्, **ऊर्ध्वरेतसः** योगोर्ध्वीकृतरेतस्त्रयवत्परमहंसत्वात् । वाग्दृष्टिमनांसि रेतस्त्रयम् । तथा च स्मृतिः—

मनोवाग्दृष्टिरेतः स्यादयमात्माऽक्षरः परः ।
बद्धरेता विमुच्येत मुक्तरेतास्तु बध्यते ॥ इति ॥

एवंधर्मविशिष्टा **वालखिल्या इति** अङ्गुष्ठसन्निभगात्राः मुनयः **श्रूयन्ते** । **ते** वालखिल्याः **प्रजापतिमब्रुवन्** । किमिति? हे **भगवन् इदं शरीरं शकटमिव अचेतनमिति** सर्वानुभवसिद्धं स्वापादौ दर्शनात् । तदेतच्छरीरं येन चेतनेन अनुविद्धं सत् चेतनवत् प्रतिष्ठापितं **कस्यैष** चेतनस्य **अतीन्द्रियभूतस्य** अचेतनचेतनीकरणसमर्थोऽयं **महिमा,** करणानां जडत्वेन अकिञ्चित्करत्वात् । **येनेदं** शरीरं **चेतनवत् प्रतिष्ठापितं अस्य** स्वव्यापृतौ **प्रचोदयिता कोऽयं** प्रवर्तकः स्यादित्येतत् **हे भगवन् अस्माकं ब्रूहि इति** वालखिल्यैः पृष्टः **तान् प्रत्युवाच ह** किल ॥ ३ ॥ किं उवाचेत्यत आह— **यो हेति** । **यो ह खलु** प्रसिद्धः । वाचा उपनिषदा "सर्वस्मादन्यो विलक्षणः" इति [1]श्रुत्यनुरोधेन सर्वस्मादुपरि प्रतिष्ठित इति **वाचोपरिस्थः** श्रूयते । यो वाचोपरिस्थः श्रूयते **सोऽयं शुद्धः** अशुचिवैरळ्यतः तमोगुणातीतत्वात्, **पूतः** अपूतरजोऽतीतत्वात्, **शून्यः** तमआदिगुणत्रयमस्तिनास्तीतिविभ्रमशून्यत्वात्, **शान्तः** संशान्तमायातत्कार्यत्वात्, **अप्राणः** जडक्रियाशक्त्यभावात्, **अनीशात्मा** स्वेशितव्यकलनाऽसहत्वात्, **अनन्तः** देशकालवस्तुपरिच्छेदशून्यत्वात्, **अक्षय्यः** निर-

[1] श्रुत्य स—उ १.

वयवत्वात्, **स्थिरः** अचलत्वात्, अत एव **शाश्वतः** सनातनत्वात्, **अजः** स्वोत्पन्नोत्पादककार्यकारणवैरळ्यात्, **स्वतन्त्रः** कर्तुमकर्तुमन्यथा कर्तुं शक्तत्वात्, यः एवंविशेषणविशिष्टो भगवान् सर्वविशेषापह्नवसिद्धे स्वे **महिम्नि** स्वयमेव **तिष्ठति** । **अनेनेदं शरीरं चेतनवत् प्रतिष्ठापितं एष एवास्य** शरीरादेः **प्रचोदयिता** चेति भगवदुक्तमाकर्ण्य ते **होचुः** । किमिति? हे **भगवन् ईदृशेन** स्वे महिम्नि संस्थितेन स्वातिरिक्तासहेन **कथमेतत्** स्वातिरिक्तशरीरं शशविषाणकल्पं **चेतनवत्** प्रतिष्ठितं स्यात्, कथं स्वातिरिक्तशरीरमस्तिनास्तीतिविभ्रमापह्नवसिद्धोऽस्य **प्रचोदयिता** स्यात्, इत्येवमाशङ्कमानान् **तान्** प्रति निष्प्रतियोगिकब्रह्ममात्रदृष्टेः प्रेर्यप्रेरककलना अस्तिनास्तीतिविभ्रमोऽपि न हि सेद्धुं पारयति, व्यावहारिकत्वेन प्रातिभासिकत्वेन वा स्वातिरिक्तशरीरादिकमस्तीति ये मन्यन्ते तेषां ब्रह्ममात्राज्ञानावृतदृष्टित्वात् तदवलम्बनस्वाज्ञानव्यवधानेन सर्वमुपपद्यत इति भगवान् प्रजापतिः **होवाच** ॥ ४ ॥

आत्मनः सर्वाधिष्ठातृपुरुषत्वम्

स वा एष सूक्ष्मोऽग्राह्योऽदृश्यः पुरुषसंज्ञको बुद्धिपूर्वमिहैवावर्ततेऽशेन सुषुप्तस्यैव बुद्धिपूर्वं निबोधयत्यथ यो ह खलु वावैतस्यांशोऽयं यश्चेतनमात्रः प्रति[1]पूरुषं क्षेत्रज्ञः संकल्पाध्यवसायाभिमानलिङ्गः प्रजापतिर्विश्वाक्षस्तेन चेतनेनेदं शरीरं चेतनवत् प्रतिष्ठापितं प्रचोदयिता चैषोऽस्येति ते होचुर्भगवन्नीदृशस्य कथमंशेन वर्तनमिति तान् होवाच ॥ ५ ॥

किमुवाचेत्यत आह—**स वा इति** । यः शुद्धः पूतः इत्यादिविशेषणविशिष्टः **स वा एषः** परमात्मा **सूक्ष्मः** बुद्ध्यादेरपि सुसूक्ष्मत्वात्, अत एव **अग्राह्यः** सर्वग्राहकत्वात्, **अदृश्यः** अमात्रत्वात्, **पुरुषसंज्ञकः** स्वज्ञदृष्टिप्रसक्त-

[1] पूरुषः—उ, उ १.

स्वातिरिक्तपिण्डाण्डब्रह्माण्डानि जीवेशात्मना पूरणात् पुरुष इति संज्ञा न वस्तुतः, निरंशत्वात्, निरंशोऽपि तुर्यत्वमवलम्ब्य सर्वाधिष्ठाता भूत्वा स्वविकल्पितनिजांशेन बुद्धिपूर्वमिव स्वप्रयोजनाभावात् तथाऽपि वक्ष्यमाणानुरोधेनानुप्रवेशचिन्तापूर्वकं इह शरीर आवर्तते आ समन्ताद्वर्तमान इव भातत्वात्। एवं सुप्तस्येव बुद्धिपूर्वं निबोधयति नितरां चेतनवत् प्रतिष्ठापयति। यत एवं अतः प्रचोदयति च। निरंशे अंशारोपणपूर्वकं उक्तार्थः प्रपञ्च्यते—अथेति। अथशब्दः क्रमार्थः। असौ खलु वाव प्रसिद्धः निरंशः चिद्धातुः तदज्ञानविकल्पितः तदंशः। कोऽसौ? यः प्रतिपुरुषं प्रतिप्राणिशरीरं क्षेत्रं तत् स्वोपाधित्वेन जानातीति क्षेत्रज्ञः, स हि चेतनमात्रः चिदंशत्वात्, स ह्यात्मनोंऽशः। देहातिरेकेण क्षेत्रज्ञोऽस्तीत्यत्र किं लिङ्गमित्यत आह—सङ्कल्पाध्यवसायाभिमानलिङ्ग इति। इदं मे भूयात् इति सङ्कल्पः, एवमेव भवितव्यं भवति इत्यध्यवसायः, साधयाम्येतदिति दृढाभिनिवेशोऽभिमानः, एतत्त्रयं क्षेत्रातिरिक्तक्षेत्रज्ञसद्भावे लिङ्गं, ततः कदाचित् कार्यं कारणं अनुमापयति इत्येवं प्रमाणसिद्धश्चेतनमात्र एव प्रजापतिः, स च विश्वाक्षः विश्वेयत्ताद्रष्टृत्वात्। तेनैव भगवता चेतनेन इदं शरीरं चेतनवत् प्रतिष्ठापितं, क्रियाऽऽदिशक्तित्रयमवष्टभ्य एष एवास्य शरीरादेः प्रचोदयिता चेत्युक्तवन्तः ते पुनः वालखिल्याः होचुः। किमिति? हे भगवन् निरंशस्य ईदृशस्य स्वविभक्तांशक्षेत्रज्ञतया वर्तनं कथं सेद्धुं पारयति ब्रह्मणो निष्प्रतियोगिकनिर्विशेषत्वात् इति एवमसंभावयतः तान् प्रति तादृशाधिकारिदृष्ट्या तथात्वेऽपि मध्यममन्दाधिकारिणां ब्रह्ममात्रसिद्धान्तावगत्युपायतया निरंशेऽप्यंशारोपो युज्यत इति प्रत्युवाच ह ॥ ९ ॥

आत्मनः प्रजासु प्राणात्मना प्रवेशः

प्रजापतिर्वा एषोऽग्रेऽतिष्ठत् स नारमतैकः स आत्मानमभिध्यायद्व्ह्रीः प्रजा असृजत्ता अस्मै वा अप्रबुद्धा अप्राणा स्थाणुरिव तिष्ठमाना अपश्यत् स नारमत सोऽमन्यतैतासां प्रतिबोधनायाभ्यन्तरं

प्राविशानीत्यथ स वायुमिवात्मानं कृत्वाऽभ्यन्तरं प्राविशत् स एको नाविशत् स पञ्चधाऽऽत्मानं प्रविभज्योच्यते यः प्राणोऽपानः समान उदानो व्यान इति ॥ ६ ॥

तत् कथमित्यत आह—**प्रजापतिरिति** । यः शुद्धः पूत इत्यादिपदार्थः सोऽयं **प्रजापतिः** प्रजापतिरेव **अग्रे** सृष्टेः प्राक् निष्प्रतियोगिकाद्वितीयः स्वेतरचेतनान्तरवैरळ्यात् स्वाज्ञदृष्टया लोकवदेकाकी **नारमत**, "तस्मादेकाकी न रमते" इति श्रुतेः । य एकः **स आत्मानं** बहु भविष्यामि **इत्यभिध्यायत्** । निरङ्कुशसर्वज्ञेश्वरो बुद्धिपूर्वं लीलया वा **बह्वीः प्रजाः असृजत्** । एवमीश्वरेण याः प्रजाः सृष्टाः **ता अस्मै** स्वस्रष्ट्रे अयमस्मज्जनक इति **अप्रबुद्धाः** घटाङ्कुरादिवत् प्रबोधरहिता **अप्राणाः** स्पन्दनप्रज्ञाशक्तिभ्यां विरळाः, "यो वै प्राणः सा प्रज्ञा या वा प्रज्ञा स प्राणः" इति श्रुतेः । एवं क्रियाज्ञानशक्त्योरभावात् केवलं **स्थाणुरिव तिष्ठमानाः** प्रजा **अपश्यत्** प्रजापतिः । तासु **नारमत** । **सोऽमन्यत**—एतासां प्रजानां **प्रतिबोधनाय** तासु **अभ्यन्तरं प्राविशानि इति** आलोच्य **अथ स** प्रजापतिः **वायुमिव आत्मानं कृत्वा** प्रजासु **अभ्यन्तरं प्राविशत्** । तत्तच्छरीरोचितैकैकज्ञानक्रियाशक्त्यात्मना प्रविष्ट एकोऽपि यथावत् **नाविशत् स पञ्चधा आत्मानं प्रविभज्योच्यते यः प्राणोऽपानः समान उदानो व्यान इति** ॥ ६ ॥

पञ्चप्राणस्वरूपम्

अथ योऽयमूर्ध्वमुत्क्रामतीत्येष वाव स प्राणोऽथ योयमवाञ्चं संक्रामत्येष वाव सोऽपानोऽथ योऽयं स्थविष्ठमन्नधातुमपाने स्थापयत्यणिष्ठं चाङ्गेऽङ्गे समं नयत्येष वाव स समानोऽथ योऽयं पीताशितमुद्गिरति निगिरतीति चैष वाव स उदानोऽथ येनैताः सिरा अनुव्याप्ता एष वाव स व्यानः ॥ ७ ॥

कीदृशः प्राणादिः इत्यत आह—**अथेति**। **अथ योऽयं** वायुः नासात **ऊर्ध्वमुत्क्रामत्येष वाव स प्राणः**। **अथ योऽयं** बाह्यनासिकारन्ध्रात् **अवाञ्चं संक्रामति एष वाव सोऽपानः**। **अथ योऽयं स्थविष्ठं** अतिस्थूलं **अन्नधातुं** भुक्तान्नस्वरूपं **अपाने** तदुपरि पाचनार्थं **स्थापयति अणिष्ठन्त्वङ्गे** अङ्ग-सम्बन्धिलिङ्गे अभिनयति, तथा च श्रुतिः—"योऽणिष्ठस्तन्मनः" इति, **एष वाव स समानः**। **अथ योऽयं पीताशितं** —द्वन्द्वैकवद्भावः— **तदुद्गिरति** धातुवैषम्ये साम्ये **निगिरति** ग्रसति च **एष वाव स उदानः**। अथ य **एताः सिराः** द्वासप्ततिसहस्रसङ्ख्याकाः **अनुव्याप्तः एष वाव स व्यानः**, "एकैकस्यां द्वासप्ततिर्द्वासप्ततिः प्रतिशाखानाडीसहस्राणि भवन्ति आसु व्यानश्चरति" इति श्रुतेः। इत्थं क्रियाशक्त्यनुप्रवेशेन स्वसृष्टं सकलं चेष्टावत् भवतीत्यर्थः ॥७॥

वैश्वानरस्वरूपम्

अथोपांशुरन्तर्याम्य[मम]भिभवत्यन्तर्याममु[म उ]पांशुमेतयोरन्तराले चौष्ण्यं प्रास्रवद्यदौष्ण्यं स पुरुषोऽथ यः पुरुषः सोऽग्निर्वैश्वानरोऽप्यन्यत्राप्युक्तमयमग्निर्वैश्वानरो योऽयमन्तः पुरुषे येनेदमन्नं पच्यते यदिदमद्यते तस्यैष घोषो भवति यदेतत् कर्णावपिधाय शृणोति स यदोत्क्रमिष्यन् भवति नैनं घोषं शृणोति ॥ ८ ॥

वैश्वानरोत्पत्तिरुपदिश्यते—**अथेति**। **अथोपांशुः** तदाख्यो वायुः **अन्तर्यामी** तदाख्यं वायुमभिभवति। तथा **अन्तर्यामश्चोपांशुमभिभवति** क्रमात्। तावेतौ पाणिपादेन्द्रियगतप्राणौ। तथा सुबालोपनिषदि—"हस्तमेवाप्येति मुख्यमेवाप्येति पादमेवाप्येति अन्तर्याममेवाप्येति" इति। तत्र मुख्यस्यैव उपांशुपर्यायत्वम्। एतयोः प्राणापानवत् परस्परमभिभवतोः उपांश्वन्तर्यामयोः **अन्तराळे** आकर्णनाडीमध्यदेशे घुष्यमाणवेणुदळान्तराळ इव **औष्ण्यं** च शारीरं **प्रास्रवत्** प्रसृतं उत्पन्नं भवति। **यदौष्ण्यं स पुरुषः** स्थूलशरीररूपः। **अथ**

यः पुरुषः इत्युक्तः स एव वैश्वानरः कौक्षेयोऽग्निः । अनयोः पुरुषाग्न्योरपि ज्ञानक्रियाशक्तिवत्तादात्म्यं अन्यत्र श्रुत्यन्तरेऽप्युक्तं, "अयमग्निर्वैश्वानरः" इति । कोऽयमिति ? योऽयमन्तः पुरुषे स्थूलशरीरान्तरुपलभ्यते । औष्ण्यानुभवतो यद्यप्यसौ गम्यते, तथाऽपि बाह्याग्निवदनुभवतो विप्रतिपद्यमानं प्रति कार्यलिङ्गेनैव तत्सत्त्वं बोध्यते—येनेति । यदिदं व्रीहियवादि अद्यते तदिदं अन्नं जग्धं स्थालीतण्डुलवत् । तत्कालपाचकाग्निरेव वैश्वानरः इत्यर्थः, भुक्तान्नपाचकाग्नेः स्वानुभवसिद्धत्वात् । लिङ्गान्तरमेतत्—तस्य कौक्षेयाग्नेः एष घोषः शब्दो भवति यं—इति लिङ्गव्यत्ययः—यः एष पुरुषः कर्णावपिधाय शृणोति आन्तरं, तस्य कार्यत्वेन हेतुसापेक्षत्वात्, "आपोमयः प्राणः तेजोमयी वाक्" इति, "अग्निर्वाग्भूत्वा मुखं प्राविशत्" इत्यादिश्रुतितः शब्दस्य तेजःकारणत्वाविवादादान्तरं तेजस्सिद्धम् । अन्तस्तेजोमयोऽध्यक्षः पुरुषो यदा अस्मात् स्थूलपुरुषादुत्क्रमिष्यन् भवति तदा नैनं आन्तरं घोषं शृणोति । तथाचोत्क्रान्तिकाले स्थूलपुरुषस्य नाशे तद्गताग्नेरपि नाशात् तत्प्रभवघोषोऽपि नश्यतीत्युक्तं भवति । स्थूलशरीराभ्युदयस्थितिनाशस्य चोपदिष्टप्रायत्वात् क्रियाज्ञानशक्तिवत्तादात्म्यमनयोः सिद्धमित्यर्थः ॥ ८ ॥

परमात्मनः शारीरात्मत्वम्

स वा एष पञ्चधाऽऽत्मानं प्रविभज्य निहितो गुहायां मनोमयः प्राणशरीरो [1]बहुरूपः सत्यसंकल्प आत्मेति स वा एषोऽस्य हृदन्तरे तिष्ठन्नकृतार्थोऽमन्यतार्था[2]नसानि तत्स्थानीमानि भित्त्वोदितः पञ्चभी रश्मिभिर्विषयानत्तीति बुद्धीन्द्रियाणि यानीमान्येतान्यस्य रश्मयः कर्मेन्द्रियाण्यस्य हया रथः शरीरं मनो नियन्ता

[1] भारू—अ, अ १.

[2] नश्नामील्यतः—अ, अ १. नसामीति तत्—अ २. नसानील्यतः—उ.

प्रकृतिमयोऽस्य प्रतोदनेन[स्तेन] खल्वीरितं परिभ्रमतीदं शरीरं [1]चक्रमिवानेनैवेदं शरीरं चेतनवत् प्रतिष्ठापितं प्रचोदयिता चैषोऽस्येति ॥ ९ ॥

उक्तस्थूलपुरुषादिप्रचोदयिता क इत्यत आह—स वा इति । एवं शरीराभ्यन्तरं प्रविश्य यः **पञ्चधा** प्राणादिभेदेन आत्मानं विभज्य स्थूलशरीरानुग्रहायैव वैश्वानरस्या[म]प्युपपादितवान् **स एष** ज्ञानक्रियाशक्त्यात्मा भगवान् तद्धृदयगुहायां **निहितः** निधिवत् प्रतिष्ठितत्वात् । सोऽसौ **मनोमयः** ज्ञानशक्तिप्रधानत्वात् **प्राणशरीरः** क्रियाशक्त्युपाधिकत्वात् **बहुरूपः** नानोपाधिकत्वात् **सत्यसङ्कल्पः** अवितथसङ्कल्पत्वात् य **आत्मेति** प्रसिद्धः । **स वा एष** भगवान् **अस्य** हृद(या)न्तरे **तिष्ठन्** वाञ्छितार्थलाभात् अकृतार्थो भूत्वा **अमन्यत** । किमिति? शब्दाद्यर्थानसानि प्राप्नुवानीति तत् **स्वानीमानि** व्यष्टिस्थूलशरीराणि तानि **पञ्चभिः रश्मिभिः** स्वीयज्योतिर्मयकिरणैः **भित्त्वा उदितः** तन्निर्भिद्य बहिर्गतो **विषयान्** अत्तीति । ताश्च **रश्मयो यानीमानि** प्रसिद्धानि **अस्यात्मनः** श्रोत्रादिबुद्धीन्द्रियाणि रश्मिस्थानीयानि । सोऽसौ पञ्चरश्मिमाली मनोमयः प्राणशरीरो भगवान् रथी, वक्ष्यमाणरथाधिष्ठातृत्वात् । **अस्य** वागादिकर्मेन्द्रियाणि **हयाः**, **अस्य शरीरमेव रथः** इन्द्रियाश्ववाह्यत्वात्, **मनो नियन्ता मनसः** सारथित्वेन शरीररथवाहकाश्वस्थानीयेन्द्रियनियन्तृत्वात्, **प्रतोदः** तोत्रं **प्रकृतिमयः** नानाविधवासनास्वरूपत्वात् । **तेन** हि ते हयाः प्रतुद्यन्ते । पुनः पुनः यथोक्तरथिना खलु हययन्त्रद्वारेरितं सत् **इदं शरीरं परिभ्रमति** । यत एवमतः शकटमिव अचेतनमिदं **शरीरं**, **अनेनैव** निजरश्मिभिः **चेतनवत् प्रतिष्ठापितं**, **एष एव अस्य प्रचोदयिता** । एवं भगवत एव सर्वशरीरेष्वंशेन वर्तनमुक्तं भवतीत्यर्थः ॥ ९ ॥

[1] अयं व्याख्याऽनुसारी पाठः कोशगतपाठस्तु, ' चक्रमिव मृतेचनेदं ' इति वर्तते ' चक्रमिव मृत्पचेनेदं ' इति रामतीर्थाभिमतपाठस्तु युक्ततरो भाति.

परमात्मनः आभासत एव संसारित्वम्

स वा एष आत्मेत्यदोवशं नीत इव सितासितैः कर्मफलै-
रभिभूयमान इव प्रतिशरीरेषु चरत्यव्यक्तत्वात् सूक्ष्मत्वाददृश्यत्वाद-
ग्राह्यत्वान्निर्ममत्वाच्चानवस्थोऽकर्ता कर्तेवावस्थितः ॥ १० ॥

अंशवदंशिनः संसारित्वं वास्तवमित्यत आह—**स वा इति** । य एवं स्वसृष्टव्यष्ट्यादिशरीरेषु अंशेन अवतीर्य वर्तते **स वा एष** भगवान् परमात्मेति विख्यातः स हि **अदोरथस्थानीयशरीरवशं नीत इव** अतस्मिंस्तद्भावसिद्ध-**सितासितैः** शुभाशुभैः पुण्यपापकर्मफलैः **अभिभूयमान इव** अस्वतन्त्रतया **प्रतिशरीरेषु** चरतीव **चरति** न वस्तुतः । स्वावृत्यपाये निष्प्रतियोगिकब्रह्ममात्र-त्वद्योतकस्त्ववशब्दः । इवशब्दार्थसाधका हि वक्ष्यमाणहेतवः । **अव्यक्तत्वात् सूक्ष्मत्वात् अदृश्यत्वात् अग्राह्यत्वात् निर्ममत्वाच्च,** मिथोहेतुहेतुमद्भेतुपञ्चक-मित्यर्थः । **अनवस्थः** सर्वावस्थाऽपह्नवसिद्धत्वात् । तथाऽपि स्वाज्ञादिदृष्टि-प्रसक्तकर्तृत्वादिवैरळ्यात्, यत एवं अतोऽकर्तैव सन् शुभाशुभकर्मकर्तेव **अवस्थितो** भवति ॥ १० ॥

आत्मनः शुद्धस्वरूपम्

स वा एष शुद्धः स्थिरोऽचलश्चालेपोऽव्यग्रो निःस्पृहः
प्रेक्षकवदवस्थितः स्वस्य चरितमुग्गुणमयेन पटेनात्मानमन्तर्धाया-
वस्थित इत्यवस्थित इति ॥ ११ ॥

कर्तेवेति इवशब्दार्थः कथमित्याशङ्क्य शुद्धादिविशेषणविशिष्टत्वात् इवशब्दः सङ्गच्छत इत्याह—**स वा इति** । **स वा एष** आत्मा **शुद्धः** तमोऽतीतत्वात् **स्थिरः** पूर्णत्वात् अत एव **अचलः** बद्धपीठाचलवत् अप्रकम्प्यत्वात् **अलेपः**

[1] ति होशन्निव—अ, अ १.

पापादिलेपरहितत्वात् अव्यग्रः निष्क्रियत्वात् निःस्पृहः स्पृहणीयस्वातिरिक्त-मृग्यत्वात् प्रेक्षकवत् अवस्थितः साक्षिवत् सर्वत्रोदासीनतया स्थितत्वात् तथाऽपि स्वाज्ञानतः स्वस्य चरितभुक् स्वकृतकर्मफलानुभवव्यग्रत्वात्। कथमिह प्रेक्षकवत् अवस्थितस्य स्वकृतचरितभुक्त्वं तत्राह—गुणेति। त्रिगुणतत्कार्य-नामरूपकर्मकर्तृत्वादिमयदृढपटेन स्वाज्ञदृष्टेः स्वात्मानमन्तर्धाय अवस्थितः पश्यत्कर्तेव भोक्तेव सर्वत्र आत्मात्मीयाभिमानारूढ इव आत्मानं मत्वा अवस्थितवद्भातत्वात्। वस्तुतः त्रिगुणतत्कार्यापाये निष्प्रतियोगिकब्रह्ममात्रमव-शिष्यत इत्यर्थः। आवृत्तिः अवधारणार्था अध्यायपरिसमाप्त्यर्था च भवति ॥११॥

इति द्वितीयः प्रपाठकः

तृतीयः प्रपाठकः

संसारिणो भूतात्मनः स्वरूपम्

ते होचुर्भगवन् [1]यद्येवमस्यात्मनो महिमानं सूचयसीत्यन्यो वा परः कोऽयमात्मा [2]योऽयं सितासितैः कर्मफलैरभिभूयमानः सदसद्योनिमापद्यत इत्यवाचीं वोर्ध्वां गतिं द्वन्द्वैरभिभूयमानः परिभ्रमतीति कतम एष इति तान् होवाच ॥ १ ॥ अस्ति खल्वन्योऽपरो भूतात्माऽऽख्यो योऽयं सितासितैः कर्मफलैरभिभूयमानः सदसद्योनिमापद्यत इत्यवाचीं वोर्ध्वां गतिं द्वन्द्वैरभिभूयमानः परिभ्रमतीत्यस्योपव्याख्यानं पञ्च तन्मात्राणि भूतशब्देनोच्यन्ते पञ्च महाभूतानि भूतशब्देनोच्यन्तेऽथ तेषां यः समुदायः

[1] यदेव—इति लिखितकोशेषु. [2] कोयं—इति लिखितकोशेषु.

शरीरमित्युक्तमथ यो ह खलु वाव शरीरमित्युक्तं स भूतात्मेत्युक्त-मथास्ति तस्यात्मा बिन्दुरिव पुष्कर इति स वा एषोऽभिभूतः प्राकृतैर्गुणैरित्यतोऽभिभूतत्वात् संमूढत्वं प्रयात्यसंमूढत्वादात्मस्थं प्रभुं भगवन्तं कारयितारं नापश्यद्गुणौघैस्तृप्यमानः कलुषीकृतश्चा-स्थिरश्चञ्चलो लोलुप्यमानः सस्पृहो व्यग्रश्चाभि[1]मानित्वं प्रयात इत्यहं सो ममेदमित्येवं मन्यमानो निबध्नात्यात्मनाऽऽत्मानं जालेनेव कृतस्यानुफलैरभिभूयमानः परिभ्रमतीति ॥ २ ॥

यस्त्वयोक्त आत्मा संसारी उत असंसारी वा इति स्वात्मयाथात्म्यबुभुत्सया पुनः प्रश्नप्रतिवचनमुखेन तृतीयः प्रपाठक आरभ्यते—**ते होचुरिति**। स्वात्मनः संसारानुवृत्त्याशङ्क्या ऋषयो बालखिल्याः **ते होचुः** हे **भगवन्** इत्येवं प्रकारेण **अस्यात्मनः** व्यष्टिसमष्ट्युपाधेः वा **महिमानं** सर्वसंसारनिर्वाहकत्वेऽपि तदस्पर्शित्वलक्षणं **सूचयसि** यद्येवमात्मनः संसारास्पर्शस्तदा **परः** परमात्मा **अन्यो** वा अस्तु **कोऽयमात्मा योऽयं सितासितैः कर्मफलैः अभिभूयमानः सदसद्योनिमापद्यत** इत्यनुभवतः **अवाचीं** सांसारिकीं **वा ऊर्ध्वां** अपवर्गलक्षणां **वाऽऽपद्यत** इत्यनुकर्षः। एवमनुभूत्या **द्वन्द्वैरभिभूयमानः परिभ्रमति**। तत्र **कतम एषः**—किं व्यष्टिसमष्टिसंसारातीतः परमात्मनोऽन्यः, उत तस्यैव कया च न विधया संसारोऽपीति प्रश्नः, अचेतनस्य अर्थानर्थायोगात् कः संसार्यात्मेति। एवं पृष्टो भगवान् उपाधिकृतं अस्य संसारित्वं न वस्तुतः इति **तान् होवाचेति** ॥ १ ॥ किं उवाचेत्यत आह—**अस्तीति**। तैरेवं पृष्टो भगवान्—संसार्यात्मा सर्वथैव नाचेतनो नापि चेतनः, अपि तु तप्तायःपिण्डवत् उभयात्मा, तस्यैव साक्षात् संसारः, तद्वारा आत्मनः संसार इत्युपचर्यते न स्वतः, इत्येतदर्थं मनसि निधाय अस्तीत्याद्युक्तिः युक्ता। **अस्ति खलु** प्रसिद्धः **अन्यः** परमात्मनो भिन्नः **अपरोऽश्रेष्ठः** संसारी **भूतात्माऽऽख्यः**। **योऽयं—सितासितैः**

[1] मान—अ१, अ२, उ.

इत्याद्युक्तार्थं—एवं **परिभ्रमतीति** पृष्टः सोऽन्योऽस्तीति पूर्वेण सम्बन्धः। **अस्य** संसारिणः **उपव्याख्यानं** क्रियत इति शेषः। तत् कथं इत्यत्र—**पञ्चतन्मात्राणि** अपञ्चीकृतसूक्ष्मभूतानि **भूतशब्देनोच्यन्ते,** पञ्चीकृतपञ्चमहाभूतानि च **भूतशब्देनोच्यन्ते। अथ तेषां** स्थूलसूक्ष्मभूतानां **समुदायः** सङ्घातः **शरीर**मित्युक्तम्। तत्र भूतत्रयसङ्घातप्रधानं स्थूलशरीरं, सूक्ष्मं वायुप्रधानं, आन्तरं व्योमप्रधानं, तथा मात्राप्रधानम्। **अथ खलु वाव** प्रसिद्धः **योऽयं** शारीरः श्रुतिषु **शरीरसम्बन्धी** आत्मेत्युक्तः स एवं **भूतात्मेत्युक्तं** उपदिष्टम्। **अथ** भूतमयशरीरनिरूपणानन्तरं तत्स्वरूपं निरूप्यत इत्यर्थः। तदेव क्रियते—**तस्येति। तस्य** भूतसमुदायशरीरस्य **बिन्दुः पुष्कर इव** तैलबिन्दुलव इवेति वा **इत्यनुभूतितो** व्यापक **आत्मा** चेतनः अस्त्येव। **स वा एष** शारीरो **यथोक्तभूतात्मा** आन्तरो लैङ्ग्यज्योतिर्मयः पुरुषः **प्राकृतैः गुणैः** नानावासनाविजृंभितैः **इत्यतोऽभिभूतत्वात्** नीलपीतादिगुणकलितनैर्मल्यस्फटिकवत् **सम्मूढत्वं प्रयाति।** वस्तुतः स्वात्मनः स्वावारकदेहसम्बन्धाभावेन **असम्मूढत्वात्** सूत्रान्तर्यामिप्रत्यगादिरूपेण आत्मनि शरीरे तिष्ठतीति **आत्मस्थं प्रभुं भगवन्तं** कूटस्थात्मानं अनापन्नविकारतया सङ्घातप्रेरयितारं **नापश्यन्** गुणत्रयावृतत्वेन बहिर्मुखत्वात्। तथा च स्मृतिः—

त्रिभिर्गुणमयैर्भावैरेभिः सर्वमिदं जगत्।
मोहितं नाभिजानाति मामेभ्यः परमव्ययम्॥ इति॥

सोऽसौ भूतात्मा शब्दादिसत्वादिगुणौघैः **तृप्यमानः** तुष्यमाणः तद्वासनया **कलुषीकृतश्च** भवति, **अस्थिरः** बहिःप्रतिष्ठाराहित्यात्, **चञ्चलः** मानसोपाधियोगात्, **लोलुप्यमानः**—लुपेः यङन्ताच्छानच्—लोलुपतां प्राप्तः, अप्राप्तविषये स्पृहया अन्वितः **सस्पृहः,** अतत्कर्मणि **व्यग्रश्चाभिमानित्वं प्रयात इति।** यतः एवं अतः **अहं स** इति स्वपरशरीरात्माभिमानं **ममेदमिति** दारपुत्रधनक्षेत्रादिषु स्वीयबुद्धिं **मन्यमानोऽभिमतिं कुर्वन् आत्मना** मनसा **स्वात्मानं** प्रत्यञ्चं जालेन खचरमिव **बध्नाति** स्वकृतस्य पुण्यपापरूपस्य स्वर्गनरकादिफलैः **अभिभूयमानः** यावत्स्वाज्ञानं **परिभ्रमतीति॥ २॥**

भूतात्मसत्त्वे प्रमाणान्तरम्

अथान्यत्राप्युक्तं यः कर्ता सोऽयं वै भूतात्मा करणैः कारयिताऽन्तःपुरुषोऽथ यथाऽग्निनाऽयःपिण्डो वाऽभिभूतः कर्तृभिर्हन्यमानो नानात्वमुपैत्येवं वाव खल्वसौ भूतात्माऽन्तःपुरुषेणाभिभूतो गुणैर्हन्यमानो नानात्वमुपैत्यथ यत्त्रिगुणं चतुरशीतिलक्षयोनिपरिणतं भूतत्रिगुणमेतद्वै नानात्वस्य रूपं तानि ह वा इमानि गुणानि पुरुषेणेरितानि चक्रमिव चक्रिणेत्यथ यथाऽयःपिण्डे हन्यमाने नाग्निरभिभूयत्येवं नाभिभूयत्यसौ पुरुषोऽभिभूयत्ययं भूतात्मोपसंश्लिष्टत्वात् ॥ ३ ॥

स्वोक्तार्थं श्रुतिः श्रुत्यन्तरमपि प्रमाणयति—अथेति। अथ भूतात्म स्वरूपनिरूपणानन्तरं स्वोक्तार्थजातं अन्यत्र श्रुत्यन्तरेऽप्युक्तम्। तत् कथं? यः कर्मकर्ता सोऽयं वै भूतात्मा स्वीयकरणैः कारयिता अन्तःपुरुषः अन्तर्याम्यात्मना शरीरपूरणात् अयस्कान्तवत् कारयिता। श्रुतौ कर्तृस्वरूपतन्त्रता निरूप्यते—अथेत्यादिना। यथा अग्निना अयःपिण्डः शैत्यकाठिन्यविशिष्टोऽभिभूतः खनित्रादिकर्तृभिः हन्यमानो नानात्वमुपैति एवं वाव खल्वसौ भूतात्मा स्वान्तःपुरुषेण अग्निस्थानीयेन अभिभूतो गुणैः हन्यमानः सन् नानात्वमुपैति। तत् कथं कीदृशं? अथ यत् त्रिगुणं सत्वादिगुणत्रय परिणामरूपं चतुरशीतिलक्षसङ्ख्याकयोनित्वेन त्रिस्रोतोऽवान्तरजातत्वेन च परिणतं भूतत्रिगुणं—लिङ्गव्ययः—प्राणिसमूहः। एतद्वै नानात्वस्य रूपं—जातित्वे अवान्तरप्रवाहनित्यत्वेन त्रिसङ्ख्याकयोनिलक्षचतुरशीतिभूतात्मानः। तानि ह वा इमानि गुणानि चतुरशीतिलक्षयोनिपरिणतभूतरूपाणि पुरुषेण अन्तर्यामिणा चक्रिणा कुलालेन तच्चक्रमिव ईरितानि प्रेरितानि भवन्ति। यथोक्तयोनिप्राप्तिः भूतात्मन एव नान्तर्यामिण इत्यत्रायं दृष्टान्तः—अथ यथा अयःपिण्डे हन्यमाने नानात्वं गते सति नाग्निः अभिभूयति—इति छान्दसं

परस्मैपदं—अभिभूयते अग्नेरयःसम्बन्धवैरळ्यात्, एवं **नाभिभूयति असौ पुरुषोऽन्तर्यामी । भूतात्मा अभिभूयत्येव** । कुतो वैषम्यमित्यत्र हेतुः—**उपसंश्लिष्टत्वादिति** ॥ ३ ॥

भूतात्मनानात्वे प्रमाणान्तरम्

अथान्यत्राप्युक्तं शरीरमिदं मैथुनादेवोद्भूतं संविद्व्यपेतं निरय एव मूत्रद्वारेण निष्क्रान्तमस्थिभिश्चितं मांसेनानुलिप्तं चर्मणाऽवबद्धं विण्मूत्र[1]पित्तकफमज्जामेदोवसाभिरन्यैश्च मलैर्बहुभिः परिपूर्णं कोश [2]इवावसन्नेति ॥ ४ ॥

भूतात्मन एव नानात्वापत्तौ श्रुत्यन्तरं प्रमाणयति—**अथेति** । किं तदन्यत्राप्युक्तम्? **इदं शरीरं** परमकुत्सितशुक्रशोणितयोगलक्षणं **मैथुनादेवोद्भूतं संविदा** शरीरात्मना **व्यपेतं** विसृष्टं विचार्यमाणे **निरय एव** । शिष्टं स्पष्टम् । इत्यादिमलपूरितं शरीरं स्वबन्धहेतु**कोश इवावसन्नेति** ॥ ४ ॥

भूतात्मैव शरीरमित्यत्र प्रमाणान्तरम्

अथान्यत्राप्युक्तं संमोहो भयं विषादो निद्रा तन्द्री व्रणो जरा शोकः क्षुत् पिपासा कार्पण्यं क्रोधो नास्तिक्यमज्ञानं मात्सर्यं [3]वैकारिण्यं मूढत्वं निर्व्रीडत्वं निकृतत्वमुद्धतत्वमसमत्वमिति तामसान्वितस्तृष्णा स्नेहो रागो लोभो हिंसा रतिर्दृष्टिर्व्यावृतत्वमीर्ष्या-काममस्थिरत्वं चञ्चलत्वं जिहीर्षाऽर्थोपार्जनं मित्रानुग्रहणं परिग्रहावल-म्बोऽनिष्टेष्विन्द्रियार्थेषु द्विष्टिरिष्टेष्वभिष्वङ्ग इति राजसान्वितैः परिपूर्ण एतैरभिभूत इत्ययं भूतात्मा तस्मान्नानारूपाण्याप्नोतीत्याप्नोतीति ॥५॥

[1] वातपि—अ, अ १, क. [2] इव वसुनेति—रामतीर्थपाठः
[3] वैकारुण्यं—अ, अ १, उ १.

भूतात्मैव शरीरमित्यत्र श्रुत्यन्तरं प्रमाणयति—अथेति । भूतात्मा शरीरत्रयमिति यदुक्तं तदन्यत्राप्युक्तं भवति । अस्य शारीरस्य भूतात्मनः **संमोहादयः** स्वप्रधानधर्माः **व्रणादयः** स्वोपाधिप्रधानाः, **कार्पण्यादयोऽपि** स्वप्रधानधर्माः । **वैकारिण्यं** विकारिसंश्रितत्वम् । **निकृतत्वं** शठत्वम् । **शिष्टं** स्पष्टम् । अन्नपानादिविषयेच्छा तृष्णा, पुत्राद्यासक्तिः स्नेहः, स्त्रीविषयेच्छा **रागः**, स्वद्रव्यत्यागानिच्छा **लोभः**, प्राणिमात्रपीडा **हिंसा, रतिः** क्रीडा, **ईर्ष्या** असूया, स्त्रीमोहः **कामः**, स्थिरप्रतिष्ठाराहित्यं **अस्थिरत्वम्**, प्रतिक्षणविकारित्वं **चञ्चलत्वम्**, अर्थादिहरणेच्छा जिहीर्षा, **अर्थोपार्जनं**, मित्रानुग्रहणं, स्त्र्यादि-**परिग्रहावलम्बः**, **अनिष्टेन्द्रियार्थेषु** द्विष्टिः, **इष्टेषु** अभिष्वङ्गः सक्तिरिति **राजसैः** गुणैः **परिपूर्णः** एतैः **अभिभूतः** इत्येवंप्रकारोऽयं **भूतात्मा** शारीरः । यस्मात् एवं **तस्मात् नानारूपाण्याप्नोति** पुरोक्तनानायोनीः प्राप्नोति । आवृत्तिस्तु तृतीयप्रपाठकसमाप्त्यर्था ॥ ९ ॥

इति तृतीयः प्रपाठकः

चतुर्थः प्रपाठकः

धर्मानुष्ठानेन विना संसारानिवृत्तिः

[1]अथान्यत्राप्युक्तं महानदीषूर्मय इव निवर्तकमस्य यत् पुराकृतं समुद्रवेलेव दुर्निवार्यमस्य मृत्योरागमनं सदसत्फलमयैर्हि पाशैः

[1] अत्र (अ) कोशे (मु) कोशे च अयमधिकः पाठो वर्तते—"ते ह खल्वथोर्ध्व-रेतसोऽतिविस्मिता अतिसमेत्योचुर्भगवन्नमस्ते त्वं नः शाधि त्वमस्माकं गतिरन्या न विद्यत इत्यस्य कोऽतिथिर्भूतात्मनो येनेदं हित्वात्मन्येव सायुज्यमुपैति तान् होवाच ॥"

पशुरिव बद्धं बन्धनस्थ इवास्वतन्त्रं यमविषयस्थ इव बहुभयावस्थं मदिरोन्मत्त इवामोदमदिरोन्मत्तं पाप्मना गृहीत इव भ्राम्यमाणं महोरगदष्ट इव विपदृष्टं महान्धकार इव रागान्धमिन्द्रजाल [1]इव मायामयं स्वप्न इव मिथ्यादर्शनं कदलीगर्भ इवासारं नट इव क्षणवेषं चित्रभित्तिरिव मिथ्यामनोरममित्यथोक्तम् ॥

शब्दस्पर्शादयो येऽर्था अनर्था इव ते स्थिताः ।
येषां सक्तस्तु भूतात्मा न स्मरेच्च परं पदम् ॥ १ ॥

पूर्वस्मिन् प्रपाठके संसारेयत्तां प्रतिपाद्य तदसम्भवप्रबोधप्रदर्शनाय चतुर्थः प्रपाठकः आरभ्यते—**अथेति** । **अथ** संसारप्रवृत्तिप्रदर्शनानन्तरं अस्माभिः यत् व्याचिख्यासितं तत् **अन्यत्राप्युक्तम्** । किं तत्? कैवल्यहेतुतत्त्वज्ञानम् । **महानदीषु ऊर्मय इव** भूतात्मनः संसारात् **निवर्तकमस्य समुद्रवेलेव** अस्य भूतात्मनः ऊर्मितुल्यप्रवृत्तिसंसारस्य समुद्रोर्मीणां समुद्रवेलेव निवर्तकं निवारकं तु **यदस्य पुराकृतं** जन्मान्तरकृतस्वधर्मानुष्ठानं एतदेव, अन्यथा **दुर्निवार्य अस्य मृत्योः** संसारस्य पुनः पुनः ऊर्मिवत् **आगमनं** प्राप्तम् । **यत्** यस्मात् शुभकर्मरहितः **असत्फलमयैः** असन्ति अशुभानि दुष्कृतानि तन्मयैः **पाशैः पशुरिव** बद्धं प्राचीनसुकृतराहित्यात् । तं मृत्युः न मुञ्चतीति शेषः । कारागृहबन्धनस्थ **इव** अस्वतन्त्रं स्वार्थस्वातन्त्र्यरहितं, **यमविषयस्थो नारकीव बहुभयावस्थं, मदिरोन्मत्त इव आमोदमदिरोन्मत्तं**—दारपुत्रादौ न्यस्तप्रीतिः आमोदः, पिशाचोपमपाप्मना **गृहीत इव भ्राम्यमाणं** व्याघूर्णमानचित्तत्वात्, **महोरगदष्ट इव विपदृष्टं, महान्धकार इव रागान्धं** कृत्याकृत्यविवेकवैरळ्यात्, **इन्द्रजाल इव मायामयं** परवञ्चनानिरतत्वात्, **स्वप्न इव मिथ्यादर्शनं** अदृष्टदृष्टनष्टाभिरामत्वात्, **कदलीगर्भ इव असारं, नट इव**

[1] मिव—मु.

क्षणवेषं प्रतिक्षणविकृतवेषत्वात्, नानाविधविचित्रचित्रभित्तिरिव मिथ्यामनोरमं मृत्युः न कदाऽपि मुञ्चति । इत्युक्तेऽर्थे अथोक्तं श्लोकान्तरं—शब्देति । भूतात्मनो ये शब्दस्पर्शादयोऽर्थाः ते अनर्था इव स्थिताः । येषां येषु सक्तो भूतात्मा न हि जात्वपि परं पदं स्वातिरिक्तसर्वापह्नवमुखेन ब्रह्ममात्रतया यत् पद्यते तत् पदं स्वमात्रमिति न कदाऽपि स्मरेत् ॥ १ ॥

संसारप्रतिक्रियारूपं स्वधर्मानुष्ठानम्

अयं वाव खल्वस्य प्रतिविधिर्भूतात्मनो यदेव विद्याऽधिगमं स्वधर्मस्यानुचरणं स्वाश्रमेष्वेवानुक्रमणं स्वधर्म एव सर्वं धत्ते स्तम्भशाखे[1]वेतराण्यनेनोर्ध्वभाग्भवत्यन्यथाऽधः पतत्येष स्वधर्मोऽभिहितो यो वेदेषु न स्वधर्मातिक्रमेणाश्रमी भवत्याश्रमेष्वेवावस्थितस्तपस्वी चेत्युच्यत एतदप्युक्तं नातपस्कस्यात्म[2]ज्ञानेऽधिगमः कर्मशुद्धिर्वेत्येवं ह्याह ॥

तपसा प्राप्यते सत्त्वं सत्त्वात् संप्राप्यते मनः ।
मनसा प्राप्यते त्वात्मा ह्यात्मापत्त्या निवर्तते ॥ २ ॥

स्वमुखेनैव भगवान् ब्रह्ममात्रावस्थानलक्षणकैवल्यहेतुं ससाधनं ज्ञानमुपदिशति—अयमिति । अयं वाव वक्ष्यमाणरूपः खलु अस्य भूतात्मनः प्रतिविधिः संसारानर्थप्रतिक्रिया । कोऽयं? यदेव विद्याऽधिगमः, यदित्यव्ययं, योऽयं विद्याऽधिगमः स्वतत्त्वविद्याप्राप्तिः सैव प्रतिविधिः । तत्प्राप्तौ चोपायः स्वाश्रमेष्वेव अनुक्रमणं स्वाश्रमविहितब्रह्मचर्याद्याश्रमेषु अनुप्रवेशनं यथाशास्त्रं प्राप्य ततः स्वधर्मस्य नित्यादिकर्मणोऽनुचरणं अनुष्ठानम् । स्वधर्म एव यथोक्तलक्षणः सर्वं आत्मवर्गं धत्ते । इहामुत्र स्तम्भशाखेव छदिषः

[1] चेत—अ, अ १, अ २, क. [2] ध्याने—अ, अ १, अ २, क.

उभयपार्श्वशाखाधारशाखामध्यस्था स्तम्भशाखा सा यथा इतराणि शाखाऽन्तराणि धत्ते तथा अनेन धारणात् धर्मसंज्ञकेन धृतं ऊर्ध्वभाक् ऊर्ध्वगतिभाक् भवति। अन्यथा आधारकर्माभावे अधः पतति। एष एव हि स्वधर्मो यो वेदेषु साङ्गोपाङ्गेषु अभिहितः। तत्तद्वर्णाश्रमानुष्ठेयविहितस्वधर्मातिक्रमेण कश्चिदपि आश्रमी न भवति, न हि सिद्धो भवति। यतः एवं अतः आश्रमधर्मेष्वेव अवस्थितः तपस्वीत्युच्यते। इत्येतदप्युक्तं तदेतदन्यत्राप्युक्तमित्यर्थः। अतपस्कस्य यथोक्ततपोरहितस्य आत्मज्ञानाधिगमो न, कर्मशुद्धिर्वा पापकर्मसंशुद्धिरपि न भवति इत्येवं ह्याह श्रुतिः। यतः एवं अतः तपसा प्राप्यते सत्वं ज्ञानवैराग्यादिहेतुसत्वगुणप्राधान्यं, सत्वात् संप्राप्यते मनः ब्रह्माकारवृत्तिमन्मनः संप्राप्यते, तादृशेन मनसा आत्मा प्राप्यते, आत्मापत्त्या निवर्तते, "न च पुनरावर्तते" इति श्रुतेः। निवर्तत इति शब्दतो न पुनः संसारी भवतीति द्योत्यते ॥ २ ॥

प्रसन्नचित्तस्यैव मोक्षः

अत्रैते श्लोका भवन्ति—

यथा निरिन्धनो वह्निः स्वयोनावुपशाम्यति।
तथा वृत्तिक्षयाच्चित्तं स्वयोनावुपशाम्यति ॥ १ ॥

स्वयोनावुपशान्तस्य मनसः सत्यकामिनः।
इन्द्रियार्थाविमूढस्यानृताः कर्मवशानुगाः ॥ २ ॥

चित्तमेव हि संसारस्तत् प्रयत्नेन शोधयेत्।
यच्चित्तस्तन्मयो भवति गुह्यमेतत् सनातनम् ॥ ३ ॥

चित्तस्य हि प्रसादेन हन्ति कर्म शुभाशुभम्।
प्रसन्नात्माऽऽत्मनि स्थित्वा सुखमव्ययमश्नुते ॥ ४ ॥

समासक्तं [1]यदा चित्तं जन्तोर्विषयगोचरे ।
यद्येवं ब्रह्मणि स्यात्तत् को न मुच्येत बन्धनात् ॥ ५ ॥
मनो हि द्विविधं प्रोक्तं शुद्धं चाशुद्धमेव च ।
अशुद्धं कामसंकल्पं शुद्धं कामविवर्जितम् ॥ ६ ॥
लयविक्षेपरहितं मनः कृत्वा [2]सुनिश्चलम् ।
यदा यात्यमनीभावं तदा तत् परमं पदम् ॥ ७ ॥
तावदेव निरोद्धव्यं हृदि यावत् क्षयं गतम् ।
एतज्ज्ञानं च मोक्षश्च शेषास्तु ग्रन्थविस्तराः ॥ ८ ॥
समाधिनिर्धूतमलस्य चेतसो निवेशितस्यात्मनि यत् सुखं लभेत्।
न शक्यते वर्णयितुं गिरा तदा स्वयं तदन्तःकरणेन गृह्यते ॥९॥
अपामपोऽग्निरग्नौ वा व्योम्नि व्योम न लक्षयेत् ।
एवमन्तर्गतं चित्तं पुरुषः प्रतिमुच्यते ॥ १० ॥
मन एव मनुष्याणां कारणं बन्धमोक्षयोः ॥
बन्धाय विषयासक्तं मुक्त्यै निर्विषयं स्मृतम् ॥ ११ ॥ ३ ॥

"मनसा प्राप्यते" इत्यादिना योऽर्थोऽभिहितः तस्मिन् उक्तार्थे **इमे** वक्ष्यमाणाः **श्लोकाः** मन्त्राः **भवन्ती**त्याह—**यथेत्यादि** । **यथा** स्वदाह्येन्धन-रहितो **वह्निः स्वयोनौ** स्वाश्रयभूताङ्गारशकल **एवोपशाम्यति तथा चित्तं** तत्संवलितचैतन्यं स्वातिरिक्तविषयकवृत्तिक्षयात् **स्वयोनौ** कूटस्थे **उपशाम्यति** ॥ १ ॥ एवं **स्वयोनावुपशान्तस्य सत्यकामिनः** सत्तामात्रमहमस्मीति कामनावतः श्रोत्रादीन्द्रियार्थशब्दादौ **अविमूढस्य** तदावृतिमोहरहितस्य यावत् सम्यज्ज्ञानं

[1] यथा—क. [2] सुनिश्चितम्—क.

नोदेति तावत् आरब्धादिकर्मवशानुगा अत्यन्तानृताः स्वातिरिक्तदेहाद्यस्तिताऽऽभासा मरुमरीचिकादिवत् मिथ्यात्वेन भान्ति । उदिते तु सम्यज्ज्ञानसूर्ये स्वातिरिक्तदेहाद्याभासोऽस्ति नास्तीति प्रतीतिध्वान्तः कथं स्थातुं पारयति ब्रह्ममात्रस्य निष्प्रतियोगिकत्वात् ॥ २ ॥ तादृशसम्यज्ज्ञानोदयोपायमाह—**चित्तमेवेति** । **चित्तं** तदेव हि सम्यज्ज्ञानावृतिसंसारः । यावत् चित्तं अस्ति नास्तीति भ्रान्तिः नोदेति तदानीमेव सम्यज्ज्ञानं जातमिति मन्तव्यम् । यतः एवं अतः वेदान्तश्रवणादिना महता **प्रयत्नेन** ब्रह्मातिरिक्तचित्तं नास्तीति **शोधयेत्** निर्मूलीकुर्यादित्यर्थः । **यच्चित्तः** पुरुषः **तन्मयो भवति** तन्मात्रमवशिष्यते इति यत् तदेतत् **सनातनं** गुह्यं परमसिद्धान्तत्वेन गोपनीयत्वात् ॥ ३ ॥ **चित्तप्रसादेन** हि योगी शुभाशुभकर्मजातं **हन्ति** "ज्ञानप्रसादेन विशुद्धसत्वः" इति श्रुतेः । तस्मात् **प्रसन्नात्माऽऽत्मनि स्थित्वा अव्ययं** परमसुखं **अश्नुते** ॥ ४ ॥ यच्चित्तं विषयवत् ब्रह्मसंसक्तं स मुनिः नेच्छन्नपि मुच्यते इत्याह—**समासक्तमिति** । यस्य **जन्तोः चित्तं** विषयासक्तं सत् विषये निमज्जति **यद्येवं ब्रह्मणि समासक्तं** चित्तं तदा **बन्धनात् को** वा **न मुच्येत** । बन्धनस्य बहिश्चित्तमूलत्वात् चित्तापाये कुतो बन्धनमित्यर्थः ॥ ५ ॥ **शुद्धाशुद्धभेदेन मनो द्विविधं हि** । तत्र अशुद्धं कामसङ्कल्पादिमत् । शुद्धं तु तद्विवर्जितम् ॥ ६ ॥ किं च—**यदा** योगबलात् मनो **लयविक्षेपादिदोषरहितं निश्चलं मनः कृत्वा** योगिमनः **अमनीभावमायाति तदा तत्परमं पदं ब्रह्म** याति ॥ ७ ॥ **यावत्** हृदि तदवभासकप्रत्यगभिन्ने ब्रह्मणि मनउपलक्षितस्वाविद्यापदतत्कार्यजातं **क्षयं गतं** विरूपविलयं गतं **तावदेव मनो निरोद्धव्यम्** । एतदेव हि स्वातिरिक्तवृत्तिरहितं **ज्ञानं च मोक्षश्च** मोक्षस्य परा काष्ठाऽप्येतदेव **शेषास्तु** बन्धमोक्षप्रतिपादकाः **ग्रन्थविस्तराः** मोक्षशास्त्रबोधितार्थः नातः परमस्तीत्यर्थः, "नातः परं वेदितव्यं हि किञ्चित्" इति मन्त्रवर्णात् ॥ ८ ॥ मलशब्देन शब्दादिविषयसंसृष्टिः उच्यते । निर्विकल्पकसमाधिना **निर्धूतमलस्य** स्वात्ममात्रनिवेशितस्य **चेतसः** स्वावशेषतया **यत्** परमसुखं **लभेत्** भवेत् **तद्विरा** वाचा **वर्णयितुं न शक्यते** निरुपमत्वात् । **तत्** सुखं तावत् **स्वयं** ब्रह्माकारपरिणतान्तःकरणेन

गृह्यते, स्वानुभवैकवेद्यमिति यावत्। तथा च श्रुतिस्मृती—"दृश्यते त्वग्र्यया बुद्ध्या" इति, "सुखमात्यन्तिकं यत्तत् बुद्धिग्राह्यमतीन्द्रियम्" इति च ॥ ९ ॥ लययोगरहस्यमुपदिश्यते—**अपामिति**। अपां मध्ये निवेशिता **आपो** वा **अग्नौ** निक्षिप्तोऽग्निर्वा **व्योम्नि** महाकाशे निक्षिप्तघटाद्यनुगतव्योम वा मिथो भेदेन यथा **न** लक्ष्यते **एवमन्तर्गतं चित्तं** तत्कार्यदेहात्मानं वा यदा **न लक्ष्येत्** स्वभिन्नं न पश्यति, "यथैव मृन्मयः कुंभः तद्वद्देहोऽपि चिन्मयः" इति श्रुतेः। तदा **पुरुषः** संप्रसादः **परिमुच्यते** स्वातिरिक्तास्तिताभ्रमात् विमुक्तो भवति ॥ १० ॥ यतः एवं अतो **मनुष्याणां** बन्धमोक्षहेतुः **मन एव**। तत्र **विषयासक्तं** मनो **बन्धसाधनम्**। **निर्विषयं** मनस्तु **मुक्तिसाधनं स्मृतम्** ॥ ११ ॥ ३ ॥

चित्तप्रशमनार्थं भगवदुपासनम्

अथ यथेयं कौत्सायनिस्तुतिः—

त्वं च ब्रह्मा त्वं च वै विष्णुस्त्वं रुद्रस्त्वं प्रजापतिः।
त्वमग्निर्वरुणो वायुस्त्वमिन्द्रस्त्वं निशाकरः ॥ १ ॥
त्वं मनुस्त्वं यमश्च त्वं पृथिवी त्वमथाच्युतः।
स्वार्थे स्वाभाविकेऽर्थे च बहुधा तिष्ठसे दिवि ॥ २ ॥
विश्वेश्वर नमस्तुभ्यं विश्वात्मा विश्वकर्मकृत्।
विश्वमुग्विश्वमायस्त्वं विश्वक्रीडारतिः प्रभुः ॥ ३ ॥
नमः शान्तात्मने तुभ्यं नमो गुह्यतमाय च।
अचिन्त्यायाप्रमेयाय अनादिनिधनाय चेति ॥ ४ ॥ ४ ॥

अथ यथोपदिष्टार्थहेतुचित्तप्रसादसिद्धये चित्तात्मभगवदुपासनमुपदिश्यते —**अथेति**। **अथ यथेयं कौत्सायनिस्तुतिः** तदृषिकोऽयं मन्त्रग्रामः। हे भगवन् पुरुष **त्वं ब्रह्मा** चतुराननः **त्वं च विष्णुः त्वं रुद्रः** इत्यादेः प्रसिद्ध्यर्थत्वात् ॥ १ ॥ **स्वार्थे** ब्रह्ममात्रावशेषार्थे सांसारिकत्वेन **स्वाभाविके**

अर्थे च बहुधा तिष्ठसे ॥ २–३ ॥ **शान्तात्मने** स्वातिरिक्तशान्तवपुषे **नमः**। **इतिशब्दो** मन्त्रग्रामपरिसमाप्त्यर्थः ॥ ४ ॥ ४ ॥

उपाधिवशात् आत्मनो जगद्रूपत्वम्

तमो वा इदमेकमास तत् पश्चात्तत् परेणेरितं विषमत्वं प्रयात्येतद्वै रजसो रूपं तद्रजः खल्वीरितं विषमत्वं प्रयात्येतद्वै तमसो रूपं तत्तमः खल्वीरितं तमसः संप्रास्रवत्येतद्वै सत्त्वस्य रूपं तत् सत्त्वमेवेरितं तत् सत्त्वात् संप्रास्रवत् सोंऽशोऽयं यश्चेतनमात्रः प्रतिपुरुषं क्षेत्रज्ञः संकल्पाध्यवसायाभिमानलिङ्गः प्रजापतिस्तस्य प्रोक्ता अग्र्यास्तनवो ब्रह्मा रुद्रो विष्णुरित्यथ यो ह खलु वावास्य राजसोंशोऽसौ स योऽयं ब्रह्माऽथ यो ह खलु वावास्य तामसोंऽशोऽसौ स योऽयं रुद्रोऽथ यो ह खलु वावास्य सात्त्विकोंऽशोऽसौ स योऽयं विष्णुः स वा एष एकस्त्रिधाभूतोऽष्टधैकादशधा द्वादशधाऽपरिमितधा चोद्भूत उद्भूतत्वाद्भूतेषु चरति प्रतिष्ठा सर्वभूतानामधिपतिर्बभूवेत्यसावात्माऽन्तर्बहिश्चान्तर्बहिश्च ॥ ५ ॥

अथ प्रक्रमे **असौ** खलु वावैतस्यांशो यश्चेतनमात्र इत्युक्तम्। कथं पुनः निरंशस्य अंशसंभव इति? निरुपाधिकसोपाधिकाभ्यां उभयमपि संगच्छत इति प्रकटनाय इदमाम्नायते—**तम इति**। इदं कृत्स्नं कार्यजातं एकं अखण्डं **तमो वै** तम एव **आस** अवस्थितमभूत्। **तत्** तमः सर्गात् प्राक् **पश्चाच्च** तमसः **परेण** साक्षिणा **ईरितं** कार्योन्मुखीकृतं सत् **विषमत्वं** वैषम्यं **प्रयातीति** वर्तमानत्वप्रयोगः सनातनत्वद्योतकः। **एतद्वै** क्षीणतमस्कप्रकृतिस्वरूपमेव **रजसो रूपम्**। **तद्रजः** खलु **ईरितं विषमत्वं प्रयाति**। **एतद्वै** क्षीणतमोरजस्कं प्रकृतिस्वरूपमेव **सत्वस्य रूपं** तत्सत्वमेव **ईरितमभूत्**। ततो रजसः सत्वस्य सारांशो भूमलिङ्गारूपः संप्रास्रवत् निर्गतोऽभूत्। **सोऽयमंशो** विद्याकोशोपाधेः

ब्रह्मणः साक्षात्कार्यभूतत्वात् । कोऽयं तत्कारणभूतः इत्यत्र—**चेतनमात्रः** कूटस्थांशत्वात् **प्रतिपुरुषं क्षेत्रज्ञः सङ्कल्पाध्यवसायाभिमानलिङ्गः प्रजापतिरिति** व्याख्यातम् । **तस्य** भूमलिङ्गज्योतिर्मयस्य भगवतो **ब्रह्मा** स्वराट्, **रुद्रः** सम्राट्, **विष्णुः** विराट्, इत्येताः अग्रे ह वा **अस्याः तनवः** । कथमित्यत आह—**अथेति** । **अथ यो ह खलु वावास्य** भूमलिङ्गज्योतिषः **राजसोंऽशः असावेव स यः** प्रसिद्धोऽयं भगवान् **ब्रह्मा** चतुराननः । **अथ यो ह खलु वावास्य तामसोंऽशोऽसौ स योऽयं रुद्रोऽथ यो ह खलु वावास्य सात्विकोंऽशोऽसौ स योऽयं विष्णुः** । तत्र अन्तर्मध्यबहिःसत्वरजस्तमस्को ब्रह्मा ऊर्ध्वमध्याधःसत्वरजस्तमस्कः, अयं रुद्रः बहिर्मध्यान्तारजस्तमस्सत्वः तथा अधोमध्योर्ध्वेषु च, विष्णुः बहिर्मध्यान्तस्तमस्सत्वरजस्कः तथा अधोमध्योर्ध्वेषु चेति । **स वा एष** भूमलिङ्गज्योतिर्मयः कारणात्मा **एक एव सन्** उक्ततनुत्रयोपाधितः **त्रिधाभूतो** भवति । पश्चात् वसुरूपेण **अष्टधा** पश्चात् रुद्रादित्यरूपेण **एकादशधा द्वादशधा** च प्रागुक्तरीत्या अनन्तव्यष्टिसंसारिरूपेण **अपरिमितधा च उद्भूतः** । एवमुद्भूतत्वात् असावेव सर्वप्राण्यन्तर्बहिश्च **चरति** । **अतः सर्वभूतानां** अयमेव **प्रतिष्ठा** । एवं स एव **अधिपतिः** स्वामी **बभूव** । **असावात्मा** स्वाज्ञविकल्पितस्वाविद्यापदतत्कार्यारोपापवादाधिकरणतया **तदन्तर्बहिश्च** स्थितः, "अन्तर्बहिश्च तत् सर्वं व्याप्य नारायणः स्थितः" इति श्रुतेः । उपाधिनिमित्तोऽयं अंशांशिभावः, वस्तुतो निरंशं ब्रह्ममात्रमवशिष्यते । आवृत्तिः उपनिषत्समाप्त्यर्था ॥ ९ ॥

इति चतुर्थः प्रपाठकः

श्रीवासुदेवेन्द्रशिष्योपनिषद्ब्रह्मयोगिना ।
लिखितं स्याद्विवरणं प्रकृतोपनिषत्स्फुटम् ॥
मैत्रायणीविवरणग्रन्थसङ्ख्या निगद्यते ।
चतुश्चत्वारिंशदधिचतुःशतमुदीरिता ॥

इति श्रीमदीशाद्यष्टोत्तरशतोपनिषच्छास्त्रविवरणे चतुर्विंशतिसङ्ख्यापूरकं
मैत्रायणीयोपनिषद्विवरणं संपूर्णम्

वज्रसूचिकोपनिषत्

आप्यायन्तु—इति शान्तिः

वज्रसूचीप्रस्तावः

वज्र[1]सूचीं प्रवक्ष्यामि शास्त्रमज्ञानभेदनम् ।
दूषणं ज्ञानहीनानां भूषणं ज्ञानचक्षुषाम् ॥ १ ॥

यज्ज्ञानाद्यान्ति मुनयो ब्राह्मण्यं परमाद्भुतम् ।
तत्त्वैपदब्रह्मतत्त्वमहमस्मीति चिन्तये ॥

इह खलु सामवेदप्रविभक्तेयं वज्रसूचिकोपनिषत् ब्राह्मण्यनिर्धारणच्छलेन निर्विशेषब्रह्ममात्रपर्यवसानार्थप्रकाशकतया प्रवृत्ता । तस्याः स्वल्पग्रन्थतो विवरणमारभ्यते—वज्रसूचीमिति ॥ १ ॥

को वा ब्राह्मणो नाम

[2]ब्रह्मक्षत्रियवैश्यशूद्रा इति चत्वारो वर्णास्तेषां वर्णानां ब्राह्मण एव प्रधान इति वेदवचनानुरूपं स्मृतिभिरप्युक्तम् । तत्र चोद्यमस्ति को वा ब्राह्मणो नाम किं जीवः किं देहः किं जातिः किं ज्ञानं किं कर्म किं [3]धार्मिक इति ॥ २ ॥

[1] सूचिं—अ.
[2] ब्राह्मण—अ.
[3] धार्मिकं किं वर्णः, किं पाण्डित्यं इत्यष्टौ प्रश्नाः—अ.

इत्थं प्रतिज्ञाय प्रतिज्ञातार्थं प्रकटयति—ब्रह्मेति । ब्रह्मणा सृष्टचातुर्वर्ण्ये "ब्राह्मणोऽस्य मुखमासीत्" इति, "मुखदेशात् द्विजो जज्ञे क्षत्रियो बाहुदेशतः" इति च, श्रुतिस्मृत्यनुरोधेन ब्राह्मणजातेः प्राधान्यमुक्तं ब्रह्ममात्रज्ञानप्रशंसार्थम् । तत्र चोद्यमस्तीति विकल्पोक्तिः । जीवदेहादिषट्प्रकारेषु को वा स्वाभिमतब्राह्मणपदमर्हतीति विकल्पयति—क इति ॥ २ ॥

न जीवो ब्राह्मणः

तत्र प्रथमो जीवो ब्राह्मण इति चेत्तन्न । अतीतानाग[1]तानेकदेहानां जीवस्यैकरूपत्वात् एकस्यापि कर्मवशादनेकदेहसंभवात् सर्वशरीराणां जीवस्यैकरूपत्वाच्च । तस्मान्न जीवो ब्राह्मण इति ॥३॥

तत्र आद्यविकल्पो जीवो ब्राह्मण्यमर्हतीत्याशङ्क्य तत्पक्षं शिथिलयति—तत्रेति । तत् कथमित्यत्र हेतुत्रयेण जीवस्य ब्राह्मण्यं निराकरोति—अतीतेति । भूतादिकालपरिच्छिन्नदेहानां नानाजातिभवानां नानात्वेऽपि तदारोपाधिकरणजीवस्यैकरूपत्वात् । शिष्टं स्पष्टम् । यस्मात् एवं तस्मात् ॥ ३ ॥

न देहो ब्राह्मणः

तर्हि देहो ब्राह्मण इति चेत्तन्न । आचाण्डालादिपर्यन्तानां मनुष्याणां [2]पाञ्चभौतिकत्वेन देहस्यैकरूपत्वात् जरामरणधर्माधर्मादिसाम्यदर्शनात् । [3]ब्राह्मणः श्वेतवर्णः क्षत्रियो रक्तवर्णो वैश्यः पीतवर्णः शूद्रः कृष्णवर्ण इति नियमाभावात् पित्रादिशरीरदहने पुत्रादीनां ब्रह्महत्यादिदोषसंभवाच्च । तस्मान्न देहो ब्राह्मण इति ॥४॥

[1] तदे—उ. तवर्तमानाने—अ.
[2] पशुपक्षिकिमिकीटपतङ्गादीनां पा—अ.
[3] तर्हि वर्णो ब्राह्मण इति चेन्न, ब्रा—अ.

जीवस्य ब्राह्मण्याभावेऽपि जीवाधिष्ठेयदेहस्य ब्राह्मण्यं स्यादित्याशङ्क्य हेतुचतुष्टयेन देहस्य ब्राह्मण्याभावमाचष्टे—तर्हीति ॥ ४ ॥

न जातिर्ब्राह्मणः

तर्हि जातिर्ब्राह्मण इति चेत्तन्न । तत्र जात्यन्त[1]रजन्तुष्वनेकजातिसंभवात् । महर्षयो बहवः सन्ति । ऋष्यशृङ्गो [2]मृग्यः, कौशिकः कुशात्, जाम्बूको जम्बूकात्, वाल्मीको वल्मीकात्, व्यासः कैवर्त[3]कन्यकायाम्, शशपृष्ठात् गौतमः, वसिष्ठ [4]उर्वश्याम्, [5]अगस्त्यः कलशे जात इति श्रुतत्वात् । एतेषां जात्या विनाऽप्य[6]ग्रे ज्ञानप्रतिपादिता ऋषयो बहवः सन्ति । तस्मा[7]न्न जातिर्ब्राह्मण इति ॥ ५ ॥

जीवदेहयोः ब्राह्मण्यासम्भवेऽपि जातेः ब्राह्मण्यं स्यादित्याशङ्क्य नियमाभावादिति हेतुना ब्राह्मण्याभावं व्यक्तीकरोति—तर्हीति ॥ ५ ॥

न ज्ञानं ब्राह्मणः

तर्हि ज्ञानं ब्राह्मण इति चेत्तन्न । क्षत्रियादयोऽपि परमार्थदर्शिनोऽभिज्ञा बहवः सन्ति । तस्मान्न ज्ञानं ब्राह्मण इति ॥ ६ ॥

जातेः ब्राह्मण्याभावेऽपि ज्ञानस्य ब्राह्मणत्वं स्यादित्याशङ्क्य क्षत्रियादेरपि ज्ञानसम्भवादिति हेतुना ज्ञानस्यापि ब्राह्मण्याभावमाह—तर्हीति ॥ ६ ॥

[1] रेष्व—अ २, क. [2] मृग्याः—क.
[3] कन्यायाः—अ. कन्यायां—अ १, अ २, क.
[4] ऊ—अ, क. ऊर्वश्याः—अ.
[5] 'विश्वामित्रः क्षत्रियः, नारदो दासीपुत्रः', इत्यधिकः—अ.
[6] न्ये—अ १. [7] च न—अ.

न कर्म ब्राह्मणः

तर्हि कर्म ब्राह्मण इति चेत्तन्न । सर्वेषां प्राणिनां प्रारब्ध-संचितागामिकर्मसाधर्म्यदर्शनात् कर्माभिप्रेरिताः सन्तो जनाः क्रियाः कुर्वन्तीति । तस्मान्न कर्म ब्राह्मण इति ॥ ७ ॥

"कर्मणा जायते द्विजः" इति स्मृत्यनुरोधेन कर्मैव ब्राह्मणः स्यादित्या-शङ्क्य तत्प्राणिसामान्यसाधारणहेतुना ब्राह्मण्याभावं प्रकटयति—तर्हीति ॥ ७ ॥

न धार्मिको ब्राह्मणः

तर्हि धार्मिको ब्राह्मण इति चेत्तन्न । क्षत्रियादयो हिरण्य-दातारो बहवः सन्ति । तस्मान्न धार्मिको ब्राह्मण इति ॥ ८ ॥

अद्वितीयात्मसाक्षात्कारवानेव ब्राह्मणः

[1]तर्हि को वा ब्राह्मणो [2]नाम । यः कश्चिदात्मानमद्वितीयं जातिगुणक्रियाहीनं षड्ऊर्मिषड्भावेत्यादिसर्वदोषरहितं सत्यज्ञानानन्दा-नन्तस्वरूपं स्वयं निर्विकल्पमशेष[3]कल्पाधारमशेषभूतान्तर्यामित्वेन वर्तमानमन्तर्बहिश्चाकाशवदनुस्यूतमखण्डानन्दस्वभावमप्रमेयमनुभवै -कवेद्यमपरोक्षतया भासमानं करतलामलकवत् साक्षादपरोक्षीकृत्य कृतार्थतया कामरागादिदोषरहितः शमदमादि[4]संपन्नो [5]भावमात्सर्य-तृष्णाऽऽशामोहादिरहितो दम्भाहंकारादिभिरसंस्पृ[6]ष्टचेता वर्तत एव-

[1] "तर्हि पाण्डित्यं ब्राह्मण इति चेत्तन्न, क्षत्रियादयोऽपि पण्डिता बहवः सन्ति, तस्मान्न पाण्डित्यं ब्राह्मण इति" इत्यधिकः—अ.

[2] नाम भवति—उ, उ १.

[3] विकल्पा—अ.

[4] साधनसं—उ.

[5] लोभमदमा—अ, अ १.

[6] ष्टो वेत्ता—अ, अ १.

मुक्तलक्षणो यः स एव ब्राह्मण इति श्रुतिस्मृतिपुराणेतिहासानामभिप्रायः । अन्यथा हि ब्राह्मणत्वसिद्धिर्नास्त्येव । सच्चिदानन्दमात्मानमद्वितीयं ब्रह्म भावयेदात्मानं सच्चिदानन्दं ब्रह्म भावयेदित्युपनिषत् ॥ ९ ॥

तर्हि को वा ब्राह्मणो नाम भवति इत्याशङ्क्य स्वातिरिक्तसर्वापह्नवसिद्धं ब्रह्म निष्प्रतियोगिकस्वमात्रमिति यः कोऽपि वा जानाति स एव ब्राह्मणो नेतर इत्याह—यः कश्चिदिति । ब्रह्मादिस्तम्बान्तभूतेषु यः कश्चित् पुमान् स्वान्तस्थपराक्करणग्रामप्रातिलोम्येन भासमानं प्रत्यञ्चं आत्मानं स्वातिरिक्तकरणग्रामाभावात् अद्वितीयं यत्र गोत्वादिजातिः शुक्लत्वादिगुणः पाकादिक्रिया च न विद्यते तं जातिगुणक्रियाहीनं अशनायादिः षड्भिः जायते अस्तीत्यादिषड्भावविकारः आदिशब्देन कामाद्यरिषड्वर्गत्वगादिषट्कोशादयो गृह्यन्ते । एवमादिसर्वदोषरहितं सत्यज्ञानानन्दानन्तस्वरूपं असत्याज्ञानदुःखपरिच्छेदत्रयवैरळ्यात् स्वयं निर्विकल्पं सर्वविकल्पासहत्वात् अशेषकल्पाधारं सर्वाधारत्वात् ईश्वरात्मना अशेषभूतान्तर्यामित्वेन वर्तमानं " एष त आत्मा सर्वान्तरः " इत्यादिश्रुतेः प्रत्यगभिन्नब्रह्मात्मना अन्तर्बहिश्चाकाशवदनुस्यूतं स्वव्याप्यान्तर्बाह्यापह्नवात् निष्प्रतियोगिकाखण्डानन्दस्वभावं स्वमात्रमिति विना प्रमातुमशक्यत्वात् अप्रमेयं स्वानुभवैकवेद्यं अपरोक्षतया भासमानं ब्रह्मात्मानं करतलविन्यस्तामलकवत् साक्षादपरोक्षीकृत्य कृतार्थतया यो वर्तते तस्य प्रकृतिं विशिनष्टि — कामेति। कामसङ्कल्परागद्वेषादिदोषरहितः शमदमादिसम्पन्नः। भावः षड्भावः। मात्सर्यग्रहणमरिषड्वर्गोपलक्षणार्थम्। अलब्धव्येच्छा तृष्णा, आशा तु लब्धव्येच्छा । स्वभावतः इत्यादिमहामोहरहितः । दम्भाहङ्कारममकारादिभिः असंस्पृष्टचेताः । एवमुक्तलक्षणो यः स एव ब्राह्मणः इति । " एतं वै तमात्मानं विदित्वा ब्राह्मणाः पुत्रैषणायाश्च," इत्यारभ्य, " स ब्राह्मणः " इत्यन्तं, " य एतदक्षरं गार्गि विदित्वा अस्मात् लोकात् प्रैति स ब्राह्मणः " " एष नित्यो महिमा ब्राह्मणस्य " इत्यारभ्य " शान्तो दान्त उपरतस्तितिक्षुः समाहितो भूत्वा आत्मन्येवात्मानं पश्यति " इत्यन्तम्,

"शिखा ज्ञानमयी यस्य उपवीतं च तन्मयम् ।
ब्राह्मण्यं सकलं तस्य इति ब्रह्मविदो विदुः ॥

इत्यादि,

ये स्वात्महितमिच्छन्ति तैः पूज्योऽयं द्विजोत्तमः । इत्यादि,
मोक्षमिच्छसि चेद्राजन् ब्राह्मणान् भज सन्ततम् । इति,
ब्राह्मणान् भर कौन्तेय पुनश्च ब्राह्मणान् भर ।

इत्यादिश्रुतिस्मृतिपुराणेतिहासानां परमोऽयमभिप्रायः । अन्यथा एतद्विपर्यये **ब्राह्मणत्वसिद्धिः नास्त्येव** । यस्मादेवं श्रुतिस्मृत्यादिप्रकटितेयं ब्राह्मण्यसिद्धिः तस्मात् द्विजातिसंस्काराल्लङ्कृतः सन् ब्रह्म जानाति इति ब्राह्मणो भूत्वा स्वातिरिक्तानृतजडदुःखप्रपञ्चापह्नवसिद्धं **सच्चिदानन्दमात्मानमद्वितीयं** निष्प्रतियोगिक-**ब्रह्ममात्रं भावयेदात्मानं सच्चिदानन्दमद्वितीयं ब्रह्म भावयेदिति** । द्विरुक्तिरादरार्था ॥

अत्रैतद्विचार्यते । यः कश्चिदात्मानं ब्रह्मेति वेद स वै ब्राह्मण इत्युक्तम् । तत्र ब्रह्म जानातीति ब्राह्मण इत्युक्तिः ज्ञानस्तुत्यर्था । वस्तुतो न हि सर्वेषां निर्विशेष-ब्रह्मवेदनमात्रतो ब्रह्मवित्त्वं विना ब्राह्मणत्वमस्ति मुख्यब्राह्मणशब्दस्य परिव्राजकवाचित्वात्, "एतं वै तमात्मानं विदित्वा ब्राह्मणाः (पुत्राद्येषणात्रयतो) व्युत्थाय भिक्षाचर्यं चरन्ति ।" "यो वा एतदक्षरं गार्गि विदित्वा अस्मात् लोकात् प्रैति (कर्मसामान्यं त्यजति) स ब्राह्मणः" इति च त्यजामेव मुख्य-ब्राह्मणशब्दप्रयोगो दृश्यते । न हि द्विजेतरेषां ब्राह्मणत्वहेतुपारिव्राज्यमस्ति । किञ्च—कामरागादिदोषरहितः शमदमादिसम्पन्नः शान्तो दान्त इत्यादिविशेषण-पूगस्तु न हि द्विजेतरेषु समग्रो भवति, द्विजानां सोपरतिशमप्रकृतिकत्वात् । तथा च सर्वज्ञगौडपादाचार्यैरुक्तम्—

विप्राणां विनयो ह्येष शमः प्राकृत उच्यते ।
दमः प्रकृतिदान्तत्वादेवं विद्वान् शमं व्रजेत् ॥ इति ॥

अतो द्विजातिसंस्काराल्लङ्कृतस्य केवलस्य गौणब्राह्मणत्वं, तस्यैव त्यक्पदं प्रपन्नस्य सर्वापह्नवसिद्धब्रह्ममात्रज्ञानतो मुख्यब्राह्मणत्वम् । मुचुकुन्दं

प्रति भगवानेवमाह—"भूत्वा द्विजवरस्त्वं वै मामुपैष्यसि केवलम्" इति। क्षत्रियादीनां ब्रह्मज्ञानतो ब्रह्मवित्त्वं द्विजत्वे सति ब्रह्मविदां मुख्यब्राह्मणत्वं सिद्धमित्यवधृतम्॥

इत्युपनिषच्छब्दः प्रकरणसमाप्त्यर्थः॥ ९॥

श्रीवासुदेवेन्द्रशिष्योपनिषद्ब्रह्मयोगिना।
वज्रसूच्याख्योपनिषद्व्याख्येयं लिखिता स्फुटम्।
प्रकृतोपनिषद्व्याख्याग्रन्थोऽशीतिपदं गतः॥

इति श्रीमदीशाद्यष्टोत्तरशतोपनिषच्छास्त्रविवरणे षट्त्रिंशत्सङ्ख्यापूरकं
वज्रसूचिकोपनिषद्विवरणं सम्पूर्णम्

शारीरकोपनिषत्

सह नाववतु—इति शान्तिः

पञ्चभूतात्मकं शरीरम्

अथातः पृथिव्यादिमहाभूतानां समवायं शरीरम्। यत् कठिनं सा पृथिवी यद्द्रवं तदापो यदुष्णं तत्तेजो यत् संचरति स वायुर्यत् सुषिरं तदाकाशम् ॥ १ ॥

तत्त्वग्रामोपायसिद्धं परतत्त्वस्वरूपकम्।
शारीरोपनिषद्वेद्यं श्रीरामब्रह्म मे गतिः ॥

इह खलु कृष्णयजुर्वेदप्रविभक्तेयं शारीरकोपनिषत् चतुर्विंशतितत्त्वेयत्ता-प्रकटनपूर्वकं स्वातिरिक्ततत्त्वग्रामासंभवप्रबोधसिद्धब्रह्ममात्रपर्यवसन्ना विजृंभते। अस्याः श्रुतेः संक्षेपतो विवरणमारभ्यते। यथोक्ताधिकारिण उपलभ्य श्रुतिरादौ शरीरेयत्तां प्रकाशयति—**अथेति**। **अथ** यथोक्ताधिकारिलाभानन्तरं तस्य परमार्थोपदेशः कर्तव्यः। परमार्थवस्तु ब्रह्ममात्रं, तत्सिद्धेः तदतिरिक्तापह्नवपूर्वकत्वात्, यतः तदियत्तापरिज्ञानं विना न हि तदपह्नोतुं शक्यं, **अतः** तदियत्ताप्रपञ्चनं न्याय्यमिति। **पृथिव्यादि**पञ्चभूतोपादानं **शरीर**मित्यर्थः। कथं तत्पञ्चभूतोपादानं शरीरमित्यत्र विभागशः तन्निदर्शयति—**यदिति**। शरीरे **यत् कठिनम्** ॥ १ ॥

ज्ञानेन्द्रियतद्विषयाणां भौतिकत्वम्

श्रोत्रादीनि ज्ञानेन्द्रियाणि। श्रोत्रमाकाशे वायौ त्वगग्नौ चक्षुरप्सु जिह्वा पृथिव्यां घ्राणमिति। एवमिन्द्रियाणां यथाक्रमेण शब्दस्पर्शरूपरसगन्धाश्चैते विषयाः पृथिव्यादिमहाभूतेषु क्रमेणोत्पन्नाः ॥ २ ॥

करणेष्वपि भूतविभाग उच्यते। श्रोत्रादीनि ज्ञानेन्द्रियाणि। तत्र श्रोत्रं आकाशे ॥ २–३ ॥

कर्मेन्द्रियतद्विषयाणां भौतिकत्वम्

वाक्पाणिपादपायूपस्थाख्यानि कर्मेन्द्रियाणि। तेषां क्रमेण वचनादानगमनविसर्गानन्दाश्चैते विषयाः पृथिव्यादिमहाभूतेषु क्रमेणोत्पन्नाः ॥ ३ ॥

अन्तःकरणचतुष्टयम्

मनोबुद्धिरहंकारश्चित्तमित्यन्तःकरणचतुष्टयम्। तेषां क्रमेण संकल्पविकल्पाध्यवसायाभिमानावधारणास्वरूपाश्चैते विषयाः। मनःस्थानं गलान्तं बुद्धेर्वदनमहंकारस्य हृदयं चित्तस्य नाभिरिति ॥ ४ ॥

मनआदेः गोळकस्थानं निर्दिशति—मनःस्थानमिति ॥ ४ ॥

शरीरावयवानां भौतिकत्वप्रपञ्चनम्

अस्थिचर्मनाडीरोममांसाश्चेति पृथिव्यंशाः। मूत्रश्लेष्मरक्तशुक्रस्वेदा अबंशाः। क्षुत्तृष्णाऽऽलस्यमोहमैथुनान्यग्नेः। प्रचारण-

विलेखनस्थूलाक्ष्युन्मेषनिमेषादि वायोः । कामक्रोधलोभमोहभयान्याकाश[1]स्य ॥ ९ ॥

"यत् कठिनं सा पृथिवी" इति शरीरे सङ्क्षेपतः पृथिव्यादिभूतविकृतिरुक्ता, इदानीं तदेव विस्तरेण प्रपञ्चयति—अस्थीति ॥ ९ ॥

भूतगुणाः

शब्दस्पर्शरूपरसगन्धाः पृथिवीगुणाः । शब्दस्पर्शरूपरसाश्चापां गुणाः । शब्दस्पर्शरूपाण्यग्निगुणाः । शब्दस्पर्शाविति वायुगुणौ । शब्द एक आकाशस्य ॥ ६ ॥

पूर्वपूर्वपृथिव्यादिकार्यापेक्षया उत्तरोत्तरस्य गुणापकर्षमाचष्टे—शब्देति॥६॥

सत्वादिगुणत्रयकार्याणि

सात्त्विकराजसतामसलक्षणानि त्रयो गुणाः ॥ ७ ॥
अहिंसा सत्यमस्तेयब्रह्मचर्यापरिग्रहाः ।
अक्रोधो गुरुशुश्रूषा शौचं संतोष आर्जवम् ॥ ८ ॥
अमानित्वमदम्भित्वमास्तिक्त्वमहिंसता ।
एते सर्वे गुणा ज्ञेयाः सात्विकस्य विशेषतः ॥ ९ ॥
अहं कर्ताऽस्म्यहं भोक्ताऽस्म्यहं वक्ताऽभिमानवान् ।
एते गुणा राजसस्य प्रोच्यन्ते ब्रह्मवित्तमैः ॥ १० ॥
निद्राऽऽलस्ये मोहरागौ मैथुनं चौर्यमेव च ।
एते गुणास्तामसस्य प्रोच्यन्ते ब्रह्मवादिभिः ॥ ११ ॥

[1] स्यांशाः—अ २.

ऊर्ध्वे सात्त्विको मध्ये राजसोऽधस्तामस इति ॥ १२ ॥ सम्यज्ज्ञानं सात्विकम् । धर्मज्ञानं राजसम् । तिमिरान्धं तामसमिति ॥ १३ ॥

सत्त्वादिभेदेन गुणानां त्रैविध्यमाह—**सात्त्विके**ति ॥ ७ ॥ तत्र सात्विककार्याण्याह—**अहिंसे**ति । अहिंसाद्वयशब्दार्थस्तु—आद्यस्तु प्राण्यहिंसा, द्वितीयस्तु यथावत् आत्मानवलोकनं, देहादावात्मबुद्धेः आत्महिंसारूपत्वात्,

अखण्डमात्मचैतन्यं देहादित्वेन खण्डनम् ।
आत्महिंसनमाख्यातं तन्न कुर्यात् कदाचन ॥

इति स्मृतेः ॥ ८–९ ॥ राजसकार्याण्याह—**अहमि**ति ॥ १० ॥ तामसकार्याण्याह—**निद्रे**ति ॥ ११ ॥ सत्त्वादय ऊर्ध्वादिलोकप्रापका इत्याह—**ऊर्ध्व इति** । अत्र

ऊर्ध्वं गच्छन्ति सत्त्वस्था मध्ये तिष्ठन्ति राजसाः ।
जघन्यगुणवृत्तिस्था अधो गच्छन्ति तामसाः ॥

इति स्मृतेः ॥ १२ ॥ सत्त्वादिकार्यं ज्ञानादिकमित्याह—**सम्यगि**ति । "सत्त्वात् सञ्जायते ज्ञानं" इत्यादि स्मृतेः ॥ १३ ॥

अवस्थाचतुष्टयम्

जाग्रत्स्वप्नसुषुप्तितुरीयमिति चतुर्विधा अवस्थाः । ज्ञानेन्द्रियकर्मेन्द्रियान्तःकरणचतुष्टयं चतुर्दशकरणयुक्तं जाग्रत् । अन्तःकरणचतुष्टयैरेवं संयुक्तः स्वप्नः । चित्तैककरणा सुषुप्तिः । केवलजीवसंयुक्तमेव तुरीयमिति ॥ १४ ॥

व्यष्ट्यादिप्रपञ्चारोपापवादाधारविश्वादिनिर्वर्त्यजाग्रदाद्यवस्थाचतुष्टयस्वरूपमाह—**जाग्रदि**ति । तत्र जाग्रदादिस्वरूपमाह—**ज्ञाने**ति । तत्र व्यवहृतेः स्फुट-

त्वात् । अन्तःकरणचतुष्टयैरेव चतुष्टयेनैव संयुक्तः स्वप्नः, तत्रत्यव्यवहृतेरस्फुटत्वात् । चित्तैककरणा सुषुप्तिः, विषयाभावेपि " सुखमहमस्वाप्सं " इति स्मृतिमात्रपर्यवसन्नत्वात् । केवलजीवसंयुक्तमेव तुरीयमिति केवलजीवस्तुरीय इत्यर्थः ॥ १४ ॥

क्षेत्रज्ञस्वरूपम्

उन्मीलितनिमीलितमध्यस्थजीवपरमात्मनोर्मध्ये जीवात्मा क्षेत्रज्ञ इति विज्ञायते ॥ १५ ॥

क्षेत्रज्ञस्वरूपमाह—उन्मीलितेति । स्वातिरिक्तविषये उन्मीलितदृष्टिः अविद्या, तत्र निमीलितदृष्टिः विद्या, तन्मध्यस्थितौ जीवात्मपरमात्मानौ, तयोर्मध्ये जीवात्मा क्षेत्रज्ञः तत्रात्मात्मीयाभिमतिदर्शनात् ॥ १५ ॥

क्षेत्रस्वरूपम्

बुद्धिकर्मेन्द्रियप्राणपञ्चकैर्मनसा धिया ।
शरीरं सप्तदशभिःसूक्ष्मं तल्लिङ्गमुच्यते ॥ १६ ॥
मनो बुद्धिरहंकारः खानिलाग्निजलानि भूः ।
एताः प्रकृतयस्त्वष्टौ विकाराः षोडशापरे ॥ १७ ॥
श्रोत्रं त्वक्चक्षुषी जिह्वा घ्राणं चैव तु पञ्चमम् ।
पायूपस्थौ करौ पादौ वाक्चैव दशमी मता ॥ १८ ॥
शब्दः स्पर्शश्च रूपं च रसो गन्धस्तथैव च ।
त्रयोविंशतिरेतानि तत्त्वानि प्र[प्रा]कृतानि तु ॥ १९ ॥

तद्विषयभूतं क्षेत्रं किमित्यत्र लिङ्गमित्याह—बुद्धीति ॥ १६ ॥ तत्तदभिधानपूर्वकं चतुर्विंशतितत्त्वानि दर्शयति—मन इति ॥ १७ ॥ के प्रकृत्यष्टकविकारा इत्यत्र—श्रोत्रमिति ॥ १८-१९ ॥

प्रकृतिपुरुषौ

चतुर्विंशतिरव्यक्तं प्रधानं पुरुषः परः ॥ इत्युपनिषत् ॥ २० ॥

अव्यक्तं प्रधानं, अव्यक्तस्य सर्वानर्थकल्पनाप्रधानत्वात् । एतत्तत्त्वग्रामं स्वेन रूपेण पूरयतीति **पुरुषः** परमात्मा स्वपूर्यसापेक्षपूरकताऽपाये स एव **परो** निष्प्रतियोगिकस्वमात्रमवशिष्यत इत्यर्थः । **इत्युपनिषच्छब्दः** प्रकृतोपनिषत्-समाप्त्यर्थः ॥ २० ॥

श्रीवासुदेवेन्द्रशिष्योपनिषद्ब्रह्मयोगिना ।
शारीरकोपनिषदो व्याख्यानं लिखितं लघु ।
शारीरविवृतिग्रन्थः चत्वारिंशदितीरितः ॥

इति श्रीमदीशाद्यष्टोत्तरशतोपनिषच्छास्त्रविवरणे द्विषष्टिसङ्ख्यापूरकं
शारीरकोपनिषद्विवरणं सम्पूर्णम्

शुकरहस्योपनिषत्

सह नाववतु—इति शान्तिः

रहस्योपनिषत्प्रस्तावः

अथातो रहस्योपनिषदं व्याख्यास्यामः ॥ १ ॥ देवर्षयो ब्रह्माणं संपूज्य प्रणिपत्य पप्रच्छुर्भगवन्नस्माकं रहस्योपनिषदं ब्रूहीति ॥ २ ॥

प्रज्ञानादिमहावाक्यरहस्यार्थकळेबरम् ।
विकळेबरनिर्वाणत्रिपाद्रामपदं भजे ॥

इह खलु कृष्णयजुर्वेदप्रविभक्तेयं शुकरहस्योपनिषत् प्रणवमहावाक्यार्थ-प्रकाशकतया निर्विशेषब्रह्ममात्रपर्यवसन्ना प्रसक्तप्रत्यक्परयो रैक्यप्रबोधिनी विजृम्भते । अस्या उपोद्घातादि कठवल्लीवत् ऊह्यम् । अस्याः शुकरहस्योपनिषदः सङ्क्षेपतो विवरणमारभ्यते । वक्ष्यमाणाख्यायिकाद्वयमपि विद्यास्तुत्यर्थम् । अत्रादौ यथोक्तसाधनसम्पन्नानुद्दिश्याख्यायिकाद्वयप्रकटनपूर्वकं रहस्यार्थं श्रुतिः प्रकाशयति—अथेति । अथ यथोक्ताधिकारिलाभानन्तरं सर्वश्रुतयो मिळित्वा यतः स्वाज्ञानेन संसारभ्रम उदेति स्वज्ञानादस्तं गच्छति अतः सर्वेषां स्वातिरिक्त-भ्रमनिरसनाय सर्वोपनिषदामपि रहस्योपनिषदं यथा सकृच्छ्रवणतः स्वाज्ञलोकाः कृतकृत्या भवेयुः तथा विस्पष्टमाख्यास्याम इति-प्रतिज्ञापूर्वकं भाव्याख्यायि-

काद्वयमवतारयति ॥ १ ॥ केयमाख्यायिकेत्यत आह—देवेति । पप्रच्छुः—किमिति? भगवन्निति ॥ २ ॥

शुकाय शिवकृतप्रणवब्रह्मोपदेशः

सोऽब्रवीत्—

पुरा व्यासो महातेजाः सर्ववेदतपोनिधिः ।
प्रणिपत्य शिवं साम्बं कृताञ्जलिरुवाच ह ॥ ३ ॥

श्रीवेदव्यास उवाच—

देवदेव महाप्राज्ञ पाशच्छेददृढव्रत ।
शुकस्य मम पुत्रस्य वेदसंस्कारकर्मणि ॥ ४ ॥
ब्रह्मोपदेशकालोऽयमिदानीं समुपस्थितः ।
ब्रह्मोपदेशः कर्तव्यो भवताऽद्य जगद्गुरो ॥ ५ ॥

ईश्वर उवाच—

मयोपदिष्टे कैवल्ये साक्षाद्ब्रह्मणि शाश्वते ।
विहाय पुत्रो निर्वेदात् प्रकाशं यास्यति स्वयम् ॥ ६ ॥

श्रीवेदव्यास उवाच—

यथा तथा वा भवतु ह्युपनायनकर्मणि ।
उपदिष्टे मम सुते ब्रह्मणि त्वत्प्रसादतः ॥ ७ ॥
[1]सर्वज्ञो भवतु क्षिप्रं मम पुत्रो महेश्वर ।
तव प्रसादसंपन्नो लभेन्मुक्तिं चतुर्विधाम् ॥ ८ ॥

[1] अयं श्लोको नास्ति—उ,

तच्छ्रुत्वा व्यासवचनं सर्वदेवर्षिसंसदि ।
उपदेष्टुं स्थितः शम्भुः साम्बो दिव्यासने मुदा ॥ ९ ॥
कृतकृत्यः शुकस्तत्र समागम्य सुभक्तिमान् ।
तस्मात् स प्रणवं लब्ध्वा [1]पुनरेत्याब्रवीच्छिवम् ॥ १० ॥

तथेति तेषां प्रश्नमङ्गीकृत्य तत्पृष्टार्थे पुरावृत्तमितिहासं **सोऽयं ब्रह्मा-ऽब्रवीदि**त्याह—**पुरे**ति ॥ ३ ॥ किं तत् इत्याकाङ्क्षायां मत्पुत्रस्य भवता ब्रह्मोपदेशः कर्तव्यः इत्याह—**देवे**ति । ये मां सकृत् भजन्ति तेषां स्वमात्रात् च्युतिहेतुस्वातिरिक्तास्तितापाशं छेदयामीति दृढं व्रतं यस्य तस्य सम्बुद्धिः ॥४–५॥ एवं व्यासेन प्रार्थित **ईश्वर उवाच** । किमिति? **मये**ति । **मया** निरावृतेश्वरेण **साक्षात्** मद्याथात्म्यस्वरूपावस्थानलक्षणे शाश्वते कैवल्ये **ब्रह्मणि उपदिष्टे** सति मदुपदेशसमकालं त्वत्पुत्रः स्वातिरिक्तवस्तुसामान्यनिर्वेदात् तीव्रतमवैराग्यात् स्वातिरिक्तास्तिताभ्रमं **विहाय** अपह्नवं कृत्वा तदपह्नवसिद्धं ब्रह्ममात्रप्रकाशं **स्वयं** स्वावशेषधिया **यास्यति** ॥ ६ ॥ एवं ईश्वरसूक्तिमवगम्य **श्रीवेदव्यास उवाच** । किमिति? **यथे**ति । परे **ब्रह्मणि** अभेदमापन्नेन भवता मम **सुते** साक्षात् **उपदिष्टे** सति अयं **त्वत्प्रसादतः** कृतकृत्यो भवेत् । तस्मात् भवान् तदुपनायनकर्मणि प्रार्थितः त्वदुपदेशानन्तरं अयं शुकः **यथा तथा वा भवतु** संसरतु परिव्रजतु वेत्यर्थः ॥ ७–८ ॥ एवं व्यासवचनमाकर्ण्य शुकस्य ब्रह्मविद्यामुपदेष्टुमीश्वरः सन्नद्धो भवतीति श्रुतिराह—**तदि**ति ॥ ९ ॥ ततः किमित्यत आह—**कृतकृत्य इति** । शुकस्तु जातमात्रेण परमेश्वरानन्यभक्तिमान् विदितवेद्यतया **कृतकृत्योऽपि** पारमहंस्यधर्मानुकम्पया "तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत् समित्पाणिः" इति श्रुत्यनुरोधेन **तत्र** शिवपदसमीपे यथाविधि समागम्य **तस्मात्** प्रणिपातादिना प्रसन्नपरमेश्वरसकाशात् **सोऽयमादौ** तुर्यतुर्यगोचरब्रह्मप्रणवं **लब्ध्वा** दक्षिणामूर्ति-मुखतो यथासम्प्रदायमवगम्य महावाक्योपदेशबुभुत्सया **पुनः शिवमेत्या-ब्रवीत्** ॥ १० ॥

[1] पुनरित्य—उ. पुनरे—अ १, क, उ १.

रहस्योपनिषन्महिमा

श्रीशुक उवाच—

देवादिदेव सर्वज्ञ सच्चिदानन्दलक्षण ।
उमारमण भूतेश प्रसीद करुणानिधे ॥ ११ ॥
उपदिष्टं परं ब्रह्म प्रणवान्तर्गतं परम् ।
तत्त्वमस्यादिवाक्यानां प्रज्ञाऽऽदीनां विशेषतः ॥ १२ ॥
श्रोतुमिच्छामि तत्त्वेन षडङ्गेन यथाक्रमम् ।
वक्तव्यानि रहस्यानि कृपयाऽद्य सदाशिव ॥ १३ ॥

श्रीसदाशिव उवाच—

साधु साधु महाप्राज्ञ शुक ज्ञाननिधे सुनें ।
प्रष्टव्यं तु त्वया पृष्टं रहस्यं वेदगर्भितम् ॥ १४ ॥
रहस्योपनिषन्नाम्ना सषडङ्गमिहोच्यते ।
यस्य विज्ञानमात्रेण मोक्षः साक्षान्न संशयः ॥ १५ ॥
अङ्गहीनानि वाक्यानि गुरुर्नोपदिशेत् पुनः ।
सषडङ्गान्युपदिशेन्महावाक्यानि कृत्स्नशः ॥ १६ ॥
चतुर्णामपि वेदानां यथोपनिषदःशिरः ।
इयं रहस्योपनिषत्तथोपनिषदां शिरः ॥ १७ ॥
रहस्योपनिषद्ब्रह्म ध्यातं येन विपश्चिता ।
तीर्थैर्व्रतैः श्रुतैर्जप्यैस्तस्य किं पुण्यहेतुभिः ॥ १८ ॥
वाक्यार्थस्य विचारेण यदाप्नोति शरच्छतम् ।
एकवारजपेनैव ऋष्यादिन्यासतश्च तत् ॥ १९ ॥

श्रीशुक उवाच—किमिति? देवादिदेवेति। हे देवादिदेवेति सप्तधा सम्बोध्य स्वामिन् परं ब्रह्म प्रणवान्तर्गतं जाग्रज्जाग्रदाद्यविकल्पानुञ्जैकरसान्त-कलनायाः परं तुर्यतुर्यब्रह्मयाथात्म्यं उपदिष्टं, तेनैव मे कृतकृत्यता स्यादित्यत्र न हि संशयोऽस्ति, तुर्यातीतावधूतयोः महावाक्योपदेशाधिकारः परमहंसस्यापीति श्रुत्यर्थमाननाय पारिव्राज्यसम्प्रदायप्रवृत्तये च प्रणवाद्यवयवसञ्जातं तत्त्वमस्यादि-महावाक्यजातं षडङ्गेन साकं श्रोतुमिच्छामि, केवलकृपयोपदिशेति॥११-१३॥ श्रीशुकेनैवं पृष्टो भगवान् श्रीसदाशिव उवाच। किमिति—साधु साध्विति। यत् त्वया पृष्टं तत् साधु साध्विति श्रीशुकं श्लाघयन् यद्विज्ञानतः साक्षान्मोक्षो भवति तत्ते सषडङ्गं प्रवक्ष्यामीति प्रतिज्ञायाथ रहस्योपनिषदः सर्वोपनिषन्मस्तकत्वं तन्मुखात् ब्रह्म ध्यायतां कृतकृत्यतां वाक्यार्थविचारापेक्षया वक्ष्यमाणऋष्यादि-षडङ्गसहितैकवारजपस्य फलाधिक्यं च भवतीत्युक्त्वा॥ १४-१९॥

साङ्गो महावाक्यजपः

ॐ अस्य श्रीमहावाक्यमहामन्त्रस्य हंस ऋषिः। अव्यक्तगायत्री छन्दः। परमहंसो देवता। हं बीजम्। सः शक्तिः। सोऽहं कीलकम्। मम परमहंसप्रीत्यर्थे महावाक्यजपे विनियोगः। सत्यं ज्ञानमनन्तं ब्रह्म अङ्गुष्ठाभ्यां नमः। नित्यानन्दो ब्रह्म तर्जनीभ्यां स्वाहा। नित्यानन्दमयं ब्रह्म मध्यमाभ्यां वषट्। यो वै भूमा अनामिकाभ्यां हुम्। यो वै भूमाधिपतिः कनिष्ठिकाभ्यां वौषट्। एकमेवाद्वितीयं ब्रह्म करतलकरपृष्ठाभ्यां फट्। सत्यं ज्ञानमनन्तं ब्रह्म हृदयाय नमः। नित्यानन्दो ब्रह्म शिरसे स्वाहा। नित्यानन्दमयं ब्रह्म शिखायै वषट्। यो वै भूमा कवचाय हुम्। यो वै भूमाधिपतिः नेत्रत्रयाय वौषट्। एकमेवाद्वितीयं ब्रह्म अस्त्राय फट्। भूर्भुवः सुवरोमिति दिग्बन्धः॥ २०॥

ध्यानम्—

नित्यानन्दं परमसुखदं केवलं ज्ञानमूर्तिं
विश्वातीतं गगनसदृशं तत्त्वमस्यादिलक्ष्यम् ।
एकं नित्यं विमलमचलं सर्वधीसाक्षिभूतं
भावातीतं त्रिगुणरहितं सद्गुरुं तं नमामि ॥ २१ ॥

अथ महावाक्यानि चत्वारि । यथा—प्रज्ञानं ब्रह्म । अहं ब्रह्मास्मि । तत्त्वमसि । अयमात्मा ब्रह्म । तत्त्वमसीत्यभेदवाचकं ये जपन्ति ते शिवसायुज्यमुक्तिभाजो भवन्ति ॥ २२ ॥

अथ चतुर्वेदगतमहावाक्यचतुष्टयस्य षडङ्गमुपदिशति—**ओमिति** ॥२०॥ **नित्यानन्दं** अनित्यविषयानन्दविलक्षणत्वात्, **परमसुखदं** भजत्स्वानन्द-प्रदत्वात्, **केवलं** अशेषविशेषाभावात्, **ज्ञानमूर्तिं** भौतिकदेहवैरळ्यात्, **विश्वातीतं** विश्वाधिकत्वात्, **गगनसदृशं** निरवयवत्वात्, **तत्त्वमस्यादिलक्ष्यं** प्रत्यगभिन्नब्रह्मरूपत्वात्, "तत्त्वंपदलक्ष्यं प्रत्यगभिन्नं ब्रह्म" इति श्रुतेः, **एकं** अनेकस्य मृग्यत्वात्, **नित्यं** अनित्याभावात्, **विमलं** मलवदज्ञानासम्भवात्, **अचलं** अन्तःकरणबाह्यत्वात्, **सर्वधीसाक्षिभूतं** स्वसाक्ष्यधीवृत्तिसहस्रसत्त्वे तद्भावाभावप्रकाशकतया तत्साक्षित्वात्, **भावातीतं** भावनाऽगम्यत्वात्, **त्रिगुणरहितं** निर्गुणत्वात्, उक्तविशेषणविशिष्टं **सद्गुरुं** यः स्वाज्ञानमोचकः **तं नमामि** तदस्मीति तत्पदं यामीत्यर्थः ॥ २१–२३ ॥

साङ्गस्तत्पदजपः

तत्पदमहामन्त्रस्य । हंस ऋषिः । अव्यक्तगायत्री छन्दः । परमहंसो देवता । हं बीजम् । सः शक्तिः । सोऽहं कीलकम् । मम सायुज्यमुक्त्यर्थे जपे विनियोगः । तत्पुरुषाय अङ्गुष्ठाभ्यां नमः ।

ईशानाय तर्जनीभ्यां स्वाहा । अघोराय मध्यमाभ्यां वषट् । सद्योजाताय अनामिकाभ्यां हुम् । वामदेवाय कनिष्ठिकाभ्यां वौषट् । तत्पुरुषेशानाघोरसद्योजातवामदेवेभ्यः करतलकरपृष्ठाभ्यां फट् ॥ एवं हृदयादिन्यासः ॥ भूर्भुवःसुवरोमिति दिग्बन्धः ॥ २३ ॥

ध्यानम्—

ज्ञानं ज्ञेयं ज्ञानगम्यादतीतं शुद्धं बुद्धं मुक्तमप्यव्ययं च ।
सत्यं ज्ञानं सच्चिदानन्दरूपं ध्यायेदेवं तन्महो भ्राजमानम् ॥

ज्ञानं सत्ववृत्तित्वात्, **ज्ञेयं** शबळब्रह्मरूपं, **ज्ञानगम्यादतीतं** ज्ञानगम्यं शबळं तस्मादप्यतीतं निर्विशेषत्वात्, अत एव **शुद्धं** शुद्धचैतन्यरूपत्वात्, **बुद्धं** चिन्मात्रतया बुद्धत्वात्, स्वातिरिक्तभ्रमतो **मुक्तं**, स्वातिरिक्तमुक्तत्वे स्वयमपि व्येतीत्यत आह—**मुक्तमप्यव्ययम्** । चशब्दान्निष्प्रतियोगिकाव्ययत्वं द्योत्यते । **सत्यं** असत्यप्रपञ्चविलक्षणत्वात्, **ज्ञानं** अजडत्वात्, **सच्चिदानन्दरूपं** अनृतजडदुःखग्रासत्वात्, यत् एवंविशेषणविशिष्टं **महो भ्राजमानं** अवशिष्यते **तत्** स्वयमेवेति **ध्यायेदि**त्यर्थः ॥ २४–२९ ॥

साङ्गस्त्वंपदजपः

त्वंपदमहामन्त्रस्य विष्णुर्ऋषिः । गायत्री छन्दः । परमात्मा देवता । ऐं बीजम् । क्लीं शक्तिः । सौः कीलकम् । मम मुक्त्यर्थे जपे विनियोगः । वासुदेवाय अङ्गुष्ठाभ्यां नमः । संकर्षणाय तर्जनीभ्यां स्वाहा । प्रद्युम्नाय मध्यमाभ्यां वषट् । अनिरुद्धाय अनामिकाभ्यां हुम् । वासुदेवाय कनिष्ठिकाभ्यां वौषट् । वासुदेव-संकर्षणप्रद्युम्नानिरुद्धेभ्यः करतलकरपृष्ठाभ्यां फट् ॥ एवं हृदयादि-न्यासः ॥ भूर्भुवः सुवरोमिति दिग्बन्धः ॥ २९ ॥

ध्यानम्—

जीवत्वं सर्वभूतानां सर्वत्राखण्डविग्रहम् ।
चित्ताहंकारयन्तारं जीवाख्यं त्वंपदं भजे ॥ २६ ॥

ब्रह्मादिस्तम्बान्तानां **सर्वभूतानां** यज्जीवनहेतुजीवत्वं **सर्वत्र** परागभावापाये **अखण्डानन्दविग्रहं चित्ताहङ्कारादिपरागभावप्रसक्तौ** तत्प्रवृत्तिनिमित्ततया **यन्तारं** तद्भावाभावप्रकाशकं च **जीवाख्यं** प्रत्यञ्चमात्मानं **त्वंपदलक्ष्यं भजे** ॥ २६–२७ ॥

साङ्गः असिपदजपः

असिपदमहामन्त्रस्य मन ऋषिः । गायत्री छन्दः । अर्धनारीश्वरो देवता । अव्यक्तादिर्बीजम् । नृसिंहः शक्तिः । परमात्मा कीलकम् । जीवब्रह्मैक्यार्थे जपे विनियोगः । पृथ्वीद्व्यणुकाय अङ्गुष्ठाभ्यां नमः । अब्द्वयणुकाय तर्जनीभ्यां स्वाहा । तेजोद्व्यणुकाय मध्यमाभ्यां वषट् । वायुद्व्यणुकाय अनामिकाभ्यां हुम् । आकाशद्व्यणुकाय कनिष्ठिकाभ्यां वौषट् । पृथिव्यप्तेजोवाय्वाकाशद्व्यणुकेभ्यः करतलकरपृष्ठाभ्यां फट् ॥ एवं हृदयादिन्यासः ॥ भूर्भुवः सुवरोमिति दिग्बन्धः ॥ २७ ॥

ध्यानम्—

जीवो ब्रह्मेति वाक्यार्थं यावदस्ति मनःस्थितिः ।
[1]ऐक्यत्वं तल्लये कुर्वन् ध्यायेदसिपदं सदा ॥ २८ ॥
एवं महावाक्यषडङ्गान्युक्तानि ॥ २९ ॥

[1] ऐक्यं तत्त्वं लये—मु. ऐक्यं तावत्तयोः—अ.

यो जीवत्वेन अभिमतः वेदान्तश्रवणजनितबोधेन स्वगतजीवत्वापाये स एव **ब्रह्मेति वाक्यार्थे यावन्मनस्स्थितिः अस्ति** तावत् जीवोऽयं परोऽयमिति यो भेदः तल्लये तत्त्वंपदलक्ष्ययोः ऐक्यं कुर्वन् तथाऽसिपदार्थं सदा ध्यायेत् ॥ २८–३० ॥

महावाक्यानामर्थः

अथ रहस्योपनिषद्विभागशो वाक्यार्थश्लोकाः प्रोच्यन्ते ॥३०॥

येनेक्षते शृणोतीदं जिघ्रति व्याकरोति च ।
स्वाद्वस्वादु विजानाति तत् प्रज्ञानमुदीरितम् ॥ ३१ ॥

चतुर्मुखेन्द्रदेवेषु मनुष्याश्वगवादिषु ।
चैतन्यमेकं ब्रह्मातः प्रज्ञानं ब्रह्म मय्यपि ॥ ३२ ॥

परिपूर्णः परात्माऽस्मिन् देहे विद्याऽधिकारिणि ।
बुद्धेः साक्षितया स्थित्वा स्फुरन्नहमितीर्यते ॥ ३३ ॥

स्वतः पूर्णः परात्माऽत्र ब्रह्मशब्देन वर्णितः ।
अस्मीत्यैक्यपरामर्शात् तेन ब्रह्म भवाम्यहम् ॥ ३४ ॥

एकमेवाद्वितीयं सन्नामरूपविवर्जितम् ।
सृष्टेः पुराऽधुनाऽप्यस्य तादृक्त्वं तदितीर्यते ॥ ३५ ॥

श्रोतुर्देहेन्द्रियातीतं वस्त्वत्र त्वंपदेरितम् ।
एकता ग्राह्यतेऽसीति तदैक्यमनुभूयताम् ॥ ३६ ॥

स्वप्रकाशापरोक्षत्वमयमित्युक्तितो मतम् ।
अहंकारादिदेहान्तात् प्रत्यगात्मेति गीयते ॥ ३७ ॥

दृश्यमानस्य सर्वस्य जगतस्तत्त्वमीर्यते ।
ब्रह्मशब्देन तद्ब्रह्म स्वप्रकाशात्मरूपकम् ॥ ३८ ॥

तत्र प्रज्ञानशब्दार्थमाह—**येनेति**। **येन** प्रकाशितकरणेनायं ईक्षते इदं शब्दजातं शृणोति जिघ्रति व्याकरोति वाग्व्यापारं करोति। शिष्टकरणोपलक्षणार्थः **चशब्दः**। इदं स्वादु इदं अस्वादु इति **विजानाति तदेव प्रज्ञानमित्युदीरितम्**। उक्तार्थे "कोऽयमात्मेति वयमुपास्महे" इत्यारभ्य "सर्वाण्येवैतानि प्रज्ञानस्य नामधेयानि भवन्ति" इत्यन्तश्रुतेः ॥ ३१ ॥ "प्रज्ञानं ब्रह्म" इत्यत्र श्रुतिः प्रज्ञानशब्दार्थं व्याख्याय ब्रह्मशब्दार्थं व्याचष्टे—**चतुर्मुख इति**। **चतुर्मुखेन्द्रादिदेवेषु मनुष्याश्वगवादिषु**, आदिशब्देन स्तम्बान्तभूतानि गृह्यन्ते। तेषु व्यक्तितो भिन्नेष्वपि घटशरावाद्यनुस्यूतव्योमवत् सर्वभूतानुस्यूत**चैतन्यं ब्रह्मैकमेव**। यत एवं **अतः प्रज्ञानं ब्रह्म मय्यपि**। प्रज्ञानशब्देन प्रत्यगुच्यते, ब्रह्मशब्देन प्रत्यगभिन्नपरमात्मोच्यते, "एष ब्रह्म एष इन्द्रः" इत्यादि "प्रज्ञा प्रतिष्ठा प्रज्ञानं ब्रह्म" इत्यन्तश्रुतेः ॥ ३२ ॥ ऋग्वेदप्रविभक्तैतरेयगतं "प्रज्ञानं ब्रह्म" इति महावाक्यं व्याख्याय, अथ शुक्लयजुर्वेदप्रविभक्तबृहदारण्यकगतं "अहं ब्रह्मास्मि" इति वाक्यं इमौ मन्त्रौ व्याकुरुतः। तत्र अहंशब्दार्थमाह—**परिपूर्ण इति**। यः प्रसक्ताविद्यापदतत्कार्यारोपापवादाधारतया **परिपूर्णो** भवति सोऽयं परमात्मा ससाधनब्रह्म**विद्याधिकारिणि देहे** विद्यमानबुद्धेः अनेकवृत्तिरूपाया भावाभाव**साक्षितया स्थित्वा** प्रत्यग्रूपेण **स्फुरन्नहमितीर्यते** ॥ ३३ ॥ ब्रह्मशब्दार्थमाह—**स्वत इति**। व्याप्य नैरपेक्ष्येण **स्वत** एव यः परिपूर्णः सोऽयमात्मा **अत्र** अस्मिन् प्रकरणे **ब्रह्मशब्देन वर्णितः**। अस्मिशब्दार्थमाह—**अस्मीति**। अहं ब्रह्मास्मि, ब्रह्मैवाहमस्मि, **इत्यैक्यपरामर्शात् तेन** व्यतिहारानुसन्धानेन **ब्रह्म भवाम्यहम्**। अस्मिशब्दः प्रत्यक्परचितोरैक्यघटकार्थः ॥ ३४ ॥ ऋगादिवेदद्वयगतवाक्यद्वयं व्याख्याय सामवेदप्रविभक्तछान्दोग्योपनिषन्निष्ठतत्त्वमसीति वाक्ये तत्पदार्थं स्फुटयति—**एकमिति**। **यन्नामरूपविवर्जितं** सत् **एकमेवाद्वितीयं** सजातीयविजातीयस्वगतभेदकलनाविरळं स्वातिरिक्तविश्व**सृष्टेः पुरा** अधुना स्थितिकाले, **अपि**शब्दात् प्रळयानन्तरे च, अस्य सतः **तादृक्त्वं** नामरूपकलनावैरळ्येन सजातीयादिभेदत्रयराहित्यं **तत्पदलक्ष्यं इतीर्यते** ॥ ३५ ॥ त्वंपदार्थमाह—**श्रोतुरिति**।

श्रोतुः जीवस्य देहेन्द्रियोपलक्षितदेहत्रयातीतं यत् वस्तु अस्ति प्रत्यगर्थं तद्वि त्वंपदेनेरितं प्रोक्तमित्यर्थः । असिपदार्थमाह—एकतेति । तत् त्वमसि, त्वं तदसि, इति तत्त्वंपदलक्ष्ययोर्यत् एकता एकत्वं ग्राह्यते गृह्यते तदैक्यं विद्वद्भिः अनुभूयताम् ॥ ३६ ॥ वेदत्रयगतवाक्यत्रयं व्याख्याय अथर्वणवेदप्रविभक्त-माण्डूक्योपनिषन्निष्ठायमात्माब्रह्मेत्यत्र अयंशब्दार्थमाह—स्वेति । अयमहम-स्मीत्युक्तिः साधनान्तरनैरपेक्ष्येण स्वयंप्रकाशकतया इतरपदार्थावभासकत्वं अपरोक्षत्वं च मतं अभिप्रेतमित्यर्थः । आत्मशब्दार्थमाह—अहङ्कारादीति । अहङ्कारादिदेहान्तात् परागभावात् प्रातिलोम्येन अञ्चतीति प्रत्यक् स चासौ तत् सर्वं अततीति प्रत्यगात्मेति गीयते ॥ ३७ ॥ ब्रह्मशब्दार्थमाह—दृश्यमानस्येति । यत् ब्रह्मशब्देन दृश्यमानस्य सर्वस्य जगतः तत्त्वमीर्यते जगतो ब्रह्मसत्ताऽतिरिक्तसत्तावैरळ्यात् तद्ब्रह्म स्वप्रकाशात्मरूपकं अनृतजडदुः-खात्मकप्रपञ्चवैलक्षण्येन सच्चिदानन्दमात्रं ब्रह्मेत्यर्थः, " सच्चिदानन्दमात्रोऽहं " इति श्रुतेः । ऋगादिचतुर्वेदेषु प्रातिस्विकेनैकैकं महावाक्यं वर्तते । अस्यां तु रहस्योपनिषदि चत्वारि महावाक्यानि विद्यन्ते । अत इयमुपनिषत् वेदमस्तक-मस्तकतया परमरहस्यतां भजतीति भावः ॥ ३८ ॥

शुकस्य स्वानुभवप्रकटनम्

अनात्मदृष्टेरविवेकनिद्रामहंममस्वप्नगतिं गतोऽहम् ।
स्वरूपसूर्येऽभ्युदिते स्फुटोक्तैर्गुरोर्महावाक्यपदैः प्रबुद्धः ॥ ३९ ॥

श्रीशुकः एवं परमेश्वरसकाशात् ब्रह्मप्रणवमहावाक्यचतुष्टयं सार्थं गृहीत्वा भूयोऽपि कृतार्थतां प्राप्त इव लोकानुग्रहधिया स्वानुभवं प्रकटयति—अनात्मेति । भवदुपदेशात् पुरा अनात्मदृष्टेः मम सर्वापह्नवसिद्धं ब्रह्म निष्प्रतियोगिकस्व-मात्रमिति अविवेकनिद्रा ब्रह्ममात्रावरणरूपिणी स्थिता । तस्यां महानिद्रायां स्वान्यत्राहंममत्वाभिमानलक्षणस्वप्नगतिं गतवानस्मि । इदानीं तु भगवत्कटाक्षतः ब्रह्ममात्रस्वरूपसूर्ये श्रीगुरोः स्फुटोक्तैः महावाक्यपदैः उदिते सति अथ हे

स्वामिन् स्वाज्ञाननिद्रातः प्रबुद्धोऽस्मि सर्वापह्नवसिद्धनिष्प्रतियोगिकब्रह्ममात्रभावं गतोऽस्मीत्यर्थः ॥ ३९ ॥

जीवेशयोः ऐक्योपपत्तिः

वाच्यं लक्ष्यमिति द्विधाऽर्थसरणी वाच्य[क्य]स्य हि त्वंपदे
वाच्यं भौतिकमिन्द्रियादिरपि यल्लक्ष्यं त्वमर्थश्च सः ।
वाच्यं तत्पद ईशताकृतमतिर्लक्ष्यं तु सच्चित्सुखा-
नन्दब्रह्म तदर्थ एष च तयोरैक्यं त्वसीदं पदम् ॥ ४० ॥
त्वमिति तदिति कार्ये कारणे सत्युपाधौ
द्वितयमितरथैकं सच्चिदानन्दरूपम् ।
उभयवचनहेतू देशकालौ च हित्वा
जगति भवति सोऽयं देवदत्तो यथैकः ॥ ४१ ॥
कार्योपाधिरयं जीवः कारणोपाधिरीश्वरः ।
कार्यकारणतां हित्वा पूर्णबोधोऽवशिष्यते ॥ ४२ ॥

तत्त्वंपदार्थेशजीवयोः कारणाद्युपाधिकत्वेन तेजस्तिमिरयोरिव तयोरैक्यासंभवं स्वाज्ञाः मन्येरन्निति तेषां तद्भ्रमं मार्ष्टुं निरपेक्षं श्रीशुकं व्याजीकृत्य सोपायं प्रत्यक्परचितोरैक्योपपत्तिमाचष्टे—**वाच्यमिति** । तत्त्वंपदयोः **वाच्यं लक्ष्यमिति द्विधा अर्थसरणी** विद्येते । तत्र त्वंपदे विकल्पितवाच्यस्य स्वरूपमाह—**भौतिकमिन्द्रियादिरपीति** । शरीरत्रयतदभिमतिः त्वंपदवाच्यमित्यर्थः । यः शरीरत्रयावभासकः प्रत्यगात्मा त्वंपदार्थः सोऽयं त्वंपदलक्ष्यमिति विज्ञेयः । **तत्पदे** या **ईशताकृतमतिः** सर्वज्ञत्वसर्वेश्वरत्वादिः सेयं तत्पदवाच्यं, तत्पदलक्ष्यं तु तदर्थभूतसच्चिदानन्दब्रह्म । **तयोरैक्यघटकं त्वसीदं पदम्** ॥४०॥ **त्वमिति तदिति कार्ये कारणे सत्युपाधौ** स्वाज्ञदृष्टिप्रसक्तं तत् **द्वितयं** द्वैतं

भवति। अतस्तत् **इतरथा** कार्यकारणमात्रोपाधिपरित्यागेन कार्यकारणोपाध्यसंस्पृष्टं तत्त्वंपदलक्ष्यं **सच्चिदानन्दरूपं** ब्रह्म एकमेव। तत्र दृष्टान्तमाह—**उभयेति**। **यथा एको देवदत्तः** पुरा काश्मीरदेशे प्रातःकाले राजाङ्गसम्पदा जुष्टो मण्डलेश्वरो दृष्टः क्वचिद्देशकालवैपरीत्यात् केरळदेशे भिक्षुपरिकरकौपीनावशिष्टोऽयमपराह्णकाले दृष्टः तत्र राजभिक्षुकोभयवचनहेतू **तद्देशतत्कालौ** एतद्देशैतत्कालौ **च हित्वा** योऽयं तद्देशतत्काले मण्डलेश्वरो दृष्टः **सोऽयमेतद्देश** एतत्काले भिक्षुः दृष्टः उभयपरित्यागात् देवदत्तमात्रो लक्ष्यते ॥ ४१ ॥ तथा ईश्वरत्वजीवत्वे विहाय चिन्मात्रमवशिष्टं लक्ष्यत इत्याह—**कार्येति**। **कार्यकारणोपाधिपरित्यागादपह्नवात्** निष्प्रतियोगिकपूर्णबोध एव **अवशिष्यते** ॥ ४२ ॥

कैवल्यसाधनज्ञानोपायः

श्रवणं तु गुरोः पूर्वं मननं तदनन्तरम्।
निदिध्यासनमित्येतत् पूर्णबोधस्य कारणम् ॥ ४३ ॥
अन्यविद्यापरिज्ञानमवश्यं नश्वरं भवेत्।
ब्रह्मविद्यापरिज्ञानं ब्रह्मप्राप्तिकरं स्थितम् ॥ ४४ ॥
रहोवाक्यान्युपदिशेत् सषडङ्गानि देशिकः।
केवलं न हि वाक्यानि ब्रह्मणो वचनं यथा ॥ ४५ ॥

पूर्णबोधतया अवस्थानलक्षणकैवल्यसाधनज्ञानोपायमाह—**श्रवणं त्विति**। वेदान्तश्रवणादिनिष्पन्नज्ञानमेव **पूर्णबोधाप्तिकारणं** साधनमित्यर्थः ॥ ४३ ॥ ज्ञानेतरसाधनेनापि तत्पदमाप्तुं शक्यमित्यत आह—**अन्येति**। ज्ञानेतरकर्मादिसाधनं नश्वरस्वर्गादिफलदं, ज्ञानमेव नित्यकैवल्यसाधनमित्यत्र—"नान्यः पन्था विद्यतेऽयनाय" इति श्रुतेः ॥ ४४ ॥ देवर्षीन् ब्रह्मेदमाह—**रह इति**। यथा पारमहंस्यधर्मालङ्कारं श्रीशुकं प्रति परमेश्वरेण सषडङ्गानि महावाक्यान्युपदिष्टानि तथेतरोऽपि परमेश्वरभावमापन्नो **देशिकः** श्रीशुकवद्योग्याधिकारिणे संसार-

निरपेक्षाय **रहोवाक्यानि** रहस्यानामपि परमरहस्यभूतमहावाक्यानि **सषडङ्गानि उपदिशेत्**, न हि केवलमहावाक्यान्युपदिशेदिति देवर्षीन् प्रति ब्रह्मणो वचनमेतदित्यर्थः ॥ ४५ ॥

ब्रह्मज्ञानेन सर्वात्मभावप्राप्तिः

ईश्वर उवाच—

एवमुक्त्वा मुनिश्रेष्ठ रहस्योपनिषच्छुक ।
मया पित्राऽनुनीतेन व्यासेन ब्रह्मवादिना ॥ ४६ ॥
ततो ब्रह्मोपदिष्टं वै सच्चिदानन्दलक्षणम् ।
जीवन्मुक्तः सदा ध्यायन् नित्यस्त्वं विहरिष्यसि ॥ ४७ ॥
यो वेदादौ स्वरः प्रोक्तो वेदान्ते च प्रतिष्ठितः ।
तस्य प्रकृतिलीनस्य यः परः स महेश्वरः ॥ ४८ ॥
उपदिष्टः शिवेनेति जगत्तन्मयतां गतः ।
उत्थाय प्रणिपत्येशं त्यक्ताशेषपरिग्रहः ॥ ४९ ॥
परब्रह्मपयोराशौ प्लवन्निव ययौ तदा ।
प्रव्रजन्तं तमालोक्य कृष्णद्वैपायनो मुनिः ॥ ५० ॥
अनुव्रजन्नाजुहाव पुत्रविश्लेषकातरः ।
प्रतिनेदु[1]स्तदा [2]सर्वं जगत् स्थावरजङ्गमम् ॥ ५१ ॥
तच्छ्रुत्वा सकलाकारं व्यासः सत्यवतीसुतः ।
पुत्रेण सहितः प्रीत्या परानन्दमुपेयिवान् ॥ ५२ ॥

[1] स्तथा—अ, अ १, उ. [2] सर्वे—अ, अ १, अ २, क.

यो रहस्योपनिषदमधीते गुर्वनुग्रहात् ।
सर्वपापविनिर्मुक्तः साक्षात् कैवल्यमश्नुते ॥ साक्षात् कैवल्यमश्नुते ॥ इत्युपनिषत् ॥ ९३ ॥

ततः ईश्वरोक्तिमनुक्रामति—**ईश्वर उवाचेति** ॥ ४६–४७ ॥ एवं मयोपदिष्टो मद्याथात्म्यं भजतीत्याह—**य इति** । ॐ इति **यः स्वरः** प्रणवाख्यो वेदादौ **प्रोक्तः** तथा च वेदान्ते वेदपाठावसानेऽपि प्रतिष्ठितः, ओमिति हि वेदः समाप्यते, **तस्य प्रकृतिलीनस्य** स्वभावं भजतो **यः परः सोऽयं** मच्छिष्यो मुनिः **महेश्वरः** परमात्मैव भवति ॥ ४८ ॥ तदेव प्रपञ्चयति—**उपदिष्ट इति** । शिवोपदेशमहिम्ना सर्वात्माऽयं भवतीत्यर्थः । ततः किमित्यत आह—**उत्थायेति**। परमेश्वरप्रसादतश्चिरं समाधिमनुभूय ततः कदाचित् **समुत्थाय त्यक्ताशेषपरिग्रहः सन्** परमेश्वरमनेकशः **प्रणिपत्य** तत्प्रसादतः तत्सर्वात्मभावमेत्य यथेच्छं **प्रवव्राज** ॥ ४९ ॥ ज्ञानफलं निदर्शयति—**प्रव्रजन्तमिति** । एवं प्रत्यक्षीकृत-सर्वात्मभावेन आत्मजेन सहितो व्यासः परमानन्दं जगामेत्यर्थः ॥ ५०–५२ ॥ यथावच्छास्त्राध्ययनसामान्यविशेषफलमाह—**य इति** । आवृत्तिरादरार्था । **इत्युपनिषच्छब्दः** रहस्योपनिषत्समाप्त्यर्थः ॥ ५३ ॥

श्रीवासुदेवेन्द्रशिष्योपनिषद्ब्रह्मयोगिना ।
रहस्योपनिषद्व्याख्या लिखिता हरितुष्टये ।
रहस्योपनिषद्व्याख्याग्रन्थोऽशीत्यधिकं शतम् ॥

इति श्रीमदीशाद्यष्टोत्तरशतोपनिषच्छास्त्रविवरणे पञ्चत्रिंशत्सङ्ख्यापूरकं शुकरहस्योपनिषद्विवरणं सम्पूर्णम्

सर्वसारोपनिषत्

सह नाववतु—इति शान्तिः

बन्धादिविषयाः प्रश्नाः

कथं बन्धः कथं मोक्षः का विद्या काऽविद्येति । जाग्रत्स्वप्न-सुषुप्तितुरीयं च कथम् । अन्नमयप्राणमयमनोमयविज्ञानमयानन्दमयकोशाः कथम् । कर्ता जीवः पञ्चवर्गः क्षेत्रज्ञः साक्षी कूटस्थोऽन्तर्यामी कथम् । प्रत्यगात्मा परमात्मा माया चेति कथम् ॥ १ ॥

समस्तवेदान्तसारसिद्धान्तार्थकळेबरम् ।
विकळेबरकैवल्यरामचन्द्रपदं भजे ॥

इह खलु कृष्णयजुर्वेदप्रविभक्तेयं सर्वसारोपनिषत् । उपोद्घातादिकमस्याः कठवल्ल्यादिवत् ऊह्यम् । सेयमुपनिषत् गुरुशिष्याविव आक्षेपसमाधानपूर्वकं स्वयमेव प्रवृत्ता । अस्याः स्वल्पग्रन्थतो विवरणमारभ्यते । अत्रादौ तावत् बन्ध-मोक्ष - तद्धेतुविद्याऽविद्या-तत्कार्यावस्थाकोश - तद्व्यष्टिसमष्ट्यारोपापवादाधिकरण - स्वरूपं किमिति पृथक् पृथगाक्षिपति—कथमित्यादिना ॥ १ ॥

बन्धमोक्षयोः स्वरूपम्

आत्मेश्वरजीवोऽनात्मनां देहादीनामात्मत्वेनाभिमन्यते सोऽभिमान आत्मनो बन्धः । तन्निवृत्तिर्मोक्षः ॥ २ ॥

एवमाशङ्क्य श्रुतिः क्रमेण समाधत्ते । तत्र कथं बन्धः इति प्रश्नोत्तरमाह—**आत्मेश्वर इति ।**

यच्चाप्नोति यदादत्ते यच्चात्ति विषयानिह ।
यच्चास्य सन्ततो भावः तस्मादात्मेति गीयते ॥

इति स्मृत्युक्तात्मशब्देन आत्माविद्यापदचतुरंशापह्नवसिद्धपरमात्मोच्यते । स एव समष्टिमूलाविद्यायोगतः ईश्वर इव भवति । तद्व्यष्टितूलान्तःकरणाविद्यायोगतो जीव इव भवति । सोऽयं जीवः स्वविकल्पितानात्मनां स्थूलादिदेहानामिति कर्मणि षष्ठी, देहान् आत्मत्वेनाभिमन्यते **सोऽभिमान** एव स्वात्मनो **बन्धः** । कथं मोक्षः इति प्रश्नोत्तरमाह—**तन्निवृत्तिर्मोक्ष इति** । अनात्मनि आत्माभिमानस्य मोक्षावरणत्वात् स्वावरणापाये मोक्षः प्रकाशत इत्यर्थः ॥ २ ॥

विद्याऽविद्ययोः स्वरूपम्

या तदभिमानं कारयति सा अविद्या । सोऽभिमानो यया निवर्तते सा विद्या ॥ ३ ॥

काऽविद्येति प्रश्नोत्तरमाह—**येति** । अनात्मनि आत्माभिमानप्रयोजिका **अविद्येत्यर्थः** । का विद्येति प्रश्नोत्तरमाह—**स इति** । स्वाविद्यातत्कार्याभिमाननिवर्तिकेयं **विद्येत्यर्थः** ॥ ३ ॥

अवस्थाचतुष्टयनिरूपणम्

मनआदिचतुर्दशकरणैः पुष्कलैरादित्याद्यनुगृहीतैः शब्दादीन् विषयान् स्थूलान् यदोपलभते तदाऽऽत्मनो जागरणम् । तद्वासनासहितैश्चतुर्दशकरणैः शब्दाद्यभावेऽपि वासनामयाञ्छब्दादीन् यदोपलभते तदाऽऽत्मनः स्वप्नम् । चतुर्दशकरणोपरमाद्विशेषविज्ञानाभावाद्यदा

शब्दादीन्नोपलभते तदाऽऽत्मनः सुषुप्तम् । अवस्थात्रयभावाभावसाक्षी [1]स्वयं भावरहितं नैरन्तर्यं चैतन्यं यदा तदा तत्तुरीयं चैतन्यमित्युच्यते ॥ ४ ॥

जाग्रत्स्वप्नसुषुप्तितुरीयं च कथमिति प्रश्नोत्तरे जाग्रत्स्वरूपमाह—**मन इति**। ज्ञानकर्मेन्द्रियान्तःकरणचतुष्टयैः स्थूलशब्दादिचतुर्दशविषयोपलब्धिः जाग्रदवस्थेत्युच्यते । अथ स्वप्नस्वरूपमाह—**तदिति**। स्वप्नावस्थायां विषयसामान्याभावेऽपि जाग्रद्वासनावासितशब्दाद्युपलब्धिः स्वप्न इत्यर्थः। स्वापस्वरूपमाचष्टे—**चतुर्दशेति**। सर्वप्रकारज्ञानोपसंहारकावस्था सुषुप्तिरित्यर्थः । तुर्यस्वरूपं विशदयति—**अवस्थेति** । जाग्रदाद्यवस्थात्रयभावाभावप्रकाशकं तुर्यावस्थासंज्ञं तुर्यमित्यर्थः ॥ ४ ॥

पञ्चकोशनिरूपणम्

अन्नकार्याणां कोशानां समूहोऽन्नमयकोश इत्युच्यते । प्राणादिचतुर्दशवायुभेदा अन्नमयकोशे यदा वर्तन्ते तदा प्राणमयकोश इत्युच्यते । एतत्कोशद्वयसंसक्तं मनआदिचतुर्दशकरणैरात्मा शब्दादिविषयसंकल्पादिधर्मान् यदा करोति तदा मनोमयकोश इत्युच्यते । एतत्कोशत्रयसंसक्तं तद्गतविशेषज्ञो यदा भासते तदा विज्ञानमयकोश इत्युच्यते । एतत्कोशचतुष्टयसंसक्तं स्वकारणाज्ञाने वटकणिकायामिव वृक्षो यदा वर्तते तदा आनन्दमयकोश इत्युच्यते ॥ ५ ॥

अन्नमयप्राणमयमनोमयविज्ञानमयानन्दमयकोशाः कथमिति प्रश्नोत्तरे अन्नमयकोशं विवृणोति—**अन्नेति**। यः अन्ने उत्पत्तिस्थितिभङ्गं भजति सोऽन्नमय-

[1] स्वयमाविर्भावतिरोभावरहितं—अ, अ १.

कोश इत्यर्थः । प्राणकोशस्वरूपमाह—**प्राणादीति** । सुबालोपनिषदुक्तप्राणादिनागान्ताश्चतुर्दशवायवो यदा अन्नमयकोशान्तर्विलसन्ति तदा **प्राणमयकोशः** । यद्वा—वागादिकर्मेन्द्रियैः साकं प्राणादिपञ्चकं प्राणमयकोशः । मनोमयकोशं स्पष्टयति—**एतदिति** । एतदन्नप्राणकोशद्वयमिळित आत्मा मनआदिचतुर्दशकरणोपाधिकः सन् यदा चतुर्दशकरणैः तत्तद्विषयं सङ्कल्पयति तदा मनोमयकोशः। यद्वा—मनश्च ज्ञानेन्द्रियपञ्चकं च मनोमयकोशः । विज्ञानमयकोशं प्रपञ्चयति—**एतदिति** । अन्नादिकोशत्रयमिळित आत्मा यदि कोशत्रयगतविशेषज्ञः तदा **विज्ञानमयकोश** उच्यते । यद्वा—बुद्धिश्च ज्ञानेन्द्रियपञ्चकं विज्ञानमयकोशः । स्थूलदेहोऽयमन्नमयकोशः, प्राणादिकोशत्रयं सूक्ष्मशरीरम् । आनन्दमयकोशं वर्णयति—**एतदिति** । स्वपरप्रपञ्चाज्ञानं **आनन्दमयकोशः** । अयमेव हि बीजकारणदेहः ॥ ९ ॥

उपहितजीवस्वरूपम्

सुखदुःखबुद्ध्याश्रयोऽन्तः कर्ता यदा तदा इष्टविषये बुद्धिः सुखबुद्धिरनिष्टविषये बुद्धिर्दुःखबुद्धिः । शब्दस्पर्शरूपरसगन्धाः सुखदुःखहेतवः । पुण्यपापकर्मानुसारी भूत्वा प्राप्तशरीरसंयोगमप्राप्तशरीरसंयोगमिव कुर्वाणो यदा दृश्यते तदोपहितजीव इत्युच्यते ॥ ६ ॥

कर्ता जीवः पञ्चवर्गः क्षेत्रज्ञः साक्षी कूटस्थः अन्तर्यामी कथमिति प्रश्नोत्तरावसरे कर्ता जीव इत्यंशं विवृणोति—**सुखेति** । यदा अयं कर्ता जीवः सुखदुःखबुद्ध्यादिकमाश्रयति तदाऽस्य स्वेष्टानिष्टफल्गुविषये सुखदुःखबुद्धी भवतः । तद्धेतवः के इत्यत्र शब्दादयः परमार्थसुखावारकसुखदुःखहेतवः,

शब्दस्पर्शादयो येऽर्था अनर्था इव ते स्थिताः ।
येषां सक्तस्तु भूतात्मा न स्मरेत् परमं पदम् ॥

इति श्रुतेः। तत्रासक्तोऽयं स्वकृतपुण्यपापकर्मानुसारेण सम्प्राप्तशरीरसंयोगभ्रममीषद्विवेकेनासम्प्राप्तशरीरसंयोगमिव यदाऽऽत्मानं भावयति तदाऽयं उपहितः सोपाधिको जीव इत्यभिधीयते ॥ ६ ॥

जीवोपाधिस्वरूपम्

मनआदिश्च प्राणादिश्चेच्छादिश्च सत्त्वादिश्च पुण्यादिश्चैते पञ्चवर्गा इत्येषां पञ्चवर्गाणां [1]धर्मीभूतात्मज्ञानाद्दते न नश्यत्यात्मसन्निधौ नित्यत्वेन प्रतीयमान आत्मोपाधिर्यस्तल्लिङ्गशरीरं हृद्ग्रन्थिरित्युच्यते ॥ ७ ॥

पञ्चवर्गस्वरूपं जीवोपाधिं प्रकटयति—**मन इति**। **मनआद्यन्तःकरणचतुष्टयं च प्राणादिनागान्तचतुर्दशवायुभेदश्च इच्छाद्वेषादिश्च सत्वादिगुणत्रयं च पुण्यपापादिश्च एते** ह्युपहिताधिष्ठेयपञ्चवर्गा इति। एषां पञ्चवर्गाणामध्यासः तद्धर्मी जीवात्मा प्रत्यगात्मा वा तत्सम्बन्धरहित इति ज्ञानं विना **न नश्यति**। योऽयं स्वाज्ञानप्रभवोऽध्यासः **स्वात्मसन्निधौ** स्वाज्ञानात् **नित्यत्वेन प्रतीयमानः स्वात्मोपाधिः लिङ्गशरीरमिति** ख्यातः। स एव **हृदिति**। लिङ्गशरीर-[2]द्वयमिति(?)साक्षी। तयोः तप्तायःपिण्डवत् तादात्म्यं **हृदयग्रन्थिः** जीवतेत्यभिधीयते ॥ ७ ॥

क्षेत्रज्ञस्वरूपम्

तत्र यत्प्रकाशते चैतन्यं स क्षेत्रज्ञ इत्युच्यते ॥ ८ ॥

क्षेत्रज्ञस्वरूपमाह—**तत्रेति**। तत्र लिङ्गशरीरे जडे यच्चैतन्यं तदियत्तां ज्ञात्वा स्वयमपि प्रकाशते सोऽयं क्षेत्रज्ञः परमेश्वरः उच्यते, "क्षेत्रज्ञं चापि मां विद्धि सर्वक्षेत्रेषु" इति स्मृतेः ॥ ८ ॥

[1] धर्मि—अ, अ १, अ २. [2] मय—इ १.

साक्षिस्वरूपम्

ज्ञातृज्ञानज्ञेयानामाविर्भावतिरोभावज्ञाता स्वयमाविर्भावतिरोभावरहितः स्वयंज्योतिः साक्षीत्युच्यते ॥ ९ ॥

साक्षिस्वरूपं व्यनक्ति—ज्ञातृज्ञानेति। ज्ञात्रादित्रिपुटीनां स्वाज्ञानस्वज्ञानाभ्यां आविर्भावतिरोभावौ भवतः। ज्ञानज्ञेयापेक्षया ज्ञाता स्वयमाविर्भावतिरोभावविरळः, साधनान्तरनैरपेक्ष्येण स्वयंज्योतिः साक्षीत्युच्यते ॥ ९ ॥

कूटस्थस्वरूपम्

ब्रह्मादिपिपीलिकापर्यन्तं सर्वप्राणिबुद्धिष्ववशिष्टतयोपलभ्यमानः सर्वप्राणिबुद्धिस्थो यदा तदा कूटस्थ इत्युच्यते ॥ १० ॥

कूटस्थस्वरूपं प्रतिपादयति—ब्रह्मादीति। ब्रह्मादिस्तम्बान्तप्राणिपटलान्तःकरणविकारास्पृष्टात्मा निर्विकारोऽयं कूटस्थ इत्यर्थः ॥ १० ॥

अन्तर्यामिस्वरूपम्

कूटस्थोपहितभेदानां स्वरूपलाभहेतुर्भूत्वा मणिगणे सूत्रमिव सर्वक्षेत्रेष्वनुस्यूतत्वेन यदा काशते आत्मा तदाऽन्तर्यामीत्युच्यते ॥ ११ ॥

अन्तर्यामिस्वरूपं प्रकाशयति—कूटस्थेति। भेदानामित्यत्र प्रथमार्थे षष्ठी। निर्विकारकूटस्थविकल्पितोपाधिभेदा अन्तःकरणादय अन्तर्यामिस्वरूपलाभहेतवो भूत्वा वर्तन्ते। तेषु सर्वक्षेत्रेषु मणिगणे सूत्रमिव तत्करणग्रामप्रवृत्तिनिमित्ततया यदा प्रकाशते तदाऽयमात्मा अन्तर्यामीत्युच्यते ॥ ११ ॥

प्रत्यगात्मस्वरूपम्

सत्यं ज्ञानमनन्तमानन्दं सर्वोपाधिविनिर्मुक्तं कटकमुकुटाद्युपाधिरहितसुवर्णघनवद्विज्ञानचिन्मात्रस्वभावात्मा यदा भासते तदा त्वंपदार्थः प्रत्यगात्मेत्युच्यते। सत्यं ज्ञानमनन्तं ब्रह्म। सत्यमविनाशि। अविनाशि नाम देशकालवस्तुनिमित्तेषु विनश्यत्सु यन्न विनश्यति तदविनाशि। ज्ञानं नामोत्पत्तिविनाशरहितं नैरन्तर्यं चैतन्यं ज्ञानमित्युच्यते। अनन्तं नाम मृद्विकारेषु मृदिव स्वर्णविकारेषु स्वर्णमिव तन्तुविकारेषु तन्तुरिवाव्यक्तादिसृष्टिप्रपञ्चेषु पूर्णं व्यापकं चैतन्यमनन्तमित्युच्यते। आनन्दं नाम सुखचैतन्यस्वरूपोऽपरिमितानन्दसमुद्रोऽवशिष्टसुखस्वरूपश्चानन्द इत्युच्यते ॥ १२ ॥

प्रत्यगात्मा परमात्मा माया चेति कथमिति प्रश्नोत्तरे प्रत्यगात्मस्वरूपं प्रकटयति—**सत्यमिति**। पराक्प्रपञ्चप्रातिलोम्येन अञ्चतीति प्रत्यक् स चासावात्मा चेति **प्रत्यगात्मोच्यते**। **सत्यं ज्ञानमनन्तमानन्दमिति** पदचतुष्टयबोध्यं यत् **ब्रह्म** तत् स्वज्ञदृष्ट्या स्वाज्ञविकल्पितसर्वोपाधिविरळम्। उक्तार्थे दृष्टान्तमाह—**कटकेति**। **कटकमकुटाद्युपाधिरहितसुवर्णघनवत्** अखण्डरूपमित्यर्थः। तथा चेदस्य जडत्वं स्यादित्यत आह—**विज्ञानेति**। **विज्ञानचिन्मात्रस्वभावात्मा** तद्रूपेण **यदा भासते तदा त्वंपदार्थः** प्रत्यगात्मा भवति। सत्यं ज्ञानमनन्तं किमित्याशङ्क्य ब्रह्मेत्याह—**सत्यं ज्ञानमनन्तं ब्रह्मेति**। स्वयमेव श्रुतिः सत्यादिपदचतुष्टयं व्याचष्टे—**सत्यमविनाशीति**। अविनाशिपदार्थमाह—**अविनाशि नामेति**। स्वाज्ञविकल्पितस्वातिरिक्तापायेऽपि स्वयं सन्मात्रतया अवशिष्यते इत्यर्थः। ज्ञानपदं व्याचष्टे—**ज्ञानं नामेति**। स्वरूपज्ञानस्य सत्तामात्रतया जन्मस्थितिभङ्गाभावात् अजडं ब्रह्मेत्यर्थः। अनन्तपदार्थमाह—**अनन्तं नामेति**। कारणात्मना स्वकार्यव्यापकचैतन्यमनन्तं त्रिविधपरिच्छेदशून्यं,

"देशतः कालतो वस्तुतः परिच्छेदरहितं ब्रह्म" इति श्रुतेः। आनन्दपदार्थमाह —आनन्दं नामेति। आनन्दमिति लिङ्गव्यत्ययः छान्दसः। शिष्टं स्पष्टम्॥ १२॥

परमात्मस्वरूपम्

एतद्वस्तुचतुष्टयं यस्य लक्षणं देशकालवस्तुनिमित्तेष्वव्यभिचारी तत्पदार्थः परमात्मेत्युच्यते॥ १३॥

परमात्मस्वरूपमाह—एतदिति। सत्यं ज्ञानमनन्तमानन्द इति वस्तुबोधकपदचतुष्टयं यस्य लक्षणं लक्ष्यमात्रपर्यवसन्नत्वात् सोयं व्यभिचारिदेशकालवस्तुनिमित्तेषु अव्यभिचारी तत्पदार्थः परमात्मा भवतीत्यर्थः॥ १३॥

परब्रह्मस्वरूपम्

त्वंपदार्थादौपाधिकात् तत्पदार्थादौपाधिकभेदाद्विलक्षणमाकाशवत् सूक्ष्मं केवलं सत्तामात्रस्वभावं परं ब्रह्मेत्युच्यते॥ १४॥

प्रत्यक्परैक्यं किमित्याशङ्क्याह—त्वंपदार्थादिति। त्वंपदार्थौपाधिभेदः जीवत्वं तस्मात् तत्पदार्थौपाधिकभेदस्त्वीश्वरत्वं तस्मादपि विलक्षणं अत एव आकाशवत् सूक्ष्मं आकाशव्यापकत्वात् यत् केवलं प्रत्यक्परविभागैक्यकलनाऽसम्भवप्रबोधसिद्धं सत्तामात्रस्वभावं, "ब्रह्ममात्रमसन्न हि" इति निष्प्रतियोगिकब्रह्ममात्रावशेषश्रुतेः, तदेव हि परं ब्रह्मेत्यर्थः॥ १४॥

मायास्वरूपम्

माया नाम—अनादिरन्तवती प्रमाणाऽप्रमाणसाधारणा न सती नासती न सदसती स्वयमधिका विकाररहिता निरूप्यमाणा

सतीतरलक्षणशून्या सा मायेत्युच्यते । अज्ञानं तुच्छाऽप्यसती कालत्रयेऽपि पामराणां वास्तवी च सत्त्वबुद्धिर्लौकिकानामिदमित्थमनिर्वचनीया वक्तुं न शक्यते ॥ १९ ॥

मायास्वरूपं व्यनक्ति—**माया नामेति**। यावत् ब्रह्मज्ञानं नोदेति तावदियं माया **अनादिः** शास्त्रजन्यज्ञानिदृष्ट्या **अन्तवती** स्वसत्त्वे स्वासत्त्वे च स्वाज्ञस्वज्ञदृष्टी यस्याः प्रमाणभूते भवतः सेयं **प्रमाणा**, "नाविद्याऽस्तीह नो माया" इति,

या च प्रागात्मनो मे मा तथाऽन्ते च तिरस्कृता ।
ब्रह्मवादिभिरुद्गीता सा मायेति विवेकतः ॥

इति च, श्रुत्यर्थसंस्कृतपरमार्थदृष्ट्या शशविषाणवत् अवस्तुभूतमायातत्कार्यसद्भावप्रमाणवैरळ्यात् **अप्रमाणसाधारणा** व्यावहारिकदृष्ट्या कारणदृष्ट्या वा **न सती** बाधदर्शनात्, अचाक्षुषत्वाद्वा, कार्यात्मना **नासती** तत्कार्योपलब्धेः, **न सदसती** तेजस्तिमिरवदेकस्याः सत्त्वासत्त्वासंभवात्, स्वाज्ञदृष्ट्या सर्वस्मात् **स्वयमधिका** स्वाज्ञस्य स्थावराद्यव्यक्तान्तवास्तवदृष्टित्वात्, वस्तुदृष्ट्या **निरूप्यमाणा सती** पृथिव्याद्यव्यक्तान्तविकाररहिता सर्वविकारयोनेः स्वस्याः शशविषाणवदवस्तुत्वात् अत एव या **ब्रह्मातिरिक्तलक्षणशून्या सा मायेत्युच्यते**। **कालत्रयेऽप्यसती** एवमज्ञानतया **तुच्छाऽपि** सेयं **पामराणां वास्तवी** च भवति,

अविद्यमानैवाविद्या वस्तुतत्त्वविचारिणाम् ।
इतरेषां तु मूढानां वज्रादपि दृढायते ॥

इति स्मृत्यनुरोधेन अस्यां **लौकिकानां सत्त्वबुद्धिर्भवति** । अलौकिकानां तु **इदमित्थमिति अनिर्वचनीया** अस्याः सत्त्वं वक्तुं न शक्यते । ब्रह्मातिरिक्तसामान्यापह्नवतावादिश्रुतिरत्र मानम्—

सिद्धान्तोऽध्यात्मशास्त्राणां सर्वापह्नव एव हि ।
नाविद्याऽस्तीह नो माया शान्तं ब्रह्मेदमक्रमम् ॥ इति ॥ १९ ॥

ब्रह्मात्मानुभवप्रकटनम्

नैवं भवाम्यहं देहो नेन्द्रियाणि दशैव तु ।
न बुद्धिर्न मनः शश्वन्नाहंकारस्तथैव च ॥ १६ ॥
अप्राणो ह्यमनाः शुभ्रो बुद्ध्यादीनां हि सर्वदा ।
साक्ष्यहं सर्वदा नित्यश्चिन्मात्रोऽहं न संशयः ॥ १७ ॥
नाहं कर्ता नैव भोक्ता प्रकृतेः साक्षिरूपकः ।
मत्सान्निध्यात् प्रवर्तन्ते देहाद्या अजडा इव ॥ १८ ॥
स्थाणुर्नित्यः सदानन्दः शुद्धो ज्ञानमयोऽमलः ।
आत्माऽहं सर्वभूतानां विभुः साक्षी न संशयः ॥ १९ ॥
ब्रह्मैवाहं सर्ववेदान्तवेद्यं नाहं वेद्यं व्योमवातादिरूपम् ।
रूपं नाहं नाम नाहं न कर्म ब्रह्मैवाहं सच्चिदानन्दरूपम् ॥२०॥
नाहं देहो जन्ममृत्यू कुतो मे नाहं प्राणः क्षुत्पिपासे कुतो मे ।
नाहं चेतः शोकमोहौ कुतो मे नाहं कर्ता बन्धमोक्षौ कुतो मे ॥

इत्युपनिषत् ॥ २१ ॥

"कथं बन्धः" इत्यादिप्रश्नोत्तरमभिधाय स्वाज्ञसमर्पितस्वातिरिक्तदेहादिकलनाऽपह्नवमुखेन निष्प्रतियोगिकस्वमात्रानुभवं श्रुतिः स्वयमेव व्यक्तीकरोति—**नैवमिति** । शरीरत्रयापह्नवसिद्धं ब्रह्म स्वमात्रमित्यर्थः ॥ १६ ॥ स्वाज्ञदृष्ट्या बुद्ध्यादिप्रसक्तौ सर्वदा तेषां स्वज्ञदृष्ट्या **साक्ष्यहं** परमार्थदृष्ट्या निष्प्रतियोगिक**चिन्मात्रोऽहमित्यत्र न हि संशयोऽस्तीत्यर्थः** ॥ १७ ॥

किञ्च—**नाहमिति** । कर्तृत्वादिप्रकृतिप्रसक्तौ तत्साक्ष्यहं देहेन्द्रियादिप्रवृत्तिनिमित्तमहमित्याह—**मदिति** ॥ १८ ॥ अनित्यदुःखादिप्रसक्तौ कस्त्वमसि

इत्यत आह—**स्थाणुरिति** ॥ १९ ॥ वेदान्तवेद्यसच्चिदानन्दोऽहमस्मि इत्याह—**ब्रह्मैवाहमिति**। नामरूपकर्मापह्नवसिद्धसच्चिदानन्दरूपोऽस्मीत्यर्थः, "सच्चिदानन्दमात्रोऽहमनुत्पन्नमिदं जगत्" इति श्रुतेः ॥ २० ॥ देहासुचित्ताभिमतिवैरळ्यान्न मे देहादिः स्यादित्याह—**नाहमिति** ॥ **इत्युपनिषच्छब्दौ प्रकृतोपनिषत्समाप्त्यर्थौ** ॥ २१ ॥

श्रीवासुदेवेन्द्रशिष्योपनिषद्ब्रह्मयोगिना ।
लिखितं स्याद्विवरणं सर्वसारस्य साम्प्रतम् ।
प्रकृतोपनिषद्व्याख्याग्रन्थस्त्रिंशोत्तरं शतम् ॥

इति श्रीमदीशाद्यष्टोत्तरशतोपनिषच्छास्त्रविवरणे त्रयस्त्रिंशत्सङ्ख्यापूरकं
सर्वसारोपनिषद्विवरणं सम्पूर्णम्

सावित्र्युपनिषत्

आप्यायन्तु—इति शान्तिः

सवितृसावित्र्योः मिथः कार्यकारणत्वादि

कः सविता का सावित्री? अग्निरेव सविता पृथिवी सावित्री स यत्राग्निस्तत् पृथिवी यत्र वा पृथिवी तत्राग्निस्ते द्वे [1]योनिस्तदेकं मिथुनम् ॥ १ ॥कः सविता का सावित्री? वरुण एव सविताऽऽपः सावित्री स यत्र वरुणस्तदापो यत्र वा आपस्तद्वरुणस्ते द्वे योनिस्तदेकं मिथुनम् ॥ २ ॥ कः सविता का सावित्री? वायुरेव सविताऽऽकाशः सावित्री स यत्र वायुस्तदाकाशो यत्र वा आकाशस्तद्वायुस्ते द्वे योनिस्तदेकं मिथुनम् ॥ ३ ॥ कः सविता का सावित्री? यज्ञ एव सविता छन्दांसि सावित्री स यत्र यज्ञस्तच्छन्दांसि यत्र वा छन्दांसि स यज्ञस्ते द्वे योनिस्तदेकं मिथुनम् ॥ ४ ॥ कः सविता का सावित्री? स्तनयित्नुरेव सविता विद्युत् सावित्री स यत्र स्तनयित्नुस्तद्विद्युत् यत्र वा विद्युत्त [2]त्स्तनयित्नुस्ते द्वे योनिस्तदेकं

[1] योनी त—क, अ २. (एवं सर्वपर्यायेषु).

[2] त्र स्त—अ, अ १, अ २, क.

मिथुनम् ॥ ५ ॥ कः सविता का सावित्री? आदित्य एव सविता द्यौः सावित्री स यत्रादित्यस्तद्द्यौर्यत्र वा द्यौस्तदादित्यस्ते द्वे योनिस्तदेकं मिथुनम् ॥ ६ ॥ कः सविता का सावित्री? चन्द्र एव सविता नक्षत्राणि सावित्री स यत्र चन्द्रस्तन्नक्षत्राणि यत्र वा नक्षत्राणि स चन्द्रमास्ते द्वे योनिस्तदेकं मिथुनम् ॥ ७ ॥ कः सविता का सावित्री? मन एव सविता वाक् सावित्री स यत्र वा मनस्तद्वाक् यत्र वा वाक् तन्मनस्ते द्वे योनिस्तदेकं मिथुनम् ॥ ८ ॥ कः सविता का सावित्री? पुरुष एव सविता स्त्री सावित्री स यत्र पुरुषस्तत् स्त्री यत्र वा स्त्री तत् पुरुषस्ते द्वे योनिस्तदेकं मिथुनम् ॥ ९ ॥

सावित्र्युपनिषद्वेद्यचित्सावित्रपदोज्वलम् ।
प्रतियोगिविनिर्मुक्तरामचन्द्रपदं भजे ॥

इह खलु सामवेदप्रविभक्तेयं सावित्र्युपनिषत् सवितृसावित्रीनवमिथुन-बलातिबलामहामनुप्रकटनव्यग्रा तद्गतहेयांशापायसिद्धनिर्विशेषब्रह्मणि पर्यवसन्ना विजयते । अस्याः श्रुतेः संक्षेपतो विवरणमारभ्यते । श्रुतिरेव शिवशक्तिस्वरूपं किमित्याशङ्क्य अवान्तररूपेण स्वयमेव प्रकाशयति—क इति । "सविता प्राणिनः सूते" इति श्रुत्यनुरोधेन यदज्ञानतः स्वाज्ञदृष्ट्या स्वाविद्यापदतत्कार्यजातं सूतं प्रसूतमाविर्भूतं तत्रैव स्थितं तिरोभूतं च भवति, यः स्वज्ञदृष्ट्या स्वाज्ञविकल्पितप्रपञ्चारोपापवादाधारो भवति, यः परमार्थदृष्ट्या स्वाज्ञस्वज्ञ-विकल्पितारोपापवादापह्नवसिद्धः सन् निष्प्रतियोगिकतया स्वमात्रमवशिष्यते, सोऽयं सविता परमेश्वरः परमात्मा कीदृशः, यया विद्यया सविता प्रकाशते सेयं सावित्री कीदृशीति श्रुतिः स्वयमेवाशङ्क्य स्वाज्ञबुद्ध्यारोहाय तयोः स्वरूपं प्रकटयति—अग्निरिति । अन्नाद्यादिपुरुषान्तमेव सविता, अन्नाद्यादिपुरुषान्तगत-

नामरूपादिविशेषांशापाये तत्त्वंसच्चिदानन्दस्वरूपस्य निष्प्रतियोगिकचिन्मात्र-सवितृरूपत्वात् । **पृथिव्यादिस्त्र्यन्तं सावित्री,** तत्त्वंजडाविद्यांऽशापाय-सिद्धाजडविद्यायाः स्वाज्ञविकल्पितस्वातिरिक्तकलनाऽपह्नवसिद्धं ब्रह्म निष्प्रति-योगिकस्वमात्रमिति बोधकत्वात् । तयोः वाच्यवाचकलक्ष्यलक्षणबोध्यबोधकभावं कथमित्यत्राह—**स इति** । **स यत्राम्यादिपुरुषान्तानुस्यूतः** सविता विराजते **तत्र पृथिव्यादिस्त्र्यन्तानुस्यूतरूपिणी** सावित्री, पुनर्व्यतिहारेण **यत्र पृथिव्यादिः तत्राम्यादिः** । **ते द्वे योनिः तदेकं मिथुनं** इति नवकृत्वोपदेशः, तयोः सवितृसावित्र्योः मिथः कार्यकारणत्वं वाच्यवाचकत्वं लक्ष्यलक्षणत्वं बोध्यबोध-कत्वं चोपपद्यते इत्यर्थः ॥ १–९ ॥

सावित्र्याः पादत्रयम्

तस्या एव[ष]प्रथमः पादो भूस्तत्सवितुर्वरेण्यमित्यग्निर्वै वरेण्यमापो वरेण्यं चन्द्रमा वरेण्यम् ॥ १० ॥ तस्या एव[ष]-द्वितीयः पादो भर्गमयो भुवो भर्गो देवस्य धीमहीत्यग्निर्वै भर्ग आदित्यो वै भर्गश्चन्द्रमा वै भर्गः ॥ ११ ॥ तस्या एष तृतीयः पादः स्वर्धियो यो नः प्रचोदयादिति स्त्री चैव पुरुषश्च प्रजनयतः ॥ १२ ॥

उक्तनवकृत्वोपदेशः सावित्र्याः प्रथमः पादो भवतीत्याह—**तस्या इति** । कः सवितेत्यादिनवकृत्वोपदेशः सावित्र्याः **प्रथमः पादो** विज्ञेयः । तत्सवितुः यद्वरेण्यं तदग्न्यापश्चन्द्रादिगतहेयांशापायसिद्धं तत् सावित्र्याः द्वितीयः [प्रथमः] पादो भवति ॥ १० ॥ भूरित्याद्यव्याहृतिस्वरूपमुक्त्वा अथ **भर्गमयो भुवो भर्गो देवस्य धीमहि इति** भुवइति व्याहृत्यात्मकं देवस्य यद्भर्गः तेजः चिन्मात्रज्योतिः स्वमात्रमिति धीमहि, तदग्न्यादित्यचन्द्रगतहेयांशापायसिद्धं **भर्गः** ॥ ११ ॥ **तस्या एष तृतीयः पादः स्वरिति** व्याहृत्यात्मकं सावित्रं **ब्रह्म**

यन्नो अस्माकं धियः सर्वापह्नवसिद्धं ब्रह्म निष्प्रतियोगिकस्वमात्रमिति सम्यज्ज्ञाने प्रचोदयात्। तदतिरेकेण स्त्रीपुंरूपेण प्रविभक्तप्रपञ्चो नास्त्येव। यद्यस्तीति भ्रान्तिः तदा सर्वत्र .[सवितृ] सावित्र्यौ स्त्रीपुमादिविशिष्टप्रपञ्चं जनयतः उत्पादयतः। यत एवं अतः तयोः सवितृप्रपञ्चयोः कार्यकारणभावः सम्पद्यते, कारणातिरेकेण कार्याभावात् कार्यापाये कारणस्य कार्यकारणकलनाविरळ-ब्रह्ममात्रत्वात् ॥ १२ ॥

सावित्रीवेदनफलं पुनर्मृत्युजयः

यो वा एतां सावित्रीमेवं वेद स पुनर्मृत्युं जयति ॥ १३ ॥

एवं वेदनफलमाह—य इति। यो वै मुनिः एतां चिन्मात्रसवितृबोधिनीं सावित्रीं विद्यां जानाति सोऽयं मुनिः ब्रह्मनिष्ठाप्रमादरूपमृत्युं जयति अप्रमादेन ब्रह्मनिष्ठामर्हतीत्यर्थः ॥ १३ ॥

बलाऽतिबलामन्त्रौ

बलातिबलयोर्विराट् पुरुष ऋषिः। गायत्री छन्दः। गायत्री देवता। अकारोकारमकारा बीजाद्याः। क्षुधाऽऽदिनिरसने विनियोगः। क्लामित्यादि[1]षडङ्गम्। ध्यानम्—

अमृतकर[2]तलाग्रौ सर्वसंजीवनाढ्या-
वघहरणसुदक्षौ वेदसारे मयूखे।
प्रणवमयविकारौ भास्कराकारदेहौ
सततमनुभवेऽहं तौ [3]बलातिबलान्तौ ॥

[1] षडंगन्यासः—क. [2] तलार्द्रौ—मु.
[3] बलाती—अ, अ १, क.

ॐ ह्रीं बले महादेवि ह्रीं महाबले क्लीं चतुर्विधपुरुषार्थ-सिद्धिप्रदे तत्सवितुर्वरदात्मिके ह्रीं वरेण्यं भर्गो देवस्य वरदात्मिके अतिबले सर्वदयामूर्ते बले सर्वक्षुत्[1]च्छ्रमोप[2]नाशिनी धीमहि धियो यो नर्जाते [3]प्रचुर्या या प्रचोदयात्मिके प्रणवशिरस्कात्मिके हुं फट् स्वाहा ॥ १४ ॥

श्रुतिरियं क्षुत्पिपासापीडितानां ब्रह्मनिष्ठासङ्कोचो भवेदिति क्षुत्पिपासा-निरासकौ बलाऽतिबलाऽभिधानौ महामन्त्रौ प्रकाशयति—बलेति । वर्णसहस्र-पुरश्चरणतो विद्यासिद्धिर्भवति । तया क्षुत्पिपासाविरळो भूत्वाऽस्खलितब्रह्मनिष्ठो भवति ॥ १४ ॥

विद्याफलम्

एवं विद्वान् कृतकृत्यो भवति सावित्र्या एव सलोकतां जयतीत्युपनिषत् ॥ १५ ॥

विद्याफलमाह—एवमिति । मुख्यफलं कृतकृत्यत्वं, आन्तराळिकफलं अपर-ब्रह्मपदावाप्तिरित्यर्थः । इत्युपनिषच्छब्दः सावित्र्युपनिषत्परिसमाप्त्यर्थः ॥ १५ ॥

श्रीवासुदेवेन्द्रशिष्योपनिषद्ब्रह्मयोगिना ।
सावित्र्युपनिषद्व्याख्या लिखिता ब्रह्मबोधिनी ।
सावित्र्युपनिषद्व्याख्या पञ्चत्रिंशत् प्रकीर्तिता ॥

इति श्रीमदीशाद्यष्टोत्तरशतोपनिषच्छास्त्रविवरणे पञ्चसप्ततिसङ्ख्यापूरकं सावित्र्याख्योपनिषद्विवरणं सम्पूर्णम्

---

[1] ब्रमो—मु.
[2] नाशिनि—क, मु.
[3] प्रचुर्यः—मु.

सुबालोपनिषत्

पूर्णमदः—इति शान्तिः

प्रथमानुशासनम्—सर्वप्रपञ्चलयस्थितिप्रकारः

निर्विकल्पकब्रह्मावस्थितिः

तदाहुः। किं तदासीत्? तस्मै स होवाच न सन्नासन्न सदसदिति ॥ १ ॥

बीजाज्ञानमहामोहापह्नवाद्यद्विशिष्यते।
निर्बीजं त्रैपदं तत्त्वं तदस्मीति विचिन्तये ॥

इह खलु शुक्लयजुर्वेदप्रविभक्तेयं सुबालोपनिषत् सोपायनिर्विशेषब्रह्ममात्रगोचरतया विजृंभते। अस्याः स्वल्पग्रन्थतो विवरणमारभ्यते। ईशावास्यादिवत् उपोद्घातादिकं ऊह्यम्। सुबालब्रह्मप्रश्नप्रतिवचनरूपेयं आख्यायिका वक्ष्यमाणविद्यास्तुत्यर्था। केयं उपनिषत् इत्युपनिषदारभ्यते—**तदाहुरित्यादि**। तत् प्रसिद्धब्रह्मज्ञानमुद्दिश्य ब्रह्मवादिनो मिथो गुरुशिष्यभावमेत्य **आहुः** मीमांसां कुर्वन्ति। तत्र सुबालो नाम मुनिः निष्प्रतियोगिकब्रह्ममात्रज्ञानबुभुत्सया ब्रह्माणं विधिवत् उपसङ्गम्य पृच्छति—**किं तदासीदिति**। तदा पृथिव्याद्यव्यक्तान्तोपसंहारदशायां किमात्मकं ब्रह्म आसीत् इत्येवं पृष्टवते **तस्मै स ब्रह्मा होवाच**। किमिति? **न सन्नासन्न सदसदिति**। तदानीं तत्परमकारणं ब्रह्म सद्व्यवहारवदपि

नाभूत्, नासदपि असद्व्यवहारवदभूत्, नापि सदसदात्मकतया अनिर्वचनीय-व्यवहारवद्वा अभूत् । एतावता किं अवधृतम्? निष्प्रतियोगिकनिर्विकल्पमेव अभूत् इत्युक्तं भवतीत्यर्थः ॥ १ ॥

तमआदिपृथिव्यन्तजननम्

तस्मात्तमः संजायते तमसो भूतादिर्भूतादेराकाशमाकाशाद्वायुर्वायोरग्निरग्नेरापोऽद्भ्यः पृथिवी ॥ २ ॥

ततः किं जातं इत्यत आह—तस्मादिति । तस्मात् बीजभावमापन्नात् अविकलपात् तमः स्वाविद्यापेशी सञ्जायते । सञ्जायत इति वर्तमानप्रयोगतो बीजात्मा पञ्चकृत्यकारीति द्योत्यते । तस्मात् तमसः अज्ञानात् भूतादिः अक्षराव्यक्तमहत्तत्त्वाहङ्कारादिः, सञ्जायत इति सर्वत्र अनुवर्तते । भूतादेः आकाशादिपृथिव्यन्तं क्रमेण सञ्जायते ॥ २ ॥

विराट्पुरुषोत्पत्तिः

तदण्डं समभवत्तत् संवत्सरमात्रमुषित्वा द्विधाऽकरोदधस्ताद्भूमिमुपरिष्टादाकाशं मध्ये पुरुषो दिव्यः सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् सहस्रबाहुरिति ॥ ३ ॥

तत् इत्यव्ययम् । तत् तैः आकाशादिभूतैः पञ्चीकृतैः हिरण्मयं अविद्याऽण्डं महाविराण्णिकेतनं समभवत् । ततः तत् किमासीदित्यत आह—तदिति । तत् अविद्याऽण्डं संवत्सरमात्रं अच्छिद्रकुक्कुटाण्डवत् उषित्वा अथ तदण्डं द्विधा अकरोत् ऊर्ध्वाधोविभागेनेत्यर्थः । तदधस्तात् भूमिः तदुपरिष्टाद्भागे आकाशं, तन्मध्ये किं अभूदित्यत आह—मध्य इति । कपालद्वयमध्ये दिवि भवो दिव्यः पुरुषो विराट् सहस्रशीर्षेत्यादिविशेषणविशिष्टः सम्राट् चतुराननो जायते ॥ ३ ॥

मृत्युसृष्टिः

सोऽग्रे भूतानां मृत्युमसृजत्। [1]त्र्यक्षं त्रिशिरस्कं त्रिपादं खण्डपरशुम् ॥ ४ ॥

सः किं कृतवान् इत्यत आह—स इति। स भगवान् ब्रह्मा भूतानां अग्रे मृत्युं तमःपेशीप्रधानं रुद्रं त्र्यक्षं त्रिशिरस्कं त्रिपादं खण्डपरशुं असृजत् ॥ ४ ॥

सप्तमानसप्रजापतिसृष्टिः

[2]तस्य ब्रह्मा बिभेति [3]स ब्रह्माणमेव विवेश। स मानसान् सप्त [4]पुत्रानसृजत्। ते ह विराजः सप्त मानसानसृजन्। ते ह प्रजापतयः ॥ ५ ॥

तं सृष्ट्वा किं कृतवान् इत्यतः आह—तस्येति। स्वसृष्टस्य तस्य रूपं दृष्ट्वा चतुर्मुखो भीतो जायते। स जनकभीहेतुः किं कृतवान् इत्यत आह—स इति। भीतं रक्ष इव स रुद्रो जनकं ब्रह्माणमेव आविवेश। तेनाविष्टः किं कृतवान् इत्यत आह—स इति। यः एवं रुद्रावेशक्षुब्धः सः ब्रह्मा मानसान् मनोमात्रोपादानान् सप्त पुत्रान् असृजत्। ते किं कृतवन्तः इत्यत आह—त इति। ते ह सप्त पुत्रा विराजः सप्त पुत्रान् मानसान् असृजन्। ते किमर्थं सृष्टाः इत्यत आह—ते ह प्रजापतय इति। बहुधा प्रजासर्जनार्थं सृष्टा इत्यर्थः ॥ ५ ॥

[1] त्र्यक्षरं—अ, अ १, अ २, क.
[2] न तस्य—अ, अ १, अ २, क
[3] सो ब्र—अ, अ १, अ २, क.
[4] पुरुषान—अ २.

पुरुषात् ब्राह्मणादिसृष्टिः

ब्राह्मणोऽस्य मुखमासीद्बाहू राजन्यः कृतः ।
ऊरू तदस्य यद्वैश्यः पद्भ्यां शूद्रो अजायत ॥
श्रोत्राद्वायुश्च प्राणश्च हृदयात् सर्वमिदं जायते ॥ ६ ॥

एवं सप्त पुत्रान् सृष्ट्वा किंविशेषणविशिष्टान् पुनरसृजत् इत्यत आह—**ब्राह्मणोऽस्येति** । **अस्य** चतुर्मुखस्य **ब्राह्मणो मुखमासीत्** मुखात् सृष्टोऽभूत् इत्यर्थः । तथा **बाहू राजन्यः** क्षत्रियः **कृतः** क्षत्रियस्य बाहुत्वेन कृतसन्निवेशात् बाहुभ्यां अजायत इति यावत् । **यत्तच्च** अव्ययम् । यावस्य **ऊरू** तौ **वैश्यः** तदात्मकः ततोऽजायत इति यावत् । **पद्भ्यां शूद्रो अजायत** । ब्राह्मणादीनां मुखमासीदिति ब्रह्माङ्गता उक्ता, शूद्रस्य तदनर्हत्वात् नीचाङ्गजातिरुक्ता निर्विद्यत्वात्, "तस्माच्छूद्रो निर्विद्योऽभवत्" इति श्रुतेः । **श्रोत्राद्वायुश्च प्राणश्च**, च शब्दात् मनश्चक्षुर्भ्यां चन्द्रसूर्यौ जाताविति द्योत्यते । चतुर्मुखस्य **हृदयात् सर्वमिदं** चराचरात्मकं जगत् **जायते** ॥ ६ ॥

इति प्रथमः खण्डः

पुरुषात् निषादादिसृष्टिः

अपानान्निषादा यक्षराक्षसगन्धर्वाश्चास्थिभ्यः पर्वता लोमभ्य
ओषधिवनस्पतयो ललाटात् क्रोधजो रुद्रो जायते ॥ १ ॥

पुनरङ्गान्तरेभ्यः के जायन्ते इत्यत आह—**अपानादिति** । तस्य ब्रह्मणः अपानस्थानात् **निषादाः** म्लेच्छादिजातिविशेषाः बहवो जायन्ते **यक्षराक्षसगन्धर्वाश्च**। **अस्थिभ्यः पर्वता** इत्यादि—स्पष्टोऽर्थः। अस्य **ललाटात्**

क्रोधजः क्रोधमूर्तिः कालाग्निरूपो **रुद्रो जायते**, छन्दोगानामुपस्थाने "ब्रह्मणः पुत्राय विरूपाक्षाय नमः" इत्युक्तम् ॥ १ ॥

वेदादिशास्त्राविर्भावः

तस्यैतस्य महतो भूतस्य निश्वसितमेतद्यदृग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदः [1]शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषामयनं न्यायो मीमांसा धर्मशास्त्राणि व्याख्यानान्युपव्याख्यानानि च सर्वाणि च भूतानि ॥ २ ॥

तत एव निश्वासवद्वेदाद्याविर्भावमाह—**तस्येति**। **तस्यैतस्य महतो भूतस्य** ब्रह्मणो **निश्वसितो** निश्वासवत् अप्रयत्नेन आविर्भूतः ऋगादिचतुर्वेदः **शिक्षा** स्वरमात्राविभागहेतुः **कल्पः** कल्पसूत्राणि **व्याकरणं** शब्दराशिशोधनं **निरुक्तं** मन्त्रार्थनिर्वचनं **छन्दः** नानावृत्तलक्षणं **ज्योतिषां** सूर्यादीनां **अयनं** गतिनिरूपकं ज्योतिःशास्त्रं **न्यायः** तर्कः पूर्वोत्तरा च **मीमांसा**, पूर्वा तु धर्मविचारः उत्तरा तु ब्रह्मविचारः, **धर्मशास्त्राणि** मन्वादिस्मृतयः **व्याख्यानानि** शाबरमहाभाष्यरूपाणि **उपव्याख्यानानि** प्रकरणानि **सर्वाणि च भूतानि** शब्दप्रकरणात् सर्वप्राणिभाषाश्च, सर्वाणि निश्वसितानि इति पूर्वेण संबन्धः ॥ २ ॥

स्त्रीपुंरूपसृष्टिः

हिरण्यज्योतिर्यस्मिन्नयमात्माऽधि[2]क्षियन्ति भुवनानि विश्वा आत्मानं द्विधाऽकरोदर्धेन स्त्री अर्धेन पुरुषो देवो भूत्वा देवानसृजदृषिर्भूत्वा ऋषीन् यक्षराक्षसगन्धर्वान् ग्राम्यानारण्यांश्च पशूनसृजदितरा गौरितरोऽनड्वानितरा बडवेतरोऽश्व इतरा गर्दभीतरो गर्दभ इतरा विश्वंभरीतरो विश्वंभरः ॥ ३ ॥

[1] शीक्षा—अ, अ १, अ २, क. [2] क्षय—अ, अ १, अ २, क.

अथ यस्मिन् अयमात्मा प्रत्यक् विश्वा विश्वानि भुवनानि लोकाश्च अधिक्षियन्ति अधिक्षेपवत् भवन्ति सोऽसौ भगवान् हिरण्यज्योतिः कला[नक]वर्णस्वरूपो भगवान् स्वात्मानं द्विधा विभागं अकरोत्। कथं? वामार्धेन स्त्री दक्षिणार्धेन पुरुषो बभूव। तथा च बृहदारण्यके "स यथा स्त्रीपुमांसौ संपरिष्वक्ताविममेवात्मानं द्वेधाऽपातयत् ततः पतिश्च पत्नी चाभवतां तस्मादिदमर्धबृगलमिव" इति। तथा उभाभ्यामादिमातापितृभ्यां स्त्रीपुरुषसृष्टिः अद्याप्यनुवर्तते। अथ सपत्नीकः स पुरुषो देवो भूत्वा सपत्नीकान् देवानसृजत् तथा ऋषिर्भूत्वा ऋषीन् तथा यक्षराक्षसगन्धर्वान् ग्राम्यान् आरण्यांश्च पशून् तत्तद्वन्द्वरूपो भूत्वा असृजत्। अयमेवार्थो विशिष्टः प्रदर्श्यते इतरा इत्यादि। इतरा करेणुः इतरो गजो बभूव। तथा इतरोऽनड्वान् इतरा गौः इतराऽश्वबडबा इतरोऽश्वः इतरोऽश्वतरः तथेतराऽश्वतरी इतरा गर्दभी इतरो गर्दभः इतरा विश्वंभरी धरणी इतरो विश्वंभरो भूवराहरूपः। उक्तार्थे बृहदारण्यकवाक्यशेषोऽप्यनुसन्धेयः "सा गौः अभवत् ऋषभः इतरः तां समेवाभवत् ततो गावोऽजायन्त" इत्यादि। एवं स भगवान् स्वमूर्तिभ्यामेव तत्तद्योनिकारणकूटस्थमातापितृरूपो भूत्वा सृष्टिपरम्परां अद्यापि करोति ॥ ३ ॥

प्रपञ्चोपसंहारक्रमः

सोऽन्ते वैश्वानरो भूत्वा [1]सं दग्ध्वा सर्वाणि भूतानि पृथिव्यप्सु प्रलीयत आपस्तेजसि लीयन्ते तेजो वायौ विलीयते वायुराकाशे विलीयत आकाशमिन्द्रियेष्विन्द्रियाणि तन्मात्रेषु तन्मात्राणि भूतादौ विलीयन्ते भूतादिर्महति विलीयते महानव्यक्ते विलीयतेऽव्यक्तमक्षरे विलीयते अक्षरं तमसि विलीयते तमः परे देव एकीभवति परस्तान्न सन्नासन्न सदसदित्येतन्निर्वाणानुशासनमिति वेदानुशासनमिति वेदानुशासनम् ॥ ४ ॥

[1] स द—अ, अ १, अ २, क

स्वज्ञानिदृष्ट्या उपसंहारक्रम उच्यते—**सोऽन्त इति**। अन्ते प्रळये आत्यन्तिकप्रळये वा यः चतुराननरूपेण स्रष्टा विष्णुरूपेण पालयिता स एव **वैश्वानरः** सर्वोपसंहारपण्डितो भूत्वा, समिति पृथक्पदं, **दग्ध्वा सर्वाणि भूतानि** भस्मीकृत्य, उपसंहरतीति शेषः। संभूतिवैपरीत्येनोपसंहारक्रमः। तथा हि प्रसिद्धा इयं **पृथिवी अप्सु प्रलीयत** इत्यादि समानम्। **आकाशं इन्द्रियेषु** सत्वादिगुणेषु। गुणभूतेन्द्रियाणि **भूतादौ** तत्तल्लिङ्गे विलीयन्ते। **भूतादिः महति** जीवघने। **महान् अव्यक्ते** अव्याकृते। अव्यक्तं स्वारोपाधिकरणे **अक्षरे** ईश्वरे। **अक्षरं तमसि** पेशिस्थानीये साक्षिणि **विलीयते**। **तमः** साक्षी तु **परे देवे** ब्रह्मणि एकीभवति। ततो ब्रह्मणः **परस्तात् न सत् नासत् न सदसत्** इत्युक्तार्थम्। इत्येतत् उपदिष्टं तत्त्वं **निर्वाणानुशासनं** सर्वोपसंहारोपदेशः **इति** एवमेव सर्ववेदानुशासनं सर्ववेदान्तेषु मोक्षोपदेशः। आवृत्तिः प्रथमानुशासनसमाप्त्यर्था ॥ ४ ॥

इति द्वितीयः खण्डः

द्वितीयानुशासनम्—तुरीयतत्त्वम्

निर्विकल्पकब्रह्ममन्तुः शोकाभावः

असद्वा इदमग्र आसीदजातमभूतमप्रतिष्ठितमशब्दमस्पर्शमरूपमरसमगन्धमव्ययममहान्तमबृहन्तमजमात्मानं मत्वा धीरो न शोचति ॥ १ ॥

एवं प्रथमानुशासनेन तमःशब्दवाच्यसाक्ष्यादिसर्वप्रपञ्चस्थितिलयप्रकारः उक्तः। अथ साक्ष्यादिप्रपञ्चो यत्र समाप्यते तद्याथात्म्यविवक्षया द्वितीयानुशासनमारभ्यते—**असदित्यादिना**। इदं तमआदि पृथिव्यन्तं कार्यजातं **अग्रे** पूर्वकाले

असद्वै गुणसाम्यावच्छिन्नसाक्षितत्वमेव **आसीत्** । तमआदिपृथिव्यन्तापह्नवसिद्धं ब्रह्म तमआदिप्रपञ्चजन्मस्थितिभङ्गकालेऽपि स्वयं **अजातं** जन्मरहितमेव भवति । यतोऽजातं अत एव **अभूतं** उदयास्तमनकलनाविरळचिदाकाश-स्वरूपत्वात् । तथा **अप्रतिष्ठितं** निरवयवत्वेन निर्विशेषत्वात् । स्वाज्ञदृष्टिविकल्पित-प्रपञ्चप्रसक्तौ स्वज्ञदृष्ट्या तदारोपापवादाधिकरणत्वेऽपि परमार्थदृष्ट्या निरधिकरणं ब्रह्मेत्यर्थः । शब्दादिप्रपञ्चे सति कथं निरधिकरणतेत्यत आह—**अशब्दमित्यादि** । शब्दाद्याश्रयवियदादिपञ्चभूतापह्नवसिद्धत्वात् **अशब्दं अस्पर्शं अरूपं अरसं अगन्धं** अत एव **अव्ययं** निरवयवत्वात् **अमहान्तं** महत्तत्त्वाभावात् **अबृहन्तं** बृहत्तत्त्वाव्यक्ताभावात्, **अजं** स्वस्मात् अन्यानुत्पत्तेः अन्यस्माद्वा स्वस्यानु-त्पत्तेः "स बाह्याभ्यन्तरो ह्यजः," "न जायते म्रियते वा" इति, "स्वतो वा परतो वाऽपि न किञ्चिद्वस्तु जायते" इत्यादि श्रुतेः, गौडपादाचार्योक्तेश्च । एवं अनात्मापह्नवसिद्धं परमात्मानं स्वमात्रमिति **मत्वा धीरो** ब्रह्मविद्वरीयान् **न शोचति** शोचनीयप्रसक्तेः दुर्लभत्वात् ॥ १ ॥

निर्विकल्पकब्रह्मणि प्राणाद्यभावः

अप्राणममुखमश्रोत्रमवागमनोऽतेजस्कमचक्षुष्कमनामगोत्रम - शिरस्कमपाणिपादमस्निग्धमलोहितमप्रमेयमह्रस्वमदीर्घमस्थूलमनण्व - नल्पमपारमनिर्देश्यमनपावृतमप्रकाश्यमसंवृतमनन्तरमबाह्यं न तदश्नाति किंचन न तदश्नाति कश्चन ॥ २ ॥

शोचनीयप्राणादिकलनासत्त्वात् कथं न शोचतीत्यत आह—**अप्राणमित्यादि** । प्राणादिपञ्चवृत्त्यपह्नवसिद्धत्वात् स्वमात्रतया मन्तव्यब्रह्मणः । अतोऽयं विद्वान् न शोचतीत्यर्थः । तथा **अमुखं** मुखाद्यवयववैरळ्यात्, तथा **अश्रोत्रं अवाक्** तथा **अमनः** अमनस्कत्वात् तथा **अतेजस्कं अचक्षुष्कं अनामगोत्रं अशिरस्कं अपाणिपादं** सर्वावयवशून्यमित्यर्थः । **अस्निग्धं** स्नेहगुणविरळं **अलोहितं** रजआदिगुणत्रयातीतं **अप्रमेयं** चक्षुरादिप्रमेयाभावात्

अह्रस्वं अदीर्घं अस्थूलं अनणु, ह्रस्वादीनां सावयवधर्मत्वात् निरवयवस्य ह्रस्वादिकलना कथं सेद्धुं पारयतीत्यर्थः । **अनल्पं** भूमरूपत्वात् **अपारं** कालाद्यपरिच्छिन्नत्वात् अत एव **अनिर्देश्यं** अनिदंस्वरूपत्वात् **अनपावृतं** निरावृतत्वात् **अप्रकाश्यं** स्वप्रकाशकवैरळ्यात् **असंवृतं** स्वसंवरणाविद्याद्वया भावात् **अनन्तरं अबाह्यं** अन्तर्बाह्यविभागहेतुशरीराभावात् । एतादृशं ब्रह्म **न किञ्चन** विषयजातं **अश्नाति** तथा **नापि कश्चन तद्ब्रह्म अश्नाति** स्वातिरिक्तान्नात्त्रोरसंभवात् ॥ २ ॥

ब्रह्मावगत्युपायः फलं च

एतद्वै सत्येन दानेन तपसाऽनाशकेन ब्रह्मचर्येण निर्वेदनेना-नाशकेन षडङ्गेनैव साधयेदेतत्त्रयं [1]वीक्षेत दमं दानं दयामिति न तस्य प्राणा उत्क्रामन्त्यत्रैव समवलीयन्ते ब्रह्मैव सन् ब्रह्माप्येति यं एवं वेद ॥ ३ ॥

यद्येवं निर्विशेषं तदवगत्युपायः कः इत्यत आह—**एतद्वा इति** । **एतद्वै स्वे** महिम्नि प्रतिष्ठितं ब्रह्ममात्रं लौकिकालौकिकसत्येन तथा लौकिकवैदिकवित्त-विद्यादानेन तथा **अनाशकेन** अनशनप्रधानेन **तपसा** तथा द्विविध**ब्रह्मचर्येण** स्वातिरिक्तपदार्थनिर्वेदनेन तीव्रतमवैराग्येण **अनाशकेन** स्त्र्यादिविषयभोग-प्रसक्तिरहितेन स्वातिरिक्तसामान्यसंन्यासेनेति यावत् । एवं सत्यादिलक्षणेन **षडङ्गेन** साधनेनैव **साधयेत्** । तथा **दमं दानं दयां इत्येतत्त्रयं** च ब्रह्मप्राति-साधनमिति **वीक्षेत** । तथा च बृहदारण्यके आम्नातं—"एतत्त्रयं शिक्षेद्दमं दानं दयामिति" । एवं यथोक्तसाधनेन ब्रह्ममात्रविद्यां साधयतः निष्प्रतियोगिक-ब्रह्ममात्रज्ञाने जातेऽपि प्रातिभासिकरूपेण वा प्राणाः सन्तीति यस्य भ्रान्तिः **तस्यापि** निर्विशेषज्ञानमहिम्ना **प्राणाः** स्वाज्ञानिन इव **नोत्क्रमन्ति** नह्युत्क्रमणं

[1] वीक्षणं—अ १, उ १.

भजन्ति । अपि तु अत्र ब्रह्मण्येव समवलीयन्ते जले जलवत् अविशेषतां प्रपद्यन्ते । य एवं विद्वान् सोऽपि ब्रह्मैव सन् ब्रह्माप्येति ब्रह्मैव भवतीत्यर्थः ॥ ३ ॥

इति तृतीयः खण्डः

हृदयस्थनाडीस्वरूपम्

हृदयस्य मध्ये लोहितं मांसपिण्डं यस्मिंस्तद्दहरं पौण्डरीकं कुमुदमिवानेकधा विकसितं हृदयस्य दश छिद्राणि भवन्ति येषु प्राणाः प्रतिष्ठिताः ॥ १ ॥

उत्तमाधिकारिणां ब्रह्ममात्रज्ञानसमकालं ब्रह्मभावापत्तिमुक्त्वा मन्दाधिकारिणां स्वातिरिक्तानात्मप्रपञ्चवैराग्यहेतवे त्रिधामसंसारगतिनिरूपणशेषतया आदौ नाडीस्वरूपं निरूपयति—हृदयस्येति । वक्षोऽभ्यन्तरविलसद्धृदयस्य मध्ये लोहितं मांसपिण्डमिति—लिङ्गस्य लोकाश्रयत्वात् नपुंसकोऽपि पिण्डशब्दः—पिण्डसंस्थानो मांसोऽधिदैवं ब्रह्मपुरस्थानीयोऽस्ति, यस्मिन् हृदयाकारमांसपिण्डे तत् प्रसिद्धं दहरं दग्ध्वा रमते अत्र सर्वानर्थमिति दहराख्यं पौण्डरीकं ईषत्पुण्डरीकं सितपद्मं तत्सम्बन्धि पौण्डरीकं पुण्डरीकसंस्थानतुल्यसंस्थानं अधिदैवं हिरण्मयकमलकोशस्थानीयमिति यावत् । वस्तुतः प्रत्यक्पुरे तु कुमुदमिव अनेकधा अनेकदलभेदेन विकसितं भवति । तस्य हृदयस्य दश छिद्राणि रन्ध्राणि भवन्ति येषु रन्ध्रेषु दश दश वागादयः प्राणाः मुख्यप्राणादयः नागाद्याश्च प्रतिष्ठिताः त इमाः दशनाड्यः प्रथमः कोशः ॥ १ ॥

स्थूलकोशे जाग्रदनुभवः

स यदा प्राणेन सह संयुज्यते तदा पश्यति [1]नद्यो नगराणि बहूनि विविधानि च यदा व्यानेन सह संयुज्यते तदा पश्यति

[1] सद्यो—क.

देवांश्च ऋषींश्च यदाऽपानेन सह संयुज्यते तदा पश्यति यक्षराक्षस-गन्धर्वान् यदोदानेन सह संयुज्यते तदा पश्यति देवलोकान् देवान् स्कन्दं जयन्तं चेति यदा समानेन सह संयुज्यते तदा पश्यति देवलोकान् धनानि च यदा वैरम्भेण सह संयुज्यते तदा पश्यति दृष्टं च श्रुतं च मुक्तं चामुक्तं च सच्चासच्च सर्वं पश्यति ॥ २ ॥

तत्र योऽवरमुख्यप्राणाधारः सोऽयं जीवो जाग्रदवस्थायां यदा प्राणेन सह संयुज्यते सम्बध्यते तदा नद्यो नगराणि बहूनि अनेकानि विविधानि पश्यति। यदा व्यानेन सह संयुज्यते तदा देवांश्च ऋषींश्च पश्यति। यदा अपानेन सह संयुज्यते तदा यक्षराक्षसगन्धर्वान् पश्यति । यदा अत्र उदानेन सह संयुज्यते तदा देवलोकान् देवान् स्कन्दं जयन्तं च पश्यति। यदा समानेन सह संयुज्यते तदा देवलोकान् धनानि च पश्यति। यदा वैरम्भेण प्राणविशेषेण सह संयुज्यते तदा स्वप्नसर्गे जागरणे दृष्टं चादृष्टं च श्रुतं चाश्रुतं च स्त्र्यादिकं भुक्तमभुक्तं च सच्च चाक्षुषं असच्च अचाक्षुषं पश्यति। एवं जागरितवत्प्रथमकोशे पूर्णानुभवः उक्तः ॥ २ ॥

सूक्ष्मकोशे स्वप्नानुभवः

अथेमा दश दश नाड्यो भवन्ति तासामेकै[1]कस्या द्वा-सप्ततिर्द्वासप्ततिः शाखानाडीसहस्राणि भवन्ति यस्मिन्नयमात्मा स्वपिति शब्दानां च करोत्यथ [2]द्वितीये सं कोशे स्वपिति तदेमं च लोकं परं च लोकं पश्यति सर्वाञ्छब्दान् विजानाति स संप्रसाद इत्याचक्षते प्राणः शरीरं परिरक्षति। हरितस्य नीलस्य पीतस्य लोहितस्य श्वेतस्य नाड्यो रुधिरस्य पूर्णाः ॥ ३ ॥

[1] कस्यां—अ, अ १, अ २, क. [2] यद्वितीये—अ २. सद्वितीये—क.

अथेति प्रथमकोशानन्तर्यार्थः। अथेमाः प्रागुक्ताः महानाडयो दशदश शतं भवन्ति वृक्षे उपशाखाभिरिव। तासां शतानां नाडीनां एकैकस्याः नाड्याः द्वासप्ततिर्द्वासप्ततिसङ्ख्याकानि शाखानाडीनां सहस्राणि भवन्ति, यस्मिन् सूक्ष्मनाडीसहस्रस्थाने अयमात्मा जीवः स्वपिति स्वप्नदर्शनमनुभवति शब्दानां च दर्शनं करोति। अथ तत्र सूक्ष्मस्वापस्थाने द्वितीये सं कोशे—समिति पृथक्पदं—द्वितीयकोशसंसृष्टः सन् यदा स्वपिति स्वप्नानुभवं करोति तदा इमं च लोकं परं च लोकं—चशब्दद्वयतः तत्तल्लोकार्थानुष्ठेयं च—पश्यति। सर्वान् शब्दान् विजानाति। एवं अत्यल्प इहार्थानुभवः। तमेतं द्वितीयादि-कोशस्थं संप्रसाद इत्याचक्षते। वक्ष्यमाणतृतीयकोशे करणोपरमात् विषय-कालुष्यरहितः प्रसन्न एव भवति। द्वितीयेऽपि कोशे करणानामुपरतकल्पत्वात् संप्रसादत्वम्। अस्यामुपरतकल्पावस्थायां प्राण एव केवलं निजकर्मनियुक्तः प्रोषितयजमानगृहदासीदासादिरिव स्थूलशरीरं परिरक्षति निजवृत्तिभिः सुप्त-जनकग्रामं पालका इव। ताः इमाः शाखानाडयो हरितस्य नीलस्य पीतस्य लोहितस्य श्वेतस्य रुधिरस्य वातपित्तादिरसस्य पूर्णः। पूर्णयोगे छन्दसि तृतीयायां षष्ठी दृश्यते। हरितादिवर्णेन पूर्णा इत्यर्थः ॥ ३ ॥

हृदयाकाशे सुषुप्त्यनुभवः

अथ यत्रैतद्धरं पुण्डरीकं कुमुदमिवानेकधा विकसितं यथा केशः सहस्रधा भिन्नस्तथा हिता नाम नाड्यो भवन्ति हृद्याकाशे परे कोशे दिव्योऽयमात्मा स्वपिति यत्र सुप्तो न कंचन कामं कामयते न कंचन स्वप्नं पश्यति न तत्र देवा न देवलोका यज्ञा न यज्ञा वा न माता न पिता न बन्धुर्न बान्धवो न स्तेनो न ब्रह्महा तेजस्कायममृतं सलिल एवेदं सलिलं वनं[मग्नं] भूयस्तेनैव मार्गेण जाग्राय धावति सम्राडिति होवाच ॥ ४ ॥

अथशब्दः तृतीयकोशारम्भार्थः। यत्रैतत् दहरं पुण्डरीकं कुमुदमिव अनेकधा विकसितमित्युक्तार्थं, तत्र यथा एकः केशः सहस्रधा भिन्नो विदीर्णः परमसूक्ष्मः तथा परमसूक्ष्मा हिता नाम नाडयो भवन्ति। तत्र लोचनकण्ठप्राधान्येन प्रथमद्वितीयकोशौ, हृदयप्राधान्येन तृतीयकोशो विज्ञेयः। नेत्रकण्ठहृदयविभाता हि जाग्रदादिप्रथमद्वितीयतृतीयकोशाः इत्यत्र—

नेत्रस्थं जागरितं विद्यात् कण्ठे स्वप्नं समाविशेत्।
सुषुप्तं हृदयस्थं तु तुरीयं मूर्ध्नि संस्थितम्॥

इति श्रुतेः। कोशद्वयापेक्षया हृद्याकाशे परे उत्कृष्टे तृतीयकोशे तदन्तर्वर्तिनि हृदयाकाशे दिव्योऽयमात्मा जीवः स्वपिति करणग्रामोपरतिलक्षणां सुप्तिं गतो भवति, यत्र तृतीयकोशे सुप्तोऽयमात्मा न कंचन कामं कामयते न कंचन स्वप्नं पश्यति। तत्र तृतीयकोशे देवलोकानुग्रहकारिणो देवा न भवन्ति, तथा स्वावासयोग्या लोका न भवन्ति। तथा यज्ञाः न यज्ञाः न माता न पिता तथा न बन्धुः भ्रात्रादिः न बान्धवो ज्ञातिः न स्तेनो न ब्रह्महा। एवमादिव्यवहारातीतं जीवस्वरूपं तेजस्कायं शक्तित्रयमयतेजः-शरीरात्मकमेव भवति। महान् अव्यक्ते विलीयत इति यत् पुरोक्तं तदिदं अमृतं शाश्वतं तेजःशरीरम्। तदानीं सलिल एव हार्दहिताऽऽकाशात् कमलनाळमार्गेण नाभिस्थकमलाधारजल एव मग्नं यथोपसंहृतस्रोतस्कं कारणशरीरं संवर्तसमुद्रजले उदरस्थाने सलिल एव स्थितं पुरुषोपग्रहं आन्तरं शरीरं भूयः पुनरपि कालकर्मोद्भूतं सत् तेनैव मार्गेण पुण्डरीकाधारं प्राप्य प्रतितिष्ठति पुनस्तृतीयकोशात् द्वितीयं प्रथममिति क्रमेण प्रत्यागतो जाग्राय—औणादिकः—जागरणाय बहिःपदार्थानुभवाय धावति जागरितादिस्थानं गच्छति। सोऽयं समन्तात् राजत इति सम्राट्। यद्वा—चतुर्थकोशारूढतुरीयं ब्रह्म सम्राडिति होवाच॥ ४॥

इति चतुर्थः खण्डः

कोशत्रयगतात्मनः तुरीयब्रह्मत्वम्

स्थानानि स्थानिभ्यो यच्छति नाडी तेषां निबन्धनं चक्षुरध्यात्मं द्रष्टव्यमधिभूतमादित्यस्तत्राधिदैवतं नाडी तेषां निबन्धनं यश्चक्षुषि यो द्रष्टव्ये य आदित्ये यो नाड्यां यः प्राणे यो विज्ञाने य आनन्दे यो हृद्याकाशे य एतस्मिन् सर्वस्मिन्नन्तरे संचरति सोऽयमात्मा तमात्मानमुपासीताजरममृतमभयमशोकमनन्तम् ॥ १ ॥

श्रोत्रमध्यात्मं श्रोतव्यमधिभूतं दिशस्तत्राधिदैवतं नाडी तेषां निबन्धनं यः श्रोत्रे यः श्रोतयितव्ये यो दिक्षु यो नाड्यां यः प्राणे यो विज्ञाने य आनन्दे यो हृद्याकाशे य एतस्मिन् सर्वस्मिन्नन्तरे संचरति सोऽयमात्मा तमात्मानमुपासीताजरममृतमभयमशोकमनन्तम् ॥ २ ॥

नासाऽध्यात्मं घ्रातव्यमधिभूतं पृथिवी तत्राधिदैवतं नाडी तेषां निबन्धनं यो नासायां यो घ्रातव्ये यः पृथिव्यां यो नाड्यां . . . नन्तम् ॥ ३ ॥

जिह्वाऽध्यात्मं रसयितव्यमधिभूतं वरुणस्तत्राधिदैवतं नाडी तेषां निबन्धनं यो जिह्वायां यो रसयितव्ये यो वरुणे यो नाड्यां . . . नन्तम् ॥ ४ ॥

त्वगध्यात्मं स्पर्शयितव्यमधिभूतं वायुस्तत्राधिदैवतं नाडी तेषां निबन्धनं यस्त्वचि यः स्पर्शयितव्ये यो वायौ यो नाड्यां . . . नन्तम् ॥ ५ ॥

मनोऽध्यात्मं मन्तव्यमधिभूतं चन्द्रस्तत्राधिदैवतं नाडी तेषां निबन्धनं यो मनसि यो मन्तव्ये यश्चन्द्रे यो नाड्यां . . . नन्तम् ॥

बुद्धिरध्यात्मं बोद्धव्यमधिभूतं ब्रह्मा तत्राधिदैवतं नाडी तेषां निबन्धनं यो बुद्धौ यो बोद्धव्ये यो ब्रह्मणि यो नाडचां . . . नन्तम् ॥ ७ ॥

अहंकारोऽध्यात्ममहंकर्तव्यमधिभूतं रुद्रस्तत्राधिदैवतं नाडी तेषां निबन्धनं योऽहंकारे योऽहंकर्तव्ये यो रुद्रे यो नाडचां . . . नन्तम् ॥ ८ ॥

चित्तमध्यात्मं चेतयितव्यमधिभूतं क्षेत्रज्ञस्तत्राधिदैवतं नाडी तेषां निबन्धनं यश्चित्ते यश्चेतयितव्ये यः क्षेत्रज्ञे यो नाडचां . . . नन्तम् ॥ ९ ॥

वागध्यात्मं वक्तव्यमधिभूतमग्निस्तत्राधिदैवतं नाडी तेषां निबन्धनं यो वाचि यो वक्तव्ये योऽग्नौ यो नाडचां . . . नन्तम् ॥ १० ॥

हस्तावध्यात्ममादातव्यमधिभूतमिन्द्रस्तत्राधिदैवतं नाडी तेषां निबन्धनं यो हस्ते य आदातव्ये य इन्द्रे यो नाडचां . . . नन्तम् ॥ ११ ॥

पादावध्यात्मं गन्तव्यमधिभूतं विष्णुस्तत्राधिदैवतं नाडी तेषां निबन्धनं यः पादे यो गन्तव्ये यो विष्णौ यो नाडचां . . . नन्तम् ॥ १२ ॥

पायुरध्यात्मं विसर्जयितव्यमधिभूतं मृत्युस्तत्राधिदैवतं नाडी तेषां निबन्धनं यः पायौ यो विसर्जयितव्ये यो मृत्यौ यो नाडचां . . . नन्तम् ॥ १३ ॥

उपस्थोऽध्यात्ममानन्दयितव्यमधिभूतं प्रजापतिस्तत्राधिदैवतं नाडी तेषां निबन्धनं य उपस्थे य आनन्दयितव्ये यः प्रजापतौ यो नाड्यां यः प्राणे यो विज्ञाने य आनन्दे यो हृद्याकाशे य एतस्मिन् सर्वस्मिन्नन्तरे संचरति सोऽयमात्मा तमात्मानमुपासीताजरममृतमभयमशोकमनन्तम् ॥ १४ ॥

एवं जाग्रदादिकोशत्रयगतात्मनः तुर्यब्रह्मतया उपासनाया जरामृतत्वादिस्वरूपप्रकटनाय खण्डिकेयमारभ्यते—**स्थानानीति** । चक्षुःकनीनिकादिस्थानविशेषवद्भ्यो **स्थानिभ्यः स्थानानि** चक्षुःकनीनिकाऽऽदितत्तद्गोळकलक्षणानि **यच्छति** प्रयच्छति । एवं स्थानिनां स्थानप्रदाने कूटस्थात्मनो **नाडयेव निबन्धनं** साधनम् । के ते स्थानिनः इत्यत्र—कनीनिकास्थानिनो रूपग्राहकं **चक्षुरध्यात्मं**, रूपलक्षणस्थानं **द्रष्टव्यमधिभूतं** प्रतिष्ठा । **तत्र** द्रष्टव्ये प्रतिष्ठितस्य **तस्य आदित्योऽधिदैवतं** अनुग्राहकस्थानम् । एवं त्रिस्थानस्थानिनश्चक्षुषः स्थानसम्बन्धेऽपि **नाडयेव** चाक्षुषो नाडीसम्बन्ध एव **निबन्धनं** कारणम् । **य** आत्मा **चक्षुषि** संचरति **यो द्रष्टव्ये य आदित्ये यः** त्रिस्थानसंसर्गहेतौ **नाड्यां यः प्राणे** नाड्यवच्छिन्ने चक्षुःशक्तिप्रापके **यो विज्ञाने** चक्षुःशक्तिद्वारा प्रकाशके बुद्धिमये जीवे **य आनन्दे** रूपज्ञानजानन्दवृत्तौ तत्स्मृतौ च **यो हृद्याकाशे** रूपज्ञानतत्फलानन्दस्वीयाभिमानलक्षणहार्दवृत्तौ **य एतस्मिन् सर्वस्मिन्नन्तरे** अन्तर्यामी भूत्वा **संचरति सोऽयं** सर्वानुस्यूततुर्यात्मा **तमिममात्मानं** अन्तर्यामिणं **अजरं** जराऽऽदिविकारातीतं **अमृतं** मृत्यादिविक्रियारहितं **अभयं** भयहेतुद्वैतशून्यं **अशोकं** कालत्रयेऽपि सांसारिकशोकविरळं **अनन्तं** त्रिविधपरिच्छेदशून्यं तुर्यात्मानं **उपासीत** तुरीयं ब्रह्मास्मीत्यनुसन्धानं कुर्यात् ॥ १ ॥ तथा **श्रोत्रं अध्यात्मं श्रोतव्यं** शब्दलक्षणं **अधिभूतम्** । **यः प्राणे** इत्यादि सर्वपर्यायेषु समानम् ॥ २–७ ॥ **अहंकर्तव्यं** स्वात्मात्मीयतया अभिमन्तव्यम् ॥ ८ ॥ **चित्तं** नाम कारणशरीरात्मकं **चेतयितव्यं** स्वापवृत्त्यादिकं **अधिभूतं** कारण**क्षेत्रज्ञोऽत्राधिदैवतम्** ॥ ९–१४ ॥

ईश्वरस्य तुर्यानतिरेकः

एष सर्वज्ञ एष सर्वेश्वर एष सर्वाधिपतिरेषोऽन्तर्याम्येष योनिः सर्वस्य सर्वसौख्यैरुपास्यमानो न च सर्वसौख्या[1]नुपास्यति वेदशास्त्रै-रुपास्यमानो न च वेदशास्त्रा[2]नुपास्यति यस्यान्नमिदं सर्वं [3]न च योऽन्नं भवत्यतः परं सर्वनयनप्रशास्ताऽन्नमयो भूतात्मा प्राणमय इन्द्रियात्मा मनोमयः संकल्पात्मा विज्ञानमयः कालात्माऽऽनन्दमयो लयात्मैकत्वं नास्ति द्वैतं कुतो मर्त्यं नास्त्यमृतं कुतो नान्तःप्रज्ञो न बहिःप्रज्ञो नोभयतःप्रज्ञो न प्रज्ञानघनो न प्रज्ञो नाप्रज्ञोऽपि नो विदितं वेद्यं नास्तीत्येतन्निर्वाणानुशासनमिति वेदानुशासनमिति वेदानुशासनम् ॥ १९ ॥

तुर्यातिरिक्तोऽयमीश्वर इत्यत आह—**एष सर्वज्ञ इति** । योऽजरामृताभय-त्वेनोक्तः **एष** एव मूलाविद्याबीजांशयोगतः **सर्वज्ञः** सर्वविदित्यर्थः । किंच—**एष** इति । **एष सर्वेश्वरः** सर्वनियन्तृत्वात्, **एष सर्वाधिपतिः** सर्वमधिष्ठाय पालयितृत्वात्, **एषोऽन्तर्यामी** सर्वान्तरत्वात्, **एष योनिः सर्वस्य** कार्य-सामान्यस्य योनिः कारणरूपत्वात् । किंच—**सर्वसौख्यैरिति** । लौकिकालौ-किक**सर्वसौख्यैः** हेतुभिः तत्सिद्धये स्वांशजजीवकोटिभिः **उपास्यमानो** भवति स्वस्यैव सर्वसौख्यफलप्रदत्वात्, सोऽसौ भगवान् सर्वसौख्यान्—सौख्यानीति लिङ्गव्यत्ययः—तान्युद्दिश्य न किंचि**नोपास्यति** । तथा प्रागुक्तफलाय **वेदशास्त्रैः** तदुपदिष्टसाधनैः अयमुपास्यो भवति **न** चासौ **वेदशास्त्रान्** शास्त्राणि तत्प्रभवसाधनानि **उपास्यति** स्वयं नानुतिष्ठतीत्यर्थः, स्वस्यैव फलरूपत्वात् । **यस्येदं** स्वाविद्यापदतत्कार्यजातं **अन्नं** भोज्यं भवति, **यो न कस्यचिदप्यन्नं** भोग्यं **भवति** स्वातिरिक्तान्नान्नादाभावात् । यत एवं **अतः**

[1] न्युपा—अ २, क. [2] ण्युपा—अ २, क. [3] तच—अ, अ १.

सर्वनयनप्रशास्ता स्वातिरिक्तप्रपञ्चपञ्चकृत्यप्रवर्तकत्वात् प्रशास्तृत्वं तस्यास्य, अतः कार्यप्रपञ्चात् **परं** तत्त्वं ब्रह्म पञ्चधा उपदिश्यते **अन्नेति**। स्थूलप्रपञ्चमयत्वात् **अन्नमयः**, **भूतात्मा** विराट् **प्राणमयः** सूक्ष्मशरीरमयः, **इन्द्रियात्मा** हिरण्यगर्भ उच्यते, **मनोमयः** अन्तरशरीरमयः, **सङ्कल्पात्मा** बीजात्मेत्युच्यते बीजात्मनः सत्यसङ्कल्पत्वात्। **विज्ञानमयः** "यदा पञ्चावतिष्ठन्ते ज्ञानानि मनसा सह" इति श्रुत्यनुरोधेन समाधिनिष्पन्नो विज्ञानमयः, **कालात्मा** कालरूपगुणसाम्यावभासकसाक्ष्यात्मा, "सुखमात्यन्तिकं यत्तद्बुद्धिग्राह्यमतीन्द्रियं," "यस्मिन् स्थितो न दुःखेन गुरुणाऽपि विचाल्यते" इति स्मृत्यनुरोधेन, **आनन्दमयः** प्रत्यगानन्दाभिन्नपरमानन्दस्वरूपः, **लयात्मा** स्वातिरिक्तप्रपञ्चविलयाधिकरणत्वात्। उक्तविशेषणविशिष्टे परमात्मनि सापेक्षैकत्वमपि **नास्ति कुतो द्वैतं**, "एकाभावे द्वितीयं न" इति श्रुतेः। **न** कुतोऽपि **मर्त्यं** न हि मर्त्यशरीरादिविकल्पोऽस्ति, **अमृत**विकल्पोऽपि **कुतः** संभवति, "मरणं यदि चेज्जन्म जन्माभावे मृतिर्न च" इति श्रुतेः, निष्प्रतियोगिकब्रह्ममात्रावगतेः एकानेकादिविकल्पापह्नवपूर्वकत्वात्। अन्तर्बाह्यादिप्रज्ञाविकल्पतया वेद्यस्य कुतो ब्रह्ममात्रतेत्यत आह—**नान्तःप्रज्ञ** इति। स्वान्तः स्वाज्ञविकल्पितकामसङ्कल्पादिवृत्तिविकल्पवृत्त्यारोपापवादाधिकरणतैजसतुर्यकलनाबाह्यत्वात्। तथा अयं **न बहिःप्रज्ञः** बहिःप्रज्ञाऽऽरोपापवादाधिकरणविश्वतुर्यकलनावैरळ्यात्। तथा **नोभयतःप्रज्ञः** स्वस्मिन् स्वातिरिक्ते वा प्रज्ञाविरळप्राज्ञतुर्यविकल्पासहत्वात्। अत एव **न प्रज्ञानघनः** जाग्रदादिप्रज्ञानैः घनो निबिडः, विराडादितत्कलनाभावात्। तथा **न प्रज्ञः** विषयप्रज्ञावैरळ्यात्। **नाप्रज्ञोऽपि** स्वाज्ञानविषयकप्रज्ञाभावात्, भूमानन्दमात्रप्रज्ञत्वाच्च। कस्मादेवं न प्रतीयत इत्यत्र —**नो विदितं वेद्यं नास्तीति**, स्वातिरिक्तं विदितं न भवति, निष्प्रतियोगिकस्वमात्रत्वात्। **एतत्** यथोपदिष्टं **निर्वाणानुशासनमिति वेदानुशासनमिति वेदानुशासनमित्युक्तार्थम्॥ १५॥**

इति पञ्चमः खण्डः

तृतीयानुशासनम्—स्वमात्रतत्त्वम्

ब्रह्मण एव सर्वसृष्टिः

नैवेह किंचनाग्र आसीदमूलमनाधारा इमाः प्रजाः प्रजायन्ते ॥ १ ॥

एवं प्रथमद्वितीयानुशासनाभ्यां बहूपायपूर्वकं तुर्यतत्त्वं निर्धारितम् । इदानीं स्वातिरिक्तप्रपञ्चयाथात्म्यप्रतिपादनद्वारा तृतीयानुशासनेन स्वमात्रतत्त्वं निर्धार्यते—नैवेहेत्यादिना । इहेदानीं परिदृश्यमानकार्यजातं किंचनाप्यग्रे प्रागुत्पत्तेः नैवासीत्, अपि तु अमूलमेवासीत्, नत्वर्थान्तरम् । तस्मात् कारणात् तमोभूतादिक्रमेण प्रक्रमोक्तरीत्या इमाः प्रजाः अनाधाराः भगवदतिरिक्ताधाराधेयवैरळ्यात् भगवदाधाराः रज्जुसर्पवत् जायन्ते । सोऽसौ स्वाज्ञविकल्पितप्रजाऽऽधारभूतो नारायण एक एव ॥ १ ॥

सर्वप्रपञ्चस्य नारायणानतिरेकः

चक्षुश्च द्रष्टव्यं च नारायणः श्रोत्रं च श्रोतव्यं च नारायणो घ्राणं च घ्रातव्यं च नारायणो जिह्वा च रसयितव्यं च नारायणस्त्वक् च स्पर्शयितव्यं च नारायणो मनश्च मन्तव्यं च नारायणो बुद्धिश्च बोद्धव्यं च नारायणोऽहंकारश्चाहंकर्तव्यं च नारायणश्चित्तं च चेतयितव्यं च नारायणो वाक् च वक्तव्यं च नारायणो हस्तौ चादातव्यं च नारायणः पादौ च गन्तव्यं च नारायणः पायुश्च विसर्जयितव्यं च नारायण उपस्थश्चानन्दयितव्यं च नारायणो धाता [1]विधाता कर्ता विकर्ता दिव्यो देव एको नारायणः ॥ २ ॥

[1] विधर्ता—क.

आदित्या रुद्रा मरुतो वसवोऽश्विनावृचो यजूंषि सामानि मन्त्राग्निराज्याहुति [1]संभवो दिव्यो देव एको नारायणः ॥ ३ ॥

माता पिता भ्राता निवासः शरणं सुहृद्गतिर्नारायणः ॥ ४ ॥

कथं पुनः नारायणस्यैकत्वं इत्याशङ्क्य, स्वाज्ञदृष्टिविकल्पितचक्षुरादि दिश इत्यन्तं तद्दृष्ट्या मिथो भिन्नमपि स्वज्ञदृष्ट्या सर्वं नारायण एव परमार्थदृष्ट्या नारायणादतिरिक्तं न किंचिदस्तीत्याह—चक्षुश्चेति । चक्षुरिन्द्रियं **द्रष्टव्यं** रूपजातं, चशब्दद्वयतो द्रष्टा च । स्वाज्ञदृष्ट्या मिथो भेदेऽपि स्वज्ञदशायां एतत्त्रयं नारायण एव । तथा श्रोत्रं चेत्यादि समानम् । **धाता** विराट् स्वाविद्याऽण्डस्थूलांशधारकत्वात् । **विधाता** हिरण्यगर्भात्मना तत्सूक्ष्मांशधारकत्वात् । **कर्ता** ईश्वरात्मना तद्बीजांशमवष्टभ्य स्वातिरिक्तप्रपञ्चसर्गस्थितिसंहारकर्तृत्वात् । **विकर्ता** तुर्यात्मना तत्तुर्यांशासङ्गतया च विगतकर्तृत्वात् । स्वेन रूपेण **दिव्यो देव एको नारायणः** स्वे महिम्नि विद्योतमानपरमात्मरूपत्वात् ॥ २ ॥ तथा द्वादशादित्याः एकादश **रुद्राः** सप्त **मरुतः** अष्टौ **वसवः अश्विनौ** ऋगादिवेदचतुष्टयं मन्त्रो याज्यापुरोनुवाक्यादिः होममन्त्रः तदाधारः त्रेताग्निः तत्साधनं आज्यं तदुपलक्षितं होमद्रव्यं **आहुतिः** हवनक्रिया च **संभवः** जन्म च **दिव्यो देव एको नारायणः** ॥ ३ ॥ मात्रादिसुहृदन्तं परलोकगतिश्च **नारायणः** ॥ ४ ॥

परागतिप्रापकसुषुम्नानामानि

विराजा सुदर्शनाजितासोम्यामोघाकुमारामृतासत्यामध्यमा-[2]नासीराशिशुरासुरासूर्या[3]भास्वतीविज्ञेयानि नाडीनामानि दिव्यानि ॥९॥

तस्य परागतिरूपस्य नारायणस्य प्राप्तिद्वारसुषुम्नानामानि कानीत्यत आह—**विराजेति** तत्प्राप्तिहेतुत्वात्, **सुदर्शना** ज्ञानिदर्शनीयत्वात्, **जिता**

[1] संभवादिति दि—अ २, क. [2] नासिम—अ. नासीना—अ १.
[3] भास्वरा—अ २, क

अपराजितब्रह्मप्राप्तिहेतुत्वात्, **सौम्या** सुखमार्गत्वात्, **अमोघा** अप्रच्युतिहेतुत्वात्, **कुमारा** बाल्यपदप्रापकत्वात्, **अमृता** अमृतत्वहेतुत्वात्, "तयोर्ध्वमायन्नमृतत्वमेति" इति श्रुतेः, **सत्या** सत्यब्रह्मलोकप्राप्तिहेतुत्वात्, **मध्यमा** इडाऽऽदिदशनाडीमध्यगत्वात्, **नासीरा** नाडीनां प्रधानत्वात्, शिशून् प्राणान् रातीति **शिशुरा** प्राणविश्रान्तिस्थानत्वात्, असुं मुख्यं प्राणं रातीत्यसुरा हिरण्यगर्भपदप्रापकत्वात्, **सूर्या** सूर्यगतिप्रदत्वात्, **भास्वती** अर्चिर्मार्गत्वात्, इत्येवं नारायणप्राप्तिहेतुसुषुम्नानाडीनामानि दिव्यानि अप्राकृतानि ॥ ५ ॥

नारायणस्यैव सर्वत्र कर्तृत्वम्

[1]गर्जति गायति वाति वर्षति वरुणोऽर्यमा चन्द्रमाः[2]कालः कविर्धाता [3]ब्रह्मा मघवा दिवसाश्चार्धदिवसाश्च कलाः कल्पाश्चोर्ध्वं च दिशश्च सर्वं नारायणः ॥ ६ ॥

पुरुष एवेदं सर्वं यद्भूतं यच्च भव्यम् ॥
तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः ।
दिवीव चक्षुराततम् ॥
तद्विप्रासो विपन्यवो जागृवांसः समिन्धते ।
विष्णोर्यत् परमं पदम् ॥
तदेतन्निर्वाणानुशासनमिति वेदानुशासनमिति वेदानुशासनम् ॥ ७ ॥

[1] गच्छति —अ, अ १, उ १.

[2] कलाकलि—अ, अ १, अ २, क, मु. व्याख्यानुसारी पाठस्तु "कालः कविः" इति.

[3] ब्रह्मा प्रजापतिर्मघवा—मु.

एवं नाडीगन्तव्योऽयमात्मा यः स एव पर्जन्यो भूत्वा **गर्जति**, गन्धर्वो भूत्वा **गायति**, वायुः भूत्वा **वाति**, मेघो भूत्वा **वर्षति**। स एव **वरुणो** जलेश्वरः, स एव **अर्यमा** सूर्यः **चन्द्रमाः कालः निमेषादिः कविः शुक्रः धाता ब्रह्मा मघवा** मघवान् इन्द्रः। **दिवसाः** षष्टिघटिकामात्राः, निशामात्रं अहर्मात्रं वा अर्धदिवसाः, चशब्दो यामोपलक्षणार्थः। **कलाः** विकला घटिकामात्रपूरकषष्टिविघटिकाः, **कल्पाश्च** मानवाहोरात्ररूपाः महाकल्पाः वैराजाहोरात्ररूपाः, अधश्चोर्ध्वं च, दिशश्च प्रागाद्याः, चशब्दात् आग्नेयादि-विदिशोऽपि गृह्यन्ते। यदुक्तं चक्षुरित्यादि दिशइत्यन्तं अनुक्तं वा **सर्वं नारायणः** ॥ ६ ॥ **पुरुष एवेदं सर्वं यद्भूतं** अतीतं **यच्च भव्यं** वर्तमानं भविष्यच्च, एवमुक्तं अनुक्तं सर्वं नारायण एवेत्यर्थः। **तद्विष्णोः** व्यापनशीलस्य **परमं** उत्कृष्टं व्याप्यसापेक्षव्यापकताऽपह्नवसिद्धब्रह्ममात्रतया पद्यत इति **पदं सूरयः** ब्रह्मविद्वरीयांसः स्वमात्रतया **सदा पश्यन्ति**। पश्यन्तीति व्यपदेशतः परिच्छेदप्रसक्तौ **दिवि चक्षुरिव आततं** अपरिच्छिन्नमित्यर्थः। सूरयः कीदृशाः? **विप्रासो** विप्राः **विपन्यवो** गतमन्यवः **जागृवांसः** स्वाज्ञाननिद्राविरळा इत्यर्थः। उक्तविशेषणविशिष्टाः सूरयो यत् **समिन्धते यद्विष्णोः परमं पदं** सदा अनुसन्दधते तदेव निष्प्रतियोगिकब्रह्ममात्रतया अवशिष्यते। **इति**शब्दो मन्त्रपरिसमाप्त्यर्थः ॥ ७ ॥

इति षष्ठः खण्डः

चतुर्थानुशासनम्—अन्तर्यामिस्वरूपम्

नारायणस्य सर्वान्तर्यामित्वम्

अन्तःशरीरे निहितो गुहायामज एको नित्यो यस्य पृथिवी शरीरं यः पृथिवीमन्तरे संचरन् यं पृथिवी न वेद यस्यापः

शरीरं योऽपोऽन्तरे संचरन् यमापो न विदुः यस्य तेजः शरीरं यस्तेजोऽन्तरे संचरन् यं तेजो न वेद यस्य वायुः शरीरं यो वायुमन्तरे संचरन् यं वायुर्न वेद यस्याकाशः शरीरं य आकाशमन्तरे संचरन् यमाकाशो न वेद यस्य मनः शरीरं यो मनोऽन्तरे संचरन् यं मनो न वेद यस्य बुद्धिः शरीरं यो बुद्धिमन्तरे संचरन् यं बुद्धिर्न वेद यस्याहंकारः शरीरं योऽहंकारमन्तरे संचरन् यमहंकारो न वेद यस्य चित्तं शरीरं यश्चित्तमन्तरे संचरन् यं चित्तं न वेद यस्याव्यक्तं शरीरं योऽव्यक्तमन्तरे संचरन् यमव्यक्तं न वेद यस्याक्षरं शरीरं योऽक्षरमन्तरे संचरन् यमक्षरं न वेद यस्य मृत्युः शरीरं यो मृत्युमन्तरे संचरन् यं मृत्युर्न वेद स एष सर्वभूतान्तरात्माऽपहतपाप्मा दिव्यो देव एको नारायणः ॥ १ ॥

उक्तार्थमेव अन्तर्यामिनिरूपणद्वारा प्रकटयितुं चतुर्थानुशासनमारभ्यते—**अन्तरिति**। परावरान्तःशरीरमध्ये व्यष्टिसमष्टिहृदयगुहायां **निहितः** प्रत्यगादि-**रूपेण** निक्षेपवत् प्रतिष्ठितः। शरीरासनतो जन्मादित्वं स्यादित्यत आह—**अज इति**। घटाद्यसङ्गाकाशवत् देहाद्यसङ्गात्मनो जन्माद्यभावात्। अत एव **नित्यः**। स्वविकल्पोपाधिषु अनेकेष्वपि स्वयं नित्य एक एव, द्वित्वाभावात्। **यस्याद्वयात्मनः पृथिवी शरीरं** स्वनियम्यत्वात्, **यः पृथिवीमन्तरे संचरन्** तदात्मतया वर्तमानो भवति, अत एव जडात्मिकेयं **पृथिवी यं** स्वान्तरात्मभूतं **न वेद, स एषः** इत्यग्रेण सम्बन्धः। **यस्याप** इत्यादि समानम्। **अक्षरमीश्वर**-तत्त्वम्। स्वातिरिक्तं मारयतीति **मृत्युः** साक्षी **यं** परमात्मानं **न वेद स एष** स्वाज्ञदृष्टिप्रसक्तसर्वभूतेषु स्वज्ञदृष्ट्या **अन्तरात्मा अपहतपाप्मा** व्याविद्धपापपुण्यत्वात्, **दिव्यो देव एको नारायणः** उक्तार्थः ॥ १ ॥

एतद्विद्यावंशः

एतां विद्यामपान्तरतमाय ददावपान्तरतमो ब्रह्मणे ददौ ब्रह्मा घोराङ्गिरसे ददौ घोराङ्गिरा रैकाय ददौ रैको रामाय ददौ रामः सर्वेभ्यो भूतेभ्यो ददावित्येवं निर्वाणानुशासनमिति वेदानुशासनमिति वेदानुशासनम् ॥ २ ॥

स्वाङ्गसमर्पितसविशेषताऽपाये निष्प्रतियोगिकब्रह्ममात्रमवशिष्यते इत्येतां विद्यां आदिब्रह्मा यस्मात् अपान्तरमपगतं तमः सोऽयं अपान्तरतमः तस्मै **अपान्तरतमाय ददौ**। सोऽसौ अपान्तरतमो विष्णुः **ब्रह्मणे** चतुर्मुखाय **ददौ**। सोऽसौ **ब्रह्मा घोराङ्गिरसे** ददौ। घोराङ्गिराः **रैकाय ददौ, रैकः** परशुरामाय **ददौ**। रामः **सर्वेभ्यो भूतेभ्यो ददौ** ॥ २ ॥

इति सप्तमः खण्डः

पञ्चमानुशासनम्—शरीरस्थात्मतत्त्वम्

शरीरस्थस्याप्यात्मनः शुद्धत्वम्

अन्तःशरीरे निहितो गुहायां शुद्धः सोऽयमात्मा सर्वस्य मेदोमांसक्लेदावकीर्णे शरीरमध्येऽत्यन्तोपहिते चित्रभित्तिप्रतीकाशे गन्धर्वनगरोपमे कदलीगर्भवन्निःसारे जलबुद्बुदवच्चञ्चले निःसृतमात्मानमचिन्त्यरूपं दिव्यं देवमसङ्गं शुद्धं तेजस्का[1]यमरूपं सर्वेश्वरमचिन्त्यमशरीरं निहितं गुहायाममृतं विभ्राजमानमानन्दं तं पश्यन्ति विद्वांसस्तेन लयेन पश्यन्ति ॥ १ ॥

वैराग्यहेतोः शरीरयाथात्म्यप्रकटनपूर्वकं तन्निःसृतात्मयाथात्म्यं प्रपञ्चयितुं पञ्चमानुशासनमारभ्यते—अन्तरिति। **अन्तःशरीरे निहितो गुहायां**

[1] यं सर्वरूपं—उ, उ १.

इत्युक्तार्थम् । यः सर्वप्राणिगुहागतः शुद्धः **सोऽयमात्मा** । सर्वस्य ब्रह्मादिस्तम्बान्तस्य शरीरत्रये अशुद्धेऽपि तद्गतविकारास्पृष्टप्रत्यगात्मा शुद्ध एव स्थूलदेहमध्यगतोऽपीत्याह—**सर्वस्येति**। **सर्वस्य स्थूलशरीरजातस्य मेदोमांसक्लेदावकीर्णे** मेदोमांससम्बन्धिक्लेदेन द्रवेण अवकीर्णे विलिप्ते दुर्गन्धे आधिव्याधिजरामृत्युभिः **अत्यन्तोपहिते चित्रभित्तिप्रतीकाशे** । अत्रास्पन्दजाड्यदृष्टान्तमाह—**गन्धर्वनगरोपम** इति । मुमूर्षुमरणकालविभातभाविजन्मानुकूलनानारत्नखचितपक्षिपन्नगादिसदृशे **कदळीगर्भवत् निःसारे जलबुद्बुदवत् चञ्चले** क्षणविनाशिनि एवंरूपे **शरीरे** तस्यापि मध्ये, वर्तमानोऽप्ययमात्मा शुद्ध एवेति पूर्वेणान्वयः । तमिमं शरीरात् **निःसृतं** आत्मानं अशुचिदुःखदोषविरळं **अचिन्त्यरूपं** अनिदंवस्तुत्वेन निर्विषयत्वात् दिव्यं अप्राकृतं देवं द्योतनात्मकं **असङ्गं** वस्त्वन्तरप्रसक्तावपि तत्सङ्गरहितमेव शुद्धं **तेजस्कायं** शक्तित्रयात्मकतेजःशरीरं अत एव सर्वमयं सर्वस्वरूपं **अरूपं** रूपादिमात्राऽतीतं **सर्वेश्वरं** कारणोपाधितया सर्वनियामकं **अचिन्त्यं** केनापि चिन्तितुमशक्यं **अशरीरं** शरीरत्रयविरळं **गुहायां** बुद्धौ **निहितं** तद्वृत्तिसहस्रभावाभावप्रकाशकत्वेन **अमृतं** स्वाज्ञादिसमर्पितसर्वविशेषारोपापवादापह्नवसिद्धनिष्प्रतियोगिकब्रह्ममात्रतया **विभ्राजमानमानन्दं** निरतिशयानन्दरूपं **विद्वांसो** ब्रह्मविद्वरीयांसः **तेन** स्वातिरिक्तलयेन अपह्नवेन **पश्यन्ति** । तमिमं परमात्मानं स्वमात्रमिति विद्यादिति शेषः ॥ १ ॥

इति अष्टमः खण्डः

निर्बीजब्रह्मणः सर्वाप्ययाश्रयत्वम्

अथ हैनं रैक्वः पप्रच्छ भगवन् कस्मिन् सर्वेऽस्तं गच्छन्तीति । तस्मै स होवाच । चक्षुरेवाप्येति यश्चक्षुरेवास्तमेति द्रष्टव्यमेवाप्येति यो द्रष्टव्यमेवास्तमेत्यादित्यमेवाप्येति य आदित्यमेवास्तमेति[1] विराजामे-

[1] विराजमे—अ, अ १.

वाप्येति यो विराजामेवास्तमेति प्राणमेवाप्येति यः प्राणमेवास्तमेति विज्ञानमेवाप्येति यो विज्ञानमेवास्तमेत्यानन्दमेवाप्येति य आनन्दमेवास्तमेति तुरीयमेवाप्येति यस्तुरीयमेवास्तमेति तदमृतमभयमशोकमनन्तं निर्बीजमेवाप्येतीति होवाच ॥ १ ॥

श्रोत्रमेवाप्येति यः श्रोत्रमेवास्तमेति श्रोतव्यमेवाप्येति यः श्रोतव्यमेवास्तमेति दिशमेवाप्येति यो दिशमेवास्तमेति[1]सुदर्शनामेवाप्येति यः सुदर्शनामेवास्तमेत्यपानमेवाप्येति योऽपानमेवास्तमेति विज्ञानमेवाप्येति यो विज्ञानमेवास्तमेति तदमृतमभयमशोकमनन्तं निर्बीजमेवाप्येतीति होवाच ॥ २ ॥

नासामेवाप्येति यो नासामेवास्तमेति घ्रातव्यमेवाप्येति यो घ्रातव्यमेवास्तमेति पृथिवीमेवाप्येति यः पृथिवीमेवास्तमेति जितामेवाप्येति यो जितामेवास्तमेति व्यानमेवाप्येति यो व्यानमेवास्तमेति विज्ञानमेवाप्येति तद . . . होवाच ॥ ३ ॥

जिह्वामेवाप्येति यो जिह्वामेवास्तमेति रसयितव्यमेवाप्येति यो रसयितव्यमेवास्तमेति वरुणमेवाप्येति यो वरुणमेवास्तमेति [2]सौम्यामेवाप्येति यः सौम्यामेवास्तमेत्युदानमेवाप्येति य उदानमेवास्तमेति विज्ञानमेवाप्येति तद . . . होवाच ॥ ४ ॥

त्वचमेवाप्येति यस्त्वचमेवास्तमेति स्पर्शयितव्यमेवाप्येति यः स्पर्शयितव्यमेवास्तमेति वायुमेवाप्येति यो वायुमेवास्तमेति

[1] सुदर्शन—अ, अ १. [2] सौम्यमे—अ, अ १.

मोघामेवाप्येति यो मोघामेवास्तमेति समानमेवाप्येति यः समानमेवास्तमेति विज्ञानमेवाप्येति तद . . . होवाच ॥ ५ ॥

वाचमेवाप्येति यो वाचमेवास्तमेति वक्तव्यमेवाप्येति यो वक्तव्यमेवास्तमेत्यग्निमेवाप्येति योऽग्निमेवास्तमेति[1]कुमारामेवाप्येति यः कुमारामेवास्तमेति वैरम्भमेवाप्येति यो वैरम्भमेवास्तमेति विज्ञानमेवाप्येति तद . . . होवाच ॥ ६ ॥

हस्तमेवाप्येति यो हस्तमेवास्तमेत्यादातव्यमेवाप्येति य आदातव्यमेवास्तमेतीन्द्रमेवाप्येति य इन्द्रमेवास्तमेत्य[2]मृतामेवाप्येति योऽमृतामेवास्तमेति मुख्यमेवाप्येति यो मुख्यमेवास्तमेति विज्ञानमेवाप्येति तद . . . होवाच ॥ ७ ॥

पादमेवाप्येति यः पादमेवास्तमेति गन्तव्यमेवाप्येति यो गन्तव्यमेवास्तमेति विष्णुमेवाप्येति यो विष्णुमेवास्तमेति[3]सत्यामेवाप्येति यः सत्यामेवास्तमेत्यन्तर्याममेवाप्येति योऽन्तर्याममेवास्तमेति विज्ञानमेवाप्येति तद . . . होवाच ॥ ८ ॥

पायुमेवाप्येति यः पायुमेवास्तमेति विसर्जयितव्यमेवाप्येति यो विसर्जयितव्यमेवास्तमेति मृत्युमेवाप्येति यो मृत्युमेवास्तमेति मध्यमामेवाप्येति यो मध्यमामेवास्तमेति प्रभञ्जनमेवाप्येति यः प्रभञ्जनमेवास्तमेति विज्ञानमेवाप्येति तद . . . होवाच ॥ ९ ॥

[1] कुमार—अ, अ १, मु. कुमारा—उ. [2] मृतमे—अ, अ १.
[3] सत्यमे—अ, अ १.

उपस्थमेवाप्येति य उपस्थमेवास्तमेत्यानन्दयितव्यमेवाप्येति य आनन्दयितव्यमेवास्तमेति प्रजापतिमेवाप्येति यः प्रजापतिमेवास्तमेति[1]नासीरामेवाप्येति यो नासीरामेवास्तमेति कूर्मिरमेवाप्येति यः कूर्मिरमेवास्तमेति विज्ञानमेवाप्येति तद . . . होवाच ॥ १० ॥

मन एवाप्येति यो मन एवास्तमेति मन्तव्यमेवाप्येति यो मन्तव्यमेवास्तमेति चन्द्रमेवाप्येति यश्चन्द्रमेवास्तमेति शिशुमेवाप्येति यः शिशुमेवास्तमेति श्येनमेवाप्येति यः श्येनमेवास्तमेति विज्ञानमेवाप्येति तद . . . होवाच ॥ ११ ॥

बुद्धिमेवाप्येति यो बुद्धिमेवास्तमेति बोद्धव्यमेवाप्येति यो बोद्धव्यमेवास्तमेति ब्रह्माणमेवाप्येति यो ब्रह्माणमेवास्तमेति [2]सूर्यामेवाप्येति यः सूर्यामेवास्तमेति कृष्णमेवाप्येति यः कृष्णमेवास्तमेति विज्ञानमेवाप्येति तद . . . होवाच ॥ १२ ॥

अहंकारमेवाप्येति योऽहंकारमेवास्तमेत्यहंकर्तव्यमेवाप्येति योऽहंकर्तव्यमेवास्तमेति रुद्रमेवाप्येति यो रुद्रमेवास्तमेत्य[3]सुरामेवाप्येति योऽसुरामेवास्तमेति श्वेतमेवाप्येति यः श्वेतमेवास्तमेति विज्ञानमेवाप्येति तद . . . होवाच ॥ १३ ॥

चित्तमेवाप्येति यश्चित्तमेवास्तमेति चेतयितव्यमेवाप्येति यश्चेतयितव्यमेवास्तमेति क्षेत्रज्ञमेवाप्येति यः क्षेत्रज्ञमेवास्तमेति

[1] नासीना—अ, अ १.
[2] सूर्य—अ, अ १.
[3] सूर—अ, अ १.

[1]भास्वतीमेवाप्येति यो भास्वतीमेवास्तमेति नागमेवाप्येति यो नागमेवास्तमेति विज्ञानमेवाप्येति यो विज्ञानमेवास्तमेत्यानन्दमेवाप्येति य आनन्दमेवास्तमेति तुरीयमेवाप्येति यस्तुरीयमेवास्तमेति तदमृतमभयमशोकमनन्तं निर्बीजमेवाप्येति तद्...होवाच ॥ १४ ॥

एवं सर्वापह्नवेन किमवशिष्यते ? तद्याथात्म्यं कथयेति रैक्कः पृच्छतीत्याह —अथेति। अथ हैतामुपनिषदं अपान्तरतमादिक्रमात् प्राप्तवन्तं निजाचार्यं घोराङ्गिरसं रैक्कः तच्छिष्यः प्रपच्छ हे भगवन् कस्मिन्नु तत्त्वे सर्वे लयं अस्तं गच्छन्ति इति। एवं पृष्टतते तस्मै स होवाच। किमिति ? चक्षुराद्येकैककरणगतविशेषांशसप्रतियोगिकनिष्प्रतियोगिकलयात् निर्बीजं ब्रह्म अवशिष्यत इत्युच्यते चक्षुरेवाप्येति यश्चक्षुरेव अस्तमेति इति। चक्षुरेव चक्षुरन्तर्याम्यात्मानमेव नद्यः समुद्र इव रूपादिकं नित्यादिप्रळये अप्येति सरूपविलयं भजति। कैवल्यदशायां चक्षुःपदार्थः अस्तमेति स्वात्मनि विरूपविलयं अपह्नवं भजति। तथा द्रष्टव्यं रूपं नित्यप्रळयादौ रूपान्तर्यामिणमेवाप्येति। अप्येतिशब्दः सर्वत्र सरूपलयार्थः, तथा अस्तमेतिशब्दस्तु सर्वत्र विरूपविलयार्थः। यो द्रष्टव्यमेव नीलादिपदार्थ एव अस्तमेति दृष्टिद्रष्टव्यानुग्राहकादित्यमेव आदित्यान्तर्यामिणमप्येति। तथा य आदित्यमेव आदित्यपदार्थ एव अस्तमेति आदित्यानुग्राहिकेयं विराजा सुषुम्ना नाडी तां विराजामेवाप्येति। यो विराजामेवास्तमेति प्राणनव्यापारादिकं प्राणान्तर्यामिणमप्येति। यः प्राणानुग्राहकं विज्ञानं अन्तःकरणमेव अस्तमेति विज्ञेयं विज्ञानान्तर्यामिणमेवाप्येति तदनुग्राहकमानन्दमेवाप्येति। य आनन्दमेवास्तमेति तुरीयं शुद्धात्मानमप्येति। सोऽयं शुद्धात्मा तत्त्वं तुर्यं अमृतं स्वातिरिक्तमार्त्यवैरळ्यात् अत एव अभयं भयहेतुद्वैताभावात् अत एव अशोकं शोचनीयविषयाभावात् अनन्तं अपरिच्छिन्नत्वात्। यत्सापेक्षामृतादिशब्दबोध्यं तुर्यतत्त्वं सबीजं निर्बीजं

[1] भास्वति —अ, अ १.

ब्रह्मैवाप्येतीति होवाच, स्वाज्ञविकल्पितं सर्वं परमार्थदृष्ट्या अपह्नवमेत्य निर्बीजब्रह्मभावमापद्यते इत्युक्तवान् । तथा श्रोत्रमेवाप्येति इत्यादि सर्वत्र समानम् । यद्वा—चक्षुरेवाप्येति इत्यत्र द्वितीयायाः प्रथमार्थः । यश्चक्षुरेवेत्यत्र यच्छब्दप्रथमायाः सप्तम्यर्थः । स्वाधिष्ठेयचक्षुरादिविलये तदधिष्ठानस्यापि विलयो भवतीत्याशङ्क्य तन्निरसनाय चक्षुरेवाप्येति नाधिष्ठानमित्यवधारणार्थः । अप्येत्यस्तमेत्योः एकार्थत्वेन न पुनर्वचो मन्तव्यम्, शब्दभेदवत् अर्थभेदसंभवात् । स्वाज्ञस्वज्ञदृष्ट्या नित्यादिप्रलयप्रत्यगभिन्नब्रह्मस्वरूपे व्यष्टिसमष्ट्यात्मकचक्षुरादिचतुर्दशकरणं द्रष्टव्यादिचतुर्दशविषयजातं आदित्यादिकरणाधिपजातं सुदर्शनेत्यादिचतुर्दशविशेषणविशिष्टसुषुम्नानाडीप्राणादिचतुर्दशवायुजातं चैवाप्येतीत्यत्र सरूपविलयो विज्ञेयः, सप्रतियोगिकतया सविशेषत्वात् । सम्यज्ज्ञदृष्ट्या चक्षुरेव अस्तमेतीति विरूपविलयः, निष्प्रतियोगिकतया निर्विशेषत्वात् । छन्दस्सु व्यत्ययः कथमित्यत्र "छन्दसि व्यत्ययानुशासनात्" इति सूत्रम् । व्यष्टिप्रपञ्चारोपाधारो विज्ञानात्मा जीवः "जाग्रदादिविमोक्षान्तः संसारो जीवकल्पितः" इति श्रुतेः । समष्टिप्रपञ्चारोपाधिष्ठानं आनन्दात्मेश्वरः "ईक्षणादिप्रवेशान्ता सृष्टिरीशेन कल्पिता" इति श्रुतेः । सर्वप्रपञ्चापवादाधिकरणं तुर्यतुरीयात्मा प्रत्यगभिन्नपरमात्मा, "तत्त्वंपदलक्ष्यं प्रत्यगभिन्नं ब्रह्म" इति श्रुतेः । सप्रतियोगिकारोपापवादाधिष्ठानं सबीजं तदमृतमभयमशोकमनन्तं इति विशेषणविशिष्टं, तद्गतसापेक्षप्रभवसविशेषजातापह्नवसिद्धं तु निर्बीजं निष्प्रतियोगिकब्रह्ममात्रम् । शिष्टमुक्तार्थम् ॥ १–१४ ॥

निर्बीजब्रह्मवेदनफलम्

य एवं निर्बीजं वेद निर्बीज एव स भवति न जायते न म्रियते न मुह्यते न भिद्यते न दह्यते न छिद्यते न कम्पते न कुप्यते सर्वदहनोऽयमात्मेत्याचक्षते ॥ १५ ॥

"ब्रह्ममात्रमसन्न हि" इति ब्रह्म निर्बीजं, निष्प्रतियोगिकत्वात्, यन्नैवं तन्नैवं, यथा तरुः—इति श्रुतेरनुमानाच्च यन्निर्बीजब्रह्ममात्रमवशिष्यते तद्विशेष-

सामान्यफलमाह—**य इति**। यः "सन्मात्रमसन्न हि" इति श्रुत्यनुरोधेन **एवं निर्बीजं** ब्रह्म निष्प्रतियोगिकस्वमात्रमिति वेद तद्वेदनसमकालं **स मुनिः निर्बीज एव भवति** "ज्ञानसमकालमेव मुक्तः" इति श्रुतेः। निर्बीजब्रह्मसम्पत्त्याऽपि पुनर्जायते म्रियते चेत्यत आह—**न जायते न म्रियते इति**। जनिमृत्योराविद्यकत्वेन कारणतुल्यत्वात् आन्तराळिकफळळक्षणजीवन्मुक्तिदशायामपि **न मुह्यते** इत्यात्मनेपदं छान्दसम्, न मुह्यतीत्यर्थः, नहि स्वाज्ञवत् मोहमेति। **न भिद्यते न दह्यते** भेदमोहग्रासब्रह्मीभूतत्वात्। अत एव **न कम्पते न कुप्यते** कम्पकोपहेतुस्वाज्ञानाभावात्। अत एव जीवन्मुक्तप्राप्यात्मा स्वातिरिक्तकलनां दहतीति **सर्वदहनोऽयमात्मेत्याचक्षते** ब्रह्मविदः ॥ १५ ॥

ब्रह्मात्मलाभोपायः

नैवमात्मा प्रवचनशतेनापि लभ्यते न बहुश्रुतेन न बुद्धिज्ञानाश्रितेन न मेधया न वेदैर्न यज्ञैर्न तपोभिरुग्रैर्न सांख्यैर्न योगैर्नाश्रमैर्नान्यैरात्मानमुपलभन्ते प्रवचनेन प्रशंसया व्युत्थानेन तमेतं ब्राह्मणाः शुश्रुवांसोऽनूचाना उपलभन्ते शान्तो दान्त उपरतस्तितिक्षुः समाहितो भूत्वाऽऽत्मन्येवात्मानं पश्यति सर्वस्यात्मा भवति य एवं वेद ॥ १६ ॥

यथोक्तात्मा प्रवचनादिभिः लभ्यत इत्यत आह—**नैवमिति**। **नह्येवमयमात्मा प्रवचनशतेनापि** वेदजाताध्ययनमात्रेणापि **लभ्यते, न च बहुश्रुतेन** बहुशास्त्रश्रवणेनापि लभ्यते, **न च बुद्धिबलसाध्यज्ञानाश्रयेणापि** लभ्यते, **नापि** धारणाशक्तिमन्मेधया, तथा **न वेदैः न यज्ञैः न उग्रैस्तपोभिः न साङ्ख्यैः न योगैः नाश्रमैः** अनुक्तैरपि लौकिकालौकिकोपायैरप्यात्मानं **न लभन्ते**। कथं लभ्यत इत्यत आह—**प्रवचनेनेति**। तमेतमात्मानमनूचानाः शिष्टाः यथोक्तसाधनसम्पन्नाः **प्रवचनेन** यथोक्तब्रह्मचर्येण श्रुतवेदान्तश्रवणेन, स्वगुरोः

प्रशंसया शुश्रूषया, **व्युत्थानेन** सर्वकर्मपरित्यागलक्षणसंन्यासेन, ईशाद्यष्टोत्तरशतवेदान्तार्थं यथाविधि **शुश्रुवांसः** उपलभन्ते। एवं श्रुत्वाऽथ **स्वान्तः**करणव्यापृतेः **शान्तः** बहिःकरणव्यापृतेरपि **दान्तः** अत एव बाह्यान्तर्व्यापृते**रुपरतः** शीतोष्णादि**तितिक्षुः** सहिष्णुः **समाहितो भूत्वा** बाल्येन तिष्ठासेदिति निर्विकल्पसमाधिनिष्ठो भूत्वा **स्वात्मन्येव स्वात्मानं पश्यति** स्वातिरिक्तानात्मापह्नवसिद्धपरमात्मानं निष्प्रतियोगिकस्वमात्रमिति पश्यति। एवमात्ममात्रं **यो वेद** स मुनिः **सर्वस्यात्मा** भवति सर्वापह्नवसिद्धब्रह्मैव भवतीत्यर्थः ॥ १६ ॥

इति नवमः खण्डः

सर्वलोकानां ब्रह्मात्मनि प्रतिष्ठितत्वम्

अथ हैनं रैक्वः प्रपच्छ भगवन् कस्मिन् सर्वे संप्रतिष्ठिता भवन्तीति रसातललोकेष्विति होवाच कस्मिन् रसातललोका ओताश्च प्रोताश्चेति भूर्लोकेष्विति होवाच कस्मिन् भूर्लोका ओताश्च प्रोताश्चेति भुवर्लोकेष्विति होवाच कस्मिन् भुवर्लोका ओताश्च प्रोताश्चेति सुवर्लोकेष्विति होवाच कस्मिन् सुवर्लोका ओताश्च प्रोताश्चेति महर्लोकेष्विति होवाच कस्मिन् महर्लोका ओताश्च प्रोताश्चेति जनोलोकेष्विति होवाच कस्मिन् जनोलोका ओताश्च प्रोताश्चेति तपोलोकेष्विति होवाच कस्मिंस्तपोलोका ओताश्च प्रोताश्चेति सत्यलोकेष्विति होवाच कस्मिन् सत्यलोका ओताश्च प्रोताश्चेति प्रजापतिलोकेष्विति होवाच कस्मिन् प्रजापतिलोका ओताश्च प्रोताश्चेति ब्रह्मलोकेष्विति होवाच कस्मिन् ब्रह्मलोका

ओताश्च प्रोताश्चेति सर्वलोका आत्मनि ब्रह्मणि मणय इवौताश्च प्रोताश्चेति स होवाच ॥ १ ॥

रैक्वप्रश्नानुरोधेन सर्वाप्ययप्राधान्येन ब्रह्मयाथात्म्यमुपदिश्य पुनः पृच्छते ब्रह्मयाथात्म्यप्राधान्येन प्रतिष्ठां प्रकटयति—अथेत्यादिना । अथ ह स्वातिरिक्ताप्ययप्रश्नानन्तरं एनं घोराङ्गिरसं रैकः पप्रच्छ हे भगवन् कस्मिन्नु सर्वे सलोकिलोकाः संप्रतिष्ठिताः भवन्तीति । एवं पृष्टवते तस्मै स होवाच । किमिति ? रसातललोकेष्विति होवाच । तद्भतावान्तरभेदविवक्षया बहुवचनम् । रसातलाधस्तनलोकाभावात् प्रथमं तत्रैव सर्वप्रतिष्ठोपदेशो युज्यते । जडस्य निराधारतया स्थित्ययोगात् तदाधारं पृच्छति—कस्मिन्नित्यादि । कस्मिन्नु लोके पटगततिर्यगूर्ध्वतन्तुवत् रसातललोका ओताश्च प्रोताश्चेति ? भूर्लोकेष्विति होवाच इत्यादि समानम । कस्मिन् प्रजापतिलोका ओताश्च प्रोताश्चेति ब्रह्मलोकेष्विति होवाच । एवमुक्ते तत्रापि जडत्वमूर्त्तत्वधिया पृच्छति—कस्मिन् ब्रह्मलोका ओताश्च प्रोताश्चेति । तत्र मूर्तत्वादिप्रतीत्यभावात् तस्यैव सर्वलोकाधिकरणत्वमाह—सर्वलोका इति । रसातलादिप्रजापतिलोकान्तानां पटे तन्तव इव ब्रह्मलोकाश्रयत्वात्, स्वातिरिक्ताश्रयाभावाच्च । यस्मादेवं तस्मात् सर्वलोका मणय इव ओताश्च प्रोताश्चेति । यः सर्वलोकाधारो ब्रह्मलोकः सोऽयमात्मैवेति स होवाच ॥ १ ॥

तादृशब्रह्मवेदनफलम्

एवमेतान् लोकानात्मनि प्रतिष्ठितान् वेदात्मैव स भवतीत्येतन्निर्वाणानुशासनमिति वेदानुशासनमिति वेदानुशासनम् ॥ २ ॥

एवमेतान् रसातलादिप्रजापतिलोकान्तान् आत्मनि प्रतिष्ठितान् यो वेद सोऽयं मुनिः आधेयत्वसापेक्षाधारतापाये आत्मैव आत्ममात्रमेव भवति ॥

इति दशमः खण्डः

षष्ठानुशासनम्—उत्क्रान्तिमार्गः

हृदयनाड्याः उत्क्रान्तिप्रकारः

अथ हैनं रैक्कः पप्रच्छ भगवन् योऽयं विज्ञानघन उत्क्रामन् स केन कतरद्भाव स्थानमुत्सृज्यापक्रामतीति तस्मै स होवाच हृदयस्य मध्ये लोहितं मांसपिण्डं यस्मिंस्तद्हरं पुण्डरीकं कुमुदमिवानेकधा विकसितं तस्य मध्ये समुद्रः समुद्रस्य [1]मध्ये काशस्तस्मिन्नाडयश्चतस्रो भवन्ति तत्र रमाऽरमेच्छाऽपुनर्भवेति तत्र रमा पुण्येन पुण्यं लोकं नयत्यरमा पापेन पापमिच्छया यत् स्मरति तदभिसंपद्यते अपुनर्भवा[व]या कोशं भिनत्ति कोशं भित्त्वा शीर्षकपालं भिनत्ति शीर्षकपालं भित्त्वा पृथिवीं भिनत्ति पृथिवीं भित्त्वाऽपो भिनत्त्यपो भित्त्वा तेजो भिनत्ति तेजो भित्त्वा वायुं भिनत्ति वायुं भित्त्वाऽऽकाशं भिनत्त्याकाशं भित्त्वा मनो भिनत्ति मनो भित्त्वा भूतादिं भिनत्ति भूतादिं भित्त्वा महान्तं भिनत्ति महान्तं भित्त्वाऽव्यक्तं भिनत्त्यव्यक्तं भित्त्वाऽक्षरं भिनत्त्यक्षरं भित्त्वा मृत्युं भिनत्ति मृत्युर्वै परे देव एकीभवतीति परस्तान्न सन्नासन्न सदसदित्येतन्निर्वाणानुशासनमिति वेदानुशासनमिति वेदानुशासनम् ॥ १ ॥

सविशेषनिर्विशेषब्रह्मलोकातिसाधनसुषुम्नाकैवल्यनाडयुत्क्रान्त्यनुत्क्रान्ति-निरूपणार्थं षष्ठानुशासनमारभ्यते—अथेत्यादि । अथ ब्रह्मलोकावगत्यनन्तरं **रैक्कः पप्रच्छ** । किमिति? **योऽयं विज्ञानमयः** अन्तःकरणोपाधिको जीवः सोऽयं स्वाज्ञादिदृष्ट्या **केन** मार्गेण उत्क्रामति किं वा **उत्सृज्य** उत्क्रामति इत्येवं पृष्टवते **तस्मै स होवाच** । हृदयस्य मध्य इत्यादि व्याख्यातम् । **तस्य**

[1] मध्ये आकाशः—अ २.

हृदयस्य **मध्ये** सम्यगुद्रवतीति **समुद्रः** जीवद्धृदयस्य सद्रवत्वात् । तस्य **समुद्रस्य मध्ये** आकाशः तत्सुषिरपरिमिताव्याकृताकाशः । **समुद्रः** सम्पुटः **समुद्रस्य मध्ये** यः **कोशः** पुण्डरीकान्तःकोशः इति पाठान्तरम् । **तस्मिन्**नाकाशे कोशे वा उत्क्रान्तिसाधननाड्यः **चतस्रो भवन्ति** । कास्ता इत्यत आह— **रमाऽरमेच्छाऽपुनर्भवेति**। तत्र **सुरमा पुण्येन** साधनेन साधकं **पुण्यफलस्वर्गलोकं** नयति, **अरमा पापेन** साधनेन साधकं **पापं** लोकं रौरवादिनरकं नयति, **इच्छया** काले **यत् स्मरति** स्त्र्यादिकमन्यद्वा **तदभिसम्पद्यते,** अन्तकालस्मरणस्य तथाविधत्वादित्यत्र

अन्तकाले च मामेव स्मरन् मुक्त्वा कळेबरम् ॥
यं यं वाऽपि स्मरन् भावं त्यजत्यन्ते कळेबरम् ।
तं तमेवैति कौन्तेय सदा तद्भावभावितः ॥

इत्यादिस्मृतेः । तथा **अपुनर्भवाया कोशमिति** । अत्र विसर्गलोपः छान्दसः । **अपुनर्भवायाः** सुषुम्नायाः **कोशं** सुषिरं मूलाधारविद्यमानवक्त्रं कुण्डलिनीशक्त्या योगाभ्यासवशीकृतया **भिनत्ति** । **कोशं भित्त्वा** सुषुम्नामार्गतो मूर्धप्रदेशं प्राप्य तत्रत्यं **शीर्षकपालं** भिनत्ति । सुषुम्नाद्वारेण निर्गत्य स्वतनुं त्यजति । अथ **शीर्षकपालं भित्त्वा** अर्चिरादिना ब्रह्मलोकं प्राप्य अथ निर्बीजसम्पत्तये **पृथिवीं** पृथिवीतत्त्वं **भिनत्ति** । एवं क्रमेण आकाशान्तं भित्त्वा मनस्तत्त्वं भिनत्ति । **मनो भित्त्वा भूतादिं** लिङ्गतत्त्वं **भिनत्ति** । **भूतादिं भित्त्वा महान्तं** जीवतत्त्वं **भिनत्ति** । **महान्तं भित्त्वा अव्यक्तं** स्थूलादित्रिशक्त्यात्मकं कारणभावं **भिनत्ति** । **अव्यक्तं भित्त्वा अक्षरं** ईश्वरतत्त्वं यावद्विजयते तावत्तद्भावमेत्य तत्प्रळयकाले तदपि **भिनत्ति** । **अक्षरं भित्त्वा मृत्युं** साक्षितत्त्वं **भिनत्ति** । साक्षिणः स्वविकल्पितसर्वग्रासत्वात् मृत्युत्वम् । यदि कदाचित् ईश्वरप्रसादात् सुषुम्नानाडयन्तर्विलसितकैवल्यसिरावक्त्रं प्रविशति तदा **मृत्युर्वै परे** सर्वापह्नवसिद्धे **देवे** स्वावशेषतया दीप्यमाने **एकीभवति** तन्मात्रं अवशिष्यते विद्वान् । **ततः परस्तात् न सत् नासत् न सदसत्** ॥ १ ॥

इति एकादशः खण्डः

सप्तमानुशासनम्—समाधिविधिः

आहारशुद्धिः

नारायणाद्वा अन्न[1]मागतमपक्वं ब्रह्मलोके महासंवर्तके पुनः पक्वमादित्ये पुनः पक्वं क्रव्यादि पुनः पक्वं [2]जाठरेण क्लिन्नं पर्युषि[3]तं पूतमन्नमयाचितमसंक्लृप्तमश्नीयान्न कंचन याचेत ॥ १ ॥

पुरोक्तनिर्बीजब्रह्मभावापत्तिसाधनसमाधिप्रकटनाय इदं सप्तमानुशासनमारभ्यते। तस्यान्तरङ्गसाधनमादौ आहारशुद्धिमुपदिशति—**नारायणादिति**। **नारायणादीश्वराद्वै** प्रसिद्धात् स्वाविद्यापदतत्कार्यलक्षणं **अन्नं आगतं** अहरादावुत्पन्नं, तदहरन्ते **महासंवर्ते** महाप्रळयकाले **ब्रह्मलोके** उपसंहृतं, "सर्वाः प्रजाः अहरहः ब्रह्म गच्छन्ति एतं ब्रह्मलोकम्" इति श्रुतेः। तत्र ब्रह्मलोकात् यदागतं तदन्नं **अपक्वं** [**पक्वं**] भवति। **पुनरहरादावुत्पन्नं आदित्ये** कालाग्नौ वर्षादिद्वारा परिपक्वं भवति। **पुनः क्रव्यादि** काल्याणावसथ्याग्नौ **पक्वं** भवति। **पुनः** प्राणिभुक्तं **जाठरेण पक्वं** भवति। एवं चतुर्विधपाकोपदेशः तज्ज्ञानपूर्वकभुक्तौ चतुर्विधदिव्यादिव्यसंस्कारवदिदमन्नं प्रसिद्धौदनादिरूपम्(?)। **क्लिन्नं** यातयामादिदोषदुष्टं स्रवज्जलं, तथा **पर्युषितं** निशि जलाधिवासितमित्युपलक्षणं शूद्रादिशेषस्य, एतादृशमन्नं मुमुक्षुः न कदाऽप्यश्नीयात्। **पूतं** यातयामत्वादिदोषविरळं भगवन्निवेदनतुळसीतीर्थादिमिश्रं **अन्नं अयाचितं** यदृच्छया शिष्यजनोपहृतं तथा **असंक्लृप्तं** अद्यास्य गेह इत्यादिसङ्कल्परहितं, अपितु माधूकरान्नं, **अश्नीयात्** यतिः। **न कञ्चनान्नं याचेत**। इयमेव ह्याहारशुद्धिः। तया चित्तशुद्धिः। शुद्धे चित्ते तच्छुद्धिसापेक्षं ज्ञानं विज्ञानं सम्यज्ज्ञानं तत्त्वज्ञानं वा जायते।

[1] मागतं पक्वं—अ, अ १, अ २, क.

[2] जालकिलक्लि—अ, अ १, अ २, क, उ. जालकीलक्लि—उ १. "जाठरेण" इति पाठः व्याख्यानुसारी.

[3] तापू—अ २. तपू—अ, अ १.

यस्य यादृशं ज्ञानं उदेति स तादृशं फलमश्नुते इत्यत्र—" आहारशुद्धौ सत्वशुद्धिः सत्वशुद्धौ ध्रुवा स्मृतिः स्मृतिलम्भे सर्वग्रन्थीनां विप्रमोक्षः " इत्यादिश्रुतेः । एवं शुद्धान्नभुग्यतेरेव ज्ञानाधिकारो नेतरस्येत्यर्थः ॥ १ ॥

इति द्वादशः खण्डः

ब्रह्मज्ञानसाधनं सपरिकरसमाधिः

बाल्येन तिष्ठासेद्बालस्वभावोऽसङ्गो निरवद्यो मौनेन पाण्डित्येन निरवधिकारतयोपलभ्यते कैवल्यमुक्तं [1]निगमनः प्रजापतिरुवाच महत्पदं ज्ञात्वा वृक्षमूले वसेत कुचेलोऽसहाय एकाकी समाधिस्थ आत्मकाम [2]आप्तकामो निष्कामो जीर्णकामो हस्तिनि सिंहे दंशे मशके नकुले सर्पराक्षसगन्धर्वे मृत्यो रूपाणि विदित्वा न बिभेति कुतश्चनेति वृक्षमिव तिष्ठासेच्छिद्यमानोऽपि न कुप्येत न कम्पे[3]तोपलमिव तिष्ठासेच्छिद्यमानोऽपि न कुप्येत न कम्पेताकाशमिव तिष्ठासेच्छिद्यमानोऽपि न कुप्येत न कम्पेत सत्येन तिष्ठासेत् सत्योऽयमात्मा ॥ १ ॥

एवं अयाचितभिक्षान्नमश्नतः तीव्रतरवैराग्यपूर्वकं ब्रह्मज्ञानं तत्फलं च स्यादित्याह—बाल्येनेति । यः सत्वान्नाशी सोऽयं मुनिः बाल्येन तिष्ठासेत् । बाल्यशब्दार्थमाह—बालस्वभाव इति । कोऽयं बालस्वभावः ? असङ्ग इति, बालस्य स्वान्यत्रात्मात्मीयाभिमानाभावेनासङ्गत्वात्, अत एव निरवद्यः

[1] निगमनप्र—अ, अ १, अ २, क
[2] आप्त—क.
[3] तोत्पल—अ, अ १.

पुण्यपापावद्यराहित्यात्। **मौनेन** अवचनेन, पण्डा बोधोऽस्य सञ्जातेति पण्डितः तद्भावः पाण्डित्यं तेन **पाण्डित्येन, निरवधिकारतया** वर्णाश्रमानुष्ठानराहित्येन च मुनिः अधिकार**मुपलभ्यते** नेतरः इत्यर्थः। तत्राधिकारस्य देहाभिमाननिमित्तत्वात् यथा बालः स्तनंधयः कर्तव्याकर्तव्यप्रयोजनरहितः तथा एवं योगी निर्विशेषब्रह्मज्ञानमहिम्ना स्वातिरिक्तभ्रमविरळो भवति। तस्यैवं बाल्यमौनपाण्डित्यमुपेयुषो मुनेरेव केवलनिष्प्रतियोगिकनिर्विशेषब्रह्ममात्रभावः **कैवल्यं** तन्मात्रतया अवस्थानं स्यादिति सर्ववेदान्तैः **उक्तं** नेतरस्येति **निगमनो** निगमान्तार्थतत्त्वज्ञः **प्रजापतिरुवाच**। विदिततत्त्वस्य यथावत् संसरणं स्यादित्यत आह—**महदिति**। सर्वमहत्तया निष्प्रतियोगिकब्रह्ममात्रं पद्यत इति **महत्पदं** स्वमात्रमिति **ज्ञात्वा** ग्रामात् बहिष्ट**वृक्षमूले वसेत** समाधिं कुर्वन् तत्रैव तिष्ठेत्,

विज्ञातब्रह्मतत्त्वस्य यथापूर्वं न संसृतिः।
अस्ति चेन्न स विज्ञातब्रह्मभूतो बहिर्मुखः॥

इति श्रुतेः। यत एवमतो विदिततत्त्वज्ञोऽयाचितवृत्त्या यदृच्छालाभसन्तुष्टः सन् कालं नयेत्। यद्यप्राप्तं तदा न यत्नं कुर्यात्। भिक्षाऽलाभे नश्यतु तिष्ठतु वा इत्युपेक्षामेव कुर्यादित्यर्थः। अपि च **कुचेलः** जीर्णकन्थाकौपीनमात्रालङ्कृतः **असहायः** परिचारकान्तरराहित्यात् अत एव **एकाकी समाधिस्थः स्वात्ममात्रकामः आप्तकामः** सम्प्राप्तसमस्तकामत्वात् अत एव **निष्कामः** पृथिव्याद्यव्यक्तान्ताभिलाषरहितः निर्विकल्पसमाधिना **जीर्णकामः** ग्रामात् बहिः वृक्षमूलवासकाले यदृच्छया संप्राप्ते व्याघ्रे **हस्तिनि सिंहे दंशे मशके नकुले सर्पराक्षसगन्धर्वे मृत्योः** सर्वहरस्य **रूपाणि**, यद्वा मृत्योः सर्वग्रासस्य **रूपाणि** सच्चिदानन्दात्मकानि, **विदित्वा** मुनिः **कुतश्चन** कारणादपि **न बिभेति** केवलनिर्भयतया आस्ते। **इतिशब्दः** सम्मतिवचनसमाप्त्यर्थः। एवं लयसमाधेः प्रथमद्वितीयभूमी उक्ते। तृतीयभूमिस्तु—**वृक्षमिव तिष्ठासेत्** स्थातुमिच्छेत्। तदवस्थानं कीदृशमित्यत्र—**छिद्यमानो न कुप्येत**, यथा वृक्षः परेण छिद्यमानोऽपि अचित्तत्वान्न कुप्यति तथा सचित्तोऽप्ययं परैरवयवशः छिद्यमानोऽपि न

कुप्येत। स्वागाम्यादिकर्मभिः **न कम्पेत** स्वाविद्यापदतत्कार्यस्थूलांशासंभव-प्रबोधेन ब्रह्मवित्त्वमवलम्ब्य तिष्ठेत्। तथा **उपलमिव** पाषाणमिव **तिष्ठासेत्**—उत्पलमिव तिष्ठासेदिति वा—कथं? **छिद्यमानो न कुप्येत न कम्पेत** तत्सूक्ष्मांशासंभवज्ञानेन ब्रह्मविद्वरत्वमवलम्ब्य तिष्ठेत्। तथा **आकाशमिव तिष्ठासेत् छिद्यमानोऽपि न कुप्येत न कम्पेत** तद्वीजांशासंभवज्ञानेन ब्रह्मविद्वरीयान् भूयात्। अथ **सत्येन तिष्ठासेत्** स्वातिरिक्तासत्यतदर्धमात्रासंभवप्रबोधसिद्धं सत्यं तद्भावमेत्य तिष्ठेत्। एवं प्रबोधतो ब्रह्मविद्वरिष्ठो भवेत्। **सत्यो नामायमात्मा,** "सत्यस्य सत्यमिति प्राणा वै सत्यं तेषामेव सत्यम्," "पश्यतेहापि सन्मात्रमसदन्यत्," "ब्रह्ममात्रमसन्न हि" इत्यादिश्रुतेः॥ १॥

सन्मात्रावगत्युपायः सप्तभूमिका

सर्वेषामेव गन्धानां पृथिवी हृदयं सर्वेषामेव रसानामापो हृदयं सर्वेषामेव रूपाणां तेजो हृदयं सर्वेषामेव स्पर्शानां वायुर्हृदयं सर्वेषामेव शब्दानामाकाशं हृदयं सर्वेषामेव गतीनामव्यक्तं हृदयं सर्वेषामेव सत्त्वानां मृत्युर्हृदयं मृत्युर्वै परे देव एकीभवतीति परस्तान्न सन्नासन्न सदसदित्येतन्निर्वाणानुशासनमिति वेदानुशासनमिति वेदानुशासनम्॥ २॥

कथं सन्मात्रावगतिः इत्यत्र तदवगत्युपायसप्तभूमिकां प्रकटयति—**सर्वेषामिति। सर्वेषामेव गन्धानां पृथिवी हृदयं,** गन्धजातोत्पादस्थितिभङ्गभूमित्वात्। तथा **सर्वेषामेव रसानां आपो हृदयं** इत्यादि समानम्। **सर्वेषामेव सत्त्वानां** पृथिव्याद्यव्यक्तान्तानां स्वातिरिक्तोपसंहर्ता सर्वसाक्षी **मृत्युः हृदयम्।** एवं पृथिव्यादिमृत्युपर्यन्तं सबीजं तत्सर्वं **परे देवे** निष्प्रतियोगिकनिर्बीजब्रह्ममात्रे **एकीभवति** तन्मात्रमवशिष्यते। **परस्तात् न सत् नासत् न सदसत्** इत्युक्तार्थम्॥ २॥

इति त्रयोदशः खण्डः

अष्टमानुशासनम्—सर्वात्त्वधिष्ठानं ब्रह्म

सर्वात्त्वधिष्ठानं ब्रह्म

पृथिवी वा अन्नमापोऽन्नादा आपो वा अन्नं ज्योतिरन्नादं ज्योतिर्वा अन्नं वायुरन्नादो वायुर्वा अन्नमाकाशोऽन्नाद आकाशो वा अन्नमिन्द्रियाण्यन्नादानीन्द्रियाणि वा अन्नं मनोऽन्नादं मनो वा अन्नं बुद्धिरन्नादा बुद्धिर्वा अन्नमव्यक्तमन्नादमव्यक्तं वा अन्नमक्षरमन्नादमक्षरं वा अन्नं मृत्युरन्नादो मृत्युर्वै परे देव एकीभवतीति परस्तान्न सन्नासन्न सदसदित्येतन्निर्वाणानुशासनमिति वेदानुशासनमिति वेदानुशासनम् ॥ १ ॥

अन्नात्तृद्वारा ब्रह्मयाथात्म्यप्रकटनायेदमष्टमानुशासनमारभ्यते—**पृथिवीति**। या **पृथिवी वै** प्रसिद्धा सैव प्रथममन्नं ग्रसनीयवस्त्विति यावत्। तदपेक्षया **आपोऽन्नादाः** कारणत्वात्। **आपो वा अन्नं** इत्यादि समानम्। **आकाशो वा अन्नं इन्द्रियाण्यन्नादानि**, आकाशादिस्थूलभूतापेक्षया अपञ्चीकृतभूतकार्येन्द्रियाणां सूक्ष्मत्वात्। पूर्वपूर्वं कार्यं उत्तरोत्तरं कारणं इति मन्तव्यम्। **मृत्युर्वै परे देवे एकीभवति** इत्यादि समानम् ॥ १ ॥

इति चतुर्दशः खण्डः

नवमानुशासनम्—तत्त्वदहनम्

उत्क्रान्तस्य ब्रह्मसमापत्तौ तत्त्वदहनक्रमः

अथ हैनं रैकः पप्रच्छ भगवन् योऽयं विज्ञानघन उत्क्रामन् स केन कतरद्वाव स्थानं दहतीति तस्मै स होवाच योऽयं विज्ञानघन

उत्क्रामन् प्राणं दहत्यपानं व्यानमुदानं समानं वैरम्भं मुख्यमन्तर्यामं प्रभञ्जनं कुमारं श्येनं श्वेतं कृष्णं नागं दहति पृथिव्यापस्तेजोवायुराकाशं दहति जागरितं स्वप्नं सुषुप्तं च तुरीयं च महतीं च लोकं परं च लोकं दहति लोकालोकं दहति धर्माधर्मं दहत्यभास्करममर्यादं निरालोकमतः परं दहति महान्तं दहत्यव्यक्तं दहत्यक्षरं दहति मृत्युं दहति मृत्युर्वै परे देव एकीभवतीति परस्तान्न सन्नासन्न सदसदित्येतन्निर्वाणानुशासनमिति वेदानुशासनमिति वेदानुशासनम् ॥ १ ॥

षष्ठानुशासने अपुनर्भवाया उत्क्रान्तस्य क्रमेण ब्रह्मसम्पत्तिरभिहिता। अत्र तु कति तत्त्वानि दग्ध्वा मुनिः ब्रह्म संपद्यत इति पृच्छति—अथेति। **अथ हैनं रैकः पप्रच्छ। भगवन् योऽयं विज्ञानघनः उत्क्रामन् स केन मार्गेण कतरद्वाव स्थानं तत्त्वं दहति** बीजानर्हं करोति **इति** एवं पृष्टवते **तस्मै स होवाच। योऽयं विज्ञानघन उत्क्रामन्** ब्रह्मलोकं प्राप्तो निर्बीजसम्पदिच्छया निजपरिकरभूतं **प्राणं दहति** निर्बीजं प्राणं दहति। तथा **अपानं दहती**त्यादि समानम्। पृथिव्यादीन् जाग्रदादीन् दहति निर्बीजं करोति। **महतीं इमं च लोकं परं च लोकं** दहति तत्साधनधर्माधर्मं दहति अतः परममभास्करं **अमर्यादं निरालोकं** तमोलोकमित्यर्थः। **मृत्युर्वै** सर्वग्रासः साक्षी **परे** देवे एकीभवति। **परस्ता**दित्याद्युक्तार्थम् ॥ १ ॥

इति पञ्चदशः खण्डः

दशमानुशासनम्—ब्रह्मविद्यासंप्रदानम्

ब्रह्मविद्यासंप्रदानविधिः

सौबालबीजब्रह्मोपनिषन्नाप्रशान्ताय दातव्या नापुत्राय नाशिष्याय नासंवत्सररात्रोषिताय नापरिज्ञातकुलशीलाय दातव्या नैव च प्रवक्तव्या।

यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ ।
तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः ॥

इत्यतेन्निर्वाणानुशासनमिति वेदानुशासनमिति वेदानुशासनम् ॥ १ ॥

ब्रह्मविद्यासंप्रदायप्रकटनपूर्वकं शास्त्रमुपसंहरति—**सौबालेति** । सुबाल-सम्बन्धि सौबालं बीजं यस्य तत् **सौबालबीजं ब्रह्मोपनिषत्** निर्बीजब्रह्मविद्येयं **नाप्रशान्ताय दातव्या** । तथा **नापुत्राय इत्यादि** । "यस्य देवे" इति मन्त्रोऽयं श्वेताश्वतरसमाप्तौ व्याख्यातः । इत्येतन्निर्वाणानुशासनमित्याद्युक्तार्थम् ॥

इति षोडशः खण्डः

श्रीवासुदेवेन्द्रशिष्योपनिषद्ब्रह्मयोगिना ।
सुबालोपनिषद्ध्याख्या लिखिता जयताच्चिरम् ॥
सुबालोपनिषद्ध्याख्याग्रन्थसङ्ख्या निगद्यते ।
पञ्चचत्वारिंशदधिशतानां पञ्च विश्रुता ॥

इति श्रीमदीशाद्यष्टोत्तरशतोपनिषच्छास्त्रविवरणे त्रिंशत्सङ्ख्यापूरकं सुबालोपनिषद्विवरणं सम्पूर्णम्

सूर्योपनिषत्

भद्रं कर्णेभिः—इति शान्तिः

सूर्योपनिषदः ऋष्यादिध्यानान्तम्

अथ सूर्याथर्वाङ्गिरसं व्याख्यास्यामः । ब्रह्मा ऋषिः । गायत्री छन्दः । आदित्यो देवता । हंसः सोऽहमग्निनारायणयुक्तं बीजम् । ह्रल्लेखा शक्तिः । वियदादिसर्गसंयुक्तं कीलकम् । चतुर्विध-पुरुषार्थसिद्धयर्थे जपे विनियोगः । षट्स्वरारूढेन बीजेन षडङ्गम् । रक्ताम्बुजसंस्थितं सप्ताश्वरथिनं हिरण्यवर्णं चतुर्भुजं पद्मद्वयाभय-वरदहस्तं कालचक्रप्रणेतारं श्रीसूर्यनारायणं य एवं वेद स वै ब्राह्मणः ॥ १ ॥

सूदितस्वातिरिक्तारिं सूरिबृन्दात्मभावितम् ।
सूर्यनारायणाकारं नौमि चित्सूर्यवैभवम् ॥

इह खलु अथर्वणवेदप्रविभक्तेयं सूर्योपनिषत् सर्वकारणत्वसारात्म्यकलना-प्रकटनव्यग्रा ब्रह्ममात्रपर्यवसन्ना विजृम्भते । अस्याः स्वल्पग्रन्थतो विवरणमारभ्यते । स्वाङ्गलोकानुकम्पया सौरविद्यां श्रुतिः स्वयमुपन्यस्यति—अथेति । अथ यथोक्ताधिकारिसम्पत्त्यनन्तरं सूर्यप्रतिपादकाथर्वाङ्गिरसं श्रुतयो वयं व्याख्या-

स्यामः कथयामः इत्यर्थः । सूर्योपनिषदो मन्त्ररूपत्वेन ऋष्यादिध्यानान्तमुच्यते —**ब्रह्मेति** । **हंसः सोऽहं** रामिति बीजम् । ह्रीमिति हृल्लेखा **शक्तिः** । हयरवलेति **वियदादिसर्गसंयुक्तं कीलकम्** । हंसामित्यादि **षट्स्वरारूढेन बीजेन** । **सप्ताश्वरथिनं** "सप्त युञ्जन्ति रथमेकचक्रम् । एको अश्वो वहति सप्तनामा ।" इति श्रुतेः । निमिषादिब्रह्मकल्पान्तकालचक्रप्रणेतारम् । श्रीः प्रकाशरूपिणी दीप्तिः, तद्विशिष्टः **श्रीसूर्यः** परमेश्वरः, स एव **नारायणः** परमात्मा, तं एवं प्रत्यगभेदेन **यो वेद स ब्राह्मणो** ब्रह्मनिष्ठो भवतीत्यर्थः ॥

सूर्यप्रत्यगभेदः

ॐ भूर्भुवः सुवः । तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि ।
धियो यो नः प्रचोदयात् ॥ २ ॥

सूर्यस्य प्रत्यगभिन्नब्रह्मता कुत इत्यत आह—**ओमिति** । ओमित्येतदक्षरं परं ब्रह्मेति परापरब्रह्माभिधानम् । तदवयवा अकारोकारमकाराः **भूर्भुवःसुवरिति** व्याहृतित्रयरूपेण परिणता भवन्ति । व्याहृतित्रयपरिणमनं ह्यविद्याद्वयतत्कार्य-जातम् । तद्व्यष्टिसमष्ट्यारोपापवादाधारा विश्वविराडोत्रादयो द्वितुर्याविकल्पान्ताः । तत्र यत्स्वातिरिक्तसर्वापह्नवसिद्धनिष्प्रतियोगिकब्रह्ममात्रज्ञानप्रसवितृजनकं, **य ईश्वरो नोऽस्माकं धियो** ब्रह्ममात्रसाम्राज्ये **प्रचोदयात्** सोऽयं सविता परमेश्वरः **तस्य सवितुः देवस्य** यत् निर्विशेषतया **वरेण्यं भर्गो** निष्प्रतियोगिकचिन्मात्रं अवशिष्यते, तत् स्वमात्रमिति वयं **धीमहि** ध्यायामः । एवं ध्याता **ब्राह्मणो** ब्रह्मनिष्ठो विदेहमुक्तो भवति ॥ २ ॥

सूर्यभर्गस्य जगत्कारणत्वम्

सूर्य आत्मा जगतस्तस्थुषश्च । सूर्याद्वै खल्विमानि भूतानि
जायन्ते । सूर्याद्यज्ञः पर्जन्योऽन्नमात्मा ॥ ३ ॥

यन्निर्विशेषं भर्गः तदेव स्वाज्ञदृष्ट्या परमेश्वरात्मना विश्वारोपाधिकरणतया तदुत्पत्तिस्थितिलयकारणं भवतीत्याह—**सूर्य आत्मेति**। सूत्रान्तर्यामिप्रत्यग्रूपेण स्थिरचरात्मकजगत **आत्मा** भवति। वियदादिभूततत्कार्यभौतिकानि च ततः संभूतानीत्याह—**सूर्यादिति**। **यज्ञः** अग्निष्टोमादिः, प्रपञ्चजीवनहेतुः **पर्जन्यः**, तज्जं **अन्नं**, तदत्ता **आत्मा** जीवपूगः तत्सर्वं सूर्यादेव जातमित्यर्थः ॥ ३ ॥

आदित्यस्तुतिः

नमस्त आदित्य । त्वमेव प्रत्यक्षं कर्मकर्ताऽसि । त्वमेव प्रत्यक्षं ब्रह्माऽसि । त्वमेव प्रत्यक्षं विष्णुरसि । त्वमेव प्रत्यक्षं रुद्रोऽसि । त्वमेव प्रत्यक्षमृगसि । त्वमेव प्रत्यक्षं यजुरसि । त्वमेव प्रत्यक्षं सामासि । त्वमेव प्रत्यक्षमथर्वाऽसि । त्वमेव [1]सर्वं छन्दोऽसि ॥ ४ ॥

एवं जगत्कारणात्मना यस्त्वं स्थितः **नमस्ते आदित्य**। एवं सर्वेश्वरं आदित्यं नमस्कृत्य सर्वात्मकतया स्तौति—**त्वमेवेति**। जीवात्मना **त्वमेव प्रत्यक्षं कर्मकर्ताऽसि**। त्रिमूर्त्यात्मना **त्वमेवेति**। वेदात्मना **त्वमेवेति** ॥ ४ ॥

आदित्यस्य सर्वात्मकब्रह्मत्वम्

आदित्याद्वायुर्जायते । आदित्याद्भूमिर्जायते । आदित्यादापो जायन्ते । आदित्याज्ज्योतिर्जायते । आदित्याद्व्योम दिशो जायन्ते । आदित्याद्देवा जायन्ते । आदित्याद्वेदा जायन्ते । आदित्यो वा एष [2]एतन्मण्डलं तपति । असावादित्यो ब्रह्म । आदित्योऽन्तःकरणमनोबुद्धिचित्ताहंकाराः । आदित्यो वै व्यानः

[1] प्रत्यक्षं सर्वं—अ, [2] एतस्मिन्म—उ १,

समानोदानोऽपानः प्राणः । आदित्यो वै श्रोत्रत्वक्चक्षूरसनघ्राणाः । आदित्यो वै वाक्पाणिपादपायूपस्थाः । आदित्यो वै शब्दस्पर्शरूपरसगन्धाः । आदित्यो वै वचनादानागमनविसर्गानन्दाः । आनन्द[1]मयो विज्ञानमयो विज्ञानमय आदित्यः ॥ ९ ॥

पुरा सङ्क्षिप्तार्थं विस्तरयति—आदित्यादिति । य एवं जगत्कारणतयोक्तः **असावादित्यो ब्रह्म** तत्रत्यकार्यसापेक्षकारणताऽपाये तस्यैव ब्रह्मत्वं युज्यत इत्यर्थः । अन्तःकरणादयस्तद्भिन्ना इत्यत आह—**आदित्य इति । आनन्दमय-विज्ञानमय**शब्दौ पञ्चकोशोपलक्षणार्थौ । अपरो **विज्ञानमय**शब्दस्तु जीववाचीत्यर्थः ॥ ९ ॥

सूर्य प्रति प्रार्थना

नमो मित्राय भानवे मृत्योर्मा पाहि । भ्राजिष्णवे विश्वहेतवे नमः ।

सूर्याद्भवन्ति भूतानि सूर्येण पालितानि तु ।
सूर्ये लयं प्राप्नुवन्ति यः सूर्यः सोऽहमेव च ॥
चक्षुर्नो देवः सविता चक्षुर्न उत पर्वतः ।
चक्षुर्धाता दधातु नः ॥
आदित्याय विद्महे सहस्रकिरणाय धीमहि ।
तन्नः सूर्यः प्रचोदयात् ॥
सविता पुरस्तात् सविता पश्चात्तात्
सवितोत्तरात्तात् सविताऽधरात्तात् ।

[1] मयो ज्ञा—अ, अ १, अ २, क.

सविता नः सुवतु सर्वतातिं
सविता नो रासतां दीर्घमायुः ॥ ६ ॥

हे मित्र तुभ्यं नमोऽस्तु स्वातिरिक्तमृत्योः सकाशात् मां पाहीत्याह—**नम** इति । यः सर्वहेतुः सोऽहमित्याह—**सूर्यादिति** । त्रिमूर्तिभावापन्नात् **सूर्यात्** । एवं जगत्कारणरूपो यः सोऽयं मे ज्ञानचक्षुः ददात्वित्याह—**चक्षुरिति** । **चक्षुर्नो देवः सविता** तस्य नोऽस्माकं आलोकप्रदत्वात् **चक्षुर्न उत पर्वतः** उतायं सविता नोऽस्माकं भूतादिकालज्ञानचक्षुः ददातु । तद्दापनशक्तिः अस्यास्तीत्यत्र को हेतुरित्यत्राह—**पर्वत इति** । पर्वणो गणनात्मकतया पर्वशब्देन काल उच्यते । निमेषादिः कालपर्वः, तस्य पर्वतः, कालस्वरूपत्वात् "स एष कालो भुवनस्य गोप्ता" इति, "कालः कलयतामहम्", इति श्रुतेः, स्मृतेश्च । किंच—**चक्षुरिति** । **धाता** परमेश्वरो **नो** अस्माकं **चक्षुः** निर्विशेषब्रह्ममात्रदृष्टिं **दधातु** ददात्वित्यर्थः । अथ सौरगायत्रीमाह—आदित्यायेति । यो **नः** सन्मार्गे **प्रचोदयात्** तस्मै **धीमहि** तं ब्रह्मास्मीति ध्यायामीत्यर्थः । सर्वत्र पूर्णरूपः सविता अस्माकं स्वनिर्विशेषध्याननिर्वर्तकदीर्घायुः दद्यादिति प्रार्थयति—**सवितेति** । यः **सविता** दिगन्तविश्रान्तशरीरी स्यात् सोऽयं सविता **नो**ऽस्माकं पुरस्तादित्यादिदशदिग्विश्रान्तां सर्वततिमेव **सर्वतातिं** सर्वाधिष्ठानतया सर्वव्यापकतां **सुवतु** तनोतु । किं च—**नो**ऽस्माकं **सविता** निर्विशेषब्रह्मभावापत्तये **दीर्घमायुः रासतां** दीयतां इति प्रार्थितः तथा दद्यादित्यर्थः । सर्वत्र तादित्यनर्थको निपातः । यद्वा—**पश्चादित्यादि** । स्वेनात्तात् पूर्णभावात् हेतोः नः पूर्णतां सुवत्वित्यर्थः ॥ ६ ॥

सूर्याष्टाक्षरी

ॐ इत्येकाक्षरं ब्रह्म । घृणिरिति द्वे अक्षरे । सूर्य इत्यक्षरद्वयम् । आदित्य इति त्रीण्यक्षराणि । [1]एतस्यैव सूर्यस्याष्टाक्षरो मनुः ॥ ७ ॥

[1] एतद्वै सू—अ, अ १.

सौरमन्त्रराजमष्टाक्षरमुद्धरति--ओमिति । **ओमित्येकाक्षरं ब्रह्म** निर्विशेषमित्यर्थः । घृणा दया अस्य अस्तीति घृणिः ॥ ७ ॥

मन्त्रजपफलम्

यः सदाऽहरहर्जपति स वै ब्राह्मणो भवति स वै ब्राह्मणो भवति । सूर्याभिमुखो जप्त्वा महाव्याधिभयात् प्रमुच्यते । अलक्ष्मीर्नश्यति । अभक्ष्यभक्षणात् पूतो भवति । अगम्यागमनात् पूतो भवति । पतितसंभाषणात् पूतो भवति । असत्संभाषणात् पूतो भवति । मध्याह्ने सूर्याभिमुखः पठेत् । सद्योत्पन्न-पञ्चमहापातकात् प्रमुच्यते । सैषा सावित्री विद्यां[द्या]न किंचिदपि न कस्मैचित् प्रशंसयेत् । य एतां महाभागः प्रातः पठति स भाग्यवान् जायते । पशून् विन्दति । वेदार्थं लभते । त्रिकाल-मेतज्जप्त्वा क्रतुशतफलमवाप्नोति । हस्तादित्ये जपति स महामृत्युं तरति स महामृत्युं तरति य एवं वेद ॥ इत्युपनिषत् ॥ ८ ॥

मन्त्रार्थानुसन्धानपूर्वकं जपफलमाह—य इति । **स वै ब्राह्मणो भवति,** आवृत्तिः निःसंशयार्था । इतिशब्दः सौरविद्यासमाप्तिद्योतकः ॥ ८ ॥

श्रीवासुदेवेन्द्रशिष्योपनिषद्ब्रह्मयोगिना ।
लिखितं स्याद्विवरणं सूर्योपनिषदः स्फुटम् ।
सूर्यव्याख्याग्रन्थजातं चत्वारिंशत् समीरितम् ॥

इति श्रीमदीशाद्यष्टोत्तरशतोपनिषच्छास्त्रविवरणे एकसप्ततिसङ्ख्यापूरकं
सूर्योपनिषद्विवरणं सम्पूर्णम्

स्कन्दोपनिषत्

सह नाववतु—इति शान्तिः

ब्रह्मात्मैक्ये विद्वदनुभवः

अच्युतोऽस्मि महादेव तव कारुण्यलेशतः ।
विज्ञानघन एवास्मि शिवोऽस्मि किमतः परम् ॥ १ ॥
ननिजं निजवद्भात्यन्तःकरणजृम्भणात् ।
अन्तःकरणनाशेन संविन्मात्रस्थितो हरिः ॥ २ ॥
संविन्मात्रस्थितश्चाह[1]मजोऽस्मि किमतः परम् ।
व्यतिरिक्तं जडं सर्वं स्वप्नवच्च विनश्यति ॥ ३ ॥
चिज्जडानां तु यो द्रष्टा सोऽच्युतो ज्ञानविग्रहः ।
स एव हि महादेवः स एव हि महाहरिः ॥ ४ ॥
स एव ज्योतिषां ज्योतिः स एव परमेश्वरः ।
स एव हि परं ब्रह्म तद्ब्रह्माहं न संशयः ॥ ५ ॥

यत्रासंभवतां याति स्वातिरिक्ताभिदाततिः ।
संविन्मात्रं परं ब्रह्म तत्स्वमात्रं विजृम्भते ॥

इह खलु कृष्णयजुर्वेदप्रविभक्तेयं स्कन्दोपनिषत् क्रमेण निर्विशेष-ब्रह्ममात्रानुभूतिं प्रकटयन्ती प्रवृत्ता । अस्याः स्वल्पग्रन्थतो विवरणमारभ्यते ।

[1] मेकोऽस्मि—अ.

स्कन्दः परमेश्वरात् परमतत्त्वमवगम्य तत्सन्निधौ विद्वदनुभव एवमेव भूयादिति स्वानुभवं प्रकटयति—**अच्युत इति**। हे **महादेव** सर्वदेवोत्तम भवत्करुणया स्वस्वरूपात् **अच्युतोऽस्मि** प्रत्यगभिन्नब्रह्मरूपेण **विज्ञानघनलक्षणशिव एवास्मि**। **अतः परं** किं अवशिष्यते, न किमपीत्यर्थः ॥ १ ॥ पुरा स्वाज्ञदशायां शरीराद्युपलक्षणस्वाविद्यापदतत्कार्यजातं **ननिजमित्यादि**। इदानीं तु **अन्तःकरणनाशेन** ॥ २ ॥ स्वस्य संविन्मात्रत्वे स्वव्यतिरिक्तस्य का गतिरित्यत आह—**व्यतिरिक्तमिति** ॥ ३ ॥ स्वव्यतिरिक्तचरस्थिरप्रपञ्चे जीवजगद्रूपेण चित्त्वं जडत्वं च प्रतिभाति, तुर्यरूपेण तत्सर्वसाक्ष्यस्मीत्याह—**चिज्जडानामिति**। यः प्रसक्तसाक्ष्यसापेक्षसाक्षी **स एव हि** ॥ ४–५ ॥

जीवपरयोरभेदः

जीवः शिवः शिवो जीवः स जीवः केवलः शिवः।
तुषेण बद्धो व्रीहिः स्यात् तुषाभावेन तण्डुलः ॥ ६ ॥
एवं बद्धस्तथा जीवः कर्मनाशे सदाशिवः।
पाशबद्धस्तथा जीवः पाशमुक्तः सदाशिवः ॥ ७ ॥

जीवपरयोः भेदप्रसक्तौ सदृष्टान्तं तं निराकरोति—**जीव इति** ॥ ६ ॥ स्वातिरिक्ताशया पाश्यते बध्यते इति **पाशः** स्वातिरिक्तास्तित्वविभ्रमः, तद्योगात् पर एव **जीवोऽस्मी**त्यात्मानं मन्यते, तद्वियोगतः जीवोऽपि **सदाशिवोऽस्मी**त्यात्मानं मन्यते। यत एवं अतः स्वातिरिक्तास्तित्वपाशं निष्प्रतियोगिकस्वमात्रज्ञानप्रळयकालाग्निना निर्दहेदित्यर्थः ॥ ७ ॥

शिवकेशवयोरभेदः

शिवाय विष्णुरूपाय शिवरूपाय विष्णवे।
शिवस्य हृदयं विष्णुर्विष्णोश्च हृदयं शिवः ॥ ८ ॥

यथा शिवमयो विष्णुरेवं विष्णुमयः शिवः ।
यथाऽन्तरं न पश्यामि तथा मे [1]स्वस्तिरायुषि ।
यथाऽन्तरं न भेदाः स्युः शिवकेशवयोस्तथा ॥ ९ ॥

शिवकेशवयोः प्रसक्तभेदं परिहरति—**शिवायेति** ॥ ८ ॥ **यथाऽन्तरं** शिवकेशवयोः भेदम् । **स्वस्तिरस्तु** स्वस्त्यस्तु । न कदाऽपि तयोः भेदः स्फुरत्वित्याह—**यथान्तरमिति** । यथा ब्रह्मात्मैक्यज्ञानेन प्रत्यक्परात्मनोः विश्वतैजसाद्यवान्तरभेदाः न स्युः तथा शिवकेशवयोः भेदादर्शनेन स्वस्त्यस्त्विति पूर्वेणान्वयः ॥ ९ ॥

आत्मज्ञानान्तरङ्गसाधनं मानसिकपूजा

देहो देवालयः प्रोक्तः स जीवः केवलः शिवः ।
त्यजेदज्ञाननिर्माल्यं सोऽहंभावेन पूजयेत् ॥ १० ॥
अभेददर्शनं ज्ञानं ध्यानं निर्विषयं मनः ।
स्नानं मनोमलत्यागः शौचमिन्द्रियनिग्रहः ॥ ११ ॥
ब्रह्मामृतं पिबेद्भैक्षमाचरेद्देहरक्षणे ।
वसेदेकान्तिको भूत्वा चैकान्ते द्वैतवर्जिते ॥
इत्येवमाचरेद्धीमान् स [2]एवं मुक्तिमाप्नुयात् ॥ १२ ॥

स्वाङ्गलोकानां स्वज्ञानजननान्तरङ्गसाधनमानसिकपूजाविधिमाचष्टे—**देह इति** ॥ १० ॥ प्रत्यक्परयोः **अभेददर्शनम्** ॥ ११ ॥ **भैक्षमाचरेद्देहरक्षणे** देहमात्ररक्षणे तु यथोक्तकाले भैक्षमाचरेदित्यर्थः । पूजाफलमाह—**इत्येवमिति** ॥ १२ ॥

[1] यावदायुषि—उ. [2] एव—उ.

स्वस्त्यायुःप्रार्थनापुरस्सरं परमपदानुसंधानम्

श्रीपरमधाम्ने स्वस्ति चिरायुष्योन्नम इति ॥

[1]विरिञ्चिनारायणशंकरा[2]त्मकं नृसिंह देवेश तव प्रसादतः ।
अचिन्त्यमव्यक्तमनन्तमव्ययं वेदात्मकं ब्रह्म निजं
विजानते ॥ १३ ॥

तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः ।
दिवीव चक्षुराततम् ॥ १४ ॥
तद्विप्रासो विपन्यवो जागृवांसः समिन्धते ।
विष्णोर्यत् परमं पदम् ॥
इत्येतन्निर्वाणानुशासनमिति वेदानुशासनमित्युपनिषत् ॥ १५ ॥

चिरं ब्रह्मानुसन्धानानुकूलायुःस्थैर्यं बुधाः प्रार्थयन्तीत्याह—श्रीति । श्रीमत् परमं उत्कृष्टं ब्रह्मलोकं वैकुण्ठं कैलासं च धाम स्थानं यस्य त्रिमूर्त्तिरूपिणः तस्मै **श्रीपरमधाम्ने** त्रिमूर्त्यात्मकाय नमोऽस्तु । इतिशब्देन त्रिमूर्त्यैक्यानुसन्धानं द्योत्यते । यतो वयं तावदैक्यानुसन्धानेन तृप्ताः स्मः अतोऽस्माकं **स्वस्ति** स्वस्त्यस्तु । भवच्चिरानुसन्धानानुकूलदीर्घायुष्यमस्त्विति संप्रार्थ्य किं कृतवन्त इत्यत्राह—**विरिञ्चिनारायणेति** । चतुराननस्य समष्टिजीवत्वेन **नृ**शब्दः चतुराननवाचकः, **सिंह**शब्देन विष्णुः, **देवेश**शब्देन शिवः, विशिष्टसम्बोधनमेतत्—हे **नृसिंह देवेश** ब्रह्मविष्णुमहेश्वरात्मकत्रिमूर्ते **तव प्रसादतो** मुनयो **यद्विरिञ्चिनारायणशङ्करात्मकं** ब्रह्मविष्ण्वादिविभागकलनाविरळं स्वातिरेकेण **अचिन्त्यं** मूर्तामूर्तकलनावैरळ्यात् **अव्यक्तं** देशादिपरिच्छेदत्रयाभावात् **अनन्तं** पारमार्थिकसत्यत्वात् **अव्ययं** समस्तवेदमुख्यार्थत्वात् **वेदात्मकं** स्वातिरिक्ताविद्यापदतत्कार्यापह्नवसिद्धं **ब्रह्म निजं** निष्प्रतियोगिकत्वात् स्वमात्रमिति

[1] विरिञ्च—अ, अ १, अ २. [2] त्मनो—अ.

विजानते ॥ १३ ॥ तत् किमित्यत आह—**तदिति**। "**तद्विष्णोः परमं पदम्**" इति श्रुतिः आरुणिकादौ सम्यक् व्याख्यातेति अत्र न व्याख्यायते। निष्प्रतियोगिकब्रह्ममात्रावस्थानमेव विष्णुपरमपदमित्यर्थः ॥ १४ ॥ इत्युपनिषच्छब्दः स्कन्दोपनिषत्समाप्त्यर्थः ॥ १५ ॥

श्रीवासुदेवेन्द्रशिष्योपनिषद्ब्रह्मयोगिना।
लिखितं स्याद्विवरणं स्कन्दोपनिषदः स्फुटम्।
स्कन्दोपनिषदो व्याख्याग्रन्थः पञ्चाशदीरितः ॥

इति श्रीमदीशाद्यष्टोत्तरशतोपनिषच्छास्त्रविवरणे एकपञ्चाशत्सङ्ख्यापूरकं
स्कन्दोपनिषद्विवरणं सम्पूर्णम्

नामधेयपदसूची

यत्र पुटसंख्याऽनन्तरं तिर्यग्रेखायाः परं संख्या वर्तते तत्र तावती पदावृत्तिः बोध्या

पदम्	पुटसंख्या
अगस्त्यः	४१८
अङ्गिराः	९०
अजातशत्रुः	१९५, १९६, १९७–३, १९८–२, १९९–३, १६०–३, १६१–२, १६२–४, १६३–३, १६४
अनड्वान्	२२९
अनिरुद्धनारायणः	३८२
अपान्तरतमः	२५, ४८३
अप्सरसः	३८४
अयोध्यानगरम्	३४५
आरुणिः	१११
इन्द्रः	१४०–४, १६६
ईशः	१९७, २०६
ईशानः	३३८
ईश्वरः	१८३–२, ४३०, ४४२
उशीनरः	१९५
ऋभुः	२९
ऋश्यशृङ्गः	४१८
कालकाश्याः	१४१
काशीविदेहाः	१९५
काशी	३४८–२
कुरुपञ्चालाः	१९५
कृष्णद्वैपायनः	२४४
कौण्डिन्यः	४८
कौशिकः	४१८
कौषीतकिः	१२४, १३१
गन्धर्वाः	३८४
गार्ग्यः	१९५
गौतमः	४१८
घोराङ्गिराः	२५, ४८३
चित्रः	१११, ११३
जनकः	१९५–२, २४५–२, २४६–४
जाम्बूकः	४१८
दैवोदासिः	१४०
नारायणः	२१०
निदाघः	२६, २९, २५४

पदम्	पृष्ठसंख्या
पादनारायणः . .	३८२
पैङ्गलः १९२, १९७,	२०४, २०९
पैङ्ग्यः . . .	१२९
पैप्पलादः . .	२८०–२
पौलोमाः . . .	१४१
प्रजापतिः . . .	४९६
प्रतर्दनः . .	१४०–४
प्रह्लादयः . . .	१४१
फलितः . . .	२२९
बालाकिः १९५, १९६,	१९७–३, १९८–२, १९९–३, १६०–३, १६१–२, १६२–४, १६३–२
बृहद्रथः . . .	३८८
बृहन्पाण्डरवासः . .	१६३
ब्रह्मनालम् . . .	३४८
ब्रह्मा . २५, ३२१–३,	४८३
माण्डव्यः . . .	४८
मारुतिः . . .	३४५
मिथिलापुरम् . .	२४५
मैत्रेयः . . .	३९३
याज्ञवल्क्यः १९३, १९७,	२०४, २०९
रामः . २५,	३४८, ४८३
रैक्कः २५,	४८३, ४८४, ४९१, ४९३, ४९९
रोहितोच्छिष्टः . .	२२९
वसिष्ठः . . .	४१८
वालखिल्याः . .	३९३
वाल्मीकिः . . .	४१८
वासुदेवः . . १०,	३८०
विदेहनगरी . . .	२४५
व्यासः २४५,	४१८, ४३०–३, ४४२
व्रत्यः . . .	२२९
शंभुः . . .	४३१
शर्वः . . .	२२९
शाकायन्यः . .	३८८, ३९२
शिवः . . .	३३८
शुकः २४०,	२४४, २४५–३, २४६, २५३, ४३१, ४३२
श्वेतकेतुः . . .	१११
सत्त्वमत्स्याः . .	१५५
सदाशिवः . . .	४३२
सविता .	४५५–१०, ४५६–८
साङ्कृतिः . . .	१, ३
सावित्री .	४५५–१०, ४५६–८
सुमेरुः . . .	२४५
स्तंभः . . .	२२९
हिरण्यगर्भः . .	१९६, ३४३

विशेषपदसूची

यत्र पुटसंख्याऽनन्तरं तिर्यग्रेखायाः परं संख्या वर्तते तत्र तावती पदावृत्तिः बोध्या

पदम्	पुटसंख्या
अकर्म	१८९–२
अग्निगुणाः	४२९
अग्निलोकः	११९
अग्र्यंशाः	१९८, ४२४
अग्राह्यम्	१८९–२
अङ्गभावना	८३
अचित्ताः	६२
अज्ञानम्	१८९–२
अज्ञानचक्षुः	२८०
अज्ञानभूः	२९०
अण्डम्	२३७
अतद्व्यावृत्तिसमाधिः	३६९
अदेहमुक्तत्वम्	२०८, २९०, ३७५
अधिदैवतम्	१३४, ४७३–६, ४७४–७, ४७५
अधिभूतम्	४७३–६, ४७४–७, ४७५
अध्यात्मम्	१३४, ४७३–६, ४७४–७, ४७५
अध्यासः	१३
अध्वर्युः	१२९, २२३
अनन्तः	४५०
अनुयाजाः	२२४
अनुसन्धानम्	२०४
अन्तःकरणम्	१९६, १९८
अन्तःकरणचतुष्टयम्	४२४
अन्तरात्मा	९०, ९१–२
अन्तर्यामी	४४९
अन्तर्यामः	४८६–२
अन्तर्वेदिः	१७८, २२३
अन्नमयकोशः	१९९, ४४६
अन्वेष्टिहामुहूर्तः	११९
अपञ्चीकरणम्	२०६
अपराजितायतनम्	११९, १२०

पदम्	पुटसंख्या
अपरोक्षबोधः	२०
अब्गुणाः	४२९
अमनस्ता	६२, ३६४
अमनीभावः	४११
अमलवासनाः	३७२
अमृतधारा	२०६
अमृता	४८६–२
अरमा	४९३
अरिषड्वर्गः	३८९
अरूपः	३६९–२
अवभृथः	२२४
अवस्थाः	४२६
अवस्थात्रयभाक्	२०१
अविद्या	४४९
अविद्याक्षयः	२८९
अविनाशि	४९०
अव्यक्तम्	४२८
अष्टपुरम्	१९९
अष्टोत्तरशतम् ३४९, ३९०, ३९१–२, ३९२	
अष्टप्रकृतयः	१७३
असङ्गः	३९
असङ्गास्थितिः	३८
असत्	९०
असंप्रज्ञातसमाधिः	३६९
असंवेदरूपा	८३
असंसक्तः	३९–२
असंसक्तिः	२९९, २९६
असंसर्गः	६–२
असुरा	४८७–२
आकाशगुणाः	४२९
आकाशांशाः	४२९
आधारः	२२३
आज्यभागः	२२४
आज्यस्थाली	२२३
आत्मतत्त्वम्	३६
आत्मनिष्ठा	३९२
आत्मपरः	८०
आत्मलाभः	९४
आत्मा ३९, ४२, ९०–२, २०७, ३३८, ३९९, ४८९, ४९६	
आदित्यलोकः	११९
आनन्दः	४९०
आनन्दमयकोशः	१९९, ४४६
आप्यायन्त्विति शान्तिः	३९३
आबल्यम्	१४६
आरब्धम्	२२
आरोहृदः	११९, ११८
आर्यः	४
आवरणशक्तिः	१९४

पदम्	पृष्ठसंख्या
आसुरम्	१८८–२
आहवनीयम्	१७८, २२१
इच्छा	४९३
इडा	२२४
इत्याः	१३८–२
इन्द्रप्रजापतीद्वारगोपौ	११९, १२०
इन्द्रलोकः	११९
इन्द्रियपालकाः	१९६
इल्यः	११९, १२०
इरा	१२०
इष्टयः	२२४
ईश्वरचैतन्यम्	१९४
उक्थम्	१४९
उच्छास्त्रम्	३९८–२
उदानः	३९७–२
उद्गाता	१२९, २२३
उद्गीथः	१२१
उपप्राणाः	१९८
उपरतिः	१८
उपहितजीवः	४४७
उपाधयः	१७, १९
उपासनानि	१३१
उपास्यः	१८८–२
ऋचः सामानि प्राचीनागानम्	१२१
एकधनावरोधनम्	१२६
एकार्थाभ्यसनम्	७८
एको निश्चयः	३३७
ऐष्टकं कर्म	१२९
करणाधिपाः	१९९
कर्म	१८९–२
कर्मेन्द्रियाणि	१९५, १९८, ४२४
कंसः	१२६
कामः	२७
कारणशरीरम्	१९९
कालः	२२९
कालतो व्याप्तिः	३७८
कुमारः	९००
कुमारा	४८६–२
कुम्भकावस्था	३६८
कुलालचक्रन्यायः	१९७
कूटस्थः	४४९
कूर्मिरम्	४८७–२
कृष्णः	४८७–२, ९००
केवलः	८२
केवलीभावः	३३
कैवल्यम्	२१०–२
कैवल्यपदम्	७१
कैवल्यमुक्तिः	३४८, ३४९, ३९४–२
कोशाः	१९९
कोष्ठाग्निः	१७७–२, २२१

पदम्	पुटसंख्या
कौत्सायनिस्तुतिः . .	४१३
क्षेत्रज्ञः ३१४, ३९५, ४२७, ४४८, ४८७–२	
गार्हपत्यम् . .	१७८, २२१
ग्राह्यम् . .	१८९–२
चतुर्थकश्रमः . .	२९
चतुर्थी भूमिका . .	८–२
चतुर्थो निश्चयः . .	३३७
चतुर्धा मुक्तिः . .	३४७
चतुर्विंशतिसङ्ख्यातम् .	२३०
चतुर्व्यूहः . . .	३७८
चमसः . . .	१२६
चाक्षुष्मती विद्या .	१–२, २
चित्तत्त्वम् . . .	७४
चित्तनाशः . . .	५५
चित्तशमः . . .	६७–२
चित्तस्पन्दः . .	६८
चिदाकाशः . . .	३०
चिद्व्योम . . .	७५
चेतःपरिक्षयः . .	७८
जगनी अम्बा . .	११५
जनोलोकाः . . .	४९१
जागरणम् . . .	४४५
जाग्रत् ८, ८३, २९२–२, ४२६	
जाग्रत्स्वप्नः . .	२९२–२
जाग्रदवस्था . . .	२०१
जातिः . . .	१८४
जिता . .	४८५–२
जीवः . . .	१८३
जीवन्मुक्तः २१–४, ४४, ५४, ६२, ६३, ६९, ८०, २०६, २०८, २४७, २४८, २४९, २५०, ३३४, ३३६	
जीवन्मुक्तिः. १५, ३५५, ३५६	
ज्ञप्तिः . . .	२९८
ज्ञभूः . . .	२९०
ज्ञानम् . १८५–२, ४५०	
ज्ञानचक्षुः . . .	२८०
ज्ञानभूमिः . . .	२९४
ज्ञानाग्निः . . .	१७७
ज्ञानेन्द्रियाणि १९६, १९८, ४२४	
तत्पदवाच्यः . .	२०४
तत्त्वज्ञानम् . . .	६७–२
तत्त्वनिष्ठः . . .	१०
तत्त्वमस्यादिवाक्यानि .	२००
तत्त्वानि . . .	४२७
तत्त्वावबोधः . .	२६५
तनुमानसी . .	२९५–२
तनुवासनम् . . .	३३
तन्मात्राणि . . .	१९५

पदम्	पुटसंख्या
तपः	१८९–२
तपोलोकाः	४९१
तापत्रयम्	३८५
तामसः	४२६
तामसगुणाः	४२५
तारः	२७
तुरीया	४०, ४२६, ४४६, ४८८–२
तुर्यगा	२९५, २९६
तुर्यत्वम्	४२
तुर्यम्	४९, ७१, ८६–२
तुर्यपदम्	८३
तुर्यरूपम्	५०
तुर्या	९
तुर्याकलना	८६
तुर्यातीतम्	७६, २९६
तुर्यातीतपदम्	३१
तुर्यातीतपदावस्था	८३
तुर्या दृष्टिः	३६
तुर्यावस्था	८७, २९६
तृतीयकभ्रमः	२८
तृतीयाहङ्कारः	३०९
तृतीयो निश्चयः	३३७
तृष्णाबद्धा	३३६
तृष्णामुक्ता	३३६

पदम्	पुटसंख्या
तैजसः	१०
तैजसत्वम्	२००
तैजसनाम	२००
त्रिणाचिकादियोगान्ताः	२७९
त्वंपदवाच्यः	२०४
दक्षिणा	२२४
दक्षिणाग्निः	१७८, २२१
दर्शनाग्निः	१७७, २२१
दशोपनिषत्	३४९
दहरम्	४७१
दीक्षा	१७८
दुःखबुद्धिः	४४७
दृढभावना	६१, ३६८
दृश्यम्	२७४
देवयजनम्	११९
देशतोव्याप्तिः	३७८
देहगृहम्	२९८–२
द्रोणकलशः	२२३
द्वात्रिंशाख्योपनिषत्	३४९
द्वितीयकभ्रमः	२८
द्वितीयाहङ्कृतिः	३०९
द्वितीयो निश्चयः	३३७
धनवासनम्	३३
धर्ममेघः	२०, २०६
धारापोता	२२४

पदम्	पुटसंख्या
ध्यानम्	३६८
ध्यानयोगः	२१३
नतिः	२७
नरकः	१८६–२
नागः	४८८–२, ५००
नाडीनामानि	४७९
नासीरा	४८७–२
नित्यम्	३३८
निदिध्यासनम्	१९, २०५
निराभासः	७५
निर्मम	२१४, २७८–२
निवृत्तिः	१९
निर्वाणम्	४४
निर्विकल्पः	१६
निःश्रेयसादानम्	१३६
नैष्कर्म्यम्	३९
पञ्चकोशाः	३८५
पञ्चभ्रमनिवृत्तिः	२९
पञ्चमभ्रमः	२९
पञ्चमी भूमिका	८–३
पञ्चविंशतिः	२३६
पञ्चात्मकम्	१६८
पञ्चावस्थाः	२०१
पण्डितलक्षणम्	३२२
पत्नीसंयाजाः	२२४
पदार्थभावना	२६६, २९५
परमपदम्	१८९–२
परमात्मा	३५,७८,९०,९१, १८४–२, २७५, ४५१
परानन्दा	३६
परा प्रज्ञा	३६
परिसरः	१३४
पशुः	२२४
पातकानि	२१५
पारमार्थिकसमाधिः	३३९
पुण्डरीकम्	४९३
पुरीतत्म्	१६४
पुरुषः	३३८
पुर्यष्टकम्	३१५
पूरकः	७३
पूर्णबोधः	४४०
पूर्णबोधकारणम्	४४१
पूर्णमद इति शान्तिः	३५३
पृथिवीगुणाः	४२५
पृथिव्यंशाः	१९८, ४२४
पौण्डरीकम्	४६९
प्रकृतिः	१८३–२, ३१५, ३३८, ४२७
प्रजातिः	१३८–२
प्रजापतिः	३९६
प्रजापतिलोकः	११५, ४९१

पदम्	पुटसंख्या
प्रज्ञा	२१
प्रज्ञानम्	४३७
प्रज्ञामात्राः	१९२–३, १९३
प्रतिप्रस्थाता	२२३
प्रतिरूपा चाक्षुषी	११९
प्रत्यगात्मा	४३७, ४९०
प्रत्ययः	२४१
प्रत्याहतम्	११३–२
प्रथमाभूमिका	४, ७, ८२
प्रथमाहङ्कृतिः	३०८
प्रधानपुरुषः	१९५
प्रभञ्जनः	४८६–२
प्रभामनोबुद्धिशून्यम्	२११
प्रमादः	१६–२
प्रयाजाः	२२४
प्रस्तोता	२२३
प्राज्ञः	१०
प्राज्ञत्वम्	२००
प्राज्ञनाम	२००
प्राणः ७३–२, ७४–३, २२९, ३९७–२	
प्राणपरिस्पन्दः ६१, ६८, ३६३, ३६८	
प्राणमयकोशः	१९९, ४४६
प्राणरोधनम्	६१–२, ७८
प्राणवृत्तयः	१९८
प्राणस्पन्दनवासने	३६४
प्राणायामः	७३
प्रातर्दनाग्निहोत्रम्	१२८
प्राथमिकक्रमः	२८
प्रारब्धम्	२२, २३–४
प्रियामानसी	११९
बन्धः ४२, ४३, ४४, १८७–१२, २०३, २४८, २७३, ३४१, ४४४	
बलाऽतिबलाऽन्तौ	४९८
बह्वृचाः	२२८
बिन्दुनादकलाश्रया	२७
बीजजाग्रत्	२९२–२
बीजाङ्कुरक्रमः	३६३
बृहत्साम	२२८
बृहद्रथन्तरम्	१२०
बृहन्पाण्डरवासाधिष्ठाः	१९६
बोधः	२६९
ब्रह्म १०, १९, २४, ४१, ९०, ६९, ७६, ७८, ८०, ८१, १८२–२, १८४, १९३, २०४, ३३८, ३८९, ४९०, ४९१	
ब्रह्मपुरम	९९

पदम्	पुटसंख्या
ब्रह्मलोकः	११९, ४९१
ब्रह्मा	११९
ब्राह्मणः	४२०
ब्राह्मणाच्छंसी	२२३
भगवान्	२२९
भद्रंकर्णेभिः इति शान्तिः	३९४
भद्रयज्ञायज्ञीये	१२१
भवः	२२९
भवान्तः	२७७
भार्गवाः	२२८
भावना	३८
भास्वती	४८८–२
भुवर्लोकाः	४९१
भूतमात्रा	१४८, १४९–९, १९२–३
भूतात्मा	४०३, ४०५–३, ४०६, ४०८
भूतानि	४६४
भूमिकावान्	४
भूर्लोकाः	४९१
भेददृष्टिः	३१२
भोक्ता	२१०
भ्रमरकीटवत्	३४८
मध्यमा	४८६–२
मनः	२७४
मननम्	१९, ४४, २०५
मनुः	५०६
मनोगतिः	३६
मनोनाशः	६७–२
मनोमयकोशः	१९९, ४४६
मन्त्रसाराः	२७
मन्युः	२२९
मम	२१४, २७८–२
मरणावस्था	२०२
मलं	३१५
मलिनवासना	३७१–३
महती	५००
महर्त्विजः	२२३
महर्लोकाः	४९१
महाजाग्रत्	२९२–२
महापुरुषः	३८२
महावाक्यषडङ्गानि	४३६
महावाक्यानि	४३४
महासत्ता	७८
माण्डूक्यम्	३४९
माया	३१५, ३३८, ४५२
मायाविद्ये	१९
मुक्तः	४१, २१५, ३२७
मुक्तिः	४२, ३४१
मुख्यम्	४८६–२
मुहूर्तान्विष्टिहा	११८
मूर्च्छा	२०२

पदम्	पुटसंख्या
मूढः	१८८–२
मूलप्रकृतिः	१९३
मूलशृङ्गाटमध्यस्था	२७
मृतः	६९
मैत्रावरुणः	२२३
मोक्षः ४३–४, ४४, ६३, १८७–२, २०३, २४७, २४८, २८४, २८६, ३१०, ४४४	
मोक्षप्रकारः	३८२
मोक्षेच्छा	२०२
मोघा	४८६–२
यजमानः	२२३
यजूंषि तिरश्चीनानि	१२१
यज्ञपात्राणि	१७८, २२४
यज्ञस्तोमम्	२३९
यज्ञोपवीतम्	१३१
युक्तयः	३६७
यूपः	२२४
योगः	२२९
योगयोगिनः	७८
योगस्थः	३
योगिनीगणसेविता	२७
रथः	२२३, २२४
रथन्तरम्	२२८
रमा	४९३
रशना	२२४
रसातललोकाः	४९१
राजसः	४२६
राजसगुणाः	४२९
राजानः	३९०
रुद्रः	२२९
लिङ्गम्	४२७
लिङ्गशरीरम्	१९९
लोकायतादिसांख्यान्ताः	२७९
वरुणलोकः	११९
वाङ्मे मनसि इति शान्तिः	३९३
वायुगुणः	४२९
वायुलोकः	११९
वाय्वंशाः	१९८, ४२९
वासना ६२–२, ६७, ६८, ६९–२, ७१–२, ३६२, ३६४, ३७०	
वासनाक्षयः १५, ६७–३, ३३४	
वासनाक्षयविज्ञानमनोनाशाः	३६०
वासनात्यागः	३३३
वासनाव्यूहः	३९८
वासनासरित्	३९८
विकाराः	४२७
विक्षेपशक्तिः	१९४
विचक्षणसन्ध्यमितौजाः	११९

पदम्	पुटसंख्या
विचक्षणासन्दी	१२०
विचारणा	८३, २६३, २९५–२, ३१३–२
विचारनाम्नी	५
विज्ञानम्	६७, १४५, १४६, ३३८
विज्ञानमयकोशः	१९९, ४४६
विज्ञानी	२८०
विदेहमुक्तः	५६, २५१
विदेहमुक्तता	९
विदेहमुक्तिः	३५४, ३५५, ३५६
विद्या	४४५
विद्वान्	१८८–२
विभुप्रमितम्	११५, १२०
विमुक्तः	४६
विरजानदी	११५, ११८
विरागः	३२२
विराजा	४८४, ४८५
विराट्	१९६
विराट्चैतन्यम्	१९५
विराड्हिरण्यगर्भेश्वराः	२०७
विलायिनी	८३
विश्वः	१०, २०१
विश्वतैजसप्राज्ञाः	२०७
विश्वत्वम्	१९९
विश्वम्भरकुलायः	१६५

पदम्	पुटसंख्या
विश्वनाम	२००
विषयाः	१९८–३, ४२४–३
वृत्तयः	१९, १९८–३, २०६
वेदिः	२२३
वैरम्भः	४७०, ४८६–२
वैश्वानरः	३९८
व्यानः	३९७–२
व्योमांशाः	१९८
शमः	२६३
शरावान्	२२९
शान्तः	२७०–२
शान्तता	३३
शान्तिः	१८
शारीरयज्ञम्	२१७
शारीराग्निः	२२१
शास्त्रितम्	३५८–२
शिशुः	४८७–२
शिष्यः	१८८–२
शीर्षकपालम्	४९३–२
शुद्धमनः	४११–२
शुद्धतृष्णाः	३३८
शुद्धसंविन्मया	८३
शुद्धधर्मः	२०
शुद्धा वासना	३७१–२
शुभेच्छा	२९५–२

पदम्	पुटसंख्या
शुष्कभृङ्गारम्	१२९
शून्यम्	३३८
शौचम्	३७१
शंयोर्वाकः	२२४
श्येनः	४८७–२, ५००
श्रवणम्	१९, २०५
श्रीः	१२०
श्रेष्ठः	६
श्रेष्ठासङ्गः	७
श्वेतम्	४८७–२, ५००
षट्कोशाः	३८५
षडङ्गम्	५०२
षडाश्रयम्	१७०
षड्मयः	३८५
षड्भावाः	३८५
षड्भ्रमाः	३८५
षड्विंशकः	२३०
षोडशविकाराः	१७३
सङ्कल्पाः	३९, ३६६
सङ्गः	३८–२, ६९
सञ्चितम्	२२
सत्	५०
सत्तासामान्यता	३१–२
सत्त्वस्थाः	२२६
सत्त्वापत्तिः	२९५–२
सत्यलोकाः	४९२
सदस्याः	२२४
सन्तुष्टः	२७१–२
सन्तोषः	२६३
सन्धाः	१४०
सन्न्यासी	१९०
सप्तविंशः	२३०
सप्तविंशतिवर्णात्मा	२७
सप्तवैघ्रः	२२८
सप्तावस्थाः	२९३
समता	२६५, ३२६–३
समाधानम्	२६४
समाधिः	१९,२०,३३,८१, २०५,२७६
समानः	३९७–२
समाहितः	३३
सम्प्रज्ञातसमाधिः	३६९
सम्प्रदानम्	१३८
सम्यज्ज्ञानम्	७५
सरूपः	३६५
सर्वज्ञेशः	१९६
सहजावस्था	२८०–२
सह नाववतु इति शान्तिः	३५३
साक्षिचैतन्यम्	१९३
साक्षी	४४९

पदम्	पुटसंख्या
साङ्ख्ययोगौ	२७५
साङ्ख्ययोगिनः	७७
सात्विकः	४२६
सात्विकगुणाः	४२५
साधुरः	२२९
साधुसङ्गमः	२६३
सामान्यः	६
सामान्यासङ्गः	६
सामान्यासङ्गमः	७
सायुज्यमुक्तिः	३४८
सालज्जं संस्थानम्	११५, १२०
सालोक्यसारूप्यमुक्तिः	३४८
सालोक्यसारूप्यसामीप्यमुक्तिः	३४८
सुखम्	१८६–२
सुखदुःखहेतवः	४४७
सुखबुद्धिः	४४७
सुदर्शना	४८५–२
सुप्तः	१६५
सुवर्लोकाः	४९१
सुषुप्तम्	४४६
सुषुप्तता	४०
सुषुप्तपदम्	५०
सुषुप्तिकम्	२९२, ४२६
सुषुप्तिस्थः	४९–२
सुषुप्त्यवस्था	२०२
सूक्तवाकः	२२४
सूक्ष्मतन्मात्राणि	१९५
सूर्या	४८७–२
सूर्याग्निः	२२१
सृष्टियज्ञः	३७९–२, ४८३
सोमांशवः	१२१
सौम्या	८३, ४८५–२
सौषुप्तस्थितिः	४०
सौषुप्ती	४२, २९३
संवित्	६१, ६४
संसारवासना	३६१
स्थानम्	१९८–२
स्थितप्रज्ञः	२१
स्थितिः	३६
स्थूलशक्तिः	१९५
स्थूलशरीरम्	१९८, १९९
स्नातकाध्वर्यवः	२२८
स्रुवः	१२६, २२३
स्वप्नः	८, ८३, २९२, २९३, ४२६, ४४५
स्वप्नजाग्रत्	२९२, २९३
स्वप्नावस्था	२०१
स्वरूपम्	२९१
स्वरूपस्थितिः	२९१

पदम्	पुटसंख्या	पदम्	पुटसंख्या
स्वर्गः . .	१८६–२	हिताः . .	१६४, ४७१
स्वाध्यासापनयः .	. ९, १४	हिरण्यगर्भचैतन्यम् .	. १९४
स्वानन्दः . .	. २०२	हृद्ग्रन्थिः . .	. ४४८
स्वाराज्यम् .	. १६६–२	होता . .	. २२३
हवींषि . .	. २२४	हंसः . .	. २२९

Printed by J. R. Aria at the Vasanta Press, Adyar, Madras.

Upanisads
Philosophy - Upanisads

D.G.A. 80.
CENTRAL ARCHAEOLOGICAL LIBRARY
NEW DELHI
Issue record.

Call No.— Sa2Vu/Mah-7941

Author— Mahādeva Śāstrī, A. Ed.

Title— Sāmānya Vedānta Upanishads

Borrower's Name	Date of Issue	Date of Return

P.T.O.

D.G.A. 80.
CENTRAL ARCHAEOLOGICAL LIBRARY
NEW DELHI
Borrowers record.

Call No.— Sa8Vu/Mah-7941

Author— Mahādeva Śāstrī, A. Ed.

Title— Sāmānya Vedānta Upanishads

Borrower's Name	Date of Issue	Date of Return

P.T.O.

THE YOGA UPANISHADS

WITH THE COMMENTARY OF

SRI UPANISHAD-BRAHMA-YOGIN

EDITED BY

PANDIT A. MAHADEVA SASTRI, B.A

DIRECTOR, ADYAR LIBRARY, ADYAR, MADRAS

PUBLISHED FOR THE ADYAR LIBRARY

(THEOSOPHICAL SOCIETY)

1920

अष्टोत्तरशतोपनिषत्सु

योग-उपनिषदः

श्री उपनिषद्ब्रह्मयोगिविरचितव्याख्यायुताः

अडयार्-पुस्तकालयाध्यक्षेण

अ. महादेवशास्त्रिणा

संपादिताः

अडयार्-पुस्तकालयार्थं

प्रकटीकृताश्च

ॐ नमो
ब्रह्मादिभ्यो
ब्रह्मविद्यासंप्रदायकर्तृभ्यो
वंशऋषिभ्यो
नमो गुरुभ्यः

DEDICATED TO
Brahma and the Rishis,
The Great Teachers
Who handed down Brahmavidya
through Generations

PREFACE

It will be remembered that Dr. F. O. Schrader, my predecessor in office, soon after taking charge of the Library in 1905, projected a scheme for the publication of the texts of the Minor Upanishads comprised in the collection of the well known One-Hundred-and-Eight Upanishads and brought out in 1912 the first volume of the Minor Upanishads, containing all those Upanishads which treat of Saṃnyāsa. After another interval of eight years I have the pleasure of issuing the second volume in the series comprising the Upanishads which treat of Yoga. This long interval in the publication of the first and the second volumes is due to several causes, not the least of which is the outbreak of war and the immediate removal of Dr. Schrader to the camp of war-prisoners. The interval though regrettable in many ways has proved beneficial in one respect. Since I took charge of the Library in 1916, I have been able to collect more materials and have also had the fortune of coming by a commentary of a single author on all the 108 Upanishads. This commentary by Sri Upanishad-Brahma-Yogin of a Kanchi Advaita Mutt, which is as clear and full as necessary, given side by side with the

text of the Upanishads will be valued more by the reader than the editor's own notes or those compiled by him from extraneous works, such as were appended at the end of the first volume by Dr. Schrader. The plan of giving the commentary along with the text has rendered it desirable to give in the body of the text that reading which is endorsed by the commentary and to note at foot only those variants which are found in the MSS. of the southern recension, reserving all other critical notes to the volumes of translations which will follow.

The materials available for a critical edition of the 108 Upanishads have been described in full by Dr. Schrader in the first volume, and it only remains for me to say that more MSS. have been since collected under each head. The MSS. on which the edition of the Upanishads contained in the present volume is based are the following:

अ — Adyar Library IX K 7—Devanāgari MS. containing Minor Upanishads with Appayadîkshita's commentary.

अ १. — Adyar Library XXXIV B 2—A Grantha MS. of 108 Upanishads.

क. — A Grantha MS. of 108 Upanishads lent by Mr. V. Kachchapesvara Iyer, B.A., B.L., of Vellore.

उ, उ १.— Adyar Library XXXVI E 1 and XXXIV I 6—Two copies of 108 Upanishads with Śrī Upanishad-Brahmendra-Yogin's

commentary in Devanāgari and Grantha characters respectively.

Except for any unforeseen cause, there will be no occasion for delay in the publication of the succeeding volumes of the text and the commentary according to the present plan. One volume at least of the size of the present one may be issued every year. I can, however, make no promise at present as to when the first volume of the English translation of these Upanishads will appear.

ADYAR .
August, 1920 A. MAHADEVA SASTRI

विषयसूचिका

अद्वयतारकोपनिषत्

तारकयोगाधिकारः . . . १
योगोपायतत्फलम् २
तारकस्वरूपम् २
लक्ष्यत्रयानुसन्धानविधिः . . . ३
अन्तर्लक्ष्यलक्षणम् ३
बहिर्लक्ष्यलक्षणम् ४
मध्यलक्ष्यलक्षणम् ४
द्विविधं तारकम् ५
तारकयोगसिद्धिः ५
मूर्तामूर्तभेदेन द्विविधं अनुसन्धेयम् . . . ६
तारकयोगस्वरूपम् ७
शाम्भवीमुद्रा ७
अन्तर्लक्ष्यविकल्पाः ८
आचार्यलक्षणम् ९
ग्रन्थाभ्यासफलम् ९

अमृतनादोपनिषत्

श्रवणाद्युपायः ११
प्रणवोपासना १२

प्रत्याहारलक्षणम् १४
षडंगयोगः १४
प्राणायामादिफलम् १४
त्रिविधप्राणायामः १५
प्राणायामलक्षणम् १५
रेचकलक्षणम् १६
पूरकलक्षणम् १६
कुम्भकलक्षणम् १६
धारणालक्षणम् १७
तर्कलक्षणम् १७
समाधिलक्षणम् १८
समाधिसिद्ध्युपायः १८
योगस्य नित्यकर्तव्यता २०
स्वप्राप्तिद्वाराणि २०
भयादीनां त्यागः २१
अभ्यासफलम् २२
योगचिन्त्यम् २२
चिन्तनाप्रकारः २३
श्वासप्रमाणम् २३
प्राणादीनां स्थानानि २४
तेषां वर्णभेदाः २४
परमफलम् २४

अमृतबिन्दूपनिषत्

मन एव बन्धमोक्षयोः कारणम् . . . २६
मनोनिरोधो मोक्षोपायः २७

ब्रह्मज्ञानेन ब्रह्मभावप्राप्तिः . . . २८
सविशेषब्रह्मानुसन्धानेन निर्विशेषब्रह्माधिगमः . . २८
आत्मन एकत्वम् ३०
आत्मनो जन्मनाशराहित्यम् . . . ३१
निरुपाधिकात्मदर्शनम् ३१
शब्दब्रह्मध्यानेन परब्रह्माधिगमः . . . ३२
सर्वभूतप्रत्यगात्मन एकत्वम् . . . ३३
तत्साक्षात्कारसाधनं ध्यानम् . . . ३४

क्षुरिकोपनिषत्

योगाधिकारः ३७
आसनप्राणायामौ ३७
प्रत्याहारः ३८
धारणाध्यानसमाधयः ४०
योगसाधनं तदधिकारी च. . . . ४३
सामाधिफलम् ४४

तेजोबिन्दूपनिषत्

प्रथमोऽध्यायः

निर्विशेषतेजोबिन्दुस्वरूपम् . . . ४५
निर्विशेषब्रह्मावगतिसाधनानि . . . ४६
परवस्तुन एव सविशेषत्वादिभावाः . . . ४८
परब्रह्मावगतिसाधनं पञ्चदशाङ्गयोगः . . ५१
पञ्चदशाङ्गानां लक्षणानि . . . ५१
योगाभ्यासेन ब्रह्मभावनम् . . . ५५
समाधिविघ्नशमनम् ५५
समाधिना शुद्धब्रह्मपदप्राप्तिः . . . ५६

द्वितीयोऽध्यायः

सर्वस्य अखण्डैकरसत्वम् . . . ९८
सर्वस्य चिन्मात्रत्वभावना . . . ६०
विद्याफलम् ६३

तृतीयोऽध्यायः

आत्मनः सच्चिदानन्दब्रह्मत्वानुभवः . . . ६४
आत्मनि सर्वप्रविभक्तरूपाभावानुभवः . . ७०
स्वेतरस्य सर्वस्य असत्त्वानुभवः . . . ७१
अहंब्रह्मास्मीत्यात्ममन्त्राभ्यासः . . . ७२

चतुर्थोऽध्यायः

जीवन्मुक्तिः—प्रत्यगभिन्नब्रह्मभावापत्तिः . . ७४
विदेहमुक्तिः—निष्प्रतियोगिकस्वमात्रब्रह्ममात्रावस्थानम् . ७८
स्वात्मनिष्ठाविधिः ८९

पञ्चमोऽध्यायः

स्वात्मयाथात्म्यम् ८६
अनात्मनः सर्वस्य मिथ्यात्वम् . . . ८८
अहंवस्तुनः परमात्मत्वम् . . . ९४
अविद्यातत्कार्यप्रपञ्चस्य निष्प्रतियोगिकाभावरूपत्वम् . ९६
सङ्कल्पादिरूपं मन एव सर्वानर्थहेतुः . . . ९८

षष्ठोऽध्यायः

सर्वस्य सच्चिदानन्दत्वम् १००
सर्वस्य ब्रह्मत्वम् १०१
ब्रह्मणः निष्प्रतियोगिकस्वमात्रत्वम् . . . १०५

स्वातिरिक्तप्रपञ्चस्यासत्त्वम् . . . १०८
अहं ब्रह्मेति भावनाविधिः ११२
शास्त्रसंप्रदायविधिः ११५

त्रिशिखिब्राह्मणोपनिषत्

आत्मब्रह्मविषये प्रश्नाः ११६
सर्वस्य शिवत्वम् ११७
ब्रह्मणः अखिलजगदुत्पत्तिः . . . ११७
एकस्य पिण्डस्य बहुधा विभागः . . . ११८
आकाशादीनामंशभेदाः ११८
तेषां विषयभेदाः ११९
सूक्ष्मभूतमात्राः ११९
आध्यात्मिकादिविभागः ११९
ज्ञातृव्यापाराभिव्यक्तिः १२०
ब्रह्मणः सकाशात् पञ्चीकरणान्ता सृष्टिः . . १२१
चराचरात्मकविश्वसृष्टिः १२२
अवस्थाचतुष्टयम् १२३
दक्षिणोत्तरायणगतिः १२५
सद्योमुक्तिप्रापकं ज्ञानम् १२६
ज्ञानोपायभूतो योगः १२७
कर्मज्ञानयोगौ १२७
निर्विशेषब्रह्मज्ञानोपायः अष्टांगयोगः . . . १२८
दशविधयमनियमाः १२९
हठयोगरीत्या आसनानि १२९
नाडीशुद्धिपूर्वकप्राणायामविधिः . . . १३२

अग्निमण्डलस्वरूपम् १३२
नाभिस्थानम १३३
नाडीचक्रे जीवभ्रमणम् १३३
कुण्डलिनीस्थानं तद्व्यापारश्च . . . १३४
देहमध्यस्थनाडीकन्दस्वरूपम् . . . १३४
नाडीचरा वायवः १३६
नाडीज्ञानपुरस्सरा नाडीशुद्धिः . . . १३८
योगाभ्यासस्थलं तद्विधिश्च . . . १३८
चिन्मुद्रासहितकेवलकुंभकम् . . . १३८
सहितप्राणायामः १३९
नाडीशोधकप्राणायामः १३९
प्राणायामफलम् १४०
प्राणधारणात् रोगनाशः १४१
षण्मुखीमुद्रया मनोजयः १४२
प्राणगतिः १४२
प्राणगतिज्ञानेन योगावाप्तिः . . . १४३
मर्मस्थानेषु प्राणस्य प्रत्याहारः . . . १४४
धारणाप्रकारः १४५
देहावयवेषु पञ्चभूतधारणम् . . . १४५
पृथिव्यादिषु अनिरुद्धादिध्यानं तत्फलं च . . १४६
परमात्मध्यानं तत्फलं च १४७
तुरीयातीतं वासुदेवचैतन्यम् . . . १४७
सगुणध्यानम् १४८
निर्गुणध्यानम् १४९
सविशेषज्ञानस्यापि मुक्तिहेतुत्वम् . . . १४९

दर्शनोपनिषत्

प्रथमखण्डः

जीवन्मुक्तिसाधनं अष्टांगयोगः . . . १९२
अष्टांगोद्देशः १९३
दशविधयमः १९३
अहिंसा १९३
सत्यम् १९३
अस्तेयम् १९४
ब्रह्मचर्यम् १९४
दया १९४
आर्जवम् १९४
क्षमा १९५
धृतिः १९५
मिताहारः १९५
शौचम् १९५
ब्रह्मात्मवेदनविधिः १९६

द्वितीयखण्डः

दशविधनियमः १९६
तपः १९६
सन्तोषः १९७
आस्तिक्यम् १९७
दानम् १९७
ईश्वरपूजनम् १९७
सिद्धान्तश्रवणम् १९७
ह्रीः १९८

मतिः १९८
जपः १९८

तृतीयखण्डः

आसनानि नव १९९
स्वस्तिकम् १९९
गोमुखम् १९९
पद्मम् १९९
वीरासनम् १६०
सिंहासनम् १६०
भद्रासनम् १६०
मुक्तासनम् १६०
मयूरासनम् १६१
सुखासनम् १६१
आसनजयफलम् १६१

चतुर्थखण्डः

देहप्रमाणम् १६१
नाडीपरिगणनम् १६२
कुण्डल्याः स्थानं स्वरूपं च . . . १६३
नाडीस्थानानि १६३
नाडीषु वायुसञ्चारः १६४
वायुव्यापाराः १६५
नाडीदेवताः १६६
नाडीषु चन्द्रसूर्यसंचारः १६६
नाडीषु संवत्सरात्मकप्राणसूर्यसंचारः . . . १६६
अन्तस्तीर्थप्राशस्त्यम् १६७

आत्मनि शिवदृष्टिः १६९
ब्रह्मदर्शनेन ब्रह्मभावः १६९

पञ्चमखण्डः

नाडीशोधनम् १७०
नाडीशुद्धिचिह्नानि १७२
स्वात्मशुद्धिः १७२

षष्ठखण्डः

प्राणायामलक्षणम् १७२
पूरकादिलक्षणम् १७४
प्राणायामसिद्धयः १७४
रोगनिवर्तकप्राणायामभेदाः . . . १७५
षण्मुखीमुद्राऽभ्यासेन वायुजयः . . . १७६
वायुजयचिह्नानि १७८
वायुजयेन रोगपापविनाशवैराग्यपूर्विका ज्ञानोत्पत्तिः . १७८

सप्तमखण्डः

प्रत्याहारलक्षणं तद्भेदाश्च १७९
प्रत्याहारफलम् १८०
वायुधारणात्मकप्रत्याहारः . . . १८०
वेदान्तसंमतप्रत्याहारः १८०

अष्टमखण्डः

पञ्चभूतेषु धारणा १८१
आत्मनि धारणा १८२

नवमखण्डः

सविशेषब्रह्मध्यानम् १८२
निर्विशेषब्रह्मध्यानम् १८३
ध्यानफलम् १८३

दशमखण्डः

समाधिस्वरूपम् १८३
ब्रह्ममात्रावशेषः १८४
उपसंहारः १८५

ध्यानबिन्दूपनिषत्

ब्रह्मध्यानयोगमहिमा १८६
ब्रह्मणः सूक्ष्मत्वं सर्वव्यापकत्वं च . . . १८७
प्रणवस्वरूपम १८९
प्रणवध्यानविधिः १९०
प्राणायामपूर्वकं प्रणवध्यानम् . . . १९१
प्रकारान्तरेण प्रणवध्यानम् . . . १९२
सविशेषब्रह्मध्यानम् १९२
त्रिमूर्तिध्यानम् १९३
हृदये ध्यानं तत्फलं च १९४
ब्रह्मायतने प्राणविलापनम . . . १९५
षडंगयोगः १९६
आसनचतुष्टयम् १९६
योनिस्थानम् १९७
मूलाधारादिचतुश्चक्रस्वरूपम् . . . १९८
नाडीचक्रम १९८

प्राणादिदशवायवः १९९
जीवस्य प्राणापानवशत्वम् . . . २००
योगकाले प्राणापानैक्यम् . . . २००
अजपाहंसविद्या २००
कुण्डलिनीबोधनेन मोक्षद्वारविभेदनम् . . . २०१
ब्रह्मचर्यादिना कुण्डलिनीबोधः . . . २०२
बन्धत्रयम् २०३
खेचरीमुद्राऽभ्यासः २०४
खेचर्यभ्यासेन वज्रोळिसिद्धिः . . . २०४
द्विविधबिन्दैक्यबोधतो जीवन्मुक्तत्वम् . . . २०५
महामुद्राऽभ्यासः २०६
हृदये आत्मसाक्षात्कारः २०७
नादानुसन्धानतः आत्मदर्शनम् . . . २१०

नादबिन्दूपनिषत्

वैराजप्रणवस्वरूपम् २१४
वैराजविद्याफलम् २१५
प्रणवस्य प्रधानमात्राचतुष्टयस्वरूपम् . . . २१६
प्रणवस्य व्यष्टिसमष्ट्यात्मकद्वादशमात्राभेदविवरणम् . २१७
उपासकानां तत्तन्मात्राकालोत्क्रमणफलम् . . २१७
निर्विशेषब्रह्मस्वरूपं, तज्ज्ञानफलं च . . . २१८
ज्ञानिनः प्रारब्धकर्मभावाभावविचारः . . . २१९
तुरीयतुरीयाधिगमोपायभूतं नादानुसन्धानम् . . २२१
नादस्य मनोनियमनसामर्थ्यम् . . . २२३
उपेयनादस्वरूपम् २२४
नादारूढयोगिनां विदेहमुक्तिलाभः . . . २२५

पाशुपतब्रह्मोपनिषत्

पूर्वकाण्डः

जगन्नियन्तृविषयाः सप्तप्रश्नाः . . . २२७
सप्तप्रश्नानामुत्तराणि २२८
सृष्टियज्ञे कर्त्रादिनिरूपणम् . . . २३
नादानुसन्धानयज्ञः २३
परमात्मनो हंसत्वनिरूपणम् . . . २३
यज्ञसूत्रब्रह्मसूत्रयोः साम्यम् . . . २३१
ब्रह्मयज्ञो ब्राह्मणाधिकारिकः . . . २३२
प्रणवहंसस्य ब्रह्मयज्ञत्वम् २३२
ब्रह्मसन्ध्याक्रियारूपो मनोयागः . . . २३३
हंसप्रणवाभेदानुसन्धानं अन्तर्यागः . . . २३३
षण्णवतिहंससूत्राणि २३५
हंसात्मविद्यैव मुक्तिः २३६
बाह्यापेक्षया आन्तरयागस्य श्रेष्ठत्वम् . . . २३७
ज्ञानयज्ञरूपोऽश्वमेधः २३८
तारकहंसज्योतिः २३८

उत्तरकाण्डः

अखण्डवृत्त्या ब्रह्मसम्पत्तिः . . . २३९
परमात्मनि जगदाविर्भावो मायिकः . . . २४०
हंसार्कप्रणवध्यानविधिः २४१
परचित एव करणप्रेरकत्वम् . . . २४२
आत्मान्यस्य मायाकल्पितत्वम् . . . २४३
वस्तुतः स्वात्मनि मायाऽसम्भवः . . . २४३
आत्मज्ञानिनः ब्रह्मात्मत्वम् . . . २४४

सत्यादिपरविद्यासाधनम् २४५
स्वज्ञस्य क्वचिद्गमनाभावः २४६
ब्रह्मज्ञानिनः अभक्ष्याभावः . . . २४६
ज्ञानिनः स्वसर्वात्मत्वदर्शनम् . . . २४७

ब्रह्मविद्योपनिषत्

ब्रह्मविद्यारहस्यार्थप्रणवब्रह्मसूचनम् . . . २४९
प्रणवमात्राचतुष्टयप्रपञ्चनम् . . . २५०
सुषुम्नायोगेन नाडीसूर्ययोः भेदनम् . . . २५१
प्रणवनादलयेन मोक्षप्राप्तिः . . . २५१
जीवस्वरूपनिरूपणम् २५२
बन्धमोक्षकारणनिरूपणम् . . . २५२
हंसविद्ययैव परमेश्वरप्राप्तिः . . . २५४
हंसविद्यागुरुभक्तिविधिः २५५
आत्मनःश्रुत्याचार्यैकगम्यत्वम् . . . २५५
सकलनिष्कलदेवताविवेकः . . . २५६
योगस्य परमगोप्यत्वं उत्तमाधिकारिण एव दातव्यत्वं च . २५८
केवलशास्त्रज्ञानवतोऽपि पापपुण्यलेपाभावः . . २५९
त्रिविधा आचार्याः २५९
प्रणवहंसानुसन्धानात्मकं प्रत्यक्षयजनम् . . २६०
हंसयोगलब्धज्ञानात् सायुज्यप्राप्तिः . . . २६१
हंसोपलब्धिस्थानम् २६२
हंसमन्त्रानुस्मरणपूर्वकसमाध्यभ्यासः . . . २६२
हंसस्यासननिरूपणम् २६३
हंसयोगाभ्यासक्रमः २६३
हंसयोगिनाऽनुसन्धेयं आत्मस्वरूपम् . . . २६७

मण्डलब्राह्मणोपनिषत्

प्रथमे ब्राह्मणे प्रथमः खण्डः

आत्मतत्त्वजिज्ञासा २७३
सूक्ष्माष्टांगयोगप्रतिज्ञा २७३
चतुर्विधयमः २७४
नवविधयमनियमः २७४
आसनादिषडंगविवरणम् २७५
सूक्ष्मयोगाष्टांगज्ञानफलम् २७५

प्रथमे ब्राह्मणे द्वितीयः खण्डः

देहपञ्चदोषनिरसनम् २७६
तारकावलोकनं तत्फलं च . . . २७६
लक्ष्यत्रयावलोकनेन तारकप्राप्तिः . . . २७७
अन्तर्लक्ष्यदर्शनम् २७७
बहिर्लक्ष्यदर्शनम् २७८
मध्यलक्ष्यदर्शनम् २७८

प्रथमे ब्राह्मणे तृतीयः खण्डः

तारकामनस्कभेदेन द्विविधो योगः . . . २७९
मनोयोगविधिः २८०
पूर्वतारकम् २८०
उत्तरतारकम् २८०
उत्तरतारकस्य शाम्भवीपर्यवसानम् . . . २८०
अन्तर्लक्ष्यलक्षणम् २८१

प्रथमे ब्राह्मणे चतुर्थः खण्डः

अन्तर्लक्ष्ये वादिविप्रतिपत्तिः . . . २८१

सर्वलक्ष्यानुस्यूतात्मदर्शनविधिः . . . २८२
आत्मनिष्ठस्य ब्रह्मभावप्राप्तिः . . . २८२

द्वितीये ब्राह्मणे प्रथमः खण्डः

सर्वाधारज्योतिरात्मनः अन्तर्लक्ष्यत्वम् . . २८३
ज्योतिरात्मज्ञानफलम् २८३
शाम्भव्या तदधिगमः २८४
पूर्णिमादृष्टिविधिः २८४
पूर्णिमादृष्टेः शाम्भवीपर्यवसानम् . . . २८५
मुद्रासिद्धिः तच्चिह्नानि च २८५

द्वितीये ब्राह्मणे द्वितीयः खण्डः

प्रणवस्वरूपप्रत्यक्प्रकाशानुभवः, तच्चिह्नानि च . . २८६
षण्मुख्या प्रणवाधिगमः २८६
प्रणवविदः कर्मलेपाभावः . . . २८६
उन्मन्यवस्थाद्वारा अमनस्कसिद्धिः . . . २८७
अमनस्कपूजाप्रकारः २८७

द्वितीये ब्राह्मणे तृतीयः खण्डः

ब्रह्मानुसन्धानेन कैवल्यप्राप्तिः . . . २८८
ब्रह्मवित्स्वरूपम् २८९
सुषुप्तिसमाध्योः भेदः २८९
ब्रह्मविदो ब्रह्मभावः २८९
सङ्कल्पत्यागपूर्वकपरमात्मध्यानेन मुक्तिसिद्धिः . . २९०

द्वितीये ब्राह्मणे चतुर्थः खण्डः

जाग्रदादिपञ्चावस्थाः २९०
प्रवृत्तिसङ्कल्पः २९०

निवृत्तिसङ्कल्पः २९१
संसारतरणमार्गः २९१
मनसो बन्धमोक्षहेतुत्वनिरूपणम् . . . २९२

द्वितीये ब्राह्मणे पञ्चमः खण्डः

निर्विकल्पकसमाध्यभ्यासेन ब्रह्मविद्वरत्वप्राप्तिः . . २९३
अपरिच्छिन्नानन्दरूपब्रह्मावाप्तिः . . . २९३

तृतीये ब्राह्मणे प्रथमः खण्डः

शाम्भवीमुद्राऽन्वितं अमनस्कम . . . २९४
परमात्मप्रत्ययलक्ष्यदर्शनेन अमनस्कप्राप्तिः . . २९४
ततः संसारनिवृत्तिः २९५
तारकमार्गेण करणविलयद्वारा मनोनाशः . . २९५

तृतीये ब्राह्मणे द्वितीयः खण्डः

उन्मनीप्राप्त्या योगिनो ब्रह्मात्मभवनम . . २९६

चतुर्थं ब्राह्मणम्

व्योमपञ्चकज्ञानं तत्फलं च . . . २९७
राजयोगमर्वस्वक्रोडीकरणम . . . २९८

पञ्चमं ब्राह्मणम्

परमात्मनि मनोलयाभ्यासविधिः . . . २९८
अमनस्काभ्यासेन ब्रह्मावस्थानसिद्धिः . . . २९९
अमनस्कसिद्धस्य महिमा ३००

महावाक्योपनिषत्

अपरोक्षानुभवोपदेशाधिकारी . . . ३०१
विद्याऽविद्ययोः स्वरूपं कार्यं च . . . ३०२
हंसविद्याऽभ्यासेन परमात्माविर्भावः . . . ३०३
तत्त्वज्ञानवृत्तिस्वरूपम् ३०४
प्रणवहंसज्योतिर्ध्यानम् ३०५
हंसज्योतिर्विद्याफलम् ३०६

योगकुण्डल्युपनिषत्

थमोऽध्यायः

वायुजयोपायत्रयम् ३०७
मिताहारः ३०८
पद्मवज्रासने ३०८
शक्तिचालनं तत्साधनद्वयं च . . . ३०८
सरस्वतीचालनम् ३०९
प्राणायामभेदाः ३१०
सूर्यकुंभकः ३१०
उज्जायीकुंभकः ३११
शीतलीकुंभकः ३११
भस्त्रकुंभकः ३१२
बन्धत्रयविधिः ३१२
मूलबन्धः ३१३
उड्डियाणबन्धः ३१३
जालन्धरबन्धः ३१४
अभ्यासकुंभकसङ्ख्यानियमः . . . ३१४

योगाभ्यासविघ्नाः तत्त्यागश्च . . . ३१४
योगाभ्यासेन कुण्डलिनीबोधः . . ८. ३१५
ग्रन्थित्रयभेदेन कुण्डलिन्याः सहस्रारगमनम् . . ३१६
प्राणादिविलयः विलीनानां बहिःप्रसरश्च . . ३१७
समाधौ सर्वस्य चिन्मात्रत्वानुभवः . . . ३१८
समाधियोगः ३२०

द्वितीयोऽध्यायः

खेचरीविद्या ३२१
खेचरीमन्त्रराजोद्धारः ३२४
मन्त्रजपात् खेचरीसिद्धिः . . . ३२४
खेचर्यभ्यासक्रमः ३२५

तृतीयोऽध्यायः

मेळनमन्त्रः ३२८
अमावास्याप्रतिपत्पूर्णिमाभेदेन दृष्टिभेदः . . ३२९
पूर्णिमादृष्टिविधिः ३२९
प्राणाभ्यासात् विराड्रूपापत्तिः . . . ३३१
अभ्यासयोगेन विना न स्वात्मप्रकाशः . . ३३२
गुरूपदेशात् ब्रह्मज्ञानम् ३३२
वाग्वृत्त्यधिष्ठानं ब्रह्म ३३३
विश्वादिप्रपञ्चाधिष्ठानं ब्रह्म . . . ३३३
निष्प्रतियोगिकं ब्रह्म ३३४
ब्रह्मसिद्ध्युपायभूतं ध्यानम् . . . ३३४
जीवन्मुक्तिविदेहमुक्ती ३३५

योगचूडामण्युपनिषत्

योगाङ्गपटूकम् . . . ३३७
योगसिद्धये आवश्यकं देहतत्त्वज्ञानम् . . . ३३८
मूलाधारादिचक्राणि ३३८
योनिस्थाने परमज्योतिर्दर्शनम . . . ३३८
स्वाधिष्ठानादिचक्रलक्षणम् . . . ३३९
नाडीमहाचक्रम् ३४०
नाडीस्थानानि ३४१
नाडीसञ्चारिवायवः तद्व्यापाराश्च . . . ३४१
प्राणचलनाचलनाभ्यां जीवचलनाचलने . . ३४२
अजपागायत्र्या अनुसन्धानम् . . . ३४३
कुण्डलिन्या मोक्षद्वारभेदनम् . . . ३४३
बन्धत्रयम् ३४५
खेचरीमुद्रा ३४६
वज्रोळ्यादियोगिलक्षणम् ३४७
महामुद्रा ३४९
प्रणवजपः ३५०
प्रणवार्थरूपं ब्रह्म ३५०
प्रणवावयवानां प्रत्येकमर्थः . . . ३५२
तुरीयोङ्काराग्रविद्योतब्रह्म . . . ३५३
प्रणवार्थतुरीयहंसः ३५४
केवलात्मप्रकाशकप्रणवजपः . . . ३५५
प्रणवानुष्ठायिनोऽपि प्राणजय आवश्यकः . . ३५५
नाडीशुद्धितः प्राणायामसिद्धिः . . . ३५६
प्राणायामलक्षणम् ३५७
नाडीशोधनम् ३५७

मात्रानियमपूर्वकः प्राणायामः . . . ३५७
योगांगानां प्रत्येकं फलं तत्तारतम्यं च . . ३५९
षण्मुखीमुद्राऽभ्यासेन नादाभिव्यक्तिः . . . ३६०
प्राणाभ्यासः सर्वरोगनिरासकः . . . ३६१
प्राणाभ्यासे इन्द्रियप्रत्याहार आवश्यकः . . ३६१

योगतत्त्वोपनिषत्

अष्टांगयोगजिज्ञासा ३६३
योगतत्त्वस्य दुर्लभत्वम् ३६४
परस्यैव जीवत्वम ३६५
प्राकृतगुणवियुक्तस्य जीवस्य परमात्मत्वम् . . ३६६
ज्ञानयोगयोः युगपदभ्यासः . . . ३६६
ज्ञानस्वरूपम् ३६६
मन्त्रयोगादिः चतुर्विधो योगः . . . ३६७
आरम्भादयो योगावस्थाः . . . ३६७
मन्त्रयोगलक्षणम् ३६८
लययोगलक्षणम ३६८
हठयोगांगानि ३६८
यमनियमासनेषु प्रधानांगानि . . . ३६९
योगाभ्यासविघ्नत्यागः ३६९
प्राणायामोचितमठासनयोः स्वरूपम् . . . ३७०
प्राणायामारम्भप्रकारः ३७०
मात्रानियमपूर्वकः प्राणायामः . . . ३७१
आन्तराळिकफलं नाडीशुद्धिः तच्चिह्नानि च . . ३७१
योगाभ्यासकाले आहारादिनियमः . . . ३७२
केवलकुम्भकसिद्धिः ३७२
प्रस्वेदादिसिद्धयः ३७३

योगप्रतिबन्धनाशाय प्रणवजपः—आत्मावस्था . . ३७४
घटावस्था ३७५
प्रत्याहारलक्षणम् ३७५
धारणास्वरूपम् ३७५
धारणासिद्धयः तद्गोपनविधिश्च . . . ३७६
परिचयावस्था ३७७
पञ्चभूतमण्डलेषु पञ्चब्रह्मधारणानि . . . ३७८
सगुणध्यानम् ३८०
निर्गुणध्यानतः समाधिसिद्धिः . . . ३८०
सिद्धयोगस्य स्वेच्छया देहत्यागात्यागौ . . ३८१
महाबन्धलक्षणम् ३८२
महावेधलक्षणम् ३८२
खेचरीस्वरूपम् ३८३
बन्धत्रयस्वरूपं तत्फलं च . . . ३८३
विपरीतकरणीलक्षणं तत्फलं च . . . ३८४
वज्रोळीस्वरूपम् ३८४
अमरोळीस्वरूपम् ३८५
राजयोगनिष्पत्तिः ३८५
वैराग्यहेतुनिरूपणम् ३८६
हृत्पद्मे प्रणवोपासनम् ३८७
सर्वकरणव्यापारोपरतिः आत्मावगत्युपायः . . ३८८

योगशिखोपनिषत्

प्रथमोऽध्यायः

मुक्तिमार्गजिज्ञासा ३९०
मुक्तिमार्गस्य दुर्लभत्वम् ३९१

ब्रह्म केवलशास्त्रागम्यम् ३९१
ब्रह्मणो जीवभावः ३९२
कामादिदोषविमुक्तजीवस्य शिवत्वम् . . . ३९२
ज्ञानयोगाभ्यां दोषविनाशः . . . ३९३
ज्ञानस्वरूपं तत्फलं च ३९४
आभासज्ञान्यज्ञानिनोरविशेषः . . . ३९५
आभासज्ञानिनो योगेन विना न मोक्षसिद्धिः . . ३९६
आभासज्ञानिनां दुःखानिवृत्तिः . . . ३९७
अहम्भाव एव सर्वानर्थमूलम् . . . ३९८
योगसिद्धस्य ईश्वरत्वं जीवन्मुक्तत्वं च . . ३९९
आभासज्ञानिनां विडम्बनम् . . . ४००
तेषा सिद्धसंगत्या कृतकृत्यत्वम् . . . ४०१
ज्ञानयोगयोः मिथः कार्यकारणत्वम् . . . ४०१
योग एव परमो मोक्षमार्गः . . . ४०१
योगसंस्कृतमनस्येव आत्मज्ञानोत्पत्तिः . . ४०२
योगाभ्यास एव प्रथमकृत्यम . . . ४०३
योगशिक्षोपदेशः ४०४
योगाभ्यासात् परमपदसाक्षात्कारः . . . ४०५
ध्यानाशक्तस्य पुण्यलोकप्राप्तिः . . . ४०६
लब्धयोगस्य स्वात्मबोधः ४०६
योगाभ्यासार्थं जितप्राणगुरूपसदनम् . . . ४०७
सरस्वतीचालनम् ४०७
कुण्डलीचालनेन ग्रन्थित्रयभेदः . . . ४०७
कुम्भकचतुष्टयाभ्यासविधिः . . . ४०८
सूर्यकुम्भकलक्षणम् ४०९

उज्जायीकुम्भकलक्षणम् ४०९
शीतलीकुम्भकलक्षणम् ४१०
भस्त्रिकाकुम्भकलक्षणम् ४१०
बन्धत्रयविधिः ४१०
मूलबन्धः ४११
उड्डियाणबन्धः ४११
जालन्धरबन्धः ४१२
कुण्डल्या ग्रन्थित्रयविभेदनेन निर्विकल्पकप्राप्तिः . . ४१२
सुषुम्नायाः मोक्षमार्गत्वं कालभोक्तृत्वं च . . ४१३
सुषुम्नायोगेन ब्रह्मज्ञानसिद्धिः . . . ४१४
योगाभ्यासेन स्वरूपावस्थितिसिद्धिक्रमः . . ४१५
मन्त्रादियोगचतुष्टयात्मको महायोगः . . . ४१६
मन्त्रयोगः ४१६
हठयोगः ४१६
लययोगः ४१७
राजयोगः ४१७
योगसामान्यस्वरूपं योगेन मुक्तिप्राप्तिश्च . . ४१७
असिद्धयोगस्य मृतस्य उत्तरजन्मनि सिद्धिप्रकारः . . ४१८
अभ्यासयोगादेव मुक्तिः ४१८
योगिनः सर्वैश्वर्यजीवन्मुक्त्यादिसिद्धिलाभः . . ४१९
कृत्रिमाकृत्रिमसिद्धीनां गोपनविधिः . . . ४२०
योगसिद्धजीवन्मुक्तयोः सूचकम् . . . ४२१
देहे सत्यपि ज्ञानिनो विदेहमुक्तिलाभः. . . ४२२
पिण्डाण्डस्य शिवालयत्ववर्णनम् . . . ४२४
आधारषट्कपीठचतुष्टययोः विवरणम् . . . ४२५

द्वितीयोऽध्यायः

योगज्ञानाधिकारी ४२६
प्रणवाख्यमूलमन्त्रमहिमा ४२७
मूलमन्त्रत्वनिर्वचनम् ४२८
नादलिंगत्वनिर्वचनम् ४२८
सूत्रत्वनिर्वचनम् ४२८
प्रणवस्य बिन्दुपीठत्वम् ४२९
निर्विशेषप्रणवब्रह्मावगत्युपायः . . . ४२९
स्थूलसूक्ष्मबीजरूपैः त्रिविधं ब्रह्म . . . ४३०
शुद्धतत्त्वस्य आत्ममन्त्राभ्यामैकवेद्यत्वम् . . ४३०
परतत्त्वाभिव्यक्तिचिह्नानि ४३०
नादानुसन्धानमहिमा ४३१
गुरुभगवद्भक्तेरेव परतत्त्वज्ञानसम्भवः . . . ४३१

तृतीयोऽध्यायः

नादब्रह्मणः परापश्यन्त्यादिरूपचतुष्टयम . . ४३२
वैखरीस्वरूपविवरणम् ४३३
वैखरीसाक्षात्कारात् वाक्सिद्धिः . . . ४३४
परमाक्षरस्वरूपम् ४३४
शब्दब्रह्मभक्तिभावनाभ्यां परब्रह्माधिगमः . . ४३६

चतुर्थोऽध्यायः

जीवस्य अमरत्वम् ४३७
सर्वप्रपञ्चस्य ब्रह्मत्वम् ४३७
ब्रह्मातिरिक्तदर्शनात् अनर्थप्राप्तिः . . . ४३८
व्यावहारिकप्रपञ्चस्य मिथ्यात्वम् . . . ४३९

स्वातिरिक्तप्रपञ्चस्य अत्यन्तासम्भवः . . . ४४०
अज्ञानकृतः आत्मनि देहाद्यारोपः . . . ४४०

पञ्चमोऽध्यायः

देहस्य विष्ण्वालयत्वम् ४४१
आधारषट्कपीठचतुष्टययोः विवरणम् . . . ४४२
नाडीचक्रस्वरूपम् ४४३
बिन्दुग्निसोमात्मकं ब्रह्मशरीरत्रयम् . . . ४४४
पञ्चाग्निभावना, तत्फलं च . . . ४४५
कुण्डलिनीप्रबोधनम् ४४६
खेचरीमुद्राऽभ्यासः, तत्फलं च . . . ४४६
सहस्रारे नारायणभावनातः कैवल्यसिद्धिः . . ४४७
यथोक्तभावनायुक्तस्य तत्तत्सिद्ध्युपायाः . . ४४७
गुरुपूजाविधिः ४४८
योगशिखामहिमा ४४९
सिद्धिषु उपेक्षाविधिः ४४९

षष्ठोऽध्यायः

कुण्डलिनीशक्तेः उपासनाविधिः . . . ४५०
सुषुम्नास्वरूपम् ४५०
सुषुम्नायाः सर्वाधारत्वम् ४५१
पराशक्तेः उद्बोधनम् ४५२
परमात्मध्यानम् ४५३
आधारब्रह्मणि प्राणादिविलयान्मुक्तिः . . . ४५३
चक्रेषु ब्रह्मादिमूर्तिध्यानेन ब्रह्मरन्ध्रप्रवेशः . . ४५५
ब्रह्मरन्ध्रविलीनकरणस्य मुक्तिः . . . ४५६
सुषुम्नायोगमहिमा ४५६

चिच्छक्तिर्जीवयोः स्थानविवेकः . . . ४५७
वायुवशस्य जीवस्य हंसमन्त्रजपप्रकारः . . ४५८
कुण्डल्यवस्थाभेदतो बन्धमुक्तिव्यवस्था . . ४५९
प्रणवस्य सर्वाधारत्वम् ४५९
चित्तचलनाचलनाभ्यां बन्धमुक्ती . . . ४५९
चित्तस्य स्वात्मानतिरिक्तत्वानुसन्धानेन ब्रह्मसाक्षात्कारः . ४६०
प्राणचित्तयोरविनाभावः ४६१
नादानुसन्धानं मनोलयहेतुः . . . ४६२
मनोयुक्तप्राणाभ्यासविधिः . . . ४६२
गुरूपदेशपूर्वकं अभ्यासं विना न ज्ञानोदयः . . ४६३

वराहोपनिषत्

प्रथमाध्यायः

तत्त्वसंख्याविकल्पाः ४६४
चतुर्विंशतितत्त्वानि ४६५
षट्त्रिंशत्तत्त्वानि ४६६
षण्णवतितत्त्वानि ४६६
तत्त्वार्नातभगवद्भक्तेरेव मुक्तिः . . . ४६७
तत्त्वज्ञानफलम् ४६७

द्वितीयाध्यायः

साधनचतुष्टयसम्पत्तिः ४६८
ब्रह्मात्मज्ञान्येव कृतकृत्यः ४६९
आत्मनः सुखरूपत्वम् ४६९
आत्मनः स्वयंप्रकाशत्वम् . . . ४७०
आत्मनः मायातत्कार्यविलक्षणत्वम् . . . ४७०

ब्रह्मात्मज्ञानिनः ब्रह्मभावः . . . ४७१
आत्मज्ञानिनः कर्मबन्धाभावः . . . ४७१
अज्ञानिज्ञानिनोः दर्शनस्थितिवैलक्षण्यम् . . ४७२
आत्मनि वस्तुतो बन्धमुक्त्यभावः . . . ४७३
बन्धनिवृत्तये ब्रह्मात्मानुसन्धानम् . . . ४७४
ब्रह्मप्राप्तिसाधनभूतस्योपवासस्य निर्वचनम् . . ४७५
जीवन्मुक्तिसाधनं अपरोक्षज्ञानम् . . . ४७६
बाह्यान्तश्चिन्तात्यागविधिः . . . ४७६
भगवच्चिन्तनमेव सर्वचिन्तात्यागोपायः . . ४७६
सर्वकल्पनातीतं ब्रह्मैव चिन्तनीयम् . . . ४७७
प्रत्यगभिन्नब्रह्म सर्वावस्थाऽतीतम् . . . ४७९
निर्विशेषब्रह्मज्ञानेन ब्रह्मभावः . . . ४७९
जगद्विलापनपुरस्सरं ब्रह्मैकत्वचिन्तनम् . . ४८०
प्रत्यगभिन्नब्रह्मविषयको विद्वदनुभवः . . . ४८०
समाधिसाधनं नादानुसन्धानम् . . . ४८३

तृतीयाध्यायः

अद्वितीयपरमात्मानुभवः ४८९
चिन्मात्रभावापत्तिसाधनमौनविधिः . . . ४८६
भगवतः सच्चिदानन्दत्वम् . . . ४८७
भगवद्भक्तिरेव मोक्षसाधनम् . . . ४८७
ईश्वरस्य सर्वसमत्वम् ४८८
चित्तमेव संसारकारणम् ४८९
अनात्मनि रागाद्यनुभवो विद्वल्लक्षणम् . . . ४९०

चतुर्थाध्यायः—१. ब्राह्मणम्

सप्तभूमिकासु जीवन्मुक्तिभूमिकाचतुष्टयम् . . ४९१
प्रणवविकृत्यकारादेः चातुर्विध्यम् . . . ४९२

अकाग्स्थूलादीनां अध्यक्षा: . . . ४९२
प्रणवावयवश: भूमिकाभेदा: . . ६ ४९३
चतुर्विधा: जीवन्मुक्ता: ४९३

चतुर्थाध्याय:—२. मन्त्र:

सप्तभूमिकानिर्देश: ४९४
सप्तभूमिकाविवरणम् ४९४
सप्तभूमिकासु बुद्ध्यवस्थाभेदनिरूपणम् . . ४९६
केवलब्रह्मात्मभावनाविधि: . . . ४९६
जीवन्मुक्तलक्षणम् ४९६
भूमब्रह्मनिष्ठाविधि: ४९८
विहंगमपिपीलिकामार्गविवेक: . . . ४९८
ब्रह्मविद्दृष्टिप्रसग्म्य पावनत्वम् . . . ५००

पञ्चमाध्याय:

योगेच्छो: देहज्ञानं आवश्यकम् . . . ५०१
श्वाससंख्या ५०२
देहक्षयनिवाग्णाय भूतधाग्णविधि: . . . ५०२
भूतधारणाय उड्याणबन्धाभ्यास: . . . ५०२
लयमन्त्रहठाख्यास्त्रयो योगा: . . . ५०३
योगाष्टांगानि ५०३
यमनियमभेदा: ५०४
एकादशासनानि ५०४
चक्रासनलक्षणम् ५०४
प्राणायाम: ५०५
देहतद्वयवमानानि ५०५

नाडीचक्रम् ९०५
तृतीयदर्शनाभ्यामविधिः ९०६
कालवञ्चनोपायभूतो योगः . . . ९०७
कायदार्ढ्यबलादिसाधनभूताः योगाः . . . ९०७
देहच्छायाज्ञानविधिः ९०८
चतुष्पथबन्धोपायः सम्पुटयोगः . . . ९०९
सम्पुटाभ्यासेन ब्रह्मज्ञानप्राप्तिक्रमः . . . ९१०
शिवशक्तिस्थाननिरूपणम् . . . ९१०
ब्रह्मानुसन्धानसहितप्राणायामः . . . ९११
वेधकयोगाभ्यासक्रमः ९१२
विघ्नशान्तये प्रणवजपः ९१४
आरम्भादियोगभूमिकाचतुष्टयम् . . . ९१५
एतद्विद्यापठनवेदनयोः फलम् . . . ९१६

शाण्डिल्योपनिषत्

प्रथमाध्याये प्रथमः खण्डः

योगाष्टांगनिर्देशः ९१८
दशविधयमनिरूपणम् ९१९
दशविधनियमनिरूपणम् ९२०

प्रथमाध्याये द्वितीयः खण्डः

अष्टविधासननिरूपणम् ९२१
आसनजयफलम् ९२२

प्रथमाध्याये तृतीयः खण्डः

नाडीसंख्यादिजिज्ञासा ९२३
शरीरप्राणप्रमाणम ९२३

कुम्भकविधिः ५२३
मनुष्यादीनां अग्निस्थानम् . . . ५२३
मनुष्यादिदेहमध्यलक्षणम् . . . ५२४
नाभिचक्रे जीवभ्रमणम् ५२४
कुण्डलिनीस्वरूपचेष्टाः ५२४
चतुर्दशनाड्यः ५२५
सुषुम्नानाडी ५२५
सुषुम्नां परितः इतरनाडीस्थानानि . . . ५२५
प्राणादिदशवायुस्थानचेष्टाः . . . ५२६
नाडीशोधनविधिः ५२७

प्रथमाध्याये चतुर्थः खण्डः

योगाधिकारियोगमठयोः लक्षणम् . . . ५२८
प्राणायामारम्भप्रकारः ५२८
नाडीशोधनप्राणाभ्यामकालावधिः . . . ५२९
नाडीशुद्धिचिह्नानि ५२९

प्रथमाध्याये पञ्चमः खण्डः

प्रणवात्मकप्राणायामः ५२९
प्रणववर्णध्यानप्रकारः ५३०
प्राणाभ्यासप्रकारः ५३०

प्रथमाध्याये षष्ठः खण्डः

सुषुम्नामलशोधनार्थप्राणायामः . . . ५३१
अहरहःकर्तव्यप्राणायामसंख्या . . . ५३१
अभ्यासोचितसिद्धिभेदः ५३१
अभ्यासकाले आहारनियमः . . . ५३२

अभ्यासे सावधानताविधिः ९३२
नाड्डीशुद्धितो मनोन्मन्यवस्थाप्राप्तिः ९३२
बन्धत्रयस्य कर्तव्यता ९३३
प्राणापानयोगफलम् ९३३
कपालशोधनोपायः ९३३
उज्जायीप्राणायामः ९३४
सीत्कारप्राणायामः ९३४
शीतलप्राणायामः ९३४
उपायोपेयकुम्भकद्वयम् ९३४
कुम्भकाभ्यासफलम् ९३५
वैष्णवीमुद्राप्राप्तिः ९३५
खेचरीप्राप्त्या ब्रह्मदर्शनम् ९३५
खेचर्या उन्मनीभावापत्तिः ९३६
कालापरिच्छिन्नब्रह्मप्राप्तिसाधनम् . . . ९३७
मनोविलापनेन कैवल्यप्राप्तिः . . . ९३८
योगज्ञानाभ्यां मनोलयः ९३९
मनोलयात् प्राणस्पन्दनिरोधः . . . ९३९
प्राणस्पन्दनिरोधात् मनस्स्पन्दनिरोधः . . ९४०
प्राणस्पन्दनिरोधविविधोपायाः . . . ९४०
कुम्भकेन सुषुम्नाभेदनद्वारा परमपदगमनम् . . ९४२
मनोयुक्तप्राणस्य सुषुम्नाप्रवेशनविधिः . . ९४२
खेचरीमुद्राप्राप्तिः ९४३
बाह्यखेचरीसिद्ध्युपायः ९४४
अभ्यासकाले प्राणजयोपायः . . . ९४४
स्वात्मापरोक्षसिद्ध्युपायः ९४५
सर्वरोगविनिर्मोकसाधनं धारणाविशेषः . . ९४५

नासाग्रादिषु संयमेन विविधसिद्धयः . . . ९४९

प्रथमाध्याये सप्तमः खण्डः

पञ्चविधप्रत्याहारः ४८

प्रथमाध्याये अष्टमः खण्डः

पञ्चविधा धारणाः ९४८

प्रथमाध्याये नवमः खण्डः

द्विविधं ध्यानम् ९४९

प्रथमाध्याये दशमः खण्डः

समाधिस्वरूपम् ९४९

द्वितीयोऽध्यायः

निर्विशेषब्रह्मस्वरूपम् ९५०
ब्रह्मणः अनिर्देश्यत्वम् ९५०
ब्रह्मणः अवाङ्मानसगोचरत्वम् . . . ९५१
सर्वस्य परमात्मत्वम् ९५१
गुरूपदेशतः सर्वात्मत्वज्ञानप्राप्तिः . . . ९५२

तृतीयाध्याये प्रथमः खण्डः

ब्रह्मणो वस्तुतः निष्प्रतियोगिकस्वमात्रत्वम् . . ९५२
ब्रह्मणो रूपत्रयम् ९५३
निष्कलं ब्रह्म ९५३
सकलं ब्रह्म ९५४
सकलनिष्कलं ब्रह्म ९५४

तृतीयाध्याये द्वितीयः खण्डः

सन्मात्रस्य परब्रह्मत्वनिर्वचनम् . . . ५५६
सन्मात्रस्य आत्मत्वनिर्वचनम् . . . ५५६
सन्मात्रस्य महेश्वरत्वनिर्वचनम् . . . ५५६
सन्मात्रस्य दत्तात्रेयत्वनिर्वचनम् . . . ५५६
निरुक्तिवेदनफलम् ५५७

हंसोपनिषत्

ब्रह्मविद्यासाधनहंसविद्याया अतिगुह्यत्वम् . . ५५९
हंसविद्याऽधिकारिस्वरूपम् . . . ५६१
हंसस्वरूपं तज्ज्ञानफलं च . . . ५६१
हंसज्ञानोपायो योगः ५६२
हृत्पद्मे हंसभावनया तुर्यात्मदर्शनम् . . . ५६३
अजपाहंसमन्त्रजपप्रकारः . . . ५६५
सगुणहंसध्यानेन परमात्मदर्शनम् . . . ५६६
अजपाजपेन दशनादानुभवः . . . ५६७
केवलदशमनादाभ्यासविधिः . . . ५६८
तत्तन्नादानुभवफलम् ५६८
मनोलयात् ब्रह्मात्मत्वप्रकाशः . . . ५६९

ADDENDUM

PREFACE, pp. ७–८ : Add to the list the following :

अ २. — Adyar Library XXXIII C 22—A Grantha MS. of 108 Upanishads.

मु. — The printed edition of 108 Upanishads published by Tukaram Javaji, Bombay, 1913, based on a South Indian MS.

अद्वयतारकोपनिषत्

पूर्णमदः—इति शान्तिः

तारकयोगाधिकारः

अथातोऽद्वयतारकोपनिषदं व्याख्यास्यामो यतये जितेन्द्रियाय शमादिषड्गुणपूर्णाय ॥ १ ॥

उपनिषद्ब्रह्मयोगिविरचितं विवरणम्

ॐ श्रीमद्विश्वाधिष्ठानपरमहंससद्गुरुरामचन्द्राय नमः

द्वैतासम्भवविज्ञानसंसिद्धाद्वयतारकम् ।
तारकब्रह्मेति गीतं वन्दे श्रीरामवैभवम् ॥

इह खलु शुक्लयजुर्वेदप्रविभक्तेयं अद्वयतारकोपनिषत् राजयोगसर्वस्वं कटयन्ती ब्रह्ममात्रपर्यवसन्ना दृश्यते । अस्याः स्वल्पग्रन्थतो विवरणमारभ्यते । त्र यथोक्ताधिकार्युद्देशेन श्रुतयः तारकयोगमुपदिशन्तीत्याह—**अथेति** ॥ थ कर्मोपासनाकाण्डद्वयनिरूपणानन्तरं यतः तेन पुरुषार्थासिद्धिः **अतः**

तदर्थं यत्र स्वातिरेकेण द्वयं न विद्यते तत् अद्वयं ब्रह्म तन्मात्रबोधिनी विद्या **तारकोपनिषत्** तां श्रुतयो वयं **व्याख्यास्यामः**। कस्मा अधिकारिण इत्यत आह—**यतय इति**। स्वाश्रमानुष्ठानपूर्वकं देशिकमुखतो वेदान्तश्रवणं ततो युक्तिभिः श्रुत्यविरुद्धाभिः मननं च कृत्वा निदिध्यासनाय यतत इति यतिः। अजितेन्द्रियस्य यतित्वं कुत इत्यत आह—**जितेन्द्रियायेति**। जितेन्द्रियस्य यतित्वोपपत्तेः। अरिषड्वर्गाक्रान्तस्य जितेन्द्रियता कुत इत्यत आह—**शमादिषड्गुणपूर्णायेति**। शमादिषड्गुणसम्पत्तेः अरिषड्वर्गोपगतिपूर्वकत्वात्। एवं साधनवते श्रुतयः तारकयोगमुपदिशन्तीत्यर्थः ॥ १ ॥

योगोपायतत्फलम्

चित्स्वरूपोऽहमिति सदा भावयन् सम्यङ्निमीलिताक्षः किंचिदुन्मीलिताक्षो वाऽन्तर्दृष्ट्या भ्रूदहरादुपरि सच्चिदानन्दतेजःकूट-रूपं परं ब्रह्मावलोकयन् तद्रूपो भवति ॥ २ ॥

एवं निदिध्यासनोपायतत्फलमाह—**चिदिति** ॥ योगी स्वान्तः चिद्रूपोऽस्मीति **भावयन्** अर्धोन्मीलितलोचनः भ्रूमध्यादौ सच्चिदानन्दमात्रं ब्रह्माहमस्मीत्यालोकयन् **तद्रूपः** तारकरूपो भवति ॥ २ ॥

तारकस्वरूपम्

गर्भजन्मजरामरणसंसारमहद्भयात् संतारयति तस्मात्तारक-मिति। जीवेश्वरौ मायिकाविति विज्ञाय सर्वविशेषं नेति नेतीति विहाय यदवशिष्यते तदद्वयं ब्रह्म ॥ ३ ॥

किं तारकमित्यत आह—**गर्भेति** ॥ "ज्योतिर्लिङ्गं भ्रुवोर्मध्ये नित्यं ध्यायेत् सदा यतिः।" इति श्रुतिसिद्धज्योतिर्लिङ्गस्य प्रत्यग्रूपत्वेन

ाज्ञविकल्पितगर्भवासादिसंसारतारकत्वात् तारकं प्रत्यगात्मेत्यर्थः । जीवेशभेदे ति प्रत्यगभिन्नब्रह्मभावः कुत इत्याशङ्क्य तयोर्भेदस्य मायिकत्वेन मिथ्यात्वात् ो यच्छिष्यते तदेव ब्रह्मेत्याह—जीवेति ॥ ३ ॥

लक्ष्यत्रयानुसन्धानविधिः

तत्सिद्धचै लक्ष्यत्रयानुसंधानं कर्तव्यम् ॥ ४ ॥

तदधिगमोपायः कथमित्यत आह तत्सिद्धचा इति ॥ ४ ॥

अन्तर्लक्ष्यलक्षणम्

देहमध्ये ब्रह्मनाडी सुषुम्ना सूर्यरूपिणी पूर्णचन्द्राभा वर्तते । सा तु मूलाधारादारभ्य ब्रह्मरन्ध्रगामिनी भवति । तन्मध्ये तटित्कोटिसमानकान्त्या मृणालसूत्रवत् सूक्ष्माङ्गी कुण्डलिनीति प्रसिद्धाऽस्ति । तां दृष्ट्वा मनसैव नरः सर्वपापविनाशद्वारा मुक्तो भवति । फालोर्ध्वगललाटविशेषमण्डले निरन्तरं तेजस्तारकयोग-विस्फुरणेन पश्यति चेत् सिद्धो भवति । तर्जन्यग्रोन्मीलितकर्ण-रन्ध्रद्वये तत्र फूत्कारशब्दो जायते । तत्र स्थिते मनसि चक्षुर्मध्यगतनीलज्योतिस्स्थलं विलोक्य अन्तर्दृष्ट्या निरतिशयसुखं प्राप्नोति । एवं हृदये पश्यति । एवमन्तर्लक्ष्यलक्षणं मुमुक्षुभिरुपास्यम् ॥ ५ ॥

अन्तर्बाह्यमध्यभेदेन लक्ष्यं त्रिविधम् । तत्र अन्तर्लक्ष्यलक्षणं तदभ्यासफलं चाह—देहेति ॥ यदा कुण्डलिनी प्राणदृष्टिमनोभिभिः

मूलाधारत्रिकोणाग्रालङ्कारसुषुम्नाऽधोवक्त्रं विभिद्य तन्मध्ये प्रविशति तदा बाह्यान्तःप्रपञ्चविस्मरणपूर्वकं मुन्यन्तःकरणं निर्विकल्पब्रह्मपदं भजति। मुनिः निर्विकल्पज्ञानात् विकल्पात् मुक्तो भवतीत्यर्थः। तत्सिद्ध्युपायः कः इत्यत आह—फालेति। तद्गतसुखानुभवोपायं वदन् अन्तर्लक्ष्यं उपसंहरति—तर्जनीति। सुखं प्राप्नोति, न केवलं कर्णरन्ध्रद्वये, एवं हृदये ॥ ५ ॥

बहिर्लक्ष्यलक्षणम्

अथ बहिर्लक्ष्यलक्षणम्। नासिकाग्रे चतुर्भिः षड्भिरष्टभिः दशभिः द्वादशभिः क्रमात् अङ्गुलान्ते नीलद्युतिश्यामत्वसदृग्रक्तभङ्गीस्फुरत्पीतवर्णद्वयोपेतं व्योम यदि पश्यति स तु योगी भवति। चलदृष्ट्या व्योमभागवीक्षितुः पुरुषस्य दृष्टयग्रे ज्योतिर्मयूखा वर्तन्ते। तद्दर्शनेन योगी भवति। तप्तकाञ्चनसंकाशज्योतिर्मयूखा अपाङ्गान्ते भूमौ वा पश्यति तदृष्टिः स्थिरा भवति। शीर्षोपरि द्वादशाङ्गुलसमीक्षितुः अमृतत्वं भवति। यत्र कुत्र स्थितस्य शिरसि व्योमज्योतिर्दृष्टं चेत् स तु योगी भवति ॥ ६ ॥

बहिर्लक्ष्यलक्षणमाह—अथेति ॥ योगी भवति इत्यादिकृत्स्नोपनिषत् प्रायशो मण्डलब्राह्मणोपनिषद्व्याख्यानेन व्याख्यातं स्यादिति मन्तव्यम् ॥ ६ ॥

मध्यलक्ष्यलक्षणम्

अथ मध्यलक्ष्यलक्षणं प्रातश्चित्रादिवर्णाखण्डसूर्यचक्रवत् वह्निज्वालावलीवत् तद्विहीनान्तरिक्षवत् पश्यति। तदाकाराकारितया

अवतिष्ठति । तद्भ्रूयोदर्शनेन गुणरहिताकाशं भवति । विस्फुरत्तारकाकारदीप्यमानगाढतमोपमं परमाकाशं भवति । कालानलसमद्योतमानं महाकाशं भवति । सर्वोत्कृष्टपरमद्युतिप्रद्योतमानं तत्त्वाकाशं भवति । कोटिसूर्यप्रकाशवैभवसंकाशं सूर्याकाशं भवति । एवं बाह्याभ्यन्तरस्थव्योमपञ्चकं तारकलक्ष्यम् । तद्दर्शी विमुक्तफलस्तादृग्व्योमसमानो भवति । तस्मात् तारक एव लक्ष्यं अमनस्कफलप्रदं भवति ॥ ७ ॥

अन्तर्बाह्यलक्ष्यस्वरूपमुक्त्वा मध्यलक्ष्यस्वरूपमाह—अथेति ॥ तद्दर्शी विमुक्तस्वाज्ञानतत्कार्यफलः । यस्मादेवं तस्मात् ॥ ७ ॥

द्विविधं तारकम्

तत्तारकं द्विविधं पूर्वार्धं तारकं उत्तरार्धं अमनस्कं चेति । तदेष श्लोको भवति—

तद्योगं च द्विधा विद्धि पूर्वोत्तरविधानतः ।
पूर्वं तु तारकं विद्यात् अमनस्कं तदुत्तरमिति ॥ ८ ॥

तारकयोगसिद्धिः

अक्ष्यन्तस्तारयोः चन्द्रसूर्यप्रतिफलनं भवति । तारकाभ्यां सूर्यचन्द्रमण्डलदर्शनं ब्रह्माण्डमिव पिण्डाण्डशिरोमध्यस्थाकाशे रवीन्दुमण्डलद्वितयमस्तीति निश्चित्य तारकाभ्यां तद्दर्शनम् ।

अत्राप्युभयैक्यदृष्ट्या मनोयुक्तं ध्यायेत्, तद्योगाभावे इन्द्रियप्रवृत्ते-रनवकाशात्। तस्मात् अन्तर्दृष्ट्या तारक एवानुसंधेय ॥ ९ ॥

ब्रह्माण्डवत् पिण्डाण्डेऽपि रवीन्दू विद्येते इति निश्चित्य तारकाभ्यां तदैक्यदर्शनतः तारकयोगसिद्धिः भवेदित्याह—**अक्षीति** ॥ अयोगी यथा ब्रह्माण्डस्थचन्द्रसूर्यौ मनस्सहकृततारकाभ्यां पश्यति तथा योगी स्वमस्तका-काशविभातरवीन्दुद्वयं मनस्सहकृततताराभ्यां अवलोकयेदित्यर्थः। रूपदर्शनस्य चक्षुरधीनत्वात् किं मनसेत्यत आह—**तदिति**। मनसि अन्यत्र व्यापृते रूपादि-ग्रहणशक्तिः चक्षुरादेः नास्तीत्यत्र "अन्यत्रमना अभूवं नादर्शम्, अन्यत्रमना अभूवं नाश्रौषं" इत्यादिश्रुतेः। यस्मादेवं **तस्मात्** ॥ ९ ॥

मूर्तामूर्तभेदेन द्विविधमनुसन्धेयम्

तत्तारकं द्विविधं, मूर्तितारकं अमूर्तितारकं चेति। यत् इन्द्रियान्तं तत् मूर्तिमत्। यत् भ्रूयुगातीतं तत् अमूर्तिमत्। सर्वत्र अन्तःपदार्थविवेचने मनोयुक्ताभ्याम इष्यते। तारकाभ्यां तदूर्ध्व-स्थसत्त्वदर्शनात् मनोयुक्तेन अन्तरीक्षणेन सच्चिदानन्दस्वरूपं ब्रह्मैव। तस्मात् शुक्लतेजोमयं ब्रह्मेति सिद्धम्। तद्ब्रह्म मनःसहकारिचक्षुषा अन्तर्दृष्ट्या वेद्यं भवति। एवं अमूर्तितारकमपि। मनोयुक्तेन चक्षुषैव दहरादिकं वेद्यं भवति, रूपग्रहणप्रयोजनस्य मनश्चक्षुरधीनत्वात् बाह्यवदान्तरेऽपि आत्ममनश्चक्षुःसंयोगेनैव रूपग्रहणकार्योदयात्। तस्मात् मनोयुक्ता अन्तर्दृष्टिः तारकप्रकाशाय भवति ॥ १० ॥

यदनुसन्धेयं तत् कतिविधं इत्यत्र **तत्तारकं** ॥ बाह्यपदार्थविवेचनवत् न्तःपदार्थविवेचनमपि मनश्चक्षुरधीनमित्याह—**सर्वत्रेति** । **तदूर्ध्वस्थसत्व-**ानात् भ्रूमध्योर्ध्वविलसितोत्तरतारकलक्ष्यदर्शनात् । केनैतद्दर्शनीयमित्यत्र ोयुक्तेनेति । **ब्रह्मैव** उत्तरतारकलक्ष्यमित्यनुसन्धेयम् । यस्मादेवं **तस्मात्** । ध्यादिस्थलविलसितशुक्लतेजसो मनःकल्पितत्वेऽपि ब्रह्मणः सर्वव्यापकत्वेन ापि विद्यमानत्वात् तदेव ब्रह्मेति अभिमतिद्रढिम्ना लीने तत्र मनसि कल्पक-पेक्षकल्पनावैरळ्ये निर्विकल्पकं ब्रह्मैव अवशिष्यते इत्यर्थः । **यत्तेजो मनः-**ल्पितं **तद्ब्रह्म** । यस्मादेवं **तस्मात्** ॥ १० ॥

तारकयागस्वरूपम्

भ्रूयुगमध्यबिले दृष्टिं तद्वारा ऊर्ध्वस्थिततेज आविर्भूतं तारकयोगो भवति । तेन सह मनोयुक्तं तारकं सुसंयोज्य प्रयत्नेन भ्रूयुग्मं सावधानतया किंचिदूर्ध्वमुत्क्षेपयेत् । इति पूर्वतारकयोगः । उत्तरं तु अमूर्तिमत् अमनस्कमित्युच्यते । तालुमूलोर्ध्वभागे महान् ज्योतिर्मयूखो वर्तते । तत् योगिभिर्ध्येयम् । तस्मात् अणिमादि-सिद्धिर्भवति ॥ ११ ॥

कोऽयं तारकयोग इत्यत्र **भ्रूयुगमध्यबिले** तत्रत्याज्ञाचक्रे दृष्टियुग्मं नवेश्य । **सावधानतया** विलोकयन् । **ध्येयम्** तज्ज्योतिः **ब्रह्मेति** योगि-श्चेन्त्यमित्यर्थः । ततः किं भवतीत्यत्र **तस्मादिति** ॥ ११ ॥

शाम्भवीमुद्रा

अन्तर्बाह्यलक्ष्ये दृष्टौ निमेषोन्मेषवर्जितायां सत्यां शांभवी मुद्रा भवति । तन्मुद्रारूढज्ञानिनिवासात् भूमिः पवित्रा भवति ।

तद्दृष्ट्या सर्वे लोकाः पवित्रा भवन्ति । तादृशपरमयोगिपूजा यस्य लभ्यते सोऽपि मुक्तो भवति ॥ १२ ॥

यत् योगिभिः ध्येयमुक्तं पर्यवसाने तदेव शांभवी मुद्रा भवतीत्याह **अन्तरिति ॥ मुद्रा भवति** इत्यत्र

अन्तर्लक्ष्यं बहिर्दृष्टिः निमेषोन्मेषवर्जिता ।
एषा सा शाम्भवी मुद्रा सर्वतन्त्रेषु गोपिता ॥

इति श्रुतेः । तन्मुद्रारूढयोगिनं स्तौति—**तदिति । पवित्रा भवति** इत्यत्र "स्वपादन्यासमात्रेण पावयन् वसुधातलं" इति स्वरूपदर्शनोक्तेः । **पवित्रा भवन्ति**—

खेचरा भूचराः सर्वे ब्रह्मविद्दृष्टिगोचराः ।
सद्य एव विमुच्यन्ते कोटिजन्मार्जितैरघैः ॥

इति श्रुतेः ॥ १२ ॥

अन्तर्लक्ष्यविकल्पाः

अन्तर्लक्ष्यज्वलज्ज्योतिःस्वरूपं भवति । परमगुरूपदेशेन सहस्रारज्वलज्ज्योतिर्वा बुद्धिगुहानिहितचिज्ज्योतिर्वा षोडशान्तस्थ-तुरीयचैतन्यं वा अन्तर्लक्ष्यं भवति । तद्दर्शनं सदाचार्यमूलम् ॥१३॥

अन्तर्लक्ष्यं विकल्प्य निर्धारयति—**परमेति ॥** उक्तविकल्पानां एकार्थपर्यवसायित्वात् तद्दर्शनमूलं किमित्यत्र—**तद्दर्शनमिति ॥ १३ ॥**

आचार्यलक्षणम्

आचार्यो वेदसंपन्नो विष्णुभक्तो विमत्सरः ।
योगज्ञो योगनिष्ठश्च सदा योगात्मकः शुचिः ॥ १४ ॥
गुरुभक्तिसमायुक्तः पुरुषज्ञो विशेषतः ।
एवंलक्षणसंपन्नो गुरुरित्यभिधीयते ॥ १५ ॥
गुशब्दस्त्वन्धकारः स्यात् रुशब्दस्तन्निरोधकः ।
अन्धकारनिरोधित्वात् गुरुरित्यभिधीयते ॥ १६ ॥
गुरुरेव परं ब्रह्म गुरुरेव परा गतिः ।
गुरुरेव परा विद्या गुरुरेव परायणम् ॥ १७ ॥
गुरुरेव परा काष्ठा गुरुरेव परं धनम् ।
यस्मात्तदुपदेष्टाऽसौ तस्माद्गुरुतरो गुरुरिति ॥ १८ ॥

आचार्यलक्षणमुक्त्वा गुरुशब्दार्थमाह—**गुशब्दस्त्विति** ॥ १४–१८ ॥

ग्रन्थाभ्यासफलम्

यः सकृदुच्चारयति तस्य संसारमोचनं भवति । सर्वजन्मकृतं पापं तत्क्षणादेव नश्यति । सर्वान् कामानवाप्नोति । सर्वपुरुषार्थसिद्धिर्भवति । य एवं वेदेत्युपनिषत् ॥ १९ ॥

ग्रन्थतदर्थपठनानुसन्धानफलमाह—**य इति** ॥ कामाकामधियां पठनफलं सर्वकामाप्तिः परमपुरुषार्थाप्तिश्च । **इत्युपनिषच्छब्दः** अद्वयतारकोपनिषत्समाप्त्यर्थः ॥ १९ ॥

श्रीवासुदेवेन्द्रशिष्योपनिषद्ब्रह्मयोगिना ।
अद्वयोपनिषद्व्याख्या लिखितेश्वरगोचरा ।
अद्वयोपनिषद्व्याख्याग्रन्थोऽशीतिरितीरितः ॥

इति श्रीमदीशाद्यष्टोत्तरशतोपनिषच्छास्त्रविवरणे त्रिपञ्चाशत्सङ्ख्यापूरकं अद्वयतारकोपनिषद्विवरणं सम्पूर्णम्

ॐ श्रीमद्विश्वाधिष्ठानपरमहंससद्गुरुरामचन्द्रार्पणमस्तु ॥

ॐ

अमृतनादोपनिषत्

सह नाववतु—इति शान्तिः

श्रवणाद्युपायः

शास्त्राण्यधीत्य मेधावी अभ्यस्य च पुनः पुनः ।
परमं ब्रह्म विज्ञाय उल्कावत्तान्यथोत्सृजेत् ॥ १ ॥

विवरणम्

ॐ श्रीमद्विश्वाधिष्ठानपरमहंससद्गुरुरामचन्द्राय नमः

अमृतनादोपनिषत्प्रतिपाद्यं पराक्षरम् ।
त्रैपदानन्दसाम्राज्यं हृदि मे भातु संततम् ॥

इह खलु कृष्णयजुर्वेदप्रविभक्तेयं अमृतनादोपनिषत् । कठवल्ल्यादिसमं उपोद्घातादिकम् । षडङ्गयोगप्रकाशनात्मिकोपनिषदोऽल्पग्रन्थतो विवरणमारभ्यते । आदौ तावत्—विशुद्धचित्तानां श्रवणाद्युपायादेव पुरुषार्थसिद्धिः, मलिनचित्तानां ब्रह्मोपासनाविशिष्टषडङ्गयोगाभ्यासद्वारकज्ञानेन

पुरुषार्थसिद्धिः अस्यामुपनिषदि प्रतिपाद्यते । तत्रादौ मुख्याधिकारिणां श्रवणाद्युपायमाह—**शास्त्राणीति** । मुमुक्षून् प्रति सूर्वापह्नवसिद्धं ब्रह्म निष्प्रतियोगिकस्वमात्रमिति अनुशासनं कुर्वन्तीति **शास्त्राणि** ईशाद्यष्टोत्तरशतोपनिषत्संज्ञकानि श्रुतार्थधारणासमर्थो **मेधावी** ब्रह्मविद्वरिष्ठदेशिकमुखात् यथावत् अधीत्य यावत् संशयादिपञ्चदोषनिवृत्तिः **पुनः पुनः** तावत् **अभ्यस्य** श्रवणमननिदिध्यासनानि नैरन्तर्येण कृत्वा तत्सञ्जातसम्यज्ज्ञानेन स्वातिरिक्ताविद्यापदतत्कार्यजातं यत्र पर्यवस्यति अपह्नवं भजति तत् **परमं** तन्मात्रतया उपबृंहणात् **ब्रह्म** निष्प्रतियोगिकस्वमात्रमिति **विज्ञाय** तज्ज्ञानसमकालं विद्वान् तद्भावमेत्य तन्मात्रतयाऽवशिष्यते । यतः शास्त्राभ्यासः एवं प्रभाववान् अतो ब्रह्मभावापत्त्यनन्तरमपि शास्त्राभ्यास एव अप्रमादेन कर्तव्य इत्यत आह—**उल्कावदिति** । यथा उल्काप्रकाशतो द्रव्यमालोक्य उल्कां परित्यजति तथा ब्रह्मभावापत्त्यनन्तरं तत्साधनानि **तानि** शास्त्राणि तत्प्रभवज्ञानं चापि **अथोत्सृजेत्** इत्यत्र

उल्काहस्तो यथा कश्चिद् द्रव्यमालोक्य तां त्यजेत् ।
ज्ञानेन ज्ञेयमालोक्य पश्चात् ज्ञानं परित्यजेत् ॥ इति,
आत्मानमात्मना साक्षात् ब्रह्म बुद्ध्वा सुनिश्चलम्
देहजात्यादिसंबन्धान् वर्णाश्रमसमन्वितान् ॥
वेदशास्त्रपुराणानि पदपांसुमिव त्यजेत् ॥ इति च श्रुतेः ॥ १ ॥

प्रणवोपासना

ओंकाररथमारुह्य विष्णुं कृत्वाऽथ सारथिम् ।
ब्रह्मलोकपदान्वेषी रुद्राराधनतत्परः ॥ २ ॥
तावद्रथेन गन्तव्यं यावद्रथपथि [1]स्थितः ।
स्थात्वा रथपथिस्थानं रथमुत्सृज्य गच्छति ॥ ३

[1] स्थितिः । स्थि—क.

मात्रालिङ्गपदं त्यक्त्वा शब्दव्यञ्जनवर्जितम् ।
अस्वरेण मकारेण पदं सूक्ष्मं हि गच्छति ॥ ४ ॥

प्रथममन्त्रेणोत्तमाधिकारिणां कृतार्थतामभिधाय मध्यममन्दाधिकारिणां तत्पदारोहाय प्रणववाच्यार्थोपासनां षडङ्गयोगं चाह—**ओङ्कारेति** । रथस्थानीयमोङ्कारं **आरुह्य** कांस्यघण्टानिनादवत् प्रणवोच्चारणपूर्वकं तदर्थानुसन्धानं कृत्वा **रथसारथिं** बुद्धितत्त्वं **विष्णुं** व्यापकं प्रणवार्थेश्वराकाराकारितं कृत्वा । "बुद्धिं तु सारथिं विद्धि" इति श्रुतेः । ब्रह्मैव लोको ब्रह्मलोकः निर्विशेषपरमात्मा तद्रूपतया पद्यत इति ब्रह्मलोकपदं स्वमात्रतया अन्वेष्टुमिच्छतीति **ब्रह्मलोकपदान्वेषी** तदुपायत्वेन **रुद्राराधनतत्परो** भवेत् स्वातिरिक्तत्वेन परागभावमापन्नस्वाविद्यापदतत्कार्यभूतरुजं द्रावयतीति रुद्रः प्रत्यगात्मा तदाराधनं व्यष्टिसमष्ट्यन्तःकरणवृत्तिसहस्रभावाभावप्रकाशकप्रत्यगस्मीत्यनुसन्धानं तदेकनिष्ठत्वं तत्परत्वमित्यर्थः । आदौ ओङ्कारार्थेश्वरानुचिन्तनं, तदाकाराकारितान्तःकरणं प्रसन्नं सत् निर्विशेषब्रह्ममात्रावस्थितिं ईहते, तदुपायत्वेन प्रत्यगनुसन्धानं, ततः प्रत्यक्परागभावसापेक्षप्रत्यग्भावं विहाय निष्प्रतियोगिकब्रह्ममात्रतया अवशिष्यत इति भावः ॥ २ ॥ ब्रह्मभावापत्तावपि सदा प्रणवानुसन्धानं कर्तव्यमित्यत आह—**तावदिति** । **यावद्रथपथि** प्रणवानुसन्धानवर्त्मनि **स्थितस्तिष्ठति तावद्रथेन गन्तव्यं** ओङ्कारोच्चारणपूर्वकं अर्थानुसन्धानं कर्तव्यम् । एवं **रथपथिस्थानं** रथपथेन यत् गन्तव्यस्थानं निर्विशेषं ब्रह्म तत्र तन्मात्रावशेषतया **स्थात्वा** स्थित्वा ततः रथेन गन्तव्यप्रदेशस्य प्राप्तत्वात् ओङ्कार**रथमुत्सृज्य** तत्प्राप्यतुर्यतुर्यस्थानं **गच्छति** तुर्यतुर्यो भवतीत्यर्थः ॥ ३ ॥ तुर्यतुर्याधिगमोपायमाह—**मात्रेति** । सर्वव्यवहारहेत्वकारादयः स्वराः शब्दाः, ककारादीनि व्यञ्जनानि, तैः वर्जितं शब्दव्यञ्जनात्मकप्रपञ्चाशद्वर्णव्यवहार्यप्रपञ्चकलनाविरळं यत् **मात्रालिङ्गपदं** अकारादिमात्रातदध्यक्षविश्वविराडोत्रादिरूपं **त्यक्त्वा** स्वातिरेकेण किञ्चिन्नास्तीति निश्चित्य अथ **अस्वरेण** मकारेण मकारार्थेश्वरभावेन निरावृतक्रियाज्ञानेच्छाशक्तिसम्पत्त्या यत् **सूक्ष्मं हि**

पदं विराजते तत् सूक्ष्मपदं ब्रह्म स्वमात्रमिति गच्छति मात्रालिङ्गशब्दव्यञ्जन-कलनापह्नवसिद्धब्रह्ममात्रतया मुनिः अवशिष्यत इत्यर्थः ॥ ४ ॥

प्रत्याहारलक्षणम्

शब्दादिविषयान् पञ्च मनश्चैवातिचञ्चलम् ।
चिन्तयेदात्मनो रश्मीन् प्रत्याहारः स उच्यते ॥ ५ ॥

मन्दाधिकारिचित्तशुद्धिहेतुषडङ्गयोगमुपदिशति । तत्र प्रत्याहार-स्वरूपमाह—शब्दादीति । "यद्यच्छृणोति कर्णाभ्यां तत्तदात्मेति भावयेत्" इत्यादिश्रुत्यनुरोधेन श्रोत्रादिग्राह्यपञ्चशब्दादिविषयान् स्वात्मनो रश्मीन् स्वात्मविकल्पितत्वेन स्वरूपभूतान् । मनश्चेति चशब्दतः सविषयान्तः-करणचतुष्टयं गृह्यते । तत्तु अतिचञ्चलं क्षणविकारित्वात् । तदप्यात्मनो रूपं चिन्तयेत् स्वात्मातिरिक्तविषयतः प्रत्याहरेदिति योऽर्थोऽभिहितः सः प्रत्याहारः उच्यते ॥ ५ ॥

षडङ्गयोगः

प्रत्याहारस्तथा ध्यानं प्राणायामोऽथ धारणा ।
तर्कश्चैव समाधिश्च षडङ्गो योग उच्यते ॥ ६ ॥

योगषडङ्गानि गणयति—प्रत्याहार इति । स्पष्टोऽर्थः ॥ ६ ॥

प्राणायामादिफलम्

यथा पर्वतधातूनां [1]दह्यन्ते धमता मलाः ।
तथेन्द्रियकृता दोषा दह्यन्ते प्राणधारणात् ॥ ७ ॥

[1] दह्यते धमता मलम्—अ.

प्राणायामैर्दहेद्दोषान् धारणाभिश्च किल्बिषम् ।
किल्बिषं हि क्षयं [1]नीत्वा रुचिरं चैव चिन्तयेत् ॥ ८ ॥

प्राणायामादिफलप्रदर्शनपूर्वकं प्राणायामादिप्रकारमाह—**यथेति** ॥ **यथा धमता धमनाभिवर्धितवह्निना पर्वतधातूनां मलाः मलानि दह्यन्ते तथा प्राणधारणात् दशेन्द्रियकृताः दोषा दह्यन्ते** ॥ ७ ॥ **यत एवं अतः प्राणायामैः लिङ्गदेहाश्रयदोषान् दहेत्** । **तथा धारणाभिश्च अन्तःकरणगतकिल्बिषं दहेत्** । एवं **अन्तःकरणजकिल्बिषं अशुद्धिं क्षयं नीत्वा रुचिरं किल्बिषक्षयाधिकरणं चैव** हीतिशब्दात् सर्ववृत्तिकुम्भकं मनःप्राणवृत्तिस्तम्भनं चिन्तयेत् ॥ ८ ॥

त्रिविधप्राणायामः

रुचिरं रेचकं चैव वायोराकर्षणं तथा ।
प्राणायामास्त्रयः प्रोक्ता रेचपूरककुम्भकाः ॥ ९ ॥

त्रिविधप्राणायाममाह—**रुचिरमिति** । कुम्भकरेचकपूरकभेदेन **प्राणायामाः त्रयः प्रोक्ताः** । अत्र रुचिरशब्दः कुम्भकवाची, रेचकपूरकसहपठितत्वात् ॥ ९ ॥

प्राणायामलक्षणम्

सव्याहृतिं सप्रणवां गायत्रीं शिरसा सह ।
त्रिः पठेदायतप्राणः प्राणायामः स उच्यते ॥ १० ॥

प्राणायामस्वरूपमाह—**सव्याहृतिमिति** । कुम्भकावस्थायां "ॐ भूः" इत्यादिप्रणवसम्पुटितसप्तव्याहृतिभिः "परोरजसेसावदोम्" इति **शिरसा** च

[1] तीर्त्वा—अ १.

सह गायत्रीं त्रिः पठेत् त्रिवारं मनसा उच्चरेदिति योऽर्थोऽभिहितः स प्राणायामः उच्यते ॥ १० ॥

रचकलक्षणम्

उत्क्षिप्य वायुमा[1]काशे शून्यं कृत्वा निरात्मकम् ।
शून्यभावे नियुञ्जीयाद्रेचकस्येति लक्षणम् ॥ ११ ॥

रेचकलक्षणमाह—उत्क्षिप्येति । बाह्याकाशे वायुमुत्क्षिप्य तैलधारावत् मन्दंमन्दं विरेच्य अन्तः निरात्मकं वायुं शून्यं कृत्वा शून्यभावे नियुञ्जीयात् इति यत्तत् रेचकस्य लक्षणम् ॥ ११ ॥

पूरकलक्षणम्

[2]वक्त्रेणोत्पलनाळेन तोयमाकर्षयेन्नरः ।
एवं वायुर्ग्रहीतव्यः पूरकस्येति लक्षणम् ॥ १२ ॥

पूरकलक्षणमाह—वक्त्रेणेति । यथा नरो वक्त्रेण वक्त्रस्थोत्पलनाळेन वा तोयं आकर्षयेत् एवमिडया पिङ्गळया शीतल्या वा वायुः ग्रहीतव्यः इति यत्तत् पूरकस्य लक्षणम् ॥ १२ ॥

कुम्भकलक्षणम्

[3]नोच्छ्वसेन्न च [4]निश्वासेत् नैव गात्राणि चालयेत् ।
एवं भावं नियुञ्जीयात् कुम्भकस्येति लक्षणम् ॥ १३ ॥

[1] काशं—क, अ १, अ २. शे इत्येतत् शं इति शोधितं—अ.
[2] वक्त्रे—क. [3] नोच्छ्वासे—अ २. [4] निश्वसे—अ १.

अन्धवत् पश्य रूपाणि शब्दं बधिरवच्छृणु ।
काष्ठवत् पश्य वै देहं [1]प्रशान्तस्येति लक्षणम् ॥ १४ ॥

कुम्भकलक्षणमाह—**नोच्छ्वसेदिति** । सिद्धाद्यासनमास्थाय निश्चलगात्रो योगी रेचकपूरकव्यापारमकृत्वा एवं वायुस्तम्भनभावं नियुञ्ज्यादिति यत्तत् कुम्भकलक्षणम् ॥ १३ ॥ कुम्भकवेळायां अन्धबधिरवत् रूपशब्दादिव्याप्तिविरळो भूयादिति प्रशान्तलक्षणमाह—**अन्धवदिति** । अन्धबधिरग्रहणं शिष्टेन्द्रियवैकल्योपलक्षणार्थं, यथा अन्धादिः रूपादिग्रहणं न करोति तथा अविकलेन्द्रियोऽपि । रूपादीन् अन्धादिवत् पश्य स्वदेहं काष्ठवत् पश्येति यत्तत् प्रशान्तस्य लक्षणम् । योगी सर्वेन्द्रियव्याप्तिविरळो भवेदित्यर्थः ॥१४॥

धारणालक्षणम्

मनः संकल्पकं ध्यात्वा संक्षिप्यात्मनि बुद्धिमान् ।
धारयित्वा तथाऽऽत्मानं धारणा परिकीर्तिता ॥ १५ ॥

धारणालक्षणमाह—**मन** इति । बुद्धिमान् योगी सङ्कल्पात्मकं **मनः** तद्वृत्तिजातं **सङ्क्षिप्य** अथ निस्सङ्कल्पकं **ध्यात्वा आत्मनि** निर्विकल्पके प्रत्यग्भावपरिणते मनसि तथाविधं परमात्मानं **धारयित्वा** या प्रत्यक्परैक्यस्थितिः सेयं **धारणेति परिकीर्तिता** ॥ १५ ॥

तर्कलक्षणम्

आगमस्याविरोधेन ऊहनं तर्क उच्यते ।

तर्कलक्षणमाह—**आगमस्येति** । श्रुत्यनुगृहीतोहनमेव तर्क इत्यभिधीयते ॥

[1] प्रशान्तस्यैव—अ २.

समाधिलक्षणम्

समं मन्येत [1]यं लब्ध्वा स समाधिः प्रकीर्तितः ॥ १६[1]॥

समाधिलक्षणमाह—सममिति । ब्रह्माहं, अहमेव ब्रह्म इति यं परमात्मानं मत्वा स्वविकल्पितप्रपञ्चजातं समं आत्मानमेव मन्येत स समाधिरिति श्रुतिभिः परिकीर्तितः ॥ १६ ॥

समाधिसिद्ध्युपायः

भूमौ दर्भासने रम्ये सर्वदोषविवर्जिते ।
कृत्वा मनोमयीं रक्षां जप्त्वा वै रथमण्डले ॥ १७ ॥
पद्मकं स्वस्तिकं वाऽपि भद्रासनमथापि वा ।
बद्ध्वा योगासनं सम्यक् उत्तराभिमुखः स्थितः ॥ १८ ॥
नासिकापुटमङ्गुल्या पिधायैकेन मारुतम् ।
आकृष्य धारयेदग्निं शब्दमेव विचिन्तयेत् ॥ १९ ॥
ओमित्येकाक्षरं ब्रह्म ओमित्येतन्न [2]रेचयेत् ।
दिव्यमन्त्रेण बहुधा कुर्या[3]न्मलविमुक्तये ॥ २० ॥
पश्चात् ध्यायीत पूर्वोक्तक्रमशो मन्त्रविद् बुधः ।
स्थूलादिस्थूलसूक्ष्मं च नाभेरूर्ध्वमुपक्रमः ॥ २१ ॥

[1] यल्लब्ध्वा समाधिः परिकीर्तितः—उ १. [2] रोचयेत्—अ, अ १.
[3] दमलमुक्तये—अ. दामलमुक्तये—उ, उ १, अ १, अ २. 'दात्ममलच्युतिं' इति शोधितं—क.

तिर्यगूर्ध्वमधोदृष्टिं विहाय च महामतिः ।
स्थिरस्थायी विनिष्कम्पः सदा योगं समभ्यसेत् ॥ २२ ॥
तालमात्राविनिष्कम्पो धारणायोजनं तथा ।
द्वादशमात्रो योगस्तु कालतो नियमः स्मृतः ॥ २३ ॥
अघोषमव्यञ्जनमस्वरं च अतालुकण्ठोष्ठमनासिकं च [1]यत् ।
अरेफजातमुभयोष्मवर्जितं यदक्षरं न क्षरते कथंचित् ॥ २४ ॥

एतादृशसमाधिसिद्ध्युपायमाह—**भूमाविति** । विशुद्धभूमौ—दर्भासनग्रहणं चेलाजिनोपलक्षणार्थं—कुशाजिनचेलमृद्वासने सर्वदोषरहिते तत्संस्कारार्थं भूशुद्धिभूतशुद्ध्यादिमनोमयीं **रक्षां कृत्वा** तदासनमुपस्पृश्य **रथमण्डले** प्रणवव्याहृतिसौम्याष्टाक्षरे यथाशक्ति **जप्त्वा** ॥ १७ ॥ ततस्तदासने यथाविध्युपविश्य अथ पद्मस्वस्तिकभद्र्योगासनेष्वन्यतमासनमास्थाय **सम्यक्** उत्तराभिमुखतया आसीनः सन् ॥ १८ ॥ **नासिकापुटं एकेन** सा**ङ्गुलीकरेण पिधाय मारुतमाकृष्य** मूलाधारत्रिकोणे **अग्निं धारयेत्**, धारयन् **शब्दं ओङ्कारमेव विचिन्तयेत्** ॥ १९ ॥ किं तत् । **ओमित्येकाक्षरमिति** । ओङ्कारानुसन्धानविच्छित्तिं न कुर्यात् । स्वान्तःकरणस्थमलविमुक्तये **बहुधेति** ॥ २० ॥ एवं **मन्त्रविदिति** । ध्यानक्रमनियम उच्यते—**स्थूलादीति** । स्वाविद्यापदस्थूलाद्यंशारोपापवादाधिकरणविराट्सूत्रबीजतुर्यरूपेण तत्प्रविभक्तस्थूलं सूक्ष्मं चाधिष्ठाय । चशब्दात् बीजतुर्यांशमप्यधिष्ठायेति द्योत्यते । विराडादयो भवन्ति (?) स्वनाभेरूर्ध्वं विद्यमानहृदयादिषु विराडादिध्यानस्य **उपक्रमः** कर्तव्यः ॥ २१ ॥ विराडादिध्यानोपक्रमानन्तरं **महामतिः** योगी स्वध्येयस्वरूपातिरिक्ततिर्यगूर्ध्वमधोदृष्टिं **विहाय** । चशब्दात्तदेकनिष्ठो भूत्वेति द्योत्यते । पूर्वोक्तपद्मासने **स्थिरस्थायी** भूत्वा स्वाभिलषितलक्ष्यानुसन्धानतो **विनिष्कम्पः** लक्ष्यैकतानचित्तः सन् **सदा** विराडादिरहमस्मीत्यनुसन्धानरूपं

[1] 'यत्' इत्येतत् लुप्तं—अ.

योगं समभ्यसेत् ॥ २२ ॥ कुम्भकमात्रानियमस्तु हटशाम्बादि-**ताळमात्राविनिष्कम्पः** कालः अष्टमात्रात्मकः सप्तमात्रात्मको वा यथा लोके प्रथितः **तथा** कुम्भके श्वासधारणायोजनं कार्यम् । तथा सम्पूर्णकुम्भके **कालतो द्वादशमात्रात्मको योगस्तु** नियमेन स्मृतः । अत्रत्यद्वादशमात्राकालस्तु सहजो-च्छ्वासनिश्वासकालमानेन षण्णवतिमात्रात्मकः स्मृतः । एतावत्कालकुम्भके स्वरूपं ध्यायतः तदक्षरसाक्षात्कारो भवतीत्यर्थः ॥ २३ ॥ किं तदक्षरं घोषादि-वर्णात्मकं ? इत्यत आह—**अघोषमिति** । हशो घोषाः तद्रहितं **अघोषं व्यञ्जनं** ककारादिः तद्रहितं **अव्यञ्जनं** तथाऽकारादिस्वरविरळं **अस्वरं च** यत्तालुकण्ठोष्ठनासिकास्थाने अभिव्यज्यते तद्रहितं **अरेफजातं** अन्तःस्थ-कलनाविरळं शषसहाद्युभयोष्मवर्जितं **कथंचिदपि यन्न क्षरते तदेवाक्षरं** योगिप्रत्यक्षमुपलभ्यत इत्यर्थः ॥ २४ ॥

योगस्य नित्यकर्तव्यता

येनासौ [1]पश्यते मार्गं प्राणस्तेनाभिगच्छति ।
अतस्तमभ्यसेन्नित्यं यन्मार्गगमनाय वै ॥ २५ ॥

यतः स्वप्राप्य[ति]मार्गदर्शनहेतुः योगः अतस्तमेव सदा अभ्यसेदित्याह —**येनेति** ॥ **असौ** योगी **येन** योगेन स्वप्राप्यमार्गं **पश्यते** पश्यति **प्राणस्तु** दृङ्मनोग्निभिः सह **तेन** एव मार्गेण **अभिगच्छति** । यत एवं **अतः यत्** पदप्रापकमार्गगमनायैव **तमेव** योगमप्रमादेन **अभ्यसेत्** ॥ २५ ॥

सप्त स्वप्राप्तिद्वाराणि

हृद्द्वारं वायुद्वारं च मूर्धद्वारमथापरम् ।
मोक्षद्वारं बिलं चैव सुषिरं मण्डलं विदुः ॥ २६ ॥

[1] गच्छते-क, अ २.

स्वप्राप्य[प्ति]द्वाराणि कतिविधानीत्यत आह—**हृद्वारमिति** ॥ **हृद्वारं** विराट्प्रापकं, विराजो हृदयाश्रितब्रह्माण्डोपाधिकत्वात् । **वायुद्वारं** सूत्रप्रापकं, वायोः सूत्ररूपत्वात्, "वायुर्वै गौतम तत्सूत्रं" इति श्रुतेः । **मूर्धद्वारं** बीजेश्वरप्रापकं, "तयोर्ध्वमायन्नमृतत्वमेति" इति श्रुतेः । **अथापरं** किमित्युक्ते **मोक्षद्वारं** अर्धमात्रात्मकं प्रत्यगभिन्नब्रह्मप्रापकं, तदवगतेरर्धमात्राद्वारकत्वात् । मोक्षद्वारं त्रिधा भिद्यते । तत् कथं? अर्धमात्रास्थूलांशात्मकं **बिलं**, तस्य तुर्यवैराजप्रापकत्वात् । अर्धमात्रासूक्ष्मांशात्मकं **सुषिरं**, तुर्यसूत्रप्रापकत्वात् । अर्धमात्राबीजांशात्मकं **मण्डलं**, तुर्यबीजप्रापकत्वात् । **च**शब्दात् परेति विख्यातकैवल्यद्वारमस्तीति द्योत्यते, तस्य निष्प्रतियोगिकब्रह्ममात्रगमकत्वात् । एवं सप्तधा स्वात्मप्तिद्वाराणि सन्तीति ब्रह्मविद्वरीयांसो **विदुः** जानन्तीत्यर्थः ॥ २६ ॥

भयादीनां त्यागः

भयं क्रोधमथालस्यम् अतिस्वप्नातिजागरम् ।
अत्याहारमनाहारं नित्यं योगी विवर्जयेत् ॥ २७ ॥

भयक्रोधादिविघ्नबाहुळ्ये सति कथमेवं सिद्धिः स्यादित्याशङ्क्य भयादित्यागतः तत्सिद्धिः स्यादित्यत आह—**भयमिति** ॥ निर्भयादिदर्शनेन भयादिवृत्तित्यागयोगो भवतीत्यत्र

युक्ताहारविहारस्य युक्तचेष्टस्य कर्मसु ।
युक्तस्वप्नावबोधस्य योगो भवति दुःखहा ॥

इति स्मृतेः ॥ २७ ॥

अभ्यासफलम्

अनेन विधिना सम्यङ् नित्यमभ्यस्यते क्रमात् ।
स्वयमुत्पद्यते ज्ञानं त्रिभिर्मासैर्न संशयः ॥ २८ ॥
चतुर्भिः पश्यते देवान् पञ्चभिर्वि[1]ततः क्रमः ।
इच्छयाऽऽप्नोति कैवल्यं षष्ठे मासि न संशयः ॥ २९ ॥

एवमभ्यासं कुर्वतः अवान्तरफलं मुख्यफलं चाह—**अनेनेति** ॥ "भूमौ दर्भासने रम्ये" इति यदुक्तं **अनेन विधिना** अभ्यासं कुर्वतः **त्रिभिः मासैः स्वयमेव** उपदेशमन्तरा **ब्रह्मज्ञानं उत्पद्यते** ॥ २८ ॥ मासचतुष्टयाभ्यासात् इन्द्रादिदेवान् **पश्यते** पश्यति । मासपञ्चकाभ्यासतो **विततः क्रमो** विराडादिः दृश्यते । षण्मासाभ्यासतो यद्[दि]च्छया **कैवल्यं आप्नोतीत्यत्र न हि संशयः** अस्तीत्यर्थः ॥ २९ ॥

योगचिन्त्यम्

पार्थिवः पञ्चमात्रस्तु चतुर्मात्रस्तु वारुणः ।
आग्नेयस्तु त्रिमात्रोऽसौ वायव्यस्तु द्विमात्रकः ॥ ३० ॥
एकमात्रस्तथाऽऽकाशो ह्यमात्रं तु विचिन्तयेत् ।

योगेन यच्चिन्त्यं तदाह **पार्थिव इति** ॥ ३० ॥ पार्थिवाद्याकाशान्तं एकैकगुणापकर्षतः सूक्ष्मत्वं प्रत्यक्त्वं व्यापकत्वम् । इत्थं मात्राविशिष्टभूतभौतिकजातापह्नवसिद्धं **अमात्रं ब्रह्म** निष्प्रतियोगिस्वयमात्रमिति **विचिन्तयेदित्यर्थः** ॥

[1] ततक्रमः—अ.

चिन्तनाप्रकारः

•संधिं कृत्वा तु मनसा चिन्तयेदात्मनाऽऽत्मनि ॥ ३१ ॥

[1]त्रिंशत्सार्धाङ्गुलः प्राणो यत्र प्राणैः प्रतिष्ठितः ।

एष प्राण इति ख्यातो बाह्यप्राणस्य गोचरः ॥ ३२ ॥

तच्चिन्तनाप्रकारमाह **सन्धिमिति** ॥ ३१ ॥ अर्धाङ्गुलाधिकत्रिंशदङ्गुलगतिः **प्राणो यत्र** हृदयाकाशे वागादिभिः **प्राणैः** सह **प्रतिष्ठितः** योऽयं **बाह्यप्राणस्य** आधिदैविकस्य **गोचरो** विषयो भवति **एष** एव आध्यात्मिक**प्राण** इति विख्यातो भवति । स यत्र हृदयाकाशे प्रत्यग्भास्ये स्वोपजीव्यकरणग्रामेण सह विलीयते तद्विलयाधिकरणं प्रत्यगभिन्नं ब्रह्म तस्मिन् **ब्रह्मात्मनि** ब्रह्माकारपरिणतमनसा तद्भासकप्रत्यगात्मना **सन्धिमैक्यं कृत्वा** प्रत्यक्परभेदसापेक्षतदैक्यगतसविशेषांशापह्नवसिद्धं ब्रह्म स्वमात्रमिति **विचिन्तयेत्** ॥ ३२ ॥

श्वासप्रमाणम्

अशीतिश्च शतं चैव सहस्राणि त्रयोदश ।

[2]लक्षश्चैकोननिश्वास अहोरात्रप्रमाणतः ॥ ३३ ॥

अहोरात्रनिर्वर्त्यश्वासप्रमाणमाह—**अशीतिश्चेति** ॥ द्व्यशीत्यधिकशतोत्तरसहस्रलक्षसङ्ख्याविशिष्टनिश्वासादिः अहोरात्रप्रमाणतो गण्यते । श्रुत्यन्तरे तु षट्सङ्ख्याहोरात्रयोः एकविंशतिसहस्राणि षट्छतान्यधिकानि भवन्तीत्याम्नातम् । प्रकारद्वयप्रविभातसङ्ख्याभेदस्तु बाल्यादिशरीरतारतम्यतः उपपद्यते । सुखं तिष्ठतो दृढगात्रस्य श्वासगतिः स्तिमिता विभाति, एतद्विपरीतस्य विपरीतं भवतीति उभयमपि सङ्गच्छते, नहि विरोधोऽस्तीत्यर्थः ॥ ३३ ॥

[1] त्रिंशत्यार्धा-क. त्रिंशत्वार्धाङ्गुलः-अ, उ. त्रिंशत्सार्धाङ्गुलः-इति तु पाठः व्याख्यानुसारीति धृतः

[2] लक्षश्चैकोवि-अ १. लक्षश्चैकोवि-क, अ २.

प्राणादीनां स्थानानि

प्राण आद्यो हृदि स्थाने अपानस्तु पुनर्गुदे ।
समानो नाभिदेशे तु उदानः कण्ठमाश्रितः ॥ ३४ ॥
व्यानः सर्वेषु चाङ्गेषु व्याप्य तिष्ठति सर्वदा ।

एवं श्वासकृत्प्राणादिस्थानान्याह—**प्राण इति ॥ ३४ ॥**

तेषां वर्णभेदाः

अथ वर्णास्तु पञ्चानां प्राणादीनामनुक्रमात् ॥ ३५ ॥
रक्तवर्णो मणिप्रख्यः प्राणवायुः प्रकीर्तितः ।
अपानस्तस्य मध्ये तु इन्द्रकोपसमप्रभः ॥ ३६ ॥
समानस्तु द्वयोर्मध्ये गोक्षीरधवलप्रभः ।
आपाण्डर उदानश्च व्यानो [1]ह्यर्चिसमप्रभः ॥ ३७ ॥

प्राणाद्याकृतिवर्णभेदमाह **अथेति ॥ ३५-३७ ॥**

परमफलम्

यस्येदं मण्डलं भित्त्वा मारुतो याति मूर्धनि ।
यत्र यत्र म्रियेद्वाऽपि न स भूयोऽभिजायते ।
न स भूयोऽभिजायत इत्युपनिषत् ॥ ३८ ॥

षडङ्गयोगाभ्यासपरमफलं प्रकटयन् उपसंहरति—**यस्येति ॥ यस्य** मुमुक्षोः योगिनो **मारुतः** प्राणादिः **इदं** स्वाधिष्ठेयहृदयादि **मण्डलं अभ्यासबलेन**

[1]सम-अ.

भित्त्वा मूर्धनि सहस्रारे विद्यमानं तुर्यं तुर्यतुर्यं वा स्वमात्रमित्येति सोऽयं तादृशपरिपक्वयोगी "तीर्थे श्वपचगृहे वा" इत्यादिश्रुत्यनुरोधेन यत्र क्व जीवन् तिष्ठेत् म्रियेद्वाऽपि सोऽयं नहि भूयोऽभिजायते ब्रह्मवेदनकाले ब्रह्मैव भवतीत्यर्थः । आवृत्तिः आदरार्था । इत्युपनिषत्समाप्त्यर्थः ॥ ३८ ॥

श्रीवासुदेवेन्द्रशिष्योपनिषद्ब्रह्मयोगिना ।
लिखितं स्याद्विवरणं नादोपनिषदः स्फुटम् ।
प्रकृतोपनिषद्व्याख्याग्रन्थः षष्ट्युत्तरं शतम् ॥

इति श्रीमदीशाद्यष्टोत्तरशतोपनिषच्छास्त्रविवरणे एकविंशतिसङ्ख्यापूरकं
अमृतनादोपनिषद्विवरणं सम्पूर्णम्

अमृतबिन्दूपनिषत्

सह नाववतु—इति शान्तिः

मन एव बन्धमोक्षयोः कारणम्

मनो हि द्विविधं प्रोक्तं शुद्धं चाशुद्धमेव च ।
अशुद्धं कामसंकल्पं शुद्धं कामविवर्जितम् ॥ १ ॥
मन एव मनुष्याणां कारणं बन्धमोक्षयोः ।
बन्धाय विषयासक्तं मुक्त्यै निर्विषयं स्मृतम् ॥ २ ॥

अमृतबिन्दूपनिषद्वेद्यं यत् [1] परमामृतम् ।
तदेव हि त्रिपाद्रामचन्द्राख्यं नः परा गतिः ॥

अथ खलु कृष्णयजुर्वेदप्रविभक्तेयं अमृतबिन्दूपनिषत् । तस्या उपोद्घातादिसङ्गतिः कठवल्ल्यादिसमा । इयं आख्यायिकां विना अवान्तररूपेण प्रवृत्ता । अल्पग्रन्थतोऽस्या विवरणमारभ्यते ॥ मन इति ॥ स्वातिरिक्ताविद्यापदतत्कार्यापह्नवसिद्धनिष्प्रतियोगिकब्रह्ममात्राज्ञदृष्टिः यत् स्वातिरिक्तमस्तीति मननं करोति तदेव मनो मायातत्त्वम् । हिशब्देन त्रिगुणात्मकमनसो निष्प्रतियोगिकाभावरूपत्वं द्योत्यते । स्वाज्ञदृष्टिसत्यवद्विकल्पितमनो द्विविधमिति

[1] परमाक्षरं—उ, अ १.

शास्त्रतः प्रोक्तम् । किंरूपेण द्विविधमित्यत्र तत्सत्वांशः शुद्धं च तद्रजस्तमोंशः अशुद्धमेव च । पदद्वयं श्रुतिरेव व्याकरोति अशुद्धमिति । कामसङ्कल्पविशिष्टं अशुद्धं अविद्यांशत्वात्, कामसामान्यविवर्जितं शुद्धं विद्यांशत्वात् ॥ १ ॥ बन्धमोक्षहेतुः मन एवेत्याह—मन एवेति । सङ्कल्पादिवृत्तिमन्मनो बन्धहेतुः निःसङ्कल्पं मनो मुक्तिहेतुः इत्यर्थः ॥ २ ॥

मनोनिरोधो मोक्षोपायः

यतो निर्विषयस्यास्य मनसो मुक्तिरिष्यते ।
अतो निर्विषयं नित्यं मनः कार्यं मुमुक्षुणा ॥ ३ ॥
निरस्तविषयासङ्गं संनिरुद्धं मनो हृदि ।
यदा यात्यात्मनोऽभावं तदा तत्परमं पदम् ॥ ४ ॥
तावदेव निरोद्धव्यं यावद्धृदि गतं क्षयम् ।
एतज्ज्ञानं च ध्यानं च शेषो न्यायश्च विस्तरः ॥ ५ ॥

यतो निर्विषयमनसो मुक्तिहेतुत्वं अतो मुमुक्षुणा मनो निर्विषयं कार्यमित्याह—यत इति ॥ ३ ॥ अमनीभाव एव मोक्ष इत्याह—निरस्तेति । यस्य मनसो ब्रह्मध्यानतो विषयासङ्गो निरस्तः तत् निरस्तविषयासङ्गं मनो हृदि संनिरुद्धं सत् यदा यस्मिन् काले आत्मनः स्वस्य अभावं अमनीभावं याति तदा तस्मिन् काले यत् सर्वापह्नवसिद्धपदं तत् परमं पदं निष्प्रतियोगिकब्रह्ममात्रमवशिष्यते ॥ ४ ॥ मनस्तत्कार्यापह्नवसिद्धं ब्रह्मेति यत् तदेव ज्ञानमिति सर्ववेदान्तपरमतात्पर्यमित्याह—तावदिति । यावद्धृदि कामादिवृत्तिमन्मनः क्षयं गतं तावदेव मनो निरोद्धव्यम् । यत् मनस्तत्कार्यापह्नवसिद्धं ब्रह्मस्वमात्रमिति जानाति तत् एतत् निर्विशेषज्ञानं ध्यानं च । शब्दद्वयतः निष्प्रतियोगिकस्वमात्रतया ब्रह्म ज्ञातुं ध्यातुं

शक्यते इति द्योत्यते । स्वातिरेकेण ज्ञातुं ध्यातुं किमन्यदस्ति, ब्रह्ममात्रस्यैव निष्प्रतियोगिकत्वात् । तदतिरेकेण शेषो न्यायश्च विस्तरः वाचारम्भणमात्रत्वात, "वाचारम्भणं विकारो नामधेयम्" इति श्रुतेः ॥ ५ ॥

ब्रह्मज्ञानेन ब्रह्मभावप्राप्तिः

नैव चिन्त्यं न चाचिन्त्यं न चिन्त्यं चिन्त्यमेव च ।
पक्षपातविनिर्मुक्तं ब्रह्म संपद्यते [1]तदा ॥ ६ ॥

ब्रह्मयाथात्म्यविदः तद्भावापत्तिमाह—नैवेति । स्वातिरेकेण एतत् नैव चिन्त्यं स्वमात्रत्वात् । स्वमात्रतया नचाचिन्त्यं, सविशेषतया न चिन्त्यं, स्वयमेवेति चिन्त्यमेव तत् । नैव चिन्त्यमित्यादिपक्षे पततीति पक्षपातं तद्विनिर्मुक्तं ब्रह्म स्वमात्रमिति यदा वेद तदा वेदनसमकालं ब्रह्म सम्पद्यते ब्रह्मैव भवतीत्यर्थः ॥ ६ ॥

सविशेषब्रह्मानुसन्धानेन निर्विशेषब्रह्माधिगमः

स्वरेण संधयेद्योगमस्वरं भावयेत्परम् ।
अस्वरेणानुभावेन [2]नाभावो भाव इष्यते ॥ ७ ॥
तदेव निष्कलं ब्रह्म निर्विकल्पं निरञ्जनम् ।
तद्ब्रह्माहमिति ज्ञात्वा ब्रह्म संपद्यते ध्रुवम् ॥ ८ ॥
निर्विकल्पमनन्तं च हेतुदृष्टान्तवर्जितम् ।
अप्रमेयमनादिं च यत् ज्ञात्वा मुच्यते बुधः ॥ ९ ॥

[1] ध्रुवं—क, अ २. [2] नभावो-क, अ १, अ २.

न निरोधो न चोत्पत्तिर्न बद्धो न च साधकः ।
न [1]मुमुक्षुर्न वै मुक्तः इत्येषा परमार्थता ॥ १० ॥

सविशेषब्रह्मोपासनया निर्विशेषब्रह्माधिगमः स्यादित्याह—**स्वरेणेति** । ओङ्कारस्वरेण आदावपरब्रह्मयोगं सन्धयेत् सविशेषेश्वरोऽस्मीत्यनुसन्धानं कुर्यात् । सविशेषब्रह्मप्रसादात् **परं अस्वरं** निर्विशेषं **ब्रह्म भावयेत्** । **अस्वरेण** निर्विशेषब्रह्मणा **अनुभावेन** अनुभवेन अस्वरं परं ब्रह्मैव भावयेदिति पूर्वेणान्वयः । स्वराभावोऽस्वर इति चेन्न, अस्वरस्य निर्विशेषब्रह्मतया भावरूपत्वात् । न हि भावः कदाऽप्यभाव इष्यते ॥ ७ ॥ यस्मादेवं तस्मात् यदेव अस्वरं **तदेव** प्राणादिनामान्तषोडशकला-वैलक्षण्येन उपबृंहणात् **निष्कळं ब्रह्म** स्वविकल्पितविकल्पासम्भवात् **निर्विकल्पं** स्वाञ्जनार्हस्वातिरिक्तवैरळ्यात **निरञ्जनं** यत् **तत् ब्रह्माहमिति ज्ञात्वा** तज्ज्ञानसमकालं **ध्रुवं** निर्विशेषं **ब्रह्म सम्पद्यते** ॥ ८ ॥ उक्तार्थमेव भङ्ग्यन्तरेणाह—**निर्विकल्पमिति** । जाग्रज्जाग्रदाद्यविकल्पानुङ्कारसान्तचतु-ष्पञ्चदशविकल्पाः यत्र स्वावशेषतया पर्यवस्यन्ति तत् निर्विकल्पम् । निर्वि-कल्पस्य सूक्ष्मत्वेनान्तवत्त्वं स्यादित्यत आह—**अनन्तं चेति** । त्रिविधपरि-च्छेदवैरळ्यात् "देशतः कालतो वस्तुतः परिच्छेदरहित ब्रह्म" इति श्रुतेः । चशब्दो निष्प्रतियोगिकानन्त्यद्योतकः । उक्तार्थे को हेतुः, दृष्टान्तो वा कः, इत्यत आह—**हेतुदृष्टान्तवर्जितमिति** । स्वसिद्धौ स्वातिरिक्तहेत्वभावात् स्वस्य निष्प्रतियोगिकत्वेन दृष्टान्तासम्भवाच्च । यतः एवं अतः तत् **अप्रमेयं** वेदान्तेतरप्रमाणासहत्वात् । अप्रमेयत्वेऽपि तदादिमत् स्यात् इत्यत आह —**अनादिं चेति** । निष्प्रतियोगिकसन्मात्रस्य उत्पत्त्यादेरसम्भवात् । च-शब्दतः स्वातिरिक्तस्याप्यजत्वं द्योत्यते, "पश्यतेहापि सन्मात्रमसदन्यत्" "ब्रह्ममात्रमसन्नहि" इति श्रुतेः । यत् एवं **ज्ञात्वा बुधो** विद्वान् ज्ञानसमकालं स्वातिरिक्तास्तित्वभ्रमतो **मुच्यते** तत् स्वमात्रमवशिष्यते इत्यर्थः ॥ ९ ॥

[1] मुमुक्षान—अ २.

उत्पत्तिप्रलयबन्धमोक्षादिव्यवस्थादर्शनात् कथं स्वमात्रसिद्धिरित्याशङ्क्य अस्याः स्वाविद्याविकल्पितत्वेन कारणतुल्यत्वात् निष्प्रतियोगिकस्वमात्रसिद्धिः निरङ्कुशा इत्याह—**न निरोध** इति। **निरोधः** प्रलयः, **उत्पत्तिः** जातिः, **बद्धः** संसारी, मोक्षसाधकः प्रमाता, स्वाज्ञानतत्कार्यात मोक्तुमिच्छुः **मुमुक्षुः**, संछिन्नसंसृतिपाशो **मुक्तः** इत्यादिकल्पना यतः स्वातिरिक्तास्तिताप्रभवा अतः स्वातिरिक्तसामान्यस्य शशविषाणवदवस्तुत्वेनाविद्यकत्वात् स्वातिरिक्तोत्पत्तिप्रलयादिः निष्प्रतियोगिकाभावरूपः इत्यत्र मायाविद्याज्ञानविश्वाभावान्तःकरणादयः ब्रह्मातिरिक्तपर्यायाः अत्यन्ताभावरूपिणः इति परमाक्षरोक्तेः निरोधादि न स्वमात्रे अस्ति **इत्येषैव परमार्थता**। अतो निष्प्रतियोगिकब्रह्ममात्रसिद्धिः निरङ्कुशेत्यर्थः ॥ १० ॥

आत्मनः एकत्वम्

एक एवात्मा मन्तव्यो जाग्रत्स्वप्नसुषुप्तिषु।
स्थानत्रयव्यतीतस्य पुनर्जन्म न विद्यते ॥ ११ ॥
एक एव हि भूतात्मा भूते भूते व्यवस्थितः।
एकधा बहुधा चैव दृश्यते जलचन्द्रवत् ॥ १२ ॥

अवस्थाभेदानुरोधेन तदध्यक्षभेदः स्यादित्यत आह—**एक इति**। चतुश्चतुर्धाभिन्नजाग्रत्स्वप्नसुषुप्तिषु विश्वविश्वाद्यनुङ्गैकरसाविकल्पान्तभेदेन यो विभागः सोऽयं **आत्मा एक एव** इति **मन्तव्यः**, घटशरावाद्यनुगतव्योमैकत्ववत् जाग्रज्जाग्रदाद्यवस्थानुगतविश्वविश्वादिचित एकत्वात्। एवं चतुश्चतुर्धाभिन्न**स्थानत्रयव्यतीतस्य** तुर्यावस्थाऽऽरूढस्य विश्वविश्वादिरूपेण **पुनर्जन्म न विद्यते** तथा जन्महेतुस्वाज्ञानवैरळ्यात् ॥ ११ ॥ कथं पुनरात्मनः एकत्वमित्यत्र सदृष्टान्तमेकत्वमाह—**एक इति**। पञ्चभूतभौतिकव्यवस्थित **आत्मा एक एव हि** स्वज्ञादिदृश्यनुरोधेन नभोजलबिम्बप्रतिबिम्बभावमापन्नचन्द्रवत् शिवजीवभेदेन **एकधा बहुधेव दृश्यते**, वस्तुत आत्मन एकत्वात् ॥ १२ ॥

आत्मनो जन्मनाशराहित्यम्

घटसंवृतमाकाशं नीयमाने घटे यथा ।
घटो [1]लीयेत नाकाशः तद्वज्जीवो नभोपमः ॥ १३ ॥
घटवद्विविधाकारं भिद्यमानं पुनः पुनः ।
तद्भेदे च न जानाति स जानाति च नित्यशः ॥ १४ ॥

सर्वोपाध्यवच्छिन्नात्मनः तत्सत्त्वासत्त्वाभ्यां स्थितिनाशौ स्यातामित्यत आह—घटेति । **घटसंवृतं** घटावच्छिन्नाकाशं अन्येन घटे **नीयमाने यथा** घटावच्छिन्नाकाशं नीतमिव भाति न वस्तुतः आकाशस्याचलत्वात्, यदा **घटो लीयेत न** हि तदवच्छिन्नाकाशो लीनो भवति तथा **तद्वत् नभोपमो जीवः** स्वोपाधिचलननाशाभ्यां जीवो न चलति न नश्यति चेत्यर्थः "जीवापेतं वाव किलेदं म्रियते न जीवो म्रियते" इति श्रुतेः ॥ १३ ॥ स्वोपाधिसत्त्वासत्त्वाभ्यां आत्मा दृश्यते न दृश्यते इति यो जानाति स एव आत्मयाथात्म्यं जानातीत्याह—घटवदिति । यथा घटादिः **विविधाकारः** तद्वत् तदवच्छिन्नाकाशमपि **पुनः पुनः** उद्भूतघटादिरूपं विविधाकारमिव दृश्यते । तद्घटादीनां भेदे ध्वंसे लोकस्तदवच्छिन्नाकाशभेदं यथा न जानाति अखण्डाकाशमेव पश्यति, तद्याथात्म्यज्ञस्तु घटाद्युपाधिसत्त्वासत्त्वाभ्यां **नित्यशोऽखण्डाकाशमेव जानाति** ॥ १४ ॥

निरुपाधिकात्मदर्शनम्

शब्दमायावृतो नैव [2]तमसा याति पुष्करे ।
भिन्ने तमसि चैकत्व[3]मेक एवानुपश्यति ॥ १५ ॥

[1] नीयेत—अ, अ २. [2] तमसो—क, अ, अ १, अ २. [3] मेकमेवा—क.

तथा स्वाज्ञदृष्टिरुपाध्यनुकारिनानात्मभेदं पश्यति उपाध्यपाये तद्भेदं न पश्यति । परमार्थमतिस्तूपाधिसत्त्वासत्त्वाभ्यां निरुपाधिकमात्मानमेकमेवानुपश्यतीत्याह—**शब्देति** । शब्दार्थप्रपञ्चहेतुभूता **शब्दमाया**, यद्वा अर्थशून्यतया शब्दमात्ररूपिणी वाचारम्भणात्मिका अघटितघटनापटीयसी माया, तयाऽऽवृतो जन्तुः **तमसा** अन्धकारेण आवृतजन्तुवत् **पुष्करे** परमपावने स्वात्मनि **नैव याति** । प्रदीपादिना अन्धकारभेदवत् स्वज्ञानेन स्वाज्ञानतमसि **भिन्ने**, चकारात् तद्वासनायां नष्टायां, प्रत्यक्परचितोः **एकत्वं एक एवानुपश्यति** । यद्वा—स्वाज्ञस्तु **शब्दमायावृतः** सन् **पुष्करे तमसाऽऽवृतजन्तुवत्** सर्वभूतप्रत्यग्ब्रह्मैक्यज्ञानं **नैव याति** । स्वज्ञस्तु स्वाज्ञानतमसि **भिन्ने** पुष्करे परमात्मनि सर्वभूतप्रत्यगेकत्वमनुपश्यति । परमार्थदृष्टिस्तु प्रत्यक्परविभागैक्यासहब्रह्मतत्त्वं निष्प्रतियोगिकस्वमात्रमिति पश्यति ॥ १५ ॥

शब्दब्रह्मध्यानेन परब्रह्माधिगमः

शब्दाक्षरं परं ब्रह्म तस्मिन्क्षीणे यदक्षरम् ।
तद्विद्वानक्षरं ध्यायेद्यदीच्छेच्छान्तिमात्मनः ॥ १६ ॥
द्वे विद्ये वेदितव्ये तु शब्दब्रह्म परं च यत् ।
शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति ॥ १७ ॥
ग्रन्थमभ्यस्य मेधावी ज्ञानविज्ञानतत्परः ।
पलालमिव धान्यार्थी त्यजेद् ग्रन्थमशेषतः ॥ १८ ॥

निर्विशेषब्रह्ममात्रावगत्युपायमाह—**शब्देति** । निर्विशेषब्रह्मास्त्युपायत्वेन यत् प्रसिद्धं **शब्दाक्षरं** ॐ इत्येतदक्षरं **परं ब्रह्मालम्बनं** तदर्थज्ञानतः **तस्मिन्** सावयवे शब्दाक्षरे **क्षीणे** विलयं प्रपन्ने सति **यत्** शब्दाक्षरविलयाधिकरणं **अक्षरं** न क्षरति तदेतत् आधेयाधारात्मकक्षराक्षरगतहेयांशापह्नवसिद्धं परमाक्षरं **यदि विद्वानात्मनः** स्वातिरिक्तक्षराक्षरप्रपञ्चशान्तिं **इच्छेत्** तदा **तदक्षरं**

अहमस्मीति ध्यायेत् ॥ १६ ॥ शब्दब्रह्मयाथात्म्यज्ञानतः शब्दप्रपञ्च-निरसनपूर्वकं तदर्थब्रह्माधिगमो भवतीत्याह—द्वे इति । शब्दब्रह्म परब्रह्मेति यत् ब्रह्म द्विविधं तच्छब्दपरब्रह्मगोचरे द्वे विद्ये वेदितव्ये सगुण-निर्गुणब्रह्मयाथात्म्ये ज्ञातव्ये । तु शब्दोऽवधारणार्थः । तयोरुपायोपेयात्मक-त्वात् तत्रोपायभूते शब्दब्रह्मणि सविशेषब्रह्मणि निष्णातो मुनिः—प्रणववाच्यब्रह्मानुसन्धानतः निर्विशेषब्रह्मज्ञानमुदेति—तज्ज्ञानोदयसमकालं स्वातिरिक्तसर्वापह्नवसिद्धं ब्रह्म निष्प्रतियोगिकस्वमात्रमिति परं ब्रह्माधिगच्छति तन्मात्रतया विद्वानवशिष्यते इत्यर्थः ॥ १७ ॥ ब्रह्माधिगमेऽपि तद्धेतुग्रन्थाभ्यासः कर्तव्य इत्यत आह—ग्रन्थमिति । साधनचतुष्टयसम्पन्नो विद्वान् यावत् ब्रह्ममात्रज्ञानं नोदेति तावत् तज्ज्ञानविज्ञानतत्परः सन् सर्ववेदान्तग्रन्थजातमभ्यस्य संशयादिपञ्चदोषशान्त्यन्तं गुरुमुखात् श्रवणं कृत्वा अथ मननिदिध्यासनप्रभवसम्यज्ज्ञानं यदि जायते तदा धान्यार्थी पलालमिव ग्रन्थजातमशेषतः त्यजेत्, प्रयोजनाभावात् । नहि सरित्पारं प्रविष्टस्य नौकापेक्षाऽस्ति, तथेत्यर्थः ॥ १८ ॥

सर्वभूतप्रत्यगात्मनः एकत्वम्

गवामनेकवर्णानां क्षीरस्याप्येकवर्णता ।
क्षीरवत्पश्यते ज्ञानं लिङ्गिनस्तु गवां यथा ॥ १९ ॥
घृतमिव पयसि निगूढं भूते भूते च वसति विज्ञानम् ।
[1]सततं मनसि मन्थयितव्यं मनोमन्थानभूतेन ॥ २० ॥

नानाऽन्तःकरणावच्छिन्नप्रतीचो नानात्वं स्यादित्यत आह—गवामिति । नानावर्णविशिष्टगोक्षीरं यथा एकरूपं तथा नानालिङ्गयनुगतप्रत्यज्ञानमेकरूपम्।

[1] अत्र उत्तरार्धं मूलाकरानुसारेण धृतम्. तत्र "मनसि" इत्येतस्य लोपो युज्येत. "मनसा मन्थानभूतेन" इति मु. पाठः

तुशब्दोऽवधारणार्थः ॥ १९ ॥ एवं सर्वभूतप्रतीचः एकत्वं किं न भातीत्यत आह—**घृतमिवेति** । यथा **पयसि निगूढं घृतं** मथनादिना आविर्भवति तथा **भूते भूते** सर्वभूतान्तःकरणे तद्वृत्तिभावाभावप्रकाशकमपि **विज्ञानं प्रत्यक्तत्त्वं** स्वाज्ञदृष्टिनिगूढतया **वसति** । चशब्दो निस्संशयार्थः । प्रत्यगभिमुखीभूते **मनसि मन्थानभूतेन** प्रत्यग्भावमापन्नेन मनसा **मन्थयितव्यम्** । एवं सन्ततमननात् पराक्सापेक्षप्रत्यक्परविभागैक्यगतहेयांशापह्नवसिद्धं ब्रह्ममात्रं निष्प्रतियोगिकतया आविर्भवतीत्यर्थः ॥ २० ॥

तत्साक्षात्कारसाधनं ध्यानम्

ज्ञाननेत्रं समाधाय चोद्धरेद्वह्निवत् परम् ।
निष्कलं निश्चलं शान्तं तद् ब्रह्माहमिति स्मृतम् ॥ २१ ॥
सर्वभूताधिवासं यद्भूतेषु च वसत्यपि ।
सर्वानुग्राहकत्वेन तदस्म्यहं वासुदेवः ॥ २२ ॥

तदस्म्यहं वासुदेव इत्युपनिषत् ॥

सर्वभूतनिगूढं ब्रह्म कथं साक्षात्कर्तुं शक्यमित्यत आह—**ज्ञानेति** । सर्वापह्नवसिद्धब्रह्ममात्रगोचरज्ञानमेव नेत्रं **ज्ञाननेत्रमन्तःकरणे समाधाय** विन्यस्य —चशब्दात् ज्ञानेतरसाधनासिद्धत्वं द्योत्यते—दार्वोः मथनाविर्भूतवह्निवत् निष्प्रतियोगिकं **परं ब्रह्म उद्धरेत्** । प्राणादिकलासु सत्सु कथं निष्प्रतियोगिकता इत्यत आह—**निष्कलमिति** । ब्रह्ममात्रसिद्धेः प्राणादिनामान्तषोडशकलापह्नवपूर्वकत्वात् । पूर्णत्वात् **निश्चलं** स्वातिरिक्तशान्तं यदवशिष्यते **तत् निष्कलमित्यादि**पदत्रयविशिष्टं **ब्रह्मेति स्मृतं**, ब्रह्म स्वमात्रमिति पर्यवसन्नमित्यर्थः ॥ २१ ॥ निष्प्रतियोगिकब्रह्ममात्रस्य अर्धमात्राभागत्रयावष्टम्भतः सार्वात्म्यं वस्तुतः स्वमात्रसिद्धिं प्रकटयन् उपसंहरति—**सर्वेति** । यत् सर्वभूतानामधिवासः स्थानं अधिष्ठानत्वात्, यदन्तर्याम्यात्मनाऽपि **भूतेषु च वसति, यत् सर्वानुग्राहकत्वेन**

कूटस्थचिन्मात्रतया अवशिष्यते **तदस्म्यहं वासुदेवः** तत्परवासुदेवाख्यं ब्रह्मास्मि। यः स्वातिरिक्ताधिवसनाद्वासुः सचासौ अधिष्ठेयसापेक्षाधिष्ठानगतहेयांशापह्नव-सिद्धनिष्प्रतियोगिकब्रह्ममात्रतया दीव्यत इति देवः परमात्मा स्वमात्रमवशिष्यत इति फलितोऽर्थः। आवृत्तिरादरार्था। **इत्युपनिषच्छब्दः** प्रकृतोपनिषत्स-माप्त्यर्थः॥ २२॥

श्रीवासुदेवेन्द्रशिष्योपनिषद्ब्रह्मयोगिना।
लिखितं स्याद्विवरणं बिन्दूपनिषदः स्फुटम्।
प्रकृतोपनिषद्व्याख्याग्रन्थस्त्रिशाधिकं शतम्।

इति श्रीमदीशाद्यष्टोत्तरशतोपनिषच्छास्त्रविवरणे विंशतिसङ्ख्यापूरकं
अमृतबिन्दूपनिषद्विवरणं सम्पूर्णम्

क्षुरिकोपनिषत्

सह नाववतु—इति शान्तिः

योगाधिकारः

क्षुरिकां संप्रवक्ष्यामि धारणां योगसिद्धये ।
यां प्राप्य न पुनर्जन्म योगयुक्तस्य जायते ॥ १ ॥
वेदतत्त्वार्थविहितं यथोक्तं हि स्वयम्भुवा ।

कैवल्यनाडिकान्तस्थपराभूमि[1]वरासनम् ।
क्षुरिकोपनिषद्योगभासुरं राममाश्रये ॥

इह खलु कृष्णयजुर्वेदान्तर्गतेयं क्षुरिकोपनिषत् ज्ञानप्रतिबन्धकनिरसनयोगशास्त्ररूपिणी प्रवृत्ता । तस्याः उपोद्घातादि कठवल्लीवदूह्यम् । उक्तलक्षणलक्षितायाः अस्याः स्वल्पग्रन्थतो विवरणमारभ्यते । श्रुतिरेव यथोक्ताधिकारिण उद्दिश्य स्वच्छन्दं प्रवृत्तेति यत्तद्विद्यास्तुत्यर्थम् । केयं श्रुतिरित्यत आह—**क्षुरिकामिति** ॥ ये यथोक्तयोगसाधनसम्पन्नाः तान् प्रति स्वाज्ञानहृदयग्रन्थिच्छेदनपटीं **क्षुरिकामिव** शास्त्ररूपां **धारणां** ब्रह्मातिरिक्तं न किञ्चिदस्तीति भावनालक्षणां **सम्यक् प्रवक्ष्यामि** । किमर्थं ? ब्रह्ममात्रानुसन्धानं

[1] निवासिनं-इति पाठान्तरम् .

योगः तत्सिद्धये तदवगतय इत्यर्थः। **यां** उक्तलक्षणलक्षितां धारणां **प्राप्य योगयुक्तस्य** मुनेः **न पुनर्जन्म जायते** जनिमृतिकलना न हि भवति तामेव संप्रवक्ष्यामीति पूर्वेणाऽन्वयः ॥ १ ॥ किं तद्योगलक्षणं, केनोक्तं, किं तत्साधनजातं, इत्यत आह—वेदेति । स्वयमेव भवतीति स्वयंभूः तेन **स्वयंभुवा** ब्रह्मणा परमेश्वरेण योगशिखाऽऽदौ ब्रह्माणं प्रति **यथोक्तं** तत् वेदतत्त्वार्थविहितं सर्ववेदान्तसम्मतमित्यर्थः ॥

आसनप्राणायामौ

निःशब्दं देशमास्थाय तत्रासनमवस्थितः ॥ २ ॥
कूर्मोऽङ्गानीव संहृत्य मनो हृदि निरुध्य च ।
मात्राद्वादशयोगेन प्रणवेन शनैःशनैः ॥ ३ ॥
पूरयेत् सर्वमात्मानं सर्वद्वारं निरुध्य च ।
उरोमुखकटिग्रीवं किंचिद्धृदयमुन्नतम् ॥ ४ ॥
प्राणान् संधारयेत् तस्मिन् नासाभ्यन्तरचारिणः ।
भूत्वा तत्रायतप्राणः शनैरुच्छ्वासमुच्छ्वसेत् ॥ ५ ॥

तथाविधयोगसिद्धये साधनान्युपदिशति—**निःशब्दमिति** ॥ यो निर्विकल्पकयोगार्थी सोऽयं जनसंबाधराहित्यात् **निःशब्दं देशमास्थाय तत्र** रहस्यप्रदेशे सिद्धपद्माद्यासनं **अवस्थितः** सन् ॥ २ ॥ श्रोत्रादीनीन्द्रियाणि **कूर्मोऽङ्गानीव संहृत्य** स्वहृदि **मनो निरुध्य** । चशब्दात् प्राणेन्द्रियद्वारसङ्कल्पविरळं मनः कृत्वेति द्योत्यते ।

जानू प्रदक्षिणीकृत्य न द्रुतं न विलम्बितम् ।
अङ्गुलीस्फोटनं कुर्यात् सा मात्रा परिकीर्तिता ॥

इति श्रुतिसिद्धकालरूपमात्राद्वादशयोगेन चतुर्मात्रप्रणवेन **शनैःशनैः** ॥ ३ ॥ **सर्वमात्मानं** स्वशरीरं वायुना **पूरयेत** । वायुनिर्गमनद्वारेषु सत्सु कथं वायुधारणा स्यादित्यत्र अपानादि**सर्वद्वारं निरुध्य** । **च**शब्दात् पूरितं वायुं अष्टचत्वारिंशन्मात्राकालं कुम्भयेदिति द्योत्यते । एवं धारणां कृत्वा यथावत् रेचयेत इत्याह—**उर** इति । सिद्धाद्यासनस्थितो योगी उरश्च मुखं च कटिश्च ग्रीवा च **उरोमुखकटिग्रीवमिति** । प्राण्यङ्गत्वात एकवद्भावः । **हृदयं** च **किंचित्** उन्नतं विधाय ॥ ४ ॥ एवं यथोक्तकालं **आयतप्राणो भूत्वा शनैःशनैः** उच्छ्वासं उच्छ्वसेत् चतुर्विंशतिमात्राकालं पूरितं वायुं रेचयेत् । इडया वायुमापूर्य कुम्भयित्वा पिङ्गळया विरेच्य पुनः पिङ्गळयाऽऽपूर्य कुम्भयित्वा इडया विरेचयेत । एवं प्रतिदिनं चतुष्कालं अशीति-प्राणायामं कुर्यात इति भावः ॥ ५ ॥

प्रत्याहारः

स्थिरमात्मदृढं कृत्वा अङ्गुष्ठेन समाहितः ।
द्वे गुल्फे तु प्रकुर्वीत जङ्घे चैव त्रयस्त्रयः ॥ ६ ॥
द्वे जानुनी तथोरू द्वे गुदे शिश्नं त्रयस्त्रयः ।
पायोरायतनं तत्र नाभिदेशे समाश्रयेत् ॥ ७ ॥
तत्र नाडी सुषुम्ना तु नाडिभिर्दशभिर्वृता ।
तत्र रक्ता च पीता च कृष्णा ताम्रा विलोहिता ॥ ८ ॥
अतिसूक्ष्मा च तन्वी च [1]शुक्लां नाडीं समाश्रयेत् ।
तत्र सञ्चारयेत् प्राणान् ऊर्णनाभीव तन्तुना ॥ ९ ॥

[1] शुक्ला नाडी-अ.

ततो रक्तोत्पलाभासं हृदयायतनं महत् ।
हरं पुण्डरीकं तत् वेदान्तेषु निगद्यते ॥ १० ॥
तद्भित्त्वा [1]कण्ठमायाति तन्नाडीं पूरयेदिति ।

आसनप्राणायामलक्षणमुक्त्वा प्रत्याहारलक्षणमाह—**स्थिरमिति** । एवं प्राणाभ्यासपाटवात योगी सिद्धं पद्मासनं वा आस्थाय समाहितेन्द्रियो भूत्वा कनिष्ठिकानामिकाभ्यां सहाङ्गुष्ठेन नासिकापुटं निरुध्य हृदये **स्थिरं** यथा भवति तथा **स्वात्ममनःप्राणं** दृढं कृत्वा केवलकुम्भकमास्थाय । अथ द्वे **गुल्फे** वर्तेते तत्र वायुं समागोप्य धारणां **कुर्वीत** । तुशब्दतः पादाङ्गुलीष्वपि वायुमागोपयेदिति द्योत्यते । ततो **जङ्घे** जङ्घाप्रदेशे **चैव** । **त्रयस्त्रय** इत्यावृत्तिः आदरार्था । पादाङ्गुलीगुल्फजङ्घेषु त्रयस्त्रय इति द्वितीयार्थे प्रथमा—त्रिसङ्ख्याकान् दृष्टिमनःप्राणान् क्रमेण आरोप्य ततस्ततः प्रत्याहरेत् ॥ ६ ॥ **तथा** द्वे **जानुनी ऊरू** द्वे **गुदे शिश्ने** च **त्रयस्त्रयो** दृष्टिमनःप्राणान् प्रत्याहरेत् । जानूरुमूलाधारस्वाधिष्ठानेषु तत्र तत्र कुम्भित्वा प्रत्याहृत्य अथ **पायोः** मूलाधारादेः **यदायतनं** आश्रयः **तत्र नाभिदेशे** मणिपूरके दृष्टिमनःप्राणान् समागोप्य तज्जयपर्यन्तं **समाश्रयेत्** ॥ ७ ॥ **तत्र** मणिपूरकाश्रयनाडीकन्दे इडापिङ्गळादिनाडीभिः **दशभिः वृता** सती **सुषुम्ना** नाम काचन **ब्रह्मनाडी** वर्तते । **तत्रैव** नाडीकन्दे **रक्ता**, चशब्दात् कपिशा, **पीता** चशब्दात् पिशङ्गा, **कृष्णा, ताम्रा, विलोहिता** । पाण्डरादिवर्णविशिष्टा इडा-पिङ्गळा-गान्धारा-वरुणेत्यादिदशनाडीततिः ॥ ८ ॥ **सूक्ष्मा च तन्वी च** । चशब्दद्वयतः द्वासप्ततिसहस्रसङ्ख्याः प्रधाननाड्यः सन्तीति द्योत्यते । सर्वासु नाडीषु या प्रधानभूता शुक्लवर्णोज्ज्वला तां **शुक्लां सुषुम्नानाडीं समाश्रयेत्** । तत्र दृङ्मनःप्राणान् प्रत्याहरेत् इत्याह—**तत्रेति** । यथा **ऊर्णनाभिः तन्तुना** सञ्चरति तथा **तत्र** सुषुम्नायां दृगादीन् संक्रमेत् इत्यर्थः ॥ ९ ॥ **ततः** सुषुम्नामार्गात् **रक्तोत्पलाभासं हृदयायतनं** नाड्यपेक्षया

[1] कर्ण-अ.

महत्। "दहरं पुण्डरीकं वेश्म" इत्यादिवेदान्तेषु यत् दहरं पुण्डरीकं निगद्यते तत्र सुषुम्नानाळार्पितहृदये दृगादीन् त्रीनपि प्रत्याहरेत्॥ ॥ १० ॥ ततः तत् हृदयपङ्कजं भित्त्वा दृगादिः कण्ठं तद्गतविशुद्धिचक्रं याति। तत्र प्रत्याहृत्य, ततो भ्रूमध्यं आज्ञाचक्रं ततः सहस्रारचक्रं च पूरयेत् प्रत्याहरेत्। इतिशब्दः प्रत्याहारसमाप्त्यर्थः ॥

धारणाध्यानसमाधयः

मनसस्तु परं गुह्यं [1]सुतीक्ष्णं बुद्धिनिर्मलम् ॥ ११ ॥
पादस्योपरि यन्मर्म तद्रूपं नाम चिन्तयेत्।
मनोधारेण तीक्ष्णेन योगमाश्रित्य नित्यशः ॥ १२ ॥
इन्द्रवज्रमिति प्रोक्तं मर्मजङ्घानुकृन्तनम्।
तद्ध्यानबलयोगेन धारणाभिर्निकृन्तयेत् ॥ १३ ॥
ऊर्वोर्मध्ये तु संस्थाप्य मर्मप्राणविमोचनम्।
चतुरभ्यस्य योगेन छिन्देदनभिशङ्कितः ॥ १४ ॥
ततः कण्ठान्तरे योगी [2]समूहेन्नाडिसञ्चये।
एकोत्तरं नाडिशतं तासां मध्ये परा स्थिरा ॥ १५ ॥
सुषुम्ना तु परे लीना विरजा ब्रह्मरूपिणी।
इडा तिष्ठति वामेन पिङ्गळा दक्षिणेन तु ॥ १६ ॥
तयोर्मध्ये परं स्थानं यस्तं वेद स वेदवित्।
द्वासप्ततिसहस्राणि प्रतिनाडीषु तैतिलम् ॥ १७ ॥

[1] सुतीर्ण-अ. [2] समूहे ना-क, अ.

छिद्यते ध्यानयोगेन सुषुम्नैका न छिद्यते ।
[1]योगनिर्मलसारेण क्षुरेणानलवर्चसा ॥ १८ ॥
छिन्देन्नाडीशतं धीरः प्रभवादिह जन्मनि ।
[2]जातीपुष्पसमं योगी यदा पश्यति तैतिलम् ॥ १९ ॥
एवं शुभाशुभैर्भावैः सा नाडीनां विभावयेत् ।
तद्भाविताः प्रपद्यन्ते पुनर्जन्मविवर्जिताः ॥ २० ॥

ततो धारणाध्यानसमाधिलक्षणमाह—**मनस** इति ॥ **मनसः** अन्तःकरणवृत्तिसहस्रात् **परम्** । तुशब्दो मनस्तत्कार्यस्य वस्तुतोऽसम्भवार्थः । **गुह्यं,** अनधिकारिणो गोपनीयत्वात् । **सुतीक्ष्णं,** स्वाज्ञानतत्कार्यतन्तुच्छेदनसुतीक्ष्णस्वज्ञानशस्त्रवत्वात् । **बुद्धिनिर्मलं,** निर्मलबुद्धिवेद्यत्वात् ॥ ११ ॥ विश्वविराडोत्रादिपादजातस्य **उपरि** यन्मर्म विश्वाद्यसम्भवप्रबोधसिद्धसीम **तद्रूपं नाम** तदस्मीति **चिन्तयेत्** धारयेत् । एवं ब्रह्मधारणं स्वाज्ञानग्रन्थिच्छेदकं स्यादित्याह—**मन** इति ॥ एवं **नित्यशः** सदा **तीक्ष्णेन मनोधारेण** ब्रह्मातिरिक्तं न किञ्चिदस्तीति मनोधारणारूपशस्त्रेण, स्वाज्ञानं भ्रमं छिन्देत् इत्यन्वयः ॥ १२ ॥ यत् स्वाज्ञानपर्वतभेदने **इन्द्रवज्रमिति प्रोक्तं** स्वातिरिक्तमर्माद्यवयवकृन्तनं तथाविधयोगं सुषुम्नाभेदनलक्षणं **आश्रित्य तद्ब्रह्माहमस्मीति ध्यानबलयोगेन** तद्विशिष्टपदाङ्गुष्ठादिसहस्रारान्त**धारणाभिः** स्वातिरिक्तं भ्रमं **निकृन्तयेत्** ॥ १३ ॥ यदि पुनः स्वातिरिक्तभ्रम उदेति तदा स्वाविद्यापदस्य **ऊर्वोः** व्यष्टिसमष्ट्योः तदारोपापवादाधारविश्वविराट्तत्तुर्ययोः यत् मध्यं अविकल्पं तस्मिन् **मध्ये** दृङ्मनःप्राणान् **संस्थाप्य** धारणां कृत्वा । तुशब्दः अवधारणार्थः । यथोक्तयोगेन स्थूलादिचतुरंशाढ्यस्वाविद्यापदतत्कार्यं **मर्म** । तदारोपापवादाधारः **प्राणो** विश्वविराडोत्रादिः **तन्मोचनं चतुरन्यस्य** मर्मप्राणस्थूलादिचतुरंशापवादं कृत्वा तदपवादाधिकरणं

[1] योगे नि-अ. [2] जातिपुष्पमयं-क,

ब्रह्मास्मीति धारणाबलेन अनभिशङ्कितः सन् योगी योगान्तरायं छिन्देत् ॥१४॥ ततः किं इत्यत आह—तत इति ॥ यतः नाडीसञ्चयशुद्धिं विना योगसिद्धिः न भवति ततः कारणात् योगी स्वकण्ठान्तरे विलसन्नाडीसञ्चये प्राणवायुं सम्यक् ऊहेत्, केवलकुम्भकोपायतो नाडीसञ्चयशुद्धिं कुर्यात्। प्रधाननाडयः काः इत्यत आह—एकेति ॥ स्वदेहमध्ये एकोत्तरं इडादिप्रधाननाडीशतं विद्यते। तासां मध्ये स्थिरा सुषुम्ना नाडी परा सर्वोत्कृष्टा ॥ १५ ॥ सेयं सुषुम्ना तु परे ब्रह्मणि लीना, ब्रह्मसूत्रत्वात्। विरजा, रजस्तमोविकार-वैरळ्यात्। ब्रह्मरूपिणी, ब्रह्मलोकासिहेतुत्वात्। सुषुम्नाज्ञानफलमाह—इडेति ॥ सुषुम्नाया वामभागेन, सप्तम्यर्थे तृतीया, सुषुम्नावामदक्षिणपार्श्वयोः इडा पिङ्गळा च तिष्ठति ॥ १६ ॥ तयोर्मध्ये सुषुम्नायां परमुत्कृष्टं ब्रह्मस्थानं वर्तते। तं तत्रत्यपरमात्मानं प्रत्यगभेदेन यो वेद स मुनिः वेदार्थब्रह्मवित् भवति। यथोक्तध्यानयोगेन सुषुम्नेतरनाडीषु प्राणगतिः छिद्यते, सुषुम्नाप्राणगतिस्तु न छिद्यत इत्याह—द्वासप्ततीति ॥ प्रधाननाडयस्तु द्वासप्ततिसहस्राणि भवन्ति। तत्र सुषुम्नानाडयन्तर्गतकैवल्यनाडिकान्तःस्थनिष्प्रतियोगिकचिन्मात्रध्यानयोगेन प्रतिनाडीषु प्राणवायोस्तैतिलं गतागतलक्षणं ॥ १७ ॥ छिद्यते विच्छिद्यते। तदानीं सुषुम्ना एका सुषुम्नामध्यगकैवल्यनाडिकायां दृङ्मनःप्राणवृत्तिः न छिद्यते आब्रह्मकल्पं न नश्यति, न बहिः निर्गच्छति, कल्पान्ते विरूपविलयं भजति। अत एव कैवल्यनाडीप्रविष्टदृग्वायुमनोवृत्तिमन्मुनिकळेबरं आब्रह्मकल्पं तिष्ठतीत्यत्र भगवद्वचनं मानम्।

मत्तत्त्ववेत्तुः करणाळिरादौ कैवल्यनाड्यन्तरचित्खमेत्य।
आब्रह्मकल्पं विलयं भजन् सन् कायेन कैवल्यमवाप्य तिष्ठेत् ॥

इति ॥ यतः एवं अतो धीरो योगी योगः तत्त्वज्ञानं तथाविधयोग एव निर्मलसारः सूक्ष्मधारारूपः तेन योगनिर्मलसारेण क्षुरेण अनलवर्चसा ॥ १८ ॥ इह अस्मिन्नेव जन्मनि प्रभवात् ब्रह्मातिरिक्तं न किंचिदस्तीति भावनाबलात् नाडीशतं तद्गतप्राणप्रचरान् छिन्देत् कैवल्यनाड्यामेव

दृङ्मनःप्राणप्रचारं कुर्यात् इति भावः । कैवल्यतदितरनाडीवायुप्रचाराप्रचारतो योगी कृतकृत्यो भवतीत्याह—जातीति ॥ यथोक्तसाधनसम्पन्नो योगी जातीपुष्पपरिमळाविनाभाववत् यदा कैवल्यनाड्यां दृङ्मनःप्राणतैतिलं स्थैर्यं पश्यति तदा विदेहमुक्तो भवति, "गमनं तैतिलं स्थैर्यं" इति कोशात् ॥ १९ ॥ एवं यदा सुषुम्नान्तःस्थकैवल्यनाडीतरनाडीनां या दृङ्मनःप्राणगतिः सेयं स्वर्गनरकगमनागमनलक्षणैः शुभाशुभैः भावैः युक्तेति विभावयेत् । अपुनर्भवगतिप्रदा इयं सुषुम्ना नाडी, कैवल्यगतिप्रदा इयं सुषुम्नाऽन्तर्गतकैवल्यनाडी, तदितररमादिनाडीततिः शुभफलस्वर्गादिप्रापिका, अरमादिनाडीततिः अशुभफलनरकादिप्रापिका, तदितरनाड्यस्तु नानाविचित्ररोगादिगतिप्रापिका इत्यत्र "रमा पुण्येन पुण्यं लोकं नयति अरमा पापेन पापं इच्छया यत् स्मरति तदभिसम्पद्यते अपुनर्भवायाकोशं भिनत्ति" इत्यादि, "मृत्युर्वै परे देव एकीभवति" इत्यादि श्रुतेः । यतः इतरनाडीवायुप्रचारः शुभाशुभहेतुः अतो योगाभ्यासेन तद्गतिनिरोधं कृत्वा सुषुम्नादिनाड्यामेव वायुप्रचारं भावयेत् । एवं भावनाफलमाह—तदिति ॥ एवं सुषुम्नादौ प्राणमारोप्य तद्ब्रह्माहमस्मीति धिया भाविता एवं भावनया ते पुनर्जन्मविवर्जिताः सन्तः तदेव ब्रह्म प्रपद्यन्ते ॥ २० ॥

योगसाधनं तदधिकारी च

तपोविजितचित्तस्तु निःशब्दं देशमास्थितः ।
निःसङ्गः साङ्गयोगज्ञो निरपेक्षः शनैःशनैः ॥ २१ ॥

तद्योगसाधनं अधिकारिणं च निरूपयति—तप इति ॥ स्वाश्रमाचारसहकृतयोगाभ्यासतपसा विजितचित्तस्तु योगी निर्विकल्पकसमाध्यर्थं जनसम्बाधराहित्यात् निःशब्दं देशमास्थितः स्वान्तर्बहिःकलनानिःसङ्गः साङ्गयोगज्ञः अष्टाङ्गयोगतत्त्ववित् स्वातिरिक्तनिरपेक्षः सन् शनैःशनैः विकल्पजातं हित्वा निर्विकल्पकसमाधिनिष्ठो भवेत् इति वाक्यशेषः ॥ २१ ॥

समाधिफलम्

पाशान् छित्त्वा यथा हंसो निर्विशङ्कं खमुत्पतेत् ।
[1]छिन्नपाशस्तथा जीवः संसारं तरते सदा ॥ २२ ॥
यथा निर्वाणकाले तु दीपो दग्ध्वा लयं व्रजेत् ।
तथा सर्वाणि कर्माणि योगी दग्ध्वा लयं व्रजेत् ॥ २३ ॥
प्राणायामसुतीक्ष्णेन मात्राधारेणयोगवित् ।
वैराग्योपल[2]घृष्टेन छित्त्वा तन्तुं न बध्यते ॥ २४ ॥
इत्युपनिषत् ॥

सदृष्टान्तं समाधिफलमाह—**पाशानिति** ॥ **यथा हंसः** स्वतुण्डेन स्वपादबन्धनमानससरोरुहकमलपाशान **छित्त्वा निर्विशङ्कं** यथा भवति तथा **खमुत्पतेत् तथा** योगी **जीवः सदा** योगाभ्यासतीक्ष्णखड्गेन सञ्छिन्नसंसृति**पाशः** सन् **संसारं तरते** ॥ २२ ॥ किं च—**यथा दीपो निर्वाणकाले** स्वाश्रयवर्त्त्यादिकं **दग्ध्वा** स्वयोनौ **लयं** शान्तिं **व्रजेत् तथा** योगी स्वावारकब्रह्ममात्रावरण**सर्वकर्म**जालं **दग्ध्वा** स्वातिरिक्तलयमपह्नवं **व्रजेत्** ॥ २३ ॥ उक्तोपनिषदर्थमुपसंहरति—**प्राणेति** ॥ यथोक्तयोगवित् मुनिः **प्राणायामादि**साधन**सुतीक्ष्णेन** सम्यक्तीव्रतर**वैराग्योपल**घृष्टेन अर्धमात्राधारेण स्वज्ञानशस्त्रेण स्वाज्ञानतन्तुं **छित्त्वा न** पुनः **बध्यते** स्वाज्ञानेन । स्वज्ञानेन तन्तुच्छेदन समकालं योगी स्वमात्रं अवशिष्यते । **इति**शब्दो निःसंशयार्थः । **उपनिषच्छब्दः** प्रकृतोपनिषत्परिसमाप्त्यर्थः ॥ २४ ॥

श्रीवासुदेवेन्द्रशिष्योपनिषद्ब्रह्मयोगिना ।
लिखितं स्याद्विवरणं क्षुरिकायाः स्फुटं लघु ॥
क्षुरिकोपनिषद्व्याख्या विंशत्यधिशतं स्मृता ॥

इति श्रीमदीशाद्यष्टोत्तरशतोपनिषच्छास्त्रविवरणे एकत्रिंशत्सङ्ख्यापूरकं
क्षुरिकोपनिषद्विवरणं सम्पूर्णम्

[1] छिन्नवंश—क. [2] कृष्टेन—अ.

तेजोबिन्दूपनिषत्

सह नाववतु—इति शान्तिः

प्रथमोऽध्यायः

निर्विशेषतेजोबिन्दुस्वरूपम्

तेजोबिन्दुपरं ध्यानं विश्वात्महृदि संस्थितम् ।
[1]अणुवं शांभवं शान्तं स्थूलसूक्ष्मपरं च यत् ॥ १ ॥
दुःखाढ्यं च दुराराध्यं दुष्प्रेक्ष्यं मुक्तमव्ययम् ।
दुर्लभं तत्स्वयं ध्यानं मुनीनां च मनीषिणाम् ॥ २ ॥

यन्नाचिन्मात्रकलना यात्यपह्नवमञ्जसा ।
तच्चिन्मात्रमखण्डैकरसं ब्रह्म भवाम्यहम् ॥

इह खलु कृष्णयजुर्वेदप्रविभक्तेयं तेजोबिन्दूपनिषत् स्वातिरिक्तखण्डाचिन्मात्रापह्नवसिद्धाखण्डानन्दचिन्मात्ररूपावस्थानलक्षणविकळेबरकैवल्यार्थबोधिनी विजृम्भते । अस्या उपोद्घातादिकं कठवल्ल्यादिसमम् । अस्या ब्रह्ममात्रानुभवप्रकाशिकायाः तेजोबिन्दूपनिषदः स्वल्पग्रन्थतो विवरणमारभ्यते ।

[1]आणवं—अ.

वक्ष्यमाणशिवस्कन्दऋभुनिदाघप्रश्नप्रतिवचनाख्यायिका तु विद्यास्तुत्यर्था । अत्रादौ तावत् प्रथमाध्याये प्रश्नप्रतिवचनकलनां विना श्रुतिः स्वयमेव यथोक्ताधिकारिभ्यः पञ्चदशाङ्गयोगसाधनसिद्धं निर्विशेषब्रह्मतत्त्वमुपदिशति —**तेजोबिन्दिति** । ये स्वात्मयाथात्म्यमननेच्छवो मुनयः तेषां **मुनीनां** निर्विशेषब्रह्मध्याने येषां मनीषा विद्यते तेषां **मनीषिणां** च स्वातिरिक्ताविद्यापदतत्कार्यध्वान्तापह्नवसिद्धं निष्प्रतियोगिकस्वमात्रतेजोबिन्दुस्वरूपं तत्परं तद्विषयकं **ध्यानं** वक्ष्यामीति शेषः । ध्येयं कीदृशं इत्यत आह—**विश्वेति** । **स्वाङ्गैः** स्वातिरेकेणास्तीति विश्वसनीयं विश्वं स्वाविद्यापदतत्कार्यजातमेव यस्यात्मा शरीरं सोऽयं **विश्वात्मा** विराट्, तस्य **हृत्कमले** तद्वृत्तिसहस्रावभासकतया **स्थितम्** । निराधारं अविद्यापदं कथं तिष्ठेत् इत्यत आह— **अणिवति** । अणुं अविद्यापदसर्वस्वं आदिकूर्मादिरूपेण अन्तर्यामिरूपेण सर्वाधिष्ठानरूपेण वा वहतीति **अणुवं** । स्वापेक्षया अस्य परिच्छिन्नत्वात् **अणुत्वम्** । शं अस्मात् भवतीति शम्भुः प्रत्यक्, तद्विषयकसुखस्य तदधीनत्वात् । तद्याथात्म्यं निर्विशेषं **ब्रह्म शाम्भवम्** । वस्तुतः विश्वविराडादिकलनाशान्तम् । स्वाङ्गदृष्ट्या स्थूलसूक्ष्मादिप्रपञ्चकलनाप्रसक्तौ यत्तदारोपापवादाधिकरणं तत् **स्थूलसूक्ष्मादिप्रपञ्चात्** **परं** विलक्षणमित्यर्थः । **च**शब्दात्तुर्यभागादपि वैलक्षण्यं द्योत्यते ॥ १ ॥ तस्य स्वाङ्गदृष्टिग्रहणाराधनाशक्यतया **दुःखाढ्यं** **दुराराध्यं** **दुष्प्रेक्ष्यं** **च** । स्वङ्गदृष्ट्या तत्सर्वकलनामुक्तं, अत एव **अव्ययं** व्ययहेतुस्वातिरिक्तभ्रमासम्भवात् । श्रुत्याचार्यप्रसादं विना **तत्स्वरूपं** तद्विषयकध्यानं वा **स्वयं** स्वतो **दुर्लभं**, श्रुत्याचार्यप्रसादतः तदवगन्तुं सुलभमेवेत्यर्थः ॥ २ ॥

निर्विशेषब्रह्मावगतिसाधनानि

यताहारो जितक्रोधो जितसङ्गो जितेन्द्रियः ।
निर्द्वन्द्वो निरहंकारो निराशीरपरिग्रहः ॥ ३ ॥

अगम्यागम[1]कर्तारो गम्यागमन[2]मानसाः ।
मुखे त्रीणि च [3]विन्दन्ति त्रिधामा हंस उच्यते ॥ ४ ॥
परं गुह्यतमं विद्धि ह्यस्त[4]तन्द्री निराश्रयः ।
सोमरूपकला सूक्ष्मा विष्णोस्तत्परमं पदम् ॥ ५ ॥

उत्तमाधिकारिणां तदवगतिः भवत्येव । मन्दमध्यमानां तदवगतिः कथमित्यत्र साधनान्युपदिशति—यतेति । हे स्वाङ्गलोक यदि त्वं मदुपदेशप्रभवस्वज्ञानतः स्वपदं प्राप्तुमीहसे तदा मदुक्तसाधनसम्पन्नो भूत्वा **विष्णोस्तत् परमं पदं** यास्यसीत्यन्वयः ।

आहारस्य च भागौ द्वौ तृतीयमुदकस्य च ।
वायोः सञ्चरणार्थाय चतुर्थमवशेषयेत् ॥

इति येनाहारो यतो नियतः स त्वमादौ **यताहारो** भव, "आहारशुद्धौ सत्वशुद्धिः" इत्यादि श्रुतेः । कामालाभजः क्रोधो येन जितः स त्वं **जितक्रोधो** भव । स्वविकल्पितेन्द्रियेन्द्रियार्थेषु सङ्गो येन जितः स त्वं **जितसङ्गो जितेन्द्रियवर्गो** भव । शीतोष्णादिद्वन्द्वो यस्मान्निर्गतः स त्वं **निर्द्वन्द्वो** भव । शरीरत्रये अहङ्कारो यस्मान्निर्गतः स त्वं **निरहङ्कारो** भव । स्वातिरिक्तविषयभोगानशितुमिच्छा आशीः यस्मान्निर्गता स त्वं **निराशीः** भव । प्राणमात्रधारणानुकूलपरिग्रहेतरपरिग्रहो येनागृहीतः स त्वं **अपरिग्रहो** भव ॥ ३ ॥ स्वज्ञैकदेशिनो यत्पदं विन्दन्ति तत्पदमादावुपास्स्वेत्याह—**अगम्येति** । केवलस्वाज्ञ[ज्ञा]गम्ये स्वाविद्यापदारोपाधिकरणे विश्वविराडोत्रादौ तद्भावाभावितधिया अगमनं कुर्वन्तीति **अगम्यागमकर्तारः**, स्वाज्ञदृष्टिगम्ये स्वाविद्यापदतत्कार्ये येषां मानसं गमनं न भजति ते हि **गम्यागमनमानसाः**

[1] कर्ता यो—अ.
[2] मानसः—अ, अ १.
[3] विन्देत—अ.
[4] तन्द्रो—मु.

शबलब्रह्मशरणाः स्वज्ञैकदेशिनः । "नेत्रस्थं जागरितं विद्यात्" "दक्षिणाक्षिमुखे विश्वः" इति श्रुतिसिद्धे मुखे जाग्रज्जाग्रदादौ व्यष्टिसमष्टितदुभयैक्याधिकरणतया विश्वविश्वादिविराड्विराडाद्योत्रात्रादिभेदेन त्रीणि त्रीणि रूपाणि, चशब्दात् तत्तुर्यरूपाण्यपि, स्वाभेदेन विन्दन्ति जानन्ति । एवं त्रीणि धामानि यस्य सोऽयं त्रिधामा हंस उच्यते । स्वज्ञानतः स्वभजत्स्वात्मानं हन्तीति हंसः परमेश्वर इत्यर्थः ॥ ४ ॥ तमेतं हंसं सोऽहमित्युपास्य तत्प्रसादतो हि अस्ता तन्द्रीं जामिता यस्य सः त्वं अस्ततन्द्री सन् स्वात्मेतराश्रयाभावात् निराश्रयो भूत्वा यन्मयोच्यते तत्सर्वापवादाधिकरणतया जाग्रज्जाग्रदादिकलनायाः परं अनधिकारिणे अवक्तव्यत्वात् गुह्यतमं ब्रह्म अधिष्ठेयसापेक्षाधिष्ठानताऽपाये निःप्रतियोगिकस्वमात्रमिति विद्धि जानीहि । किं तदित्युत आह—सोमेति । उमया स्वविद्यया सहितमुनिसम्यज्ज्ञानविदिता कला चिन्मात्ररूपिणी सोमरूपकला निर्विशेषतया सूक्ष्मा, सैव, स्वाज्ञदृष्टिविकल्पितव्याप्यप्रसक्तौ, व्यापकभावमापन्नस्य विष्णोः सम्यज्ज्ञदृष्ट्या व्याप्यव्यापकताऽपह्नवसिद्धं यत् तत् परमं निःप्रतियोगिकनिरतिशयं तन्मात्रतया पद्यत इति पदं स्वमात्रमवशिष्यत इत्यर्थः ॥ ५ ॥

परवस्तुन एव सविशेषत्वादिभावाः

त्रिवक्त्रं [1]त्रिगुणं स्थानं त्रिधातुं रूपवर्जितम् ।
निश्चलं निर्विकल्पं च निराकारं निराश्रयम् ॥ ६ ॥
उपाधिरहितं स्थानं वाङ्मनोऽतीतगोचरम् ।
स्वभावं भावसंग्राह्यमसंघा[2]तं पदाच्युतम् ॥ ७ ॥

[1] त्रिगुणस्था—अ.

[2] तपदा—उ. तं च यदच्युतं—अ. तं पदाच्चयुतं—क, अ २. तं पदच्युतं—अ १.

अनानानन्दनातीतं [1]दुष्प्रेक्ष्यं मुक्तमव्ययम् ।
चिन्त्यमेवंविनिर्मुक्तं शाश्वतं ध्रुव[2]मच्युतम् ॥ ८ ॥
तद्ब्रह्मणस्तदध्यात्मं तद्विष्णोस्तत्परायणम् ।
अचिन्त्यं चिन्मयात्मानं यद्व्योम परमं स्थितम् ॥ ९ ॥
अशून्यं शून्यभावं तु शून्यातीतं हृदि स्थितम् ।
न ध्यानं च न च ध्याता न ध्येयो ध्येय एव च ॥ १० ॥
सर्वं च न परं शून्यं न परं [3]न परात्परम् ।
अचिन्त्यमप्रबुद्धं च न सत्यं न [4]परं विदुः ॥ ११ ॥
मुनीनां संप्रयुक्तं च न देवा न परं विदुः ।
लोभं मोहं भयं दर्पं कामं क्रोधं च किल्बिषम् ॥ १२ ॥
शीतोष्णे क्षुत्पिपासे च संकल्पक[5]विकल्पकम् ।
न ब्रह्मकुलदर्पं च न [6]मुक्ति[7]ग्रन्थिसंचयम् ॥ १३ ॥
न भयं न सुखं दुःखं तथा मानावमानयोः ।
एतद्भावविनिर्मुक्तं तद्ब्रह्म ब्रह्म तत्परम् ॥ १४ ॥

तदेव स्वाज्ञादिदृष्ट्या सविशेषतां तत्प्रतियोगिकनिर्विशेषतां, परमार्थदृष्ट्या निष्प्रतियोगिकनिर्विकल्पतां च भजतीव भातीत्याह—त्रिवक्त्रमिति । विश्वतैजसप्राज्ञभेदेन त्रिवक्त्रं, विराट्सूत्रादिभेदेन त्रिगुणं, स्थानं मुक्तप्राप्यत्वात्, ओत्रनुज्ञात्रनुज्ञाभेदेन ब्रह्मविष्ण्वीशभेदेन वा त्रिधातुं, वस्तुत उक्तत्रिवक्त्रादि[8]स्वरूपविवर्जितं, चलविकल्पाकृत्या-

[1] दुष्प्राप्यं पूर्णमद्वयं—अ.
[2] मक्रियः—अ.
[3] नापरात्—क, अ १, अ २.
[4] परे—अ.
[5] विकल्पकौ—अ.
[6] मुनि—अ, अ १.
[7] ग्रन्थ—उ.
[8] वर्ज्यस्व—उ १.

श्रयवैरळ्यात् **निश्चलं** **निर्विकल्पं** **च** **निराकारं** **निराश्रयम्** ॥ ६ ॥ **उपाधिरहितं** निरुपाधिकत्वात् । **स्थानं** उक्तार्थं । **वाङ्मनोतीततुर्यतया** **गोचरं** । स्वयमेव भवतीति **स्वभावं** । भावरूपेणैव सम्यग्ग्राह्यं सन्मात्रत्वात् । **असङ्गतं** करणग्रामबाह्यत्वात् । स्वस्वभावादच्युतम् ॥ ७ ॥ नानानन्दनो जीवः स न भवतीति **अनानानन्दनः** साक्षी तद्भावादप्यतीतं । **दुष्प्रेक्ष्यं** **मुक्तमव्ययं** इति पदत्रयं व्याख्यातम् । सदा अव्ययतया **चिन्त्यं** । चिन्तितस्य सविशेषप्रसक्तौ **एवंविनिर्मुक्तं**, केनाप्यचिन्त्यत्वात् । अशाश्वतविश्वाभावात् **शाश्वतं** । अध्रुवमायापायात् **ध्रुवं** । सर्वप्रकारेणापि च्युत्यभावात् **अच्युतम्** ॥ ८ ॥ यदेवंभूतं **तद्ब्रह्मणः** स्वरूपम् । **तत्** प्रत्यग्रूपेण सर्वात्मानं विराजमधिकृत्य भवतीति **अध्यात्मम्** । **तदेव** **विष्णोः** स्वरूपमपि । तदेव **तत्परायणं** मुक्तप्राप्यनारायणत्वात् । निर्विशेषात्मना **अचिन्त्यम्** । अन्तःकरणाभावात् **चिन्मयात्मानं** इति, विभक्तिलिङ्गव्यत्ययः छान्दसः, चिन्मयात्मकम् । **यद्व्योम** चिदाकाशत्वात् । **परमं** व्याख्यातम् । **स्थितं** सत्तामात्रत्वात् ॥ ९ ॥ अत एव **अशून्यम्** । पूर्णत्वात् स्वातिरिक्तशून्यभावम् । तुशब्दोऽवधारणार्थः । शून्यभावमापन्नस्वातिरिक्तादप्यतीतं निष्प्रतियोगिकत्वात् । प्रत्यगादिरूपेण **हृदि** **स्थितम्** । तस्य प्रत्यक्त्वे त्रिपुटी स्यादित्यत आह—**नेति** । स्वातिरेकेण **न** **ध्यानं** **च** **नच** **ध्याता** **न** **ध्येयः** । स्वावशेषतया **ध्येय** **एव** **च** ॥ १० ॥ स्वातिरेकेण यदि सर्वं प्रसक्तं तदा **न** **च** **सर्वं** अस्ति । यदि स्यात् तदा **स्वस्मात्** **परं** **शून्यम्** । अत एव **न** **परं** अस्ति । सापेक्षपरात् **परं** अपि स्वयं न भवति । स्वातिरेकेण चिन्तितुं बोद्धुं द्रष्टुं अशक्यतया मुनयः **अचिन्त्यमप्रबुद्धं** **च** **न** **सत्यं** **न** **परं** **विदुः** ॥ ११ ॥ यत्परं अतिरिक्तं नेति **मुनीनां**—तृतीयार्थे षष्ठी—मुनिभिः यत् **सम्प्रयुक्तं** अवधृतं तत्र देवाः सूक्ष्मबुद्धयोऽपि ततः **परं** अस्तीति **न** **विदुः** । लोभमित्यादौ लिङ्गव्यत्ययो द्रष्टव्यः । नहि तत्र लोभमोहावन्तःकरणवृत्तयः शीतोष्णादिद्वन्द्वं क्षुत्पिपासादिषड्ऊर्मयः सङ्कल्पविकल्पादिमानसवृत्तयः ब्रह्मादिकुलप्रसूतोऽस्मीति दर्पश्च बन्धमोक्षादिग्रन्थिसञ्चयश्च मानावमानवृत्तयो वा विद्यन्ते । यत् **एतत्**

सर्वभावविनिर्मुक्तं स्वातिरिक्तसामान्यापह्नवसिद्धं तत् ब्रह्म। ब्रह्म तत्परं स्वमात्रमवशिष्यते इत्यर्थः ॥ १२-१४ ॥

परब्रह्मावगतसाधन पञ्चदशाङ्गयोगः

यमो हि नियमस्त्यागो मौनं देशश्च कालतः ।
आसनं मूलबन्धश्च देहसाम्यं च दृक्स्थितिः ॥ १५ ॥
प्राणसंयमनं चैव प्रत्याहारश्च धारणा ।
आत्मध्यानं समाधिश्च प्रोक्तान्यङ्गानि वै क्रमात् ॥ १६ ॥

यद्येवं ब्रह्म निष्प्रतियोगिकं तदा तदवगत्युपायवैरळ्यमाशङ्क्य यदि ते तदवगतीच्छा विद्यते तदा तदवगतिसाधनतया पञ्चदशाङ्गयोग उच्यते—यमो हीति । इत्थं पञ्चदशयोगाङ्गानि सूत्रितानि ॥ १५-१६ ॥

पञ्चदशाङ्गानां लक्षणानि

सर्वं ब्रह्मेति वै ज्ञानादिन्द्रियग्रामसंयमः ।
यमोऽयमिति संप्रोक्तोऽभ्यसनीयो मुहुर्मुहुः ॥ १७ ॥
सजातीयप्रवाहश्च विजातीयतिरस्कृतिः ।
नियमो हि परानन्दो नियमात्क्रियते बुधैः ॥ १८ ॥
त्यागः प्रपञ्चरूपस्य सच्चिदात्मावलोकनात् ।
त्यागो हि महतां पूज्यः सद्यो मोक्षप्रदायकः ॥ १९ ॥
यस्माद्वाचो निवर्तन्ते अप्राप्य मनसा सह ।
यन्मौनं योगिभिर्गम्यं तद्भवेत्सर्वदा जडैः ॥ २० ॥

वाचो यस्मान्निवर्तन्ते तद्वक्तुं केन शक्यते ।
प्रपञ्चो यदि वक्तव्यः सोऽपि शब्दविवर्जितः ॥ २१ ॥
इति वा तद्भवेन्मौनं सर्वं सहजसंज्ञितम् ।
गिरा मौनं तु बालानामयुक्तं ब्रह्मवादिनाम् ॥ २२ ॥
आदावन्ते च मध्ये च जनो यस्मिन्न विद्यते ।
येनेदं सततं व्याप्तं स देशो विजनः स्मृतः ॥ २३ ॥
कल्पना सर्वभूतानां ब्रह्मादीनां निमेषतः ।
कालशब्देन निर्दिष्टं ह्यखण्डानन्दमद्वयम् ॥ २४ ॥
सुखेनैव भवेद्यस्मिन्नजस्रं ब्रह्मचिन्तनम् ।
आसनं तद्विजानीयादन्यत्सुखविनाशनम् ॥ २५ ॥
सिद्धये सर्वभूतादि विश्वाधिष्ठानमद्वयम् ।
[1]तस्मिन्सिद्धिं गताः सिद्धास्तत्सिद्धासनमुच्यते ॥ २६ ॥
यन्मूलं सर्वलोकानां यन्मूलं चित्तबन्धनम् ।
मूलबन्धः सदा सेव्यो योग्योऽसौ [2]राजयोगिनाम् ॥ २७ ॥
अङ्गानां समता विद्यात्समे ब्रह्मणि [3]लीयते ।
नो चेन्नैव समानत्वमृजुत्वं शुष्कवृक्षवत् ॥ २८ ॥
दृष्टिं ज्ञानमयीं कृत्वा पश्येद्ब्रह्ममयं जगत् ।
सा दृष्टिः परमोदारा न नासाग्रावलोकिनी ॥ २९ ॥

[1] यस्मिन्—क, अ २. [2] ब्रह्मवादिनाम्—अ, अ १, अ २.
[3] नीयते—अ.

द्रष्टृदर्शनदृश्यानां विरामो यत्र वा भवेत् ।
दृष्टिस्तत्रैव कर्तव्या न नासाग्रावलोकिनी ॥ ३० ॥

चित्तादिसर्वभावेषु ब्रह्मत्वेनैव भावनात् ।
निरोधः सर्ववृत्तीनां प्राणायामः स उच्यते ॥ ३१ ॥

निषेधनं प्रपञ्चस्य रेचकाख्यः समीरितः ।
ब्रह्मैवास्मीति या वृत्तिः पूरको वायुरुच्यते ॥ ३२ ॥

ततस्तद्वृत्तिनैश्चल्यं कुम्भकं प्राणसंयमः ।
[1]अयं चापि प्रबुद्धानामज्ञानां घ्राणपीडनम् ॥ ३३ ॥

विषयेष्वात्मतां दृष्ट्वा मनसश्चित्त[2]रञ्जकम् ।
प्रत्याहारः स विज्ञेयोऽभ्यसनीयो मुहुर्मुहुः ॥ ३४ ॥

यत्र यत्र मनो याति ब्रह्मणस्तत्र दर्शनात् ।
[3]मनसा धारणं चैव धारणा सा परा मता ॥ ३५ ॥

ब्रह्मैवास्मीति [4]सद्वृत्त्या निरालम्बतया स्थितिः ।
ध्यानशब्देन विख्यातः परमानन्ददायकः ॥ ३६ ॥

निर्विकारतया वृत्त्या ब्रह्माकारतया पुनः ।
वृत्तिविस्मरणं सम्यक्समाधिरभिधीयते ॥ ३७ ॥

सूत्रीभूतपञ्चदशाङ्गानि यथाक्रमं श्रुतिरेव व्याचष्टे। तत्र यमशब्दार्थमाह—सर्वमिति । करणग्रामे ब्रह्मभाव एव यम इत्यर्थः ॥ १७ ॥ नियमशब्दार्थमाह—

[1] अध—अ १. [2] रञ्जनम्—अ, अ १. [3] मनसो—अ.
[4] सद्वृत्त्या—(क) आदिसर्वकोशेषु. सद्व्रत्या—अयं पाठः (उ१) कोश एव.

सजातीयेति । अखण्डचिन्मात्रादिवृत्तिः सजातीया, घटपटादिवृत्तिःविजातीया ॥ १८ ॥ त्यागशब्दं व्याकरोति—त्याग इति । सच्चिदानन्ददृष्टिः अनृतादिप्रपञ्चं ग्रसतीत्यर्थः ॥ १९ ॥ मौनशब्दार्थं प्रकटयति—यस्मादिति । पक्षान्तरम्—वाच्च इति । प्रथमपक्षे जडैः वागादिकरणैः स्वस्वव्यापृत्युपरमणं मौनमित्युक्तम् । द्वितीयपक्षे तु स्वातिरिक्तयोः निष्प्रतियोगिकभावाभावरूपतया निर्वक्तुमशक्यत्वात् । प्रथमपर्यायगदितमौनं तु बालानां न हि ब्रह्मविदामस्ति ॥ २०-२२ ॥ देशशब्दार्थं व्याकरोति—आदाविति । तादृशदेशो ब्रह्मैवेत्यर्थः ॥ २३ ॥ कालशब्दार्थमाह—कल्पनेति । यदज्ञाननिमेषविकल्पितं निखिलं तदधिकरणं ब्रह्म कालशब्दवाच्यम् ॥ २४ ॥ आसनशब्दार्थं विशदीकरोति—सुखेनेति । ध्यानानुकूलं सुखासनं सिद्धसिद्धिदं ब्रह्म सिद्धासनं, नह्युक्तलक्षणमित्यर्थः ॥ २५-२६ ॥ मूलबन्धस्वरूपं व्यक्तीकरोति—यदिति । सर्वकारणं ब्रह्मैव मूलबन्धः, नत्वाकुञ्चनादिः । अयं राजयोगिनां योग्यो न हठयोगिनामित्यर्थः ॥ २७ ॥ देहसाम्यशब्दार्थमाह—अङ्गानामिति । स्थूलादिदेहानां समब्रह्मणि विलयभावः समता नहि स्तम्भवत् ऋजुतेत्यर्थः ॥ २८ ॥ दृष्टिस्वरूपमाह—दृष्टिमिति । स्वाज्ञदृष्टिः स्वातिरिक्तं जगत् पश्यति । सर्वाधिकरणदृष्टिः स्वज्ञः परमार्थदृष्टिः ब्रह्ममात्रवित् । तेन दृश्यादित्रिपुट्यपह्नवसिद्धे ब्रह्मणि स्वमात्रदृष्टिः कार्येत्यर्थः ॥ २९–३० ॥ रेचकपूरककुम्भकसहितविद्वत्प्राणायामस्वरूपमाचष्टे—चित्तादीति । सर्वं ब्रह्मेति भावनं प्राणायामः । स्वातिरिक्तं जगत् नेत्यनुसन्धानं रेचकवृत्तिः । तदेवास्मीति पूरकवृत्तिः । तद्वृत्तिस्थैर्यं कुम्भकवृत्तिः । स्वज्ञानामेवम् । स्वाज्ञानां घ्राणपीडनमेव फलमित्यर्थः ॥ ३१–३३ ॥ प्रत्याहारस्वरूपमाह—विषयेष्विति । विषयसामान्यब्रह्मदृष्टिः प्रत्याहारः ॥ ३४ ॥ धारणास्वरूपमाह—यत्रेति । मनःप्रचाराधिकरणं ब्रह्मेत्यर्थः ॥ ३५ ॥ ध्यानलक्षणमाह—ब्रह्मेति । निरालम्बब्रह्मभावनं ध्यानम् ॥ ३६ ॥ समाधिस्वरूपमाह—निर्विकारेति । अखण्डाकारवृत्तिः सविकल्पः, तद्वृत्त्यस्मरणं निर्विकल्पसमाधिरित्यर्थः ॥ ३७ ॥

योगाभ्यासेन ब्रह्मभवनम्

[0]इमं चाकृत्रिमानन्दं तावत्साधु समभ्यसेत् ।
[1]लक्ष्ये यावत्क्षणात्पुंसः प्रत्यक्त्वं संभवेत्स्वयम् ॥ ३८ ॥
ततः साधननिर्मुक्तः सिद्धो भवति योगिराट् ।
तत्स्वरूपं [2]भवेत्तस्या विषयो [3]मनसो गिराम् ॥ ३९ ॥

मुमुक्षुः इममेव पञ्चदशावयवयोगं यावद्ब्रह्ममात्रतया स्थितिः तावदभ्यसेत्, ततो ब्रह्मैव भवतीत्याह—इममिति ॥ ३८–३९ ॥

समाधिविघ्नशमनम्

समाधौ क्रियमाणे तु विघ्नान्यायान्ति वै बलात् ।
अनुसंधानराहित्यमालस्यं भोगलालसम् ॥ ४० ॥
लयस्तमश्च विक्षेपस्तेजः स्वेदश्च शून्यता ।
एवं हि विघ्नबाहुल्यं त्याज्यं ब्रह्मविशारदैः ॥ ४१ ॥
भाववृत्त्या हि भावत्वं शून्यवृत्त्या हि शून्यता ।
ब्रह्मवृत्त्या हि पूर्णत्वं तया पूर्णत्वमभ्यसेत् ॥ ४२ ॥

अनुसन्धानराहित्यादिसमाधिविघ्ने सति कथं निर्विकल्पकसमाधिरुदेति इत्याशङ्क्य तद्विघ्नशान्तितः पूर्णाखण्डसमाधिरुदेतीत्याह—समाधाविति । समाध्यभ्यासयुक्तस्य कादाचित्कप्रसक्ताननुसन्धानादिशून्यवृत्त्यन्तविघ्नसमूहे प्रातिस्विकेन युगपद्वा अभ्युदिते अनुसन्धानाद्युपायतः तद्विघ्नसमूहं निर्मूल्य अथ ब्रह्मैवाहमस्मि इत्यखण्डाकारवृत्त्या स्वपूर्णभावमभ्यसेदित्यर्थः ॥ ४०-४२ ॥

[1] लक्ष्यो—क, अ १, अ २. [2] भवेत्तस्य—अ, अ १.
[3] मनसा—क, अ १, उ १. मनसां—अ, अ २.

समाधिना शुद्धब्रह्मपदप्राप्तिः

ये हि वृत्तिं विहायैनां ब्रह्माख्यां पावनीं पराम् ।
वृथैव ते तु जीवन्ति पशुभिश्च समा नराः ॥ ४३ ॥
ये तु वृत्तिं विजानन्ति ज्ञात्वा वै वर्धयन्ति ये ।
ते वै सत्पुरुषा धन्या वन्द्यास्ते भुवनत्रये ॥ ४४ ॥
येषां वृत्तिः समा वृद्धा परिपक्वा च सा पुनः ।
ते वै सद्ब्रह्मतां प्राप्ता नेतरे शब्दवादिनः ॥ ४५ ॥
कुशला ब्रह्मवार्तायां वृत्तिहीनाः सुरागिणः ।
तेऽप्यज्ञानतया नूनं पुनरायान्ति यान्ति च ॥ ४६ ॥
निमिषार्धं न तिष्ठन्ति वृत्तिं [1]ज्ञानमयीं विना ।
यथा तिष्ठन्ति ब्रह्माद्याः सनकाद्याः शुकादयः ॥ ४७ ॥
कारणं यस्य वै कार्यं कारणं तस्य जायते ।
कारणं तत्त्वतो नश्येत्कार्याभावे विचारतः ॥ ४८ ॥
अथ शुद्धं भवेद्वस्तु यद्वै वाचामगोचरम् ।
उदेति शुद्धचित्तानां वृत्तिज्ञानमतः परम् ॥ ४९ ॥
भावितं तीव्र[2]योगेन [3]यद्वस्तु निश्चयात्मकम् ।
दृश्यं ह्यदृश्यतां नीत्वा ब्रह्माकारेण चिन्तयेत् ॥ ५० ॥
विद्वान्नित्यं सुखे तिष्ठेद्धिया चिद्रसपूर्णया ॥ ५१ ॥ इति ॥

[1] ब्रह्ममयीं—क, अ, अ १, अ २.
[2] वेगेन—(क) आदिकोशेषु.
[3] वस्तु यन्नि—अ.

ब्रह्माकारवृत्तिविरळान् दूषयति—ये हीति ॥ ४३ ॥ अखण्डाकारवृत्तिमन्त एव ब्रह्मपदं यान्ति, तद्विपरीताः संसारं भजन्ति। यत एवं अतः श्रीशुकसनकादिवत् ब्रह्मपदेच्छुभिः समाधिरेव अभ्यसनीय इत्याह—येत्विति ॥ ४४–४७ ॥ अखण्डाकारवृत्तेः अभ्यासजन्यत्वात् कारणं अभ्यासः, कार्यं अखण्डाकारवृत्तिः, तस्याः कृतकत्वेनाध्रुवत्वात् तया ध्रुवब्रह्मापत्तिः कथमित्याशङ्क्य यावदेवं विचारो नोदेति तावदेवमभ्यस्य ततः "कार्यं चेत् कारणं किञ्चित् कार्याभावे न कारणम्" इति सापेक्षश्रुतियुक्तितः कार्यकारणकल्पनां अपह्नवं कृत्वा अथ तदपह्नवसिद्धं शुद्धचैतन्यं स्वावशेषतया विजृम्भते इत्याह—कारणमिति। यस्य एवंवादिनः अभ्यासाख्यं कारणमेव कार्यं भवति तस्य कारणमेव जायते। कार्यस्य कृतकत्वोक्त्या कार्याभावे कार्यं चेदिति सापेक्षश्रुतियुक्तितः कारणमेव नश्येत्। अभ्यासाखण्डाकारवृत्त्युपलक्षितस्वाविद्यापदतत्कार्यतदारोपाधिकरणयोः अपह्नवतां गतयोः कार्यकारणकल्पनाविरळं ब्रह्म स्वमात्रमवशिष्यते इति भावः ॥ ४८ ॥ ततः किं इत्यत आह—अथेति। अथ कार्यकारणत्वविभ्रमनिरसनानन्तरं यद्वै वाचामगोचरं करणग्रामासम्भवप्रबोधसिद्धं तदेव वस्तु यत् स्वाज्ञदशायां अशुद्धनानारूपेण भातं स्वज्ञदशायां स्वप्रकृतिमवलम्ब्येव शुद्धं भवेत्। वस्तुतस्तु स्वाज्ञादिदृष्टिमोहे सत्यसति विशुद्धं वस्तु स्वमात्रमवशिष्यते। यदि ब्रह्म स्वमात्रं तदवगतिः कथमित्यत्र सत्कर्मानुष्ठानतो विशुद्धचित्तानां ततः परं वेदान्तश्रवणादिसञ्जाताखण्डाकारवृत्तिज्ञानमुदेति ॥ ४९ ॥ तज्ज्ञानं तीव्रयोगेन अखण्डनिर्विकल्पसमाधिना तत्त्वज्ञाने भावितं सत् यद्वस्तु निश्चयात्मकं तदेव भवति। यस्मादेवं तस्मात् विद्वान्—स्वाज्ञदशायां स्वाविद्यापदतत्कार्यजातं दृश्यं भवति—सम्यज्ज्ञानबलात् तत् अदृश्यतां अभावरूपतां नीत्वा ब्रह्माकारेण चिन्तयेत् ॥ ५० ॥ एवं धिया चिद्रसपूर्णया दृश्यं ब्रह्माकारेण चिन्तित्वा सुखे नित्यानन्दे ब्रह्मणि स्वावशेषतया तिष्ठेत् ॥ ५१ ॥ इतिशब्दः अध्यायपरिसमाप्त्यर्थः ॥

इति प्रथमोऽध्यायः

द्वितीयोऽध्यायः

सर्वस्य अखण्डैकरसत्वम्

अथ ह कुमारः शिवं पप्रच्छाखण्डैकरसचिन्मात्रस्वरूपमनुब्रूहीति। स होवाच परमशिवः।

अखण्डैकरसं दृश्यमखण्डैकरसं जगत्।
अखण्डैकरसं भावमखण्डैक[1]रसः स्वयम्॥ १॥

अखण्डैकरसो मन्त्र अखण्डैकरसा क्रिया।
अखण्डैकरसं ज्ञानमखण्डैकरसं जलम्॥ २॥

अखण्डैकरसा भूमिरखण्डैकरसं वियत्।
अखण्डैकरसं शास्त्रमखण्डैकरसा त्रयी॥ ३॥

अखण्डैकरसं ब्रह्म चाखण्डैकरसं [2]वृतम्।
अखण्डैकरसो जीव अखण्डैकरसो ह्यजः॥ ४॥

अखण्डैकरसो ब्रह्मा अखण्डैकरसो हरिः।
अखण्डैकरसो रुद्र अखण्डैकरसोऽस्म्यहम्॥ ५॥

अखण्डैकरसो ह्यात्मा अखण्डैकरसो गुरुः।
अखण्डैकरसं लक्ष्यमखण्डैकरसं महः॥ ६॥

अखण्डैकरसो देह अखण्डैकरसं मनः।
अखण्डैकरसं चित्तमखण्डैकरसं सुखम्॥ ७॥

[1] रसं—अ, अ १, अ २, क. [2] व्रतं—अ १.

अखण्डैकरसा विद्या अखण्डैकरसोऽव्ययः ।

अखण्डैकरसं नित्यमखण्डैकरसं [1]परम् ॥ ८ ॥

अखण्डैकरसं किंचिदखण्डैकरसं [2]वरम् ।

अखण्डैकरसादन्यन्नास्ति नास्ति षडानन ॥ ९ ॥

अखण्डैकरसान्नास्ति अखण्डैकरसान्न हि ।

अखण्डैकरसात्किंचिदखण्डैकरसादहम् ॥ १० ॥

अखण्डैकरसं स्थूलं सूक्ष्मं चाखण्डरूपकम् ।

अखण्डैकरसं वेद्यमखण्डैकरसो भवान् ॥ ११ ॥

अखण्डैकरसं गुह्यमखण्डैकरसादिकम् ।

अखण्डैकरसो ज्ञाता अखण्डैकरसा स्थितिः ॥ १२ ॥

अखण्डैकरसा माता अखण्डैकरसः पिता ।

अखण्डैकरसो भ्राता अखण्डैकरसः पतिः ॥ १३ ॥

अखण्डैकरसं सूत्रमखण्डैकरसो विराट् ।

अखण्डैकरसं गात्रमखण्डैकरसं शिरः ॥ १४ ॥

अखण्डैकरसं चान्तरखण्डैकरसं बहिः ।

अखण्डैकरसं पूर्णमखण्डैकरसामृतम् ॥ १५ ॥

अखण्डैकरसं गोत्रमखण्डैकरसं गृहम् ।

अखण्डैकरसं गोप्यमखण्डैकरसः शशी ॥ १६ ॥

[1] परं—अ १. [2] परं—क, अ २.

अखण्डैकरसास्तारा अखण्डैकरसो रविः ।
अखण्डैकरसं क्षेत्रमखण्डैकरसा क्षमा ॥ १७ ॥
अखण्डैकरसः शान्त अखण्डैकरसो गुणः ।
अखण्डैकरसः साक्षी अखण्डैकरसः सुहृत् ॥ १८ ॥
अखण्डैकरसो बन्धुरखण्डैकरसः सखा ।
अखण्डैकरसो राजा अखण्डैकरसं पुरम् ॥ १९ ॥
अखण्डैकरसं राज्यमखण्डैकरसाः प्रजाः ।
अखण्डैकरसं तारमखण्डैकरसो जपः ॥ २० ॥
अखण्डैकरसं ध्यानमखण्डैकरसं पदम् ।
अखण्डैकरसं ग्राह्यमखण्डैकरसं महत् ॥ २१ ॥
अखण्डैकरसं ज्योतिरखण्डैकरसं धनम् ।
अखण्डैकरसं भोज्यमखण्डैकरसं हविः ॥ २२ ॥
अखण्डैकरसो होम अखण्डैकरसो जयः ।
अखण्डैकरसः स्वर्गः अखण्डैकरसः स्वयम् ॥ २३ ॥

स्वाज्ञविकल्पितस्वाविद्यापदतत्कार्ये यद्यत् दृश्यते यद्यत् श्रूयते यद्यत् स्मर्यते तत्तत खण्डं अचिन्मात्रं लक्ष्यते । तदतिरेकेण किं अखण्डैकरसं किं वा चिन्मात्रं विद्यते इति तदियत्ताबुभुत्सुः कुमारः स्कन्दः जानन्नपि लोकानुग्रहार्थं **अखण्डैकरसचिन्मात्रमनुब्रूहीति** सर्वज्ञं शिवं **पप्रच्छ** । यः **तेनैवं पृष्टः परमशिवः स होवाचेत्याह**—अथेति ॥ किं तत् ? **अखण्डैकरसं दृश्यमित्यादि** ॥१–४१॥

सर्वस्य चिन्मात्रत्वभावना

अखण्डैकरसं सर्वं चिन्मात्रमिति भावयेत् ।
चिन्मात्रमेव चिन्मात्रमखण्डैकरसं रसम् ॥ २४ ॥

भववर्जितचिन्मात्रं सर्वं चिन्मात्रमेव हि ।
इदं च सर्वं चिन्मात्रमयं [1]चिन्मात्रमेव हि ॥ २५ ॥
आत्मभावं च चिन्मात्रमखण्डैकरसं विदुः ।
सर्वलोकं च चिन्मात्रं त्वत्ता मत्ता च चिन्मयम् ॥ २६ ॥
आकाशो भूर्जलं वायुरग्निर्ब्रह्मा हरिः शिवः ।
यत्किंचिद्यन्न किंचिच्च सर्वं चिन्मात्रमेव हि ॥ २७ ॥
अखण्डैकरसं सर्वं यद्यच्चिन्मात्रमेव हि ।
भूतं भव्यं भविष्यच्च सर्वं चिन्मात्रमेव हि ॥ २८ ॥
द्रव्यं कालं च चिन्मात्रं ज्ञानं ज्ञेयं चिदेव हि ।
ज्ञाता चिन्मात्ररूपश्च सर्वं चिन्मयमेव हि ॥ २९ ॥
संभाषणं च चिन्मात्रं यद्यच्चिन्मात्रमेव हि ।
असच्च सच्च चिन्मात्रमाद्यन्तं चिन्मयं सदा ॥ ३० ॥
आदिरन्तश्च चिन्मात्रं गुरुशिष्यादि चिन्मयम् ।
दृग्दृश्यं यदि चिन्मात्रमस्ति चेच्चिन्मयं सदा ॥ ३१ ॥
सर्वाश्चर्यं च चिन्मात्रं देहश्चिन्मात्रमेव हि ।
लिङ्गं च कारणं चैव चिन्मात्रान्न हि विद्यते ॥ ३२ ॥
अहं त्वं चैव चिन्मात्रं मूर्तामूर्तादि चिन्मयम् ।
पुण्यं पापं च चिन्मात्रं जीवश्चिन्मात्रविग्रहः ॥ ३३ ॥
चिन्मात्रान्नास्ति संकल्पश्चिन्मात्रान्नास्ति वेदनम् ।
चिन्मात्रान्नास्ति मन्त्रादि चिन्मात्रान्नास्ति देवता ॥ ३४ ॥

[1] चिन्मय—अ १, अ २.

चिन्मात्रान्नास्ति दिक्पालाश्चिन्मात्राद्यावहारिकम् ।
चिन्मात्रात्परमं ब्रह्म चिन्मात्रान्नास्ति कोऽपि हि ॥ ३५ ॥
चिन्मात्रान्नास्ति माया च चिन्मात्रान्नास्ति पूजनम् ।
चिन्मात्रान्नास्ति मन्तव्यं चिन्मात्रान्नास्ति सत्यकम् ॥ ३६ ॥
चिन्मात्रान्नास्ति कोशादि चिन्मात्रान्नास्ति वै वसु ।
चिन्मात्रान्नास्ति मौनं च चिन्मात्रान्नास्त्यमौनकम् ॥ ३७ ॥
चिन्मात्रान्नास्ति वैराग्यं सर्वं चिन्मात्रमेव हि ।
यच्च यावच्च चिन्मात्रं यच्च यावच्च दृश्यते ॥ ३८ ॥
यच्च यावच्च दूरस्थं सर्वं चिन्मात्रमेव हि ।
यच्च यावच्च भूतादि यच्च यावच्च लक्ष्यते ॥ ३९ ॥
यच्च यावच्च वेदान्ताः सर्वं चिन्मात्रमेव हि ।
चिन्मात्रान्नास्ति गमनं चिन्मात्रान्नास्ति मोक्षकम् ॥ ४० ॥
चिन्मात्रान्नास्ति लक्ष्यं च सर्वं चिन्मात्रमेव हि ।
अखण्डैकरसं ब्रह्म चिन्मात्रान्न हि विद्यते ॥ ४१ ॥
शास्त्रे मयि त्वयीशे च ह्यखण्डैकरसो भवान् ।

स्वातिरिक्तखण्डाविद्यापदतत्कार्यरसजातापह्नवसिद्धं ब्रह्म स्वाज्ञादिदृष्टिमोहे सत्यसति निष्प्रतियोगिकाखण्डैकरसचिन्मात्रतया सदा अवशिष्यते इत्यत्र नहि संशयोऽस्ति । तदेव स्वाज्ञदृष्टेः अचिद्रूपदृश्यजगद्भावादिखण्डरूपेण स्वाध्यस्तवैधर्म्यं सत्यं विभाति । तथैवं स्वाज्ञसमर्पितवैधर्म्यं केवलशास्त्रजन्य-ज्ञानिनो व्यावहारिक प्रतिभाति, विज्ञानिनां तु प्रातिभासिकं, सम्यज्ज्ञानिनां

शून्यं, तत्त्वज्ञानां तु स्वाज्ञसमर्पितदृश्यजगद्भावादिखण्डवैधर्म्यजातं निष्प्रतियोगिकाखण्डैकरसचिन्मात्रमेव विभाति । स्वाज्ञादिदृष्टिदृष्टवैधर्म्यजातं स्वाज्ञादिदृष्टेरेव, नहि तद्वस्तुस्पर्शी भवितुमर्हति, वस्तुनो निष्प्रतियोगिकस्वमात्रत्वादित्यत्र "पश्यतेहापि सन्मात्रम्—असदन्यत्", "ब्रह्ममात्रमसन्नहि",

सिद्धान्तोऽध्यात्मशास्त्राणां सर्वापह्नव एव हि ।
नाविद्याऽस्तीह नो माया शान्तं ब्रह्मेदमक्रमम् ॥ इत्यादि ।
अक्षरार्पितवैधर्म्यं सत्यं भात्यज्ञसन्ततेः ।
ज्ञविज्ञसम्यज्ज्ञतत्त्वज्ञैर्वैधर्म्यं यथाक्रमम् ॥
ज्ञेयं भवेत् दृश्यमिथ्याशून्यचिन्मात्रभेदतः ।
तत्तद्दृष्टिविपर्यासः तत्तद्दृष्टेर्नचात्मनः ॥

इत्यादि श्रुतेः, परमाक्षरोक्तेश्च । अखण्डैकरसचिन्मात्रात् न किञ्चिदस्तीति फलितोऽर्थः । "अखण्डैकरसं भावं" इत्याद्यस्मिन्नध्याये वक्ष्यमाणाध्यायेषु च "कालभेदं" इत्यादि च लिङ्गव्यत्ययः छान्दसः । शिष्टं स्पष्टम् ॥

विद्याफलम्

इत्येकरूपकतया यो वा जानात्यहं त्विति ॥ ४२ ॥
सकृज्ज्ञानेन मुक्तिः स्यात्सम्यज्ज्ञाने स्वयं गुरुः ॥ ४३ ॥

इति ॥

विद्याफलमुपसंहरति—इतीति । "अखण्डैकरसं दृश्यं" इत्यारभ्य "अखण्डैकरसं ब्रह्म चिन्मात्रान्नहि विद्यते । शास्त्रे मयीशे त्वयि च योऽखण्डैकरसः" परमात्मा विद्यते स एव "भवान्" नेतरः इत्यन्तं एकरूपकतया यः कोपि वा अखण्डैकरसचिन्मात्रमहमेवेति जानाति सोऽयमेवं विद्वान् सम्यज्ज्ञाने—तृतीयार्थे सप्तमी—सम्यज्ज्ञानेन गुरुः ब्रह्मविद्वरीयान्

वरिष्ठो वा भूत्वा अवतिष्ठते । पुनस्तस्यैव सकृद्विभातनिष्प्रतियोगिकब्रह्ममात्र-ज्ञानेन विकळेबरमुक्तिः स्यात् । इतिशब्दः अध्यायपरिसमाप्त्यर्थः ॥ ४२-४३ ॥

इति द्वितीयोऽध्यायः

तृतीयोऽध्यायः

आत्मनः सच्चिदानन्दब्रह्मत्वानुभवः

कुमारः पितरमात्मानुभवमनुब्रूहीति पप्रच्छ । स होवाच भगवान् परमशिवः ।

परंब्रह्मस्वरूपोऽहं परमानन्दमस्म्यहम् ।
केवलं ज्ञानरूपोऽहं केवलं परमोऽस्म्यहम् ॥ १ ॥
केवलं शान्तरूपोऽहं केवलं चिन्मयोऽस्म्यहम् ।
केवलं नित्यरूपोऽहं केवलं शाश्वतोऽस्म्यहम् ॥ २ ॥
केवलं सत्त्वरूपोऽहमहं त्यक्त्वाऽहमस्म्यहम् ।
सर्वहीनस्वरूपोऽहं चिदाकाशमयोऽस्म्यहम् ॥ ३ ॥
केवलं तुर्यरूपोऽस्मि तुर्यातीतोऽस्मि केवलः ।
सदा चैतन्यरूपोऽस्मि चिदानन्दमयोऽस्म्यहम् ॥ ४ ॥
केवलाकाररूपोऽस्मि शुद्धरूपोऽस्म्यहं सदा ।
केवलं ज्ञानरूपोऽस्मि केवलं प्रियमस्म्यहम् ॥ ५ ॥

निर्विकल्पस्वरूपोऽस्मि निरीहोऽस्मि निरामयः ।
सदाऽसङ्गस्वरूपोऽस्मि निर्विकारोऽहमव्ययः ॥ ६ ॥
सदैकरसरूपोऽस्मि सदा चिन्मात्रविग्रहः ।
अपरिच्छिन्नरूपोऽस्मि ह्यनन्तानन्दरूपवान् ॥ ७ ॥
सत्परानन्दरूपोऽस्मि चित्परानन्दमस्म्यहम् ।
अन्तरान्तररूपोऽहमवाङ्मनसगोचरः ॥ ८ ॥
आत्मानन्दस्वरूपोऽहं सत्यानन्दोऽस्म्यहं सदा ।
आत्मारामस्वरूपोऽस्मि ह्यहमात्मा सदाशिवः ॥ ९ ॥
आत्मप्रकाशरूपोऽस्मि ह्यात्मज्योतीरसोऽस्म्यहम् ।
आदिमध्यान्तहीनोऽस्मि ह्याकाशसदृशोऽस्म्यहम् ॥ १० ॥
नित्यशुद्धचिदानन्दसत्तामात्रोऽहमव्ययः ।
नित्यबुद्धविशुद्धैकसच्चिदानन्दमस्म्यहम् ॥ ११ ॥
नित्यशेषस्वरूपोऽस्मि सर्वातीतोऽस्म्यहं सदा ।
रूपातीतस्वरूपोऽस्मि परमाकाशविग्रहः ॥ १२ ॥
भूमानन्दस्वरूपोऽस्मि भाषाहीनोऽस्म्यहं सदा ।
सर्वाधिष्ठानरूपोऽस्मि सर्वदा चिद्घनोऽस्म्यहम् ॥ १३ ॥
देहभावविहीनोऽस्मि चिन्ताहीनोऽस्मि सर्वदा ।
चित्तवृत्तिविहीनोऽहं चिदात्मैकरसोऽस्म्यहम् ॥ १४ ॥
सर्वदृश्यविहीनोऽहं दृग्रूपोऽस्म्यहमेव हि ।
सर्वदा पूर्णरूपोऽस्मि नित्यतृप्तोऽस्म्यहं सदा ॥ १५ ॥

अहं ब्रह्मैव सर्वं स्यादहं चैतन्यमेव हि ।
अहमेवाहमेवास्मि भूमाकारस्वरूपवान् ॥ १६ ॥
अहमेव महानात्मा ह्यहमेव परात्परः ।
अहमन्यवदाभामि ह्यहमेव शरीरवत् ॥ १७ ॥
अहं शिष्यवदाभामि ह्यहं लोकत्रयाश्रयः ।
अहं कालत्रयातीत अहं वेदैरुपासितः ॥ १८ ॥
अहं शास्त्रेण निर्णीत अहं चित्ते व्यवस्थितः ।
मत्त्यक्तं नास्ति किंचिद्वा मत्त्यक्तं पृथिवी तु वा ॥ १९ ॥
मयाऽतिरिक्तं यद्यद्वा तत्तन्नास्तीति निश्चिनु ।
अहं ब्रह्मास्मि सिद्धोऽस्मि नित्यशुद्धोऽस्म्यहं सदा ॥ २० ॥
निर्गुणः केवलात्माऽस्मि निराकारोऽस्म्यहं सदा ।
केवलं ब्रह्ममात्रोऽस्मि ह्यजरोऽस्म्यमरोऽस्म्यहम् ॥ २१ ॥
स्वयमेव स्वयं भामि स्वयमेव सदात्मकः ।
स्वयमेवात्मनि स्वस्थः स्वयमेव परा गतिः ॥ २२ ॥
स्वयमेव स्वयं भुञ्जे स्वयमेव स्वयं रमे ।
स्वयमेव स्वयंज्योतिः स्वयमेव स्वयं महः ॥ २३ ॥
स्वस्यात्मनि स्वयं रंस्ये स्वात्मन्येव विलोकये ।
स्वात्मन्येव सुखासीनः स्वात्ममात्रावशेषकः ॥ २४ ॥
स्वचैतन्ये स्वयं स्थास्ये स्वात्मराज्ये सुखे रमे ।
स्वात्मसिंहासने स्थित्वा स्वात्मनोऽन्यन्न चिन्तये ॥ २५ ॥

चिद्रूपमात्रं ब्रह्मैव सच्चिदानन्दमद्वयम् ।
आनन्दघन एवाहमहं ब्रह्मास्मि केवलम् ॥ २६ ॥
सर्वदा सर्वशून्योऽहं [1]सर्वात्मानन्दवानहम् ।
नित्यानन्दस्वरूपोऽहमात्माकाशोऽस्मि [2]सर्वदा ॥ २७ ॥
अहमेव हृदाकाशे चिदादित्यस्वरूपवान् ।
आत्मनाऽऽत्मनि तृप्तोऽस्मि ह्यरूपोऽस्म्यहमव्ययः ॥ २८ ॥
एकसंख्याविमुक्तोऽस्मि नित्यमुक्तस्वरूपवान् ।
आकाशादपि सूक्ष्मोऽहमाद्यन्ताभाववानहम् ॥ २९ ॥
सर्वप्रकाशरूपोऽस्मि परावरसुखोऽस्म्यहम् ।
सत्तामात्रस्वरूपोऽहं शुद्धमोक्षस्वरूपवान् ॥ ३० ॥
सत्यानन्दस्वरूपोऽहं ज्ञानानन्दघनोऽस्म्यहम् ।
विज्ञानमात्ररूपोऽहं सच्चिदानन्दलक्षणः ॥ ३१ ॥
ब्रह्ममात्रमिदं सर्वं ब्रह्मणोऽन्यन्न किंचन ।
तदेवाहं सदानन्दं ब्रह्मैवाहं सनातनम् ॥ ३२ ॥
त्वमित्येतत्तदित्येतन्मत्तोऽन्यन्नास्ति किंचन ।
चिच्चैतन्यस्वरूपोऽहमहमेव परः शिवः ॥ ३३ ॥
अतिभावस्वरूपोऽहमहमेव सुखात्मकः ।
साक्ष्यवस्तुविहीनत्वात्साक्षित्वं नास्ति मे सदा ॥ ३४ ॥
केवलं ब्रह्ममात्रत्वादहमात्मा सनातनः ।
अहमेवादिशेषोऽहमहंशेषोऽहमेव हि ॥ ३५ ॥

[1] सदात्मा—अ, अ १. [2] नित्यशः—अ, अ १, क.

नामरूपविमुक्तोऽहमहमानन्दविग्रहः ।
इन्द्रियाभावरूपोऽहं सर्वभावस्वरूपकः ॥ ३६ ॥
बन्धमुक्तिविहीनोऽहं शाश्वतानन्दविग्रहः ।
आदिचैतन्य[1]रूपोऽहमखण्डैकरसोऽस्म्यहम् ॥ ३७ ॥
वाङ्मनोऽगोचरश्चाहं सर्वत्र सुखवानहम् ।
सर्वत्र पूर्णरूपोऽहं भूमानन्दमयोऽस्म्यहम् ॥ ३८ ॥
सर्वत्र तृप्तिरूपोऽहं परामृतरसोऽस्म्यहम् ।
एकमेवाद्वितीयं सद्ब्रह्मैवाहं न संशयः ॥ ३९ ॥
सर्वशून्यस्वरूपोऽहं [2]सकलागमगोचरः ।
मुक्तोऽहं मोक्षरूपोऽहं निर्वाणसुखरूपवान् ॥ ४० ॥
सत्यविज्ञानमात्रोऽहं सन्मात्रानन्दवानहम् ।
तुरीयातीतरूपोऽहं निर्विकल्पस्वरूपवान् ॥ ४१ ॥
सर्वदा ह्यजरूपोऽहं [3]नीरागोऽस्मि निरञ्जनः ।
अहं शुद्धोऽस्मि बुद्धोऽस्मि नित्योऽस्मि प्रमुरस्म्यहम् ॥ ४२ ॥
ओङ्कारार्थस्वरूपोऽस्मि निष्कलङ्कमयोऽस्म्यहम् ।

एवं स्वपितृमुखतः कुमारः अखण्डैकरसचिन्मात्रेयत्तां श्रुत्वा तत्र स्वानुभवं पृच्छतीत्याह—कुमार इति। तत्प्रश्नमङ्गीकृत्य अखण्डैकरसचिन्मात्रानुभवं स्वाज्ञविकल्पितात् सर्वस्मात् परं विलक्षणं यत् सम्यक् बृंहयति विजृम्भते तत् **परंब्रह्म** तत्स्वरूपोऽहम् । **परमानन्दमिति** लिङ्गाव्यत्ययः,

[1] मात्रो—क, अ, अ १, अ २
[2] सकलामर—क, अ २.
[3] निरागो—क, अ १, अ २, उ १.

परमानन्दोऽस्म्यहमित्यर्थः । किंच—केवलमित्यादि । प्रत्यक्प्रकाशत्वात् ज्ञानरूपः । सर्वोत्कृष्टत्वात् परमः ॥ १ ॥ क्रूरस्वातिरिक्ताभावात् शान्तः । अनित्यापायात् नित्यः । चिरन्तनत्वात् शाश्वतः ॥ २ ॥ ईश्वरत्वात् सत्स्वरूपः । पराक्सापेक्षप्रत्यगहम्भावं त्यक्त्वा शिष्टाहम्भावोऽस्मि । सर्वं ब्रह्मेत्यत्र सर्वापह्नवसिद्धब्रह्ममात्रमस्मि । चिदाकाशमयः चिदाकाशस्वरूपः ॥ ३ ॥ तुर्यः प्रत्यक् । तदतीतः परः । अशेषविशेषाभावात् केवलः ॥ ४–५ ॥ विकल्पासहत्वात् निर्विकल्पः । अन्तःकरणाभावात् निरीहः । भवरोगहानात् निरामयः । उपाधिसत्त्वेऽपि असङ्गः । विकाराभावात् निर्विकारः । स्वतः परतो वा व्ययाभावात् अव्ययः ॥ ६ ॥ अपरिच्छिन्नः त्रिविधपरिच्छेदाभावात् । अनन्तानन्दः अपरिमितानन्दरूपत्वात् ॥ ७ ॥ सच्चित्परानन्दरूपः सच्चित्परमानन्दरूपत्वात । सर्वान्तरः प्रत्यक् तस्मादप्यन्तरः परः प्रत्यगभिन्नब्रह्मरूपत्वात । वाङ्मानसादिकरणग्रामागोचरः ॥ ८ ॥ सत्यात्मानन्दरूपः । प्रत्यगादिरूपेण सर्वात्मसु गमत इति आत्मागमः ॥ ९ ॥ स्वोत्पत्तिस्थितिलयाभावात् आदिमध्यान्तहीनः । निरवयवत्वात् आकाशसदृशः ॥ १० ॥ सत्तासामान्यत्वात् सत्तामात्रः ॥ ११ ॥ सर्वावशेषरूपत्वात् नित्यशेषः ॥ १२ ॥ अपरिच्छिन्नानन्दत्वात् भूमानन्दः । वागादिकरणाभावात् भाषाहीनः ॥ १३–१४ ॥ दृश्यासम्भवतो दृङ्मात्रः ॥ १५–१६ ॥ स्वाङ्गदृष्टेः अहमन्यवत् गुरुशिष्यवत् भातोऽस्मि । वेदशास्त्रैः उपास्यो निर्णीतोऽस्मि ॥ १७–१८ ॥ शिष्टं स्पष्टम् ॥ मया अव्याप्तं मदतिरिक्तं वा नास्तीति जानीहीत्याह—मत्त्यक्तमिति ॥ १९ ॥ किञ्च—अहमिति ॥ २० ॥ केवलं ब्रह्ममात्रोऽस्मि निष्प्रतियोगिकत्वात् ॥ २१ ॥ यतः स्वयमेवेदं सर्वं अतः स्वस्मादन्यत् न चिन्तये इत्याह—स्वयमेवेति ॥ २२ ॥ "भुङ्क्ते" इत्यत्र पुरुषव्यत्ययः, भुञ्जे इत्यर्थः ॥ २३–२५ ॥ यच्चिद्रूपमात्रं तदेवाहमस्मीत्याह—चिदिति ॥ २६ ॥ सर्वशून्योऽहं [1]सर्वदा सर्वासम्भवात् ॥ २७ ॥

[1] सर्वथा—उ १.

अहमेव चिदादित्यस्वरूपवान् सर्वप्राणिहृद्गतकामादिवृत्तिसहस्रभासकचित्सूर्यत्वात् ॥ २८ ॥ **एकसङ्ख्याविमुक्तः** असङ्ख्येयत्वात् । **आद्यन्ताभाववान्** सम्भूतिप्रलयाभावात् ॥ २९ ॥ **परावरसुखः** प्रत्यगभिन्नब्रह्मानन्दत्वात् । **शुद्धमोक्षस्वरूपवान्** स्वस्य स्वातिरिक्तभ्रममोक्षसिद्धत्वात् ॥ ३०–३१ ॥ यतः अन्यत् न विद्यते तदेवाहमित्याह—**ब्रह्ममात्रमिति** ॥ ३२ ॥ त्वंतदित्यादिशब्दवाच्यं मदतिरिक्तं नास्तीत्याह—**त्वमिति** ॥ ३३ ॥ **अतिभावस्वरूपः** सर्वभावातीतत्वात् । **साक्षित्वं**—साक्ष्यसापेक्षसाक्षितायाः सविशेषत्वात् तद्विरळोऽस्मीत्यर्थः ॥ ३४ ॥ **आदिशेषः** धरणीधरत्वात् । **अहंशेष** इति स्वमात्रत्वमवशिष्टत्वात् ॥ ३५–३८ ॥ **एकमेवाद्वितीयं** सजातीयविजातीयस्वगतभेदवैरळ्यात् ॥ ३९ ॥ **सकलागमगोचरः** वेदान्तवेद्यत्वात् । स्वाविद्याद्वयतो **मुक्तः** । **निर्वाणसुखरूपवान्** विदेहकैवल्यानन्दत्वात् ॥ ४०–४१ ॥ **बुद्धः** विशुद्धबोधरूपत्वात ॥ ४२ ॥ **ओङ्कारार्थस्वरूपः** तुर्यतुर्यत्वात् ॥

आत्मनि सर्वप्रविभक्तरूपाभावानुभवः

चिदाकारस्वरूपोऽस्मि नाहमस्मि न सोऽस्म्यहम् ॥ ४३ ॥
न हि किंचित्स्वरूपोऽस्मि निर्व्यापारस्वरूपवान् ।
निरंशोऽस्मि निराभासो न मनो नेन्द्रियोऽस्म्यहम् ॥ ४४ ॥
न बुद्धिर्न विकल्पोऽहं न देहादित्रयोऽस्म्यहम् ।
न जाग्रत्स्वप्नरूपोऽहं न सुषुप्तिस्वरूपवान् ॥ ४५ ॥
न तापत्रयरूपोऽहं नेषणात्रयवानहम् ।
श्रवणं नास्ति मे सिद्धेर्मननं च चिदात्मनि ॥ ४६ ॥
सजातीयं न मे किंचिद्विजातीयं न मे क्वचित् ।
स्वगतं च न मे किंचिन्न मे भेदत्रयं क्वचित् ॥ ४७ ॥

अहंशब्दबोध्यं स्थूलदेहादिप्रत्यगन्तं, तच्छब्दबोध्यं विराडादितुर्यान्तं, तदुभयविलक्षणत्वात् **नाहमस्मि न सोऽस्म्यहम्** ॥ ४३ ॥ **स्वातिरेकेण किञ्चित्स्वरूपः** । अखण्डार्थत्वात् **निरंशः** । देहत्रयविलक्षणत्वात् **न मन इत्यादि** ॥ ४४–४५ ॥ स्वस्य स्वतःसिद्धत्वेन न हि श्रवणादिसाधनाकाङ्क्षा अस्तीत्याह—**श्रवणमित्यादि** ॥ **च**शब्दो निदिध्यासनसमुच्चयार्थः ॥ ४६ ॥ न हि सजातीयादिभेदत्रयमस्तीत्याह—**सजातीयमिति** ॥ ४७ ॥

स्वेतरस्य सर्वस्य असत्त्वानुभवः

असत्यं हि मनोरूपमसत्यं बुद्धिरूपकम् ।
अहंकारमसद्धीति नित्योऽहं शाश्वतो ह्यजः ॥ ४८ ॥
देहत्रयमसद्विद्धि कालत्रयमसत्सदा ।
गुणत्रयमसद्विद्धि ह्यहं सत्यात्मकः शुचिः ॥ ४९ ॥
श्रुतं सर्वमसद्विद्धि वेदं सर्वमसत्सदा ।
शास्त्रं सर्वमसद्विद्धि ह्यहं सत्यं चिदात्मकः ॥ ५० ॥
मूर्तित्रयमसद्विद्धि सर्वभूतमसत्सदा ।
सर्वतत्त्वमसद्विद्धि ह्यहं भूमा सदाशिवः ॥ ५१ ॥
गुरुशिष्यमसद्विद्धि गुरोर्मन्त्रमसत्ततः ।
यद्दृश्यं तदसद्विद्धि न मां विद्धि तथाविधम् ॥ ५२ ॥
यच्चिन्त्यं तदसद्विद्धि यच्ज्ञाय्यं तदसत्सदा ।
यद्धितं तदसद्विद्धि न मां विद्धि तथाविधम् ॥ ५३ ॥
सर्वान्प्राणीनसद्विद्धि सर्वान्भोगानसत्त्विति ।
दृष्टं श्रुतमसद्विद्धि [1]ओतं प्रोतमसन्मयम् ॥ ५४ ॥

[1] ओतं—उ, उ १.

कार्याकार्यमसद्विद्धि नष्टं प्राप्तमसन्मयम् ।
दुःखादुःखमसद्विद्धि सर्वासर्वमसन्मयम् ॥ ५५ ॥
पूर्णापूर्णमसद्विद्धि धर्माधर्ममसन्मयम् ।
लाभालाभावसद्विद्धि जयाजयमसन्मयम् ॥ ५६ ॥
शब्दं सर्वमसद्विद्धि स्पर्शं सर्वमसत्सदा ।
रूपं सर्वमसद्विद्धि रसं सर्वमसन्मयम् ॥ ५७ ॥
गन्धं सर्वमसद्विद्धि सर्वाज्ञानमसन्मयम् ।
असदेव सदा सर्वमसदेव भवोद्भवम् ॥ ५८ ॥
असदेव गुणं सर्वं सन्मात्रमहमेव हि ।

स्वातिरिक्तसामान्यं शशविषाणवदत्यन्ताभावरूपतया असदेव । अहं तु तदपह्नवसिद्धनिष्प्रतियोगिकब्रह्ममात्रभावरूपोऽस्मीत्याह—असत्यं हीति ॥ ४८–५८ ॥

अहंब्रह्मास्मीत्यात्ममन्त्राभ्यासः

स्वात्ममन्त्रं सदा पश्येत्स्वात्ममन्त्रं सदाभ्यसेत् ॥ ५९ ॥
अहं ब्रह्मास्मिमन्त्रोऽयं दृश्यपापं विनाशयेत् ।
अहं ब्रह्मास्मि मन्त्रोऽयमन्यमन्त्रं विनाशयेत् ॥ ६० ॥
अहं ब्रह्मास्मि मन्त्रोऽयं देहदोषं विनाशयेत् ।
अहं ब्रह्मास्मि मन्त्रोऽयं जन्मपापं विनाशयेत् ॥ ६१ ॥
अहं ब्रह्मास्मि मन्त्रोऽयं मृत्युपाशं विनाशयेत् ।
अहं ब्रह्मास्मि मन्त्रोऽयं द्वैतदुःखं विनाशयेत् ॥ ६२ ॥

अहं ब्रह्मास्मि मन्त्रोऽयं भेदबुद्धिं विनाशयेत् ।
अहं ब्रह्मास्मि मन्त्रोऽयं चिन्तादुःखं विनाशयेत् ॥ ६३ ॥
अहं ब्रह्मास्मि मन्त्रोऽयं बुद्धिव्याधिं विनाशयेत् ।
अहं ब्रह्मास्मि मन्त्रोऽयं चित्तबन्धं विनाशयेत् ॥ ६४ ॥
अहं ब्रह्मास्मि मन्त्रोऽयं सर्वव्याधीन्विनाशयेत् ।
अहं ब्रह्मास्मि मन्त्रोऽयं सर्वशोकं विनाशयेत् ॥ ६५ ॥
अहं ब्रह्मास्मि मन्त्रोऽयं कामादीन्नाशयेत्क्षणात् ।
अहं ब्रह्मास्मि मन्त्रोऽयं [1]क्रोधवृत्तिं विनाशयेत् ॥ ६६ ॥
अहं ब्रह्मास्मि मन्त्रोऽयं चित्तवृत्तिं विनाशयेत् ।
अहं ब्रह्मास्मि मन्त्रोऽयं संकल्पादीन्विनाशयेत् ॥ ६७ ॥
अहं ब्रह्मास्मि मन्त्रोऽयं कोटिदोषं विनाशयेत् ।
अहं ब्रह्मास्मि मन्त्रोऽयं सर्वतन्त्रं विनाशयेत् ॥ ६८ ॥
अहं ब्रह्मास्मि मन्त्रोऽयमात्माज्ञानं विनाशयेत् ।
अहं ब्रह्मास्मि मन्त्रोऽयमात्मलोकजयप्रदः ॥ ६९ ॥
अहं ब्रह्मास्मि मन्त्रोऽयमप्रतर्क्यसुखप्रदः ।
अहं ब्रह्मास्मि मन्त्रोऽयमजडत्वं प्रयच्छति ॥ ७० ॥
अहं ब्रह्मास्मि मन्त्रोऽयमनात्मासुरमर्दनः ।
अहं ब्रह्मास्मि वज्रोऽयमनात्माख्यगिरीन्हरेत् ॥ ७१ ॥
अहं ब्रह्मास्मि चक्रोऽयमनात्मं[2]त्वासुरान्हरेत् ।
अहं ब्रह्मास्मि मन्त्रोऽयं सर्वोस्तान्मोक्षयिष्यति ॥ ७२ ॥

[1] क्रोधशक्तिं—अ, अ १, अ २, क. [2] ख्यासुरान्—क, अ २.

अहं ब्रह्मास्मि मन्त्रोऽयं ज्ञानानन्दं प्रयच्छति ।
सप्तकोटिमहामन्त्रं जन्म[1]कोटिशतप्रदम् ॥ ७३ ॥
सर्वमन्त्रान्समुत्सृज्य एतन्मन्त्रं [2]समभ्यसेत् ।
सद्यो मोक्षमवाप्नोति नास्ति संदेहमण्वपि ॥ ७४ ॥

इति ॥

स्वात्ममन्त्राभ्यासस्य ब्रह्मात्यन्तरायनिरसनद्वारा निष्प्रतियोगिकब्रह्ममात्र-पदप्रापकत्वात् यत एवं अतः बन्धमोक्षभ्रममुमुक्षुः इममेव अहं ब्रह्मास्मीति मन्त्रं सदा अभ्यसेदित्याह—स्वात्ममन्त्रमिति । स्पष्टोऽयमर्थः ॥ ५९–७४ ॥ इतिशब्दः अध्यायपरिसमाप्त्यर्थः ॥

इति तृतीयोऽध्यायः

चतुर्थोऽध्यायः

जीवन्मुक्तिः—प्रत्यगभिन्नब्रह्मभावापत्तिः

कुमारः परमेश्वरं पप्रच्छ जीवन्मुक्तविदेहमुक्तयोः स्थिति-मनुब्रूहीति । स होवाच परः शिवः ।

चिदात्माऽहं परात्माऽहं निर्गुणोऽहं परात्परः ।
आत्ममात्रेण यस्तिष्ठेत्स जीवन्मुक्त उच्यते ॥ १ ॥
देहत्रयातिरिक्तोऽहं शुद्धचैतन्यमस्म्यहम् ।
ब्रह्माहमिति यस्यान्तः स जीवन्मुक्त उच्यते ॥ २ ॥

[1] कोश—क, अ २, [2] सदाभ्य—क, अ २,

आनन्दघनरूपोऽस्मि परानन्दघनोऽस्म्यहम् ।
यस्य देहादिकं नास्ति यस्य ब्रह्मेति निश्चयः ।
परमानन्दपूर्णो यः स जीवन्मुक्त उच्यते ॥ ३ ॥
यस्य किंचिदहं नास्ति चिन्मात्रेणावतिष्ठते ।
चैतन्यमात्रो यस्यान्तश्चिन्मात्रैकस्वरूपवान् ॥ ४ ॥
सर्वत्र पूर्णरूपात्मा सर्वत्रात्मावशेषकः ।
आनन्दरतिरव्यक्तः परिपूर्णश्चिदात्मकः ॥ ५ ॥
शुद्धचैतन्यरूपात्मा सर्वसङ्गविवर्जितः ।
नित्यानन्दः प्रसन्नात्मा ह्यन्यचिन्ताविवर्जितः ॥ ६ ॥
किंचिदस्तित्वहीनो यः स जीवन्मुक्त उच्यते ।
न मे चित्तं न मे बुद्धिर्नाहंकारो न चेन्द्रियम् ॥ ७ ॥
न मे देहः कदाचिद्वा न मे प्राणादयः क्वचित् ।
न मे माया न मे कामो न मे क्रोधः परोऽस्म्यहम् ॥ ८ ॥
न मे किंचिदिदं वापि न मे किंचित्क्वचिज्जगत् ।
न मे दोषो न मे लिङ्गं न मे चक्षुर्न मे मनः ॥ ९ ॥
न मे श्रोत्रं न मे नासा न मे जिह्वा न मे करः ।
न मे जाग्रन्न मे स्वप्नं न मे कारणमण्वपि ॥ १० ॥
न मे तुरीयमिति यः स जीवन्मुक्त उच्यते ।
इदं सर्वं न मे किंचिदयं सर्वं न मे क्वचित् ॥ ११ ॥

न मे [1]कालो न मे देशो न मे वस्तु न मे मतिः ।
न मे स्नानं न मे संध्या न मे दैवं न मे स्थलम् ॥ १२ ॥
न मे तीर्थं न मे सेवा न मे ज्ञानं न मे पदम् ।
न मे बन्धं न मे जन्म न मे वाक्यं न मे रविः ॥ १३ ॥
न मे पुण्यं न मे पापं न मे कार्यं न मे शुभम् ।
न मे जीव इति स्वात्मा न मे किंचिज्जगत्त्रयम् ॥ १४ ॥
न मे मोक्षो न मे द्वैतं न मे वेदो न मे विधिः ।
न मेऽन्तिकं न मे दूरं न मे बोधो न मे [2]रहः ॥ १५ ॥
न मे गुरुर्न मे शिष्यो न मे हीनो न चाधिकः ।
न मे ब्रह्मा न मे विष्णुर्न मे रुद्रो न चन्द्रमाः ॥ १६ ॥
न मे पृथ्वी न मे तोयं न मे वायुर्न मे वियत् ।
न मे वह्निर्न मे गोत्रं न मे लक्ष्यं न मे भवः ॥ १७ ॥
न मे ध्याता न मे ध्येयं न मे ध्यानं न मे मनुः ।
न मे शीतं न मे चोष्णं न मे तृष्णा न मे क्षुधा ॥ १८ ॥
न मे मित्रं न मे शत्रुर्न मे मोहो न मे जयः ।
न मे पूर्वं न मे पश्चान्न मे चोर्ध्वं न मे दिशः ॥ १९ ॥
न मे वक्तव्यमल्पं वा न मे श्रोतव्यमण्वपि ।
न मे मन्तव्यमीषद्वा न मे ध्यातव्यमण्वपि ॥ २० ॥
न मे भोक्तव्यमीषद्वा न मे स्मर्तव्यमण्वपि ।
न मे भोगो न मे [3]रागो न मे यागो न मे लयः ॥ २१ ॥

[1] लोका—उ. लोको—उ १. [2] रविः—उ, उ १. [3] रोगो— उ १.

न मे मौर्ख्यं न मे शान्तं न मे बन्धं न मे प्रियम् ।
न मे मोदः प्रमोदो वा न मे स्थूलं न मे [1]कृशम् ॥ २२ ॥
न मे दीर्घं न मे ह्रस्वं न मे वृद्धिर्न मे क्षयम् ।
अध्यारोपापवादौ वा न मे चैकं न मे बहु ॥ २३ ॥
न मे आन्ध्यं न मे मान्द्यं न मे [2]पट्विदमण्वपि ।
न मे मांसं न मे रक्तं न मे मेदो न मे ह्यसृक् ॥ २४ ॥
न मे मज्जा न मेऽस्थिर्वा न मे त्वग्धातुसप्तकम् ।
न मे शुक्लं न मे रक्तं न मे नीलं न मे पृथक् ॥ २५ ॥
न मे तापो न मे लोभो मुख्यं गौणं न मे क्वचित् ।
न मे भ्रान्तिर्न मे स्थैर्यं न मे गुह्यं न मे कुलम् ॥ २६ ॥
न मे त्याज्यं न मे ग्राह्यं न मे हास्यं न मे नयः ।
न मे व्रतं न मे ग्लानिर्न मे शोष्यं न मे सुखम् ॥ २७ ॥
न मे ज्ञाता न मे ज्ञानं न मे ज्ञेयं न मे स्वयम् ।
न मे तुभ्यं न मे मह्यं न मे त्वं च न मे त्वहम् ॥ २८ ॥
न मे जरा न मे बाल्यं न मे यौवनमण्वपि ।
अहं ब्रह्मास्म्यहं ब्रह्मास्म्यहं ब्रह्मेति निश्चयः ॥ २९ ॥
चिदहं चिदहं चेति स जीवन्मुक्त उच्यते ।
ब्रह्मैवाहं चिदेवाहं परो वाहं न संशयः ॥ ३० ॥
स्वयमेव स्वयं हंसः स्वयमेव स्वयं स्थितः ।
स्वयमेव स्वयं पश्येत्स्वात्मराज्ये सुखे वसेत् ॥ ३१ ॥

[1] त्वहं—उ, उ १. [2] पट्वीद—क, उ. पद्मद—अ.

स्वात्मानन्दं स्वयं भोक्ष्येत्स जीवन्मुक्त उच्यते ।
स्वयमेवैकवीरोऽग्रे स्वयमेव प्रभुः स्मृतः ।
स्वस्वरूपे स्वयं स्वप्स्ये स जीवन्मुक्त उच्यते ॥ ३२ ॥

कुमारः स्वपितुः परमेश्वरस्य मुखतः अखण्डैकरसचिन्मात्रज्ञानं तदनुभवं च यथावदवगम्य तदान्तराळिकमुख्यफलरूपजीवन्मुक्तिविदेहमुक्तिस्वरूपमवगन्तुं शिवं पृच्छतीत्याह—कुमार इति ॥ तदङ्गीकृत्य क्रमेण जीवन्मुक्तविदेहमुक्तलक्षणं **स होवाच** । तत्र जीवन्मुक्तलक्षणमुच्यते—**चिदात्मेति** । परागभावग्रासप्रत्यग्भावस्थितिः जीवन्मुक्तिः प्रत्यगभिन्नब्रह्मभावापत्तिर्वेति वक्ष्यमाणजीवन्मुक्तिपर्यायसमुदायार्थः ॥ १–४ ॥ आनन्दात्मन्येव रतिः यस्य सोऽयं **आनन्दरतिः** ॥ ५ ॥ **अन्यचिन्ताविवर्जितः** स्वान्यस्य मृग्यत्वात् ॥ ६–९ ॥ देहत्रयवैलक्षण्यवदवस्थाचतुष्टयवैलक्षण्यमाह—**न मे जाग्रदिति** ॥ १०–१४ ॥ **न मे विधिः न निषेधोऽपीत्यर्थः** ॥ १५–३१ ॥ **स्वयमेव प्रभुः** ईश्वरत्वात् । "चिदात्माऽहं परात्माऽहं" इत्येतावता ग्रन्थेन ब्रह्मविदादिचतुर्भेदभिन्नजीवन्मुक्तलक्षणमभिहितम् । प्रायशः इयं तेजोबिन्दूपनिषत् विध्यादिविदेहमुक्त्यन्तमहावाक्यरत्नावलीप्रभालोचने प्रसक्तानुप्रसक्त्या व्याख्याता नेह पुनः पदशो व्याख्यायते ग्रन्थविस्तरभयादिति ॥ ३२ ॥

विदेहमुक्तिः—निष्प्रतियोगिकस्वमात्रब्रह्ममात्रावस्थानम्

ब्रह्मभूतः प्रशान्तात्मा ब्रह्मानन्दमयः सुखी ।
[1]स्वच्छरूपो महामौनी वैदेही मुक्त एव सः ॥ ३३ ॥
सर्वात्मा समरूपात्मा शुद्धात्मा त्वह[2]मुत्थितः ।
एकवर्जित एकात्मा सर्वात्मा स्वात्ममात्रकः ॥ ३४ ॥

[1] स्वस्व—अ, अ १. [2] मुज्झि—अ, अ १, अ २, क.

अजात्मा चामृतात्माऽहं स्वयमात्माऽहमव्ययः ।
अक्ष्यात्मा ललितात्माऽहं तूष्णीमात्मस्वभाववान् ॥ ३५ ॥
आनन्दात्मा प्रियो ह्यात्मा मोक्षात्मा बन्धवर्जितः ।
ब्रह्मैवाहं चिदेवाहमेवं वापि न चिन्त्यते ॥ ३६ ॥
चिन्मात्रेणैव यस्तिष्ठेद्वैदेही मुक्त एव सः ॥ ३७ ॥
निश्चयं च परित्यज्य अहं ब्रह्मेति निश्चयम् ।
आनन्दभरितस्वान्तो वैदेही मुक्त एव सः ॥ ३८ ॥
[1]सर्वमस्तीति नास्तीति निश्चयं त्यज्य तिष्ठति ।
अहं ब्रह्मास्मि नास्मीति सच्चिदानन्दमात्रकः ॥ ३९ ॥
किंचित्कचित्कदाचिच्च आत्मानं न स्पृशत्यसौ ।
तूष्णीमेवं स्थितस्तूष्णीं तूष्णीं सत्यं न किंचन ॥ ४० ॥
परमात्मा गुणातीतः सर्वात्मा भूतभावनः ।
कालभेदं वस्तुभेदं देशभेदं स्वभेदकम् ॥ ४१ ॥
किंचिद्भेदं न तस्यास्ति किंचिद्वाऽपि न विद्यते ।
अहं त्वं तदिदं सोऽयं कालात्मा कालहीनकः ॥ ४२ ॥
शून्यात्मा सूक्ष्मरूपात्मा विश्वात्मा विश्वहीनकः ।
देवात्मा देवहीनात्मा मेयात्मा मेयवर्जितः ॥ ४३ ॥
सर्वत्र जडहीनात्मा सर्वेषामन्तरात्मकः ।
सर्वसंकल्पहीनात्मा चिन्मात्रोऽस्मीति सर्वदा ॥ ४४ ॥

[1] सर्वमस्मीति नास्मीति-

केवलः परमात्माऽहं केवलो ज्ञानविग्रहः ।
सत्तामात्रस्वरूपात्मा नान्यत्किंचिज्जगद्भयम् ॥ ४५ ॥
जीवेश्वरेति वाक् क्वेति वेद[1]शास्त्राः क्वहं त्विति ।
इदं चैतन्यमेवेति अहं चैतन्यमित्यपि ॥ ४६ ॥
इति निश्चयशून्यो यो वैदेही मुक्त एव सः ।
चैतन्यमात्रसंसिद्धस्वात्मारामः सुखासनः ॥ ४७ ॥
अपरिच्छिन्नरूपात्मा अणुस्थूलादिवर्जितः ।
तुर्यतुर्यः परानन्दो वैदेही मुक्त एव सः ॥ ४८ ॥
नामरूपविहीनात्मा परसंवित्सुखात्मकः ।
तुरीयातीतरूपात्मा शुभाशुभविवर्जितः ॥ ४९ ॥
योगात्मा योगयुक्तात्मा बन्धमुक्तिविवर्जितः ।
गुणागुणविहीनात्मा देशकालादिवर्जितः ॥ ५० ॥
साक्ष्यसाक्षित्वहीनात्मा किंचित्किंचिन्न किंचन ।
यस्य प्रपञ्चमानं न ब्रह्माकारमपीह न ॥ ५१ ॥
स्वस्वरूपे स्वयंज्योतिः स्वस्वरूपे स्वयंरतिः ।
वाचामगोचरानन्दो वाङ्मनोऽगोचरः स्वयम् ॥ ५२ ॥
अतीतातीतभावो यो वैदेही मुक्त एव सः ।
चित्तवृत्तेरतीतो यश्चित्तवृत्त्यवभासकः ॥ ५३ ॥
सर्ववृत्तिविहीनात्मा वैदेही मुक्त एव सः ।
तस्मिन्काले [2]विदेहीति देहस्मरणवर्जितः ॥ ५४ ॥

[1] वेदशास्त्राण्यहं—अ. [2] विदेहोति—अ १, अ २, क, उ १. विदेहोस्ति

ईषन्मात्रं स्मृतं चेद्यस्तदा सर्वसमन्वितः ।
परैरदृष्टबाह्यात्मा परमानन्दचिद्घनः ॥ ९५ ॥
परैरदृष्टबाह्यात्मा सर्ववेदान्तगोचरः ।
ब्रह्मामृतरसास्वादो ब्रह्मामृतरसायनः ॥ ९६ ॥
ब्रह्मामृतरसासक्तो ब्रह्मामृतरसः स्वयम् ।
ब्रह्मामृतरसे मग्नो ब्रह्मानन्दशिवार्चनः ॥ ९७ ॥
[1]ब्रह्मामृतरसे तृप्तो ब्रह्मानन्दानुभावकः ।
ब्रह्मानन्दशिवानन्दो ब्रह्मानन्दरस[2]प्रभः ॥ ९८ ॥
ब्रह्मानन्दपरं ज्योतिर्ब्रह्मानन्दनिरन्तरः ।
ब्रह्मानन्दरसास्वादो ब्रह्मानन्दकुटुम्बकः ॥ ९९ ॥
ब्रह्मानन्दरसारूढो ब्रह्मानन्दैकचिद्घनः ।
ब्रह्मानन्दरसोद्राहो ब्रह्मानन्दरसंभरः ॥ ६० ॥
ब्रह्मानन्दजनैर्युक्तो ब्रह्मानन्दात्मनि स्थितः ।
आत्मरूपमिदं सर्वमात्मनोऽन्यन्न किंचन ॥ ६१ ॥
सर्वमात्माऽहमात्माऽस्मि परमात्मा परात्मकः ।
नित्यानन्दस्वरूपात्मा वैदेही मुक्त एव सः ॥ ६२ ॥
पूर्णरूपो महानात्मा प्रीतात्मा शाश्वतात्मकः ।
सर्वान्तर्यामिरूपात्मा निर्मलात्मा निरात्मकः ॥ ६३ ॥
निर्विकारस्वरूपात्मा शुद्धात्मा शान्तरूपकः ।
शान्ताशान्तस्वरूपात्मा नैकात्मत्वविवर्जितः ॥ ६४ ॥

[1] ब्रह्मानन्द —उ, उ १. [2] प्रदः—अ, अ १.

जीवात्मपरमात्मेति चिन्तासर्वस्ववर्जितः ।
मुक्तामुक्तस्वरूपात्मा मुक्तामुक्तविवर्जितः ॥ ६५ ॥
बन्धमोक्षस्वरूपात्मा बन्धमोक्षविवर्जितः ।
द्वैताद्वैतस्वरूपात्मा द्वैताद्वैतविवर्जितः ॥ ६६ ॥
सर्वासर्वस्वरूपात्मा सर्वासर्वविवर्जितः ।
[1]मोदप्रमोदरूपात्मा [2]मोदादिविनिवर्जितः ॥ ६७ ॥
सर्वसंकल्पहीनात्मा वैदेही मुक्त एव सः ।
निष्कलात्मा निर्मलात्मा बुद्धात्मा पुरुषात्मकः ॥ ६८ ॥
आनन्दादिविहीनात्मा अमृतात्मामृतात्मकः ।
कालत्रयस्वरूपात्मा कालत्रयविवर्जितः ॥ ६९ ॥
अखिलात्मा ह्यमेयात्मा मानात्मा मानवर्जितः ।
नित्यप्रत्यक्षरूपात्मा नित्यप्रत्यक्ष[3]निर्णितः ॥ ७० ॥
अन्यहीनस्वभावात्मा अन्यहीनस्वयंप्रभः ।
विद्याऽविद्यादिमेयात्मा विद्याऽविद्यादिवर्जितः ॥ ७१ ॥
नित्यानित्यविहीनात्मा इहामुत्रविवर्जितः ।
शमादिषट्कशून्यात्मा मुमुक्षुत्वादिवर्जितः ॥ ७२ ॥
स्थूलदेहविहीनात्मा सूक्ष्मदेहविवर्जितः ।
कारणादिविहीनात्मा [4]तुरीयादिविवर्जितः ॥ ७३ ॥

[1] मोदः—अ १, अ २, उ.
[2] मोदामोदवि—क.
[3] निर्णीतः—उ १.
[4] तुर्यातुर्यादिव—उ १.

अन्नकोशविहीनात्मा प्राणकोशविवर्जितः ।
मनःकोशविहीनात्मा विज्ञानादिविवर्जितः ॥ ७४ ॥
आनन्दकोशहीनात्मा पञ्चकोशविवर्जितः ।
निर्विकल्पस्वरूपात्मा सविकल्पविवर्जितः ॥ ७५ ॥
दृश्यानुविद्धहीनात्मा शब्दविद्धविवर्जितः ।
सदा समाधिशून्यात्मा आदिमध्यान्तवर्जितः ॥ ७६ ॥
प्रज्ञानवाक्यहीनात्मा अहंब्रह्माम्मिवर्जितः ।
तत्त्वमस्यादिहीनात्मा अयमात्मेत्यभावकः ॥ ७७ ॥
ओंकारवाच्यहीनात्मा सर्ववाच्यविवर्जितः ।
अवस्थात्रयहीनात्मा अक्षरात्मा चिदात्मकः ॥ ७८ ॥
आत्मज्ञेयादिहीनात्मा यत्किंचिदिदमात्मकः ।
भानाभानविहीनात्मा वैदेही मुक्त एव सः ॥ ७९ ॥

स्वातिरिक्ताविद्यापदतत्कार्यजातकलनापह्नवसिद्धं ब्रह्म निष्प्रतियोगिकस्वमात्रमिति तन्मात्रावस्थानं विदेहमुक्तलक्षणम् । तदिह प्रपञ्चयते—**ब्रह्मभूत** इत्यादिना । **ब्रह्मभूतः** ब्रह्ममात्रतया अवस्थितत्वात् । **प्रशान्तात्मा** प्रशान्तदेहत्रयाभिमतित्वात् । **ब्रह्मानन्दमयः** आनन्दस्वरूपः निष्प्रतियोगिकभूमानन्दमात्र इत्यर्थः । **स्वच्छरूपः** पूर्णबोधस्वरूपत्वात् । **महामौनी** स्वमात्रतया तूष्णीमवस्थितत्वात् । देहत्रयोपलक्षितस्वाविद्यापदतत्कार्यजाते आत्मात्मीयाभिमतिमूलभूता विगताश्च ते देहाश्च विदेहाः, विदेहा एव वैदेहाः, ते अस्य सन्तीति **वैदेही** । तद्रूपेण व्यपदिष्टस्य बद्धत्वं स्यादित्यत आह—**मुक्त** इति । स्वातिरिक्तं यत्र मुक्तं अपह्नवतां गतं सोऽयं वैदेही **मुक्त एवेत्यत्र**—

यस्मिन् व्यष्टिसमष्ट्याख्यस्थूलदेहादिवासना ।
विरूपविलयं याति स विदेहो महामुनिः ॥ ६
सर्वापह्नवसंसिद्धब्रह्ममात्रं स एव हि ।
अकल्पविद्वरिष्ठोऽयमिति सर्वत्र गीयते ॥

इति स्मृतिः मानम् । एवमेव विदेहमुक्तिश्रुतयो बोद्धव्याः ॥ ३३ ॥ किंच—**सर्वात्मेति** । **स्वात्ममात्रकः** निष्प्रतियोगिकैकरूपत्वात् ॥ ३४ ॥ **लक्ष्यात्मा** स्वावशेषतया लक्षितत्वात् । **ललितात्मा** केवलनिर्विशेषत्वात् । **तूष्णीमात्मस्वभाववान्** महामौनफलरूपत्वात् ॥ ३५ ॥ **न चिन्त्यते** तथाविधचिन्ताया अपि विद्यावृत्तित्वेन अपह्नोतव्यत्वात ॥ ३६ ॥ स्वातिरिक्तमस्तीति, चशब्दात् नास्तीति, **निश्चयं च** इति ॥ ३७–३९ ॥ यत्र स्वाज्ञजातं संसरति तत्र ज्ञानी विज्ञानी वा सङ्गोदासीनतया प्रत्यगभिन्नब्रह्मगोचराखण्डाकारवृत्तिपरवशो भूत्वा एवं तूष्णीमास्ते । यद्येवं अखण्डाकारवृत्तिमपि असहमानो योगी सम्यज्ज्ञानी निर्विकल्पकसमाधिपरवशो भूत्वा क्वचित्कालं तूष्णीं स्थितो भवति । **तूष्णीं सत्यं न किञ्चन** इत्यत्र—"सरूपविलयसिद्धनिर्विकल्पसमाधितः कादाचित्कव्युत्थानमप्यसहमानः तत्त्वज्ञानी सुषुम्नानाडयन्तर्गतकैवल्यनाडिकोज्ज्वलचिदाकाशे स्वान्तर्बहिर्भावित-स्वाविद्याद्वयतत्कार्यविकल्पजातापह्नवसिद्धनिष्प्रतियोगिकनिर्विकल्पब्रह्ममात्रतया तू-ष्णींस्वभावेनावशिष्यते इति यत् तदेव सत्यं सन्मात्रावस्थानलक्षणविदेहकैवल्यं तत्र न किञ्चन स्वातिरिक्तमस्ति नास्तीति विभ्रमोऽस्ति ब्रह्मव्यतिरिक्तं न किञ्चिदस्ति मद्व्यतिरिक्तमणुमात्रं न विद्यते सन्मात्रमसदन्यत्" इत्यादि श्रुतेः ॥ ४०–४१ ॥ भेद इति वक्तव्ये **भेदमिति** विभक्तिव्यत्ययः ॥ ४२–४५ ॥ जीवेश्वराविति वक्तव्ये **जीवेश्वरेति** सम्बुद्धिः, वेदशास्त्राणीति वक्तव्ये **वेदशास्त्रा**: इति लिङ्गव्यत्ययः ॥ ४६–४७ ॥ **तुर्यतुर्यः** अविकल्पाविकल्परूपत्वात्

॥ ४८–४९ ॥ **गुणागुणविहीनात्मा** त्रिगुणवत्तत्सापेक्षनिर्गुणस्यापि सविशेषत्वात् । मिथः सापेक्षसगुणनिर्गुणताविरहनिष्प्रतियोगिकनिर्गुणात्माऽयमित्यर्थः ॥ ५० ॥ साक्ष्यसाक्षिनिरूपितसविशेषजातं **किञ्चित् किञ्चिदपि न किञ्चन** ॥ ५१–६० ॥ विदेहमुक्तेः पुरा यद्यदन्नादिकं आस्वादितं यद्यदुद्वाहादिकुटुम्बभरणशिवपूजादि कृतं तत्तत सर्वं इदानीं ब्रह्मानन्द एव भवति, विदेहमुक्तस्य स्वातिरिक्तकलनातत्प्रवृत्तिनिवृत्तिव्यापृत्यपह्नवसिद्धत्वात् । विदेहमुक्तातिरेकेण न किञ्चिदस्तीत्याह—**आत्मरूपमिति** ॥ ६१-६२ ॥ **निरात्मकः** ईश्वरसाक्षिचिन्मात्रत्वात् ॥ ६३–६६ ॥ **सर्वासर्वविवर्जितः** सापेक्षबन्धमोक्षद्वैताद्वैतादेः सविशेषत्वात् निष्प्रतियोगिकाद्वैतात्माऽयमित्यर्थः ॥ ६७–६९ ॥ **नित्यप्रत्यक्षनिर्णितः** स्वाज्ञादिभिः स्वस्वदृष्ट्यनुरोधेन निर्णीत इत्यर्थः ॥ ७०–७३ ॥ चतुर्महावाक्यवाच्यलक्ष्यता स्यादित्यत आह— **प्रज्ञानेति** ॥ ७७–८१ ॥

स्वात्मनिष्ठाविधिः

आत्मानमेव वीक्षस्व आत्मानं बोधय स्वकम् ।
स्वमात्मानं स्वयं भुङ्क्ष्व स्वस्थो भव षडानन ॥ ८० ॥
स्वमात्मनि स्वयं तृप्तः स्वमात्मानं स्वयं चर ।
आत्मानमेव मोदस्व वैदेही मुक्तिको भव ॥ ८१ ॥

इत्युपनिषत् ॥

इत्युपनिषच्छब्दः कुमारशिवाख्यायिकासमाप्त्यर्थः ॥ ८२ ॥

इति चतुर्थोऽध्यायः

पञ्चमोऽध्यायः

स्वात्मयाथात्म्यम्

निदाघो नाम वै मुनिः पप्रच्छ ऋभुं भगवन्तमात्मा-
नात्मविवेकमनुब्रूहीति । स होवाच भगवान् ऋभुः ।

सर्ववाचोऽवधिर्ब्रह्म सर्वचिन्तावधिर्गुरुः ।
सर्वकारणकार्यात्मा कार्यकारणवर्जितः ॥ १ ॥
सर्वसंकल्परहितः [1]सर्वनादमयः शिवः ।
सर्ववर्जितचिन्मात्रः सर्वानन्दमयः परः ॥ २ ॥
सर्वतेजःप्रकाशात्मा नादानन्दमयात्मकः ।
सर्वानुभवनिर्मुक्तः सर्वध्यानविवर्जितः ॥ ३ ॥
सर्वनादकलातीत एष आत्माऽहमव्ययः ।
आत्मानात्मविवेकादिभेदाभेदविवर्जितः ॥ ४ ॥
शान्ताशान्तादिहीनात्मा [2]नादान्तर्ज्योतिरूपकः ।
महावाक्यार्थतो दूरो ब्रह्मास्मीत्यतिदूरतः ॥ ५ ॥
तच्छब्दवर्ज्यस्त्वंशब्दहीनो वाक्यार्थवर्जितः ।
क्षराक्षरविहीनो यो [3]नादान्तर्ज्योतिरेव सः ॥ ६ ॥
अखण्डैकरसो वाऽहमानन्दोऽस्मीति वर्जितः ।
सर्वातीतस्वभावात्मा [4]नादान्तर्ज्योतिरेव सः ॥ ७ ॥

[1] सर्वानन्द—क, अ २, उ १.
[2] नादान्तज्यो—अ, अ २.
[3] नादान्तज्यो—अ.
[4] नादान्तज्यो—अ, अ २.

आत्मेति [1]शब्दहीनो य आत्मशब्दार्थवर्जितः ।
सच्चिदानन्दहीनो य एषैवात्मा सनातनः ॥ ८ ॥
स निर्देष्टुमशक्यो यो वेदवाक्यैरगम्यगः ।
यस्य किंचिद्बहिर्नास्ति किंचिदन्तः कियन्न च ॥ ९ ॥
यस्य लिङ्गं प्रपञ्चं वा ब्रह्मैवात्मा न संशयः ।
नास्ति यस्य शरीरं वा जीवो वा भूतभौतिकः ॥ १० ॥
नामरूपादिकं नास्ति भोज्यं वा भोगभुक् च वा ।
सद्वाऽसद्वा स्थितिर्वाऽपि यस्य नास्ति क्षराक्षरम् ॥ ११ ॥
गुणं वा विगुणं वाऽपि स म आत्मा न संशयः ।
यस्य वाच्यं वाचकं वा श्रावणं मननं च वा ॥ १२ ॥
गुरुशिष्यादिभेदं वा देवलोकाः सुरासुराः ।
यत्र धर्ममधर्मं वा शुद्धं वाऽशुद्धमण्वपि ॥ १३ ॥
यत्र कालमकालं वा निश्चयः संशयो न हि ।
यत्र मन्त्रममन्त्रं वा विद्याऽविद्ये न विद्यते ॥ १४ ॥
द्रष्टृदर्शनदृश्यं वा ईषन्मात्रं [2]कलात्मकम् ।

कुमारेण साकं ऋभुर्नाम ब्रह्ममानसपुत्रः सोऽपि शिवमुखतः अखण्डैकरसचिन्मात्रज्ञानतदनुभवतदान्तगळिकमुख्यफलात्मकजीवन्मुक्तिविदेहमुक्त्योः इयत्तामवगम्य कृतकृत्यवदं गतः खलु । तं कदाचित् निदाघो नाम मुनिः समस्तवेदशास्त्रपुराणेतिहासादिषु आत्मानात्मानौ स्त इति श्रूयते तयोः इयत्ताजिज्ञासया पृष्टवानित्याह श्रुतिः—निदाघ इति । तत्प्रश्नमङ्गीकृत्य

[1] शब्दरूपो—क.
[2] कलामृतं—अ २, क.

स होवाच । किं तत् इत्यत्र **सर्ववाच्** इति । **सर्ववाचोऽवधिः** अशब्दत्वात् । **सर्वचिन्तावधिः** प्रतीचश्चिन्तादिवृत्तिप्रासत्वात् । **स्वाज्ञादिदृष्टया सर्वकारणकार्यात्मा** ॥ १ ॥ **सर्वनादमयः** नादतत्त्ववेदशास्त्रसिद्धान्तार्थत्वात् । **स्वाज्ञसमर्पितसर्ववर्जितचिन्मात्रः** ॥ २ ॥ स्वानुभूतिध्यानादिविषयस्य सविशेषता स्यादित्यत आह—**सर्वेति** ॥ ३–४ ॥ तत्त्वंपदवाक्यार्थ आत्मेत्यत आह—**महावाक्येति** ॥ ५ ॥ **क्षराक्षरविहीनः** क्षराक्षरकलना-विरळपरमाक्षरत्वात् ॥ ६–८ ॥ परमात्मनो व्याविद्धनानापदवाक्यार्थत्वेन महावाक्यात्मसच्चिदानन्दशब्दतद्वाच्यार्थवर्जितत्वात् **स निर्देष्टुमिति** । कर्म-काण्डगोचरवेदवाक्यैः साक्षादगम्यतां गच्छतीति **अगम्यगः** ॥ ९–१४ ॥

अनात्मनः सर्वस्य मिथ्यात्वम्

अनात्मेति प्रसङ्गो वा अनात्मेति मनोऽपि वा ॥ १५ ॥
अनात्मेति जगद्वाऽपि [1]नास्त्यनात्मेति निश्चिनु ।
सर्वसंकल्पशून्यत्वात्सर्वकार्यविवर्जनात् ॥ १६ ॥
केवलं ब्रह्ममात्रत्वात् [2]नास्त्यनात्मेति निश्चिनु ।
देहत्रयविहीनत्वात्कालत्रयविवर्जनात् ॥ १७ ॥
जीवत्रयगुणाभावात्तापत्रयविवर्जनात् ।
लोकत्रयविहीनत्वात्सर्वमात्मेति शासनात् ॥ १८ ॥
चित्ताभावाच्चिन्तनीयं देहाभावाज्जरा न च ।
पादाभावाद्गतिर्नास्ति हस्ताभावात्क्रिया न च ॥ १९ ॥
मृत्युर्नास्ति जनाभावाद्बुद्ध्यभावात्सुखादिकम् ।
धर्मो नास्ति शुचिर्नास्ति सत्यं नास्ति [3]भयं न च ॥ २० ॥

[1] नास्तिनास्तीति—क, अ, अ १, अ २.
[2] नास्तिनास्तीति—अ २.
[3] भवं—अ २.

अक्षरोच्चारणं नास्ति गुरुशिष्यादि नास्त्यपि ।
एकाभावे द्वितीयं न न द्वितीये न चैकता ॥ २१ ॥
सत्यत्वमस्ति चेत्किंचिद्[1]सत्त्वं न च संभवेत् ।
असत्यत्वं यदि भवेत्सत्यत्वं न [2]घटिष्यति ॥ २२ ॥
शुभं यद्यशुभं विद्धि अशुभाच्छुभमिष्यते ।
भयं यद्यभयं विद्धि ह्यभयाद्भयमापतेत् ॥ २३ ॥
[3]बन्धत्वमस्ति चेन्मोक्षो बन्धाभावे क्व मोक्षता ।
मरणं यदि चेज्जन्म जन्माभावे मृतिर्न च ॥ २४ ॥
त्वमित्यपि भवेच्चाहं त्वं नो चेदहमेव न ।
इदं यदि तदेवास्ति तदभावादिदं न च ॥ २५ ॥
अस्तीति चेन्नास्ति तदा नास्ति चेदस्ति किंचन ।
कार्यं चेत्कारणं किंचित्कार्याभावे न कारणम् ॥ २६ ॥
द्वैतं यदि तदाऽद्वैतं द्वैताभावेऽद्वयं न च ।
दृश्यं यदि दृगप्यस्ति दृश्याभावे दृगेव न ॥ २७ ॥
अन्तर्यदि बहिः सत्यमन्ताभावे बहिर्न च ।
पूर्णत्वमस्ति चेत्किंचिदपूर्णत्वं प्रसज्यते ॥ २८ ॥
तस्मादेतत्कचिन्नास्ति त्वं चाहं वा इमे इदम् ।
नास्ति दृष्टान्तिकं सत्ये नास्ति दार्ष्टान्तिकं ह्यजे ॥ २९ ॥

[1] सत्यं—अ, अ १, अ २. [2] वदि—अ.
[3] इदं श्लोकार्ध (उ) (उ १) कोशयोर्नास्ति.

परं ब्रह्माहमस्मीति स्मरणस्य मनो न हि ।
ब्रह्ममात्रं जगदिदं ब्रह्ममात्रं त्वमप्यहम् ॥ ३० ॥
चिन्मात्रं केवलं चाहं नास्त्यनात्मेति निश्चिनु ।
इदं प्रपञ्चं नास्त्येव नोत्पन्नं नो स्थितं क्वचित् ॥ ३१ ॥
चित्तं प्रपञ्चमित्याहुर्नास्ति नास्त्येव सर्वदा ।
न प्रपञ्चं न चित्तादि नाहंकारो न जीवकः ॥ ३२ ॥
मायाकार्यादिकं नास्ति माया नास्ति भयं न हि ।
कर्ता नास्ति क्रिया नास्ति श्रवणं मननं न हि ॥ ३३ ॥
समाधिद्वितयं नास्ति मातृमानादि नास्ति हि ।
अज्ञानं चापि नास्त्येव ह्यविवेकं कदाचन ॥ ३४ ॥
अनुबन्धचतुष्कं न संबन्धत्रयमेव न ।
न गङ्गा न गया सेतुर्न भूतं नान्यदस्ति हि ॥ ३५ ॥
न भूमिर्न जलं नाग्निर्न वायुर्न च खं क्वचित् ।
न देवा न च दिक्पाला न वेदा न गुरुः क्वचित् ॥ ३६ ॥
न दूरं नान्तिकं नाळं न मध्यं न क्वचित्स्थितम् ।
नाद्वैतं द्वैतसत्यं वा ह्यसत्यं वा इदं न च ॥ ३७ ॥
बन्धमोक्षादिकं नास्ति सद्वाऽसद्वा सुखादि वा ।
जातिर्नास्ति गतिर्नास्ति वर्णो नास्ति न लौकिकम् ॥ ३८ ।
सर्वं ब्रह्मेति नास्त्येव [1]ब्रह्मेत्यपि च नास्ति हि ।
चिदित्येवेति नास्त्येव चिदहंभाषणं न हि ॥ ३९ ॥

[1] ब्रह्म इत्येव—क, अ, अ १, अ २. ब्रह्मेत्येव च—उ १.

अहं ब्रह्माम्मि नास्त्येव नित्यशुद्धोऽम्मि न क्वचित् ।
वाचा यदुच्यते किंचिन्मनसा मनुते क्वचित् ॥ ४० ॥
बुद्ध्या निश्चिनुते नास्ति चित्तेन ज्ञायते न हि ।
योगियोगादिकं नास्ति सदा सर्वं सदा न च ॥ ४१ ॥
अहोरात्रादिकं नास्ति स्नानध्यानादिकं न हि ।
भ्रान्तिरभ्रान्ति[1]नास्त्येव नास्त्यनात्मेति निश्चिनु ॥ ४२ ॥
वेदं शास्त्रं पुराणं च कार्यं कारणमीश्वरः ।
लोको भूतं जनस्त्वैक्यं सर्वं मिथ्या न संशयः ॥ ४३ ॥
बन्धो मोक्षः सुखं दुःखं ध्यानं चित्तं सुरासुराः ।
गौणं मुख्यं परं चान्यत्सर्वं मिथ्या न संशयः ॥ ४४ ॥
वाचा वदति यत्किंचित्संकल्पैः कल्प्यते च यत् ।
मनसा चिन्त्यते यद्यत्सर्वं मिथ्या न संशयः ॥ ४५ ॥
बुद्ध्या निश्चीयते [2]यद्यच्चित्ते निश्चीयते क्वचित् ।
शास्त्रैः प्रपञ्च्यते यद्यन्नेत्रेणै[3]व निरीक्ष्यते ॥ ४६ ॥
श्रोत्राभ्यां श्रूयते यद्यदन्यत्सद्भावमेव च ।
नेत्रं श्रोत्रं गात्रमेव मिथ्येति च सुनिश्चितम् ॥ ४७ ॥
[4]इदमित्येव निर्दिष्टमयमित्येव कल्प्यते ।
त्वमहं तदिदं सोऽहमन्यत्सद्भावमेव च ॥ ४८ ॥

[1] नास्त्येव—उ.
[2] किंचि—क, अ १.
[3] वं—उ १.
[4] इदं मिथ्येव—अ.

यद्यत्संभाव्यते लोके सर्वसंकल्पसंभ्रमः ।
सर्वाध्यासं सर्वगोप्यं सर्वभोगप्रभेदकम् ॥ ४९ ॥
सर्वदोषप्रभेदाश्च नास्त्यनात्मेनि निश्चिनु ।
मदीयं च त्वदीयं च ममेति च तवेति च ॥ ५० ॥
मह्यं तुभ्यं मयेत्यादि तत्सर्वं वितथं भवेत् ।
रक्षको विष्णुरित्यादि ब्रह्मा सृष्टेस्तु कारणम् ॥ ५१ ॥
संहारे रुद्र इत्येवं सर्वं मिथ्येति निश्चिनु ।
स्नानं जपस्तपो होमः स्वाध्यायो देवपूजनम् ॥ ५२ ॥
मन्त्रं तन्त्रं च सत्सङ्गो गुणदोषविजृम्भणम् ।
अन्तःकरणसद्भाव अविद्यायाश्च संभवः ॥ ५३ ॥
अनेककोटिब्रह्माण्डं सर्वं मिथ्येति निश्चिनु ।
सर्वदेशिकवाक्योक्तिर्येन केनापि निश्चितम् ॥ ५४ ॥
दृश्यते [1]जगति यद्यद्यज्जगति वीक्ष्यते ।
वर्तते [1]जगति यद्यत्सर्वं मिथ्येति निश्चिनु ॥ ५५ ॥
येन केनाक्षरेणोक्तं येन केन विनिर्णितम् ।
येन केनापि गदितं येन केनापि मोदितम् ॥ ५६ ॥
येन केनापि यद्दत्तं येन केनापि यत्कृतम् ।
यत्र यत्र शुभं कर्म यत्र यत्र च दुष्कृतम् ॥ ५७ ॥
यद्यत्करोषि सत्येन सर्वं मिथ्येति निश्चिनु[2] ।

[1] जगती—अ, अ १.

[2] अत्र प्रथमखण्डान्तः—॥ १ ॥—चिह्नितोऽस्ति—अ १.

निदाघेन आत्मानात्मयाथात्म्यमनुब्रूहीति यत् पृष्टं तत्र स्वातिरिक्ता-विद्यापदतत्कार्यजातापह्नवसिद्धोऽयमात्मेत्यात्मयाथात्म्यमभिहितम् । अथानात्म-याथात्म्यमुच्यते—**अनात्मेति** । अनात्मा अस्ति नास्तीति वार्ताऽपि न विद्यते । अविद्यारूपेण अविद्याऽभावेऽपि तत्कार्यमनोरूपेण जगद्रूपेण वा अविद्या स्यादित्यत आह—**अनात्मेति** ॥ १५ ॥ मनःकार्यजगद्वाऽपि न विद्यते । यस्मादेवं तस्मात कार्यकारणात्मना येन केनापि वा हे निदाघ **नास्त्यनात्मेति निश्चिनु** निश्चयवान् भव, "नाविद्याऽस्तीह नो माया" इति, "अविद्यमानैवाविद्यावस्तुतत्त्वविचारिणाम्" इति,

नात्मभावेन नानेदं न स्वेनापि कथं चन ।
न पृथङ् नापृथक्किञ्चिदिति तत्त्वविदो विदुः ॥

इति श्रुतिस्मृतिगौडपादाचार्योक्तेः । जगन्मनोऽनात्मासम्भवे हेतुत्रयमाचष्टे —**सर्वेति** ॥ **सर्वसङ्कल्पशून्यत्वात्** सङ्कल्पादिवृत्तिसहस्रजुष्टमानसाभावात् । **सर्वकार्यविवर्जनात्** मनःकार्यजगदभावात ॥ १६ ॥ ब्रह्ममात्रस्य निष्प्रतियोगि-कत्वेन मनस्तत्कार्यहेत्वनात्मापह्नवसिद्धत्वात **नास्त्यनात्मेति निश्चिनु** । इतश्च अनात्मासम्भवे हेतूनुपन्यस्यति—**देहेति** ॥ १६–२० ॥ यद्यत सापेक्षं तत्तत् सविशेषं अनात्मत्वात् । यद्यत् अनात्मा न भवति तत्तत् सविशेषमपि न भवति यथा निर्विशेषं ब्रह्मेति श्रुतियुक्तितः स्वविकल्पितानात्मापह्नवसिद्धात्म-मात्रसिद्धये सापेक्षश्रुतिवाक्यान्युपन्यस्यति—**एकाभाव** इति ॥ २१–२७ ॥ **अन्ताभावे**, विसर्गलोपः, अन्तरभावे ॥ २८–३० ॥ कथं पुनः अनात्मा नास्तीत्युच्यते सम्भूतिस्थितिप्रलयवदनात्मप्रपञ्चदर्शनादित्यत आह—**इदमिति**॥ अयं प्रपञ्चः इति वक्तव्ये **इदं प्रपञ्चं** इति लिङ्गव्यत्ययः ॥ ३१–३६ ॥ **नाळं** [न आळं] दूरान्तिकयोः अन्तराळमित्यर्थः । मिथः सापेक्षतया **नाद्वैतं** ॥ ३७–४१ ॥ भ्रान्तिः अतस्मिन् तद्भावः, अभ्रान्तिः तस्मिन् तद्भावः, भ्रान्त्यादिगतभावस्य तूलान्तःकरणाविद्याकार्यत्वेन कारणतुल्यत्वात् । अभ्रान्ति नास्तीत्यत्र विसर्गलोप इति केचित् । तत्पक्षे—**भ्रान्तिरभ्रान्ति**

नास्त्येव इति पाठः ॥ ४२ ॥ स्वाज्ञदृष्ट्या यद्यत् विकल्पितं स्वज्ञस्तु तत्तत् मिथ्येति मन्यते इत्याह - वेदमित्यादिना । वेदं इति विभक्ति-व्यत्ययः ॥ ४३–५७ ॥

अहंवस्तुनः परमात्मत्वम्

त्वमेव परमात्माऽसि त्वमेव परमो गुरुः ॥ ५८ ॥

त्वमेवाकाशरूपोऽसि साक्षिहीनोऽसि सर्वदा ।

त्वमेव सर्वभावोऽसि त्वं ब्रह्मासि न संशयः ॥ ५९ ॥

कालहीनोऽसि कालोऽसि सदा ब्रह्मासि चिद्घनः ।

सर्वतः स्वस्वरूपोऽसि चैतन्यघनवानसि ॥ ६० ॥

सत्योऽसि सिद्धोऽसि सनातनोऽसि मुक्तोऽसि मोक्षोऽसि मुदामृतोऽसि ।

देवोऽसि शान्तोऽसि निरामयोऽसि ब्रह्मासि पूर्णोऽसि परात्परोऽसि ॥

समोऽसि सच्चासि सनातनोऽसि सत्यादिवाक्यैः प्रतिबोधितोऽसि ।

सर्वाङ्गहीनोऽसि सदा स्थितोऽसि ब्रह्मेन्द्ररुद्रादिविभावितोऽसि ॥

सर्वप्रपञ्चभ्रमवर्जितोऽसि सर्वेषु भूतेषु च [1]भासितोऽसि ।

सर्वत्र संकल्पविवर्जितोऽसि सर्वागमान्तार्थविभावितोऽसि ॥६३॥

सर्वत्र संतोषसुखासनोऽसि सर्वत्र गत्यादिविवर्जितोऽसि ।

सर्वत्र लक्ष्यादिविवर्जितोऽसि ध्यातोऽसि विष्ण्वादिसुरैरजस्रम् ॥

[1] भावितो—अ. भाव्यतो—उ १.

[1]चिदाकारस्वरूपोऽसि चिन्मात्रोऽसि निरङ्कुशः ।
आत्मन्येव स्थितोऽसि त्वं सर्वशून्योऽसि निर्गुणः ॥ ६५ ॥

आनन्दोऽसि परोऽसि [2]त्वमेक एवाद्वितीयकः ।
चिद्घनानन्दरूपोऽसि परिपूर्णस्वरूपकः ॥ ६६ ॥

सदसि त्वमसि ज्ञोऽसि सोऽसि जानासि वीक्षसि ।
सच्चिदानन्दरूपोऽसि वासुदेवोऽसि वै [3]प्रभुः ॥ ६७ ॥

अमृतोऽसि विभुश्चासि चञ्चलो ह्यचलो ह्यसि ।
सर्वोऽसि सर्वहीनोऽसि शान्ताशान्तविवर्जितः ॥ ६८ ॥

सत्तामात्रप्रकाशोऽसि सत्तासामान्यको ह्यसि ।
नित्यसिद्धिस्वरूपोऽसि सर्व[4]सिद्धिविवर्जितः ॥ ६९ ॥

ईषन्मात्रविशून्योऽसि अणुमात्रविवर्जितः ।
अस्तित्ववर्जितोऽसि त्वं नास्तित्वादिविवर्जितः ॥ ७० ॥

लक्ष्यलक्षणहीनोऽसि निर्विकारो निरामयः ।
सर्वनादान्तरोऽसि त्वं कला[5]काष्ठाविवर्जितः ॥ ७१ ॥

ब्रह्मविष्ण्वीशहीनोऽसि स्वस्वरूपं प्रपश्यसि ।
स्वस्वरूपावशेषोऽसि स्वानन्दाब्धौ निमज्जसि ॥ ७२ ॥

[6]स्वात्मराज्ये स्वमेवासि स्वयंभावविवर्जितः ।
शिष्टपूर्णस्वरूपोऽसि स्वस्मात्किंचिन्न पश्यसि ॥ ७३ ॥

[1] चिदाकाश—अ. [2] त्वमेकमे—उ. [3] विभुः—क, अ २.
[4] विद्ध—उ. [5] काष्ठ—अ १. [6] स्वात्मा—अ.

स्वस्वरूपान्न चलसि स्वस्वरूपेण जृम्भसि ।
स्वस्वरूपादनन्योऽसि ह्यहमेवासि निश्चिनु ॥ ७४ ॥[1]

वेदं शास्त्रं इत्यारभ्य एतावता ग्रन्थेन सर्वं मिथ्येत्यवधृतं; किमहं मिथ्याऽन्तःपाती इत्याशङ्कमानमालक्ष्य मिथ्याऽऽधारो निराधारो वा परमात्मा त्वमसीत्याह—त्वमेवेति । भगवदात्मना ब्रह्मविद्याऽऽचार्यत्वात् ॥ ९८–७४ ॥

अविद्यातत्कार्यप्रपञ्चस्य निष्प्रतियोगिकाभावरूपत्वम्

इदं प्रपञ्चं यत्किंचिद्यद्यज्जगति [2]विद्यते ।
दृश्यरूपं च दृग्रूपं सर्वं शशविषाणवत् ॥ ७५ ॥
भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च ।
अहंकारश्च तेजश्च लोकं भुवनमण्डलम् ॥ ७६ ॥
नाशं जन्म च सत्यं च पुण्यपापजयादिकम् ।
रागः कामः क्रोधलोभौ ध्यानं ध्येयं गुणं परम् ॥ ७७ ॥
गुरुशिष्योपदेशादिरादिरन्तं शमं शुभम् ।
भूतं भव्यं वर्तमानं लक्ष्यं लक्षणमद्वयम् ॥ ७८ ॥
शमो विचारः संतोषो भोक्तृभोज्यादिरूपकम् ।
यमाद्यष्टाङ्गयोगं च गमनागमनात्मकम् ॥ ७९ ॥
आदिमध्यान्तरङ्गं च ग्राह्यं त्याज्यं हरिः शिवः ।
इन्द्रियाणि मनश्चैव अवस्थात्रितयं तथा ॥ ८० ॥

[1] अत्र द्वितीयखण्डान्तः—॥ २ ॥—चिह्नितोऽस्ति—क. अ १, अ २.
[2] वीक्ष्यते—उ.

चतुर्विंशतितत्त्वं च साधनानां चतुष्टयम् ।
स्वजातीयं विजातीयं लोका भूरादयः क्रमात् ॥ ८१ ॥
सर्ववर्णाश्रमाचारं मन्त्रतन्त्रादिसंग्रहम् ।
विद्याऽविद्यादिरूपं च सर्ववेदं जडाजडम् ॥ ८२ ॥
बन्धमोक्षविभागं च ज्ञानविज्ञानरूपकम् ।
बोधाबोधस्वरूपं वा द्वैताद्वैतादिभाषणम् ॥ ८३ ॥
सर्ववेदान्तसिद्धान्तं सर्वशास्त्रार्थनिर्णयम् ।
अनेकजीवसद्भावमेकजीवादिनिर्णयम् ॥ ८४ ॥
यद्यद्ध्यायति चित्तेन यद्यत्संकल्प्यते क्वचित् ।
बुद्ध्या निश्चीयते यद्यद्गुरुणा संश्रृणोति यत् ॥ ८५ ॥
यद्यद्वाचा व्याकरोति यद्यदाचार्यभाषणम् ।
यद्यत् [1]स्वेरेन्द्रियैर्भाव्यं यद्यन्मीमांस्यते पृथक् ॥ ८६ ॥
यद्यन्न्यायेन निर्णीतं महद्भिर्वेदपारगैः ।
शिवो क्ष[ह]रति लोकान्वै विष्णुः पाति जगत्त्रयम् ॥ ८७ ॥
ब्रह्मा सृजति लोकान्वै एवमादिक्रियादिकम् ।
यद्यदस्ति पुराणेषु यद्यद्वेदेषु [2]निर्णयम् ॥ ८८ ॥
सर्वोपनिषदां भावं सर्वं शशविषाणवत् ।[3]

हे स्वामिन् भवदनुग्रहमहिम्ना शिष्टपूर्णस्वरूपोऽस्मीत्यत्र न हि संशयोऽस्ति । पुरा अनुभूतस्वान्तर्बाह्यविजृम्भितदृग्दृश्यकलनान्वितव्यष्टिसमष्टिविभागेद्धस्वाविद्या-

[1] सुरे—अ १. सर्वे—क. [2] निर्णितम्—अ, अ १.
[3] अत्र तृतीयखण्डान्तचिह्नं ॥ ३ ॥—अ १.

पदतत्कार्यप्रपञ्चस्य का गतिः इत्याकाङ्क्षायां स्वाज्ञदृष्ट्या सत्यत्वेन [1]स्वज्ञदृष्ट्या मिथ्यात्वेन अनुभूतोऽपि परमार्थदृष्ट्या शशविषाणवत् निःप्रतियोगिकाभावरूप एवेत्याह—इदमिति ॥ ७९ ॥ स्वातिरिक्तापह्नवः उक्तः । पुनरपह्नोतव्यविषयाभावात् उत्तरग्रन्थारम्भः किमर्थं इत्याकाङ्क्षायां, सत्यमपह्नवविषयो न विद्यते तस्य शशविषाणवत् अवस्तुत्वात् । तथाऽपि "इदं प्रपञ्चं" इत्यादि "सर्वं शशविषाणवत्" इत्यन्तश्रुतिवृत्त्यर्थतया उत्तरग्रन्थारम्भो युज्यते इत्याह—भूमिरित्यादि ॥ ७६–८३ ॥ तूलान्तःकरणाविद्याया यदनेकत्वं तदनेकजीवसद्भावप्रयोजकं; आदिशब्देन एकत्वानेकत्वहेत्वविद्याद्वयस्य व्यावहारिकादिदृष्ट्या मिथ्यात्वम् ॥ ८४–८८ ॥ परमार्थदृष्ट्या ब्रह्मातिरिक्तस्य शशविषाणवत् अवस्तुत्वं युज्यत एवेत्यर्थः ॥

सङ्कल्पादिरूपं मन एव सर्वानर्थहेतुः

देहोऽहमिति संकल्पं तदन्तःकरणं स्मृतम् ॥ ८९ ॥

देहोऽहमिति [2]संकल्पो महत्संसार उच्यते ।
देहोऽहमिति संकल्पं तद्बन्धमिति चोच्यते ॥ ९० ॥

देहोऽहमिति संकल्पं तद्दुःखमिति चोच्यते ।
देहोऽहमिति यत् ज्ञानं तदेव नरकं स्मृतम् ॥ ९१ ॥

देहोऽहमिति संकल्पं जगत्सर्वमितीर्यते ।
देहोऽहमिति संकल्पो हृदयग्रन्थिरीरितः ॥ ९२ ॥

देहोऽहमिति यज्ज्ञानं तदेवाज्ञानमुच्यते ।
देहोऽहमिति यज्ज्ञानं तदसद्भावमेव च ॥ ९३ ॥

[1] स्वाज्ञ—उ १. [2] संकल्पं—क.

देहोऽहमिति या बुद्धिः सा चाविद्येति भण्यते ।
देहोऽहमिति यज्ज्ञानं तदेव द्वैतमुच्यते ॥ ९४ ॥
देहोऽहमिति संकल्पः सत्यजीवः स एव हि ।
देहोऽहमिति यज्ज्ञानं परिच्छिन्नमितीरितम् ॥ ९५ ॥
देहोऽहमिति संकल्पो महापापमिति स्फुटम् ।
देहोऽहमिति या बुद्धिस्तृष्णा दोषामयः किल ।
यत्किंचिदपि संकल्पं तापत्रयमितीरितम् ॥ ९६ ॥
कामं क्रोधं बन्धनं सर्वदुःखं विश्वं दोषं कालनानास्वरूपम् ।
यत्किंचेदं सर्वसंकल्पजालं तत्किंचेदं मानसं सोम्य विद्धि ॥९७॥
मन एव जगत्सर्वं मन एव [1]महारिपुः ।
मन एव हि संसारो मन एव जगत्त्रयम् ॥ ९८ ॥
मन एव महद्दुःखं मन एव जरादिकम् ।
मन एव हि कालं च मन एव मलं तथा ॥ ९९ ॥
मन एव हि संकल्पो मन एव हि जीवकः ।
मन एव हि चित्तं च मनोऽहंकार एव च ॥ १०० ॥
मन एव महद्बन्धं मनोऽन्तःकरणं च तत् ।
मन एव हि भूमिश्च मन एव हि तोयकम् ॥ १०१ ॥
मन एव हि तेजश्च मन एव मरुन्महान् ।
मन एव हि चाकाशं मन एव हि शब्दकम् ॥ १०२ ॥

स्पर्शं रूपं रसं गन्धं कोशाः पञ्च मनोभवाः ।
जाग्रत्स्वप्नसुषुप्त्यादि मनोमयमितीरितम् ॥ १०३ ॥
दिक्पाला वसवो रुद्रा आदित्याश्च मनोमयाः ।
दृश्यं जडं द्वन्द्वजातमज्ञानं मानसं स्मृतम् ॥ १०४ ॥
संकल्पमेव यत्किंचित्तत्तन्नास्तीति निश्चिनु ।
नास्ति नास्ति जगत्सर्वं गुरुशिष्यादिकं नहि ॥ १०५ ॥

इत्युपनिषत् ॥[1]

स्वाज्ञदृष्टिप्रसक्तस्वातिरिक्तानर्थनिदानं किं इत्याशङ्क्य सर्वानर्थहेतुः सङ्कल्प एवेत्याह—देह इति ॥ सङ्कल्पमित्यादि विभक्तिव्यत्ययः ॥ ८९–९६ ॥ सङ्कल्पमूलं किमित्यत्र कामं इत्यादि ॥ ९७–१०४ ॥ स्वाविद्यापदतत्कार्यजातं मन एवेत्यर्थः । इत्युपनिषच्छब्दः अध्यायपरिसमाप्त्यर्थः ॥ १०५ ॥

इति पञ्चमोऽध्यायः

षष्ठोऽध्यायः

सर्वस्य सच्चिदानन्दत्वम्

ऋभुः—

सर्वं सच्चिन्मयं विद्धि सर्वं सच्चिन्मयं ततम् ।
सच्चिदानन्दमद्वैतं सच्चिदानन्दमव्ययम् ॥ १ ॥
सच्चिदानन्दमात्रं हि सच्चिदानन्दमन्यकम् ।
सच्चिदानन्दरूपोऽहं सच्चिदानन्दमेव खम् ॥ २ ॥
सच्चिदानन्दमेव त्वं सच्चिदानन्दकोऽस्म्यहम् ।

[1] अत्र चतुर्थखण्डान्तचिह्नं ॥ ४ ॥—क.

यद्यत् स्वाज्ञदृष्टिविकल्पितं नामरूपविकल्पजालं तत्तत् स्वज्ञदृष्टया सच्चिदानन्दसमम् । परमार्थदृष्टया ब्रह्ममात्रातिरिक्तप्रसक्तिरेव नास्ति । यदि स्वाज्ञादिदृष्टया अस्ति नास्तीति प्रसक्तं तदा तत् असदेव । स्वातिरिक्तासदपह्नवसिद्धं निष्प्रतियोगिकब्रह्ममात्रमवशिष्यते इत्येतत्प्रपञ्चनाय षष्ठाध्याय आरभ्यते— ऋभुरिति ॥ १–२ ॥

सर्वस्य ब्रह्मत्वम्

न मनोबुद्ध्यहंकारचित्तसंघातका अमी ॥ ३ ॥
न त्वं नाहं न चान्यं वा सर्वं ब्रह्मैव केवलम् ।
न वाक्यं न पदं वेदं नाक्षरं न जडं क्वचित् ॥ ४ ॥
न मध्यं नादि नान्तं वा न सत्यं न निबन्धनम् ।
न दुःखं न सुखं भावं न माया प्रकृतिस्तथा ॥ ५ ॥
न देहं न मुखं घ्राणं न जिह्वा न च तालुनी ।
न दन्तोष्ठौ ललाटं च निश्वासोच्छ्वास एव च ॥ ६ ॥
न स्वेदमस्थि मांसं च न रक्तं न च मूत्रकम् ।
न दूरं नान्तिकं नाङ्गं नोदरं न किरीटकम् ॥ ७ ॥
न हस्तपादचलनं न शास्त्रं न च शासनम् ।
न वेत्ता वेदनं वेद्यं न जाग्रत्स्वप्नसुप्तयः ॥ ८ ॥
तुर्यातीतं न मे किंचित्सर्वं सच्चिन्मयं ततम् ।
नाध्यात्मिकं नाधिभूतं नाधिदैवं न मायिकम् ॥ ९ ॥
न विश्वस्तैजसः प्राज्ञो विराट्सूत्रात्मकेश्वराः ।
न गमागमचेष्टा च न नष्टं न प्रयोजनम् ॥ १० ॥

त्याज्यं ग्राह्यं न दूष्यं वा [1]ह्यमेध्यामेध्यकं तथा ।
न पीनं न कृशं क्लेदं न कालं देशभाषणम् ॥ ११ ॥
न सर्वं न भयं द्वैतं न वृक्षतृणपर्वताः ।
न ध्यानं योगसंसिद्धिर्न ब्रह्मक्षत्रवैश्यकम् ॥ १२ ॥
न पक्षी न मृगो नाङ्गी न लोभो मोह एव च ।
न मदो न च मात्सर्यं कामक्रोधादयस्तथा ॥ १३ ॥
न स्त्रीशूद्रबिडालादि भक्ष्यभोज्यादिकं च यत् ।
न प्रौढहीनौ नास्तिक्यं न वार्तावसरोऽस्ति हि ॥ १४ ॥
न लौकिको न लोको वा न व्यापारो न मूढता ।
न भोक्ता भोजनं भोज्यं न [2]मातृ मानमेयकम् ॥ १५ ॥
न शत्रुमित्रपुत्रादिर्न माता न पिता स्वसा ।
न जन्म न मृतिर्वृद्धिर्न देहोऽहमिति भ्रमः ॥ १६ ॥
न शून्यं नापि चाशून्यं नान्तःकरणसंसृतिः ।
न रात्रिर्न दिवा नक्तं न ब्रह्मा न हरिः शिवः ॥ १७ ॥
न वारपक्षमासादि वत्सरं न च चञ्चलम् ।
न ब्रह्मलोको वैकुण्ठं न कैलासो न चान्यकः ॥ १८ ॥
न स्वर्गो न च देवेन्द्रो नाग्निलोको न चाग्निकः ।
न यमो यमलोको वा न लोका लोकपालकाः ॥ १९ ॥
न भूर्भुवःस्वस्त्रैलोक्यं न पातालं न भूतलम् ।
नाविद्या न च विद्या च न माया प्रकृतिर्जडा ॥ २० ॥

[1] ह्यमेध्यं मे—अ, अ १. [2] मात्रं—उ.

न स्थिरं क्षणिकं नाशं न गतिर्न च भावनम् ।
न ध्यातव्यं न मे स्नानं न मन्त्रो न जपः क्वचित् ॥ २१ ॥
न पदार्थं न पूजार्हं नाभिषेकं न चार्चनम् ।
न पुष्पं न फलं पत्रं गन्धपुष्पादिधूपकम् ॥ २२ ॥
न स्तोत्रं न नमस्कारो न प्रदक्षिणमण्वपि ।
न प्रार्थना पृथग्भावो न हविर्नाग्निवन्दनम् ॥ २३ ॥
न होमो न च कर्माणि न दुर्वाक्यं सुभाषणम् ।
न गायत्री न वा संधिर्न [1]मनस्यं न दुःस्थितिः ॥ २४ ॥
न दुराशा न [2]दुष्टात्मा न चण्डालो न पौल्कसः ।
न दुःसहं दुरालापं न किरातो न कैतवम् ॥ २५ ॥
न पक्षपातं पक्षं वा न विभूषणतत्करौ ।
न च डम्भो डाम्भिको वा न हीनो नाधिको नरः ॥ २६ ॥
नैकं द्वयं त्रयं तुर्यं न महत्त्वं न चाल्पता ।
न पूर्णं न परिच्छिन्नं न काशी न व्रतं तपः ॥ २७ ॥
न गोत्रं न कुलं सूत्रं न विभुत्वं न शून्यता ।
न स्त्री न योषि[3]न्नो वृद्धा न कन्या न वितन्तुता ॥ २८ ॥
न सूतकं न जातं वा नान्तर्मुखसुविभ्रमः ।
न महावाक्यमैक्यं वा नाणिमादिविभूतयः ॥ २९ ॥
[4]सर्वं चैतन्यमात्रत्वात्सर्वदोषः सदा न हि ।
सर्वं सन्मात्ररूपत्वात्सच्चिदानन्दमात्रकम् ॥ ३० ॥

[1] नमस्यं—उ. [2] तुष्टात्मा—उ १. [3] नाबृद्धं—उ १. [4] सर्वचै—उ.

ब्रह्मैव सर्वं नान्योऽस्ति तदहं तदहं तथा ।
तदेवाहं तदेवाहं ब्रह्मैवाहं सनातनम् ॥ ३१ ॥
ब्रह्मैवाहं न संसारी ब्रह्मैवाहं न मे मनः ।
ब्रह्मैवाहं न मे बुद्धिर्ब्रह्मैवाहं न चेन्द्रियम् ॥ ३२ ॥
ब्रह्मैवाहं न देहोऽहं ब्रह्मैवाहं न गोचरः ।
ब्रह्मैवाहं न जीवोऽहं ब्रह्मैवाहं न भेदभूः ॥ ३३ ॥
ब्रह्मैवाहं जडो नाहमहं ब्रह्म न मे मृतिः ।
ब्रह्मैवाहं न च प्राणो ब्रह्मैवाहं परात्परः ॥ ३४ ॥
इदं ब्रह्म परं ब्रह्म सत्यं ब्रह्म प्रभुर्हि सः ।
कालो ब्रह्म कला ब्रह्म सुखं ब्रह्म स्वयंप्रभम् ॥ ३५ ॥
एकं ब्रह्म द्वयं ब्रह्म मोहो ब्रह्म शमादिकम् ।
दोषो ब्रह्म गुणो ब्रह्म दमः शान्तं विभुः प्रभुः ॥ ३६ ॥
लोको ब्रह्म गुरुर्ब्रह्म शिष्यो ब्रह्म सदाशिवः ।
पूर्वं ब्रह्म परं ब्रह्म शुद्धं ब्रह्म शुभाशुभम् ॥ ३७ ॥
जीव एव सदा ब्रह्म सच्चिदानन्दमस्म्यहम् ।
सर्वं ब्रह्ममयं प्रोक्तं सर्वं ब्रह्ममयं जगत् ॥ ३८ ॥
स्वयं ब्रह्म न संदेहः स्वस्मादन्यन्न किंचन ।
सर्वमात्मैव शुद्धात्मा सर्वं चिन्मात्रमद्वयम् ॥ ३९ ॥
नित्यनिर्मलरूपात्मा ह्यात्मनोऽन्यन्न किंचन ।

सच्चिदानन्दब्रह्मातिरेकेण न मन इत्यादि ॥ ३–२९ ॥ "न मनोबुद्ध्यहङ्कार" इत्यारभ्य "अणिमादिविभूतयः" इत्यन्तं यद्यत्

स्वाज्ञदृष्ट्यारोपितं स्वज्ञदृष्ट्या ब्रह्मातिरिक्तं नेत्यपोदितं च तत्तत् सर्वमित्यादि ॥ ३०–३९ ॥

ब्रह्मणः निष्प्रतियोगिकस्वमात्रत्वम्

अणुमात्रलसद्रूपमणुमात्रमिदं जगत् ॥ ४० ॥
अणुमात्रं शरीरं वा ह्यणुमात्रमसत्यकम् ।
अणुमात्रमचिन्त्यं वा चिन्त्यं वा ह्यणुमात्रकम् ॥ ४१ ॥
ब्रह्मैव सर्वं चिन्मात्रं ब्रह्ममात्रं जगत्त्वयम् ।
आनन्दं परमानन्दमन्यत्किंचिन्न किंचन ॥ ४२ ॥
चैतन्यमात्रमोंकारं ब्रह्मैव सकलं स्वयम् ।
अहमेव जगत्सर्वमहमेव परं पदम् ॥ ४३ ॥
अहमेव गुणातीत अहमेव परात्परः ।
अहमेव परं ब्रह्म अहमेव गुरोर्गुरुः ॥ ४४ ॥
अहमेवाखिलाधार अहमेव सुखात्सुखम् ।
आत्मनोऽन्यज्जगन्नास्ति आत्मनोऽन्यत्सुखं न च ॥ ४५ ॥
आत्मनोऽन्या गतिर्नास्ति सर्वमात्ममयं जगत् ।
आत्मनोऽन्यन्नहि क्वापि आत्मनोऽन्यत्तृणं न हि ॥ ४६ ॥
आत्मनोऽन्यत्तुषं नास्ति सर्वमात्ममयं जगत् ।
ब्रह्ममात्रमिदं सर्वं ब्रह्ममात्रमसन्न हि ॥ ४७ ॥
ब्रह्म[1]मात्रं श्रुतं सर्वं स्वयं ब्रह्मैव केवलम् ।
ब्रह्ममात्रं वृतं सर्वं ब्रह्ममात्रं रसं सुखम् ॥ ४८ ॥

[1] मात्रमिदं—अ, अ १.

ब्रह्ममात्रं चिदाकाशं सच्चिदानन्दमद्वयम् ।
ब्रह्मणोऽन्यतरन्नास्ति ब्रह्मणोऽन्यज्जगन्न च ॥ ४९ ॥
ब्रह्मणोऽन्यदहं नास्ति ब्रह्मणोऽन्यत्फलं न हि ।
ब्रह्मणोऽन्यत्तृणं नास्ति ब्रह्मणोऽन्यत्पदं न हि ॥ ५० ॥
ब्रह्मणोऽन्यद्गुरुर्नास्ति ब्रह्मणोऽन्यदसद्वपुः ।
ब्रह्मणोऽन्यन्न चाहंता त्वत्तेदन्ते न हि क्वचित् ॥ ५१ ॥
स्वयं ब्रह्मात्मकं विद्धि स्वस्मादन्यन्न किंचन ।
यत्किंचिद्दृश्यते लोके यत्किंचिद्भा[1]ष्यते जनैः ॥ ५२ ॥
यत्किंचिद्भुज्यते क्वापि तत्सर्वमसदेव हि ।
कर्तृभेदं क्रियाभेदं गुणभेदं रसादिकम् ॥ ५३ ॥
लिङ्गभेदमिदं सर्वमसदेव सदा सुखम् ।
कालभेदं देशभेदं वस्तुभेदं जयाजयम् ॥ ५४ ॥
यद्यद्भेदं च तत्सर्वमसदेव हि केवलम् ।
असदन्तःकरणकमसदेवेन्द्रियादिकम् ॥ ५५ ॥
असत्प्राणादिकं सर्वं संघातमसदात्मकम् ।
असत्यं पञ्चकोशाख्यमसत्यं पञ्च देवताः ॥ ५६ ॥
असत्यं षड्विकारादि असत्यमरिवर्गकम् ।
असत्यं षड्ऋतुश्चैव असत्यं षड्रसस्तथा ॥ ५७ ॥
सच्चिदानन्दमात्रोऽहमनुत्पन्नमिदं जगत् ।
आत्मैवाहं परं सत्यं [2]नान्याः संसारदृष्टयः ॥ ५८ ॥

[1] षते—अ, अ१, उ १, क. [2] नान्यासं—अ १, अ २, क.

सत्यमानन्दरूपोऽहं चिद्घनानन्दविग्रहः ।
अहमेव परानन्द अहमेव परात्परः ॥ ५९ ॥
ज्ञानाकारमिदं सर्वं ज्ञानानन्दोऽहमद्वयः ।
सर्वप्रकाशरूपोऽहं [1]सर्वाभावस्वरूपकः ॥ ६० ॥
अहमेव सदा भामीत्येवंरूपं कुतोऽप्यसत् ।
त्वमित्येवं परं ब्रह्म चिन्मयानन्दरूपवान् ॥ ६१ ॥
चिदाकारं चिदाकाशं चिदेव परमं सुखम् ।
आत्मैवाहमसन्नाहं कूटस्थोऽहं गुरुः परः ॥ ६२ ॥
सच्चिदानन्दमात्रोऽहमनुत्पन्नमिदं जगत् ।
कालं नास्ति जगन्नास्ति मायाप्रकृतिरेव न ॥ ६३ ॥
अहमेव हरिः साक्षादहमेव सदाशिवः ।
शुद्धचैतन्यभावोऽहं शुद्धसत्त्वानुभावनः ॥ ६४ ॥
अद्वयानन्दमात्रोऽहं चिद्घनैकरसोऽस्म्यहम् ।
सर्वं ब्रह्मैव सततं सर्वं ब्रह्मैव केवलम् ॥ ६५ ॥
सर्वं ब्रह्मैव सततं सर्वं ब्रह्मैव चेतनम् ।
सर्वान्तर्यामिरूपोऽहं सर्वसाक्षित्वलक्षणः ॥ ६६ ॥
परमात्मा परं ज्योतिः परं धाम परा गतिः ।
सर्ववेदान्तसारोऽहं सर्वशास्त्रसुनिश्चितः ॥ ६७ ॥
योगानन्दस्वरूपोऽहं मुख्यानन्दमहोदयः ।
सर्वज्ञानप्रकाशोऽस्मि मुख्यविज्ञानविग्रहः ॥ ६८ ॥

तुर्यातुर्यप्रकाशोऽस्मि तुर्यातुर्यादिवर्जितः ।
चिदक्षरोऽहं सत्योऽहं वासुदेवोऽजरोऽमरः ॥ ६९ ॥
अहं ब्रह्म चिदाकाशं नित्यं ब्रह्म निरञ्जनम् ।
शुद्धं बुद्धं सदामुक्तमनामकमरूपकम् ॥ ७० ॥
सच्चिदानन्दरूपोऽहमनुत्पन्नमिदं जगत् ।
सत्यासत्यं जगन्नास्ति संकल्पकलनादिकम् ॥ ७१ ॥
नित्यानन्दमयं ब्रह्म केवलं सर्वदा स्वयम् ।
अनन्तमव्ययं शान्तमेकरूपमनामयम् ॥ ७२ ॥

स्वाज्ञदृष्टिविकल्पितब्रह्मातिरिक्तजगतः परिच्छिन्नतां तदधिष्ठानब्रह्मणः त्रिविधपरिच्छेदशून्यतां वस्तुतो ब्रह्मातिरिक्तसामान्यस्य अपह्नवतां ब्रह्मणो निष्प्रतियोगिकस्वमात्रतां चाह—**अणुमात्रेति** ॥ ४०–४६ ॥ **जगत्** स्वाज्ञविकल्पितासत्प्रपञ्चापह्नवसिद्धनिष्प्रतियोगिकब्रह्ममात्रमित्याह—**ब्रह्ममात्रमिदमिति** ॥ ४७ ॥ उक्तार्थमेव प्रपञ्चयति—**ब्रह्ममात्रं श्रुतं** इत्यादिना ॥ ४८–७१ ॥ केवलं ब्रह्म कीदृशं इत्यत आह—**अनन्तमिति** ॥ ७२ ॥

स्वातिरिक्तप्रपञ्चस्यासत्त्वम्

मत्तोऽन्यदस्ति चेन्मिथ्या यथा मरुमरीचिका ।
वन्ध्याकुमारवचने भीतिश्चेदस्ति किंचन ॥ ७३ ॥
शशशृङ्गेण नागेन्द्रो मृतश्चेज्जगदस्ति तत् ।
मृगतृष्णाजलं पीत्वा तृप्तश्चेदस्त्विदं जगत् ॥ ७४ ॥
नरशृङ्गेण नष्टश्चेत्कश्चिदस्त्विदमेव हि ।
गन्धर्वनगरे सत्ये जगद्भवति सर्वदा ॥ ७५ ॥

गगने नीलिमासत्ये जगत्सत्यं भविष्यति ।
शुक्तिकारजतं सत्यं भूषणं चेज्जगद्भवेत् ॥ ७६ ॥
रज्जुसर्पेण दष्टश्चेन्नरो [1]भवतु संसृतिः ।
जातरूपेण बाणेन ज्वालाग्नौ नाशितं जगत् ॥ ७७ ॥
विन्ध्याटव्यां पायसान्नमस्ति चेज्जगदुद्भवः ।
रम्भास्तम्भेन काष्ठेन [2]पाके सिद्धे जगद्भवेत् ॥ ७८ ॥
सद्यःकुमारिकारूपैः पाके सिद्धे जगद्भवेत् ।
चित्रस्थदीपैस्तमसो नाशश्चेदस्त्विदं जगत् ॥ ७९ ॥
मासात्पूर्वं मृतो मर्त्यो ह्यागतश्चेज्जगद्भवेत् ।
तक्रं क्षीरस्वरूपं चेत्कचिन्नित्यं जगद्भवेत् ॥ ८० ॥
गोस्तनादुद्भवं क्षीरं पुनरारोपणं जगत् ।
भूरजोऽब्धौ समुत्पन्ने [3]जगद्भवतु सर्वदा ॥ ८१ ॥
कूर्मरोम्णा गजे बद्धे जगदस्तु तदोत्कटे ।
नालस्थतन्तुना मेरुश्चालितश्चेज्जगद्भवेत् ॥ ८२ ॥
तरङ्गमालया सिन्धुर्बद्धश्चेदस्त्विदं जगत् ।
अग्नेरधश्चेज्ज्वलनं जगद्भवतु सर्वदा ॥ ८३ ॥
ज्वालावह्निः शीतलश्चेदस्तिरूपमिदं जगत् ।
ज्वालाग्निमण्डले पद्मवृद्धिश्चेज्जगदस्त्विदम् ॥ ८४ ॥

[1] भवति—अ १, अ २, क. [2] पाकसिद्धिर्ज—अ, अ १, अ २, क.
[3] जगद्भवति—अ २, क.

महच्छैलेन्द्रनीलं वा संभवेच्चेदिदं जगत् ।
मेरुरागत्य पद्माक्षे स्थितश्चेदस्त्विदं जगत् ॥ ८५ ॥
निगिरिश्चेद्भृङ्गसूनुर्मेरुश्चलवदस्त्विदम् ।
मशकेन हते सिंहे जगत्सत्यं तदाऽस्तु ते ॥ ८६ ॥
अणुकोटर[1]विस्तीर्णं त्रैलोक्यं चेज्जगद्भवेत् ।
तृणानलश्च नित्यश्चेत्क्षणिकं यज्जगद्भवेत् ॥ ८७ ॥
स्वप्नदृष्टं च यद्वस्तु जागरे चेज्जगद्भवः ।
नदीवेगो निश्चलश्चेत्केनापीदं भवेज्जगत् ॥ ८८ ॥
क्षुधितस्याग्नि[2]भोज्यश्चेन्निमिषं कल्पितं भवेत् ।
जात्यन्धै रत्नविषयः सुज्ञातश्चेज्जगत्सदा ॥ ८९ ॥
नपुंसककुमारस्य स्त्रीसुखं चेद्भवेज्जगत् ।
निर्मितः शशशृङ्गेण [3]रथश्चेज्जगदस्ति तत् ॥ ९० ॥
सद्योजाता तु या कन्या भोगयोग्या भवेज्जगत् ।
वन्ध्या [4]गर्भान्वितत्सौख्यं ज्ञाता चेदस्त्विदं जगत् ॥ ९१ ॥
काको वा हंसवद्गच्छेज्जगद्भवतु निश्चलम् ।
महाखरो वा सिंहेन युध्यते चेज्जगत्स्थितिः ॥ ९२ ॥
महाखरो गजगतिं गतश्चेज्जगदस्तु तत् ।
संपूर्णचन्द्रसूर्यश्चेज्जगद्भातु स्वयं जडम् ॥ ९३ ॥

[1] विस्तीर्ण—अ. [2] भोज्य—अ, अ १. [3] जगत्ये—अ, अ २.
[4] गर्भान्वितस्सौ—अ. गर्भान्नवत्सौ—अ १.

चन्द्रसूर्यादिकौ त्यक्त्वा राहुश्चेद्दृश्यते जगत् ।
भृष्टबीजसमुत्पन्नवृद्धिश्चेज्जगदस्तु सत् ॥ ९४ ॥
[1]दरिद्रो धनिकानां च [2]सुखं भुङ्क्ते तदा जगत् ।
शुनां वीर्येण सिंहस्तु जितो यदि जगत्तदा ॥ ९५ ॥
ज्ञानिनो हृदयं मूढैर्ज्ञातं [3]चेत्कल्पनं तदा ।
श्वानेन सागरे पीते निःशेषेण मनो भवेत् ॥ ९६ ॥
शुद्धाकाशो मनुष्येषु पतितश्चेत्तदा जगत् ।
भूमौ वा पतितं व्योम व्योमपुष्पं [4]सुगन्धकम् ॥ ९७ ॥
शुद्धाकाशे वने जातं चलितं तु तदा जगत् ।
केवले दर्पणे नास्ति प्रतिबिम्बं तदा जगत् ॥ ९८ ॥
अजकुक्षौ जगन्नास्ति ह्यात्मकुक्षौ जगन्न हि ।
सर्वथा भेदकलनं द्वैताद्वैतं न विद्यते ॥ ९९ ॥
मायाकार्यमिदं भेदमस्ति चेद्ब्रह्मभावनम् ।
देहोऽहमिति दुःखं चेद्ब्रह्माहमिति निश्चयः ॥ १०० ॥
हृदयग्रन्थिरस्तित्वे छेदनं ब्रह्मचक्रकम् ।
संशये समनुप्राप्ते ब्रह्मनिश्चय[5]माप्नुयात् ॥ १०१ ॥
अनात्मरूपचोरश्चेदात्मरत्नस्य रक्षणम् ।
नित्यानन्दमयं ब्रह्म केवलं सर्वदा स्वयम् ॥ १०२ ॥

परिच्छित्तिव्ययकलनाऽनेकत्वप्रसक्तौ अनन्तमित्याद्यनेकविशेषणविशिष्टं न वस्तुतः तदस्ति । यदि मदतिरेकेण अनन्तमित्यादिविशेषणमस्तीति भ्रान्तिः

[1] दरिद्रैर्ध—अ. [2] सुखे ज्ञाते—उ. [3] चेदस्त्विदं जगत्—अ.
[4] सग—क. सुगन्धिकं—अ १. [5] माश्रयेत्—अ, अ १, क.

तदा तदसदेवेत्याह—मत्त इति । कथं पुनः स्वातिरिक्तप्रपञ्चस्य अत्यन्तामत्त्वं, घटोऽस्ति पटोऽस्ति इत्याद्यनेकधा प्रतीयमानत्वात्, इत्याशङ्क्याह अस्त्यस्तीति प्रतीतेः सन्मात्रत्वेन निष्प्रतियोगिकब्रह्ममात्रत्वात् तत्र स्वातिरिक्तप्रपञ्चासम्भवे "वन्ध्याकुमारवचने भीतिश्चेदस्त्विदं जगत" इत्याद्यनेकदृष्टान्तेन विश्वसत्त्वं विडम्बयन् विश्वासत्त्वं प्रकटयति— वन्ध्येत्यादिना ॥ ७३–७८ ॥ अस्त्विदं जगत् परमार्थदृष्ट्येत्यर्थः ॥ ७९–८५ ॥ पर्यन्तपर्वता निगिरिः ॥ ८६–८८ ॥ अग्निभोज्यः, विसर्गलोपः ॥ ८९–९० ॥ सद्यःकुमारिका, सद्योजाता तु या कन्या, इत्यत्र पुनरुक्तिः स्यादिति चेत् न; शब्दभेदवत् अर्थभेदसम्भवात् । तत् कथमित्यत्र "सद्यःकुमारिकारूपैः" वैद्यशास्त्राख्यातौषधिविशेषैः इन्धनैः "पाके सिद्धे" इत्युक्त्या पाकसाधनेन्धनविशेषो द्योत्यते, कुमारिकाया जलपूरितत्वेन नित्यक्लिन्नत्वात्, तस्या गाढाग्निमध्यपातितत्वेऽप्यग्निशान्तिकरत्वात न पुनर्वचः, तया पाकासम्भवात ॥ ९१–९८ ॥ यदेवमपह्नोतव्यं व्यष्ट्यादिकलनाविशिष्टं जगत तत्र समष्टिजगदजकुक्षौ व्यष्टिजगज्जीवकुक्षौ वर्तते, नह्यभावपदमर्हतीत्याशङ्क्य कालत्रयेऽपि न विद्यत इत्याह—अजेति । स्याज्ञस्वज्ञदृष्टिविभातद्वैताद्वैतवृत्तेरपि परमार्थदृष्ट्याऽसम्भवात् स्वमात्रे स्वातिरिक्तकलना नास्त्येवेत्यर्थः ॥ ९९ ॥ तथाऽपि ब्रह्मानुसन्धानमजस्रं कर्तव्यमित्यत आह— मायेति । भेदः स्याज्ञदृष्ट्या अस्ति चेत् स्वज्ञदृष्ट्या इदं जगत न भवति किं तु ब्रह्मैवेदमिति ब्रह्मभावनं कर्तव्यं, न हि परमार्थदृष्टेः तदुभयमस्तीत्यर्थः । तथा देहोऽहमिति ॥ १००–१०१ ॥ वस्तुतः नित्यानन्दमयं ब्रह्म केवलं निष्प्रतियोगिकब्रह्ममात्रमित्यर्थः ॥ १०२ ॥

अहं ब्रह्मेति भावनाविधिः

एवमादिसुदृष्टान्तैः साधितं ब्रह्ममात्रकम् ।
ब्रह्मैव सर्वं[1] भवनं भुवनं नाम संत्यज ॥ १०३ ॥

[1] भुवनं—अ

अहं ब्रह्मेति निश्चित्य अहंभावं परित्यज ।
सर्वमेव लयं याति सुप्तहस्तस्थपुष्पवत् ॥ १०४ ॥
न देहो न च कर्माणि सर्वं ब्रह्मैव केवलम् ।
न भूतं न च कार्यं च न चावस्थाचतुष्टयम् ॥ १०५ ॥
लक्षणात्रयविज्ञानं सर्वं ब्रह्मैव केवलम् ।
सर्वव्यापारमुत्सृज्य ह्यहं ब्रह्मेति भावय ॥ १०६ ॥
अहं ब्रह्म न संदेहो ह्यहं ब्रह्म चिदात्मकम् ।
सच्चिदानन्दमात्रोऽहमिति निश्चित्य तत्त्यज ॥ १०७ ॥

वन्ध्याकुमारवचन इति एवमादि इति । अस्यामुपनिषदि—

चिन्मात्रमेव चिन्मात्रमखण्डैकरसं रसम् ।
सर्ववर्जितचिन्मात्रं ब्रह्ममात्रमसन्न हि ॥

इत्यादिश्रुत्या योऽर्थोऽभिहितः स्वातिरिक्तसर्वापह्नवसिद्धं स्वमात्रमिति तमेतमर्थं दुर्विज्ञेयं मन्यमाना श्रुतिः स्वाज्ञानां यथायथा स्वातिरिक्तापह्नवसिद्धब्रह्ममात्रज्ञानमुदेति तथातथा भूयोभूयः प्रसङ्गमापाद्यापाद्य स्वप्रकटितसिद्धान्तार्थमेव आदौ "तेजोबिन्दुपरं" इत्यारभ्य पञ्चदशाङ्गज्ञानयोगसहितमवान्तरवाक्येनाखण्डशुद्धचैतन्ययाथात्म्यं प्रतिपाद्य, स्वाज्ञदृष्ट्या दृश्यजडजगद्गतभावादिस्वर्गान्तखण्डताप्रसक्तौ कुमारशिवसंवादरूपेण "अखण्डैकरसं दृश्यं" इत्यादि "अखण्डैकरसं सर्वं" इत्यन्तेन "अखण्डैकरसः स्वयं" इति प्रकटयित्वा, अथ पुनरिदमयमित्यादिशब्दवाच्यभावानामचिन्मात्रत्वप्रसक्तौ "यत्किञ्चिद्यन्न किञ्चिच्च सर्वं चिन्मात्रमेव हि" इत्यादिना निष्प्रतियोगिकचिन्मात्रस्वरूपमभिधाय, ब्रह्मद्वयप्रसक्तौ "अखण्डैकरसं ब्रह्म चिन्मात्रान्न हि भिद्यते" इत्यखण्डैकरसचिन्मात्रयोरेकार्थपर्यवसानत्वमुक्त्वा, अथ "परं ब्रह्मस्वरूपोऽहम्" इत्यारभ्य स्वातिरिक्तप्रपञ्चासत्त्वप्रकटनपूर्वकं स्वानुभवं प्रकाशयित्वा, अहं ब्रह्मास्मीतिमन्त्रमाहात्म्यप्रशंसापूर्वकं मुमुक्षुकोटिग्राह्यतां प्रतिपाद्य, तदान्तराळिकमुख्यफलप्रकटनव्याजेन "चिदात्माऽहं परात्माऽहं" इत्युपक्रम्य

"स्वस्वरूपे स्वयं स्वप्स्ये स जीवन्मुक्त उच्यते" इत्यन्तेन निर्विशेष-ज्ञानान्तराळिकफलजीवन्मुक्तिं, "ब्रह्मभूतः प्रशान्तात्मा" इत्युपक्रम्य "स्वात्मानमेव मोदस्व वैदेही मुक्तिगो भव" इत्यन्तेन ब्रह्ममात्रज्ञानमुख्यफलं तन्मात्रावस्थानलक्षणविदेहमुक्तिं च प्रकटयित्वा, पुनराख्यायिकाऽन्तरमवलम्ब्य "सर्ववाचोऽवधिर्ब्रह्म" इत्यादिना स्वात्मयाथात्म्यं, "अनात्मेति प्रसङ्गो वा" इत्यादिना अनात्मयाथात्म्यं च प्रतिपाद्य आत्मानात्मेत्युक्त्या तयोरेकत्वानेकत्वप्रसक्तसविशेषतां "एकाभावे द्वितीयं न" इत्यादिसापेक्षश्रुतियुक्तिभिः शिथिलयित्वा, क्वचित् क्वचित् स्वातिरिक्तयोः आत्मानात्मनोः शब्दभेदेन अर्थभेदेन च स्वमात्रस्य निष्प्रतियोगिकभावरूपत्वं स्वातिरिक्त-सामान्यस्य "इदं प्रपञ्चं नास्त्येव" इत्यादिना "वन्ध्याकुमारवचने भीतिश्चेत्" इत्यादिस्वातिरिक्तजगदत्यन्तासम्भवदृष्टान्तेन च शशविषाणवत् अत्यन्ताभावरूपतां च विभक्तिलिङ्गपुरुषव्यत्ययमप्यनादरेण विस्मृत्येव महता वेगेन यत इयं श्रुतिः जामितामन्तरेण प्रवृत्ता अतोऽस्मिन् वेदान्तशास्त्रसमुदाये न हि पुनरुक्तिशङ्का सेद्धुं पारयति । स्वाज्ञादिमात्र-भावमापन्नायाः श्रुतेः स्वसन्तानस्वातिरिक्तमस्ति नास्तीति विभ्रमापह्नवसिद्धनिष्प्रतियोगिकब्रह्ममात्रावशेषलक्षणविकळेबरकैवल्यसाम्राज्यपट्टाभिषेचनकर्मव्यग्रत्वात् सद्भिरत्र न कोऽपि दोषः स्मर्तव्यः । प्रकृते तु यद्यज्ञोऽसि तदा आदौ ब्रह्मैव सर्वभवनं सर्वाधिकरणं विचिन्तय । ततः स्वाधिष्ठेयनिरूपितमधिष्ठान-भ्रममपि भुवनं सन्त्यज ॥ १०३ ॥ सर्वं अहं ब्रह्मेति निश्चित्य तत्रत्याहम्भावं परित्यज । यद्येवमुद्योगवानसि तदा यद्यत् स्वविकल्पितं तत्तत् सर्वमेव ॥ १०४ ॥ तदानीं न देह इत्यादि ॥ १०५ ॥ जहदादि लक्षणा । आदौ सर्वव्यापारं ॥ १०६ ॥ तन्निश्चयमपि संत्यज, तद्वृत्तेरपि स्वातिरिक्ततया त्याज्यत्वात् । तथा चोक्तं—

तस्मिन् काले विदेहोतिदेहस्मरणवर्जितः ।
ईषन्मात्रं स्मृतं चेद्यस्तदा सर्वसमन्वितः ॥

इति ॥ १०७ ॥

शास्त्रसम्प्रदायविधिः

[1]शांकरीयं महाशास्त्रं न देयं यस्य कस्यचित् ।
नास्तिकाय कृतघ्नाय दुर्वृत्ताय दुरात्मने ॥ १०८ ॥
गुरुभक्तिविशुद्धान्तःकरणाय महात्मने ।
सम्यक् परीक्ष्य दातव्यं मासं षाण्मासवत्सरम् ॥ १०९ ॥
सर्वोपनिषदभ्यासं दूरतस्त्यज्य सादरम् ।
तेजोबिन्दूपनिषदमभ्यसेत्सर्वदा मुदा ॥ ११० ॥
सकृदभ्यासमात्रेण ब्रह्मैव भवति स्वयम् ।
ब्रह्मैव भवति स्वयमित्युपनिषत् ॥ १११ ॥

शास्त्रसम्प्रदायार्थं प्रकटयन् उपसंहरति—**शाङ्करीयमिति** । कस्य वा न देयं कस्य वा देयं इत्यत आह—**नास्तीति** ॥ १०८–१०९ ॥ एवं गुरुमुखात् लब्धविद्यो मुमुक्षुः **सर्वोपनिषत्** । सर्वं परित्यज्य एतदभ्यासेन किमित्यत आह—**सकृदिति** । सकृच्छ्रवणपठनमात्रतो विद्वान् सर्वोपह्नवसिद्धनिष्प्रतियोगिकब्रह्ममात्रमवशिष्यत इत्यर्थः । **इत्युपनिषच्छब्दः** तेजोबिन्दूपनिषत्समाप्त्यर्थः ॥ १११ ॥

इति षष्ठोऽध्यायः

श्रीवासुदेवेन्द्रशिष्योपनिषद्ब्रह्मयोगिना ।
लिखितं स्याद्विवरणं तेजोबिन्दोः स्फुटं लघु ॥
तेजोबिन्दूपनिषदो व्याख्यानग्रन्थविस्तरः ।
चतुष्पञ्चाशदधिकशतानां सप्तकं स्मृतः ॥

इतीशाद्यष्टोत्तरशतोपनिषच्छास्त्रविवरणे सप्तत्रिंशत्सङ्ख्यापूरकं
तेजोबिन्दूपनिषद्विवरणं सम्पूर्णम्

---

[1] शैवमेतन्म—अ.

त्रिशिखिब्राह्मणोपनिषत्

पूर्णमदः— इति शान्तिः

ब्राह्मणम्

आत्मब्रह्मविषये प्रश्नाः

त्रिशिखी ब्राह्मण आदित्यलोकं जगाम । तं गत्वोवाच ।
भगवन् किं देहः किं प्राणः किं कारणं किमात्मा ॥ १ ॥

योगज्ञानैकसंसिद्धशिवतत्त्वतयोज्ज्वलम् ।
प्रतियोगिविनिर्मुक्तं परं ब्रह्म भवाम्यहम् ॥

इह खलु शुक्लयजुर्वेदप्रविभक्तेयं त्रिशिखिब्राह्मणोपनिषत् निष्प्रतियोगिकब्रह्ममात्रपर्यवसन्ना तदुपायाष्टाङ्गयोगप्रपञ्चप्रकाशिनी विजृम्भते । तस्याः स्वल्पग्रन्थतो विवरणमारभ्यते । त्रिशिखिब्राह्मणादित्यप्रश्नप्रतिवचनरूपेयं आख्यायिका विद्यास्तुत्यर्था । केयं आख्यायिका इत्यत आह—त्रिशिखीति । नामतः त्रिशिखी, ब्रह्मणोऽपत्यं ब्राह्मणः, सनातनो नाम मुनिः, आदित्यलोकासनं आदित्यं विधिवत् उपसङ्गम्य देहप्राणादिकं तत्कारणं किं, स्वयं वा कीदृश इति पप्रच्छ ॥ १ ॥

सर्वस्य शिवत्वम्

स होवाच सर्वमिदं शिव एव विजानीहि । किं तु नित्यः शुद्धो निरञ्जनो विमु[1]रद्वयानन्दः शिव एकः स्वेन [2]भासेदं सर्वं [3]सृष्ट्वा तत्तायःपिण्डवत् [4]ऐक्यं भिन्नवत् अवभासते । तद्भासकं किमिति चेत् उच्यते । सच्छब्दवाच्यं अविद्याशबलं ब्रह्म ॥ २ ॥

तत्प्रश्नं अङ्गीकृत्य तं होवाच भगवान् । किमिति ? सर्वमिदं इत्यादि । त्वया किं देह इत्यादि यत् पृष्टं तत् शिव एवेति विजानीहि, सर्वस्य शिवाज्ञानविकल्पितत्वात् । विकल्पाधिकरणत्वे अनित्यत्वादि स्यात् इत्यत आह—किन्त्विति । स्वाज्ञस्वविकल्पितविकल्पजालं अनित्यत्वादिदोषदुष्टमेव । किन्तु तद्विकल्पनाधारो नित्यत्वादिविशेषणविशिष्टः अद्वैतात्मा शिव एक एव, न कदाऽपि द्वैतभावमुपैतीत्यर्थः । विकल्पजातं केन विकल्पितं सदेकतां गतं, तद्भासकं किं इत्याशङ्कायां य एकः शिवः स स्वेन तेजसा सर्वमिदं सृष्ट्वा तेन तत्तायःपिण्डवत् एकीभूय तद्वैलक्षण्येनापि भासते इत्याह—स्वेनेति । ऐक्यं प्राप्य स्वज्ञदृष्ट्या भिन्नवत् अवभासते । किं तदित्यत्र किं देह इत्यादि त्रिशिखिप्रश्नप्रतिवचने सर्वमिदं शिव एवेति यत् प्रतिज्ञातं तत्र स्वविकल्पित-कार्यापेक्षया स्वस्य कारणत्वं स्वातिरिक्ताव्यक्तादेः कार्यत्वं च विशदीकरोति—सदिति । "सदेव सोम्येदमग्र आसीत्" इति स्वाविद्यायोगात् शबळत्वं स्वेन रूपेण ब्रह्मत्वं सिद्धं इत्यर्थः ॥ २ ॥

ब्रह्मणः अखिलजगदुत्पत्तिः

ब्रह्मणोऽव्यक्तम् । अव्यक्तान्महत् । महतोऽहंकारः । अहंकारात् पञ्चतन्मात्राणि । पञ्चतन्मात्रेभ्यः पञ्चमहाभूतानि । पञ्चमहाभूतेभ्योऽखिलं जगत् ॥ ३ ॥

[1] रुद्रयः शि—क.
[2] भासेनेदं—क, अ २.
[3] दृष्ट्वा—क, अ, अ १, अ २.
[4] एकं—अ, अ १.

केवलब्रह्मणः कल्पनाऽनधिकरणत्वेन निष्प्रतियोगिकनिर्विकल्पत्वात् तत् तिष्ठतु, शबलब्रह्मणः किं विकल्पितं इत्यत आह—ब्रह्मणोऽव्यक्तमिति । ततः किं इत्यत्र गुणसाम्यभावमापन्नाव्यक्तात् महत् । सत्वभावमापन्नमहतः अहङ्कारः । रजोभावमापन्नाहङ्कारात् पञ्चतन्मात्राणि । तमःप्रधान-पञ्चतन्मात्रेभ्यः पञ्चमहाभूतानि, पञ्चीकृतानीत्यर्थः । तमस्तमःप्रधानत्रिगुणो-पसर्जनपञ्चीकृतपञ्चमहाभूतेभ्यः अखिलं जगत् ॥ ३ ॥

एकस्य पिण्डस्य बहुधा विभागः

[1]तदखिलं किमिति । भूतविकारविभागादिति । एकस्मिन् पिण्डे कथं भूतविकारविभाग इति । [2]तत्कार्यकारणभेदरूपेण अंशतत्त्ववाचकवाच्यस्थानभेदविषयदेवताकोशभेदविभागा भवन्ति ॥

एकस्य पिण्डात्मनो जगतः कथं अखिलत्वं इत्यत्र पञ्चीकृतपञ्चमहा-भूतविकारविभागादिति । तत्राप्याक्षिपति—एकस्मिन्निति । तत्प्रकारमाह—तदिति । पृथिव्यादेः आकाशकार्यत्वं आकाशादेः पृथिव्यादिकारणत्वमिति तत्तद्भूतकार्यकारणभेदरूपेण पृथिव्यादिपञ्चभूतविभागः । आकाशाद्यंशश्रोत्रादि-तत्त्वभेदेन तेषामभिधानाभिधेयभेदेन तत्तद्गोलकस्थानभेदेन शब्दादिविषयभेदेन दिगादिदेवताभेदेन आनन्दमयादिकोशभेदेन च बहुधा विभागा भवन्ति । एकस्मिन् अविद्याऽण्डपिण्डे भूतभौतिकविकारविभागाः उपपद्यन्त इत्यर्थः ॥ ४ ॥

आकाशादीनामंशभेदाः

अथाकाशः अन्तःकरणमनोबुद्धिचित्ताहंकाराः । वायुः समानो[3]दानोव्यानापानप्राणाः । वह्निः श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणाः । आपः शब्दस्पर्शरूपरसगन्धाः । पृथिवी वाक्पाणिपादपायूपस्थाः ॥

[1] जगदखिलं—क. [2] तत्तत्कार्य—क, अ, अ १, अ २. [3] दान—अ.

एवं यत् सूत्रितं तदर्थं आकाशादिक्रमेण विशदीकरोति—अथेत्यादिना ॥ आकाशांशा व्यर्थः । अथ वाय्वाद्यंशा उच्यन्ते—वायुरिति ॥ ५ ॥

तेषां विषयभेदाः

ज्ञानसंकल्पनिश्चयानुसंधानाभिमाना आकाश[1]कार्यान्तः-करणविषयाः । समीकरणोन्नयनग्रहण[2]श्रपणोच्छ्वासा वायुकार्य-प्राणादिविषयाः । [3]शब्दस्पर्शरूपरसगन्धा अग्निकार्यज्ञानेन्द्रियविषया अब्बाश्रिताः । वचनादानगमनविसर्गानन्दाः पृथिवीकार्यकर्मे-न्द्रियविषयाः । कर्मज्ञानेन्द्रियविषयेषु प्राणतन्मात्रविषया अन्तर्भूताः । मनोबुद्ध्योश्चित्ताहंकारौ चान्तर्भूतौ ॥ ६ ॥

अंशभेदानुक्त्वा विषयभेदानाह—ज्ञानेति ॥ ६ ॥

सूक्ष्मभूतमात्राः

अवकाशविधूतदर्शनपिण्डीकरणधारणाः सूक्ष्मतमा [4]जैव-तन्मात्रविषयाः ॥ ७ ॥

सूक्ष्मभूतमात्रा उच्यन्ते—अवकाशेति ॥ ७ ॥

आध्यात्मिकादिविभागः

एवं द्वादशाङ्गानि आध्यात्मिकान्याधिभौतिकान्याधिदैवि-कानि । अत्र निशाकरचतुर्मुखदिग्वातार्कवरुणाश्वयग्नीन्द्रोपेन्द्रप्रजापति-[5]यमा अक्षाधिदेवतारूपैर्द्वादशनाड्यन्तःप्रवृत्ताः प्राणा एवाङ्गानि अङ्गज्ञानं तदेव ज्ञातेति ॥ ८ ॥

[1] कार्या अन्तः—अ २.
[2] श्रवणो—क, अ.
[3] कर्मज्ञानेन्द्रियविषयेषु शब्दस्पर्श—अ.
[4] 'जैव' इत्येतत् 'एव' इति शोधितं—क.
[5] यमाक्ष्या—क, अ, अ १, अ २.

अंशादिभेदेन एवं इत्यादि । अत्र आत्मानं देहं भूतजातं देवताजातं च अधिकृत्य भवन्तीति आध्यात्मिकानि इत्यादि । तत्र आध्यात्मिकानि आधिभौतिकानि उक्तानि । अत्र आधिदैविकविवक्षया करणाधिपाः उच्यन्ते—अत्रेति । इडादि द्वादशनाडी । यत् सर्वाङ्गज्ञानं अन्तःकरणं तदेव उपाधित्वेन योऽभिमन्यते स एव ज्ञाता जीवो भवतीत्यर्थः ॥ ८ ॥

ज्ञातृव्यापाराभिव्यक्तिः

अथ व्योमानिलानलजलान्नानां पञ्चीकरणमिति । ज्ञातृत्वं समानयोगेन श्रोत्रद्वारा शब्दगुणो वागधिष्ठित आकाशे तिष्ठति आकाशस्तिष्ठति। मनो व्यानयोगेन त्वग्द्वारा स्पर्शगुणः पाण्यधिष्ठितो वायौ तिष्ठति वायुस्तिष्ठति । बुद्धिरुदानयोगेन चक्षुर्द्वारा रूपगुणः पादाधिष्ठितोऽग्नौ तिष्ठत्यग्निस्तिष्ठति । चित्तमपानयोगेन जिह्वाद्वारा रसगुण उपस्थाधिष्ठितोऽप्सु तिष्ठत्यापस्तिष्ठन्ति । अहंकारः प्राणयोगेन घ्राणद्वारा गन्धगुणो गुदाधिष्ठितः पृथिव्यां तिष्ठति पृथिवी तिष्ठतीत्येवं वेद ॥ ९ ॥

एवं आध्यात्मिकादितापत्रयं निरूप्य अथ पञ्चीकरणाभिव्यक्तज्ञातृव्यापृतिं व्यक्तीकरोति—अथेति । पञ्चीकरणमिति पञ्चीकरणनिष्पन्नं ज्ञातुः ज्ञातृत्वमित्यर्थः । व्यष्टिसमष्टिप्रपञ्चरूपाधिकरणजीवेश्वरयोः व्यापृतिं भूत-तत्कार्यानुप्रवेशं चाह—ज्ञातृत्वमिति । जीवेशाववष्टभ्य ज्ञातृत्वं इत्यादि । आकाशस्तिष्ठति आकाशादौ आकाशादिः भूत्वा तिष्ठतीत्यर्थः । एवं वेद य एवं पञ्चभूततत्कार्यासङ्गान्तर्यामिणं वेद सोऽन्तर्यामी भवतीति शेषः ॥ ९ ॥

मन्त्रः

ब्रह्मणः सकाशात् पञ्चीकरणान्ता सृष्टिः

अत्रैते श्लोका भवन्ति—

पृथग्भूते षोडश कलाः स्वार्धभागान्[1] परान् क्रमात् ।
अन्तःकरण[2]व्यानाक्षिरस[3]पायुनभःक्रमात् ॥ १ ॥
[4]मुख्यान् पूर्वोत्तरैर्भागैर्भूतेभूते चतुश्चतुः ।
पूर्वमाकाशमाश्रित्य पृथिव्यादिषु [5]संस्थितः ॥ २ ॥
[6]मुख्या[7]ऊर्ध्वे परा ज्ञेया ना[अ]परानुत्तरान्विदुः ।
[8]एवमंशो अभूत्तस्मात्तेभ्यश्चां[9]शो अभूत्तथा ॥ ३ ॥
तस्मादन्योन्यमाश्रित्य ह्यो[10]तं प्रोतमनुक्रमात् ।

ब्राह्मणेन योऽर्थोऽभिहितः तमेतमर्थं मन्त्रा अप्यनुवदन्तीत्याह—**अत्रेति**। स्वाज्ञविकल्पितस्वातिरिक्तषोडशकलातत्कार्यजातात् स्वज्ञदृष्ट्या **पृथग्भूते** निष्कले ब्रह्मणि निर्बीजे सकलकलनानिर्वाहकस्वाज्ञदृष्ट्या प्रश्नोपनिषत्परिपठितप्राणादिनामान्तकला बीजरूपेण आदौ विकल्पिताः सत्यः स्वारोपाधिकरणेश्वरयोगात् ईश्वरो भूत्वा । **अन्तःकरण**शब्देन तत्कारणं आकाशमुच्यते, **व्यान**शब्देन वायुः, **अक्षि**शब्देन अग्निः—अक्ष्णः तैजसत्वात्—**रस**शब्देन आपः, **पायु**शब्देन पृथिवी, इत्येवं **नभःक्रमात्** आकाशादिक्रमात् **परान् स्वार्धभागान्** पञ्चभूतानां **मुख्यान्** अंशान् **क्रमात्** तत्तद्भूते निक्षिप्य ॥ १ ॥ **पूर्वोत्तरैः** आकाशादिपृथिव्यन्तैः **भागैः** तत्तद्भूतार्धांशानां तत्तद्भूते निक्षिप्तत्वात् शिष्टार्धांशान् **चतुश्चतुर्धा** विधाय आकाशः स्वांशेतरार्धांशान् वाय्वादिभूतचतुष्टये निक्षिप्य, तथा वायुः स्वांशेतरार्धांशान् आकाशाग्निजलपृथिवीषु निक्षिप्येत्यादि

[1] वरान्—अ १. [2] व्यानोऽक्षि—क. [3] पायू नभः —क, अ २.
[4] मुख्यात्—क, अ १. [5] संस्थिताः—अ १. [6] परा—अ.
[7] ऊर्ध्वं—अ १. [8] एवमंशा—क, अ, अ १, अ २.
[9] शा—क, अ, अ १, अ २. [10] तप्रोतं—अ १.

समानम् । एवं पञ्चीकृते सति पूर्वं आकाशमाश्रित्य योंऽशोऽस्ति सोऽयं पञ्चीकरणानन्तरं पृथिव्यादिषु संस्थितो भवति ॥ २ ॥ ऊर्ध्वं पूर्वं तत्तद्भूतमुख्यांशा एव पराः श्रेष्ठाः इति ज्ञेयाः । पञ्चीकृतेऽपि "वैशेष्यात्तु तद्वादस्तद्वादः" इति वैय्यासिकसूत्रानुरोधेन तत्तद्भूतव्यपदेशात् परत्वं युज्यते । उत्तरान् मुख्यांशेतरान् अंशान् अपरान् गौणान् विदुः तद्विद इत्यर्थः । यस्मात् एवं पञ्चभूतांशः अभूत् तस्मात् तेभ्यः मुख्यांशेभ्यः तथा गौणांशः अभूत् । "पञ्चभूतांशा अभूत्" "गौणांशा अभूत्" इति पाठे अभूवन्नित्यर्थे अभूदिति वचनव्यत्ययः ॥ ३ ॥ यस्मात् एवं तस्मात् अनुक्रमात् ओतं प्रोतं यथा भवति तथा पञ्चभूतेषु मुख्यांशोज्वलेषु गौणांशाः अन्योन्यमाश्रित्य वर्तन्ते इत्यर्थः ॥

चराचरात्मकविश्वसृष्टिः

पञ्चभूतमया भूमिः सा चेतनसमन्विता ॥ ४ ॥
तत ओषधयोऽन्नं च ततः पिण्डाश्चतुर्विधाः ।
रसासृङ्मांसमेदोऽस्थिमज्जाशुक्रानि धातवः ॥ ५ ॥
केचित्तद्योगतः पिण्डा भूतेभ्यः संभवाः क्वचित् ।
तस्मिन्नन्नमयः पिण्डो नाभिमण्डलसंस्थितः ॥ ६ ॥
अस्य मध्येऽस्ति हृदयं सनालं पद्मकोशवत् ।
सत्वान्तर्वर्तिनो देवाः कर्त्रहंकारचेतनाः ॥ ७ ॥
अस्य बीजं तमःपिण्डं मोहरूपं जडं घनम् ।
वर्तते कण्ठमाश्रित्य मिश्रीभूतमिदं जगत् ॥ ८ ॥
प्रत्यगानन्दरूपात्मा [1]मूर्ध्नि स्थाने परंपदे ।
अनन्तशक्ति[2]संयुक्तो जगद्रूपेण भासते ॥ ९ ॥

[1] मूर्ध्नः—अ. [2] संयुक्ते—अ, अ १.

एवं पञ्चीकृतभूततः चेतनयुक्तात् किं जायते इत्यत्र चराचरात्मकं विश्वं जायते इत्याह—पञ्चेति ॥ ४ ॥ चेतनाधिष्ठितात् ततः, चैतन्याधिष्ठितान्नात्, जरायुजादिभेदेन चतुर्विधाः पिण्डाः सञ्जाताः इत्यर्थः । धातवोऽप्यन्नादेव जायन्ते इत्याह—रसेति ॥ ५ ॥ केचिदेव वदन्तीत्याह—केचिदिति । तद्योगतः शुक्रशोणितयोगतः पिण्डाः भुक्तान्नपुरुषभूतेभ्यः सञ्जातशुक्रशोणित-सम्भवाः पिण्डाः इति केचिदाहुः । सर्वथा अन्नमया इत्यर्थः । अन्नसारःपिण्डः क्व आसनमर्हति इत्यत आह—तस्मिन्निति । तस्मिन् भूतकदम्बे, तस्य सर्वप्राणिजीवननिमित्तत्वात ॥ ६ ॥ तन्मध्ये किं वर्तते इत्यत आह—अस्येति । अन्नमयस्य । तदाश्रित्य के वर्तन्ते इत्यत आह—सत्त्वेति । सत्वान्तर्वर्तिनः सत्वगुणप्रधानाः इन्द्रादयो ब्रह्मादयश्च देवाः वर्तन्ते । यद्वा—कर्त्रहङ्कारचेतनाः अन्तःकरणविशिष्टाः देवाः इन्द्रियाणि विद्यन्ते इत्यर्थः ॥ ७ ॥ हृदयबीजं किं इत्यत आह—अस्येति । घनम् स्वाज्ञानमित्यर्थः । तत् कुत्र वर्तते इत्यत आह—वर्तते इति । "स्वाज्ञानं मनःस्थानं गळान्तं" इति श्रुत्यनुरोधेन कण्ठं कण्ठासनं मनः आश्रित्य वर्तते । तेन स्वाज्ञानकवळितमनसा इदं जगत मिश्रीभूतं व्याप्तं भवति ॥ ८ ॥ जगतः स्वाज्ञानमिश्रितत्वे जगद्रूपेण भानं किं इत्यत आह—प्रत्यगिति । जगतः स्वाज्ञानव्याप्तत्वेऽपि "तुरीयं मूर्ध्नि संस्थितम्" इति श्रुत्या स्वाज्ञानास्पृष्टमूर्ध्नि स्थाने परंपदे प्रत्यगानन्दरूपात्मा स्थिरासनो भूत्वा ईश्वरात्मना अनन्त-शक्तियुक्तः सन् जगद्रूपेण भासते । यतः एवं अतः जगद्रूपेणापि भानं प्रत्यगात्मनिष्ठं न स्वाज्ञानतत्कार्यजगन्निष्ठं इत्यर्थः ॥ ९ ॥

अवस्थाचतुष्टयम्

सर्वत्र वर्तते जाग्रत्स्वप्नं[1] जाग्रति वर्तते ।
सुषुप्तं च तुरीयं च नान्यावस्थासु कुत्रचित् ॥ १० ॥

[1] प्रजा—अ १, अ २.

सर्वदेशेष्वनुस्यूतश्च[1]तूरूपः शिवात्मकः ।
यथा महाफले सर्वे रसाः सर्वप्रवर्तकाः ॥ ११ ॥
तथैवान्नमये कोशे कोशास्तिष्ठन्ति [2]चान्तरे ।
यथा कोशस्तथा जीवो यथा जीवस्तथा शिवः ॥ १२ ॥
सविकारस्तथा जीवो निर्विकारस्तथा शिवः ।
कोशास्तस्य विकारास्ते ह्यवस्था[3]सु प्रवर्तकाः ॥ १३ ॥
यथा रसाशये फेनं मथनादेव जायते ।
मनोनिर्मथनादेव विकल्पा बहवस्तथा ॥ १४ ॥

जगत्कलनानिर्वर्त्यावस्थाचतुष्टयेयत्तां तद्वासकचिद्धातुस्वरूपं चाह— सर्वत्रेति । साक्षिभास्यप्रपञ्चे सर्वत्र जाग्रदवस्था वर्तते, करणग्रामव्यापृतेः स्फुटं अवगन्तुं शक्यत्वात् । अन्नमयकोशे प्राणादिकोशवत् जाग्रति स्वप्नादित्रयं वर्तते, नान्यावस्थास्वित्यर्थः ॥ १० ॥ जाग्रदवस्थायाः स्वप्नाद्याधारत्वं स्वागंपाधारेश्वरनिष्ठं इत्याह— सर्वेति । विश्वविराडोत्रादिद्वितुर्याविकल्पान्तरूपेण व्यष्टिसमष्ट्यात्मकजाग्रदादिसर्वदेशेष्वनुस्यूतः प्रत्यगात्मा सदा वर्तते इत्यर्थः । कथं पुनः प्रतीचः सर्वानुस्यूतत्वं इत्यत्र विकारवत् कोशजीवदृष्टान्तेन सर्वानुस्यूतत्वं साधयति—यथेति । यथा अन्नमयकोशः सर्वकोशाधारो व्यापकश्च भवति तथा जीवः यथा कृत्स्नकोशविकारं आत्मात्मीयाभिमानपूर्वकं व्याप्य वर्तते तथा तद्विकारास्पृष्टः सन् शिवोऽपि वर्तते । जीवशिवयोः सविकारनिर्विकारत्वं कोशाभिमानभावाभावनिष्ठम् ॥ ११–१३ ॥ य(क?)स्मात् अवस्थात्रयतद्धेतुपञ्चकोशादिविकल्पः सञ्जात इत्यत्र—मथनसञ्जातरसाशयफेनवत् एवं मनोनिर्मथनात् जाग्रदादि विद्यते इति । सङ्कल्पात् एवमादिबहवो विकल्पाः जायन्ते, मनःसङ्कल्पाभावे किमपि नास्तीत्यर्थः ॥ १४ ॥

[1] तुरूपः—अ, क. [2] चापरे—क, क २. [3] सं—अ २.

दक्षिणोत्तरायणगतिः

कर्मणा वर्तते कर्मी तत्त्यागाच्छान्तिमाप्नुयात् ।
अयने दक्षिणे प्राप्ते प्रपञ्चाभिमुखं गतः ॥ १५ ॥
अहंकाराभिमानेन जीवः स्याद्धि सदाशिवः ।
स चाविवेकप्रकृतिसङ्गत्या तत्र मुह्यते ॥ १६ ॥
नानायोनिशतं गत्वा शेतेऽसौ वासनावशात् ।
विमोक्षात्संचरत्येव मत्स्यः कूलद्वयं यथा ॥ १७ ॥
ततः कालवशादेव ह्यात्मज्ञानविवेकतः ।
उत्तराभिमुखो भूत्वा स्थानात्स्थानान्तरं क्रमात् ॥ १८ ॥
मूर्ध्न्याधायात्मनः प्राणान्योगाभ्या[1]मं स्थितश्चरन् ।

एवं सङ्कल्पसञ्जातनानाविधकर्मणा कर्मी जीवो मनःकल्पितसंसारपाशेन निरुच्छ्वासं बद्धः सन् वर्तते । यावत् स्वज्ञानेन स्वभावापत्तिः तावत् संसरति । यदाऽयं स्वज्ञानेन स्वाज्ञानतत्कार्यं त्यजति तदा स्वातिरिक्तविभ्रमशान्तिमाप्नुयात् । शिवस्य जीवत्वं जीवस्य शिवत्वं कथं भवतीत्याशङ्क्य अनात्मनि आत्माभिमानात् शिवस्य जीवत्वं तदभिमतित्यागात् जीवस्य शिवत्वं च स्यादित्याह—अयन इति । ज्ञानगन्धविकलकामसङ्कल्पादिघटितेष्टापूर्तादिकर्मणा अयने दक्षिणे प्राप्ते ॥ १५–१७ ॥ कदा जीवः शिवो भवति? स्वभावाप्तौ किं साधनं? इत्यत आह—तत इति । ततो निष्कामबुद्ध्या अनुष्ठितसत्कर्मफलसमर्पणेश्वरप्रसादात् उत्तराभिमुखो भूत्वा "तेऽर्चिषमभिसम्भवन्ति" इत्यादिस्थानात् स्थानान्तरं प्राप्य शबलब्रह्मपदं क्रमात् प्राप्नोतीत्यर्थः ॥ १८ ॥ किं कुर्वन् उत्तराभिमुखो भवति इत्यत आह—

[1] सत्स्थितः—अ २.

मूर्ध्नीति । सिद्धासनस्थो योगी **स्वात्मनः प्राणान् सुषुम्नाद्वारेण मूर्ध्नि आधाय सदा एवं योगाभ्यासं चरन् यथोक्तकाले मूर्धानं भित्त्वा देवयानेन पथा ब्रह्मलोकमेत्य न पुनरावर्तते** इत्यर्थः ॥

सद्योमुक्तिप्रापकं ज्ञानम्

योगात्संजायते ज्ञानं ज्ञानाद्योगः प्रवर्तते ॥ १९ ॥

योगज्ञानपरो नित्यं स योगी न प्रणश्यति ।

विकारस्थं शिवं पश्येद्विकारश्च शिवे न तु ॥ २० ॥

योगप्रकाशकं योगैर्ध्यायेच्चानन्यभावनः ।

केवलकर्मानुष्ठानफलं चान्द्रपदं, कर्मज्ञानसमुच्चयानुष्ठानफलं तु ब्रह्मलोकावाप्तिः इत्युक्त्वा सद्यःकैवल्यप्रापकनिर्विशेषज्ञानं सोपायमाह -**योगादिति** । स्वाश्रमाचारसत्कृतनित्यादिसाधनचतुष्टयवदनुष्ठितसर्ववेदान्तश्रवणयोगात् निर्विशेषज्ञानं सञ्जायते । यथोक्तमननाभिवर्धितज्ञानात् योगो निदिध्यासो ब्रह्मातिरिक्तं न किञ्चिदस्तीति सम्यज्ज्ञानं **प्रवर्तते** प्रादुर्भवति ॥ १९ ॥ **नित्यमेवं योगज्ञानपरो योगी** स्वाज्ञवत् स्वातिरिक्तास्तित्वधिया **न** कदाऽपि **प्रणश्यति** सम्यज्ज्ञानसमकालं सर्वापह्नवसिद्धनिष्प्रतियोगिकब्रह्ममात्रभावापन्नो भवतीत्यर्थः । सम्यज्ज्ञानोपायस्तु —"सर्वं खल्विदं ब्रह्म" इति श्रुत्यनुरोधेन स्वाज्ञदृष्टिप्रसक्तसर्वविकारस्थं **शिवं पश्येत्** । एवं सर्वं ब्रह्मेति बोधे सिद्धे सर्वविकारजातं **शिवे न किञ्चिदस्तीति** विज्ञानं जायते ॥ २० ॥ ततो विज्ञानयोगी सर्वविकारासम्भवसिद्धं ब्रह्म निष्प्रतियोगिकस्वमात्रं इति **अनन्यभावनः** सम्यज्ज्ञानीभूत्वा पुरोदितश्रवणादियोगैः सञ्जातसम्यज्ज्ञानयोगप्रकाशकं आत्मानं ब्रह्ममात्रं **ध्यायेत्** । एवं ध्यानात्मकसम्यज्ज्ञानसमकालं कृतकृत्यो भवतीत्यर्थः ॥

ज्ञानोपायभूतो योगः

योगज्ञाने न विद्येते तस्य भावो न सिध्यति ॥ २१ ॥
तस्मादभ्यासयोगेन मनःप्राणान्निरोधयेत् ।
योगी निशितधारेण क्षुरेणैव निकृन्तयेत् ॥ २२ ॥
शिखा [1]प्राणमयी वृत्तिर्यमाद्यष्टाङ्गसाधनैः ।

यदि श्रवणाधिकारी न भवति तस्य स्वप्नेऽपि योगज्ञाने न विद्येते, सम्यज्ज्ञानभावोऽपि न सिध्यति ॥ २१ ॥ यस्मात् एवं तस्मात् । एवं अभ्यासयोगतः ब्रह्मप्राप्तिप्रतिबन्धकाज्ञानं योगी निशितधारेण अभ्यासयोगक्षुरेणैव निकृन्तयेदिति ॥ २२ ॥ एवं अभ्यासयोगः केनोपायेन जायते इत्यत आह—शिखेति । वक्ष्यमाणयमाद्यष्टाङ्गयोगसाधनैः प्राणमयी वृत्तिः योगशिखा अभ्यासयोगफलप्रापिका सञ्जायते इत्यर्थः ॥

कर्मज्ञानयोगौ

ज्ञानयोगः कर्मयोग इति योगो द्विधा मतः ॥ २३ ॥
क्रियायोगमथेदानीं शृणु ब्राह्मणसत्तम ।
अव्याकुलस्य चित्तस्य बन्धनं विषये क्वचित् ॥ २४ ॥
यत्संयोगो द्विजश्रेष्ठ स च द्वैविध्यमश्नुते ।
कर्म कर्तव्यमित्येव विहितेष्वेव कर्मसु ॥ २५ ॥
बन्धनं मनसो [2]नित्यं कर्मयोगः स उच्यते ।
यत्तु चित्तस्य [3]सततमर्थे श्रेयसि बन्धनम् ॥ २६ ॥

[1] ज्ञातमयी—अ २. ज्ञानमयी—क. [2] नित्यः—क.
[3] वितत—क.

ज्ञानयोगः स विज्ञेयः सर्वसिद्धिकरः शिवः ।
यस्योक्तलक्षणे योगे द्विविधेऽप्यव्ययं मनः ॥ २७॥
स याति परमं श्रेयो मोक्षलक्षणमञ्जसा ।

ज्ञानकर्मभेदेन योगद्वैविध्यं तदियत्तामाह—**ज्ञानेति** ॥ २३ ॥ तत्र क्रियायोगं इत्यादि । किं तत्? अव्याकुलस्य इत्यादि ॥ २४ ॥ क्रियायोगस्य कथं द्वैविध्यं इत्यत्र कर्म कर्तव्यं इत्यादि । ईश्वराराधनधिया निष्कामकर्मानुष्ठानाभिनिवेश एव कर्मयोग इत्यर्थः ॥ २५ ॥ श्रेयोमार्गाभिनिवेश एव ज्ञानयोगः इत्याह—**यस्त्विति** ॥ २६ ॥ एवं उपायोपेयद्विविधयोगानुष्ठानतः श्रेयो भवतीत्याह—*यस्येति* ॥ २७ ॥

निर्विशेषब्रह्मज्ञानोपायः अष्टाङ्गयोगः

देहेन्द्रियेषु वैराग्यं यम इत्युच्यते बुधैः ॥ २८ ॥
अनुरक्तिः परे तत्त्वे सततं नियमः स्मृतः ।
सर्ववस्तुन्युदासीनभाव [1]आसनमुत्तमम् ॥ २९ ॥
जगत्सर्वमिदं मिथ्याप्रतीतिः प्राणसंयमः ।
चित्तस्यान्तर्मुखीभावः प्रत्याहारस्तु सत्तम ॥ ३० ॥
चित्तस्य निश्चलीभावो धारणा धारणं विदुः ।
सोऽहं चिन्मात्रमेवेति चिन्तनं ध्यानमुच्यते ॥ ३१ ॥
ध्यानस्य विस्मृतिः सम्यक्समाधिरभिधीयते ।

पूर्वोक्तनिर्विशेषब्रह्मज्ञानोपायतया संक्षेपविस्ताराभ्यां अष्टाङ्गयोगं उपदिशति—**देहेति** ॥ २८–३१ ॥

[1] मासन—क, अ, अ १, अ २.

दशविधयमनियमाः

अहिंसा सत्यमस्तेयं ब्रह्मचर्यं दयाऽऽर्जवम् ॥ ३२ ॥
क्षमा धृतिर्मिताहारः शौचं चेति यमा दश ।
तपस्सन्तुष्टिरास्तिक्यं दानमाराधनं हरेः ॥ ३३ ॥
वेदान्तश्रवणं[1]चैव ह्रीर्मतिश्च जपो व्रतम् ॥
इति ॥

उत्तमाधिकारिणां ब्रह्मज्ञानसाधनतया अष्टाङ्गयोगो निरूपितः । तत्र यमो दशधा भिद्यते इत्यत आह—अहिंसेति ॥ ३२ ॥ तथा नियमोऽपीत्याह—तप इति ॥ ३३ ॥

हठयोगरीत्या आसनानि

आसनानि तदङ्गानि स्वस्तिकादीनि वै द्विज ॥ ३४ ॥
[2]वर्ण्यते स्वस्तिकं पादतलयोरुभयोरपि ।
पूर्वोत्तरे जानुनी द्वे [3]कृत्वाऽऽसनमुदीरितम् ॥ ३५ ॥
सव्ये दक्षिणगुल्फं तु पृष्ठपार्श्वे नियोजयेत् ।
दक्षिणेऽपि तथा सव्यं गोमुखं गोमुखं यथा ॥ ३६ ॥
एकं चरणमन्यस्मिन्नूरावारोप्य निश्चलः ।
आस्ते यदिदमेनोघ्नं वीरासनमुदीरितम् ॥ ३७ ॥
गुदं नियम्य गुल्फाभ्यां व्युत्क्रमेण [4]समाहितः ।
योगासनं भवेदेतदिति योगविदो विदुः ॥ ३८ ॥

[1] ह्रीश्च जप इत्यादि लक्षणं—अ, अ १. [2] वर्ण्यन्ते—क, अ, अ १, अ २.
[3] कूर्मासन—अ. [4] समासितः—अ, अ १.

ऊर्वोरुपरि वै धत्ते यदा पादतले उभे ।
पद्मासनं भवेदेतत्सर्वव्याधिविषापहम् ॥ ३९ ॥

पद्मासनं सुसंस्थाप्य [1]तदङ्गुष्ठद्वयं पुनः ।
व्युत्क्रमेणैव हस्ताभ्यां बद्धपद्मासनं भवेत् ॥ ४० ॥

पद्मासनं सुसंस्थाप्य जानूर्वोरन्तरे करौ ।
निवेश्य भूमावातिष्ठेद्योमस्थः कुक्कुटासनः ॥ ४१ ॥

कुक्कुटासनबन्धस्थो दोर्भ्यां संबध्य कन्धरम् ।
शेते कूर्मवदुत्तान एतदुत्तानकूर्मकम् ॥ ४२ ॥

पादाङ्गुष्ठौ तु पाणिभ्यां गृहीत्वा श्रवणावधि ।
धनुराकर्षकाकृष्टं धनुरासनमीरितम् ॥ ४३ ॥

सीवनीं गुल्फ[2]देशेभ्यो निपीडच व्युत्क्रमेण तु ।
प्रसार्य [3]जानुनोर्हस्तावासनं सिंहरूपकम् ॥ ४४ ॥

गुल्फौ च वृषणस्याधः [4]सीविन्युभयपार्श्वयोः ।
निवेश्य [5]भूमौ हस्ताभ्यां बद्ध्वा भद्रासनं भवेत् ॥ ४५ ॥

[6]सीवनीपार्श्वमुभयं गुल्फाभ्यां व्युत्क्रमेण तु ।
निपीड्यासनमेतच्च मुक्तासनमुदीरितम् ॥ ४६ ॥

[1] पद—क. [2] देशाभ्यां—अ, क, अ १, अ २.
[3] जानुनो (तो?) हस्तौ—अ, क, अ १, अ २.
[4] सीविन्यो—क, अ २. [5] पादौ—अ, क, अ १, अ २.
[6] ' सीविनीं गुल्फदेशाभ्यां निपीड्य ' इति च—क.

[1]अवष्टभ्य धरां सम्यक्तलाभ्यां हस्तयोर्द्वयोः ।
कूर्परौ नाभिपार्श्वे तु स्थापयित्वा मयूरवत् ॥ ४७ ॥
समुन्नतशिरः[2]पादो मयूरासनमिष्यते ।
वामोरुमूले दक्षाङ्घ्रिं जान्वोर्वेष्टितपाणिना ॥ ४८ ॥
वामेन वामाङ्गुष्ठं तु गृहीतं मत्स्यपीठकम् ।
योनिं वामेन संपीड्य मेढ्रादुपरि दक्षिणम् ॥ ४९ ॥
ऋजुकायः समासीनः सिद्धासनमुदीरितम् ।
प्रसार्य भुवि पादौ [3]तु दोर्भ्यामङ्गुष्ठमादरात् ॥ ५० ॥
जानूपरि ललाटं तु पश्चिमं ताणमुच्यते ।
येन केन प्रकारेण सुखं [4]धार्यं च जायते ॥ ५१ ॥
तत्सुखासनमित्युक्तमशक्तस्तत्समाचरेत् ।
आसनं विजितं येन जितं तेन जगत्त्रयम् ॥ ५२ ॥

अथ मध्यमाधिकारिणां हठयोगरीत्या आसनाद्यङ्गानि उपदिशति —आसनानीति ॥ ३४ ॥ तत्र स्वस्तिकासनलक्षणमाह—वर्ण्यत इति ॥ ३५ ॥ गोमुखासनलक्षणमुच्यते—सव्य इति ॥ ३६ ॥ वीरासनलक्षणमाचष्टे—एकमिति ॥ ३७ ॥ योगासनलक्षणं व्यनक्ति—गुदमिति ॥ ३८ ॥ पद्मासनलक्षणं प्रकाशयति—ऊर्वोरिति ॥ ३९ ॥ बद्धपद्मासनलक्षणं विशदयति—पद्मासनमिति । हस्ताभ्यां बद्धेति यत् तत् बद्धपद्मासनं भवेत् ॥ ४० ॥ कुक्कुटासनप्रकारं व्यक्तीकरोति—पद्मेति ॥ ४१ ॥ उत्तानकूर्मलक्षणमाह—कुक्कुटेति ॥ ४२ ॥ धनुरासनमाह—

[1] अवष्टभ्याधरां—अ.
[2] पादं—क, अ, अ १, अ २.
[3] तौ—अ.
[4] धैर्यं—अ, अ २.

पादेति ॥ ४३ ॥ सिंहासनं दर्शयति—सीविनीमिति ॥ ४४ ॥ भद्रासन-लक्षणमाह—गुल्फाविति ॥ ४५ ॥ मुक्तासनस्वरूपमाह—सीविनीति ॥ ४६ ॥ मयूरासनप्रकारमाह—अवष्टभ्येति ॥ ४७ ॥ मत्स्यासनलक्षणमाचष्टे—वामेति ॥ ४८ ॥ सिद्धासनलक्षणमाह— योनिमिति ॥ ४९ ॥ पश्चिमताणलक्षणं प्रकटयति—प्रसार्येति ॥ ५० ॥ अशक्तोपयोग्यासनमाह—येनेति ॥ ५१ ॥ आसनफलमाह—आसनमिति ॥ ५२ ॥

नाडीशुद्धिपूर्वकप्राणायामविधिः

यमैश्च नियमैश्चैव ह्यासनैश्च सुसंयतः ।
नाडीशुद्धिं च कृत्वाऽऽदौ प्राणायामं समाचरेत् ॥ ५३ ॥
देहमानं स्वाङ्गुलिभिः षण्णवत्यङ्गुलायतम् ।
प्राणः शरीरादधिको द्वादशाङ्गुलमानतः ॥ ५४ ॥
देहस्थमनिलं देहसमुद्भूतेन वह्निना ।
न्यूनं समं वा योगेन कुर्वन्ब्रह्मविदिष्यते ॥ ५५ ॥

यमाद्यङ्गत्रयविशिष्टयोगिनो नाडीशुद्धिपूर्वकं प्राणायामक्रममाह—यमैश्चेति । पूर्वोक्तैः ॥ ५३ ॥ अभ्यासानुकूलदेहप्राणमानं तत्र प्राणाभ्यासफलं चाह—देहमानमिति ॥ ५४–५५ ॥

अग्निमण्डलस्वरूपम्

देहमध्ये शिखिस्थानं तप्तजाम्बूनदप्रभम् ।
त्रिकोणं द्विपदामन्यच्चतुरश्रं चतुष्पदाम् ॥ ५६ ॥
वृत्तं [1]विहङ्गमानां तु षडश्रं [2]सर्पजन्मनाम् ।
अष्टाश्रं स्वेदजानां तु तस्मिन्दीपवदुज्ज्वलम् ॥ ५७ ॥

[1] विहङ्गमानं—उ. [2] सर्व—क, अ २.

मूलाग्निमण्डलस्वरूपमाह—देहेति ॥ ९६ ॥ तत्तज्जन्त्वग्निमण्डले तस्मिन् उज्ज्वलं वह्निं विद्धीत्यर्थः ॥ ९७ ॥

नाभिस्थानम्

कन्दस्थानं मनुष्याणां [1]देहमध्यं नवाङ्गुलम् ।
चतुरङ्गुलमुत्सेधं चतुरङ्गुलमायतम् ॥ ९८ ॥
अण्डाकृति तिरश्चां च द्विजानां च चतुष्पदाम् ।
तुन्दमध्यं तदिष्टं वै तन्मध्यं नाभिरिष्यते ॥ ९९ ॥

मनुष्यादिदेहमध्यं विशदयति—कन्देति ॥ ९८–९९ ॥

नाडीचक्रे जीवभ्रमणम्

तत्र चक्रं द्वादशारं तेषु विष्ण्वादिमूर्तयः ।
अहं तत्र स्थितश्चक्रं भ्रामयामि स्वमायया ॥ ६० ॥
अरेषु भ्रमते जीवः क्रमेण द्विजसत्तम ।
तन्तुपञ्जरमध्यस्था यथा भ्रमति लूतिका ॥ ६१ ॥
प्राणाधिरूढश्चरति जीवस्तेन विना न हि ।

तत्रस्थनाडीचक्रं विष्ण्वादिभिरधिष्ठितं सत् वर्तते । तत्राहमन्तर्याम्यात्मना स्थित्वा तच्चालयामीत्याह—तत्रेति । तत्र नाभिमध्ये नाडीचक्रं ।

ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति ।
भ्रामयन् सर्वभूतानि यन्त्रारूढानि मायया ॥

इति स्मृत्यनुरोधेन अहं इत्यादि ॥ ६० ॥ को वा त्वया भ्राम्यते इत्यत आह—अरेष्विति । नाडीचक्रारेषु । जीवभ्रमणं सदृष्टान्तमाह—तन्त्विति । लूतिका ऊर्णनाभिः कीटविशेषः । तथा जीवः चलनमेतीत्यर्थः ॥ ६१ ॥

[1] देहमध्ये—अ.

कुण्डलिनीस्थानं तद्व्यापारश्च

तस्योर्ध्वे कुण्डलीस्थानं नाभेस्तिर्यगथोर्ध्वतः ॥ ६१ ॥
अष्टप्रकृतिरूपा सा चाष्टधा कुण्डलीकृता ।
यथावद्वायु[1]संचारं [2]जलान्नादि च नित्यशः ॥ ६३ ॥
परितः कन्दपार्श्वे तु निरुध्यैव सदा स्थिता ।
मुखेनैव समावेष्टच ब्रह्मरन्ध्रमुखं तथा ॥ ६४ ॥
योगकालेन मरुता साग्निना बोधिता सती ।
स्फुरिता हृदयाकाशे नागरूपा महोज्ज्वला ॥ ६५ ॥

तदूर्ध्वविलसितकुण्डलिनीस्थानं तद्व्यापारं चाह—तस्येति । नाडीचक्रस्य तस्य ॥ ६२ ॥

भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च ।
अहङ्कार इतीयं मे भिन्ना प्रकृतिरष्टधा ॥

इति स्मृत्यनुरोधेन अष्टप्रकृतिरूपा वायुसञ्चारं प्राणापानयोरैक्यमित्यर्थः । भुक्तजलान्नादि ॥ ६३ ॥ किं कुर्वती स्थितेत्यत्र मुखेनैव इत्यादि ॥ ६४ ॥ सा कदा ऊर्ध्वं प्रसरतीत्यत्र योगकालेन इत्यादि ॥ ६५ ॥

देहमध्यस्थनाडीकन्दस्वरूपम्

[3]अपानाद्व्यङ्गुलादूर्ध्वमधो मेढ्रस्य तावता ।
देहमध्यं मनुष्याणां हृन्मध्यं तु चतुष्पदाम् ॥ ६६ ॥

[1] सारं च—क, अ १, अ २.

[2] चलनादि—अ. ज्वलनादि—क, अ १, अ २. 'सञ्चारं जलान्नादि' इति च—क, अ २.

[3] अपानद्वय—अ, अ १.

इतरेषां तुन्द[1]मध्यं नानानाडीसमावृतम् ।
[2]चतुष्प्रकारव्ययुते देहमध्ये सुषुम्नया ॥ ६७ ॥
कन्दमध्ये स्थिता नाडी सुषुम्ना सुप्रतिष्ठिता ।
पद्मसूत्रप्रतीकाशा ऋजुरूर्ध्व[3]प्रवर्तिनी ॥ ६८ ॥
ब्रह्मणो विवरं यावद्वि[4]द्युदाभासनालकम् ।
वैष्णवी ब्रह्मनाडी च निर्वाणप्राप्तिपद्धतिः ॥ ६९ ॥
इडा च पिङ्गला चैव तस्याः सव्येतरे स्थिते ।
इडा समुत्थिता कन्दाद्वामनासापुटावधिः ॥ ७० ॥
पिङ्गला चोत्थिता तस्माद्दक्षनासापुटावधिः ।
गान्धारी हस्तिजिह्वा च द्वे चान्ये नाडिके स्थिते ॥ ७१ ॥
पुरतः पृष्ठतस्तस्याः वामेतरदृशौ प्रति ।
पूषायशस्विनीनाड्यौ तस्मादेव समुत्थिते ॥ ७२ ॥
सव्येतरश्रुत्यवधि पायु[5]मूलावलम्बुसा ।
अधोगता शुभा नाडी मेढ्रान्तावधिरायता ॥ ७३ ॥
पादाङ्गुष्ठावधिः कन्दादधोयाता च कौशिकी ।
दशप्रकारभूतास्ताः कथिताः कन्दसंभवाः ॥ ७४ ॥

[1] मध्ये—अ १, अ.
[2] चतुष्प्रकारेत्यादि श्लोकार्धं (अ, अ १) कोशानुसारेण मूले धृतं.
[3] प्रकाशिनी—क, अ २.
[4] द्युदाभं स—क, अ २.
[5] मूलादलम्बुसा— अ.

तन्मूला बहवो नाड्यः [1]स्थूलाः सूक्ष्माश्च नाडिकाः ।
द्वासप्ततिसहस्राणि स्थूलाः सूक्ष्माश्च नाडयः ॥ ७५ ॥
संख्यातुं नैव शक्यन्ते [2]स्थूलमूलाः पृथग्विधाः ।
यथाऽश्वत्थ[3]दले सूक्ष्माः स्थूलाश्च विततास्तथा ॥ ७६ ॥

देहमध्यं तदाश्रयनाडीकन्दस्वरूपमाह—**अपानादिति** ॥ ६६–६७ ॥ तत्र केयं प्रधाननाडी ? तदाश्रित्य कति नाडयो वर्तन्ते ? इत्यत्रोच्यते—**कन्देति** । वीणादण्डमाश्रित्य **ऋजुरूर्ध्वप्रवर्तिनी** ॥ ६८ ॥ कियत्पर्यन्तं ऊर्ध्वं प्रवृत्तेत्यत्र ब्रह्मरन्ध्रान्तमित्याह—**ब्रह्मण** इति । **विद्युल्लेखेव आ** समन्तात् **भासमाननाळकं** ब्रह्मरन्ध्रं तावत्, मूलाधारमारभ्य ब्रह्मरन्ध्रपर्यन्तं प्रवर्तते इत्यर्थः । तस्या नाम निर्दिशति—**वैष्णवीति** । विष्ण्वधिष्ठितत्वात् । **ब्रह्मनाडी** ब्रह्मलोकप्रापकत्वात्, तदन्तर्गतकैवल्यनाडी । **निर्वाणप्राप्तिपद्धतिः** कैवल्यसृतित्वात् ॥ ६९ ॥ तदाश्रयनाड्यः उच्यन्ते—**इडा चेति** ॥ ७०–७५ ॥ असङ्ख्येयत्वे दृष्टान्तमाह—**यथेति** ॥ ७६ ॥

नाडीचराः वायवः

प्राणापानौ समानश्च उदानो व्यान एव च ।
नागः कूर्मश्च कृकरो देवदत्तो धनंजयः ॥ ७७ ॥
चरन्ति दशनाडीषु दश प्राणादिवायवः ।
प्राणादिपञ्चकं तेषु प्रधानं तत्र च द्वयम् ॥ ७८ ॥
प्राण एवाथवा ज्येष्ठो जीवात्मानं बिभर्ति यः ।
आस्यनासिकयोर्मध्यं हृदयं नाभिमण्डलम् ॥ ७९ ॥

[1] स्थूलसूक्ष्माश्च—अ, क, अ १, अ २. [2] स्थूले—अ, अ १.
[3] दळैः—अ, अ १.

पादाङ्गुष्ठमिति प्राणस्थानानि द्विजसत्तम ।
अपानश्चरति ब्रह्मन् गुदमेढ्रोरुजानुषु ॥ ८० ॥
समानः सर्वगात्रेषु सर्वव्यापी व्यवस्थितः ।
उदानः सर्वसन्धिस्थः पादयोर्हस्तयोरपि ॥ ८१ ॥
व्यानः श्रोत्रोरुकट्यां च गुल्फस्कन्धगलेषु च ।
नागादिवायवः पञ्च त्वगस्थ्यादिषु संस्थिताः ॥ ८२ ॥
तुन्दस्थं जलमन्नं च [1]रसादि च समीकृतम् ।
तुन्दमध्यगतः प्राणस्तानि कुर्यात्पृथक्पृथक् ॥ ८३ ॥
इत्यादिचेष्टनं प्राणः करोति च पृथक्[2]स्थितः ।
अपानवायुर्मूत्रादेः करोति च विसर्जनम् ॥ ८४ ॥
प्राणापानादिचेष्टादि क्रियते व्यानवायुना ।
उज्जीर्यते शरीरस्थमुदानेन नभस्वता ॥ ८५ ॥
पोषणादि शरीरस्य समानः कुरुते सदा ।
उद्गारादिक्रियो नागः कूर्मोऽक्ष्यादिनिमीलनः ॥ ८६ ॥
कृकरः क्षपयोः कर्ता दत्तो निद्रादिकर्मकृत् ।
मृतगात्रस्य [3]शोभादि धनंजय उदाहृतः ॥ ८७ ॥

नाडीचरा वायवः कतिसङ्ख्याकाः इत्यत्र प्राणापानौ इत्यादि ॥ ७७ ॥ तेषु कः प्रधानः इत्यत आह—प्राणादीति ॥ ७८ ॥ तेषां स्थानानि निर्दिशति—आस्येति ॥ ७९–८२ ॥ प्राणादिव्यापारमाह—तुन्दस्थमिति ॥ ८३–८६ ॥ क्षपयोः निमेषोन्मेषयोः ॥ ८७ ॥

[1] रसानि च समीकृतौ—अ, अ १. [2] स्थितं—अ, क, अ १, अ २.
[3] शोभादेर्धनञ्जयः इति मुद्रितपुस्तके. यो भाति धनञ्जयः—अ.

नाडीज्ञानपुरःसरा नाडीशुद्धिः

नाडीभेदं मरुद्भेदं मरुतां स्थानमेव च ।
चेष्टाश्च विविधास्तेषां [1]ज्ञात्वैवं द्विजसत्तम ॥ ८८ ॥
शुद्धौ यतेत नाडीनां पूर्वोक्तज्ञानसंयुतः ।

एवं नाडीभेदस्थानादिकं ज्ञात्वा तच्छुद्ध्यर्थं यतेदित्याह—नाडीति ॥ ८८ ॥

योगाभ्यासस्थलं तद्विधिश्च

विविक्तदेश[2]मास्थाय सर्वसंबन्धवर्जितः ॥ ८९ ॥
योगाङ्गद्रव्यसंपूर्णं तत्र दारुमये शुभे ।
आसने कल्पिते दर्भकुशकृष्णाजिनादिभिः ॥ ९० ॥
तावदासनमुत्सेधे तावद्व्यसमायते ।
उपविश्यासनं सम्यक्स्वस्तिकादि यथारुचि ॥ ९१ ॥

योगस्थलं योगविधिं चाह—विविक्तेति ॥ ८९–९१ ॥

चिन्मुद्रासहितकेवलकुंभकम्

बद्ध्वा प्रागासनं विप्र ऋजुकायः समाहितः ।
नासाग्रन्यस्तनयनो दन्तै[3]र्दन्तानसंस्पृशन् ॥ ९२ ॥
रसनां तालुनि न्यस्य स्वस्थचित्तो निरामयः ।
आकुञ्चितशिरः किंचिन्निबध्नन्योगमुद्रया ॥ ९३ ॥
हस्तौ यथोक्तविधिना प्राणायामं समाचरेत् ।

[1] ज्ञात्वैव—अ, अ १. [2] माश्रित्य—क, अ २. मासाद्य—अ, अ १.
[3] र्दन्तासनं-

प्राणायामलक्षणं वक्तुं भूमिकां रचयति—बध्नेति । नासिकाबन्धनं बन्धत्रयं वा योगमुद्रेत्यर्थः ॥ ९२-९३ ॥ हस्तौ इत्यादि । यद्वा—हस्तौ चिन्मुद्रायुतौ विधाय केवलकुम्भकप्राणायामं कुर्यादित्यर्थः ॥

सहितप्राणायामः

रेचनं पूरणं वायोः शोधनं रेचनं तथा ॥ ९४ ॥
चतुर्भिः क्लेशनं वायोः प्राणायाम उदीर्यते ।

सहितप्राणायामलक्षणमाह—रेचनमिति ॥ ९४ ॥ प्राणायामारम्भसमये शरीरगतदुष्टवायुरेचनं ततः पूरणं ततः कुम्भकेन वायोः शोधनं पुनः निःशेषतो रेचनं, एवं चतुर्भिः पर्यायैः वायोः क्लेशनं उपक्रमप्राणायामः उदीर्यते । एवं प्राणायामत्रये कृते सति अथ यथोक्तप्राणायामयोग्यं शरीरं भवतीत्यर्थः ॥

नाडीशोधकप्राणायामः

हस्तेन दक्षिणेनैव पीडयेन्नासिकापुटम् ॥ ९५ ॥
शनैः शनैरथ बहिः प्रक्षिपेत्पिङ्गलानिलम् ।
इडया वायुमापूर्य ब्रह्मन्षोडशमात्रया ॥ ९६ ॥
पूरितं कुम्भयेत्पश्चाच्चतुःषष्ट्या तु मात्रया ।
द्वात्रिंशन्मात्रया सम्यग्रेचयेत्पिङ्गलानिलम् ॥ ९७ ॥
एवं पुनः पुनः कार्यं व्युत्क्रमानुक्रमेण तु ।
संपूर्णकुम्भवद्देहं कुम्भयेन्मातरिश्वना ॥ ९८ ॥
पूरणान्नाडयः सर्वाः पूर्यन्ते मातरिश्वना ।
एवं कृते सति ब्रह्मंश्चरन्ति दश वायवः ॥ ९९ ॥

हृदयाम्भोरुहं चापि व्याकोचं भवति स्फुटम् ।
तत्र पश्येत्परात्मानं वासुदेवमकल्मषम् ॥ १०० ॥
[1]प्रातर्माध्यन्दिने सायमर्धरात्रे च कुम्भकान् ।
शनैरशीतिपर्यन्तं चतुर्वारं समभ्यसेत् ॥ १०१ ॥
एकाहमात्रं कुर्वाणः सर्वपापैः प्रमुच्यते ।
संवत्सरत्रयादूर्ध्वं प्राणायामपरो नरः ॥ १०२ ॥
योगसिद्धो भवेद्योगी वायुजिद्विजितेन्द्रियः ।
अल्पाशी स्वल्पनिद्रश्च तेजस्वी बलवान्भवेत् ॥ १०३ ॥
अपमृत्यु[2]मपक्रम्य दीर्घमायुरवाप्नुयात् ।

नाडीशोधनहेतुतया अभ्यसनीयप्राणायामक्रमः उच्यते—**हस्तेनेति** । **अनुक्रमस्तु,** इडया आपूर्य कुम्भित्वा पिङ्गळया रेचनम् । **व्युत्क्रमस्तु,** पिङ्गळया आपूर्य कुम्भित्वा इडया रेचनम् ॥ ९५–९७ ॥ एवं अहरहः चतुर्वारं दिनैकमात्रावृद्धिपूर्वकं अशीतिप्राणायाममभ्यसेत् इत्याह—**सम्पूर्णेति** ॥ ९८–९९ ॥ **व्याकोचं** विकासम् ॥ १००–१०३ ॥

प्राणायामफलम्

प्रस्वेदजननं यस्य [3]प्राणायामेषु सोऽधमः ॥ १०४ ॥
कम्पनं वपुषो यस्य प्राणायामेषु मध्यमः ।
उत्थानं वपुषो यस्य स उत्तम उदाहृतः ॥ १०५ ॥
अधमे व्याधिपापानां नाशः स्यान्मध्यमे पुनः ।
पापरोगमहाव्याधिनाशः स्यादुत्तमे पुनः ॥ १०६ ॥

[1] प्रातर्म—अ, अ २. [2] मतिक्रम्य—क, अ, अ १, अ २.
[3] प्राणायामस्तु—क, अ, अ १, अ २.

अल्पमूत्रोऽल्पविष्ठश्च लघुदेहो मिताशनः ।
पटुन्द्रियः पटुमतिः कालत्रयविदात्मवान् ॥ १०७ ॥
रेचकं पूरकं मुक्त्वा कुम्भीकरणमेव यः ।
करोति त्रिषु कालेषु नैव तस्यास्ति दुर्लभम् ॥ १०८ ॥

प्रथमाभ्यासकाले स्वेदकम्पनोत्थानादिसिद्धिं तत्फलं चाह—प्रस्वेदेति ॥ १०४–१०७ ॥ केवलकुम्भकारूढयोगिनो वाञ्छितार्थसिद्धिः स्यादित्याह—रेचकमिति ॥ १०८ ॥

प्राणधारणाद्रागनाशः

नाभिकन्दे च नासाग्रे पादाङ्गुष्ठे च यत्नवान् ।
धारयेन्मनसा प्राणान्सन्ध्याकालेषु वा सदा ॥ १०९ ॥
सर्वरोगैर्विनिर्मुक्तो जीवेद्योगी गतक्रमः ।
कुक्षिरोगविनाशः स्यान्नाभिकन्देषु धारणात् ॥ ११० ॥
[1]नासाग्रधारणाद्दीर्घमायुः स्याद्देहलाघवः ।
ब्राह्मे मुहूर्ते संप्राप्ते वायुमाकृष्य जिह्वया ॥ १११ ॥
पिबतस्त्रिषु मासेषु वाक्सिद्धिर्महती भवेत् ।
[2]अभ्यस्यतुश्च षण्मासान्महारोगविनाशनम् ॥ ११२ ॥
यत्रयत्र धृतो वायुरङ्गे रोगादिदूषितें ।
धारणादेव मरुतस्तत्तदारोग्यमश्नुते ॥ ११३ ॥

[1] नासाग्रे—क, अ, अ १, अ २.
[2] अभ्यासतश्च—मु. 'अभ्यस्यतश्च' इति तु पाठो युक्तो भाति.

यद्यदङ्गं रोगदूषितं भवति तत्तदङ्गवायुधारणात् तत्तद्रोगनिवृत्तिद्वारा आयुर्वृद्धिः स्यादित्याह—**नाभीति** । केवलकुम्भकाभ्याससिद्धो योगी **नाभिकन्दे** इत्यादि ॥ १०९–११३ ॥

षण्मुखीमुद्रया मनोजयः

मनसो धारणादेव पवनो धारितो भवेत् ।
मनसः स्थापने हेतुरुच्यते द्विजपुङ्गव ॥ ११४ ॥
कारणानि समाहृत्य विषयेभ्यः समाहितः ।
अपानमूर्ध्वमा[1]कृष्येदुदरोपरि धारयेत् ॥ ११५ ॥
बध्नन्कराभ्यां श्रोत्रादिकरणानि [2]यथातथम् ।
[3]युञ्जानस्य यथोक्तेन [4]वर्त्मना स्ववशं मनः ॥ ११६ ॥
[5]मनोवशात्प्राणवायुः स्ववशे स्थाप्यते सदा ।

मनःप्राणयोरविनाभावात् मनोवशार्थं षण्मुखीमुद्रां दर्शयति—**मनस** इति ॥ ११४ ॥ किं तत्? **कारणानि** इत्यादि ॥ ११५–११६ ॥ मनोवशतः प्राणोऽपि स्ववशो भवतीत्याह—**मन** इति ॥

प्राणगतिः

नासिकापुटयोः प्राणः पर्यायेण प्रवर्तते ॥ ११७ ॥
तिस्रश्च नाडिकास्तासु स [6]यावन्तश्चरत्ययम् ।
शङ्खिनीविवरे याम्ये प्राणः प्राणभृतां सताम् ॥ ११८ ॥
[7]तावन्तं च पुनः कालं सौम्ये चरति संततम् ।

[1] कृष्य उ—अ. [2] यथा तथा—क, अ २. [3] युञ्जानश्च—अ, अ १. वर्तनात्—क, अ २. [5] मनश्चक्षुश्च वै—अ, अ १.
[6] यावन्तं च—क, अ २. यावन्तश्च—अ १.
[7] तावन्तश्च—अ, क, अ २.

प्राणगतिं विवृणोति—नासिकेति ॥ ११७ ॥ मूलाधारमारभ्य भ्रूमध्यान्तमिडापिङ्गळादिभेदेन तिस्रश्च इत्यादि । इडादिभेदेन तिस्रो नाडिकाः सन्ति । नासु सुषुम्नायां प्राणगतिः प्राणभृतां मध्ये सतां योगिनामेव भवति । अयोगिनां तु सोऽयं प्राणः शङ्खवत् अन्तरावर्तत्रयविशिष्टयं शङ्खिनी नासिका तस्या याम्ये विवरे पिङ्गळेतिविश्रुतदक्षिणनासापुटे यावन्तं कालं चरति ॥ ११८ ॥ पुनः तावन्तं कालं सौम्ये वामनासापुटे चरति । एवं प्राणगतिः पिङ्गळेडयोः सन्ततं भवतीत्यर्थः ॥

प्राणगतिज्ञानेन योगावाप्तिः

इत्थं क्रमेण चरता वायुना वायुनिश्चयः ॥ ११९ ॥

अहश्च रात्रिं पक्षं च [1]मासं मत्वायनादिकम् ।

अन्तर्मुखो विजानीयात् [2]कालभेदं [3]समाहितः ॥ १२० ॥

अङ्गुष्ठादि[4]स्वावयवास्फुरणादर्शनैरपि ।

अरिष्टैर्जीवितस्यापि जानीयात्क्षयमात्मनः ॥ १२१ ॥

ज्ञात्वा यतेत कैवल्यप्राप्तये योगवित्तमः ।

पादाङ्गुष्ठे कराङ्गुष्ठे स्फुरणं यस्य नश्यति ॥ १२२ ॥

तस्य संवत्सरादूर्ध्वं [5]जीवितव्यक्षयो भवेत् ।

मणिबन्धे तथा गुल्फे स्फुरणं यस्य नश्यति ॥ १२३ ॥

षण्मासावधिरेतस्य जीवितस्य स्थितिर्भवेत् ।

[6]कूर्परास्फुरणं यस्य तस्य त्रैमासिकी स्थितिः ॥ १२४ ॥

[1] मासमृत्वय—मु. [2] कालभेदस्स—अ, अ १. [3] समाहितं—अ २.
[4] स्वावयवात्—क. स्वावयव—अ, अ १.
[5] जीवितस्य—क, अ, अ २. [6] कूर्परे—अ, क, अ २.

कक्षे मेहनपार्श्वे च स्फुरणानुपलम्भने ।
मासावधि[1]जीवितं स्यात् [2]तदर्धं सत्वदर्शने ॥ १२५ ॥
आश्रिते [3]जठरे द्वारे दिनानि दश जीवितम् ।
ज्योतिः खद्योतवद्यस्य तदर्धं तस्य जीवितम् ॥ १२६ ॥
जिह्वाग्रादर्शने त्रीणि दिनानि स्थितिरात्मनः ।
ज्वालाया दर्शने मृत्युर्द्विदिने भवति ध्रुवम् ॥ १२७ ॥
एवमादीन्यरिष्टानि दृष्ट्वाऽऽयुः[4]क्षरकारणम् ।
निःश्रेयसाय युञ्जीत जपध्यानपरायणः ॥ १२८ ॥
मनसा परमात्मानं ध्यात्वा तद्रूपतामियात् ।

यद्येवं वायुगतिज्ञो योगी भवति तदा स्वशास्त्रानुरोधेन स्वकालगतिं विदित्वा झटिति मानसं निःश्रेयसाय युञ्जन् अनात्मापह्नवसिद्धं परमात्मानं स्वमात्रमिति ज्ञात्वा तद्भावापन्नो भवेदित्याह---इत्थमिति ॥ ११९–१२० ॥ कालभेदज्ञानोपायमाह---अङ्गुष्ठादीत्यादिना ॥ १२१ ॥ स्ववाक्यं स्वयमेव विवृणोति---पादाङ्गुष्ठ इति ॥ १२२–१२८ ॥

मर्मस्थानेषु प्राणस्य प्रत्याहारः

यद्यष्टादशभेदेषु मर्मस्थानेषु धारणम् ॥ १२९ ॥
स्थानात्स्थानं समाकृष्य प्रत्याहारः स उच्यते ।
पादाङ्गुष्ठं तथा गुल्फं जङ्घामध्यं तथैव च ॥ १३० ॥
मध्यमूर्वोश्च मूलं च पायुर्हृदयमेव च ।
मेहनं देहमध्यं च नाभिं च गलकूर्परम् ॥ १३१ ॥

[1] जीवितस्य—अ, क, अ १, अ २.
[2] तदर्धस्य तु—अ.
[3] जठर—क, अ २.
[4] क्षय—अ, क, अ १, अ २.

तालुमूलं च मूलं च घ्राणस्याक्ष्णोश्च मण्डलम् ।
भ्रुवोर्मध्यं ललाटं च मूलमूर्ध्वं च जानुनी ॥ १२२ ॥
मूलं च करयोर्मूलं महान्त्येतानि वै द्विज ।

प्रत्याहारप्रकारमाह—यदीति ॥ १२९ ॥ कानि मर्मस्थानानीत्यत आह—पादाङ्गुष्ठमिति । पादाङ्गुष्ठाद्यष्टादशस्थानेषु आरोहावरोहणक्रमेण प्राणं प्रत्याहरेदित्यर्थः ॥ १३०–१३२ ॥

धारणाप्रकारः

पञ्चभूतमये देहे भूतेष्वेतेषु पञ्चसु ॥ १३३ ॥
मनसो धारणं यत्तद्युक्तस्य च यमादिभिः ।
धारणा सा च संसारसागरोत्तारकारणम् ॥ १३४ ॥

सङ्क्षेपविस्ताराभ्यां धारणाप्रकारमाह—पञ्चेति । प्रविभक्तपञ्चभूतेषु ॥ १३३–१३४ ॥

देहावयवेषु पञ्चभूतधारणम्

आजानुपादपर्यन्तं पृथिवीस्थानमिष्यते ।
[1]पीतला चतुरस्रा च वसुधा वज्रलाञ्छिता ॥ १३५ ॥
स्मर्तव्या पञ्चघटिका तत्रारोप्य प्रभञ्जनम् ।
आजानुकटिपर्यन्तमपां स्थानं प्रकीर्तितम् ॥ १३६ ॥
अर्धचन्द्रसमाकारं श्वेतमर्जुनलाञ्छितम् ।
स्मर्तव्यमम्भः श्वसनमारोप्य दश[2]नाडिका ॥ १३७ ॥

[1] पित्तला—मु. [2] नाडिकां—क. नाडिकाः—अ.

आदेहमध्यकट्यन्तमग्निस्थानमुदाहृतम् ।
तत्र सिन्दूरवर्णोऽग्निर्ज्वलनं दश पञ्च च ॥ १३८ ॥
[1]स्मर्तव्या घटिका प्राणं कृत्वा कुम्भे तथेरितम् ।
नाभेरुपरि नासान्तं वायुस्थानं तु तत्र वै ॥ १३९ ॥
वेदिकाकारवद्धूम्रो बलवान्भूतमारुतः ।
स्मर्तव्यः कुम्भकेनैव प्राणमारोप्य मारुतम् ॥ १४० ॥
घटिकाविंशतिस्तस्माद् [2]घ्राणाद्ब्रह्मबिलावधि ।
व्योमस्थानं नभस्तत्र भिन्नाञ्जनसमप्रभम् ॥ १४१ ॥
[3]व्योम्नि मारुतमारोप्य कुम्भकेनैव यत्नवान् ।

स्वदेहावयवे पृथिव्यादिपञ्चभूतधारणं तत्फलं चाह—आजान्विति ॥ १३९ ॥ एवं पृथिव्यादिपञ्चभूतधारणात् पञ्चभूतभौतिकजयः । ततः मृत्युरपि न विद्यते इत्यर्थः । अबादिधारणाक्रममाह—आजान्विति ॥ १३६–१४१ ॥

पृथिव्यादिषु अनिरुद्धादिध्यानं तत्फलं च

पृथिव्यंशे तु देहस्य चतुर्बाहुं किरीटिनम् ॥ १४२ ॥
अनिरुद्धं हरिं योगी यतेत भवमुक्तये ।
अबंशे पूरयेद्योगी नारायणमुदग्रधीः ॥ १४३ ॥
प्रद्युम्नमग्नौ वाय्वंशे संकर्षणमतः परम् ।
व्योमांशे परमात्मानं वासुदेवं सदा स्मरेत् ॥ १४४ ॥
अचिरादेव तत्प्राप्तिर्युञ्जानस्य न संशयः ।

[1] स्मर्तव्या नाडिका—अ, क, अ १, अ २. [2] प्राणा—अ १.
[3] ध्येयं मारुत—अ, अ १.

एवं आदौ पञ्चभूतधारणां कृत्वा अथ पृथिव्याद्यंशेषु अनिरुद्धादीन् ध्यायेदित्याह- पृथिवीति ॥ १४२-१४४ ॥ ध्यानफलमाह— अचिरादिति ॥

परमात्मध्यानं तत्फलं च

बद्ध्वा योगासनं पूर्वं हृद्देशे हृदयाञ्जलिः ॥ १४५ ॥
नासाग्रन्यस्तनयनो जिह्वां कृत्वा च तालुनि ।
दन्तैर्दन्तानसंस्पृश्य ऊर्ध्वकायः समाहितः ॥ १४६
संयमेच्चेन्द्रियग्राम[1]मात्मबुद्ध्या विशुद्धया ।
चिन्तनं वासुदेवस्य परस्य परमात्मनः ॥ १४७ ॥
स्वरूपव्याप्तरूपस्य ध्यानं कैवल्यसिद्धिदम् ।
याममात्रं वासुदेवं चिन्तयेत्कुम्भकेन यः ॥ १४८ ।
सप्तजन्मार्जितं पापं तस्य नश्यति योगिनः ।

परमात्मध्यानोपायं तत्फलं चाह—बद्ध्वेति ॥ १४५-१४७ ॥ एवं ध्यानावान्तरफलमाह—याममिति ॥ १४८ ॥ पापं तदुपलक्षितागाम्यादि-कर्मत्रयम् ॥

तुरीयातीतं वासुदेवचैतन्यम्

नाभिकन्दात्समारभ्य यावद्धृदयगोचरम् ॥ १४९ ॥
जाग्रद्वृत्तिं विजानीयात्कण्ठस्थं स्वप्नवर्तनम् ।
सुषुप्तं तालुमध्यस्थं तुर्यं भ्रूमध्यसंस्थितम् ॥ १५० ॥

[1] मात्र—उ.

तुर्यातीतं परं ब्रह्म ब्रह्मरन्ध्रे तु लक्ष्येत् ।
जाग्रद्वृत्तिं समारभ्य यावद्ब्रह्मबिलान्तरम् ॥ १९१ ॥
तत्रात्माऽयं [1]तुरीयः स्यात् [2]तुर्यान्ते विष्णुरुच्यते ।

वासुदेवापेक्षया तुर्यातीतं भिन्नं इत्याशङ्क्य तुर्यातीतभूमिकाप्रदर्शनपूर्वकं वासुदेवचैतन्यमेव तुर्यातीतमित्याह—नाभीति ॥ १४९ ॥ ब्रह्मरन्ध्राद्यसम्भवप्रबोधतः तुर्यातीतमेव विष्णुतत्त्वं नेतरदित्यर्थः ॥ १९०–१९१ ॥

सगुणध्यानम्

ध्यानेनैव समायुक्तो व्योम्नि चात्यन्तनिर्मले ॥ १९२ ॥
सूर्यकोटिद्युतिधरं नित्योदितमधोक्षजम् ।
हृदयाम्बुरुहासीनं ध्यायेद्वा विश्वरूपिणम् ॥ १९३ ॥
अनेकाकारखचितमनेकवदनान्वितम् ।
अनेकभुजसंयुक्तमनेकायुधमण्डितम् ॥ १९४ ॥
नानावर्णधरं देवं शान्तमुग्रमुदायुधम् ।
अनेकनयनाकीर्णं सूर्यकोटिसमप्रभम् ॥ १९५ ॥
ध्यायतो योगिनः सर्वमनोवृत्तिर्विनश्यति ।

सगुणनिर्गुणध्यानप्रकारमाह—ध्यानेनेति ॥ १९२ ॥ ध्यायेत् यद्वा विराजं विश्वरूपिणम ॥ १९३ ॥ अनेकाकारखचितं स्थिरचरात्मकमित्यर्थः ॥ १९४–१९५ ॥ वैराजपदध्यानफलमाह—ध्यायत इति । वैराजपदध्यानारूढमनसः विराजो विभुत्वेन तत्रैव पर्यवसन्नत्वात् मनो मनस्त्वं विहाय वैराजपदमेव भजतीत्यर्थः ॥

[1] तु तुर्यस्य—क, अ २, तुरीयस्य—अ, अ १. [2] कथान्ते—अ, अ १.

निर्गुणध्यानम्

हृत्पुण्डरीकमध्यस्थं [1]चैतन्यज्योतिरव्ययम् ॥ १९६ ॥
कदम्बगोलकाकारं तुर्यातीतं परात्परम् ।
अनन्तमानन्दमयं चिन्मयं भास्करं विभुम् ॥ १९७ ॥
निवातदीपसदृशमकृत्रिममणिप्रभम् ।
ध्यायतो योगिनस्तस्य मुक्तिः करतले स्थिता ॥ १९८ ॥

निर्गुणध्यानमाह— हृदिति ॥ हृत्पुण्डरीकमध्ये प्रत्यग्रूपेण तिष्ठतीति **हृत्पुण्डरीकमध्यस्थम्** । हृत्सम्बन्धात् जडत्वप्रसक्तौ **चैतन्यज्योतिः**। तस्य स्वाश्रयनाशात् व्ययप्रसक्तौ **अव्ययम्** ॥ १९६ ॥ कदम्बगोळकवत् आकारो यस्य सहस्रारस्य तत् **कदम्बगोळकाकारम्** । "तुरीयं मूर्ध्नि संस्थितम्" इति श्रुत्यनुरोधेन तत्र उपलभ्यमानतुरीयस्य तदाकृतित्वं युज्यत एवेत्यर्थः । तदुपाध्यभावे तदेव **तुरीयातीतं परगत्** तुरीयादपि **परं, अनन्तं** परिच्छेदत्रयाभावात्, "देशतः कालतो वस्तुतः परिच्छेदरहितं ब्रह्म" इति श्रुतेः । **आनन्दमयं**, परमानन्दस्वरूपत्वात । **चिन्मयं**, चिन्मात्रत्वात् । खद्योतादिसूर्यान्तभासामपि भासकाकारत्वात **भास्करम्** । विद्वद्दृष्ट्या ब्रह्ममात्रं भवतीति **विभुम्** ॥ १९७ ॥ **निवातदीपसदृशं**, आकाशवदचलत्वात् । **अकृत्रिम**-कौस्तुभादि**मणिप्रभं** प्रकाशमात्रमित्यर्थः । य एवंविशेषणविशिष्टं ब्रह्म स्वमात्रधिया ध्यायति तस्य एवं **ध्यायतो योगिनो मुक्तिः** विदेहमुक्तिः **करे स्थिता**, तद्भावापन्नत्वात् इत्यर्थः ॥ १९८ ॥

सविशेषज्ञानस्यापि मुक्तिहेतुत्वम्

विश्वरूपस्य देवस्य रूपं यत्किंचिदेव हि ।
स्थवीयः सूक्ष्ममन्यद्वा पश्यन्हृदयपङ्कजे ॥ १९९ ॥

[1] वैतानज्योति—अ, अ १.

ध्यायतो योगिनो यस्तु साक्षादेव प्रकाशते ।
अणिमादिफलं चैव सुखेनैवोपजायते ॥ १६० ॥
जीवात्मनः परस्यापि यद्येवमुभयोरपि ।
अहमेव परंब्रह्म ब्रह्माहमिति संस्थितिः ॥ १६१ ॥
समाधिः स तु विज्ञेयः सर्ववृत्तिविवर्जितः ।
ब्रह्म संपद्यते योगी न भूयः संसृतिं व्रजेत् ॥ १६२ ॥
एवं विशोध्य तत्त्वानि योगी निःस्पृहचेतसा ।
यथा निरिन्धनो वह्निः स्वयमेव प्रशाम्यति ॥ १६३ ॥
ग्राह्याभावे मनःप्राणो निश्चयज्ञानसंयुतः ।
शुद्धसत्त्वे परे लीनो जीवः सैन्धवपिण्डवत् ॥ १६४ ॥
मोहजालक[1]संघातं विश्वं पश्यति स्वप्नवत् ।
सुषुप्तिवद्यश्चरति स्वभावपरि[2]निश्चलः ॥ १६५ ॥
निर्वाणपदमाश्रित्य योगी कैवल्यमश्नुते ॥

इत्युपनिषत् ॥

निर्विशेषज्ञानिन एव मुक्तिः न हि सविशेषज्ञानिनः इत्याशङ्क्य सविशेषज्ञानस्य निर्विशेषज्ञानहेतुतया तस्यापि मुक्तिहेतुत्वं सिद्धं इत्याह— **विश्वरूपस्येति** ॥ १५९ ॥ **अणिमादिफलं** सकामस्येत्यर्थः । यदि निष्कामः तदा तस्य प्रत्यगभिन्नब्रह्मनिर्विकल्पकसमाधिः स्यादिति ॥ १६० ॥ समाधिलक्षणमप्याह—**जीवेति** । अब्रह्मत्वानात्मत्वप्रसक्तौ तन्निरसनाय तयोः एकत्वप्रबोधाय च व्यतिहारेण **अहमेव परं ब्रह्म ब्रह्माहमिति** प्रत्यगभिन्नब्रह्मरूपेण

[1] सङ्घातो—अ, अ १. [2] निश्चयः—अ, अ १.

अवस्थानासंप्रज्ञातनिर्विकल्पकसमाधिः । एवं निर्विकल्पकसमाधिबलात् पराक्सापेक्षप्रत्यगभिन्नब्रह्मगतविशेषासम्भवप्रबोधसिद्धं ब्रह्म संपद्यते ॥ १६१–१६२ ॥ केन ब्रह्म सम्पद्यते इत्यत्र—एवं इति । स्वातिरिक्तस्पृहाविरळचेतसा ब्रह्म सम्पद्यते इत्यर्थः । मनआदिकरणग्रामे सति ब्रह्मसम्पत्तिः कुत इत्याशङ्क्य निष्प्रतियोगिकब्रह्ममात्रप्रबोधसमकालं आभासतो वाऽपि करणग्रामोऽस्तीति यदि भ्रान्तिः तदा तच्छान्तिः भवेदिति सदृष्टान्तमाह—यथेति । प्रशाम्यते शाम्यति ॥ १६३ ॥ कुतः ? स्वातिरेकेण ग्राह्याभावे प्राणोपाधिकः शुद्धसत्वे परे लीनो जीवः सल्लिलसैन्धवपिण्डवत् जीवभावं विहाय ब्रह्मीभूतो भवतीत्यर्थः ॥ १६४ ॥ यदि स्वातिरिक्तविश्वस्फूर्तिः स्यात् तदा तत्स्फूर्त्तौ मोह इत्यादि । तदस्फूर्त्तौ सुषुप्तिवद्यश्चरति सः स्वभावपरिनिश्चलः ॥ १६५ ॥ स्वातिरिक्तविश्वस्फूर्त्यपह्नवसिद्धनिष्प्रतियोगिकब्रह्ममात्रतया अवस्थानं यत् तत् निर्वाणपदम् । एवं ब्रह्ममात्रज्ञानयोगी ज्ञानसमकालं कैवल्यरूपेण अवशिष्यते इत्यर्थः । इत्युपनिषच्छब्दः त्रिशिखिब्राह्मणोपनिषत्समाप्त्यर्थः ॥

श्रीवासुदेवेन्द्रशिष्योपनिषद्ब्रह्मयोगिना ।
प्रकृतोपनिषद्व्याख्या लिखिता स्फुटतो लघु ॥
प्रकृतोपनिषद्व्याख्या षष्ट्युत्तरशतत्रयम् ॥

इति श्रीमदीशाद्यष्टोत्तरशतोपनिषच्छास्त्रविवरणे चतुश्चत्वारिंशत्सङ्ख्यापूरकं त्रिशिखिब्राह्मणोपनिषद्विवरणं सम्पूर्णम्

दर्शनोपनिषत्

आप्यायन्तु—इति शान्तिः

जीवन्मुक्तिसाधनं अष्टाङ्गयोगः

दत्तात्रेयो महायोगी भगवान्भूतभावनः ।
चतुर्भुजो महाविष्णुर्योगसाम्राज्यदीक्षितः ॥ १ ॥
तस्य शिष्यो मुनिवरः सांकृतिर्नाम भक्तिमान् ।
पप्रच्छ गुरुमेकान्ते प्राञ्जलिर्विनयान्वितः ॥ २ ॥
भगवन्ब्रूहि मे योगं साष्टाङ्गं सप्रपञ्चकम् ।
येन विज्ञानमात्रेण जीवन्मुक्तो भवाम्यहम् ॥ ३ ॥
सांकृते शृणु वक्ष्यामि योगं साष्टाङ्गदर्शनम् ।

यमाद्यष्टाङ्गयोगेद्धब्रह्ममात्रप्रबोधतः ।
योगिनो यत्पदं यान्ति तत्कैवल्यपदं भजे ॥

इह खलु सामवेदप्रविभक्तेयं दर्शनोपनिषत् निर्विशेषब्रह्मज्ञानसहकृतयमाद्यष्टाङ्गयोगप्रकटनव्यग्रा निष्प्रतियोगिकब्रह्ममात्रपर्यवसन्ना विजृम्भते । अस्याः स्वल्पग्रन्थतो विवरणमारभ्यते । साङ्कृतिदत्तात्रेयप्रश्नप्रतिवचनरूपेयं आख्यायिका विद्यास्तुत्यर्था । आख्यायिकामवतारयति—**दत्तात्रेय** इति ॥ १-२ ॥ किमिति ? **भगवन्** इत्यादि ॥ ३ ॥ साङ्कृतिना एवं पृष्टो भगवानाह—**साङ्कृत** इति ॥

अष्टाङ्गोद्देशः

यमश्च नियमश्चैव तथैवासनमेव च ॥ ४ ॥
प्राणायामस्तथा ब्रह्मन्प्रत्याहारस्ततः परम् ।
धारणा च तथा ध्यानं समाधिश्चाष्टमं मुने ॥ ५ ॥

अष्टाङ्गानि कानीत्यत आह—यमश्चेति ॥ ४–५ ॥

दशविधयमः

अहिंसा सत्यमस्तेयं ब्रह्मचर्यं दयाऽऽर्जवम् ।
क्षमा धृतिर्मिताहारः शौचं चेति यमा दश ॥ ६ ॥

दशधा भिन्नयमावयवमाह—अहिंसेति ॥ ६ ॥

अहिंसा

वेदोक्तेन प्रकारेण विना सत्यं तपोधन ।
कायेन मनसा वाचा हिंसा हिंसा न चान्यथा ॥ ७ ॥
आत्मा सर्वगतोऽच्छेद्यो न ग्राह्य इति या मतिः ।
सा चाहिंसा वरा प्रोक्ता मुने वेदान्तवेदिभिः ॥ ८॥

उपायोपेयभेदेन अहिंसादिदशयमलक्षणमाह—वेदेति । वेदोक्तयज्ञीयपश्वादिहिंसा अहिंसैवेत्यर्थः ॥ ७ ॥ यद्वा—आत्मेत्यादि ॥ ८ ॥

सत्यम्

चक्षुरादीन्द्रियैर्दृष्टं श्रुतं घ्रातं मुनीश्वर ।
तस्यैवोक्तिर्भवेत्सत्यं विप्र तन्नान्यथा भवेत् ॥ ९ ॥

सर्वं सत्यं [1]वरं ब्रह्म न चान्यदिति या मतिः ।
तच्च सत्यं वरं प्रोक्तं वेदान्तज्ञानपारगैः ॥ १० ॥

उपायोपेयसत्यलक्षणं तु—चक्षुरित्यादि ॥ ९–२९ ॥

अस्तेयम्

अन्यदीये तृणं रत्ने काञ्चने मौक्तिकेऽपि च ।
[2]मनसा विनिवृत्तिर्या तदस्तेयं विदुर्बुधाः ॥ ११ ॥
आत्मन्यनात्मभावेन व्यवहारविवर्जितम् ।
यत्तदस्तेयमित्युक्तमात्मविद्भिर्महा[3]मुने ॥ १२ ॥

ब्रह्मचर्यम्

कायेन वाचा मनसा स्त्रीणां परिविवर्जनम् ।
ऋतौ भार्यां तदा [4]स्वस्य ब्रह्मचर्यं तदुच्यते ॥ १३ ॥
ब्रह्मभावे मनश्चारं ब्रह्मचर्यं परन्तप ।

दया

स्वात्मवत्सर्वभूतेषु कायेन मनसा गिरा ॥ १४ ॥
अनुज्ञा या दया सैव प्रोक्ता वेदान्तवेदिभिः ।

आर्जवम्

पुत्रे मित्रे कलत्रे च रिपौ स्वात्मनि संततम् ॥ १५ ॥
एकरूपं [5]मुने यत्तदार्जवं प्रोच्यते मया ।

[1] परं—अ, क. [2] मनसाऽपिनि—अ. [3] मते—क, अ, अ १.
[4] तस्य—अ १, क. [5] मनो—अ.

क्षमा

कायेन मनसा वाचा शत्रुभिः परिपीडितः ॥ १६ ॥
बुद्धिक्षोभनिवृत्तिर्या क्षमा सा मुनिपुङ्गव ।

धृतिः

वेदादेव विनिर्मोक्षः संसारस्य न चान्यथा ॥ १७ ॥
इति विज्ञाननिष्पत्तिर्धृतिः प्रोक्ता हि वैदिकैः।
अहमात्मा न चान्योऽस्मीत्येवमप्रच्युता मतिः ॥ १८ ॥

मिताहारः

अल्पमृष्टाशनाभ्यां च चतुर्थांशावशेषकम् ।
[1]तस्माद्योगानुगुण्येन भोजनं मितभोजनम् ॥ १९ ॥

शौचम

स्वदेहमलनिर्मोक्षो मृज्जलाभ्यां महामुने ।
यत्तच्छौचं भवेद्बाह्यं मानसं मननं विदुः ॥ २० ॥
अहं शुद्ध इति ज्ञानं शौचमाहुर्मनीषिणः ।
अत्यन्तमलिनो देहो देही चात्यन्तनिर्मलः ॥ २१ ॥
उभयोरन्तरं ज्ञात्वा कस्य शौचं विधीयते ।
ज्ञानशौचं परित्यज्य बाह्ये यो रमते नरः ॥ २२ ॥
स मूढः काञ्चनं त्यक्त्वा लोष्टं गृह्णाति सुव्रत ।

[1] यत्तयो—अ.

ब्रह्मात्मवेदनविधिः

ज्ञानामृतेन तृप्तस्य कृतकृत्यस्य योगिनः ॥ २३ ॥
न चास्ति किंचित्कर्तव्यमस्ति चेन्न स तत्त्ववित् ।
लोकत्रयेऽपि कर्तव्यं किंचिन्नास्त्यात्मवेदिनाम् ॥ २४ ॥
तस्मात्सर्वप्रयत्नेन मुनेऽहिंसादिसाधनैः ।
आत्मानमक्षरं ब्रह्म विद्धि [1]ज्ञानात्तु वेदनात् ॥ २५ ॥

इति प्रथमः खण्डः

दशविधनियमः

तपः संतोषमास्तिक्यं दानमीश्वरपूजनम् ।
सिद्धान्तश्रवणं चैव ह्रीर्मतिश्च जपो व्रतम् ॥ १ ॥
एते च नियमाः प्रोक्तास्तान्वक्ष्यामि क्रमाच्छृणु ।

दशधा भिन्ननियमावयवानाह—तप इति ॥ १ ॥

तपः

वेदोक्तेन प्रकारेण कृच्छ्रचान्द्रायणादिभिः ॥ २ ॥
शरीरशोषणं यत्तत्तप इत्युच्यते बुधैः ।
को वा मोक्षः कथं [2]केन संसारं प्रतिपन्नवान् ॥ ३ ॥
इत्या[3]लोकनमर्थज्ञास्तपः शंसन्ति पण्डिताः ।

उपायोपेयभेदेन तपआदिनियमलक्षणमाह—वेदेति ॥ २–१० ॥

[1] ज्ञानात्म—अ, [2] तेन—उ, [3] लोचन—अ २, क.

सन्तोषः

यदृच्छालाभतो नित्यं प्रीतिर्या जायते नृणाम् ॥ ४ ॥
तत्संतोषं विदुः प्राज्ञाः परिज्ञानैकतत्पराः ।
[1]ब्रह्मावलोकपर्यन्ताद्विरक्त्या यल्लभेत्प्रियम् ॥ ५ ॥
सर्वत्र विगतस्नेहः संतोषं परमं विदुः ।

आस्तिक्यम्

श्रौते स्मार्ते च विश्वासो [2]यत्तदास्तिक्यमुच्यते ॥ ६ ॥

दानम्

न्यायार्जितधनं श्रान्ते श्रद्धया वैदिके जने ।
अन्यद्वा [3]यत्प्रदीयन्ते तद्दानं प्रोच्यते मया ॥ ७ ॥

ईश्वरपूजनम्

रागाद्यपेतं हृदयं वागदुष्टाऽनृतादिना ।
हिंसादिरहितं कर्म यत्तदीश्वरपूजनम् ॥ ८ ॥

सिद्धान्तश्रवणम्

सत्यं ज्ञानमनन्तं च परानन्दं परं ध्रुवम् ।
प्रत्यगित्यवगन्तव्यं वेदान्तश्रवणं [4]बुधः ॥ ९ ॥

[1] ब्रह्मादि—उ. [2] यस्तदा—अ, अ १.
[3] यत्प्रदीयेत—अ. यत्प्रतीयन्ते—उ १. [4] बुधाः—अ, अ १, अ २. बुध—क.

ह्रीः

वेदलौकिकमार्गेषु कुत्सितं कर्म यद्भवेत् ।
तस्मिन्भवति या लज्जा ह्रीः सैवेति प्रकीर्तिता ॥ १० ॥

मतिः

वैदिकेषु च सर्वेषु श्रद्धा या सा मतिर्भवेत् ।
गुरुणा चोपदिष्टोऽपि [1]तत्र संबन्धवर्जितः ॥ ११ ॥

वेदविरुद्धमार्गः गुरुणा उपदिष्टोऽपि तत्र संबन्धवर्जितः सन वेदोक्तानुष्ठानमेव कुर्यादित्यर्थः ॥ ११–१६ ॥

जपः

वेदोक्तेनैव मार्गेण मन्त्राभ्यासो जपः स्मृतः ।
कल्पसूत्रे यथा वेदे धर्मशास्त्रे पुराणके ॥ १२ ॥
इतिहासे च वृत्तिर्या स जपः प्रोच्यते मया ।
जपस्तु द्विविधः प्रोक्तो वाचिको मानसस्तथा ॥ १३ ॥
वाचिकोपांशुरुच्चैश्च द्विविधः परिकीर्तितः ।
मानसो मननध्यानभेदाद्वैविध्यमाश्रितः ॥ १४ ॥
उच्चैर्जपादुपांशुश्च सहस्रगुणमुच्यते ।
मानसश्च तथोपांशोः सहस्रगुणमुच्यते ॥ १५ ॥

[1] तन्त्र—अ.

उच्चैर्जपश्च सर्वेषां यथोक्तफलदो भवेत् ।
नीचैः श्रोत्रेण चेन्मन्त्रः [1]श्रुतश्चेन्निष्फलं भवेत् ॥ १६ ॥

इति द्वितीयः खण्डः

आसनानि नव

स्वस्तिकं गोमुखं पद्मं वीरसिंहासने तथा ।
भद्रं मुक्तासनं चैव मयूरासनमेव च ॥ १ ॥
सुखासनसमाख्यं च नवमं मुनिपुङ्गव ।

यमनियमलक्षणमुक्त्वा आसनलक्षणमाह---स्वस्तिकमिति ॥ १-१४ ॥

स्वस्तिकम्

जानूर्वोरन्तरे कृत्वा सम्यक् पादतले उभे ॥ २ ॥
समग्रीवशिरःकायः स्वस्तिकं नित्यमभ्यसेत् ।

गोमुखम्

सव्ये दक्षिणगुल्फं तु पृष्ठपार्श्वे नियोजयेत् ॥ ३ ॥
दक्षिणेऽपि तथा सव्यं गोमुखं तत्प्रचक्षते ।

पद्मम्

अङ्गुष्ठावधि गृह्णीयाद्धस्ताभ्यां व्युत्क्रमेण तु ॥ ४ ॥
ऊर्वोरुपरि विप्रेन्द्र कृत्वा पादतलद्वयम् ।
पद्मासनं भवेत्प्राज्ञ सर्वरोगभयापहम् ॥ ५ ॥

[1] श्रुतःस्यान्निष्फलो---अ. श्रुतं चे---क, अ २.

देहमध्यं विजानीहि मनुजानां तु सांकृते ।
कन्दस्थानं मुनिश्रेष्ठ मूलाधारान्नवाङ्गुलम् ॥ ३ ॥
चतुरङ्गुलमायामविस्तारं मुनिपुङ्गव ।
कुक्कुटाण्डवदाकारं भूषितं तु त्वगादिभिः ॥ ४ ॥
तन्मध्ये नाभिरित्युक्तं योगज्ञैर्मुनिपुङ्गव ।

प्राणायामस्य नाडीपुञ्जदेहप्राणनिर्वर्त्यत्वेन देहतत्कार्येयत्तापरिज्ञानं विन प्राणायामसिद्धिः न स्यादिति देहनाडीप्राणेयत्तां प्रपञ्चयति—शरीरमिति शिखिस्थानं अग्निस्थानम् ॥ १–१० ॥

नाडीपरिगणनम्

कन्दमध्यस्थिता नाडी सुषुम्नेति प्रकीर्तिता ॥ ५ ॥
तिष्ठन्ति परितस्तस्य नाडयो मुनिपुङ्गव ।
द्विसप्ततिसहस्राणि तासां मुख्याश्चतुर्दश ॥ ६ ॥
सुषुम्ना पिङ्गला तद्वदिडा चैव सरस्वती ।
पूषा च वरुणा चैव हस्तिजिह्वा यशस्विनी ॥ ७ ॥
अलम्बुसा कुहूश्चैव विश्वोदारा पयस्विनी ।
शङ्खिनी चैव गान्धारा इति मुख्याश्चतुर्दश ॥ ८ ॥
आसां मुख्यतमास्तिस्रस्तिसृष्वेकोत्तमोत्तमा ।
ब्रह्मनाडीति सा प्रोक्ता मुने वेदान्तवेदिभिः ॥ ९ ॥
पृष्ठमध्यस्थितेनास्था वीणादण्डेन सुव्रत ।
सह मस्तकपर्यन्तं सुषुम्ना सुप्रतिष्ठिता ॥ १० ॥

कुण्डल्याः स्थानं स्वरूपं च

नाभिकन्दादधः स्थानं कुण्डल्या व्याकुलं मुने ।
अष्टप्रकृतिरूपा सा कुण्डली मुनिसत्तम ॥ ११ ॥
यथावद्वायुचेष्टां च जलान्नादीनि नित्यशः ।
परितः कन्दपार्श्वेषु निरुध्यैव सदा स्थिता ॥ १२ ॥
स्वमुखेन [1]सदाऽऽवेष्टच ब्रह्मरन्ध्रमुखं मुने ।

कुण्डलिनीस्थानं तत्स्वरूपं चाह- नाभीति । पृथिव्यंतेजोवाय्वाकाशमनोबुद्ध्यहङ्काररूपिण्यः अष्टौ प्रकृतयः ॥ ११–१२ ॥

नाडीस्थानानि

सुषुम्नाया इडा मध्ये दक्षिणे पिङ्गला स्थिता ॥ १३ ॥
सरस्वती कुहूश्चैव सुषुम्नापार्श्वयोः स्थिते ।
गान्धारा हस्तिजिह्वा च इडायाः पृष्ठपूर्वयोः ॥ १४ ॥
पूषा यशस्विनी चैव पिङ्गलापृष्ठपूर्वयोः ।
कुहोश्च हस्तिजिह्वाया मध्ये विश्वोदरा स्थिता ॥ १५ ॥
यशस्विन्याः कुहोर्मध्ये वरुणा सुप्रतिष्ठिता ।
पूषायाश्च सरस्वत्या मध्ये प्रोक्ता यशस्विनी ॥ १६ ॥
गान्धारायाः सरस्वत्या मध्ये प्रोक्ता च शङ्खिनी ।
अलम्बुसा स्थिता पायुपर्यन्तं कन्दमध्यगा ॥ १७ ॥
पूर्वभागे सुषुम्नाया राकायाः संस्थिता कूहूः ।
अधश्चोर्ध्वं स्थिता नाडी [2]याम्यनासान्तमिष्यते ॥ १८ ॥

[1] समावेष्टय—क, अ २. [2] वामना—अ, अ १.

इडा तु सव्यनासान्तं संस्थिता मुनिपुङ्गव ।
यशस्विनी च वामस्य पादाङ्गुष्ठान्तमिष्यते ॥ १९ ॥
पूषा वामाक्षिपर्यन्ता पिङ्गलायास्तु पृष्ठतः ।
पयस्विनी च याम्यस्य कर्णान्तं प्रोच्यते बुधैः ॥ २० ॥
सरस्वती तथा [1]चोर्ध्वं गता जिह्वा तथा मुने ।
हस्तिजिह्वा तथा सव्यपादाङ्गुष्ठान्तमिष्यते ॥ २१ ॥
शङ्खिनी नाम या नाडी सव्यकर्णान्तमिष्यते ।
गान्धारा सव्यनेत्रान्ता प्रोक्ता वेदान्तवेदिभिः ॥ २२ ॥
विश्वोदराभिधा नाडी कन्दमध्ये व्यवस्थिता ।

सुषुम्नानाडीपरितः प्रधाननाड्यः तिष्ठन्तीत्याह—**सुषुम्नाया** इति ॥ १३–२२ ॥

नाडीषु वायुसञ्चारः

प्राणोऽपानस्तथा व्यानः समानोदान एव च ॥ २३ ॥
नागः कूर्मश्च कृकरो देवदत्तो धनंजयः ।
एते नाडीषु सर्वासु चरन्ति दश वायवः ॥ २४ ॥
तेषु प्राणादयः पञ्च मुख्याः पञ्चसु सुव्रत ।
प्राणसंज्ञस्तथाऽपानः पूज्यः प्राणस्योर्मुने ॥ २५ ॥
आस्यनासिकयोर्मध्ये नाभिमध्ये तथा हृदि ।
प्राणसंज्ञोऽनिलो नित्यं वर्तते मुनिसत्तम ॥ २६ ॥

[1] चोर्ध्वगा जिह्वान्तं स्थिता मुने—क, अ २. चोर्ध्वानाजिह्वायास्तथा मुने—अ १. चोर्ध्वाजिह्वायाश्च तथा मुने—अ.

अपानो वर्तते नित्यं गुद[1]मध्योरुजानुषु ।
उदरे सकले कट्यां नाभौ जङ्घे च सुव्रत ॥ २७ ॥
व्यानः श्रोत्राक्षिमध्ये च ककुद्ग्रीवां गुल्फयोरपि ।
प्राणस्थाने गले चैव वर्तते मुनिपुङ्गव ॥ २८ ॥
उदानसंज्ञो विज्ञेयः पादयोर्हस्तयोरपि ।
समानः सर्वदेहेषु व्याप्य तिष्ठत्य[2]संशयः ॥ २९ ॥
नागादिवायवः पञ्च त्वगस्थ्यादिषु संस्थिताः ।

एवमुक्तासु नाडीषु प्राणादयश्चरन्तीत्याह—प्राण इति ॥ २३–२६ ॥ उदरे सकले यावदुदरे । जङ्घे जङ्घायां ॥ २७–२९ ॥

वायुव्यापाराः

निःश्वासोच्छ्वासकामाश्च प्राणकर्म हि सांकृते ॥ ३० ॥
अपानाख्यस्य वायोस्तु विण्मूत्रादिविसर्जनम् ।
समानः सर्वसामीप्यं करोति मुनिपुङ्गव ॥ ३१ ॥
उदान ऊर्ध्वगमनं करोत्येव न संशयः ।
व्यानो [3]विवादकृत् प्रोक्तो मुने वेदान्तवेदिभिः ॥ ३२ ॥
उद्गारादिगुणः प्रोक्तो नागाख्यस्य महामुने ।
धनंजयस्य शोभादि कर्म प्रोक्तं हि सांकृते ॥ ३३ ॥
निमीलनादि कूर्मस्य क्षुधा तु कृकरस्य च ।
देवदत्तस्य विप्रेन्द्र तन्द्रीकर्म प्रकीर्तितम् ॥ ३४ ॥

प्राणादिदशवायुव्यापारानाह—निःश्वासेति ॥ ३०–३४ ॥

[1] मेढ्रोरु—क, अ २. [2] संशयम्—अ. [3] विनाद—क.

नाडीदेवताः

सुषुम्नायाः शिवो देव इडाया देवता हरिः ।
पिङ्गलाया विरिञ्चः स्यात् सरस्वत्या विराण्मुने ॥ ३५ ॥
पूषाऽधिदेवता प्रोक्तो वरुणा वायुदेवता ।
हस्तिजिह्वाभिधायास्तु वरुणो देवता भवेत् ॥ ३६ ॥
यशस्विन्या मुनिश्रेष्ठ भगवान् भास्करस्तथा ।
अलम्बु[1]माया अत्रात्मा वरुणः परिकीर्तितः ॥ ३७ ॥
कुहोः क्षुद्देवता प्रोक्ता गान्धारी चन्द्रदेवता ।
शङ्खिन्याश्चन्द्रमास्तद्वत् पयस्विन्याः प्रजापतिः ॥ ३८ ॥
विश्वोदराभिधायास्तु भगवान् पावकः पतिः ।

सुषुम्नादिचतुर्दशनाडीदेवताभेदमाह सुषुम्नाया इति ॥ ३५–३८ ॥

नाडीषु चन्द्रसूर्यसञ्चारः

इडायां चन्द्रमा नित्यं चरत्येव महामुने ॥ ३९ ॥
पिङ्गलायां रविस्तद्वन्मुने वेदविदां वर ।

सदेडापिङ्गळयोश्चन्द्रसूर्यौ चरतः इत्याह– –इडायामिति ॥ ४० ॥

नाडीषु संवत्सरात्मकप्राणसूर्यसञ्चारः

पिङ्गलाया इडायां तु वायोः संक्रमणं तु यत् ॥ ४० ॥
तदुत्तरायणं प्रोक्तं मुने वेदान्तवेदिभिः ।
इडायाः पिङ्गलायां तु प्राणसंक्रमणं मुने ॥ ४१ ॥

[1] षाधमन्यात्मा—अ, अ १.

दक्षिणायनमित्युक्तं पिङ्गलायामिति श्रुतिः ।
इडापिङ्गल्योः संधिं यदा प्राणः समागतः ॥ ४२ ॥
अमावास्या तदा प्रोक्ता देहे देहभृतां वर ।
मूलाधारं यदा प्राणः प्रविष्टः पण्डितोत्तम ॥ ४३ ॥
तदाद्यं विषुवं प्रोक्तं तापसैस्तापसोत्तम ।
प्राणसंज्ञो मुनिश्रेष्ठ मूर्धानं [1]प्राविशद्यदा ॥ ४४ ॥
तदन्त्यं विषुवं प्रोक्तं तापसैस्तत्त्वचिन्तकैः ।
निःश्वासोच्छ्वासनं सर्वं मासानां संक्रमो भवेत् ॥ ४५ ॥
[2]इडया कुण्डलीस्थानं यदा प्राणः समागतः ।
सोमग्रहणमित्युक्तं तदा तत्त्वविदां वर ॥ ४६ ॥
यदा पिङ्गलया प्राणः कुण्डलीस्थानमागतः ।
तदातदा भवेत् सूर्यग्रहणं मुनिपुङ्गव ॥ ४७ ॥

संवत्सरात्मकप्राणसूर्यस्य नाडीराशिसञ्चारतो दिनपक्षमासायनादिग्रहणादिः भवतीत्याह—पिङ्गलाया इति ॥ ४१–४७ ॥

अन्तस्तीर्थप्राशस्त्यम्

श्रीपर्वतं शिरःस्थाने केदारं तु ललाटके ।
वाराणसीं महाप्राज्ञ भ्रुवोर्घ्राणस्य मध्यमे ॥ ४८ ॥
कुरुक्षेत्रं कुचस्थाने प्रयागं हृत्सरोरुहे ।
चिदम्बरं तु हृन्मध्ये आधारे कमलालयम् ॥ ४९ ॥

[1] प्रविशेद्यदा—अ. [2] इडायाः—अ, अ १, अ २.

आत्मतीर्थं समुत्सृज्य बहिस्तीर्थानि यो व्रजेत् ।
करस्थं स महारत्नं त्यक्त्वा काचं विमार्गते ॥ ९०॥
भावतीर्थं परं तीर्थं प्रमाणं सर्वकर्मसु ।
अन्यथाऽऽलिङ्ग्यते कान्ता [1]अन्यथाऽऽलिङ्ग्यते सुता ॥ ९१ ॥
तीर्थानि तोयपूर्णानि देवान् काष्ठादिनिर्मितान् ।
योगिनो न प्रपद्यन्ते स्वात्मप्रत्ययकारणात् ॥ ९२ ॥
बहिस्तीर्थात् परं तीर्थमन्तस्तीर्थं महामुने ।
आत्मतीर्थं महातीर्थमन्यत्तीर्थं निरर्थकम् ॥ ९३ ॥
चित्तमन्तर्गतं दुष्टं तीर्थस्नानैर्न शुध्यति ।
शतशोऽपि जलैर्धौतं सुराभाण्डमिवाशुचि ॥ ९४ ॥
विषुवायनकालेषु ग्रहणे चान्तरे सदा ।
वाराणस्यादिके स्थाने स्नात्वा शुद्धो भवेन्नरः ॥ ९५ ॥
ज्ञानयोगपराणां तु पादप्रक्षालितं जलम् ।
भावशुद्ध्यर्थ[2]मज्ञानां तत्तीर्थं मुनिपुङ्गव ॥ ९६ ॥

मस्तकाद्याधारान्तं श्रीशैलादिपुण्यस्थलं भवतीत्याह—श्रीपर्वतमिति ॥ ४८–४९ ॥ एवं भावनामयमात्मतीर्थं तदेव मुमुक्षुभिः सेव्यं इति स्तौति—आत्मतीर्थमिति । काचं—काचमणिम् ॥ ९० ॥ देहादिनिर्वर्त्य-सर्वकर्मसु तीर्थबुद्धिः गरीयसीत्यर्थः । तत्र दृष्टान्तस्तु—अन्यथेति ॥ ९१ ॥ अत एवं तीर्थानीति ॥ ९२ ॥ तदेव आत्मतीर्थम् ॥ ९३ ॥ बाह्यतीर्थस्नानेन कोऽपि न शुध्यतीति सदृष्टान्तमाह—चित्तमिति ॥ ९४ ॥ न तथा

[1] 'भावेनदुहिताऽन्यथा' इति पाठान्तरम्—उ. [2] मज्ञानात्—अ, अ १.

भावतीर्थस्नानेनेत्याह—विषुवेति । भ्रूमध्यादिस्थानेषु स्वात्मलक्ष्यानुसन्धानतः शुद्धात्मैव भवतीत्यर्थः ॥ ५५ ॥ एवमात्मतीर्थस्नानानधिकारे[री]तीर्थपादचरणोदकस्पर्शतः शुद्धो भवतीत्याह—ज्ञानेति ॥ ५६ ॥

आत्मनि शिवदृष्टिः

तीर्थे दाने जपे यज्ञे काष्ठे पाषाणके सदा ।
शिवं पश्यति मूढात्मा शिवे देहे प्रतिष्ठिते ॥ ५७ ॥
अन्तःस्थं मां परित्यज्य बहिष्ठं यस्तु सेवते ।
हस्तस्थं पिण्डमुत्सृज्य लिहेत् कूर्परमात्मनः ॥ ५८ ॥
शिवमात्मनि पश्यन्ति प्रतिमासु न योगिनः ।
अज्ञानां भावनार्थाय प्रतिमाः परिकल्पिताः ॥ ५९ ॥

स्वाज्ञाः स्वातिरिक्तात्मानं द्रष्टुमिच्छन्ति, स्वज्ञाः स्वमात्मानं पश्यन्तीत्याह—तीर्थे इति ॥ ५७–५८ ॥ अत एव शिवमिति । अयोगिजनानुकम्पया प्रतिमाऽपि विकल्पितेत्याह—अज्ञानामिति ॥ ५९ ॥

ब्रह्मदर्शनेन ब्रह्मभावः

अपूर्वमपरं ब्रह्म स्वात्मानं सत्यमद्वयम् ।
प्रज्ञानघनमानन्दं यः पश्यति स पश्यति ॥ ६० ॥
नाडीपुञ्जं सदाऽसारं नरभावं महामुने ।
समुत्सृज्यात्मनाऽऽत्मानमहमित्यवधारय ॥ ६१ ॥
अशरीरं शरीरेषु महान्तं विभुमीश्वरम् ।
आनन्दमक्षरं साक्षान्मत्वा धीरो न शोचति ॥ ६२ ॥

विभेदजनके ज्ञाने नष्टे ज्ञानबलान्मुनेः ।
आत्मनो ब्रह्मणो भेदमसन्तं [1]किं करिष्यति ॥ ६३ ॥

निर्विशेषं ब्रह्म यः पश्यति स तदेव भवतीत्याह—अपूर्वमिति । यस्मात् पूर्वं कारणं परं कार्यं वा न विद्यते तत् कार्यकारणकलनाशून्यं ब्रह्म स्वमात्रमिति यः पश्यति स तन्मात्रमवशिष्यते इत्यर्थः ॥ ६० ॥ यावच्चित्तशुद्धिः तावत् नरभावनया योगं युञ्जीत, ततः शुद्धावुदितायां नरभावं विहाय ब्रह्मभावेन वर्तस्वेत्याह—नाडीति ॥ ६१ ॥ यः कोऽप्येवमात्मानं जानाति स कृतकृत्यो भवतीत्याह—अशरीरमिति ॥ ६२ ॥ स्वाज्ञानजभेददृष्ट्यपाये निर्भेदं ब्रह्म प्रसीदतीत्याह—विभेदेति । वस्तुतः कालत्रयेऽप्यसंभवभेदः किं करिष्यति? स्वस्य लब्धात्मकत्वान्निर्भेदं ब्रह्मावशिष्यते इत्यर्थः ॥ ६३ ॥

इति चतुर्थः खण्डः

नाडीशोधनम्

सम्यक्कथय मे ब्रह्मन् नाडीशुद्धिं समासतः ।
यया शुद्ध्या सदा ध्यायन् जीवन्मुक्तो भवाम्यहम् ॥ १ ।
सांकृते शृणु वक्ष्यामि नाडीशुद्धिं समासतः ।
विध्युक्तकर्मसंयुक्तः कामसंकल्पवर्जितः ॥ २ ॥
यमाद्यष्टाङ्गसंयुक्तः शान्तः सत्यपरायणः ।
स्वात्मन्यवस्थितः सम्यक् ज्ञानिभिश्च सुशिक्षितः ॥ ३ ॥

[1] कः—अ.

पर्वताग्रे नदीतीरे बिल्वमूले वनेऽथवा ।
मनोरमे शुचौ देशे मठं कृत्वा समाहितः ॥ ४ ॥
आरभ्य चासनं पश्चात् प्राङ्मुखोदङ्मुखोऽपि वा ।
समग्रीवशिरःकायः संवृताम्यः सुनिश्चलः ॥ ५ ॥
नासाग्रे शशभृद्बिम्बे बिन्दु[1]मध्ये तुरीयकम् ।
स्रवन्तममृतं पश्येन्नेत्राभ्यां सुसमाहितः ॥ ६ ॥
[2]इडया प्राणमाकृष्य पूरयित्वोदरस्थितम् ।
ततोऽग्निं देहमध्यस्थं ध्यायन् ज्वालावलीयुतम् ॥ ७ ॥
बिन्दुनादसमायुक्तमग्निबीजं विचिन्तयेत् ।
पश्चाद्विरेचयेत् सम्यक् प्राणं पिङ्गलया बुधः ॥ ८ ॥
पुनः पिङ्गलयाऽऽपूर्य वह्निबीजमनुस्मरेत् ।
पुनर्विरेचयेद्धीमानिडयैव शनैःशनैः ॥ ९ ॥
त्रिचतुर्वासरं [3]वाऽथ त्रिचतुर्वारमेव [4]च ।
षट्[5]कृत्वो विचरेन्नित्यं [6]रहस्येवं त्रिसंधिषु ॥ १० ॥

नरभावभावितनाडीशुद्धिबुभुत्सया पृच्छतीत्याह—**सम्यगिति** ॥ १ ॥ प्रश्नोत्तरं भगवानाह—**साङ्कृत इति** ॥ कस्तत्प्रकारः इत्यत्र—**विध्युक्तेति** ॥ २–५ ॥ स्रवदमृतचन्द्रबिम्बं नासाग्रे अवलोकयन् योगं समारभेदित्यर्थः ॥ ६–७ ॥ **रामिति** अग्निबीजम् ॥ ८–९ ॥ प्रतिदिनं **त्रिचतुर्वारम्** ॥ १०–१४ ॥

[1] मध्यतु—अ १. मध्यं तु—अ. [2] इडायाः—अ. [3] वाऽपि—अ.
[4] वा—अ. [5] कृत्वा—अ १, अ २, क. [6] रहस्ये—उ, अ १.

नाडीशुद्धिचिह्नानि

नाडीशुद्धिमवाप्नोति पृथक्चिह्नोपलक्षितः ।
शरीरलघुता दीप्तिर्वह्नेर्जाठरवर्तिनः ॥ ११ ॥
नादाभिव्यक्तिरित्येतच्चिह्नं तत्सिद्धिसूचकम् ।
यावदेतानि संपश्येत्तावदेवं समाचरेत् ॥ १२ ॥

स्वात्मशुद्धिः

अथवैतत् परित्यज्य स्वात्मशुद्धिं समाचरेत् ।
आत्मा शुद्धः सदा नित्यः सुखरूपः स्वयंप्रभः ॥ १३ ॥
अज्ञानान्मलिनो भाति ज्ञानाच्छुद्धो [1]विभात्ययम् ।
अज्ञानमलपङ्कं यः क्षालयेज्ज्ञानतोयतः ।
स एव सर्वदा शुद्धो नान्यः कर्मरतो हि सः ॥ १४ ॥

इति पञ्चमः खण्डः

प्राणायामलक्षणम्

प्राणायामक्रमं वक्ष्ये सांकृते शृणु सादरम् ।
प्राणायाम इति प्रोक्तो रेचपूरककुम्भकैः ॥ १ ॥
वर्णत्रयात्मकाः प्रोक्ता रेचपूरककुम्भकाः ।
स एष प्रणवः प्रोक्तः प्राणायामश्च तन्मयः ॥ २ ॥

[1] भव—उ,

इडया वायुमाकृष्य पूरयित्वोदरस्थितम् ।
शनैः षोडशभिर्मात्रैरकारं तत्र संस्मरेत् ॥ ३ ॥
पूरितं धारयेत् पश्चाच्चतुःषष्ट्या तु मात्रया ।
उकारमूर्तिमत्रापि संस्मरन् प्रणवं जपेत् ॥ ४ ॥
यावद्वा शक्यते तावद्धारयेज्जपतत्परः ।
पूरितं रेचयेत् पश्चान्मकारेणानिलं बुधः ॥ ५ ॥
शनैः पिङ्गलया तत्र द्वात्रिंशन्मात्रया पुनः ।
प्राणायामो भवेदेषः ततश्चैवं समभ्यसेत् ॥ ६ ॥
पुनः पिङ्गलयाऽऽपूर्य मात्रैः षोडशभिस्तथा ।
अकारमूर्तिमत्रापि स्मरेदेकाग्रमानसः ॥ ७ ॥
धारयेत् पूरितं विद्वान् प्रणवं संजपन् वशी ।
उकारमूर्तिं [1]स ध्यायन् चतुःषष्ट्या तु मात्रया ॥ ८ ॥
मकारं तु स्मरन् पश्चाद्रेचयेदिडयाऽनिलम् ।
एवमेव पुनः कुर्यादिडयाऽऽपूर्य बुद्धिमान् ॥ ९ ॥
एवं समभ्यसेन्नित्यं प्राणायामं मुनीश्वर ।
एवमभ्यासतो नित्यं षण्मासाद् ज्ञानवान् भवेत् ॥ १० ॥
वत्सराद्ब्रह्मविद्वान् स्यात् तस्मान्नित्यं समभ्यसेत् ।
योगाभ्यासरतो नित्यं स्वधर्मनिरतश्च यः ॥ ११ ॥
प्राणसंयमनेनैव ज्ञानान्मुक्तो भविष्यति ।

विशेषतः प्राणायामेति ॥ १–११ ॥

[1] संधाय च—अ २. संध्यायां च—अ १. स ध्यायात् च—अ.

पूरकादिलक्षणम्

बाह्यादापूरणं वायोरुदरे पूरको हि सः ॥ १२ ॥
संपूर्णकुम्भवद्वायोर्धारणं कुम्भको भवेत् ।
बहिर्विरेचनं वायोरुदराद्रेचकः स्मृतः ॥ १३ ॥

पूरकादिलक्षणमाह—बाह्यादिति ॥ १२–१३ ॥

प्राणायामसिद्धयः

प्रस्वेदजनको यस्तु प्राणायामेषु सोऽधमः ।
कम्पनं मध्यमं विद्यादुत्थानं चोत्तमं विदुः ॥ १४ ॥
पूर्वपूर्वं प्रकुर्वीत यावदुत्थानसंभवः ।
संभवत्युत्तमे प्राज्ञः प्राणायामे सुखी भवेत् ॥ १५ ॥
प्राणायामेन चित्तं तु शुद्धं भवति सुव्रत ।
चित्ते शुद्धे शुचिः साक्षात् प्रत्यग्ज्योतिर्व्यव[1]स्थितः ॥ १६
[2]प्राणश्चित्तेन संयुक्तः परमात्मनि तिष्ठति ।
प्राणायामपरस्यास्य पुरुषस्य महात्मनः ॥ १७ ॥
देहश्चोत्तिष्ठते तेन किंचिज्ज्ञानाद्विमुक्तता ।
रेचकं पूरकं मुक्त्वा कुम्भकं नित्यमभ्यसेत् ॥ १८ ॥
सर्वपापविनिर्मुक्तः सम्यज्ज्ञानमवाप्नुयात् ।
मनोजवत्वमाप्नोति पलितादि च नश्यति ॥ १९ ॥

[1] स्थितम्—अ. [2] प्राणचि—उ, क.

प्राणायामैकनिष्ठस्य न किंचिदपि दुर्लभम् ।
तस्मात् सर्वप्रयत्नेन प्राणायामान् समभ्यसेत् ॥ २० ॥

स्वेदादिसिद्धिमाह— प्रस्वेदेति ॥ १४–१७ ॥ उत्तिष्ठते भूतलात् ॥ १८–२० ॥

रोगनिवर्तकप्राणायामभेदाः

विनियोगान् प्रवक्ष्यामि प्राणायामस्य सुव्रत ।
संध्ययोर्ब्राह्मकालेऽपि मध्याह्ने वाऽथवा सदा ॥ २१ ॥
बाह्यं प्राणं समाकृष्य [1]पूरयित्वोदरेण च ।
नासाग्रे नाभिमध्ये च पादाङ्गुष्ठे च धारणात् ॥ २२ ॥
सर्वरोगविनिर्मुक्तो जीवेद्वर्षशतं नरः ।
नासाग्रधारणाद्वाऽपि जितो भवति सुव्रत ॥ २३ ॥
सर्वरोगनिवृत्तिः स्यान्नाभिमध्ये तु धारणात् ।
शरीरलघुता विप्र [2]पादाङ्गुष्ठनिरोधनात् ॥ २४ ॥
जिह्वया वायुमाकृष्य यः पिबेत् सततं नरः ।
श्रमदाहविनिर्मुक्तो योगी नीरोगतामियात् ॥ २५ ॥
जिह्वया वायुमाकृष्य जिह्वामूले निरोधयेत् ।
पिबेदमृतमव्यग्रं सकलं सुखमाप्नुयात् ॥ २६ ॥
इडया वायुमाकृष्य भ्रुवोर्मध्ये निरोधयेत् ।
यः पिबेदमृतं शुद्धं व्याधिभिर्मुच्यते हि सः ॥ २७ ॥

[1] पूरयित्वाऽऽद—अ १. [2] पादाङ्गुष्ठे—अ.

इडया वेदतत्त्वज्ञ तथा पिङ्गलयैव च ।
नाभौ निरोधयेत्तेन व्याधिभिर्मुच्यते नरः ॥ २८ ॥
मासमात्रं त्रिसन्ध्यायां जिह्वयाऽऽरोप्य मारुतम् ।
अमृतं च [1]पिबन्नाभौ मन्दंमन्दं निरोधयेत् ॥ २९ ॥
वातजाः पित्तजा दोषा नश्यन्त्येव न संशयः ।
नासाभ्यां वायुमाकृष्य नेत्र[2]द्वन्द्वे निरोधयेत् ॥ ३० ॥
नेत्ररोगा विनश्यन्ति तथा श्रोत्रनिरोधनात् ।
तथा वायुं समारोप्य धारयेच्छिरसि स्थितम् ॥ ३१ ॥
शिरोरोगा विनश्यन्ति सत्यमुक्तं हि सांकृते ।

योगसिद्धयन्तरायरोगनिरासकान् धारणाभेदानाह—विनियोगानिति । ब्राह्मकाले ब्राह्मे मुहूर्ते ॥ २१–३९ ॥

षण्मुखीमुद्राभ्यासादिना वायुजयः

स्वस्तिकासनमास्थाय समाहितमनास्तथा ॥ ३२ ॥
अपानमूर्ध्वमुत्थाप्य प्रणवेन शनैः शनैः ।
हस्ताभ्यां धारयेत्सम्यक् कर्णादिकरणानि च ॥ ३३ ॥
अङ्गुष्ठाभ्यां मुने श्रोत्रे तर्जनीभ्यां तु चक्षुषी ।
नासापुटावथान्याभ्यां प्रच्छाद्य करणानि वै ॥ ३४ ॥
आनन्दावि[3]र्भवो यावत् तावन्मूर्धनि [4]धारयेत् ।
प्राणः प्रयात्यनेनैव ब्रह्मरन्ध्रं महामुने ॥ ३५ ॥

[1] पिबे—क, अ २.
[2] द्वन्द्वं—अ १.
[3] र्भवं—अ १.
[4] धाराणात्—क, अ १, अ २.

ब्रह्मरन्ध्रं गते वायौ नादश्चोत्पद्यतेऽनघ ।
शङ्खध्वनिनिभश्चादौ मध्ये मेघध्वनिर्यथा ॥ ३६ ॥
शिरोमध्यगते वायौ गिरिप्रस्रवणं यथा ।
पश्चात् प्रीतो महा[1]प्राज्ञ साक्षादात्मोन्मुखो भवेत् ॥ ३७ ॥
पुनस्तज्ज्ञाननिष्पत्तिर्योगात् संसारनिह्नुतिः ।
[2]दक्षिणोत्तरगुल्फेन सीविनीं पीडयेत् स्थिराम् ॥ ३८ ॥
सव्येतरेण गुल्फेन पीडयेद्बुद्धिमान् नरः ।
जान्वोरधः स्थितां सन्धिं स्मृत्वा देवं त्रियम्बकम् ॥ ३९ ॥
विनायकं च संस्मृत्य तथा वागीश्वरीं पुनः ।
[3]लिङ्गनालात् समाकृष्य वायुमप्यग्रतो मुने ॥ ४० ॥
प्रणवेन नियुक्तेन बिन्दुयुक्तेन बुद्धिमान् ।
मूलाधारस्य विप्रेन्द्र मध्ये तं तु निरोधयेत् ॥ ४१ ॥
निरुध्य वायुना दीप्तो वह्निरूहति कुण्डलीम् ।
पुनः सुषुम्नया वायुर्वह्निना सह गच्छति ॥ ४२ ॥
एवमभ्यसतस्तस्य जितो वायुर्भवेद्ध्रुवम् ।

एवं षण्मुखीमुद्राभ्यासतः ब्रह्मरन्ध्रमिति ॥ ३६ ॥ यथा तथा चन्द्रमण्डलगिरितः अमृतप्रवाहो जायते । तेन भ्रूमध्यस्थज्योतिर्लिङ्गमभिषिच्य तदमृतास्वादनतो योगी विमृत्युः भवति । ततः पश्चात् ॥ ३७–३८ ॥ दक्षिणेतरगुल्फाभ्यां सीविनीं मेढ्रगुदान्तराळस्थनाडीं सम्पीडयन् जान्वोरधः-स्थितसन्धिं शिवलिङ्गं स्मृत्वा विनायकं वागीश्वरीं च ध्यात्वा ततो लिङ्गनालादित्यादि ॥ ३९–४२ ॥

[1] प्रज्ञः—अ. [2] दक्षिणेतर—अ, अ २, क. [3] लिङ्गे—क.

वायुजयचिह्नानि

प्रस्वेदः प्रथमः पश्चात् कम्पनं मुनिपुङ्गव ॥ ४३ ॥
उत्थानं च शरीरस्य चिह्नमेतज्जितेऽनिले ।

वायुजयसूचकचिह्नान्याह — प्रस्वेद इति ॥ ४३–४८ ॥

वायुजयेन रोगपापविनाशवैराग्यपूर्विका ज्ञानोत्पत्तिः

एवमभ्यसतस्तस्य मूलरोगो विनश्यति ॥ ४४ ॥
भगन्धरं च नष्टं स्यात् सर्व[1]रोगाश्च सांकृते ।
पातकानि विनश्यन्ति क्षुद्राणि च महान्ति च ॥ ४५ ॥
नष्टे पापे विशुद्धं स्याच्चित्तदर्पणमद्भुतम् ।
पुनर्ब्रह्मादिभोगेभ्यो वैराग्यं जायते हृदि ॥ ४६ ॥
विरक्तस्य तु संसाराज्ज्ञानं कैवल्यसाधनम् ।
तेन पाशापहानिः स्यात् [2]ज्ञात्वा देवं सदाशिवम् ॥ ४७ ॥
ज्ञानामृतरसो येन सकृदास्वादितो भवेत् ।
स सर्वकार्यमुत्सृज्य तत्रैव परिधावति ॥ ४८ ॥
ज्ञानस्वरूपमेवाहुर्जगदेतद्विचक्षणाः[3] ।
अर्थस्वरूपमज्ञानात् पश्यन्त्यन्ये कुदृष्टयः ॥ ४९ ॥
आत्मस्वरूपविज्ञानादज्ञानस्य परिक्षयः ।
क्षीणेऽज्ञाने महाप्राज्ञ रागादीनां परिक्षयः ॥ ९० ॥

[1] रोगाणि—उ. [2] ज्ञाना—अ १. ज्ञानादेव सदाशिवः—अ. [3] लक्ष—उ.

रागाद्यसंभवे प्राज्ञ पुण्यपापवि[1]मर्शनम् ।
त्रयोर्नाशे शरीरेण न पुनः संप्रयुज्यते ॥ ९१ ॥

विचक्षणाः ज्ञानिनः ॥ ४९–९० ॥ विमर्शनं विशोधनं विनाशनमित्यर्थः ॥ ९१ ॥

इति षष्ठः खण्डः

प्रत्याहारलक्षणम्, तद्भेदाश्च

अथातः संप्रवक्ष्यामि प्रत्याहारं महामुने ।
इन्द्रियाणां विचरतां विषयेषु स्वभावतः ॥ १ ॥
बलादाहरणं तेषां प्रत्याहारः स उच्यते ।
यत्पश्यति तु तत्सर्वं ब्रह्म पश्यन्समाहितः ॥ २ ॥
प्रत्याहारो भवेदेष ब्रह्मविद्भिः पुरोदितः ।
[2]यद्यच्छुद्धमशुद्धं वा करोत्यामरणान्तिकम् ॥ ३ ॥
तत्सर्वं ब्रह्मणे कुर्यात् प्रत्याहारः स उच्यते ।
अथवा नित्यकर्माणि ब्रह्माराधनबुद्धितः ॥ ४ ॥
काम्यानि च तथा कुर्यात् प्रत्याहारः स उच्यते ।
अथवा वायुमाकृष्य स्थानात् स्थानं निरोधयेत् ॥ ५ ॥
दन्तमूलात्तथा कण्ठे कण्ठादुरसि मारुतम् ।
उरोदेशात् समाकृष्य नाभिदेशे निरोधयेत् ॥ ६ ॥

[1] मर्दनम्—अ, अ १, अ २, क. [2] यदिच्छु—अ २.

नाभिदेशात् समाकृष्य कुण्डल्यां तु निरोधयेत् ।
कुण्डलीदेशतो विद्वान् मूलाधारे निरोधयेत् ॥ ७ ॥
अथापानात् कटिद्वन्द्वे तथोरौ च सुमध्यमे ।
तस्माज्जानुद्वये जङ्घे पादाङ्गुष्ठे निरोधयेत् ॥ ८ ॥
प्रत्याहारोऽयमुक्तस्तु प्रत्याहारपरैः पुरा ।

यमनियमासनप्राणायामेयत्ता प्रतिपाद्य ततः प्रत्याहारस्वरूपमाह— अथेति ॥ १–१२ ॥

प्रत्याहारफलम्

एवमभ्यासयुक्तस्य पुरुषस्य महात्मनः ॥ ९ ॥
सर्वपापानि नश्यन्ति भवरोगश्च सुव्रत ।

वायुधारणात्मकप्रत्याहारः

नासाभ्यां वायुमाकृष्य निश्चलः स्वस्तिकासनः ॥ १० ॥
पूरयेदनिलं विद्वानापादतलमस्तकम् ।
पश्चात् पादद्वये तद्वत् मूलाधारे तथैव च ॥ ११ ॥
नाभिकन्दे च हृन्मध्ये कण्ठमूले च तालुके ।
भ्रुवोर्मध्ये ललाटे च तथा मूर्धनि धारयेत् ॥ १२ ॥

वदान्तसम्मतप्रत्याहारः

देहे त्वात्ममतिं विद्वान् समाकृष्य समाहितः ।
आत्मनाऽऽत्मनि निर्द्वन्द्वे निर्विकल्पे निरोधयेत् ॥ १३ ॥

प्रत्याहारः समाख्यातः साक्षाद्वेदान्तवेदिभिः ।
एवमभ्यसतस्तस्य न किंचिदपि दुर्लभम् ॥ १४ ॥

किं बहुना—देहे इति ॥ १३–१४ ॥

इति सप्तमः खण्डः

पञ्चभूतेषु धारणा

अथातः संप्रवक्ष्यामि धारणाः पञ्च सुव्रत ।
देहमध्यगते व्योम्नि बाह्याकाशं तु धारयेत् ॥ १ ॥
प्राणे बाह्यानिलं तद्वत् ज्वलने चाग्निमौदरे ।
तोयं तोयांशके भूमिं भूमिभागे महामुने ॥ २ ॥
हयरावलकाराख्यं मन्त्रमुच्चारयेत् क्रमात् ।
धारणैषा परा प्रोक्ता सर्वपापविशोधिनी ॥ ३ ॥
[1]जान्वन्तं पृथिवी ह्यंशो ह्यपां [2]पाय्वन्तमुच्यते ।
[3]हृदयांशस्तथाग्न्यंशो भ्रू[4]मध्यान्तोऽनिलांशकः ॥ ४ ॥
आकाशांशस्तथा प्राज्ञ मूर्धांशः परिकीर्तितः ।
ब्रह्माणं पृथिवीभागे विष्णुं तोयांशके तथा ॥ ५ ॥
अग्न्यंशे च महेशानमीश्वरं चानिलांशके ।
आकाशांशे महाप्राज्ञ धारयेत्तु सदाशिवम् ॥ ६ ॥

प्रत्याहारलक्षणमुक्त्वा धारणालक्षणमाह—अथेति ॥ १–६ ॥

[1] जान्वन्तः—अ. [2] पाय्वंश—अ २, क. पाय्वन्त उ, अ.
[3] हृदयान्त—अ, अ १. [4] मध्यांशो—क, अ २.

आत्मनि धारणा

अथ वा तव वक्ष्यामि धारणां मुनिपुङ्गव ।
पुरुषे सर्व[1]शास्तारं बोधानन्दमयं शिवम् ॥ ७ ॥
धारयेद्बुद्धिमान् नित्यं सर्वपापविशुद्धये ।
ब्रह्मादिकार्यरूपाणि स्वेस्वे संहृत्य कारणे ॥ ८ ॥
सर्वकारणमव्यक्तमनिरूप्यमचेतनम् ।
साक्षादात्मनि संपूर्णं धारयेत् प्रणवे मनः ।
इन्द्रियाणि समाहृत्य मनसात्मनि योजयेत् ॥ ९ ॥

पुरुषे प्रतीचि स्वातिरिक्तसर्वग्रासतया शिवं धारयेत् । यद्वा—पुरुषे परमात्मनि सर्वशास्तारं प्रत्यञ्चं धारयेत् ॥ ७–९ ॥

इत्यष्टमः खण्डः

सविशेषब्रह्मध्यानम्

अथातः संप्रवक्ष्यामि ध्यानं संसारनाशनम् ।
ऋतं सत्यं परं ब्रह्म सर्वसंसारभेषजम् ॥ १ ॥
ऊर्ध्व[2]रेतं विरूपाक्षं विश्वरूपं महेश्वरम् ।
सोऽहमित्यादरेणैव ध्यायेद्योगीश्वरेश्वरम् ॥ २ ॥

धारणामुक्त्वा सविशेषनिर्विशेषब्रह्मध्यानमाह—अथेति । ऋतं कर्मफलमपरं ब्रह्म । सत्यं ज्ञानफलं परं ब्रह्म ॥ १–२ ॥

[1] शस्ता—उ १. [2] रूपं—अ, अ१.

निर्विशेषब्रह्मध्यानम्

अथ वा सत्यमीशानं ज्ञानमानन्दमद्वयम् ।
अत्यर्थ[1]ममलं नित्यमादिमध्यान्तवर्जितम् ॥ ३ ॥
तथाऽस्थूलमनाकाशमसंस्पृश्यमचाक्षुषम् ।
न रसं न च गन्धाख्यमप्रमेयमनूपमम् ॥ ४ ॥
आत्मानं सच्चिदानन्दमनन्तं ब्रह्म सुव्रत ।
अहमस्मीत्यभिध्याये[2]द्देहातीतं विमुक्तये ॥ ५ ॥

अर्थजातमतीत्य ज्ञप्तिमात्रतया वर्तते इति अत्यर्थम् ॥ ३ ॥ अनाकाशमित्यादिपञ्चविशेषणतः पञ्चभूतवैलक्षण्यमुक्तं भवति ॥ ४–६ ॥

ध्यानफलम्

एवमभ्यासयुक्तस्य पुरुषस्य महात्मनः ।
क्रमाद्वेदान्तविज्ञानं [3]विजायेत न संशयः ॥ ६ ॥

इति नवमः खण्डः

समाधिस्वरूपम्

अथातः संप्रवक्ष्यामि समाधिं भवनाशनम् ।
समाधिः संविदुत्पत्तिः परजीवैकतां प्रति ॥ १ ॥
नित्यः सर्वगतो ह्यात्मा कूटस्थो दोषवर्जितः ।
[4]एकः सन् भिद्यते भ्रान्त्या मायया न स्वरूपतः ॥ २ ॥

[1] मचलं—अ, अ १, अ २, क.
[2] द्धयेया—मु.
[3] विज्ञायेत—अ २.
[4] एकस्मिन्—उ.

तस्माद्द्वैतमेवास्ति न प्रपञ्चो न संसृतिः ।
यथाऽऽकाशो घटाकाशो [1]मठाकाश इतीरितः ॥ ३ ॥
तथा भ्रान्तैर्द्विधा प्रोक्तो ह्यात्मा जीवेश्वरात्मना ।
नाहं देहो न च प्राणो नेन्द्रियाणि मनो न हि ॥ ४ ॥
सदा साक्षिस्वरूपत्वाच्छिव [2]एवास्मि केवलः ।
इति धीर्या मुनिश्रेष्ठ सा समाधिरिहोच्यते ॥ ५ ॥

ध्यानप्रकारमुक्त्वा समाधिप्रकारमाह-- अथेति ॥ १–२ ॥ यस्मादेवं तस्मात् । यथाऽऽकाश एव घटाकाशः ॥ ३–६ ॥

ब्रह्ममात्रावशेषः

सोऽहं ब्रह्म न संसारी न मत्तोऽन्यः कदाचन ।
यथा फेनतरङ्गादि समुद्रादुत्थितं पुनः ॥ ६ ॥
समुद्रे लीयते तद्वत् जगन्मय्यनुलीयते ।
तस्मान्मनः पृथङ् नास्ति जगन्माया च नास्ति हि ॥ ७ ॥
यस्यैवं परमात्माऽयं प्रत्यग्भूतः प्रकाशितः ।
स तु याति [3]च पुंभावं स्वयं साक्षात् परामृतम् ॥ ८ ॥
यदा मनसि चैतन्यं भाति सर्वत्रगं सदा ।
योगिनोऽव्यवधानेन तदा संपद्यते स्वयम् ॥ ९ ॥
यदा सर्वाणि भूतानि स्वात्मन्येव हि पश्यति ।
सर्वभूतेषु चात्मानं ब्रह्म संपद्यते तदा ॥ १० ॥

[1] महाकाश—अ, अ १. [2] एवास्ति—अ २.
[3] सपुं—क, अ १, अ २, उ १. स्वपुं—अ.

यदा सर्वाणि भूतानि समाधिस्थो न पश्यति ।
एकीभूतः परेणासौ तदा भवति केवलः ॥ ११ ॥
यदा पश्यति चात्मानं केवलं परमार्थतः ।
मायामात्रं जगत् कृत्स्नं तदा भवति निर्वृतिः ॥ १२ ॥

यस्मादेवं तस्मात् मनः मत्तः पृथक् नास्ति ॥ ७ ॥ प्रत्यक्परचितोरैकत्वात् स्वयं इत्यादि । स्वातिरिक्तप्रपञ्चे मायामात्रपदं गते स्वयमेव निष्प्रतियोगिकब्रह्ममात्रमवशिष्यते इति दर्शनोपनिषत्फलितोऽर्थः ॥ ८–१२ ॥

उपसंहारः

एवमुक्त्वा स भगवान् दत्तात्रेयो महामुनिः ।
[1]सांकृतिः स्वस्वरूपेण सुख[2]मास्तेऽतिनिर्भयः ॥ १३ ॥
इति ॥

आख्यायिकामुपसंहरति—एवमिति । इतिशब्दो दर्शनोपनिषत्परिसमाप्त्यर्थः ॥ १३ ॥

इति दशमः खण्डः

श्रीवासुदेवेन्द्रशिष्योपनिषद्ब्रह्मयोगिना ।
दर्शनोपनिषद्व्याख्या लिखिता ब्रह्ममात्रगा ॥
दर्शनोपनिषद्व्याख्याग्रन्थस्तु द्विशतं स्मृतः ॥

इति श्रीमदीशाद्यष्टोत्तरशतोपनिषच्छास्त्रविवरणे नवतिसंख्यापूरकं दर्शनोपनिषद्विवरणं सम्पूर्णम्

[1] सांकृतेः—अ. [2] मास्ये—क, अ १.

ध्यानबिन्दूपनिषत्

सह नाववतु— इति शान्तिः

ब्रह्मध्यानयोगमहिमा

यदि शैलसमं पापं विस्तीर्णं बहुयोजनम् ।
भिद्यते ध्यानयोगेन नान्यो भेदः कदाचन ॥ १ ॥
बीजाक्षरं परं [1]बिन्दु [2]नादं तस्योपरि स्थितम् ।
सशब्दश्चाक्षरे क्षीणे निःशब्दं परमं पदम् ॥ २ ॥
अनाहतं तु यच्छब्दं तस्य शब्दस्य यत्परम् ।
तत्परं विन्दते यस्तु स योगी छिन्नसंशयः ॥ ३ ॥

ध्यात्वा यद्ब्रह्ममात्रं ते स्वावशेषधिया ययुः ।
योगतत्त्वज्ञानफलं तत्स्वमात्रं विचिन्तये ॥

इह खलु कृष्णयजुर्वेदप्रविभक्तेयं ध्यानबिन्दूपनिषत् निर्विशेषब्रह्ममात्रपर्यवसन्नाऽन्तःप्रणवार्थप्रकाशिनी तदुपायाजपाहंसविद्यातदुपायषडङ्गयोगप्रकाशिनी च सती प्रवृत्ता । तस्याः स्वल्पग्रन्थतो विवरणमारभ्यते । तस्याः उपोद्घातादिकं कठवल्ल्यादिवत् ऊह्यम् । श्रुतिगदौ तावत् ध्यानयोगसामान्यमुख्यफलप्रकटनपूर्वकं निर्विशेषब्रह्मस्वरूपं प्रकाशयति—यदीति ।

[1] बिन्दुं—अ, अ १. बीज—अ २. [2] नादान्त—अ.

यस्य कस्यचिद्योगिनोऽनन्तकोटिजन्मसञ्चितं विस्तीर्णं बहुयोजनं यदि शैलसमं पापं दुर्भेदं विद्यते तदा तदपि वज्रटङ्कोपमब्रह्मध्यानयोगेन भिद्यते तिलशश्छिद्यते । इत्थंभूतध्यानयोगं विना कदाचन नान्यो भेदो भेदकोऽस्तीत्यर्थः ॥ १ ॥ एवं ध्यानयोगं स्तुत्वा ध्येयस्वरूपमाह—बीजेति । प्रणवो हि बीजाक्षरं अकारोकारमकारार्धमात्रात्मकं तत्परं तु बिन्दु[1]नादकला-कलातीतम् । यः एवंविशेषणविशिष्टः शब्दप्रपञ्चः प्रणवः तस्योपरि निर्विशेषतया यत् स्थितं तत् निःशब्दं इत्यर्थः । सशब्दः प्रणवः चशब्दः तदभिधेयोपलक्षणार्थः । तस्मिन् शब्दप्रपञ्चे स्वाधिकरणपरमाक्षरे क्षीणे विलयमपह्नवं वा गते सति ततो यन्निःशब्दं ब्रह्म अवशिष्यते तदेव परमं पदं विदेहकैवल्यमित्यर्थः ॥ २ ॥ एवंविदं स्तौति—अनाहतमिति । ह्रजत्वात् नित्यत्वाद्वा अनाहतम् । तुशब्दो नित्यत्वख्यापनार्थः । तथाच भाष्यवार्तिककारोक्तेः "नित्यो ह्योङ्कारः" इति, "ओङ्कारस्य तु नित्यत्वात् नाञ्जसोत्पत्तिरिष्यते" इति च । यच्छब्दं शब्दात्मकप्रणवरूपं विद्यते तस्य शब्दस्य यत् परं व्यष्टिसमष्टिसाक्षिरूपं तन् परं निर्विशेषं ब्रह्म यस्तु यो वा को वा स्वमात्रमिति विन्दते सः योगी छिन्नसंशयो विदेहमुक्तो भवति ॥ ३ ॥

ब्रह्मणः सूक्ष्मत्वं सर्वव्यापकत्वं च

वालाग्रशतसाहस्रं तस्य भागस्य भागिनः ।
तस्य भागस्य भागार्धं तत्क्षये तु निरञ्जनम् ॥ ४ ॥
पुष्पमध्ये यथा गन्धः पयोमध्ये यथा घृतम् ।
तिलमध्ये यथा तैलं पाषाणेष्विव काञ्चनम् ॥ ५ ॥
एवं सर्वाणि भूतानि मणौ सूत्र इवात्मनि ।
स्थिरबुद्धिरसंमूढो ब्रह्मविद्ब्रह्मणि स्थितः ॥ ६ ॥

[1] नादकलातीतम्—अ १.

तिलानां तु यथा तैलं पुष्पे गन्ध इवाश्रितः ।
पुरुषस्य शरीरे तु सबाह्याभ्यन्तरे स्थितः ॥ ७ ॥
वृक्षं तु सकलं विद्याच्छाया तस्यैव निष्कला ।
सकले निष्कले भावे सर्वत्रात्मा व्यवस्थितः ॥ ८ ॥

इत्थंभूतयोगिगम्यब्रह्मणो निर्विशेषत्वेन परमसूक्ष्मतामाह—**वालाग्रेति** । वालाग्रं नीवारशूकं दृश्यादृश्यतया स्थितसुसूक्ष्मं, तस्य शतसाहस्रं लक्षैकांशसूक्ष्मं जीवचैतन्यं सूक्ष्मं व्यष्टिप्रपञ्चव्यापकत्वात्, तस्य जीवचैतन्यगतसूक्ष्मस्य शतसहस्रैकभागयुक्तमीश्वरचैतन्यं सूक्ष्मतरं [1]समष्ट्यण्डव्यापकत्वात्, तस्यैवं **भागिनः** ईश्वरस्य **भागार्धं** पञ्चाशत्सहस्रैकभागरूपं साक्षिचैतन्यं सूक्ष्मतमं स्वाविद्यापदतत्कार्यव्यापकत्वात्, साक्ष्यसापेक्षसाक्षिचैतन्यगतसविशेषक्षये तु तत्सर्वकलनानिरञ्जनं अञ्जनीयस्वातिरिक्तासम्भवात् निष्प्रतियोगिकब्रह्ममात्रमवशिष्यते इत्यर्थः ॥ ४ ॥ कथं पुनः साक्षिणोऽविद्यापदव्यापकत्वमित्यत आह—**पुष्पेति** । पुष्पतिलपाषाणेषु गन्धतैलकाञ्चनं यथा व्याप्य वर्तते, यथा मणिगणे सूत्रं, तथैव जीवात्मना **पुरुषस्य शरीरे तु सबाह्याभ्यन्तरे स्थितः** ॥ ५–७ ॥ ईश्वरसाक्ष्यात्मना ब्रश्चनं छेदनमर्हतीति **वृक्षं** तु स्वाविद्यापादं **सकळमिति विद्यात्** । स्वेन रूपेणाविद्यापदवृक्षं छादयत्यावृणोतीति **छाया** माया तु **निष्कळा** निरवयवत्वात् । इत्थं **सकळे निष्कळे भावे** वृक्षच्छायास्थानीयस्वाविद्यापदतद्धेतुमायातत्त्वे **सर्वत्र** तत्कार्ये च **परमात्मा व्यवस्थितः** व्याप्य स्थितः, "अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः" इति श्रुतेः । यद्वा—**सकळे** जीवादिसाक्ष्यन्ते **निष्कळे भावे**—इत्यत्र द्वितीयार्थे सप्तमी—निष्कळभावं गते पुरा स्वाज्ञदशायां **सर्वत्र** स्वातिरिक्तं यदनुभूतं तदात्मैव स्वमात्रं **व्यवस्थितो** भवतीत्यर्थः ॥ ८ ॥

[1] समष्ट्यण्ड—उ १.

प्रणवस्वरूपम्

ओमित्येकाक्षरं ब्रह्म ध्येयं सर्वं मुमुक्षुभिः ।
पृथिव्यग्निश्च ऋग्वेदो भूरित्येव पितामहः ॥ ९ ॥
अकारे तु लयं प्राप्ते प्रथमे प्रणवांशके ।
अन्तरिक्ष यजुर्वायुर्भुवो विष्णुर्जनार्दनः ॥ १० ॥
उकारे तु लयं प्राप्ते द्वितीये प्रणवांशके ।
द्यौः सूर्यः सामवेदश्च स्वरित्येव महेश्वरः ॥ ११ ॥
मकारे तु लयं प्राप्ते तृतीये प्रणवांशके ।
अकारः पीतवर्णः स्याद्रजोगुण उदीरितः ॥ १२ ॥
उकारः सात्त्विकः शुक्लो मकारः कृष्णतामसः ।
अष्टाङ्गं च चतुष्पादं त्रिस्थानं पञ्चदैवतम् ॥ १३ ॥
ओंकारं यो न जानाति ब्राह्मणो न भवेत्तु सः ।

तदर्थं मुमुक्षुभिः किं ध्येयमित्यत आह—**ओमिति** । तस्य सर्वापवादाधिकरणतामाह—**पृथिवीति** ॥ ९ ॥ **प्राप्ते** इति सप्तमी प्रथमार्था । पृथिव्यादिः प्रणवप्रथमांशाकारे विलयं प्राप्तो भवतीत्युक्त्या सम्भूतिस्थितिरपि तत्रेति द्योत्यते । तथा च अन्तरिक्षादिः द्यौरादिश्च क्रमेण उकारे मकारे च संभूतिस्थितिप्रळयं प्राप्नोतीत्यर्थः,

अकारे लीयते ब्रह्मा उकारे लीयते हरिः ।
मकारे लीयते रुद्रः प्रणवो हि परः स्मृतः ॥

इत्यादि श्रुतेः ॥ १०–११ ॥ अकारादिप्रणवमात्राणां त्रिगुणान्वितत्वेन पीतादिवर्णवैशिष्ट्यमुच्यते—**अकार** इति ॥ १२ ॥ अङ्गपादस्थानदेवता-

विशिष्टप्रणवज्ञानाज्ञानाभ्यां ब्राह्मणानां ब्राह्मणत्वं भवेदित्याह—अष्टाङ्गमिति । अकारोकारमकारबिन्दुनादकलाकलातीततत्परभेदेनाष्टावङ्गानि यस्य तं, विश्वतैजसप्राज्ञतुरीयभेदेन व्यष्टौ, समष्टौ तु विराट्सूत्रबीजतुर्यभेदेन, व्यष्टि-समष्ट्यविभागे तु ओतानुज्ञात्रनुज्ञैकरसाविकल्पभेदेन चत्वारः पादा यस्य तं चतुष्पादं, जाग्रदाद्यवस्थात्रयं स्थूलादिदेहत्रयं सत्वादिगुणत्रयं क्रियाशक्त्यादि शक्तित्रयं भूतादिकालत्रयं वा यस्य स्थानमावसथं भवति तं त्रिस्थानं, ब्रह्मविष्णुरुद्रेश्वरसदाशिवा यदवयवाकारादिदेवभावं प्रपेदिरे तं पञ्चदैवतम् ॥ १३ ॥ इत्थंभूतमोङ्कारं यो जानाति स ब्राह्मणो ब्रह्मनिष्ठो जीवन्मुक्तो भवेत् । य एवं न जानाति स ब्राह्मणो न भवेदित्यर्थः ॥

प्रणवध्यानविधिः

प्रणवो धनुः शरो ह्यात्मा ब्रह्म तल्लक्ष्यमुच्यते ॥ १४ ॥
अप्रमत्तेन वेद्धव्यं शरवत्तन्मयो भवेत् ।
निवर्तन्ते क्रियाः सर्वास्तस्मिन्दृष्टे परावरे ॥ १५ ॥
ओंकारप्रभवा देवा ओंकारप्रभवाः स्वराः ।
ओंकारप्रभवं सर्वं त्रैलोक्यं सचराचरम् ॥ १६ ॥
ह्रस्वो दहति पापानि दीर्घः संपत्प्रदोऽव्ययः ।
अर्धमात्रासमायुक्तः प्रणवो मोक्षदायकः ॥ १७ ॥
तैलधारामिवाच्छिन्नं दीर्घघण्टानिनादवत् ।
अवाच्यं प्रणवस्याग्रं यस्तं वेद स वेदवित् ॥ १८ ॥

यत एवमन्तःप्रणवो विशिष्टफलदः अतः तत्साधनेन ब्रह्म जानतस्तद्भावापत्तिः निरङ्कुशं भवेदित्याह—प्रणव इति । अष्टमात्रात्मकान्तःप्रणव एव धनुरिव धनुः शरस्थानीयान्तःकरणाधिकरणत्वात् । शरो ह्यात्मा मनः वेगवत्तरत्वाच्छरस्य । किं लक्ष्यमित्यत्र

ब्रह्म तल्लक्ष्यमुच्यते स्वात्मतया लक्ष्यमाणत्वात् ॥ १४ ॥ तदेतल्लक्ष्यं अप्रमत्तेन एकाग्रचित्तेन वेद्धव्यं अन्तःप्रणवार्थब्रह्मैवास्मीत्यनुसन्धानं कर्तव्यम् । एवं कृते यथा शरो लक्ष्यनिमग्नो भवति तथा तन्मयो ब्रह्मैव भवेत् । सक्रियस्य ब्रह्मभावापत्तिः कुत इत्यत आह—निवर्तन्त इति ॥ १५ ॥ परावग्प्रत्यगभिन्नब्रह्मदर्शनस्य सर्वव्यापृतिन्यासपूर्वकत्वात् ब्रह्मालम्बनोङ्कारस्य सर्वारोपाधिकरणतामाह—ओङ्कारेति ॥ १६ ॥ ह्रस्वदीर्घप्लुततया प्रणवजपफलमाह—ह्रस्व इति । "यदि [1]ह्रस्वो भवति सर्वं पाप्मानं दहति अमृतत्वं च गच्छति । यदि [2]दीर्घो भवति महतीं श्रियमाप्नोति अमृतत्वं च गच्छति । यदि [3]प्लुतो भवति ज्ञानवान् भवति अमृतत्वं च गच्छति" इति श्रुतेः ॥ १७ ॥ प्रणवाग्रज्ञानफलमाह—तैलेति ॥ १८ ॥

प्राणायामपूर्वक प्रणवध्यानम्

हृत्पद्मकर्णिकामध्ये स्थिरदीपनिभाकृतिम् ।
अङ्गुष्ठमात्रमचलं ध्यायेदोंकारमीश्वरम् ॥ १९ ॥
इडया वायुमापूर्य पूरयित्वोदरस्थितम् ।
ओंकारं देहमध्यस्थं ध्यायेज्ज्वालावलीवृतम् ॥ २० ॥
ब्रह्मा पूरक इत्युक्तो विष्णुः कुम्भक उच्यते ।
रेचो रुद्र इति प्रोक्तः प्राणायामस्य देवताः ॥ २१ ॥

कथमोङ्कारो ध्येय इत्यत आह—हृदिति ॥ १९ ॥ किं तूष्णीं ध्यातव्यमित्यत आह—इडयेति । "मूलाम्नावग्निरूपं प्रणवं सन्दध्यात्" इति श्रुत्यनुरोधेन मूलाधारत्रिकोणे जाज्वल्यमानतया प्रणवार्थेश्वरं कुम्भकेऽनुध्यायेत् ॥ २० ॥ प्राणायामावयवदेवतास्वरूपमाह—ब्रह्मेति । पूरकादिकाले ब्रह्मविष्णुरुद्रान् ध्यायेदित्यर्थः ॥ २१ ॥

[1] ह्रस्वा—उ १. [2] दीर्घा—उ १. [3] प्लुता—उ १.

प्रकारान्तरेण प्रणवध्यानम्

आत्मानमरणिं कृत्वा प्रणवं चोत्तरारणिम् ।
ध्याननिर्मथनाभ्यासा[1]देवं पश्येन्निगूढवत् ॥ २२ ॥
ओंकारध्वनिनादेन वायोः संहरणान्तिकम् ।
[2]यावद्बुलं समादध्यात्सम्यङ्नादलयावधि ॥ २३ ॥
गमागमस्थं गमनादिशून्यमोंकारमेकं रविकोटिदीप्तम् ।
पश्यन्ति ये सर्वजनान्तरस्थं हंसात्मकं ते विरजा भवन्ति ॥२४॥

विधान्तरेश्वरध्यानमाह—आत्मानमिति । आत्मानं अन्तःकरणं अधरारणिं कृत्वा प्रणवमुत्तरारणिं प्रणवोच्चारणपूर्वकं प्रणवार्थब्रह्माहमस्मीति पौनःपुन्येनानुसन्धानं ध्याननिर्मथनाभ्यासः तस्मात् निगूढकलशान्तरदीपवत् एवं आत्मानमयमहमस्मीति पश्येत् अवलोकयेदित्यर्थः ॥ २२ ॥ प्रणवोच्चारणप्रणवनादावसानविद्योतब्रह्मदर्शनफलमाह—ओङ्कारेति । यावद्बुलमोङ्कारोच्चारणप्रभवनादवायुविलयाधिकरणतया यत् विभाति तत् स्वाज्ञदृष्ट्या गमनागमनलक्षणनादरूपप्राणोपाधिस्थमिव भातमपि स्वज्ञदृष्ट्या गमनादिशून्यं अनन्तकोटिरविप्रभं सर्वान्तरं हंसात्मकं प्रत्यगभिन्नब्रह्मरूपं ये पश्यन्ति ते विरजाः कृतकृत्याः भवन्तीत्यर्थः ॥ २३–२४ ॥

सविशेषब्रह्मध्यानम्

यन्मनस्त्रिजगत्सृष्टिस्थिति[3]प्रलयकर्मकृत् ।
तन्मनो विलयं याति तद्विष्णोः परमं पदम् ॥ २५ ॥
अष्टपत्रं तु हृत्पद्मं द्वात्रिंशत्केसरान्वितम् ।
तस्य मध्यगतो भानुर्भानुमध्यगतः शशी ॥ २६ ॥

[1] देवं—अ, अ १. [2] यावद्बन्धः—अ २. [3] व्यसन—अ, अ १, अ २, क.

शशिमध्यगतो वह्निर्वह्निमध्यगता प्रभा ।
प्रभामध्यगतं पीठं नानारत्नप्रवेष्टितम् ॥ २७ ॥
तस्य मध्यगतं देवं वासुदेवं निरञ्जनम् ।
श्रीवत्सकौस्तुभोरस्कं मुक्तामणिविभूषितम् ॥ २८ ॥
शुद्धस्फटिकसंकाशं चन्द्रकोटिसमप्रभम् ।
एवं ध्यायेन्महाविष्णुमेवं वा विनयान्वितः ॥ २९ ॥

ब्रह्ममात्रावरणं मनः, तदपह्नवतो निष्प्रतियोगिकं ब्रह्ममात्रं प्रकाशते इत्याह—यदिति ॥ २९ ॥ एवं ध्यातुमशक्तस्य यथोक्तलक्षणहृत्कमले सविशेषब्रह्मध्यानप्रकारमाह—अष्टपत्रमिति ॥ २७-२८ ॥ एवं कल्पनासृष्टमित्यर्थः । एवं ध्यानं कृतं चेत् तत्प्रसादलब्धचित्तशुद्धिप्राप्यज्ञानद्वारा कृतकृत्यो भवेत् । एवं कर्तुमलसस्य एवं वा वक्ष्यमाणपूरकादौ त्रिमूर्तिध्यानमाह—एवमिति ॥ २९-३१ ॥

त्रिमूर्तिध्यानम्

अतसीपुष्पसंकाशं नाभिस्थाने प्रतिष्ठितम् ।
चतुर्भुजं महाविष्णुं पूरकेण विचिन्तयेत् ॥ ३० ॥
कुम्भकेन हृदि स्थाने चिन्तयेत्कमलासनम् ।
ब्रह्माणं रक्तगौराभं चतुर्वक्त्रं पितामहम् ॥ ३१ ॥
रेचकेन तु विद्यात्मा ललाटस्थं त्रिलोचनम् ।
शुद्धस्फटिकसंकाशं निष्कलं पापनाशनम् ॥ ३२ ॥

विद्यात्मा सगुणविद्याविशिष्टोपासकः । वस्तुतो निष्कलं ॥ ३२ ॥

हृदये ध्यानं तत्फलं च

अब्जपत्रमधःपुष्पमूर्ध्वनालमधोमुखम् ।
कदलीपुष्पसंकाशं [1]सर्ववेदमयं शिवम् ॥ ३३ ॥
शताब्दं शतपत्राढ्यं विप्रकीर्णाब्जकर्णिकम् ।
तत्रार्कचन्द्रवह्नीनामुपर्युपरि चिन्तयेत् ॥ ३४॥
पद्मस्योद्घाटनं कृत्वा [2]सूर्यचन्द्राग्निवर्चसः ।
तस्य हृद्बीजमाहृत्य आत्मानं चरते ध्रुवम् ॥ ३५ ॥
त्रिस्थानं च [3]त्रिमार्गं च त्रिब्रह्म च त्रयाक्षरम् ।
त्रिमात्रमर्धमात्रं वा यस्तं वेद स वेदवित् ॥ ३६ ॥
तैलधारामिवाच्छिन्नं दीर्घघण्टानिनादवत् ।
[4]अवाच्यं प्रणवस्याग्रं यस्तं वेद स वेदवित् ॥ ३७ ॥

ध्यानाधारहृदयं विधान्तरेण वर्णयति--**अब्जेति** ॥ अब्जं अब्जातं अम्मयं शरीरं परितः त्रायत इति **अब्जपत्रं** हृत्कमलं, **अधःपुष्पं** अधोभागकुसुमितत्वात्, **ऊर्ध्वनालमधोमुखं** लम्बमानकदळीपुष्पसदृशं, **सर्ववेदमयं** वेदहेतुनादाधारत्वात्, अत एव **शिवम्** ॥ ३३ ॥ **शताब्दं** शतायुःपरिमितस्थितित्वात्, **शतपत्राढ्यं** शतपत्रकुशेशयोपमत्वात्, **विप्रकीर्णाब्जकर्णिकं** विकसितपद्मकर्णिकोपमं हृत्कमलं यदस्ति तस्य लम्बमान**सूर्यचन्द्राग्निवर्चसः** हृत्पद्मस्य प्रणवेनोद्घाटनं कृत्वा ऊर्ध्वमुखं विधाय तत्र **अर्कचन्द्रवह्नीनां** मण्डलं **उपर्युपरि चिन्तयेत्** भावयेत् । **तस्य** हृत्पद्मस्य

[1] सर्वदेव—अ २. सर्ववेदमवाङ्मुखं—अ, अ १.
[2] बोधचन्द्राग्निसूर्यकं—अ, अ १. [3] त्रिमात्रं—अ, अ १, अ २, क.
[4] बिन्दुनादकलातीतं—अ, अ १, अ २, क.

हृद्बीजमकाराख्यं तदाहृत्य गृहीत्वा तद्रूपं ध्रुवमात्मानं सम्भाव्य ततस्तत्राकाराथौ विष्णुश्चरते—पदव्यत्ययः—चरति ॥ ३४–३५ ॥ एवं चरन्तं हंसमात्मानं प्रणवत्वेन चिन्तयतः जीवन्मुक्ततामाह—त्रिस्थानमिति । अवस्थात्रयादि-स्थानत्रयं यस्य तं, यद्याथात्म्यविदः [1]स्वज्ञानानुरोधेन धूमार्चिरगतिभेदेन यत् यान्ति तं त्रिमार्गं, विश्वविराडोतृब्रह्मादिभेदेन ब्रह्मत्रयं यदर्थभूतं तं त्रिब्रह्मात्मकं, अकारादित्रीण्यक्षराणि यदवयवतयोक्तानि तं त्र्याक्षरं, ह्रस्वदीर्घप्लुतभेदेन तिस्रो मात्रा यस्य तं त्रिमात्रमर्धमात्रं वा, यः तं वेद स वेदवित् जीवन्मुक्तो भवतीत्यर्थः ॥ ३६ ॥ "ओङ्काराग्रविद्योतं तुर्यतुरीयं" इति श्रुत्यनुरोधेन प्रणवाग्रदर्शनफलमाह—तैलेति ॥ ३७ ॥

ब्रह्मायतने प्राणविलापनम्

यथैवोत्पलनालेन तोयमाकर्षयेन्नरः ।
तथैवोत्कर्षयेद्वायुं योगी योगपथे स्थितः ॥ ३८ ॥
अर्धमात्रात्मकं कृत्वा कोशभूतं तु पङ्कजम् ।
कर्षयेन्नालमात्रेण भ्रुवोर्मध्ये लयं नयेत् ॥ ३९ ॥
भ्रूमध्ये तु ललाटे तु [2]नासिकायास्तु मूलतः ।
जानीयादमृतस्थानं तद्ब्रह्मायतनं महत् ॥ ४० ॥

परागवायुं प्रत्यङ्मुखं नीत्वा ब्रह्मायतने विलापयेदित्याह—यथेति । यथैव नरः उत्पलनालेन तोयमाकर्षयेत् तथैव योगी योगमार्गे तिष्ठन् मूलाधारात् अपानैक्यमापन्नप्राणवायुमूर्ध्वं उत्कर्षयेत् सुषुम्नायामूर्ध्वमुखं नयेत् ॥ ३८ ॥ पुनः स्थूलसूक्ष्मबीजभावमापन्नं दृष्टिमनोग्निभिरेकीभूतं कोशभूतं यत् हृदयपङ्कजं वर्तते तत्र अर्धमात्रात्मकं कृत्वा सुषुम्नामार्गेण भ्रुवोर्मध्ये लयं नयेत् विलयं प्रापयेत् ॥ ३९ ॥ प्राणलयाधिकरणं कीदृशमित्यत आह—

[1] सज्ञा—उ. [2] नासिकायां तु—अ, अ २.

भ्रूमध्ये त्विति । भ्रूमध्यस्य ब्रह्मोपलब्धिस्थानत्वात् । तुशब्दत्रयतः तस्मात् बहिर्निर्गतमपि तत्रैव पुनःपुनः लयं नयेदिति द्योत्यते ॥ ४० ॥

षडङ्गयोगः

आसनं प्राणसंरोधः प्रत्याहारश्च धारणा ।
ध्यानं समाधिरेतानि योगाङ्गानि भवन्ति षट् ॥ ४१ ॥

अमृतस्थाने प्राणादिलयस्य सुषुम्नाद्वाग्कत्वात्, नहि सुषुम्नाप्रवेशः सर्वसाधारणो भवति, नहि योगाभ्यासं विना सुषुम्नामार्गः स्प्रष्टुं शक्यते, अतस्तदुपायत्वेन षडङ्गयोग उच्यते—आसनमिति ॥ ४१ ॥

आसनचतुष्टयम्

आसनानि च तावन्ति यावन्त्यो जीवजातयः ।
एतेषामतुलान्भेदान् विजानाति महेश्वरः ॥ ४२ ॥
सिद्धं भद्रं तथा सिंहं पद्मं चेति चतुष्टयम् ।

योगासनानामनेकत्वात् तत्र श्रेष्ठतया सिद्धाद्यासनचतुष्टयमुद्दिशति—आसनानीति । असंख्येयतया दुर्विज्ञेयत्वात् एतेषामिति ॥ ४२ ॥ तेषु मुख्यान्यासनचतुष्टयानीत्यत्र सिद्धं इति । तत्प्रतिपादकश्रुतयो लिख्यन्ते—

योनिं वामेन सम्पीड्य मेढ्रादुपरि दक्षिणम् ।
ऋजुकायः समासीनः सिद्धासनमिदं भवेत् ॥
गुल्फौ तु वृषणस्याधः सीविन्याः पार्श्वयोः क्षिपेत् ।
पार्श्वपादौ च पाणिभ्यां दृढं बध्वा सुनिश्चलम् ।
भद्रासनं भवेदेतद्विषरोगविनाशनम् ॥

सीविनीं गुल्फदेशाभ्यां निपीड्य व्युत्क्रमेण तु ।
प्रसार्य जानुनोर्हस्तावासनं सिंहरूपकम् ॥
ऊर्वोरुपरि वै धत्ते यदा पादतले उभे ।
पद्मासनं भवेदेतत् सर्वव्याधिविषापहम् ॥
इति ॥

योनिस्थानम्

आधारं प्रथमं चक्रं स्वाधिष्ठानं द्वितीयकम् ॥ ४३ ॥
योनिस्थानं तयोर्मध्ये कामरूपं निगद्यते ।
आधाराख्ये गुदस्थाने पङ्कजं यच्चतुर्दलम् ॥ ४४ ॥
तन्मध्ये प्रोच्यते योनिः कामाख्या सिद्धवन्दिता ।
योनिमध्ये स्थितं लिङ्गं पश्चिमाभिमुखं तथा ॥ ४५ ॥
मस्तके मणिवद्भिन्नं यो जानाति स योगवित् ।

ततो मूलाधारस्वाधिष्ठानमध्यगतव्यष्टिप्रपञ्चयोन्यादिज्ञानफलं षडाधार-स्वरूपं च विशदयति—**आधारमिति** ॥ ४३ ॥ मूलाधारस्वाधिष्ठानमध्ये योनिस्थानं वर्तते इत्युक्तम् । तत्र योनिः कीदृशीत्यत आह—**आधारेति** ॥ ४४ ॥ मूलाधारचतुर्दळमध्ये व्यष्टिसंसारप्रवृत्तिनिवृत्तिहेतुतया योगायोगसिद्धैरपि वन्दिता कामरूपिणी नाम काचन योनिः कुण्डलिनीशक्तिः विद्यते । तस्याः सिद्धासिद्धवन्दितत्वं कथमित्यत्र—यदि हृदयादूर्ध्वगामिनी स्यात्तदा निवृत्तिमार्गभूषणसिद्धसेव्या भवति । यदा पुनः स्वस्थानान्न चलति तदा प्रवृत्तिहेतुतया संसारिसेविता भवतीत्यर्थः । तादृशयोनिमध्ये कुण्डलिनीमध्यप्रदेशे मस्तकभागे **मणिवत् भिन्नं** स्वयं प्रकाशितं **पश्चिमाभिमुखं** प्रत्यगात्मलिङ्गं विद्यते । प्रवृत्तिनिवृत्तिप्रकाशकत्वात् तदस्मीति **यो जानाति स योगवित्** प्रत्यक्परैक्यज्ञो जीवन्मुक्तो भवतीत्यर्थः ॥ ४५–४६ ॥

मूलाधारादिचतुश्चक्रस्वरूपम्

तप्तचामीकराकारं तडिल्लेखेव विस्फुरत् ॥ ४६ ॥
चतुरस्रमुपर्यग्नेरधो मेढ्रात्प्रतिष्ठितम् ।
स्वशब्देन भवेत्प्राणः स्वाधिष्ठानं तदाश्रयम् ॥ ४७ ॥
स्वाधिष्ठानं ततश्चक्रं मेढ्रमेव निगद्यते ।
मणिवत्तन्तुना यत्र वायुना पूरितं वपुः ॥ ४८ ॥
तन्नाभिमण्डलं चक्रं प्रोच्यते मणिपूरकम् ।
द्वादशारमहाचक्रे पुण्यपापनियन्त्रितः ॥ ४९ ॥
तावज्जीवो भ्रमत्येवं यावत्तत्त्वं न विन्दति ।

ततो मूलाधारस्वरूपमाह—तप्तेति । मूलाधारचक्रस्याग्निमण्डलमेढ्रमध्यगतत्वात् ॥ ४६–४७ ॥ स्वाधिष्ठानस्वरूपमाह—स्वेति । लिङ्गमूले षड्दळयुक्तं स्वाधिष्ठानमित्यर्थः ॥ ४७–४८ ॥ मणिपूरकं व्युत्पादयति- मणिवदिति । दशदळान्वितं मणिपूरकमित्यर्थः । तत अनाहतचक्रं द्वादशदळं षोडशदळं विशुद्धिचक्रं द्विदळमाज्ञाचक्रं तदुपरि चन्द्रसूर्यमण्डलं तदुपरि सहस्राग्चक्रं विद्यते इति मन्तव्यम् ॥ ४८–४९ ॥ तत्रानाहतचक्रे जीवात्मस्वरूपमाह—द्वादशेति । तत्रत्यो जीवो यावत् स्वयाथात्म्यं न जानाति तावत् संसरति, स्वज्ञानेन स्वाज्ञाने नष्टे जीवस्य ब्रह्ममात्रत्वादित्यर्थः ॥ ४९–५० ॥

नाडीचक्रम्

ऊर्ध्वं मेढ्रादधो नाभेः कन्दो योऽस्ति खगाण्डवत् ॥ ५० ॥
तत्र नाड्यः समुत्पन्नाः सहस्राणि द्विसप्ततिः ।
तेषु नाडीसहस्रेषु द्विसप्ततिरुदा[1]हृता ॥ ५१ ॥

[1] हृताः-

प्रधानाः प्राणवाहिन्यो भूयस्तत्र दश स्मृताः ।
इडा च पिङ्गला चैव सुषुम्ना च तृतीयका ॥ ९२ ॥
गान्धारी हस्तिजिह्वा च पूषा चैव यशस्विनी ।
अलम्बुसा कुहूरत्र शङ्खिनी दशमी स्मृता ॥ ९३ ॥
एवं नाडीमयं चक्रं विज्ञेयं योगिनां सदा ।
सततं प्राणवाहिन्यः सोमसूर्याग्निदेवताः ॥ ९४ ॥
इडापिङ्गलासुषुम्नास्तिस्रो नाड्यः प्रकीर्तिताः ।
इडा वामे स्थिता [1]नाडी पिङ्गला दक्षिणे स्थिता ॥ ९५ ॥
सुषुम्ना मध्य[2]देशस्था प्राणमार्गास्त्रयः स्मृताः ।

ततो नाडीकन्दस्थानं तदियत्तामधिदेवतासहितप्रधाननाडीस्वरूपं चाह—ऊर्ध्वमिति ॥ ९०–९३ ॥ योगिनां, तृतीयार्थे षष्ठी, योगिभिरित्यर्थः । एतत् सर्वं स्पष्टमिति न व्याख्यातम् ॥ ९४–९६ ॥

प्राणादिदशवायवः

प्राणोऽपानः समानश्चोदानो व्यानस्तथैव च ॥ ९६ ॥
नागः कूर्मः कृकरको देवदत्तो धनंजयः ।
प्राणाद्याः पञ्च विख्याता नागाद्याः पञ्च वायवः ॥ ९७ ॥
एते नाडीसहस्रेषु वर्तन्ते जीवरूपिणः ।

जीवाधिष्ठेयनाडीचरप्राणादिदशवायुनाम निर्दिशति—प्राण इति ॥ ९७ ॥ तत्र प्राणाद्याः पञ्च प्रधानतया विख्याताः नागाद्या वायवस्तु

[1] भागे—क, अ १, अ २. [2] देशे तु—अ १. देशस्थाः—अ २.

उपप्राणाः उच्यन्ते ॥ ५७ ॥ तेषां जीवरूपेण नाडीचरत्वं जीवस्य प्राणापानवशतः यातायातत्वमविश्रान्तमित्याह एत्त इति ॥ ५८ ॥

जीवस्य प्राणापानवशत्वम्

प्राणापानवशो जीवो ह्यधश्चोर्ध्वं च धावति ॥ ५८ ॥
वामदक्षिणमार्गेण चञ्चलत्वान्न दृश्यते ।
आक्षिप्तो भुजदण्डेन यथोच्चलति कन्तुकः ॥ ५९ ॥
प्राणापानसमाक्षिप्तस्तद्वज्जीवो न विश्रमेत् ।

अविश्रान्तत्वे दृष्टान्तः आक्षिप्त इति ॥ ५९ ॥

योगकाले प्राणापानैक्यम्

अपानात्कर्षति प्राणोऽपानः प्राणाच्च कर्षति ॥ ६० ॥
खगरज्जुवदित्येतद्यो जानाति स योगवित् ।

योगकाले प्राणापानैक्यं तज्ज्ञानफलं चाह अपानादिति । प्राणादपानादिति पञ्चमी द्वितीयार्था ॥ ६० ॥

अजपाहंसविद्या

हकारेण बहिर्याति सकारेण विशेत्पुनः ॥ ६१ ॥
हंसहंसेत्यमुं मन्त्रं जीवो जपति सर्वदा ।
शतानि षड् दिवारात्रं सहस्राण्येकविंशतिः ॥ ६२ ॥
एतत्संख्याऽन्वितं मन्त्रं जीवो जपति सर्वदा ।
अजपा नाम गायत्री योगिनां मोक्षदा सदा ॥ ६३ ॥

अस्याः संकल्पमात्रेण नरः पापैः प्रमुच्यते ।
अनया सदृशी विद्या अनया सदृशो जपः ॥ ६४ ॥
अनया सदृशं पुण्यं न भूतं न भविष्यति ।

अहोरात्रनिर्वर्त्योच्छ्वासनिःश्वासरूपहंसविद्याऽजपास्वरूपमाह — **हकारेणेति** ॥ ६१ ॥ प्राणापानव्यापारोच्छ्वासनिःश्वासव्यापार एव हंसमनुः तं **हंसहंसेत्यमुं मन्त्रं** हंसमन्यावर्तनसंख्येयत्तामाह — **शनानीति** ॥ ६२ ॥ स्वयमजपन् तूष्णीं तिष्ठन्नपि एतत् इति । या अजपतां जपभावमेति सेयं **अजपा गायत्री** सदैवमनुसन्धानयोगिनां **मोक्षदा** भवति ॥ ६३ ॥ यतः एवं अतः **अस्याः** इति । अजपां स्तौति—**अनयेति** ॥ ६४ ॥

कुण्डलिनीबोधनेन मोक्षद्वारविभेदनम्

येन मार्गेण गन्तव्यं [1]ब्रह्मस्थानं निरामयम् ॥ ६५ ॥
मुखेनाच्छाद्य तद्द्वारं प्रसुप्ता परमेश्वरी ।
प्रबुद्धा वह्नियोगेन मनसा मरुता सह ॥ ६६ ॥
सूचिवद्व्रणमादाय व्रजत्यूर्ध्वं सुषुम्नया ।
उद्घाटयेत्कपाटं तु यथा [2]कुञ्चिकया हठात् ॥ ६७ ॥
कुण्डलिन्या तथा योगी मोक्षद्वारं विभेदयेत् ॥ ६८ ॥
कृत्वा संपुटितौ करौ दृढतरं बध्वाऽथ पद्मासनं
गाढं वक्षसि सन्निधाय चुबुकं ध्यानं च तच्चेतसि ।
वारंवारमपानमूर्ध्वमनिलं प्रोच्चारयन्पूरितं
मुञ्चन्प्राणमुपैति बोध[3]मतुलं शक्ति[4]प्रभावान्नरः ॥ ६९ ॥

[1] ब्रह्मरन्ध्रं—क. ब्रह्मद्वारं—अ २. [2] कुञ्चितया—अ १, अ २.
[3] ममलं—क. [4] प्रवाहान्न—अ २ (पाठान्तरत्वेन).

कुण्डलिनीस्थितिमाह— येनेति । "तुरीयं मूर्ध्नि संस्थितं" इति श्रुत्यनुरोधेन सहस्रारचक्रं ब्रह्मस्थानं, तत्रैवोपलभ्यते हि ब्रह्म योगिनाम् । तत्र स्वातिरिक्तामयवैरळ्यात् निरामयम ॥ ६५ ॥ येन सुषुम्नामार्गेण तद्गन्तव्यं तद्द्वारं स्वमुखेन आच्छाद्य परमेश्वरी कुण्डलिनी प्राणिसामान्यजठरे प्रसुप्ता भवति । सा कदा प्रतिबुध्यते इत्यत्र योगिनः केवलकुम्भकावस्थायां मूलाधारस्थाग्निना मनसा मरुता च सह प्रबुद्धा सती ॥ ६६ ॥ सूक्ष्मसूचिवत् गुणं भोगमादाय सुषुम्नयोर्ध्वं ब्रह्मस्थानं सहस्रारं व्रजति । कुण्डलिन्या सुषुम्नावदनं विभेदयेदित्याह—उद्घाटयेदिति । यथा नरो हठात् कुञ्चिकाप्रयत्नेन कवाटमुद्घाटयेत् तथैव योगी कुण्डलिन्या मोक्षहेतुसुषुम्नाद्वारं विभेदयेदित्यर्थः ॥ ६७–६८ ॥ सुषुम्नामार्गभेदोपायमाह— कृत्वेति । आदौ योगी पद्मासनं बद्ध्वा अथ स्वकरौ संपुटितौ कृत्वा वक्षसि चुबुकं चेतसि स्वस्वरूपध्यानं च सन्निधाय वारंवारमपानानिलमूर्ध्वं प्रोद्धारयन् आकुञ्चयन् एवं पूरितं प्राणं सुषुम्नायां मुञ्चन् नरो योगी सुषुम्नां प्रविष्टकुण्डलिनीशक्तिप्रभावात् निरुपमं अतुलं निरतिशयं ब्रह्माहं अहमेव ब्रह्मेति ब्रह्मात्मबोधमुपैति ॥ ६९ ॥

ब्रह्मचर्यादिना कुण्डलिनीबोधः

पद्मासनस्थितो योगी नाडीद्वारेषु पूरयन् ।
मारुतं कुम्भयन्यस्तु स मुक्तो नात्र संशयः ॥ ७० ॥
अङ्गानां मर्दनं कृत्वा श्रमजातेन वारिणा ।
कटुम्ललवणत्यागी क्षीरपानरतः सुखी ॥ ७१ ॥
ब्रह्मचारी मिताहारी योगी योगपरायणः ।
अब्दादूर्ध्वं भवेत्सिद्धो नात्र कार्या विचारणा ॥ ७२ ॥
[1]कन्दोर्ध्वकुण्डलीशक्तिः स योगी सिद्धिभाजनम् ।

[1] कन्दोर्ध्वे—उ.

एवं सुषुम्नाकुम्भकान्मुक्तो भवतीत्याह पद्मेति । यस्तु पुनः योगी पद्मासने स्थित्वा बाह्यं वायुमिडया आकृष्य नाडीद्वारेषु पूरयन् पूरितं मारुतं कुम्भयन् सुषुम्नां प्रापयित्वा यदा योगी ब्रह्मरन्ध्रं भिनत्ति सोऽयं योगी ततो ब्रह्मरन्ध्रं भित्त्वा यत्प्राप्यं तत् प्राप्य मुक्तो भवतीत्यत्र न हि संशयोऽस्तीत्यर्थः ॥ ७० ॥ तत्रोपायमाह —अङ्गानामिति । अभ्यासदशाया-मादौ प्राणायामकाले स्वेदो जायते । तेन सर्वाङ्गानां मर्दनं कृत्वा दृढकायो भूत्वा तदानीं कटूम्ललवणत्यागी क्षीरपानरतः सुखी ॥ ७१ ॥ एवं ब्रह्मचर्यादिनियमसम्पन्नो भूत्वा संवत्सरादूर्ध्वं सिद्धो भवति ॥ ७२ ॥ यस्य नाडीकन्दोर्ध्वभागे सुषुम्नायां कुण्डलिनीशक्तिः स्यात् सोऽयं योगी योगसिद्धिभाजनं भवति ॥

बन्धत्रयम्

अपानप्राणयोरैक्यं [1]क्षयान्मूत्रपुरीषयोः ॥ ७३ ॥
युवा भवति वृद्धोऽपि सततं मूलबन्धनात् ।
पार्ष्णिभागेन संपीड्य योनिमाकुञ्चयेद्गुदम् ॥ ७४ ॥
अपानमूर्ध्वमुत्कृष्य मूलबन्धोऽयमुच्यते ।
उड्यानं कुरुते यस्मादविश्रान्तमहाखगः ॥ ७५ ॥
उड्डियाणं तदेव स्यात्तत्र बन्धो विधीयते ।
उदरे पश्चिमं ताणं नाभेरूर्ध्वं तु कारयेत् ॥ ७६ ॥
उड्डियाणोऽप्ययं बन्धो मृत्युमातङ्गकेसरी ।
बध्नाति हि शिरोजातमधोगामिनभोजलम् ॥ ७७ ॥
ततो जालन्धरो बन्धः कण्ठदुःखौघनाशनः ।
जालन्धरे कृते बन्धे कण्ठ[2]संकोचलक्षणे ॥ ७८ ॥

[1] क्षयोमू—अ १. [2] दुःखौघल—अ २.

तदङ्गत्वेन बन्धत्रयं तत्फलं चाचष्टे—अपानेति ॥ ७३–७५ ॥ उदरसङ्कोचनं पश्चिमं ताणमित्यर्थः ॥ ७६ ॥ अयमुड्डियाणबन्धः शिरोनभोजातं सहस्रारनभोविद्यमानं सर्वरोगाकरं कफजलं बध्नाति शुष्कं करोतीत्यर्थः ॥ ७७–७८ ॥

खेचरीमुद्राऽभ्यासः

न पीयूषं पतत्यग्नौ न च वायुः प्रधावति ।
कपालकुहरे जिह्वा प्रविष्टा विपरीतगा ॥ ७९ ॥
भ्रुवोरन्तर्गता दृष्टिर्मुद्रा भवति खेचरी ।
न रोगो मरणं तस्य न निद्रा न क्षुधा तृषा ॥ ८० ॥
न च मूर्च्छा भवेत्तस्य यो मुद्रां वेत्ति खेचरीम् ।
पीड्यते न च रोगेण लिप्यते न च कर्मणा ॥ ८१ ॥
बध्यते न च कालेन यस्य मुद्राऽस्ति खेचरी ।
चित्तं चरति खे यस्माज्जिह्वा भवति खेगता ॥ ८२ ॥
तेनैषा खेचरी नाम मुद्रा सिद्धनमस्कृता ।

योगाङ्गतया बन्धत्रयमुक्त्वाऽथ खेचरीमुद्रां तदभ्याससिद्धफलं चाह—कपालेति ॥ ७९ ॥ तदभ्यासान्तगळिकफलं तु न रोग इति ॥ ८०–८२ ॥

खेचर्यभ्यासेन वज्रोलिसिद्धिः

खेचर्या मुद्रया यस्य विवरं [1]लम्बिकोर्ध्वतः ॥ ८३ ॥
[2]बिन्दुः क्षरति नो यस्य कामिन्यालिङ्गितस्य च ।
यावद्बिन्दुः स्थितो देहे तावन्मृत्युभयं कुतः ॥ ८४ ॥

[1] बन्धि—अ २. [2] बीजं—अ २.

यावद्बद्धा नभोमुद्रा तावद्बिन्दुर्न गच्छति ।
गलितोऽपि यदा बिन्दुः संप्राप्तो योनिमण्डले ॥ ८९ ॥
व्रजत्यूर्ध्वं हठाच्छक्त्या निबद्धो योनिमुद्रया ।

खेचरीमुद्रारूढस्य जीवनहेतुबिन्दुस्थैर्यं वज्रोळिसिद्धिरपि भवतीत्याह— खेचर्येति । खेचर्या मुद्रया यस्य जिह्वा लम्बिकायाः अन्तर्जिह्वाया ऊर्ध्वतः तद्विवरं प्रविशति ॥ ८३ ॥ यच्छब्दस्तच्छब्दार्थः । अप्यर्थः चकारः । कामिन्यालिङ्गितस्यापि यस्य तस्य नैव बिन्दुः शुक्रं क्षरति । यावद्बिन्दुस्थैर्यं जायते तावत्तस्य मृत्युभयं कुतः संभवति ॥ ८४ ॥ यावत्खेचरीमुद्रा बद्धा भवेत् तावद्बिन्दुः न गच्छति । यदा गलितोऽपि बिन्दुः योनिमण्डले संप्राप्तोऽपि ॥ ८९ ॥ तदा वज्रोळिसंस्कृतयोनिमुद्रया हठाच्छक्त्या ऊर्ध्वं व्रजति ॥

द्विविधबिन्दैक्यबोधतो जीवन्मुक्तत्वम्

स एव द्विविधो बिन्दुः पाण्डरो लोहितस्तथा ॥ ८६ ॥
पाण्डरं शुक्रमित्याहुर्लोहिताख्यं महारजः ।
विद्रुमद्रुमसंकाशं योनिस्थाने स्थितं रजः ॥ ८७ ॥
शशिस्थाने वसेद्बिन्दुस्तयोरैक्यं सुदुर्लभम् ।
बिन्दुः शिवो रजः शक्तिर्बिन्दुरिन्दू रजो रविः ॥ ८८ ॥
उभयोः संगमादेव प्राप्यते परमं वपुः ।
वायुना शक्ति[1]चालेन प्रेरितं खे यथा रजः ॥ ८९ ॥
रविणैकत्वमायाति भवेद्दिव्यवपु[2]स्तदा ।
शुक्रं चन्द्रेण संयुक्तं रजः सूर्यसमन्वितम् ॥ ९० ॥
द्वयोः समरसीभावं यो जानाति स योगवित् ।

[1] जालेन—अ १. [2] स्तथा—क, अ १.

बिन्दोर्द्वैविध्यं तयोरैक्यप्रबोधतो जीवन्मुक्तत्वं चाह—स एवेति ॥ ८६ ॥ मूलाधारस्थं योनिस्थानं तत्र रजो देवीतत्त्वं जीवाख्यं वा भवति ॥ ८७ ॥ भ्रूमध्यसहस्रारमध्यं शशिस्थानं, तत्र बिन्दुः शिवतत्त्वं वर्तते। तयोः शिवशक्त्योः जीवपरयोर्वा ऐक्यं योगिनो विना यस्य कस्यापि दुर्लभं भवेत् ॥ ८८–९० ॥ शुक्रजोरूपभ्रूसहस्रारमध्यस्थसोमसूर्यैक्यं यो जानाति स योगवित् ब्रह्मवित् भवतीत्यर्थः ॥

महामुद्राऽभ्यासः

शोधनं मलजालानां घटनं चन्द्रसूर्ययोः ॥ ९१ ॥
रसानां शोषणं सम्यङ् महामुद्राऽभिधीयते ॥ ९२ ॥
वक्षोन्यस्तहनुर्निपीड्य सुषिरं योनेश्च वामाङ्घ्रिणा
हस्ताभ्यामनुधारयन् प्रविततं पादं तथा दक्षिणम् ।
आपूर्य श्वसनेन कुक्षियुगलं बध्वा शनै रेचये-
देषा पातक[1]नाशिनी ननु महामुद्रा नृणां प्रोच्यते ॥९३॥

महामुद्रालक्षणमुच्यते - शोधनमिति । नानासाधनसिद्धरेचकपूरक-कुम्भकात्मकप्राणायामशुद्धोदकेन नाडीगतमलजातशोधनं चन्द्रसूर्ययोरैक्यं वातपित्तादिरसानां शोषणं च यया भवति सेयं महामुद्रेत्यभिधीयते ॥ ९१–९२ ॥ महामुद्राभ्याममाह - वक्ष इति । आदौ योगी जालन्ध-रबन्धमारोप्य वामाङ्घ्रिणा योनिसुषिरं निपीडय प्रसारितदक्षिणपादं हस्ताभ्यां धारयन् कुक्षियुगळं श्वसनेनापूर्य कुम्भयित्वाऽथ शनैरिडया रेचयेत् । सैषा रीतिः सर्वपातकनाशिनी नृणां योगिनां योगविघ्ननाशिनी महामुद्रेति प्रोच्यते ॥ एवं प्राणायाम उक्तः । अनात्मदेहादि[2]गताहंभावं [त्यक्त्वा] प्रतीचि प्रत्याहरणं

[1] नाशनी—उ, मु. [2] गतं भा—उ १.

प्रत्याहारः । प्रत्यगेव ब्रह्मेति निश्चयो धारणा भवति । अहं ब्रह्माऽस्मि ब्रह्मैवाऽहमस्मि इति दृढभावना ध्यानम् । ध्यानादित्रिपुटीविकल्पलयो निर्विकल्पसमाधिः । "षडङ्गो योग उच्यते" इति प्रतिज्ञातत्वात् तदनुरोधेन प्रतिवचनाभावेऽप्येवं प्रत्याहारादि ऊह्यमित्यर्थः ॥ ९३ ॥

हृदये आत्मसाक्षात्कारः

अथात्मनिर्णयं व्याख्यास्ये—हृदि स्थाने अष्टदलपद्मं वर्तते तन्मध्ये रेखावलयं कृत्वा जीवात्मरूपं ज्योतीरूपमणुमात्रं वर्तते । तस्मिन्सर्वं प्रतिष्ठितं भवति सर्वं जानाति सर्वं करोति सर्वमतच्चरितमहं कर्ताऽहं भोक्ता सुखी दुःखी काणः खञ्जो बधिरो मूकः कृशः स्थूलोऽनेन प्रकारेण स्वतन्त्रवादेन वर्तते ॥ ९३–१ ॥ पूर्वदले विश्रमते पूर्वदलं श्वेतवर्णं तदा भक्तिपुरःसरं धर्मे मतिर्भवति ॥ ९३–२ ॥ यदाऽऽग्नेयदले विश्रमते तदाग्नेयदलं रक्तवर्णं तदा निद्रालस्यमतिर्भवति ॥ ९३–३ ॥ यदा दक्षिणदले विश्रमते तद्दक्षिणदलं कृष्णवर्णं तदा द्वेषकोपमतिर्भवति ॥ ९३–४ ॥ यदा नैर्ऋतदले विश्रमते तन्नैर्ऋतदलं नीलवर्णं तदा पापकर्महिंसामतिर्भवति ॥ ९३–५ ॥ यदा पश्चिमदले विश्रमते तत्पश्चिमदलं स्फटिकवर्णं तदा क्रीडा[1]विनोदमतिर्भवति ॥ ९३–६ ॥ यदा वायव्यदले विश्रमते वायव्यदलं माणिक्यवर्णं तदा गमन[2]चालनवैराग्यमतिर्भवति ॥ ९३–७ ॥ यदोत्तरदले विश्रमते तदुत्तरदलं पीतवर्णं तदा सुखशृङ्गारमतिर्भवति ॥ ९३–८ ॥ यदेशानदले

[1] विनोदे—क, अ १, अ २. [2] चलन—क, अ २.

विश्रमते तदीशानदलं वैडूर्यवर्णं तदा दानादिकृपामतिर्भवति ॥ ९३–९ ॥ यदा संधिसंधिषु मतिर्भववि तदा वातपित्तश्लेष्म-महाव्याधिप्रकोपो भवति ॥ ९३–१० ॥ यदा मध्ये तिष्ठति तदा सर्वं जानाति गायति नृत्यति पठत्यानन्दं करोति ॥ ९३–११ ॥ यदा नेत्रश्रमो भवति श्रमनिर्हरणार्थं प्रथमरेखावलयं कृत्वा मध्ये निमज्जनं कुरुते प्रथमरेखा बन्धूकपुष्पवर्णं तदा निद्रावस्था भवति । निद्रावस्थामध्ये स्वप्नावस्था भवति । स्वप्नावस्थामध्ये दृष्टं श्रुतमनुमानसंभववार्ता इत्यादिकल्पनां करोति [1]तदादिश्रमो भवति ॥ ९३–१२ ॥ श्रमनिर्हरणार्थं द्वितीयरेखावलयं कृत्वा मध्ये निमज्जनं कुरुते द्वितीयरेखा इन्द्रकोपवर्णं तदा सुषुप्त्यवस्था भवति सुषुप्तौ केवलपरमेश्वरसंबन्धिनी बुद्धिर्भवति नित्यबोधस्वरूपा भवति पश्चात्परमेश्वर[2]रूपेण प्राप्तिर्भवति ॥ ९३–१३ ॥ तृतियरेखावलयं कृत्वा मध्ये निमज्जनं कुरुते तृतीयरेखा पद्मरागवर्णं तदा तुरीयावस्था भवति तुरीये केवलपर[3]मात्म[4]संबन्धिनी मतिर्भवति नित्यबोधस्वरूपो भवति तदा

शनैः शनैरुपरमेद्बुद्ध्या धृतिगृहीतया ।

आत्मसंस्थं मनः कृत्वा न किंचिदपि चिन्तयेत् ॥९३–१४॥

तदा प्राणापानयोरैक्यं कृत्वा सर्वं विश्वमात्मस्वरूपेण लक्ष्यं धारयति यदा तुरीयातीतावस्था तदा सर्वेषामानन्दस्वरूपो भवति द्वन्द्वातीतो भवति यावद्देहधारणा वर्तते तावत्तिष्ठति पश्चात्परमात्म-

[1] तदाति—क.
[2] स्वरूपे—क, अ १, अ २.
[3] मात्मनिसं—अ २.
[4] संबन्धिनी भवति—क, अ १, अ २.

स्वरूपेण प्राप्तिर्भवति इत्यनेन प्रकारेण मोक्षो भवतीदमेवात्मदर्शनोपायं भवति ॥ ९३–१९ ॥

चतुष्पथसमायुक्तमहाद्वारगवायुना ।
सहस्थित[1]त्रिकोणोर्ध्वगमनं दृश्यतेऽच्युतः ॥ ९४ ॥

ध्येयनिर्णयः कथं स्यादित्याशङ्क्य सोपायं परमात्मनिर्णयमाचष्टे—अथेति । अथ यथोक्ताधिकारिलाभानन्तरं आत्मयाथात्म्यं सोपायं व्याख्यास्य इति परमदयावती श्रुतिः एवमाह—हृदीति । हृदयाष्टदलमध्ये रेखावलयं कृत्वा वृत्ताकारं विभाव्य तन्मध्ये प्राणाधारं हंसज्योतीरूपं जीवात्मरूपं अणुमात्रं वर्तते । य एवं वर्तते तस्मिन् सर्वं प्रतिष्ठितं भवति तस्य सर्वाधिकरणत्वात् । स हि सर्वं जानाति सर्वं करोति यत् कर्तव्यं तत् कृतमेव सर्वं अहं कर्ता इत्याद्यभिमानी सन् वर्तते इत्यर्थः ॥ ९३-१ ॥ तस्य पूर्वादिदलयोगतो धर्मादिवृत्तिमत्त्वमाह—पूर्वेति । सोऽयं जीवाख्योऽहं हंसः यदा पूर्वदले ॥ ९३-२–९३-१३ ॥ यत एवं अतः पूर्वदलादिद्वितीयरेखान्तं विहाय तृतीयरेखामवलम्ब्य तुर्यस्वरूपं तुर्यादिविश्रान्तगतहेयांशापह्नवसिद्धं तुर्यातीतं ब्रह्म निष्प्रतियोगिकस्वमात्रमिति तन्मात्रतयाऽवशिष्टो भवतीत्याह—तदा शनैः-शनैरिति ॥ ९३-१४ ॥ यदि स्वातिरिक्तवृत्त्युदयो भवति तदा प्राणापानयोरैक्यमित्यादि । सर्वं विश्वमात्मस्वरूपेण लक्ष्यं धारयति, विश्वगतहेयांशापह्नवसिद्धब्रह्मणः स्वावशेषतया लक्षितत्वात् । यदैवमवस्था लक्ष्यते तदा सेयं तुरीयावस्था । यावद्देहधारणा . . . प्राप्तिर्भवति—यावत्प्रातिभासिकतयाऽपि देहोऽस्मीति ज्ञानं तावज्जीवन्मुक्तिदशामवलम्ब्य पश्चात् स्वातिरिक्तं न किञ्चिदस्तीति प्रबोधानन्तरं परमात्मैव भवतीत्यर्थः । जीवताया अनेन प्रकारेण मोक्षो भवति । इदमेवात्मदर्शनोपायं नेतरदित्यर्थः ॥ ९३–१९ ॥ मन्दानामात्मदर्शनोपायमाह—चतुष्पथेति ।

[1] त्रिकोणार्ध—क, अ २. त्रिकोणार्थ—अ १.

चतुष्पथो जालन्धरबन्धः तेन समायुक्तं महाद्वारं सुषुम्नारन्ध्रं गच्छतीति महाद्वारगः सचाऽसौ वायुश्चेति महाद्वारगवायुः तेन महाद्वारगवायुना सह स्थितमूलाधारत्रिकोणस्योर्ध्वमूलाधारगमनो मूलाधारस्थसुषुम्नायां दृक्प्राणाग्निमनः-कुण्डलिनीप्रवेशमात्रेण स्वमात्राच्युतः परमात्मा दृश्यते साक्षात्क्रियते इत्यर्थः ॥ ९४ ॥

नादानुसन्धानतः आत्मदर्शनम्

पूर्वोक्तत्रिकोणस्थानादुपरि पृथिव्यादिपञ्चवर्णकं ध्येयम् ।
प्राणादिपञ्चवायुश्च बीजं वर्णं च स्थानकम् ।
यकारं प्राणबीजं च नीलजीमूतसन्निभम् ।
रकारमग्निबीजं च अपानादित्यसंनिभम् ॥ ९५ ॥
लकारं पृथिवीरूपं व्यानं बन्धूकसंनिभम् ।
वकारं जीवबीजं च उदानं शङ्खवर्णकम् ॥ ९६ ॥
हकारं वियत्स्वरूपं च समानं स्फटिकप्रभम् ।
हृन्नाभि[1]नासिकाकण्ठपादाङ्गुष्ठादिसंस्थितः ॥ ९७ ॥
द्विसप्ततिसहस्राणि नाडिमार्गेषु वर्तते ।
अष्टाविंशतिकोटीषु रोमकूपेषु संस्थितः ॥ ९८ ॥
समानप्राण एकस्तु [2]जीवः स एक एव हि ।
रेचकादित्रयं कुर्यादृढचित्तः समाहितः ॥ ९९ ॥
शनैः समस्तमाकृष्य हृत्सरोरुहकोटरे ।
प्राणापानौ च बध्वा तु प्रणवेन समुच्चरेत् ॥ १०० ॥

[1] नासिकर्ण च—क, अ १, अ २.
[2] जीवस्थो—क. जीवस्सो—अ १, अ २.

[1]कण्ठसंकोचनं कृत्वा लिङ्गसंकोचनं तथा ।
मूलाधारात्सुषुम्ना च [2]बिसतन्तुनिभा शुभा ॥ १०१ ॥
अमूर्तो [3]वर्तते नादो वीणादण्डसमुत्थितः ।
शङ्खनादादिभिश्चैव मध्यमेव ध्वनिर्यथा ॥ १०२ ॥
व्योमरन्ध्रगतो नादो मायूरं [4]नादमेव च ।
कपालकुहरे मध्ये चतुर्द्वारस्य मध्यमे ॥ १०३ ॥
तदात्मा राजते तत्र यथा व्योम्नि दिवाकरः ।
कोदण्डद्वयमध्ये तु ब्रह्मरन्ध्रेषु शक्ति च ॥ १०४ ॥
स्वात्मानं पुरुषं पश्येन्मनस्तत्र लयं गतम् ।
रत्नानि ज्योत्स्निनादं तु बिन्दु माहेश्वरं पदम् ॥ १०५ ॥
य एवं वेद पुरुषः स कैवल्यं समश्नुते ॥ १०६ ॥

इत्युपनिषत् ॥

एवमकृतसाक्षात्काराणां नादानुसन्धानोपायतः तत्पदार्थं प्रकटयन्नुपसंहरति—पूर्वेति ॥ ध्येयम्—किं तत्? प्राणादि । यद्येवमपक्वचित्तः कश्चित् तेन पूर्वोक्तमूलाधारत्रिकोणाग्निमण्डलादुपरि प्राणादिवायुजातं पृथिव्यादिपञ्चवर्णयुक्तं ध्येयम् । यकारादिबीजं नीलजीमूतादिवर्णं हृदयादिस्थानविशिष्टं ध्येयमिति पूर्वेणान्वयः । आदौ हृदि यकारं प्राणबीजं विद्यात् नीलजीमूततुल्यवर्णविशिष्टं प्राणं जानीयादित्यध्याहार्यम् । गुदे रेफमग्निबीजमपानमादित्यसन्निभं विद्यात् ॥ ९५ ॥ पृथिवीबीजं लकारं बन्धूकसन्निभं व्यानं कृत्स्नशरीरव्यापकं विद्यात् । कण्ठदेशे वकारं जीवबीजमुदानं शङ्खवर्णविशिष्टं विद्यात् ॥ ९६ ॥ हकारं वियद्बीजं समानं नाभ्यासनं स्फटिकप्रभं च विद्यात् । एवं प्राणपञ्चकं

[1] कर्ण—क, अ १.
[2] पद्म—क, अ १, अ २.
[3] दृश्यते—उ.
[4] नाद एव—उ.

हृन्नाभिनासिकाकण्ठपादाङ्गुष्ठादिषु संस्थितं विद्यात् ॥ ९७ ॥ तत्र समानवायुस्तु द्विसप्ततिसहस्रनाडीमार्गेषु सदा सञ्चरन् वर्तते अष्टाविंशतिकोटिरोमकूपेषु व्याप्य स्थितो भवति ॥ ९८ ॥ विचार्यमाणे एकस्तु—तुशब्दोऽवधारणार्थः—समानादिप्राणान्तवायुभेदः एक एव । य एवं पञ्चप्राणाधारः सोऽयं जीव एक एव । हिशब्दः प्रसिद्धिद्योतकः । एवं ज्ञात्वा ततः परं रेचकादि इति । एवं यथोक्तपञ्चप्राणारूढजीवस्वरूपं ज्ञात्वा ततो दृढचित्तो योगी समाहितो भूत्वा रेचकाद्यवयवत्रयविशिष्टप्राणायामत्रयं कुर्यात् ॥ ९९ ॥ शनैः स्वान्तःकरणवृत्तिसहस्रं हृत्सरोरुहकोटरे समाकृष्य तत्रैव प्राणापानौ च बद्ध्वा प्रणवेन तु प्रणवेनैव प्रणवेनाऽऽज्ञासहस्रारचक्रं प्रत्युच्चरेन् ऊर्ध्वं नयेत् ॥ १०० ॥ तदुपायतया कण्ठलिङ्गसङ्कोचनग्रहणं बन्धत्रयोपलक्षणार्थम् । तथा बन्धत्रयं कृत्वा मूलाधारात् मूलाधारमारभ्य पद्मतन्तुनिभा शुभा सुषुम्ना—चशब्दात् तदन्तःकैवल्यनाडी च—प्रतिष्ठिता भवतीति द्योत्यते ॥ १०१ ॥ तत्र सुषुम्नाश्रयवीणादण्डे समुत्थितः सन् अमूर्तो नादो वर्तते । अत एव वीणादण्डमध्यमेव नादोत्पत्तिस्थानं यथा शङ्खनादादिभिश्चैव ॥ १०२ ॥ हृद्यथोमरन्ध्रगतो नादोऽभिव्यक्तो भवति । यदाऽयं नादो मायूरं नादमेवानुकरोति तदा इडापिङ्गळासुषुम्नाषण्टिकाभेदेन चतुर्द्वारस्य मध्यमे कपालकुहरमध्ये ॥ १०३ ॥ तत्र यथा व्योम्नि दिवाकरः तथा परमात्मा राजते सम्यगभिव्यक्तो भवति । यत्र मनउपलक्षितदृष्टिवाय्वग्निकुण्डल्यादिकं लयं गतं तत्र मूलाधारादिब्रह्मोपलब्धिरन्ध्रेषु कोदण्डद्वयमध्ये तु—तुशब्दार्थः—यथाशक्ति यथाबलं ॥ १०४ ॥ स्वात्मानं पुरुषं पश्येत् । किंविशेषणविशिष्टमित्यत्र, "वज्रदण्डसमुद्भूताः मणयश्चैकविंशतिः" इति श्रुत्यनुरोधेन विश्वतुर्यमित्याद्यविकल्पानुञ्छैकरसान्तानि एकविंशतितुरीयरत्नानि तेषां ज्योतिरिव ज्योतिष्मदधिकरणं जाग्रज्जाग्रदादिचतुष्पञ्चदशविकल्पं न ददातीति नदं तदेव नादं तुर्यतुर्यं बिन्दु निर्विशेषरूपं महांश्चासौ निष्प्रतियोगिकब्रह्ममात्रतयाऽवस्थातुमीश्वरश्चेति महेश्वरः तद्भावो माहेश्वरं स्वमात्रतया पद्यते इति पदं विद्वान् पश्येदिति पूर्वेणान्वयः ॥ १०५ ॥ विद्याफलं वदन्नुपसंहरति—य

इति । विद्वान् वेदनसमकालं कैवल्यरूपेण अवशिष्यते इत्यत्र, "ब्रह्म वेद ब्रह्मैव भवति" इति ज्ञानसमकालमेव ब्रह्ममात्रभावापत्तिश्रुतेः । इत्युपनिषच्छब्दोऽयं ध्यानबिन्दूपनिषत्समाप्त्यर्थः ॥ १०६ ॥

श्रीवासुदेवेन्द्रशिष्योपनिषद्ब्रह्मयोगिना ।
लिखितं स्याद्विवरणं ध्यानबिन्दोः स्फुटं लघु ॥
ध्यानबिन्दुविवरणं त्रिंशदधिशतत्रयम् ॥

इति श्रीमदीशाद्यष्टोत्तरशतोपनिषच्छास्त्रविवरणे एकोनचत्वारिंशत्सङ्ख्यापूरकं ध्यानबिन्दूपनिषद्विवरणं सम्पूर्णम्

नादबिन्दूपनिषत्

वाङ्मे मनसि—इति शान्तिः

वैराजप्रणवस्वरूपम्

अकारो दक्षिणः पक्ष उकारस्तूत्तरः स्मृतः ।
मकारं पुच्छमित्याहुरर्धमात्रा तु मस्तकम् ॥ १ ॥
पादादिकं गुणास्तस्य शरीरं तत्त्वमुच्यते ।
धर्मोऽस्य दक्षिणश्चक्षुरधर्मो योऽपरः स्मृतः ॥ २ ॥
भूर्लोकः पादयोस्तस्य भुवर्लोकस्तु जानुनि ।
सुवर्लोकः कटीदेशे नाभिदेशे महर्जगत् ॥ ३ ॥
जनोलोकस्तु हृद्देशे कण्ठे लोकस्तपस्ततः ।
भ्रुवोर्ललाटमध्ये तु सत्यलोको व्यवस्थितः ॥ ४ ॥

वैराजात्मोपासनया सञ्जातज्ञानवह्निना ।
दग्ध्वा कर्मत्रयं योगी यत्पदं याति तद्भजे ॥

इह खलु ऋग्वेदप्रविभक्तेयं नादबिन्दूपनिषत् विराट्प्रणवप्रकटनपूर्वकं तद्गतसविशेषब्रह्मविदां स्वात्तज्ञानानुरोधेन सविशेषब्रह्मप्राप्तिमभिधाय निर्विशेषब्रह्म-

याथात्म्यप्रकटनपूर्वकं तज्ज्ञानान्नादोपायसाधनसम्पन्नानां कर्मत्रयभङ्गप्रभा[भ]वविकळेबरैकवल्यं प्रकटयन्ती विजृम्भते स्वयमवान्तरूपेण । अस्याः स्वल्पग्रन्थतो विवरणमारभ्यते । श्रुतिस्तु अकारइत्यादिना । अन्तर्विराट्प्रणवावेर्कीकृत्य द्वादशमात्रात्मको महावैराजप्रणव उच्यते । तद्भावापत्तये महाविराजः सुपर्णतयोक्तिः । सुपर्णभावमापन्नमहाविराजः स्थूलप्रपञ्चाभिधायकोऽयमकारो दक्षिणः पक्षः । तस्योत्तरपक्षस्तु सूक्ष्मप्रपञ्चाभिधायक उकारः स्मृतः । तस्य पुच्छं बीजप्रपञ्चाभिधायकं मकारमिति ब्रह्मविद आहुः । अर्धमात्रा तु तन्मस्तकभावं गतेत्यामनन्ति ॥ १ ॥ तस्य पादादिकं सत्वादिगुणा भवन्ति । तस्य विशिष्टावयवसम्पन्नं शरीरं तु वराहोपनिषदुक्तषण्णवतितत्त्वजातमुच्यते । अस्य दक्षिणोत्तरचक्षुषी धर्माधर्मौ भवतः । दक्षिणश्चक्षुरिति लिङ्गव्यत्ययः ॥ २ ॥ तस्य पादजानुकटिनाभिहृदयकण्ठभ्रूमध्येषु भूरादिसप्तलोकाः प्रतिष्ठिताः इत्यर्थः । पादयोरिति सप्तमीद्विवचनम् ॥ ३–४ ॥

वैराजविद्याफलम्

सहस्रार्णमती वाऽत्र मन्त्र एष प्रदर्शितः ।
एवमेतां समारूढो हंसयोगविचक्षणः ॥ ५ ॥
न भिद्यते कर्मचारैः पापकोटिशतैरपि ।

एवंविशेषणविशिष्टो वैराजप्रणव उक्तः इत्याह—सहस्रेति । सहस्रार्णमि[र्णमती]ति लिङ्गव्यत्ययः । प्रणवाद्य[द्या]वयवाकारस्य सहस्रावयवत्वं श्रूयते, "अकारः सहस्रावयवान्वितः" इति । अत्र अस्मिन् महावैराजप्रणवात्मनि सहस्रार्णाख्यावयवविशिष्टाकारान्वितोऽयमेष ओङ्कारो मन्त्र अभिधानतया स्थितः इति श्रुतिभिः प्रदर्शित इत्यर्थः । वाशब्दः अवधारणे । इत्थं वक्ष्यमाणद्वादशमात्रात्मकप्रणवार्थमहाविराडस्मि इत्यनुसन्धानं हंसयोगः, तद्वतः पापाद्यभेद्यतामाह—एवमिति । स्वतत्त्वज्ञानेन स्वातिरिक्तकलनां हन्तीति

हंसः । स एवास्मीत्यनुसन्धानं हंसयोगः । तद्विचक्षणः तदभिज्ञो योगी ॥ ५ ॥ एवमुक्तलक्षणां महावैराजविद्यां समारूढो यदा तदनुसन्धानपरो भवति तदा स्वकृतकर्मचारैः कर्मप्रभवैः पापकोटिशतैरपि न कदाऽपि भिद्यते— इति वक्ष्यमाणविद्याफलं दर्शयति ॥

प्रणवस्य प्रधानमात्राचतुष्टयस्वरूपम्

आग्नेयी प्रथमा मात्रा वायव्येषा तथा परा ॥ ६ ॥
भानुमण्डलसंकाशा भवेन्मात्रा तथोत्तरा ।
परमा चार्धमात्रा या वारुणीं तां विदुर्बुधाः ॥ ७ ॥
कालत्रयेऽपि [1]यत्रेमा मात्रा नूनं प्रतिष्ठिताः ।
एष ओंकार आख्यातो धारणाभिर्निबोधत ॥ ८ ॥

प्रधानमात्राचतुष्टयस्वरूपमाह—आग्नेयीति । अग्निः वैश्वानरः तत्सम्बन्धिनी आग्नेयी वैराज्यकाराभिधाना प्रथमा मात्रा भवति । तथा वायुशब्देन सूत्रात्मोच्यते, "वायुर्वै गौतम तत्सूत्रं" इति श्रुतेः । तत्सम्बन्धिनी वायवी एषा परा उकाररूपिणी द्वितीया मात्रा भवति ॥ ६ ॥ भानुमण्डलवत् सम्यक् काशत इति बीजात्मा भानुमण्डलसङ्काशः तदभिधानमकारात्मिका भानुमण्डलसङ्काशा परा तृतीयमात्रा भवेत् । या च पुनः मात्रात्रयापेक्षया अर्धमात्रा परमा सर्वोत्कृष्टा भवति बुधाः तामेतां स्वविकल्पितभेदजातं स्वेन रूपेण वारयति व्याप्नोतीति वरुणः तुर्यः तद्रूपिणीं वारुणीं चतुर्थमात्रात्मिकां विदुः ॥ ७ ॥ यत्र प्रणवे भूतादिकालत्रयेऽपि इमाः मात्राः प्रतिष्ठिताः एषः ओङ्कारः एवं श्रुतिभिराख्यातो भवति । हे स्वाङ्गलोकाः यूयं वक्ष्यमाणघटिकापञ्चककालात्मकघोषिण्यादिमात्रा धारणाभिः निबोधत जानथेत्यर्थः ॥ ८ ॥

[1] यस्ये—क, अ २.

प्रणवस्य व्यष्टिसमष्ट्यात्मकद्वादशमात्राभेदविवरणम्

● घोषिणी प्रथमा मात्रा विद्युन्मात्रा तथा परा ।
पतङ्गिनी तृतीया स्याच्चतुर्थी वायुवेगिनी ॥ ९ ॥
पञ्चमी नामधेया तु षष्ठी चैन्द्र्यभिधीयते ।
सप्तमी वैष्णवी नाम अष्टमी शांकरीति च ॥ १० ॥
नवमी महती नाम धृतिस्तु दशमी मता ।
एकादशी भवेन्नारी ब्राह्मी तु द्वादशी परा ॥ ११ ॥

व्यष्टिसमष्ट्यात्मकद्वादशमात्राभेदं विवृणोति—घोषिणीति ॥ ९ ॥ अन्तःप्रणवमात्रा अकारायाः पञ्चब्रह्मवाचका ज्ञेयाः ॥ १० ॥ समष्ट्यकारायाः [अ]ण्डविराडादिवाचका भवन्ति ॥ ११ ॥

उपासकानां तत्तन्मात्राकालोत्क्रमणफलम्

प्रथमायां तु मात्रायां यदि प्राणैर्वियुज्यते ।
भरते वर्षराजाऽसौ सार्वभौमः प्रजायते ॥ १२ ॥
द्वितीयायां समुत्क्रान्तो भवेद्यक्षो महात्मवान् ।
विद्याधरस्तृतीयायां गान्धर्वस्तु चतुर्थिका ॥ १३ ॥
पञ्चम्यामथ मात्रायां यदि प्राणैर्वियुज्यते ।
उषितः सह देवत्वं सोमलोके महीयते ॥ १४ ॥
[1]षष्ठ्यामिन्द्रस्य सायुज्यं सप्तम्यां वैष्णवं पदम् ।
अष्टम्यां व्रजते रुद्रं पशूनां च पतिं तथा ॥ १५ ॥

[1] षष्ठ्यांमित्रस्य-

नवम्यां तु महर्लोकं दशम्यां तु जनं व्रजेत् ।
एकादश्यां तपोलोकं द्वादश्यां ब्रह्म शाश्वतम् ॥ १६ ॥

षष्टिघटिकास्वेवं द्वादशमात्रादृष्टिं कृत्वा उपासनां कुर्वतः तत्तन्मात्राकालोत्क्रमणफलमाह—प्रथमायामिति । चतुर्मुखदैवत्यघोषिण्याख्याकाराभिधानोदयादिपञ्चघटिकाकालपरिमितायां प्रथमायां तु मात्रायां यद्येवमुपासकः प्राणैः वियुज्यते सोऽसौ योगी भरते वर्षे राजा सार्वभौमः सन् प्रजायते ॥ १२ ॥ तथा च द्वितीयायाम् । सप्तम्यर्थे चतुर्थिकेति । प्रथमपर्यायवदेकादशपर्यायोऽप्यूह्यः ॥ १३–१६ ॥

निर्विशेषब्रह्मस्वरूपं, तज्ज्ञानफलं च

ततः परतरं शुद्धं व्यापकं निर्मलं [1]शिवम् ।
सदोदितं परं ब्रह्म ज्योतिषामुदयो यतः ॥ १७ ॥
अतीन्द्रियं गुणातीतं मनो लीनं यदा भवेत् ।
अनूपमं शिवं शान्तं [2]योगयुक्तः सदा विशेत् ॥ १८ ॥
तद्युक्तस्तन्मयो जन्तुः शनैर्मुञ्चेत् [3]कुले चिरम् ।
संस्थितो योगचारेण सर्वसङ्गविवर्जितः ॥ १९ ॥
ततो विलीनपाशोऽसौ विमलः कमलाप्रभुः ।
तेनैव ब्रह्मभावेन परमानन्दमश्नुते ॥ २० ॥

सविशेषब्रह्मविदामेवं फलतारतम्यमुक्त्वा निर्विशेषब्रह्मस्वरूपं तज्ज्ञानफलं चाह—तत इति । ततः—"अकारो दक्षिणः पक्षः" इत्यारभ्य महावैराजाभिधानं सविशेषं ब्रह्म तदुपासकानां तत्फलं चाभिहितं, ततः परतरं महावैराजगतहेयां-

[1] परं—क, अ २. [2] योगयुक्तं—अ २. [3] कलेबरं—उ (पाठान्तरं), मु.

शापह्नवसिद्धं अत एव शुद्धं, स्वाज्ञदृष्ट्या व्याप्यमलाशिवप्रसक्तौ व्यापकं निर्मलं शिवं, यतः सूर्यादिज्योतिषामुदयो भवति तदेतत् ब्रह्म सदोदितम् ॥ १७ ॥ करणग्रामतद्धेतुत्रिगुणप्रसक्तौ अतीन्द्रियं गुणातीतं निर्गुणं, यदा स्वातिरिक्तकलनोज्जीवकमनो लीनं भवेत्तदा तदनूपमं निरुपमं, चिन्मात्रत्वात् शिवं, शान्तस्वातिरिक्तं यत् ब्रह्म अवशिष्यते सदा तन्निर्विकल्पकयोगयुक्तो विशेत् ॥ १८ ॥ तद्योगयुक्तो जन्तुः तन्मयो भूत्वा स्वकारणभूते कुले स्वाविद्याद्वयतत्कार्ये शनैःशनैः मुञ्चेत अथ यद्यिरं चिन्मात्रं भवेत् । कोऽयं एवमधिकारीत्याह— संस्थित इति । योगचारेण योगाभ्यासेन सम्यक् स्थितः । अन्तर्बाह्यकलनासङ्गिनो योगाभ्यासेच्छा कुत इत्यत आह— सर्वसङ्कल्पविवर्जितः इति ॥ १९ ॥ अतो योगी विमलान्तरो भूत्वा विलीन-स्वबन्धनहेतुस्वातिरिक्तपाशः सन् विदेहकैवल्यकमलया प्रभवतीति प्रभुः परमानन्दं यः स्वेन अनुष्ठितः तेनैव ब्रह्मभावेन सर्वापह्नवसिद्धं ब्रह्म निष्प्रतियोगिकस्वमात्रमिति ज्ञानयोगेन अश्नुते, कृतकृत्यो भवतीत्यर्थः ॥ २० ॥

ज्ञानिनः प्रारब्धकर्मभावाभावविचारः

आत्मानं सततं ज्ञात्वा कालं नय महामते ।
प्रारब्धमखिलं भुञ्जन्नोद्वेगं कर्तुमर्हसि ॥ २१ ॥
उत्पन्ने चात्मविज्ञाने प्रारब्धं नैव मुञ्चति ।
तत्त्वज्ञानोदयादूर्ध्वं प्रारब्धं नैव विद्यते ॥ २२ ॥
देहादीनामसत्त्वात्तु यथा [1]स्वप्नो विबोधतः ।
कर्म जन्मान्तरीयं यत्प्रारब्धमिति कीर्तितम् ॥ २३ ॥
यत्तु जन्मान्तराभावात्पुंसो नैवास्ति कर्हिचित् ।
स्वप्नदेहो यथाध्यस्तस्तथैवायं हि देहकः ॥ २४ ॥

[1] स्वप्ने—क, अ १, अ २.

अध्यस्तस्य कुतो जन्म जन्माभावे कुतः स्थितिः ।
उपादानं प्रपञ्चस्य मृद्भाण्ड[1]स्येव पश्यति ॥ २५ ॥

अज्ञानं चेति वेदान्तैस्तस्मिन्नष्टे क्व विश्वता ।
यथा रज्जुं परित्यज्य सर्पं गृह्णाति वै भ्रमात् ॥ २६ ॥

तद्वत्सत्यमविज्ञाय जगत्पश्यति मूढधीः ।
रज्जुखण्डे परिज्ञाते सर्परूपं न तिष्ठति ॥ २७ ॥

अधिष्ठाने तथा ज्ञाते प्रपञ्चे शून्यतां गते ।
देहस्यापि प्रपञ्चत्वात्प्रारब्धावस्थितिः कुतः ॥ २८ ॥

अज्ञानजनबोधार्थं प्रारब्धमिति चोच्यते ।
ततः कालवशादेव प्रारब्धे तु क्षयं गते ॥ २९ ॥

ब्रह्मप्रणवसंधाननादो ज्योतिर्मयः शिवः ।
स्वयमाविर्भवेदात्मा मेघापायेंऽशुमानिव ॥ ३० ॥

कंचनापक्वज्ञानिनमुद्दिश्येदमाह—आत्मानमिति । सततं श्रुत्याचार्यप्रसादलब्धश्रवणादिसाधनेन स्वात्मानं ब्रह्मेति ज्ञात्वा हे महामते आयुःशेषकालं नय इच्छाऽनिच्छापरेच्छाप्रभवसुखदुःखतन्मिश्रप्रारब्धमखिलं भुञ्जन् नोद्वेगं सन्तापं कर्तुं अर्हसि ॥ २१ ॥ तव एवं उत्पन्ने चात्मविज्ञाने नैव प्रारब्धं त्वां मुञ्चति । यदि ते ब्रह्ममात्रतत्त्वज्ञानं जायते तदा न हि ते प्रारब्धं कर्म अस्तीत्याह—तत्त्वज्ञानेति ॥ २२ ॥ प्रारब्धसम्भवे हेतुमाचष्टे—देहादीनामिति । यत् जन्मान्तरीयं कर्म सुखादिभोगप्रदं प्रारब्धं तत्तु प्रबोधात् स्वप्नवत् तत्त्वज्ञानेन नश्यत्येव । तत्र हेतुः—वस्तुतो देहादीनामसत्त्वात् ॥ २३ ॥ एवं देहादीनामसत्त्वे पुंसो जन्मान्तराभावात् यत् प्रारब्धमिति मन्यसे तत्तु

१, अ २.

कर्हिचिदपि नैवास्तीति निश्चिन्वित्यर्थः । प्रारब्धायत्तदेहस्यासत्त्वं स्फुटयति सदृष्टान्तं- -स्वप्नेति ॥ २४–२५ ॥ स्वाज्ञानं अध्यासहेतुः । तस्मिन् वेदान्तैः तत्प्रभवज्ञानविज्ञानसम्यज्ज्ञानैः अभावपदं गते क तत्कार्यविश्वता सेद्धुं पारयति, देहादेः विश्वान्तःपातित्वात् । न कदाऽपि प्रारब्धादिकर्मत्रयं विद्यते इत्यर्थः । शिष्टं स्पष्टम् ॥ २६–२८ ॥ तथा चेत् कथं प्रारब्धकल्पनेत्यत आह—अज्ञानेति । स्वज्ञानेन स्वाज्ञानतत्कार्ये नष्टे कथं ते देहो विद्यत इति स्वाज्ञानानुरोधमाक्षिपन्ति, तद्वाग्बन्धनायेयं प्रारब्धकल्पनेत्यर्थः । ततः किमित्यत आह—तत इति । ततः सम्यज्ज्ञानादूर्ध्वं कालवशात् ईश्वरप्रसादादेव प्रारब्धकर्मोपलक्षितस्वातिरिक्तास्तित्वभ्रमे क्षयं अपह्नवं गते सति ॥ २९ ॥ अथ पुरा ब्रह्मप्रणवानुसन्धानप्रभवप्रबोधः पुनः स्वातिरिक्तास्तित्वभ्रमं न ददाति, ज्योतिर्मयः शिवो नादः तुर्यतुर्यो भूत्वा मेघापाये अंशुमानिव स्वयं आविर्भवेत् आत्मा स्वमात्रमवशिष्यत इत्यर्थः ॥ ३० ॥

तुरीयतुरीयाधिगमोपायभूतं नादानुसन्धानम्

सिद्धासनस्थितो योगी मुद्रां संधाय वैष्णवीम् ।
शृणुयाद्दक्षिणे कर्णे नादमन्तर्गतं सदा ॥ ३१ ॥
अभ्यस्यमानो नादोऽयं बाह्यमावृणुते [1]ध्वनिम् ।
पक्षाद्विपक्षमखिलं जित्वा तुर्यपदं व्रजेत् ॥ ३२ ॥
श्रूयते प्रथमाभ्यासे नादो नानाविधो महान् ।
वर्धमानस्तथाऽभ्यासे श्रूयते सूक्ष्मसूक्ष्मतः ॥ ३३ ॥
आदौ जलधिजीमूतभेरीनिर्झरसंभवः ।
मध्ये मर्दलशब्दाभो घण्टाकाहलजस्तथा ॥ ३४ ॥

[1] ध्वनिः—क, अ १, अ २.

अन्ते तु किंकिणीवंशवीणाभ्रमरनिस्वनः ।
इति नानाविधा नादाः श्रूयन्ते सूक्ष्मसूक्ष्मतः ॥ ३५ ॥
महति श्रूयमाणे तु महाभेर्यादिकध्वनौ ।
तत्र सूक्ष्मं सूक्ष्मतरं नादमेव परामृशेत् ॥ ३६ ॥
घनमुत्सृज्य वा सूक्ष्मे सूक्ष्ममुत्सृज्य वा घने ।
रममाणमपि [1]क्षिप्तं मनो नान्यत्र चालयेत् ॥ ३७ ॥
यत्र कुत्रापि वा नादे लगति प्रथमं मनः ।
तत्र तत्र स्थिरीभूत्वा तेन सार्धं विलीयते ॥ ३८ ॥
विस्मृत्य सकलं बाह्यं नादे दुग्धाम्बुवन्मनः ।
एकीभूयाथ सहसा चिदाकाशे विलीयते ॥ ३९ ॥
उदासीनस्ततो भूत्वा सदाऽभ्यासेन संयमी ।
उन्मनीकारकं सद्यो नादमेवावधारयेत् ॥ ४० ॥
सर्वचिन्तां समुत्सृज्य सर्वचेष्टाविवर्जितः ।
नादमेवानुसंदध्यान्नादे चित्तं विलीयते ॥ ४१ ॥

ब्रह्मप्रणवार्थतुर्यतुर्याधिगमोपायतया नादानुसन्धानप्रकारमाह—**सिद्धासनेति** ॥

गुदं वामेन सम्पीड्य मेढ्रादुपरि दक्षिणम् ।
ऋजुकायस्त्रिबन्धाभ्यां सिद्धासनमिदं भवेत् ॥

इति योगशास्त्रप्रसिद्धसिद्धासने स्थितो योगी

[1] कूलसं— अ २.

अन्तर्लक्ष्यं बहिर्दृष्टिः निमेषोन्मेषवर्जिता ।
एषा सा वैष्णवी मुद्रा सर्वतन्त्रेषु गोपिता ॥

इति श्रुतिसिद्धवैष्णवीं मुद्रामनुसन्धाय स्वान्तरनाहतगतं नादं दक्षिणकर्णे सदा शृणुयात् ॥ ३१ ॥ एवं नादश्रवणतः किं स्यादित्यत आह— अभ्यस्यमान इति । एवं अभ्यस्तो नादः स्वावाग्कबाह्यशब्दादिकमावृत्य पक्षमात्रेण स्वविपक्षभूतस्वातिरिक्तास्तित्वं निर्मूल्य नादसाधनो योगी तुर्यतुर्यपदं स्वमात्रमिति व्रजेत् ॥ ३२ ॥ नादेयत्तां तदभ्यासानुभवं च प्रकटयति— श्रूयत इति ॥ ३३ ॥ कथं? आदौ ॥ ३४–३५ ॥ तत् किं ग्राह्यमित्यत आह—महतीति ॥ ३६ ॥ यथाकथंचित् नादात् मनो न चालयेदित्याह— घनमिति ॥ ३७ ॥ जलध्यादिभ्रमगनिस्वनान्तनादेषु यत्र कुत्र वा मनः स्थिरीभवेत् तेन नादेन साकं चिदाकाशे विलीयत इत्याह—यत्रेति ॥ ३८–३९ ॥ तदितरकार्येषु उदासीनः ॥ ४० ॥ यतो नादाभ्यासः क्षिप्रफलदः अत एव सर्वचिन्ताम् ॥ ४१ ॥

नादस्य मनोनियमनसामर्थ्यम्

मकरन्दं पिबन्भृङ्गो गन्धान् [1]नापेक्षते यथा ।
नादासक्तं सदा चित्तं विषयं न हि काङ्क्षते ॥ ४२ ॥

बद्धः सुनादगन्धेन सद्यःसंत्यक्त[2]चापलम् ।
नादग्रहणतश्चित्तमन्तरङ्ग[3]भुजङ्गमम् ॥ ४३ ॥

विस्मृत्य विश्व[4]मेकाग्रं कुत्रचिन्न हि धावति ।
[5]मनोन्मत्तगजेन्द्रस्य विषयोद्यानचारिणः ॥ ४४ ॥

[1] नाक्षेपते—उ, अ १. [2] चापलः—क, अ १, अ २, मु.
[3] भुजंगमः—मु. [4] मेकाग्रः—मु. [5] मनोम—क, अ १.

नियामनसमर्थोऽयं निनादो निशिताङ्कुशः ।
नादोऽन्तरङ्गसारङ्गबन्धने वागुरायते ॥ ४५ ॥
अन्तरङ्ग[1]तरङ्गस्य रोधे वेलायतेऽपि च ।

नादासक्तं चित्तं तदतिरिक्तविषयं न काङ्क्षतीति सदृष्टान्तमाह—मकरन्दमिति ॥ ४२ ॥ नादपाशनिरुच्छ्वासबद्धं चित्तं अचलं सत् स्वबाह्याभ्यन्तरं विस्मृत्य स्तब्धीभवतीत्याह—बद्ध इति ॥ ४३ ॥ स्वान्तर्बाह्यं विस्मृत्य स्वस्मिन्नेव स्थिरं सत् न कुत्रचिन् परिधावतीत्यर्थः । नादाङ्कुशो मनोगजनियमनदक्ष इत्याह—मन इति ॥ ४४ ॥ नादोन्तरङ्गविहङ्गमतरङ्गरोधनजालवेलेव दक्ष इत्याह—नाद इति ॥ ४५ ॥

उपेयनादस्वरूपम्

ब्रह्मप्रणवसंलग्ननादो ज्योतिर्मयात्मकः ॥ ४६ ॥
मनस्तत्र लयं याति तद्विष्णोः परमं पदम् ।
तावदाकाशसंकल्पो यावच्छब्दः प्रवर्तते ॥ ४७ ॥
निःशब्दं तत्परं ब्रह्म परमात्मा [2]समीर्यते ।
नादो यावन्मनस्तावन्नादान्ते तु मनोन्मनी ॥ ४८ ॥
सशब्दश्चाक्षरे क्षीणे निःशब्दं परमं पदम् ।
सदा नादानुसंधानात्संक्षीणा वासना [3]भवेत् ॥ ४९ ॥
निरञ्जने विलीयेते मनोवायू न संशयः ।
नादकोटिसहस्राणि बिन्दुकोटिशतानि च ॥ ५० ॥
सर्वे तत्र लयं यान्ति ब्रह्मप्रणव[4]नादके ।

[1] समुद्रस्य—क, अ २.
[2] समीयते—अ १, अ २.
[3] तुया—क, अ १, अ २.
[4] नादकः—उ.

उपायनादस्वरूपमुक्त्वा फलात्मकोपेयनादस्वरूपं तज्ज्ञानफलं च प्रकटयति—ब्रह्मेति । अकारस्थूलांशादिप्रविभक्तजाग्रज्जाग्रदाद्यविकल्पानुक्रैकरसान्तकलनोपबृंहणात् ब्रह्म यस्मिन् षोडशमात्रात्मकप्रणवे विराजते स ब्रह्मप्रणवः तत्संलग्नः तदभिन्नः सचाऽसौ स्वज्ञानां पराग्भावं न ददातीति नदः स एव नादः प्रत्यगात्मा स्वयंप्रकाशकतया ज्योतिर्मयात्मको भवति ॥ ४६ ॥ यन्मनः पराक्प्रत्यग्विभागहेतुः तत्र प्रत्यगभिन्नपरब्रह्मणि लयं याति, मनउपलक्षितस्वाविद्यापदाधिकरणं यत् तस्य विष्णोः तद्विष्णोः व्याप्यसापेक्षव्यापनशीलस्य व्याप्यसापेक्षव्यापकताऽभावे यद्व्याप्यव्यापककलनाविगळमवशिष्यते, तदेव परमं निष्प्रतियोगिकनिर्विशेषं तन्मात्रतया पद्यत इति पदं विकळेबरकैवल्यमित्यर्थः । किं सदा ब्रह्मप्रणवानुसन्धानं कर्तव्यमित्यवधिमाह—तावदिति । यावद्ब्राह्यान्तःशब्दकामादिप्रतीतिः तावदाकाशसङ्कल्पः स्वातिरिक्तशब्दादिप्रपञ्चोऽस्ति नास्तीति विभ्रमसङ्कल्पविगळो भवेत् ॥ ४७ ॥ ततोऽयं निःशब्दतया विभाति परमात्मेति सम्यगीर्यते । नादानुसन्धानावधिं तत्फलं चाह—नाद इति ॥ ४८–४९ ॥ ब्रह्मप्रणवनादस्य सर्वापवादाधिकरणतामाह—नादेति । नादस्य सर्वसाक्षिणोऽधिगमे यान्युपायतया कोटिसहस्राणि साधनानि सन्ति यानि बिन्दोः ईश्वरस्य अधिगमे सालोक्यादितत्पदाप्तिसाधनानि कोटिशतानि सन्ति तानि सर्वाणि ॥ ९० ॥ चशब्दात् ये ये स्वाज्ञविकल्पिताः विकाराः सन्ति ते सर्वे तत्र ब्रह्मप्रणवनादके प्रत्यगभिन्ने ब्रह्मणि लयं यान्ति । ततः प्रत्यगभिन्नं ब्रह्म स्वाधिष्ठेयाभावात् निरधिष्ठानं सत् स्वमात्रमवशिष्यत इति भावः ॥

नादारूढयोगिनां विदेहमुक्तिलाभः

सर्वावस्थाविनिर्मुक्तः सर्वचिन्ताविवर्जितः ॥ ९१ ॥
मृतवत्तिष्ठते योगी स मुक्तो नात्र संशयः ।
शङ्खदुन्दुभिनादं च न शृणोति कदाचन ॥ ९२ ॥
काष्ठवज्ज्ञायते देह उन्मन्यावस्थया ध्रुवम् ।
न जानाति स शीतोष्णं न दुःखं न सुखं तथा ॥ ९३ ॥

न मानं नावमानं च संत्यक्त्वा तु समाधिना ।
अवस्थात्रयमन्वेति न चित्तं योगिनः सदा ॥ ९४ ॥
जाग्रन्निद्राविनिर्मुक्तः स्वरूपावस्थतामियात् ॥ ९५ ॥
दृष्टिः स्थिरा यस्य विना सदृश्यं
वायुः स्थिरो [1]यस्य विना प्रयत्नम् ।
चित्तं स्थिरं यस्य विनाऽवलम्बं
स ब्रह्मतारान्तरनादरूपः ॥ ९६ ॥

इत्युपनिषत् ॥

एवं ब्रह्मप्रणवनादारूढयोगिनां स्थितिं तत्कृतकृत्यतां विशदीकरोति—सर्वेति ॥ ९१–९२ ॥ ब्रह्ममात्रभावमापन्नो योगी ब्रह्मातिरिक्तकलनां न जानाति ब्रह्मातिरिक्तयोः निष्प्रतियोगिकभावाभावरूपत्वात् इत्यर्थः ॥ ९३–९५ ॥ तस्य ब्रह्मप्रणवनादरूपतां दर्शयन् उपसंहरति—दृष्टिरिति । यस्य दृष्टिवायुचित्तानि दृश्यप्रयत्नावलम्बकलनां विना स्थिरीभूत्वा ब्रह्मप्रणवपर्यवसन्ना भवन्ति सोऽयं विद्वान् ब्रह्मतारान्तरतुर्यतुर्याभिधाननादरूपतया अवशिष्यते, विदेहमुक्तो भवतीत्यर्थः ॥ ९६ ॥ इत्युपनिषच्छब्दौ नादबिन्दूपनिषत्समाप्त्यर्थौ ॥

श्रीवासुदेवेन्द्रशिष्योपनिषद्ब्रह्मयोगिना ।
लिखितं स्याद्विवरणं नादबिन्दोः स्फुटं लघु ।
नादबिन्दुविवरणं पञ्चाशदधिकं शतम् ॥

इति श्रीमदीशाद्यष्टोत्तरशतोपनिषच्छास्त्रविवरणे अष्टत्रिंशत्सङ्ख्यापूरकं नादबिन्दूपनिषद्विवरणं सम्पूर्णम्

[1] यत्र—उ १.

पाशुपतब्रह्मोपनिषत्

भद्रं कर्णेभिः—इति शान्तिः

पूर्वकाण्डः

जगन्नियन्तृविषयाः सप्तप्रश्नाः

अथ ह वै स्वयंभूर्ब्रह्मा प्रजाः सृजानीति कामकामो जायते कामेश्वरो वैश्रवणः ॥ १ ॥ वैश्रवणो ब्रह्मपुत्रो वालखिल्यः स्वयंभुवं परिपृच्छति—जगतां का विद्या का देवता जाग्रत्तुरीययोरस्य को देवो [1]यानि कस्य वशानि कालाः कियत्प्रमाणाः कस्याज्ञया रवि-चन्द्रग्रहादयो भासन्ते कस्य महिमा गगनस्वरूप एतदहं श्रोतु-मिच्छामि नान्यो जानाति त्वं ब्रूहि ब्रह्मन् ॥ २ ॥

पाशुपतब्रह्मविद्यासंवेद्यं परमाक्षरम् ।
परमानन्दसम्पूर्णं रामचन्द्रपदं भजे ॥

इह खलु अथर्वणवेदप्रविभक्तेयं पाशुपतब्रह्मोपनिषत् हंससूत्रस्वरूप-प्रकटनव्यग्रा निष्प्रतियोगिकब्रह्ममात्रपर्यवसन्ना विजयते । अस्याः सङ्क्षेपतो

[1] युगानि—अ.

विवरणमारभ्यते । वालखिल्यस्वयम्भूप्रश्नप्रतिवचनरूपेयमाख्यायिका विद्यास्तुत्यर्था । आख्यायिकामवतारयति—अथेति । अथ प्राण्यदृष्टपरिपाकानन्तरम् । हवा इति वृत्तार्थस्मरणार्थौ निपातौ । स्वयमेव भवतीति स्वयम्भूः ब्रह्मा तस्य प्रजाः सृजेयमिति कामं कामः कामकामो जायते प्रादुर्बभूव । तत्सङ्कल्पानुरोधेन कामेश्वरो रुद्रः, "ललाटात् क्रोधजो रुद्रोऽजायत" इति श्रुतेः, वैश्रवणश्च ॥ १ ॥ वैश्रवणोनामकः ब्रह्मपुत्रः वालखिल्यो ऋषिपूगश्च स्वयम्भुवं परिपृच्छति । किमिति? जगतां का विद्येत्यादि समधा प्रश्नः कृतः । एतदहं त्वत्तः सकाशात् श्रोतुमिच्छामि । त्वदितरेणैतदुक्ता न हि कोऽपि विद्यते । अतो ब्रह्मन् त्वं ब्रूहि ॥ २ ॥

सप्तप्रश्नानामुत्तराणि

स्वयंभूरुवाच—[1]कृत्स्नजगतां मातृका विद्या ॥ ३ ॥ द्वित्रिवर्णसहिता द्विवर्णमाता त्रिवर्णसहिता चतुर्मात्रात्मकोङ्कारो मम प्राणात्मिका देवता ॥ ४ ॥ अहमेव जगत्त्रयस्यैकः पतिः ॥ ५ ॥ मम वशानि सर्वाणि युगान्यपि [2]च ॥ ६ ॥ अहो[3]रात्रादिमतिसंवर्धिताः कालाः ॥ ७ ॥ मम रूपा रवेस्तेजश्चन्द्रनक्षत्र[4]ग्रहतेजांसि ॥ ८ ॥ गगनो मम त्रिशक्तिमायास्वरूपः नान्यो मदस्ति ॥ ९ ॥ तमोमायात्मको रुद्रः सात्विकमायात्मको विष्णू राजसमायात्मको ब्रह्मा । इन्द्रादयस्तामसराज[5]सात्मिका न सात्विकः कोऽपि अघोरः [6]साधारणस्वरूपः ॥ १० ॥

[1] कृत्स्नं—अ १, अ २, क. [2] "च" लुप्तम्—क, अ २.
[3] रात्रामति सं—क, अ १, अ २, उ १. रात्रादयः मत्सं—अ.
[4] ग्रहास्ते—अ, अ १, अ २. [5] ससात्विका [6] सर्वसाधा—क, अ २.

इति पृष्टो भगवान् स्वयम्भूरुवाच'। किमिति? 'जगतां का विद्या' इत्याद्यप्रश्नमपाकरोति—कृत्स्नजगतां मातृका अकारादिक्षकारान्तरूपिणी विद्या, तस्या वैखरीप्रपञ्चनिर्वाहकत्वात् ॥ ३ ॥ 'का देवता' इति द्वितीय-प्रश्नमपाकरोति—द्वित्रिवर्णेति । षदरूपेण द्वित्रिवर्णसहिता स्वयमकारो-काराख्यद्विवर्णतो मीयत इति द्विवर्णमाता मकारेण सह त्रिवर्णसहिता "स्थूलमेतद्ह्रस्वदीर्घप्लुतम्" इति श्रुत्यनुरोधेन य ओङ्कारः चतुर्मात्रात्मको भवति सोऽयं मम प्राणात्मिका देवता ॥ ४ ॥ 'जाग्रत्तुरीययोरस्य को देवः' इति प्रश्नमपाकरोति—अहमेवेति । अस्य जाग्रदादितुरीयान्तकलनाकलितस्य जगत्त्रयस्य अहमेक एव देवः, मम सूत्रादिरूपेण जगन्त्रयचालकत्वात् ॥ ५ ॥ 'यानि कस्य वशानि' इति प्रश्नमपाकरोति—ममेति । कृतादियुगानि, अपिच-शब्दाभ्यां स्थावरजङ्गमात्मकं जगच्च मदृशे वर्तत इत्यर्थः ॥ ६ ॥ 'कालाः कियत्प्रमाणाः' इति प्रश्नमपाकरोति—अहोरात्रेति । निमेषाहोरात्रादिमत्या संवर्धिताः कल्पावसानाः कालाः ॥ ७ ॥ 'कस्याज्ञया रविचन्द्रग्रहादयो भासन्ते' इति प्रश्नमपाकरोति—मम रूपा इति ।

यदादित्यगतं तेजो जगद्भासयतेऽखिलम् ।
यच्चन्द्रमसि यच्चाग्नौ तत्तेजो विद्धि मामकम् ॥

इति स्मृतेः ॥ ८ ॥ 'कस्य महिमा गगनस्वरूपः' इति चरमप्रश्नमपाकरोति—गगन इति । गगनः गगनम् । क्रियाज्ञानेच्छारूपेण दुर्गालक्ष्मीसरस्वतीरूपेण वा मायामयाः तिस्रः शक्तयः तत्कार्यजातं च मन्महिमास्वरूपमित्यर्थः । अहं एतादृशः परमेश्वरः, मदतिरेकेण न किञ्चिदस्तीत्याह—नान्य इति ॥ ९ ॥ रुद्रादयः किंगुणविशिष्टाः इत्यत आह—तम इति । तस्य सर्वसंहारकतया तामसगुणोपाधित्वात् । विष्ण्वतिरेकेण न सात्त्विकः कोऽपि, तस्य सर्वमर्यादापालकतया शुद्धसत्वरूपत्वात् । अत एवाऽयं अघोरः सर्वसाधारणस्वरूपः सत्वगुणावष्टम्भतः शान्तरूपेण भक्तकोटिसाधारणत्वात् ॥ १० ॥

सृष्टियज्ञे कर्त्रादिनिरूपणम्

समस्तयागानां रुद्रः [1]पशुकर्ता रुद्रो यागदेवो विष्णु-
रध्वर्युर्होतेन्द्रो देवता यज्ञभुङ् मानसं ब्रह्म महेश्वरं ब्रह्म ॥ ११ ॥

सृष्टियज्ञे रुद्रादयः कीदृशाः सन्तः किं कुर्वन्ति इत्यत आह—**समस्तेति** । तत्र **रुद्रस्तु** अग्निष्टोमादिवाजिमेधान्तसमस्तयागानां विशसनकर्मणि पशून् करोतीति **पशुकर्ता** यागसामान्यस्य पशुप्रधानत्वात् रुद्रः । **यागदेवः**, यागप्रधानाहुतिद्रव्यस्य विष्ण्वायत्तत्वात्, **विष्णुः अध्वर्युः** अन्यूनाधिकतया तत् पालयन् । चालकत्वात् **होता इन्द्रः**, स्तुतशस्त्रकृत्त्वात् । तत्तद्देवतारूपेण पशुपतिरेव **यज्ञभुक्** । **मानसं ब्रह्म**—वाङ्मौनपूर्वं मानसं मनसा सर्वर्त्विङ्निर्वर्त्यप्रयोगद्रष्टृत्वेन यज्ञोपबृंहणात् —**महेश्वरं ब्रह्म** ब्रह्मणः सर्वद्रष्टृतया ब्रह्म ब्रह्माणं महेश्वरं विद्धि ॥ ११ ॥

नादानुसन्धानयज्ञः

मानसो हंसः [2]सोऽहं हंस इति तन्मयं यज्ञो नादानुसंधानम् ।
तन्मयविकारो जीवः ॥ १२ ॥

कोऽयं यज्ञ इत्यत्र नादानुसन्धानं इत्याह—**मानस इति** । **हंसः-सोऽहमिति** चिरभावनातः **तन्मयं** तद्भावसाधनं यत् **नादानुसन्धानं** तदेव **मानसो यज्ञो** भवतीत्यर्थः । एवं अनुसन्धाता **जीवस्तु** उच्छ्वासनिःश्वासवद्यन्मनः **तन्मयविकारः** । जीवस्य प्राणमनउपाधिकत्वात् तद्विकारत्वं युज्यत इत्यर्थः ॥ १२ ॥

परमात्मनो हंसत्वनिरूपणम्

परमात्मस्वरूपो हंसः । अन्तर्बहिश्चरति हंसः । अन्तर्गतो-
ऽनवकाशान्तर्गतसुपर्णस्वरूपो हंसः ॥ १३ ॥

[1] पशुपतिः कर्ता—अ. [2] सोहमिति—अ.

हंसस्तु स्वतत्त्वज्ञानेन स्वातिरिक्तभ्रमं हन्ति अपह्नवं करोतीति हंसः परमात्मा भवति। स कुत्र आसनमर्हतीत्यत्र—सोऽयं हंसः प्राणापानोपाधियोगात् अन्तर्बहिश्चरति। यद्वा—सर्वप्राण्यन्तर्बहिश्चरति प्रत्यगभिन्नब्रह्मरूपेण उपलभ्यते, "अन्तर्बहिश्च तत् सर्वं व्याप्य नारायणः स्थितः" इति श्रुतेः। सर्वप्राण्यन्तः कामादयो वर्तन्ते, बाह्ये शब्दादिविषयाश्च, तथा सति स्वव्याप्तेः अनवकाशात् कथं अन्तर्गतो बहिर्गतो वा भवितुमर्हतीत्यत्र—सर्वप्राण्यन्तर्बाह्यगतकामशब्दादिविषसर्पग्राससुपर्णस्वरूपो हंसः। प्रत्यगभिन्नं ब्रह्मास्मीति सम्यज्ज्ञानस्य स्वान्तर्बाह्यकलनाविलयपूर्वकत्वात् हंसः स्वान्तर्बहिः व्याप्य परिपूर्णो भवतीत्यर्थः। तथाच स्मृतिः—

विषया बाह्यदेशस्था देहस्यान्तर्हृदाकृतिः।
सर्वग्रहोपसंशान्तौ स्वयमेवावशिष्यते॥

इति॥ १३॥

यज्ञसूत्रब्रह्मसूत्रयोः साम्यम्

षण्णवतितत्त्वतन्तुवद्व्यक्तं चित्सूत्रत्रयचिन्मयलक्षणं नवतत्त्वत्रिरावृतं ब्रह्मविष्णुमहेश्वरात्मकमग्नित्रयकलोपेतं चिद्ग्रन्थिबन्धनम् अद्वैतग्रन्थिः॥ १४॥ यज्ञसाधारणाङ्गं बहिरन्तर्ज्वलनं यज्ञाङ्गलक्षणब्रह्मस्वरूपो हंसः॥ १५॥

बाह्यान्तर्भासमानयज्ञब्रह्मसूत्रयोः साम्यमाह—षण्णवतीति। चतुरङ्गुलमानेन षण्णवतिसङ्ख्याविशिष्टं यज्ञसूत्रं यथा व्यक्तं भवति तथा षण्णवतितत्त्वतन्तुविशिष्टं ब्रह्मसूत्रं व्यक्तं भवति। यज्ञसूत्रं तु सूत्रत्रयविशिष्टतन्तुलक्षणं, ब्रह्मसूत्रं तु द्वितुर्यांविकल्पात्मना चित्सूत्रत्रयचिन्मयलक्षणं भवति। यथा यज्ञसूत्रं सूत्रत्रयं त्रिरावृतं यदि तदा नवसूत्रं भवति तथा ब्रह्मसूत्रमपि द्वितुर्यांविकल्पत्रयं त्रिरावृतं चेत् नवमहातत्त्वात्मकं भवति। यद्वा—तुर्यविश्वविराडोत्रादिभेदेन नवतत्त्वं तुर्यप्राज्ञबीजानुज्ञैकरसात्मना त्रिरावृतं तृतीयपाद-

पर्यवसन्नं भवति । यद्वा—नवतत्त्वत्रिरावृतं ब्रह्मसूत्रं ब्रह्मविष्णुमहेश्वरात्मकं गार्हपत्याद्यग्नित्रयकळोपेतं वा भवति । एवं त्रिधाभिन्नब्रह्मसूत्रैक्योपायस्तु चिन्मात्रादतिरिक्तं त्रिधा विभक्तं न किञ्चिदस्तीति चिद्ग्रन्थिबन्धनम् । व्यष्टिसमष्टितदैक्यावभासकचितामैक्यं ग्रन्थिबन्धनतः कथमित्यत्र—अद्वैतग्रन्थिः तदैक्यग्रन्थेः तद्भेदग्रासत्वात् अद्वैतग्रन्थिः अद्वितीयपरमात्मा भवतीत्यर्थः । यथा यज्ञसूत्रब्रह्मग्रन्थिः तदैक्यहेतुः तथा अत्रापीत्यर्थः ॥ १४ ॥ बाह्यान्तः-सूत्रयोः सामानाधिकरण्यमाह—यज्ञेति । यज्ञसूत्रं बहिः ज्वलतीति यथा बाह्ययज्ञसाधारणाङ्गं भवति तथा ब्रह्मसूत्रं अन्तर्ज्वलतीत्यन्तर्यज्ञसाधारणाङ्गं भवतीति ज्ञेयम् । हंसस्तु अन्तर्यज्ञाङ्गलक्षणब्रह्मस्वरूपो भवति ॥ १५ ॥

ब्रह्मयज्ञो ब्राह्मणाधिकारिकः

उपवीतलक्षणसूत्र[1]ब्रह्मगा यज्ञाः । ब्रह्माङ्गलक्षणयुक्तो यज्ञसूत्रम् । तद्ब्रह्मसूत्रम् । यज्ञसूत्रसंबन्धी ब्रह्मयज्ञः तत्स्वरूपः ॥१६॥

बाह्ययज्ञास्तु उपवीतलक्षणसूत्रवद्ब्रह्मगा ब्राह्मणाश्रया भवन्ति । यज्ञसूत्रं ब्रह्माङ्गलक्षणयुक्तो वेदाङ्गलक्षणयुक्तो ब्राह्मणो भजति । तत् ब्रह्मसूत्रमपि स एव भजति । तत् कथं इत्यत्र—यज्ञसूत्रवद्ब्राह्मणसम्बन्धी ब्रह्मयज्ञः, ब्रह्मनिष्ठाया ब्राह्मणनिर्वर्त्यत्वात् । यो यन्निष्ठः स तत्स्वरूपो भवति ॥ १६ ॥

प्रणवहसस्य ब्रह्मयज्ञत्वम्

अङ्गानि मात्राणि । मनोयज्ञस्य हंसो यज्ञसूत्रम् । प्रणवं ब्रह्मसूत्रं ब्रह्मयज्ञमयम् । प्रणवान्तर्वर्ती हंसो ब्रह्मसूत्रम् । तदेव ब्रह्मयज्ञमयं मोक्षक्रमम् ॥ १७ ॥

[1] ब्रह्मसूत्रगा—क.

यत्प्रणवनिष्ठः प्रणवो भवति तदङ्गानि कानीत्यत्र—**मात्राणि** अकारादि-मात्राः। अङ्गिप्रणवस्वरूपं कीदृशं इत्यत्र—**मनोयज्ञस्य** अन्तर्यज्ञस्य फलत्वेन यो विराजते **हंसः** तत्स्वरूपमेव **यज्ञसूत्रम्**। प्रणवं प्रणवः **ब्रह्मसूत्रमयं ब्रह्मयज्ञश्च**। यत एवं अतो हंस एव सर्वं, तदतिरिक्तं न किञ्चिदस्ति इत्यर्थः। यो **हंसः** प्रणवार्थतया **प्रणवान्तरुपलभ्यते** स एव **ब्रह्मसूत्रम्**। प्रत्यगभिन्नं ब्रह्म यत् ब्रह्मसूत्रं **तदेव ब्रह्मयज्ञमयं** निर्विशेषब्रह्मज्ञानम्। तदेव **मोक्षक्रमं** स्वातिरिक्तभ्रममोक्षणस्य स्वमात्रज्ञानमेव साधनं, तदतिरिक्तसाधनजालस्य तन्मोक्षणेऽकिञ्चित्करत्वात्। अयमेव हि क्रमः, "नान्यः पन्था अयनाय विद्यते" इति श्रुतेः ॥ १७ ॥

ब्रह्मसन्ध्याक्रियारूपो मनोयागः

ब्रह्मसंध्याक्रिया मनोयागः। संध्याक्रिया मनोयागस्य लक्षणम् ॥ १८ ॥

मनोयागः कीदृशः इत्यत आह—**ब्रह्मेति**। "तत् त्वमसि," "अहं ब्रह्मास्मि" इति प्रत्यक्परब्रह्मणोरैक्यमेव **सन्ध्याक्रिया मनोयागः** उच्यते। तयोः **सन्ध्याक्रिया** हि **मनोयागस्य लक्षणं** इत्यत्र—जीवात्मपरमात्मनोः एकत्वज्ञानेन तयोः भेद एव विभग्नः, सा सन्ध्येति—

नोदकैर्जायते सन्ध्या न मन्त्रोच्चारणेन तु।
सन्धौ जीवात्मनोरैक्यं सा सन्ध्या सद्भिरुच्यते ॥

इति श्रुतेः स्मृतेश्च ॥ १८ ॥

हंसप्रणवाभेदानुसन्धानं अन्तर्यागः

यज्ञ[1]सूत्रं प्रणवम्। ब्रह्मयज्ञक्रियायुक्तो ब्राह्मणः। ब्रह्मचर्येण चरन्ति देवाः। हंससूत्रचर्या यज्ञाः। हंसप्रणवयोरभेदः ॥ १९ ॥

[1] सूत्रप्रणवब्र—अ.

हंसस्य प्रार्थनास्त्रिकालाः । त्रिकालास्त्रिवर्णाः । त्रेताभ्यनुसंधानो यागः । त्रेताभ्यात्माकृतिवर्णोङ्कारहंसानुसंधानोऽन्तर्यागः ॥ २० ॥ चित्स्वरूपवत्तन्मयं तुरीयस्वरूपम् । अन्तरादित्ये ज्योतिःस्वरूपो हंसः ॥ २१ ॥ यज्ञाङ्गं ब्रह्मसंपत्तिः । ब्रह्म[1]प्रवृत्तितत्प्रणवहंससूत्रेणैव ध्यानमाचरन्ति ॥ २२ ॥

हंसप्रणवयोः अभेदं वक्तुं भूमिकां करोति—**यज्ञसूत्रमिति** । यज्ञत्वेन सूचनात् **यज्ञसूत्रं** ब्रह्मप्रणवं प्रणवः, यज्ञस्य विष्णोः प्रणवार्थत्वात् **ब्रह्मयज्ञक्रिया** निष्कामकर्मानुष्ठानसहकृतध्यानसमाधिः, तदनुष्ठाता **ब्राह्मणः**, तस्य परापरब्रह्मवित्त्वात् । "ब्रह्मभावे मनश्चारो ब्रह्मचर्यं विदुर्बुधाः" इति श्रुत्यनुरोधेन **देवा** इन्द्रादयोऽपि सदा **ब्रह्मचर्येण चरन्ति**, तेषां प्रजापतिशिष्यत्वेन ब्रह्मवित्त्वात् । **यज्ञा** अपि **हंससूत्रचर्याः** अन्तर्यज्ञानां प्रत्याहारधारणाध्यानसमाधीनां हंससूत्रचर्याविर्भावहेतुत्वात् । "आत्ममन्त्रस्य हंसस्य परस्परसमन्वयात्" इति स्मृतिसिद्धः **हंसप्रणवयोरभेदः**, वाच्यवाचकयोरैक्यत्वात् ॥ १९ ॥ हंसप्रणवयोरैक्यं कथमित्यत्राह—**हंसस्येति** । प्रत्यगभिन्नपरमात्मनो **हंसस्य** आप्त्युपायभूताः **प्रार्थनाः** श्रवणादयः । ते **त्रिकालाः**, श्रवणादीनां कालपरिच्छेद्यत्वात् । भूतादित्रिकाला एव अकारादित्रिवर्णाः । विश्वविराडोत्रादि**त्रेताभ्यनुसन्धानो**ऽनुसन्धानमन्तर्यागः । तत् कथं इत्यत्र—विश्वादित्रेताभ्यात्मनां द्वितुर्यांविकल्पपर्यवसन्नानां व्यष्टिसमष्टितदुभयैक्याकाराद्याकृतिवर्णवदोङ्कारार्थनिष्प्रतियोगिकतुर्यतुर्यहंसः स्वमात्रमित्यनुसन्धानोऽनुसन्धानमन्तर्यागः ॥ २० ॥ विश्वविराडोत्रादिचित्स्वरूपवत्तन्मयं तद्वतहेयांशापायसिद्धं तुर्यप्रविभक्ततुरीयस्वरूपम् । तद्विकल्पितान्तरादित्ये स्वान्तःकामादिवृत्त्यवभासकप्रत्यक्सूर्ये तदभेदेन विद्योतमानज्योतिःस्वरूपो हंसः परमात्मा ॥ २१ ॥ तदनुसन्धानात्मकान्तर्यज्ञाभिधानाङ्गं सम्यज्ज्ञानमङ्गिब्रह्मसम्पत्तिहेतुः, स्वाप्तेः

[1] प्रवृत्तौ—अ.

स्वातिरिक्तासम्भवसिद्धस्वज्ञानपूर्वकत्वात्। अत एव ब्रह्मविदादयः पराक्प्रवृत्ति-निरसनपूर्वकं प्रत्यगभिन्नब्रह्मगोचरा प्रवृत्तिः तदालम्बनभूतः प्रणवः तदर्थभूतप्रत्यक्परविभागैक्यासहतुर्यतुर्यहंसरूपेण तुरीयोङ्कारात्प्रविद्योतं तुर्यतुर्यं "ब्रह्ममात्रमसन्न हि" इत्यादिश्रुतिततिसूचनात् हंससूत्रं "मद्व्यतिरिक्तमणुमात्रं न विद्यते" इति निर्विशेषब्रह्मज्ञानं तेनैव हंसः स्वमात्रमिति ध्यानमाचरन्ति। एवंनिष्ठाः तत्स्वरूपा एव भवन्तीत्यर्थः ॥ २२ ॥

षण्णवतिहंससूत्राणि

प्रोवाच पुनः स्वयंभुवं प्रतिजानीते ब्रह्मपुत्रो ऋषिर्वाल-खिल्यः। हंससूत्राणि कतिसंख्यानि कियद्वा प्रमाणम् ॥ २३ ॥

हृदादित्यमरीचीनां पदं षण्णवतिः। [1]चित्सूत्राघ्राणयोः स्वर्निर्गता प्रणवाधारा षडङ्गुल्यदशाशीतिः ॥ २४ ॥

वालखिल्यः स्वयम्भूमुखात् एवमवगम्य पुनः स्वावगतिदार्ढ्याय ब्रह्मयज्ञसूत्रेयत्तां पृच्छतीत्याह—प्रोवाचेति। वालखिल्यो मुनिः पुनः स्वयम्भुवं प्रति हे भगवन्—भवान् सर्वं प्रतिजानीते, तव निरङ्कुशसर्वज्ञत्वात्—हंसस्य परमात्मनः प्रापकतया सूचनात् सूत्राणि कतिसङ्ख्याकानि कियद्वा तत्प्रमाणं तदियत्तेति तद्बुभुत्सया प्रोवाच पृष्टवान् ॥ २३ ॥ प्रश्नोत्तरं भगवानाह—हृदीति। हृदि विलसितकामादिवृत्तिसहस्रभावाभावप्रकाशचि-दादित्यमरीचीनां तत्त्वकिरणानां वराहोपनिषत्प्रकाशितानां पदं स्वरूपं षण्णवतिः, कार्पासकयज्ञसूत्रषण्णवतितुल्यमित्यर्थः। षण्णवतिसङ्ख्याक-चित्तत्वमरीचयः क्व आविर्भूता इत्यत्र—चित्सूत्रोपलब्धिहेतुहृदयाद्याघ्राणयोः विश्वकायविराड्हृदये तत्सङ्कल्पत आविर्भूय—आघ्राण इत्यत्राकारः छान्दसः—घ्राणयोः घ्राणाभ्यां अकारादिस्वरात्मकोच्छ्वासरूपेण बहिर्निर्गतानि तत्त्वानि

[1] चित्सूत्रघ्रा—क, अ.

तेषां भेदाः । किमाधारा इत्यत्र परापरब्रह्माधिष्ठितप्रणवाधाराः सन्तः अद्यापि वर्तन्ते । कतिविधा इत्यत्र षडङ्गुलदशाशीतिः षण्णवतिविधा भवन्ति । यद्वा—षण्णवत्यङ्गुलपरिमितषण्णवतितत्त्वात्मका भवन्ति ॥ २४ ॥

हंसात्मविद्यैव मुक्तिः

वाम[1]बाहुदक्षिणकट्योरन्तश्चरति हंसः परमात्मा ब्रह्मगुह्यप्रकारो नान्यत्र विदितः ॥ २५ ॥ ये जानन्ति तेऽमृतफलकाः । सर्वकालं [2]हंसं न प्रकाशकम् । प्रणवहंसान्त[3]र्ध्यान[4]प्रकृतिं विना न मुक्तिः ॥ २६ ॥

इत्थंभूतविराट्छरीरवामबाहुदक्षिणकटयोरन्तश्चरति हंसः परमात्मा यथा यज्ञसूत्रं वामबाहुदक्षिणकट्यन्तं विराजते तथा वामबाहुदक्षिणकटयुपलक्षितसर्वाङ्गं स्वाविद्यापदतत्कार्यजातं तदन्तर्बहिश्च विश्वविश्वाद्यविकल्पानुञ्जैकरसान्तभेदेन चरति । वस्तुतस्तु हंसः तत्सर्वापह्नवसिद्धपरमात्मरूपेण अवशिष्यत इति योऽर्थः सोऽयमर्थो ब्रह्मगुह्यप्रकारः नान्यत्र विदितः, अत्रैव विशेषतः प्रकटितत्वात् ॥ २५ ॥ विद्याफलमाह—य इति । किं सर्वेऽप्येवं हंसं आत्मतया विदित्वा तद्वेदनफलं अमृतत्वं नाप्नुयुः इत्यत आह—सर्वेति ।

श्रुतिः स्मृतिः ममैवाज्ञा यस्तामुल्लङ्घ्य वर्तते ।
आज्ञाच्छेदी मम द्रोही मद्भक्तोऽपि न वैष्णवः ॥

इति स्मृतिसिद्धस्वाज्ञारूपश्रुतिस्मृतिमार्गोल्लङ्घकानां निष्प्रतियोगिकब्रह्ममात्रं भावरूपं ब्रह्मातिरिक्ताविद्यापदतत्कार्यजातमपि निष्प्रतियोगिकाभावरूपं नानयोः वाच्यवाचककार्यकारणाधाराधेयत्वं अस्तीति सर्वकालं सदा न प्रकाशकं

[1] वामबाह्वोर्द—उ, उ १, अ १.
[2] हंसप्र—अ.
[3] र्धान—क, अ १.
[4] प्रकृतिर्वि—क, अ १, अ २, उ.

हंसमात्मानं, विद्धीति शेषः । तेषां स्वापराधदोषावृतत्वात् दिवाभीतसूर्यवदात्मा स्वरूपप्रकाशको न भवतीत्यर्थः । सत्त्वप्रकृतेः मुक्तिः भेतरस्येत्याह—प्रणवेति । प्रणवहंसः स्वान्तःप्रणवार्थतुर्यतुर्यहंसः सोऽहमिति ध्यानप्रकृतिः ध्यानशीलो जीवन्मुक्तः । तस्य मुक्तिः करस्था । तं विना न कस्यापि मुक्तिरस्ति ॥ २६ ॥

बाह्यापेक्षया आन्तरयागस्य श्रेष्ठत्वम्

नवसूत्रान्परिचर्चितान् । तेऽपि यद्ब्रह्म चरन्ति । अन्तरादित्यं न ज्ञातं मनुष्याणाम् ॥ २७ ॥ जगदादित्यो रोचत इति ज्ञात्वा ते मर्त्या विबुधास्तपनप्रार्थनायुक्ता आचरन्ति ॥ २८ ॥ वाजपेयः पशुहर्ता अध्वर्युरिन्द्रो देवता अहिंसा धर्मयागः परमहंसोऽध्वर्युः परमात्मा देवता पशुपतिः ॥ २९ ॥ ब्रह्मोपनिषदो ब्रह्म । स्वाध्याययुक्ता ब्राह्मणाश्चरन्ति ॥ ३० ॥

ये तु पुनः विश्वविराडोत्रादिप्राज्ञबीजानुज्ञंकरसान्ततया मिथो भिदाचर्चितान् परस्परभेदेन व्याहृतान् नवसूत्रान् आत्मेति भजन्ति तेऽपि यत् ब्रह्मेति वदन्ति तदेव चरन्ति भजन्ति, विश्वादिनवकगतहेयांशापाये तेषामपि ब्रह्मरूपत्वात् । तथाऽपि ते यथावत् न जानन्तीत्याह—अन्तरिति । मनुष्याणां मनुष्यैः स्वान्तर्विलसितचिदादित्यस्वरूपं न ज्ञातं, तेषां स्वाज्ञानावृतत्वात् ॥ २७ ॥ तेषां कुत्र रुचिः? जगदात्मकादित्यो रोचते, तेषां नामरूपमोहितदृष्टित्वात् । ते परमार्थात् हीयन्त इत्यर्थः । केचन एवं ज्ञात्वा मर्त्या विबुधाश्च स्वाज्ञानजस्वातिरिक्तध्वान्तग्रासचित्तपनप्रार्थनायुक्ताः चिदादित्योऽस्मीति नित्यानुसन्धानशीलाः परमार्थतत्त्वमाचरन्ति ॥ २८ ॥ किमाचरन्तीत्यत्र अन्तर्यागमित्याह—वाजपेय इति । वाजं स्वातिरिक्तान्नरसं

पिबतीति वाजपेयो निर्विशेषज्ञानयज्ञः । देहादावात्मात्मीयाभिमतिपशुं-हरतीति पशुहर्ता । य इन्द्रः परमेश्वरो देवतात्वेन अभिमतः स एव अध्वर्युः भूत्वा ज्ञानयज्ञचालको भवति । बाह्ययज्ञापेक्षया अस्य श्रैष्ठ्ये हेतुः अहिंसात्मकोऽयं मोक्षधर्मयागः । ज्ञानयागनिर्वाहकोऽध्वर्युः परमहंसपरिव्राजक एव । यज्ञदेवता तु पशुपतिः परमात्मैव देवता ॥ २९ ॥ इत्थंभूतब्रह्मोपनिषदः परमतात्पर्यार्थस्तु ब्रह्मैव नेतरत्, ब्रह्मणो वेदवेदान्तार्थत्वात् । के एवं आचरन्तीत्यत्र—स्वाध्याययुक्ता वेदवेदान्तार्थपारीणाः ब्राह्मणाः आचरन्ति, तेषां ज्ञानयज्ञे मुख्याधिकारित्वात् ॥ ३० ॥

ज्ञानयज्ञरूपोऽश्वमेधः

अश्वमेधो महायज्ञकथा । तद्राज्ञा ब्रह्मचर्यमाचरन्ति । सर्वेषां पूर्वोक्तब्रह्मयज्ञक्रमं मुक्तिक्रममिति ॥ ३१ ॥

महायज्ञकथा कीदृशी इत्यत्र—स्वातिरिक्तप्रपञ्चपशुमेधनं विशसनं अपह्नवः, श्वः परश्वो वा भवित्विति विश्वासानर्होऽश्वमेधः स्वज्ञानसमकालमेव स्वातिरिक्तसामान्यस्य अपह्नोतुं युक्तत्वात् । इयमेव हि निर्विशेषमहाज्ञानयज्ञकथा ख्यातिरित्यर्थः । तादृशाश्वमेधमहायज्ञे निष्प्रतियोगिकस्वमात्रतया राजत इति तद्राजा तेन तद्राज्ञा स्वकृतसाधनानुष्ठानेन ये अनुगृहीताः कृतार्था भवन्त्विति ते हि द्विविधब्रह्मचर्यमाचरन्ति ब्रह्मचर्यस्य तत्प्रसादबहिर्भूतानां सुदुर्लभत्वात् इति यत् तत् सर्वेषां मुमुक्षूणां यो ब्रह्मप्रापकमार्गोऽस्ति तं पूर्वोक्तब्रह्मयज्ञक्रमं मुक्तिक्रमं चेति विद्धि ॥ ३१ ॥

तारकहंसज्योतिः

ब्रह्मपुत्रः प्रोवाच । उदितो हंस ऋषिः । स्वयंभूस्तिरोदधे । [1]रुद्रो ब्रह्मोपनिषदो हंसज्योतिः पशुपतिः प्रणवस्तारकः स एवं वेद ॥ ३२ ॥

[1] ख्रोप—क, अ २.

इति स्वयम्भुवा अनुगृहीतः ब्रह्मपुत्रः वालखिल्यगणः प्रोवाच । किमिति ? भगवदुपदेशमहिम्ना उदितो हंस ऋषिः सर्वापह्नवसिद्धनिष्प्रतियोगिक-स्वमात्रतया हंसः परमात्मा प्रादुर्भूतः, तेन अहं कृतकृत्योऽस्मीति शिष्योक्ति-माकर्ण्य अतीव हर्षितः सन् स्वयम्भूस्तिरोदधे । स्वस्वरूपं गतवानित्यर्थः । रुद्रो वैश्रवणोऽप्येवं वेदेत्याह—रुद्र इति । वैश्रवणेन साकं रुद्रोऽपि स्वयम्भूमुखतः ब्रह्मोपनिषदः परमाशयो ब्रह्मतारकार्थः पशुपतिः हंसज्योति-रस्मीत्येवं विदितवानित्यर्थः ॥ ३२ ॥

उत्तरकाण्डः

अखण्डवृत्त्या ब्रह्मसम्पत्तिः

हंसात्ममालिका[1]वर्णब्रह्मकालप्रचोदिता ।
परमात्मा पुमानिति ब्रह्मसंपत्तिकारिणी ॥ १ ॥
अध्यात्मब्रह्मकल्पस्य आकृतिः कीदृशी कथा ।

कथं एवं विदितवानित्यत आह—हंसेति । अभिधेयरूपस्य हंसात्मनो मालिकावर्णोऽभिधानात्मकोऽयमोङ्कारः तदर्थरूपं ब्रह्मैव कालेश्वरस्वरूपमासाद्य एवं कर्तव्यं एवमकर्तव्यमिति सर्वप्राणिहिताहितविषयप्रचोदिता प्रचोदयिता प्रेरको भवति । स्वेन रूपेण पुमान् ईश्वरः स्वगतविशेषापाये निष्प्रतियोगिक-परमात्मा स्वमात्रमवशिष्यत इति या संविदखण्डाकारवृत्तिरुदेति सेयं ब्रह्म-सम्पत्तिं करोतीति ब्रह्मसम्पत्तिकारिणी भवति ॥ १ ॥ इति या "ब्रह्म वेद ब्रह्मैव भवति" इत्यादिवेदान्तप्रसिद्धा सैवाध्यात्मब्रह्मकल्पस्यासावाकृतिः निरङ्कुशोपायभूतेत्यर्थः । उक्तार्थदार्ढ्याय चोदयत्येवम्—कीदृशी कथेति ॥

[1] वर्णा—उ, उ १.

परमात्मनि जगदाविर्भावो मायिकः

ब्रह्मज्ञानप्रभा सन्ध्या कालो गच्छति धीमताम् ।
हंसाख्यो देवमात्माख्यमात्मतत्त्वप्रजा कथम् ॥ २ ॥
[1]अन्तःप्रणवनादाख्यो [2]हंसः प्रत्ययबोधकः ।
अन्तर्गतप्रभा[3]गूढं [4]ज्ञाननालं विराजितम् ॥ ३ ॥
शिव[5]शक्त्यात्मकं रूपं चिन्मयानन्दवेदितम् ।
नादबिन्दुकला [6]त्रीणि नेत्र विश्वविचेष्टितम् ॥ ४ ॥
[7]त्रियङ्गानि शिखा त्रीणि [8]द्वित्रीणि संख्यमाकृतिः ।
अन्तर्गूढप्रभा हंसः [9]प्रमाणान्निर्गतं बहिः ॥ ५ ॥

ब्रह्माकारवृत्तिकथा कीदृशी इत्यत्र—**ब्रह्मज्ञानसूर्यप्रभा** प्रत्यक्परचित्सिद्धिमैक्यं करोतीति **सन्ध्येत्युच्यते** । तया हि खलु **धीमतां** जीवन्मुक्तानां **कालो** गच्छति, जीवन्मुक्तानां निर्विशेषब्रह्मसमाधिक्षपितकालत्वात् । स्वातिरिक्तपराक्प्रपञ्चग्रासहंसाख्यः प्रत्यग्देवं स्वप्रकाशचिन्मात्रं परमात्मानं भजति चेत् तदा **स्वात्मतत्त्वे कथं** विश्वविराडोत्रादिप्रजा जायते ॥ २ ॥ इत्यत्र—परमार्थतः स्वातिरेकेण कापि प्रजा न जायते, मायया पुनः प्रत्यगादिभावमेत्य यदा भासते तदा तद्ग्रास्यवर्गोऽपि जात इव लक्ष्यत इत्याह—**अन्तरिति** । नारदपरिव्राजकोपनिषद्यष्टमात्रात्मकोऽन्तःप्रणवः सम्यक् प्रपञ्चितः । तत्रान्तःप्रणवनादावभासकः प्रत्यक् **हंसः** स्वान्तर्बाह्यविकल्पितपराक्प्रत्ययकदम्बबोधकोऽवभासको भवति । तथा चेत् किं तत् प्रत्यक्तत्त्वं न दृश्यते इत्यत्र—पराग्दृशामन्तर्गतप्रमया गूढं भाति

[1] अतः—अ. [2] हंसप्रत्ययरो—क. [3] रूढम्—उ. [4] ज्ञानं—उ, क.
[5] तत्वा—क. [6] तीतनेत्रं—उ १. [7] क्रियांगानि.—अ २, क.
[8] द्वित्राणांसांख्य—अ. द्वित्रीणिस्संख्य—क, अ १, अ २. द्वित्रिणीसं—उ १.
[9] प्रमाणं नि—अ, अ १. प्रमाणाग्नि—उ.

तद्दृष्ट्या ज्ञाननाळं सर्वप्रकाशकज्ञानप्रत्यग्रूपेण प्रकाशितुं नाळं नालं, समर्थमिव न हि स्थितमित्यर्थः । किं तदप्रकाशात्मकं ? इत्यत्र—स्वेन रूपेण विराजितं तस्य स्वयंप्रकाशत्वेन सर्वप्रकाशकत्वात् ॥ ३ ॥ कैः एवं विदितं इत्यत्र—प्रत्यग्दृष्टिभिः यत् शिवशक्त्यात्मकं शवळरूपं तदेव स्वगतविशेषांशापायतः सच्चिदानन्दोऽस्मीति वेदितं भवतीत्यत्र

एष सर्वेषु भूतेषु गूढोत्मा न प्रकाशते ।
दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिः ॥

इति श्रुतेः । पुनः स्वाज्ञदृष्ट्या नादबिन्दुकळा इति प्रणवावयवाः तत्कार्याणि अनुग्रहोपसंहारतिरोधानानि त्रीणि सदाशिवाद्यधिष्ठितानि एतद्विकल्पजातं "दक्षिणाक्षिमुखे विश्व" इति, "नेत्रस्थं जागरितं विद्यात्" इति च, श्रुतिसिद्धनेत्रादिचतुर्दशकरणनिर्वर्त्यजाग्रदवस्थाभिमानिविश्वविचेष्टितं विकल्पितमित्यर्थः ॥ ४ ॥ विश्वेन कानि कानि विकल्पितानीत्यत्र स्थूलसूक्ष्मकारणभेदेन त्र्यङ्गानि शरीराणि तदारूढविश्वतैजसप्राज्ञाख्यशिखारूपाणि त्रीणि द्वित्रीणि पञ्चभूततत्कार्यभौतिकानि सङ्ख्यं सङ्ख्यानि यानि सङ्ख्यावाचकानि सर्वत्र आकृतिः नामरूपविकृतिश्च उक्तानि अनुक्तानि च सर्वाणि विश्वस्वाज्ञानविकल्पितानीत्यर्थः । एवंविकल्पकविश्वगतविकल्पापाये स एव प्रत्यक् भवतीत्याह- अन्तरिति । यः पुरा सर्वप्राण्यन्तर्गूढप्रमारूपेण हंसो वर्तते "सत्यं ज्ञानमनन्तं ब्रह्म" इत्यादिश्रुतिप्रमाणान् प्रत्यगभिन्नब्रह्मतत्त्वं बहिर्निर्गतं प्रकाशितं भवति । यदेवं श्रुतिप्रमाणसिद्धं तदेव सच्चिदानन्दमात्मानमद्वितीयं ब्रह्म भावयेत् ॥ ५ ॥

हंसार्कप्रणवध्यानविधिः

ब्रह्मसूत्रपदं ज्ञेयं ब्राह्मचं विध्युक्तलक्षणम् ।
हंसार्कप्रणवध्यानमित्युक्तो ज्ञानसागरे ॥ ६ ॥
एतद्विज्ञानमात्रेण ज्ञानसागरपारगः ।

"आत्मानमेवावेदहं ब्रह्मास्मि" इति विधिच्छायापह्नव[पन्न]वाक्योक्तलक्षणं ग्राह्यं ब्रह्ममात्रतया सूचनात् ब्रह्मसूत्रं स्वावशेषतया पद्यत इति पदं सदैकरूपेण विजृम्भत इति ज्ञेयम् । एवं हंसार्कप्रणवध्यानं यः करोति सोऽयं ज्ञानसागरे ब्रह्मणि समासो भवेदित्युक्तो भवति ॥ ६ ॥ यः कोऽपि मुमुक्षुः एतदुक्तलक्षणं ब्रह्माहमस्मीति विज्ञानमात्रेण स्वान्तर्बाह्यविजृम्भितस्वातिरिक्तज्ञानाज्ञानतत्कार्यभ्रमसागरपारनिष्प्रतियोगिकब्रह्ममात्रावस्थानलक्षणविकळेबरकैवल्यतो भवतीत्यर्थः ॥

परचित एव करणप्रेरकत्वम्

स्वतः शिवः पशुपतिः साक्षी सर्वस्य सर्वदा ॥ ७ ॥
सर्वेषां तु मनस्तेन प्रेरितं नियमेन तु ।
विषये गच्छति प्राणश्चेष्टते वाग्वदत्यपि ॥ ८ ॥
चक्षुः पश्यति रूपाणि श्रोत्रं सर्वं शृणोत्यपि ।
अन्यानि खानि सर्वाणि तेनैव प्रेरितानि तु ॥ ९ ॥
स्वं स्वं विषयमुद्दिश्य प्रवर्तन्ते निरन्तरम् ।
प्रवर्तकत्वं चाप्यस्य मायया न स्वभावतः ॥ १० ॥
श्रोत्रमात्मनि चाध्यस्तं स्वयं पशुपतिः पुमान् ।
अनुप्रविश्य श्रोत्रस्य ददाति श्रोत्रतां शिवः ॥ ११ ॥
मनः स्वात्मनि चाध्यस्तं प्रविश्य परमेश्वरः ।
मनस्त्वं तस्य सत्त्वस्थो ददाति नियमेन तु ॥ १२ ॥
म एव विदितादन्यस्तथैवाविदितादपि ।
अन्येषामिन्द्रियाणां तु कल्पितानामपीश्वरः ॥ १३ ॥
तत्तद्रूपमनुप्राप्य ददाति नियमेन तु ।

स्वाज्ञविकल्पितकरणग्रामसत्त्वे तच्चालकः कः? इत्यत आह—स्वत इति ॥ ७ ॥ स्वस्वविषये ॥ ८–९ ॥ न स्वभावतः, स्वतो निर्विकारत्वात् ॥ १०–१२ ॥ स्वस्यैव करणत्वं करणग्रामचालकत्वं यदि तदा अयं संसारी स्यादित्याशङ्क्य तत्रात्मात्मीयाभिमानाभावात् तद्विलक्षणतो न संसारीत्याह—स एवेति । यः करणजातस्वरूपी मन् तच्चालकोऽपि भवति स एव ॥ १३–१४ ॥

आत्मान्यस्य मायाकल्पितत्वम्

ततश्चक्षुश्च वाक्चैव मनश्चान्यानि खानि च ॥ १४ ॥
न गच्छन्ति स्वयंज्योतिःस्वभावे परमात्मनि ।
[1]अकर्तृविषयप्रत्यक्प्रकाशं स्वात्मनैव तु ॥ १५ ॥
विना तर्कप्रमाणाभ्यां ब्रह्म यो वेद वेद सः ।

इत्यादि केनोपनिषदि सम्यक् प्रपञ्चितमित्यर्थः । समानप्रकरणत्वात् प्रत्यक्त्वमपि मायिकमित्यत्राह—अकर्तृविषयेति ॥ १५ ॥

वस्तुतः स्वात्मनि मायाऽसम्भवः

प्रत्यगात्मा परं ज्योतिर्माया सा तु महत्तमः ॥ १६ ॥
तथा सति कथं मायासंभवः प्रत्यगात्मनि ।
तस्मात्तर्कप्रमाणाभ्यां स्वानुभूत्या च चिद्घने ॥ १७ ॥
स्वप्रकाशैकसंसिद्धे नास्ति माया परात्मनि ।
व्यावहारिकदृष्टयेयं विद्याऽविद्या न चान्यथा ॥ १८ ॥

[1] अकर्त्रवि—क, अ १, अ २.

तत्त्वदृष्ट्या तु नास्त्येव तत्त्वमेवास्ति केवलम् ।
व्यावहारिकदृष्टिस्तु प्रकाशाव्यभिचारतः ॥ १९ ॥

प्रकाश एव सततं तस्माद्द्वैत एव हि ।
अद्वैतमिति चोक्तिश्च प्रकाशाव्यभिचारतः ॥ २० ॥

प्रकाश एव सततं तस्मान्मौनं हि युज्यते ।

वस्तुतः स्वात्मनि मायाऽसम्भवमाह—**प्रत्यगिति** ॥ १६ ॥ यस्मादेवं **तस्मान** ॥ १७–१८ ॥ स्वातिरेकेण व्यावहारिकदृष्टिरपि नास्तीत्याह—**व्यावहारिकेति** ॥ १९ ॥ अद्वैतमित्युक्तिरपि न तात्त्विकीत्याह—**अद्वैतमिति** । तद्द्वैतसापेक्षा **अद्वैतमिति चोक्तिः** ॥ २० ॥

आत्मज्ञानिनः ब्रह्मात्मत्वम्

अयमर्थो महान्यस्य स्वयमेव प्रकाशितः ॥ २१ ॥

न स जीवो न च [1]ब्रह्मा न चान्यदपि किंचन ।
न तस्य वर्णा विद्यन्ते नाश्रमाश्च तथैव च ॥ २२ ॥

न तस्य धर्मोऽधर्मश्च न निषेधो विधिर्न च ।
यदा ब्रह्मात्मकं सर्वं विभाति स्वत एव तु ॥ २३ ॥

तदा दुःखादिभेदोऽयमाभासोऽपि न भासते ।
जगज्जीवादिरूपेण पश्यन्नपि परात्मवित् ॥ २४ ॥

न तत्पश्यति चिद्रूपं ब्रह्मवस्त्वेव पश्यति ।
धर्मधर्मित्ववार्ता च भेदे सति हि विद्यते ॥ २५ ॥

[1] ब्रह्म—क, अ, अ २.

भेदा[दोऽ]भेदस्तथा [1]भेदाभेदः साक्षात्परात्मनः ।
नास्ति स्वात्मातिरेकेण स्वयमेवास्ति सर्वदा ॥ २६ ॥
ब्रह्मैव विद्यते साक्षाद्वस्तुतोऽवस्तुतोऽपि च ।
तथैव ब्रह्मविज्ज्ञानी किं गृह्णाति जहाति किम् ॥ २७ ॥
अधिष्ठानमनौपम्यमवाङ्मनसगोचरम् ।
यत्तद्वेद्यमग्राह्यमगोत्रं रूपवर्जितम् ॥ २८ ॥
अचक्षुःश्रोत्रमत्यर्थं तदपाणिपदं तथा ।
नित्यं विभुं सर्वगतं सुसूक्ष्मं च तदव्ययम् ॥ २९ ॥
ब्रह्मैवेदममृतं तत्पुरस्ता-
द्ब्रह्मानन्दं परमं चैव पश्चात् ।
ब्रह्मानन्दं परमं दक्षिणे च
ब्रह्मानन्दं परमं चोत्तरं च ॥ ३० ॥
स्वात्मन्येव स्वयं सर्वं सदा पश्यति निर्भयः ।
तदा मुक्तो न मुक्तश्च [2]बद्धस्यैव विमुक्तता ॥ ३१ ॥

एवंज्ञानी शिव एवेत्याह—अयमिति ॥ २१ ॥ ब्रह्मा चतुर्मुखः ॥ २२–२५ ॥ भेदाभेदः साक्षात् परात्मनः—सापेक्षभेदाभेदयोः सविशेषत्वात्—नास्ति ॥ २६–२८ ॥ तदपाणिपदं तथा इत्यादि मुण्डकोपनिषत्समानप्रकरणमित्यर्थः ॥ २९–३५ ॥

सत्यादि परविद्यासाधनम्

एवंरूपा परा विद्या सत्येन तपसाऽपि च ।
ब्रह्मचर्यादिभिर्धर्मैर्लभ्या वेदान्तवर्त्मना ॥ ३२ ॥

[1] भेदाद् भे—क. [2] बन्धस्यैव विमुक्तिता—क.

स्वशरीरे स्वयंज्योतिःस्वरूपं पारमार्थिकम् ।
क्षीणदोषाः प्रपश्यन्ति नेतरे मायया ऽऽवृताः ॥ ३३ ॥

स्वज्ञस्य क्वचित् गमनाभावः

एवं स्वरूपविज्ञानं यस्य कस्यास्ति योगिनः ।
कुत्रचिद्गमनं नास्ति तस्य संपूर्णरूपिणः ॥ ३४ ॥
आकाशमेकं संपूर्णं कुत्रचिन्न हि गच्छति ।
तद्वद्ब्रह्मात्मविच्छ्रेष्ठः कुत्रचिन्नैव गच्छति ॥ ३५ ॥

ब्रह्मज्ञानिनः अभक्ष्याभावः

अभक्ष्यस्य निवृत्त्या तु विशुद्धं हृदयं भवेत् ।
आहारशुद्धौ चित्तस्य विशुद्धिर्भवति ध्रुवतः ॥ ३६ ॥
[1]चित्ते शुद्धे क्रमाज्ज्ञानं वृत्त्यन्ते ग्रन्थयः स्फुटम् ।
अभक्ष्यं ब्रह्मविज्ञानविहीनस्यैव देहिनः ॥ ३७ ॥
न सम्यज्ज्ञानिनस्तद्वत्स्वरूपं सकलं खलु ।
अहमन्नं सदाऽन्नाद इति हि ब्रह्मवेदनम् ॥ ३८ ॥
ब्रह्मविद्भ्रमति ज्ञानात्सर्वं ब्रह्मात्मनैव तु ।
ब्रह्मक्षत्रादिकं सर्वं यस्य स्यादोदनं सदा ॥ ३९ ॥
यस्योपसेचनं मृत्युस्तज्ज्ञानी तादृशः खलु ।
ब्रह्मस्वरूपविज्ञानाज्जगद्भोज्यं भवेत्खलु ॥ ४० ॥

जगदात्मतया भाति यदा भोज्यं भवेत्तदा ।
ब्रह्म[1]स्वात्मतया नित्यं भक्षितं सकलं तदा ॥ ४१ ॥
यदा[2]भानेन रूपेण जगद्भोज्यं भवेत्तु तत् ।
मानतः स्वात्मना भातं भक्षितं भवति ध्रुवम् ॥ ४२ ॥
स्वस्वरूपं स्वयं भुङ्क्ते नास्ति भोज्यं पृथक् स्वतः ।
अस्ति चेदस्तितारूपं ब्रह्मैवास्तित्वलक्षणम् ॥ ४३ ॥

आहारशुद्धिः चित्तशुद्धिद्वारा ज्ञानहेतुः स्वाज्ञानाम् । स्वज्ञानी तु स्वातिरिक्तं सर्वं स्वमात्रतया प्रसर्तीत्याह अभक्ष्यस्येति ॥ ३६ ॥ ज्ञानं जायते तेन मुच्यन्ते ॥ ३७–४५ ॥

ज्ञानिनः स्वसर्वात्मत्वदर्शनम्

अस्तितालक्षणा सत्ता सत्ता ब्रह्म न चापरा ।
नास्ति सत्ताऽतिरेकेण नास्ति माया च वस्तुतः ॥ ४४ ॥
योगिनामात्मनिष्ठानां माया ह्यात्मनि कल्पिता ।
साक्षिरूपतया भाति ब्रह्मज्ञानेन बाधिता ॥ ४५ ॥
ब्रह्मविज्ञानसंपन्नः प्रतीतमखिलं जगत् ।
पश्यन्नपि सदा नैव पश्यति स्वात्मनः पृथक् ॥ ४६ ॥

इत्युपनिषत् ॥

सर्वापह्नवसिद्धं ब्रह्म निष्प्रतियोगिकं स्वमात्रमवशिष्यते न कदाचित् तदतिरिक्तमस्तीति ब्रह्मविज्ञानसम्पन्नो योगी स्वाज्ञदृष्टिप्रतीतं अखिलं जगत्

[1] सात्म—क. [2] भासेन—मु.

मरुमरीचितुल्यतया कदाचित् **पश्यन्नपि सदा** तत् **स्वात्मनः पृथक् नैव पश्यति** । ब्रह्ममात्रस्य निरूप्रतियोगिकत्वेन ब्रह्मातिरिक्तं अस्ति नास्तीति नहि विभ्रमावकाशोऽस्तीत्यर्थः ॥ ४६ ॥ **इत्युपनिषच्छब्दः** प्रकृतोपनिषत्समाप्त्यर्थः ॥

श्रीवासुदेवेन्द्रशिष्योपनिषद्ब्रह्मयोगिना ।
पाशुपतोपनिषदो व्याख्यानं लिखितं लघु ।
पाशुपतीयविवृतिः द्विशतग्रन्थभूषिता ॥

इति श्रीमदीशाद्यष्टोत्तरशतोपनिषच्छास्त्रविवरणे सप्तसप्ततिसङ्ख्यापूरकं
पाशुपतब्रह्मोपनिषद्विवरणं सम्पूर्णम्

ब्रह्मविद्योपनिषत्

सह नाववतु—इति शान्तिः

ब्रह्मविद्यारहस्यार्थप्रणवब्रह्मसूचनम्

अथ ब्रह्मविद्योपनिषदुच्यते—

प्रसादाद्ब्रह्मणस्तस्य विष्णोरद्भुतकर्मणः ।
रहस्यं ब्रह्मविद्यायां [1]ध्रुवाग्निः संप्रचक्षते ॥ १ ॥
ओमित्येकाक्षरं ब्रह्म यदुक्तं ब्रह्मवादिभिः ।
शरीरं तस्य वक्ष्यामि स्थानं कालत्रयं तथा ॥ २ ॥
तत्र देवास्त्रयः प्रोक्ता लोका वेदास्त्रयोऽग्नयः ।
तिस्रो मात्रार्धमात्रा च त्र्यक्षरस्य शिवस्य तु ॥ ३ ॥

स्वाविद्यातत्कार्यजातं यद्विद्यापह्नवं गतम् ।
तद्ध्वंसविद्यानिष्पन्नं रामचन्द्रपदं भजे ॥

इह खलु कृष्णयजुर्वेदप्रविभक्तेयं ब्रह्मविद्योपनिषत् प्रणवहंसविद्यातद्वेद्य-ब्रह्मानुभूतिं प्रकटयन्ती ब्रह्ममात्रपर्यवसन्ना विजृम्भते । अस्याः स्वल्पग्रन्थतो

[1] ध्रुवाग्निं—क, अ १, अ २.

विवरणमारभ्यते । उपोद्घातादिकमस्याः कठवल्ल्यादिसमम् । ब्रह्मविष्णुप्रसादलभ्येयमिति विद्या स्तूयते । श्रुतिरेव स्वाज्ञजनान् प्रत्येवमाह— **अथेत्यादिना** । अथ स्वाज्ञानां **ब्रह्मविद्योचितसाधनसम्पत्त्यनन्तरं इयं ब्रह्मविद्योपनिषदुच्यते** । तत् कथं? यः सर्वलोकस्रष्टा पालयिता च भवति **तस्य ब्रह्मणः** अघटितघटनाघटनपटुतरशक्तेरद्भुतकर्मणो **विष्णोश्च प्रसादात् ब्रह्मविद्यायां** यत् **रहस्यं,** अनधिकारिणे गोपनीयत्वात्, स्वाज्ञानतत्कार्यस्वातिरिक्तप्रपञ्चतूलाचलभस्मीकरणपटुत्वात् ध्रुवाग्निः प्रत्यक् तदभिन्नः परमात्मेति **सम्यक् प्रचक्षते** ॥ १ ॥ किं तत्स्वरूपमित्याकांक्षायां—

सर्वे वेदा यत्पदमामनन्ति
तपांसि सर्वाणि च यद्वदन्ति ।
यदिच्छन्तो ब्रह्मचर्यं चरन्ति
तत्ते पदं संग्रहेण ब्रवीम्योमित्येतत् ॥

इत्यादिश्रुत्यनुरोधेन सप्रकारं ब्रह्मालम्बनभूतप्रणवस्वरूपं विशदीकरोति— **ओमिति** ॥ २–३ ॥

प्रणवमात्राचतुष्टयप्रपञ्चनम्

ऋग्वेदो गार्हपत्यं च पृथिवी ब्रह्म एव च ।
अकारस्य शरीरं तु व्याख्यातं ब्रह्मवादिभिः ॥ ४ ॥
यजुर्वेदोऽन्तरिक्षं च दक्षिणाग्निस्तथैव च ।
विष्णुश्च भगवान्देव उकारः परिकीर्तितः ॥ ५ ॥
सामवेदस्तथा द्यौश्चाहवनीयस्तथैव च ।
ईश्वरः परमो देवो मकारः परिकीर्तितः ॥ ६ ॥
सूर्यमण्डलमध्येऽथ ह्यकारः शङ्खमध्यगः ।
उकारश्चन्द्रसंकाशस्तस्य मध्ये व्यवस्थितः ॥ ७ ॥

मकारस्त्वग्निसंकाशो विधूमो विद्युतोपमः ।
तिस्रो मात्रास्तथा ज्ञेयाः सोमसूर्याग्निरूपिणः ॥ ८ ॥
शिखा तु दीपसंकाशा तस्मिन्नुपरि वर्तते ।
अर्धमात्रा तथा ज्ञेया प्रणवस्योपरि स्थिता ॥ ९ ॥

सूत्रार्थं व्याकरोति—ऋग्वेद इति । ब्रह्म एव च, ब्रह्मा इत्यर्थः ॥ ४–६ ॥ अकारादेः स्थानं वर्णं चाह—सूर्येति ॥ ७–८ ॥ एवं मात्रात्रयं प्रपञ्चयित्वा अथ अर्धमात्रां प्रपञ्चयति—शिखात्विति । यथा दीपे दीपशिखा वर्तते तथा प्रणवोपरि अर्धमात्रा वर्तत इत्यर्थः ॥ ९ ॥

सुषुम्नायोगेन नाडीसूर्ययोः भेदनम्

पद्मसूत्रनिभा सूक्ष्मा शिखा सा दृश्यते परा ।
सा नाडी सूर्यसंकाशा सूर्यं भित्त्वा तथा परा ॥ १० ॥
द्विसप्ततिसहस्राणि नाडीं भित्त्वा च मूर्धनि ।
[1]वरदा सर्वभूतानां सर्वं व्याप्येव तिष्ठति ॥ ११ ॥

सुषुम्नास्वरूपकथनं प्रणवानुसन्धानविधानं तत्सर्वापवादाधिकरण-ब्रह्मज्ञानफलं चाह—पद्मेति । सुषुम्नायाः सूर्यनाडित्वेन तद्द्वारोत्क्रान्तस्य मूर्ध्नि ब्रह्मरन्ध्रे लक्ष्यानुसन्धानं कुर्वतः द्विसप्ततिसहस्रनाडीभेदनं सूर्यमण्डलभेदनं च उपपद्यत इत्यर्थः ॥ १०–११ ॥

प्रणवनादलयेन मोक्षप्राप्तिः

कांस्यघण्टानिनादस्तु यथा लीयति शान्तये ।
ओङ्कारस्तु तथा योज्यः शान्तये सर्वमिच्छता ॥ १२ ॥

[1] वरदः-

यस्मिन्स लीयते शब्दस्तत्परं ब्रह्म गीयते ।
धियं हि लीयते ब्रह्म सोऽमृतत्वाय कल्पते ॥ १३ ॥

एवं योगाभ्यासमकुर्वतोऽपि प्रणवालम्बनेन तत्फलं प्राप्तुं शक्यमित्याह—कांस्येति। हेममूलिकाषोडशवारसंस्कृतकांस्यघण्टानादशान्तिवत् षोडशमात्राकालोच्चारितप्रणवनादलयकृत् योगी य एवं प्रणवजपं करोति ॥ १२ ॥ यस्य—धियमिति विभक्तिव्यत्ययः, प्रथमार्थे द्वितीया—धीः अन्तःकरणं प्रणवनादेन साकं विलीयते सोऽयं योगी तल्ल्याधिकरणब्रह्मभूयाय अमृतत्वाय स्वातिरिक्तास्तित्वभ्रममोक्षाय कल्पते ॥ १३ ॥

जीवस्वरूपनिरूपणम्

[1]वायुस्तेज्ञस्तथाकाशस्त्रिविधो जीवसंज्ञकः ।
स जीवः प्राण इत्युक्तो वालाग्रशतकल्पितः ॥ १४ ॥
नाभिस्थाने स्थितं विश्वं शुद्धतत्त्वं सुनिर्मलम् ।
आदित्यमिव दीप्यन्तं रश्मिभिश्चाखिलं शिवम् ॥ १५ ॥

हंसविद्याप्रकटनाय तद्विद्याऽनुष्ठातारं जीवं निरूपयति—वायुरिति ॥ १४ ॥ तस्य स्थानं निर्दिशति—नाभीति । विश्वं वैश्वानरांशं वस्तुतः स्वगतहेयांशापाये शुद्धतत्त्वम् । शिवं प्रत्यञ्चमात्मानं अन्तःकरणयोगतो जीवं पश्यन्ति ॥ १५ ॥

बन्धमोक्षकारणनिरूपणम्

सकारं च हकारं च जीवो जपति सर्वदा ।
नाभि[2]देशाद्विनिष्क्रान्तं विषयव्याप्तिवर्जितम् ॥ १६ ॥

[1] वायुःप्राण—क, अ २. [2] रन्ध्रा—अ १, अ २, क.

तेनेदं निष्कलं विद्यात्क्षीरात्सर्पिर्यथा तथा ।
कारणेनात्मना युक्तः प्राणायामैश्च पञ्चभिः ॥ १७ ॥
चतुष्कलासमायुक्तो भ्राम्यते च हृदि स्थितः ।
गोलकस्तु [1]यदा देहे क्षीरदण्डेन वाऽ[2]हतः ॥ १८ ॥
एतस्मिन् [3]वसते शीघ्रमवि[4]श्रामं महाखगः ।
यावन्निश्वसितो जीवस्तावन्निष्कलतां गतः ॥ १९ ॥
नभस्स्थं निष्कलं ध्यात्वा मुच्यते भवबन्धनात् ।
अनाहतध्वनियुतं हंसं यो वेद हृद्गतम् ॥ २० ॥
स्वप्रकाशचिदानन्दं स हंस इति गीयते ।

सोऽयं जीवः उच्छ्वासनिःश्वासच्छलेन सकारं च । निष्क्रमणवेळायां **विषयव्याप्तिवर्जितम्** ॥ १६ ॥ येन हेतुना विषयविरळः स्यात् **तेनेदं निष्कलम्** । **यथा क्षीरात्** कारणात् **सर्पिः** कार्यतो भिन्नमपि कारणावस्थायां क्षीरमेव भवति **तथा** अयं सर्पिःस्थानीयो जीवः क्षीरस्थानीयकारणेनात्मना **युक्तो** भवति । स्वकारणभावापत्तिमाधनं किमित्यत्र—**प्राणायामैश्च पञ्चभिः** प्राणायामप्रत्याहारधारणाध्यानसमाधिभिः ॥ १७ ॥ विश्वतैजसप्राज्ञतुर्यभेदेन **चतुष्कळासमायुक्तो** भवति । एवं हृदि स्थितः सन् बन्धमोक्षतत्कार्यकलनासु **भ्राम्यते** चेत्यर्थः । यावत् ब्रह्मनाडीं न प्रविशति तावत् अविश्रान्तं संसरतीत्याह—**गोळकस्त्विति** । **यदा** यस्मिन् काले स्थूलदेहे विद्यमान-मूलाधारत्रिकोणाग्रविलसत्सुषुम्नागोळकस्तु **क्षीरदण्डेन** क्षीरवद्धवळदण्डवत् भोगविशिष्टकुण्डलीशक्तितत्त्वेन प्राणेन वा यावत् अहत अनाक्रान्तो भवति ॥ १८ ॥ तदा **एतस्मिन** देहे **महाखगो** हंसः प्राणाधारो जीवः **अविश्रामं**

[1] यथा—अ १.
[2] हतं—क, अ १, अ २.
[3] वहते—अ १.
[4] श्रान्तं—अ १, उ.

अविश्रान्तं यथा भवति तथा यत् स्वज्ञाननाश्यं शीघ्रं स्वाज्ञानमवलम्ब्य वसते वसति, आभूतसंप्लवं स्वज्ञानावधि संसरतीत्यर्थः । कदा तत्संसृतिनिवृत्तिरित्यत आह—यावदिति । अयं जीवः प्राणादिवृत्तिमवष्टभ्य यावन्निश्वसितो न श्वसितः प्राणनादिव्यापारविरळो भवति तावत्सर्वकरणव्यापृत्युपरमणलक्षणनिर्विकल्पकावस्थायां निष्कळतां गतो भवति ॥ १९ ॥ हृदयनभसि तिष्ठति उपलभ्यत इति नभस्स्थं प्राणादिनामान्तकलाभावात् निष्कळमात्मानं ध्यात्वा भवबन्धनात् मुच्यते निवृत्तसंसारः कृतकृत्यो भवतीत्यर्थः । हंसज्ञानी हंस एवेत्याह - अनाहतेति । अनाहतध्वनियुतं हृदयविभातनादोपाधिकमित्यर्थः ॥ २० ॥

हंसविद्ययैव परमेश्वरप्राप्तिः

रेचकं पूरकं मुक्त्वा कुम्भकेन स्थितः सुधीः ॥ २१ ॥
नाभिकन्दे [1]समं कृत्वा प्राणापानौ समाहितः ।
मस्तकस्थामृताम्वादं पीत्वा ध्यानेन सादरम् ॥ २२ ॥
दीपाकारं महादेवं ज्वलन्तं नाभिमध्यमे ।
अभिषिच्यामृतेनैव हंसहंसेति यो जपेत् ॥ २३ ॥
जरामरणरोगादि न तस्य भुवि विद्यते ।
एवं दिनेदिने कुर्यादणिमादिविभूतये ॥ २४ ॥
ईश्वरत्वमवाप्नोति सदाऽभ्यासरतः पुमान् ।
बहवो नैकमार्गेण प्राप्ता नित्यत्वमागताः ॥ २५ ॥
हंसविद्यामृते लोके नास्ति नित्यत्वसाधनम् ।

केवलकुम्भके परमेश्वरं ध्यायतः तदाप्तिमाह—रेचकमिति २१–२४ ॥ हंसविद्यामृते मुक्तिसाधनं न किञ्चिदस्तीति विद्यां स्तौति—बहव इति ॥ २५ ॥

[1] समौ—क, अ १.

हंसविद्यागुरुभक्तिविधिः

यो ददाति महाविद्यां हंसाख्यां [1]पावनीं पराम् ॥ २६ ॥
तस्य दास्यं सदा कुर्यात् [2]प्रज्ञया परया सह ।
शुभं वाऽशुभमन्यद्वा यदुक्तं गुरुणा भुवि ॥ २७ ॥
तत्कुर्यादविचारेण शिष्यः संतोषसंयुतः ।
हंसविद्यामिमां लब्ध्वा गुरुशुश्रूषया नरः ॥ २८ ॥
आत्मानमात्मना साक्षाद्ब्रह्म [3]बुद्ध्वा सुनिश्चलम् ।
देहजात्यादिसंबन्धान्वर्णाश्रमसमन्वितान् ॥ २९ ॥
वेदशास्त्राणि चान्यानि पदपांसुमिव त्यजेत् ।
गुरुभक्तिं सदा कुर्याच्छ्रेयसे भूयसे नरः ॥ ३० ॥
गुरुरेव हरिः साक्षान्नान्य इत्यब्रवीच्छ्रुतिः ॥ ३१ ॥

हंसविद्योपदेष्टारं ईश्वरं मत्वा तदाज्ञाऽनुवर्ती योगी तत्प्रसादतः प्रत्यगभिन्नं ब्रह्मास्मीति निश्चित्य स्वातिरिक्तमखिलं त्यक्त्वा यावदुपाधि गुरुदेवतैक्य भावयेदित्याह—यो ददातीति ॥ २६–२९ ॥ "यावदुपाधिपर्यन्तं तावच्छुश्रूषयेत् गुरून्" इति श्रुत्यनुरोधेन गुरुभक्तिं सदा कुर्यात् ॥ ३० ॥ "गुरुः साक्षात् आदिनारायण एव" इति श्रुतिः ॥ ३१ ॥

आत्मनः श्रुत्याचार्यैकगम्यत्वम्

श्रुत्या यदुक्तं परमार्थ[4]मेतत्
तत्संशयो नात्र ततः समस्तम् ।

[1] पारमेश्वरीम्—अ १, अ २, क.
[2] श्रद्धया—अ १.
[3] बुद्धया—क.
[4] मेव—क, अ १, अ २.

श्रुत्या विरोधे न भवेत्प्रमाणं
भवेदनर्थाय विना प्रमाणम् ॥ ३२ ॥
देहस्थः सकलो ज्ञेयो निष्कलो देहवर्जितः ।
आप्तोपदेशगम्योऽसौ सर्वतः किमवस्थितः ॥ ३३ ॥
हंसहंसेति यो ब्रूयाद्धंसो ब्रह्मा हरिः शिवः ।
गुरुवक्त्रात्तु लभ्येत प्रत्यक्षं सर्वतोमुखम् ॥ ३४ ॥
तिलेषु च यथा तैलं पुष्पे गन्ध [1]इवास्थितः ।
पुरुषस्य शरीरेऽस्मिन् स बाह्याभ्यन्तरे [2]स्थितः ॥ ३५ ॥

श्रुत्युक्तं प्रमाणम् । तदतिरिक्तं अप्रमाणम् । प्रमाणाप्रमाणानुष्ठानतः स्वार्थानर्थौ स्यातामित्याह---श्रुत्येति ॥ ३२ ॥ देहयोगायोगाभ्यां सकळत्व-निष्कळत्वं निष्कळस्य देशिकोपदेशगम्यत्वं चाह---देहस्थ इति। सर्वव्यापकोऽपि निष्कळः स्वाचार्योपदेशेन गम्यः नान्यथेत्यर्थः ॥ ३३ ॥ आचार्यः क इत्यत आह—हंसेति । उक्तार्थमेतत् ॥ ३४ ॥ हंसस्य सदृष्टान्तं सर्वव्यापकता-माह—तिलेष्विति ॥ ३५ ॥

सकलनिष्कलदेवताविवेकः

उल्काहस्तो यथा[3]कश्चित् द्रव्यमालोक्य तां त्यजेत् ।
ज्ञानेन ज्ञेयमालोक्य पश्चाज्ज्ञानं परित्यजेत् ॥ ३६ ॥
पुष्पवत्सकलं विद्याद्गन्धस्तस्य तु निष्कलः ।
वृक्षस्तु सकलं विद्याच्छाया तस्य तु निष्कला ॥ ३७ ॥

[1] इवाश्रितः—क, अ २. [2] तथा—क, अ २.
[3] लोके—क, अ २.

निष्कलः सकलो भावः सर्वत्रैव व्यवस्थितः ।
उपायः सकलस्तद्वदुपेयश्चैव निष्कलः ॥ ३८ ॥
सकले सकलो भावो निष्कले निष्कलस्तथा ।
एकमात्रो द्विमात्रश्च त्रिमात्रश्चैव भेदतः ॥ ३९ ॥
अर्धमात्रा परा ज्ञेया तत ऊर्ध्वं परात्परम् ।
पञ्चधा पञ्चदैवत्यं सकलं परिपठ्यते ॥ ४० ॥
ब्रह्मणो हृदयस्थानं कण्ठे विष्णुः समाश्रितः ।
तालुमध्ये स्थितो रुद्रो ललाटस्थो महेश्वरः ॥ ४१ ॥
नासाग्रे अच्युतं विद्यात्तस्यान्ते तु परं पदम् ।
परत्वात्तु परं नास्तीत्येवं शास्त्रस्य निर्णयः ॥ ४२ ॥
देहातीतं तु तं विद्यान्नासाग्रे द्वादशाङ्गुलम् ।
तदन्तं तं विजानीयात्तत्रस्थो व्यापयेत्प्रभुः ॥ ४३ ॥

कैवल्याप्तावपि तदुपकारकज्ञानं न त्याज्यमित्यत्राह—उल्केति ॥ ३६ ॥ दृश्यादृश्ययोः सकळनिष्कळत्वं चाह—पुष्पवदिति । वृक्षः स्वाविद्यापादः । स्वज्ञानवह्न्यनात् वृक्षत्वं, तद्धेतुमायायाः तच्छादकत्वात् छायात्वं इत्यर्थः ॥ ३७ ॥ एवं निष्कलसकलभावः सर्वत्र वर्तत इत्याह—निष्कल इति । स्वातिरिक्तकलाविशिष्टस्वाविद्यापदे सकळभावः । तदपवादाधिकरणे निष्कळे सकळसापेक्षतः सप्रतियोगिकनिष्कळे सापेक्षप्रभवसप्रतियोगिकनिष्कळगतसविशेषापह्नवात् निष्प्रतियोगिकनिष्कळात्मा अवशिष्यते इत्यर्थः ॥ ३८ ॥ अकारादिमात्राचतुष्टयात् परं ब्रह्मेत्याह—एकमात्र इति ॥ ३९ ॥ अकारादिमात्रात्रयापेक्षया अर्धमात्रा । हृदयादिपञ्चस्थानासनपञ्चब्रह्मातीतं परं ब्रह्मैव, तस्य सर्वपरत्वेन तत्परं नास्तीत्याह—पञ्चधेति ॥ ४०–४१ ॥ अच्युतं सदाशिवम् ॥ ४२ ॥

तस्य देहातीतत्वं व्यापकत्वं चाह—देहेति । प्राणलयस्थानं नासाग्रद्वादशाङ्गुलं यः तल्लयाधारः तं देहातीतं प्रत्यगात्मानं विद्यात् । यः प्रत्यग्भावविरळः तदन्तं तं परमात्मानं जानीयात् । सोऽयं परमात्मा प्रभुः तत्रस्थः सर्वातीतपदे स्थितोऽपि स्वविकल्पितं विश्वं विश्वविराडोत्राद्यात्मना व्यापयेत् ॥ ४३ ॥

योगस्य परमगोप्यत्वम्, उत्तमाधिकारिण एव दातव्यत्वं च

मनोऽप्यन्यत्र निक्षिप्तं चक्षुरन्यत्र पातितम् ।
तथाऽपि योगिनां योगो ह्यविच्छिन्नः प्रवर्तते ॥ ४४ ॥
एतत्तु परमं गुह्यमेतत्तु परमं शुभम् ।
नातः परतरं किंचिन्नातः परतरं शुभम् ॥ ४५ ॥
शुद्धज्ञानामृतं प्राप्य परमाक्षरनिर्णयम् ।
गुह्याद्गुह्यतमं गोप्यं ग्रहणीयं प्रयत्नतः ॥ ४६ ॥
नापुत्राय प्रदातव्यं नाशिष्याय कदाचन ।
गुरुदेवाय भक्ताय नित्यं भक्तिपराय च ॥ ४७ ॥
प्रदातव्यमिदं शास्त्रं नेतरेभ्यः प्रदापयेत् ।
दाताऽस्य नरकं याति सिध्यते न कदाचन ॥ ४८ ॥

योगिनां करणग्रामस्य स्वस्वव्यापारव्यग्रत्वेन योगविच्छित्तिः स्यादित्याह—मनोऽपीति । मनस्तु स्वात्मनोऽन्यत्र नादे निक्षिप्तं तथा चक्षुरपि नासाग्रे पातितं सङ्कल्परूपादिविषयादुपरतम् । स्वान्तर्बाह्ययोगविघ्नाभावात् योगियोगस्य अविच्छिन्नत्वं युज्यत इत्यर्थः ॥ ४४ ॥ यत् योगमुख्यफलं तदतिरिक्तरहस्यं नास्तीत्याह—एतदिति ॥ ४५ ॥ सर्वमन्यत् परित्यज्य

परमाक्षरज्ञानमेव सदा ग्राह्यं इत्याह—शुद्धेति ॥ परमाक्षरनिर्णयात्मकं ज्ञानं प्रयत्नादेशिकमुखेन ग्रहणीयं ग्राह्यम् ॥ ४६ ॥ यदेवं गुह्यतमं तत् उत्तमाधिकारिणे दातव्यं तदितरेभ्यो न दातव्यम्। यदि दद्यात् तदा दातुः नरकपातः स्यादित्याह—नेति ॥ ४७–४८ ॥

केवलशास्त्रज्ञानवतोऽपि पापपुण्यलेपाभावः

गृहस्थो ब्रह्मचारी वा वानप्रस्थोऽथ भिक्षुकः ।
यत्र तत्र स्थितो ज्ञानी परमाक्षरवित्सदा ॥ ४९ ॥
विषयी विषयासक्तो याति [1]देहान्तरे शुभम् ।
ज्ञानादेवास्य शास्त्रस्य सर्वावस्थोऽपि मानवः ॥ ५० ॥
ब्रह्महत्याश्वमेधाद्यैः पुण्य[2]पापैर्न लिप्यते ।

यः कोऽपि वा वृत्त्यादिज्ञानादेव कृतार्थो भवति तस्य न पुण्यपापलेपोऽस्तीत्याह—गृहस्थ इति । आभासतोऽपि विषयासक्तिदर्शनात् अयं सविशेषज्ञानी ॥ ४९ ॥ तस्य देहावसानसमये विषयासक्तिर्वैगल्यात् शुभप्राप्तिरिष्यत इत्यर्थः । केवलशास्त्रजन्यज्ञानात् आगामिपुण्यपापालेपो भवतीत्यर्थः ॥ ५० ॥

त्रिविधा आचार्याः

चोदको बोधकश्चैव मोक्षदश्च परः स्मृतः ॥ ५१ ॥
इत्येषां त्रिविधो ज्ञेय आचार्यस्तु महीतले ।
चोदको दर्शयेन्मार्गं बोधकः स्थान[3]मादिशेत् ॥ ५२ ॥
मोक्षदस्तु परं तत्त्वं यज्ज्ञात्वाऽमृतमश्नुते ।

[1] देहान्तरं—उ. [2] पापैः प्रमुच्यते—क.
[3] माचरेत्—अ २.

चोदकादिभेदेन देशिकत्रैविध्यं तज्ज्ञानतः कृतकृत्यतां चाह— **चोदक** इति ॥ ९१ ॥ "अहं ब्रह्मास्मि" इत्यनुसन्धानं कुर्यादिति स्वाङ्गं ब्रह्माभिमुख्येन चोदयतीति **चोदको** वेदान्तः, मार्गदर्शकत्वात् । "तत् त्वमेव त्वमेव तत्" इति स्वाङ्गं बोधयतीति **बोधको** देशिकः, ब्रह्मप्रापकत्वात् ॥ ९२ ॥ मत्स्वरूपमेव सर्वं मामेव प्राप्स्यसि, मद्व्यतिरिक्तमणुमात्रं न विद्यते इति परमोपदेशेन स्वातिरिक्तभ्रममोक्षं ददातीति **मोक्षदः** परमेश्वरः, **परतत्त्वस्वरूपत्वात्** । यज्ज्ञानात् मुमुक्षुः अमृतो भवति सोऽयं ईश्वर इत्यर्थः ॥

प्रणवहंसानुसन्धानात्मकं प्रत्यक्षयजनम्

प्रत्यक्षयजनं देहे संक्षेपाच्छृणु गौतम ॥ ९३ ॥
तेनेष्ट्वा स नरो याति शाश्वतं पदमव्ययम् ।
स्वयमेव [1]कृतः पश्येद्देहे बिन्दुं च निष्कलम् ॥ ९४ ॥
अयने द्वे च विषुवे [2]सदा पश्यति मार्गवित् ।
कृत्वा यामं पुरा वत्स रेचपूरककुम्भकान् ॥ ९५ ॥
पूर्वं चोभयमुच्चार्य अर्चयेत्तु यथाक्रमम् ।
नमस्कारेण योगेन मुद्रयाऽऽरभ्य चार्चयेत् ॥ ९६ ॥
सूर्यस्य ग्रहणं वत्स प्रत्यक्षयजनं स्मृतम् ।

किं तत् प्रत्यक्षयजनं इत्यत्र शृण्वेतत् इत्याह—प्रत्यक्षेति ॥ ९३ ॥ यदा प्राणः पिंगळ्या कुण्डलिनीस्थानं प्रविशति तदेव सूर्यग्रहणं, येनेष्ट्वा मुनिः ब्रह्मपदं एति तत् प्रत्यक्षयजनमित्याह—**स्वयमेवेति** । इडापिंगळ्योः पिंगळेडयोः क्रमणं उत्तरायणदक्षिणायने भवतः । तथा मूलाधारे मूर्धनि च

[1] तुसंप—अ, अ २, क. [2] तदा—उ.

यदा प्राणः प्रविशति तदा द्वे विषुवे भवतः । एवं अयनविषुवद्वये च प्राणमार्गविन् स्वयमेव देहे बिन्दुं सकळं निष्कळं च सदा पश्येत् पश्यति । हे वत्स पुरा आदौ रेचपूरककुम्भकान् सहितान् केवलान् वा अहरहः याममात्रं कृत्वा ॥ ९४–९५ ॥ ओं इति हंस इति च यन्मन्त्रद्वयं पूर्वमुक्तं तदुभयं चार्थानुसन्धानपूर्वकं उच्चार्य यः प्रणवार्थो हंसः सोऽहमित्यनुसन्धानं नमस्कारयोगः, ऐक्यानुसन्धानस्य नमस्कारयोगत्वात् "नमस्त्वैक्यं प्रवदेत्" इति श्रुतेः । तेन नमस्कारयोगेन स्वातिरिक्तं नेति चिन्मुद्रया शाम्भवीखेचरीमुद्रया वा युक्तः सन् यथाक्रमं आत्मानं अर्चयेत्, सदा सोऽहमस्मीति ध्यायेत्, "सोऽहंभावेन पूजयेत्" इति श्रुतेः ॥ ९६ ॥ इदमेव हि प्रत्यक्षयजनं विज्ञेयम् ॥

हंसयोगलब्धज्ञानात् सायुज्यप्राप्तिः

ज्ञानात्सायुज्यमेवोक्तं तोये तोयं यथा तथा ॥ ९७ ॥
एते गुणाः प्रवर्तन्ते [1]योगमार्गकृतश्रमैः ।
यस्माद्योगं समादाय सर्वदुःखबहिष्कृतः ॥ ९८ ॥
योगध्यानं सदा कृत्वा ज्ञानं तन्मयतां व्रजेत् ।
ज्ञानात्स्वरूपं परमं हंसमन्त्रं समुच्चरेत् ॥ ९९ ॥

ब्रह्मज्ञानात् जले जलयोगवत् सायुज्यं प्रत्यक्परैक्यमुक्तं योगिभिः ॥ ९७ ॥ एवं जीवन्मुक्तगुणाः प्रवर्तन्ते । यस्मात् एवं योगाभ्यासतः सर्वदुःखबहिष्कृतो भवति तस्मात् योगध्यानं सदा कृत्वा तत्प्रभवविज्ञानमवाप्य ज्ञानसमकालं ब्रह्ममात्रतामियादित्यर्थः ॥ ९८ ॥ यद्यत् अन्तर्बाह्याविलसितं तत्तत् हंस एव, हंसातिरिक्तं न किञ्चिदस्तीति ज्ञानी परमहंसः परमात्मा भवतीत्याह—ज्ञानादिति । हंसः सोऽहमिति यः सदा हंसमन्त्रमुच्चरेत् सोऽयं

[1] योगाभ्यास—क, अ १, अ २.

सोऽहमिति ज्ञानात् हंसस्य यत् परमं स्वरूपं यत् निष्प्रतियोगिकम्त्वमात्रं अवशिष्यते तदेव भवतीत्यर्थः ॥ ५९ ॥

हंसोपलब्धिस्थानम्

प्राणिनां देहमध्ये तु स्थितो हंसः सदाऽच्युतः ।
हंस एव परं सत्यं हंस एव तु [1]सत्यकम् ॥ ६० ॥
हंस एव परं वाक्यं हंस एव तु वैदिकम् ।
हंस एव परो रुद्रो हंस एव परात्परम् ॥ ६१ ॥
सर्वदेवस्य मध्यस्थो हंस एव महेश्वरः ।
पृथिव्यादिशिवान्तं तु अकाराद्याश्च वर्णकाः ॥ ६२ ॥
कूटान्ता हंस एव स्यान्मातृकेति व्यवस्थिताः ।

स कुत्रोपलभ्यत इत्यत आह--प्राणिनामिति । नित्यानुसन्धानात् स्वमात्राच्युतो हंसः हृद्येवोपलभ्यते इत्यर्थः । हंसस्य सार्वात्म्यमाह---हंस एवेति । अक्षाक्षाधिपान्तर्यामित्वात् ॥ ६०-६१ ॥ अभिधेयं अभिधानं च हंस एवेत्याह---पृथिव्यादीति ॥ ६२ ॥ कूटशब्देन क्षकार उच्यते ॥

हंसमन्त्रानुस्मरणपूर्वकमभ्यासः

मातृकारहितं मन्त्रमादिश्यन्ते न कुत्रचित् ॥ ६३ ॥
हंसज्योतिरनूपम्यं देवमध्ये व्यवस्थितम् ।
दक्षिणामुखमाश्रित्य ज्ञानमुद्रां प्रकल्पयेत् ॥ ६४ ॥

[1] शक्तिदं---अ २. शक्तिकं---अ १, क.

सदा समाधिं कुर्वीत हंसमन्त्रमनुस्मरन् ।
निर्मलस्फटिकाकारं दिव्यरूपमनूपमम् ॥ ६५ ॥
मध्यदेशे परं हंसं ज्ञानमुद्राऽऽत्मरूपकम् ।

मातृकामन्त्रयोरैक्यं हंसज्योतिरवगम्य ज्ञानमुद्रामावध्य स्वात्ममन्त्रं स्मरन् सदा समाधिं कुर्वीतेत्याह— मातृकेति । अनूपम्यं अनूपमं निरुपमं सर्वदेवमध्ये दक्षिणाभिमुखं देवमाश्रित्य ॥ ६३–६४ ॥ देवं कीदृशमित्यत्र निर्मलेति ॥ ६५ ॥

हंसस्यासननिरूपणम्

प्राणापानसमानाश्चोदानव्यानौ च वायवः ॥ ६६ ॥
पञ्चकर्मेन्द्रियैर्युक्ताः क्रियाशक्तिबलोद्यताः ।
नागः कूर्मश्च कृकरो देवदत्तो धनंजयः ॥ ६७ ॥
पञ्चज्ञानेन्द्रियैर्युक्ता ज्ञानशक्तिबलोद्यताः ।
पावकः शक्तिमध्ये तु नाभिचक्रे रविः स्थितः ॥ ६८ ॥
[1]बद्धमुद्रा कृता येन नासाग्रे तु स्वलोचनं ।

हंसः क आसनमर्हतीत्यत्र नाभिचक्रे नासाग्रे नेत्रयोश्च व्यवस्थित इत्याह—प्राणेति ॥ ६६–६७ ॥ शक्तिद्वयमध्ये मूलाधारस्थपावकरूपेण हंस एव स्थितः । येन नासाग्रे स्वलोचने च बद्धखेचरीमुद्रा कृता सोऽयं हंसो रविर्भूत्वा नाभिचक्रे नासाग्रे लोचनयोश्च स्थित इत्यर्थः ॥ ६८ ॥

हंसयोगाभ्यासक्रमः

अकारे वह्निरित्याहुरुकारे हृदि संस्थितः ॥ ६९ ॥

[1] बन्धमुद्रा—मु. बध्व—उ.

मकारे च भ्रुवो[1]र्मध्ये प्राणशक्त्या प्रबोधयेत् ।
ब्रह्मग्रन्थिरकारे च विष्णुग्रन्थिर्हृदि स्थितः ॥ ७० ॥
रुद्रग्रन्थिर्भ्रुवोर्मध्ये भिद्यतेऽक्षरवायुना ।
अकारे संस्थितो ब्रह्मा उकारे विष्णुरास्थितः ॥ ७१ ॥
मकारे संस्थितो रुद्रस्ततोऽभ्यान्तः परात्परः ।
कण्ठं संकुच्य नाड्यादौ स्तम्भितं येन शक्तितः ॥ ७२ ॥
रसना पीड्यमानंयं षोडशीवोर्ध्वगामिनी ।
त्रिकूटं [2]त्रिविधं चैव गोलाखं निखरं तथा ॥ ७३ ॥
त्रिशङ्खं वज्रमोंकारमूर्ध्वनालं भ्रुवोर्मुखम् ।
कुण्डलीं चालयन्प्राणान्भेदयन्शशिमण्डलम् ॥ ७४ ॥
साधयन्वज्रकुम्भानि नव द्वाराणि बन्धयेत् ।
सुमनःपवनारूढः सरागो निर्गुणस्तथा ॥ ७५ ॥
ब्रह्मस्थानं तु नादः स्याच्छंकि[3]न्यमृतवर्षिणी ।
षट्चक्रमण्डलोद्धारं ज्ञानदीपं प्रकाशयेत् ॥ ७६ ॥
सर्वभूतस्थितं देवं सर्वेशं नित्यमर्चयेत् ।
आत्मरूपं तमालोक्य ज्ञानरूपं निरामयम् ॥ ७७ ॥
दृश्यं तं दिव्यरूपेण सर्वव्यापी निरञ्जनः ।
हंस हंस वदेद्वाक्यं प्राणिनां देहमाश्रितः ।
स प्राणापानयोर्ग्रन्थिरजपेत्यभिधीयते ॥ ७८ ॥

[1] मध्यं—अ १. [2] त्रिविधा—अ १, अ २, क.
[3] न्यामृ—क, अ १, अ २.

सहस्रमेकं द्व्युतं षट् शतं चैव सर्वदा ।
उच्चरन्पतितो हंसः सोऽहमित्यभिधीयते ॥ ७९ ॥
पूर्वभागे ह्यधोलिङ्गं शिखिन्यां चैव पश्चिमम् ।
ज्योतिर्लिङ्गं भ्रुवोर्मध्ये नित्यं ध्यायेत्सदा यतिः ॥ ८० ॥

विराडादिरूपेणाकारादिमात्रात्रये यो वसेत् तं प्राणशक्त्या बोधयेदित्याह—**अकार** इति । **अकारे** मूलाधारे च **वह्निः** वैश्वानरो वर्तत **इत्याहुः** । शिष्टं स्पष्टम् ॥ ६९ ॥ यथोक्तस्थानविशिष्टाकारादिमात्रात्रये यत् विद्यते ग्रन्थित्रयं तद्भंसज्ञानवायुना भिद्यते । तत अकारादौ ब्रह्मादयः प्रकाशन्ते । तद्देहकलनापाये निर्विशेषपरमात्मा स्वमात्रं प्रकाशते इत्याह—**ब्रह्मेति** ॥ ७०–७१ ॥ तद्दर्शनग्रन्थित्रयभेदनोपायतया योगमुपदिशति—**कण्ठमिति** । जालन्धरबन्धेन **कण्ठं सङ्कुच्य** सिद्धासनारूढेन **येन** योगिना **नाडयादौ** सुषुम्नामूले कुण्डलिनीशक्तितः कुण्डलिनीशक्त्या सह दृष्टिप्राणादौ **स्तम्भिते** सति ॥ ७२ ॥ अथ "ऊर्ध्वमुन्नमत इत्योङ्कारः" इति श्रुत्यनुरोधेनाकारादिपरान्तषोडशावयवा यस्य सः **षोडशीप्रणव इव ऊर्ध्वगामिनी** घण्टिकाकुहरगामिनी **इयं** जिह्वा **पीड्यमाना** भवति तनुतामेत्य ब्रह्मबिलं प्रविशति । तदा तिस्रो नाडयो यत्रैक्यं भजन्ति तं **त्रिकूटं** भ्रूमध्यं मूलाधारविशुद्ध्यादिभेदेन तत् **त्रिविधं** विराजते । तत्र गोशब्देन पृथिव्यादिभूतपञ्चकतत्कार्यमुच्यते, तन्नित्यादिप्रलये यदात्मना लीयते सेयं गोला अव्यक्तशक्तिः, तदात्मकं खं **गोलाखं** अव्याकृताकाशं यस्मात् निर्गतं व्याकृताव्याकृताकाशादिपृथिव्यन्तं **तन्निखरं** चिदाकाशं योगिरमणस्थानं ब्रह्म च विद्यत इत्यर्थः । यद्वा—गोशब्देन जिह्वोच्यते । तथा च हठतन्त्रे आम्नायते—"गोमांसं भक्षयेत्" इत्यंशविवरणे "गोशब्देनेरिता जिह्वा" इत्युक्तत्वात् । शिष्टं समानम् ॥ ७३ ॥ पुनः त्रिकूटविशेषणमेतत्—इच्छानिच्छापरेच्छाप्रभवस्वान्तरुपलभ्यमानं त्रिशं सुखदुःखत्रयं खादतीति **त्रिशङ्खं**, अयोगिभिः

कदाऽपि दुर्भेद्यत्वात् **वज्रं, ओङ्कारं** अकारादिमात्रात्रयावसानस्थानत्वात्, **ऊर्ध्वनाळं भ्रुवोर्मुखं** भ्रूमध्यम्। यदि तत्र योगी ज्योतिर्लिङ्गं द्रष्टुमिच्छति तदा शक्तिचालनाद्युपायतो ज्ञानदीपं पश्यतीत्याह—**कुण्डलीमिति** ॥ ७४ ॥ सूर्योज्जायीशीतळ्यादीनि **वज्रकुम्भकानि,** तेषां ग्रन्थित्रयभेदनपटुत्वात्। ततो नादः आविर्भवतीत्याह—**सुमन** इति। **सुमनः** मनोज्ञत्वात् **पवनारूढः** प्राणोपाधिकत्वात् **सरागो** नैसर्गिकत्वात् तथा **निर्गुणः** तमआदिगुणत्रयास्पृष्टत्वात् ॥ ७५ ॥ "दहरं पुण्डरीकं वेश्म" इति श्रुतिसिद्धब्रह्मस्थाने **नादाविर्भावः** स्यात्। शं सुधां किरतीति **शङ्किनी** चान्द्री कला **अमृतवर्षिणी** भवति। ततो योगी प्रत्यग्रूपेण प्रकाशयेदित्याह—**षडिति**। मूलाधारादिषट्चक्रमण्डलं अधोमुखं ऊर्ध्वं धरतीति **षट्चक्रमण्डलोद्धारं** ज्ञानाज्ञानवृत्ति दीपयतीति **ज्ञानदीपं** प्रत्यक्त्वं, तद्रूपेण विद्वान् **प्रकाशयेदित्यर्थः** ॥ ७६ ॥ प्रत्यञ्चं सर्वान्तरत्वेन भावयेदित्याह—**सर्वेति**। ततः प्रत्यगभिन्नपरं ब्रह्मास्मीति ध्यायेदित्याह—**आत्मेति** ॥ ७७ ॥ ज्ञानिभिः **दिव्यरूपेण दृश्यं तं** परमात्मानं प्रत्यगभेदेन यो जानाति सोऽयं मुनिः **सर्वव्यापी निरञ्जनो** भूत्वा। हंसहंसेति वीप्सया "हंसः सोऽहं" इति **वाक्यं वदेदिति** द्योत्यते। योऽयं हंसानुसन्धानव्यापारः **सः** ॥ ७८ ॥ अजपाजपसङ्ख्येयत्तामाह—**सहस्रमिति** ॥ ७९ ॥ एवं हंसयोगिना यतिना प्रत्यहं यत् कर्तव्यं तदाह—**पूर्वेति**। सुषुम्नायाः **पूर्वभागे** मूलाधारचक्रे **ह्यधोलिङ्गं** वैराजतत्त्वं ध्यायेत्। "तस्य मध्ये महानग्निर्विश्वार्चिर्विश्वतोमुखः" इति श्रुत्यनुरोधेन अनाहतस्थशिखिन्यां पावकज्वालायां **पश्चिमं** सौम्यं प्रत्यगात्मलिङ्गं वा अहमस्मीति ध्यायेत्। **भ्रुवोराज्ञाचक्रमध्ये** तु ब्रह्ममात्रभावापत्तौ यतत इति **यतिः** मुनिः **ज्योतिरैश्वरं नित्यं** निष्प्रतियोगिक**ब्रह्ममात्रलिङ्गं** वा **सदा ध्यायेत्** अहमस्मीत्यनुसन्धानं कुर्यादित्यर्थः ॥ ८० ॥

हंसयोगिना अनुसन्धेयं आत्मस्वरूपम्

अच्युतोऽहमचिन्त्योऽहमतर्क्योऽहमजोऽस्म्यहम् ।
अव्रणोऽहमकायोह[1]मनङ्गोऽस्म्यभयोऽस्म्यहम् ॥ ८१ ॥
अशब्दोऽहमरूपोऽहमस्पर्शोऽस्म्यहमद्वयः ।
अरसोऽहमगन्धोऽहमनादिरमृतोऽस्म्यहम् ॥ ८२ ॥
अक्षयोऽहमलिङ्गोहमजरोऽस्म्यकलोऽस्म्यहम् ।
अप्राणोऽहममूर्कोऽहमचिन्त्योऽस्म्यकृतोऽस्म्यहम् ॥ ८३ ॥
अन्तर्याम्यहमग्राह्योऽनिर्देश्योऽहमलक्षणः ।
अगोत्रोऽहमगात्रोऽहमचक्षुष्कोऽस्म्यवागहम् ॥ ८४ ॥
[2]अद्रेश्योऽहमवर्णोऽहमखण्डोऽस्म्यहमद्भुतः ।
अश्रुतोऽहमदृष्टोऽहमन्वेष्टव्योऽमरोऽस्म्यहम् ॥ ८५ ॥
अवायुरप्यनाकाशोऽतेजसोऽव्यभिचार्यहम् ।
अमतोऽहमजातोऽहमतिसूक्ष्मोऽविकार्यहम् ॥ ८६ ॥
अरजस्कोऽतमस्कोऽहमसत्त्वोस्म्यगुणोऽस्म्यहम् ।
अमायोऽनुभवात्माऽहमनन्योऽविषयोऽस्म्यहम् ॥ ८७ ॥
अद्वैतोऽहमपूर्णोऽहमबाध्योऽहमनन्तरः ।
अश्रोत्रोऽहमदीर्घोऽहमव्यक्तोऽहमनामयः ॥ ८८ ॥
अद्वयानन्दविज्ञानघनोऽस्म्यहमविक्रियः ।
अनिच्छोऽहमलेपोऽहमकर्ताऽस्म्यहमद्वयः ॥ ८९ ॥

[1] मसङ्गो—क. [2] अद्—क, अ १, अ २.

अविद्याकार्यहीनोऽहमवाङ्मनसगोचरः ।
अनल्पोऽहमशोकोऽहमविकल्पोऽस्म्यविञ्चलन् ॥ ९० ॥
आदिमध्यान्तहीनोऽहमाकाशसदृशोऽस्म्यहम् ।
आत्मचैतन्यरूपोऽहमहमानन्दचिद्घनः ॥ ९१ ॥
आनन्दामृतरूपोऽहमात्मसंस्थोऽहमन्तरः ।
आत्मकामोऽहमाकाशात्परमात्मेश्वरोऽस्म्यहम् ॥ ९२ ॥
ईशानोऽस्म्यहमीड्योऽहमहमुत्तमपूरुषः ।
उत्कृष्टोऽहमुपद्रष्टाऽहमुत्तरतरोऽस्म्यहम् ॥ ९३ ॥
केवलोऽहं कविः कर्माध्यक्षोऽहं करणाधिपः ।
गुहाशयोऽहं गोप्ताऽहं चक्षुषश्चक्षुरस्म्यहम् ॥ ९४ ॥
चिदानन्दोऽस्म्यहं चेताश्चिद्घनश्चिन्मयोऽस्म्यहम् ।
ज्योतिर्मयोऽस्म्यहं ज्यायान् ज्योतिषां ज्योतिरस्म्यहम् ॥९५॥
तमसः साक्ष्यहं तुर्युतुर्योऽहं तमसः परः ।
दिव्यो देवोऽस्मि दुर्दर्शो दृष्टाध्यायो ध्रुवोऽस्म्यहम् ॥ ९६ ॥
नित्योऽहं निरवद्योऽहं निष्क्रियोऽस्मि निरञ्जनः ।
निर्मलो निर्विकल्पोऽहं निराख्यातोऽस्मि निश्चलः ॥ ९७ ॥
निर्विकारो नित्यपूतो निर्गुणो निस्स्पृहोऽस्म्यहम् ।
निरिन्द्रियो नियन्ताऽहं निरपेक्षोऽस्मि निष्कलः ॥ ९८ ॥
पुरुषः परमात्माऽहं पुराणः परमोऽस्म्यहम् ।
परावरोऽस्म्यहं प्राज्ञः प्रपञ्चोपशमोऽस्म्यहम् ॥ ९९ ॥

परामृतोऽस्म्यहं पूर्णः प्रभुरस्मि पुरातनः ।
पूर्णानन्दैकबोधोऽहं प्रत्यगेकरसोऽस्म्यहम् ॥ १०० ॥
प्रज्ञातोऽहं प्रशान्तोऽहं प्रकाशः परमेश्वरः ।
एकधा चिन्त्यमानोऽहं द्वैताद्वैतविलक्षणः ॥ १०१ ॥
बुद्धोऽहं भूतपालोऽहं भारूपो भगवानहम् ।
महादेवो महानस्मि महाज्ञेयो महेश्वरः ॥ १०२ ॥
विमुक्तोऽहं विभुरहं वरेण्यो व्यापकोऽस्म्यहम् ।
वैश्वानरो वासुदेवो विश्वतश्चक्षुरस्म्यहम् ॥ १०३ ॥
विश्वाधिकोऽहं विशदो विष्णुर्विश्वकृदस्म्यहम् ।
शुद्धोऽस्मि शुक्रः शान्तोऽस्मि शाश्वतोऽस्मि शिवोऽस्म्यहम् ॥
सर्वभूतान्तरात्माऽहमहमस्मि सनातनः ।
अहं सकृद्विभातोऽस्मि स्वे महिम्नि सदा स्थितः ॥ १०५ ॥
सर्वान्तरः स्वयंज्योतिः सर्वाधिपतिरस्म्यहम् ।
सर्वभूताधिवासोऽहं सर्वव्यापी स्वराडहम् ॥ १०६ ॥
समस्तसाक्षी सर्वात्मा सर्वभूतगुहाशयः ।
सर्वेन्द्रियगुणाभासः सर्वेन्द्रियविवर्जितः ॥ १०७ ॥
स्थानत्रयव्यतीतोऽहं सर्वानुग्राहकोऽस्म्यहम् ।
सच्चिदानन्दपूर्णात्मा सर्वप्रेमास्पदोऽस्म्यहम् ॥ १०८ ॥
सच्चिदानन्दमात्रोऽहं स्वप्रकाशोऽस्मि चिद्घनः ।
सत्त्वस्वरूपसन्मात्रसिद्धसर्वात्मकोऽस्म्यहम् ॥ १०९ ॥

सर्वाधिष्ठानसन्मा[1]त्रः सर्वबन्धहरोऽस्म्यहम् ।
सर्वग्रासोऽस्म्यहं सर्वद्रष्टा सर्वानुभूरहम् ॥ ११० ॥
एवं यो वेद तत्त्वेन स वै पुरुष उच्यते ॥ इत्युपनिषत् ॥

यथायथा यतिभिः अनुसन्धेयं तदेवाह—**अच्युतोऽहमित्यादिना** । **अच्युतोऽहं**, अच्युतस्वभावात्, **अचिन्त्यः** चित्तवृत्त्यभावात्, **अतर्क्यः** अनिर्वाच्यत्वात्, **अजः** जन्माद्यभावात् । **अव्रण** इत्यादिविशेषणत्रयं शरीरत्रयप्रतिषेधार्थम् । **अभयः**, भयहेतुद्वैताभावात् ॥ ८१ ॥ किं च— **अशब्दोऽहमित्यादि** । पञ्चतन्मात्रवैरळ्यात् शब्दादिप्रतिषेधसिद्धोऽस्मि । **अद्वयः**, द्वैताभावात् । **अनादिरमृतः**, सम्भूतिप्रळयाभावात् ॥ ८२ ॥ किं च—**अक्षयोऽहमित्यादि** । **अक्षयोऽहं**, क्षयिष्णुस्थूलशरीराभावात् । **अलिङ्गः**, अचिह्नत्वात् । **अजरः**, जरादिषड्ऊर्म्यभावात् । **अप्राणोऽहममूकोऽहं** सप्राणवागिन्द्रियाभावात् । **अकृतः**, कृतिहेत्वभावात् ॥ ८३ ॥ किं च— **अन्तर्याम्यहमित्यादि** । **अन्तर्यामी**, सर्वान्तरत्वात् । **अग्राह्यः** करणैः । **अनिर्देश्यः** अनिदंस्वरूपत्वात् । **अलक्षणः**, लक्षणात्रयाभावात् । **अगोत्रः**, कुलगोत्रविवर्जितत्वात् । **अचक्षुष्कः**, ज्ञानाक्षाभावात् । **अवाक्**, कर्माक्षाभावात् ॥ ८४ ॥ किं च—**अदृश्योऽहमित्यादि** । दृश्याभावात् **अदृश्यः** । **अवर्णः** वर्णाश्रमाभावात् । **अखण्डः** पूर्णत्वात् । **अद्भुतः**— स्वस्य निष्प्रतियोगिकस्वमात्रत्वेऽपि स्वाज्ञादिदृष्ट्यनुरोधेन जाग्रज्जाग्रदाद्य-विकल्पानुङ्गीकरसान्तवत् भानात् अद्भुतत्वं युज्यते । वेदान्तवाक्येषु मुमुक्षुभिः **अन्वेष्टव्यः** । **अमरः** पारमार्थिकनित्यत्वात् ॥ ८५ ॥ किं च— **अवायुरित्यादि** । वाय्वाकाशतेजोग्रहणं जलपृथिव्युपलक्षणम् । **अतेजस** इति षष्ठी प्रथमार्था । **अव्यभिचारी** सदेकरूपत्वात् । अन्तःकरणवृत्तिभिः **अमतः** । **अजातः** अजत्वात् । **अतिसूक्ष्मः** केशकोटयंशैकभागसूक्ष्माव्यक्तादपि

[1] त्रस्वात्मब—क, अ १, अ २.

सूक्ष्मत्वात् । **अविकारी** विकारकलनावैरळ्यात् ॥ ८६ ॥ किं च—**अरजस्क** इत्यादि । गुणत्रयगुणसाम्याभावतो निर्गुणत्वात् । **अमायः** निर्मायत्वात् । **अनुभवात्मा** विज्ञानगम्यत्वात् । **अनन्यः** ब्रह्माभिन्नत्वात् । **अविषयः** निर्विषयत्वात् ॥ ८७ ॥ **अद्वैतः** निष्प्रतियोगिकत्वात् । **अपूर्णः** जीवात्मना परिच्छिन्नदृष्टित्वात् । यद्वा—अकारवाच्यविष्ण्वात्मना सर्वत्र पूर्णत्वात् । **अबाह्योऽहमनन्तरः** स्वबाह्यान्तःकलनावैरळ्यात् । अकरणत्वात् परिमाणाभावात् अदृश्यत्वात् अन्नाविरत्वाच्च **अश्रोत्रादिविशेषणचतुष्टयमुपपद्यते** ॥ ८८ ॥ किं च—**अद्रुयेति** । पूर्णानन्दबोधस्वरूपत्वात् **अनिच्छः** ॥ ८९ ॥ **अनल्पः** अपरिच्छिन्नत्वात् । **अशोकोऽहं** निरहङ्कृतित्वात् । **अविकल्पः** निर्विकल्पत्वात् । **अविज्वलन्** निरग्नित्वात् ॥ ९० ॥ **आदिमध्यान्तशून्यः** उत्पत्तिस्थितिप्रळयाभावात् । **आकाशसदृशः** चिदाकाशत्वात् ॥ ९१ ॥ **आत्मसंस्थः** स्वे माहिम्नि स्थितत्वात् । **अन्तरः** सर्वान्तरत्वात् ॥ ९२ ॥ **उत्तमपूरुषः** क्षराक्षराकलनाविरळपुरुषोत्तमत्वात्, "उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः" इति स्मृतेः । सर्वस्मात् **उत्कृष्टः** । **उपद्रष्टा** सर्वसाक्षिस्वरूपत्वात् । **उत्तरतरः** सर्वोत्तरत्वात् ॥ ९३ ॥ **केवलः** अशेषविशेषाभावात् । **कविः** क्रान्तदर्शित्वात् । **कर्माध्यक्षः** कर्मिणां कर्मफलदातृत्वात् । **करणाधिपः** दिग्वातादिरूपत्वात् । **गुहाशयः** सर्वप्रत्यक्स्वरूपत्वात् । **गोप्ता** विष्णुत्वात् । **चक्षुषश्चक्षुः** चक्षुरादीन्द्रियप्रवृत्तिनिमित्तत्वात् ॥ ९४ ॥ अचेतनचेतयितृत्वात् **चेताः** । **ज्यायान्** पृथिव्यादेः । **ज्योतिषां ज्योतिः** सूर्यादिप्रकाशकत्वात् ॥ ९५ ॥ **ध्रुवः** शाश्वतत्वात् ॥ ९६ ॥ **निरञ्जनः** अमङ्गत्वात् ॥ ९७–१०० ॥ **एकधा चिन्त्यमानोऽहं** सर्वापह्नवसिद्धं ब्रह्म, निष्प्रतियोगिकैकरूपेण चिन्तनीयत्वात् । **सापेक्षद्वैताद्वैतविलक्षणः** निष्प्रतियोगिकपरमाद्वैतरूपत्वात् ॥ १०१–१०३ ॥ **शिवः** स्वातिरिक्ताशिवग्रासत्वात् ॥ १०४ ॥ **सकृद्विभातः** निरावृतप्रकाशः ॥ १०५ ॥ **स्वराट्** स्वमात्रतया राजमानत्वात् ॥ १०६ ॥ **सर्वेन्द्रियगुणाभासः सर्वेन्द्रियविवर्जितः, स्वाङ्गस्वङ्गदृष्टिभ्यामित्यर्थः** ॥ १०७ ॥ **जाग्रदादिस्थानत्रयव्यतीतोऽहम्** ॥ १०८–११० ॥

विद्याफलमाह—एवमिति । अच्युतोऽहमित्यादिसर्वानुभूरित्यन्तस्वानुभूतिवाक्यानि स्वानुभूतिमहावाक्यरत्नावलीप्रभालोचने प्रायशो व्याख्यातानीत्यर्थः । इत्युपनिषच्छब्दः ब्रह्मविद्योपनिषत्समाप्त्यर्थः ॥

श्रीवासुदेवेन्द्रशिष्योपनिषद्ब्रह्मयोगिना ।
ब्रह्मविद्योपनिषदो व्याख्येयं लिखिता लघु ।
प्रकृतोपनिषद्व्याख्या सप्तत्यधिशतद्वयम् ॥

इति श्रीमदीशाद्यष्टोत्तरशतोपनिषच्छास्त्रविवरणे चत्वारिंशत्संख्यापूरकं ब्रह्मविद्योपनिषद्विवरणं सम्पूर्णम्

मण्डलब्राह्मणोपनिषत्

पूर्णमदः—इति शान्तिः

प्रथमं ब्राह्मणम्

आत्मतत्त्वजिज्ञासा

याज्ञवल्क्यो ह वै महामुनिरादित्यलोकं जगाम । तमादित्यं नत्वा भो भगवन्नादित्यात्मतत्त्वमनुब्रूहीति ॥ १ ॥

बाह्यान्तस्तारकाकारं व्योमपञ्चकविग्रहम् ।
राजयोगैकसंसिद्धं रामचन्द्रमुपास्महे ॥

अथ खलु शुक्लयजुर्वेदप्रविभक्तेयं मण्डलब्राह्मणोपनिषत् सूक्ष्माष्टांगयोग-प्रकटनपूर्वकं लक्ष्यत्रयव्योमपञ्चकतारकद्वयादिप्रकाशकराजयोगसर्वस्वं प्रकाशयन्ती विजृम्भते । अस्याः स्वल्पग्रन्थतो विवरणमारभ्यते । याज्ञवल्क्यादित्यप्रश्नप्रतिवचनरूपेयमाख्यायिका विद्यास्तुत्यर्था । आख्यायिकामवतारयति—याज्ञवल्क्य इति ॥ १ ॥

सूक्ष्माष्टाङ्गयोगप्रतिज्ञा

स होवाच नारायणः । ज्ञान[1]सहितयमाद्यष्टाङ्गयोग उच्यते ॥२॥

[1] युक्तय—अ, अ १, अ २, क.

याज्ञवल्क्येन एवं पृष्टः तत्प्रश्नमंगीकृत्य **स होवाच**। आदित्यमण्डलान्तर्वर्ती सर्वलोकपरायणरूपोऽसौ याज्ञवल्क्यप्रश्नोत्तरमाहेत्यर्थः। किं तदित्याकांक्षायां तत्पृष्टात्मतत्त्वोपायतया यमाद्यष्टांगयोगमादावाह—**ज्ञानेति**। "ब्रह्मैव सर्वं, ब्रह्मातिरिक्तं न किञ्चिदस्ति" इति **ज्ञानं** उपेयं **तत्सहितः** तद्गर्भित इत्यर्थः॥ २॥

चतुर्विधयमः

शीतोष्णाहारनिद्राविजयः सर्वदा शान्तिर्निश्चलत्वं विषयेन्द्रियनिग्रहश्चैते यमाः॥ ३॥

अष्टांगेषु चतुर्धा भिन्नयमलक्षणमाह—**शीतेति**। देहादावात्मात्मीयाभिमानत्यागतः शीतादिविनिवृत्तिः भवति। स्वाप्राप्तं वस्तु नेतीति ज्ञानात् **सर्वदा शान्तिः** भवति। स्वाभिलषितलक्ष्ये मनसो **निश्चलत्वम्**। इन्द्रियेन्द्रियार्थेषु वस्तुचिन्तनं **इन्द्रियेन्द्रियार्थनिग्रहो** भवति। **च**शब्दः समुच्चयार्थः। **एते** चतुष्प्रकारा **यमा** इत्यर्थः॥ ३॥

नवविधनियमः

गुरुभक्तिः सत्यमार्गानुरक्तिः सुखागतवस्त्वनुभवश्च तद्वस्त्वनुभवेन तुष्टिर्निःसङ्गता एकान्तवासो मनोनिवृत्तिः फलानभिलाषो वैराग्यभावश्च नियमाः॥ ४॥

नवधा भिन्ननियम उच्यते—**गुर्विति**। नित्यं अमायया स्वाज्ञानमोचकगुरुभजनं **गुरुभक्तिः**, "गुरुभक्तिं सदा कुर्यात् श्रेयसे" इति श्रुतेः। **सत्यं** ब्रह्म तत्प्रापकमार्गः तद्बोधः **तत्रानुरक्तिः** आसक्तिः। निरतिशयसुखरूपतया श्रुत्याचार्यप्रसादादागतब्रह्मवस्त्वनुभवश्च। **तद्वस्त्वनुभवेनैव तुष्टिः** न बाह्यविषयानुभवतः। तुष्टावपि **निस्सङ्गता**। सदा आदिमध्यान्तभेदेन **एकान्तत्रये वासः**—विजने प्रयत्नपूर्वकं मनोनियमनं आद्यैकान्तं, विजने

सजने वाऽपि प्रयत्नपूर्वकमनोनियमनं मध्यैकान्तं, विजने सजने वा प्रदेशे अप्रयत्नेन मनोनियमनं अन्तैकान्तं, यस्य येन यदा एकान्तं साधितं स तत्रैव वसेदित्यर्थः । स्वातिरेकेण मनो नास्तीति दृढाभिसन्धिः **मनोनिवृत्तिः** । स्वानुष्ठितकर्मफलानभिलाषः । स्वातिरिक्तविषयसामान्ये वान्ताशनमूत्र-पुरीषवदिच्छागाहित्यं सर्वत्र **वैराग्यभावश्च** । सर्वत्र समुच्चयार्थं चशब्दद्वयम् । एते नियमा नवविधाः ॥ ४ ॥

आसनादिषडङ्गविवरणम्

सुखासनवृत्तिश्चिरवासश्चैवमासननियमो भवति ॥ ५ ॥ पूरककुम्भकरेचकैः षोडशचतुष्षष्टिद्वात्रिंशत्संख्यया यथाक्रमं प्राणा-यामः ॥ ६ ॥ विषयेभ्य इन्द्रियार्थेभ्यो मनोनिरोधनं प्रत्याहारः ॥ ७ ॥ विषयव्यावर्तनपूर्वकं चैतन्ये चेतस्स्थापनं धारणं भवति ॥ ८ ॥ सर्वशरीरेषु चैतन्यैकतानता ध्यानम् ॥ ९ ॥ ध्यानविस्मृतिः समाधिः ॥ १० ॥

आसननियम उच्यते—**सुखेति** । यत्र सुखेनाखण्डाकारात्मिका वृत्तिरुदेति सा **सुखासनवृत्तिः** । निरायासेन यत्र चिरं वसति स **चिरासनवासः** ॥ ५ ॥ प्राणायामलक्षणमाह—**पूरकेति** । षोडशमात्राकालपरिमितं **पूरकं**, **कुम्भकं** तच्चतुर्गुणितं, **रेचकं** तदर्धमित्यर्थः ॥ ६ ॥ प्रत्याहारलक्षणमाह—**विषयेभ्य** इति ॥ ७ ॥ धारणाध्यानसमाधिलक्षणमाह—**विषयेति** । सर्वत्र **विषयेति** ॥ ८ ॥ अनेकघटशरावादिषु भिद्यमानेष्वपि यथा तदवच्छिन्नव्योम्न एकत्वं तथेत्यर्थः ॥९॥ **समाधिः** निर्विकल्पकसमाधिः त्रिपुटीग्रासत्वात् ॥१०॥

सूक्ष्मयोगाष्टाङ्गज्ञानफलम्

एवं सूक्ष्माङ्गानि । य एवं वेद स मुक्तिभाग्भवति ॥ ११ ॥

एवं अष्टांगयोगज्ञानफलमाह—एवमिति । सूक्ष्म-अष्ट-अङ्गानि । स्वात्तज्ञानानुरोधेन स मुक्तिभाग्भवति ॥ ११ ॥

इति प्रथमः खण्डः

देहपञ्चदोषनिरसनम्

देहस्य पञ्च दोषा भवन्ति कामक्रोधनिश्वासभयनिद्राः ॥१॥

तन्निरासस्तु निःसंकल्पक्षमालघ्वाहाराप्रमादतातत्त्वसेवनम् ॥ २ ॥

पञ्चदोषवद्देहावच्छिन्नस्य मुक्तिभाक्त्वं कथमित्याशङ्क्य तन्निरसनोपायसत्त्वात् तत्सिद्धिः स्यादित्याह—देहस्येति । के ते इत्यत्र—कामेति ॥ १ ॥ क्रमेण तन्निरासस्तु । निस्सङ्कल्पतः कामादिनिवृत्तिः, क्षमातः क्रोधनिवृत्तिः, लघ्वाहारोपलक्षितप्राणायामतः श्वासस्थिरत्वं, सर्वत्र द्वैतधीत्यागतो भयनिवृत्तिः, परमार्थतत्त्वसेवनतः स्वाज्ञाननिद्रानिवृत्तिः । एवं पञ्चदोषशान्तितो मुक्तिभाक्त्वं स्यादित्यर्थः ॥ २ ॥

तारकावलोकनं तत्फलं च

[1]निद्राभयसरीसृपं हिंसादितरङ्गं तृष्णावर्तं दारपङ्कं संसारवार्धिं तर्तुं सूक्ष्ममार्गमवलम्ब्य सत्त्वादिगुणानतिक्रम्य तारकमवलोकयेत् ॥ ३ ॥ भ्रूमध्ये सच्चिदानन्दतेजःकूटरूपं तारकं ब्रह्म ॥ ४ ॥

अपारदुस्तारसंसारवारिधेः सत्त्वात् तत्तरणोपायो नास्तीत्याशङ्क्य लक्ष्यत्रयगोचरतारकनौकासत्त्वात् तदाश्रित्य तद्वारिधिः तरितुं शक्यः इत्याह—

[1] निद्रासरी—उ.

निद्रेति । संसृतेः सागरत्वं कथमित्यत्र निद्रेत्यादि । उक्तविशेषणविशिष्टं संसारवार्धिं तर्तुं तरितुं वक्ष्यमाणसूक्ष्ममार्गम् ॥ ३ ॥ कितत्तारकमित्यत्र भ्रूमध्य इति । नासाग्रदर्शिनो भ्रूमध्ये ज्योतिर्दृश्यते, सच्चिदानन्दस्य सर्वव्यापकत्वेन चक्षुर्मनोविकल्पिततेजःकूटरूपेऽपि व्याप्तत्वात् । भ्रूमध्यविलसितसच्चिदानन्दतेजः-कूटरूपस्य परमेश्वररूपत्वेन स्वभजद्भक्तपटलस्वातिरिक्तास्तित्वलक्षणसंसारसागर-सन्तारणात् तारकत्वम् । वस्तुतः स्वमात्रतया बृंहणात् तारकं ब्रह्मेति व्यपदिश्यते ॥ ४ ॥

लक्ष्यत्रयावलोकनेन तारकप्राप्तिः

[1]तदाप्युपायं लक्ष्यत्रयावलोकनम् ॥ ५ ॥

तदुपायः कः इत्यपेक्षायामाह—तदाप्युपायमिति । विद्धि इत्यर्थः ॥ ५ ॥

अन्तर्लक्ष्यदर्शनम्

मूलाधारादा ब्रह्मरन्ध्रपर्यन्तं सुषुम्ना सूर्याभा । तन्मध्ये तटित्कोटिसमा मृणालतन्तुसूक्ष्मा कुण्डलिनी । [2]तत्र तमोनिवृत्तिः । तद्दर्शनात्सर्वपापनिवृत्तिः ॥ ६ ॥ तर्जन्यग्रोन्मीलित[3]कर्णरन्ध्रद्वये फूत्कारशब्दो जायते । तत्र स्थिते मनसि चक्षु[4]र्मध्यनीलज्योतिः पश्यति । एवं हृदयेऽपि ॥ ७ ॥

लक्ष्यत्रयं किं इत्यत्र अन्तर्बाह्यमध्यभेदेन तत् त्रिविधम् । तत्र अन्तर्लक्ष्यलक्षणं तत्फलं चाह—मूलेति । वीणादण्डमाश्रित्य सुषुम्ना वर्तते । तटित्कोटिसमाभा कुण्डलिनीशक्तिरस्ति । तत्र मनसि स्थिरीभूते स्वाज्ञान-तमोनिवृत्तिः । कुण्डलिनीमध्ये यदाकाशं विद्यते तद्दर्शनात् सर्वपापनिवृत्तिः

[1] तदुपायं—क, अ १.
[2] "तत्र" इत्येतत्लुप्तम्—अ, उ.
[3] कर्णद्वये—क. अ २.
[4] र्मध्यं—अ, अ १.

भवति ॥ ६ ॥ कर्णद्वयान्तः तर्जनीद्वयप्रवेशो मुकुन्दमुद्रा, तया तर्जनीति। तर्जनीभ्यां कर्णद्वयपिधानात् तत्र फूत्कारादिनादः उदेति। तत्र स्थिते मनसि साधकः चक्षुरित्यादि। न केवलं नादे, किं तु एवं हृदयेऽपि पश्यति ॥ ७ ॥

बहिर्लक्ष्यदर्शनम्

बहिर्लक्ष्यं तु नासाग्रे चतुःषडष्टदशद्वादशाङ्गुलीभिः क्रमान्नीलद्युतिश्यामत्वसदृग्रक्तभङ्गीस्फुरत्पीतवर्णद्वयोपेतं व्योमत्वं पश्यति स तु योगी ॥ ८ ॥ चलदृष्ट्या व्योमभागवीक्षितुः पुरुषस्य दृष्टयग्रे ज्योतिर्मयूखा वर्तन्ते। तद्दृष्टिः स्थिरा भवति ॥ ९ ॥ शीर्षोपरि द्वादशाङ्गुलिमानज्योतिः पश्यति तदाऽमृतत्वमेति ॥१०॥

अन्तर्लक्ष्येयत्तामुक्त्वा बहिर्लक्ष्येयत्तामनुक्रामति—बहिरिति। योगी स्वदृष्टी समे कृत्वा स्वनासाग्रे स्वकृताभ्यासानुरोधेन क्रमाच्चतुरादिद्वादशांगुलिपर्यन्तं व्योमत्वं व्योमभावं पश्यति। किंविशिष्टं व्योमेत्यत्र दृश्यमाननीलद्युतिः ईषच्छ्यामत्वगुणसदृशा आपाततो रक्तभङ्गी च स्फुरत्पीतवर्णविशिष्टा। तत्र नीलपीतवर्णौ प्रधानौ। श्यामादिवर्णस्तु उपसर्जनभूतः। एवं वर्णद्वयविशिष्टं व्योमेत्यर्थः। यदा एवं पश्यति तदा अयं योगी भवति ॥ ८ ॥ एवं दर्शनान्मनो[1]नुगृहीतदृष्टिः स्थिरा भवतीत्याह—चलेति। स्वदृष्टयग्रे। मयूखाः किरणाः। यद्दृष्टिः तत्र समारोपिता तद्दृष्टिः ॥ ९ ॥ मस्तकोपरि ज्योतिर्दर्शनं अमृतत्वफलकमित्याह—शीर्षेति। यदा अयं योगी शीर्षोपरि ॥ १० ॥

मध्यलक्ष्यदर्शनम्

मध्यलक्ष्यं तु प्रातश्चित्रादिवर्णसूर्यचन्द्रवह्निज्वालावलीवत्तद्विहीनान्तरिक्षवत्पश्यति ॥ ११ ॥ तदाकाराकारी भवति ॥ १२ ॥

[1] निगृहीत—उ.

अभ्यासान्निर्विकारं गुणरहिताकाशं भवति । विस्फुरत्तारकाका-[1]रगादद्भुमोपमं [2]पराकाशं भवति । कालानलसमद्योतमानं महाकाशं भवति । सर्वोत्कृष्टप[3]रमाद्वितीयप्रद्योतमानं तत्त्वाकाशं भवति । कोटिसूर्य[4]प्रकाशसंकाशं सूर्याकाशं भवति ॥ १३ ॥ एवमभ्यासात्तन्मयो भवति । य एवं वेद ॥ १४ ॥

अन्तर्बाह्यलक्ष्यलक्षणमुक्त्वा मध्यलक्ष्यलक्षणं प्रकटयति—मध्येति । योगी नातिदूरदेशपुरोभागान्तरिक्षे प्रातरित्यादि ॥ ११ ॥ एवं दर्शनतः किं स्यादित्याशङ्क्य तन्मयत्वं व्योमपञ्चकदर्शनं तद्भावापत्तिरपि स्यादित्याह—तदाकारेति ॥ १२–१३ ॥ अभ्यासज्ञानफलमाह—एवमिति ॥ १४ ॥

इति द्वितीयः खण्डः

तारकामनस्कभेदेन द्विविधो योगः

तद्योगं च द्विधा विद्धि पूर्वोत्तर[5]विधानतः ।
पूर्वं तु तारकं विद्यादमनस्कं तदुत्तरमिति ॥

तारकं द्विविधम् । मूर्तितारकममूर्तितारकमिति । यदिन्द्रियान्तं तन्मूर्तितारकम् । यद्भ्रूयुगातीतं तदमूर्तितारकमिति ॥ १ ॥

व्योमपञ्चकाभ्यासतः किं स्यादित्यत्र पर्यवसाने तारकामनस्कसिद्धिः स्यादित्याह—तदिति । यद्व्योमपञ्चकाभ्यासयोगः उक्तः पर्यवसाने तद्योगम् ।

[1] रं गा—अ. रा गा—अ १.
[2] परमाका—अ.
[3] रमद्युतिप्र—अ, अ १.
[4] प्रकाशं सू—अ १, अ२, क.
[5] विभागतः—अ, अ १, अ २, क.

किं मूर्तितारकं किं अमूर्तितारकं इत्यत्र मूलाधारमारभ्याज्ञाचक्रपर्यन्तं मूर्तितारकं, आज्ञाचक्रमारभ्य सहस्रारान्तं अमूर्तितारकमित्याह—यदिति ॥ १ ॥

मनोयोगविधिः

उभयमपि मनोयुक्तमभ्यसेत् । मनो[1]युक्तान्तरदृष्टिस्तारक-प्रकाशाय भवति ॥ २ ॥

लक्ष्यदर्शनस्य चक्षुरधीनत्वात् किं मनसेत्याशङ्क्य मनोनुगृहीतदृष्टिः अन्तर्दृष्टिर्भूत्वा तारकग्राही भवति न केवलदृष्टिरित्याह—मन इति ॥ २ ॥

पूर्वतारकम्

भ्रूयुगमध्यबिले तेजस आविर्भावः । एतत्पूर्वतारकम् ॥ ३ ॥

पूर्वतारकस्वरूपमाह—भ्रूयुगेति ॥ ३ ॥

उत्तरतारकम्

उत्तरं त्वमनस्कम् । तालुमूलोर्ध्वभागे महज्ज्योतिर्विद्यते । तद्दर्शनादणिमादिसिद्धिः ॥ ४ ॥

सफलोत्तरतारकस्वरूपमाह—उत्तरं त्विति । सिद्धिः भवति ॥ ४ ॥

उत्तरतारकस्य शाम्भवीपर्यवसानम्

लक्ष्येऽ[2]न्तर्बाह्यायां दृष्टौ निमेषोन्मेषवर्जितायां च इयं शाम्भवी मुद्रा भवति । सर्वतन्त्रेषु गोप्या महाविद्या भवति । तज्ज्ञानेन संसारनिवृत्तिः । तत्पूजनं मोक्षफलदम् ॥ ५ ॥

[1] युक्तान्तद—उ. [2] न्तस्थबा—अ, अ १.

उत्तरतारकमेव पर्यवसाने मुक्तिफलप्रदशाम्भवीमुद्रा भवतीत्याह—लक्ष्य इति। तथा च श्रुत्यन्तरम्—

अन्तर्लक्ष्यं बहिर्दृष्टिः निमेषोन्मेषवर्जिता।
एषा सा शाम्भवीमुद्रा सर्वतन्त्रेषु गोपिता॥

इति। शांभवीज्ञानं संसारनिवर्तकं, तद्योगिपूजनं मुक्तिफलदं भवेदित्याह—तदिति॥ ५॥

अन्तर्लक्ष्यलक्षणम्

अन्तर्लक्ष्यं [1]जलज्योतिस्स्वरूपं भवति महर्षिवेद्यं अन्तर्बाह्येन्द्रियैरदृश्यम्॥ ६॥

किं पुनः अन्तर्लक्ष्यमित्यत्र यत्करणग्रामागोचरं तदेव अन्तर्लक्ष्यमित्याह—अन्तरिति॥

इति तृतीयः खण्डः

अन्तर्लक्ष्ये वादिविप्रतिपत्तिः

सहस्रारे [1]जलज्योतिरन्तर्लक्ष्यम्। बुद्धिगुहायां सर्वाङ्गसुन्दरं पुरुषरूपमन्तर्लक्ष्यमित्यपरे। शीर्षान्तर्गतमण्डलमध्यगं पञ्चवक्त्रमुमासहायं नीलकण्ठं प्रशान्तमन्तर्लक्ष्यमिति केचित्। अङ्गुष्ठमात्रः पुरुषोऽन्तर्लक्ष्यमित्येके॥ १॥

[1] ज्वल—अ २.

अन्तर्लक्ष्यविषये वादिविप्रतिपत्तिं परमार्थदृष्ट्या सर्ववादिविकल्पगोचर-लक्ष्यस्यैकत्वं तद्दर्शनतो ब्रह्मनिष्ठत्वं चाह—**सहस्रार** इति । योगिनः बुद्धिगुहायां, अपरे वैष्णवाः । केचित् शैवाः । एके दहरविद्योपासकाः ॥ १ ॥

सर्वलक्ष्यानुस्यूतात्मदर्शनविधिः

उक्तविकल्पं सर्वमात्मैव । तल्लक्ष्यं शुद्धात्मदृष्ट्या वा यः पश्यति स एव ब्रह्मनिष्ठो भवति ॥ २ ॥

परमार्थदृष्ट्या योग्यादिभिः उक्तेति । एवमन्तर्लक्ष्यैक्यदर्शी ब्रह्मनिष्ठः इत्याह—**तल्लक्ष्यमिति** ॥ २ ॥

आत्मनिष्ठस्य ब्रह्मभावप्राप्तिः

जीवः पञ्चविंशकः स्वकल्पितचतुर्विंशतितत्त्वं परित्यज्य षड्विंशकः परमात्माऽहमिति निश्चयाज्जीवन्मुक्तो भवति ॥ ३ ॥ एवमन्तर्लक्ष्यदर्शनेन जीवन्मुक्तिदशायां स्वयमन्तर्लक्ष्यो भूत्वा परमाकाशाखण्डमण्डलो भवति ॥ ४ ॥

स्वतत्त्वे स्थितो जीवः स्वन्यूनतत्त्वं परित्यज्य स्वाधिकतत्त्ववेदनान्मुक्तो भवतीत्याह—**जीव** इति । ज्ञानकर्माक्षप्राणभूतपञ्चकानि विंशतिः अन्तःकरण-चतुष्टयं चेति चतुर्विंशतितत्त्वानि । तदुपाधिको **जीवः पञ्चविंशकः**, "पञ्चविंश आत्मा भवति" इति श्रुतेः । तत्सर्वोपाधिसम्बन्धरहितः **षड्विंशक** इत्यर्थः ॥ ३ ॥ जीवन्मुक्तः कां गतिं भजतीत्याशङ्क्य जीवन्मुक्ता-भिमतित्यागानन्तरं ब्रह्मैव भवतीत्याह—एवमिति । भूत्वा तदभिमतित्यागसम-कालम् **भवति**, परमात्मैव भवतीत्यर्थः ॥

इति चतुर्थः खण्डः

इति प्रथमं ब्राह्मणम्

द्वितीयं ब्राह्मणम्

सर्वाधारज्योतिरात्मनःअन्तर्लक्ष्यत्वम्

अथ ह याज्ञवल्क्य आदित्यमण्डलपुरुषं पप्रच्छ । भगवन्नन्तर्लक्ष्यादिकं बहुधोक्तम् । मया तन्न ज्ञातम् । तद्ब्रूहि मह्यम् ॥ १ ॥ तदु होवाच पञ्चभूतकारणं तटित्कूटाभं तद्वच्चतुःपीठम् । तन्मध्ये [1]तत्त्वप्रकाशो भवति । सोऽतिगूढ अव्यक्तश्च ॥ २ ॥

जानन्नपि याज्ञवल्क्यो मन्दबुद्धयारोहाय पुनरन्तर्लक्ष्येयत्तां पृच्छतीत्याह—अथेति । किमिति? भगवन्निति । यथावत् मया ॥ १ ॥ तत्प्रश्नोत्तरं भगवानुवाच । किमिति? पञ्चेति । अन्तर्लक्ष्यात्मनः पञ्चभूतहेतुत्वात्, "आत्मन आकाशः सम्भूतः" इति श्रुतेः । तटित्कूटाभं, तेजःपुञ्जरूपत्वात् । तद्वत्तेजोवदात्मनः स्वाज्ञादिदृष्ट्यनुरोधेन तमोरजःसत्वगुणसाम्यरूपेण जाग्रदाद्यवस्थाचतुष्टयभेदेन स्वाविद्यापदस्थूलादिचतुरंशभेदेन वा चत्वारि पीठस्थानानि यस्य तत् तद्वत् चतुष्पीठं, जाग्रदादेः विश्वविराडोत्राद्यासनत्वात् । स्वाधिष्ठिताविद्यापादप्रकाशकः स्वयमेवेत्याह—तदिति । तस्य अविद्यापादस्य मध्ये तद्गतविशेषजातं ग्रसित्वा तत्त्वप्रकाशः तुर्यतुर्यज्योतिः सदा भवति । तादृशश्चेत्प्रकाशः किं न दृश्यत इत्यत आह—स इति । स्वावृत्यावृतदृष्टेः सोऽतिगूढ अव्यक्तश्च भवति ॥ २ ॥

ज्योतिरात्मज्ञानफलम्

तज्ज्ञानप्लवाधिरूढेन ज्ञेयम् । तद्बाह्याभ्यन्तर्लक्ष्यम् ॥ ३ ॥ तन्मध्ये जगल्लीनम् । तन्नादबिन्दुकलाऽतीतमखण्डमण्डलम् । [2]सगुणनिर्गुणस्वरूपम् । तद्वेत्ता विमुक्तः ॥ ४ ॥

[1] तत्प्र—क. [2] तत्सगु—अ, अ १, अ २, क.

तत् केन वा ज्ञातुं शक्यते इत्यत आह—**तदिति** । **ज्ञानप्लवाधिरूढेन** स्वाज्ञानसागरं तीर्त्वा तत्पारं यत् **तत्** स्वमात्रमिति **ज्ञेयम्** । तत् कीदृशमित्यत्र **तत् बाह्याभ्यन्तर्लक्ष्यं**, बाह्याभ्यन्तःकलनाऽऽरोपापवादाधिकरणतया लक्षितत्वात् ॥ ३ ॥ अत एव **तन्मध्ये जगल्लीनं**, लयाधारत्वात् । लयाधारत्वे सविशेषता स्यादित्यत आह – **तदिति** । यत् सर्वाधिकरणं **तन्नादेति** । नादादि-विशेषापह्नवसिद्धं निष्प्रतियोगिकाखण्डैकरसचिन्मात्रमित्यर्थः । सविशेषं तद्भिन्नमित्यत आह—**सगुणेति** । तद्गतविशेषाविशेषत्वं स्वाज्ञादिदृष्टिनिष्ठं न स्वनिष्ठमिति । वेदनफलमाह –**तद्वेत्तेति** ॥ ४ ॥

शाम्भव्या तदधिगमः

आदावग्निमण्डलम् । तदुपरि सूर्यमण्डलम् । तन्मध्ये सुधा[1]चन्द्रमण्डलम् । तन्मध्येऽखण्डब्रह्मतेजोमण्डलम् । तद्विद्युल्लेखाव-च्छुक्लभास्वरम् । तदेव शाम्भवीलक्षणम् ॥ ५ ॥

यद्वेत्ता मुक्तो भवति तदधिगमोपायमाह– –**आदाविति** । सिद्धासनमारुह्य षण्मुखीमुद्राऽभ्यासयोगिनः वह्निमण्डलादि क्रमेण दृश्यते । पर्यवसाने तदेवोन्मन्यवस्थाजनकशाम्भवी भवतीत्यर्थः ॥ ५ ॥

पूर्णिमादृष्टिविधिः

तद्दर्शने त्रयो दृष्टय अमा प्रतिपत्पूर्णिमा चेति । निमीलि-तदर्शनममादृष्टिः । अर्धोन्मीलितं प्रतिपत् । सर्वोन्मीलनं पूर्णिमा भवति । तासु पूर्णिमाऽभ्यासः कर्तव्यः ॥ ६ ॥ तल्लक्ष्यं नासाग्रम् । तदा तालुमूले गाढतमो दृश्यते । तदभ्यासादखण्डमण्डलाकारज्योति-र्दृश्यते । तदेव सच्चिदानन्दं ब्रह्म भवति ॥ ७ ॥

[1] चक्रम—क.

तदर्शनोपायमाह—तद्दर्शन इति । कथं दृष्टेः त्रैविध्यमित्यत्र अमेति । तत्र निमीलितेति ॥ ६ ॥ दृष्टित्रयलक्ष्यं किमित्यत्र—तल्लक्ष्यमिति । नासाग्रावलोकनतः किं दृश्यते इत्यत्र—तदिति । एवं तदभ्यासात् । तद्दृष्ट्या तदेव । सच्चिदानन्दब्रह्मातिरिक्तस्य मृग्यत्वात् सहजानन्दरूपं तदेवेत्यर्थः ॥ ७ ॥

पूर्णिमादृष्टेः शाम्भवीपर्यवसानम्

एवं सहजानन्दे यदा मनो लीयते तदा शांभवी भवति ।
तामेव खेचरीमाहुः ॥ ८ ॥

तत्र मनोलय एव शाम्भवीत्याह—एवमिति । पर्यवसाने शाम्भवी-खेचर्योः एकलक्ष्यसमाप्तत्वात् ॥ ८ ॥

मुद्रासिद्धिः तच्चिह्नानि च

तदभ्यासान्मनःस्थैर्यम् । ततो [1]बुद्धिस्थैर्यम् ॥ ९ ॥ तच्चिह्नानि । आदौ तारकवद्दृश्यते । ततो वज्रदर्पणम् । [2]ततः परिपूर्णचन्द्रमण्डलम् । [3]ततो रत्नप्रभामण्डलम् । ततो मध्याह्नार्कमण्डलम् । ततो वह्निशिखामण्डलं क्रमाद्दृश्यते ॥ १० ॥

मुद्राऽभ्यासेन किं स्यादित्यत आह—तदिति ॥ ९ ॥ तच्चिह्नानि तत्सिद्धिचिह्नानि । कानीत्यत आह—आदाविति । तारकवत् नक्षत्रवत् । परिष्कृतवज्रवत् दर्पणवच्चेत्यर्थः । तथा च श्रुतिः—

नीहारधूमार्कानलानिलानां खद्योतविद्युत्स्फटिकशशीनाम् ।
एतानि रूपाणि पुरस्सराणि ब्रह्मण्यभिव्यक्तिकराणि योगे ॥ इति ॥ १० ॥

इति प्रथमः खण्डः

[1] वायुस्थै—अ, अ १, अ २, क. [2] ततउपरि—क. ततःपू—अ, अ १.
[3] ततो नवर—क, अ २.

प्रणवस्वरूपप्रत्यक्प्रकाशानुभवः, तच्चिह्नानि च

तदा पश्चिमाभिमुखप्रकाशः स्फटिकधूम्रबिन्दुनादकला-नक्षत्रखद्योतदीपनेत्रसुवर्णनवरत्नादिप्रभा दृश्यन्ते । तदेव [1]प्रणवरूपम् ॥ १ ॥

यदैवं चिह्नानि दृष्टानि तदा प्रत्यक्प्रकाशानुभवो भवति । ततः कानि चिह्नानि दृश्यन्ते इत्यत्र—स्फटिकेति । दृश्यन्ते प्रणवानुसन्धानं कुर्वतः । बिन्दुशब्देन मनस्तत्त्वं, नादशब्देन बुद्धितत्त्वं, कलाशब्देन महत्तत्त्वं, शिष्टं स्पष्टम् । यदेतदेवं दृष्टं तत् सर्वं प्रणवरूपमित्याह—तदिति ॥ १ ॥

षण्मुख्या प्रणवाधिगमः

प्राणापानयोरैक्यं कृत्वा धृत[2]कुम्भको नासाग्रदर्शनदृढभावनया द्विकराङ्गुलिभिः षण्मुखीकरणेन [3]प्रणवादिध्वनिं निशाम्य मनस्तत्र लीनं भवति ॥ २ ॥

षण्मुख्युपायपूर्वकं मनस्तत्कार्यलयाधिकरणं प्रणवार्थं ब्रह्मेत्याह—प्राणेति । हठयोगरीत्या प्राणेति । धृतकुम्भको योगी । तत्र नादावसाने ब्रह्मणि ॥ २ ॥

प्रणवविदः कर्मलेपाभावः

तस्य न कर्मलेपः । रवेरुदयास्तमययोः किल कर्म कर्तव्यम् । एवं [4]विदश्चिदादित्यस्योदयास्तमयाभावात्सर्वकर्माभावः ॥ ३ ॥

[1] प्रणवस्वरूपं—क, अ २.
[2] कुम्भके—अ २.
[3] प्रणवध्व—क, अ २.
[4] विदिचि—अ.

यस्य मनो ब्रह्मणि लीयते तस्य न कर्मलेपः, योगिनो निर्लिप्तत्वात्। कर्तव्यकर्मसु सत्सु कथं तत्र निर्लेपतेत्याशङ्क्य कर्मणामादित्योदयास्तमयनिमित्तत्वेन योग्यात्मादित्यस्योदयास्तमयाभावात्तन्निमित्तकर्माभावतो निर्लिप्तोऽयमित्युक्तिरपि गौणीत्याह—रवेरिति।

कर्मणा बध्यते जन्तुः विद्ययाऽमृतमश्नुते।
तस्मात् कर्म न कुर्वन्ति यतयः पारदर्शिनः॥

इति श्रुतेः॥ ३॥

उन्मन्यवस्थाद्वारा अमनस्कसिद्धिः

शब्दकाललयेन दिवारात्र्यतीतो भूत्वा सर्वपरिपूर्णज्ञानेनोन्मन्यवस्थावशेन ब्रह्मैक्यं भवति। उन्मन्या अमनस्कं भवति॥ ४॥

एवं प्रणवनादलयतः किं स्यादित्यत्र सर्वकलनाविरलब्रह्मैक्यं भवतीत्याह—शब्देति। अभिधानाभिधेयात्मकशब्दकाललयेन—शब्दः अभिधानप्रपञ्चः, अभिधेयकलनात्मकः कालः, तयोः श्रावणज्ञानतो मिथ्यादृष्ट्या सत्ताबाध एव लयः। ततो विज्ञानं जायते। तेन ब्रह्मातिरेकेण दिवारात्र्युपलक्षितावस्थात्रयं नास्तीति निश्चयज्ञानतः तदतीतो भूत्वा ततो ब्रह्मातिरिक्तसामान्यासम्भवपरिपूर्णसम्यज्ज्ञानेन उन्मन्यवस्था जायते। उन्मनी नाम तत्त्वज्ञानम्। तेन सर्वापह्नवसिद्धं ब्रह्म निष्प्रतियोगिकस्वमात्रमिति ब्रह्मैक्यं भवति। न हि पृथग्भावं गतजीवेशयोरेकत्वमित्यर्थः। उन्मन्या किं जायते इत्यत आह—उन्मन्येति। "अमनस्कं स्वरूपं तन्न तत्र कलनामलं" इति श्रुत्या ब्रह्मैव अमनस्कशब्दार्थः॥ ४॥

अमनस्कपूजाप्रकारः

तस्य निश्चिन्ता ध्यानम्। सर्वकर्मनिराकरणमावाहनम्। निश्चयज्ञानमासनम्। उन्मनीभावः पाद्यम्। सदाऽमनस्कमर्घ्यम्।

सदा दीप्ति[1]रपारामृतवृत्तिः स्नानम्। [2]सर्वत्र भावना गन्धः। दृक्स्वरूपावस्थानमक्षताः। चिदाप्तिः पुष्पम्। चिदग्निस्वरूपंc धूपः। चिदादित्यस्वरूपं दीपः। परिपूर्णचन्द्रामृतस्यैकीकरणं नैवेद्यम्। निश्चलत्वं प्रदक्षिणम्। सोऽहंभावो नमस्कारः। मौनं स्तुतिः। सर्वसंतोषो विसर्जनमिति। य एवं वेद ॥ ९ ॥

यदमनस्कं ब्रह्म तस्य ध्यानाद्युपचारः कथमित्याशङ्क्य "सोऽहंभावेन पूजयेत्" इति श्रुत्यनुरोधेन तदस्मीत्यनुसन्धानमेव तत्पूजेत्याह—तस्येति। दीप्तिमद्ब्रह्मगोचराखण्डाकारवृत्तिरेव स्नानमित्यर्थः। सर्वत्र ब्रह्मेति भावना। भ्रूमध्यसहस्रारान्तरगळविलसत्परिपूर्णचन्द्रमण्डलनिस्सृतामृतस्य एकीकरणं अमृतसागररूपं नैवेद्यम्। सर्वदा संतोषः। सोऽयमेवं ब्रह्मानुसन्धानतो ब्रह्मैव भवतीत्यर्थः ॥ ९ ॥

इति द्वितीयः खण्डः

ब्रह्मानुसन्धानेन कैवल्यप्राप्तिः

एवं त्रिपुट्यां निरस्तायां निस्तरङ्गसमुद्रवन्निवातस्थितदीपवदचलसंपूर्णभावाभावविहीनकैवल्यज्योतिर्भवति ॥ १ ॥

ब्रह्मानुसन्धानस्य त्रिपुटीकबळितत्वेन कथं योगी ब्रह्मभावमेतीत्याशङ्क्य सर्वापह्नवसिद्धं ब्रह्म निष्प्रतियोगिकस्वमात्रमित्यनुसन्धानात्मकसम्यज्ज्ञानस्य ध्यात्रादित्रिपुटीग्रासत्वात् ब्रह्मभावापत्तिरिष्यते इत्याह—एवमिति। स्वातिरिक्तमस्ति नास्तीति भावाभावकलनासम्भवप्रबोधसिद्धं कैवल्यज्योतिः स्वमात्रमवशिष्यते विद्वानित्यर्थः ॥ १ ॥

[1] रवारा—अ. [2] सर्वात्म—अ, अ १.

ब्रह्मवित्स्वरूपम्

•जाग्रन्निद्राऽन्तपरिज्ञानेन ब्रह्मविद्भवति ॥ २ ॥

तस्य ब्रह्मत्वं विना ब्रह्मवित्त्वं कुत इत्यत्र कृत्स्नब्रह्मवेदनतः ब्रह्मत्वं सिद्धमेव । अकृत्स्नब्रह्मज्ञानतो ब्रह्मवित्त्वं स्यादित्याह—जाग्रदिति ॥ २ ॥

सुषुप्तिसमाध्योः भेदः

सुषुप्तिसमाध्योर्मनोलयाविशेषेऽपि महदस्त्युभयोर्भेदस्तमसि लीनत्वान्मुक्तिहेतुत्वाभावाच्च ॥ ३ ॥ समाधौ मृदितमोविकारस्य तदाकाराकारिताखण्डाकारवृत्त्यात्मकसाक्षिचैतन्ये प्रपञ्चलयः संपद्यते प्रपञ्चस्य मनःकल्पितत्वात् ॥ ४ ॥

सुषुप्तिसमाध्योः मनोलयसाम्यतः बन्धमुक्तिहेतुत्वं उभयमपि स्यादित्यत आह—सुषुप्तीति । तत् कथं? तमसीति ॥ ३ ॥ तत् कथं? प्रपञ्चस्येति ॥ ४ ॥

ब्रह्मविदो ब्रह्मभावः

ततो भेदाभावात् कदाचिद्बहिर्गतेऽपि मिथ्यात्व[1]भानात् । सकृद्विभातसदानन्दानुभवैकगोचरो ब्रह्मवि[2]त्तदेव भवति ॥ ५ ॥

मनस्तत्कार्याभावे तत्तदनुस्यूतचैतन्यस्य यत एकत्वं ततः बहिर्गतेऽपि मनसि तद्विकल्पितप्रपञ्चस्य मिथ्यात्वभानात् । सर्वप्रकारेण ब्रह्मवित् ब्रह्मैव भवतीत्याह—सकृदिति । सदाद्यावृतित्रयानावृतसकृदित्यादि ॥ ५ ॥

[1] हानात्—अ. [2] त्तदैव—अ.

सङ्कल्पत्यागपूर्वकपरमात्मध्यानेन मुक्तिसिद्धिः

यस्य संकल्पनाशः स्यात्तस्य मुक्तिः करे स्थिता । तस्माद्भावा[1]भावौ परित्यज्य परमात्मध्यानेन मुक्तो भवति ॥ ६ ॥ पुनःपुनः सर्वावस्थासु ज्ञानज्ञेयौ ध्यानध्येयौ लक्ष्यालक्ष्ये दृश्यादृश्ये चोहापोहादि परित्यज्य जीवन्मुक्तो [2]भवति । य एवं वेद ॥ ७ ॥

सङ्कल्पभावाभावौ बन्धमुक्तिहेतू स्यातामित्याह—यस्येति । यस्मादेवं तस्मात् । सङ्कल्पोऽस्ति नास्तीति तद्भावाभावौ । निष्प्रतियोगिकपरमात्मा स्वमात्रमिति ज्ञानाविर्भूतपरमात्मध्यानेन ॥ ६ ॥ इत्थंभूतज्ञानफलमाह—पुनरिति । स्वावशेषधिया ब्रह्मणि ज्ञातेऽपि स्वातिरिक्तधिया यदि ज्ञानज्ञेयादिवृत्तिरुदेति तदा पुनःपुनरिति । तत्त्यागाधिकरणं ब्रह्मास्मीति य एवं वेद स विद्वान् जीवन्मुक्तो भवेदित्यर्थः ॥ ७ ॥

इति तृतीयः खण्डः

जाग्रदादिपञ्चावस्थाः

पञ्चावस्थाः जाग्रत्स्वप्नसुषुप्तितुरीयतुरीयातीताः ॥ १ ॥

बन्धमोक्षहेतुः कः? इत्यत आह—पञ्चेति । कास्ता इति?—जाग्रदिति । पञ्चावस्था इत्यर्थः ॥ १ ॥

प्रवृत्तिसङ्कल्पः

जाग्रति प्रवृत्तो जीवः प्रवृत्तिमार्गासक्तः पापफलनरकादिमाऽस्तु शुभकर्मस्वर्गफलमस्त्विति काङ्क्षते ॥ २ ॥

[1] भावं—उ. भावे—क. [2] भवेत्—अ २.

तत्र जीवप्रवृत्तिनिवृत्तिसङ्कल्पौ प्रतिपादयति—जाग्रतीति । शुभकर्मज-स्वर्गफलम् । एवं कांक्षन् स्वाज्ञः संसाग्बद्धो भवति ॥ २ ॥

निवृत्तिसङ्कल्पः

एवं स एव स्वीकृतवैराग्यात्कर्मफलजन्मालं संसारबन्धनमल-मिति विमुक्त्यभिमुखनिवृत्तिमार्गप्रवृत्तो भवति ॥ ३ ॥

एवं स्थितेष्वनेकेषु कश्चिदनन्तकोटिजन्मस्वनुष्ठितकर्मफलार्पणसन्तुष्ट-श्वरप्रसादतः निवृत्तिमार्गप्रवृत्तो भवतीत्याह—एवमिति । य एवंविधसंसार-निर्विण्णो भवति सः । इतः कर्मफलजन्म ॥ ३ ॥

ससारतरणमागः

स एव संसारतारणाय गुरुमाश्रित्य कामादि त्यक्त्वा विहितकर्माचरन् साधनचतुष्टयसंपन्नो हृदयकमलमध्ये भगवत्सत्ता-मात्रान्तर्लक्ष्यरूपमासाद्य सुषुप्त्यवस्थायामुक्तब्रह्मानन्दस्मृतिं लब्ध्वा एक एवाहमद्वितीयः कंचित्कालमज्ञानवृत्त्या विस्मृतजाग्द्वास-नाऽनुफलेन तैजसोऽस्मीति तदुभयनिवृत्त्या प्राज्ञ इदानीम-स्म्यहमेक एव स्थानभेदादवस्थाभेदस्य परं तु न हि मदन्यदिति [1]जातिविवेकः शुद्धाद्वैतब्रह्माहमिति भिदागन्धं निरस्य स्वान्तर्वि-जृम्भितभानुमण्डलध्यानतदाकाराकारित[2]परंब्रह्माकारितमुक्ति[3]मार्गमा-रूढः परिपक्को भवति ॥ ४ ॥

[1] जातवि—अ १. [2] परब्रह्माकारमु—अ, अ १. परब्रह्माका—क.
[3] मार्गारू—उ.

कामादि परागभावप्रवृत्तिं **त्यक्त्वा** । पुरा **स्वाज्ञदशायां कंचित् कालम्** । **तैजसोऽस्मीति** विश्वभावग्रासतैजसभावमेत्य तद्भोगक्षयतो यत् जाग्रत्स्वप्नकलनान्वितं **तदुभयेति** । जाग्रदादिस्थानभेदात् **अवस्थाभेदस्य** स्वाज्ञानविकल्पितस्य स्वज्ञानतः प्रळयात् यदवशिष्यते तत् **परं तु ब्रह्म न हि मदन्यदिति जातिविवेकः**--ब्रह्मातिरेकेण जायते इति जातिः जन्मादि न कदाऽपि मेऽस्तीति विवेकः --उदेति । ततः किमित्यत आह--**शुद्धेति** । **ब्रह्माहमिति** विज्ञानेन व्यावहारिकभिदागन्धम् । यदा विज्ञानेन भिदागन्धनिरासो भवति तदा **स्वान्तः**प्रत्यग्भानुमण्डलसाक्षात्कारो भवति । तद्ध्यानाभ्यासतः ब्रह्माकाराकारितो यो **मुक्तिमार्गः** सम्यज्ज्ञानाख्यः तमवष्टभ्य **परिपक्वः** कृतकृत्यो **भवतीत्यर्थः** ॥ ४ ॥

मनसो बन्धमोक्षहेतुत्वनिरूपणम्

संकल्पादिकं मनो बन्धहेतुः । तद्वियुक्तं मनो मोक्षाय भवति ॥ ५ ॥ तद्वांश्चक्षुरादिबाह्यप्रपञ्चोपरतो विगतप्रपञ्चगन्धः सर्वं जगदात्मत्वेन पश्यंस्त्यक्ताहंकारो ब्रह्माहमस्मीति चिन्तयन्निदं सर्वं यदयमात्मेति भावयन् कृतकृत्यो भवति ॥ ६ ॥

स्वाज्ञादिदशाविजृम्भितबन्धमोक्षहेतुः मन एवेत्याह--**सङ्कल्पादिकमिति** ॥ ५ ॥ एवं निस्सङ्कल्पान्तगो योगी स्वातिरिक्तास्तित्वभ्रमविरळो भूत्वा ब्रह्ममात्रं निष्प्रतियोगिकमिति वेदनसमकालं कृतकृत्यो योगी भवतीत्याह--**तद्वानिति** । निर्विकल्पकवृत्तिमान् ज्ञानी **तद्वान्** । "**ब्रह्मैवेदं सर्वं**" इति श्रुत्यनुरोधेन **सर्वं भावयन्** ज्ञानसहितभावनातः ॥ ६ ॥

इति चतुर्थः खण्डः

निर्विकल्पकसमाध्यभ्यासेन ब्रह्मविद्वरत्वप्राप्तिः

सर्वपरिपूर्णतुरीयातीतब्रह्म[1]भूतो योगी भवति । तं ब्रह्मेति स्तुवन्ति ॥ १ ॥ सर्वलोकस्तुति[2]पात्रं [3]सर्वलोकसंचारशीलः परमात्मगगने बिन्दुं निक्षिप्य शुद्धाद्वैताजाड्यमहजामनस्कयोगनिद्राऽखण्डानन्दपदानुवृत्त्या जीवन्मुक्तो भवति ॥ २ ॥

ब्रह्मभूतः भूत्वा ब्रह्ममात्रयोगी । ब्रह्मविदो य एवं विद्वान् तम् ॥ १ ॥ उक्तविशेषणविशिष्टो योगी परमात्मगगने बिन्दुं निक्षिप्य चिदाकाशे मनोविलयं कृत्वा तद्विलयाधिकरणशुद्धाद्वैतेति । मनोलयाधारशुद्धाद्वैते ब्रह्मणि जाड्यजाग्रदाद्यवस्थावैरूप्यात् अजाड्यसहजामनस्कयोगनिद्रा निर्विकल्पसमाधिः तत्राखण्डानन्दतया पद्यत इत्यखण्डानन्दपदं तदनुवृत्त्या अनवरतानुसन्धानात् ब्रह्मविद्वरो भवतीत्यर्थः ॥ २ ॥

अपरिच्छिन्नानन्दरूपब्रह्मावाप्तिः

तच्चानन्दसमुद्रमग्ना योगिनो भवन्ति ॥ ३ ॥ तदपेक्षया इन्द्रादयः स्वल्पानन्दाः । एवं प्राप्तानन्दः परमयोगी भवतीत्युपनिषत् ॥ ४ ॥

यद्ब्रह्म निस्तरंगानन्दसमुद्रतया विख्यातं तच्च ॥ ३ ॥ इन्द्रादिरस्मीत्यभिमानात् परिच्छिन्नानन्दत्वं, तद्वैपरीत्येन अपरिच्छिन्नब्रह्मभावारूढतया एवम् ॥ ४ ॥

इति पञ्चमः खण्डः

इति द्वितीयं ब्राह्मणम्

[1] भूतयो—क, अ २. [2] पात्रः—अ, अ १, अ २, क.
[3] सर्वदेश—अ, अ १, अ २, क.

तृतीयं ब्राह्मणम्

शाम्भवीमुद्राऽन्वितं अमनस्कम्

याज्ञवल्क्यो महामुनिर्मण्डलपुरुषं पप्रच्छ स्वामिन्नमनस्कलक्षणमुक्तमपि विस्मृतं पुनस्तल्लक्षणं ब्रूहीति ॥ १ ॥ तथेति मण्डलपुरुषोऽब्रवीत् । इदममन[1]स्कमतिरहस्यम् । यज्ज्ञानेन कृतार्थो भवति तन्नित्यं शांभवीमुद्राऽन्वितम् ॥ २ ॥

याज्ञवल्क्यो मन्दबुद्धिर्वैशद्यार्थं अमनस्कलक्षणमादित्यं पृच्छतीत्याह—याज्ञवल्क्य इति । किमिति? स्वामिन्निति ॥ १ ॥ तत्प्रश्नमंगीकृत्य तदुत्तरं भगवानाह—तथेति । किं तदित्यत्र वक्ष्यमाणविद्यां स्तौति—इदमिति । मनो यत्र विलीयते अमनीभावमेति इदम् । योगी यज्ज्ञानेन ॥ २ ॥

परमात्मप्रत्ययलक्ष्यदर्शनेन अमनस्कप्राप्तिः

परमात्मदृष्ट्या तत्प्रत्ययलक्ष्याणि दृष्ट्वा तदनु सर्वेशमप्रमेयमजं शिवं पराकाशं निरालम्बमद्वयं ब्रह्मविष्णुरुद्रादीनामेकलक्ष्यं सर्वकारणं परं ब्रह्मात्मन्येव पश्यमानो गुहाविहरणमेवं निश्चयेन ज्ञात्वा भावाभावादिद्वन्द्वातीतः संविदितमनोन्मन्य[2]नुभवस्तदनन्तरमखिलेन्द्रियक्षयवशादमनस्कसुखब्रह्मानन्दसमुद्रे मनःप्रवाहयोगरूपनिवातस्थितदीपवदचलं परं ब्रह्म प्राप्नोति ॥ ३ ॥

शाम्भवीमुद्रोपायसिद्धं तुर्यचैतन्यं परमात्मदृष्ट्या । ब्रह्मविष्णुरुद्रादीनामिति तृतीयार्थे षष्ठी, तैः सर्वात्मैक्यधिया लक्षितत्वात् ।

[1] स्कलक्षणमति—अ. [2] न्यवस्थस्त—अ.

गुहाशब्देन बुद्धिगुहोच्यते । तत्र तद्वृत्तिभासकप्रत्यग्रूपेण विहरणात् गुहाविहरणं मनो यत्र उन्मनीभावं निस्सङ्कल्पतामेति तादृशं ब्रह्मास्मीत्यनुभवो मनोन्मन्यनुभवः । शिष्टं स्पष्टं तत्र तत्र व्याख्यातं च ॥ ३ ॥

ततः संसारनिवृत्तिः

ततः शुष्कवृक्षवन्मूर्च्छानिद्रामयनिश्वासोच्छ्वासाभावान्नष्ट-द्वन्द्वः सदाऽचञ्चलगात्रः परमशान्तिं स्वीकृत्य मनः प्रचारशून्यं परमात्मनि लीनं भवति ॥ ४ ॥

योगी स्वात्मानं एवं ज्ञात्वा परब्रह्म प्राप्नोतीत्युक्तम् । ततः परं योगी पूर्ववत् किं संसरतीत्याशङ्क्य संसारकलनानिर्वाहकमानसाभावात् ब्रह्मैव भवतीत्याह—तत इति । प्राणान्तःकरणसरूपविलयो मूर्च्छा निद्राऽवस्थेत्यर्थः । तन्मयः तद्विकारः मूर्च्छास्वापयोरिव निश्वासोच्छ्वासकामसङ्कल्पादिव्यापृत्यभावात् नष्टद्वन्द्वः । बाह्यान्तर्व्यापारोपरमात् परमशान्तिं स्वीकृत्य ब्रह्मभूतो विजयते दीर्घनिर्विकल्पकसमाधिपरवशो भवति । तदा तत् मनः । शून्यं सत् ॥ ४ ॥

तारकमार्गेण करणविलयद्वारा मनोनाशः

पयःस्रावानन्तरं धेनुस्तनक्षीरमिव सर्वेन्द्रियवर्गे परिनष्टे मनोनाशं भवति तदेवामनस्कम् ॥ ५ ॥ तदनु नित्यशुद्धः परमात्माऽहमेवेति तत्त्वमसीत्युपदेशेन त्वमेवाहमहमेव त्वमिति तारकयोगमार्गेणाखण्डानन्दपूर्णः कृतार्थो भवति ॥ ६ ॥

समाधिस्थयोगिनः इन्द्रियग्रामे सति कथं मनोनाश उपपद्यते इत्यत आह—पय इति । भवति इति यत् तदेव ॥ ५ ॥ यदि कदाचित्

विरूपलयमप्राप्य सरूपलयमेत्य तन्मनो बहिः निस्सरति तदा तदनु । तारकयोगमार्गेण योगी करणग्रामविरूपविलयमेव भजति । ततो योगी अखण्डेति । ब्रह्मैव भवतीत्यर्थः ॥ ६ ॥

इति प्रथमः खण्डः

उन्मनीप्राप्त्या योगिनो ब्रह्मात्मभवनम्

परिपूर्ण[1]परमाकाशमग्नमनाः प्राप्तोन्मन्यवस्थः संन्यस्तसर्वेन्द्रियवर्गः अनेकजन्मार्जितपुण्यपुञ्जपक्वैकैवल्यफलोऽखण्डानन्दनिरस्तसर्वक्लेशकश्मलो ब्रह्माहमस्मीति कृतकृत्यो भवति ॥ १ ॥

त्वमेवाहं न भेदोऽस्ति पूर्णत्वात्परमात्मनः ।
इत्युच्चरन्त्समालिङ्ग्य शिष्यं ज्ञप्तिमनीनयत् ॥ २ ॥

कथं पुनः योगी कृतार्थो भवतीत्यत आह—**परिपूर्णेति** । **प्राप्तोन्मन्यवस्थः** संप्राप्तदीर्घनिर्विकल्पकावस्थः ॥ १ ॥ ब्राह्मणोक्तार्थं मन्त्रोऽपि अनुवदति—**त्वमेवेति** । मण्डलपुरुषो याज्ञवल्क्यं प्रति हे याज्ञवल्क्य परमात्मनो मम पूर्णरूपत्वात् **त्वमेवाहं** नावयोः **भेदोऽस्ति इत्युच्चरन्** स्वशिष्यं याज्ञवल्क्यं गाढं **समालिङ्ग्य** स्वीयां **ज्ञप्तिं** ब्रह्मैव अस्मीति **प्रज्ञामनीनयत्** ॥ २ ॥

इति द्वितीयः खण्डः

इति तृतीयं ब्राह्मणम्

---

[1] पराका—अ १, क.

चतुर्थं ब्राह्मणम्

व्योमपञ्चकज्ञानं तत्फलं च

अथ ह याज्ञवल्क्यो मण्डलपुरुषं पप्रच्छ व्योमपञ्चकलक्षणं विस्तरेणानुब्रूहीति ॥ १ ॥ स होवाचाकाशं पराकाशं महाकाशं सूर्याकाशं परमाकाशमिति पञ्च भवन्ति ॥ २ ॥ सबाह्याभ्यन्तरमन्धकारमयमाकाशम् । सबाह्याभ्यन्तरे कालानलसदृशं पराकाशम् । सबाह्याभ्यन्तरेऽपरिमितद्युतिनिभं तत्त्वं महाकाशम् । सबाह्याभ्यन्तरे सूर्यनिभं सूर्याकाशम् । अनिर्वचनीयज्योतिः सर्वव्यापकं निरतिशयानन्दलक्षणं परमाकाशम् ॥ ३ ॥ एवमन्तर्लक्ष्यदर्शना[1]त्तद्रूपो भवति ॥ ४ ॥

पुनः याज्ञवल्क्यो मन्दबुद्ध्यनुकम्पया व्योमपञ्चकलक्षणं पृच्छतीत्याह—अथेति । किमिति? व्योमेति ॥ १ ॥ स होवाच किं तदिति—आकाशमित्यादि ॥ २ ॥ तत्र आकाशं कीदृशमित्यत्र जडभूतिरित्याह—सबाह्येति । पराकाशं किमित्यत्र जडभूतिग्रासमोहभूतिरित्याह—सबाह्येति । मोहभूतेः कृत्स्नजडभूतिव्यापकत्वेन तत्परतया च काशमानत्वात् पराकाशत्वम् । महाकाशं किमित्यत्र जडमोहभूतिग्रासलीलाभूतिरित्याह—सबाह्येति । लीलाभूतेः जडमोहभूतिभ्यां व्यापकत्वेन तदपेक्षया अपरिमितद्युतिनिभतत्त्वरूपेण काशमानत्वात् । सूर्याकाशं किमित्यत्र जडादिभूतित्रयग्रासनित्यभूतिरित्याह—सबाह्येति । नित्यविभूतेः लीलादिभूतित्रयव्यापकत्वेन सर्वावभासकसूर्यवत् काशमानत्वात् । परमाकाशस्वरूपं किमित्यत्र नित्यभूत्यादिव्यापकत्वेन अनिर्वचनीयेति । त्रिपाद्भूतेः नित्यादिभूतिचतुष्टयगतहेयांशापह्नवसिद्धत्वात्

[1] एवं तत्तल्लक्ष्यदर्शनात् तत्तद्रूपो—अ १, अ २, क. एवमन्तर्लक्ष्यमर्दनात्त—उ.

निरतिशयादिविशेषणता उपपद्यते इत्यर्थः ॥ ३ ॥ व्योमपञ्चकात्मकभूतिपञ्चक-ज्ञानफलमाह—एवमिति ॥ ४ ॥

राजयोगसर्वस्वक्रोडीकरणम्

नवचक्रं षडाधारं त्रिलक्ष्यं व्योमपञ्चकम् ।
सम्यगेतन्न जानाति स योगी नामतो भवेत् ॥ ५ ॥

राजयोगसर्वस्वं क्रोडीकृत्योपसंहरति—**नवचक्रमिति** । मूलाधारादि-षट्चक्रं तालुवाकाशभ्रूचक्रभेदात् चक्रत्रयं आहृत्य **नवचक्रम्** । लक्ष्यत्रयं व्योमपञ्चकं च व्याख्यातम् । **सम्यगेतत्** सर्वं यो **न जानाति** तद्याथात्म्याज्ञानात् केवलग्रन्थार्थज्ञानमात्रतो **नाममात्रयोगी** भवति । यस्तु यथावत् जानाति स योगी कृतकृत्यो भवतीत्यर्थः ॥ ५ ॥

इति चतुर्थं ब्राह्मणम्

पञ्चमं ब्राह्मणम्

परमात्मनि मनोलयाभ्यासविधिः

सविषयं मनो बन्धाय निर्विषयं मुक्तये भवति ॥ १ ॥ अतः [1]सर्वं चित्तगोचरम् । तदेव चित्तं निराश्रयं [2]मनोन्मन्यव-स्थापरिपक्वं लययोग्यं भवति ॥ २ ॥ तल्लयं परिपूर्णे मयि समभ्यसेत् । मनोलयकारणमहमेव ॥ ३ ॥

[1] सर्वं जगच्चित्त—अ, अ १, अ २, क. [2] उन्म—उ.

अनाहतस्य शब्दस्य तस्य शब्दस्य यो ध्वनिः ।
ध्वनेरन्तर्गतं ज्योतिर्ज्योतिरन्तर्गतं मनः ॥ ४ ॥
यन्मनस्त्रिजगत्सृष्टिस्थितिव्यसनकर्मकृत् ।
तन्मनो विलयं याति तद्विष्णोः परमं पदम् ॥ ५ ॥

बन्धमोक्षहेतुः किमित्याशङ्क्य विषयसंगासंगमन एवेत्याह—**सविषयमिति** ॥ १ ॥ यतः एवं **अनः** । **यच्चित्तं** योगाभ्यासतः शुद्धं भवति **तदेव निराश्रयं** विषयसंबन्धविगळम् ॥ २ ॥ लयाधिकरणं किमित्यत्र **तल्लयमिति** ॥ ३ ॥ यत् सर्वलयास्पदं आधेयसापेक्षाधाराग्गतविशेषापाये तदेव निर्विशेषपरमपदमित्याह—**अनाहतस्येति** । अनाहतभवनादान्तर्गतप्रत्यग्ज्योतिर्विकल्पितं स्वातिरिक्तसृष्टि-स्थितिनाशनिर्वर्तकं मनो यत्र विलीयते तत् लयाधिकरणं परमार्थदृष्ट्या निरधिकरणवैष्णवपदरूपेण अवशिष्यते इत्यर्थः ॥ ४–५ ॥

अमनस्काभ्यासेन ब्रह्मावस्थानसिद्धिः

तल्लयाच्छुद्धाद्वैतसिद्धिर्भेदाभावात् । एतदेव परमतत्त्वम् ॥ ६ ॥ [1]स तज्ज्ञो बालोन्मत्तपिशाचवज्जडवृत्त्या लोकमाचरेत् ॥ ७ ॥ एवममनस्काभ्यासेनैव नित्यतृप्तिरल्पमूत्रपुरीषमितभोज-नदृढाङ्गाजाड्यनिद्रादृग्वायुचलनाभावब्रह्मदर्श[2]नाज्ञातसुखस्वरूपसिद्धि-र्भवति ॥ ८ ॥

यन्मनो द्वैतहेतुः **तल्लयात्** । तदा प्रत्यक्परयोः **भेदाभावात्** । यत् त्वया परमतत्त्वमनुब्रूहीति पृष्टं **एतदेव** ॥ ६ ॥ मदुक्तप्रकारेण य एवं परमतत्त्वं जानाति **स तज्ज्ञः** । **आचरेत्** स्वमाहात्म्यख्यापनप्रयोजनाभावात् ॥ ७ ॥

[1] "स" इत्येतन्न—अ, अ १. [2] नाज्ञा—अ, अ २, क.

एवममनस्काभ्यासतः का सिद्धिरुदेतीत्यत आह—एवमिति । यदा योगी निर्विकल्पकसमाध्यारूढो भवति तदा अतृप्तिहेतुवृत्त्यनुदयात् नित्यतृप्तिः, समाधितो व्युत्थानेऽपि केवलकुम्भकतो मूत्रपुरीषादेः शोषितत्वात् मूत्रादेरल्पत्वं, उदरे निरवकाशतोऽल्पभोजनं, तथाऽपि योगमहिम्ना दृढाङ्गत्वं, पदे पदे जाड्यनिद्राऽभावाद्जाडयनिद्रो निर्विकल्पकसमाधिः । तत्र हृद्वायुचलनाभावतो निश्चलब्रह्मादर्शनसञ्जातं अवाङ्मानसगोचरतया अज्ञातसुखस्वरूपब्रह्ममात्रावस्थानरूपिणी सिद्धिः भवति । विद्वान् तद्रूपेण अवशिष्यते इत्यर्थः ॥ ८ ॥

अमनस्कसिद्धस्य महिमा

एवं चिरसमाधिजनितब्रह्मामृतपानपरायणोऽसौ संन्यासी परमहंस अवधूतो भवति । तद्दर्शनेन सकलं जगत्पवित्रं भवति । तत्सेवापरोऽज्ञोऽपि मुक्तो भवति । तत्कुलमेकोत्तरशतं तारयति । तन्मातृपितृजायाऽपत्यवर्गं च मुक्तं भवतीत्युपनिषत् ॥ ९ ॥

यः एवंवित् स एव मुख्यावधूतः, तद्दृष्टिपथं गतं अखिलं अखिलतामेति, तत्सेवया अज्ञोऽपि मुच्यते, तत्कुलमपि कृतार्थत्वं भजतीति शास्त्रमुपसंहरति—एवमिति । इत्युपनिच्छब्दः प्रकृतोपनिषत्समाप्त्यर्थः ॥ ९ ॥

इति पञ्चमं ब्राह्मणम्

श्रीवासुदेवेन्द्रशिष्योपनिषद्ब्रह्मयोगिना ।
मण्डलब्राह्मणव्याख्या लिखिता ब्रह्मगोचरा ।
मण्डलब्राह्मणव्याख्याग्रन्थस्तु त्रिशतं स्मृतः ॥

इति श्रीमदीशाद्यष्टोत्तरशतोपनिषच्छास्त्रविवरणे अष्टचत्वारिंशत्संख्यापूरकं मण्डलब्राह्मणोपनिषद्विवरणं सम्पूर्णम्

महावाक्योपनिषत्

भद्रं कर्णेभिः—इति शान्तिः

अपरोक्षानुभवोपदेशाधिकारी

अथ होवाच भगवान्ब्रह्माऽपरोक्षानुभवपरोपनिषदं व्याख्यास्यामः ॥ १ ॥ गुह्याद्गुह्य[1]तरमेषा न प्राकृतायोपदेष्टव्या । सात्त्विकायान्तर्मुखाय परिशुश्रूषवे ॥ २ ॥

यन्महावाक्यसिद्धान्तमहाविद्याकळेबरम् ।
विकळेबरकैवल्यरामचन्द्रपदं भजे ॥

इह खलु अथर्वणवेदप्रविभक्तेयं महावाक्योपनिषत् स्वातिरिक्तप्रपञ्चतदसम्भवप्रबोधसिद्धब्रह्ममात्रप्रपञ्चनपूर्वकं विजयते । अस्याः स्वल्पग्रन्थतो विवरणमारभ्यते । उत्तमाधिकारिपुरुषानुपलभ्य ब्रह्मा स्वानुभवं प्रकटयतीत्याह—अथेति । किमिति? अपरोक्षेति ॥ १ ॥ आदौ वक्ष्यमाणोपनिषदो गृह्यार्थतया गोप्यतामाह—गुह्यादिति । प्राकृताय यथोक्तसाधनविकलाय । कस्मा उपदेष्टव्येत्यत्र सात्त्विकायेति । केवलसत्त्ववृत्तिमत्प्रत्यङ्मुखाय स्वाचार्यशुश्रूषाऽऽदिसाधनसम्पन्नाय उपदेष्टव्येत्यर्थः ॥ २ ॥

[1] तरैषा—अ.

विद्याऽविद्ययोः स्वरूपं कार्यं च

अथ संसृतिबन्धमोक्षयोर्विद्याऽविद्ये चक्षुषी उपसंहृत्य विज्ञायाविद्या[1]लोकाण्डस्तमोदृक् ॥ ३ ॥ तमो हि शारीरप्रपञ्चमाब्रह्मस्थावरान्तमनन्ताखिलाजाण्डभूतम् । निखिलनिगमोदितसकामकर्मव्यवहारो लोकः ॥ ४ ॥

केयमुपनिषदित्यत्र तामेव विशिनष्टि—**अथेति** । **अथ** यथोक्तसाधनसम्पत्त्यनन्तरं मुमुक्षुः स्वातिरिक्तास्तितारूपेयं संसृतिः तदस्तीति प्रवृत्तिमार्गो बन्धः तन्नास्तीति निवृत्तिमार्गो मोक्षः । तयोः **संसृतिमोक्षबन्धयोः** हेतू कावित्यत्र—विद्याचक्षुः संसारनिवर्तकतया मोक्षहेतुः । अविद्याचक्षुस्तु संसारोऽस्तीति प्रवर्तकतया बन्धहेतुः । ते उभे संसारो नास्त्यस्तीति वेदनरूपे **विद्याऽविद्ये चक्षुषी** ब्रह्मातिरिक्तवस्तुसामान्यासम्भवप्रबोधतः **उपसंहृत्य** अपह्नवं कृत्वा तदपह्नवसिद्धं ब्रह्म निष्प्रतियोगिकस्वमात्रमिति **विज्ञाय** । सम्यज्ज्ञानसमकालं विद्वान् विदेहमुक्तो भवतीति वाक्यशेषः । अविद्याचक्षुः कीदृशमित्यत्राह—**अविद्येति** । ब्रह्मातिरेकेण कालत्रयेऽपि या अविद्यमाना सेयमविद्या तया सत्यवल्लोक्यते इत्यविद्यालोकः स **एवाण्डः** अण्डमविद्यापदं तदेव **तमोदृष्टिः** स्वमात्रावारकत्वात् ॥ ३ ॥ किं तत् स्वावारकं तम इत्यत आह—**तमो हीति** । **तमो हि शारीरप्रपञ्चं** प्रपञ्चः स्वज्ञानतः कालतो वा शीर्यत इति शरीरं तदेव शारीरं अविद्यापदं तत्कार्यं **आब्रह्मस्थावरान्तं**, तस्य निष्प्रतियोगिकब्रह्ममात्रावरणतया प्रपञ्चनात् प्रपञ्च इति व्यवहरणात् प्रतीतिकालमात्रस्थायिवत् [2]भानाद्वा व्यावहारिकत्वं प्रातिभासिकत्वं च ज्ञेयम् । किं तद्व्यावहारिकत्वं प्रातिभासिकत्वं च अर्हतीत्यत्र—यावत् स्वाज्ञानं तावदनन्ततया अखिलाण्डवत् अनन्तकोटिब्रह्माण्डवत् भवतीत्यनन्ताखिलाजाण्डभूतम् । स्वाज्ञलोकस्तु "वायव्यं श्वेतमालभेत भूतिकामः," "चित्रया

[1] लोकान्ध —अ २. लोकाण्डं ततोदृक्—अ. [2] भानाद्व्याव—उ १.

यजेत पशुकामः," "अपाम सोममभूता अभूम," इत्यादिनिखिलनिगमोदितसकामकर्मन्यवहारो व्यवहारवान् भवति ॥ ४ ॥

हंसविद्याऽभ्यासेन परमात्माविर्भावः

नैषोऽन्धकारोऽयमात्मा । विद्या हि काण्डान्तरादित्यो ज्योतिर्मण्डलं ग्राह्यं नापरम् ॥ ५ ॥ असावादित्यो ब्रह्मेत्यजपयोपहितं हंसः सोऽहम् । प्राणापानाभ्यां प्रतिलोमानुलोमाभ्यां समुपलभ्यैवं सा चिरं लब्ध्वा त्रिवृदात्मनि ब्रह्मण्यभिध्यायमाने सच्चिदानन्दः परमात्माऽऽविर्भवति ॥ ६ ॥

स्वात्माऽप्येवं संसरतीत्यत आह—नैषोऽन्धकारोऽयमात्मा । योऽनात्मप्रपञ्चापह्नवसिद्ध एषोऽयमात्मा नान्धकारो भवति, स्वस्य प्रत्यक्प्रकाशाभिन्नपरप्रकाशमात्रत्वात् । यावदेवं स्वात्मा नोपलभ्यते तावन्मुमुक्षुणा विद्याऽभ्यासः कर्तव्य इत्याह—विद्या हीति । स्वातिरिक्तगन्धासहं ब्रह्म निष्प्रतियोगिकस्वमात्रतया विद्यत इति ज्ञानविज्ञानसम्यज्ज्ञानतत्त्वज्ञानवृत्तिः विद्या हि काण्डान्तरादित्यः कुत्सितस्वाविद्यापदाण्डान्तर्बाह्यावभासकचिदादित्यपर्यवसन्नेति चिदादित्य इत्युक्ता । सैव चिन्मात्रज्योतिर्मण्डलं, तत्प्रभापुञ्जं निर्विशेषब्रह्ममात्रगोचरतत्त्वज्ञानमेव ग्राह्यं, तस्य चरमसाक्षात्कारहेतुत्वात् ब्रह्ममात्रपर्यवसन्नत्वाच्च । तदेव ग्राह्यं नापरमपरब्रह्मगोचरं सविशेषज्ञानं, कालविळम्बफलदत्वात् । तीव्रतममुमुक्षुणैतन्न ग्राह्यमित्यर्थः ॥ ५ ॥ तथाविधतत्त्वज्ञानप्राप्यपरमात्माविर्भावोपायतत्त्वज्ञानाधिगमहेतुज्ञानविज्ञानादिसाधनं किमित्यत आह—असाविति । "स यश्चायं पुरुषे । यश्चासावादित्ये । स एकः । स य एवंवित् ।" इत्यादिश्रुत्यनुरोधेन अस्मद्दृष्टिगोचरोऽसावादित्यो ब्रह्म, स्वगतविशेषांशापाये तस्यैव ब्रह्मत्वात् । सोऽयमसावादित्यः नाडीद्वारा प्रतिशरीरं समुपलभ्य उच्छ्वासनिश्वासव्यापारतः प्रतिलोमानुलोमाभ्यां प्राणापानाभ्यां हंसः सूर्यः सोऽहमिति सहजयाऽप्रयत्ननिष्पन्नयाऽजपयोपहितम् ।

एवमजपाऽनुसन्धाननिष्पन्नं ज्ञानं विज्ञानं सम्यज्ज्ञानं वा चिरं चिरकालसाध्यं असौ विद्वान् लब्ध्वाऽथ व्यष्टिसमष्टितदैक्यप्रपञ्चानुवृत्तविश्वविराडोत्रादिद्वितुर्या-विकल्पभेदेन त्रिवृदात्मनि ब्रह्मणि व्यष्ट्यादिविभागमूलस्वाज्ञानतत्कार्यनामरूपा-पह्नवसिद्धनिष्प्रतियोगिकब्रह्ममात्रावशेषतया अभिध्यायमाने सति अथ अनृतजडदुःखासम्भवप्रबोधसिद्धसच्चिदानन्दः परमात्मा आविर्भवति स्वमात्रमवशिष्यत इत्यर्थः ॥ ६ ॥

तत्त्वज्ञानवृत्तिस्वरूपम्

सहस्रभानुमच्छुरिता पूरित[1]त्वादलीया पारावारपूर इव । [2]नैषा समाधिः । [2]नैषा योगसिद्धिः । [2]नैषा मनोलयः । ब्रह्मैक्यं तत् ॥ ७ ॥ आदित्यवर्ण तमसस्तु पारे । सर्वाणि [3]रूपाणि विचित्य धीरः । नामानि कृत्वाऽभिवदन्यदास्ते ॥ ८ ॥ धाता पुरस्ताद्य-मुदाजहार । शक्रः प्रविद्वान्प्रदिशश्चतस्रः । तमेवं विद्वानमृत इह भवति । नान्यः पन्था अयनाय विद्यते ॥ ९ ॥ यज्ञेन यज्ञमयजन्त देवाः । तानि धर्माणि प्रथमान्यासन् । ते ह नाकं महिमानः सचन्ते । यत्र पूर्वे साध्याः सन्ति देवाः ॥ १० ॥

इत्थंभूतब्रह्ममात्रपर्यवसन्नतत्त्वज्ञानवृत्तिस्तु युगपदुदितसहस्रोपलक्षिता-नन्तकोटिभानुमत्प्रत्यक्प्रकाशाभिन्नपरप्रकाशात्मना छुरिता स्फुरिता । पारावारपूर इव निस्तरंगसमुद्रवत् ब्रह्ममात्ररूपेण पूरितत्वात् पूर्णत्वात् न हि लीयते इत्यलीया ब्रह्मरूपत्वात् । नह्येषा वृत्तिः समाधिः योगसिद्धिः मनोलयो वा भवितुमर्हति । किं तु प्रत्यग्ब्रह्मैक्यं तत् ॥ ७ ॥ किं तत्प्रत्यग्ब्रह्मैक्यं इत्यत आह—आदित्येति । यत् पराक्सापेक्षप्रत्यक्परचिदैक्य-

[1] स्वानिलीयः—अ. त्वानिलीयः—अ १.
[2] सैषा—अ, अ १. [3] भूतानि—क, अ २.

गतसविशेषापह्नवसिद्धं तत् स्वातिरिक्ततमसस्तु पारे विद्योतमानमुदयास्तमनकलनाविगळचिदादित्यवर्ण चिदादित्यस्वरूपं सच्चिदानन्दरूपेण सर्वत्र पूर्णमवशिष्यते। धीरो विद्वान् स्वातिरिक्ताविद्यापदतत्कार्यगोचररूपाणि नामानि च विचित्य मिथ्येति विचिन्त्य अपह्नवं कृत्वा ब्रह्मातिरिक्तं न किञ्चिदस्तीति यदभिवदन्नास्ते तन्मात्रमवशिष्यते, "स यो ह वै तत्परमं ब्रह्म वेद ब्रह्मैव भवति," "य एवं निर्बीजं वेद निर्बीज एव स भवति," इति वेदनसमकालब्रह्मभावापत्तिश्रुतेः ॥ ८ ॥ तथा च धाता ब्रह्मा पुरस्तादेव अमुमर्थमुदाजहार, पूर्वाग्नेयादिचतस्रो दिशः प्रदिशश्च ब्रह्मवित्त्वेन विख्यातकीर्तिः प्रविद्वान शक्रोऽपि "प्राणोऽस्मि प्रज्ञाऽऽत्मा तं मामायुरमृतमित्युपास्स्व" इति, वेदनफलं तु "विपापो विरजो ब्रह्मविद्वान् ब्रह्मैवाभिप्रैति" इति यमर्थमुदाजहार तं परमात्मानं निष्प्रतियोगिकस्वमात्रमिति एवं विद्वान् वेदनसमकालं अमृतः परमात्मेह भवति, "ज्ञानसमकालमेव मुक्तः कैवल्यं याति" इति श्रुतेः। स्वाज्ञानप्रभवोऽयं बन्धः स्वज्ञानान्मोक्षः। अयमेवाव्याहतः पन्थाः। अयनाय मोक्षाय ब्रह्मज्ञानादृते अन्यः पन्था न विद्यते ॥ ९ ॥ एवं देवाः इन्द्रादयोऽपि ब्रह्म निष्प्रतियोगिकस्वमात्रमवशिष्यते ब्रह्मातिरिक्तं न किञ्चिदस्तीति ज्ञानयज्ञेन यज्ञं विष्णवाख्यं ब्रह्मायजन्त, ब्रह्माहमस्मीति भावयन्ते जीवन्मुक्ता महीयन्ते। तेषां जीवन्मुक्तपदारूढानां देवानां तानि धर्माणि प्रथमान्यासन् ते जीवन्मुक्तधर्माः अमानित्वादयः मैत्र्यादयश्च प्रथमाः प्रधाना आसन् बभूवुः। य एवं महिमानो देवा यत्र पूर्वे साध्या देवविशेषा जीवन्मुक्ताः सन्ति तन्नाकं सुच(क)न्ते तं स्वर्गं प्राप्य प्रकाशन्ते ॥ १० ॥

प्रणवहंसज्योतिर्ध्यानम्

सोऽह[1]मर्कः परं ज्योतिरर्कज्योतिरहं शिवः।
आत्मज्योतिरहं शुक्रः सर्वज्योतिरसावहोम् ॥ ११ ॥

[1] मेकः—अ.

तत्र देवाः किं कुर्वन्तो वर्तन्ते इत्यत्र प्रत्यक्परचितोरैक्यानुसन्धानं कुर्वन्तो वर्तन्ते इत्याह—**सोऽहमिति** । **यः परंज्योतिः सोऽहं चिदर्कः योऽर्कज्योतिरहं शिवः** योऽहं शिवार्कज्योतिः **अहं शुक्रः** प्रत्यगभिन्नपरमात्मा **सर्वज्योतिरसावहोम्** । एवं व्यतिहारेण प्रत्यक्प्रकाशाभिन्नपरप्रकाशोऽहमों ओङ्कारार्थप्रत्यक्परविभागैक्यासहतुरीयतुरीयं ब्रह्म निष्प्रतियोगिकस्वमात्रमित्येवं ध्यायन्तोऽद्यापि महीयन्त इत्यर्थः ॥ ११ ॥

हंसज्योतिर्विद्याफलम्

एतदथर्वशिरोऽधीते । प्रातरधीयानो रात्रिकृतं पापं नाशयति । सायमधीयानो दिवसकृतं पापं नाशयति । तत्सायं प्रातः प्रयुञ्जानः पापोऽपापो भवति । माध्यन्दिनमादित्याभिमुखोऽधीयानः पञ्चमहापातकोपपातकात्प्रमुच्यते । सर्ववेदपारायणपुण्यं लभते । श्रीमहाविष्णुसायुज्यमवाप्नोतीत्युपनिषत् ॥ १२ ॥

विद्याफलमाह—एतदिति । किं बहुना—**श्रीमहाविष्णुसायुज्यमवाप्नोति**। **इत्युपनिषच्छब्दः** महावाक्योपनिषत्समाप्त्यर्थः ॥ १२ ॥

श्रीवासुदेवेन्द्रशिष्योपनिषद्ब्रह्मयोगिना ।
महावाक्योपनिषदो व्याख्यानं लिखितं लघु ।
महावाक्यविवृतिस्तु द्विषष्टिः ग्रन्थतो भवेत् ॥

इति श्रीमदीशाद्यष्टोत्तरशतोपनिषच्छास्त्रविवरणे द्विनवतिसङ्ख्यापूरकं महावाक्योपनिषद्विवरणं सम्पूर्णम्

योगकुण्डल्युपनिषत्

सह नाववतु—इति शान्तिः

प्रथमोऽध्यायः

वायुजयोपायत्रयम्

हेतुद्वयं हि चित्तस्य वासना च समीरणः ।
तयोर्विनष्ट एकस्मिन्[1]स्तद्वावपि विनश्यतः ॥ १ ॥
तयोरादौ समीरस्य जयं कुर्यान्नरः सदा ।
मिताहारश्चासनं च शक्तिचालस्तृतीयकः ॥ २ ॥

योगकुण्डल्युपनिषद्योगसिद्धह्रदासनम् ।
निर्विशेषब्रह्मतत्त्वं स्वमात्रमिति चिन्तये ॥

इह खलु कृष्णयजुर्वेदप्रविभक्तेयं योगकुण्डल्युपनिषत् हठलम्बिकायोग-प्रकटनव्यग्रा निर्विशेषब्रह्ममात्रपर्यवसन्ना विजयते । अस्याः संक्षेपतो विवरण-मारभ्यते । आदाववान्तरवाक्यरूपेण हठयोगमवतारयति—हेतुद्वयमित्यादिना । वासनाप्राणरोधाभ्यां चित्तचलनाचलने भवतः । एतदन्यतररोधेऽपि द्वयमपि निरुद्धं भवतीत्यर्थः ॥ १ ॥ तदुपायतया मिताहारः इत्यादि ॥ २ ॥

[1] स्तेद्वा—अ १.

मिताहारः

एतेषां लक्षणं वक्ष्ये शृणु गौतम सादरम् ।
सुस्निग्धमधुराहारश्चतुर्थांशावशेषकः[1] ॥ ३ ॥
भुज्यते शिवसंप्रीत्यै मिताहारः स उच्यते ।

तत्र सुस्निग्धेति ॥ ३–४ ॥

पद्मवज्रासन

आसनं द्विविधं प्रोक्तं पद्मं वज्रासनं तथा ॥ ४ ॥
ऊर्वोरुपरि चेद्धत्ते उभे पादतले यथा ।
पद्मासनं भवेदेतत्सर्वपापप्रणाशनम् ॥ ५ ॥
वामाङ्घ्रि[2]मूलं कन्दाधः अन्यं तदुपरि क्षिपेत् ।
समग्रीवशिरःकायो वज्रासनमितीरितम् ॥ ६ ॥

तत्र पद्मासनलक्षणं तु ऊर्वोरिति ॥ ५–६ ॥

शक्तिचालनं तत्साधनद्वयं च

कुण्डल्येव भवेच्छक्तिस्तां तु संचालयेद्बुधः ।
स्वस्थानादाभ्रुवोर्मध्यं शक्तिचालनमुच्यते ॥ ७ ॥
तत्साधने द्वयं मुख्यं सरस्वत्यास्तु चालनम् ।
प्राणरोधमथाभ्यासादूर्ध्वी कुण्डलिनी भवेत् ॥ ८ ॥

[1] शविवर्जितः—क, अ १, अ २. [2] मूल—अ १.

किं तच्छक्तिचालनमित्यत्र कुण्डल्येव ॥ ७ ॥ तत्साधनं किमित्यत्र तत्साधने इति ॥ ८–१४ ॥

सरस्वतीचालनम्

तयोरादौ सरस्वत्याश्चालनं कथयामि ते ।
अरुन्धत्यैव कथिता पुराविद्भिः सरस्वती ॥ ९ ॥
यस्याः संचालने[1] नैव स्वयं चलति कुण्डली ।
इडायां वहति प्राणे बद्ध्वा पद्मासनं दृढम् ॥ १० ॥
द्वादशाङ्गुलदैर्घ्यं च अम्बरं चतुरङ्गुलम् ।
विस्तीर्य तेन तन्नाडीं वेष्टयित्वा ततः सुधीः ॥ ११ ॥
अङ्गुष्ठतर्जनीभ्यां तु हस्ताभ्यां धारयेद्दृढम् ।
स्वशक्त्या चालयेद्वामे दक्षिणेन पुनःपुनः ॥ १२ ॥
मुहूर्तद्वयपर्यन्तं निर्भयाच्चालयेत्सुधीः ।
ऊर्ध्वमाकर्षयेत्किंचित्सुषुम्नां कुण्डलीगता ॥ १३ ॥
तेन कुण्डलिनी तस्याः सुषुम्नाया मुखं व्रजेत् ।
जहाति तस्मात्प्राणोऽयं सुषुम्नां व्रजति स्वतः ॥ १४ ॥
तुन्दे तु ताणं कुर्याच्च कण्ठसंकोचने कृते ।
सरस्वत्याश्चालनेन वक्षः स्यादूर्ध्वगो मरुत् ॥ १५ ॥
सूर्येण रेचयेद्वायुं सरस्वत्यास्तु चालने ।
कण्ठसंकोचनं कृत्वा वक्षः स्यादूर्ध्वगो मरुत् ॥ १६ ॥

[1] चैव—क.

तस्मात्संचालयेन्नित्यं शब्दगर्भां सरस्वतीम् ।
यस्याः संचालनेनैव योगी रोगैः प्रमुच्यते ॥ १७ ॥
गुल्मं जलोदरप्लीहो ये चान्ये तुन्दमध्यगाः ।
सर्वे ते शक्तिचालेन रोगा नश्यन्ति निश्चयम् ॥ १८ ॥

मूलादिबन्धत्रयपूर्वकं सरस्वतीचालनतः वक्षः वक्षसः ऊर्ध्वगो मरुत् स्यात् ॥ १५ ॥ उक्तार्थमेतत् ॥ १६ ॥ यस्मादेवं तस्मात् ॥ १७–२४ ॥

प्राणायामभेदाः

प्राणरोधमथेदानीं प्रवक्ष्यामि समासतः ।
प्राणश्च देहगो वायुरायामः कुम्भकः स्मृतः ॥ १९ ॥
स एव द्विविधः प्रोक्तः सहितः केवलस्तथा ।
यावत्केवलसिद्धिः स्यात्तावत्सहितमभ्यसेत् ॥ २० ॥
सूर्योज्जायी शीतली च भस्त्री चैव चतुर्थिका ।
भेदैरेव समं कुम्भो यः स्यात्सहितकुम्भकः ॥ २१ ॥

पवित्रे निर्जने देशे शर्करादिविवर्जिते ।
धनुःप्रमाणपर्यन्तं शीताग्निजलवर्जिते ॥ २२ ॥
पवित्रे नात्युच्चनीचे ह्यासने सुखदे सुखे ।
बद्धपद्मासनं कृत्वा सरस्वत्यास्तु चालनम् ॥ २३ ॥

दक्षनाड्या समाकृष्य बहिष्ठं पवनं शनैः ।
यथेष्टं पूरयेद्वायुं रेचयेदिडया ततः ॥ २४ ॥
कपालशोधने वाऽपि रेचयेत्पवनं शनैः ।
चतुष्कं वातदोषं तु कृमिदोषं निहन्ति च ॥ २५ ॥
पुनः पुनरिदं कार्यं सूर्यभेदमुदाहृतम् ।

चतुष्कं चतुर्विधम् ॥ २५–४२ ॥

उज्जायीकुम्भकः

मुखं संयम्य नाडीभ्यामाकृष्य पवनं शनैः ॥ २६ ॥
यथा लगति कण्ठात्तु हृदयावधि सस्वनम् ।
पूर्ववत्कुम्भयेत्प्राणं रेचयेदिडया ततः ॥ २७ ॥
शीर्षोदित[1]नलहरं गलश्लेष्महरं परम् ।
सर्वरोगहरं पुण्यं देहानलविवर्धनम् ॥ २८ ॥
नाडीजलोदरं धातुगतदोषविनाशनम् ।
गच्छतस्तिष्ठतः कार्यमुज्जाय्याख्यं तु कुम्भकम् ॥ २९ ॥

शीतलीकुम्भकः

जिह्वया वायुमाकृष्य पूर्ववत्कुम्भकादनु ।
शनैस्तु घ्राणरन्ध्राभ्यां रेचयेदनिलं सुधीः ॥ ३० ॥
गुल्मप्लीहादि[2]का दोषाः क्षयं पित्तं ज्वरं तृषाम् ।
विषाणि शीतली नाम कुम्भकोऽयं निहन्ति च ॥ ३१ ॥

[1] निल—क. [2] कान् दोषान्—क, अ १, अ २.

भस्त्रकुम्भकः

ततः पद्मासनं बद्ध्वा समग्रीवोदरः सुधीः ।
मुखं संयम्य यत्नेन प्राणं घ्राणेन रेचयेत् ॥ ३२ ॥
यथा लगति कण्ठात्तु कपाले सस्वनं ततः ।
वेगेन पूरयेत् किंचिद्धृत्पद्मावधि मारुतम् ॥ ३३ ॥
पुनर्विरेचयेत्तद्वत्पूरयेच्च पुनः पुनः ।
यथैव लोहकारांण्मं भस्त्रा वेगेन चाल्यते ॥ ३४ ॥
तथैव स्वशरीरस्थं चालयेत्पवनं शनैः ।
यथा श्रमो भवेद्देहे तथा सूर्येण [1]रेचयेत् ॥ ३५ ॥
यथोदरं भवेत्पूर्णं पवनेन तथा लघु ।
धारयन्नासिकामध्यं तर्जनीभ्यां विना दृढम् ॥ ३६ ॥
कुम्भकं पूर्ववत्कृत्वा रेचयेदिडयाऽनिलम् ।
कण्ठोत्थितानलहरं शरीराग्निविवर्धनम् ॥ ३७ ॥
कुण्डलीबोधकं पुण्यं पापघ्नं शुभदं सुखम् ।
ब्रह्मनाडीमुखान्तस्थकफाद्यर्गलनाशनम् ॥ ३८ ॥
गुणत्रयसमुद्भूतग्रन्थित्रयविभेदकम् ।
विशेषेणैव कर्तव्यं भस्त्राख्यं कुम्भकं त्विदम् ॥ ३९ ॥

बन्धत्रयविधिः

चतुर्णामपि भेदानां कुम्भके समुपस्थिते ।
बन्धत्रयमिदं कार्यं योगिभिर्वीतकल्मषैः ॥ ४० ॥

[1] पूर—क, अ १, अ २.

प्रथमो मूलबन्धस्तु द्वितीयोड्डीयणाभिधः ।
जालन्धरस्तृतीयस्तु तेषां लक्षणमुच्यते ॥ ४१-॥

मूलबन्धः

अधोगतिमपानं वै ऊर्ध्वगं कुरुते बलात् ।
आकुञ्चनेन तं प्राहुर्मूलबन्धोऽयमुच्यते ॥ ४२ ॥
अपाने चोर्ध्वगे याते संप्राप्ते वह्निमण्डले ।
ततोऽनलशिखा दीर्घा वर्धते वायुना हता ॥ ४३ ॥
ततो यातौ वह्न्यपानौ प्राणमुष्णस्वरूपकम् ।
तेनात्यन्तप्रदीप्तेन ज्वलनो देहजस्तथा ॥ ४४ ॥
तेन कुण्डलिनी सुप्ता संतप्ता संप्रबुध्यते ।
दण्डाहतभुजङ्गीव निश्वस्य ऋजुतां व्रजेत् ॥ ४५ ॥
बिलप्रवेशतो यत्र ब्रह्मनाड्यन्तरं व्रजेत् ।
तस्मान्नित्यं मूलबन्धः कर्तव्यो योगिभिः सदा ॥ ४६ ॥

हता चलिता ॥ ४३–६२ ॥

उड्डियाणबन्धः

कुम्भकान्ते रेचकादौ कर्तव्यस्तूड्डियाणकः ।
बन्धो येन सुषुम्नायां प्राणस्तूड्डीयते यतः ॥ ४७ ॥
तस्मादुड्डीयणाख्योऽयं योगिभिः समुदाहृतः ।
सति वज्रासने पादौ कराभ्यां धारयेद्दृढम् ॥ ४८ ॥

गुल्फदेशसमीपे च कन्दं तत्र प्रपीडयेत् ।
पश्चिमं ताणमुदरे धारयेद्धृदये गले ॥ ४९ ॥
शनैः शनैर्यदा प्राणस्तुन्दसन्धिं निगच्छति ।
तुन्ददोषं विनिर्धूय कर्तव्यं सततं शनैः ॥ ५० ॥

जालन्धरबन्धः

पूरकान्ते तु कर्तव्यो बन्धो जालन्धराभिधः ।
कण्ठसंकोचरूपोऽसौ वायुमार्गनिरोधकः ॥ ५१ ॥
अधस्तात्कुञ्चनेनाशु कण्ठसंकोचनं कृते ।
मध्ये पश्चिमताणेन स्यात्प्राणो ब्रह्मनाडिगः ॥ ५२ ॥
पूर्वोक्तेन क्रमेणैव सम्यगासनमास्थितः ।
चालनं तु सरस्वत्याः कृत्वा [1]प्राणं निरोधयेत् ॥ ५३ ॥

अभ्यासकुम्भकसंख्यानियमः

प्रथमे दिवसे कार्यं कुम्भकानां चतुष्टयम् ।
प्रत्येकं दशसंख्याकं द्वितीये पञ्चभिस्तथा ॥ ५४ ॥
विंशत्यलं तृतीयेऽह्नि पञ्चवृद्ध्या दिने दिने ।
कर्तव्यः कुम्भको नित्यं बन्धत्रयसमन्वितः ॥ ५५ ॥

योगाभ्यासविघ्नाः, तत्त्यागश्च

दिवा [2]सुप्तिर्निशायां तु जागरादतिमैथुनात् ।
बहुसंक्रमणं नित्यं रोधान्मूत्रपुरीषयोः ॥ ५६ ॥

[1] प्राणान्—उ १. [2] सप्तिनि—अ १.

विषमासनदोषाश्च प्रयासप्राणचिन्तनात् ।
शीघ्रमुत्पद्यते रोगः स्तम्भयेद्यदि संयमी ॥ ५७-॥
योगाभ्यासेन मे रोग उत्पन्न इति कथ्यते ।
ततोऽभ्यासं त्यजेदेवं प्रथमं विघ्नमुच्यते ॥ ५८ ॥
द्वितीयं संशयाख्यं च तृतीयं च प्रमत्तता ।
आलस्याख्यं चतुर्थं च निद्रारूपं तु पञ्चमम् ॥ ५९ ॥
षष्ठं तु विरतिर्भ्रान्तिः सप्तमं परिकीर्तितम् ।
विषयं चाष्टमं चैव अनाख्यं नवमं स्मृतम् ॥ ६० ॥
अलब्धियोगतत्त्वस्य दशमं प्रोच्यते बुधैः ।
इत्येतद्विघ्नदशकं विचारेण त्यजेद्बुधः ॥ ६१ ॥

योगाभ्यासेन कुण्डलिनीबोधः

प्राणाभ्यासस्ततः कार्यो नित्यं सत्त्वास्थया धिया ।
सुषुम्ना लीयते चित्तं न च वायुः प्रधावति ॥ ६२ ॥
शुष्के मले [1]तु योगी [2]च स्याद्गतिश्चालिता ततः ।
अधोगतिमपानं वै ऊर्ध्वगं कुरुते बलात् ॥ ६३ ॥
आकुञ्चनेन तं प्राहुर्मूलबन्धोऽयमुच्यते ।
अपानश्चोर्ध्वगो भूत्वा वह्निना सह गच्छति ॥ ६४ ॥
प्राणस्थानं ततो वह्निः प्राणापानौ च सत्वरम् ।
मिलित्वा कुण्डलीं याति प्रसुप्ता कुण्डलाकृतिः ॥ ६५ ॥

[1] चा—अ १. [2] स्यादगति—क.

तेनाग्निना च संतप्ता पवनेनैव चालिता ।
प्रसार्य स्वशरीरं तु सुषुम्नावदनान्तरे ॥ ६६ ॥

एवं सत्वास्थया प्राणायामं कुर्वतः चित्तादिकं न चलति । न च कदाऽपि वायुः प्रधावति । केवलकुम्भकतो नाडीगतमले शुष्के सत्यथ सुषुम्नायां प्राणगतिः चालिता स्तम्भिता यदि तदा ततोऽयं योगी स्यादित्यर्थः ॥ ६३–६४ ॥ याति यातः ॥ ६५ ॥ चालिता कुण्डलिनी ॥ ६६–६७ ॥

ग्रन्थित्रयभेदेन कुण्डलिन्याः सहस्रारगमनम्

ब्रह्मग्रन्थिं ततो भित्त्वा रजोगुणसमुद्भवम् ।
सुषुम्नावदने शीघ्रं विद्युल्लेखेव संस्फुरेत् ॥ ६७ ॥
विष्णुग्रन्थिं प्रयात्युच्चैः सत्वरं हृदि संस्थिता ।
ऊर्ध्वं गच्छति यच्चास्ते रुद्रग्रन्थिं तदुद्भ[1]वम् ॥ ६८ ॥
भ्रुवोर्मध्यं तु संभिद्य याति शीतांशुमण्डलम् ।
अनाहताख्यं यच्चक्रं दलैः षोडशभिर्युतम् ॥ ६९ ॥
तत्र शीतांशुसंजातं द्रवं शोषयति स्वयम् ।
चलिते प्राणवेगेन रक्तं पित्तं [2]रविर्ग्रहात् ॥ ७० ॥
यातेन्दुचक्रं यत्रास्ते शुद्धश्लेष्मद्रवात्मकम् ।
(तत्र सिक्तं ग्रसत्युष्णं कथं शीतस्वभावकम्) ॥ ७१ ॥
तथैव रभसा शुक्लं चन्द्ररूपं हि तप्यते ।
ऊर्ध्वं प्रवहति [3]क्षुब्धा तदैवं [4]स्रवतेतराम् ॥ ७२ ॥

[1] वाम्—उ १. [2] रविग्र—क, अ १, अ २.
[3] क्षुब्धं—क, अ २. क्षुब्ध—अ १. [4] भ्रमते—क, अ १, अ २.

तस्यास्वादवशाच्चित्तं बहिष्ठं विषमेषु यत् ।
• तदेव परमं भुक्त्वा स्वस्थस्यात्मरतो युवा ॥ ७२ ॥

तदुद्भवं आज्ञाचक्रमूलोद्भवं रुद्रग्रन्थिम् ॥ ६८ ॥ दलैः षोडशभिर्युतम्—प्रधानदळान्यष्टौ, तथा उपदळानि, आहत्य षोडश ॥ ६९ ॥ यदा प्राणो हृदये शीतांशुजं द्रवं शोषयति तदा तत्रत्यरक्तादौ प्राणवेगेन चलिते सति रविः रक्तपित्तादिकं ग्रहान् ग्रसंत् शोषयेदित्यर्थः ॥ ७० ॥ ततः प्राणे यातेन्दुचक्रमिति ॥ ७१ ॥ स्रवतंततरां—अमृतधारेत्यर्थः ॥ ७२ ॥ अस्या अमृतधारायाः आस्वादवशात् यच्चित्तं विषमेषु विषयेषु उदासीनतया बहिष्ठं बहिर्भूतं भवति तद्वानात्मरतो मुनिः तदेव परमं अमृताख्यं हविर्भुक्त्वा स्वस्थः स्यात् । स्वस्थस्यात्मरत इत्यत्र [1]विसर्गतकाराकाराणां लोपः ॥ ७३ ॥

प्राणादिविलयः, विलीनानां बहिःप्रसरश्च

प्रकृत्यष्टकरूपं च स्थानं गच्छति कुण्डली ।
क्रोडीकृत्य शिवं याति क्रोडीकृत्य विलीयते ॥ ७४ ॥
इत्यधोर्ध्वरजः [2]शुक्ले शिवे तदनु मारुतः ।
प्राणापानौ समौ याति [3]सह जातौ तथैव च ॥ ७५ ॥
भूतेऽल्पे [4]च मनोल्पे वा वाचके त्वतिवर्धते ।
[5]धावयत्यखिला वाता अग्निमूषाहिरण्यवत् ॥ ७६ ॥

[1] तकारलोपः—उ १. [2] शुक्लं—क, अ १, अ २.
[3] सदा जातौ—सर्वकोशेषु. "सहजातौ" इति पाठस्तु व्याख्यानुसारी.
[4] चमनल्पेत्वं वा च—क, अ १, अ २. चमनल्पेत्व—उ १. चाप्यनल्पेवा वा च—मु. [5] धावयन्त्य—उ.

ततः किमित्यत आह—**प्रकृतीति** ।

भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च ।
अहंकार इतीयं मे भिन्ना प्रकृतिरष्टधा ॥

इति स्मृत्यनुरोधेन हित्वा स्वात्तप्रकृत्यष्टकरूपम् । **सहस्रारस्थानम्** । **दृङ्मनः-प्राणादिकं क्रोडीकृत्य** ॥ ७४ ॥ यदा कुण्डलिनी सर्वं क्रोडीकृत्य सहस्रारे विलीयते [1]**इत्यथोर्ध्वरजःशुक्ले शिवे** इत्यत्र कुण्डलिनीविलयादथोर्ध्वक्षणं सौरं प्राकृतं जीवतत्त्वं रजश्च चान्द्रं ऐश्वरं शुक्लं च रजःशुक्ले सहस्रारालङ्कारे स्वातिरिक्ताशिवग्रासे **शिवे** परमात्मनि विलीयेते **तदनु** तदुत्तरक्षणं **मारुतोऽपि** विलीयते । सहजप्राणादेः कथं विलय इत्यत्र यथा अहोरात्रे सहजे सन्ध्ययोः समे भवतः **तथैव सहजातौ** सहजौ तुर्यस्वरूपावस्थानलक्षणनिर्विकल्पकावस्थायां प्राणापानौ **समौ** ऊर्ध्वाधोगतिविरळौ निर्व्यापारतां **याति** यातः । अयमेव प्राणादिविलय इत्यर्थः ॥ ७५ ॥ एवं विलीनप्राणमनोवागादिः कथमन्तर्बाह्ये प्रसरतीत्यत्र बाह्ये स्वातिरेकेण घटाद्यल्पं भवतीति भूतमल्पं तस्मिन् भूते अल्पे च स्मृते प्राणः प्रसरति । स्वातिरेकेण अल्पं वा किञ्चिदस्तीति यन्मनुते तन्मनल्पं मनोल्पं तस्मिन् **मनोल्पे** सङ्कल्पिते सङ्कल्पविकल्पात्मकं मनः प्रसरति । स्वातिरेकेण वाच्यके तु स्मृते तदा वाग्वृत्तिः प्रसरति । एवं प्राणमनोवागादिरुत्पन्नः सन् **वर्धते** । एवं प्राणादिनिष्पत्तौ सत्यां मूषानिषिक्तद्रुतसुवर्णवदापादमस्तकमखिलाः प्राणादिवाता धावयति धावन्ति आपादमस्तकं व्याप्य वर्तन्ते इत्यर्थः ॥ ७६ ॥

समाधौ सर्वस्य चिन्मात्रत्वानुभवः

आधिभौतिकदेहं तु आधिदैविकविग्रहे ।
देहोऽतिविमलं याति चातिवाहिकतामियात् ॥ ७७ ॥

[1] इत्यत्र यत्तथो—उ.

जाड्यभावविनिर्मुक्तममलं चिन्मयात्मकम् ।
तस्यातिवाहिकं मुख्यं सर्वेषां तु मदात्मकम् ॥ ७८ ॥
जायाभवविनिर्मुक्तिः कालरूपस्य विभ्रमः ।
इति [1]तं स्वस्वरूपा हि मती रज्जुभुजङ्गवत् ॥ ७९ ॥
मृषैवोदेति सकलं मृषैव प्रविलीयते ।
रौप्यबुद्धिः शुक्तिकायां स्त्रीपुंसोर्भ्रमतो यथा ॥ ८० ॥
पिण्डब्रह्माण्डयोरैक्यं लिङ्गसूत्रात्मनोरपि ।
स्वापाव्याकृतयोरैक्यं स्वप्रकाशचिदात्मनोः ॥ ८१ ॥

पुनः समाहितावस्थायां एतत् सर्वं चिन्मात्रपर्यवसन्नं भवतीत्याह— **आधिभौतिकेति** । स्वाज्ञविकल्पितभौतिकदेहमधिकृत्य भवतीत्याधिभौतिकदेहः तं तु **आधिभौतिकदेहं** आत्मानं प्रत्यञ्चं देवमधिकृत्य भवतीत्याधिदैविकविग्रहः तस्मिन् **आधिदैविकविग्रहे** प्रत्यगभिन्नपरमात्मनि तन्मात्रतया प्रविलापयेत् । ततः पूर्वाधिष्ठितदेहः मलवद्देहादिभावं विहाय विमलब्रह्मभानमेव **याति** स्वाज्ञविकल्पितप्रपञ्चाधारतया समन्ताद्वहतीत्यातिवाहिकतां ब्रह्मतामियादित्यर्थः ॥ ७७ ॥ यत् स्वातिरिक्तजडशरीरादिकमनुभूतं तत् सर्वं **जाड्यभाव-विनिर्मुक्तममलं चिन्मयात्मकम्** । यत् **सर्वेषां** देहादीनां अधिष्ठेयानां आरोपापवादाधिष्ठानं **मदात्मकं** अस्मत्प्रत्ययालम्बनभूतप्रत्यगभिन्नं ब्रह्म **तस्यातिवाहिकत्वमेव मुख्यं** वास्तवमित्यर्थः ॥ ७८ ॥ यदि ते पराक्सापेक्ष-प्रत्यगभिन्ने ब्रह्मणि सविशेषधीः जायते तदा जनित्वा भवतीति **तज्जायाभावः** सविशेषत्वस्फूर्तिः । तदपह्नवसिद्धिः **तद्विनिर्मुक्तिः** । एवं सविशेषापह्नवोक्तिरपि **कालरूपस्य** ब्रह्मणो **ज्ञानविभ्रमः** सर्वापह्नवसिद्धब्रह्ममात्रस्य निष्प्रतियोगिकत्वेन स्वातिरिक्तमस्ति नास्तीति विभ्रमापह्नवोक्तिरप्यपह्नवतां अर्हतीति भावः ।

[1] तुस्व . . . . मति—उ १.

इत्येवं योऽवशिष्यते तं स्वावशेषधिया विदित्वा वेदनसमकालं या हि स्वस्वरूपावस्थितिः, तन्मतिरेव मुक्तिः ॥ ७९ ॥ तदतिरेकेण स्वाज्ञदशायां यद्यदनुभूतं रज्जुभुजङ्गवत्, शुक्तिकायां यथा अनुभूतं इदं रजतमिति विपरीतभ्रमतः स्त्रीपुंसोः रौप्यबुद्धिवच्च, मृषैवोदेति सकलं मृषैव प्रविलीयते । वस्तुतः स्वाज्ञादिदृष्टिमोहे सत्यसति ब्रह्ममात्रं निष्प्रतियोगिकमवशिष्यत इति फलितोऽर्थः ॥ ८० ॥ कथं पुनः ब्रह्ममात्रमवशिष्यत इत्युक्तम् ? व्यष्टिसमष्टिविभागसिद्धविश्वादिजीवत्रयविराडादीश्वरत्रयभेदसत्त्वादित्याशङ्क्य, यदि सर्वत्र भेदं मन्यसे तदा व्यष्टिसमष्टिप्रपञ्चतदारोपापवादाधारविश्वादितुरीयान्तस्य विराडादितुर्यान्तैनैक्यं विचिन्तयेदित्याह—पिण्डेति । ऐक्यं विश्वविराडैक्योपलक्षणार्थम् । भेदसापेक्षतदैक्यगतसविशेषताऽपाये ब्रह्म निष्प्रतियोगिकत्वमात्रमवशिष्यते इत्यर्थः ॥ ८१ ॥

समाधियोगः

शक्तिः कुण्डलिनी नाम बिसतन्तुनिभा शुभा ।
मूलकन्दं फणाग्रेण दष्ट्वा कमलकन्दवत् ॥ ८२ ॥
मुखेन पुच्छं संगृह्य ब्रह्मरन्ध्रसमन्विता ।
पद्मासनगतः स्वस्थो गुदमाकुञ्च्य साधकः ॥ ८३ ॥
वायुमूर्ध्वगतं कुर्वन् कुम्भकाविष्टमानसः ।
वाय्वाघातवशादग्निः स्वाधिष्ठानगतो ज्वलन् ॥ ८४ ॥
ज्वलनाघातपवना[1]घातोरुन्निद्रितोऽहिराट् ।
ब्रह्मग्रन्थिं ततो भित्त्वा विष्णुग्रन्थिं भिनत्त्यतः ॥ ८५ ॥

[1] घातोरू—बहुकोशेषु.

रुद्रग्रन्थिं च भित्त्वैव कमलानि भिनत्ति षट् ।
• सहस्रकमले शक्तिः शिवेन सह मोदते ॥ ८६ ॥
सैवावस्था परा ज्ञेया सैव निर्वृतिकारणा ॥ ८७ ॥
इति ॥

इत्थंभूतज्ञानोपायतया समाधियोगमाचष्टे—शक्तिरिति ॥ ८२–८४ ॥ घातेनेत्यत्र घातोरिति छान्दसः ॥ ८५ ॥ षट्चक्रालङ्कारग्रन्थित्रयभेदनानन्तरं इयं कुण्डलिनीशक्तिः शिवेन सह सहस्रारे मोदते ॥ ८६ ॥ स्वविकल्पित-भेदप्रपञ्चं ग्रसित्वा निर्विशेषब्रह्मविद्यारूपमासाद्य स्वयमपि निष्प्रतियोगिकब्रह्ममात्र-पर्यवसन्नेति याऽवस्थोक्ता सैवावस्था परा विदेहमुक्तिरिति ज्ञेया । सैव निर्वृतिकारणा, तस्याः परमानन्दाविर्भावहेतुत्वात् । इतिशब्दो हठयोगसमाप्त्यर्थोऽध्यायपरिसमाप्त्यर्थश्च ॥ ८७ ॥

इति प्रथमोऽध्यायः

द्वितीयोऽध्यायः

खेचरीविद्या

अथाहं संप्रवक्ष्यामि विद्यां खेचरिसंज्ञिकाम् ।
यथा [1]विज्ञातवानस्य लोकेऽस्मिन्नजरामरः ॥ १ ॥
मृत्युव्याधिजराग्रस्तो दृष्ट्वा विद्यामिमां मुने ।
बुद्धिं दृढतरां कृत्वा खेचरीं तु समभ्यसेत् ॥ २ ॥

[1] विज्ञान—अ २.

जरामृत्यु[1]गदघ्नो यः खेचरीं वेत्ति भूतले ।
ग्रन्थतश्चार्थतश्चैव तदभ्यासप्रयोगतः ॥ ३ ॥
तं मुने सर्वभावेन गुरुं मत्वा समाश्रयेत् ।
दुर्लभा खेचरी विद्या तदभ्यासोऽपि दुर्लभः ॥ ४ ॥
अभ्यासं मेलनं चैव युगपन्नैव सिध्यति ।
अभ्यासमात्रनिरता न विन्दन्ते ह मेलनम् ॥ ५ ॥
अभ्यासं लभते ब्रह्मन् जन्मजन्मान्तरे क्वचित् ।
मेलनं जन्मनां तत्तु शतान्तेऽपि न लभ्यते ॥ ६ ॥
अभ्यासं बहुजन्मान्ते कृत्वा तद्भावसाधितम् ।
मेलनं लभते कश्चिद्योगी जन्मान्तरे क्वचित् ॥ ७ ॥
यदा तु मेलनं योगी लभते गुरुवक्त्रतः ।
तदा तत्सिद्धिमाप्नोति [2]यदुक्ता शास्त्रसंततौ ॥ ८ ॥
ग्रन्थतश्चार्थतश्चैव मेलनं लभते यदा ।
तदा शिवत्वमाप्नोति निर्मुक्तः सर्वसंसृतेः ॥ ९ ॥
शास्त्रं विनाऽपि संबोद्धुं गुरवोऽपि न शक्नुयुः ।
तस्मात्सुदुर्लभतरं [3]लभ्यं शास्त्रमिदं मुने ॥ १० ॥
यावन्न लभ्यते शास्त्रं तावद्वां पर्यटेद्यतिः ।
यदा संलभ्यते शास्त्रं तदा सिद्धिः करे स्थिता ॥ ११ ॥

[1] गदा—उ, उ १. [2] यदुक्तं—उ, उ १. [3] लभ्य—उ, उ १.

न शास्त्रेण विना सिद्धिर्दृष्टा चैव जगत्त्रये ।
तस्मान्मेलनदातारं शास्त्रदातारमच्युतम् ॥ १२ ॥
तदभ्यासप्रदातारं शिवं मत्वा समाश्रयेत् ।
लब्ध्वा शास्त्रमिदं [1]मह्यमन्येषां न प्रकाशयेत् ॥ १३ ॥
तस्मात्सर्वप्रयत्नेन गोपनीयं विजानता ।
यत्रास्ते च गुरुर्ब्रह्मन्दिव्ययोगप्रदायकः ॥ १४ ॥
तत्र गत्वा च [2]तेनोक्तविद्यां संगृह्य खेचरीम् ।
[3]तेनोक्तः सम्यगभ्यासं कुर्यादादावतन्द्रितः ॥ १५ ॥
अनया विद्यया योगी खेचरीसिद्धिभाग्भवेत् ।
खेचर्या खेचरीं युञ्जन् खेचरीबीजपूरया ॥ १६ ॥
खेचराधिपतिर्भूत्वा खेचरेषु सदा वसेत् ।

ज्ञानसहितहठयोगसर्वस्वं प्रतिपाद्य सप्रपञ्चं लम्बिकायोगमाचष्टे—**अथेति** । **यथा** यथावत् ॥ १–१२ ॥ **मह्यं** मत्तः ॥ १३–१५ ॥ **ह्रीमित्यादिखेचरीबीजपूरया**

अन्तर्लक्ष्यविलीनचित्तपवनो योगी सदा वर्तते
दृष्ट्या निश्चलतारया बहिरधः पश्यन्नपश्यन्नपि ।
मुद्रेयं खलु खेचरी भवति सा लक्ष्यैकताना शिवा
शून्याशून्यविवर्जितं स्फुरति सा तत्त्वं पदं वैष्णवि ॥

इति श्रुतिसिद्धखेचरीमुद्रया खेचरीयोगं युञ्जन् यः कालं नयति ॥ १६ ॥ स योगी देहान्ते खेचराधिपतिः सूर्यो भूत्वा **खेचरेषु** खेचरणीयलोकेषु **सदा वसेत् ॥**

[1] गुह्य—क [2] तेनोक्तं—क, अ १, अ २, उ १. [3] तेनोक्त—अ १.

खेचरीमन्त्रराजोद्धारः

खेचरावसथं वह्निमम्बुमण्डलभूषितम् ॥ १७ ॥
आख्यातं खेचरीबीजं तेन योगः प्रसिध्यति ।
सोमांशनवकं वर्णं प्रतिलोमेन चोद्धरेत् ॥ १८ ॥
तस्मात् त्र्यं[1]शकमाख्यातमक्षरं चन्द्ररूपकम् ।
तस्मादप्यष्टमं वर्णं विलोमेनापरं मुने ॥ १९ ॥
[2]तथा तत्परमं विद्धि तदादिरपि पञ्चमा ।
इन्दोश्च बहुभिन्नं च कूटोऽयं परिकीर्तितः ॥ २० ॥

मेळनमन्त्रराजमुद्धरति—**खेचरेति** । खवाचकतया चरतीति **खेचरः** हकारः **आवसथमिति** धारणाशक्तिरीकारः रेति **वह्निः अम्बुमण्डलमिति** बिन्दुः । एतत् सर्वं मिळित्वा **भूषितं** ह्रीमिति ॥ १७ ॥ **खेचरीबीजं आख्यातम्** । **तेनैव** लम्बिकायोगः **प्रसिध्यति** । शिष्टबीजषट्कमप्यम्बुमण्डल-भूषितमिति ज्ञेयम् । **सोमांशः** सकारः चन्द्रबीजं **तत्प्रतिलोमेन तन्नवकं वर्णमुद्धरेत्** भमिति ॥ १८ ॥ **तस्मात्** भकारादनुलोमेन **त्रित्र्यंशकं** चन्द्रबीज-**माख्यातं** समिति । **तस्मात्** सकारात् **विलोमेन अपरमष्टमं वर्णमुद्धरेत्** [3]मिति ॥ १९ ॥ तथा मकारात् विलोमेन अपरं पञ्चमवर्ण[4]मिति **विद्धि** । पुनरिन्दोश्च बीजं समित्युद्धरेत् । बहुभिः ककारषकारबिन्दुभिः युक्तोऽयं **कूटः** क्षमिति । आहृत्य बीजानि सप्त—ह्रीं, भं, सं, मं, पं, सं, क्षं, इति ॥ २०–२१ ॥

मन्त्रजपात् खेचरीसिद्धिः

गुरूपदेशलभ्यं च सर्वयोगप्रसिद्धिदम् ।
यत्तस्य देहजा माया निरुद्धकरणाश्रया ॥ २१ ॥

[1] वक—क. [2] तदा—क, अ १, अ २, उ १. [3] ध—उ १. [4] ध—उ १.

स्वप्नेऽपि न लभेत्तस्य नित्यं द्वादशजप्यतः ।
य इमां पञ्च लक्षाणि जपेदपि सुयन्त्रितः ॥ २२ ॥
तस्य श्रीखेचरीसिद्धिः स्वयमेव प्रवर्तते ।
नश्यन्ति सर्वविघ्नानि प्रसीदन्ति च देवताः ॥ २३ ॥
वलीपलितनाशश्च भविष्यति न संशयः ।
एवं लब्ध्वा महाविद्यामभ्यासं कारयेत्ततः ॥ २४ ॥
अन्यथा क्लिश्यते [1]ब्रह्मन्न सिद्धिः खेचरीपथे ।
यदभ्यासविधौ विद्यां न लभेद्यः सुधामयीम् ॥ २५ ॥
ततः संमेलकादौ च लब्ध्वा विद्यां सदा जपेत् ।
नान्यथा रहितो ब्रह्मन्न किंचित्सिद्धिभाग्भवेत् ॥ २६ ॥
[2]यदिदं लभ्यते शास्त्रं तदा विद्यां समाश्रयेत् ।
ततस्तदोदितां सिद्धिमाशु तां लभते मुनिः ॥ २७ ॥

नित्यं द्वादशवारं यो जपति स मायातीतो भवतीत्यर्थः ॥ २२–२७ ॥

खचयभ्यासक्रमः

तालुमूलं समुत्कृष्य सप्तवासरमात्मवित् ।
स्वगुरूक्तप्रकारेण मलं सर्वं विशोधयेत् ॥ २८ ॥
क्षुहिपत्रनिभं शस्त्रं सुतीक्ष्णं स्निग्धनिर्मलम् ।
समादाय ततस्तेन लोममात्रं समुच्छिनेत् ॥ २९ ॥

[1] ब्रह्म न—क. [2] यदि तं—अ १.

हित्वा सैन्धवपथ्याभ्यां चूर्णिताभ्यां प्रकर्षयेत् ।
पुनः सप्तदिने प्राप्ते रोममात्रं समुच्छिनेत् ॥ ३० ॥
एवं क्रमेण षाण्मासं नित्योद्युक्तः समाचरेत् ।
षाण्मासाद्रसनामूलं सिराबन्धं प्रणश्यति ॥ ३१ ॥
अथ वागीश्वरीधाम शिरो वस्त्रेण वेष्टयेत् ।
शनैरुत्कर्षयेद्योगी कालवेलाविधानवित् ॥ ३२ ॥
पुनः षाण्मासमात्रेण नित्यं संघर्षणान्मुने ।
भ्रूमध्यावधि चाप्येति तिर्यक्कर्णबिलावधि ॥ ३३ ॥
अधश्च चुबुकं मूलं प्रयाति क्रम[1]चारिता ।
पुनः संवत्सराणां तु तृतीयादेव लीलया ॥ ३४ ॥
केशान्तमूर्ध्वं क्रमति तिर्यक्शाखाऽवधिर्मुने ।
अधस्तात्कण्ठकूपान्तं पुनर्वर्षत्रयेण तु ॥ ३५ ॥
ब्रह्मरन्ध्रं समावृत्य तिष्ठेदेव न संशयः ।
तिर्यक् चूलितलं याति अधः कण्ठबिलावधिः ॥ ३६ ॥
शनैः शनैर्मस्तकाच्च महावज्रकवाटभित् ।
पूर्वं बीजयुता विद्या ह्याख्याता याति दुर्लभाम् ॥ ३७ ॥
तस्याः षडङ्गं कुर्वीत तया षट्स्वरभिन्नया ।
कुर्यादेवं करन्यासं सर्वसिद्ध्यादिहेतवे ॥ ३८ ॥
शनैरेवं प्रकर्तव्यमभ्यासं युगपन्न हि ।
युगपद्वर्तते यस्य शरीरं विलयं व्रजेत् ॥ ३९ ॥

[1] चारितां—क. चारितः—अ १, अ २.

तस्माच्छनैः शनैः कार्यमभ्यासं मुनिपुङ्गव ।
• यदा च बाह्यमार्गेण जिह्वा ब्रह्मबिलं व्रजेत् ॥ ४० ॥
तदा ब्रह्मार्गलं ब्रह्मन्दुर्भेद्यं त्रिदशैरपि ।
अङ्गुल्यग्रेण संघृष्य जिह्वामात्रं निवेशयेत् ॥ ४१ ॥
एवं वर्षत्रयं कृत्वा ब्रह्मद्वारं [1]प्रविश्यति ।
ब्रह्मद्वारे प्रविष्टे तु सम्यङ्मथनमाचरेत् ॥ ४२ ॥
मथनेन विना केचित्साधयन्ति विपश्चितः ।
खेचरीमन्त्रसिद्धस्य सिध्यते मथनं विना ॥ ४३ ॥
जपं च मथनं चैव कृत्वा शीघ्रं फलं लभेत् ।
स्वर्णजां रौप्यजां वाऽपि लोहजां वा शलाकिकाम् ॥ ४४ ॥
नियोज्य नासिकारन्ध्रं दुग्धसिक्तेन तन्तुना ।
[2]प्राणान्निरुध्य हृदये सुखमासनमात्मनः ॥ ४५ ॥
शनैः सुमथनं कुर्याद्भ्रूमध्ये न्यस्तचक्षुषि ।
[3]षाण्मासान्मथनावस्थाभावेनैव प्रजायते ॥ ४६ ॥
यथा सुषुप्तिर्बालानां यथा भावस्तथा भवेत् ।
न सदा मथनं शस्तं मासे मासे समाचरेत् ॥ ४७ ॥
सदा रसनया योगी मार्गं न परिसंक्रमेत् ।
एवं द्वादशवर्षान्ते संसिद्धिर्भवति [4]ध्रुवा ॥ ४८ ॥

[1] प्रप—क.
[2] प्राणं नि—क, अ १, अ २.
[3] षाण्मासं म—क, अ २.
[4] ध्रुवं—अ २.

शरीरे सकलं विश्वं पश्यत्यात्माविभेदतः ।
ब्रह्माण्डोऽयं महामार्गो राजदन्तोर्ध्वकुण्डली ॥ ४९ ॥

इति ॥

अभ्यासक्रममाह—तालिवति ॥ २८–२९ ॥ कार्यान्तरं हित्वेति । हरीतकी पथ्याशब्दार्थः ॥ ३०–३१ ॥ वागीश्वरीधामशिरः जिह्वाग्रम् ॥ ३२–३४ ॥ तिर्यक्च्छाखावधिः शिखामूलमित्यर्थः ॥ ३५—३६ ॥ दुर्लभां दुर्लभताम् ॥ ३७ ॥ षट्स्वरभिन्नया ह्रां ह्रीं इत्यादिनेत्यर्थः ॥ ३८–४० ॥ ब्रह्मार्गलं अन्तर्जिह्वासुषिरम् ॥ ४१–४७ ॥ एवं गुरुमुखात् लम्बिकाविद्यां अभ्यस्य द्वादशवर्षानुष्ठानात् लम्बिकायोगसिद्धिः भवति ॥ ४८ ॥ शरीरे सकलं विश्वं पश्यतीत्यनेन विराट्सूत्रबीजतुर्यरूपं क्रमेण प्रतिपद्यते । यत्र सहस्रारे राजदन्तोर्ध्वकुण्डली जिह्वा प्रसरति सोऽयं मार्गः ब्रह्माण्डनिभो भवति, सुपथत्वात् । इतिशब्दः लम्बिकायोगसमाप्त्यर्थः, द्वितीयाध्यायसमाप्त्यर्थश्च भवति ॥ ४९ ॥

इति द्वितीयोऽध्यायः

तृतीयोऽध्यायः

मेळनमन्त्रः

ह्रीं [1]भं सं [2]मं [3]पं सं क्षम् ।

मेळनमनुं कण्ठतः पठति—ह्रीमिति ।

[1] हं—अ २. [2] षं—उ १.
[3] फं—उ १. वं—अ १. यं—अ २.

अमावास्याप्रतिपत्पूर्णिमाभेदेन दृष्टिभेदः

पद्मज उवाच—

अमावास्या च प्रतिपत्पौर्णमासी च शंकर ।
अस्याः का वर्ण्यते संज्ञा एतदाख्याहि तत्त्वतः ॥ १ ॥
प्रतिपद्दिनतोऽकाले अमा[1]वास्या तथैव च ।
पौर्णमास्यां स्थिरीकुर्यात्स च पन्था हि नान्यथा ॥ २ ॥

दृष्टित्रयतल्लक्ष्ययाथार्थ्यबुभुत्सया शिवं प्रति ब्रह्मा पृच्छतीत्याह—**पद्मज** इति ॥ १ ॥ प्रश्नोत्तरं भगवानाह—**प्रतिपदिति** । बाह्यमध्यान्तर्लक्ष्यदर्शनकरणं मनस्सहकृतदृष्टिः । अमादिभेदेन सेयं त्रिधा भिद्यते । तत्र गाढनिर्मीलनदृष्टिरमा, अर्धोन्मीलनदृष्टिः प्रतिपत्, सर्वोन्मीलनदृष्टिः पूर्णिमा भवति । लक्ष्यदर्शने पूर्णिमादृष्टिः प्रशस्यते । अभ्यासकाले यदि नेत्रश्रमो भवति तदा **प्रतिपद्दिनतोऽकाले** प्रतिपद्दृष्ट्याऽवलोकयेत् अमादृष्ट्या वा । यदा जितश्रमो भवति तदा पूर्णिमादृष्टिमेव **स्थिरीकुर्यात्**,

कदाचित् पूर्णिमादृष्ट्या कदाचित् प्रतिपद्दृशा ।
अमादृष्ट्या कदाचिच्च निर्विघ्नेनावलोकयेत् ॥

इति ब्रह्मप्रणवोक्तेः । प्राणापाना[णायामा]द्यपेक्षया अयमेव पन्थाः वरीयानित्यर्थः ॥ २ ॥

पूर्णिमादृष्टिविधिः

कामेन विषयाकाङ्क्षी विषयात्काममोहितः ।
द्वावेव संत्यजेन्नित्यं निरञ्जनमुपाश्रयेत् ॥ ३ ॥

[1] वास्यां—अ १.

अपरं संत्यजेत्सर्वं यदिच्छेदात्मनो हितम् ।
शक्तिमध्ये मनः कृत्वा मनः शक्तेश्च मध्यगम् ॥ ४ ॥
मनसा मन आलोक्य तत्त्यजेत्परमं पदम् ।
मन एव हि बिन्दुश्च उत्पत्तिस्थितिकारणम् ॥ ५ ॥
मनसोत्पद्यते बिन्दुर्यथा क्षीरं घृतात्मकम् ।
न च बन्धनमध्यस्थं तद्वै [1]कारणमा[2]नसम् ॥ ६ ॥
चन्द्रार्कमध्यमा शक्तिर्यत्रस्था तत्र बन्धनम् ।
ज्ञात्वा सुषुम्ना तद्भेदं कृत्वा वायुं च मध्यगम् ॥ ७ ॥
[3]स्थित्वाऽसौ बैन्दवस्थाने घ्राणरन्ध्रे निरोधयेत् ।
वायुं बिन्दुं समाख्यातं सत्वं प्रकृतिमेव च ॥ ८ ॥
षट् चक्राणि परिज्ञात्वा प्रविशेत्सुखमण्डलम् ।
मूलाधारं स्वाधिष्ठानं मणिपूरं तृतीयकम् ॥ ९ ॥
अनाहतं विशुद्धिं च आज्ञाचक्रं च षष्ठकम् ।
आधारं गुदमित्युक्तं स्वाधिष्ठानं तु लैङ्गिकम् ॥ १० ॥
मणिपूरं नाभिदेशं हृदयस्थमनाहतम् ।
विशुद्धिः कण्ठमूले च आज्ञाचक्रं च मस्तकम् ॥ ११ ॥

विषयविषयिकलनात्यागपूर्वकं पूर्णमादृष्ट्या ब्रह्माहमिति लक्षयेत् इत्याह—कामेनेति ॥ ३ ॥ किंच—शक्तिमध्ये । कुण्डलिनीशक्तिमध्ये पूर्णमादृष्टिकलितं मनः कृत्वा पुनः शक्तेश्च मध्यगं मनोऽपि कृत्वा

[1] करण—क, अ १, अ २. [2] सनं—क.
[3] स्थित्वा तु—उ, उ १.

ब्रह्माकारपरिणतमनसा मनस्तत्कार्यापवादाधिकरणं ब्रह्मास्मीत्यालोक्य एवमालोकनवृत्तिमपि सन्त्यजेदिति यत् तदेव हि परमं पदं कैवल्यमित्यर्थः ॥ ४ ॥ किं तन्मनः इत्यत आह—मन इति । मनसः व्यष्टिप्रपञ्चोत्पत्त्यादिकारणत्वात् तदेव बिन्दुरीश्वरः, "बिन्दुरीश्वरसंज्ञः" इति श्रुतेः ॥ ५ ॥ यद्वा—मनसोत्पद्यते बिन्दुः बिन्दुादिकल्पनाया मनोहेतुकत्वात् मनःकार्यत्वं, "सेशं मया कल्पितं" इति भगवत्पादाचार्योक्तेः । यथा क्षीरं घृतात्मकं तथा बिन्दुः मनआत्मकमित्यर्थः । मनोबद्धमीश्वरतत्त्वं इत्यत्राह—नचेति । स्वसङ्कल्पतो बन्धनमेतीति बन्धनं मनः नच बिन्दुतत्त्वं बन्धनमध्यस्थं मनसो मृषात्वात् । नापि तद्वै तदेव स्वकारणमानसवत् भवति, मानसापाये बिन्दोः ईश्वरस्य निर्विशेषब्रह्ममात्रत्वात् ॥ ६ ॥ ईश्वरादतिरिक्तमेव बन्धनमित्याह—चन्द्रेति । ब्रह्मरन्ध्रमूलाधारासनचन्द्रार्कमध्यमा शक्तिः कुण्डलिनी यत्र तिष्ठति तत्र बन्धनं मनोऽस्तीति ज्ञात्वा । स्वातिरिक्तकुण्डलीकार्यं मनोबन्धनमिति ज्ञात्वा तदुन्मूलनाय यत् सुषुम्नायां ग्रन्थित्रयं विद्यते तद्भेदं कृत्वा प्राणादिकमपि तत्सुषुम्ना मध्यगं कृत्वा ॥ ७ ॥ बैन्दवस्थाने भ्रूमध्यादौ बिन्दाख्येश्वरोऽस्मीति स्थित्वा वायुं स्थिरीकृत्य प्राणरन्ध्रे निरोधयेत् केवलकुम्भकमेव कुर्यात् इत्यर्थः । प्राणादीन् ज्ञात्वा योगानन्दं विशेदित्याह—वायुमिति ॥ ८ ॥ कानि षट्चक्राणीत्यत आह—मूलेति ॥ ९–१२ ॥

प्राणाभ्यासात् विराड्रूपापत्तिः

षट् चक्राणि परिज्ञात्वा प्रविशेत्सुखमण्डले ।
प्रविशेद्वायुमाकृष्य [1]तयैवोर्ध्वं नियोजयेत् ॥ १२ ॥
एवं समभ्यसेद्वायुं स ब्रह्माण्डमयो भवेत् ।
वायुं बिन्दुं तथा चक्रं चित्तं चैव समभ्यसेत् ॥ १३ ॥

[1] तथै—अ.

एवं प्राणाभ्यासात् विराड्रूपो भवतीत्यर्थः । **वायुं . . . समभ्यसेत्** चित्तप्राणावेकीकृत्य षट्चक्रेषु बिन्दुध्यानपूर्वकं योगमभ्यसेदित्यर्थः ॥ ॥ १३ ॥

अभ्यासयोगेन विना न स्वात्मप्रकाशः

समाधिमेकेन सममभृतं यान्ति योगिनः ।
यथाऽग्निर्दारुमध्यस्थो नोत्तिष्ठेन्मथनं विना ॥ १४ ॥
विना चाभ्यासयोगेन ज्ञानदीपस्तथा न हि ।
घटमध्यगतो दीपो बाह्ये नैव प्रकाशते ॥ १५ ॥
भिन्ने तस्मिन्घटे चैव दीपज्वाला च भासते ।
स्वकायं घटमित्युक्तं यथा दीपो हि तत्पदम् ॥ १६ ॥

एकेन निर्विकल्पयोगेन **समं** सर्वसाम्यं **समाधिं ब्रह्म अमृतं योगिनो यान्ति** । एवमभ्यासयोगं विना स्वात्मा न प्रकाशते इति सदृष्टान्तमाह— **यथेति** ॥ १४–१५ ॥ स्वकायो घटस्थानीय इत्युक्तः ॥ १६ ॥

गुरूपदेशात् ब्रह्मज्ञानम्

गुरुवाक्यसमा भिन्ने ब्रह्मज्ञानं स्फुटीभवेत् ।
कर्णधारं गुरुं प्राप्य कृत्वा सूक्ष्मं तरन्ति च ॥ १७ ॥
अभ्यासवासनाशक्त्या तरन्ति भवसागरम् ।

गुरुवाक्यसमं स्वाज्ञानावरणे **भिन्ने** *अथ* **ब्रह्मज्ञानम्** । **गुरुं प्राप्य** तदुपदिष्टार्थं **नौकां कृत्वा** ॥ १७ ॥

वाग्वृत्त्यधिष्ठानं ब्रह्म

परायामंकुरी[1]भूय पश्यन्त्यां द्विदलीकृता ॥ १८ ॥
मध्यमायां मुकुलिता वैखर्यां विकसीकृता ।
पूर्वं यथोदिता या वाग्विलोमेनास्तगा भवेत् ॥ १९ ॥
तस्या वाचः परो देवः कूटस्थो वाक्प्रबोधकः ।
सोऽहमस्मीति निश्चित्य यः सदा वर्तते पुमान् ॥ २० ॥
शब्दैरुच्चावचैर्नीचैर्भाषि[2]तोऽपि न लिप्यते ।

व्यावहारिकप्रपञ्चदृष्टीनां भवसागरतारणं कथमित्याशङ्क्य व्यावहारिकप्रपञ्चनिर्वाहकवाग्वृत्तिसम्भूतिस्थितिप्रळयाधिष्ठानब्रह्मज्ञानतो निर्लिप्तो भूत्वा लीलया भवसागरपारब्रह्मपदं यान्तीत्याह—परायामिति । वाग्वृत्तिः

चत्वारि वाक्परिमिता पदानि
तानि विदुर्ब्राह्मणा ये मनीषिणः ।
गुहा त्रीणि निहिता नेंगयन्ति
तुरीयं वाचो मनुष्या वदन्ति ॥

इति श्रुत्यनुरोधेन मूलाधारस्थपरायां अङ्कुरीभूय । अनाहतस्थपश्यन्त्याम् ॥ १८ ॥ विशुद्धिचक्रस्थमध्यमायां, आस्यस्थवैखर्याम् ॥ १९-२० ॥

विश्वादिप्रपञ्चाधिष्ठानं ब्रह्म

विश्वश्च तैजसश्चैव प्राज्ञश्चेति च ते त्रयः ॥ २१ ॥
विराड्धिरण्यगर्भश्च ईश्वरश्चेति ते त्रयः ।
ब्रह्माण्डं चैव पिण्डाण्डं लोका भूरादयः क्रमात् ॥ २२ ॥

[1] भूयं—अ [2] तेष—अ.

स्वस्वोपाधिलयादेव लीयन्ते प्रत्यगात्मनि ।
अण्डं ज्ञानाग्निना तप्तं लीयते कारणैः सह ॥ २३ ॥
परमात्मनि लीनं तत्परं ब्रह्मैव जायते ।

व्यष्टिसमष्टिप्रपञ्चसापेक्षविश्वविराडादिभेदे सति कथं विद्वान् भवसागरपार-ब्रह्मतया अवशिष्यते इत्याशङ्क्य यदि ते स्वातिरेकेण साधारव्यावहारिक-प्रपञ्चोऽस्तीति भ्रान्तिस्तदा स्वज्ञानतः स्वाज्ञानप्रपञ्चो विलीयते, तद्विलयाधिकरणं स्वातिरिक्तासम्भवब्रह्ममात्रज्ञानेन निरधिकरणं सत् निष्प्रतियोगिकस्वमात्रमव-शिष्यते इत्याह—विश्वश्चेति ॥ २१–२३ ॥ स्वाज्ञदृष्टिविकल्पितस्वातिरिक्तं स्वज्ञदृष्ट्या विलीनं सत् परमार्थदृष्ट्या ब्रह्मैव भवतीत्यर्थः ॥

निष्प्रतियोगिकं ब्रह्म

ततः स्तिमितगम्भीरं न तेजो न तमस्ततम् ॥ २४ ॥
अनाख्यमनभिव्यक्तं सत्किंचिदवशिष्यते ।

परमार्थदृष्ट्या कथं तद्ब्रह्म भवतीत्यत्राह—तत इति । यतः स्वाज्ञादिदृष्ट्या स्वातिरिक्तप्रपञ्चः तदपवादोऽपि भवति ततो वस्तुयाथार्थ्य-दर्शनात् निर्गुणनिरवयवव्योमवत् स्तिमितगम्भीरं भूतभौतिकतेजस्तमः-परिच्छेदासम्भवात् न तेजो न तमस्ततम् ॥ २४ ॥ तथा नामरूपासम्भवात् अनाख्यमनभिव्यक्तं स्वाज्ञादिदृष्टिमोहे सत्यसति सत् किञ्चिदवशिष्यते, "ब्रह्ममात्रमसन्न हि" इति श्रुतेः ॥

ब्रह्मसिद्ध्युपायभूतं ध्यानम्

ध्यात्वा मध्यस्थमात्मानं कलशान्तरदीपवत् ॥ २५ ॥
अङ्गुष्ठमात्रमात्मानमधूमज्योतिरूपकम् ।
प्रकाशयन्तमन्तस्थं ध्यायेत्कूटस्थमव्ययम् ॥ २६ ॥

विज्ञानात्मा तथा देहे जाग्रत्स्वप्नसुषुप्तितः ।
मायया मोहितः पश्चाद्बहुजन्मान्तरे पुनः ॥ २७ ॥
सत्कर्मपरिपाकात्तु स्वविकारं चिकीर्षति ।
कोऽहं कथमयं दोषः संसाराख्य उपागतः ॥ २८ ॥
जाग्रत्स्वप्ने व्यवहरन्त्सुषुप्तौ क्व गतिर्मम ।
इति चिन्तापरो भूत्वा स्वभासा च विशेषतः ॥ २९ ॥
अज्ञानात्तु चिदाभासो बहिस्तापेन तापितः ।
दग्धं भवत्येव तदा तूलपिण्डमिवाग्निना ॥ ३० ॥
दहरस्थः प्रत्यगात्मा नष्टे ज्ञाने ततः परम् ।
विततो व्याप्य विज्ञानं दहत्येव क्षणेन तु ॥ ३१ ॥
मनोमयज्ञानमयान् सम्यग्दग्ध्वा क्रमेण तु ।
घटस्थदीपवच्छ्रुध्यदन्तरेव प्रकाशते ॥ ३२ ॥

एवं निष्प्रतियोगिकब्रह्ममात्रसिद्ध्युपायमाह—ध्यात्वेति ॥ २५–२६ ॥ स्वेन रूपेण विज्ञानात्मा परमात्माऽपि स्वातिरिक्तात्मात्मीयाभिमानतः संसरति, अनेककोटिजन्मसुकृतपरिपाकवशात् प्रत्यगभिमुखो भवति, ततः स्वाज्ञविकल्पितप्रपञ्चकलनाविरळविदेहमुक्तात्मरूपतया अवशिष्यते इत्याह—विज्ञानात्मेति ॥ २७–३३ ॥

जीवन्मुक्तिविदेहमुक्ती

ध्यायन्नास्ते मुनिश्चैवमा सुप्तेरा मृतेस्तु यः ।
जीवन्मुक्तः स विज्ञेयः स धन्यः कृतकृत्यवान् ॥ ३३ ॥

जीवन्मुक्तपदं त्यक्त्वा स्वदेहे कालसात्कृते ।
विशत्यदेहमुक्तत्वं पवनोऽस्पन्दतामिव ॥ ३४ ॥
अशब्दमस्पर्शमरूपमव्ययं तथाऽरसं नित्यमगन्धवच्च यत् ।
अनाद्यनन्तं महतः परं ध्रुवं तदेव शिष्यत्यमलं निरामयम् ॥३५॥

इत्युपनिषत् ॥

स्वदेहे रूढमूलदेहाभिमाने कालसात्कृते विरूपविलयं गते सत्यथ देहादावात्मात्मीयाभिमानासम्भवप्रबोधसमकालमस्पन्द पवनाकाशवद्विदेहमुक्तत्वं विशति विदेहमुक्तः स्वमात्रमवशिष्यते इत्यर्थः ॥ ३४ ॥ शब्दादिप्रपञ्चे सति विदेहमुक्तस्य स्वात्ममात्रता कथमित्यत आह —अशब्दमिति । सर्वापह्नवसिद्ध-विदेहमुक्तस्वरूपं ब्रह्म निष्प्रतियोगिकस्वमात्रमित्यत्र न विवादः । यदि स्वाज्ञदृष्ट्या शब्दादिविकारः स्यात् तदा स्वज्ञदृष्ट्या शब्दादिविलयाधिकरणम-शब्दादिविशेषणविशिष्टं भवति, तदेव परमार्थदृष्ट्या निष्प्रतियोगिकस्वमात्रं अवशिष्यते इत्यर्थः ॥ ३५ ॥ इत्युपनिषच्छब्दः योगकुण्डल्युपनिषत्समाप्त्यर्थः ॥

इति तृतीयोऽध्यायः

श्रीवासुदेवेन्द्रशिष्योपनिषद्ब्रह्मयोगिना ।
योगकुण्डल्युपनिषद्व्याख्यानं लिखितं स्फुटम् ।
कुण्डल्युपनिषद्व्याख्याग्रन्थस्तु द्विशतं स्मृतः ॥

इति श्रीमदीशाद्यष्टोत्तरशतोपनिषच्छास्त्रविवरणे षडशीतिसंख्यापूरकं
योगकुण्डल्युपनिषद्विवरणं सम्पूर्णम्

योगचूडामण्युपनिषत्

आप्यायन्तु इति शान्तिः

यागाङ्गषट्कम्

योगचूडामणिं वक्ष्ये योगिनां हितकाम्यया ।
कैवल्यसिद्धिदं गूढं सेवितं योगवित्तमैः ॥ १ ॥
आसनं प्राणसंरोधः प्रत्याहारश्च धारणा ।
ध्यानं समाधिरेतानि योगाङ्गानि भवन्ति षट् ॥ २ ॥
एकं सिद्धासनं प्रोक्तं द्वितीयं कमलासनम् ।

मूलाधारादिषट्चक्रसहस्रारोपरिस्थितम् ।
[1]योगज्ञानमुख्यफलं रामचन्द्रपदं भजे ॥

इह खलु सामवेदप्रविभक्तेयं योगचूडामण्युपनिषत् षडंगयोगोपाय-प्रदर्शनपूर्वकं निष्प्रतियोगिकब्रह्ममात्रपर्यवसन्ना विजयते । अस्याः स्वल्पग्रन्थतो विवरणमारभ्यते । स्वाङ्गलोकमुद्दिश्य श्रुतिरेवमाह—योगेति । योगचूडामणिं योगश्रेष्ठमित्यर्थः । कथमस्य चूडामणित्वं? इत्यत्राह—कैवल्येति । अस्य कैवल्यफलतया योगवित्तमसेवितत्वात् चूडामणित्वं युज्यते इत्यर्थः ॥ १ ॥

[1] योगज्ञानैकफलकं—इति च पाठः. योगज्ञानं मु—क.

यमनियमसाधनसम्पन्नानां षडंगयोगः उच्यते—आसनमिति ॥ २ ॥ आदावासनमुद्दिशति—एकमिति । प्रोक्तं—सिद्धपद्मासनलक्षणस्य त्रिशिखब्राह्मणोपनिषदि प्रकाशितत्वात् ॥

योगसिद्धये आवश्यकं देहतत्त्वज्ञानम्

षट्चक्रं षोडशाधारं त्रिलक्ष्यं व्योमपञ्चकम् ॥ ३ ॥
स्वदेहे यो न जानाति तस्य सिद्धिः कथं भवेत् ।

देहतत्त्वज्ञानं विना देहे सिद्धिः कथं स्यादित्याक्षिपति— षट्चक्रमिति । मूलाधारादिषट्चक्रम् । मूलाधारत्रिकोणमारभ्य षोडशान्तावधि षोडशाधारं विद्यते । तद्राजयोगसारे प्रसिद्धम् । बाह्यमध्यान्तर्भेदेन त्रिलक्ष्यम् । आकाशादिपरमाकाशान्तं व्योमपञ्चकम ॥ ३ ॥ शिष्टं स्पष्टम् ॥

मूलाधारादिचक्राणि

चतुर्दलं स्यादाधारं स्वाधिष्ठानं च षड्दलम् ॥ ४ ॥
नाभौ दशदलं पद्मं हृदयं द्वादशारकम् ।
षोडशारं विशुद्धाख्यं भ्रू[1]मध्ये द्विदलं तथा ॥ ५ ॥
सहस्रदलसंख्यातं ब्रह्मरन्ध्रे महापथि ।

यत् त्वया पृष्टं तत् मूलाधारादिसहस्रारान्तेष्वन्तर्भवतीत्याह— चतुर्दलमिति ॥ ४–५ ॥

योनिस्थाने परमज्योतिर्दर्शनम्

आधारं प्रथमं चक्रं स्वाधिष्ठानं द्वितीयकम् ॥ ६ ॥
योनिस्थानं द्वयोर्मध्ये कामरूपं निगद्यते ।
कामाख्यं तु गुदस्थाने पङ्कजं तु चतुर्दलम् ॥ ७ ॥

[1] मध्यं विदलं—उ.

तन्मध्ये प्रोच्यते योनिः कामाख्या सिद्धवन्दिता ।
तस्य मध्ये महालिङ्गं पश्चिमाभिमुखं स्थितम् ॥ ८ ॥
नाभौ तु मणिवद्विम्बं यो जानाति स योगवित् ।
तप्तचामीकराभासं तडिल्लेखेव विस्फुरत् ॥ ९ ॥
त्रिकोणं तत्पुरं वह्नेरधोमेढ्रात्प्रतिष्ठितम् ।
समाधौ परमं ज्योतिरनन्तं विश्वतोमुखम् ॥ १० ॥
तस्मिन्दृष्टे महायोगे यातायातो न विद्यते ।

प्रथमद्वितीयचक्रतया नामोद्दिश्य क्रमेण विवृणोति—आधारमिति ॥ ६ ॥ योनिस्थानं किमित्यत्र—योनिस्थानमिति । द्वयोः मूलाधारस्वाधिष्ठानयोः । योगसिद्धेः तत्पीडनपूर्वकत्वात् तदेव विशदयति—कामाख्यमिति । योगसिद्धिकामाख्यम् ॥ ७ ॥ योनिः कुण्डलिनीशक्तिः । अस्या जगत्प्रसूतिहेतुत्वात् योनित्वमुपपद्यते । अत एव कामाख्या । तस्य सुषुम्नामध्यविलसितकुण्डलिनीभोगस्य मध्ये वायव्यं पश्चिमाभिमुखं महालिङ्गं केवलकुम्भके योगिप्रत्यक्षतया स्थितं भवति ॥ ८ ॥ एवंज्ञानवदभ्यासफलमाह—नाभाविति । मेढ्रादधोविद्यमानवह्निमण्डलस्वरूपमाह—तप्तेति ॥ ९ ॥ यस्य एवं योगकाले पावकी ज्वाला दृश्यते तस्य पुनरिडादिमार्गेण यातायातो न विद्यते इत्याह—समाधाविति ॥ १० ॥

स्वाधिष्ठानादिचक्रलक्षणम्

स्वशब्देन भवेत्प्राणः स्वाधिष्ठानं [1]तदाश्रयम् ॥ ११ ॥
स्वाधिष्ठानाश्रयादस्मान्मेढ्रमेवाभिधीयते ।
तन्तुना मणिवत्प्रोतो योऽत्र कन्दः सुषुम्नया ॥ १२ ॥

[1] तदाश्रयः—क, अ १, अ २.

तन्नाभिमण्डले चक्रं प्रोच्यते मणिपूरकम् ।
द्वादशारे महाचक्रे पुण्यपापविवर्जिते ॥ १३ ॥
तावज्जीवो भ्रमत्येवं यावत्तत्त्वं न विन्दति ।

स्वाधिष्ठानलक्षणमाह—स्वेति ॥ ११ ॥ मेढ्रस्य प्राणनाडित्वात् स्वाधिष्ठानाश्रयत्वं युज्यते । मणिपूरकलक्षणं किमित्यत्र तन्तुनेति ॥ १२ ॥ स्वाज्ञानावधि जीवो ह्रदासनः सन् संसारमण्डले परिभ्रमतीत्याह—द्वादशार इति । पुण्यपापविवर्जिते—तत्र प्रत्यग्दृष्टेः पुण्यपापसम्बन्धाभावात् ॥ १३ ॥

नाडीमहाचक्रम्

ऊर्ध्वं मेढ्रादधोनाभेः [1]कन्दयोनिः खगाण्डवत् ॥ १४ ॥
तत्र नाड्यः समुत्पन्नाः [2]महत्राणि द्विसप्ततिः ।
तेषु नाडीसहस्रेषु द्विसप्ततिरुदाहृ[3]ता ॥ १५ ॥
प्रधानाः प्राणवाहिन्यो भूयस्तासु दश स्मृताः ।
इडा च पिङ्गला चैव सुषुम्ना च तृतीयगा ॥ १६ ॥
गान्धारी हस्तिजिह्वा च पूषा चैव यशस्विनी ।
अलम्बुसा कुहूश्चैव शङ्खिनी दशमी स्मृता ॥ १७ ॥
एतन्नाडीमहाचक्रं ज्ञातव्यं योगिभिः सदा ।

नाडीकन्दं तद्गतनाडीभेदं चाह—ऊर्ध्वमिति ॥ १४–१५ ॥ दशनाडीनां स्थानानि निर्दिशति—इडेति ॥ १६–१७ ॥

[1] कन्दं यो—क, अ २. [2] सहस्राणां—क, अ १.
[3] ताः—क, अ १, अ २.

नाडीस्थानानि

इडा वामे स्थिता भागे दक्षिणे पिङ्गला स्थिता ॥ १८ ॥
सुषुम्ना मध्यदेशे तु गान्धारी वामचक्षुषि ।
दक्षिणे हस्तिजिह्वा च पूषा कर्णे [1]तु दक्षिणे ॥ १९ ॥
यशस्विनी वामकर्णे चानने चाप्यलम्बुसा ।
कुहूश्च लिङ्गदेशे तु मूलस्थाने तु शङ्खिनी ॥ २० ॥
एवं द्वारं समाश्रित्य तिष्ठन्तं नाडयः क्रमात् ।

मध्यस्थसुषुम्नायाः इडा वामे स्थिता ॥ १८–२० ॥

नाडीसञ्चारिवायवः तद्व्यापाराश्च

इडापिङ्गलसौषुम्नाः प्राणमार्गे च संस्थिताः ॥ २१ ॥
सततं प्राणवाहिन्यः सोमसूर्याग्निदेवताः ।
प्राणापानसमानाख्या व्यानोदानौ च वायवः ॥ २२ ॥
नागः कूर्मोऽथ कृकरो देवदत्तो धनंजयः ।
हृदि प्राणः स्थितो नित्यमपानो गुदमण्डले ॥ २३ ॥
समानो नाभिदेशे तु उदानः कण्ठमध्यगः ।
व्यानः सर्वशरीरे तु प्रधानाः पञ्च वायवः ॥ २४ ॥
उद्गारे नाग आख्यातः कूर्म उन्मीलने तथा ।
कृकरः क्षुत्करो ज्ञेयो देवदत्तो विजृम्भणे ॥ २५ ॥

न जहाति मृतं वापि सर्वव्यापी धनंजयः ।
एते नाडीषु सर्वासु भ्रमन्ते जीवजन्तवः ॥ २६ ॥

तत्र अयोगियोगिभेदेन इडेति ॥ २१ ॥ नाडीगतप्राणादिस्वरूपं तद्व्यापारं चाह—प्राणेति ॥ २२–२९ ॥ जीवजन्तवः—जीवरूपिण इत्यर्थः, तेषां जीवाधारत्वात् ॥ २६ ॥

प्राणचलनाचलनाभ्यां जीवचलनाचलने

आक्षिप्तो भुजदण्डेन [1]यथोच्चलति कन्तुकः ।
प्राणापानसमाक्षिप्तस्तथा जीवो न तिष्ठति ॥ २७ ॥
प्राणापानवशो जीवो ह्यधश्चोर्ध्वं च [2]धावति ।
वामदक्षिणमार्गाभ्यां चञ्चलत्वान्न दृश्यते ॥ २८ ॥
रज्जुबद्धो यथा श्येनो गतोऽप्याकृष्यते पुनः ।
गुणबद्धस्तथा जीवः प्राणापानेन कर्षति ॥ २९ ॥
प्राणापानवशो जीवो ह्यधश्चोर्ध्वं च गच्छति ।
अपानः कर्षति प्राणं प्राणोऽपानेन कर्षति ॥ ३० ॥
ऊर्ध्वाधःसंस्थितावेतौ यो जानाति स योगवित् ।

प्राणचलनाचलनसापेक्षं जीवचलनाचलनमित्याह—आक्षिप्त इति ॥ २७ ॥ तदेव विशदयति—प्राणेति ॥ २८–३० ॥

[1] यथा च— क, अ १, अ २. [2] गच्छति—उ.

अजपागायत्र्या अनुसन्धानम्

हकारेण बहिर्याति सकारेण विशेत्पुनः ॥ ३१ ॥
हंसहंसेत्यमुं मन्त्रं जीवो जपति सर्वदा ।
षट्शतानि दिवा[1]रात्रौ सहस्राण्येकविंशतिः ॥ ३२ ॥
एतत्संख्यान्वितं मन्त्रं जीवो जपति सर्वदा ।
अजपा नाम गायत्री योगिनां मोक्षदा सदा ॥ ३३ ॥
अस्याः संकल्पमात्रेण सर्वपापैः प्रमुच्यते ।
अनया सदृशी विद्या अनया सदृशो जपः ॥ ३४ ॥
अनया सदृशं ज्ञानं न भूतं न भविष्यति ।
कुण्डलिन्यां समुद्भूता गायत्री प्राणधारिणी ॥ ३५ ॥
प्राणविद्या महाविद्या यस्तां वेत्ति स वेदवित् ।

प्राणापानोच्छ्वासादिव्यापृतिरेव हंसमनुः अजपागायत्री जीवनिर्वर्त्या भवतीति अजपेयत्तां तज्ज्ञानफलं चाह—हकारेणेति ॥ ३१–३३ ॥ उच्छ्वासनिःश्वासयोः हंसः सोऽहमित्यजपाऽनुसन्धानेन जीवः **सर्वपापैः प्रमुच्यते** । अजपां स्तौति—अनयेति ॥ ३४ ॥ अजपा कुण्डलिनीजन्येति ज्ञानफलमाह—कुण्डलिन्यामिति ॥ ३५ ॥

कुण्डलिन्या मोक्षद्वारभेदनम्

कन्दोर्ध्वे कुण्डलीशक्तिरष्टधा कुण्डलाकृतिः ॥ ३६ ॥
ब्रह्मद्वारमुखं नित्यं मुखेनाच्छाद्य तिष्ठति ।
येन द्वारेण गन्तव्यं ब्रह्म[2]द्वारमनामयम् ॥ ३७ ॥

[1] रात्रं—क, अ २. [2] द्वारं मनो—अ २.

मुखेनाच्छाद्य तद्द्वारं प्रसुप्ता परमेश्वरी ।
प्रबुद्धा वह्नियोगेन मनसा मरुता सह ॥ ३८ ॥
सूचीवद्गात्रमादाय व्रजत्यूर्ध्वं सुषुम्नया ।
उद्घाटयेत्कवाटं तु [1]यथा कुञ्चिकया गृहम् ।
कुण्डलिन्या तथा योगी मोक्षद्वारं प्रभेदयेत् ॥ ३९ ॥
कृत्वा संपुटितौ करौ दृढतरं [2]बद्धोऽथ पद्मासनं
गाढं वक्षसि संनिधाय चुबुकं ध्यानं च तच्चेष्टितम् ।
वारंवारमपानमूर्ध्वमनिलं प्रोच्चा[3]रयेत्पूरितं
मुञ्चन्प्राणमुपैति बोधमतुलं शक्तिप्रभावान्नरः ॥ ४० ॥
अङ्गानां मर्दनं कृत्वा श्रमसंजातवारिणा ।
कट्वम्ललवणत्यागी क्षीरभोजनमाचरेत् ॥ ४१ ॥
ब्रह्मचारी मिताहारी योगी योगपरायणः ।
अब्दादूर्ध्वं भवेत्सिद्धो नात्र कार्या विचारणा ॥ ४२ ॥
सुस्निग्धमधुरा[4]हारश्चतुर्थां[5]शावशेषितः ।
भुञ्जते शिवसंप्रीत्या मिता[6]हारी स उच्यते ॥ ४३ ॥
कन्दोर्ध्वे कुण्डलीशक्तिरष्टधा कुण्डलाकृतिः ।
बन्धनाय च मूढानां योगिनां मोक्षदा सदा ॥ ४४ ॥

[1] यदा—क, अ १.
[2] बद्धा तु—क, अ १, अ २.
[3] रितं—क. रयन्—अ २.
[4] हारं च—अ १.
[5] शविवर्जितः—क, अ २. शावशेषितं—अ १.
[6] हारः—क, अ २.

सर्वप्राण्याधारकुण्डलिनीस्वरूपं तद्व्याप्तिं चाह—कन्देति ॥ ३६ ॥ सुषुम्नाख्यं ब्रह्मद्वारमुखम् ॥ ३७ ॥ अयोगिनां मूलाधारप्रदेशे-प्रसुप्ता । योगिनां योगकाले प्रबुद्धा ॥ ३८ ॥ यतः इयं मोक्षद्वारभेदनपटुः अतः कुञ्चिकया देवालयकवाटमिव योगी तया मोक्षद्वारं विभेदयेदित्याह—उद्घाटयेदिति ॥ ३९ ॥ तद्भेदनोपायं तत्फलं चाह—कृत्वेति । नरो योगी स्वहृदयसमं स्वकरौ सम्पुटितौ कृत्वा पद्मासनं बद्ध्वा गाढं वक्षसि सन्निधाय चुबुकं कण्ठसङ्कोचलक्षणजालन्धरबन्धमारोप्य मूलबन्धेन वारंवारं अपानं ऊर्ध्वं अनिलपूरितं प्रोद्धारयेत् ऊर्ध्वं प्राणेनैक्यं नयेत् । ऐक्यानन्तरं केवल-कुम्भकमास्थाय कुण्डलिनीशक्तिप्रभावात् तत्कुण्डलिनीचेष्टितं प्राणादिव्यापारं मुञ्चन् शरीरत्रयकलनाविरळं ब्रह्मास्मीति मननं ध्यानं च कृत्वा सम्यक् प्रबोधमेत्य तत्समकालं प्राणं परमात्मानं उपैति ॥ ४० ॥ एवं साधनानुष्ठानवान् योगी अचिरात् सिद्धो भवतीत्याह—अङ्गानामिति । यद्यभ्यासकाले स्वेदो जायते तदा अङ्गानां . . . वारिणा दृढकायो भवेदित्यर्थः । योगानुकूलाहार-नियममाह—कट्विति ॥ ४१–४३ ॥ अयोगियोगिनां इयं शक्तिः बन्धमोक्षहेतुः स्यादित्याह—कन्देति । कन्दाधोभागे यदि स्थिता तदा बन्धनाय । यदि सुषुम्नामार्गेण कन्दोर्ध्वमार्गं गता तदा योगिनां मोक्षदा ॥ ४४ ॥

बन्धत्रयम्

महामुद्रा नभोमुद्रा [1]ओड्याणं च जलन्धरम् ।
मूलबन्धं च यो वेत्ति स योगी मुक्तिभाजनम् ॥ ४५ ॥
पार्ष्णिघातेन संपीड्य योनिमाकुञ्चयेद्दृढम् ।
अपानमूर्ध्वमाकृष्य मूलबन्धो [2]यमुच्यते ॥ ४६ ॥

[1] ड्डीयाण—क, अ १, अ २. [2] विधीयते—क, अ १, अ २.

अपानप्राणयोरैक्यं क्षयान्मूत्रपुरीषयोः ।
युवा भवति [1]वृद्धोऽपि सततं मूलबन्धनात् ॥ ४७ ॥

ओड्याणं कुरुते यस्मादविश्रान्तं महाखगः ।
ओड्डियाणं तदेव स्यान्मृत्युमातङ्गकेसरी ॥ ४८ ॥

उदरात्पश्चिमं ताणमधोनाभेर्निगद्यते ।
ओड्याणमुदरे बन्धस्तत्र बन्धो विधीयते ॥ ४९ ॥

बध्नाति हि शिरोजातमधोगामि नभोजलम् ।
ततो जालन्धरो बन्धः कण्ठदुःखौघनाशनः ॥ ५० ॥

जालन्धरे कृते बन्धे कण्ठ[2]दुःखौघनाशने ।
न पीयूषं पतत्यग्नौ न च वायुः प्रधावति ॥ ५१ ॥

वक्ष्यमाणमहामुद्राऽऽदिज्ञानतो मुक्तिभाक् भवतीत्याह—महामुद्रेति ॥ ४५ ॥ मूलबन्धादिलक्षणमाह—पार्ष्णीति ॥ ४६ ॥ तत्फलमेतत्—अपानेति ॥ ४७–५२ ॥

खेचरीमुद्रा

कपालकुहरे जिह्वा प्रविष्टा विपरीतगा ।
भ्रुवोरन्तर्गता दृष्टिर्मुद्रा भवति खेचरी ॥ ५२ ॥

न रोगो मरणं तस्य न निद्रा न क्षुधा तृषा ।
न च मूर्छा भवेत्तस्य यो मुद्रां वेत्ति खेचरीम् ॥ ५३ ॥

[1] वृद्धो वा—उ, उ १. [2] संकोचलक्षणे—क, अ १, अ २.

पीड्यते न च रोगेण लिप्यते न स कर्मभिः ।
[1]बध्यते न च केनापि यो मुद्रां वेत्ति खेचरीम् ॥ ९४ ॥
चित्तं चरति खे यस्माज्जिह्वा चरति खे यतः ।
तेनेयं खेचरी मुद्रा सर्वसिद्धनमस्कृता ॥ ९५ ॥
बिन्दुमूलशरीराणि सिरा[2]यत्र प्रतिष्ठिताः ।
भावयन्ति शरीराणि आपादतलमस्तकम् ॥ ९६ ॥
खेचर्या मुद्रितं येन विवरं लम्बिकोर्ध्वतः ।
न तस्य क्षीयते बिन्दुः कामिन्यालिङ्गितस्य च ॥ ९७ ॥
यावद्बिन्दुः स्थितो देहे तावन्मृत्युभयं कुतः ।
यावद्बद्धा नभोमुद्रा तावद्बिन्दुर्न गच्छति ॥ ९८ ॥

तत्फलमेतत् न रोग इति ॥ ९३–९९ ॥ खेचरीमुद्रारूढाः योगिनः शरीरे सर्वं पश्यन्तीत्याह—बिन्दिति । सिरशब्देन नाड्यः उच्यन्ते । तदुपलक्षितचतुर्दशभुवनानि यत्र प्रतिष्ठितानि तद्बिन्दुः ईश्वरः एव मूलं येषां अनन्तकोटिब्रह्माण्डानां तानि बिन्दुमूलानि तानि च शरीराणि अनन्तकोटि-ब्रह्माण्डानि खेचरीमुद्रारूढयोगिनः स्वाधिष्ठितापादतलमस्तकं स्वशरीरं भावयन्ति महाविराड्भावं नयन्तीत्यर्थः ॥ ९६ ॥ किंच—खेचर्येति ॥ ९७ ॥ नभोमुद्रा खेचरीत्यर्थः ॥ ९८ ॥

वज्रोळ्यादियोगिलक्षणम्

ज्वलितोऽपि यथा बिन्दुः संप्राप्तश्च हुताशनम् ।
व्रजत्यूर्ध्वं गतः शक्त्या निरुद्धो योनिमुद्रया ॥ ९९ ॥

[1] बाध्यते—क, अ १, अ २. [2] स्तत्र—अ १.

स पुनर्द्विविधो बिन्दुः पाण्डरो लोहितस्तथा ।
पाण्डरं शुक्लमित्याहुर्लोहिताख्यं महारजः ॥ ६० ॥
सिन्दूरव्रातसंकाशं रविस्थानस्थितं रजः ।
शशिस्थानस्थितं शुक्लं तयोरैक्यं सुदुर्लभम् ॥ ६१ ॥
बिन्दुर्ब्रह्मा रजः शक्तिर्बिन्दुरिन्दू रजो रविः ।
उभयोः सङ्गमादेव प्राप्यते परमं पदम् ॥ ६२ ॥
वायुना शक्तिचालेन प्रेरितं च यथा रजः ।
याति बिन्दुः सदैकत्वं भवेद्दिव्यवपुस्तदा ॥ ६३ ॥
शुक्लं चन्द्रेण संयुक्तं रजः [1]सूर्यसमन्वितम् ।
तयोः समरसैकत्वं यो जानाति स योगवित् ॥ ६४ ॥

वज्रोळ्यादियोगिलक्षणमाह—ज्वलितोऽपीति । यथा लोहद्रावकबिन्दुः लोहसान्निध्यात् ज्वलति तथाऽयं बिन्दुः योषित्सान्निध्यात् ज्वलितोऽपि पुरुषेण हुतं रेतः अश्नातीति हुताशनं योषिद्योनिमण्डलं संप्राप्तोऽपि लिंगाकुञ्चनलक्षणया योनिमुद्रया शक्त्या यथाबलं निरुद्धः सन् ऊर्ध्वमेव व्रजति नाधः पततीत्यर्थः । अस्यामरोळियोगसिद्धत्वात् तद्बिन्दुः कदाऽपि न क्षरतीति भावः ॥ ५९–६० ॥ भ्रूमण्डलोर्ध्ववामदक्षिणभागयोः रविशशिस्थाने भवतः । रजःशुक्लरूपयोः सूर्याचन्द्रमसोः ऐक्यं योगिनो विना यस्य कस्यापि दुर्लभमित्यर्थः ॥ ६१ ॥ किञ्च—बिन्दुरिति ॥ ६२ ॥ केन रवीन्दोरैक्यं, तेन किं जायते इत्यत आह—वायुनेति । यथा स्वशक्तिचालेन प्रचण्डवायुना प्रेरितं सद्रजो रविनैकत्वमायाति तथा वायुना सह कुण्डलिनीशक्तिचालेन प्रेरितं शशिमण्डलस्थं रजः, बिन्दुरिति तृतीयार्थे प्रथमा, बिन्दुना रविणा सदा एकत्वं

[1] सूर्येण संगतं—क, अ १, अ २.

याति । यदा सूर्याचन्द्रमसोरैक्यं भवति तदा अयं योगी दिव्यवपुः भवेत् ॥ ६३–६४ ॥

महामुद्रा

शोधनं नाडिजालस्य चालनं चन्द्रसूर्ययोः ।
रसानां शोषणं चैव महामुद्राऽभिधीयते ॥ ६५ ॥
वक्षोन्यस्तहनुः प्रपीड्य सुचिरं योनिं च वामाङ्घ्रिणा
हस्ताभ्यामनुधारयन्प्रसरितं पादं तथा दक्षिणम् ।
आपूर्य श्वसनेन कुक्षियुगलं बद्ध्वा शनै रेचये-
देतद्व्याधिविनाशिनी सुमहती मुद्रा नृणां प्रोच्यते ॥ ६६ ॥
चन्द्रांशेन समभ्यस्य सूर्यांशेनाभ्यसेत्पुनः ।
या तुल्या तु भवेत्संख्या ततो मुद्रां विसर्जयेत् ॥ ६७ ॥
नहि पथ्यमपथ्यं वा रसाः सर्वेऽपि नीरसाः ।
अतिमुक्तं विषं घोरं पीयूषमिव जीर्यते ॥ ६८ ॥
क्षयकुष्ठगुदावर्तगुल्माजीर्णपुरोगमाः ।
तस्य रोगाः क्षयं यान्ति महामुद्रां तु योऽभ्यसेत् ॥ ६९ ॥
कथितेयं महामुद्रा महासिद्धिकरी नृणाम् ।
गोपनीया प्रयत्नेन न देया यस्य कस्यचित् ॥ ७० ॥

महामुद्रास्वरूपं तत्फलं चाह—शोधनमिति । यन्नाडीशुद्धिकरं चन्द्र-सूर्ययोरपि चालकं शरीरस्थदुष्टवातपित्तादिरसानां शोषणकरं भवति तदेव महामुद्रेत्यभिधीयते ॥ ६५ ॥ तदभ्यासप्रकारस्तु—आदौ जालन्धरबन्ध-

मारोप्य वामपादतलेन योनिं निपीड्य बहिः प्रसारितदक्षिणचरणं हस्ताभ्यां धारयन् चन्द्रनाडीसमुद्भवश्वसनेन वामदक्षिणकुक्षियुगळमापूर्य निरुच्छ्वासं बद्ध्वा कुम्भकान्ते पिंगळया शनैरेव रेचयेदिति यदेतत् सैषा नृणां सर्वव्याधिविनाशिनी महामुद्रा भवति ॥ ६६ ॥ एवं चन्द्रांशेनेति ॥ ६७–७० ॥

प्रणवजपः

पद्मासनं समारुह्य समकायशिरोधरः ।
नासाग्रदृष्टिरेकान्ते जपेदोंकारमव्ययम् ॥ ७१ ॥

एवं महामुद्रामभ्यस्य ततो यथोक्तविधिना प्रणवार्थानुसन्धानपूर्वकं प्रणवं सदा जपेदित्याह—पद्मेति ॥ ७१ ॥

प्रणवार्थरूपं ब्रह्म

ॐ नित्यं शुद्धं बुद्धं निर्विकल्पं निरञ्जनं निराख्यातमनादिनिधनमेकं तुरीयं यद्भूतं भवद्भविष्यत् परिवर्तमानं सर्वदाऽनवच्छिन्नं परं ब्रह्म । तस्माज्जाता परा शक्तिः स्वयं ज्योतिरात्मिका । आत्मन आकाशः संभूतः । आकाशाद्वायुः । वायोरग्निः । अग्नेरापः । अद्भ्यः पृथिवी । तेषां पञ्चभूतानां पतयः पञ्च सदाशिवेश्वररुद्रविष्णुब्रह्माणश्चेति । तेषां ब्रह्मविष्णुरुद्राश्चोत्पत्तिस्थितिलयकर्तारः । राजसो ब्रह्मा सात्त्विको विष्णुस्तामसो रुद्र इति । एते त्रयो गुणयुक्ताः । ब्रह्मा देवानां प्रथमः संबभूव । धाता च सृष्टौ विष्णुश्च स्थितौ रुद्रश्च नाशे भोगाय चेन्द्रः प्रथमजा बभूवुः । एतेषां ब्रह्मणो लोका देवतिर्यङ्नरस्थावराश्च जायन्ते । तेषां मनुष्यादीनां

पञ्चभूतसमवायः शरीरम् । ज्ञानकर्मेन्द्रियैर्ज्ञानविषयैः प्राणादि-पञ्चवायुमनोबुद्धिचित्ताहंकारैः स्थूलकल्पितैः सोऽपि स्थूलप्रकृतिरित्युच्यते । ज्ञानकर्मेन्द्रियैर्ज्ञानविषयैः प्राणादिपञ्चवायुमनोबुद्धिभिश्च सूक्ष्मस्थोऽपि लिङ्गमेवेत्युच्यते । गुणत्रययुक्तं कारणम् । सर्वेषा[1]मेवं त्रीणि शरीराणि वर्तन्ते । जाग्रत्स्वप्नसुषुप्तितुरीयाश्चेत्यवस्थाश्चतस्रः । तासामवस्थानामधिपतयश्चत्वारः पुरुषा विश्वतैजसप्राज्ञात्मानश्चेति ॥

विश्वो हि स्थूलभुङ्नित्यं तैजसः प्रविविक्तभुक् ।
आनन्दभुक्तथा प्राज्ञः सर्वमाक्षीत्यतः परः ॥ ७२ ॥
प्रणवः सर्वदा तिष्ठेत्सर्वजीवेषु भोगतः ।
अभिरामस्तु सर्वासु ह्यवस्थासु ह्यधोमुखः ॥ ७३ ॥

ओङ्कारार्थश्चैतन्यं किमित्यत्र ब्रह्मेत्याह—ओमिति । नित्यशुद्धादिपदानां नृसिंहतापिन्यां पदशो व्याख्यातत्वात् । भूतमिति भूतादिकालत्रयेऽपि स्वयं एकरूपेणावस्थितं, उत्पत्तिप्रळयवैरळ्यादनादिनिधनं, अनवच्छिन्नं परिच्छेदरहितं यत् तदेव प्रणवार्थश्चैतन्यं ब्रह्मेत्यर्थः । ब्रह्मणो निष्प्रतियोगिकस्वमात्रत्वे अव्यक्तादिस्थावरान्तसृष्टिः कुतः ? इत्याशङ्क्य तदज्ञानादेतत् सर्वं तस्मात् जातवत् भातीत्याह—तस्मादिति । स्वाज्ञदृष्ट्या यन्निर्विशेषं ब्रह्म निष्प्रतियोगिकस्वमात्रं तस्मान्निर्विशेषब्रह्मणः सकाशात् चित्सामान्यात्मिका परा शक्तिः स्वागेपापवादाधिकरणसान्निध्यात् स्वयंज्योतिरात्मिका जातेव जाता न वस्तुत इत्यर्थः । एवं स्वाज्ञदृष्टिविकल्पिताव्यक्तमहत्तत्त्वोपाधिकात् आत्मनः । एवं आत्मनः सकाशात् क्रमेण पञ्चभूतानि जातानि, तेषां इत्यादि । सृष्ट्यादिकर्तृत्वं गुणत्रययोगनिमित्तं तत् कथं? राजस इति । सृष्ट्यादिकर्तारो ब्रह्मादयः

[1] मेव—अ १, अ २.

प्रथमजपदं गता इत्याह—ब्रह्मेति । "सदेव सोम्येदमग्र आसीत्", "हिरण्यगर्भः समवर्तताग्रे," इति श्रुतेः । तत्र धातेत्यादि । यदेकमेवाग्रे सच्चैतन्यं समवर्तत तदेव सृष्ट्यादिकार्यभेदानुरोधेन ब्रह्मविष्णुरुद्रेन्द्रतां प्राप्तवत् भातीति तेषां प्रथमजत्वं उक्तमित्यर्थः । एतेषां मध्ये ब्रह्मण इत्यादि । ब्रह्मणः सकाशात् भूरादिचतुर्दशलोकाः तन्निवासिनो देवतिर्यङ्नराः तद्भोज्यतया स्थावराश्च स्थावराणि च जायन्ते । तेषां शरीरं भौतिकमित्याह—तेषामिति । शरीरं भवति । जाग्रदाद्यवस्थारूढजीवापेक्षया तत्तदवस्थाऽनुरोधेन शरीरत्रयं प्रदर्शयति —ज्ञानेति । विषयैः सह स्थूलकल्पितैः पञ्चीकृतभूतकार्यैः यो विशिष्टः सोऽपि जीवः । जाग्रदवस्थाभिमानिस्थूलशरीरोपाधिको विश्व इत्यर्थः । तैजसभोग्यलिंगशरीरमाह—ज्ञानेति । अपञ्चीकृतभूतकार्यैः ज्ञान . . . विषयैः सह प्राणादि . . . बुद्धिभिश्च युक्तस्तैजसः स्वप्नावस्थायां सूक्ष्मस्थोऽपि सूक्ष्मशरीर-स्थोऽपि तदभेदेन अयं लिङ्गमेवेत्युच्यते । स्वापाभिमानिप्राज्ञनिर्वर्त्यं यत् तत् गुणत्रययुक्तं कारणं कारणशरीरं भवति । विश्वादित्रयस्य स्थूलादिभुक्त्वं तुरीयस्य तद्राहित्यं चाह—विश्व इति ॥ ७२ ॥ तुर्यप्रणवस्य सर्वव्यापकत्वमाह—प्रणव इति । प्रणवः तुरीयोङ्कारस्तुरीयः साक्षी स्थूलप्रविभक्तादिभोगाभिमानतः विश्वादिभावं गतेषु सर्वजीवेषु सर्वदा प्रत्यग्रूपेण तिष्ठेत् । अभितः परितो राजते महीयते इत्यभिरामः । तुरीयस्तु सर्वासु जाग्रदाद्यवस्थासु मिथ्यात्वदृष्ट्या अधोमुखः पराङ्मुखः उदासीनो भवति, विश्वादिवत् जाग्रदादिसम्मुखो न कदाऽपि भवतीत्यर्थः ॥ ७३ ॥

प्रणवावयवानां प्रत्येकमर्थः

अकार उकारो मकारश्चेति त्रयो वर्णास्त्रयो वेदास्त्रयो लोकास्त्रयो गुणास्त्रयोऽक्षराणि एवं प्रणवः प्रकाशते ।

अकारो [1]जाग्रति नेत्रे वर्तते सर्वजन्तुषु ।
उकारः कण्ठतः स्वप्ने मकारो हृदि सुप्तितः ॥ ७४ ॥

[1] जग्रती—क, अ २.

विराड्विश्वः स्थूलश्चाकारः । हिरण्यगर्भस्तैजसः सूक्ष्मश्च उकारः । कारणाव्याकृतप्राज्ञश्च मकारः ।

अकारो राजसो रक्तो ब्रह्मा चेतन उच्यते ।
उकारः सात्त्विकः शुक्लो विष्णुरित्यभिधीयते ॥ ७५ ॥
मकारस्तामसः कृष्णो रुद्रश्चेति तथोच्यते ।
प्रणवात्प्रभवो ब्रह्मा प्रणवात्प्रभवो हरिः ॥ ७६ ॥
प्रणवात्प्रभवो रुद्रः प्रणवो हि परो भवेत् ।
अकारे लीयते ब्रह्मा [1]उकारे लीयते हरिः ॥ ७७ ॥
मकारे लीयते रुद्रः प्रणवो हि प्रकाशते ।

स्वातिरिक्तप्रपञ्चजातं प्रणवावयवसम्भूतमित्याह—अकार इति । त्रयः त्रीणि अक्षराणि । एवं वस्तुतः सदा प्रणवः प्रकाशते कथमकारादीनां सर्वव्यापकत्वमित्यत्र—अकार इति ॥ ७४–७५ ॥ ब्रह्माद्यारोपापवादाधारस्तुरीयोङ्कार एवेत्याह—प्रणवादिति ॥ ७६ ॥ रुद्रः, ततः प्रणवः ॥ ७७ ॥

तुरीयोङ्काराग्रविद्योतब्रह्म

ज्ञानिनामूर्ध्वगो भूयादज्ञा[2]नीनामधोमुखः ॥ ७८ ॥
एवं वै प्रणवस्तिष्ठेद्यस्तं वेद स वेदवित् ।
अनाहतस्वरूपेण ज्ञानिनामूर्ध्वगो भवेत् ॥ ७९ ॥
तैलधारामिवाच्छिन्नं दीर्घघण्टानिनादवत् ।
प्रणवस्य ध्वनिस्तद्वत्तदग्रं ब्रह्म चोच्यते ॥ ८० ॥

[1] ङुकारे—क, अ १. [2] ने स्यादधो—मु.

ज्योतिर्मयं तदग्रं स्यादवाच्यं बुद्धिसूक्ष्मतः ।
ददृशुर्ये महात्मानो यस्तं वेद स वेदवित् ॥ ८१ ॥

स्वज्ञस्वाज्ञदृष्ट्या ऊर्ध्वाधोमुखतया प्रणव एव प्रकाशत इति यो वेद स वेदवित् भवतीत्याह—ज्ञानिनामिति । ज्ञानिदृष्ट्या अनाहतविलसत्प्रत्यगभिन्नब्रह्मरूपेण तुरीयोङ्कारात्रविद्योतब्रह्ममात्रतया सर्वोर्ध्वं प्रणवो विभाति, अज्ञानामधोमुखाकारादितया विभातीत्यर्थः ॥ ७८–७९ ॥ किंच—तैलेति ॥ ८०–८१ ॥

प्रणवार्थतुरीयहंसः

जाग्रन्नेत्रद्वयोर्मध्ये हंस एव प्रकाशते ।
सकारः खेचरी प्रोक्तस्त्वंपदं चेति निश्चितम् ॥ ८२ ॥
हकारः परमेशः स्यात्तत्पदं चेति निश्चितम् ।
सकारो ध्यायते जन्तुर्हकारो हि भवेद् ध्रुवम् ॥ ८३ ॥
इन्द्रियैर्बध्यते जीव आत्मा चैव न बध्यते ।
ममत्वेन भवेज्जीवो निर्ममत्वेन केवलः ॥ ८४ ॥

प्रणवार्थतुरीयहंसः क्व आसनमासाद्य प्रकाशते इत्यत आह—जाग्रदिति । "नेत्रस्थं जागरितं विद्यात्" इति श्रुतितः नेत्रजागरणयोः आधाराधेयता श्रूयते । एवं आधाराधेयात्मकजाग्रन्नेत्रद्वययोः मध्ये तदारोपापवादाधिकरणतया हंसः प्रत्यगभिन्नपरमात्मैव प्रकाशते । हंसस्य प्रत्यक्त्वं परत्वं तयोः ऐक्यसिद्धत्वं वा कुत इत्यत आह—सकार इति । सर्वप्राणिहृदये विद्यमाने खे अव्याकृताकाशे तत्रत्यपराग्रूपलिंगशरीरप्रातिलोम्येन चरतीति खेचरी सकार इति प्रोक्तः सकारस्य खेचरीबीजत्वात्, "सत्वंपदार्थः" इति प्रभोक्तेः । अतः सकारबीजं त्वंपदार्थप्रत्यक्चैतन्यमिति निश्चितम् ॥ ८२ ॥ हकारार्थः परमेशः परमात्मा स्यात् । अतः हकारबीजार्थभूतं तत्पदलक्ष्यपरमात्मचैतन्यमिति

निश्चितम् । एवं सकारवाच्यो जन्तुः जीवः स्वगतजीवत्वमपास्य सोऽहंशब्दलक्ष्यप्रत्यगभिन्नपरमात्माऽस्मीति यद्यात्मानं ध्यायते जानाति तदा हकारार्थः परमात्मैव भवेदिति यत् तत् ध्रुवं सत्यं इत्यर्थः, "ब्रह्म वेद ब्रह्मैव भवति" इति श्रुतेः ॥ ८३ ॥ देहेन्द्रियादौ अहंममाभिमानभावाभावौ जीवपर भेदाभेदहेतू भवत इत्याह—इन्द्रियैरिति ॥ ८४ ॥

केवलात्मप्रकाशकप्रणवजपः

भूर्भुवः स्वरिमे लोकाः सोमसूर्याग्निदेवताः ।
यस्य मात्रासु तिष्ठन्ति तत्परं ज्योतिरोमिति ॥ ८५ ॥
इच्छा क्रिया तथा ज्ञानं ब्राह्मी रौद्री च वैष्णवी ।
त्रिधा मात्रा[1]स्थितिर्यत्र तत्परं ज्योतिरोमिति ॥ ८६ ॥
वचसा तज्जपेन्नित्यं वपुषा तत्समभ्यसेत् ।
मनसा तज्जपेन्नित्यं तत्परं ज्योतिरोमिति ॥ ८७ ॥
शुचिर्वाऽप्यशुचिर्वाऽपि यो जपेत्प्रणवं सदा ।
न स लिप्यति पापेन पद्मपत्रमिवाम्भसा ॥ ८८ ॥

केवलात्मप्रकाशकप्रणवस्वरूपं निर्दिशति—भूरिति ॥ ८५–८६ ॥ सन्तो यदनुसन्धानतः कृतकृत्या भवन्ति तदेव प्रणवार्थपरंज्योतिरित्याह—वचसेति ॥ ८७ ॥ प्रणवजपस्य शुच्यादिनियमाभावप्रकटनपूर्वकं तत्फलमाह—शुचिरिति ॥ ८८ ॥

प्रणवानुष्ठायिनोऽपि प्राणजय आवश्यकः

चले वाते चलो बिन्दुर्निश्चले निश्चलो भवेत् ।
योगी स्थाणुत्वमाप्नोति ततो वायुं निरुन्धयेत् ॥ ८९ ॥

[1] स्थिताय—अ १, अ २.

यावद्वायुः स्थितो देहे तावज्जीवो न मृच्छति ।
मरणं तस्य निष्क्रान्तिस्ततो [1]वायुं निरुन्धयेत् ॥ ९० ॥
यावद्बद्धो मरुत् देहे तावज्जीवो न मृच्छति ।
यावद्दृष्टिर्भ्रुवोर्मध्ये तावत्कालभयं कुतः ॥ ९१ ॥
अल्पकालभयाद्ब्रह्मा प्राणायामपरो भवेत् ।
योगिनो मुनयश्चैव ततः प्राणान्निरोधयेत् ॥ ९२ ॥

प्रणवानुष्ठानेन पुरुषार्थसिद्धेः किं प्राणजयेनेत्याशङ्क्य बिन्दुप्राणयो अन्योन्याश्रयतः जीवनहेतुबिन्दुजयार्थं प्राणजयः कर्तव्य इत्याह—चल इति ॥ ८९–९१ ॥ अत एव ब्रह्मादयोऽपि प्राणायामपरा भवन्तीत्याह— अल्पेति । यतः प्राणायामपरा भवन्ति ततः तस्मात् ॥ ९२ ॥

नाडीशुद्धितः प्राणायामसिद्धिः

षड्विंशदङ्गुली[2]र्हंसः प्रयाणं कुरुते बहिः ।
वामदक्षिणमार्गेण प्राणायामो विधीयते ॥ ९३ ॥
शुद्धिमेति यदा सर्वं नाडीचक्रं मलाकुलम् ।
तदैव जायते योगी प्राणसंग्रहणक्षमः ॥ ९४ ॥

प्राणगतिनिरोधनमेव प्राणायाम इत्याह— षड्विंशदिति । इडापिंगळमार्गमाश्रित्य बहिः षड्विंशत्यंगुलपर्यन्तं प्राणः प्रसरति, तद्गतिकुण्ठनाय प्राणायामो विधीयते इत्यर्थः ॥ ९३ ॥ नाडीशुद्ध्यनन्तरं केवलकुम्भकशक्तिः भवतीत्याह—शुद्धिमिति ॥ ९४ ॥

[1] ह्यायुर्नि—उ. [2] हंसः—क, अ १, अ २, उ १.

प्राणायामलक्षणम्

बद्धपद्मासनो योगी प्राणं चन्द्रेण पूरयेत् ।
धारयेद्वा यथाशक्त्या भूयः सूर्येण रेचयेत् ॥ ९५ ॥
अमृतोदधिसंकाशं गोक्षीरधवलोपमम् ।
ध्यात्वा चन्द्र[1]मसं बिम्बं प्राणायामे सुखी भवेत् ॥ ९६ ॥
स्फुरत्प्रज्वलसज्ज्वालापूज्यमादित्यमण्डलम् ।
ध्यात्वा हृदि स्थितं योगी प्राणायामे सुखी भवेत् ॥ ९७ ॥

प्राणायामलक्षणं तत्र ध्येयबिम्बद्वयं चाह—बद्धेति ॥ ९५–९७ ॥

नाडीशोधनम्

प्राणं चेदिडया पिबेन्नियमितं भूयोऽन्यथा रेचयेत्
पीत्वा पिङ्गलया समीरणमथो [2]बद्ध्वा त्यजेद्वामया ।
सूर्याचन्द्रमसोरनेन विधिना बिन्दुद्वयं ध्यायतः
शुद्धा नाडिगणा भवन्ति यमिनो मासद्वयादूर्ध्वतः ॥ ९८ ॥
यथेष्ट[3]धारणं वायोरनलस्य प्रदीपनम् ।
नादाभिव्यक्तिरारोग्यं जायते नाडिशोधनात् ॥ ९९ ॥

नाडीशुद्ध्युपायमाह—प्राणमिति ॥ ९८ ॥ तत्फलं—यथेष्टेति ॥ ९९ ॥

मात्रानियमपूर्वकः प्राणायामः

प्राणो देहस्थितो यावदपानं तु निरुन्धयेत् ।
एकश्वासमयी मात्रा [4]ऊर्ध्वाधो गगने स्थितिः ॥ १०० ॥

[1] समं—उ १.
[2] पीत्वा जपेद्वा—अ १.
[3] धारणाद्वा—अ १.
[4] ऊर्ध्वयोर्गगने गतिः—अ १.

रेचकः पूरकश्चैव कुम्भकः प्रणवात्मकः ।
प्राणायामो भवेदेवं मात्राद्वादशसंयुतः ॥ १०१ ॥
मात्राद्वादशसंयुक्तौ निशाकरदिवाकरौ ।
दोषाजालमबध्नन्तौ ज्ञातव्यौ योगिभिः सदा ॥ १०२ ॥
पूरकं द्वादशं कुर्यात्कुम्भकं षोडशं भवेत् ।
रेचकं दश चोंकारः प्राणायामः स उच्यते ॥ १०३ ॥
अधमे द्वादशा मात्रा मध्यमे द्विगुणा मता ।
उत्तमे त्रिगुणा प्रोक्ता प्राणायामस्य निर्णयः ॥ १०४ ॥
अधमे स्वेदजननं कम्पो भवति मध्यमे ।
उत्तमे स्थानमाप्नोति ततो वायुं निरुन्धयेत् ॥ १०५ ॥
बद्धपद्मासनो योगी नमस्कृत्य गुरुं शिवम् ।
नासाग्रदृष्टिरेकाकी प्राणायामं समभ्यसेत् ॥ १०६ ॥
द्वाराणां नव संनिरुध्य मरुतं [1]बद्ध्वा दृढां धारणां
नीत्वा कालमपानवह्निसहितं शक्त्या समं चालितम् ।
आत्मध्यानयुतस्त्वनेन विधिना विन्यस्य मूर्ध्नि स्थिरं
यावत्तिष्ठति तावदेव महतां सङ्घो न संस्तूयते ॥ १०७ ॥
प्राणायामो भवेदेवं पातकेन्धनपावकः ।
भवोदधिमहासेतुः प्रोच्यते योगिभिः सदा ॥ १०८ ॥

मूलबन्धावधिं, मात्रालक्षणं, भंगयन्तरेण प्राणायामलक्षणं चाह—प्राण इति । सहजोच्छ्वासनिःश्वासकालो मात्राकाल इत्यर्थः ॥ १००–१०१ ॥

[1] लब्ध्वा—ड, मु.

योगिना द्वादशमात्राऽलङ्कारचन्द्रसूर्यौ ध्येयावित्याह—मात्रेति । अहोरात्रं द्वादशधा विभज्य पञ्चघटिकाकालो मात्राकालः । तत्संयुक्तौ निशाकरदिवाकरौ चन्द्रसूर्यनाडीभ्यां गमनागमनं कुर्वन्तौ । दोषाग्रहणमह्नश्चाप्युपलक्षणार्थम् । दोषाजालमबध्नन्तौ अहोरात्रमविश्रान्तौ योगिभिः आदौ ज्ञातव्यौ । चन्द्रसूर्यनाडीगतिं ज्ञात्वा यदा या नाडी प्रवहति तदा तया पूरकं निरुद्धया अन्यया रेचकं कुर्यात् । एवं कृते वायोः नाडीद्वयेऽपि प्राणस्य समगतिः स्यात् । ततः प्राणायामो निरायासेन भवेदिति भावः ॥ १०२ ॥ ततः पूरकं द्वादशं द्वादशमात्राकालं कुर्यात् । दश चोङ्कार इति दशमात्राकालः इत्यर्थः ॥ १०३ ॥ किंच—अधमे ॥ १०४–१०५ ॥ पद्मासनस्थो योगी आत्मध्यानयुतः सन् नवद्वारं सन्निरुध्य अपानवह्निसहितं कुण्डलिनीशक्त्या समं चालितं मारुतं बद्ध्वा मूलाधारादिषट्चक्रेषु क्रमात् नीत्वा अनेन विधिना कालं तुर्यात्मानं मूर्ध्नि सहस्रारचक्रे विन्यस्य स्थिरं सम्भाव्य यावन्मूर्ध्नि स्थिरं तिष्ठति तावदेव महतां सङ्गो न संस्तूयते मूर्ध्नि साक्षात्कृततुर्यतत्त्वस्य कृतकृत्यत्वेन नहि संगकांक्षा अस्ति । यावत्सहस्रारे तुर्यात्मानं न पश्यति तावन्महतां संगः स्तूयत इत्यर्थः ॥ १०६–१०७ ॥ प्राणायामं स्तौति—प्राणेति । महासेतुः इति प्रोच्यते ॥ १०८ ॥

योगाङ्गानां प्रत्येकं फलं तत्तारतम्यं च

आसनेन रुजं हन्ति प्राणायामेन पातकम् ।
विकारं मानसं योगी प्रत्याहारेण मुञ्चति ॥ १०९ ॥
धारणाभिर्मनोधैर्यं याति चैतन्यमद्भुतम् ।
समाधौ मोक्षमाप्नोति त्यक्त्वा कर्म शुभाशुभम् ॥ ११० ॥
प्राणायामद्विषट्केन प्रत्याहारः प्रकीर्तितः ।
प्रत्याहारद्विषट्केन जायते धारणा शुभा ॥ १११ ॥

धारणा द्वादश प्रोक्तं ध्यानं योगविशारदैः ।
ध्यानद्वादशकेनैव समाधिरभिधीयते ॥ ११२ ॥
[1]समाधौ परमं ज्योतिरनन्तं विश्वतोमुखम् ।
तस्मिन्दृष्टे क्रियाकर्म यातायातो न विद्यते ॥ ११३ ॥

प्रातिस्विकेन षडंगयोगफलमाह—आसनेनेति ॥ १०९ ॥ ध्यानेन याति ॥ ११० ॥ आसनजयापेक्षया प्राणायामादेः द्वादशगुणाधिक्यं दर्शयति—प्राणेति ॥ १११–११२ ॥ समाधिसिद्ध्यनन्तरं कृतकृत्यता स्यादित्याह—समाधाविति । विश्वतोमुखं ब्रह्म विजयते अयमहमस्मीति ॥ ११३ ॥

षण्मुखीमुद्राऽभ्यासेन नादाभिव्यक्तिः

संबद्धाऽऽसनमेढ्रमङ्घ्रियुगलं कर्णाक्षिनासापुट-
द्वारानङ्गुलिभिर्नियम्य पवनं वक्त्रेण वा पूरितम् ।
बद्धा वक्षसि बद्धपानसहितं मूर्ध्नि स्थितं धारये-
देवं याति विशेषतत्त्वसमतां योगीश्वरस्तन्मनाः ॥ ११४ ॥
गगनं पवने प्राप्ते ध्वनिरुत्पद्यते महान् ।
घण्टाऽऽदीनां प्रवाद्यानां नादसिद्धिरुदीरिता ॥ ११५ ॥

एवं समाधिः केन सिध्यतीत्यत्राह—संबद्धेति । योगी सम्यक् सिद्धासनं बद्धा मध्ये मेढ्रं तदधोर्ध्वं अंघ्रियुगळं च बद्धेत्यर्थः । षण्मुखीमुद्रया वक्त्रेण वायुमापूर्य बन्धत्रयपूर्वकं मूर्ध्नि सहस्रारे तुर्ये तुर्यातीते वा मनो धारयेत् । एवं धारणया योगीश्वरो विशेषतत्त्वसमतां अवशिष्टतत्त्वतुर्यातीतभावं यातीत्यर्थः ॥ ११४ ॥ षण्मुखीमुद्राऽभ्याससिद्धिः नादाभिव्यक्तिरित्याह—गगनमिति । हृदयावच्छिन्नाव्याकृतगगनम् ॥ ११५ ॥

[1] यत्समाधौ परं ज्योतिः—क, अ १, अ २.

प्राणाभ्यासः सर्वरोगनिरासकः

प्राणायामेन युक्तेन सर्वरोगक्षयो भवेत् ।
प्राणायामवियुक्तेभ्यः सर्वरोगसमुद्भवः ॥ ११६ ॥
हिक्का कासस्तथा श्वासः शिरःकर्णाक्षिवेदनाः ।
भवन्ति विविधा रोगाः पवनव्यत्ययक्रमात् ॥ ११७ ॥
यथा सिंहो गजो व्याघ्रो भवेद्वश्यः शनैः शनैः ।
तथैव सेवितो वायुरन्यथा हन्ति साधकम् ॥ ११८ ॥
युक्तंयुक्तं त्यजेद्वायुं युक्तंयुक्तं प्रपूरयेत् ।
युक्तंयुक्तं प्रबध्नीयादेवं सिद्धिमवाप्नुयात् ॥ ११९ ॥

विधिवत् प्राणाभ्यासः सर्वरोगनिरासकः विपरीते विपरीतफलदो भवतीत्याह —प्राणायामेनेति ॥ ११६–११७ ॥ यतः एवं अतः यथाशास्त्रं गुरूक्तप्रकारेण प्राणाभ्यासो विशिष्टफलदः इत्याह—यथेति । वायुः सिद्धकरो भवति ॥ ११८ ॥ अत एव युक्तमिति ॥ ११९ ॥

प्राणाभ्यासे इन्द्रियप्रत्याहार आवश्यकः

चरतां चक्षुरादीनां विषयेषु यथाक्रमम् ।
तत्प्रत्याहरणं तेषां प्रत्याहारः स उच्यते ॥ १२० ॥
यथा तृतीयकाले तु रविः प्रत्याहरेत्प्रभाम् ।
तृतीयाङ्गस्थितो योगी विकारं मानसं हरेत् ॥ १२१ ॥

इत्युपनिषत् ॥

इन्द्रियाणामिन्द्रियार्थपरवशतया स्थितत्वात् कथं अभ्याससिद्धिरित्यत्र तत्प्रत्याहरणादभ्यासः सफलो भवेदित्याह—चरतामिति ॥१२०॥ कथं प्रत्याहरणं

कर्तव्यं इत्यत्र सदृष्टान्तं तदाह—यथेति। यथा रविः तृतीयकाले सायाह्ने स्वप्रभां प्रत्याहरेत् तथा बाल्ययौवनकौमारभेदेन स्थूलसूक्ष्मकारणशरीरभेदेन तमोरजः-सत्वभेदेन व्रतिकामिवनिभेदेन वा तत्राप्यसंगतया तृतीयाङ्गस्थितो योगी सर्वापह्नवसिद्धं ब्रह्म निष्प्रतियोगिकस्वमात्रमिति बोधेन मानसं तद्विकारं सङ्कल्पादिं च हरेत् विलापयेत् अपह्नवं कुर्यादित्यर्थः। इत्युपनिषच्छब्दः योगचूडामण्युपनिषत्समाप्त्यर्थः॥ १२१॥

श्रीवासुदेवेन्द्रशिष्योपनिषद्ब्रह्मयोगिना।
लिखितं स्याद्विवरणं योगचूडामणेः स्फुटम्॥
चूडामणिविवरणमशीत्यधिशतद्वयम्॥

इति श्रीमदीशाद्यशोत्तरशतोपनिषच्छास्त्रविवरणे षट्चत्वारिंशत्संख्यापूरकं
योगचूडामण्युपनिषद्विवरणं सम्पूर्णम्

योगतत्त्वोपनिषत्

सह नाववतु--इति शान्तिः

अष्टाङ्गयोगजिज्ञासा

योगतत्त्वं प्रवक्ष्यामि योगिनां हितकाम्यया ।
यच्छ्रुत्वा च पठित्वा च सर्वपापैः प्रमुच्यते ॥ १ ॥
विष्णुर्नाम महायोगी महाभूतो महातपाः ।
तत्त्वमार्गे यथा दीपो दृश्यते पुरुषोत्तमः ॥ २ ॥
तमाराध्य जगन्नाथं प्रणिपत्य पितामहः ।
पप्रच्छ योगतत्त्वं मे ब्रूहि चाष्टाङ्गसंयुतम् ॥ ३ ॥

योगैश्वर्यं च कैवल्यं जायते यत्प्रसादतः ।
तद्वैष्णवं योगतत्त्वं रामचन्द्रपदं भजे ॥

इह खलु कृष्णयजुर्वेदप्रविभक्तेयं योगतत्त्वोपनिषत् मन्त्रलयराजयोगविशिष्टारम्भघटपरिचयनिष्पत्तिचैत्यावस्थोपेतयमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधितत्साधनबन्धत्रयमहामुद्राबन्धषेधखेचरीप्रकटनपूर्वकं ब्रह्ममात्रपर्यवसन्ना विराजते । अस्याः उपनिषदः संक्षेपतो विवरणमारभ्यते । सृष्टिस्थितिकर्तृब्रह्मविष्ण्वाख्यायिका तु विद्यास्तुत्यर्था । आदौ तावत्

वक्ष्यमाणयोगतत्त्वोपनिषच्छ्रवणपठनफलं प्रकटयति—योगतत्त्वमिति । प्रत्यक्परयोः योगः तत्त्वं प्रत्यक्परविभागैक्यासहं निष्प्रतियोगिकब्रह्ममात्रं यस्यां उपनिषदि प्रतिपाद्यते सेयं योगतत्त्वोपनिषत् । केवलं तच्छ्रवणपठनतः सर्वपापनिवृत्तिर्भवतीत्यर्थः ॥ १ ॥ एतद्विद्याऽऽचार्यस्वरूपं विशदयति—विष्णुरिति । तत्त्वज्ञानयोगमार्गे योगिभिः यथा दीपः तथा पुरुषोत्तमो विष्णुः दृश्यते साक्षात्क्रियत इत्यर्थः ॥ २ ॥ तं ब्रह्मा पृच्छतीत्याह—तमिति ॥ ३ ॥

योगतत्त्वस्य दुर्लभत्वम्

तमुवाच हृषीकेशो वक्ष्यामि शृणु तत्त्वतः ।
सर्वे जीवाः सुखैर्दुःखैर्मायाजालेन वेष्टिताः ॥ ४ ॥
तेषां मुक्तिकरं मार्गं मायाजालनिकृन्तनम् ।
जन्ममृत्युजराव्याधिनाशनं मुक्तितारकम् ॥ ५ ॥
नानामार्गैस्तु दुष्प्रापं कैवल्यं परमं पदम् ।
पतिताः शास्त्रजालेषु प्रज्ञया तेन मोहिताः ॥ ६ ॥
अनिर्वाच्यपदं वक्तुं न शक्यं तैः सुरैरपि ।
स्वात्मप्रकाशरूपं तत्किं शास्त्रेण प्रकाश्यते ॥ ७ ॥

एवं पृष्टो भगवान् प्रश्नोत्तरमाह—तमिति । स्ववक्तव्यरहस्यार्थस्य नानामार्गालङ्कारनानाशास्त्रतत्प्रवर्तकैरपि दुष्प्रापतामाह—सर्व इति । मायाजालेन वेष्टिताः मायातत्कार्यपटैः आवृताः इत्यर्थः ॥ ४–५ ॥ कैवल्यमार्गस्य ज्ञानेतरसाधनेन दुष्प्रापत्वे "नान्यः पन्था अयनाय विद्यते" इति श्रुतेः । शास्त्रजालमोहितैः यन्मयोच्यमानं तद्वक्तुं न शक्यमित्याह—पतिता इति । तेन स्वाज्ञानेन च मोहिताः ॥ ६ ॥ सूर्यादिघटान्ताः येन प्रकाश्यन्ते

येन वेदशास्त्राण्यर्थवन्ति तत् कदाऽपि शास्त्रप्रकाश्यं न भवति, ब्रह्मणः स्वप्रकाशमात्रत्वेन व्याविद्धपदवाक्यार्थत्वात् ॥ ७ ॥

परस्यैव जीवत्वम्

निष्कलं निर्मलं शान्तं सर्वातीतं निरामयम् ।
तदेव जीवरूपेण पुण्यपापफलैर्वृतम् ॥ ८ ॥
परमात्मपदं नित्यं तत्कथं जीवतां गतम् ।
सर्व[1]भावपदातीतं ज्ञानरूपं निरञ्जनम् ॥ ९ ॥
वारिवत्स्फुरितं तस्मिंस्तत्राहंकृतिरुत्थिता ।
पञ्चात्मकमभूत्पिण्डं धातुबद्धं गुणात्मकम् ॥ १० ॥
सुखदुःखैः समायुक्तं जीवभावनया कुरु ।
तेन जीवाभिधा प्रोक्ता विशुद्धे परमात्मनि ॥ ११ ॥

जीवः परस्मात् भिद्यत इत्याशङ्क्य यन्निर्विशेषं तदेव जीवतां गच्छतीव भातीत्याह—निष्कळमिति ॥ ८ ॥ तत् कथं जीवतामर्हति इत्याक्षिपति—परमात्मेति । प्रश्नोत्तरमाह—सर्वेति । वस्तुतो ब्रह्म सर्वभावपदातीतम् । स्वातिरिक्तभावः शशविषाणवत् नास्त्येव । यदि स्वाज्ञदृष्ट्या स्यात्तदा स्वज्ञदृष्ट्या सर्वभावपदातीतं ज्ञानरूपं ज्ञप्तिमात्रत्वात्, निरञ्जनं सर्वत्रासंगमित्यर्थः ॥ ९ ॥ यत् स्वमात्रं अवशिष्टं तत्र स्वाज्ञः स्वातिरिक्तं अध्यस्यतीत्याह—वारिवदिति । यत् सर्वभावपदातीतं तत्र तस्मिन् आदौ मन्दवातेरितवारिवत् स्फुरितं तत्र गुणसाम्यात्मिका मूलप्रकृतिवाच्यां अहङ्कृतिरुत्थिता । ततः पञ्चतन्मात्राणि, ततः पञ्चीकृतपञ्चमहाभूतानि, ततः सप्तधातुबद्धं त्रिगुणात्मकं पञ्चात्मकं पिण्डमभूत् ॥ १० ॥ तत्र सुखदुःखसमायुक्तं यच्चैतन्यं तत्

[1] ताप—अ १.

जीवभावनया कुरु । सर्वभावातीतविशुद्धे परमात्मनि तेन प्राकृतगुणयोगेन निर्विशेषब्रह्मण एव जीवाभिधा प्रोक्ता ॥ ११ ॥

प्राकृतगुणवियुक्तस्य जीवस्य परमात्मत्वम्

कामक्रोधभयं चापि मोहलोभमदो रजः ।
जन्म मृत्युश्च कार्पण्यं शोकस्तन्द्रा क्षुधा तृषा ॥ १२ ॥
तृष्णा लज्जा भयं दुःखं विषादो हर्ष एव च ।
एभिर्दोषैर्विनिर्मुक्तः स जीवः केवलो मतः ॥ १३ ॥

यदा प्राकृतगुणवियुक्तो भवति तदा जीव एव केवलपरमात्मा भवतीत्याह—कामेति । अत्र वचनलिंगाव्यत्ययः छान्दसः ॥ १२-१३ ॥

ज्ञानयोगयोः युगपदभ्यासः

तस्माद्दोषविनाशार्थमुपायं कथयामि ते ।
योगहीनं कथं ज्ञानं मोक्षदं भवति ध्रुवम् ॥ १४ ॥
योगोऽपि ज्ञानहीनस्तु न क्षमो मोक्षकर्मणि ।
तस्माज्ज्ञानं च योगं च मुमुक्षुर्दृढमभ्यसेत् ॥ १५ ॥

यस्मादेवं तस्मात् । केवलनिर्विशेषज्ञानस्य मोक्षदत्वेऽपि सविशेषज्ञानस्य तदभावात् योगाकांक्षा भवेदिति ज्ञानयोगौ युगपदभ्यसेदित्याह—**योगहीनमिति** ॥ १४ ॥ यस्मादेवं **तस्मात्** ॥ १५ ॥

ज्ञानस्वरूपम्

अज्ञानादेव संसारो ज्ञानादेव विमुच्यते ।
ज्ञानस्वरूपमेवादौ ज्ञानं ज्ञेयैकसाधनम् ॥ १६ ॥

ज्ञातं येन निजं रूपं कैवल्यं परमं पदम् ।
निष्कलं निर्मलं साक्षात्सच्चिदानन्दरूपकम् ॥ १७ ॥
उत्पत्तिस्थितिसंहारस्फूर्तिज्ञानविवर्जितम् ।
एतज्ज्ञानमिति प्रोक्तमथ योगं ब्रवीमि ते ॥ १८ ॥

बन्धमोक्षहेतू स्वाज्ञानस्वज्ञाने इत्याह—अज्ञानादिति । तत्र ज्ञानं कीदृशं इत्याह—ज्ञानेति ॥ १६–१७ ॥ स्वातिरेकेण इदमुत्पन्नं स्थितं उपसंहृतं इति या स्फूर्तिः तज्ज्ञानविवर्जितं तदेव निर्विशेषज्ञानमिति प्रोक्तम् । नहि तत् स्वफलाप्तौ योगादिसाधनमपेक्षते । यद्यपरब्रह्मगोचरं सविशेषज्ञानं स्वगतविशेषताशान्तये तदेव योगमपेक्षते । यत् सविशेषज्ञानेन समुच्चिचीषितं तत् ब्रवीमीत्याह—अथेति । अथ सविशेषज्ञानोत्पत्त्यनन्तरं तन्निर्विशेषताहेतुयोगं शृण्वित्यर्थः ॥ १८ ॥

मन्त्रयोगादिः चतुर्विधो योगः

योगो हि बहुधा ब्रह्मन् भिद्यते व्यवहारतः ।
मन्त्रयोगो लयश्चैव हठोऽसौ राजयोगकः ॥ १९ ॥

सोऽयं योगः कीदृश इत्याकांक्षायां पारमार्थिकयोग एकोऽपि साधनवैचित्र्यात् बहुधा भिद्यते इत्याह—योगो हीति । तत् कथमित्यत्र मन्त्रेति । इति प्रधानयोगाः चत्वारः ॥ १९ ॥

आरम्भादयो योगावस्थाः

आरम्भश्च घटश्चैव तथा परिचयः स्मृतः ।
निष्पत्तिश्चेत्यवस्था च सर्वत्र परिकीर्तिता ॥ २० ॥

अङ्गयोगास्तु—आरम्भश्चेति ॥ २० ॥

मन्त्रयोगलक्षणम्

एतेषां लक्षणं ब्रह्मन् वक्ष्ये शृणु समासतः ।
मातृकादियुतं मन्त्रं द्वादशाब्दं तु यो जपेत् ॥ २१ ॥
क्रमेण लभते ज्ञानमणिमादिगुणान्वितम् ।
अल्पबुद्धिरिमं योगं सेवते साधकाधमः ॥ २२ ॥

इति सूत्रवाक्यानि, एतेषाम् । तत्रादौ मन्दानुकम्पया मन्त्रयोगमाह मातृकेति ॥ २१–२२ ॥

लययोगलक्षणम्

लययोगश्चित्तलयः कोटिशः परिकीर्तितः ।
गच्छंस्तिष्ठन्स्वपन्भुञ्जन्ध्यायेन्निष्कलमीश्वरम् ॥ २३ ॥
स एव लययोगः स्याद्धठयोगमतः शृणु ।

लययोगप्रकारमाह—लयेति । तत्रायं सारतरो गच्छन्निति ॥ २३ ॥

हठयोगाङ्गानि

यमश्च नियमश्चैव ह्यासनं प्राणसंयमः ॥ २४ ॥
प्रत्याहारो धारणा च ध्यानं भ्रूमध्यमे हरिम् ।
समाधिः समताऽवस्था साष्टाङ्गो योग उच्यते ॥ २५ ॥
महामुद्रा महाबन्धो महावेधश्च खेचरी ।
उड्डियाणश्च मूलबन्धस्तथैव च ॥ २६ ॥

दीर्घप्रणवसंधानं सिद्धान्तश्रवणं [1]तथा ।
वज्रोली चामरोली च सहजोली त्रिधा मता ॥ २७ ॥

अष्टांगविशिष्टहठयोगमाह—हठेति ॥ २४–२५ ॥ पुनः द्वादशांगयोगमाचष्टे—महामुद्रेति ॥ २६–२७ ॥

यमनियमासनेषु प्रधानाङ्गानि

एतेषां लक्षणं ब्रह्मन् प्रत्येकं शृणु तत्त्वतः ।
लघ्वाहारो यमेष्वेको मुख्यो भवति नेतरः ॥ ॥
अहिंसा नियमेष्वेका मुख्या वै चतुरानन ।
सिद्धं पद्मं तथा सिंहं भद्रं चेति चतुष्टयम् ॥ ॥

आहृत्य अयं योगो विंशत्यंगविशिष्टः । एतेषामंगान लक्षणमाह—एतेषामिति । दशयमेषु प्रधानसाधनमाह—लघ्विति ॥ २८ । तथा दशनियमेषु मुख्यसाधनमाह—अहिंसेति । आसनानि अनन्तानि । तेषां अशीत्यासनानि मुख्यानि । तेष्वपि सिद्धाद्यासनचतुष्टयं मुख्यं इत्याह—सिद्धमिति ॥ २९ ॥

योगाभ्यासविघ्नत्यागः

प्रथमाभ्यासकाले तु विघ्नाः स्युश्चतुरानन ।
आलस्यं कत्थनं धूर्तगोष्ठी मन्त्रादिसाधनम् । ३० ॥
धातुस्त्रीलौल्यकादीनि मृगतृष्णामयानि वै ।
ज्ञात्वा सुधीस्त्यजेत्सर्वान् विघ्नान् पुण्यप्रभाव ॥ ३१ ॥

योगाभ्यासकालप्रादुर्भूतविघ्नजालं त्यजेदित्याह—प्रथम ॥ ३०–३१ ॥

[1] परं—क, अ १, अ २.

प्राणायामोचितमठासनयोः स्वरूपम्

प्राणायामं ततः कुर्यात्पद्मासनगतः स्वयम् ।
सुशोभनं मठं कुर्यात्सूक्ष्मद्वारं तु निर्व्रणम् ॥ ३२ ॥
सुष्ठुलिप्तं गोमयेन सुधया वा प्रयत्नतः ।
मत्कुणैर्मशकैर्लूकैर्वर्जितं च प्रयत्नतः ॥ ३३ ॥
दिने दिने च संमृष्टं संमार्जन्या विशेषतः ।
वा तं च सुगन्धेन धूपितं गुग्गुलादिभिः ॥ ३४ ॥
न युच्छिष्टं नातिनीचं चेलाजिनकुशोत्तरम् ।
त पविश्य मेधावी पद्मासनसमन्वितः ॥ ३५ ॥

ततः कि त्यत आह—प्राणायाममिति । प्राणायामोचितमठलक्षणमाह-सुशोभनमिति ३२–३४ ॥ योगिनो लक्षणमाह—तत्रेति ॥ ३५ ॥

प्राणायामारम्भप्रकारः

ऋ कायः प्राञ्जलिश्च प्रणमेदिष्टदेवताम् ।
त दक्षिणहस्तस्य अङ्गुष्ठेनैव पिङ्गलाम् ॥ ३६ ॥
नि य पूरयेद्वायुमिडया तु शनैः शनैः ।
य क्त्यविरोधेन ततः कुर्याच्च कुम्भकम् ॥ ३७ ॥
पु जेत्पिङ्गलया शनैरेव न वेगतः ।
पु पिङ्गलयाऽऽपूर्य [1]पूरयेदुदरं शनैः ॥ ३८ ॥

[1] धार—ङ

धारयित्वा यथाशक्ति रेचयेदिडया शनैः ।
यया त्यजेत्तयाऽऽपूर्य धारयेदविरोधतः ॥ ३९ ॥

योगारम्भसमये प्रणमेत् । ततः किमित्यत्र प्राणायामानुष्ठानक्रममाह—तत इति ॥ ३६–३९ ॥

मात्रानियमपूर्वकः प्राणायामः

जानु प्रदक्षिणीकृत्य न द्रुतं न विलम्बितम् ।
अङ्गुलिस्फोटनं कुर्यात्सा मात्रा परिगीयते ॥ ४० ॥
इडया वायुमा[1]पूर्य शनैः षोडशमात्रया ।
कुम्भयेत्पूरितं पश्चाच्चतुःषष्ट्या तु मात्रया ॥ ४१ ॥
रेचयेत्पिङ्गलानाड्या द्वात्रिंशन्मात्रया पुनः ।
पुनः पिङ्गलयाऽऽपूर्य पूर्ववत्सुसमाहितः ॥ ४२ ॥
प्रातर्माध्यंदिने सायमर्धरात्रे च कुम्भकान् ।
शनैरशीतिपर्यन्तं चतुर्वारं समभ्यसेत् ॥ ४३

सामान्यप्राणायामलक्षणमुक्त्वा अथ मात्राकालप्र नपूर्वकं विशेष-प्राणायामलक्षणमाह—जान्विति ॥ ४०–४२ ॥ प्रत्यहं प्राणा कालसंख्येयत्ता-माह—प्रातरिति ॥ ४३ ॥

आन्तराळिकफलं नाडीशुद्धिः तच्चिह्नानि च

एवं मासत्रयाभ्यासान्नाडीशुद्धिस्ततो भवेत्
यदा तु नाडीशुद्धिः स्यात्तदा चिह्नानि बाह्य ॥ ४४ ॥

[1] रोध्य—क, अ १.

जायन्ते योगिनो देहे तानि वक्ष्याम्यशेषतः ।
शरीरलघुता दीप्तिर्जाठराग्निविवर्धनम् ॥ ४९ ॥
कृशत्वं च शरीरस्य तदा जायेत [1]निश्चितम् ।

एवमभ्यासान्तराळिकफलमाह—एवमिति । नाडीशुद्धिचिह्नानि कानीत्यत आह—यदेति ॥ ४४–४८ ॥

योगाभ्यासकाले आहारादिनियमः

ये विघ्नकराहारं वर्जयेद्योगवित्तमः ॥ ४६ ॥
ल णं सर्षपं चाम्लमुष्णं रूक्षं च तीक्ष्णकम् ।
ः कजातं रामठादि वह्निस्त्रीपथिसेवनम् ॥ ४७ ॥
प्र स्नानोपवासादिकायक्लेशांश्च वर्जयेत् ।
अ यासकाले प्रथमं शस्तं क्षीराज्यभोजनम् ॥ ४८ ॥
गे ममुद्गशाल्यन्नं योगवृद्धिकरं विदुः ।

केवलकुम्भकसिद्धिः

त परं यथेष्टं तु शक्तः स्याद्वायुधारणे ॥ ४९ ॥
य धारणाद्वायोः सिध्येत्केवलकुम्भकः ।
के कुम्भके सिद्धे रेचपूरविवर्जिते ॥ ५० ॥
न न्य दुर्लभं किंचित् त्रिषु लोकेषु विद्यते ।

ततः । यत आह—तत इति ॥ ४९ ॥ तेन किं स्यादित्यत आह—यथेष्टेति ॥ ५० ॥

[1] निश्चयं—ब, उ १.

प्रस्वेदादिसिद्धयः

प्रस्वेदो जायते पूर्वं मर्दनं तेन कारयेत् ॥ ५१ ॥
ततोऽपि धारणाद्वायोः क्रमेणैव शनैः शनैः ।
कम्पो भवति देहस्य आसनस्थस्य देहिनः ॥ ५२ ॥
ततोऽधिकतराभ्यासात् [1]दर्दरी स्वेन जायते ।
यदा च [2]दर्दरो भाव उत्प्लुत्योत्प्लुत्य गच्छति ॥ ५३ ॥
पद्मासनस्थितो योगी तथा गच्छति भूतले ।
ततोऽधिकतराभ्यासाद्भूमित्यागश्च जायते ॥ ५४ ॥
पद्मासनस्थ एवासौ भूमिमुत्सृज्य [3]गच्छति ।
अतिमानुषचेष्टादि तथा सामर्थ्यमुद्भवेत् ॥ ५५ ॥
न दर्शयेच्च सामर्थ्यं दर्शनं वीर्यवत्तरम् ।
स्वल्पं वा बहुधा दुःखं योगी न व्यथते तदा ५६ ॥
अल्पमूत्रपुरीषश्च स्वल्पनिद्रश्च जायते ।
कीलवो दूषिका लाला स्वेददुर्गन्धताऽऽनने ॥ ७ ॥
एतानि सर्वथा तस्य न जायन्ते ततः परम् ।
ततोऽधिकतराभ्यासाद्बलमुत्पद्यते बहु ॥ ५८
येन भूचरसिद्धिः स्याद्भूचराणां जये क्षमः
व्याघ्रो वा शरभो वाऽपि गजो गवय एव व ५९ ॥

[1] दार्दरी—क. दर्दुरी—अ १. [2] दर्द —उ, अ २.
[3] वर्तते—क, अ १, अ २.

सिंहो वा योगिना तेन म्रियन्ते हस्तताडिताः ।
कन्दर्पस्य यथा रूपं तथा [1]स्यादपि योगिनः ॥ ६० ॥
तद्रूपवशगा नार्यः काङ्क्षन्ते तस्य सङ्गमम् ।
यदि सङ्गं करोत्येष तस्य बिन्दुक्षयो भवेत् ॥ ६१ ॥
वर्जयित्वा स्त्रियां संगं कुर्यादभ्यासमादरात् ।
योगिनोऽङ्गे सुगन्धश्च जायते बिन्दुधारणात् ॥ ६२ ॥

पादार्धा[illegible] पादपूर्णाभ्यासतः प्रस्वेदादयतिमानुषचेष्टाऽन्तसिद्धिरुदेति। तत्सिद्धिजालं सद[illegible] गोपयेदित्याह—प्रस्वेद इति । पादप्राणायामतः प्रस्वेदः ॥ ९१–९५ ॥ दुःखं प्राप्यापि ॥ ९६ ॥ एवमभ्यासं कुर्वतो योगिनो मानुषविकारराः[illegible] पूर्वकं महाबलं सौन्दर्यं स्त्र्यादिपराङ्मुखत्वं स्वांगदिव्यसुगन्धश्च जायत इत्याह—अल्पेति । स्वदेहजकीलं सन्धिबन्धमुद्बध्नन्तीति कीलवो वायुबन्धाः । [illegible]रीरं दूषयति कार्श्यभावं करोतीति दूषिका क्षयादिः, नेत्रमलं वा । शिष्टं [illegible]ष्टम् ॥ ९७ ॥ किंच—तत इति ॥ ९८ ॥ तत् कथं? व्याघ्र इति ॥ ९–६२ ॥

योगप्रतिबन्धनाशाय प्रणवजपः आरम्भावस्था

त[illegible] रहस्युपाविष्टः प्रणवं प्लुतमात्रया ।
ज[illegible] पूर्वार्जितानां तु पापानां नाशहेतवे ॥ ६३ ॥
स[illegible] ग्रहरो मन्त्रः प्रणवः सर्वदोषहा ।
ए[illegible] न्यासयोगेन सिद्धिरारम्भसंभवा ॥ ६४ ॥

[1] स्मा—[illegible], अ २, उ १.

यदि प्रतिबन्धकवशात् योगो न सिध्यति तदा तच्छान्त्यै प्रणवजपः कार्यः इत्याह—तत इति ॥ ६३ ॥ प्रस्वेदादिसुगन्धश्च जायते इत्यन्तसिद्धेरारब्धत्वादयमारम्भः इत्याह—एवमिति ॥ ६४ ॥

घटावस्था

ततो भवेद्घटावस्था पवनाभ्यासतत्परा ।
प्राणोऽपानो मनो बुद्धिर्जीवात्मपरमात्मनोः ॥ ६५ ॥
अन्योन्यस्याविरोधेन [1]एकतां घटते यदा ।
घटावस्थेति सा प्रोक्ता तच्चिह्नानि ब्रवीम्यहम् ॥ ६६ ॥
पूर्वं यः कथितोऽभ्यासश्चतुर्थांशं परिग्रहेत् ।
दिवा वा यदि वा [2]सायमेककालं समभ्यसेत् ॥ ६७ ॥
एकवारं प्रतिदिनं कुर्यात्केवलकुम्भकम् ।

घटयोगमाह—तत इति ॥ ६५–६७ ॥

प्रत्याहारलक्षणम्

इन्द्रियाणीन्द्रियार्थेभ्यो यत्प्रत्याहरणं स्फुटम् ६८ ॥
योगी कुम्भकमास्थाय प्रत्याहारः स उच्यते

प्रत्याहारस्वरूपमाह—इन्द्रियाणीति ॥ ६८ ॥

धारणास्वरूपम्

यद्यत्पश्यति चक्षुर्भ्यां तत्तदात्मेति भावयेत् ॥ ६९ ॥
यद्यच्छृणोति कर्णाभ्यां तत्तदात्मेति भावयेत्
लभते नासया यद्यत्तत्तदात्मेति भावयेत् ॥

[1] एकता—मु. [2] सायं याममात्रं- क, १, अ २.

जिह्वया यद्रसं ह्यत्ति तत्तदात्मेति भावयेत् ।
त्वचा यद्यत्स्पृशेद्योगी तत्तदात्मेति भावयेत् ॥ ७१ ॥
एवं ज्ञानेन्द्रियाणां तु तत्त[1]दात्मनि धारयेत् ।

धारणालक्षणमाह—यद्यदिति ॥ ६९–७१ ॥ चक्षुरादीन्द्रियेन्द्रियार्थजात स्वाञ्जदशायामब्रह्मतया विकल्पितं स्वञ्जदशायां तत् ब्रह्मेति प्रतीचि धारयेदित्यर्थः ॥

धारणासिद्धयः तद्गोपनविधिश्च

य मात्रं प्रतिदिनं योगी यत्नादतन्द्रितः ॥ ७२ ॥
य वा [2]चित्तसामर्थ्यं जायते योगिनो ध्रुवम् ।
दू तिर्दूरदृष्टिः क्षणाद्दूरागमस्तथा ॥ ७३ ॥
व सिद्धिः कामरूपत्वमदृश्यकरणी तथा ।
म मूत्रप्रलेपेन लोहादेः स्वर्णता भवेत् ॥ ७४ ॥
खे ातिस्तस्य जायेत संततान्यासयोगतः ।
स बुद्धिमता भाव्यं योगिना योगसिद्धये ॥ ७५ ॥
ए विघ्ना महासिद्धेर्न रमेत्तेषु बुद्धिमान् ।
न र्यात्स्वसामर्थ्यं यस्य कस्यापि योगिराट् ॥ ७६ ॥
य मूढो यथा मूर्खो यथा बधिर एव वा ।
त र्तेत लोकस्य स्वसामर्थ्यस्य गुप्तये ॥ ७७ ॥

[1] यं तु ...धयेत्—क, अ १, अ २. [2] चित्र—अ १, अ २, क.

शिष्याश्च स्वस्वकार्येषु प्रार्थयन्ति न संशयः ।
तत्तत्कर्मकरव्यग्रः स्वाभ्यासे विस्मृतो भवेत् ॥ ७८ ॥
सर्वव्यापारमुत्सृज्य योगनिष्ठो भवेद्यतिः ।
अविस्मृत्य गुरोर्वाक्यमभ्यसेत्तदहर्निशम् ॥ ७९ ॥
एवं भवेद्घटावस्था संताभ्यासयोगतः ।
अनभ्यासवतश्चैव वृथागोष्ठ्या न सिध्यति ॥ ८० ॥
तस्मात्सर्वप्रयत्नेन योगमेव सदाऽभ्यसेत् ।

ततः किं जायते इत्यत आह—याममात्रमिति ॥ ७२ ॥ किं तत्? दूरश्रुतिरिति ॥ ७३–७५ ॥ यतः स्वात्तसिद्धिप्रकटनाद्योग[illegible]न्तरायो भवति तस्मात् सिद्धिजालोपेक्षापूर्वकं स्वसामर्थ्यं गोपयन् योगमेवा[illegible]सेत् इत्याह—एत इति ॥ ७६–७७ ॥ तत्तत्कर्मकरव्यग्रः तत्तत्कर्म[illegible]णे व्यग्रचित्तो भवति । ततः स्वाभ्यासे ॥ ७८–७९ ॥ अभ्यासत[illegible] इयं घटावस्था सिध्यति नान्यथेत्याह—एवमिति ॥ ८० ॥

परिचयावस्था

ततः परिचयावस्था जायतेऽभ्यासयोगतः ॥ ८ ॥
वायुः परिचितो यत्नादग्निना सह [1]कुण्डलीम् ।
भावयित्वा सुषुम्नायां प्रविशेदनिरोधतः ॥ ८२
वायुना सह चित्तं च प्रविशेच्च महापथम् ।
यस्य चित्तं [2]स्वपवनः सुषुम्नां प्रविशेदिह ॥ [illegible] ॥

परिचयस्वरूपमाह—तत इति ॥ ८१ ॥ तत् कथं? [illegible]रिति ॥ ८२ ॥ महापथं सुषुम्नाद्वारमित्यर्थः । तदा सेयं परिचयावस्थेत्युच्यते ॥ ८३ ॥

[1] कुण्डली—क, अ १, अ २. [2] स्वपवनं [सपव[illegible]]—अ १.

पञ्चभूतमण्डलेषु पञ्चब्रह्मधारणानि

भूमिरापोऽनलो वायुराकाशश्चेति [1]पञ्चकः ।
येषु पञ्चसु देवानां धारणा पञ्चधोच्यते ॥ ८४ ॥
पादादिजानुपर्यन्तं पृथिवीस्थानमुच्यते ।
पृथिवी चतुरश्रं च पीतवर्णं लवर्णकम् ॥ ८५ ॥
पार्थिवे वायुमारोप्य लकारेण समन्वितम् ।
ध्यायंश्चतु[2]र्भुजाकारं चतुर्वक्त्रं हिरण्मयम् ॥ ८६ ॥
धारयेत्पञ्च घटिकाः पृथिवीजयमाप्नुयात् ।
पृथिवीयोगतो मृत्युर्न भवेदस्य योगिनः ॥ ८७ ॥
जानोः पायुपर्यन्तमपां स्थानं प्रकीर्तितम् ।
अ[3]र्धचन्द्रं शुक्लं च [4]वंबीजं परिकीर्तितम् ॥ ८८ ॥
[5]वरुणे वायुमारोप्य वकारेण समन्वितम् ।
स्मरन्नारायणं देवं चतुर्बाहुं किरीटिनम् ॥ ८९ ॥
स्फटिकसंकाशं पीतवाससमच्युतम् ।
धारयेत्पञ्च घटिकाः सर्वपापैः प्रमुच्यते ॥ ९० ॥
तत्र जलाद्भयं नास्ति जले मृत्युर्न विद्यते ।
अपानो हृदयान्तं च वह्निस्थानं प्रकीर्तितम् ॥ ९१ ॥
त्रिकोणं रक्तं च रेफाक्षरसमुद्भवम् ।
वायुनिलमारोप्य रेफाक्षरसमुज्ज्वलम् ॥ ९२ ॥

[1] -क, अ २.
[2] यं—अ १. [5] वारुणो—अ १.

त्रियक्षं वरदं रुद्रं तरुणादित्यसंनिभम् ।
भस्मोद्धूलितसर्वाङ्गं सुप्रसन्नमनुस्मरन् ॥ ९३ ॥
धारयेत्पञ्च घटिका वह्निनाऽसौ न [1]दह्यते ।
न दह्यते शरीरं च प्रविष्टस्याग्निकुण्डके ॥ ९४ ॥
आहृदयाद्भ्रुवोर्मध्यं वायुस्थानं प्रकीर्तितम् ।
वायुः षट्कोणकं कृष्णं यकाराक्षरभासुरम् ॥ ९५ ॥
मारुतं मरुतां स्थानं यकाराक्षरभासुरम् ।
धारयेत्तत्र सर्वज्ञमीश्वरं विश्वतोमुखम् ॥ ९६ ॥
धारयेत्पञ्च घटिका वायुवद्व्योमगो भवेत् ।
मरणं न तु वायोस्तु भयं भवति योगिनः ॥ ९ ॥
आभ्रूमध्यात्तु मूर्धान्तमाकाशस्थानमुच्यते ।
व्योम वृत्तं च धूम्रं च हकाराक्षरभासुरम् ॥ ९
आकाशे वायुमारोप्य हकारोपरि शंकरम् ।
बिन्दुरूपं महादेवं व्योमाकारं सदाशिवम् ॥ ९ ॥
शुद्धस्फटिकसंकाशं धृतबालेन्दुमौलिनम् ।
पञ्चवक्त्रयुतं सौम्यं दशबाहुं त्रिलोचनम् ॥ १
सर्वायुधैर्धृताकारं सर्वभूषणभूषितम् ।
उमार्धदेहं वरदं सर्वकारणकारणम् ॥ १०१
आकाशधारणात्तस्य खेचरत्वं भवेद्ध्रुवम् ।
यत्र कुत्र स्थितो वाऽपि सुखमत्यन्तमश्नते ।

[1] दा—क, अ १, अ २.

एवं च धारणाः पञ्च कुर्याद्योगी विचक्षणः ।
ततो दृढशरीरः स्यान्मृत्युस्तस्य न विद्यते ॥ १०३ ॥
ब्रह्मणः प्रलयेनापि न सीदति महामतिः ।

ततः स्वावयवप्रविभक्तपञ्चभूतमण्डले पञ्चब्रह्मधारणमाह—भूमिरिति । देवानां ब्रह्मादिसदाशिवान्तानाम् ॥ ८४ ॥ तत्रादौ पादादीति । पृथिवीशब्देन पार्थिवमण्डलमुच्यते ॥ ८५ ॥ ततः पार्थिवे ॥ ८६–८७ ॥ अम्मण्डले विष्णुध्यानं तत्फलं चाह—आजानोरिति ॥ ८८–९० ॥ वह्निमण्डले रुद्रध्यानं तत्फलं चाह—आपायोरिति ॥ ९१–९४ ॥ वायुमण्डले ईश्वरध्यानं तत्फलं चाह—आहृदयादिति ॥ ९५–९७ ॥ आकाशमण्डले सदाशिवध्यानं तत्फलं चाह—आभ्रूमध्यादिति ॥ ९८–१०३ ॥

सगुणध्यानम्

[illegible]म्यसेत्तथा ध्यानं घटिकाषष्टिमेव च ॥ १०४ ॥
व[illegible] निरुध्य चाकाशे देवतामिष्टदामिति ।
म[illegible]ध्यानमेतत्स्यादणिमादिगुणप्रदम् ।

सगुणनि[illegible]गमेदेन द्विप्रकारं ध्यानमाह—समभ्यसेदिति ॥ १०४ ॥

निर्गुणध्यानतः समाधिसिद्धिः

नि[illegible]ध्यानयुक्तस्य समाधिश्च ततो भवेत् ॥ १०५ ॥
दि[illegible]दृशकेनैव समाधिं समवाप्नुयात् ।
[illegible]रुध्य मेधावी जीवन्मुक्तो भवत्ययम् ॥ १०६ ॥
[illegible]ः समताऽवस्था जीवात्मपरमात्मनोः ।

ब्रह्मातिरिक्तं न किञ्चिदस्तीति तत्स्वरूपेणावस्थानं समाधिरित्यर्थः ॥ १०५ ॥ तथाविधं दिनद्वादशकेनैव ॥ १०६ ॥ समाधिशब्दं व्युत्पादयति— समाधिरिति । जीवात्मपरमात्मनोः वाच्यार्थवैषम्यत्यागपूर्वकं तयोः लक्ष्यरूपेण समताऽवस्थैव समाधिरित्यर्थः ॥

सिद्धयोगस्य स्वेच्छया देहत्यागात्यागौ

यदि स्वदेहमुत्स्रष्टुमिच्छा चेदुत्सृजेत्स्वयम् ॥ १०७ ॥
परब्रह्मणि लीयेत न तस्योत्क्रान्तिरिष्यते ।
अथ नो चेत्समुत्स्रष्टुं स्वशरीरं प्रियं यदि ॥ १०८ ॥
सर्वलोकेषु विहरन्नणिमादिगुणान्वितः ।
कदाचित्स्वेच्छया देवो भूत्वा स्वर्गे महीयते ॥ १०९ ॥
मनुष्यो वाऽपि यक्षो वा स्वेच्छयाऽपि क्षणाद्भवन् ।
सिंहो व्याघ्रो गजो वाऽश्वः स्वेच्छया बहुतामियात् ॥ ११० ॥
यथेष्टमेव वर्तेत योगी यद्वा महेश्वरः ।
अभ्यासभेदतो भेदः फलं तु सममेव हि ॥ १११ ॥

यः स्वातिरेकेणाभासतोऽपि शरीरत्रयमस्तीति म[illegible]ते सोऽयं योगी तत्यक्त्वा परब्रह्मणि लीयते । यद्येवं नहि त्यक्तुमिच्छति [illegible]त्रशक्तिं प्रकटयन् आभूतसंप्लवं अस्मिन् लोके विहरेदित्याह—यदीति [illegible] १०७–११० ॥ अभ्यासतत्फलभेदेन भिद्यते । तत्रान्तराळिकफलनिरपेक्ष[illegible]मुख्यफलं कैवल्यं सममेवेत्यर्थः ॥ १११ ॥

महाबन्धलक्षणम्

पार्ष्णिं वामस्य पादस्य योनिस्थाने नियोजयेत् ।
प्रसार्य दक्षिणं पादं हस्ताभ्यां धारयेद्दृढम् ॥ ११२ ॥
चुबुकं हृदि विन्यस्य पूरयेद्वायुना पुनः ।
कुम्भकेन यथाशक्त्या धारयित्वा तु रेचयेत् ॥ ११३ ॥
वामाङ्गेन समभ्यस्य दक्षाङ्गेन [1]समभ्यसेत् ।
प्रसारितस्तु यः पादस्तमूरूपरि मानयेत् ॥ ११४ ॥
अनेनैव महाबन्ध उभयत्रैवमभ्यसेत्

महामुद्रा लक्षणं अन्यत्राम्नायते-

वक्षोहनुस्तहनुर्निपीड्य सुषिरं योनेश्च वामांघ्रिणा
हस्ताभ्यामनुधारयन् प्रसरितं पादं तथा दक्षिणम् ।
आपूर्य श्वसनेन कुक्षियुगळं मूर्ध्नि स्थितं धारये-
देषा पातकनाशनी ननु महामुद्रा नृणां प्रोच्यते ॥

इति । महाबन्धलक्षणमाह—पार्ष्णिमिति ॥ ११२–११३ ॥ मानयेत् समर्पयेत् आरोपयेदित्यर्थः ॥ ११४ ॥ अभ्यसेत् वामांगवत् दक्षांगेऽपीत्यर्थः

महावेधलक्षणम्

महाबन्धस्थितो योगी कृत्वा पूरकमेकधीः ॥ ११५ ॥
[2]वायोः [3]गतिमा[3]वृत्य निभृतं कण्ठमुद्रया ।
श्रोत्रमाक्रम्य वायुः स्फुरति सत्वरम् ॥ ११६ ॥
अयं महावेधः सिद्धैरभ्यस्यतेऽनिशम् ।

[1] ततोभ्य—क, अ १, अ २. [2] वायुना—क, अ १, अ २. [3] वृत्य—अ १.

वेधस्वरूपमाह—महाबन्धेति ॥ ११५ ॥ उच्छ्वासनिश्वासरेचक-पूरकवायूनां गतिं आवृत्य आच्छाद्य कण्ठमुद्रया जालन्धरबन्धेन निरुध्य ततः प्राणवायुः इडापिंगळापुटद्वयं सम्यगाक्रम्य अतिक्रम्य सत्वरं सुषुम्नायां स्फुरतीति यत् अयमेव ॥ ११६ ॥

खेचरीस्वरूपम्

अन्तः कपालकुहरे जिह्वां व्यावृत्य धारयेत् ॥ ११७ ॥
भ्रूमध्यदृष्टिरप्येषा मुद्रा भवति खेचरी

खेचरीस्वरूपमाह—अन्तरिति ॥ ११७ ॥

बन्धत्रयस्वरूपं तत्फलं च

कण्ठमाकुञ्च्य हृदये स्थापयेद्दृढया धिया ॥ ११८ ॥
बन्धो जालंधराख्योऽयं मृत्युमातङ्गकेसरी ।
बन्धो येन सुषुम्नायां प्राणस्तूड्डीयते यतः ॥ ११९ ॥
उड्याणाख्यो हि बन्धोऽयं योगिभिः मुदा[illegible] ।
पार्ष्णिभागेन संपीड्य योनिमाकुञ्चयेद्दृढं ॥ १२० ॥
अपानमूर्ध्वमुत्थाप्य योनिबन्धोऽयमुच्यते ।
प्राणापानौ नादबिन्दू मूलबन्धेन चैकता ॥ १२१ ॥
गत्वा योगस्य संसिद्धिं यच्छतो नात्र संशयः

बन्धत्रयस्वरूपं तत्फलं चाह—कण्ठमिति ॥ १२१ ॥

विपरीतकरणीलक्षणं तत्फलं च

करणी विपरीताख्या [1]सर्वाधिव्याधिनाशिनी ॥ १२२ ॥
नित्यमभ्यासयुक्तस्य जाठराग्निविवर्धनी ।
आहा[2]रा बहवस्तस्य [3]संपाद्याः साधकस्य च ॥ १२३ ॥
अल्पाहारा यदि भवेदग्निर्देहं हरेत्क्षणात् ।
अधःशिरश्चोर्ध्वपादः क्षणं स्यात्प्रथमे दिने ॥ १२४ ॥
[4]क्षणात्तु [5]चिदधिकमभ्यसे[5]त्तु दिनेदिने ।
वलीं च पलितं चैव षण्मासार्धान्न दृश्यते ॥ १२५ ॥
या मात्रं [illegible] यो नित्यमभ्यसेत्स तु कालजित् ।

[illegible]र्णां तन्नित्यफलं चाह—करणीति ॥ १२२–१२३ ॥ स्वस्थितिविपरीत[illegible] क्रियतु इति विपरीतकरणी । तदेव प्रपञ्चयति—अध इति ॥ १२[illegible]–१२[illegible] ॥

[illegible]

वज्रोळीस्वरूपम्

[illegible]म
[illegible]मभ्यसेद्यस्तु स योगी सिद्धिभाजनम् ॥ १२६ ॥
[illegible] या तस्यैव योगसिद्धिः करे स्थिता ।
[illegible]ान तं वेत्ति खेचरी च भवेद्ध्रुवम् ॥ १२७ ॥

[illegible]रूपं तत्फलं चाह—वज्रोळीमिति । किं नाम वज्रोळी ? कांस्यपात्रे गोव[illegible] क्षिप्य वज्रोळीतुल्यलिंगनाळेन प्रसित्वा पुनर्विरेच्य [illegible]

[illegible] अ १, अ २. [2] रो बहुल—अ १, अ २. रो बहुश—क.
[illegible]ह १, अ २. [4] क्षणाच—क, अ १, अ २.
[5] च—अ १, [illegible]

पुनर्ग्रसनादिकमभ्यस्याथ स्त्रीयोनिमण्डले रेतो विसृज्य तच्छोणितेन साकं प्रसेदिति यत् सैव वज्रोळीत्युच्यते । यस्तामभ्यस्यति स तु सिद्धो भवतीत्याह —लभ्यत इति । सोऽयं योगी अतीतानागतं वेत्ति । तस्यैव खेचरी ॥ १२६–१२७ ॥

अमरोळीस्वरूपम्

अमरीं यः पिबेन्नित्यं नस्यं कुर्वन् दिने दिने ।
वज्रोलीमभ्यसेन्नित्यममरोलीति कथ्यते १२८ ॥

अमरोळीस्वरूपमाह—अमरीमिति । अमरीश[illegible]न मूत्रमुच्यते । तत्र प्रथमान्त्यधारे विहाय मध्यधारां हस्ते पात्रे वा गृहीत्वा योऽयं [illegible]ोगी तत्त्रिभागं दिनेदिने पिबन् नासापुटयोः नस्यं कुर्वन् [illegible]यं व[illegible]ोळीमभ्यसेत् इति यत् सैव अमरोळीति कथ्यते । तथा च हठयोगतन[illegible] अभि[illegible]नम्—

पित्तोल्बणत्वात् प्रथमां च धारां
विहाय निस्सारतयाऽन्त्यधाराम् ।
निषेव्यते शीतळमध्यधारा
वज्रोळिसिद्धैरमरोळिसिद्ध्यै ॥

इति । एवममरोळीसिद्धस्यामरीपाननस्यं विना [illegible] रि[illegible]द्धरुदेति सैव सहजोळीत्युच्यते ॥ १२८ ॥

राजयोगनिष्पत्तिः

ततो भवेद्राजयोगो नान्तरा भवति ध्रुवम्
यदा तु राजयोगेन निष्पन्ना योगिभिः [1][illegible]याः । १२९ ॥
तदा विवेकवैराग्यं जायते योगिनो ध्रुवम्
विष्णुर्नाम महायोगी महाभूतो महातपाः । [illegible]० ॥
तत्त्वमार्गे यथा दीपो दृश्यते पुरुषोत्तमः ।

[1] क्रिया—क, अ १, अ २.

राजयोगस्वरूपमाह—तत इति । न हि विशल्यवयवहठाभ्यासमन्तरा राजयोगो भवतीत्यर्थः ॥ १२९ ॥ हठयोगसिद्धोऽयं राजयोगः योगराजत्वात् । तत्रैव हि भगवान् दत्तात्रेय इत्याह—विष्णुरिति । क्षराक्षरकलनाविरळपुरुषोत्तमतत्त्वस्य सोऽहमस्मीति जयोगेनैव लक्षितत्वात् ॥ १३० ॥

वैराग्यहेतुनिरूपणम्

यः स्तनः पूर्वपीतस्तं निष्पीड्य मुदमश्नुते ॥ १३१ ॥
य माज्जा । भगात्पूर्वं तस्मिन्नेव भगे रमन् ।
य माता सा पुनर्भार्या या भार्या मातरेव हि ॥ १३२ ॥
य पिता । पुनः पुत्रो यः पुत्रः स पुनः पिता ।
एव संसा क्रेण कूपचक्रे घटा इव ॥ १३३ ॥
भ्रा न्तो निजन्मानि श्रुत्वा लोकान् समश्नुते ।

पुरुषोत्त चाति दागदिबाह्यवैराग्यहेतवे इदमाम्नायते—यः स्तन इति । तं तादृशमित्यर्थ ॥ १३ ॥ तस्मिन्नेव तथाविधे भगे रमन् रममाणो मुदमश्नुते । अस्मिन् जन्मनि या माता सा पुनः भवान्तरे भार्या भवति, या भार्या सा भवान्तरे म व भवतीत्याह—या मातेति । मातरेव मातैवेत्यर्थः ॥ १३२ ॥ एवं पुरुषोत्तमत्व ाप्ति क्तं किञ्चिदप्यस्तीति पश्यन्तः कूपचक्रे घटा इव—संसारचक्रेणेति तृत ा सप्तम्यर्था—संसारचक्रे ॥ १३३ ॥ परिभ्रमन्तो नानायोनिषु जन्म र्त भजन्ते । यतः एवं अतः "ब्रह्मैव सर्वं" "ब्रह्मातिरिक्तं न किञ्चिदस्ति" ते मुख्याचार्यमुखतः श्रुत्वा मुमुक्षुरुत्तमलोकान् ब्रह्माद्यावासभूतान् समश्नुते । यावद्ब्रह्मोपाधि तावदुषित्वा तेन साकं कैवल्यं लभन्ते ॥

हृत्पद्मे प्रणवोपासनम्

त्रयो लोकास्त्रयो वेदास्तिस्रः संध्यास्त्रयः स्वराः ॥ १३४ ॥
त्रयोऽग्नयश्च त्रिगुणाः स्थिताः सर्वे [1]त्र
त्रयाणामक्षराणां च योऽधीतेऽप्यर्धमक्षर ॥ १३५ ॥
तेन सर्वमिदं प्रोतं तत्सत्यं तत्परं पदम्
पुष्पमध्ये यथा गन्धः पयोमध्ये यथा घृ म् ॥ १३६ ॥
तिलमध्ये यथा तैलं पाषाणेष्विव काञ्चन
हृदि स्थाने स्थितं पद्मं तस्य वक्त्रमधोमुर म् ॥ १३७ ॥
ऊर्ध्वनालमधोबिन्दु[2]स्तस्य मध्ये स्थितं नः ।
अकारे रेचितं पद्ममुकारेणैव भिद्यते ॥ १ ८ ॥
मकारे लभते नादमर्धमात्रा तु निश्चला ।
शुद्धस्फटिकसंकाशं निष्कलं पापनाशनम् ॥ १३९ ॥
लभते योगयुक्तात्मा पुरुषस्तत्परं पदम्

तदुपायत्वेन परापरब्रह्मगोचराकारादिमात्राचतु यविशिष्टप्रणवोपासनाचष्टे—त्रय इति । प्रणवावयवाकारादित्र्यक्षरे क्रमेण रादयः त्रयो लोकाः, गादयः त्रयो वेदाः, प्रातःसन्ध्यादिसन्ध्याः तिस्रः, कारोकारमकारभेदेन यः स्वराः ॥ १३४ ॥ गार्हपत्यादिभेदेन अग्नयः त्र ः, सत्त्वादित्रिगुणाश्च र्वे स्थिताः प्रतिष्ठिता इत्यर्थः । अकारादित्रयाणामक्षर णां तदारोपाधिकरणवेश्वविराडोत्रादिप्राज्ञबीजानुञ्जैकरसान्तानां सविशेषत्वेऽ लोकत्रयादित्रिगुणास्ताश्रयाकारादिमात्रात्रयतदध्यक्षापवादाधिकरणार्धमात्रासंग र्धमक्षरं तुर्यचैतन्यं ब्रह्मास्मीति योऽधीते श्रुत्याचार्यमुखतो जानाति १३५ ॥ तेन

[1] त्रियक्षरे—उ. [2] तस्य- अ १. अ २.

तुर्यभावमापन्नेन योगिना सर्वमिदं प्रपञ्चजातं प्रोतं अहमेवेदं सर्वमिति व्याप्तम्। यच्चाप्यसापेक्षव्यापकतापह्नवसिद्धं तत् सत्यम्। यत् सत्तामात्रं तदेव परं निरतिशयं स्वावशेषतया [illegible]पद्यत इति पदं ब्रह्ममात्रमवशिष्यत इत्यर्थः। कथं पुनः तुर्यस्य सर्वप्रोतत्व[illegible]त्र दृष्टान्तचतुष्टयमाचष्टे—पुष्पेति ॥ १३६ ॥ यथा हेमनिमिळ[बिड]शि[illegible]यां निर्विशेषतया काञ्चनं तत् सर्वं व्याप्य वर्तते तथा इत्यर्थः। यदेवं [illegible]पकचैतन्यं तदुपलब्धिस्थाननिर्देशपूर्वकं तत्स्वरूपं तज्ज्ञानफलं च वि[illegible]दयति—हृदिस्थान इति। हृदिस्थाने उर्ध्वभागे कदळीपुष्पवदूर्ध्वनाळं [illegible]धोवक्त्रं हृत्पद्मं स्थितं भवति ॥ १३७ ॥ तदधोभागे बिन्दुव्याव्[illegible]शं विद्यते। तस्य मध्ये मनउपलक्षितं लिंगशरीरं वर्तते। तत्र तद्वृत्ति[illegible]स्वभावाभावप्रकाशकतया प्रत्यक्चैतन्यं स्थितं भवति। तदूर्ध्वनयनार्थं विकर[illegible]र्थं तद्गतचैतन्यसाक्षात्कारार्थं चोपायमाह—अकार इति। अकारे वि[illegible]गाडोतृचैतन्ये साक्षात्कृते सति हृत्पद्ममूर्ध्वमुखतया रेचितं उत्थितं भव[illegible]। उकारतदभ्यक्षतैजससूत्रानुज्ञातृचैतन्यसाक्षात्कारेण तत् पद्मं भिद्यते विका[illegible]ति ॥ १३८ ॥ मकारतदभ्यक्षप्राज्ञबीजानुज्ञकरसचैतन्ये साक्षात्कृते सति ना[illegible]श्वरतत्त्वं तदात्मकप्रणवनादो विजृम्भते। अकारादि-मात्रात्रयप्रपञ्चपर्यवसान[illegible]मात्रा तु द्वितुर्यांविकल्पाधिष्ठिता निश्चला भवति। तत्र यदुपलभ्यते यदनुसन्[illegible]तः पुण्यपापजालं नश्यति तत् शुद्धस्फटिकसङ्काशं पापनाशनं वस्तुतो नि[illegible]तियोगिकनिष्कळं यत् स्वमात्रमवशिष्यते ॥ १३९ ॥ यथोक्तयोगयुक्तात्मा [illegible]षः तत् परं पदं लभते कृतकृत्यो भवतीत्यर्थः ॥

करणव्यापारोपरतिः आत्मावगत्युपायः

कूर्मः स्व[illegible]णिपादादिशिरश्चात्मनि धारयेत् ॥ १४० ॥

एवं द्वारे[illegible]सर्वेषु वायुपूरितरेचितः।

निषिद्धे[illegible]नवद्वारे ऊर्ध्वं प्राङ्[1]निःश्वासस्तथा ॥ १४१ ॥

[1] श्वसतस्तदा—[illegible] श्वसतस्तथा—अ १. श्वासतस्तथा—अ २.

घटमध्ये यथा दीपो निवातं कुम्भकं विदुः ।
निषिद्धैर्नवभिर्द्वारैर्निर्जने निरुपद्रवे ॥ १४२ ॥
निश्चितं त्वात्ममात्रेणावशिष्टं योगसेवया ॥

इत्युपनिषत् ॥

तदवगत्युपायस्तु सर्वकरणव्यापृत्युपरतिरेवेत्य —कूर्म इति । यथा कूर्मः स्वाङ्गान्युपसंहृत्य शिलावत् वर्तते ॥ १४ ॥ एवं योगी नवद्वारेषु सर्वेषु नाडीद्वारेषु च वायुपूरितरेचितः पूरक वकावस्थायां वायुना पूरितरेचितनाडीमुखिरावच्छिन्ननिर्व्यापारदेहविशिष्टो भवे । रेचकपूरकादिव्यापारं विना सुषुम्नामार्गेण ऊर्ध्वनिःश्वासो भवेदित्याह—नि षिद्ध इति । नवद्वारे निषिद्धे निरुद्धे सत्यथ सुषुम्नायाः प्राक् पूर्वद्वारं मू ग्रान्ध्रं भित्त्वा अथोर्ध्व निःश्वासः निर्गतश्वासव्यापारो भवेत्, केवलकुम्भकेन ष्टेत्यर्थः ॥ १४१ ॥ कुम्भकलक्षणमाह—घटमध्य इति । एवं केवलकुम्भ गेन आत्मतत्त्वमवगम्य कृतार्थो भवेदित्युपसंहरति—निषिद्धैरिति । स्व ापृतिनिषिद्धैः निरुद्धैः नवद्वारैः विशिष्टदेहो योगी निर्जने निरुपद्रवे ऽ ो सिद्धाद्यासनमास्थाय ॥ १४२ ॥ निर्विकल्पकयोगसेवया कैवल्यनाडीं भि ा तत्र आत्ममात्रेणाव-शिष्टमिति तत्त्वज्ञानेन निश्चितं विकलेवरं कैवल्यं भवे ति शेषः । तुशब्दोऽव-धारणार्थः । इत्युपनिषच्छब्दो योगतत्त्वोपनिषत्समाप्त्य र्थो ॥

श्रीवासुदेवेन्द्रशिष्योपनिषद्ब्रह्मयोगिना ।
लिखितं स्याद्विवरणं योगतत्त्वस्य सुस्फुटम्
योगतत्त्वविवरणं षष्ट्युत्तरशतद्वयम् ॥

इति श्रीमदीशाद्यष्टोत्तरशतोपनिषच्छास्त्रविवरणे एकच रिंशत्संख्यापूरकं योगतत्त्वोपनिषद्विवरणं सम्पूर्णम् ।

योगशिखोपनिषत्

ॐ सह नाववतु । इति शान्तिः

प्रथमोऽध्यायः

मुक्तिमार्गजिज्ञासा

सर्वे जीवा दुःखैर्दुःखैर्मायाजालेन वेष्टिताः ।
तेषां मुक्ति कथं देव कृपया वद शंकर ॥ १ ॥
सर्वसिद्धिव मार्गं मायाजालनिकृन्तनम् ।
जन्ममृत्युज व्याधिनाशनं सुखदं वद ॥ २ ॥
इति ॥

योगज्ञाने य मुक्तिसाधनत्वेन विश्रुते ।
तत्त्रिपदं ब्रह्म त्वं स्वमात्रमवशिष्यते ॥

इह खलु कृष्ण यजुर्वेदप्रविभक्तेयं योगशिखोपनिषत् ससाधनज्ञानयोग-सर्वस्वप्रकटनव्यग्रा ब्रह्मात्रविश्रान्ता विजयते । अस्याः स्वल्पग्रन्थतो विवरणमारभ्यते । शिष्याचार्यभावं गतचतुराननमहेश्वरप्रश्नप्रतिवचनरूपाख्यायिका तु विद्यास्तुत्यर्थमादौ आख्यायिकामवतारयति—सर्वे इति ॥ १ ॥ किं तदित्यत्र—सर्वेति ॥ २ ॥

मुक्तिमार्गस्य दुर्लभत्वम्

हिरण्यगर्भः पप्रच्छ स होवाच महेश्वरः
नानामार्गैस्तु दुष्प्रापं कैवल्यं परमं पदं ॥ ३ ॥
सिद्धिमार्गेण लभते नान्यथा पद्मसंभव

लोकोपकारार्थं महेश्वरं प्रति हिरण्यगर्भः प्रच्छ । तत्प्रश्नमंगीकृत्य स होवाच । किं तदुवाचेत्यत्र वक्ष्यमाणार्थं प्रकाः प्रन् स्तौति—नानेति । निर्विशेषज्ञानैकगम्यत्वात् ॥ ३ ॥ "नान्यः पन्थाः अयनाय विद्यते" इति श्रुतिसिद्धसिद्धिमार्गेण । कैवल्यसिद्धिप्रदोऽयं मार्गो विशेषब्रह्ममात्रज्ञानरूपः तेनैव कैवल्यं लभते नान्यथेत्यर्थः ॥

ब्रह्म केवलशास्त्रागम्यम्

पतिताः शास्त्रजालेषु प्रज्ञया तेन मोहि ॥ ४ ॥
स्वात्मप्रकाशरूपं तत् किं शास्त्रेण प्रका ति ।
निष्कलं निर्मलं शान्तं सर्वातीतं निराम ॥ ५ ॥
तदेव जीवरूपेण पुण्यपापफलैर्वृतम् ।
परमात्मपदं नित्यं तत्कथं जीवतां गतम् ॥ ६ ॥
तत्त्वातीतं महादेव प्रसादात्कथयेश्वर ।

उन्मार्गगामिन आभासज्ञानिनो विडम्बयति— तेता इति । ब्रह्मचर्य-गुरुकुलवाससाधनचतुष्टयादिकं विस्मृत्य "तन्त्वत्र मयाऽधीतं नाधीतं तुर्यतन्त्रकं" इत्यादिस्वरूपदर्शनसिद्धाञ्जनोक्तरीत्या पाँ : ॥ ४ ॥ शास्त्रेण ब्रह्म प्रकाश्यते इत्यत्र स्वात्मेति ब्रह्मणो व्यावि दंवाक्यार्थत्वेन स्वयं-प्रकाशरूपत्वात्, "येनार्थवन्ति तं किं तु वि ारं प्रकाशयेत्" ।

स्वात्मप्रकाशरूपं ब्रह्म कीदृशं इत्यत्र—**निष्कलमिति**। प्राणादिनामान्तषोडश-कलाऽपह्नवसिद्धं ब्रह्म निष्प्रतियोगिकनिष्कलं ब्रह्ममात्रमित्यर्थः ॥ ५ ॥ निष्कलस्य ब्रह्ममात्रत्वे जीवजातं [illegible] न्नमित्यत आह —**तदेवेति**। यत् स्वज्ञदृष्ट्या स्वमात्रं अवशिष्टं स्वाज्ञदृष्ट्या [illegible] च। कथं पुनः ब्रह्म जीवत्वं भजतीत्याक्षिपति—**परमात्मेति** ॥ ६ ॥ तत् [illegible] कीदृशं? **तत्वातीतम्** ॥

ब्रह्मणो जीवभावः

[1]सर्वभावप [illegible] तीतं ज्ञानरूपं निरञ्जनम् ॥ ७ ॥
वायुवत्स्पु [illegible] रतं स्वस्मिंस्तत्राहंकृतिरुत्थिता ।
पञ्चात्मक [illegible] भूत् पिण्डं धातुबद्धं गुणात्मकम् ॥ ८ ॥
सुखदुःखै [illegible] मायुक्तं जीवभावनया कुरु ।
तेन जीवा [illegible] श्वा प्रोक्ता विशुद्धे परमात्मनि ॥ ९ ॥

प्रश्नोत्तरं भगव [illegible] ह—**सर्वेति** ॥ ७ ॥ तदेव स्वाज्ञदृष्ट्या व्योम्नि **वायुवत** इति। तत्स [illegible] गात् **पञ्चात्मकमभूत पिण्डम**। यन्निष्प्रतियोगिक-स्वमात्रमवशिष्टं तदेव [illegible] वज्ञादिदृष्ट्या किञ्चित् स्फुरितं सत् साक्षिभावं भजति। त्रिपाद्भूतिरेव नित्यभूति [illegible] ा चकास्ति। नित्यभूतिरेव पूर्णाहम्भावमेत्य लीलाभूतिः भवति। लीलाभूति [illegible] पे परिच्छिन्नपिण्डाभिमानात् मोहभूतिः। साऽपि पिण्डादिरूपेण जडभू [illegible] पि भवतीत्यर्थः ॥ ८–९ ॥

कामादिदोषविमुक्तजीवस्य शिवत्वम्

कामक्रो [illegible] धं चापि मोहलोभमथो रजः ।
जन्म मृ [illegible] श्च कार्पण्यं शोकस्तन्द्रा क्षुधा तृषा ॥ १० ॥

[1] महेश्वरः इत्यधि [illegible] —अ.

तृष्णा लज्जा भयं दुःखं विषादो हर्ष [1]एव च ।
एभिर्दोषैर्विनिर्मुक्तः स जीवः शिव उच्यते ॥ ११ ॥

त्रिपादेव परिच्छिन्नपिण्डाभिमानात् मोहभूतित्व भजतीत्युक्तं पुनर्मोहभूतेः लीलादिभूतित्वं कथमित्यत्र त्रिपादस्मीति प्रबोधतः ण्डाद्यभिमतिमूलकामादि- वृत्तित्यागसमकालं त्रिपाद्भूतिरेव भवतीत्याह—कामो ॥ १० ॥ कामादिवृत्ति- परिग्रह एव दोषः, त्रिपाद्भूतेः मोहभूतिप्रापकत्वात् ॥ ॥

ज्ञानयोगाभ्यां दोषविनाशः

तस्माद्दोषविनाशार्थमुपायं कथयामि ते
ज्ञानं केचिद्वदन्त्यत्र केवलं तन्न सिद्धये १२ ॥
योगहीनं कथं ज्ञानं मोक्षदं भवतीह भो
योगोऽपि ज्ञानहीनस्तु न क्षमो मोक्षक ॥ १३ ॥
तस्माज्ज्ञानं च योगं च मुमुक्षुर्दृढमभ्य

यस्मादेवं कामादिवृत्तिसंगादनर्थो जातः तस्मा मोहभूतेस्त्रिपाद्भूतित्व- प्रापकोपायः कः इत्यत्र "पश्यतेहापि सन्मात्रमसदन्य "ब्रह्मव्यतिरिक्तं न किञ्चिदस्ति," "ब्रह्ममात्रमसन्नहि," इत्यादिश्रुतिसिद्धर तिरिक्तासत्प्रपञ्चापह्नव- ज्ञानप्रादुर्भूतनिष्प्रतियोगिकब्रह्ममात्रज्ञानसमकालं त्रैपदब्र त्रावस्थानलक्षणविक- ळेबरकैवल्यं स्यादित्यत्र न विवादः, स्वाज्ञानप्रभव ीवत्वादेः स्वज्ञानाव- धिकत्वात् तज्ज्ञानस्य चरमजन्माश्रयत्वात् । तद्विना सवि ाभासज्ञानं केचिदिति ॥ १२–१३ ॥ यथोक्तसाधनविकलब्रह्मचित्ताश्रिताभासः शेषज्ञानस्य स्वफल- साधनानीशत्वात् विविधफलभुसिद्धिप्रापकाभासयोगस्याः मुख्ययोगफलप्रापणा- नीशत्वाच्च यस्मादेतावाभासज्ञानयोगौ प्रातिस्विकेन स्व लसाधनानीशौ भवतः

[1] मेव—अ, अ १, क, उ १.

तस्मात् ज्ञानयोगौ समुच्चित्य मुमुक्षुः दृढमभ्यसेत् । तेनाभासज्ञानयोगौ स्वगताभासतां विहाय निष्प्रतियोगिकनिर्विशेषब्रह्ममात्रज्ञानपर्यवसन्नौ भवतः । तथा च श्रुतिः "शाम्[illegible]ति ह्यस्त्रमस्त्रेण मलेन क्षाळ्यते मलम्" इत्यादि । तत्र योगाभासस्तु आभासज्ञान[illegible]ताभासत्वं निर्मूल्य निर्विशेषज्ञानपर्यवसन्नो भवति ॥

ज्ञानस्वरूपं तत्फलं च

ज्ञानस्वरूप[illegible]वादौ ज्ञेयं ज्ञानैकसाधनम् ॥ १४ ॥
अज्ञानं क[illegible]शं चेति प्रविचार्य मुमुक्षुणा ।
ज्ञातं येन [illegible]जं रूपं कैवल्यं परमं पदम् ॥ १५ ॥
असौ दो[illegible]निर्मुक्तः कामक्रोधभयादिभिः ।
सर्वदोषैर्वृ[illegible]जीवः कथं ज्ञानेन मुच्यते ॥ १६ ॥
स्वात्मरू[illegible]था [1]ज्ञानं पूर्णं तद्व्यापकं तथा ।
कामक्रोध[illegible]दोषाणां [2]स्वरूपान्नास्ति भिन्नता ॥ १७ ॥
पश्चात्तस्य[illegible]धिः [3]किं नु निषेधोऽपि कथं भवेत् ।
विवेकी स[illegible]ा मुक्तः संसारभ्रमवर्जितः ॥ १८ ॥
परिपूर्णम्व[illegible]यं तत्सत्यं कमलसंभव ।
सकलं नि[illegible]लं चैव पूर्णत्वाच्च तदेव हि ॥ १९ ॥

यत एवमतो [illegible]विशेषज्ञानं स्वफलसाधनसमर्थं स्यादेवेति मनसि निधाय मुमुक्षुभिः ज्ञानाज्ञाने[illegible] ज्ञातव्येत्याह—ज्ञानेति ॥ १४ ॥ तत्र निर्विशेषज्ञान-स्वरूपमाह—ज्ञातमि[illegible] । तदेव यथोक्तज्ञानमित्यर्थः ॥ १५ ॥ य एवं

[1] ज्ञातं—अ, अ [illegible] [2] स्वरूपं ना—क, अ १, उ १.
[3] किं तु—क, च

ज्ञानी सोऽयं असौ । कृतकृत्यो भवतीत्यर्थः । पुनराभासज्ञानाभिप्रायेणाक्षिपति । किमिति? कामक्रोधादिसर्वदोषैरिति । कामक्रोधादयो दोषाः स्वाज्ञानविजृम्भिताः●॥ १६ ॥ सर्वदोषग्रासस्वज्ञाने वा तदेकाद्वे स्वात्मनि दोषासम्भवं प्रकटयन् परिहरति—स्वात्मेति । यथा स्वात्मरू सर्वपरिपूर्ण व्याप्यसत्वे व्यापकमपि भवति तथा तद्गोचरज्ञानस्य तन्मात्रप वसन्नत्वान्न तत् भिद्यते । स्वात्मातिरेकेण ज्ञानाभावेऽपि कामादिदोषाः तद्विन्न भवेयुरित्यत आह—कामेति । न हि निम्प्रतियोगिकब्रह्ममात्रे कामादिदोषपृ : स्यान्न वेति स्मृतिर्वा कथं सेद्धुं पार्यति ब्रह्ममात्रगतनिम्प्रतियोगिक या: स्वातिरिक्तमस्ति नास्तीति गन्धासहत्वात् ॥ १७ ॥ एवं ज्ञानी तकृत्यो भवतीत्याह—विवेकीति ॥ १८ ॥ तस्यैव ब्रह्मत्वमाह—परिपूर्णेति । सांसारिकभ्रमविरळ- ब्रह्मविदो ब्रह्मत्वात् यत् सत्यमिति ख्यातं तदेव स्व दिदृष्टया सकळादिभावं भजतीत्याह—सकळमिति ॥ १९ ॥

आभासज्ञान्यज्ञानिनोरविशेषः

[1]कलिना स्फूर्तिरूपेण संसारभ्रमतां गतम्
निष्कलं निर्मलं साक्षात्सकलं गगनोपमम् ॥ २० ॥
उत्पत्तिस्थितिसंहारस्फूर्तिज्ञानविवर्जितम्
एतद्रूपं समायातः स कथं मोहसागरे ॥ २१ ॥
निमज्जति महाबाहो त्यक्त्वा विद्यां पुनः ः ।
सुखदुःखादिमोहेषु यथा संसारिणां स्थितिः ॥ २२ ॥
तथा ज्ञानी यदा तिष्ठेद्वासनावासितस्तदा ।
तयोर्नास्ति विशेषोऽत्र समा संसारभावना ॥ २३ ॥
ज्ञानं चेदीदृशं ज्ञातमज्ञानं कीदृशं पुनः

[1] कलना—अ, अ १.

अप्रकाशकल्यन्तःकरणयोगात् संसारित्वं भजतीत्याह—**कलिनेति** वस्तुतस्तु **निष्कलम्** ॥ २० ॥ *यन्निष्कलमित्यादिविशेषणविशिष्टमेतद्* चित्तशुद्धिसाधनचतुष्टयसम्पत्त्यभावेऽपि येन केनोपायेन **समायोगो** यदि ज्ञानी तदा कृतकृत्यो [illegible]वेत्, स कथं स्वात्मज्ञानं विहाय स्वाज्ञवन्मोहसागरं *निमज्जतीति प्रश्नोत्तरं* [illegible]वानाह—*सुखेति* ॥ २१–२२ ॥ **तथा** *अयमाभास-ज्ञानी । स्वाज्ञानेनास्यापि [illegible]मा* ॥ २३ ॥ *आभासज्ञानिनः ज्ञानम् । आभासज्ञाना-ज्ञानयोरविरोधादेकार्थपर्य[illegible]सायित्वं युज्यत इत्यर्थः ।*

आभासज्ञानिनो योगेन विना न मोक्षसिद्धिः

ज्ञाननिष्ठोऽ[illegible]रक्तोऽपि धर्मज्ञोऽविजितेन्द्रियः ॥ २४ ॥
विना देहे[illegible] योगेन न मोक्षं लभते विधे ।
अपक्काः [illegible]पक्काश्च देहिनो द्विविधाः स्मृताः ॥ २५ ॥
अपक्का यो[illegible]हीनास्तु पक्का योगेन देहिनः ।
मर्त्यो योग[illegible]ना देहो ह्यजडः शोकवर्जितः[1] ॥ २६ ॥
जडस्तु प[illegible]वो ज्ञेयो ह्यपक्को दुःखदो भवेत् ।

तस्य योगं विन[illegible]किञ्चित्करतामाह—**ज्ञानेति** । स्वारोपितज्ञाननिष्ठः । शास्त्रतो धर्मज्ञः । स्व[illegible] **अविजितेन्द्रियः** ॥ २४ ॥ *अयमाभासज्ञानी* **योगेन विना** स्वात्मज्ञानगताभा[illegible]मलं संक्षाळ्य शुद्धं ज्ञानं प्राप्य तत्समकालं **न** कदापि **मोक्षं लभते**, योगोद्[illegible]स्य चित्तमलशोधकत्वात् । नह्यशुद्धचित्तासादितज्ञानं कार्यकारि भवतीत्यर्थः आभासपारमार्थिकभेदेन ज्ञानिनौ द्विविधावित्याह— **अपक्व** इति ॥ २५ [illegible]केवलाभासज्ञानिनः **अपक्काः** अशुद्धान्तरत्वात् । **योगेन पक्काः** पारमा[illegible]कज्ञानिनः इत्यर्थः । शुद्धाशुद्धज्ञानिनोरधिष्ठितदेहादेः जडाजडतामाह—**सर्व**[illegible]ते । ज्ञानाग्निदग्धकल्मषत्वात् ज्ञानिदेहादेरजडत्वं युज्यते इत्यत्र "यथैव मृण्मयः [illegible]म्मः तद्वद्देहोऽपि चिन्मयः" इति श्रुतेः ॥ २६ ॥

[1] ज: शोकविवर्जि[illegible]—क

आभासज्ञानिनां दुःखानिवृत्तिः

ध्यानस्थोऽसौ तथाऽप्येवमिन्द्रियैर्विवशो भवेत् ॥ २७ ॥
तानि गाढं नियम्यापि तथाऽप्यन्यैः प्र
शीतोष्णसुखदुःखाद्यैर्व्याधिभिर्मानसैस्तथ ॥ २८ ॥
अन्यैर्नानाविधैर्जीवैः शस्त्राग्निजलमारुतैः
शरीरं पीड्यते तैस्तैश्चित्तं संक्षुभ्यते ततः ॥ २९ ॥
तथा प्राणविपत्तौ तु क्षोभमायाति मारुतः
ततो दुःखशतैर्व्याप्तं चित्तं क्षुब्धं भवेन्नृण ॥ ३० ॥
देहावसानसमये चित्ते यद्यद्विभावयेत्
तत्तदेव भवेज्जीव इत्येवं जन्मकारणम् ॥ १ ॥
देहान्ते किं भवेज्जन्म तन्न जानन्ति म ाः ।
तस्माज्ज्ञानं च वैराग्यं जीवस्य केवलं ः ॥ ३२ ॥
पिपीलिका यथा[दा ?]लग्ना देहे ध्यानार्ा च्यते ।
असौ किं वृश्चिकैर्दष्टो देहान्ते वा कथं ी ॥ ३३ ॥
तस्मान्मूढा न जानन्ति मिथ्यातर्केण वा ाः ।

यद्याभासज्ञानी शुद्धज्ञानिवत् ध्यानस्थः । वि ो भवेत् ब्रह्मातिरेकेण इन्द्रियादिकं नास्तीत्यसमाहितकरणग्रामत्वात् ॥ २ ॥ यथाबलं तानि ॥ २८–२९ ॥ नराणां निर्विशेषब्रह्मज्ञानीतराणाम् ॥ ३ -३१ ॥ यस्मादाभास-ज्ञानिनः एवं न विदुः तस्मात् आभासज्ञानम् । वैशेषज्ञानिनोऽप्येवं न विदुरिति चेत्, सत्यं ब्रह्मातिरेकेण देहः तदवसान मयो वा अस्ति चेत् जानन्ति, निर्विशेषब्रह्ममात्रावगतेः देहाद्युपलक्षितार्ा ापदतत्कार्यजातमस्ति

नास्तीति विभ्रमापह्नवपूर्वकत्वात् । तस्मादाभासज्ञानी अत्र विषयो भवतीति मन्तव्यम् । ज्ञानियोगिशब्देन मुख्यज्ञानियोगिनौ गृहीतौ चेत् मूलश्रुत्यनुरूप भवेदिति चेन्न; मूलश्रुतेरप्याभासज्ञान्यादिविषयतात्पर्यत्वात्, चतुर्थाध्याये शुद्धज्ञानिसमाचारस्य स्फुटीकृतत्वाच्च । न हि कदाऽपि श्रुतिर्विरुद्धार्थं वदति । तस्मादाभासपारमार्थिकज्ञानिनौ मिथोविविक्तं श्रुतिरनुवदतीति वक्तुं युक्तमित्यर्थः ॥ ३२ ॥ आभासज्ञानी अस्मिन् प्रकरणे विशेषितव्यः इति स एव विशेष्यते—पिपीलिकेति ॥ ३३ ॥ यस्मादेवं ब्रह्मातिरेकेण स्वदेहध्यानतद्विरोधादिकमस्तीति भ्रान्तिः तस्मात् ॥

अहंभाव एव सर्वानर्थमूलम्

अहंकृतिर्यस्य यस्य नष्टा भवति तस्य वै ॥ ३४ ॥
देहस्त्वपि भवेन्नष्टो व्याधयश्चास्य किं पुनः ।
जलाग्निशस्त्रघातादिबाधा कस्य भविष्यति ॥ ३५ ॥
यदा यदा परिक्षीणा पुष्टा चाहंकृतिर्भवेत् ।
[1]तमनेनास्य नश्यन्ति प्रवर्तन्ते रुगादयः ॥ ३६ ॥
कारणेन विना कार्यं न कदाचन विद्यते ।
अहंकारं विना तद्वद्देहे दुःखं कथं भवेत् ॥ ३७ ॥

स्वाज्ञविकल्पितदेहादौ अहंकृतिः ॥ ३४ ॥ ज्ञानिनो विदेहत्वात् यद्यपि स्वाज्ञदृष्ट्या देहोऽस्तु शस्त्रघातादिः तस्यैवास्तु ज्ञानिनो न काचित् क्षतिरस्तीत्यर्थः ॥ ३५ ॥ यदि पुनरस्य देहादावहम्भावः उदेति तदा स्वाज्ञवत् सर्वानर्थो भवतीत्याह—उदेति । अनेन देहाभिमानदोषेण अस्य ब्रह्मास्मीत्यादिवृत्तयो नश्यन्ति तिरोभवन्ति । किंच तं देहाभिमानिनं प्रति रुगादयः प्रवर्तन्ते ॥ ३६ ॥ अहम्भाव एव सर्वानर्थमूलमित्याह—कारणेनेति ॥ ३७ ॥

[1] तदा तदा-

योगसिद्धस्य ईश्वरत्वं जीवन्मुक्तत्वं च

शरीरेण जिताः सर्वे शरीरं योगिभिर्जितम् ।
तत्कथं कुरुते तेषां सुखदुःखादिकं फलम् ॥ ३८ ॥
इन्द्रियाणि मनो बुद्धिः कामक्रोधादिकं जितम् ।
तेनैव विजितं सर्वं नासौ केनापि बाध्यते ॥ ३९ ॥
महाभूतानि तत्त्वानि संहृतानि क्रमेण च
समधातुमयो देहो दग्धो योगाग्निना शनैः ॥ ४० ॥
देवैरपि न लक्ष्येत [1]योगिदेहो महाबलः
भेदबन्धविनिर्मुक्तो नानाशक्तिधरः परः ॥ ४१ ॥
यथाऽऽकाशस्तथा देह आकाशादपि निर्मलः ।
सूक्ष्मात्सूक्ष्मतरो दृश्यः [2]स्थूलात्स्थूलो [3]जडाजडः ॥ ४२ ॥
इच्छारूपो हि योगीन्द्रः स्वतन्त्रस्त्वजरामरः ।
क्रीडते त्रिषु लोकेषु लीलया यत्रकुत्रचित् ॥ ४३ ॥
अचिन्त्यशक्तिमान् योगी नानारूपाणि धारयेत् ।
संहरेच्च पुनस्तानि स्वेच्छया विजितेन्द्रियः ॥ ४४ ॥
नासौ मरणमाप्नोति पुनर्योगबलेन तु ।
हठेन मृत एवासौ मृतस्य मरणं कुतः ॥ ४५ ॥
मरणं यत्र सर्वेषां तत्रासौ परिजीवति ।
यत्र जीवन्ति मूढास्तु तत्रासौ मृत एव हि ॥ ४६ ॥

योग—अ, अ १, अ २, क. स्थूलात्स्थू—उ.
[3] जडाजडः—अ, अ २, उ.

कर्तव्यं नैव तस्यास्ति कृतेनासौ न लिप्यते ।
जीवन्मुक्तः सदा स्वच्छः सर्वदोषविवर्जितः ॥ ४७ ॥

सर्वे स्वाज्ञाः [illegible] ब्रह्मात्मैक्ययोगिभिः ॥ ३८ ॥ "ब्रह्मातिरिक्तं न किञ्चिदस्ति" इति ज्ञा[illegible]खड्गेन इन्द्रियाणि ॥ ३९ ॥ किंच—महाभूतानि ॥ ४० ॥ सम्यज्ञानिनं ईश्वरभावापत्त्या सत्यसङ्कल्पत्वादयदि सम्यज्ञानयोगी अयं देहः सर्वादृश्यो भ[illegible]तु ईश्वरादिसामर्थ्यमीहते तदा देवैरपीति ॥ ४१–४४ ॥ नासौ मरणमाप्नोति [illegible]रणादेः देहनिष्ठत्वेन योगिनो देहातीतत्वात्, "न जायते म्रियते वा [illegible]नश्चित्" इति श्रुतेः । ब्रह्मातिरेकेण देहादिकं नास्तीति बोध एव हठः, हठे[illegible] सम्यज्ञानेन मृत एवासौ देहः ॥ ४५ ॥ "या निशा सर्वभूतानां" इत्यादिस्[illegible]णात् ॥ ४६–४७ ॥

आभासज्ञानिनां विडम्बनम्

विरक्ता [illegible]नेनश्चान्ये देहेन विजिताः सदा ।
ते कथं व[illegible]गेभिस्तुल्या मांसपिण्डाः कुदेहिनः ॥ ४८ ॥
देहान्ते इ[illegible]नेभिः पुण्यात्पापाच्च फल[1]माप्यते ।
ईदृशं तु [illegible]त्तत्तद्भुक्त्वा ज्ञानी पुनर्भवेत् ॥ ४९ ॥

योगव्याविद्धचि[illegible]मलनिर्विशेषज्ञानिनमीश्वरत्वेन जीवन्मुक्तत्वेन च स्तुत्वा तदपेक्षया आभासज्ञ[illegible]नो विडम्बयति—विरक्ता इति । स्वातिरिक्तविषये विशेषेण [illegible]क्ताः विर[illegible]क्ताः ॥ ४८ ॥ प्रारब्धादिकर्मफलं भुक्त्वा ज्ञानी पुनर्भवेत् । न हि पा[illegible]मार्थिकज्ञानिनः पुण्यपापतत्फलोच्चावचजन्मादिकमस्ति, आभासज्ञानिनि तु [illegible]र्मुपपद्यत इति श्रुतेराशयः । अन्यथा "ब्रह्म वेद ब्रह्मैव भवति," "य एवं [illegible]निर्बीजं वेद निर्बीज एव स भवति," "तमेवं विद्वानमृत

[1] मश्नुते—क, व[illegible]२.

इह भवति नान्यः पन्था अयनाय विद्यते," इत्यादयो वेदनसमकालमेव ब्रह्ममात्रावस्थानलक्षणविदेहकैवल्यानुवादिश्रुतयो बाध्येरन्। तस्माद्यत्र ज्ञानिनः पापपुण्यानुरोधेन पुनर्भवोक्तिराभासज्ञानिनिष्ठेति ॥ ४९ ॥

तेषां सिद्धसङ्गत्या कृतकृत्यत्व.

पश्चात्पुण्येन लभते सिद्धेन सह [1]सङ्गम् ।
ततः सिद्धस्य कृपया योगी भवति नान्यथा ॥ ९० ॥
ततो नश्यति संसारो नान्यथा शिवभाषितम् ।

तादृशाभासज्ञानिनः सुकृतविशेषात् जीवन्मुक्तसंगत्या कृतकृत्यता स्यादित्याह—पश्चादिति ॥ ९० ॥

ज्ञानयोगयोः मिथः कार्यकारणत्वम्

योगेन रहितं ज्ञानं न मोक्षाय भवेद्विधेः ॥ ९१ ॥
ज्ञानेनैव विना योगो न सिध्यति कदाचन ॥ ।

आभासज्ञानयोगसमुच्चयाभिप्रायेण प्रातिस्विकेन तयोः निन्दोच्यते—योगेनेति ॥ ९१ ॥

योग एव परमो मोक्षमार्गः

जन्मान्तरैश्च बहुभिर्योगो ज्ञानेन लभ्यते ॥ ९२ ॥
ज्ञानं तु जन्मनैकेन योगादेव प्रजायते ।
तस्माद्योगात्परतरो नास्ति मार्गस्तु मोक्षदः ॥ ९३ ॥

[1] संगतिः—अ, अ १, अ २, क.

प्रविचार्य चिरं ज्ञानं मुक्तोऽहमिति मन्यते ।
किमसौ मननादेव मुक्तो भवति तत्क्षणात् ॥ ९४ ॥
पश्चाज्जन्मान्तरशतैर्योगादेव विमुच्यते ।
न तथा भवतः[1] योगाज्जन्ममृत्यू पुनःपुनः ॥ ९५ ॥
प्राणापानसम[1]योगश्चन्द्रसूर्यैकता भवेत् ।
सप्तधातुमयं देहमग्निना रञ्जयेद्ध्रुवम् ॥ ९६ ॥
व्याधयस्तस्य[2] नश्यन्ति छेदखातादि का[3]कथा ।
तदसौ परमाकाशरूपो देह्यवतिष्ठति ॥ ९७ ॥
किं पुनर्बहुनोक्तेन मरणं नास्ति तस्य वै ।
[3]देहिवदृश्यते लोके दग्धकर्पूरवत्स्वयम् ॥ ९८ ॥

तयोः मिथः [illegible]र्यकाग्रतामाह---जन्मेति ॥ ९२ ॥ यस्मादेवं तस्मान् । नास्ति, अ[illegible]ासज्ञानगताभासतां ग्रसित्वा शुद्धज्ञानजनकत्वात् । अत एव योगमार्गस्तु [illegible]ानद्वारा मोक्षदः ॥ ९३ ॥ योगाभावे ज्ञानाभासेनापि प्रविचार्य । कादाचित्[illegible]मननादेव ॥ ९४ ॥ योगादेव विमुच्यते इति योगं स्तौति । यथा [illegible]ाभासज्ञानिनां जन्ममृत्यू भवतः न तथा ॥ ९५ ॥ सप्तधातुमयं देहं—शुक्रादयः सप्तधातवः देहस्य तन्मयत्वात् तम् ॥ ९६–९८ ॥

योगसंस्कृतमनस्त्येव आत्मज्ञानोत्पत्तिः

चित्तं प्राणेन संबद्धं सर्वजीवेषु संस्थितम् ।
रज्ज्वा यद्वत्सुसंबद्धः पक्षी तद्वदिदं मनः ॥ ९९ ॥

[1] योगाच्च—अ २.
[2] स्तथा—अ.
[3] देहीव दृ—क, अ १.

नानाविधैर्विचारैस्तु न [1]बाध्यं जायते मनः ।
तस्मात्तस्य जयोपायः प्राण एव हि नान्यथा ॥ ६० ॥
तर्कैर्जल्पैः शास्त्रजालैर्युक्तिभिर्मन्त्रभेषजैः
न वशो जायते प्राणः सिद्धोपायं विना विधे ॥ ६१ ॥
उपायं तमविज्ञाय योगमार्गे प्रवर्तते ।
खण्डज्ञानेन सहसा जायते क्लेश[2]वत्तरः ॥ ६२ ॥
योऽजित्वा पवनं मोहाद्योगमिच्छति योगिनाम् ।
सोऽपक्वं कुम्भमारुह्य सागरं तर्तुमिच्छति ॥ ६३ ॥
यस्य प्राणो विलीनोऽन्तः साधके जीवितं सति ।
पिण्डो न पतितस्तस्य [3]चित्तं दोषैः प्रबाधते ॥ ६४ ॥

संस्थितं स्वात्मानं विषयीकरोतीत्यर्थः । तद्वदिदं मनः, "प्राणबन्धनं हि सोम्य मनः" इति श्रुतेः ॥ ५९ ॥ यस्मादेवं तस्मात् ॥ ६०–६५ ॥

योगाभ्यास एव प्रथमकृत्यम्

शुद्धे चेतसि तस्यैव स्वात्मज्ञानं प्रकाशते ।
तस्माज्ज्ञानं भवेद्योगाज्जन्मनैकेन पद्मज ॥ ६५ ॥
तस्माद्योगं तमेवादौ साधको नित्यमभ्यसेत् ।
मुमुक्षुभिः प्राणजयः कर्तव्यो मोक्षहेतवे ॥ ६६ ॥

[1] साध्यं—अ, अ १. [2] वत्तरः—अ २. वात्तरः—क.
[3] चित्तो—अ. अ १, अ २.

योगात्परतरं पुण्यं योगात्परतरं शिवम् ।
योगात्परतरं सूक्ष्मं योगात्परतरं न हि ॥ ६७ ॥
योऽपानप्राणयोरैक्यं [1]रजसो[2]रेतसस्तथा ।
सूर्यचन्द्रमसोर्योगो जीवात्मपरमात्मनोः ॥ ६८ ॥
एवं हि द्वन्द्वजालस्य संयोगो योग उच्यते ।

यस्माद्योग एवं प्रभववान् तस्मात् ॥ ६६–६८ ॥

योगशिखोपदेशः

अथ योगशिखां वक्ष्ये सर्वज्ञानेषु चोत्तमाम् ॥ ६९ ॥
यदाऽनुध्यायते मन्त्रं गात्रकम्पोऽथ जायते ।
आसनं पद्मकं बद्ध्वा यच्चान्यदपि रोचते ॥ ७० ॥
नासाग्रे दृष्टिमारोप्य हस्तपादौ च [3]संयतौ ।
मनः सर्वत्र संगृह्य ॐकारं तत्र चिन्तयेत् ॥ ७१ ॥
ध्यायते सततं प्राज्ञो हृत्कृत्वा परमे[4]श्वरम् ।
एकस्तम्भे नवद्वारे त्रिस्थूणे पञ्चदैवते ॥ ७२ ॥
ईदृशे तु शरीरे वा मतिमान्नोपलक्षयेत् ।
आदित्यमण्डलाकारं रश्मिज्वालासमाकुलम् ॥ ७३ ॥
तस्य मध्यगतं वह्निं प्रज्वलेद्दीपवर्तिवत् ।
दीपशिखा तु या मात्रा सा मात्रा परमेश्वरे ॥ ७४ ॥

[1] स्वरजो—अ, अ १, अ २, क, मु.
[2] रेतसो—अ, मु.
[3] संयतौ—उ १.
[4] छिन्नं—उ. उ १.

इत्थं योगं स्तुत्वा अथ अनन्तरं योगसारभूतां शिखां प्रपञ्चयति—अथेति । योगमस्तकविलसितत्वात् योगशिखा । आभासादिज्ञानापेक्षया इयमुत्तमा, अशुद्धचित्ताश्रयज्ञानगताभासग्रासत्वात् । तां तुभ्यं वक्ष्ये इत्यर्थः ॥ ६९ ॥ किं तत् इत्यत्र तदियत्तां तदभ्यासक्रमं चाह—यदेति । मन्तारं अनुसन्धातारं त्रायते इति मन्त्रः नादः । मन्त्रं मन्त्रो यदा अनुध्यायते अनुसन्धीयते तदा अथ अनन्तरं योगिनो गात्रकम्पं जायते । तदुपशमनार्थं आसनमिति । यद्वान्यदपि गेचते सिद्धासनादि ॥ ७० ॥ एवं आसने स्थित्वा नासाग्रे इति ॥ ७१ ॥ तदानीं देहदृष्टिः न कार्येत्याह—एकेति । वीणादण्डस्य शरीरमण्टपाधारत्वात् । स्थूणशब्देन आगाम्यादिकर्मत्रयमुच्यते । पञ्चदैवतशब्देन ब्रह्मादिसदाशिवान्तपञ्चब्रह्माण उच्यन्ते ॥ ७२ ॥ एतत्संघाते शरीरे स्वात्मात्मीयदृष्टिं न कुर्यादित्यर्थः । ततः किं कर्तव्यमित्यत्र स्वहृदये आदित्येति ॥ ७३ ॥ प्राणायामानुकूलध्यानेन मूलाधारगताग्निज्वालावलीयुतं भावयेदित्यर्थः । तत्र दीपशिखारूपेण परमेश्वरो भावनीयः इत्याह—दीपशिखेति । मूलाधारस्थदीपशिखा तु या मात्रा नीवारशूकादपि तन्वी सा मात्रा तदाकारेण परमेश्वरे भाविते सति ॥ ७४ ॥

योगाभ्यासात् परमपदसाक्षात्कारः

भिन्दन्ति योगिनः सूर्यं योगाभ्यासेन वै पुनः ।
द्वितीयं सुषुम्नाद्वारं परिशुभ्रं समर्पितम् ॥ ७५ ॥
कपालसंपुटं पीत्वा ततः पश्यति तत्पदम् ।

अथ तत्प्रसादतो योगिनः योगाभ्यासबलेन सूर्यमण्डलं भित्त्वा तत्पदं यान्तीत्यत्र "सूर्यद्वारेण ते विरजाः प्रयान्ति" इति श्रुतेः ॥

संन्यस्तं पुरुषं दृष्ट्वा स्थानाच्चलति भास्करः ।
एष मे मण्डलं भित्त्वा परं ब्रह्म प्रयास्यति ॥

इति स्मृत्यनुरोधेन सन्न्यासयोगिनः सूर्यमण्डलं भित्त्वा तत्पदं यान्तीत्युक्तम्। केवलयोगिनस्तु द्वितीयं सुषुम्नाद्वारं कुण्डलिन्या विभिद्य ॥ ७५ ॥ तन्मार्गेण कपालसम्पुटं सहस्रारचक्रं प्रविश्य तत्र रवीन्दुग्निजममृतं पीत्वा ततः तत्पदं तत्रत्यतुरीयं तुरीयातीतं वा सोऽहमिति पश्यति पश्यन्ति। ततः तदात्त-ज्ञानानुरोधेन सविशेषं निर्विशेषं वा ब्रह्म प्रयान्तीत्यर्थः ॥

ध्यानाशक्तस्य पुण्यलोकप्राप्तिः

अथ तद् ध्यायते जन्तुरालस्याच्च प्रमादतः ॥ ७६ ॥
यदि त्रिकालमागच्छेत् [1]स गच्छेत्पुण्यसंपदम्।
पुण्यमेतत्समासाद्य संक्षिप्य कथितं मया ॥ ७७ ॥

एवं ध्यातुमशक्तानां पुण्यलोकाप्तिमाह—अथेति। यदि यो जन्तुः यथावत् ध्यानकलनायामालस्यात् प्रमादतश्च भेदधिया तत् ब्रह्म ध्यायते ध्यायति ॥ ७६ ॥ एवं अहरहः त्रिकालं ध्यानमागच्छेत् ध्यानं करोति सोऽयं मुनिः स्वभावनाऽनुरोधेन पुण्यसम्पदं ब्रह्मेन्द्राद्यैश्वर्यं गच्छेत् प्राप्नुयात्। एतत्पुण्यानुरोधेन संक्षेपेण मयोक्तमित्यर्थः ॥ ७७ ॥

लब्धयोगस्य स्वात्मबोधः

लब्धयोगोऽथ बुध्येत प्रसन्नं परमेश्वरम्।
जन्मान्तरसहस्रेषु यदा क्षीणं तु किल्बिषम् ॥ ७८ ॥
तदा पश्यति योगेन संसारोच्छेदनं महत्।

वक्ष्यमाणरीत्या लब्धयोगः स्वात्मानं बुध्यते इत्याह—लब्धेति। सोऽहमिति बुध्येत। किल्बिषवतां स्वातिरिक्तकलनोच्छेदनेश्वरसाक्षात्कारः कुत इत्यत आह—जन्मान्तरेति। नित्यादिकर्मफलसमर्पणसन्तुष्टेश्वरप्रसादतः यदा ॥ ७८ ॥

[1] संग—अ १.

योगाभ्यासार्थं जितप्राणगुरूपसदनम्

अधुना संप्रवक्ष्यामि योगाभ्यासस्य लक्षणम् ॥ ७९ ॥
मरुज्जयो यस्य सिद्धः सेव्येत्तं गुरुं सदा ।
गुरुवक्त्रप्रसादेन कुर्यात्प्राणजयं बुधः ॥ ८० ॥

तदा पश्यति योगेनेत्युक्तं, सोऽयं योगः कीदृश इत्याकांक्षायां तदियत्तां ससाधनां सफलामाचष्टे—अधुनेति ॥ ७९ ॥ तत् गुरुमुखेनैव ज्ञेयमित्याह—मरुदिति ॥ ८० ॥

सरस्वतीचालनम्

वितस्तिप्रमितं दैर्घ्यं चतुरङ्गुलविस्तृतम् ।
मृदुलं धवलं प्रोक्तं वेष्टनाम्बरलक्षणम् ॥ ८१ ॥

आदौ सरस्वतीनाडीचालनपुरस्सरं कुण्डलिनीस्थितिं तच्चालनोपायं चाह—वितस्तीति । सरस्वतीनाडीमस्तकमुक्तलक्षणलक्षितवस्त्रेणावेष्टय ब्राह्मे मुहूर्ते उत्थाय मुहूर्तपर्यन्तं निर्भयाच्चालयेत् ॥ ८१ ॥

कुण्डलीचालनेन ग्रन्थित्रयभेदः

निरुध्य मारुतं गाढं शक्तिचालनयुक्तितः ।
अष्टधा कुण्डलीभूतामृर्ज्वीं कुर्यात्तु कुण्डलीम् ॥ ८२ ॥
पायोराकुञ्चनं कुर्यात्कुण्डलीं चालयेत्तदा ।
मृत्युवक्त्रगतस्यापि तस्य मृत्युभयं कुतः ॥ ८३ ॥
एतदेव परं गुह्यं कथितं तु मया तव ।
वज्रासनगतो नित्यमूर्ध्वाकुञ्चनमभ्यसेत् ॥ ८४ ॥

वायुना ज्वलितो वह्निः कुण्डलीमनिशं दहेत् ।
संतप्ता साऽग्निना [1]जीवा शक्तिस्त्रैलोक्यमोहिनी ॥ ८५ ॥
प्रविशेच्चन्द्र[2]कुण्डे तु सुषुम्नावदनान्तरे ।
वायुना वह्निना सार्धं ब्रह्मग्रन्थिं भिनत्ति सा ॥ ८६ ॥
विष्णुग्रन्थिं ततो भित्त्वा रुद्रग्रन्थौ च तिष्ठति ।
ततस्तु कुम्भकैर्गाढं पूरयित्वा पुनःपुनः ॥ ८७ ॥

सरस्वतीनाडीचालनानन्तरं निरुध्य ॥ ८२ ॥ तदा पायोः । कुण्डलिनीचालनतोऽस्य विमृत्युत्वमाह—मृत्युवक्त्रेति ॥ ८३ ॥ कुण्डलीं चालयेदिति यदुक्तं सोपायं तदाह—वक्त्रेति ॥ ८४ ॥ आकुञ्चनोत्थवायुना । तेन दाहेन सन्तप्ता ॥ ८५ ॥ ततः सा किं करोतीत्यत्र प्रविशेत् । सुषुम्नायाः चन्द्रवत् शीतळत्वात् कुण्डलीतापशान्तिकरत्वं योग्यनुभवसिद्धमित्यर्थः । दक्प्राणवायुना । मूलाधारप्रवेशमार्गकवाटाभं ब्रह्मग्रन्थिम् ॥ ८६ ॥ अनाहतकवाटं विष्णुग्रन्थिम् । आज्ञाकवाटे रुद्रग्रन्थौ । रुद्रग्रन्थिभेदनोपायमाह—तत इति ॥ ८७ ॥

कुम्भकचतुष्टयाभ्यासविधिः

अथाभ्यसेत्सूर्यभेदमुज्जायीं चापि शीतलीम् ।
भस्त्रां च सहितो नाम स्याच्चतुष्टयकुम्भकः ॥ ८८ ॥
बन्धत्रयेण संयुक्तः केवलप्राप्तिकारकः ।

कुम्भकभेदमाह—अथेति ॥ ८८-८९ ॥

[1] जीव—अ, मु. [2] तुण्डे—क. खण्डे—अ. तुण्डेन—ज २.

सूर्यभेदलक्षणम्

अथास्य लक्षणं सम्यक्फलयुक्तमिदं समासतः ॥ ८९ ॥

एकाकिना समुपगम्य विविक्तदेशं
प्राणादिरूपमसृतं परमार्थतत्त्वम् ।
लघ्वाशिना धृतिमता परिभावितव्यं
संसाररोगहरमौषधमद्वितीयम् ॥ ९० ॥

सूर्यनाड्या समाकृष्य वायुमभ्यासयोगिना ।
विधिवत्कुम्भकं कृत्वा रेचयेच्छीतरश्मिना ॥ ९१ ॥

उदरे बहुरोगघ्नं क्रिमिदोषं निहन्ति च ।
मुहुर्मुहुरिदं कार्यं सूर्यभेदमुदाहृतम् ॥ ९२ ॥

आदौ समुदायलक्षणमुच्यते—एकाकिनेति ॥ ९० ॥ ततः सूर्यभेदलक्षणं तत्फलं चाह—सूर्येति ॥ ९१–९२ ॥

उज्जायीकुम्भकलक्षणम्

नाडीभ्यां वायुमाकृष्य कुण्डल्याः पार्श्वयोः क्षिपेत् ।
धारयेदुदरे पश्चाद्रेचयेदिडया सुधीः ॥ ९३ ॥

कण्ठे कफादिदोषघ्नं शरीराग्निविवर्धनम् ।
नाडीजलापहं धातुगतदोषविनाशनम् ॥ ९४ ॥

गच्छतस्तिष्ठतः कार्यमुज्जाय्याख्यं तु कुम्भकम् ।

उज्जायीकुम्भकलक्षणमाह—नाडीभ्यामिति ॥ ९३–९४ ।

मुखेन वायुं संगृह्य घ्राणरन्ध्रेण रेचयेत् ॥ ९५ ॥
शीतलीकरणं चेदं हन्ति पित्तं क्षुधां तृषम् ।

शीतलीलक्षणमाह—मुखेनेति ॥ ९५ ॥

भस्त्रिकाकुम्भकलक्षणम्

स्तनयोरथ भस्त्रेव लोहकारस्य वेगतः ॥ ९६ ॥
रेचयेत्पूरयेद्वायुमाश्रमं देहगं धिया ।
यथा श्रमो भवेद्देहे तथा सूर्येण पूरयेत् ॥ ९७ ॥
कण्ठसंकोचनं कृत्वा पुनश्चन्द्रेण रेचयेत् ।
वातपित्तश्लेष्महरं शरीराग्निविवर्धनम् ॥ ९८ ॥
कुण्डलीबोधकं वक्रदोषघ्नं शुभदं सुखम् ।
ब्रह्मनाडीमुखान्तःस्थकफाद्यर्गलनाशनम् ॥ ९९ ॥
सम्यग्बन्धसमुद्भूतं ग्रन्थित्रयविभेदकम् ।
विशेषेणैव कर्तव्यं भस्त्राख्यं कुम्भकं त्विदम् ॥ १०० ॥

भस्त्रिकाकुम्भकलक्षणमाह—स्तनयोरिति । भस्त्रिकाचालकस्तनयोः समं अथ ॥ ९६–९९ ॥ भस्त्रिकाकुम्भकात् रुद्रग्रन्थिरपि भिद्यते इत्यर्थः ॥ १०० ॥

बन्धत्रयविधिः

बन्धत्रयमथेदानीं प्रवक्ष्यामि यथाक्रमम् ।
नित्यं कृतेन तेनासौ वायोर्जयमवाप्नुयात् ॥ १०१ ॥

चतुर्णामपि भेदानां कुम्भके समुपस्थिते ।
बन्धत्रयमिदं कार्यं वक्ष्यमाणं मया हि तत् ॥ १०२ ॥
प्रथमो मूलबन्धस्तु द्वितीयोड्डीयणाभिधः ।
जालन्धरस्तृतीयस्तु लक्षणं कथयाम्यहम् ॥ १०३ ॥

कुम्भकचतुष्टयांगतया बन्धत्रयलक्षणमाह—बन्धेति ॥ १०१–१०४ ॥

मूलबन्धः

गुदं पार्ष्ण्या तु संपीड्य [1]वायुमाकुञ्चयेद्बलात् ।
वारंवारं यथा चोर्ध्वं समायाति समीरणः ॥ १०४ ॥
प्राणापानौ नादबिन्दू मूलबन्धेन चैकताम् ।
गत्वा योगस्य संसिद्धिं यच्छतो नात्र संशयः ॥ १०५ ॥

नादबिन्दुशब्देन बुद्धिमनसी उच्येते ॥ १०५–१०७ ॥

उड्डियाणबन्धः

कुम्भकान्ते रेचकादौ कर्तव्यस्तूड्डियाणकः ।
बन्धो येन सुषुम्नायां प्राणस्तूड्डीयते यतः ॥ १०६ ॥
तस्मादुड्डीयणाख्योऽयं योगिभिः समुदाहृतः ।
उड्डियाणं तु सहजं गुरुणा कथितं सदा ॥ १०७ ॥
अभ्यसेत्तदतन्द्रस्तु वृद्धोऽपि तरुणो भवेत् ।
नाभेरूर्ध्वमधश्चापि ताणं कुर्यात्प्रयत्नतः ॥ १०८ ॥
षण्मासमभ्यसेन्मृत्युं जयत्येव न संशयः ।

[1] पायु—क, अ २.

ताणं आकुञ्चनम् ॥ १०८–१११ ॥

जालन्धरबन्धः ६.

पूरकान्ते तु कर्तव्यो बन्धो जालन्धराभिधः ॥ १०९ ॥
कण्ठसंकोचरूपोऽसौ वायुमार्गनिरोधकः ।
कण्ठमाकुञ्च्य हृदये स्थापयेद्दृढमिच्छया ॥ ११० ॥
बन्धो जालन्धराख्योऽयममृता[1]प्यायकारकः ।
अधस्तात्कुञ्चनेनाशु कण्ठसंकोचने कृते ॥ १११ ॥
मध्ये पश्चिमताणेन स्यात्प्राणो ब्रह्मनाडिगः ।

कुण्डल्या ग्रन्थित्रयविभेदनेन निर्विकल्पकप्राप्तिः

वज्रासनस्थितो योगी चालयित्वा तु कुण्डलीम् ॥ ११२ ॥
कुर्यादनन्तरं भस्त्रीं कुण्डलीमाशु बोधयेत् ।
भिद्यन्ते ग्रन्थयो वंशे तप्तलोहशलाकया ॥ ११३ ॥
तथैव पृष्ठवंशे स्याद्ग्रन्थिभेदस्तु वायुना ।
पिपीलिकायां लग्नायां कण्डूस्तत्र प्रवर्तते ॥ ११४ ॥
सुषुम्नायां तथाऽभ्यासात्सततं वायुना भवेत् ।
रुद्रग्रन्थिं ततो भित्त्वा ततो याति शिवात्मकम् ॥ ११५ ॥
चन्द्रसूर्यौ समौ कृत्वा तयोर्योगः प्रवर्तते ।
गुणत्रयमतीतं स्याद्ग्रन्थित्रयविभेदनात् ॥ ११६ ॥
शिवशक्तिसमायोगे जायते परमा [2]स्थितिः ।

[1] प्याय—अ १, अ २, क. [2] स्थितः—अ, अ १.

बन्धत्रययुक्तो योगी वज्रासनेति ॥ ११२–११६ ॥ ब्रह्मरन्ध्रगततुरीय एव शिवः, शक्तिस्तु कुण्डलिनी, तयोर्योगादेव परमा स्थितिः सहजनिर्विकल्पकावस्था जायते इत्यर्थः ॥

सुषुम्नायाः मोक्षमार्गत्वं कालभोक्तृत्वं च

यथा करी करेणैव पानीयं प्रपिबेत्सदा ॥ ११७ ॥
सुषुम्नावज्रनालेन पवमानं प्रसेत्तथा ।
वज्रदण्डसमुद्भूता मणयश्चैकविंशतिः ॥ ११८ ॥
सुषुम्नायां स्थिताः सर्वे सूत्रे मणिगणा इव ।
मोक्षमार्गे प्रतिष्ठाना सुषुम्ना विश्वरूपिणी ॥ ११९ ॥
यथैव निश्चितः कालश्चन्द्रसूर्यनिबन्धनात् ।
आपूर्य कुम्भितो वायुर्बहिर्नो याति साधके ॥ १२० ॥
पुनःपुनस्तद्वदेव पश्चिमद्वारलक्षणम् ।
पूरितम्तु स तद्वारैरीषत्कुम्भकतां गतः ॥ १२१ ॥
प्रविशेत्सर्वगात्रेषु [1]वायुः पश्चिममार्गतः ।
रेचितः क्षीणतां याति [2]पूरितः पोषयेत्ततः ॥ १२२ ॥

सुषुम्नया प्राणोदकं पिबेदित्यत्र दृष्टान्तमाह—यथेति ॥ ११७ ॥ वज्रदण्डो नाम सुषुम्नाश्रयो वीणादण्डः तत्र भवा एकविंशतिमणयश्चण-कवन्मांसपिण्डाः सुषुम्नामार्गगतध्वान्तप्रासत्वात् दीपवत् प्रकाशरूपेण मूलाधारमारभ्य ब्रह्मरन्ध्रान्तं सुषुम्नावेणुपर्ववत् विद्यन्ते योगिप्रत्यक्षाः भवन्तीत्यर्थः ॥ ११८ ॥ तथाविधसुषुम्नाया मोक्षमार्गत्वं कालभोक्तृत्वं चाह—

[1] वायुं—अ, अ १. [2] पूरितं—अ

मोक्षेति । विश्वरूपिणी विश्वाधारब्रह्माश्रयत्वात् ॥ ११९ ॥ निमिषादिकल्पान्त-कालः यत्र विलीयते सेयं सुषुम्ना कालभोक्त्रीत्यर्थः । साधके योगिनि या सुषुम्ना वर्तते तया आपूर्य कुम्भितो वायुः उच्छ्वासनिश्वासरूपेण निमेषादिकल्पान्तकालकलनानिर्वाहकः प्राणवायुः सहसा बहिः नो याति । अतः कालभोक्तृत्वं सुषुम्नायाः सिद्धमित्यर्थः ॥ १२० ॥ यदि प्रमादतः सुषुम्नाया बहिः निर्गच्छति तदा पुनःपुनः तद्वत् पूर्ववदेव । सुषुम्नया प्राणमापूर्य कुम्भयेदिति यत्तत् पश्चिमद्वारलक्षणं भवति । सोऽयं प्राणः तद्वारैः तद्वारेण पूरितः सन्नादावीषत्कुम्भकतां भजति ॥ १२१ ॥ ततः प्राणवायुः पश्चिममार्गतः सर्वगात्रेषु प्रविशेत् । यदि कालकर्मसंयोगतः सुषुम्नया रेचितो वायुः क्षीणतां याति ततः तदा पूरितः शरीरं पोषयेत् पुष्टिं कुर्यादित्यर्थः ॥ १२२ ॥

सुषुम्नायोगेन ब्रह्मज्ञानसिद्धिः

यत्रैव जातं सकलेवरं मन-
स्तत्रैव लीनं कुरुते स योगात् ।
स एव मुक्तो निरहंकृतिः सुखी
मूढा न जानन्ति हि पिण्डपातिनः ॥ १२३ ॥
चित्तं विनष्टं यदि भासितं स्या-
त्तत्र प्रतीतो मरुतोऽपि नाशः ।
न चेद्यदि स्यान्न तु तस्य शास्त्रं
नात्मप्रतीतिर्न गुरुर्न मोक्षः ॥ १२४ ॥
जम्बुको रुधिरं यद्वद्बलादाकृष्यति स्वयम् ।
ब्रह्मनाडी तथा धातून्संतताभ्यासयोगतः ॥ १२५ ॥

अनेनाभ्यासयोगेन नित्यमासनबन्धतः ।
चित्तं विलीनतामेति विन्दुर्नो यात्यधस्तथा ॥ १२६ ॥

स्वातिरिक्तमनस्तत्कार्यजातारोपापवादाधिष्ठानात्मज्ञानं यस्यास्ति स एव मुक्त इत्याह—यत्रेति । स्वातिरिक्तभ्रमतो मुक्तः । एवं अधिष्ठानयाथात्म्यज्ञानं ये न जानन्ति ते मूढाः तेषां आवृतित्रयावृतदृष्टित्वात् मूढत्वं सिद्धमित्यर्थः ॥१२३॥ यस्य एवमधिष्ठानज्ञानं नोदेति तद्दृष्ट्या श्रुत्याचार्यतत्प्रभवज्ञानतत्फलमोक्षादिकं नास्तीत्याह—चित्तमिति । तज्जन्म व्यर्थमित्यर्थः ॥ १२४ ॥ यतः अयं अधिष्ठानज्ञानाभावोऽनर्थहेतुः अतः तत्प्रबोधार्थं उत्तरो ग्रन्थ आरभ्यते । ब्रह्मातिरिक्तधातुषु सत्सु ब्रह्मज्ञानं कथं भवतीत्यत्र जम्बूको रुधिरमिव धातून् सुषुम्ना ग्रसति ततो ब्रह्मज्ञानं जायते इत्याह—जम्बुक इति । ब्रह्मनाडी तथा धातून बहिः पदार्थतत्प्रबोधान् ग्रसत्येव । ततो ब्रह्मज्ञानमुदेति तत्समकालं स्वातिरिक्तभ्रममुक्तिश्च भवति । एवं सिद्धावुपायस्तु—सन्ततेति । योगतः उक्तार्थसिद्धिः स्यादित्यर्थः ॥ १२५ ॥ अभ्यासतः किं स्यादित्यत्र अनेनेति ॥ १२६ ॥

योगाभ्यासेन स्वरूपावस्थितिसिद्धिक्रमः

रेचकं पूरकं मुक्त्वा वायुना स्थीयते स्थिरम् ।
नानानादाः प्रवर्तन्ते संत्रवेच्चन्द्रमण्डलम् ॥ १२७ ॥
नश्यन्ति क्षुत्पिपासाद्याः सर्वदोषास्तत[1]स्तदा ।
स्वरूपे सच्चिदानन्दे स्थितिमाप्नोति केवलम् ॥ १२८ ॥
कथितं तु तव प्रीत्या ह्येतदभ्यासलक्षणम् ।

ततः किं स्यादित्यत्र रेचकमिति । यदा वायुः स्थिरो भवति तदा नानानादाः ॥ १२७ ॥ एवं अमृतास्वादनतः, "ब्रह्मातिरिक्तं न किञ्चिदस्ति" इति प्रबोधाच्च नश्यन्ति इत्यादि ॥ १२८ ॥

[1] स्तदा—क, अ २.

मन्त्रादियोगचतुष्टयात्मको महायोगः

मन्त्रो लयो हठो राज[1]योगान्ता भूमिकाः क्रमात् ॥ १२९ ॥
एक एव चतुर्धाऽयं महायोगोऽभिधीयते ।

पुनस्ते महायोगं कथयामीत्याह—मन्त्र इति ॥ १२९ ॥

मन्त्रयोगः

हकारेण बहिर्याति सकारेण विशेत्पुनः ॥ १३० ॥
हंसहं सेति मन्त्रोऽयं सर्वैर्जीवैश्च जप्यते ।
गुरुवाक्यात्सुषुम्नायां विपरीतो भवेज्जपः ॥ १३१ ॥
सोऽहं सोऽहमिति [2]यः स्यान्मन्त्रयोगः स उच्यते ।

आदौ मन्त्रयोगलक्षणमाह—हकारेणेति ॥ १३० ॥ मन्त्रोऽयं सदाऽवशादुच्छ्वासनिश्वासरूपेण सर्वैः जप्यते । अयोगिनामेव भवतीत्यर्थः । योगिनां तु गुरुवाक्यात् इति ॥ १३१ ॥

हठयोगः

प्रतीतिमन्त्रयोगाच्च जायते पश्चिमे पथि ॥ १३२ ॥
हकारेण तु सूर्यः स्यात्सकारेणेन्दुरुच्यते ।
सूर्याचन्द्रमसोरैक्यं हठ इत्यभिधीयते ॥ १३३ ॥

सूत्रवाक्यपठितलययोगं पश्चाद्विवक्षन् हठयोगलक्षणमाह—प्रतीतीति ॥ १३२ ॥ चन्द्रसूर्यैक्यं जायते इत्याह—हकारेणेति ॥ १३३ ॥

[1] योगान्तर्भू—अ, अ १, अ २, क. [2] यस्य म—अ, अ १, अ २, क.

हठेन [1]गृह्यते जाड्यं सर्वदोषसमुद्भवम् ।
क्षेत्रज्ञः परमात्मा च तयोरैक्यं यदा भवेत् ॥ १३४ ॥
तदैक्ये साधिते ब्रह्मश्चित्तं याति विलीनताम् ।
पवनः स्थैर्यमायाति लययोगोदये सति ॥ १३५ ॥
लयात्संप्राप्यते सौख्यं स्वात्मानन्दं परं पदम् ।

लययोगलक्षणमाह—हठेनेति ॥ १३४–१३५ ॥

राजयोगः

योनिमध्ये महाक्षेत्रे जपाबन्धूकसंनिभम् ॥ १३६ ॥
रजो वसति जन्तूनां देवीतत्त्वं समावृतम् ।
रजसो रेतसो योगाद्राजयोग इति स्मृतः ॥ १३७ ॥
अणिमादिपदं प्राप्य राजते राजयोगतः ।

राजयोगलक्षणमाह—योनीति ॥ १३६ ॥ शशि[शिश्न ?]स्थाने रेतो वर्तते तद्धि शिवतत्त्वम् । रजसो रेतसो योगात् शक्तिशिवयोगात् राजयोगः ॥ १३७ ॥

योगसामान्यस्वरूपम्, योगेन मुक्तिप्राप्तिश्च

प्राणापानसमायोगो ज्ञेयं योगचतुष्टयम् ॥ १३८ ॥
संक्षेपात्कथितं ब्रह्मन्नान्यथा शिवभाषितम् ।
क्रमेण प्राप्यते प्राप्यमभ्यासादेव नान्यथा ॥ १३९ ॥

[1] प्रस्य—अ, अ १, क.

एकेनैव शरीरेण योगाभ्यासाच्छनैः शनैः ।
चिरात्संप्राप्यते मुक्तिर्मर्कटक्रम एव सः ॥ १४० ॥

मन्त्रादियोगचतुष्टयस्यापि एकार्थपर्यवसायित्वमाह—प्राणेति । योगचतुष्टयेऽपि प्राणापानयोगः समानः इत्यर्थः ॥ १३८ ॥ एवं सङ्क्षेपात् । स्वोक्तयोगफलमाह—क्रमेणेति । निर्विशेषब्रह्मज्ञानसमकालप्राप्यकैवल्यवद्योगफलस्य न ह्यचिरात् प्राप्तिरिष्यते इत्यर्थः ॥ १३९–१४० ॥

असिद्धयोगस्य मृतस्य उत्तरजन्मनि सिद्धिप्रकारः

योगसिद्धिं विना देहः प्रमादाद्यदि नश्यति ।
पूर्ववासनया युक्तः शरीरं चान्यदाप्नुयात् ॥ १४१ ॥
ततः पुण्यवशात्सिद्धो गुरुणा सह संगतः ।
पश्चिमद्वारमार्गेण जायते त्वरितं फलम् ॥ १४२ ॥
पूर्वजन्मकृताभ्यासात्सत्वरं फलमश्नुते ।

योगाभ्यासिनो योगफलाप्तेः पुरा यदि देहो नश्यति तदा तत्कृतश्रमो निष्फलो भवतीत्यत आह—योगेति । तदाऽयं योगी पूर्ववासनया ॥ १४१–१४२ ॥

अभ्यासयोगादेव मुक्तिः

एतदेव हि विज्ञेयं तत्काकमतमुच्यते ॥ १४३ ॥
नास्ति काकमतादन्यदभ्यासाख्यमतः परम् ।
तेनैव प्राप्यते मुक्तिर्नान्यथा शिवभाषितम् ॥ १४४ ॥

तदेव स्तौति—एतदिति । वस्तुतः अस्याः स्थितिः केत्याक्षेपार्थेन किंशब्देन मायोच्यते । सा यस्य वशे वर्तते सोऽयं काको मायी महेश्वरः । "मायां तु प्रकृतिं विद्यात् मायिनं तु महेश्वरम्" इति श्रुतिसिद्धकाकस्य महेश्वरस्याभ्यासयोगाख्यमिदमेव मतम् ॥ १४३ ॥ अज्ञानिनामाभासज्ञानिनामपि तच्चित्तमालिन्यसंक्षाळनद्वारा निर्विशेषब्रह्मज्ञानहेतुत्वात् कलौ तेनैव प्रायशो मुक्तिः प्राप्यते नान्यथेत्यर्थः ॥ १४४ ॥

योगिनः सर्वैश्वर्यजीवन्मुक्त्यादिसिद्धिलाभः

हठयोगक्रमात्काष्ठा सह जीवलयादिकम् ।
नाकृतं मोक्ष[1]मार्गं स्यात्प्रसिद्धं पश्चिमं विना ॥ १४५ ॥
आदौ रोगाः प्रणश्यन्ति पश्चाज्जाड्यं शरीरजम् ।
ततः समरसो भूत्वा चन्द्रो वर्षत्यना[2]रतम् ॥ १४६ ॥
धातूंश्च संग्रहेद्बह्निः पवनेन समं ततः ।
नानानादाः प्रवर्तन्ते मार्दवं स्यात्कलेवरम् ॥ १४७ ॥
जित्वा वृष्ट्यादिकं जाड्यं खेचरः स भवेन्नरः ।
सर्वज्ञोऽसौ भवेत्कामरूपः पवनवेगवान् ॥ १४८ ॥
क्रीडते त्रिषु लोकेषु जायन्ते सिद्धयोऽखिलाः ।
कर्पूरे लीयमाने किं काठिन्यं तत्र विद्यते ॥ १४९ ॥
अहंकारक्षये तद्वद्देहे कठिनता कुतः ।
सर्वकर्ता च योगीन्द्रः स्वतन्त्रोऽनन्तरूपवान् ॥ १५० ॥
जीवन्मुक्तो महायोगी जायते नात्र संशयः ।

[1] मार्गः—अ, अ १, क. [2] रतः—उ.

हठयोगं स्तौति—हठेति। अकृतमकृत्रिमं "तयोर्ध्वमायन्नमृतत्त्वमेति," "सुषुम्ना तु परे लीना विरजा ब्रह्मरूपिणी" इत्यादिश्रुतिप्रसिद्धं यत्रार्थजातं तत्तज्ज्ञानेन सह जीवतो योगिनो लयादिकमश्नुते तदिदं हठयोगक्रमादनुष्ठानात् सिद्धं पश्चिमं मोक्षमार्गं महापथं विना योगिनां काऽपि काष्ठा न विद्यते इत्यर्थः ॥ १४५ ॥ इत्थंभूतयोगप्रशंसापूर्वकं नानाविधसिद्धिभूषणं योगिनं जीवन्मुक्तत्वेन ईश्वरत्वेन च स्तौति—आदाविति। आदौ अभ्यासदशायामेव सर्वे रोगाः। शरीरजं आलस्यादि। प्राणाग्निसूर्यचन्द्रशक्तिशिवयोगतश्चन्द्रोऽनारतमनवरतं अमृतधारां वर्षति ॥ १४६ ॥ ततो मूलाधारगतोऽग्निः पवनेन समं स्थित्वा धातूंश्च संग्रहेत् बलवृद्धिं वीर्यस्तम्भनं च कुर्यादित्यर्थः। मार्दवं बालवत् कोमलं भवतीत्यर्थः ॥ १४७ ॥ जित्वा "अभ्रं भूत्वा मेघो भवति" इत्यादिजडतां विहाय तेजसा खेचरः स भवेन्नरः। एवमभ्यासयोगी सोऽयं सूर्यो भवतीत्यर्थः। किंच—सर्वज्ञः ॥ १४८ ॥ स्वेच्छामात्रेण जायन्ते। कथं पुनरस्य कळेबरं काठिन्यं विहाय मार्दवं भजतीत्यत्र सदृष्टान्तमुत्तरमाह—कर्पूर इति। दीपकणिकायोगतः कर्पूरे ॥ १४९ ॥ योगाग्निना अहङ्कारक्षये। मार्दवदेहः आकाशदेहो वा भवेदयमित्यर्थः। किंच—सर्वकर्ता ॥ १५० ॥

कृत्रिमाकृत्रिमसिद्धीनां गोपनविधिः

द्विविधाः सिद्धयो लोके कल्पिताकल्पितास्तथा ॥ १५१ ॥
रसौषधिक्रियाजालमन्त्राभ्यासादिसाधनात्।
सिध्यन्ति सिद्धयो यास्तु कल्पितास्ताः प्रकीर्तिताः ॥ १५२ ॥
अनित्या अल्पवीर्यास्ताः सिद्धयः साधनोद्भवाः।
साधनेन विनाऽप्येवं जायन्ते स्वत एव हि ॥ १५३ ॥
स्वात्मयोगैकनिष्ठेषु स्वातन्त्र्यादीश्वरप्रियाः।
प्रभूताः सिद्धयो यास्ताः कल्पनारहिताः स्मृताः ॥ १५४ ॥

सिद्धा नित्या महावीर्या इच्छारूपाः स्वयोगजाः ।
चिरकालात्प्रजायन्ते वासनारहितेषु च ॥ १९५ ॥
तास्तु गोप्या महायोगात्परमात्मपदेऽव्यये ।
विना कार्यं सदा [1]गुप्तं योगसिद्धस्य लक्षणम् ॥ १९६ ॥

योगजाः सिद्धयः कतिविधाः इत्यत्र कृत्रिमाकृत्रिमभेदेन द्विविधाः इत्याह —द्विविधा इति ॥ १९१–१९२ ॥ अकल्पितास्तु साधनेन ॥१९३–१९४॥ स्वेनैव सिद्धाः ॥ १९५ ॥ तासां गोपनीयतामाह—तास्त्विति । महायोगात् परमात्मपदे स्थितेन योगिना कार्यं विना ताः सिद्धयो गोपनीयाः । सदा सिद्धिजालं गुप्तं गोप्यं भवितव्यमिति यत् तद्योगसिद्धस्य लक्षणं सहजमित्यर्थः ॥ १९६ ॥

योगसिद्धजीवन्मुक्तयोः सूचकम्

यथाऽऽकाशं [काशीं ?] समुद्दिश्य गच्छद्भिः पथिकैः पथि ।
नानातीर्थानि दृश्यन्ते नानामार्गास्तु सिद्धयः ॥ १९७ ॥
स्वयमेव प्रजायन्ते लाभालाभविवर्जिते ।
योगमार्गे तथैवेदं सिद्धिजालं प्रवर्तते ॥ १९८ ॥
परीक्षकैः स्वर्णकारैर्हेम संप्रोच्यते यथा ।
सिद्धिभिर्लक्ष्येत्सिद्धं [2]जीवन्मुक्तं तथैव च ॥ १९९ ॥
अलौकिकगुणस्तस्य कदाचिद्दृश्यते ध्रुवम् ।
सिद्धिभिः परिहीनं तु नरं बद्धं तु लक्ष्येत् ॥ १६० ॥

[1] दीप्तं—अ, अ १.
[2] जीवन्मुक्तिस्त—अ, अ १. जीवन्मुक्तिं त—अ २.

सिद्धयो योगिनामेव स्युः इति सङ्कल्पिता भवेयुरित्यत आह—यथेति। कार्यं समुद्दिश्य। तथा यदृच्छया योगिनो नानामार्गाः सिद्धयो दृश्यन्ते ॥ १९७ ॥ योगिनि स्वयमेव। यथा आकाशमार्गे तीर्थानि दृश्यन्ते योगमार्गे ॥ १९८ ॥ स्वर्णं स्वर्णपरीक्षकवत् सिद्धं सिद्धिभिः परीक्ष्य तन्निकटे सिद्धयो यदि स्युः तदा तं सिद्धं मुक्तं विद्यात्। यदि ताः न स्युः तदा तं बद्धं विद्यादित्याह—परीक्षकैरिति। यद्ययं ज्ञानी तदा तं जीवन्मुक्तम् ॥ १९९ ॥ तस्मिन् यद्यस्ति तदा चिरपरिचयात् अलौकिकेति। तस्य तस्मिन् ॥ १६० ॥

देहे सत्यपि ज्ञानिनो विदेहमुक्तिलाभः

अजरामरपिण्डो यो जीवन्मुक्तः स एव हि।
पशुकुक्कुटकीटाद्या मृतिं संप्राप्नुवन्ति वै ॥ १६१ ॥
तेषां किं पिण्डपातेन मुक्तिर्भवति पद्मज।
न बहिःप्राण आयाति पिण्डस्य पतनं कुतः ॥ १६२ ॥
पिण्डपातेन या मुक्तिः सा मुक्तिर्न तु हन्यते।
देहे ब्रह्मत्वमायाते जलानां सैन्धवं यथा ॥ १६३ ॥
अनन्यतां यदा याति तदा मुक्तः स उच्यते।
विमतानि शरीराणि इन्द्रियाणि तथैव च ॥ १६४ ॥
ब्रह्म देहत्वमापन्नं [1]वारि बुद्बुदतामिव।

यद्ययं योगसहितज्ञानी तदा अजरेति। अजरामरपिण्डत्वं ज्ञानयोगिनः कथं? पिण्डस्याजरामरत्वे अस्य पिण्डपातलक्षणविदेहमुक्तिस्वप्नोऽपि दुर्लभः इत्यत आह—पश्चिति ॥ १६१ ॥ न बहिःप्राण आयाति योगी ॥ १६२ ॥ पिण्डपातेनोत्था मुक्तिः हन्यते नेति काक्वर्थः। किंतु हन्यत एवेत्यर्थः।

[1] यथावाप्तं पुनस्तथा—अ, अ १.

विदेहमुक्तिः कथमित्यत्र देह इति । जलानां कार्यं सैन्धवम् ॥ १६३ ॥ परदृष्टिसमर्पितदेहाभासादावात्मात्मीयाभिमतिवैरळ्यपूर्वकं निष्प्रतियोगिकब्रह्ममात्रज्ञानं यस्य यदा उदेति स तदा विदेहमुक्तो भवतीत्यर्थः । विदेहमुक्तेः स्वातिरेकेण किञ्चिदस्ति नास्तीति विभ्रमापह्नवपूर्वकत्वात् , स्वमात्रातिरेकेण

देहासुभानं शिवजीवभानं
जगद्विभानं परमात्मभानम् ।
नानाविभानं न हि भाति यस्मिन्
स रामचन्द्रोऽस्मि विदेहमुक्तः ॥

इति विदेहमुक्तिमहावाक्यप्रबोधेः, आत्यन्तिकदेहाद्यभिमानासम्भवज्ञान्येव परदृष्ट्या देहे सत्यपि विदेहमुक्तो भवतीत्यर्थः । अन्यथा इदानीं मे देहादिः आत्मात्मीयाभिमानतया सत्यवत् भाति तेन जीवो बद्धः स्यां, इदानीं देहादिः व्यावहारिकप्रातिभासिकदृष्टिभ्यां मिथ्यात्वेन दृश्यते जीवन्मुक्तो वा स्यां, इतो वर्तमानदेहपातानन्तरं विदेहमुक्तो भविष्यामीति स्वातिरिक्तकलनावतां विदेहमुक्तिः भवितव्या स्यात् । न हि तेषां स्वप्नेऽपि सा भवितुमर्हति तेषां स्वातिरिक्तदेहाभासानुवर्तनादित्यत्र

तस्मिन् काले विदेहातिदेहेस्मरणवर्जितः ।
ईषन्मात्रं स्मृतश्चेद्यस्तदा सर्वसमन्वितः ॥

इति ॥

अणुमात्रेऽपि वैधर्म्ये जायमाने विपश्चितः ।
असंगताऽपि नास्त्येव किमुतावरणच्युतिः ॥

इति श्रुतेः, गौडपादाचार्योक्तेश्च । येषां स्वातिरेकेण देहादिकमस्तीति भ्रान्तिः तद्दृष्ट्या देहापायसिद्धेयं विदेहमुक्तिः स्यादेव । येषां पुनः स्वातिरिक्तदेहाद्युपलक्षितस्वाविद्यापदतत्कार्यजातमस्ति नास्तीति विभ्रमोक्तिरप्यपह्नवतां भजति तदपह्नवसिद्धनिष्प्रतियोगिकब्रह्ममात्रज्ञानसमकालमेव ते परदृष्ट्या देहवन्त इव भाता अपि विदेहमुक्ता एव भवन्तीत्यत्र न विवाद इति सिद्धम् । तथा च स्मृतिः—

स्वकल्पितशरीरादावात्मात्मीयाभिमानतः ।
जीवत्वमेत्य चिन्मात्रं बद्धवत् संसरत्यहो ॥
यदि स्वज्ञानतो देहः प्रातिभासिकतामियात् ।
तदा जीवन्मुक्तवत्तच्चिन्मात्रं प्रतिभाति हि ॥
स्वमात्रव्यतिरेकेण यदा देहादि न स्फुरेत् ।
तदा विदेहकैवल्यं चिन्मात्रं प्राप्तवत् भवेत् ॥
स्वकल्पितशरीरादिः भात्वा भातु सदा स्वयम् ।
चिन्मात्रमेव चिन्मात्रमचिन्मात्रं भवेत् कथम् ॥

इति ॥

प्रकृते तु परदृष्ट्या विमतानि । सन्तु न सन्तु वा ॥ १६४ ॥ सर्वप्रकारेणापि ब्रह्म । यथा वार्यतिरिक्तं बुद्बुदादिकं नास्ति तथा ब्रह्मातिरेकेण देहादिकं नास्तीत्यर्थः ॥

पिण्डाण्डस्य शिवालयत्ववर्णनम्

दशद्वारपुरं देहं दशनाडीमहापथम् ॥ १६५ ॥
दशभिर्वायुभिर्व्याप्तं दशेन्द्रियपरिच्छदम् ।
षडाधारापवरकं षडन्वयमहावनम् ॥ १६६ ॥
चतुःपीठसमाकीर्णं चतुरान्नायदीपकम् ।
बिन्दुनादमहालिङ्गं शिवशक्तिनिकेतनम् ॥ १६७ ॥
देहं शिवालयं प्रोक्तं सिद्धिदं सर्वदेहिनाम् ।

उत्तमाधिकारिणां ब्रह्मयाथात्म्यं प्रकटयित्वा मध्यमाधिकारिणां पिण्डाण्डेयत्तां प्रकटयंति—दशद्वारेति ॥ १६५–१६६ ॥ चतुरान्नायदीपकं चतुर्वेदप्रकाशकमित्यर्थः । बिन्दुनादमहालिङ्गं बिन्दुः मनः, नादो बुद्धिः,

तद्वृत्तिसहस्रभावाभावप्रकाशकमहालिंगं प्रत्यक्चैतन्यं यत्र तत्तथोक्तम् । शिव-शक्तिनिकेतनं, जीवकुण्डल्याधारत्वात् देहस्येत्यर्थः ॥ १६७ ॥ देहं शिवालयं प्रोक्तं, ●

देहो देवालयः प्रोक्तः स जीवः केवलः शिवः ।
त्यजेदज्ञाननिर्माल्यं सोऽहंभावेन पूजयेत् ॥

इति श्रुत्यन्तरात् ॥

आधारषट्कपीठचतुष्टययोः विवरणम्

गुदमेढ्रान्तरालस्थं मूलाधारं त्रिकोणकम् ॥ १६८ ॥
शिवस्य जीवरूपस्य स्थानं [1]तद्धि प्रचक्षते ।
यत्र कुण्डलिनी नाम परा शक्तिः प्रतिष्ठिता ॥ १६९ ॥
यस्मादुत्पद्यते वायुर्यस्माद्वह्निः प्रवर्तते ।
यस्मादुत्पद्यते बिन्दुर्यस्मान्नादः प्रवर्तते ॥ १७० ॥
यस्मादुत्पद्यते हंसो यस्मादुत्पद्यते मनः ।
तदेतत्कामरूपाख्यं पीठं कामफलप्रदम् ॥ १७१ ॥
स्वाधिष्ठानाह्वयं चक्रं लिङ्गमूले षडश्रके ।
नाभिदेशे स्थितं चक्रं दशारं मणिपूरकम् ॥ १७२ ॥
द्वादशारं महाचक्रं हृदये चाप्यनाहतम् ।
तदेतत्पूर्णगिर्याख्यं पीठं कमलसंभव ॥ १७३ ॥
कण्ठकूपे विशुद्धचाख्यं यच्चक्रं षोडशाश्रकम् ।
पीठं जालन्धरं नाम तिष्ठत्यत्र सुरेश्वर ॥ १७४ ॥

[1] तच्च—अ.

आज्ञा नाम भ्रुवोर्मध्ये द्विदलं चक्रमुत्तमम् ।
उड्याणाख्यं महापीठमुपरिष्टात्प्रतिष्ठितम् ॥ १७५ ॥
चतुरश्रं धरण्यादौ ब्रह्मा तत्राधिदेवता ।
अर्धचन्द्राकृतिजलं विष्णुस्तस्याधिदेवता ॥ १७६ ॥
त्रिकोणमण्डलं वह्नी रुद्रस्तस्याधिदेवता ।
वायोर्बिम्बं तु षट्कोणमीश्वरोऽस्याधिदेवता ॥ १७७ ॥
आकाशमण्डलं वृत्तं देवताऽस्य सदाशिवः ।
नादरूपं भ्रुवोर्मध्ये मनसो मण्डलं विदुः ॥ १७८ ॥

षडाधारापवरकमित्यंशं विवृणोति—गुदेति ॥ १६८–१७० ॥ चतुष्पीठसमाकीर्णमित्यंशं च विवृणोति—तदेतदिति ॥ १७१–१७७ ॥ मनः-प्रकाशकं ज्योतिर्लिंगं प्रत्यगभिन्नं ब्रह्मास्मीति विदुः, "ज्योतिर्लिंगं भ्रुवोर्मध्ये नित्यं ध्यायेत् सदा यतिः" इति श्रुतेः । एवं पिण्डाण्डयाथात्म्यं प्रत्यञ्चमात्मानं यो जानाति सोऽयं मुनिः ब्रह्माण्डयाथात्म्यं ब्रह्म जानाति व्यष्टिसमष्टि-प्रपञ्चापवादाधिकरणप्रत्यक्परचितोरेकत्वात् । कृतकृत्यो भवतीत्यर्थः ॥ १७८ ॥

इति प्रथमोऽध्यायः

द्वितीयोऽध्यायः

योगज्ञानाधिकारी

पुनर्योगस्य माहात्म्यं श्रोतुमिच्छामि शंकर ।
येन [1]विज्ञानमात्रेण खेचरीसमतां व्रजेत् ॥ १ ॥

[1] विज्ञात—क.

शृणु ब्रह्मन्प्रवक्ष्यामि गोपनीयं प्रयत्नतः ।
द्वादशा[1]ब्दं तु शुश्रूषां यः कुर्यादप्रमादतः ॥ २ ॥
तस्मै वक्ता यथातथ्यं दान्ताय ब्रह्मचारिणे ।
पाण्डित्यादर्थ[2]लोभाद्वा प्रमादा[3]द्यः प्रयच्छति ॥ ३ ॥
तेनाधीतं श्रुतं तेन तेन सर्वमनुष्ठितम् ।
मूलमन्त्रं विजानाति यो विद्वान्गुरुदर्शितम् ॥ ४ ॥

एवं ईश्वरमुखात् ज्ञानयोगं श्रुत्वाऽप्यतृप्त इव चतुराननः पुनर्योगज्ञान-माहात्म्यं पृच्छतीत्याह—पुनरिति । खेचरसूर्यवदतितेजस्वी भवेत् ॥ १ ॥ प्रश्नोत्तरं भगवानाह— शृण्विति ॥ २ ॥ मया वक्ष्यमाणविद्यां तस्मै ॥ ३ ॥ अनधिकारिविद्यादानदोषेण तत् सर्वं हीयते इत्यर्थः । यद्यधिकारी गुरुमुखतो यथावत् विजानाति स कृतकृत्यो भवतीत्याह—मूलेति ॥ ४ ॥

प्रणवाख्यमूलमन्त्रमहिमा

[4]शिवशक्तिमयं मन्त्रं मूलाधारात्समुत्थितम् ।
तस्य मन्त्रस्य वै ब्रह्मञ्छ्रोता वक्ता च दुर्लभः ॥ ५ ॥
एतत्पीठमिति प्रोक्तं नादलिङ्गं मदात्मकम् ।
तस्य विज्ञानमात्रेण जीवन्मुक्तो भवेज्जनः ॥ ६ ॥
अणिमादिकमैश्वर्यमचिरादेव जायते ।

तन्मन्त्रं स्तौति—शिवेति । स मन्त्रः प्रणवो नादो वा भवितुमर्हति । तदियत्तां बुद्ध्वा वक्ता श्रोता परमेश्वरोऽहमेव । न हि मद्व्यतिरिक्तः कोऽपि

[1] ब्दस्तु—उ, उ १. [2] लाभा—अ, अ १, क.
[3] द्वा प्र—अ, अ १, अ २, क. [4] मूलश—अ.

तदियत्ताज्ञो वक्ता श्रोता अस्ति ॥ ५ ॥ तन्मन्त्रस्वरूपमाचष्टे—एतदिति । एतन्मन्त्रस्वरूपं पीठमिति प्रोक्तं, मन्त्रार्थब्रह्मणः सर्वाधिकरणत्वात् पीठत्वम् । यद्भजतां स्वातिरिक्तलिंगज्ञानं न ददाति तन्नादलिङ्गम् । तत् किं त्वत्तोऽन्यदित्यत्र अहमेवात्मा स्वरूपं यस्य तत् मदात्मकमेव अभिधानाभिधेययोरेकत्वात् । तज्ज्ञानफलमाह—तस्येति ॥ ६ ॥

मूलमन्त्रत्वनिर्वचनम्

मननात्प्राणनाच्चैव मद्रूपस्यावबोधनात् ॥ ७ ॥
मन्त्रमित्युच्यते ब्रह्मन् मदधिष्ठानतोऽपि वा ।
मूलत्वात्सर्वमन्त्राणां मूला[1]धारात् समुद्भवात् ॥ ८ ॥
मूलस्वरूपलिङ्गत्वान्मूलमन्त्र इति स्मृतः ।

तस्य मूलमन्त्रत्वं कुत इत्यत आह—मननादिति ॥ ७ ॥ मन्त्रमिति विभक्तिव्यत्ययः । "तद्यथा शंकुना सर्वाणि पर्णानि सन्तृण्णानि एवमेवोङ्कारेण सर्वा वाक् सन्तृण्णा" "ओङ्कार एवेदं सर्वं" इति श्रुत्यनुरोधेन मूलत्वात् ॥ ८ ॥

नादलिङ्गत्वनिर्वचनम्

सूक्ष्मत्वात् [2]कारणत्वाच्च लयनाद्गमनादपि ॥ ९ ॥
लक्षणात्परमेशस्य लिङ्गमित्यभिधीयते ।

पुनस्तस्य लिंगत्वं सूत्रत्वं चाह—सूक्ष्मत्वादिति ॥ ९–१० ॥

सूत्रत्वनिर्वचनम्

संनिधानात्समस्तेषु जन्तुष्वपि च संततम् ॥ १० ॥
सूचकत्वाच्च रूपस्य सूत्रमित्यभिधीयते ।

[1] धारस—क, अ २. [2] कार—ड.

प्रणवस्य बिन्दुपीठत्वम्

महामाया महालक्ष्मीर्महादेवी सरस्वती ॥ ११ ॥
आधारशक्तिरव्यक्ता यया विश्वं प्रवर्तते ।
सूक्ष्माभा बिन्दुरूपेण पीठरूपेण वर्तते ॥ १२ ॥

प्रणवस्यैव मूलमन्त्रत्वेन लिंगत्वेन सूत्रत्वेन च प्रकृतत्वात् प्रकृतित्वं "प्रणवत्वात् प्रकृतित्वं वदन्ति ब्रह्मवादिनः" इति श्रुतेः । सेयं प्रकृतिः कीदृशीत्यत आह—महामायेति ॥ ११ ॥ यया प्रणवप्रकृत्या अभिधानाभिधेयात्मकं विश्वं प्रवर्तते, या च दुर्गालक्ष्मीसरस्वतीत्वेन व्यवह्रियते सेयमाधारशक्तिरव्यक्तरूपा भवति । केन रूपेण व्यक्ताव्यक्तत्वमित्यत्र बिन्दुः मनस्तदूपेण सूक्ष्माभा । कामरूपादिचतुष्पीठरूपेण स्थूलत्वम् ॥ १२ ॥

निर्विशेषप्रणवब्रह्मावगत्युपायः

बिन्दुपीठं विनिर्भिद्य नादलिङ्गमुपस्थितम् ।
प्राणेनोच्चार्यते ब्रह्मन् षण्मुखीकरणेन च ॥ १३ ॥
गुरूपदेशमार्गेण सहसैव प्रकाशते ।

एवं स्थूलसूक्ष्माकारेण या वर्तते तद्गतहेयांशापायसिद्धं ब्रह्म गुरूपदेशतो प्रकाशते इत्याह—बिन्दिति । हे ब्रह्मन् या प्राणापानव्यापारतः सोऽहमोमित्युच्चार्यते तद्गतहेयांशं बिन्दुपीठं व्यक्ताव्यक्तात्मकं गुरूपदेशमार्गेण षण्मुखीकरणेन, चशब्दतो निर्विशेषब्रह्मज्ञानासिना च, तिलशो विनिर्भिद्य वर्तमानस्य योगिनः यदुपस्थितं नादलिंगं स्वातिरिक्तबिन्दुपीठोपलक्षितजाग्रज्जाग्रदाद्यविकल्पानुद्वैकरसान्तभेदलिंगावकाशं स्वाज्ञादिदृष्टिमोहे सत्यसति कालत्रयेऽपि यन्न ददाति तुर्यतुरीयं ब्रह्म निष्प्रतियोगिकस्वमात्रतया सहसैव प्रकाशते इत्यर्थः ॥ १३ ॥

स्थूलसूक्ष्मबीजरूपैः त्रिविधं ब्रह्म

स्थूलं सूक्ष्मं परं चेति त्रिविधं ब्रह्मणो वपुः ॥ १४ ॥
पञ्चब्रह्ममयं रूपं स्थूलं वैराजमुच्यते ।
हिरण्य[1]गर्भसूक्ष्मं तु नादं बीजत्रयात्मकम् ॥ १५ ॥

यत्तुर्यतुर्यरूपेण अवशिष्टं तदेव स्वाज्ञादिदृष्टितारतम्यानुरोधेन स्थूलसूक्ष्मपररूपेण त्रिधा विभातीत्याह—स्थूलमिति ॥ १४ ॥ तत्र स्थूलं तु पञ्चेति । अपरं तु हिरण्येति । तुशब्दात् बीजचैतन्यमपि गृह्यते । तत्तु आकारादिबीजत्रयात्मकम् ॥ १५ ॥

शुद्धतत्त्वस्य आत्ममन्त्राभ्यासैकवेद्यत्वम्

परं ब्रह्म परं सत्यं सच्चिदानन्दलक्षणम् ।
अप्रमेयमनिर्देश्यमवाङ्मनसगोचरम् ॥ १६ ॥
शुद्धं सूक्ष्मं निराकारं निर्विकारं निरञ्जनम् ।
अनन्तमपरिच्छेद्यमनूपममनामयम् ॥ १७ ॥
आत्ममन्त्रसदाभ्यासात् परतत्त्वं प्रकाशते ।

सर्वस्मात् परं तु आत्ममन्त्राभ्यासेन प्रकाशते न स्वेनेत्याह—परमिति ॥ १५–१७ ॥ प्रकाशते, न स्वत इत्यर्थः । आत्ममन्त्रशब्देन प्रणवमहावाक्यजातमुच्यते । "सुप्तेरुत्थाय सुप्त्यन्तं ब्रह्मैकं प्रविचिन्त्यताम्" इति श्रुत्यनुरोधेन श्रवणमननिदिध्यासनानुसन्धानं अभ्यासः ॥

परतत्त्वाभिव्यक्तिचिह्नानि

तदभिव्यक्तिचिह्नानि सिद्धिद्वाराणि मे शृणु ॥ १८ ॥

[1] गर्भ—अ, अ १.

दीपज्वालेन्दुखद्योतविद्युन्नक्षत्रभास्वराः ।
दृश्यन्ते सूक्ष्मरूपेण सदा युक्तस्य योगिनः ॥ १९ ॥
अणिमादिकमैश्वर्यमचिरात्तस्य जायते ।

एवं परतत्त्वसाक्षात्काराभिव्यक्तिचिह्नानि कानीत्यत आह—तदिति ॥ १८–१९ ॥ यदीच्छा जायते तदा अणिमादिकम् ।

नादानुसन्धानमहिमा

नास्ति नादात्परो मन्त्रो न देवः स्वात्मनः परः ॥ २० ॥
नानुसंधेः परा पूजा न हि तृप्तेः परं सुखम् ।
गोपनीयं प्रयत्नेन सर्वदा सिद्धिमिच्छता ॥ २१ ॥

नादात्मानुसन्धानतृप्तितुल्यं नास्तीत्याह—नास्तीति ॥ २० ॥ एवं-विशेषणविशिष्टस्वात्ममन्त्रस्यातिरहस्यार्थत्वेन गोपनीयतामाह—गोपनीयमिति ॥

गुरुभगवद्भक्तेष्वेव परतत्त्वज्ञानसम्भवः

मद्भक्त एतद्विज्ञाय कृतकृत्यः सुखी भवेत् ।
यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ ।
तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः ॥ २२ ॥

एतज्ज्ञानफलमाह—मद्भक्त इति ॥ २१ ॥ श्रुत्याचार्यभक्तस्यैव उक्तार्थः प्रकाशते इत्याह—यस्येति ॥ २२ ॥

इति द्वितीयोऽध्यायः

तृतीयोऽध्यायः

नादब्रह्मणः परापश्यन्त्यादिरूपचतुष्टयम्

यन्न[1]मस्य चिदाख्यातं यत्सिद्धीनां च कारणम् ।
येन विज्ञानमात्रेण जन्मबन्धात्प्रमुच्यते ॥ १ ॥
अक्षरं परमो नादः शब्दब्रह्मेति कथ्यते ।
मूलाधारगता शक्तिः स्वाधारा बिन्दुरूपिणी ॥ २ ॥
तस्यामुत्पद्यते नादः सूक्ष्मबीजादिवांकुरः ।
तां पश्यन्तीं विदुर्विश्वं यया पश्यन्ति योगिनः ॥ ३ ॥
हृदये व्यज्यते घोषो गर्जत्पर्जन्यसंनिभः ।
तत्र स्थिता सुरेशान मध्यमेत्यभिधीयते ॥ ४ ॥
प्राणेन च स्वराख्येन प्रथिता वैखरी पुनः ।

"नास्ति नादात् परो मन्त्रः" इति यदुक्तं तद्वैखरीप्रपञ्चप्रपञ्चनाय तृतीयाध्याय आरभ्यते—यन्नमस्येति । "नमस्त्वैक्यं प्रवदेत्" इति श्रुत्यनुरोधेन यन्नमस्य यदैक्यमनुभूय योगिभिः स्वशिष्येभ्यः चिदतिरिक्तं न किंचिदस्ति इत्याख्यातमित्यत्र

चिदिहास्तीति चिन्मात्रमिदं चिन्मयमेव च ।
चित्त्वं चिदहमेते च लोकाश्चिदिति भावयेत् ॥

इत्यादि श्रुतेः । यत्सर्वसिद्धिनिदानं पर्यवसानं चिन्मात्रसिद्धिसमकालं सिद्धिजालस्यासिद्धिपदं गतत्वात् यद्विज्ञानमात्रतः स्वातिरिक्तभ्रमात् अज्ञोऽपि

[1] मस्यं—मु. कस्य—अ, अ १.

मुच्यते स्वाज्ञानविजृम्भितस्वातिरिक्तविभ्रमस्य स्वज्ञानतः प्रलयप्रमाणतः स्वयमेव अवशिष्यते इत्यत्र स्मृतिः

स्वाज्ञानोत्थे स्वातिरिक्ते स्वज्ञानात् प्रलयं गते ।
प्रतियोगिविनिर्मुक्तं स्वमात्रमवशिष्यते ॥

इति ॥ १ ॥

यज्ज्ञानात् मुच्यते इत्युक्तं तत् स्वाज्ञादिदृष्टिं आश्रित्य परापररूपेण द्विधा भिद्यते इत्याह—अक्षरमिति । अत्र स्वज्ञदृष्ट्या अनुभूतं तु अक्षरं परमः परमाक्षरमित्यर्थः । स्वाज्ञदृष्ट्यनुभूतं तु नादः नादरूपं शब्दब्रह्म परमाक्षरावगत्युपायभूतं, "शब्दब्रह्मणि निष्णातः परं ब्रह्माऽधिगच्छति" इति श्रुतेः । तदेतदपरं ब्रह्म क्व आविर्भवतीत्यत आह—मूलेति । मूलाधारगता परेति चित्सामान्यात्मिका बिन्द्वाख्याव्यक्तरूपिणी नादाधारा काचन शक्तिरस्ति ॥ २ ॥ तस्यामेव सूक्ष्मबीजांकुरवन्नाद उत्पद्यते इत्यत्र

परायामंकुरीभूय पश्यन्त्यां द्विदळीकृता ।
मध्यमायां मुकुळिता वैखर्यां विकसीकृता ॥

इति श्रुतेः । या परात्वेनाभिमता तामेव पश्यन्तीं मध्यमां वैखरीं च विदुरित्याह—तामिति ॥ ३ ॥ मूलाधारस्थपरायां योऽङ्कुरतां गतः सोऽयं नादः अनाहताख्यपश्यन्त्यां हृदये ॥ ४ ॥ सैव प्राणेन ॥ ५–९ ॥

वैखरीस्वरूपविवरणम्

शाखापल्लवरूपेण तालवादिस्थानघट्टनात् ॥ ५ ॥
अकारादिक्षकारान्तान्यक्षराणि समीरयेत् ।
अक्षरेभ्यः पदानि स्युः पदेभ्यो वाक्यसंभवः ॥ ६ ॥
सर्वे वाक्यात्मका मन्त्रा वेदशास्त्राणि कृत्स्नशः ।
पुराणानि च काव्यानि भाषाश्च विविधा अपि ॥ ७ ॥

सप्तस्वराश्च गाथाश्च सर्वे नादसमुद्भवाः ।
एषा सरस्वती देवी सर्वभूतगुहाश्रया ॥ ८ ॥
वायुना वह्नियुक्तेन प्रेर्यमाणा शनैः शनैः ।
[1]द्वित्रिवर्णपदैर्वाक्यैरित्येवं वर्तते सदा ॥ ९ ॥

वैखरीसाक्षात्कारात् वाक्सिद्धिः

य इमां वैखरीं शक्तिं योगी स्वात्मनि पश्यति ।
स वाक्सिद्धिमवाप्नोति सरस्वत्याः प्रसादतः ॥ १० ॥
वेदशास्त्रपुराणानां स्वयं कर्ता भविष्यति ।

चत्वारि वाक्परिमिता पदानि
तानि विदुर्ब्राह्मणा ये मनीषिणः ।
गुहा त्रीणि निहिता नेंगयन्ति
तुरीयं वाचो मनुष्या वदन्ति ॥

इति श्रुतिसिद्धवैखरीज्ञानफलमाह—य इति ॥ १० ॥

परमाक्षरस्वरूपम्

यत्र बिन्दुश्च नादश्च सोमसूर्याग्निवायवः ॥ ११ ॥
इन्द्रियाणि च सर्वाणि लयं गच्छन्ति सुव्रत ।
[2]वायो यत्र विलीयन्ते मनो यत्र विलीयते ॥ १२ ॥

[1] तद्विवर्ण—अ, अ १, अ २, क. तद्विवर्त—मु. [2] वायवो यत्र ली—अ, क.

यं लब्ध्वा चापरं लाभं मन्यते नाधिकं ततः ।
यस्मिन् स्थितो न दुःखेन गुरुणाऽपि विचाल्यते ॥ १३ ॥
यत्रोपरमते चित्तं निरुद्धं योगसेवया ।
यत्र चैवात्मनाऽऽत्मानं पश्यन्नात्मनि तुष्यति ॥ १४ ॥
सुखमात्यन्तिकं यत्तद्बुद्धिग्राह्यमतीन्द्रियम् ।
एतत्क्षराक्षरातीतमनक्षरमितीर्यते ॥ १५ ॥
क्षरः सर्वाणि भूतानि सूत्रात्माऽक्षर उच्यते ।
अक्षरं परमं ब्रह्म निर्विशेषं निरञ्जनम् ॥ १६ ॥
अलक्षणमलक्ष्यं तदप्रतर्क्यमनूपमम् ।
अपारपारमच्छेद्यमचिन्त्यमतिनिर्मलम् ॥ १७ ॥
आधारं सर्वभूतानामनाधारमनामयम् ।
अप्रमाणमनिर्देश्यमप्रमेयमतीन्द्रियम् ॥ १८ ॥
अस्थूलमनणुह्रस्वमदीर्घमजमव्ययम् ।
अशब्दस्पर्शरूपं तदचक्षुःश्रोत्रनामकम् ॥ १९ ॥
सर्वज्ञं सर्वगं शान्तं सर्वेषां हृदये स्थितम् ।
सुसंवेद्यं गुरुमतात्सुदुर्बोधमचेतसाम् ॥ २० ॥
निष्कलं निर्गुणं शान्तं निर्विकारं निराश्रयम् ।
निर्लेपकं निरापायं कूटस्थमचलं ध्रुवम् ॥ २१ ॥

परमाक्षरं किमित्याकांक्षायां यत्सर्वापवादाधिष्ठानं स्वाधिष्ठेयनिरूपिताधिष्ठानतापायसिद्धं तदेतदित्याह—यत्रेति ॥ ११ ॥ वायो वायवः ॥१२–१४॥ अनक्षरं परमाक्षरम् ॥ १५–१९ ॥ गुरुमतात् गुरूक्तार्थानुष्ठानात् ॥२०–२५॥

शब्दब्रह्मभक्तिभावनाभ्यां परब्रह्माधिगमः

ज्योतिषामपि तज्ज्योतिस्तमःपारे प्रतिष्ठितम् ।
भावाभावविनिर्मुक्तं भावनामात्रगोचरम् ॥ २२ ॥
भक्तिगम्यं परं तत्त्वमन्तर्लीनेन चेतसा ।
भावनामात्रमेवात्र कारणं पद्मसंभव ॥ २३ ॥
यथा देहान्तरप्राप्तिकारणं भावना नृणाम् ।
विषयं ध्यायतः पुंसो विषये रमते मनः ॥ २४ ॥
मामनुस्मरतश्चित्तं मय्येवात्र विलीयते ।
सर्वज्ञत्वं परेशत्वं सर्वसंपूर्णशक्तिता ॥ २५ ॥
अनन्तशक्तिमत्त्वं च ममानुस्मरणाद्भवेत् ।

इति ॥

निष्कामधिया शब्दब्रह्माभिधानमादोपासकानां शब्दब्रह्मप्रसादतः सर्वापवादाधिकरणं "एतत्क्षराक्षरातीतमनक्षर" मित्यादिना य "निर्विशेष" मित्यादि-"परं तत्त्व" मित्यन्तविशेषणविशिष्टं निष्प्रतियोगिकब्रह्ममात्रं स्वयमेवेति प्रसीदति । यत एवं अतः शब्दब्रह्मपरब्रह्मणोरुपायोपेयत्वं सिद्धमित्यर्थः ।

यं यं वाऽपि स्मरन् भावं त्यजत्यन्ते कळेबरम् ।
तं तमेवैति कौन्तेय सदा तद्भावभावितः ॥

इति स्मृत्यनुरोधेन यथा देहान्तरप्राप्तिकारणं भावनैव तथा अस्मिन् लोके ये ये सविशेषेण निर्विशेषेण वा भावेन मां भजन्ति ते ते पुरुषाः सविशेषं निर्विशेषं वा ब्रह्म भवन्तीत्यत्र "तं यथा यथोपासते तथैव भवती" ति श्रुतेः । इतिशब्दः अध्यायपरिसमाप्त्यर्थः ॥

इति तृतीयोऽध्यायः

चतुर्थोऽध्यायः

जीवत्वस्य असत्यत्वम्

चैतन्यस्यैकरूपत्वाद्भेदो युक्तो न कर्हिचित् ।
जीवत्वं च तथा ज्ञेयं रज्ज्वां सर्पग्रहो यथा ॥ १ ॥
रज्ज्वज्ञानात्क्षणेनैव यद्वद्रज्जुर्हि सर्पिणी ।
भाति तद्वच्चितिः साक्षाद्विश्वाकारेण केवला ॥ २ ॥

स्वातिरिक्ताविद्यापदतत्कार्यजातं सर्वैरपि नानाविधभेदभिन्नं सत् सत्यत्वेन अनुभूयते । तत् कथं भावनाशतेनाप्यभावपदं भजतीत्याकांक्षायां—परमार्थदृष्टयभातत्वात् स्वातिरिक्तं नास्त्येव । न हि शशशृङ्गवदवस्तुनि भावना प्रसरति । यत् परमार्थं वस्तु निष्प्रतियोगिकब्रह्ममात्रमवशिष्यते तदेव स्वाज्ञदृष्टेः स्वातिरिक्तवदवभासते । यदा पुनः स्वज्ञानेन स्वाज्ञानं नष्टं भवति तदा ब्रह्मातिरिक्तं परमार्थदृष्टेः ब्रह्ममात्रमवशिष्यते इत्येतदर्थप्रपञ्चनार्थं चतुर्थाध्याय आरभ्यते—चैतन्यस्येति । घटशरावाद्यनुगतव्योमवत् चैतन्यस्य । जीवत्वं वास्तवं इत्यत्र सदृष्टान्तमुत्तरमाह—जीवत्वमिति ॥ १ ॥ ब्रह्मातिरेकेण जगतो दृश्यमानत्वात् तत् सत्यमित्यत्र तत्सत्त्वस्य स्वाज्ञानावधिकत्वात् स्वज्ञानोदये तज्जगच्चिदेव भवतीति सदृष्टान्तमाह—रज्ज्वज्ञानादिति ॥ २ ॥

सर्वप्रपञ्चस्य ब्रह्मत्वम्

उपादानं प्रपञ्चस्य ब्रह्मणोऽन्यन्न विद्यते ।
तस्मात्सर्वप्रपञ्चोऽयं ब्रह्मैवास्ति न चेतरत् ॥ ३ ॥
व्याप्यव्यापकता मिथ्या सर्वमात्मेति शासनात् ।
इति ज्ञाते परे तत्त्वे भेदस्यावसरः कुतः ॥ ४ ॥

ब्रह्मणः सर्वभूतानि जायन्ते परमात्मनः ।
तस्मादेतानि ब्रह्मैव भवन्तीति विचिन्तय ॥ ५ ॥
ब्रह्मैव सर्वनामानि रूपाणि विविधानि च ।
कर्माण्यपि समग्राणि [1]बिभर्तीति विभावय ॥ ६ ॥
सुवर्णाज्जायमानस्य सुवर्णत्वं च शाश्वतम् ।
ब्रह्मणो जायमानस्य ब्रह्मत्वं च तथा भवेत् ॥ ७ ॥

कार्यकारणव्याप्यव्यापककलनासत्वात् प्रपञ्चोऽस्तीति मन्यमानमालक्ष्याह —उपादानमिति । यस्मादेवं तस्मात् ॥ ३–४ ॥ नामरूपकर्मवत् भूतजातस्य ब्रह्मकार्यत्वहेतुना तद्ब्रह्मैवेति सदृष्टान्तमाह—ब्रह्मण इति । यस्मात् ब्रह्मणः ॥ ५ ॥ किंच—ब्रह्मैव ॥ ६ ॥ यथा सुवर्णात् ॥ ७ ॥

ब्रह्मातिरिक्तदर्शनात् अनर्थप्राप्तिः

स्वल्पमप्यन्तरं कृत्वा जीवात्मपरमात्मनोः ।
यस्तिष्ठति विमूढात्मा भयं तस्यापि भाषितम् ॥ ८ ॥
यदज्ञानाद्भवेद्द्वैतमितरत्तत्प्रपश्यति ।
आत्मत्वेन तदा सर्वं नेतरत्तत्र चाण्वपि ॥ ९ ॥

ईषदपि ब्रह्मातिरिक्तमस्तीति पश्यतोऽनर्थमाह—स्वल्पमिति । "यदा ह्येवैष एतस्मिन्नुदरमन्तरं कुरुते अथ तस्य भयं भवति" इति श्रुत्यन्तरेणापि भयं भाषितमित्यर्थः ॥ ८ ॥ स्वाज्ञानविजृम्भितं द्वैतं स्वज्ञानेनाद्वैतं विभातीत्याह—यदिति ॥ ९ ॥

[1] बिभर्त्यतीति भा—अ २, उ १.

व्यावहारिकप्रपञ्चस्य मिथ्यात्वम्

अनुभूतोऽप्ययं लोको व्यवहारक्षमोऽपि सन् ।
असद्रूपो यथा स्वप्न उत्तरक्षणबाधितः ॥ १० ॥
स्वप्ने जागरितं नास्ति जागरे स्वप्नता नहि ।
द्वयमेव लये नास्ति लयोऽपि ह्यनयोर्न च ॥ ११ ॥
त्रयमेव भवेन्मिथ्या गुणत्रयविनिर्मितम् ।
अस्य द्रष्टा गुणातीतो नित्यो ह्येष चिदात्मकः ॥ १२ ॥
यद्वन्मृदि घटभ्रान्तिः शुक्तौ हि रजतस्थितिः ।
तद्वद्ब्रह्मणि जीवत्वं [1]वीक्षमाणे विनश्यति ॥ १३ ॥
यदा मृदि घटो नाम कनके कुण्डलाभिधा ।
शुक्तौ हि रजतख्यातिर्जीव[2]शब्दार्थता परे ॥ १४ ॥
यथैव व्योम्नि नीलत्वं यथा नीरं मरुस्थले ।
पुरुषत्वं यथा स्थाणौ तद्वद्विश्वं चिदात्मनि ॥ १५ ॥
यथैव शून्यो वेतालो गन्धर्वाणां पुरं यथा ।
यथाऽऽकाशे द्विचन्द्रत्वं तद्वत्सत्ये जगत्स्थितिः ॥ १६ ॥
यथा तरङ्गकल्लोलैर्जलमेव स्फुरत्यलम् ।
घटनाम्ना यथा पृथ्वी पटनाम्ना हि तन्तवः ॥ १७ ॥
जगन्नाम्ना चिदाभाति सर्वं ब्रह्मैव केवलम् ।

१—अ. वीक्षमाणो—क.
२—शब्दस्तथा—अ, अ १, अ २, क.

स्वातिरिक्तस्य व्यावहारिकसत्यत्वं मन्यमानं प्रत्याह—अनुभूत इति ॥ १० ॥ जाग्रदाद्यवस्थानां मिथो व्यभिचारित्वं तत्कल्पनाधारस्य नित्यत्वं चाह—स्वप्न इति ॥ ११–१२ ॥ जीवत्वादिकं स्वातिरिक्तयाथात्म्यं नावधिकमिति सदृष्टान्तमाह—यद्वदिति ॥ १३–१७ ॥

स्वातिरिक्तप्रपञ्चस्य अत्यन्तासम्भवः

यथा वन्ध्यासुतो नास्ति यथा नास्ति मरौ जलम् ॥ १८ ॥
यथा नास्ति नभोवृक्षस्तथा नास्ति जगत्स्थितिः ।
गृह्यमाणे घटे यद्वन्मृत्तिका भाति वै बलात् ॥ १९ ॥
[1]वीक्ष्यमाणे प्रपञ्चे तु ब्रह्मैवाभाति भासुरम् ।

किं बहुना स्वातिरिक्तप्रपञ्चस्यात्यन्तासम्भवमाह—यथेति ॥ १८–१९ ॥

अज्ञानकृतः आत्मनि देहाद्यारोपः

सदैवात्मा विशुद्धोऽ[2]स्मि ह्यशुद्धो भाति वै सदा ॥ २० ॥
यथैव द्विविधा रज्जुर्ज्ञानिनोऽज्ञानिनोऽनिशम् ।
यथैव मृन्मयः कुम्भस्तद्वद्देहोऽपि चिन्मयः ॥ २१ ॥
आत्मानात्मविवेकोऽयं मुधैव क्रियते बुधैः ।
सर्पत्वेन यथा रज्जू रजतत्वेन शुक्तिका ॥ २२ ॥
विनिर्णीता विमूढेन देहत्वेन तथाऽऽत्मता ।
घटत्वेन यथा पृथ्वी जलत्वेन मरीचिका ॥ २३ ॥

[1] वीक्ष—अ १, अ २, क. [2] स्ति—क, अ २.

गृहत्वेनै हि काष्ठानि खड्गत्वेनैव लोहता ।
तद्वदात्मनि देहत्वं पश्यत्यज्ञानयोगतः ॥ २४ ॥

इति ॥

यत एवमतः सदैवेति ॥ २०–२१ ॥ तथा सति आत्मेत्यादि । अनात्मनो दुर्लभत्वात् सर्पत्वेन ॥ २२–२३ ॥ वस्तुतस्तु सर्वापह्नवसिद्धं ब्रह्म निष्प्रतियोगिकमेवेति फलितोऽर्थः ॥ २४ ॥ इतिशब्दः अध्यायपरिसमाप्त्यर्थः ॥

इति चतुर्थोऽध्यायः

पञ्चमोऽध्यायः

देहस्य विष्णवालयत्वम्

पुनर्योगं प्रवक्ष्यामि गुह्यं ब्रह्मस्वरूपकम् ।
समाहितमना भूत्वा शृणु ब्रह्मन् यथाक्रमम् ॥ १ ॥
दशद्वारपुरं देहं दशनाडीमहापथम् ।
दशभिर्वायुभिर्व्याप्तं दशेन्द्रियपरिच्छदम् ॥ २ ॥
षडाधारापवरक षडन्वयमहावनम् ।
चतुष्पीठसमाकीर्णं चतुराम्नायदीपकम् ॥ ३ ॥
बिन्दुनादमहालिङ्गविष्णुलक्ष्मीनिकेतनम् ।
देहं विष्णवालयं प्रोक्तं सिद्धिदं सर्वदेहिनाम् ॥ ४ ॥

उत्तमाधिकारिणामेवं निर्विशेषं ब्रह्म प्रतिपाद्य मध्यमाधिकारिणां पुरोक्तोऽपि योगो भूयोऽपि सप्रकारं वक्तव्य इति पञ्चमाध्याय आरभ्यते— पुनरिति ॥ १–२ ॥ योगाचार्यैः भुसुण्डप्रभृतिभिः मन्त्र-लय-हठ-राज-भावना-

सहजयोगसम्प्रदायभेदेन षडन्वय एव महावनं यस्मिन् तत्तथोक्तं, एकैकस्य अन्वयस्य समुद्रवदपारत्वात् ॥ ३ ॥ पुरा शिवशक्तिनिकेतनं शिवालयमित्युक्तं, पुनः विष्णुलक्ष्मीनिकेतनं विष्णवालयमित्युक्तिः शिवविष्णवोः भेदभ्रमनिरासनार्थेति मन्तव्या ॥ ४–१९ ॥

आधारषट्कपीठचतुष्टययोः विवरणम्

गुदमेढ्रान्तरालस्थं मूलाधारं त्रिकोणकम् ।
शिवस्य जीवरूपस्य स्थानं तद्धि प्रचक्षते ॥ ५ ॥
यत्र कुण्डलिनी नाम परा शक्तिः प्रतिष्ठिता ।
यस्मादुत्पद्यते वायुर्यस्माद्वह्निः प्रवर्तते ॥ ६ ॥
यस्मादुत्पद्यते बिन्दुर्यस्मान्नादः प्रवर्तते ।
यस्मादुत्पद्यते हंसो यस्मादुत्पद्यते मनः ॥ ७ ॥
तदेतत्कामरूपाख्यं पीठं कामफलप्रदम् ।
स्वाधिष्ठानाह्वयं चक्रं लिङ्गमूलं[1] षडश्रकम् ॥ ८ ॥
नाभिदेशे स्थितं चक्रं दशास्रं मणिपूरकम् ।
द्वादशारं महाचक्रं हृदये चाप्यनाहतम् ॥ ९ ॥
तदेतत्पूर्णगिर्याख्यं पीठं कमलसंभव ।
कण्ठकूपे विशुद्धाख्यं यच्चक्रं षोडशाश्रकम् ॥ १० ॥
पीठं जालन्धरं नाम तिष्ठत्यत्र चतुर्मुख ।
आज्ञा नाम भ्रुवोर्मध्ये द्विदलं चक्रमुत्तमम् ॥ ११ ॥

[1] मूले—क, ग २,

उड्डयाणाख्यं महापीठमुपरिष्टात्प्रतिष्ठितम् ।
स्थानान्येतानि देहेऽस्मिन्शक्तिरूपं प्रकाशते ॥ १२ ॥
चतुरश्रा धरण्यादौ ब्रह्मा तत्राधिदेवता ।
अर्धचन्द्राकृति जलं विष्णुस्तस्याधिदेवता ॥ १३ ॥
त्रिकोणमण्डलं वह्नी रुद्रस्तस्याधिदेवता ।
[1]वायोर्बिम्बं तु षट्कोणं संकर्षोऽत्राधिदेवता ॥ १४ ॥
आकाशमण्डलं वृत्तं श्रीमन्नारायणोऽत्राधिदेवता ।
नादरूपं भ्रुवोर्मध्ये मनसो मण्डलं विदुः ॥ १५ ॥
शांभवस्थानमेतत्ते वर्णितं पद्मसंभव ।

एतत् प्रथमाध्यायान्ते प्रायशः उक्तं इत्याह—शाम्भवेति ॥

नाडीचक्रस्वरूपम्

अतः परं प्रवक्ष्यामि नाडीचक्रस्य निर्णयम् ॥ १६ ॥
मूलाधारत्रिकोणस्था सुषुम्ना द्वादशाङ्गुला ।
मूलार्धच्छिन्नवंशाभा ब्रह्मनाडीति सा स्मृता ॥ १७ ॥
इडा च पिङ्गला चैव तस्याः पार्श्वद्वये गते ।
विलम्बिन्यामनुस्यूते नाडिकाऽन्तमुपागते ॥ १८ ॥
इडायां हेमरूपेण वायु[2]र्वामेन गच्छति ।
पिङ्गलायां तु सूर्यात्मा याति दक्षिणपार्श्वतः ॥ १९ ॥
विलम्बिनीति या नाडी व्यक्ता नाभौ प्रतिष्ठिता ।
तत्र नाड्यः समुत्पन्नास्तिर्यगूर्ध्वमधोमुखाः ॥ २० ॥

[1] वायौ बि—क. [2] मेंहे—उ १. हेंमे—उ.

तन्नाभिचक्रमित्युक्तं कुक्कुटाण्डमिव स्थितम् ।
गान्धारी हस्तिजिह्वा च तस्मान्नेत्रद्वयं गते ॥ २१
पूषा चालम्बुसा चैव श्रोत्रद्वयमुपागते ।
शूरा नाम महानाडी तस्माद्ब्रूमध्यमाश्रिता ॥ २२ ॥
विश्वोदरी तु या नाडी सा भुङ्क्तेऽन्नं चतुर्विधम् ।
सरस्वती तु या नाडी सा जिह्वाऽन्तं प्रसर्पते ॥ २३ ॥
राकाऽऽह्वया तु या नाडी पीत्वा च सलिलं क्षणात् ।
श्रुतमुत्पादयेद् घ्राणे श्लेष्माणं संचिनोति च ॥ २४ ॥
कण्ठकूपोद्भवा नाडी शङ्खिन्याख्या त्वधोमुखी ।
अन्नसारं समादाय मूर्ध्नि संचिनुते सदा ॥ २५ ॥
नाभेरधोगतास्तिस्रो नाडयः स्युरधोमुखाः ।
मलं त्यजेत्कुहूर्नाडी मूत्रं मुञ्चति वारुणी ॥ २६ ॥
चित्राख्या सीविनी नाडी शुक्रमोचनकारिणी ।
नाडीचक्रमिति प्रोक्तं बिन्दुरूपमतः शृणु ॥ २७ ॥

ततो नाडीचक्रस्वरूपमाह—अत इति ॥ १६–२७ ॥

बिन्द्वग्निसोमात्मकं ब्रह्मशरीरत्रयम्

स्थूलं सूक्ष्मं परं चेति त्रिविधं ब्रह्मणो वपुः ।
स्थूलं शुक्रात्मकं [1]बिन्दुः सूक्ष्मं पञ्चाग्निरूपकम् ॥ २८ ॥
सोमात्मकः परः प्रोक्तः सदा साक्षी सदाऽच्युतः ।

[1] बिन्दुस्—क, अ १, अ २.

कालाग्न्यादि पञ्चाग्निरूपकम् ॥ २८ ॥

पञ्चाग्निभावना, तत्फलं च

पातालानामधोभागे कालाग्निर्यः प्रतिष्ठितः ॥ २९ ॥
स मूलाग्निः शरीरऽग्निर्यस्मान्नादः प्रजायते ।
बडवाग्निः शरीरस्थो ह्यस्थिमध्ये प्रवर्तते ॥ ३० ॥
काष्ठपाषाणयोर्वह्निर्ह्यस्थिमध्ये प्रवर्तते ।
काष्ठपाषाणजो वह्निः पार्थिवो ग्रहणीगतः ॥ ३१ ॥
अन्तरिक्षगतो वह्निर्वैद्युतः स्वान्तरात्मकः ।
नभःस्थः सूर्यरूपोऽग्निर्नाभिमण्डलमाश्रितः ॥ ३२ ॥
विषं [1]वर्षति सूर्योऽसौ स्रवत्यमृतमुन्मुखः ।
तालुमूले स्थितश्चन्द्रः सुधां वर्षत्यधोमुखः ॥ ३३ ॥
भ्रूमध्यनिलयो बिन्दुः शुद्धस्फटिकसंनिभः ।
महाविष्णो[2]श्च देवस्य तत्सूक्ष्मं रूपमुच्यते ॥ ३४ ॥
एतत्पञ्चाग्निरूपं यो भावयन् बुद्धिमान् धिया ।
तेन भुक्तं च पीतं च हुतमेव न संशयः ॥ ३५ ॥

क्रमात् पञ्चाग्निस्वरूपमाह—पातालानामिति । अतलादिपातालानां पातालान्तलोकानां पातालानाम् ॥ २९ ॥ कालाग्निरेव नादाधाराग्निर्भूत्वा शरीरे वर्तते ॥ ३० ॥ तथा काष्ठेति । ग्रहणीगतः—पार्थिवाग्निरेव योषात्वं प्राप्त इत्यर्थः ॥ ३१–३४ ॥ पञ्चाग्निभावनाफलमाह—एतदिति ॥ ३५ ॥

[1] पिबति—क.
[2] स्य—क, अ २, उ १.

कुण्डलिनीप्रबोधनम्

सुखसंसेवितं स्वप्नं सुजीर्णमितभोजनम् ।
शरीरशुद्धिं कृत्वाऽऽदौ सुखमासनमास्थितः ॥ ३६ ॥
प्राणस्य शोधयेन्मार्गं रेचपूरककुम्भकैः ।
गुदमाकुञ्च्य यत्नेन मूलशक्तिं प्रपूजयेत् ॥ ३७ ॥

एवमाहारतः शरीरशुद्धिम् । स्वस्य येन सुखधारणा स्यात् तत् सुखमासनम् ॥ ३६ ॥ मूलशक्तिं प्रपूजयेत् कुण्डलिनीशक्तिं प्रबोधयेदित्यर्थः ॥ ३७–४२ ॥

खेचरीमुद्राभ्यासः तत्फलं च

नाभौ लिङ्गस्य मध्ये तु उड्डयाणाख्यं च बन्धयेत् ।
उड्डीय याति तेनैव शक्तितोऽड्याणपीठकम् ॥ ३८ ॥
कण्ठं संकोचयेत्किंचिद्बन्धो जालन्धरो ह्ययम् ।
बन्धयेत्खेचरीमुद्रां दृढचित्तः समाहितः ॥ ३९ ॥
कपालविवरे जिह्वा प्रविष्टा विपरीतगा ।
भ्रुवोरन्तर्गता दृष्टिर्मुद्रा भवति खेचरी ॥ ४० ॥
खेचर्या मुद्रितं येन विवरं लम्बिकोर्ध्वतः ।
न पीयूषं पतत्यग्नौ न च वायुः प्रधावति ॥ ४१ ॥
न क्षुधा न तृषा निद्रा नैवालस्यं प्रजायते ।
न च मृत्युर्भवेत्तस्य यो मुद्रां वेत्ति खेचरीम् ॥ ४२ ॥

सहस्रारे नारायणभावनातः कैवल्यसिद्धिः

ततः पूर्वापरे व्योम्नि द्वादशान्तेऽच्युतात्मके ।
उड्डीयाणपीठे निर्द्वन्द्वे निरालम्बे निरञ्जने ॥ ४३ ॥
ततः पङ्कजमध्यस्थं चन्द्रमण्डलमध्यगम् ।
नारायणमनुध्यायेत्स्रवन्तममृतं सदा ॥ ४४ ॥
भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः ।
क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे ॥ ४५ ॥

ततो योगी सहस्रारगकाशे स्रवदमृतं नारायणं स्वात्मतया ध्यायन् ग्रन्थिसंशयकर्मासम्भवकैवल्यसिद्धिमेतीत्याह—तत इति । सहस्रारे आज्ञायां वा ॥ ४३–४५ ॥

यथोक्तभावनायुक्तस्य तत्तत्सिद्ध्युपायाः

अथ सिद्धिं प्रवक्ष्यामि सुखोपायं सुरेश्वर ।
जितेन्द्रियाणां शान्तानां जितश्वासचित्तसाम् ॥ ४६ ॥
नादे मनोलयं ब्रह्मन् दूरश्रवणकारणम् ।
बिन्दौ मनोलयं कृत्वा दूरदर्शनमाप्नुयात् ॥ ४७ ॥
कालात्मनि मनो लीनं त्रिकालज्ञानकारणम् ।
परकायमनोयोगः परकायप्रवेशकृत् ॥ ४८ ॥
अमृतं चिन्तयेन्मूर्ध्नि क्षुत्[1]तृषाविषशान्तये ।
पृथिव्यां धारयेच्चित्तं पातालगमनं भवेत् ॥ ४९ ॥

[1] तृष्णा—अ, अ १.

सलिले धारयेच्चित्तं नाम्भसा परिभूयते ।
अग्नौ संधारयेच्चित्तमग्निना दह्यते न सः ॥ ९० ॥
वायौ मनोलयं कुर्यादाकाशगमनं भवेत् ।
आकाशे धारयेच्चित्तमणिमादिकमाप्नुयात् ॥ ९१ ॥
विराड्[1]रूपे मनो युञ्जन् महिमानमवाप्नुयात् ।
चतुर्मुखे मनो युञ्जन् जगत्सृष्टिकरो भवेत् ॥ ९२ ॥
इन्द्ररूपिणमात्मानं भावयन् मर्त्यभोगवान् ।
विष्णुरूपे [2]महायोगी पालयेदखिलं जगत् ॥ ९३ ॥
रुद्ररूपे महायोगी संहरत्येव तेजसा ।
नारायणे मनो युञ्जन् नारायण[3]मयो भवेत् ।
वासुदेवे मनो युञ्जन् सर्वसिद्धिमवाप्नुयात् ॥ ९४ ॥
यथा संकल्पयेद्योगी योगयुक्तो जितेन्द्रियः ।
तथा तत्तदवाप्नोति भाव एवात्र कारणम् ॥ ९५ ॥

एवं भावयतः ते नानाविधसिद्ध्युपायं वदामीत्याह—**अथेति** ॥ ४६ ॥ **बिन्दौ** चक्षुस्तारके ॥ ४७–६१ ॥

गुरुपूजाविधिः

गुरुर्ब्रह्मा गुरुर्विष्णुर्गुरुर्देवः सदाऽच्युतः ।
न गुरोरधिकः कश्चित् त्रिषु लोकेषु विद्यते ॥ ९६ ॥

[1] रूपं—अ, अ १. [2] मनो—उ.
[3] मयं—अ १, अ २, क.

दिव्यज्ञानोपदेष्टारं देशिकं परमेश्वरम् ।
पूजयेत्परया भक्त्या तस्य ज्ञानफलं [1]भवेत् ॥ ९७ ॥
यथा गुरुस्तथैवेशो यथैवेशस्तथा गुरुः ।
पूजनीयो महाभक्त्या न भेदो विद्यतेऽनयोः ॥ ९८ ॥
नाद्वैतवादं कुर्वीत गुरुणा सह कुत्रचित् ।
अद्वैतं भावयेद्भक्त्या गुरोर्देवस्य चात्मनः ॥ ९९ ॥

योगशिखामहिमा

योगशिखां महागुह्यं यो जानाति महामतिः ।
न तस्य किंचिदज्ञातं त्रिषु लोकेषु विद्यते ॥ ६० ॥
न पुण्यपापे [2]नास्वस्थो न दुःखं न पराजयः ।
न चास्ति पुनरावृत्तिरस्मिन् संसारमण्डले ॥ ६१ ॥

सिद्धिषु उपेक्षाविधिः

सिद्धौ चित्तं न कुर्वीत चञ्चलत्वेन चेतसः ।
तथाऽपि ज्ञाततत्त्वोऽसौ मुक्त एव न संशयः ॥ ६२ ॥

इत्युपनिषत् ॥

विज्ञातस्वात्मतत्त्वानां योगिनां सिद्धिगोपनागोपनतो न काचित् क्षतिः लाभो वा अस्तीत्यर्थः । इत्युपनिषच्छब्दः पञ्चमाध्यायसमाप्त्यर्थः ॥ ६२ ॥

इति पञ्चमोऽध्यायः

[1] लभेत्—अ, अ १, अ २, क. [2] नस्व—अ, अ १, अ २, क.

षष्ठोऽध्यायः

कुण्डलिनीशक्तेः उपासनाविधिः

उपासनाप्रकारं मे ब्रूहि त्वं परमेश्वर ।
येन विज्ञानमात्रेण मुक्तो भवति संसृतेः ॥ १ ॥
उपासनाप्रकारं ते रहस्यं श्रुतिसारकम् ।
हिरण्यगर्भ वक्ष्यामि श्रुत्वा सम्यगुपासय ॥ २ ॥
सुषुम्नायै कुण्डलिन्यै सुधायै चन्द्रमण्डलात् ।
मनोन्मन्यै नमस्तुभ्यं महाशक्त्यै चिदात्मने ॥ ३ ॥

स्वाङ्गलोको येन मुच्यते तदुपायोपासनाप्रकारं ब्रूहीति महेश्वरं प्रति चतुर्मुखः पृच्छतीत्याह—उपासनेति ॥ १ ॥ प्रश्नोत्तरं भगवानाह—उपासनेति ॥ २ ॥ उपासनामन्त्रतत्प्रकारं तत्फलं चाह—सुषुम्नाया इति ॥ ३ ॥

सुषुम्नास्वरूपम्

शतं चैका च हृदयस्य नाड्य-
स्तासां मूर्धानमभिनिःसृतैका ।
तयोर्ध्वमायन्नमृतत्वमेति
विष्वङ्न्या उत्क्रमणे भवन्ति ॥ ४ ॥
एकोत्तरं नाडिशतं तासां मध्ये परा स्मृता ।
सुषुम्ना तु परे लीना विरजा ब्रह्मरूपिणी ॥ ५ ॥
इडा तिष्ठति वामेन पिङ्गला दक्षिणेन तु ।
तयोर्मध्ये परं स्थानं [1]यस्तद्वेद स वेदवित् ॥ ६ ॥

[1] यस्तं वे—उ,

प्राणान् संधारयेत्तस्मिन् नासाभ्यन्तरचारिणः ।
भूत्वा तत्रायतप्राणः शनैरेव समभ्यसेत् ॥ ७ ॥
गुदस्य पृष्ठभागेऽस्मिन्वीणा[1]दण्डस्तु देहभृत् ।
दीर्घास्थिदेहपर्यन्तं ब्रह्मनाडीति कथ्यते ॥ ८ ॥
तस्यान्ते सुषिरं सूक्ष्मं ब्रह्मनाडीति सूरिभिः ।
इडापिङ्गलयोर्मध्ये सुषुम्ना सूर्यरूपिणी ॥ ९ ॥

सुषुम्नारूपं तन्मार्गगमनफलं चाह—शतमिति ॥ ४–१९ ॥

सुषुम्नायाः सर्वाधारत्वम्

सर्वं प्रतिष्ठितं तस्मिन् सर्वगं सर्वतोमुखम् ।
तस्य मध्यगताः सूर्यसोमाग्निपरमेश्वराः ॥ १० ॥
भूतलोका दिशः क्षेत्राः समुद्राः पर्वताः शिलाः ।
द्वीपाश्च निम्नगा वेदाः शास्त्रविद्याकलाऽक्षराः ॥ ११ ॥
स्वरमन्त्रपुराणानि गुणाश्चैते च सर्वशः ।
बीजं बीजात्मकस्तेषां क्षेत्रज्ञाः प्राणवायवः ॥ १२ ॥
सुषुम्नाऽन्तर्गतं विश्वं तस्मिन् सर्वं प्रतिष्ठितम् ।
नानानाडीप्रसवगं सर्वभूतान्तरात्मनि ॥ १३ ॥
ऊर्ध्वमूलमधःशाखं वायुमार्गेण सर्वगम् ।
द्विसप्ततिसहस्राणि नाड्यः स्युर्वायुगोचराः ॥ १४ ॥
सर्वमार्गेण सुषिरास्तिर्यञ्चः सुषिरात्मकाः ।
अधश्चोर्ध्वं च कुण्डल्याः सर्वद्वारनिरोधनात् ॥ १५ ॥

[1] दण्डस्य—क, अ, अ १, अ २. दण्डः स—मु.

पराशक्तेः उद्बोधनम्

वायुना सह जीवोर्ध्वज्ञानान्मोक्षमवाप्नुयात् ।
ज्ञात्वा सुषुम्ना तद्भेदं कृत्वा पायुं च मध्यगम् ॥ १६ ॥
कृत्वा तु बैन्दवस्थाने घ्राणरन्ध्रे निरोधयेत् ।
द्विसप्ततिसहस्राणि नाडीद्वाराणि पञ्जरे ॥ १७ ॥
सुषुम्ना शाम्भवी शक्तिः शेषास्त्वन्ये निरर्थकाः ।
ह्लेखे परमानन्दे तालु[1]मूलव्यवस्थितं ॥ १८ ॥
अत ऊर्ध्वं निरोधे तु मध्यमं मध्यमध्यमम् ।
उच्चारयेत्परां शक्तिं ब्रह्मरन्ध्रनिवासिनीम् ।
यदि भ्रमरसृष्टिः स्यात् संसारभ्रमणं त्यजेत् ॥ १९ ॥

जीवशक्तिः कुण्डलिनीत्यर्थः ॥ १६ ॥ **बैन्दवस्थाने** भ्रूमध्ये । **पञ्जरे** शरीरे ॥ १७ ॥ **ह्लेखे** ह्रींकारवाच्ये **परमानन्दे** ईश्वरतत्त्वे **तालुमूलव्यवस्थिते** चित्तादिकं निरोधयेत् ॥ १८ ॥ मध्यमं तुरीयं, मध्यमध्यमं तुर्यतुरीयं, तत्र लक्ष्यं कृत्वा **उच्चारयेत**, षोडशमात्राकालं प्रणवप्रकृतिमुच्चारयेत् । **ब्रह्मरन्ध्रनिवासिनीं**—षोडशसंख्यापूरकमात्रायाः परभूमित्वेन ब्रह्मरन्ध्रासनत्वात् । तत्र यदीति । स्वातिरिक्तं विकल्प्य परिभ्रमतीति **भ्रमरः** कामसङ्कल्पादिमनोवृत्तिपूगः, "कामः सङ्कल्पो विचिकित्सा श्रद्धा अश्रद्धा धृतिः अधृतिः ह्रीः धीः भीः इत्येतत् सर्वं मन एव" इति श्रुतेः । **तत्सृष्टिः** कल्पना स्यात् । तत्र कदाऽपि कल्पनावकाशो नास्ति ब्रह्मरन्ध्रस्य निर्बीजत्वात् । यदि भ्रूमध्यादधःप्रदेशमेत्य विशुद्धिचक्रे कामसङ्कल्पादिसृष्टिः स्यात् तदाऽऽज्ञाचक्रमवष्टभ्य स्वानर्थकारणं **संसारभ्रमणं** स्वातिरिक्तविषयपरिभ्रमणं "स्वातिरिक्तं न किञ्चिदस्ति" इति धैर्येण **त्यजेत्** अपह्नवं कुर्यादित्यर्थः ॥ १९ ॥

[1] मूले—अ, अ १, अ २, क.

गमागमस्थं गमनादिशून्यं चिद्रूपदीपं तिमिरान्धकारम्[1] ।
पश्यामि ते सर्वजनान्तरस्थं नमामि हंसं परमात्मरूपम् ॥२०॥
अनाहतस्य शब्दस्य तस्य शब्दस्य यो ध्वनिः ।
ध्वनेरन्तर्गतं ज्योतिर्ज्योतिरन्तर्गतं मनः ।
तन्मनो विलयं याति तद्विष्णोः परमं पदम् ॥ २१ ॥

ततः किमित्यत आह—गमेति । स्वान्तःकरणवृत्तिकदम्बगमनागमनावभासकप्रत्यगभिन्नब्रह्मरूपेण तिष्ठतीति **गमागमस्थम्** । वस्तुतः स्वातिरिक्तान्तःकरणतत्कार्याभावात् **गमनादिशून्यम्** । ततः स्वातिरिक्तं तिमिरान्धकारं चिद्रूपाग्निशिखया दीपयति भस्मावशेषं करोतीति **चिद्रूपदीपम्** । शिष्टं स्पष्टम् ॥ २० ॥ अनाहतोपलक्षितमूलाधारादिवैखर्यन्तप्रादुर्भूतशब्दज्योतिः प्रपञ्चकलनाकलितसवृत्तिकमानसासम्भवप्रबोधसिद्धं विष्णुपदं अवशिष्यते इत्यर्थः ॥२१॥

आधारब्रह्मणि प्राणादिविलयान्मुक्तिः

केचिद्वदन्ति चाधारं सुषुम्ना च सरस्वती ।
आधाराज्जायते विश्वं विश्वं तत्रैव लीयते ॥ २२ ॥
तस्मात्सर्वप्रयत्नेन गुरुपादं समाश्रयेत् ।
आधारशक्तिनिद्रायां विश्वं भवति निद्रया ॥ २३ ॥
तस्यां शक्तिप्रबोधेन त्रैलोक्यं प्रतिबुध्यते ।
आधारं यो विजानाति तमसः परमश्नुते ॥ २४ ॥
तस्य विज्ञानमात्रेण नरः पापैः प्रमुच्यते ॥ २५ ॥

[1] न्धनाशम्—मु. पहारम्—अ.

आधारचक्रमहसा विद्युत्पुञ्जसमप्रभा ।
तदा मुक्तिर्न संदेहो यदि तुष्टः स्वयं गुरुः ॥ २६
आधारचक्रमहसा पुण्यपापे निकृन्तयेत् ।
आधारवातरोधेन लीयते गगनान्तरे ॥ २७ ॥
आधारवातरोधेन शरीरं कम्पते यथा ।
आधारवातरोधेन योगी नृत्यति सर्वदा ॥
आधारवातरोधेन विश्वं तत्रैव दृश्यते ॥ २८ ॥
सृष्टिराधारमाधारमाधारे सर्वदेवताः ।
आधारे सर्वे[1]वेदाश्च तस्मादाधारमाश्रयेत् ॥ २९ ॥
आधारे पश्चिमे भागे त्रिवेणीसङ्गमो भवेत् ।
तत्र स्नात्वा च पीत्वा च नरः पापात् प्रमुच्यते ॥ ३० ॥
आधारे पश्चिमं लिङ्गं कवाटं तत्र विद्यते ।
तस्योद्घाटनमात्रेण मुच्यते भवबन्धनात् ॥ ३१ ॥
आधारपश्चिमे भागे चन्द्रसूर्यौ स्थिरौ यदि ।
तत्र तिष्ठति विश्वेशो ध्यात्वा ब्रह्ममयो भवेत् ॥ ३२ ॥

केचिन्नादाधाराप्राणादिविलयात् स्वाधेयाभावतो निराधारब्रह्मस्वरूपावस्थानलक्षणमुक्तिः स्यादिति वदन्ति । तदपि युक्तमेवेत्याह—केचिदिति । सुषुम्नासरस्वतीनाडयौ यत्र प्रतिष्ठिते तन्मूलाधारमित्यर्थः । तस्य ब्रह्मात्मना विश्वाधारोपापवादाधिकरणतामप्याह—आधारादिति ॥ २२ ॥ यस्मादेवं तस्मात् । येन मूलाधारयाथात्म्यं दर्शितं स गुरुः परमात्मा स्वाज्ञानमोचकत्वात् ।

[1] देवा—अ, अ १.

तत्पादं तद्भावं समाश्रयेत् । किंच—आधारेति । आधारशक्तिः कुण्डलिनी तस्याः स्वाधारावस्थितिः निद्रा तस्यां सत्यां विश्वं स्वाज्ञाननिद्राविशिष्टं भवति ॥ २३ ॥ तत्प्रबो[illegible] सुषुम्नाप्रवेशः । तेन त्रैलोक्ययाथात्म्यबोधो जायते । एवं ज्ञानफ[illegible]ह—आधारमिति ॥ २४–२५ ॥ मुक्तेः गुरुप्रसादैकलभ्यत्वात्, "यमेवैष वृणुते तेन लभ्यः" इति श्रुतेः ॥ २६ ॥ किंच—आधारेति । विश्वं तत्रैव दृश्यते—स्वातिरिक्तं नेति प्रकाशते इत्यर्थः ॥ २७–२८ ॥ आधारत्वं कथमित्यत्र यतः स्वातिरिक्तसृष्टिः स्वाधारमवष्टभ्य प्रवृत्ता यतः तदभावे न सम्भवति, अतः सर्वाधारमधिष्ठानं ब्रह्मेति सिद्धम् । तत् कथमित्यत्र आधारे सति सर्वदेवताः ॥ २९ ॥ इडा पिंगळा सुषुम्ना चेति त्रिवेणी ॥ ३० ॥ पश्चिमलिङ्गं प्रत्यक्चैतन्यं तत्कवाटमावारकं ग्रन्थित्रयम् ॥ ३१ ॥ आधारपश्चिमे भागे सुषुम्नायाम् ॥ ३२ ॥

चक्रेषु ब्रह्मादिमूर्तिध्यानेन ब्रह्मरन्ध्रप्रवेशः

आधारपश्चिमे भागे मूर्तिस्तिष्ठति संज्ञया ।
षट् चक्राणि च निर्भिद्य ब्रह्म[1]रन्ध्राद्बहिर्गतम् ॥ ३३ ॥
वामदक्षे [2]निरुद्धन्ति प्रविशन्ति सुषुम्नया ।
ब्रह्मरन्ध्रं प्रविश्यन्ति ते यान्ति परमां गतिम् ॥ ३४ ॥

ब्रह्मादीनां मूर्तिः । एवमुपासकाः तत्तच्चक्रालङ्कारमूर्तिध्यानपुरस्सरं षट्चक्राणीति । ब्रह्मरन्ध्रात् सुषुम्नारन्ध्रात् पुरा बहिर्गतं प्राणमादौ योगिनो वामदक्षे इडापिंगळे निरुद्धन्ति निरोधं कुर्वन्ति । ततः तत्प्राणादयः सहसा सुषुम्नया क्रमात् ग्रन्थित्रयालंकृतषट्चक्राणि च निर्भिद्य चन्द्रसूर्याग्नैक्यजममृतमास्वाद्य सहस्रारचक्रोज्ज्वलत्तुरीयं तुरीयातीतं वा प्रविशन्ति । ये एवं ब्रह्मरन्ध्रम् ॥ ३३–३४ ॥

[1] रन्ध्रे ब—अ, अ १. [2] निरुन्धन्ति—क, अ १, अ २.

ब्रह्मरन्ध्रविलीनकरणस्य मुक्तिः

सुषुम्नायां यदा हंसः अध ऊर्ध्वं प्रधावति ।
सुषुम्नायां यदा प्राणं [1]भ्रामयेद्यो निरन्तरम् ॥ ३५ ॥
सुषुम्नायां यदा प्राणः स्थिरो भवति धीमताम् ।
सुषुम्नायां प्रवेशेन चन्द्रसूर्यौ लयं गतौ ॥ ३६ ॥
तदा समरसं भावं यो जानाति स योगवित् ।
सुषुम्नायां यदा यस्य म्रियते मनसो रयः ॥ ३७ ॥
सुषुम्नायां यदा योगी क्षणैकमपि तिष्ठति ।
सुषुम्नायां यदा योगी क्षणार्धमधितिष्ठति ॥ ३८ ॥
सुषुम्नायां यदा योगी सुलग्नो लवणाम्बुवत् ।
सुषुम्नायां यदा योगी लीयते क्षीरनीरवत् ॥ ३९ ॥
भिद्यते [2]च तदा ग्रन्थिश्छिद्यन्ते सर्वसंशयाः ।
क्षीयन्ते परमाकाशे ते यान्ति परमां गतिम् ॥ ४० ॥

यत्करणपटलं सुषुम्नाद्वारेण ब्रह्मरन्ध्रे विलीयते ते मुक्ता भवन्तीत्याह- **सुषुम्नायामिति** । **हंसः** प्राणः ॥ ३५–३९ ॥ एवं सुषुम्नाविलयफलमाह- **भिद्यत** इति । जीवेशभेदग्रन्थिः ॥ ४० ॥

सुषुम्नायोगमहिमा

गङ्गायां सागरे स्नात्वा नत्वा च मणिकर्णिकाम् ।
मध्यनाडीविचारस्य कलां नार्हन्ति षोडशीम् ॥ ४१ ॥

[1] क्रा—अ. [2] हृदय—अ २. च तथा—क, अ १, उ.

श्रीशैलदर्शनान्मुक्तिर्वाराणस्यां मृतस्य च ।
केदारोदकपानेन मध्यनाडीप्रदर्शनात् ॥ ४२ ॥
अश्वमेधसहस्राणि वाजपेयशतानि च ।
सुषुम्नाध्यान[1]योगस्य कलां नार्हन्ति षोडशीम् ॥ ४३ ॥
सुषुम्नायां यदा गोष्ठीं यः कश्चित्कुरुते नरः ।
स मुक्तः सर्वपापेभ्यो निश्रेयसमवाप्नुयात् ॥ ४४ ॥
सुषुम्नैव परं तीर्थं सुषुम्नैव परो जपः ।
सुषुम्नैव परं ध्यानं सुषुम्नैव परा गतिः ॥ ४५ ॥
अनेकयज्ञदानानि व्रतानि नियमानि च ।
सुषुम्नाध्यानयोगस्य कलां नार्हन्ति षोडशीम् ॥ ४६ ॥

सुषुम्नाविचारादिकं स्तौति—गङ्गायामिति ॥ ४१–४६ ॥

चिच्छक्तिजीवयोः स्थानविवेकः

ब्रह्मरन्ध्रे महास्थाने वर्तते सततं शिवा ।
चिच्छक्तिः परमा देवी मध्यमे सुप्रतिष्ठिता ॥ ४७ ॥
मायाशक्तिर्ललाटाग्रभागे व्योमाम्बुजे तथा ।
नादरूपा परा शक्तिर्ललाटस्य तु मध्यमे ॥ ४८ ॥
भागे बिन्दुमयी शक्तिर्ललाटस्यापरांशके ।
बिन्दुमध्ये च जीवात्मा सूक्ष्मरूपेण वर्तते ॥ ४९ ॥
हृदये स्थूलरूपेण मध्यमे न तु मध्यमे ॥ ५० ॥

[1] लेशस्य—अ, अ १, क.

ब्रह्मरन्ध्रादिस्थानेषु चिच्छक्त्यादयो वर्तन्ते। बिन्द्वादिमध्ये जीवोऽर्ध वर्तते। सोऽयं प्राणापानवशतो विश्रान्तिमलब्ध्वा उच्छ्वासादिव्यापारच्छले हंसमनुजपनिष्ठो भवतीत्याह—ब्रह्मरन्ध्र इति। मध्यमे भ्रूमध्ये हृदयाकाशे च तथा वर्तते इत्यनुषज्यते ॥ ४८ ॥ बिन्दुमर्य[illegible] ॥ ४९ ॥ मध्यमे हृदये स्थूलरूपेण जीवो वर्तते, न तु मध्यमे, भ्रूमध्ये सहस्रारे वा न तु जीवः सरति। यदि भ्रूमध्यादौ गच्छति तदा क्षरः परमाक्षरो वा भवतीत्यर्थः ॥ ९० ॥

वायुवशस्य जीवस्य हंसमन्त्रजपप्रकारः

प्राणापानवशो जीवो ह्यधश्चोर्ध्वं प्रधावति।
वामदक्षिणमार्गेण चञ्चलत्वान्न दृश्यते ॥ ९१ ॥
आक्षिप्तो भुजदण्डेन यथोच्चलति कन्तुकः।
प्राणापानसमाक्षिप्तस्तथा जीवो न विश्रमेत् ॥ ९२ ॥
अपानः कर्षति प्राणं प्राणोऽपानं च कर्षति।
हकारेण बहिर्याति सकारेण विशेत्पुनः ॥ ९३ ॥
हंसहंसेत्यमुं मन्त्रं जीवो जपति सर्वदा।
तद्विद्धानक्षरं नित्यं यो जानाति स योगवित् ॥ ९४ ॥

सोऽयं प्राणापानेति। केन मार्गेण यावद्[illegible]धावन्न[illegible]श्यते इत्यत्र वामेति ॥ ९१ ॥ तच्चलनदृष्टान्तमाह—आक्षिप्त इति ॥ ९२ ॥ तत् कथं? हकारेणेति ॥ ९३ ॥ इत्थंभूतोऽपि जीवः स्वगतजीवत्वं निरस्याक्षरोऽस्मीति ज्ञानात् तदेव भवतीत्याह—तदिति ॥ ९४ ॥

कुण्डल्यवस्थाभेदतो बन्धमुक्तिव्यवस्था

ऊर्ध्वं कुण्डली शक्तिर्मुक्ति[1]रूपाऽथ योगिनाम् ।
बन्धनाय च मूढानां यस्तां वेत्ति स योगवित् ॥ ९५ ॥

कुण्डली यदि स्वस्थानादूर्ध्वं गच्छति तदाऽयं मुक्तो भवति, यदि सा स्वस्थानं न मुञ्चति तदाऽयं बद्धो भवतीत्याह—ऊर्ध्वेति ॥ ९५ ॥

प्रणवस्य सर्वाधारत्वम्

भूर्भुवःस्वरिमे लोकाश्चन्द्रसूर्याग्निदेवताः ।
[2]यासु मात्रासु तिष्ठन्ति तत्परं ज्योतिरोमिति ॥ ९६ ॥
त्रयः कालास्त्रयो देवास्त्रयो लोकास्त्रयः स्वराः ।
त्रयो वेदाः स्थिता यत्र तत्परं ज्योतिरोमिति ॥ ९७ ॥

भूरादिलोकाधारः प्रणवः इत्याह—भूरिति ॥ ९६–९७ ॥

चित्तचलनाचलनाभ्यां बन्धमुक्ती

चित्ते चलति संसारो निश्चलं मोक्ष उच्यते ।
तस्माच्चित्तं स्थिरीकुर्यात्प्रज्ञया परया विधे ॥ ९८ ॥
चित्तं कारणमर्थानां तस्मिन् सति जगत्त्रयम् ।
तस्मिन् क्षीणे जगत् क्षीणं तच्चिकित्स्यं प्रयत्नतः ॥ ९९ ॥

यतः चित्तचलनाचलने बन्धमोक्षहेतू अतः स्वातिरेकेण चित्तं नास्तीत्यनुसन्धेयमित्याह—चित्त इति । यस्मादेवं तस्मात् ॥ ९८–९९ ॥

[1] रूपाय—क, उ. रूपा हि—मु. [2] यासु—अ १.

चित्तस्य स्वात्मानतिरिक्तत्वानुसन्धानेन ब्रह्मसाक्षात्कारः

मनोऽहं गगनाकारं मनोऽहं सर्वतोमुखम् ।
मनोऽहं सर्वमात्मा च न मनः केवलः परः ॥ ६० ॥
मनः कर्माणि जायन्ते मनो लिप्यति पातकैः ।
मनश्चेदुन्मनीभूयान्न पुण्यं न च पातकम् ॥ ६१ ॥
मनसा मन आलोक्य वृत्तिशून्यं यदा भवेत् ।
ततः परं परब्रह्म दृश्यते च सुदुर्लभम् ॥ ६२ ॥
मनसा मन आलोक्य मुक्तो भवति योगवित् ।
मनसा मन आलोक्य, उन्मन्यन्तं सदा स्मरेत् ॥ ६३ ॥
मनसा मन आलोक्य योगनिष्ठः सदा भवेत् ।
मनसा मन आलोक्य[1]दृशाप्रत्ययदृश्यते ॥ ६४ ॥
यदा प्रत्यया दृश्यन्ते तदा योगीश्वरो भवेत् ॥ ६५ ॥
बिन्दुनादकलाज्योतिरबिन्दुर्ध्रुवतारकम् ।
शान्तं च तदतीतं च परंब्रह्म तदुच्यते ॥ ६६ ॥

मनस्तु ब्रह्मावरणं तन्मनसः सत्वांशतः स्वावरणे नष्टे निरावरणं ब्रह्म प्रकाशत इत्याह—मनइति । शुद्धसत्वेश्वरभावमापन्नमनस्तु **मनोऽहं गगनाकारं**, सङ्कल्पादिवृत्त्यभावात् । तथा चेत् सत्ववृत्तिमन्मनो ब्रह्मेत्यत आह— **न मनः केवलः पर** इति ॥ ६० ॥ रजस्तमोवृत्तिकं मनस्तु **मनः कर्माणि** जायन्ते । यस्य **मनश्चेदुन्मनीभूयात्** ॥ ६१ ॥ सात्विकभावापन्नेन **मनसा** तमआदिभावापन्नं **मन आलोक्य** मिथ्येति दृष्ट्वा एवं दर्शनतो **वृत्तिशून्यम्**

[1] दशप्रत्ययो—क, अ २. दृश्यन्ते प्रत्यया दश—अ.

॥ ६२–६३ ॥ आलोक्य स्थितस्य योगिनः दृशप्रत्ययदृश्यते—"दृशमोऽसि" इति बोधितस्य "दृशमोऽस्मि" इति प्रत्ययवत् "तत् त्वमसि" इति बोधि[illegible] "ब्रह्मास्मि" इति प्रत्ययो दृश्यते। ब्रह्मास्मीति ज्ञानमुदेतीति भाव[illegible] ६४–६५ ॥ प्रत्ययगोचरं ब्रह्म कीदृशमित्यत्र बिन्दुनादेति। स्वाज्ञादिदृष्टया विराडादिरूपेण बिन्दुनादकलाज्योतिः। ओत्रादेर्विराडादिविलक्षणत्वात् अबिन्दुः ओता, ध्रुवतारकं अनुज्ञातृचैतन्यं, स्वकार्यापेक्षया स्वयं ध्रुवं सत् स्वोपासकभवसागरसन्तारणात्। विराडाद्यनुज्ञात्रन्तकलनाशान्तं अनुज्ञैकरसचैतन्यं, तदतीतं त्वविकल्पचैतन्यम्। यत् त्रिबन्धादि तदतीतान्तं विभाति वस्तुतः तत् सर्वं परं ब्रह्मेत्युच्यते। स्वातिरिक्तबिन्दुदिगतहेयांशापह्नवसिद्धनिष्प्रतियोगिकस्वमात्रतया बृंहणात् ब्रह्मत्वं निरंकुशमित्यर्थः ॥ ६६ ॥

प्राणचित्तयोरविनाभावः

हसत्युल्लसति प्रीत्या क्रीडते मोदते तदा।
तनोति जीवनं बुद्ध्या बिभेति सर्वतो भयात् ॥ ६७ ॥
रोधते बुध्यते शोके मुह्यते नवसंपदा।
कम्पते शत्रुकार्येषु कामेन रमते हसन् ॥ ६८ ॥
स्मृत्या कामरतं चित्तं विजानीयात्कलेबरे।
यत्र देशे वसेद्वायुश्चित्तं तद्ध[1]सते ध्रुवम् ॥ ६९ ॥
मनश्चन्द्रो रविर्वायुर्दृष्टिरग्निरुदाहृतः।
बिन्दुनादकला ब्रह्मन् विष्णुब्रह्मेशदेवताः ॥ ७० ॥

ब्रह्मातिरेकेण यच्चिन्तनीयं तच्चित्तमित्याह—हसतीति ॥ ६७–६८ ॥ एवं हसनादिकामरमणान्तस्मृत्या। प्राणचित्तयोरविनाभावतामाह—यत्रेति

[1] सति—अ, मु.

॥ ६९ ॥ मनःप्राणद्वयीनां चन्द्रार्काग्नितां बिन्दुनादकलानां ब्रह्मविष्ण्वीशतां चाह—मन इति ॥ ७० ॥

नादानुसन्धानं मनोलयहेतुः

सदा नादानुसन्धानात् संक्षीणा वासना भवेत् ।
निरञ्जने [1]विलीयेते मरुन्मनसि पद्मज ॥ ७१ ॥
यो वै नादः स वै बिन्दुस्तद्वै चित्तं प्रकीर्तितम् ।
नादो बिन्दुश्च चित्तं च त्रिभिरैक्यं प्रसाधयेत् ॥ ७२ ॥
मन एव हि बिन्दुश्च उत्पत्तिस्थितिकारणम् ।
मनसोत्पद्यते बिन्दुर्यथा क्षीरं घृतात्मकम् ॥ ७३ ॥

वासनावन्मनोलयहेतुः किमित्यत्र सदेति । वासनाक्षयसमकालं निरञ्जने ॥ ७१ ॥ नादबिन्दुचित्तानामेकत्वं भावनीयमित्याह—य इति ॥ ७२ ॥ कथं पुनः मनोबिन्द्वोरेकत्वमित्यत आह—मन इति ॥ ७३ ॥

मनोयुक्तप्राणाभ्यासविधिः

षट् चक्राणि परिज्ञात्वा प्रविशेत्सुखमण्डलम् ।
प्रविशेद्वायुमाकृष्य तथैवोर्ध्वं नियोजयेत् ॥ ७४ ॥
वायुं बिन्दुं तथा चक्रं चित्तं चैव समभ्यसेत् ।
[2]समाधिनैकेन सममृतं यान्ति योगिनः ॥ ७५ ॥

सर्वानर्थहेतुमनोविलयार्थं षट्चक्रपरिज्ञानपूर्वकं मनोयुक्तपवनाभ्यासः कर्तव्य इत्याह—षडिति । सुषुम्नाऽन्तर्विलसितं सुखमण्डलम् ॥ ७४ ॥ योगिनः समाधिसमकालं कृतकृत्या भवन्तीत्याह—समाधिनेति ॥ ७५ ॥

[1] विलीयेत—मु. लयं याति—अ. [2] समाधिभे—अ, अ १, अ २, क.

गुरूपदेशपूर्वकं अभ्यासं विना न ज्ञानोदयः

यथाऽग्निर्दारुमध्यस्थो नोत्तिष्ठेन्मथनं विना ।
विना चाभ्यासयोगेन ज्ञानदीपस्तथा न हि ॥ ७६ ॥
घटमध्ये यथा दीपो बाह्ये नैव प्रकाशते ।
भिन्ने तस्मिन् घटे चैव दीपज्वालाऽवभासते ॥ ७७ ॥
स्वकायं घटमित्युक्तं यथा जीवो हि तत्पदम् ।
गुरुवाक्य[1]समं भिन्ने ब्रह्मज्ञानं प्रकाशते ॥ ७८ ॥
कर्णधारं गुरुं प्राप्य तद्वाक्यं प्लववद्दृढम् ।
अभ्यासवासनाशक्त्या तरन्ति भवसागरम् ॥ ७९ ॥

इत्युपनिषत् ॥

अभ्यासं विना ज्ञानं नोदेतीत्यत्र सदृष्टान्तमुत्तरमाह—यथेति ॥ ७६ ॥ किंच—घटमध्ये ॥ ७७ ॥ घटमित्युक्तम्, अत्र प्रथमार्थे द्वितीया । जीवो हि तत्पदं जीवगतहेयांशापाये जीवस्य तत्पदत्वात् । तद्वतस्त्वाज्ञाने गुरुवाक्यसमं भिन्ने ॥ ७८ ॥ नौकाचालकस्थानीय आचार्यः, प्लवस्थानीयोऽयं तदुपदिष्टार्थः । सन्तस्तमाश्रित्य भवसागरं तरन्तीत्याह—कर्णेति । शिष्याः श्रुत्याचार्यप्रसादज-ज्ञानसमकालं निष्प्रतियोगिकब्रह्ममात्रावस्थानलक्षणकैवल्यं यान्तीत्यर्थः ॥ ७९ ॥ इतिशब्दः षष्ठाध्यायपरिसमाप्त्यर्थः । उपनिषच्छब्दस्तु शास्त्रपरिसमाप्त्यर्थः ॥

इति षष्ठोऽध्यायः

श्रीवासुदेवेन्द्रशिष्योपनिषद्ब्रह्मयोगिना ।
योगशिखोपनिषदो व्याख्यानं लिखितं स्फुटम् ।
शिखोपनिषदो व्याख्याग्रन्थः सप्तशतं स्मृतः ॥

इति श्रीमदीशाद्यष्टोत्तरशतोपनिषच्छास्त्रविवरणे त्रिषष्टिसंख्यापूरकं
योगशिखोपनिषद्विवरणं सम्पूर्णम्

[1] समाप्ति—क, अ १. अ २. समाभासे—अ.

वराहोपनिषत्

सह नाववतु—इति शान्तिः

प्रथमोऽध्यायः

तत्त्वसंख्याविकल्पाः

अथ ऋभुर्वै महामुनिर्देवमानेन द्वादशसंवत्सरं तपश्चचार। तदवसाने वराहरूपी भगवान् प्रादुरभूत्। स होवाचोत्तिष्ठोत्तिष्ठ वरं वृणीष्वेति। सोदतिष्ठत्। तस्मै नमस्कृत्योवाच भगवन् कामिभिर्यद्यत्कामितं तत्तत् त्वत्सकाशात्स्वप्नेऽपि न याचे। समस्तवेदशास्त्रेतिहासपुराणानि समस्तविद्याजालानि ब्रह्मादयः सुराः सर्वे त्वद्रूपज्ञानान्मुक्तिमाहुः। अतस्त्वद्रूपंप्रतिपादिकां ब्रह्मविद्यां ब्रूहीति होवाच। तथेति स होवाच वराहरूपी भगवान्।

चतुर्विंशतितत्त्वानि केचिदिच्छन्ति वादिनः।
केचित् षट्त्रिंशत्तत्त्वानि केचित् षण्णवतीनि च ॥ १ ॥
तेषां [1]क्रमं प्रवक्ष्यामि सावधानमनाः शृणु।

[1] क्रमात्—क, अ १.

श्रीमद्वराहोपनिषद्वेद्याखण्डमुखाकृति ।
त्रिपान्नारायणाख्यातरामचन्द्रपदं भजे ॥

खलु कृष्णयजुर्वेदप्रविभक्तेयं वराहोपनिषत् षण्णवतितत्त्वप्रकाशन-ज्ञानयोगप्रकटनव्यग्रा निष्प्रतियोगिकब्रह्मप्रणवार्थतुर्यतुर्यपर्यवसन्ना विजयते । अस्याः स्वल्पग्रन्थतो विवरणमारभ्यते । तपोब्रह्मचर्यदेवताप्रसादादि-साधनसम्पत्तिनिष्पन्नेयमिति ब्रह्मविद्या महीक्रियते । ऋभुवराहयोः निदाघऋभ्वोश्च प्रश्नप्रतिवचनरूपेयं आख्यायिका ब्रह्मविद्यास्तुत्यर्था । आदावाख्यायिकामवतार-यति—अथेति । तपश्चचार एवमत्युग्रं तपः कृतवान् । प्रादुरभूत् स्वपुरतः आविर्भूतवान् । एवमाविर्भूय तत्कृततपःफलदित्सया स होवाच । इत्थं भगवद्वाक्यमाकर्ण्य सोदतिष्ठत् । उवाच, किमिति? भगवन्निति । पुनरन्यत् किं वाञ्छन् तपश्चरसि इत्युक्ते समस्तेति । सर्वे त्वद्रूपाज्ञानप्रभवं बन्धं त्वद्रूपज्ञानात् मुक्तिं च आहुः । ऋभुकृतप्रश्नमंगीकृत्य तथेति । आदौ स्वातिरिक्ततत्त्वेयत्तापरि-ज्ञानाभावे न हि स्वमात्रतत्त्वे शिष्यबुद्धिः प्रसरेदिति स्वातिरिक्ततत्त्वेयत्तामाचष्टे—चतुरिति ॥ १ ॥

चतुर्विंशतितत्त्वानि

ज्ञानेन्द्रियाणि पञ्चैव श्रोत्रत्वग्लोचनादयः ॥ २ ॥
कर्मेन्द्रियाणि पञ्चैव वाक्पाण्यङ्घ्र्यादयः क्रमात् ।
प्राणादयस्तु पञ्चैव पञ्च शब्दादयस्तथा ॥ ३ ॥
मनोबुद्धिरहंकारश्चित्तं चेति चतुष्टयम् ।
चतुर्विंशतितत्त्वानि तानि ब्रह्मविदो विदुः ॥ ४ ॥

किं तदित्यत्र—ज्ञानेति ॥ २–४ ॥

षट्त्रिंशत्तत्त्वानि

एतैस्तत्त्वैः समं पञ्चीकृतभूतानि पञ्च च ।
पृथिव्यापस्तथा तेजो वायुराकाश एव च ॥ ५ ॥
देहत्रयं स्थूलसूक्ष्मकारणानि विदुर्बुधाः ।
अवस्थात्रितयं चैव जाग्रत्स्वप्नसुषुप्तयः ॥ ६ ॥
आहृत्य तत्त्वजातानां षट्त्रिंशन्मुनयो विदुः ।

षट्त्रिंशत्तत्त्वानि कानीत्यत्र—एतैरिति ॥ ५–६ ॥

षण्णवतितत्त्वानि

पूर्वोक्तैस्तत्त्वजातैस्तु समं तत्त्वानि योजयेत् ॥ ७ ॥
षड्भावविकृतिश्चास्ति जायते वर्धतेऽपि च ।
परिणामं क्षयं नाशं षड्भावविकृतिं विदुः ॥ ८ ॥
अशना च पिपासा च शोकमोहौ जरा मृतिः ।
एते षड्ऊर्मयः प्रोक्ताः षट्कोशानथ [1]वच्मि ते ॥ ९ ।
त्वक् रक्तं मांसमेदोमज्जास्थीनि निबोधत ।
कामक्रोधौ लोभमोहौ मदो मात्सर्यमेव च ॥ १० ॥
एतेऽरिषट्का विश्वश्च तैजसः प्राज्ञ एव च ।
जीवत्रयं सत्त्वरजस्तमांसि च गुणत्रयम् ॥ ११ ॥
प्रारब्धागाम्यर्जितानि कर्मत्रयमितीरितम् ।
वचनादानगमनविसर्गानन्दपञ्चकम् ॥ १२ ॥

[1] चोच्यते—क, अ १, अ २.

संकल्पोऽध्यवसायश्च अभिमानोऽवधारणा ।
मुदिता करुणा मैत्री उपेक्षा च चतुष्टयम् ॥ १३ ॥
दिग्वातार्कप्रचेतोऽश्विवह्नीन्द्रोपेन्द्रमृत्युकाः ।
तथा चन्द्रश्चतुर्वक्त्रो रुद्रः क्षेत्रज्ञ [1]ईश्वरः ॥ १४ ॥
आहत्य तत्त्वजातानां षण्णवत्यस्तु कीर्तिताः ।

षण्णवतितत्त्वानि कानीत्यत्र—पूर्वोक्तेति ॥ ७–१४ ॥

तत्त्वातीतभगवद्भक्तेरेव मुक्तिः

पूर्वोक्ततत्त्वजातानां वैलक्षण्यमनामयम् ॥ १५ ॥
वराहरूपिणं मां ये भजन्ति मयि [2]तत्त्वतः ।
विमुक्ताज्ञानतत्कार्या जीवन्मुक्ता भवन्ति ते ॥ १६ ॥

उक्ततत्त्वेषु त्वं कीदृशः त्वज्ज्ञानफलं किं इत्यत आह—पूर्वोक्तेति ॥ १५–१६ ॥

तत्त्वज्ञानफलम्

ये षण्णवतितत्त्वज्ञा यत्र कुत्राश्रमे रताः ।
जटी मुण्डी शिखी वाऽपि मुच्यते नात्र संशयः ॥ १७ ॥
इति ॥

विशिष्टतत्त्वज्ञानफलमाह—य इति । सांख्यपरिगृहीतषण्णवतितत्त्वानि शैवपरिगृहीतषट्त्रिंशत्तत्त्वे अन्तर्भवन्ति । तानि च वेदान्त्येकदेशिपरिगृहीत-

[1] ईश्वराः—क, अ १, अ २. [2] भक्तितः—क, अ, अ १, अ २.

चतुर्विंशतितत्त्वेषु अन्तर्भवन्ति । पुनस्तान्यपि स्वातिरिक्तमायैकतत्त्वे अन्तर्भवन्ति, सर्वस्य मायाकार्यत्वात् । स्वातिरिक्तमायातत्त्वस्य निष्प्रतियोगिकाभावरूपतया निष्प्रतियोगिकब्रह्मतत्त्वमात्रमवशिष्यत इति सर्ववेदान्तसिद्धान्तार्थः ॥ १५७ ॥ इतिशब्दः अध्यायसमाप्त्यर्थः ॥

इति प्रथमाऽध्यायः

द्वितीयोऽध्यायः

साधनचतुष्टयसम्पत्तिः

ऋभुर्नाम महायोगी क्रोडरूपं रमापतिम् ।
वरिष्ठां ब्रह्मविद्यां त्वमधीहि भगवन्मम ॥ १ ॥
एवं स पृष्टो भगवान् प्राह भक्तार्तिभञ्जनः ।
स्ववर्णाश्रमधर्मेण तपसा गुरुतोषणात् ॥ २ ॥
साधनं प्रभवेत्पुंसां [1]वैराग्यादिचतुष्टयम् ।
नित्यानित्यविवेकश्च इहामुत्र विरागता ॥ ३ ॥
शमादिषट्कसंपत्तिर्मुमुक्षा तां समभ्यसेत् ।

एवं सामान्यतः ब्रह्मतत्त्वमवगम्य विस्पष्टं ससाधनं ब्रह्मतत्त्वं ज्ञातुमिच्छन् मुनिः भगवन्तं पृच्छतीत्याह—ऋभुरिति ॥ १ ॥ किं प्राहेत्यत्र आदौ साधनानुष्ठानं कर्तव्यमित्याह—स्ववर्णेति ॥ २ ॥ किं तदभ्यसनीयचतुष्टयसाधनमित्यत्राह—नित्येति । ब्रह्मैव नित्यं ब्रह्मातिरिक्तं अनित्यं इति नित्यानित्य-

[1] विवेकादि—अ;

विवेकः इह स्त्रक्चन्दनवनितादिषु अमुत्र स्वर्गादिभोगेषु च वान्ताशनमूत्र-पुरीषादिवत् इच्छागाहित्यं इहामुत्रविरागता ॥ ३ ॥ शमः दमः उपरतिः तितिक्षा श्रद्धा समाधानं चेति शमादिषट्कसम्पत्तिः । अन्तःकरणनिग्रहः शमः बाह्यकरणनिग्रहो दमः, उपरतिः सर्वकर्मसंन्यासः, शीतोष्णादिद्वन्द्वसहनं तितिक्षा, श्रुत्याचार्यवाक्यविश्वासः श्रद्धा, चित्तैकाग्रता समाधानम् । स्वातिरिक्तभ्रमतो मोक्तुमिच्छा मुमुक्षा । इत्थं साधनचतुष्टयाभ्यासतो जितेन्द्रियो भवतीत्यर्थः ॥

ब्रह्मात्मज्ञान्येव कृतकृत्यः

एवं जितेन्द्रियो भूत्वा सर्वत्र ममतामतिम् ॥ ४ ॥
विहाय साक्षिचैतन्ये मयि कुर्यादहंमतिम् ।
दुर्लभं प्राप्य मानुष्यं तत्रापि नरविग्रहम् ॥ ५ ॥
ब्राह्मण्यं च महाविष्णोर्वेदान्तश्रवणादिना ।
अतिवर्णाश्रमं रूपं सच्चिदानन्दलक्षणम् ॥ ६ ॥
यो न जानाति सोऽविद्वान् कदा मुक्तो भविष्यति ।

ब्रह्मातिरिक्तत्यागपूर्वकं ब्रह्ममात्रमतिं कुर्यादित्याह—एवमिति ॥ ४ ॥ एवं ज्ञानसाधनब्राह्मणादिदेहमाश्रित्य यः स्वात्मतत्त्वं न जानाति स कदा मुक्तो भवति? न कदेत्याह—दुर्लभमिति ॥ ५ ॥ वेदान्तश्रवणादिनिष्पन्नं महाविष्णोः व्यक्तलिंगं पारिव्राज्यं अव्यक्तलिंगं अतिवर्णाश्रममित्यर्थः ॥ ६ ॥

आत्मनः सुखरूपत्वम्

अहमेव सुखं नान्यदन्यच्चेन्नैव तत्सुखम् ॥ ७ ॥

अमदर्थं न हि प्रेयो मदर्थं [तु] [तत्] स्वतःप्रियम् ।
परप्रेमास्पदतया मा न भूवमहं सदा ॥ ८ ॥
भूयासमिति यो द्रष्टा सोऽहं विष्णुर्मुनीश्वर ।

स्वात्मन एव सर्वप्रेमास्पदत्वमाह—अहमिति । अहं प्रत्यगेव परानन्दं परमसुखं ब्रह्म भवामि नान्यत्, ब्रह्मातिरिक्तान्यस्य मृग्यत्वात् । वस्तुतो यद्यन्यत् तदा तद्ब्रह्म निष्प्रतियोगिकसुखं नैव भवति, "यो वै भूमा तत् सुखं" इति भूमब्रह्मणो निष्प्रतियोगिकसुखस्वरूपमात्रतावादिश्रुतेः ॥ ७ ॥ अत एव यत् मदर्थं तदेव सुखं, अमदर्थं तु न हि सुखं भवितुमर्हति । मदर्थमपि न हि प्रियं भवतीति चेन्न; तत् स्वत एव प्रियं भवतीत्यर्थः । स्वात्मानं सुखरूपतया यो जानाति सोऽहं विष्णुरित्याह—परेति । अहं निर्विशेषसुखरूपतया मा भूवमिति न किं तु भूयासमेवेत्यर्थः ॥ ८ ॥

आत्मनः स्वयंप्रकाशत्वम्

न प्रकाशोऽहमित्युक्तिर्यत्प्रकाशैकबन्धना ॥ ९ ॥
स्वप्रकाशं तमात्मानमप्रकाशः कथं स्पृशेत् ।
स्वयं भातं निराधारं ये जानन्ति सुनिश्चितम् ॥ १० ॥
ते हि विज्ञानसंपन्ना इति मे निश्चिता मतिः ।

सत्तामात्रत्वात् यत् सन्मात्रं तदेव स्वयंप्रकाशं ब्रह्मेत्याह—नेति । न प्रकाशोऽहमिति यत्प्रकाशतः पश्यति तत्स्वरूपं प्रकाशमात्रम् ॥ ९ ॥ तस्याप्रकाशाग्रासत्वात् अप्रकाशस्पर्शो न युज्यत इत्यर्थः । एवं स्वयं-प्रकाशमात्मानं ये मन्यन्ते ते कृतकृत्या इति मन्येऽहमित्याह—स्वयमिति ॥ १० ॥

आत्मनः मायातत्कार्यविलक्षणत्वम्

स्वपूर्णात्मातिरेकेण जगज्जीवेश्वरादयः ॥ ११ ॥

न सन्ति नास्ति माया च तेभ्यश्चाहं विलक्षणः ।
अज्ञानान्धतमोरूपं कर्मधर्मादिलक्षणम् ॥ १२ ॥
स्वयंप्रकाशमात्मानं नैव मां [1]स्प्रष्टुमर्हति

परमार्थदृष्ट्या स्वातिरिक्तं न किञ्चिदस्ति । यदि स्वाज्ञदृष्ट्या स्यात् तदा स्वज्ञदृष्ट्या तद्विलक्षणोऽस्मीत्याह—स्वेति ॥ ११ ॥ स्वातिरिक्तविलक्षणमपि त्वां स्वातिरिक्तं स्पृशेदित्यत आह—अज्ञानेति ॥ १२ ॥

ब्रह्मात्मज्ञानिनः ब्रह्मभावः

सर्वसाक्षिणमात्मानं वर्णाश्रमवि[2]लक्षणम् ॥ १३ ॥
ब्रह्मरूपतया पश्यन् ब्रह्मैव भवति स्वयम् ।
भासमानमिदं सर्वं भानरूपं परं पदम् ॥ १४ ॥
पश्यन् वेदान्तमानेन सद्य एव विमुच्यते ।
देहात्मज्ञानवज्ज्ञानं देहात्मज्ञानबाधकम् ॥ १५ ॥
आत्मन्येव भवेद्यस्य स नेच्छन्नपि मुच्यते ।

प्रत्यक्प्रकाशमात्मानं ब्रह्मेति यो जानाति स प्रत्यगभिन्नं ब्रह्मैव भवतीत्याह—सर्वेति ॥ १३ ॥ भानातिरेकेण भास्यं नेति ज्ञानी भास्यभावतो विमुच्यत इत्याह—भासमानमिति ॥ १४ ॥ एवं सम्यज्ज्ञानी स्वयमेव मुच्यत इत्याह—देहेति ॥ १५ ॥

आत्मज्ञानिनः कर्मबन्धाभावः

सत्यज्ञानानन्दपूर्णलक्षणं तमसः परम् ॥ १६ ॥

[1] द्रष्टु—अ, अ १. [2] वर्जितम्—क, अ, अ १, अ २.

ब्रह्मानन्दं सदा पश्यन् कथं बध्येत कर्मणा ।
त्रिधामसाक्षिणं सत्यज्ञानानन्दादिलक्षणम् ॥ १७ ॥
त्वमहंशब्दलक्ष्यार्थमसक्तं सर्वदोषतः ।

स्वात्मदर्शिनः कर्मबन्धासम्भवमाह—सत्येति ॥ १६ ॥ स्वात्मनः कर्मबन्धाभावे हेतुः असक्तत्वमित्याह—त्रिधामेति ॥ १७ ॥

अज्ञानिज्ञानिनोः दर्शनस्थितिवैलक्षण्यम्

सर्वगं सच्चिदानन्दं ज्ञानचक्षुर्निरी[1]क्षते ॥ १८ ॥
अज्ञानचक्षुर्नेक्षेत भास्वन्तं भानुमन्धवत् ।
प्रज्ञानमेव तद्ब्रह्म सत्य[2]प्रज्ञानलक्षणम् ॥ १९ ॥
एवं ब्रह्मपरिज्ञानादेव मर्त्योऽमृतो भवेत् ।
तद्ब्रह्मानन्दमद्वन्द्वं निर्गुणं सत्यचिद्घनम् ॥ २० ॥
विदित्वा स्वात्मनो रूपं न बिभेति कुतश्चन ।
चिन्मात्रं सर्वगं नित्यं संपूर्णं सुखमव्ययम् ॥ २१ ॥
साक्षाद्ब्रह्मैव नान्योऽस्तीत्येवं ब्रह्मविदां स्थितिः ।
अज्ञस्य दुःखौघमयं ज्ञस्यानन्दमयं जगत् ॥ २२ ॥
अन्धं भुवनमन्धस्य प्रकाशं तु सुचक्षुषाम् ।

ज्ञानचक्षुः स्वात्मानं सर्वासक्तं पश्यति, स्वाज्ञानचक्षुस्तु दिवान्धवत् भास्वन्तमात्मानं न पश्यतीत्याह—सर्वगमिति ॥ १८ ॥ यादृग्ब्रह्मज्ञानी तादृग्ब्रह्मैव भवतीत्याह—प्रज्ञानमिति ॥ १९ ॥ ब्रह्मज्ञानी कुतश्चित् न बिभेतीत्याह—तदिति ॥ २० ॥ निर्भयब्रह्मविदां स्थितिः केत्यत आह—चिन्मात्रमिति ॥ २१ ॥ स्वाज्ञगृहीतं स्वाज्ञो विपरीतं पश्यतीत्याह—अज्ञस्येति ॥ २२ ॥

[1] क्ष्यते—क, अ १, अ २. [2] ज्ञानादि—क, अ २.

आत्मनि वस्तुतो बन्धमुक्त्यभावः

अनन्ते सच्चिदानन्दे मयि वाराहरूपिणि ॥ २३ ॥
स्थितेऽद्वितीयभावः स्यात् को बन्धः कश्च मुच्यते ।
स्वस्वरूपं तु चिन्मात्रं सर्वदा सर्वदेहिनाम् ॥ २४ ॥
नैव देहादिसंघातो घटवद्दृशिगोचरः ।
स्वात्मनोऽन्यतया भातं चराचरमिदं जगत् ॥ २५ ॥
स्वात्ममात्रतया बुद्ध्वा तदस्मीति विभावय ।
स्वस्वरूपं स्वयं मुङ्क्ष्व नास्ति भोज्यं पृथक् स्वतः ॥ २६ ॥
अस्ति चेदस्तितारूपं ब्रह्मैवास्तित्वलक्षणम् ।
ब्रह्मविज्ञानसंपन्नः प्रतीतमखिलं जगत् ॥ २७ ॥
पश्यन्नपि सदा नैव पश्यति स्वात्मनः पृथक् ।
मत्स्वरूपपरिज्ञानात् कर्मभिर्न स बध्यते ॥ २८ ॥
यः शरीरेन्द्रियादिभ्यो विहीनं सर्वसाक्षिणम् ।
परमार्थैकविज्ञानं सुखात्मानं स्वयंप्रभम् ॥ २९ ॥
स्वस्वरूपतया सर्वं वेद स्वानुभवेन यः ।
स धीरः स तु विज्ञेयः सोऽहं तत्त्वं ऋभो भव ॥ ३० ॥
अतः प्रपञ्चानुभवः सदा न हि
स्वरूपबोधानुभवः सदा खलु ।
इति प्रपश्यन् परिपूर्णवेदनो
न बन्धमुक्तो न च बद्ध एव तु ॥ ३१ ॥

वस्तुतो मम निष्प्रतियोगिकाद्वितीयत्वेन न कोऽपि बद्धो मुक्तो वा भवितुमर्हतीत्याह—अनन्त इति ॥ २३ ॥ अद्वितीयभावेन को बन्धः। "चिन्मात्रमेव चिन्मात्रं" इति श्रुत्यनुरोधेन स्वस्वरूपमेव [illegible] न अन्यदित्याह—स्वस्वरूपमिति ॥ २४ ॥ स्वातिरिक्तदेहादिकं स्व[illegible] । चिन्तयेत्याह—स्वात्मन इति ॥ २५ ॥ स्वातिरिक्तं नास्त्येव। यदा तातें भ्रान्तिस्तदा तदप्यस्तित्वं ब्रह्मेत्याह—स्वेति ॥ २६ ॥ स्वज्ञानी स्वातिरिक्तं स्वातिरिक्तत्वेन न पश्यति, किंतु स्वमात्रतया पश्यतीत्याह—ब्रह्मेति ॥ २७ ॥ कर्मबन्धे सति कथं एवं पश्यतीत्यत आह—मदिति ॥ २८ ॥ शरीरादौ सति कथं एवं न बध्यते इत्याशंक्य तद्विलक्षणत्वेन आत्मानं यः पश्यति सोऽहमेव स्यामित्याह—य इति ॥ २९–३० ॥ एवं मद्भावापन्नस्य स्वात्मानुभूतिं विनाऽनात्मप्रपञ्चानुभूतिः नास्ति । एवं स्वात्मानुभूतियोगिनो बन्धमोक्षविभ्रमो नास्तीत्याह—अत इति ॥ ३१ ॥

बन्धनिवृत्तये ब्रह्मात्मानुसन्धानम्

स्वस्वरूपानुसंधानान्नृत्यन्तं सर्वमाक्षिणम् ।
मुहूर्तं चिन्तयेन्मां यः सर्वबन्धैः प्रमुच्यते ॥ ३२ ॥

सर्वभूतान्तरस्थाय नित्यमुक्तचिदात्मने ।
प्रत्यक्चैतन्यरूपाय मह्यमेव नमो नमः ॥ ३३ ॥

त्वं वाऽहमस्मि भगवोऽहं वै त्वमसि देवते ।
तुभ्यं मह्यमनन्ताय मह्यं तुभ्यं चिदात्मने ॥ ३४ ॥

नमो मह्यं परेशाय नमस्तुभ्यं शिवाय च ।
किं करोमि क्व गच्छामि किं गृह्णामि त्यजामि किम् ॥ ३५ ॥

मन्मया पूरितं विश्वं महाकल्पाम्बुना यथा ।
अन्तःसङ्गं बहिःसङ्गमात्मसङ्गं च यस्त्यजेत् ।
सर्वसङ्गनिवृत्तात्मा स मामेति न संशयः ॥ ३६ ॥
अहिरिव जनयोगं सर्वदा वर्जयेद्यः
कुणपमिव सुनारीं त्यक्तकामो विरागी ।
विषमिव विषयादीन् मन्यमानो दुरन्तान्
जगति परमहंसो वासुदेवोऽहमेव ॥ ३७ ॥
इदं सत्यमिदं सत्यं सत्यमेतदिहोच्यते ।
अहं सत्यं परं ब्रह्म मत्तः किंचिन्न विद्यते ॥ ३८ ॥

बन्धनिवृत्तिहेतुः किमित्याशंक्य मच्चिन्तनमित्याह—स्वेति ॥ ३२ ॥ प्रत्यगभिन्नब्रह्मानुसन्धानप्रकारमाह—सर्वेति ॥ ३३–३४ ॥ स्वस्याविक्रियतां परिपूर्णतामप्याह—किं करोमीति ॥ ३५ ॥ तव विभुत्वेन सर्वेऽपि त्वामेव प्रतिपद्यन्ते इत्यत्र—मां नित्यं प्राप्ता अपि स्वातिरिक्तसंगिनो मां नाप्नुवन्ति । तत्र यः कश्चित् स्वान्तर्बाह्यसंगविरळो भवति स एव मां एतीत्याह—अन्तरिति ॥ ३६ ॥ स्वातिरिक्तसंगत्यागोपायं तज्ज्ञानफलं चाह—अहिरिति ॥ ३७ ॥ अहमेव वासुदेवः सत्यं, मदतिरिक्तं असत्यं न विद्यते, मदतिरिक्तस्य मृग्यत्वादित्याह—इदमिति ॥ ३८ ॥

ब्रह्मप्राप्तिसाधनभूतस्योपवासस्य निर्वचनम्

उप समीपे यो वासो जीवात्मपरमात्मनोः ।
उपवासः स विज्ञेयो न तु कायस्य शोषणम् ॥ ३९ ॥
कायशोषणमात्रेण का तत्र ह्यविवेकिनाम् ।
वल्मीकताडनादेव मृतः किं नु महोरगः ॥ ४० ॥

सत्यब्रह्मात्युपायः क इत्यत आह—उपेति ॥ ३९–४० ॥

जीवन्मुक्तिसाधनं अपरोक्षज्ञानम्

अस्ति ब्रह्मेति चेद्वेद परोक्षज्ञानमेव तत् ।
अहं ब्रह्मेति चेद्वेद साक्षात्कारः स उच्यते ॥ ४१ ॥
यस्मिन् काले स्वमात्मानं योगी जानाति केवलम् ।
तस्मात् कालात् समारभ्य जीवन्मुक्तो भवेदसौ ॥ ४२ ॥
अहं ब्रह्मेति नियतं मोक्षहेतुर्महात्मनाम् ।

परोक्षापरोक्षज्ञानस्वरूपमाह—अस्तीति ॥ ४१ ॥ अपरोक्षज्ञानसमकालं जीवन्मुक्तो भवतीत्याह—यस्मिन्निति ॥ ४२ ॥ सदा अहं ब्रह्मेति ज्ञानं मोक्षहेतुरित्याह—अहमिति ॥

बाह्यान्तश्चिन्तात्यागविधिः

द्वे पदे बन्धमोक्षाय निर्ममेति ममेति च ॥ ४३ ॥
ममेति बध्यते जन्तुर्निर्ममेति विमुच्यते ।
बाह्यचिन्ता न कर्तव्या तथैवान्तरचिन्तिका ।
सर्वचिन्तां समुत्सृज्य स्वस्थो भव सदा ऋभो ॥ ४४ ॥

देहादावहंकारममकारभावाभावौ बन्धमोक्षहेतू भवतः इत्याह—द्वे इति ॥ ४३ ॥ अहंभावाद्यनुदयहेतुः बाह्यान्तश्चिन्तात्याग एवेत्याह—बाह्येति ॥४४॥

भगवच्चिन्तनमेव सर्वचिन्तात्यागोपायः

संकल्पमात्रकलनेन जगत्समग्रं
संकल्पमात्रकलने हि जगद्विलासः ।

सकल्पमात्रमिदमुत्सृज निर्विकल्प-
माश्रित्य मामकपदं हृदि भावयस्व ॥ ४५ ॥
मच्चिन्तनं मत्कथनमन्योन्यं मत्प्रभाषणम्
मदेकपरमो भूत्वा कालं नय महामते ॥ ४६ ॥
चिदिहास्तीति चिन्मात्रमिदं चिन्मयमेव च ।
चित्त्वं चिदहमेते च लोकाश्चिदिति भावय ॥ ४७ ॥
रागं नीरागतां नीत्वा निर्लेपो भव सर्वदा ।

चिन्तामूलसङ्कल्पमुन्मूल्य निर्विकल्पं मां आश्रयेत्याह—सङ्कल्पेति ॥ ४५ ॥ सङ्कल्पत्यागोपायमाह—मदिति ॥ ४६ ॥ त्वच्चिन्तनं कीदृशं इत्यत्र सर्वं चिन्मात्रमिति चिन्तनमित्याह—चिदिति ॥ ४७ ॥ स्वातिरिक्तविषये रागम् ॥

सर्वकल्पनातीतं ब्रह्मैव चिन्तनीयम्

अज्ञानजन्यकर्त्रादिकारकोत्पन्नकर्मणा ॥ ४८ ॥
श्रुत्युत्पन्नात्मविज्ञानप्रदीपो बाध्यते कथम् ।
अनात्मतां परित्यज्य निर्विकारो जगत्स्थितौ ॥ ४९ ॥
एकनिष्ठतयाऽन्तस्स्थसंविन्मात्रपरो भव ।
घटाकाशमठाकाशौ महाकाशे प्रतिष्ठितौ ॥ ५० ॥
एवं मयि चिदाकाशे जीवेशौ परिकल्पितौ ।
या च प्रागात्मनो मे मा तथाऽन्ते च तिरस्कृता ॥ ५१ ॥

ब्रह्मवादिभिरुद्गीता सा मायेति विवेकतः ।
मायातत्कार्यविलये नेश्वरत्वं न जीवता ॥ ९२ ॥
ततः शुद्धश्चिदेवाहं व्योमवन्निरुपाधिकः ।
जीवेश्वरादिरूपेण चेतनाचेतनात्मकम् ॥ ९३ ॥
ईक्षणादिप्रवेशान्ता सृष्टिरीशेन कल्पिता ।
जाग्रदादिविमोक्षान्तः संसारो जीवकल्पितः ॥ ९४ ॥
[1]त्रिणाच्चिकादियोगान्ता ईश्वरभ्रान्तिमाश्रिताः ।
लोकायतादिसांख्यान्ता जीवविभ्रान्तिमाश्रिताः ॥ ९५ ॥
तस्मान्मुमुक्षुभिर्नैव मतिर्जीवेशवादयोः ।
कार्या किं तु ब्रह्मतत्त्वं निश्चलेन विचार्यताम् ॥ ९६ ॥
अद्वितीयब्रह्मतत्त्वं न जानन्ति [2]यथा यथा ।
भ्रान्ता एवाखिलास्तेषां क्व मुक्तिः कुह वा सुखम् ॥ ९७ ॥

कर्मलेपस्यानिवार्यत्वात् निर्लेपत्वं कुतो मे स्यादित्यत आह—**अज्ञानेति** ॥ ४८ ॥ अनात्मनि सति स्वात्ममात्रज्ञानं कथं उदेतीत्यत आह—**अनात्मतामिति** ॥ ४९ ॥ जीवेशभेदे सति संविन्मात्रपरता कुतो मे स्यादित्यत आह—**घटेति** ॥ ५० ॥ जीवेशादिकल्पनामूलमायायाः सत्त्वात् निर्मायभावः कथं मे स्यात् इत्यत्र मायामूलविचारतो निर्मायं ब्रह्म प्रसीदतीत्याह—**या चेति** ॥ ५१–५२ ॥ उक्तलक्षणलक्षितजीवेशादिनानाकल्पनां हित्वा निर्विकल्पाद्वैतब्रह्मैव सदा चिन्त्यमित्याह—**जीवेति**। "जीवेश्वरादिरूपेण" इत्यादि "निश्चलेन विचार्यतां" इत्यन्तं महोपनिषदि व्याख्यातम् ॥ ९३–९६ ॥ एवं अखण्डैकरसब्रह्माज्ञानिनो भ्रान्ता एवेत्याह—**अद्वितीयेति** ॥ ९७ ॥

[1] त्रिणा च—क, अ. त्रिणार्च—अ १. [2] यदा तदा—अ, अ १.

प्रत्यगभिन्नब्रह्म सर्वावस्थाऽतीतम्

उत्तमाधमभावश्चेत्तेषां स्यादस्ति तेन किम् ।
स्वप्नस्थराज्यभिक्षाभ्यां प्रबुद्धः [1]स्पृश्यते खलु ॥ ५८ ॥
अज्ञाने बुद्धिविलये निद्रा सा भण्यते बुधैः ।
विलीनाज्ञानतत्कार्ये मयि निद्रा कथं भवेत् ॥ ५९ ॥
बुद्धेः पूर्णविकासोऽयं जागरः परिकीर्त्यते ।
विकारादिविहीनत्वाज्जागरो मे न विद्यते ॥ ६० ॥
सूक्ष्मनाडिषु संचारो बुद्धेः स्वप्नः प्रजायते ।
संचारधर्मरहिते मयि [2]स्वप्नो न विद्यते ॥ ६१ ॥

शिवजीवाद्युत्तमाधममेदे सति कथं अद्वितीयब्रह्मज्ञानं उदेतीत्यत्र सदृष्टान्तं तन्निराकरोति —उत्तमेति ॥ ५८ ॥ अवस्थात्रयावृतस्य तुर्यानन्दानुभवः कुत इत्यत आह—अज्ञान इति । निद्रा सुषुप्तिः ॥ ५९-६१ ॥

निर्विशेषब्रह्मज्ञानेन ब्रह्मभावः

सुषुप्तिकाले सकले विलीने तमसाऽऽवृते ।
स्वरूपं महदानन्दं मुङ्क्ते [3]दृश्यविवर्जितः ॥ ६२ ॥
अविशेषेण सर्वं तु यः पश्यति चिदन्वयात् ।
स एव साक्षाद्विज्ञानी स शिवः स हरिर्विधिः ॥ ६३ ॥

एवं स्वातिरिक्तप्रपञ्चसुषुप्तिकाले ॥ ६२ ॥ चितः सर्वावस्थानुस्यूतज्ञानी चिदेव भवतीत्याह—अविशेषेणेति ॥ ६३ ॥

[1] स्पृशते—अ, अ १. [2] स्वापो—अ, अ १. [3] विश्व—अ, अ १.

जगद्विलापनपुरस्सरं ब्रह्मैकत्वचिन्तनम्

दीर्घस्वप्नमिदं यत्तद्दीर्घं वा चित्तविभ्रमम् ।
दीर्घं वाऽपि मनोराज्यं संसारं दुःखसागरम्
सुप्तेरुत्थाय सुप्त्यन्तं ब्रह्मैकं प्रविचिन्त्यताम् ॥ ६४ ॥
आरोपितस्य जगतः प्रविलापनेन
चित्तं मदात्मकतया परिकल्पितं नः ।
शत्रून्निहत्य गुरुषट्कगणान्निपातात्
गन्धद्विपो भवति केवलमद्वितीयः ॥ ६५ ॥

अवस्थात्रयसंसृतेः चित्तविकल्पतामाह—दीर्घेति । **दुःखसागरं** विद्धीत्यर्थः । यत एवं अतः तच्छान्तये **सुप्तेरुत्थाय** ॥ ६४ ॥ **केनोपायेन ब्रह्मैकमिति** चिन्त्यमित्यत आह—**आरोपितस्येति** । स्वाज्ञदृष्ट्या **आरोपितस्य प्रविलापनेन** विलापनाधिष्ठानमवशिष्यते । तत्राखण्डाकारवृत्तिमत् **चित्तं** मत्स्वरूपमेव भवतीत्यर्थः । **शत्रून्** सच्चिदानन्दावरणान् कामाद्यरिषड्वर्गान् वा **गुरुषट्कगणात्** गणेन शमादिषड्गुणासिना **निहत्य** निर्मूल्य इत्थं शत्रुनिपातात् निपातेन आत्मा **गन्धद्विपो** मत्तगज इव **केवलं अद्वितीयः** स्वात्मा अवशिष्यत इत्यर्थः ॥ ६५ ॥

प्रत्यगभिन्नब्रह्मविषयको विद्वदनुभवः

अद्यास्तमेतु वपुराशशितारमास्तां
कस्तावताऽपि मम चिद्वपुषो विशेषः ।
कुम्भे विनश्यति चिरं समवस्थिते वा
कुम्भाम्बरस्य न हि कोऽपि विशेषलेशः ॥ ६६ ॥

अहिनिर्ल्वयिनी सर्पनिर्मोको जीववर्जितः ।
वल्मीके पतितस्तिष्ठेत्तं सर्पो नाभिमन्यते ॥ ६७ ॥
एवं स्थूलं च सूक्ष्मं च शरीरं नाभिमन्यते ।
प्रत्यग्ज्ञानशिखिध्वस्ते मिथ्याज्ञाने सहेतुके ।
नेति नेतीति [1]रूपत्वादशरीरो भवत्ययम् ॥ ६८ ॥
शास्त्रेण नश्येत् परमार्थदृष्टिः
कार्यक्षमं नश्यति चापरोक्ष्यात् ।
प्रारब्धनाशात् प्रतिभाननाश
एवं त्रिधा नश्यति चात्ममाया ॥ ६९ ॥
ब्रह्मत्वे योजिते स्वस्मिन् जीवभावो न गच्छति ।
अद्वैते बोधिते तत्त्वे वासना विनिवर्तते ॥ ७० ॥
आरब्धान्ते देहहानिर्मायेत्थं क्षीयतेऽखिला ।
अस्तीत्युक्ते जगत्सर्वं सद्रसं ब्रह्म तद्भवेत् ॥ ७१ ॥
भातीत्युक्ते जगत्सर्वं भानं ब्रह्मैव केवलम् ।
मरुभूमौ जलं सर्वं मरुभूमात्रमेव तत् ।
जग[2]त्त्वयमिदं सर्वं चिन्मात्रं स्वविचारतः ॥ ७२ ॥
अज्ञानमेव न कुतो जगतः प्रसङ्गो
जीवेशदेशिकविकल्पकथाऽतिदूरे ।
एकान्तकेवलचिदेकरसस्व[3]भावे
हं परिपूर्णमस्मि ॥ ७३ ॥

[1] द्रू—क. [2] द्रूप—क, अ २. [3] भावो—अ २.

बोधचन्द्रमसि पूर्णविग्रहे
मोहराहुमुषितात्मतेजसि ।
स्नानदानयजनादिकाः क्रिया
मोचनावधि वृथैव तिष्ठते ॥ ७४ ॥

मद्भावापन्नविद्वदनुभव एवं भवतीत्याह—अद्येति । तत्र दृष्टान्तस्तु कुम्भे विनश्यति ॥ ६६ ॥ विदुषोऽपि शरीरदर्शनात् अशरीरत्वं कुत इत्याशंक्य "अशरीरं वाव सन्तं न प्रियाप्रिये स्पृशतः" इति श्रुत्यनुरोधेन स्वाज्ञविकल्पितशरीरत्रये स्वात्मात्मीयाभिमतिवैकल्यमेव अशरीरत्वमिति सदृष्टान्तमाह—अहिनिर्ल्वयिनीति ॥ ६७ ॥ विद्वान् एवम् ॥ ६८ ॥ शरीरत्रयहेतुमायायां सत्यां कथं अशरीरत्वं इत्याशंक्य शास्त्रजन्यज्ञानविज्ञानसम्यक्तत्त्वज्ञानतो ब्रह्मातिरेकेण माया नास्तीति माया निर्मायं पदं भजति, तत्समकालं मायाकार्यागाम्यादिकर्मत्रयमपि सवासनं क्षीयते, ततो विद्वान् अशरीरब्रह्ममात्रतया अवशिष्यत इत्याह—शास्त्रेणेति । ब्रह्मैव सत्यं ब्रह्मातिरिक्तं न किञ्चिदस्ति इति शास्त्रजन्यज्ञानात् मायायाः परमार्थदृष्टिः नश्यति । तेन तद्बीजांशप्रभवभ्रान्तिजतादात्म्यास्पदागामिकर्मणोऽश्लेषो भवति । तदा स्वातिरिक्तं व्यावहारिकं प्रतिभाति । पूर्वाभ्यस्तशास्त्रजन्यज्ञानमनुभवारूढं चेत् विज्ञानपदं भजति तेन यत् कार्यक्षमं व्यावहारिकं तत् नश्यति । तेन स्वातिरिक्तं प्रातिभासिकं भाति । तेन सहजतादात्म्यास्पदसञ्चितकर्मापि नश्यति । विज्ञानिनः प्रारब्धकर्म भोगेन क्षीयते, न हि तदानीं नश्यति, आरब्धत्वात् । विज्ञानं दृढानुभवकलितं चेत् सम्यज्ज्ञानपदं भजति । तेन प्रातिभासिकतया भातं स्वातिरिक्तं शून्यभावं भजति । तेन कर्मजतादात्म्यास्पदमायास्थूलांशारब्धं कर्मापि नश्यति । प्रारब्धनाशसमकालं मायायाः शून्यतया प्रतिभासोऽपि नश्यति । एवं माया त्रेधा विनश्यतीत्यर्थः । यदा स्वातिरिक्तसामान्यमस्ति नास्तीति विभ्रमापह्नवो भवति एवं स्वातिरिक्तापह्नववृत्तिः तत्त्वज्ञानपदं भजति । तेन ब्रह्म निष्प्रतियोगिकस्वमात्रमिति विद्वान् अवशिष्यत इति भावः ॥ ६९ ॥ उक्तार्थमेव पुनः

ब्रह्मत्व इति । केवलशास्त्रजन्यज्ञानेन ब्रह्मत्वे योजिते ॥ ७० ॥ हाभिमानवृत्तिः माया । अस्ति भाति प्रियमिति यद्यत् व्यवहृतं नन्दं ब्रह्मेत्याह—अस्तीति ॥ ७१ ॥ यद्यत् प्रियं तदेव ब्रह्म ध्यमित्यत्र—

अस्ति भाति प्रियं रूपं नाम चेत्यंशपञ्चकम् ।
आद्यं त्रयं ब्रह्मरूपं जगद्रूपं ततो द्वयम् ॥

इति श्रुतेः । नामरूपसद्वितीयं ब्रह्मेत्यत आह—मरुभूमाविति ॥ ७२ ॥ कथं पुनः चिन्मात्रं निष्प्रतियोगिकं, जीवेशादिविकल्पजुष्टजगतः सत्त्वादित्यत आह—अज्ञानमिति । जगतः स्वाज्ञानकार्यत्वात् स्वज्ञानेन स्वाज्ञाननाशे तत्कार्यं जगत् कुतः सत्पदमर्हतीत्यत्र—"कारणाभावतः कार्यं कथं सिद्धिपदं भजेत्" इति परमाक्षरोक्तेः ॥ ७३ ॥ स्वातिरिक्तकलनामुक्ते ब्रह्मणि मूढाः स्वातिरिक्तं कल्पयित्वा तच्छान्तये मुधा व्याप्रियन्त इत्याह—बोधेति ॥ ७४ ॥

समाधिसाधनं नादानुसन्धानम्

सलिले सैन्धवं यद्वत् साम्यं [1]भजति योगतः ।
तथाऽऽत्ममनसोरैक्यं समाधिरिति कथ्यते ॥ ७५ ॥
दुर्लभो विषयत्यागो दुर्लभं तत्त्वदर्शनम् ।
दुर्लभा सहजावस्था सद्गुरोः करुणां विना ॥ ७६ ॥
उत्पन्नशक्तिबोधस्य त्यक्तनिःशेषकर्मणः ।
योगिनः सहजावस्था स्वयमेव प्रकाशते ॥ ७७ ॥
रसस्य मनसश्चैव चञ्चलत्वं स्वभावतः ।
रसो बद्धो मनो बद्धं किं न सिध्यति भूतले ॥ ७८ ॥

[1] भवति—क, अ २.

मूर्च्छितो हरति व्याधिं मृतो जीवयति स्वयम्
[1]बद्धः खेचरतां धत्ते ब्रह्मत्वं रसचेतसि ॥ ७९ ॥
इन्द्रियाणां मनो नाथो मनोनाथस्तु मारुतः ।
मरुतस्य लयो नाथस्तन्नाथं लयमाश्रय ॥ ८० ॥
निश्चेष्टो निर्विकारश्च लयो जीवति योगिनाम् ।
उच्छिन्नसर्वसंकल्पो निःशेषाशेषचेष्टितः ।
स्वावगम्यो लयः कोऽपि मनसां वागगोचरः ॥ ८१ ॥
[2]पुङ्खानुपुङ्खविषयेक्षणतत्परोऽपि
ब्रह्मावलोकनधियं न जहाति योगी ।
सङ्गीततालल्यवाद्यवशं गताऽपि
मौलिस्थकुम्भपरिरक्षणधीर्नटीव ॥ ८२ ॥
सर्वचिन्तां परित्यज्य सावधानेन चेतसा ।
नाद एवानुसंधेयो योगसाम्राज्यमिच्छता ॥ ८३ ॥

इति ॥

स्वातिरिक्तासम्भवप्रबोधसिद्धं ब्रह्मास्मीति ब्रह्ममनसोरेकत्वं समाधिरिति सदृष्टान्तमाह—सलिल इति ॥ ७९ ॥ एवं तत्त्वदर्शनं गुरुकटाक्षतो भवतीत्याह —दुर्लभः इति ॥ ७६ ॥ कस्येयं सहजावस्था जायत इत्यत आह— उत्पन्नेति । ज्ञानसहकृतयोगाभ्यासपाटवेन उत्पन्नकुण्डलिनीशक्तिबोधस्य, "ब्रह्मातिरिक्तं न किञ्चिदस्ति" इत्यजडक्रियाज्ञानेच्छाशक्तिबोधस्य, सम्यज्ज्ञानिनो वा शक्तिबोधस्य ॥ ७७ ॥ ब्रह्मातिरेकेण मनसः सत्त्वं ये मन्यन्ते तद्दृष्टिमाश्रित्य

[1] बन्धः—अ, अ २, [2] पुंषा—अ २, उ.

लनादिः बन्धमुक्तिहेतुरिति सदृष्टान्तमाह—रसस्येति ॥ ७८–७९ ॥
द्रयमनःप्राणादिकं विलाप्य तल्लयाधिकरणं ब्रह्मास्मीत्याश्रयेत्याह—
मिति ॥ ८० ॥ कीदृशोऽयं लय इत्यत्र निश्चेष्ट इति । किञ्च—
। लयशब्देन लयाधिकरणं ब्रह्मोच्यते इत्यर्थः ॥ ८१ ॥ विदुषो
सत्सु तल्लयाधिकरणब्रह्मदृष्टिः कुत इत्यत्र सदृष्टान्तमुत्तरमाह—
पुञ्जेति ॥ ८२ ॥ स्वातिरिक्तभ्रमासम्भवप्रबोधसिद्धंपरमात्मा स्वावशेषधिया
अनुसन्धेय इति अध्यायार्थमुपसंहरति—सर्वेति । योगसाम्राज्यं कैवल्यमिच्छता
स्वातिरिक्तावकाशं न ददातीति नदः स एव नादः परमात्मैव निष्प्रतियोगिक-
स्वमात्रमित्यनुसन्धेयः ॥ ८३ ॥ इतिशब्दोऽध्यायपरिसमाप्त्यर्थः ॥

इति द्वितीयोऽध्यायः

तृतीयोऽध्यायः

अद्वितीयपरमात्मानुभवः

न हि नानास्वरूपं स्यादेकं वस्तु कदाचन ।
तस्मादखण्ड एवास्मि यन्मदन्यन्न किंचन ॥ १ ॥
दृश्यते श्रूयते यद्यद्ब्रह्मणोऽन्यन्न तद्भवेत् ।
नित्यशुद्धविमुक्तैकमखण्डानन्दमद्वयम् ।
सत्यं ज्ञानमनन्तं यत् परं [1]ब्रह्म भवामि तत् ॥ २
आनन्दरूपोऽहमखण्डबोधः
परात्परोऽहं घनचित्प्रकाशः ।

[1] ब्रह्माहमेव—क, अ १, अ २.

मेघा यथा व्योम न च स्पृशन्ति
संसारदुःखानि न मां स्पृशन्ति ॥ ३ ॥
सर्वं सुखं विद्धि सुदुःखनाशात्
सर्वं च सद्रूपम[1]सत्यनाशात् ।
चिद्रूपमेव प्रतिभानयुक्तं
तस्मादखण्डं मम रूपमेतत् ॥ ४ ॥
न हि जनिर्मरणं गमनागमौ
न च मलं विमलं न च वेदनम् ।
चिन्मयं हि सकलं विराजते
स्फुटतरं परमस्य तु योगिनः ॥ ५ ॥

कथं त्वं निष्प्रतियोगिकपरमात्माऽसि स्वप्रतियोगिनानात्वस्य विद्यमानत्वादित्याशङ्कमानमालक्ष्य भगवान् स्वस्य निष्प्रतियोगिकाद्वितीयत्वस्थापनाय स्वानुभवं प्रकटयति—न हीति । यस्मादेवं तस्मात् ॥ १ ॥ स्वान्यत् दृश्यते श्रूयते चेदित्यत्राह—दृश्यत इति । कीदृशं ब्रह्म त्वं भवसीत्यत्राह—नित्येति ॥ २ ॥ जीववद्देहधारणसामान्यात् त्वमपि संसारदुःखी भवसीत्यत आह—आनन्देति ॥ ३ ॥ सच्चिदानन्दाखण्डं मां विद्धीत्याह—सर्वमिति ॥ ४ ॥ निर्विशेषज्ञानयोगिनो मद्रूपमेवं विभातीत्याह—न हि जनिरिति । योगी स्वात्मनो मम जनिमृतिगमनागमनादिविक्रिया नास्तीति मत्वा सर्वत्र मामेव निष्प्रतियोगिकचिन्मात्रं पश्यतीत्यर्थः ॥ ५ ॥

चिन्मात्रभावापत्तिसाधनमौनविधिः

सत्यचिद्घनमखण्डमद्वयं सर्वदृश्यरहितं निरामयम् ।
यत्पदं विमलमद्वयं शिवं तत्सदाऽहमिति मौनमाश्रय ॥ ६ ॥

[1] सत्य—क, अ २.

जन्ममृत्युसुखदुःखवर्जितं जातिनीतिकुलगोत्रदूरगम् ।
चिद्विवर्तजगतोऽस्य कारणं तत्सदाऽहमिति मौनमाश्रय ॥ ७ ॥
पूर्णमद्वयमखण्डचेतनं विश्वभेदकलनादिवर्जितम् ।
अद्वितीयपर[1]संविदंशकं तत्सदाऽहमिति मौनमाश्रय ॥ ८ ॥

तवेश्वरत्वेन निष्प्रतियोगिकचिन्मात्रत्वं युज्यते । ममानीशत्वेन तद्भावापत्त्युपायमादिशेति पृच्छमानमालक्ष्य भगवान् स्वभावापत्त्युपायमादिशति —सत्येति ॥ ६–८ ॥

भगवतः सच्चिदानन्दत्वम्

केनाप्यबाधितत्वेन त्रिकालेऽप्येकरूपतः ।
विद्यमानत्वमस्त्येतत् सद्रूपत्वं सदा मम ॥ ९ ॥
निरुपाधिकनित्यं यत् सुप्तौ सर्वसुखात्परम् ।
सुखरूपत्वमस्त्येतदानन्दत्वं सदा मम ॥ १० ॥

एवं मुनेः स्वभावापत्त्युपायमुपदिश्य तद्दार्ढ्याय स्वात्मनः सच्चिदानन्दत्वं साधयति—केनेति ॥ ९–१० ॥

भगवद्भक्तिरेव मोक्षसाधनम्

दिनकरकिरणैर्हि शार्वरं तमो
निबिडतरं झटिति प्रणाशमेति ।
घनतरभवकारणं तमो य-
द्धरिदिनकृत्प्रभया न चान्तरेण ॥ ११ ॥

[1] सच्चि—क, अ २.

मम चरणस्मरणेन पूजया च
स्वकृतमसः परिमुच्यते हि जन्तुः ।
न हि मरणप्रभवप्रणाशहेतु-
र्मम चरणस्मरणादृतेऽस्ति किंचित् ॥ १२
आदरेण यथा स्तौति धनवन्तं धनेच्छया ।
तथा चेद्विश्वकर्तारं को न मुच्येत बन्धनात् ॥ १३ ॥

मद्भावापत्तिहेतुमद्भक्तिं विना कोऽपि न मुच्यत इति सदृष्टान्तमुपपादयति —दिनकरेति । दिनकृत्प्रभया विनाशमेति ॥ ११–१२ ॥ कश्चिद्राजसेव्यपि दरिद्रयतो मुच्यते तथा मामुपास्य को वा स्वातिरिक्तभ्रमतः न मुच्यत इत्याह— मेणेति ॥ १३ ॥

ईश्वरस्य सर्वसमत्वम्

आदित्यसंनिधौ लोकश्चेष्टते स्वयमेव तु ।
तथा मत्संनिधावेव समस्तं चेष्टते जगत् ॥ १४ ॥
शुक्तिकायां यथा तारं कल्पितं मायया तथा ।
महदादि जगन्मायामयं मय्येव [1]केवलम् ॥ १५ ॥
चण्डालदेहे परादिस्थावरे ब्रह्मविग्रहे ।
अन्येषु तारतम्येन स्थितेषु न तथा ह्यहम् ॥ १६ ॥
विनष्टदिग्भ्रमस्यापि यथापूर्वं विभाति दिक् ।
तथा विज्ञानविध्वस्तं जगन्मे भाति तन्न हि ॥ १७ ॥

[1] कल्पितम्

न देहो नेन्द्रियप्राणो न मनोबुद्ध्यहंकृतिः ।
न चित्तं नैव माया च न च व्योमादिकं जगत् ॥-१८ ॥
न कर्ता नैव भोक्ता च न च भोजयिता तथा ।
केवलं चित्सदानन्दब्रह्मैवाहं जनार्दनः ॥ १९ ॥

स्वाज्ञादिलोकप्रवृत्तिनिवृत्तिनिमित्तमप्यहमेवेत्याह—आदित्येति ॥ १४ ॥ मदतिरिक्तं मय्येव विकल्पितम् । विषमेष्वपि समोऽहमेवेत्याह—शुक्तिकायामिति ॥ १५–१६ ॥ मदज्ञानविकल्पितं मज्ज्ञानतो न भातीत्याह—विनष्टेति । विनष्टदिग्भ्रमस्यापि भ्रमापाये ॥ १७ ॥ तवापि जगदन्तःपातिदेहेन्द्रियादि-सत्त्वात् कथं जगत् न भातीत्युच्यते इत्यत्राह—न देह इति ॥ १८–१९ ॥

चित्तमेव संसारकारणम्

जलस्य चञ्चलादेव चञ्चलत्वं यथा रवेः ।
तथाऽहंकारसंबन्धादेव संसार आत्मनः ॥ २० ॥
चित्तमूलं हि संसारस्तत्प्रयत्नेन शोधयेत् ।
हन्त चित्तमहत्तायां कैषा विश्वासता तव ॥ २१ ॥
क्व धनानि महीपानां ब्राह्मणः क्व ज[illegible]न्ति वा ।
[1]प्राक्तनानि प्रयातानि गताः सर्गपरंपराः ॥ २२ ॥
कोट्यो ब्रह्मणां याता भूपा नष्टाः [illegible]रागवत् ।
[2]स चाध्यात्माभिमानोऽपि विदुषो [illegible]सुरत्वतः ॥ २३ ॥
[illegible]षोऽप्यासुरश्चेत्स्यान्निष्फलं तत्त्व[illegible]र्शनम् ।

[1] स्वारोपिताशेषपदार्थभासकत्वमात्मनः साधनमन्तरेण यत् ।
वदन्ति वेदान्तविदो हि तां स्वयंप्रकाशमानस्य तु चित्स्वरूपताम् ॥
इत्यधिकः—अ १. [2] न च—अ १, तथा—अ.

तव ईश्वरस्य देहादिवैरळ्यमस्तु वस्तुतो निर्विशेषब्रह्मरूपत्व बन्धमोक्षहेतू कावित्यत्र अतस्मिंस्तद्भावातद्भावावित्याह—जलस्य एवं संसारमूलं किं इत्यत्र चित्तमित्याह—चित्तेति संसारमूलचि तद्विकल्पितं सर्वं स इति मन्यमानं प्रत्याह—हन्तेति । भ्रान्त्युज्जीवकत्वात् तदपाये यथापूर्वमदर्शनात् चित्ततत्कार्यकलना ॥ २१–२२ ॥ विदुषोऽप्येवं सत्यवत् भातं चेत् तस्य वैदुष्यं नास्ती स चेति । यः अनात्मनि आत्मधीप्रभवः अविद्वद्गोचरः स चाध्यात्माभिमानः देहाभिमानः स्वान्यत्र ममताऽपि विदुषोऽप्यनर्थकर एव । कुतः? देहादावात्मात्मीयाभिमानस्य आसुरत्वतः आसुरकृत्यत्वात् ॥ २३ ॥ अविदुष इव विदुषोऽपि आसुरश्चेत् तदार्जिततत्त्वदर्शनं निष्फलमेव स्यात् । तथा च श्रुतिः—

ज्ञानामृतेन तृप्तस्य कृतकृत्यस्य योगिनः ।
नचास्ति किञ्चित् कर्तव्यमस्ति चेन्न स तत्त्ववित् ॥

इति ॥

अनात्मनि रागाद्यनुभवो विद्वल्लक्षणम्

उत्पाद्यमाना रागाद्या विवेकज्ञानवह्निना ॥ २४ ॥
यदा तदैव दह्यन्ते कुतस्तेषां प्ररोहणम् ।
यथा सुनिपुणः सम्यक् परदोषेक्षणे रतः ॥ २५ ॥
तथा चेन्निपुणः स्वेषु को न मुच्येत बन्धनात् ।
अनात्मविदमोऽपि सिद्धिजालानि वाञ्छति ॥ २६ ॥
द्रव्यमन्त्राक्रियाकालयुक्त्याऽऽप्नोति मुनीश्वर ।
नात्मज्ञस्यैष विषय आत्मज्ञो ह्यात्ममात्रदृक् ॥ २७ ॥
आत्मनाऽऽत्मनि संतृप्तो नाविद्यामनुधावति ।
ये केचन जडीभावास्तानविद्यामयान् विदुः ॥ २८ ॥

शाण्डिल्योपनिषत्

भद्रं कर्णेभिः—इति शान्तिः

प्रथमोऽध्यायः

योगाष्टाङ्गनिर्देशः

शाण्डिल्यो ह वा अथर्वाणं पप्रच्छात्मलाभोपायभूतमष्टाङ्गयोगमनुब्रूहीति ॥ १ ॥ स होवाचाथर्वा—यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधयोऽष्टाङ्गानि ॥ २ ॥ तत्र दश यमाः । तथा नियमाः । आसनान्यष्टौ । [1]त्रिः प्राणायामः । पञ्च प्रत्या[2]हाराः । तथा धारणाः । द्विप्रकारं ध्यानम् । समाधिस्त्वेकरूपः ॥ ३ ॥

शाण्डिल्योपनिषत्प्रोक्तयमाद्यष्टांगयोगिनः ।
यद्बोधाद्यान्ति कैवल्यं स रामो मे परा गतिः ॥

इह खलु अथर्वणवेदप्रविभक्तेयं शाण्डिल्योपनिषत् यमाद्यष्टांगयोगतद्गौणमुख्यसिद्धिप्रकाशनव्यग्रा निष्प्रतियोगिकब्रह्ममात्रपर्यवसन्ना विजृम्भते । अस्याः

[1] त्रयः प्राणायामाः—अ. [2] हारः—अ १, अ २, उ १, क.

स्वल्पग्रन्थतो विवरणमारभ्यते । शाण्डिल्याथर्वप्रश्नप्रा[illegible]पयमाख्यायिका विद्यार्था । आख्यायिकामवतारयति—शाण्डि[illegible] इति । किमिति ? १ ॥ एवं शाण्डिल्येन पृष्टः स होवाच । किं तत् ? योगोऽष्टांग उच्यते [illegible] मेति ॥ २–१४ ॥

दशविधयमनिरूपणम्

तत्राहिंसासत्यास्तेयब्रह्मचर्यदयाऽऽर्जवक्षमाधृतिमिताहारशौचानि चेति यमा दश ॥ ४ ॥ तत्राहिंसा नाम मनोवाक्कायकर्मभिः सर्वभूतेषु सर्वदाऽक्लेशजननम् ॥ ५ ॥ सत्यं नाम मनोवाक्कायकर्मभिर्भूतहितयथार्थाभिभाषणम् ॥ ६ ॥ अस्तेयं नाम मनोवाक्कायकर्मभिः परद्रव्येषु निःस्पृहा ॥ ७ ॥ ब्रह्मचर्यं नाम सर्वावस्थासु मनोवाक्कायकर्मभिः सर्वत्र मैथुनत्यागः ॥ ८ ॥ दया नाम सर्वभूतेषु सर्वत्रानुग्रहः ॥ ९ ॥ आर्जवं नाम मनोवाक्कायकर्मणां विहिताविहितेषु जनेषु प्रवृत्तौ निवृत्तौ वा एकरूपत्वम् ॥ १० ॥ क्षमा नाम प्रियाप्रियेषु सर्वेषु [1]ताडनपूजनेषु सहनम् ॥ ११ ॥ धृतिर्नामार्थहानौ स्वेष्टबन्धुवियोगे तत्प्राप्तौ सर्वत्र चेतःस्थापनम् ॥ १२ ॥ मिता[2]हारो नाम चतुर्थांशावशेषकसुस्निग्धमधुराहारः ॥ १३ ॥ शौचं नाम द्विविधं बाह्यमान्तरं चेति । तत्र मृज्जलाभ्यां बाह्यम् । मनःशुद्धिरान्तरम् । तदध्यात्मविद्यया लभ्यम् ॥ १४ ॥

इति प्रथमः खण्डः

[1] तारतम्यपू—अ. [2] हारं—अ, अ १, अ २, क.

दशविधयमनिरूपणम्

तपःसन्तोऽास्तिक्यदानेश्वरपूजनसिद्धान्तश्रवणह्रीमति-
तानि दश नियमाः ॥ १ ॥ तत्र तपो नाम विध्युक्तकृच्छ्रा
यणादिभिः शरीरशोषणम् ॥ २ ॥ [1]संतोषो नाम यदृच्छालाभतुष्टिः
॥ ३ ॥ आस्तिक्यं नाम वेदोक्तधर्माधर्मेषु विश्वासः ॥ ४ ॥ दानं
नाम न्यायार्जितधनधान्यादेः श्रद्धयाऽर्थिभ्यः प्रदानम् ॥ ५ ॥
ईश्वरपूजनं नाम प्रसन्नस्वभावेन यथाशक्ति विष्णुरुद्रादिपूजनम्
॥ ६ ॥ सिद्धान्तश्रवणं नाम वेदान्तार्थविचारः ॥ ७ ॥ ह्रीर्नाम
वेदलौकिकमार्गकुत्सितकर्मणि लज्जा ॥ ८ ॥ मतिर्नाम वेदविहित-
कर्ममार्गेषु श्रद्धा ॥ ९ ॥ जपो नाम विधिवद्गुरूपदिष्टवेदाविरुद्ध-
मन्त्राभ्यासः । तद्विविधं वाचिकं मानसं चेति । मानसं तु मनसा
ध्यानयुक्तम् । वाचिकं द्विविधमुच्चैरुपांशुभेदेन । उच्चैरुच्चारणं
यथोक्तफलम् । [2]उपांशु सहस्रगुणम् । मानसं कोटिगुणम् ॥ १० ॥
[3]व्रतं नाम वेदोक्तविधिनिषेधानुष्ठाननैयत्यम् ॥ ११ ॥

दशधा भिन्नयमस्वरूपमुक्त्वा तथा नियमस्वरूपमाह—तप इति ॥१–९॥ मन्त्रार्थानुसन्धानं मानसमित्यर्थः ॥ १०–११ ॥

इति द्वितीयः खण्डः

[1] संतोषं—अ, अ १, अ २, क.
[2] उपांशुः—अ, अ १.
[3] एतद्वाक्यं मुद्रितकोश एव दृश्यते.

अष्टविधासननिरूपणम्

स्वस्तिकगोमुखपद्मवीरसिंहभद्रमुक्तमयूराख्यान्यासनान्यष्टौ ।

; नाम—

जानूर्वोरन्तरे सम्यक्कृत्वा पादतले उभे ।
ऋजुकायः समासीनः स्वस्तिकं तत्प्रचक्षते ॥ १ ॥
सव्ये दक्षिणगुल्फं तु पृष्ठपार्श्वे नियोजयेत् ।
दक्षिणेऽपि तथा सव्यं गोमुखं गोमुखं यथा ॥ २ ॥
अङ्गुष्ठेन निबध्नीयाद्धस्ताभ्यां व्युत्क्रमेण च ।
ऊर्वोरुपरि शाण्डिल्य कृत्वा पादतले उभे ।
पद्मासनं भवेदेतत् सर्वेषामपि पूजितम् ॥ ३ ॥
एकं पादमथैकस्मिन् विन्यस्योरुणि संस्थितः ।
इतरस्मिंस्तथा चोरुं वीरासनमुदीरितम् ॥ ४ ॥
दक्षिणं सव्यगुल्फेन दक्षिणेन तथेतरम् ।
हस्तौ च जान्वोः संस्थाप्य स्वाङ्गुलीश्च प्रसार्य च ॥ ५ ॥
व्यात्तवक्त्रो निरीक्षेत नासाग्रं सुसमाहितः ।
सिंहासनं भवेदेतत् पूजितं योगिभिः सदा ॥ ६ ॥
योनिं वामेन संपीड्य मेढ्रादुपरि दक्षिणम् ।
भ्रूमध्ये च मनोलक्ष्यं सिद्धासनमिदं भवेत् ॥ ७ ॥
गुल्फौ तु वृषणस्याधः सींवन्याः पार्श्वयोः क्षिपेत् ।
पादपार्श्वे तु पाणिभ्यां दृढं बद्ध्वा सुनिश्चलम् ।
भद्रासनं भवेदेतत् सर्वव्याधिविषापहम् ॥ ८ ॥

संप[illegible]ीविनीं सूक्ष्मां गुल्फेनैव तु सव्यतः ।
सव्यं दक्षिणगुल्फेन मुक्तासनमिदं भवेत् ॥ ९ ॥
अवष्टभ्य धरां सम्यक् तलाभ्यां तु करद्वयोः ।
हस्तयोः कूर्परौ चापि स्थापयेन्नाभिपार्श्वयोः ॥ १० ॥
समुन्नतशिरःपादो दण्डवद्व्योम्नि संस्थितः ।
मयूरासनमेतत्तु सर्वपापप्रणाशनम् ॥ ११ ॥
शरीरान्तर्गताः सर्वरोगा विनश्यन्ति । विषाणि जीर्यन्ते ॥१२॥ येन केनासनेन सुखधारणं भवत्यशक्तस्तत्समाचरेत् ॥१३॥

स्वस्तिकाद्यष्टासनप्रकारमाह—स्वस्तिकेति ॥ १ ॥ गोमुखासनमाह—सव्य इति ॥ २ ॥ पद्मासनमाचष्टे—अङ्गुष्ठेनेति ॥ ३ ॥ वीरासनलक्षणमाह—एकमिति ॥ ४ ॥ सिंहासनप्रकारमाह—दक्षिणमिति ॥ ५–६ ॥ सिद्धासनस्वरूपमाह—योनिमिति ॥ ७ ॥ भद्रासनमाह—गुल्फाविति ॥ ८ ॥ मुक्तासनप्रकारमाह—सम्पीडयेति ॥ ९ ॥ मयूरासनमाह—अवष्टभ्येति ॥ १०–१३ ॥

आसनजयफलम्

येनासनं विजितं जगत्त्रयं तेन विजितं भवति ॥ १४ ॥
यमनियमासनाभ्यासयुक्तः पुरुषः प्राणायामं चरेत् । तेन नाडयः शुद्धा भवन्ति ॥ १५ ॥

आसनजयफलमाह—येनेति ॥ १४ ॥ ततः किमित्यत आह—यमेति ॥ १५ ॥

इति तृतीयः खण्डः

नाडीसंख्यादिजिज्ञासा

अथ हैनमथर्वाणं शाण्डिल्यः पप्रच्छ कैनोपायेन नाड्यः शुद्धा स्युः । नाड्यः कतिसंख्याकाः तासामुत्पत्तिः कीदृशी । तासु कति वायवस्तिष्ठन्ति । तेषां कानि स्थानानि । तत्कर्माणि कानि । देहे यानियानि विज्ञातव्यानि तत्सर्वं मे ब्रूहीति ॥ १ ॥

शाण्डिल्यः प्रश्नबीजमवष्टभ्याथर्वाणं पृच्छतीत्याह—अथेति ॥ १ ॥

शरीरप्राणप्रमाणम्

स होवाचाथर्वा । अथेदं शरीरं षण्णवत्यङ्गुलात्मकं भवति । शरीरात्प्राणो द्वादशाङ्गुलाधिको भवति ॥ २ ॥

शाण्डिल्येन एवं पृष्टः सः स्वस्वांगुलिमानेन षण्णवतीति ॥ २ ॥

कुम्भकविधिः

शरीरस्थं प्राणमग्निना सह योगाभ्यासेन समं न्यूनं वा यः करोति स योगिपुङ्गवो भवति ॥ ३ ॥

समन्यूनशब्दाभ्यां कुम्भकदीर्घकुम्भकावुच्येते इत्यर्थः ॥ ३ ॥

मनुष्यादीनां अग्निस्थानम्

देहमध्ये शिखिस्थानं त्रिकोणं तप्तजाम्बूनदप्रभं मनुष्याणाम् । चतुष्पदां चतुरश्रम् । विहगानां वृत्ताकारम् । तन्मध्ये शुभा तन्वी पावकी शिखा तिष्ठति ॥ ४ ॥

मनुष्यादी[illegible] स्थानमाह—देहेति ॥ ४ ॥

मनुष्यादिदेहमध्यलक्षणम्

गुदाद्द्व्यङ्गुलादूर्ध्वं मेढ्राद्द्व्यङ्गुलादधो देहमध्यं मनुष्याणां भवति । चतुष्पदां हृन्मध्यम् । विहगानां तुन्दमध्यम् । देहमध्यं नवाङ्गुलं चतुरङ्गुलमुत्सेधायतमण्डाकृति ॥ ५ ॥

मनुष्यादिदेहमध्यलक्षणमाह—गुदादिति ॥ ५–७ ॥

नाभिचक्रे जीवभ्रमणम्

तन्मध्ये नाभिः । तत्र द्वादशारयुतं चक्रम् । तच्चक्रमध्ये पुण्यपापप्रचोदितो जीवो भ्रमति ॥ ६ ॥ तन्तुपञ्जरमध्यस्थलूतिका यथा भ्रमति तथा चासौ तत्र प्राणश्चरति । देहेऽस्मिञ्जीवः प्राणारूढो भवेत् ॥ ७ ॥

कुण्डलिनीस्वरूपचेष्टाः

नाभेस्तिर्यगधोर्ध्वं कुण्डलिनीस्थानम् । अष्टप्रकृतिरूपाऽष्टधा कुण्डलीकृता कुण्डलिनी शक्तिर्भवति । यथावद्वायुसंचारं जलान्नादीनि परितः [1]स्कन्धपार्श्वेषु निरुध्यैनं मुखेनैष समावेष्टच्य ब्रह्मरन्ध्रं योगकालेऽपानेनाग्निना च स्फुरति हृदयाकाशं महोज्ज्वला ज्ञानरूपा भवति ॥ ८ ॥

तत्स्वरूपं तच्चेष्टां चाह—अष्टेति । ब्रह्मरन्ध्रं पुच्छेन च ॥ ८ ॥

[1] स्कन्द[कन्द?]पा—अ २, उ १.

चतुर्दशनाड्यः

मध्यस्थकुण्डलिनीमाश्रित्य मुख्या नाड्यश्चतुर्दश भवन्ति । इडा पिङ्गला सुषुम्ना सरस्वती [1]वारुणा पूषा हस्तिजिह्वा यशस्विनी विश्वोदरा कुहूः शङ्खिनी पयस्विनी अलम्बुसा गान्धारीति नाड्यश्चतुर्दश भवन्ति ॥ ९ ॥

देहमध्यस्थेति । कास्ता इत्यत्र इडेति ॥ ९ ॥

सुषुम्नानाडी

तत्र सुषुम्ना विश्वधारिणी मोक्षमार्गेति चाचक्षते । गुदस्य पृष्ठभागे वीणादण्डाश्रिता [2]मूर्धपर्यन्तं ब्रह्मरन्ध्रेति विज्ञेया व्यक्ता सूक्ष्मा वैष्णवी भवति ॥ १० ॥

सुषुम्नास्वरूपमाह --गुदस्येति ॥ १० ॥

सुषुम्नापरितः इतरनाडीस्थानानि

सुषुम्नायाः सव्यभागे इडा तिष्ठति । दक्षिणभागे पिङ्गला । इडायां चन्द्रश्चरति । पिङ्गलायां रविः । तमोरूपश्चन्द्रः । रजोरूपो रविः । विषभागो रविः अमृतभागश्चन्द्रमाः । तावेव सर्वकालं धत्ते । सुषुम्ना कालभोक्त्री भवति । सुषुम्ना-पृष्ठपार्श्वयोः सरस्वतीकुहू भवतः । यशस्विनीकुहू[3]मध्ये वारुणी प्रतिष्ठिता भवति । पूषासरस्वतीमध्ये पयस्विनी भवति । गान्धारी-

[1] वारुणी—मु. वरुणा—उ, अ २. [2] मूर्धिक, अ २, उ १.
[3] मं—क, अ १, अ २.

सरस्वतीमध्ये कृष्णस्विनी भवति । कन्दमध्येऽलम्बुसा भवति । सुषुम्नापूर्वभागे मेढ्रान्तं कुहूर्भवति । कुण्डलिन्या अधश्चोर्ध्वं वारुणी सर्वगामिनी भवति । यशस्विनी सौम्या च पादांगुष्ठान्तमिष्यते । पिङ्गला चोर्ध्वगा याम्यनासान्तं भवति । पिङ्गलायाः पृष्ठतो याम्यनेत्रान्तं पूषा भवति । याम्यकर्णान्तं यशस्विनी भवति । जिह्वाया ऊर्ध्वान्तं सरस्वती भवति । आसव्यकर्णान्तमूर्ध्वगा शङ्खिनी भवति । इडापृष्ठभागात्सव्यनेत्रान्तगा गान्धारी भवति । पायुमूलादधोर्ध्वगाऽलम्बुसा भवति । एतासु चतुर्दशनाडीष्वन्या नाड्यः संभवन्ति । तास्वन्यास्तास्वन्या भवन्तीति विज्ञेयाः । यथाऽश्वत्थादिपत्रं सिराभिर्व्याप्तमेवं शरीरं नाडीभिर्व्याप्तम् ॥ ११ ॥

सुषुम्नायाः पण्डितः इडादिनाड्यस्तिष्ठन्तीत्याह—सुषुम्नाया इति ॥ ११ ॥

प्राणादिदशवायुस्थानचेष्टाः

प्राणापानसमानोदानव्याना नागकूर्मकृकरदेवदत्तधनञ्जया एते दश वायवः सर्वासु नाडीषु चरन्ति ॥ १२ ॥ आस्यनासिका-[1]कण्ठनाभिपादाङ्गुष्ठद्वयकुण्डल्यधश्चोर्ध्वभागेषु प्राणः संचरति । श्रोत्राक्षिकटिगुल्फघ्राणगलस्फिग्देशेषु व्यानः संचरति । गुदमेढ्रो-रुजानूदरवृषणकटिजङ्घानाभिगुदाग्न्यगारेष्वपानः संचरति । सर्व-संधिस्थ उदानः । पादहस्तयोरपि सर्वगात्रेषु सर्वव्यापी समानः । भुक्तान्नरसादिकं गात्रेऽग्निना सह व्यापयन् द्विसप्ततिसहस्रेषु नाडीमार्गेषु

[1] हृन्नाभि—अ १.

चरन् समानवायुरग्निना सह साङ्गोपाङ्गकलेवरं व्याप्य॰॰ नागादिवायवः पञ्च त्वगस्थ्यादिसंस्थाः तुन्दस्थं जलमन्नं च रसादिषु समीरितं— तुन्दमध्यगतः प्राणस्तानि पृथक्कुर्यात् । अग्नेरुपरि जलं स्थाप्य जलोपर्यन्नादीनि संस्थाप्य स्वयमपानं संप्राप्य तेनैव सह मारुतः प्रयाति देहमध्यगतं [1]ज्वलनम् । वायुना पतितो बहिरपानेन शनैर्देहमध्ये ज्वलति । ज्वलनो ज्वालाभिः प्राणेन कोष्ठमध्यगतं जलमत्युष्णमकरोत् । जलोपरि समर्पितं व्यञ्जनसंयुक्तमन्नं बहिसंयुक्तवारिणा पक्वमकरोत् । तेन स्वेदमूत्रजलरक्तवीर्यरूपरसपुरीषादिकं प्राणः पृथक्कुर्यात् । समानवायुना सह सर्वासु नाडीषु रसं व्यापयन् श्वासरूपेण देहे वायुश्चरति । नवभिर्व्योमरन्ध्रैः शरीरस्य वायवः कुर्वन्ति विण्मूत्रादिविसर्जनम् । निश्वासोच्छ्वासकासश्च प्राणकर्मोच्यते । विण्मूत्रादिविसर्जनमपानवायुकर्म । हानोपादानचेष्टादि व्यानकर्म । देहस्योन्नयनादिकमुदानकर्म । शरीरपोषणादिकं समानकर्म । उद्गारादि नागकर्म । निमीलनादि कूर्मकर्म । क्षुत्करणं कृकरकर्म । तन्द्री देवदत्तकर्म । श्लेष्मादि धनञ्जयकर्म ॥ १३ ॥

नाडीभेदमुक्त्वा वायुभेदमाह—प्राणेति ॥ १२ ॥ प्राणादिचेष्टामाचष्टे —आस्येति ॥ १३–१४ ॥

नाडीशोधनविधिः

एवं नाडीस्थानं वायुस्थानं तत्कर्म च सम्यज्ज्ञात्वा नाडीसंशोधनं कुर्यात् ॥ १४ ॥

इति चतुर्थः खण्डः

[1] जलं—क, अ २.

योगाधिकारियोगमठयोः लक्षणम्

यमनियमयुतः पुरुषः सर्वसङ्गविवर्जितः कृतविद्यः स्वधर्मरतो जितक्रोधो गुरुशुश्रूषानिरतः पितृमातृविधेयः स्वाश्रमोक्तसदाचार[1]विद्वल्लक्षितः फलमूलोदकान्वितं तपोवनं प्राप्य रम्यदेशे ब्रह्मघोषसमन्विते स्वधर्मनिरतब्रह्मवित्समावृते फलमूलपुष्पवारिभिः सुसंपूर्णे देवायतने नदीतीरे ग्रामे नगरे वाऽपि सुशोभनमठं नात्युच्चनीचायतमल्पद्वारं गोमयादिलिप्तं सर्वरक्षासमन्वितं कृत्वा तत्र वेदान्तश्रवणं कुर्वन् योगं समारभेत् ॥ १ ॥

सप्रकारं सोपायं सामान्यविशेषप्राणायामलक्षणमाह—यमेति । योगाधिकारिलक्षणमुक्त्वा योगमठलक्षणमाह—फलेति । तत्र योगमठे ॥ १ ॥

प्राणायामारम्भप्रकारः

आदौ विनायकं संपूज्य स्वेष्टदेवतां नत्वा पूर्वोक्तासने स्थित्वा प्राङ्मुख उदङ्मुखो वाऽपि मृद्वासनेषु जितासनगतो विद्वान् समग्रीवशिरोनासाग्रदृग्भ्रूमध्ये शशभृद्बिम्बं पश्यन् नेत्राभ्याममृतं द्वादशमात्रया इडया वायुमापूर्योदरे स्थितं ज्वालावलीयुतं रेफबिन्दुयुक्तमग्निमण्डलयुतं ध्यायेद्रेचयेत् पिङ्गलया । पुनः पिङ्गलयाऽऽपूर्य कुम्भित्वा रेचयेदिडया ॥ २ ॥

योगारम्भप्रकारमाह—आदाविति । अमृतं स्रवन्तं चन्द्रमण्डलं पश्यन् ॥ २ ॥

[1] विच्छि—क, अ २.

नाडीशोधकप्राणायामाभ्यासकालावधिः

त्रिचतुस्त्रिचतुः सप्तत्रिचतुर्मासपर्यन्तं त्रिसंधिषु तदन्त[1]राले च षट्कृत्व आचरेन्नाडीशुद्धिर्भवति ॥ ३ ॥

कियन्तं कालं कर्तव्यमित्यत्र अवधिमाह—त्रिचतुरिति । त्रिचतुस्त्रिचत्वारिंशद्दिनपर्यन्तं वा, त्रिचतुस्त्रिमासं चतुर्मासं सप्तमासं वा, त्रिचतुर्मासपर्यन्तं संवत्सरपर्यन्तं वा, एवं षट्कालं प्राणायामं कुर्वतो नाडीशुद्धिः भवति ॥ ३ ॥

नाडीशुद्धिचिह्नानि

ततः शरीरलघुदीप्तिवह्निवृद्धिनादाभिव्यक्तिर्भवति ॥ ४ ॥

ततः किमित्यत आह—तत इति । योगिनः शरीरस्य लघुत्वं दीप्तिमत्त्वं सौन्दर्यादिः जायते इत्यर्थः ॥

इति पञ्चमः खण्डः

प्रणवात्मकप्राणायामः

प्राणापानसमायोगः प्राणायामो भवति । रेचकपूरक[2]कुम्भकभेदेन स त्रिविधः ॥ १ ॥ ते वर्णात्मकाः । तस्मात् प्रणव एव प्राणायामः ॥ २ ॥

प्रणवात्मकप्राणायामस्वरूपमाह—प्राणेति ॥ १ ॥ रेचकादयः ते । यस्मात् रेचकादयः अकारोकारमकारात्मकाः तस्मात् ॥ २ ॥

[1] रालेषुच—क, अ २.

[2] कुम्भकैः स—अ, अ २.

प्रणवकर्णध्यानप्रकारः

पद्माद्यासनस्थः पुमान्नासाग्रशशभृद्बिम्बोत्सङ्गालवितानि-[1]ताकारमूर्ती रक्ताङ्गी हंसवाहिनी दण्डहस्ता बाला गायत्री भवति। उकारमूर्तिः श्वेताङ्गी तार्क्ष्यवाहिनी युवती चक्रहस्ता सावित्री भवति। मकारमूर्तिः कृष्णाङ्गी वृषभवाहिनी वृद्धा त्रिशूलधारिणी सरस्वती भवति ॥ ३ ॥ अकारादित्रयाणां सर्वकारणमेकाक्षरं परंज्योतिः प्रणवं भवति ॥ ४ ॥

यथोक्तसाधनसम्पन्नो योगी अकारादिवर्णत्रयवाच्यगायत्र्यादिमूर्तित्रयध्यानपूर्वकं यथाविधि प्राणायामं कुर्यादित्याह—पद्मेति ॥ ३ ॥ अकारादिमात्रात्रयसमष्टिः प्रणवो भवतीत्याह—अकारादीति। प्रणवं प्रणवस्वरूपम् ॥ ४ ॥

प्राणाभ्यासप्रकारः

इडया बाह्याद्वायुमापूर्य षोडशमात्राभिरकारं चिन्तयन् पूरितं वायुं चतुःषष्टिमात्राभिः कुम्भयित्वोंकारं ध्यायन् पूरितं पिङ्गलया द्वात्रिंशन्मात्रया मकार[2]मूर्तिध्यानेनैवं क्रमेण पुनः पुनः कुर्यात् ॥५॥

प्राणाभ्यासप्रकारमाह—इडयेति ॥ ५ ॥

इति षष्ठः खण्डः

[1] तमका—अ, अ १, क. च मका—अ २. [2] मूर्ति—अ, अ १.

अथासनदृढो योगी वशी मितहिताशनः सुषुम्नानाडीस्थ-मलशोषार्थं योगी बद्धपद्मासनो वायुं चन्द्रेणापूर्य यथाशक्ति कुम्भयित्वा सूर्येण रेचयित्वा पुनः सूर्येणापूर्य कुम्भयित्वा चन्द्रेण विरेच्य यया त्यजेत्तया संपूर्य धारयेत्। तदेते श्लोका भवन्ति—

प्राणं प्रागिडया पिबेन्नियमितं भूयोऽन्यया रेचयेत्
पीत्वा पिङ्गलया समीरणमथो बद्ध्वा त्यजेद्वामया।
सूर्याचन्द्रम[1]सोरनेन विधिनाऽभ्यासं सदा तन्वतां
शुद्धा नाडिगणा भवन्ति यमिनां मासत्रयादूर्ध्वतः ॥१॥

योगी सुषुम्नाऽन्तर्गतमलशोधनार्थं पुरोक्तरीत्या प्राणायामं कुर्यादित्याह-अथेति। उक्तार्थं वक्ष्यमाणाः श्लोकाः मन्त्रा भवन्तीत्याह—तदिति ॥ १ ॥

अहरहः कर्तव्यप्राणायामसङ्ख्या

प्रातर्मध्यन्दिने सायमर्धरात्रे तु कुम्भकान्।
शनैरशीतिपर्यन्तं चतुर्वारं समभ्यसेत् ॥ २ ॥

अहरहः कति प्राणायामाः कर्तव्याः इत्यत आह—प्रातरिति ॥ २ ॥

अभ्यासोचितसिद्धिभेदः

कनीयसि भवेत् स्वेदः कम्पो भवति मध्यमे।
उत्तिष्ठत्युत्तमे प्राणरोधे पद्मासनं [2]भवेत् ॥ ३ ॥

[1] सोऽन्यने—ड, ड १. [2] महत्—अ, अ १.

जलेन श्रमजातेन गात्रमर्दनमाचरेत् ।
दृढता लघुता चापि तस्य गात्रस्य जायते ॥ ४ ॥

अभ्यासोचितसिद्धिभेदमाचष्टे—कनीयसीति ॥ ३ ॥ तेन किं स्यादित्यत्र जलेनेति ॥ ४ ॥

अभ्यासकाले आहारनियमः

अभ्यासकाले प्रथमं शस्तं क्षीराज्यभोजनम् ।
ततोऽभ्यासे स्थिरीभूते न [1]तावन्नियमग्रहः ॥ ५ ॥

आहारनियममाह—अभ्यासेति ॥ ५ ॥

अभ्यासे सावधानताविधिः

यथा सिंहो गजो व्याघ्रो भवेद्वश्यः शनैःशनैः ।
तथैव सेवितो वायुरन्यथा हन्ति साधकम् ॥ ६ ॥
युक्तंयुक्तं त्यजेद्वायुं युक्तंयुक्तं च पूरयेत् ।
युक्तं युक्तेन बध्नीयादेवं सिद्धिमवाप्नुयात् ॥ ७ ॥

यावत् सुषुम्नाप्रवेशः तावत् सावधानतया अभ्यासः कार्यः इत्यत आह—यथेति ॥ ६ ॥ तत्रोपायस्तु युक्तमिति । एवं अभ्यासं कुर्वतो नाडीशुद्धिः भवति ॥ ७ ॥

नाडीशुद्धितो मनोन्मन्यवस्थाप्राप्तिः

यथेष्ट[2]धारणं वायोरनलस्य प्रदीपनम् ।
नादाभिव्यक्तिरारोग्यं जायते नाडिशोधनात् ॥ ८ ॥

[1] तद्व—अ, अ १. [2] धारणाद्वा—क, अ २.

विधिवत् प्राणसंयामैर्नाडीचक्रे विशोधिते ।
सुषुम्नावदनं भित्त्वा सुखाद्विशति मारुतः ॥ ९ ॥
मारुते मध्यसंचारे मनःस्थैर्यं प्रजायते ।
यो मनःसुस्थिरीभावः सैवावस्था मनोन्मनी ॥ १० ॥

ततो वायुः सुषुम्नां प्रविश्य योगिनं मनोन्मन्यवस्थाऽऽरूढं कुर्यादित्याह—यथेष्टेति ॥ ८–९ ॥ तेन किं स्यादित्यत्र—मारुत इति ॥ १० ॥

बन्धत्रयस्य कर्तव्यता

पूरकान्ते तु कर्तव्यो बन्धो जालन्धराभिधः ।
कुम्भकान्ते रेचकादौ कर्तव्यस्तूड्डियाणकः ॥ ११ ॥
अधस्तात्कुञ्चनेनाशु कण्ठसंकोचने कृते ।
मध्ये पश्चिमतानेन स्यात् प्राणो ब्रह्मनाडिगः ॥ १२ ॥

बन्धत्रयपूर्वकाभ्यास एव फलवानित्याह—पूरकान्त इति ॥ ११–१२ ॥

प्राणापानयोगफलम्

अपानमूर्ध्वमुत्थाप्य प्राणं कण्ठादधो नयन् ।
योगी जराविनिर्मुक्तः षोडशो वयसा भवेत् ॥ १३ ॥

प्राणापानयोगफलमाह—अपानमिति ॥ १३ ॥

कपालशोधनोपायः

सुखासनस्थो दक्षनाड्या बहिस्थं पवनं समाकृष्याकेशमानखाग्रं कुम्भयित्वा सव्यनाड्या रेचयेत् । तेन कपालशोधनं वातनाडीगतसर्वरोगविनाशनं भवति ॥ १३–१ ॥

कपालशोधनोपायमाह—सुखेति । योगी सुखासनस्थः । कपालशोधनं भवति । तेन किं भवतीत्यत्र—वातेति ॥ १३–१ ॥

उज्जायीप्राणायामः

हृदयादिकण्ठपर्यन्तं सस्वनं नासाभ्यां शनैः पवनमाकृष्य यथाशक्ति कुम्भयित्वा इडया विरेच्य गच्छंस्तिष्ठन्कुर्यात् । तेन श्लेष्महरं जाठराग्निवर्धनं भवति ॥ १३–२ ॥

श्लेष्महरोज्जायीलक्षणमाह—हृदयादीति । तिष्ठन् उज्जायीनामकं प्राणायामं कुर्यात् ॥ १३–२ ॥

सीत्कारप्राणायामः

वक्त्रेण सीत्कारपूर्वकं वायुं गृहीत्वा यथाशक्ति कुम्भयित्वा नासाभ्यां रेचयेत् । तेन क्षुत्तृष्णाऽऽलस्यनिद्रा न जायन्ते ॥१३–३॥

सीत्कारप्राणायाममाह—वक्त्रेणेति ॥ १३–३ ॥

शीतलप्राणायामः

जिह्वया वायुं गृहीत्वा यथाशक्ति कुम्भयित्वा नासाभ्यां रेचयेत् । तेन गुल्मप्लीहज्वरपित्तक्षुधादि नश्यति ॥ १३–४ ॥

शीतळी तु जिह्वया ॥ १३–४ ॥

उपायापयकुम्भकद्वयम्

[1]कुम्भकः स द्विविधः सहितः केवलश्चेति । रेचकपूरकयुक्तः सहितः । तद्विवर्जितः केवलः । केवलसिद्धिपर्यन्तं सहितमभ्यसेत् ।

[1] अथकुम्भकः—क, अ २.

केवलकुम्भके सिद्धे त्रिषु लोकेषु न तस्य दुर्लभं भवति । केवल-कुम्भकात् कुण्डलिनीबोधो जायते ॥ १३–५ ॥

उपायोपेयकुम्भकद्वयमाह—कुम्भक इति । ततः किं जायत इत्यत्र-केवलेति ॥ १३–५ ॥

कुम्भकाभ्यासफलम्

ततः कृशवपुः प्रसन्नवदनो निर्मललोचनोऽभिव्यक्तनादो निर्मुक्तरोगजालो जितबिन्दुः पटुग्निर्भवति ॥ १३–६ ॥

ततः किं स्यादित्यत्र ततः इति ॥ १३–६ ॥

वैष्णवीमुद्राप्राप्तिः

अन्तर्लक्ष्यं बहिर्दृष्टिर्निमेषोन्मेषवर्जिता ।
एषा सा वैष्णवी मुद्रा सर्वतन्त्रेषु गोपिता ॥ १४ ॥

तेन किमित्याकांक्षायां अनेन योगी वैष्णवीमुद्राऽऽरूढो भवतीत्याह—अन्तर्लक्ष्यमिति । मूलाधारानाहताज्ञासहस्रारेषु यथाक्रमं विराट् सूत्रं बीजं तुरीयं वा अन्तर्लक्ष्यं तदेकतानं मनः बहिर्दृष्टिस्तु अन्तर्दृष्टिर्भूत्वा यदा निमेषोन्मेषवर्जिता भवति तदा दृष्टिरियं वैष्णवीमुद्रा भवतीत्यर्थः ॥ १४ ॥

खेचरीप्राप्त्या ब्रह्मदर्शनम्

अन्तर्लक्ष्यविलीनचित्तपवनो योगी सदा वर्तते
दृष्ट्या निश्चलतारया बहिरधः पश्यन्नपश्यन्नपि ।
मुद्रेयं खलु खेचरी भवति सा लक्ष्यैकताना शिवा
शून्याशून्यविवर्जितं स्फुरति सा तत्त्वं पदं [1]वैष्णवी ॥

[1] वैष्णवं—अ.

अर्धोन्मीलितलोचनः स्थिरमना नासाग्रदत्तेक्षण-
श्चन्द्रार्कावपि लीनतामुपनयन्निष्यन्दभावोत्तरम् ।
ज्योतीरूपमशेषबाह्यरहितं देदीप्यमानं परं
तत्त्वं तत्परमस्ति वस्तुविषयं शाण्डिल्य विद्धीह तत् ॥

यदा योगी वैष्णवीमुद्राऽऽरूढो भवति तदा इयं वैष्णवीमुद्रा खेचरीपदवीमेत्य तत्त्वंपदलक्ष्यैक्यप्रत्यगभिन्नब्रह्मगोचरा भवतीत्याह—अन्तरिति । अन्तर्दृष्टिभावमापन्ननिश्चलबहिर्दृष्टिरेव मुद्रेयम् । शून्यं सुषुप्तिः अशून्यं स्वप्नादिकं तदुभयवर्जितं यथा भवति तथा लक्ष्यैकताना वैष्णवी स्फुरतीत्यर्थः ॥ १५ ॥ खेचरीमुद्राऽऽरूढयोगिनः स्थितिं तद्ध्येयस्वरूपं चाह—अर्धेति । अर्धोन्मीलितलोचनः इत्यादिविशेषणविशिष्टो योगी चन्द्रार्कौ इडापिंगळागोचरवायू मनोदृष्टथग्निभिः सह सुषुम्नायां लीनतां लयभावं उपनयन् यदा तिष्ठति तदा स्वान्तर्बाह्यविस्मारकब्रह्मानन्दनदी प्रवहति । ततो निष्यन्दभावोत्तरं नितरां स्रवदानन्दभावानुभवानन्तरं तदनुभूत्यसंगतया यद्वस्तु प्रत्यग्ज्योतीरूपं अशेषबाह्यान्तःकलनाविरळं परमात्माभेदेन देदीप्यमानं "परो दिवो ज्योतिर्दीप्यते" इति श्रुतिसिद्धं परं तत्त्वमस्ति हे शाण्डिल्य तद्विषयं तद्भावापन्नं वस्तु ब्रह्माहमिति विद्धि ॥ १६ ॥

खेचर्या उन्मनीभावापत्तिः

तारं ज्योतिषि संयोज्य किंचिदुन्नमय भ्रुवौ ।
पूर्वाभ्यासस्य मार्गोऽयमुन्मनीकारकः क्षणात् ॥ १७ ॥
तस्मात् खेचरीमुद्रामभ्यसेत् । ततोन्मनी भवति । ततो योगनिद्रा भवति । लब्धयोगनिद्रस्य योगिनः कालो नास्ति ॥ १७—१ ॥

कथं एवं ज्ञातुं शक्यते इत्यत्रोपायमाह—तारमिति । भ्रूमध्यविलसज्ज्योतिषि समभावमापन्नकृष्णतारयुगळं दृढं संयोज्य अवलोक्य किंचित्

भ्रुवौ ऊर्ध्वमुन्नमय्य उर्ध्वोत्क्षेपणं कृत्वा अथ सहस्रारविलसिततुरीयं तत्कलनाविरळतुरीयातीतं वा स्वावशेषधिया पश्येदिति शेषः। "तारं ज्योतिषि संयोज्य" इति यो दर्शितः "अन्तर्लक्ष्यं" इत्यादिपूर्वाभ्यासस्य अयमेव मार्गः क्षणादुन्मनीकारकः निर्विकल्पकब्रह्मभावापत्तिहेतुरित्यर्थः ॥ १७ ॥ यस्मादेवं तस्मात्। ततोन्मनीभवति निर्व्यापारं मनो भवतीत्यर्थः। ततः किमित्यत आह—तत इति। योगनिद्रा निर्विकल्पभावापत्तिः। ततो व्युत्थान-शङ्कां वारयति—लब्धेति। एवं लब्धयोगनिद्रस्य योगिनः निर्विकल्पकतो व्युत्थापककालो नास्ति ॥ १७–१ ॥

कालापरिच्छिन्नब्रह्मप्राप्तिसाधनम्

शक्तिमध्ये मनः कृत्वा शक्तिं च मनमध्यगाम्।
मनसा मन आलोक्य शाण्डिल्य त्वं सुखी भव ॥ १८ ॥
स्वमध्ये कुरु चात्मानमात्ममध्ये च खं कुरु।
सर्वं च स्वमयं कृत्वा न किंचिदपि चिन्तय ॥ १९ ॥

कालापरिच्छिन्ननिर्विकल्पकब्रह्मभावापत्त्युपायमाह—शक्तीति। कुण्ड-लिनीशक्तिमध्ये मनः कृत्वा मनोलयं कृत्वा ततः कुण्डलिनीशक्तिं, चशब्दात् दृष्टिं, मनमध्यगां मनःप्रवृत्तिनिमित्तप्रत्यक्चैतन्यपर्यवसन्नां कृत्वा प्रत्यग्भावापन्नेन मनसा मनः मनोवृत्तिसहस्रभावाभावप्रकाशकप्रत्यगभिन्नं ब्रह्म अहमस्मीत्यालोक्य हे शाण्डिल्य त्वं तन्मात्रावस्थानलक्षणकैवल्यसुखी भवेत्यर्थः ॥ १८ ॥ प्रकारान्तरमाह—स्वमध्य इति। चित्स्वमध्ये आत्मानमन्तःकरणं कुरु आत्मान्तःकरणमध्ये च स्वं कुरु। एवं व्यतिहारेण सर्वं चित्स्वमयं कृत्वा चिदाकाशातिरिक्तं न किञ्चिदस्ति इति चिन्तय ॥ १९ ॥

मनोविलापनेन कैवल्यप्राप्तिः

बाह्यचिन्ता न कर्तव्या तथैवान्तरचिन्तिका ।
सर्वचिन्तां परित्यज्य चिन्मात्रपरमो भव ॥ २० ॥
कर्पूरमनले यद्वत् सैन्धवं सलिले यथा ।
तथा च लीयमानं च मनस्तत्त्वे विलीयते ॥ २१ ॥
ज्ञेयं [1]सर्वप्रतीतं च तज्ज्ञानं मन उच्यते ।
ज्ञानं ज्ञेयं समं नष्टं नान्यः पन्था द्वितीयकः ॥ २२ ॥
ज्ञेयवस्तुपरि[2]त्यागे विलयं याति मानसम् ।
मानसे विलयं याते कैवल्यमवशिष्यते ॥ २३ ॥

बाह्यान्तर्वृत्त्यावृतस्य कथं चिदाकाशदृष्टिः उदेतीत्यत आह—**बाह्येति** ॥ २० ॥ निष्प्रतियोगिकचिन्मात्रावगतेः अन्तर्बाह्यविभागकलनापूर्वपूर्वकत्वात् ज्ञेयसामान्यासम्भवप्रबोधसमकालं योगी कैवल्यरूपेण अवशिष्यते इत्याह—**कर्पूरमिति** । दग्धकर्पूरवत् जलगतसैन्धवपिण्डवच्च जाग्रदाद्यवस्थात्रयलीयमानं **मनः** स्वरूपध्यानसंस्कृतं सत्प्रपञ्चविमुखं भूत्वा **स्वतत्त्वे ब्रह्मणि लीयते** ॥ २१ ॥ प्रपञ्चतद्गोचरज्ञेयज्ञानसत्त्वात् कथं मनः स्वतत्त्वे विलीयत इत्यत आह—**ज्ञेयमिति** । सर्वत्र स्वातिरेकेण प्रतीयत इति **सर्वप्रतीतम्** । अविद्यापदशब्दात् जाग्रदादितत्कार्यप्रपञ्च उच्यते । तत् सर्वं **ज्ञेय**शब्दार्थः **तद्गोचरं मनः ज्ञानमुच्यते** । "ब्रह्मातिरिक्तं न किञ्चिदस्ति" इति यज्ज्ञानसमकालं **ज्ञानं ज्ञेयं समं** युगपन्नष्टं भवति अयमेव अद्वितीयब्रह्मप्रापकः **पन्थाः नातोऽन्यः** कश्चिदस्तीत्यर्थः ॥ २२ ॥ युगपत् कथं लीयते इत्यत आह—**ज्ञेयेति** ॥ २३ ॥

[1] सर्व—अ, अ २, क. [2] त्यागाद्वि—क, अ १, अ २.

योगज्ञानाभ्यां मनोलयः

द्वौ क्रमौ चित्तनाशस्य योगो ज्ञानं मुनीश्वर ।
योग[1]स्तु वृत्तिरोधो हि ज्ञानं सम्यगवेक्षणम् ॥ २४ ॥
तस्मिन्निरोधिते नूनमुपशान्तं मनो भवेत् ।
मनःस्पन्दोपशान्त्यायां संसारः प्रविलीयते ॥ २५ ॥
सूर्या[2]लोकपरिस्पन्दशान्तौ व्यवहृतिर्यथा ।

कथं पुनः मानसं विलीयते इत्याशङ्क्य प्रत्यगभिन्नब्रह्मगोचरयोगज्ञानाभ्यां मानसं विलीयत इति सदृष्टान्तमाह—द्वाविति । योगस्तु स्वातिरिक्तास्तित्वगोचरतच्चित्तवृत्तिरोधः, ज्ञानं ब्रह्मातिरिक्तं न किञ्चिदस्तीति सम्यगवेक्षणम् ॥ २४ ॥ यः स्वातिरिक्तमस्तीति भ्रम उदेति तस्मिन् । संसारे सति कथं मनः शाम्यतीत्यत्र—मन इति । मनःस्पन्दोपशान्त्यायामित्यस्य मनःस्पन्दोपशान्तावित्यर्थः । "मनःस्पन्दोपशान्त्याऽयं" इत्येकं पाठान्तरमपि वर्तते । संसारः प्रविलीयते, संसारस्य मनःकल्पितत्वात् कल्पकाभावे कल्प्याभावो युज्यते इत्यर्थः ॥ २५ ॥ अत्र दृष्टान्तः—सूर्येति ॥

मनोलयात् प्राणस्पन्दनिरोधः

शास्त्रसज्जनसंपर्कवैराग्याभ्यासयोगतः ॥ २६ ॥
अनास्थायां कृतास्थायां पूर्वं संसारवृत्तिषु ।
यथाऽभिवाञ्छितध्यानाच्चिरमेकतयोदितात् ॥ २७ ॥
एकतत्त्वदृढाभ्यासात् प्राणस्पन्दो निरुध्यते ।

स्वाज्ञानविकल्पितमनःस्पन्दस्य प्राणस्पन्दनपूर्वकत्वात् । यत एवमतः तच्छान्तावुपाय उच्यते—शास्त्रेति ॥ २६ ॥ अनास्थायां निवृत्तिमार्गे

[1] स्तद्वृत्ति—क, अ १, अ २. [2] लोके—क, अ २.

कृतास्थायां सत्यां ब्रह्म सत्यं जगत् मिथ्येति ज्ञानमुदेति । ततः यथेति ॥ २७ ॥

प्राणस्पन्दनिरोधात् मनःस्पन्दनिरोधः

पूरकाद्यनिलायामाद्दृढाभ्यासादखेदजात् ॥ २८ ॥
एकान्तध्यानयोगाच्च मनःस्पन्दो निरुध्यते ।

मनःस्पन्दशान्तिः कथमित्यत्र—पूरकेति ॥ २८ ॥ प्राणस्पन्दशान्ति-समकालं मन इति ॥

प्राणस्पन्दनिरोधविविधोपायाः

ओङ्कारोच्चारणप्रान्तशब्दतत्त्वानुभावनात् ।
सुषुप्ते [1]संविदो जाते प्राणस्पन्दो निरुध्यते ॥ २९ ॥
तालुमूलगतां यत्नाज्जिह्वयाऽऽक्रम्य घण्टिकाम् ।
ऊर्ध्वरन्ध्रं गते प्राणे प्राणस्पन्दो निरुध्यते ॥ ३० ॥
प्राणे गलितसंवित्तौ तालूर्ध्वद्वादशान्तगे ।
अभ्यासादूर्ध्वरन्ध्रेण प्राणस्पन्दो निरुध्यते ॥ ३१ ॥
द्वादशाङ्गुलपर्यन्ते नासाग्रे विमलाम्बरे ।
संविद्दृशि प्रशाम्यन्त्यां प्राणस्पन्दो निरुध्यते ॥ ३२ ॥
भ्रूमध्ये तारकालोकशान्तावन्तमुपागते ।
चेतनैकतनं बद्धे प्राणस्पन्दो निरुध्यते ॥ ३३ ॥
ओमित्येव यदुद्भूतं [2]ज्ञानं ज्ञेयात्मकं शिवम् ।
असंस्पृष्ट[3]विकारांशं प्राणस्पन्दो निरुध्यते ॥ ३४ ॥

[1] स्सं—अ, अ १. [2] ज्ञानञ्च—अ २. [3] विकल्पां—अ, अ १, अ २, क.

चिरकालं हृदैकान्तव्योमसंवेदना[1]न्मुने ।
अवासनमनोध्यानात् प्राणस्पन्दो निरुध्यते ॥ ३५ ॥
एभिः क्रमैस्तथान्यैश्च नानासंकल्पकल्पितैः ।
नानादेशिकवक्त्रैः प्राणस्पन्दो निरुध्यते ॥ ३६ ॥

प्लुतप्रणवानुसन्धानेनापि प्राणस्पन्दो निरुध्यत इत्याह—ओङ्कारेति । ओंकार. . . भावनात् कांस्यघण्टानिनादवत् प्रणवनादानुसन्धानात् । बाह्यान्तर्भवसंविदो विषयज्ञानततेः सुषुप्ते जाते सति अथ प्राणेति ॥ २९ ॥ लम्बिकयाऽपि प्राणस्पन्दशान्तिः स्यादित्याह—तालेति । तदुपायतः ऊर्ध्वरन्ध्रं गते ॥ ३० ॥ राजयोगाभ्यासपाटवतः प्राण इति । षण्मुखीमुद्रया गलितसंवित्तौ विगलितबाह्यान्तःसंवित्कलनायां सत्यां अभ्यासात् तालूर्ध्व-रन्ध्रेण प्राणे तालूर्ध्वविलसितद्वादशान्तं सहस्रारचक्रं गते सति अथ प्राणेति ॥ ३१ ॥ बहिःकुम्भकेनापि प्राणजयः स्यादित्याह—द्वादशेति । संविद्दृशि प्रशाम्यन्त्यां स्वातिरिक्तविषयवृत्तौ नष्टायाम् ॥ ३२ ॥ तारकानुसन्धा-नतोऽपि भ्रूमध्ये । तारकालोकनशान्तौ सत्याम् । तारकालोकनं कर्तव्यमिति सङ्कल्पे अन्तमुपागते अथ मनसि चेतनैकताने, चेतने प्रतीचि एकताने बद्धे एकतानतया बद्धे मनोन्मनीभावं गते सति, अथ प्राणेति ॥ ३३ ॥ ब्रह्मज्ञानेनापि प्राणस्पन्दशान्तिः स्यादित्याह—ओमिति । तदेव चाहं सकलं विमुक्त ओमिति ओङ्कारार्थविचारणसञ्जातासंस्पृष्टविकारांशज्ञानसमकालं प्राणेति ॥ ३४ ॥ ध्यानात् वासनाक्षयाच्च प्राणस्पन्दशान्तिः स्यादित्याह—चिरेति । हृदा एकान्तव्योमसंवेदनात् "चिद्व्योमातिरिक्तं न किञ्चिदस्ति" इति ज्ञानात् वासना क्षीयते । ततो ध्येयैकगोचरं मनो भवति । प्राणस्पन्दशान्तिः भवेदित्यर्थः ॥ ३५ ॥ उक्तैरनुक्तैर्वा उपायैः चिरानुष्ठितैः प्राणस्पन्दशान्तिः स्यादित्याह—एभिरिति ॥ ३६ ॥

[1] न्मुखे—क.

कुम्भकेन सुषुम्नाभेदनद्वारा परमपदगमनम्

आकुञ्चनेन कुण्डलिन्याः कवाटमुद्घाट्य मोक्षद्वारं विभेदयेत् ॥ ३६–१ ॥ येन मार्गेण गन्तव्यं तद्द्वारं मुखेनाच्छाद्य [1]प्रसुप्ता कुण्डलिनी कुटिलाकारा सर्पवद्वेष्टिता भवति ॥ ३६–२ ॥ सा शक्तिर्येन चालिता स्यात् स तु मुक्तो भवति । सा कुण्डलिनी कण्ठोर्ध्वभागे सुप्ता चेद्योगिनां मुक्तये भवति । बन्धनायाधो मूढानाम् ॥ ३६–३ ॥ इडादिमार्गद्वयं विहाय सुषुम्नामार्गेण गच्छेत्तद्विष्णोः परमं पदम् ॥ ३६–४ ॥

प्राणस्पन्दनिरोधलक्षणकेवलकुम्भकतो योगी कुण्डलिन्या सुषुम्नावदनं भेदयेदित्याह—**आकुञ्चनेनेति** । सुषुम्नाकवाटम् । **मोक्षद्वारं ब्रह्मरन्ध्रं विभेदयेत्** ॥ ३६–१ ॥ मोक्षद्वारभेदककुण्डलिनीस्वरूपं तच्चालनफलं चाह—**येनेति** ॥ ३६–२, ३ ॥ यत एवं अतः **इडादीति** । सुषुम्नायाः विष्णुपदाप्तिद्वारत्वात् ॥ ३६–४ ॥

मनोयुक्तप्राणस्य सुषुम्नाप्रवेशनविधिः

मरुदभ्यसनं सर्वं मनोयुक्तं समभ्यसेत् ।
इतरत्र न कर्तव्या मनोवृत्तिर्मनीषिणा ॥ ३७ ॥
दिवा न पूजयेद्विष्णुं रात्रौ नैव प्रपूजयेत् ।
सततं पूजयेद्विष्णुं दिवारात्रं न पूजयेत् ॥ ३८ ॥

मनोयोगाभ्यासः फलवानित्यर्थः ॥ ३७ ॥ मनोयुक्तप्राणं इडादिमार्गद्वयमप्रापयित्वा महापथव्यापृतं कुर्यादित्याह—**दिवेति** । मनोयोगतो **विष्णुं प्राणं**

[1] सुप्तासुप्त—अ, अ १.

दिवा सूर्यनाड्यां न पूजयेत् न व्यापारयेत् । तथा चन्द्रनाड्यां रात्रौ नैव प्रपूजयेत् । ततः अव्याकृताकाशं तेन पूरितं सततं सुषुम्नाऽऽख्यं महापथं प्रति विष्णुं पूजयेत् । कदाऽपि दिवारात्रं न पूजयेदित्यर्थः ॥ ३८ ॥

खेचरीमुद्राप्राप्तिः

सुषिरो ज्ञानजनकः पञ्चस्रोतःसमन्वितः ।
तिष्ठते खेचरी मुद्रा त्वं हि शाण्डिल्य तां भज ॥ ३९ ॥
सव्यदक्षिण[1]नाडीस्थो मध्ये चरति मारुतः ।
तिष्ठते खेचरी मुद्रा तस्मिन् स्थाने न संशयः ॥ ४० ॥
इडापिङ्गलयोर्मध्ये शून्यं चैवानिलं ग्रसेत् ।
तिष्ठन्ती खेचरी मुद्रा तत्र सत्यं प्रतिष्ठितम् ॥ ४१ ॥
सोमसूर्यद्वयोर्मध्ये निरालम्बतले पुनः ।
संस्थिता व्योमचक्रे सा मुद्रा नाम च खेचरी ॥ ४२ ॥

सुषुम्नाप्रवेशतः किं स्यादित्याशङ्क्य तत्र खेचरीमुद्रा वर्तते तत्साक्षात्कारात् कृतकृत्यो भवसीत्याह—सुषिर इति । यत्र सुषुम्नामध्ये सुषिरः विराडादि-तुरीयातीतान्तपञ्चस्रोतस्समन्वितः सन् मूलाधारानाहताज्ञासहस्रारेषु योगिनः क्रमेण विराडादिज्ञानजनको भवति तत्रैव खेचरीमुद्रा निर्विकल्पकरूपिणी वर्तते । मत्प्रसादतः तां त्वं भजेत्यर्थः ॥ ३९ ॥ उक्तार्थमेव पुनः पुनः शब्दान्तरेण विशदयति—सव्येति ॥ ४० ॥ शून्यशब्देन अव्याकृतमाकाश-मुच्यते, आकाशस्य वायुग्रासत्वात् ॥ ४१ ॥ व्योमचक्रस्य निरालम्बत्वात् ॥ ४२ ॥

[1] नासि—अ.

बाह्यखेचरीसिद्ध्युपायः

छेदनचालनदोहैः [1]कलां परां जिह्वां कृत्वा दृष्टिं भ्रूमध्ये स्थाप्य कपालकुहरे जिह्वा विपरीतगा यदा भवति तदा खेचरी मुद्रा जायते । जिह्वा चित्तं च खे [2]चरति । तेनोर्ध्वजिह्वः पुमानमृतो भवति ॥ ४२–१ ॥

बाह्यखेचरीसिद्ध्युपायमाह—छेदनेति । प्रतिभानुवासरं षण्मासावधि स्नुहिपत्रनिभशस्त्रेण रोममात्रं जिह्वासिराच्छेदनेन प्रतिब्राह्ले मुहूर्ते जिह्वाचालनतः प्रातः सैन्धवपथ्याचूर्णतो दोहैः कलां परां सूक्ष्मां जिह्वां कृत्वा दृष्टियुग्मं भ्रूमध्ये स्थाप्य घण्टिकारन्ध्रेण कपालकुहरे जिह्वा विपरीतगा यदा भवति तदा खेचरीमुद्रा उदेति । सहस्रागजिह्वाप्रवेशतो योगी कृतकृत्यो भवतीत्यर्थः ॥ ४२–१ ॥

अभ्यासकाले प्राणजयोपायः

वामपादमूलेन योनिं संपीड्य दक्षिणपादं प्रसार्य तं कराभ्यां धृत्वा नासाभ्यां वायुमापूर्य कण्ठबन्धं समारोप्योर्ध्वतो वायुं धारयेत् । तेन सर्वक्लेशहानिः । ततः पीयूषमिव विषं जीर्यते । क्षयगुल्मगुदावर्तजीर्णत्वगादिदोषा नश्यन्ति । एष प्राणजयोपायः सर्वमृत्यूपघातकः ॥ ४२–२ ॥

अभ्यासकाले प्राणजयोपायमाह—वामेति । महामुद्राऽभ्यासेन तेन ॥ ४२–२ ॥

[1] फलां—मु. [2] चरी—अ २.

स्वात्मापरोक्षसिद्ध्युपायः

वामपादपार्ष्णिं योनिस्थाने नियोज्य दक्षिणचरणं वामोरूपरि संस्थाप्य वायुमापूर्य हृदये चुबुकं निधाय योनिमाकुञ्च्य मनोमध्ये यथाशक्ति धारयित्वा स्वात्मानं भावयेत्। तेनापरोक्षसिद्धिः ॥ ४२–३ ॥

स्वात्मापरोक्षसिद्ध्युपायमाह—वामेति । स्वात्मानं ब्रह्माहमस्मीति भावयेत्। सिद्धिः भवति ॥ ४२–३ ॥

सर्वरोगविनिर्मोकसाधनं धारणाविशेषः

बाह्यात् प्राणं समाकृष्य पूरयित्वोदरे स्थितम्।
नाभिमध्ये च नासाग्रे पादाङ्गुष्ठे च यत्नतः ॥ ४३ ॥
धारयेन्मनसा प्राणं सन्ध्याकालेषु वा सदा।
सर्वरोगविनिर्मुक्तो भवेद्योगी गतक्लमः ॥ ४४ ॥

धारणाविशेषमाह—बाह्यादिति ॥ ४३–४४ ॥

नासाग्रादिषु संयमेन विविधसिद्धयः

नासाग्रे वायुविजयं भवति। नाभिमध्ये सर्वरोगविनाशः। पादाङ्गुष्ठधारणाच्छरीरलघुता भवति ॥ ४४–१ ॥

रसनाद्वायुमाकृष्य यः पिबेत् सततं नरः।
श्रमदाहौ तु न स्यातां नश्यन्ति व्याधयस्तथा ॥ ४५ ॥
सन्ध्ययोर्ब्राह्मणः [1]काले वायुमाकृष्य यः पिबेत्।
त्रिमासात्तस्य कल्याणी जायते वाक् सरस्वती ॥ ४६ ॥

[1] काले—क.

एवं षण्मासाभ्यासात् सर्वरोगनिवृत्तिः ॥
जिह्वया वायुमानीय जिह्वामूले निरोधयेत् ।
यः पिबेदमृतं विद्वान् सकलं भद्रमश्नुते ॥ ४७ ॥
आत्मन्यात्मानमिडया धारयित्वा भ्रुवोऽन्तरे ।
विभेद्य त्रिदशाहारं व्याधिस्थोऽपि विमुच्यते ॥ ४८ ॥
[1]नाडीभ्यां वायुमारोप्य नाभौ तुन्दस्य पार्श्वयोः ।
घटिकैकां वहेद्यस्तु व्याधिभिः स विमुच्यते ॥ ४९ ॥
मासमेकं त्रिसन्ध्यं तु जिह्वयाऽऽरोप्य मारुतम् ।
विभेद्य त्रिदशाहारं धारयेत्तुन्दमध्यमे ॥ ५० ॥
ज्वराः सर्वे विनश्यन्ति विषाणि विविधानि च ।
मुहूर्तमपि यो नित्यं नासाग्रे मनसा सह ॥ ५१ ॥
सर्वं तरति पाप्मानं तस्य जन्मशतार्जितम् ।

[2]तारसंयमात् सकलविषयज्ञानं भवति । नासाग्रे चित्तसंयमादिन्द्रलोकज्ञानम् । तदधश्चित्तसंयमादग्निलोकज्ञानम् । चक्षुषि चित्तसंयमात् सर्वलोकज्ञानम् । श्रोत्रे चित्तस्य संयमाद्यमलोकज्ञानम् । तत्पार्श्वे संयमान्निर्ऋतिलोकज्ञानम् । पृष्ठभागे संयमाद्वरुणलोकज्ञानम् । वामकर्णे संयमाद्वायुलोकज्ञानम् । कण्ठे संयमात् सोमलोकज्ञानम् । वामचक्षुषि संयमाच्छिवलोकज्ञानम् । मूर्ध्नि संयमाद्ब्रह्मलोकज्ञानम् । पादाधोभागे संयमादतललोकज्ञानम् । पादे संयमाद्वितललोकज्ञानम् । पादसन्धौ संयमान्नितललोकज्ञानम् । जङ्घे संयमात्सुतललोकज्ञानम् । जानौ संयमान्महातललोकज्ञानम् । ऊरौ चित्तसंयमाद्रसातललो-

[1] नासीभ्यां—अ, [2] तारचित्तसं—उ.

कज्ञानम् । कटौ चित्तसंयमात्तलातललोकज्ञानम् । नाभौ चित्तसंयमाद्भूलोकज्ञानम् । कुक्षौ संयमाद्भुवर्लोकज्ञानम् । हृदि चित्तसंयमात् स्वर्लोकज्ञानम् । हृदयोर्ध्वभागे चित्तसंयमान्महर्लोकज्ञानम् । कण्ठे चित्तसंयमाज्जनोलोकज्ञानम् । भ्रूमध्ये चित्तसंयमात्तपोलोकज्ञानम् । मूर्ध्नि चित्तसंयमात् सत्यलोकज्ञानम् । धर्माधर्मसंयमादतीतानागतज्ञानम् । तत्तज्जन्तुध्वनौ चित्तसंयमात् सर्वजन्तुरुतज्ञानम् । संचितकर्मणि चित्तसंयमात् पूर्वजातिज्ञानम् । परचित्ते चित्तसंयमात् परचित्तज्ञानम् । कायरूपे चित्तसंयमादन्यादृश्यरूपम् । बले चित्तसंयमाद्धनुमदादिबलम् । सूर्ये चित्तसंयमाद्भुवनज्ञानम् । चन्द्रे चित्तसंयमात्तारव्यूहज्ञानम् । ध्रुवे तद्गतिदर्शनम् । [1]स्वार्थसंयमात् पुरुषज्ञानम् । नाभिचक्रे कायव्यूहज्ञानम् । कण्ठकूपे क्षुत्पिपासानिवृत्तिः । कूर्मनाड्यां स्थैर्यम् । तारे सिद्धदर्शनम् । कायाकाशसंयमादाकाशगमनम् । तत्तत्स्थाने संयमात्तत्तत्सिद्धयो भवन्ति ॥९२॥

नासाग्रादिकायाकाशान्तसंयमाद्विचित्रसिद्धयो भवन्तीत्याह—**नासाग्र** इति । **नासाग्रे** वायुधारणात् ॥ ४४–१ ॥ **रसनात्** रसनया ॥ ४९–४७ ॥ चन्द्रमण्डलं **विभेद्य** । **त्रिदशाहारं** अमृतं पीत्वा ॥ ४८–९० ॥ **मनसा सह** यो लक्ष्यं पश्यति ॥ ९१ ॥ **तारसंयमात्** तारकचित्तसंयमात् भवतीति सर्वत्रानुवर्तते । **जंघे** जंघायाम् । इत्थंभूतसिद्धिः पुरुषार्थसाधनमिति चेन्न, सिद्धेः पुरुषार्थपरिपन्थित्वात् । न हि स्वातिरेकेण स्वपरशरीरचतुर्दशलोकतद्विषयकज्ञानं वाऽस्ति । तस्मात् मुमुक्षुभिः सिद्धिमार्गो नादर्तव्यः इत्यर्थः ॥

इति सप्तमः खण्डः

---

[1] स्वार्थे—क, अ २.

पञ्चविधप्रत्याहारः

अथ प्रत्याहारः । स पञ्चविधः । विषयेषु विचरतामिन्द्रियाणां बलादाहरणं प्रत्याहारः । यद्यत्पश्यति [1]तत्सर्वमात्मेति प्रत्याहारः । नित्यविहितकर्मफलत्यागः प्रत्याहारः । सर्वविषयपराङ्मुखत्वं प्रत्याहारः । अष्टादशसु मर्मस्थानेषु क्रमाद्धारणं प्रत्याहारः ॥ १ ॥ पादाङ्गुष्ठगुल्फजङ्घाजानूरुपायुमेढ्रनाभिहृदयकण्ठकूपतालुनासाक्षिभ्रूमध्यललाटमूर्ध्नि स्थानानि । तेषु क्रमादारोहावरोहक्रमेण प्रत्याहरेत् ॥ २ ॥

यमनियमासनप्राणायामप्रासंगिकपरमार्थोपदेशतत्प्रतिपन्थिनानाविधसिद्धीः प्रतिपाद्य अथ योगांगप्रकृतप्रत्याहारमाचष्टे— अथेति । स्वस्वविषयतो बलात् । क्रमाद्धारणं, धारणं हारणं संक्रमणं प्रत्याहारः ॥ १ ॥ मर्मस्थानानि कानीत्यत्र पादेति ॥ २ ॥

इत्यष्टमः खण्डः

पञ्चविधाः धारणाः

अथ धारणाः । [2]स पञ्चविधः । आत्मनि मनोधारणं दहराकाशे बाह्याकाशधारणं पृथिव्यप्तेजोवाय्वाकाशेषु पञ्चमूर्तिधारणं चेति ॥

स पञ्चविधः ताः पञ्चविधाः । पञ्चब्रह्म-पञ्चमूर्तिधारणम् ॥

इति नवमः खण्डः

[1] तत्तत्स—अ. [2] सा त्रिविधा—मु.

द्विविधं ध्यानम्

अथ ध्यानम् । तद्द्विविधं सगुणं निर्गुणं चेति । सगुणं मूर्तिध्यानम् । निर्गुणमात्मयाथात्म्यम् ॥

अनात्मापह्नवसिद्धात्ममात्रावशेषो हि आत्मयाथात्म्यम् ॥

इति दशमः खण्डः

समाधिस्वरूपम्

अथ समाधिः । जीवात्मपरमात्मैक्यावस्था त्रिपुटीरहिता परमानन्दस्वरूपा शुद्धचैतन्यात्मिका भवति ॥

तूलाविद्योपाधिको जीवः मूलाविद्योपाधिकः परमात्मा तयोरौपाधिक-विशेषांशापायात् प्रत्यक्परैक्यं यस्यामाभाति सेयं जीवात्मपरमात्मैक्यावस्था निर्विकल्पकरूपिणीत्यर्थः । त्रिपुट्यां सत्यां निर्विकल्पता कुत इत्यत आह—त्रिपुटीति । निर्निकल्पकप्रकृतेः त्रिपुट्यादिविकृतिप्रासत्वात् त्रिपुट्यभावे दुःखरूपा स्यादित्यत आह—परमानन्देति । त्रिपुटीदुःखप्रासनिर्विकल्प-कस्थितेः परमानन्दस्वरूपत्वात् ऐक्यावस्थाया जडत्वं स्यादित्याशङ्क्य अस्य असंप्रज्ञातसमाधिरूपतया शुद्धचैतन्यतामाह—शुद्धेति । अत्र जीवात्मपरमात्मै-क्यावस्थाशब्देन असंप्रज्ञातसमाधिरुच्यते इत्यर्थः ॥

इत्येकादशः खण्डः

इति प्रथमोऽध्यायः

द्वितीयोऽध्यायः

निर्विशेषब्रह्मस्वरूपम्

अथ ह शाण्डिल्यो ह वै ब्रह्मऋषिश्चतुर्षु वेदेषु ब्रह्मविद्यामलभमानः किं नामेत्यथर्वाणं भगवन्तमुपसन्नः पप्रच्छ अधीहि भगवन् ब्रह्मविद्यां येन श्रेयोऽवाप्स्यामीति ॥ १ ॥ स होवाचाथर्वा शाण्डिल्य सत्यं विज्ञानमनन्तं ब्रह्म ॥ २ ॥

अष्टांगयोगच्छलेन स्वात्मतत्त्वं श्रुत्वाऽपि यथावदनधिगततया निष्प्रतियोगिकनिर्विशेषब्रह्ममात्रज्ञानबुभुत्सया शाण्डिल्यः पुनः अथर्वाणं पृच्छतीत्याह—अथेति। वेदेषु अर्थतोऽवधारितेष्वपि निष्प्रतियोगिकब्रह्ममात्रविद्याम्। किंनाम ब्रह्म। प्रपच्छ—किमिति? अधीहि। येन त्वदुपदेशेन ॥ १ ॥ शाण्डिल्येनैवं पृष्टः स होवाच। किं नाम ब्रह्मेति प्रश्नोत्तरं—शाण्डिल्येति। सत्यं विज्ञानमनन्तं ब्रह्म इति तैत्तिरीयके सम्यक् व्याख्यातमेतत् ॥ २ ॥

ब्रह्मणः अनिर्देश्यत्वम्

यस्मिन्निदमोतं च प्रोतं च यस्मिन्निदं संच विचैति सर्वं यस्मिन् विज्ञाते सर्वमिदं विज्ञातं भवति तदपाणिपादमचक्षुःश्रोत्रमजिह्वमशरीरमग्राह्यमनिर्देश्यम् ॥ ३ ॥

यत् सर्वाधिकरणं तदनिर्देश्यमित्याह—यस्मिन्निति। इदं अविद्यापदतत्कार्यजातं यत्र ओतप्रोतभावमेत्य संच विचैति सङ्कोचविकासतां भजति, यन्मात्रज्ञानतः इदं स्वातिरिक्तं नेति विज्ञातं भवति, तदेतत्पाणिपादादिमद्व्यष्टिसमष्ट्यात्मकशरीरापह्नवसिद्धं तत्त्वेन निर्देष्टुमशक्यत्वात् अनिर्देश्यम् ॥ ३ ॥

ब्रह्मणः अवाङ्मानसगोचरत्वम्

यतो वाचो निवर्तन्ते अप्राप्य मनसा सह । यत्केवलं ज्ञानगम्यम् । प्रज्ञा च यस्मात्प्रसृता पुराणी । यदेकमद्वितीयम् । आकाशवत् सर्वगतं सुसूक्ष्मं निरञ्जनं निष्क्रियं सन्मात्रं चिदानन्दैकरसं शिवं प्रशान्तममृतं तत् परं च ब्रह्म । तत्त्वमसि तज्ज्ञानेन हि विजानीहि ॥ ४ ॥

तस्यावाङ्मानसगोचरत्वं ज्ञानैकगम्यत्वं प्रज्ञाजनकत्वं अद्वितीयत्वं वस्तुतः सच्चिदानन्दमात्रत्वं चाह—यत इति । केवलं ज्ञानगम्यं ज्ञानेतरसाधनैरगम्यमित्यर्थः, "नान्यः पन्थाः विद्यतेऽयनाय" इति श्रुतेः । "निर्विकल्पा च चिन्मात्रा वृत्तिः प्रज्ञेति कथ्यते" इति श्रुतिसिद्धा प्रज्ञा पुराणी, आकैवल्यभावस्थायित्वात् । सा यस्मात् प्रसृता विजृम्भिता । यच्चैतन्यमात्रं द्वैतादिविकृतिप्रसक्तौ अद्वितीयमित्यादिविशेषणवत् तदभावे "सन्मात्रं असदन्यत्" इति श्रुतेः यत्सर्वासदपह्नवसिद्धनिष्प्रतियोगिकसन्मात्रमवशिष्यते तत् । तदेव सर्वं तदतिरिक्तं नास्तीति बुध्यस्वेत्यर्थः ॥ ४ ॥

सर्वस्य परमात्मत्वम्

य एको देव आत्मशक्तिप्रधानः सर्वज्ञः सर्वेश्वरः सर्वभूतान्तरात्मा सर्वभूताधिवासः सर्वभूतनिगूढो भूतयोनिर्योगैकगम्यः । यश्च विश्वं सृजति विश्वं बिभर्ति विश्वं भुङ्क्ते स आत्मा । आत्मनि तं तं लोकं विजानीहि ॥ ५ ॥

कथं पुनस्तद्विया सर्वं ज्ञातुं शक्यते तद्ब्रह्मातिरेकेण विश्वकृदीश्वरसत्त्वादित्याशङ्क्य यः स्वाज्ञदृष्ट्या स्वातिरिक्तेश्वरवत् भातः स एव स्वज्ञदृष्ट्या परमात्मतया

अवशिष्यते इत्याह—य इति । यस्यानात्मापह्नवसिद्धात्ममात्रशक्तिः प्रकृतिः प्रधाना मुख्या भवति साक्षित्वेश्वरत्वादिशक्तिस्तु उपसर्जनभूता च भवति सोऽयं आत्मशक्तिप्रधानः । उपसर्जनशक्तिमवष्टभ्य सर्वज्ञ इत्यादि । ईश्वरसाक्षात्कारस्य योगैकसाध्यत्वात् ईश्वरसद्भावलिंगमाह—यश्चेति । "यस्य लिंगं प्रपञ्चं वा स म आत्मा न संशयः" इति श्रुतिसिद्धतटस्थलक्षणेनेश्वरास्तित्वमवगम्य तस्मिन् स्वाङ्गसमर्पितविशेषापाये यो य ईश्वरः साक्षी जीवो जगदिति च व्यपदिष्टः तं तं लोकं निष्प्रतियोगिकब्रह्ममात्रमिति विजानीहि ॥ ५ ॥

गुरूपदेशतः सर्वात्मत्वज्ञानप्राप्तिः

मा शोचीरात्मविज्ञानी शोकस्यान्तं गमिष्यसि ॥ ६ ॥

कथं एवं ज्ञातुं शक्यमिति मा शुचः मदुपदेशमहिम्ना स्वातिरिक्तास्तिताप्रभवशोकान्तब्रह्म भवसीत्याह—मा शोचीरिति ॥ ६ ॥

इति द्वितीयोऽध्यायः

तृतीयोऽध्यायः

ब्रह्मणो वस्तुतः निष्प्रतियोगिकस्वमात्रत्वम्

अथ हैनं शाण्डिल्योऽथर्वाणं पप्रच्छ यदेकमक्षरं निष्क्रियं शिवं सन्मात्रं परं ब्रह्म । तस्मात् कथमिदं विश्वं जायते कथं स्थीयते कथमस्मिल्लीयते । तन्मे संशयं छेत्तुमर्हसीति ॥ १ ॥
स होवाचाथर्वा सत्यं शाण्डिल्य परब्रह्म निष्क्रियमक्षरमिति ॥ २ ॥

ब्रह्मणो निष्प्रतियोगिकस्वमात्रत्वमुक्तं, ततो विश्वं जायते इति च। निष्प्रतियोगिकस्वमात्रत्वे विश्वहेतुत्वं न सम्भवति, विश्वहेतुत्वे निष्प्रतियोगिकत्वं च न सम्भवतीति ब्रह्मातिरिक्तेश्वरौबुभुत्सया शाण्डिल्योऽथर्वाणं पृच्छतीत्याह—अथेति ॥ १ ॥ ब्रह्म तु सन्मात्रप्रकृतिकं तन्निष्प्रतियोगिकस्वप्रकृतिं विना जगज्जन्मस्थितिभंग[1]विकृतितां नैति । वस्तुयाथात्म्याज्ञानतो नितरां संशयाविष्ट-शाण्डिल्यप्रश्नोत्तरं स होवाच । हे शाण्डिल्य यन्मयोक्तं सन्मात्रं परं ब्रह्म निष्प्रतियोगिकं स्वातिरेकेण अस्तीति विश्वसनीयविश्वोत्पादस्थितिभंगका-र्यकारणविक्रियाऽपह्नवसिद्धं परमाक्षरमिति तदेव सत्यम् । तस्य निष्प्रतियोगिकत्वे न हि संशयोऽस्ति स्वाज्ञादिदृष्टिमोहे सत्यसति स्वस्यैकरूपतया स्थितत्वात् ॥२॥

ब्रह्मणो रूपत्रयम्

अथाप्यस्यारूपस्य ब्रह्मणस्त्रीणि रूपाणि भवन्ति निष्कलं सकलं सकलनिष्कलं चेति ॥ ३ ॥

तथा चेद्विश्वकारणता कुत इत्याशङ्क्य पारमार्थिकस्वज्ञस्वाज्ञदृष्टिवैचित्र्यात् निष्प्रतियोगिकनिष्कळमपि ब्रह्म सप्रतियोगिकनिष्कळवत् सकळवत् सकळ-निष्कळवच्च भातीत्याह—अथेति ॥ ३ ॥

निष्कलं ब्रह्म

यत्सत्यं विज्ञानमानन्दं निष्क्रियं निरञ्जनं सर्वगतं सुसूक्ष्मं सर्वतोमुखमनिर्देश्यममृतमस्ति तदिदं निष्कलं रूपम् ॥ ४ ॥

परमार्थदृष्ट्या यत् निष्प्रतियोगिकनिष्कळमित्युक्तं तत् तिष्ठतु, तदवगतेः सप्रतियोगिककलनाऽपह्नवपूर्वकत्वात,

चिन्मात्रमेव चिन्मात्रमखण्डैकरसं रसम् ।
सर्ववर्जितचिन्मात्रं ब्रह्ममात्रमसन्न हि ॥

[1] विकृतितामेति—उ.

इत्यादि श्रुतेः । तत्र आदौ स्वज्ञदृष्टिमवष्टभ्य सप्रतियोगिकनिष्कलस्वरूपं विशदयति—यदिति । सत्यज्ञानानन्दाद्युक्तविशेषणानामनृतजडदुःखादिप्रतिषेधकत्वेन सप्रतियोगिकत्वं युज्यते, निष्प्रतियोगिकपक्षे तु तद्दृष्ट्या अपह्नोतव्यविषयसामान्यमस्ति नास्तीति विभ्रमस्याप्यपह्नवं गतत्वात् ॥ ४ ॥

सकलं ब्रह्म

अथास्य या [1]सहजाऽस्ति विद्या मूलप्रकृतिर्माया लोहितशुक्लकृष्णा तया सहजवान् देवः कृष्णपिङ्गलो महेश्वर ईष्टे । तदिदमस्य [2]सकलं रूपम् ॥ ५ ॥

सप्रतियोगिकसकळरूपं स्पष्टयति—अथेति । य एष निष्प्रतियोगिकनिष्कळतया अवशिष्टः स एव स्वाज्ञदृष्ट्या सप्रतियोगिकनिष्कळ इति ख्यातः । स एवाथ स्वाज्ञ[3]दृष्ट्या विकल्पानन्तरं सर्वेश्वरो भवति । अस्येश्वरत्वहेतुः केत्यत आह—येति । स्वाज्ञदृष्टिसहजा या मूलप्रकृतित्वेन प्रकृता त्रिगुणात्मिका मायाऽस्ति तया सहजवान् देवः त्रिगुणयोगतः कृष्णपिङ्गलो महेश्वरः सर्वेश्वरत्वमवलम्ब्य स्वाज्ञदृष्टिप्रसक्तस्वाविद्यापदतत्कार्यजातं ईष्टे । तदिदमस्य सकळं रूपं, ईश्वरस्य निरावृतक्रियाज्ञानेच्छाशक्तिमत्त्वेन स्वदृष्टयेशितव्यस्वाविद्यापदतत्कार्यवैरळ्यात् स्वस्यैव निष्प्रतियोगिकनिष्कळत्वात् अस्य सकळत्वं स्वाज्ञदृष्टिनिष्ठमेवेत्यर्थः ॥ ५ ॥

सकलनिष्कलं ब्रह्म

अथैष ज्ञानमयेन तपसा चीयमानोऽकामयत बहु स्यां प्रजायेयेति । अथैतस्मात् तप्यमानात् सत्यकामात् त्रीण्यक्षराण्यजायन्त ।

[1] सहजाऽस्त्यविद्या—मु.
[2] सकलनिष्कल—अ २. सकलनिष्कलं—क. सकलं निष्कलं—अ, अ १.
[3] दृष्टिविकल्पान्तरं—उ.

तिस्रो व्याहृतयस्त्रिपदा गायत्री त्रयो वेदास्त्रयो देवास्त्रयो वर्णास्त्रयोऽग्नयश्च जायन्ते । योऽसौ देवो भगवान् सर्वैश्वर्यसंपन्नः सर्वव्यापी सर्वभूतानां हृदये संनिविष्टो मायावी मायया कृतिः स ब्रह्मा स विष्णुः स रुद्रः स इन्द्रः स सर्वे देवाः सर्वाणि भूतानि स एव पुरस्तात् स एव पश्चात् स एवोत्तरतः स एव दक्षिणतः स एवाधस्तात् स एवोपरिष्टात् स एव सर्वम् । अथास्य देवस्यात्मशक्तिक्रीडस्य भक्तानुकम्पिनो दत्तात्रेयरूपा सुरूपा तनूरवासा इन्दीवरदलप्रख्या चतुर्बाहुरघोरापापकाशिनी । तदिदमस्य सक[1]लनिष्कलं रूपम् ॥ ६ ॥

अर्धस्वज्ञदृष्टिमवष्टभ्य सकळस्वरूपप्रपञ्चनपूर्वकं सकळनिष्कळस्वरूपमाचष्टे यथेति । आद्यन्तयोः सकळं मध्ये निष्कळं यत्र दृश्यते तत् सकळनिष्कळस्वरूपम् । तत्रादौ ईश्वर एकोऽपि तपसा क्षीयमानो वर्धमानः सन् बहु स्यां प्रजायेय इति बहुभु[भ]वनसङ्कल्पं कृतवान् । एवं सत्यसङ्कल्पात्तस्मादीश्वरात् अकारोकारमकारभेदेन त्रीण्यक्षराण्यजायन्त— इति सर्वत्र वचनानुरोधेन ऊह्यम् । भूरादिभेदेन तिस्रो व्याहृतयः, पदत्रयात्मिका गायत्री, ऋगादिभेदेन त्रयो वेदाः, ब्रह्मादिभेदेन त्रयो देवाः, ब्राह्मणादिभेदेन त्रयो वर्णाः, गार्हपत्यादिभेदेन त्रयोऽग्नयश्च जायन्ते । सोऽयमीश्वरो निरवधिकविभूतिसम्पन्नः स्वेन अन्तर्यामिरूपेण सर्वव्यापी सर्वभूतहृदासनः । तस्याकृतिमत्वं मायया, न स्वतः, स्वतो निराकृतित्वात् । ब्रह्मादिरूपेणापि स एव वर्तते । दिग्विदिगधश्चोर्ध्वं चापि स एव । दत्तात्रेयरूपेणापि स एव वर्तते । सुरूपा तनूः अवासाः इति विशेषणतोऽस्या अवधूतत्वमवगम्यते, "जडभरतदत्तात्रेयरैवतक-ऋभुनिदाघ" इति श्रुतेः । एवं अर्धस्वज्ञदृष्ट्यनुरोधेन सकळनिष्कळस्वरूपं प्रतिपादितमित्यर्थः ॥

इति प्रथमः खण्डः

---

[1] सकलमकलं—अ २. सकलंक—अ, अ १, क.

सन्मात्रस्य परब्रह्मत्वनिर्वचनम्

अथ हैनमथर्वाणं शाण्डिल्यः पप्रच्छ भगवन् सन्मात्रं चिदानन्दैकरसं कस्मादुच्यते परं ब्रह्मेति ॥ १ ॥ स होवाचाथर्वा यस्माच्च बृहति बृंहयति च सर्वं तस्मादुच्यते परं ब्रह्मेति ॥ २ ॥

ब्रह्मणः सन्मात्रत्वं परब्रह्मत्वं आत्मत्वं महेश्वरत्वं च कथमिति शाण्डिल्योऽथर्वाणं पृच्छति, भगवानथर्वाऽपि तत्प्रश्नपूरणं कृतवानित्याह— अथेति । निष्प्रतियोगिकसच्चिदानन्दमात्रं कस्मात् ॥ १–८ ॥

सन्मात्रस्य आत्मत्वनिर्वचनम्

अथ कस्मादुच्यते आत्मेति ॥ ३ ॥ यस्मात् सर्वमाप्नोति सर्वमादत्ते सर्वमत्ति च तस्मादुच्यते आत्मेति ॥ ४ ॥

सन्मात्रस्य महेश्वरत्वनिर्वचनम्

अथ कस्मादुच्यते महेश्वर इति ॥ ५ ॥ यस्मान्महत ईशः शब्दध्वन्या चात्मशक्त्या [1]तस्मादुच्यते महेश्वर इति ॥ ६ ॥

सन्मात्रस्य दत्तात्रेयत्वनिर्वचनम्

[2]अथ कस्मादुच्यते दत्तात्रेय इति ॥ ७ ॥ यस्मात् सुदुश्चरं तपस्तप्यमानायात्रये पुत्रकामायातितरां तुष्टेन भगवता ज्योतिर्मये-

[1] सर्वमीष्टे तस्मा—क.

[2] ७, ८, ११, १२, १३,—एवमङ्कितवाक्यानि मुद्रित(क)कोशयोरेव दृश्यन्ते.

नात्मैव दत्तो यस्माद्धानसूयायामत्रेस्तनयोऽभवत्तस्मादुच्यते दत्तात्रेय इति ॥ ८ ॥

निरुक्तिवेदनफलम्

अथ योऽस्य निरुक्तानि वेद स सर्वं वेद ॥ ९ ॥ अथ यो ह वै विद्यैनं [1]परमुपास्ते सोऽहमिति स ब्रह्मविद्भवति ॥ १० ॥ अत्रैते श्लोका भवन्ति—

दत्तात्रेयं शिवं शान्तमिन्द्रनीलनिभं प्रभुम् ।
आत्ममायारतं देवमवधूतं दिगम्बरम् ॥ ११ ॥
भस्मोद्धूलितसर्वाङ्गं जटाजूटधरं विभुम् ।
चतुर्बाहुमुदाराङ्गं प्रफुल्लकमलेक्षणम् ॥ १२ ॥
ज्ञानयोगनिधिं विश्वगुरुं योगिजनप्रियम् ।
भक्तानुकम्पिनं सर्वसाक्षिणं सिद्धसेवितम् ॥ १३ ॥
एवं यः सततं ध्यायेद्देवदेवं सनातनम् ।
स मुक्तः सर्वपापेभ्यो निःश्रेयसमवाप्नुयात् ॥ १४ ॥
इत्यों सत्यमित्युपनिषत् ॥ १५ ॥

उक्तनिरुक्तत्रयवेदनफलमाह—अथेति । ब्रह्मणः सर्वव्यापकत्वेन ब्रह्मवेदनतः सर्ववित्त्वं स्यादित्यर्थः ॥ ९ ॥ य एतद्ब्रह्म विदित्वोपास्ते स तदेव भवतीत्याह—अथेति । विद्य विदित्वेत्यर्थः ॥ १०–१३ ॥ य एवमुक्तप्रकारेण सदा देवदेवं परमात्मानं अयमहमस्मीति विदित्वा ध्यायेत्

[1] दत्तमु—क.

स निःश्रेयसं तत्पदमाप्नुयात् ॥ १४ ॥ यत् सत्यमोङ्कारात्प्रविद्योतमानं तदेव भवतीत्यर्थः ॥ इत्युपनिषच्छब्दः शाण्डिल्योपनिषत्समाप्त्यर्थः ॥ १५ ॥

इति द्वितीयः खण्डः समाप्तः, तृतीयोऽध्यायश्च ॥

श्रीवासुदेवेन्द्रशिष्योपनिषद्ब्रह्मयोगिना ।
शाण्डिल्योपनिषद्व्याख्या लिखिता ब्रह्मगोचरा ।
शाण्डिल्योपनिषद्व्याख्याग्रन्थस्तु त्रिशतं स्मृतः ॥

इति श्रीमदीशाद्यष्टोत्तरशतोपनिषच्छास्त्रविवरणे अष्टपञ्चाशत्संख्यापूरकं
शाण्डिल्योपनिषद्विवरणं सम्पूर्णम्

हंसोपनिषत्

पूर्णमदः—इति शान्तिः

ब्रह्मविद्यासाधनहंसविद्याया अतिगुह्यत्वम्

गौतम उवाच—

भगवन् सर्वधर्मज्ञ सर्वशास्त्रविशारद ।
ब्रह्मविद्याप्रबोधो हि [1]येनोपायेन जायते ॥ १ ॥

सनत्कुमार उवाच—

विचार्य सर्व[2]धर्मेषु मतं ज्ञात्वा पिनाकिनः ।
पार्वत्या कथितं तत्त्वं शृणु गौतम तन्मम ॥ २ ॥
अनाख्येयमिदं गुह्यं [3]योगिने कोशसंनिभम् ।
हंसस्याकृतिविस्तारं मुक्तिमुक्तिफलप्रदम् ॥ ३ ॥

हंसाख्योपनिषत्प्रोक्तनादालिर्यत्र विश्रमेत् ।
तदाधारं निराधारं ब्रह्ममात्रमहं महः ॥

इह खलु हंसोपनिषदः शुक्लयजुर्वेदप्रविभक्तत्वेन ईशावास्यबृहदारण्यकादौ य उपोद्घातः स एव अत्रापि द्रष्टव्यः । सनत्कुमारगौतमप्रश्नप्रतिवचनरूपेय-

[1] केनो—उ, मु. [2] वेदे—उ, मु. [3] योगिनां—उ, मु.

माख्यायिका विद्यास्तुत्यर्था। तत्रादौ गौतमः सनत्कुमारं ब्रह्मज्ञानं तदुपायं च पृच्छतीत्याह—भगवन्निति। हे भगवन् षड्गुणैश्वर्यसम्पन्न, सर्वधर्मज्ञ, सर्वशास्त्रविशारद, इति सम्बोधनत्रयेण त्वं सर्वज्ञोऽसि सर्वज्ञेश्वरभावारूढत्वात् येनोपायेन मे झटिति अनायासेन ब्रह्मविद्याप्रबोधो हि निर्विशेषब्रह्ममात्रज्ञानं जायते तदुपायं कृपया उपदिश ॥ १ ॥ इति गौतमेन पृष्टः सनत्कुमारो मुनिः श्रोतृबुद्धिप्ररोचनाय वक्ष्यमाणविद्यां स्तुवन्निदमुवाचेत्याह—सनत्कुमार उवाचेति। हे गौतम सर्वेशितुः पिनाकिनो यन्मतं स्वातिरिक्तसर्वकलनाविरळं ब्रह्म स्वमात्रमिति तदेव तन्मुखतो ज्ञात्वा तदनुरोधेन स्वातिरिक्तासदपह्नवसिद्धं ब्रह्म सन्मात्रमिति धारणार्हो धर्मो येषु वेदान्तेषु धार्यते तेषु सर्वधर्मेषु ईशाद्यष्टोत्तरशतवेदान्तेषु सम्यक् विचार्य निश्चित्य लोकमात्रा ब्रह्मविद्यारूपया पार्वत्या यत् ब्रह्मतत्त्वं मे केवलकृपया कथितं यत् पिनाकिनोऽभिमतं तन्मतं सावधानमना भूत्वा शृणु, श्रुत्वा सम्यगवधारयेत्यर्थः ॥ २ ॥ तत् कीदृशमित्यत आह—अनाख्येयमिति। यत् मया वक्ष्यमाणं ब्रह्मविज्ञानं तदिदं गुह्यं अयोगिषु गोपनीयमित्याह—अनाख्येयमिति। कदाऽपि न वक्तव्यमित्यर्थः। अनधिकारिषु ख्यापने महाननर्थो भवेदित्यत्र—

अज्ञस्यार्धप्रबुद्धस्य सर्वं ब्रह्मेति यो वदेत्।
महानरकसाम्राज्ये स तेन विनियोजयेत् ॥ इति,
न बुद्धिभेदं जनयेदज्ञानां ज्ञानसंगिनाम् ॥

इति च श्रुतिस्मृती मानम्। तर्हि इदं कस्मै आख्येयमित्यत आह—योगिन इति। स्वाश्रमाचारपुरस्सरं ब्रह्मविद्योपयोगसाधनयुक् योगी तस्मै योगिने देशिकेन इदं वक्तव्यमित्यर्थः। तत् कीदृशं किंफलदमित्यत्राह—हंसस्येति। स्वमात्रप्रबोधेन स्वातिरिक्तकलनां हन्ति अपह्नवं करोतीति हंसः परमात्मा तस्याकृतिविस्तारो विश्वविराडोत्रादिः तं तदेव ब्रह्म ज्ञानरत्नकोशसंनिभं स्वातिरिक्तमुक्तेः स्वाज्ञताया मुक्तिः अपह्नवः ततो यत् फलं स्वमात्रावस्थान-लक्षणकैवल्यमवशिष्यते तत्फलप्रदं, मया उच्यमानं ज्ञानयोगं शृण्विति पूर्वेण अन्वयः ॥ ३ ॥

हंसविद्याऽधिकारिस्वरूपम्

अथ हंसपरमहंसनिर्णयं व्याख्यास्यामो ब्रह्मचारिणे [1]दान्ताय गुरुभक्ताय हंसहंसेति सदा ध्यायन् ॥ ४ ॥

हंसस्य आकृतिविस्तारः तदधिकारी वा कीदृशः किं तद्विद्याफलं किं तत्साधनमित्याकांक्षायां योग्याधिकारिणमुपलभ्य मुनिः एतत् सर्वमाचष्टे—**अथेति**। **अथ** यथोक्ताधिकारसम्पत्त्यनन्तरं क्रमेण जाग्रदाद्यवस्थात्रयं हत्वा तुर्यपदं गच्छतीति **हंसः** व्यष्टितुर्यः प्रत्यगात्मा, स एव परमः सर्वोत्कृष्टः समष्ट्यवस्थात्रयं हत्वा तत्तुर्यपदं गच्छतीति **परमहंसः** तयोः हंसपरमहंसयोः प्रत्यक्परयोः **निर्णयं** याथात्म्यं प्रत्यक्परविभागैक्यासहब्रह्ममात्रज्ञानं **विस्पष्टमाख्यास्यामः** वक्ष्यामः। कस्मा अधिकारिणे वक्ष्यसीत्यत्र हंसः सोऽहमित्यर्थे हंसहंसेत्यावृत्तिः। यः **सदैवं** हंसः सोऽहमित्यनुसन्धानपूर्वकं तत्स्वरूपं **ध्यायन्** ब्रह्मणि चरति ब्रह्मनिष्ठामारोढुमिच्छति स ब्रह्मचारी तस्मै **ब्रह्मचारिणे दान्ताय** वशीकृतकरणग्रामाय परमार्थोपदेष्टृगुरुभक्ताय गुरूपदिष्टार्थश्रद्धाळवे तुभ्यं व्याख्यास्याम इति पूर्वेणान्वयः ॥ ४ ॥

हंसस्वरूपं तज्ज्ञानफलं च

सर्वेषु देहेषु व्याप्य वर्तते यथा ह्यग्निः काष्ठेषु तिलेषु तैलमिव। तं विदित्वा न मृत्युमेति ॥ ५ ॥

स हंसः किंपरिच्छिन्नः कुत्रासनमर्हतीत्यत्र सदृष्टान्तमाह—**सर्वेष्विति**। **यथा ह्यग्निः काष्ठेषु** स्वावारकेषु स्वदाह्येषु च व्याप्य वर्तते **तिलेषु तैलमिव** च तथा स्वाज्ञदृष्टिप्रसक्तसर्वेषु ब्रह्मादिस्तम्बान्तदेहेषु सत्सु तदारोपापवादाधिकरणजीवेशप्रत्यक्परररूपेण **व्याप्य वर्तते**, स्वज्ञानेन स्वाज्ञानहानौ सत्यां

[1] शान्ताय दा—उ, मु.

व्याप्यत्वसापेक्षव्यापकत्ववैरळ्यात् निष्प्रतियोगिकब्रह्ममात्रमवशिष्यते । तज्ज्ञान-फलमाह—तमिति । तमेवं विदित्वा वेदनसमकालं मृत्युं स्वातिरिक्तास्तितामोहं नैति विद्वान् । स्वातिरिक्तापह्नवसिद्धब्रह्ममात्रतया अवशिष्यते इत्यर्थः ॥ ९ ॥

हंसज्ञानोपायो योगः

गुदमवष्टभ्याधाराद्वायुमुत्थाप्य स्वाधिष्ठानं त्रिः प्रदक्षि-णीकृत्य मणिपूरकं गत्वा अनाहतमतिक्रम्य शिश्नाभे पार्श्वे भवतः । [1]विशुद्धौ प्राणान्निरुध्याज्ञामनुयायन् ब्रह्मरन्ध्रं ध्यायन् त्रिमात्रोऽहं-मित्येवं सर्वदा पश्यत्यनाकारश्च भवति ॥ ६ ॥ एषोऽसौ परमहंसो भानुकोटिप्रतीकाशो येनेदं सर्वं व्याप्तम् ॥ ७ ॥

एवं सम्यज्ज्ञानावाप्तौ उपायः कः इत्याकांक्षायां तदुपायत्वेन योगमुपदि-शति—गुदमवष्टभ्येति । तं विदित्वा न मृत्युमेतीत्युक्तितो वेदनादेव मृत्यु-ग्रासब्रह्मप्राप्तिरवगम्यते । केषां चिन्मलिनचित्तानां मुमुक्षायां सत्यामपि केवलवेदान्तश्रवणतो मृत्युग्रासब्रह्मज्ञानं नोदेति । तत्रान्तरायो मलिनचित्तता । योगाख्यशुद्धवारिणा यदि सा शोधिता तदा पूर्वश्रुतज्ञानमेव स्वगताभासतां विहाय सम्यज्ज्ञानपदवीं भजति । ततः सम्यज्ज्ञानसमकालं मृत्युग्रास-ब्रह्मप्राप्तिरिष्यते । तस्मात् ब्रह्मप्राप्तिहेतुज्ञानसाधनत्वेन अष्टांगयोगोऽभ्यसनीयः । कोऽयमष्टांगयोगः? यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधयः इत्यष्टां-गानि गुरुसंनिधौ यथावदभ्यस्य अथ समाध्यर्थं जनसम्बाधरहितगुहां प्रविश्य योगी सिद्धासनारूढः सन् वामगुल्फेन गुदमवष्टभ्य नासिकाभ्यां वक्त्रेण वा वायुमापूर्य कुम्भयित्वा सम्यगाकुञ्चनेन मूलाधाराद्वायुमुत्थाप्य प्राणापान-योरैक्यं कृत्वा अथ मूलाधारत्रिकोणगतवह्निप्राणापानान् मिळित्वा कुण्डलिनीं बोधयित्वा तया मूलाधारस्थसुषुम्नाकवाटब्रह्मग्रन्थिं विभिद्य चतुर्दळयुक्तं

[1] विशुद्धे—अ, अ १, अ २, क.

मूलाधारचक्रं प्रविश्य विराजं तत्तुर्यं वा ध्यात्वा अथ स्वाधिष्ठानं षड्दलशोभितं त्रिः प्रदक्षिणीकृत्य अथ दशारशोभितं मणिपूरकं गत्वा अनाहतचक्रं द्वादशदलं तन्मूलस्थविष्णुग्रन्थिं विभिद्य अनाहतचक्रमध्ये सूत्रं तत्तुर्यं वा ध्यात्वा तत्र निर्विकल्पसमाधिमेत्य, अथ अनाहतमतिक्रम्य, अथ विशुद्धिचक्रं षोडशदलं, तदधोभागे शिश्नाभे पार्श्वे भवतः विशुद्धचक्राधोभागे लम्बमानशिश्नतुल्यमांसखण्डे भवतः, "य एषः स्तन इवावलम्बते । सेन्द्रयोनिः" इति श्रुत्यन्तरात् । तत्पार्श्वस्थमार्गद्वयं विहाय तन्मांसखण्ड-मध्यमार्गेण विशुद्धिचक्रं प्रविश्य तत्र विशुद्धौ विशुद्धिचक्रे प्राणान्निरुध्य अथ भ्रूमध्ये द्विदलाढ्यं आज्ञाचक्रं तन्मूलस्थरुद्रग्रन्थिं विभिद्य आज्ञाचक्रं प्रविश्य तन्मध्ये बीजं तत्तुर्यं वा अनुयायन् ध्यायन् निर्विकल्पकसमाधिमेत्य, अथ चन्द्रसूर्याग्नैक्यसञ्जातामृतमास्वाद्य अजरामरपिण्डो योगी सहस्रारशोभि ब्रह्मरन्ध्रं प्रविश्य, तत्रत्यत्रिमात्रारोपाधिकरणतुर्यस्त्रिमात्रोऽहं, यद्वा त्रिपञ्चमात्रा यत्रापह्नवं भजति तत्तुर्यतुर्यं वाऽहमस्मीति यदि सर्वदा पश्यति तदा योगी त्रिमात्राधिकरणकिञ्चित्साकारवत् तुर्यो वा, अनाकारवत् तुर्यतुर्यो वा भवति । तुर्यतुर्यस्य निष्प्रतियोगिकत्वख्यापकः चशब्दः ॥ ६ ॥ यः तुर्यतुरीयत्वेन उक्तः एषोऽसौ परमहंसः परमात्मा स्वांशजतुर्याभेदेन भानुकोटिप्रतीकाशः-युगपदुदितानन्तकोटिभानुसदृशप्रकाशः येन तुर्यप्रकाशेन इदं सर्वं जगत् व्याप्तं कबळितम् ॥ ७ ॥

हृत्पद्मे हंसभावनया तुर्यात्मदर्शनम्

तस्याष्टधा वृत्तिर्भवति । पूर्वदले पुण्ये मतिः । आग्नेये निद्रालस्यादयो भवन्ति । याम्ये क्रौर्ये मतिः । नैर्ऋते पापे मनीषा । वारुण्यां क्रीडा । वायव्यां गमनादौ बुद्धिः । सौम्ये रतिप्रीतिः । ईशान्ये द्रव्यादानम् । मध्ये वैराग्यम् । केसरे जाग्रदवस्था । कर्णिकायां स्वप्नम् । लिङ्गे सुषुप्तिः । पद्मत्यागे तुरीयम् ।

यदा[1]हंसे नादो विलीनो भवति तत् तुरीयातीतम् ॥ ८ ॥ अथो नाद आधाराद्ब्रह्मरन्ध्रपर्यन्तं शुद्धस्फटिकसंकाशः स वै ब्रह्म परमात्मेत्युच्यते ॥ ९ ॥

तस्यैव पुनर्व्यष्टिप्रपञ्चारोपाधिकरणजीवभावमापन्नस्य अष्टधा अष्टप्रकारा वृत्तिर्भवति । कथमित्यत्र—तदधिष्ठेयं हृत्पद्मं द्वादशदळयुक्तं इत्युक्तम् । तत्र दळचतुष्टयं हंसास्पृश्यं, शिष्टाष्टदळं व्यवहारयोग्यं भवतीति कृत्वा तत्प्रकार उच्यते । तत्र हंसः प्राणोपाधिकजीवः यदा पूर्वदळे प्रविशति तदा पुण्ये कर्मणि मतिः भवति । यदा आग्नेयदळे प्रविशति तदा निद्रालस्यादयो भवन्ति । यदा याम्यदळे प्रविशति तदा क्रौर्ये कर्मणि मतिर्जायते । यदा नैर्ऋते दळे प्रविशति तदा पापे कर्मणि कर्तुं मनीषा उदेति । यदा वारुण्यां दिशि विद्यमानदळे प्रविशति तदा क्रीडाविनोदमतिर्भवति । वायव्यां दिशि विद्यमानदळे यदा प्रविशति तदा चलनगमनादौ बुद्धिः उदेति । यदा सौम्ये दळे प्रविशति तदा विद्वदविदुषोः आत्मानात्मरतिप्रीतिः उदेति । यदा ईशान्ये दळे प्रविशति तदा इहामुत्रोपयोगिद्रव्यादानमतिः जायते । यदा दळानां मध्ये प्रविशति तदा स्वातिरिक्तविषये वैराग्यमुदेति । यदा तत्केसरे सञ्चरति तदा जाग्रदवस्था भवति । तदानीमहंकृतिः पूर्णविकासतामेति । यदा तत्कर्णिकायां सञ्चरति तदा स्वप्नं पश्यति । तदानीमहंकृतेः अर्धविकासो भवति । तदन्तः सुषिरं लिङ्गं तत्र यदा प्रविशति तदा सुषुप्तिः भवति । यथोक्तलक्षणपञ्चत्यागे तुरीयं तत्साक्षात्कारो भवति । तदानीं हंसः प्रत्यगभिन्नपरमात्मतया अवशिष्यते । यदा हंसे प्रत्यगभिन्नपरमात्मनि नादोऽर्धमात्रात्मको विलीनो भवति तदा स्वाधिष्ठेयगुणसाम्यादिप्रपञ्चवैरळ्यात् तन्निरूपिताधिष्ठानताविरळं निरधिष्ठानं तुरीयातीतं निष्प्रतियोगिकब्रह्ममात्रं अवशिष्यते ॥ ८ ॥ एवं भावनाविशिष्टयोगिनः स्वदेहे तुर्यात्मा प्रकाशत इत्याह—अथो इति । अथो निर्विकल्पकसमाधिसिद्ध्यनन्तरं योगिनो हृदये नादो

[1] हंसो नादे—अ, अ १, उ.

गुणसाम्यासंगचिद्धातुः तुर्यः आधारगत मूलाधारमारभ्य ब्रह्मरन्ध्रपर्यन्तं तुर्यस्वरूपं शुद्धस्फटिकसङ्काशं निर्दुष्टस्फटिकाचलवत् शुक्लतेजोमयं ब्रह्म स वै नादावभासकपरमात्मेत्युच्यते ॥ ९ ॥

अजपाहंसमन्त्रजपप्रकारः

अथ हंस ऋषिः । अव्यक्तगायत्री छन्दः । परमहंसो देवता । हं बीजम् । सः शक्तिः । सोऽहं कीलकम् ॥ १० ॥ षट्संख्यया अहोरात्रयोरेकविंशतिसहस्राणि षट्छतान्यधिकानि भवन्ति । सूर्याय सोमाय निरञ्जनाय निराभासायातनुसूक्ष्म प्रचोदयादिति ॥ ११ ॥ अग्नीषोमाभ्यां वौषट् हृदयाद्यङ्गन्यास-करन्यासौ भवतः ॥ १२ ॥ एवं कृत्वा हृदये हंसमात्मानं ध्यायेत् ॥ १३ ॥

इत्थंविधतुर्यसाक्षात्कारात्ममन्त्रस्य ऋषिछन्दोदेवतांऽगन्यासध्यानसहित-जपप्रकार उच्यते । अथ शयनादुत्थानानन्तरमहोरात्रगणनीयश्वाससंख्यया मुमुक्षुभिः अजपाऽनुसन्धानं कर्तव्यम् । तत उच्छ्वासनिश्वास एव आत्ममन्त्र उच्यते । निश्वास एव सकारस्त्वंपदार्थः । उच्छ्वास एव सबिन्दुकवियद्बीजं हमिति तत्पदार्थः । पुनःपुनः तयोर्योग एव असिपदार्थः ॥

सकारः खेचरी प्रोक्तस्त्वंपदं चेति निश्चितम् ।
हकारः परमेशः स्यात्तत्पदं चेति निश्चितम् ।
सकारो ध्यायते जन्तुः हकारो हि भवेत् ध्रुवम् ॥

इति श्रुतेः । अथ अजपाऽऽत्ममन्त्रस्य हंसः प्रत्यगात्मैव ऋषिः । अव्यक्त-गायत्री छन्दः । परमहंसः परमात्मा देवता । हं बीजम् । सः

शक्तिः । सोऽहं कीलकम् । हंसात्मसाक्षात्कारार्थे विनियोगः । हंसाग्न्यादि-षडंगन्यासः । ध्यानम्—

गमागमस्थं गमनादिशून्यं चिद्रूपमेकं परमाद्वितीयम् ।
ध्यायन्ति ये सर्वजनान्तरस्थं नमामि हंसं परमात्मरूपम् ॥

इति ॥

लमित्यादि पञ्चपूजा । सोऽहमिति मन्त्रः । निश्वासोच्छ्वासावर्तनमेव हि जपः ॥ १० ॥ षट्संख्याकाः षडाधारदेवता गणेशाद्यः जपसंख्याकर्तारो भवन्ति । अहोरात्रविभक्तश्वाससंख्या निगद्यते । अहोरात्रयोरेकविंशतिसहस्राणि षट्छतान्यधिकानि भवन्ति । दिने दिने षट्छताधिकैकविंशतिसहस्रसंख्यया निश्वासोच्छ्वासाः सोऽहं सोऽहमिति जपन्ति । अजपां विशिष्टां चतुर्धा विभज्य तत्राद्यो भागः विराडात्मने सूर्याय समर्पयेत् । द्वितीयो भागः सूत्रभावमापन्नाय सोमाय प्रचोदयात् समर्पयेत् । तथा तृतीयो भागः अतनुसूक्ष्माभिधविराट्सूत्रारोपाधिकरणतया स्वाधिष्ठेयनिरञ्जनाय सर्वेश्वराय प्रचोदयात् विनियोजयेत् । अवशिष्टतुर्यभागस्तु स्वातिरिक्तस्थूलसूक्ष्मबीजाभासतदध्यक्षविराडादिगतहेयांशापवादाधिकरणतया निराभासाय प्रत्यगभिन्न-परमात्मने अतनुसूक्ष्मादिप्रपञ्चं प्रचोदयात् विलापयेत् ॥ ११ ॥ अग्नीषोमाभ्यां वौषट् हृदयाद्यङ्गन्यासकरन्यासौ भवतः इति । हंसौं इति दीर्घभाक् षट्पर्यायेषु, हंसौं इति पञ्चमपर्यायस्थाने तदेव, नोचेदग्नीषोमाभ्यां वौषडिति वा कुर्यादित्यर्थः ॥ १२ ॥ एवमंगन्यासादिकं कृत्वैव हृदये हंसमात्मानं प्रत्यगभिन्नं ब्रह्मास्मीति ध्यायेत् ॥ १३ ॥

सगुणहंसध्यानेन परमात्मदर्शनम्

अग्नीषोमौ पक्षावोंकारः शिर उकारो बिन्दुस्त्रिणेत्रं मुखं रुद्रो रुद्राणी चरणौ द्विविधं कण्ठतः कुर्यादित्युन्मनाः

अजपोपसंहार[1]इत्यभिधीयते ॥ १४ ॥ एवं हंसवशान्मनो विचार्यते ॥ १५ ॥

एवं निर्गुणध्यानाशक्तस्य सगुणध्यानप्रकार उच्यते—अग्नीषोमाविति। वैराजभावमापन्नहंसस्य अग्नीषोमौ सूर्याचन्द्रमसौ पक्षौ बाहू भवतः। अस्य शिरस्तु ओङ्कारः। अस्य त्रिणेत्रं सबिन्दुकाकारोकारमकाराः। अस्य मुखं रुद्रः। अस्य चरणौ पादौ रुद्राणी गंगा च भवति। एवं सगुणनिर्गुणभेदात् द्विविधं हंसध्यानं कण्ठतः कण्ठरवेण मुमुक्षुः निश्शङ्कं कुर्यात्। इत्येवं प्रकारद्वयध्यानेन उद्गतं तिरस्कृतं मनः तत्कार्यं यस्य सोऽयमुन्मनाः मुनिः। अजपा हंसविद्या तस्या उपसंहारः विलापनं यत्र प्रत्यगभिन्नपरमात्मनि सोऽयं अजपोपसंहारः परमात्मेत्यभिधीयते ॥ १४ ॥ एवं सोऽहमिति हंसध्यानवशात् हंसातिरेकेण मनस्तत्कार्यं नेति नेति इति विचार्यते निर्धार्यते ॥ १५ ॥

अजपाजपेन दशनादानुभवः

[2]अस्यैव जपकोट्या नादमनुभवति। स च दशविधो जायते। चिणिति प्रथमः। चिणिचिणीति द्वितीयः। घण्टानादस्तृतीयः। शङ्खनादश्चतुर्थः। पञ्चमस्तन्त्रीनादः। षष्ठस्तालनादः। सप्तमो वेणुनादः। अष्टमो भेरीनादः। नवमो मृदङ्गनादः। दशमो मेघनादः ॥ १६ ॥

यदि मुमुक्षुः सगुणनिर्गुणध्यानाशक्तो भवति तदा तूष्णीमहोरात्रनिर्वर्त्यनिश्वासोच्छ्वासरूपेण केवलाजपात्मकहंसमन्त्रजपं कुर्वतः स्वानुभवजन्यनादेयत्तां तदनुसन्धानावान्तरफलं परमफलं चाह—अस्यैवेति। एवं यथोक्तस्य अस्यैव

[1] इत्याचक्षते—क, अ २. [2] तस्यै—क. सएव—मु.

हंसमनोर्जपकोट्या कोटिसंख्याजपप्रभावेनाऽयं मुमुक्षुः अनाहतचक्रे नादब्रह्म अनुभवति स्वानुभूतिप्रमाणतो जानाति । योऽयमनुभूतो नादः स च दक्षिणकर्णे दशविध उपजायते अभिव्यज्यते । क्रमशः तत्प्रकारमाह— चिणितीति । प्राथमिको नादः चिणितिध्वन्यात्मको भवति । द्वितीयो नादः चिणिचिणीति ध्वन्यात्मकः । तृतीयो नादः घण्टानादसमो भवति । चतुर्थस्तु शङ्खनादवदभिव्यक्तो भवति । पञ्चमस्तु वीणातन्त्रीनादवदभिव्यज्यते । षष्ठः ताळनादनिभो भवति । सप्तमनादस्तु मृस्वरवेणुनादसमानो भवति । भेरीनादतुल्योऽयमष्टमः । मृदङ्गनादनिभोऽयं नवमः । दशमस्तु मेघनादसंनिभः ॥ १६ ॥

केवलदशमनादाभ्यासविधिः

नवमं परित्यज्य दशममेवाभ्यसेत् ॥ १७ ॥

एवं दशविधनादेषु प्रथमादिनवमान्तं परित्यज्य मुमुक्षुः दशममेव अभ्यसेत् ॥ १७ ॥

तत्तन्नादानुभवफलम्

प्रथमे चिञ्चिणीगात्रं द्वितीये गात्रभञ्जनम् ।
तृतीये भेदनं याति चतुर्थे कम्पते शिरः ॥ १८ ॥
पञ्चमे [1]स्रवती तालू षष्ठेऽमृतनिषेवणम् ।
सप्तमे गूढविज्ञानं परा[2]वाचा तथाऽष्टमे ॥ १९ ॥
अदृश्यं नवमे देहं दिव्यं चक्षुस्तथाऽमलम् ।
दशमं च परं ब्रह्म भवेद्ब्रह्मात्मसंनिधौ ॥ २० ॥

[1] स्रवते—अ, क. [2] वाचा—अ.

चिणिति प्राथमिको नादो य उक्तः तस्मिन् प्रथमे नादे यथावदनुभूते तदा स्वस्य चिच्चिणीगात्रं प्रतिभाति । तथा द्वितीये तद्गात्रभञ्जनं भवति । तृतीये तु हृदयं भेदनं याति हृत्पद्मं विकासमेति । चतुर्थे तु स्वशिरः कम्पते—षण्मुखीमुद्राऽऽरूढस्य कुम्भकावस्थायां वायावाज्ञाचक्रं प्रविष्टे शिरः कम्पयतीत्यर्थः ॥ १८ ॥ पञ्चमे तन्त्रिनादेऽभिव्यक्ते स्वतालू स्रवती । षष्ठाख्यतालनादाभिव्यक्तौ चन्द्रसूर्यमण्डलद्वयैक्यसञ्जातामृतनिषेवणममृतास्वादनं भवति । सप्तमवेणुनादाभिव्यक्तौ स्वातिरिक्तजनानां यत् गूढं ब्रह्म तद्विषयक-विज्ञानं जायते । अष्टममेरीनादाभिव्यक्तौ सर्ववेदशास्त्ररूपिण्या परावाचा अयं योगी विजृम्भते, सकलविषयकशास्त्रविज्ञानी सर्वज्ञो भवति ॥ १९ ॥ नावमिकमृदंगनादाभिव्यक्तौ देहं पश्यतामदृश्यं भवति अन्तर्धानादिशक्तिमान् भवति । निर्मलदिव्यचक्षुः त्रिकालज्ञः ईश्वरो भवति । प्रथमादिनवमान्तनाद-तद्भवनानाविधसिद्ध्युपेक्षापूर्वकं दशममेघनादाभिव्यक्तौ ब्रह्मात्मसंनिधौ प्रत्यग-भिन्ने ब्रह्मणि स्वाज्ञादिदृष्टिप्रसक्ततद्गतभेदैक्यकलनापह्नवसिद्धब्रह्म भवेत्, तन्मात्रतया अवशिष्यत इत्यर्थः ॥ २० ॥

मनोलयात् ब्रह्मात्मत्वप्रकाशः

तस्मान्मनो विलीने मनसि गते संकल्पविकल्पे दग्धे पुण्यपापे [1]सदाशिवः शक्त्यात्मा सर्वत्रावस्थितः स्वयंज्योतिः शुद्धो बुद्धो नित्यो निरञ्जनः शान्ततमः प्रकाशयतीति वेदानुवचनं भवतीत्युपनिषत् ॥ २१ ॥

कथं पुनरेवं ब्रह्ममात्रमवशिष्यते स्वातिरिक्तमनस्तत्कार्यसङ्कल्प-पुण्यपापादिसत्त्वादित्यत आह—तस्मादिति । यस्मात् स्वाज्ञानविकल्पितोऽयं मनआदिविकारपूगः तस्मात् स्वज्ञानेन मनो मनसि विलीने निर्मूलभावं

[1] सदाशिवोंश—उ.

गते तत्कार्यसङ्कल्पविकल्पे तत्कार्यपुण्यपापादावपि दग्धे सम्यज्ज्ञानाग्निना भस्मीकृतेऽथ स्वातिरिक्तमनस्तत्कार्यारोपापवादाधिकरणतया (ब्रह्मप्रणवार्थतुर्य-तुर्यतया) सदाशिवः परमेश्वरः तत्तत्पदार्थगतसर्वशक्त्यात्मा सर्वत्र व्यक्ताव्यक्तप्रपञ्चे सच्चिदानन्दात्मना अवस्थितः । जडप्रपञ्चानुयोगतो जडत्वं स्यादित्यत आह—स्वयंज्योतिरिति । स्वाज्ञदृष्टिप्रसक्तजडप्रपञ्चस्य स्वज्ञदृष्ट्या मिथ्यात्वेन तदनुयोगस्यापि तथात्वात् स्वयंज्योतिरात्मा ह्यजडात्मकः । अत एवायं शुद्धः अशुद्धमायावैरळ्यात् । मायाऽपाये तदनुगतस्यापि तथात्वं स्यादित्यत आह—नित्य इति । सत्तामात्रत्वात् । मात्रशब्दस्येतरव्यवच्छेदकत्वेन तत्राज्ञनता स्यादित्यत आह—निरञ्जन इति । सत्तामात्रस्य निष्प्रतियोगिकत्वेने-तररञ्जनता कथं सेद्धुं पारयति? स्वातिरिक्तास्तिताहेतुस्वाज्ञानहेतुतमस्त्वे निष्प्रतियोगिकसत्तामात्रता कुत इत्यत आह—शान्ततमः प्रकाशयतीति । यदवगतिसमकालं स्वाज्ञानतत्कार्यं तमोऽपह्नवपदं भजति सोऽयं शान्ततमः अत एवायं निष्प्रतियोगिकतया प्रकाशयति । अस्मिन्नर्थे "पश्यतेहापि सन्मात्रमसदन्यत्," "ब्रह्मव्यतिरिक्तं न किञ्चिदस्ति," "अतोऽन्यदार्त," "ब्रह्ममात्रमसन्न हि"

सिद्धान्तोऽध्यात्मशास्त्राणां सर्वापह्नव एव हि ।
नाविद्याऽस्तीह नो माया शान्तं ब्रह्मेदमक्रमम् ॥

इत्यादिवेदानुवचनं भवति । इत्युपनिषच्छब्दौ उपनिषत्परिसमाप्त्यर्थौ ॥ २१ ॥

श्रीवासुदेवेन्द्रशिष्योपनिषद्ब्रह्मयोगिना ।
लिखितं स्याद्विवरणं हंसोपनिषदः स्फुटम् ।
हंसोपनिषदो व्याख्या सप्तत्यधिशतं स्मृता ॥

इति श्रीमदीशाद्यष्टोत्तरशतोपनिषच्छास्त्रविवरणे पञ्चदशसंख्यापूरकं
हंसोपनिषद्विवरणं सम्पूर्णम्

विशेषपदसूची

[यत्र पुटसंख्यानन्तरं तिर्यग्रेखायाः परं संख्या वर्तते तत्र तावती पदावृत्तिः बोध्या]

पदम्	पुटसंख्या
अकल्पितः . . .	४२०
अक्षरम् .	१९, ३२, १५६
अखण्डब्रह्मतेजोमण्डलम् .	२८४
अग्निबीजम् . . .	१७१
अग्निमण्डलम् . .	२८४
अंगानि (योगांगानि)	५१, ११९
अजपा	२००, २६४, ३४३, ५६७
अणिमादिसिद्धिः . .	२८०
अणुवम् . . .	४५
अद्वयं ब्रह्म . . .	२
अद्वैतम् . . .	२४४
अद्वैतग्रन्थिः . .	२३१
अधोलिंगम् . .	२६५
अनाख्यम् . . .	३१५
अनात्मा . .	८८ to ९२
अनाहतम्	३१६, ३३०–२, ४२५, ४४२
अनुसन्धानराहित्यम् .	५५
अनेकजीवसद्भावः . .	९७
अन्तःकरणविषयः . .	११९
अन्तःप्रणवनादाख्यो हंसः .	२४०
अन्तर्दृष्टिः .	२, ३, ६–३
अन्तर्यागः . . .	२३४
अन्तर्लक्ष्यम्	३, ८–२, २८१–५, २८२
अपक्वः . - .	३९६
अपरोक्षसिद्धिः . .	५४५
अपानः	२४, १३७–२, १६४, १६५–२, २००, ३४१, ३४२, ५२६, ५२७
अपां स्थानम् . .	३७८
अभिरामः . . .	३५१
अभ्यासः .	३२२–२, ४१५
अमनस्कम्	५–४, २७९, २८७–२, २९४, २९५, २९९

पदम्	पुटसंख्या
अमरोळी	३६९, ३८५
अमात्रम्	२२
अमादृष्टिः	२८४
अमावास्या	१६७, ३२९
अमूर्तनादः	२११
अमूर्तितारकम्	६, २७९–२
अमूर्तिमदमनस्कम्	७
अमृतत्वम्	४
अमृतवर्षिणी	२६४
अमृतस्थानम्	१९५
अयने दक्षिणे	१२५
अयने द्वे	२६०
अरिषट्कम्	४६६
अर्थस्वरूपम्	१७८
अलम्बुसा	१३५, १६२, १६३, १६६, ३४०, ३४१, ४४४, ५०५, ५२६–२
अवधूतः	२००
अवस्थात्रयम्	९६, २२६
अविद्याशबलं ब्रह्म	११७
अव्यक्तम्	११७
अशुद्धम्	२६
अष्टदळपद्मम्	२०७
अष्टांगयोगः	२७३, ५१८
अष्टांगानि	५१८
असंसक्तिः	४९२, ४९४, ४९५
अस्तेयम्	१२९, १९३, १९४–२, ५०४, ५१९
अस्वरम्	२८
अहङ्कारः	११७, ३६५, ३९२
अहिंसा	१२९, १९३–२, ५०४, ५१९
आकाशम्	२९७–२
आकाशस्थानम्	३७९
आग्नेयी	२१६
आचार्यः	९
आत्मतीर्थम्	१६८
आत्ममाया	४८१
आत्मवान्	१४१
आत्मा	३०, ८६, ८७, १८८, ५५१, ५५६–२
आधारम्	१९७, ३३८–२, ४५३, ४५४–२
आधारचक्रमहः	४५४–२
आधारवातरोधः	४५४
	३१८
आधिभौतिकम्	३१८
आन्तरम्	५१९
आयामः	३१
आरम्भः	३६७, ५१५–२

पदम्	पुटसंख्या
आराधनम्	१२९
आर्जवम्	१२९, १५३, १५४, ५०४, ५१९
आलस्यम्	५५, ३१५
आसनम्	३७, ५२, १२८, १५३, १९६, ३०७, ३३७, ३५९, ३६८, ५०३, ५१७
आसननियमः	२७५
आस्तिक्यम्	१२९, १५६ १५७, ५०४, ५२०
आहवनीयः	२५०
आज्ञाचक्रम्	३३०–२
आज्ञा	४२६, ४४२
इडा	४०, १३५, १६२, १६३, १६४, १६६, १९९, ३४०, ३४१, ३५७, ४४३, ४५०, ५०६, ५२५
इडादिदर्शनाङ्यः	१९९
इडापिंगळसौषुम्नाः	३४१
इन्द्रवज्रम्	४०
इहामुत्रविरागता	४६८
ईश्वरः	३३३
ईश्वरपूजनम्	१५६, १५७, ५०४, ५२०
उच्चैः	१५८, ५२०
उच्छ्वासः	३७
उज्जायी	३१०, ३११, ४०८, ४०९
उड्डियणः	२०३–२, ३१३–३, ३४५, ३८३, ४११–३, ४२६, ४४३, ४४६–२, ४४७, ५०२, ५३३
उत्तरं त्वमनस्कम्	२८०
उत्तराभिमुखः	१२५
उत्तरायणम्	१६६
उत्तानकूर्मकम्	१३०
उत्थानम्	१४०, १७८
उदानः	२४, १३७–२, १६४, १६५–२, ३४१, ५२६, ५२७
उन्मनीकारकम्	२२२, ५३६
उन्मनीभावः	२८७, ५३६
उन्मन्यवस्था	२२५
उपवासः	४७५
उपांशुः	१५८, ५२०
उपासना	४५०
ऊर्ध्वाकुञ्चनम्	४०७
एकजीवादिनिर्णयः	९७
ऐन्द्री	२१७

पदम्	पुटसंख्या
ओङ्कारः	१८९, २१६, २६४, ३९०, ४०४
ओङ्काररथः	१२
ओतं प्रोतम्	७१, १२१
कण्ठमुद्रा	३८२, ९१२
कन्दयोनिः	३४०
कपालशाधनम्	९३३
कमलालयम्	१६७
कमलासनम्	३३७
कम्पनम्	१४०, १७८
कर्मत्रयम्	४६६
कर्मयोगः	१२७–२
कर्मेन्द्रियविषयाः	११९
कल्पनारहितः	४२०
कल्पितः	४२०–२
काकमतम्	४१८
कामपीठम्	४२९, ४४२
कामरूपम्	१९७, ३३८
कामः	३३८
कारणम्	३९१
कालवञ्चनम्	९०७
काशशब्दः	९२
कुक्कुटासनम्	१३०, ९०४
कुण्डलिनी	३, १३४, १६३, १७७, २०१, २६४, २७७, ३०८, ३०९–२, ३२०, ३४३, ४०७–२, ४२९, ४४२, ४९०, ४९९, ५०५, ५१०, ५२४–२, ५४२, ५३९
कुंभकः	१६, ५३, १७४, १९१, १९३, ३१४, ३५८–२, ३७०, ३८९, ५०५, ५११, ५३४
कुंभीकरणम्	१४१
कुरुक्षेत्रम्	१६७
कुहूः	१६२, १६३–२, १६६, ३४०, ३४१, ४४४, ५०५, ५२६
कूटः	३२४
कूर्मः	१३७, १६४, १६९, ३४१–२, ५०४, ५२७
कृकरः	१३७, १६४, १६९, ३४१–२, ५२७
केदारम्	१६७
केवलकुम्भकः	३१०, ३७२, ३७९
केवलसिद्धिः	३१०
कोशः	१२४
कौशिकी	१३९
क्षमा	१२९, १९३, १९९, ५०४, ५१९

पदम्	पुटसंख्या
क्षुरिका . . .	३६
क्षेत्रज्ञः . .	४१७, ४५१
खेचरीमुद्रा	२०४–३, २८५, ३२१, ३२२–२, ३२३–२, ३२४, ३२५, ३४६, ३४७, ३५४, ३६८, ३८३, ३८४, ४४६–३, ५३५, ५३६, ५४३–४, ५४४
गान्धारी	१३५, १६२, १६३, १६४, १६६, ३४०, ३४१, ४४४, ५०६, ५२६
गायत्री . .	३४३, ५३०
गार्हपत्यम् . . .	२५०
गुणत्रयम् . . .	४६६
गुणरहिताकाशम् .	५, २७९
गुरुः . . .	९–३
गूढसुप्तिः . . .	४९६
गोमुखम्	१२९, १५९–२, ५०४, ५२१
गोलकः . . .	२५३
गोलाखम् . . .	२६४
घटः . .	३६७, ५१५
घटाख्या भूमिका . .	५१५
घटावस्था .	३७५–२, ३७७
घोषिणी . . .	२१७
चक्रासनम् .	३३१, ५०४–२
चतुष्कला . . .	२५३
चतुष्पथो बन्धः . .	५०९
चतुष्पीठम् . . .	५१२
चतुर्विंशतितत्त्वानि	९७, ४६४, ४६५
चलदृष्टिः . . .	४
चिच्छक्तिः . . .	४५७
चिदम्बरम् . . .	१६७
चिद्रसः . . .	५६
चूलितलम् . . .	३२६
चोदकः . . .	२५९
छाया . . .	५०८
छिन्नपाशः . . .	४४
जनोलोकः . . .	२१४
जपः	१२९, १५६, १५८, ५०४, ५२०
जागरः . . .	४७९
जाग्रत्तुरीयः . . .	२२७
जाग्रत्स्वप्नसुषुप्तयः . .	४६६
जाग्रद्विश्वादयः . .	४९२
जाग्रद्वृत्तिः . .	१४७, ५६३
जालन्धरः	२०३, ३१३, ३१४, ३४५, ३४६, ३६८, ३८३, ४११, ४१२, ४२५, ४४२, ४४६, ५३३

पदम्	पृष्ठसंख्या
जीवः	३१, ४४, १३३, २५२, ३६६
जीवत्रयम्	४६६
जीवन्मुक्तः	७४ to ७८, २८२, २९०, २९३, ३३५, ३८०, ४००, ४२१, ४२२, ४६७, ४९१, ४९६, ४९७–९, ५१६
जैवतन्मात्रविषयाः	११९
ज्ञानम्	५३९
ज्ञानदीपः	२६४
ज्ञाननेत्रम्	३४
ज्ञानमुद्रा	२६२
ज्ञानयोगः	१२७, १२८
ज्ञानशौचम्	१५५
ज्ञानसागरपारगः	२४१
ज्ञानस्वरूपम्	१७८
ज्ञानेन्द्रियविषयाः	११९
ज्योतिर्मण्डलम्	३०३
ज्योतिर्लिंगम्	२६५
ज्वलन्ती	५०६
तत्त्वप्रकाशः	२८३
तत्त्वाकाशः	९, २७९
तत्त्वानि	१५०
तनुमानसी	४९२, ४९४–२
तपः	१२९, १५६–३, ५०४, ५२०
तपोलोकः	२१४
तर्कः	१७
ताणम्	१३१, २०३, ३०९, ३१४, ४११
तारकम्	२, ९–२, २७६–२, २७९, २९५
तुर्यम्	१४७, १४८, १७१, ५०६, ५६३
तुर्यगा	४९२, ४९४, ४९५
तुर्यपदम्	२२१
तुरीयविश्वादयः	४९२
तुर्यातीतम्	१४८, ५६४
तेजः	५५
तेजोबिन्दु	४५
तैजसः	३३३, ३५१, ४६६
तैतिलम्	४०, ४१
त्यागः	५१
त्रिकूटम्	२६४
त्रिधामा हंसः	४७
त्रिलक्ष्यम्	३३८
त्रिविधम्	२६४
त्रिविध आचार्यः	२५९
त्रिशक्तिमायास्वरूपः	२२७
त्रिशङ्कम्	२६४

पदम्	पुटसंख्या
दक्षिणाग्निः . . .	२९०
दक्षिणायनम् . .	१६७
दत्तः	१३७
दत्तात्रेयः . .	५५६, ५५७
दया १२९, १५३, १५४, ५०४, ५१९	
दर्दरी . . .	३७३
दशविधनादः . .	५६७
दहरं पुण्डरीकम् . .	३९
दहरादिकम् . . .	६
दानम् १२९, १५६, १५७, ५०४, ५२०	
दिव्यमन्त्रम् . .	१८
दीर्घः . . .	५१४
देवदत्तः १६४, १६५, ३४१–२, ५२७	
देहः . . ४२४, ४४१–२	
द्रष्टृदर्शनदृश्यानि . .	५३
धनञ्जयः १३७, १६४, १६५, ३४१, ३४२, ५२७	
धनुरासनम् . . .	१३०
धारणा १७, ३६, ५३ १२८, १४५, १५३, १८१, १८२, १९६, २७५, ३३७, ३५८, ३५९, ३६८, ३७८, ३८०, ५०३, ५१८, ५४८	
धृतिः १२९, १५३, १५५, २१७, ५०४, ५१९	
ध्यानम् ४५, ५३, १२८, १५३, १५८, १८२, १९६, २७५, ३३७, ३६०, ३६८, ५०३, ५१८, ५४९	
ध्यानयोगः . . ४१, १८६	
ध्रुवम् . . . ४९	
ध्रुवतारकम् . . . ४६०	
ध्रुवाग्निः . . . २४९	
नभोमुद्रा . २०५, ३४५, ३४७	
नागः १३७, १६४, १६५, ३४१–२, ५२७	
नागादिवायवः . . २६३	
नाडीकन्दम् . . ५०५	
नाडीचक्रम् . ४४४, ५०५	
नाडीशुद्धिः १३२, १७२, ३७१–२, ५२७, ५२९	
नाड्यः . . . ५२५	
नादः २६४, ४२५, ४३०, ४३२, ४३४, ४४२, ४४५, ४८४, ५११	
नादबिन्दुकला . . २४०	
नादरूपिणी . . ५०६	

पदम्	पुटसंख्या
नादलिंगम्	४२७, ४२९
नादसिद्धिः	३६०
नादानुसन्धानम्	२३०
नादाभिव्यक्तिः	३९७, ५२९, ५३२
नाभिचक्रम्	४४४, ५०६
नामधेया	२१७
नारी	२१७
निखरम्	२६४
नित्यानित्यविवेकः	४६८
निद्रा	३१५, ४७९
नियमः	५१, १२८, १५३, २७४, ३६८, ५०३, ५०४, ५१८, ५२०
निरञ्जनम्	३२९
निर्गुणध्यानयुक्तः	३८०
निर्वाणपदम्	१५०
निर्विषयम्	२७
निश्वासः	२३
निष्कलः	२५७, ५५३–२
निष्पत्तिः	३६७, ५१५
नीलज्योतिः	२७७
नीलज्योतिस्स्थलम्	३
पञ्चतन्मात्राणि	११७
पञ्चदोषाः	२७६
पञ्चमहाभूतानि	११७
पञ्चाग्निरूपम्	४४५
पञ्चावस्थाः	२९०
पञ्चीकरणम्	१२०
पतंगिनी	२१७
पदार्थभावना	४९२, ४९४, ४९५
पद्मासनम्	१३०, १५९–२, १९६, २०१, ३०८, ३०९, ३१०, ३२०, ३३८, ३४४, ३५८, ३६०, ४०४, ५०४, ५२१, ५३१
पयस्विनी	१६२, १६४, १६६, ५२५
परतत्त्वम्	४३०
परम्	४४४–२
परंब्रह्म	३२, ५५६–२, ५६८
परमहंसः	४७५ ५६२
परमहंसज्ञानमुद्रा	२६३
परमाकाशः	५, २९७–२
परमात्मा	४१७, ५६४
परमार्थता	२९
परमेश्वरी	३४४
परमं पदम्	२७, ४७
परमात्मा	५६४
पररन्ध्रा	५०६

पदम्	पुटसंख्या
परा . . .	३३३
पराकाशः . .	२७९, २९७
पराविद्या . . .	२४९
पराशक्तिः . . .	४९७
परिचयः . .	३६७, ५१९
परिपक्वः . .	२९१, ३९६
परिपूर्णचन्द्रमण्डलम् .	२८९
पश्चिमताणम् . .	४१२
पश्यन्ती . .	३३३, ४३२
पाण्डरः . .	२०९, ३४८
पार्थिवः . . .	४४९
पिंगळा ४०, १३९, १६२, १६३, १६६, १९९, ३४०, ३४१, ३९७, ४४३, ४९०, ५०९, ५२९, ५२६	
पिण्डाण्डम्. . .	३३३
पूरकः ९३, १४१, १७४, १९१, १९३, २९४, ३९८–२, ५०५–२, ५११–२, ५१२	
पूर्णगिर्याख्यं पीठम्.	४२९, ४४२
पूर्णत्वम् . . .	९९
पूर्णिमा . . .	२८४
पूर्णिमाभ्यासः . .	२८४
पूर्वतारकयोगः .	७, २८०
पूषा १६२, १६३, १६४, १६६, ३४०, ३४१, ४४४, ५०६, ५२६	
पृथिवीस्थानम् . .	३७८
पौर्णमासी . . .	३२९
प्रकृत्यष्टकरूपम् . .	३१७
प्रचयभूमिका . .	५१९
प्रणवः ३७, १९०, २८६, ३९१, ३९२, ३७४, ५२९, ५३०	
प्रतिपत् . .	२८४, ३२९
प्रत्यक्त्वम् . . .	९९
प्रत्यगात्मा . . .	२४३
प्रत्यक्षयजनम् .	२६०–२
प्रत्याहारः १४, ९३, १२८, १४४, १९३, १७९–४, १८०, १८१, १९६, २७५, ३३७, ३९९, ३६१, ३६८, ३७५, ५०३, ५१८, ५४८–६	
प्रथमं विघ्नम् . .	३१९
प्रमत्तता . . .	३१९
प्रयागः . . .	१६७
प्रशान्तलक्षणम् . .	१७
प्रस्वेदजननम् .	१४०, १७८

पदम्	पुटसंख्या
प्राणः	२३, २४, १३७, १६४–२, २००, ३४१, ३४२, ५२६, ५२७
प्राणजयः	४०७, ५४४
प्राणधारणम्	१४
प्राणरोधः	३१०, ३३७
प्राणविद्या	३४३
प्राणसंयमः	१२८, ३६८
प्राणस्पन्दः	५३९, ५४०–६, ५४१–२
प्राणादिवायवः	१३६, १९९, २६३
प्राणादिविषयाः	११९
प्राणापानसमानाः	३४१
प्राणायामः	१५–२, ५३, १३२, १३८, १३९, १५३, १७२, २७५, ३५६, ३५८–३, ३५९, ५०३, ५१८, ५२९
प्राज्ञः	३३३, ३५१, ४६६
प्लुतः	५१४
फूत्कारशब्दः	३, २७७
बद्धपद्मासनम्	१३
बद्धमुद्रा	२६३
बन्धत्रयम्	३१२, ४१०, ४११, ५०९
बन्धमोक्षौ	२६
बहिर्लक्ष्यलक्षणम्	४, २७८
बाह्यशौचम्	५१९
बाह्यप्राणः	२३
बिन्दु	२११, ३३०–३, ४२५, ४३४, ४४२, ४४४, ४४५, ५११
बिन्दुनादकलाः	४६१
बिन्दुपीठम्	४२९
बिन्दुमयी शक्तिः	४५७
बिलम्	२०
बैन्दवस्थानम्	४५२
बोधकः	२५९ २८–२, ४९, ४३८, ४३९, ४४०, ५५०, ५५२
ब्रह्मग्रन्थिः	२६४, ३१६, ३२०, ५१३
ब्रह्मचर्यम्	१२९, १५३, १५४–३, ५१९
ब्रह्मतारान्तरनादरूपः	२२६
ब्रह्मद्वारम्	३४३
ब्रह्मनाडी	३, १३५, १६२, ४१४, ४४३, ४५१
ब्रह्मप्रणवनादकः	२२४
ब्रह्मयज्ञमयमोक्षक्रमः	२३२
ब्रह्मरन्ध्रम्	३, १३४, १६३, १७६, १७७

पदम्	पुटसंख्या
ब्रह्मरूपिणी. . .	४०
ब्रह्मवित् . १३२, २८९–२,	४९३
ब्रह्मविद्वरः . . .	४९३
ब्रह्मविद्वरिष्ठः . .	४९३
ब्रह्मविद्वरीयान् . .	४९३
ब्रह्मसंपत्तिः . . .	२३४
ब्रह्मसूत्रम् . . .	२३२
ब्रह्मस्थानम्. . .	२०१
ब्रह्माण्डम् . . .	३३३
ब्राह्मी . . .	२१७
भद्रासनम् १८, १३०, १५९, १६०, १९६,	३६९, ५०४, ५२१
भस्त्री ३१०, ३१२,	४०८, ४१०
भुवर्लोकः . . .	२१४
भूतधारणम्. . .	५०२
भूतात्मा . . .	३०
भूरादयः . . .	३३३
भूर्भुवःसुवः.. . .	३५५
भूर्लोकः . . .	२१४
भोगलालसम् . .	५५
भ्रमरसृष्टिः . . .	४५२
भ्रान्तिः . . .	३१५
भ्रूदहरम् . . .	२
मणयः . . .	४१३
मणिपूरकम् १९८, ३३०–२,	३४०, ४२५, ४४२
मण्डलम् . . .	२०
मतिः १२९, १५६, १५८,	५०४, ५२०
मथनम् . .	३२७–३
मध्यमा . .	३३३, ४३२
मध्यलक्ष्यलक्षणम् . .	४
मध्याह्नार्कमण्डलम् . .	२८५
मननम् . . .	१५८
मनस्स्पन्दः.. . .	५४०
मनोन्मनी २२४, २९८,	४५०, ५३३
मनोयागः . . .	२३३
मन्त्रः . .	४१६, ४२८
मन्त्रयोगः . .	३६७, ४१६
मयूरासनम् १३१, १५९,	१६१, ५०४, ५२१
मरुज्जयः . . .	४०७
मर्कटक्रमः . . .	४१८
महत् . . .	११७
महती . . .	२१७
महर्जगत् . . .	२१४
महाकाशः . ५,	२७९, २९७–२
महाबन्धः . .	३६८, ३८२
महामुद्रा २०६–२,	३४५, ३४९–२, ३६८

पदम्	पुटसंख्या
महामेरुः	५१२
महायोगः	४१६
महायोगी	४१९
महाविद्या	३४३
महावेधः	३६८, ३८२
महेश्वरः	५५६–२
मात्रा	३७१
मानसः	१५८, ५२०
मायाशक्तिः	४५७
मायूरनादः	२११
मासंसक्रमः	१६७
मिताहारः	१२९, १५३, १५५, ३०७, ३०८, ३४४, ५०४, ५१९
मुक्तः	४२२
मुक्तासनम्	१३०, १५९, १६०–२, ५०४, ५२२
मुद्राबन्धविशेषः	५१३
मुमुक्षा	४६८
मुमुक्षुः	४९३
मूर्तितारकम्	६, २७९–२
मूलबन्धः	५२, २०३, ३१३–२, ३१५, ३४५, ३६८, ४११, ५०९
मूलमन्त्रः	४२८
मूलशक्तिः	४४६
मूलाग्निः	४४५
मूलाधारम्	३, ३३०–२, ४२५, ४४२, ५१०
मेघध्वनिः	१७७
मेलनम्	३२२–६
मोक्षदः	२५९
मोक्षद्वारम्	२०
मौनम्	५१, ५२, २४४
यमः	५१, १२८, १५३, २७४, ३६८, ५०३, ५०४, ५१८, ५१९
यशस्विनी	१६२, १६३–२, १६४, १६६, ३४०, ३४१, ५०५, ५०६, ५२६
यज्ञसूत्रम्	२३३
योगः	५२८, ५३९
योगनिद्रा	५३६
योगमुद्रा	१२८
योगवरः	५०८
योगशिखा	४०४, ४४९
योगसिद्धः	१४०, ३८४
योगाभ्यासविधिः	५०१
योगासनम्	१२९, १४७
योगिपुंगवः	५२३

पदम्	पुटसंख्या
योगिवर्ज्यानि . .	२१
योगी . .	४–२, १९५
योनिः . .	१९७, ३३९
योनिबन्धः . . .	३८३
योनिमुद्रा . .	२०५, ३४७
योनिस्थानम् .	१९७, ३३८
रत्नप्रभामण्डलम् . .	२८५
रथमण्डलम् . . .	१८
राका . . .	४४४
राजदन्तोर्ध्वकुण्डली . .	३२८
राजयोगः ३६७, ३८५, ४१६, ४१७	
रुद्रग्रन्थिः २६४, ३१६, ३२१, ५१३–२	
रेचकः १६, ५३, १४१, १७४, १९१, १९३, २५४, ३५८, ५०५, ५११–२	
रेचपूरककुंभकाः . २६०, ४४६	
लक्ष्यत्रयम् . . .	३
लक्ष्यत्रयावलोकनम् . .	२७७
लज्जा . . .	५२०
लम्बिका . . २०४, ४४६	
लयः ३६७, ३६८, ४१६, ४८४	
लयमन्त्रहठाः . .	५०३
लिंगम् . .	३५१, ४२८
लिंगिनः . . .	३३
लोहितः . .	२०५, ३४८
वज्रम् . . .	२६४
वज्रदर्पणम् . . .	२८५
वज्रासनम् . .	३०८–२
वज्रोळी . .	३६९, ३८४
वरुणा १६२, १६३, १६६, ५०५	
वर्णाः . . .	२४
वह्निशिखामण्डलम् . .	२८५
वह्निस्थानम् . . .	३७८
वाचिकः . .	१५८, ५२०
वामदेवः . .	४९८, ४९९–३
वायवी . . .	२१६
वायुद्वारम्	२०
वायुवेगिनी . . .	२१७
वायुस्थानम् . . .	३७९
वाराणसी . . .	१६७
वारुणी २१६, ४४४, ५२५, ५२६	
वासना . . .	३०७
विघ्नदशकम् . . .	३१५
विचारणा . ४९२, ४९४–२	
विजनः . . .	५२
विदेहमुक्तः . . ७८ to ८३	
विद्युन्मात्रा . . .	२१७
विपरीतकरणी . .	३८४

पदम् पृष्ठसंख्या

विरजा . . . ४०
विरतिः . . . ३१५
विराट् . . . ३३३
विलम्बिनी . . . ४४३
विशुद्धचक्रम् . ४२९, ४४२
विशुद्धिः . ३३०–२, ३३८
विश्वः . ३३३, ३९१, ४६६
विश्वतैजसप्राज्ञात्मानः . ३९१
विश्वोदारा १६२, १६३, १६४, १६६, ४४४, ९०६
विषयः . . . ३१५
विषुवम् . . १६७–२, २६०
विष्णुग्रन्थिः २६४, ३१६, ३२०, ९१३–२
वीरासनम् १२९–२, १६०, ९०४, ९२१
वृत्तिज्ञानम् . . ९६, ९६३
वेदवित् . . . ४०
वेदान्तश्रवणम् . . १२९
वेधः . . .९१३–२
वेधकत्रययोगः . . ९१२
वैखरी . ३३३, ४३२, ४३४
वैद्युतः . . . ४४९
वैराजम् . . . ४३०
वैष्णवी . . २१७, ९३९

पदम् पृष्ठसंख्या

व्यानः २४, १३७–२, १६४, १६९–२, ३४१, ९२६, ९२७
व्यानोदानौ . . . ३४१
व्योम . . . ४
व्योमपञ्चकम् ९, २९७, २९८, ३३८
व्योमरन्ध्रगतो नादः . . २११
व्रतम् १२९, १९६, ९०४, ९२०

शक्तिचालः ३०७, ३०८, ३१०
शक्तिस्थानम् . . ९११
शङ्खध्वनिः . . . १७७
शङ्खिनी १६२, १६३, १६४, १६६, २६४, ३४०, ३४१, ४४४, ९०६, ९२६
शब्दः . . . १८
शब्दब्रह्म . . . ३२
शमादिषट्कसंपत्तिः . . ४६८
शमादिषड्गुणाः . . १
शशविषाणम् . . ९६
शशिमण्डलम् . . २६४
शाङ्करी . . . २१७
शाम्भवस्थानम् . . ९११
शांभवीमुद्रा ७, २८०, २८९, २९४
शिखिस्थानम् १३२, १६१, ९२३
शीतली ३१०, ३११, ४०८, ४१०

पदम्	पुटसंख्या
शुक:	४९८, ४९९–२
शुक्ला नाडी	३८
शुद्ध:	२६
शुभेच्छा	४९२, ४९४–२
शून्यता	९९
शूरा	४४४
शौचम्	१२९, १९३, १९९–२, ९०४, ९१९
श्रीपर्वतम्	१६७
षट्चक्रमण्डलम्	२६४, ३३८, ४९९, ४६२
षट्त्रिंशत्तत्त्वानि	४६४, ४६६
षडंगयोग:	१४
षड्ऊर्मय:	४६६
षड्भावविकृति:	४६६
षण्णवतितत्त्वानि	४६४, ४६७
षण्मुखीकरणम्	२८६, ४२९
षोडशी	२६४
षोडशाधारम्	३३८
सकल:	२९७, ९९३, ९९४
सकलनिष्कलम्	९९३, ९९९
सगुणध्यानम्	३८०
सङ्कल्प:	९८ to १००
सच्चिदानन्दं ब्रह्म	१००, २८४
सत्ता	२४७
सत्यम्	१२९, १९३–२, १९४, ९०४, ९१९
सत्यलोक:	२१४
सत्वापत्ति:	४९२, ४९४–२
सद्भक्तता	९६
सन्तोष:	१२९, १९६, १९७–२, ९०४, ९२०
संपुटयोग:	९०९
समता	९२
समाधि:	१८, ९३, १९०, १९३, १८३, १८४, १९६, २६३, २७९, ३३७, ३६० ३६८, ३८०–३, ४८३, ९०३, ९१८, ९४९
समान:	२४, १३७–२, १६४, १६९–२, ३४१, ९२६, ९२७
समीरण:	३०७
सरस्वती	१६२, १६३, १६४, १६६, ३०९, ४३४, ४४४, ४९३, ९०६, ९२६, ९३०
सर्वसाक्षी	३९१
सहजोळी	३६९
साक्षात्कार:	४७६
साधनचतुष्टयम्	९७
सावित्री	९३०
सिद्धान्तश्रवणम्	९१, १३१, १९६, १९७, ३३७, ३६९, ९०४, ९२०
सिंहासनम्	१३०, १९९, १६०, १९६, ३६९, ९०४, ९२१
सीविनी	४४४
सुखासनम्	१३१, १९९, १६१, ४४६
सुधाचन्द्रमण्डलम्	२८४

पदम्	पुटसंख्या
सुमहतीमुद्रा	३४९
सुवर्लोकः	२१४
सुषिरम्	२०
सुषुप्तविश्वादयः	४९२
सुषुप्तिः	५६३
सुषुम्ना ३,३८,४०,४१,१३५, १६२–३, १६६, १९९, २११,२७७,३०९,३४०, ३४१,४१३,४४३,४५०–२, ४५१, ४५२, ४५३, ४५६, ५०५, ५०६–२, ५२५	
सुषुम्नाद्वारम्	४०५
सुषुम्नाध्यानयोगः	४५७
सूक्ष्मम् १३, ४४४–२, ४४५	
सूक्ष्मांगानि	२७५
सूत्रम्	४२८
सूर्यः	३१०
सूर्यग्रहणम्	१६७, २६०
सूर्यभेदः	३११, ४०९
सूर्यमण्डलम्	२८४
सूर्याकाशः ५, २७९, २९७–२	
सूर्याग्निः	४४५
सोमग्रहणम्	१६७
सोमरूपकला	४७
सौम्या	५२६
स्थूलम्	४४४–२
स्थूलप्रकृतिः	३५१
स्थूलसूक्ष्मकारणानि	४६६
स्वप्नः ४७९, ५६३	
स्वप्नवर्तनम्	१४७
स्वप्नविश्वादयः	४९२
स्वरः	२८
स्वस्तिकम् १८,१२९, १३८, १५९–२, १७६, ५०४, ५२१	
स्वाधिष्ठानम् १९७,१९८,३२०, ३३०–२,३३८–२,३३९,४२५,४४२	
स्वेदः	५५
हठः ३६७, ४१६–२	
हस्तिजिह्वा १३५,१६२,१६३, १६४,१६६,३४०,३४१,४४४,५०६	
हंसः २३०–३,२३१,२३४, २३६,२४०,२५३,२६२, २६५,३५४,४२५,४४२, ४५३,४५८,५११	
हंसज्योतिः	२६२
हंसमन्त्रम् २६१, २६३	
हंसविद्या २५४, २५५	
हंससूत्राणि	२३५
हंसार्कप्रणवध्यानम्	२४१
हिरण्यगर्भः	३३३
हृत्पद्मम्	१९२
हृदयम् १३६, ३३८	
हृद्वारम्	२०
हृद्बीजम्	१९४
ह्रस्वः	५१४
ह्रीः १२९, १५६, १५८,५०४,५२०	

Printed by J. R. Aria at the Vasanta Press, Adyar, Madras.

Publications of the Adyar Library

(Theosophical Society, Adyar, Madras, S. India)

1. A Preliminary List of the Samskrit and Prakrit MSS. in the Adyar Library.

The list comprises 11,842 MSS. distributed among 5,270 titles (Dēvanāgari character). Demi 8vo., pp. 279.

Boards — Re. 1-8.
Cloth — Rs. 2.

2. A Descriptive Catalogue of the Samskrit MSS. in the Adyar Library, by F. O. Schrader, Ph. D. Vol. I— UPANISHADS.

The collection described in this volume comprises 1,322 MSS. distributed among 365 works. (Dēvanāgari and English.) Royal 8vo., pp. xi, 315.

Cloth — Rs. 7-8.

3. The Minor Upanishads, critically edited for the Adyar Library by F. O. Schrader, Ph. D. Vol. I— *Samnyāsa Upanishads.*

Texts in Dēvanāgari. Preface, critical notes, etc., in English. Royal 8vo., pp. liv, 501.

Cloth — Rs. 15.

4. Ahirbudhnya-Samhitā of the Pāncharātra Āgama, edited for the Adyar Library by Pandit M. D. Rāmānujāchārya, of the Adyar Library, under the supervision of F. Otto Schrader, Ph. D. 2 vols.

(Samskrit Text only, in Dēvanāgari.) Royal 8vo., pp. 59, 674.

Cloth — Rs. 15.

5. Introduction to the Pāncharātra and the Ahirbudhnya-Samhitā, by F. O. Schrader, Ph. D.

Part I. The literature of the Pāncharātras.
Part II. The philosophy of the Pāncharātras.
Part III. The Ahirbudhnya-Samhitā.

(English) Royal 8vo., pp. 178.

Cloth — Rs. 3.

6. The *Yoga Upanishads* with the Commentary of Śrī Upanishad-Brahma-Yogin, edited by Pandit A. Mahadeva Sastri, B.A., Director, Adyar Library.

(Samskrit, in Dēvanāgari). Demi 8vo., pp. 44, 586.

This Commentary extends to all the one-hundred-and-eight Upanishads.

Cloth — Rs. 6.

7. The *Sāmānya-Vedānta Upanishads* with the Commentary of Sri Upanishad-Brahma-Yogin, edited by Pandit A. Mahadeva Sastri, B. A., Director, Adyar Library. (*In the Press*)

GOVERNMENT OF INDIA

DEPARTMENT OF ARCHAEOLOGY

CENTRAL ARCHAEOLOGICAL LIBRARY

CALL NO. Sa2Vu—Mah

D.G.A. 79.

THE S'AIVA-UPANISHADS

WITH THE COMMENTARY OF

SRI UPANISHAD-BRAHMA-YOGIN

7903

EDITED BY

PANDIT A. MAHADEVA SASTRI, B.A.

DIRECTOR, ADYAR LIBRARY, ADYAR, MADRAS

Sa2Vu.
Mah



PUBLISHED FOR THE ADYAR LIBRARY
(THEOSOPHICAL SOCIETY)
1925

CENTRAL ARCHAEOLOGICAL
LIBRARY NEW DELHI.
Acc. No. 7903
Date. 19.11.56
Call No. 892 Vu / Mah

अष्टोत्तरशतोपनिषत्सु

शैव-उपनिषदः

श्री उपनिषद्ब्रह्मयोगिविरचितव्याख्यायुताः

अडयार्-पुस्तकालयाध्यक्षेण

अ. महादेवशास्त्रिणा

सम्पादिताः

अडयार्-पुस्तकालयार्थं

प्रकटीकृताश्च

१९२५

ॐ नमो
ब्रह्मादिभ्यो
ब्रह्मविद्यासंप्रदायकर्तृभ्यो
वंशऋषिभ्यो
नमो गुरुभ्यः

DEDICATED TO
Brahma and the Rishis,
The Great Teachers
Who handed down Brahmavidya
through Generations

THE EDITOR'S NOTE

THE materials on which is based this edition of the SAIVA-UPANISHADS comprised in this volume are the same as those described in the volume of *The Yoga Upanishads*.

August, 1925 A. M. S.

अस्मिन् सम्पुटे अन्तर्गतानामुपनिषदां सूची

संख्या	उपनिषन्नाम	ईशादिसंख्या	पुटसंख्या
१.	अक्षमालिकोपनिषत् . .	६७	१
२.	अथर्वशिखोपनिषत् . .	२३	१०
३.	अथर्वशिर-उपनिषत् . .	२२	२०
४.	कालाग्निरुद्रोपनिषत् . .	२८	३९
५.	कैवल्योपनिषत् . .	१२	४६
६.	गणपत्युपनिषत् . .	८९	५८
७.	जाबाल्युपनिषत् . .	१०४	६५
८.	दक्षिणामूर्त्युपनिषत् . .	४९	७०
९.	पञ्चब्रह्मोपनिषत् . .	९३	७९
१०.	बृहज्जाबालोपनिषत् . .	२६	८७
११.	भस्मजाबालोपनिषत् . .	८७	१२९
१२.	रुद्रहृदयोपनिषत् . .	८५	१४८
१३.	रुद्राक्षजाबालोपनिषत् . .	८८	१५६
१४.	शरभोपनिषत् . .	५०	१६६
१५.	श्वेताश्वतरोपनिषत् . .	१४	१७५

विषयसूचिका

१. अक्षमालिकोपनिषत्

अक्षमालालक्षणादिजिज्ञासा . . . १
अक्षमालालक्षणादि २
अक्षमालायां ब्रह्मादिभावना . . . २
अक्षमालाशोधनादि ३
एकैकाक्षस्य एकैकेन मन्त्रेण संयोजनम् . . ३
देवमन्त्रविद्यातत्त्वानां सान्निध्यार्थो मन्त्रजपः . . ६
अक्षमालायां सर्वात्मकत्वभावना . . . ८
अक्षमालिकास्तुतिः ८
विद्याफलम् ९

२. अथर्वशिखोपनिषत्

प्रथमः खण्डः

आदिप्रयुक्तध्यानजिज्ञासा १०
चतुष्पात्प्रणवध्यानम् ११
मात्राचतुष्टयस्वरूपम् ११
वर्णदेवताविशिष्टमात्रास्वरूपम् . . . १२
विशिष्टप्रणवस्वरूपम् १३

विशिष्टप्रणवध्यानफलम् १३
स्थूलादिभेदैः प्रणवस्य चतुर्धा विभागः . . १३

द्वितीयः खण्डः

तुर्योङ्कारस्य तारकत्वम् १४
तस्य विष्णुत्वम् १५
तस्य ब्रह्मत्वम् १५
तस्य स्वयंप्रकाशत्वम् १५
तस्य महादेवत्वम् १६

तृतीयः खण्डः

तुर्योङ्कारनिरूपणम् १६
तुर्यज्ञानपथ एव सिद्धिकरः . . . १७
तज्ज्ञानोपायः १७
शिवस्यैव ध्येयत्वम् १८
अध्ययनफलम् १९

३. अथर्वशिर-उपनिषत्

देवानां रुद्रस्वरूपजिज्ञासा . . . २०
रुद्रैकत्वप्रतिपादनम् २०
रुद्रस्य सर्वात्मत्वम् २१
रुद्रज्ञानफलम् २२
देवकृतरुद्रस्तुतिः २३
रुद्रं प्रति देवानां प्रार्थना २४
ओङ्कारशब्दार्थः २६
प्रणवशब्दार्थः २७
सर्वव्यापिशब्दार्थः २७

अनन्तशब्दार्थः २७
तारशब्दार्थः २८
सूक्ष्मशब्दार्थः २८
शुक्लशब्दार्थः २८
वैद्युतशब्दार्थः २९
परंब्रह्मशब्दार्थः २९
एकशब्दार्थः २९
एकोरुद्रशब्दार्थः २९
ईशानशब्दार्थः ३०
भगवच्छब्दार्थः ३१
महेश्वरशब्दार्थः ३१
महादेवशब्दार्थः ३२
रुद्रस्य व्यापकत्वम् ३२
एवमुपासनायाः फलम् ३३
तृष्णावतां शान्त्युपायः ३४
महापाशुपतव्रतम् ३५
ग्रन्थपठनतदर्थज्ञानफलम् ३६
रुद्रैक्यप्रार्थना ३७
श्रीविद्यामोक्षप्रार्थना ३७

४. कालाग्निरुद्रोपनिषत्

कालाग्निरुद्रोपनिषन्मन्त्रस्य ऋष्यादि . . . ३९
त्रिपुण्ड्रविधिजिज्ञासा ४०
शाम्भवव्रतं नाम त्रिपुण्ड्रविधिः . . . ४१
त्रिपुण्ड्ररेखाप्रमाणम् ४२
रेखात्रयस्य शक्तिदेवताऽऽदिप्रतिपादनम् . . ४२

विद्याफलम् ४३
ग्रन्थाध्ययनफलम् ४४

५. कैवल्योपनिषत्

ब्रह्मविद्याजिज्ञासा ४६
ब्रह्मविद्यासाधनं तत्फलं च ४७
सविशेषब्रह्मध्यानपरिकरः ४९
सर्वात्मब्रह्मदर्शनमेव परमसाधनम् . . . ५०
प्रणवध्यानविधिः ५१
परमात्मन एव जीवरूपेण संसारः . . . ५२
जीवेश्वरयोरभेदः ५३
अभेदानुभवप्रकाशः ५५
अभेदानुभूतिफलम् ५६
शतरुद्रीयजपविधिः ५६

६. गणपत्युपनिषत्

गणपतिस्तुतिः ५८
गणपतिं प्रति प्रार्थना ५९
गणपतेः सर्वात्मतया स्तुतिः ५९
गणपतिमनुः ६१
गणपतिगायत्री ६१
गणपतिध्यानम् ६२
गणपतिमालामन्त्रः ६२
विद्यापठनफलम् ६३
विद्यासंप्रदाननियमः ६३

काम्यप्रयोगाः ६३
विद्यावेदनफलम् ६४

७. जाबाल्युपनिषत्

ईश्वरोपासनं परमतत्त्वज्ञानसाधनम् . . . ६५
पशुपशुपतितत्त्वनिवेदनम् . . . ६६
विभूतिधारणस्य ज्ञानोपायत्वम् . . . ६७
शाम्भवव्रतम् ६७
त्रिपुण्ड्रधारणप्रमाणम् ६८
रेखात्रये भावनाविशेषः ६८
भस्मधारणफलम् ६८

८. दक्षिणामूर्त्युपनिषत्

शिवतत्त्वज्ञानेन चिरजीवित्वप्राप्तिः . . . ७०
शिवतत्त्वज्ञाने प्रश्नाः ७१
परमशिवतत्त्वज्ञानस्वरूपम् . . . ७१
ज्ञेयदेवस्वरूपम् ७१
चतुर्विंशाक्षरमनुः ७२
नवाक्षरमनुः ७३
अष्टादशाक्षरमनुः ७३
द्वादशाक्षरमनुः ७४
आनुष्टुभो मन्त्रराजः ७४
निष्ठाऽऽदीनां निरूपणम् ७५
शिवतत्त्वज्ञानोदयादिनिरूपणम् . . . ७६
अध्ययनवेदनफलम् ७८

९. पञ्चब्रह्मोपनिषत्

पञ्चब्रह्मणां आदौ जनिः ७९
तेषां वर्णादिविषयकः प्रश्नः . . . ८०
महेशोपदिष्टं तद्रहस्यम् ८०
सद्योजातस्वरूपम् ८०
अघोरस्वरूपम् ८१
वामदेवस्वरूपम् ८१
तत्पुरुषस्वरूपम् ८२
ईशानस्वरूपम् ८२
पञ्चब्रह्मलयाधारः परमं ब्रह्म . . . ८३
परमब्रह्मज्ञानविधिः ८३
शिवस्याद्वैतचैतन्यत्वम् . . . ८४
दहराकाशे शिवोपलब्धिः . . . ८६

१०. बृहज्जाबालोपनिषत्

प्रथमं ब्राह्मणम्

प्रजापतिकृताविद्याऽण्डसृष्टिः . . . ८७
विभूतिरुद्राक्षबृहज्जाबालजिज्ञासा . . . ८८
भस्मपञ्चकस्य नामस्वरूपनिरूपणम् . . . ८९

द्वितीयं ब्राह्मणम्

अग्नीषोमात्मकभस्मस्नानजिज्ञासा . . . ९१
जगतः अग्नीषोमात्मकत्वम् ९१
जगतः शिवशक्त्यात्मकत्वम् . . . ९२
ज्ञानानधिकारिणां भस्मस्नानविधिः . . . ९४

जीवेशैक्यज्ञानतः संसारनिवृत्तिः . . . ९५
सविशेषब्रह्मोपासनेनापि अमृतत्वप्राप्तिः . . ९६

तृतीयं ब्राह्मणम्

विभूतियोगजिज्ञासा ९७
विभूतेः उत्पत्तिक्रमः ९७
गोमयादौ विद्याऽऽदिदृष्टिः . . . ९८
गवादिभस्मान्तस्य मन्त्रसंस्कारः . . . ९८
भस्मोद्धूळनप्रकारः १०२
चतुर्विधं भस्मकल्पनम् १०३

चतुर्थं ब्राह्मणम्

भस्मस्नानप्रकारः १०४
भस्मस्नानकालविशेषाः १०६
ज्ञानार्थिना शङ्खतोयादिमिश्रभस्म धार्यम् . . १०६
त्रिपुण्ड्रविधिः १०७
उद्धूळनाशक्तौ त्रिपुण्ड्रधारणम् . . . १०९

पञ्चमं ब्राह्मणम्

वेदत्रयदृष्टिपूर्वकं त्रिपुण्ड्रधारणम् . . . १११
वर्णाश्रमभेदानुसारेण भस्मविशेषविधिः . . १११
भस्मधारणे फलविशेषः ११२
भस्मधारणविमुखस्य दूषणम् . . . ११३
भस्मनिष्ठस्य स्वरूपमहिमवर्णनम् . . . ११४

षष्ठं ब्राह्मणम्

नामपञ्चकमाहात्म्यजिज्ञासा . . . ११४
भस्ममाहात्म्यख्यापनार्था करुणाख्यायिका . . ११५

भस्मनः पापघ्नत्वख्यापनार्था अहल्याख्यायिका . . ११६
भस्मनः हरिशंकरज्ञानप्रदत्वम् . . . ११७
भस्मनः भूतिकरत्वम् ११८
ब्रह्मभावरहितज्ञानतत्साधनानां वैय्यर्थ्यम् . . ११८
बृहज्जाबालविद्यामहिमा ११९

सप्तमं ब्राह्मणम्

त्रिपुण्ड्रविधिः १२०
भस्मधारणफलम् १२०
भस्मस्नानफलम् १२१
त्रिपुण्ड्रमाहात्म्यम् १२१
विभूतिधारणमहिमा १२२
रुद्राक्षधारणजिज्ञासा १२३
रुद्राक्षजन्म १२३
रुद्राक्षधारणमहिमा १२३

अष्टमं ब्राह्मणम्

उपनिषत्पारायणफलजिज्ञासा . . . १२४
सर्वपूतत्वम् १२४
अग्न्यादिस्तम्भनम् १२५
मृत्व्वादितरणम् १२५
सर्वलोकजयः १२५
सर्वशास्त्रज्ञानम् १२५
बृहज्जाबालाध्यापकस्य सर्वोत्तमत्वम् . . . १२६
बृहज्जाबालजपशीलस्य परंधामप्राप्तिः . . १२६
परंधामस्वरूपम् १२७

११. भस्मजाबालोपनिषत्

प्रथमोऽध्यायः

त्रिपुण्ड्रविधिजिज्ञासा १२९
प्रातःकृत्यं होमान्तम् १३०
भस्मधारणविधिः १३१
भस्मधारणस्यावश्यकर्तव्यता . . . १३२
अकरणे प्रायश्चित्तम् १३३
संस्कृतभस्माभावे कर्तव्यनिरूपणम् . . . १३३
भस्मधारणफलम् १३३

द्वितीयोऽध्यायः

ब्राह्मणानां किं नित्यं कर्तव्यम् . . . १३४
प्रातःकृत्यत्रिपुण्ड्रधारणादि. . . . १३५
शिवपूजाविधिः १३५
शिवषडक्षर-अष्टाक्षरयोरुद्धारः . . . १३६
ब्रह्मस्वरूपम् १३७
ब्रह्मज्ञानमेव मुक्तिसाधनम् . . . १३७
शिवस्य विश्वाधारत्वम् १३८
शिवस्य पशुपाशमोचकत्वम् . . . १३८
शिवतत्त्ववेदनाशक्तानां काशीवासः तरणोपायः . . १३९
काशीवासिनां नियमविशेषाः . . . १४०
काश्यां ज्योतिर्लिङ्गार्चनं तत्फलं च . . . १४०
अनभ्यर्च्याशनादौ कृते प्रायश्चित्तम् . . . १४२
सर्वपातकपावनं शिवाभ्यर्चनम् . . . १४२
मुक्त्यादिसाधनं शिवाभिषेचनम् . . . १४३
शिवसायुज्यसाधनं शिवाभिषेचनम् . . . १४३

चन्द्रादिलोकसाधनं शिवाभिषेचनम् . . . १४३
काशीवासिनां शैवतारकोपदेशान्मुक्तिलाभः . . १४४
काश्यामप्रमादेन वस्तव्यम् . . . १४६

१२. रुद्रहृदयोपनिषत्

सर्वदेवात्मकदेवविषयः शुकप्रश्नः . . . १४८
रुद्रस्य सर्वदेवात्मकत्वम् १४८
शिवविष्ण्वोरैक्यम् १४९
आत्मनस्त्रैविध्यम् १५०
रुद्रस्य त्रिमूर्तित्वम् १५०
रुद्रकीर्तनात् सर्वपापविमुक्तिः . . . १५०
सर्वस्य कारणानतिरिक्तत्वम् . . . १५१
परापरविद्ययोः स्वरूपम् १५२
अक्षरज्ञानादेव संसारविनाशः . . . १५२
मुमुक्षोः प्रणवोपास्तिप्रकारः . . . १५३
जीवेशभेदस्य कल्पितत्त्वम् . . . १५३
अद्वैतज्ञानाच्छोकमोहनिवृत्तिः . . . १५४

१३. रुद्राक्षजाबालोपनिषत्

रुद्राक्षविषयो भुसुण्डप्रश्नः . . . १५६
रुद्राक्षोत्पत्तिः १५७
रुद्राक्षधारणजपफलम् १५७
रुद्राक्षाणां उत्तमादिभेदाः . . . १५८
रुद्राक्षाणां ब्रह्मक्षत्रादिजातिभेदाः . . . १५८
रुद्राक्षाणां ग्राह्याग्राह्यविभागः . . . १५८

शिखाऽऽदिस्थानेषु धारणाभेदः . . . १५९
तत्तत्स्थानधारणामन्त्राः १६०
रुद्राक्षाणां वक्त्रभेदेन फलभेदः . . . १६०
रुद्राक्षधारिवर्ज्यानि १६२
रुद्राक्षधारणामहिमा १६३
रुद्राक्षोत्पत्तिः तन्महिमा च . . . १६३
रुद्राक्षविद्यावेदनफलम् १६४

१४. शरभोपनिषत्

ब्रह्मविष्णुरुद्राणां मध्ये कोऽधिकतमः . . १६६
रुद्रस्य श्रेष्ठत्वम् १६६
शरभरूपेण रुद्रेण नृसिंहवधः . . . १६७
देवकृतशरभस्तुतिः १६८
रुद्रानुग्रहः १६९
रुद्रयाथात्म्यज्ञानफलम् १६९
रुद्रमहिमा १७०
विष्णुशिवयोरभेदः १७१
शिवस्यैव ध्येयत्वम् १७२
एतच्छास्त्रसंप्रदाननियमः . . . १७३

१५ श्वेताश्वतरोपनिषत्

प्रथमोऽध्यायः

जगत्कारणजिज्ञासा १७५
परमात्मनः उपादानकारणत्वम् . . . १७६
तस्य निमित्तकारणत्वम् १७९
सर्वस्य जगतः अध्यस्तत्वम् . . . १८१

ब्रह्मातिरेकेण न किंचिद्वेदितव्यम् . . . १८४
सम्यज्ज्ञानसाधनं ध्यानम् . . . १८५

द्वितीयोऽध्यायः

समाध्युपक्रमे परमेश्वरप्रार्थना . . . १८६
साङ्गयोगोपदेशः १८९
योगसिद्धिः १९०
मुख्ययोगः तत्फलं च १९१

तृतीयोऽध्यायः

मायया परमात्मनः सर्वकारणत्वम् . . . १९३
ईश्वरप्रसादप्रार्थना १९५
निष्कलब्रह्मज्ञानादेव मोक्षः . . . १९६
निर्विशेषब्रह्मज्ञानोपायः १९८
ईश्वरस्य सर्वमयत्वम् २००
ईश्वरस्य सर्वप्रत्यक्त्वम् २०१
परमात्मवेदनाच्छोकनिवृत्तिः . . . २०२

चतुर्थोऽध्यायः

ईश्वरात् सम्यज्ज्ञानप्रार्थना . . . २०४
ईश्वरस्यैव स्वमायया निखिलकार्यप्रवेशः . . २०४
जीवेश्वरभेदो मायिकः २०५
मायाऽधिष्ठातुरीश्वरस्यैव सर्वस्रष्टृत्वम् . . २०७
ज्ञानार्थमीश्वरप्रार्थना २०९
ईश्वरज्ञानादेव पाशविमोकः . . . २१०
ज्ञानार्थं पुनरीश्वरप्रार्थना २१३

पञ्चमोऽध्यायः

विद्याऽविद्ययोः स्वरूपम् २१४
ईश्वरस्यैव विद्याप्रदातृत्वम् . . . २१५
ईशस्य सर्वाधिपत्यम् २१६
ईशस्य वेदवेद्यत्वम् २१७
जीवयाथात्म्यम् २१७
जीवसंसारमूलम् २१९
जीवेशैक्यज्ञानात् संसारमोक्षः . . . २२०

षष्ठोऽध्यायः

ईश्वरादन्यस्य कालादेरकारणत्वम् . . . २२१
सम्यज्ज्ञानसाधनम् २२३
परमेश्वरादेव स्वज्ञानमोक्षयोः प्राप्तिः . . . २२४
ईश्वरवेदनमेव संसारतारकम् . . . २२८
मुमुक्षोरीश्वर एव शरणम् २३०
सर्वशास्त्रार्थसंग्रहः २३१
ब्रह्मविद्याऽधिकारिनिरूपणम् . . . २३२

नामधेयपदसूची २३५
विशेषपदसूची २३७

अक्षमालिकोपनिषत्

वाङ् मे मनसि—इति शान्तिः

अक्षमालालक्षणादिजिज्ञासा

अथ प्रजापतिर्गुहं पप्रच्छ—भो भगवन् अक्षमालाभेदविधिं ब्रूहीति । सा किंलक्षणा कतिभेदा अस्याः कति सूत्राणि कथं घटनाप्रकारः के वर्णाः का प्रतिष्ठा कैवाऽधिदेवता किं फलं चेति ॥ १ ॥

अकारादिक्षकारान्तवर्णजातकळेबरम् ।
विकळेबरकैवल्यरामचन्द्रपदं भजे ॥

इह खलु ऋग्वेदप्रविभक्तेयं अक्षमालिकोपनिषत् पञ्चाशद्वर्णार्थप्रकटनव्यग्रा परम्परया ब्रह्ममात्रपर्यवसन्ना विजयते । अस्याः श्रुतेः स्वल्पग्रन्थतो विवरणमारभ्यते । प्रजापतिगुहप्रश्नप्रतिवचनरूपेयमाख्यायिका विद्यास्तुत्यर्था । आख्यायिकामवतारयति—अथेति । अथ स्वाज्ञलोकस्याभ्युदयनिःश्रेयसाप्तिप्रतिबन्धतानवानन्तरं प्रजानां स्वसृष्टानां स्वात्युपायप्रापकः प्रजापतिः चतुर्मुखः गुहं कुमारस्वामिनं पप्रच्छ । अयं स्वातिरिक्तप्रपञ्चः स्वाज्ञानविकल्पितः, सर्वापह्नवसिद्धं ब्रह्म निष्प्रतियोगिकस्वमात्रमिति स्वज्ञानं विना स्वातिरिक्तास्तित्वभ्रमः न ह्यपह्नवपदं भजति, न हि स्वाज्ञलोकस्य सहसा स्वज्ञानमुदेति तस्याशुद्धान्तरत्वात्, तत्सत्त्वशुद्ध्यर्थं अर्थानुसन्धानपूर्वकं मन्त्रानुष्ठानं कर्तव्यं, नह्यशुद्धचित्तं

मन्त्रार्थप्रत्यगभिन्नब्रह्मविषयं भवति, तदुपायतया अक्षमालिकासु पञ्चाशद्वर्णान् सार्धान् विन्यस्य तया अक्षमालिकया जप्तो मन्त्रो मन्त्रजापकदुरितक्षयद्वारा मन्त्रार्थप्रत्यगभिन्नब्रह्माभिमुखमेनं करोति इत्येतमर्थं मनसि निधाय पृच्छति। किमिति ? **भो भगवन्** इति ॥ १ ॥

अक्षमालालक्षणादि

तं गुहः प्रत्युवाच—प्रवालमौक्तिकस्फटिकशङ्खरजताष्टापद-चन्दनपुत्रजीविकाब्जरुद्राक्षा इति आदिक्षान्तरमूर्तिसंविधानुभावाः। सौवर्णं राजतं ताम्रं चेति सूत्रत्रयम्। तद्विवरे सौवर्णं तद्दक्षपार्श्वे राजतं तद्वामे ताम्रं तन्मुखे मुखं तत्पुच्छे पुच्छं तदन्तरावर्तनक्रमेण योजयेत् ॥ २ ॥

प्रजापतिप्रश्नमङ्गीकृत्य **तं गुहः प्रत्युवाच**। किमिति ? **प्रवाळादि-रुद्राक्षान्ताः** दश भवन्ति। **आदिक्षान्तरमूर्तिसंविधानुभावाः** अकारादि-क्षकारान्तरविलसिततत्तद्वर्णार्थमूर्तिभिः संविधेन संयोगेनानुभावा भावनीया इत्यर्थः। ततः किं इत्यत्र—**सौवर्णमिति**। यदक्षजातं **तद्विवरे** ॥ २ ॥

अक्षमालायां ब्रह्मादिभावना

यदस्यान्तरं सूत्रं तद्ब्रह्म। यद्दक्षपार्श्वे तच्छैवम्। यद्वामे तद्वैष्णवम्। यन्मुखं सा सरस्वती। यत् पुच्छं सा गायत्री। यत् सुषिरं सा विद्या। या ग्रन्थिः सा प्रकृतिः। ये स्वरास्ते धवलाः। ये स्पर्शास्ते पीताः। ये परास्ते रक्ताः ॥ ३ ॥

तदन्तरादौ ब्रह्मादयो भावनीया इत्याह—**यदिति**। तथा **यद्दक्षपार्श्वे** राजतसूत्रवलयं **तच्छैवम्**। **यद्वामे** ताम्रसूत्रवलयं **तद्वैष्णवम्**। प्रत्यक्षं **या ग्रन्थिः**

सा प्रकृतिः। ये स्वराः ते धवळाः सात्त्विकत्वात्। ये स्पर्शाः ते पीताः सत्त्वतमोमिश्रत्वात्। ये परास्ते रक्ताः राजसत्वात् ॥ ३ ॥

अक्षमालाशोधनादि

अथ तां पञ्चभिर्गव्यैरमृतैः पञ्चभिर्गव्यैस्तनुभिः शोधयित्वा पञ्चभिर्गव्यैर्गन्धोदकेन संस्नाप्य तस्मात् सोङ्कारेण पत्रकूर्चेन स्रपयित्वाऽष्टभिर्गन्धैरालिप्य सुमनःस्थले निवेश्याक्षतपुष्पैराराध्य प्रत्यक्षमादिक्षान्तैर्वर्णैर्भावयेत् ॥ ४ ॥

एवं संभाव्य अथ तां अक्षमालिकां **पञ्चभिर्गव्यैरमृतैः** नन्दाऽऽदिगोपञ्चकक्षीरैः पुनः **पञ्चभिर्गव्यैस्तनुभिः** तत्तनुभवगोमूत्रादिपञ्चकैः **शोधयित्वा** अथ पुनः **पञ्चभिर्गव्यैः** केवलदधिभिः **गन्धोदकेन** च **संस्नाप्य**। **अष्टभिर्गन्धैः** तक्कोलोशीरादिभिः मन्त्रशास्त्रप्रसिद्धैः **आलिप्य** । अकारादिक्षकारान्तैकपञ्चाशद्बीजात्मकमन्त्रैरक्षमालिकाविशिष्टं वा प्रातिस्विकैकैकाक्षमेकैकमन्त्रेण संयोजयेदित्यर्थः ॥ ४ ॥

एकैकाक्षस्य एकैकेन मन्त्रेण संयोजनम्

[1]ओमंकार मृत्युंजय सर्वव्यापक प्रथमेऽक्षे प्रतितिष्ठ । ओमांकाराकर्षणात्मक सर्वगत द्वितीयेऽक्षे प्रतितिष्ठ। ओमिंकार पुष्टिदाक्षोभकर तृतीयेऽक्षे प्रतितिष्ठ । ओमींकार वाक्प्रसादकर निर्मल चतुर्थेऽक्षे प्रतितिष्ठ। ओमुंकार सर्वबलप्रद सारतर पञ्चमेऽक्षे प्रतितिष्ठ। ओमूंकारोच्चाटनकर दुःसह षष्ठेऽक्षे प्रतितिष्ठ। ओमृंकार संक्षोभकर चञ्चल सप्तमेऽक्षे प्रतितिष्ठ । ओमॄंकार संमोहनकरो-

[1] अकार, आकार, इत्येव अनुस्वारं विनैव सर्ववर्णानां ग्रहणम्—अ १, अ २.

ज्ज्वलाष्टमेऽक्षे प्रतितिष्ठ । ओम्लृंकार विद्वेषणकर [1]शूहक नवमेऽक्षे प्रतितिष्ठ । ओम्लृंकार मोहकर दशमेऽक्षे प्रतितिष्ठ । ओमेंकार सर्ववश्यकर शुद्धसत्त्वैकादशेऽक्षे प्रतितिष्ठ । ओमैंकार शुद्धसात्त्विक पुरुषवश्यकर द्वादशेऽक्षे प्रतितिष्ठ । ओमोंकाराखिलवाङ्मय नित्य-शुद्ध त्रयोदशेऽक्षे प्रतितिष्ठ । ओमौंकार सर्ववाङ्मय वश्यकर शान्त चतुर्दशेऽक्षे प्रतितिष्ठ । ओमंकार गजादिवश्यकर मोहन पञ्चदशेऽक्षे प्रतितिष्ठ । ओमःकार मृत्युनाशनकर रौद्र षोडशेऽक्षे प्रतितिष्ठ । ॐ कंकार सर्वविषहर कल्याणद सप्तदशेऽक्षे प्रतितिष्ठ । ॐ खंकार सर्वक्षोभकर व्यापकाष्टादशेऽक्षे प्रतितिष्ठ । ॐ गंकार सर्वविघ्नशमन महत्तरैकोनविंशेऽक्षे प्रतितिष्ठ । ॐ घंकार सौभाग्यद स्तम्भनकर विंशेऽक्षे प्रतितिष्ठ । ॐ ङंकार सर्वविषनाशकरोग्रैकविंशेऽक्षे प्रतितिष्ठ । ॐ चंकाराभिचारघ्न क्रूर द्वाविंशेऽक्षे प्रतितिष्ठ । ॐ छंकार भूतनाशकर भीषण त्रयोविंशेऽक्षे प्रतितिष्ठ । ॐ जंकार कृत्याऽऽदिनाशकर दुर्धर्ष चतुर्विंशेऽक्षे प्रतितिष्ठ । ॐ झंकार भूतनाशकर पञ्चविंशेऽक्षे प्रतितिष्ठ । ॐ ञंकार मृत्युप्रमथन षड्विंशेऽक्षे प्रतितिष्ठ । ॐ टंकार सर्वव्याधिहर सुभग सप्तविंशेऽक्षे प्रतितिष्ठ । ॐ ठंकार चन्द्ररूपाष्टाविंशेऽक्षे प्रतितिष्ठ । ॐ डंकार गरुडात्मक [2]विषघ्न शोभनैकोनत्रिंशेऽक्षे प्रतितिष्ठ । ढंकार सर्वसंपत्प्रद [3]सुभग त्रिंशेऽक्षे प्रतितिष्ठ । ॐ णंकार सर्वसिद्धिप्रद [4]मोहकरैकत्रिंशेऽक्षे प्रतितिष्ठ ।

[1] गूहक—अ २. ग्रहक—अ, अ १. [2] विपद्घ्न—अ, अ १, उ १.
[3] सुखद—उ १. [4] मोहनक—क.

ॐ तंकार धनधान्यादिसंपत्प्रद प्रसन्न द्वात्रिंशेऽक्षे प्रतितिष्ठ । ॐ थंकार धर्मप्राप्तिकर निर्मल त्रयस्त्रिंशेऽक्षे प्रतितिष्ठ । ॐ दंकार पुष्टिवृद्धिकर प्रियदर्शन चतुस्त्रिंशेऽक्षे प्रतितिष्ठ । ॐ धंकार विषज्वरनिघ्न विपुल पञ्चत्रिंशेऽक्षे प्रतितिष्ठ । ॐ नंकार मुक्ति-मुक्तिप्रद शान्त षट्त्रिंशेऽक्षे प्रतितिष्ठ । ॐ पंकार विषविघ्ननाशन भव्य सप्तत्रिंशेऽक्षे प्रतितिष्ठ । ॐ फंकाराणिमादिसिद्धिप्रद ज्योती-रूपाष्टत्रिंशेऽक्षे प्रतितिष्ठ । ॐ बंकार सर्वदोषहर शोभनैकोन-चत्वारिंशेऽक्षे प्रतितिष्ठ । ॐ भंकार भूतप्रशान्तिकर भयानक चत्वा-रिंशेऽक्षे प्रतितिष्ठ । ओं मंकार विद्वेषिमोहनकरैकचत्वारिंशेऽक्षे प्रतितिष्ठ । ॐ यंकार सर्वव्यापक पावन द्विचत्वारिंशेऽक्षे प्रतितिष्ठ । ॐ रंकार दाहकर विकृत त्रिचत्वारिंशेऽक्षे प्रतितिष्ठ । ॐ लंकार विश्वंभर भासुर चतुश्चत्वारिंशेऽक्षे प्रतितिष्ठ । ॐ वंकार सर्वाप्यायनकर निर्मल पञ्चचत्वारिंशेऽक्षे प्रतितिष्ठ । ॐ शंकार सर्वफलप्रद पवित्र षट्चत्वारिंशेऽक्षे प्रतितिष्ठ । ॐ षंकार धर्मार्थकामद धवल सप्तचत्वारिंशेऽक्षे प्रतितिष्ठ । ॐ संकार सर्वकारण सार्ववर्णिकाष्ट-चत्वारिंशेऽक्षे प्रतितिष्ठ । ॐ हंकार सर्ववाङ्मय निर्मलैकोनपञ्चाशदक्षे प्रतितिष्ठ । ॐ ळंकार सर्वशक्तिप्रद प्रधान पञ्चाशदक्षे प्रतितिष्ठ । ॐ क्षंकार परापरतत्त्वज्ञापक परंज्योतीरूप शिखामणौ प्रतितिष्ठ ॥ ९ ॥

तत्र "अकारो वै सर्वा वाक् सैषा स्पर्शोष्मभिः व्यज्यमाना बह्वी नानारूपा भवति" इति श्रुतितः सर्वे वर्णाः अकारविकारा इत्युक्ता भवन्ति । "अक्षराणामकारोऽस्मि" इति स्मृतितश्च विष्णोः सर्वव्यापकत्वेन अकारादि-

क्षकारान्तबीजविशिष्टमन्त्रार्थत्वमुक्तं भवतीति ज्ञेयम् । विष्णोर्व्यापकत्वेऽपि मृत्युञ्जयत्वं कुतः ? इत्यत्र सर्वापह्नवसिद्धं ब्रह्म निष्प्रतियोगिकस्वमात्रमिति वेदनं सम्यज्ज्ञानं तत्स्वोदयसमकालकैवल्यफलकं इत्यत्र—"ब्रह्म वेद ब्रह्मैव भवति", "य एवं निर्बीजं वेद निर्बीज एव स भवति" इत्यादि ज्ञानसमकालमेव कैवल्यफलानुवादिन्यः श्रुतयः मानम् । तथाविधज्ञानतत्साधनानुष्ठानविस्मारकं ब्रह्मातिरिक्तजाग्रज्जाग्रदाद्यविकल्पानुज्ञैकरसान्तभेदजातास्तित्वं, तस्य प्रमादकारित्वात् "प्रमादं वै मृत्युमहं ब्रवीमि" इति, "प्रमादो ब्रह्मनिष्ठायां न कर्तव्यः कदाचन" इति च स्मृतेः । एवं स्वाज्ञानप्रभवस्वातिरिक्तास्तित्वभ्रमात्मकमृत्युं स्वज्ञानसमकालं जयत्यपह्नवं करोतीति मृत्युञ्जयत्वमुपपद्यते इति यत् तदेव वक्ष्यमाणैकपञ्चाशदकारादिक्षकारान्तमन्त्राणां परमाशय इत्याह—**ओमिति** । त्वं अक्षमालाशिखामणिदक्षिणभागस्थप्रथमे **अक्षे प्रतितिष्ठ** इत्यादिना अक्षं प्रत्येवमावाहयेत् । तथा शिष्टाक्षजातं शिष्टवर्णैरावाहयेदित्याह—**ॐ आंकारे**-त्यादिना । **शूहक**, स्वातिरिक्तं शून्यतयोहयतीति शूहकः, स्वातिरिक्तशून्यकरेत्यर्थः, स त्वं **नवमे अक्षे प्रतितिष्ठ** । प्रत्यक्षमेवमावाहयेत् ॥ ९ ॥

देवमन्त्रविद्यातत्त्वानां सान्निध्यार्थो मन्त्रजपः

अथोवाच ये देवाः पृथिवीषदस्तेभ्यो नमो भगवन्तोऽनुमदन्तु शोभायै पितरोऽनुमदन्तु शोभायै ज्ञानमयीमक्षमालिकाम् ॥ ६ ॥

अथोवाच ये देवा अन्तरिक्षसदस्तेभ्य ॐ नमो भगवन्तोऽनुमदन्तु शोभायै पितरोऽनुमदन्तु शोभायै ज्ञानमयीमक्षमालिकाम् ॥ ७ ॥

अथोवाच ये देवा दिविषदस्तेभ्यो नमो भगवन्तोऽनुमदन्तु शोभायै पितरोऽनुमदन्तु शोभायै ज्ञानमयीमक्षमालिकाम् ॥ ८ ॥

अथोवाच ये मन्त्रा या[1] विद्यास्तेभ्यो नमस्ताभ्यश्चोन-मस्तच्छक्तिरस्याः प्रतिष्ठापयति ॥ ९ ॥

[1] कलास्ते—उ.

अथोवाच ये ब्रह्मविष्णुरुद्रास्तेभ्यः समुणेभ्य ॐ नमस्त-[1]द्वीर्यमस्याः प्रतिष्ठापयति ॥ १० ॥

अथोवाच ये [2]सांख्यादितत्त्वभेदास्तेभ्यो नमो वर्तध्वं [3]वरोधे[4]नुवर्तध्वम् ॥ ११ ॥

अथोवाच ये शैवा वैष्णवाः शाक्ताः शतसहस्रशस्तेभ्यो नमो नमो भगवन्तोऽनुमदन्त्वनुगृह्णन्तु ॥ १२ ॥

अथोवाच याश्च मृत्योः प्राणवत्यस्ताभ्यो नमो नमस्तेनैतां मृडयत मृडयत ॥ १३ ॥

एवं पञ्चाशद्वर्णविशिष्टाक्षमालिकां स्पृष्ट्वा स्वाविद्यापदतत्कार्यब्रह्माण्ड-पटलवासिनो ये ये देवाः मन्त्रविद्यातत्त्वादयो विद्यन्ते तेषां अत्र सान्निध्याय अस्याः सार्वात्म्यसिद्धये च वक्ष्यमाणमन्त्रान् जपेदित्याह—**अथोवाचेति** । **अथोवाच ये देवाः** द्योतनात्मकाः सर्वत्र पृथिव्यां सीदन्ति गच्छन्ति व्याप्य वर्तन्त इति **पृथिवीषदः** । अस्यामक्षमालिकायां स्थिरासना भूत्वा अनुमोदन्तु अनुमोदनं सदा कुर्वन्तु पुनरस्या विशेषतः **शोभायै** शोभार्थं **पितरोऽनुमदन्तु शोभायै ज्ञानमयीं अक्षमालिकां** प्राप्य अग्निष्वात्तादिपितरोऽपि सदाऽनुमोदनं भजन्त्वित्यर्थः ॥ ६ ॥ तथा सर्वत्रानुभाव्यमित्याह—**अथेति** । पितृभिः सह **अन्तरिक्षसदो** देवा अप्यक्षमालिकां प्राप्य वरदाः सन्त. स्थिरासना भवन्त्विति प्रार्थनीया इत्यर्थः ॥ ७–८ ॥ अस्मिन् लोके ये सप्तकोटिमहामन्त्राः विद्यन्ते **याश्च** चतुष्षष्टिकला **विद्या** विद्यन्ते **ताभ्यो नमः** ॥ ९–१० ॥ **ये सांख्यादि-तत्त्वभेदाः** षण्णवतितत्त्वानि **तेभ्यो नमः** । ये षण्णवतितत्त्वभेदाः यूयमत्र **वरो** वराः सर्वोत्कृष्टाः सन्तः कामधेनव इव अक्षमालिकोपासकस्य वाञ्छितार्थदा भूत्वा अत्र सदा **वर्तध्वमित्यर्थः** ॥ ११–१२ ॥ स्वभावतोऽमरं जीवं स्वभावतः

[1] द्वितीयम—क, [2] संख्या—क, अ१. [3] विरो—मु. [4] निव—क,

प्रच्याव्य मृतिं देहात्मभावनारूपां नयतीति मृत्युः स्वातिरिक्तास्तित्वभ्रमः तस्य मृत्योः प्राणवत्य उपजीव्या याः शक्तयो विद्यन्ते स्वातिरिक्तभ्रमापनुत्तये ताभ्यो नमो नमः। ताः सर्वाः यूयं मिळित्वा मत्कृतनमस्कारेण तेनैतां अक्षमालिकां मृडयत मृडयत। स्वोपासकसुखप्रदां कुरुतेत्यर्थः॥ १३॥

अक्षमालायां सर्वात्मकत्वभावना

पुनरेतस्यां सर्वात्मकत्वं भावयित्वा भावेन पूर्वमालिकामुत्पाद्यारभ्य तन्मयीं महोपहारैरुपहृत्यादिक्षान्तैरक्षैरक्षमालामष्टोत्तरशतं स्पृशेत्॥

अकारादिळकारान्तद्विरावृत्त्याऽथ अकचटतपयश इत्यष्टवर्गं योजितं चेत् तदा अष्टोत्तरशतं भवति। क्षकारः सकृन्मेरुस्थाने योजनीय इत्यर्थः॥ १४॥

अक्षमालिकास्तुतिः

अथ पुनरुत्थाप्य प्रदक्षिणीकृत्योंनमस्ते भगवति मन्त्रमातृकेऽक्षमाले सर्ववशंकर्योंनमस्ते भगवति मन्त्रमातृकेऽक्षमालिकेऽशेषस्तम्भिन्योंनमस्ते भगवति मन्त्रमातृकेऽक्षमाले उच्चाटन्योंनमस्ते भगवति मन्त्रमातृकेऽक्षमाले विश्वामृत्यो [1]मृत्युंजयस्वरूपिणि सकलोद्वीपिनि सकललोकद[र]क्षा[2]दिके सकललोकोज्जीविके सकलोत्पादिके दिवाप्रवर्तिके रात्रिप्रवर्तिके नद्य[3]न्तरयासि देशान्तरयासि द्वीपान्तरयासि लोकान्तरयासि सर्वदा स्फुरसि सर्वहृदि वासयसि। नमस्ते परारूपे नमस्ते पश्यन्तीरूपे नमस्ते मध्यमारूपे नमस्ते वैखरीरूपे सर्वतत्त्वात्मिके सर्वविद्याऽऽत्मिके सर्वशक्त्यात्मिके सर्वदेवात्मिके वसिष्ठेन मुनिनाऽऽराधिते विश्वामित्रेण मुनिनोपसेव्यमाने नमस्ते नमस्ते॥ १५॥

[1] मृत्यु—अ १, उ १. [2] त्मिके—उ, उ १. [3] न्तरंया—उ, मु, अ.

अथ पुनरुत्थाप्य प्रदक्षिणीकृत्य वश्यादिषट्कर्मसाधकतया परमार्थपदप्रापिकतया च वक्ष्यमाणमन्त्रैरक्षमालिकां स्तौति—**ओमिति**। **मृत्युञ्जयस्वरूपिणि** स्वातिरिक्तविश्वाभिधानमृत्युग्रासत्वज्ञानरूपिणि, तथा **सकलोद्द्वीपिनि**। ईश्वरात्मना **सकललोकदं[र]क्षात्मिके**। रवीन्द्वात्मना **दिवाप्रवर्तिके रात्रिप्रवर्तिके**। अन्तर्याम्यात्मना **नद्यन्तरयासि** नद्यन्तरं नदीपटलं यास्यसि। प्रत्यग्रूपेण **सर्वदा स्फुरसि**। सरस्वत्यात्मना **नमस्ते परारूपे**। **वसिष्ठेन मुनिना** "ब्रह्मातिरिक्तं न किंचिदस्ति" इति **आराधिते**। तथा विश्वामित्रेण ॥ १५ ॥

विद्याफलम्

प्रातरधीयानो रात्रिकृतं पापं नाशयति। सायमधीयानो दिवसकृतं पापं नाशयति। तत् सायं प्रातः प्रयुञ्जानः पापोऽपापो भवति। एवमक्षमालिकया जप्तो मन्त्रः सद्यः सिद्धिकरो भवतीत्याह भगवान् गुहः प्रजापतिमित्युपनिषत् ॥ १६ ॥

विद्याफलमाह—**प्रातरिति**। कामिनां **सद्यः** कामितार्थ**सिद्धिकरो भवति**। अकामिजप्तमन्त्रस्तु सद्यश्चित्तशुद्धिकरो भूत्वा अस्य वेदान्तश्रवणादिमतिमुत्पाद्य सद्यः श्रवणादिजनितसम्यज्ज्ञानसमकालं सर्वोपद्रवसिद्धनिष्प्रतियोगिकब्रह्ममात्रावस्थानलक्षणविकळेबरकैवल्यसिद्धिकरो भवति। इतिशब्दस्त्वक्षमालिकोपनिषत्परिसमाप्त्यर्थः ॥ १६ ॥

श्रीवासुदेवेन्द्रशिष्योपनिषद्ब्रह्मयोगिना।
अक्षमालोपनिषदो व्याख्यानं लिखितं लघु।
अक्षमालोपनिषदो व्याख्याग्रन्थः शतं स्मृतः ॥

इति श्रीमदीशाद्यष्टोत्तरशतोपनिषच्छास्त्रविवरणे सप्तषष्टिसङ्ख्यापूरकं अक्षमालिकोपनिषद्विवरणं सम्पूर्णम्

अथर्वशिखोपनिषत्

भद्रं कर्णेभिः—इति शान्तिः

प्रथमः खण्डः

आदिप्रयुक्तध्यानजिज्ञासा

अथ हैनं पैप्पलादोऽङ्गिराः सनत्कुमारश्चाथर्वाणमुवाच[1]—भगवन् किमादौ प्रयुक्तं ध्यानं ध्यायितव्यं किं तद्ध्यानं को वा ध्याता कश्च ध्येयः ॥ १ ॥

ओङ्कारार्थतया भातं तुर्योङ्काराप्रभासुरम् ।
तुर्यतुर्यत्रिपाद्रामं स्वमात्रं कलयेऽन्वहम् ॥

इह खलु अथर्वशिखोपनिषदः अथर्ववेदप्रविभक्तत्वेन उपोद्घातादिकं प्रश्नोपनिषदादितुल्यम्। शिष्याचार्यपैप्पलादाद्यथर्वप्रश्नप्रतिवचनरूपेयमाख्यायिका वक्ष्यमाणविद्यास्तुत्यर्था । प्रकृतोपनिषदो विवरणमारभ्यते—**अथेत्यादिना** । **अथ** ह यथोक्तसाधनानुष्ठानसंजातचित्तशुद्धयनन्तरं खलु पिप्पलादस्यापत्यं **पैप्पलादो** नामतोऽङ्गिराः **सनत्कुमारश्च** एनं विख्यातं **अथर्वाणमुवाच** ।

[1] थर्व—अ, अ २, मु.

किमिति? हे भगवन् किं सर्वस्मात् आदौ प्रयुक्तं मुमुक्षुभिः कस्य ध्यानं ध्यायितव्यं किं वा तस्य ध्यानं को वा ध्याता ध्यानकर्ता सर्वैः कश्च को वा ध्येय इति ॥ १ ॥

चतुष्पात्प्रणवध्यानम्

स एभ्योऽ[1]थर्वा प्रत्युवाच—ओमित्येतदक्षरमादौ प्रयुक्तं ध्यानं ध्यायितव्यमित्येतदक्षरं परं ब्रह्मास्य पादाश्चत्वारो वेदाश्चतुष्पादिदमक्षरं परं ब्रह्म ॥ २ ॥

एवं पिप्पलादाङ्गिरस्सनत्कुमारैः पृष्टो मुनिराह—स इति । य एवमेतैः पृष्टः सोऽयमथर्वा मुनिः एभ्यः प्रत्युवाच । किमिति? ओमिति ब्रह्मप्रतीकालम्बनतया सर्वस्मादादौ प्रयुक्तं ईश्वरेच्छयाऽऽविर्भूतं मुमुक्षुभिः प्रणवार्थेश्वरध्यानं ध्यायितव्यमिति यत् तदेतदक्षरं प्रणवार्थरूपं परं अपरं वा ब्रह्म, "परं चापरं च ब्रह्म यदोङ्कारः," "प्रणवो ह्यपरं ब्रह्म प्रणवश्च परः स्मृतः।" इति श्रुतेः। अस्य प्रणवस्य व्यष्टिसमष्टितदैक्यावस्थाविशिष्टस्य चत्वारो वेदाः पादा इव पादाः चतुष्पात् इदमक्षरं परं अपरं वा ब्रह्म ॥ २ ॥

मात्राचतुष्टयस्वरूपम्

पूर्वाऽस्य मात्रा पृथिव्यकारः स ऋग्भिर्ऋग्वेदो ब्रह्मा वसवो गायत्री गार्हपत्यः ॥ ३ ॥

द्वितीयाऽन्तरिक्षं स उकारः स यजुर्भिर्यजुर्वेदो [2]विष्णू रुद्रास्त्रिष्टुब्दक्षिणाग्निः ॥ ४ ॥

तृतीया द्यौः स मकारः स सामभिः सामवेदो [3]रुद्र आदित्या जगत्याहवनीयः ॥ ५ ॥

[1] थर्वाः—उ, मु, अ १, अ २, थर्वः—उ १.
[2] विष्णुरु—अ १.
[3] स्त्रादि—अ २, क, उ.

याऽवसानेऽस्य चतुर्थ्यर्धमात्रा सा सोमलोक ओंकारः साऽथर्व-
णैर्मन्त्रैरथर्ववेदः संवर्तकोऽग्निर्मरुतो विराडेकर्षिर्भास्वती स्मृता ॥ ६ ॥

तस्याद्यमात्रास्वरूपमाह—**पूर्वेति** । **अस्य** प्रणवस्य **पूर्वा** आद्यमात्रा **पृथिव्यकारः** इत्यादेः प्राथम्यात् प्रथममात्रारूपत्वं युज्यत इत्यर्थः ॥ ३ ॥ द्वितीयमात्रेयत्तामाह—**द्वितीयेति** । येयं द्वितीया मात्रा **अन्तरिक्षं स उकार** इत्यादेः प्रथममात्राप्रसक्तपृथिव्यकाराद्यपेक्षया आनन्तर्यात् द्वितीयमात्रात्वं युज्यत इत्यर्थः ॥ ४ ॥ तृतीयमात्रेयत्तामाह—**तृतीयेति** । द्वितीयमात्रात्वेन प्रकटितान्त-रिक्षोकाराद्यपेक्षया **द्यौः मकार** इत्यादेः समनन्तरत्वात् तृतीयमात्रात्वं युज्यत इत्यर्थः ॥ ५ ॥ चतुर्थमात्रेयत्तामाह—**याऽवसान इति** । अस्य प्रणवस्य **या अवसाना सेयं चतुर्थ्यर्धमात्रा** प्रणवतुरीयांशः **ओङ्कारः सोमलोकश्च अथर्वणमन्त्रग्रामविशिष्टः अथर्वणवेदश्च संवर्तकोऽग्निः** प्रळयकालीनाग्निः **मरुतः** सप्त महा**विराट्** एक एव ऋषत्यवगम्यत इति **एकर्षिः** एवं विशेषणविशिष्ट-यमर्धमात्रा तुर्यप्रकाशभास्यतया **भास्वती स्मृता** सर्ववेदान्तेष्वभिहितेत्यर्थः ॥६॥

वर्णदेवताविशिष्टमात्रास्वरूपम्

प्रथमा रक्तपीता महद्ब्रह्मदैवत्या । द्वितीया विद्युमती कृष्णा विष्णुदैवत्या । तृतीया शुभाशुभा शुक्ला रुद्रदैवत्या । याऽवसानेऽस्य चतुर्थ्यर्धमात्रा सा विद्युमती सर्ववर्णा पुरुषदैवत्या ॥ ७ ॥

पुनर्विशिष्टमात्रातदध्यक्षपादस्वरूपमाचष्टे—**प्रथमेत्यादिना** । येयं **प्रथमा** मात्रा अकाररूपिणी सेयं **रक्तमिश्रपीतवर्णा** । यस्या महान् ब्रह्मा देवता सेयं **महद्ब्रह्मदैवत्या** । योकारात्मिका **द्वितीया** मात्रा विद्युद्वत् द्योतनात् **विद्युमती** तन्मिश्रकृष्णवर्णोज्वला **विष्णुदैवत्या** च भवति । मकारात्मिकेयं **तृतीया** मात्रा अर्धमात्रोकारसन्निहितत्वात् **शुभाशुभा** वर्णतः शुक्ला शुक्लतेजोमयेश्वरोपाधित्वात् **रुद्रदैवत्या** च भवति । **याऽवसाने** इत्युक्तार्थम् । **सा विद्युमती** विद्युन्निभा

सर्ववर्णहेतुत्वात् **सर्ववर्णा** स्वेन तुर्यरूपेण कृत्स्नमात्रातदध्यक्षप्रपञ्चपूरणात् पुरुषस्तुर्यात्मा स एव देवता यस्याः सेयं **पुरुषदैवत्या** च भवति ॥ ७ ॥

विशिष्टप्रणवस्वरूपम्

स एष ह्योंकारश्चतुरक्षरश्चतुश्चतुष्पादश्चतुःशिरश्चतुश्चतुर्धा मात्रा स्थूलमेतद्ध्रस्वदीर्घप्लुतम् ॥ ८ ॥

विशिष्टप्रणवेयत्तामाह—**स एष** इति । य एवमुक्तः **स एष ह्योङ्कारः** अकारादिभेदेन **चतुरक्षरः** विश्वविराडोत्रादिभेदेन **चतुश्चतुष्पादः चतुश्शिरः** चतुस्तुर्यविशिष्टत्वात् **चतुश्चतुर्धा मात्रा** । यद्वा—मात्राशब्दः कालवाची, स्थूलं प्रथममात्रा कालस्य स्थूलत्वात्, तथैतत् ह्रस्वं सूक्ष्मत्वात्, दीर्घं तदपेक्षया सूक्ष्मं, तदपेक्षया प्लुतं सुसूक्ष्मम् ॥ ८ ॥

विशिष्टप्रणवध्यानफलम्

ॐ ॐ ॐ इति त्रिरुक्त्वा चतुर्थः शान्त आत्मा प्लुतप्रणव-प्रयोगेण समस्तमोमिति प्रयुक्तमात्मज्योतिः सकृदावर्तते ॥ ९ ॥

एवंप्रकारत्रयभेदेन प्रणवमुच्चार्य **चतुर्थमात्राऽऽत्मकः शान्त आत्मा** तुर्यस्य स्वातिरिक्तशान्तिसिद्धत्वात् एवं प्लुतप्रणवप्रयोगेण प्रणवाग्रनादज्योतिरनुसन्धानात् **आत्मज्योतिः** निरावृतं सत् **सकृदावर्तते** सदा विभातीत्यर्थः ॥९॥

स्थूलादिभेदैः प्रणवस्य चतुर्धा विभागः

सकृदुच्चारितमात्रेणोर्ध्वमुन्नामयतीत्योंकारः । प्राणान् सर्वान् प्रलीयत इति [1]प्रलयः । प्राणान् सर्वान् परमात्मनि प्रणामयतीत्ये-

[1] प्रणवः—अ १, अ २, क.

तस्मात् प्रणवः । चतुर्धाऽवस्थित इति सर्वदेववेदयोनिः सर्ववाच्यवस्तु प्रणवात्मकम् ॥ १० ॥

प्रणवं चतुर्धा व्युत्पादयति—**सकृदिति** । **सकृत्** प्लुतोच्चारणतः मूलाधारादिब्रह्मरन्ध्रान्तमूर्ध्वं **उन्नामयति** उद्गच्छतीति **ओङ्कारः** । सर्वप्राणान् **प्रलीयते** प्रकर्षेण लयं नयतीति **प्रलयः** प्रणवस्य प्राणादिप्रलयहेतुत्वात् प्रलयत्वम् । **सर्वप्राणान् परमात्मनि प्रणामयति** प्रकर्षेण नमनमैक्यं गमयतीत्येतस्माद्धेतोः **प्रणव** उच्यते । एतत्कलनात्रयविरळः चतुर्थः "चतुर्थः शान्त आत्मा" इत्युक्तत्वात् । प्रणवस्थूलांश ओङ्कारः, तत्सूक्ष्मांशः प्रलयः, तद्बीजांशः प्रणवः, चतुर्थस्तु संशान्तस्वातिरिक्तः, इत्येवं **चतुर्धाऽवस्थितः** । **इति**शब्दः वस्तुत एक इति द्योतकः । अभिधेयाभिधानरूपेण **सर्वदेववेदयोनिः** । यत एवमतः **सर्ववाच्यवस्तु प्रणवात्मकं**, न हि ब्रह्मप्रणवातिरिक्तं अभिधेयजातं अभिधानजातं वाऽस्ति ॥ १० ॥

इति प्रथमः खण्डः

द्वितीयः खण्डः

तुर्योङ्कारस्य तारकत्वम्

देवाश्चेति संधत्तां सर्वेभ्यो दुःख[1]भयेभ्यः संतारयतीति तारणात्तारः ॥ १ ॥

अभिधेयाभिधानदेववेदजातं पूर्वोक्ततुर्योङ्कारस्य तारकत्वं विष्णुत्वं ब्रह्मत्वं स्वयंप्रकाशत्वं महादेवत्वं च प्रकटयतीत्याह—**देवाश्चेति** । विश्वविश्वाद्यविकल्पा-

[1] भवेभ्यः—क.

नुज्ञैकरसान्ताः प्रणवाभिधेयरूपा देवाः चशब्दात् अभिधानरूपा वेदाश्च इति एवं संधत्तां संदधतां व्यत्ययेन अभिसन्धि कृतवन्तः । किमिति? यस्तुरीयोङ्कारत्वेनाभिमतः तस्य सर्वदुःखभयान्वितसंसृतिसंतारणात् स एव तारः ॥ १ ॥

तस्य विष्णुत्वम्

सर्वे देवाः संविशन्तीति विष्णुः ॥ २ ॥

किं च—यत्र तुरीयोङ्कारे तुर्यतुर्ये विश्वविश्वाद्यविकल्पानुज्ञैकरसान्ताः सर्वे देवाः तन्मात्रावशेषतया संविशन्तीति स विष्णुः तुर्योङ्कारः ॥ २ ॥

तस्य ब्रह्मत्वम्

सर्वाणि बृंहयतीति ब्रह्म ॥ ३ ॥

किं च—यत् स्वातिरिक्ताविद्यापदतत्कार्यजातं ग्रसित्वा स्वमात्रतया बृंहयतीति तद्धि ब्रह्म ॥ ३ ॥

तस्य स्वयंप्रकाशत्वम्

सर्वेभ्योऽन्तः[1]स्थानेभ्यो[2]ध्येयेभ्यः प्रदीपवत् प्रकाशयतीति प्रकाशः ॥ ४ ॥

किंच स्वाज्ञदृष्टिप्रसक्तसर्वप्राण्यन्तर्बाह्यविलसितकामादिघटादिस्वप्रकाश्यध्येयेभ्यः विविक्ततया तत् सर्वं यः प्रदीपवत् प्रकाशयति स्वभास्यकामादिघटाद्यभावे प्रकाशमात्रतया स्वयमवशिष्यत इति च तुरीयोङ्कारः प्रकाशः ॥ ४ ॥

[1] स्थानि—क. [2] ध्यायिभ्यः—क.

तस्य महादेवत्वम्

प्रकाशेभ्यः सदोमित्यन्तः शरीरे विद्युद्वद्द्योतयति मुहुर्मुहुरिति विद्युद्वत् [1]प्रतीयां दिशं [2]भित्त्वा सर्वाँल्लोकान् व्याप्नोति व्यापयतीति व्यापनाद्व्यापी महादेवः ॥ ९ ॥

किंच **स्वान्तःशरीरे** स्वप्रकाश्येभ्यः कामादिभ्यः विविक्ततया **सदोमिति मुहुर्मुहुर्यो** विषयजातं **विद्युद्वत् द्योतयति** प्रकाशयति तत् कथं यथा **विद्युत् प्रतीयां** स्वप्रकाश्यमेघावृतिरूपां **दिशं भित्त्वा** स्वविषयलोकैकदेशं **व्याप्नोति** तथा तुरीयोङ्कारस्वप्रतीतिविषयभूतां **प्रतीयां** स्वावृतिरूपिणीं मायाऽऽख्यां **दिशं भित्त्वा** स्वाज्ञदृष्टिविकल्पित**सर्वान् लोकान्** तदुपलक्षितान्यनन्तकोटिब्रह्माण्डानि सच्चिदानन्दात्मना **व्याप्नोति** विश्वविराडोत्रादिरूपेण वा **व्यापयतीति** च येन केन वैवं **व्यापनात् व्यापी महादेवः** तुर्योङ्कार एवेति सर्वदेवानां वेदानामभिप्रेतोऽर्थः ॥ ९ ॥

इति द्वितीयः खण्डः

तृतीयः खण्डः

तुर्योङ्कारनिरूपणम्

पूर्वाऽस्य मात्रा जागर्ति जागरितं द्वितीया स्वप्नं तृतीया सुषुप्तिश्चतुर्थी तुरीयम् ॥ १ ॥

मात्राऽवस्थापादभेदविशिष्टतुर्योङ्कारं पुनरनूद्य विशदयति—**पूर्वेति**। अस्य तुरीयोङ्कारस्य **पूर्वा मात्रा** अकाराख्या पञ्चीकृतपञ्चमहाभूततत्कार्यभौतिकरूपेण

[1] प्रतीयादि—क. प्रतीर्चीं दि—अ. [2] दिशं भि—क.

जागर्तीति सैव जागरणमभिधीयते। अस्य **द्वितीया** उकाराख्या मात्रा अपञ्चीकृतपञ्चीकृतपञ्चमहाभूततत्कार्यजाग्रद्वासनाऽऽत्मिका **स्वप्नं** स्वप्नावस्था भवति। अस्य **तृतीया** मकाररूपिणी मात्रा तु पञ्चीकृतापञ्चीकृतपञ्चमहाभूततत्कार्यव्यष्टिसमष्टिकारणरूपेयं **सुषुप्त्यवस्था** भवति। अस्य **चतुर्थी** अर्धमात्रारूपिणी मात्रा तु जाग्रदाद्यवस्थात्रयप्रपञ्चतत्कार्यभावाभावप्रकाशकं तुर्यं तुर्यावस्था भवति ॥ १ ॥

तुर्यज्ञानपथ एव सिद्धिकरः

मात्रा मात्राः प्रतिमात्रागताः सम्यक् समस्तानपि पादान् जयतीति स्वयंप्रकाशः स्वयं ब्रह्म भवतीत्येष सिद्धिकर एतस्माद्ध्यानादौ प्रयुज्यते। सर्वकरणोपसंहारत्वाद्धार्यधारणाद्ब्रह्म तुरीयम् ॥ २ ॥

एवं अकारादिमात्राप्रविभक्तस्थूलसूक्ष्मादिमात्राः पूर्वपूर्वा उत्तरोत्तरप्रतिमात्रासु विलयं **गता** यदि तदा **सम्यक्** अकाराद्यर्धमात्राप्रविभक्तस्थूलादिमात्रापञ्चदशारोपापवादाधिकरणविश्वविश्वाद्यविकल्पानुद्वैकरसान्तान् **समस्तानपि पादान्** तुर्यतुर्यपरायणतया **जयतीति** प्रबोधसमकालं विद्वान् **स्वयंप्रकाशो** भूत्वा **स्वयं ब्रह्मैव भवतीत्येष** तुर्यतुर्यो निष्प्रतियोगिकस्वमात्रमिति तत्त्वज्ञानपथः **सिद्धिकरः**। एतस्मादतिरिक्तः पन्थाः कुपथ इत्यर्थः। **एतस्मात्** कुपथात् अतिरिक्ततुर्यतुर्यप्रापकपथस्तु तुर्यतुर्यध्यानादौ आदिशब्दार्थनिर्विकल्पकसमाधौ च तदभिव्यक्तिः **प्रयुज्यते**। तत् कथं? तुर्यतुर्याधिगमस्य स्वातिरिक्तसर्वकरणोपसंहारसिद्धत्वात्। तदपह्नवसिद्धत्वेन यत् **धार्यं** तत्स्वमात्रमित्यवधारणात् तुर्यतुर्यं **ब्रह्म** स्वमात्रमवशिष्यत इत्यर्थः ॥ २ ॥

तज्ज्ञानोपायः

सर्वकरणानि संप्रतिष्ठाप्य ध्यानं विष्णुः प्राणं मनसि सह करणैः मनसि संप्रतिष्ठाप्य ध्याता रुद्रः प्राणं मनसि सह करणैर्नादान्ते परमात्मनि संप्रतिष्ठाप्य ध्यायीतेशानं प्रध्यायितव्यम् ॥ ३ ॥

तत्रोपाय उच्यते—यत्तुर्यं ब्रह्मेति प्रथितं तत्र **सर्वकरणानि संप्रतिष्ठाप्य** सम्यग्विलापनं कृत्वा यदेतद्विलापनाधिष्ठानं तद्ब्रह्मास्मीति **ध्यानं** कृत्वा तत्प्रभावतः **विष्णुः** प्रधानपुरुषो भवति । यद्वा—**करणैः सह प्राणं मनसि संप्रतिष्ठाप्य** मनोमात्रावशिष्टं कृत्वा यस्य मनो ब्रह्माकारपरिणतं सोऽयमेवं **ध्याता रुद्रो** भवति । अथवा—मुमुक्षुभिः **करणैः सह प्राणं मनसि** मनस्तु ब्रह्मप्रणवनादान्ते **परमात्मनि संप्रतिष्ठाप्य** स्वमात्रतया अवस्थातुमीश्वरं ब्रह्म **प्रकर्षेण** ध्यायितव्यं तस्मात् **ईशानं** आत्मेति **ध्यायीत** ॥ ३ ॥

शिवस्यैव ध्येयत्वम्

सर्वमिदं ब्रह्मविष्णुरुद्रेन्द्रास्ते संप्रसूयन्ते सर्वाणि चेन्द्रियाणि सह भूतैर्न कारणं कारणानां [1]ध्याता कारणं तु ध्येयः सर्वैश्वर्यसंपन्नः सर्वेश्वरः शंभुराकाशमध्ये ध्रुवं स्तब्ध्वाऽधिकं क्षणमेकं क्रतुशतस्यापि चतुःसप्तत्या यत् फलं तदवाप्नोति कृत्स्नमोंकारगतिश्च सर्वध्यानयोगज्ञानानां यत् फलमोंकारो वेद पर ईशो वा शिव एको ध्येयः शिवंकरः सर्वमन्यत् परित्यज्य ॥ ४ ॥

यस्मात् **इदं सर्वं** जगत् तत्सर्गस्थितिभङ्गकर्तारो **ब्रह्मविष्णुरुद्राश्च ते संप्रसूयन्ते** पञ्चभूतैः सह **सर्वाणीन्द्रियाणि** च संप्रसूयन्ते **तत्कारणमीश्वराख्यं** ब्रह्म, तदतिरेकेण भूतैः सहं इन्द्रियाणि सत्त्वरजस्तमांसि वा **नहि कारणपदं** भजति। मद्व्यतिरिक्तमणुमात्रं न विद्यते इति **ध्याता** परमेश्वरस्तु स्वयमेव सर्वध्येयो भूत्वा स्वकार्यत्वेऽपि मिथः कार्यकारणभावमापन्नानां वियदादीनां कारणं भवति । सर्वकारणत्वेन यो **ध्येयः** सोऽयं सर्वज्ञत्वसर्वेश्वरत्वसर्वकारणत्वसर्वान्तर्यामित्वादि-**सर्वैश्वर्यसम्पन्नः सर्वेश्वरः** स्वांशजसर्वप्राणिस्वामित्वात् **शंभुः** सर्वसुखकृत्त्वात् एवंविशेषणविशिष्टः परमात्मा सदा यो विजयते तमेतं **ध्रुवं** आत्मानं यः कोऽपि वा पुरुषः **स्वहृदयाकाशमध्ये अधिकं** क्षणं एकं क्षणं क्षणार्धं वा ध्यानपूर्वकं **स्तब्ध्वा**

[1] धाताध्या—क. ध्याता ध्या—अ १.

स्तम्भयित्वा ध्यायीत तस्य तद्भावापत्तिरेव परमफलं, आन्तराळिकफलं तु चतुस्सप्तत्यधिकशतक्रत्वनुष्ठानतो यत्फलं तदवाप्नोति कृत्स्नमोङ्कारगतिश्चानेन विदिता भवेत्। एवमोङ्कार ओङ्कारं यः वेद सोऽयं मुनिः सर्वध्यानयोगज्ञानानां यत्फलं विद्यते तदवाप्नोति। एवमोङ्कारवित् पर ईशो वा शिव एको ध्येयः स्वभक्तपटलस्य शिवङ्करश्च भवति। यस्मादेवं तस्मात् सर्वमन्यत् परित्यज्य तदधिकरणे निरधिकरणे वा ॥ ४ ॥

अध्ययनफलम्

समाप्ताऽथर्वशिखा तामधीत्य द्विजो गर्भवासाद्विमुक्तो मुच्यत एतामधीत्य द्विजो गर्भवासाद्विमुक्तो विमुच्यत इत्योꣳ सत्यमित्युपनिषत् ॥ ५ ॥

परिसमाप्तेयं अथर्वशिखा तामर्थतो द्विजः अधीत्य तज्ज्ञानमहिम्ना पुरैव गर्भवासाद्विमुक्तः स्वाज्ञानव्यवधानतो बद्धवद्भातः स्वाज्ञानापाये जीवन्मुक्तो भूत्वा विमुच्यते विदेहमुक्तो भवति। अभ्यास आदरार्थः। एतदथर्वशिखोपनिषदर्थविचारजन्यज्ञानेन विदेहमुक्तो भवतीत्युक्तमित्येतत्तत् ओं सत्यं अवितथम्। इत्युपनिषच्छब्दः प्रकृतोपनिषत्परिसमाप्त्यर्थः ॥ ५ ॥

इति तृतीयः खण्डः

श्रीवासुदेवेन्द्रशिष्योपनिषद्ब्रह्मयोगिना।
लिखितं स्याद्विवरणं शिखोपनिषदः स्फुटम्।
शिखोपनिषदो व्याख्या विंशत्यधिशतं स्मृता ॥

इति श्रीमदीशाद्यष्टोत्तरशतोपनिषच्छास्त्रविवरणे त्रयोविंशतिसङ्ख्यापूरकं अथर्वणशिखोपनिषद्विवरणं सम्पूर्णम्

अथर्वशिर-उपनिषत्

भद्रं कर्णेभिः—इति शान्तिः

देवानां रुद्रस्वरूपजिज्ञासा

देवा ह वै स्वर्गं लोकमगमंस्ते देवा रुद्रमपृच्छन् को भवानिति ॥ १ ॥

अथर्वशिरसामर्थमनर्थव्रातमोचकम् ।
सर्वाधारमनाधारं स्वमात्रं त्रैपदाक्षरम् ॥

इह खलु अथर्वणवेदप्रविभक्तेयं अथर्वशिरआख्योपनिषत् परंब्रह्मार्थतया दृश्यते । प्रश्नमुण्डकमाण्डूक्यवत् अस्या उपोद्घातादिकमूह्यम् । यथोक्तलक्षण-लक्षिताया उपनिषदः स्वल्पग्रन्थतो विवरणमारभ्यते । देवताकदम्बरुद्रप्रश्न-प्रतिवचनरूपेयमाख्यायिका विद्यास्तुत्यर्था । केयमाख्यायिकेत्यत आह—**देवा** इति । स्वदेहप्रभया द्योतनवन्तः इन्द्रादयः **देवाः**, **ह वा** इति निपातौ वृत्तानुस्मरणार्थौ, स्वर्लोकनिवासिभिरपि गेयं **स्वर्गं लोकं** महाकैलासं **अगमन्** गतवन्तः । ये महाकैलासं प्रविष्टाः ते देवाः स्वातिरिक्तास्तितारुजं द्रावयति नाशयतीति **रुद्रमपृच्छन्** पृष्टवन्तः । किमिति ? **को भवानिति** ॥ १ ॥

रुद्रैकत्वप्रतिपादनम्

सोऽब्रवीदहमेकः प्रथममासं वर्तामि भविष्यामि च नान्यः कश्चित् मत्तो व्यतिरिक्त इति ॥ २ ॥

तैरेवं पृष्टो रुद्र आह—**सोऽब्रवीदिति** । य एवं देवैः पृष्टः **सोऽयं रुद्रोऽब्रवीत्** । किमिति ? अस्मदादिप्रत्ययभासकप्रत्यग्रूपेण **अहमेकः**। तत्रोपपत्तिमाह—**प्रथममिति** । **प्रथमं** सृष्टेः प्राक् **अहमासं** स्थितवान् इदानीं **वर्तामि** इतो **भविष्यामि च** कालत्रयापरिच्छिन्नोऽस्मि । **नान्यः कश्चिदपि मत्तः** सर्वेश्वरात् **व्यतिरिक्तोऽस्तीति** ॥ २ ॥

रुद्रस्य सर्वात्मत्वम्

सोऽन्तरादन्तरं प्राविशत् दिशश्चान्तरं संप्राविशत् ॥ ३ ॥

सोऽहं नित्यानित्योऽहं [1]ब्रह्माहमब्रह्माहं प्राञ्चः प्रत्यञ्चोऽहं दक्षिणाञ्चोदञ्चोऽहं अधश्चोर्ध्वं च दिशश्च विदिशश्चाहं पुमानपुमान् स्त्रियश्चाहं सावित्र्यहं गायत्र्यहं सरस्वत्यहं त्रिष्टुब्जगत्यनुष्टुप्चाहं छन्दोऽहं गार्हपत्योऽहं दक्षिणाग्निराहवनीयोऽहं सत्योऽहं गौरहं गौर्यहं ज्येष्ठोऽहं श्रेष्ठोऽहं वरिष्ठोऽहमापोऽहं तेजोऽहं ऋग्यजुस्सामाथर्वाङ्गिरसोऽहमक्षरमहं क्षरमहं गोप्योऽहं गुह्योऽहमरण्योऽहं पुष्करमहं पवित्रमहं अग्रं च मध्यं च बहिश्च पुरस्ताद्दशसु दिक्ष्ववस्थितमनवस्थितं च ज्योतिरित्यहमेकः सर्वं च मामेव ॥ ४ ॥

देवान् प्रत्येवमुक्त्वा **सोऽयं रुद्रः** निरावृतः स्वेन रूपेण **सर्वान्तरात्** ईश्वरात् **अन्तरं** स्वातिरिक्तसाक्ष्यभासकसाक्षिभावं **प्राविशत्**, "सर्वस्य साक्षी ततः सर्वस्मात् अन्यो विलक्षणः" इति श्रुतेः । अन्तर्याम्यात्मना प्राच्यादिदिशश्चान्तरं **संप्राविशत्** ॥ ३ ॥ य एवंविधः **सोऽहं** स्वज्ञादिदृष्टिमाश्रित्य आधाराधेयात्मना **नित्यानित्यरूपः**, कारणं **ब्रह्म** कार्यं **अब्रह्म** आत्मानात्मरूपोऽपि अहमेव, "नान्यः कश्चित् मत्तो व्यतिरिक्तः" इति प्रतिज्ञातत्वात् ।

[1] ब्रह्माहं ब्र—अ, अ १, अ २, क.

प्रागादिदिक्षु अञ्चतीति **प्राच्यः** इत्यादि समानम्। प्रागाग्नेयादिदिशश्च **विदिशश्च अधश्चोर्ध्वं च** पुंनपुंसकस्त्रीजातिश्च **गायत्र्यादिशक्तित्रयं** च **त्रिष्टुबादिछन्दस्त्रयं** च **गार्हपत्याद्यग्नित्रयं** च प्रातिभासिकादिसत्यमपि यत्सत्तामाश्रित्य प्रवृत्तं सोऽहं **सत्यः** कामधेनुजातिः **गौः** गिरिजा **गौरी** वयसा **ज्येष्ठः** गुणतः **श्रेष्ठः** ज्ञानेन **वरिष्ठः**। अप्तेजोग्रहणं पञ्चभूतोपलक्षणार्थं—अप्तेजआदिपञ्चभूतं च ऋगादि-वेदचतुष्टयं च कल्पितं **क्षरं** अकल्पितं **अक्षरं** च शत्रुणाऽवेदनीयं **गोप्यं** मित्रेणाप्यवेदनीयं **गुह्यं** च **अरण्योऽरण्यं** च **पुष्करं** पुण्यक्षेत्रं च **पवित्रं** शुद्धिहेतुस्नानादि च **अग्रं मध्यं** मूलं च सर्वान्तर्बहिश्च **पुरस्तात्** पूर्वादिदशसु दिक्षु यद्यदवस्थितं यद्यदनवस्थितं तत्तत्सर्वं च मत्स्वरूपज्योतिरिति प्रतिपर्याय-महमित्यनुसंधेयम्। नित्यानित्यादि अवस्थितमनवस्थितमित्यन्तं सर्वज्योति**रहमेवैकः** न मत्तोऽन्यदस्ति, "सर्वज्योतिरसावहम्" इति श्रुतेः। हे देवाः **सर्वे च** यूयं **मामेव** सर्वमिति जानन्तु इति शेषः ॥ ४ ॥

स्वज्ञानफलम्

मां यो वेद सर्वान् देवान् वेद गां गोभिर्ब्राह्मणान् ब्राह्मण्येन हवींषि हविषाऽऽयुरायुषा सत्यं सत्येन धर्मं धर्मेण तर्पयामि तर्पयामि ॥ ५ ॥

यो मुमुक्षुः मां एवंविधं **वेद** सोऽयं मुनिः **सर्वान् देवान्** मत्स्वरूपतया वेद। तत्तद्रूपमास्थाय वैराजभावं वैकुण्ठभावं वैत्य स्वांशजीवजातं तर्पयामीत्याह—**गामिति**। **गोभिः** स्वाधिष्ठितसूर्यरश्मिभिः **गां** भूमिं **तर्पयामि ब्राह्मण्या**पादक-कर्मणा **ब्राह्मणान्** तर्पयामीति सर्वत्रानुषज्यते। घृतादिह**विषा हवींषि** चरुपुरोडाशादीनि, **आयुषा** मुख्यप्राणरूपेण आयुः व्यष्टिप्राणं तर्पयामि, पारमार्थिक**सत्येन** व्यावहारिकादि**सत्यं** तर्पयामि, स्वात्मज्ञानधारणार्ह**धर्मेण** अभ्युदयहेतुधर्मजातं तर्पयामि। आवृत्तिस्तर्पयामीति सर्वत्रानुवृत्त्यर्था ॥ ५ ॥

देवकृतरुद्रस्तुतिः

स्वेन तेजसा ततो देवा रुद्रं नापश्यन् ते देवा रुद्रं ध्यायन्ति ततो देवा ऊर्ध्वबाहवः स्तुवन्ति—ॐ यो ह वै रुद्रः स भगवान् यश्च ब्रह्मा भूर्भुवः सुवः तस्मै वै नमो नमः शीर्षञ्जनदों विश्व-रूपोऽसि ॥ ६ ॥ . . . यश्च विष्णुः . . . ॥ ७ ॥ . . . यश्च महेश्वरः . . . ॥ ८ ॥ . . . या चोमा . . . ॥ ९ ॥ . . . यश्च विनायकः . . . ॥ १० ॥ . . . यश्च स्कन्दः . . . ॥ ११ ॥ . . . यश्चेन्द्रः . . . ॥ १२ ॥ . . . यश्चाग्निः . . . ॥ १३ ॥ . . . या च भूः . . . ॥ १४ ॥ . . . यश्च भुवः . . . ॥ १५ ॥ . . . यश्च सुवः . . . ॥ १६ ॥ . . . यच्च महः . . . ॥ १७ ॥ . . . यश्च जनः . . . ॥ १८ ॥ . . . यच्च तपः . . . ॥ १९ ॥ . . . यच्च सत्यम् . . . ॥ २० ॥ . . . या च पृथिवी . . . २१ ॥ . . . याश्चापः . . . ॥ २२ ॥ . . . यच्च तेजः . . . ॥ २३ ॥ . . . यश्च वायुः . . . ॥ २४ ॥ . . . यच्चाकाशम् . . . ॥ २५ ॥ . . . यश्च सूर्यः . . . ॥ २६ ॥ . . . यश्च सोमः . . . ॥ २७ ॥ . . . यानि च नक्षत्राणि . . . ॥ २८ ॥ . . . ये चाष्टौ ग्रहाः . . . ॥ २९ ॥ . . . यश्च प्राणः . . . ॥ ३० ॥ . . . यश्च कालः . . . ॥ ३१ ॥ . . . यश्च यमः . . . ॥ ३२ ॥ . . . यश्च मृत्युः . . . ॥ ३३ ॥ . . . यच्चामृतम् . . . ॥ ३४ ॥ यच्च भूतं भव्यं भविष्यत् . . . ॥ ३५ ॥ . . . यच्च विश्वम् . . . ॥ ३६ ॥

. . . यच्च कृत्स्नम् . . . ॥ ३७ ॥ . . . यच्च सर्वम् . . . ॥ ३८ ॥ . . . यच्च सत्यम् . . . ॥ ३९ ॥ . . .

ब्रह्मैकस्त्वं द्वित्रिधोर्ध्वमधश्च त्वं शान्तिश्च त्वं पुष्टिश्च त्वं तुष्टिश्च त्वं हुतमहुतं विश्वमविश्वं दत्तमदत्तं कृतमकृतं परमपरं परायणं चेति ॥ ४० ॥

इत्थं प्रौढप्रकाशात्मना विश्वरूपं दर्शयन्तं देवा द्रष्टुमशक्ताः सन्तः तं ध्यायन्ति चतुस्त्रिंशन्मन्त्रैः स्तुवन्ति चेत्याह—**स्वेनेति** । देवा यैर्मन्त्रैः रुद्रं स्तुवन्ति तान् मन्त्रानुदाहरति—**ओमित्यादिना** । ओमादौ मध्ये भूर्भुवःसुवरन्ते शीर्षञ्जनदों विश्वरूपोऽसि इति यथा प्रथममन्त्रोक्तादिमध्यान्तविन्यासः सर्वमन्त्रेषु समान इति वेदितव्यः । एतैर्मन्त्रैः स्तुतो रुद्रः प्रीतो भूत्वा देवानां स्वात्मानं दर्शयतीत्यर्थः ॥ ६—३९ ॥ श्रीरुद्रदर्शनेन सन्तुष्टा देवाः पुनस्तमेव स्तुवन्तीत्याह—**ब्रह्मैकस्त्वमिति** । त्वमेव **ब्रह्म** एकद्वित्रिसङ्ख्यावाच्यमपि त्वमेव **ऊर्ध्वमधश्च** त्वमेव स्वाविद्याद्वयतत्कार्यशान्तिरपि त्वमेव **पुष्टिः** बलं **तुष्टिः** आनन्दः त्वमेव **हुतं** होमः **अहुतं** तद्विपरीतं **विश्वं** आरोपः **अविश्वं** अपवादः दानं **दत्तं** तद्विपरीतं **अदत्तं** **कृतमकृतं** सकामनिष्कामकर्म **परं** कारणं **अपरं** कार्यं स्वांशजप्राणिपटलपरायणं परिसमाप्तिस्थानमपि **त्वमेवेति** सर्वत्रानुषज्यते ॥ ४० ॥

रुद्रं प्रति देवानां प्रार्थना

अपाम सोममृता अभूमागन्म ज्योतिरविदाम देवान् ।
किं नूनमस्मान् कृणवदरातिः किमु धूर्तिरमृत मर्त्यस्य ॥ ४१ ॥

सर्वजगद्धितं वा एतदक्षरं प्राजापत्यं सूक्ष्मं सौम्यं पुरुषमग्राह्यमग्राह्येण वायुं वायव्येन सोमं सौम्येन ग्रसति स्वेन तेजसा [1]तस्मा उपसंहर्त्रे महाग्रासाय वै नमो नमः ॥ ४२ ॥

[1] तस्मादुप—अ, अ १, अ २, क.

हृदिस्था देवताः सर्वा हृदि प्राणाः प्रतिष्ठिताः ।
हृदि त्वमसि यो नित्यं तिस्रो मात्राः परस्तु सः ॥ ४३ ॥
तस्योत्तरतः शिरो दक्षिणतः पादो य उत्तरतः स ओङ्कारो य ओङ्कारः स प्रणवो यः प्रणवः स सर्वव्यापी यः सर्वव्यापी सोऽनन्तः योऽनन्तः तत्तारं यत्तारं तत् सूक्ष्मं यत् सूक्ष्मं तच्छुक्लं यच्छुक्लं तद्वैद्युतं यद्वैद्युतं तत् परं ब्रह्मेति स एकः स एको रुद्रः स ईशानः स भगवान् स महेश्वरः स महादेवः ॥ ४४ ॥

विधाऽन्तरेण देवास्तमेव प्रार्थयन्तीत्याह—**अपामेति** । हे **अमृत** रुद्र त्वत्प्रसादात् वयं **सोमं अपाम** पिबेम । एवं सोमादियागं कृत्वा **अमृता** अमरणधर्माणो देवा **अभूम** भवेम । यद्वा—स्वकृतयागादिफलं त्वय्येव समर्प्य ततः त्वत्प्रसादसञ्जातचित्तशुद्धिप्राप्यज्ञानद्वारा तावकं **ज्योतिः अहमेवास्मीति अगन्म** गच्छामः । किंच त्वद्भावसंसिद्धज्ञानेन स्वाभेदेन द्योतमानान् **देवान्** विराडादीन् ब्रह्मविष्णुमहेश्वरान् वा अहमेवेदं सर्वं इति **अविदाम** स्वात्मतया पश्यामः । एवं त्वद्दत्ताभयान् **अस्मान् अरातिः** कामाद्यरिषड्वर्गः स्वाज्ञानं वा **किं कृणवत्** किं वा कुर्यात् न किमपीत्यर्थः । **नूनं** निश्चयम् । एवं स्वाज्ञानारातेः अस्मच्चालनसामर्थ्याभावे **मर्त्यस्य** मरणधर्मविशिष्टस्य मम **धूर्तिः** दुष्कृतिः चालनं **किमु** कृणवत् दुष्कृतेरपि त्वत्प्रसादलब्धज्ञानसमकालं ब्रह्मरूपत्वात्, "पुण्यं पापं च चिन्मात्रं" इति श्रुतेः ॥ ४१ ॥ ध्यानस्तवनलब्धरुद्रप्रसादा देवाः सर्वग्रासरुद्राय नमस्कुर्वन्तीत्याह—**सर्वेति** । यत् सर्वेषां जगतां अन्तर्याम्याधाररूपेण हितं करोतीति **सर्वजगद्धितम्** । **वा**शब्दोऽवधारणार्थः । यत् **एतत्** रुद्राख्यं **अक्षरं यत्प्राजापत्यं** प्रजापतिभिः स्तुत्यत्वात् यन्निरतिशयसूक्ष्मं **यत्स्वानन्यभक्तपटलसौम्यं** यत् पूर्णभावेन **पुरुषाख्यं** यत् **अग्राह्येण** निर्विशेषरूपेण सर्वप्रमाणाग्राह्यमव्यक्तं **ग्रसति वायव्येन** सूत्ररूपेण **वायुं** आध्यात्मिकं ग्रसति, यत् **सौम्येन** रूपेण **सोमं** अमृतं ग्रसति, यत् **स्वेन तेजसा** स्वातिग्नि-

स्वाज्ञानध्वान्तं ग्रसति **तस्मै सर्वोपसंहर्त्रे** स्वावशेषतया सर्वग्रासाय श्रीरुद्राय परमात्मने **वै नमो नमः** सर्वग्रासरुद्रोऽस्मीत्यैक्यानुसंधानं कुर्म इत्यर्थः, "नमस्त्वैक्यं प्रवदेत्" इति श्रुतेः ॥ ४२ ॥ पुनः प्रकारान्तरेण देवाः स्वहृदि स्वात्मानं रुद्रं ध्यायन्तः तत्स्वरूपेयत्तां वर्णयन्तीत्याह—**हृदिस्था** इति । हृञ् हरणे इति धातोः स्वाज्ञानहारिणि हृदि प्रतीचि सर्वाधारे रज्जुसर्पवत्तिष्ठन्तीति **हृदिस्थाः देवताः सर्वाः** इन्द्रादयः । तथा हृदि पञ्चवृत्तिसहितवागादिप्राणाश्च **प्रतिष्ठिताः** । यस्त्वं अकारादि**तिस्रो मात्रा** या वर्तन्ते तासां **परः**, तुशब्दोऽवधारणार्थः । अकारादिमात्रातदध्यक्षविश्वविराडोत्रादेरपि पर एव भूत्वा हृदि विलसितवृत्तिसहस्रभावाभावप्रकाशकप्रत्यगभिन्नपरमात्मा **त्वमसि** स त्वं सर्वविलक्षणश्चासि ॥ ४३ ॥ **तस्य** हृदयस्योत्तरतः **शिरः** मकारः तदध्यक्षप्राज्ञादिश्च वर्तते,

शिरोवाची मकारः स्यादकारः पादवाचकः ।
उकारो मध्यदेहः स्यात् तदात्मा तुर्य उच्यते ॥

इति स्मृतेः । तथा **दक्षिणतः पादः** अकारः तदध्यक्षः प्रतिष्ठितः । **य उत्तरतो** मकारः विराजते **स एवोङ्कारः** मकारादेः ओङ्कारावयवत्वात् ॥ ४४ ॥

ओङ्कारशब्दार्थः

अथ कस्मादुच्यते ओङ्कारो यस्मादुच्चार्यमाण एव सर्वं शरीरं ऊर्ध्वमुन्नामयति तस्मादुच्यत ओङ्कारः ॥ ४५ ॥

य ओङ्कारः स प्रणवः इत्यादिमन्त्रार्थः तिरोहित इति मत्वा तदर्थजातं तद्ब्राह्मणमुखेन श्रुतिः व्याकरोति—**अथेति** । आदौ प्रश्नोत्तररूपेण ओङ्कारस्वरूपं व्युत्पादयति—**कस्मादिति** । सर्वत्र अथशब्दः प्रश्नार्थः **कस्मात् ओङ्कार इत्युच्यते** । **यस्मादुच्चार्यमाण एव** यतः ओङ्कारोच्चारणादेव **सर्वं शरीरं ऊर्ध्वमुन्नामयतीव** भाति **ओङ्कार** इति **तस्मादुच्यते** ॥ ४५ ॥

प्रणवशब्दार्थः

अथ कस्मादुच्यते प्रणवो यस्मादुच्चार्यमाण एव ऋग्यजुस्सामाथर्वाङ्गिरसश्च यज्ञे ब्रह्म च ब्राह्मणेभ्यः प्रणामयति तस्मादुच्यते प्रणवः ॥ ४६ ॥

य ओङ्कारः स प्रणव इति प्रणवशब्दार्थमाह—अथेति । अथेत्यादि यस्मादुच्चार्यमाण एवेत्यन्तं सर्वत्र समानम् । यज्ञे ऋगादिवेदचतुष्टयं ब्रह्म, चशब्दः सर्वर्त्विगुपलक्षणार्थः, ब्राह्मणेभ्यः प्रणामयति, वेदर्त्विङ्निर्वर्त्ययज्ञस्य निष्कामधिया अनुष्ठितस्य चित्तशुद्धिप्राप्यज्ञानद्वारा ब्राह्मण्यपदप्रणामहेतुत्वात् । ब्राह्मणेभ्यः प्रणामयति इत्युक्त्या ब्राह्मणेतराणां वेदतदर्थग्रहणधारणाधिकाराभावो द्योत्यते । तस्मादुच्यते प्रणवः ॥ ४६ ॥

सर्वव्यापिशब्दार्थः

अथ कस्मादुच्यते सर्वव्यापी यस्मादुच्चार्यमाण एव सर्वान् लोकान् व्याप्नोति स्नेहो यथा पललपिण्डं शान्तमूलमोतं प्रोतमनुप्राप्य व्यतिषिक्तस्तस्मादुच्यते सर्वव्यापी ॥ ४७ ॥

सर्वव्यापिशब्दार्थमाह—अथेति । यथा स्नेहो वसादिविकारः शान्तमूलं मूलतः पृथक्कृतं पललपिण्डं ओतं प्रोतमनुप्राप्य व्यतिषिक्तः तत्समग्रं व्याप्य वर्तते तथा अयमात्मा स्वेन रूपेण सर्वान् लोकान् व्याप्नोतीत्यर्थः ॥ ४७ ॥

अनन्तशब्दार्थः

अथ कस्मादुच्यते अनन्तो यस्मादुच्चार्यमाण एवाद्यन्तं नोपलभ्यते तिर्यगूर्ध्वमधस्तात्तस्मादुच्यते अनन्तः ॥ ४८ ॥

अनन्तशब्दार्थमाह—**अथेति** । स्वाविद्यापदतत्कार्यजातस्याद्यन्तवत्त्वेऽपि तदारोपापवादाधिकरणस्यात्मनस्तत्तिर्यगूर्ध्वमधस्तादाद्यन्तं **नोपलभ्यते**, तस्य त्रिविधपरिच्छेदशून्यत्वादनन्तत्वं निरङ्कुशमित्यर्थः ॥ ४८ ॥

तारशब्दार्थः

अथ कस्मादुच्यते तारं यस्मादुच्चार्यमाण एव गर्भजन्मजरा-मरणसंसारमहाभयात् संतारयति तस्मादुच्यते तारम् ॥ ४९ ॥

तारशब्दार्थमाह—**अथेति**। यद्ब्रह्माहमस्मीति स्मृतिमात्रतः स्वाज्ञविकल्पित-जन्मादिसंसृतिसंतारणात् तारकत्वम् ॥ ४९ ॥

सूक्ष्मशब्दार्थः

अथ कस्मादुच्यते सूक्ष्मं यस्मादुच्चार्यमाण एव सूक्ष्मो भूत्वा परशरीराण्येवाधितिष्ठति तस्मादुच्यते सूक्ष्मम् ॥ ५० ॥

सूक्ष्मशब्दार्थमाह—**अथेति** । यत्प्रत्यग्रूपेण वालाग्रशतैकभागादपि **सूक्ष्मो भूत्वा** विश्वविश्वादिरूपतः **परशरीराण्येव अधितिष्ठति** तद्वस्तुतः स्थूलसूक्ष्मादि-कलनाविरळमित्यर्थः ॥ ५० ॥

शुक्लशब्दार्थः

अथ कस्मादुच्यते शुक्लं यस्मादुच्चार्यमाण एव क्लन्दते [1]क्लामयते तस्मादुच्यते शुक्लम् ॥ ५१ ॥

शुक्लशब्दार्थमाह—**अथेति** । यत् स्वेनैव रूपेण **क्लन्दते** प्रकाशते स्वातिरिक्तं **क्लामयते** प्रकाशयति तदेव शुक्लमुच्यते, "शुक्लतेजोमयं ब्रह्म" इति श्रुतेः ॥ ५१ ॥

[1] क्लमयते—अ १, अ २, क.

वैद्युतशब्दार्थः

अथ कस्मादुच्यते वैद्युतं यस्मादुच्चार्यमाण एवातिमहति तमसि सर्वं शरीरं विद्योतयति तस्मादुच्यते वैद्युतम् ॥ ९२ ॥

वैद्युतशब्दार्थमाह—**अथेति** । यदात्मतत्त्वं स्वाज्ञदृष्ट्या **अतिमहति तमसि** गाढस्वाज्ञानध्वान्ते **सर्वं शरीरो**पलक्षितस्वाविद्यापदं स्वज्ञदृष्ट्या नेति नेति इति **विद्योतयति** तत् **वैद्युतम्** ॥ ९२ ॥

परंब्रह्मशब्दार्थः

अथ कस्मादुच्यते परं ब्रह्म यस्मादुच्चार्यमाण एव बृहति बृंहयति तस्मादुच्यते परंब्रह्म ॥ ९३ ॥

परंब्रह्मशब्दार्थमाह—**अथेति** । स्वातिरिक्तं ग्रसित्वा स्वयमेव सर्वोत्कर्षेण वर्तत इति **परं** तद्रूपेणोपबृंहणात् **परंब्रह्म** ॥ ९३ ॥

एकशब्दार्थः

अथ कस्मादुच्यते एको यः सर्वान् लोकानुद्गृह्णाति अजस्रं सृजति विसृजति वासयति तस्मादुच्यते एकः ॥ ९४ ॥

एकशब्दार्थमाह—**अथेति** । यः परमेश्वरः स्वविकल्पित**सर्वान् लोकान्** अहमेवेदं सर्वं इति स्वावशेषतया **उद्गृह्णाति** उपसंहरति, **अजस्रमिति** सर्वत्र संबध्यते, **अजस्रं सृजति** सूक्ष्मरूपेण पुनः स्थूलरूपेण **विसृजति** एवमपञ्चीकृतपञ्चीकृतभूतसृष्टिं कृत्वा स्वस्मिन् आधारभूते अजस्रं **वासयति** स्थितिं करोतीत्यर्थः ॥ ९४ ॥

एकोरुद्रशब्दार्थः

अथ कस्मादुच्यते एको रुद्रः—

एक एव रुद्रो न द्वितीयाय तस्थुः
इमान् लोकानीशत ईशनीयुर्जननीयुः ।

प्रत्यञ्जनास्तिष्ठति सञ्चुकोचान्तकाले

संसृज्य विश्वा भुवनानि गोप्ता ॥

तस्मादुच्यते एको रुद्रः ॥ ९९ ॥

एकोरुद्रशब्दार्थमाह—**अथेति** । स्वातिरिक्तरुद्रावको **रुद्र एक एव** तस्य निष्प्रतियोगिकत्वेनाद्वैतरूपत्वात् । तदतिरिक्तस्वाविद्यापदतत्कार्याणि **न** कदाचिदपि **द्वितीयाय तस्थुः** स्थितवन्तः, तेषामाविद्यकत्वेन कारणतुल्यत्वात् । **यः** पुनः मूलाबीजांशयोगतः ईश्वरत्वमवलम्ब्य स्वविकल्पितेमान् **लोकान्** स्वस्वोचितव्याप्तौ **ईशते** ईष्टे, वचनव्यत्ययः छान्दसः, नियमयति, य एते लोका **ईशेन जननीयुः** सृज्यमाना सृष्टा वा भवेयुः, य एवं सृष्टास्त एव ते **ईशनीयुः** स्वोचितकर्मणि नियुज्यमाना भवेयुः, सोऽयमीश्वरः **प्रत्यञ्जनाः** प्रतिजनाः तेषां हृदये सूत्रान्तर्यामिप्रत्यग्रूपेण **तिष्ठति** सृष्टिकाले चतुराननात्मना **विश्वा** विश्वानि **संसृज्य** सृष्ट्वा पुनः स्थितिकाले स्वस्मिन् भवन्तीति **भुवनानि** विष्ण्वात्मना **गोप्ता** रक्षिता पुनः **अन्तकाले** कालाग्निरुद्रात्मना **संचुकोच** उपसंहृत्य स्वयं एक एवावशिष्यते इत्यर्थः ॥ ९९ ॥

ईशानशब्दार्थः

अथ कस्मादुच्यते ईशानो यः सर्वान् लोकानीशत ईशनीभिः जननीभिः परमशक्तिभिः ॥ ९६ ॥

अभि त्वा शूर नो नुमोऽदुग्धा इव धेनवः ।

ईशानमस्य जगतः सुवर्दृशमीशानमिन्द्र तस्थुषः ॥

तस्मादुच्यते ईशानः ॥ ९७ ॥

ईशानशब्दार्थमाह—**अथेति** । यः **सर्वान् लोकान् ईशते** ईष्टे नियमयति । काभिः नियमयति इत्यत्र **ईशनीभिः** अजडक्रियाशक्तिवृत्तिभिः तथा

जननीभिः अजडज्ञानशक्तिवृत्तिभिः तथा **परमशक्तिभिः** अजडेच्छाशक्तिवृत्तिभिश्च य इमान् लोकानीशते ॥ ९६ ॥ स्वाज्ञानासहनात् हे **शूर** तं **त्वां** वयं **अभितो नुमः** यथा धेनुस्वामी स्वकीयतया अभिमता **अदुग्धा** अपि **धेनवो** धेनूः नोपेक्ष्य पालयति, द्वितीयार्थे प्रथमा, तथा **नोऽस्मान्** भवदाराधनं कर्तुमशक्तान् मत्वा केवलकरुणया परिपालय त्वत्पदपात्रीभूतान् कुर्विल्यर्थः। हे **इन्द्र** परमेश्वर **अस्य जगतः** जङ्गमस्य स्वस्वकर्मनियन्तृत्वात् **ईशानं तस्थुषः** स्थावरस्यापि वृद्ध्यादिविक्रियानियमनात् **ईशानं** सुवर्लोकोपलक्षितसर्वलोकदृशं द्रष्टारं निरङ्कुशसर्वज्ञं त्वां अभितो नुमः इति पूर्वेणान्वयः ॥ ९७ ॥

भगवच्छब्दार्थः

अथ कस्मादुच्यते भगवान् यः सर्वान् भावान् निरीक्षित्यात्म-
ज्ञानं निरीक्षयति योगं गमयति तस्मादुच्यते भगवान् ॥ ९८ ॥

भगवच्छब्दार्थमाह—**अथेति** । यः **सर्वान्** स्वांशजसर्वान् **भावान्** जीवान् मत्स्वरूपमेव सर्वं मदतिरिक्तं नेतीति **निरीक्षित्य** पुनस्तेषामपि परमेश्वरोऽस्मीति **आत्मज्ञानं निरीक्षयति** प्रत्यक्परचितोः **योगं** ऐक्यज्ञानं **गमयति** प्रापयति स **भगवानित्यर्थः** ॥ ९८ ॥

महेश्वरशब्दार्थः

अथ कस्मादुच्यते महेश्वरो यः सर्वान् लोकान् संभक्षः
संभक्षयत्यजस्रं सृजति विसृजति वासयति तस्मादुच्यते **महेश्वरः** ॥ ९९ ॥

महेश्वरशब्दार्थमाह—**अथेति** । यः स्वाज्ञदृष्टिविकल्पित**सर्वलोकान्** अजस्रं स्वदृष्ट्या **संभक्षः** उपसंहर्ता सन् **संभक्षयति** स्वात्ममात्रावशिष्टान् करोति **अजस्रं सृजति विसृजति वासयतीत्युक्तार्थम्**। एवं यः स्वमात्रमव-शिष्यते स एव **महेश्वर** इत्यर्थः ॥ ९९ ॥

महादेवशब्दार्थः

अथ कस्मादुच्यते महादेवो यः सर्वान् भावान् परित्यज्यात्म-
ज्ञानयोगैश्वर्ये महति महीयते तस्मादुच्यते महादेवः ॥ ६० ॥

महादेवशब्दार्थमाह—अथेति । यः सर्वान् स्वातिरिक्तभावान् परित्यज्य मिथ्यात्वेन निरस्य स्वात्मज्ञानयोगैश्वर्ये स्वे महिम्नि महति महीयते सोऽयं महादेवः परमात्मेत्यर्थः ॥ ६० ॥

रुद्रस्य व्यापकत्वम्

तदेतदुद्रचरितं—

एषो हि देवः प्रदिशो नु सर्वाः
पूर्वो हि जातः स उ गर्भे अन्तः ।
स विजायमानः स जनिष्यमाणः
प्रत्यङ्जनास्तिष्ठति विश्वतोमुखः ॥ ६१ ॥

विश्वतश्चक्षुरुत विश्वतोमुखो
विश्वतोबाहुरुत विश्वतस्पात् ।
सं बाहुभ्यां धमति संपतत्रैर्द्यावा-
भूमी जनयन् देव एकः ॥ ६२ ॥

एवं रुद्रप्रशंसां कृत्वा तस्य व्यापकतामाह—तदेतदिति । देवा ह वा इत्यारभ्य यदेतदुक्तं तदेतत् श्रीरुद्रचरितम् । यः प्रणवादिमहादेवान्तशब्दै-रभिहितः एष देवो हि स्वयंप्रकाशचिद्धातुः निष्प्रतियोगिकचिन्मात्ररूपोऽपि स्वाज्ञादिदृष्टिमाश्रित्य आग्नेयपूर्वादिसर्वाः प्रदिशो दिशोऽनुगतो विराट्-हिरण्यगर्भ-रूपेण सर्वस्मात् पूर्वो हि जातः, "हिरण्यगर्भः समवर्तताग्रे" इति श्रुतेः ।

स उ स एव प्राणिनां अन्तः **गर्भे** वर्तते । **स** एव मनुष्यादिरूपेण **जायमानो जनिष्यमाणश्च** प्रत्यञ्जनाः प्रतिप्राणिनः तेषां हृदये अन्तर्याम्यात्मना **तिष्ठति** युगपत् **विश्वतोमुखः** स्वाविद्यापदप्रविभक्तानन्तकोटिब्रह्माण्डालङ्कारप्राणिपटल-रूपेण ॥ ६१ ॥ **विश्वतः** सर्वतः **चक्षुरुतापि विश्वतोमुखः** तथा **विश्वतोबाहुः उत विश्वतस्पात्** । चक्षुरादिग्रहणं अनुक्तावयवकरणग्रामोपलक्षणार्थम् । **सं बाहुभ्यां धमति** स्वसृष्टप्राणिजातं बाहुभ्यां संयोजयति यस्त्वेक एव सन् द्यौश्च भूमिश्च **द्यावाभूमी** तदुपलक्षितानन्तकोटिब्रह्माण्डानि संसारपतनत्राणनशक्तैः **संपतत्रैः**: जीवैश्च सह **जनयन्** उत्पादयन्नास्ते सोऽयं परमार्थदृष्ट्या **एक** एवाव-शिष्यते । स्वस्य निष्प्रतियोगिकाद्वैतरूपत्वात् एकत्वं निरङ्कुशमित्यर्थः ॥ ६२ ॥

एवमुपासनायाः फलम्

तदेतदुपासितव्यं यद्वाचो
वदन्ति तदेव ग्राह्यम् ।
अयं पन्था वितत उत्तरेण येन देवा येन ऋषयो येन
पितरः प्राप्नुवन्ति परमपरं परायणं च ॥ ६३ ॥
वालाग्रमात्रं हृदयस्य मध्ये
विश्वं देवं जातवेदं वरेण्यम् ।
तमात्मस्थं येऽनुपश्यन्ति धीरा-
स्तेषां शान्तिः शाश्वती नेतरेषाम् ॥ ६४ ॥
यो योनिं योनिमधितिष्ठत्येको
येनेदं पूर्णं पञ्चविधं च सर्वम् ।
तमीशानं पुरुषं देवमीड्यं
[1]निदिध्यात्तारं शान्तिमत्यन्तमेति ॥ ६५ ॥

[1] निदिध्यायात्तारं—अ २, क.

एवमुपासनां तत्फलं चाह—**तदिति** । **यत्** सर्वापह्नवसिद्धं ब्रह्म स्वमात्रमिति "सन्मात्रमसदन्यत्", "ब्रह्ममात्रमसन्न हि" इत्यादिसर्ववेदान्त-**वाचोऽभिवदन्ति तदेतत्** ब्रह्म निष्प्रतियोगिकस्वमात्रमिति **उपासितव्यम्** । कैवल्येच्छुभिः आत्मत्वेन **तदेव हि ग्राह्यम्** । **अयं पन्थाः** मार्गो **विततः**, इतोऽतिरिक्तमार्गस्य कुपथत्वात्, "नान्यः पन्था विद्यतेऽयनाय" इति श्रुतेः । **येन देवर्षिपितरः प्राप्नुवन्ति**—किं तत्?—**परं** परं ब्रह्म **अपरं** अपरं ब्रह्म उत्तरेण पथा **परायणं** चेति । के तत् प्राप्नुवन्ति ? ज्ञानकर्मसमुच्चयानुष्ठातारः ऊर्ध्वरेतसश्च, दक्षिणमार्गापेक्षया सोऽपि वितत इत्यर्थः ॥ ६३ ॥ प्राप्यस्वरूपं तज्ज्ञानाज्ञानफलं चाह—**वालाग्रमात्रमिति** । स्वांशजप्राणिपटलहृदयस्य **मध्ये वालाग्रमात्रं** ततोऽपि सूक्ष्मम् । सर्वप्राण्यात्मतया विश्वसनीयत्वात् **विश्वं देवं** स्वप्रकाशं, यतो ऋगादिचतुर्वेदा जाताः तं **जातवेदं** सर्वज्ञकल्पं, **वरेण्यं** सर्वैरपि वरणीयम् । एवं यो वर्तते **तमात्मस्थं** प्रत्यञ्चं पराग्भावसापेक्षप्रत्यग्भावा-पायसिद्धं परमात्मानं निष्प्रतियोगिकस्वमात्रमिति **येऽनुपश्यन्ति धीराः** ब्रह्म-विद्वरीयांसः **तेषां शाश्वती शान्तिः** विकलेबरमुक्तिः **नेतरेषां** स्वाज्ञानामित्यर्थः ॥ ६४ ॥ उक्तार्थस्यातिसूक्ष्मतया पुनर्भङ्ग्यन्तरेण तदेव विशदयति—**यो योनिमिति** । **यः** परमात्मा कालत्रयेऽप्येकरूपोऽपि स्वाविद्याद्वयतत्कार्यप्रवि-भक्तयोनिं **योनिं** प्रतियोनिं विश्वविश्वाद्यविकल्पानुज्ञैकरसान्तवपुषा **अधितिष्ठति** वा अधितिष्ठति **येनेदं** परिदृश्यमानं **पञ्चविधं** वियदादिपञ्चभूतभौतिकजातं **सर्वं च** पञ्चब्रह्मात्मनाऽपि **पूर्णम्** । **तमीशानं** स्वातिरिक्ताविद्याद्वयतत्कार्यपञ्च-भूतभौतिकं ग्रसित्वा निष्प्रतियोगिकब्रह्ममात्रतया अवस्थातुमीश्वरं **पुरुषं** स्वाज्ञदृष्टि-प्रसक्ताविद्यापदपूरणात् **देवं** स्वयंप्रकाशचिद्धातुं ब्रह्मादिभिरपि स्वात्मतया **ईड्यं** स्वाज्ञपटलसन्तारं यो मुनिः अहं ब्रह्मास्मि इति **निदिध्यात्** निदिध्यासनं ध्यानं कुर्यात् स मुनिः **अत्यन्तं** निरुपचरितं स्वा[न]तिरिक्तशान्तिं विदेहकैवल्यं एति ॥

तृष्णावतां शान्त्युपायः

प्राणेष्वन्तर्मनसो लिङ्गमाहु-
र्यस्मिन् क्रोधो या च तृष्णाऽक्षमा च ।

तृष्णां छित्त्वा हेतुजालस्य मूलं
बुद्ध्या सञ्चिन्त्य स्थापयित्वा तु रुद्रे रुद्र एकत्वमाहुः ॥

तृष्णाबद्धानां ब्रह्मैक्यरूपिणी शान्तिः कथं भवतीत्यत आह—प्राणेष्विति। प्राणेषु ब्रह्मपिपीलिकान्तप्राणिषु अन्तः हृदये यस्मिन् स्वेप्सितकामापूरणसंजातः क्रोधश्च याऽप्राप्तविषयकतृष्णा च परश्रेयोदर्शनाक्षमा च वर्तते तत्र तन्मनसो लिङ्गं तत्त्वविद आहुः। तत्र मनसो लिङ्गे संसृतिहेतुजालं स्वाविद्याद्वय-तत्कार्यजातं तस्यापि मूलं हेतुभूतां तृष्णां मायां ब्रह्ममात्रज्ञानखड्गेन छित्त्वा अपह्नवं कृत्वा रुद्रे प्रतीचि स्वे महिम्नि तदपह्नवसिद्धमात्मानं बुद्ध्या संचिन्त्य स्थापयित्वा यत्तन्मात्रतयाऽवस्थितत्वं तत् रुद्र एकत्वमाहुः, "परेऽव्यये सर्वं एकीभवन्ति" इति श्रुत्यनुरोधेन सर्वं प्रत्यक्परविभागैक्यप्रभवसविशेषत्वरु-जद्रावके रुद्रे स्वाज्ञविकल्पितं सर्वं स्वज्ञादिदृष्टथा तन्मात्रपर्यवसन्नं ब्रह्मविदः आहुः कथयन्तीत्यर्थः ॥ ६६ ॥

महापाशुपतव्रतम्

रुद्रं शाश्वतं वै पुराणमिषमूर्जं तपसा नियच्छत। व्रतमेतत् पाशुपतम्। अग्निरिति भस्म वायुरिति भस्म जलमिति भस्म स्थलमिति भस्म व्योमेति भस्म सर्वं ह वा इदं भस्म मन इत्येतानि चक्षूंषि भस्मान्यग्निरित्यादिना भस्म गृहीत्वा विमृज्याङ्गानि संस्पृशेत्तस्माद्व्रतमे-तत् पाशुपतम् ॥ ६७ ॥

केवलस्वातिरिक्तास्तित्वपाशबद्धानां पशूनां कथं तद्विपरीतपशुपतियाथा-त्म्यरूपावस्थानलक्षणकैवल्यसिद्धिः स्यादित्याशङ्क्य तत्प्रापकोपायतया महापाशु-पतव्रतमुपदिशति—रुद्रमिति। हे स्वाज्ञलोकाः यूयं रुद्रं शाश्वतं वै पुराणं, तदतिरिक्तस्याशाश्वताज्ञानविकल्पितत्वेन इदानींतनत्वात् तदेव शाश्वतं पुराणं,

इषं इच्छाविषयं ऊर्जं अन्नं च रुद्राख्यं ब्रह्मैव, तदतिरेकेण न किंचिदस्ति, तद्रुद्राख्यं ब्रह्माहमस्मीति **तपसा** विचारेण मनो **नियच्छत** नियमनं कुरुत । मुमुक्षुणैवं कर्तव्यमिति यत् **तदेतद्व्रतं पाशुपतं**, पशुपतियाथात्म्यप्रापकत्वात् । तदतिरेकेण अग्न्यादिपञ्चभूत-मनआदिभौतिकजातसत्त्वात् कथं पशुपतियाथात्म्यसिद्धिः इत्याशङ्क्य अग्न्यादिपञ्चमहाभूतानि मनआदिभौतिकानि तद्भेत्वव्यक्तं च ब्रह्ममात्रज्ञानाग्निना भस्म कृत्वा तद्भस्म अग्निरित्यादिमनुना गृहीत्वा स्वमात्रज्ञानतोयेन निमृज्य स्वाङ्गदृष्टिविकल्पिताङ्गानि विमृजेत् तेन पशुपतियाथात्म्यलक्षणकैवल्यं स्यादित्याह—**अग्निरितिभस्मेत्यादिना** ॥ ६७ ॥

ग्रन्थपठनतदर्थज्ञानफलम्

पशुपाशविमोक्षाय योऽथर्वशिरसं ब्राह्मणोऽधीते सोऽग्निपूतो भवति स वायुपूतो भवति स आदित्यपूतो भवति स सोमपूतो भवति स सत्यपूतो भवति स सर्वपूतो भवति स सर्वेषु तीर्थेषु स्नातो भवति स सर्वेषु वेदेष्वधीतो भवति स सर्ववेदव्रतचर्यासु चरितो भवति स सर्वैर्देवैर्ज्ञातो भवति स सर्वयज्ञक्रतुभिरिष्टवान् भवति । तेनेतिहासपुराणानां रुद्राणां शतसहस्राणि जप्तानि भवन्ति । गायत्र्याः शतसहस्रं जप्तं भवति । प्रणवानामयुतं जप्तं भवति । रूपे रूपे दश पूर्वान् पुनाति दशोत्तरानाचक्षुषः पङ्क्तिं पुनातीत्याह भगवानथर्वशिरोऽथर्वशिरः । सकृज्जप्त्वा शुचिः पूतः कर्मण्यो भवति द्वितीयं जप्त्वा गाणापत्यमवाप्नोति तृतीयं जप्त्वा [1]देवमेवानुप्रविशत्योंसत्यम् ॥ ६८ ॥

एवं भावयितुमशक्तस्यापि पशुपाशविमोचनोपायग्रन्थपठनतदर्थज्ञानफलं चाह—**पञ्चिति** । यः पशुपाशविमोचनार्थी **ब्राह्मणोऽथर्वशिरसं** उपनिषदं

[1] देवमेव प्र—क.

अधीते तदर्थज्ञानं विनाऽपि ग्रन्थतः पठति सोऽयं मुमुक्षुः अग्निवाय्वादित्य-सोमसत्यवत् पूतः पवित्रो भवति । स सार्धत्रिकोटिमहातीर्थस्नातो भवति इत्यादि शिष्टं स्पष्टम् । प्रथमवारजपतः सर्वकर्मकृत् । द्वितीयवारजपस्तु गाणापत्य-प्रापकः । केवलपाठतोऽर्थतो वा तृतीयवारजपस्तु तत्सायुज्यस्य कैवल्यस्य वा प्रापको भवति । यदाहाथर्वशिरो भगवान् तदेतत् ओं सत्यं, न हि तत्र संशयोऽस्तीत्यर्थः ॥ ६८ ॥

रुद्रैक्यप्रार्थना

यो रुद्रो अग्नौ यो अप्स्वन्तर्य ओषधीर्वीरुधः आविवेश ।
य इमा विश्वा भुवनानि चक्लृपे तस्मै रुद्राय नमो अस्तु ॥ ६९ ॥

उक्तविशेषणविशिष्टरुद्रैक्यं प्रार्थयतीत्याह—य इति । यो रुद्रः परमात्मेति प्रकटितः सोऽयं स्वाज्ञदृष्टिविकल्पितागन्यादिपञ्चभूतेष्वन्तर्याम्यात्मना—ओषधी-वीरुद्ग्रहणं भौतिकजातोपलक्षणार्थम्—भूतभौतिकजातं आविवेशेत्यर्थः "यः सर्वेषु भूतेषु तिष्ठन्नेष त आत्माऽन्तर्यामी" इति श्रुतेः । योऽयं रुद्रः हिरण्य-गर्भात्मना इमा इमानि विश्वा विश्वानि अनन्तकोटिब्रह्माण्डानि प्रत्यण्डं भवन्तीति चतुर्दश भुवनानि चक्लृपे निर्मितवान् तस्मै एतत्सूत्रान्तर्याम्यादिकलनारुद्राव-करुद्राय प्रत्यगभिन्नपरमात्मने नमोऽस्तु रुद्रात्मात्मनोरैक्यमस्त्वित्यर्थः ॥ ६९ ॥

श्रीविद्यामोक्षप्रार्थना

[1]अस्य मूर्धानमस्य संशीर्योऽ[2]थर्वा हृदयं च मन्मस्तिष्कादूर्ध्वं प्रेरयन् पवमानोऽथ शीर्ष्णस्तद्वाऽथर्वशिरो देवकोशः समुज्झितः तत्प्राणोऽभिरक्षतु श्रियमन्नमथो मनःश्रियमन्नमथो मनो विद्यामन्नमथो मनो विद्यामन्नमथो मनो मोक्षमन्नमथो मनो मोक्षमन्नमथो मन इत्यों सत्यमित्युपनिषत् ॥ ७० ॥

[1] अद्य—अ १, क. [2] भर्व—अ २, क.

स्वस्वभावानुरोधेन श्रियं विद्यां मोक्षं च देहीति प्रार्थयति—**अस्येति**। **योऽथर्वा** अथर्ववेदशिरः **अस्य** ब्रह्माण्डस्य **अस्य** पिण्डाण्डस्य च **मूर्धानं** समष्टिव्यष्टितुरीययोरैक्यं **संशीः** शंसितवान् "रुद्र एकत्वमाहुः" "तस्मै रुद्राय नमो अस्तु" इत्यादिना प्रतिपादितवानित्यर्थः। शंसीरित्यर्थे संशीरिति वर्णव्यत्ययः छान्दसः। मूर्धस्तुर्याधिष्ठितत्वात्, "तुरीयं मूर्ध्नि संस्थितं" इति श्रुतेः। सर्वपावनहेतुत्वात् सोऽयं **पवमानः** परमेश्वरः **हृदयं** हृदयोपलक्षितान्तःकरणसहितप्राणं **अथ** प्रारब्धकर्मक्षयानन्तरं **शीर्ष्णो** मस्तकात् तत्रत्यमन्मस्तिष्कात् सहस्रारमध्यगब्रह्मनाड्यन्तर्गतमेदोविकारात् **ऊर्ध्वं प्रेरयन्** तद्वा तत्रैव सहस्रारविलसितस्य **देवस्य** स्वप्रकाशचिद्धातोः तुर्यस्य स्वावृतिरूपः **कोशः समुज्झितः** विगलितः विशीर्णः इत्यर्थः। ततः **तत्प्राणः** तत्रत्यप्राणः परमेश्वरः निर्विकल्पकसमाधिपरवशं मत्कलेबरं **अभिरक्षतु** मशकाद्युपद्रवतः परिपालयतु। यावन्मद्विकल्पितकलेबरं भुवि तिष्ठति तावत् **श्रियं** इहलोकोपयोगिनानाविधसंपदं मद्देहधारणोपयोगि **अन्नं अथो** ब्रह्मविषयकं **मनश्च** प्राणः परमेश्वरो विदधातु इत्यध्याहार्यम्। यावद्देहधारणं तावत् स्वाविद्याद्वयतत्कार्यापह्नवसिद्धनिष्प्रतियोगिकब्रह्ममात्रगोचरविद्यां **अन्नं अथो मन** इत्युक्तार्थम्। स्वकलेबरे सत्यसति स्वातिरिक्तमस्ति नास्तीति विभ्रममोक्षं विकलेबरकैवल्यं मामनिच्छन्तमपि वृणोतु। पर्यायत्रयेऽप्यावृत्तिरादरार्था। अस्यामुपनिषदि यद्यदुक्तं तत्सर्वं **ॐ सत्यं** सन्मात्रं "पश्यतेहापि सन्मात्रमसदन्यत्" इति स्वातिरिक्तासत्प्रपञ्चापह्नवसिद्धनिष्प्रतियोगिकसन्मात्रावशेषतावादिश्रुतेः। **इत्युपनिषच्छब्दः** प्रकृतोपनिषत्समाप्त्यर्थः॥ ७०॥

श्रीवासुदेवेन्द्रशिष्योपनिषद्ब्रह्मयोगिना।
लिखितं स्याद्विवरणमथर्वशिरसः स्फुटम्।
अथर्वशिरसो व्याख्या षष्ठ्यधित्रिशतं स्मृता॥

इति श्रीमदीशाद्यष्टोत्तरशतोपनिषच्छास्त्रविवरणे द्वाविंशतिसङ्ख्यापूरकं
अथर्वशिरआख्योपनिषद्विवरणं सम्पूर्णम्

कालाग्निरुद्रोपनिषत्

सह नाववतु—इति शान्तिः

कालाग्निरुद्रोपनिषन्मन्त्रस्य ऋष्यादि

अथ कालाग्निरुद्रोप[1]निषत् संवर्तकोऽग्निर्ऋषिरनुष्टुप् छन्दः श्रीकालाग्निरुद्रो देवता श्रीकालाग्निरुद्रप्रीत्यर्थे जपे विनियोगः ॥ १ ॥

ब्रह्मज्ञानोपायतया यद्विभूतिः प्रकीर्तिता ।
तमहं कालाग्निरुद्रं भजतां स्वात्मदं भजे ॥

इह खलु कृष्णयजुर्वेदप्रविभक्तेयं कालाग्निरुद्रोपनिषत् ब्रह्मज्ञानसाधनभस्मधारणविधिपरा । अस्याः स्वल्पग्रन्थतो विवरणमारभ्यते । उपोद्घातादि पूर्ववत् । सनत्कुमारकालाग्निरुद्रप्रश्नप्रतिवचनरूपेयमाख्यायिका वक्ष्यमाणविद्यास्तुत्यर्था । जपार्थेयमुपनिषत्, अस्याः ऋषिच्छन्दोदेवताऽऽदिकीर्तनात् । एवमियमुपनिषत् प्रवृत्तेत्याह—**अथेति** । विद्योपक्रमार्थ **अथशब्दः** । स्वाज्ञानतत्कार्यं कालयति नाशयति निःशेषं भस्मीकरोतीति **कालाग्निः** परमेश्वरः तस्य स्वाज्ञानप्रभवसंसृतिरुद्रावकत्वात् स एव **रुद्रः** तत्पदमुपगमयतीति **उपनिषत्** । कालाग्निरुद्रविद्याप्रकाशकोऽयं महामन्त्रः । तस्य **संवर्तकोऽग्निः** स्वाविद्याऽण्डभस्मीकरणपटुः

[1] निषदः सं—मु, उ.

प्रळयकालसूर्य एव ऋषिः। अनुष्टुप्छन्दः कालाग्निरुद्रो देवता, स्पष्टम्। जपविनियोगस्तु कालाग्निरुद्रप्रीतिकरः। अनेन जपेन प्रीतो भगवान् स्वमन्त्रजापिनां स्वाज्ञानं मोचयित्वा स्वज्ञानप्रदानेन स्वमात्रपदं प्रयच्छतीत्यर्थः ॥ १ ॥

त्रिपुण्ड्रविधिजिज्ञासा

अथ कालाग्निरुद्रं भगवन्तं सनत्कुमारः पप्रच्छ अधीहि भगवंस्त्रिपुण्ड्रविधिं सतत्त्वं किं द्रव्यं कियत् स्थानं कति प्रमाणं का रेखाः के मन्त्राः का शक्तिः किं दैवतं कः कर्ता किं फलमिति च ॥ २ ॥

आख्यायिकामवतारयति—**अथेति**। **सनत्कुमारो** नाम ब्रह्ममानसपुत्रः जातमात्रेण परमार्थतत्त्ववित् स्वयं कृतकृत्योऽपि स्वाज्ञलोकमवलोक्य तमुद्धर्तुमिच्छया **अथ** स्वाज्ञलोककर्मपरिपाकानन्तरं चिरकालध्यानतः प्रादुर्भूतं **कालाग्निरुद्रं भगवन्तं** स्वारोपितषड्गुणैश्वर्यसंपत्त्या विराजमानं **पप्रच्छ** पृष्टवान्। किं तत्? न हि स्वाज्ञलोकः स्वज्ञानोपदेशतः कृतार्थो भवति, तस्य स्वज्ञानाधिकाराभावात्। न ह्यनधिकारिषु सन्तः स्वज्ञानमुपदिशन्ति, तेषां चित्तशुद्धिविकलत्वात्। तथात्वेऽपि ज्ञानोपदेशमहिम्ना कृतार्था भवेयुरिति चेन्न; स्वाज्ञान् प्रति परमार्थोपदेशस्य तदधःप्रापकत्वात् इत्यत्र—

अज्ञस्यार्धप्रबुद्धस्य सर्वं ब्रह्मेति यो वदेत्।
महानरकसाम्राज्ये स तेन विनियोजितः ॥

इति श्रुतेः। यत एवमतस्तेषामादौ स्वज्ञानसाधनोपदेशेन विशुद्धसत्त्वं भवति, ततः स्वज्ञानं जायते, ततः कृतकृत्या भवेयुरिति निश्चित्य तत्र स्वज्ञानान्तरङ्गसाधनं त्रिपुण्ड्रमेवेति मनसि निधाय, हे **भगवन्** कालाग्निरुद्र स्वाज्ञलोकविलसत्स्वाज्ञानप्राप्तस्वज्ञानान्तरङ्गसाधनं **सतत्त्वं** स्वतत्त्वज्ञानसहितं **त्रिपुण्ड्रविधिमधीहि** उपदिश, सप्रकारं प्रतिपादयेति पप्रच्छेत्यर्थः। किं तत्सप्रकारं? इत्यत आह—**किं द्रव्यमित्यादि**। स्पष्टम् ॥ २ ॥

शाम्भवव्रतं नाम त्रिपुण्ड्रविधिः

तं होवाच भगवान् कालाग्निरुद्रः । यद्द्रव्यं तदाग्नेयं [1]भस्म सद्योजातादिपञ्चब्रह्ममन्त्रैः परिगृह्याग्निरिति भस्म वायुरिति भस्म खमिति भस्म जलमिति भस्म स्थलमिति भस्मेत्यनेनाभिमन्त्र्य मानस्तोके तनय इति समुद्धृत्य मा नो महान्तमिति जलेन संसृज्य त्रियायुषं जमदग्नेरिति शिरोललाटवक्षःस्कन्धेषु त्रियायुषैस्त्र्यम्बकैस्त्रिशक्तिभिस्तिर्यक् तिस्रो रेखाः प्रकुर्वीत व्रतमेतच्छाम्भवं सर्वेषु वेदेषु वेदवादिभिरुक्तं भवति तस्मात् समाचरेन्मुमुक्षुर्न पुनर्भवाय ॥ ३ ॥

सनत्कुमारेणैवं पृष्टस्तं होवाच भगवान् कालाग्निरुद्रः । तत्र किं द्रव्यमिति प्रश्नोत्तरमाह—यद्द्रव्यमिति । यद्द्रव्यं त्रिपुण्ड्रस्य तत् बृहज्जाबालोपनिषदुक्तविधिना निष्पन्नमाग्नेयं भस्मेति । के मन्त्राः इति प्रश्नोत्तरमाह—सद्योजातादीति । सद्योजातादिपञ्चब्रह्ममन्त्रैः दक्षिणहस्तेन श्रौतभस्म परिगृह्य वामहस्ते निधाय । अनेन पञ्चभूतमन्त्रसमुदायेन वामहस्तस्थं भस्म दक्षिणपाणिना स्पृशन् अभिमन्त्र्य पुनः मा नस्तोके तनये इति मन्त्रेण सम्यगुद्धृत्य उद्धृतं भस्म मा नो महान्तं इति मन्त्रेण जलेन संसृज्य । ततः "कियत्स्थानं" इति प्रश्नोत्तरमाह —त्रियायुषमिति । त्रियायुषं जमदग्नेः इति मन्त्रेण शिरोललाटवक्षस्स्कन्धेषु स्थलेषु धारयेदिति शेषः । "का रेखा" इति प्रश्नोत्तरमाह—त्रियायुषैरिति । त्रियायुषैः "त्रियायुषं" इति पञ्चभिर्मन्त्रैः त्र्यम्बकानुवाकैः मृत्युञ्जयसूक्तमन्त्रैः त्रिशक्तिभिः दुर्गालक्ष्मीसरस्वतीभिः तत्प्रतिपादकमन्त्रैः "जातवेदसे सुनवाम सोमं" इति, "हिरण्यवर्णां हरिणीं" इति, "पावका नः सरस्वती" इति च

[1] गोमयं भ—क.

दुर्गालक्ष्मीसरस्वतीमन्त्राः तैः क्रियाज्ञानेच्छाशक्तिभिर्वा शिरोललाटादिस्थलेषु **तिस्रो रेखाः प्रकुर्वीत**। नियमेनैवं त्रिपुण्ड्रधारणं क्रियते इति यत् तत् **एतत् शाम्भवव्रतम्**। "कति प्रमाणं" इति प्रश्नोत्तरमाह—**सर्वेष्विति**। **यदेतत् शाम्भवव्रतं** तत् **सर्वेषु वेदेषु** बृहज्जाबालभस्मजाबालादिषु वेदवादिभिः संवर्तकादिभिः ये संसारान्मोक्तुमिच्छन्ति तैः एतत् **शाम्भवव्रतं** अवश्यं कर्तव्यमिति **उक्तं भवति**। यस्मादेवं **तस्मान्मुमुक्षुरपुनर्भवाय** एतत् त्रिपुण्ड्रधारणलक्षणं **शाम्भवव्रतं समाचरेत्** ॥ ३ ॥

त्रिपुण्ड्ररेखाप्रमाणम्

अथ सनत्कुमारः प्रमाणमस्य पप्रच्छ त्रिपुण्ड्रधारणस्य ॥ ४ ॥

त्रिधा रेखा आललाटादाचक्षुषोरामूर्ध्नोराभ्रुवोर्मध्यतश्च ॥ ५ ॥

कति प्रमाणं इति प्रश्नोत्तरं वेदादिभिरुक्तं भवतीति सामान्येनोक्तमपि तद्विशेषबुभुत्सया **सनत्कुमारोऽथ** कालाग्निरुद्रं भगवन्तं **अस्य त्रिपुण्ड्रधारणस्य प्रमाणं पप्रच्छ** ॥ ४ ॥ सनत्कुमारेणैवं पृष्टो भगवानेवमाह—**त्रिपुण्ड्रेति**। वैदिकत्रिपुण्ड्रधारणस्य **त्रिधैव रेखाः आ ललाटात् आचक्षुषोः आमूर्ध्नोः आभ्रुवोर्मध्यतश्च** चक्षुर्भ्रूयुगमारभ्य ललाटमस्तकपर्यन्तं त्रिपुण्ड्रं धारयेदित्यर्थः ॥ ५ ॥

रेखात्रयस्य शक्तिदेवताऽऽदिप्रतिपादनम्

याऽस्य प्रथमा रेखा सा गार्हपत्यश्चाकारो [1]रजः स्वात्मा क्रियाशक्तिर्ऋग्वेदः प्रातःसवनं महेश्वरो देवतेति ॥ ६ ॥

याऽस्य द्वितीया रेखा सा दक्षिणाग्निरुकारः [2]सत्त्वमन्तरात्मा चेच्छाशक्तिर्यजुर्वेदो माध्यंदिनं सवनं सदाशिवो देवतेति ॥ ७ ॥

[1] रजो भूर्लोकः स्वा—मु, क. [2] सत्वमन्तरिक्षमन्त—मु.

याऽस्य तृतीया रेखा साऽऽहवनीयो मकार[1]स्तमः परमात्मा ज्ञानशक्तिः सामवेदस्तृतीयसवनं महादेवो देवतेति ॥ ८ ॥

"का शक्तिः ? किं दैवतं ?" इति प्रश्नोत्तरमाह—याऽस्येति । याऽस्य त्रिपुण्ड्रस्य प्रथमा रेखा सा इयं गार्हपत्यः, चशब्दः पृथिव्यग्न्याद्युपलक्षणार्थः, व्यष्टिसमष्टिरूपोऽयं अकारः विश्वविराडोत्रधिष्ठितः रजो रजोगुणविशिष्टः भूर्लोकः स्वस्याः प्रथमरेखायाः आत्मा स्वात्मा क्रियाशक्तिः चतुरानना धिष्ठिता ऋग्वेदः प्रातःसवनं महान् अपरिच्छिन्नश्चासावीश्वरश्चेति महेश्वरः आत्मा देवता । इतिशब्दः प्रथमरेखाप्रमाणसमाप्त्यर्थः ॥ ६ ॥ द्वितीयरेखेयत्तां विशदयति—याऽस्येति । अस्य त्रिपुण्ड्रस्य या द्वितीया रेखा सा एव दक्षिणाग्निः व्यष्टिसमष्टिरूपोऽयं उकारः तैजससूत्रानुज्ञात्रधिष्ठितः सत्त्वगुणः अन्तरात्मा विष्णुः चशब्दः त्रिष्टुबाद्युपलक्षणार्थः । इच्छाशक्तिः सत्यसङ्कल्परूपिणी यजुर्वेदो माध्यन्दिनं सवनं सदाशिवः द्वितीयरेखाया देवता । इतिशब्दः द्वितीयरेखाप्रमाणसमाप्त्यर्थः ॥ ७ ॥ तृतीयरेखेयत्तामाह—याऽस्येति । अस्य त्रिपुण्ड्रस्य या तृतीया रेखा सा एव आहवनीयो मकारः व्यष्ट्यादिविभागयुक्तः प्राज्ञेश्वरानुज्ञैकरसाधिष्ठितः तमोगुणविशिष्टः परमात्मा रुद्रः, "परमात्मा महेश्वरः" इति श्रुतेः, ज्ञानशक्तिः निरङ्कुशसर्वज्ञरूपिणी सामवेदो गीतिविशिष्टः तृतीयसवनं महांश्चासौ देवश्चेति महादेवः अस्य तृतीयरेखाया देवता । इतिशब्दः तृतीयरेखासमाप्त्यर्थः । एवं रेखात्रये गार्हपत्यादिसदाशिवान्तदृष्टिः कार्येत्यर्थः ॥ ८ ॥

विद्याफलम्

त्रिपुण्ड्रविधिं भस्मना करोति यो विद्वान् ब्रह्मचारी गृही वानप्रस्थो यतिर्वा स महापातकोपपातकेभ्यः पूतो भवति स सर्वेषु

[1] स्तमो द्यौर्लोकः प—मु.

तीर्थेषु स्नातो भवति स सर्वान् वेदानधीतो भवति स सर्वान् देवान् ज्ञातो भवति स सततं सकलरुद्रमन्त्रजापी भवति स सकलभोगान् भुङ्क्ते देहं त्यक्त्वा शिवसायुज्यमेति न स पुनरावर्तते न स पुनरावर्तत इत्याह भगवान् कालाग्निरुद्रः ॥ ९ ॥

"कः कर्ता?" इति प्रश्नोत्तरमाह—त्रिपुण्ड्रेति। य एवं विद्वान् मुनिः त्रिपुण्ड्रविधिं भस्मना करोति सोऽयं ब्रह्मचारी गृही वानप्रस्थो यतिर्वा स्वाश्रमाचारसंपन्नः त्रिपुण्ड्राधिकारी कर्ता भवति। "किं फलं च" इति प्रश्नोत्तरं सामान्यविशेषफलमप्याह—स इति। य एवं विद्वान् स महापातकोपपातकेभ्यः पूतो भवति—यद्येवमाचरणात् पुरा ब्रह्महत्याऽऽदिपातकी परदारप्रवेशाद्युपपातकी वा भवतु सः अपि तदा गुरुमुखादेवं त्रिपुण्ड्रविधिं ज्ञात्वा यथावत् करोति चेत् तेभ्यः पातकेभ्यः पूतः पावितो भवति सार्धत्रिकोटिसङ्ख्याविशिष्टसर्वेषु तीर्थेषु अस्नाताऽपि स्नातः स्नानफलभाक् भवति। तथा सर्वान् वेदानधीतो भवति सर्ववेदपारायणफलं चित्तशुद्ध्यात्मकं लभत इत्यर्थः। सर्वान् देवान् ज्ञातो भवति स सततं सकलरुद्रमन्त्रजापी भवति। स सकलभोगान् इहामुत्रप्रभवान् भुङ्क्ते इति यत्तदान्तराळिकफलं, मुख्यफलं तु वर्तमानदेहं देहाद्यभिमतिं वा त्यक्त्वा शिवेन सायुज्यं सयुग्भावं, यदि कदाचित् त्रिपुण्ड्रधारणमहिम्ना स्वातिरिक्ताविद्यापदतत्कार्यापह्नवसिद्धं ब्रह्म निष्प्रतियोगिकस्वमात्रमिति सम्यज्ज्ञानी भवति तदा परममुख्यफलं विकळेबरकैवल्यं वा एति। ततः किं पुनरावर्तते इत्यत आह—नेति। "ब्रह्मभावं प्रपद्यैष यतिर्नावर्तते पुनः" इत्यादिश्रुत्यनुरोधेन न स पुनरावर्तते न स पुनरावर्तते इत्याह भगवान् कालाग्निरुद्रः। आवृत्तिरादरार्था ॥ ९ ॥

ग्रन्थाध्ययनफलम्

यस्त्वेतद्वाऽधीते सोऽप्येवमेव भवतीत्योँ सत्यमित्युपनिषत्॥ १० ॥

यस्त्वेवं कर्तुमशक्तः एतत्कालाग्निरुद्रोपनिषदं **वाऽधीते सोऽप्येवमेव भविष्यति** । किं तत् ? यत् ओंकाराग्रविद्योततुर्यतुरीयं ब्रह्म तदेव **सत्यं** स्वातिरिक्तासदपह्नवसिद्धसन्मात्रं ब्रह्मैव भवति "सन्मात्रमसदन्यत्" इति श्रुतेः । **इत्युपनिषच्छब्दः** उपनिषत्समाप्त्यर्थः ॥ १० ॥

श्रीवासुदेवेन्द्रशिष्योपनिषद्ब्रह्मयोगिना ।
कालाग्निरुद्रव्याख्येयं लिखिता स्वात्मशुद्धये ।
कालाग्निरुद्रोपनिषद्व्याख्याग्रन्थस्तु सप्ततिः ॥

इति श्रीमदीशाद्यष्टोत्तरशतोपनिषच्छास्त्रविवरणे अष्टाविंशतिसङ्ख्यापूरकं
कालाग्निरुद्रोपनिषद्विवरणं सम्पूर्णम्

कैवल्योपनिषत्

सह नाववतु—इति शान्तिः

ब्रह्मविद्याजिज्ञासा

अथाश्वलायनो भगवन्तं परमेष्ठिनं परिसमेत्योवाच—

अधीहि भगवन् ब्रह्मविद्यां वरिष्ठां सदा सद्भिः सेव्यमानां निगूढाम्।
ययाऽचिरात् सर्वपापं व्यपोह्य परात् परं पुरुषमुपैति विद्वान्॥ १ ॥

कैवल्योपनिषद्वेद्यं कैवल्यानन्दतुन्दिलम्।
कैवल्यगिरिजाऽऽरामं स्वमात्रं कलयेऽन्वहम्॥

इह खलु कृष्णयजुर्वेदान्तर्गतकेवलशाखायां विद्यात्रयं प्रकाशितम्। तत्र कर्मविद्याशीलिनां पुनरावृत्तिमच्चन्द्रलोकाप्तिरुक्ता। उपासनाविद्याशीलिनां कर्मोपासनासमुच्चयानुष्ठानादपुनरावृत्त्यर्हब्रह्मलोकाप्तिरभिहिता। मार्गद्वयविरक्तानां उक्तसाधनसम्पन्नानां कैवल्यावाप्तिसाधनतया ब्रह्मविद्यारूपेयं कैवल्योपनिषदारब्धा। वक्ष्यति चैवं "अधीहि भगवन् ब्रह्मविद्यां वरिष्ठां" इति, "तत्त्वमेव त्वमेव तत्", "परात् परं पुरुषमुपैति विद्वान्" इति च। एवमुक्तलक्षणलक्षितकैवल्योपनिषदोऽल्पग्रन्थतो विवरणमारभ्यते। आख्यायिका विद्यास्तुत्यर्था। **अथ** यथोक्तसाधनसम्पत्त्यनन्तरं अश्वलायनापत्यं **आश्वलायनः** मुनिः **भगवन्तं**

षड्गुणैश्वर्यसम्पन्नं परमस्थानस्थितितः **परमेष्ठिनं** शास्त्रोक्तविधिना **परिसमेत्य** श्रद्धाभक्तिपुरस्सरं **उवाच**। किमित्यत आह—**अधीहीति**। हे **भगवन् यया** विद्यया **विद्वान् अचिरात्** कृत्याकृत्यप्रभवपुण्यपापे **व्यपोह्य** सहेतू तयाऽपह्नवीकृत्य, आरोपापवादापेक्षया तदधिकरणं **परं** तस्मादपि **परं** निरधिकरणं निष्प्रतियोगिकपूर्णं **पुरुषं** स्वमात्रधिया **उपैति** तामेतां स्वातिरिक्तास्तिताबुद्धेः **निगूढां** आवृतवद्भातां **सदा सद्भिः** ब्रह्मरातैः ब्रह्ममात्रपदप्रापकोपायतया **सेव्यमानां** चतुष्षष्टिकलाविद्यातोऽपि **वरिष्ठां** स्वातिरिक्तकलनाऽपह्नवसिद्धब्रह्ममात्रविद्यां **अधीहि** केवलकृपयोपदिशेत्यर्थः ॥ १ ॥

ब्रह्मविद्यासाधनं तत्फलं च

तस्मै स होवाच पितामहश्च श्रद्धाभक्तिध्यानयोगादवेहि ॥ २ ॥
न कर्मणा न प्रजया धनेन त्यागेनैके अमृतत्वमानशुः ।
परेण नाकं निहितं गुहायां विभ्राजते यद्यतयो विशन्ति ॥ ३ ॥
वेदान्तविज्ञानसुनिश्चितार्थाः संन्यासयोगाद्यतयः शुद्धसत्त्वाः ।
ते ब्रह्मलोकेषु परान्तकाले परामृतात् परिमुच्यन्ति सर्वे ॥ ४ ॥

मुनिनैवं पृष्टो भगवानुवाच—**तस्मा** इति। य एवं पृष्टः सोऽयं जगत्पितरो दक्षादयः तेषां पिता **पितामहः**, चोऽप्यर्थः, सर्वलोकगुरुरपि यथोक्ताधिकारिणे **तस्मै होवाच** नोपेक्षां कृतवान्। यन्मया निरूप्यमाणं निर्विशेषं ब्रह्म यतो न सहसा साक्षात्कर्तुं शक्यं अतः तदुपायभूतश्रद्धाभक्तिध्यानयोगादवेहि जानीहीत्यर्थः। मदुक्तार्थास्तिक्यबुद्धिः श्रद्धा, मदुक्तार्थभजनं भक्तिः, विजातीयप्रत्ययतिरस्कारपूर्वकं सजातीयप्रत्ययप्रवाहीकरणं ध्यानं, मदुक्तार्थपर्यवसानधीः योगः, एवं साधनवता ब्रह्म ज्ञातुं शक्यमित्यर्थः ॥ २ ॥ यथा श्रद्धाभक्तिध्यानयोगादि ब्रह्मविद्यासाधनं तथा संन्यासोऽपीत्याह—**न कर्मणेति**। न श्रौतस्मार्तकर्मणा, न मनुष्यलोकसाधनप्रजया, न दैवमानुषवित्तेन चामृतत्वमस्ति, तेषां

धर्मप्रजाधनानां गतागतलोकभ्रमणहेतुत्वात् । केनामृतत्वसिद्धिः इत्यत आह—**त्यागेनेति** । **एके** परमार्थदर्शिनः श्रौतस्मार्तसर्वकर्मपरित्यागेन व्यक्ताव्यक्त-विष्णुलिङ्गायमानपारमार्थिकसंन्यासेन ब्रह्ममात्रसम्यज्ज्ञानात्मना **अमृतत्वं** ब्रह्म-मात्रावस्थितिलक्षणकैवल्यं **आनशुः** आनशिरे, प्राप्ता इत्यर्थः । कथं त आनशुरित्यत्र, कं सुखं तत्प्रतियोगि दुःखं अकं तद्यत्र न विद्यते स **नाकः** स्वर्गः तं **परेण** स्वर्गादिरुपरि । यद्वा—**परेण** स्वातिरिक्ताविद्यापदतत्कार्यादपि परं **नाकं** परमानन्दरूपम् । **गुहायां** बुद्धौ **निहितं** सत् प्रत्यगभेदेन **यद्विभ्राजते** यत्प्रत्यक्परविभागासहं ब्रह्ममात्रं तन्मात्रावस्थानयतनशीलाः **यतयः** स्वावशेषतया **विशन्ति** तन्मात्रतया अवशिष्यन्त इत्यर्थः ॥ ३ ॥ ये ब्रह्ममात्रपर्यवसन्नास्ते किंविशेषणविशिष्टा इत्यत्र—ईशाद्यष्टोत्तरशतोपनिषदो हि वेदान्तः, तन्निष्पन्नं "ब्रह्ममात्रमसन्न हि" इत्याद्यसत्प्रपञ्चापह्नवसिद्धब्रह्ममात्रानुवादिश्रुतिसिद्धविज्ञानं, तेन ब्रह्म स्वमात्रमिति यैरेवमर्थो निश्चितः ते **वेदान्तविज्ञानसुनिश्चितार्थाः** । स्वाज्ञदृष्टिप्रसक्तस्वाविद्यापदतत्कार्यापह्नवो हि संन्यासयोगः स्वातिरिक्तासंभवज्ञानं तस्मात् **संन्यासयोगात्** । **यतयः**—व्याख्यातम् । एवं विज्ञानवन्तो यतयः ते ब्रह्मैव भवन्तीत्यत्र न विवादः । यद्येवं ज्ञानरहिताः केचन यतयस्ते रागादि-कालुष्याभावात् शुद्धं सत्त्वमन्तःकरणं येषां ते **विशुद्धसत्त्वाः** सन्तः ते **ब्रह्मलोकेषु**—उपासनातारतम्यतः तेषां भिन्नभिन्नतया भानात् बहुवचनं युज्यते—तेषु ब्रह्मलोकेषु **परान्तकाले** विराडपेक्षया परस्य ब्रह्मणोऽन्तकाले द्विपरार्धावसानकाले **परामृतात्** अव्याकृतोपाधितः **परिमुच्यन्ति** परिमुच्यन्ते सर्वतः **सर्वे** मुक्ता भवन्ति । यद्वा—ब्रह्मविद्वरीयांसो भूत्वा ब्रह्मविद्वरिष्ठताऽऽप्तये यतन्त इति **यतयः** । यैः ब्रह्म स्वावशेषतया लोक्यते ते **ब्रह्मलोकाः** ब्रह्मविद्वरिष्ठा इत्यर्थः । यद्वा--ब्रह्मैव लोका ब्रह्मलोकाः तेषु—पूजायां बहुवचनयोगात्—**ब्रह्मलोकेषु** ब्रह्ममात्रे परं स्वातिरिक्तं तत् कालयत्यपह्नवं करोतीति परान्तकालं तस्मिन् **परान्तकाले** ब्रह्मणि कार्यापेक्षया कारणस्य परत्वेनामृतत्वात् परामृतं कारणं तस्मात् कार्यकारणकलनारूप**परामृतात्** **परिमुच्यन्ति** मुच्यन्ते । **परामृता** इति पाठान्तरं, स्वातिरिक्तपरत्वेन पराश्च ते अमृताश्चेति **परामृताः**

ब्रह्मविद्वरिष्ठाः । सर्वे पुरैव विमुक्ताः पुनः परिमुच्यन्ते इत्युपचर्यन्ते, "परामृता ब्रह्मविदां वरिष्ठाः" इति प्रभोक्तेः, ब्रह्मैव भवन्तीत्यर्थः ॥ ४ ॥

सविशेषब्रह्मध्यानपरिकरः

विविक्तदेशे च सुखासनस्थः शुचिः समग्रीवशिरःशरीरः ।
अत्याश्रमस्थः सकलेन्द्रियाणि निरुध्य भक्त्या स्वगुरुं प्रणम्य ।
हृत्पुण्डरीकं विरजं विशुद्धं विचिन्त्य मध्ये विशदं विशोकम् ॥ ५ ॥
अचिन्त्यमव्यक्तमनन्तरूपं शिवं प्रशान्तममृतं ब्रह्मयोनिम् ।
[1]तदादिमध्यान्तविहीनमेकं विभुं चिदानन्दमरूपमद्भुतम् ॥ ६ ॥
उमासहायं परमेश्वरं प्रभुं त्रिलोचनं नीलकण्ठं प्रशान्तम् ।
ध्यात्वा मुनिर्गच्छति भूतयोनिं समस्तसाक्षिं तमसः परस्तात् ॥७॥

एवं निर्विशेषं ब्रह्म मन्दाधिकारिभिः प्रतिपत्तुं अशक्यमिति मत्वा तदनुकम्पया सविशेषं निरूपयन् देशासनादिविशेषमाह—**विविक्त** इति । **विविक्तदेशे** जनसंबाधरहितप्रदेशे । चशब्दादुचितकाले । **शुचिः** सन् **सुखासने** स्वस्तिकादौ **स्थित्वा समग्रीवशिरःशरीरः** ऋजुकायो भूत्वा करणग्रामनिरोधनं कुर्यात् । कथमेवमाश्रमिणां संभवतीत्यत आह—**अत्याश्रमस्थ** इति । व्रतिकाम्निनो ह्याश्रमिणः तानतीत्य तुर्याश्रमे तिष्ठतीति **अत्याश्रमस्थः**, तस्य निर्विक्षेपतया करणग्रामनिग्रहक्षमत्वात् । सोऽयं परिव्राट् **सकलेन्द्रियाणि निरुध्य** स्वस्वव्यापृत्युपरमं कृत्वा येन परमार्थोपदेशः कृतः तं **स्वगुरुं भक्त्या प्रणम्य** अथ स्वहृत्पुण्डरीकं रागाद्यभावात् **विरजं** अशुद्धाज्ञानाभावात् **विशुद्धं** तन्मध्ये हृदयकमलान्तःप्रदेशे स्वाविद्याऽपायात् **विशदं** शोचनीयस्वातिरिक्तवैरळ्यात् **विशोकं** आत्मानं ध्यात्वा **विचिन्त्य** मननिदिध्यासने कृत्वा ॥ ५ ॥ अतो

[1] तमादि—मु.

वाङ्मनसवृत्तिभिरगोचरं **अचिन्त्यं** शब्दादिविषयाभावात् **अव्यक्तं** परिच्छेदत्रयाभावात् **अनन्तरूपं** नित्यमङ्गळरूपत्वात् **शिवं** बाह्यान्तःकलानाऽभावात् **प्रशान्तं** सन्मात्रत्वात् **अमृतं** स्वकल्पितबृहतोऽपि बृहत्त्वात् **ब्रह्म** स्वाज्ञदृष्टिप्रसक्तस्वाविद्यापदहेतुत्वात् **योनिम्**। तथात्वे आद्यन्तवत्ता स्यादित्यत आह—**तं**दिति। यत्कारणत्वेनाभिमतं **तत् आदिमध्यान्तविहीनं**, कार्यस्याद्यन्तवत्त्वेऽपि कार्यापाये कारणस्याकार्यकारणत्वेन ब्रह्ममात्रत्वात्। तन्मात्रत्वे हेतुमाह—**एक**मिति। बह्वपेक्षया एकस्याल्पत्वेन परिच्छेद्यता स्यादित्यत आह—**विभु**मिति। व्याप्यप्रसक्तौ व्यापिनमित्यर्थः। अत एव **चिदानन्दं**, सच्चिदानन्दमात्रत्वात्। तदेव **रूपं**, तदितररूपराहित्यात् **अरूपं** अत एव **अद्भुतं**, सर्वात्मत्वेऽपि तैः आत्मत्वेनाग्रहणं अद्भुतत्वम्॥ ६॥ तेषां स्वामित्वेन भानात् तत् कथमित्यत्र—**उमासहायं** अर्धनारीश्वरत्वात्, विद्यासहायं वा। सर्वेषां स्वामित्वेन नियन्तृत्वात् **परमेश्वरं प्रभुं** त्रीणि सोमसूर्याग्निलोचनानि यस्य तं **त्रिलोचनं**, कण्ठे नीलं यस्य तं **नीलकण्ठं**, प्रसन्नवदनत्वात् **प्रशान्तम्**। यद्वा—प्रशमितभक्तपटलस्वाज्ञानत्वात् **प्रशान्तम्**। एवमुक्तलक्षणलक्षितमीश्वरं **मुनिः** अयमहमस्मीति सर्वभूतयोनिं तद्गतकारणताऽपाये **समस्तसाक्षिं** सर्वसाक्षिणं ध्यात्वा तद्ध्यानसंस्कृतचित्तवैशद्यात् साक्ष्यनिरूपितसाक्षिताऽपाये यच्चिन्मात्रमवशिष्यते तदेव स्वावशेषतया मुनिः **गच्छति तमसः परस्तात्** यद्विद्योतते तदेव भवतीत्यर्थः॥ ७॥

सर्वात्मब्रह्मदर्शनमेव परमसाधनम्

स ब्रह्मा स शिवः सेन्द्रः सोऽक्षरः परमः स्वराट्।
स एव विष्णुः स प्राणः स कालोऽग्निः स चन्द्रमाः॥ ८॥
स एव सर्वं यद्भूतं यच्च भव्यं सनातनम्।
ज्ञात्वा तं मृत्युमत्येति नान्यः पन्था विमुक्तये॥ ९॥
सर्वभूतस्थमात्मानं सर्वभूतानि चात्मनि।
संपश्यन् ब्रह्म परमं याति नान्येन हेतुना॥ १०॥

ब्रह्मभावं प्राप्य मुनिः कृतकृत्यो भवतीत्युक्तं, तदतिरेकेण ब्रह्मादेः सत्त्वात् कृतकृत्यता कुतः ? इत्याशङ्क्य स एव सर्वमित्याह—**स** इति । यो ब्रह्मीभूतः **सोऽयं मुनिः ब्रह्मा** चतुराननः **स शिवः** शूलपाणिः **इन्द्रो** वज्रधरः **अक्षरः** कूटस्थः, "कूटस्थोऽक्षर उच्यते" इति स्मृतेः, **परमः** उत्तमः, स्वे महिम्नि राजत इति **स्वराट् स एव विष्णुः** व्यापी हरिर्वा **प्राणः** पञ्चवृत्तिविशिष्टः **स कालः** कलयिता, यमो वा, **अग्निश्चन्द्रमाश्च** ॥ ८ ॥ किं बहुना—यद्यद्भूतादि-कालत्रयपरिच्छिन्नं तत्तत्सर्वं स एवेत्यर्थः । यतस्तदतिरेकेणोक्तानुक्तकलना न किंचिदस्ति अतः **सनातनं**, ब्रह्मापि स मुनिरेवेत्यर्थः । यत एवंवित्सर्वात्मा ब्रह्ममात्रं वा भवति अतो ब्रह्मज्ञानादृते मृत्युतरणोपायो न कोऽप्यस्तीत्याह—**ज्ञात्वेति** । **तं ज्ञात्वा** स्वातिरिक्तमृत्युमतीत्य कृतकृत्यो भवतीति वर्तमानप्रयोगतो ज्ञानसमकालमेव स्वातिरिक्तं ग्रसित्वा विद्वान् ब्रह्मैव भवतीति द्योत्यते । स्वाज्ञान-प्रभवमृत्युतरणोपायस्वज्ञानं विना न किंचिदस्तीत्यर्थः, "नान्यः पन्था अयनाय विद्यते" इति श्रुतेः ॥ ९ ॥ कथमेवं मार्गान्तरसत्त्वात् इत्याशङ्क्य मार्गान्तर-स्याभ्युदयहेतुत्वेन निःश्रेयसमार्गास्पर्शित्वात् निःश्रेयसहेतुः ज्ञानादृते नास्तीति सोपायं तदेव दृढयति—**सर्वेति** । ब्रह्मादिस्तम्बान्तेषु सर्वभूतेषु प्रत्यग्रूपेण तिष्ठतीति **सर्वभूतस्थमात्मानं** प्रत्यगभेदेन पश्यन् पुनः **स्वात्मनि** सर्वाधिष्ठाने **सर्वभूतानि** कल्पितानीति विचिन्त्य यत्सर्वभूतारोपाधिकरणं एवमध्यारोपाप-वादमोहे अपह्नवतां गते तन्निरूपिताधिकरणताऽपाये निरधिकरणब्रह्ममात्र-तयोपबृंहणात् **ब्रह्म परमं संपश्यन्** तन्निष्प्रतियोगिकस्वमात्रमेवेत्यवलोकयन् तद्वेदनदर्शनसमकालं तदेव **याति** तन्मात्रतया अवशिष्यते । विनैवं सम्यज्ज्ञानं उपायान्तरेण नैति, उक्तं ह्येतत् "नान्यः पन्था विमुक्तये" इति ॥ १० ॥

प्रणवध्यानविधिः

आत्मानमरणिं कृत्वा प्रणवं चोत्तरारणिम् ।
[1]ज्ञाननिर्मथनाभ्यासात् पापं दहति पण्डितः ॥ ११ ॥

[1] ध्यान—अ, अ १, क.

7903

यदा एवं बोधो न जायते तदा तदर्थमुपायमाह—आत्मानमिति। आत्मानं अन्तःकरणं अधरारणिं कृत्वा प्रणवं उत्तरारणिं च कृत्वा, सर्वापवादाधिष्ठानब्रह्मास्मीति वेदान्तविचारजं ज्ञानं, युक्तिभिरनुचिन्तनं तन्निर्मथनं अभ्यासः तस्मात् ज्ञाननिर्मथनाभ्यासात् पण्डितो विद्वान् स्वाज्ञानपाशं दहति भस्मीकरोतीत्यर्थः ॥ ११ ॥

परमात्मन एव जीवरूपेण संसारः

स एव मायापरिमोहितात्मा शरीरमास्थाय करोति सर्वम् ।
[1]स्त्र्यन्नपानादिविचित्रभोगैः स एव जाग्रत् परितृप्तिमेति ॥ १२ ॥
स्वप्ने तु जीवः सुखदुःखभोक्ता स्वमायया कल्पित[2]विश्वलोके ।
सुषुप्तिकाले सकले विलीने तमोऽभिभूतः सुखरूपमेति ॥ १३ ॥
पुनश्च जन्मान्तरकर्मयोगात् स एव जीवः स्वपिति प्रबुद्धः ।
पुरत्रये क्रीडति यश्च जीवस्ततस्तु जातं सकलं विचित्रम् ॥
आधारमानन्दमखण्डबोधं यस्मिन् लयं याति पुरत्रयं च ॥ १४ ॥
एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च ।
खं वायुर्ज्योतिरापः पृथिवी विश्वस्य धारिणी ॥ १५ ॥

ज्ञप्तिमात्रस्य कथं स्वाज्ञानपाश इत्यत आह—स एवेति । यः स्वातिरिक्तकलनाऽसहपरमात्मेति ख्यातः स एव निर्मायोऽपि स्वाज्ञानरूपया मायया परिमोहितात्मेव स्थूलादिशरीरमास्थाय सर्वत्रात्मात्मीयाभिमानतः सर्वव्यापारजातं करोति । किं च—स्त्र्यन्नपानादिविचित्रभोगैः स एव इन्द्रियैरिन्द्रियार्थग्रहणलक्षणजाग्रत्कलनापरितृप्तिमेति जाग्रदवस्थायां नानाविधसुखदुःखे आप्नोतीत्यर्थः ॥ १२ ॥ स्वप्नेऽपि सुखदुःखभोक्तृत्वं सुषुप्तौ तदभावं च स्पष्टयति—

[1] स्त्रियन्न—मु. [2] जीवलो—क.

स्वप्ने त्विति । जाग्रदवस्थायामिव **स्वप्नेऽपि** । तुशब्दोऽप्यर्थः । **जीवः** प्राणानां धारयिता विविधवासनावासितसुखदुःखभोक्ता सुख्यहं दुःख्यहं इति प्रत्ययवान् । सुखादिभोक्तृत्वस्य वास्तवत्वं वारयति—**स्वाज्ञानरूपया मायया विकल्पित-विश्वलोके,** वासनाप्रपञ्चेऽपि जागरणवत् सुखदुःखभोक्ता भवतीत्यर्थः । स्वानन्द-भोगावसरसुषुप्तिकाले तत्रत्यतमसि **सकले** स्वातिरिक्तमोहे **विलीने** सति स्वाज्ञान-**तमोऽभिभूतः** सन् **सुखरूपं** ब्रह्म **एति** ॥ १३ ॥ यः सुषुप्तः स एव स्वप्नं जागरणं वैतीत्याह—**पुनश्चेति** । पुराऽऽनन्दात्मस्वरूपं प्राप्य **पुनश्च जन्मान्तर-कर्मयोगात् स एव जीवः स्वपिति** सुषुप्तात् स्वप्नस्थानं **गच्छति प्रबुद्धो** जागरणं वा गच्छति । **यश्च** य एव **जीवः** जाग्रदाद्यवस्थात्रयावच्छिन्नपुरत्रये शरीरत्रये **क्रीडति** विहरति **ततस्तस्मात्** प्रत्यगभिन्नपरमात्मनः । तुशब्दोऽव-धारणार्थः । तत एव **सकलं विचित्रं** विविधनामरूपकर्मात्मकं विश्वं **जातं** रज्ज्वज्ञदृष्ट्या रज्जौ सर्पवद्विकल्पितम् । तदारोपापवादाधिकरणं किं ? ततः किं किं जायते ? कथमस्मिन् लीयते ? इत्यत आह—**आधारमिति** । यत्स्वातिरिक्ता-विद्यापदतत्कार्यारोपापवादा**धार**भूतं यद्ब्रह्म तन्निरतिशया**नन्द**रूपं **अखण्डबोधं** सच्चिदानन्दरसस्वभावं **यस्मिन् पुरत्रयो**पलक्षितस्वाविद्यापदतत्कार्यजातं **लयं याति** ॥ १४ ॥ चशब्दात् पुनरुत्पत्त्यधिकरणमप्येतदेवेत्याह—**एतस्मादिति** । **एतस्मात्** सर्वाधिकरणात् आत्मनः क्रियाशक्त्यात्मकः **प्राणो** रज्जुसर्पवत् **जायते,** तथा ज्ञानशक्त्यात्मकं **मनः** ज्ञानकर्माख्यानि **सर्वेन्द्रियाणि** । चशब्दात् देहादिकमपि । **खं वायुर्ज्योतिरापः पृथिवी विश्वस्य धारिणी** इति पञ्च-भूतान्यप्येतस्मादेव जायन्ते ॥ १५ ॥

जीवेश्वरयोरभेदः

यत् परं ब्रह्म सर्वात्मा विश्वस्यायतनं महत् ।
सूक्ष्मात् सूक्ष्मतरं नित्यं तत्त्वमेव त्वमेव तत् ॥ १६ ॥
जाग्रत्स्वप्नसुषुप्त्यादि प्रपञ्चं यत् प्रकाशते ।
तद्ब्रह्माहमिति ज्ञात्वा सर्वबन्धैः प्रमुच्यते ॥ १७ ॥

त्रिषु धामसु यद्भोज्यं भोक्ता भोगश्च यद्भवेत् ।
तेभ्यो विलक्षणः साक्षी चिन्मात्रोऽहं सदाशिवः ॥ १८ ॥
मय्येव सकलं जातं मयि सर्वं प्रतिष्ठितम् ।
मयि सर्वं लयं याति तद्ब्रह्माद्वयमस्म्यहम् ॥ १९ ॥

व्यष्टिसमष्ट्यारोपापवादाधिकरणयोः स्वाज्ञदृष्ट्या भेदप्रसक्तौ स्वज्ञदृष्ट्या तयोरैक्यमाचष्टे—**यदिति** । व्यष्ट्याधारस्त्वंपदार्थः । समष्ट्याधारस्तत्पदार्थः । **यत्** स्वातिरेकेण किंचिदस्तीति विश्वसनीय**विश्वस्यायतनं** अधिकरणं स्वाधिष्ठेय-विश्वापेक्षया **परं** व्यतिरिक्तं **बृहत् ब्रह्म सर्वात्मा** सर्वप्रत्यक्त्वात् **महत्** त्रिविधपरिच्छेदरहितं **सूक्ष्मात्** धीवृत्तेरपि **सूक्ष्मतरं** वस्तुतः स्थूलसूक्ष्मपरिमाण-विरळं **नित्यं** पारमार्थिकसद्रूपत्वात् । उक्तविशेषणविशिष्टं यत् समष्टिप्रपञ्चापवादाधिकरणं **तत् ब्रह्म एव** व्यष्टिप्रपञ्चापवादाधिकरणं **त्वंपदार्थलक्ष्यं**, यत् **त्वंपदार्थलक्ष्यं तत्** तत्पदार्थलक्ष्यमेव नान्यत्, "तत्त्वमसि", "अहं ब्रह्मास्मि", इत्यादिश्रुतेः । व्यष्ट्याद्यधिष्ठेयाभावे तत्सापेक्षाधिष्ठानत्वकलनाविरळं निरधिष्ठानं ब्रह्मैकमेवेत्यर्थः ॥ १६ ॥ ब्रह्मातिरेकेण जाग्रदादिप्रपञ्चसत्त्वात् कथं ब्रह्ममात्रसिद्धिः ? तज्ज्ञानेन किं फलं ? इत्यत आह—**जाग्रदिति** । **जाग्रत्स्वप्न-सुषुप्त्यादि**—आदिशब्देन विश्वविराडोत्रादयो गृह्यन्ते—तद्विशिष्टं **प्रपञ्चं** प्रपञ्चः स्वातिरेकेण नास्तीति **यत्** ब्रह्म प्रकाशते—स्वाज्ञदृष्टिप्रसक्तप्रपञ्चे सति तत्प्रकाशकं, तदभावे स्वयंप्रकाशमात्रमवशिष्यते । यदेवं सिद्धं **तद्ब्रह्माहमिति ज्ञात्वा** तत्स्वमात्रमिति ज्ञानसमकालं स्वातिरिक्तास्तितामोहप्रभव**सर्वबन्धैः प्रमुच्यते** ॥ १७ ॥ भोज्यादिकलनायां सत्यां कथं बन्धाद्विमुक्तः स्वमात्रमवशिष्यत इत्यत आह—**त्रिष्विति** । स्वाज्ञदृष्टिप्रसक्त**त्रिषु** धामसु जाग्रदादिस्थानेषु स्थूलप्रविभक्तानन्दरूपेण **यत्** प्रसिद्धं **भोज्यं** विश्वतैजसादिः **भोक्ता** स्थूलप्रवि-भक्तादि**र्भोगः**—चशब्दादधिदैवादिविभागोऽपि गृह्यते—**तेभ्यः** साक्ष्येभ्यः **विलक्षणः साक्षी** सर्वस्य साक्षी, "ततः सर्वस्मादन्यो विलक्षणः" इति श्रुतेः ।

साक्ष्यसापेक्षसाक्षिताऽपाये पुरा योऽहंप्रत्ययगोचरः साक्षी सोऽहं **चिन्मात्रः** चिदेकरसत्वात् **सदाशिवः** नित्यकल्याणकैवल्यरूपत्वात् ॥ १८ ॥ स्वाज्ञदृष्टि-प्रसक्तप्रपञ्चवैलक्षण्यमुक्त्वा मूलबीजांशयोगतः प्रपञ्चकारणमप्यहमेवेत्याह—**मय्येवेति**। विश्वारोपापवादाधिकरणे **मय्येव सकलं** स्वाविद्यापदतत्कार्यजातं **जातं प्रतिष्ठितम्** लयं च **याति**। यदेवं सकलकारणत्वेन सिद्धं स्वकार्य-निरूपितकारणताऽपाये **तद्ब्रह्म** निष्प्रतियोगिकाद्वितीयमस्मि ॥ १९ ॥

अभेदानुभवप्रकाशः

अणोरणीयानहमेव तद्वन्महानहं विश्वमिदं विचित्रम्।
पुरातनोऽहं पुरुषोऽहमीशो हिरण्मयोऽहं शिवरूपमस्मि ॥ २० ॥
अपाणिपादोऽहमचिन्त्यशक्तिः पश्याम्यचक्षुः स शृणोम्यकर्णः।
अहं विजानामि विविक्तरूपो न चास्ति वेत्ता मम चित्सदाहम्॥
वेदैरनेकैरहमेव वेद्यो वेदान्तकृद्वेदविदेव चाहम् ॥ २२ ॥
न पुण्यपापे मम नास्ति नाशो न जन्म देहेन्द्रियबुद्धिरस्ति।
न भूमिरापो मम वह्निरस्ति न चानिलो मेऽस्ति न चाम्बरं च ॥

स्वविज्ञानानुरूपं स्वानुभूतिं प्रकटयति—**अणोरिति**। यद्वदहं सर्वकारणं **तद्वत्** **अणोः** बुद्ध्यादेः तूलातत्कार्यादपि **अणीयान्** तथा महतो मूलाविद्या-विजृम्भितस्वाविद्यापदतत्कार्यजातादपि **महान्** अणीयस्त्वमहत्त्वमविद्याद्वयसापेक्षं, "अणुत्वं बुद्धिनिष्ठं स्यान्महत्त्वं खादिनिष्ठितम्" इति स्मृतेः। अणुमहत्परिणत-कार्यकारणकलनाऽन्वितं **इदं विश्वं** नानाविचित्रशोभितं **अहमेवेत्यर्थः**, "मद्व्य-तिरिक्तमणुमात्रं न विद्यते" इति श्रुतेः। **पुरातनः** चिरन्तनोऽहं **पुरुषोऽहं** निष्प्रतियोगिकपूर्णरूपत्वात्। स्वाज्ञदृष्ट्या **अहमीशः** सर्वनियन्तृत्वात्। आदित्यात्मना **हिरण्मयोऽहं** ज्योतिर्मयत्वात्। **शिवरूपमस्मि** नित्यमङ्गळस्व-रूपत्वात् ॥ २० ॥ करणग्रामाभावेऽपि स्वस्य सर्वज्ञतामाह—**अपाणीति**।

पाणिपादचक्षुःश्रोत्रादिकरणग्रामवैरळ्यात् **अपाणिपादोऽहमचिन्त्यशक्तिः** स्वाज्ञदुर्बोधशक्तित्वात् । एवंभूतोऽपि जवनो गृहीतेत्यर्थः । **पश्याम्यचक्षुः स शृणोम्यकर्णः** । स्वातिरिक्तं नेति **अहं विजानामि** । **विविक्तरूपोऽहं**, बुद्ध्याद्यतिरिक्तत्वात् । **मम** आनन्दात्मनो **वेत्ता न चास्ति, सदा चिदहमस्मी**त्यर्थः ॥ २१ ॥ इदानीं स्वस्य वेदशास्त्रप्रतिपाद्यत्वं सर्वविकारास्पृष्टत्वं च दर्शयति—**वेदैरिति** । ऋगादिभिः **अनेकशाखामण्डितैः वेदैरहमेव वेद्यः** वेदान्तैकवेद्यत्वात् । व्यासभगवत्पादादिरूपेण **वेदान्तकृत्** सूत्रभाष्यादिकृत्त्वात् । **कृत्स्नवेदविदेव चाहम्** । परमार्थदर्शित्वख्यापकः **चशब्दः** ॥ २२ ॥ किं च **पुण्यपापे मम न स्तः** । **मम नास्ति नाशः**, सन्मात्रत्वात् । **न जन्मदेहेन्द्रिय-बुद्धिरस्ति** जनिमृतिमद्देहेन्द्रियादिविरळप्रत्यग्रूपत्वात् । **न भूमिरापः** इति पञ्चभूततत्कार्यजातमस्ति नास्तीति विभ्रमोऽपि न ममास्तीत्यर्थः ॥ २३ ॥

अभेदानुभूतिफलम्

एवं विदित्वा परमात्मरूपं गुहाशयं निष्कलमद्वितीयम् ।
समस्तसाक्षिं सदसद्विहीनं प्रयाति शुद्धं परमात्मरूपम् ॥ २४ ॥

एवंविदः परमफलमाह—**एवमिति** । यत्रानात्मप्रपञ्चोऽपह्नवतां गतः तत् **परमात्मरूपं** स्वात्ममात्रावशेषतया निरूपणात्, स्वाज्ञविकल्पितसर्वप्राणि**गुहाशयं** सर्वप्रत्यगभिन्नत्वात्, **निष्कळं** प्राणादिनामान्तकलाऽपह्नवसिद्धत्वात्, **अद्वितीयं** निष्प्रतियोगिकत्वात्, **समस्तसाक्षिं** समस्तसाक्षिणं आत्मानमेव **सदसद्विहीनं** व्यक्ताव्यक्तप्रपञ्चकलनाविरळं **शुद्धं** शुद्धचैतन्यं **एवं** अहमस्मीति **विदित्वा** तद्वेदनसमकालं **परमात्मरूपं प्रयाति** तन्मात्रतयाऽवशिष्यते ॥ २४ ॥

शतरुद्रीयजपविधिः

यः शतरुद्रियमधीते सोऽग्निपूतो भवति [1]स्वर्णस्तेयात् पूतो भवति सुरापानात् पूतो भवति ब्रह्महत्यात् पूतो भवति कृत्याकृत्यात्

[1] "स वायुपूतो भवति स आत्मपूतो भवति" इत्यधिकः—मु.

पूतो भवति तस्मादविमुक्तमाश्रितो भवत्यत्याश्रमी सर्वदा सकृद्वा जपेत् ॥ २५ ॥

अनेन ज्ञानमाप्नोति संसारार्णवनाशनम् ।
तस्मादेवं विदित्वैनं कैवल्यं फलमश्नुते कैवल्यं फलमश्नुत इति ॥ २६ ॥

एवं परमात्मावगतिविरळस्य तदवगत्यर्थमुपायमाह—य इति । यः अनुत्पन्नसाक्षात्कारो मुमुक्षुः "नमस्ते रुद्र" इति शतरुद्रीयं रुद्राध्यायं अधीते यथाशक्ति नित्यं पठति । यद्वा—पञ्चरुद्रमधीते । सोऽयं श्रौतस्मार्तकर्महेत्वग्निवत् पूतो भवति स्वर्णस्तेयात् पूतो भवति सुरापानात् पूतो भवति ब्रह्महत्यात् पूतो भवति । शास्त्रीयं कृत्यं अशास्त्रीयं अकृत्यं तस्मादपि पूतो भवति । तस्मात् एवं शतरुद्रीयाध्ययनात् अविमुक्तं काशीक्षेत्रं भ्रूमध्यगतज्योतिर्लिङ्गमविमुक्तं वा आश्रितो भवति । अत्याश्रमी संन्यासी सर्वदा सकृद्वा । वाशब्दोऽधिकारिविकल्पार्थः ॥ २५ ॥ एवं शतरुद्रपठनादुत्पन्नचित्तशुद्धितः कैवल्यप्रापकज्ञानद्वारा कैवल्यमाप्नोतीत्याह—अनेनेति । अनेन शतरुद्रीयजपेन अहं ब्रह्मास्मीति संसारार्णवनाशनं शोषणं ब्रह्ममात्रज्ञानमाप्नोति । यस्मादेवं तस्मादेवमेनं परमात्मानं स्वमात्रमिति विदित्वा तद्वेदनसमकालं विकळेवरकैवल्यं फलमश्नुते प्राप्नोति । अभ्यासेतिशब्दौ शास्त्रपरिसमाप्त्यर्थौ ॥ २६ ॥

श्रीवासुदेवेन्द्रशिष्योपनिषद्ब्रह्मयोगिना ।
लिखितं स्याद्विवरणं कैवल्योपनिषत्स्फुटम् ॥
कैवल्योपनिषद्व्याख्याग्रन्थस्तु द्विशतं स्मृतः ॥

इतीशाद्यष्टोत्तरशतोपनिषच्छास्त्रविवरणे द्वादशसङ्ख्यापूरकं
कैवल्योपनिषद्विवरणं सम्पूर्णम्

गणपत्युपनिषत्

भद्रं कर्णेभिः—इति शान्तिः

गणपतिस्तुतिः

ॐ लं नमस्ते गणपतये ॥ १ ॥

त्वमेव प्रत्यक्षं तत्त्वमसि । त्वमेव केवलं कर्ताऽसि । त्वमेव केवलं धर्ताऽसि । त्वमेव केवलं हर्ताऽसि । त्वमेव सर्वं खल्विदं ब्रह्मासि । त्वं साक्षादात्माऽसि ॥ २ ॥

ऋतं वच्मि । सत्यं वच्मि ॥ ३ ॥

यन्नत्वा मुनयः सर्वे निर्विघ्नं यान्ति तत्पदम् ।
गणेशोपनिषद्वेद्यं तद्ब्रह्मैवास्मि सर्वगम् ॥

इह खलु अथर्वणवेदप्रविभक्तेयं गणपत्युपनिषत् सर्वात्मभावप्रकटनव्यग्रा सर्ववर्जितचिन्मात्रपर्यवसन्ना विजृम्भते । अस्याः सङ्क्षेपतो विवरणमारभ्यते । परमदयावतीयं श्रुतिः स्वाज्ञलोकस्वाज्ञानविघ्नशान्तये स्वज्ञानसिद्धये च गणपतिं नत्वा स्तौति—ओमिति । यद्रूपं ॐ लं ओङ्कारलक्ष्यतुर्यरूपं ते तुभ्यं **गणपतये नमोऽस्तु**, आवयोरैक्यमस्त्वित्यर्थः । यद्वा—लं इति मूलाधारबीजं, मूलाधारस्य गणपतिसदनत्वात् । यदोङ्कारार्थगणपतितत्त्वं लकारवाच्यपार्थिवांशमूलाधारे

विभाति **तस्मै** ककारवाच्यमूलाधारसदनाय **गणपतये नमोऽस्त्विति** ॥ १ ॥ नमस्कृत्य महावाक्यार्थप्रत्यगभिन्नब्रह्मत्वेन स्तौति—**त्वमिति** । **त्वमेव** श्रोत्रादि-**प्रत्यक्षं** प्रतिकरणं तत्तद्विषयप्रवृत्तिनिवृत्तिनिमित्ततया यच्चैतन्यं वर्तते **तत्त्वमसि** सर्वनियन्ताऽसीत्यर्थः । प्रकृतिमधिष्ठाय जीवरूपेण **त्वमेव केवलं** विष्ण्वात्मना **कर्ताऽसि,** अधिष्ठानात्मना **त्वमेव केवलं धर्ताऽसि,** रुद्रात्मना **त्वमेव केवलं हर्ताऽसि, त्वमेव सर्वं खल्विदं ब्रह्मासि** यदिदं जगत्सर्वं परिदृश्यमानं ब्रह्मैव खलु तत्त्वमेव ब्रह्मासि, सर्वप्रत्यग्रूपेण **त्वं साक्षादात्माऽसि** ॥ २ ॥ व्यावहारिकसत्य-रूपेण त्वामेव **नित्यं ऋतं** वच्मि, पारमार्थिकधिया **सत्यं** वच्मि ॥ ३ ॥

गणपतिं प्रति प्रार्थना

अव त्वं माम् । अव वक्तारम् । अव श्रोतारम् । अव दातारम् । अव धातारम् । अवानूचानमव शिष्यम् ॥ अव पुरस्तात्तात् । अव दक्षिणात्तात् । अव पश्चात्तात् । अवोत्तरात्तात् । अव चोर्ध्वात्तात् । अवाधरात्तात् । सर्वतो मां पाहि पाहि समन्तात् ॥ ४ ॥

परापरब्रह्मभावमापन्नगणपते **त्वं मां अव** । शिष्येभ्यो **वक्तारं** त्वद्विद्यादातारं मां **अव** मत्तः **श्रोतारं धातारं** धारयितारं **अनूचानसन्ततिभवं शिष्यं अव,** आचार्यशिष्यौ सदा रक्षेत्यर्थः । हे वैराजभावमापन्नगणपते पूर्वाग्नेयादिदिक्षु विदिक्षूर्ध्वाधःप्रदेशेऽपि मयाऽऽत्तात् स्वाज्ञानतत्कार्यान्मां मोचयित्वा तत्**समन्तात्** त्वयाऽऽत्तवैभवात् **सर्वतो मां पाहि पाहि** रक्ष रक्षेत्यर्थः ॥ ४ ॥

गणपतेः सर्वात्मतया स्तुतिः

त्वं वाङ्मयस्त्वं चिन्मयः । त्वमानन्दमयस्त्वं ब्रह्ममयः । त्वं सच्चिदानन्दाद्वितीयोऽसि । त्वं प्रत्यक्षं ब्रह्मासि । त्वं ज्ञानमयो विज्ञानमयोऽसि ॥ ५ ॥

सर्वं जगदिदं त्वत्तो जायते । सर्वं जगदिदं त्वत्तस्तिष्ठति । सर्वं जगदिदं त्वयि [1]लयमेष्यति । सर्वं जगदिदं त्वयि प्रत्येति । त्वं भूमिरापोऽनलोऽनिलो नभः । त्वं चत्वारि वाक्परिमिता पदानि । त्वं गुणत्रयातीतः । त्वं देहत्रयातीतः । त्वं कालत्रयातीतः । त्वं मूलाधारे स्थितोऽसि नित्यम् । त्वं शक्तित्रयात्मकः । त्वां योगिनो ध्यायन्ति नित्यम् । त्वं ब्रह्मा त्वं विष्णुस्त्वं रुद्रस्त्वमिन्द्रस्त्वमग्निस्त्वं वायुस्त्वं सूर्यस्त्वं चन्द्रमास्त्वं ब्रह्म भूर्भुवः सुवरोम् ॥ ६ ॥

एवं त्वत्पालनशक्तिर्मे कुत इत्यत आह—त्वं इत्यादिना । ओङ्कारतदर्थपरापरब्रह्मात्मना त्वं वाङ्मयः । "श्रोत्रस्य श्रोत्रं" इत्यादिश्रुतिसिद्धप्रत्यक्षप्रवृत्तिनिमित्तेश्वरात्मना त्वं प्रत्यक्षं ब्रह्मासि । त्वं ज्ञानमयो विज्ञानमयोऽसि ज्ञानविज्ञानसम्यज्ज्ञानतत्त्वज्ञानभासकज्ञप्तिमात्रोऽसीत्यर्थः ॥ ५ ॥ ब्रह्मविष्णुरुद्रात्मना जगदुत्पत्तिस्थितिभङ्गकारणं त्वमेवेत्याह—सर्वमिति । पुनर्व्युत्थानतया सरूपविलयं भजति । सर्वं जगदिदं त्वयि प्रत्येति तत्त्वज्ञदृष्ट्या विरूपविलयं भजति । स्वाज्ञदृष्टिविकल्पितभूरादिपञ्चभूतानि परापश्यन्तीमध्यमावैखरीभेदेन तन्निष्पन्नशब्दजालमपि त्वमेवेत्याह—त्वमिति । स्वज्ञस्वाज्ञदृष्टिभ्यां त्वं तमआदिगुणत्रयातीतः । त्वं स्थूलादिदेहत्रयातीतः । त्वं भूतादिकालत्रयातीतः । त्वं व्यष्टिसमष्ट्यात्मकप्रपञ्चस्य चतुर्दळात्मके मूलाधारे स्थितोऽसि नित्यम् । अजडक्रियाज्ञानेच्छाभेदेन त्वं शक्तित्रयात्मकः । ब्रह्मैवाहमस्मीति त्वां योगिनो ध्यायन्ति नित्यम् । ब्रह्मादिव्याहृत्यन्तरूपस्त्वमेवेत्याह—त्वमिति । सृष्टिकर्ता ब्रह्मा स्थितिकर्ता विष्णुः संहारकर्ता रुद्रः । इन्द्राग्निवायुग्रहणं अष्टदिक्पालकोपलक्षणार्थम् । जगच्चक्षुः सूर्यः जगदाप्यायनकरः चन्द्रः । एवंरूपेण सर्वत्रोपबृंहणात् ब्रह्म । तव व्याहृतित्रयात्मकोङ्कारस्वरूपेण सर्वात्मकत्वं सिद्धमित्यर्थः ॥ ६ ॥

[1] लयिष्यति—अ १, अ २, उ १.

गणपतिमनुः

[1]गणादीन् पूर्वमुच्चार्य [2]वर्णादिं तदनन्तरम् ।
[3]अनुस्वारः परतरः अर्धेन्दुलसितं तथा ॥
तारेण युक्तमेतदेव मनुस्वरूपम् ॥ ७ ॥

गकारः पूर्वरूपम् । अकारो मध्यमरूपम् । अनुस्वारश्चान्त्यरूपम् । बिन्दुरुत्तररूपम् । नादः संधानम् । संहिता संधिः । सैषा गाणेशी विद्या ॥ ८ ॥

गणक ऋषिः । नृचद्गायत्री छन्दः । श्रीमहागणपतिर्देवता । [4]ॐ गणपतये नमः ॥ ९ ॥

गणपत्यष्टाक्षरमनुं साङ्गं तद्गायत्रीं तद्ध्यानं तत्फलं चाह—**गणादीनिति** । आद्यावोङ्कारमुच्चार्य ततो **गणादीन्** गणादिगणपतिमनुवर्णादिं **तदनन्तरमनुस्वारः** ॥ ७ ॥ **गकारः पूर्वरूपं**, तदुपरिविद्योतमान **अकारो मध्यमरूपं, अनुस्वारश्चान्त्यरूपं**, अर्धमात्रात्मको **बिन्दुरुत्तररूपं**, दीर्घोच्चारणप्रभवनादः **संधानं** कृत्स्नोच्चारणरूपा **संहिता संधिः** । यैवंविधा भवति **सैषा गाणेशी विद्या** ॥ ८ ॥ तस्या ऋष्यादय उच्यन्ते—श्रीगणेशमहामन्त्रस्य **गणक ऋषिः**। गं बीजम् । नमः शक्तिः । गणपतय इति कीलकम् । गां इत्यादिषडङ्गम् । एकदन्तं इति ध्यानम् । लं इत्यादिपञ्चपूजा । **ॐ गणपतये नमः** इति मूलमन्त्रः ततो हृदयादिध्यानपञ्चपूजा ॥ २ ॥

गणपतिगायत्री

एकदन्ताय विद्महे वक्रतुण्डाय धीमहि । तन्नो दन्तिः प्रचोदयात् ॥ १० ॥

[1] गणादं—मु. [2] वर्णादीन् त—अ २. वर्णानुस्तद—उ १.
[3] एतच्छ्लोकार्धो नातिस्पष्टः । व्याख्या तु यथाऽऽकरं धृता. [4] ॐ गंग—अ १, क.

ततस्तद्गायत्री—**एकदन्तायेति** ॥ १० ॥

गणपतिध्यानम्

एकदन्तं चतुर्हस्तं पाशमङ्कुशधारिणम् ।
अभयं वरदं हस्तैर्बिभ्राणं मूषकध्वजम् ॥ ११ ॥
रक्तलम्बोदरं शूर्पसुकर्णं रक्तवाससम् ।
रक्तगन्धानुलिप्ताङ्गं रक्तपुष्पैः सुपूजितम् ॥ १२ ॥
भक्तानुकम्पिनं देवं जगत्कारण[1]मच्युतम् ।
आविर्भूतं च सृष्ट्यादौ प्रकृतेः पुरुषात् परम् ॥ १३ ॥
एवं ध्यायति यो नित्यं स योगी योगिनां वरः ॥ १४ ॥

ध्यानं तु—**एकदन्तमिति** ॥ ११—१२ ॥ प्राण्यदृष्टवशात् एवं **आविर्भूतं च** । मायेश्वरकलनातः **परं** विलक्षणमित्यर्थः ॥ १३ ॥ एवं ध्यानतः **एवमिति** । सविशेषगणपतिध्यानयोगिनां निर्विशेषगणपतिध्यायी वरो भवति ॥ १४ ॥

गणपतिमालामन्त्रः

नमो व्रातपतये नमो गणपतये नमः प्रमथपतये नमस्तेऽस्तु लम्बोदरायैकदन्ताय विघ्नविनाशिने शिवसुताय वरदमूर्तये नमोनमः ॥ १५ ॥

गणपतिमालामन्त्रमाह—**नम** इति । **नमः** ब्रह्मादिदेवतानां **व्रातपतये** मनुष्याणां **गणपतये नमः** । एवं गणपतिमन्त्रगायत्रीमालामन्त्रपुरश्चरणां यथावद्यः करोति तस्य चित्तशुद्धिर्जायते, ततोऽयं गणेशविद्याविचारप्रादुर्भूतज्ञान-विज्ञानसम्यज्ज्ञानसमकालप्राप्यकैवल्यभाग्भवतीति प्रकरणार्थः ॥ १५ ॥

[1] मुत्तमम्—अ १, अ २.

विद्यापठनफलम्

एतदथर्वशिरो योऽधीते स ब्रह्मभूयाय कल्पते । स सर्वतः सुखमेधते । स सर्वविघ्नैर्न बाध्यते । स पञ्चमहापातकोपपातकात् प्रमुच्यते । सायमधीयानो दिवसकृतं पापं नाशयति । प्रातरधीयानो रात्रिकृतं पापं नाशयति । सायंप्रातः प्रयुंजानोऽपापो भवति । धर्मार्थकाममोक्षं च विन्दति ॥ १६ ॥

विद्यापठनवेदनफलमाह—एतदिति । अर्थानुसन्धानपुरस्सरं **एतदथर्वशिरो योऽधीते स ब्रह्मभूयाय** कल्पते ब्रह्मीभूतो भवति । **स सर्वतः सुखमेधते** अखण्डानन्दमेति । **स सर्वविघ्नैर्न बाध्यते** निर्विघ्नतया स्वपदं याति । पञ्चमहापातकघ्नमिदमेवेत्याह—**स** इति । कालत्रयाध्ययनफलं सर्वपापनिरसनपूर्वकं पुरुषार्थचतुष्टयप्रदमित्याह—**सायमित्यादिना** ॥ १६–१७ ॥

विद्यासंप्रदाननियमः

इदमथर्वशीर्षमशिष्याय न देयम् । यो यदि मोहाद्दास्यति स पापीयान् भवति ॥ १७ ॥

काम्यप्रयोगाः

सहस्रावर्तनाद्यं यं काममधीते तं तमनेन साधयेत् । अनेन गणपतिमभिषिञ्चति स वाग्मी भवति । चतुर्थ्यामनश्नन् जपति स विद्यावान् भवति । इत्यथर्वणवाक्यं ब्रह्माद्याचरणं विद्यात् न बिभेति कदाचनेति । यो दूर्वाङ्कुरैर्यजति स वैश्रवणोपमो भवति । यो लाजैर्यजति स यशोवान् भवति स मेधावान् भवति । यो मोदकसहस्रेण

यजति स वाञ्छितफलमवाप्नोति । यः साज्यसमिद्भिर्यजति स सर्वं लभते स सर्वं लभते । अष्टौ ब्राह्मणान् सम्यग्ग्राहयित्वा सूर्यवर्चस्वी भवति । सूर्यग्रहणे महानद्यां प्रतिमासंनिधौ वा जप्त्वा स सिद्धमन्त्रो भवति । महाविघ्नात् प्रमुच्यते । महादोषात् प्रमुच्यते ॥ १८ ॥

यदनधिकारिणे न देयं तत् सर्वकामार्थदमित्याह—**सहस्रेति** । **अनेन** अनयोपनिषदा **वाग्मी भवति** वाचालको भवति । देहपातपर्यन्ताभ्यासान्निर्भय-ब्रह्मभावमेति । धनार्थी **यो दूर्वाङ्कुरैः यजति स वैश्रवणोपमो भवति** । यशोमेधाऽर्थी **यो लाजैर्यजति स यशोवान् भवति** ॥ १८ ॥

विद्यावेदनफलम्

स सर्वविद्भवति स सर्वविद्भवति य एवं वेदेत्युपनिषत् ॥ १९ ॥

ब्राह्मे मुहूर्ते उत्थाय स्वाश्रमाचारसंपन्नो भूत्वा अर्थानुसन्धानतया गणेशोपनिषदं सदा अनुसंदधाति मुनिः यद्गणपतिविद्यानिष्पन्नं गणपतित्वं सर्वापह्नवसिद्धनिष्प्रतियोगिकब्रह्ममात्रमिति **य एवं वेद** स स्वातिरेकेण सर्वासंभवं जानातीति **स सर्वविद्भवति** ब्रह्मैव भवतीत्यर्थः । **इत्युपनिषच्छब्दः** गणपत्युपनिषत्परिसमाप्त्यर्थः ॥ १९ ॥

श्रीवासुदेवेन्द्रशिष्योपनिषद्ब्रह्मयोगिना ।
गणेशोपनिषद्व्याख्या लिखिता स्वात्मगोचरा ।
गणेशविवृतिग्रन्थः सप्ताशीतिरितीरितः ॥

इति श्रीमदीशाद्यष्टोत्तरशतोपनिषच्छास्त्रविवरणे एकोननवतिसङ्ख्यापूरकं गणपत्युपनिषद्विवरणं सम्पूर्णम्

जाबाल्युपनिषत्

आप्यायन्तु—इति शान्तिः

ईश्वरोपासनं परमतत्त्वज्ञानसाधनम्

अथ हैनं भगवन्तं जाबालिं पैप्पलादिः पप्रच्छ भगवन् मे ब्रूहि परमतत्त्वरहस्यम् ॥ १ ॥

किं तत्त्वं को जीवः कः पशुः क ईशः को मोक्षोपाय इति ॥ २ ॥

स तं होवाच साधु पृष्टं सर्वं निवेदयामि यदाज्ञातमिति ॥ ३ ॥

पुनः स तमुवाच कुतस्त्वया ज्ञातमिति ॥ ४ ॥

पुनः स तमुवाच षडाननादिति ॥ ५ ॥

पुनः स तमुवाच तेनाथ कुतो ज्ञातमिति ॥ ६ ॥

पुनः स तमुवाच तेनेशानादिति ॥ ७ ॥

पुनः स तमुवाच कथं तस्मात्तेन ज्ञातमिति ॥ ८ ॥

पुनः स तमुवाच तदुपासनादिति ॥ ९ ॥

जाबाल्युपनिषद्वेद्यपरतत्त्वस्वरूपकम् ।
पारमैश्वर्यविभवरामचन्द्रपदं भजे ॥

इह खलु सामवेदप्रविभक्तेयं जाबाल्युपनिषत् ज्ञानसाधनभस्मधारणविधिप्रकटनव्यग्रा परापरतत्त्वपर्यवसन्ना विजयते । अस्याः स्वल्पग्रन्थतो

विवरणमारभ्यते। पैप्पलादिजाबालिप्रश्नप्रतिवचनरूपेयमाख्यायिका विद्यास्तुत्यर्था। आख्यायिकामवतारयति—**अथेति**। **पप्रच्छ** किमित्यत्र—**भगवन्निति** ॥ १ ॥ पैप्पलादिना पृष्टो जाबालिः निरुत्तरेण तूष्णीमास। "यतो वाचो निवर्तन्ते" इति श्रुतिसिद्धपरमतत्त्वरहस्यब्रह्मणो निष्प्रतियोगिकाद्वैतत्वेन निरुत्तरमहामौनरूपत्वात् ब्रह्म तथाविधमित्यवगम्य तदवगत्युपायतया प्रश्नान्तरं पृच्छति—**किं** इति ॥ २ ॥ प्रश्नोत्तरमाह—**स तं होवाचेति**। किमिति—**साध्विति**। त्वया **साधु पृष्टं** तत् **सर्वं निवेदयामीति**। एवं त्वया **यदाज्ञातमिति** ॥ ३ ॥ निर्विशेषब्रह्मणः स्वभेदेन ज्ञातुमशक्यमिति प्रकटनायावचनेन **पुनः स तमुवाच** ॥ ४–१० ॥

पशुपशुपतितत्त्वनिवेदनम्

पुनः स तमुवाच भगवन् कृपया मे सरहस्यं सर्वं निवेदयेति ॥ १० ॥

स तेन पृष्टः सर्वं निवेदयामास तत्त्वम्। पशुपतिरहंकाराविष्टः संसारी जीवः। स एव पशुः। सर्वज्ञः पञ्चकृत्यसंपन्नः सर्वेश्वर ईशः पशुपतिः ॥ ११ ॥

के पशव इति पुनः स तमुवाच ॥ १२ ॥

जीवाः पशव उक्ताः। तत्पतित्वात् पशुपतिः ॥ १३ ॥

स पुनस्तं होवाच कथं जीवाः पशव इति। कथं तत्पतिरिति ॥ १४ ॥

स तमुवाच यथा तृणाशिनो विवेकहीनाः परप्रेष्याः कृष्यादिकर्मसु नियुक्ताः सकलदुःखसहाः स्वस्वामिवध्यमाना गवादयः पशवः। यथा तत्स्वामिन इव सर्वज्ञ ईशः पशुपतिः ॥ १५ ॥

सोऽयं जाबालिः **तेन** पैप्पलादिना **पृष्टः** सन् यद्वक्तव्यं **तत्त्वं** तत् **सर्वं निवेदयामास**। किमिति निवेदयामासेत्यत आह—**पशुपतिरिति**। स्वाज्ञानपाशेन

बध्यन्त इति पशवः, तेषां पतिः स्वामी **पशुपतिः** परमेश्वरः निरावृताजडक्रिया-ज्ञानेच्छासंपन्नोऽपि स्वाज्ञविकल्पिताहंकाराविष्ट इवाविष्टो यः **संसारी जीव** इति विख्यातः। **स एव** हि **पशुरुच्यते**। ईशस्यैव जीववद्भानात् शिवजीवयोरभेदः सिद्धः इत्यत्र—"जीवः शिवः शिवो जीवः स जीवः केवलः शिवः" इति, "तत्त्वमसि", "अहं ब्रह्मास्मि", इत्यादिश्रुतेः, "कारणं कार्यमुत्पाद्य कार्यतामिव गच्छति" इति वार्तिककारोक्तेश्च। वस्तुतोऽयमीशः स्वातिरेकेण न हि सर्वमस्तीति जानातीति **सर्वज्ञः** "यः सर्वज्ञः सर्ववित्" इति श्रुतेः। स्वाज्ञदृष्टिविकल्पितपञ्चब्रह्मात्मना सृष्ट्यादिपञ्चकृत्यसम्पन्नः सर्वश्चासावीश्वर इति **सर्वेश्वरः** परमार्थदृष्ट्या स्वावशेषेण अवस्थातुं य ईष्टे स ईश एव **पशुपतिः** परमात्मेत्यर्थः ॥ ११ ॥ पुनः पृच्छति—**के पशव** इति ॥ १२–१४ ॥ पशूनां लक्षणमाह—**यथेति** ॥ १५–१७ ॥

विभूतिधारणस्य ज्ञानोपायत्वम्

तज्ज्ञानं केनोपायेन जायते ॥ १६ ॥

पुनः स तमुवाच विभूतिधारणादेव ॥ १७ ॥

शांभवव्रतम्

तत्प्रकारः कथमिति। कुत्रकुत्र धार्यम् ॥ १८ ॥

पुनः स तमुवाच सद्योजातादिपञ्चब्रह्ममन्त्रैर्भस्म संगृह्याग्निरिति भस्मेत्यनेनाभिमन्त्र्य मानस्तोक इति समुद्धृत्य जलेन [1]**संसृज्य त्र्यायुषमिति शिरोललाटवक्षःस्कन्धेष्विति तिसृभिस्त्र्यायुषैस्त्र्यम्बकैस्तिस्रो रेखाः प्रकुर्वीत। व्रतमेतच्छाम्भवं सर्वेषु वेदेषु वेदवादिभिरुक्तं भवति। तत् समाचरेन्मुमुक्षु[2]र्न पुनर्भवाय** ॥ १९ ॥

[1] संमृज्य—अ २. [2] रपुन—क.

सद्योजातादिपञ्चब्रह्ममन्त्रैः इत्यादि कालाग्निरुद्रोपनिषदि व्याख्यातम् ॥ १९–२२ ॥

त्रिपुण्ड्रधारणप्रमाणम्

अथ सनत्कुमारः प्रमाणं पृच्छति त्रिपुण्ड्रधारणस्य । त्रिधा रेखा आललाटादाचक्षुषोराभ्रुवोर्मध्यतश्च ॥ २० ॥

रेखात्रये भावनाविशेषः

याऽस्य प्रथमा रेखा सा गार्हपत्यश्चाकारो रजो भूर्लोकः स्वात्मा क्रियाशक्तिः ऋग्वेदः प्रातःसवनं प्रजापतिर्देवो देवतेति । याऽस्य द्वितीया रेखा सा दक्षिणाग्निरुकारः सत्त्वमन्तरिक्षमन्तरात्मा चेच्छाशक्तिर्यजुर्वेदो माध्यन्दिनं सवनं विष्णुर्देवो देवतेति । याऽस्य तृतीया रेखा साऽऽहवनीयो मकारस्तमो द्यौर्लोकः परमात्मा ज्ञानशक्तिः सामवेदस्तृतीयसवनं महादेवो देवतेति ॥ २१ ॥

भस्मधारणफलम्

त्रिपुण्ड्रं भस्मना करोति यो विद्वान् ब्रह्मचारी गृही वानप्रस्थो यतिर्वा [1]स महापातकोपपातकेभ्यः पूतो भवति । स सर्वान् वेदानधीतो भवति । स सर्वान् देवान् ध्यातो भवति । स सर्वेषु तीर्थेषु स्नातो भवति । स सकलरुद्रमन्त्रजापी भवति । न स पुनरावर्तते न स पुनरावर्तते ॥ इति ॥ २२ ॥

ॐ सत्यमित्युपनिषत् ॥ २३ ॥

[1]. समस्तम—अ, अ १, उ १.

आदौ यदवचनेनोक्तवान् तदोङ्काराग्रविद्योतमानं, "तुर्योङ्काराग्रविद्योतमानं तुर्यतुर्यं" इति श्रुतेः। यज्जाग्रज्जाग्रदाद्यविकल्पानुज्झैकरसान्तचतुष्पञ्चदशविकल्पासंभवप्रबोधसिद्धतुर्यतुर्यस्वरूपं तदेव सत्यं स्वाज्ञादिदृष्टिमोहे सत्यसति निष्प्रतियोगिकसन्मात्रमित्यर्थः, "पश्यतेहापि सन्मात्रमसदन्यत्" इति श्रुतेः, "मत्तः परतरं नान्यत् किंचिदस्ति धनञ्जय" इति स्मृतेश्च । इत्युपनिषच्छब्दः जाबाल्युपनिषत्समाप्त्यर्थः ॥ २३ ॥

श्रीवासुदेवेन्द्रशिष्योपनिषद्ब्रह्मयोगिना ।
जाबाल्युपनिषद्व्याख्या लिखिता शिवगोचरा ।
जाबाल्युपनिषद्व्याख्या चत्वारिंशदितीरिता ॥

इति श्रीमदीशाद्यष्टोत्तरशतोपनिषच्छास्त्रविवरणे चतुरुत्तरशतसङ्ख्यापूरकं
जाबाल्युपनिषद्विवरणं सम्पूर्णम् ॥

दक्षिणामूर्त्युपनिषत्

सह नाववतु—इति शान्तिः

शिवतत्त्वज्ञानेन चिरजीवित्वप्राप्तिः

ब्रह्मावर्ते महाभाण्डीरवटमूले महासत्राय समेता महर्षयः शौनकादयस्ते ह समित्पाणयस्तत्त्वजिज्ञासवो मार्कण्डेयं चिरंजीविनमुपसमेत्य पप्रच्छुः केन त्वं चिरं जीवसि केन वाऽऽनन्दमनुभवसीति ॥ १ ॥

परमरहस्यशिवतत्त्वज्ञानेनेति स होवाच ॥ २ ॥

यन्मौनव्याख्यया मौनिपटलं क्षणमात्रतः ।
महामौनपदं याति स हि मे परमा गतिः ॥

इह खलु कृष्णयजुर्वेदप्रविभक्तेयं दक्षिणामूर्त्युपनिषत् ससाधनपरमरहस्यशिवतत्त्वं प्रकाशयन्ती विजृम्भते । अस्याः स्वल्पग्रन्थतो विवरणमारभ्यते । शौनकादिमहर्षिपटलमार्कण्डेयप्रश्नप्रतिवचनरूपेयमाख्यायिका विद्यास्तुत्यर्था । आदावाख्यायिकामवतारयति—**ब्रह्मावर्ते** इत्यादिना । **पप्रच्छुः** किमिति ? **केनेति** ॥ १ ॥ एवं पृष्टो मुनिराह—**परमरहस्यशिवतत्त्वज्ञानेनेति** । अनधिकारिषु गोपनीयत्वात् परमरहस्यं यत्तत्त्वं यद्याथात्म्यं स्वातिरिक्ताशिवा-

विद्यापादतत्कार्यजातापह्नवसिद्धमिति ज्ञायते तत् **परमरहस्यशिवतत्त्वज्ञानं तेनैवाहं चिरं जीवन् स्वानन्दमनुभवामीत्यर्थः ॥ २ ॥**

शिवतत्त्वज्ञाने प्रश्नाः

किं तत् परमरहस्यशिवतत्त्वज्ञानम् । तत्र को देवः । के मन्त्राः । का निष्ठा । किं तज्ज्ञानसाधनम् । कः परिकरः । को बलिः । कः कालः । किं तत्स्थानमिति ॥ ३ ॥

पुनस्ते तं पृच्छन्तीत्याह—**किं तदिति ॥ ३ ॥**

परमशिवतत्त्वज्ञानस्वरूपम्

स होवाच । येन दक्षिणामुखः शिवोऽपरोक्षीकृतो भवति तत् परमरहस्यशिवतत्त्वज्ञानम् ॥ ४ ॥

नवविधप्रश्नोत्तरं क्रमेण य आचार्यपदं गतो मार्कण्डेयः **स होवाच ।** आद्यं प्रश्नमपाकरोति—**येनेति ।**

शिवो गुरुः शिवो वेदः शिवो देवः शिवः प्रभुः ।
शिवोऽस्म्यहं शिवः सर्वं शिवादन्यन्न किञ्चन ॥

इति श्रुतिसिद्धप्रबोधेन **येन** । स्वदृष्टिपथं प्रविष्टानां मोक्षार्थिनां केवलमौनव्याख्यानतो निष्पन्ननिष्प्रतियोगिकब्रह्ममात्रज्ञानसमकालप्रादुर्भूतस्वमात्रावस्थानलक्षणविकळेबरकैवल्यदक्षिणा देयेति यस्तद्वितरणाभिमुखो भवति सोऽयं **दक्षिणामुखः** परमात्मा येन स्वोपदिष्टनिर्विशेषज्ञानेन स्वावशेषधिया **अपरोक्षीकृतो भवति** तद्धि तज्ज्ञानमित्यर्थः ॥ ४ ॥

ज्ञेयदेवस्वरूपम्

यः सर्वोपरमे काले सर्वानात्मन्युपसंहृत्य स्वात्मानन्दसुखे मोदते प्रकाशते वा स देवः ॥ ५ ॥

द्वितीयप्रश्नोत्तरमाह—य इति। स्वाज्ञदृष्टिविकल्पितं सर्वं स्वज्ञानसमकालमुपरममपह्नवं गच्छतीति सर्वोपरमः तस्मिन् **सर्वोपरमे काले** स्वाज्ञविकल्पितस्वाविद्यापदतत्कार्यरूपान् **सर्वान्** स्वात्मनि स्वमात्रं उपसंहृत्य स्वात्मानन्दसुखे सच्चिदानन्दाकाशे स्वमात्रतया मोदते प्रकाशत इति वा स देव इति ॥ ९ ॥

चतुर्विंशाक्षरमनुः

अत्रैते मन्त्ररहस्यश्लोका भवन्ति—[1]अस्य श्रीमेधादक्षिणामूर्तिमन्त्रस्य ब्रह्मा ऋषिः। गायत्री छन्दः। देवता दक्षिणाऽऽस्यः। मन्त्रेणाङ्गन्यासः ॥ ६ ॥

ॐ आदौ नम उच्चार्य ततो भगवते पदम्।
दक्षिणेति पदं पश्चान्मूर्तये पदमुद्धरेत् ॥ ७ ॥
असच्छब्दं चतुर्थ्यन्तं मेधां प्रज्ञां पदं वदेत्।
प्रमुच्चार्य ततो वायुबीजं च्छं च ततः पठेत् ॥
अग्निजायां ततस्त्वेष चतुर्विंशाक्षरो मनुः ॥ ७ ॥
स्फटिकरजतवर्णं मौक्तिकीमक्षमाला-
मृतकलशविद्यां ज्ञानमुद्रां कराग्रे।
दधतमुरगकक्ष्यं चन्द्रचूडं त्रिणेत्रं
विधृतविविधभूषं दक्षिणामूर्तिमीडे ॥ ८ ॥

तृतीयप्रश्नापकरणाय प्रज्ञामेधाविज्ञानप्रदमन्त्रानुदाहरति—**अत्रेति**। मायागर्भितप्रणवाभ्यां बीजादिकं मन्त्रपञ्चकसाधारणम्। **मन्त्रेणाङ्गन्यासः** ॥ ६ ॥

[1] "अस्यश्री" इति नास्ति—अ, अ १, अ २, क.

मन्त्रोद्धारः ओमिति । मनुः—ॐ नमो भगवते दक्षिणामूर्तये मह्यं मेधां प्रज्ञां प्रयच्छ स्वाहेति ॥ ७–८ ॥

नवाक्षरमनुः

मन्त्रेण न्यासः—

आदौ वेदादिमुच्चार्य स्वराद्यं सविसर्गकम् ।
पञ्चार्णं तत उद्धृत्य अतरं सविसर्गकम् ।
अन्ते समुद्धरेत्तारं मनुरेष नवाक्षरः ॥ ९ ॥
मुद्रां भद्रार्थदात्रीं सपरशुहरिणं बाहुभिर्बाहुमेकं
जान्वासक्तं दधानो भुजग[1]विलसमावद्धकक्ष्यो वटाधः ।
आसीनश्चन्द्रखण्डप्रतिघटितजटाक्षीरगौरस्त्रिणेत्रो
दद्यादाद्यः शुकाद्यैर्मुनिभिरभिवृतो भावशुद्धिं भवो नः ॥ १० ॥

नवाक्षरमन्त्रमुद्धरति—आदाविति । ॐ दक्षिणामूर्तिरतरों इति नवाक्षरमनुः ॥ ९–१० ॥

अष्टादशाक्षरमनुः

मन्त्रेण न्यासः—

तारं क्लूंनम उच्चार्य मायां वाग्भवमेव च ।
दक्षिणापदमुच्चार्य ततः स्यान्मूर्तयेपदम् ॥ ११ ॥
ज्ञानं देहि पदं पश्चाद्वह्निजायां ततो न्यसेत् ।
मनुरष्टादशार्णोऽयं सर्वमन्त्रेषु गोपितः ॥ १२ ॥

[1] वरस—अ, अ १.

भस्मव्यापाण्डराङ्गः शशिशकलधरो ज्ञानमुद्राक्षमाला-
वीणापुस्तैर्विराजत्करकमलधरो योगपट्टाभिरामः ।
व्याख्यापीठे निषण्णो मुनिवरनिकरैः सेव्यमानः प्रसन्नः
सव्यालः कृत्तिवासाः सततमवतु नो दक्षिणामूर्तिरीशः ॥ १३ ॥

ॐ ब्लूं नमो ह्रीं ऐं दक्षिणामूर्तये ज्ञानं देहि स्वाहा इत्यष्टादशाक्षर-मनुः ॥ ११–१३ ॥

द्वादशाक्षरमनुः

मन्त्रेण न्यासः—

तारं परां रमाबीजं वदेत् साम्बशिवाय च ।
तुभ्यं चानलजायां तु मनुर्द्वादशवर्णकः ॥ १४ ॥
वीणां करैः पुस्तकमक्षमालां बिभ्राणमभ्राभगलं वराढ्यम् ।
फणीन्द्रकक्ष्यं मुनिभिः शुकाद्यैः सेव्यं वटाधः कृत-
नीडमीडे ॥ १५ ॥

ॐ ह्रीं श्रीं साम्बशिवाय तुभ्यं स्वाहा इति द्वादशाक्षरमनुः ॥१४–१५॥

आनुष्टुभो मन्त्रराजः

विष्णू ऋषिरनुष्टुप् छन्दः । देवता दक्षिणाऽऽस्यः । मन्त्रेण न्यासः ।
तारं नमो भगवते तुभ्यं वटपदं ततः ।
मूलेति पदमुच्चार्य वासिने पद[1]मुद्धरेत् ॥ १६ ॥

[1] मुच्चरेत्—अ, अ १.

[1]वागीशाय पदं पश्चान्महाज्ञानपदं ततः ।
दायिने पदमुच्चार्य मायिने[2] नम उद्धरेत् ॥ १७ ॥
[3]आनुष्टुभो मन्त्रराजः सर्वमन्त्रोत्तमोत्तमः ॥ १८ ॥
मुद्रापुस्तकवह्निनागविलसद्बाहुं प्रसन्ननं
मुक्ताहारविभूषणं शशिकलाभास्वत्किरीटोज्ज्वलम् ।
अज्ञानापहमादिमादिमगिरामर्थं भवानीपतिं
न्यग्रोधान्तनिवासिनं परगुरुं ध्यायाम्यभीष्टाप्तये ॥ १९ ॥

ॐ नमो भगवते तुभ्यं वटमूलनिवासिने ! वागीशाय महाज्ञानदायिने मायिने नमः ॥ इति ॥ १६–१९ ॥

निष्ठाऽऽदीनां निरूपणम्

सोऽहमिति यावदास्थितिः सा निष्ठा भवति ॥ २० ॥
तदभेदेन मन्वाम्रेडनं ज्ञानसाधनम् ॥ २१ ॥
चित्ते तदेकतानता परिकरः ॥ २२ ॥
अङ्गचेष्टार्पणं बलिः ॥ २३ ॥
त्रीणि धामानि कालः ॥ २४ ॥
द्वादशान्तपदं स्थानमिति ॥ २५ ॥

चतुर्थप्रश्नोत्तरं प्रकटयति—**सोऽहमिति**। यः स्वातिरिक्तकलनाऽपह्नवसिद्ध-ब्रह्ममात्रतया अवशिष्यते **सोऽहं** स्वमात्रमिति **यावदास्थितिः** शरीरपातावधिवर्तनं

[1] अ, अ १ कोशयोः एतच्छ्लोकार्धस्थाने "प्रज्ञामेधापदं पश्चात् आदिसिद्धिं ततो वदेत्" इति पाठो दृश्यते. [2] पदमुद्ध—अ, अ १.
[3] अतः पूर्वं अ, अ १ कोशयोः "वह्निजायां ततस्त्वेष द्वात्रिंशद्वर्णको मनुः ।" इत्यधिकः.

सैव हि ब्रह्मनिष्ठा भवति ॥ २० ॥ पञ्चमप्रश्नमापूरयति—तदभेदेनेति। मन्तारं त्रायत इति मन्त्रः प्रत्यक्परचिदैक्यार्थमन्त्रप्रतिपाद्या देवता सैवाहमस्मीति तदभेदेन मन्त्रदेवताऽऽत्माभेदेन मन्वाम्रेडनं आवर्तनं तज्ज्ञानसाधनम् ॥२१॥ षष्ठप्रश्नोत्तरमाचष्टे—चित्ते तदेकतानता परिकर इति। चित्ते तदेकतानता मन्त्रैकशरणत्वं परिकर उपकरणमित्यर्थः ॥ २२ ॥ सप्तमप्रश्नोत्तरमाह—अङ्गन्चेष्टार्पणं बलिरिति। हस्तपादचलनादिकं सपर्या भवति ॥ २३ ॥ अष्टमप्रश्नोत्तरमाह—त्रीणि धामानि काल इति। स्वाविद्यापदस्थूलसूक्ष्मबीजरूपाणि त्रीणि धामानि कालः स्वातिरिक्तप्रपञ्चकलनानिर्वाहकत्वात् कालो गुणसाम्यमित्यर्थः ॥ २४ ॥ नवमप्रश्नं विशदयति—द्वादशान्तपदं स्थानमिति। द्वादशान्तशब्देन हृदयं सहस्रारं वोच्यते, प्रत्यगभिन्नपरमात्मन उपलब्धिस्थानत्वात् ॥ २५ ॥

शिवतत्त्वज्ञानोदयादिनिरूपणम्

ते ह पुनः श्रद्दधानास्तं प्रत्यूचुः—कथं वाऽस्योदयः। किं स्वरूपम्। को वाऽस्योपासक इति ॥ २६ ॥

स होवाच—

वैराग्यतैलसंपूर्णे भक्तिवर्तिसमन्विते।
प्रबोधपूर्णपात्रे तु ज्ञप्तिदीपं विलोकयेत् ॥ २७ ॥
मोहान्धकारे निःसारे उदेति स्वयमेव हि।
वैराग्यमरणिं कृत्वा ज्ञानं कृत्वा तु [1]चित्रगुम् ॥ २८ ॥
गाढतामिस्रसंशान्त्यै गूढमर्थं निवेदयेत्।
मोहभानुजसंक्रान्तं विवेकाख्यं मृकण्डुजम् ॥ २९ ॥

[1] चित्तगुं—उ १,

तत्त्वाविचारपाशेन बद्धद्वैतभयातुरम् ।
उज्जीवयन्निजानन्दे स्वस्वरूपेण संस्थितः ॥ ३० ॥
शेमुषी दक्षिणा प्रोक्ता सा यस्याभीक्षणे मुखम् ।
दक्षिणाभिमुखः प्रोक्तः शिवोऽसौ ब्रह्मवादिभिः ॥ ३१ ॥
सर्गादिकाले भगवान् विरिञ्चिरुपास्यैनं सर्गसामर्थ्यमाप्य ।
तुतोष चित्ते वाञ्छितार्थांश्च लब्ध्वा सोऽस्योपासको भवति ॥३२॥

स्वप्रश्नोत्तरहर्षिता मुनयः पुनः पृच्छन्तीत्याह—त इति । **प्रत्यूचुः** किमिति? **कथमिति** ॥ २६ ॥ क्रमेण प्रश्नत्रयमपाकरोति—**स होवाचेति** । तत्र कथं वाऽस्योदयः इत्याद्यप्रश्नोत्तरमाह—**वैराग्येति** । तैलवर्तिपात्रस्थानीयवैराग्य-भक्तिप्रबोधतः **ज्ञप्तितया** दीप्यत इति **ज्ञप्तिदीपं** प्रत्यञ्चमात्मानं स्वात्मधिया **विलोकयेत्** ॥ २७ ॥ एवं विलोकनतः किं स्यादित्यत्र स्वाज्ञदृष्टिविकल्पित-**मोहान्धकारे** स्वज्ञदृष्ट्या **निस्सारे** सत्यसति परमार्थदृष्ट्या **स्वयमेव सदोदेति** । हिशब्दो निस्संशयार्थः । स्वाज्ञानगाढान्धकारे सति तदवलोकनं कुत इत्यत्राह—**वैराग्यमिति** । वैराग्यभक्ती पूर्वोत्तरारणी कृत्वा, यत्र मन्थानकाष्ठे चित्रो-ऽग्निर्गूढतया वर्तते तं **चित्रगुं** मन्थानशङ्कुं तत्स्थानीयं **ज्ञानं कृत्वा** ॥ २८ ॥ स्वाज्ञदृष्टिप्रसक्तगाढतामिस्रसंशान्त्यै सम्यङ्मथनं कृत्वा मथनाविर्भूतदारु-गूढाग्निवत् **गूढमर्थं** वैराग्यज्ञानमथनप्रादुर्भूतं स्वाज्ञानतत्कार्यासंभवप्रबोधसिद्धं **निवेदयेत्** अवलोकयेत् जानीयादित्यर्थः ॥ किं स्वरूपमिति प्रश्नोत्तरमाह—**मोहेति** । स्वाज्ञानमृत्युवक्त्रं प्रविष्टं **मृकण्डुतनयं** स्वज्ञानेनोज्जीवयन् तदात्मतया-ऽवस्थितो भवति इति श्रुतेर्वचः ॥ २९–३० ॥ किंविशेषणविशिष्टः परमात्मेत्यत्राह —**शेमुषीति** । **शेमुषी** तत्त्वज्ञानरूपिणी ब्रह्ममात्रप्रकाशनदक्षेति **दक्षिणा प्रोक्ता सैव यस्य** परमात्मन **अभितः** ईक्षणे साक्षात्करणे मुखं द्वारं भवति **सोऽसौ शिवो ब्रह्मवादिभिः दक्षिणाभिमुखः** इति **प्रोक्तः** प्रतिपादित इत्यर्थः,

ज्ञानैकगम्यत्वात्, "नान्यः पन्था अयनाय विद्यते" इति श्रुतेः ॥ ३१ ॥ को वा अस्योपासकः इति प्रश्नोत्तरमाह—**सर्गादिकाल** इति ॥ ३२ ॥

अध्ययनवेदनफलम्

य इमां परमरहस्यशिवतत्त्वविद्यामधीते स सर्वपापेभ्यो मुक्तो भवति।
य एवं वेद स कैवल्यमनुभवतीत्युपनिषत् ॥ ३३ ॥

विद्याऽऽन्तराळिकमुख्यफलप्रकटनपूर्वकं उपसंहरति—य इति। यथावत् य एवं वेद। इत्युपनिषच्छब्दः दक्षिणामूर्त्युपनिषत्समाप्त्यर्थः ॥ ३३ ॥

श्रीवासुदेवेन्द्रशिष्योपनिषद्ब्रह्मयोगिना।
दक्षिणामूर्त्युपनिषद्व्याख्येयं लिखिता लघु।
प्रकृतोपनिषद्व्याख्यासङ्ख्या नवतिसंयुता ॥

इति श्रीमदीशाद्यष्टोत्तरशतोपनिषच्छास्त्रविवरणे एकोनपञ्चाशत्सङ्ख्यापूरकं दक्षिणामूर्त्युपनिषद्विवरणं सम्पूर्णम् ॥

पञ्चब्रह्मोपनिषत्

सह नाववतु—इति शान्तिः

पञ्चब्रह्मणां आदौ जनिः

अथ पैप्पलादो भगवन् भो किमादौ किं जातमिति सद्यो-जातमिति । किं भगव इति । अघोर इति । किं भगव इति । वामदेव इति । किं वा पुनरिमे भगव इति । तत्पुरुष इति । किं वा पुनरिमे भगव इति । सर्वेषां दिव्यानां प्रेरयिता ईशान इति । ईशानो भूतभव्यस्य सर्वेषां देवयोनिनाम् ॥ १ ॥

ब्रह्मादिपञ्चब्रह्माणो यत्र विश्रान्तिमाप्नुयुः ।
तदखण्डसुखाकारं रामचन्द्रपदं भजे ॥

इह खलु कृष्णयजुर्वेदप्रविभक्तेयं पञ्चब्रह्मोपनिषत् पञ्चब्रह्मतत्कार्यप्रपञ्च-प्रकटनव्यग्रा ब्रह्ममात्रपर्यवसन्ना विजृम्भते । अस्याः संक्षेपतो विवरणमारभ्यते । शाकलपैप्पलादप्रश्नप्रतिवचनरूपेयमाख्यायिका विद्यास्तुत्यर्था । आख्यायिकाम-वतारयति—अथेति । किं जातमिति शाकलेन पृष्टः सन् सद्योजातमिति उवाच । सर्वेषां दिवि भवानां दिव्यानां देवानामपि अन्तर्यामितया प्रेरयिता ईशानः सर्वेश्वरत्वात् । भूतादिकालत्रयस्याप्ययमेवेशान इत्याह—ईशान इति ॥ १ ॥

तेषां वर्णादिविषयकः प्रश्नः

कति वर्णाः । कति भेदाः । कति शक्तयः । यत् सर्वं तद्ब्रूह्यम् ॥ २ ॥

रक्तादिवर्णभेदं क्रियाऽऽदिशक्तिभेदं च पृच्छति—कति वर्णा इति । पञ्चब्रह्मतद्विद्याया अनधिकारिणो गोपनीयत्वं गुह्यत्वम् ॥ २–३ ॥

महेशोपदिष्टं तद्रहस्यम्

तस्मै नमो महादेवाय महारुद्राय ॥ ३ ॥

प्रोवाच तस्मै भगवान् महेशः ॥ ४ ॥

पञ्चब्रह्मविद्या कस्मै केनोक्तेत्यत्र प्रोवाच तस्मै पैप्पलादाय भगवान् महेश इति श्रुतेर्वचः ॥ ४ ॥

सद्योजातस्वरूपम्

गोप्याद्गोप्यतरं लोके यद्यस्ति शृणु शाकल ।

सद्योजातं मही पूषा रमा ब्रह्मा त्रिवृत् स्वरः ॥ ५ ॥

ऋग्वेदो गार्हपत्यं च मन्त्राः सप्त स्वरास्तथा ।

वर्णं पीतं क्रिया शक्तिः सर्वाभीष्टफलप्रदम् ॥ ६ ॥

पैप्पलादः श्रोतारं शाकलमभिमुखीकृत्य सद्योजातादिपञ्चब्रह्मेयत्तां प्रपञ्चयति —गोप्यादिति । किं तत् गोप्याद्गोप्यं इत्यत्र सद्योजातं सदाशिवपूर्वमुखं मही पूषा रमा ब्रह्मा त्रिवृत् विश्वविराडोतृचैतन्यम् ॥ ५ ॥ अकारादिस्वरः । पञ्चाक्षरादयो मन्त्राः सरिगमेति सप्तस्वराः ॥ ६ ॥

अघोरस्वरूपम्

अघोरं सलिलं चन्द्रं गौरी वेदद्वितीयकम् ।
नीरदाभं स्वरं सान्द्रं दक्षिणाग्निरुदाहृतम् ॥ ७ ॥
पञ्चाशद्वर्णसंयुक्तं स्थितिरिच्छाक्रियाऽन्वितम् ।
शक्तिरक्षणसंयुक्तं सर्वाघौघविनाशनम् ॥ ८ ॥
सर्वदुष्टप्रशमनं सर्वैश्वर्यफलप्रदम् ॥ ९ ॥

पश्चिममघोरमुखमाह—अघोरमिति । सलिलं आपः । वर्णतो नीरदाभं स्वरं उकाराख्यं सान्द्रं स्निग्धं दक्षिणाग्निरुदाहृतम् ॥ ७ ॥ अकारादिपञ्चाशद्वर्णसंयुक्तम् । स्थितिः परिपालनं इच्छाक्रियाशक्तिद्वययुतं स्वविकल्पितशक्तिरक्षणसंयुक्तम् ॥ ८–९ ॥

वामदेवस्वरूपम्

वामदेवं महाबोधदायकं [1]पावकात्मकम् ।
विद्यालोकसमायुक्तं भानुकोटिसमप्रभम् ॥ १० ॥
प्रसन्नं सामवेदाख्यं गानाष्टकसमन्वितम् ।
धीरस्वरमधीनं चाहवनीयमनुत्तमम् ॥ ११ ॥
ज्ञानसंहारसंयुक्तं शक्तिद्वयसमन्वितम् ।
वर्णं शुक्लं तमोमिश्रं पूर्णबोधकरं स्वयम् १२ ॥
धामत्रयनियन्तारं धामत्रयसमन्वितम् ।
सर्वसौभाग्यदं नृणां सर्वकर्मफलप्रदम् ॥ १३ ॥
अष्टाक्षरसमायुक्तमष्टपत्रान्तरस्थितम् ॥ १४ ॥

[1] पावकात्मजम्—अ, अ १.

वामदेवाख्यदक्षिणमुखस्वरूपमाह—**वामदेवमिति** ॥ १० ॥ सामवेद-प्रविभक्तसप्तगानं भरतशास्त्रनिष्पन्नगीतिश्च **गानाष्टकमित्युक्तम्** । आमिति **धीरस्वरम्** ॥ ११ ॥ ज्ञानशक्तिसंहारशक्तिभेदेन **शक्तिद्वयसमन्वितम्** ॥ १२ ॥ जाग्रदादिस्थूलप्रपञ्चादिधामत्रयनियन्तारं विश्वतैजसात्मना **धामत्रयसमन्वितम्** ॥ १३ ॥ अकचटतपयश इत्यष्टवर्गात्मना ॐ नमो महादेवाय इति वा **अष्टाक्षरसमायुक्तं** हृत्पुण्डरीकप्रविभक्ताष्टपत्रान्तरस्थितम् ॥ १४ ॥

तत्पुरुषस्वरूपम्

यत्तत् तत्पुरुषं प्रोक्तं वायुमण्डलसंवृतम् ।
पञ्चाग्निना समायुक्तं मन्त्रशक्तिनियामकम् ॥ १५ ॥
पञ्चाशत्स्वरवर्णाख्य[1]मथर्ववेदस्वरूपकम् ।
कोटिकोटि[2]गणाध्यक्षं ब्रह्माण्डाखण्डविग्रहम् ॥ १६ ॥
वर्णं रक्तं कामदं च सर्वाधिव्याधिभेषजम् ।
सृष्टिस्थितिलयादीनां कारणं सर्वशक्तिधृक् ॥ १७ ॥
अवस्थात्रितयातीतं तुरीयं ब्रह्मसंज्ञितम् ।
ब्रह्मविष्ण्वादिभिः सेव्यं सर्वेषां जनकं परम् ॥ १८ ॥

तत्पुरुषाख्योत्तरमुखमाह—**यदिति** । सप्तकोटिमहामन्त्रशक्तिनियामकम् ॥ १५ ॥ पञ्चाशत्सङ्ख्याविशिष्टं **पञ्चाशत्स्वरवर्णाख्यम्** ॥ १६–१८ ॥

ईशानस्वरूपम्

ईशानं परमं विद्यात् प्रेरकं बुद्धिसाक्षिणम् ।
आकाशात्मकमव्यक्तमोंकारस्वरभूषितम् ॥ १९ ॥

[1] मथर्वेद—अ २. [2] गुणा—उ १.

सर्वदेवमयं शान्तं शान्त्यतीतं स्वराद्बहिः ।
अकारादिस्वराध्यक्षमाकाशमयविग्रहम् ॥ २० ॥
पञ्चकृत्यनियन्तारं पञ्चब्रह्मात्मकं बृहत् ॥ २१ ॥

मध्यविलसितेशानमुखस्वरूपमाह—ईशानमिति ॥ १९ ॥ सप्तस्वराद्बहिः शान्त्याख्या काचन कलाऽस्ति, तदतीतं तत्परं, "तत्परः परमात्मा" इति श्रुतेः ॥ २० ॥ सृष्ट्यादिपञ्चकृत्यनियन्तारम् ॥ २१ ॥

पञ्चब्रह्मलयाधारः परमं ब्रह्म

पञ्चब्रह्मोपसंहारं कृत्वा स्वात्मनि संस्थितम् ।
स्वमायावैभवान् सर्वान् संहृत्य स्वात्मनि स्थितः ॥ २२ ॥
पञ्चब्रह्मात्मकातीतो भासते स्वस्वतेजसा ।
आदावन्ते च मध्ये च भासते नान्यहेतुना ॥ २३ ॥

पञ्चब्रह्मप्रपञ्चप्रविलापनात् तदाधारो भवतीत्याह—पञ्चेति ॥ २२–२३ ॥

परमब्रह्मज्ञानविधिः

मायया मोहिताः शंभोर्महादेवं जगद्गुरुम् ।
न जानन्ति सुराः सर्वे सर्वकारणकारणम् ।
न संदशे तिष्ठति रूपमस्य परात् परं पुरुषं विश्वधाम ॥ २४ ॥
येन प्रकाशते विश्वं यत्रैव प्रविलीयते ।
तद्ब्रह्म परमं शान्तं तद्ब्रह्मास्मि परं पदम् ॥ २५ ॥
पञ्चब्रह्ममिदं विद्यात् सद्योजातादिपूर्वकम् ।
दृश्यते श्रूयते यच्च पञ्चब्रह्मात्मकं स्वयम् ॥ २६ ॥

पञ्चधा वर्तमानं तं ब्रह्मकार्यमिति स्मृतम् ।
ब्रह्मकार्यमिति ज्ञात्वा ईशानं प्रतिपद्यते ॥ २७ ॥
पञ्चब्रह्मात्मकं सर्वं स्वात्मनि प्रविलाप्य च ।
सोऽहमस्मीति जानीयाद्विद्वान् ब्रह्मामृतो भवेत् ॥ २८ ॥
इत्येतद्ब्रह्म जानीयाद्यः स मुक्तो न संशयः ॥ २९ ॥
पञ्चाक्षरमयं शंभुं परब्रह्मस्वरूपिणम् ।
नकारादियकारान्तं ज्ञात्वा पञ्चाक्षरं जपेत् ॥ ३० ॥
सर्वं पञ्चात्मकं विद्यात् पञ्चब्रह्मात्मतत्त्वतः ॥ ३१ ॥
पञ्चब्रह्मात्मिकीं विद्यां योऽधीते भक्तिभावितः ।
स पञ्चात्मकतामेत्य भासते पञ्चधा स्वयम् ॥ ३२ ॥

एवं स्वयंप्रकाशमप्यात्मानं सोऽहमिति देवा अपि न जानन्तीत्याह—**मायये**ति । **सर्वकारणकारणं** कारणभावमापन्नब्रह्मादेरपि कारणत्वात्, "यो ब्रह्माणं विदधाति पूर्वं" इति श्रुतेः । यज्जगत्कारणं तद्रूपस्य सूक्ष्मतया न दृश्यत इत्याह—नेति ॥ २४ ॥ स्वातिरिक्तकलनाशान्तम् ॥ २५–२७ ॥ यद्यत्करणग्रामगोचरं तत्तत् पञ्चब्रह्मात्मकम्, तदतीतः परमात्मा अहमस्मीति ज्ञानी परमात्मैव भवतीत्याह—**पञ्चे**ति । **पञ्चब्रह्म** पञ्चब्रह्मात्मकं **इदं** विश्वं **विद्यात्**। यस्तत्प्रविलापनाधारः **सोऽहमस्मि** ॥ २८–२९ ॥ एवं पञ्चब्रह्मभावनया पञ्चाक्षरं जपन् यः आस्ते स पञ्चब्रह्मैव भवतीत्युपसंहरति—**पञ्चाक्षर**-मिति ॥ ३०–३२ ॥ पुरा एवमुक्त्वा ॥ ३३ ॥

शिवस्याद्वैतचैतन्यत्वम्

एवमुक्त्वा महादेवो गालवस्य महात्मनः ।
कृपां चकार तत्रैव स्वान्तर्धिमगमत् स्वयम् ॥ ३३ ॥

यस्य श्रवणमात्रेणाश्रुतमेव श्रुतं भवेत् ।
अमतं च मतं ज्ञातमविज्ञातं च शाकल ॥ ३४ ॥
एकेनैव तु पिण्डेन मृत्तिकायाश्च गौतम ।
विज्ञातं मृण्मयं सर्वं मृदभिन्नं हि कार्यकम् ॥ ३५ ॥
एकेन लोहमणिना सर्वं लोहमयं यथा ।
विज्ञातं स्यादथैकेन नखानां कृन्तनेन च ॥ ३६ ॥
सर्वं काष्णायसं ज्ञातं तदभिन्नं स्वभावतः ।
कारणाभिन्नरूपेण कार्यं कारणमेव हि ॥ ३७ ॥
तद्रूपेण सदा सत्यं भेदेनोक्तिर्मृषा खलु ।
तच्च कारणमेकं हि न भिन्नं नोभयात्मकम् ॥ ३८ ॥
भेदः सर्वत्र मिथ्यैव धर्मादेरनिरूपणात् ।
अतश्च कारणं नित्यमेकमेवाद्वयं खलु ।
अत्र कारणमद्वैतं शुद्धचैतन्यमेव हि ॥ ३९ ॥

योऽन्तर्धिमगमत् स सर्वकारणं कारणविज्ञानेन कारणातिरिक्तं कार्यं नास्तीति कार्याभावे तत्सापेक्षकारणताऽभावात् अकार्यकारणं ब्रह्म निष्प्रतियोगिकस्वमात्रमवशिष्यत इत्याह—यस्येति ॥ ३४ ॥ येन कारणविज्ञानेन तदनतिरिक्तं कार्यं विज्ञातं स्यादित्यत्र—"येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातं" इत्युपक्रम्य "एकेन मृत्पिण्डेन सर्वं मृण्मयं विज्ञातं स्यात्" इत्यादिछान्दोग्यषष्ठाध्यायनिष्ठार्थं संक्षिप्य प्रकटयतीत्याह—एकेनेति ॥ ३५–३६ ॥ **तदभिन्नं स्वभावतः** इत्यत्र उपपत्तिमाह—कारणेति ॥ ३७ ॥ यदि कारणा[न]तिरिक्तं कार्यं तदा कार्यवत् कारणमपि अनेकतामर्हतीत्यत काह—**तच्चेति** । मृदाद्यतिरेकेण घटादिशकलस्याप्यदर्शनात् । न हि कारण**भिन्नं** कार्यमस्ति ।

नाप्येकमेव कार्यकारणभावमर्हति, अर्धजरतीयन्यायवत् अतिविरुद्धत्वात् ॥ ३८ ॥ कार्यकारणभेदो नास्तीत्याह—**भेद** इति । यत एवं **अतः** ॥ ३९ ॥

दहराकाशे शिवोपलब्धिः

अस्मिन् ब्रह्मपुरे वेश्म दहरं यदिदं मुने ।
पुण्डरीकं तु तन्मध्ये आकाशो दहरोऽस्ति तत् ।
स शिवः सच्चिदानन्दः सोऽन्वेष्टव्यो मुमुक्षुभिः ॥ ४० ॥
अयं हृदि स्थितः साक्षी सर्वेषामविशेषतः ।
तेनायं हृदयं प्रोक्तः शिवः संसारमोचकः ॥
इत्युपनिषत् ॥ ४१ ॥

इत्थंभूतनिष्प्रतियोगिकाद्वैतात्मोपलब्ध्यधिकरणं किं इत्यत आह—**अस्मिन्निति** । अस्मिन् दहराकाशे यः करणग्रामप्रवृत्तिनिवृत्तिनिमित्ततया तदसङ्गत्वेन तद्भावाभावप्रकाशकतया तदसंभवप्रबोधसिद्धनिष्प्रतियोगिकब्रह्ममात्रतया च तत्तद्दृष्टयनुरूपमवभासते **स शिवः** ॥ ४० ॥ शिवस्य हृदयोपलब्धत्वात् हृदयस्यापि शिवत्वमुपचर्यत इत्यर्थः । **इत्युपनिषच्छब्दः** पञ्चब्रह्मोपनिषत्परिसमाप्त्यर्थः ॥ ४१ ॥

श्रीवासुदेवेन्द्रशिष्योपनिषद्ब्रह्मयोगिना ।
पञ्चब्रह्मोपनिषदो व्याख्यानं लिखितं स्फुटम् ।
पञ्चब्रह्मोपनिषदो व्याख्या पञ्चाशदीरिता ॥

इति श्रीमदीशाद्यष्टोत्तरशतोपनिषच्छास्त्रविवरणे त्रिणवतिसङ्ख्यापूरकं
पञ्चब्रह्मोपनिषद्विवरणं सम्पूर्णम्

बृहज्जाबालोपनिषत्

भद्रं कर्णेभिः—इति शान्तिः

प्रथमं ब्राह्मणम्

प्रजापतिकृताविद्याऽण्डसृष्टिः

आपो वा इदमासन् सलिलमेव। स प्रजापतिरेकः पुष्करपर्णे समभवत्। तस्यान्तर्मनसि कामः समवर्तत इदं सृजेयमिति। तस्माद्यत् पुरुषो मनसाऽभिगच्छति। तद्वाचा वदति। तत् कर्मणा करोति॥ १॥

तदेषाऽभ्यनूक्ता—कामस्तदग्रे समवर्तताधि। मनसो रेतः प्रथमं यदासीत्। सतो बन्धुमसति निरविन्दन्। हृदि प्रतीष्या कवयो मनीषेति। उपैनं तदुपनमति। यत्कामो भवति। य एवं वेद॥ २॥

यज्ज्ञानाग्निः स्वातिरिक्तभ्रमं भस्म करोति तत्।
बृहज्जाबालनिगमशिरोवेद्यमहं महः॥

इह खल्वथर्वणवेदप्रविभक्तेयं बृहज्जाबालोपनिषत् स्वातिरिक्तप्रपञ्चभस्मीकरणपटीयसी सती विजयते। अस्याः स्वल्पग्रन्थतो विवरणमारभ्यते। प्रश्न-

मुण्डकादिवदुपोद्घातादिकमस्यामप्यूह्यम् । भुसुण्डादिशिष्यवर्गकालाग्निरुद्रप्रश्न-प्रतिवचनरूपेयमाख्यायिका विद्यास्तुत्यर्था । अस्यामुपनिषदि स्वातिरिक्तं भस्म, ततः शिष्टं स्वयमेवेति प्रतिपाद्यते । तत्र स्वातिरिक्तेयत्तापरिज्ञानं विना न हि तद्भस्म भवितुमर्हतीति तदियत्ताप्रकटनाय पुराणमवतारयति—**आपो वा** इति । प्रळय-कालीना **आपो** वै प्रसिद्धाः अनभिव्यक्तनामरूपं **इदं** अविद्याऽण्डं **आसन् सलिलमेव** । न हि सलिलादतिरिक्तं किंचिदस्ति । तत्र बृहज्जाबालमन्त्रद्रष्टा यः **सोऽयं प्रजापतिरेकः पुष्करपर्णे** नारायणनाभिपद्मे **समभवत्** । **तस्य** प्रजापते-**रन्तर्मनसि कामः समवर्तत** । किमिति ? **इदं** अनन्तकोटिब्रह्माण्डात्मक-मविद्याऽण्डं **सृजेयमिति** । यस्मादयं जगत्स्रष्टुकामो भवति **तस्माद्यत्पुरुषः मनसा** अन्तःकरणेन **अभिगच्छति** निश्चिनोति यन्मनसि स्मृतं **तद्वाचा वदति** । यद्वाचोक्तं **तत्** शरीरनिर्वर्त्यकर्मणा **करोति** ॥ १ ॥ ब्राह्मणोक्तेऽर्थे **तदेषाऽभ्यनु** पश्चात् **उक्ता** । वक्ष्यमाणाविद्याऽण्डोद्भूतेः **अग्रे** प्राक् **अधिकत्वेन कामोऽभिलाषः समवर्तत** । कामः **क** जातः इत्यत्र **मनसोऽन्तःकरणस्य यद्रेतो** वीर्यं **प्रथममासीत्**, स कामो भवतीति पूर्वेणान्वयः,

न हि संकल्पातिरिक्तं मनोऽस्तीति विचिन्त्यताम् ।
काम जानामि ते रूपं संकल्पात् किल जायसे ॥

इति स्मृतेः । **सतः** चक्षुर्ग्राह्यप्रपञ्चस्य बन्धुरिवोपकारकत्वात् कामो **बन्धुः असति** अचाक्षुषे ब्रह्मणि **निरविन्दन्** निःशेषमगमन् । **कवयो मनस** ईष्ट इति मनीट् धीः तया **मनीषा** हृदि **प्रतीष्य** अवलोक्य । **उप** समीपे **एनं** कामिनं **उपनमति** आप्नोति यस्य दारादिविषये कामो भवति स **यत्कामो भवति** इति मन्त्रसमाप्त्यर्थः । **य एवं** यो वेद जानाति स प्राजापत्यपदमश्नुत इत्यर्थः ॥ २ ॥

विभूतिरुद्राक्षबृहज्जाबालजिज्ञासा

स तपोऽतप्यत । स तपस्तप्त्वा । स एतं भुसुण्डः कालाग्नि-रुद्रमगमदागत्य भो विभूतेर्माहात्म्यं ब्रूहीति ॥ ३ ॥

तथेति प्रत्यवोचद्भु[1]सुण्ड [2]वाच्यमानं किमिति ॥ ४ ॥

विभूतिरुद्राक्षयोर्माहात्म्यं बभाणेति ॥ ५ ॥

आदावेव पैप्पलादेन सहोक्तमिति ॥ ६ ॥

तत्फलश्रुतिरिति ॥ ७ ॥

तस्योर्ध्वं किं वदामेति ॥ ८ ॥

बृहज्जाबालाभिधां मुक्तिश्रुतिं ममोपदेशं कुरुष्वेति ॥ ९ ॥

इदानीं प्रासङ्गिकं परित्यज्य प्रकृतमनुसरति—स इति । स प्रजापतिः **तपोऽतप्यत** आलोचनं कृतवान् । एवं स तपस्तप्त्वा यो वायसाकारो भुसुण्ड इति विख्यातः परमयोगी तमनुप्रविष्टवान् । **सोऽयं** प्रजापतिनाऽऽविष्टः **भुसुण्डः** स्वातिरिक्तभस्मावगत्यर्थं **एतं** कालाग्निरुद्रमगमत् । तं गत्वा किं कृतवानित्यत आह—**आगत्य भो विभूतेर्माहात्म्यं ब्रूहीति** ॥ ३ ॥ भुसुण्डप्रश्नोत्तरं भगवानाह—**तथेति प्रत्यवोचत्** । किमिति ? **भुसुण्ड वाच्यमानं किमिति**, उच्यमानं किमित्यर्थः ॥ ४ ॥ आहेतरः **विभूतिरुद्राक्षयोर्माहात्म्यं बभाणेति** उपदिशेत्यर्थः ॥ ५ ॥ पुरैवोक्तमित्याह—**आदावेव पैप्पलादेन सहोक्तमिति**, पैप्पलादेन साकं तुभ्यं विभूतिरुद्राक्षमाहात्म्यं उक्तमित्यर्थः ॥ ६ ॥ इतर आह—**तत्फलश्रुतिरिति** । वक्तव्येत्यध्याहार्यम् ॥ ७ ॥ ततः किमिति भगवानाह—**तस्योर्ध्वं किं वदामेति** ॥ ८ ॥ इतर आह—**बृहज्जाबालाभिधामिति** ॥ ९ ॥

भस्मपबकस्य नामस्वरूपनिरूपणम्

ॐ तथेति । सद्योजातात् पृथिवी । तस्याः स्यान्निवृत्तिः । तस्याः कपिलवर्णा नन्दा । तद्भोमयेन विभूतिर्जाता ॥ १० ॥

वामदेवादुदकम् । तस्मात् प्रतिष्ठा । तस्याः कृष्णवर्णा भद्रा । तद्भोमयेन भसितं जातम् ॥ ११ ॥

[1] सुण्डं—मु.

[2] **वच्य**—अ १, क. वक्ष्य—अ.

अघोराद्वह्निः । तस्माद्विद्या । तस्या रक्तवर्णा सुरभिः । तद्गोमयेन भस्म जातम् ॥ १२ ॥

तत्पुरुषाद्वायुः । तस्माच्छान्तिः । तस्याः श्वेतवर्णा सुशीला । तस्या गोमयेन क्षारं जातम् ॥ १३ ॥

ईशानादाकाशम् । तस्माच्छान्त्यतीता । तस्याश्चित्रवर्णा सुमना । तद्गोमयेन रक्षा जाता ॥ १४ ॥

विभूतिर्भसितं भस्म क्षारं रक्षेति भस्मनो भवन्ति पञ्च नामानि । पञ्चभिर्नामभिर्भृशमैश्वर्यकारणाद्भूतिः । भस्म सर्वाघभक्षणात् । भासनाद्भसितम् । क्षारणादापदां क्षारम् । भूतप्रेतपिशाचब्रह्मराक्षसापस्मारभवभीतिभ्योऽभिरक्षणाद्रक्षेति ॥ १५ ॥

भगवान् तत्प्रश्नमङ्गीकृत्य प्रतिवचनमभिधास्यति—ॐ तथेति । ओङ्कारस्यानुकृत्यर्थत्वात्, "ओमित्येतदनुकृतिः" इति श्रुतेः । आदौ वक्ष्यमाणनामपञ्चके तत्राद्यनामात्मकविभूतिस्वरूपमाह—**सद्योजातादिति** । ईश्वरपूर्वाभिमुखसञ्जातसद्योजातंप्रपद्यामीतिमन्त्रतो जाता **पृथिवी** । **तस्याः** सकाशात् **निवृत्तिकला** संजाता । **तस्याः** सकाशात् **नन्दा नाम कपिलवर्णा** धेनुरभूत् । वक्ष्यमाणप्रकारेण संस्कृततद्गोमयेन **विभूतिः** संजाता ॥ १० ॥ तद्द्वितीयभसितस्वरूपमाह—**वामदेवादिति** ॥ ११ ॥ भस्मस्वरूपमाह—**अघोरादिति** ॥ १२ ॥ क्षारस्वरूपमाह—**तदिति** ॥ १३ ॥ रक्षास्वरूपमाह—**ईशानादिति** ॥ १४ ॥ एवं भस्मनः पञ्चनामान्यभिधाय तेषां यौगिकार्थमाह—**विभूतिरिति** ॥ १५ ॥

इति प्रथमं ब्राह्मणम्

द्वितीयं ब्राह्मणम्

अग्नीषोमात्मकभस्मस्नानजिज्ञासा

अथ भुसुण्डः कालाग्निरुद्रमग्नीषोमात्मकं भस्मस्नानविधिं पप्रच्छ ॥ १ ॥

भुसुण्डो भगवन्तं भस्मस्नानविधिं पृच्छतीत्याह—**अथ भुसुण्ड** इति ॥१॥

जगतः अग्नीषोमात्मकत्वम्

अग्निर्यथैको भुवनं प्रविष्टो रूपं रूपं प्रतिरूपो बभूव ।
एकं भस्म सर्वभूतान्तरात्मा रूपं रूपं प्रतिरूपो बहिश्च ॥ २ ॥
अग्नीषोमात्मकं विश्वमित्यग्निरित्याचक्षते ।
रौद्री घोरा या तैजसी तनूः ।
सोमः शक्त्यमृतमयः शक्तिकरी तनूः ॥ ३ ॥
अमृतं यत्प्रतिष्ठा सा तेजोविद्याकला स्वयम् ।
स्थूलसूक्ष्मेषु भूतेषु त एव रसतेजसी ॥ ४ ॥
द्विविधा तेजसो वृत्तिः सूर्यात्मा चानलात्मिका ।
तथैव रसशक्तिश्च सोमात्मा चानलात्मिका ॥ ५ ॥
वैद्युदादिमयं तेजो मधुरादिमयो रसः ।
तेजोरसविभेदैस्तु वृतमेतच्चराचरम् ॥ ६ ॥
अग्नेरमृतनिष्पत्तिरमृतेनाग्निरेधते ।
अत एव हविः कृत्स्नमग्नीषोमात्मकं जगत् ॥ ७ ॥

प्रश्नोत्तरं भगवानाह—**अग्निरिति** । **यथैकोऽप्यग्निर्भुवनं** प्रविश्य स्वाश्रयदार्वनुरूपं **रूपं प्रतिरूपो** बहुरूपो बभूव तथा **एकं** स्वातिरिक्तभस्म स्वातिरिक्तप्रपञ्चापवादाधिकरणं व्यष्टिसमष्टिप्रपञ्चारोपाधिकरणविश्वविराडोत्राद्यात्मना **सर्वभूतान्तरात्मा** भूत्वा तूलान्तःकरणोपाधियोगात् **रूपं रूपं प्रतिरूपः** स्वातिरिक्तप्रपञ्चापवादाधिकरणद्वितुर्यतदैक्याविकल्पात्मना **तद्वहिश्च** विलक्षणो भवति, "सर्वस्मादन्यो विलक्षणः" इति श्रुतेः । **च**शब्दात् वस्तुतो निरधिकरणं निष्प्रतियोगिकब्रह्ममात्रमवशिष्यते इति द्योत्यते ॥ २ ॥ भस्मनस्तत्कार्यविश्वस्य वाऽग्नीषोमात्मकत्वं कथमियत आह—**अग्नीषोमात्मकमिति** । अग्निश्च सोमश्च अग्नीषोमौ तावेव आत्मा यस्य तत् **अग्नीषोमात्मकं** तद्रूपेण विश्वासार्हं **विश्वमग्निरित्युच्यते** विश्वस्याग्नीषोमकार्यत्वात् । **या तनूर्घोरा तैजसी** च भवति अस्या अग्न्यंशत्वात् । अपरा तु **शक्तिकरी तनूः अमृतमयः सोम एव शक्तिः** वामभागस्थेडाशंकरमृतमयत्वात् ॥ ३ ॥ **अमृतं** यत्प्रतिष्ठा यस्यां चन्द्रनाड्यां अमृतस्य प्रतिष्ठितत्वात् **सेयं** स्वयं चन्द्रनाडी तेजोविद्याकलाऽऽत्मिका भवति । **त एव रसतेजसी** स्थूलसूक्ष्मभूतेषु द्विधा भवतः ॥ ४ ॥ सूर्याग्निभेदेन यथा **तेजसो** वृत्तिः द्विविधा **तथैव सोमात्मानलात्मिकेति** च **रसशक्तिश्च द्विधा** भवति ॥ ५ ॥ तत्र किं तेजः को रसः इत्यत्र विद्युदेव वैद्युत्, आदिशब्देन प्रदीपनक्षत्रादयो गृह्यन्ते, तन्मयं हि तेजः मधुराम्लादिमयो **रसः** । इत्थं **चराचरभेदभिन्नं** जगत् **तेजोरसभूतैराबृतम्** । तुशब्दोऽवधारणार्थः ॥ ६ ॥ मथनाविर्भूताग्नेः **अमृतनिष्पत्तिः**, नवनीतघृतादेः मथनाग्निनिष्पन्नत्वात् । **अमृतस्थानीयाज्यतैलकाष्ठगतस्नेहादिना अग्निरेधते** वृद्धिमुपैति । यतो मथनाविर्भूतोष्णांशोऽग्निः तज्जोऽमृतविशेषः सोमो भवति, यत एवाग्नीषोमीयं **हविः कृत्स्नं** निष्पन्नं **अत एवेदं जगत् अग्नीषोमात्मकमिति** ज्ञेयम् ॥ ७ ॥

जगतः शिवशक्त्यात्मकत्वम्

ऊर्ध्वशक्तिमयः सोम अधःशक्तिमयोऽनलः ।
ताभ्यां संपुटितं तस्माच्छबद्विश्वमिदं जगत् ॥ ८ ॥

अग्नेरूर्ध्वं भवत्येषा यावत् सौम्यं परामृतम् ।
यावदग्न्यात्मकं सौम्यममृतं विसृजत्यधः ॥ ९ ॥
अत एव हि कालाग्निरध[1]स्ताच्छक्तिरूर्ध्वगा ।
यावदादहनश्चोर्ध्वमधस्तात् [2]पावनं भवेत् ॥ १० ॥
आधारशक्त्याऽवधृतः कालाग्निरयमूर्ध्वगः ।
तथैव निम्नगः सोमः शिवशक्ति[3]पदास्पदः ॥ ११ ॥
शिवश्चोर्ध्वमयः शक्तिरूर्ध्वशक्तिमयः शिवः ।
तदित्थं शिवशक्तिभ्यां नाव्याप्तमिह किंचन ॥ १२ ॥
असकृच्चाग्निना दग्धं जगत्तद्भस्मसात्कृतम् ।
अग्नेर्वीर्यमिदं प्राहुस्तद्वीर्यं भस्म यत्ततः ॥ १३ ॥

अग्नीषोमात्मकतया जगत् प्रतिपाद्य पुनः शिवशक्त्यात्मकतया जगत् प्रदर्शयति—ऊर्ध्वेति । ऊर्ध्वाधोभेदेन परमेश्वरशक्तिर्द्विविधा । **सोमस्तूर्ध्व-शक्तिमयः** शिवफालाक्षस्थान्यपेक्षया सर्वोर्ध्वतन्मौळिप्रतिष्ठानात् । तदपेक्षया **अधःशक्तिमयोऽनलः** । यद्वा—ऊर्ध्वशक्तिमयः सोमः शिवः, स्वभक्तोर्ध्वपद-प्रापकविद्याशक्तिसंपन्नत्वात् । यस्य शब्दादिविषये अलंबुद्धिर्न विद्यते **सोऽयं अनलो** जीवः **अधःशक्तिमयः** परमार्थतत्त्वाधःप्रापकतूलान्तःकरणाविद्याशक्ति-सहितत्वात् । अयमविद्याशक्तिरित्यर्थः,

अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मे पराम् ।
जीवभूतां महाबाहो ययेदं धार्यते जगत् ॥

इति स्मृतेः । यस्मादेवं **तस्मात् ताभ्यां** शिवशक्तिभ्यां स्वाज्ञदृष्ट्या स्वातिरेकेणा-स्तीति **शश्वद्विश्वसनीयं इदं विश्वं जगत् संपुटितं** कवळितमित्यर्थः ॥ ८ ॥ यैषा

[1] स्तच्छ—अ २, क. [2] पावनो—क.
[3] पदात्मकः—अ १, अ २, क. पदास्पदम्—अ.

शिवशक्तिः **अग्नेरप्यूर्ध्वं भवति यावत्** सोमसंबन्धि **सौम्यं परामृतं** मूलाधारस्थाग्नेरूर्ध्वं यावदाज्ञाचक्रसहस्रारचक्रान्तराळविलसत्सोममण्डलं सौम्यं परामृतं विद्यते तदेतद्यावत् केवलकुम्भकोत्थितं **अग्न्यात्मकं** अग्निसंयुक्तं सत् **अधः** आपादं **सौम्यममृतं विसृजति** तावच्छिवशक्तियोगो भवतीत्यर्थः ॥ ९ ॥ यतोऽग्नीषोमयोग एव शिवशक्तियोगो जीवैक्यं भवति **अत एव ह्यधस्ताच्छक्तिः कालाग्निजीवाभिधाना** ऊर्ध्वं ऐश्वरं तत्त्वं तावत् गच्छतीति **ऊर्ध्वगा** भवति । यावच्छिवशक्तिस्थानीयजीवेशयोरैक्यं भवति तावत्पुराऽनुभूतभिदादहनो निश्शेषदहनं भवति । चशब्दात् पुनर्जीवेशभिदायोगो द्योत्यते । ततः पुराऽनुभूतोर्ध्वाधःकलनामलं **पावनं** ब्रह्मभावापन्नमेव **भवेत्** ॥ १० ॥ पुनरुक्तार्थमेव दृढयति—**आधारेति** । **मूलाधारशक्त्याऽवधृतो** युक्तोऽयं **कालाग्निजीवः** स्वोपाधिशक्त्यंशं विहाय **ऊर्ध्वगो** यथा भवति तथैव **शिवशक्तिपदास्पदः** शिवशक्त्यैक्यनिम्नगो भवतीव **भवति** वस्तुतस्तस्य निम्नोन्नतवैरळ्यात् ॥ ११ ॥ शक्तिशक्तिमतोरभेदमाह—**शिव** इति । **शिवश्च** शिवोऽपि **ऊर्ध्वमयः शक्तिः** यथा तथा **ऊर्ध्वशक्तिमयः शिवः**, शिवातिरेकेण शक्त्यभावात् । इति यत् **तदित्थं इह किंचन** किंचिदपि **शिवशक्तिभ्यां नान्यान्नमस्ति** सर्वं शिवात्मकमित्यर्थः ॥ १२ ॥ शिवातिरिक्तशक्त्यंशं भस्मापह्नवं कृत्वा तदपह्नवसिद्धं शिवं स्वमात्रमिति यः पश्यति तस्य तद्भावापत्तिः फलं इति ब्राह्मणार्थमुपसंहरति—**असकृदिति** । यत् असकृत् शास्त्रीयज्ञानाग्निना **दग्धं** तज्जगत् ब्रह्मातिरिक्तं न किंचिदस्तीति सम्यज्ज्ञानाग्निना **भस्मसात्कृतं** भस्मावसानं कृतमित्यर्थः, "भस्मान्तं शरीरं" इति श्रुतेः । यत् यस्मात् कारणात् **इदं** जगत् **अग्नेर्वीर्यं प्राहुः** जगतस्तावदग्निस्थानीयजीवविकल्पितत्वात् **ततः** तस्मात् कारणात् **तस्य** जगतो **वीर्यं भस्म** नासति जगति तद्भस्म तदपह्नोतुमशक्यत्वात् ॥ १३ ॥

ज्ञानानधिकारिणां भस्मस्नानविधिः

यश्चैत्थं भस्मसद्भावं ज्ञात्वाऽभिस्नाति भस्मना ।
अग्निरित्यादिभिर्मन्त्रैर्दग्धपाशः स उच्यते ॥ १४ ॥

अग्नेर्वीर्यं च तद्भस्म सोमेनाप्लावितं पुनः ।
अयोगयुक्त्या प्रकृतेरधिकाराय कल्पते ॥ १५ ॥
योगयुक्त्या तु तद्भस्म प्लाव्यमानं समन्ततः ।
शाक्तेनामृतवर्षेण ह्यधिकारान्निवर्तते ॥ १६ ॥

एवं ज्ञातुमशक्तानां स्वाज्ञानपाशदहनोपायमाह—**यश्चेति** । **यश्च** यः कोऽपि **इत्थं** वक्ष्यमाणब्राह्मणोक्तविधानेन यथाविधि **भस्मसद्भावं ज्ञात्वा** "**अग्निरिति भस्म**" इत्यादिमन्त्रैः **भस्मना स्नाति** सोऽयं विधिभस्मस्नानमहिम्ना **दग्धस्वाज्ञानपाश** इत्युच्यते ॥ १४ ॥ विधिभस्मस्नातस्य मुख्यभस्माधिगमाधिकारः कुतः इत्यत आह—**अग्नेरिति** । यत् **अग्नेर्वीर्यं तत् पुनः सोमेन** शिवशक्त्यमृतवारिणा **प्लावितं** मिश्रीकृतमिव भाति । तत्प्रकृतेरयोगयुक्त्या सोमातिरेकेण प्रकृतिर्विकृतिर्वा न ह्यस्ति इति श्रुत्यनुग्राहकयुक्त्या तर्केण यदि विशिष्टस्तदा पुमान् मुख्यभस्मावगत्यधिकाराय **कल्पते** अधिकारी भवतीत्यर्थः ॥ १५ ॥ व्यतिरेकमाह—**योगयुक्त्येति** । यस्तु **शाक्तेनामृतवर्षेण** प्रकृतविकृतयोगयुक्त्या तु **समन्ततः प्लाव्यमानं भस्म** स्वाविद्योपहितमात्मानं जानाति संसार्यहमित्यात्मानं पश्यति स पुमान् मुख्यस्वातिरिक्तभस्मावगत्यधिकारान्निवर्तते । अनधिकार्ययं मन्दप्रज्ञो भवतीत्यर्थः ॥ १६ ॥

जीवेशैक्यज्ञानतः संसारनिवृत्तिः

अतो मृत्युंजयायेत्थममृतप्लावनं सताम् ।
शिवशक्त्यमृतस्पर्शे लब्ध एव कुतो मृतिः ॥ १७ ॥
यो वेद गहनं गुह्यं पावनं च ततोदितम् ।
अग्नीषोमपुटं कृत्वा न स भूयोऽभिजायते ॥ १८ ॥

अनधिकारिताहेतुसंसारित्वासंभवोपायमाह—**अत इति** । यतः शक्तियोगयुक्त्या संसारित्वं **अतः** कारणात् स्वातिरिक्तास्तिताहेतुस्वाज्ञानमृत्युं जयति

अपह्नवं करोतीति मृत्युंजयः परमात्मा तस्मै **मृत्युञ्जयाय इत्थं अमृतप्लावनं** शिवातिरेकेण शक्त्यंशो न विद्यत इति स्वमात्रज्ञानसमर्पणं ये कुर्वन्ति ते सन्तः तेषां **सतां** स्वाज्ञदृष्ट्या **शिवशक्त्यमृतस्पर्श** एव लब्धेऽपि स्वज्ञदृष्ट्या शिवशक्त्यमृतस्पर्शवैरळ्यात् **कुतो मृतिः** परमार्थदृष्ट्या न कुतश्चिदित्यर्थः ॥ १७ ॥ जीवेशैक्यज्ञानतो नेह पुनर्जात्यादिरस्तीत्याह—य इति। यः पुमान् स्वाज्ञजनगहनं दुरवगमत्वात् **गुह्यं** अनधिकारिणे गोपनीयत्वात् **पावनं च** पवित्राणां पवित्रत्वात् । स्वातिरिक्तापावनासंभवद्योतकः चशब्दः । सर्वत्र **ततत्वेन सदोदितं**, कदाऽप्यनस्तमितत्वात् । किं तत्? **अग्नीषोमपुटं**, पराक्प्रपञ्चदाहकत्वादग्निः प्रत्यक् सर्वात्मकत्वात्, स्वातिरिक्तसर्वाप्यायकत्वाच्च सोमः परमात्मा, तयोरग्नीषोमयोः प्रत्यक्परयोः पुटमैक्यं ब्रह्माहं अहमेव ब्रह्म इति वेद जानाति स मुनिरेवमैक्यं **कृत्वा** तद्भेदसापेक्षप्रभवैक्यगतसविशेषांशमप्यपह्नवं कृत्वा तदपह्नवसिद्धं ब्रह्म निष्प्रतियोगिकस्वमात्रमित्यवगम्य नेह पुनः स्वातिरिक्तास्तित्वमोहाय **जायते** तदासक्त्या म्रियते वेत्यर्थः ॥ १८ ॥

सविशेषब्रह्मोपासनेनापि अमृतत्वप्राप्तिः

शिवाग्निना तनुं दग्ध्वा शक्तिसोमामृतेन यः ।
प्लावयेद्योगमार्गेण सोऽमृतत्वाय कल्पते ।
सोऽमृतत्वाय कल्पत इति ॥ १९ ॥

सविशेषब्रह्मोपासकोऽपि तत्प्रसादान्निर्विशेषब्रह्मोपासनाफलमेवैतीत्याह—शिवेति। स्वातिरिक्ताशिवग्रासः शिवः परमात्मा स एवाग्निः तेन **शिवाग्निना तनुं** तदुपलक्षितस्वाविद्यापदतत्कार्यजातं **दग्ध्वा** भस्मीकृत्य तत्पुनर्भस्मशक्तिरेव सोमः स एवामृतं तेन **शक्तिसोमामृतेन योऽयं** योगी सुषुम्नावायुप्रवेशलक्षण**योगमार्गेण प्लावयेत्** पिण्डीकुर्यात् ईश्वरभावमापादयेत् **सोऽपि** तत्प्रसादलब्धनिर्विशेषज्ञानसमकालं **अमृतत्वाय** कैवल्याय **कल्पते**। आवृत्तिरेतद्ब्राह्मणसमाप्त्यर्था ॥१९॥

इति द्वितीयं ब्राह्मणम्

तृतीयं ब्राह्मणम्

विभूतियोगजिज्ञासा

अथ भुसुण्डः कालाग्निरुद्रं विभूतियोगमनुब्रूहीति होवाच ॥ १ ॥

भुसुण्डः पुनः भगवन्तं विभूतियोगबुभुत्सया पृच्छतीत्याह—अथेति ॥१॥

विभूतेः उत्पत्तिक्रमः

विकटाङ्गामुन्मत्तां महाखला[1]मशिवादिचिह्नान्वितां पुनर्धेनुं कृशाङ्गां वत्सहीनामशान्तामदुग्धदोहिनीं निरिन्द्रियां जग्धतृणां केशचेलास्थिभक्षिणीं संधिनीं नवप्रसूतां रोगार्तां गां विहाय प्रशस्तगोमयमाहरेद्गोमयं खसंस्थं ग्राह्यं शुभे स्थाने वा पतितमपरित्यज्यात ऊर्ध्वं मर्दयेद्गव्येन । गोमयग्रहणं कपिला वा धवला वा अलाभे तदन्या गौः स्याद्दोषवर्जिता । कपिलागोभस्मोक्तम् । [2]लब्धगो[3]भस्मना चेदन्यगोक्षारं यत्र क्वापि स्थितं यत्तन्न हि धार्यं [4]संस्काररहितं धार्यम् ॥ २ ॥

भुसुण्डेन विभूत्युत्पत्तिक्रमं पृष्टो भगवान् धेनुलक्षणादि सप्रकारमाह—**विकटामिति** । विकटांगां विरूपाङ्गां उन्मत्तां इत्यादि **रोगार्तां** इत्यन्तविशेषणविशिष्टां गां **विहाय** कपिलादि वर्णतो गुणतः **प्रशस्तगोः** सकाशात् **गोमयमाहरेत्**। तदाहरणविधिस्तु **गोमयं खसंस्थं** अन्तराळस्थं **शुभे स्थाने वा पतितं ग्राह्यं** यन्निर्दुष्टं तत् **अपरित्यज्य अत ऊर्ध्वं गव्येन** गोमयेन सम्यक् **मर्दयेत्** । यत्

[1] मलिनामशि—अ १, अ २, क. [2] लब्धं—मु.
[3] भस्मनो—उ, मु. [4] संस्कार्यर—उ. संस्कारसहि—मु.

गोमयग्रहणं कार्यं इत्यत्र लाभे कपिला वा धवला वा अलाभे विकटाऽऽदि-दोषवर्जिता वा स्यात् तस्याः सकाशात् गोमयं ग्राह्यम्। कपिलादिप्रशस्त-गोशकृद्भस्म प्रशस्तत्वेन उक्तम्। एवं लब्धगोशकृद्भस्मनोद्भूळनादिः कार्यः। एवं लाभे दोषविशिष्टान्यगोक्षारं यत्र कापि स्थितं वक्ष्यमाणसंस्काररहितं वा न हि धार्यम् ॥ २ ॥

गोमयादौ विद्याऽऽदिदृष्टिः

तत्रैते श्लोका भवन्ति—

विद्याशक्तिः समस्तानां शक्तिरित्यभिधीयते।
गुणत्रयाश्रया विद्या सा विद्या च तदाश्रया ॥ ३ ॥
गुणत्रयमिदं धेनुर्विद्याऽभूद्गोमयं शुभम्।
मूत्रं चोपनिषत् प्रोक्तं कुर्याद्भस्म ततः परम् ॥ ४ ॥
वत्सस्तु स्मृतयश्चास्यास्तत्संभूतं तु गोमयम्।

इत्यर्थप्रकाशने एते श्लोका मन्त्रा भवन्तीत्याह—तत्रेति। समस्तानां शक्तीनां मध्ये विद्याशक्तिरेव शक्तिः। सा सत्त्वादिगुणत्रयाश्रया गुणत्रयमपि तदाश्रयम् ॥ ३ ॥ इदं गुणत्रयमेव धेनुः। शुभं गोमयं विद्याऽभूत्। गोमूत्रमुपनिषत् इति प्रोक्तम्। इत्थं धेनुगोमयगोमूत्रादौ गुणत्रयविद्योपनिषद्दृष्टिं कुर्यात् ॥ ४ ॥ अस्याः गुणत्रयविशिष्टधेन्वाः वत्सस्तु स्मृतिगणो ज्ञेयः। गोतद्वत्सेषु श्रुतिस्मृतिदृष्टिः कार्येत्यर्थः। तत्संभूतं यत् गोमयं तद्भस्म कुर्यादिति पूर्वेणान्वयः ॥

गवादिभस्मान्तस्य मन्त्रसंस्कारः

आगाव इति मन्त्रेण धेनुं तत्राभिमन्त्रयेत् ॥ ५ ॥
गावो भगो गाव इति प्राशयेत्तत्तृणं जलम्।
उपोष्य च चतुर्दश्यां शुक्ले कृष्णेऽथवा व्रती ॥ ६ ॥

परेद्युः प्रातरुत्थाय शुचिर्भूत्वा समाहितः ।
कृतस्नानो धौतवस्त्रः पयोर्ध्वं च सृजेच्च गाम् ॥ ७ ॥
उत्थाप्य गां प्रयत्नेन गायत्र्या मूत्रमाहरेत् ।
सौवर्णे राजते ताम्रे धारयेन्मृण्मये घटे ॥ ८ ॥
पौष्करेऽथ पलाशे वा पात्रे गोशृङ्ग एव वा ।
आदधीत हि गोमूत्रं गन्धद्वारेति गोमयम् ॥ ९ ॥
आभूमिपातं गृह्णीयात् पात्रे पूर्वोदिते गृही ।
गोमयं शोधयेद्विद्वान् श्रीर्मे भजतुमन्त्रतः ॥ १० ॥
अलक्ष्मीर्म इति मन्त्रेण गोमयं धान्यवर्जितम् ।
सं त्वा सिंचामि मन्त्रेण गोमूत्रं गोमये क्षिपेत् ॥ ११ ॥
पञ्चानां त्वेतिमन्त्रेण पिण्डानां च चतुर्दश ।
कुर्यात् संशोध्य किरणैः सौरैकैराहरेत्ततः ॥ १२ ॥
निदध्यादथ पूर्वोक्तपात्रे गोमयपिण्डकान् ।
स्वगृह्योक्तविधानेन प्रतिष्ठाप्याग्निमीजयेत् ॥ १३ ॥
पिण्डांश्च निक्षिपेत्तत्र आद्यन्तं प्रणवेन तु ।
षडक्षरस्य [1]सूक्तस्य व्याकृतस्य तथाऽक्षरैः ॥ १४ ॥
स्वाहाऽन्ते जुहुयात्तत्र वर्णदेवाय पिण्डकान् ।
आघारावाज्यभागौ च प्रक्षिपेद्व्याहृतीः सुधीः ॥ १५ ॥
ततो निधनपतये त्रयोविंशञ्जुहोति च ।
होतव्याः पञ्च ब्रह्माणि नमो हिरण्यबाहवे ॥ १६ ॥

[1] सूत्रस्य—उ.

इति सर्वाहुतीर्हुत्वा चतुर्थ्यन्तैश्च मन्त्रकैः ।
ऋतं सत्यं कद्रुद्राय यस्य वैकंकतीति च ॥ १७ ॥
एतैश्च जुहुयाद्विद्वाननाज्ञातत्रयं तथा ।
व्याहृतीरथ हुत्वा च ततः स्विष्टकृतं हुनेत् ॥ १८ ॥
इध्मशेषं तु निर्वर्त्य पूर्णपात्रोदकं तथा ।
पूर्णमसीति यजुषा जलेनान्येन बृंहयेत् ॥ १९ ॥
ब्राह्मणेष्वमृतमिति तज्जलं शिरसि क्षिपेत् ।
प्राच्यामिति [1]दिशं लिङ्गैर्दिक्षु तोयं विनिक्षिपेत् ॥ २० ॥
ब्रह्मणे दक्षिणां दत्त्वा शान्त्यै पुलकमाहरेत् ।
आहरिष्यामि देवानां सर्वेषां कर्मगुप्तये ॥ २१ ॥
जातवेदसमेनं त्वां पुलकैश्छादयाम्यहम् ।
मन्त्रेणानेन तं वह्निं पुलकैश्छादयेत्ततः ॥ २२ ॥
त्रिदिनं [2]ज्वलनस्थित्यै छादनं पुलकैः स्मृतम् ।
ब्राह्मणान् भोजयेद्भक्त्या स्वयं भुञ्जीत वाग्यतः ॥ २३ ॥
भस्माधिक्यमभीप्सुस्तु अधिकं गोमयं हरेत् ।
दिनत्रयेण यदि वा एकस्मिन् दिवसेऽथवा ॥ २४ ॥
तृतीये वा चतुर्थे वा प्रातः स्नात्वा सिताम्बरः ।
शुक्लयज्ञोपवीती च शुक्लमाल्यानुलेपनः ॥ २५ ॥

[1] दिशां—अ २, क.
[2] ज्वलसंस्थि—अ १, अ २, उ १. ज्वलनं स्थि—क.

शुक्लदन्तो भस्मदिग्धो मन्त्रेणानेन मन्त्रवित् ।
ॐ तद्ब्रह्मेति चोच्चार्य पौलकं भस्म संत्यजेत् ॥ २६ ॥
तत्र चावाहनमुखानुपचारांस्तु षोडश ।
[1]कर्तव्या व्याहृतास्त्वेवं ततोऽग्निमुपसंहरेत् ॥ २७ ॥
अग्नेर्भस्मेति मन्त्रेण गृह्णीयाद्भस्म चोत्तरम् ।
अग्निरित्या[2]दिमन्त्रेण प्रमृज्य च ततः परम् ॥ २८ ॥
संयोज्य गन्धसलिलैः कपिलामूत्रकेण वा ।
चन्द्रकुङ्कुमकाश्मीरमुशीरं चन्दनं तथा ॥ २९ ॥
अगरुत्रितयं चैव चूर्णयित्वा तु सूक्ष्मतः ।
क्षिपेद्भस्मनि तच्चूर्णमोमिति ब्रह्ममन्त्रतः ॥ ३० ॥
प्रणवेनाहरेद्विद्वान् ब्रह्मतो वटकानथ ।
अणोरणीयानिति हि मन्त्रेण च विचक्षणः ॥ ३१ ॥

तत्तन्मनुना गवादिसंस्कारं कुर्यादित्याह—**आ गाव** इति । "आ गावो अग्मन्नुत भद्रमक्रन्" इति मन्त्रेण धेनुमभिमन्त्र्य ॥ ५ ॥ "गावो भगो गाव इन्द्रो मे अच्छात्" इति मन्त्रेण तृणोदकं प्राशयित्वा श्वेतभस्मव्रती शुक्लकृष्णपक्षयोरन्यतरचतुर्दश्यामुपोष्य ॥ ६ ॥ परेद्युः स्नानादिनित्यकर्म कृत्वा पयोर्ध्वं पयोदोहनानन्तरम् ॥ ७ ॥ प्रयत्नेन गामुत्थाप्य सौवर्णाद्यन्यतमपात्रे गायत्र्यभिमन्त्रणपूर्वकं गोमूत्रमादधीत ॥ ९ ॥ ततो "गन्धद्वारां" इति गोमयं आभूमिपातं पूर्वोदितपात्रे गृह्णीयात् ॥ १० ॥ "श्रीर्मे भजतु अलक्ष्मीर्मे नश्यतु" इति मन्त्रेण गोमयं संशोध्य, "सं त्वा सिञ्चामि" इति मन्त्रेण गोमये गोमूत्रं निक्षिप्य ॥ ११ ॥ "पञ्चानां त्वा वातानां

[1] कुर्याद्व्याहृतिभिस्त्वेवं—उ, मु. [2] दिभिर्मन्त्रैः—उ, उ १.

यन्त्राय धर्त्राय गृह्णामि" इति चतुर्दश पिण्डान् कृत्वा, सौरकिरणैः शुष्कीकृत्य ॥ १२ ॥ पूर्वोक्तपात्रे निक्षिप्य, स्वगृह्योक्तविधानेन अग्निं प्रतिष्ठाप्य ॥ १३ ॥ आद्यन्तप्रणवोच्चारणपूर्वकं तत्त्यवर्णैः स्वाहाऽन्तैः पञ्चब्रह्मपरब्रह्माधिष्ठितैः स्वाहाऽन्तैः हुत्वा, तूष्णीं "अग्नये स्वाहा सोमाय स्वाहा" इति मन्त्रैर्व्याहृतिभिश्च हुत्वा ॥ १४–१५ ॥ ततः "निधनपतये नमः" इत्यादित्रयोविंशतिमन्त्रैः पञ्चब्रह्ममन्त्रैः ॥ १६ ॥ "ऋतं सत्यं परं ब्रह्म" इति, "कद्रुद्राय प्रचेतसे मीढुष्टमाय तव्यसे" इति मन्त्राभ्यां च ॥ १७ ॥ "अनाज्ञातं" इति त्रयेण व्याहृतित्रयेण च यथावद्धुत्वा, ततः स्विष्टकृत्पूर्णाहुती च हुत्वा ॥ १८ ॥ इध्मशेषं निर्वर्त्य, पूर्णपात्रोदकं "पूर्णमसि" इति यजुषा जलान्तरेण संपूर्य, "प्राच्यां दिशि देवाः" इत्यादिना दिक्षु तोयं निक्षिप्य ॥ १९ ॥ "ब्राह्मणेष्वमृतं" इति तज्जलं शिरसि संप्रोक्ष्य ॥ २० ॥ ब्रह्मदक्षिणां दत्वा, "आहरिष्यामि देवानां" इति जातवेदसं पुलकैः संछाद्य ॥ २१–२२ ॥ ब्राह्मणान् भोजयित्वा, स्वयमपि भुक्त्वा ॥ २३–२४ ॥ चतुर्थेऽऽहनि शान्तेऽग्नौ नित्यानुष्ठानानन्तरं "ॐ तद्ब्रह्म" इति मन्त्रेण पौलकभस्मत्यागपूर्वकं भस्ममात्रं पूर्वोदितपात्रे निक्षिप्य ॥ २५–२६ ॥ तत्र शिवमावाह्य, षोडशोपचारैरभ्यर्च्य, अग्निमुपसंहरेत्। इति श्रौतभस्माविर्भावविधिः ॥ २७ ॥

पुनर्भस्मनः संस्कारान्तरमुच्यते—अग्नेरिति । "अग्नेर्भस्मास्यग्नेः पुरीषमसि" इति मन्त्रेण चतुर्दश भस्मपिण्डान् गृहीत्वा, ततः परं "अग्निरिति भस्म" इत्यादिमन्त्रेण सम्यग्विमृज्य एकीकृत्य ॥ २८ ॥ कपिलामूत्रदिव्यगन्धसलिलैः संमिश्र्य, चन्द्रकुङ्कुमकुसुमादिचूर्णसंयोजनं कृत्वा, "ओमिति ब्रह्म" इति, "अणोरणीयान्" इति च मन्त्राभ्यां अथ वटकान् कृत्वा, यथासंभवपात्रे निक्षिप्य, नित्यं संपूजयेत् ॥ २९–३१ ॥

भस्मोद्धूलनप्रकारः

इत्थं भस्म सुसंपाद्य शुष्कमादाय मन्त्रवित्।
प्रणवेन विमृज्याथ सप्तप्रणवमन्त्रितम् ॥ ३२ ॥

ईशानेति शिरोदेशं मुखं तत्पुरुषेण तु ।
ऊरुदेशमघोरेण गुह्यं वामेन मन्त्रयेत् ॥ ३३ ॥
सद्योजातेन वै [1]पादान् सर्वाङ्गं प्रणवेन तु ।
तत उद्धूल्य सर्वाङ्गमापादतलमस्तकम् ॥ ३४ ॥
आचम्य वसनं धौतं ततश्चैतत् प्रधारयेत् ।
पुनराचम्य कर्म [2]स्वं कर्तुमर्हसि सत्तम ॥ ३५ ॥

अथ भस्मोद्धूलनप्रकारमाह—प्रणवेनेति । वामहस्ते भस्म निक्षिप्य, प्रणवेन विमृज्य पुनः प्रणवेन सप्तवारमभिमन्त्र्य ॥ ३२ ॥ "ईशानः सर्वविद्यानां" इत्यादिपञ्चब्रह्ममन्त्रैः शिरोमुखोरुगुह्यपादान्तं प्रणवेन शिष्टाङ्गं च उद्धूळय, आचम्य, अहरहर्नित्यादिकर्म कर्तव्यमित्यर्थः ॥ ३३–३५ ॥

चतुर्विधं भस्मकल्पनम्

अथ चतुर्विधं भस्मकल्पम् । प्रथममनुकल्पम् । द्वितीयमुपकल्पम् । उपोपकल्पं तृतीयम् । अकल्पं चतुर्थम् ॥ ३६ ॥

अग्निहोत्रससमुद्भूतं विरजानलजमनुकल्पम् । वने शुष्कं शकृत्संगृह्य कल्पोक्तविधिना कल्पितमुपकल्पं स्यात् । अरण्ये शुष्कगोमयं चूर्णीकृत्यानुसंगृह्य गोमूत्रैः पिण्डीकृत्य कल्पोक्तविधिना कल्पितमुपोपकल्पम् । शिवालयस्थमकल्पं शतकल्पं च ॥ ३७ ॥

इत्थं चतुर्विधं भस्म सर्वपापं निकृन्तयेन्मोक्षं ददातीति भगवान् कालाग्निरुद्रः ॥ ३८ ॥

[1] पादौ—अ २. पादाः—अ १, उ १, क. [2] त्वं—अ, अ १.

अनुकल्पादिभेदेन भस्मकल्पनं चतुर्विधमित्याह—अथेति ॥ ३६ ॥ सूत्रभूतवाक्यचतुष्टयस्य वृत्त्यर्थमुत्तरो ग्रन्थ इत्याह—अग्नीति। स्पष्टोऽर्थः ॥३७–३८॥

इति तृतीयं ब्राह्मणम्

चतुर्थं ब्राह्मणम्

भस्मस्नानप्रकारः

अथ भुसुण्डः कालाग्निरुद्रं भस्मस्नानविधिं ब्रूहीति होवाच ॥ १ ॥

अथ प्रणवेन विमृज्याथ सप्तप्रणवेनाभिमन्त्रितमागमेन तु तेनैव दिग्बन्धनं कारयेत् पुनरपि तेनास्त्रमन्त्रेणाङ्गानि मूर्धादीन्युद्धूलयेन्मलस्नानमिदम् ॥ २ ॥

ईशाद्यैः पञ्चभिर्मन्त्रैस्तनुं क्रमादुद्धूलयेत्। ईशानेति शिरोदेशं मुखं तत्पुरुषेण तु। [1]ऊरुदेशमघोरेण गुह्यं वामेन। सद्योजातेन वै पादौ सर्वाङ्गं प्रणवेन। आपादतलमस्तकं सर्वाङ्गं तत उद्धूल्याचम्य वसनं धौतं श्वेतं प्रधारयेद्विधिस्नानमिदम् ॥ ३ ॥

तत्र श्लोका भवन्ति—

भस्ममुष्टिं समादाय संहितामन्त्रमन्त्रिताम्।
मस्तकात् पादपर्यन्तं मलस्नानं पुरोदितम् ॥ ४ ॥

[1] ऊरु—उ, उ १.

तन्मन्त्रेणैव कर्तव्यं विधिस्नानं समाचरेत् ।
ईशाने पञ्चधा भस्म विकिरेन्मूर्ध्नि यत्नतः ॥ ५ ॥
मुखे चतुर्थवक्त्रेण अघोरेणाष्टधा हृदि ।
वामेन गुह्यदेशे तु त्रिदशस्थानभेदतः ॥ ६ ॥
अष्टावङ्गेन साध्येन पादावुद्धूल्य यत्नतः ।
सर्वाङ्गोद्धूलनं कार्यं राजन्यस्य यथाविधि ।
मुखं विना च तत्सर्वमुद्धूल्य[1] क्रमयोगतः ॥ ७ ॥

पुनर्भुसुण्डो भगवन्तं भस्मस्नानविधिं पृच्छतीत्याह—**अथेति** ॥ १ ॥ भुसुण्डेनैवं पृष्टो भगवान् द्विविधभस्मस्नानप्रकारमाह—**अथेति** । **अथ** प्रातः-स्नानानन्तरम् । **प्रणवेने**त्याद्युक्तार्थम् । यत् **सप्तप्रणवेनाभिमन्त्रितं** तत् **आगमेन तु** आगममध्यविलसितपञ्चाक्षरेणापि । **तेनैव दिग्बन्धनं कारयेत्** । **पुनरपि तेन** पञ्चाक्षरास्त्रमन्त्रेण **मूर्धादिसर्वाङ्गं उद्धूलयेत्** इति यत्तदिदं **मलस्नानं**, एवं मलस्नानतो निर्मलो भवतीत्यर्थः ॥ २ ॥

विधिस्नानं कीदृशं इत्यत आह—**ईशाद्यै**रिति । उक्तार्थमेतत् ॥ ३ ॥ **तत्र** एवमुक्तार्थप्रकाशकाः **श्लोकाः** मन्त्रा **भवन्ती**त्याह—**भस्मे**ति । मन्त्रोक्त-स्नानद्वयं पुरोक्तब्राह्मणेनैव व्याख्यातम् ॥ ४ ॥ **ईशाने** ईशानमन्त्रेण ॥ ५ ॥ **चतुर्थवक्त्रेण** तत्पुरुषमन्त्रेण सप्तधा विकिरेत् । **हृदि अघोरमन्त्रेण अष्टधा** विकिरेत् । **गुह्यदेशे** गुह्योपरि नाभिदेशे **तु** वामदेवमन्त्रेण नवधा विकिरेत् । तत्तदङ्गविद्यमानत्रिदशानां हस्तादिस्थानभेदतः ॥ ६ ॥ उर आद्यष्टावङ्गानि विद्यन्ते । तत्र **अङ्गेन** हृदयादिमनुना **साध्येन** स्वाभिलषितसाध्यनामाक्षरयुक्ते-नाभिमन्त्र्य, **पादावुद्धूल्य**, ततो ब्राह्मणेन विधिवत् **सर्वाङ्गोद्धूलनं कार्य**मित्यर्थः ॥

[1] क्रतु—क.

ब्राह्मणेतरस्य कथमित्यत आह—**राजन्यस्येति**। राजन्यस्यायं विधिः—**मुखं** तत्पुरुषस्थानं **विना** क्रमयोगतः **सर्वमुद्धूळ्य** नित्यादिकर्म कर्तव्यमित्यर्थः ॥ ७ ॥

भस्मस्नानकालविशेषाः

संध्याद्वये निशीथे च तथा पूर्वावसानयोः ।
सुप्त्वा भुक्त्वा पयः पीत्वा कृत्वा चावश्यकादिकम् ॥ ८ ॥
स्त्रियं नपुंसकं गृध्रं बिडालं वक्रमूषिकम् ।
स्पृष्ट्वा तथाविधानन्यान् भस्मस्नानं समाचरेत् ॥ ९ ॥
देवाग्निगुरुवृद्धानां समीपेऽन्त्यजदर्शने ।
अशुद्धभूतले मार्गे कुर्यान्नोद्धूलनं व्रती ॥ १० ॥

कदा कदा भस्मस्नानं कर्तव्यं इत्यत आह—**सन्ध्याद्वय** इति ॥ ८–९ ॥ अन्वयमुक्त्वा व्यतिरेकमाह—**देवाग्नी**ति ॥ १० ॥

ज्ञानार्थिना शङ्खतोयादिमिश्रभस्म धार्यम्

शङ्खतोयेन मूलेन भस्मना मिश्रणं भवेत् ।
योजितं चन्दनेनैव वारिणा भस्मसंयुतम् ॥ ११ ॥
चन्दनेन समालिम्पेज्ज्ञानदं चूर्णमेव तत् ।
मध्याह्नात् प्राग्जलैर्युक्तं तोयं तदनु वर्जयेत् ॥ १२ ॥

किं केवलभस्म धार्यं इत्यत्र यदि ज्ञानार्थी तदा तेन शङ्खतोयादिमिश्रभस्म धार्यं इत्यत आह—**शङ्खतोये**नेति। **मूलेन** मूलमन्त्राभिमन्त्रितशङ्खतोयेनेत्यर्थः ॥ ११ ॥ किं सदैवं धार्यं तत्राह—**मध्याह्नात्** इति ॥ १२ ॥

त्रिपुण्ड्रविधिः

अथ भुसुण्डो भगवन्तं कालाग्निरुद्रं त्रिपुण्ड्रविधिं पप्रच्छ ॥ १३ ॥

तत्रैते श्लोका भवन्ति—

त्रिपुण्ड्रं कारयेत् पश्चाद्ब्रह्मविष्णुशिवात्मकम् ।
मध्याङ्गुलीभिरादाय तिसृभिर्मूलमन्त्रतः ॥ १४ ॥
अनामामध्यमाङ्गुष्टैरथवा स्यात्त्रिपुण्ड्रकम् ।
उद्धूलयेन्मुखं विप्रः क्षत्रियस्तच्छिरोदितम् ॥ १५ ॥
द्वात्रिंशत्स्थानके[1]चार्धं षोडशस्थानकेऽपि वा ।
अष्टस्थाने तथा चैव पञ्चस्थानेऽपि योजयेत् ॥ १६ ॥
उत्तमाङ्गे ललाटे च कर्णयोर्नेत्रयोस्तथा ।
नासावक्त्रे गले चैवमंसद्वयमतः परम् ॥ १७ ॥
कूर्परे मणिबन्धे च हृदये पार्श्वयोर्द्वयोः ।
नाभौ गुह्यद्वये चैवमूर्वोः स्फिग्बिम्बजानुनी ॥ १८ ॥
जङ्घाद्वये च पादौ च द्वात्रिंशत्स्थानमुत्तमम् ।
अष्टमूर्त्यष्टविद्येशान् दिक्पालान् वसुभिः सह ॥ १९ ॥
धरो ध्रुवश्च सोमश्च कृपश्चैवानिलोऽनलः ।
प्रत्यूषश्च प्रभासश्च वसवोऽष्टावितीरिताः ॥ २० ॥
एतेषां नाममन्त्रेण त्रिपुण्ड्रं धारयेद्बुधः ।
विदध्यात् षोडशस्थाने त्रिपुण्ड्रं तु समाहितः ॥ २१ ॥
शीर्षके च ललाटे च कण्ठे चांसद्वये तथा ।
कूर्परे मणिबन्धे च हृदये नाभिपार्श्वयोः ॥ २२ ॥

[1] चाथ—क.

पृष्ठे चैकं प्रतिस्थानं जपेत्तत्राधिदेवताः ।
शिवशक्तिं च सादाख्यामीशं विद्याऽऽख्यमेव च ॥ २३ ॥
वामादिनवशक्तीश्च एते षोडश देवताः ।
[1]नासत्यो दस्रकश्चैव अश्विनौ द्वौ समीरितौ ॥ २४ ॥
अथवा मूर्ध्न्यलीके च कर्णयोः श्वसने तथा ।
बाहुद्वये च हृदये नाभ्यामूर्वोर्युगे तथा ॥ २५ ॥
जानुद्वये च पदयोः पृष्ठभागे च षोडश ।
शिवश्चेन्द्रश्च रुद्राकौं विघ्नेशो विष्णुरेव च ॥ २६ ॥
श्रीश्चैव हृदयेशश्च तथा नाभौ प्रजापतिः ।
नागश्च नागकन्याश्च उभे च ऋषिकन्यके ॥ २७ ॥
पादयोश्च समुद्राश्च तीर्थाः पृष्ठेऽपि च स्थिताः ।
एवं वा षोडशस्थानमष्टस्थानमथोच्यते २८ ॥
गुरुस्थानं ललाटं च कर्णद्वयमनन्तरम् ।
अंसयुग्मं च हृदयं नाभिरित्यष्टमं भवेत् ॥ २९ ॥
ब्रह्मा च ऋषयः सप्त देवताश्च प्रकीर्तिताः ।
अथवा मस्तकं बाहू हृदयं नाभिरेव च ॥ ३० ॥
पञ्च स्थानान्यमून्याहुर्भस्मतत्त्वविदो जनाः ।
यथासंभवतः कुर्याद्देशकालाद्यपेक्षया ॥ ३१ ॥

भुसुण्डः तदुक्तोद्गूळनविधिं ज्ञात्वा त्रिपुण्ड्रविधिं ज्ञातुं पृच्छतीत्याह—
थेति ॥ १३ ॥ तत्प्रश्नानुरोधेन भगवता यद्वक्तव्यं तत्र प्राचीना मन्त्रास्तदर्थ-

[1] नासत्यौ—क. नासत्या—अ २.

प्रकाशका भवन्तीत्याह—तत्रैते श्लोका भवन्तीति। ब्रह्मविष्णुशिवात्मकमेतदिति ज्ञात्वा त्रिपुण्ड्रं धारयेत् । तत्रादौ मध्याङ्गुलीभिः तिसृभिः मूलमन्त्रतः त्रिपुण्ड्रं कुर्यात् ॥ १४ ॥ अथवा अनामिकामध्यमाङ्गुष्ठैः त्रिपुण्ड्रं धारयेत् । ब्रह्मक्षत्रयोर्विशेषविधिमाह—उद्धूळयेदिति ॥ १५ ॥ त्रिपुण्ड्रधारणीयस्थानानि कतीत्याशङ्क्याह—द्वात्रिंशदिति ॥ १६ ॥ तत्र तदधिष्ठानदेवतासहितं द्वात्रिंशत्स्थानं निर्दिशति—उत्तमाङ्ग इति ॥ १७–१८ ॥ अष्टमूर्तयस्तु शिखण्डिश्रीकण्ठप्रभृतयः, सत्येशाद्या अष्टविद्याः, तदीशास्तु शिवोत्तमादयः शैवागमप्रसिद्धाः, अष्टवसवस्तु धरादयः । दिक्पाला इन्द्रादयः ॥ १९–२० ॥ षोडशस्थानं विशदयति—विदध्यादिति । पुनः पक्षान्तरमाह—अथवेति ॥ २१–२७ ॥ एवं वा षोडशस्थानं जानीयादित्यर्थः ॥ २८–२९ ॥ पक्षान्तरमाह—अथवेति ॥ ३० ॥ पर्यायचतुष्टयेषु कः पर्यायोऽनुष्ठेयः इत्यत आह—यथेति ॥ ३१ ॥

उद्धूळनाशक्तौ त्रिपुण्ड्रधारणम्

उद्धूलनेऽप्यशक्तश्चेत्त्रिपुण्ड्रादीनि कारयेत् ।
ललाटे हृदये नाभौ गले च मणिबन्धयोः ।
बाहुमध्ये बाहुमूले पृष्ठे चैव च शीर्षके ॥ ३२ ॥

ललाटे ब्रह्मणे नमः । हृदये हव्यवाहनाय नमः । नाभौ स्कन्दाय नमः । गले विष्णवे नमः । मध्ये प्रभञ्जनाय नमः । मणिबन्धे वसुभ्यो नमः । पृष्ठे हरये नमः । ककुदि शंभवे नमः । शिरसि परमात्मने नमः । इत्यादिस्थानेषु त्रिपुण्ड्रं धारयेत् ॥३३॥

त्रिणेत्रं त्रिगुणाधारं त्रयाणां जनकं प्रभुम् ।
स्मरन्नमः शिवायेति ललाटे [1]तत्त्रिपुण्ड्रकम् ॥ ३४ ॥

[1] तु त्रि—अ २, क.

कूर्पराधः पितृभ्यां तु ईशानाभ्यां तदोपरि ।
ईशाभ्यां नम इत्युक्त्वा पार्श्वयोश्च त्रिपुण्ड्रकम् ॥ ३५ ॥
स्वच्छाभ्यां नम इत्युक्त्वा धारयेत्तत्प्रकोष्ठयोः ।
भीमायेति तथा पृष्ठे शिवायेति च पार्श्वयोः ॥ ३६ ॥
नीलकण्ठाय शिरसि क्षिपेत् सर्वात्मने नमः ।
पापं नाशयते कृत्स्नमपि जन्मान्तरार्जितम् ॥ ३७ ॥
कण्ठोपरि कृतं पापं नष्टं स्यात्तत्र धारणात् ।
कर्णे तु धारणात् कर्णरोगादिकृतपातकम् ॥ ३८ ॥
बाह्वोर्बाहुकृतं पापं वक्षःसु मनसा कृतम् ।
नाभ्यां शिश्नकृतं पापं पृष्ठे गुदकृतं तथा ॥ ३९ ॥
पार्श्वयोर्धारणात् पापं परस्त्रयालिङ्गनादिकम् ।
तद्भस्मधारणं कुर्यात् सर्वत्रैव त्रिपुण्ड्रकम् ॥ ४० ॥
ब्रह्मविष्णुमहेशानां त्रय्यग्नीनां च धारणम् ।
गुणलोकत्रयाणां च धारणं तेन वै श्रुतम् ॥ ४१ ॥

उद्धूळनत्रिपुण्ड्रयोः किमनुष्ठेयं इत्यत आह—उद्धूळनेऽपीति । कुत्र धार्यं त्रिपुण्ड्रं इत्यत आह—ललाट इति ॥ ३२–३३ ॥ पर्यायान्तरेण त्रिपुण्ड्रविधिं तत्फलं चाह—त्रिणेत्रमिति ॥ ३४–४० ॥ येन यदा विधिवद्विभूतिधारणं कृतं तेन ब्रह्मादिधारणं कृतमित्यर्थः ॥ ४१ ॥

इति चतुर्थं ब्राह्मणम्

पञ्चमं ब्राह्मणम्

वेदत्रयदृष्टिपूर्वकं त्रिपुण्ड्रधारणम्

मानस्तोकेति मन्त्रेण मन्त्रितं भस्म धारयेत् ।
ऊर्ध्वपुण्ड्रं भवेत् साम मध्यपुण्ड्रं त्रियायुषम् ॥ १ ॥
त्रियायुषाणि कुरुते ललाटे च भुजद्वये ।
नाभौ शिरसि हृत्पार्श्वे ब्राह्मणाः क्षत्रियास्तथा ॥ २ ॥

पुनर्विधाऽन्तरेण भस्मधारणत्रिपुण्ड्रवेदत्रयदृष्टिब्राह्मणादिवर्णचतुष्टयभस्मभेदभस्मधारणविशिष्टफलं तद्दूषकमहापातकित्वं सर्ववर्णाश्रमावश्यधारकत्वं चाह भगवान् कालाग्निरुद्र इति श्रुतिराह—**मा नस्तोकेतीति** । **"मा नस्तोके तनये"** इति **मन्त्रेण** अभिमन्त्रितं त्रिपुण्ड्रं **भस्म धारयेत्** । तत्र **ऊर्ध्वपुण्ड्रं साम भवेत्**, ऋगाद्यपेक्षया साम्न ऊर्ध्वत्वात् । ऊर्ध्वभागविलसिततिर्यक्पुण्ड्रे सामदृष्टिः कर्तव्येत्यर्थः । **मध्यपुण्ड्रं** तु **त्रियायुषं**—याजुषमित्यर्थे यायुषमिति वर्णव्यत्ययः । मध्यस्थतिर्यक्पुण्ड्रं संहितापदक्रमविशिष्टं त्रियायुषं विद्धीत्यर्थः । अधःस्थतिर्यक्पुण्ड्रे तु ऋग्वेददृष्टिः कर्तव्येत्यध्याहार्यम् ॥ १ ॥ य एवं रेखात्रये ऋक्सामत्रियायुषाणि तद्विशिष्टदृष्टिं **कुरुते** स विशिष्टफलभाक् भवतीत्यर्थः । यथा ब्राह्मणास्तथा क्षत्रियादयोऽपि ललाटे भुजद्वये नाभौ शिरसि हृत्पार्श्वे च त्रिपुण्ड्रं कुर्वन्त्वित्यर्थः ॥ २ ॥

वर्णाश्रमभेदानुसारेण भस्मविशेषविधिः

त्रैवर्णिकानां सर्वेषामग्निहोत्रसमुद्भवम् ।
इदं मुख्यं गृहस्थानां विरजानलजं भवेत् ॥ ३ ॥
विरजानलजं चैव धार्यं प्रोक्तं महर्षिभिः ।
औपासनसमुत्पन्नं गृहस्थानां विशेषतः ॥ ४ ॥

समिदग्निसमुत्पन्नं धार्यं वै ब्रह्म[1]चारिणा ।
शूद्राणां श्रोत्रियागारपचनाग्निसमुद्भवम् ॥ ५ ॥
अन्येषामपि सर्वेषां धार्यं [2]चैवानलोद्भवम् ।
यतीनां ज्ञानदं प्रोक्तं वनस्थानां विरक्तिदम् ।
अतिवर्णाश्रमाणां तु श्मशानाग्निसमुद्भवम् ॥ ६ ॥
सर्वेषां देवालयस्थं भस्म शिवाग्निजं शिवयोगिनाम् ।
शिवालयस्थं तल्लिङ्गलिप्तं वा मन्त्रसंस्कारदग्धं वा ॥ ७ ॥

त्रैवर्णिकानां त्रैवर्णिकैः श्रौताग्निहोत्रसमुद्भवं भस्म धार्यमित्यर्थः ॥ ३ ॥ गृहस्थैः विरजानलजं भस्म धार्यमिति महर्षिभिः प्रोक्तम् । औपासनसमुत्पन्नं यदि स्वीयं तदा गृहस्थैः विशेषतो धार्यं इति च ॥ ४ ॥ समिदाधानाग्निजं भस्म ब्रह्मचारिणा धार्यम् । शूद्रैः श्रोत्रियपचनाग्निजं भस्म धार्यम् ॥ ५ ॥ विधिवत्सिद्धभस्मालाभे सर्वेषां गोमयशुष्कजं भस्म धार्यमेव । तद्भस्म यतीनां ज्ञानदं, वनस्थानां विरक्तिदम् । अतिवर्णाश्रमस्थानामवधूतानां श्मशानाग्निजं भस्म विहितमित्यर्थः ॥ ६ ॥ सर्वेषां शिवयोगिनां शिवालयस्थं शिवाग्निजं शिवलिङ्गलिप्तं वा मन्त्रसंस्कारदग्धं वा विहितमित्यर्थः ॥ ७ ॥

भस्मधारणे फलविशेषः

अत्रैते श्लोका भवन्ति—

तेनाधीतं श्रुतं तेन तेन सर्वमनुष्ठितम् ।
येन विप्रेण शिरसि त्रिपुण्ड्रं भस्मना धृतम् ॥ ८ ॥
त्यक्तवर्णाश्रमाचारो लुप्तसर्वक्रियोऽपि यः ।
सकृत्तिर्यक्त्रिपुण्ड्राङ्कधारणात् सोऽपि पूज्यते ॥ ९ ॥

[1] चारिणः—अ ।, उ १. [2] दावा—अ १.

एवं विधिभस्मधारी कृतार्थो भवति तद्विपरीतस्तद्दूषको वा हीयत इत्यस्मिन्नर्थे प्रकाशकाः एते मन्त्रा भवन्तीत्याह—अत्रैते श्लोका भवन्तीति। "तेनाधीतं" इत्यादि "धिग्विद्यामशिवात्मिकां" इत्यन्तं स्पष्टम् ॥ ८–१७ ॥

भस्मधारणविमुखस्य दूषणम्

ये भस्मधारणं त्यक्त्वा कर्म कुर्वन्ति मानवाः।
तेषां नास्ति विनिर्मोक्षः संसाराज्जन्मकोटिभिः ॥ १० ॥
महापातकयुक्तानां पूर्वजन्मार्जितागसाम्।
त्रिपुण्ड्रोद्धूलने द्वेषो जायते सुदृढं बुधाः ॥ ११ ॥
येषां कोपो भवेद्ब्रह्मन् ललाटे भस्मदर्शनात्।
तेषामुत्पत्तिसांकर्यमनुमेयं विपश्चिता ॥ १२ ॥
येषां नास्ति मुने श्रद्धा श्रौते भस्मनि सर्वदा।
गर्भाधानादिसंस्कारस्तेषां नास्तीति निश्चयः ॥ १३ ॥
ये भस्मधारिणं दृष्ट्वा नराः कुर्वन्ति ताडनम्।
तेषां चण्डालतो जन्म ब्रह्मन्नूह्यं विपश्चिता ॥ १४ ॥
येषां क्रोधो भवेद्भस्मधारणे तत्प्रमाणके।
ते महापातकैर्युक्ता इति शास्त्रस्य निश्चयः ॥ १५ ॥
त्रिपुण्ड्रं ये विनिन्दन्ति निन्दन्ति शिवमेव ते।
धारयन्ति च ये भक्त्या धारयन्ति शिवं च ते ॥ १६ ॥
धिग्भस्मरहितं फालं धिग्ग्राममशिवालयम्।
धिगनी[1]शार्चनं जन्म धिग्विद्यामशिवात्मिकाम् ॥ १७ ॥

[1] शात्मकं—अ १, अ २, उ १.

भस्मनिष्ठस्य स्वरूपमहिमवर्णनम्

रुद्राज्ञेर्यत् परं वीर्यं तद्भस्म परिकीर्तितम् ।
तस्मात् सर्वेषु कालेषु वीर्यवान् भस्मसंयुतः ॥ १८ ॥
भस्मनिष्ठस्य दह्यन्ते दोषा भस्माग्निसंगमात् ।
भस्मस्नानविशुद्धात्मा भस्मनिष्ठ इति स्मृतः ॥ १९ ॥
भस्मसंदिग्धसर्वाङ्गो भस्मदीप्तत्रिपुण्ड्रकः ।
भस्मशायी च पुरुषो भस्मनिष्ठ इति स्मृतः ॥ २० ॥

स्वातिरिक्तभ्रमद्रावको हि **रुद्रः** स एव **अग्निः** तस्य **यत् परं वीर्यं** स्वातिरिक्तासंभवप्रबोधजनकसामर्थ्यं **तदेव** स्वातिरिक्तभस्म स्वातिरिक्तापह्नवसिद्धं ब्रह्मेति स्मृतम् । यस्मादेवं **तस्मात्** कालत्रयेऽपि स्वातिरिक्तभस्मसंयुतः पुमान् **वीर्यवान्** भवेत् ॥ १८ ॥ एवं **भस्मनिष्ठस्य भस्माग्निसङ्गमात्** स्वातिरिक्तास्तिताभ्रान्तिसंभवा **दोषाः** दह्यन्ते भस्मभावं भजन्ति । इत्थंभूतो **भस्मस्नानविशुद्धात्मा भस्मनिष्ठो** भवति **इति स्मृतः** ॥ १९ ॥ यद्वा—**भस्मसन्दिग्धसर्वाङ्गः** ज्ञानाग्निभस्मीकृतसर्वाङ्गः भस्मावकुण्ठितसर्वाङ्गो वा **भस्मसंदीप्तत्रिपुण्ड्रकः भस्मशायी च** पुमान् **भस्मनिष्ठो** भवति **इति स्मृतः** ॥ २० ॥

इति पञ्चमं ब्राह्मणम्

षष्ठं ब्राह्मणम्

नामपञ्चकमाहात्म्यजिज्ञासा

अथ भुसुण्डः कालाग्निरुद्रं नामपञ्चकस्य माहात्म्यं ब्रूहीति होवाच ॥ १ ॥

विभूत्यादिनामपञ्चकमाहात्म्यबुभुत्सया भुसुण्डो भगवन्तं पृच्छतीत्याह— अथेति ॥ १ ॥

भस्ममाहात्म्यख्यापनार्था करुणाख्यायिका

अथ वसिष्ठवंशजस्य शतभार्यासमेतस्य धनंजयस्य ब्राह्मणस्य ज्येष्ठभार्यायाः पुत्रः करुण इति नाम । तस्य शुचिस्मिता भार्या । असौ करुणो भ्रातृवैरमसहमानो भवानीतटस्थं नृसिंहमगमत् । तत्र देवसमीपेऽन्येनोपायनार्थं समर्पितं जम्बीरफलं गृहीत्वाऽजिघ्रत् । तदा तत्रस्था अशपन् पाप मक्षिको भव वर्षाणां शतमिति । सोऽपि शापमादाय मक्षिकः सन् स्वचेष्टितं तस्यै निवेद्य मां रक्षेति स्वभार्यामवदत् । तदा मक्षिकोऽभवत् । तमेवं ज्ञात्वा ज्ञातयस्तैलमध्ये ह्यमारयन् । सा मृतं पतिमादायारुन्धतीमगमत् । भो शुचिस्मिते शोकेनालमरुन्धत्याहामुं जीवयाम्यद्य विभूतिमादायेति । एषाऽग्निहोत्रजं भस्म—

मृत्युंजयेन मन्त्रेण मृतजन्तौ तदाऽक्षिपत् ।
मन्दवायुस्तदा जज्ञे व्यजनेन शुचिस्मिते ॥ २ ॥
उदतिष्ठत्तदा जन्तुर्भस्मनोऽस्य प्रभावतः ।
ततो वर्षशते पूर्णे ज्ञातिरेको ह्यमारयत् ॥ ३ ॥
भस्मैव जीवयामास काश्यां पञ्च तथाऽभवन् ।
देवानपि तथाभूतान् मामप्येतादृशं पुरा ॥ ४ ॥
तस्मात्तु भस्मना जन्तुं जीवयामि [1]तदाऽनघे ।

[1] तवान—क.

इत्येवमुक्त्वा भगवान् दधीचिः समजायत ।
स्वरूपं च ततो गत्वा स्वमाश्रमपदं ययाविति ॥ ॥ ९ ॥

एवं पृष्टो भगवान् आख्यायिकां वक्तव्यार्थे प्रमाणयति—**अथेति** ॥२–३॥ **यस्मात् देवानपि तथाभूतान्** स्वकृतदोषतो विपरीतभावमापन्नान् **मामप्येतादृशं** भस्मैव जीवयामासेति यस्मादेवं विश्रुतं **तस्मात्** मक्षिकत्वमापन्नमेतं **जन्तुं हे अनघे** शुचिस्मिते **भस्मना जीवयामीत्युक्त्वा** मक्षिकत्वमापन्नकरुणोपरि भस्म प्राक्षिपत् । ततोऽसौ करुणो **भगवान्** द्विजशापात् आगतमक्षिकत्वं विहाय **दधीचिरिति** नाम्ना **समजायत** । ततो यथापूर्वस्थितिं **गत्वा स्वमाश्रमपदं ययौ** । धनञ्जयसूनुः यथावत् स्वाश्रमं गतवानित्यर्थः । **इति**शब्दः करुणाख्यायिकासमाप्त्यर्थः ॥ ४–९ ॥

भस्मनः पापघ्नत्वख्यापनार्था अहल्याख्यायिका

इदानीमस्य भस्मनः सर्वाघभक्षणसामर्थ्यं विधत्त इत्याह । श्रीगौतमविवाहकाले तामहल्यां दृष्ट्वा सर्वे देवाः कामातुरा अभवन् । तदा नष्टज्ञाना [1]दुर्वाससं गत्वा पप्रच्छुः । तद्दोषं शमयिष्यामीत्युवाच । ततः शतरुद्रेण मन्त्रेण मन्त्रितं भस्म वै पुरा मयाऽपि दत्तं तेनैव ब्रह्महत्याऽऽदि शान्तम् ॥ ६ ॥

इत्येवमुक्त्वा दूर्वासा दत्तवान् भस्म चोत्तमम् ।
जाता मद्वचनात् सर्वे यूयं तेऽधिकतेजसः ॥ ७ ॥
शतरुद्रेण मन्त्रेण भस्मोद्धूलितविग्रहाः ।
निर्धूतरजसः सर्वे तत्क्षणाच्च वयं मुने ।
आश्चर्यमेतज्जानीमो भस्मसामर्थ्यमीदृशम् ॥ ८ ॥

[1] दूर्वा—उ १.

सर्वपापघ्नं भस्मेत्यत्र आख्यायिकाऽन्तरमाह—इदानीमिति ॥ ६–८ ॥

भस्मनः हरिशंकरज्ञानप्रदत्वम्

अस्य भस्मनः शक्तिमन्यां शृणु । एतदेव हरिशंकरयोर्ज्ञानप्रदं ब्रह्महत्याऽऽदिपापनाशकं महाविभूतिदमिति ॥ ९ ॥ शिववक्षसि स्थितं नखेनादाय प्रणवेनाभिमन्त्र्य गायत्र्या पञ्चाक्षरेणाभिमन्त्र्य हरिमस्तकगात्रेषु समर्पयेत् । [1]तदा हृदि ध्यायस्वेति हरिमुक्त्वाऽथ हरिः स्वहृदि ध्यात्वा दृष्टो दृष्ट इति शिवमाह ॥ १० ॥

ततो भस्म भक्षयेति हरिमाह हरस्ततः ।
भक्षयिष्ये शिवं भस्म स्नात्वाऽहं भस्मना पुरा ॥ ११ ॥
पृष्ट्वेश्वरं भक्तिगम्यं भस्माभक्षयदच्युतः ।
तत्राश्चर्यमतीवासीत् प्रतिबिम्बसमद्युतिः ॥ १२ ॥
वासुदेवः शुद्धमुक्ताफलवर्णोऽभवत् क्षणात् ।
तदाप्रभृति शुक्लाभो वासुदेवः प्रसन्नवान् ॥ १३ ॥
न शक्यं भस्मनो [2]ज्ञानप्रभावं ते कुतो विभो ।
नमस्तेऽस्तु नमस्तेऽस्तु त्वामहं शरणं गतः ॥ १४ ॥
त्वत्पादयुगले शंभो भक्तिरस्तु सदा मम ।
भस्मधारणसंपन्नो मम भक्तो भविष्यति ॥ १५ ॥

पुनरपि भस्म स्तौति—अस्येति । किं तन्माहात्म्यं इत्यत्राह—एतदेवेति ॥ ९ ॥ कथमस्य हरिशङ्करज्ञानप्रदत्वमित्यत्र आख्यायिकामवतारयति—

[1] ततो—क. [2] ज्ञानेप्र—अ १, क.

शिववक्षसीति । शिवस्य शिवत्वहेतु स्वातिरिक्तभस्मैव शिवत्वसिद्धेः स्वातिरिक्ता-शिवत्वापह्नवपूर्वकत्वात् तथा हरेरपि ज्ञानप्रदं भस्मैव । तत् कथमित्यत्राऽऽह—**तदेति** ॥ १०–१३ ॥ यद्भस्मस्पर्शनभक्षणाभ्यां नीलवर्णो वासुदेवः शुक्लवर्णोऽ-भवत् तद्भस्ममाहात्म्यं वक्तुं न शक्यमित्याह—**न शक्यमिति** । हे **विभो** व्यापकेश्वर **ते** तव **भस्मनो ज्ञानप्रभावं** त्वयाऽपि ज्ञातुं **न हि शक्यम्** । **कुतो** (न) मया तत् ज्ञातुं शक्यम् । यतस्त्वं स्वातिरिक्तभस्मसिद्धोऽसि अतस्ते नमोऽस्त्वित्याह—**नम** इति ॥ १४ ॥ हरिणा प्रार्थितो हर आह—**भस्मेति** । यो भस्मधारी स मद्भक्त एवेत्यर्थः ॥ १५ ॥

भस्मनः भूतिकरत्वम्

अत एवैषा भूतिर्भूतिकरीत्युक्ता । अस्य पुरस्ताद्वसव आसन् रुद्रा दक्षिणत आदित्याः पश्चाद्विश्वेदेवा उत्तरतो ब्रह्मविष्णुमहेश्वरा नाभ्यां सूर्याचन्द्रमसौ पार्श्वयोः ॥ १६ ॥

यत एवं **अत एवेति** । तत् कथं इत्यत्र वस्वादिविभूतीनामेतदायत्तत्वात् इत्याह—**अस्येति** । अस्य भस्मनो वस्वाद्यास्पदत्वात् वस्वादिभूतीनां तदायत्त-त्वात् भूतेः भूतिकरत्वं युज्यत इत्यर्थः ॥ १६ ॥

ब्रह्मभावरहितज्ञानतत्साधनानां वैय्यर्थ्यम्

तदेतदृचाऽभ्युक्तम्—

ऋचो अक्षरे परमे व्योमन् यस्मिन् देवा अधि विश्वे निषेदुः ।
यस्तन्न वेद किमृचा करिष्यति य इत्तद्विदुस्त इमे समासते ॥१७॥

स्वातिरिक्तभस्मसिद्धब्रह्ममात्रज्ञानतत्साधनानां ब्रह्मभावादृते वैय्यर्थ्यं स्यादि-त्येतदृगादिनाऽभ्युक्तमित्याह—**तदेतदृचाऽभ्युक्तमिति** । ऋगादयः सर्ववेदाः

अक्षरे स्वातिरिक्ताक्षरभस्मतः सिद्धे परमे व्योमनि निषेदुः यस्मिन्नक्षरे विराडादयो देवाः अधिनिषेदुः । यदृगादिवेदमस्तकप्रतिपाद्यं ब्रह्म निष्प्रतियोगिकस्वमात्रमिति ऋगादिवेदविहितकर्मचित्तशुद्धिसंन्यासश्रवणादिसाधनेन यदि यो न वेद तदा स ऋचा किं करिष्यति न किमपीत्यर्थः । ये ऋगादितज्जकर्मसंन्यासश्रवणादि-सज्ञातज्ञानेन विदुस्त इमे ब्रह्मविद्वरीयांसस्ते स्वे महिम्नि समासते ब्रह्मैव भवन्तीत्यर्थः ॥ १७ ॥

बृहज्जाबालविद्यामहिमा

यदेतद्बृहज्जाबालं सार्व[1]कामिकं मोक्षद्वारमृङ्मयं यजुर्मयं साममयं ब्रह्ममयममृतमयं भवति । यदेतद्बृहज्जाबालं बालो वा युवा वा वेद स महान् भवति । स गुरुः सर्वेषां मन्त्राणामुपदेष्टा भवति । मृत्युतारकं गुरुणा लब्धं कण्ठे बाहौ शिखायां वा बध्नीत । सप्तद्वीप-वती भूमिर्दक्षिणार्थं नावकल्पते तस्माच्छ्रद्धया यां कांचिद्वां दद्यात् सा दक्षिणा भवति ॥ १८ ॥

यदेतत्स्वातिरिक्तभस्मज्ञानप्रकाशकं ग्रन्थजातं तदपि तन्मयमिति स्तौति—यदेतदिति । ऋगादिसाहचर्यात् ब्रह्मशब्देन अथर्ववेद उच्यते । यदेतद्ग्रन्थ-जातार्थवित् सर्वज्ञेश्वरो भवति एतदुपदेष्टुः सर्वस्वमपि दातुं नालमित्याह—यदिति ॥ १८ ॥

इति षष्ठं ब्राह्मणम्

---

[1] कालिकं—क.

सप्तमं ब्राह्मणम्

त्रिपुण्ड्रविधिः

अथ जनको वैदेहो याज्ञवल्क्यमुपसमेत्योवाच भगवन् त्रिपुण्ड्र-विधिं नो ब्रूहीति ॥ १ ॥

स होवाच सद्योजातादिपञ्चब्रह्ममन्त्रैः परिगृह्याग्निरिति भस्मेत्यभिमन्त्र्य मानस्तोक इति समुद्धृत्य त्रियायुषमिति जलेन संसृज्य त्र्यम्बकं यजामह इति मन्त्रेण शिरोललाटवक्षःस्कन्धेषु त्रिपुण्ड्रं धृत्वा पूतो भवति मोक्षी भवति । शतरुद्रेण यत् फलमवाप्नोति तत् फलमश्नुते स एष भस्मज्योतिरिति वै याज्ञवल्क्यः ॥ २ ॥

त्रिपुण्ड्रविषये जनकयाज्ञवल्क्याख्यायिकामवतारयति—अथेति ॥ १ ॥ जनकप्रश्नोत्तरं मुनिराह—स होवाचेति । एतदर्थस्य पुरा प्रपञ्चितत्वात् नेह पुनरर्थो वर्णितः ॥ २ ॥

भस्मधारणफलम्

जनको ह वैदेहः स होवाच याज्ञवल्क्यं [1]भस्मधारणात् किं फलमश्नुत इति ॥ ३ ॥

स होवाच तद्भस्मधारणादेव मुक्तिर्भवति तद्भस्मधारणादेव शिवसायुज्यमवाप्नोति न स पुनरावर्तते न स पुनरावर्तते स एष भस्मज्योतिरिति वै याज्ञवल्क्यः ॥ ४ ॥

[1] भस्मधारिणा—उ.

जनको ह वैदेहः स होवाच याज्ञवल्क्यं भस्मधारणात् किं फलमश्नुते न वेति ॥ ५ ॥

तत्र परमहंसा नाम संवर्तकारुणिश्वेतकेतुदुर्वासऋभुनिदाघजड-भरतदत्तात्रेयरैवतकमुसुण्डप्रभृतयो विभूतिधारणादेव मुक्ताः स्युः स एष भस्मज्योतिरिति वै याज्ञवल्क्यः ॥ ६ ॥

पुनर्भस्मधारणफलं पृच्छति—जनक इति ॥ ३ ॥ स्वातिरिक्तं भस्मेति धारणात् निश्चयज्ञानात् स्वमात्रावशेषणरूपेयं मुक्तिः भवतीत्यर्थः ॥ ४ ॥ श्रुतार्थदार्ढ्याय पुनः पृच्छतीत्याह—जनक इति ॥ ५ ॥ राज्ञा पृष्टेऽर्थे शिष्टाचारं प्रमाणयति—तत्रेति ॥ ६ ॥

भस्मस्नानफलम्

जनको ह वैदेहः स होवाच याज्ञवल्क्यं भस्मस्नानेन किं जायत इति ॥ ७ ॥

यस्य कस्यचिच्छरीरे यावन्तो रोमकूपास्तावन्ति लिङ्गानि भूत्वा तिष्ठन्ति ब्राह्मणो वा क्षत्रियो वा वैश्यो वा शूद्रो वा तद्भस्मधारणादेतच्छब्दस्य रूपं यस्यां तस्यां ह्येवावतिष्ठते ॥ ८ ॥

भस्मस्नानं किंफलकं इति पुनः पृच्छति—जनक इति ॥ ७ ॥ पृष्टो मुनिराह—यस्येति ॥ ८ ॥

त्रिपुण्ड्रमाहात्म्यम्

जनको ह वैदेहः पैप्पलादेन सह प्रजापतिलोकं जगाम तं गत्वोवाच भो प्रजापते त्रिपुण्ड्रस्य माहात्म्यं ब्रूहीति ॥ ९ ॥

तं प्रजापतिरब्रवीद्यथैवेश्वरस्य माहात्म्यं तथैव त्रिपुण्ड्रस्येति ॥ १० ॥

अथ पैप्पलादो वैकुण्ठं जगाम तं गत्वोवाच भो विष्णो त्रिपुण्ड्रस्य माहात्म्यं ब्रूहीति ॥ ११ ॥

यथैवेश्वरस्य माहात्म्यं तथैव त्रिपुण्ड्रस्येति विष्णुराह ॥ १२ ॥

गुरुदेवतापरायणोऽपि सम्राट् पामरलोकसंशयोच्छित्तये ब्रह्मविष्णुरुद्रलोकान् गत्वा ब्रह्मादिमुखतोऽपि त्रिपुण्ड्रमाहात्म्यमवगम्य सर्वत्र प्रकाशयामासेत्याह—जनक इति ॥ ९–१४ ॥

विभूतिधारणमहिमा

अथ पैप्पलादः कालाग्निरुद्रं परिसमेत्योवाचाधीहि भगवन् त्रिपुण्ड्रस्य विधिम् ॥ १३ ॥

त्रिपुण्ड्रस्य विधिर्मया वक्तुं न शक्यमिति सत्यमिति होवाच। अथ भस्मच्छन्नः संसारान्मुच्यते। भस्मशय्याशायानस्तच्छब्दगोचरः शिवसायुज्यमवाप्नोति न स पुनरावर्तते न स पुनरावर्तते। रुद्राध्यायी सन्नमृतत्वं च गच्छति। स एष भस्मज्योतिः। विभूतिधारणाद्ब्रह्मैकत्वं च गच्छति विभूतिधारणादेव सर्वेषु तीर्थेषु स्नातो भवति विभूतिधारणाद्वाराणस्यां स्नानेन यत् फलमवाप्नोति तत् फलमश्नुते। स एष भस्मज्योतिः। यस्य कस्यचिच्छरीरे त्रिपुण्ड्रस्य लक्ष्म वर्तते प्रथमा प्रजापतिर्द्वितीया विष्णुस्तृतीया सदाशिव इति स एष भस्मज्योतिः स एष भस्मज्योतिरिति ॥ १४ ॥

रुद्राक्षधारणजिज्ञासा

अथ कालाग्निरुद्रं भगवन्तं सनत्कुमारः पप्रच्छाधीहि भगवन् रुद्राक्षधारणविधिम् ॥ १५ ॥

सनत्कुमारो मुनिः रुद्राक्षेयत्तापरिज्ञानपूर्वकं तद्धारणविधिं ज्ञातुमिच्छन् पृच्छतीत्याख्यायिकामवतारयति—अथेति ॥ १५ ॥

रुद्राक्षजन्म

स होवाच रुद्रस्य नयनादुत्पन्ना रुद्राक्षा इति लोके ख्यायन्ते । सदाशिवः संहारं कृत्वा संहाराक्षं मुकुलीकरोति तन्नयनाज्जाता रुद्राक्षा इति होवाच । तस्माद्रुद्राक्षत्वमिति ॥ १६ ॥

मुनिना पृष्टः स होवाच ॥ १६ ॥

रुद्राक्षधारणमहिमा

तद्रुद्राक्षे वाग्विषये कृते दशगोप्रदानेन [1]यत् फलमवाप्नोति तत् फलमश्नुते । स एष भस्मज्योती रुद्राक्ष इति । तद्रुद्राक्षं करेण स्पृष्ट्वा धारणमात्रेण द्विसहस्रगोप्रदानफलं भवति । तद्रुद्राक्षे कर्णयोर्धार्यमाणे एकादशसहस्रगोप्रदानफलं भवति एकादशरुद्रत्वं च गच्छति । तद्रुद्राक्षे शिरसि धार्यमाणे कोटिगोप्रदानफलं भवति । एतेषां स्थानानां कर्णयोः फलं वक्तुं न शक्यमिति होवाच । मूर्ध्नि चत्वारिंशच्छिखायामेकं त्रयं वा श्रोत्रयोर्द्वादश द्वादश कण्ठे

[1] यत् फलं भवति तत्—उ, उ १.

द्वात्रिंशद्बाह्वोः षोडश षोडश द्वादश द्वादश मणिबन्धयोः षट् षडङ्गुष्ठयोस्ततः संध्यां सकुशोऽहरहरुपासीत। अग्निर्ज्योतिरित्यादिभिरग्नौ जुहुयात् ॥ १७ ॥

"अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहा सूर्यो ज्योतिर्ज्योतिस्सूर्यः स्वाहा" इति मन्त्रेणाज्याहुतीरग्नौ जुहुयात् न हि रुद्राक्षाहुतीरित्यर्थः ॥ १७ ॥

इति सप्तमं ब्राह्मणम्

अष्टमं ब्राह्मणम्

उपनिषत्पारायणफलजिज्ञासा

अथ बृहज्जाबालस्य फलं नो ब्रूहि भगवन्निति ॥ १ ॥

अहरहरर्थानुसन्धानपूर्वकमुपनिषत्पारायणफलेयत्तां पृच्छति—अथेति ॥१॥

सर्वपूतत्वम्

स होवाच य एतद्बृहज्जाबालं नित्यमधीते सोऽग्निपूतो भवति स वायुपूतो भवति स आदित्यपूतो भवति स सोमपूतो भवति स ब्रह्मपूतो भवति स विष्णुपूतो भवति स रुद्रपूतो भवति स सर्वपूतो भवति स सर्वपूतो भवति ॥ २ ॥

अग्न्यादिना पूतो भवति अग्न्यादिवत् पूतो भवतीति वेत्यर्थः ॥ २ ॥

अग्न्यादिस्तम्भनम्

य एतद्बृहज्जाबालं नित्यमधीते सोऽग्निं स्तम्भयति स वायुं स्तम्भयति स आदित्यं स्तम्भयति स सोमं स्तम्भयति स उदकं स्तम्भयति स सर्वान् देवान् स्तम्भयति स सर्वान् ग्रहान् स्तम्भयति स विषं स्तम्भयति स विषं स्तम्भयति ॥ ३ ॥

किंच—य एतदिति ॥ ३–५ ॥

मृत्व्यादितरणम्

य एतद्बृहज्जाबालं नित्यमधीते स मृत्युं [1]तरति स पाप्मानं तरति स ब्रह्महत्यां तरति स भ्रूणहत्यां तरति स वीरहत्यां तरति स सर्वहत्यां तरति स संसारं तरति स सर्वं तरति स सर्वं तरति ॥ ४ ॥

सर्वलोकजयः

य एतद्बृहज्जाबालं नित्यमधीते स भूर्लोकं जयति स भुवर्लोकं जयति स सुवर्लोकं जयति स महर्लोकं जयति स जनोलोकं जयति स तपोलोकं जयति स सत्यलोकं जयति स सर्वान् लोकान् जयति स सर्वान् लोकान् जयति ॥ ५ ॥

सर्वशास्त्रज्ञानम्

य एतद्बृहज्जाबालं नित्यमधीते स ऋचोऽधीते स यजूंष्यधीते स सामान्यधीते सोऽथर्वणमधीते सोऽङ्गिरसमधीते स शाखा अधीते

[1] जयति—अ १, अ २, क.

स कल्पानधीते स नाराशंसीरधीते स पुराणान्यधीते स ब्रह्मप्रणव-मधीते स ब्रह्मप्रणवमधीते ॥ ६ ॥

यत्र व्यष्टिसमष्ट्यात्मकजाग्रज्जाग्रदादितद्व्यष्टिसमष्ट्यारोपापवादाधिकरण - विश्वविश्वाद्यविकल्पानुञ्जैकरसान्तचतुष्पञ्चदशकलनापह्नवतां भजति तदपह्नव-सिद्धोऽयं परमात्मा तुर्यतुर्यो ब्रह्मप्रणवशब्देनोच्यते। तत्रापह्नोतव्यजाग्रज्जाग्रदादि-चतुष्पञ्चदशकलनाया अपि तादर्थ्येन तस्या अपि गौण्या वृत्त्या ब्रह्मप्रणवत्वं युज्यत इत्यर्थः ॥ ६ ॥

बृहज्जाबालाध्यापकस्य सर्वोत्तमत्वम्

अनुपनीतशतमेकमेकेनोपनीतेन तत्सममुपनीतशतमेकमेकेन गृहस्थेन तत्समं गृहस्थशतमेकमेकेन वानप्रस्थेन तत्समं वानप्रस्थ-शतमेकमेकेन यतिना तत्समं यतीनां तु शतं पूर्णमेकमेकेन रुद्रजापकेन तत्समं रुद्रजापकशतमेकमेकेन अथर्वशिरःशिखाऽध्या-पकेन तत्समथर्वशिरःशिखाऽध्यापकशतमेकमेकेन बृहज्जाबालोपनि-षदध्यापकेन तत्समम् ॥ ७ ॥

अत एव ग्रन्थपारायणस्य फलाधिक्यं दर्शयति—**अनुपनीतेति** ॥ ७ ॥

बृहज्जाबालजपशीलस्य परंधामप्राप्तिः

तद्वा एतत् परं धाम बृहज्जाबालोपनिषज्जपशीलस्य यत्र न सूर्यस्तपति यत्र न वायुर्वाति यत्र न चन्द्रमा भाति यत्र न नक्षत्राणि भान्ति यत्र नाग्निर्दहति यत्र न मृत्युः प्रविशति यत्र न दुःखानि प्रविशन्ति सदानन्दं परमानन्दं शान्तं शाश्वतं सदाशिवं

ब्रह्मादिवन्दितं योगिध्येयं परं पदं यत्र गत्वा न निवर्तन्ते योगिनः ॥ ८ ॥

यत्र स्वातिरिक्तमस्माधिकरणे सूर्यादयो न भान्ति मृत्युरपि यत्पदं स्प्रष्टुं न हि पारयति बृहज्जाबालोपनिषदर्थमननं कुर्वतः तद्वा एतत्परं धाम तद्धि सदानन्दं इत्यादिनवविशेषणविशिष्टम् ॥ ८ ॥

परंधामस्वरूपम्

तदेतदृचाऽभ्युक्तम्—

तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः ।
दिवीव चक्षुराततम् ॥ ९ ॥
तद्विप्रासो विपन्यवो जागृवांसः समिन्धते ।
विष्णोर्यत्परमं पदम् ॥ ॐ सत्यमित्युपनिषत् ॥ १० ॥

"यद्गत्वा न निवर्तन्ते तद्धाम परमं मम" इत्यादिस्मृतिसिद्धं यद्धाम तदेतदृचा मन्त्रेणापि प्रतिपादितम् । किं तत् ?—स्वाज्ञदृष्टिप्रसक्तप्रपञ्चाधिकरणतया विष्णोः व्यापकस्य व्याप्यसापेक्षव्यापकत्वाधिष्ठानत्वासंभवप्रबोधसिद्धं निरधिष्ठानतया परमं निरतिशयं स्वमात्रतया पश्यत इति पदं यत् तद्विष्णोः परमं पदं "राहोः शिरः" इतिवत् विष्णुयाथात्म्यं स्वातिरिक्तभस्मसिद्धं ब्रह्ममात्रं स्वावशेषतया सूरयः सदा पश्यन्ति । पश्यन्तीति व्यपदेशतः परिच्छेदता स्यादित्यत आह—दिवीति । दिवि द्योतनात्मके ब्रह्मणि इव चक्षुः दृष्टिर्दर्शनं तद्गोचरज्ञानं आततं अपरिच्छिन्नं तद्वद्विष्णुपदं निष्प्रतियोगिकपूर्णम् ॥ ९ ॥ सूरयः कीदृशाः ? विप्रासो विप्राः विपन्यवो विगतमन्यवः मन्युहेतुस्वातिरिक्तस्य स्वभावं गतत्वात् अतो जागृवांसः स्वाज्ञाननिद्राऽसंभवात् नित्यं जागरूकाः । यद्विष्णोः परमं पदं पश्यन्ति तदर्शनसमकालं तत् पदं समिन्धते तन्मात्रतया

अवशिष्यन्ते। इति एवं यत् प्रतिपादितं तत् ओं तुरीयोङ्काराग्रविद्योतत्वात्। तदेव तुर्यतुर्यं ब्रह्म सत्यं निष्प्रतियोगिकसन्मात्रत्वात्। इत्युपनिषच्छब्दः प्रकृतोपनिषत्समाप्त्यर्थः॥ १०॥

इत्यष्टमं ब्राह्मणम्

श्रीवासुदेवेन्द्रशिष्योपनिषद्ब्रह्मयोगिना।
लिखितं स्याद्विवरणं बृहज्जाबालभासकम्।
बृहज्जाबालटीकेयमशीत्यधिचतुःशतम्॥

इति श्रीमदीशाद्यष्टोत्तरशतोपनिषच्छास्त्रविवरणे षड्विंशतिसङ्ख्यापूरकं बृहज्जाबालोपनिषद्विवरणं सम्पूर्णम्

भस्मजाबालोपनिषत्

भद्रं कर्णेभिः—इति शान्तिः

प्रथमोऽध्यायः

त्रिपुण्ड्रविधिजिज्ञासा

अथ जाबालो भुसुण्डः कैलासशिखरावासमोंकारस्वरूपिणं महादेवमुमाऽर्धकृतशेखरं सोमसूर्याग्निनयनमनन्तेन्दुरविप्रभं व्याघ्रचर्माम्बरधरं मृगहस्तं भस्मोद्धूलितविग्रहं तिर्यक्त्रिपुण्ड्ररेखाविराजमानफालप्रदेशं स्मितसंपूर्णपञ्चविंशपद्माननं वीरासनारूढमप्रमेयमना[1]द्यनन्तं निष्कलं निर्गुणं शान्तं निरञ्जनमनामयं हुम्फट्कुर्वाणं शिवनामान्यनिशमुच्चरन्तं हिरण्यबाहुं हिरण्यरूपं हिरण्यवर्णं हिरण्यनिधिमद्वैतं चतुर्थं ब्रह्मविष्णुरुद्रातीतमेकमाशास्यं भगवन्तं शिवं प्रणम्य मुहुर्मुहुरभ्यर्च्य श्रीफलदलैस्तेन भस्मना च नतोत्तमाङ्गः कृताञ्जलिपुटः पप्रच्छ—अधीहि भगवन् वेदसारमुद्धृत्य त्रिपुण्ड्रविधिं यस्मादन्यानपेक्षमेव मोक्षोपलब्धिः। किं भस्मनो द्रव्यम्। कानि

[1] द्यन्तं—क. द्यनन्तनि—अ १, अ २.

स्थानानि । मनवोऽप्यत्र के वा । कति वा तस्य धारणम् । के वाऽत्राधिकारिणः । नियमस्तेषां को वा । मामन्तेवासिनमनुशासयामोक्षमिति ॥ १ ॥

यत्सम्यज्ज्ञानकालाग्निः स्वातिरिक्तास्तिताभ्रमम् ।
करोति भस्म निःशेषं तद्ब्रह्मैवास्मि केवलम् ॥

इह खल्वथर्वणवेदप्रविभक्तेयं भस्मजाबालोपनिषत् भस्मोद्भूळनत्रिपुण्ड्रशिवार्चनकाशीमाहात्म्यप्रकटनव्यग्रा ब्रह्ममात्रपर्यवसन्ना विजृम्भते । अस्याः संक्षेपतो विवरणमारभ्यते । जाबालशिवप्रश्नप्रतिवचनरूपेयमाख्यायिका विद्यास्तुत्यर्था । आख्यायिकामवतारयति—अथेति । ओंकारस्वरूपिणं ओंकारार्थतुर्यरूपिणम् । स्वातिरिक्ताशिवपटलं हुंफट्कुर्वाणं दूरादुत्सारयन्तम् । पप्रच्छ किमिति—अधीहीति । यस्मादन्यानपेक्षमेव मोक्षोपलब्धिः तन्मे ब्रूहीत्यर्थः ॥ १ ॥

प्रातःकृत्यं होमान्तम्

अथ स होवाच भगवान् परमेश्वरः परमकारुणिकः प्रमथान् सुरानपि सोऽन्वीक्ष्य ॥ २ ॥

पूतं प्रातरुदयाद्धोमयं ब्रह्मपर्णे निधाय त्र्यम्बकमिति मन्त्रेण शोषयेत् । येन केनापि तेजसा तत्स्वगृह्योक्तमार्गेण प्रतिष्ठाप्य वह्निं तत्र तद्धोमयद्रव्यं निधाय सोमाय स्वाहेति मन्त्रेण ततस्तिलव्रीहिभिः साज्यैर्जुहुयात् । अयं तेनाष्टोत्तरसहस्रं सार्धमेतद्वा । तत्राज्यस्य पर्णमयी जुहूर्भवति । तेन न पापं शृणोति । तद्धोममन्त्रस्त्र्यम्बकमित्येव । अन्ते स्विष्टकृत् पूर्णाहुतिस्तेनैवाष्टदिक्षु बलिप्रदानम् ॥३॥

[1] य मो—अ १.

क्रमेण प्रश्नोत्तरं अथ स इति । यैरेवं षट्प्रश्नाः कृताः तान् प्रमथान् ॥ २ ॥ किं भस्मनो द्रव्यं इत्याद्यप्रश्नमपाकरोति—पूतमिति । अयं तेनाष्टोत्तरसहस्रं सार्धमेतद्वा "सोमाय स्वाहा" इति मन्त्रेण सार्धं अयं तेनेत्यष्टोत्तरसहस्रं जुहुयादित्यर्थः । अन्ते तद्वोमान्ते । अष्टदिक्षु बलिदानं "त्र्यम्बकं" इति मन्त्रेण कुर्यादित्यर्थः ॥ ३ ॥

भस्मधारणविधिः

तद्भस्म गायत्र्या संप्रोक्ष्य तद्धैमे राजते ताम्रे मृण्मये वा पात्रे निधाय [1]रुद्रमन्त्रैः पुनरभ्युक्ष्य शुद्धदेशे संस्थापयेत् । ततो भोजयेद्ब्राह्मणान् । ततः स्वयं पूतो भवति ॥ ४ ॥

मानस्तोक इति सद्योजातमित्यादिपञ्चब्रह्ममन्त्रैर्भस्म संगृह्याग्निरिति भस्म वायुरिति भस्म जलमिति भस्म स्थलमिति भस्म व्योमेति भस्म देवा भस्म ऋषयो भस्म सर्वं ह वा एतदिदं भस्म पूतं पावनं नमामि सद्यः समस्तपशुपाशकमिति शिरसाऽभिनम्य पूते वामहस्ते वामदेवायेति निधाय त्र्यम्बकमिति संप्रोक्ष्य शुद्धं शुद्धेनेति संमृज्य संशोध्य तेनैवापादशीर्षमुद्धूलनमाचरेत् । तत्र ब्रह्ममन्त्राः पञ्च ॥ ५ ॥

ततः शेषस्य भस्मनो विनियोगः । तर्जनीमध्यमानामिकाभिरग्नेर्भस्मासीति भस्म संगृह्य मूर्धानमिति मूर्धन्यग्रे न्यसेत् त्र्यम्बकमिति ललाटे नीलग्रीवायेति कण्ठे कण्ठस्य दक्षिणे पार्श्वे त्र्यायुषमिति वामेति कपोलयोः कालायेति नेत्रयोस्त्रिलोचनायेति श्रोत्रयोः शृणवामेति वक्त्रे प्रब्रवामेति हृदये आत्मन इति नाभौ

[1] रुद्रसूक्तैः—उ, उ १.

[1]नाभिरिति मन्त्रेण दक्षिणभुजमूले भवायेति तन्मध्ये रुद्रायेति तन्मणिबन्धे शर्वायेति तत्करपृष्ठे पशुपतय इति वामबाहुमूले उग्रायेति तन्मध्ये अग्रेवधायेति तन्मणिबन्धे दूरेवधायेति तत्करपृष्ठे नमो हन्त इति अंसे शंकरायेति यथाक्रमं भस्म धृत्वा सोमायेति शिवं नत्वा ततः प्रक्षाल्य तद्भस्मापः पुनन्त्विति पिबेत्। नाधो त्याज्यं नाधो त्याज्यम् ॥ ६ ॥

एतन्मध्याह्नसायाह्नेषु त्रिकालेषु विधिभस्मधारणमप्रमादेन कार्यम्। प्रमादात् पतितो भवति ॥ ७ ॥

ततः **तद्भस्म गायत्र्या संप्रोक्ष्य** ॥ ४ ॥ मनवोऽप्यत्र के वेति तृतीयप्रश्नोत्तरमाह—**मा नस्तोक** इति। स्वातिरिक्तं भस्म करोतीति भस्म ब्रह्म सर्वात्मकत्वात्। अग्निरित्यादिपञ्चभूतग्रहणं जडप्रपञ्चोपलक्षणार्थम्। देवर्षिग्रहणं अजडप्रपञ्चोपलक्षणार्थम्। भस्मनो ब्रह्मतया जडाजडप्रपञ्चव्यापकत्वे "एकं भस्म सर्वभूतान्तरात्मा" इति बृहज्जाबालश्रुतेः। यत एवं अतो भस्म ब्रह्म **पूतं पावनं नमामि**। किमर्थमस्य नमनं इत्यत्र स्मृतिमात्रेण **सद्यः समस्ताघशासकं इति शिरसाऽभिनम्य**। शुद्धं शुद्धेन इति मन्त्रेण **संमृज्य**। तत्र "सद्योजातं" इत्यादिब्रह्ममन्त्राः **पञ्च** ॥ ५ ॥ कानि स्थानानि इति द्वितीयप्रश्नमपाकरोति—त्र्यम्बकमिति। कति वा तस्य धारणं इति प्रश्नोऽप्यपाकृतः। **तद्भस्म तद्भस्मोदकम्** ॥ ६ ॥ के वाऽत्राधिकारिणः, नियमस्तेषां को वा इति प्रश्नद्वयमप्यपाक्रियते—एतदित्यादिना ॥ ७–९ ॥

भस्मधारणस्यावश्यकर्तव्यता

ब्राह्मणानामयमेव धर्मोऽयमेव धर्मः। एवं भस्मधारणमकृत्वा नाश्नीयादापोऽन्नमन्यद्वा। प्रमादात्त्यक्त्वा भस्मधारणं न गायत्रीं

[1] नाभू—उ १.

जपेत्। न जुहुयादग्नौ तर्पयेद्देवानृषीन् पित्रादीन्। अयमेव धर्मः सनातनः सर्वपापनाशको मोक्षहेतुः। नित्योऽयं धर्मो ब्राह्मणानां ब्रह्मचारिगृहिवानप्रस्थयतीनाम्। एतदकरणे प्रत्यवैति ब्राह्मणः ॥८॥

अकरणे प्रायश्चित्तम्

अकृत्वा प्रमादेनैतदष्टोत्तरशतं जलमध्ये स्थित्वा गायत्रीं जप्त्वोपोषणेनैकेन शुद्धो भवति। यतिर्भस्मधारणं त्यक्त्वैकदोपोष्य द्वादशसहस्रप्रणवं जप्त्वा शुद्धो भवति। अन्यथेन्द्रो यतीन्त्सालावृकेभ्यः पातयति ॥ ९ ॥

संस्कृतभस्माभावे कर्तव्यनिरूपणम्

भस्मनो यद्यभावस्तदा नर्यभस्मदाहनजन्यमन्यद्वाऽवश्यं मन्त्रपूतं धार्यम् ॥ १० ॥

इत्यादिसंस्कारसंस्कृतभस्मनः ॥ १० ॥

भस्मधारणफलम्

एतत् प्रातः प्रयुञ्जानो रात्रिकृतात् पापात् पूतो भवति स्वर्णस्तेयात् प्रमुच्यते। मध्यन्दिने माध्यन्दिनं कृत्वोपस्थानान्तं ध्यायमान आदित्याभिमुखोऽधी[1]यानः सुरापानात् पूतो भवति स्वर्णस्तेयात् पूतो भवति ब्राह्मणवधात् पूतो भवति गोवधात् पूतो भवति अश्ववधात् पूतो भवति गुरुवधात् पूतो भवति मातृवधात्

[1] यमानः—क, अ १.

पूतो भवति पितृवधात् पूतो भवति । त्रिकालमेतत् प्रयुञ्जानः सर्व-वेदपारायणफलमवाप्नोति सर्वतीर्थफलमश्नुते अनपब्रुवः सर्वमायुरेति विन्दते प्राजापत्यं रायस्पोषं गौपत्यम् । एवमावर्तयेदुपनिषदमित्याह भगवान् सदाशिवः साम्बः सदाशिवः साम्बः ॥ ११ ॥

सर्वतीर्थफलं सर्वतीर्थस्नानफलम् । **प्राजापत्यं** प्रजापतित्वं **रायस्पोषं** कुबेरत्वं **गौपत्यं** पशुपतित्वं **विन्दते** लभत इत्यर्थः । **सदाशिवः साम्बः**—आवृत्तिः प्रथमाध्यायसमाप्त्यर्था ॥ ११ ॥

इति प्रथमोऽध्यायः

द्वितीयोऽध्यायः

ब्राह्मणानां किं नित्यं कर्तव्यम्

अथ भुसुण्डो जाबालो महादेवं साम्बं प्रणम्य पुनः पप्रच्छ किं नित्यं ब्राह्मणानां कर्तव्यं यदकरणे प्रत्यवैति ब्राह्मणः । कः पूजनीयः । को वा ध्येयः । कः स्मर्तव्यः । कथं ध्येयः । क्व स्थातव्यमेतद्ब्रूहीति ॥ १ ॥

किं नित्यं ब्राह्मणैः कर्तव्यं इत्यादिबुभुत्सया जाबालो महादेवं पृच्छतीत्याह—अथेति ॥ १ ॥

प्रातःकर्तव्यत्रिपुण्ड्रधारणादि

समानेन तं होवाच । प्रागुदयान्निर्वर्त्य शौचादिकं ततः स्नायात् । मार्जनं रुद्रसूक्तैः । ततश्चाहतं वासः परिधत्ते पाप्मनोऽपहत्यै । उद्यन्तमादित्यमभिध्यायन्नुद्धूलिताङ्गं कृत्वा यथास्थानं भस्मना त्रिपुण्ड्रं श्वेतेनैव रुद्राक्षान्छ्वेतान् बिभृयात् । नैतत्र संमर्शः । तथाऽन्ये । मूर्ध्नि चत्वारिंशत् । शिखायामेकं त्रयं वा । श्रोत्रयोर्द्वादश । कण्ठे द्वात्रिंशत् । बाह्वोः षोडशषोडश । द्वादशद्वादश मणिबन्धयोः । षट्षडङ्गुष्ठयोः । ततः संध्यां सकुशोऽहरहरुपासीत । अग्निर्ज्योतिरित्यादिभिरग्नौ जुहुयात् ॥ २ ॥

जाबालेन पृष्टो भगवान् सप्रमाणं प्रश्नोत्तरमाह—**समानेन तं होवाचेति** । किं तदिति—**प्रागुदयादिति** । **उद्यन्तमादित्यं** असावादित्यो ब्रह्मेति **अभिध्यायन्** । **भस्मना त्रिपुण्ड्रं** ललाटादौ धारयेत् । "ब्रह्मणो बिभृयाच्छ्वेतान्" इति श्रुत्यनुरोधेन **श्वेतेनैव रुद्राक्षान्** श्वेतान् बिभृयात् । ब्राह्मे मुहूर्ते उत्थाय **शौचादिकं निर्वर्त्य** अथ रुद्रसूक्तमार्जनपूर्वकं स्नात्वा अहतवस्त्रधारणपूर्वकं यथोक्तस्थानेषु भस्मोद्धूलनत्रिपुण्ड्ररुद्राक्षधारणं कृत्वा अथ संध्याऽऽद्यनुष्ठानपूर्वकं औपासनाग्निहोत्रादिकं कृत्वा ॥ २ ॥

शिवपूजाविधिः

शिवलिङ्गं त्रिसंध्यमभ्यर्च्य कुशेष्वासीनो ध्यात्वा साम्बं मामेव वृषभारूढं हिरण्यबाहुं हिरण्यवर्णं हिरण्यरूपं पशुपाशविमोचकं पुरुषं कृष्णपिङ्गलमूर्ध्वरेतं विरूपाक्षं विश्वरूपं सहस्राक्षं सहस्रशीर्षं सहस्रचरणं विश्वतोबाहुं विश्वात्मानमेकमद्वैतं निष्कलं निष्क्रियं शान्तं

शिवमक्षरमव्ययं [1]हरिहरहिरण्यगर्भस्रष्टारमप्रमेयमनाद्यन्तं रुद्रसूक्तै-रभिषिच्य सितेन भस्मना श्रीफलदलैश्च त्रिशाखैरार्द्रैरनार्द्रैर्वा। नैतत्र संस्पर्शः। तत्पूजासाधनं कल्पयेच्च नैवेद्यम्। ततश्चैकादशगुणरुद्रो जपनीयः। [2]एकगुणोऽनन्तः ॥ ३ ॥

अथ शिवपूजां कुर्यादित्याह—शिवलिङ्गमिति। विराडात्मना **सहस्रचरणं विश्वतोबाहुं विश्वात्मानं** प्रत्यगभिन्नब्रह्मात्मना **एकम्**। ईश्वरात्मना **हरिहर-हिरण्यगर्भस्रष्टारं अप्रमेयं अनाद्यन्तं** एवमुक्तविशेषणविशिष्टं **शिवलिङ्गं रुद्रसूक्तैरभिषिच्य सितेन भस्मना** चाभिषिच्य। उक्ताभिषेकद्रव्याणां **नैतत्र संस्पर्शः** ॥ ६ ॥

शिवषडक्षर-अष्टाक्षरयोरुद्धारः

षडक्षरोऽष्टाक्षरो वा शैवो मन्त्रो जपनीयः। ओमित्यग्रे व्याहरेत्। नम इति पश्चात्। ततः शिवायेत्यक्षरत्रयम्। ओमित्यग्रे व्याहरेत्। नम इति पश्चात्। ततो महादेवायेति पञ्चाक्षराणि। नातस्तारकः परमो मन्त्रः। तारकोऽयं पञ्चाक्षरः। कोऽयं शैवो मनुः। शैवस्तारकोऽयमुपदिश्यते मनुरविमुक्ते शैवेभ्यो जीवेभ्यः। शैवोऽयमेव मन्त्रस्तारयति। स [3]एव ब्रह्मोपदेशः ॥ ४ ॥

शिवषडक्षरमष्टाक्षरं चोद्धरति—ॐ इति। केभ्य इत्यत्र—**शैवेभ्य** इति। यस्तारकः काश्यामुपदिश्यते **स एव ब्रह्मोपदेशः** ॥ ४ ॥

[1] हरिहिरण्य—अ १, अ २, क.
[2] एको गु—क.
[3] एवं—अ १.

ब्रह्मस्वरूपम्

ब्रह्म सोमोऽहं पवनः सोमोऽहं पवते सोमोऽहं जनिता मतीनां सोमोऽहं जनिता पृथिव्याः सोमोऽहं जनिताऽग्नेः सोमोऽहं जनिता सूर्यस्य सोमोऽहं जनितेन्द्रस्य सोमोऽहं जनितोत विष्णोः सोमोऽहमेव जनिता स यश्चन्द्रमसो देवानां भूर्भुवःस्वरादीनां सर्वेषां लोकानां च ॥ ५ ॥

विश्वं भूतं भुवनं चित्रं बहुधा जातं जायमानं च यत् ।
सर्वस्य सोमोऽहमेव जनिता विश्वाधिको रुद्रो महर्षिः ॥ ६ ॥

हिरण्यगर्भादीनहं जायमानान् पश्यामि । यो रुद्रो अग्नौ यो अप्सु य ओषधीषु यो रुद्रो विश्वा भुवना विवेशैवमेव । अहमेवात्माऽन्तरात्मा ब्रह्मज्योतिर्यस्मान्न मत्तोऽन्यः परः । अहमेव परो विश्वाधिकः ॥ ७ ॥

ब्रह्म कीदृशं इत्यत्र—योऽयं उमया सहितः सोऽयं **ब्रह्म सोमोऽहम्** । यः सूत्ररूपेण **पवनो** भूत्वा सर्वं **पवते** पवित्रीकरोति स **सोमोऽहं** परमेश्वर इत्यर्थः । यः सोमः सोऽहमीश्वरात्मना स्वातिरिक्तमित्यादिसर्वजनिता स्यामित्याह—**जनितेति** ॥ ५ ॥ सर्वकारणत्वेऽपि सर्वातीतः स्यामित्याह—**विश्वाधिक** इति ॥ ६ ॥ योऽन्तर्याम्यात्मना भुवनमाविवेश सोऽहं प्रत्यगभेदेन **ब्रह्मज्योतिः** । **विश्वाधिकः** विश्वारोपापवादाधिष्ठानत्वात् ॥ ७ ॥

ब्रह्मज्ञानमेव मुक्तिसाधनम्

मामेव विदित्वाऽमृतत्वमेति तरति शोकम् । मामेव विदित्वा सांसृतिकीं रुजं द्रावयति तस्मादहं रुद्रो यः सर्वेषां परमा गतिः सोऽहं सर्वाकारः ॥ ८ ॥

स्वाज्ञलोको मामेव विदित्वा अमृतत्वमेति तरति शोकं यो मामेव "अहं ब्रह्मास्मि" इति विदित्वा आस्ते तस्य स्वाज्ञविकल्पितसांसृतिकीं रुजं द्रावयामि तस्मादहं रुद्रः निर्विशेषब्रह्मात्मना यः सर्वेषां परमा गतिः ॥ ८ ॥

शिवस्य विश्वाधारत्वम्

यतो वा इमानि भूतानि जायन्ते । येन जातानि जीवन्ति । यत् प्रयन्त्यभिसंविशन्ति । तं मामेव विदित्वोपासीत । भूतेभिर्देवेभिरभिष्टुतोऽहमेव ॥ ९ ॥

भीषाऽस्माद्वातः पवते । भीषोदेति सूर्यः । भीषाऽस्माद-ग्निश्चेन्द्रश्च ॥ १० ॥

सोमोऽत एव योऽहं सर्वेषामधिष्ठाता सर्वेषां च भूतानां पालकः । सोऽहं पृथिवी । सोऽहमापः । सोऽहं तेजः । सोऽहं वायुः । सोऽहं कालः । सोऽहं दिशः । सोऽहमात्मा । मयि सर्वं प्रतिष्ठितम् ॥ ११ ॥

तं विश्वोत्पत्तिस्थितिप्रळयाधारं अहमस्मीति विदित्वोपासीत । भूतेभिर्देवेभिरभिष्टुतोऽहमेव मनुष्यादिभूतैर्देवैरपि च ब्रह्मास्मीति स्तुतोऽहमेव ॥ ९ ॥ वातादिभयकारणमप्यहमेवेत्याह—भीषाऽस्मादिति । अत एवाहं वातादिभयहेतुरित्यर्थः ॥ १० ॥ योऽहं सर्वेषामधिष्ठाता कूटस्थात्मना विष्ण्वात्मना सर्वेषां च भूतानां पालकः सोऽहं पृथिवीत्यादि ॥ ११ ॥

शिवस्य पशुपाशमोचकत्वम्

ब्रह्मविदाप्नोति परम् । ब्रह्मा शिवो मे अस्तु सदाशिवोम् ॥ १२ ॥

अचक्षुर्विश्वतश्चक्षुरकर्णो विश्वतःकर्णोऽपादो विश्वतःपादोऽपाणिर्विश्वतःपाणिरहमशिरा विश्वतःशिरा विद्यामन्त्रैकसंश्रयो विद्यारूपो विद्यामयो विश्वेश्वरोऽहमजरोऽहम् ॥ १३ ॥

मामेवं विदित्वा संसृतिपाशात् प्रमुच्यते । तस्मादहं पशुपाशविमोचकः । पशवश्चामानवान्तं मध्यवर्तिनश्च युक्तात्मानो यतन्ते मामेवप्राप्तुम् । प्राप्यन्ते मां न पुनरावर्तन्ते न पुनरावर्तन्ते ॥ १४ ॥

सर्वात्मकं ब्रह्माहमस्मीति यो वेद स तदेवाप्नोतीत्याह—**ब्रह्मविदाप्नोति परमिति** "ब्रह्मविदो मे ममात्मा ब्रह्मैव सत्यमात्मा ब्रह्मैव ब्रह्मात्मैव अत्र ह्येव न विचिकित्स्यं" इति श्रुतेः । किं च—योऽहं **ब्रह्मा** चतुर्मुखः स एव **सदाशिवश्चास्तु** । सर्वात्मैकत्वे ओमिति मानं अकाराद्योङ्काराद्यवयवानां पञ्चब्रह्मपरब्रह्मार्थत्वात् ॥ १२ ॥ एवं निरुपाधिकसोपाधिकरूपाभ्यां **अचक्षुः** ॥ १३ ॥ मुमुक्षुः **संसृतिपाशात् प्रमुच्यते** । यस्मादेवं **तस्मात्** । के पशवः इत्यत्र—**पशवश्च** ब्रह्मादि **आमानवान्तं मध्यवर्तिनश्च** । पशवो यदि समाहितात्मानो भवन्ति तदा मामाप्तुं **यतन्ते** क्रमेण ते मां **प्राप्यन्ते** मां प्राप्य केऽपि **न पुनरावर्तन्ते** ॥ १४ ॥

शिवतत्त्ववेदनाशक्तानां काशीवासः तरणोपायः

[1]त्रिशूलायां काशीमधिश्रित्य त्यक्तासवोऽपि मय्येव संविशन्ति। प्रज्वलद्वह्निगं हविर्यथा न यजमानमासादयति तथाऽसौ त्यक्त्वा कुणपं न तत्तादृशं पुरा प्राप्नुवन्ति । एष एवादेशः । एष उपदेशः । एष एव परमो धर्मः ॥ १५ ॥

एवं सविशेषनिर्विशेषरूपेण त्वद्वेदनाशक्तानां का गतिरित्याशङ्क्याह—**त्रिशूलायामिति** । चरमश्वासवेळायां मदुपदिष्टतारकोपदेशेन ते मां विदित्वा वेदनसमकालं **मय्येव संविशन्ति** । यत एवमतः मदाप्तिः मज्ज्ञानायत्तेत्यर्थः । चिरकालसेवितश्रवणादिसंजातज्ञानेन त्वां प्राप्य अपुनरावृत्तिरस्तु । तत् कथं

[1] त्रिशूलगां का—मु.

चरमश्वासकालीनतारकोपदेशतो न पुनरावृत्तिः इत्यत आह—प्रज्वलदिति । अन्त्यकालीनमत्स्मृतेर्मद्भावापत्तिहेतुत्वात् । तथा चेश्वरस्मृतिः—

अन्तकाले च मामेव स्मरन् मुक्त्वा कळेबरम् ।
यः प्रयाति स मद्भावं याति नास्त्यत्र संशयः ॥

इति तारकोपदेशमहिम्ना यदि निर्विशेषब्रह्मज्ञानं जातं तदा निर्विशेषब्रह्मैव भवति । यदि सविशेषज्ञानं तदा मत्सालोक्यादिमुक्तिमेत्य मल्लोके पुनर्मदुपदेशतः निर्विशेषज्ञानमासाद्य चतुष्पदैक्यसमये निर्विशेषं ब्रह्मैव प्रतिपद्यत इति । अत एव मुमुक्षवः काश्यामुषित्वा मरणमिच्छन्ति ॥ १५ ॥

काशीवासिनां नियमविशेषाः

सत्यात्तत्र कदाचिन्न प्रमदितव्यं तत्रोद्धूलनत्रिपुण्ड्राभ्याम् । तथा रुद्राक्षधारणात्तथा मदर्चनाच्च । प्रमादेनापि नान्तर्देवसदने पुरीषं कुर्यात् । व्रतान्न प्रमदितव्यम् । तद्धि तपस्तद्धि तपः काश्यामेव मुक्तिकामानाम् ॥ १६ ॥

न तत्त्याज्यं न तत्त्याज्यं मोचकोऽहमविमुक्ते निवसताम् । नाविमुक्तात् परं स्थानं नाविमुक्तात् परं स्थानम् ॥ १७ ॥

तत्र मृतिमात्रेण मुक्तिः भवतीति यथेच्छाचरणं न कर्तव्यमित्याह—सत्यादिति ॥ १६ ॥ काशीक्षेत्रं मुमुक्षुभिः न कदाऽपि त्याज्यमित्यर्थः । कथमेवं ? मोचकोऽहमविमुक्ते निवसतां अतो नाविमुक्तात् परं स्थानम ॥ १७ ॥

काश्यां ज्योतिर्लिङ्गार्चनं तत्फलं च

काश्यां स्थानानि चत्वारि । तेषामभ्यर्हितमन्तर्गृहम् । तत्राप्यविमुक्तमभ्यर्हितम् । तत्र स्थानानि पञ्च । तन्मध्ये

शिवागारमभ्यर्हितम् । तत्र प्राच्यामैश्वर्यस्थानम् । दक्षिणायां विचालनस्थानम्। पश्चिमायां वैराग्यस्थानम्। उत्तरायां ज्ञानस्थानम्। तस्मिन् यदन्तर्निलिप्तमव्ययमनाद्यन्तमशेषवेदवेदान्तवेद्यमनिर्देश्यमनिरुक्तमप्रच्यवमाशास्यमद्वैतं सर्वाधारमनाधारमनिरीक्ष्यमहरहर्ब्रह्मविष्णुपुरन्दराद्यमरवरसेवितं मामेव ज्योतिःस्वरूपं लिङ्गं मामेवोपासितव्यं तदेवोपासितव्यम् ॥ १८ ॥

नैव भासयन्ति तल्लिङ्गं भानुश्चन्द्रो[1]ऽग्निर्वा स्वप्रकाशं विश्वेश्वराभिधं पातालमधितिष्ठति । तदेवाहम् ॥ १९ ॥

तत्रार्चितोऽहं साक्षादर्चितः । त्रिशाखैर्बिल्वदलैर्दीप्तैर्वा योऽभिसंपूजयेन्मन्मना मय्याहितासुर्मय्येवार्पिताखिलकर्मा भस्मदिग्धाङ्गो रुद्राक्षभूषणो मामेव सर्वभावेन प्रपन्नो मदेकपूजानिरतः संपूजयेत् तदहमश्नामि तं मोचयामि संसृतिपाशात् । अहरहरभ्यर्च्य विश्वेश्वरं लिङ्गं तत्र रुद्रसूक्तैरभिषिच्य तदेव स्नपनं पयस्त्रिः पीत्वा महापातकेभ्यो मुच्यते न शोकमाप्नोति मुच्यते संसारबन्धनात् ॥ २० ॥

अभ्यर्हितं श्रेष्ठम् । तस्मिन् यदन्तर्निलिप्तं ज्ञानवृत्त्यलिप्तत्वात् यन्निर्विशेषतया ज्ञेयं तत् अव्ययम् । अनिर्देश्यमनिरुक्तं इदमित्थमिति निर्देष्टुमशक्यतया निरुक्तरत्वात् अप्रच्यवमाशास्यं स्वधामतोऽप्रच्यवमच्युतं "ब्रह्माहमस्मि" इति मुमुक्षुभिः आशास्यं काङ्क्षणीयम् । किं तत्? अद्वैतं सर्वाधारमनाधारं आधेयसत्त्वे आधारं तदभावे निराधारं स्वातिरेकेण अनिरीक्ष्यं

[1] अग्निर्वायुः स्व—अ १, अ २, क.

अहरहर्ब्रह्मविष्णुपुरन्दराद्यमरवरसेवितं "ब्रह्माहमस्मि" इति भावितमित्यर्थः । किं ते भावयन्ति इत्यत्र—"ज्योतिर्लिङ्गं भ्रुवोर्मध्ये नित्यं ध्यायेत् सदा यतिः" इति श्रुत्यनुरोधेन यतयो यतो **मामेव ज्योतिःस्वरूपं लिङ्गं** भावयन्ति अतो **मामेवोपासितव्यं** सर्वैरप्यहमेव स्वात्मतयोपासितव्यः यत्सर्वाधिकरणं **तदेवोपासितव्यम्** ॥ १८ ॥ तत् किं भान्वादिभास्यं तत् कासनमर्हति इत्यत आह—नैवेति । एते प्रकाशवन्तोऽपि **नैव भासयन्तीत्यर्थः** । किं तत् केत्यत्र—**विश्वेश्वराभिधमिति** । किं तत् त्वद्भिन्नं इत्यत्र—**तदेवाहमिति** ॥ १९ ॥ स्वाज्ञः केनोपायेन संसृतिपाशान्मुच्यते इत्यत्र यो हि मुमुक्षुः **अहरहरभ्यर्च्येति** । **तदेव स्नपनं** स्वाभिषेचितम् ॥ २० ॥

अनभ्यर्च्याशनादौ कृते प्रायश्चित्तम्

तदनभ्यर्च्य नाश्नीयात् फलमन्नमन्यद्वा । यदश्नीयाद्रेतोभक्षी भवेत् । नापः पिबेत् । यदि पिबेत् पूयपो भवेत् । प्रमादेनैकदा त्वनभ्यर्च्य मां भुक्त्वा भोजयित्वा केशान् वापयित्वा गव्यानां पञ्च संगृह्योपोष्य जले रुद्रस्नानम् । जपेत्त्रिवारं रुद्रानुवाकम् । आदित्यं पश्यन्नभिध्यायन् स्वकृतकर्मकृद्भिरेव मन्त्रैः कुर्यान्मार्जनम् । ततो भोजयित्वा ब्राह्मणान् पूतो भवति । अन्यथा परेतो यातनामश्नुते । पत्रैः फलैर्वा जलैर्वाऽन्यैर्वाऽभिपूज्य विश्वेश्वरं मां ततोऽश्नीयात् ॥ २१ ॥

मामेवं अनभ्यर्च्य यो भोजनादिव्यापारं करोति स प्रत्यवैतीत्याह—तदिति । यत एवमतः **पत्रैरिति** । सोऽयमर्चको मत्प्रसादभाक् भवतीत्यर्थः ॥ २१ ॥

सर्वपातकपावनं शिवाभ्यर्चनम्

कापिलेन पयसाऽभिषिच्य रुद्रसूक्तेन मामेव शिवलिङ्गरूपिणं ब्रह्महत्यायाः पूतो भवति । कापिलेन दध्नाऽभिषिच्य सुरापानात्

पूतो भवति । कापिलेनाज्येनाभिषिच्य स्वर्णस्तेयात् पूतो भवति । मधुनाऽभिषिच्य गुरुदारगमनात् पूतो भवति । सितया शर्करयाऽभिषिच्य सर्वजीववधात् पूतो भवति ॥ २२ ॥

मदर्चनैव ब्रह्महत्यादिसर्वमहापातकभञ्जनीत्याह—कापिलेनेति ॥ २२ ॥

मुक्त्यादिसाधनं शिवाभिषेचनम्

क्षीरादिभिरेतैरभिषिच्य सर्वानवाप्नोति कामान् । इत्येकैकं महाप्रस्थशतं महाप्रस्थशतमानैः शतैरभिपूज्य मुक्तो भवति संसारबन्धनात् ॥ २३ ॥

भवबन्धमोचनार्थं कापिलक्षीरदध्याज्यशर्करादीनां इत्येकैकमित्यादि । द्वात्रिंशत्पलपरिमितप्रस्थशतं महाप्रस्थ उच्यते ॥ २३ ॥

शिवसायुज्यसाधनं शिवाभिषेचनम्

मामेव शिवलिङ्गरूपिणमार्द्रायां पौर्णमास्यां वाऽमावास्यायां वा महाव्यतीपाते ग्रहणे संक्रान्तावभिषिच्य तिलैः सतण्डुलैः सयवैः संपूज्य बिल्वदलैरभ्यर्च्य कापिलेना[ला]ज्यान्वितगन्धसारधूपैः परिकल्प्य दीपं नैवेद्यं साज्यमुपहारं कल्पयित्वा दद्यात् पुष्पाञ्जलिम् । एवं प्रयतोऽभ्यर्च्य मम सायुज्यमेति ॥ २४ ॥

मत्पूजैव मत्सायुज्यकारणमित्याह—मामेवेति ॥ २४ ॥

चन्द्रादिलोकसाधनं शिवाभिषेचनम्

शतैर्महाप्रस्थैरखण्डैस्तण्डुलैरभिषिच्य चन्द्रलोककामश्चन्द्रलोकमवाप्नोति । तिलैरेतावद्भिरभिषिच्य वायुलोककामो वायुलोक-

मवाप्नोति । मार्षैरेतावद्भिरभिषिच्य वरुणलोककामो वरुणलोकमवाप्नोति। यवैरेतावद्भिरभिषिच्य सूर्यलोककामः सूर्यलोकमवाप्नोति। एतैरेतावद्भिर्द्विगुणैरभिषिच्य स्वर्गलोककामः स्वर्गलोकमवाप्नोति । एतैरेतावद्भिश्चतुर्गुणैरभिषिच्य ब्रह्मलोककामो ब्रह्मलोकमवाप्नोति । एतैरेतावद्भिः शतगुणैरभिषिच्य चतुर्जालं ब्रह्मकोशं यन्मृत्युर्नावपश्यति । तमतीत्य मल्लोककामो मल्लोकमवाप्नोति [1]नान्यं मल्लोकात् परं यमवाप्य न शोचति न स पुनरावर्तते न स पुनरावर्तते ॥ २९ ॥

चन्द्रलोकादिसर्वलोकातिसाधनमपि मत्पूजेत्याह—शतैरिति । "ब्रह्मणः कोशोऽसि" इति श्रुत्यनुरोधेन प्रणवो हि ब्रह्मकोशः तं—किंविशेषणविशिष्टं ? व्यष्टिसमष्ट्यात्मकस्थूलसूक्ष्मबीजार्धमात्रांशतदारोपापवादाधिष्ठानविश्वविराडोत्रादिद्वितुर्याविकल्पान्तभेदेन चतुर्जालं यत्स्वरूपं विमृत्यु तत्प्रणवं ब्रह्मलोकं वा अतीत्य मल्लोककामो मल्लोकमवाप्नोति नान्यं मल्लोकात् परं अस्ति मुमुक्षुः यमवाप्य न शोचति । न स पुनरावर्तते—आवृत्तिरवधारणार्था । "यावदायुषं ब्रह्मलोकमभिसंपद्यते न च पुनरावर्तते" इति श्रुतेः, "यद्गत्वा न निवर्तन्ते तद्धाम परमं मम" इति स्मृतेश्च ॥ २९ ॥

काशीवासिनां शैवतारकोपदेशान्मुक्तिलाभः

लिङ्गरूपिणं मां संपूज्य चिन्तयन्ति योगिनः सिद्धाः सिद्धिं गताः यजन्ति यज्वानः । मामेव स्तुवन्ति वेदाः साङ्गाः सोपनिषदः सेतिहासाः । न मत्तोऽन्यदहमेव सर्वम् । मयि सर्वं प्रतिष्ठितम् । ततः काश्यां प्रयतैरेवाहमन्वहं पूज्यः ॥ २६ ॥

[1] नान्यं लोकात्—अ १, अ २, क.

तत्र गणा रौद्रानना नानामुखा नानाशस्त्रधारिणो नानारूपधरा नानाचिह्नितः । ते सर्वे भस्मदिग्धाङ्गा रुद्राक्षाभरणाः कृताञ्जलयो नित्यमभिध्यायन्ति । तत्र पूर्वस्यां दिशि ब्रह्मा कृताञ्जलिरहर्निशं मामुपास्ते । दक्षिणस्यां दिशि विष्णुः कृत्वैव मूर्धाञ्जलिं मामुपास्ते । प्रतीच्यामिन्द्रः सन्नताङ्ग उपास्ते । उदीच्यामग्निकायमुमाऽनुरक्ता हेमाङ्गविभूषणा हेमवस्त्रा मामुपासते मामेव देवाश्चतुर्मूर्तिधराः ॥ २७ ॥

दक्षिणायां दिशि मुक्तिस्थानं तन्मुक्तिमण्डपसंज्ञितम् । तत्रानेकगणाः पालकाः सायुधाः पापघातकाः । तत्र ऋषयः शांभवाः पाशुपता महाशैवा वेदावतंसं शैवं पञ्चाक्षरं जपन्तस्तारकं सप्रणवं मोदमानास्तिष्ठन्ति । तत्रैका रत्नवेदिका । तत्राहमासीनः काश्यां त्यक्तकुणपाञ्छैवानानीय स्वस्याङ्के संनिवेश्य भसितरुद्राक्षभूषितानुपस्पृश्य मा भूदेतेषां जन्म मृतिश्चेति तारकं शैवं मनुमुपदिशामि । ततस्ते मुक्ता मामनुविशन्ति विज्ञानमये[1]नाङ्गेन । न पुनरावर्तन्ते हुताशनप्रतिष्ठं हविरिव । तत्रैव मुक्त्यर्थमुपदिश्यते शैवोऽयं मन्त्रः पञ्चाक्षरः । तन्मुक्तिस्थानम् । तत ओंकाररूपम् । ततो मदर्पितकर्मणां मदाविष्टचेतसां मद्रूपता भवति । नान्येषामियं ब्रह्मविद्येयं ब्रह्मविद्या ॥ २८ ॥

मुमुक्षवः काश्यामेवासीना वीर्यवन्तो विद्यावन्तो विज्ञानमयं ब्रह्मकोशं चतुर्जालं ब्रह्मकोशं यं मृत्युर्नावपश्यति यं ब्रह्मा नावपश्यति

[1] ना श्वेन—अ १, अ २, क.

यं विष्णुर्नावपश्यति यमिन्द्राग्नी नावपश्येतां यं वरुणादयो नावपश्यन्ति तमेव तत्तेजःप्लुष्टविड्भावं हैममुमां संश्लिष्य [1]वसन्तं चन्द्रकोटिसमप्रभं चन्द्रकिरीटं सोमसूर्याग्निनयनं भूतिभूषितविग्रहं शिवं मामेवमभिध्यायन्तो मुक्तकिल्बिषास्त्यक्तबन्धा मय्येव लीना भवन्ति ॥ २९ ॥

अहमेव सर्वाप्यो मदतिरिक्तं न किंचिदस्तीत्याह—लिङ्गेति ॥ २६ ॥ ब्रह्मविष्णुरुद्रेन्द्रभेदेन देवाश्चतुर्मूर्तिधरा मामुपासत इति । स्पष्टोऽर्थः ॥ २७ ॥ ततस्ते स्वातिरिक्तभ्रमतो विमुक्ता मामनुविशन्ति ॥ २८ ॥ विज्ञानमयं ब्रह्मकोशं किं तत्? यथाव्याख्यातं चतुर्जालं ब्रह्मकोशं यं मृत्युः स्वात्मविस्मृतिः प्रमादः, "प्रमादं वै मृत्युमहं ब्रवीमि" इति स्मृतेः । स मृत्युः नावपश्यति । तत्तेजःप्लुष्टविड्भावं विराड्भावम् ॥ २९ ॥

काश्यामप्रमादेन वस्तव्यम्

ये चान्ये काश्यां पुरीषकारिणः प्रतिग्रहरतास्त्यक्तभस्मधारणास्त्यक्तरुद्राक्षधारणास्त्यक्तसोमवारव्रतास्त्यक्तगृहयागास्त्यक्तविश्वेश्वरार्चनास्त्यक्तपञ्चाक्षरजपास्त्यक्तभैरवार्चना भैरवीं घोरादियातनां नानाविधां काश्यां परेता भुक्त्वा ततः शुद्धा मां प्रपद्यन्ते च । अन्तर्गृहे रेतो मूत्रं पुरीषं वा विसृजन्ति तदा तेन सिञ्चन्ते पितॄन् । तमेव पापकारिणं मृतं पश्यन्नीललोहितो भैरवस्तं पातयत्यस्त्रमण्डले ज्वलज्ज्वलन-[2]कुण्डेष्वन्येष्वपि । ततश्चाप्रमादेन निवसेदप्रमादेन निवसेत् काश्यां लिङ्गरूपिण्यामित्युपनिषत् ॥ ३० ॥

[1] वसन्तश्च—अ १, क. [2] कूटे—अ २, क.

त्यक्तगृहयागाः औपासनादिहोमाः । काशीमरणप्रभावतः न हि मद्धामतः च्यवन्त इत्यर्थः । **मामेव प्रपद्यन्ते** । यतः काश्यां विश्वेशस्तारकमुपदिशति अतः सर्वे मुमुक्षवः काशीमधिश्रित्य **अप्रमादेन** वसन्तु । एवं वसतां विश्वेशोपदिष्ट-तारकः विश्वेशभावप्रदो भवति । काशीक्षेत्रं विश्वेश्वरतनुत्वेन संभाव्याप्रमादेन वस्तव्यमित्यर्थः ॥ ३० ॥

श्रीवासुदेवेन्द्रशिष्योपनिषद्ब्रह्मयोगिना
भस्मजाबालविवृतिः लिखिता शिवगोचरा ।
जाबालविवृतिग्रन्थः पञ्चाशदधिकं शतम् ॥

इति श्रीमदीशाद्यष्टोत्तरशतोपनिषच्छास्त्रविवरणे सप्ताशीतिसंख्यापूरकं
भस्मजाबालोपनिषद्विवरणं सम्पूर्णम् ॥

रुद्रहृदयोपनिषत्

सह नाववतु—इति शान्तिः

सर्वदेवात्मकदेवविषयः शुकप्रश्नः

प्रणम्य शिरसा पादौ शुको व्यासमुवाच ह ।
को देवः सर्वदेवेषु कस्मिन् देवाश्च सर्वशः ॥ १ ॥
कस्य शुश्रूषणान्नित्यं प्रीता देवा भवन्ति मे ।

यद्ब्रह्म रुद्रहृदयमहाविद्याप्रकाशितम् ।
तद्ब्रह्ममात्रावस्थानपदवीमधुना भजे ॥

इह खलु कृष्णयजुर्वेदप्रविभक्तेयं रुद्रहृदयोपनिषत् शिवविष्णवभेदप्रकटनपूर्वकमुमामहेश्वरसार्वात्म्यप्रकटनव्यग्रा निःप्रतियोगिकब्रह्ममात्रपर्यवसन्ना विजयते । अस्याः स्वल्पग्रन्थतो विवरणमारभ्यते । श्रीशुकव्यासप्रश्नप्रतिवचनरूपेयमाख्यायिका विद्यास्तुत्यर्था । आख्यायिकामवतारयति—**प्रणम्येति** । **उवाच ह**—किमिति?—**को देव** इति ॥ १ ॥

रुद्रस्य सर्वदेवात्मकत्वम्

तस्य तद्वचनं श्रुत्वा प्रत्युवाच पिता शुकम् ॥ २ ॥

सर्वदेवात्मको रुद्रः सर्वे देवाः शिवात्मकाः ।
रुद्रस्य दक्षिणे पार्श्वे रविर्ब्रह्मा त्रयोऽग्नयः ॥ ३ ॥
वामपार्श्वे उमा देवी विष्णुः सोमोऽपि ते त्रयः ।
या उमा सा स्वयं विष्णुर्यो विष्णुः स हि चन्द्रमाः ॥ ४ ॥

इति शुकप्रश्नोत्तरं श्रीवेदव्यास आह—तस्येति ॥ २ ॥ श्रीवेदव्यास उवाच **सर्वदेवात्मक** इति ॥ ३–४ ॥

शिवविष्णवोरैक्यम्

ये नमस्यन्ति गोविन्दं ते नमस्यन्ति शंकरम् ।
येऽर्चयन्ति हरिं भक्त्या तेऽर्चयन्ति वृषध्वजम् ॥ ५ ॥
ये द्विषन्ति विरूपाक्षं ते द्विषन्ति जनार्दनम् ।
ये रुद्रं नाभिजानन्ति ते न जानन्ति केशवम् ॥ ६ ॥
रुद्रात् प्रवर्तते बीजं बीजयोनिर्जनार्दनः ।
यो रुद्रः स स्वयं ब्रह्मा यो ब्रह्मा स हुताशनः ॥ ७ ॥
ब्रह्मविष्णुमयो रुद्र अग्नीषोमात्मकं जगत् ।
पुंलिङ्गं सर्वमीशानं स्त्रीलिङ्गं भगवत्युमा ॥ ८ ॥
उमारुद्रात्मिकाः सर्वाः प्रजाः स्थावरजङ्गमाः ।
व्यक्तं सर्वमुमारूपमव्यक्तं तु महेश्वरम् ॥ ९ ॥
उमाशंकरयोर्योगः स योगो विष्णुरुच्यते ।
यस्तु तस्मै नमस्कारं कुर्याद्भक्तिसमन्वितः ॥ १० ॥

शिवविष्णवोरेकत्वावगमायेदमाह—ये **नमस्यन्ती**ति ॥ ५–७ ॥ **पुंलिङ्गं सर्वमीशानं** ईशानरूपं, **स्त्रीलिङ्गं भगवत्युमा** उमारूपम् ॥ ८–१६ ॥

आत्मनस्त्रैविध्यम्

आत्मानं परमात्मानमन्तरात्मानमेव च ।
ज्ञात्वा त्रिविधमात्मानं परमात्मानमाश्रयेत् ॥ ११ ॥
अन्तरात्मा भवेद्ब्रह्मा परमात्मा महेश्वरः ।
सर्वेषामेव भूतानां विष्णुरात्मा सनातनः ॥ १२ ॥

रुद्रस्य त्रिमूर्तित्वम्

अस्य त्रैलोक्यवृक्षस्य भूमौ विटपशाखिनः ।
अग्रं मध्यं तथा मूलं विष्णुब्रह्ममहेश्वराः ॥ १३ ॥
कार्यं विष्णुः क्रिया ब्रह्मा कारणं तु महेश्वरः ।
प्रयोजनार्थं रुद्रेण मूर्तिरेका त्रिधा कृता ॥ १४ ॥
धर्मो रुद्रो जगद्विष्णुः सर्वज्ञानं पितामहः ॥ १५ ॥

रुद्रकीर्तनात् सर्वपापविमुक्तिः

श्रीरुद्र रुद्र रुद्रेति यस्तं ब्रूयाद्विचक्षणः ।
कीर्तनात् सर्वदेवस्य सर्वपापैः प्रमुच्यते ॥ १६ ॥
रुद्रो नर उमा नारी तस्मै तस्यै नमो नमः ॥ १७ ॥
रुद्रो ब्रह्मा उमा वाणी तस्मै तस्यै नमो नमः ।
रुद्रो विष्णुरुमा लक्ष्मीस्तस्मै तस्यै नमो नमः ॥ १८ ॥
रुद्रः सूर्य उमा छाया तस्मै तस्यै नमो नमः ।
रुद्रः सोम उमा तारा तस्मै तस्यै नमो नमः ॥ १९ ॥

रुद्रो दिवा उमा रात्रिस्तस्मै तस्यै नमो नमः ।
रुद्रो यज्ञ उमा वेदिस्तस्मै तस्यै नमो नमः ॥ २० ॥
रुद्रो वह्निरुमा स्वाहा तस्मै तस्यै नमो नमः ।
रुद्रो वेद उमा शास्त्रं तस्मै तस्यै नमो नमः ॥ २१ ॥
रुद्रो वृक्ष उमा वल्ली तस्मै तस्यै नमो नमः ।
रुद्रो गन्ध उमा पुष्पं तस्मै तस्यै नमो नमः ॥ २२ ॥
रुद्रोऽर्थ अक्षरः सोमा तस्मै तस्यै नमो नमः ।
रुद्रो लिङ्गमुमा पीठं तस्मै तस्यै नमो नमः ॥ २३ ॥
सर्वदेवात्मकं रुद्रं नमस्कुर्यात् पृथक्पृथक् ।
एभिर्मन्त्रपदैरेव नमस्यामीशपार्वती ॥ २४ ॥
यत्रयत्र भवेत् सार्धमिमं मन्त्रमुदीरयेत् ।
ब्रह्महा जलमध्ये तु सर्वपापैः प्रमुच्यते ॥ २५ ॥

शिवशक्त्यात्मकं सर्वं तदतिरिक्तं न किंचिदस्ति इति ज्ञानात् पञ्चमहापातकी विलीयत इत्याह—**रुद्र** इति ॥ १७–२५ ॥

सर्वस्य कारणानतिरिक्तत्वम्

सर्वाधिष्ठानमद्वन्द्वं परं ब्रह्म सनातनम् ।
सच्चिदानन्दरूपं तदवाङ्मनसगोचरम् ॥ २६ ॥
तस्मिन् सुविदिते सर्वं विज्ञातं स्यादिदं शुक ।
तदात्मकत्वात् सर्वस्य तस्माद्भिन्नं न हि क्वचित् ॥ २७ ॥

कारणब्रह्मातिरिक्तं न किंचिदस्तीत्याह—**सर्वाधिष्ठानमिति** ॥ २६–२७ ॥

परापरविद्ययोः स्वरूपम्

द्वे विद्ये वेदितव्ये हि परा चैवापरा च ते ।
तत्रापरा तु विद्येषा ऋग्वेदो यजुरेव च ॥ २८ ॥
सामवेदस्तथाऽथर्ववेदः शिक्षा मुनीश्वर ।
कल्पो व्याकरणं चैव निरुक्तं छन्द एव च ॥ २९ ॥
ज्योतिषं च तथाऽनात्मविषया अपि बुद्धयः ।
अथैषा परमा विद्या ययाऽऽत्मा परमाक्षरम् ॥ ३० ॥
यत्तदद्रेश्यमग्राह्यमगोत्रं रूपवर्जितम् ।
अचक्षुःश्रोत्रमत्यर्थं तदपाणिपदं तथा ॥ ३१ ॥
नित्यं विभुं सर्वगतं सुसूक्ष्मं च तदव्ययम् ।
तद्भूतयोनिं पश्यन्ति धीरा आत्मानमात्मनि ॥ ३२ ॥
यः सर्वज्ञः सर्वविद्यो यस्य ज्ञानमयं तपः ।
तस्मादत्त्वन्नरूपेण जायते जगदावलिः ॥ ३३ ॥

मुण्डकोपनिषत्परमतात्पर्यार्थमाचष्टे—द्वे विद्ये इत्यादिना ॥ २८–४२ ॥

अक्षरज्ञानादेव संसारविनाशः

सत्यवद्भाति तत् सर्वं रज्जुसर्पवदास्थितम् ।
तदेतदक्षरं सत्यं तद्विज्ञाय विमुच्यते ॥ ३४ ॥
ज्ञानादेव हि संसारविनाशो नैव कर्मणा ।
श्रोत्रियं ब्रह्मनिष्ठं स्वगुरुं गच्छेद्यथाविधि ॥ ३५ ॥
गुरुस्तस्मै परां विद्यां दद्याद्ब्रह्मात्मबोधिनीम् ।

गुहायां निहितं साक्षादक्षरं वेद चेन्नरः ॥ ३६ ॥
छित्त्वाऽविद्यामहाग्रन्थिं शिवं गच्छेत् सनातनम् ।

मुमुक्षोः प्रणवोपास्तिप्रकारः

तदेतदमृतं सत्यं तद्वेद्धव्यं मुमुक्षुभिः ॥ ३७ ॥
धनुस्तारं शरो ह्यात्मा ब्रह्म तल्लक्ष्यमुच्यते ।
अप्रमत्तेन वेद्धव्यं शरवत्तन्मयो भवेत् ॥ ३८ ॥
लक्ष्यं सर्वगतं चैव शरः सर्वगतो मुखः ।
वेद्धा सर्वगतश्चैव शिवलक्ष्यं न संशयः ॥ ३९ ॥
न तत्र चन्द्रार्कवपुः प्रकाशते न वान्ति वाताः सकला देवताश्च ।
स एष देवः कृतभावभूतः स्वयं विशुद्धो विरजाः प्रकाशते ॥४०॥

जीवेशभेदस्य कल्पितत्वम्

द्वौ सुपर्णौ शरीरेऽस्मिन् जीवेशाख्यौ सह स्थितौ ।
तयोर्जीवः फलं भुङ्क्ते कर्मणो न महेश्वरः ॥ ४१ ॥
केवलं साक्षिरूपेण विना भोगं महेश्वरः ।
प्रकाशते स्वयं भेदः कल्पितो मायया तयोः ॥ ४२ ॥
घटाकाशमठाकाशौ यथाऽऽकाशप्रभेदतः ।
कल्पितौ परमौ जीवशिवरूपेण कल्पितौ ॥ ४३ ॥
तत्त्वतश्च शिवः साक्षाच्चिज्जीवश्च स्वतः सदा ।
चिच्चिदाकारतो भिन्ना न भिन्ना चित्त्वहानितः ॥ ४४ ॥

चितश्चिन्न चिदाकाराद्भिद्यते जडरूपतः ।
भिद्यते चेज्जडो भेदश्चिदेका सर्वदा खलु ॥ ४५ ॥
तर्कतश्च प्रमाणाच्च चिदेकत्वव्यवस्थितेः ।

यथा परमाकाशप्रविभक्तभेदतः घटाकाशमठाकाश(शौ तत्) स्थानीयौ जीवेशौ विकल्पितावित्यर्थः ॥ ४३ ॥ औपाधिकोऽयं जीवेशभेदः न तात्त्विकः इत्याह—**तत्त्वतश्चेति** । जीवेशाद्यनुस्यूतचिच्चिदाकारतो भिन्ना जीवेशानुगता चित् चिदाकारतः चिद्विकल्पिताकारतः उपाधितो भिन्ना, स्वरूपतो **न भिन्ना,** कुतः? **चित्त्वहानितः**, स्वरूपभेदे स्वरूपहानिः स्यादित्यर्थः ॥ ४४ ॥ **चितो** या **चित्** सा चिदाकारादुपाधितो भिद्यते, उपाधीनां जडरूपत्वात् भेदो युज्यत इत्यर्थः । जडापाये अजडं ब्रह्मावशिष्यते इत्याह—**भिद्यत** इति । जीवेशविकल्पितोपाधिकृतभेदापाये निरुपाधिकेयं चिदेकैव भवति ॥ ४५ ॥ निरुपाधिकचित एकत्वे हेतुमाह—**तर्कतश्चेति** ॥

अद्वैतज्ञानाच्छोकमोहनिवृत्तिः

चिदेकत्वपरिज्ञाने न शोचति न मुह्यति ।
अद्वैतं परमानन्दं शिवं याति तु केवलम् ॥ ४६ ॥
अधिष्ठानं समस्तस्य जगतः सत्यचिद्घनम् ।
अहमस्मीति निश्चित्य वीतशोको भवेन्मुनिः ॥ ४७ ॥
स्वशरीरे स्वयं ज्योतिस्स्वरूपं सर्वसाक्षिणम् ।
क्षीणदोषाः प्रपश्यन्ति नेतरे माययाऽऽवृताः ॥ ४८ ॥
एवंरूपपरिज्ञानं यस्यास्ति परयोगिनः ।
कुत्र चिद्गमनं नास्ति तस्य पूर्णस्वरूपिणः ॥ ४९ ॥

आकाशमेकं संपूर्णं कुत्रचिन्नैव गच्छति ।
तद्वत् स्वात्मपरिज्ञानी कुत्रचिन्नैव गच्छति ॥ ९० ॥
स यो ह वै तत् परमं ब्रह्म यो वेद वै मुनिः ।
ब्रह्मैव भवति स्वस्थः सच्चिदानन्दमात्रकः ॥ इत्युपनिषत् ॥९१॥

प्रत्यक्परचिदैक्यज्ञानफलमाह—चिदिति ॥ ४६–९० ॥ यो यदा निर्विशेषं ब्रह्म स्वमात्रमिति जानाति स तदैव ब्रह्मैव भवति । वेदनसमकालं ब्रह्मैव भवतीत्यर्थः । इत्युपनिषच्छब्दः रुद्रहृदयोपनिषत्परिसमाप्त्यर्थः ॥ ९१ ॥

श्रीवासुदेवेन्द्रशिष्योपनिषद्ब्रह्मयोगिना ।
रुद्रहृदयोपनिषद्व्याख्यानं लिखितं लघु ।
श्रीरुद्रहृदयव्याख्याग्रन्थः पञ्चाशदीरितः ॥

इति श्रीमदीशाद्यष्टोत्तरशतोपनिषच्छास्त्रविवरणे पञ्चाशीतिसङ्ख्यापूरकं रुद्रहृदयोपनिषद्विवरणं सम्पूर्णम् ॥

रुद्राक्षजाबालोपनिषत्

आप्यायन्तु—इति शान्तिः

रुद्राक्षविषयो भुसुण्डप्रश्नः

अथ हैनं कालाग्निरुद्रं भुसुण्डः पप्रच्छ—कथं रुद्राक्षोत्पत्तिः, तद्धारणात् किं फलमिति ॥ १ ॥

रुद्राक्षोपनिषद्वेद्यमहारुद्रतयोज्ज्वलम् ।
प्रतियोगिविनिर्मुक्तशिवमात्रपदं भजे ॥

इह खलु सामवेदप्रविभक्तेयं रुद्राक्षजाबालोपनिषत् रुद्राक्षेयत्ताप्रकटनव्यग्रा ब्रह्ममात्रपर्यवसन्ना विजयते । अस्याः स्वल्पग्रन्थतो विवरणमारभ्यते । भुसुण्ड-कालाग्निरुद्रप्रश्नप्रतिवचनरूपेयमाख्यायिका विद्यास्तुत्यर्था । आख्यायिकामवतारयति—**अथेति** । भुसुण्डः सहजयोगित्वेन कृतकृत्योऽपि स्वाज्ञानां स्वातिरिक्ताविद्यापदतत्कार्यजातारोपापवादाधारनिराधारसविशेषनिर्विशेषज्ञानं चित्तशुद्धिं विना नोदेति, चित्तशुद्धिः विभूतिरुद्राक्षधारणादृते न संभवतीत्यालोच्य, भस्मजाबालोपनिषदि भस्मोद्धूलनत्रिपुण्ड्रशिवपूजाविधिश्च शिवेन प्रकटितः, तत्रैव रुद्राक्षधारणविधिरपि संक्षेपत उक्तः भगवन्मुखेनैव, इदानीं रुद्राक्षतद्धारणालक्षणं तत्फलं च प्रकटितं चेत् श्रद्धया स्वाज्ञलोको रुद्राक्षधारणं करोति, तेनेश्वरप्रसादचित्तशुद्धिसंजातज्ञानद्वारा कृतार्थो भवेत्, इत्यनुकम्पया **कालाग्निरुद्रं भुसुण्डः पप्रच्छ** । **ह** इत्यैतिह्यार्थः ॥ १ ॥

रुद्राक्षोत्पत्तिः

तं होवाच भगवान् कालाग्निरुद्रः । त्रिपुरवधार्थमहं निमीलिताक्षोऽभवम् । तेभ्यो जलबिन्दवो भूमौ पतितास्ते रुद्राक्षा जाताः । सर्वानुग्रहार्थाय तेषां नामोच्चारणमात्रेण दशगोप्रदानफलं दर्शनस्पर्शनाभ्यां द्विगुणफलमत ऊर्ध्वं वक्तुं न शक्नोमि ॥ २ ॥

तत्रैते श्लोका भवन्ति—

कस्मिन् स्थितं तु किं नाम कथं वा धार्यते नरैः ।
कतिभेदमुखान्यत्र कैर्मन्त्रैर्धार्यते कथम् ॥ ३ ॥
दिव्यवर्षसहस्राणि चक्षुरुन्मीलितं मया ।
भूमावक्षिपुटाभ्यां तु पतिता जलबिन्दवः ॥ ४ ॥
तत्राश्रुबिन्दवो जाता महारुद्राक्षवृक्षकाः ।
स्थावरत्वमनुप्राप्य भक्तानुग्रहकारणात् ॥ ५ ॥

भुसुण्डेनैवं पृष्टः तं होवाच भगवान् कालाग्निरुद्रः । किमिति? **त्रिपुरवधार्थमिति** ॥ २ ॥ स्वोक्तार्थे मन्त्रानपि प्रमाणयति—**तत्रैते श्लोका भवन्तीति** ॥ ३ ॥ इत्याशङ्क्याह—**दिव्येति** ॥ ४–५ ॥

रुद्राक्षधारणजपफलम्

भक्तानां धारणात् पापं दिवारात्रिकृतं हरेत् ।
लक्षं तु दर्शनात् पुण्यं कोटिस्तद्धारणाद्भवेत् ॥ ६ ॥
तस्य कोटिशतं पुण्यं लभते धारणान्नरः ।
लक्षकोटिसहस्राणि लक्षकोटिशतानि च ॥ ७ ॥

तज्जपाल्लभते पुण्यं नरो रुद्राक्षधारणात् ।

तद्धारणाजपफलमाह—**भक्तानामिति** ॥ ६–७ ॥

रुद्राक्षाणां उत्तमादिभेदाः

धात्रीफलप्रमाणं यच्छ्रेष्ठमेतदुदाहृतम् ॥ ८ ॥

बदरीफलमात्रं तु मध्यमं प्रोच्यते बुधैः ।

अधमं चणमात्रं स्यात् प्रक्रियैषा मयोच्यते ॥ ९ ॥

उत्तमादिभेदेनास्य त्रैविध्यमाह—**धात्रीफलप्रमाणमिति** ॥ ८–९ ॥

रुद्राक्षाणां ब्रह्मक्षत्रादिजातिभेदाः

ब्राह्मणाः क्षत्रिया वैश्याः शूद्राश्चेति शिवाज्ञया ।

वृक्षा जाताः पृथिव्यां तु तज्जातीयाः शुभाक्षकाः ॥ १० ॥

श्वेतास्तु ब्राह्मणा ज्ञेयाः क्षत्रिया रक्तवर्णकाः ।

पीता वैश्यास्तु विज्ञेयाः कृष्णाः शूद्रा उदाहृताः ॥ ११ ॥

ब्राह्मणो बिभृयाच्छ्वेतान् रक्तान् राजा तु धारयेत् ।

पीतान् वैश्यस्तु बिभृयात् कृष्णाञ्छूद्रस्तु धारयेत् ॥ १२ ॥

तत्प्रविभक्तब्रह्मक्षत्रादिजातिरुद्राक्षा ब्रह्मक्षत्रादिभिः धार्या इत्याह—**ब्राह्मणा इति** ॥ १०–१२ ॥

रुद्राक्षाणां ग्राह्याग्राह्यविभागः

समाः स्निग्धा दृढाः स्थूलाः कण्टकैः संयुताः शुभाः ।

कृमिदष्टं छिन्नभिन्नं कण्टकैर्हीनमेव च ॥ १३ ॥

व्रणयुक्तमयुक्तं च षड् रुद्राक्षाणि वर्जयेत् ।
स्वयमेव कृतद्वारं रुद्राक्षं स्यादिहोत्तमम् ॥ १४ ॥
यत्तु पौरुषयत्नेन कृतं तन्मध्यमं भवेत् ।
समान् स्निग्धान् दृढान् स्थूलान् क्षौमसूत्रेण धारयेत् ॥ १५ ॥
सर्वगात्रेण [1]सौम्येन सामान्यानि विचक्षणः ।
निकषे हेमरेखाभा यस्य रेखा प्रदृश्यते ॥ १६ ॥
तदक्षमुत्तमं विद्यात् तद्धार्यं शिवपूजकैः ।

तद्गुणदोषप्रकटनपूर्वकं अयं ग्राह्यः अयमग्राह्य इत्याह—**समा** इति ॥ १३–१६ ॥

शिखाऽऽदिस्थानेषु धारणाभेदः

शिखायामेकरुद्राक्षं त्रिंशतं शिरसा वहेत् ॥ १७ ॥
षट्त्रिंशतं गले दध्याद्बाह्वोः षोडशषोडश ।
मणिबन्धे द्वादशैव स्कन्धे [2]पञ्चशतं वहेत् ॥ १८ ॥
अष्टोत्तरशतैर्मालामुपवीतं प्रकल्पयेत् ।
द्विसरं त्रिसरं वाऽपि सराणां पञ्चकं तथा ॥ १९ ॥
सराणां सप्तकं वाऽपि बिभृयात् कण्ठदेशतः ।
मुकुटे कुण्डले चैव कर्णिकाहारकेऽपि वा ॥ २० ॥
केयूरकटके सूत्रं कुक्षिबन्धे विशेषतः ।
सुप्ते पीते सदाकालं रुद्राक्षं धारयेन्नरः ॥ २१ ॥

[1] साम्येन—क. [2] पञ्चदशं—अ १.

त्रिशतं त्वधमं पञ्चशतं मध्यममुच्यते ।
सहस्रमुत्तमं प्रोक्तमेवं भेदेन धारयेत् ॥ २२ ॥

शिखाऽऽदिस्थानेषु धारणाभेदमाह—शिखायामिति ॥ १७–२२ ॥

तत्तत्स्थानधारणामन्त्राः

शिरसीशानमन्त्रेण [1]कण्ठे तत्पुरुषेण तु ।
अघोरेण गले धार्यं तेनैव हृदयेऽपि च ॥ २३ ॥
अघोरबीजमन्त्रेण करयोर्धारयेत् सुधीः ।
पञ्चाशदक्षग्रथितान् व्योमव्याप्यभिचोदरे ॥ २४ ॥
पञ्च ब्रह्मभिरङ्गैश्च त्रिमाला पञ्च सप्त च ।
ग्रथित्वा मूलमन्त्रेण सर्वाण्यक्षाणि धारयेत् ॥ २५ ॥

तत्तन्मन्त्रोच्चारणपूर्वकं तत्तत्स्थाने धार्यमित्याह—शिरसीति ॥ २३ ॥ रुद्राक्षाणां मध्यविलसितव्योमव्याप्यभिचोदरे रुद्राक्षमध्यस्थसुषिराकाशे अकारादिक्षकारान्तपञ्चाशदक्षरविन्यासपूर्वकसूत्रग्रन्थिग्रथितान् पञ्चब्रह्ममन्त्रैः पञ्चाक्षरीमन्त्रेण चाभिमन्त्र्य, अक्षमालिकोपनिषदुक्तरीत्या प्राणप्रतिष्ठाऽऽदिकं कृत्वा, सर्वाण्यक्षाणि धारयेदित्यर्थः ॥ २४–२५ ॥

रुद्राक्षाणां वक्त्रभेदेन फलभेदः

अथ हैनं भगवन्तं कालाग्निरुद्रं भुसुण्डः पप्रच्छ रुद्राक्षाणां भेदेन यदक्षं यत्स्वरूपं यत्फलमिति तत्स्वरूपं मुखयुक्तमरिष्टनिरसनं कामाभीष्टफलं ब्रूहीति होवाच ॥ २६ ॥

[1] मुखं—उ, उ १.

तत्रैते श्लोका भवन्ति—

एकवक्त्रं तु रुद्राक्षं परतत्त्वस्वरूपकम् ।
तद्धारणात् परे तत्त्वे लीयते विजितेन्द्रियः ॥ २७ ॥
द्विवक्त्रं तु मुनिश्रेष्ठ चार्धनारीश्वरात्मकम् ।
धारणादर्धनारीशः प्रीयते तस्य नित्यशः ॥ २८ ॥
त्रिमुखं चैव रुद्राक्षमग्नित्रयस्वरूपकम् ।
तद्धारणाच्च हुतभुक् तस्य तुष्यति नित्यदा ॥ २९ ॥
चतुर्मुखं तु रुद्राक्षं चतुर्वक्त्रस्वरूपकम् ।
तद्धारणाच्चतुर्वक्त्रः प्रीयते तस्य नित्यदा ॥ ३० ॥
पञ्चवक्त्रं तु रुद्राक्षं पञ्चब्रह्मस्वरूपकम् ।
पञ्चवक्त्रः स्वयं ब्रह्म पुंहत्यां च व्यपोहति ॥ ३१ ॥
षड्वक्त्र[1]मपि रुद्राक्षं कार्तिकेयाधिदैवतम् ।
तद्धारणान्महाश्रीः स्यान्महदारोग्यमुत्तमम् ॥ ३२ ॥
मतिविज्ञानसंपत्तिशुद्धये धारयेत् सुधीः ।
विनायकाधिदैवं च प्रवदन्ति मनीषिणः ॥ ३३ ॥
सप्तवक्त्रं तु रुद्राक्षं सप्तमात्राधिदैवतम् ।
तद्धारणान्महाश्रीः स्यान्महदारोग्यमुत्तमम् ॥ ३४ ॥
महती ज्ञानसंपत्तिः शुचिर्धारयतः सदा ।
अष्टवक्त्रं तु रुद्राक्षमष्टमात्राधिदैवतम् ॥ ३५ ॥

[1] मति—क, अ १, उ १.

वस्वष्टकप्रियं चैव गङ्गाप्रीतिकरं तथा ।
तद्धारणादिमे प्रीता भवेयुः सत्यवादिनः ॥ ३६ ॥
नववक्त्रं तु रुद्राक्षं नवशक्त्यधिदैवतम् ।
तस्य धारणमात्रेण प्रीयन्ते नव शक्तयः ॥ ३७ ॥
दशवक्त्रं तु रुद्राक्षं यमदैवमुदाहृतम् ।
[1]दर्शात् प्रशान्तिजनकं धारणान्नात्र संशयः ॥ ३८ ॥
एकादशमुखं त्वक्षं रुद्रैकादशदैवतम् ।
तदिदं दैवतं प्राहुः सदा सौभाग्यवर्धनम् ॥ ३९ ॥
रुद्राक्षं द्वादशमुखं महाविष्णुस्वरूपकम् ।
द्वादशादित्यरूपं च बिभर्त्येव हि तत्परः ॥ ४० ॥
त्रयोदशमुखं चाक्षं कामदं सिद्धिदं शुभम् ।
तस्य धारणमात्रेण कामदेवः प्रसीदति ॥ ४१ ॥
चतुर्दशमुखं चाक्षं रुद्रनेत्रसमुद्भवम् ।
सर्वव्याधिहरं चैव सर्वदाऽऽरोग्यमाप्नुयात् ॥ ४२ ॥

रुद्राक्षाणां वक्त्रभेदं जिज्ञासुः भुसुण्डो भगवन्तं पृच्छतीत्याह—अथेति ॥२६–३७॥ दशवक्त्ररुद्राक्षदर्शनं स्वातिरिक्ताखिलशान्तिकरमित्यर्थः॥३८–४२॥

रुद्राक्षधारिवर्ज्यानि

मद्यं मांसं च लशुनं पलाण्डुं शिग्रुमेव च ।
श्लेष्मातकं विड्वराहमभक्ष्यं वर्जयेन्नरः ॥ ४३ ॥

[1] दर्शनाच्छान्ति—अ २.

रुद्राक्षधारी मद्यमांसादिकं कदाऽपि नास्वादयेदित्याह—मद्यमिति ॥४३॥

रुद्राक्षधारणामहिमा

ग्रहणे विषुवे चैवमयने संक्रमेऽपि च ।
दर्शेषु पूर्णमासे च पूर्णेषु दिवसेषु च ।
रुद्राक्षधारणात् सद्यः सर्वपापैः प्रमुच्यते ॥ ४४ ॥
रुद्राक्षमूलं तद्ब्रह्मा तन्नालं विष्णुरेव च ।
तन्मुखं रुद्र इत्याहुस्तद्विन्दुः सर्वदेवताः ॥ इति ॥ ४५ ॥

ग्रहणादिपुण्यकालधारणात् सर्वपापनिवृत्तिं तत्त्रिमूर्तित्वं सर्वदेवतात्मकत्वं चाह—ग्रहण इति ॥ ४४–४५ ॥

रुद्राक्षोत्पत्तिः तन्महिमा च

अथ कालाग्निरुद्रं भगवन्तं सनत्कुमारः पप्रच्छाधीहि भगवन् रुद्राक्षधारणविधिम् । तस्मिन् समये निदाघजडभरतदत्तात्रेयकात्यायनभरद्वाजकपिलवसिष्ठपिप्पलादयश्च कालाग्निरुद्रं परिसमेत्योचुः । अथ कालाग्निरुद्रः किमर्थं भवतामागमनमिति होवाच । रुद्राक्षधारणविधिं वै सर्वे श्रोतुमिच्छामह इति ॥ ४६ ॥

अथ कालाग्निरुद्रः प्रोवाच । रुद्रस्य नयनादुत्पन्ना रुद्राक्षा इति लोके ख्यायन्ते । अथ सदाशिवः संहारकाले संहारं कृत्वा संहारार्थं मुकुलीकरोति । तन्नयनाज्जाता रुद्राक्षा इति होवाच । तस्माद्रुद्राक्षत्वमिति कालाग्निरुद्रः प्रोवाच ॥ ४७ ॥

तद्रुद्राक्षे वाग्विषये कृते दशगोप्रदानेन यत् फलमवाप्नोति तत् फलमश्नुते । स एव भस्मज्योती रुद्राक्ष इति । तद्रुद्राक्षं करेण

स्पृष्ट्वा धारणमात्रेण द्विसहस्रगोप्रदानफलं भवति । तद्रुद्राक्षे कर्णयोर्धार्यमाणे एकादशसहस्रगोप्रदानफलं भवति । एकादशरुद्रत्वं च गच्छति । तद्रुद्राक्षे शिरसि धार्यमाणे कोटिगोप्रदानफलं भवति । एतेषां स्थानानां कर्णयोः फलं वक्तुं न शक्यमिति होवाच ॥ ४८ ॥

सनत्कुमारादयोऽपि रुद्राक्षेयत्तामवगन्तुं कालाग्निरुद्रं पृच्छन्तीत्याह— अथेति ॥ ४६–४८ ॥

रुद्राक्षविद्यावेदनफलम्

य इमां रुद्राक्षजाबालोपनिषदं नित्यमधीते बालो वा युवा वा वेद स महान् भवति । स गुरुः सर्वेषां मन्त्राणामुपदेष्टा भवति । एतैरेव होमं कुर्यात् । एतैरेवार्चनम् । तथा राक्षोघ्नं मृत्युतारकं गुरुणा लब्धं कण्ठे बाहौ शिखायां वा बध्नीत । ससद्वीपवती भूमिर्दक्षिणार्थं नावकल्पते । तस्माच्छ्रद्धया यां कांचिद्दां दद्यात् सा दक्षिणा भवति । य इमामुपनिषदं ब्राह्मणः प्रातरधीयानो रात्रिकृतं पापं नाशयति । सायमधीयानो दिवसकृतपापं नाशयति । मध्याह्नेऽधीयानः षड्जन्मकृतपापं नाशयति । सायं प्रातः प्रयुञ्जानोऽनेकजन्मकृतपापं नाशयति षट्सहस्रलक्षगायत्रीजपफलमवाप्नोति ब्रह्महत्यासुरापानस्वर्णस्तेयगुरुदारगमनतत्संयोगपातकेभ्यः पूतो भवति सर्वतीर्थफलमश्नुते पतितसंभाषणात् पूतो भवति षड्वंशतसहस्रपावनो भवति शिवसायुज्यमवाप्नोति न च पुनरावर्तते न च पुनरावर्तत इत्यों सत्यमित्युपनिषत् ॥ ४९ ॥

रुद्राक्षविद्यावेदनफलमाह—य इति । **एतैरेव मन्त्रैः होमं कुर्यात्** । एवमुक्तप्रकारेण रुद्राक्षधारी शिवप्रसादतश्चित्तशुद्धिं ज्ञानं चाप्य स्वातिरिक्ता-शिवग्रास**शिवसायुज्यं,**

शिवो गुरुः शिवो वेदः शिवो देवः शिवः प्रभुः ।
शिवोऽस्म्यहं शिवःसर्वं शिवादन्यन्न किञ्चन ॥

इति श्रुतिसिद्धशिवतत्त्वज्ञानशिवस्वरूपावस्थानलक्षणं विदेहकैवल्यमेतीत्यर्थः । **इत्युपनिषच्छब्दः** रुद्राक्षजाबालोपनिषत्परिसमाप्त्यर्थः ॥ ४९ ॥

श्रीवासुदेवेन्द्रशिष्योपनिषद्ब्रह्मयोगिना ।
रुद्राक्षोपनिषद्व्याख्या लिखिता शिवगोचरा ।
रुद्राक्षजाबालव्याख्याग्रन्थः पञ्चाशदीरितः ॥

इति श्रीमदीशाद्यष्टोत्तरशतोपनिषच्छास्त्रविवरणे अष्टाशीतिसङ्ख्यापूरकं
रुद्राक्षजाबालोपनिषद्विवरणं सम्पूर्णम्

शरभोपनिषत्

भद्रं कर्णेभिः—इति शान्तिः

ब्रह्मविष्णुरुद्राणां मध्ये कोऽधिकतमः

अथ हैनं पैप्पलादो ब्रह्माणमुवाच भो भगवन् ब्रह्मविष्णु-रुद्राणां मध्ये को वा अधिकतरो ध्येयः स्यात्तत्त्वमेव नो ब्रूहीति ॥ १ ॥

सर्वं सन्त्यज्य मुनयो यद्ब्रजन्त्यात्मरूपतः ।
तच्छारभं त्रिपाद्ब्रह्म स्वमात्रमवशिष्यते ॥

इह खलु अथर्वणवेदप्रविभक्तेयं शरभोपनिषत् सर्वैरपि सर्वात्मतयोपास्य-पारमैश्वर्यतत्त्वं प्रकटयन्ती विजृम्भते । अस्याः स्वल्पग्रन्थतो विवरणमारभ्यते । पैप्पलादब्रह्मप्रश्नप्रतिवचनरूपेयमाख्यायिका विद्यास्तुत्यर्था । आख्यायिकामव-तारयति—अथेति । उवाच किमिति ? भो भगवन्निति ॥ १ ॥

रुद्रस्य श्रेष्ठत्वम्

तस्मै स होवाच पितामहश्च हे पैप्पलाद शृणु वाक्यमेतत् ॥ २ ॥

बहूनि पुण्यानि कृताति येन तेनैव लभ्यः परमेश्वरोऽसौ ।
यस्याङ्गजोऽहं हरिरिन्द्रमुख्या मोहान्न जानन्ति सुरेन्द्रमुख्याः॥३॥
प्रभुं वरेण्यं पितरं महेशं यो ब्रह्माणं विदधाति तस्मै ।
वेदांश्च सर्वान् प्रहिणोति चाग्र्यं तं वै प्रभुं पितरं देवतानाम् ॥४॥
ममापि विष्णोर्जनकं देवमीड्यं योऽन्तकाले सर्वलोकान् संजहार ।
स एकः श्रेष्ठश्च वरिष्ठश्च ॥ ५ ॥

पैप्पलादप्रश्नोत्तरं ब्रह्मोवाचेत्याह—**तस्मा** इति ॥ २ ॥ श्रोतारमभिमुखीकृत्य परमेश्वरं सर्वकारणत्वेन सर्वदेवश्रेष्ठत्वेन च स्तौति—**बहूनी**ति । **मोहान्न जानन्ति** स्वात्मेति । अनन्तकोटिजन्मसुकृतपरिपाकसिद्धो यदधिगमः, ब्रह्मादयो यदंशसंभूताः, इन्द्रादयोऽपि यत्तत्त्वं न जानन्ति, यो हि चतुराननसर्वार्थसाधकवेदप्रदाता, यः सर्वोपरमकाले सर्वानात्मन्युपसंहरति, सोऽयं परमेश्वर एव सर्वदेवेषु **श्रेष्ठः वरिष्ठश्च** भवतीत्यर्थः ॥ ३–५ ॥

शरभरूपेण रुद्रेण नृसिंहवधः

यो घोरं वेषमास्थाय शरभाख्यं महेश्वरः ।
नृसिंहं लोकहन्तारं संजघान महाबलः ॥ ६ ॥
हरिं हरन्तं पादाभ्यामनुयान्ति सुरेश्वराः ।
मा वधीः पुरुषं विष्णुं विक्रमस्व महानसि ॥ ७ ॥
कृपया भगवान् विष्णुं विददार नखैः खरैः ।
चर्माम्बरो महावीरो वीरभद्रो बभूव ह ॥ ८ ॥
स एको रुद्रो ध्येयः सर्वेषां सर्वसिद्धये ।

कथं पुनरस्य देववरिष्ठत्वमित्याकाङ्क्षायां लोकक्षोभकरनृसिंहनिग्रह-ब्रह्मशिरःपाटन-विश्वसर्गस्थितिभङ्गकरण—सर्वग्रासकालदर्पहरण-हालाहलगतिकुण्ठन -

स्वपदार्चकविष्णुचक्रप्रदानादिनिरङ्कुशनिग्रहानुग्रहाकुण्ठितशक्तिसंपन्नत्वात् सर्व-देववरिष्ठत्वमीशस्य स्वभावसिद्धं इति देवैरप्युपास्यमानत्वं चाप्याह—**यो घोरमिति** ॥ ६ ॥ तदा **हरिम्** ॥ ७ ॥ देवैः प्रार्थितः तेषु कृपया ॥ ८ ॥

देवकृतशरभस्तुतिः

यो ब्रह्मणः पञ्चमवक्त्रहन्ता तस्मै रुद्राय नमो अस्तु ॥ ९ ॥
यो विस्फुलिङ्गेन ललाटजेन सर्वं जगद्भस्मसात्संकरोति ।
पुनश्च सृष्ट्वा पुनरप्यरक्षदेवं स्वतन्त्रं प्रकटीकरोति ॥
तस्मै रुद्राय नमो अस्तु ॥ १० ॥
यो वामपादेन जघान कालं घोरं पपेऽथ हालाहलं दहन्तम् ।
दक्षाङ्घ्रिनापस्मृतिमुग्रवीर्यं तस्मै रुद्राय नमो अस्तु ॥ ११ ॥
यो वामपादार्चितविष्णुनेत्रस्तस्मै ददौ चक्रमतीव हृष्टः ।
तस्मै रुद्राय नमो अस्तु ॥ १२ ॥
यो दक्षयज्ञे सुरसङ्घान् विजित्य विष्णुं बबन्धोरगपाशेन वीरः ।
तस्मै रुद्राय नमो अस्तु ॥ १३ ॥
यो लीलयैव त्रिपुरं ददाह विष्णुं कविं सोमसूर्याग्निनेत्रः ।
सर्वे देवाः पशुतामवापुः स्वयं तस्मात् पशुपतिर्बभूव ।
तस्मै रुद्राय नमो अस्तु ॥ १४ ॥
यो मत्स्यकूर्मादिवराहसिंहान् विष्णुं क्रमन्तं वामनमादिविष्णुम् ।
विविक्तवं पीड्यमानं सुरेशं भस्मीकृत्य मन्मथं यमं च ।
तस्मै रुद्राय नमो अस्तु ॥ १५ ॥
एवंप्रकारेण बहुधा प्रतुष्ट्वा क्षमापयामासुर्नीलकण्ठं महेश्वरम् ॥ १६ ॥

कथं देवाः स्तुवन्तीत्यत्र—यो ब्रह्मण इति ॥ ९–१४ ॥ विविक्लबं श्रमान्वितम् ॥ १५ ॥ एवं देवैः प्रार्थितो भगवान् तत्प्रार्थनामङ्गीकृत्य तेषु प्रसादं चकारेत्याह—एवमिति ॥ १६ ॥

रुद्रानुग्रहः

तापत्रयसमुद्भूतजन्ममृत्युजरादिभिः ।
नानाविधानि दुःखानि जहार परमेश्वरः ॥ १७ ॥
एवमङ्गीकरोच्छिवः प्रार्थनं सर्वदेवानाम् ।
शङ्करो भगवानाद्यो ररक्ष सकलाः प्रजाः ॥ १८ ॥
यत्पादाम्भोरुहद्वन्द्वं मृग्यते विष्णुनाऽधुना ।
स्तुत्वा स्तुत्यं महेशानमवाङ्मनसगोचरम् ।
भक्त्या नम्रतनोर्विष्णोः प्रसादमकरोद्विभुः ॥ १९ ॥

ततस्तेषां तापत्रयसमुद्भूतजन्ममृत्युजरादिभिः संजातानि नानाविधानि दुःखानि जहार परमेश्वरः जहार निश्शेषमपहृतवान् ॥ १७ ॥ एवमङ्गीकरोत् अङ्गीचकार ॥ १८ ॥ तस्य देवैरपि दुरवगमत्वमाह—यदिति । अधुनाऽपि । तं स्तुत्वा तत्प्रभावतः इन्द्रादयो देवाः तत्प्रसादं लेभिरे । ततो विष्णुरपि देवं प्रणिपत्य बहुधा स्तुत्वा कृताञ्जलिरासासास । ततः भक्त्या ॥ १९ ॥

रुद्रयाथात्म्यज्ञानफलम्

यतो वाचो निवर्तन्ते अप्राप्य मनसा सह ।
आनन्दं ब्रह्मणो विद्वान्न बिभेति कदाचनेति ॥ २० ॥
अणोरणीयान् महतो महीयानात्माऽस्य जन्तोर्निहितो गुहायाम् ।
तमक्रतुं पश्यति वीतशोको धातुः प्रसादान्महिमानमीशम् ॥ २१ ॥

तद्याथात्म्यं तज्ज्ञानफलं चाह—यत इति ॥ २० ॥ ब्रह्मणोऽवाङ्मनसगोचरत्वेन न कोऽपि तत्स्वरूपं पश्यतीत्याशङ्क्य तद्भजनलब्धप्रसादो मुनिस्तं यथावत् पश्यतीत्याह—अणोरिति । तमक्रतुं निर्विकल्पं स्वमात्रमिति पश्यति ॥ २१ ॥

रुद्रमहिमा

वसिष्ठवैयासिकिवामदेव[1]विरिञ्चिमुख्यैर्हृदि भाव्यमानः ।
सनत्सुजातादिसनातनाद्यैरीड्यो महेशो भगवानादिदेवः ॥२२॥
सत्यो नित्यः सर्वसाक्षी महेशो नित्यानन्दो निर्विकल्पो निराख्यः ।
अचिन्त्यशक्तिर्भगवान् गिरीशः स्वाविद्यया कल्पितमानभूयः ॥
अतिमोहकरी माया मम विष्णोश्च सुव्रत ।
तस्य पादाम्बुजध्यानात् दुस्तरा [2]सुतरा भवेत् ॥ २४ ॥

तस्य वसिष्ठादिब्रह्मनिष्ठपटलेड्यनिर्विशेषस्वरूपमाह—**वसिष्ठेति** । **हृदि** प्रत्यगभिन्नब्रह्मरूपेण **भाव्यमानः** तथा **सनत्सुजातादिसनातनाद्यैः** "ब्रह्माहं", "अहमेव ब्रह्म" इत्यनवरतं **ईड्यः** । ब्रह्मादीनामपि य आदिः सोऽयम् ॥ २२ ॥ **सत्यः** कालत्रयाबाध्यत्वात् । **नित्यः** निरवधिकैश्वर्यसम्पन्नत्वात् । **सर्वसाक्षी** सर्वसाक्ष्यभावाभावेक्षितृत्वात् । **महेशः** महदादिप्रपञ्चेशितृत्वात् । यद्वा—निष्प्रतियोगिकतया महान् परमात्माऽहमेवेत्यवस्थातुमीश्वरत्वात् । **नित्यानन्दः** भूमानन्दमात्रत्वात् । स्वाङ्गदृष्टिप्रसक्तविकल्पग्रासत्वात् **निर्विकल्पः** । **निराख्यः** नामरूपबाह्यत्वात् । यस्य शक्तिः अघटितघटनासामर्थ्यत अचिन्त्या स्यात् सोऽयं **अचिन्त्यशक्तिः** । सर्वेश्वरत्वात् अचिन्त्यशक्तिमत्सर्वेश्वरत्वं वास्तवमित्याशङ्क्य स्वाविद्याकल्पितत्वे मानबाहुल्यात् न हि वास्तवमित्याह—**स्वाविद्ययेति** । स्वदृष्ट्याऽविद्यमाना स्वाविद्या तया सर्वसाक्षित्वमचिन्त्यशक्तिम-

[1] विरिञ्च—अ १, अ २. [2] सुस्तरा—क, अ १, अ २, उ १.

त्सर्वेश्वरत्वादिकं सर्वं कल्पितमेवेत्यत्र—"पश्यतेहापि सन्मात्रमसदन्यत्", "मद्व्यतिरिक्तमणुमात्रं न विद्यते", "मायाक्लृप्तौ बन्धमोक्षौ नेश्वरत्वं न जीवता", इत्यादिमानभूयस्त्वात् निष्प्रतियोगिकब्रह्ममात्रत्वमेव वास्तवमित्यर्थः । भूय इत्यव्ययम् ॥ २३ ॥ यद्येवमविद्यमानाऽविद्या सर्वैरपि जेतुं शक्येत्यत आह—अतिमोहकरीति । मम ब्रह्मणो विष्णोश्चाप्यतिमोहं परिच्छिन्नब्रह्मत्वविष्णुत्वाभिमानं करोतीति अतिमोहकरी माया अनापन्नशैवभावानां दुस्तराऽपि तत्पदध्यानतः सुतरा भवेदित्यर्थः ॥ २४ ॥

विष्णुशिवयोरभेदः

विष्णुर्विश्वजगद्योनिः स्वांशभूतैः स्वकैः सह ।
ममांशसंभवो भूत्वा पालयत्यखिलं जगत् ॥ २५ ॥
विनाशं कालतो याति ततोऽन्यत् सकलं मृषा ।
तस्मै महाग्रासाय महादेवाय शूलिने ।
महेश्वराय मृडाय तस्मै रुद्राय नमो अस्तु ॥ २६ ॥
एको विष्णुर्महद्भूतं पृथग्भूतान्यनेकशः ।
त्रीन् लोकान् व्याप्य भूतात्मा भुङ्क्ते विश्वभुगव्ययः ॥ २७ ॥
चतुर्भिश्च चतुर्भिश्च द्वाभ्यां पञ्चभिरेव च ।
हूयते च पुनर्द्वाभ्यां स मे विष्णुः प्रसीदतु ॥ २८ ॥
ब्रह्मार्पणं ब्रह्म हविर्ब्रह्माग्नौ ब्रह्मणा हुतम् ।
ब्रह्मैव तेन गन्तव्यं ब्रह्मकर्मसमाधिना ॥ २९ ॥
शरा जीवास्तदङ्गेषु भाति नित्यं हरिः स्वयम् ।
ब्रह्मैव शरभः साक्षान्मोक्षदोऽयं महामुने ॥ ३० ॥

विष्ण्वादिः शिवात् भिद्यत इत्यत आह—**विष्णुरिति** । **स्वांशभूतैः स्वकैः सह** जीवकोटिभिः साकम् ॥ २५ ॥ सर्वप्रपञ्चस्य स्वांशजत्वे सत्यत्वं स्यादित्याशङ्क्य प्रतिबिम्बं बिम्बमात्रवत् स्वज्ञानकाले स्वांशनाशः स्वमात्रमेवेत्याह—**विनाशमिति** । यः स्वाज्ञादिदृष्ट्या अंशांशितया भातः **तस्मै** ॥ २६ ॥ पैप्पलादभेददृष्ट्यनुरोधेन विष्णुशिवयोः नियम्यनियामकतोक्ता । शिवप्रसादतो विष्णुशिवभेदहेत्वज्ञानापायमालक्ष्य तयोरभेददार्ढ्याय विष्णुत्वेन तमेव प्रार्थयति—**एक इति** ॥ २७ ॥ कथं पुनरस्य विश्वयज्ञभोक्तृत्वं इत्यत आह—**चतुर्भिरिति** । "आश्रावयेति चतुरक्षरमस्तु श्रौषडिति चतुरक्षरं यजेति द्व्यक्षरं ये यजामह इति पञ्चाक्षरं द्व्यक्षरो वषट्कारः" इति श्रुतिसिद्धमन्त्रतो यत्र यज्ञे "यज्ञो वै विष्णुः" इति श्रुतिसिद्धे विष्णौ **हूयते स मे विष्णुः** परमेश्वरः स्वज्ञानं दत्वा **प्रसीदत्वित्यर्थः** ॥ २८ ॥ विष्णोर्यज्ञत्वे अर्पणहविरादीनामनेकत्वात् विष्णोरनेकत्वं स्यादित्यत आह—**ब्रह्मार्पणमिति** । अर्पणहविरादिकं सर्वं विष्ण्वाख्यं ब्रह्मैवेत्यर्थः ॥ २९ ॥ शरभशब्दार्थनिर्वचनेनापि विष्णुशिवयोरत्यन्ताभेदमेव व्यक्तीकरोति—**शरा इति** । **शरा जीवास्तदङ्गेषु** पादादिशिरोरुहान्तेषु तस्य विष्णोरङ्गेषु तस्य शिवस्याङ्गेषु वा शरा अनन्तकोटिब्रह्माण्डानि तन्निवासिनो जीवाश्च मायया विकल्पिताः स्वाज्ञादिदृष्टिमोहे सत्यसति परमार्थतो **भाति** । विष्ण्वाख्यं **ब्रह्मैव शरभः** ॥ ३० ॥

शिवस्यैव ध्येयत्वम्

मायावशादेव देवा मोहिता ममताऽऽदिभिः ।
तस्य माहात्म्यलेशांशं वक्तुं [1]केनाप्यशक्यते ॥ ३१ ॥
परात्परतरं ब्रह्म यत् परात्परतो हरिः ।
तत् परात्परतरो हीशस्तस्मात्तल्योऽधिको न हि ॥ ३२ ॥
एक एव शिवो नित्यस्ततोऽन्यत् सकलं मृषा ।

[1] केनापि श—अ १, अ २.

तस्मात् सर्वान् परित्यज्य ध्येयान् विष्ण्वादिकान् सुरान् ॥३३॥

शिव एव सदा ध्येयः सर्वसंसारमोचकः ।

तस्मै महाग्रासाय महेश्वराय नमः ॥ ३४ ॥

एवं विष्णुशिवयोरभेदेऽपि मायावशादेव । निर्मायस्य तस्य ॥ ३१ ॥ क्षरप्रपञ्चात् परमक्षरमीश्वराख्यं तस्मात् परात् ईश्वरादपि परतरं परमाक्षरं ब्रह्म । यत्परादपि परमाक्षरं तदेव हरिः, परात् परतरत्वेन हरेर्विभातत्वात् । यत्परात् परतो हरिः इति ख्यातं तत्परात् परतरो विभात ईश एव हि । तस्मात् तुल्योऽधिकः समो वा कोऽपि न विद्यते, स्वातिरिक्तसामान्यस्य मृग्यत्वात् ॥ ३२ ॥ यत एवमतः एक एव । यस्मादेवं तस्मात् । स्वाज्ञानतः परिच्छिन्नतया ध्येयान् ॥ ३३ ॥ निष्प्रतियोगिकस्वमात्रधिया ध्येयः । यः स्वानां स्वातिरिक्तसंसारभ्रमापह्नवकृत् तस्मै ॥ ३४ ॥

एतच्छास्त्रसंप्रदाननियमः

पैप्पलादं महाशास्त्रं न देयं यस्य कस्य चित् ।

नास्तिकाय कृतघ्नाय दुर्वृत्ताय दुरात्मने ॥ ३५ ॥

दाम्भिकाय नृशंसाय शठायानृतभाषिणे ।

सुव्रताय सुभक्ताय सुवृत्ताय सुशीलिने ॥ ३६ ॥

गुरुभक्ताय दान्ताय शान्ताय ऋजुमानसे ।

शिवभक्ताय दातव्यं ब्रह्मकर्मोक्तधीमते ॥ ३७ ॥

स्वभक्तायैव दातव्यमकृतघ्नाय सुव्रत ।

न दातव्यं सदा गोप्यं यतो नैव द्विजोत्तम ॥ ३८ ॥

एतत् पैप्पलादं महाशास्त्रं योऽधीते श्रावयेद्विजः स जन्ममरणेभ्यो मुक्तो भवति गर्भवासाद्विमुक्तो भवति सुरापानात्

पूतो भवति स्वर्णस्तेयात् पूतो भवति ब्रह्महत्यात् पूतो भवति गुरुतल्पगमनात् पूतो भवति । स सर्वान् वेदानधीतो भवति । स सर्वान् देवान् ध्यातो भवति । स समस्तमहापातकोपपातकात् पूतो भवति । तस्मादविमुक्तमाश्रितो भवति । स सततं शिवप्रियो भवति । स शिवसायुज्यमेति । न स पुनरावर्तते न स पुनरावर्तते । इत्याह भगवान् ब्रह्मेत्युपनिषत् ॥ ३९ ॥

उक्तलक्षणलक्षितमेतच्छास्त्रं अनधिकारिणे न देयं अधिकारिणे देयमित्याह —पैप्पलादमिति ॥ ३५–३७ ॥ उक्ताधिकारिलक्षणविरळाय **न दातव्यम्** ॥ ३८ ॥ एतच्छास्त्रपठनतदर्थविचारणसामान्यमुख्यफलमाह—**एतदिति** । उपनिषच्छब्दः शरभोपनिषत्समाप्त्यर्थः ॥ ३९ ॥

श्रीवासुदेवेन्द्रशिष्योपनिषद्ब्रह्मयोगिना ।
शरभोपनिषद्व्याख्या लिखितेश्वरगोचरा ।
शरभोपनिषद्व्याख्याग्रन्थजातं शतं स्मृतम् ॥

इति श्रीमदीशाद्यष्टोत्तरशतोपनिषच्छास्त्रविवरणे पञ्चाशत्सङ्ख्यापूरकं शरभोपनिषद्विवरणं सम्पूर्णम् ॥

श्वेताश्वतरोपनिषत्

सह नाववतु—इति शान्तिः

प्रथमोऽध्यायः

जगत्कारणजिज्ञासा

ब्रह्मवादिनो वदन्ति—

किं कारणं ब्रह्म कुतः स्म जाता जीवाम केन क्व च संप्रतिष्ठाः।
अधिष्ठिताः केन सुखेतरेषु वर्तामहे ब्रह्मविदो व्यवस्थाम् ॥ १ ॥

श्वेताश्वतरोपनिषन्मन्त्रग्रामप्रकाशितम्।
प्रतियोगिविनिर्मुक्तब्रह्ममात्रमहं महः ॥

इह खलु श्वेताश्वतरमन्त्रोपनिषदः कृष्णयजुर्वेदप्रविभक्तत्वात् कठवल्ली-तैत्तिरीयादौ य उपोद्घातो वर्णितः स एव अत्रापि द्रष्टव्य इति न पृथगत्र निरूप्यते। अध्यायषट्कजुष्टेयं श्वेताश्वतरोपनिषत्। तत्राद्यं वाक्यं ब्राह्मणम्। ततः कृत्स्नोपनिषत् मन्त्रात्मिका। तत्राद्यं ब्राह्मणवाक्यमाह—**ब्रह्मवादिनो वदन्ती**ति। ब्रह्मवदनशीला मुनयः सर्वे मिलित्वा वेदार्थेतरस्वातिरिक्तास्तितावादिपक्षनिरसन-पूर्वकं, "सर्वे वेदा यत्पदमामनन्ति" इति, "वेदार्थः परमाद्वैतं नेतरत्" इति च श्रुतिस्मृत्यनुरोधेन स्वातिरिक्तापह्नवसिद्धं ब्रह्ममात्रं निष्प्रतियोगिकतया अवशिष्यत इति वदन्ति कथयन्तीत्यर्थः ॥

ब्राह्मणवाक्येन योऽर्थः प्रकाशितः तमेतमर्थं उत्तरे मन्त्राः प्रतिपादयन्तीत्याह—**किं कारणमित्यादिना**। स्वाज्ञदृष्टिप्रसक्तस्वातिरिक्तस्वाविद्यापदतत्कार्यजातस्य **किं कारणं ब्रह्म** अन्यद्वा, किं तद्ब्रह्म निर्विशेषं सविशेषं वा, किं तन्निमित्तमुपादान वा, यद्वा निमित्तकारणमेवैतत्। वयमाकाशादिवत् **कुतः स्म जाताः** स्थितिकाले ब्रह्मकार्यतया स्थिताः सुषुप्तिप्रळयादावुपादानब्रह्मणि लयं गताः सन्तः प्रबोधसर्गादौ पुनर्ब्रह्मकार्यतया वयं जाताः, अथवा जलचन्द्रघटाकाशस्थानीयाश्च वयं सुषुप्तिप्रळयादावुपाधिविलये बिम्बचन्द्रमहाकाशस्थानीयब्रह्मणैक्यमनुभूय पुनः प्रबोधादौ ब्रह्मविवर्ततया जाताः। **जीवाम केन,** केन वयं जीवामः, लडर्थे लोट्, अदृष्टेनेश्वरेण स्वभावेन वा। **क च संप्रतिष्ठाः** स्वापादावस्माकं विकारिण्यविकारिणि ब्रह्मणि वाऽवस्थानम्। **क च संप्रतिष्ठिता** इत्यस्मिन् पाठे मुक्तौ कीदृशे ब्रह्मणि वयमेकत्वेनावस्थिता इत्यर्थः। **केन वयं अधिष्ठिताः** अधिदेवतादित्यादिना ईश्वरेणोभाभ्यां वा अधिष्ठिताः सन्तः **सुखेतरेषु** सुखदुःखदप्रपञ्चेषु **वर्तामहे हे ब्रह्मविदः** वयं सम्यग्विचिन्त्य व्यवस्थां कुर्मः ॥ १ ॥

परमात्मनः उपादानकारणत्वम्

कालः स्वभावो नियतिर्यदृच्छा भूतानि योनिः पुरुष इति चिन्त्यम्।
संयोग एषां न त्वात्मभावादात्माऽप्यनीशः सुखदुःखहेतोः ॥२॥
ते ध्यान[1]योगा अनुगता अपश्यन् देवात्मशक्तिं स्वगुणैर्निगूढाम्।
यः कारणानि निखिलानि तानि कालात्मयुक्तान्यधितिष्ठत्येकः ॥
तमेकनेमिं त्रिवृतं षोडशान्तं शतार्धारं विंशतिप्रत्यराभिः।
अष्टकैः षड्भिर्विश्वरूपैकपाशं त्रिमार्गभेदं द्विनिमित्तैकमोहम् ॥४॥
पञ्चस्रोतोऽम्बुं पञ्चयोन्युग्र[2]वक्त्रां पञ्चप्राणोर्मिं पञ्चबुद्ध्यादिमूलाम्।
पञ्चावर्तां पञ्चदुःखौघवेगां पञ्चाशद्भेदां पञ्चपर्वामधीमः ॥ ५ ॥

[1] योगानु—क, उ, मु.

[2] वक्तां—क, उ, मु.

अत्रापरे ब्रह्मातिरिक्तकारणवादिनः समुत्तिष्ठन्ति, तान्निराकृत्य वेदार्थपक्षं स्थापयति—**काल** इति। संसृतिकारणं काल एवेति कालविदो वदन्ति, **स्वभाव** इति लोकायतिकाः, पुण्यपाप**नियति**रेव कारणमिति मीमांसकाः, कल्पादौ प्राणिकर्मसापेक्षमीश्वरेण न किंचिदपि सृष्टं किंतु **यदृच्छ**येदं जायते इति निरीश्वरवादिनः, जगन्नित्यतावादिनो **भूतानि** कारणमिति वदन्ति, **योनिः** प्रकृतिः कारणमिति प्राकृताः शाक्ताः, **पुरुषो** हिरण्यगर्भ एव कारणमिति योगिनः, इत्थं कालादिपुरुषान्तं स्वाज्ञानानुरोधेन **चिन्त्यं** चिन्तामात्रमवशिष्यते, नैतावताऽर्थसिद्धिः। प्रातिस्विकेन कालादीनां कारणताऽभावेऽपि मिलित्वा कारणता स्यादित्यत आह—**संयोगः** इति। कालादिप्रातिस्विकपक्षवदेषां संयोगोऽपि कारणतां नार्हति। तर्ह्येषां संयोगस्याप्यकारणत्वे तदपेक्षया किं कारणतामर्हतीत्यत आह—**आत्मभावा**दिति। कालादीनां भोग्यत्वेन परतन्त्रत्वात् तदपेक्षया भोक्तुरात्मनः सत्त्वात् स एव मुख्यकारणं भवत्वित्यत आह—**आत्माऽप्यनीश** इति। जगन्निर्माणासमर्थ इत्यर्थः। कुतः? **सुखदुःखकर्तृत्वहेतोः** ॥ २ ॥ तस्याप्येवमकारणत्वे किं कारणत्वेन पश्यन्तीत्यत आह—**त** इति। ते ब्रह्मविदः ध्यानमेव योगो येषां ते **ध्यानयोगाः** सन्तः जगन्मूलकारणं **अनुगता अपश्यन्**। किमित्यपेक्षायामाह—**देवात्मशक्तिमिति**। देवस्य निर्विशेषत्वेन कारणत्वानुपपत्त्या तदभेदाध्यासेन तत्परतन्त्रा काचन देवात्मन ईश्वरत्वकलनाहेतुभूता **देवात्मशक्तिः** तां मायां सत्त्वादिस्वगुणैः स्रष्टृत्वादिगुणैश्च **निगूढाम्**। जगत्परिणामिकारणत्वेन अपश्यन्नित्युक्तमायायाः स्फुरणशक्तिप्रदो यः परमात्मा कालप्रभृतीन्यात्मपर्यन्तानि **कालात्मयुक्तानि निखिलानि कारणानि तान्येक** एव **अधितिष्ठति**, तेषां सत्ताप्रदत्वात् ॥ ३ ॥ तमेव वैराग्यहेतोः उत्तरो मन्त्रः प्रतिपादयति रथचक्रतया—**तमिति**। यः सर्वाधिकरणतया वर्णितस्तमेतमात्मानं पूर्वमन्त्रे या स्वमायाशक्तितया निर्दिष्टा तस्याः संसारभ्रमणनिर्वाहकत्वेन स्वाधिष्ठातुर्देवस्य सैवैकनेमिः **तमेकनेमिं**, सत्त्वादिगुणत्रययोगतः जगत्सृष्टिस्थितिसंहारशक्तियुग्ब्रह्मविष्णुरुद्रैस्त्रिभिर्विशिष्टं **त्रिवृतं**, यः प्रश्नोपनिषत्पठितप्राणादिनामान्तषोडशकलाऽवसाने विभाति तं **षोडशान्तं**, यस्याकारादिळकारान्तपञ्चाशद्वर्णा

अरा इव विभान्ति तं **शतार्धारं**, ज्ञानेन्द्रियपञ्चकं कर्मेन्द्रियपञ्चकं तत्तद्विषयपञ्चकं शब्दादिवचनादि मनआद्यन्तःकरणचतुष्टयं मन्तव्यादिविषयचतुष्टयं दिग्वातादि-श्रोत्रादिचतुर्दशकरणाधिपाश्च प्राणादिपञ्चकं तत्र दशेन्द्रियाणि तद्विषयाश्च विंशत्यपराः अन्तःकरणादिना सह अष्टौ वसवः द्वादशादित्याश्च कीलस्थानीयाः प्रत्यराः **विंशतिप्रत्यरैः** युक्तम् । अराभिरिति स्त्रीलिङ्गं छान्दसम् । तैत्तिरीयपठित-त्वक्चर्ममांसरुधिरमेदोऽस्थिमज्जानः शुक्रं चेति धात्वष्टकं, धर्मज्ञानवैराग्यैश्वर्याधर्मा-ज्ञानावैराग्यानैश्वर्याणि भावाष्टकं, गौतमोक्तदयाक्षान्त्यनसूयाशौचमङ्गळानाया-सार्कार्पण्यास्पृहेत्यात्मगुणाष्टकं, अणिमाद्यैश्वर्याष्टकं, भूमिराप इत्यादिप्रकृत्यष्टकं,

ब्रह्मा प्रजापतिर्देवा गन्धर्वाः यक्षराक्षसाः ।
पितरश्च पिशाचाश्च देवाष्टकमुदाहृतम् ॥

इति देवाष्टकं, भवशर्वेशानपशुपत्युग्रभीमरुद्रमहादेव इति मूर्त्यष्टकं, **एवं षड्भिरष्टकैः** युक्तम् । विश्वरूपतया विवर्तत इति विश्वरूपः कामः तेनेदं सर्वं पाश्यते बध्यत इति स एव पाशः यस्य तं **विश्वरूपैकपाशम्** । अर्चिरादिरेको मार्गः, धूमादिरेकः, जायस्व म्रियस्वेत्याद्येकः, एते त्रयो मार्गभेदा यस्य तं **त्रिमार्गभेदम्** । द्वयोः पुण्यपापयोः तन्मूलरागद्वेषयोश्च यन्निमित्तं कारणं तदेवैकं स एवानात्मन्यात्माभिमानलक्षणो मोहो यस्य तं **द्विनिमित्तैकमोहम्** । अपश्यन्निति क्रियापदमनुवर्तते ॥ ४ ॥ स्वविवर्तसर्वाधिष्ठानत्वेन सर्वात्मकमात्मानं पूर्वमन्त्रतश्चक्ररूपेण निरूपितं नितरां वैराग्यहेतोः उत्तरो मन्त्रो नदीरूपेणापि निरूपयति । चक्षुरादिपञ्चज्ञानेन्द्रियाणि स्रोतांस्यम्बुस्थानीयानि यस्यास्तां **पञ्चस्रोतोऽम्बुं** पञ्चधा स्वस्वविषयेषु प्रवहितत्वात्, पञ्चतन्मात्राः पञ्चयोनयः त एवोग्राणि वक्त्राणि यस्यास्तां **पञ्चयोन्युग्रवक्त्रां**, यस्या ऊर्मिस्थानीयाः प्राणादयः पञ्च भवन्ति तां **पञ्चप्राणोर्मिं**, बुद्ध्यादिमूलचक्षुरादिज्ञानेन्द्रियाण; विज्ञानशक्तिमदहङ्कारः स एव संसृतिमूलं यस्यास्तां **पञ्चबुद्ध्यादिमूलां**, आका-शादिपञ्चभूतान्येकैकावर्तस्थानीयगुणोत्तराणि यस्यास्तां **पञ्चावर्तां**, गर्भजन्म-व्याधिजरामरणदुःखानि अविद्याद्वयतत्कार्यरागद्वेषाभिनिवेशा वा पञ्च **दुःखानि**

ओघः पूरो वेगः पञ्चदुःखान्येव ओघवेगो यस्यास्तां **पञ्चदुःखौघवेगां**, पञ्चाशदक्षरदेवताभेदा यस्यास्तां **पञ्चाशद्भेदाम्**,

तमोमोहो महामोहस्तामिस्रो ह्यन्धसंज्ञितः ।

इति पुराणप्रसिद्धानि ईश्वरान्तर्यामिसूत्रहिरण्यगर्भविराड्रूपाणि वा पर्वाणि यस्यास्तां **पञ्चपर्वां**, एवं पूर्वोक्तविशेषणेषु अधीम इति प्रत्येकं संबध्यते । अनेन 'किं कारणं ब्रह्म' इति प्रश्नोऽपाकृतो भवति ॥ ५ ॥

तस्य निमित्तकारणत्वम्

सर्वाजीवे सर्वसंस्थे बृहन्ते तस्मिन् हंसो भ्राम्यते ब्रह्मचक्रे ।
पृथगात्मानं प्रेरितारं च मत्वा जुष्टस्ततस्तेनामृतत्वमेति ॥ ६ ॥

[1]उद्गीतमेतत् परमं तु ब्रह्म तस्मिंस्त्रयं सुप्रतिष्ठाक्षरं च ।
अत्रान्तरं वेदविदो विदित्वा लीना ब्रह्मणि तत्परा योनिमुक्ताः ॥७॥

कुतः स्म जाताः इत्यादिप्रश्नस्य अपाकरणार्थमुत्तरे मन्त्राः इत्याह—**सर्वाजीव** इति । रजतव्याघ्रादीनां शुक्तिमायाव्यादिवत् चेतनाचेतनानां सत्तास्फूर्त्यानन्दप्रदतया जीवनहेतुभूते, सर्वलयाधिकरणत्वात् **सर्वसंस्थे**, वियदादिबृहतोऽपि बृहत्त्वात् **बृहन्ते**, यत् सविशेषत्वेन प्रकृतं **तस्मिन् ब्रह्मचक्रे** जाग्रज्जाग्रदादिपञ्चदशावस्थातत्कार्यतदारोपापवादाधिकरणविश्वविश्वाद्यविकल्पानुज्झैकरसान्तचैतन्यभेदगतसविशेषतां हित्वा स्वातिरिक्तं नेतीत्यपह्नवं कृत्वा सन्मात्रतया निष्प्रतियोगिकं स्वयमवशिष्यत इति **हंसः** परमात्मा स्वयं निष्प्रतियोगिकाद्वयोऽपि स्वाविद्यया जीवभावमेत्य पुण्यपापनियन्त्रितो नानायोनिषु **भ्राम्यते** परिभ्रमति । इत्थं विभ्रमहेतुः कः इत्यत आह—**पृथगिति** । महाकाश-

[1] उद्गीथ—अ, अ १, क.

बिम्बस्थानीयपरमात्मनः सकाशात् घटाकाशप्रतिबिम्बस्थानीयजीवात्मानं पृथक् भिन्नं मत्वा संसारचक्रे परिभ्रमतीत्यत्र—"अथ योऽन्यां देवतामुपास्तेऽन्योऽसावन्योऽहमस्मि", "मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति", "उदरमन्तरं कुरुते। अथ तस्य भयं भवति।", इत्यादिश्रुतेः। यद्वा—स्वातिरिक्तदेहाद्युपलक्षितस्वाविद्यापदतत्कार्यजातादपि पृथग्विलक्षणं मत्वा शोधित-तत्त्वंपदलक्ष्ययोरैकत्वे "तत्त्वमसि", "अहं ब्रह्मास्मि", इति श्रुतिप्रमाणतः तत्पदलक्ष्यब्रह्मणा यदा त्वंपदलक्ष्यो जीव एकत्वेन जुष्टः सेवितो भवति तदा ततः तस्मात् एकत्वानुसन्धानात् स्वाज्ञाननिवृत्तिर्जायते तेन स्वाज्ञाननिवृत्त्याविर्भूतस्वज्ञानेन प्रत्यक्परविभागैक्यासहनिष्प्रतियोगिकब्रह्ममात्रावस्थानलक्षणं **अमृतत्वं** कैवल्यं एति स्वप्रबोधसमकालं स्वयमेव ब्रह्म भवति इत्यत्र—'ब्रह्म वेद ब्रह्मैव भवति" इत्यादिश्रुतेः ॥ ६ ॥ हंसशब्दार्थात्मनि सर्वं विकल्पितमित्याह—**उद्गीतमिति**। स्वातिरिक्तस्वाविद्यापदतत्कार्यजातमस्ति नास्तीति विभ्रमादुपरि स्वातिरिक्तसामान्यापह्नवसिद्धं ब्रह्ममात्रं निष्प्रतियोगिकमवशिष्यत इति ईशाद्यष्टोत्तरशतवेदान्तैर्गीतं प्रतिपादितं, किं तत्? एतत् प्रकृतं वस्तु निष्प्रतियोगिकत्वेन **परमं** उत्कृष्टम्। तुशब्दोऽवधारणार्थः। यदेवंरूपेण बृंहणात् **ब्रह्म** इति ख्यातं **तस्मिन्** निर्विशेषे ब्रह्मणि प्रणवार्थे स्थूलसूक्ष्मादिभागचतुष्टयविशिष्टाकारादिमात्रात्रयं तथा भागचतुष्टयविशिष्टसत्त्वादिगुणत्रयं तद्व्यष्टिसमष्टितदुभयैक्यारोपापवादाधिकरणविश्वविश्वाद्यविकल्पानुज्ञैकरसान्तत्रयं चतुष्पञ्चदशकलनाजुष्टं त्रित्रिसंख्यारूपं यत्तत्सर्वं स्वाज्ञदृष्ट्या यस्मिन् विवृत्तं यत्कल्पनाधिकरणं तस्य स्वविकल्पितकलनायाः सत्तास्फूर्तिसुखप्रदत्वात् तदेतत् **स्वप्रतिष्ठाक्षरं च** स्वविकल्पितक्षरजातं ग्रसित्वा स्वयं न क्षरतीत्यक्षरम्। चशब्दोऽक्षरस्य निष्प्रतियोगिकत्वख्यापनार्थः। अत्र स्वविकल्पितसर्वप्रपञ्चे स्वप्रबोधतोऽपह्नवतां गते पुरा यत् **अन्तरं** अधिकरणं तन्निरधिकरणं ब्रह्ममात्रमिति **वेदविदो विदित्वा** वेदनसमकालं **तत्पराः** तत्पर्यवसन्नाः सन्तः **ब्रह्मण्येव लीनाः** एकीभूता भवन्ति। लयशब्दार्थं श्रुतिराह—**योनिमुक्ता** इति। योनिः कार्यनिरूपितकारणं तदस्ति नास्तीति विभ्रमतो विमुक्ताः, तद्भ्रान्तिमुक्तिरेव लयः, तदाप्तिश्चेत्युपचर्यते ॥ ७ ॥

सर्वस्य जगतः अध्यस्तत्वम्

संयुक्तमेतत् क्षरमक्षरं च व्यक्ताव्यक्तं भरते विश्वमीशः ।
अनीशश्चात्मा बुध्यते भोक्तृभावात् ज्ञात्वा देवं मुच्यते सर्वपाशैः ॥
ज्ञाज्ञौ द्वावजा[1]वीशनीशावजा ह्येका भोक्तृभोगार्थयुक्ता ।
अनन्तश्चात्मा विश्वरूपो ह्यकर्ता त्रयं यदा विन्दते ब्रह्ममेतत् ॥९॥
क्षरं प्रधानममृताक्षरं हरः क्षरात्मानावीशते देव एकः ।
तस्याभिध्यानाद्योजनात् तत्त्वभावाद्भूयश्चान्ते विश्वमायानिवृत्तिः॥
ज्ञात्वा देवं सर्वपाशापहानिः क्षीणैः क्लेशैर्जन्ममृत्युप्रहाणिः ।
तस्याभिध्यानात्तृतीयं देहभेदे विश्वैश्वर्यं केवल[2]आप्तकामः ॥११॥

स्वातिरिक्तकलनारोपापवादाधिकरणेयत्तां प्रतिपाद्य इदानीं कार्यकारणरूपेण सर्वस्याध्यस्तत्वं तदपवादतो मोक्षप्रकारं च दर्शयति—**संयुक्तमिति** । कार्यकारणत्वेन **संयुक्तं क्षरं** स्वाविद्यापदतत्कार्यजातं, तस्य स्वज्ञानसमकाल क्षरणात् क्षरत्वं, चतुर्विधक्षरप्रपञ्चप्रळयेऽपि यत स्वरूपतो न क्षरति तत् **अक्षरं**, चशब्दात् क्षरसापेक्षाक्षरताऽपाये परमाक्षरं **एतत्** इति द्योत्यते । प्राकृतं **व्यक्तं प्रकृतिः अव्यक्तं** तद्रूपत्वेन विश्वसनीयविश्वं अविद्यापदतत्कार्यजातं ईश्वरो विश्वविश्वाद्यविकल्पानुज्ञैकरसान्तवपुषा **भरते** बिभर्ति । य एवं बिभर्ति सोऽयं **अनीशश्चात्मा** तूलाविद्याऽऽवृतत्वेन यत्किंचिदपि कर्तुं त्यक्तुमशक्तत्वात् । चशब्दः स्वस्वरूपाज्ञत्वप्रदर्शनार्थः । कुत एवमित्यत्र **भोक्तृभावात्** एवं **बुध्यते**, स्वधर्मतया कर्तृत्वभोक्तृत्वादिकं स्वीकृत्य अनीशोऽस्मीति मोहितत्वात् । स कदा स्वस्वरूपं भजतीत्यत आह—**ज्ञात्वेति** । अनेककोटिजन्मानुष्ठितसत्कर्मफलार्पणसन्तुष्टेश्वरप्रसादजनितचित्तशुद्धिपारिव्राज्यधर्मश्रवणादिसंजातसम्यज्ज्ञानेन स्वावशेषतया देदीप्यमानं **देवं ज्ञात्वा** तज्ज्ञानसमकालं स्वातिरिक्तास्तितावृत्तिभिः

[1] वीशानी—उ, मु. [2] आत्मका—अ १, अ २, क.

पाश्यते बध्यते स्वाज्ञ इति पाशाः स्वातिरिक्तास्तिताबुद्धिवृत्तिरूपाः तैः **सर्वपाशैः मुच्यते** स्वावृतिबीजापाये स्वयमेवावशिष्यत इत्यर्थः ॥ ८ ॥ निष्प्रतियोगिक-ब्रह्ममात्रे मायाजीवेशतत्कार्यविकल्पः कथं सेत्स्यतीत्याशङ्क्य स्वाज्ञानतः सर्वं सिध्यतीत्याह—**ज्ञाज्ञाविति** । **ज्ञाज्ञौ द्वौ** ब्रह्ममात्राज्ञदृष्टिविकल्पितौ । तत्र बिम्बस्थानीय ईश्वरो हि ज्ञः सर्वज्ञत्वात् । प्रतिबिम्बस्थानीयोऽयं जीवोऽज्ञः, किंचिज्ज्ञत्वात् । द्वावेतौ मायाविकल्पितावित्याह—**अजावीशनीशाविति** । मायोपाधित्वेन बिम्बस्थानीयो हि ईशः, सर्वनियन्तृत्वेऽपि निरावृतत्वात् । स्वाविद्योपाधित्वेन प्रतिबिम्बस्थानीयो जीवः अनीशः, नियम्यत्वेन स्वाज्ञानावृतत्वात् । उभावपि **अजौ** । ईशनीशावित्यत्र ह्रस्वं छान्दसम् । इत्थं जीवेशविभागहेतुः केत्यत आह—**अजेति** । परमार्थदृष्ट्या कालत्रयेऽपि न जायत इति **अजा** अलब्धात्मकत्वात् । स्वाज्ञसर्वानर्थकर्यजा **एका हि** । सेयं किंविशिष्टेत्यत्र प्रतिबिम्बस्थानीय**भोक्तृ**जीवस्य दर्पणस्थानीया प्रकृतिः **भोगार्थतया युक्ता** स्थिता स्वात्मन्यध्यस्तेत्यर्थः । एवं कल्पनाधिकरणत्वेन **अनन्तश्चात्माऽपि** विद्यते अन्तवत्कल्पनायाः परिच्छिन्नत्वेऽपि तदधिकरणस्य त्रिविधपरिच्छेदशून्यत्वेनानन्तत्वात् । **च**शब्दो निष्प्रतियोगिकानन्त्यद्योतकः । सोऽयमात्मा **विश्वरूपः** विश्वकल्पनाधारतया विश्वसत्तास्फूर्तिप्रदत्वात् । तद्विकारास्पृष्टत्वात् **अकर्ता हि** । यस्मादयमकर्ता तस्मात् बिम्बस्थानीयमीश्वरं प्रतिबिम्बस्थानीयं जीवं दर्पणस्थानीयां प्रकृतिं चेति **एतत् त्रयं** यदा सम्यज्ज्ञानं जायते तदा निष्प्रतियोगिकब्रह्ममात्रं **विन्दते** । तद्वेदनसमकालं विद्वान् ब्रह्मैव भवति । **ब्रह्ममिति** छान्दसम् ॥ ९ ॥ जीवप्रकृत्योः नित्यानित्यत्वेन ईश्वरनियम्यत्वं स्वातिरिक्तासंभवब्रह्मज्ञानतः तन्मात्रावस्थितिं चाह—**क्षरमिति** । स्वज्ञानतः क्षरतीति **क्षरं** यस्मिन् सति स्वातिरिक्तं प्रतीयते तत् **प्रधानं** सम्यज्ज्ञानसमकालं अदर्शनात् असत्त्वं तादृशज्ञानाभावे व्यावहारिकादित्वं क्षरतया मार्त्यप्रधानं यत्र विकल्पितं तदधिकरणं अमृतं च तदक्षरं चेति **अमृताक्षरं** आरोपवैलक्षण्येन नित्यत्वात् क्षरप्रधानसापेक्षप्रभवसविशेषतां वस्तुतो हरतीति **हरः** निष्प्रतियोगिकाद्वितीयत्वात् स्वाज्ञदृष्टिप्रसक्तदर्पणप्रतिबिम्बस्थानीय**क्षरात्मानौ** प्रकृतिजीवौ **ईशते** स्वयं चिन्मात्रतया तावीष्टे ।

कोऽसौ ? स्वावशेषतया दीप्यत इति **देवः** परमात्मा **एकः** तस्य चिन्मात्रतयाऽद्वितीयत्वात् । तद्याथात्म्यज्ञानफलमाह—**तस्येति** । स्वाज्ञादिदृष्टिप्रसक्तक्षरप्रधानतत्कार्यमोहे सत्यसति तदाधारतया यो दीप्यते **तस्य** देवस्य तद्गतविकारास्पृष्टचिन्मात्रतया**ऽभितो ध्यानात्** यश्चिन्मात्ररूपेणावशिष्यते सोऽहमस्मीति **योजनात्** वस्तुतः स्वातिरिक्तक्षरप्रधानापह्नवसिद्धपरमात्मा निष्प्रतियोगिकस्वमात्रमवशिष्यत इति **तत्त्वभावात्** । इत्थंभूततत्त्वज्ञानात् पुराऽपि स्वातिरेकेण किंचिदस्तीति विश्वसनीयविश्वमाया निवृत्तैव तस्याः शशविषाणवदवस्तुत्वात् स्वाज्ञानतो विद्यमानेव भाता पुनः स्वज्ञानतो **भूयश्चान्ते** स्वाज्ञानावसानसमये या तद्रूपेण विश्वसनीया (?) **विश्वमायानिवृत्तिः** स्यादित्युपचर्यते । विद्यमानस्य निवृत्तिरुपपद्यते नाविद्यमानस्य निवृत्तिरस्ति, वस्तुतः प्रवर्तनीयनिवर्तनीयमायातत्कार्यवैरळ्यात् । कालत्रयेऽपि निष्प्रतियोगिकनिर्विशेषं ब्रह्मैव स्वमात्रमवशिष्यते,

स्वयं मृत्वा स्वयं भूत्वा स्वयमेवावशिष्यते ॥

इति श्रुतेः ॥ १० ॥ एवं विदुषस्तद्भावापत्तिःस्यादित्याह—**ज्ञात्वेति** । यः स्वात्मेति प्रकृतस्तं **देवं** स्वयमेवेति **ज्ञात्वा** एवं ज्ञानात् पुरा स्वातिरेकेण किंचिदस्तीत्यविद्वान् पाश्यतीव भातः । ज्ञानसमकालं स्वातिरिक्तास्तितारूपस**र्वपाशापहानिः** ज्ञानाग्निना दाहो भवति । तद्दाहे तन्मूलरागद्वेषदाहः । ततो विहितप्रतिषिद्धक्रिया-(ततः)तद्धेत्वपूर्वेत्यादिस्वातिरिक्तास्तितारूपक्लेशाः सम्यज्ज्ञानदग्धा भवन्ति । एवं विदुषः **क्षीणैः क्लेशैः जन्ममृत्युप्रहाणिः** तद्धेतुस्वाज्ञानाभावात् । यः स्वज्ञानेन स्वमात्रमवशिष्यते तद्याथात्म्यं स्वयमेवेत्याभिमुख्येन **ध्यानात्** स्वमात्रावरणदेहोपलक्षिताविद्यापदतत्कार्ये स्वातिरेकेण नास्तीति **भेदे** अपह्नवं गतेऽथ धूमादिमार्गद्वयप्राप्यपुनरावृत्त्यपुनरावृत्तिलक्षणचन्द्रब्रह्मलोकगतैश्वर्यापेक्षया **तृतीयं** सम्यज्ज्ञानैकलभ्यं **विश्वैश्वर्यं** कैवल्यत्वेन विश्वसनीयपारमैश्वर्यं ब्रह्ममात्रावस्थानलक्षणमिति प्रतिपाद्य पुनःस्वातिरिक्तास्तिताप्रभवदुःखनिवृत्तिलक्षणं स्वस्य कृतकृत्यतां चाह—**केवल आप्तकाम** इति । विद्वान् स्वयं **केवलः** अशेषविशेषशून्यब्रह्ममात्रपदारूढत्वात् । स्वाज्ञदशायां स्वातिरेकेण विषयजातं काम्यन्त इति कामाः त एवेदानीं येन ब्रह्ममात्रतया आप्ताः सोऽयं **आप्तकामः** कृतकृत्य इत्यर्थः ॥ ११ ॥

ब्रह्मातिरेकेण न किंचिद्वेदितव्यम्

एतज्ज्ञेयं नित्यमेवात्मसंस्थं नातः परं वेदितव्यं हि किंचित् ।
भोक्ता भोग्यं प्रेरितारं च मत्वा सर्वं प्रोक्तं त्रिविधं ब्रह्ममेतत् ॥ १२ ॥
वह्नेर्यथा योनिगतस्य मूर्तिर्न दृश्यते नैव च लिङ्गनाशः ।
स भूय एवेन्धनयोनिगृह्यस्तद्वोभयं वै प्रणवेन देहे ॥ १३ ॥

यद्बोधतो विद्वान् कृतकृत्यो भवति तदेव स्वावशेषतया ज्ञेयं तदतिरेकेण किंचिदपि वेदितव्यं नास्तीत्याह—एतदिति । एतत् प्रकृतं ब्रह्मैव स्वमात्रमिति **ज्ञेयं** तदतिरिक्तपुरुषार्थाभावात् । यदेवं ज्ञेयं तत् **नित्यमेव** सन्मात्रत्वात् । तत् किमित्यत आह—आत्मसंस्थमिति । स्वात्ममात्रतया स्थितत्वात् । वेदितव्यान्तरमाशङ्क्याह—नेति । निष्प्रतियोगिकत्वेन ब्रह्ममात्रं वेदितव्यं **अतो ब्रह्ममात्रात् परं** अपरं **वेदितव्यं न किंचित्** अस्ति तस्य निष्प्रतियोगिकत्वस्योक्तत्वात् । स्वाज्ञदशायां यत् भोक्त्रादिभिदाजातं अनुभूतं तत् स्वज्ञदशायां **ब्रह्मैव** जातमित्याह—**भोक्तेति** । द्वितीयार्थे प्रथमा । कार्योपाधिं जीवं **भोक्तारं**, **दृश्यजातं भोग्यं**, ईश्वरं **प्रेरयितारं च** भेददृष्ट्या ज्ञात्वा जीवतामापन्न इदानीं भोक्त्रादिभेदरूपं **त्रिविधं एतद्ब्रह्मेति मत्वा प्रोक्तं** श्रुतितात्पर्यज्ञैः प्रतिपादितम् । यद्वा—भोक्ता भोग्यं प्रेरितारं च प्रथमार्थे द्वितीया एतद्भोक्त्रादिभेदजातं ब्रह्मेति मत्वा कृतकृत्यो भवतीत्यर्थः ॥ १२ ॥ यदेतत्त्रिविधभेदोपलक्षितस्वाविद्यापदतत्कार्यतिरोहितमिव दृश्यते प्रणवासिना तदावरणं सञ्छिद्य निरावृतं ब्रह्म साक्षात्कुर्यादित्यत्र दृष्टान्तमाह—**वह्नेरिति** । **यथा वह्नेः** स्वयोनि-अरणिगतस्य **मूर्तिः न दृश्यते** स्वदाह्यदार्वावृतत्वात् । तत्र वह्निर्नास्तीति चेन्न, तल्लिङ्गस्य सत्त्वात् । यतो **नैव च लिङ्गनाशोऽस्ति** । दृश्यते हि मथनेन तल्लिङ्गम् । **स** मथनात् प्राक् काष्ठतिरोहितो वह्निर्भवति **भूयोभूयो**मथनात् **इन्धनयोनिः** स्वयोनिदाहकत्वेन **गृह्यः** गृह्यते यथा **तद्वोभयं वै प्रणवेन देहे**, उभयमिव, वैशब्दस्योपमार्थत्वात्, दार्ष्टान्तिकेऽपि स्वदाह्यमायातत्कार्यतिरस्कृतत्वेन विद्यमानमविद्वद्दृष्ट्या

तत्सत्वे साक्षित्वादिकं लिङ्गं, तदुभयं सम्यज्ज्ञानात् प्राक् विद्यते, प्रणवेन प्रणवाख्यसाधनजनितब्रह्मात्मैक्यविद्यया पूर्वं स्वतिरस्कारानाद्यविद्यातत्कार्यदाहात् देहे कार्यकरणसंघाते अरणिस्थानीये आत्मतत्त्वाभिव्यक्तिः तदभिव्यक्तिलिङ्गं चोभयं विद्वत्सु गृह्यते । सम्यज्ज्ञानात् प्राक् आत्मतत्त्वतिरस्कारकाविद्यातज्जकार्यकरणसंघातलक्षणं स्वातिरिक्तत्वेनानुभूतं सम्यज्ज्ञानात् एतत्सर्वं ब्रह्ममात्रं भवतीति ॥ १३ ॥

सम्यज्ज्ञानसाधनं ध्यानम्

स्वदेहमरणिं कृत्वा प्रणवं चोत्तरारणिम् ।
ध्याननिर्मथनाभ्यासाद्देवं पश्येन्निगूढवत् ॥ १४ ॥
तिलेषु तैलं दधनीव सर्पिरापः स्रोतस्स्वरणीषु चाग्निः ।
एवमात्माऽऽत्मनि [1]गृह्यतेऽसौ सत्येनैनं तपसा योऽनुपश्यति ॥
सर्वव्यापिनमात्मानं क्षीरे सर्पिरिवार्पितम् ।
आत्मविद्यातपोमूलं तद्ब्रह्मोपनिषत्परं तद्ब्रह्मोपनिषत्परमिति॥ १६॥

अत्र सम्यज्ज्ञानसाधनोपायमाह—**स्वदेहमिति** । **स्वदेहं** अधरारणिं **कृत्वा** स्वात्माभिव्यक्तिस्थानं कृत्वा षोडशमात्रात्मकप्रणवं **चोत्तरारणिं** कृत्वा अकारस्थूलांशवैराजीभूम्यादिपश्यन्तीभूम्यन्तपञ्चदशमात्रातद्व्यष्टिसमष्टितदुभयै-क्यारोपापवादाधिकरणविश्वविश्वाद्यविकल्पानुज्ञैकरसान्तचैतन्यगतविशेषांशापह्न-वसिद्धनिर्विशेषतुर्यतुरीयं ब्रह्म स्वमात्रमित्यनुसन्धानध्याननिर्मथनाभ्यासात् **देवं** स्वयंद्योतनस्वभावं चिन्मात्रं स्वावशेषतया **पश्येत्** ज्ञानी तदपरोक्षीकुर्यात् । पित्रादिसंचितनिधिः यथा तदज्ञानादप्राप्तः तज्ज्ञानादवाप्यते तथा मुमुक्षुः स्वाज्ञानात् **निगूढवत्** आत्मतत्त्वं स्वज्ञानात् स्वयमेवेति पश्यति ॥ १४ ॥ सङ्घातप्रत्यक्त्वेनात्मा द्रष्टव्यः इत्यत्र दृष्टान्तमाह—**तिलेष्विति** । यथा **तिलेषु**

[1] जायते—अ, अ १, अ २, क.

व्याप्यतिरोहितंतैलं यन्त्रनिष्पीडनेनाभिव्यक्तं दृश्यते यथा **दधनि** मथनाविर्भूत-नवनीतं सगुणब्रह्मस्थानीयं, तदेतन्नवनीतमग्निसंपर्कतो नवनीतभावं विहाय सुगन्धिघृतं भवतीति यत्तन्निर्गुणब्रह्माभिव्यक्त्युदाहरणं, यथा **शुष्कस्रोतस्सु आपः** खननेनाभिव्यक्ताः सत्यः कार्यकारिण्यो भवन्ति, यथा वा **अरणीषु चाग्निः** स्वयोनिदारुमथनेनाविर्भूतो भवति, यथाऽयं दृष्टान्तः तथा **एवमात्मा** निर्विशेष-चिद्धातुः **आत्मनि** गुहास्थबुद्धितत्त्वे **गृह्यते** श्रुत्याचार्यप्रसादात्तश्रवणादिभिर-भिव्यज्यते । **सत्येन** सत्यवचनोपलक्षितयमादिसाधनेन बाह्यान्तःकरणनिरोध-लक्षणतपसा **चैनं** सत्यतपस्संजातचित्तशुद्धिप्राप्यसम्यज्ज्ञानेन स्वावशेषतया पश्यति अपरोक्षीकरोतीत्यर्थः ॥ १५ ॥ कैवल्यसाधनं ज्ञानं तपआदि तत्साधनं ताभ्यां स्वात्माभिव्यक्तिमुक्त्वा प्रकरणार्थमुपसंहरति—**सर्वव्यापिनमिति** । स्वाविद्यापदतत्कार्यसर्वव्यापिनमात्मानं, **क्षीरे सर्पिर्वत्** सर्वत्र सारत्वेन **अर्पितं**, आत्मविद्यातपसी यस्य मूले स्वात्माभिव्यञ्जके तत् **आत्मविद्यातपोमूलं** यत्तत् **ब्रह्म** अद्वितीयं **उपनिषत्परं** प्रमाणान्तरनैरपेक्ष्येणोपनिषदेकमानतया पर्यवस्य-तीत्युपनिषत्परं उपनिषदर्थत्वेन निरतिशयानन्दतयाऽऽविर्भूतम् । द्विर्वचनमाद-रार्थम् । इतिशब्दोऽध्यायसमाप्त्यर्थः ॥ १६ ॥

इति प्रथमोऽध्यायः

द्वितीयोऽध्यायः

समाध्युपक्रमे परमेश्वरप्रार्थना

युञ्जानः प्रथमं मनस्तत्त्वाय सविता धियः ।
अग्नेर्ज्योतिर्निचाय्य पृथिव्या अध्याभरत् ॥ १ ॥

युक्तेन मनसा वयं देवस्य सवितुः सवे ।
सुवर्गेयाय शक्त्या ॥ २ ॥
[1]युक्त्वाय मनसा देवान् सुवर्यतो धिया दिवम् ।
[2]बृहज्ज्योतिः करिष्यतः सविता प्रसुवाति तान् ॥ ३ ॥
युञ्जते मन उत युञ्जते धियो विप्रा विप्रस्य बृहतो विपश्चितः ।
वि होत्रा दधे वयुनाविदेक इन्मही देवस्य सवितुः परिष्टुतिः ॥४॥
युजे वां ब्रह्म पूर्व्यं नमोभिर्वि[3]श्लोक एतु पथ्येव [4]सूरेः ।
[5]शृण्वन्तु विश्वे अमृतस्य पुत्रा आ ये धामानि दिव्यानि
तस्थुः ॥ ५ ॥

स्वात्मनः स्वविद्यातपोमूलत्वं यदुक्तं उत्तरे मन्त्रास्तदेव प्रतिपादयन्तीत्याह —युञ्जान इति। समाध्युपक्रमसमये प्रथमं प्रपञ्चप्रसवगुणयुक् **सविता** परमेश्वरः स्वात्मनि **मनो युञ्जानो** योजयन्, किमर्थं मनोयोजनमित्यत्र **तत्त्वाय** स्वयाथात्म्यावगतये, तत्साधनत्वेन किं करोतीत्यत्र **धियः** स्वध्यानप्रतिबन्धिज्ञानेन्द्रियाणि आसुरवृत्तिवियोगपूर्वकं सत्त्ववृत्तिभिः संयोजयन्नित्यर्थः। **अग्नेः** अग्न्यादित्यादिज्योतिषां **ज्योतिः** अहमेवेति **निचाय्य** निश्चित्य **पृथिव्याः** तदुपलक्षितपञ्चभूतभौतिकजातात् **अधि** बुद्धौ तद्ब्रह्मज्योतिः **आभरत्** कार्यकरणसंघातप्रत्यक्त्वेनाहरत् अभिव्यनक्त्विति यावत् ॥ १ ॥ सवितृमण्डलस्थेशप्रार्थनाफलमाह— **युक्तेनेति**। **देवस्य सवितुः सवे** सत्यामनुज्ञायां तत्प्रसादात् प्रत्यगात्मनैकाग्र्यभावापन्नमनसा शमादिसाधनसंपन्नाः सन्तः **सुवर्गेयाय** निर्विशेषानन्दहेतुज्ञानसाधनश्रवणादिशक्त्या देवप्रसादलब्धबलेन प्रयतामह इत्यर्थः ॥ २ ॥

[1] युक्तेन—क. [2] ब्रह्मज्यो—अ १, क. [3] श्लोकायन्ति—उ, मु.
[4] सूराः—उ, मु. [5] शृण्वन्ति—उ, मु.

विद्वन्मुमुक्ष्वनुग्राहकत्वं ईश्वरस्य स्वभाव इत्याह—**युक्त्वायेति**। **युक्त्वाय** प्रत्यगात्मानं योजयित्वा तत्संयुक्तमनसा **देवान्** ब्रह्मेन्द्रादीन् **स्वर्यतः** स्वःशब्दवाच्यनिरतिशयानन्दस्वभावं यतो गच्छतो दे[दि?]वं बृहत् अद्वितीयं **ज्योतिः** चित्प्रकाशं **धिया** आविःकरिष्यतो मनसः प्रत्यक्प्रावण्यमापाद्य अहं ब्रह्मास्मीति प्रत्यगभेदेन ब्रह्माविष्करिष्यत इत्यर्थः ॥ ३ ॥ यः पुनः विद्यातपसोः निमित्तभूतः तस्यैवं परमेश्वरस्य मुमुक्षुभिः महती परिष्कृतिः कर्तव्येत्याह—**युञ्जत** इति। **विप्राः** विद्वांसो ब्राह्मणाः "प्रा पूरणे" इति धातोः **विप्रस्य** देशतः पूर्णस्य **बृहतः** कालतो वस्तुतोऽपि पूर्णस्य विपश्चितो ज्ञप्तिमात्रस्य साक्षात्करणाय **स्वमनो** युञ्जते प्रत्यक्प्रवणं योजयन्ति **धियो** बुद्धीन्द्रियाण्यपि शब्दादिविषयेभ्यः प्रत्याहृत्य **युञ्जते** स्ववशं कुर्वन्ति। **विहोत्रा दधे**,—होत्राः ऋत्विगभिधानमेतत् इह तु तत्कर्मसु वर्तते—ऋत्विङ्निर्वर्त्यान्तःकरणवैमल्यहेतुभूताः क्रियाः सर्वा इति यावत्। **वयुनाविदित्यत्र** वयुनेति बुद्ध्यभिधानमेतत्, सर्वबुद्धिसाक्षी **एकः इत्** एवकारार्थः, एक एव सजातीयविजातीयभेदरहितः सर्वप्रत्ययसाक्ष्यद्वितीयो यः पूर्वोक्ताः क्रियाः दधे विदधे, पूर्वस्य वेः अत्रान्वयः, स एव सर्वज्ञेशो जीवात्मना जीवतामोक्षसाधनानुष्ठानं करोतीति भूतपूर्वगत्या **देवस्य** स्वातिरिक्तप्रसवितुः **सवितुः** मही महती **परिष्टुतिः** परिष्कृतिः मुमुक्षुभिः कर्तव्येति वाक्यशेषः ॥४॥ यथा पूर्वं करणग्रामप्रणिधानमुखेन ब्रह्म साक्षात्कुर्वन्ति तथाऽहं करवाणीति मुमुक्षुराहेत्याह—**युजे** वामिति। **पूर्व्यं ब्रह्म** प्रतीचा **युजे** एकीकरोमि। केन साधनेन? वां युवयोः वाङ्मनसौ हे मनोबुद्धी वामहं प्रतीचि युजे समादधे **नमोभिः** नमस्कारैः सह मे श्लोकश्च पूर्वं ब्रह्मोद्दिश्येति वाक्यार्थः। मुमुक्षोर्मम **श्लोकः** कीर्तिः स्तुतिरीश्वरमुद्दिश्य **व्येतु** विविधमेतु, पूर्वव्युपसर्गस्य अत्रान्वयः। **पथ्येव सूरेः** प्राज्ञस्य पथ्येव सन्मार्गप्रवर्तकनिमित्ता कीर्तिः इतो विसर्पतु - पञ्चमश्लोकं स्तुतिं विसृतं **शृण्वन्तु** आकर्णयन्तु **विश्वे** सर्वे **अमृतस्य** ब्रह्मणो हिरण्यगर्भादयः **पुत्राः**। क स्थिता इत्यत्र—आदित्युत्तरत्र सम्बन्धः—**ये धामानि** स्थानानि **दिव्यानि आतस्थुः** तिष्ठन्ति। तत्स्था ब्रह्मपुत्रा हिरण्यगर्भादयो मम स्तुतिं शृण्वन्त्वित्यर्थः ॥ ५ ॥

साङ्गयोगोपदेशः

अग्निर्यत्राभिमथ्यते वायुर्यत्रा[1]धिरुध्यते ।
सोमो यत्रातिरिच्यते तत्र संजायते मनः ॥ ६ ॥
सवित्रा प्रसवेन [2]जुषेत ब्रह्म पूर्व्यम् ।
तत्र योनिं कृणवसे न हि ते [3]पूतमक्षिपत् ॥ ७ ॥
त्रिरुन्नतं स्थाप्य समं शरीरं हृदीन्द्रियाणि मनसा संनिरुध्य ।
ब्रह्मोडुपेन प्रतरेत विद्वान् स्रोतांसि सर्वाणि भयावहानि ॥ ८ ॥
प्राणान् प्रपीडयेह स युक्तचेष्टः क्षीणे प्राणे नासिक्योच्छ्वसीत ।
दुष्टाश्वयुक्तमिव वाहमेनं विद्वान् मनो धारयेताप्रमत्तः ॥ ९ ॥
समे शुचौ शर्करावह्निवालुकाविवर्जिते शब्दजलाश्रयादिभिः ।
मनोऽनुकूले न तु चक्षुपीडने गुहानिवाताश्रयणे प्रयोजयेत् ॥ १० ॥

उत्तमाधिकारिणः शमादिसाधनसहितब्रह्मज्ञानमुपदिश्य मध्यमाधिकारिणां सत्त्वशुद्धिहेतुयोगमुपदिशन्ति उत्तरे केचिन्मन्त्राः । तत्रादौ योगं संक्षिप्याह—**अग्निरिति** । **यत्र** मूलाधारे अग्निमण्डले त्रिकोणे **अग्निर्मथ्यते** क्षोभ्यते **वायुर्यत्र** मूलाधारगसुषुम्नायां **अधि** उपरि **रुध्यते** बिसतन्तुनिभाग्निशिखया सह, **सोमः** कल्पार्कचन्द्रमण्डलं ध्यातं सत् **यत्र** द्वादशान्ते **अतिशयेन रिच्यते** यत्र सुषुम्नायां मूलाधारादमृतं प्रस्रवद्भाव्यते **तत्र** मूलाधारगसुषुम्नायां ध्येयवस्तु-प्रणवार्थगोचरं **मनः संजायते** ॥ ६ ॥ ध्यानप्रकारमाह—**सवित्रेति** । द्वादशान्तस्थितेन **सवित्रा** कल्पार्केण **प्रसवेन** सोममण्डलात् सुषुम्नायां प्रसूता-मृतेन **जुषेत** अधिकारी सेवेत किं तत्? **ब्रह्म** ध्येयं वस्तु **पूर्व्यं** मूलाधारे स्थितम् । **तत्र योनिं** अग्निकुण्डलं ब्रह्मोपासनास्थानत्वेन **कृणवसे** कुरुष्व ।

[1] भियुज्यते—उ, मु.
[2] जुषेतद्ब्र—अ, अ १, अ २, क.
[3] पूर्व—उ, मु.

न हि ते एवं कुर्वतस्तव कल्पार्कैण विलापितचन्द्रमण्डलात् सुषुम्नायां स्रवदमृतेन **पूर्तं** पूरितं फलितं मूलाधारस्थं ब्रह्म **अक्षिपत्** नह्यक्षिपत् कालक्षेपं न करोति। एवं ध्यातं ब्रह्म शीघ्रं फलं प्रयच्छतीत्यर्थः ॥ ७ ॥ योगाङ्गनियममाह—**त्रिरिति**। उरो ग्रीवा शिरः इति त्रीण्यङ्गान्युन्नतानि यस्य तत् **शरीरं** [illegible] **तं** यथा तथा तत् **संस्थाप्य हृदीन्द्रियाणि** सर्वाणि **मनसा** सह संनिवेश्य ब्रह्मप्रणवेयत्ता-वित् **विद्वान्** व्यष्टिसमष्ट्यात्मकजाग्रज्जाग्रदादितत्कार्यरूपाणि पश्यत्-**भयावहानि सर्वाणि स्रोतांसि ब्रह्मोडुपेन** ब्रह्मप्रणवप्लवेन **प्रतरेत** प्रकर्षेण जाग्रज्जाग्रदादि-पञ्चदशस्रोतांसि संतरेत् इत्यधिकारिणं श्रुतिरनुशास्ति ॥ ८ ॥ प्राणायामप्रकार-माह—**प्राणानिति**। यः प्राणायामाधिकारी **प्राणान्** मूलाधारादिस्थले प्रकर्षेण मनसा सह **प्रपीड्य** निरुध्य "युक्ताहारविहारस्य" इत्यादिना युक्ता चेष्टा यस्य **सः युक्तचेष्टः** सन् मूलाधारादिगतत्रिपञ्चदशलक्ष्ये **प्राणे क्षीणे** तनुत्वं गते अथ केवलकुम्भकानन्तरं इडापिङ्गलासंज्ञिकनासिकयोः अन्यतरेण शनैः **उच्छ्वसीत** रेचयेत्। यया रेचयेत्तया पुनरापूर्य कुम्भयित्वा विरेचयेत्। एवं केवलकुंभकावधि शनैः शनैरभ्यसेत्। **दुष्टाश्वयुक्तमिव वाहमेनं** रथं **विद्वान्** कुशलसारथिरिव बाह्या-न्तःकरणनिरोधपूर्वकं **अप्रमत्तः** सन् **मनो धारयेत** ॥ ९ ॥ योगाभ्यासोचितदेश-माह—**सम** इति। **समे** अनिम्नोन्नते **शुचौ** मेध्यप्रदेशे **शर्करावह्निवालुकाभिः शब्दजलाश्रयादिभिश्च** विवर्जिते किंच **मनोऽनुकूले** मनोरम्यप्रदेशे **न तु चक्षुपीडने**—विसर्गलोपश्छान्दसः—अग्न्यादित्यादिचक्षुःपीडारहिते प्रदेशे गुहायां निवातस्थलमाश्रित्य **प्रयोजयेत्** योगं समाधिं कुर्यात् ॥ १० ॥

योगसिद्धिः

नीहारधूमार्कानलानिलानां खद्योतविद्युत्स्फटिकशशीनाम् ॥
एतानि रूपाणि पुरःसराणि ब्रह्मण्यभिव्यक्तिकराणि योगे ॥ ११ ॥
पृथ्व्याप्यतेजोऽनिलखे समुत्थिते पञ्चात्मके [1]योगगुणे प्रवृत्ते।

[1] योगगुणैः—अ, अ १, अ २, क.

न तस्य रोगो न जरा न मृत्युः प्राप्तस्य योगाग्निमयं शरीरम् ॥
लघुत्वमारोग्यमलोलुपत्वं [1]वर्णप्रसादं स्वरसौष्ठवं च ।
गन्धः शुभो मूत्रपुरीषमल्पं योगप्रवृत्तिं प्रथमां वदन्ति ॥ १२ ॥

एवमभ्यस्तयोगस्य योगसिद्धिचिह्नान्याह—**नीहारेति** । प्रथमं नीहाराकारेण चित्तवृत्तिः प्रवर्तते ततो धूमवत् ततोऽर्कानलानिलानां **खद्योतविद्युत्स्फटिकशशिनां** च रूपसदृशानि एतानि योगानुभवसिद्धानि बुद्धेः **रूपाणि ब्रह्मण्यभिव्यक्तिकराणि** ब्रह्माविर्भावहेतुलिङ्गानि क्रमेणाविर्भवन्तीत्यर्थः ॥ ११ ॥ योगसिद्धिसूचकचिह्नान्युक्तानि, ततः पञ्चभूतजयं तत्फलं चाह—**पृथ्वीति** । पादादिमस्तकान्तं पञ्चभूतमण्डलं तत्तद्देवतामहंग्रहोपासनयोपास्य तेन पृथिव्यादिपञ्चभूतमण्डलवशीकरणं कृत्वा पृथिव्यामप्सु तेजसि वायौ खे च क्रमेण ध्यानेन **समुत्थिते** तत्तदुपासनया **पञ्चात्मके** वशीकृते **योगगुणे प्रवृत्ते** सति अथ पृथिव्यादिमण्डलतत्तच्छक्तीनामुत्तरोत्तरक्रमेण पूर्वपूर्वं सर्वं स्वाभेदेन चिन्तयित्वा **तस्य** योगिनो योगो ध्यानं तदेवाग्निः तेन वशीकृतपञ्चभूतात्मकं **शरीरं** प्राप्तस्य तस्य भूतभौतिकसंबन्धिनानारोगजातं **जरा मृत्युः** मरणं च कदाऽपि **न** भवति ॥ १२ ॥ किंच—लघुत्वमित्यादि । स्पष्टोऽर्थः ॥ १३ ॥

मुख्ययोगः तत्फलं च

यथैव बिम्बं मृदयोपलिप्तं तेजोमयं भ्राजते तत् सुधान्तम् ।
तद्वाऽऽत्मतत्त्वं प्रसमीक्ष्य देही एकः कृतार्थो भवते वीतशोकः ॥
यदाऽऽत्मतत्त्वेन तु ब्रह्मतत्त्वं दीपोपमेनेह युक्तः प्रपश्येत् ।
अजं ध्रुवं सर्वतत्त्वैर्विशुद्धं ज्ञात्वा देवं मुच्यते सर्वपाशैः ॥ १५ ॥
[2]एष हि देवः प्रदिशोऽनु सर्वाः पूर्वो हि जातः स उ गर्भे अन्तः ।

[1] वर्णप्रसादः—उ १. [2] एषो हि—क, उ १.

स एव जातः स जनिष्यमाणः प्रत्यङ्जनास्तिष्ठति सर्वतोमुखः ॥
यो देवोऽग्नौ योऽप्सु यो विश्वं भुवनमाविवेश ।
य ओषधीषु यो वनस्पतिषु तस्मै देवाय नमो नमः ॥ १७ ॥

एवं योगेन शुद्धान्तरस्य मुख्ययोगं तत्फलं चाह—**यथेति** । **यथैव बिम्बं** आदर्शादि **मृदया** मृजया भस्मचूर्णादिना **उपलिप्तं तेजोमयं** प्रचुरतेजस्कं चूर्णादिमलेन तिरस्कृतपूर्वमलं तद्दर्पणादि **भ्राजते** दीप्यते **तद्वा** तद्वत् **आत्मतत्त्वं** स्वातिरिक्तानात्मापह्नवसिद्धमात्ममात्रं **प्रसमीक्ष्य** तत्स्वमात्रमित्यपरोक्षीकृत्य **देही** ब्रह्मविद्वरीयान् एकत्वदर्शनेनैव वीतस्वातिरिक्तास्तितात्प्रभवशोकमोहस्सन् **एक एव कृतार्थो भवते** भवति । सुधौतमित्यस्मिन्नर्थे **सुधान्तमिति** छान्दसम् ॥ १४ ॥ निर्विशेषब्रह्मज्ञानसमकालं तद्भावापत्तिं दर्शयति—**यदेति** । **यदा** श्रुत्याचार्य-प्रसादलभ्यवेदान्तश्रवणादिना प्रत्यगात्मतत्त्वेन तु, तुशब्दोऽवधारणार्थः, त्वंपदलक्ष्येण **दीपोपमेन** यथा दीपः स्वप्रकाश्यघटादेः विलक्षणः तथा प्रत्यगात्मा स्वप्रकाश्यदेहेन्द्रियादेः विलक्षणो भवितुमर्हतीति दीपोपमेन सर्वसाक्षिणैव **ब्रह्मतत्त्वं** तत्पदलक्ष्यं **इह** हृदये शमादिसाधनयुक्तः **प्रपश्येत्** शोधिततत्त्वंपदार्थयोः अहं ब्रह्मास्मीत्येकीकुर्यादिति स्वाज्ञदृष्टिप्रसक्तभेदनिवृत्त्यर्थ-मधिकारिणमनुशास्ति । एवं तत्त्वंपदलक्ष्यैक्यज्ञानेन स्वाज्ञाने अपह्नवतां गते ततस्तत्त्वमर्थविभागैक्यकलनाविरळं ब्रह्ममात्रमवशिष्यते । तत् किं ब्रह्ममात्रं जातमित्यत आह—**अजमिति** । स्वतः परतो वा जात्यसंभवात् । स्वयमजातं कथं सत्पदमर्हतीत्यत आह—**ध्रुवमिति** । अजातेः स्वरूपत्वेन निष्प्रतियोगिक-सन्मात्रत्वात् । यत्सन्मात्रं तद्ध्रुवमेवेत्यर्थः । अध्रुवतत्त्वग्रामयोगात् ध्रुवता कुतः इत्यत आह—**सर्वतत्त्वैर्विशुद्धं** स्वाज्ञदृष्टिमाश्रित्य तत्त्वेषु सत्स्वपि स्वज्ञदृष्ट्या तैरसंस्पृष्टत्वात् । परमार्थदृष्ट्या निष्प्रतियोगिकशुद्धमेवेत्यर्थः । यच्छुद्धं तत् ध्रुवम् । तद्रूपेण द्योतनात् देवं स्वावशेषतया **ज्ञात्वा** तज्ज्ञानसमकालं **मुच्यते सर्वपाशैः** विद्वान् निर्मुक्तपाशो ब्रह्मैव भवतीत्यर्थः ॥ १५ ॥ यत् परमार्थदृष्ट्या निष्प्रतियोगिकमवशिष्टं इत्युक्तं तस्य स्वाज्ञदृष्ट्या ब्रह्मादिस्तम्बान्तभेदेन महदणु-

भेदेन चावस्थानं स्वज्ञदृष्ट्या प्रत्यक्तया सर्वान्तरत्वं चाह—एष इति। एष प्रकृतः परमात्मा निर्विशेषचिद्धातुः, हिः प्रसिद्धार्थोऽवधारणार्थो वा, निष्प्रतियोगिकतया द्योतनात् देवः प्रदिशः प्राच्याद्याः दिशः सर्वाः प्रति अनु अनुगतः व्याप्य स्थितत्वात्, कल्पादौ हिरण्यगर्भात्मना पूर्वो हि जातः किल। य एवं जातो हिरण्यगर्भः स उ स एव गर्भे ब्रह्माण्डोदरे विराडात्मना अन्तः वर्तते। स एव स्थूलसूक्ष्मसमष्टिकार्यकारणोपाधिकत्वेन यो जातः स एव व्यष्टिभूताधिष्ठातृजीवात्मना जातः, इतो जनिष्यमाणोऽपि स एव, प्रत्यङ्जनास्तिष्ठति सर्वोपाधिषु प्रत्यगान्तरत्वेन जना इति शब्दाभिलप्यो भूत्वा तिष्ठति। किं बहुना, सर्वतोमुखः चेतनाचेतनात्मकत्वेन स एव स्थितः। हे जनाः इत्यन्योन्यसंबोधनं वा। जनान् प्रति प्रत्यगिति वा। अस्मिन् पक्षे द्वितीयार्थे प्रथमा॥ १६॥ स एवैवं जात इत्युक्तम्। घटाकाशजलचन्द्रन्यायेन तज्जन्म न स्वेन रूपेणेत्याह —यो देव इति। यो देवः स्वयंप्रकाशः अग्नौ शब्दादितन्मात्रापञ्चीकृतभूतकार्यत्वेन तत्पञ्चकव्यापी बुद्धौ जलचन्द्रवत् घटाकाशवच्च हिरण्यगर्भात्मना विवेश, यो अप्सु पञ्चीकृतपञ्चभूतकार्यतया तद्व्यापी विराट्शब्दवाच्यतया विवेश, योऽनन्तसद्बोधानन्दवपुरात्मा व्यष्टिकार्योपाधिषु भुवनशब्दवाच्येषु इन्द्रादिरूपेण आविवेश यावद्भुवनसत्तास्फूर्तिसुखप्रदत्वात्, यः फलपाकावसायिषु ओषधीषु स्थावरेषु आविवेश, यो वनस्पतिषु पुष्पफलवत्सु। स्वयमाविवेशेत्यत्र सर्वत्रानुषज्यते "तत् सृष्ट्वा तदेवानुप्राविशत्" इत्यादिश्रुतेः। तस्मै सर्वान्तरायात्मने देवाय नमो नमः इति द्विर्वचनमध्यायपरिसमाप्त्यर्थमादरार्थं च॥ १७॥

इति द्वितीयोऽध्यायः

तृतीयोऽध्यायः

मायया परमात्मनः सर्वकारणत्वम्

य एको जालवानीशत ईशनीभिः सर्वाँल्लोकानीशत ईशनीभिः।
य एवैक इह उद्भवे संभवे च य एतद्विदुरमृतास्ते भवन्ति॥१॥

एको हि रुद्रो न द्वितीयाय तस्थुर्य इमान् लोकानीशत ईशनीभिः।
प्रत्यङ्जनास्तिष्ठति संचुकोचान्तकाले संसृज्य विश्वा भुवनानि
गोप्ता ॥ २ ॥

विश्वतश्चक्षुरुत विश्वतोमुखो विश्वतोबाहुरुत विश्वतस्पात्।
सं बाहुभ्यां धमति सं पतत्रैर्द्यावाभूमी जनयन् देव एकः ॥ ३ ॥

प्रकृतपरमात्मनो मायाविन इव मायया सर्वकारणत्वं प्रत्यक्त्वं चाह—**य एक** इति। **य एकोऽद्वितीयः** परमात्मा **जालवान्** जालशब्देन जीवजातमत्स्यग्राही मायाशक्तिरुच्यते तदधिष्ठातृत्वेन तद्वानीश्वरः सर्वं **ईशते ईशनीभिः** मायाशक्तिभिः **ईष्टे** न तु स्वेन रूपेण स्वस्य निष्प्रतियोगिकाद्वितीयत्वात् स्वाज्ञदृष्ट्या लोक्यन्त इति **सर्वान् लोकान** पृथिव्यादीन् भूरादीन् प्राणिभेदांश्च **ईशनीभिः** मायाशक्तिभिः मायावी ईशः ईशते ईष्टे तत्तद्रूपो भूत्वा तत्तत्सर्वमीष्ट इत्यर्थः। एवं सर्वनियन्तृत्व-मुक्त्वा तस्यैव सर्वकारणत्वं तद्याथात्म्यज्ञानफलं चाह—**य** इति। **य एवैकोऽद्वितीयः** परमात्मा स्वातिरिक्तसर्वोद्भवे हेतुत्वेन स्थितः कारणतया, सम्यग्भवतीति संभवः तस्मिन् **संभवे** कारणैक्यलयोत्पत्तौ निमित्ततया स्थितः, तद्गतकार्यकारणसापेक्षसविशेषताऽपाये निर्विशेषं ब्रह्ममात्रमवशिष्यते इति **य एतद्विदुः** ब्रह्मविद्वरीयांसः ते एवं वेदनसमकालं **अमृता भवन्ति** विदेहमुक्ता भवन्तीत्यर्थः ॥ १ ॥ पूर्वमन्त्रोक्तार्थमेव पुनरप्याह—**एको हीति**। यः स्वातिरिक्तरुजं द्रावयतीति **रुद्रः** परमात्मा स **एक** एव। तस्मात् **न द्वितीयाय तस्थुः** स्वाविद्यापदतत्कार्याणि, रुद्रस्य निष्प्रतियोगिकाद्वितीयत्वात्। स्वाज्ञदृष्ट्या **य इमान् लोकान् ईशत ईशनीभिः**। **प्रत्यङ्जनास्तिष्ठतीति** व्याख्यातार्थमेतत्। सर्गकाले **भुवनानि संसृज्य** स्वसत्ताप्रदतया सम्यक् सृष्ट्वा स्थितिकाले आनन्दप्रदतया भुवनानां **गोप्ता अन्तकाले** स्वातिरिक्तं **संचुकोच** उपसंहरति च पश्यत् स्वाज्ञानापाये तत्कार्यस्वातिरिक्तकलनाविरळं ब्रह्मैवावशिष्यते ॥ २ ॥ ज्ञदृष्टिप्रसक्तस्वाविद्यापदस्थूलांशयोगतो विराडिव भातीत्याह—**विश्वत** इति।

आब्रह्मस्तम्बपर्यन्तप्राणिनां चक्षूंषि मुखानि बाहवः पादादयोऽस्येति **विश्वतश्चक्षुः उत** अपि उत्तरत्र करणग्रामोपलक्षणार्थम्। सर्वप्राणिकरणग्रामसंयोजयितृत्वेन तत्प्रवृत्तिनिमित्तं एष एवेत्याह—**संबाहुभ्यामिति**। मनुष्यादीन् **बाहुभ्यां संधमति** संयोजयति धातूनामनेकार्थत्वात् **पतत्रैः** पादैः **संधमति**। सर्वपदार्थस्रष्टाऽप्येष एवेत्याह—**द्यावाभूमीति**। तदुपलक्षितस्वाविद्यापदतत्कार्यं **जनयन् देव एको**ऽद्वितीयः सर्वप्राणिकरणप्रवृत्तिनिमित्तं सन् वस्तुतः स्वातिरिक्तं ग्रसित्वा स्वयमेव विजृम्भत इत्यर्थः,

ब्रह्मैवैकमनाद्यन्तमब्धिवत् प्रविजृम्भते ॥ इति श्रुतेः ॥ ३ ॥

ईश्वरप्रसादप्रार्थना

यो देवानां प्रभवश्चोद्भवश्च विश्वाधिको रुद्रो महर्षिः ।
हिरण्यगर्भं जनयामास पूर्वं स नो बुद्ध्या शुभया संयुनक्तु ॥४॥
या ते रुद्र शिवा तनूरघोराऽपापकाशिनी ।
तया नस्तनुवा शंतमया गिरिशन्ताभिचाकशीहि ॥ ५ ॥
यामिषुं गिरिशंत हस्ते बिभर्ष्यस्तवे ।
शिवां गिरित्र तां कुरु मा हिꣳसीः पुरुषं जगत् ॥ ६ ॥

व्यष्टिसमष्टिप्रपञ्चहेतुत्वं मुमुक्षुस्वज्ञानप्रदत्वं चाह—**यो देवानामिति**। य ईशोऽग्न्यादिदेवानां **प्रभवश्च** उत्पत्तिक्रमात् प्रातिलोम्येन भवो यस्मिन् सः प्रभवः लयस्थानं, उद्भवत्यस्मादिति उद्भवः उत्पत्तिस्थानमिति यावत् उपसर्गाणामनेकार्थत्वात्। विश्वश्चासावधिकश्चेति **विश्वाधिकः** निरतिशयानन्दत्वात्। **रुद्र**पदं व्याख्यातम्। महांश्चासावृषिश्चेति **महर्षिः** निरतिशयमहत्त्वेन सर्वज्ञत्वात्। स एव सृष्टेः **पूर्वं** सर्वप्राण्यन्तःकरणाभिमानिनं **हिरण्यगर्भं जनयामास**। **सो**ऽयमीश्वरो **नो** अस्मान् योग्याधिकारिणः **शुभं** ब्रह्ममात्रं तद्विषयया **शुभया बुद्ध्या संयुनक्तु** येनाहं तत्पदं भजामि तथा मां नियोजयत्वित्यर्थः ॥ ४ ॥

ईश्वरस्य सर्वमुमुक्ष्वनुग्राहकत्वमाह—**या** ते रुद्रेति। हे **रुद्र** या इयं श्रुतिस्मृतिपटलप्रसिद्धा तस्याः ते तव सकलनिष्कलतनोरस्तित्वे रुद्रशब्द एव प्रमाणं रुद्रेति, **शिवा** शुद्धा अजडक्रियाज्ञानेच्छाशक्तिमती निरतिशयानन्दनिष्कला च **तनूः** तनुः **अघोरा** नित्यप्रसन्ना पापप्रकाशिनी न भवतीति **अपापकाशिनी** स्वाभिव्यक्तेः पुण्यफलरूपत्वात्, **तया नोऽस्मान्** स्वातिसाधनविशिष्टान् निष्कलरूपया **तन्वा शंतमया** परमसुखतमया गिरौ कैलासे स्थितः शं तनोतीति हे **गिरिशन्त अभि** आभिमुख्येन प्रत्यक्तया **चाकशीहि** त्वं निष्कलभावेन मुमुक्षून् प्रति प्रकाशस्व ॥ ५ ॥ सम्यज्ज्ञानहेतुसगुणतनुप्रार्थनमाह—**यामिषुमिति**। हे **गिरिशन्त** स्वातिरिक्तोपसंहारसमर्थत्वेन **यां** प्रसिद्धां **इषुं हस्ते बिभर्षि** धारयसि किमर्थम्? **अस्तवे** स्वोपसंहर्तव्यं प्रति क्षेप्तुं, गिरौ स्थितः सन् सर्वान् त्रायत इति हे **गिरित्र** स्वातिरिक्तोपसंहारसमर्थो **शिवां कुरु** इति पूर्वेणान्वयः। सम्यज्ज्ञानसाधनसंपन्नं **पुरुषं** तदुपायभूतशमादिविशिष्टं **जगत् मा हिंसीः** हिंसां मा कार्षीः, यावत्सम्यज्ज्ञानेन त्वत्पदं भजामि तावत् सम्यज्ज्ञानतत्साधनं मा हिंसीरित्यर्थः ॥ ६ ॥

निष्कलब्रह्मज्ञानादेव मोक्षः

ततः परं ब्रह्म परं बृहन्तं यथा निकायं सर्वभूतेषु गूढम्।
विश्वस्यैकं परिवेष्टितारमीशं तं ज्ञात्वाऽमृता भवन्ति ॥ ७ ॥
वेदाहमेतं पुरुषं महान्तमादित्यवर्णं तमसः परस्तात्।
तमेव विदित्वाऽतिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय ॥ ८ ॥
यस्मात् परं नापरमस्ति किंचिद्यस्मान्नाणीयो न ज्यायोऽस्ति [1]किंचित्।
वृक्ष इव स्तब्धो दिवि तिष्ठत्येकस्तेनेदं पूर्णं पुरुषेण सर्वम् ॥९॥

[1] कश्चित्—अ, अ २, उ, मु.

ततो यदुत्तरतरं तदरूपमनामयम् ।
य एतद्विदुरमृतास्ते भवन्त्यथेतरे दुःखमेवापि यन्ति ॥ १० ॥

निष्कळतनुं तज्ज्ञानफलं चाह--तत इति । **ततो** देवप्रसादानन्तरं स्वातिरिक्तपरत्वेन बृंहणात् **परं ब्रह्म परं** निरतिशयं **बृहन्तं** सर्वत्र परिपूर्णं, ईशमिति विशेषणात् पुँल्लिङ्गनिर्देशः, **यथा निकायं** स्वातिरिक्तयोगात् स्वतो निर्विशेषं यथाऽयोगोळकानुगतवह्निवत् ब्रह्मादिस्तम्बान्त**सर्वभूतेषु गूढं, विश्वस्यैकं परिवेष्टितारं** यथा मायावी मायाहस्त्यादीन् परिवेष्ट्य तिष्ठति यथा मृगतृष्णोदकरजतादीनि ऊषरशुक्त्यादीन् परिवेष्ट्य स्थितानि तथा विश्वस्यान्त-र्बहिश्च व्याप्य परिवेष्टितारं ईशं **तं** विध्वस्तनिखिलोपाधिं निष्प्रतियोगिकस्वमात्रमिति **ज्ञात्वा** ज्ञानसमकालं **अमृता भवन्ति** ब्रह्मैव भवन्तीत्यर्थः ॥ ७ ॥ ब्रह्ममात्र-प्रबोधादेव तन्मात्रावस्थितिलक्षणकैवल्यं सिध्यति न तु प्रकारान्तरेणेत्याह— **वेदेति** । **एतं** प्रकृतं **पुरीतत्युपलक्षितस्वाविद्यापदतत्कार्यजातं** स्वावशेषतया ग्रसित्वा स्वेन रूपेण पूरणात् **पुरुषं महान्तं** अद्वितीयं **आदित्यवर्णं** स्वप्रकाशचिन्मात्रं स्वाज्ञानतपसः **परस्तात्** स्वेन रूपेणावस्थितं यः स्वाज्ञान-तत्कार्यापह्नवसिद्धः **तं** आत्मानं स्वमात्रतया **विदित्वा** तद्वेदनसमकालं मृत्युं स्वातिरिक्तमतीत्यापह्नवं कृत्वा यत् स्वमात्रमवशिष्यते तत् **अतिमृत्यु ब्रह्ममात्रं एति** । सम्यज्ज्ञानादृते **नान्यः पन्था विद्यतेऽयनाय** । स्वाज्ञानप्रभवबन्धनिवृत्तेः स्वज्ञाननिमित्तत्वात् ज्ञानादेव मुक्तो भवतीत्यर्थः ॥ ८ ॥ ज्ञानादृते मोक्षसाधनं नास्तीत्याह—**यस्मादिति** । **यस्मात्** पुरुषात् निर्विशेषचिन्मात्रात् **परं** उत्कृष्टमपकृष्टं वा **किंचिन्नास्ति** व्याविद्धस्वातिरिक्तत्वात्, **यस्मादणीयोऽणुतमं** नास्ति, यस्मात् **किंचित्** अपि **न ज्यायोऽस्ति** यदतिरिक्तस्य मायामात्रत्वात्, निवातप्रदेशस्थवृक्ष **इव स्तब्धः** स्थाणुरविकारी **दिवि** स्वे महिम्नि स्वाराज्य **एक** एवावतिष्ठते निष्प्रतियोगिकाद्वैतरूपत्वात् य एवं **तिष्ठति तेनेदं पूर्णं पुरुषेण सर्वं** त्रिपरिच्छेदवैरळ्यात् । यतः पुरुषादतिरिक्तं न किंचिदस्ति अतस्तन्मात्रज्ञानात् तद्भावापत्तिः ॥ ९ ॥ ज्ञानेतरमार्गावलम्बिनां न हि

पुरुषार्थसिद्धिः प्रत्युत बहुळतमदुःखमेवेत्याह—तत इति । यतो ब्रह्ममात्रज्ञानादेव कैवल्यसिद्धिर्भवति ततः तस्मात् यदुत्तरतरं साधनान्तरं नास्ति तदरूपं निष्कळत्वात् अत एव तत् अनामयं स्वाज्ञानरोगस्याविद्यकत्वेन कारणतुल्यत्वात् । य एतत् प्रकृतं स्वातिरिक्तापह्नवसिद्धं ब्रह्म स्वमात्रमिति विदुः त एव वेदनसमकालं अमृता भवन्ति ब्रह्मैव भवन्ति । अथेति पक्षान्तरद्योतकः । अथेतरे पक्षान्तरावलम्बिनो दुःखमेवापियन्ति न कदाऽपि कैवल्यसुखिनो भवन्ति । ततो ज्ञानादेव कैवल्यसिद्धिरित्यर्थः ॥ १० ॥

निर्विशेषब्रह्मज्ञानोपायः

सर्वाननशिरोग्रीवः सर्वभूतगुहाशयः ।
सर्वव्यापी स भगवान् तस्मात् सर्वगतः शिवः ॥ ११ ॥
महान् प्रभुर्वै पुरुषः सत्वस्यैष प्रवर्तकः ।
सुनिर्मलामिमां शान्तिमीशानो ज्योतिरव्ययः ॥ १२ ॥
अङ्गुष्ठमात्रः पुरुषोऽन्तरात्मा सदा जनानां हृदये संनिविष्टः ।
हृदा मनीषा मनसाऽभिकॢप्तो य एतद्विदुरमृतास्ते भवन्ति ॥ १३ ॥

निर्विशेषप्रबोधोपायमाह—सर्वेति । स्वाव्यतिरिक्ताविद्यापदतत्कार्यं सृष्ट्वा तद्व्यष्टिसमष्टिस्थूलांशयोगतो विश्वविराडोत्रात्मना सर्वाण्याननानि शिरांसि ग्रीवाश्च अस्येति सर्वाननशिरोग्रीवः, इतरावयवानामुपलक्षणमेतत्, तथा स्वाविद्यापदव्यष्ट्यादिसूक्ष्मांशोपाधिकतैजससूत्रानुज्ञात्रात्मना सर्वेषामाब्रह्मस्तम्बपर्यन्तभूतानां हृदयविलसितलिङ्गशरीराश्रयः तत्प्रवृत्तिनिमित्तसूत्ररूपत्वात्, तथा स्वाविद्यापदव्यष्ट्यादिबीजांशयोगतः प्राज्ञबीजानुज्ञैकरसात्मना सर्वतो व्यातुं शीलमस्येति सर्वव्यापी स हि भगवान् निरङ्कुशषड्गुणैश्वर्यसंपन्नत्वात् । यस्मात् एवं तस्मात् सर्वगतः । तथा स्वाविद्यापदव्यष्ट्यादितुर्यांशासङ्गतो द्वितुर्यैक्याविकल्पात्मना स्वाविद्यापदस्थूलादिभागत्रयाशिवं ग्रसित्वा तुर्यांशेऽप्यसङ्गचिद्धातुः

शिवो भवति । स्वातिरिक्ताविद्यापदाशिवापह्नवसिद्धो वा शिवो भवति ॥ ११ ॥ ज्ञानतत्फलदातेश्वर इत्याह—**महानिति** । **महान्** देशकालाद्यपरिच्छिन्नत्वात् **प्रभुः** जगच्चक्रचालकत्वेन नियन्तृत्वात् **वैशब्दः** प्रसिद्ध्यर्थः **पुरुषः** स्वेन रूपेण अखिलपूरणात् **यः** एवंविधः परमेश्वरः **एष** हि **सत्वस्य प्रवर्तकः** ये स्वानुग्रहभाजनाः **तैः** स्वाराधनधिया सत्कर्मोपासनयोगादीनि कारयित्वा तेषां यत् सत्वं अन्तःकरणं तस्य वैमल्यापादनद्वारेणादौ प्रत्यक्प्रावण्यमापाद्य ततः प्रत्यगभिन्नब्रह्मगोचरं विधाय ततः प्रत्यक्परविभागैक्यकलना यत्र सुदुर्लभतामर्हति तद्धि निष्प्रतियोगिकब्रह्ममात्रं तत्सम्यज्ज्ञानं प्रत्यप्येतस्य प्रवर्तकत्वात्,

> धातुः प्रसादान्महिमानमात्मनः ज्ञानप्रसादेन विशुद्धसत्त्वः ॥ इत्यादि
> परमाद्वैतविज्ञानमिदं भवभयापहम् ।
> भवप्रसादतो लभ्यं भावनारहितं परम् ॥ इति

श्रुतेः स्मृतेश्च । परमेश्वरप्रसादादेव स्वातिरिक्तशान्तिः भवतीत्याह—**सुनिर्मलामिति** । स्वातिरिक्तमलापह्नवसिद्धां विद्वदनुभवैकगोचरां **शान्तिं** निरतिशयानन्दाविर्भावलक्षणां विकलेवरमुक्तिं प्रत्ययमेव **ईशानः**, मुमुक्षोः स्वाविर्भावहेतुः स्वयमेवेत्यर्थः । अत एवेश्वरो **ज्योतिरव्ययः** चिन्मात्रत्वेन नित्यत्वात् ॥ १२ ॥ ईश्वरस्यैव सर्वान्तःकरणयोगतो जीवत्वं स्वयाथात्म्यज्ञानतः स्वभावापत्तिं चाह—**अङ्गुष्ठमात्र** इति । हृदयस्य स्वाङ्गुष्ठपरिमितिसुषिरवत्त्वेन तदुपलब्धृचैतन्यस्यापि तन्मात्रत्वमुपचर्यते इति **अङ्गुष्ठमात्रः**, वस्तुतः पूर्णत्वात् **पुरुषः** सपादिषु रज्वादिवत्, सर्वान्तःकरणावभासकत्वेन सर्वभूतान्तरात्मा, प्रत्यगात्मरूपेण **सदा जनानां हृदये सन्निविष्टः** हृदयाख्यसूक्ष्मशरीरसत्तास्फूर्त्यानन्दप्रदत्वात्, **हृदा** हृदयस्थबुद्ध्या मनः ईष्ट इति **मनीषा** संकल्पादिमन्मनसाऽभिक्लृप्तः प्रकाशितः । यद्वा—**हृदा** "हृञ् हरणे" इति धातोः नेति नेतीति स्वातिरिक्तप्रतिषेधोपदेशेन **मनीषा** ज्ञानविज्ञानात्मना **मनसा** सम्यज्ज्ञानेन च **अभिक्लृप्तोऽभिप्रकाशितः** । **य एतत्** निर्विशेषं ब्रह्म स्वमात्रमिति **विदुः त** एव **अमृताः भवन्तीत्युपचर्यते**, पुरैव तेषां नित्यामृतत्वस्वरूपत्वात् ॥ १३ ॥

ईश्वरस्य सर्वमयत्वम्

सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् ।
स भूमिं विश्वतो वृत्वाऽत्यतिष्ठद्दशाङ्गुलम् ॥ १४ ॥
पुरुष एवेदꣳ सर्वं यद्भूतं यच्च भव्यम् ।
उतामृतत्वस्येशानो यदन्नेनातिरोहति ॥ १५ ॥

स्वाविद्यामवष्टभ्य सर्वस्रष्टृत्वं स्वसृष्टोपाध्यनुप्रवेशतो जीवत्वं स्वज्ञानतः स्वभावापत्तिं चाह—**सहस्रेति** । समष्टिजीवात्मना सहस्राणि शीर्षाण्यस्येति **सहस्रशीर्षा, पुरुषः** पूर्णत्वात् । **सहस्राक्ष** इत्यादावपि एवमेव योजना । **स** प्रकृतेशः **भूमिं** भूम्युपलक्षितभौतिकजातं सर्वतो **विश्वतोऽन्तर्बहिश्च वृत्वा** व्याप्य **अत्यतिष्ठद्दशाङ्गुलं** हिरण्यगर्भं विराजं चातीत्य स्वे महिम्नि अत्यतिष्ठत् । यानि यानि दशसङ्ख्याकानि तानि तान्यङ्गुलपरिमाणोपलक्षितानि तानि सर्वाण्यतीत्य स्थितवानिति वा । अथवा भौतिकजातमन्तर्बहिर्व्याप्य तदपेक्ष्य दशाङ्गुलमत्यतिष्ठत्, दशाङ्गुलवचनं निरवधिकमहत्त्वोपलक्षणार्थम् ॥ १४ ॥ यत् सर्वकल्पनाधिष्ठानं तदेव सर्वमित्याह—**पुरुष एवेदमिति** । पुरुषातिरिक्तस्य मायामात्रत्वेन कारणतुल्यत्वात्, "पुरुषान्न परं किंचित् सा काष्ठा सा परा गतिः" इति श्रुतेः, पुरुषातिरेकेण **यद्भूतं यच्च भव्यं** यद्वर्तमानकालिकं च तदपि मायामात्रम् । तत्कल्पनाधिष्ठानं पुरुषमात्रमेवेत्याह—**उतामृतत्वस्येशान** इति । उतापि स्वातिरिक्तमार्त्यपह्नवसिद्धामृतत्वस्येशानः परमेश्वरः स्वाज्ञानबन्धनिरासकत्वात् यद्दृश्यजातमन्नं, सम्यज्ज्ञानेनाद्यत इत्यन्नशब्देन मायातत्कार्यमुच्यते, इत्थंभूतान्नेन वस्तुस्वभावमतिलङ्घ्य तदतिरेकेण **अतिरोहति** जायते, कार्यजातस्यापि सत्ताप्रदत्वेनाधिष्ठानत्वादीशानो नियन्ता परमेश्वर एवेत्यर्थः । यत्पुरुषतत्त्वमन्नेन कार्यरूपेण रोहति स्वगतहेयांशापाये स एवामृतत्वस्येशानः ॥ १५ ॥

ईश्वरस्य सर्वप्रत्यक्त्वम्

सर्वतःपाणिपादं तत् सर्वतोऽक्षिशिरोमुखम् ।
सर्वतःश्रुतिमल्लोके सर्वमावृत्य तिष्ठति ॥ १६ ॥
सर्वेन्द्रियगुणाभासं सर्वेन्द्रियविवर्जितम् ।
सर्वस्य प्रभुमीशानं सर्वस्य शरणं [1]सुहृत् ॥ १७॥
नवद्वारे पुरे देही हंसो लेलायते बहिः ।
वशी सर्वस्य लोकस्य स्थावरस्य चरस्य च ॥ १८ ॥

ईश्वरस्य सर्वप्रत्यक्त्वेन सर्वात्मकतामाह—**सर्वत** इति । ब्रह्मादिस्तम्बान्त-प्राणिपटलपाणिपादा अस्यैव पाणिपादा इति **सर्वतःपाणिपादं तत्** प्रकृतं ब्रह्म । **सर्वतोऽक्षिशिरोमुखं** इत्यादेरप्येवमेव विग्रहः । तथा **सर्वतःश्रुतिमल्लोके** प्राणिनिकाये । **किं बहुना,** स्वातिरिक्तसर्वप्रपञ्चं सच्चिदानन्दरूपेण **आवृत्य तिष्ठति** ॥ १६ ॥ ईश्वरस्य स्वविकल्पितप्रपञ्चासङ्गतया सर्वसाक्षित्वं सर्व-नियन्तृत्वादिरपीत्याह—**सर्वेति** । सर्वाणि श्रोत्रादीनीन्द्रियाणि तेषां गुणाः शब्दादयो यदधिगमादाभासमात्रतया दृश्यन्ते तत् **सर्वेन्द्रियगुणाभासं,** वस्तुतः **सर्वेन्द्रियविवर्जितं सर्वस्य प्रभुं** स्वामिनं **ईशानं** नियन्तारं **सर्वस्य शरणं** सर्वापद्रक्षकत्वात् **सुहृत्** मित्रं सर्वावस्थायां हितकरम् । सर्वाणि पदानि प्रथमान्तानि नपुंसकानि । **प्रभुं** इत्यत्र लिङ्गविभक्तिव्यत्ययो द्रष्टव्यः ॥ १७ ॥ ग्रन्थलाघवात् बुद्धिलाघवमाश्रयणीयं इति न्यायात् एतस्यार्थस्य दुरवगाह्य-त्वेनोक्तार्थमेव पुनः पुनरुच्यते । शोधितजीवेशयोरेकत्वमसकृदुक्तम् । स्वमाया-विकल्पितकार्यानुप्रवेशतो जीवत्वं तन्नियन्तृत्वं स्वज्ञानतः स्वमात्रतां च पुनरप्याह—**नवद्वार** इति । शिरसि सप्तद्वाराणि द्वाववाञ्चौ एतानि नवद्वाराणि यस्मिन् तस्मिन् **नवद्वारे पुरे** शरीरे प्रविश्य **देही** पुराभिमानी सन् संसरति । कथं इत्यत्र जाग्रदाद्यभिमानं क्रमेण गत्वा हित्वा ज्ञानविज्ञानाभ्यां सर्वं हत्वा

[1] बृहत्—मु.

तुरीयं गच्छति सम्यज्ज्ञानेन तदपि हत्वा तुरीयातीतं स्वमात्रतया गच्छतीति वा **हंसः** परमात्मा **लेलायते** तद्वहिरेव भूत्वा लीलया चरति संसरतीव। अस्य वशे सर्वं वर्तत इति **वशी सर्वस्य लोकस्य, स्थावरस्य चरस्य च** वशी सर्वनियन्तेत्यर्थः ॥ १८ ॥

परमात्मवेदनाच्छोकनिवृत्तिः

अपाणिपादो जवनो ग्रहीता पश्यत्यचक्षुः स शृणोत्यकर्णः ।
स वेत्ति वेद्यं न च तस्यास्ति वेत्ता तमाहुरग्र्यं पुरुषं महान्तम् ॥
अणोरणीयान् महतो महीयानात्मा गुहायां निहितोऽस्य जन्तोः ।
तमक्रतुं पश्यति वीतशोको धातुः प्रसादान्महिमानमीशम् ॥२०॥
वेदाहमेतमजरं पुराणं सर्वात्मानं सर्वगतं विभुत्वात् ।
जन्मनिरोधं प्रवदन्ति यस्य ब्रह्मवादिनो हि प्रवदन्ति नित्यम् ॥२१॥

निष्कलेश्वरस्यापि स्वविद्यया करणग्रामराहित्यं तत्तद्व्यापारवत्त्वं सर्वज्ञतामनन्यवेद्यतामद्वितीयत्वं चाह—**अपाणीति**। पाणिपादा यस्य न विद्यन्ते सोऽयं **अपाणिपादः** निर्विशेषत्वात् तथाऽपि ज्ञाताज्ञातसाक्षितया तत्र तत्र गच्छतीवेति **जवनः** स्वाभेदेन सर्वग्राहकत्वात् **ग्रहीता** च। शिष्टकर्मेन्द्रियाणामुपलक्षणमेतत्। स्वयं **अचक्षुरपि** स्वभावेन चक्षुस्तद्विषयं च **पश्यति** कर्णहीनोऽपि श्रोत्रतद्वृत्तिविषयं **शृणोति**। शिष्टज्ञानेन्द्रियाणामुपलक्षणमेतत्। किं बहुना, **सोऽयं** परमात्मा यद्व्यष्टिसमष्टिबाह्यान्तःकरणैर्वेदनीयं **वेद्यं** तत्सर्वं युगपत् **वेत्ति** सर्वज्ञत्वात्। विषयग्राहिकरणग्रामग्राहकवत् वेत्तृवेदयिता कश्चित् स्यादित्यत आह—**न च तस्यास्ति वेत्तेति**, "विज्ञातारमरे केन विजानीयात्" इति श्रुतेः। तं प्रकृतं अग्रे भवं **अग्र्यं पुरुषं महान्तं** त्रिविधपरिच्छेदशून्यं **आहुः** ब्रह्मविदः,

न व्यापित्वादेशतोऽन्तः कारणत्वान्न कालतः ।
न वस्तुतोऽपि सार्वात्म्यादानन्त्यं ब्रह्मणि त्रिधा ॥

इति चन्द्रिकोक्तेः ॥ १९ ॥ परमात्मन एकत्वं तज्ज्ञानात्कैवल्यं तज्ज्ञानाधिकारतां चाह—**अणोरिति**। **अणोरणीयान्** परमाणुवत् सूक्ष्मबुद्ध्यादेरपि सूक्ष्मतमत्वात्, **महतो महीयान्** आकाशादेर्महतोऽपि महत्तमत्वात्। बुद्ध्याकाशसापेक्षमणुत्वं महत्त्वं च न स्वतः, स्वस्य निष्प्रतियोगिकात्ममात्रत्वात्,

आत्ममात्रमिदं सर्वमात्मनोऽन्यन्न किंचन ॥

इति श्रुतेः। यदि स्वाज्ञविकल्पिता हृद्गुहा तदा तत्र प्रत्यक्त्वेन **निहितः**। कस्य गुहेत्यत्र जनिमज्जन्तोः स्थूलशरीरस्य हृदयावच्छिन्नबुद्धिः गूहनात् गुहेत्युच्यते। यः प्रत्यगात्मतया प्रकृतः **तमक्रतुं** नानाविधसङ्कल्पविरळं **महिमानं** निरवधिकमहद्रूपं स्वातिरिक्तप्रसनेशं, "सर्वसंहारसमर्थः" इति श्रुतेः। इत्थंभूतं प्रत्यक्तत्त्वं परतत्त्वाभेदेन प्रत्यक्परभिदाऽसहपरब्रह्मतया वा **धातुः** ईश्वरस्य **प्रसादात्** यः **पश्यति** यदा सोऽयं तदा **वीतस्वातिरिक्तास्तिताप्रभवशोको** भवति ॥ २० ॥ उक्तार्थदार्ढ्याय मन्त्रदृगनुभवमाह—वेदेति। **वेदाहं** इत्याचार्यपदारूढो मन्त्रद्रष्टा मुनिः। किं वेदेत्यत्र **एतं** अध्यायत्रयप्रतिपादितं **अजरं** अपक्षयशून्यत्वात् **पुराणमिति** च जन्मादिषड्भावविकारप्रतिषेधः, कूटस्थनित्यं, सर्वश्चासावात्मा चेति **सर्वात्मानं** सर्वेषामात्मानमिति वा **सर्वगतं** सर्वव्यापिनम्! कुत एवमित्यत्राह—**विभुत्वादिति**। आकाशादिविविधकार्यरूपेण भवतीति विभुः, तस्मात् सर्वगतम्। **यस्य** जगज्जन्मनिरोधं **प्रवदन्ति** एतदेव परमेश्वरकर्मेति **ब्रह्मवादिनः हि**: प्रसिद्धौ प्रवदन्ति नित्यं महाप्रळयमहासर्ग-अवान्तरप्रळयावान्तरसर्ग-सुषुप्तिप्रबोधेषु मध्ये च। यद्वा—**जन्मनिरोधं** जन्माभावं **यस्य वदन्ति** तमहं वेदेत्यन्वयः। स्वविकल्पितमायातत्कार्यापाये स एवेश्वरः परमात्मा स्वमात्रमवशिष्यत इति तदपि वेदाहमित्यभिप्रायः ॥

इति तृतीयोऽध्यायः

चतुर्थोऽध्यायः

ईश्वरात् सम्यज्ज्ञानप्रार्थना

य एकोऽवर्णो बहुधा शक्तियोगाद्वर्णाननेकान् निहितार्थो दधाति।
वि चैति चान्ते विश्वमादौ स देवः स नो बुद्ध्या शुभया संयुनक्तु॥

अभ्यासस्य तात्पर्यलिङ्गत्वात् वक्ष्यमाणार्थस्य दुरवगाह्यत्वाच्च जामितां विहायोक्तार्थमेव पुनः पुनरावर्तयति। चतुर्थाध्याये ईश्वरात् सम्यज्ज्ञानप्रार्थनं तत्त्वंपदार्थशोधनं द्वैतस्य मिथ्यात्वं अद्वैतस्य सत्यत्वं निष्प्रतियोगिकत्वं च सम्यज्ज्ञानस्य कैवल्यान्तरङ्गसाधनत्वं च वक्ष्यते। तत्रादौ मुमुक्षोरीश्वरात् सम्यज्ज्ञानप्रार्थनमाह—**य एक** इति। **यः** चिद्धातुः **एकोऽद्वितीयत्वात्** नामरूपवैरळ्यात् **अवर्णः** निर्विशेषत्वात् **बहुधा** बहुप्रकारमायाशक्तियोगात् **अनेकान् वर्णान्** नामरूपाणि, यस्य स्रष्टव्यविषयेक्षणे **निहितो** निक्षिप्तोऽर्थः, **दधाति** व्याकरोति, पूर्वं स्वेक्षणतो नामरूपव्याकरणं कृत्वा पश्चात् बहिर्व्याकरोति। **अन्ते** संहारकाले **विश्वं वि चैति** व्येति च, अन्तर्भावितणिजर्थोऽयं शब्दः, विगमयति स्वात्मनि सर्वमुपसंहरति। चकारात् आदौ दधातीति जगदुत्पत्तिस्थितिलयकारणत्वं द्योत्यते। य एवंविधः परमेश्वरो विजयते **स नो बुद्ध्या शुभया संयुनक्तु** ससाधनतत्त्वज्ञानरूपया शुभया धिया योजयतु॥ १॥

ईश्वरस्यैव स्वमायया निखिलकार्यप्रवेशः

तदेवाग्निस्तदादित्यस्तद्वायुस्तदु चन्द्रमाः।
तदेव [1]शुक्रं तद्ब्रह्म तदाप[2]स्सप्रजापतिः॥ २॥
त्वं स्त्री त्वं पुमानसि त्वं कुमार उत वा कुमारी।
त्वं जीर्णो दण्डेन वंचसि त्वं जातो भवसि [3]सर्वतोमुखः॥ ३॥

[1] शुक्रममृतंत—अ, अ १, अ २, क. [2] स्तत्प्र—उ, मु. [3] विश्वतो—अ, क.

नीलः पतङ्गो हरितो लोहिताक्षस्तटिद्गर्भ ऋतवः समुद्राः ।
अनादिमत्त्वं विभुत्वेन वर्तसे यतो जातानि भुवनानि विश्वा ॥४॥

स्वमायायोगतः आधिदैविकोपाधीनुत्पाद्य तेष्वनुप्रविश्य अग्न्याद्याख्यांमवलम्ब्य तन्नियन्तृत्वेनापि स्वयमेव अवतीत्याह—**तदेवेति** । **तदेव** ईश्वरतत्त्वं अग्निसूर्यवाय्वाख्यं तच्चन्द्रादिरूपेणापि स्थितं, **तदु** अपि, अस्य सर्वत्रान्वयो द्रष्टव्यः, **तदेव शुक्रं** नक्षत्रजालवत् स्थितं, शुक्रमिति वा पाठे विराड्रूपेणापि स्थितं, **तद्ब्रह्म तदापः** अत्रभिमानिदेवतारूपत्वात् , स हि **प्रजापतिः** चतुराननरूपत्वात् "एष ब्रह्मैष इन्द्रः" इत्यादिश्रुतेः । अग्न्यादित्यादीनां वाक्चक्षुरादिसमष्टित्वात् वागादिसमष्टिग्रहणं इतरसमष्टीनामुपलक्षणार्थम् ॥ २ ॥ स्वमायाशक्त्या निखिलकार्योपाधीन् सृष्ट्वा तत्र घटाकाशवत् जलचन्द्रवच्च प्रविश्य तत्तदाख्यां प्राप्तवद्भातोऽपि स्वयमीश्वर एवेत्याह—त्वमिति । **त्वमेव स्त्रीपुंनपुंसकभेदेन** स्थितोऽसि, तत्र **कुमारकुमारीरूपेणापि** स्थितोऽसि, **त्वं जीर्णो** जरठः **करकलितदण्डेन वंचसि** संचरसि । किं बहुना, त्वमेव मायया **सर्वतोमुखः** नानाऽऽकारेण मायया जात इव लक्ष्यसे ॥ ३ ॥ तिर्यगादिरूपेणापि त्वमेव वर्तस इत्याह—**नील** इति । **नीलः पतङ्गः** कृष्णभ्रमरादिः **हरितः** शुकादिः **लोहिताक्षः** कोकिलादिः **तटिद्गर्भो** मेघः **ऋतवो** वसन्तादयः षट् **समुद्राः** लवणाद्याः सप्त । नीलपतङ्गादिस्त्वमेवेत्यर्थः । आदिमन्न भवतीति **अनादिमत्** उत्पत्त्यादिरहितः त्वमेव । तव देशकालवस्त्वपरिच्छिन्नत्वात् **विभुत्वेन वर्तसे** विभुत्वेन वर्तमानमपि त्वमेवेति सर्वत्रानुषज्यते । **यतो भुवनानि** भूरादीनि **विश्वा** विश्वानि **जातानि**, भुवनाद्याविर्भावतिरोभावाधिकरणमपि त्वमेव ॥ ४ ॥

जीवेश्वरभेदो मायिकः

अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजाः [1]सृज्यमानां सरूपाः ।
अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्यः ॥

[1] सृजमा—अ १, अ २, क, उ, मु.

द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते ।
तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्योऽभिचाकशीति ॥ ६ ॥
समाने वृक्षे पुरुषो निमग्नोऽनीशया शोचति मुह्यमानः ।
जुष्टं यदा पश्यत्यन्यमीशमस्य महिमानमिति वीतशोकः ॥७॥

इदानीं तेजोऽबन्नलक्षणां प्रकृतिं तद्विकारप्रपञ्चस्येश्वरविवर्ततां ईश्वरस्य तदसङ्गत्वेन तत्कारणतां तद्गतविशेषांशापह्नवबोधतः कैवल्यसिद्धिं चाह— **अजामिति** परमार्थदृष्ट्या कालत्रयेऽपि या न जायते तां **अजां** ब्रह्ममात्रप्रबोधसमकालं मूलप्रकृतेरलब्धात्मकत्वात् । स्वाज्ञदृष्ट्या तस्या एकत्वमनेकत्वं चाह— **एकामिति** । मूलप्रकृतेरेकत्वात् । **लोहितशुक्लकृष्णां** तेजोऽबन्नानि सृष्ट्वा तत्तदवस्थाऽऽपन्नत्वात् । यद्वा—रजस्सत्त्वतमोगुणात्मिकाम् । गुणत्रयानुयोगतो **बह्वीः** अनेकाः प्रविभक्तरूपेण जायन्त इति **प्रजाः** कारणप्रविभक्तरूपेण व्यज्यमानाः लोहिताद्यात्मना रजआद्यात्मना वा **सरूपाः** स्वसमानरूपाः **सृज्यमानां** उत्पादयन्तीमजां वस्तुतो जन्मराहित्यात् **अजो ह्येकः** पूर्वोक्तामजां **जुषमाणोऽनुशेते** क्षेत्रज्ञस्य स्वाविद्यापाशपाशितत्वेन तत्परवशत्वात् । तथाऽप्ययं तदसङ्गचिन्मात्रस्वरूपः प्राकृतपञ्चकोशेषु जलचन्द्रवदनुप्रविश्य तद्धर्मान् स्वधर्मत्वेनोररीकृत्य प्रकृतिप्राकृतपरवशोऽनुवर्तते । सर्वानर्थमूलकारणभूतां **भुक्तभोगां** वान्ताशनमिव **एनामन्योऽजः** परमेश्वरो **जहाति** स्वमात्रज्ञानाग्निना भस्मीकरोतीत्यर्थः ॥ ९ ॥ एकः प्रकृतिगुणान् भजमानः तत्परतन्त्रतया संसरति, अपरस्तां परित्यज्य नित्यमुक्ततया अवतिष्ठत इति योऽर्थोऽभिहितः तमेतमर्थं भङ्ग्यन्तरेणाचष्टे— **द्वासुपर्णेति** । द्वा द्वौ घटाकाशमहाकाशस्थानीयौ जीवपरमात्मानौ **सुपर्णा** सुपर्णौ शोभनपतनगमनौ **सयुजा** सयुजौ बिम्बप्रतिबिम्बभावमापन्नौ **सखाया** सखायौ समानाख्यानौ समानाभिव्यक्तिकारणौ चेतनत्वाजत्वसामान्यात् किंचिज्ज्ञत्वसर्वज्ञत्वोपाधिकत्वेन नियम्यनियामकत्वेन शुद्धयशुद्धयुपाधिकत्वेन च प्रकृतिप्राकृतत्वेन **समानं** उच्छेदधर्मवत्त्वात् **वृक्षं परिषस्वजाते** परिष्वक्तवन्तौ । **तयोः** कार्यकारणोपाधिजीवेशयोर्मध्ये लिङ्गशरीराभिमानी **अन्यो** जीवः **पिप्पलं** पुण्य-

पापकर्मफलनिष्पन्नं स्वादु विविधविषयजफलं अत्ति भुङ्क्ते । जीवात् अन्यः परमेश्वरः पिप्पलं जीववत् अनश्नन् स्वयमविकृतः सन् अभिचाकशीति स्वातिरिक्तं नेतीत्यभितः पश्यन्नुदास्ते । यथा व्योमासनादित्यः स्वप्रकाश्यं प्रकाशयन् प्रकाशरूपेणास्ते तथा अयमीश्वर इत्यर्थः ॥ ६ ॥ जीवेशावनूद्य जीवस्य स्वयाथात्म्यज्ञानात् कैवल्यसिद्धिमाह—समान इति । पुण्यपापफलभोगायतनत्वेन समाने वृक्षे स्वाविद्याद्वयतत्कार्यपञ्चकोशात्मके स्वेन रूपेण सर्वत्र पूरणात् पुरुषः परमेश्वरो निमग्नः स्वाविद्याजलधौ प्रतिबिम्बितत्वात् स्वस्वरूपतिरोधानं कर्तुं अनीशया स्वाविद्यया कर्ता भोक्ता सुखी दुःखी इत्यादिना मुह्यमानः सन् शोचति संसारशोकमनुभवति । "ब्रह्ममात्रमसन्न हि" इत्यादिश्रुत्यनुरोधेन स्वातिरिक्तासदपह्नवसिद्धं निष्प्रतियोगिकब्रह्ममात्रमिति ब्रह्मविद्वरिष्ठैः तत्त्वज्ञानिभिः जुष्टं ब्रह्ममात्रं यदा स्वावशेषतया पश्यति तदा वीतस्वातिरिक्तास्तिताप्रभवशोको भवतीत्यन्वयः । कीदृशमात्मानं पश्यति इत्यत्र स्वाविद्याद्वयतत्कार्यात् अन्यं स्वावशेषतयाऽवस्थातुं ईशं तस्य प्रत्यगभिन्नपरमात्मनो महिमानं प्रत्यक्परविभागैक्यासहसत्तासामान्यरूपं यदा पश्यति तदा ब्रह्ममात्रप्रबोधतो वीतशोको ब्रह्मैव भवति ॥ ७ ॥

मायाऽधिष्ठातुरीश्वरस्यैव सर्वस्रष्टृत्वम्

ऋचो अक्षरे परमे व्योमन् यस्मिन् देवा अधि विश्वे निषेदुः ।
यस्तन्न वेद किमृचा करिष्यति य इत्तद्विदुस्त इमे समासते ॥८॥
छन्दांसि यज्ञाः क्रतवो व्रतानि भूतं भव्यं यच्च वेदा वदन्ति ।
अस्मान् मायी सृजते विश्वमेतत्तस्मिंश्चान्यो मायया संनिरुद्धः ॥
मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम् ।
[1]अस्यावयवभूतैस्तु व्याप्तं सर्वमिदं जगत् ॥ १० ॥

[1] तस्या—अ, मु.

यो योनिं योनिमधितिष्ठत्येको यस्मिन्निदं सं च वि चैति सर्वम्।
तमीशानं [1]वरदं देवमीड्यं निचाय्येमां शान्तिमत्यन्तमेति ॥ १ ॥

ब्रह्ममात्रज्ञानतत्साधनानामीश्वराधीनत्वं ईश्वरभावादृते तेषां वैय्यर्थ्यमीश्वरभावादेव कैवल्यसिद्धिं चाह—ऋच इति। ऋगादिसर्वे वेदाः **अक्षरे परमे** परमाक्षरे **व्योमन्** परमाकाशे परमात्मनि **निषेदुः यस्मिन्** पूर्वोक्तपरमाक्षरे **देवा** विराडादयः अन्यादयश्च **अधि** उपरि **निषेदुः** आश्रिताः तिष्ठन्ति। ऋगादिवेदप्रतिपादितसत्कर्मानुष्ठानसञ्जातचित्तशुद्धिसाधनचतुष्टयसहकृतपारमहंस्यधर्मपूर्वगवदनुष्ठितश्रवणादिसञ्जातसम्यज्ज्ञानतो **यो** यदि यद्ब्रह्म सर्वापह्नवसिद्धमिति सर्ववेदान्तार्थं **तत्** स्वमात्रमिति **न वेद** स तदा **ऋचा** तदुपलक्षितनिखिलवेदवेदान्तैः **किं करिष्यति**, न किमपि प्रयोजनं भवतीत्यर्थः, "एवं तं परमज्ञात्वा वेदैर्नास्ति प्रयोजनम्" इति स्मृतेः। **ये** वेदोक्तकर्मानुष्ठानतः चित्तशुद्धिमेत्य यथोक्तसाधनविशिष्टकृतवेदान्तश्रवणादिसम्यज्ज्ञानेन **इत्** तत् लभ्यं ब्रह्म स्वावशेषतया **विदुस्त इमे** ब्रह्मविद्वरीयांसः **स्वे महिम्नि समासते** कृतकृत्या ब्रह्मैव भवन्तीत्यर्थः ॥ ८ ॥ यद्ययं सविशेषब्रह्मवित् तदाऽयमीशभावमेत्य स्वशक्त्या पुरुषार्थोपयोगिवेदादीन् तन्निर्वर्त्ययागादीन् तत्साध्यकालत्रयपरिच्छिन्नव्यष्टिसमष्ट्यात्मकप्रपञ्चजातं सृष्ट्वा तत्र जलचन्द्रवदनुप्रविश्य स्वाविद्याकामकर्मपाशैः सुतरां बद्धो जीवाख्यां लभत इत्याह—**छन्दांसीति**। **छन्दांसि** ऋगादिचतुर्वेदाः पञ्च **यज्ञाः** ज्योतिष्टोमादयः **क्रतवः** सयूपाः **व्रतानि** कृच्छ्रचान्द्रायणादीनि **भूतं** भव्यं भविष्यत् **यच्च वेदा वदन्ति**, यज्ञादिसाध्यत्वेन भूतादिकालपरिच्छिन्नः प्रपञ्च इत्यर्थे वेदा एव प्रमाणमित्येतत्। यच्छब्दः सर्वत्र संबध्यते। **अस्मात्** अकाराख्यात् ब्रह्मणः, एतत्सर्वमुत्पन्नमित्यध्याहार्यम्। कथं ब्रह्मणो जगत्कारणतेत्यत आह—**मायी सृजते विश्वमिति**। निर्विशेषब्रह्मणोऽपि मायायोगतः सविशेषतया सर्वस्रष्टृत्वमुपपद्यते। **तस्मिन्** ईश्वरसृष्टव्यष्ट्यादिप्रपञ्चे य ईशभावमापन्नः स एव **मायया सन्निरुद्धः** ततो मायया

[1] परमं दे—अ १.

अन्यः सन् परिवर्तते ॥ ९ ॥ स्वाधिष्ठेयमायायाः प्रकृतित्वं तदारोपाधिकरणस्य मायित्वं स्यादित्याह—**मायामिति**। या परमार्थदृष्ट्या मा न भवति तां **मायां तु** मायामेव स्वाज्ञदृष्टिप्रकृतप्रकृतिं **विद्यात्** जानीयात्। अत्रेशत्वेन य उक्तः तं **मायिनं तु** मायाऽवच्छिन्नमेव मायाऽधिष्ठातारं **महेश्वरं** विद्यात्। **अस्य** मायिनः **अवयवभूतैः** घटाकाशजलचन्द्रस्थानीयैः आकाशादिः सन् आकाशादिः स्फुरतीति **व्याप्तं सर्वमिदं जगत्** महाकाशव्याप्तेरध्यस्तत्वात् न तु स्वपरिणामित्वेन। तुशब्दत्रयस्यापि अवधारणमर्थः। यद्वा—मायाऽधिष्ठातुरीश्वरस्य **अवयवभूतैः** स्वस्मिन्नध्यस्तत्वात् तदेकदेशभूतैः मायातत्सामर्थ्यैः तद्विवर्तत्वेनैव **व्याप्तं सर्वमिदं जगत्**। स्वाध्यस्तसर्वकलनानिवृत्तये मुमुक्षुभिः यत्नः कर्तव्यः इत्यभिप्रायः ॥ १० ॥ मायायोनेः अवान्तराकाशादियोनीनां च अद्वितीयेशस्याधिष्ठातृत्वं, मायाऽधिष्ठानतो वियदाद्युत्पत्तिहेतुत्वं, वियदाद्यवान्तरयोनिमवष्टभ्येतरेषां सृष्ट्यादिहेतुत्वं, तत्सर्वाधिष्ठानभूतपरमेश्वरयाथात्म्यज्ञानात् मोक्षसिद्धिं चाह—**यो योनिमिति**। **यः** प्रकृतः परमेश्वरः **योनिं** मूलप्रकृतिं कारणोपाधिरूपां पुनः प्राकृतयोनिं कार्योपाधिरूपां च **अधितिष्ठति** तत्सत्तास्फूर्तिप्रदत्वात्। यद्वा—योनिं योनिं प्रत्यन्तर्यामिरूपेणाधितिष्ठति। यः सर्वयोन्यधिष्ठाता स **एकोऽद्वितीयः**। **यस्मिन्** मायाऽऽधारेश्वरे **सर्वमिदं** जगत् **समेति** संहारकाले विलयं याति पुनः सृष्टिकाले **वि चैति** वियदादिरूपेण तादात्म्यं प्रतिपद्यते **तं** प्रकृतं **ईशानं** स्वांशजजीवाभिलषितवरप्रदातारं **देवं** वेदैर्वेदविद्भिः **ईड्यं** अहमस्मीति **निचाय्य** साक्षात्कृत्य स्वातिरिक्तप्रकृतिप्राकृतापह्नवसिद्धां परमशान्तिं **विदेहमुक्तिं एति** ॥ ११ ॥

ज्ञानार्थमीश्वरप्रार्थना

यो देवानां प्रभवश्चोद्भवश्च विश्वाधिको रुद्रो महर्षिः।
हिरण्यगर्भं [1]पश्यत जायमानं स नो बुद्ध्या शुभया संयुनक्तु ॥

[1] पश्यति—अ, अ १, क.

यो देवानामधिपो यस्मिन् लोका अधिश्रिताः।
य ईशे अस्य द्विपदश्चतुष्पदः कस्मै देवाय हविषा विधेम ॥ १३ ॥

हिरण्यगर्भोपास्येश्वरं प्रति सम्यज्ज्ञानं प्रार्थयति—य इति। उक्तार्थोऽयं मन्त्रः। पश्यत अपश्यत्, व्यत्ययेनात्मनेपदं, बहुळं छन्दसि, अमाङ्योगेऽपीत्यडभावः। अवान्तरस्थितिकर्तृत्वेन वेदप्रवर्तकत्वेन च निरीक्षणं कृतवानित्यर्थः ॥ १२ ॥ देवान् प्रति स्वामित्वं सर्वलोकाश्रयत्वं जीवजातनियन्तृत्वं मुमुक्षुभिरुपास्यत्वं चाह—य इति। यः प्रकृतः परमेश्वरः व्यष्टिसमष्टिदेवानामधिपः कारणोपाधिकत्वात् यस्मिन् भूरादयो लोकाः अधिश्रिताः ओतप्रोततयोपरिश्रिताः अस्य द्विपदो मनुष्यादेः चतुष्पदः पश्वादेश्च यः कारणोपाधिः ईशे ईष्टे, तकारलोपश्छान्दसः, कस्मै काय सुखरूपाय, स्मैभावः छान्दसः, तस्मै देवाय हविषा विधेम चरुपुरोडाशादिभिः परिचरेम, विधेः परिचरणकर्मणः एतद्रूपम् ॥ १३ ॥

ईश्वरज्ञानादेव पाशविमोकः

सूक्ष्मातिसूक्ष्मं कलिलस्य मध्ये विश्वस्य स्रष्टारं तमनेकरूपम्।
विश्वस्यैकं परिवेष्टितारं ज्ञात्वा शिवं शान्तिमत्यन्तमेति ॥ १४ ॥
स एव कालो भुवनस्य गोप्ता [1]विश्वाधिपः सर्वभूतेषु गूढः।
यस्मिन् युक्ता ब्रह्मर्षयो देवताश्च तमेवं ज्ञात्वा मृत्युपाशांश्छिनत्ति ॥
घृतात् परं मण्डमिवातिसूक्ष्मं ज्ञात्वा शिवं सर्वभूतेषु गूढम्।
विश्वस्यैकं परिवेष्टितारं ज्ञात्वा देवं मुच्यते सर्वपाशैः ॥ १६ ॥
एष देवो विश्वकर्मा महात्मा सदा जनानां हृदये संनिविष्टः।
हृदा मनीषा मनसाऽभिक्लृप्तो य एनं विदुरमृतास्ते भवन्ति ॥

[1] विश्वाधिकः—क.

यदाऽतमस्तन्न दिवा न रात्रिर्न सन्न चासच्छिव एव केवलः ।
तदक्षरं तत् सवितुर्वरेण्यं प्रज्ञा च तस्मात् प्रसृता पुराणी ॥१८॥
नैनमूर्ध्वं न तिर्यञ्चं न मध्ये परिजग्रभत् ।
न तस्य प्रतिमाऽस्ति यस्य नाम महद्यशः ॥ १९ ॥
न संदृशे तिष्ठति रूपमस्य न चक्षुषा पश्यति कश्चनैनम् ।
हृदा हृदिस्थं मनसा य एनमेवं विदुरमृतास्ते भवन्ति ॥ २० ॥

ईश्वरस्य परमसूक्ष्मत्वं सर्वकारणत्वं सर्वसाक्षित्वं स्वज्ञानान्मोक्षप्रदत्वं च पुनरप्याह—सूक्ष्मेति । पृथिव्याद्यव्यक्तान्तानि पूर्वपूर्वापेक्षया उत्तरोत्तराणि सूक्ष्मतराणि, पृथिव्याद्यव्यक्तान्तगतसूक्ष्मादपि परमेश्वरतत्त्वं **अतिसूक्ष्मं** "केशकोटयंशैकभागसूक्ष्मं ब्रह्म सुखात्मकम्" इति ब्रह्मप्रणवोक्तेः, स्वातिरिक्तत्वेन **कलिलस्य** स्वाविद्यापदतत्कार्यजातस्य **मध्ये** विश्वविश्वाद्यविकल्पानुज्ञैकरसान्तात्मनाऽवस्थितं स्वाज्ञदृष्टिविकल्पितविश्वस्य **स्रष्टारं** तं तच्छब्दार्थं नानाजलपात्रानुगतचन्द्रवत् स्वाविद्यापदतत्कार्येषु **अनेकरूपवदवस्थितं** स्वविवर्तविश्वस्यैकं अधिष्ठानं स्वाधिष्ठेयसत्तास्फूर्तिसुखप्रदतया तदन्तर्बहिः **परिवेष्टितारं** वस्तुतः स्वातिरिक्ताशिवापह्नवसिद्धं **शिवं** स्वमात्रमिति **ज्ञात्वा शान्तिमत्यन्तमेति** व्याख्यातम् ॥ १४ ॥ ईश्वरस्य सर्वस्रष्टृत्वपालकत्वोपसंहारकत्वं प्रत्यक्त्वं सर्वाप्यत्वं ज्ञानैकगम्यत्वं चाह—**स** एवेति । यः प्रकृतः **स एव** परमेश्वरः स्वातिरिक्तं कलयति स्वात्मसात्करोतीति **कालः** । काले इति पाठान्तरम् । तत्र जीवसञ्चितकर्मपरिपाककाले **भुवनस्य** तत्तत्कर्मफलानुरोधेन **गोप्ता** रक्षिता **विश्वाधिपः** विश्वस्वामी सर्वभूतेषु अनुप्रविष्टत्वेन **गूढः** । **यस्मिन्** संविन्मात्रेश्वरे **ब्रह्मर्षयः** सनत्कुमारादयः **देवताश्च** हिरण्यगर्भादयः **युक्ताः** एकतां गताः **तं** ईश्वरं **ज्ञात्वा** सोऽहमस्मीत्यपरोक्षीकृत्य स्वाज्ञानस्य मृत्युहेतुत्वेन **मृत्युः** स्वाज्ञानं तद्वृत्तिभिः पाश्यते बध्यत इति स्वाज्ञानवृत्तयः पाशाः तान् **मृत्युपाशान् छिनत्ति**, "मृत्युर्वै तमः" इति श्रुतेः ॥ १९ ॥ ईश्वरस्य परमानन्दस्वभावत्वं सर्वदोषा-

स्पृष्टत्वं जीवरूपेण सर्वभूतगूढत्वं सर्वव्यापित्वं स्वज्ञानात् स्वाज्ञानपाशापहानिं चाह—**घृतादिति**। **घृतात् परं** उपरि वर्तमानं **मण्डं** यथा सूक्ष्मं प्रीतिविषयं च तथा मुमुक्षुप्रीतिविषयं **अतिसूक्ष्मं** च ब्रह्मादिस्तम्बान्तभूतेषु अनुप्रविश्य विश्व-विराडोत्रादिरूपेण वर्तमानमप्यतिगूढं स्वाज्ञदृष्टेरावृतवत् भानात्। **विश्वस्यैकं परिवेष्टितारं** इत्याद्युक्तार्थम् ॥ १६ ॥ ईश्वरस्य सप्रपञ्चनिष्प्रपञ्चरूपेणावस्थानं तन्मात्रज्ञानान्मोक्षसिद्धिं चाह—एष इति। **एष** प्रकृतः परमात्मा मायाशक्ति-योगान्महदादिविश्वं करोति इति **विश्वकर्मा** महानात्मा अस्येति **महात्मा** महाकाशस्थानीयपरमात्मरूपत्वात् **सदा जनानां हृदये** जलपात्रावलिगतचन्द्रवत् **संनिविष्टः**। **हृदा मनीषेत्याद्युक्तार्थम्** ॥ १७ ॥ स्वातिरिक्तकलनापाये स्वयमेवावशिष्यते इत्याह—**यदेति**। **यदा** परमार्थावस्थायां **अतमः** स्वाज्ञाना-संभवात् **तत्** तदा **न दिवा न रात्रिः** दिवारात्र्यादिकलना न ह्यस्ति **न सन्न चासत्** भावाभावकलना न ह्यस्ति। ततः किमवशिष्यते इत्यत्र **शिव एव** स्वातिरिक्ताशिवं ग्रसित्वा **केवलः** स्वमात्रतयाऽवशिष्यते, "सत् किंचिदवशिष्यते" इति श्रुतेः। यदीश्वरतत्त्वं **तत्** एव **अक्षरं** तत्पदार्थभूतं **सवितुः ईश्वरस्य** मुमुक्षुभिः प्रार्थनीयं **वरेण्यं** रूपं निर्गुणम्। स्वाविद्यातत्कार्यग्रासब्रह्मविद्यारूपेयं **प्रज्ञा च पुराणी** ब्रह्मादिपरंपरागता **तस्मात्** शिवादेव **प्रसृता** ॥ १८ ॥ ईश्वरस्याद्वितीयत्वमनुपमत्वं महद्विख्यातनामत्वं चाह—**नैनमिति**। **एनं** प्रकृतं शिवं **ऊर्ध्वं न** हि कश्चिदपि **परिजग्रभत्** न परिगृहीतुं शक्नुयात्, **न तिर्यञ्चमपि** परिजग्रभत् सन्मात्रत्वेन दिग्देशाद्यनवच्छिन्नत्वात्, **न मध्ये** परिजग्रभत् निरंशत्वेन मध्यस्थानाभावात्। **न हि तस्य ईश्वरस्य प्रतिमा** उपमा काचित् **अस्ति** निष्प्रतियोगिकत्वेन ब्रह्ममात्रत्वात्, **यस्य** परमेश्वरस्य **नाम** अभिधानं **महद्यशः** निष्प्रतियोगिकपूर्णब्रह्मगमकत्वात् ॥ १९ ॥ परमेश्वर-स्यातीन्द्रियत्वं प्रत्यगभिन्नतां स्वज्ञानात् मोक्षसिद्धिं चाह—**न सन्दृश** इति। **अस्य** ईश्वरस्य यन्निर्विशेषरूपं चक्षुरादीन्द्रियैः **संदृशे** संदर्शनयोग्यदेशे **न तिष्ठति**। एतादृशं एनं ईश्वरं **चक्षुषा** तदुपलक्षितसर्वेन्द्रियैः **कश्चन** कोऽपि **न पश्यति** गृहीतुं न शक्नुयात् "**यच्चक्षुषा** न पश्यति येन चक्षूंषि पश्यति" इति

श्रुतेः। स्वात्मातिरिक्तात्मा नेति नेतीत्यपह्नवबोधरूपया हृदा निरहंभावमापन्नमनसा अखण्डाकारवृत्त्या हृदयगुहायां प्रत्यग्रूपेण तदभिन्नब्रह्मरूपेण तद्वैदैक्यासहब्रह्ममात्ररूपेण वा तिष्ठतीति **हृदिस्थं एनं** एवं **ये** यथोक्तसाधनसंपन्ना योग्याधिकारिणः स्वमात्रमिति **विदुः** ते तद्वेदनसमकालं **अमृता भवन्ति** ॥ २० ॥

ज्ञानार्थं पुनरीश्वरप्रार्थना

अजात इत्येवं कश्चिद्भीरुः प्रपद्ये ।
रुद्र यत्ते दक्षिणं मुखं तेन मां पाहि नित्यम् ॥ २१ ॥
मा नस्तोके तनये मा न आयुषि मा नो गोषु मा नो अश्वेषु रीरिषः ।
वीरान् मा नो रुद्र भामितोऽवधीर्हविष्मन्तः सदमित् त्वा हवामहे ॥ २२ ॥

ईश्वरस्य स्वाज्ञानग्रासस्वज्ञानप्रदत्वात् तत्प्रार्थनामाह—**अजात** इति । **इति**शब्दो हेत्वर्थः। यस्मात् त्वं **एवं** उक्तप्रकारेण **अजातः** जनिमृत्यशनायाऽऽदिषड्भावषड्ऊर्मिवैरळ्यादजातः परमात्मा नाहं तत्सदृशः षड्भावषड्ऊर्मिविशिष्टदेहित्वादित्यात्मानं मत्वा **कश्चित्** जात्याद्यशनायाऽऽदिभावषट्कषड्ऊर्मितो **भीरुः** सन् विशुद्धान्तःकरणो योग्याधिकार्यहं हे **रुद्र** ते तव **यत्ते** सर्वापह्नवसिद्धनिष्प्रतियोगिकब्रह्ममात्रावस्थानलक्षणकैवल्यदापनदक्षिणं समर्थं **मुखं** निष्प्रतियोगिकनिर्गुणं स्वावशेषधिया **प्रपद्ये तेन** मुखेन योग्याधिकारिणं **मां पाहि** यत्ते **नित्यं** रूपं तन्मात्रं मां विधाय रक्षस्व। **प्रपद्यते** इत्यस्मिन् पाठे—कश्चिन्मुमुक्षुः मोक्षसिद्ध्यर्थं त्वां प्रपद्यते अतोऽहमपि मोक्षसिद्ध्यर्थं त्वामेव प्रपद्य इत्यर्थः ॥२१॥ अस्मच्छिष्यपरम्परां सम्यज्ज्ञानयोग्यां विधाय त्वं निष्कळभावं दत्त्वा पाहि कदाऽपि मा हिंसीः इति प्रार्थनमाह—**मा न** इति । **नो**ऽस्माकं **तोके** शिष्यवर्गे **तनये** पुत्रवर्गेऽपि **मा रीरिषः** मा हिंसीः रिषतिधातोः हिंसार्थकत्वात्। **मा न**

आयुषि मा नो गोषु सम्यज्ज्ञानसाधनवाग्विभूतिषु **मा नो** अश्ववत् **अश्वेषु** इन्द्रियेषु, "इन्द्रियाणि हयानाहुः" इति श्रुतेः । मा रीरिष इति सर्वत्र संबध्यते । **वीरान्** विक्रमवतः परिचारकान् ज्ञातकान् **नोऽस्माकं हे रुद्र भामितः**, भामक्रोधे ण्यन्तः, तैः कृतापराधेन क्रोधितः सन् **वधीः**, मा वधीरिति पूर्वप्रतिषेधेन संबन्धः । मदीयानां त्वत्प्रापकसम्यज्ज्ञानयोग्यतासिद्ध्यर्थं वयं त्वदाराधनसाधनहविष्मन्तो भूत्वा **सदं** सदा इत् एव सदैव **त्वा** त्वां **हवामहे** यजामहे । अथवा, न केवलमसौ निःश्रेयसार्थिभिरेव प्रार्थ्यः प्रेयोमार्गनिरतैरपि प्रार्थनीय इत्याह—**मा न** इति । अभ्युदयार्थिभिः अनेन मन्त्रेण अग्निरेव प्रार्थित इत्यर्थः ॥ २२ ॥

इति चतुर्थोऽध्यायः

पञ्चमोऽध्यायः

विद्याऽविद्ययोः स्वरूपम्

द्वे अक्षरे ब्रह्मपरे त्वनन्ते विद्याऽविद्ये निहिते यत्र गूढे ।
क्षरं त्वविद्या ह्यमृतं तु विद्या विद्याऽविद्ये ईशते यस्तु सोऽन्यः ॥ १ ॥

विद्याऽविद्ययोः परमेश्वरतन्त्रत्वं विद्याऽविद्येयत्तां विद्याऽविद्येशितृत्वं तदस्पृष्टत्वमित्याद्यर्थं प्रकटयितुं पञ्चमोऽध्याय आरभ्यते । प्रथमं विद्याऽविद्ये अङ्गीकृत्याह—**द्वे** इति । **विद्याऽविद्ये द्वे** न क्षरतीति **अक्षरे** अक्षरात्मिके **ब्रह्मपरे** ब्रह्मणो हिरण्यगर्भात् परे, अथवा ब्रह्म च तत्परं चेति ब्रह्मपरं तस्मिन् **ब्रह्मपरे** परब्रह्मणीति यावत् । परनिपातः छान्दसः । तुशब्दोऽवधारणार्थः ।

तस्मिन् परब्रह्मण्येव **अनन्ते** परिच्छेदत्रयकथाविरळे । विद्याऽविद्ये अक्षर इति विशेष्यत्वेनान्वयो दर्शितः । **निहिते** निक्षिप्ते परमेश्वराधीनतया नितरां स्थितत्वात् । **यत्र** यस्मिन् स्वयंप्रकाशतया गूढे अनभिव्यक्ते । तत्र विद्याऽविद्ययोर्लक्षणमाह— **क्षरं त्विति** । यद्यत् क्षरणहेतुः तत्तत् **अविद्यैव** । तुशब्दोऽवधारणार्थः । यद्यत् **अमृतत्वसाधनं** तत्तत् **विद्यैव** । तु शब्दोऽवधारणार्थः । या नित्यमोक्षपुरुषार्थ-प्रापकतया विद्यते सा विद्यैव । स्वर्गाद्यनित्यफलहेतुः कर्माविद्या । शमाद्युपबृंहित-श्रवणादिनिष्पन्नेयं विद्या । यस्मादेवं तस्मात् पुरुषार्थेच्छुभिः सर्वकर्माणि संन्यस्य शमाद्युपबृंहितश्रवणादिरेवाश्रयितव्यः इति भावः । **विद्याऽविद्ये ईशते यस्तु** यः परमात्मेष्टे नियमयति । तुशब्दश्चार्थः । यत्र विद्याऽविद्ये निहिते यश्च विद्याऽविद्ये ईष्टे **स** ताभ्यां **अन्यः** विद्याऽविद्याऽऽरोपापवादाधिकरणत्वात् ॥ १ ॥

ईश्वरस्यैव विद्याप्रदातृत्वम्

योऽयोनिं योनिमधितिष्ठत्येको विश्वानि रूपाणि योनीश्च सर्वाः ।
ऋषिं प्रसूतं कपिलं यस्तमग्रे ज्ञानैर्बिभर्ति जायमानं च पश्येत् ॥ २ ॥

ईश्वरस्य सर्वाधिष्ठातृत्वेन स्वविद्याप्रदातृत्वमाह— **योऽयोनिमिति** । **यः** प्रकृतः परमेश्वरः एक एव सन् **अयोनिं** समष्टिमूलाविद्यां **योनिं** व्यष्टितूलाविद्यां च स्वसत्तास्फुरणप्रदतया **अधितिष्ठति विश्वानि रूपाणि** सर्वशरीराणि वियदादि-समष्टियोनीश्च **सर्वाः** तद्व्यष्टिरूपावान्तरयोनीश्च स्वसत्तास्फुरणप्रदतयाऽधितिष्ठति, **ऋषिं** अप्रतिहतज्ञानतया **प्रसूतं कपिलं** कनकवर्णं हिरण्यगर्भं **य** ईशः **अग्रे** सृष्टिकाले **ज्ञानैः** धर्मवैराग्यैश्वर्यैः निखिलवेदतदर्थपरिज्ञानैर्वा युतं **बिभर्ति** बभारेत्यर्थः । **तं च जायमानं च पश्येत्** विद्यासंप्रदायकर्तृत्वेन ददर्श ॥ २ ॥

ईशस्य सर्वाधिपत्यम्

एकैकं जालं बहुधा विकुर्वन् यस्मिन् क्षेत्रे संहरत्येष देवः ।
भूयः सृष्ट्वा पतयस्त्वथेशः सर्वाधिपत्यं कुरुते महात्मा ॥ ३ ॥

सर्वा दिश ऊर्ध्वमधश्च तिर्यक् प्रकाशयन् भ्राजते [1]यद्वनड्वान् ।
एवं स देवो भगवान् वरेण्यो योनिस्वभावानधितिष्ठत्येकः ॥ ४ ॥
यच्च स्वभावं पचति विश्वयोनिः पाच्यांश्च सर्वान् परिणामयेद्यः ।
सर्वमेतद्विश्वमधितिष्ठत्येको गुणांश्च सर्वान् विनियोजयेद्यः ॥ ५ ॥

व्यष्टिसमष्टिकरणग्रामं स्वमायया सृष्ट्वा तदात्मप्रवेशितुः सर्वाधिपत्यमाह—**एकैकमिति** । एकैकं **जालं** पुरुषमत्स्यानां बन्धनहेतुत्वात् व्यष्टिसमष्ट्यन्तः करणरूपं व्यष्टिसमष्टिप्राणज्ञानकर्मेन्द्रियाणामेकैकं जालं तज्जालावस्थामेत्य तत्तत्कर्मोपासनानुगुणं **बहुधा विकुर्वन् यस्मिन्** प्राकृते क्षेत्रे नित्यप्रळयादाविदं सर्वं **एष देवः संहरति** उपसंहृतवान् । भूयः पुनरपि व्यष्ट्याद्युपाधीन् **सृष्ट्वाऽथ पतयस्तु** पतींश्च तुश्चार्थे, तत्तदुपाध्यधिष्ठातॄन् ब्रह्मादिस्तम्बान्तान् सृष्ट्वाऽथ सर्वोपाधितदुपहितानामसौ **महात्मा** ईश्वरोऽयं **आधिपत्यं** नियन्तृत्वं **कुरुते** ॥ ३ ॥ ईशस्य सर्वज्ञत्वं नियन्तृत्वं चाह—**सर्वा इति** । **सर्वाः** प्राच्यादिचतस्रो **दिशः** तद्वर्तिनः सर्वपदार्थांश्च **ऊर्ध्वमधश्च तिर्यक्** उपदिशश्चतस्रश्च ऊर्ध्वाधस्तिर्यग्विदिग्गतपदार्थांश्च **प्रकाशयन् भ्राजते, यत्** उइत्यनर्थको निपातः, यद्यथेति यावत् । जगच्चक्रवाहने युक्तत्वात् यथा **अनड्वान्** आदित्यः प्राच्यादिदिशः स्वप्रभया भासयन् भ्राजते तथेश्वरोऽपीत्याह—**एवमिति** । यथा आदित्यः स्वप्रकाश्यमवभासयन् स्वयं भासते **एवं स** प्रकृतो **देवः** स्वातिरिक्तं नेति नेतीति भासयन् स्वयमेव भ्राजते य एवंविधः स हि **भगवान्** षड्गुणैश्वर्यसंपन्नः अभ्युदयनिःश्रेयसकाङ्क्षिभिः **वरेण्यः** स्वामित्वेन स्वात्मतया वा वरणीयः सोऽयमन्तर्याम्यादिरूपेण योनिः स्वाविद्याद्वयं वियदाद्यण्वन्ताः तत्स्वभावाः तान् **योनिस्वभावान्** हिरण्यगर्भादिस्तम्बपर्यन्तभावांश्च स्वयं **एक** एव **अधितिष्ठति** नियमयति ॥ ४ ॥ ईश्वरस्य सर्वपाचकत्वं स्वाधिष्ठेयमायाऽनुकारित्वं सर्वनियन्तृत्वं जीवजातकर्मानुरोधेन विनियोजयितृत्वं चाह—**यच्चेति** । **यच्च** इति लिङ्गव्यत्ययः यश्चेश्वरः सर्वं

[1] यन्नभस्वान्—अ १.

प्रकाशयन् सर्वत्र व्याप्य स्थितः, किं च भूतानां **स्वभावं** तत्तत्कार्यानुरोधेन संनिधिमात्रकर्तृतया **पचति** कोऽयं ? **विश्वयोनिः** ईश्वरः विश्वसंभवस्थितिप्रळय-हेतुत्वात् । यद्वा—विश्वा योनयो यस्य नियम्याः स विश्वयोनिः । पाकयोग्यान् **पाच्यांश्च सर्वान्** स्वात्मसत्तासंनिधिमात्रेण **योऽयमीश्वरः परिणामयेत्** सोऽयं **एक एवेश्वरः सर्वमेतत्** विश्वमधितिष्ठति अधिष्ठाय नियमयति, किं च पापपुण्यानुगुणतया सत्त्वादिगुणान् अध्यात्मादिभेदभिन्नेषु **विनियोजयेद्यः** स संसृतिकारणनिवृत्त्यर्थं सोऽयमीश्वरः स्वात्मतया वेदितव्य इत्यर्थः । अथवा यच्छब्दस्य उत्तरमन्त्रगततच्छब्देन सम्बन्धः ॥ ५ ॥

ईशस्य वेदवेद्यत्वम

[1]तद्वेदगुह्योपनिषत्सु गूढं तद्ब्रह्मा वेदते ब्रह्मयोनिम् ।
ये पूर्वं देवा ऋषयश्च तद्विदुस्ते तन्मया अमृता वै बभूवुः ॥६॥

ईश्वरस्य वेदवेदान्तगूढत्वं सर्वदेवर्षिभिरात्मतया वेद्यत्वं स्वज्ञानान्मोक्षं चाह—**तद्वेदेति** । यद्विश्वमधितिष्ठति यद्गुणान् विनियोजयेत् **तत्** प्रकृतमीश्वरतत्त्वं **वेदगुह्योपनिषत्सु** वेदगतकर्मभागे यष्टव्यत्वेन तदपेक्षया गुह्ये सगुणविद्याया-मुपास्यत्वेन निर्गुणप्रकाशकोपनिषद्भागे ज्ञेयत्वेन च एवं वेदगुह्योपनिषत्सु **गूढम्** । यद्वा—वेदश्चासौ गुह्यश्चेति वेदगुह्यः तदपेक्षया गुह्योपनिषत्सु शक्तितात्पर्याभ्यां प्रमेयत्वेन यत् संवृतम् । ब्रह्म वेदस्तद्योनिं **ब्रह्मयोनिं तद्ब्रह्मा** हिरण्यगर्भो **वेदते** स्वात्मतया जानाति । पूर्वं पूर्वकाले **ये** यथोक्तसाधनसंपन्ना **देवा** अग्न्यादयः **ऋषयश्च** वामदेवादयः **तत्** तच्छब्दार्थं स्वमात्रतया **विदुः** तद्वेदनसमकालं **ते तन्मयाः** तद्भावारूढाः सन्तोऽमृता **वै** विदेहमुक्ता एव **बभूवुः** "ब्रह्मैव सन् ब्रह्माप्येति" इति श्रुतेः । वैशब्दः एवं शास्त्रन्यायानुभव-प्रसिद्धिद्योतकः ॥ ६ ॥

जीवयाथात्म्यम्

गुणान्वयो यः फलकर्मकर्ता कृतस्य तस्यैव स चोपभोक्ता ।
स विश्वरूपस्त्रिगुणस्त्रिवर्त्मा [2]प्राणाधिपः संचरति स्वकर्मभिः ॥

[1] यद्वेद—क. [2] विश्वाधि—अ, अ १, अ २,

अङ्गुष्ठमात्रो रवितुल्यरूपः संकल्पाहंकारसमन्वितो यः ।
बुद्धेर्गुणेनात्मगुणेन चैव आराग्रमात्रो ह्यवरोऽपि दृष्टः ॥ ८ ॥
वालाग्रशतभागस्य शतधा कल्पितस्य च ।
भागो जीवः स विज्ञेयः स चानन्त्याय कल्पते ॥ ९ ॥
नैव स्त्री न पुमानेषो नैव चायं नपुंसकः ।
यद्यच्छरीरमादत्ते तेन तेन स युज्यते ॥ १० ॥

तत्पदार्थयाथात्म्यं प्रतिपाद्य त्वंपदार्थेयत्तां प्रकटयितुमुत्तरे केचिन्मन्त्राः प्रस्तूयन्ते । तत्रादौ जीवस्य कर्तृत्वादिसंसृतिरुपाधिकृतेत्याह—**गुणान्वय** इति । सत्वादिगुणा एवान्वयो यस्य स **गुणान्वयः**, किंचिद्रज उपसर्जनसत्वगुणावष्टम्भतो मुक्तिसाधनश्रवणादिकर्म करोति, ईषत्सत्वोपसर्जनरजोगुणप्रधानः सन् स्वर्गादिफलसाधनं कर्म करोति, ईषद्रजउपसर्जनतमोगुणप्रधानः सन् नरकादिसाधनं कर्म करोति, एवं सत्वादिगुणपरवशः सन् **फलवत्कर्मकर्ता स्वकृतस्य तस्यैव** कर्मणः फलस्य **स** एव **उपभोक्ता च** । यो गुणपरवशो भूत्वा फलवत्कर्माण्युपचिनोति **स** स्वकृतकर्मभिः **विश्वरूपो** नानारूपो भवति, यस्य गुणाः कामक्रोधलोभाख्याः त्रयः सः **त्रिगुणः** देवपितृयाणतिर्यग्वर्त्मानि यस्य सः **त्रिवर्त्मा** पञ्चवृत्तिमत्प्राणाधिपः करणजाताधिपतिश्च कार्यकरणस्वामी सन् सप्तदशात्मकलिङ्गशरीरमात्मसात्कृत्य सत्वादिकामादिगुणपरवशो भूत्वा शुभाशुभकर्माणि कृत्वा तत्फलपाशवेष्टितः सन् सागरमध्यपतितशुष्कालाबुवत् संसारदुःखमहोदधौ **संचरति** संचरते । परस्मैपदं छान्दसम् ॥ ७ ॥ जीव एवात्मा, अस्य कर्तृत्वादिः औपाधिकः, अतोऽस्य ज्ञाताज्ञातसाक्षित्वमखण्डैकरसत्वं चाह—**अङ्गुष्ठमात्र** इति । स्वाङ्गुष्ठपरिमितहृदयान्तर्वर्त्यव्याकृताकाशासनत्वात् **अङ्गुष्ठमात्रः** न स्वेन रूपेणास्याङ्गुष्ठमात्रत्वं तस्य विभुत्वात् । **रवितुल्यरूपः** स्वयंप्रकाशत्वात् , "अत्रायं पुरुषः स्वयंज्योतिः" इति श्रुतेः । मानसोपाधित्वात् अहंकारोपाधिकत्वाच्च **संकल्पाहंकारसमन्वितो यः रवितुल्य-**

रूपश्च स हि बुद्धेः लिङ्गशरीरस्य गुणेन परिच्छेदभेदादिना सच्चिदानन्दात्मगुणेन चैवाराग्रमात्रो न स्वतः, आरा प्रतोदः तदुपरि प्रोतलोहाग्रस्य मात्रेव मात्रा परिमितिः यस्य सोऽयमित्यर्थः । वस्तुतोऽयं स्वेन रूपेण दृष्टः नान्येन दृष्टः प्रकाशितः कारणोपाध्यपेक्षया अयं अवरः कार्योपाधित्वात् ॥ ८ ॥ जीवस्य परिच्छित्तिः औपाधिकी, स्वतोऽयमपरिच्छिन्न इत्याह—वालाग्रेति । वालाग्रस्य यः शततमो भागः तस्यापि पुनः शतधा कल्पितस्य च यो भागः स यथा सूक्ष्मः तद्वत् जीवोऽतिसूक्ष्मः उपाध्यवच्छिन्नरूपेण सूक्ष्मो विज्ञेयः । स च आनन्त्याय कल्पते । चकारोऽवधारणे । स्वातिरिक्तोपाध्यसंभवप्रबोधतोऽयं ब्रह्ममात्रमवशिष्यत इत्यर्थः ॥ ९ ॥ जीवस्य लिङ्गशरीरोपाधिकत्वं तदतीतत्वं चोक्त्वा इदानीं स्वतः स्थूलदेहवैलक्षण्यं स्वाविद्यया स्थूलदेहतद्धर्मभाक्त्वं चाह—नैवेति । जीवस्य चिन्मात्ररूपत्वात् अयमेव जीवो नैव स्त्री पुमान् नपुंसको वा भवितुमर्हति । किं तु स्वाज्ञानपुरस्सरं मिथ्याऽभिमानात् यद्यत् स्थूलशरीरमादत्ते स्वीकुरुते तेन तेन स्त्र्यादिरूपेण तद्धर्मकृशत्वादिरूपेण च स विज्ञानात्मा युज्यते संरज्यते स्त्री पुमान्नपुंसको वा अहं जातो मृतः कृशः स्थूलः इत्यादिमिथ्याऽभिमानतः संसरतीत्यर्थः । चशब्देन निरुपाधिकचिन्मात्रता द्योत्यते ॥ १० ॥

जीवसंसारमूलम्

संकल्पनस्पर्शनदृष्टिहोमैर्ग्रासांबुवृष्ट्या चात्म[1]विवृद्धिजन्म ।
कर्मानुगान्यनुक्रमेण देही स्थानेषु रूपाण्यभिसंप्रपद्यते ॥ ११ ॥
स्थूलानि सूक्ष्माणि बहूनि चैव रूपाणि देही स्वगुणैर्वृणोति ।
क्रियागुणैरात्मगुणैश्च तेषां संयोगहेतुरयरोऽपि दृष्टः ॥ १२ ॥

स्वस्योपाधिपरिग्रहे कर्तृत्वादिसंसृतिधर्मभाक्त्वे च किं मूलमित्यत आह—संकल्पनेति । एवमेव भवितव्यं इति मनसः संकल्पनेन स्पर्शनं त्वगिन्द्रिय-

[1] विवृद्धजन्म—उ, मु.

व्यापारः गङ्गोदकचण्डालादिस्पर्शनं पुण्यपापहेतुः तेन स्पर्शनेन दृष्टिः चक्षुर्व्यापारः सत्पुरुषपतितदर्शनं पुण्यपापहेतुः तेन दर्शनेन होमो हस्तव्यापारः अग्निहोत्राभिचारादिहोमः पुण्यपापहेतुः तेन होमेन, इतरेन्द्रियव्यापाराणामुपलक्षणमेतत् । एतैः **सङ्कल्पनस्पर्शनदृष्टिहोमैः ग्रासाम्बुवृष्ट्या** ग्रासवृष्ट्या अम्बुवृष्ट्या च, ग्रासोऽन्नं वृष्टिरितिदानं, देशकालपात्रेष्वल्पादरेणान्नाम्बुनोर्दानमतिदानं पुण्यहेतुः, तद्विपरीतेष्वतिदानं पापहेतुः । अथवा योग्यायोग्यपात्रेषु ग्रासाम्बुवृष्टिदानं पुण्यपापहेतुः । एवं **ग्रासाम्बुवृष्ट्या चात्मविवृद्धिजन्म** एवमेतेषां कर्तुर्विवृद्धिजन्म विवृद्धिश्च जन्म च विवृद्धिजन्म ब्रह्मादिस्तम्बपर्यन्तयोनिषु विवृद्धिजन्म च विवृद्धयादीतरभावविकाराश्च भवन्तीति विवृद्धिरित्युपलक्षणम् । इममेवार्थं स्पष्टयति—**कर्मानुगानीति** । पुण्यकर्मानुसारीणि हिरण्यगर्भदेवताशरीराणि पापानुसारीणि तिर्यग्रूपाणि समप्रधानपुण्यपापानुसारीणि मनुष्यशरीराणि **अनुक्रमेण देही** लिङ्गशरीरोपाधिकः आत्मा आध्यात्मिकादि**स्थानेषु** ब्रह्मादिस्तम्बान्त**रूपाणि अभिसंप्रपद्यते** ॥ ११ ॥ संसारभजनप्रकारमाह—**स्थूलानीति** । पार्थिवत्वेन स्थूलशरीराणि भूलोकवर्तीनि, ततः **सूक्ष्माणि** अम्मयानि शरीराणि भुवर्लोकपरिवर्तीनि, ततोऽपि सूक्ष्माणि शरीराणि स्वर्लोकवर्तीनि, ततोऽपि सूक्ष्माणि शरीराणि वायव्यानि महर्लोकवर्तीनि, ततोऽपि सूक्ष्माणि नभोमयानि शरीराणि तपस्सत्यलोकवर्तीनि । सर्वशरीरारम्भे सर्वभूतान्यारम्भकतया वर्तन्ते, यत एवमतः तत्तल्लोकवर्तितत्तच्छरीरारम्भे तत्तद्भूतप्राधान्यं द्रष्टव्यम् । यद्वा—हस्त्यादिशरीराणि स्थूलानि, मशकादिशरीराणि सूक्ष्माणि, एवं **बहूनि** अनेकानि शरीराणि **देही** विज्ञानात्मा **स्वात्मसत्त्वादिगुणैः** तदवच्छिन्नसत्तास्फुरणादिभिर्वा **वृणोति** संभजते श्रौतस्मार्तविहितक्रियाऽपूर्व**गुणैरात्मनो** लिङ्गशरीरस्य **गुणैर्विहित**प्रतिषिद्धोपासनादिभिश्च, वृणोतीति पूर्वेणान्वयः, "तं विद्याकर्मणी समन्वारभेते पूर्वप्रज्ञा च" इति श्रुतेः । तेषां कार्यकरणतद्धर्माणां **संयोगहेतुः** भोगायतनभोक्तृभोगोपकरणादिभावेनान्वयस्य हेतुः निमित्तं पूर्वप्रज्ञा चेति ॥ १२ ॥

जीवेशैक्यज्ञानात् संसारमोक्षः

अनाद्यनन्तं कलिलस्य मध्ये विश्वस्य स्रष्टारं तमनेकरूपम् ।
विश्वस्यैकं परिवेष्टितारं ज्ञात्वा देवं मुच्यते सर्वपाशैः ॥ १३ ॥

भावग्राह्यमनीडाख्यं भावाभावकरं शिवम् ।
कलासर्गकरं देवं ये विदुस्ते जहुस्तनुम् ॥ १४ ॥

त्वंपदार्थभूतस्य संसारगतिमुक्त्वा अथेदानीं स्वारोपितहेयांशत्यागपूर्वकं तत्पदार्थैक्यज्ञानात् मोक्षसिद्धिमाह—अनादीति । **अनाद्यनन्तं** आदिमध्यान्तविकलं **कलिलस्य** मलवत्संसारस्य **मध्ये** तदसङ्गसाक्षित्वेन स्थितं **विश्वस्य स्रष्टारं तमनेकरूपं** त्रिकोणत्वाद्यनेकायःपिण्डानुगतवह्निवत् ब्रह्मादिपिपीलिकान्तेषु जलचन्द्रवत् अनुप्रविश्य तत्तद्रूपेणावभासमानम्। **विश्वस्यैकं परिवेष्टितारं** इत्युक्तार्थम् ॥ १३ ॥ परमेश्वरस्य सर्वहेतुत्वं तद्याथात्म्यज्ञानान्मोक्षसिद्धिं चाह—**भावेति**। **भावग्राह्यं** शुद्धान्तःकरणग्राह्यं नीडं शरीरं तद्रहितं **अनीडाख्यं** अशरीरं इत्याद्युपनिषत्ख्यायमानम् । यद्वा—नीडं स्थानं आख्याऽभिधानं अस्य ते नीडाख्ये न विद्येते इत्यनीडाख्यम् । स्वातिरिक्तविश्वभावाभावयोः सृष्टिप्रळययोः आरोपापवादयोः कलनां करोतीति **भावाभावकरं शिवं** तुर्यानन्दरूपत्वात् । कलया स्वमायाशक्त्या समस्तभूतसर्गकरं, यद्वा प्राणादिनामान्तकलासर्गकरं, चतुष्षष्टिकलानां सृष्टिकरमिति वा, **देवं** नित्यानुभवैकरसं **ये** यथोक्तसाधनसंपन्नाः ब्रह्माहमस्मीति **विदुस्ते तनुं** प्रकृतिप्राकृतरूपां **जहुः** त्यजन्ति प्रकृतिप्राकृतकलनापह्नवसिद्धब्रह्मैव भवन्तीत्यर्थः ॥ १४ ॥

इति पञ्चमोऽध्यायः

षष्ठोऽध्यायः

ईश्वरादन्यस्य कालादेरकारणत्वम्

स्वभावमेके कवयो वदन्ति कालं तथाऽन्ये परिमुह्यमानाः ।
देवस्यैष महिमा तु लोके येनेदं भ्राम्यते ब्रह्मचक्रम् ॥ १ ॥

येनावृतं नित्यमिदं हि सर्वं ज्ञः कालकालो गुणी सर्वविद्यः ।
तेनेशितं कर्म विवर्तते ह पृथ्व्याप्यतेजोऽनिलखानि चिन्त्यम् ॥२॥

परमेश्वरस्य सर्वहेतुत्वं सर्वसमत्वं सम्यज्ज्ञानैकलभ्यत्वं इत्यादिबह्वर्थ-प्रकटनार्थं षष्ठाध्याय आरभ्यते । प्रथमाध्याये कालादिगतजगत्कारणत्वं निरस्य परमेश्वरस्यैव जगत्कारणत्वं समर्थितम् । इदानीं तु कालादीनां स्वाज्ञविकल्पित-त्वमाह—**स्वभावमिति** । **एके कवयः** संसारचक्रकारणं पदार्थानां **स्वभावमेव वदन्ति** । **कालं** कारणं इति अन्ये कालविदः । तत्र स्वभावग्रहणं वेदबाह्यास-ह्यौकिकविशिष्टोपलक्षणार्थम् । कालमिति वैदिकपक्षमवलम्ब्यैव, तस्येश्वरस्व-रूपत्वात् । तद्विपरीतकालग्रहणं परमार्थेतरभ्रमोपलक्षणार्थम् । एवं केचन **परिमुह्यमानाः** तेषां परमार्थपक्षाज्ञत्वात् । तुशब्दः एतान् पक्षान् व्यावर्तयति । **येनेदं भ्राम्यते ब्रह्मचक्रं** तस्यायमेव **देवस्य महिमा** । परमार्थातिरिक्तनानामतानि स्वाज्ञानविकल्पितान्येवेत्यर्थः ॥ १ ॥ सर्वज्ञत्वादिकं ईश्वरस्येत्याह—**येनेति** । **येन** स्वाविद्याऽऽरोपाधिकरणेनेश्वरेण **इदं** परिदृश्यमानं जगत् **सर्वमावृतं नित्यं** नियमेन महाप्रळयादावैक्येन स्थित्यवस्थायां तादात्म्येनावृतम् । स कीदृशः ? **ज्ञः** सर्वज्ञत्वात् ।

कालः सृजति भूतानि कालः संहरति प्रजाः ।
सर्वं कालस्य वशगा न कालः कस्य चिद्वशः ॥

इति स्मृतिसिद्धकालस्य महिमा यः स परमेश्वराधीन एवेत्याह—**कालकाल** इति । कालारोपापवादाधिकरणत्वात् । अपहतपाप्मत्वादयो गुणा अस्येति **गुणी** । अहमेवेदं सर्वं इति स्वाभेदेन सर्वं जानातीति **सर्वविद्** "यः सर्वज्ञः सर्वविद्" इति श्रुतेः, **योऽनन्तसुखानुभूतिः** स हि सर्वविदित्यर्थः । अस्य सर्वा विद्याऽस्तीति वा सर्वविद्यः । **तेन** ईश्वरेण हि सर्वं **ईशितं** नियमितं क्रियत इति **कर्म** विवर्तते विकल्प्यते । ह प्रसिद्धौ । विवर्तक्रममाह—**पृथ्वीति** । पाठक्रमादर्थक्रमस्य बलीयस्त्वात् स एवेहाश्रयणीयः । "आत्मन आकाशः संभूतः" इत्यादिश्रुत्यनु-रोधेन आकाशादिकर्म विवर्तते ततो भौतिकं सर्वम् । **चिन्त्यं** लोके कारणत्वेन

प्रसिद्धानां वादिमतिविकल्पितानां परमेश्वरविवर्तत्वमेव न तु स्वातन्त्र्यं इति परीक्षकैः चिन्त्यम् ॥ २ ॥

सम्यज्ज्ञानसाधनम्

तत् कर्म कृत्वा [1]विनिवृत्य भूयस्तत्त्वस्य तत्त्वेन समेत्य योगम् ।
एकेन द्वाभ्यां त्रिभिरष्टभिर्वा कालेन चैवात्मगुणैश्च सूक्ष्मैः ॥३॥
आरभ्य कर्माणि गुणान्वितानि भावांश्च सर्वान् विनियोजयेद्यः ।
तेषामभावे कृतकर्मनाशः कर्मक्षये याति स तत्त्वतोऽन्यः ॥ ४ ॥
आदिः स संयोगनिमित्तहेतुः परस्त्रिकालादकलोऽपि दृष्टः ।
तं विश्वरूपं भवभूतमीड्यं देवं स्वचित्तस्थमुपास्य पूर्वम् ॥ ५ ॥

सम्यज्ज्ञानसाधनसर्वस्वमाह—**तदिति** । मनोवाक्कायैः यद्यत् क्रियते **तत्** सर्वं **कर्म** भगवदाराधनधिया कृत्वा पुनः कर्मतत्फलेभ्यो **विनिवृत्य** सर्वकर्मसंन्यासं कृत्वा **तत्त्वस्य** त्वंपदलक्ष्यस्य **तत्त्वेन** तत्पदलक्ष्येण **योगं सम्यगैक्यमेत्य** । तत्र कानि साधनानि इत्यत्राह—**एकेनेति** । **एकेन** गुरूपसदनेन **द्वाभ्यां** देशिकेशभक्तिभ्यां **त्रिभिः** श्रवणमननिदिध्यासनैः **अष्टभिः** यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधिभिः । **वा**शब्दश्चार्थे । अनेकजन्मपरिपक्ककालेन । **चकारः** चरमजन्मार्थः । दयाक्षान्तिशौचमङ्गळास्पृहाऽकार्पण्यानायासान-सूयाऽऽख्यैः **आत्मगुणैः सूक्ष्मैः** अनेकजन्मसु ज्ञानार्थमनुष्ठितपुण्यसंस्कारैः चत्वारिंशद्भिः । एतैः साधनैः स्वात्मपरमात्मैक्यलक्षणं ज्ञात्वा मुक्तो भवतीति भावः ॥३॥ पूर्वमन्त्रोक्तमेवार्थं स्पष्टयति—**आरभ्येति** । नित्यनैमित्तिककर्माणि ईश्वराराधन-**गुणान्वितानि आरभ्य** कृत्वा तेन परिपक्वान्तरः सन् **सर्वभावान्वितपदार्थान् विनियोजयेदिति** यतेः समाधिप्रकारकथनमिदं,—"वाचाऽऽरम्भणं विकारो नामधेयं" इति श्रुत्यनुरोधेन कार्यसामान्यं कारणमात्रतया प्रविलाप्य कारणी-

[1] विनिवर्त्य—अ, अ १, अ २, क, मु.

भूतमायोपाधिमपि निष्प्रतियोगिकचिन्मात्रतया बुद्ध्वा य इत्थं योजयेत् स यतिः तन्मात्रपदवीमियादित्यर्थः। एवं साक्षात्कृतब्रह्मतत्त्वदृष्ट्या ये स्वाज्ञदशायामनुभूताः प्रकृतिप्राकृतविकाराः तेषामभावे दाहे सति आगाम्यादिकर्मत्रयनाशो भवति, कर्मत्रयस्य ब्रह्ममात्रप्रबोधसमकालं अकर्मब्रह्मपदवीं गतत्वात्। एवं कर्मक्षये स्वातिरिक्तकर्मत्रयापह्नवे सति तदानीं स विद्वान् मुनिः कर्मत्रयतत्कार्यापह्नवसिद्धं यद्ब्रह्ममात्रं तत् स्वावशेषतया याति विदेहमुक्तो भवतीत्यर्थः। य इत्थंभूतस्तत्त्ववित् तत्त्वतः स्वाज्ञदृष्टिप्रसक्तस्वातिरिक्तप्रपञ्चमोहे सत्यसति तदन्यः, कालत्रयेऽपि ब्रह्मवित् ब्रह्मैवेत्यर्थः ॥ ४ ॥ परमेश्वरप्रसादादेव कैवल्यहेतुसम्यज्ज्ञानं जायत इत्याह—आदिरिति। सर्वेषां आदिः अधिष्ठानत्वात् यः सर्वाधिष्ठाता स प्रकृतः परमेश्वरः जीवस्य परमात्मना सम्यग्योगः संयोगः तस्य निमित्तानां एकेन द्वाभ्यामित्यादिनोक्तानां हेतुः कारणभूतः। यद्वा—शरीरसंयोगनिमित्तानां पुण्यपापानां संकल्पनस्पर्शनदृष्टिहोमैरित्यादिनोक्तानाम्। परः व्यतिरिक्तः। कस्मात्? अतीतानागतवर्तमानरूपात् त्रिकालात् परः कालाद्यनवच्छिन्न इत्यर्थः। यस्य कळा अवयवाः प्रश्नोपनिषत्पठितप्राणादिनामान्ता वा न सन्ति सोऽयं अकळः। अपिशब्दः पूर्वसमुच्चयार्थः। ईशाद्यष्टोत्तरशतोपनिषत्सु सम्यज्ज्ञानिषु दृष्टः। श्रुत्याचार्यवेद्यतया यः प्रसिद्धः तं एवंभूतं विश्वरूपं उपासकचित्तानुरोधेन विचित्रविश्वरूपधरत्वात्, भवत्यस्मिन् सर्वमिति भवः स चासौ भूतः अवितथस्वरूपश्चेति तं भवभूतं सर्वेषां ईड्यं देवं स्वप्रकाशं स्वचित्तोपलक्षितलिङ्गशरीरे तिष्ठतीति स्वचित्तस्थं पूर्वमेव प्रत्यक्त्वेनावस्थितं अहं ब्रह्मास्मीत्युपास्य तत्प्रसादलब्धसम्यज्ज्ञानसमकालं मुक्तो भवति। अयं मन्त्रः सगुणवस्तुपरः इति केचन वदन्ति। तद्रीत्या सगुणब्रह्मोपासनात् सम्यज्ज्ञानाधिकारो भवतीत्यर्थः ॥ ५ ॥

परमेश्वरादेव स्वज्ञानमोक्षयोः प्राप्तिः

स वृक्षकालाकृतिभिः परोऽन्यो यस्मात् प्रपञ्चः परिवर्ततेऽयम्।
धर्मावहं पापनुदं भगेशं ज्ञात्वाऽऽत्मस्थममृतं विश्वधाम ॥ ६ ॥

तमीश्वराणां परमं महेश्वरं तं देवतानां परमं च दैवतम् ।
पतिं पतीनां परमं परस्ताद्विदाम देवं भुवनेशमीड्यम् ॥ ७ ॥
न तस्य कार्यं करणं च विद्यते न तत्समश्चाभ्यधिकश्च दृश्यते ।
पराऽस्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च ॥
न तस्य कश्चित् पतिरस्ति लोके न चेशिता नैव च तस्य लिङ्गम् ।
स कारणं करणाधिपाधिपो न चास्य कश्चिज्जनिता न चाधिपः ॥
यस्तन्तुनाभ इव तन्तुभिः प्रधानजैः स्वभावतः ।
देव एकः [1]स्वमावृणोति स नो दधातु ब्रह्माव्ययम् ॥ १० ॥
एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा ।
कर्माध्यक्षः सर्वभूताधिवासः साक्षी चेता केवलो निर्गुणश्च ॥ ११ ॥
एको वशी निष्क्रियाणां बहूनामेकं [2]रूपं बहुधा यः करोति ।
तमात्मस्थं येऽनुपश्यन्ति धीरास्तेषां सुखं शाश्वतं नेतरेषाम् ॥
नित्यो नित्यानां चेतनश्चेतनानामेको बहूनां यो विदधाति कामान् ।
तत् कारणं सांख्ययोगाधिगम्यं ज्ञात्वा देवं मुच्यते सर्वपाशैः ॥

परमेश्वरस्य सर्वाधिष्ठातृत्वं स्वात्युपायप्रापकत्वं स्वयाथात्म्यज्ञानान्मोक्षसिद्धिं चाह—स इति । स वृक्षकालाकृतिभिः इति पञ्चम्यर्थे तृतीया, सोऽयमीश्वरः, वृक्षशब्देन संसार उच्यते, तत्रानुस्यूतं कालतत्त्वं काल उच्यते, तस्मादा समन्तात् कृतिराकृतिः महदादिकार्यरूपेण कृतिः प्रकृतिः स्वाधिष्ठातृ सहिता चेदाकृतिः मूलप्रकृतिरुच्यते, तस्याश्च **परोऽन्यः** तेभ्यः परः विलक्षणः स्वयमुत्कृष्टश्चेति वाऽर्थः । **यस्मात्** ईश्वरात् **अयं प्रपञ्चः परिवर्तते** तं **धर्मावहं** तत्तदाश्रमरूपेण तत्तद्धर्मवहनात् स्वेषां स्वप्रापकधर्मप्रदातारमित्यर्थः । तेनैव

[1] समा—अ, अ १, अ २, क [2] बीजं ब—उ, मु.

पापनुदं पापक्षपयितृ यन्नाम, **भगस्य** षड्विधैश्वर्यस्य ईशं आत्मन्यन्तःकरणे प्रत्यगभिन्नब्रह्मरूपेण तद्वृत्तिसहस्रभावाभावप्रकाशकतया तिष्ठतीति **आत्मस्थं अमृतं** अमरणधर्माणं **विश्वधाम** विश्वाधिष्ठानं, वस्तुतोऽधिष्ठेयसापेक्षाधिष्ठानगत-विशेषापायान्निरधिष्ठानं निष्प्रतियोगिकस्वमात्रतया **ज्ञात्वा**, तत्समकालं तन्मात्रतया अवशिष्यत इति वाक्यशेषः ॥ ६ ॥ सर्वेशितृत्वं तज्ज्ञानात् कृतकृत्यतामाह—**तमिति** । तं प्रकृतं परमात्मानं जगद्धेतूनां ब्रह्मादीश्वराणामपि **परमं** उत्कृष्टं **महेश्वरं देवतानां** इन्द्रादीनामपि देवत्वप्रापकत्वेन परमं उत्कृष्टं **दैवतं च** व्यष्टिसमष्टिकरणाधि**पतीनामपि परमं पतिं** स्वामिनं प्राकृतेभ्यः **परस्तात्** परमं **देवं भुवनेशं** वेदेतिहासादिभिः **ईड्यं विदाम** विद्मः । लडर्थे लोट् । एव-मीश्वरमात्मतया ज्ञात्वा तत्पदवीं प्राप्य वर्तामहे । ईश्वरापत्तिर्हि मुक्ति-रित्यर्थः ॥ ७ ॥ परमार्थत ईश्वरस्य कार्यकारणशून्यत्वमाह—**न तस्येति** । **तस्य** परमात्मनो व्यष्टिसमष्ट्यात्मककार्यं शरीरं बाह्यान्तःकरणजातं **च न विद्यते** अद्वितीयसन्मात्रत्वात् । तेन समः **तत्समश्च** तस्मात् **अभ्यधिकश्च न दृश्यते** वेदेष्वित्यर्थः । कार्यकरणानि पुराणादिषु बहुशः श्रूयन्त इत्यत आह—**परेति** । **परा** सर्वोत्कृष्टा **अस्य शक्तिः** प्रकृतिः, देवात्मशक्तिमित्युक्तत्वात्, सेयं **विविधा** अनन्तकार्यकरणतया **श्रूयते** सर्वत्र । सेयं परा शक्तिः न तत्स्वाभाविकी इत्यत आह—**स्वाभाविकीति** । निर्विशेषस्य तदभावेऽपि सविशेषेश्वरस्य स्वाभेदेन कीर्त्यत इति **स्वाभाविकी** सर्वज्ञेयविषयत्वेन सर्वज्ञत्वादिलक्षणा अस्य स्वरूप-त्वात् स्वाभाविकी नान्यायत्ता स्वसंनिधिमात्रेण प्रकृतिप्राकृतं सर्वं वशीकृत्य नियन्त्राऽधिष्ठितनियमनात् **बलक्रिया** च स्वभावसिद्धा ना (?) नन्यत्वात् ॥ ८ ॥ ईश्वरस्य अनन्यपतित्वं सर्वकारणताऽऽदि स्यादित्याह—**न तस्येति** । **तस्य** परमेश्वरस्य स्वातिरेकेण **कश्चित्** स्वामी **पतिः न ह्यस्ति** लोके स्वस्यैव सर्व-स्वामित्वात् । **न** च स्वातिरेकेण **ईशिता** नियन्ताऽप्यस्ति । येनासावनुमीयते तत् **नैव** च **तस्य लिङ्गं** अस्ति । कार्यदर्शनादेव हि कारणमनुमीयते । न हि कारणं द्रष्टुं शक्यते तस्यामूर्तत्वात् । अतः सर्वज्ञं ब्रह्म जगत्कारणं इत्यस्यार्थस्य वेदैकगम्यत्वात् नानुमानगम्यताऽस्तीत्यर्थः । यद्वा—कार्यसामान्यस्य अस्मिन्

विलयनात् तन्निरूपितकारणताऽपि नास्ति । **स** एवंभूतः परमेश्वर एव स्वमायया सर्व**कारणं**, करणाधिपो जीवः करणग्रामाधिकरणत्वात् तस्यापि कारणोपाधिरीश्वरः पतिः स्वामी । यद्वा—करणाधिपश्चासावधिपतिश्चेति **करणाधिपाधिपः** स्वस्यैव जीवरूपेणापि स्थितत्वात् "अनेन जीवेनात्मनाऽनुप्रविश्य नामरूपे व्याकरवाणि" इति श्रुतेः । यथा विराट्कारणहिरण्यगर्भस्यापि कारणान्तरमधिपत्यन्तरमपि विद्यते तथा तस्यापि स्यादित्यत आह—**न चेति** । अस्येशितुः **स्वातिरिक्तसर्वकारणत्वेन न चास्य कश्चिज्जनिता न चाधिपोऽस्ति स्वस्यैव** सर्वकारणतया स्वामित्वात् । यस्मादेवं तस्मात् अयमेव मुमुक्षुभिः आत्मत्वेन ज्ञातव्यः ॥ ९ ॥ इदानीं मन्त्रदृगभिप्रेतार्थप्रार्थनामाह—**य** इति । **यः** परमेश्वरः **तन्तुनाभ इव** । कथं ? यथोर्णनाभिः स्वशरीरप्रभवतन्तुभिः आत्मानमावृणोति तद्वत् **प्रधानजैः** मायातत्कार्यनामरूपकर्मभिः स्वतन्त्रोऽपि स्वेच्छया सर्वकल्पनाधिकरणत्वेन **स्वात्मानं** स्वयमेव **आवृणोति** । **स** परमेश्वरो **नोऽस्माकं** यथोक्ताधिकारिणां **दधातु** ददातु धारयतु वा । किं तत् ? ब्रह्म तदव्ययं चेति **ब्रह्माव्ययम्** । स्वाज्ञानमुन्मूलयन् स्वाप्तिहेतुः स्वज्ञानं विदधात्विति भावः ॥१०॥ परमेश्वरस्य स्वाज्ञादिदृष्ट्यनुरोधेन सर्वभूतगूढत्वं व्यापकत्वं सार्वात्म्यं नियन्तृत्वं निर्गुणैकत्वं चाह—**एक** इति । **एकः** अद्वितीयः । व्योमवदात्मन एकत्वे जडत्वं स्यादित्यत आह—**देव** इति । देदीप्यमानरूपत्वात् । एवं किं न भातीत्यत आह—**सर्वभूतेषु गूढ** इति । सर्वभूतेषु आत्मैकत्वेन विदुषां भासमानोऽप्यविदुषां गूढवन्न भासत इत्यर्थः । व्यष्टिभूतान्तर्गूढत्वेन परिच्छिन्नता स्यादित्यत आह—**सर्वव्यापीति** । व्योमवद्व्यापकत्वमस्योपपद्यते । सर्वव्यापकत्वे व्योमवदचेतनत्वं स्यादित्यत आह—**सर्वभूतान्तरात्मेति** । सर्वभूतान्तर्विलसितप्रत्यगात्मनश्चेतनत्वे सति व्यापकत्वात् । सर्वकर्मफलदातेश्वरः तद्भिन्न इत्यत्राह—**कर्माध्यक्ष** इति । कूटस्थस्यैव मूलाबीजांशयोगतः ईश्वरत्वेन सर्वप्राणिभावानुरोधेन तत्कृतकर्मणः फलदातृत्वात् । सूत्रात्मा तद्भिन्न इत्यत आह—**सर्वभूताधिवास** इति । ईश्वरस्यैव मूलासूक्ष्मांशयोगतः सर्वभूतेषु सूत्रात्मना अधिवसन् सर्वभूतनियन्ता भवतीत्यर्थः । सर्वभूतनियन्तृत्वे विकारित्वं स्यादित्यत आह—**साक्षीति** ।

साक्षिणः साक्ष्यगतविकारास्पृष्टत्वेन निर्विकारत्वात्। साक्ष्यभासकत्वव्यपदेशः स्यादित्यत्राह—चेतेति। स्वभास्यसाक्ष्यताऽपाये तन्निरूपितसाक्षित्वभासकतावैरळ्यात् चैतन्यमात्रो भवतीत्यर्थः। विशेषे सति चैतन्यमात्रता कुत इत्यत आह—केवल इति। विशेषसामान्यशून्य इत्यर्थः। सत्त्वादित्रिगुणे सति केवलता कुत इत्यत आह—निर्गुणश्चेति। त्रिगुणतद्धेतुगुणसाम्याभावात् केवलत्वमुपपद्यत इत्यर्थः। चशब्दो निष्प्रतियोगिकनिर्गुणत्वख्यापक इत्यर्थः॥११॥ ईश्वरभावमापन्नानां ईश्वरसाक्षात्कारजन्यसुखं नेतरेषां भवतीत्याह—एक इति। एकोऽद्वितीयः सर्वमस्य वशे वर्तत इति वशी बहूनां निष्क्रियाणां अचेतनानां नामरूपकर्मणां आरोपापवादाधिकरणं एकं सत्यज्ञानसुखात्मकं अखण्डैकरसात्मकं आत्मानं बहुधा मायामहदादिबहुप्रकारं यःकरोति, "तदात्मानं स्वयमकुरुत" इति श्रुतेः। तं एवंभूतं परमेश्वरं स्वविकल्पितानात्मापह्नवसिद्धमात्ममात्रतया तिष्ठतीति आत्मस्थं स्वावशेषतया येऽनुपश्यन्ति धीराः ब्रह्मविद्वरीयांसः तेषां सुखं शाश्वतं नेतरेषां सिध्यति स्वाज्ञानावृतदृष्टित्वात्॥ १२॥ परमेश्वरस्य नित्यचेतनत्वं कर्माध्यक्षत्वं स्वयाथात्म्यज्ञानात् मोक्षसिद्धिं चाह—नित्य इति। लोके नित्यत्वेन प्रसिद्धानां आकाशादीनां नित्यत्वहेतुः पारमार्थिकनित्यः लोके चेतनत्वेन प्रतिपन्नानां प्रमात्रादीनां अयं पारमार्थिकचेतनः। स्वेतरनित्यत्वचेतनत्वयोः मायामात्रत्वे "अतोऽन्यदार्तं" इति श्रुतेः। ब्रह्मादिस्तम्बान्तजीवानां बहूनां यः स्वयं एक एव सन् ईश्वरः तत्तत्प्राणिसुकृताद्यनुरोधेन कामान् विदधाति। तत् ब्रह्म जगतः कारणं साङ्ख्यं वेदान्तमहातात्पर्यजन्यसम्यज्ज्ञानं ब्रह्ममात्रगोचरं तत्साधनश्रवणादिः योगः ताभ्यां साङ्ख्ययोगाभ्यां अधिगम्यं ज्ञातव्यं ज्ञात्वा देवं इत्याद्युक्तार्थम्॥ १३॥

ईश्वरवेदनमेव संसारतारकम्

न तत्र सूर्यो भाति न चन्द्रतारकं नेमा विद्युतो भान्ति कुतोऽयमग्निः।
तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति॥१४॥

एको हꣳसो भुवनस्यास्य मध्ये स एवाग्निः सलिले संनिविष्टः ।
[1]तमेव विदित्वाऽतिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय ॥१५॥
स विश्वकृद्विश्वविदात्मयोनिर्ज्ञः कालकालो गुणी सर्वविद्यः ।
प्रधानक्षेत्रज्ञपतिर्गुणेशः संसारमोक्षस्थितिबन्धहेतुः ॥ १६ ॥
स तन्मयो ह्यमृत ईशसंस्थो ज्ञः सर्वगो भुवनस्यास्य गोप्ता ।
य ईशेऽस्य जगतो नित्यमेव नान्यो हेतुर्विद्यत ईशनाय ॥१७॥

ईश्वरस्य आदित्याद्यनवभासकत्वमाह—न तत्रेति । तत्र स्वयंप्रकाशचिद्धातौ सर्वावभासकोऽपि **सूर्यो न भाति** सूर्यादेः तत्प्रकाशजडीकृतत्वात् । तथा **चन्द्रतारकं नेमा विद्युतो भान्ति कुतोऽयं** अस्मद्गोचरः **अग्निः** । स्वभास्यसत्त्वासत्त्वाभ्यां यो भामात्रतया विजृम्भते प्रत्यक्षादिप्रमाणनैरपेक्ष्येण **तमेव भान्तं** सूर्यादयः अनुसृत्य भान्तीव भान्ति **तस्य भासा** सूर्यादिघटान्तं जगत् **इदं सर्वं विभाति** । यत एवमतो भामात्रः परमात्मेत्यर्थः ॥ १४ ॥ परमेश्वरस्य स्वातिरिक्तकलनाबाधकत्वं तत्पदाप्तिहेतुः ज्ञानमेव तदतिरिक्तोपायो नास्तीत्याह—**एक** इति । स्वातिरिक्तकलनासर्वस्वं हत्वा स्वमात्रमवशिष्यत इति **हंसः** परमात्मा **एक** एव **भुवनस्यास्य मध्ये** अयमेक एव हंसो नान्योऽतोऽस्ति **स एव** अहं ब्रह्मास्मीति सम्यज्ज्ञानफलकारूढः स ह्यग्निरिव **अग्निः**, स यथा काष्ठावृतोऽपि मथनादाविर्भवति एवं स्वयमाविर्भूय स्वावारककाष्ठं भस्मीकरोति तथा स्वाविद्यातत्कार्यावृतः आत्मा अग्निः, उत्तराधरारणिस्थानीयगुरुशिष्यसंवादमथनस्थानीयश्रवणादिजन्यसम्यज्ज्ञानफलकाऽऽरूढः सन् स्वावारकाविद्याद्वयतत्कार्यतूलराशिं भस्मीकृत्य स्वमात्रमवतिष्ठते इत्यग्निः आत्मेत्युच्यते, सोऽयमग्निरन्तःकरणसमुदायसलिले **संनिविष्टो** यः प्रकृतिप्राकृतापह्नवसिद्धः **तं** परमात्मानं स्वात्ममात्रतया **विदित्वा** तद्वेदनसमकालं **अतिमृत्युं ब्रह्म एति** । स्वातिरिक्तास्तिताश्रमो हि मृत्युः स यत्रापह्नवं भजति सोऽतिमृत्युः

[1] तमेवं—अ १.

परमात्मेत्यर्थः । इत्थंभूतसम्यज्ज्ञानात् **अन्यः** पन्था मार्गो **न विद्यते अयनाय** मोक्षाय ॥ १५ ॥ उक्तार्थमेव पुनर्विशदयति—**स विश्वकृदिति** । **स** प्रकृतः परमात्मा मूलाबीजांशयोगतः ईश्वरत्वमवलम्ब्य स्वशक्त्या विश्वं करोतीति **विश्वकृत्** स्वातिरेकेण विश्वं नेति नेतीति जानातीति **विश्वयाथात्म्यवित्** **आत्मयोनिः** स्वे महिम्नि स्वयमेव जातत्वात् । यद्वा—ब्रह्मादिस्तम्बान्तात्मनां योनिः **आत्मयोनिः**, तत्त्वंपदार्थरूपेण स एव स्थित इति यावत् । **ज्ञः** चित्स्वरूपः, सर्वोपसंहर्तुः **कालस्यापि कालः** उपसंहर्तृत्वात्, **गुणी** मायातत्कार्यगुणी अपहतपाप्मादिगुणवान् वा । सर्वा विद्या अस्येति **सर्वविद्यः** स्वस्मिन् विज्ञाते सर्वमिदं विज्ञातं भवतीति वा सर्वविद्यः । प्रधानश्चासौ क्षेत्रज्ञश्चेति प्रधानक्षेत्रज्ञः स एव पतिश्चेति **प्रधानक्षेत्रज्ञपतिः** । यद्वा—प्रधानं क्षेत्रत्वेन जानातीति प्रधानक्षेत्रज्ञः ईश्वरः तस्यापि साक्षी पतिः । **गुणेशः** सत्त्वादिगुणनियन्तृत्वात् । सम्यज्ज्ञानज्ञाततया संसारमोक्षहेतुः नाशहेतुः अज्ञानेनाज्ञाततया संसारस्थितिलक्षणबन्धहेतुः कारणम् ॥ १६ ॥ स्वे महिम्नि प्रतिष्ठां कर्मादिनैरपेक्ष्येण ईशितृत्वं चाचष्टे—**स** इति । **स** प्रकृत ईश्वरः **तन्मयो** ज्ञाततया अज्ञाततया च बन्धमोक्षहेतुरूपः, स्वार्थे मयट् । हि प्रसिद्धौ । **अमृतोऽमरणधर्मा ईशसंस्थः** ईश्वरत्वेन सम्यगवस्थितत्वात् । **ज्ञः** चित् प्रकाशः साक्षितया सर्वं गच्छतीति **सर्वगः भुवनस्यास्य** दृश्यप्रपञ्चस्य **गोप्ता** स्वानन्दप्रदतया पालयिता । **अस्य जगतो नित्यमेव य ईशे** ईष्टे, यथोक्तलक्षणेशादन्यत्र जगत **ईशनाय अन्यो हेतुर्न विद्यते** । सर्वेश्वरेशनक्रियायां स एव कर्ता नान्यः कर्ता विद्यत इति यावत् ॥ १७ ॥

मुमुक्षोरीश्वर एव शरणम्

यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै ।
तꣳ ह देवमात्मबुद्धिप्रकाशं मुमुक्षुर्वै शरणमहं प्रपद्ये ॥ १८ ॥

ईश्वरस्य सम्यज्ज्ञानप्रदत्वेन मुमुक्षुरीश्वरशरणो भूयादित्याह—य इति । **यः** प्रकृतः परमेश्वरः सर्वजीवसमष्टिरूपं **ब्रह्माणं**, विश्वसर्गस्थित्यन्तकर्तृत्वेन

स्वमायया **विदधाति** सृष्टवान् **यः** प्रकृतेशः **पूर्वं** सर्गादौ **स्वेन** सृष्टो हिरण्यगर्भः **तस्मै वेदांश्च प्रहिणोति** प्रददौ । किमर्थं? महाप्रळयविच्छिन्ने संप्रदाये यथोक्ताधिकारिषु वेदार्थसंप्रदायस्थापनाय तस्मै वेदांस्तु ददौ । **तं** एतमीश्वरं **देवं**, ह एवार्थे, **स्वात्मबुद्धिप्रकाशं** अहं ब्रह्मास्मीति स्वपदार्थसाधनबुद्धिप्रकाशयितारं **मुमुक्षुर्वै शरणमहं प्रपद्ये** प्रपन्नो भवेयमित्यर्थः ॥ १८ ॥

सर्वशास्त्रार्थसंग्रहः

निष्कलं निष्क्रियꣳ शान्तं निरवद्यं निरञ्जनम् ।
अमृतस्य परꣳ सेतुं दग्धेन्धनमिवानलम् ॥ १९ ॥
यदा चर्मवदाकाशं वेष्टयिष्यन्ति मानवाः ।
तदा [1]शिवमविज्ञाय दुःखस्यान्तो भविष्यति ॥ २० ॥

कृत्स्नशास्त्रे यावन्तोऽर्थाः प्रकाशिताः तान् सर्वान् मन्त्रद्वयेन संक्षिपति —**निष्कळमिति** । प्राणादिनामान्तकला यत्प्रबोधसमकालमपह्नवं भजति तदपह्नवसिद्धं हि **निष्कळम्** । सक्रियस्य निष्कळता कुत इत्यत आह— **निष्क्रियमिति** । निरवयवस्य क्रियाऽसंभवान्निष्कळत्वं निष्क्रियत्वं च सिद्धमित्यर्थः । अशान्तस्वातिरिक्तदेहादिप्रपञ्चस्य निष्क्रियत्वं दुर्लभमित्यत आह—**शान्तमिति** । स्वमात्रावगतेः स्वातिरिक्तशान्तिपूर्वकत्वात् निष्क्रियत्वं सिद्धमित्यर्थः । स्वातिरिक्ताभावादेव **निरवद्यं** स्वावद्यहेतोः शान्तत्वान्निरवद्यं निष्प्रतियोगिकसन्मात्रमित्यर्थः । स्वाज्ञदृष्ट्या स्वातिरिक्तसत्त्वे तत्राञ्जनं स्यादित्यत आह—**निरञ्जनमिति** । स्वज्ञदृष्ट्या स्वातिरिक्तस्य बाधितत्वात् तत्सत्त्वासत्त्वाभ्यां निरञ्जनमित्यर्थः । मार्त्यस्वाविद्याद्वयतत्कार्यं यत्र विलीयते तदधिकरणं **अमृतं** तस्यापि **परं** निरधिकरणं स्वाधेयनिरूपिताधिकरणगतसविशेषसिन्धुसेतुमिव **सेतुं** स्वातिरिक्ताविद्यापदतत्कार्यजातं स्वतावन्मात्रतया दग्ध्वा अपह्न-

[1] देव—ड, मु.

वीक्ष्य स्वावशेषधिया मोक्षीभवतीति **दग्धेन्धनमिवानलमित्युच्यते** ॥ १९ ॥ **यदा चर्म** वेष्टयिष्यन्ति मानवाः **तद्वदाकाशं वेष्टयिष्यन्ति** चेत् **तदा** एवं विशिष्टशास्त्रोपसंहारभूतं पूर्वमन्त्रप्रकाशितं निष्कळमित्यादिविशेषणविशिष्टं षोडशकलाऽपह्नवसिद्धत्वेन **शिवं** स्वप्रकाशमात्रं निष्प्रतियोगिकस्वमात्रमिति **अविज्ञाय** स्वातिरिक्तास्तितामभवदुःखस्यान्तो नाशो **भविष्यति** । यस्मादेवं तस्मात् स्वाज्ञानप्रभवसंसारोऽस्तीति प्रसक्तौ न हि स्वज्ञानमन्तरा तन्निवृत्तिरुपपद्यते । परमार्थदृष्ट्या तु स्वातिरिक्तमस्ति नास्तीति न हि विभ्रमस्यावकाशोऽस्ति, किं तु स्वाज्ञादिदृष्टिप्रसक्त्या स्वातिरिक्तास्तिताभ्रमे सत्यसति स्वयमेव निष्प्रतियोगिकमवशिष्यते । न हि तत्र संशयोऽस्तीत्यर्थः ॥ २० ॥

ब्रह्मविद्याऽधिकारिनिरूपणम्

तपःप्रभावाद्देवप्रसादाच्च [1]ब्रह्म ह श्वेताश्वतरोऽथ विद्वान् ।
अत्याश्रमिभ्यः परमं पवित्रं प्रोवाच सम्यगृषिसङ्घजुष्टम् ॥२१॥

वेदान्ते परमं गुह्यं पुरा [2]कल्पे प्रचोदितम् ।
नाप्रशान्ताय दातव्यं नापुत्रायाशिष्याय वै पुनः ॥ २२ ॥
यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ ।
तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः ॥
प्रकाशन्ते महात्मन इति ॥ २३ ॥

इत्थं संप्रदायपरंपराऽऽगतब्रह्मविद्याया मोक्षफलपर्यन्तत्वं दर्शयितुं विद्याऽधिकारिणं दर्शयति---**तप** इति । रूढत्वेन कृच्छ्रचान्द्रायणादिलक्षणस्य **तपसः** "तप इति तपो नानशनात् परं" इत्यादिश्रुतिसिद्धस्य, स्वेन्द्रियमनसोः

[1] ब्रह्माह—अ १, अ २, क. [2] कल्पप्र—अ, अ १, अ २, क.

एकाग्रलक्षणस्य वा तपसः "मनसश्चेन्द्रियाणां च ह्यैकाग्र्यं परमं तपः" इति स्मरणात्, तत्फलभूतविचारात्मकस्य वा तपसः "तपसा ब्रह्म विजिज्ञासस्व" इति श्रुतिप्रकटितस्य वा **प्रभावात्** सामर्थ्यादनन्तकोटिजन्मसूपासितस्य **देवस्य प्रसादाच्च** स्वातिरिक्तकलनापह्नवप्रबोधसमकालं स्वमात्रतया बृंहणात् **ब्रह्म** हशब्द ऐतिह्यार्थः। श्वेताश्वतरो नाम **विद्वान्** महर्षिः स्वेन यद्ब्रह्म स्वावशेषतया साक्षात्कृतं तदेव ब्रह्मयाथात्म्यं ब्रतिकामिवनिकुटीचकबहूदकहंसाश्चाश्रमिणः तानतीत्य परमहंसाश्रमे ये वर्तन्ते ते खल्वत्याश्रमिणः परमहंसपरिव्राजकाः तेभ्यो हि **अत्याश्रमिभ्यः** यत् पूर्वोक्तं ब्रह्मयाथात्म्यं तदेव **परमं** निष्प्रतियोगिकनिर्विशेषब्रह्ममात्रगोचरं **पवित्रं** स्वविद्याद्वयापवित्रशोधकं वसिष्ठागस्त्यवामदेवश्रीशुकोद्दालकवीतहव्यसनकादिमहर्षिसङ्घेन **जुष्टं** सेवितं ब्रह्ममात्रज्ञानं **प्रोवाच**, यथा ब्रह्ममात्रं स्वावशेषतया साक्षात्कृतं भवेत् तथा प्रोवाच ॥ २१ ॥ प्रशब्देन गुरोरुपदेशकालं दर्शयति—**वेदान्त** इति। वेदान्त इति जातावेकवचनम्। ईशावास्यादिमुक्तिकोपनिषदन्ताष्टोत्तरशतोपनिषत्सु **परमं** परमात्मतत्त्वं परमपुरुषार्थहेतुत्वात् **गुह्यं** पारमहंस्यं अनधिकारिषु गोपनीयत्वात् **पुरा** पूर्वस्मिन् **कल्पे प्रचोदितं** सम्यगनुशासितं, गुरुशिष्यसंप्रदायपरंपरया सम्यगागतमिति वा। कल्पादावीश्वरेण हिरण्यगर्भं प्रति यत् प्रचोदितं उपदिष्टं तदिदं ब्रह्ममात्रविज्ञानं **नाप्रशान्ताय** स्वातिरिक्तनिरासकब्रह्ममात्रज्ञानसाधनसाधनचतुष्टयसम्पत्तिविकलाय **न** कदाऽपि **दातव्यम्**। तत्रापि **नापुत्राय अशिष्याय वा** न दातव्यम्। प्रशान्तान्तरपुत्राय शिष्याय वा सम्यक् तच्छीलं परीक्ष्य दातव्यम् ॥ २२ ॥ देवतादेशिकभक्त्योर्विद्याप्राप्तावन्तरङ्गसाधनत्वमाह—**यस्येति**। **यस्य** मुमुक्षोः **देवे** परमेश्वरे **परा** निर्हेतुकी **भक्तिः** विद्यते **यथा देवे तथा गुरावपि** निर्हेतुकी भक्तिः यदि विद्यते तदा **तस्य** मुमुक्षोः गुरुदेवतयोरैकत्वं भावयतः अस्यां उपनिषदि श्वेताश्वतरेण मुनिना **येऽर्थाः कथिताः** त एव **अर्थाः** अस्य **महात्मनो** महानुभावस्य **प्रकाशन्ते** फलपर्यवसायिनो भवन्ति। यस्मादेवं तस्मात् विद्यार्थिभिः देवतादेशिकविषये निर्हेतुकी भक्तिः कर्तव्या,

परमाद्वैतविज्ञानं कृपया वै ददाति यः ।
सोऽयं गुरुवरः साक्षाच्छिव एव न संशयः ॥

इति स्मृतेः । द्विर्वचनमादरार्थम् । **इत्युपनिषच्छब्दौ** विशिष्टोपनिषत्समाप्त्यर्थौ ॥ २३ ॥

इति षष्ठाध्यायः

श्रीवासुदेवेन्द्रशिष्योपनिषद्ब्रह्मयोगिना ।
श्वेताश्वतरोपनिषद्व्याख्येयं लिखिता स्फुटम् ।
श्वेताश्वतरोपनिषदो व्याख्याग्रन्थः सहस्रकम् ॥

इति श्रीमदीशाद्यष्टोत्तरशतोपनिषच्छास्त्रविवरणे चतुर्दशसङ्ख्यापूरकं
श्वेताश्वतरोपनिषद्विवरणं सम्पूर्णम् ॥

नामधेयपदसूची

यत्र पुटसंख्यानन्तरं तिर्यग्रेखायाः परं संख्या वर्तते तत्र तावती पदावृत्तिः बोध्या

पदम्	पुटसंख्या
अग्निः	२३
अघोरः	७९
अङ्गिराः	१०
अच्युतः	११७
अजः	२०९–२
अथर्वा	११
अर्धनारीशः	१६१
अश्विनौ	१०८
आरुणिः	१२१
आश्वलायनः	४६
इन्द्रः	२३
ईशानः	३०, ७९, ८२, ८४, ९०, १४९, २००, २०८
उमा	२३, १४५, १४९–२
ऋभुः	१२१
कपिलः	१६३
करुणः	११५–२
कात्यायनः	१६३
कालः	२३
कालाग्निरुद्रः	३९, ४०, ४१, ४४, ८८, ९१, ९७, १०३, १०४, १०७, ११४, १२२, १२३, १५६, १५७, १६०, १६३–५
गिरीशः	१७०
गुहः	२, ९
गोविन्दः	१४९
गौतमः	८५, ११६
चतुर्मुखम्	१६१
चन्द्रमाः	१४९
जडभरतः	१२१
जनकः	१२०–२, १२१–३
जनार्दनः	१४९–२
जाबालः	१२९, १३४

पदम्	पृष्ठसंख्या
दत्तात्रेयः . .	१२१, १६३
दधीचिः . . .	११६
दुर्वासाः .	११६–२, १२१
निदाघः . .	१२१, १६३
नीललोहितः . .	१४६
पितामहः . . .	१६६
पैप्पलादः १०, ७९, १२२–२,	१६६, १७३–२
पैप्पलादिः . . .	६९
भरद्वाजः . . .	१६३
भुसुण्डः ८८, ८९, ९१,	९७, १०४, १०७, ११४, १२१, १२९, १३४, १५६, १६०
भैरवः . . .	१४६
महागणपतिः . .	६१
महादेवः . . १६, ३२, ८४	
महेशः . . ८०, १७०	
महेश्वरः २३, ३१, १५०,	१५३–२, १६७
मार्कण्डेयः . . .	७०
मृकण्डुजः . . .	७६
याज्ञवल्क्यः	१२०–२, १२१–३
रैवतकः . . .	१२१
वसिष्ठः . .	१६३, १७०

पदम्	पृष्ठसंख्या
विष्णुः १५, २३, ५०, १०९,	१२२–३, १४५, १४९–२, १५०, १६३, १७१
वीरभद्रः . . .	१६७
व्यासः . . .	१४८
शरभः . . .	१७१
शाकलः . . ८०, ८५	
शिवः १८, ४९, ५०,	८६–२, ९३–२, १२९, १७२, १७३, १९८, २१०, २११
शुकः . . १४८, १५१	
शुचिस्मिता . . .	११५
श्वेतकेतुः . . .	१२१
श्वेताश्वतरः . . .	२३२
सनत्कुमारः १०, ४०, ४२,	६८, १२३, १६३
सरस्वती . . .	२
साम्बः . .	१३४–२
सूर्यः . . २३, १५०	
सोमः २३, ९२, ९३, १४९,	१५०, १८९
स्कन्दः . . .	२३
हरः . . .	११७
हरिः . .११७–३, १७२	

विशेषपदसूची

यत्र पुटसंख्याऽनन्तरं तिर्यग्रेखायाः परं संख्या वर्तते तत्र तावती पदावृत्तिः बोध्या

पदम्	पुटसंख्या	पदम्	पुटसंख्या
अकल्पम्	१०३–२	अनुकल्पम्	१०३–२
अकारः	११	अन्तरिक्षसदः	६
अक्षरम्	१८१	अपरा	१९२
अग्निः	१०१, १२०, १२४, १३९	अभक्ष्यम्	१६२
अग्नीषोमपुटम्	९५	अमृतम्	९३
अग्नीषोमात्मकम्	९१–२	अमृतप्लावनम्	९५
अंकारः	३	अरुन्धती	११५–२
अणोरणीयान्	१०१	अर्धमात्रा	१२
अत्याश्रमस्थः	४९	अलक्ष्मीः	९९
अथर्वशिरः	३६–२, ६३	अविद्या	२१४
अथर्वशीर्षम्	६३	अष्टवक्त्रम्	१६१
अद्वैतम्	८५, १५४	अष्टस्थानम्	१०८
अधमम्	१५८, १६०	अष्टादशार्णः	७३
अनन्तः	२७	आकाशः	८६
अनपब्रुवः	१३४	आत्मज्योतिः	१३
अनलः	९२	आत्मतत्त्वम्	१९१
अनाज्ञातत्रयम्	१००	आत्मा	१९३, १८१

पदम्	पुटसंख्या
आदिक्षान्ताः	८
आदित्याः	११८
आनुष्टुभः	७५
इध्मशेषम्	१००
उकारः	११
उत्तमम्	१५९–२, १६०
उत्पत्तिसांकर्यम्	११३
उद्भूळनम्	१०६
उपकल्पम्	१०३–२
उपदेशः	१३९
उपनिषत्	९८
उपासकः	७७
उपोपकल्पम्	१०३–२
ऋतम्	१००
एकः	२९
एकवक्त्रम्	१६१
एकादशगुणरुद्रः	१३६
एकादशमुखम्	१६२
ऐश्वर्यस्थानम्	१४१
ओङ्कारः	१३, २६
कपिला	९७
कवयः	२२१
काष्णायसम्	८५
कालाग्निः	९३–२
कृतकर्मनाशः	२२३
क्षंकारः	५
क्षत्रियाः	१५८
क्षरम्	१८१
क्षारम्	९०–२
गाणेशीविद्या	६१
गायत्री	२, ९९
गुह्यम्	८०
ग्रहाः	२३
चतुर्जालम्	१४५
चतुर्थवक्त्रम्	१०५
चतुर्दशमुखम्	१६२
चतुर्विंशाक्षरः	७२
छाया	१५०
जनः	२३
जागरितम्	१६
जालवान्	१९३
जीवः	५२–२, १५३, २१८
जुहूः	१३०
ज्ञप्तिदीपम्	७६
ज्ञानदम्	१०६
ज्ञानसाधनम्	७५
ज्ञानस्थानम्	१४१
ज्योतिः	२१
तत्त्वम्	६६
तत्पुरुषः	७९

पदम्	पुटसंख्या
तन्तुनाभः	२२९
तपः	२३
तारः	१४
तारकम्	१४९
तारा	१९०
तुरीयम्	१६
तृतीया रेखा	४३, ६८
तेजः	९१
तेजोविद्याकला	९१
त्रयोदशमुखम्	१६२
त्रिपुण्ड्रम्	१०९–२, ११२, ११३
त्रिपुण्ड्रविधिः	१२९
त्रिमाला	१६०
त्रिमुखम्	१६१
त्रियायुषम्	१११
दक्षिणाभिमुखः	७१, ७७
दक्षिणामूर्तिः	७२, ७४
दक्षिणास्यः	७४
दक्षिणा	१६४
दग्धपाशः	९४
दशवक्त्रम्	१६२
दहरः	८६
दिविषदः	६
देवः	७१, १९४, २०४, २१६, २२०, २२१, २२९
देही	२०१, २१९
द्वात्रिंशत्स्थानम्	१०७
द्वादशमुखम्	१६२
द्वादशवर्णकः	७४
द्विवक्त्रम्	१६१
धवळा	९७
धारणम्	११०–२
धिक्	११३–४
धेनुः	९८
नन्दा	८९
नरः	१९०
नववक्त्रम्	१६२
नवाक्षरः	७३
नारी	१९०
निवृत्तिः	८९
निष्ठा	७९
पञ्चब्रह्मम्	८३
पञ्चवक्त्रम्	१६१
पञ्चस्थानानि	१०८
पञ्चाक्षरम्	८४
पण्डितः	९१
पन्थाः	१९६
परमतत्त्वरहस्यम्	६९
परमरहस्यशिवतत्त्वज्ञानम्	७१–२
परमात्मरूपम्	९६

पदम्	पुटसंख्या
परमेश्वरः	१३०, १६७, १६९
पराः	२, १९२
परिकरः	७९
परंब्रह्म	२९
पशवः	६६–४
पशुपतिः	६६–४, १६८
पशुपाशविमोचकः	१३९
पावनम्	९३
पाशुपतम्	३९–२
पिप्पलः	१६३
पीठम्	१९१
पुण्डरीकम्	८६
पुरत्रयम्	९२
पुरुषः	८७
पुरुषदैवत्या	१२
पुष्पाञ्जलिः	१४३
पूर्णपात्रोदकम्	१००
पूर्णाहुतिः	१३०
पृथिवीषदः	६
प्रकाशः	१९
प्रकृतिः	२
प्रजापतिः	१
प्रणवः	१४, २७, १०३, १०४
प्रतिष्ठा	८९
प्रलयः	१३
बलिः	७९
बलिप्रदानम्	१३०
ब्रह्म	२, ११–२, १९, २४, २९, ९०, ९३, ९४, ८३, १९१, १९३, १९९, १७९, २३२,
ब्रह्मकार्यम्	८४–२
ब्रह्मचक्रम्	२२१
ब्रह्मतुरीयम्	१७
ब्रह्मदैवत्या	१२
ब्रह्ममन्त्राः	१३१
ब्रह्मवादिनः	१७९
ब्रह्मविद्या	१४९–२
ब्रह्मविष्णुमहेश्वराः	११४
ब्रह्मविष्णुरुद्राः	७
ब्रह्मविष्णुरुद्रेन्द्राः	१८
ब्रह्मा	९०, १४९, १४९, १९०, १६३,
ब्रह्मोपदेशः	१३६
ब्राह्मणाः	१९८
भगवान्	३१
भद्रा	८९
भवः	७३
भसितम्	८९
भस्म	९०–२, ९१, ९३, ११४

पदम्	पुटसंख्या
भस्मज्योतिः १२०–२,१२१, १२२–३ ,१२३, १६३	
भस्मधारणम्	१३३
भस्मनिष्ठः	११४–२
भस्मस्नानम्	९१, १०६
भूतिकरी	११८
भेदः	८९
मकारः	११
मनुस्वरूपम्	६१
मलस्नानम्	१०४–२
महः	२३
महर्षिः	१३७
महात्मा	२१९
माया	१७०
मायी	२०७
मार्जनम्	१३९
मुक्तिस्थानम्	१४९
मृत्युतारकम्	११९
यज्ञः	१९१
यतयः	४७–२
यमः	२३
रक्षा	९०–२
रत्नवेदिका	१४९
रविः	१४९
रसः	९१
रसतेजसी	९१
राक्षोघ्नम्	१६४
रुद्रः ३७, ११८, १४९–३, १६३, १६७, १९४,	
रुद्रचरितम्	३२
रुद्रदैवत्या	१२
रुद्रस्नानम्	१४२
रुद्राक्षाः २, १२३–२, १५७, १५९, १६३	
रौद्री	९१
लक्ष्मीः	१९०
लिङ्गम	३४
लिङ्गलिप्तम्	११२
वत्सः	९८
वसवः	१०७
वह्निः	१९१
वाणी	१९०
वामदेवः	७९
वासुदेवः	११७–२
विचालनस्थानम्	१४१
विद्या ३, ९०, ९८, २१४	
विद्याशक्तिः	९८
विधिस्नानम्	१०४
विनायकः	२३
विभूतिः	८९, ९०–२

पदम्	पुटसंख्या	पदम्	पुटसंख्या
विरक्तिदम्	११२	शिवरूपम्	९९
विरजानलजम्	१११–२	शिवसायुज्यम्	१७४
विरिञ्चिः	१७०	शिवाग्निजम	११२
विश्वधाम	२२४	शुक्लाभः	११७
विश्वरूपः	२१७	शुद्धचैतन्यम्	८९
विश्वाधिकः	१३७–२	शुक्लम्	२८
विश्वेदेवाः	११८	शूद्राः	१९८
विष्णुदैवत्या	१२	शैवम्	२
विष्णुब्रह्ममहेश्वराः	१९०	षड्वक्त्रम्	१६१
वेदिः	१९१	षोडशदेवताः	१०८
वैकङ्कती	१००	षोडशस्थानम्	१०८
वैद्युतम्	२९	सकलरुद्रमन्त्रजापी	६८
वैयासिकिः	१७०	सच्चिदानन्दः	८६
वैराग्यम्	७६	सत्यम्	२३
वैराग्यस्थानम्	१४१	सदाशिवः	९४
वैश्याः	१९८	सद्योजातम्	७९
वैष्णवम	२	सप्तवक्त्रम्	१६१
शक्तिः	९३	सर्वव्यापी	२७
शक्तिकारी	९१	सम्मर्शः	१३९
शङ्करः	१६९	साङ्ख्यादितत्त्वभेदाः	७
शतरुद्रीयम्	९६	साम	१११
शम्भुः	१८	सिद्धमन्त्रः	६४
शान्तिः	३३–२, ९०, २०८	सुपर्णा	२०६
शान्त्यतीता	९०	सुमना	९०
शाम्भवम्	४१	सुरभिः	९०

पदम्	पुटसंख्या	पदम्	पुटसंख्या
सुशीला	९०	स्पर्शाः	२
सुषुप्तिः	१६	स्वात्मपरिज्ञानी	१९९
सूर्यात्मा	९१	स्वाहा	१९१
सूक्ष्मम्	२८	स्विष्टकृतम्	१००
सूत्रत्रयम्	२	स्वप्नम्	१६
सोमात्मा	९१	स्वयंप्रकाशः	१७
संयोगः	१७६	स्वराः	२
संस्कारः	११३	हुताशनः	१४९
संस्पर्शः	१३६	हृदयम्	८६
संवर्तकः	१२१	हंसः	१७९
स्थानम्	७५		

Upanisads – Śaiva
Philosophy – Upanisads

D.G.A. 80.
CENTRAL ARCHAEOLOGICAL LIBRARY
NEW DELHI
Borrowers record.

Call No.—Sa2Vu/Mah-7903

Author— Mahadeva Sastri, A. Ed.

Title— Saiva-Upanishads with comm. of Sri Upanishad-Brahma-Yogin.

Borrower's Name	Date of Issue	Date of Return

P.T.O.

Iyar Library Series—No. 10

EDITOR :
RINIVASA MURTI, B.A., B.L., M.B. & C.M., VAIDYARATNA
Director, Adyar Library

THE S'ĀKTA UPANIṢADS

WITH THE COMMENTARY OF

S'RĪ UPANIṢADBRAHMAYOGIN

THE S'ĀKTA UPANIṢADS

WITH THE COMMENTARY OF

S'RĪ UPANISAD-BRAHMA-YOGIN

EDITED BY

PANDIT A. MAHADEVA SASTRI, B.A.

Director, Adyar Library

THE ADYAR LIBRARY

1950

Price Rs. 3-8-0

Printed by C. Subbarayudu, at the Vasanta Press,
The Theosophical Society, Adyar, Madras

अष्टोत्तरशतोपनिषत्सु

शाक्त-उपनिषदः

श्री उपनिषद्ब्रह्मयोगिविरचितव्याख्यायुताः

अडयार्-पुस्तकालयाध्यक्षेण

अ. महादेवशास्त्रिणा

सम्पादिताः

ॐ नमो
ब्रह्मादिभ्यो
ब्रह्मविद्यासंप्रदायकर्तृभ्यो
वंशऋषिभ्यो
नमो गुरुभ्यः

DEDICATED TO

Brahma and the Rishis,
The Great Teachers
Who handed down Brahmavidya
through Generations

PREFACE

THE first edition of the S'ĀKTA UPANIṢADS was issued by the then Director of the Adyar Library, Pandit A. Mahadeva Sastri in 1925. It went out of print in 1948. The demand for copies of the work showed steady increase, and the present edition is now issued to meet the demand. This is only a reprint of the first edition.

Adyar Library G. SRINIVASA MURTI,
17-4-1950 *Hony. Director*

EDITOR'S NOTE TO THE FIRST EDITION

THE materials on which is based this edition of the S'ĀKTA-UPANIṢADS comprised in this volume are the same as those described in the volume of *The Yoga Upaniṣads.*

5th November, 1925 A. MAHADEVA SASTRI

मन् सम्पुटे अन्तर्गतानामुपनिषदां सूची

उपनिषन्नाम	ईशादिसंख्या	पुटसंख्या
त्रिपुरोपनिषत् . .	८२	१
त्रिपुरातापिन्युपनिषत् .	८०	११
देव्युपनिषत् . .	८१	९३
बह्वृचोपनिषत् . .	१०७	६१
भावनोपनिषत् . .	८४	६८
सरस्वतीरहस्योपनिषत् .	१०६	७४
सीतोपनिषत् . .	४९	८९
सौभाग्यलक्ष्म्युपनिषत् .	१०९	१०९

विषयसूचिका

पुटसंख्या

१. त्रिपुरोपनिषत्

चिच्छक्तिस्वरूपम् १
चिच्छक्तिं प्रति प्रार्थना २
कामेश्वरस्वरूपम् ३
आवरणदेवताः ४
शिवकाममुन्दरीविद्याफलम् . . . ४
आदिमूलविद्योद्धारः ५
विरक्तानामादिविद्याज्ञानफलम् . . . ५
देवीज्ञानफलम् ५
मन्दाधिकारिणां ध्यानविशेषः . . . ६
अधमाधिकारिणामनुष्ठानं तत्फलं च . . . ७
निष्कामोपासकस्य ब्रह्मत्वप्राप्तिः . . . ८

२. त्रिपुरातापिन्युपनिषत्

प्रथमोपनिषत्

त्रिपुरास्वरूपम् ११
त्रिपुरामहामनुः १२
शिवशक्तियोगात् प्रपञ्चसृष्टिः . . . १३
वाग्भवकूटस्य गायत्र्या समन्वयः . . . १३

पुटसंख्या

कामकूटस्य गायत्र्या समन्वयः . . . १७
शक्तिकूटस्य गायत्र्या समन्वयः . . . १९
कामाकामधियां विशिष्टविद्याफलम् . . . २०
शक्तिशिवादिद्वादशविद्योद्धारः . . . २०
महात्रिपुरादेवीध्यानप्रकारः . . . २९

द्वितीयोपनिषत्

त्रिपुराविद्यामधिकृत्य प्रश्नः . . २६
त्रिपुराविद्या २७
महाविद्येश्वरीविद्या २८
सर्वरक्षाकरीविद्या २९
त्रिपुरेशी-आत्मासनरूपिणी-शक्तिशिवरूपिणीविद्याः . ३०
त्रिपुरवासिनीविद्या ३१
त्रिपुराम्बाविद्या ३२
श्रीचक्रस्याऽनुलोमक्रमः ३३
श्रीचक्रस्य प्रतिलोमक्रमः ३४
श्रीचक्रे महात्रिपुरसुन्दरीपूजा . . . ३६
पूजाफलम् ३७

तृतीयोपनिषत्

मुद्रासामान्यलक्षणम् ३७
योन्यादिनवमुद्रालक्षणम् ३८
पञ्चबाणमुद्रालक्षणम् ३९
नवबीजोद्धारः ४०
कामकलाचक्रम् ४०
क्षेत्रेशपूजा ४१
कुलकुमारीपूजा ४२

पुटसंख्या

चतुर्थोपनिषत्

मृत्युञ्जयोपदेशः ४२
त्र्यम्बकादिशब्दार्थविवरणम् . . . ४३
भगवतीदर्शनसाधनमन्त्रः . . . ४४

पञ्चमोपनिषत्

निर्विशेषब्रह्मजिज्ञासा ४६
परमात्मनिरूपणम् ४७
मनोनिरोधः ४७
ब्रह्मज्ञानाद्ब्रह्मभावप्राप्तिः . . . ४८
सविशेषब्रह्मानुसन्धानान्निर्विशेषब्रह्माधिगमः . . ४८
निरुपाधिकात्मदर्शनम् ४९
शब्दब्रह्मध्यानात् परब्रह्माधिगमः . . . ५०
परमात्मदर्शनम् ५०
श्रीकामराजविद्यामहिमा ५१

३. देव्युपनिषत्

चिच्छक्तेः सर्वात्मरूपेण ब्रह्मत्वम् . . . ५३
चिच्छक्तेः सर्वधारकत्वम् . . . ५४
देवकृतदेवीस्तुतिः ५५
आदिविद्योद्धारः ५६
आदिविद्यामहिमा ५७
भुवनेश्येकाक्षरीमन्त्रः ५७
महाचण्डीनवाक्षरविद्या ५८
विद्याजपस्तुतिः ५९

पुटसंख्या

४. बह्वृचोपनिषत्

चिच्छक्तिस्वरूपम् ६१
चिच्छक्तेर्ब्रह्मादिस्थावरान्तकारणत्वम् . . ६२
चिच्छक्तेः शब्दतदर्थरूपभावनम् . . . ६२
चिच्छक्तेरद्वितीयत्वम् . . . ६४
प्रत्यक्परचिदैक्यभावना ६५
अम्बिकाऽऽदिरूपेण चिच्छक्तिभावना . . ६६
ब्रह्मण एव मुख्यज्ञेयत्वम् . . . ६६

५. भावनोपनिषत्

शिवस्य शक्तियोगादीश्वरत्वम् . . . ६८
अध्यात्मदेहत्रयश्रीचक्रभावना . . . ६९
देवताया आवाहनाद्युपचारभावना . . . ७१
भावनाफलम् ७३

६. सरस्वतीरहस्योपनिषत्

सरस्वतीदशश्लोक्यास्तत्त्वज्ञानसाधनत्वम् . . ७४
दशश्लोक्या ऋष्यादि ७५
प्रणो देवीति मन्त्रस्य ऋष्यादि . . . ७५
आ नो दिव इति मन्त्रस्य ऋष्यादि . . . ७६
पावका न इति मन्त्रस्य ऋष्यादि . . . ७६
चोदयित्री इति मन्त्रस्य ऋष्यादि . . . ७७
महो अर्ण इति मन्त्रस्य ऋष्यादि . . . ७७
चत्वारि वागिति मन्त्रस्य ऋष्यादि . . . ७८

पुटसंख्या

यद्वागिति मन्त्रस्य ऋष्यादि . . . ७८
देवीं वाचमिति मन्त्रस्य ऋष्यादि . . . ७८
उत त्व इति मन्त्रस्य ऋष्यादि . . . ७९
अम्बितम इति मन्त्रस्य ऋष्यादि . . . ७९
देवताप्रार्थना ८०
भगवत्या ब्रह्मत्वं प्रकृतित्वं पुरुषत्वं च . . ८१
मायावशाद्भगवत्या ईश्वरत्वम् . . . ८२
मायाया विक्षेपावरणशक्तिद्वयम् . . . ८३
जीवस्वरूपम् ८३
आवृतिनाशे भेदनाशः ८४
दृश्यप्रपञ्चे ब्रह्मप्रकृत्यंशयोर्विवेकः . . . ८४
ब्रह्मांशे समाधिविधानम् ८५
षड्विधसमाधयः ८५
निर्विकल्पसाक्षात्कारः ८७

७. सीतोपनिषत्

सीताया मूलप्रकृतित्वम् ८९
सीताप्रकृतेरक्षरार्थः ९०
सीताया व्यक्ताव्यक्तस्वरूपम् . . . ९०
सीताया ब्रह्मत्वम् ९२
सीताया इच्छाऽऽदिशक्तित्रयत्वम् . . . ९३
इच्छाशक्तेः श्रीभूमिनीलाऽऽत्मकत्वम् . . ९३
सोमरूपा नीला ९३
सूर्यादिरूपा नीला ९४
अग्निरूपा नीला ९५
श्रीदेवीरूपेच्छाशक्तिः ९५

पृष्ठसंख्या

भूदेवीरूपेच्छाशक्तिः . . . ९५
इच्छाशक्तेः सर्वरूपत्वम् . . . ९६
इच्छाशक्तेर्भुवनाधारत्वम् . . . ९६
क्रियाशक्तेर्नादोद्भवः ९६
साङ्गोपाङ्गवेदतच्छाखाकथनम् . . . ९७
नादस्यैव वेदशास्त्रद्वारा ब्रह्मभवनम् . . . १००
साक्षाच्छक्तिस्वरूपम् १०१
योगशक्तिरूपेच्छाशक्तिः १०१
भोगशक्तिरूपेच्छाशक्तिः . . . १०२
वीरशक्तिरूपेच्छाशक्तिः १०३

८. सौभाग्यलक्ष्म्युपनिषत्

प्रथमः खण्डः

सौभाग्यलक्ष्मीविद्याजिज्ञासा . . . १०५
सौभाग्यलक्ष्मीध्यानम् १०५
श्रीसूक्तस्य ऋष्यादि १०६
सौभाग्यलक्ष्मीचक्रम् १०७
एकाक्षरीमन्त्रस्य ऋष्यादि . . . १०८
एकाक्षरीचक्रम् १०९
लक्ष्मीमन्त्रविशेषाः १०९

द्वितीयः खण्डः

उत्तमाधिकारिणां ज्ञानयोगः . . . ११०
षण्मुखीमुद्राऽन्वितप्राणायामयोगः . . . १११
नादाविर्भावपूर्वको ग्रन्थित्रयभेदः . . . ११२
अखण्डब्रह्माकारवृत्तिः ११३

पुटसंख्या

निर्विकल्पभाव: ११४
समाधिलक्षणम् ११५

य: खण्ड:

आधारचक्रम् ११६
स्वाधिष्ठानचक्रम् ११७
नाभिचक्रम् ११७
हृदयचक्रम् ११८
कण्ठचक्रम् ११८
तालुचक्रम् ११८
भ्रूचक्रम् ११९
ब्रह्मरन्ध्रचक्रम् ११९
आकाशचक्रम् ११९
एतदुपनिषदध्ययनफलम् १२०

ाध्येयपदसूची १२१
ाषपदसूची १२५

त्रिपुरोपनिषत्

वाङ्मे मनसि—इति शान्तिः

चिच्छक्तिस्वरूपम्

तिस्रः पुरस्त्रिपथा विश्वचर्षणा अत्राकथा अक्षराः संनिविष्टाः ।
अधिष्ठायैना अजरा पुराणी महत्तरा महिमा देवतानाम् ॥ १ ॥
नवयोनिं नव चक्राणि दीधिरे नवैव योगा नव योगिन्यश्च ।
नवानां चक्रा अधिनाथाः स्योना नव भद्रा नव मुद्रा महीनाम् ॥ २ ॥

त्रिपुरोपनिषद्वेद्यपारमैश्वर्यवैभवम् ।
अखण्डानन्दसाम्राज्यरामचन्द्रपदं भजे ॥

इह खलु ऋग्वेदप्रविभक्तेयं त्रिपुरोपनिषत् श्रीविद्येयत्ताप्रकटनव्यग्रा ब्रह्ममात्रपर्यवसन्ना विजयते । अस्याः संक्षेपतो विवरणमारभ्यते । उत्तमाधिकारिण उपलभ्य तेषां चित्तशुद्धिप्राप्यज्ञानद्वारा परमपुरुषार्थसिद्धये श्रुतिरवान्तररूपेण प्रवृत्तेत्याह—तिस्र इति । या स्वाज्ञदृष्टिविकल्पिता व्यष्टिसमष्टिभिदाजुष्टस्थूलसूक्ष्मकारणतनव एव तिस्रः पुरः सन्ति, ये देवयानपितृयानादिभेदेन कर्मोपासनाज्ञानकाण्डभेदेन ज्ञानविज्ञानसम्यग्ज्ञानभेदेन वा विश्वेन व्यावहारिकजीवेन चर्षणा

विकल्पिता ये त्रिपथाः त्रयः पन्थानः सन्ति, किंच "अकथादि श्रीपीठ" इत्यादिश्रुत्यनुरोधेन अत्र श्रीचक्रे अकथाद्यक्षराः सन्निविष्टा यान्यकारादिक्षकारान्तान्यक्षराणि सन्निविष्टानि सन्निवेशितानि सन्ति, ता एनाः पुरश्च एनान् पथश्च एतान्यक्षराणि च जीवेशप्रत्यक्परात्मना अधिष्ठाय ब्रह्मादिदेवतानामपि महिमा सृष्ट्यादिसामर्थ्यरूपिणी स्थूलादिशरीरत्रयवैलक्षण्यात् अजरा सत्तासामान्यातिद्वारीभूतचित्सामान्यरूपत्वात् महत्तरा काचन पुराणी चिरन्तना चिच्छक्तिर्विजयते ॥ १ ॥ सेयं चिच्छक्तिः कीदृशीत्यत आह—नवयोनिमिति। यामाश्रित्य नवयोनिं नवयोनयः महात्रिपुरसुन्दर्यादिशक्तयः सर्वानन्दमयादिनवचक्राणि च यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधिसहजयोगभेदेन नवैव योगाश्च तथा नवचक्रवासिन्यः नवयोगिन्यश्च दीधिरे प्रकाशन्ते नवानां महीनां देवताऽऽधारभूमीनां चक्रानाथाः स्योनाः द्वारपालिन्यश्च कामेश्वर्यादिभद्राश्च योन्यादिनवमुद्राश्च ॥ २ ॥

चिच्छक्तिं प्रति प्रार्थना

एका स आसीत् प्रथमा सा नवासीदा सोनविंशादा सोनत्रिंशात्।
चत्वारिंशादथ तिस्रः [1]समिधा उशतीरिव मातरो माऽऽविशन्तु ॥
[2]ऊर्ध्वज्वलनं ज्योतिरग्रे तमो वै तिरश्चीनमजरं तद्रजोऽभूत्।
आनन्दनं मोदनं ज्योतिरिन्दोरेता उ वै मण्डला मण्डयन्ति ॥ ४ ॥

यामाश्रित्य सदा दीधिरे सेयं प्रथमा प्रधाना एकैवासीत्। नवभद्रादयस्तद्भिन्ना इत्यत आह—सेति। सैव नवभद्रादयः आसीत् ज्ञानकर्माक्षप्राणपञ्चकान्तःकरणचतुष्टयभेदेन एकोनविंशान् तत्त्वग्रामात् याः शक्तयो निष्पन्नास्तत्स्वरूपेणापीयमेवास। किंच कर्मज्ञानाक्षप्राणपञ्चकान्तःकरणचतुष्टयविषय-

[1] समिद्ध'—अ २.

[2] ऊर्ध्वज्वलज्ज्वलनं—मु, उ. ऊर्ध्वज्वलन् ज्वलनं—उ १.

जातपञ्चभूतोपप्राणभेदेन एकोनत्रिंशत्तत्वग्रामात् याः शक्तयो निरूपकास्ताभिर्देवताभि-यमेवास। किंच चतुर्दशाक्षाधीशतूलामूलाविद्याकर्मत्रयविक्षेपावरणमुदितादित्रिपुट-चतुष्टयविश्वविश्वादितुर्यप्राज्ञान्तभेदेन चत्वारिंशच्छक्तयो या विद्यन्ते ताभिर्देवताभी-यमेवासेत्यर्थः। सम्यगिद्धाः समिधाः क्रियाज्ञानेच्छाऽऽत्मकज्ञानविज्ञानस्वरूपज्ञानशक्तयः तिस्रः स्वस्वसुतान् प्रति उशतीः उशत्यः स्वात्मजक्षेत्रकान्नित्य. मातर इव मा मां ब्रह्मपदवीमात्तुमुद्युक्तं आविशन्तु अजडक्रियाज्ञानेच्छाशक्तयो मां प्रविशन्त्वित्यर्थः ॥ ३ ॥ किंच—ऊर्ध्वेति। "अथ तत ऊर्ध्वं उदेता", "अथ यदतः परो दिवो ज्योतिर्दीप्यते," "ज्योतिर्ज्वलति ब्रह्माहमस्मि" इति श्रुत्यनुरोधेन पराक्प्रपञ्चेन्धनमाश्रित्य तत ऊर्ध्वं ज्वलतीति ऊर्ध्वज्वलनं प्रत्यग्ज्योतिः अग्रे परागवृत्युदयात् पूर्वमेव सदा मेऽभूत् तद्वैपरीत्येन निश्चीनं पराग्रूपं तमः रजः सत्त्वं च स्वात्तपराग्भावमुत्सृज्य अजरं ब्रह्म अभूत्। एवं ग्रसित्वा अहं ब्रह्मास्मीति प्रत्यगभिन्नब्रह्मभावेन आ समन्तान्नन्दति स्वातिरिक्तं न किंचिदस्तीति मोदत इति आनन्दनं मोदनं ज्योतिः स्वातिरिक्ताज्ञानान्धकारग्रास-प्रत्यगभिन्नपरमात्म—इन्दोः यद्विजयते न हि तदतिरिक्तमस्ति तदेवाहमस्मीति या वै खण्डमण्डलाकाराखण्डसविकल्पनिर्विकल्पवृत्तय एना मण्डयन्ति मां ब्रह्म-भावापन्नमलंकुर्वन्ति ता अपि ब्रह्मणि विलीयन्ते। ततः परमात्मा निरतियोगिकाद्वैतरूपेणावशिष्यत इत्यर्थः ॥ ४ ॥

कामेश्वरस्वरूपम्

यास्तिस्रो रेखाः सदनानि भूस्त्रीस्त्रिविष्टपास्त्रिगुणास्त्रि[1]प्रकाराः।
एतत्त्रयं पूरकं पूरकाणां [2]मन्त्रप्रतते मदनो मदन्या ॥ ५ ॥

याः पुनः तिस्रो रेखाः जडक्रियाज्ञानेच्छाशक्तयो यानि सदनानि जाग्रत्स्वप्नसुषुप्तितुरीयस्थानानि लोचनकण्ठहृदयसहस्रारचक्राणि भूस्त्रीरिति

[1] प्रकाशाः—क.

[2] मन्त्रप्रथते—अ १, अ २, क. मन्त्रः प्रथते—उ. मन्त्री प्रथये—सु, अ.

भूर्भुवःसुवरिति त्रिलोकाः त्रिविष्टपाः तमआदिगुणाः तत्रैकैकगुणस्य तमस्तम-इत्यादिभेदेन त्रित्रिप्रकाराश्च यामाश्रित्य वर्तन्ते, त्रिरेखात्रिविष्टपत्रिगुणतया यदुक्तं एतत्त्रयं पूरकाणां ब्राह्म्यादिस्वचक्रावरणानामपि रेखाविष्टपगुणाभिधानकामेश्वर्यादिशक्तित्रयं पूरकं प्रधानमित्यर्थः। साङ्गावरणदेवतां विज्ञाय ये स्वचक्रमर्चयन्ति ते स्वधाम त्रैपुरं विशन्तीत्याह—मन्त्रेति। मन्त्रप्रतते आदिविद्यातदङ्गदेवता-मन्त्रप्रतते श्रीचक्रे मदन्या कामिन्या मध्यत्रिकोणरूपिण्या चिच्छक्त्या सह बिन्दुरूपी मदनः कामेश्वरो विजयते ॥ ५ ॥

आवरणदेवताः

मदन्तिका मानिनी मङ्गला च सुभगा च सा सुन्दरी सिद्धिमत्ता।
लज्जा मतिस्तुष्टिरिष्टा च पुष्टा लक्ष्मीरुमा ललिता लालपन्ती ॥ ६ ॥

तत्परिवारावरणदेवतास्तु मदन्तिकेत्यादिपञ्चदशनित्या भवन्ति ॥ ६ ॥

शिवकामसुन्दरीविद्याफलम्

इमां विज्ञाय [1]सुधया मदन्ती परिसृता तर्पयन्तः स्वपीठम्।
नाकस्य पृष्ठे महतो वसन्ति परं धाम त्रैपुरं चाविशन्ति ॥ ७ ॥

एवं परिवारदैवतैर्या परिसृता परितः सेविता सेयं सुधया मदन्ती स्वातिरिक्तं न किंचिदस्त्यहमेवेदं सर्वमिति स्वरूपानुसन्धानविस्मृतस्वातिरिक्ता चिच्छक्तिः शिवेन साकं विजयते। ये मुमुक्षवः इमां शिवकामसुन्दरीं निष्प्रतियोगिकचिन्मात्रपर्यवसन्नां विज्ञाय तज्ज्ञानसमकालं ते तत्पदं यान्ति। य एवं यदि ज्ञातुमशक्तास्ते तदा निष्कामधिया यावज्जीवं स्वपीठं श्रीचक्रं स्ववर्णाश्रमानुरोधेन क्षीरादिभिः तर्पयन्तः सन्तः कालं नयन्ति, अथ देहावसानानन्तरं महतो नाकस्य पृष्ठे श्रीपुरे ज्ञानाभ्यासं कुर्वन्त आभूतसंप्लवं वसन्ति ततः त्रैपुरं परं धाम विशन्ति कृतकृत्यपदं भजन्तीत्यर्थः ॥ ७ ॥

[1] सुदया—उ १.

आदिमूलविद्योद्धारः

कामो योनिः कामकला वज्रपाणिर्गुहा हसा मातरिश्वाऽभ्रमिन्द्रः ।
पुनर्गुहा सकला मायया च पुरूच्येषा विश्वमाताऽऽदिविद्या ॥ ८ ॥

आदिमूलविद्यामुद्धरति—काम इति । मूलविद्या देव्युपनिषदि व्याख्याता ॥

विरक्तानामादिविद्याज्ञानफलम्

षष्ठं सप्तममथ वह्निसारथिमस्या मूलत्रिकमादेशयन्तः ।
कव्यं कविं कल्पकं काममीशं तुष्टुवांसो अमृतत्वं भजन्ते ॥ ९ ॥

केवलविरक्तानामादिविद्यासारं तद्ध्येयवस्तु तज्ज्ञानफलं चाह— षष्ठमिति । मूलविद्यायाः षष्ठं अक्षरं हेति शिवबीजं तत्सप्तमं सेति शक्तिबीजं पुनः वह्निसारथिः केति कामेशबीजं एवं शिवसंपुटितशक्तिबीजं एवं अस्या आदिविद्यायाः हसकेति मूलत्रिकं आदेशयन्तो वाचोपांशुतया जपन्तो मनसा वाचा श्रुतिशिरोभिरतन्निरसनोपायतः कव्यं अशब्दमस्पर्शमिति कविं क्रान्तदर्शिनं सर्वज्ञं स्वातिरेकेण सर्वं नास्तीति ज्ञत्वाज्जीवेशात्मना व्यष्टिसमष्टिप्रपञ्चकल्पकं, यद्वा स्वातिरिक्तजीवशिवतत्कल्पनीयव्यष्टिसमष्टिप्रपञ्चजातं नेतीति स्वातिरिक्तापवादकृद्वेदान्तशास्त्रकल्पकं निश्वसितश्रुत्यनुरोधेन वेदशास्त्राविर्भावहेतुत्वात्, यथाकामं सर्वापह्नवसिद्धब्रह्ममात्रतयाऽवस्थातुमीशत्वात् काममीशं तुष्टुवांसः ब्रह्माहमस्मीति स्तुतिं कुर्वन्तो मुमुक्षवः अमृतत्वं कैवल्यं भजन्ते विदेहमुक्ता भवन्तीत्यर्थः ॥ ९ ॥

देवीज्ञानफलम्

पुरं हन्त्रीमुखं [1]विश्वमातू रवे रेखा स्वरमध्यं तदेषा ।
बृहत्तिथिर्दश[2]पञ्चादित्या सषोडशिकं पुरमध्यं बिभर्ति ॥ १० ॥

[1] विश्वमाभू—क. विश्वमात्म—अ १. [2] पञ्चाचनि—अ, अ २, क.

या षोडशावयवपुरमध्यं बिभर्ति तत्स्वरूपं तज्ज्ञानफलं चाह—**पुरमिति**। भक्तानुग्रहायैवं रूपं या बिभर्ति तामेव विश्वमातुर्व्यक्तिं निष्कामधिया ज्ञात्वा स्वस्वभावानुरोधेन तत्तत्फलमेतीत्युक्तं, तत्र सा किं किं रूपं बिभर्तीत्यत्र—"**पुरमेकादशद्वारं**" इति श्रुत्या **पुरं** स्वाविद्यापदतत्कार्यजातं विश्वविश्वाद्यविकल्पानुज्ञैकरसान्तत्रिपञ्चदशतनुभिस्तद्बिभर्तीत्यर्थः। किं च हसकेति **हन्त्रीमुखं** आदिविद्यासाररूपं बिभर्तीति सर्वत्रानुषज्यते। **रवेः रेखा** आदित्यमण्डलरूपं ईं ओं इति वा **स्वरमध्यं** यत् तदेषा देवी बिभर्ति। **बृहत्तिथिरिति** निमेषादिकल्पान्तकालविशेषः **दशपञ्चादिनित्या** पञ्चदशतिथिवारनक्षत्रादिरूपं नित्यदेवताभावमापन्नपञ्चदशतिथिभिः सह बृहत्तिथिरूपं **सषोडशिकं** पूर्वोक्त**पुरमध्यं** स्वाविद्यापदारोपाधारेश्वररूपं **बिभर्ति**। एवं देवतापरिग्रहोपाधिषु यत्र यत्र यन्मनः स्पृहयति तत्तत्परदेवताधिया निष्कामचित्ताञ्चितमुनिनोपास्यं भवति, तेनायं चित्तशुद्धिप्राप्यज्ञानद्वारा कृतकृत्यो भवेदित्यर्थः॥ १०॥

मन्दाधिकारिणां ध्यानविशेषः

यद्वा मण्डलाद्वा स्तनबिम्बमेकं मुखं चाधस्त्रीणि गुहासदनानि।
कामीकलां कामरूपां चिकित्वा नरो जायते कामरूपश्च[1]काम्यः॥

एवं ध्यातुमशक्तानां सकामानां वा ध्यानभेदमाह—**यद्वेति**। रवीन्द्वादि**मण्डलात्** आविर्भूतां **स्तनबिम्बमेकं मुखं चाधः** इत्युपलक्षितसर्वाङ्गसुन्दरीं **त्रीणि गुहासदनानि** इत्यनेन स्थूलसूक्ष्मकारणभेदेन देहत्रयगुहासनां कामिनः परमेश्वरस्य **कलां** स्वभक्तपटलचित्तग्राहककामरूपां चिच्छक्तिं **चिकित्वा** ध्यात्वा कामनापूरितचित्तः **काम्यो नरः** स्वकामनानुरूपेण **कामरूपश्च** भवति कामितार्थभाक् भवतीति यत्तत्सामान्यफलमित्यर्थः। काम्यफलस्य जन्मादिहेतुत्वेन त्रैवर्णिकैर्मुमुक्षुभिः काम्योपासना न कार्येत्यत्र—

[1] कामः—अ, अ २, क.

मोक्तुमिच्छसि चेद्ब्रह्मन् कामनोपासनं त्यज ।
निष्कामाञ्चितधीवृत्त्या मामुपास्य विमोक्ष्यसे ॥

इति स्मृतेः । त्रैवर्णिकैर्निष्कामबुद्ध्या वाममार्गाचारोऽपि चित्तशुद्धिप्राप्त्यज्ञान-हेतुरिति चेन्न, परधर्मत्वात् । न हि परधर्माचरणं कृत्वा यः कोऽपि स्वातिरिक्त-भ्रमतो मोक्तुं पारयति परधर्मानुष्ठानस्यानर्थहेतुत्वादित्यत्र—

श्रेयान् स्वधर्मो विगुणः परधर्मात् स्वनुष्ठितात् ।
स्वधर्मे निधनं श्रेयः परधर्मो भयावहः ॥

इति स्मृतेः । त्रैवर्णिकैरपि चित्तशुद्ध्यर्थं चिच्छक्त्युपासना कर्तव्येति चेत्, सत्यं दक्षिणाचारेण कर्तव्यम् । त्रैवर्णिकानां निष्कामधिया दक्षिणमार्गाचरणं कर्तव्यमित्यत्र—"निष्कामानामेव श्रीविद्यासिद्धिः न कदाऽपि सकामानाम्" इत्यादिश्रुतेः ॥ ११ ॥

अधमाधिकारिणामनुष्ठानं तत्फलं च

परिसृतं झषमाजं पलं च भक्तानि [1]योनिः सुपरिष्कृताश्च ।
निवेदयन् देवतायै महत्यै स्वात्मीकृते सुकृते सिद्धिमेति ॥ १२ ॥
सृण्येव स्मितया विश्व[2]चर्षणिः पाशेनैव प्रतिबध्नात्यभीकान् ।
इषुभिः पञ्चभिर्धनुषा च विद्धत्यादिशक्तिररुणा विश्वजन्या ॥ १३ ॥

शूद्रादीनां निर्विद्यत्वेन स्वच्छन्दाचारत्वात्, "तूष्णीं शूद्रमजनयत् । तस्माच्छूद्रो निर्विद्योऽभवत्" इति श्रुत्यनुरोधेन शूद्रो निर्विद्यः सन् स्वच्छन्दचारी भूत्वा वामाचारानुकूलद्रव्यसेवी भवति। स्वशरीरभोगायेदं मध्वादिसेवनमित्यपेक्षया देवताऽऽराधनधियाचरणस्य वरत्वात् । एवमनुष्ठाता शूद्रः स्वभावनानुरोधेन सिद्धिमेतीत्याह—**परिसृतमिति** । **परिसृतं** यथावत् संस्कृतं **झषमाजं पलं, च**-शब्दान्मद्यादिर्गृह्यते, **भक्तानि** अन्नानि **योनिरिति** स्पष्टमवगम्यते । एवं

[1] योनीः—उ, मु.
[2] चर्षणीः—उ १.

स्वभोज्यद्रव्ये स्वात्मोपभोगधियं त्यक्त्वा पूर्वं देवतायै निवेद्य ततः स्वात्मसात्करणादयमपि सुकृते लोके सिद्धिमेतीति । तथाऽपि शूद्रसामान्येनैवं कर्तव्यमिति न हि नियमोऽस्तीत्यर्थः । स्वस्ववर्णानुरोधेन सर्वैरपि चित्तशुद्ध्यर्थं देवतोपासना कार्येत्यत्र—"विप्राः क्षोणिभुजो विशस्तदितरे क्षीराज्यमध्वासवैः" इति, "चतुर्थपर्याये निवृत्तिरिष्टा" इति च स्मृतेः ॥ १२ ॥ एवमनुष्ठातुर्देवताप्रातिकूल्येन बन्धनमाह—**सृण्येवेति** । **सितया** सरस्वत्या **विश्वजन्या** विश्वजनन्या लक्ष्म्या च सह **आदिशक्तिररुणा** गौरी विश्वं तदुपलक्षितावियापदतत्कार्यजातं स्वातिरिक्तप्रपञ्चं निर्विशेषब्रह्मज्ञानविज्ञानसम्यग्ज्ञानतत्त्वज्ञानरूपेण निष्प्रतियोगिकब्रह्ममात्रावशेषतया चर्षयत्युपसंहरत्यपह्नवं करोतीति **विश्वचर्षणिः** ब्रह्ममात्रविद्या भूत्वा, अनयैव **सृण्या** सृत्या काम्यवर्त्मना मुमुक्षुभिरनादरणीयेन य उपासते तान् इदं मे स्यात् इदं मे स्यात् इदं मा भूत् इत्यभितः परितः स्वातिरिक्तविषये कामयन्तीति **अभीकान** कामिनो जननमरणपरंपराहेतुस्वातिरिक्तास्तितापाशैः स्वाज्ञानवृत्तिभिर्गाढं निरुच्छ्वासं **प्रतिबध्नाति** सम्यग्बद्ध्वा संसारसागरमहावर्ते पातयति । यथा ते पुनः संसारभ्रमणाद्बहिर्न गच्छन्ति तथा **पञ्चबाणेषुभिः धनुषा च विद्धति** वेधनं करोति न कदाऽपि तान् प्रत्यङ्मुखान् करोतीत्यर्थः । तथा चेश्वरस्मृतिः—

तानहं द्विषतः क्रूरान् संसारेषु नराधमान् ।
क्षिपाम्यजस्रमशुभानासुरीष्वेव योनिषु ॥
आसुरीं योनिमापन्ना मूढा जन्मनि जन्मनि ।
मामप्राप्यैव कौन्तेय ततो यान्त्यधमां गतिम् ॥

ादिः ॥ १३ ॥

निष्कामोपासकस्य ब्रह्मत्वप्राप्तिः

भगः शक्तिर्भगवान् काम ईश उभा दाताराविह सौभगानाम् ।
समप्रधानौ समसत्त्वौ समोजौ तयोः शक्तिरजरा विश्वयोनिः ॥

परिसृता हविषा भावितेन प्रसंकोचे गलिते वैमनस्कः ।
शर्वः सर्वस्य जगतो विधाता धर्ता हर्ता विश्वरूपत्वमेति ॥ १५ ॥
इयं महोपनिषत्त्रैपुर्या [1]यामक्षयं [2]परमा गीर्भिरीट्टे ।
एषऋग्यजुः परमेतच्च सामायमथर्वेयमन्या च विद्या ॥ १६ ॥
ॐ ह्रीमों ह्रीमित्युपनिषत् ॥ १७ ॥

यः कोऽपि काम्यसृतिं विहाय निष्कामधिया श्रुतिस्मृत्यनुगृहीतशिष्टाचारानुरोधेन चिच्छक्तिं समप्रधानतयोपास्ते सोऽमनस्कत्वमेत्य कृतकृत्यो भवतीत्याह—**भग** इति । सकामनिष्कामभक्तपटलप्रवृत्तिनिवृत्तिमार्गप्रवर्तनशक्तिः चिच्छक्तिस्त्रिपुरा च **भगः** षड्गुणैश्वर्यसंपन्नः **भगवान् कामः** ईशः कामेश्वरश्च तावुभावपि चित्सामान्यात्मना **समप्रधानौ समसत्त्वौ समोजौ** दयाकळेवरौ भूत्वा इह अस्मिन्नेव जन्मनि येषां निष्कामानामाशयाः सुभगा ब्रह्मगोचरा भवन्ति **सौभगाः** तेषां तद्भावानुरोधेन सविशेषनिर्विशेषब्रह्मपददातारौ भवतः । तयोः दयाळवोः शक्तिशिवयोर्मध्ये शरीरत्रयविलक्षणेयं **अजरा विश्वयोनिः** विश्वमाता **शक्तिः** परमदयातनुर्भूत्वा निष्कामधिया स्वोपासकभावितेन ज्ञानविज्ञानसम्यग्ज्ञानहविषा **परिसृता** संतृप्ता सती स्वभक्तप्रसादकारिणी विक्षेपावरणे **प्रसंकोचे गलिते** कृत्वा शिवेन साकं स्वयं स्वोपासकात्मतयाऽवशिष्टा भवति । ततोऽयमुपासकः स्वाज्ञविकल्पितस्वातिरिक्तप्रपञ्चवैमनस्को भूत्वा सर्वस्य **जगतो विधाता** स्रष्टा **धर्ता** पालयिता **हर्ता** उपसंहर्ता **शर्वश्च** ब्रह्मविष्णुमहेश्वरो भूत्वा **विश्वरूपत्वं** विश्वारोपापवादाधिकरणब्रह्मतामपि एति इत्यर्थः ॥ १४–१५ ॥ केयं दयातनुश्चिच्छक्तिरित्यत आह—**इयमिति** । ऋगादिचतुर्वेदः, एवं **अन्या च** चतुष्षष्टिकला **विद्या** च **यामक्षय**संविद्रूपां **परमा गीर्भिः** सृष्ट्यादिदशप्रणवैरष्टोत्तरसहस्रमहावाक्यैरपि **ईट्टे**

[1] यामक्षरं—अ २.
[2] परमो—अ, अ २, क, मु.

महाचिदेकैवेहास्ति महासत्तेति योच्यते ।
निष्कलङ्का समा शुद्धा निरहंकाररूपिणी ॥
सकृद्विभाता विमला नित्योदयवती समा ।
सा ब्रह्मपरमात्मेति नामभिः परिगीयते ॥

इति स्तौति या त्रैपुरीति विख्याता सेयं महोपनिषत् ब्रह्मविद्या निष्प्रतियोगिक-ब्रह्ममात्रपर्यवसन्ना विजयत इत्यर्थः ॥ १६ ॥ तत्तनुः कीदृशीत्यत्र ॐ ह्रीं इति ओंकारार्थतश्चित्त्वं ह्रींकारार्थतश्चिच्छक्तित्वं चेति चिच्छक्तिरित्युच्यते । आवृत्तिरादरार्था । इत्युपनिषच्छब्दस्त्रिपुरोपनिषत्समाप्त्यर्थः ॥ १७ ॥

श्रीवासुदेवेन्द्रशिष्योपनिषद्ब्रह्मयोगिना ।
त्रिपुरोपनिषद्व्याख्या लिखिता स्वात्मगोचरा ।
त्रिपुरोपनिषद्व्याख्याग्रन्थजातं शतं स्मृतम् ॥

इति श्रीमदीशाद्यशोत्तरशतोपनिषच्छास्त्रविवरणे द्व्यशीतिसङ्ख्यापूरकं
त्रिपुरोपनिषद्विवरणं सम्पूर्णम् ॥

त्रिपुरातापिन्युपनिषत्

भद्रं कर्णेभिः—इति शान्तिः

प्रथमोपनिषत्

त्रिपुरास्वरूपम्

अथैतस्मिन्नन्तरे भगवान् प्राजापत्यं वैष्णवं विलयकारणं रूपमाश्रित्य त्रिपुराऽभिधा भगवतीत्येवमादिशक्त्या भूर्भुवः स्वस्त्रीणि स्वर्गभूपातालानि त्रिपुराणि हरमायाऽऽत्मकेन ह्रींकारेण ह्रल्लेखाख्या भवती त्रिकूटावसाने निलये विलये धाम्नि महसा घोरेण व्याप्नोति। सैवेयं भगवती त्रिपुरेति व्यापठ्यते ॥ १ ॥

त्रिपुरातापिनीविद्यावेद्यचिच्छक्तिविग्रहम्।
वस्तुतश्चिन्मात्ररूपं परं तत्त्वं भजाम्यहम् ॥

इह खल्वथर्वणवेदप्रविभक्तेयं त्रिपुरातापिन्युपनिषद् उपासनाकाण्ड-प्रकटनव्यग्रा निर्विशेषब्रह्ममात्रपर्यवसन्ना विजयते। अस्याः स्वल्पग्रन्थतो विवरणमारभ्यते। यथोक्ताधिकारिण उपलभ्यादौ त्रिपुरास्वरूपं श्रुतिः प्रकटयति—अथेति। अथ प्राण्यदृष्टपरिपाकानन्तरं एतस्मिन् अविद्यापदान्तरे

परमदयालुः भगवान् सदाशिवः परमेश्वरः ब्रह्मविष्णुरुद्ररूपमाश्रित्य सत्य-वैकुण्ठकैलासाख्यपुरत्रयाधिपत्यतः त्रिपुराभिधा भगवतीत्येवं स्वीयया आदि-शक्त्या भूर्भुवःस्वर्त्रीणि स्वर्गभूपातालानि वा त्रिपुराणि शिवशक्तिरूपेण ह्रींकारेण या सर्वप्राणिहृदि प्रत्यग्रूपेण विद्योतमाना हृल्लेखाख्या भगवती स्वाविद्याऽण्डत्रिकूटावसाने भ्रूयुगोपरि, यद्वा वाग्भवादित्रिकूटावसाने, निलये गुणसाम्यपीठे चित्सामान्यरूपे स्वातिरिक्तप्रपञ्चविलये धाम्नि घोरेण महसा तेजसा व्याप्नोति। सैवेयं भगवती सर्वैः त्रिपुरेति गीयत इत्यर्थः ॥ १ ॥

त्रिपुरामहामन्त्रः

तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि ।
धियो यो नः प्रचोदयात् परो रजसेऽसावदोम् ॥ २ ॥
जातवेदसे सुनवाम सोममरातीयतो निदहाति वेदः ।
स नः पर्षदति दुर्गाणि विश्वा नावेव सिन्धुं दुरितात्यग्निः ॥ ३ ॥
त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम् ।
उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय मामृतात् ॥ ४ ॥
शताक्षरी परमा विद्या त्रयीमयी साष्टार्णा त्रिपुरा परमेश्वरी ।
आद्यानि चत्वारि पदानि परब्रह्म[1]विकासीनि। द्वितीयानि शाक्तानि।
तृतीयानि शैवानि ॥ ५ ॥

सदाशिवशक्तेस्त्रित्रिपुरायाश्चिच्छक्तिरूपतया तद्गोचराष्टोत्तरशताक्षरीमन्त्रं प्रकाशयति—तदिति । इयमष्टोत्तरशताक्षरीमन्त्रानुष्ठानात् त्रिपुरा प्रसीद-तीत्यर्थः ॥ २–४ ॥ त्रयीमयी वेदत्रयस्वरूपिणी । तत्सवितुरिति आद्यानि

[1] विकासिनी—अ १, अ २, क, ङ.

चत्वारि पदानि परब्रह्मविकासीनि । जातवेदस इति द्वितीयानि शाक्तानि । त्र्यम्बकमिति तृतीयानि शैवानि ॥ ५ ॥

शिवशक्तियोगात् प्रपञ्चसृष्टिः

तत्र लोका वेदाः शास्त्राणि पुराणानि धर्माणि वै चिकित्सितानि ज्योतींषि शिवशक्तियोगादित्येवं घटना व्यापठ्यते ॥६॥

एवं चिच्छिवशक्तियोगादेव लोकादिर्जायत इत्याह—तत्रेति । भूरादिचतुर्दशलोकाः । ऋगादिचत्वारो वेदाः । भरतमन्त्रशब्दादिषट् शास्त्राणि । भागवतादीनि पुराणानि । मन्वादिप्रणीतानि धर्माणि सर्वाणि धर्मशास्त्राणि वै चिकित्सितानि भिषक्शास्त्राणि । ज्योतींषि ज्योतिश्शास्त्राणि । एतानि सर्वाणि, यदुक्तमनुक्तं वै तत् सर्वं शिवशक्तियोगादेव जायत इत्यर्थः ॥ ६ ॥

वाग्भवकूटस्य गायत्र्या समन्वयः

अथैतस्य परं गह्वरं व्याख्यास्यामः । महामनुममुद्भवं तदिति ब्रह्म शाश्वतं परो भगवान् निर्लक्षणो निरञ्जनो निरुपाधिराधिरहितो देव उन्मीलतं पश्यति विकासते चैतन्यभावं कामयत इति स एको देवः शिवरूपी दृश्यत्वेन विकासते यतिषु यज्ञेषु योगिषु कामयते कामं जायते । स एष निरञ्जनोऽकामत्वेनोज्जृम्भते अकचटतपयशान् सृजते । तस्मादीश्वरः कामोऽभिधीयते । तत्परिभाषया कामः ककारं व्याप्नोति । काम एवेदं तत्तदिति ककारो गृह्यते । तस्मात्तत्पदार्थ इति य एवं वेद ॥ ७ ॥

सवितुर्वरेण्यमिति षूङ् प्राणिप्रसवे सविता प्राणिनः सूते प्रसूते शक्तिः सूते ॥ ८ ॥

त्रिपुरा शक्तिरादेयं त्रिपुरा परमेश्वरी ।
महाकुण्डलिनी देवी जातवेदसमण्डलम् ॥ ९ ॥

योऽधीते सर्वं व्याप्यते । त्रिकोणशक्तिरेकारेण महाभागेन प्रसूते । तस्मादेकार एवा गृह्यते ॥ १० ॥

वरेण्यं श्रेष्ठं भजनीयमक्षरं नमस्कार्यम् । तस्माद्वरेण्य-[1]मेकाराक्षरं गृह्यत इति य एवं वेद ॥ ११ ॥

भर्गो देवस्य धीमहीत्येवं व्याख्यास्यामः । धकारो धारणा । धियैव धार्यते भगवान् परमेश्वरः । भर्गो देवो मध्यवर्ति तुरीय-मक्षरं साक्षात्तुरीयं सर्वं सर्वान्तरभूतं तुरीयाक्षरमीकारं पदानां मध्यवर्तीत्येवं व्याख्यातं भर्गोरूपं व्याचक्षते । तस्माद्भर्गो देवस्य धीत्येव[2]मीकाराक्षरं गृह्यते ॥ १२ ॥

महीत्यस्य व्याख्यानं महत्त्वं जडत्वं काठिन्यं विद्यते यस्मिन्नक्षरे तन्महि । लकारः परं धाम । काठिन्याढ्यं ससागरं सपर्वतं समस्तद्वीपं सकाननमुज्ज्वलद्रूपं मण्डलमेवोक्तं लकारेण । पृथ्वी देवी महीत्यनेन व्याचक्षते ॥ १३ ॥

धियो यो नः प्रचोदयात् । परमात्मा सदाशिव आदिभूतः [3]परः स्थाणुभूतेन लकारेण ज्योतिर्लिङ्गमात्मानं धियो बुद्धयः परे वस्तुनि ध्यानेच्छारहिते निर्विकल्पके प्रचोदयात् प्रेरयेदित्युच्चाररहितं [4]चेतसैव चिन्तयित्वा भावयेदिति ॥ १४ ॥

[1] मेकाक्षरं—अ १, अ २, क.
[2] मेकाक्षरं—अ २
[3] परस्था—अ १, अ २, क.
[4] चेतसैवं—उ, उ १.

परो रजसेऽसावदोमिति तदवसाने परज्योतिरमलं हृदि दैवतं चैतन्यं चिल्लिङ्गं हृदयागारवासिनी ह्रल्लेखेत्यादिना स्पष्टं वाग्भवकूटं पञ्चाक्षरं पञ्चभूतजनकं पञ्चकलामयं व्यापठ्यत इति । य एवं वेद ॥ १९ ॥

आदौ त्रिपुरास्वरूपं तद्गोचरमहामनुं तद्वाच्यशिवशक्तियोगतः स्वातिरिक्त-प्रपञ्चसृष्टिं चाभिधायाथ परब्रह्मार्थगायत्र्याः प्रातिस्विकेनाऽऽदिविद्याऽभिधान-पञ्चदशीखण्डत्रयेण समन्वयार्थमयमारम्भ इत्याह—अथेति । अथ महामन्त्र-प्रदर्शनानन्तरं तस्यैव महामनोः **परं गह्वरं** परमगूढार्थं श्रुतयो वयं विशेषेण **आख्यास्यामः** कथयाम इत्यर्थः । किं तद्गूढार्थप्रकटनमित्यत्र, महामनो-स्तदित्याद्यक्षरस्याऽऽदिविद्याप्रथमखण्डाद्यक्षरस्य ककारस्य चार्थतः समन्वय उच्यते । तत् कथमित्यत्र—**महामन्विति** । तत्पदलक्ष्यार्थस्य निरतियोगिक-सन्मात्रत्वेन शाश्वतत्वम् । यः स्वरूपतः शाश्वतपदं गतः स हि **परो भगवान्** लक्षणसापेक्षलक्ष्यताऽभावात् **निर्लक्षणः**, स्वाज्ञदृष्टिविकल्पितस्वातिरिक्तप्रसक्ता-वपि तत्रात्मात्मीयाभिमानाभावात् **निरञ्जनो** निरुपाधिराधिरहितोऽपि **देवः** मूलाविद्याबीजांशयोगत ईश्वरत्वमवलम्ब्य "स ईक्षत बहु स्यां प्रजायेयेति" इति श्रुत्यनुरोधेन **उन्मीलते** इत्यादि । दृश्यत्वेन विकासते जगद्रूपेण भासते । ततः स्वान्तःस्थेषु **यतिषु यज्ञेषु** चानुप्रविश्येदानीं ज्ञानफलं कर्मफलं वा मे स्यादिति **कामयते** । एवंकामनया **कामं** कामफलं **जायते** । य एवमवस्थाऽऽपन्नोऽपि परमेश्वरः स्वेन रूपेण स एष **निरञ्जनोऽकामत्वेनोज्जृम्भते** । ततोऽयं **अकचटतपयशान्** अष्टवर्गान् **सृजते** । यस्मादेवं सृजति तस्मादीश्वरः **कामोऽभिधीयते** कार्यकारणयोरेकत्वात् । यस्मादेवं **तस्मात्** ककारः तत्पदार्थः । य **एवं वेद स मुनिः** ईश्वरो भवतीत्यर्थः ॥ ७ ॥ सवितुर्वरेण्यमिति महामन्वंशस्यादि-विद्याऽऽद्यखण्डद्वितीयवर्णात्मकैकारस्य च समन्वय उच्यते । तत् कथमित्यत्र—

सवितुर्वरेण्यमितीति । तत्र सवितृशब्दार्थस्तु पूङ् प्राणिप्रसवे सविता प्राणिनः सूते तदभिन्ना सावित्री प्रसूते ॥ ८ ॥ सेयं सावित्री केत्यत्र— त्रिपुरा शक्तिरिति । सैव व्यष्टिरूपेण महाकुण्डलिनी देवी जातवेदसमण्डलं मूलाधारत्रिकोणं व्याप्यावतिष्ठते ॥ ९ ॥ एवंरूपां विद्यां योऽधीते सः सर्वं व्याप्यते व्याप्नोति । त्रिकोणशक्तिः कुण्डलिनी एकारेण महाभागेन सर्वं प्रसूते सविता । यस्मादेवं तस्मादेकार एव गृह्यते ॥ १० ॥ सवितुरेकारस्य समन्वयमुक्त्वा वरेण्यैकारयोः समन्वयमाह—वरेण्यमिति । यदेकाराक्षरं सर्वकारणतया ख्यातं तदेव वरेण्यं इत्यादि । य एवं वेद स विद्वान् स्वावरेभ्यो वरिष्ठो भवतीत्यर्थः ॥ ११ ॥ भर्गो देवस्य धीतिशब्दस्य ईकारस्य च समन्वयमाह—भर्ग इति । तत्र धीत्यत्र धकारो धारणा । तत् कथं? धियैवेति । भर्गो देव. स्वयं ज्योतिःस्वरूपेण दीप्यमानत्वात् । तन्मध्यवर्ति तुरीयमक्षरं अर्धमात्राऽऽत्मकम् । ईकारस्याप्यक्षरसामानाधिकरण्यमाह—ईकारमिति । यस्मादेवं धीकारयोः साम्यमुक्तं तस्मात् ॥ १२ ॥ महीति पदस्य लकारस्य च समन्वयमाह—महीति । महीत्यस्य व्याख्यानं, किं तदियत्र—महत्त्वमित्यादि । बीजं तु—लकार इति । धरणीमण्डलमेवोक्तम् ॥ १३ ॥ महीबीजलकारेण महीमण्डलमुक्तं, तद्गतनामरूपविलक्षणतया यो नः अस्माकं धियः ध्यानेच्छारहिते निर्विकल्पके परमात्मनि प्रचोदयात् तं ज्योतिर्लिङ्गं आत्मानं अनिर्वचनीयं ब्रह्माकारपरिणतचेतसा सोऽहमस्मीति भावयेदित्यर्थः ॥ १४ ॥ गायत्रीतुरीयपादस्य ह्रल्लेखायाश्च समन्वयमाह—पर इति । रजसे रजसः रजउपलक्षितगुणत्रयात् यः परः सोऽसौ अहमोङ्कारार्थतुर्यतुर्योऽस्मि यन्मत्तोऽदो विप्रकृष्टं तदवसाने परंज्योतिरमलं हृदि दैवतं चैतन्यं चिल्लिङ्गं सर्वप्राणिहृदि प्रत्यगभेदेन विद्योतमानं तदभेदेन हृदयागारवासिनी चिच्छक्तिः ह्रल्लेखा ह्रींकाररूपिणीति प्रसिद्धां तत्सवितुरित्यादिना पादचतुष्टयेनाऽऽदिविद्याया यदाद्यं वाग्भवकूटं पञ्चा पञ्चभूतजनकं निवृत्तिप्रतिष्ठाविद्याशान्तिशान्त्यतीतकलाभेदेन पञ्चकलामयं स्पष्टं व्यापठ्यते वाग्भवकूटं गायत्रीसमन्वयतो विस्पष्टं व्याख्यातमित्यर्थः ॥ १५ ॥

कामकूटस्य गायत्र्या समन्वयः

अथ तु परं कामकालभूतं कामकूटमाहुः । तत् सवितुर्वरेण्य-मित्यादिद्वात्रिंशदक्षरीं पठित्वा तदिति परमात्मा सदाशिवोऽक्षरं विमर्शं निरुपाधितादात्म्यप्रतिपादनेन हकाराक्षरं शिवरूपं [1]अनक्षरमक्षरं व्यालिख्यत इति तत्परागत्र्यावृत्तिमादाय शक्तिं दर्शयति ॥ १६ ॥

तत् सवितुरिति पूर्वेणाध्वना सूर्याधश्चन्द्रिकां व्यालिख्य मूलादिब्रह्मरन्ध्रगं साक्षरमद्वितीयमाचक्षत इत्याह भगवन्तं देवं शिवशक्त्यात्मकमेवोदितम् ॥ १७ ॥

शिवोऽयं परमं देवं शक्तिरेषा तु जीवजा ।
सूर्याचन्द्रमसोर्योगाद्धंसस्तत्पदमुच्यते ॥ १८ ॥
तस्मादुज्जृम्भते कामः कामान् कामः परः शिवः ।
कार्णोऽयं कामदेवोऽयं वरेण्यं भर्ग उच्यते ॥ १९ ॥

तत् सवितुर्वरेण्यं भर्गो देवः क्षीरं [2]सेवनीयमक्षरं समभुग्नमक्षरं परमात्मजीवात्मनोर्योगात् तदिति स्पष्टमक्षरं तृतीयं ह इति नदेव सदाशिव एव [3]निष्कलमषो द्यो देवोऽन्त्यमक्षरं व्याक्रियते परमं पदम् ॥ २० ॥

धीति धारणं विद्यते जडत्वधारणं महीति लकारः शिवाधस्तात्तु लकारार्थः स्पष्टमन्त्यमक्षरं परमं चैतन्यं धियो यो नः प्रचोदयात् ॥ २१ ॥

परो रजसेऽमावदोमित्येवं कूटं कामकलाऽऽलयं षडध्वपरिवर्तको वैष्णवं परमं धामेति भगवांश्चैतस्माद्य एवं वेद ॥ २२ ॥

[1] निरक्षरं—अ १, अ २, क, मु.
[2] सेचनीय—उ.
[3] निष्कळोद्यो—क. निष्कलमषो ह्याद्यो—उ.

वाग्भवकूटं गायत्रीसमन्वयतो व्याख्याय ततः कामकूटमपि पूर्ववद्गायत्रीसमन्वयपूर्वकं योजनीयमित्याह—**अथेति** । **अथ तु परं कामकलाभूतं** कामकलापरिणतं संप्रदायविदः **कामकूटमाहुः** । द्वितीयखण्डात्मककामकूटप्रविभक्तवर्णषट्कस्य गायत्र्या समन्वयप्रकारमाह—**तदिति** । **पठित्वा** तत्र यदाद्यं तदिति तत्पदार्थः **परमात्मा सदाशिवः** यत्स्वरूपं कालत्रयेऽपि न क्षरति तत् **अक्षरं विमलं निरुपाधि** कामकूटाद्यवर्णहकारस्य **निरुपाधिकाक्षरतादात्म्यप्रतिपादनेन हकाराक्षरं शिवरूपं**, न हि तच्छिवरूपमक्षरं भवति तालव्योष्ठादिव्यापारानर्हत्वात्, किंतु **अनक्षरं** तत्समन्वयाभिप्रायेण **अक्षरं** अक्षरतया व्याख्यायते व्याख्यायत इति **तत्परागव्यावृत्तिमादाय शक्तिं दर्शयति** परागव्यावृत्तिसिद्धं शिवरूपं यदेतद्विपरीतं हकाराद्यक्षरं तद्गतपराग्भावादव्यावृत्तिं परागभावमेवादाय हकारादिशक्तिं दर्शयति ॥ १६ ॥ तत् कथमित्यत्र—**तदिति** । **अध्वना** वर्त्मना । सूर्यबीजं हकारः पुरस्तात् तत्पदेन समन्वितस्तदधस्तत्पश्चाच्चन्द्रिका चन्द्रबीजं सकारः सवितृशब्देन समन्वयितव्यः । सवितृचैतन्यं कीदृशं कासनमर्हतीत्यत्र **मूलादिब्रह्मरन्ध्रगं** मूलाधारमारभ्य ब्रह्मरन्ध्रपर्यन्तं व्याप्य स्थितं साक्षरमद्वितीयं सकाराक्षरमपि तेनाद्वितीयमाचक्षते तद्विदः इत्याह श्रुतिः । श्रुतिः किमित्याहेत्यत्र यस्तत्त्वेन सवितृत्वेन च ध्यातस्तं **भगवन्तं देवं शिवशक्त्यात्मकमेवोदितं** इत्याहेत्यर्थः ॥ १७ ॥ कथं शिवशक्त्यात्मकतेत्यत्र—**शिवोऽयमिति** । यं देवं सवितारं ब्रह्मविदः **परमं** परमात्मानमाहुः सोऽयं शिवो भवति ।

अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मे पराम् ।
जीवभूतां महाबाहो ययेदं धार्यते जगत् ॥

इति स्मृत्यनुरोधेन या तु जीवतया जाता सैषा मूलशक्तिरित्यर्थः । हकारार्थः सूर्यः तत्पदार्थः शिवः सकारार्थचन्द्रमास्त्वंपदार्थजीवभूता प्रकृतिस्तद्गतहेयांशत्यागपूर्वकं तयोर्लक्ष्यभूतसूर्याचन्द्रमसोर्योगात् हंसः प्रत्यगभिन्नपरमात्मा तत्त्वेन पद्यत इति तत्पदं निर्विशेषं ब्रह्म उच्यते ॥ १८ ॥ ककारः कस्मादाविर्भूत इत्यत्र—**तस्मादिति** । यः परः शिवो विविधान् **कामान्** सृजति **तस्मात्** परमशिवात् **कामः ककारः उज्जृम्भते** । यत्स्वरूपं **वरेण्यं भर्गः** निरतिशय-

ज्योतिःस्वरूपं सोऽयं कार्णः ककारः कामदेवः परमेश्वरो भवति ॥ १९ ॥ तत् सवितुर्वरेण्यं भर्गो देवः चिद्धातुः तत्स्वरूपस्य क्षीणाविद्याऽऽधारत्वात् क्षीरं मुमुक्षुकोटिभिः स्वात्मधिया सेवनीयमक्षरं ईश्वरचैतन्यं समधुघ्नमक्षरं मधु स्वार्जितकर्मफलेन सह स्वात्मानमपि हन्ति भक्षयतीति समधुघ्नमक्षरं जीव-चैतन्यं चैतन्यद्वयगतहेयांशापायसिद्धलक्ष्ययोः परमात्मजीवात्मनोर्योगात् यदेव-मैक्यसिद्धं तदिति स्पष्टमक्षरं परमाक्षरं तृतीयं,

क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते ।
उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः ॥

इति स्मृतेः । यदक्षरं तुरीयं ह इति विख्यातं तदेव सदाशिव एव तद्गतविकारापाये निष्कलमषो द्योतनात्मको देवः तत्स्वरूपमेव अन्त्यमक्षरं परमाक्षरमिति व्याक्रियते । किमिति ? परमं पदमिति ॥ २० ॥ धीमहीति यत् धारणं विद्यते महीगतजडत्वधारणं शिवाधस्तात् हकाराधस्तात् विद्यमानलकारार्थः स्पष्टः लकारवाच्यमहीगतजडत्वविकारापाये लकारो ब्रह्मेति स्पष्टोऽर्थः । यन्निर्विशेषं ब्रह्म तदेव अन्त्यमक्षरम् ॥ २१ ॥ कामकलाऽऽलयं कामकूटस्य वाग्भवकूटाख्य-कामकलाऽऽधारत्वात् । वर्णाध्वेत्यादितत्त्वाध्वान्तभेदेन षडध्वपरिवर्तको मन्त्री वैष्णवं परमं धामैतीति । य एवं वेद स वैष्णवं धामैति, तस्मादतिरिक्तं न किंचिदस्तीति भगवानाहेत्यर्थः ॥ २२ ॥

शक्तिकूटस्य गायत्र्या समन्वयः

अथैतस्मादपरं तृतीयं शक्तिकूटं प्रति[1]पद्यते द्वात्रिंशदक्षर्या गायत्र्या ॥ २३ ॥

तत् सवितुर्वरेण्यं तस्मादात्मन आकाश आकाशाद्वायुः स्फुरते तदधीनं वरेण्यं समुदीयमानं सवितुर्वा योग्यो जीवात्मपर-मात्मसमुद्भवस्तं प्रकाशशक्तिरूपं जीवाक्षरं स्पष्टमापद्यते ॥ २४ ॥

[1] पाद्यते—उ.

भर्गो देवस्य धीत्यनेनाधाररूपशिवात्माक्षरं गण्यते महीत्यादिना शेषं काम्यं रमणीयं दृश्यं काम्यं रमणीयं शक्तिकूटं स्पष्टीकृतमिति ॥ २५ ॥

वाग्भवकूटं कामकूटं चैवं प्रकाशयित्वा महामनुशक्तिकूटयोरपि समन्वयमाह —अथेति । प्रतिपद्यते कयेत्यत्र—द्वात्रिंशदक्षर्या गायत्र्या शक्तिकूटमपि समन्वयमर्हतीत्यर्थः ॥२३॥ तत् सवितुर्वरेण्यमिति सकाराक्षरः समन्वितः ॥२४॥ भर्गो देवस्य धीत्यनेन ककारोऽपि समन्वितो भवति । महीत्यादिना लकारः समन्वित इति ज्ञेयः । शेषं धियो यो नः प्रचोदयात् परो रजसेऽसावदोमिति काम्यं रमणीयं दृश्यं काम्यं रमणीयं ह्लेखाऽपि समन्विता स्यात् । एवं शक्तिकूटमपि स्पष्टीकृतमित्यर्थः ॥ २५ ॥

कामाकामधियां विशिष्टविद्याफलम्

एवं पञ्चदशाक्षरं त्रैपुरं योऽधीते स सर्वान् कामानवाप्नोति स सर्वान् भोगानवाप्नोति स सर्वान् लोकान् जयति स सर्वा वाचो विजृम्भयति स रुद्रत्वं प्राप्नोति स वैष्णवं धाम भित्त्वा परं ब्रह्म प्राप्नोति य एवं वेद ॥ २६ ॥

कामाकामधियां विशिष्टविद्याफलमाह—एवमिति । वैष्णवं धाम मायाशबलं भित्त्वा अतिक्रम्य ॥ २६ ॥

शक्तिशिवादिद्वादशविद्योद्धारः

[1]एवमाद्यां विद्यामभिधायैतस्याः शक्तिकूटं शक्ति[2]शिवाद्या । लोपामुद्रेयं द्वितीये धामनि ॥ २७ ॥

पूर्वेणैव मनुना बिन्दुहीना शक्तिभूतह्लेखा क्रोधमुनिनाऽधिष्ठिता तृतीये धामनि ॥ २८ ॥

[1] इत्याद्यां—अ १, अ २, क. [2] शिवाद्यां—अ १, अ २, क, मु.

पूर्वस्या एव विद्याया यद्वाग्भवकूटं तेनैव मानवीं चान्द्रीं कौबेरीं विद्यामाचक्षते ॥ २९ ॥

मदनाधः शिवं वाग्भवम्, तदूर्ध्वं कामकलामयम्, शक्त्यूर्ध्वं [1]शाक्तमिति मानवी विद्या चतुर्थे धामनि ॥ ३० ॥

शिव[2]शक्त्याख्यं वाग्भवं तदेवाधः शिवशक्त्याख्यमन्यत्तृतीयं चेयं चान्द्री विद्या पञ्चमे धामनि ध्येयेयम् ॥ २१ ॥

चान्द्री कामाधः [3]शिवाद्यकामा सैव कौबेरी षष्ठे धामनि व्याचक्षत इति य एवं वेद ॥ ३२ ॥

हित्वेकारं तुरीयस्वरं सर्वादौ सूर्याचन्द्रमस्केन कामेश्वर्यैवाग-स्त्यसंज्ञा सप्तमे धामनि ॥ ३३ ॥

तृतीयमेनस्या एव पूर्वोक्तायाः कामाद्यं द्विवाऽवः कं मदनकलाऽऽद्यं शक्तिबीजं वाग्भवाद्यं तयोरर्धावशिरस्कं कृत्वा नन्दि-विद्येयमष्टमे धामनि ॥ ३४ ॥

वाग्भवमागस्त्यं वागर्थकलामयं कामकलाऽभिधं सकलमाया-शक्तिः प्रभाकरी विद्येयं नवमे धामनि ॥ ३५ ॥

पुनरागस्त्यं वाग्भवं शक्तिमन्मथशिवशक्तिमन्मथोर्वीमाया-कामकलालयं चन्द्रसूर्यानङ्गधूर्जटिमहिमायं तृतीयं षण्मुखीयं विद्या दशमे धामनि ॥ ३६ ॥

विद्याप्रकाशितया भूय एवागस्त्यविद्यां पठित्वा भूय एवेमामन्त्यमायां परमशिवविद्येयमेकादशे धामनि ॥ ३७ ॥

[1] शान्तमिति—उ. [2] शक्त्यामकं—अ १, अ २. [3] शिवाद्या—उ.

भूय एवागस्त्यं पठित्वा एतस्या एव वाग्भवं यद्धनजं काम-
कलाऽऽत्मयं च तत्सहजं कृत्वा लोपामुद्रायाः शक्तिकूटराजं पठित्वा
वैष्णवीं विद्या द्वादशे धामनि व्याचक्षत इति य एवं वेद ॥ ३८ ॥

एवं आद्यां विद्यां श्रीमत्पञ्चदशाक्षरीं खण्डशो ब्रह्मगायत्र्या समन्वितां अभिधायैतस्याः मध्ये तृतीयं सकलह्रीमिति शक्तिकूटं स क इति शक्तिशिवा-ऽऽद्या प्रथमे धामनि व्यष्टिसमष्टिजागरणे संभाव्या। हसकहलह्रीमिति लोपामुद्रेयं विद्या द्वितीये धामनि व्यष्टिसमष्टिस्वप्ने संभाव्या ॥ २७ ॥ यो लोपामुद्रामनु-र्द्वितीये धामनि विन्यस्तः हसकहलह्री इति क्रोधमुनिना अधिष्ठिता दुर्वाससा आराधिता सेयं तृतीये धामनि समष्टिस्वापे संभाव्येत्यर्थः ॥ २८ ॥ एवं पूर्वस्या एव विद्यायाः लोपामुद्राविद्यायाः यद्वाग्भवकूटं योजितं तदा तेनैव योजनेन मनुचन्द्रकुबेरैरेवमाराधितेति तामेव विद्यां संप्रदायविदः मानवीं चान्द्रीं कौबेरीं विद्यामाचक्षते ॥ २९ ॥ तत्र मानवी विद्या केत्यत्र—मदनेति। मदनशब्देन कामकूटं क्लीं इति वोच्यते तदधस्तात् पश्चात् हादिविद्यायाः पर शिवं वाग्भवं कामकलामयं कादिविद्यारूपं, तदूर्ध्वं शाक्तं शक्तिकूटं सादि-विद्यारूपं, पूर्वं हादिविद्या ततः कादिविद्या ततः सादिविद्येति प्रतिपादनात् शक्त्यूर्ध्वमित्युक्तम्। या मनुनैवमुपासिता सेयं मानवी चतुर्थे धामनि, व्यष्टि-जागरणारोपाधारविश्वे तदभेदेन संभाव्येत्यर्थः ॥ ३० ॥ केयं चान्द्री विद्येत्यत्र—शिवेति। आदौ शिवशक्त्याख्यं हादि ततः वाग्भवं कादि तदेवाधः शिव-शक्त्याख्यं पुनर्हादि अन्यत् तृतीयं सादि च येयं खण्डचतुष्टयविशिष्टविद्या चन्द्रेणाराधिता सेयं चान्द्री पञ्चमे धामनि व्यष्टिस्वप्नप्रपञ्चारोपाधारतैजसे संभाव्येत्यर्थः ॥ ३१ ॥ केयं कौबेरी विद्येत्यत्र—चान्द्रीति। या चान्द्री विद्या खण्डचतुष्टयात्मिकाभिहिता तदधः पश्चात् शिवाद्यकामा हादिविद्या योजिता यदि तदा पञ्चखण्डात्मिकेयं विद्या कुबेरेणाराधिता सेयं कौबेरीत्युच्यते। सेयं षष्ठे धामनि व्यष्टिस्वापप्रपञ्चारोपाधारप्राज्ञे सदा ध्येयेति व्याचक्षत इति। य एवं वेद सोऽयं संपदा कुबेरतुल्यो भवतीत्यर्थः ॥ ३२ ॥ अगस्त्यविद्या कीदृशी-

त्यत्र—हित्वेकारमिति । कादिविद्याऽलंकारतुरीयस्वरमीकारं हित्वा सर्वादौ सर्वखण्डादौ हसेति सूर्याचन्द्रमस्केन संयोजितं यदि खण्डत्रयं तदा कामेश्वर्यै तुष्टिकरं भवति । यद्वा—एवमुपासकस्य स्वेप्सितकामश्च निरवधिकैश्वर्यं च कामेश्वर्यै भवत इत्यगस्त्येन योपासिता सेयं अगस्त्यसंज्ञा विद्योच्यते, सा सप्तमे धामनि समष्टिजाग्रत्प्रपञ्चारोपाधारे विराजि तदभेदेन ध्येयेत्यर्थः ॥ ३३ ॥ केयं नन्दिविद्येत्यत्र—तृतीयमिति । या पूर्वोक्तागस्त्यविद्या एतस्या अधः पूर्वं द्विधा कामाद्यं मदनकलाऽऽद्यं हहेति सेति शक्तिबीजं केति वाग्भवाद्यं तयोः सकारककारयोः अर्धावशिरस्कं प्लुतोच्चारणभवार्धमात्रामस्तकं कृत्वा येयं नन्दिनोपासिता सेयं नन्दिविद्या अष्टमे धामनि समष्टिस्वप्नप्रपञ्चारोपाधारसूत्रात्मनि तदभेदेन चिन्त्येयमित्यर्थः ॥ ३४ ॥ प्रभाकरी विद्या कीदृशीत्यत्र—वाग्भवमिति । आदौ वाग्भवकूटं कादि तत आगस्त्यं अगस्त्यविद्याकात्स्न्यं वागर्थकलामयं शिवशक्त्यात्मकं कामकलाऽभिधं हादि सकलमायाशक्तिकूटं चैकीकृत्य या प्रभाकरेण सूर्येणैवमुपासिता सेयं प्रभाकरी विद्या नवमे धामनि समष्टिस्वापप्रपञ्चारोपाधारबीजेश्वरात्मनि तदभेदेन ध्येयेत्यर्थः ॥ ३५ ॥ षण्मुखी विद्या कीदृशीत्यत्र—पुनरागस्त्यमिति । वाग्भवं कादि, ह्रींमिति शक्तिबीजं, क्लीमिति मन्मथबीजं, हंस इति शिवशक्तिबीजे, पुनर्मन्मथबीजं क्लीमिति, लमित्युर्वीबीजं, ह्रीमिति मायाबीजं, कामकलाऽऽद्यं हादिषडक्षरं, सोऽहमिति चन्द्रसूर्यबीजे, क्लीमित्यनङ्गबीजं, हमिति बृजट्टिबीजं, स इति महिमाबीजं, पुनः तृतीयं हंसः सोऽहं हंसः इति, एवं षण्मुखेनोपासिता षण्मुखीयं विद्या दशमे धामनि व्यष्टिसमष्ट्यात्मकजाग्रत्प्रपञ्चापवादाधिकरणओतृचैतन्ये तदभेदेन भावयेदित्यर्थः ॥ ३६ ॥ परमशिवविद्या कीदृशीत्यत्र—विद्येति । पूर्वोक्तषण्मुखीविद्याप्रकाशितया षण्मुखीविद्यात्वेन या प्रकाशिता तया साकं भूय एव आगस्त्यविद्यां पठित्वा भूय एवेमामन्त्यमायां अन्त्यनां तुर्यरूपिणीमधिष्ठाय यः शिवः सर्वसाक्षी भवति सेयं परमशिवविद्या, षण्मुख्यागस्त्यविद्याद्वयं मिलितं चेत् परमशिवविद्या भवति, सेयमेकादशे धामनि समष्टिस्वप्नप्रपञ्चापवादाधिकरणेऽनुज्ञातृचैतन्ये तदभेदेन भावनीये-

यमित्यर्थः ॥ ३७ ॥ केयं वैष्णवी विद्येत्यत्र—भूय इति । अगस्त्यविद्यया साकं वाग्भवं कादि यद्धनजं धनदं कौवेरं कामकलाऽऽलयं च हादिषट्कं तत्सहजं कृत्वा एकीकृत्य पूर्वोक्तलोपामुद्रायाः हादिविद्यायाः परिणतं सादिशक्तिकूटराजं पठित्वा एतत्सर्वं चित्सामान्यमहाविद्याऽऽत्मकं सम्यग्ज्ञानरूपं विष्णुनाऽधिष्ठितमिति वैष्णवी विद्येत्युच्यते । सेयं द्वादशे धामनि व्यष्टिसमष्ट्यात्मकजाग्रत्स्वप्नसुषुप्तिप्रपञ्चापवादाधिकरणेऽनुज्ञैकरसचैतन्ये तदभेदेन भावनीयेति । य एवं वेद स विष्णुरेव भवतीत्यर्थः ॥ ३८ ॥

अथ द्वादशविद्यामुद्धरति—एवमित्यादिना । आदिविद्या तु क ए ई ल ह्रीं, हसकहलह्रीं, सकलह्रीम् । अत्राद्यखण्डं वाग्भवकूटं, द्वितीयं कामकूटं, तृतीयं शक्तिकूटम् । व्यष्टिसमष्टिजाग्रदादिद्वादशधामसु भावनीयशक्तिशिवादिद्वादशविद्योच्यते । सक इति शक्तिशिवविद्या (१), हसकहलह्रीमिति लोपामुद्राविद्या (२), हसकहलह्री इति क्रोधमुनिविद्या (३), हसकहलह्रीं क ए ई ल ह्रीं सकलह्रीं इति मानवी विद्या (४), हसकहलह्रीं क ए ई ल ह्रीं हसकहलह्रीं सकलह्रीं इति चान्द्री विद्या (५), हसकहलह्रीं क ए ई ल ह्रीं हसकहलह्रीं सकलह्रीं हसकहलह्रीं इति कौबेरी विद्या (६), हसकएलह्रीं हसहसकहलह्रीं हससकलह्रीं इत्यगस्त्यविद्या (७), हहसकहसकएलह्रीं हसहसकहलह्रीं हससकलह्रीं इति नन्दिविद्या (८), क ए ई ल ह्रीं हसकएलह्रीं हसहस कहलह्रीं हससकलह्रीं हसकहलह्रीं सकलह्रीं इति प्रभाकरी विद्या (९), [1]ह्रीं क्लीं हं सः क्लीं लं ह्रीं हसकहलह्रीं सोहं क्लीं हंसः ह्रीं हंसः सोहं हंसः इति षण्मुखी विद्या (१०), ह्रीं क्लीं हंसः क्लीं लं ह्रीं हसकहलह्रीं सोहं क्लीं हंसः ह्रीं हंसः सोहं हंसः हसकएलह्रीं हसहसकहलह्रीं हससकलह्रीं इति परमशिवविद्या (११), हसकएलह्रीं हसहसकहलह्रीं हससकलह्रीं क ए ई ल ह्रीं हसकहलह्रीं क ए ई ल ह्रीं हसकहलह्रीं सकलह्रीं हसकहलह्रीं हसकहलह्रीं [2]सकलह्रीं इति वैष्णवी विद्या (१२) ॥

[1] अत्र व्याख्यापर्यालोचनेन आदावागस्त्यवाग्भवयोः संयोजनं युक्तं स्यादिति भाति.

[2] अत्र व्याख्यापर्यालोचनेन "सकलह्रीं" इत्यत्र "सकहलह्रीं" इति मन्त्रोद्धारः साधुरिव भाति.

महात्रिपुरादेवीध्यानप्रकारः

तान् होवाच भगवान् सर्वे यूयं श्रुत्वा पूर्वां कामाख्यां तुरीयरूपां तुरीयातीतां सर्वोत्कटां सर्वमन्त्रासनगतां पीठोपपीठ-देवतापरिवृतां सकलकलाव्यापिनीं देवतां सामोदां सपरागां महृदयां सामृतां सकलां सेन्द्रियां सदोदितां [1]परां विद्यां स्पष्टीकृत्वा हृदये निधाय विज्ञायानिलयं गमयित्वा त्रिकूटां त्रिपुरां परमां मायां श्रेष्ठां परां वैष्णवीं संनिधाय हृदयकमलकर्णिकायां परां भगवतीं लक्ष्मीं मायां सदोदितां महावश्यकरीं मदनोन्मादनकारिणीं धनुर्बाणधारिणीं वाग्विजृम्भिणीं चन्द्रमण्डलमध्यवर्तिनीं चन्द्रकलां सप्तदशीं महा-नित्योपस्थितां पाशाङ्कुशमनोज्ञपाणिपल्लवां समुद्यदर्कनिभां त्रिणेत्रां विचिन्त्य देवीं महालक्ष्मीं सर्वलक्ष्मीमयीं सर्वलक्षणसंपन्नां हृदये चैतन्यरूपिणीं निरञ्जनां त्रिकूटाख्यां स्मितमुखीं सुन्दरीं महामायां सर्वसुभगां महाकुण्डलिनीं त्रिपीठमध्यवर्तिनीमकथादिश्रीपीठे परां भैरवीं चित्कलां महात्रिपुरां देवीं ध्यायेन्महाध्यानयोगेनेयमेवं वेदेति महोपनिषत् ॥ ३९ ॥

ये महाविद्यां श्रुतवन्तस्तान् प्रति भगवानुवाचेत्याह—तानिति । तान् होवाच भगवान् सदाशिवः । किमिति—हे देवाः सर्वे यूयं मयोक्तां वक्ष्यमाणां च विद्यां श्रुत्वा पूर्वां कामाख्यां कामेश्वरविद्यामर्धमात्राकलातीतात्मना तुरीयरूपां तुरीयातीतां सर्वोत्कटां असमाहितचित्तैर्दुराराध्यां सर्वमन्त्रासनगतां समस्त-यन्त्रालयां पीठोपपीठदेवतापरिवृतां उड्याणादिचतुर्पीठमध्यवर्तिपरिवारदेवता-बृन्दसेवितां प्राणादिनामान्तसकलकलाव्यापिनीं देवतां सामोदां स्वानन्दभरितां

[1] परमां—अ २, क, ङ १.

सपरागां परचितैक्यं गच्छतीति सपरागां ब्रह्माभिन्नां स्वभक्तपालने सहृदयां सामृतां सकलां सेन्द्रियां निरावृतसम्यग्ज्ञानात्मना सदोदितां परां विद्यां अहं ब्रह्मास्मीति स्पष्टीकृत्वा हृदये निधाय ब्रह्मातिरिक्तं न किंचिदस्तीति विज्ञाय यद्यदतिरिक्तमस्तीति भ्रान्तिस्तदा तामपि अनिलयं निरालम्बं ब्रह्म गमयित्वा त्रिकूटां वाङ्मया[ग्भवा]दित्रिकूटार्थरूपिणीम्। स्वपदं भजतां महतां करणग्रामं स्वपदध्यानानुकूलतया वश्यं स्वाधीनं करोतीति महावश्यकरीम्। स्वभक्त-पटलोन्मादनकरमदनोन्मादनकारिणीम्। सरस्वत्यात्मना वाग्विजृम्भिणीम्। सप्तदशीं सप्तदशप्रजापतिरूपां महानित्योपस्थितां महानित्यात्वेन स्वयमुपस्थि-ताम्। मूलोड्याणजालन्धरभेदेन त्रिपीठमध्यवर्तिनीं अकथादिश्रीपीठे निषण्णां परां स्वाज्ञानतत्कार्यभैरवीं ब्रह्मरूपेण ध्यात्वा कृतकृत्या भवतेत्यर्थः। यः कोऽप्येवमेनां ध्यायेत् स महाध्यानयोगेन इयं इमां एवं वेद यथावद्विदित्वा कृतकृत्यो भवेदित्यर्थः। इति महोपनिषच्छब्दः प्रथमोपनिषत्समाप्त्यर्थः ॥३९॥

इति प्रथमोपनिषत्

द्वितीयोपनिषत्

त्रिपुराविद्यामधिकृत्य प्रश्नः

अथातो जातवेदसे सुनवाम सोममित्यादि पठित्वा त्रैपुरी व्यक्तिर्लक्ष्यते ॥ १ ॥

जातवेदस इत्येकर्चसूक्तस्याद्यमध्यमावसानेषु तत्र स्थानेषु विलीनं बीजसागररूपं व्याचक्ष्वेत्यृषय ऊचुः ॥ २ ॥

प्रथमोपनिषदि येयं त्रिपुरसुन्दरी प्रतिपादिता तदपरोक्षसाक्षात्कारायेयं द्वितीयोपनिषदारभ्यते—अथेति। अथ तत्साक्षात्कारार्हाधिकारिसंपत्त्यनन्तरं यतः

पूर्वोपनिषदर्थश्रवणे कृतेऽपि देवतासाक्षात्कारो न जायते अतः तदर्थमयमुपनिषदारम्भो युज्यते। यः कोऽपि वा परदेवतासाक्षात्कारार्थी "जातवेदसे सुनवाम सोमं" इत्यादि त्रिपुराविद्यामर्थानुसन्धानपुरस्सरं तद्भावभावितः सन् पठित्वा पठन् वर्तते तस्यैव त्रैपुरी व्यक्तिर्लक्ष्यते त्रिपुरासान्निध्यं भवति ॥ १ ॥ इति भगवन्मुखतः श्रुत्वा ऋषयस्तदियत्ताबुभुत्सया भगवन्तं पृच्छन्तीत्याह— जातवेदस इति ॥ २ ॥

त्रिपुराविद्या

तान् होवाच भगवान्। जातवेदसे सुनवाम सोमं तदन्त्यमवाणीं विलोमेन पठित्वा प्रथमस्याद्यं तदेव दीर्घं द्वितीयस्याद्यं सुनवाम सोममित्यनेन कौलं वामं श्रेष्ठं सोमं महासौभाग्यमाचक्षते ॥ ३ ॥

तत्कृतप्रश्नमङ्गीकृत्य **तान् होवाच भगवान्**। आदौ जातवेदसे सुनवाम सोमं इत्युच्चार्य तदन्त्यमवाणीं तस्या आदिविद्यायाः सकलह्रीं इति अन्त्यमवाणीं ह्रींलकसेति **विलोमेन पठित्वा** आदिविद्यायाः **प्रथमस्य** वाग्भवकूटस्य **आद्यं तदेव दीर्घं** का इति **द्वितीयस्य** कामकूटस्य **आद्यं** हेति बीजद्वययोगतः काहेत्युक्तं भवति। सेयं कुण्डलिनी शक्तिः किमाह? कदा सुषुम्नावदनं भित्त्वा तदन्तः प्रविश्य ग्रन्थित्रयान्वितमूलाधारस्वाधिष्ठानमणिपूरकानाहतविशुद्धाज्ञाचक्राणि क्रमाद्विभिद्य तदुपरि विद्योतमानसूर्येन्दुमण्डलद्वयैक्यजसोमं अमृतं दृग्प्राणमनोग्निभिः सह **सुनवाम** वयं सर्वे मिलित्वा पिबाम ततः सहस्रारचक्रं प्रविश्य तत्रत्यतुर्यैक्यं तुर्यतुर्यैक्यं वा भजाम इत्यनेन। कुः पृथिवी तदुपलक्षितविद्यापदतत्कार्यजातं यत्र विलयमेत्य तन्मात्रमवशिष्यते तत् कुलं तदेव **कौलं**, स्वातिरिक्तप्रपञ्चापवादाधिष्ठानं यत्सर्वाधिष्ठानं तदेव स्वाज्ञदृष्टिविकल्पितस्वातिरिक्तग्रसने **वामं** सनर्थं, यत् स्वावशेषतयाऽवस्थातुं **वामं** तदेव निष्प्रतियोगिकश्रेष्ठं स्वातिरिक्तसानान्यग्रसनात्, किं तत् क्रूरमित्यत्र सर्वप्राण्यात्मतया सर्वाह्लादनकरत्वात् **सोमं**

संशान्तस्वातिरिक्तभ्रमं निष्प्रतियोगिकब्रह्ममात्रं लोके ब्रह्मविद्वरिष्ठा अपि तन्मात्रावशेषलक्षणविकलेवरकैवल्यमेव महासौभाग्यमाचक्षते प्रवदन्तीत्यर्थः ॥ ३ ॥

महाविद्येश्वरीविद्या

सर्वसंपत्तिभूतं प्रथमं निवृत्तिकारणं द्वितीयं स्थितिकारणं तृतीयं सर्गकारणमित्यनेन करशुद्धिं कृत्वा त्रिपुराविद्यां स्पष्टीकृत्वा जातवेदसे सुनवाम सोममित्यादि पठित्वा महाविद्येश्वरीविद्यामाचक्षते ॥ ४ ॥

त्रिपुरेश्वरीं जातवेदस इति जाते आद्यक्षरे मातृकायाः शिरसि बैन्दवममृतरूपिणीं कुण्डलिनीं त्रिकोणरूपिणीं चेति वाक्यार्थः ॥ ५ ॥

तथाविधसौभाग्यपदवीप्रापकोपायः क इत्यत आह—सर्वेति । यत्सर्वसंपत्तिप्रापकहेतुतया भवतीति सर्वसंपत्तिभूतं वाग्भवादिकूटत्रयं, तत्र प्रथमं वाग्भवकूटं स्वातिरिक्तप्रपञ्चनिवृत्तिकारणं तस्य स्वातिरिक्तोपसंहारकप्रलयकालरुद्रार्थत्वात्, द्वितीयं कामकूटं स्थितिकारणं स्वाज्ञविकल्पितप्रपञ्चजातस्य स्वज्ञानतः स्वाज्ञानभ्रमं मोचयित्वा स्वावशेषीकृत्य परिपालकविष्ण्वर्थत्वात्, तृतीयं शक्तिकूटं स्वातिरिक्तप्रपञ्चसृष्टिकारणं तस्य ब्रह्मार्थत्वात्, इत्यनेन त्रिमूर्तिधिया खण्डत्रयोपासनेन स्वातिरिक्तभ्रमं करोतीति करं अन्तःकरणं शुद्धिं कृत्वा त्रिपुराविद्यां स्पष्टीकृत्वा पुनः जातवेदसे इतीमामृचं पठित्वा नित्यानुसंधानतो ा संविदुदेति तामेव सन्तो महाविद्येश्वरीविद्यामाचक्षते कथयन्तीत्यर्थः ॥ ४ ॥ न्त्रार्थमाह—त्रिपुरेति । त्रिपुरेश्वरीविद्यामधिष्ठाय जातवेदस इति जाते वेदाद्यक्षरे अकारादिमातृकायाः शिरसि प्रणवे "बिन्दुरीश्वरसंज्ञस्तु शत्रुघ्नः" इति श्रुत्यनुरोधेन बिन्दुरेव बैन्दवं ईश्वरतत्त्वं, अमृतं तद्भावापन्नां अमृतरूपिणीं

सर्वप्राणिनाडीकन्दाश्रयणतः कुण्डलिनीं मूलाधारत्रिकोणरूपिणीं चेति समष्टि-रूपेणेयममृतरूपिणी व्यष्टिरूपेण कुण्डलिनीति वाक्यार्थः ॥ ५ ॥

सर्वरक्षाकरीविद्या

एवं प्रथमस्याद्यं वाग्भवं द्वितीयं कामकला[1]मयं जात इत्यनेन परमात्मनोज्जृम्भणम् ॥ ६ ॥

जात इत्यादिना परमात्मा शिव उच्यते ॥ ७ ॥

जातमात्रेण कामी कामयते काममित्यादिना पूर्णं व्याचक्षते॥८॥

तदेव सुनवाम गोत्रारूढं मध्यवर्तिनाऽमृतमध्येनार्णेन मन्त्राणान् स्पष्टीकृत्वा गोत्रेति नामगोत्रायामित्यादिना स्पष्टं कामकलालयं शेषं वाममित्यादिना पूर्वेणाध्वना विद्येयं सर्वरक्षाकरी व्याचक्षते ॥ ९ ॥

एवं प्रथमस्य प्रधानभूतस्याऽऽदिविद्यातत्त्वस्य आद्यं वाग्भवकूटं कादि, द्वितीयं कामकलामयं हादि, तृतीयं शक्तिकूटं सादीति च, एवंरूपी जात इत्यनेन परमात्मोज्जृम्भणं एवंरूपेण परमात्मैव वर्तत इत्युक्तं भवति ॥ ६ ॥ स्वाज्ञदृष्ट्या एवमुज्जृम्भितोऽपि स्वज्ञदृष्ट्या निर्विशेषं जात इत्यादिना परमात्मा शिव उच्यते स्वातिरिक्तविशेषाशिवग्रासत्वात् ॥ ७ ॥ पुनः स्वाज्ञदृष्ट्या कामी भूत्वा स्वस्येश्वरत्वं कामयते । एवंकामे कुतो मे संकल्पवृत्तिरिति तत्त्यागत-स्तत्स्वरूपं ब्रह्मविदः पूर्णं व्याचक्षते कथयन्तीत्यर्थः ॥ ८ ॥ ततः किमित्यत आह—तदेवेति । ब्रह्मविदो यत्पूर्णमामनन्ति तत् पूर्णशिवचैतन्यं एव सुनवाम सुष्ठु वदामः । किमिति ? गोत्रारूढमिति । गोत्राशब्देन वाग्भवादिकूटत्रयालङ्कार-लकारत्रयमभिधीयते । लकारस्य पृथ्वीबीजत्वाल्लकारत्रयस्य गोत्रात्वमुक्तम् ।

[1] लयं—अ १, अ २, क, मु.

तद्गतनामरूपादिविकारमलक्ष्यीकृत्येदमस्ति भाति प्रियमिति सच्चिदानन्दरूपेण तदारूढमिति सुनवामेत्यर्थः। कूटत्रयमध्यवर्तिना लकारत्रयेण अर्णेन अमृतमध्येन लार्णार्थस्य स्ववाच्यपृथिवीगतमार्त्यनामरूपग्राससच्चिदानन्दरूपेणामृतत्वाल्लकारस्यामृतमध्यत्वम्। एवं लकारत्रयोपलक्षितमन्वार्णान् स्पष्टीकृत्वा ब्रह्मार्थत्वेन संभाव्य गोत्रेति नाम पृथिव्याः गोत्रायां पृथिव्यां नामरूपविकारास्पृष्टसच्चिदानन्दात्मना शिवतत्त्वमारूढमिति यत् पुरस्तादेवोक्तं तदित्यादिना स्पष्टं कामकलाऽऽलयं व्याख्यातं शेषं तु वाग्भवकूटं शक्तिकूटं च वाममित्यादिना पूर्वेणाध्वना स्पष्टीकृतमित्यर्थः। ईश्वरचैतन्यं स्वातिरिक्तकलनाग्रसने वामं समर्थमित्यनेन शिवादतिरिक्तं न किंचिदस्तीति यैवं व्याख्याता सेयं विद्या सर्वरक्षाकरीति व्याचक्षते ॥ ९ ॥

त्रिपुरेशी-आत्मासनरूपिणी-शक्तिशिवरूपिणीविद्याः

एवमेतेन विद्यां त्रिपुरेशीं स्पष्टीकृत्वा जातवेदस इत्यादिना जातो देव [1]एक ईश्वरः परमो ज्योतिर्मन्त्रतो वेति तुरीयं वरं दत्त्वा बिन्दुपूर्णज्योतिःस्थानं कृत्वा प्रथमस्याद्यं द्वितीयं च तृतीयं च सर्वरक्षाकरी [2]संबन्धं कृत्वा विद्यामात्मासनरूपिणीं स्पष्टीकृत्वा जातवेदसे सुनवाम सोममित्यादि पठित्वा रक्षाकरीं विद्यां स्मृत्वाऽऽद्यन्तयोर्धान्नोः शक्तिशिवरूपिणीं विनियोज्य स इति शक्त्यात्मकं वर्ण सोममिति शैवात्मकं धाम जानीयात्। यो जानीते स सुभगो भवति ॥ १० ॥

एवमेतेन शिवादतिरिक्तं न किंचिदस्तीति विद्यां त्रिपुरेशीं स्पष्टीकृत्वा जातवेदस इत्यादिना निर्विशेषस्वरूपेण जातो देवः एक एवेश्वरः परमो

[1] एको हीश्वरः—उ. [2] संबद्धं—क.

ज्योतिरवशिष्यते तथा कूटत्रयविशिष्टमन्त्रतो वेति कूटत्रयापेक्षया तदवसान-विभातं तुरीयचैतन्यं वरं तस्य निर्विकल्पत्वात् कूटत्रये तुरीयस्वरूपं दत्त्वा तुरीयशिवादतिरिक्तं कूटत्रयं नास्तीति ध्यात्वा बिन्दुपूर्णज्योतिःस्थानं कृत्वा पूर्णाहंभावेश्वरभावमापाद्य प्रधानविद्याऽऽद्यं द्वितीयं च तृतीयं च कूटत्रयं पूर्वोक्त-सर्वरक्षाकरीविद्यया संबन्धं कृत्वा आत्मासनरूपिणीं विद्यामपि पूर्ववत् स्पष्टीकृत्वा जातवेदसे सुनवाम सोमं इत्यादि पठित्वा पुनश्च रक्षाकरीविद्यां स्मृत्वा सर्वरक्षाकर्या आद्यन्तयोः धाम्नोः आद्यवसानसीम्नोः शक्तिशिवरूपिणीं विनियोज्य किं तच्छक्तिशिवरूपमित्यत्र जातवेदसे सुनवाम सोममित्यस्मिन् वाक्ये स इति शक्त्यात्मकं वर्णं सोममिति शैवात्मकं धाम जानीयात्। यो जानीते स सुभगो महान् भवति ॥ १० ॥

त्रिपुरवासिनीविद्या

इत्येवमेतां चक्रासनगतां त्रिपुरवासिनीं विद्यां स्पष्टीकृत्वा जातवेदसे सुनवाम सोममिति पठित्वा त्रिपुरेश्वरीविद्यां सदोदितां शिवशक्त्यात्मिकामावेदितां जातवेदाः शिव इति सेति शक्त्यात्मा-क्षरमिति शिवादिशक्त्यन्तरालभूतां त्रिकूटादिचारिणीं सूर्याचन्द्र-मस्कां मन्त्रासनगतां त्रिपुरां महालक्ष्मीं सदोदितां स्पष्टीकृत्वा जातवेदसे सुनवाम सोममित्यादि पठित्वा पूर्वां मदात्मामनरूपां विद्यां स्मृत्वा देव इत्यादिना विश्वाहसंततोदयाबैन्दवमुपरि विन्यस्य सिद्धासनस्थां त्रिपुरां मालिनीं विद्यां स्पष्टीकृत्वा जातवेदसे सुनवाम सोममित्यादि पठित्वा त्रिपुरां सुन्दरीं श्रित्वा कले अक्षरे विचिन्त्य मूर्तिभूतां मूर्तिरूपिणीं सर्वविद्येश्वरीं त्रिपुरां विद्यां

स्पष्टीकृत्वा जातवेदस इत्यादि पठित्वा त्रिपुरां लक्ष्मीं श्रित्वाऽग्निं निदहाति ॥ ११ ॥

ततस्त्रिपुरवासिनीं विद्यां स्पष्टीकुर्यादित्याह—इत्येवमिति । त्रिपुरवासिनीं विद्यां चिच्छक्तिरूपेण स्पष्टीकृत्वा शिवशक्त्यात्मकत्वं कथमित्यत्र —जातवेदा इति । जातवेदा इति शिवश्च सेत्यादिशक्तिश्च तयोः अन्तरालभूतां मध्यस्थां त्रिकूटादिचारिणीं त्रिकूटादिमन्त्रग्रामसंचारिणीं हसेति सूर्याचन्द्रमस्कां मन्त्रासनगतां सर्वमन्त्रविन्याससर्वचक्रासनाम् । अरातीयतो निदहाति वेद इत्यादिना वैराजात्मना विश्वा विश्वरूपिणी हकारार्धसूर्यात्मना सन्ततोदया चिच्छक्तिः, तदुपरि बैन्दवं शैवतत्त्वं चिन्मात्रं विन्यस्य चिन्मात्रादतिरिक्तं न किंचिदस्तीति । कूटत्रयव्यापके शिवशक्त्यात्मके कले ककारलकारे विचिन्त्य ककारलकारमूर्तिभूताम् ॥ ११ ॥

त्रिपुराम्बाविद्या

सैवेयमग्न्या[1]नने ज्वलतीति विचिन्त्य त्रिज्योतिषमीश्वरीं त्रिपुरामम्बां विद्यां स्पष्टीकुर्यात् ॥ १२ ॥

एवमेतेन स नः पर्षदति दुर्गाणि विश्वेत्यादिपरप्रकाशिनी प्रत्यग्भूता कार्या विद्येयमाह्वानकर्मणि सर्वतोधीरेति व्याचक्षते॥ १३॥

एवमेतद्विद्याऽष्टकं महामायादेव्यङ्गभूतं व्याचक्षते ॥ १४ ॥

स्वारातिवर्गानग्नि शीतलज्ञानाग्निरूपेण या दहाति दहति सैवेयमग्न्याने अग्न्याना ज्वलतीति विचिन्त्य सूर्येन्द्वग्न्यात्मना त्रिज्योतिषम् ॥ १२ ॥ परप्रकाशिनी सम्यग्ज्ञानरूपेण परप्रकाशकत्वात् स्वयं प्रत्यग्भूता कार्या विद्येयमाह्वानकर्मणि कारणीभूतविद्यात्मना ज्ञानरूपिणी कार्यभावमापन्ना विद्यात्मना

[1] सने—क.

इयमाह्वानकर्मणि आकर्षणादिषट्कर्मोपकर्मसु विनियुज्यते। एवं सर्वाकारेणेयं सर्वकार्यकरणे सर्वतो धीरेति समर्थेति तत्स्वरूपज्ञाः व्याचक्षते ॥ १३ ॥ एवमेतत् त्रिपुराविद्याऽऽदित्रिपुराम्बाविद्याऽन्तं विद्याऽष्टकं महामायादेव्यङ्गभूतं जातवेदस इति मन्त्रनिमग्नं सम्यगुद्धृत्य चिच्छक्त्यात्मना स्पष्टीकृत्य परतत्त्वतया व्याचक्षते तद्विदो व्याख्यां कुर्वन्तीत्यर्थः ॥ १४ ॥

श्रीचक्रस्यानुलोमक्रमः

देवा ह वै भगवन्तमब्रुवन् महाचक्रनायकं नो ब्रूहीति सार्वकामिकं सर्वाराध्यं सर्वरूपं विश्वतोमुखं मोक्षद्वारं यद्योगिन उपविश्य परं ब्रह्म भित्त्वा निर्वाणमुपविशन्ति ॥ १५ ॥

तान् होवाच भगवान् श्रीचक्रं व्याख्यास्याम इति ॥ १६ ॥

त्रिकोणं त्र्यश्रं कृत्वा तदन्तर्मध्यवर्तिमानयष्टिरेखामाकृष्य विशालं नीत्वाऽग्रतो योनिं कृत्वा [1]पूर्वयोन्यग्ररूपिणीं मानयष्टिं कृत्वा तां सर्वोर्ध्वां नीत्वा योनिं कृत्वाऽऽद्यं त्रिकोणं चक्रं भवति द्वितीयमन्तरालं भवति तृतीयमष्टयोन्यङ्कितं भवति ॥ १७ ॥

अथाष्टारचक्राद्यन्तविदिक्कोणाग्रतो रेखां नीत्वा साध्याद्याकर्षणबद्धरेखां नीत्वेत्येवमधोर्ध्वसंपुटयोन्यङ्कितं कृत्वा कक्षाभ्य ऊर्ध्वगरेखाचतुष्टयं कृत्वा यथाक्रमेण मानयष्टिद्वयेन दशयोन्यङ्कितं चक्रं भवति ॥ १८ ॥

अनेनैव प्रकारेण पुनर्दशारचक्रं भवति ॥ १९ ॥

[1] पूर्वे—अ १, अ २, क.

मध्यत्रिकोणाग्रचतुष्टयाद्रेखा[1]चतुष्टयाग्रकोणेषु संयोज्य तद्-शारांशतो [2]नीतां मानयष्टिरेखां योजयित्वा चतुर्दशारं चक्रं भवति ॥ २० ॥

ततोऽष्टपत्रसंवृतं चक्रं भवति षोडशपत्रसंवृतं चक्रं भवति पार्थिवं चक्रं चतुर्द्वारं भवति ॥ २१ ॥

एवं सृष्टियोगेन चक्रं व्याख्यातम् ॥ २२ ॥

इन्द्रादयो देवाः सदाशिवमुखतः साङ्गोपाङ्गविशिष्टामादिविद्यां यथा-वच्छ्रुत्वा तत्पूजापीठसृष्ट्यादिचक्रराजेयत्ताबुभुत्सया भगवन्तमब्रुवन्नित्याह—देवा इति । सर्वकामप्रदत्वात् सार्वकामिकं सर्वाराध्यं सर्वरूपं सर्वरूपेण सर्वैरप्या-राधितत्वाद्विराड्रूपत्वाच्च सर्वतोमुखं चित्तशुद्धिप्राप्यज्ञानद्वारा मोक्षहेतुत्वात् मोक्षद्वारं यच्चक्राराधने योगिनः उपविश्य तत्प्रसादलब्धज्ञानद्वारा प्रत्यक्पर-ब्रह्मणोर्भेदग्रन्थिं भित्त्वा प्रत्यग्ब्रह्मैक्यलक्षणं निर्वाणमुपविशन्ति तच्चक्रनायकं नो ब्रूहि ॥ १५ ॥ इति देवैः पृष्टः तान् होवाच भगवान् सदाशिवः श्रीचक्रं व्याख्यास्याम इति ॥ १६ ॥ कस्तत्प्रकार इत्यत्र—आदौ त्रिकोणं त्र्यश्रं कृत्वेत्यादि ॥ १७–२२ ॥

श्रीचक्रस्य प्रतिलोमक्रमः

नवात्मकं चक्रं प्रातिलोम्येन वा वक्ष्मि—प्रथमं चक्रं त्रैलोक्यमोहनं भवति साणिमाद्यष्टकं भवति समाख्यष्टकं भवति ससर्वसंक्षोभिण्यादिदशकं भवति सप्रकटं भवति त्रिपुरयाऽधिष्ठितं भवति ससर्वसंक्षोभिणीमुद्रया जुष्टं भवति ॥ २३ ॥

[1] चराग्र—अ १, अ २, क, मु.

[2] 'नीतां' इति नास्ति—उ.

द्वितीयं सर्वाशापरिपूरकं चक्रं भवति सकामाद्याकर्षिणीषोडशकं भवति सगुप्तं भवति त्रिपुरेश्वर्याऽधिष्ठितं भवति सर्वविद्राविणीमुद्रया जुष्टं भवति ॥ २४ ॥

तृतीयं सर्वसंक्षोभणं चक्रं भवति सानङ्गकुसुमाद्यष्टकं भवति सगुप्ततरं भवति त्रिपुरसुन्दर्याऽधिष्ठितं भवति सर्वाकर्षिणीमुद्रया जुष्टं भवति ॥ २५ ॥

तुरीयं सर्वसौभाग्यदायकं चक्रं भवति ससर्वसंक्षोभिण्यादिद्विसप्तकं भवति ससंप्रदायं भवति त्रिपुरवासिन्याऽधिष्ठितं भवति ससर्ववशंकरीमुद्रया जुष्टं भवति ॥ २६ ॥

[1]पञ्चमं तुरीयान्तं सर्वार्थसाधकं चक्रं भवति ससर्वसिद्धिप्रदादिदशकं भवति [2]सकलकौलं भवति त्रिपुराम्बाल्क्ष्म्याऽधिष्ठितं भवति महोन्मादिनीमुद्रया जुष्टं भवति ॥ २७ ॥

षष्ठं सर्वरक्षाकरं चक्रं भवति ससर्वज्ञत्वादिदशकं भवति [3]सनिगर्भं भवति त्रिपुरमालिन्याऽधिष्ठितं भवति महाङ्कुशमुद्रया जुष्टं भवति ॥ २८ ॥

सप्तमं सर्वरोगहरं चक्रं भवति[4]सवशिन्याद्यष्टकं भवति सरहस्यं भवति त्रिपुरसिद्धयाऽधिष्ठितं भवति खेचरीमुद्रया जुष्टं भवति ॥२९॥

अष्टमं सर्वसिद्धिप्रदं चक्रं भवति सायुधचतुष्टयं भवति सपरापररहस्यं भवति त्रिपुराम्बयाऽधिष्ठितं भवति बीजमुद्रया जुष्टं भवति ॥ ३० ॥

[1] 'पञ्चमं' इति नास्ति—अ १, अ २, क, मु.
[2] सकुल—अ १, अ २.
[3] सनिर्गर्भ—अ १, अ २.
[4] सर्ववशि—अ १, मु.

नवमं चक्रनायकं सर्वानन्दमयं चक्रं भवति सकामेश्वर्यादित्रिकं भवति सातिरहस्यं भवति महात्रिपुरसुन्दर्याऽधिष्ठितं भवति योनिमुद्रया जुष्टं भवति ॥ ३१ ॥

संक्रामन्ति वै सर्वाणि छन्दांसि चक्राराणि तदेव चक्रं श्रीचक्रम् ॥ ३२ ॥

बिन्दुस्थानमारभ्य भूपुरान्तं सृष्टिचक्रं प्रकटयित्वाऽथ नवात्मकमिति। तत्रादौ प्रथममिति। ब्राह्म्यादिसमात्रष्टकं भवति ॥ २३ ॥ द्वितीयावरणात्मकद्वितीयचक्रेयत्तामाह—द्वितीयमिति ॥ २४–२६ ॥ सकलकौलं सर्वाधिष्ठानं भवति ॥ २७ ॥ सनिगर्भं भवति अन्तरालरहितमित्यर्थः ॥ २८–२९ ॥ पाशाङ्कुशादिसायुधचतुष्टयं भवति ॥ ३०–३१ ॥ एवं नवचक्रलक्षणमुक्तं, छन्दांस्येवात्राराणि भूत्वा वर्तन्त इत्याह—संक्रामन्तीति। यदेवं निष्पन्नं तदेव चक्रं श्रीचक्रम् ॥ ३२ ॥

श्रीचक्रे महात्रिपुरसुन्दरीपूजा

तस्य नाभ्यामग्निमण्डले सूर्याचन्द्रमसौ तत्रोंकारपीठं पूजयित्वा तत्राक्षरं बिन्दुरूपं तदन्तर्गतव्योमरूपिणीं विद्यां परमां स्मृत्वा महात्रिपुरसुन्दरीमावाह्य

क्षीरेण स्नापिते देवि चन्दनेन विलेपिते।
बिल्वपत्रार्चिते देवि दुर्गेऽहं शरणं गतः ॥

इत्येकयर्चा प्रार्थ्य मायालक्ष्मीमन्त्रेण पूजयेदिति भगवानब्रवीत्॥ ३३॥

बिन्दुरूपं ईश्वरस्वरूपं तदन्तर्गतव्योमरूपिणीं चित्सामान्यात्मिकां विद्याम्। अनेन मन्त्रेण देवीं ध्यात्वा पूजयेदित्याह—क्षीरेणेति। सदाशिवो भगवान् ॥ ३३ ॥

पूजाफलम्

एतैर्मन्त्रैर्भगवतीं यजेत् । ततो देवी प्रीता भवति स्वात्मानं दर्शयति । तस्माद्य एतैर्मन्त्रैर्यजति स ब्रह्म पश्यति स सर्वं पश्यति सोऽमृतत्वं च गच्छति । य एवं वेदेति महोपनिषत् ॥ ३४ ॥

तत्तद्भावानुरोधेन सविशेषं निर्विशेषं वा स्वात्मानं दर्शयति । यस्मादेवं तस्मात् । स सर्वं पश्यति, देवताऽतिरिक्तं न किंचिदपि पश्यति । य एवं द्रष्टा सोऽमृतत्वं च गच्छति । देवतासान्निध्यार्थमियमुपनिषदारभ्यत इति यत् प्रतिज्ञातं तत् सम्यगुपसंहृतमित्यर्थः । इति महोपनिषच्छब्दो द्वितीयोपनिषत्समाप्त्यर्थः ॥ ३४ ॥

इति द्वितीयोपनिषत्

तृतीयोपनिषत्

मुद्रासामान्यलक्षणम्

देवा ह वै मुद्राः सृजेयमिति भगवन्तमब्रुवन् । तान् होवाच भगवा[1]नवनिकृतजानुमण्डलं विस्तीर्य पद्मासनं कृत्वा मुद्राः सृजेतेति ॥ १ ॥

[1] नवनी—अ १, अ २, क.

बिन्दुत्रिकोणवसुकोणदशारयुग्मं
मन्वश्रनागदलसंयुतषोडशारम् ।
वृत्तत्रयं च धरणीसदनत्रयं च
श्रीचक्रमेतदुदितं परदेवतायाः ॥

इत्युक्तरीत्याऽनुलोमप्रतिलोमाभ्यां सृष्टिचक्रमुपसंहारचक्रं च यथाव्याख्यातमवगम्य देवा विशेषतो योन्यादिनवमुद्रालक्षणबुभुत्सया भगवन्तमब्रुवन्नित्याह—देवा इति । कृत्वा बद्ध्वा ॥ १ ॥

योन्यादिनवमुद्रालक्षणम्

स सर्वानाकर्षयति यो योनिमुद्रामधीते स सर्वं वेत्ति स सर्वफलमश्नुते स सर्वान् भञ्जयति स विद्वेषिणं स्तम्भयति । मध्यमे अनामिकोपरि विन्यस्य कनिष्ठिकाङ्गुष्ठतोऽधीते मुक्तयोस्तर्जन्योर्दण्डवदधस्तादेवं[1]विधा प्रथमा संपद्यते ॥ २ ॥

सैव मिलितमध्यमा द्वितीया ॥ ३ ॥

तृतीयाऽङ्कुशाकृतिरिति ॥ ४ ॥

प्रातिलोम्येन पाणी सङ्घर्षयित्वाऽङ्गुष्ठौ साग्रिमौ समाधाय तुरीया ॥ ५ ॥

परस्परं कनीयसेदं मध्यमाबद्धे अनामिके दण्डिन्यौ तर्जन्या[2]वालिङ्ग्यावष्टभ्य मध्यमा[3]नखमिलिताङ्गुष्ठौ पञ्चमी ॥ ६ ॥

सैवाग्रेऽङ्कुशाकृतिः षष्ठी ॥ ७ ॥

[1] विधाय—अ २. विधया—उ १.
[2] वा आलि—अ १, अ २, क. [3] नमि—उ.

दक्षिणशये वामबाहुं कृत्वाऽन्योन्यानामिके कनीयसीमध्यगते मध्यमे तर्जन्याक्रान्ते सरलास्वङ्गुष्ठौ खेचरी सप्तमी ॥ ८ ॥

सर्वोर्ध्वे सर्वसंहृति स्वमध्यमानामिकाऽन्तरे कनीयसे पार्श्वयोस्तर्जन्यावङ्कुशाढ्ये युक्ता साऽङ्गुष्ठयोगतोऽन्योन्यं सममञ्जलिं कृत्वाऽष्टमी ॥ ९ ॥

परस्परमध्यमापृष्ठवर्तिन्यावनामिके तर्जन्याक्रान्ते समे मध्यमे आदायाङ्गुष्ठौ मध्यवर्तिनौ नवमी प्रतिपद्यत इति ॥ १० ॥

तत्र वक्ष्यमाणयोनिमुद्रां स्तुवन् तल्लक्षणमाह—स इति । देवताप्रसादेन स सर्वं वेत्ति । स सर्वान् स्वामित्रान् भञ्जयति भग्नान् करोति । योनिमुद्रालक्षणमाह—मध्यम इति ॥ २ ॥ द्वितीयं बीजमुद्रालक्षणमाह—सेति ॥ ३ ॥ तृतीयं खेचरीमुद्रालक्षणमाह—तृतीयाङ्कुशाकृतिरिति ॥ ४ ॥ तुरीयं महाङ्कुशमुद्रालक्षणमाह—प्रातिलोम्येनेति ॥ ५ ॥ पञ्चमं महोन्मादिनीमुद्रालक्षणमाह—परस्परमिति ॥ ६ ॥ षष्ठं सर्ववशंकरीमुद्रालक्षणमाह—सैवेति ॥ ७ ॥ सप्तमं सर्वाकर्षिणीमुद्रालक्षणमाह—दक्षिणेति ॥ ८ ॥ अष्टमं सर्वविद्राविणीमुद्रालक्षणमाह—सर्वोर्ध्व इति ॥ ९ ॥ नवमं सर्वसंक्षोभिणीमुद्रालक्षणमाह—परस्परेति । योन्यादिसर्वसंक्षोभिण्यन्तमुद्रानवकलक्षणं सम्यक् प्रपञ्चितमित्यर्थः ॥ १० ॥

पञ्चबाणमुद्रालक्षणम्

सैवेयं कनीयसे समे अन्तरितेऽङ्गुष्ठौ समावन्तरितौ कृत्वा त्रिखण्डापद्यत इति । पञ्च बाणाः पञ्चाद्या मुद्राः स्पष्टाः ॥ ११ ॥

पञ्चबाणमुद्रालक्षणमाह—सेति ॥ ११ ॥

नवबीजोद्धारः

क्रोमङ्कुशा [1]हसखफ्रें खेचरी [2]हस्त्रौं बीजाष्टमी वाग्भवाद्या नवमी दशमी च संपद्यत इति य एवं वेद ॥ १२ ॥

ततो नववीजान्युद्धरति—क्रोमिति । क्रों इत्यङ्कुशबीजं हसेति शिवशक्तिबीजे खेति मारणबीजं फ्रें इति मोहनबीजं हसखफ्रें इति खेचरीबीजं हेति सूर्यबीजं स्त्रौमिति कामबीजं केति वाग्भवाद्यबीजं आहत्य बीजानि नव । आदिशब्दार्थकामकूटाद्यबीजं हेति दशमी च संपद्यते । य एवं वेद स मन्त्रसिद्धो भवतीत्यर्थः ॥ १२ ॥

कामकलाचक्रम्

अथातः कामकलाभूतं चक्रं व्याख्यास्यामो ह्रीं क्लीमैं ब्लूँ [3]स्त्रौमेते पञ्च कामाः सर्वचक्रं व्याप्य वर्तन्ते । मध्यमं कामं सर्वावसाने संपुटीकृत्य ब्लूङ्कारेण संपुटं व्यासं कृत्वा [4]द्विरैंद्वयेन मध्यवर्तिना साध्यं बद्ध्वा भूर्जपत्रे यजति । तच्चक्रं यो वेत्ति स सर्वं वेत्ति स [5]सकलान् लोकानाकर्षयति स सर्वं स्तम्भयति । नीलीयुक्तं चक्रं शत्रून् मारयति गतिं स्तम्भयति । लाक्षायुक्तं कृत्वा सकललोकं वशीकरोति । नवलक्षजपं कृत्वा रुद्रत्वं प्राप्नोति । मातृकया वेष्टितं कृत्वा विजयी भवति । भगाङ्ककुण्डं कृत्वाऽग्निमाधाय हविषा योषितो वशीकरोति । पुरुषे हुत्वा वर्तुले वा हुत्वा

[1] हसखफ्रें—अ २, मु.
[2] हस्त्रौं—अ १, अ २. हस्त्रीं—क.
[3] स्त्रौमे—अ १, अ २. स्त्रामे—क.
[4] द्रमद्वै—अ १, अ २, क.
[5] सकललो—अ १, अ २, क.

श्रियमतुलां प्राप्नोति । चतुरश्रे हुत्वा वृष्टिर्भवति । त्रिकोणे हुत्वा शत्रून् मारयति गतिं स्तम्भयति । पुष्पाणि हुत्वा विजयी भवति । महारसैर्हुत्वा परमानन्दनिर्भरो भवति । महारसाः षड्रसाः ॥ १३ ॥

निष्कामिनां स्वास्थ्युपायचक्रस्वरूपं सप्रपञ्चं प्रतिपाद्य तद्विपरीतानां कामिनां सर्वकामावाप्तिहेतुतया पञ्चकामभूषितं कामकलाभूतं चक्रं प्रकटयाम इत्याह—अथेति । तत्र ऐमिति मध्यमं कामं सर्वावसाने स्त्रौमित्यन्तिमकामे ऐं स्त्रौं ऐं इति संपुटीकृत्य पुनस्तत् ब्लूंकारेण संपुटं व्याप्तं कृत्वा संपुटं यथा ब्लूंकारान्तरितं भवेत् तथा तेनैव संवेष्ट्य द्विः ऐंद्वयेन मध्यवर्तिना द्विपार्श्वभूषणैंकारद्वयेन मध्यवर्तिना स्त्रौंकारेण सह वाञ्छितार्थसिद्धिं मे कुर्विति साध्यं बध्वा । पुरुषे पुरुषाकारकुण्डे हुत्वा वर्तुले वा कुण्डे हुत्वा । महारसाः षड्रसाः मधुराम्लादय इत्यर्थः ॥ १३ ॥

क्षेत्रेशपूजा

गणानां त्वा गणपतिं हवामहे कविं कवीनामुपमश्रवस्तमम् ।
ज्येष्ठराजं ब्रह्मणां ब्रह्मणस्पत आ नः शृण्वन्नूतिभिः सीद
सादनम् ॥

इत्येव[1]माद्यमक्षरं तदन्त्यबिन्दुपूर्णमित्यनेनाङ्गं स्पृशति । गं गणेशाय नम इति गणेशं नमस्कुर्वीत । ॐ नमो भगवते भस्माङ्गरागायोग्रतेजसे हनहन दहदह पचपच मथमथ विध्वंसयविध्वंसय हलभञ्जन शूलमूले व्यञ्जनसिद्धिं कुरुकुरु समुद्रं पूर्वप्रतिष्ठितं शोषयशोषय स्तम्भयस्तम्भय परमन्त्रपरयन्त्रपरतन्त्रपरदूतपरकटकपरच्छेदनकर विदारयविदारय च्छिन्धिच्छिन्धि ह्रीं फट् स्वाहा । अनेन क्षेत्राध्यक्षं पूजयेदिति ॥ १४ ॥

[1] माद्यक्ष—अ १, उ.

अविघ्नेन स्वाभिलषितप्रयोगसिद्धये गणानां त्वेति मन्त्रेण गणेशं नमस्कृत्य क्षेत्रेशं पूजयेदित्याह—गणानामिति। आद्यक्षरं गेति तदन्त्यबिन्दुपूर्णं गमिति। ततः किमित्यत्र—ओमिति। इतिशब्दो मन्त्रसमाप्त्यर्थः॥ १४॥

कुलकुमारीपूजा

कुलकुमारि विद्महे मन्त्रकोटि सुधीमहि।
तन्नः कौलिः प्रचोदयात्॥

इति कुमार्यर्चनं कृत्वा यो वै साधकोऽभिलिखति सोऽमृतत्वं गच्छति स यश आप्नोति स परमायुष्यमथ वा परं ब्रह्म भित्त्वा तिष्ठति य एवं वेदेति महोपनिषत्॥ १५॥

ततः कुमारीगायत्र्या तामर्चयेदित्याह—कुलेति। अभिलिखति अभिध्यायति। यद्ययं निष्कामस्तदा सोऽमृतत्वं गच्छति ब्रह्मविदिति स यश आप्नोति। परं ब्रह्म भित्त्वा ज्ञात्वा तद्भावमेत्य तिष्ठति। इति महोपनिषच्छब्दस्तृतीयोपनिषत्परिसमाप्त्यर्थः॥

इति तृतीयोपनिषत्

चतुर्थोपनिषत्

मृत्युंजयोपदेशः

देवा ह वै भगवन्तमब्रुवन् देव गायत्रं हृदयं नो व्याख्यातं त्रैपुरं सर्वोत्तमम्॥ १॥

जातवेदससूक्तेनाख्यातं नक्त्रैपुराष्टकम् ।

यदिष्ट्वा मुच्यते योगी जन्मसंसारबन्धनात् ॥ २ ॥

अथ मृत्युंजयं नो ब्रूहीत्येवं ब्रुवतां सर्वेषां देवानां श्रुत्वेदं वाक्यमथातस्त्र्यम्बकेनानुष्टुभेन मृत्युंजयं दर्शयति ॥ ३ ॥

यन्नो वक्तव्यं तत् सर्वं भवतोक्तमवशिष्टमृत्युंजयं ब्रूहीति देवाः पृच्छन्तीत्याह—देवा इति । आदिविद्यासमन्वयतया प्रथमोपनिषदि हृदयं गूढार्थं नो व्याख्यातम् । किं तत् त्रैपुरम् ॥१॥ किं च—जातवेदससूक्तेनेति । ततः यदिष्ट्वेति ॥ २–३ ॥

त्र्यम्बकादिशब्दार्थविवरणम्

कस्मात् त्र्यम्बकमिति । त्रयाणां पुराणामम्बकं स्वामिनं तस्मादुच्यते त्र्यम्बकमिति ॥ ४ ॥

अथ कस्मादुच्यते यजामह इति । यजामहे सेवा[1]महे वस्तु महेत्यक्षरद्वयेन कूटत्वेनाक्षरैकेन मृत्युंजयमित्युच्यते तस्मादुच्यते यजामह इति ॥ ५ ॥

अथ कस्मादुच्यते सुगन्धिमिति । सर्वतो यश आप्नोति तस्मादुच्यते सुगन्धिमिति ॥ ६ ॥

अथ कस्मादुच्यते पुष्टिवर्धनमिति । यः सर्वान् लोकान् सृजति यः सर्वान् लोकांस्तारयति यः सर्वान् लोकान् व्याप्नोति तस्मादुच्यते पुष्टिवर्धनमिति ॥ ७ ॥

अथ कस्मादुच्यते उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीयेति । [2]संलग्नत्वादुर्वारुकमिव मृत्योः संसारबन्धनात् संलग्नत्वाद्बद्धत्वान्मोक्षीभवति मुक्तो भवति ॥ ८ ॥

[1] महे स्तुम—अ २. महे वस्तुवहे—अ १, उ १. [2] मुल—अ १, अ २.

अथ कस्मादुच्यते मामृतादिति। अमृतत्वं प्राप्नोत्यक्षरं प्राप्नोति स्वयं रुद्रो भवति ॥ ९ ॥

तत्र त्र्यम्बकशब्दार्थं पृच्छति—कस्मात् त्र्यम्बकमिति। तच्छब्दार्थमाह —त्रयाणामिति। व्यष्टिसमष्ट्यात्मकस्थूलसूक्ष्मकारणशरीराणां जीवेश्वरात्मना अम्बकम् ॥ ४ ॥ यजामहे स्वात्मधिया सेवामहे स्तुमहेत्यक्षरद्वयेन त्र्यम्बेति तदुपरि कूटत्वेन विद्यमानाक्षरैकेन सबिन्दुककारेण मृत्युञ्जयमित्युच्यते ॥९–७॥ उर्वारुकमिति कश्चन शलाटुविशेषस्तदग्रमारभ्य मध्यान्तं चतुर्धा विदार्य तत्र सलवणबृहन्मरीचिचूर्णमापूर्य पुनः सर्वमेकीकृत्य सूत्रेणाबध्य कालान्तरे तद्बन्धमोक्षणतश्चतुर्धा भिन्नसन्धिबन्धविमोक्षो भवति तथेत्यारोपितबन्धमोक्षणान्मुक्तो भवतीत्यर्थः ॥ ८–९ ॥

भगवतीदर्शनसाधनमन्त्रः

देवा ह वै भगवन्तमूचुः—सर्वं नो व्याख्यातम्। अथ कैर्मन्त्रैः स्तुता भगवती स्वात्मानं दर्शयति तान् सर्वान् शैवान् वैष्णवान् सौरान् गाणेशान् नो ब्रूहीति ॥ १० ॥

स होवाच भगवान्—

त्र्यम्बकेनानुष्टुभेन मृत्युंजयमुपासयेत्।
पूर्वेणाध्वना व्याप्तमेकाक्षरमिति स्मृतम् ॥ ११ ॥

ॐ नमः शिवायेति याजुषमन्त्रोपासको रुद्रत्वं प्राप्नोति कल्याणं प्राप्नोति य एवं वेद ॥ १२ ॥

तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः।
दिवीव चक्षुराततम् ॥ १३ ॥

विष्णोः सर्वतोमुखस्य स्नेहो यथा पललपिण्डमोतप्रोतमनुव्याप्तं व्यतिरिक्तं व्याप्नुत इति व्याप्नुवतो विष्णोस्तत्परमं पदं परं

व्योमेति परमं पदं पश्यन्ति वीक्षन्ते सूरयो ब्रह्मादयो देवास इति सदा हृदय आदधते। तस्माद्विष्णोः स्वरूपं वसति तिष्ठति भूतेष्विति वासुदेव इति ॥ १४ ॥

ॐ नम इति त्रीण्यक्षराणि। भगवते इति चत्वारि। वासुदेवायेति पञ्चाक्षराणि। एतद्वै वासुदेवस्य द्वादशार्णमभ्येति। सोपप्लवं तरति स सर्वमायुरेवैति विन्दते प्राजापत्यं रायस्पोषं गौपत्यं च समश्नुते ॥ १५ ॥

प्रत्यगानन्दं ब्रह्मपुरुषं प्रणवस्वरूपमकार उकारो मकार इति। तानेकधा संभवति तदोमिति ॥ १६ ॥

हंसः शुचिषद्वसुरन्तरिक्षसद्धोता वेदिषदतिथिर्दुरोणसत्।
नृषद्वरसदृतसद्व्योमसदब्जा गोजा ऋतजा अद्रिजा ऋतं
बृहत् ॥ इति ॥ १७ ॥

हंसः इत्येतन्मनोरक्षरद्वितीयेन प्रभापुञ्जेन सौरेण घृतमब्जा गोजा ऋतजा अद्रिजा ऋतं सत्याप्रभापुञ्जिन्युषासंध्याप्रज्ञाभिः शक्तिभिः पूर्वं सौरमधीयानः सर्वफलमश्नुते। स व्योम्नि परमे धामनि सौरे निवसते ॥ १८ ॥

गणानां त्वेति त्रैष्टुभेन पूर्वेणाध्वना मनुनैकार्णेन गणाधिपमभ्यर्च्य गणेशत्वं प्राप्नोति ॥ १९ ॥

अथ गायत्री सावित्री सरस्वत्यजपा मातृका प्रोक्ता तया सर्वमिदं व्याप्तमिति ॥ २० ॥

ऐं वागीश्वरि विद्महे क्लीं कामेश्वरि धीमहि । सौस्तन्नः शक्तिः प्रचोदयादिति गायत्री प्रातः सावित्री मध्यन्दिने सरस्वती सायमिति निरन्तरमजपा हंस इत्येव मातृका पञ्चाशद्वर्णविग्रहेणाकारादिक्षकारान्तेन व्याप्तानि भुवनानि शास्त्राणि च्छन्दांसीत्येवं भगवती सर्वं व्याप्नोतीत्येव तस्यै वै नमो नम इति ॥ २१ ॥

तान् भगवानब्रवीदेतैर्मन्त्रैर्नित्यं देवीं स्तौति स सर्वं पश्यति सोऽमृतत्वं च गच्छति य एवं वेदेत्युपनिषत् ॥ २२ ॥

पुनर्देवाः कैर्मन्त्रैः स्तुता सती स्वात्मानं दर्शयति तान्नो ब्रूहीति पृच्छन्तीत्याह—देवा इति । ऊचुः किमिति सर्वमिति । स्वात्मानं दर्शयति तस्याश्चिच्छक्तित्वेन सर्वात्मकत्वात् ॥ १० ॥ देवैरेवं पृष्टः स होवाच भगवान् किमिति त्र्यम्बकेनेति । एकाक्षरमिति स्मृतं "ओमित्येकाक्षरं विद्धि" इति श्रुतेः ॥ ११–१३ ॥ श्रुतिरेव स्ववाक्यं व्याचष्टे विष्णोरिति ॥१४–२१ ॥ चिच्छक्त्यतिरिक्तं न किंचिदस्तीति दर्शनाच्छक्त्यंशमपि ग्रसित्वा चिन्मात्रादतिरिक्तं न किंचिदस्तीति ज्ञानसमकालं सोऽमृतत्वं च गच्छति ॥ २२ ॥

इति चतुर्थोपनिषत्

पञ्चमोपनिषत्

निर्विशेषब्रह्मजिज्ञासा

देवा ह वै भगवन्तमब्रुवन् स्वामिन्नः कथितं [1]स्फुटं क्रियाकाण्डं सविषयं त्रैपुरमिति । अथ परमं निर्विशेषं कथयस्वेति ॥ १ ॥

[1] सर्वं—अ १. स्पष्टं—अ

देवा भगवन्मुखतः सविशेषब्रह्मस्वरूपं सप्रपञ्चमवगम्य मुख्यामृतत्व-साधननिर्विशेषब्रह्मावगतिबुभुत्सया भगवन्तं पृच्छन्तीत्याह—देवा इति । उपासनाकाण्डमपि सम्यक् प्रपञ्चितमिति यथावदवगतम् ॥ १ ॥

परमात्मनिरूपणम्

तान् होवाच भगवान् तुरीयया माययाऽन्त्यया निर्दिष्टं परमं ब्रह्मेति परमपुरुषं चिद्रूपं परमात्मेति । श्रोता मन्ता द्रष्टाऽऽदेष्टा स्प्रष्टाऽऽघोष्टा विज्ञाता प्रज्ञाता सर्वेषां पुरुषाणामन्तः-पुरुषः स आत्मा स विज्ञेय इति ॥ २ ॥

न तत्र [1]लोकालोका न तत्र [2]देवादेवाः पशवोऽपशवस्तापसो न तापसः पौल्कसो न पौल्कसो विप्रा न विप्राः । स इत्येकमेव परं ब्रह्म विभ्राजति निर्वाणम् । न तत्र देवा ऋषयः पितर ईशते । प्रतिबुद्धः सर्वविद्यै[दे]ति ॥ ३ ॥

देवैरेवं पृष्टः तान् होवाच भगवान् । किमिति ? तुरीयया माययाऽन्त्यया ज्ञानविज्ञानसम्यग्ज्ञानरूपया निर्दिष्टं परमं ब्रह्मेति यदवशिष्यते तदेव परमपुरुषं चिद्रूपं परमात्मेति यूयं जानथ । अयमेव हि स्वाज्ञविकल्पितोपाधियोगात् श्रोतेत्यादि । य एवं दृष्टः स एव श्रुत्याचार्यप्रसादसिद्धस्वाज्ञविकल्पितनानोपाध्य-संभवप्रबोधसमकालं सर्वेषां विश्वविराडोत्रादीनां पुरुषाणामप्यन्तःपुरुषः ॥ २ ॥ न हि तत्र तदतिरेकेण लोकादिविभ्रमोऽस्ति, स्वाज्ञादिदृष्टिमोहे सत्यसति तन्निष्प्रतियोगिकैकं ब्रह्म स्वमात्रमवशिष्यत इत्याह—न तत्रेति । ब्रह्मातिरिक्तं न हि सर्वमस्तीति यो वेद स सर्ववित् तद्ब्रह्म स्वावशेषधियैतीति ॥ ३ ॥

मनोनिरोधः

तत्रैते श्लोका भवन्ति—

अतो निर्विषयं नित्यं मनः कार्यं मुमुक्षुणा ।
यतो निर्विषयो नाम मनसो मुक्तिरिष्यते ॥ ४ ॥

[1] लोका अलोका—उ, मु. [2] देवा अदेवा—उ, मु.

मनो हि द्विविधं प्रोक्तं शुद्धं चाशुद्धमेव च ।
अशुद्धं काममंकल्पं शुद्धं कामविवर्जितम् ॥ ९ ॥
मन एव मनुष्याणां कारणं बन्धमोक्षयोः ।
बन्धनं विषया[1]सक्तिर्मुक्त्यै निर्विषयं [2]मनः ॥ ६ ॥
निरस्तविषयासङ्गं [3]संनिरुद्धं मनो हृदि ।
यदा यात्यमनीभावस्तदा तत्परमं पदम् ॥ ७ ॥
तावदेव निरोद्धव्यं यावद्धृदि गतं क्षयम् ।
एतज्ज्ञानं च ध्यानं च शेषोऽन्यो ग्रन्थविस्तरः ॥ ८ ॥

अस्मिन्नर्थे एते वक्ष्यमाणा श्लोकाः मन्त्रा भवन्तीत्याह—तत्रेति । ब्रह्मातिरेकेण मनस्तत्कार्यमस्तीति यदि भ्रान्तिस्तदा अत इति ॥ ४ ॥ शुद्धाशुद्धभेदेन तद्द्विधा भिद्यत इत्याह—मनो हीति ॥ ९–८ ॥

ब्रह्मज्ञानाद्ब्रह्मभावप्राप्तिः

नैव चिन्त्यं न चाचिन्त्यं न चिन्त्यं चिन्त्यमेव च ।
पक्षपातविनिर्मुक्तं ब्रह्म संपद्यते ध्रुवम् ॥ ९ ॥

नैव चिन्त्यं स्वातिरिक्तमस्तीति, नचाचिन्त्यं स्वयमपि नास्तीति, एतदुभयमिति न चिन्त्यं, स्वातिरिक्तापह्नवसिद्धः स्वयं निष्प्रतियोगिकब्रह्ममात्रमवशिष्यत इति चिन्त्यमेव च ॥ ९ ॥

सविशेषब्रह्मानुसन्धानान्निर्विशेषब्रह्माधिगमः

स्वरेण [4]सल्लयेद्योगी स्वरं संभावयेत् परम् ।
अस्वरेण तु भावेन न भावो भाव इष्यते ॥ १० ॥

[1] सक्तं मु—अ १. [2] स्मृतं—अ १. [3] संनिरुध्य—अ १. [4] सल्लयो—अ १.

[1]तदेव निष्कलं ब्रह्म निर्विकल्पं निरञ्जनम् ।
तद्ब्रह्माहमिति ज्ञात्वा ब्रह्म संपद्यते क्रमात् ॥ ११॥
निर्विकल्पमनन्तं च हेतुदृष्टान्तवर्जितम् ।
अप्रमेयमनाद्यं च यज्ज्ञात्वा मुच्यते बुधः ॥ १२ ॥
न निरोधो न चोत्पत्तिर्न बद्धो न च साधकः ।
न मुमुक्षुर्न वै मुक्त इत्येषा परमार्थता ॥ १३ ॥
स्वरेण हंसयोगेन ॥ १०–१७ ॥

निरुपाधिकात्मदर्शनम्

एक एवात्मा मन्तव्यो जाग्रत्स्वप्नसुषुप्तिषु ।
स्थानत्रयव्यतीतस्य पुनर्जन्म न विद्यते ॥ १४ ॥
एक एव हि भूतात्मा भूते भूते व्यवस्थितः ।
एकधा बहुधा चैव दृश्यते जलचन्द्रवत् ॥ १५ ॥
घटसंवृतमाकाशं [2]नीयमाने घटे यथा ।
घटो नीयेत नाकाशं तथा जीवो नभोपमः ॥ १६ ॥
घटवद्विविधाकारं भिद्यमानं पुनः पुनः ।
तद्भेदे च न जानाति स जानाति च नित्यशः ॥ १७ ॥
[3]शब्दमायावृतो यावत्तावत्तिष्ठति पुष्कले ।
भिन्ने तमसि चैकत्वमेक एवानुपश्यति ॥ १८ ॥
स्वाज्ञानविकल्पितप्रपञ्चे भिन्ने ॥ १८ ॥

[1] तदेवं—अ १. [2] भिद्यमा—अ १, उ. [3] स च मा—अ १.

शब्दब्रह्मध्यानात् परब्रह्माधिगमः

शब्दार्णमपरं ब्रह्म तस्मिन् क्षीणे यदक्षरम् ।
तद्विद्वानक्षरं ध्याये[1]द्यदीच्छेच्छान्तिमात्मनः ॥ १९ ॥
द्वे ब्रह्मणी हि मन्तव्ये शब्दब्रह्म परं च यत् ।
शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति ॥ २० ॥
ग्रन्थमभ्यस्य मेधावी ज्ञानविज्ञानतत्परः ।
पलालमिव धान्यार्थी त्यजेद्ग्रन्थमशेषतः ॥ २१ ॥
प्रणवो हि शब्दार्णमिति ॥ १९–२२ ॥

परमात्मदर्शनम्

गवामनेकवर्णानां क्षीरस्याप्येकवर्णता ।
क्षीरवत् पश्यति [2]ज्ञानं लिङ्गिनस्तु गवां यथा ॥ २२ ॥
ज्ञाननेत्रं समाधाय स महत् परमं पदम् ।
निष्कलं निश्चलं शान्तं [3]ब्रह्माहमिति संस्मरेत् ॥ २३ ॥

इत्येकं परंब्रह्मरूपं सर्वभूताधिवासं तुरीयं जानीते सोऽक्षरे परमे व्योमन्यधिवसति ॥ २४ ॥ य एतां विद्यां तुरीयां ब्रह्मयोनिस्वरूपां तामिहायुषे शरणमहं प्रपद्ये ॥ २५ ॥

"अतो निर्विषयं" इत्यारभ्य "ब्रह्माहमिति संस्मरेत्" इत्यन्तमः बिन्दूपनिषदि पदशो व्याख्यातं द्रष्टव्यम् ॥ २३ ॥ एवं वेदनफलमाह

[1] यदि—क, अ १, अ २. [2] ज्ञानी—मु. [3] ब्रह्मैवाहमिति स्मरेत्—ङ, ञ

इतीति ॥ २४ ॥ ब्रह्मयोनिस्वरूपां तुरीयमायाया ब्रह्माविर्भावहेतुत्वात् ॥ २५ ॥

श्रीकामराजविद्यामहिमा

आकाशाद्यनुक्रमेण सर्वेषां वा एतद्भूतानामाकाशः परायणं सर्वाणि ह वा इमानि भूतान्याकाशादेव जायन्त आकाश एव लीयन्ते तस्मादेव जातानि जीवन्ति तस्मादा[1]काशं बीजं विद्यात् ॥ २६ ॥ तदेवाकाशपीठं स्पार्शनं पीठं तेजःपीठममृतपीठं रत्नपीठं जानीयात्। यो जानीते सोऽमृतत्वं च गच्छति ॥ २७ ॥ तस्मादेतां तुरीयां श्रीकामराजीयामेकादशधा भिन्नामेकाक्षरं ब्रह्मेति यो जानीते स तुरीयं पदं प्राप्नोति य एवं वेदेति महोपनिषत् ॥ २८ ॥

प्रपञ्चकल्पनाबीजं किमित्यत्र ब्रह्मेत्याह—**आकाशादीति** । यस्मादेवं सर्वाधिकरणं परमाकाशं **तस्मात्** ॥ २६ ॥ रत्नशब्देन शिष्टाबादिभूतद्वयमुच्यते रत्नस्य स्थलजलजत्वात् **रत्नपीठं** पञ्चभूततत्कार्यप्रपञ्चारोपापवादपीठमधिष्ठानं ब्रह्म **जानीयात्** ॥ २७ ॥ यस्मात् तुर्यमायाप्रदर्शितब्रह्मज्ञानात् तन्मात्रावस्थानलक्षणकैवल्यसिद्धिर्भवति **तस्मात् तुरीयां श्रीकामराजीयां** कामराजस्य परमेश्वस्यानपायिनीम्। यद्वा—कैवल्यश्रीस्वरूपेण यथाकामं यथेच्छं राजत इति श्रीकामराट् परमात्मा तत्संबन्धिनी विद्या श्रीकामराजीया तां केवलप्रणवरूपिणीमकारोकारमकारार्धमात्राबिन्दुनादकलाकलाऽतीतशान्तिशान्त्यतीतोन्मनीभेदेन **एकादशधा भिन्नां** वस्तुतस्तुरीयोङ्काराग्रविद्योतं **एकाक्षरं** तुर्यतुरीयं ब्रह्म निष्प्रतियोगिकस्वमात्रं **इति यो जानीते** जानाति **स तुरीयं पदं** तुर्यप्रविभक्ततुर्यतुर्यं पदं

[1] काशजं—अ, अ १, मु.

13074

प्राप्नोति । इतिशब्दः पञ्चमोपनिषत्समाप्तयर्थः । महोपनिषच्छब्दस्तु त्रिपुरातापिन्युपनिषत्समाप्त्यर्थः ॥ २८ ॥

इति पञ्चमोपनिषत्

श्रीवासुदेवेन्द्रशिष्योपनिषद्ब्रह्मयोगिना ।
श्रीमत्त्रिपुरतपनव्याख्यानं लिखितं स्फुटम् ।
त्रिपुरातपनव्याख्याग्रन्थजातं चतुश्शतम् ॥

इति श्रीमदीशाद्यष्टोत्तरशतोपनिषच्छास्त्रविवरणेऽशीतिसंख्यापूरकं त्रिपुरातापिन्युपनिषद्विवरणं संपूर्णम्

देव्युपनिषत्

भद्रं कर्णेभिः—इति शान्तिः

चिच्छक्तेः सर्वात्मरूपेण ब्रह्मत्वम्

सर्वे वै देवा देवीमुपतस्थुः काऽसि त्वं महादेवि ॥ १ ॥

साऽब्रवीदहं ब्रह्मस्वरूपिणी । मत्तः प्रकृतिपुरुषात्मकं जगच्छून्यं चाशून्यं च । अहमानन्दानानन्दाः । विज्ञाना-विज्ञानेऽहम् । ब्रह्माब्रह्मणी वेदितव्ये । इत्याहाथर्वणी श्रुतिः ॥ २ ॥

अहं पञ्चभूता[1]न्यपञ्चभूतानि । अहमखिलं जगत् । वेदोऽहमवेदोऽहम् । विद्याऽहमविद्याऽहम् । अजाऽहमनजाऽहम् । अधश्चोर्ध्वं च तिर्यक् चाहम् ॥ ३ ॥

श्रीदेव्युपनिषद्विद्यावेद्यापारसुखाकृति ।
त्रैपदं ब्रह्मचैतन्यरामचन्द्रपदं भजे ॥

इह खल्वथर्वणवेदप्रविभक्तेयं देव्युपनिषत् स्वसार्वात्म्यप्रकटनव्यग्रा नि-ष्प्रतियोगिकब्रह्ममात्रपर्यवसन्ना विजृम्भते । अस्याः स्वल्पग्रन्थतो विवरणमारभ्यते ।

[1] न्यहं प—अ १, अ २, क.

देवर्षिपटलश्रीमहादेवीप्रश्नप्रतिवचनरूपेयमाख्यायिका विद्यास्तुत्यर्था। आख्यायिकामवतारयति—सर्वे इति ॥ १ ॥ या चिच्छक्तिस्तैरेवं पृष्टा साऽब्रवीत्। कुतस्ते ब्रह्मतेत्यत्र सर्वात्मरूपेण सर्वकारणब्रह्मतोपपद्यत इत्याह—मत्त इति। स्थावरजङ्गमात्मकं जगत् मत्तः समुद्भूतमित्यर्थः। तज्जगत् स्वज्ञस्वाज्ञदृष्टिभ्यां शून्यं च अशून्यं चेति। अहमपि स्वज्ञादिदृष्ट्या अहमानन्देत्यादि।

यथैवेदं नभः शून्यं जगच्छून्यं तथैव हि।
अज्ञस्य दुःखौघमयं ज्ञस्यानन्दमयं जगत् ॥

इत्यादिश्रुत्यनुरोधेन स्वज्ञः स्वातिरिक्तशून्यसिद्धस्वानन्दात्मतया सर्वं पश्यति, स्वाज्ञस्तद्विपरीतं पश्यतीत्यर्थः ॥ २ ॥ स्वस्य सार्वात्म्यं सर्वकारणतां च प्रकटयति—अहमिति। पञ्चीकृतापञ्चीकृतभेदेन अहं पञ्चभूतान्यपञ्चभूतानि। अवेदोऽहं प्राकृतभाषाप्रबन्धादेरवेदत्वात् ॥ ३ ॥

चिच्छक्तेः सर्वधारकत्वम्

अहं रुद्रेभिर्वसुभिश्चराम्यहमादित्यैरुत विश्वदेवैः।
अहं मित्रावरुणावुभा बिभर्म्यहमिन्द्राग्नी अहमश्विनावुभौ ॥ ४ ॥
अहं सोमं त्वष्टारं पूषणं भगं दधाम्यहम्।
[1]विष्णुमुरुक्रमं ब्रह्माणमुत प्रजापतिं दधामि ॥ ५ ॥
अहं दधामि द्रविणं हविष्मते सुप्राव्ये यजमानाय सुन्वते।
अहं राष्ट्री सङ्गमनी वसूनामहं सुवे पितरमस्य मूर्धन् ॥ ६ ॥
मम योनिरप्स्वन्तःसमुद्रे य एवं वेद स देवीपदमाप्नोति ॥ ७ ॥

[1] विष्णवुरु—अ, अ १, अ २, क.

स्वांशभूतैः रुद्रेभिः रुद्रैः । सर्वाधारात्मना बिभर्मि ॥ ४ ॥ भगं षड्विधैश्वर्यम् । विष्णुमुरुक्रमं चण्डपराक्रमं विष्णुम् ॥ ५ ॥ हविष्मते हविः-संपन्नाय सुप्राव्ये सुप्राव्याय शोभनप्रकृष्टाशयाय प्रत्यक्प्रवणचित्ताय । प्रकर्षेण व्येति नश्यतीति प्रव्यं दुष्टचित्तं तद्यस्मात् शोभनचित्तात् प्रगतं स सुप्राव्यः । मां यथावत् सुन्वते स्तुन्वते यजमानाय तद्भावानुरोधेन द्रविणं धनं ज्ञानं वा दधामि ददामीत्यर्थः । वस्वादीनां सम्यग्गमनीयसंचरणीयराष्ट्ररूपिण्यहमित्यर्थः । गुणसाम्यात्मना अस्य प्रपञ्चस्य मूर्धन् मूर्धा अहं अस्य प्रपञ्चस्य पितरं ईश्वरमपि सुवे सृजे, "जीवेशावाभासेन करोति" इति श्रुतेः ॥ ६ ॥ अन्तः सम्य-गुद्रवतीति पुण्डरीकाकारमांसपिण्डः अन्तःसमुद्रः सर्वप्राण्यन्तर्हृत्कमले अप्सु अबादिपञ्चभूतेषु च जीवशिवात्मना मम योनिः स्वरूपं विद्यत इति य एवं वेद स देवीपदं चित्सामान्यरूपमेतीत्यर्थः ॥ ७ ॥

देवकृतदेवीस्तुतिः

ते देवा अब्रुवन्—

नमो देव्यै महादेव्यै शिवायै सततं नमः ।
नमः प्रकृत्यै भद्रायै [1]नियताः प्रणताः स्म ताम् ॥ ८ ॥
तामग्निवर्णां तपसा ज्वलन्तीं वैरोचनीं कर्मफलेषु जुष्टाम् ।
दुर्गां देवीं शरणमहं प्रपद्ये सुतरां नाशय ते तमः ॥ ९ ॥
देवीं वाचमजनयन्त देवास्तां विश्वरूपाः पशवो वदन्ति ।
सा नो मन्द्रेषमूर्जं दुहाना धेनुर्वागस्मानुपसुष्टुतैतु ॥ १० ॥
कालरात्रिं ब्रह्मस्तुतां वैष्णवीं स्कन्दमातरम् ।
सरस्वतीमदितिं दक्षदुहितरं नमामः पावनां शिवाम् ॥ ११ ॥

[1] नियतं—अ, अ १.

महा[1]लक्ष्मीश्च विद्महे सर्व[2]सिद्धिश्च धीमहि ।

तन्नो देवी प्रचोदयात् ॥ १२ ॥

[3]अदितिरिह जनिष्ट दक्षया दुहिता तव ।

तां देवा अन्वजायन्त भद्रा अमृतबन्धवः ॥ १३ ॥

देवीमुखतो देवीतत्त्वं देवा विदित्वा तां नत्वा देवाः स्तुन्वन्तीत्याह— त इति । किमिति? वक्ष्यमाणमन्त्रैरेवं स्तुन्वन्ति । नमो देव्यै शर्वाण्यै महादेव्यै त्रिमूर्तिजनन्यै शिवायै सततं नमः । यैवमुक्तविशेषणविशिष्टा तां त्वां वयं सदा प्रणताः स्मः ॥ ८ ॥ वैरोचनीं स्वतेजसा विरोचमानाम् । मत्कृते सुतरां ते तव अदर्शनात्मकं तमः नाशय । देवाः यां देवीं वाचं अशरीरवाणीं अजनयन्त तां एवं विश्वरूपाः पशवो नानाजन्तवो वदन्ति । किमिति? या देवी वाग्रूपिणी सा नोऽस्मान् प्रति इषं अभिलषितं ऊर्जं अन्नं कर्मफलात्मकं पयो वाग्धेनुः सरस्वती भूत्वा दुहाना सती अस्मानेतु वाग्विभूतयः नः उपसुष्टुत भजत ॥१०॥ स्वातिरिक्तभानस्य कालरात्रिम् ॥ ११–१२ ॥ दक्षया दाक्षायण्या त्वया इहादितिः जनिष्ट संजाता । अत इयमदितिः तव दुहिता । तां तस्याः सकाशात् देवा अन्वजायन्त । अतस्ते दौहित्रा वयमिति मत्वाऽस्मान् स्वातिरिक्तास्तित्व-भ्रमतो मोचयेत्यर्थः ॥ १३ ॥

आदिविद्योद्धारः

कामो योनिः कामकला वज्रपाणि-

गुर्हा हसा मातरिश्वाऽभ्रमिन्द्रः ।

पुनर्गुहा सकला मायया च

[4]पुरूच्येषा विश्वमाताऽऽदिविद्योम् ॥ १४ ॥

[1] लक्ष्मी च—अ १, अ २, क. लक्ष्म्यै च—अ.

[2] सिद्धी च—अ १, क. सिद्धि च—अ २. सिद्धयै च—अ.

[3] अदितिर्ह्यज—मु.

[4] पुनःकोशा—अ १, अ २, क, मु.

अथादिविद्यामुद्धरति—काम इति । कामः ककारः योनिः एकारः कामकला ईकारः वज्रपाणिः लकारः गुहा ह्रींकारः हसेत्यत्र हकारः सकारः मातरिश्वा ककारः अभ्रं हकारः इन्द्रो लकारः पुनर्गुहा ह्रींकारः सकलाः सकारककारलकाराः मायया च ह्रींकारः पुरूच्येषा विश्वमाता विशिष्टरूपेयं आदिमूलविद्या प्रणवात्मिका विजृम्भत इत्यर्थः ॥ १४ ॥

आदिविद्यामहिमा

[1]एषाऽऽत्मशक्तिः । एषा विश्वमोहिनी पाशाङ्कुशधनुर्बाणधरा । एषा श्रीमहाविद्या ॥ १५ ॥ य एवं वेद स शोकं तरति ॥ १६ ॥ नमस्ते अस्तु भगवति भवति मातरस्मान् पातु सर्वतः ॥ १७ ॥ सैषाऽष्टौ वसवः । सैषैकादशरुद्राः । सैषा द्वादशादित्याः । सैषा विश्वेदेवाः सोमपा असोमपाश्च । सैषा यातुधाना असुरा रक्षांसि पिशाचा यक्षाः सिद्धाः । सैषा सत्त्वरजस्तमांसि । सैषा प्रजापतीन्द्रमनवः । सैषा ग्रहनक्षत्रज्योतींषि कलाकाष्ठाऽऽदिकालरूपिणी । तामहं प्रणौमि नित्यम् ॥ १८ ॥

तापापहारिणीं देवीं भुक्तिमुक्तिप्रदायिनीम् ।
अनन्तां विजयां शुद्धां शरण्यां शिवदां शिवाम् ॥ १९ ॥

येयमादिविद्या एषा ॥ १५–१६ ॥ सर्वतः सर्वात्मना ॥ १७–१९ ॥

भुवनेश्येकाक्षरीमन्त्रः

वियदीकारसंयुक्तं वीतिहोत्रसमन्वितम् ।
अर्धेन्दुलसितं देव्या बीजं सर्वार्थसाधकम् ॥ २० ॥
एवमेकाक्षरं मन्त्रं यतयः शुद्धचेतसः ।
ध्यायन्ति परमानन्दमया ज्ञानाम्बुराशयः ॥ २१ ॥

[1] एषाऽस्य—उ, उ १.

भुवनेश्येकाक्षरमनुमुद्धरति वियदिति । ह्रीमिति ॥ २०–२१ ॥

महाचण्डीनवाक्षरविद्या

वाङ्मया ब्रह्मभूस्तस्मात् षष्ठं वक्त्रसमन्वितम् ।
सूर्यो वामश्रोत्रबिन्दुः [1]संयुताष्टतृतीयकम् ॥ २२ ॥
[2]नारायणेन संयुक्तो वायुश्चाधरसंयुतः ।
विच्चे नवार्णकोऽर्णः स्यान्महदानन्ददायकः ॥ २३ ॥
हृत्पुण्डरीकमध्यस्थां प्रातःसूर्यसमप्रभाम् ।
पाशाङ्कुशधरां सौम्यां वरदाभयहस्तकाम् ।
त्रिनेत्रां रक्तवसनां भक्तकाम[3]दुघां भजे ॥ २४ ॥
नमामि [4]त्वामहं देवीं महाभयविनाशिनीम् ।
महादुर्गप्रशमनीं महाकारुण्यरूपिणीम् ॥ २५ ॥

यस्याः स्वरूपं [5]ब्रह्मादयो न जानन्ति तस्मादुच्यतेऽज्ञेया । यस्या अन्तो न विद्यते तस्मादुच्यतेऽनन्ता । यस्या ग्रहणं नोपलभ्यते तस्मादुच्यतेऽलक्ष्या । यस्या जननं नोपलभ्यते तस्मादुच्यतेऽजा । एकैव सर्वत्र वर्तते तस्मादुच्यत एका । एकैव विश्वरूपिणी तस्मादुच्यते नैका । अत एवोच्यतेऽज्ञेयाऽनन्ताऽलक्ष्याऽजैका नैका ॥ २६ ॥

मन्त्राणां मातृका देवी शब्दानां ज्ञानरूपिणी ।
ज्ञानानां चिन्मयातीता शून्यनां शून्यसाक्षिणी ॥ २७ ॥

[1] संयुत्य . . . कः—अ, अ २, क. संयुक्ताष्ट—अ.
[2] एतच्छ्लोकार्धं, (उ, उ १) कोशयोर्नोपलभ्यते.
[3] दुघं—अ २, क. दुहं—अ.
[4] त्वां महादेवीं—अ २. त्वामहं देवि—अ, अ १, क.
[5] ब्रह्मादयोऽपि न—अ २.

यस्याः परतरं नास्ति सैषा दुर्गा प्रकीर्तिता ।
तां दुर्गां दुर्गमां देवीं दुराचारविघातिनीम् ।
नमामि भवभीतोऽहं संसारार्णवतारिणीम् ॥ २८ ॥

महाचण्डीनवाक्षरमुद्धरति—वाङ्मयेति । योनिमायामन्मथबीजैः साकं चामुण्डायै विच्चे इति मनुः ॥ २२–२३ ॥ तामेवं ध्यायेदित्याह—हृदिति ॥ २४–२९ ॥ अज्ञेयानन्तेत्यादिविशेषणैस्तां निर्वक्ति—यस्या इति ॥ २६ ॥ प्राधान्यात् मन्त्राणां मातृकादेवी ॥ २७–२८ ॥

विद्याजपस्तुतिः

इदमथर्वणशीर्षं योऽधीते स पञ्चाथर्वशीर्षजपफलमवाप्नोति । इदमथर्वणशीर्षं ज्ञात्वा योऽर्चां स्थापयति ॥ २९ ॥

शतलक्षं प्रजप्त्वाऽपि नार्चासिद्धिं च विन्दति ।
शतमष्टोत्तरं चास्याः पुरश्चर्याविधिः स्मृतः ॥ ३० ॥
दशवारं पठेद्यस्तु सद्यः पापैः प्रमुच्यते ।
महादुर्गाणि तरति महादेव्याः प्रसादतः ॥ ३१ ॥

प्रातरधीयानो रात्रिकृतं पापं नाशयति । सायमधीयानो दिवसकृतं पापं नाशयति । तत् सायं प्रातः प्रयुञ्जानः पापोऽपापो भवति । निशीथे तुरीयसंध्यायां जप्त्वा वाक्सिद्धिर्भवति । नूतनप्रतिमायां जप्त्वा देवतासांनिध्यं भवति । प्राणप्रतिष्ठायां जप्त्वा प्राणानां प्रतिष्ठा भवति । भौमाश्विन्यां महादेवीसंनिधौ जप्त्वा महामृत्युं तरति य एवं वेदेत्युपनिषत् ॥ ३२ ॥

नारायणादिपञ्चाथर्वशीर्षेति ॥ २९–३१ ॥

य एवं वेद स पुरुषो महादेवताप्रसादात् सर्वोपह्ववसिद्धं ब्रह्म निष्प्रतियोगिकस्वमात्रमित्यनुसंधानमृत्युं तरति सदैवमनुसंधानपरो भवतीत्यर्थः। इत्युपनिषच्छब्दो देव्युपनिषत्समाप्त्यर्थः।

श्रीवासुदेवेन्द्रशिष्योपनिषद्ब्रह्मयोगिना।
श्रीदेव्युपनिषद्व्याख्या लिखिता ब्रह्मगोचरा।
श्रीदेव्युपनिषद्व्याख्याग्रन्थः पञ्चाशदीरितः॥

रामतापिन्यादिदेव्युपनिषदन्तं त्रिशताधिकपञ्चसहस्राणि। ईशादिदेव्युपनिषदन्तग्रन्थस्तु चतुर्विंशत्यधिकनवशतोत्तरद्वात्रिंशत्सहस्राणि॥ ३२९२४॥

इति श्रीमदीशाद्यष्टोत्तरशतोपनिषच्छास्त्रविवरणे एकाशीतिसंख्यापूरकं
देव्युपनिषद्विवरणं संपूर्णम्

बह्वृचोपनिषत्

वाङ्मे मनसि—इति शान्तिः

चिच्छक्तिस्वरूपम्

ॐ देवी ह्येकाऽग्र आसीत्। सैव जगदण्डमसृजत । कामकलेति विज्ञायते। शृङ्गारकलेति विज्ञायते ॥ १ ॥

बह्वृचाख्यब्रह्मविद्यामहाखण्डार्थवैभवम्।
अखण्डानन्दसाम्राज्यरामचन्द्रपदं भजे ॥

अथ खलु ऋग्वेदप्रविभक्तेयं बह्वृचोपनिषद् जगत्कारणत्वप्रकटनपूर्वकं सार्वात्म्यप्रतिपादनव्यग्रा निष्प्रतियोगिकब्रह्ममात्रपर्यवसन्ना विजयते। अस्याः स्वल्पग्रन्थतो विवरणमारभ्यते। आदौ श्रुतिरवान्तरसङ्गत्याऽभिन्ननिमित्तोपादान-जगत्कारणचिच्छक्तिस्वरूपं प्रकटयति—ॐ देवीति। स्वज्ञस्वाज्ञदृष्टिमाश्रित्य परापरब्रह्मरूपेण यद्वस्तु तत् ओं इत्योंकारार्थरूपं तस्योंकारस्य स्वार्थपरापर-ब्रह्ममहिम्ना जगदुपादानतया प्रकृतत्वात् देवीप्रकृतित्वमुच्यते, "प्रणवत्वेन प्रकृतित्वं वदन्ति ब्रह्मवादिनः" इति श्रुतेः। स्वानुप्रविष्टचैतन्यमहिम्ना या दीप्यते सेयं देवी चिच्छक्तिः एकैवाग्रे सृष्टेः पुरा आसीत् सृष्टेः पुराऽव्यक्तशक्तेरनभि-व्यक्तनामरूपकर्मरूपत्वात्। यैवमग्रे निष्पन्ना सैव स्वाविद्यापदात्मकं जगत् अविद्याऽण्डं स्वाभेदेन असृजत सृष्टवती बभूव। या जगन्निदानतया भाता

तस्यास्तनुरींकारात्मना प्रणवात्मना च कामकलेति विज्ञायते, "कामो योनिः कामकला" इति श्रुत्या ईकारस्य कामकलात्वेन वर्णितत्वात्। "शृङ्गेष्वशृङ्गं संयोज्य" इति श्रुत्यनुरोधेनाऽकारोकारमकाराणां शृङ्गत्वेन व्यपदेशतः शृङ्गाण्यकारादीनि तेषामरमग्रमर्धमात्रा शृङ्गारकलेति विज्ञायते ॥ १ ॥

चिच्छक्तेर्ब्रह्मादिस्थावरान्तकारणत्वम्

तस्या एव ब्रह्माऽजीजनत्। विष्णुरजीजनत्। रुद्रोऽजीजनत्। सर्वे मरुद्गणा अजीजनन्। गन्धर्वाप्सरसः किंनरा वादित्रवादिनः समन्तादजीजनन्। भोग्यमजीजनत्। सर्वमजीजनत्। सर्वं शाक्तमजीजनत्। अण्डजं स्वेदजमुद्भिज्जं जरायुजं यत् किंचैतत् प्राणिस्थावरजङ्गमं मनुष्यमजीजनत् ॥ २ ॥

तस्या एव चिच्छक्तेर्ब्रह्मादिस्थावरान्तकारणत्वमाह—तस्या इति। इयं चिदनुप्रवेशतश्चिच्छक्तिर्भूत्वा ब्रह्मविष्णुरुद्रोपाधित्वेन देवगन्धर्वाप्सरःकिन्नरादुपाधित्वेन जङ्गमस्थावरात्मना चेश्वरेच्छया परिणता यदा भवति तदा वस्तुतो व्याप्यव्यापककलनाविरलमपि निर्विशेषं ब्रह्म स्वाज्ञदृष्ट्या प्रकृत्युच्चावचोपाधिपरिणामानुगतमिव भातं सत् तत्तदुपाधिगुणानुरोधेन ब्रह्मविष्णुरुद्रतां देवगन्धर्वादिरूपतामात्तवद्भातीति यत् तदेव प्रकृतितो जातमित्युपचर्यते, न परमार्थतः, ब्रह्मणो निष्प्रतियोगिकाजस्वरूपत्वात् "अज आत्मा महान् ध्रुवः" इति श्रुतेः। ब्रह्मणो निष्प्रतियोगिकभावरूपेणाजत्वं निरङ्कुशमित्यर्थः ॥ २ ॥

चिच्छक्तेः शब्दतदर्थरूपभावनम्

सैषा परा शक्तिः। सैषा शांभवी विद्या कादिविद्येति वा हादिविद्येति वा सादिविद्येति वा रहस्यमोमों वाचि प्रतिष्ठा ॥ ३ ॥

सैव पुरत्रयं शरीरत्रयं व्याप्य बहिरन्तरवभासयन्ती देशकालवस्त्वन्तरासङ्गान्महात्रिपुरसुन्दरी वै प्रत्यक् चितिः ॥ ४ ॥

ब्रह्मणोऽजत्वेऽपि सर्वानर्थमूलमायाशक्तिरेव वस्तुतो नानारूपेण जायते इति चेन्न, तस्या अपि निष्प्रतियोगिकभावरूपतयाऽजत्वात् "अजामेकां" इति श्रुतेः,

स्वतो वा परतो वाऽपि न किंचिद्वस्तु जायते ।
सदसत् सदसद्वाऽपि न किंचिद्वस्तु जायते ।
एतत्तदुत्तमं सत्यं यत्र किंचिन्न जायते ॥

इति श्रीगौडपादाचार्योक्तेः । तथाऽपि या स्वाज्ञदृष्ट्या चिच्छक्तितां गता सैव शब्दरूपेण तदर्थरूपेण च भातीत्याह—सैषेति । **सैषा परा शक्तिः** चित्सामान्यरूपत्वात् । **सैषा शांभवी विद्या** शं अस्मात् भवतीति शंभुः ईश्वरः सत्वसत्वविद्यायाः शंभ्वधिष्ठितत्वात् शांभवीत्वम् । श्रीमत्पञ्चदशाक्षरीप्रविभक्त-क ए ई ल ह्रीं-इति प्रथमखण्डात्मना **कादिविद्येति वा**-ह स क ह ल ह्रीं-इति द्वितीयखण्डात्मना **हादिविद्येति वा**-स क ल ह्रीं-इति तृतीयखण्डात्मना **सादिविद्येति वा रहस्यं ॐ ॐ वाचि प्रतिष्ठेति** यदनधिकारिणे गोपनीयतया रहस्यं निर्विशेषं ब्रह्म तदभेदेन तुरीयोंकाररूपिणी भूत्वा ॐ वाचि ओंकारप्रभवशब्दजाले तदर्थब्रह्मात्मना तिष्ठतीति ॐ वाचि प्रतिष्ठेत्युच्यते ॥३॥ यैवं स्थिता सैव ब्रह्मात्मना सर्वावभासकप्रत्यक्चितिर्भवेदित्याह—सैवेति । या चिच्छक्तिः **सैव** व्यष्टिसमष्टिभेदभिन्नपुरत्रयं स्थूलसूक्ष्मबीजात्मकं **शरीरत्रयं** विश्वविराडोत्राद्यात्मना **व्याप्य बहिः** नामरूपविकारजातं **अन्तः** कामादिवृत्तिसहस्रं च स्वातिरिक्तं नास्तीति प्रकाशयन्ती, यद्वा तद्भावाभावौ प्रकाशयन्ती । देशकालवस्त्वन्तरसङ्गतः प्रकाशकत्वं कुत इत्यत्र **देशकालवस्त्वन्तरासङ्गात्** सम्यग्ज्ञानात्मना त्रिपुरं शरीरत्रयं तदुपलक्षितावियापदतत्कार्यजातं सुतरां दारयत्यपह्नवं करोतीति महती च सा त्रिपुरसुन्दरी च **महात्रिपुरसुन्दरी वै** त्रिपुरसुन्दर्येव **प्रत्यक्चितिः** । स्वातिरिक्तप्रपञ्चप्रातिलोम्येनाञ्चनात् प्रत्यक्त्वं युज्यत इत्यर्थः ॥४॥

चिच्छक्तेरद्वितीयत्वम्

सैवात्मा ततोऽन्यदसत्यमनात्मा । अत एषा ब्रह्मसंवित्ति-र्भावाभावकलाविनिर्मुक्ता चिद्विद्याऽद्वितीयाब्रह्मसंवित्तिः सच्चिदानन्द-लहरी महात्रिपुरसुन्दरी बहिरन्तरनुप्रविश्य स्वयमेकैव विभाति । यदस्ति सन्मात्रम् । यद्भाति चिन्मात्रम् । यत् प्रियमानन्दम् । तदेतत् सर्वाकारा महात्रिपुरसुन्दरी । त्वं चाहं च सर्वं विश्वं सर्वदेवता । इतरत् सर्वं महात्रिपुरसुन्दरी । सत्यमेकं ललिताऽऽख्यं वस्तु तद-द्वितीयमखण्डार्थं परं ब्रह्म ॥ ९ ॥

पञ्चरूपपरित्यागादर्वरूपप्रहाणतः ।
अधिष्ठानं परं तत्त्वमेकं सच्छिष्यते महत् ॥ इति ॥ ६ ॥

भास्यभासकभेदतो द्वैतापत्ति. स्यादित्यत आह—सैवेति । चिच्छक्तौ शक्त्यंशापायसिद्धा या चित् **सैवात्मा ततोऽन्यत्** शक्त्यंशः **असत्यमनात्मा** । यत एवं **अत एषा** चिच्छक्त्यंशापायात् **ब्रह्मसंवित्तिः** संविन्मात्रब्रह्मरूपिणी भवति । भावाभावकलयोः सत्त्वात् संविन्मात्रता कुत इत्यत आह— **भावेति** । चाक्षुषघटादिकं भावकलोच्यते, अचाक्षुषतया केवलमानसग्राह्यमभावकलेत्युच्यते, चितो निष्प्रतियोगिकज्ञप्तिमात्रतया भावाभावकलाऽयोगात् **भावाभावकलाविनि-र्मुक्ता चित्** इत्यर्थः । चित्त्वं कुत इत्यत्र **विद्या** वेदनमात्रस्वरूपत्वात् । स्वातिरिक्तवेद्यादिसत्वात् द्वैतापत्तिरित्यत्र **अद्वितीया** चितः स्वसंवेद्यत्वेन स्वाति-रिक्तवेद्याभावात् । निष्प्रतियोगिकाद्वितीयस्वरूपैव **ब्रह्मसंवित्तिरित्यर्थः** । कथं पुनरद्वितीया ब्रह्मसंवित्तिरनृतजडदुःखप्रपञ्चसत्त्वादित्यत आह—**सच्चिदानन्द-लहरीति** । अनृतजडदुःखजातग्राससच्चिदानन्दलहरी निस्तरङ्गसच्चिदानन्दसमुद्र-रूपेयं **महात्रिपुरसुन्दरी** स्वाज्ञदृष्टिप्रसक्तबहिरन्तरनुप्रविश्य सर्वाधिष्ठान-सर्वान्तर्यामिरूपेण **स्वयमेकैव विभाति** । यद्येवं बहिरन्तरनुप्रविष्टा तदा

स्वाविद्यापदतत्कार्यरूपतां भजति, तस्याः सच्चिदानन्दत्वं दुर्लभमित्यत आह—यदिति । स्वाविद्यापदतत्कार्यानन्तकोटिब्रह्माण्डपटलं स्वातिरेकेण **यदस्ति** तत् **सन्मात्रं** स्वातिरेकेण **यद्भाति** तत् **चिन्मात्रं** स्वातिरेकेण **यत्प्रियं** तत् **आनन्दं** आनन्दमात्रं सच्चिदानन्दातिरेकेण स्वाविद्यापदतत्कार्यायोगात् । **तदेतत्सर्वाकारा महात्रिपुरसुन्दरी** भवतीत्यर्थः । त्वमहमित्यादिकलनाकलित-विश्वस्य सत्त्वात् कथं सच्चिदानन्दमात्रतेत्यत आह—**त्वं चेति** । सच्चिदा-नन्दातिरेकेण त्वमहमिदंशब्दवाच्यप्रपञ्चाभावात् सर्वं महात्रिपुरसुन्दर्येवेत्यर्थः । सच्चिदानन्दमिति पदत्रययोगतो द्वैतापत्तिः स्यादित्यत आह—**सत्यमिति** । असत्यापह्नवसिद्धं सत्यं सन्मात्रं **एकमेव** । अनेकभेदसत्त्वादेकत्वं कुत इत्यत्र अनेकलक्षभेदजातमपि यत्र विलीयते तल्लयाधिकरणं ललिताऽऽख्यं यत् **वस्तु तदद्वितीयं अखण्डार्थं** हि परं ब्रह्म निष्प्रतियोगिकाद्वितीयमित्यर्थः ॥ ५ ॥ प्रति-योगित्वेन पञ्चब्रह्मतत्कार्यपञ्चभूतभौतिकसत्त्वादित्यत आह—**पञ्चेति** । ब्रह्मातिरिक्तं न किंचिदस्तीति बोधेन सदाशिवादि **पञ्चब्रह्मरूपपरित्यागात्** विलयात् तदर्वाग्जातानि तत्कार्याणि वियदादिभूतभौतिकानि **अर्वाणि** तेषां कारणप्रळय-समकालप्रहाणतः कार्यकारणप्रपञ्चलयाधिष्ठानं अधिष्ठेयसामान्याभावात् तद-धिष्ठानं निरधिष्ठानं **सत्** सन्मात्रं **परं तत्त्वं महत्** भूमरूपं **एकमेवावशिष्यत** इत्यर्थः ॥ ६ ॥

प्रत्यक्परचिदैक्यभावना

प्रज्ञानं ब्रह्मेति वा अहं ब्रह्मास्मीति वा भाष्यते । तत्त्वमसीत्येव संभाष्यते । अयमात्मा ब्रह्मेति वा अहं ब्रह्मास्मीति वा ब्रह्मैवाहमस्मीति वा ॥ ७ ॥

इत्थंभूता चित् केन भाव्यत इत्यत आह—**प्रज्ञानमिति** । उत्तमाधिका-रिभिः प्रत्यगभिन्नब्रह्माभिप्रायेण **प्रज्ञानं ब्रह्मेति वा** अवान्तरवाक्येन **अहं ब्रह्मा-स्मीति वा** शिष्यानुभूतिवाक्येन भाष्यते, आचार्यानुभवरूपत**त्त्वमसीत्येव**

संभाष्यते, पुनरवान्तररूपेण अयमात्मा ब्रह्मेति वा ब्रह्मण्यनात्मताशान्तये स्वात्मन्यब्रह्मताशान्तये च व्यतिहारेण अहं ब्रह्मास्मीति वा ब्रह्मैवाहमस्मीति वा। अयमात्मेत्यादिमहावाक्यानां प्रत्यक्परचितोरैक्यमर्थः। एवं प्रत्यगभिन्नब्रह्मात्मना सदा भाव्यत इत्यर्थः॥ ७॥

अम्बिकाऽऽदिरूपेण चिच्छक्तिभावना

योऽहमस्मीति वा सोऽहमस्मीति वा योऽसौ सोऽहमस्मीति वा या भाव्यते सैषा षोडशी श्रीविद्या पञ्चदशाक्षरी श्रीमहात्रिपुरसुन्दरी बालाऽम्बिकेति बगलेति वा मातङ्गीति स्वयंवरकल्याणीति भुवनेश्वरीति चामुण्डेति चण्डेति वाराहीति तिरस्करिणीति राजमातङ्गीति वा शुकश्यामलेति वा लघुश्यामलेति वा अश्वारूढेति वा प्रत्यङ्गिरा धूमावती सावित्री सरस्वती गायत्री ब्रह्मानन्दकलेति॥ ८॥

उत्तमाधिकारिभिर्यैवं भाविता चिता शक्तियोगेन मध्यमाधिकारिदृष्ट्या सैषा चिच्छक्तिः। कार्यशक्त्यात्मना मातङ्गी गायत्री इति भाव्यते। निर्विशेषब्रह्मज्ञानार्थिभिः ब्रह्मानन्दकलेति नित्यतृप्तात्मना भाव्यत इत्यर्थः॥ ८॥

ब्रह्मण एव मुख्यज्ञेयत्वम्

ऋचो अक्षरे परमे व्योमन् यस्मिन् देवा अधि विश्वे निषेदुः।
यस्तन्न वेद किमृचा करिष्यति य इत्तद्विदुस्त इमे समासते॥

इत्युपनिषत्॥ ९॥

यज्ज्ञातव्यं तदेव ज्ञेयं केवलर्गिभः किं प्रयोजनं, तद्यथावद्ये जानन्ति ते तन्मात्रमवशिष्यन्त इत्याह---ऋच इति। अयं मन्त्रः श्वेताश्वतरोपनिषदि व्याख्यातः। इत्युपनिषच्छब्दो बह्वृचोपनिषत्समाप्त्यर्थः॥ ९॥

श्रीवासुदेवेन्द्रशिष्योपनिषद्ब्रह्मयोगिना।
बह्वृचोपनिषद्व्याख्या लिखिता ब्रह्मगोचरा।
बह्वृचोपनिषद्व्याख्याग्रन्थः सप्ततिरीरितः॥

इति श्रीमदीशाद्यष्टोत्तरशतोपनिषच्छास्त्रविवरणे सप्तोत्तरशतसङ्ख्यापूरकं
बह्वृचोपनिषद्विवरणं सम्पूर्णम्

भावनोपनिषत्

भद्रं कर्णेभिः—इति शान्तिः

शिवस्य शक्तियोगादीश्वरत्वम्

श्रीगुरुः [1]परमकारणभूता शक्तिः ॥ १ ॥

स्वाविद्यापदतत्कार्यश्रीचक्रोपरि भासुरम् ।
बिन्दुरूपशिवाकारं रामचन्द्रपदं भजे ॥

इह खल्वथर्वणवेदप्रविभक्तेयं भावनोपनिषत् स्वातिरिक्तप्रपञ्चश्रीचक्रासनत्रिपुरातत्त्वप्रकटनव्यग्रा तत्सर्वारोपापवादाधिकरणपरशिवतत्त्वपर्यवसन्ना विजयते । अस्याः संक्षेपतो विवरणमारभ्यते । परमदयावती श्रुतिर्देहादावात्मात्मीयाभिमानकबळितस्वाज्ञलोकमुपलभ्य देहादावात्मात्मीयाभिमतिवारणाय स्थूलादिदेहत्रये श्रीचक्रभावनां प्रकटयति—**श्रीगुरुरिति** । पराग्भावाश्रीग्रासप्रत्यग्भावश्रीरूपेण गुशब्दवाच्यस्वाज्ञानं रुशब्दवाच्यस्वज्ञानेन द्रावयतीति **श्रीगुरुः** परमशिवः, तस्य स्वातिरिक्तप्रपञ्चसर्गस्थितिभङ्गकरणपरमकारणभूता शक्तिः, तया योगतः खलु शिव ईश्वरत्वं भजतीत्यत्र—"प्रकृतिं स्वामधिष्ठाय संभवाम्यात्ममायया" इति स्मृतेः ॥ १ ॥

[1] सर्वका—मु.

अध्यात्मदेहत्रयश्रीचक्रभावना

केन ? नवरन्ध्ररूपो देहो नवशक्तिमयं श्रीचक्रम् । वाराही पितृरूपा कुरुकुल्ला[1]बली देवता माता । पुरुषार्थाः सागराः । देहो नवरत्नद्वीपः । आधारनवकमुद्राः शक्तयः । त्वगादिसप्तधातुभिरनेकैः संयुक्ताः संकल्पाः कल्पतरवः । तेजःकल्पकोद्यानम् । रसनया भाव्यमाना मधुराम्लतिक्तकटुकषायलवणरसाः षड्ऋतवः । क्रिया-[2]शक्तिः पीठम् । कुण्डलिनी ज्ञानशक्तिर्गृहम् । इच्छाशक्तिर्महात्रिपुरसुन्दरी । ज्ञाता होता । ज्ञानमर्घ्यम् । ज्ञेयं हविः । ज्ञातृज्ञान-[3]ज्ञेयानामभेदभावनं श्रीचक्रपूजनम् । नियतिसहितशृङ्गारादयो नव रसा अणिमादयः । कामक्रोधलोभमोहमदमात्सर्यपुण्यपापमया ब्राह्म्याद्यष्टशक्तयः । पृथिव्यापस्तेजोवाय्वाकाशश्रोत्रत्वक्चक्षुर्जिह्वा-घ्राणवाक्पाणिपादपायू[4]पस्थविकाराः षोडश शक्तयः । वचनादान-गमनविसर्गानन्दहानोपादानोपेक्षाबुद्धयोऽनङ्गकुसुमादिशक्तयोऽष्टौ । अलम्बुसा कुहूर्विश्वोदरी वरुणा हस्तिजिह्वा यशस्वत्यश्विनी गान्धारी पूषा शङ्खिनी सरस्वतीडा पिङ्गला सुषुम्ना चेति चतुर्दश नाड्यः सर्वसंक्षोभिण्यादिचतुर्दशारदेवताः । प्राणापानव्यानोदानसमाननाग-कूर्मकृकरदेवदत्तधनंजया दश वायवः सर्वसिद्धि[5]प्रदाऽऽदिबहिर्दशार-देवताः । एतद्वायुदशसंसर्गोपाधिभेदेन रेचकपूरकशोषकदाहकप्लावका

[1] भेरुण्डादे—अ.
[2] शक्ति पी—उ, क.
[3] ज्ञेयमेया—अ १, अ २, क.
[4] पस्थमनोवि—अ, मु. पस्थावि—अ १.
[5] प्रदा देवी ब—अ १, अ २, क.

अमृतमिति प्राणमुख्यत्वेन पञ्चविधोऽस्ति । [1]मनुष्याणां मोहको [2]देहको भक्ष्यभोज्यलेह्यचोष्यपेयात्मकं चतुर्विधमन्नं पाचयति । एता दश [3]धनकलाः सर्वज्ञत्वाद्यन्तर्दशारदेवताः । शीतोष्णसुखदुःखेच्छासत्वरजस्तमोगुणा वशिन्यादिशक्तयोऽष्टौ । शब्दस्पर्शरूपरसगन्धाः पञ्चतन्मात्राः पञ्च पुष्पबाणा मन इक्षुधनुः । वश्यो बाणो रागः पाशो द्वेषोऽङ्कुशः । अव्यक्तमहत्तत्त्वाहंकारकामेश्वरीवज्रेश्वरीभगमालिन्योऽन्तस्त्रिकोणाग्रगा देवताः । पञ्चदशातिथिरूपेण कालस्य परिणामावलोकनं पञ्चदश[4]नित्या श्रद्धाऽनुरूपा[5]धिदेवता । तयोः कामेश्वरी सदानन्दघना पूर्णा स्वात्मैक्यरूपा देवता ॥ २ ॥

केन हेतुना देहस्य श्रीचक्रत्वमित्यत आह—**केनेति** । नवत्वसाम्यात्, **नवरन्ध्ररूपो देहः**, विमलादीशानान्तनवशक्तिमयं **श्रीचक्रमिति** । श्रीचक्रात्मकदेहस्य मातापितरौ कावित्यत आह—**वाराहीति** । **वाराही पितृरूपा** पुरुषशक्तित्वात् **कुरुकुल्लाबलीति** काचन देवता माता । देह्याश्रयधर्मादिपुरुषार्थाः **सागराः** तेषामपारागाधविस्तारत्वात् । तत्र **देहो नवरत्नद्वीपः** द्वीपस्य सागरमध्यपातित्वात् । तद्द्वीपाधारशक्तयः का इत्यत आह—**आधारेति** । योनिमुद्राऽऽदिसर्वसंक्षोभिण्यन्तमुद्राऽऽरूढा महात्रिपुरसुन्दर्यादित्रिपुराऽन्ता **नवशक्तयो** भवन्ति । एतद्द्वीपसञ्जातकल्पकतरवस्तु **त्वगादिसप्तधातुभिरनेकैः** अन्तर्बाह्यविकारैः **संयुक्ताः** नानाविधसङ्कल्पा एव **कल्पतरवः** । तत्रोद्यानं किमित्यत्र स्वातिरिक्तनानाविधतेजःकल्पको जीव एव **उद्यानं** उद्यानवज्जीवस्य

[1] "जाठराग्निर्भवति क्षारको (मारको) द्वारकः क्षोभको जृम्भक इति अपानमुख्यत्वेन पञ्चविधोऽस्ति" इत्यधिकः पाठो दृश्यते (अ १, अ २) कोशयोः ।

[2] दाहको—मु. [3] वह्निकलाः—मु.

[4] नित्याः । श्र—मु. [5] धीर्देवता—अ १, अ २, क.

रमणीयत्वात् । जीवरसनाभाव्यरसाः के इत्यत्र तद्-**रसनया भाव्यमाना इति** । तत्क्रियाज्ञानेच्छाशक्तिः केत्यत्र—**क्रियाशक्तिपीठमिति** । तद्-इच्छाशक्तिः ज्ञात्रादित्रिपुटी केत्यत्र—**ज्ञानेति** । ज्ञात्रादित्रिपुटीनिरसनमेव श्रीचक्रपूजनमित्याह—**ज्ञातृज्ञानेति** । अणिमादिशक्तयस्तु यस्य यस्य या नियतिस्तया **नियतिसहितेति** । अष्टशक्तयस्तु **कामक्रोधेत्यादि** । षोडशशक्तयस्तु **पृथिवीत्यादिविकाराः** कामाकर्षिण्यादि-शरीराकर्षिण्यन्ताः **षोडश शक्तयः** अनङ्गकुसुमशक्तयस्तु **वचनादानेत्यादि** । **अनङ्गकुसुमादि**-अनङ्गमालिन्यन्तशक्तयः । चतुर्दशारदेवतास्तु **अलम्बुसेत्यादि** । सर्वसंक्षोभिण्यादि-सर्वद्वन्द्वक्षयंकर्यन्त-**चतुर्दशारदेवताः** । सर्वसिद्धिप्रदादि-सर्वसौभाग्यदायिन्यन्त**बहिर्दशारदेवताः** । सर्वज्ञत्वादि-स्वेप्सितफलप्रदान्ता **अन्तर्दशारदेवताः** । **वशिन्यादि**-कौलिन्यन्त-**शक्तयोऽष्टौ** । तयोः वज्रेश्वरीभगमालिन्योराद्या **कामेश्वरी** ॥ २ ॥

देवताया आवाहनाद्युपचारभावना

[1]सलिलं सौहित्यकारणं सत्त्वं कर्तव्यमकर्तव्यमिति भावनायुक्त उपचारः । अस्ति नास्तीति कर्तव्यता उपचारः । बाह्याभ्यन्तःकरणानां रूपग्रहणयोग्यताऽस्त्वित्यावाहनम् । तस्य बाह्याभ्यन्तःकरणानामेकरूपविषयग्रहणमासनम् । रक्तशुक्लपदैकीकरणं पाद्यम् । उज्ज्वलदामोदानन्दासनं दानमर्घ्यम् । [2]स्वच्छं स्वतःसिद्धमित्याचमनीयम् । चिच्चन्द्र[3]मयीसर्वाङ्गस्नवणं स्नानम् । चिदग्निस्वरूपपरमानन्दशक्तिस्फुरणं वस्त्रम् । प्रत्येकं सप्तविंशतिधा भिन्नत्वेनेच्छाज्ञानक्रियाऽऽत्मकब्रह्मग्रन्थिमद्रसतन्तुब्रह्मनाडी ब्रह्मसूत्रम् । स्वव्यतिरिक्तवस्तुसङ्गरहितस्मरणं विभूषणम् । स्वच्छस्वपरिपूरणानुस्मरणं

[1] सलिलमिति—अ १, अ २, क, मु.
[2] स्वच्छस्व—अ १, अ २, क
[3] मयमिति सर्वाङ्गस्मरणं—उ, उ १.

गन्धः । समस्तविषयाणां मनसः स्थैर्येणानुसंधानं कुसुमम् । तेषामेव सर्वदा स्वीकरणं धूपः । पवनावच्छिन्नोर्ध्वज्वलनसच्चि[1]दुल्काऽऽकाशदेहो दीपः । समस्तयातायातवर्ज्यं नैवेद्यम् । अवस्थात्रयैकीकरणं ताम्बूलम् । मूलाधारादाब्रह्मरन्ध्रपर्यन्तं ब्रह्मरन्ध्रादामूलाधारपर्यन्तं गतागतरूपेण प्रादक्षिण्यम् । तुर्यावस्थानमस्कारः । देहशून्यप्रमातृतानिमज्जनं बलिहरणम् । सत्वमस्ति कर्तव्यमकर्तव्यमौदासीन्यनित्यात्मविलापनं होमः । स्वयं तत्पादुकानिमज्जनं परिपूर्णध्यानम् ॥ ३ ॥

कोऽयमुपचार इत्यत्र सलिलं सलीलं गुरुमन्त्रात्मदेवतानां सौहित्यकरणं एकीकरणमिति यत् तदेव सतस्तत्त्वं सत्त्वं कर्तव्यं कदाऽपि गुरुमन्त्रात्मदेवतानामसौहित्यकरणं अकर्तव्यमिति भावनायुक्तः भावनायोग एव उपचारः । ब्रह्मैवास्ति ब्रह्मातिरिक्तं नास्तीति सदाऽनुसन्धानकर्तव्यता उपचारः द्वैतग्रासाद्वैतात्मज्ञानमेवावाहनादिपरिपूर्णध्यानान्तमुपचारो भवतीत्याह —बाह्येति । बाह्याभ्यन्तःकरणानां स्वस्वविषयरूपग्रहणयोग्यताऽस्तित्वत्यावाहनम् । आसनं तु तस्य बाह्याभ्यन्तःकरणानां एकरूपविषयग्रहणं यदेकं ब्रह्म तदेवास्मीति ज्ञानं आसनम् । केवलकुम्भकतः सुषुम्नाप्रवेशानन्तरं मूलाधारभ्रूमध्योपरिस्थप्रत्यक्पराभिधानरक्तशुक्लपदैकीकरणं पाद्यम् । अर्घ्यं तु उज्ज्वलदामोदानन्दासनं दानमर्घ्यम् । प्रत्यगभिन्नब्रह्मरूपेण सदोज्ज्वलदामोदानन्दरूपेणासनमवस्थानं सदा कर्तव्यमिति स्वयं निश्चित्य स्वशिष्येभ्यः स्वसिद्धान्तप्रदानमर्घ्यं भवतीत्यर्थः । स्वस्य स्वच्छं स्वच्छत्वम् । ब्रह्मसूत्रं तु प्रत्येकं सप्तविंशतिधेत्यादि । इच्छाऽऽदिशक्तित्रयस्य त्रिगुणात्मकतया प्रत्येकं सप्तविंशतिधा भेद उपपद्यते । नाडीनामपि गुणविकारत्वात् तथात्वम् । तत्प्रवेशनिमित्तात् तद्भेदप्रविलापनपूर्वकं ब्रह्मविष्णुरुद्रग्रन्थिमद्रसनाडी सुषुम्नैव ब्रह्मसूत्रं तस्यापरब्रह्मधामसूचकत्वात । ब्रह्मातिरिक्तं न किंचिदस्तीति स्वच्छम् ।

[1] दुल्कादाका—अ २, क.

समस्तविषयाणां मनसः स्थैर्येण तद्विलापनाधिष्ठानानुसंधानं कुसुमम्। योगकाले प्राणापानाग्न्यैक्यतः सुषुम्नायां सच्चिदानन्दोल्कारूप आकाशदेहः परमो वै दीपः। स्वातिरिक्तविषयाद्विषयान्तरेषु समस्तेषु समस्तयातायातवर्ज्यं नैवेद्यम्। तुर्यावस्थायां अवस्थात्रयैकीकरणं ताम्बूलम्। तुर्यावस्था नमस्कारः तुरीयोऽस्मीति ज्ञानस्य नमस्कारार्थत्वात् "नमस्त्वैक्यं" इति श्रुतेः। स्वात्मनः सत्त्वमस्तीति निश्चित्य तदतिरेकेण कर्तव्यमकर्तव्यं वा विद्यत इति सत्त्वप्रसक्तौ तत्र औदासीन्यमात्मविलापनं होमः ॥ ३ ॥

भावनाफलम्

एवं मुहूर्तत्रयं भावनापरो जीवन्मुक्तो भवति। तस्य देवताऽऽत्मैक्यसिद्धिः। चिन्तितकार्याण्ययत्नेन सिध्यन्ति। स एव शिवयोगीति कथ्यते ॥ ४ ॥

एवं भावनाफलमाह—एवमिति। न हि तादृशस्य ब्रह्मास्मीति सदा चिन्तनं विना काचन चिन्ता विद्यते। यदि प्राण्यदृष्टानुरोधेन स्यात् तदा स्वपरविषयकचिन्तितकार्याण्ययत्नेन सिध्यन्ति।

शिवो गुरुः शिवो वेदः शिवो देवः शिवः प्रभुः।
शिवोऽस्म्यहं शिवः सर्वं शिवादन्यन्न किंचन ॥

इति श्रुतिसिद्धशिवतत्त्वज्ञानी शिवयोगी शिव एवायमित्यर्थः। इत्युपनिषच्छब्दो भावनोपनिषत्समाप्त्यर्थः ॥ ४ ॥

श्रीवासुदेवेन्द्रशिष्योपनिषद्ब्रह्मयोगिना।
भावनोपनिषद्व्याख्या लिखिता शिवगोचरा।
भावनोपनिषद्व्याख्याग्रन्थः पञ्चाशदीरितः ॥

इति श्रीमदीशाद्यष्टोत्तरशतोपनिषच्छास्त्रविवरणे चतुरशीतिसङ्ख्यापूरक भावनोपनिषद्विवरणं सम्पूर्णम् ॥

सरस्वतीरहस्योपनिषत्

वाङ्मे मनसि—इति शान्तिः

सरस्वतीदशश्लोक्यास्तत्त्वज्ञानसाधनत्वम्

ऋषयो ह वै भगवन्तमाश्वलायनं संपूज्य पप्रच्छुः—

केनोपायेन तज्ज्ञानं तत्पदार्थावभासकम् ।
यदुपासनया तत्त्वं जानासि भगवन् वद ॥ १ ॥
सरस्वतीदशश्लोक्या सऋचा बीजमिश्रया ।
स्तुत्वा जह्वा परां सिद्धिमलभं मुनिपुङ्गवाः ॥ २ ॥

प्रतियोगिविनिर्मुक्तब्रह्मविद्यैकगोचरम् ।
अखण्डनिर्विकल्पात्तरामचन्द्रपदं भजे ॥

इह खलु कृष्णयजुर्वेदप्रविभक्तेयं सरस्वतीरहस्योपनिषद् महासरस्वती-विद्याप्रकटनपूर्वकं षट्समाधिप्रपञ्चनव्यग्रा ब्रह्ममात्रपर्यवसन्ना विजृम्भते । अस्याः स्वल्पग्रन्थतो विवरणमारभ्यते । ऋषिगणाश्वलायनप्रश्नप्रतिवचनरूपेयमाख्यायिका विद्यास्तुत्यर्था । आख्यायिकामवतारयति—ऋषय इति । किमिति? केनोपायेनेति ॥ १ ॥ प्रश्नोत्तरं मुनिराह—सरस्वतीति । वक्ष्यमाणया सरस्वतीदशश्लोक्या ॥ २ ॥

दशश्लोक्या ऋष्यादि

ऋषय ऊचुः—

कथं सारस्वतप्राप्तिः केन ध्यानेन सुव्रत ।
महासरस्वती येन तुष्टा भगवती वद ॥ ३ ॥

स होवाचाश्वलायनः—

अस्य श्रीसरस्वतीदशश्लोकमहामन्त्रस्य—अहमाश्वलायन ऋषिः । अनुष्टुप् छन्दः । श्रीवागीश्वरी देवता । यद्वागिति बीजम् । देवीं वाचमिति शक्तिः । प्रणो देवीति कीलकम् । विनियोगस्तत्प्रीत्यर्थे । श्रद्धा मेधा प्रज्ञा धारणा वाग्देवता महासरस्वतीत्येतैरङ्गन्यासः ॥ ४ ॥

नीहारहारघनसारसुधाकराभां
कल्याणदां कनकचम्पकदामभूषाम् ।
उत्तुङ्गपीनकुचकुम्भमनोहराङ्गीं
वाणीं नमामि मनसा वचसां विभूत्यै ॥ ५ ॥

ऋषयस्तं पुनः पप्रच्छुरित्याह—ऋषय ऊचुरिति ॥ ३ ॥ तैरेवं पृष्टः स होवाचाश्वलायनः । वक्ष्यमाणविद्याया ऋषिच्छन्दोदेवताबीजशक्तिकीलककराङ्गन्यासादिकमुच्यते—अस्येत्यादिना ॥ ४ ॥ ध्यानं तु—नीहारेति॥५–३५॥

प्रणो देवीति मन्त्रस्य ऋष्यादि

प्रणो देवीत्यस्य मन्त्रस्य—भरद्वाज ऋषिः । गायत्री छन्दः । श्रीसरस्वती देवता । प्रणवेन बीज[1]शक्तिकीलकम् । इष्टार्थे विनियोगः । मन्त्रेण न्यासः ॥ ६ ॥

[1] शक्तिः की—मु, उ. (एवमुत्तरपर्यायेष्वपि).

या वेदान्तार्थतत्त्वैकस्वरूपा [1]परमेश्वरी ।
नामरूपात्मना व्यक्ता सा मां पातु सरस्वती ॥ ७ ॥
ॐ प्रणो देवी सरस्वती वाजेभिर्वाजिनीवती ।
धीनामवित्र्यवतु ॥ ८ ॥

आ नो दिव इति मन्त्रस्य ऋष्यादि

आ नो दिव इति मन्त्रस्य—अत्रिर्ऋषिः । त्रिष्टुप् छन्दः । सरस्वती देवता । ह्रीमिति बीजशक्तिकीलकम् । इष्टार्थे विनियोगः । मन्त्रेण न्यासः ॥ ९ ॥

या साङ्गोपाङ्गवेदेषु चतुर्ष्वेकैव गीयते ।
[2]अद्वैता ब्रह्मणः शक्तिः सा मां पातु सरस्वती ॥ १० ॥

ह्रीं आ नो दिवो बृहतः पर्वतादा
सरस्वती यजता गन्तु यज्ञम् ।
हवं देवी जुजुषाणा घृताची
शग्मां नो वाचमुशती शृणोतु ॥ ११ ॥

पावका न इति मन्त्रस्य ऋष्यादि

पावका न इति मन्त्रस्य—[3]मधुच्छन्दा ऋषिः । गायत्री छन्दः । सरस्वती देवता । श्रीमिति बीजशक्तिकीलकम् । इष्टार्थे विनियोगः । मन्त्रेण न्यासः ॥ १२ ॥

[1] परमार्थतः— अ १, अ २, क, मु.
[2] अद्वैत—अ २, क.
[3] मधुच्छन्दऋ—उ, मु.

या वर्णपदवाक्यार्थस्वरूपेणैव वर्तते ।
अनादिनिधनाऽनन्ता सा मां पातु सरस्वती ॥ १३ ॥
श्रीं पावका नः सरस्वती वाजेभिर्वाजिनीवती ।
यज्ञं वष्टु धिया वसुः ॥ १४ ॥

चोदयित्री इति मन्त्रस्य ऋष्यादि

चोदयित्रीति मन्त्रस्य—मधुच्छन्दा ऋषिः । गायत्री छन्दः । सरस्वती देवता । ब्लूमिति बीजशक्तिकीलकम् । मन्त्रेण न्यासः ॥ १५ ॥

अध्यात्ममधिदैवं च देवानां सम्यगीश्वरी ।
प्रत्यगास्ते वदन्ती या सा मां पातु सरस्वती ॥ १६ ॥
ब्लूं चोदयित्री सूनृतानां चेतन्ती सुमतीनाम् ।
यज्ञं दधे सरस्वती ॥ १७ ॥

महो अर्ण इति मन्त्रस्य ऋष्यादि

महो अर्णेति मन्त्रस्य—मधुच्छन्दा ऋषिः । गायत्री छन्दः । सरस्वती देवता । सौरिति बीजशक्तिकीलकम् । मन्त्रेण न्यासः ॥ १८ ॥

अन्तर्याम्यात्मना विश्वं त्रैलोक्यं या नियच्छति ।
रुद्रादित्यादिरूपस्था सा मां पातु सरस्वती ॥ १९ ॥
सौः महो अर्णः सरस्वती प्रचेतयति केतुना ।
धियो विश्वा विराजति ॥ २० ॥

चत्वारि वागिति मन्त्रस्य ऋष्यादि

चत्वारि वागिति मन्त्रस्य—उचथ्यपुत्र ऋषिः । त्रिष्टुप् छन्दः । सरस्वती देवता । ऐमिति बीजशक्तिकीलकम् । मन्त्रेण न्यासः ॥ २१ ॥

या प्रत्यग्दृष्टिभिर्जीवैर्व्यज्यमानाऽनुभूयते ।
व्यापिनी ज्ञप्तिरूपैका सा मां पातु सरस्वती ॥ २२ ॥

ऐं चत्वारि वाक् परिमिता पदानि
तानि विदुर्ब्राह्मणा ये मनीषिणः ।
गुहा त्रीणि निहिता नेङ्गयन्ति
तुरीयं वाचो मनुष्या वदन्ति ॥ २३ ॥

यद्वागिति मन्त्रस्य ऋष्यादि

यद्वाग्वदन्तीति मन्त्रस्य—भार्गव ऋषिः । त्रिष्टुप् छन्दः । सरस्वती देवता । क्लीमिति बीजशक्तिकीलकम् । मन्त्रेण न्यासः ॥२४॥

नामजात्यादिभिर्भेदैरष्टधा या विकल्पिता ।
निर्विकल्पात्मना व्यक्ता सा मां पातु सरस्वती ॥ २५ ॥

क्लीं यद्वाग्वदन्त्यविचेतनानि राष्ट्री देवानां निषसाद मन्द्रा ।
चतस्र ऊर्जं दुदुहे पयांसि क स्विदस्याः परमं जगाम ॥ २६ ॥

देवीं वाचमिति मन्त्रस्य ऋष्यादि

देवीं वाचमिति मन्त्रस्य—भार्गव ऋषिः । त्रिष्टुप् छन्दः । सरस्वती देवता । सौरिति बीजशक्तिकीलकम् । मन्त्रेण न्यासः ॥२७॥

व्यक्ताव्यक्तगिरः सर्वे वेदाद्या व्याहरन्ति याम् ।
सर्वकामदुघा धेनुः सा मां पातु सरस्वती ॥ २८ ॥
सौः देवीं वाचमजनयन्त देवास्तां विश्वरूपाः पशवो वदन्ति ।
सा नो मन्द्रेषमूर्जं दुहाना धेनुर्वागस्मानुपसुष्टुतैतु ॥ २९ ॥

उत त्व इति मन्त्रस्य ऋष्यादि

उत त्व इति मन्त्रस्य—बृहस्पतिर्ऋषिः । त्रिष्टुप् छन्दः । सरस्वती देवता । समिति बीजशक्तिकीलकम् । मन्त्रेण न्यासः ॥३०॥

यां विदित्वाऽखिलं बन्धं निर्मथ्या[1]खिलवर्त्मना ।
योगी याति परं स्थानं सा मां पातु सरस्वती ॥ ३१ ॥
सं उत त्वः पश्यन्न ददर्श वाचमुत त्वः शृण्वन्न शृणोन्येनाम् ।
उतो त्वस्मै तन्वां विसस्रे जायेव पत्य उशती सुवासाः ॥ ३२ ॥

अम्बितम इति मन्त्रस्य ऋष्यादि

अम्बितम इति मन्त्रस्य—गृत्समद ऋषिः । अनुष्टुप् छन्दः । सरस्वती देवता । ऐमिति बीजशक्तिकीलकम् । मन्त्रेण न्यासः ॥३३॥

नामरूपात्मकं सर्वं यस्यामावेश्यतां पुनः ।
ध्यायन्ति ब्रह्मरूपैका सा मां पातु सरस्वती ॥ ३४ ॥
ऐं अम्बितमे नदीतमे [2]देवितमे सरस्वति ।
अप्रशस्ता इव स्मसि प्रशस्तिमम्ब नस्कृधि ॥ ३५ ॥

[1] मलवर्त्मनाम्—अ १, अ २, क. [2] देवीत—उ १.

देवताप्रार्थना

चतुर्मुखमुखाम्भोजवनहंसवधूर्मम ।
मानसे रमतां नित्यं सर्वशुक्ला सरस्वती ।। ३६ ।।
नमस्ते शारदे देवि काश्मीरपुरवासिनि ।
त्वामहं प्रार्थये नित्यं विद्यादानं च देहि मे ।। ३७ ।।
अक्षसूत्राङ्कुशधरा पाश[1]पुस्तकधारिणी ।
मुक्ताहारसमायुक्ता वाचि तिष्ठतु मे सदा ।। ३८ ।।
कम्बुकण्ठी सुताम्रोष्ठी सर्वाभरणभूषिता ।
महासरस्वती देवी जिह्वाग्रे संनिवेश्यताम् ।। ३९ ।।
या श्रद्धा धारणा मेधा वाग्देवी विधिवल्लभा ।
भक्तजिह्वाग्रसदना शमादिगुणदायिनी ।। ४० ।।
नमामि यामिनीनाथलेखाऽलंकृतकुन्तलाम् ।
भवानीं भवसंतापनिर्वापणसुधानदीम् ।। ४१ ।।
यः कवित्वं निरातङ्कं भुक्तिमुक्ती च वाञ्छति ।
सोऽभ्यर्च्यैनां दशश्लोक्या नित्यं स्तौति सरस्वतीम् ।। ४२ ।।
तस्यैवं स्तुवतो नित्यं समभ्यर्च्य सरस्वतीम् ।
भक्तिश्रद्धाऽभियुक्तस्य पाण्मासात् प्रत्ययो भवेत् ।। ४३ ।।
ततः प्रवर्तते वाणी स्वेच्छया ललिताक्षरा ।
गद्यपद्यात्मकैः शब्दैरप्रमेयैर्विवक्षितैः ।। ४४ ।।
अश्रुतो बुध्यते ग्रन्थः प्रायः सारस्वतः कविः ।। ४५ ।।
देवतां प्रार्थयति—चतुर्मुखेति ।। ३६–४५ ।।

[1] मस्तक—उ.

भगवत्याः ब्रह्मत्वं प्रकृतित्वं पुरुषत्वं च

[1]सा होवाच सरस्वती —

आत्मविद्या मया लब्धा ब्रह्मणैव [2]सनातनी ।
ब्रह्मत्वं मे सदा नित्यं सच्चिदानन्दरूपतः ॥ ४६ ॥
प्रकृतित्वं ततः स्पृष्टं सत्त्वादिगुणसाम्यतः ।
सत्यामाभाति चिच्छाया दर्पणे प्रतिबिम्बवत् ॥ ४७ ॥
तेन चित्प्रतिबिम्बेन त्रिविधा भाति सा पुनः ।
प्रकृत्यवच्छिन्नतया पुरुषत्वं पुनश्च [3]मे ॥ ४८ ॥

मयैवं स्तुता भगवती दृष्टिविषये प्रसन्ना भूत्वा स्वानुभूतिप्रकटनेन स्वात्मतत्त्वमुपदिदेशेत्याह—**सा होवाच सरस्वतीति**। किमुवाचेत्यत्र—**आत्मविद्येति**। स्वातिरिक्तमनात्मा तदसंभवप्रबोधसिद्ध—स्वयमेवात्मा स्वात्मातिरिक्तं न किंचिदस्ति स्वात्मैव निष्प्रतियोगिकाद्वितीय इति—वेदनमेव स्वात्मविद्या **सनातनी** पुरा विश्वसृजा **ब्रह्मणा** प्रसन्नेन **मया लब्धा** विदितेत्यर्थः । स्वात्मवेदनमात्रतो ब्रह्मत्वं ते कुत इत्यत आह—**ब्रह्मत्वमिति** । ममानृतजडदुःखात्मकनामरूपप्रपञ्चग्राससच्चिदानन्दरूपत्वात् **सदा मे ब्रह्मत्वं** सिद्धमेवेत्यर्थः ॥ ४६ ॥ प्रकृतिस्त्वद्विन्नेत्यत आह—**प्रकृतित्वमिति** । स्वाज्ञदृष्ट्या स्वातिरेकेण या प्रकृता सेयं प्रकृतिस्तद्भावः **प्रकृतित्वमपि मया स्पृष्टं** कुत इत्यत्र **ततो गुणसाम्यतः**, सत्त्वादिगुणत्रयं यत्र साम्यं भजति तद्गुणसाम्यं, तद्योगतः प्रकृतित्वमपि स्यादित्यर्थः । किं प्रकृतिर्ब्रह्मवद्वास्तवीत्याशङ्क्य स्वाज्ञदृष्ट्या मयि विकल्पितेत्याह—**सत्यामिति** । मयि सत्यां दर्पणे **प्रतिबिम्बवत्** भाविसर्वानर्थगर्भिणी **चिच्छाया**

[1] "इत्येवं निश्चयं विप्राः" इत्यधिकः (मु) कोशे.

[2] सनातना—अ १, क, उ १.

[3] ते—अ २, क, मु.

चित्सामान्यरूपिणी गुणसाम्यात्मिका मयि विकल्पिता **आभातीत्यर्थः** ॥ ४७ ॥ एवं त्वयि प्रकृतिकल्पनातः किं स्यादित्यत आह—**तेनेति** । येयं चितिर्मयि प्रतिबिम्बिता **तेन चित्प्रतिबिम्बेन** वपुषा **सा पुनः** प्रकृत्यावरणविक्षेपभेदतो निर्विभागव्यष्टिसमष्टिभेदतो वा त्रेधा **विभातीत्यर्थः** । तत्र निर्विभागसमष्टि-व्यष्टिप्रकृतियोगतोऽविकल्पेश्वरजीवत्वमपि भवेदित्याह—**प्रकृतीति** । या त्रेधा प्रविभक्ता तत्कलनाविरलं निर्मायं ब्रह्म निष्प्रतियोगिकमेव । निर्विभागगुणसाम्य-साक्षितया पूरणात् **पुरुषत्वं**, समष्टिप्रकृतिप्राकृतावच्छिन्नान्तर्यामितया पूरणात् पुरुषत्वमीश्वरत्वं, व्यष्टिप्रकृतिप्राकृतावच्छिन्नतया पुरुषत्वं जीवत्वं च **पुनश्च मे** न स्वत इत्यर्थः ॥ ४८ ॥

मायावशाद्भगवत्या ईश्वरत्वम्

शुद्धसत्त्वप्रधानायां मायायां बिम्बितो ह्यजः ।
सत्त्वप्रधाना प्रकृतिर्मायेति प्रतिपाद्यते ॥ ४९ ॥
सा माया स्ववशोपाधिः सर्वज्ञस्येश्वरस्य हि ।
वश्यमायत्वमेकत्वं सर्वज्ञत्वं च तस्य तु ॥ ५० ॥
सात्त्विकत्वात् समष्टित्वात् साक्षित्वाज्जगतामपि ।
जगत् कर्तुमकर्तुं वा चान्यथा कर्तुमीशते ।
यः स ईश्वर इत्युक्तः सर्वज्ञत्वादिभिर्गुणैः ॥ ५१ ॥

ईश्वरत्वं कथमित्यत्र—शुद्धसत्त्वेति । शुद्धसत्त्वप्रधानमायाप्रतिफलनचैतन्य-मीश्वर इत्यर्थः । माया कीदृशीत्यत्र **सत्त्वप्रधानेति** ॥४९॥ ईश्वरस्य मायोपाधि-कत्वेन तद्वशवर्तित्वं स्यादित्यत आह—**सेति** । येयमीश्वरत्वहेतुः सा माया **सर्वज्ञेश्वरस्य स्ववशोपाधिः** । तस्य मायातत्कार्यासङ्गत्वेन वशीकृतमायत्वात् **वश्यमायत्वं** स्वातिरिक्तद्वयाभावात् **एकत्वं** स्वाज्ञविकल्पितं सर्वं स्वदृष्ट्या नेतीति

ज्ञातृत्वात् सर्वज्ञत्वं च तस्यैव ॥ ९० ॥ किंच—स्वदृष्ट्या निर्गुणत्वेऽपि स्वाज्ञदृष्टिसमर्पितसत्त्वगुणोपाधित्वात् समष्ट्यारोपाधारत्वात् स्वारोपितजगतामपि तद्भावाभावप्रकाशकतया साक्षित्वात् किं बहुना यो जगत् कर्तुं अकर्तुं अन्यथा वा कर्तुं ईष्टे सर्वज्ञत्वादिगुणैः सोऽयं ईश्वरः इत्युक्तो भवतीत्यर्थः ॥ ९१ ॥

मायाया विक्षेपावरणशक्तिद्वयम्

शक्तिद्वयं हि मायाया विक्षेपा[1]वृतिरूपकम् ।
विक्षेप[2]शक्तिर्लिङ्गादि ब्रह्माण्डान्तं जगत् सृजेत् ॥ ९२ ॥
अन्तर्दृग्दृश्ययोर्भेदं बहिश्च ब्रह्मसर्गयोः ।
आवृणोत्यपरा शक्तिः सा संसारस्य कारणम् ॥ ९३ ॥

ईश्वरोपाधिमायास्वरूपमुक्त्वा मायाकार्यशक्तिद्वयं तत्कार्यं चाह—शक्तिद्वयमिति । यत् मायायाः कार्यं विक्षेपावृतिरूपकं तत् शक्तिद्वयम् । हिशब्दोऽवधारणे । तत्र विक्षेपकार्यं तु स्थावरजङ्गमतत्प्रविभक्तविविधाकारेण क्षिपति परिणमत इति विक्षेपशक्तिः लिङ्गादि ब्रह्माण्डान्तं जगत् सृजेत् ॥९२॥ विक्षेपकार्यमुक्त्वा आवरणकार्यमाह—अन्तरिति । स्वान्तर्हृदि दृक् प्रत्यक् दृश्यं अन्तःकरणं तयोः भेदं बहिः सच्चिदानन्दं ब्रह्म नामरूपात्मकः सर्गः तयोः भेदं च या आवरणशक्तिः आवृणोति सेयं अपरा शक्तिः संसारस्य कारणं भवतीत्यर्थः ॥ ९३ ॥

जीवस्वरूपम्

साक्षिणः पुरतो भातं लिङ्गदेहेन संयुतम् ।
चितिच्छायासमावेशाज्जीवः स्याद्व्यावहारिकः ॥ ९४ ॥

[1] वरणात्मकम्—अ १, अ २, क.
[2] शक्तिर्लिङ्गा—अ १, क, उ.

तदावृतजीवस्वरूपमाह--साक्षिण इति । साक्षादीक्षत इति साक्षी तस्य पुरतो भातं स्वाज्ञानं स्वकार्यलिङ्गदेहेन संयुतं चितिः चैतन्यं छाया बुद्धिः स्वाज्ञानं पुरस्कृत्य तयोः समावेशात् ऐक्याध्यासात् व्यावहारिकजीवः स्यात् विश्वो भवतीत्यर्थः ॥ ९४ ॥

आवृतिनाशे भेदनाशः

अस्य जीवत्वमारोपात् साक्षिण्यप्यवभासते ।
आवृतौ तु विनष्टायां भेदे भातेऽपयाति तत् ॥ ९९ ॥
तथा सर्गब्रह्मणोश्च भेदमावृत्य तिष्ठति ।
या शक्तिस्तद्वशाद्ब्रह्म विकृतत्वेन भासते ॥ ९६ ॥
अत्राप्यावृतिनाशे न विभाति ब्रह्मसर्गयोः ।
भेदस्तयोर्विकारः स्यात् सर्गे न ब्रह्मणि क्वचित् ॥ ९७ ॥

जीवस्य जीवत्वं सत्यमित्याशङ्क्य स्वावृत्यपाये जीवो ब्रह्मेत्याह--अस्येति । अस्य प्रतीचः स्वाज्ञारोपात् जीवत्वं सर्वसाक्षिण्यपि स्वस्मिन् अवभासते । स्वज्ञानसवित्रा ध्वान्तावृतौ विनष्टायां स्वान्तर्विलसितदृग्दृश्ययोः भेदे भाते तत् दृग्दृश्यभेदावरणं अपयाति ॥ ९९ ॥ यथा स्वान्तः या शक्तिः तथा ब्रह्मसर्गयोश्च भेदमावृत्य तिष्ठति तदावरणशक्तिवशात् अविकृतमपि ब्रह्म विकृतत्वेन अवभासते ॥ ९६ ॥ ब्रह्मसर्गभेददर्शनज्ञानतो भेदावृतिर्नश्यतीत्याह--अत्रेति । अत्र बाह्येऽपि ब्रह्मसर्गयोः भेदावृतिनाशे न तयोः भेदो विभाति । तद्भेदविकारः सर्ग एव न क्वचिद्ब्रह्मणि भवेदित्यर्थः ॥ ९७ ॥

दृश्यप्रपञ्चे ब्रह्मप्रकृत्यंशयोर्विवेकः

अस्ति भाति प्रियं रूपं नाम चेत्यंशपञ्चकम् ।
आद्यं त्रयं ब्रह्मरूपं जगद्रूपं ततो द्वयम् ॥ ९८ ॥

दृश्यमानप्रपञ्चे कोऽयं ब्रह्मांशः कोऽयं प्रकृत्यंश इत्यत आह—अस्तीति। इदमिदं वस्त्वस्तीत्यत्र घटपटादिभेदेन इदमंशे भिन्नेऽपि तद्गतास्तित्वस्यैकरूपत्वात् तत्सत् सन्मात्रमुच्यते, "सन्मात्रमसदन्यत्" इति श्रुतेः। इदं भाति इदं भाति इत्यत्र इदमंशे भिन्नेऽपि तदनुस्यूतभानं चित्, "चिन्मात्रमेव चिन्मात्रं" इति श्रुतेः। इदं प्रिय इदं प्रियं इत्यत्र नामरूपविकृतितः इदमंशे भिन्नेऽपि तदनुस्यूतप्रियस्य निरतिशयानन्दरूपत्वात् प्रियमानन्दघनमित्यर्थः। यदस्तित्वभावमापन्नं तदेव भातीति प्रतीत्यर्हं, यत् भातं तदेव प्रियं भवति "सद्घनोऽयं चिद्घन आनन्दघनः" इति श्रुतेः। इदमस्य रूपं इदमस्य नाम इति नामरूपे मिथो भिद्येते। अस्तिभातिप्रियाणां सच्चिदानन्दानां सर्वानुस्यूतत्वेनैकरूपत्वात् आद्यं त्रयं ब्रह्मरूपं, यदपरं नामरूपात्मकं द्वयं तन्मायाजगद्रूपं भवतीत्यर्थः॥ ९८॥

ब्रह्मांशे समाधिविधानम्

उपेक्ष्य नामरूपे द्वे सच्चिदानन्दतत्परः।
समाधिं सर्वदा कुर्याद्धृदये वाऽथ वा बहिः॥ ९९॥

स्वान्तर्बाह्यविलसितमायांऽशत्यागपूर्वकं ब्रह्मांशे मनःसमाधानं कुर्यादित्याह—उपेक्ष्येति॥ ९९॥

षड्विधसमाधयः

सविकल्पो निर्विकल्पः समाधिर्द्विविधो हृदि।
दृश्यशब्दा[1]नुभेदेन सविकल्पः पुनर्द्विधा॥ ६०॥
कामाद्याश्चित्तगा दृश्यास्तत्साक्षित्वेन चेतनम्।
ध्यायेद्दृश्यानुविद्धोऽयं समाधिः सविकल्पकः॥ ६१॥

[1] दिभे—क.

असङ्गः सच्चिदानन्दः स्वप्रभो द्वैतवर्जितः ।
अस्मीतिशब्दविद्धोऽयं समाधिः सविकल्पकः ॥ ६२ ॥
स्वानुभूतिरसावेशाद्दृश्यशब्दावुपेक्षितुः ।
निर्विकल्पसमाधिः स्यान्निवातस्थितदीपवत् ॥ ६३ ॥
[1]हृदि वा बाह्यदेशेऽपि यस्मिन् कस्मिंश्च वस्तुनि ।
समाधिराद्यः सन्मात्रान्नामरूपपृथक्कृतिः ॥ ६४ ॥
स्तब्धीभावो रसास्वादात् तृतीयः पूर्ववन्मतः ।
एतैः समाधिभिः षड्भिर्नयेत् कालं निरन्तरम् ॥ ६५ ॥

हृदये बाह्ये वा सविकल्पनिर्विकल्पभेदेन समाधिर्भिद्यत इत्याह—**सविकल्प** इति । दृश्यशब्दभेदेन सविकल्पोऽपि द्विधा भिद्यत इत्याह—**दृश्येति** ॥ ६० ॥ तत्रान्तर्दृश्यानुविद्धसविकल्पकसमाधिमाह—**कामाद्या** इति । अस्याः कामवृत्तेः संकल्पवृत्तेः संशयादिवृत्तेर्वा भावाभावसाक्षित्वेन यच्चैतन्यं वर्तते तदेवाहमस्मीति ध्यानमनुसन्धानं दृश्यानुविद्धसमाधिः ॥ ६१ ॥ शब्दानुविद्धसमाधिमाह—**असङ्ग** इति । असङ्ग इत्यादिविशेषणविशिष्टं ब्रह्मास्मीति कामादिदृश्योपेक्षापूर्वकं केवलशब्दावलम्बनतया स्थितिः **शब्दानुविद्धसविकल्पकसमाधिः** ॥ ६२ ॥ स्वान्तर्निर्विकल्पकसमाधिमाह—**स्वानुभूतीति** । ब्रह्मानुभूत्यनुभवबलात् पूर्वानुष्ठितदृश्यशब्दोपेक्षा जायते । तादृशाधिकारिणो **निवातस्थितदीपवत् निर्विकल्पकसमाधिर्भवतीत्यर्थः** ॥ ६३ ॥ स्वान्तःसमाधित्रयमुक्त्वा बाह्यसमाधित्रयमाह—**हृदीति** । स्वहृदि विभातकामादिदृश्यवत् स्वबाह्यविलसितघटपटादिनामरूपे मिथ्यातदारोपापवादाधारतया यच्चैतन्यं वर्तते तन्नामरूपपृथक्कृतिसिद्धं ब्रह्मास्मीति बाह्यदृश्यानुविद्धसमाधिः । तथा सर्वाधिकरणं ब्रह्मास्मीति नामरूपोपेक्षापूर्वकं शब्दमात्रवृत्तिर्बाह्यशब्दानुविद्धसमाधिर्भवती-

[1] हृदीव—उ, मु.

त्यर्थः ॥ ६४ ॥ बाह्यनिर्विकल्पकसमाधिमाह—स्तब्धीभाव इति । बाह्यदृश्यशब्दानुविद्धसमाध्युपेक्षापूर्वकं निवातस्थितदीपवत् स्तब्धीभावोऽयं तृतीयो निर्विकल्पकसमाधिरित्यर्थः । विद्वानेतैरेव कालं नयेदित्याह—एतैरिति ॥ ६५ ॥

निर्विकल्पसाक्षात्कारः

देहाभिमाने गलिते विज्ञाते परमात्मनि ।
यत्र यत्र मनो याति तत्र तत्र परामृतम् ॥ ६६ ॥
भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः ।
क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे ॥ ६७ ॥
मयि जीवत्वमीशत्वं कल्पितं वस्तुतो न हि ।
इति यस्तु विजानाति स मुक्तो नात्र संशयः ॥

इत्युपनिषत् ॥ ६८ ॥

निर्विकल्पात्मसाक्षात्कारः कदा भवतीत्याशङ्क्य देहादावात्मात्मीयाभिमानासंभवनिर्विशेषब्रह्मज्ञानसमकालं पुरा यत्र यत्र मनो याति तत्र तत्र परामृतपरमात्मैव प्रकाशत इत्याह—देहेति । बहिर्मुखदशायां विद्वन्मनो यत्र यत्र धावति तत्र तत्र ब्रह्मैव विभाति । एवं निर्विकल्पकज्ञानवान् मुनिः निष्प्रतियोगिकब्रह्ममात्रमवशिष्यत इत्यर्थः ॥ ६६ ॥ निष्प्रतियोगिकब्रह्ममात्रज्ञानिनोऽपि स्वाज्ञवत् ग्रन्थिसंशयकर्मसंभवात् कथं विदुषो ब्रह्ममात्रतेत्याशंक्य स्वदृष्ट्या ब्रह्मातिरेकेण ग्रन्थिसंशयकर्मासंभवात् । यद्यस्तीति भ्रान्तिस्तदा निर्विशेषब्रह्मज्ञानेन तद[सा]पि विलीयत इत्यह—भिद्यत इति । स्वाज्ञविकल्पितसमष्टिप्रपञ्चाधारः परः, व्यष्टिप्रपञ्चापवादाधारः प्रत्यगवरः, तयोर्भेदाभेदौ यत्रासंभवतां गतौ प्रत्यक्परभेदसापेक्षभेदासहनिष्प्रतियोगिकाद्वैतात्मनि स्वावशेषतया दृष्टे सत्येवमस्य साधनचतुष्टयसंपत्त्यासादितपारमहंस्यधर्मपूगवदनुष्ठितसर्ववेदान्तश्रवणमननिदिध्यासनप्रादुर्भूततत्त्वज्ञानिनो हृदयग्रन्थिर्भिद्यते—स्वाविद्यापदतत्कार्यजातं हृच्छ-

ब्देनोच्यते, अयंशब्देन तदारोपापवादाधिकरणमुच्यते, तयोस्तादात्म्यं हृदयग्रन्थिः। तस्मिन् भिन्ने अस्य सर्वसंशयाश्छिद्यन्ते निष्प्रतियोगिकब्रह्ममात्रज्ञानं मयाऽऽत्तमनात्तं वा, यद्यात्तं तदा तद्ब्रह्म साक्षात्कृतं न वा, तस्मिन् साक्षात्कृतेऽपि तन्मात्राऽवशेषलक्षणविदेहकैवल्यमस्ति वा न वा, तत्सिद्धावपि कालान्तरे स्वातिरिक्तास्तित्वभ्रमतः पुनर्जन्म भवेन्नवेत्यादिसर्वसंशयास्तत्त्वज्ञानासिना छिद्यन्ते। छिन्ने संशयपटलेऽस्य सर्वकर्माणि च क्षीयन्ते। तानि कर्माणि त्रिविधान्यागामिसंचितारब्धभेदात्। देहिनो देहारम्भात् परं यत् कृतं पुण्यादिकं तदागामिकर्म स्थूलप्रपञ्चासंभवज्ञानेन विलीयते। अनन्तकोटि-जन्मोपादानकारणं संचितकर्म, तत् स्थूलसूक्ष्मप्रपञ्चापह्नवसिद्धब्रह्मज्ञानेन नश्यति। देहारम्भात् परं देहावसानावधि सुखादिफलप्रदं प्रारब्धकर्म, तत् स्थूलसूक्ष्मबीज-प्रपञ्चापह्नवसिद्धब्रह्ममात्रसम्यग्ज्ञानेन नश्यति। एवं कर्मक्षयसमकालं सदाद्या-वृतित्रयं भ्रान्तिजादितादात्म्यत्रयं चाप्यपह्नवं भजति। ततस्तुर्यप्रपञ्चापह्नवसिद्ध-ब्रह्ममात्रतत्त्वज्ञदृष्ट्या ग्रन्थिसंशयकर्मावरणतादात्म्यासंभवाद्विद्वान् निष्प्रतियोगिक-ब्रह्ममात्रतयाऽवशिष्यत इत्यत्र नहि विवादोऽस्तीत्यर्थः ॥ ६७ ॥ यत एवं अतः मयि जीवत्वमिति। स्वस्य निष्प्रतियोगिकत्वेन स्वातिरिक्ततत्कल्पनाया मृग्यत्वात्। विद्याफलमाह—इतीति। "आत्मविद्या मया लब्धा" इत्यादि "कल्पितं वस्तुतो नहि" इत्यन्तं यथावत् यो जानाति स मुक्तो भवति इत्यत्र न हि संशयोऽस्ति ॥६८॥ इत्युपनिषच्छब्दः सरस्वतीरहस्योपनिषत्समाप्त्यर्थः।

श्रीवासुदेवेन्द्रशिष्योपनिषद्ब्रह्मयोगिना।
सरस्वतीरहस्यस्य व्याख्यानं लिखितं स्फुटम्।
प्रकृतोपनिषद्व्याख्याग्रन्थः षष्ट्युत्तरं शतम् ॥

इति श्रीमदीशाद्यष्टोत्तरशतोपनिषच्छास्त्रविवरणे षडुत्तरशतसङ्ख्यापूरकं
सरस्वतीरहस्योपनिषद्विवरणं सम्पूर्णम् ॥

सीतोपनिषत्

भद्रं कर्णेभिः—इति शान्तिः

सीताया मूलप्रकृतित्वम्

देवा ह वै प्रजापतिमब्रुवन् का सीता किं रूपमिति ॥ १ ॥

स होवाच प्रजापतिः सा सीतेति—

मूलप्रकृतिरूपत्वात् सा सीता प्रकृतिः स्मृता ।
प्रणवप्रकृतिरूपत्वात् सा सीता प्रकृति[1]रुच्यते ॥ २ ॥

इच्छाज्ञानक्रियाशक्तित्रयं यद्भावसाधनम् ।
तद्ब्रह्मसत्तासामान्यं सीतातत्त्वमुपास्महे ॥

अथर्वणवेदप्रविभक्तेयं सीतोपनिषद् ब्रह्मातिरिक्तयाथात्म्यं प्रपञ्चयन्ती प्रवृत्ता । अस्याः स्वल्पग्रन्थतो विवरणमारभ्यते । देवकदम्बप्रजापतिप्रश्नप्रतिवचनरूपेयमाख्यायिका विद्यास्तुत्यर्था । आख्यायिकामनुक्रामति—देवा इति ॥१॥ देवैः पृष्टः स होवाच प्रजापतिः । किमिति ? सा सीतेति । या हि मूलप्रकृतित्वेन प्रणवत्वेन प्रकृता सेयं प्रणवमूलप्रकृतिः सीतेत्युच्यते ॥ २ ॥

[1] रित्युच्यते—अ १, क.

सीताप्रकृतेरक्षरार्थः

सीता इति त्रिवर्णात्मा साक्षान्मायामया भवेत् ।
विष्णुः प्रपञ्चबीजं च माया ईकार उच्यते ॥ ३ ॥
सकारः सत्यममृतं प्राप्तिः सोमश्च कीर्त्यते ।
तकारस्तारलक्ष्म्या च वैराजः प्रस्तरः स्मृतः ॥ ४ ॥

सीताप्रकृतेरक्षरार्थमाह—**सीता** इति । या स्वातिरिक्तमेति प्रतिपादयति सेयं माया ब्रह्मविद्या सीतेति वर्णत्रयसमुदायार्थः । आदौ सीतेत्यत्र—सकारोपरि श्रूयमाण-ईकारार्थमाह— **विष्णुरिति** । प्रत्यगभेदेन यः सर्वं व्याप्नोति सोऽयं **विष्णुः** सर्वसाक्षी प्रपञ्चारोपाधिकरणतया **प्रपञ्चबीजं** ईश्वरचैतन्यं **च** यामवष्टभ्य आत्मा साक्षीशजीवभावमेति सेयं **माया** च **ईकारस्यार्थ उच्यते** ॥ ३ ॥ सकारार्थमाचष्टे—**सकार** इति । सत्यं अवितथं स्वरूपं **अमृतं** मरणधर्मरहितं **प्राप्तिः** कर्मयोगभक्तिज्ञानफलाप्तिः, उमया सहितः **सोमश्च** ईश्वरः सकारशब्दार्थः । तकारार्थं स्पष्टयति—**तकार** इति । तारः प्रणवः "ओङ्कारेण सर्वा वाक् संतृण्या" इति श्रुत्यनुरोधेन तारलक्ष्मीः शब्दराशिः सरस्वती तया **तारलक्ष्म्या च** सह विराजत इति विराट् स एव **वैराजः** ब्रह्मा यं प्रणम्य सन्तो भवसागरं तरन्ति सोऽयं विराट् **प्रस्तरश्च** तकार इति **स्मृत** इत्यर्थः ॥ ४ ॥

सीताया व्यक्ताव्यक्तस्वरूपम्

[1]ईकाररूपिणी सोमाऽमृतावयव[2]देव्यलंकारस्रङ्मौक्तिकाद्याभरणालंकृता महामायाऽव्यक्तरूपिणी व्यक्ता भवति ॥ ५ ॥ प्रथमा शब्दब्रह्ममयी स्वाध्यायकाले प्रसन्ना । उद्भवा नरकात्मिका द्वितीया

[1] इकार—अ १, अ २, क.
[2] दिव्या—मु. देव्यलंकारास्र—ज.

भूतले हलाग्रे समुत्पन्ना । तृतीया [1]ईकाररूपिणी अव्यक्तस्वरूपा भवतीति सीता इत्युदाहरन्ति शौनकीये ॥ ६ ॥

श्रीरामसान्निध्यवशाज्जगदा[2]धारकारिणी ।
उत्पत्तिस्थितिसंहारकारिणी सर्वदेहिनाम् ॥ ७ ॥
[3]सीता भवति ज्ञेया मूलप्रकृतिसंज्ञिता ।
प्रणवत्वात् प्रकृतिरिति वदन्ति ब्रह्मवादिनः ॥ इति ॥ ८ ॥

सीताया व्यक्ताव्यक्तस्वरूपं त्र्यक्षरानुरूपस्वरूपं च विशदयति—ईकारेति। गुणसाम्यात्मना **ईकाररूपिणी** अव्यक्तरूपाऽपि श्रीरामसंकल्पवशात् **सोमा** सोमवत् प्रियदर्शना **अमृतानवद्यावयवैः** देवी देदीप्यमाना भगवदलङ्कारदिव्यस्रग्रूपिणी **मौक्तिकाद्याभरणैः** स्वेच्छाशक्तिविकल्पितैः **नित्यालङ्कृता** स्वभावतो **महामाया अव्यक्तरूपिणी** व्यक्ता भवति ॥ ९ ॥ तस्याः प्रथमरूपं किमित्यत्र या द्विजानां स्वस्वशाखापूर्वकसर्ववेदशास्त्राध्ययनकाले सरस्वत्यात्मना शब्दब्रह्ममयी **प्रसन्ना** भवति सेयं **प्रथमा** शक्तिरिति विज्ञेया । भगवदिच्छया स्वातिरिक्ते ये न रमन्ते ते नराः **सम्यग्ज्ञानिनः** तेषां यत् कं ब्रह्मभावापत्तिसुखं तदेवात्मा स्वरूपं यस्याः सेयं **नरकात्मिका** । कदेयमुद्भवतीत्यत्र भगवद्भावमापन्नसम्यग्ज्ञहृदये निरावृतसुखरूपेण सकृत् उद्भवा सदा नित्योद्भवेत्यर्थः । येयं कैवल्यश्रीरिति विश्रुता सेयं **द्वितीया** सीता लक्ष्मीरूपेण **भूतले हलाग्राकर्षणतः समुत्पन्ना** भवति नान्यथेत्यर्थः । या **अव्यक्तस्वरूपा** भवति सेयं गौर्यात्मना **ईकाररूपिणी** तृतीया भवति । एवं सरस्वत्यादिशक्तित्रयरूपेण कैवल्यश्रीस्वरूपेण च सेयं **सीता** इति वर्णत्रयार्थतया ज्ञेयेत्यर्थः । एवं ब्राह्मणेन योऽर्थोऽभिहितस्तमेतमर्थमथर्वणवेदप्रविभक्तशौनकशाखामस्तकरामतापनीये मन्त्रा **उदाहरन्ति** ॥ ६ ॥ के ते मन्त्रा इत्यत्र **श्रीरामेति** । कैवल्यश्र्यात्मना यद्राजते महस्तत् श्रीरामशब्दार्थः । तथा च स्मृतिः—

[1] इकार—अ, अ १, अ २, उ १. [2] नन्दका—मु. [3] सीता भगवती ज्ञेया—मु.

स्वान्याश्र्यपह्नवात् सिद्धा या मुक्तिश्रीर्विजृम्भते ।
तद्रूपतो राजमानं महः श्रीराम ईरितम् ॥ इति ॥

इत्थंभूतश्रीरामसान्निध्यवशात् श्रीराममेव जगदारोपापवादाधारं करोतीति जगदाधारकारिणी भवति । किं च या सर्वदेहिनां अन्तःकरणात्मना जाग्रदादिविमोक्षान्तप्रपञ्चोत्पत्तिस्थितिसंहारान् ईश्वरेण कारयतीति तथोक्ता भवति ॥ ७ ॥ सेयं मूलप्रकृतिसंज्ञिता सीतेति ज्ञेया भवति । कथमस्याः प्रकृतित्वमित्यत्र तुर्यतुर्यार्थप्रणवत्वेन प्रकृतत्वादियं ब्रह्ममात्रप्रकृतिरिति ब्रह्मवादिनो वदन्तीत्यर्थः ॥ ८ ॥

सीताया ब्रह्मत्वम्

अथातो ब्रह्मजिज्ञासेति च ॥ ९ ॥ [1]सेयं सर्ववेदमयी सर्वदेवमयी सर्वलोकमयी सर्वकीर्तिमयी सर्वधर्ममयी सर्वाधारकार्यकारणमयी महालक्ष्मीर्देवेशस्य भिन्नाभिन्नरूपा चेतनाचेतनात्मिका ब्रह्मस्थावरात्मा तद्गुणकर्मविभागभेदाच्छरीररूपा देवर्षिमनुष्यगन्धर्वरूपा असुरराक्षसभूतप्रेतपिशाचभूतादिभूतशरीररूपा भूतेन्द्रियमनःप्राणरूपेति विज्ञायते ॥ १० ॥

यतो ब्रह्मवादिनामेवमाशयोऽत इयं ब्रह्मेति ज्ञातव्येत्याह—अथातो ब्रह्मजिज्ञासेति चेति । अथ ब्रह्मातिरिक्तं न किंचिदस्तीति श्रुत्याचार्योपदेशानन्तरमपि यतः स्वाज्ञदृष्ट्या इयं ब्रह्मातिरिक्ततया प्रकृतेव भाति अतः स्वज्ञदृष्ट्यवष्टम्भतः स्वातिरिक्तकलनापह्नवसिद्धं ब्रह्म निष्प्रतियोगिकस्वमात्रमिति सम्यग्ज्ञानावधि स्वाज्ञानुभूतप्रकृतिप्राकृतप्रपञ्चे ब्रह्मजिज्ञासा ब्रह्मदृष्टिः कर्तव्येत्यर्थः । चशब्दतो जात्वपि तत्र ब्रह्मातिरिक्तदृष्टिर्न कार्येति द्योत्यते ॥ ९ ॥ स्वातिरेकेण वेदलोकादीनामभिधानादिभेदभिन्नत्वात् कथमियं ब्रह्मतामर्हतीत्याशङ्क्य

[1] सा सर्व—अ १, अ २, क.

वेदलोकादेः स्वविकल्पितत्वेन स्वातिरेकेणाभावात् स्वयमेव सर्वमित्याह—सेति। या ब्रह्ममात्रप्रकृतिः सेयम् ॥ १० ॥

सीताया इच्छाऽऽदिशक्तित्रयत्वम्

सा देवी त्रिविधा भवति शक्त्यात्मना इच्छाशक्तिः क्रियाशक्तिः साक्षाच्छक्तिरिति ॥ ११ ॥

एवं सार्वात्म्यमापन्नाऽपि परिच्छिन्नदृष्टीनामिच्छाऽऽदिशक्तित्रयवद्भातीत्याह—सेति। या सार्वात्म्यदृष्टीनां सर्वरूपतया स्वयमेकैव भाता सा। त्रिविधा कथमित्यत्र इच्छाशक्तिरित्यादि। साक्षाच्छक्तिर्नाम ज्ञानशक्तिरित्यर्थः ॥ ११ ॥

इच्छाशक्तेः श्रीभूमिनीलाऽऽत्मकत्वम्

इच्छाशक्तिस्त्रिविधा भवति श्रीभूमिनीलाऽऽत्मिका भद्ररूपिणी प्रभावरूपिणी सोमसूर्याग्निरूपा भवति ॥ १२ ॥

इच्छाशक्तेरपि त्रैविध्यमाह—इच्छाशक्तिस्त्रिविधा भवतीति। तत् कथं? इत्यत्र—श्रीभूमिनीलात्मिकेति। श्र्यादिविष्णुपत्न्यभेदरूपत्वात्। श्र्यात्मना भद्ररूपिणी भूम्यात्मना नानाविधपुण्यस्थलरूपेण च प्रभावरूपिणी नीलात्मना सोमसूर्याग्निरूपा भवति इति विज्ञेयेत्यर्थः ॥ १२ ॥

सोमरूपा नीला

सोमात्मिका ओषधीनां प्रभवति कल्पवृक्षपुष्पफललतागुल्मात्मिका औषधभेषजात्मिका अमृतरूपा देवानां महस्तोमफलप्रदा अमृतेन तृप्तिं जनयन्ती देवानामन्नेन पशूनां तृणेन तत्तज्जीवानाम ॥ १३ ॥

सोमात्मना किं भवतीत्यत आह—**सोमेति**। "पुष्णामि चौषधीः सर्वाः सोमो भूत्वा रसात्मकः" इति स्मृत्यनुरोधेन **सोमात्मिकेति**। औषधभेषजयोः न पौनरुक्त्यं, औषधशब्देन तत्तद्रोगहरमूलिकाविशेषा उच्यन्ते, भेषजशब्देन भिषक्चिकित्सका इत्यर्थभेददर्शनात्। **अमृतरूपा** देवानां तृप्तिहेतुत्वात् **महस्तोमफलप्रदा** महान् स्तोमः परापरविद्यारूपस्तत्फलप्रदा। तत्तज्जीवानां तत्तद्भोज्यप्रदानेन तृप्तिं जयनतीत्यर्थः॥ १३॥

सूर्यादिरूपा नीला

सूर्यादिसकलभुवनप्रकाशिनी दिवा रात्रिः कालकलानिमेषमारभ्य घटिकाऽष्टयाम[1]दिवसवाररात्रिभेदेन पक्षमासर्त्वयनसंवत्सरभेदेन मनुष्याणां शतायुःकल्पनया प्रकाशमाना चिरक्षिप्रव्यपदेशा निमेषमारभ्य परार्धपर्यन्तं कालचक्रं जगच्चक्रमित्यादिप्रकारेण चक्रवत् परिवर्तमाना। सर्वस्यैतस्यैव कालस्य विभागविशेषाः प्रकाशरूपाः [2]कालरूपा भवन्ति॥ १४॥

सूर्यादिरूपेण जगच्चक्रचालिकेयं भवतीत्याह—**सूर्यादीति**। स्वयमेव सूर्यचन्द्राद्यात्मना दिवारात्रिर्भूत्वा सकललोकान् प्रकाशयतीत्यर्थः। किंच—**कालकलेति**। **प्रकाशमाना** सती स्वविकल्पितानृतजडदुःखप्रपञ्चं सच्चिदानन्दात्मना व्याप्य चिरं रक्षतीति यस्यास्तत्त्वं प्रकर्षेण व्यपदिश्यते सेयं **चिरक्षिप्रव्यपदेशा**। किंच **निमेषमिति**। **कालचक्रं**, कालानां भ्रमणात्मकत्वात् चक्रत्वं, तथा स्वाविद्याद्वयतत्कार्यात्मना **जगच्चक्रं**, इत्यादिप्रकारेण **चक्रवत् परिवर्तमाना** स्वाधिष्ठानाभेदादित्यर्थः। एवं नानाविभागाः प्रकृतेरेव नाधिष्ठानस्येत्यत आह—**सर्वस्येति**। स्वातिरिक्तधियं कालयतीति **काल** ईश्वरः "स एष कालो भुवनस्य गोप्ता" इति श्रुतेः। **सर्वस्य** सर्वारोपापवादाधिकरणस्य एतस्यैव

[1] दिवसरात्रि—उ, उ १.

[2] कालरूपा—उ, उ १.

कालस्य ईश्वरस्य इच्छाऽऽदिशक्तित्रयप्रविभक्ता नानाविभागविशेषाः स्वाज्ञदृष्ट्या जडत्वेन नानात्वेन च भाता अपि स्वज्ञदृष्ट्या यतः स्वप्रकाशरूपा अतः कालरूपा भवन्ति। स्वातिरेकेण मायाप्रकृतिसत्त्वे एवं विभाग उपपद्यते। वस्तुतः कालरूपेश्वरस्य स्वमात्रप्रकृतित्वेऽपि स्वाज्ञादिदृष्टिमाश्रित्य नानात्वमपि युज्यते न स्वत इत्यर्थः ॥ १४ ॥

अग्निरूपा नीला

अग्निरूपा अन्नपानादि प्राणिनां क्षुत्तृष्णाऽऽत्मिका देवानां मखरूपा वनौषधीनां शीतोष्णरूपा काष्ठेष्वन्तर्बहिश्च नित्यानित्यरूपा भवति ॥ १५ ॥

तत् कथं स्वाज्ञदृष्ट्या नानात्वम्? इत्यत्र— अग्निरूपेति। अन्नपानादिरूपा। देवानां मखरूपा तेषां तदुपजीवित्वात्। वनौषधीनां शीतोष्णरूपा शीतोष्णादेर्वनौषधिवर्धकत्वात्। स्वाविद्यापदतत्कार्यकाष्ठेष्वन्तर्बहिश्च विश्वविराडोत्रादिद्रव्यरूपेण व्याप्य चैतन्यजडात्मना नित्यानित्यरूपा भवति ॥१५॥

श्रीदेवीरूपेच्छाशक्तिः

श्रीदेवी त्रिविधं रूपं कृत्वा भगवत्संकल्पानुगुण्येन लोकरक्षणार्थं रूपं धारयति श्रीरिति लक्ष्मीरिति लक्ष्यमाणा भवतीति विज्ञायते ॥ १६ ॥

या वस्तुतः परमार्थनित्या चिच्छक्तिः सैव श्रीदेवी त्रिविधं श्रीभूमिनीलाऽऽत्मकं रूपं कृत्वा। कथमेवं ज्ञायत इत्यत्र तज्ज्ञैः श्रीरित्यादि ॥ १६ ॥

भूदेवीरूपेच्छाशक्तिः

भूदेवी ससागराम्भस्सप्तद्वीपा वसुन्धरा भूरादिचतुर्दशभुवनानामाधाराधेया प्रणवात्मिका भवति ॥ १७ ॥

भूदेव्यात्मना किं भवतीत्यत आह—भूदेवीति । चिच्छक्त्यात्मना आधाराधेया स्वेन रूपेण प्रणवात्मिका भवति ॥ १७ ॥

इच्छाशक्तेः सर्वरूपत्वम्

नीला [1]च विद्युन्मालिनी सर्वौषधीनां सर्वप्राणिनां पोषणार्थं सर्वरूपा भवति ॥ १८ ॥

नीलात्मना सर्वरूपा भवतीत्याह—नीलेति । नीला च सर्वतोमुखतया विद्युन्मालिनी भूत्वा ॥ १८ ॥

इच्छाशक्तेर्भुवनाधारत्वम्

समस्तभुवनस्याधोभागे जलाकारात्मिका मण्डूकमयेति भुवनाधारेति विज्ञायते ॥ १९ ॥

केन रूपेण भुवनाधारेत्यत आह—समस्तेति ॥ १९ ॥

क्रियाशक्तेर्नादोद्भवः

क्रियाशक्तिस्वरूपम् । हरेर्मुखान्नादः । तन्नादाद्बिन्दुः । बिन्दोरोंकारः । ओंकारात् परतो रामवैखानसपर्वतः । तत्पर्वते कर्मज्ञानमयीभिर्बहुशाखा भवन्ति ॥ २० ॥

इच्छाशक्तिस्वरूपमुक्त्वा क्रियाशक्तिस्वरूपमाह—क्रियाशक्तिस्वरूपमिति । यया सर्वं क्रियते सेयं क्रियाशक्तिः, तस्याः स्वरूपमुच्यत इति शेषः । क्रियाशक्तिस्वरूपमात्मैव स्वातिरिक्तं स्वावशेषं हरतीति हरिः नारायणः परमात्मा

[1] च मुखवि—मु.

तन्मुखात् वैखरीप्रपञ्चहेतुः **नादः** प्रादुर्बभूव। तदव्यक्तरूपात् **नादात्** महदात्मको बिन्दुः। तथाविधबिन्दोः अहंकारात्मक **ओङ्कारः**। अहंकारादिमौतिकान्तभावमापन्नादोङ्कारात् **परतः** वैलक्षण्यतो यो राजते महीयते सोऽयं **रामो** वैखानसवालखिल्यादिमौनिपटलाश्रयसच्चिदानन्दपर्वतो भवति। तथाविध**पर्वते** परमात्मनि **कर्मज्ञानमयीभिः** कर्मोपासनाज्ञानकाण्डप्रकाशकैः ऋगादिचतुर्वेदतरुभिः संजाताः बहवः अशीत्यधिकशतोत्तरसहस्रसंख्याकाः **शाखाः** भवन्ति ॥ २० ॥

साङ्गोपाङ्गवेदतच्छाखाकथनम्

तत्र त्रयीमयं शास्त्रमाद्यं सर्वार्थदर्शनम्।
ऋग्यजुःसामरूपत्वात् त्रयीति परिकीर्तिता ॥ २१ ॥
[हेतुना] कार्यसिद्धेन चतुर्धा परिकीर्तिता।
ऋचो यजूंषि सामान्यथर्वाङ्गिरसस्तथा ॥ २२ ॥
चातुर्होत्रप्रधानत्वाल्लिङ्गादित्रितयं त्रयी।
अथर्वाङ्गिरसं रूपं सामऋग्यजुरात्मकम् ॥ २३ ॥
तथाऽऽदिशन्त्याभिचारसामान्येन पृथक् पृथक्।
एकविंशतिशाखायामृग्वेदः परिकीर्तितः ॥ २४ ॥
शतं च नव[1]शाखासु यजुषामेव जन्मनाम्।
साम्नः सहस्रशाखाः स्युः पञ्चशाखा अथर्वणः ॥ २५ ॥
वैखानसमतं तस्मिन्नादौ प्रत्यक्षदर्शनम्।
स्मर्यते मुनिभिर्नित्यं [2]वैखानसमतः परम् ॥ २६ ॥

[1] शाखाः स्युः—अ, उ, उ १. [2] लब्ध्वा वै—अ, अ २, उ १, क.

कल्पो व्याकरणं शिक्षा निरुक्तं ज्योतिषं छन्दः एतानि षडङ्गानि ॥ २७ ॥

उपाङ्गमयनं चैव मीमांसा न्यायविस्तरः ।
धर्मज्ञसेवितार्थं च वेदवेदोऽधिकं तथा ॥ २८ ॥
[1]निबन्धाः सर्वशाखा च समयाचारसङ्गतिः ।
धर्मशास्त्रं महर्षीणामन्तःकरणसंभृतम् ॥
इतिहासपुराणाख्यमुपाङ्गश्च प्रकीर्तितः ॥ २९ ॥
वास्तुवेदो धनुर्वेदो [2]गान्धर्वो दैविकस्तथा ।
आयुर्वेदश्च पञ्चैते उपवेदाः प्रकीर्तिताः ॥ ३० ॥
दण्डो नीतिश्च वार्ता च विद्या वायुजयः परः ।
एकविंशतिभेदोऽयं स्वप्रकाशः प्रकीर्तितः ॥ ३१ ॥

चतुर्वेदस्वरूपं तच्छाखाभेदं च प्रकटयति—तत्रेति । काण्डत्रयार्थप्रकाशकत्वं सर्वार्थदर्शनत्वम् । कथमेतस्य त्रयीत्वमित्यत्र—ऋग्यजुस्सामरूपत्वादिति ॥ २१ ॥ अथर्वणपृथक्करणं किमर्थमित्यत्राऽथर्वणस्योपासनाज्ञानकाण्डप्रकाशकत्वेऽपि कर्मकाण्डाप्रकाशनात् पृथक्करणं केवलोपासनाज्ञानकाण्डकार्यनिष्पत्तेः ऋगादिसाम्यं चाह—कार्येति । उपासनाज्ञानकाण्डनिष्ठितकार्यसिद्धेन हेतुना ॥ २२ ॥ ऋगादेस्त्रयीत्वे हेतुः—चातुर्होत्रेति । ब्रह्मा होता अध्वर्युरित्यादिभेदेन "चातुर्होत्रियमग्निं चिन्वानः" इति श्रुतिसिद्धचयनभेदेन वा चातुर्होत्रप्रधानत्वात् लिङ्गादित्रितयं लिङ्गवाक्यप्रकरणात्मकं यत्रोपलभ्यते सेयं त्रयीत्युच्यते। किंच—अथर्वाङ्गिरसमिति। त्रयीरूपमथर्वणरूपं वा कीदृशं

[1] निबन्धा स—अ १, अ २, क.
[2] गान्धर्वश्च तथा मुने—अ, अ १, अ २, क, मु.

मित्यत्र सामऋग्यजुरात्मकं त्रयीरूपं तस्य कर्मादिकाण्डत्रयप्रकाशकत्वं ब्रह्मवादिनः आदिशन्ति । अथर्वाङ्गिरोभिर्दृष्टमथर्ववेदरूपं तु शान्तिवश्यस्तम्भनविद्वेषोच्चाटनमारणभेदेन आभिचारसामान्यप्रकाशकतया त्रयीतः पृथक् पृथक् आदिशन्तीत्यर्थः । ऋगादिवेदचतुष्टयस्य शाखासंख्याविभागमाचष्टे—एकविंशतीति । एकविंशतिशाखाभेदविशिष्टो ह्यृग्वेदः ॥ २३–२४ ॥ नवाधिकशतशाखाविशिष्टो यजुर्वेदः । सहस्रसंख्याविशिष्टः सामवेदः । पञ्चशाखा अथर्वणः इत्यत्र पञ्चग्रहणं पञ्चाशदुपलक्षणार्थम्, "पञ्चाशच्छाखाः अथर्वणः" इति श्रुत्यन्तरात् ॥२५॥ सूत्राण्यपि चतुर्वेदार्थरूपाणीत्याह—वैखानसमिति । यद्वैखानसमुनिना ऋगादिचतुर्वेदार्थः सूत्रितस्तत् सूत्रजातं वैखानसमतं सूत्रजाते तस्मिन्नादौ यद्वैखानसमुनिना सूत्रितं तत् प्रत्यक्षदर्शनं चतुर्वेदार्थसारस्य सूत्रितत्वात् । सर्वे मुनयः कृत्स्नं वैखानससूत्रजातं लब्ध्वा ततः परं तैः मुनिभिः नित्यं सूत्रजातं स्मृतिजातं च स्मर्यते क्रियते कृतमित्यर्थः ॥ २६ ॥ वेदाङ्गानि कानि? इत्यत आह—कल्प इति ॥ २७ ॥ कान्युपाङ्गानि? इत्यत आह—उपाङ्गमिति । एकस्मिन् वस्तुनि यत् सर्वमयनं पर्यवसानं भवति तत् अयनं वेदान्तशास्त्रमित्यर्थः । मीमांसा जैमिन्यादिप्रणीतशास्त्रम् । न्यायविस्तरः गौतमकणादादिप्रणीतं तर्कशास्त्रम् । धर्मज्ञैर्मन्वादिभिः सेवितोऽर्थो यत्र पुराणे दर्शितस्तत्पुराणजातं धर्मज्ञसेवितार्थम् । कर्मकाण्डगोचरो वेदः, तस्मादपि कर्मकाण्डगोचरवेदादप्यधिकमुपासनाकाण्डमित्यर्थः ॥ २८ ॥ निबन्धाः नीतिशास्त्रं, एतदर्थमेवमिति निबन्धनात् । स्वशाखेतरसर्वशाखा च । समयाचारसङ्गतिः वृद्धाचरणप्रवादः । महर्षीणां स्वयंभातवेदानां अन्तःकरणसंभृतं अन्तःकरणनिश्चितोऽर्थः धर्मशास्त्रम् । इतिहासपुराणाख्यं भारतादिः । एतानि दशसङ्ख्याकान्युपाङ्गानीति कीर्तितानीत्यर्थः ॥ २९ ॥ वेदतदङ्गोपाङ्गान्युक्त्वोपवेदानाह —वास्त्विति । वास्तुवेदः वास्तुनिर्माणादिशिल्पिशास्त्रम् । धनुर्वेदः ब्रह्मास्त्रादिविषयः । गान्धर्वः गीतिशास्त्रम् । दैविकः देवाचारनिबन्धनशास्त्रम् । आयुर्वेदाः योगशास्त्रं भिषक्छास्त्रं ज्योतिःशास्त्रं वा । पञ्चैते उपवेदा इति कीर्तिताः ॥ ३० ॥ ऋगाद्यायुर्वेदान्तानां स्वप्रकाशब्रह्मगोचरतया स्वप्रकाशत्वं

स्यादित्याह—दण्ड इति। ऋगादिचतुर्वेदवाक्यपटलस्य दण्डोद्यतकरराजशासनवदलङ्घ्यत्वात् दण्डशब्देन ऋगादिचतुर्वेद उच्यते। नीतिशब्देन ऋगादिचतुर्वेदस्वभावनयनकल्पादिषडङ्गमुच्यते। वार्ताशब्देन ऋगादिचतुर्वेदार्थप्रकाशकवृत्तिस्थानीयोपाङ्गमुच्यते। विद्याशब्देन वास्तुवेदादिवायुजयान्तोपवेद उच्यते। तत्र वेदाश्चत्वारः। अङ्गानि षट्। उपाङ्गान्यपि षडेव। शिष्टचतुरङ्गमपि षट्स्वन्तर्भूयते। उपवेदाः पञ्च। आहत्यायमेकविंशतिधा भिन्नः। ऋगादिवायुजयान्तविद्यायाः स्वप्रकाशब्रह्ममात्रपर्यवसन्नतयाऽयं भेदः स्वप्रकाश एवेति परिकीर्तितः कथित इत्यर्थः॥ ३१॥

नादस्यैव वेदशास्त्रद्वारा ब्रह्मभवनम्

वैखानसऋषेः पूर्वं विष्णोर्वाणी समुद्भवेत्।
त्रयीरूपेण संकल्प्य इत्थं देही विजृम्भते॥ ३२॥
संख्यारूपेण संकल्प्य वैखानसऋषेः पुरा।
उदितो यादृशः पूर्वं तादृशं शृणु मेऽखिलम्॥
शाश्वद्ब्रह्ममयं रूपं क्रियाशक्तिरुदाहृता॥ ३३॥

पुरा हरिमुखोदितनाद एव कृत्स्नवेदशास्त्राकृतिर्भूत्वा ततो ब्रह्मभावमेत्य ब्रह्मैव भवतीत्याह—वैखानस इति। स्वानन्यभावमापन्नवैखानसहृदये प्रत्यगभिन्नब्रह्मभावमृषति गच्छतीति वैखानस ऋषिः विष्णुः, तस्य विष्णोः मुखात् पूर्वं नादरूपिणी या वाणी समुद्भवेत् "हरेर्मुखान्नादः" इत्युक्तत्वात्, सेयमादौ हरिजा नादरूपिणी वाणी त्रयीरूपेण चतुर्वेदगतानेकसङ्ख्याऽन्वितशाखाभेदेन च विजृम्भते विजृम्भिता भवति॥ ३२॥ यादृशो नादः वैखानसऋषेः मुखात् उदितः मे मत्तः सकाशात् तादृशमखिलं लयक्रमं शृणु। तत् कथमित्यत्र या पुरा वेदशास्त्ररूपेण विजृम्भिता सा प्रणवात्मना लीयते, सोऽयं प्रणवः स्वावयवाकारादिमात्रात्रयमुपसंहृत्य बिन्द्वात्मना विलीयते, बिन्दुः नादात्मना,

वेष्णवात्मना, विष्णुः व्याप्यव्यापककलनापह्नवसिद्धं ब्रह्ममयं रूपं निष्प्रति-
ब्रह्ममात्रमवशिष्यत इत्यादिकलना यया क्रियते सेयं क्रियाशक्तिरित्यभि-
इत्यर्थः ॥ ३३ ॥

साक्षाच्छक्तिस्वरूपम्

साक्षाच्छक्तिर्भगवतः स्मरणमात्ररूपाऽऽविर्भावप्रादुर्भावात्मिका
ग्रहानुग्रहरूपा शन्तितेजोरूपा [1]व्यक्ताव्यक्तकारणचरणसमग्राव-
यमुख[2]वर्णभेदाभेदरूपा भगवत्सहचारिणी अनपायिनी अनवरत-
हाश्रयिणी उदितानुदिताकारा निमेषोन्मेषसृष्टिस्थितिसंहारतिरो-
ानानुग्रहादिसर्वशक्तिसामर्थ्यात् साक्षाच्छक्तिरिति गीयते ॥ ३४ ॥

साक्षाच्छक्तिस्वरूपमाह—साक्षादिति । ब्रह्मसाक्षात्कारवृत्तिर्ज्ञानं तद्रो-
चित्व साक्षाच्छक्तिः सेयं भगवद्रूपाऽपि भगवतः स्मरणमात्रेण
ष्ट्या आविर्भावतिरोभावनिग्रहानुग्रहतत्कलनाशान्ततेजोरूपा व्यक्ता-
यपञ्चकारणीभूतचरणादिसमग्रावयवसंपन्ना स्वाज्ञदृष्ट्या भगवतो भेदाभेद-
भगवत्सहचारिणी सृष्ट्यादिपञ्चकृत्यकरणसमर्था सैव साक्षाच्छक्ति-
: ॥ ३४ ॥

योगशक्तिरूपेच्छाशक्तिः

इच्छाशक्तिस्त्रिविधा । प्रलयावस्थायां विश्रमणार्थं भगवतो
क्षिणवक्षःस्थले श्रीवत्साकृतिर्भूत्वा विश्रम्यतीति [3]सा योगशक्तिः॥ ३५॥

[1] व्यक्तोव्य—अ १, अ २, क.
[2] वर्णाभे—उ १.
[3] स्वयो—उ, उ १. स्वायोक—अ, अ १, अ २.

पुनर्योगभोगवीरशक्तिभेदेनेच्छाशक्तिस्त्रिविधा । तत्र योगशक्तिस्वरूपमाह—**प्रलयेति** । स्वविश्रमणार्थम् । स्वयं श्रीवत्साकृतिः ॥ ३५ ॥

भोगशक्तिरूपेच्छाशक्तिः

भोगशक्तिर्भोगरूपा कल्पवृक्षकामधेनुचिन्तामणिशङ्खपद्मनिध्यादिनवनिधिसमाश्रिता भगवदुपासकानां कामनया अकामनया वा भक्तियुक्ता नरं नित्यनैमित्तिककर्मभिरग्निहोत्रादिभिर्वा यम[1]नियमासनप्राणायामप्रत्या[2]हारधारणाध्यानसमाधिभिर्वा [3]गोपुरप्राकारादिभिर्विमाना[4]दिभिः सह भगवद्विग्रहार्चापूजोपकरणैरर्चनैः स्नानादिभिर्वा पितृपूजा[5]दिभिरन्नपानादिभिर्वा भगवत्प्रीत्यर्थमुक्त्वा सर्वं क्रियते ॥ ३६ ॥

तत्र भोगशक्तिस्वरूपमाह—**भोगेति** । **भोगरूपा** किमाश्रिता सतीत्यत्र—**कल्पेति** । **पद्मनिध्यादिनवनिधिसमाश्रिता** सती भगवतो भोगयोग्या भवति । न केवलं भगवतः, किंतु तद्भक्तानामपीत्याह—**भगवदिति** । **ध्यानसमाधिभिर्वा** संयोज्य तत्तत्फलभोगिनं करोतीत्यर्थः । यस्तादृशाधिकारी न भवति तं **गोपुरेति** । क्षुत्तृष्णावत्प्राणिजातस्य तत्तदुचितान्नपानादिदापनशक्तिभिर्वा संयोज्य तत्तत्फलभोगभोगिनं करोति । किमर्थमनयैवं क्रियत इत्यत्र, एवं भगवद्भक्ततोषणं **भगवत्प्रीत्यर्थं** इत्युक्त्वा पूर्वोक्तं सर्वं अनया भोगशक्त्या क्रियते, न हि कार्यान्तरमुद्दिश्येत्यर्थः ॥ ३६ ॥

[1] नियमप्रा—अ १, उ, उ १,
[2] हारध्यान—उ, उ १.
[3] लमनण्वपि गो—अ १, अ २, क, मु.
[4] दिभिर्वा भ—अ १. दिभिर्वा सह भ—अ.
[5] दिभिर्वान्न—अ १.

वीरशक्तिरूपेच्छाशक्तिः

अथातो वीरशक्तिश्चतुर्भुजाऽभयवरदपद्मधरा किरीटाभरणयुता सर्वदेवैः परिवृता कल्पतरुमूले चतुर्भिर्गजै रत्नघटैरमृतजलैरभिषिच्यमाना सर्वदेवतैर्ब्रह्मादिभिर्वन्द्यमाना अणिमाद्यष्टैश्वर्ययुता [1]संमुखे कामधेनुना स्तूयमाना वेदशास्त्रादिभिः स्तूयमाना जयाद्यप्सरस्स्त्रीभिः परिचर्यमाणा आदित्यसोमाभ्यां दीपाभिः [2]प्रकाशिष्यमाणा तुम्बुरुनारदादिभिर्गीयमाना राकासिनीवालीभ्यां छत्रेण ह्लादिनीमयाभ्यां चामरेण स्वाहास्वधाभ्यां व्यजनेन भृगुपुण्यादिभिरभ्यर्च्यमाना देवी दिव्यसिंहासने पद्मासनारूढा सकलकारणकार्यकरी लक्ष्मीर्देवस्य पृथग्भवनकल्पनालंचकार स्थिरा प्रसन्नलोचना सर्वदेवतैः पूज्यमाना वीरलक्ष्मीरिति विज्ञायत इत्युपनिषत् ॥ ३७ ॥

वीरलक्ष्मीस्वरूपमाह—अथेति । अनर्घकिरीटाभरणयुता जयजयेति प्सरस्स्त्रीभिः अप्सरोभिः परिचर्यमाणा । दीपाभिः स्वतेजसा दीपभावपन्नाभ्यां दीपाभ्याम् । राकासिनीवालिभ्यां पूर्णिमाऽमावास्याभ्याम् । छत्रेण ह्लादिनीमयाभ्यां चामरे छत्रचामरहस्ताभ्यामित्यर्थः । व्यजनेन व्यजनस्ताभ्यां वीज्यमानेत्यर्थः । भृगुपुण्यादिभिः अभ्यर्च्यमाना भृगोस्तपःफलपत्वात् । पृथग्भवनकल्पनाभिः अलंचकारेव स्थिता । यदकार्यमकारणं वन्मात्रं तस्य मिथ्यास्वाविद्याद्वयसंबन्धतः कार्यकारणोपाधिकजीवत्वमीश्वरत्वं करोतीति कार्यकारणत्वकरीत्यत्र "जीवेशावाभासेन करोति" इति श्रुतेः । ाज्ञदृष्ट्या लक्ष्मीः । यैवं सर्वदेवतैः पूज्यमाना सेयम् । सा सीतेत्यारभ्य

[1] सन्मुखे—अ १, अ २, क.

[2] प्रकाश्यमाना—मु.

वीरलक्ष्मीरिति विज्ञायते इत्यन्तग्रन्थप्रतिपाद्या चिच्छक्तिः सीता चित्सामान्यरूपत्वात्। सीतातत्त्वं तु शक्तित्रयापह्नवसिद्धं चिन्मात्रमित्यर्थः। इत्युपनिषच्छब्दः सीतोपनिषत्समाप्त्यर्थः ॥ ३७ ॥

श्रीवासुदेवेन्द्रशिष्योपनिषद्ब्रह्मयोगिना।
लिखितं स्याद्विवरणं सीतोपनिषदः स्फुटम्।
सीतोपनिषदो व्याख्याग्रन्थस्तु द्विशतं स्मृतः ॥

इति श्रीमदीशाद्यष्टोत्तरशतोपनिषच्छास्त्रविवरणे पञ्चचत्वारिंशत्सङ्ख्यापूरकं सीतोपनिषद्विवरणं संपूर्णम्

सौभाग्यलक्ष्म्युपनिषत्

वाङ् मे मनसि—इति शान्तिः

प्रथमः खण्डः

सौभाग्यलक्ष्मीविद्याजिज्ञासा

अथ भगवन्तं देवा ऊचुर्हे भगवन्नः कथय सौभाग्यलक्ष्मी-विद्याम् ॥ १ ॥

सौभाग्यकैवल्यलक्ष्मीविद्यावेद्यसुखाकृति ।
त्रिपान्नारायणानन्दरामचन्द्रपदं भजे ॥

इह खलु ऋग्वेदप्रविभक्तेयं सौभाग्यलक्ष्म्युपनिषत् श्रीसूक्तवैभवैकाक्षरादि-श्रीदेवीमन्त्रग्रामयन्त्रनवचक्रविवेकादियोगसाम्राज्यप्रकटनव्यग्रा निष्प्रतियोगिक-ब्रह्ममात्रपर्यवसन्ना विजयते । अस्याः संक्षेपतो विवरणमारभ्यते । देवतापटल-नारायणप्रश्नप्रतिवचनरूपेयमाख्यायिका विद्यास्तुत्यर्था । आख्यायिकामवतारयति —अथेति । किमिति—हे भगवन्निति ॥ १ ॥

सौभाग्यलक्ष्मीध्यानम्

तथेत्यवोचद्भगवानादिनारायणः सर्वे देवा यूयं सावधान[1]मना भूत्वा शृणुत । तुरीयरूपां तुरीयातीतां सर्वोत्कटां सर्वमन्त्रासनगतां

[1] मनसो—मु.

पीठोपपीठदेवतापरिवृतां चतुर्भुजां श्रियं हिरण्यवर्णामिति पञ्चद-
शर्गिभर्ध्यायथ ॥ २ ॥

देवबृन्दप्रश्नमङ्गीकृत्य तथेत्यवोचत्। देवानभिमुखीकरणायेदमाह—सर्वे देवा इति। किं तदस्माभिः कर्तव्यमित्यत्र—**तुरीयरूपामिति**। या प्रणवत्वेन प्रकृता सौभाग्यमहालक्ष्मीस्तामर्धमात्रात्मना तुरीयरूपां नादात्मना तुरीयातीतां एवंरूपेण सर्वैरपि ज्ञातुमशक्यत्वात् सर्वोत्कटां सर्वदुरासदां नादरूपप्रकृतेरसमाहितचित्तैरासादितुमशक्यत्वात्, स्वाज्ञजनानुकम्पयैकाक्षरादिसर्वमन्त्रासनगतां, **पीठोपपीठदेवतापरिवृतां** पीठं सौभाग्यलक्ष्मीविद्याप्रकटितश्रीचक्रं तत्रत्यैकैककोणविलसितान्युपपीठानि चक्राणि तत्तत्पीठेश्वरीभिर्देवताभिः परिवृतां, **चतुर्भुजां श्रियं** "**हिरण्यवर्णां हरिणीं**" इत्यादि **पञ्चदशर्गिभः** ध्यायथ ध्यानं कुरुत। एवं ध्यायतां देवताप्रसादेन निर्विकल्पात्मकतुरीयतुरीयातीतदेवताध्यानाधिकारो भवेदित्यर्थः ॥ २ ॥

श्रीसूक्तस्य ऋष्यादि

अथ पञ्चदशऋगात्मकस्य श्रीसूक्तस्यानन्दकर्दमचिक्लीतेन्दिरासुता ऋषयः। श्रीरित्याद्या[या] ऋचः। [1]चतुर्दशानामृचामानन्दाद्यृषयः। हिरण्यवर्णामित्याद्यृक्त्रयस्यानुष्टुप् छन्दः। कांसोऽस्मीत्यस्य बृहती छन्दः। तदन्ययोर्द्वयोस्त्रिष्टुप्। पुनरष्टकस्यानुष्टुप्। शेषस्य प्रस्तारपङ्क्तिः। [2]श्र्यग्निर्देवता। हिरण्यवर्णामिति बीजम्। कांसोऽस्मीति शक्तिः। हिरण्मया चन्द्रा रजतस्रजा हिरण्यस्रजा हिरण्या हिरण्यवर्णेति प्रणवादिनमोऽन्तैश्चतुर्थ्यन्तैरङ्गन्यासः। अथ

[1] एतदादि "प्रस्तारपङ्क्तिः" इत्यन्तो ग्रन्थः उ, उ १, कोशयोः नास्ति.
[2] श्रीरग्नि—अ २, क.

वक्त्रत्रयैरङ्गन्यासः । मस्तकलोचनश्रुतिघ्राणवदन[1]कण्ठबाहुद्वय-[2]
हृन्नाभिगुह्यपायूरुजानुजङ्घेषु श्रीसूक्तैरेव क्रमशो न्यसेत् ॥ ३ ॥

[3]अमलकमलसंस्था तद्रजः[4]पुञ्जवर्णा
करकमलधृ[5]तेष्वाभीतियुग्माम्बुजा च ।
मणिमकुटविचित्रालंकृताकल्पजालैः
सकलभुवनमाता संततं श्रीः श्रियै [6]नः ॥ ४ ॥

हिरण्यवर्णामित्यादिपञ्चदशर्चामृषिच्छन्दोदेवताऽऽदिकमुच्यते—अथेति। श्रीशब्देनाग्निरुच्यते, वक्ष्यति चैवं "श्र्यग्निर्देवता" इति ॥ ३–४ ॥

सौभाग्यलक्ष्मीचक्रम्

तत्पीठम् । कर्णिकायां ससाध्यं श्रीबीजम्। वस्वादित्यकला-पद्मेषु श्रीसूक्तगतार्धार्धर्चा तद्बहिर्यः शुचिरिति मातृकया च श्रियं यन्त्राङ्गदशकं च विलिख्य श्रियमावाहयेत् ॥ ५ ॥ अङ्गैः प्रथमाऽऽवृतिः । पद्मादिभिर्द्वितीया । लोकेशैस्तृतीया । तदायुधै-स्तुरीयाऽऽवृतिर्भवति । श्रीसूक्तैरावाहनादि । षोडशसहस्रजपः ॥६॥

तस्याः सौभाग्यलक्ष्मीदेवतायाः पीठं चक्रमुच्यते । सौवर्णे राजते ताम्रे वा—

उत्तमं दशनिष्कं स्यान्मध्यमं पञ्चनिष्ककम् ।
अधमं कर्षमात्रं स्यात् पादहीनं न कारयेत् ॥

[1] कर्ण—अ १, अ २, क.
[2] नाभि—क. हृदयनाभि—अ १, अ २,
[3] अरुण—मु.
[4] पूर्ण—अ, अ १, उ १.
[5] तेष्टाभी—मु.
[6] नमः—उ १.

इति मन्त्रशास्त्रानुरोधेन चतुरश्रं यन्त्रं कृत्वा तन्मध्यकर्णिकायां मम सर्वाभीष्टसिद्धिं कुरुकुरु नम इति साध्येन सहितं ससाध्यं श्रीबीजं विलिख्य वस्वादित्यकलापद्मेषु अष्टद्वादशषोडशदलेषु श्रीसूक्तगतार्धार्धचक्रमेण विलिख्य शिष्टषट्पत्रेषु कामधेनुं शङ्खनिधिमकरनिधिसौभाग्यनिधिमोक्षनिधिबोधकल्पकतरूणां मन्त्रान् प्रणवादिनमोऽन्तान् विलिख्य षोडशदलवृत्तात् बहिः यः शुचिरित्यृचा अकारादिळकारान्तपञ्चाशद्वर्णमातृकया च विलिख्य श्रियं श्रीबीजं परितो विलिख्य—

बीजं प्राणं च शक्तिं च दृष्टिं वश्यादिकं तथा ।
मन्त्रयन्त्राख्यगायत्रीप्राणस्थापनमेव च ।
भूतदिक्पालबीजानि यन्त्रस्याङ्गानि वै दश ॥

इति यन्त्राङ्गदशकं च विलिख्य श्रियमावाहयेत् ॥ ५ ॥ अथावरणान्युच्यन्ते—अङ्गैरिति । श्रां हृदयाय नमः इत्यादिषडङ्गैः प्रथमाऽऽवृतिः । पद्मा, पद्मवासिनी, पद्मालया, पद्महस्ता, पद्मप्रिया, वरदा, विष्णुपत्नी, आदिलक्ष्मीरिति प्रणवादिनमोऽन्तैश्चतुर्थ्यन्तैर्यजेत् । इन्द्राय नम इत्यादिलोकेशमन्त्रैः । वज्राय नम इति तदायुधैश्च पूजयेदित्यर्थः । अथ श्रीसूक्तैः आवाहनादिषोडशोपचारपूजां कुर्यात् । श्रीसूक्तपुरश्चरणा तु षोडशसहस्रजपः ॥ ६ ॥

एकाक्षरीमन्त्रस्य ऋष्यादि

सौभाग्यरमैकाक्षर्या भृगुनृचद्वायत्रीश्रिय ऋष्यादयः ।
शमिति बीजशक्तिः । श्रामित्यादि षडङ्गम् ॥ ७ ॥

भूयाद्भूयो द्विपद्माभयवरदकरा तप्तकार्तस्वराभा
शुभ्राभ्राभेभयुग्मद्वयकरधृतकुम्भाद्विरासिच्यमाना ।
[2]रत्नौघाबद्धमौलिर्विमलतरदुकूलार्तवालेपनाढ्या
पद्माक्षी पद्मनाभोरसि कृतवसतिः पद्मगा श्रीः श्रियैः [3]नः ॥८॥

[1] शर्मी बी—अ, थ १. [2] रक्तौघ—मु.
[3] नमः—उ, १.

साङ्गमेकाक्षरीमनुं तत्पीठं चाह—सौभाग्येति ॥ ७ ॥ ध्यानं भूयादिति ॥ ८ ॥

एकाक्षरीचक्रम्

तत्पीठम् । अष्टपत्रं वृत्तत्रयं द्वादशराशिखण्डं चतुरश्रं रमापीठं भवति । कार्णिकायां ससाध्यं श्रीबीजम् । विभूतिरुन्नतिः कान्तिः सृष्टिः कीर्तिः सन्नति[1]र्व्यष्टिरुत्कृष्टिर्ऋद्धिरिति प्रणवादिनमोऽन्तैश्चतुर्थ्यन्तैर्नवशक्तिं यजेत् ॥ ९ ॥ अङ्गैः प्रथमाऽऽवृतिः । वासुदेवा[2]दिर्द्वितीया । बालक्या[3]दिस्तृतीया । इन्द्रादिभिश्चतुर्थी भवति । द्वादशलक्षजपः ॥ १० ॥

तत्रैव विभूतिरित्यादि ॥ ९ ॥ पूर्ववत् अङ्गैः । वासुदेवादिचतुर्व्यूहैः द्वितीयाऽऽवृतिः । बालक्यादिः—आदिशब्देन भुक्तिर्मुक्तिर्विभूतिर्ऋद्धिः समृद्धिस्तुष्टिः पुष्टिर्धात्रीति प्रणवादिनमोन्तैश्चतुर्थ्यन्तैर्यजेत् ॥ १० ॥

लक्ष्मीमन्त्रविशेषाः

श्रीलक्ष्मीर्वरदा विष्णुपत्नी वसुप्रदा हिरण्यरूपा स्वर्णमालिनी रजतस्रजा स्वर्णप्रभा स्वर्णप्राकारा पद्मवासिनी पद्महस्ता पद्मप्रिया मुक्तालंकारा चन्द्रा सूर्या बिल्वप्रिया ईश्वरी भुक्तिर्मुक्तिर्विभूतिर्ऋद्धिः समृद्धिः कृष्टिः पुष्टि[4]र्धनदा धनेश्वरी श्रद्धा भोगिनी भोगदा धात्री विधात्रीत्यादिप्रणवादिनमोऽन्ताश्चतुर्थ्यन्ता मन्त्राः । एकाक्षरवदङ्गादि-

[1] व्युष्टि—अ १, अ २. पुष्टि—क. व्युष्टिः सत्कृष्ट—मु.
[2] दिभिर्द्वि—उ, मु. [3] दिभिस्तृ—उ, मु.
[4] वर्धना—उ, उ १.

पीठम्। लक्षजपः। दशांशं तर्पणम्। शतांशं हवनम्। सहस्रांशं द्विजतृप्तिः ॥ ११ ॥ निष्कामानामेव श्रीविद्यासिद्धिः। न कदाऽपि सकामानामिति ॥ १२ ॥

पुनर्लक्ष्मीमन्त्रविशेषानाह—श्रीरित्यादि ॥ ११–१२ ॥

इति प्रथमः खण्डः

द्वितीयः खण्डः

उत्तमाधिकारिणां ज्ञानयोगः

अथ हैनं देवा ऊचुस्तुरीयया मायया निर्दिष्टं तत्त्वं ब्रूहीति। तथेति स होवाच—

योगेन योगो ज्ञातव्यो योगो योगात् प्रवर्धते।
योऽप्रमत्तस्तु योगेन स योगी रमते चिरम् ॥ १ ॥

देवा नारायणमुखतो मन्त्रोपासनाकाण्डं यथावदवगम्य योगकाण्डबुभुत्सया भगवन्तं पृच्छन्तीत्याह—अथेति। तुरीयया अन्त्यया। तैरेवं पृष्टः तथेति स होवाच। किं तदित्यत्र—योगेनेति। ब्रह्मातिरिक्तं न किंचिदस्तीति ज्ञानमेव योगः, तेन ज्ञानयोगेन तत्त्वंपदगतवाच्यार्थनिरसनपूर्वकं तत्त्वंपदलक्ष्यभूतप्रत्यक्परचितोः योगो ज्ञातव्यः प्रत्यक्परचितोरैक्यस्य स्वाज्ञविकल्पितजीवपरभेदप्रहाणपूर्वकत्वात्। पुनः प्रत्यक्परयोः योगः ऐक्यं

ज्ञानयोगात् प्रवर्धते भेदप्रत्ययवैरल्येन दृढतां भजते । इत्थंभूतज्ञानयोगेन योऽप्रमत्तस्तु सदाऽनुसन्धानपर एव भवति सोऽयं योगी प्रत्यक्परचितोः योगः ऐक्यं तत्रैव चिरं रमते ॥ १ ॥

षण्मुखीमुद्राऽन्वितप्राणायामयोगः

समापय्य निद्रां सुजीर्णेऽल्पभोजी
श्रमत्याज्यबाधे विविक्ते प्रदेशे ।
सदाऽऽसीत निस्तृष्ण एष प्रयत्नो-
ऽथ वा प्राणरोधो निजाभ्यासमार्गात् ॥ २ ॥
वक्त्रेणापूर्य वायुं हुतवहनिलयेऽपानमाकृष्य धृत्वा
स्वाङ्गुष्ठाद्यङ्गुलीभिर्वरकरतलयोः षड्भिरेवं निरुध्य ।
श्रोत्रे नेत्रे च नासापुटयुगलमथोऽनेन मार्गेण सम्यक्
पश्यन्ति [1]प्रत्ययांसं प्रणवबहुविधध्यानसंलीनचित्ताः ॥ ३ ॥

इत्युत्तमाधिकारिणामेवं ज्ञानयोगमुक्त्वाऽथ षण्मुखीमुद्राऽन्वितप्राणायामयोगमाह—समापय्येति ।

युक्ताहारविहारस्य युक्तचेष्टस्य कर्मसु ।
युक्तस्वप्नावबोधस्य योगो भवति दुःखहा ॥

इति स्मृत्यनुरोधेन निद्रां समापय्य यथोक्तकाले निद्रां कृत्वाऽथ पूर्वमुक्तान्ने जीर्णे ततोऽल्पभोजी अल्पाहारी योगानुकूलेन मिताहारं कुर्वन् श्रमत्याजी जितश्रमो भूत्वा अबाधे मशकपिपीलिकामत्कुणादिबाधारहिते विविक्ते जनसंबाधरहिते प्रदेशे मृद्वास्तरणे समारोपितपद्माद्यासने सदाऽऽसीत सर्वदा तिष्ठेत्

[1] प्रत्ययांशं—मु.

नानाविधफल्गुसिद्धिजाले निस्तृष्णो विगततृष्णो भूत्वा देशिकमुखतो लब्धनिजाभ्यासमार्गात् अप्रच्युतो भूत्वा एष योगी ग्रन्थित्रयभेदने कृतप्रयत्नो भूयात् । अथवा तादृशशक्त्यभावे तदुपायतयाऽनेन प्राणरोधः प्राणायामः कर्तव्यः ॥ २ ॥ षण्मुखीमुद्रां तत्फलं चाह—वक्त्रेणेति । केचन योगिनः सीत्कारपूर्वकं वक्त्रेण वायुमापूर्य ऊर्ध्वगतिं प्राणमधोगतिं विधाय तथा हुतवहनिलये मूलाधारत्रिकोणस्थाग्निमण्डले अपानमाकृष्य आकुञ्च्य धृत्वा मूलाधारे धारणां कृत्वा स्वाङ्गुष्ठाद्यङ्गुलीभिः षड्भिः श्रोत्रादिकरणानि पिधाय योगिनः प्रणवप्रविभक्तविश्वविराडोत्रादिद्वितुर्यांविकल्पान्तबहुविधध्यानसंलीनचित्ताः सन्तः सहस्रारचक्रे प्रत्ययांसं प्रत्यक्चैतन्यं पराभेदेन सम्यक्पश्यन्ति अपरोक्षीकुर्वन्तीत्यर्थः ॥ ३ ॥

नादाविर्भावपूर्वको ग्रन्थित्रयभेदः

श्रवणमुखनयननासानिरोधनेनैव कर्तव्यम् ।
शुद्धसुषुम्नासरणौ स्फुटममलं श्रूयते नादः ॥ ४ ॥
विचित्रघोषसंयुक्ताऽनाहते श्रूयते ध्वनिः ।
दिव्यदेहश्च तेजस्वी दिव्यगन्धोऽप्यरोगवान् ॥ ५ ॥
संपूर्णहृदयः शून्ये त्वारम्भे योगवान् भवेत् ।
द्वितीयां विघटीकृत्य वायुर्भवति मध्यगः ॥ ६ ॥
दृढासनो भवेद्योगी पद्माद्यासनसंस्थितः ।
विष्णुग्रन्थेस्ततो भेदात् परमानन्दसंभवः ॥ ७ ॥
अतिशून्यो विमर्दश्च भेरीशब्दस्ततो भवेत् ।
तृतीयां यत्नतो भित्त्वा निनादो महदध्वनिः ॥ ८ ॥

एवं षण्मुखीमुद्राऽभ्यासतो ब्रह्मग्रन्थ्यादिग्रन्थित्रयमपि भिद्यते, प्रतिग्रन्थिभेदनं विचित्रनानाविधनादाविर्भावो भवति, तन्नादलयतो निर्विकल्पकसमाधिर्जायत

इत्याह—श्रवणेति। श्रवणादिकरणनिरोधलक्षणषण्मुखीमुद्राऽभ्यसनं योगिना कर्तव्यम्। एवं चिरकालाभ्यासतः प्राणवायुः सुषुम्नां प्रविशति, तत्प्रवेशमात्रेण सुषुम्नामार्गे नादाविर्भावो भवतीत्यर्थः ॥ ४ ॥ एवं नादश्रवणतोऽयं भवति योगीत्याह—विचित्रेति। यदा सुषुम्नायां प्राणः प्रविशति तदा योगिनः अनाहते हृदयकमले विचित्रघोषवति ध्वनिः श्रूयते। तावन्मात्रेण नीरोगो भूत्वा तेजोवद्दिव्यगन्धो भवति ॥ ५ ॥ संपूर्णविकसितहृदयश्च भवति। शून्ये तत्रत्याकाशे तु नादारम्भमात्रेणायं दिव्ययोगवान् भवेदित्यर्थः। ब्रह्मग्रन्थिभेदतो दिव्यदेहादिसिद्धिरुक्ता, अथ विष्णुग्रन्थिभेदतो भेरीध्वनिरुदेतीत्याह—द्वितीयामिति। प्रथमभूमिकां जित्वाऽथ द्वितीयां भूमिकामपि विष्णुग्रन्थिभेदनरूपां विशेषेण घटीकृत्य विष्णुग्रन्थिं भित्त्वा तद्भेदतो वायुर्मध्यगतो भवति ॥ ६ ॥ ततः पद्माद्यासनस्थस्य योगिनः परमानन्द उदेति ॥ ७ ॥ अतिशून्योऽनाहतमप्यतिक्रम्य ततोऽतिविमर्दो भेरीशब्दो भवेदित्यर्थः। रुद्रग्रन्थिभेदतो वैष्णवनाद उदेति ततस्तच्चितं ब्रह्माकारं भवतीत्याह—तृतीयामिति। रुद्रग्रन्थिरूपां तृतीयभूमिकां दुर्भेद्यामपि यत्नतो भित्त्वा वर्तमानस्य योगिनो महल्ध्वनिः श्रूयते ॥ ८ ॥

अखण्डब्रह्माकारवृत्तिः

महाशून्यं ततो याति सर्वसिद्धिसमाश्रयम्।
चित्तानन्दं ततो भित्त्वा सर्वपीठगतानिलः ॥ ९ ॥
निष्पत्तौ वैष्णवः शब्दः क्वणतीति क्वणो भवेत्।
एकीभूतं तदा चित्तं सनकादिमुनीडितम् ॥ १० ॥
अन्तेऽनन्तं समारोप्य खण्डेऽखण्डं समर्पयन्।
भूमानं प्रकृतिं ध्यात्वा कृतकृत्योऽमृतो भवेत् ॥ ११ ॥

ततः तत्प्राणो सर्वसिद्ध्यास्पदं महाशून्यं सहस्राराकाशं याति। तदा चित्तमानन्दाभिमुखं भवति। तत्रानास्वादतश्चित्तानन्दमपि भित्त्वा वर्तमानस्य

प्राणानिलः कामरूपपीठादिसर्वपीठगतो भवति ॥ ९ ॥ एवं योगनिष्पत्तौ कणतीति कणो वैष्णवः शब्दो भवेत् । यत्प्रत्यग्ब्रह्मैक्यं "पश्यतेहापि सन्मात्रमसदन्यत्," "ब्रह्ममात्रमसदन्यत्" इत्यादिश्रुतिशतेन सनकादिमुनीडितं तत्रैव चित्तमेकीभूतं ब्रह्माकाराखण्डवृत्तिमद्भवतीत्यर्थः ॥ १० ॥ स्वाङ्गदृष्टिविकल्पितस्वातिरिक्तपरिच्छिन्नखण्डप्रपञ्चे सति कथमखण्डब्रह्ममात्रज्ञानं तत्फलसिद्धिर्वेत्याशङ्क्याह—अन्त इति । स्वाङ्गदृष्ट्या यदि व्यष्ट्यात्मकोऽन्तःपरिच्छिन्नपिण्डाण्डः कल्पितो भवति तदा स्वङ्गदृष्टिमवलम्ब्य तदन्ते देहादौ अनन्तं पराक्सापेक्षप्रत्यञ्चं समारोप्य अथ समष्टिप्रपञ्चखण्डे तदपवादाधारतया अखण्डं ब्रह्म समर्पयन् प्रत्यक्परयोरैक्यं कुर्वन् ततः प्रत्यक्परविभागैक्यासहब्रह्ममात्रप्रकृतिं भूमानं स्वमात्रमिति ध्यात्वा कृतकृत्यो विद्वान् अमृतो विदेहमुक्तो भवेत् भवतीत्यर्थः ॥ ११ ॥

निर्विकल्पभावः

योगेन योगं संरोध्य भावं भावेन चाञ्जसा ।
निर्विकल्पं परं तत्त्वं सदा भूत्वा परं भवेत् ॥ १२ ॥
अहंभावं परित्यज्य जगद्भावमनीदृशम् ।
निर्विकल्पे स्थितो विद्वान् भूयो नाप्यनुशोचति ॥ १३ ॥

सविकल्पप्रपञ्चे सति ब्रह्ममात्रावगतिः कुत इत्यत आह—योगेनेति । निष्प्रतियोगिकब्रह्ममात्रज्ञानयोगेन स्वातिरिक्तयोगं संरोध्य अपह्नवं कृत्वा अञ्जसा भावं विकल्पप्रपञ्चं निष्प्रतियोगिकब्रह्ममात्रभावेन ज्ञात्वा तत्समकालं विद्वान् निर्विकल्पपरब्रह्मतत्त्वं स्वयं भूत्वा सदा परमेव भवेत् भवति, "ब्रह्म वेद ब्रह्मैव भवति" इति श्रुतेः ॥ १२ ॥ अहमिदमिति विकल्पे सति निर्विकल्पता कुत इत्यत आह—अहमिति । देहादौ तद्बाह्ये च अहंभावं जगद्भावं च "ब्रह्मातिरिक्तं न किंचिदस्ति" इति परित्यज्य अनीदृशं निर्विशेषं ब्रह्मास्मीति विद्वान् निर्विकल्पे स्थितः सन् भूयोऽपि न शोचति विषयाभावादित्यर्थः ॥१३॥

समाधिलक्षणम्

सलिले सैन्धवं यद्वत् साम्यं भवति योगतः ।
तथाऽऽत्ममनसोरैक्यं समाधिरभिधीयते ॥ १४ ॥
यदा संक्षीयते प्राणो मानसं च प्रलीयते ।
तदा समरसत्वं यत् समाधिरभिधीयते ॥ १५ ॥
यत् समत्वं तयोरत्र जीवात्मपरमात्मनोः ।
समस्तनष्टसंकल्पः समाधिरभिधीयते ॥ १६ ॥
प्रभाशून्यं मनःशून्यं बुद्धिशून्यं निरामयम् ।
सर्वशून्यं निराभासं समाधिरभिधीयते ॥ १७ ॥
स्वयमुच्चलिते देहे देही नित्यसमाधिना ।
निश्चलं तं विजानीयात् समाधिरभिधीयते ॥ १८ ॥
यत्रयत्र मनो याति तत्रतत्र परं पदम् ।
तत्रतत्र परं ब्रह्म सर्वत्र समवस्थितम् ॥ १९ ॥

अशोच्यनिर्विकल्पे स्थितिः केत्यत आह—सलिल इति । सलिलप्रक्षिप्त-पेषितसैन्धवपिण्डविलयवत् प्रत्यगभिन्नपरमात्मनि मनःप्राणविलय एव समाधि-रित्यर्थः ॥ १४ ॥ इतश्च समाधिलक्षणमाह—यदेति । यदा मनःप्राणादिकं विलीयते, यदा च प्रत्यगभिन्नब्रह्मणो यत् समरसत्वं अखण्डैकरसत्वमुदेति तदैव समाधिर्भवतीत्यर्थः ॥ १५ ॥ इतश्च संकल्पाद्यनुदय एव समाधिरित्याह—यदिति ॥ १६ ॥ जाग्रदाद्यवस्थात्रयकलना यत्र न विद्यते स समाधिरित्याह—प्रभेति । प्रभाशब्देन अहंकृतिपूर्णविकासरूपं जाग्रदुच्यते । मनःशब्देन अहं-कृत्यर्धविकासात्मकः स्वप्न उच्यते । स्वातिरिक्तं नास्तीति बुध्यत इति बुद्धिशब्देन अहंकृतिमुकुलीभावरूपेयं सुषुप्तिरुच्यते । एवं जाग्रदाद्यवस्थात्रयं

यत्र शून्यं अपह्नवं वा भजति यस्तदपह्नवसिद्धः सोऽयमसंप्रज्ञातसमाधिरुच्यते ॥ १७ ॥ इतश्च निश्चलतास्थितिरेव समाधिरित्याह—स्वयमिति । "ब्रह्मातिरिक्तं न किंचिदस्ति" इति नित्यसमाधिना देहं तदुपलक्षितावियापदतत्कार्यजाते स्वात्मात्मीयाभिमतिवैरल्येन स्वयमेवोच्चलिते नामरूपकलनां त्यक्त्वा ब्रह्मभावं गते सति, अथ देही योगी यो निर्विशेषतयाऽवशिष्टस्तमात्मानं यदा स्वावशेषतया विजानीयात् तद्वेदनावस्थैवाऽखण्डनिर्विकल्पकसमाधिरित्यर्थः ॥ १८ ॥ मनःप्रचारविलयाधिकरणं ब्रह्मेत्याह—यत्रेति । स्वातिरिक्तं मनोऽस्तीति ये मन्यन्ते तद्दृष्टिमाश्रित्य स्वातिरिक्तकल्पकं मनो यत्र प्रचरति यत्र वा विलीयते तत्कल्पनालयाधिष्ठानं ब्रह्म सर्वगतं सर्वव्यापकं, वस्तुतो मनस्तत्कार्यव्याप्याभावाद्व्यापकत्वमपि न युज्यत इत्यर्थः, "व्याप्यव्यापकता मिथ्या सर्वमात्मेति शासनात्" इति श्रुतेः ॥ १९ ॥

इति द्वितीयः खण्डः

तृतीयः खण्डः

आधारचक्रम्

अथ हैनं देवा ऊचुर्नवचक्रविवेकमनुब्रूहीति ।

तथेति स होवाच—

आधारे [1]ब्रह्मचक्रं त्रिरावृत्त[2]भङ्गिमण्डलाकारं तत्र मूलकन्दे शक्तिः पावकाकारं ध्यायेत् तत्रैव कामरूपपीठं सर्व[3]कामप्रदं भवति इत्याधारचक्रम् ॥ १ ॥

[1] प्रथमं—उ, उ १. [2] भग—उ, क. [3] कामफलप्रदं—अ १, अ २.

पुनर्देवा नवचक्रबुभुत्सया पृच्छन्तीत्याह—अथेति। नवचक्रविवेकमनुब्रूहि इति तैरेवं पृष्टः तथेति स होवाच भगवान् नारायणः। अत्राद्यं चक्रमाह—आधार इति। मूलाधारे त्रिरावृत्तभङ्ग्या वह्निमण्डलाकारं ब्रह्मचक्रं विराजते। तत्र मूलकन्दे काचन शक्तिरस्ति, तद्रूपं पावकाकारं ध्यायेत्। तत्रैव मूलाधारे सर्वकामप्रदतया कामरूपपीठं विराजते इति यत् तत् आधारचक्रं भवति ॥ १ ॥

स्वाधिष्ठानचक्रम्

द्वितीयं स्वाधिष्ठानचक्रं षड्दलं तन्मध्ये पश्चिमाभि[1]मुख्यं लिङ्गं प्रवालाङ्कुरसदृशं ध्यायेत् तत्रैवोड्याणपीठं जगदाकर्षणसिद्धिदं भवति ॥ २ ॥

द्वितीयचक्रमाह—द्वितीयमिति। षड्दलाख्यं स्वाधिष्ठानचक्रम्। तत्र मांसाकारं पश्चिमाभिमुख्येन ज्योतिर्लिङ्गमस्ति, तत्प्रवालसदृशं ध्यायेत्। तत्रैव जगदाकर्षणशक्तिमत् उड्याणपीठं विराजत इति ॥ २ ॥

नाभिचक्रम्

तृतीयं नाभिचक्रं [2]पञ्चावर्तं सर्पकुटिलाकारं तन्मध्ये कुण्डलिनीं बालार्ककोटिप्रभां तटित्संनिभां ध्यायेत् सामर्थ्यशक्तिः सर्वसिद्धिप्रदा भवति मणिपूरकचक्रम् ॥ ३ ॥

तृतीयचक्रमाह—तृतीयमिति। मणिपूरकचक्रमाश्रित्य कुण्डलिनी वर्तते तटित्प्रभा, तां ध्यायतः सर्वसिद्धिर्भवति ॥ ३ ॥

[1] मुखलि—उ १.

[2] पञ्चावृत्तं—उ १.

हृदयचक्रम्

हृदयचक्रमष्टदलमधोमुखं तन्मध्ये ज्योतिर्मयलिङ्गाकारं ध्यायेत् सैव हंसकला सर्वप्रिया सर्वलोकवश्य[1]करी भवति ॥ ४ ॥

तुरीयचक्रमाह—हृदयेति । अष्टपत्राढ्यं अधोमुखं अनाहतचक्रं भवति । तत्रत्याकाशमध्ये कामादिवृत्तिसहस्रभावाभावप्रकाशकं ज्योतिर्लिङ्गाकारं प्रत्यगात्मानं ध्यायेत् । येह सर्वप्राणिनां हृदयाष्टदले संचरति सैव हंसकला सर्वात्मकतया सर्वजनप्रियकरी । तत्स्वरूपध्यानं सर्वलोकवश्यकरं भवति ॥ ४ ॥

कण्ठचक्रम्

कण्ठचक्रं चतुरङ्गुलं तत्र वामे इडा चन्द्रनाडी दक्षिणे पिङ्गला सूर्यनाडी तन्मध्ये सुषुम्नां श्वेतवर्णां ध्यायेत् य एवं वेदानाहतसिद्धिदा भवति ॥ ५ ॥

पञ्चमचक्रमाह—कण्ठेति ॥ ५ ॥

तालुचक्रम्

तालुचक्रं तत्रामृतधाराप्रवाहो घण्टिकालिङ्गं मूलचक्ररन्ध्रे राजदन्तावलम्बिनीविवरं [2]दशमद्वारं तत्र शून्यं ध्यायेत् चित्तलयो भवति ॥ ६ ॥

चित्तलयफलदं षष्ठं चक्रमाह—तालिवति । तालुमूलचक्रे लक्ष्यं ध्यायतः सूर्याचन्द्रमसोरैक्यं भवति । तत अमृतधाराप्रवाहो भवति । तत्रोर्ध्वमूलचक्ररन्ध्रे यदन्तर्जिह्वेति प्रसिद्धं घण्टिकालिङ्गं वर्तते राजदन्तावलम्बिनीविवरं दशमद्वारं तत्र वृत्तिशून्यं ध्यायतः चित्तलयो भवति ॥ ६ ॥

[1] करं—अ १, अ २. करा—क. [2] दशमद्वादशारं—अ २, क.

भ्रूचक्रम्

सप्तमं भ्रूचक्रमङ्गुष्ठमात्रं तत्र ज्ञाननेत्रं दीपशिखाऽऽकारं ध्यायेत् तदेव कपालकन्दं वाक्सिद्धिदं भवत्याज्ञाचक्रम् ॥ ७ ॥

सप्तमचक्रलक्षणमाह—सप्तममिति । आज्ञाचक्रे ज्ञाननेत्रं ध्यायतः परापरब्रह्मज्ञानं वाक्सिद्धिश्च भवतीत्यर्थः । आज्ञाचक्रं तदेव भवति ॥ ७ ॥

ब्रह्मरन्ध्रचक्रम्

ब्रह्मरन्ध्रं निर्वाणचक्रं तत्र सूचिकागृहेतरं धूम्रशिखाऽऽकारं ध्यायेत् तत्र जालन्धरपीठं मोक्षप्रदं भवतीति [2]परब्रह्मचक्रम् ॥ ८ ॥

अष्टमचक्रलक्षणमाह—ब्रह्मेति । सूचिकागृहेतरं ततोऽपि सूक्ष्माकारं बिलं धूमशिखाऽऽकारं ध्यायेत् ॥ ८ ॥

आकाशचक्रम्

नवममाकाशचक्रं तत्र षोडशदलपद्ममूर्ध्वमुखं तन्मध्यकर्णिकात्रिकूटाकारं तन्मध्ये ऊर्ध्वशक्तितां [3]परशून्यं ध्यायेत् तत्रैव पूर्णगिरिपीठं सर्वेच्छासिद्धिसाधनं भवति ॥ ९ ॥

नवमचक्रलक्षणमाह—नवममिति । षोडशदलान्वितं ऊर्ध्वमुखमाकाशचक्रं भवति । तन्मध्ये त्रिकूटाकारं ज्योतिर्वर्तते । त्रिकूटशब्देन भ्रूमध्यमुच्यते । तन्मध्ये "ऊर्ध्वमुन्नयते इत्योंकारः" इति श्रुत्यनुरोधेन ऊर्ध्वशक्तितां तुरीयोङ्काररूपतां तत्परमर्धमात्राप्रविभक्तभागत्रयमपि ब्रह्मातिरिक्तं नेतीति शून्यं

[1] अष्टमं ब्र—उ, उ १, मु.
[2] ब्रह्मरन्ध्रचक्रं—उ, उ १.
[3] पश्यन् ध्या—अ २, क.

ध्यायेत् । तत्रैव पूर्णमेवावशिष्यत इति पूर्णगिरिपीठं निःप्रतियोगिकपूर्णब्रह्ममात्रमवशिष्यते । तदेवं "सर्वं खल्विदं ब्रह्म" इति सर्ववर्जितचिन्मात्रमिति चेच्छासिद्धिस्थानं ब्रह्मैव भवतीत्यर्थः ॥ ९ ॥

एतदुपनिषदध्ययनफलम्

सौभाग्यलक्ष्म्युपनिषदं नित्यमधीते सोऽग्निपूतो भवति स वायुपूतो भवति स सकलधनधान्यसत्पुत्रकलत्रहयभूगजपशुमहिषीदासीदासयोगज्ञानवान् भवति न स पुनरावर्तत इत्युपनिषत् ॥ १० ॥

विद्याफलमाह—सौभाग्येति । उपनिषच्छब्दः सौभाग्यलक्ष्म्युपनिषत्समाप्त्यर्थः ॥ १० ॥

इति तृतीयः खण्डः

श्रीवासुदेवेन्द्रशिष्योपनिषद्ब्रह्मयोगिना ।
सौभाग्यलक्ष्म्युपनिषद्व्याख्यानं लिखितं स्फुटम् ।
सौभाग्यवृत्तिग्रन्थस्तु चत्वारिंशाधिकं शतम् ॥

इति श्रीमदीशाद्यष्टोत्तरशतोपनिषच्छास्त्रविवरणे पञ्चोत्तरशतसङ्ख्यापूरकं
सौभाग्यलक्ष्म्युपनिषद्विवरणं संपूर्णम्

नामधेयपदसूची

यत्र पुटसंख्याऽनन्तरं तिर्यग्रेखायाः परं संख्या वर्तते तत्र तावती पदावृत्तिर्बोध्या

पदम्	पुटसंख्या	पदम्	पुटसंख्या
अजपा	४९, ४६	उमा	४
अत्रिः	७६	उषा	४९
अलम्बुसा	६९	ऋद्धिः	१०९–२
अश्वारूढा	६६	कण्ठचक्रम्	११८
अश्विनी	६९	कपालकन्दम्	११९
आकाशचक्रम्	११९	कान्तिः	१०९
आज्ञाचक्रम्	११९	कामकला	६१
आदिनारायणः	१०५	कामकूटम्	१७
आधारचक्रम्	११६	कामदेवः	१७
आश्वलायनः	७५–२	कामरूपपीठम्	११६
इडा	६९, ११८	कामेश्वरी	७०–२
इष्टा	४	कीर्तिः	१०९
ईश्वरी	१०९	कुरुकुल्लाबली	६९
उचथ्यपुत्रः	७८	कुहूः	६९
उड्याणपीठम्	११७	कृष्टिः	१०९
उत्कृष्टिः	१०९	गान्धारी	६९
उन्नतिः	१०९	गायत्री	४९, ४६, ६६

पदम्	पुटसंख्या	पदम्	पुटसंख्या
गृत्समदः	७९	धूमावती	६६
घटिकालिङ्गम्	११८	नाभिचक्रम्	११७
चण्डा	६६	निर्वाणचक्रम्	११९
चन्द्रनाडी	११८	पञ्चदशाक्षरी	६६
चन्द्रा	१०६	पद्मप्रिया	१०९
चामुण्डा	६६	पद्मवासिनी	१०९
चिह्निङ्गम्	१५	पद्महस्ता	१०९
जालन्धरपीठम्	११९	परब्रह्मचक्रम्	११९
ज्ञाननेत्रम्	११९	पिङ्गळा	६९, ११८
तालुचक्रम्	११८	पितृरूपा	६९
तिरस्करिणी	६६	पुष्टा	४
तुष्टिः	४	पुष्टिः	१०९
त्रिपुरमालिनी	३५	पूर्णगिरिपीठम्	११९
त्रिपुरवासिनी	३५	पूषा	६५
त्रिपुरसिद्धा	३५	प्रज्ञा	४५
त्रिपुरसुन्दरी	३५	प्रत्यङ्गिरा	६६
त्रिपुरा	३४	प्रभापुञ्जिनी	४५
त्रिपुरामहालक्ष्मी	३५	बगळा	६६
त्रिपुराम्बा	३५	बालाम्बिका	६६
त्रिपुरेशी	३०	बिल्वप्रिया	१०९
त्रिपुरेश्वरी	२८, ३५	बृहस्पतिः	७९
देवी	७६, १०३	ब्रह्मचक्रम्	११६
धनदा	१०९	ब्रह्मरन्ध्रम्	११९
धनेश्वरी	१०९	ब्रह्मानन्दकला	६६
धात्री	१०९	भगमालिनी	७०

पदम्	पुटसंख्या	पदम्	पुटसंख्या
भरद्वाजः	७९	लज्जा	४
भार्गवः	७८–२	ललिता	४
भुक्तिः	१०९	वज्रेश्वरी	७०
भुवनेश्वरी	६६	वरदा	१०९
भृगुनृचद्गायत्रीश्रियः	१०८	वरुणा	६९
भोगदा	१०९	वसुप्रदा	१०९
भोगिनी	१०९	वाग्भवकूटम्	१५
भूचक्रम्	११९	वाराही	६६
मङ्गळा	४	विधात्री	१०९
मणिपूरकचक्रम्	११७	विभूतिः	१०९–२
मतिः	४	विश्वमोहिनी	५७
मदनः	३	विश्वोदरी	६९
मदन्तिका	४	विष्णुपत्नी	१०९
मधुच्छन्दाः	७६	वीरलक्ष्मीः	१०३
महात्रिपुरसुन्दरी	३६–२,६३,६४–३	व्यष्टिः	१०९
मातङ्गी	६६	शक्तिकूटम्	१९
मातृका	४५	शांखिनी	६९
मानिनी	४	शुकश्यामला	६६
मुक्तालंकारा	१०९	शृङ्गारकला	६१
मुक्तिः	१०९	श्रद्धा	१०९
यशस्वती	६९	श्रीः	१०७, १०८
रजतस्रजा	१०६	श्रीमहात्रिपुरसुन्दरी	६६
राजमातङ्गी	६६	श्रीमहाविद्या	५७
लक्ष्मीः	४	श्रीलक्ष्मी	१०९
लघुश्यामला	६६	श्रीविद्या	६६

पदम्	पुटसंख्या	पदम्	पुटसंख्या
षोडशी	६६	सूर्यनाडी	११८
सत्या	४९	सूर्या	१०९
सदाशिवः	१७	सृष्टिः	१०९
सन्ध्या	४९	सौभाग्यलक्ष्मीविद्या	१०९
सन्ततिः	१०९	स्वयंवरकल्याणी	६६
समृद्धिः	१०९	स्वर्णप्रभा	१०९
सरस्वती ४९, ४६, ६६, ६९, ७६–६, ७७–८, ७८–९, ७९–५, ८१		स्वर्णप्राकारा	१०९
		स्वर्णमालिनी	१०९
		स्वाधिष्ठानचक्रम्	११७
सामर्थ्यशक्तिः	११७	हस्तिजिह्वा	६९
सावित्री ४९, ४६, ६६		हिरण्मया	१०६
सिद्धिमत्ता	४	हिरण्यरूपा	१०९
सीता	८९–२	हिरण्यवर्णा	१०६
सुन्दरी	४	हिरण्यस्रजा	१०६
सुभगा	४	हृदयचक्रम्	११८
सुषुम्ना	६९	हंसकला	११८

विशेषपदसूची

यत्र पुटसंख्यानन्तरं तिर्यग्रेखायाः परं संख्या वर्तते तत्र तावती पदावृत्तिर्बोध्या

पदम्	पुटसंख्या	पदम्	पुटसंख्या
अक्षरम्	९०	अष्टमी	३९
अङ्कुशः	७०	अष्टयोन्यङ्कितम्	३३
अङ्कुशाकृतिः	३८	आकाशः	९२
अङ्गानि	९८	आकाशपीठम्	९१
अज	९८	आचमनीयम्	७१
अज्ञेया	९८	आत्मशक्तिः	९७
अनङ्गकुसुमादिशक्तयः	६९	आत्मा	४९
अनन्ता	९८	आत्मासनरूपिणी	३०
अनाहतसिद्धिदा	११८	आदिविद्या	९, ९६
अन्तरालम्	३३	आदिशक्तिः	७
अन्तर्दशारदेवताः	७०	आवाहनम	७१
अमनीभावः	४८	आसनम्	७१
अमृतः	११३	इक्षुधनुः	७०
अमृतपीठम्	९१	इच्छाशक्तिः	९३–२
अमृतबन्धवः	९६	ईश्वरः	८२
अर्घ्यम्	६९, ७१	उच्चाररहितम्	१४
अलक्ष्या	९८	उतत्वः	७९

पदम्	पुटसंख्या	पदम्	पुटसंख्या
उपचारः	७१-२	गणेशत्वम्	४९
उपवेदाः	९८	गन्धः	७२
उपाङ्गः	९८	गह्वरम्	१३
ऋग्वेदः	९७	गुहासदनानि	६
ऋतवः	६९	गृहम्	६९
एका	९८	घटना	१३
एकारः	१४	चक्राणि	१
ओङ्कारः	९६	चतुर्थी	१०९
ओङ्कारपीठम्	३६	चतुर्दशारदेवताः	६९
कल्पकोद्यानम्	६९	चित्तम्	११३
कल्पतरवः	६९	चित्तलयः	११८
कादिविद्या	६२	चोदयित्री	७७
कामः	८, १३-३	जगद्रूपम्	८४
कामकलाभूतचक्रम्	४०	जीवः	४९, ८३
कामकलामयम्	२१	जीवन्मुक्तः	७३
कामरूपः	६	जीवाक्षरम्	१९
काम्यः	६	ज्ञाननेत्रम्	९०
कालरूपाः	९४	तत्त्वम्	११०
कुमार्यर्चनम्	४२	तत्पदार्थः	१३
कुसुमम्	७२	तर्पणम्	११०
कौबेरी	२१	ताम्बूलम्	७२
क्रियाकाण्डम्	४६	तुरीया	३८
क्रियाशक्तिः	९३, १००	तृतीया	९१
क्षणः	११३	तेजःपीठम्	९१
खेचरी	३९	त्रयी	९७

पदम्	पुटसंख्या	पदम्	पुटसंख्या
त्रिकोणचक्रम् . .	३३	द्विजतृप्तिः . .	११०
त्रिकोणशक्तिः . .	१४	द्वितीया . . .	३८
त्रिखण्डा . . .	३९	धनकलाः . . .	७०
त्रिज्योतिषम् . .	३२	धर्मशास्त्रम् . .	९८
त्रिपुरवासिनी . .	३१	धारणा . . .	१४
त्रिपुरा . . .	११	धूपः . . .	७२
त्रिपुराणि . . .	११	ध्वनिः . . .	११२
त्रिपुरेश्वरीविद्या . .	३१	नन्दिविद्या . .	२१
त्रैपुरम् . . .	४	नमस्कारः . .	७२
त्रैपुराष्टकम् . .	४३	नवचक्रविवेकः . .	११६
त्रैपुरीव्यक्तिः . .	२६	नवमी . . .	३९
त्रैलोक्यमोहनम् . .	३४	नवरत्नद्वीपः . .	६९
त्र्यम्बकम् . .	४३–२	नवरसाः . . .	६९
दशयोन्यङ्कितम् . .	३३	नवलक्षजपम् . .	४०
दशारचक्रम् . .	३३	नवशक्तिः . .	१०९
दीपः . . .	७२	नवात्मकचक्रम् . .	३४
दुर्गा . . .	९९	नाड्यः . . .	६९
देवता . .	६९, ७०	नादः . .	९६, ११२
देवतासान्निध्यम् . .	५९	निवृत्तिकारणम् . .	२८
देवी . . .	६१	निर्विकल्पः . .	८५
देवीपदम् . . .	५४	निर्विकल्पसमाधिः . .	८६
देहः . . .	६९	नीला . . .	९६
देही . . .	१००	नीलीयुक्तम् . .	४०
द्वादशलक्षजपः . .	१०९	नैवेद्यम् . . .	७२
द्वादशार्णम् . . .	४५	पञ्चदशनित्याः . .	७०

पदम्	पुटसंख्या	पदम्	पुटसंख्या
पञ्चदशाक्षरम्	२०	प्राणरोधः	१११
पञ्चमी	३८	प्रादक्षिण्यम्	७२
पञ्चविधः	७०	बलिहरणम्	७२
पञ्चशाखाः	९७	बहिर्दशारदेवताः	६९
परब्रह्मविकासीनि	१२	बहुशाखाः	९६
परमशिवविद्या	२१	बाणः	७०
परमात्मा	४७	बिन्दुः	९६
परमानन्दसंभवः	११२	बीजम्	९७
परमार्थता	४९	बीजमुद्रा	३९
परामृतम्	८७	बीजसागररूपम्	२६
परिपूर्णध्यानम्	७२	बीजाष्टमी	४०
पाद्यम्	७१	ब्रह्म	२०
पार्थिवचक्रम्	३४	ब्रह्मजिज्ञासा	९२
पाशः	७०	ब्रह्मरूपम्	८४
पीठम्	६९	ब्रह्मसूत्रम्	७१
पुरमध्यम्	९	ब्रह्मसंवित्तिः	६४
पुरश्चर्याविधिः	६९	ब्रह्मस्वरूपिणी	९३
पुष्टिवर्धनम्	४३–२	भगाङ्कुण्डम्	४०
पुष्पबाणाः	७०	भद्ररूपिणी	९३
पुरुषत्वम्	८१	भद्राः	१
पूरकम्	३	भर्गोरूपम्	१४
प्रथमावृतिः	१०९	भावः	४८
प्रभाकरीविद्या	२१	भुवनाधारा	९६
प्रभावरूपिणी	९३	भूदेवी	९९
प्रयत्नः	१११	भेरीशब्दः	११२

पदम्	पुटसंख्या	पदम्	पुटसंख्या
भोगशक्तिः . . .	१०२	योगी . .	११०, ११२
मण्डलाः . . .	२	योनिमुद्रा . .	३६–३८
मण्डूकमया. . .	९६	रत्नपीठम् . . .	९१
मद्गलध्वनिः . .	११२	रमापीठम् . . .	१०९
मनः . . .	४८–४	रामवैखानसपर्वतः . .	९६
महाङ्कुशमुद्रा . .	३९	लकारः . . .	१४
महाचक्रनायकम् . .	३३	लक्षजपः . . .	११०
महात्रिपुरसुन्दरी . .	६९	लाक्षायुक्तम् . .	४०
महात्रिपुरा . .	२९	लिङ्गादित्रितयम् . .	९७
महाध्यानयोगः . .	२९	लोपामुद्रा . . .	२०
महामृत्युः . . .	९९	वरेण्यम् . . .	१४–२
महारसाः . . .	४१	वशिन्यादिशक्तयः . .	७०
महाविद्येश्वरीविद्या . .	२८	वस्त्रम् . . .	७१
महाशून्यम् . .	११३	वाक्सिद्धिः . .	९९
महासौभाग्यम् . .	२७	वाग्भवम् . . .	२१
महिमा . . .	१	वाग्भवकूटम् . .	२१
महोन्मादिनीमुद्रा . .	३९	वादित्रवादिनः . .	६२
मानवीविद्या . .	२१	वासुदेवः . . .	४९
माया	८२	विकारः . . .	८४
मुक्तः . . .	८७	विक्षेपशक्तिः . .	८३
मुद्राः . . .	१	विद्याऽष्टकम् . .	३२
योगाः . . .	१	विद्वान् . . .	११४
योगवान् . . .	११२	विभूषणम् . . .	७१
योगशक्तिः . .	१०१	विश्वजन्या . . .	७
योगिन्यः . . .	१	विश्वयोनिः . . .	८

पदम्	पुटसंख्या	पदम्	पुटसंख्या
विश्वरूपत्वम्	९	षोडशशक्तयः	६९
वीरशक्तिः	१०३	षोडशसहस्रजपः	१०७
वेदवेदः	९८	सकलकौलम्	३९
वैखानसम्	९७	सगुप्तम्	३९
वैष्णवीविद्या	२२	सगुप्ततरम्	३९
शक्तिः	६८	सदनानि	३
शक्तिभूतद्वल्लेखा	२०	सनिगर्भम्	३९
शक्तिशिवरूपिणी	३०	सपराररहस्यम्	३९
शब्दब्रह्म	९०	सप्रकटम्	३४
शब्दविद्वः	८६	समात्रष्टकम्	३४
शरीरत्रयम्	६३	समाधिः	११९–९
शाक्तानि	१२	सरहस्यम्	३९
शाम्भवीविद्या	६२	सर्गकारणम्	२८
शिवः	२९	सर्वरक्षाकरी	२९
शिवयोगी	७३	सर्वरोगहरम्	३९–२
शिवशक्त्यात्मकम्	१७	सर्वविद्राविणीमुद्रा	३९
शैवानि	१२	सर्वसिद्धिप्रदम्	३९
श्रीगुरुः	६८	सर्वसौभाग्यदायकम्	३९
श्रीचक्रम्	३६	सर्वसंक्षोभणम्	३९
श्रीचक्रपूजनम्	६९	सर्वाकर्षिणीमुद्रा	३९
श्रीदेवी	९९	सर्वानन्दमयम्	३६
श्रीविद्यासिद्धिः	११०	सर्वार्थसाधकचक्रम्	३९
षडध्वपरिवर्तकः	१७	सर्वाशापरिपूरकम्	३९
षण्मुखीविद्या	२१	सविकल्पः	८९
षष्ठी	३८	सवशिन्याद्यष्टकम्	३९

पदम्	पृष्ठसंख्या	पदम्	पृष्ठसंख्या
[illegible]	१३	[illegible]	३०
[illegible]	३४	[illegible]	९३
[illegible]	३४	[illegible]	९३
[illegible]	३४	[illegible]	४५
[illegible]	३४	[illegible]	११
[illegible]	३४	[illegible]	२८
[illegible]	३४	[illegible]	७१
[illegible]	८७	[illegible]	३१
[illegible]	८३	[illegible]	४
[illegible]	६५	[illegible]	९८
[illegible]	३४	[illegible]	१७
[illegible]	३६	[illegible]	१०
[illegible]	६२	[illegible]	६९
[illegible]	३४	[illegible]	६२
सायुधचतुष्टयम्	३४	[illegible]	११
[illegible]	८०	[illegible]	६९
[illegible]	७	[illegible]	७२
[illegible]	[illegible]	[illegible]	१७

THE VAISHNAVA-UPANISHADS

WITH THE COMMENTARY OF

SRI UPANISHAD-BRAHMA-YOGIN

EDITED BY

PANDIT A. MAHADEVA SASTRI, B.A.

DIRECTOR, ADYAR LIBRARY, ADYAR, MADRAS

PUBLISHED FOR THE ADYAR LIBRARY

(THEOSOPHICAL SOCIETY)

1923

अष्टोत्तरशतोपनिषत्सु

वैष्णव-उपनिषदः

श्री उपनिषद्ब्रह्मयोगिविरचितव्याख्यायुताः

अडयार्—पुस्तकालयाध्यक्षेण

अ. महादेवशास्त्रिणा

संपादिताः

अडयार्—पुस्तकालयार्थं

प्रकटीकृताश्च

१९२३

ॐ नमो

ब्रह्मादिभ्यो

ब्रह्मविद्यासंप्रदायकर्तृभ्यो

वंशऋषिभ्यो

नमो गुरुभ्यः

DEDICATED TO

Brahma and the Rishis,

The Great Teachers

Who handed down Brahmavidya

through Generations

THE EDITOR'S NOTE

THE materials on which is based this edition of THE VAISHNAVA UPANISHADS comprised in this volume are the same as those described in the volume of *The Yoga Upanishads*.

20th July, 1923 A. M. S.

अस्मिन् सम्पुटे अन्तर्गतानामुपनिषदां सूची

संख्या	उपनिषन्नाम	ईशादिसंख्या	पुटसंख्या
१.	अव्यक्तोपनिषत् . .	६८	१
२.	कलिसन्तरणोपनिषत् .	१०३	१६
३.	कृष्णोपनिषत् . .	९६	२१
४.	गरुडोपनिषत् . .	१०२	३२
५.	गोपालतापिन्यां पूर्वतापिन्युपनिषत्	९५	४१
,,	,, उत्तरतापिन्युपनिषत्	,,	५८
६.	तारसारोपनिषत् . .	९१	७८
७.	त्रिपाद्विभूतिमहानारायणोपनिषत्	५२	८६
८.	दत्तात्रेयोपनिषत् . .	१०१	१५९
९.	नारायणोपनिषत् . .	१८	१६७
१०.	नृसिंहतापिन्यां पूर्वतापिन्युपनिषत्	२७	१७४
,,	,, उत्तरतापिन्युपनिषत्	,,	२२३
११.	रामतापिन्यां पूर्वतापिन्युपनिषत् .	५५	३०५
,,	,, उत्तरतापिन्युपनिषत्	,,	३२६
१२.	रामरहस्योपनिषत् . .	५४	३४४
१३.	वासुदेवोपनिषत् . .	५६	३७५
१४.	हयग्रीवोपनिषत् . .	१००	३८३

विषयसूचिका

१. अव्यक्तोपनिषत्

प्रथमः खण्डः

सृष्टेः पुरा निर्विशेषब्रह्मस्तुतिः . . . १
परमेष्ठिप्रादुर्भावः २
परमेष्ठिनः स्वकृत्यजिज्ञासा. २

द्वितीयः खण्डः

परमेष्ठिनः आनुष्टुभीविद्यादर्शनम् . . . ३
आनुष्टुभीविद्यया नृसिंहदर्शनम् . . . ४
नृसिंहस्तुतिः. ४

तृतीयः खण्डः

व्यक्तस्वरूपम् ६
जगत्सृष्ट्युपायो ध्यानयज्ञः . . . ६
ध्यानयज्ञमहिमा ७

चतुर्थः खण्डः

ध्यानयज्ञेन परमेष्ठिनः सर्वज्ञत्वादिलाभः . . ७
अन्यस्यापि ध्यानयज्ञेन सर्वज्ञत्वादिलाभः . . ८

पञ्चमः खण्डः

लोकत्रयादिसृष्टिः . . . ८
वसुरुद्रादित्यसृष्टिः ९
चातुर्वर्ण्यसृष्टिः ९
अहोरात्रसृष्टिः १०
वेदछन्दस्सृष्टिः १०

षष्ठः खण्डः

स्त्रीपुरुषमिथुनसृष्टिः ११
इन्द्राख्यायिका १२
परमात्मप्रतिष्ठासाधनम् १३

सप्तमः खण्डः

एतद्विद्याऽध्ययनफलम् १४
एतद्विद्यासम्प्रदानविधिः १५

२. कलिसन्तरणोपनिषत्

भगवन्नामस्मरणमात्रेण कलिसन्तरणम् . . १६
परब्रह्मावरणविनाशकषोडशनामानि . . . १८
नामजपमहिमा १९

३. कृष्णोपनिषत्

रामचन्द्रस्य कृष्णावतारप्रतिज्ञा . . . २१
भगवतः सार्वात्म्यवर्णनम् . . . २२

४. गरुडोपनिषत्

गारुडविद्यासम्प्रदायः ३२
गारुडविद्यायाः ऋष्यादि ३३
गरुडमालामन्त्रादि ३९

५. गोपालपूर्वतापिन्युपनिषत्

प्रथमोपनिषत्

मङ्गळाचरणम् ४१
गोपालकृष्णस्य परमदेवत्वम् . . . ४२
गोपालकृष्णस्वरूपनिरूपणम् . . . ४३
गोपालकृष्णरूपविशेषध्यानम् . . . ४४
गोपालकृष्णमन्त्रजपः ४५
गोपालकृष्णभजनम् ४६

द्वितीयोपनिषत्

गोविन्दपूजाप्रकारः ४७

तृतीयोपनिषत्

सृष्टिसाधनभूतोऽष्टादशार्णमन्त्रः . . . ५२

चतुर्थोपनिषत्

स एव आत्मज्ञानसाधनभूतः . . . ५३

पञ्चमोपनिषत्

मन्त्रगतपञ्चपदेभ्यो जगत्सृष्टिः . . . ५४
पञ्चपदात्मकगोविन्दस्तुतिः . . . ५५

षष्ठोपनिषत्

गोपालकृष्णध्यानजपभजनविधिः . . . ९७

गोपालोत्तरतापिन्युपनिषत्

दुर्वाससो व्रजस्त्रीभैक्षार्हत्वम् . . . ९८
कृष्णस्य अस्खलितब्रह्मचारित्वस्मरणेन तासां यमुनातरणम् . ९८
दुर्वाससो निराहारत्वस्मरणेन तासां यमुनातरणम् . . ६०
कृष्णदूर्वाससोर्विषये गान्धर्वीशङ्का . . . ६०
ब्रह्मज्ञानिनः अभोक्तृत्वम् ६०
कृष्णस्य अभोक्तृत्वम् ६२
गोपालकृष्णजन्मादीन्यधिकृत्य गान्धर्वीप्रश्नाः . . ६३
नारायणं प्रति अवतारविषये ब्रह्मप्रश्नः . . ६४
भूचक्रस्थसप्तपुरीमध्ये मधुरा नाम गोपालपुरी . . ६४
मधुराऽऽवरणवनेषु देवादीनां वासः . . . ६५
रुद्रादिपूज्याः मथुरास्थाः कृष्णमूर्तयः . . . ६७
मुमुक्षुभिः गोपालात्मत्वं स्मरणीयम् . . . ६९
मथुरावासिगोपालकृष्णभवनमहिमा . . . ६९
एकस्य भगवतः चतुर्विधत्वोपपादनम् . . . ७०
हृदि ध्येयभगवद्रूपवर्णनम् . . . ७२
देवादिभिः भजनीयाः मूर्तयः . . . ७४
विद्यासम्प्रदायः ७७

६. तारसारोपनिषत्

प्रथमः खण्डः

अविमुक्तोपासनोपदेशः . . . ७८
नारायणस्थूलाष्टाक्षरतारकम् . . . ८०

द्वितीयः खण्डः

नारायणसूक्ष्माष्टाक्षरतारकम् . . . ८१
प्रणवावयवदेवताः ८२
श्रीरामस्य सर्वात्मकत्वम् ८२

तृतीयः खण्डः

जाम्बवदाद्यष्टतनुमन्त्राः ८३
विद्यापठनमन्त्रार्थज्ञानयोः फलम् ८५
ज्ञानिप्राप्यपरमपदम् ८५

७. त्रिपाद्विभूतिमहानारायणोपनिषत्

प्रथमोऽध्यायः

परमेष्ठिनः परमरहस्यजिज्ञासा . . . ८६
सर्वरहस्यबोधको गुरुशिष्यसंवादः . . . ८८
शिष्यप्रश्नः ८९
गुरुणा ब्रह्मस्वरूपप्रतिपादनम् . . . ८९
पादचतुष्टयात्मकं ब्रह्म ९०
पादचतुष्टयभेदः ९१
विद्याऽऽनन्दतुरीयाणां भेदः . . . ९२
एतद्वेदनफलम् ९४

द्वितीयोऽध्यायः

साकारनारायणस्य नित्यत्वविरोधशङ्का . . ९५
साकारस्य सोपाधिकनिरुपाधिकभेदः . . . ९६
सोपाधिकसाकारनिरूपणम् . . . ९७

निरुपाधिकसाकारनिरूपणम् . . . ९७
मुक्तसाकारस्य शाश्वतत्वनिरूपणम् . . . ९८
विद्याऽऽनन्दतुरीयसाकाराणां भेदः . . . ९८
परब्रह्मणः साकारनिराकारभेदविरोधपरिहारः . . ९९
आदिनारायणादविद्योदयः. . . . १०१
अविद्याऽण्डस्थनारायणमहिमा . . . १०१
एतद्वेदनफलम् १०३

तृतीयोऽध्यायः

अविद्याप्रपञ्चो महामायाविलासः . . . १०४
परब्रह्मणः अण्डपरिपालकमहाविष्णौ लयः . . १०५
महाविष्णोः आदिविराट्पुरुषे लयः . . . १०६
आदिविराट्पुरुषस्य आदिनारायणे लयः . . १०६
मायाविलये जीवेशयोः स्वरूपभजनम् . . . १०७

चतुर्थोऽध्यायः

त्रैपदचैतन्यस्वरूपम् १०८
पादभेदादिकथनं ब्रह्मस्वरूपकथनमेव . . . १०९
उक्तार्थे शाखाऽन्तरसंवादः . . . ११०
आदिनारायणस्य कीदृशावुन्मेषनिमेषौ . . ११२
महामायास्वरूपं तत्तरणोपायश्च . . . ११२
जीवस्य कार्योपाधित्वम् ११३

पञ्चमोऽध्यायः

नष्टाविद्यायाः पुनरुदयः ११४
संसारमोक्षोपायजिज्ञासा ११५
संसारस्वरूपतत्कारणनिरूपणम् . . . ११५

सत्सङ्गादन्तःकरणशुद्धिः . . . ११६
सद्गुरुकटाक्षात्तत्त्वज्ञानलाभः . . . ११७
भगवत्कथाश्रवणध्यानादिभिः हृदये परमात्माऽऽविर्भावः . ११७
भक्तिवैराग्याभ्यां ज्ञानपरिपाकः . . . ११७
जीवन्मुक्तदशा ११७
देहत्यागानन्तरं उपर्युपरि गमनेन परमानन्दप्राप्तिः. . ११८

षष्ठोऽध्यायः

ब्रह्माण्डस्वरूपावबोधः १२१
अनन्तकोटिब्रह्माण्डस्वरूपावबोधः . . . १२२
महाविराट्पदप्राप्तिः १२३
महाविराट्स्वरूपं तज्ज्ञानफलं च . . . १२३
महायोगमायाविलासावलोकनम् . . . १२४
पादविभूतिवैकुण्ठे नारायणाराधनम् . . . १२५
विष्वक्सेनप्रसादेन विद्यामयवैकुण्ठावलोकनम् . . १२५
ब्रह्मविद्यावैकुण्ठद्वारा बोधानन्दविमानप्राप्तिः . . १२६
तुलसीवैकुण्ठप्राप्तिः १२७
शुद्धबोधानन्दवैकुण्ठप्राप्तिः . . . १२७
अखण्डबोधविमाने समस्तमोक्षसाम्राज्यपट्टाभिषेकः. . १२९

सप्तमोऽध्यायः

नित्यगरुडारूढस्य ब्रह्मानन्दविभूतिप्राप्तिः . . १३०
सुदर्शनपुरवर्णनम् १३०
सुदर्शनमहाचक्रवर्णनम् १३१
चक्राभ्यन्तरस्थसुदर्शनपुरुषाराधनम् . . . १३३
क्रमेणाद्वैतसंस्थानप्राप्तिः १३४

आनन्दव्यूहमध्यस्थं प्रणवविमानम् . . . १३७
अनन्तासनोपरिस्थं समष्टिमहायन्त्रम् . . . १३८
व्यष्टियन्त्रस्वरूपम् १३८
महायन्त्रमहिमा १४७
महायन्त्रोपरिस्थस्य आदिनारायणस्य स्वरूपम् . . . १४७

अष्टमोऽध्यायः

अद्वैते ब्रह्मणि वैकुण्ठादिभेदसत्त्वोपपादनम् . . १४९
अनन्तवैकुण्ठसत्त्वोपपादनम् . . . १५०
परमतत्त्वावबोधेन ब्रह्ममात्रावशेषः . . . १५१
सालम्बनिरालम्बयोगभेदः . . . १५३
निरालम्बयोगाधिकारिलक्षणम् . . . १५३
सर्वाधिकारिको भक्तियोगः . . . १५३
भक्तियोगादनायासेन नारायणभावप्राप्तिः . . १५४
परमरहस्यस्मरणादेर्महिमा . . . १५५
आदिनारायणैकनिष्ठाविधिः . . . १५५
महाविष्णुभक्तितः सकलश्रेयःप्राप्तिः . . . १५६
एतदुपनिषदध्ययनादेर्महिमा . . . १५७

८. दत्तात्रेयोपनिषत्

प्रथमः खण्डः

दत्तात्रेयध्यानम् १५९
दत्तात्रेयतारकैकाक्षरमन्त्रः १६०
दत्तात्रेयषडक्षरमन्त्रः १६१
दत्तात्रेयाष्टाक्षरमन्त्रः १६१
दत्तात्रेयद्वादशाक्षरमन्त्रः १६२

दत्तात्रेयषोडशाक्षरमन्त्रः १६२
दत्तात्रेयानुष्टुभमन्त्रः १६३

द्वितीयः खण्डः

दत्तात्रेयमालामन्त्रः १६४

तृतीयः खण्डः

दत्तात्रेयविद्याफलम् १६५

९. नारायणोपनिषत्

प्रथमः खण्डः

नारायणात् सर्वचेतनाचेतनजन्म . . . १६७

द्वितीयः खण्डः

नारायणस्य सर्वात्मत्वम् १६९

तृतीयः खण्डः

नारायणाष्टाक्षरमन्त्रः १७०

चतुर्थः खण्डः

नारायणप्रणवः १७१
विद्याऽध्ययनफलम् १७३

१०. नृसिंहपूर्वतापिन्युपनिषत्

प्रथमोपनिषत्

शान्तिपाठः १७४
जगत्सृष्टेः प्रजापतिकाममूलत्वम् . . . १७५

सर्वजगतः आनुष्टुभत्वम् १७६
मन्त्रराजस्य पादचतुष्टयम् १७७
ऋषिच्छन्दोदेवताऽऽदिप्रश्नः . . . १७८
सपादसाङ्गमन्त्रविद्याफलम् . . . १७९
साङ्गसामविद्यायां स्त्रीशूद्रयोरनधिकारः . . १८०
लोकवेदब्रह्मादिरूपेण सामध्यानम् . . . १८०
सप्तस्वरसामोद्धारः १८१
क्षीरोदार्णवसामोद्धारः १८२
परार्धान्न्यादिज्ञानफलम् १८२
यजुर्वेदवाच्यनृसिंहज्ञानफलम् . . . १८३
सामतृतीयावयववेदनफलम् १८४
मन्त्रराजसाममाहात्म्यम् १८५
पादचतुष्टयान्न्यस्वरद्वयं तज्ज्ञानफलं च . . १८५
एतद्विद्यामहिमा १८६

द्वितीयोपनिषत्

नारसिंहमन्त्रराजस्य संसारतारकत्वम् . . . १८७
प्रणवपादानां सामपादतादात्म्यम् . . . १८८
साम्नः अनुष्टुप्त्वम् १८९
साम्नः पञ्चाङ्गानि १९०
ओंकारस्य उभयतो न्यासविधिः . . . १९१
मन्त्रराजस्य पदशोऽक्षरन्यासः . . . १९१
मन्त्रराजस्य अनुष्टुप्त्वोपपत्तिः . . . १९२
उग्रपदार्थनिर्वचनम् १९२
वीरपदार्थनिर्वचनम् १९३
विष्णुपदार्थनिर्वचनम् १९४

ज्वलत्पदार्थनिर्वचनम् १९९
सर्वतोमुखपदार्थनिर्वचनम् . . . १९६
नृसिंहपदार्थनिर्वचनम् १९७
भीषणपदार्थनिर्वचनम् १९८
भद्रपदार्थनिर्वचनम् १९८
मृत्युमृत्युपदार्थनिर्वचनम् १९९
नमामिपदार्थनिर्वचनम २००
अहंपदार्थनिर्वचनम् २००

तृतीयोपनिषत्

मन्त्रराजस्य शक्तिबीजजिज्ञासा . . . २०१
शक्तिस्वरूपनिरूपणम् २०२
बीजस्वरूपनिरूपणम् २०३

चतुर्थोपनिषत्

अङ्गमन्त्रोपदेशः २०५
प्रणवस्य ब्रह्मात्मत्वम् २०५
प्रणवप्रथमपादनिरूपणम् २०६
प्रणवद्वितीयपादनिरूपणम् . . . २०७
प्रणवतृतीयपादनिरूपणम् . . . २०७
प्रणवचतुर्थपादनिरूपणम् २०८
सावित्रीगायत्रीमन्त्रस्वरूपम् . . . २०८
यजुर्लक्ष्मीमन्त्रस्वरूपम् २१०
नृसिंहगायत्रीमन्त्रस्वरूपम् . . . २१०
प्रत्यङ्गमन्त्रस्वरूपम् २११

पञ्चमोपनिषत्

देवानां महाचक्रजिज्ञासा २१३
षडरचक्रदर्शनम् २१३
अष्टारचक्रदर्शनम् २१३
द्वादशारचक्रदर्शनम् २१४
षोडशारचक्रदर्शनम् २१५
द्वात्रिंशदरचक्रदर्शनम् २१५
अवयवदर्शनम् २१५
महाचक्रदर्शनम् २१६
महाचक्रवेदनमहिमा २१७
मन्त्रराजाध्ययनफलम् २१८
मन्त्रराजजापकस्य सर्वोत्कृष्टत्वम् . . . २२०
मन्त्रराजजापकस्य ब्रह्ममात्रपर्यवसानम् . . . २२१

नृसिंहोत्तरतापिन्युपनिषत्

प्रथमः खण्डः

देवानां निर्विशेषब्रह्मजिज्ञासा . . . २२३
ब्रह्मात्मैक्योपदेशः २२३
ब्रह्मात्मैक्यावगमोपायोपदेशः . . . २२४
ब्रह्मात्मनः चतुष्पात्त्वम् २२५
विश्वस्य चतुरात्मत्वम् २२६
तैजसस्य चतुरात्मत्वम् २२७
प्राज्ञस्य चतुरात्मत्वम् २२८
अवस्थात्रयस्य मायामात्रत्वम् . . . २२९
तुरीयस्य चतुरात्मत्वम् २३०
तुरीयतुर्यादेशः २३३

द्वितीयः खण्डः

उत्तमाधिकार्यवगतं तुर्यतुर्यम् . . . २३५
तुर्यतुर्यस्य करणग्राह्यवैलक्षण्यम् . . . २३६
तुर्यतुर्यस्य सर्वसाक्षित्वादविक्रियत्वम् . . . २३७
मध्यमाधिकारिणां ओंकारात्मनोः एकीकरणविधिः . . २३८
अकारप्रथमपादयोरभेदः २३८
उकारद्वितीयपादयोरभेदः २४०
मकारतृतीयपादयोरभेदः २४०
चतुर्थपादप्रपञ्चनम् २४१
तुरीयतुर्यप्रपञ्चनम् २४३
तुर्यतुर्यादेशः २४४
मन्दाधिकारिणां मन्त्रराजद्वारा तुरीयावगतिः . . २४५

तृतीयः खण्डः

प्रणवमन्त्रराजपादानां तुरीयात्मना ध्यानम् . . २४६
प्रथमपादध्यानम् २४७
द्वितीयपादध्यानम् २४८
तृतीयपादध्यानम् २४८
चतुर्थपादध्यानम् २४९
तुर्यतुर्ये सर्वोपसंहारः २४९
तुर्यतुर्यावगतिः २५०
सकळब्रह्मस्वरूपम् २५०
सकळब्रह्मध्यानम् २५१
सकळध्यानेन तुर्यतुर्यप्राप्तिः . . . २५२

चतुर्थः खण्डः

तुर्यतुर्यस्य स्वमात्रताऽनुसंधानम् . . . २५४
ओमितिशब्दवृत्तिप्रत्ययापह्नवविधिः . . . २५५
निर्विशेषब्रह्मानुसंधानम् २५५
मन्त्रराजस्य ब्रह्मात्मैक्यहेतुत्वम् . . . २५६
अनुवादकमन्त्रोदाहरणम् २५७

पञ्चमः खण्डः

अकारानुष्टुभोस्तादात्म्यम् २५९
उकारानुष्टुभोस्तादात्म्यम् २६१
मकारानुष्टुभोस्तादात्म्यम् २६२

षष्ठः खण्डः

देवानामनुष्टुभा आसुरजयः २६४
अपक्वकषायस्य अनुष्टुभा आत्मज्ञानप्राप्तिः . . २६५
प्रणवेन अद्वितीयावगतिः २६६
संन्यासस्य ब्रह्मावगतिसाधनत्वम् . . . २६७
अनुवादकमन्त्रोदाहरणम् २६९

सप्तमः खण्डः

तुर्यतुर्यज्ञानाय देवानां प्रश्नः . . . २७०
आत्मनः तुर्यतुर्येण एकीकरणोपदेशः . . . २७०
एकीकरणफलम् २७२
स्वात्मनः स्वराड्भावः २७३
आत्मातिरेकेण ब्रह्मासत्त्वम् . . . २७४
सच्चिदानन्दानुभवप्रकाशः २७४
ब्रह्मयाथात्म्यनिरूपणम् २७५
ब्रह्मात्मैक्यज्ञानविधानम् २७७

अष्टमः खण्डः

तुरीयमात्राया ओतत्वम् २७९
तुर्यमात्राया अनुज्ञातृत्वम् २८१
तुयमात्राया अनुज्ञकरसत्वम् . . . २८२
तुर्यमात्राया अविकल्पत्वम् . . . २८३

नवमः खण्डः

अद्वयात्मजिज्ञासा २८४
अद्वयात्मस्वरूपम् २८५
ब्रह्माभिन्ना माया २८५
मायास्वरूपम् २८६
मायाकायम् २८८
आत्मत्रैविध्यम् २८८
जीवेशभेदः २८९
आत्मनः सृष्टौ प्रवेशः २९०
सत्तामात्रं ब्रह्म २९२
सर्वस्य आत्ममात्रत्वम् २९४
आत्मतः सर्वसिद्धिः २९५
देवानां आत्मदर्शनम् २९६
आत्मनः अनल्पत्वनिरूपणम् . . . २९६
द्वितीयाभावोपदेशः २९७
देवानां संविद्रूपत्वज्ञानम् २९८
देवानां आत्मतत्त्वज्ञानख्यापनम् . . . २९८
ब्रह्मात्मैक्योपदेशः ३००
आविद्यकविशेषनिषेधः ३०१

देवानां अद्वयात्मानुभवनिर्धारणम् . . . ३०२
उक्तार्थानुवादकमन्त्रः ३०४

११. रामपूर्वतापिन्युपनिषत्

प्रथमोपनिषत्

रामनामार्थप्रकाशनम् ३०६
उपासकार्थे निर्विशेषस्य रूपकल्पना . . . ३०७
मन्त्रजपयन्त्रपूजयोः रामप्रसादकरत्वम् . . ३०८

द्वितीयोपनिषत्

रामबीजस्य सर्वात्मकत्वम् . . . ३०९

तृतीयोपनिषत्

सीतारामयोः मन्त्रयन्त्रादिपूज्यत्वम् . . . ३१०

चतुर्थोपनिषत्

रामषडक्षरार्थः ३११
देवकृतरामस्तुतिः ३१३
ऋषिकृतरामस्तुतिः ३१४
पट्टाभिषिक्तरामचन्द्रविभूतिः . . . ३१५
यन्त्रलेखनप्रकारः ३१७
मालामन्त्रोद्धारः ३२०
यन्त्रस्तुतिः ३२१

पञ्चमोपनिषत्

भूतशुद्ध्यादिपीठार्चनान्तपूजा . . . ३२१

भगवद्ध्यानपुरस्सरमावरणपूजा . . . ३२३
भगवत्प्रसादद्वारा मोक्षप्राप्तिः . . . ३२५

रामोत्तरतापिन्युपनिषत्

प्रथमः खण्डः

अविमुक्तोपासनम् ३२६

द्वितीयः खण्डः

रामषडक्षरस्य तारकत्वम् . . . ३२७
तारकजपफलम् ३२८
रामस्य प्रणवार्थत्वम् ३२८
प्रणवतदर्थयाथात्म्यम् ३२९
प्रत्यग्ब्रह्मणोरेकीकरणम् ३३०
रामज्ञानान्मुक्तिः ३३१

तृतीयः खण्डः

बाह्यान्तराविमुक्तयाथात्म्यम् . . . ३३१
मुमूर्षूणां शिवकृतरामतारकोपदेशः . . . ३३३

चतुर्थः खण्डः

रामसाक्षात्कारप्रदाः मन्त्राः . . . ३३५

पञ्चमः खण्डः

रामषडक्षरमाहात्म्यम् ३३८
मन्त्रराजमाहात्म्यप्रतिपादकश्लोकाः . . . ३३९

१२. रामरहस्योपनिषत्

प्रथमोऽध्यायः

रामस्य ब्रह्मतारकत्वम् ३४४
रामस्य अङ्गानि वायुपुत्रादीनि . . . ३४५
गृहस्थानां रामाङ्गप्रणवाधिकारः . . . ३४६
रामनामजपेन सर्वपापनिवृत्तिः . . . ३४७
रामोपनिषदादिभिरपि सर्वपापशान्तिः . . . ३४८

द्वितीयोऽध्यायः

एकाक्षरराममन्त्रः ३४९
द्वित्रिचतुरक्षरमन्त्राः ३५०
पञ्चाक्षरमन्त्रः ३५०
षडक्षरमन्त्रः ३५१
सप्त-अष्ट-नवाक्षरमन्त्राः ३५०
दश-एकादशाक्षरमन्त्राः ३५५
द्वादशाक्षरमन्त्रः ३५७
त्रयोदश-चतुर्दश-पञ्चदशाक्षरमन्त्राः . . . ३५७
षोडश-सप्तदशाक्षरमन्त्राः . . . ३५८
अष्टादश-एकोनविंशार्णमन्त्राः . . . ३५८
विंशार्णमन्त्रः ३५८
एकविंशार्णमन्त्रः ३५९
द्वाविंशार्णमन्त्रः ३५९
त्रयोविंशार्णमन्त्रः ३५९
चतुर्विंशार्णमन्त्रः ३६०
पञ्चविंश-षड्विंश-सप्तविंशार्णमन्त्राः . . . ३६०

अष्टाविंश-एकोनत्रिंश-त्रिंश-एकत्रिंशार्णमन्त्राः . . ३६०
रामानुष्टुप् ३६१
रामगायत्री ३६१
राममालामन्त्रः ३६२
सीतामन्त्रः ३६३
लक्ष्मणमन्त्रः ३६३
भरतमन्त्रः ३६४
शत्रुघ्नमन्त्रः ३६४
हनूमन्मन्त्रः ३६४

तृतीयोऽध्यायः

पूजापीठजिज्ञासा ३६५
एकाक्षरादिनवाक्षरान्तमन्त्रपूजायन्त्रम् . . ३६५
आवरणपूजापूर्वकमनुजपः . . . ३६६
दशाक्षरादिद्वात्रिंशाक्षरान्तमन्त्रपूजायन्त्रम् . . ३६७
यन्त्राराधनपूर्वकमनुजपः ३६७

चतुर्थोऽध्यायः

राममन्त्रपुरश्चरणविधिः ३६८
ऐहिके राममन्त्रविनियोगनिषेधः . . . ३६९
ऐहिके हनूमत्स्मरणविधिः . . . ३६९

पञ्चमोऽध्यायः

रामषडक्षरस्य मन्त्रराजत्वम् . . . ३७०
श्रीरामबीजार्थः ३७१
त्र्यक्षरार्थः ३७२

षडक्षरार्थः ३७३
राममन्त्रमाहात्म्यम् ३७३
विद्याऽध्ययनफलम् ३७४

१३. वासुदेवोपनिषत्

ऊर्ध्वपुण्ड्रविधिजिज्ञासा ३७५
गोपीचन्दनस्वरूपम् ३७५
गोपीचन्दनोद्धार-धारणयोर्विधानम् . . . ३७६
ब्रह्मचार्यादीनां धारणप्रकारः . . . ३७६
त्रिपुण्ड्रस्य त्रिमूर्त्यादिरूपत्वम् . . . ३७७
ऊर्ध्वपुण्ड्रस्य प्रणवाधिकारिणैव धार्यत्वम् . . ३७८
तस्य परमहंसेनापि धार्यत्वम् . . . ३७८
वासुदेवध्यानप्रकारः ३७८
वासुदेवस्य सर्वात्मत्वम् ३७९
वासुदेवध्यानस्थानेषु गोपीचन्दनधारणम् . . ३८०
गोपीचन्दनभस्मनोर्धारणविधिः . . . ३८०
विद्याफलम् ३८१
केवलाध्ययनफलम् ३८२

१४. हयग्रीवोपनिषत्

हयग्रीवमन्त्रमहिमा ३८३
हयग्रीवमन्त्रत्रयम् ३८४
मन्त्रत्रयस्य ऋष्यादिध्यानान्तम् . . . ३८४
हयग्रीवतुरीयमनुः ३८५
हयग्रीवपञ्चममनुः ३८५

हयग्रीवैकाक्षरमनुः ३८५
वागादिसिद्धिकरः प्रयोगः ३८७
सप्तदशाक्षरमनुः ३८७
मन्त्रज्ञानफलम् ३८७
हयग्रीवमन्त्राणां महावाक्यार्थप्रतिपादकत्वम् . . ३८७
स्वरव्यञ्जनभेदेन मन्त्रस्य द्विविधत्वम् . . ३८८
अनुमन्त्राः ३८८
विद्याफलम् ३८९
विद्यां प्रति प्रार्थना ३८९
नामधेयपदसूची ३९१
विशेषपदसूची ३९७

अव्यक्तोपनिषत्

आप्यायन्तु—इति शान्तिः

सृष्टेः पुरा निर्विशेषब्रह्मस्थितिः

पुरा किलेदं न किंचनासीन्न द्यौर्नान्तरिक्षं न पृथिवी केवल-ज्योतीरूपमनाद्यनन्तमनण्वस्थूलरूपमरूपं रूपवदविज्ञे[1]यमानन्दमय-मासीत् ॥ १ ॥

स्वाज्ञानासुरराड्ग्रासंस्वज्ञाननरकेसरी ।
प्रतियोगिविनिर्मुक्तं ब्रह्ममात्रं करोतु माम् ॥

इह खलु सामवेदप्रविभक्तेयं अव्यक्तोपनिषत् सोपायमन्त्रराजयाथात्म्य-प्रकटनपूर्वकं निर्विशेषब्रह्ममात्रपर्यवसन्ना विजृंभते । अस्याः संक्षेपतो विवरण-मारभ्यते । अशरीरवागाविर्भावपूर्वकं इन्द्रप्रजापतिसंवादरूपेयमाख्यायिका विद्या-स्तुत्यर्था । अत्रादौ श्रुतिः परमार्थार्थप्रकटनपूर्वकं स्वाज्ञदृष्टिमवष्टभ्य प्रपञ्चसृष्टिक्रमं प्रकटयति—पुरेति । स्वाज्ञदृष्टेः पुरा स्वज्ञदृष्ट्या इदं जगत् न किंचन आसीत् । किं तदासीत् इत्यत्र केवलज्योतीरूपं इत्यादिविशेषणबोधितं यत् तत् स्वाज्ञादि-दृष्टिमोहे सत्यसति निष्प्रतियोगिकनिर्विशेषब्रह्ममात्रं आसीदित्यर्थः ॥ १ ॥

[1] यं ज्ञानमयमा—अ, अ १, अ २, क.

परमेष्टिप्रादुर्भावः

[1]तदन्यऽत्तद्वेधाऽभूद्धरितमेकं रक्तमपरम्। तत्र यद्रक्तं तत् पुंसो रूपमभूत् यद्धरितं तन्मायायाः। तौ समागच्छतः। तयोर्वीर्यमेवमनन्दत्। तदवर्धत। तदण्डमभूद्धैमम्। तत् परिणममानमभूत्। ततः परमेष्ठी व्यजायत ॥ २ ॥

ब्रह्मणो निष्प्रतियोगिकत्वेन ब्रह्मातिरिक्तप्रसक्तिरेव नास्ति; यदि स्वाज्ञदृष्ट्या स्यात् तदा तदन्यदिति। कालकर्मयोगतः तौ समागच्छतः। तयोः वीर्यमेवमनन्दत् प्रकृतिपुरुषवीर्ययोगस्तुष्टिमगमत्। कालवशात् दिने दिने तदवर्धत। यदेवं वृद्धिं गतं तदण्डमभूत् कालान्तरे हैमम्। तत् परिणममानमभूत्। यदाऽविद्याऽण्डं घनीभूय सुवर्णरूपेण परिणतं तदा ततः अविद्याऽण्डाधिकरण-भगवन्नाभिकमलात् परमेष्ठी व्यजायत ॥ २ ॥

परमेष्ठिनः स्वकृत्यजिज्ञासा

सोऽभिजिज्ञासत किं मे कुलं किं मे कृत्यमिति। तं ह वागदृश्यमानाऽभ्युवाच भो भो प्रजापते त्वमव्यक्तादुत्पन्नोऽसि व्यक्तं ते कृत्यमिति। किमव्यक्तं यस्मादहमासिषम्। किं तद्व्यक्तं यन्मे कृत्यमिति। [2]साऽब्रवीदविज्ञेयं हि तत् सौम्य तेजः। यदविज्ञेयं तदव्यक्तम्। तच्चेज्जिज्ञाससि मामवगच्छेति। स होवाच कैषा त्वं ब्रह्मवाग्वदसि शंसात्मानमिति। सा त्वब्रवीत्तपसा मां जिज्ञासस्वेति। [3]स ह सहस्रं समा ब्रह्मचर्यमध्युवासाध्युवास ॥ ३ ॥

[1] तदनन्य—अ, अ १, अ २ [2] सो—अ १, अ २, उ, क. सा—अ.
[3] 'सह' इति लुप्तः—अ, अ १, अ २, क, उ १.

य एवमाविर्भूतः सोऽभिजिज्ञासत। किमिति? किं मे कुलं किं मे कृत्यमिति। य एवं जिज्ञासुरास्ते तं ह वागदृश्यमाना अशरीरवाणी अभ्युवाच। किमिति? भो भो प्रजापते त्वं अव्यक्तात् अव्यक्तभावमापन्ननारायणात् उत्पन्नोऽसि व्यक्तं ते कृत्यमिति, कर्तव्यार्थस्य प्रपञ्चरूपत्वेन व्यक्तत्वात्। भगवत्सङ्कल्पाशरीरवाण्यैवमुक्तः पुनस्तामुद्दिश्योर्ध्वदृष्टिः पृच्छति—किमव्यक्तमिति। तमुद्दिश्य पुनः साऽब्रवीत्। किमिति? अविज्ञेयं हि तदिति, अव्यक्तत्वात्। तदेव विशदयति—यत्तव आविर्भावनिदानं सोम्य तेजः। पुनस्तत् ज्ञातव्यमिति मन्यमानमालक्ष्याह—तच्चेदिति। जिज्ञाससि ज्ञातुमिच्छसि। ब्रह्मविद्यारूपिणीं मामवगच्छेति। अशरीरवाणीवाचं श्रुत्वा परमेष्ठी स होवाच। किमिति? कैषेति। तद्वाक्यमाकर्ण्य सा त्वब्रवीत्। किमिति? तपसेति। "मनसश्चेन्द्रियाणां च ह्यैकाग्र्यं परमं तपः। तपसा प्राप्यते विद्या" इति स्मृतितः विद्यासिद्धिः तपोनिमित्तेत्यर्थः। एवं दैवीवाक्श्रवणानन्तरं असौ परमेष्ठी स ह सहस्रमिति। आवृत्तिः अनेकसंवत्सरावधिब्रह्मचर्याचरणोपलक्षणार्था ॥ ३ ॥

इति प्रथमः खण्डः

परमेष्ठिनः आनुष्टुभीविद्यादर्शनम्

अथापश्यदृचमानुष्टुभीं परमां विद्यां यस्याङ्गान्यन्ये मन्त्राः यत्र ब्रह्म प्रतिष्ठितं विश्वेदेवाः [वेदाः?] प्रतिष्ठिताः। यस्तां न वेद किमन्यैर्वेदैः करिष्यति ॥ १ ॥

ततः किं जातं इत्यत आह—अथेति। अथ तपश्चर्यानन्तरं आनुष्टुभीं विद्यामपश्यत्। तपसा विशुद्धचित्तस्य विद्या प्रादुरभूदित्यर्थः। प्रकृतविद्यां सर्वाधिकरणतया स्तौति—यस्येति। एवं सर्वाधारतया य इति ॥ १ ॥

आनुष्टुभीविद्यया नृसिंहदर्शनम्

तां विदित्वा स च रक्तं जिज्ञासयामास । तामेवमनूचानां गायन्नासिष्ट । सहस्रं समा आद्यन्तनिहितोङ्कारेण पदान्यगायत् । सहस्रं समास्तथैवाक्षरशः । ततोऽपश्यज्ज्योतिर्मयं श्रियाऽऽलिङ्गितं सुपर्णरथं शेषफणाच्छादितमौलिं मृगमुखं नरवपुषं शशिसूर्यहव्यवाह-नात्मकनयनत्रयम् ॥ २ ॥

प्रकृतविद्याया मन्त्रराजत्वेन सर्ववेदान्तसिद्धान्तार्थत्वेन च तां विदित्वा स च परमेष्ठी स्वाविर्भावहेतुं रक्तं परमपुरुषं जिज्ञासयामास ज्ञातुमुद्युक्तो बभूव । ततः किं कृतवानित्यत आह—तामिति । तपसा प्रादुर्भूतां आनुष्टुभीं विद्यां गायन्नासिष्ट गानं कुर्वन् स्थितवान् । कियन्तं कालं केन प्रकारेण गायन्नास्त गानफलं किं लब्धवान् इत्यत आह—सहस्रमिति । आदौ सहस्रं समाः । आद्यन्तप्रणवसंपुटितमन्त्रराजपदानि तद्वर्णांश्च गायन्नूर्ध्वाभिमुखः तस्थौ । ततः किं दृष्टवान् इत्यत्र—तत इति । परमेष्ठितपःफलदित्सया स्वाव्यक्ततामाच्छाद्य दिव्यमङ्गळविग्रहनृसिंहरूपेण व्यक्तत्वमेत्य प्रसन्नो बभूवेत्यर्थः ॥ २ ॥

नृसिंहस्तुतिः

ततः प्रजापतिः प्रणिपपात नमो नम इति । [1]तयैवर्चाऽथ तमस्तौत् । उग्रमित्याह उग्रः खलु वा एष मृगरूपत्वात् । वीरमित्याह वीरो वा एष वीर्यवत्त्वात् । महाविष्णुमित्याह महतां वा अयं महान्नोदसी व्याप्य स्थितः । ज्वलन्तमित्याह ज्वलन्निव खल्वसाव-वस्थितः । सर्वतोमुखमित्याह सर्वतः खल्वयं मुखवान् विश्वरूपत्वात् ।

[1] तयैव—अ १, अ २, क, उ. तयैव—अ.

नृसिंहमित्याह यथा यजुरेवैतत्। भीषणमित्याह भीषो वा अस्मादा-दित्य उदेति भीतश्चन्द्रमा भीतो वायुर्वाति भीतोऽग्निर्दहति भीतः पर्जन्यो वर्षति। भद्रमित्याह भद्रः खल्वयं श्रिया जुष्टः। मृत्यु-मृत्युमित्याह मृत्योर्वा अयं मृत्युरमृतत्वं प्रजानामन्नादानाम्। नमामीत्याह यथा यजुरेवैतत्। [1]अहमित्याह यथा यजुरेवैतत्॥ ३॥

प्रसन्नं भगवन्तं दृष्ट्वा अयं किमकुरुत इत्यत्र—**तत इति**। सार्थया विद्यया स्तुतवानित्यर्थः। तत्प्रकारः कथमित्यत्र—**उग्रमिति**। कथमुग्रत्वमित्यत्र—**उग्रः खलु वा एषः**। तस्योग्रत्वे को हेतुरित्यत्र—**मृगरूपत्वात्**। मृगराजस्यो-ग्रत्वप्रसिद्धेः, "मृगं न भीममुपहत्नुमुग्रम्" इति श्रुतेः। तथा **वीरमित्याह वीरो वा एषः**—इत्यादि समानम्। कुतः? **वीर्यवत्त्वात्** "यतो वीरः" इति श्रुतेः। महतामप्ययं **महान्** रोदसी द्यावापृथिव्यौ **व्याप्य** स्थितत्वात्, "य आविवेश भुवनानि विश्वा" इति श्रुतेः। **ज्वलन्तमित्यादि**, ज्योतिषामपि ज्योतीरूपत्वात् "ज्वलन् ज्वलिता तपन् वितपन् संतपन्" इति श्रुतेः। **विश्वरूपत्वात्**, "विश्वतश्चक्षुरुत विश्वतोमुखः" इति श्रुतेः। **नृसिंहमिति**, सर्वेषां भूतानां ना वीर्यतमः श्रेष्ठतमश्च, सिंहो वीर्यतमः श्रेष्ठतमश्च, "प्रतद्विष्णुस्तवते वीर्याय मृगः" इति श्रुतेः। **भद्रमिति**, "भद्रं कर्णेभिः शृणुयाम देवाः" इत्यादिश्रुतेः। **मृत्युमृत्युमिति**, स्वमात्रस्य स्वातिरिक्तमृत्युमृत्युत्वात्, "यस्य छायामृतं यस्य मृत्युः" इति श्रुतेः। **नमामीति** "यस्माद्यं सर्वे देवा नमन्ति मुमुक्षवो ब्रह्मवादिनश्च" इति श्रुतेः। **अहमिति** "वेदैश्च सर्वैरहमेव वेद्यः" इति श्रुतेः॥

इति द्वितीयः खण्डः

[1] अहमित्यादि वाक्यं नास्ति (अ, अ १) कोशयोः.

व्यक्तस्वरूपम्

अथ भगवांस्तमब्रवीत् प्रजापते प्रीतोऽहं किं तवेप्सितं तद्ददामि शंसेति। स होवाच भगवन्नव्यक्तादुत्पन्नोऽ[1]स्मि व्यक्तं मम कृत्यमिति पुराऽश्रावि। तत्राव्यक्तं [2]भवानित्य[3]ज्ञायि। व्यक्तं मे कथयेति। व्यक्तं वै विश्वं चराचरात्मकम्। यद्व्यज्यते तद्व्यक्तस्य व्यक्तत्वमिति ॥ १ ॥

एवं मन्त्रराजस्तवेन स्तुतः परमेश्वरः परमेष्ठीप्सितवरं ददावित्याह—**अथेति**। **अथ** तत्कृतस्तुत्यनन्तरम्। एवं भगवदनुज्ञां लब्ध्वा **स होवाच**। **पुरा** दैव्या वाचा। परमेष्ठिना एवं पृष्टो भगवानाह—**व्यक्तमिति** ॥ १ ॥

जगत्सृष्टयुपायो ध्यानयज्ञः

स होवाच न शक्नोमि जगत् स्रष्टुमुपायं मे कथयेति। तमुवाच पुरुषः प्रजापते शृणु सृष्टेरुपायं परमं यं विदित्वा सर्वं ज्ञास्यसि सर्वत्र शक्ष्यसि सर्वं करिष्यसि मय्यग्नौ स्वात्मानं हविर्ध्यात्वा तयैवानुष्टुभर्चा। ध्यानयज्ञोऽयमेव ॥ २ ॥

भगवदुक्तं अवगम्य **स होवाच**। किमिति? **न शक्नोमीति**। तेन पृष्टः **तमुवाच पुरुषः**। किमिति? **प्रजापते इति**। वक्ष्यमाणं **यं विदित्वा**। तमुपायमाचष्टे—**मयीति**। स्वातिरिक्तभ्रमतूलाचलाग्नौ परस्मिन् ब्रह्मणि **मयि स्वात्मानं** प्रत्यञ्चं हविः ध्यात्वा **तयैवानुष्टुभर्चा**। प्रत्यगभिन्नं ब्रह्मास्मीत्यनुसन्धानमेव **ध्यानयज्ञः** ॥ २ ॥

[1] सि—अ, अ १, अ २, क. स्मि—मु. [2] भगवा—अ १,
[3] ज्ञायि—अ, अ २, क. [त्या] ज्ञाय—उ, उ १, अ १.

ध्यानयज्ञमहिमा

एतद्वै महोपनिषद्देवानां गुह्यम्। न ह वा एतस्य साम्ना नर्चा न यजुषाऽर्थोऽनुविद्यते। य इमां वेद स सर्वान् कामानवाप्य सर्वान् लोकान् जित्वा मामेवाभ्युपैति। न च पुनरावर्तते य एवं वेदेति ॥ ३ ॥

यत्प्रत्यगभिन्नब्रह्मानुसन्धानं एतदिति। यत्प्रत्यग्ब्रह्मैक्यानुसंधानं तदेतदेव महती च सा उपनिषत् प्रत्यगभिन्नब्रह्मविद्या **महोपनिषत्** देवानामपि **गुह्यं**, परमरहस्यत्वात्। **एतस्य** एतेन ध्यानयज्ञेन योऽर्थोऽनुविद्यते सोऽयमर्थो न हि वेदत्रयेणाप्यनुविद्यते। **ह वा** इत्यवधारणार्थौ। ध्यानयज्ञस्य निर्विशेषब्रह्ममात्रपर्यवसन्नत्वात्, वेदत्रयस्य प्रायशः कर्मोपासनाकाण्डव्यग्रत्वेन सविशेषब्रह्मगोचरत्वात्, ध्यानयज्ञेन यदुपलभ्यते तद्वेदत्रयगोचरकर्मोपासनाभ्यां नैव लभ्यते। यस्मादेवं तस्मात् ध्यानयज्ञोऽयमेव वरिष्ठ इत्यर्थः। विद्याफलमाह— **य इति**। **यो** मयोक्तां निर्विशेषब्रह्मोपनिषदं **वेद सोऽयं** मुनिः स्वातिरेकेण कामा लोका वा न सन्तीति **सर्वकामानवाप्य सर्वलोकान् जित्वा** मद्भावमेत्य **न** हि **पुनरावर्तते**, "मामुपेत्य तु कौन्तेय पुनर्जन्म न विद्यते" इति स्मृतेः ॥

इति तृतीयः खण्डः

ध्यानयज्ञेन परमेष्ठिनः सर्वज्ञत्वादिलाभः

प्रजापतिस्तं यज्ञाय वसीयांसमात्मानं मन्यमानो मनोयज्ञेनेजे सप्रणवया तयैवर्चा हविर्ध्यात्वाऽऽत्मानमात्मन्यग्नौ जुहुयात्। सर्वमजानत् सर्वत्राशकत् सर्वमकरोत् ॥ १ ॥

ततः किं कृतवानित्यत्र भगवदुपदिष्टध्यानयज्ञानुष्ठानतः सर्वज्ञः सर्वशक्तिः सर्वकर्ता च भवतीत्याह—**प्रजापतिरिति**। परब्रह्माग्नौ स्वात्महोमेन स्वनाशशङ्कां विहाय यः पुरा विष्णुनाभिपद्मादाविर्भूतः **तं आत्मानं यज्ञाय यज्ञार्थं वसीयांसं मन्यमानः** सन् महता धैर्येण मानसिकयज्ञेनेजे यागं कृतवान्। कया तत् कथं कृतवानित्यत्र **सप्रणवया तयैवर्चा** उग्रं वीरमित्याद्येकादशपदोज्वलया अनुष्टुभा। प्रत्यगभिन्नब्रह्मैक्यानुसन्धानं कृतवान् तस्यैव ब्रह्मयज्ञत्वात्,

ब्रह्मार्पणं ब्रह्म हविः ब्रह्माग्नौ ब्रह्मणा हुतम्।
ब्रह्मैव तेन गन्तव्यं ब्रह्मकर्मसमाधिना ॥

इति स्मृतेः। ब्रह्मयज्ञफलं किमवाप्तवानित्यत्र प्रत्यगभिन्नब्रह्मानुसन्धानमहिम्ना ब्रह्मातिरेकेण न किंचिदस्तीति सर्वत्र आत्मात्मीयाभिमतिं विहाय यत् भवितव्यं तत् **सर्वम्**। सर्वज्ञः सर्वशक्तिः सर्वकर्ता च भवतीत्यर्थः ॥ १ ॥

अन्यस्यापि ध्यानयज्ञेन सर्वज्ञत्वादिलाभः

य एवं विद्वानिमं ध्यानयज्ञमनुतिष्ठेत् स सर्वज्ञोऽनन्तशक्तिः सर्वकर्ता भवति। स सर्वान् लोकान् जित्वा ब्रह्म परं प्राप्नोति ॥ २ ॥

य एवं वेद सोऽपि यथोक्तफलं अश्नुत इत्याह—**य इति**। यथा ब्रह्मा तथा **स सर्वान्** ॥

इति चतुर्थः खण्डः

लोकत्रयादिसृष्टिः

अथ प्रजापतिर्लोकान् सिसृक्षमाणस्तस्या एव विद्याया यानि त्रिंशदक्षराणि तेभ्यस्त्रीन् लोकान्। अथ द्वे द्वे अक्षरे ताभ्यामुभयतो

दधार। तस्या एवर्चो द्वात्रिंशद्भि[1]रक्षरैस्तान् देवान् निर्ममे। सर्वैरेव स इन्द्रोऽभवत्। तस्मादिन्द्रो देवानामधिकोऽभवत्। य एवं वेद समानानामधिको भवेत्॥ १॥

किमुपादाय अयं जगत् ससर्जेत्यत आह—अथेति। अथ भगवदुक्तरीत्या स्वकृतयज्ञफलसम्पत्त्यनन्तरं प्रजापतिः लोकान् सिसृक्षमाणः स्रष्टुं व्यवसितः सन् तपस्तप्यतोऽस्य या आनुष्टुभी विद्या प्रादुर्बभूव तस्या एव विद्यायाः अक्षरेषु यानि। त्रीन् लोकान् भूरादीन्—निर्ममे इत्युत्तरेणान्वयः। लोकत्रयं सृष्ट्वा पुनरक्षरद्वयतः तत् दधार। ततः किमित्यत्र—तस्या एवेति। यस्मादेवं तस्मात्। एवंविदः फलमाह—य इति॥ १–३॥

वसुरुद्रादित्यसृष्टिः

तस्या एकादशभिः पा[प]दैरेकादश रुद्रान् निर्ममे। तस्या एकादशभिरेकादशादित्यान् निर्ममे। सर्वैरेव स विष्णुरभवत्। तस्माद्विष्णुरादित्यानामधिकोऽभवत्। य एवं वेद समानानामधिको भवेत्। स चतुर्भिश्चतुर्भिरक्षरैरष्टौ वसूनजनयत्॥ २॥

चातुर्वर्ण्यसृष्टिः

स तस्या आद्यैर्द्वादशभिरक्षरैर्ब्राह्मणमजनयत्। दशभिर्दशभिर्विट्क्षत्रे। तस्माद्ब्राह्मणो मुख्यो भवति। एवं तन्मुख्यो भवति य एवं वेद। तूष्णीं शूद्रमजनयत् तस्माच्छूद्रो [2]निर्विद्योऽभवत्॥ ३॥

[1] रेवाक्ष—अ १, क.

[2] निर्विद्यो भवति—अ, क.

अहोरात्रसृष्टिः

न वा इदं दिवा न नक्तमासीदव्यावृत्तम्। स प्रजापतिरानुष्टुभ्याम्यामर्धर्चाभ्यामहोरात्रावकल्पयत् ॥ ४ ॥

इत्थंभूतविचित्रसृष्टेः अधिकरणसापेक्षत्वात् चित्रभित्तिवत् तदधिकरणं किं दिवा उत नक्तं इत्यत आह—नेति। सृष्टेः पुरा अधिकरणे न हि दिवानक्तकल्पनाऽस्ति, तदधिकरणं कल्पनाव्यावृत्तं कल्पनाविरळं सत् निरधिकरणमेवासीत्। तदेव ब्रह्मेत्यर्थः। स्वाज्ञदृष्टिविकल्पितसृष्टिप्रसक्तौ यन्निरधिकरणं तदधिकरणभावमेति, तदवष्टभ्य खलु स प्रजापतिः ॥ ४ ॥

वेदछन्दस्सृष्टिः

ततो व्यैच्छत्। व्येवास्मा उच्छति। अथो तम एवापहते। ऋग्वेदमस्या आद्यात् पादादकल्पयत्। यजुर्द्वितीयात्। साम तृतीयात्। अथर्वाङ्गिरसश्चतुर्थात्। यदष्टाक्षरपदा तेन गायत्री। यदेकादशपदा तेन त्रिष्टुप्। यच्चतुष्पदा तेन जगती। यद्वात्रिंशदक्षरा तेनानुष्टुप्। [1]सा वा एषा सर्वाणि छन्दांसि य इमां सर्वाणि छन्दांसि वेद। सर्वं जगदानुष्टुभ एवोत्पन्नमनुष्टुप्प्रतिष्ठितं प्रतितिष्ठति यश्चैवं वेद ॥ ५ ॥

एवं कल्पयित्वा इतः किं कल्पनीयमिति ततो व्यैच्छत् विशेषेण इच्छां कृतवान्। व्येवास्मा उच्छति अस्मा एवं चिन्तां उपेयुषे या उच्छेत्तव्या सृष्ट्यावृतिरेव तदिच्छामात्रेण उच्छति भिद्यते। अथो तम एवापहते अथ सृष्ट्यावृतिभेदनानन्तरं इतः कर्तव्यावृतिरूपं तम एवापहते नश्यति, न तु

[1] स वा—अ, अ १, अ २, क.

सृष्टिकर्तव्यताज्ञानम् । पुनः निरावृतः किं कृतवानित्यत्र स्वसृष्टप्राणिपटलाभ्युदयनिःश्रेयसार्थं ऋग्वेदमिति । ततः छन्दांसि सृजति—यदष्टाक्षरपदेति । एवं वेदनफलमाह—सेति । या अनुष्टुबिति ख्याता सा वा एषा सर्वाणि छन्दांसि, छन्दसामनुष्टुप्कार्यत्वात् । य इमां आनुष्टुभीम् । वेदनफलं तु प्रतितिष्ठतीति ॥ ५ ॥

इति पञ्चमः खण्डः

स्त्रीपुरुषमिथुनसृष्टिः

अथ यदा प्रजाः सृष्टा न जायन्ते प्रजापतिः कथंन्विमाः प्रजाः सृजेयमिति चिन्तयन्नुग्रमितीमामृचं गातुमु[1]पाक्रामत् । ततः प्रथमपादादुग्ररूपो देवः प्रादुरभूत् एकः श्यामः पुरतो रक्तः पिनाकी स्त्रीपुंसरूपस्तं विभज्य स्त्रीषु तस्य स्त्रीरूपं पुंसि च पुंरूपं व्यधात् । स उभाभ्यामाशाभ्यां सर्वमादि[वि]ष्टः । ततः प्रजाः प्रजायन्ते । य एवं [2]वेद सोऽपि त्र्यम्बक इमामृचमुद्गायन्नुद्ग्रथितजटाकलापः प्रत्यग्ज्योतिष्यात्मन्येव [3]रन्ता रमति ॥ १ ॥

एवं स्वसृष्टप्राणिपटलं निर्व्यापारमुपलभ्य कथमहं व्यापारवत्प्रजाः सृजेयमिति चिन्तयतः पूर्वलब्धविद्या प्रादुर्बभूव । तां गातुमुपक्रमतः उपक्रमं

[1] पक्रामन्—अ १, अ २, क. पक्रामत्—अ.
[2] वेद प्रजापतेः सो—अ, अ १, अ २, क.
[3] रन्तारमिति—अ, अ १, अ २, क, उ. रन्ता रमति—उ १.

कुर्वतः विद्याऽर्थरूपी भगवानर्धनारीश्वरो भूत्वा प्रादुर्बभूव । न हि निराशाः प्रजाः सृष्टिचक्रे प्रवर्तन्ते इत्यालोच्य परस्पराशाबद्धं स्त्रीपुरुषमिथुनं ससर्ज । ततः प्रभृति सृष्टिचक्रं यथापूर्वकल्पं चलतीत्याह—अथेति । ततः अनुष्टुभः प्रथमपादादुमरूपो देवो नृसिंहः प्रादुरभूत् पृष्ठतः एकः श्यामः स्त्रीलिङ्गचिह्नितः, पुरतो रक्तपिनाकी रक्तशब्देन पुमांश्चासौ पिनाकपाणिश्चेति रक्तपिनाकी पुल्लिङ्गचिह्नितः, एवं स्त्रीपुंसरूपः । य इत्थंभूतकळेबरः तं विभज्य । य एवं कृतवान् सः स्वसृष्टप्राणिपटलमाविष्टः । ततः प्रभृति प्रजाः सृष्ट्यनुकूलव्यापारवत्यः प्रजायन्ते । वेदनफलं—य एवं वेद सोऽप्येवं प्रजायते । य एवं स्त्रीपुरुषसृष्टिं कृतवान् सोऽपि त्र्यम्बकः त्र्यक्षः पिनाकी भूरादित्रिपुरोपलक्षितविद्यापदतत्कार्यानन्तकोटिब्रह्माण्डाम्बकस्वामी वा नृसिंहः इमामृचं स्वात्मानुसन्धानरूपिणीं उद्गायन् उद्ग्रथितजटाकलापः ऊर्ध्वीकृतसटाकलापो वा प्रत्यग्ज्योतिष्यात्मन्येव रन्ता रमति रमते । स्वातिरिक्तबाह्यरत्यनुकूलवस्तुनोऽवस्तुत्वात् स्वस्य स्वस्मिन्नेव रतिरुपपद्यत इत्यर्थः ॥

इन्द्राख्यायिका

इन्द्रो वै किल देवानामानुजावर आसीत् । तं प्रजापतिरब्रवीद्गच्छ देवानामधिपतिर्भवेति । सोऽगच्छत् । तं देवा ऊचुरानुजावरोऽसि त्वमस्माकं कुतस्त्वाधिपत्यमिति । स प्रजापतिमभ्येत्योवाचेमं देवा ऊचुरानुजावरस्य कुतस्त्वाधिपत्यमिति । तं प्रजापतिरिन्द्रं त्रिकलशैरमृतपूर्णैरानुष्टुभाभिमन्त्रितैरभिषिच्य तं सुदर्शनेन दक्षिणतो ररक्ष पाञ्चजन्येन वामतो द्वयेनैव सुरक्षितोऽभवत् । रौक्मे फलके सूर्यवर्चसि मन्त्रमानुष्टुभं विन्यस्य तदस्य कण्ठे प्रत्यमुञ्चत् । ततः सुदुर्निरीक्षोऽभवत् । तस्मै विद्यामानुष्टुभीं प्रादात् । ततो देवास्त-

माधिपत्यायानुमेनिरे । स स्वराडभूत् । य एवं वेद स्वराड् भवेत् । सोऽमन्यत [1]पृथिवीमिमां कथं जयेयमिति । स प्रजापतिमुपाधावत् । तस्मात् प्रजापतिः कमठाकारमिन्द्रनागभुजगेन्द्राधारं भद्रासनं प्रादात् । स पृथिवीमभ्यजयत् । ततः स उभयोर्लोकयोरधिपतिरभूत् । य एवं वेदोभयोर्लोकयोरधिपतिर्भवति । स पृथिवीं जयति ॥ २ ॥

इन्द्राख्यायिकामवतारयति—इन्द्र इति । **आनुजावरः अधिपतिः** आसीत् । यः स्वनिकटमेत्य शरणं गतः **तं प्रजापतिः अब्रवीत्** । किमिति ? **गच्छेति** । तदाज्ञां शिरसा धृत्वा देवानां निकटं **सोऽगच्छत्** । **तं देवा ऊचुः** । किमिति ? किं **आनुजावरोऽसि** ? । देवैः एवमधिक्षिप्तः **सः** । एवमुक्तवन्तं **तम्** । पुनः **तम्** । **वामतो** ररक्षेत्यर्थः । एवं मूर्तिभूतसुदर्शनपाञ्चजन्यतेजसा **द्वयेनैव सुरक्षितोऽभवत्** । पुनः प्रजापतिः तत्कृते किं कृतवानित्यत्र—**रौक्मे फलके** सौवर्णपीठे **सूर्यवर्चसि** । यत एवं दिव्यतेजसा बभौ **ततो देवाः** । एवं जानतः फलमाह—**स स्वराडभूत्** इति । य एवं देवराज्ये अभिषेचितः **सोऽमन्यत** । किमिति ? पृथिवीमिति । **तस्मात् . . . प्रादात्, इन्द्राद्यष्टदिक्पालैः** अष्टदिङ्नागैः गजैः अष्टदिक्फणीन्द्रैः अलङ्कृतं कूर्माकारं **भद्रासनं** दत्तवानित्यर्थः । भद्रासनयोगतः अयं **स पृथिवीमभ्यजयत्** । **य एवं वेद स उभयोः** ॥ २ ॥

परमात्मप्रतिष्ठासाधनम्

यो वा अप्रतिष्ठितं शिथिलं भ्रातृव्येभ्यः परमात्मानं मन्यते स एतमासीनमधितिष्ठेत् । प्रतिष्ठितोऽशिथिलो भ्रातृव्येभ्यो वसीयान् भवति यश्चैवं वेद यश्चैवं वेद ॥ ३ ॥

[1] पृथिवीमपि कथमपां ज—अ, अ १, अ २, क, मु.

यस्तु स्वप्रतिकूलभावमापन्नबाह्यान्तःकरणरूपभ्रातृव्येभ्यः शत्रुभ्यः प्रत्यगभिन्नपरमात्मानं स्वपदे अप्रतिष्ठितं देहादावात्मात्मीयाभिमानतः शिथिलं जीवभावमापन्नं मन्यते सोऽयं विद्वान् स्वातिरिक्तप्रपञ्चारोपापवादाधिष्ठानतया स्वे महिम्नि आसीनं परमात्मानं निष्प्रतियोगिकाद्वैतभावेन अधितिष्ठेत् प्रत्यगभिन्नं ब्रह्मास्मीति स्थिरासनो भवेत्। एवं भावनया अयं स्वे महिम्नि प्रतिष्ठितः। एवं वेदनसमकालं स्वातिरिक्तकरणग्रामतत्कार्यकलनापह्नवसिद्धनिष्प्रतियोगिकब्रह्ममात्र-भावेन स्वे महिम्नि स्वयमेव वसीयान् भवति विदेहमुक्तो भवतीत्यर्थः। आवृत्तिः परापरब्रह्मविद्यासमाप्त्यर्था ॥ ३ ॥

इति षष्ठः खण्डः

एतद्विद्याऽध्ययनफलम्

य इमां विद्यामधीते स सर्वान् वेदानधीते। स सर्वैः क्रतुभिर्यजते। स सर्वतीर्थेषु स्नाति। स महापातकोपपातकैः प्रमुच्यते। स ब्रह्मवर्चसं महदाप्नुयात्। आब्रह्मणः पूर्वानाकल्पांश्चोत्तरांश्च वंश्यान् पुनीते। नैनमपस्मारादयो रोगा अधिदेयुः। सयक्षाः सप्रेतपिशाचा अप्येनं स्पृष्ट्वा दृष्ट्वा श्रुत्वा वा पापिनः पुण्यलोकानवाप्नुयुः। चिन्तितमात्रादस्य सर्वेऽर्थाः [1]सिध्येयुः। पितरमिवैनं सर्वे मन्यन्ते। राजानश्चास्या[2]देशकारिणो भवन्ति। न चाचार्यव्यतिरिक्तं श्रेयांसं दृष्ट्वा नमस्कुर्यात्। न चास्मादुपावरोहेत्। जीवन्मुक्तश्च भवति।

[1] अध्येयुः—अ, अ १, क. [2] देशाधिका—अ, अ २, क.

देहान्ते तमसः परं धाम प्राप्नुयात्। यत्र विराण् नृसिंहोऽवभासते तत्र खलूपासते। तत्स्वरूपध्यानपरा मुनय आकल्पान्ते तस्मिन्नेवात्मनि लीयन्ते। न च पुनरावर्तन्ते ॥ १ ॥

एतच्छास्त्रपठनपाठनवेदनफलप्रकटनार्थं सप्तमखण्डिका आरभ्यते—य इति। न चास्मादुपावरोहेत्, एतस्मादन्याश्रयणं न कुर्यात्। एतावन्मात्रानुष्ठानतो जीवन्मुक्तश्च भवति ॥ १ ॥

एतद्विद्यासंप्रदानविधिः

न चेमां विद्यामश्रद्दधानाय ब्रूयान्नासूयावते ना[न]नूचानाय नाविष्णुभक्ताय [1]नानृतिने नातपसे नादान्ताय नाशान्ताय नादीक्षिताय नाधर्मशीलाय न हिंसकाय नाब्रह्मचारिण इत्येषोपनिषत् ॥ २ ॥

शास्त्रसंप्रदायमाह—न चेमामिति ॥ २ ॥

• इति सप्तमः खण्डः

श्रीवासुदेवेन्द्रशिष्योपनिषद्ब्रह्मयोगिना।
अव्यक्तोपनिषद्व्याख्या लिखिता नरसिंहगा।
अव्यक्तविवृतिग्रन्थः पञ्चाशदधिकं शतम् ॥

इति श्रीमदीशाद्यष्टोत्तरशतोपनिषच्छास्त्रविवरणे अष्टषष्टिसङ्ख्यापूरकं अव्यक्तनृसिंहोपनिषद्विवरणं संपूर्णम् ॥

---

[1] नाव्रतिने—उ १.

कलिसंतरणोपनिषत्

सह नाववतु—इति शान्तिः

भगवन्नामस्मरणमात्रेण कलिसंतरणम्

द्वापरान्ते नारदो ब्रह्माणं जगाम कथं भगवन् गां पर्यटन् कलिं संतरेयमिति । स होवाच ब्रह्मा साधु पृष्टोऽस्मि सर्वश्रुतिरहस्यं गोप्यं तच्छृणु येन कलिसंसारं तरिष्यसि । भगवत आदिपुरुषस्य नारायणस्य नामोच्चारणमात्रेण निर्धूतकलिर्भवतीति ॥ १ ॥

यद्दिव्यनाम स्मरतां संसारो गोष्पदायते ।
स्वानन्यभक्तिर्भवति तद्रामपदमाश्रये ॥

इह खलु कृष्णयजुर्वेदप्रविभक्तेयं कलिसन्तरणोपनिषत् स्वातिरिक्तास्तित्व-भ्रमनिरासकनाममाहात्म्यप्रकटनव्यग्रा निष्प्रतियोगिकब्रह्ममात्रपर्यवसन्ना विजयते । अस्याः स्वल्पग्रन्थतो विवरणमारभ्यते । नारदब्रह्मप्रश्नप्रतिवचनरूपेयमाख्यायिका विद्यास्तुत्यर्था । आख्यायिकामवतारयति—**द्वापरान्त इति** । नारदेनैवं पृष्टः **स होवाच ब्रह्मा** । किमुवाचेत्यत्र—**साध्विति** । **येन** भगवन्नामोच्चारणमात्रेण ब्रह्महत्याऽऽदिपञ्चमहापातकपरद्रव्यपरदाराभिमर्शनपरश्रेयोऽसहिष्णुताऽऽद्यलंकृत - **कलिसंसारं तरिष्यसि**, इदित्थंभूतकलिसन्तरणोपायभूतमभक्ताय कदाऽप्यप्रकट-

नीयत्वात् गोप्यं, किं तत्प्रमाणविरळं केवलमुपदिश्यत इत्यत्र सर्वश्रुतिस्मृतिषु पञ्चमहापातकादिकोटिदोषनिरसनपूर्वं भगवत्पदप्रापकत्वेन प्रसिद्धं तद्रहस्यार्थमपि केवलकृपयोपदिश्यते तच्छृणु । कास्तास्तत्प्रशंसापराः श्रुतयः स्मृतयश्च इत्यत्र—

कृतं दिने यद्दुरितं पक्षमासर्तुवर्षजम् ।
सर्वं दहति निःशेषं तूलाचलमिवानलः ॥
ब्रह्महत्यासहस्राणि ज्ञानाज्ञानकृतानि च ।
स्वर्णस्तेयसुरापानगुरुतल्पायुतानि च ॥
कोटिकोटिसहस्राणि उपपातकजान्यपि ।
सर्वाण्यपि प्रणश्यन्ति रामनामानुकीर्तनात् ॥
यत्प्रयागादितीर्थोक्तप्रायश्चित्तशतैरपि ।
नैवापनोद्यते पापं तदप्याशु विनाशयेत् ॥
पुण्यक्षेत्रेषु सर्वेषु कुरुक्षेत्रादिषु स्वयम् ।
बुद्धिपूर्वमघं कृत्वा तदप्याशु विनाशयेत् ॥
कृच्छ्रैस्तप्तपराकाद्यैर्नानाचान्द्रायणैरपि ।
पापं च नापनोद्यं यत्तदप्याशु विनाशयेत् ॥
आत्मतुल्यसुवर्णादिदानैर्बहुविधैरपि ।
किंचिदप्यपरिक्षीणं तदप्याशु विनाशयेत् ॥
सदा रामोऽहमस्मीति तत्त्वतः प्रवदन्ति ये ।
न ते संसारिणो नूनं राम एव न संशयः ॥

इत्याद्याः श्रुतयः,

चतुर्विधा भजन्ते मां जनाः सुकृतिनोऽर्जुन ॥
ओमित्येकाक्षरं ब्रह्म व्याहरन् मामनुस्मरन् ।
यः प्रयाति त्यजन् देहं स याति परमां गतिम् ॥
सततं कीर्तयन्तो मां यतन्तश्च दृढव्रताः ।
नमस्यन्तश्च मां भक्त्या नित्ययुक्ता उपासते ॥

विवशेन प्रयत्नेन ज्ञानेनाज्ञानतोऽपि वा ।
नामस्मरणतोऽपापो विद्वानमृतमश्नुते ॥

इत्याद्याः स्मृतयश्च । एवं नामस्मरणतः कलिः नश्यतीत्याह—भगवत इति ॥ १ ॥

परब्रह्मावरणावनाशकषोडशनामानि

नारदः पुनः पप्रच्छ तन्नाम किमिति । स होवाच हिरण्यगर्भः ।

हरे राम हरे राम राम राम हरे हरे ।
हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे ॥
इति षोडशकं नाम्नां कलिकल्मषनाशनम् ।
नातः परतरोपायः सर्ववेदेषु दृश्यते ॥

षोडशकलाऽऽवृतस्य जीवस्यावरणविनाशनम् । ततः प्रकाशते परं ब्रह्म मेघापाये रविरश्मिमण्डलीवेति ॥ २ ॥

एवं श्रुतिस्मृतिप्रमाणसिद्धभगवन्नामस्मृतितो निःशेषकलिहानिं श्रुत्वा तन्नामेदमिति बुभुत्सया **नारदः पुनः पप्रच्छ** । नारदप्रश्नोत्तरं **स होवाच हिरण्यगर्भः** । किं तदित्यत्र—**हरे रामेति** । स्वातिरिक्ताविद्यापदतत्कार्यजातं स्वावशेषतया हरतीति **हरिः** । निष्प्रतियोगिकब्रह्ममात्रतया राजते महीयत इति **रामः** । कृष्यते क्लिश्यते इति कृषिशब्देन कलिरुच्यते, तं कलिं स्वभक्तकृत-संकृत्स्मरणमात्रेण निःशेषं मुष्णाति ग्रसति निःशेषीकरोतीति **कृष्णः**, तस्य संबुद्धिः **हरे राम कृष्ण** इति । रामकृष्णनाम्नोः मिथः हरिनामसमन्वयतः **नाम्नां षोडशकं** भवति । षोडशनाम सकृदुच्चारितं सत् **कलिकल्मषमुन्मूलयति** । सर्वश्रुतिस्मृतिपुराणेषु **नातः परतरोपायो दृश्यते** । अयमेव परमोपाय इत्यर्थः ।

एवं नामस्मृतितो जीवावृतौ भिन्नायां अथ निर्विशेषं ब्रह्म प्रकाशत इत्याह—षोडशेति। प्राणादिनामान्तषोडशकलाभिः आवृतस्य जीवस्य एतत्षोडशकं नाम जीवावरणविनाशकं भवति। एवं भगवन्नामस्मृतिखड्गेन स्वावरणे भिन्ने मेघापाये अंशुमानिव ततः प्रकाशते परं ब्रह्म निष्प्रतियोगिकस्वमात्रमिति ॥ २ ॥

नामजपमहिमा

पुनर्नारदः पप्रच्छ भगवन् कोऽस्य विधिरिति। तं होवाच नास्य विधिरिति। सर्वदा शुचिरशुचिर्वा पठन् ब्राह्मणः सलोकतां समीपतां [1]सरूपतां [2]सायुज्यतामेति। यदाऽस्य [3]षोडशीकस्य सार्धत्रिकोटीर्जपति तदा ब्रह्महत्यां तरति। तरति वीरहत्याम्। स्वर्णस्तेयात् पूतो भवति। वृषलीगमनात् पूतो भवति। पितृदेव-मनुष्याणामपकारात् पूतो भवति। सर्वधर्मपरित्यागपापात् सद्यः शुचितामाप्नुयात्। सद्यो मुच्यते सद्यो मुच्यते इत्युपनिषत् ॥ ३ ॥

इत्थंप्रभाववन्नामस्मरणविधिबुभुत्सया पुनः मुनिः भगवन्तं पृच्छतीत्याह—पुनरिति। पुनः नारदः पप्रच्छ—किमिति? भगवन् कोऽस्य नामस्मरणस्य विधिरिति। उत्तरं भगवानाचष्टे—तमिति। तत् कथमित्यत्र—सर्वदेति। षोडशनामात्मकविद्यायाः श्रौतत्वेन द्विजातिरेव सर्वदा शुचिरशुचिर्वाऽपि पठन् स्मरन् सालोक्यादिचतुर्विधमुक्तिमेति, श्रौतेतरनामसु स्त्रीशूद्राणामधिकारः इत्यत्र—

सदा रामेति नामैव स्मरतामघशान्तये।
निःशेषं नाशयित्वाऽथ क्रममुक्तिं विधास्यति ॥
स्वान्तःकरणसंभूतसञ्चिताघनिवृत्तये।
सर्ववर्णैराश्रमिभिः स्मर्तव्यं नाम सर्वदा ॥

[1] 'सरूपतां' इति (अ, अ १.) कोशयोः नास्ति. [2] सायुज्यमे—अ.
[3] षोडशि—अ १, अ २, उ १, क. षोडश—अ.

नाम कीर्तयतो नास्ति पातकमित्यत्र शपथयति—

नाम कीर्तयतः पुंसो नास्ति पातकमण्वपि ।
गृह्णामि तत्तायःपिण्डमहिभाण्डे करं क्षिपे ॥
नाम स्मर्तुरपापित्वादकार्यं न भवेन्मतिः ॥

इत्यादिनामार्थविवेकोक्तेः । ब्रह्महत्याऽऽदिपातकनिवृत्तये कियत् स्मर्तव्यमित्यत्र, अनधिकारिणः यथोक्तसङ्ख्यया नाम स्मर्तव्यं, अधिकारिणा तु नामार्थानुसन्धानपूर्वकं सर्वदा सकृद्वा स्मर्तव्यं, तेन स्वाङ्गः स्वाघतो मुच्यते, स्वङ्गस्तु स्वातिरिक्तभ्रमतो मुच्यत इत्याह—यदेति । स्वातिरिक्ताविद्यापदतत्कार्यासंभवप्रबोधसिद्धनिष्प्रतियोगिकब्रह्ममात्रतया राजते महीयत इति रामनामसकृत्स्मरणात् सद्यः स्मरणसमकालमेव स्वातिरिक्तभ्रमतो मुच्यते ब्रह्मैव भवतीत्यर्थः । इत्युपनिषच्छब्दः कलिसन्तरणोपनिषत्समाप्त्यर्थः ॥

श्रीवासुदेवेन्द्रशिष्योपनिषद्ब्रह्मयोगिना ।
कलिसन्तारविवृतिः लिखिता हरिगोचरा ।
कलिसन्तारविवृतिः चत्वारिंशदितीरिता ॥

इति श्रीमदीशाद्यष्टोत्तरशतोपनिषच्छास्त्रविवरणे त्रिसङ्ख्योत्तरशतसङ्ख्यापूरकं
कलिसन्तरणोपनिषद्विवरणं सम्पूर्णम् ॥

कृष्णोपनिषत्

भद्रं कर्णेभिः—इति शान्तिः

रामचन्द्रस्य कृष्णावतारप्रतिज्ञा

श्रीमहाविष्णुं सच्चिदानन्दलक्षणं रामचन्द्रं दृष्ट्वा सर्वाङ्गसुन्दरं मुनयो वनवासिनो विस्मिता बभूवुः । तं होचुर्नोऽवधमवतारान् वै गण्यन्ते आलिङ्गामो [1]भवन्तमिति । भवान्तरे कृष्णावतारे यूयं गोपिका भूत्वा मामालिङ्गथ । अन्ये येऽव[2]तारास्ते हि मोघा नः स्त्रीश्च (नो) कुरु ।

अन्योन्यविग्रहं धार्यं तवाङ्गस्पर्शनादिह ।
शश्वत् स्पर्शयिताऽस्माकं गृह्णामोऽवतरा वयम् ॥ १ ॥
रुद्रादीनां वचः श्रुत्वा प्रोवाच भगवान् स्वयम् ।
अङ्गसङ्गं करिष्यामि भवद्वाक्यं करोम्यहम् ॥ २ ॥

यो रामः कृष्णतामेत्य सार्वात्म्यं प्राप्य लीलया ।
अतोषयद्देवमौनिपटलं तं नतोऽस्म्यहम् ॥

इह खलु अथर्वणवेदप्रविभक्तेयं श्रीकृष्णोपनिषत् सार्वात्म्यप्रकटनव्यग्रा ब्रह्ममात्रपर्यवसन्ना विजयते । अस्याः संक्षेपतो विवरणमारभ्यते । मौनिमण्डल-

[1] भगव—अ २. [2] तरा—अ १.

भगवत्प्रश्नप्रतिवचनरूपेयमाख्यायिका विद्यास्तुत्यर्था। आख्यायिकामवतारयति—**श्रीति**। **तं होचुः**—किमिति? **नोऽवद्यमिति**। हे रामचन्द्र त्वद्रूपं **नोऽवद्यं** स्वेतरकलनाऽसहसत्तासामान्यरूपं, निष्प्रतियोगिकसन्मात्रत्वात्, "पश्यतेहापि सन्मात्रमसदन्यत्", "ब्रह्ममात्रमसन्न हि" इत्यादिश्रुतेः। स्वाङ्गलोकस्वपदादि-हेतवे भगवत्कृतमत्स्याद्यवतारान् **वै** मुनयो वयं मन्यामहे। ब्रह्मादिभिरपि एवमेव भगवदवतारा: स्वाङ्गस्वपदादिहेतव इति **गण्यन्ते** चिन्त्यन्ते इत्यर्थः। यत एवं अतो **भवन्तं** व्यष्टिसमष्टिप्रपञ्चोपाधितः तदारोपापवादाधारस्वरूपतश्च **आलिङ्गामः** आलिङ्गनं कुर्मः। **इति** देवर्षिपटलवचनमाकर्ण्य, पुंभिः पुंसामालिङ्गनस्यारमणीयत्वात्, यदि यूयं योगशक्त्या स्त्रीत्वं भजन्तः तदाऽपि मम सत्यवाक्सत्यप्रतिज्ञापूर्वकमेकदारव्रतत्वात् अतः **भवान्तरे** इति। इत्थं भगवद्वाक्यमाकर्ण्य देवा ऋषयश्च तुष्टा आहुरित्याह—**अन्य इति**। कृष्णावतारं कुर्वतस्ते **अन्ये ये अवतारा:** बलगोपबृन्दरूपेण ये अन्ये पुंभावापन्ना अवतारा भविष्यन्ति हे भगवन् तत्र तदा **नः** अस्मान् **स्त्रीश्च** स्त्रियः **कुरु**, तत्राप्यस्माकं अस्वतन्त्रत्वात्। **हि**शब्दोऽस्माकं अनीश्वरत्वख्यापनार्थः। तदेवाधुना—सर्वेश्वरस्य **तव** सदा **अङ्गस्पर्शनात्** स्पर्शनार्थं त्वयेश्वरेण त्वत्प्रसादतोऽस्माभिश्च रासक्रीडाऽनुकूलतया **अन्योन्यानुकूलविग्रहं धार्य** यथा अस्माकं त्वद्भावपरतन्त्राणां गात्राणि भवान् **शश्वत्** मुहुर्मुहुः **स्पर्शयिता** भवति तथा **वयं अवतरा** अवतारान् **गृह्णामो** गृह्णीमः कुर्मः॥ १॥ इत्येवंरूपं **रुद्रादीनां**, आदिशब्दवाच्यवस्वादित्यादिदेवानां, तथा ऋषीणां च **वचः श्रुत्वा प्रोवाच**। किमिति? भवतां **अङ्गसङ्गं करिष्यामि**॥ २॥

भगवतः सार्वात्म्यवर्णनम्

मोदितास्ते [1]सुराः सर्वे कृतकृत्याऽधुना वयम्।
यो नन्दः परमानन्दो यशोदा मौक्तिकेहिनी॥ ३॥

[1] नराः—अ, अ १

माया सा त्रिविधा प्रोक्ता सत्त्वराजसतामसी ।
प्रोक्ता च सात्विकी [1]रुद्रे भक्ते ब्रह्मणि राजसी ॥ ४ ॥
तामसी दैत्यपक्षेषु माया त्रेधा ह्युदाहृता ।
[2]अजया वैष्णवी माया जज्ञेन च सुता [3]पुरा ॥ ५ ॥
देवकी [4]ब्रह्मपुत्रा सा या वेदैरुपगीयते ।
निगमो [5]वसुदेवो यो वेदार्थः कृष्णरामयोः ॥ ६ ॥
स्तुवन्ति सततं [6]यस्तु सोऽवतीर्णो महीतले ।
वने वृन्दावने क्रीडन् गोपगोपीसुरैः सह ॥ ७ ॥
गोप्यो गाव ऋचस्तस्य यष्टिका कमलासनः ।
वंशस्तु भगवान् रुद्रः शृङ्गमिन्द्रः [7]सघोऽसुरः ॥ ८ ॥
गोकुलं वनवैकुण्ठं तापसास्तत्र ते द्रुमाः ।
लोभ[8]क्रोधादयो दैत्याः कलिकालस्तिरस्कृतः ॥ ९ ॥
गोपरूपो हरिः साक्षान्मायाविग्रहधारणः ।
दुर्बोधं कुहकं तस्य मायया मोहितं जगत् ॥ १० ॥
दुर्जया सा सुरैः सर्वैर्धृष्टिरूपो भवेद्विजः ।
रुद्रो येन कृतो वंशस्तस्य माया जगत् कथम् ॥ ११ ॥
बलं ज्ञानं सुराणां वै तेषां ज्ञानं हृतं क्षणात् ।
शेषनागो भवेद्रामः कृष्णो ब्रह्मैव शाश्वतम् ॥ १२ ॥

[1] रुद्रभ—अ १. [2] अजेया—अ १, अ २, क. [3] सुरो—अ, अ १.
[4] ब्रह्मपुत्री—अ २. [5] वासु—अ १. [6] यन्तु—अ, अ १.
[7] सखा—अ. सघा—अ १. सघो—अ २, क.
[8] लोभक्रोधभया—अ, क.

अष्टावष्टसहस्रे द्वे शताधिक्याः स्त्रियस्तथा ।
ऋचोपनिषदस्ता वै ब्रह्मरूपा ऋचः स्त्रियः ॥ १३ ॥
द्वेषश्चाणूरमल्लोऽयं मत्सरो मुष्टिको जयः ।
दर्पः कुवलयापीडो गर्वो रक्षः खगो बकः ॥ १४ ॥
दया सा रोहिणी माता सत्यभामा धरेति वै ।
अघासुरो महाव्याधिः कलिः कंसः स भूपतिः ॥ १५ ॥
शमो मित्रः सुदामा च सत्याऽक्रूरोद्धवो दमः ।
यः शङ्खः स स्वयं विष्णुर्लक्ष्मीरूपो व्यवस्थितः ॥ १६ ॥
दुग्धसिन्धौ समुत्पन्नो मेघघोषस्तु [1]स स्मृतः ।
दुग्धोदधिः कृतस्तेन भग्नभाण्डो दधिग्रहे ॥ १७ ॥
क्रीडते बालको भूत्वा पूर्ववत् सुमहोदधौ ।
संहारार्थं च शत्रूणां रक्षणाय च संस्थितः ॥ १८ ॥
कृपार्थे सर्वभूतानां गोप्तारं धर्ममात्मजम् ।
यत् सृष्टमीश्वरेणासीत् तच्चक्रं ब्रह्मरूपधृक् ॥ १९ ॥
जयन्तीसंभवो वायुश्चमरो धर्मसंज्ञितः ।
यस्यासौ ज्वलनाभासः खड्गरूपो महेश्वरः ॥ २० ॥
[2]कश्यपोलूखलः ख्यातो रज्जुर्माताऽदितिस्तथा ।
चक्रं शङ्खं च [3]संसिद्धिं बिन्दुं च सर्वमूर्धनि ॥ २१ ॥
यावन्ति देवरूपाणि वदन्ति विबुधा जनाः ।
नमन्ति देवरूपेभ्य एवमादि न संशयः ॥ २२ ॥

[1] संस्मृतः—अ, अ २. [2] का—अ, अ १. [3] संसिद्धं-

गदा च कालिका साक्षात् सर्वशत्रुनिबर्हिणी ।
धनुः शार्ङ्गं स्वमाया च शरत्कालः सुभोजनः ॥ २३ ॥
अब्जकाण्डं जगद्बीजं धृतं पाणौ स्वलीलया ।
गरुडो वटभाण्डीरः सुदामा नारदो मुनिः ॥ २४ ॥
वृन्दा भक्तिः क्रिया बुद्धिः सर्वजन्तुप्रकाशिनी ।
तस्मान्न भिन्नं नाभिन्नमाभिर्भिन्नो न वै विभुः ॥ २५ ॥
भूमावुत्तारितं सर्वं वैकुण्ठं स्वर्गवासिनाम् ॥ २६ ॥ इत्युपनिषत् ॥

सत्यवाग्भिरुदञ्चितश्रीरामचन्द्रसूक्तिमाकर्ण्य **मोदितास्ते सुराः सर्वे ऋषयश्च कृतकृत्याऽधुना वयमिति** । देवर्षिबृन्दकृते यत्प्रतिज्ञातं तत्परिपालनाय रामावतारमुपसंहृत्य स्वयमेव साङ्गसावरणसपरिवारसशक्तिकः श्रीकृष्णो बभूव । तत्र नन्दयशोदाऽऽदिपरिवारसहितं भगवतः सार्वात्म्यमवतारयति —**यो नन्द इति** । भगवतः स्वरूपभूतपरमानन्द एव **नन्दो** बभूव । परमानन्दं भगवन्तं पुत्रभावेन आप्य सदा अभिनन्दितत्वात् अस्य नन्दत्वम् । स्वभक्तानां यशः ख्यातिं ज्ञानं ददातीति **यशोदा** निर्विशेषब्रह्मविद्या स्वनिष्ठानां स्वातिरिक्तास्तित्व-भ्रममुक्तेरावासगेहरूपेयमिति मुक्तिगेहवती, मुक्तिगेहिन्येव **मौक्तिकगेहिनी** भवति, विद्याया मुक्तप्राप्यसीमत्वात् ॥ ३ ॥ स्वाज्ञविकल्पितमायायाः गुणतस्त्रैविध्यमाह —**मायेति** । रुद्रस्य रजस्तमस्तत्कार्यग्रासत्वेन सत्वमयत्वं, ब्रह्मणः सृष्टिकर्म-व्यग्रत्वेन रजोमयत्वं, दैत्यानां प्राणिसामान्यपीडनप्रकृतित्वेन तमोमयत्वं, एवं मायायास्त्रैविध्यमुक्तं भवतीत्यर्थः ॥ ४ ॥ तस्याः "ब्रह्मातिरिक्तं न किञ्चिदस्ति" इति निर्विशेषब्रह्मज्ञानेतरसाधनशतेनापि दुर्जयत्वमाह—**अजयेति** । **अजया** अजेया **वैष्णवी माया** । या मा सा मायेति या **पुरा** स्वाज्ञानात् प्रसूतेति **स्वसुतेव** भाता । सेयं वैष्णवी माया ब्रह्मज्ञानेतरमन्त्रादिजप्येन **च**शब्दात् कर्मयोगादिसाधनेनाप्यजेया ब्रह्मज्ञानेन जेतुं शक्येत्यत्र—

या च प्रागात्मनो मे मा तथाऽन्ते च तिरस्कृता ॥
दैवी ह्येषा गुणमयी मम माया दुरत्यया ।
मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते ॥

इति श्रुतिः स्मृतिश्च मानं भवति ॥ ९ ॥ देवकी वसुदेवश्च कीदृशः इत्यत आह —**देवकीति** । "ओमित्येतदक्षरमिदं सर्वं," "सर्वे वेदा यत्पदमामनन्ति" इत्यादिवेदैः तुरीयोङ्काररूपेण **या उपगीयते सेयं ब्रह्मपुत्री** पुत्री ब्रह्मप्रणवविद्या **देवकी** भवति । प्रणवविद्याया ब्रह्मपुत्रिकात्वं कथमित्यत्र—

ओङ्कारश्चाथशब्दश्च द्वावेतौ ब्रह्मणः पुरा ।
कण्ठं भित्त्वा विनिर्यातौ तस्मान्माङ्गळिकावुभौ ॥

इति स्मृतिर्मानम । **निगमः** ऋगादिचतुर्वेद एव **वसुदेवः** "तत्त्वमसि" इति श्रुतिप्रकटित "तत्त्वं" पदलक्ष्ययोः **कृष्णरामयोः** एकीभावो हि **वेदार्थः**, "तत्त्वंपदलक्ष्यं प्रत्यगभिन्नं ब्रह्म" इति श्रुतेः, पराक्सापेक्षप्रत्यग्ब्रह्मैक्यगत-विशेषांशापायसिद्धनिष्प्रतियोगिकब्रह्ममात्रस्य कृत्स्नवेदार्थत्वेन परमाद्वैतरूपत्वात्, "वेदार्थः परमाद्वैतं नेतरत् सुरपुङ्गवाः" इति स्मृतेः ॥ ६ ॥ वेदार्थत्वेन तं के वदन्ति, स कुत्रोपलभ्यते इत्यत आह—**स्तुवन्तीति** । **यस्तु** भगवान् **वने बृन्दावने** च **गोपैः गोपीभिः सुरैश्च** सह **क्रीडन्** आस्ते **सोऽयं** ब्रह्मादि-पिपीलिकाप्राणिपटलमहीतले स्वोपलब्धिहेतुतया महनीयतले हृदयकमले अन्तर्यामिरूपेण प्रत्यगभिन्नब्रह्मरूपेण **अवतीर्णो** भवति, तमेव सततं निष्प्रति-योगिकब्रह्ममात्रतया वेदा ब्रह्मरुद्रादयो देवाः सनकादिमुनयश्च **स्तुवन्ति** स्वमात्रावशेषतया विस्पष्टं वदन्तीत्यर्थः ॥ ७ ॥ गोप्यादयः काः इत्यत आह—**गोप्य इति** । नानाविधाः **ऋचो** मन्त्रा एव **गोप्यो गावश्च** भवन्ति । **तस्य** भगवतः **कमलासनो** ब्रह्मा गोपालनसाधनयष्टिका भवति । **भगवान् रुद्रस्तु** सप्तस्वरानुवादिवंशो वेणुर्भवति । **इन्द्रस्तु** गवयशृङ्गं भूत्वा भगवत्करतले विलसति । **असुरः** भगवद्भावविरळ्यात् **अघो** भवति, भगवन्नामस्मृतितो विनश्यतीत्यर्थः ॥ ८ ॥ किं बहुना—**गोकुलमिति** । किंच **लोभक्रोधादयो**

दैत्याः भवन्ति । भगवद्दर्शनतन्नामस्मृतिमात्रेण लोभाद्यरिषड्वर्गोज्जीवक्रकलिकाल-स्तिरस्कृतो भवति ॥ ९ ॥ तत्र गोकुलवैकुण्ठे मायाविग्रहधारणः विजयते । मायया अस्य विग्रहधारणा, वस्तुतो भगवान् निर्विशेषं ब्रह्मेत्यर्थः । तथाऽपि गोपरूपतया निष्कुहकगोपतुल्यो भवतीत्यत आह—दुर्बोधमिति । यन्मायया यदज्ञानेन इदं जगत् स्वाविद्यापदतत्कार्यं स्वातिरिक्तमिति मोहितं भवति तस्य भगवतः कुहकं अध्यवसायं तद्भावापन्नमुनिं विना सुरासुरैरपि दुर्बोधम् ॥ १० ॥ तत्र हेतुमाह—दुर्जयेति । तदीयाघटितघटनापटीयसी शक्तिः या विजृंभते सेयं सर्वैरपि दुर्जया दुर्विज्ञेयेत्यर्थः । द्विजो द्विजराजश्च चन्द्रः धृष्टिरूपो धैर्यरूपो भवेदित्यर्थः । मायाशक्तेः दुर्जयत्वेन तया भगवानपि मुह्यतीत्यत आह—रुद्र इति ॥ ११ ॥ ये देवाः तद्भावविकलाः तेषां सुराणां बलं ज्ञानं विज्ञानं च यया क्षणादपहृतं, येन रुद्रोऽपि वेणुभावं नीतः, तस्य निर्मायस्य भगवतः माया वा तत्कार्यं जगद्वा कथं स्वावारकं भवति, भगवतो निरावृताजडक्रिया-ज्ञानेच्छाशक्तिमत्त्वेन निर्मायत्वात् । को वा रामः कः कृष्णः तज्जायाग्रामः कीदृशः इत्यत आह—शेषनाग इति । आदिशेषो बलरामः, निर्विशेषं ब्रह्मैव कृष्णः ॥ १२ ॥ अष्टोत्तरशताधिकषोडशसहस्रस्त्रियस्तु ऋचोपनिषदः—इत्यत्र विसर्गलोपः—ऋचः ऋगादिचतुर्वेदप्रविभक्ताः ऋचो मन्त्राः उपनिषदश्च भवन्ति । किं बहुना—ता वै स्त्रियो ब्रह्मरूपा एव भवन्तीत्यर्थः ॥ १३ ॥ किंच—द्वेष इति । कुवलयापीडः गजविशेषः ॥ १४–१५ ॥ सत्या सत्यम् । यः शङ्खो दुग्धसिन्धौ समुत्पन्नः लक्ष्मीसोदरत्वात् लक्ष्मीरूपो व्यवस्थितः, मेघघोषश्च सोऽयं पाञ्चजन्य इति स्मृतः, य एवंरूपः शङ्खः स स्वयं विष्णुरेव भवति । किंच—दुग्धोदधिरिति । गोपीनां गृहे येन क्षीरदधि-भाण्डसहस्रं भग्नं भवति तेनैव तत्प्रवाहतो दुग्धोदधिरपरः क्षीरसमुद्रः कृतो भवति ॥ १६–१७ ॥ किंच—प्रतिगोपीगृहं क्रीडते बालको भूत्वा पूर्ववत् श्वेतद्वीपालङ्कारसुमहोदधौ क्षीरसमुद्रे च क्रीडत इत्यर्थः । किमर्थं एवं अवतारः कृतः इत्यत्र—

परित्राणाय साधूनां विनाशाय च दुष्कृताम् ।
धर्मसंस्थापनार्थाय संभवामि युगेयुगे ॥

इति स्मृत्यनुरोधेन भगवदवतारप्रयोजनमाह—**संहारार्थमिति** ॥ १८ ॥ श्रीकृष्णं विद्यादित्यर्थः । ईश्वरेण यत् **सृष्टमासीत्** तत् जगच्चक्रं ब्रह्मैव, कारणातिरेकेण कार्याभावात्, कार्यं कारणमेवेत्यर्थः ॥ १९ ॥ जयन्तीशब्देन भगवदाविर्भावकाल उच्यते । तत्काले भवतीति **जयन्तीसंभवो वायुः** मुख्यप्राणः, तस्य कालोपाधेः भगवतो निष्पन्नत्वात् । स एव **धर्मसंज्ञकः चमरः** चामरो भवतीत्यर्थः । किंच—**यस्यांशभूतोऽसौ ज्वलनाभासोऽग्निः** भवति, यस्य **खड्गरूपो महेश्वरो** रुद्र आसीत् ॥ २० ॥ भगवत्संबन्धवाञ्छया देवपिता **कश्यपप्रजापतिः उलूखलतां** गतः, देवमाता **अदितिः रज्जुतां** गता भवति, मात्रा बालचेष्टा-निरसनकामया यदाऽयमुलूखले बद्धः तदेत्यर्थः । **शङ्खचक्रे** यस्यायुधविशेषौ भवतः, **सर्वप्राणिमूर्धनि** सहस्रारचक्रे निर्विकल्परूपिणीं **सिद्धिं बिन्दुं** तुरीयसाक्षात्कारं च योगिनो लभन्ते, स भगवान् सर्वात्मना अवतिष्ठते ॥ २१ ॥ एक एव भगवान् सर्वात्मा भवतीति **विबुधा** योगिनश्च विदित्वा **नमन्तीत्यत्र नहि संशयोऽस्ति**,निःसंशयं नमन्तीत्यर्थः,

ईश्वरो जीवकलया प्रविष्टो भगवानिति ।
प्रणमेद्दण्डवद्भूमावाश्वचण्डालगोखरम् ॥

इति श्रुतेः ॥ २२ ॥ किंच—**गदेति** । यस्य धनुः **शार्ङ्गं** भवति, **यस्य मायाऽविद्या** च **शरदादिषड्तुकालश्च सुभोजनो** भोजनं भवति, भगवतो निर्मायत्वेन मायातत्कार्यग्रासत्वात् ॥ २३ ॥ ब्रह्माण्डस्य पार्थिवत्वेनाद्यो जातत्वात् **अब्जकाण्डं** अविद्याऽण्डं, तस्यानन्तकोटिब्रह्माण्डबीजत्वात् **तदेव जगद्बीजं येन लीलया स्वपाणौ धृतं** स भगवान् आदिविराट् भवतीत्यर्थः, "घटीयन्त्रस्थघटमालिकाजालवत् महाविष्णोः करतले विलसन्त्यनन्तकोटि-ब्रह्माण्डानि" इति श्रुतेः । किंच—**गरुड इति** । **सुदामा कुचेलः** ॥ २४ ॥

भगवद्भक्तिरेव वृन्दालक्ष्मीर्भूत्वा भगवन्निकटे वसति । भगवतोऽस्य क्रियाज्ञानेच्छाशक्तिस्तु भगवदतिरेकेण सर्वजन्तुः नास्तीति प्रकाशिनी बुद्धिः ज्ञानविज्ञानसम्यज्ज्ञानरूपिणी भवति । यद्यद्भगवत्सार्वात्म्यमुक्तं तत्तद्भगवतो न भिन्नमित्याह—तस्मादिति । य एवं सर्वात्मभावमापन्नः तस्मादिदं सर्वं न भिन्नम् । सर्वाभिन्नत्वे भगवतो नश्वरत्वं स्यादित्यत आह—नाभिन्नमिति । स्वातिरिक्तस्य अवस्तुत्वेन भिन्नाभिन्नव्यवहारानर्हत्वात् । स्वातिरिक्तसर्वभिन्नो वा स्यादित्यत आह—आभिरिति । निष्प्रतियोगिकविभुः भूमा नारायणः आभिः शशविषाणतुल्यस्वातिरिक्तकलनाभिः न वै भिन्नोऽभिन्नो वा भवितुमर्हति । स्वातिरिक्तसामान्यस्य निष्प्रतियोगिकाभावरूपत्वेन च नानयोः ब्रह्मातिरिक्तयोः भिन्नाभिन्नकथा भवितुमर्हतीति भावः ॥ २५ ॥ किं बहुना—भूमाविति । भगवदाविर्भावसमकालमेव स्वर्गवासिदृष्ट्याऽपि वैकुण्ठं विष्ण्वाख्यं ब्रह्म भूमावेवोत्तारितं आविर्भूतं विभाति । इत्युषनिषच्छब्दः कृष्णोपनिषत्समाप्त्यर्थः ॥ २६ ॥

श्रीवासुदेवेन्द्रशिष्योपनिषद्ब्रह्मयोगिना ।
लिखितं स्याद्विवरणं कृष्णोपनिषदः स्फुटम् ।
कृष्णोपनिषदो व्याख्याग्रन्थोऽशीतिरितीरितः ॥

इति श्रीमदीशाद्यष्टोत्तरशतोपनिषच्छास्त्रविवरणे षण्णवतिसङ्ख्यापूरकं कृष्णोपनिषद्विवरणं सम्पूर्णम् ॥

---

[1]शेषो ह वै वासुदेवात् सङ्कर्षणो नाम जीव आसीत् । सोऽकामयत प्रजाः सृजेयेति । ततः प्रद्युम्नसंज्ञक आसीत् । तस्मात् अहंकारनामाऽनिरुद्धो हिरण्यगर्भोऽजायत । तस्मात् दश प्रजापतयो

[1] अयं द्वितीयः खण्डः (अ, अ१) कोशयोरेवोपलब्धोऽत्र संयोजितः.

मरीच्याद्याः स्थाणुदक्षकर्दमप्रियव्रतोत्तानपादवायवो व्यजायन्त । तेभ्यः सर्वाणि भूतानि च । तस्माच्छेषादेव सर्वाणि च भूतानि समुत्पद्यन्ते । तस्मिन्नेव प्रलीयन्ते । स एव बहुधा जायमानः सर्वान् परिपाति । स एव काद्रवेयो व्याकरणज्योतिषादिशास्त्राणि निर्मिमाणो बहुभिर्मुमुक्षुभिरुपास्यमानोऽखिलां भुवमेकस्मिन् शीर्ष्णि [1]सिद्धार्थवद्धारयमाणः सर्वैर्मुनिभिः संप्रार्थ्यमानः सहस्रशिखराणि मेरोः शिरोभिरावार्यमाणो महावाय्वहंकारं निराचकार । स एव भगवान् भगवन्तं [2]बहुधा विप्रीयमाणः अखिलेन स्वेन रूपेण युगे युगे तेनैव जायमानः स एव सौमित्रिरैक्ष्वाकः सर्वाणि धानुषशास्त्राणि सर्वाण्यस्त्रशास्त्राणि बहुधा विप्रीयमाणो रक्षांसि सर्वाणि विनिघ्नंश्चातुर्वर्ण्यधर्मान् प्रवर्तयामास । स एव भगवान् युगसन्धिकाले शारदाभ्रसन्निकाशो रौहिणेयो वासुदेवः सर्वाणि गदाद्यायुधशास्त्राणि व्याचक्षाणो नैकान् राजन्यमण्डलान्निराचिकीर्षुः भूभारमखिलं निचखान । स एव भगवान् युगे तुरीयेऽपि [3]ब्रह्मकुले जायमानः सर्वा उपनिषदः उद्दिधीर्षुः सर्वाणि धर्मशास्त्राणि विस्तारयिष्णुः सर्वानपि जनान् सन्तारयिष्णुः सर्वानपि वैष्णवान् धर्मान् विजृम्भयन् सर्वानपि पाषण्डान् निचखान । स एष जगदन्तर्यामी । स एष सर्वात्मकः । स एव मुमुक्षुभिर्ध्येयः । स एव मोक्षप्रदः । एतं स्मृत्वा सर्वेभ्यः [4]पापेभ्यो मुच्यते । तन्नाम

[1] सिद्धार्थ ध्री—अ१.
[2] बहुधाऽपि प्री—अ१, (एवमुत्तरत्र).
[3] ब्राह्मण्यां परमहंसोजा—अ१.
[4] प्मभ्यो—अ१.

संकीर्तयन् विष्णुसायुज्यं गच्छति । तदेतत् दिवा अधीयानः रात्रिकृतं पापं नाशयति । नक्तमधीयानो दिवसकृतं पापं नाशयति । तदेतद्वेदानां रहस्यं, तदेतदुपनिषदां रहस्यं, एतदधीयानः सर्वक्रतुफलं लभते, शान्तिमेति, मनश्शुद्धिमेति, सर्वतीर्थफलं लभते, य एवं वेद देहबन्धाद्विमुच्यते इत्युपनिषत् ॥

इति द्वितीयः खण्डः

गरुडोपनिषत्

भद्रं कर्णेभिः—इति शान्तिः

गारुडविद्यासंप्रदायः

ॐ गारुडब्रह्मविद्यां प्रवक्ष्यामि यां [1]ब्रह्मा विद्यां नारदाय प्रोवाच नारदो बृहत्सेनाय बृहत्सेन इन्द्राय इन्द्रो भरद्वाजाय भरद्वाजो जीवत्कामेभ्यः शिष्येभ्यः प्रायच्छत् ॥ १ ॥

विषं ब्रह्मातिरिक्तं स्यादमृतं ब्रह्ममात्रकम् ।
ब्रह्मातिरिक्तविषहृद्ब्रह्ममात्रखगेऽहम् ॥

इह खलु अथर्वणवेदप्रविभक्तेयं स्वाज्ञानपन्नगगारुडोपनिषत् निर्विशेषब्रह्मज्ञानसाधनकळेबरप्राणपवनवियोगहेतुपन्नगादिनानाविषजातप्रशमननिपुणगारुडविद्याप्रकटनव्यग्रा परमार्थदृष्ट्या ब्रह्मातिरिक्तविषजातनिर्विषीकरणनिष्प्रतियोगिकब्रह्ममात्रगरुडपर्यवसन्ना विजयते । अस्याः स्वल्पग्रन्थतो विवरणमारभ्यते । इयं विद्या ब्रह्मादिभरद्वाजान्तपारंपर्येणागतेति सूक्तिः विद्यास्तुत्यर्था । तत्परंपरामनुक्रामति—ओमिति । ओङ्कारलक्ष्यार्थनिष्पन्नं परं ब्रह्म स्वाज्ञादिदृष्टिमोहे सत्यसति निष्प्रतियोगिकस्वमात्रमवशिष्यत इत्यत्र न हि संशयोऽस्ति । ओङ्कारवाच्यार्थनिष्पन्नं अपरं ब्रह्म "सुपर्णोऽसि गरुत्मान् त्रिवृत्ते

[1] ब्रह्म—अ, अ १, क.

शिरः" इति वक्ष्यमाणश्रुतिसिद्धं वैराजतत्त्वमित्यर्थः । तादृशापरब्रह्मगोचरां गारुडाख्यापरब्रह्मविद्यां प्रवक्ष्यामीति श्रुतेर्वचः । सेयं विद्या कीदृशी ? इत्यत्र यां इह गारुडापरब्रह्मविद्यां ब्रह्मा नारदाय प्रोवाच इत्यादिपरंपरागतां विद्यां भरद्वाजो मुनिः, "देहे नष्टे कुतो बुद्धिः बुद्धिनाशे कुतो ज्ञता" इति स्मृत्यनुरोधेन निर्विशेषब्रह्मज्ञानोपयोगितया जीवत्कामेभ्यः शिष्येभ्यः प्रायच्छत् इति । अपरब्रह्मविद्यायाः परब्रह्मात्युपायत्वे "शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति" इति श्रुतेः ॥ १ ॥

गारुडविद्यायाः ऋष्यादि

अस्याः [1]श्रीमहागरुडब्रह्मविद्याया ब्रह्मा ऋषिः । गायत्री छन्दः । श्रीभगवान् महागरुडो देवता । श्रीमहागरुडप्रीत्यर्थे मम सकलविषविनाशनार्थे जपे विनियोगः ॥ २ ॥

ॐ नमो भगवते अङ्गुष्ठाभ्यां नमः । श्रीमहागरुडाय तर्जनीभ्यां स्वाहा । पक्षीन्द्राय मध्यमाभ्यां वषट् । श्रीविष्णुवल्लभाय अनामिकाभ्यां हुम् । त्रैलोक्यपरिपूजिताय कनिष्ठिकाभ्यां वौषट् । उग्रभयंकरकालानलरूपाय करतलकरपृष्ठाभ्यां फट् ॥ एवं हृदयादिन्यासः ॥ ३ ॥

भूर्भुवः सुवरोमिति दिग्बन्धः ॥ ४ ॥

ध्यानम्—

[2]स्वस्तिको दक्षिणं पादं वामपादं तु कुञ्चितम् ।
प्राञ्जलीकृतदोर्युग्मं गरुडं हरिवल्लभम् ॥

[1] श्रीगारु—उ. [2] स्वस्तिकं—क

अनन्तो वामकटको यज्ञसूत्रं तु वासुकिः ।
तक्षकः कटिसूत्रं तु हारः कार्कोट उच्यते ॥
पद्मो दक्षिणकर्णे तु महापद्मस्तु वामके ।
शङ्खः शिरःप्रदेशे तु गुलिकस्तु भुजान्तरे ॥
पाण्डुकालिकनागाभ्यां चामराभ्यां सुवीजितम् ।
एलापुत्रकनागाद्यैः सेव्यमानं मुदाऽन्वितम् ॥
कपिलाक्षं गरुत्मन्तं सुवर्णसदृशप्रभम् ।
दीर्घबाहुं बृहत्स्कन्धं नागाभरणभूषितम् ॥
आजानुतः सुवर्णाभमाकट्योस्तुहिनप्रभम् ।
कुङ्कुमारुणमा[1]कन्थं शतचन्द्रनिभाननम् ॥
नीलाग्रनासिकावक्त्रं सुमहच्चारुकुण्डलम् ।
दंष्ट्राकरालवदनं किरीटमुकुटोज्ज्वलम् ॥
कुङ्कुमारुणसर्वा[2]ङ्गं कुन्देन्दुधवला[3]ननम् ।
विष्णुवाह नमस्तुभ्यं क्षेमं कुरु सदा मम ॥
एवं ध्यायेत्त्रिसंध्यासु गरुडं नागभूषणम् ।
विषं नाशयते शीघ्रं तूलराशिमिवानलः ॥ ५ ॥

गारुडापरब्रह्मविद्यायाः ऋषिछन्दोदेवताऽऽदिकमाह—अस्या इति॥२–४॥
हरिवल्लभं हरिरेव वल्लभः स्वामी यस्य तं हरिवल्लभम् । अधिकारिभावनानुरोधेन सर्पादेः स्वातिरिक्तस्य च विषं नाशयते ॥ ५ ॥

[1] कन्थं—अ २, स्कन्धं—अ, अ १. [2] ङ्गकु—अ १, उ, क.
[3] नन—अ १, उ, क.

गरुडमालामन्त्रादि

[1]ओमीमों नमो भगवते श्रीमहागरुडाय पक्षीन्द्राय विष्णुवल्लभाय त्रैलोक्यपरिपूजिताय उग्रभयंकरकालानलरूपाय वज्रनखाय वज्रतुण्डाय वज्रदन्ताय वज्रदंष्ट्राय वज्रपुच्छाय वज्रपक्षालक्षितशरीराय ओमीमेह्योहि श्रीमहागरुडाप्रतिशासनास्मिन्नाविशाविश दुष्टानां विषं दूषय दूषय स्पृष्टानां विषं नाशय नाशय दन्दशूकानां विषं दारय दारय प्रलीनं विषं प्रणाशय प्रणाशय सर्वविषं नाशय नाशय हन हन दह दह पच पच भस्मीकुरु भस्मीकुरु हुं फट् स्वाहा ॥ ६ ॥

चन्द्रमण्डलसंकाश सूर्यमण्डलमुष्टिक । पृथ्वीमण्डलमुद्राङ्क श्रीमहागरुड विषं हर हर हुं फट् स्वाहा ॥ ७ ॥

ॐ क्षिप स्वाहा ॥ ८ ॥

ओमीं स चरति स चरति [2]तत्कारि मत्कारि विषाणां च विषरूपिणी विषदूषिणी विष[3]शोषणी विषनाशिनी विषहारिणी हतं विषं नष्टं विषमन्तः प्रलीनं विषं प्रनष्टं विषं हतं ते ब्रह्मणा विषं हतमिन्द्रस्य वज्रेण स्वाहा ॥ ९ ॥

ॐ नमो भगवते महागरुडाय विष्णुवाहनाय त्रैलोक्यपरिपूजिताय वज्रनखवज्रतुण्डाय वज्रपक्षालंकृतशरीराय एह्योहि महागरुड विषं छिन्धि छिन्धि आवेशयावेशय हुं फट् स्वाहा ॥ १० ॥

[1] ओं रं ओं—अ १. ओं रां ओं—क.
[2] तत्कारी मत्कारी—मु. (एवमुत्तरत्र).
[3] शोषिणी—अ २, उ. (एवमुत्तरत्र).

सुपर्णोऽसि गरुत्मान् त्रिवृत्ते शिरो गायत्रं चक्षुः स्तोम आत्मा साम ते तनूर्वामदेव्यं बृहद्रथन्तरे पक्षौ यज्ञायज्ञियं पुच्छं छन्दांस्यङ्गानि धिष्णियाः शफा यजूंषि नाम। सुपर्णोऽसि गरुत्मान् दिवं गच्छ सुवः पत ॥ ११ ॥

ओमीं ब्रह्मविद्याममावा[1]स्यायां पुरोवाच स चरति स चरति तत्कारि मत्कारि विषनाशिनी विष[2]दूषिणी विषहारिणी हतं विषं नष्टं विषं प्रणष्टं विषं हतमिन्द्रस्य वज्रेण विषं हतं ते ब्रह्मणा विषमिन्द्रस्य वज्रेण स्वाहा ॥ १२ ॥

[3]तत्त्वयम् । यद्यनन्तकदूतोऽसि यदि वाऽनन्तकः स्वयं स चरति स चरति तत्कारि मत्कारि विषनाशिनी विषदूषिणी हतं विषं नष्टं विषं हतमिन्द्रस्य वज्रेण विषं हतं ते ब्रह्मणा विषमिन्द्रस्य वज्रेण स्वाहा ॥ १३ ॥

यदि वासुकिदूतोऽसि यदि वा वासुकिः स्वयं स चरति स चरति तत्कारि मत्कारि विषनाशिनी विषदूषिणी हतं विषं नष्टं विषं हतमिन्द्रस्य वज्रेण विषं हतं ते ब्रह्मणा विषमिन्द्रस्य वज्रेण स्वाहा ॥ १४ ॥

यदि तक्षकदूतोऽसि यदि वा तक्षकः स्वयं स चरति स चरति तत्कारि मत्कारि विषनाशिनी विषदूषिणी हतं विषं नष्टं विषं

[1] स्यां—अ १, अ २, क. [2] दूषणी—उ. (एवमुत्तरत्र).
[3] 'तत्' इति (उ) कोशे नास्ति.

हतमिन्द्रस्य वज्रेण विषं हतं ते ब्रह्मणा विषमिन्द्रस्य वज्रेण स्वाहा ॥ १५ ॥

यदि कर्कोटकदूतोऽसि यदि वा कर्कोटकः स्वयं स चरति स चरति तत्कारि मत्कारि विषनाशिनी विषदूषिणी हतं विषं नष्टं विषं हतमिन्द्रस्य वज्रेण विषं हतं ते ब्रह्मणा विषमिन्द्रस्य वज्रेण स्वाहा ॥ १६ ॥

यदि पद्मकदूतोऽसि यदि वा पद्मकः स्वयं स चरति स चरति तत्कारि मत्कारि विषनाशिनी विषदूषिणी हतं विषं नष्टं विषं हतमिन्द्रस्य वज्रेण विषं हतं ते ब्रह्मणा विषमिन्द्रस्य वज्रेण स्वाहा ॥ १७ ॥

यदि महापद्मकदूतोऽसि यदि वा महापद्मकः स्वयं स चरति स चरति तत्कारि मत्कारि विषनाशिनी विषदूषिणी हतं विषं नष्टं विषं हतमिन्द्रस्य वज्रेण विषं हतं ते ब्रह्मणा विषमिन्द्रस्य वज्रेण स्वाहा ॥ १८ ॥

यदि शङ्खकदूतोऽसि यदि वा शङ्खकः स्वयं स चरति स चरति तत्कारि मत्कारि विषनाशिनी विषदूषिणी विषहारिणी हतं विषं नष्टं विषं हतमिन्द्रस्य वज्रेण विषं हतं ते ब्रह्मणा विषमिन्द्रस्य वज्रेण स्वाहा ॥ १९ ॥

यदि गुलिकदूतोऽसि यदि वा गुलिकः स्वयं स चरति स चरति तत्कारि मत्कारि विषनाशिनी विषदूषिणी विषहारिणी हतं विषं

नष्टं विषं हतमिन्द्रस्य वज्रेण विषं हतं ते ब्रह्मणा विषमिन्द्रस्य वज्रेण स्वाहा ॥ २० ॥

यदि पौण्ड्रकालिकदूतोसि यदि वा पौण्ड्रकालिकः स्वयं स चरति स चरति तत्कारि मत्कारि विषनाशिनी विषदूषिणी विषहारिणी हतं विषं नष्टं विषं हतमिन्द्रस्य वज्रेण विषं हतं ते ब्रह्मणा विषमिन्द्रस्य वज्रेण स्वाहा ॥ २१ ॥

[1]यदि नागकदूतोऽसि यदि वा नागकः स्वयं स चरति स चरति तत्कारि मत्कारि विषनाशिनी विषदूषिणी विषहारिणी हतं विषं नष्टं विषं हतमिन्द्रस्य वज्रेण विषं हतं ते ब्रह्मणा विषमिन्द्रस्य वज्रेण स्वाहा ॥ २२ ॥

यदि लूतानां प्रलूतानां यदि वृश्चिकानां यदि घोटकानां यदि स्थावरजङ्गमानां स चरति स चरति तत्कारि मत्कारि विषनाशिनी विषदूषिणी विषहारिणी हतं विषं नष्टं विषं हतमिन्द्रस्य वज्रेण विषं हतं ते ब्रह्मणा विषमिन्द्रस्य वज्रेण स्वाहा ॥ २३ ॥

अनन्तवासुकितक्षककर्कोटकपद्मकमहापद्मकशङ्खकगुलिकपौण्ड्रकालिकनागक इत्येषां दिव्यानां महानागानां महानागादिरूपाणां विषतुण्डानां विषदन्तानां विषदंष्ट्राणां विषाङ्गानां विषपुच्छानां विश्वचाराणां वृश्चिकानां लूतानां प्रलूतानां मूषिकाणां गृहगौलिकानां गृहगोधिकानां घणासानां गृहगिरिगह्वरकालानलवल्मीकोद्भूतानां

[1] अयं (२२) पर्यायः मुद्रितकोश एव दृश्यते.

तार्णानां पार्णानां काष्ठदारुवृक्षकोटररतानां मूलत्वग्दारुनिर्यासपत्रपुष्पफलोद्भूतानां दुष्टकीटकपिश्वानमार्जारजम्बूकव्याघ्रवराहाणां जरायुजाण्डजोद्भिज्जस्वेदजानां शस्त्रबाणक्षतस्फोटव्रणमहाव्रणकृतानां कृत्रिमाणामन्येषां भूतवेतालकूष्माण्डपिशाचप्रेतराक्षसयक्षभयप्रदानां विषतुण्डदंष्ट्राणां विषाङ्गानां विषपुच्छानां विषाणां विषरूपिणी विषदूषिणी विषशोषिणी विषनाशिनी विषहारिणी हतं विषं नष्टं विषमन्तःप्रलीनं विषं प्रणष्टं विषं हतं ते ब्रह्मणा विषमिन्द्रस्य वज्रेण स्वाहा ॥ २४ ॥

गरुडमालामन्त्रमूलमन्त्रादिकमाह—**ओमिति** ॥ ६ ॥ **वर्णतः चन्द्रमण्डलसंकाश** । विराडात्मना यस्य मुष्टौ सूर्यमण्डलं विद्यते तस्य **सम्बुद्धिः सूर्यमण्डलमुष्टिक** ॥ ७–१० ॥ छन्दोमयाङ्गविराडादिरूपेण गरुडं स्तौति **सुपर्णोऽसीति** । गरं नानाविषजातं उन्मूल्य आत्मसात्करोतीति **गरुत्मान्** गरुत्मन् सुष्ठु शोभनौ पर्णौ पक्षौ यस्य स त्वं **सुपर्णोऽसि** विराडादिभावमापन्नस्य ते तव **त्रिवृत्** स्तोत्रीयानवकं **शिरो** भवति । **गायत्रं** सामैव ते **चक्षुः** भवति । तव **आत्मा** मध्यशरीरं अवशिष्टस्तोमसहस्रं भवति । **वामदेव्यं साम ते तनूः** भवति । बृहच्च रथन्तरं च **बृहद्रथन्तरे** सामनी ते **पक्षौ** भवतः । ते **पुच्छं यज्ञायज्ञियं** साम भवति । नानाछन्दांसि तव **अङ्गानि** भवन्ति । तव विश्रमणहेतुधिष्ण्या अपि छन्दांस्येव भवन्तीत्यर्थः । तव **शफाः** खुरा **यजूंषि ऋचश्च** भवन्ति । अनुक्ताङ्गमथर्वणवेदो भवतीति वेदितव्यम् । यतस्त्वं गरुत्मान् सुपर्णोऽसि अतः त्वं **दिवं गच्छ सुवः पत** इति सुवर्ग्रहणं चतुर्दशभुवनस्योपलक्षणार्थं, विराट्सूत्रेश्वरात्मना सर्वव्यापको भवेत्यर्थः । सुपर्णगतविशेषांशापाये सुपर्णस्य निर्विशेषब्रह्मरूपत्वं सिद्धमित्यर्थः ॥ ११–१२ ॥ **तत् स्त्र्यं** विषहरबीजम् ॥ १३–२३ ॥ किं बहुना—**अनन्तेति** ॥ २४ ॥

य इमां ब्रह्मविद्याममावा[1]स्यायां पठेच्छृणुयाद्वा यावज्जीवं न हिंसन्ति सर्पाः । अष्टौ ब्राह्मणान् ग्राहयित्वा तृणेन मोचयेत् । शतं ब्राह्मणान् ग्राहयित्वा चक्षुषा मोचयेत् । सहस्रं ब्राह्मणान् ग्राहयित्वा मनसा मोचयेत् । सर्पान् जले न मुञ्चन्ति । तृणे न मुञ्चन्ति । काष्ठान् मुञ्चन्तीत्याह भगवान् ब्रह्मेत्युपनिषत् ॥ २९ ॥

एवं अपरब्रह्मविद्यया सर्पादिविषतो भीतिमुत्सृज्य निर्विशेषब्रह्मज्ञानसाधनानुष्ठाननिष्पन्नब्रह्मविद्याप्रादुर्भावसमकालं विद्वान् ब्रह्मातिरिक्तसामान्यविषग्रासनिष्प्रतियोगिकब्रह्ममात्रामृतरूपेण अवशिष्यत इत्यर्थः । इत्युपनिषच्छब्दः गरुडोपनिषत्परिसमाप्त्यर्थः ॥

श्रीवासुदेवेन्द्रशिष्योपनिषद्ब्रह्मयोगिना ।
गरुडोपनिषद्व्याख्या लिखितेश्वरगोचरा ।
गरुडोपनिषद्व्याख्याग्रन्थोऽशीतिरितीरितः ॥

इति श्रीमदीशाद्यष्टोत्तरशतोपनिषच्छास्त्रविवरणे द्व्यधिकशतसङ्ख्यापूरकं गरुडोपनिषद्विवरणं सम्पूर्णम् ॥

---

[1] स्यां—अ १, अ २, क, ज.

गोपालतापिन्युपनिषत्

भद्रं कर्णेभिः—इति शान्तिः

गोपालपूर्वतापिनी

प्रथमोपनिषत्

मङ्गलाचरणम्

सच्चिदानन्दरूपाय कृष्णायाक्लिष्ट[1]कारिणे ।
नमो वेदान्तवेद्याय गुरवे बुद्धिसाक्षिणे ॥ १ ॥

श्रीमत्पञ्चपदागारं सविशेषतयोज्ज्वलम् ।
प्रतियोगिविनिर्मुक्तं निर्विशेषं हरिं भजे ॥

इह खलु अथर्वणवेदप्रविभक्तयं गोपालतापिन्युपनिषत् सविशेषब्रह्मसाम्राज्यप्रकटनव्यग्रा निष्प्रतियोगिकनिर्विशेषब्रह्ममात्रपर्यवसन्ना विजयते । अस्याः स्वल्पग्रन्थतो विवरणमारभ्यते । मौनिमण्डलब्रह्मणोः गोपीमण्डलदुर्वाससोः ब्रह्मनारायणयोश्च प्रश्नप्रतिवचनरूपेयमाख्यायिका विद्यास्तुत्यर्था । विद्याऽऽदौ मङ्गळं कुर्वन्त्याख्यायिकामवतारयति—सच्चिदानन्देति । अनृतजडदुःखप्रपञ्चग्रासः सच्चिदानन्दः । स एव कृषिशब्दवाच्यस्वातिरिक्तप्रपञ्चजातं

[1] कर्मणे—अ.

मुष्णाति स्वावशेषतया ग्रसतीति **कृष्णः** । स्वभक्तजनं आ[अ]क्लिष्टं आविद्यकदुःखविरळं करोतीति **आ[अ]क्लिष्टकारी** । वेदान्ता उपनिषदः तत्प्रमाणसिद्धत्वात् **वेदान्तवेद्यः** । सर्वप्राणिहितोपदेष्टृत्वात् **गुरुः** । बुद्धिवृत्ति-सहस्रभावाभावेक्षितृत्वात् सर्वप्रत्यगात्मतया **बुद्धिसाक्षी** । तस्मै उक्तविशेषण-विशिष्टाय **कृष्णाय नमः** । नमःशब्दः कृष्णात्मनोरभेदद्योतकः, "नमस्त्वैक्यं प्रवदेत्" इति श्रुतेः ॥ १ ॥

गोपालकृष्णस्य परमदेवत्वम्

ॐ मुनयो ह वै ब्राह्मणमूचुः—**कः परमो देवः** । कुतो मृत्युर्बिभेति । कस्य विज्ञानेनाखिलं विज्ञातं भवति । केनेदं विश्वं संसरतीति ॥ २ ॥

तदु होवाच ब्राह्मणः—कृष्णो वै परमं दैवतम् । गोविन्दा-न्मृत्युर्बिभेति । गोपीजनवल्लभज्ञानेनैतद्विज्ञातं भवति । स्वाहेदं विश्वं संसरतीति ॥ ३ ॥

एवं प्रत्यग्ब्रह्मैक्यलक्षणं मङ्गळं कृत्वा आख्यायिकां गोपालब्रह्मविद्या-मवतारयति—**ओमिति** । ओं ओङ्कारार्थं ब्रह्म तदतिरिक्तं न किंचिदस्ति इति मननशीलाः **मुनयः** नारदादयः विदितब्रह्मतत्त्वा अपि स्वाज्ञलोकोद्धरणं कर्तव्यमिति मनीषया **ब्राह्मणं** ब्रह्माणं प्रत्येवमूचुः । किमिति? **कः परमो देव** इति ॥ २ ॥ नारदादिमुनिभिः एवं पृष्टो ब्रह्मा गोपालमन्त्रराजविद्यया उत्तरमाचष्टे—**तदु होवाच ब्राह्मण** इति । किमिति? **कृष्ण** इति । स्वभक्तपटलस्वातिरिक्तास्ति-त्वविभ्रमकर्षणात् **कृष्णो वै** प्रसिद्धः **परमं दैवतं**, "तं देवतानां परमं च दैवतं" इति श्रुतेः । 'कः परमो देवः' इति प्रश्नमपाकृत्य 'कुतो मृत्युः बिभेति' इति प्रश्नमपाकरोति—**गोविन्दादिति** । गोभिः गीर्भिः तत्त्वमस्यादि-महावाक्यततिभिः स्वातिरिक्ताविद्यापदतत्कार्यजातासंभवप्रबोधसिद्धं ब्रह्म निष्प्रति-

योगिकस्वमात्रमिति विन्दते उपलभ्यते इति गोविन्दः तस्मात् **गोविन्दात्** स्वासक्तं मृतिं नयतीति **मृत्युः** स्वातिरिक्तास्तित्वविभ्रमः **बिभेति**। गोविन्दस्य निष्प्रतियोगिकाद्वितीयत्वं मृत्योः भीहेतुरित्यर्थः, "भीषाऽस्माद्वातः पवते" इत्यादिश्रुतेः। कस्य विज्ञानेन अखिलं विज्ञातं भवतीति प्रश्नोत्तरमाह—**गोपीति**। स्वातिरिक्तास्तित्वभ्रमं नामरूपाभ्यां गोपायतीति **गोपी**, यद्वा—स्वमात्रं ब्रह्म गोपायति आवृणोतीति **गोपी** माया। तदविद्यांऽशतो जनित्वा तद्विद्यांऽशतो नश्यतीति स्वातिरिक्तास्तित्वविभ्रमरूढमूलस्वातिरिक्तप्रपञ्चो गोपीजन इत्युच्यते। तद्भावाभावावभासकप्रत्यगभिन्नब्रह्मात्मना तल्लयाधिकरणतया भातीति **गोपीजनवल्लभः** परमात्मा स्वांधिष्ठेयप्रपञ्चविलयसापेक्षप्रसक्ताधिष्ठानत्वासंभवप्रबोधसिद्धो निष्प्रतियोगिकस्वमात्रमिति तज्ज्ञानेन **एतत्** सर्वमाविद्यकं जगन्निष्प्रतियोगिकाभावरूपतया **विज्ञातं भवति**, निष्प्रतियोगिकब्रह्ममात्रमवशिष्टं भवतीत्यर्थः। केनेदं विश्वं संसरतीति प्रश्नोत्तरं तु—

या च प्रागात्मनो मे मा तथाऽन्ते च तिरस्कृता।
ब्रह्मवादिभिरुद्गीता सा मायेति विवेकतः॥

इति श्रुतिः निष्प्रतियोगिकभावरूपब्रह्ममात्रातिरेकेण कालत्रयेऽपि नास्त्येवेति यां सुष्ठ्वाह सेयं **स्वाहा** माया तया **इदं विश्वं** जीवजातं **संसरति** संसारवत् भवतीत्यर्थः॥ ३॥

गोपालकृष्णस्वरूपनिरूपणम्

तदु होचुः—कः कृष्णः। गोविन्दश्च कोऽसाविति। गोपीजनवल्लभश्च कः। का स्वाहेति॥ ४॥

तानुवाच ब्राह्मणः—पापकर्षणो गोभूमिवेदविदितो गोपीजनविद्याकला[1]पीप्रेरकः। तन्माया चेति सकलं परं ब्रह्मैव तत्। यो ध्यायति रसति भजति सोऽमृतो भवतीति॥ ५॥

[1] पिप्रे—अ १, क. भिप्रे—अ.

एवं ब्रह्मोक्तार्थं निशम्य विशेषार्थबुभुत्सया मुनयः पृच्छन्तीत्याह—**तदु होचुरिति**। **तत्** तदुक्तार्थे उ ह पूर्ववत् ऊचुः। किमिति? **कः कृष्ण इति** ॥ ४ ॥ एवं मुनिभिः पृष्टः **तानुवाच ब्राह्मणः**। किमिति? **पापकर्षणः इति**। **सच्चिदानन्दात्मना** अनृतजडदुःखात्मकपापकर्षणात् **पापकर्षणः** कृष्णशब्दार्थः। गोविन्दशब्दार्थस्तु **गोभूमिवेदविदित** इति। गोभिः वेदैः विदितत्वात् गोविन्द इत्यर्थः। गोपीजनवल्लभशब्दार्थमाह—**गोपीति**। गोपायन्तीति गोप्यः पालनशक्तयः तासां जनः समूहः। स्वातिरिक्तविद्याऽविद्याकलाजातं पिबति ग्रसतीति **गोपीजनविद्याकलापी**, विद्याकलापः अस्यास्तीति वा, **प्रेरकः** सर्वान्तर्यामित्वात्। स्वाहास्वरूपमाह—**तन्माया चेति**। तया हि स्वाज्ञलोकः संसरति। कलया सहितं **सकलं** शबलमीश्वराख्यं वस्तु स्वगतविशेषांशापाये **परं ब्रह्मैव तत्**। तद्ध्यानादिफलमाह—**यो ध्यायतीति** ॥ ५ ॥

गोपालकृष्णरूपविशेषध्यानम्

ते होचुः—किं तद्रूपं किं रसनं किमाहो तद्भजनं तत्सर्वं विविदिषतामाख्याहीति ॥ ६ ॥

तदु होवाच हैरण्यो गोपवेषमभ्राभं कल्पद्रुमाश्रितम् ॥ ७ ॥

तदिह श्लोका भवन्ति—

सत्पुण्डरीकनयनं मेघाभं वैद्युताम्बरम्।
द्विभुजं ज्ञानमुद्राऽऽढ्यं वनमालिनमीश्वरम् ॥ ८ ॥
गोपगोपीगवावीतं सुरद्रुमतलाश्रयम्।
दिव्यालंकरणोपेतं रत्नपङ्कजमध्यगम् ॥ ९ ॥
कालिन्दीजलकल्लोलसङ्गिमारुतसेवितम्।
[1]चिन्तयन् चेतसा कृष्णं मुक्तो भवति संसृतेः ॥ १० ॥ इति ॥

[1] चिन्तयेत् चे—अ.

ध्यानादिबुभुत्सया पुनस्ते पृच्छन्तीत्याह—**ते होचुरिति** ॥ ६ ॥ तत्र ध्येयस्वरूपमाह—**तदु होवाचेति** । तत् तत्र प्रश्नत्रये हिरण्यगर्भस्य विष्णोरपत्यं **हैरण्यो** ब्रह्मा ध्येयरूपं **उवाचेत्यर्थः** । वेषमात्रेण गोपी न कृत्यत्र इति **गोपवेषं**, अपो बिभर्तीत्यभ्रः समुद्रः तद्वदाभा यस्येति **अभ्राभं** समुद्रवत् गंभीरमित्यर्थः । **कल्पद्रुमाश्रितं** स्वे[सर्वे] प्सितार्थदवेदान्तवेद्यच[श]रणत्वात्, स्वस्य कर्माध्यक्षत्वेन भक्तस्येप्सितार्थ[द]त्वादित्यत्र—"सर्वभूतान्तरात्मा कर्माध्यक्षः" इति श्रुतेः, "फलमत उपपत्तेः" इति न्यायात्, "लभते च ततः कामान् मयैव विहितान् हितान्" इति स्मृतेश्च ॥ ७ ॥ ब्राह्मणोक्तार्थं मन्त्रा अप्यनुवदन्तीत्याह—**तदिहेति** ॥ ८ ॥ गोपायतीति **गोपो** जीवः, **गोपी** माया, **गावो** वेदाश्च, **तैः आवीतं** आश्रितम् ॥ ९ ॥ इतिशब्दो ध्यानसमाप्त्यर्थः ॥ १० ॥

गोपालकृष्णमन्त्रजपः

तस्य पुना रसनमिति—जलभूमीन्दु [1]संपातकामादिकृष्णाये-त्येकं पदम् । गोविन्दायेति द्वितीयम् । गोपीजनेति तृतीयम् । वल्लभायेति तुरीयम् । स्वाहेति पञ्चममिति ॥ ११ ॥ पञ्चपदं जपन् पञ्चाङ्गं द्यावाभूमिसूर्याचन्द्रम[2]साग्निस्तद्रूपतया ब्रह्म संपद्यते ब्रह्म संपद्यत इति ॥ १२ ॥

तदेष श्लोकः—क्लीमित्येतदादावादाय कृष्णाय गोविन्दाय गोपीजनवल्लभायेति [3]बृहन् भानव्यासकृदुच्चरेद्योऽसौ गतिस्तस्यास्ति मड्क्षु नान्या गतिः स्यादिति ॥ १३ ॥

द्वितीयप्रश्नार्थमाह—**तस्येति** । तस्य कृष्णाख्यब्रह्मणः **रसनं** पञ्चपद-जपनमिति । **जलं** ककारः **भूमिः** लकारः **ईकारः** इन्दुः अनुस्वारः **तं संपातरूपं**

[1] संपातार्काय कृ—अ.
[2] साग्नितद्रू—अ १, अ २, क.
[3] ब्रह्मन्—अ, अ २, क, उ १.

कामबीजं "क्लीं" इति बीजेन साकं कृष्णाय इत्यादि पञ्चपदं भवति ॥ ११ ॥ मन्त्रजपात्मकोत्तरसनस्य फलमाह—पञ्चपदमिति। पञ्चपदं जपन् मुमुक्षुः द्यावाभूम्यादिपञ्चाङ्गविशिष्टं वैराजरूपं तद्रूपतया संपद्यते। आवृत्तिः प्रथमोपनिषत्समाप्त्यर्था ॥ १२ ॥ उत्तरसने मन्त्रसंवादमाह—तदेष श्लोक इति। "क्लीं" इत्येतत् आदावादाय ततः कृष्णायेत्यादिपदचतुष्टयं, स्वाहेत्यर्थे बृहन् भानव्य इति, आहृत्य पञ्चपदं यः [अ]सकृदुच्चरेत् तस्य मनु शीघ्रं पञ्चाङ्गब्रह्मरूपा गतिः भवतीति सामान्यफलमेतत्। मन्त्रोक्तार्थानुसन्धानपूर्वकं जपतः निर्विशेषब्रह्मभावापत्तिः मुख्यफलम्। न कदाऽपि अन्या गतिः तस्य स्यात्। इतिशब्दो रसनसमाप्त्यर्थः ॥ १३ ॥

गोपालकृष्णभजनम्

भक्तिरस्य भजनम्। तदिहामुत्रोपाधिनैराश्येनामुष्मिन् मनः-[1]कल्पनम्। एतदेव च नैष्कर्म्यम् ॥ १४ ॥

कृष्णं तं विप्रा बहुधा यजन्ति गोविन्दं सन्तं बहुधाऽऽराधयन्ति।
गोपीजनवल्लभो भुवनानि दध्रे स्वाहाश्रितो [2]जगदैजत्सुरेताः ॥
वायुर्यथैको भुवनं प्रविष्टो जन्येजन्ये पञ्चरूपो बभूव।
कृष्णस्तथैकोऽपि जगद्धितार्थं शब्देनासौ
पञ्चपदो विभाति ॥ इति ॥ १६ ॥

किमाहो तद्भजनं इति प्रश्नोत्तरमाह—भक्तिरस्येति। दासोऽहं सोऽहं इति वा अनन्यभावापन्नेयं भक्तिः, "स्वस्वरूपानुसंधानं भक्तिरित्यभिधीयते" इति स्मृतेः। भजनसाधनमाह—तदिति। एवं भजनमेव नैष्कर्म्यं ज्ञानमित्यर्थः ॥ १४ ॥ भजनोपायमाह—कृष्णमिति। यः सर्वात्मतया प्रसिद्धः तं

[1] कल्पितम्—अ २. [2] जगदेतत्—अ, अ १, मु.

कृष्णं विपश्चितो विप्राः बहुधा द्रव्ययज्ञादिज्ञानयज्ञान्तैः यजन्ति गोविन्दं सन्तं बहुधा श्रवणादिभिः आराधयन्ति महामण्डूकादिकूर्मादिशेषात्मना। गोपीजनवल्लभो भुवनानि दध्रे। यद्वा—सर्वारोपाधिकरणविश्वविराडोत्राद्यात्मना भुवनोपलक्षिता-विद्यापदतत्कार्यानन्तकोटिब्रह्माण्डानि दध्रे धृतवानित्यर्थः। किंच—स्वाहेति। स्वाहाशब्दवाच्यमायाश्रितः सन् जगत् स्वाविद्यापदं ऐजत् अचालयत् सृष्टिकाले मायायां सुष्ठु रेतोबीजं यस्य सोऽयं सुरेताः, "इन्द्रो मायाभिः पुरुरूप ईयते", "रूपं रूपं प्रतिरूपो बभूव", "मम योनिर्महद्ब्रह्म तस्मिन् भर्गं दधाम्यहम्" इति श्रुतेः, स्मृतेश्च ॥ १५ ॥ स्वभक्तभजनाय भगवान् पञ्चपदात्मना भवतीति सदृष्टान्तमाह—वायुरिति। यथा मुख्यप्राणात्मको वायुरेकोऽपि भुवनं अविद्यापदप्रविभक्तब्रह्माण्डपटलं प्रविष्टः सन् जन्येजन्ये प्रतिशरीरं प्राणापानादि-भेदेन पञ्चरूपो बभूव तथैवैकोऽप्यसौ कृष्णो जगद्धितार्थं गोपालविद्याऽऽत्मकशब्देन पञ्च पदानि यस्य पञ्चपदो विविधं भाति प्रकाशते। इतिशब्दो मन्त्रपरिसमाप्त्यर्थः ॥ १६ ॥

द्वितीयोपनिषत्

गोविन्दपूजाप्रकारः

ते होचुः—उपासनमेतस्य परमात्मनो गोविन्दस्याखि[1]लाधारिणो ब्रूहीति ॥ १७ ॥

तानुवाच—यत्तस्य पीठं हैरण्याष्टपलाशमम्बुजं तदन्तराळिका[2]नलास्रयुगं तदन्तरालाद्यर्णाखिलबीजं कृष्णाय नम इति बीजाढ्यं सब्रह्माणमादायानङ्गगायत्रीं यथावद्वर्च्या[3]लिख्या भूमण्डलं शूलवेष्टितं कृत्वाऽङ्गवासुदेवादिरुक्मिण्यादि[4]स्वशक्तीन्द्रादिवसुदेवादिपार्थादिनि-

[1] लधा—अ, अ १. [2] नलकास्र—अ २, क, ङ, मु. नलकास्र—अ.
[3] लिख्य भू—अ २, क. [4] स्वशक्तिं नन्दादि—अ, अ १, अ २, क, ङ.

ध्यावीतं यजेत् सन्ध्यासु प्रतिपत्तिभिरुपचारैः । तेनास्याखिलं भवत्यखिलं भवतीति ॥ १८ ॥

तदिह श्लोका भवन्ति—

एको वशी सर्वगः कृष्ण ईड्यः एकोऽपि सन् बहुधा यो विभाति ।
तं पीठगं येऽनुभजन्ति धीरास्तेषां सिद्धिः शाश्वती नेतरेषाम् ॥
नित्यो नित्यानां चेतनश्चेतनानामेको बहूनां यो विदधाति कामान् ।
तं पीठगं येऽनुभजन्ति धीरास्तेषां सुखं शाश्वतं नेतरेषाम् ॥ २० ॥
एतद्विष्णोः परमं पदं ये नित्योद्युक्तास्तं यजन्ते न [1]कामात् ।
तेषामसौ [2]गोपरूपः प्रयत्नात् प्रकाशयेदात्मपदं तदेव ॥ २१ ॥
यो ब्रह्माणं विदधाति पूर्वं यो [3]विद्यास्तस्मै गोपायति स्म कृष्णः ।
तं ह देवमात्मबुद्धिप्रकाशं मुमुक्षुः शरणं व्रजेत् ॥ २२ ॥
ओङ्कारेणान्तरितं ये जपन्ति गोविन्दस्य पञ्चपदं मनुम् ।
तेषामसौ दर्शयेदात्मरूपं तस्मान्मुमुक्षुरभ्यसेन्नित्यशान्त्यै ॥ २३ ॥
[4]एतस्मादेव [5]पञ्चपदादभूवन् गोविन्दस्य मनवो मानवानाम् ।
दशार्णाद्यास्तेऽपि संक्रन्दनाद्यैरभ्यस्यन्ते भूतिकामैर्यथावत् ॥

"गोविन्दं सन्तं बहुधाऽऽराधयन्ति" इत्युक्तं, तत्प्रकारं पृच्छन्तीत्याह —त इति ॥ १७ ॥ एवं नारदादिमुनिभिः पृष्टः तत्पूजापीठं प्रकटयति— तानुवाचेति । तान् प्रति ब्रह्मा उवाच । किमिति ? यत्तस्य गृहे क्षाळितं पीठं

[1] कामान्—अ २.
[2] गोपरूपोप्र—अ, अ २, क.
[3] विद्यां त—अ, अ २, क.
[4] एतस्मा एव—अ, अ १, क.
[5] पञ्चपदा अ—अ.

स्थापयित्वा हैरण्याष्टपलाशं सौवर्णाष्टदलं अम्बुजं स्थापयेत् सुगन्धचन्दनेन लिखेत्। तदन्तराळिके तस्य कमलस्यान्तराळिके अन्तराळप्रदेशे अनलास्रयुगं त्रिकोणद्वयं संपुटितं षट्कोणं लिखेदित्यर्थः। तदन्तराळाद्यर्णेति तस्य षट्कोणस्य अन्तराळमध्ये कामबीजं साधकनाम च लिखेदिति शेषः। तदुक्तं सनत्कुमार-संहितायां—

कर्णिकायां लिखेद्वह्निं पुटितं मङ्गळद्वयम्।
तन्मध्ये विलिखेत् बीजं साध्याख्यं कर्म[काम]संयुतम्॥ इति॥

कृष्णाय नम इति बीजेन कामबीजेन च आदयं षडश्रसन्धिषु षडक्षरं लिखेत्, "षडश्रसन्धिषु" इति क्रमदीपिकोक्तेः। सब्रह्माणमिति—पूर्वलिखितकर्णिकास्थमनङ्गबीजं सब्रह्माणं षट्कोणस्य पूर्वनैर्ऋत्यवायव्यकोणेषु "श्रीं" इति बीजमष्टादशाक्षरमन्त्रोपेतं आदायेत्यर्थः। मन्त्रद्रष्ट्रोरभेदात् मन्त्रो ब्रह्मा। तदुक्तं संहितायां "ततः शिष्टार्णैः सकामं वेष्टयेत् विधिरिति षट्कोणस्य पूर्वनैर्ऋत्य-वायव्यकोणेषु श्रीं इति बीजं लिखेत् आग्नेयपश्चिमेशानकोणेषु ह्रीं इति बीजम्" लिखेदिति शेषः, "श्रियं षट्कोणेषु इन्द्रनिर्ऋतिवायुषु। आलिख्य विलिखेन्मायां वह्निवारुणशूलिषु" इति संहितोक्तेः। अनङ्गगायत्रीमिति अष्टदळकेसरेषु दळं प्रति वर्णत्रयं विलिखेत्। अनङ्गगायत्री तु—"कामदेवाय विद्महे पुष्पबाणाय धीमहि। तन्नोऽनङ्गः प्रचोदयात्" इति। पुनस्तत्रैवाष्टदळेषु अष्टाचत्वारिंशदक्षरं काममालामन्त्रं प्रतिदळं षट्षडक्षरं क्रमेण विलिखेत्। मालामन्त्रस्तु "नमः कामदेवाय सर्वजनप्रियाय सर्वजनसंमोहनाय ज्वल ज्वल प्रज्वल प्रज्वल सर्वजनस्य हृदयं मे वशं कुरु स्वाहा" इति। अष्टदळोपरि वृत्तं कृत्वा मातृकाऽक्षरैः वेष्टयेत्। तथा च संहितायां—

अक्षरैः कामगायत्र्या वेष्टयेत् केसरे सुधीः।
काममालामनोवर्णैः दळेष्वष्टसु मन्त्रवित्।
लिखेत् गुहाननैर्मुक्तिः मातृकां तद्बहिर्लिखेत्॥

इति । आभूमण्डलं शूलवेष्टितं कृत्वेति, "भूगृहं चतुरश्रं स्यादष्टवज्रयुतं मुने" इति संहितोक्तेः । अस्य धारणायन्त्रत्वात् साध्यादिलेखनमप्यादावसूचयत् । अत एव धारणाविधानं तत्फलं च संहितायामुक्तम्—

हुत्वा सहस्रमाज्येन यन्त्रे सम्पातपूर्वकम् ।
मार्जयित्वाऽयुतं जप्त्वा धारयेद्यन्त्रमुत्तमम् ।
त्रैलोक्यैश्वर्यमाप्नोति देवैरपि सुपूजितः ॥

इत्यादि । यदा तु पूजाऽर्थं यन्त्रं क्रियते तदा तु पूर्वं मण्टपादिपृथिव्यन्तं पूजयेत । कर्णिकोपरि—

अभ्यादिपीठपादेषु धर्मादींश्चतुरो यजेत् ।
चतुर्षु पीठगात्रेषु धर्मादींश्चतुरो यजेत् ॥
कर्णिकायां ततोऽनन्तं पद्मान्ते च ततो यजेत् ।
तारवर्णप्रभिन्नानि मण्डलानि क्रमात्ततः ॥
सत्वं रजस्तम इति यजेदात्मचतुष्टयम् ।
आत्माऽन्तरात्मा परमात्मा ज्ञानात्मेति ते क्रमात् ॥
विमलोत्कर्षिणी ज्ञानक्रियायोगेति पञ्चमी ।
प्रह्वी सत्या तथेशानाऽनुग्रहा नवमी स्मृता ॥
प्रागाद्यष्टसु पत्रेषु कर्णिकायां यजेन्मुने ॥

ॐ नमो भगवते विष्णवे सर्वभूतात्मने वासुदेवाय सर्वात्मसंयोगपीठात्मने नम इति पीठमन्त्रं पद्मस्योपरि विन्यस्य—

ततः पीठं समभ्यर्च्य देवमावाह्य नारद ।
अर्घ्यादिधूपदीपादीन् उपचारान् प्रकल्पयेत् ॥ इति ॥

अथावरणपूजां कुर्यात् । तत्र प्रथमावृतिस्तु—अग्नीशासुरवायव्यपुरःपृष्ठेषु क्लां हृदयाय नम इत्यादिषडङ्गानि पूजयेत् । एवमङ्गावरणं संपूज्य द्वितीयावरणं संपूजयेत् । अष्टपत्रेषु पूर्वादिचतुर्दिक्षु वासुदेवसङ्कर्षणप्रद्युम्नानिरुद्धान् पूजयेत् ।

आग्नेयादिचतुर्विदिक्षु शान्तिश्रीसरस्वतीरतीः पूजयेत् । तृतीयावृतिस्तु अष्टदळे पूर्वादिक्रमेण रुक्मिण्यादिस्वशक्तीः पूजयेत् । रुक्मिणी सत्यभामा जाम्बवती नाग्नजिती मित्रविन्दा काळिन्दी लक्ष्मणा सुशीला चेति श्रीकृष्णशक्तयः । चतुर्थपञ्चमाद्यावरणमाह—इन्द्रादिवसुदेवादिपार्थादीति । अत्र वसुदेवाद्यावरणमेव चतुर्थं बोध्यम् । पूर्वदळे ॐ पीतवर्णाय वसुदेवाय नमः, आग्नेयदळे यशोदायै कनकाभायै, दक्षिणदळे नन्दाय कर्पूरगौरवर्णाय, नैर्ऋतदळे राधायै कुङ्कुमगौरवर्णायै, पश्चिमदळे देवाय शङ्खकुन्दधवळाय, वायव्यदळे कलापश्यामायै सुभद्रायै, उत्तरदळे गोपेभ्यः, ईशानदळे गोपीभ्यः । पञ्चमपार्थाद्यावृतिस्तु—अर्जुनदारुकविष्वक्सेनसात्यकिगरुडनारदपर्वतान् पूजयेत् । षष्ठनिध्याद्यावृतिस्तु—पूर्वादिक्रमेण इन्द्रनिधये नीलनिधये मुकुन्दनिधये मकरनिधये पश्चिमे अनन्तनिधये कच्छपनिधये विद्यानिधये ईशाने पद्मपरमानन्दमोक्षनिधयें नमः । सप्तमेन्द्रावृतिस्तु—पूर्वादिक्रमेण इन्द्राद्यष्टदिक्पालकेभ्यो नमः, पूर्वेशानमध्ये ब्रह्मणे, निर्ऋतिपश्चिममध्ये आदिशेषाय । अष्टमवज्राद्यावृतिस्तु—पूर्वादिक्रमेण वज्राद्यायुधेभ्यः । एतैरङ्गावरणादिवज्रावरणान्तैः आवीतं भगवन्तं यजेत् । एवं देवं त्रिसन्ध्यासु षोडशोपचारैः पूजयेत् । तेन आराधनेन अस्य पुरुषार्थचतुष्टयं अखिलं भवति । आवृत्तिः द्वितीयोपनिषत्समाप्त्यर्था ॥ १८ ॥ उक्तोपासनानुकूलमन्त्रा अपि भवन्तीत्याह—तदिह श्लोका भवन्तीति । यस्य वशे निखिलं वर्तते स वशी । शिष्टं कठवल्ल्यां व्याख्यातम् ॥ १९–२० ॥ पूर्ववन्मन्त्रान्तरमाह—एतदिति । ये साधकाः एतद्विष्णोः यन्त्वात्मकं परमं पदं नित्योद्युक्ताः सन्ततश्रद्धाभक्तिविशिष्टाः सन्तस्तं यजन्ते निष्कामधिया सम्यगाराधयन्ति न तु तस्मात् कामात् कामान् कामयन्ते तेषामसौ गोपरूपो हरिः स्वस्वरूपं प्रकाशयेदित्यर्थः ॥ २१ ॥ स्वात्मपदप्रदर्शनतः किं स्यादित्यत्र तद्भावापत्तिः स्यादित्याह—य इति । यः कृष्णः पूर्वं सृष्टिसमये ब्रह्माणं विदधाति यस्तस्मै वेदान् धारयति यः प्रळये विद्या वेदान् पयोधौ मत्स्याद्यवतारेण गोपायति पुनस्तस्मा उपदिशति तं ह देवमात्मबुद्धिप्रकाशं प्रत्यञ्चं मुमुक्षुः शरणं व्रजेत् । तच्छरणतः स एव तं मोचयतीत्यत्र—

सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज ।
अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः ॥

इति भगवद्वाक्यं मानम् ॥ २२ ॥ प्रकृतपञ्चपदस्य प्रणवयोगतो रसनफलमाह—ओमिति । गोविन्दस्य पञ्चपदं ओङ्कारेणान्तरितं संपुटितं कृत्वा ये जपन्ति तेषां असौ भगवान् स्वात्मरूपं दर्शयेत् । यस्मादेवं तस्मात् मुमुक्षुः नित्यशान्त्यै गोविन्दस्य पञ्चपदं मनुं नित्यमभ्यसेत् जपेदित्यर्थः ॥ २३ ॥ एतस्मात् अन्ये मन्त्राः बभूवुरित्याह—एतस्मादिति । एतस्मात् गोविन्दस्य पञ्चपदमन्त्रात् अन्ये दशाक्षराद्या मनवो मानवानां सनकादीनां स्फुरिता बभूवुः । "संक्रन्दनोऽनिमिष एकवीरः शतं सेना अजयत् साकमिन्द्रः" इति श्रुतिसिद्धसंक्रन्दनाद्यैः इन्द्रादिदेवैः भूतिकामैः यथावत् अभ्यस्यन्ते । ते मन्त्रा अपि कृष्णपदप्रापका एवेत्यर्थः ॥ २४ ॥

तृतीयोपनिषत्

सृष्टिसाधनभूतोऽष्टादशार्णमन्त्रः

ते पप्रच्छुः । तदु होवाच—ब्रह्मसवनं चरतो मे ध्यातः स्तुतः परमेश्वरः परार्धान्ते सोऽबुध्यत । कोपदेष्टा मे पुरुषः पुरस्तादाविर्बभूव । ततः प्रणतो मयाऽनुकूलेन हृदा मह्यमष्टादशार्णस्वरूपं सृष्टये दत्त्वाऽन्तर्हितः । पुनस्ते सिसृक्षतो मे प्रादुर्भूतेष्वक्षरेषु विभज्य भविष्यज्जगद्रूपं प्रकाशयन् तदिह कादापो लात् पृथिवीतोऽग्निर्बिन्दोरिन्दुस्तत्संपातात्तदर्क इति क्लींकारादसृजं कृष्णादाकाशं खाद्वायुरुत्तरात् सुरभिविद्याः प्रादुरकार्षमकार्षमिति तदुत्तरात् स्त्रीपुमादिभेदं सकलमिदं सकलमिदमिति ॥ २५ ॥

पुनर्मुनयः पञ्चपदस्वरूपमेव पृच्छन्ति—ते पप्रच्छुरिति । तैः पृष्टः तदु होवाच । परार्धान्ते रात्र्यन्ते । ब्रह्मणः सवनं समयं चरतो मे ध्यातः स्तुतः परमेश्वरः परार्धान्ते रात्र्यन्ते स भगवान् अबुध्यत । कोऽयं मे मम उपदेष्टा पुरुषः पुरस्तादाविर्बभूव । एवमाविर्भूय किं कृतवानित्यत आह—तत इति । य एवं मत्पुरत आविर्बभूव स पुरुषः ततः तदनन्तरं मया अनुकूलेन हृदा प्रणतः सन् मह्यं अष्टादशार्णं मन्त्रं स्वस्वरूपभूतं सृष्टयर्थं दत्त्वा अन्तर्हितोऽभवदित्यर्थः । ततः किं इत्यत आह—पुनरिति । पुनः विश्वं सिसृक्षतो मे प्रादुर्भूतेष्वक्षरेषु भविष्यज्जगद्रूपं प्रकाशयन् गोपवेषधरो भगवान् पुरस्तात् प्रादुरभूत् । किं कुर्वन्नित्यत्र अष्टादशाक्षरेषु भविष्यज्जगत् प्रकाशयन् मनोगोचरं कुर्वन् तत् तत्र जगद्रूपे प्रकाशिते सति इह अष्टादशाक्षरेषु कात् ककारात् आपो जलं, लकारात् पृथिवी, ईत ईकारात् अग्निः, बिन्दोः अनुस्वारात् इन्दुः चन्द्रः, तेषां कादीनां संपातात् संश्लेषरूपात् क्लींकारात् प्रसिद्धः अर्कः सूर्यः इत्येतान् पञ्च असृजं, कृष्णायेति पदात् आकाशमसृजं, खाद्वायुरिति—खात् चिदाकाशात् शब्दराशिः वेदः, गोविन्दायेति पदात् वायुरित्यसृजं, उत्तरात् पदद्वयात्मकात् गोपीजनवल्लभायेति पदात् सुरभिः कामधेनुः विद्याः चतुर्दशेति प्रादुरकार्षं, तदुत्तरात् स्वाहेति पदात् स्त्रीपुरुषक्लीबं च सकलं स्थावरजङ्गमं प्रादुरकार्षम् । अभ्यासः तृतीयोपनिषत्समाप्त्यर्थः । इतिशब्दः पञ्चपदार्थसृष्टिसमाप्त्यर्थः ॥ २५ ॥

चतुर्थोपनिषत्

स एव आत्मज्ञानसाधनभूतः

एतस्यैव यजने चन्द्रध्वजो गतमोहमात्मानं [1]वेदेत्योंकारा-[2]लिकं मनुमावर्तयेत् सङ्गरहितोऽभ्यानत् ॥ २६ ॥

[1] वेदयत्यों—अ, अ १, अ २, क.

[2] ळीकं—अ, अ १.

तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः ।
दिवीव चक्षुराततम् ॥ २७ ॥
तस्मादेनं नित्यमावर्तयेन्नित्यमावर्तयेदिति ॥ २८ ॥

न केवलं सृष्टिसाधनभूतोऽयं मन्त्रः, किंतु महेश्वरस्य आत्मज्ञानप्रदोऽप्रीत्याह—**एतस्येति** । एतंत्पञ्चपदयजनतो हि **चन्द्रध्वजः** चन्द्रमौलीश्वरः विगळितस्वातिरिक्तमोहमात्मानं **वेद** बुबुधे **इति** कारणात् इदानीन्तनोऽपि **ओङ्काराळिकं** प्रणवसंपुटितं अष्टादशाक्षरमनुं **फलासङ्गरहितः** सन् **आवर्तयेत्** तेन चावर्तनेन **अभि** प्रत्यक्षं परमात्मानं **आनत्** आनयदित्यर्थः ॥ २६ ॥ तत्स्वरूपं विशदयति—**तद्विष्णोरिति** । यत्पदं **सदा सूरयः** स्वावशेषधिया **पश्यन्ति तद्विष्णोः परमं पदं** निष्प्रतियोगिकब्रह्ममात्रं व्याप्य सत्वे **दिवीव** स्वे महिम्नि **चक्षुः** प्रकाशमात्रं **आततं** व्यापकं भवति ॥ २७ ॥ यस्मादेवं **तस्मात्** विष्णुपदाप्तिहेतोः अष्टादशाक्षरमन्त्रं **नित्यमभ्यसेत्** । आवृत्तिः चतुर्थोपनिषत्समाप्त्यर्था ॥ २८ ॥

पञ्चमोपनिषत्

मन्त्रगतपञ्चपदेभ्यो जगत्सृष्टिः

तदाहुरेके यस्य प्रथमपदाद्भूमिर्द्वितीयपदाज्जलं तृतीयपदात्तेजश्चतुर्थपदाद्वायुश्चरमपदाद्व्योमेति वैष्णवं पञ्चव्याहृतिमयं मन्त्रं कृष्णावभासकं कैवल्यस्य [1]सृत्यै सततमावर्तयेत् सततमावर्तयेदिति ॥२९॥

तदत्र गाथाः—

यस्य प्रथमपादाद्भूः द्वितीयात् सलिलोद्भवः ।
तृतीयात्तेज उद्भूतं चतुर्थाद्गन्धवाहनः ॥ ३० ॥

[1] सिद्धयै—अ.

पञ्चमाद्ब्रम्बरोत्पत्तिस्तमेवैकं समभ्यसेत् ।
चन्द्रध्वजोऽगमद्विष्णोः परमं पदमव्ययम् ॥ ३१ ॥
ततो विशुद्धं विमलं विशोकमशेषलोभादिनिरस्तसङ्गम् ।
यत्तत्पदं पञ्चपदं तदेव स वासुदेवो न यतोऽन्यदस्ति ॥ ३२ ॥

अथ मन्त्रान्तरेण पञ्चपदेभ्यो जगत्सृष्टिं निरूपयति—**तदाहुरिति** । **तत्** तत्र अष्टादशाक्षरेषु एके मुनय **आहुः** । **यस्य** पञ्चपदात्मकमनोः पञ्चपदात् पञ्चभूतसृष्टिः स्यात् तं **वैष्णवं पञ्चव्याहृत्यात्मकपञ्चपादमयं कृष्णावभासकं मन्त्रं कैवल्यस्य सृत्यै सततमावर्तयेत्** अभ्यसेत् । आवृत्तिः पञ्चमोपनिषत्समाप्त्यर्था ॥ २९ ॥ पूर्वोपनिषदुक्तसृष्टौ गाथाः श्लोकाः भवन्तीत्याह—**तदत्र गाथा इति** । इत्येते गाथा भवन्तीत्यर्थः ॥ ३०–३१ ॥ पञ्चपदस्य जगद्धेतुत्वान्मुक्तिदायकत्वात् वस्तुतो निष्प्रतियोगिकचिन्मात्रपर्यवसन्नत्वाच्च पञ्चपदात्मकोऽयं मनुः वासुदेव एवेत्याह—**तत इति** । **यत्तत्पदत्वेन** चिन्मात्रमिति प्रसिद्धं **तदेव पञ्चपदं स** हि तदर्थरूपो **वासुदेवः** परमात्मा तदतिरिक्तं न किंचिदस्तीत्यर्थः ॥ ३२ ॥

पञ्चपदात्मकगोविन्दस्तुतिः

तमेकं गोविन्दं सच्चिदानन्दविग्रहं पञ्चपदं बृन्दावनसुरभूरुहतलासीनं [1]सततं समरुद्गणोऽहं परमया स्तुत्या स्तोष्यामि ॥ ३३ ॥

ॐ नमो विश्वरूपाय विश्वस्थित्यन्तहेतवे ।
विश्वेश्वराय विश्वाय गोविन्दाय नमो नमः ॥ ३४ ॥
नमो विज्ञानरूपाय परमानन्दरूपिणे ।
कृष्णाय गोपीनाथाय गोविन्दाय नमो नमः ॥ ३५ ॥

[1] सततम—अ.

नमः कमलनेत्राय नमः कमलमालिने ।
नमः कमलनाभाय कमलापतये नमः ॥ ३६ ॥
बर्हापीडाभिरामाय रामायाकुण्ठमेधसे ।
रमामानसहंसाय गोविन्दाय नमो नमः ॥ ३७ ॥
कंसवंशविनाशाय केशिचाणूरघातिने ।
वृषभध्वजवन्द्याय पार्थसारथये नमः ॥ ३८ ॥
वेणुनादविनोदाय गोपालायाहिमर्दिने ।
कालिन्दीकूललोलाय लोलकुण्डलधारिणे ॥ ३९ ॥
वल्लवीवदनाम्भोजमालिने नृत्तशालिने ।
नमः प्रणतपालाय श्रीकृष्णाय नमो नमः ॥ ४० ॥
नमः पापप्रणाशाय गोवर्धनधराय च ।
पूतनाजीवितान्ताय तृणावर्तासुहारिणे ॥ ४१ ॥
निष्कलाय विमोहाय शुद्धायाशुद्धवैरिणे ।
अद्वितीयाय महते श्रीकृष्णाय नमो नमः ॥ ४२ ॥
प्रसीद परमानन्द प्रसीद परमेश्वर ।
आधिव्याधिभुजङ्गेन दष्टं मामुद्धर प्रभो ॥ ४३ ॥
श्रीकृष्ण रुक्मिणीकान्त गोपीजनमनोहर ।
संसारसागरे मग्नं मामुद्धर जगद्गुरो ॥ ४४ ॥
केशव क्लेशहरण नारायण जनार्दन ।
गोविन्द परमानन्द मां समुद्धर माधव ॥ ४५ ॥

अतः पञ्चपदात्मकं वासुदेवं स्तौमीत्याह—**तमिति** ॥ ३३ ॥ कथं स्तोष्यसीत्यत आह—**ओमिति** ॥ ३४–४५ ॥

षष्ठोपनिषत्

गोपालकृष्णध्यानजपभजनविधिः

अथैवं स्तुतिभिराराधयामि तथा यूयं पञ्चपदं जपन्तः श्रीकृष्णं ध्यायन्तः संसृतिं तरिष्यथेति होवाच हैरण्यगर्भः ॥ ४६ ॥

अमुं पञ्चपदं मनुमावर्तयेद्यः

स यात्यनायासतः केवलं तत्पदं तत् ॥ ४७ ॥

अनेजदेकं मनसो जवीयो

नैनद्देवा आप्नुवन् पूर्वमर्षदिति ॥ ४८ ॥

तस्मात् कृष्ण एव परमो देवस्तं ध्यायेत् तं रसयेत् तं यजेत् तं भजेत् ॐ तत्सदित्युपनिषत् ॥ ४९ ॥

एवं हिरण्यगर्भजो ब्रह्मा मुनीन् प्रति उवाचेत्यर्थः ॥ ४६ ॥ **अमुं पञ्चपदं** वासुदेवात्मकं मन्त्रं **आवर्तयेत् यः पुमान् सोऽयं अनायासतः केवलं** वासुदेवाख्यं **पदं याति** ॥ ४७ ॥ यद्वासुदेवपदमुक्तं तदेव मन्त्रोऽप्यनुवदति—**अनेजदिति** । **अनेजत्** व्योमवदचलं सर्वत्र **एकं मनसोऽपि जवीयो** वेगवत्तरं **तदेतत्** पदं **देवाः** चक्षुरादीन्द्रियाणि **नाप्नुवन्** चक्षुरादिव्यापारस्य मनोव्यापारपूर्वकत्वात् । चक्षुराद्यपेक्षया मनो जविष्ठं, मनसोऽप्येतत्पदं जववत्तरं, इत्यत्र हेतुः—**पूर्वमर्षत्** इति, वासुदेवपदस्य बाह्यान्तःकरणवृत्तिसहस्रभावाभावप्रकाशकतया तत्प्रवृत्तिनिवृत्तिनिमित्तत्वात् । **इति**शब्दो मन्त्रसमाप्त्यर्थः ॥ ४८ ॥ यस्मात् एतत्पदं निष्प्रतियोगिकचिन्मात्रपर्यवसन्नं भवति **तस्मात्** तत्पदाख्यः

कृष्ण एव परमो देवः प्रकाशमात्रत्वात् । **तत्स्वरूपं ध्यायेत्** सदा तन्मन्त्रं **रसयेत्** जपेत्, तमेव **भजेत्** प्रेमपूर्वकमाराधयेत् । किं तत्पदं इत्यत्र **ॐ तत् सत्** इति शब्दत्रयप्रतिपाद्यमित्यर्थः । **इति**शब्दः षष्ठोपनिषत्समाप्त्यर्थः । **उपनिषच्छब्दः** पूर्वतापिनीसमाप्त्यर्थः ॥ ४९ ॥

गोपालोत्तरतापिनी

दुर्वाससो व्रजस्त्रीभैक्षार्हत्वम्

एकदा हि व्रजस्त्रियः सकामाः शर्वरीमुषित्वा सर्वेश्वरं गोपालं कृष्णमूचिरे । उवाच ताः कृष्णः । अमुकस्मै ब्राह्मणाय भैक्षं दातव्यमिति । [1]दुर्वासस इति ॥ १ ॥

पूर्वतापिनीप्रकटितमन्त्रराजपञ्चपदध्यानरसनविशुद्धान्तरस्य निर्विशेषब्रह्मातिर्भवेदिति प्रकटयितुं उत्तरतापिनीमवतारयति । गोपीगणमौन्याद्याख्यायिका तु विद्यास्तुत्यर्था । आख्यायिकामवतारयति—**एकदा हीति** । ताभिः एवमुक्तो भगवानाह—**उवाच ताः कृष्ण** इति । सामान्यत आख्यायिका सूचिता । विशेषतस्तामेव विशदयन् आदौ स्त्रीणां वचनमाह—**अमुकस्मा इति** । कस्मा इत्यत्र—**दुर्वासस** इति छान्दसः दूर्वाससे दूर्वाशिन इत्यर्थः ॥ १ ॥

कृष्णस्य अस्खलितब्रह्मचारित्वस्मरणेन तासां यमुनातरणम्

कथं यास्यामो जलं तीर्त्वा यमुनायाः यतः श्रेयो भवति । कृष्णेति ब्रह्मचारीत्युक्त्वा मार्गं वो दास्यति यं मां स्मृत्वाऽगाधा

[1] 'ता उवाच श्रीकृष्णः' इत्यधिकः (अ) कोशे.

गाधा भवति यं मां स्मृत्वाऽपूतः पूतो भवति यं मां स्मृत्वाऽव्रती व्रती भवति यं मां स्मृत्वा सकामो निष्कामो भवति यं मां स्मृत्वाऽश्रोत्रियः श्रोत्रियो भवति यं मां स्मृत्वाऽगाधतलस्पर्शा[1]रहिता अपि सर्वा सरिद्गाधा [2]भवन्ति ॥ २ ॥

श्रुत्वा तद्वाक्यं हि वै रौद्रं स्मृत्वा तद्वाक्येन तीर्त्वा तत्सौर्यां हि वै गत्वाऽऽश्रमं पुण्यतमं हि वै नत्वा मुनिं श्रेष्ठतमं हि वै रौद्रं चेति दत्त्वाऽस्मै ब्राह्मणाय क्षीरमयं घृतमयमिष्टतमं हि वै मृष्टतमं हि तुष्टः स्नात्वा भुक्त्वा हित्वाऽऽशिषं [3]प्रयुज्यानुज्ञां त्वदात् ॥ ३ ॥

पुनः स्त्रीणां वाक्यं कथमिति । कथं वयं **यमुनाजलं** अगाधं **तीर्त्वा** मुनिं **यास्याम** इति । तासां वाक्यमाकर्ण्य भगवानाह—**कृष्णेति** । श्रीकृष्णोऽस्खलितब्रह्मचारीति सकृत् उक्त्वा व्रजत, युष्माकं यमुना **मार्गं दास्यति** । **कृष्णेति** छान्दसः । कृष्णेत्युक्तितः कथं यमुना मार्गं दास्यति, कथमनेकाङ्गनामदनलीलाशाली ब्रह्मचारी भवितुमर्हतीति शङ्कामुन्मूलयन्नाह—**यं मामिति** । **सर्वा सरित्** सर्वाः सरितः ॥ २ ॥ यं मां स्मृत्वा अपूतः पूतो भवतीति **श्रुत्वा तद्वाक्यम्** । हि निश्चितं वै स्मर्यते । तास्तु गोप्यः श्रीकृष्णवाक्यं श्रुत्वा सामर्थ्यप्रकटनवाक्येन भीताः सत्यः **रौद्रं** रुद्रांशजं दूर्वाससं **स्मृत्वा** कृष्णोऽस्खलितब्रह्मचारीति स्मरणमात्रेण अगाधामपि गाधीभूतां सूर्यजत्वात् **सौर्यां** यमुनां **तीर्त्वा पुण्यतमं तदाश्रमं गत्वा श्रेष्ठतमं** दूर्वाससं **रौद्रं नत्वा** । **इति**शब्दो भोजनपूर्वचरणपरिसमाप्त्यर्थः । **अस्मै ब्राह्मणाय क्षीरमयमि**त्यादिविशेषणविशिष्टमन्नं **दत्त्वा** आराधयामासुः इत्यर्थः । सोऽयं मुनिः आभिः दत्तमन्नं

[1] रहितापि—अ, अ १. [2] भवति—अ, अ २, क.

[3] "प्रयुज्यान्नं ज्ञात्वादात्" इति पाठः आकरेषु सर्वेषु दृष्टोपि व्याख्यानुसारेणैवं व्यत्यस्तः ।

भुक्त्वा स्वभुक्तावशेषमुच्छिष्टभाग्भ्यो दत्वा तासां आशिषं कृत्वाऽथ गमनानुज्ञामदात् दत्तवानित्यर्थः ॥ ३ ॥

दुर्वाससो निराहारत्वस्मरणेन तासां यमुनातरणम्

ता ऊचुः—कथं यास्यामो वयं सौर्यां तीर्त्वा । स होवाच मुनिः—दूर्वा[1]शिनं मां स्मृत्वा वो दास्यतीति मार्गम् ॥ ४ ॥

तेनैवमाज्ञप्ताः तं प्रति ता ऊचुः । किमिति? कथमिति। तासां वाचमाकर्ण्य स होवाच मुनिः । किमिति? दूर्वाशिनमिति । मां दूर्वाशिनं निराहारं वा स्मरत, ततो युष्माकं यमुना मार्गं दास्यति ॥ ४ ॥

कृष्णदूर्वाससोर्विषये गान्धर्वीशङ्का

तासां मध्ये हि श्रेष्ठा गान्धर्वी ह्युवाच तं हि वै ताभिरेवं कथं कृष्णो ब्रह्मचारी कथं दूर्वाशनो मुनिः । तां हि मुख्यां विधाय पूर्वमनुकृत्वा तूष्णीमासुः ॥ ५ ॥

तासां मध्ये हि श्रेष्ठा गान्धर्वी कदाचित् तं हि वै मुनिं एवं उवाच । अन्याः स्त्रियस्तु तूष्णीमासुः । एवं विचार्य । कथमिति—भूतभौतिकान्तर्याम्यात्मनो विक्रियत्वात् कृष्णो ब्रह्मचारीत्यादि कथं युज्यते ॥ ५ ॥

ब्रह्मज्ञानिनः अभोक्तृत्वम्

शब्दवानाकाशः । शब्दाकाशाभ्यां भिन्नः । तस्मिन्नाकाशस्तिष्ठति । आकाशो [2]तिष्ठति । स ह्याकाशस्तं न वेद । स ह्यात्माऽहं कथं भोक्ता भवामि ॥ ६ ॥

[1] सिनं—अ, अ १, क. [2] तिष्ठत्याका—उ.

स्पर्शवान् वायुः। स्पर्शवायुभ्यां भिन्नः। तस्मिन्वायुस्तिष्ठति। वायौ तिष्ठति। वायुस्तं न वेद। स ह्यात्माऽहं कथं भोक्ता भवामि ॥ ७ ॥

रूपवदिदं तेजः। रूपाग्निभ्यां भिन्नः। तस्मिन्नग्निस्तिष्ठति। अग्नौ तिष्ठति। अग्निस्तं न वेद। स ह्यात्माऽहं कथं भोक्ता भवामि ॥ ८ ॥

रसवत्य आपः। रसाद्भ्यो भिन्नः। तस्मिन्नापस्तिष्ठन्ति। अप्सु तिष्ठति। आपस्तं न विदुः। स ह्यात्माऽहं कथं भोक्ता भवामि ॥ ९ ॥

गन्धवतीयं भूमिः गन्धभूमिभ्यां भिन्नः। तस्मिन् भूमिस्तिष्ठति। भूमौ तिष्ठति। भूमिस्तं न वेद। स ह्यात्माऽहं कथं भोक्ता भवामि ॥ १० ॥

इदं हि मन एवेदं मनुते। तानीदं हि गृह्णाति। यत्र सर्वमात्मैवाभूत्तत्र वा कुत्र मनुते [1]क्व वा गच्छतीति। स ह्यात्माऽहं कथं भोक्ता भवामि ॥ ११ ॥

एवमाशङ्कां परिहरन् मुनिराह— **शब्दवानिति**। शब्दगुणयुक्तोऽयमाकाशो वर्तते। तदुभयभिन्नो विलक्षणः प्रत्यगात्मा। **तस्मिन्** प्रतीचि सर्वारोपापवादाधारे **आकाशस्तिष्ठति**। अन्तर्याम्यात्मना अयं प्रत्यक् **आकाशे तिष्ठति**। **स** हीति शब्दवान् **आकाशः** स्वाधारं प्रत्यञ्चं स्वान्तर्यामिणं वा जात्वपि **न वेद**। मया प्रतीचा साकं परमात्मैव तिष्ठति। **स हि** प्रत्यगभिन्नपरमात्माऽहं कथं भोक्ता

[1] कथं वा—अ, अ १, क.

भवामि ॥ ६ ॥ एवं वाग्वादयो व्याख्येयाः ॥ ७ ॥ किं भोक्ताऽहमिति मनुत इत्यत आह—इदमिति । आकाशादिपञ्चभूतभौतिकेषु वर्तमानं इदं मन एव हि भोक्ताऽहमिति मनुते । मनसो जडत्वेऽपि चैतनसंनिधानात् मननादिशक्तिः, यस्मात् यदिदं मन एव तत्तदिन्द्रियाविष्टं सत् पूर्वं शब्दादीनि गृह्णाति । तव अन्तःकरणावच्छिन्नतया भोक्ताऽहमित्यध्यासः स्यादित्यत आह—यत्रेति । यत्र यस्मिन् ब्रह्मणि कार्यकारणकलनासंभवात् एवंविदुषः सर्वमात्मैवाभूत् तत्र निष्प्रतियोगिकब्रह्ममात्रे तज्ज्ञानदशायां वा यत्र कुत्र वा धर्मिणि केन करणेन धर्मिणं मन्तारं मनुते । क्व वा अपि केन कारणेन को वा गच्छति । एवं वागादिपर्याया अप्यूह्याः । निष्प्रतियोगिकब्रह्ममात्रावगतेः अध्यारोपापवादापह्नवपूर्वकत्वात् ज्ञानिनो भोक्तृत्वाध्यासः कुत इति भावः ॥ ११ ॥

कृष्णस्य अभोक्तृत्वम्

अयं हि कृष्णो यो वो हि प्रेष्ठः शरीर[1]द्वयकारणं भवति ॥ १२ ॥

द्वा सुपर्णौ भवतो ब्रह्मणोऽहं संभूतस्तथेतरो भोक्ता भवति । अन्यो हि साक्षी भवतीति । [2]वृक्षधर्मे तौ तिष्ठतः । अतो भोक्रभोक्तारौ । पूर्वो हि भोक्ता भवति । तथेतरोऽभोक्ता कृष्णो भवतीति ॥ १३ ॥

यत्र विद्याऽविद्ये न विदामो विद्याऽविद्याभ्यां भिन्नो विद्यामयो हि [3]यः स कथं [4]विषयो भवति ॥ १४ ॥

यो ह वै कामेन कामान् कामयते स कामी भवति । यो ह वै त्वकामेन कामान् कामयते सोऽकामी भवति । जन्मजराभ्यां

[1] त्रय—अ.
[2] वृक्षधर्मेण ति—अ, अ १.
[3] यस्य—अ १, अ २, क, उ.
[4] विषयी—उ.

भिन्नः स्थाणुरयमच्छेद्योऽयम्। योऽसौ सूर्ये तिष्ठति योऽसौ गोषु तिष्ठति योऽसौ गोपान् पालयति योऽसौ सर्वेषु [1]देवेषु तिष्ठति योऽसौ सर्वै[2]र्देवैर्गीयते योऽसौ सर्वेषु भूतेष्वाविश्य भूतानि विदधाति स वो हि स्वामी भवति ॥ १५ ॥

अस्तु तव ब्रह्मज्ञानित्वात् अभोक्तृत्वं, किं कृष्णोऽपि तथेत्यतः आह—अयं हीति। कृष्णस्य सर्वप्रेमास्पदत्वेन व्यष्टिसमष्टिशरीरद्वयकारणतया चेश्वरत्वात् अयमपि न भोक्तेत्यर्थः ॥ १२ ॥ कृष्णस्य सर्वाधिष्ठानत्वेन अभोक्तृत्वमुक्तं, इदानीमन्तर्यामितयाऽप्यभोक्तृत्वं स्यादित्याह—द्वेति। ब्रह्मणः चिन्मात्रात् द्वौ सुपर्णाविव सहचरौ जीवेश्वरौ भवतः। तन्मध्ये इतरः अहंसंभूतो जीवो भोक्ता भवति। अन्यस्तु ईश्वरः साक्षी अभोक्ता भवति। इतिशब्दो मन्त्रसमाप्त्यर्थः। तयोः सुपर्णत्वं कुत इत्यत्र वृक्षवात्मको हि वृक्षधर्मः तत्र संसारे तौ तिष्ठतः। तयोः अनीश्वरेश्वरत्वात् भोक्तृत्वाभोक्तृत्वे स्याताम्। तत्र पूर्वस्य भोक्तृत्वं अपरस्य अभोक्तृत्वं इतिं सिद्धम् ॥ १३ ॥ तयोः भोक्तृत्वाभोक्तृत्वहेतुमाह—यत्रेति। यत्र ईश्वरे विद्याऽविद्याभ्यां भिन्ने विद्याऽविद्ये न विदामः। तत्र हेतुः विद्यामय इति। विद्या नाम "ब्रह्मातिरिक्तं न किञ्चिदस्ति" इति ब्रह्ममात्रवृत्तिः, तत्प्रकाशकत्वात् न हि तद्विषयो भवति। न हि घटाद्यवभासकः सविता घटो भवति, तथेत्यर्थः ॥ १४ ॥ एवं विद्याऽविद्यारहितत्वात् अभोक्तृत्वं उक्तं, अकामत्वादप्यभोक्तृत्वमाह—यो हेति। यः काम्यकामिजीवेश्वरविलक्षणतया स्वातिरिक्तषड्भावविकारास्पदशरीरोपलक्षिताविद्यापदतत्कार्यजातासंभवनिष्प्रतियोगिकब्रह्ममात्रतया चावशिष्यते स वो युष्माकं सर्वेषामपि स्वामी आत्मा भवतीत्यर्थः ॥ १५ ॥

गोपालकृष्णजन्मादीन्यधिकृत्य गान्धर्वीप्रश्नाः

सा होवाच गान्धर्वी—कथं वा स्वस्मासु जातो गोपालः। कथं [3]वा ज्ञातोऽसौ त्वया मुने कृष्णः। को वाऽस्य मन्त्रः। किं

[1] भूतेषु—उ. वेदेषु—अ, अ १. [2] र्वेदैः—उ. [3] विज्ञा—अ, अ १.

स्थानम्। कथं वा देवक्यां जातः। को वाऽस्य जायाग्रामो भवति। कीदृशी पूजाऽस्य गोपालस्य भवति। साक्षात्प्रकृतिपरोऽयमात्मा गोपालः कथं त्ववतीर्णो भूम्याम्। सा गान्धर्वी हि वै मुनिमुवाच ॥ १६ ॥

एवं मुनिमुखात् विदितभगवद्वृत्तान्ता गान्धर्वी पृच्छतीत्याह—**सा हेति**। एवमादिप्रश्नान् पृच्छति—**सेति** ॥ १६ ॥

नारायणं प्रति अवतारविषये ब्रह्मप्रश्नः

स होवाच तां हि वै—पूर्वं नारायणो यस्मिल्लोका ओताश्च प्रोताश्च तस्य हृत्पद्माज्जातोऽब्जयोनिस्तपस्तप्त्वा तस्मै ह वरं ददौ। सा कामप्रश्नमेव वव्रे। तं हास्मै ददौ ॥ १७ ॥

स होवाचाब्जयोनिः—यो वाऽवताराणां मध्ये श्रेष्ठोऽवतारः को भवति येन लोकास्तुष्टा भवन्ति यं स्मृत्वा मुक्ता अस्मात् संसाराद्भवन्ति कथं वाऽस्यावतारस्य ब्रह्मता भवति ॥ १८ ॥

एवं गान्धर्वीप्रश्नानुरोधेन भगवान् मुनिराह—**स हेति** ॥ १७ ॥ एवं भगवता दत्तवरः **स होवाचेति**। किमिति? **यो वेति** ॥ १८ ॥

भूचक्रस्थसप्तपुरीमध्ये मधुरा नाम गोपालपुरी

स होवाच तं हि वै नारायणो देवः—सकाम्या मेरोः शृङ्गे यथा सप्तपुर्यो भवन्ति तथा निष्काम्याः सकाम्या भूगोळचक्रे सप्तपुर्यो भवन्ति। तासां मध्ये साक्षाद्ब्रह्म गोपालपुरी भवति ॥ १९ ॥

सकाम्या निष्काम्या देवानां सर्वेषां भूतानां भवति। अथास्य भजनं भवति। यथा हि वै सरसि पद्मं तिष्ठति तथा भूम्यां तिष्ठति चक्रेण रक्षिता मथुरा तस्माद्गोपालपुरी भवति ॥ २० ॥

एवं ब्रह्मणा पृष्टः स होवाच। यथा मेरोः शृङ्गे कामफलेन सहिताः सकाम्याः स्वर्गादयः सप्तपुर्यो भवन्ति—यमनिर्ऋत्यधिष्ठित-लोकावेकीकृत्येत्यर्थः—तथा अधिकारितारतम्येन निष्काम्याः सकाम्याश्च भूगोळचक्रे—

अयोध्या मथुरा माया काशी काञ्ची अवन्तिका।
पुरी द्वारावृती चैव सप्तैता मोक्षदायिकाः ॥

इति सप्तपुर्यो भवन्ति। तन्मध्ये गोपालपुरी साक्षाद्ब्रह्मैव भवतीत्यर्थः ॥ १९ ॥ किंच—सकाम्येति ॥ २० ॥

मधुरावरणवनेषु देवादीनां वासः

[1]बृहद्बृहद्वनं मधोर्मधुवनं तालस्तालवनं काम्यं काम्यवनं बहुला बहुलवनं [2]कुमुदः कुमुदवनं खदिरः खदिरवनं भद्रो भद्रवनं भाण्डीर इति भाण्डीरवनं श्रीवनं लोहवनं बृन्दावनमेतैरावृता पुरी भवति ॥ २१ ॥

तत्र तेष्वेव गगनेष्वेवं देवा मनुष्या गन्धर्वा नागाः किंनरा गायन्ति नृत्यन्तीति ॥ २२ ॥

तत्र द्वादशादित्या एकादश रुद्रा अष्टौ वसवः सप्त मुनयो ब्रह्मा नारदश्च पञ्च विनायका [3]विश्वेश्वरो रुद्रेश्वरोऽम्बिकेश्वरो [4]गणेश्वरो

[1] ब्रह्मन् बृ—अ २, क.
[2] कुमुदं—अ २, क.
[3] वीरेश्वरो—उ, अ, अ १, अ २, क.
[4] 'गणेश्वरः' इति न (अ, अ १, अ २, क) कोशेषु.

नीलकण्ठेश्वरो [1]वीरेश्वरो गोपालेश्वरो भद्रेश्वर इत्यष्टावन्यानि लिङ्गानि चतुर्विंशतिर्भवन्ति ॥ २३ ॥

द्वे वने स्तः कृष्णवनं भद्रवनम् । तयोरन्तर्द्वादश वनानि पुण्यानि पुण्यतमानि । तेष्वेव देवास्तिष्ठन्ति सिद्धाः सिद्धिं प्राप्ताः ॥ २४ ॥

सेयं मथुरा द्वादशवनैरावृता भवतीत्याह—**बृहदिति** । **बृहत्** महद्भूतलं **बृहद्वनं** प्रथमम्, **मधोः** दैत्यस्याश्रयं **मधुवनं** द्वितीयम्, यत्र **ताळो** वर्तते तत् **ताळवनं** तृतीयम्, यत्र **काम्यं** कामदो देवो वर्तत इति **काम्यवनं** चतुर्थम्, **बहुळा** वर्तत इति **बहुळवनं** पञ्चमम्, **कुमुदो** वर्तत इति **कुमुदवनं** षष्ठम्, **खदिरो** वर्तत इति **खदिरवनं** सप्तमम्, **भद्रो** वृक्षविशेषो वर्तत इति **भद्रवनं** अष्टमम्, **भाण्डीरवटो** वर्तत इति **भाण्डीरवनं** नवमम्, यत्र तप्यतः श्रीः प्रसीदति तत् **श्रीवनं** दशमम्, यत्र लोहनामकोऽसुरः तपस्सिद्धिं गतः तत् **लोहवनं** एकादशम्, बृन्दाया वनं **बृन्दावनं** द्वादशम्, **एतैरावृता** इयं **पुरी** भवतीत्यर्थः ॥ २१ ॥ किंच तेषु वनेषु देवादयो वर्तन्त इत्याह—**तत्रेति** । **तत्र** बृहद्वनादिद्वादशवनेषु ॥ २२ ॥ उक्तद्वादशवनेषु वरुणादिद्वादशादित्या वसन्ति । वरुणः सूर्यो यमो वेदाङ्गो भानुः इन्द्रो रविः गभस्तिः हिरण्यरेताः दिवाकरो मित्रो विष्णुः इति द्वादशादित्यनामानि भवन्ति ।

वीरभद्रश्च शम्भुश्च गिरीशश्च तृतीयकः ।
अजैकपादहिर्बुध्न्यः पिनाकी च तथाऽपरः ॥
भुवनाधीश्वरश्चैव कपाली च दिशां पतिः ।
स्थाणुर्भु[र्भ]व इति प्रोक्ता रुद्रा एकादश स्मृताः ॥

इति **एकादश रुद्राः** ।

[1] 'वीरेश्वरो' इति न (अ, आ १, अ २, क) कोशेषु.

ध्रुवो धरश्च सोमश्च आपश्चैवानलोऽनिलः ।
प्रत्यूषश्च प्रभासश्च वसवोऽष्टावितीरिताः ॥

इति **अष्ट वसवः** ।

कश्यपोऽत्रिर्भरद्वाजो विश्वामित्रोऽथ गौतमः ।
जामदग्न्यो [जमदग्निः] वसिष्ठश्च सप्तैते मुनयः स्मृताः ॥

इति **सप्त मुनयः** ।

मोदः प्रमोद आमोदः सुमुखो दुर्मुखस्तथा ।

इति **पञ्च विनायकाः** ।

विश्वेश्वरादिभद्रेश्वरान्तं अष्टौ लिङ्गानि तथा **अन्यानि च चतुर्विंशति-लिङ्गानि भवन्ति** ॥ २३ ॥ कृष्णादिवनान्तराळे **द्वादश वनानि** सन्ति । **तत्र** कानि चित् **पुण्यानि** कानि चित् **पुण्यतमानि** । शिष्टं स्पष्टम् ॥ २४ ॥

रुद्रादिपूज्याः मथुरास्थाः कृष्णमूर्तयः

तत्र हि रामस्य राममूर्तिः प्रद्युम्नस्य प्रद्युम्नमूर्तिरनिरुद्धस्यानिरुद्धमूर्तिः कृष्णस्य कृष्णमूर्तिः ॥ २५ ॥

वनेष्वेवं मथुरास्वेवं द्वादश मूर्तयो भवन्ति । एकां हि रुद्रा यजन्ति द्वितीयां हि ब्रह्मा यजति तृतीयां ब्रह्मजा यजन्ति चतुर्थीं मरुतो यजन्ति पञ्चमीं विनायका यजन्ति षष्ठीं च वसवो यजन्ति सप्तमीमृषयो यजन्ति अष्टमीं गन्धर्वा यजन्ति नवमीमप्सरसो यजन्ति दशमी वै ह्यन्तर्धाने तिष्ठति एकादशमिति स्वपदानुगा द्वादशमिति भूम्यां तिष्ठति । तां हि ये यजन्ति ते मृत्युं तरन्ति मुक्तिं लभन्ते गर्भजन्मजरामरणतापत्रयात्मकदुःखं तरन्ति ॥ २६ ॥

तदप्येते श्लोका भवन्ति—

संप्राप्य मथुरां रम्यां [1]ब्रह्मरुद्रादिवन्दिताम् ।
शङ्खचक्रगदाशार्ङ्गरक्षितां मुसलादिभिः ॥ २७ ॥
यत्रासौ संस्थितः कृष्णः स्त्रीभिः शक्त्या समाहितः ।
[2]रामानिरुद्धप्रद्युम्नै रुक्मिण्या सहितो विभुः ॥ २८ ॥
चतुःशब्दो भवेदेको ह्यों[3]कारस्य उदाहृतः ॥ २९ ॥

सिद्धादिसिद्धिप्रदत्वे हेतुमाह—तत्र हीति । रामादेः रामाद्याख्या मूर्तिरस्तीत्यर्थः ॥ २५ ॥ कास्ताः द्वादश मूर्तयः इत्यत्र—रौद्री ब्राह्मी दैवी मानवी विघ्नविनाशिनी काम्या आर्षा गान्धर्वी गौरन्तर्धानस्था स्वस्वपदं गता भूमिष्ठा औदका चेति द्वादशमूर्तीनां नामानि भवन्ति । तासां प्रत्येकमुपासनमाह—एकां हीति । ब्रह्मजाः सनकादयः । मरुतो मरुद्गणाः । अन्तर्धाने गुप्ता तिष्ठति एकादशमिति स्वपदानुगा विष्णुपदं गतेत्यर्थः निर्विशेषत्वात् । द्वादशधामेति या प्रसिद्धा सा भूम्यां तिष्ठति । तत्पूजकानां परमफलमाह—तां हीति । दुःखहेतुत्वाज्ञानस्य निवृत्तत्वात् ॥ २६ ॥ ब्राह्मणोक्तेऽर्थे मन्त्राः भवन्तीत्याह—तदप्येते श्लोका भवन्तीति । मथुरापुरीं प्राप्य देवमनुष्यादयः तिष्ठन्ति श्रीकृष्णबलदेवायुधैः गुप्तां यत्र बलरामादिभिः रुक्मिण्यादिस्वशक्तिभिश्च कृष्णो विजयते तामधिष्ठाय देवाः तिष्ठन्तीति संबन्धः । कृष्णावतारो ह्यवताराणां श्रेष्ठः, मधुरायामस्य स्थानमित्युक्तं भवति ॥ २७–२८ ॥ प्रणवार्थत्वादस्य ब्रह्मत्वं निरङ्कुशमित्याह—चतुरिति । रामादिभेदेन चतुश्शब्दः चतुर्व्यूहः एक ईश्वरो भवेत् भवति । तत्र हेतुमाह—ओङ्कारस्येति । अकारादिमात्राचतुष्टयं ओङ्कारार्थः । तन्मात्राचतुष्टयवाच्या रामादिचतुर्व्यूहा इति समुदायार्थः ॥ २९ ॥

[1] सदा ब्रह्मादि—क, अ, अ १, अ २.
[2] रामाऽनिरुद्धः प्रद्युम्नो रु—अ, अ १, क, उ.
[3] कारश्च—अ, अ १, उ.

मुमुक्षुभिः गोपालात्मत्वं स्मरणीयम्

[1]तस्मादेव परो रजसेति सोऽहमित्यवधार्यात्मानं गोपालोऽहमिति भावयेत्। स मोक्षमश्नुते। स ब्रह्मत्वमधिगच्छति। स ब्रह्मविद्भवति। स गोमान् जीवानात्मत्वेन सृष्टिपर्यन्तमालाति। स गोपालो भवति ह्रीं तत् सत् सोऽहम्। परं ब्रह्म कृष्णात्मको नित्यानन्दैकस्वरूपः सोऽहम्। ओं तत् सद्गोपालोऽहमेव। परं सत्यमबाधितं सोऽहमित्यात्मानमादाय मनसैक्यं कुर्यात्। आत्मानं गोपालोऽहमिति भावयेत्। स एवाव्यक्तोऽनन्तो नित्यो गोपालः॥ ३०॥

"यं स्मृत्वा मुक्ता अस्मात् संसारात्" इत्यस्योत्तरमाह—तस्मादिति। तस्मात् प्रणवाभिधेयत्वात् रजस इत्युपलक्षितगुणत्रयात् यः परः सोऽहमित्यवधार्य गोपालोऽहमिति भावयेत्। रजसेति छान्दसः। विशिष्टोपास्तेः फलं दर्शयति—स मोक्षमिति। आत्ताति आदत्ते स्वीकरोतीत्यर्थः। ॐ तत् सत् सोऽहं इत्यत्र ओंतच्छब्दाभ्यां यद्वाच्यं सत् परं ब्रह्म सोऽहमिति भावयेत्। ओंतत्सत्पदवाच्यं लक्ष्यं वा परं सत्यं अबाधितं ब्रह्म स एव गोपाल इत्यर्थः॥ ३०॥

मथुरावासिगोपालकृष्णभवनमहिमा

मथुरायां स्थितिर्ब्रह्मन् सर्वदा मे भविष्यति।
शङ्खचक्रगदापद्मवनमालाधरस्य वै॥ ३१॥
विश्वरूपं परं ज्योतिः स्वरूपं रूपवर्जितम्।
मथुरामण्डले यस्तु जम्बूद्वीपस्थितोऽपि वा।
योऽर्चयेत् प्रतिमां मां च स मे प्रियतरो भुवि॥ ३२॥

[1] "चतुर्भिश्च यथा देवैरेको देवः प्रकीर्तितः" इत्यधिकः (अ) कोशे.

तस्यामधिष्ठितः कृष्णरूपी पूज्यस्त्वया सदा ।
चतुर्धा चास्यावता[1]रा भेदत्वेन यजन्ति माम् ॥ ३३ ॥
युगानुवर्तिनो लोका यजन्तीह सुमेधसः ।
गोपालं सानुजं कृष्णं रुक्मिण्या सह तत्परम् ॥ ३४ ॥
गोपालोऽहमजो नित्यः प्रद्युम्नोऽहं सनातनः ।
रामोऽहमनिरुद्धोऽहमात्मानं ह्यर्चयेद्बुधः ॥ ३५ ॥
मयोक्तेन स धर्मेण निष्कामेन विभागशः ।
तैरहं पूजनीयो वै भद्रकृष्णनिवासिभिः ॥ ३६ ॥
तद्धर्मगतिहीना ये तस्यां मयि परायणाः ।
कलिना ग्रसिता ये वै तेषां तस्यामवस्थितिः ॥ ३७ ॥
यथा त्वं सह पुत्रैस्तु यथा रुद्रो गणैः सह ।
यथा श्रियाऽभियुक्तोऽहं तथा भक्तो मम प्रियः ॥ ३८ ॥

या पुरी गोपालाधिष्ठिता भवेत् तस्यां मथुरायां स्थितिः ॥ ३१–३३ ॥ इदमेव विवृणोति—युगानुवर्तिन इति ॥ ३४–३५ ॥ भद्रकृष्णनिवासिभिः भद्रकृष्णवनयोः निवासिभिः ॥ ३६ ॥ स्वाश्रमाचारहीना अपि मद्भक्ताश्चेत् मत्पुर्यामवस्थितिः युज्यते न त्वभक्तानामित्याह—तद्धर्मेति ॥ ३७ ॥ पुत्रैस्तु सनकादिभिः ॥ ३८–३९ ॥

एकस्य भगवतः चतुर्विधत्वोपपादनम्

स होवाचाब्जयोनिश्चतुर्भिर्देवैः कथमेको देवः स्यात् ।
एकमक्षरं यद्विश्रुतमनेकाक्षरं कथं संभूतम् ॥ ३९ ॥

[1] रमे—उ, मु.

स होवाच तं हि—पूर्वमेकमेवाद्वितीयं ब्रह्मासीत्। तस्माद्-व्यक्तमेकाक्षरम्। तस्मादक्षरान्महत्। महतोऽहंकारः। तस्माद्-हंकारात् पञ्च तन्मात्राणि। तेभ्यो भूतानि। तैरावृतमक्षरम्। अक्षरोऽहमोंकारोऽहमजरोऽमरोऽभयोऽमृतो ब्रह्माभयं हि वै। स मुक्तोऽहमस्मि। अक्षरोऽहमस्मि ॥ ४० ॥

सत्तामात्रं चित्स्वरूपं प्रकाशं व्यापकं तथा।
एकमेवाद्वयं ब्रह्म मायया च चतुष्टयम् ॥ ४१ ॥
रोहिणीतनयो विश्व अकाराक्षरसंभवः।
तैजसात्मकः प्रद्युम्न उकाराक्षरसंभवः ॥ ४२ ॥
प्राज्ञात्मकोऽनिरुद्धोऽसौ मकाराक्षरसंभवः।
अर्धमात्रात्मकः कृष्णो यस्मिन् विश्वं प्रतिष्ठितम् ॥ ४३ ॥
कृष्णात्मिका जगत्कर्त्री मूलप्रकृति रुक्मिणी ॥
व्रजस्त्रीजन[1]संभूतश्रुतिभ्यो [2]ब्रह्मसंगतः।
प्रणवत्वेन प्रकृतित्वं वदन्ति ब्रह्मवादिनः ॥ ४४ ॥
तस्मादोंकारसंभूतो गोपालो विश्वसंस्थितः।
क्लीमोंकार[3]स्य चैकत्वं वदन्ति ब्रह्मवादिनः।
मथुरायां विशेषेण मां ध्यायन् मोक्षमश्नुते ॥ ४५ ॥

ब्रह्मणा पृष्टः स होवाच। स्वाज्ञदृष्ट्या तस्मादव्यक्तमेकाक्षरम्। तेभ्यः पञ्चीकृतभूतानि तैः आवृतमक्षरं घटशरावाद्यावृतमृत्पिण्डवदित्यर्थः ॥४०–४१॥

[1] संभूतः श्रु—उ, मु. [2] ज्ञानसं—अ, अ १, मु.
[3] स्यैकत्वं—अ, अ २, क. स्येकतत्वं—मु.

कथं एकस्य चातुर्विध्यमित्यत्र—**रोहिणीतनय इति** । कृष्णस्य अवस्थात्रयतदध्यक्षातीतत्वेन तुर्यरूपत्वात् कृष्णो ब्रह्मैवेत्यर्थः ॥ ४२–४३ ॥ बिन्दुप्रतिपाद्यरुक्मिणीस्वरूपमाह—**कृष्णेति** । शक्तिशक्तिमतोरभेदात् **कृष्णात्मिका रुक्मिणी जगत्कर्त्री मूलप्रकृतिः** सैव व्रजस्त्री राधारूपिणी प्रकृतिः । **व्रजस्त्रीजनेषु संभूताः श्रुतयः** ताभ्यो **ब्रह्मसङ्गतः प्रणवत्वं तस्या ब्रह्मवादिनः प्रकृतित्वं वदन्ति** ॥ ४४ ॥ यस्मादेवं **तस्मात्** अस्य ब्रह्मरूपत्वात् **ओङ्कारसंभूतः** ओङ्कारार्थतया तत्प्राप्तिपाद्यत्वात्, विश्वाधारान्तर्यामितया स्थितत्वात् **विश्वसंस्थितः**, किं वक्तव्यं चतुर्धा संस्थितः इति । **क्लीमोङ्कारयोरेकत्वं ब्रह्मवादिनो वदन्ति** बीजद्वयस्यैकार्थपर्यवसायित्वात् । मथुरायां मद्भजनं शीघ्रफलदमित्याह—**मथुरायामिति** ॥ ४९ ॥

हृदि ध्येयभगवद्रूपवर्णनम्

अष्टपत्रं विकसितं हृत्पद्मं तत्र संस्थितम् ।
दिव्यध्वजातपत्रैस्तु चिह्नितं चरणद्वयम् ॥ ४६ ॥
श्रीवत्सलाञ्छनं हृत्स्थं [1]कौस्तुभप्रभया युतम् ।
चतुर्भुजं शङ्खचक्रशार्ङ्गपद्मगदाऽन्वितम् ॥ ४७ ॥
सुकेयूरान्वितं बाहुं कण्ठमालासुशोभितम् ।
द्युमत्किरीटमभयं स्फुरन्मकरकुण्डलम् ॥ ४८ ॥
हिरण्मयं सौम्यतनुं स्वभक्तायाभयप्रदम् ।
ध्यायेन्मनसि मां नित्यं वेणुशृङ्गधरं तु वा ॥ ४९ ॥
मथ्यते तु जगत्सर्वं ब्रह्मज्ञानेन येन वा ।
मत्सारभूतं यद्यत्स्यान्मथुरा सा निगद्यते ॥ ९० ॥

[1] कौस्तुभं प्र—अ २, क.

अष्टदिक्पा[1]लभिर्भूमिपद्मं विकसितं जगत् ।
संसारार्णवसंजातं सेवितं मम मानसे ॥ ९१ ॥
चन्द्रसूर्यत्विषो दिव्या ध्वजा मेरुर्हिरण्मयः ।
आतपत्रं ब्रह्मलोकमथोर्ध्वं [2]चरणं स्मृतम् ॥ ९२ ॥
[3]श्रीवत्सं च स्वरूपं च वर्तते लाञ्छनैः सह ।
श्रीवत्सलक्षणं तस्मात् कथ्यते ब्रह्मवादिभिः ॥ ९३ ॥
येन सूर्याग्निवाकन्द्रतेजसा स्वस्वरूपिणा ।
वर्तते कौस्तु[4]भाख्यं मणिं वदन्तीशमानिनः ॥ ९४ ॥
सत्त्वं रजस्तम इति अहंकारश्चतुर्भुजः ।
पञ्चभूतात्मकं शङ्खं करे रजसि संस्थितम् ॥ ९५ ॥
बालस्वरूप[5]मित्यन्तं मनश्चक्रं निगद्यते ।
आद्या माया भवेच्छार्ङ्गं पद्मं [6]विश्वकरे स्थितम् ॥ ९६ ॥
आद्या विद्या गदा वेद्या सर्वदा मे करे स्थिता ।
धर्मार्थकामकेयूरैर्दिव्यैर्दिव्य[7]मयीरितैः ॥ ९७ ॥
कण्ठं तु निर्गुणं प्रोक्तं माल्यते आद्ययाऽजया ।
माला निगद्यते ब्रह्मंस्तव पुत्रैस्तु मानसैः ॥ ९८ ॥
कूटस्थं [8]सत्त्वरूपं च किरीटं प्रवदन्ति माम् ।
क्षीरोत्तरं प्रस्फुरन्तं कुण्डलं युगलं स्मृतम् ॥ ९९ ॥

[1] लकै—मु. [2] चार्णवं—अ, अ १. [3] श्रीवत्सस्य स्वरूपं तु—मु.
[4] भाख्यं तं वदन्ति शममानिनः—अ. [5] मत्यंतं—अ.
[6] विश्वं क—मु. [7] मयेरि—मु. मयैरि—अ, अ १. [8] सत्य—अ.

ध्यायेन्मम प्रियं नित्यं स मोक्षमधिगच्छति ।
स मुक्तो भवति तस्मै स्वात्मानं तु ददामि वै ॥ ६० ॥
एतत्सर्वं [1]भविष्यद्वै मया प्रोक्तं विधे तव ।
स्वरूपं द्विविधं चैव सगुणं निर्गुणात्मकम् ॥ ६१ ॥

हृत्स्थं श्रीवत्सलाञ्छनं मां ध्यायेदित्यर्थः ॥ ४६–४९ ॥ मथुरा-शब्दार्थमाह—मथ्यत इति । अनेनेदं सर्वं जगत् मथ्यत इति मथनं ब्रह्मज्ञानं मत्स्वरूपं वा अधिष्ठानस्यारोपभ्रमनिरासकत्वात् । मत्सारभूतं स्वरूपं यस्यां निषण्णं सा मथुरापुरीत्यर्थः ॥ ५०–५१ ॥ चन्द्रसूर्यत्विष एव दिव्यध्वजाः छत्रदण्डो मेरुः ब्रह्मलोकः आतपत्रम् ॥ ५२–५३ ॥ कौस्तुभशब्दार्थमाह—येनेति । सूर्यादयः परतन्त्रतया येन स्वरूपिणा तेजसा प्रवर्तन्ते ते तच्चित्स्वरूप-महेशमानिनः ईश्वराराधकाः कौस्तुभाख्यं मणिं प्रवदन्ति ॥ ५४ ॥ चतुर्गुणितभुजं विवृणोति—सत्वमिति । सत्वादित्रिगुणेन अहङ्कारश्चेति चतुर्भुजः । रजोगुणविशिष्टं शङ्खं करे स्थितं बुधाः विदुः इत्यर्थः ॥ ५५ ॥ विशुद्धं मन एव सत्वाख्यं करे स्थितं चक्रं निगद्यते ॥ ५६ ॥ अहं ब्रह्मास्मीति वृत्तिरेव आद्या विद्या सैव मत्करगतगदेति वेद्या भवति ॥ ५७–६१ ॥

देवादिभिः भजनीयाः मूर्तयः

स होवाचाब्जयोनिः—व्यक्तीनां मूर्तीनां प्रोक्तानां कथं त्वाभरणानि भवन्ति कथं वा देवा यजन्ति रुद्रा यजन्ति ब्रह्मा यजति ब्रह्मजा यजन्ति विनायका यजन्ति द्वादशादित्या यजन्ति वसवो यजन्ति गन्धर्वा यजन्ति [2]सपदानुगा अन्तर्धाने तिष्ठन्ति कां मनुष्या यजन्ति ॥ ६२ ॥

[1] भविष्यन्वै—उ, क, अ ३, अ १. [2] स्वपदा—उ.

स होवाच तं हि वै नारायणो देवः—आद्या व्यक्ता द्वादश मूर्तयः सर्वेषु लोकेषु सर्वेषु [1]देवेषु सर्वेषु मनुष्येषु [2]तिष्ठति रुद्रेषु रौद्री ब्रह्मणीयेषु ब्राह्मी देवेषु दैवी मनुष्येषु मानवी विनायकेषु विघ्नविनाशिनी आदित्येषु ज्योतिर्गन्धर्वेषु [3]गान्धर्वी अप्सरःस्वेवं गौर्वसुष्वेवं काम्या अन्तर्धानेष्वप्रकाशिनी आविर्भावतिरोभावा स्वपदे तिष्ठति तामसी राजसी सात्विकी मानुषी विज्ञानघन आनन्द[4]घनः सच्चिदानन्दैकरसे भक्तियोगे तिष्ठति ॥ ६२ ॥

ॐ प्राणात्मने ॐ तत्सद्भूर्भुवः सुवस्तस्मै वै प्राणात्मने नमो नमः । ॐ श्रीकृष्णाय गोविन्दाय गोपीजनवल्लभाय ॐ तत्सद्भूर्भुवः सुवस्तस्मै वै नमो नमः । ॐ अपानात्मने ॐ तत्सद्भूर्भुवः सुवस्तस्मै वा अपानात्मने नमो नमः । ॐ श्रीकृष्णायानिरुद्धाय ॐ तत्सद्भूर्भुवः सुवस्तस्मै वै नमो नमः । ॐ व्यानात्मने ॐ तत्सद्भूर्भुवः सुवस्तस्मै वै व्यानात्मने नमो नमः । ॐ श्रीकृष्णाय रामाय ॐ तत्सद्भूर्भुवः सुवस्तस्मै वै नमो नमः । ॐ उदानात्मने ॐ तत्सद्भूर्भुवः सुवस्तस्मै वा उदानात्मने नमो नमः । ॐ श्रीकृष्णाय देवकीनन्दनाय ॐ तत्सद्भूर्भुवः सुवस्तस्मै वै नमो नमः । ॐ समानात्मने ॐ तत्सद्भूर्भुवः सुवस्तस्मै वै समानात्मने नमो नमः । ॐ श्रीगोपालाय निजस्वरूपाय ॐ तत्सद्भूर्भुवः सुवस्तस्मै वै नमो नमः । ॐ योऽसौ प्रधानात्मा गोपाल ॐ तत्सद्भूर्भुवः

[1] वेदेषु—अ १, अ २, क.
[2] तिष्ठन्तीति—अ, अ १, मु.
[3] गन्ध—अ, अ १, अ २, क.
[4] घनस—अ, अ १, अ २, उ.

सुवस्तस्मै वै नमो नमः । ॐ योऽसाविन्द्रियात्मा गोपाल ॐ तत्सद्भूर्भुवः सुवस्तस्मै वै नमो नमः । ॐ योऽसौ भूतात्मा गोपाल ॐ तत्सद्भूर्भुवः सुवस्तस्मै वै नमो नमः । ॐ योऽसावुत्तमपुरुषो गोपाल ॐ तत्सद्भूर्भुवः सुवस्तस्मै वै नमो नमः । ॐ योऽसौ ब्रह्मापरं वै ब्रह्म ॐ तत्सद्भूर्भुवः सुवस्तस्मै वै नमो नमः । ॐ योऽसौ सर्वभूतात्मा गोपाल ॐ तत्सद्भूर्भुवः सुवस्तस्मै वै नमो नमः । ॐ जाग्रत्स्वप्नसुषुप्तितुरीयतुरीयातीतोऽन्तर्यामी गोपाल ॐ तत्सद्भूर्भुवः सुवस्तस्मै वै नमो नमः ॥ ६४ ॥

एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा ।
कर्माध्यक्षः सर्वभूताधिवासः साक्षी चेता केवलो निर्गुणश्च॥६५॥

रुद्राय नमः । आदित्याय नमः । विनायकाय नमः । सूर्याय नमः । विद्यायै नमः । इन्द्राय नमः । अग्नये नमः । यमाय नमः । निर्ऋतये नमः । वरुणाय नमः । वायवे नमः । कुबेराय नमः । ईशानाय नमः । सर्वेभ्यो देवेभ्यो नमः ॥ ६६ ॥

एवं भगवत्सूक्तिमाकर्ण्य स होवाच । किमिति? व्यक्तीनामिति ॥६२॥ कथं मनुष्याः यजन्तीति ब्रह्मणा पृष्टः स होवाच । आविर्भावतिरोभावात्मिका मूर्तिः स्वपदे कैलाससत्यलोकवैकुण्ठाख्ये तिष्ठतीत्यर्थः । तस्यास्त्रैविध्यमाह—तामसीत्यादि । मानुषी कुत्र तिष्ठतीत्यस्योत्तरमाह—मानुषीति । विज्ञानघनानन्दघननाम्नी मानुषी मनुष्यप्रसिद्धा मूर्तिः सच्चिदानन्दैकरसो यो भक्तियोगः तत्र तिष्ठतीत्यर्थः ॥ ६३ ॥ कथं ब्रह्मा ब्रह्मजा यजन्ति इति प्रश्नोत्तरमन्त्रानाह — ओमिति ॥ ६४ ॥ एकस्यैवं कथमनेकत्वं स्यात् इत्याशङ्क्य तस्यैव स्वाज्ञदृष्ट्या सर्वत्र प्रविष्टवत् भानादित्याह—एक इति । अयं मन्त्रः श्वेताश्वतरोपनिषदि

पदशो व्याख्यातः ॥ ६५ ॥ कथं रुद्रा यजन्ति इत्यस्योत्तरमाह—**रुद्रायेति** । कृष्णाख्यं ब्रह्म स्वाज्ञदृष्ट्या स्वाविद्यापदतत्कार्यतत्प्रविभक्तद्वादशमूर्त्यात्मना स्थितं स्वज्ञदृष्ट्या तत्सर्वापवादाधिकरणतया भातं परमार्थदृष्ट्या तु स्वाज्ञादिदृष्टिमोहे सत्यसति निष्प्रतियोगिकब्रह्ममात्रमवशिष्यते इति फलितोऽर्थः ॥ ६६ ॥

विद्यासंप्रदायः

दत्त्वा स्तुतिं पुण्यतमां ब्रह्मणे स्वस्वरूपिणे ।
कर्तृत्वं सर्वभूतानामन्तर्धाने बभूव सः ॥ ६७ ॥
ब्रह्मणो ब्रह्मपुत्रेभ्यो नारदात्तु श्रुतं [1]मुनेः ।
तथा प्रोक्तं तु [2]गान्धर्वि गच्छध्वं स्वालयान्तिकम् ॥ इति ॥ ६८ ॥

मुनिः गान्धर्वीप्रश्नोत्तरमवतारयति—**दत्त्वेति** । सोऽयं भगवान् नारायणो **ब्रह्मणे** स्वपुत्राय प्रागुक्तां **पुण्यतमां स्तुतिं** सर्वलोकसृष्टि**कर्तृत्वं** च **दत्त्वा अन्तर्धाने** अदृश्यो **बभूव** ॥ ६७ ॥ मया चेदं तत्संप्रदायतो यथा श्रुतं तथा युष्मान् प्रति प्रोक्तमित्याह—**ब्रह्मणे** इति । हे **गान्धर्वि** इदं शास्त्रं आदौ नारायणेन **स्वपुत्राय ब्रह्मण** उक्तम् । ब्रह्मणा तु **स्वपुत्रेभ्यः** सनकादिभ्यो नारदादिभ्यश्च प्रतिपादितम् । मया एतत् सनकादिभ्यो **नारदाच्च श्रुतं तथा** मया इदं युष्मान् प्रति **प्रोक्तम्** । हे गान्धर्वीप्रमुखाः सर्वाः यूयं **स्वालयान्तिकं** स्वाश्रयप्रदेशं प्रति **गच्छध्वम्** । **इति**शब्दः गोपालोत्तरतापिन्युपनिषत्समाप्त्यर्थः ॥ ६८ ॥

श्रीवासुदेवेन्द्रशिष्योपनिषद्ब्रह्मयोगिना ।
गोपालतापिनीव्याख्या लिखिता कृष्णगोचरा ।
गोपालतापिनीव्याख्या द्वाविंशाधिशतत्रयम् ॥

इति श्रीमदीशाद्यष्टोत्तरशतोपनिषच्छास्त्रविवरणे पञ्चनवतिसङ्ख्यापूरकं गोपालपूर्वोत्तरतापिन्युपनिषद्विवरणं सम्पूर्णम् ॥

---

[1] यथा—उ, मु. [2] गान्धर्वी गच्छ त्वं—अ, अ १, अ २, क.

तारसारोपनिषत्

पूर्णमदः—इति शान्तिः

अविमुक्तोपासनोपदेशः

बृहस्पतिरुवाच याज्ञवल्क्यं यदनु कुरुक्षेत्रं देवानां देवयजनं सर्वेषां भूतानां ब्रह्मसदनम्। [1]अविमुक्तं वै कुरुक्षेत्रं देवानां देवयजनं सर्वेषां भूतानां ब्रह्मसदनम् ॥ १ ॥

तस्माद्यत्र क्वचन गच्छेत्तदेव मन्येतेतीदं वै कुरुक्षेत्रं देवानां देवयजनं सर्वेषां भूतानां ब्रह्मसदनम्। अत्र हि जन्तोः प्राणेषूत्क्रममाणेषु रुद्रस्तारकं ब्रह्म व्याचष्टे येनासावमृतो भूत्वा मोक्षी भवति तस्मादविमुक्तमेव निषेवेताविमुक्तं न विमुञ्चेत् ॥ २ ॥

एवमेवैष भगवन्निति वै याज्ञवल्क्यः ॥ ३ ॥

यन्नारायणतारार्थसत्यज्ञानसुखाकृति।
त्रिपान्नारायणाकारं तद्ब्रह्मैवास्मि केवलम् ॥

इह खलु शुक्लयजुर्वेदप्रविभक्तेयं तारसारोपनिषत् स्थूलसूक्ष्माविमुक्तनारायणाष्टाक्षराष्टतनुमन्त्रप्रकटनव्यग्रा ब्रह्ममात्रपर्यवसन्ना विजयते। अस्याः

[1] 'अविमुक्तं' इत्यादि 'तस्मात्' इत्यतः प्राक्तनं वाक्यं व्याख्याऽनुसारेणात्र संयोजितम्। आकरेषु तु "अत्र हि" इत्यतः प्राक् संयोजितमस्ति.

स्वल्पग्रन्थतो विवरणमारभ्यते । बृहस्पतिर्भारद्वाजयाज्ञवल्क्यप्रश्नप्रतिवचनरूपेयमाख्यायिका विद्यास्तुत्यर्था । आख्यायिकामवतारयति—**बृहस्पतिरिति** । अयं खण्डो जाबालोपनिषदि पदशो व्याख्यातः ॥ १–३ ॥

[सा च व्याख्या झटिति प्रबोधनार्थं अत्र संयोज्यते—

मिथिलोपवनप्रान्ते वादेन ब्राह्मणान् जित्वा स्वात्तपरब्रह्मविद्यया जनकं बोधयित्वा स्वशिष्यगणेन सह याज्ञवल्क्यः पुनः मिथिलोपवने कंचित्कालमासांचक्रे । यः सर्वज्ञकल्पः तं **याज्ञवल्क्यं** अविमुक्तेयत्तां जिज्ञासुः **बृहस्पतिरुवाच** । सर्वक्षेत्रादपि **यदनु** प्रसिद्धं कुत्सितं पापकर्म रौतीति कुरुः तस्य क्षेपणपूर्वकं स्वगतजनत्राणनात् **कुरुक्षेत्रम्** । यद्वा—कुः पृथिवी तस्यां रौति शब्दं करोतीति कुरुः प्राणः तदावासहेतुशरीरं **कुरुक्षेत्रं** तत्रत्यदेवानां इन्द्रियाणां प्रवृत्तिनिमित्तदेवस्य प्रत्यक्चिद्धातोः **यजनं** पूजाकरणम् । अत्र हीन्द्रियाणि स्वोचितविषयोपहारैरात्मानं यजन्ति । **सर्वेषां भूतानां** इन्द्रियाधिष्ठातृणां वा **ब्रह्मसदनं** ब्रह्मास्तिस्थानम् ॥ १ ॥ यथा देवयजनसाधनं कुरुक्षेत्रं तथा विशेषणद्वयविशिष्टमान्तरं कुरुक्षेत्रमिति बृहस्पतिप्रश्नानुरोधं मुनिराह—**अविमुक्तमिति** । यत्स्वरूपं स्वाविद्याकामकर्मविमुक्तं तत् **अविमुक्तं** ब्रह्म यत्रोपलभ्यते भ्रूमध्यगताज्ञाचक्रं **कुरुक्षेत्रं देवानामित्याद्युक्तार्थम्** । यस्मादेवं **तस्मात् यत्र कचन** गङ्गाप्रयागादिस्थले तद्विपरीते वा **गच्छति तदेव** अविमुक्तमिति **मन्येत** जानीयात् **इति** अनेन प्रकारेण **इदं वै** मया प्राप्तमेव ब्रह्म **कुरुक्षेत्रमित्याद्युक्तार्थम्** । क्षेत्रसामान्यस्य क्षेत्रज्ञविकल्पितत्वात् तदतिरेकेण न किंचिदस्तीत्यर्थः । **अत्र** अविमुक्तरूपे कुरुक्षेत्रे ब्रह्मेति विज्ञाते तद्विज्ञानानुरोधेन **जन्तोः** प्राणिमात्रस्य **प्राणेषूत्क्रममाणेषु** स्वाज्ञानरुजं द्रावयति नाशयतीति **रुद्रः** परमेश्वरः संसार**तारकं ब्रह्म** सच्चिदानन्दलक्षणं **व्याचष्टे** कथयति **येन** "तत्त्वमसि" "अहं ब्रह्माऽस्मि" इत्युपदेशेन **असौ** जीवः **अमृतो भूत्वा** स्वातिरिक्तभ्रमतः **मोक्षी भवति** स्वातिरिक्तापह्नवसिद्धनिष्प्रतियोगिकब्रह्ममात्रतया अवशिष्यते । यस्मादेवं **तस्मात्** ब्रह्ममात्रज्ञानोत्पत्तेः प्राक् **अविमुक्तं** भ्रूमध्यगत-

ज्योतिर्लिङ्गमेव निषेवेत ज्योतिर्लिङ्गमस्मीत्यनुसंधानं कुर्यात्, "ज्योतिर्लिङ्गं भ्रुवोर्मध्ये नित्यं ध्यायेत् सदा यतिः" इति श्रुतेः। यावद्ब्रह्ममात्रज्ञानं नोदेति तावत् अविमुक्तं प्रत्यञ्चमात्मानमीश्वरं वा न विमुञ्चेत् ॥ २ ॥ याज्ञवल्क्येनैवमुक्तो बृहस्पतिः तदुक्तमङ्गीचकारेत्याह—एवमेवेति ॥ ३ ॥]

नारायणस्थूलाष्टाक्षरतारकम्

अथ हैनं भारद्वाजः पप्रच्छ याज्ञवल्क्यं किं तारकं किं तारयतीति ॥ ४ ॥ स होवाच याज्ञवल्क्यः—ॐ नमो नारायणायेति तारकं चिदात्मकमित्युपासितव्यम्। ओमित्येकाक्षरमात्मस्वरूपम्। नम इति द्व्यक्षरं प्रकृतिस्वरूपम्। नारायणायेति पञ्चाक्षरं [1]परब्रह्मस्वरूपम्। इति य एवं वेद सोऽमृतो भवति। ओमिति ब्रह्मा भवति नकारो विष्णुर्भवति मकारो रुद्रो भवति नकार ईश्वरो भवति रकारोऽण्डविराड् भवति यकारः पुरुषो भवति णकारो भगवान् भवति यंकारः परमात्मा [2]भवति। एतद्वै नारायणस्याष्टाक्षरं परमपुरुषो भवति ॥ ५ ॥

अयमृग्वेदः प्रथमः ॥ ६ ॥

श्रीमन्नारायणतारकबुभुत्सया भारद्वाजो याज्ञवल्क्यं पृच्छतीत्याह—**अथेति** ॥ ४ ॥ भारद्वाजप्रश्नोत्तरं **स होवाच**। किं तत्? इत्यत्र— **ॐ नमो नारायणायेति**। ॐ नमो नारायणायेत्यत्र नमःशब्दवाच्यजीवताग्रासप्रत्यक्चैतन्यं त्वंपदलक्ष्यमुच्यते, नारायणशब्दवाच्येश्वरताग्रासपरचैतन्यं तत्पदलक्ष्यमुच्यते, अयेति चतुर्थी लक्ष्यद्वयस्यैकत्वख्यापनार्थेत्यत्र—

[1] 'पर' इति (अ, क) कोशयोः नास्ति. परं—अ १, अ २, मु. [2] भवतीति—अ.

नमस्त्वमर्थो विज्ञेयो रामस्तत्पदमुच्यते ।
असीत्यर्थे चतुर्थी स्यादेवं मन्त्रेषु योजयेत् ॥

इति श्रुतेः । पराक्सापेक्षप्रत्यगभिन्नब्रह्मगतसविशेषापह्नवसिद्धं निष्प्रतियोगिक-ब्रह्ममात्रं ओमित्युक्तं तुरीयोङ्काराग्रविद्योततुरीयतुरीयस्य व्यष्टिसमष्ट्यात्मकजाग्र ज्जाग्रदाद्यविकल्पानुज्ञैकरसान्तभेदगतविशेषापह्नवसिद्धत्वात् । ओमित्येकाक्षरमेव स्वातिरिक्तास्तित्वभ्रमसन्तारणात् **तारकं चिदात्मकं** निष्प्रतियोगिकचिन्मात्रमिति **उपासितव्यं** चिन्त्यमित्यर्थः । उक्तार्थं तद्वेदनफलं चाह—**ओमिति** । **ओमित्येकाक्षरमात्मस्वरूपं** तस्यानात्मापह्नवसिद्धत्वात् "जीवभूतां महाबाहो ययेदं धार्यते जगत्" इति स्मृत्यनुरोधेन । **नम इति द्व्यक्षरं प्रकृतिस्वरूपं**; जीवप्रकृतिगतहेयांशापवादाधिष्ठानं प्रत्यक्चैतन्यमित्यर्थः । अष्टाक्षरप्रतिपाद्यं ब्रह्माहमस्मीति वेदनसमकालं **सोऽमृतो** विदेहमुक्तो **भवति** इत्यर्थः । प्रातिस्विकेन अष्टाक्षराक्षरार्थमाह—**ओमितीति** । अष्टाक्षरदेवताभेदगतहेयांशासंभवप्रबोध-सिद्धस्य निष्प्रतियोगिकब्रह्ममात्रतया परमपुरुषत्वात् अष्टाक्षरविशिष्टार्थस्तु ब्रह्मै-वेत्यर्थः ॥ ५ ॥ **अयं ऋग्वेदः प्रथमः**, अस्य खण्डस्य ऋग्वेदमस्तकसारत्वात् ॥६॥

इति प्रथमः खण्डः

नारायणसूक्ष्माष्टाक्षरतारकम्

ॐ इत्येतदक्षरं परं ब्रह्म । तदेवोपासितव्यम् । एतदेव सूक्ष्माष्टाक्षरं भवति । तदेतदष्टात्मकोऽष्टधा भवति । अकारः प्रथमाक्षरो भवति । उकारो द्वितीयाक्षरो भवति । मकारस्तृतीयाक्षरो भवति । बिन्दुस्तुरीयाक्षरो भवति । नादः पञ्चमाक्षरो भवति । कला षष्ठाक्षरो भवति । कलातीता सप्तमाक्षरो भवति । तत्परश्चाष्टमाक्षरो भवति । तारकत्वात्तारको भवति । तदेव तारकं ब्रह्म त्वं विद्धि । तदेवोपासितव्यम् ॥ १ ॥

एवं स्थूलाष्टाक्षरमुक्त्वा सूक्ष्माष्टाक्षरमाह—ओमिति ॥ १ ॥

प्रणवावयवदेवताः

अत्रैते श्लोका भवन्ति—

अकारादभवद्ब्रह्मा जाम्बवानितिसंज्ञकः ।
उकाराक्षरसंभूत उपेन्द्रो हरिनायकः ॥ २ ॥
मकाराक्षरसंभूतः शिवस्तु हनुमान् स्मृतः ।
बिन्दुरीश्वरसंज्ञस्तु शत्रुघ्न[1]श्चक्रराट् स्वयम् ॥ ३ ॥
नादो महाप्रभुर्ज्ञेयो भरतः शङ्खनामकः ।
कलायाः पुरुषः साक्षाल्लक्ष्मणो धरणीधरः ॥ ४ ॥
कलाऽतीता भगवती स्वयं सीतेति संज्ञिता ।
तत्परः परमात्मा च श्रीरामः पुरुषोत्तमः ॥ ५ ॥

एवं अकारादिप्रणवावयवदेवताप्रतिपादकाः मन्त्राः भवन्तीत्याह—अत्रेति । जाम्बवतो ब्रह्मांऽशत्वेन ब्रह्मत्वं, अंशांशिनोरभेदात् । तथा सर्वत्रैवमूह्यम् ॥ २–४ ॥ कैवल्यश्रीस्वरूपेण सर्वत्र राजते स्वे महिम्नि महीयते इति श्रीरामः, तस्य परमात्मतया पुरुषोत्तमत्वात् ॥ ५ ॥

श्रीरामस्य सर्वात्मकत्वम्

ओमित्येतदक्षरमिदं सर्वम् । तस्योपव्याख्यानं भूतं भव्यं भविष्यद्यच्चान्यत् तत्त्वमन्त्रवर्णदेवताछन्दो[2]ऋक्कलाशक्तिसृष्ट्यात्मकमिति । य एवं वेद ॥ ६ ॥

यजुर्वेदो द्वितीयः ॥ ७ ॥

[1] श्शत्रुरा—क.

[2] ऋषिकला—उ १.

तस्योङ्कारार्थत्वेन स एव सर्वं, तदतिरिक्तं नास्ति, इत्याह—ओमिति। कालत्रयपरिच्छेद्यं यद्यद्वस्त्वस्ति तत्सर्वं ओङ्कारार्थः श्रीराम एव, रामादतिरिक्तं न किञ्चिदस्ति इत्यत्र—

इदं सत्यमिदं सत्यं सत्यमेतदिहोच्यते।
रामः सत्यं परं ब्रह्म रामात् किंचिन्न विद्यते॥

इति स्मृतेः। किंच—यच्चेति। यच्चान्यत् कालत्रयापरिच्छेद्यं अव्यक्तादिकं श्रोत्रादीश्वरा[1]त्मकं षण्णवतितत्त्वजातं च नादप्रभवसप्तकोटिमहामन्त्रजातं च अकारादिवर्णजातं च ब्रह्मादिदेवताजातं च गायत्र्यादिछन्दोजातं च ऋगादिवेदजातं च प्राणादिकलाजातं च तत्तत्पदार्थगतकाठिन्यादिशक्तिजातं च क्रियाऽऽदिशक्तित्रयं वा सृष्ट्यात्मकमिति सृष्ट्यादिपञ्चकृत्योपलक्षणार्थं एतत्सर्वं श्रीराम एव। रामादतिरिक्तं न किंचिदस्ति इति यो वेद स एवंरूपराम एव भवतीत्यर्थः॥ ६॥ यजुर्वेदो द्वितीयः, द्वितीयखण्डस्य यजुर्वेदमस्तकसारार्थत्वात्॥ ७॥

इति द्वितीयः खण्डः

जाम्बवदाद्यष्टतनुमन्त्राः

अथ हैनं भारद्वाजो याज्ञवल्क्यमुवाच—अथ कैर्मन्त्रैः परमात्मा प्रीतो भवति स्वात्मानं दर्शयति [2]तान्नो ब्रूहि भगव इति॥ १॥

स होवाच याज्ञवल्क्यः—

ॐ यो ह वै श्रीपरमात्मा नारायणः स भगवानकारवाच्यो [3]जाम्बवान् भूर्भुवः सुवस्तस्मै वै नमो नमः॥ २॥ ॐ यो ह वै श्रीपरमात्मा नारायणः स भगवानुकारवाच्य उपेन्द्रस्वरूपो हरि-

[1] रान्तं—उ।१. [2] तन्नो—अ, मु. [3] ब्रह्मस्वरूपो जा—अ.

नायको भूर्भुवः सुवस्तस्मै वै नमो नमः ॥ ३ ॥ ॐ यो ह वै परमात्मा नारायणः स भगवान् मकारवाच्यः शिवस्वरूपो हनूमान् भूर्भुवः सुवस्तस्मै वै नमो नमः ॥ ४ ॥ ॐ यो ह वै श्रीपरमात्मा नारायणः स भगवान् बिन्दुस्वरूपः शत्रुघ्नो भूर्भुवः सुवस्तस्मै वै नमो नमः ॥ ५ ॥ ॐ यो ह वै श्रीपरमात्मा नारायणः स भगवान् नादस्वरूपो भरतो भूर्भुवः सुवस्तस्मै वै नमो नमः ॥ ६ ॥ ॐ यो ह वै श्रीपरमात्मा नारायणः स भगवान् कलास्वरूपो लक्ष्मणो भूर्भुवः सुवस्तस्मै वै नमो नमः ॥ ७ ॥ ॐ यो ह वै श्रीपरमात्मा नारायणः स भगवान् कलाऽतीता भगवती सीता चित्स्वरूपा भूर्भुवः सुवस्तस्मै वै नमो नमः ॥ ८ ॥ ॐ यो ह वै श्रीपरमात्मा नारायणः स भगवान् तत्परः परमपुरुषः पुराणपुरुषोत्तमो नित्यशुद्ध-बुद्धमुक्तसत्यपरमानन्दानन्ताद्वयपरिपूर्णः परमात्मा ब्रह्मैवाहं रामोऽस्मि भूर्भुवः सुवस्तस्मै वै नमो नमः ॥ ९ ॥

जाम्बवदादितनुमन्त्रबुभुत्सया भारद्वाजो याज्ञवल्क्यं पृच्छतीत्याह— **अथेति** । किमिति? **अथेति** ॥ १ ॥ यथा प्रथममन्त्रोक्तावाद्यन्तौ तथा सर्वमन्त्रेषु द्रष्टव्यौ । यो ह वै कैवल्यश्रीस्वरूपेण परमात्माऽवशिष्यते स भगवान् अकारादिवाच्यो जाम्बवदादिरूपी भवति **भूर्भुवः सुवस्तस्मै वै नमो नमः** । वस्तुतः श्रीरामरूपेण यो निर्विशेषात्मा तस्मै वै नमो नमः स एवाहमस्मीति भावयेत्यर्थः ॥ २–८ ॥ यदकारादिमात्रातद्वाच्यभेदभिन्नं **तत्परः** तस्मात् परः क्षराक्षरकलनावैरळ्यात् **परमपुरुषः** चिरन्तनत्वात् **पुराणपुरुषोत्तमः** परमात्म-रूपत्वात् अनित्याशुद्धाज्ञानबन्धवैरळ्यात् **नित्यशुद्धबुद्धमुक्तः** सत्तामात्रत्वात् **सत्यः** आनन्दघनत्वात् **परमानन्दः** परिच्छिन्नद्वैतांभावात् **अनन्ताद्वयपरिपूर्णः परमात्मा ब्रह्मैवाहं रामोऽस्मीत्यर्थः** ॥ ९ ॥

विद्यापठनमन्त्रार्थज्ञानयोः फलम्

[1]एतदष्टविधमन्त्रं योऽधीते सोऽग्निपूतो भवति स वायुपूतो भवति स आदित्यपूतो भवति स स्थाणुपूतो भवति स सर्वैर्देवैर्ज्ञातो भवति तेनेतिहासपुराणानां रुद्राणां शतसहस्राणि जप्तानि फलानि भवन्ति श्रीमन्नारायणाष्टाक्षरानुस्मरणेन गायत्र्याः शतसहस्रं जप्तं भवति प्रणवानामयुतं जप्तं भवति दशपूर्वान् दशोत्तरान् पुनाति । नारायणपदमवाप्नोति य एवं वेद ॥ १० ॥

विद्यापठनफलमुक्त्वा मन्त्रार्थज्ञानफलमाह— **नारायणपदमिति** ॥ १० ॥

ज्ञानिप्राप्यपरमपदम्

तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः । दिवीव चक्षुराततम् ॥ ११ ॥ तद्विप्रासो विपन्यवो जागृवांसः समिन्धते । विष्णोर्यत्परमं पदम् ॥१२॥ इत्युपनिषत् सामवेदस्तृतीयः पादः ॥१३॥

तद्विष्णोरिति मन्त्रस्तु आरुणिकोपनिषदि व्याख्यातः ॥ ११–१२ ॥ **उपनिषच्छब्दः** तारसारोपनिषत्परिसमाप्त्यर्थः । **सामवेदः तृतीयः**, तृतीयखण्डस्य सामवेदमस्तकसारत्वात् ॥ १३ ॥

इति तृतीयः खण्डः

श्रीवासुदेवेन्द्रशिष्योपनिषद्ब्रह्मयोगिना ।
तारसारोपनिषदो व्याख्यानं लिखितं स्फुटम् ।
तारसारोपनिषदो व्याख्या पञ्चाशदीरिता ॥

इति श्रीमदीशाद्यष्टोत्तरशतोपनिषच्छास्त्रविवरणे एकनवतिसङ्ख्यापूरकं तारसारोपनिषद्विवरणं सम्पूर्णम् ॥

---

[1] एतमष्ट—अ.

त्रिपाद्विभूति-महानारायणोपनिषत्

भद्रं कर्णेभिः—इति शान्तिः

प्रथमोऽध्यायः

परमेष्ठिनः परमरहस्यजिज्ञासा

अथ परमतत्त्वरहस्यं जिज्ञासुः परमेष्ठी देवमानेन सहस्र-संवत्सरं तपश्चचार । सहस्रवर्षेऽतीतेऽत्युग्रतीव्रतपसा प्रसन्नं भगवन्तं महाविष्णुं ब्रह्मा परिपृच्छति भगवन् परमतत्त्वरहस्यं मे ब्रूहीति । परमतत्त्वरहस्यवक्ता त्वमेव नान्यः कश्चिदस्ति । तत् कथमिति । तदेवोच्यते । त्वमेव सर्वज्ञः । त्वमेव सर्वशक्तिः । त्वमेव सर्वाधारः । त्वमेव सर्वस्वरूपः । त्वमेव सर्वेश्वरः । त्वमेव सर्वप्रवर्तकः । त्वमेव सर्वपालकः । त्वमेव सर्वनिवर्तकः । त्वमेव सर्वनिवर्तकः । त्वमेव सदसदात्मकः । त्वमेव सदसद्विलक्षणः । त्वमेवान्तर्बहिर्व्यापकः । त्वमेवातिसूक्ष्मतरः । त्वमेवातिमहतो महीयान् । त्वमेव महामूला-

विद्या[1]विरहः । त्वमेव महामूलाविद्याविवर्तकः । त्वमेव सर्वमूला-विद्यानिवर्तकः । त्वमेवाविद्याविहारः । त्वमेवाविद्याधारकः । त्वमेव विद्यावेद्यः । त्वमेव विद्यास्वरूपः । त्वमेव विद्याऽतीतः । त्वमेव सर्वकारणहेतुः । त्वमेव सर्वकारणसमष्टिः । त्वमेव सर्वकारणव्यष्टिः । त्वमेवाखण्डानन्दः । त्वमेव परिपूर्णानन्दः । त्वमेव निरतिशयानन्दः । त्वमेव तुरीयतुरीयः । त्वमेव तुरीयातीतः । त्वमेवानन्तोपनिषद्विमृग्यः । त्वमेवाखिलशास्त्रैर्विमृग्यः । त्वमेव ब्रह्मेशानपुरन्दरपुरोगमैरखिलामरैर-खिलागमैर्विमृग्यः । त्वमेव सर्वमुमुक्षुभिर्विमृग्यः । त्वमेवामृतमयैर्वि-मृग्यः । त्वमेवामृतमयस्त्वमेवामृतमयस्त्वमेवामृतमयः । त्वमेव सर्वं त्वमेव सर्वं त्वमेव सर्वम् । त्वमेव मोक्षस्त्वमेव मोक्षदस्त्वमेवाखिलमोक्ष-साधनम् । न किंचिदस्ति त्वद्व्यतिरिक्तम् । त्वद्व्यतिरिक्तं यत् किं चित् प्रतीयते तत् सर्वं बाधितमिति निश्चितम् । तस्मात्त्वमेव वक्ता त्वमेव गुरुस्त्वमेव पिता त्वमेव सर्वनियन्ता त्वमेव सर्वं त्वमेव सदा ध्येय इति सुनिश्चितः ॥ १ ॥

यत्रापह्नवतां याति स्वाविद्यापदविभ्रमः ।
त्रिपान्नारायणाख्यं तत् स्वमात्रमवशिष्यते ॥

इह खलु अथर्वणवेदप्रविभक्तदेवदर्शिशाखामस्तकरूपेयं त्रिपाद्विभूतिमहा-नारायणोपनिषत् पूर्वोत्तरकाण्डाभ्यामलंकृता स्वाविद्यापादप्रविभक्तस्वाविद्यापादा-दिपादचतुष्टयप्रकाशिका साकारनिराकारोरेयत्तां प्रकटयन्ती मूलाविद्यासंभूतिप्रळय-प्रकाशनव्यग्रा सम्यङ्निरूपितपरमरहस्या संसारतरणोपायपूर्वकमोक्षमार्गदर्शिनी

[1] विहारः—उ, उ १.

त्रिपाद्विभूतिपरमवैकुण्ठमहानारायणचक्रस्वरूपप्रकटनपूर्वकं सर्वापह्नवसिद्धनिष्प्रतियोगिकत्रैपदब्रह्ममात्रप्रकटनपर्यवसन्ना विजृम्भते। अस्याः स्वल्पग्रन्थतो विवरणमारभ्यते। परमेष्ठिनारायणप्रश्नप्रतिवचनपुरातनगुरुशिष्यसंवादरूपाख्यायिका वक्ष्यमाणविद्यास्तुत्यर्था, यदर्थं परमेष्ठ्यपि देवमानतः सहस्रसंवत्सरं तपश्चरित्वा परमतत्त्वरहस्यं नारायणमुखतो विज्ञातवानिति। प्रकृताख्यायिकामवतारयति—**अथेति। तपश्चचार** खलु। ततः **सहस्रवर्षे अतीतेऽत्युग्रतीव्रतपसा** केवलकुंभकेन तत्तपःफलं दातव्यमिति **प्रसन्नं भगवन्तम्। परिपृच्छति**—किमिति? **भगवन्निति**। परमतत्त्वरहस्यज्ञा विराडादयः सन्ति तन्निकटे ज्ञातुमर्हसीति यदि वदसि तदा **परमेति**। तव समस्तवेदान्तसिद्धान्तपरिशिष्टपरमतत्त्वरूपत्वात् न हि त्वदतिरेकेण परमतत्त्वज्ञः कोऽप्यस्ति। तत्राक्षिपति—**तत् कथमिति**। त्वदतिरेकेण न कोऽप्यस्तीति यन्मयोक्तं प्रमाणतः **तदेवोच्यते**। किं तत् इत्यत्र युगपच्चतुर्मुखतः ऊर्ध्वबाहुः एवमुपन्यस्यति, तत्प्रकारमाचष्टे—**त्वमेव सर्वज्ञ** इत्यादि। **त्वमेव सर्वप्रवर्तकः**, हृषीकेशतया करणग्रामप्रवृत्तिनिमित्तत्वात्। **त्वमेव सर्वकारणहेतुः**, स्वस्वकार्यापेक्षया कारणभावमापन्नानामपि हेतुत्वात्। **त्वमेव तुरीयतुरीयः**, तुरीयोङ्कारात्प्रविद्योतमानत्वात्। **त्वमेव अमृतमयैः** नित्यमुक्तैः सनकादिभिरपि स्वात्मतया **विमृग्यः** ॥ १ ॥

सर्वरहस्यबोधको गुरुशिष्यसंवादः

परमतत्त्वज्ञस्तमुवाच महाविष्णुरतिप्रसन्नो भूत्वा साधुसाध्विति साधुप्रशंसापूर्वकं—सर्वं परमतत्त्वरहस्यं ते कथयामि। सावधानेन शृणु। ब्रह्मन् देवदर्शीत्याख्याथर्वणशाखायां परमतत्त्वरहस्याख्याथर्वणमहानारायणोपनिषदि गुरुशिष्यसंवादः पुरातनः प्रसिद्धतया जागर्ति। पुरा तत्स्वरूपज्ञानेन महान्तः सर्वे ब्रह्मभावं गताः यस्य श्रवणेन सर्वबन्धाः प्रविनश्यन्ति यस्य ज्ञानेन सर्वरहस्यं विदितं भवति ॥ २ ॥

परमेष्ठिना एवं सर्वरूपेण सर्वग्रासचिन्मात्ररूपेण च संस्तुतोऽयं नारायणः **परमतत्त्वज्ञः** तमुवाच । यत् त्वयोक्तं तत् **साधु साध्विति साधुप्रशंसापूर्वकं** परमेष्ठिकृतस्तुतिमङ्गीकृत्य **सर्वमिति** । तं स्वाभिमुखीकृत्य पुरा स्वनिश्वासवदप्रयत्नतः स्वाविर्भूतऋगादिचतुर्वेदप्रविभक्तदेवदर्शीति । इत्युक्त्वा तत्संवादनिर्वृत्तार्थं स्तौति—**पुरेति** ॥ २ ॥

शिष्यप्रश्नः

तत्स्वरूपं कथमिति ॥ ३ ॥

शान्तो दान्तोऽतिविरक्तः सुशुद्धो गुरुभक्तस्तपोनिष्ठः शिष्यो ब्रह्मनिष्ठं गुरुमासाद्य प्रदक्षिणपूर्वकं दण्डवत् प्रणम्य प्राञ्जलिर्भूत्वा विनयेनोपसङ्गम्य भगवन् गुरो मे परमतत्त्वरहस्यं विविच्य वक्तव्यमिति ॥ ४ ॥

इति भगवन्मुखादवगम्य तद्बुभुत्सया तदियत्तां पृच्छति—**तत्स्वरूपं कथमिति** ॥ ३ ॥ वक्ष्यमाणाख्यायिकामवतार्य गुरुशिष्यलक्षणप्रकटनपूर्वकं तत्प्रश्नप्रतिवचनसर्वस्वमुपन्यस्यति—**शान्त** इत्यादिना ॥ ४ ॥

गुरुणा ब्रह्मस्वरूपप्रतिपादनम्

अत्यादरपूर्वकमतिहर्षेण शिष्यं [1]बहूकृत्य गुरुर्वदति—परमतत्त्वरहस्योपनिषत्क्रमः कथ्यते । सावधानेन श्रूयताम् । कथं ब्रह्म । कालत्रयाबाधितं ब्रह्म । सर्वकालाबाधितं ब्रह्म । सगुणनिर्गुणस्वरूपं ब्रह्म । आदिमध्यान्तशून्यं ब्रह्म । सर्वं खल्विदं ब्रह्म । मायाऽतीतगुणातीतं ब्रह्म । अनन्तमप्रमेयाखण्डपरिपूर्णं ब्रह्म । अद्वितीयपरमा-

[1] बहु—क, अ २.

नन्दशुद्धबुद्धमुक्तसत्यस्वरूपव्यापकाभिन्नापरिच्छिन्नं ब्रह्म । सच्चिदानन्दस्वप्रकाशं ब्रह्म । मनोवाचामगोचरं ब्रह्म । अखिलप्रमाणागोचरं ब्रह्म । अमितवेदान्तवेद्यं ब्रह्म । देशतः कालतो वस्तुतः परिच्छेदरहितं ब्रह्म । सर्वपरिपूर्णं ब्रह्म । तुरीयं निराकारमेकं ब्रह्म । अद्वैतमनिर्वाच्यं ब्रह्म । प्रणवात्मकं ब्रह्म । प्रणवात्मकत्वेनोक्तं ब्रह्म । प्रणवाद्यखिलमन्त्रात्मकं ब्रह्म । पादचतुष्टयात्मकं ब्रह्म ॥ ५ ॥

गुरुर्वेदति—किं तत्? इत्यत्र परमेति । कथ्यमानं वस्तु कीदृशं? इत्यत्र—कथमिति । सर्वकालाबाधितं ब्रह्म कालस्यापि कारणत्वात् । स्वाज्ञस्वज्ञदृष्ट्या सगुणेति । आदिमध्यान्तशून्यं आदिमध्यान्तवद्विश्वापवादसिद्धत्वात् । सर्वं खल्विदं ब्रह्म स्वातिरिक्तसर्वाभावात् । मायाऽतीतगुणातीतं मायातत्कार्यवैरळ्यात् । अनन्तमप्रमेयाखण्डपरिपूर्ण—यस्यान्तो न विद्यते तदनन्तं, यत् प्रत्यक्षादिप्रमाणामेयं तदप्रमेयं, अतं एव सर्वत्र अखण्डतया परिपूर्णम् । अद्वितीयपरमानन्दशुद्धबुद्धमुक्तसत्यस्वरूपव्यापकाभिन्नापरिच्छिन्नं—द्वैतदुःखाभावात् अद्वितीयानन्दत्वं, अशुद्धाज्ञानबन्धवैरळ्यात् शुद्धबुद्धमुक्तत्वं, असत्यव्याप्याभावात् सत्यस्वरूपतया व्यापकं, सर्वाभिन्नत्वात् अभिन्नं, तस्मात् अपरिच्छिन्नम् । प्रमाणाविषयत्वे तत्सिद्धिप्रमाणाभावात् इत्यत्र अमितवेदान्तवेद्यं ब्रह्म । वेद्यतया परिच्छिन्नत्वशङ्कायां देशत इति । ब्रह्मवाक्यानां महावाक्यरत्नावलीप्रविभक्तब्रह्मस्वरूपमहावाक्यरत्नावळीप्रभालोचने प्रायशो व्याख्यातत्वात् [अत्रत्यवाक्यानां न व्याख्यापेक्षा] ॥ ५ ॥

पादचतुष्टयात्मकं ब्रह्म

किं तत् पादचतुष्टयं भवति ॥ ६ ॥

अविद्यापादः सुविद्यापादश्चानन्दपादस्तुरीयपादश्चेति । तुरीयपाद[1]स्तुरीयतुरीयं तुरीयातीतं च ॥ ७ ॥

[1] तु तुरी—अ १, अ २.

ब्रह्मणः पादचतुष्टयात्मकत्वं कथमित्याक्षिपति—**किं तत् पादचतुष्टयं भवतीति** ॥ ६ ॥ स्वाज्ञादिदृष्टिविकल्पितब्रह्मातिरिक्तयोः स्वं ब्रह्म त्रिपात् स्वातिरिक्तापह्नवसिद्धनिष्प्रतियोगिकपरमात्मा स्वातिरिक्ताविद्यापद्मोहे सत्यसति स्वमात्रमवशिष्यते । व्यष्टिसमष्टिचतुरंशकलनाकलितस्वातिरिक्तोऽयं अविद्यापादः । तत्प्रविभक्तस्थूलादिचतुरंशानामविद्याविद्याऽऽनन्दतुर्यभेदेन नाम निर्दिशति—**अविद्येति** । अविद्यापादस्थूलादिक्रमेण **अविद्यापाद** इत्यादि । तत्र—**तुर्यपादस्तुर्यतुरीयं तुरीयातीतं च** भवति । तुर्यपादप्रविभक्तचतुरंशेषु स्वात्मावरणभेदप्रतीत्यवास्तवत्वकलनाकलितस्थूलादिभागत्रयापह्नवसिद्धं तुर्यतुरीयपदं पराभूमिसंज्ञितं तुर्यतुरीयं त्रैपदं ब्रह्ममात्रं यदवशिष्यते तदेव तुर्यातीतं च भवति । तुर्यतुर्यपादस्य निष्प्रतियोगिकनिर्विशेषब्रह्ममात्रतया तुर्यतुर्यत्वं सिद्धमेव, तुरीयोङ्काराग्रविद्योतत्वात्, "तुरीयोङ्काराग्रविद्योतं तुर्यतुर्यं" इति श्रुतेः ॥ ७ ॥

पादचतुष्टयभेदः

कथं पादचतुष्टयस्य भेदः ॥ ८ ॥

अविद्यापादः प्रथमः पादो विद्यापादो द्वितीयः आनन्दपाद-
स्तृतीयस्तुरीयपादस्तुरीय इति । मूलाविद्या प्रथमपादे नान्यत्र ।
विद्याऽऽनन्दतुरीयांशाः सर्वेषु पादेषु व्याप्य तिष्ठन्ति ॥ ९ ॥

प्रकृते तु—**कथमिति** ॥ ८ ॥ तदेव विवृणोति—**अविद्यापाद इति** । स्वाविद्यापदस्थूलांशः **अविद्यापादः प्रथमः पादः** स्थूलांशस्य प्राथम्यात् । **विद्यापादो द्वितीयः**, द्वितीयादिपादानां प्रथमपादापेक्षया सूक्ष्मत्वेन विद्यात्वं, बीजत्वेन आनन्दत्वं, चतुर्थांशत्वेन तुर्यत्वं चोपपद्यते । प्राथमिकपाद एव अविद्यापादः विद्याऽऽनन्दादिपादत्रयं त्रिपादिति चेत्—न, त्रिपाच्चैतन्यस्य निर्विशेषतया विद्याऽऽनन्दादिविभागकलनासंभवात् । त्रिपादिति सङ्ख्यावाचित्वेन निर्विभागता कुत इति चेत्—न, अन्यार्थस्य युक्तत्वात् । कथमन्यार्थो कुञ्यत

इत्यत्र त्रय्यन्ते स्वावशेषतया पद्यते ज्ञायते इति व्युत्पत्तियोगात् त्रिपाच्छब्देन निर्विशेषं ब्रह्म उच्यते । तथाच स्मृतिः—

त्रय्यन्ते स्वावशेषेण पद्यते ज्ञायते च यत् ।
तदेव हि त्रिपाद्ब्रह्म स्वमात्रमवशिष्यते ॥ इति ॥

व्यावहारिकी मूलाविद्या प्रथमपादे स्वाविद्यापदप्रविभक्तस्थूलांशे, तस्य पञ्चीकृतपञ्चमहाभूतविकारत्वेन व्यवहारक्षमत्वात् । अत्रैव व्यावहारिकी मूलाविद्या युज्यते नान्यत्र द्वितीयादिपादेषु, तेषां अपञ्चीकृतपञ्चभूतमहदव्यक्तविकृतितया स्फुटं व्यवहर्तुमशक्यत्वात् । स्वाविद्यापदसूक्ष्मबीजादिकलनाकलितविद्याऽऽनन्दतुरीयांशाः सर्वेषु पादेषु स्थूलादिषु व्याप्य तिष्ठन्ति । तत्र प्रकृताविद्यापादे तत्सूक्ष्मांशविद्यापादो व्याप्य वर्तते नानन्दादिपादयोः । आनन्दपादस्तु विद्याऽविद्यापादयोः व्याप्य वर्तते न तुर्यपादे । तुर्यपादस्तु स्वार्वाक्पादत्रयं व्याप्य वर्तते तत्तत्कारणस्य स्वस्वकार्यव्यापकत्वप्रसिद्धेः ॥ ९ ॥

विद्याऽऽनन्दतुरीयाणां भेदः

एवं तर्हि विद्याऽऽदीनां भेदः कथमिति ॥ १० ॥

तत्तत्प्राधान्येन तत्तद्व्यपदेशः । वस्तुतस्त्वभेद एव । तत्राधस्तनमेकं पादमविद्याशबलं भवति । उपरितनपादत्रयं शुद्धबोधानन्दलक्षणममृतं भवति । तच्चालौकिकपरमानन्दलक्षणाखण्डामिततेजोराशिर्ज्वलति । तच्चानिर्वाच्यमनिर्देश्यमखण्डानन्दैकरसात्मकं भवति । तत्र मध्यमपादमध्यप्रदेशेऽमिततेजःप्रवाहाकारतया नित्यवैकुण्ठं विभाति । तच्च निरतिशयानन्दाखण्डब्रह्मानन्दनिजमूर्त्याकारेण ज्वलति । अपरिच्छिन्नमण्डलानि यथा दृश्यन्ते तद्वदखण्डानन्दामितवैष्णवदिव्यतेजोराश्यन्तर्गतविलसन्महाविष्णोः परम-

पदं विराजते । दुग्धोदधिमध्य[1]स्थितामृतामृतकलशवद्वैष्णवं धाम परमं संदृश्यते । सुदर्शनदिव्यतेजोऽन्तर्गतः सुदर्शनपुरुषो यथा सूर्यमण्डलान्तर्गतः सूर्यनारायणोऽमितापरिच्छिन्नाद्वैतपरमानन्दलक्षण-तेजोराश्यन्तर्गत आदिनारायणस्तथा संदृश्यते । स एव तुरीयं ब्रह्म स एव तुरीयातीतः स एव विष्णुः स एव समस्तब्रह्मवाचकवाच्यः स एव परं ज्योतिः स एव मायाऽतीतः स एव गुणातीतः स एव कालातीतः स एवाखिलकर्मातीतः स एव सत्योपाधिरहितः स एव परमेश्वरः स एव चिरंतनः पुरुषः प्रणवाद्यखिलमन्त्रवाचकवाच्य आद्यन्तशून्य आदिदेशकालवस्तुतुरीयसंज्ञानित्यपरिपूर्णः पूर्णः सत्य-संकल्प आत्मारामः कालत्रयाबाधितनिजस्वरूपः स्वयंज्योतिः स्वयंप्रकाशमयः स्वसमानाधिकरणशून्यः स्वसमानाधिकशून्यो नदिवारात्रिविभागो नसंवत्सरादिकालविभागः स्वानन्दमयानन्ता-चिन्त्यविभव आत्माऽन्तरात्मा परमात्मा ज्ञानात्मा तुरीयात्मेत्यादि-वाचकवाच्योऽद्वैतपरमानन्दो विभुर्नित्यो निष्कलङ्को निर्विकल्पो निरञ्जनो निराख्यातः शुद्धो देव एको नारायणो न द्वितीयोऽस्ति कश्चिदिति ॥ ११ ॥

तथा सति **विद्याऽऽदीनां भेदः कथमित्याक्षिप्य तत्तत्प्राधान्येन तत्तद्व्यपदेशः** । वस्तुतस्तु स्वाविद्यातदधिष्ठानचैतन्यव्याप्तेः समत्वेन **अभेद एव** युज्यते । पूर्वोक्तपादचतुष्टयेषु स्वाविद्यातदधिष्ठानस्फूर्तिः कुत्रेत्यत आह—

[1] स्थितामृतक—अ १.

तत्रेति । प्राथमिकपादस्याविद्याप्रविभक्ताविद्यांऽशत्वेन अविद्याशबळत्वम् । तत्राविद्यायाः प्राधान्यम् । अधिष्ठानचैतन्यं प्रधानमप्युपसर्जनवत् भासते । उपरितनपादत्रये तु चैतन्यमेव प्रधानं, स्वाविद्या तूपसर्जनम् । अत्र स्वाविद्यांऽशतानवतः चैतन्यांशस्फूर्तिबाहुळ्यसिद्धिः स्यात् इत्यत एवोच्यते--**उपरितनेति** । स्वाविद्यातदधिष्ठानप्राधान्योपसर्जनकलना माऽस्तु, आद्यं पदं आविद्यकं विद्याऽऽदिपादत्रयं निर्विशेषत्रिपाद्ब्रह्मेति चेत्—न, सर्वापह्नवसिद्धत्रिपाद्ब्रह्ममात्रस्य निष्प्रतियोगिकतया विद्याऽऽनन्देत्यादिव्यपदेशासंभवात् । न हि निर्विशेषत्रैपदे विष्वक्सेनादिवैकुण्ठकल्पना उपपद्यते, नापि गत्यागतिरपि संभवति । श्रूयते ह्यग्रे अविद्यापादमुल्लङ्घ्य विद्याऽविद्ययोः सन्धौ विष्वक्सेनवैकुण्ठपुरमाभाति, विद्यानन्दमययोः सन्धिः, तत्र आनन्दतरङ्गिण्याः प्रवाहेषु स्नात्वेत्यादि । यस्मादेवं तस्मात् अविद्यातत्कार्यारोपप्रधानोऽयमविद्यापादप्रविभक्ताविद्यापादः, अविद्यापादप्रविभक्तविद्याऽऽनन्दादिपादत्रयं तु अविद्यातत्कार्यापवादप्रधानं स्वाधिकरणचैतन्यदीप्तं सत् तद्भावापन्नतया चकास्तीत्याह--**तच्चालौकिकेति** । यत् पादचतुष्टयारोपापवादाधिकरणं **तच्च अनिर्वाच्यम्** । **तत्र** पादचतुष्टये विद्याऽऽनन्दाख्यौ **मध्यमपादौ** तयोः विद्याऽऽनन्दपादयोः **मध्यप्रदेशे** उक्तविशेषणविशिष्टं **नित्यवैकुण्ठं** विभाति । यत् नित्यवैकुण्ठमित्युक्तं वस्तुतः **तच्च निरतिशयेति** । तत्रत्यविशेषांशापाये तदेव निर्विशेषत्रैपदं ब्रह्म स्वाज्ञादिदृष्ट्यनुरोधेन नानाव्यपदेशार्हवत् [र्हं सत्] वस्तुतः स्वेन रूपेण भातीत्याह—**स एवेत्यादिना** ॥ ११ ॥

एतद्वेदनफलम्

य एवं वेद स पुरुषस्तदीयोपासनया तस्य सायुज्यमेत्य-संशयमित्युपनिषत् ॥ १२ ॥

"एको नारायणो न द्वितीयोऽस्ति कश्चित्" इति वेदनसमकालं निष्प्रतियोगिकब्रह्ममात्रावस्थानलक्षणविकळेबरकैवल्यमेति । **तदीयं** शाश्वतं ब्रह्म

तदुपासनातारतम्यानुरोधेन सालोक्यादिसायुज्यान्तमुक्तिमेतीत्यत्र—"सालोक्यादिचतुर्मुक्तिः मदुपासनया भवेत्" इति श्रुतेः । इत्युपनिषच्छब्दः प्रथमाध्यायसमाप्त्यर्थः ॥ १२ ॥

इत्यथर्वणमहानारायणोपनिषदि पादचतुष्टयस्वरूपनिरूपणं नाम प्रथमोऽध्यायः

द्वितीयोऽध्यायः

साकारनारायणस्य नित्यत्वविरोधशङ्का

अथेति होवाच छात्रो गुरुं भगवन्तम्—भगवन् वैकुण्ठस्य नारायणस्य च नित्यत्वमुक्तम् । स एव तुरीयमित्युक्तमेव । वैकुण्ठः साकारो नारायणः साकारश्च । तुरीयं तु निराकारम् । साकारः सावयवो निरवयवं निराकारम् । तस्मात् साकारमनित्यं नित्यं निराकारमिति श्रुतेः । यद्यत् सावयवं तत्तदनित्यमित्यनुमानाच्चेति प्रत्यक्षेण दृष्टत्वाच्च । अतस्तयोरनित्यत्वमेव वक्तुमुचितं भवति । कथमुक्तं नित्यत्वमिति । तुरीयमक्षरमिति श्रुतेः तुरीयस्य नित्यत्वं प्रसिद्धम् । नित्यत्वानित्यत्वे परस्परविरुद्धधर्मौ । तयोरेकस्मिन् ब्रह्मण्यत्यन्तविरुद्धं भवति । तस्माद्वैकुण्ठस्य च नारायणस्य चानित्यत्वमेव वक्तुमुचितं भवति ॥ १ ॥

"आदिनारायण एव तुरीयं ब्रह्म" इत्युक्तम्; तस्य साकारनिराकारताऽसंभवं मन्यमानः पृच्छति—**अथेति** । **नित्यत्वमुक्तं** नित्यवैकुण्ठं विभातीति ॥ १ ॥

साकारस्य सोपाधिकनिरुपाधिकभेदः

सत्यमेव भवतीति देशिकः परिहरति । साकारस्तु द्विविधः सोपाधिको निरुपाधिकश्च ॥ २ ॥

यत् त्वयोक्तं तत् **सत्यमेव** । अर्धाङ्गीकारे सत्यमित्युक्तिः । परिहारक्रममाह—**साकारस्त्विति** । "ब्रह्मव्यतिरिक्तं न किंचिदस्ति", "एको नारायणो न द्वितीयोऽस्ति कश्चित्", "पश्यतेहापि सन्मात्रमसदन्यत्",

चिन्मात्रमेव चिन्मात्रमखण्डैकरसं रसम् ।
सर्ववर्जितचिन्मात्रं ब्रह्ममात्रमसन्न हि ॥

इत्यादिश्रुतिसिद्धनिष्प्रतियोगिकसदसद्रूपब्रह्मातिरिक्तयोः मध्ये ब्रह्म तावत् त्रैपदं स्वाज्ञादिदृष्टिविकल्पितस्वातिरिक्ताविद्यापदमोहे सत्यसति अव्यवहार्यतया स्वमात्रमवशिष्यत इत्यत्र ईशाद्यष्टोत्तरशतवेदान्ताः प्रमाणम् । न हि तत्र विवादोऽस्ति । स्वाज्ञदृष्टिविकल्पितस्वातिरिक्तस्तु व्यष्टिसमष्ट्यात्मकचतुश्चतुरंशविशिष्टस्वाविद्यापादाकारेण तत्तदंशारोपापवादाधिकरणाकारेण साकं वर्तत इति साकार इत्युच्यते । सोऽयं **साकारस्तु द्विविधः** । द्वैविध्यं कथं? इत्यत्र **सोपाधिकनिरुपाधिकभेदात्** द्वैविध्यमिष्यते । साकाराविद्यापदस्थूलादिभागत्रयस्य स्वारोपाधिकरणविश्वविराडोत्रादिप्राज्ञबीजानुज्ञैकरसान्तचैतन्योपाधित्वात् उपाधित्वम् । साकाराविद्यापदतुर्यांशभागत्रयस्य तु पूर्वोक्तभागत्रयापवादाधिकरणद्वितुर्याविकल्पचैतन्योपाधित्वेऽपि विश्वविराडाद्यधिष्ठितभागत्रयवत् बन्धकाभावात् निरुपाधिकत्वमुपचर्यते ॥ २ ॥

सोपाधिकसाकारनिरूपणम्

तत्र सोपाधिकसाकारः कथमिति ॥ ३ ॥

आविद्यकमखिलकार्यकारणजालमविद्यापाद एव नान्यत्र । तस्मात् समस्ताविद्योपाधिः साकारः सावयव एव । सावयवत्वादवश्यमनित्यं भवत्येव ॥ ४ ॥

तत्र सोपाधिकः साकारः कथं? इति पृष्ट आह—**आविद्यकमिति** । स्वाविद्याद्वयतत्कार्यकारणजालं आविद्यकं बाहुल्येन **अविद्यापादप्रविभक्त**स्थूलादिभागत्रय एवोपलभ्यते नान्यत्र । न हि तत्तुर्यभाग एवमुपलभ्यते । यस्मादेवं **तस्मात्** अस्य भागत्रयस्य सोपाधिकसाकारत्वेन सावयवत्वं ततोऽनित्यत्वं च स्यादिति ॥ ३–४ ॥

निरुपाधिकसाकारनिरूपणम्

सोपाधिकसाकारो वर्णितः । तर्हि निरुपाधिकसाकारः कथमिति ॥ ५ ॥

निरुपाधिकसाकारस्त्रिविधः ब्रह्मविद्यासाकारश्चानन्दसाकार उभयात्मकसाकारश्चेति । त्रिविधसाकारोऽपि पुनर्द्विविधो भवति नित्यसाकारो मुक्तसाकारश्चेति । नित्यसाकारस्त्वाद्यन्तशून्यः शाश्वतः । उपासनया ये मुक्तिं गतास्तेषां साकारो मुक्तसाकारः । तस्याखण्डज्ञानेनाविर्भावो भवति । सोऽपि शाश्वतः ॥ ६ ॥

सोपाधिकसाकारः उक्तः, तिष्ठतु एवं, तर्हि **निरुपाधिकसाकारः कथं**? इत्यत्र साकारः स्वाविद्यापदतुर्यांशो हि **निरुपाधिकसाकारः** । विद्याऽऽनन्दादि**भेदेन स त्रिविधः** । तत्र तत्तुर्यांशप्रविभक्तस्थूलभागोऽयं **ब्रह्मविद्यासाकारः**, तत्सूक्ष्मांशस्तु **आनन्दसाकारः**, तद्बीजांशस्तु **उभयात्मकसाकारश्चेति** तुर्यपादस्य

त्रैविध्यमुक्तम्। व्यष्टिसमष्टिविभागतः त्रिविधसाकारोऽपि पुनर्द्विविधो भवति। तत्र समष्टिस्तु नित्यसाकारः, व्यष्टिस्तु मुक्तसाकारश्चेति। तत्र कीदृशोऽयं नित्यसाकार इत्यत्र आद्यन्तशून्यः शाश्वतः। तुर्यविराट्सूत्रबीजचैतन्यस्य निरावृतब्रह्ममात्रदृष्टित्वेन संभूतिप्रळयाभावात् आद्यन्तशून्यत्वं, तुर्यतुर्यदृष्ट्या शाश्वतत्वं च सिद्धमेव। व्यष्ट्यात्मकमुक्तसाकारस्वरूपं वर्णयति—उपासनयेति। इह लोके श्रवणादिनैरपेक्ष्येण केवलभगवदुपासनया ये सालोक्यादिमुक्तिं भजन्ते तेषां साकारो मुक्तसाकारः। तस्य मुक्तसाकारस्य भगवदुपदिष्टवेदान्त-श्रवणजनिताखण्डज्ञानेन ब्रह्मभावाविर्भावो भवति। ब्रह्मभावापत्तितः सोऽपि शाश्वत इत्यर्थः ॥ ६ ॥

मुक्तसाकारस्य शाश्वतत्वनिरूपणम्

मुक्तसाकारस्त्वैच्छिक इति अन्ये वदन्ति। शाश्वतत्वं कथमिति ॥ ७ ॥

अद्वैताखण्डपरिपूर्णनिरतिशयपरमानन्दशुद्धबुद्धमुक्तसत्यात्मक-ब्रह्मचैतन्यसाकारत्वात् निरुपाधिकसाकारस्य नित्यत्वं सिद्धमेव। तस्मा-देव निरुपाधिकसाकारस्य निरवयवत्वात् स्वाधिकमपि दूरतो निरस्त-मेव। निरवयवं ब्रह्मचैतन्यमिति सर्वोपनिषत्सु सर्वशास्त्रसिद्धान्तेषु श्रूयते ॥

कथं पुनः मुक्तसाकारस्य शाश्वतत्वं? इत्याक्षिप्य परिहरति—मुक्तेति ॥ ७ ॥ भगवदुपदिष्टज्ञानमहिम्ना अद्वैतेति। ब्रह्माकाराकारितत्वात् सोपाधिकसाकारापेक्षया निरुपाधिकसाकारस्येति। यस्मादेवं तस्मात्। सप्रतियोगिकमपि निरवयवम् ॥ ८–१० ॥

विद्याऽऽनन्दतुरीयसाकाराणां भेदः

अथ च विद्याऽऽनन्दतुरीयाणामभेद एव श्रूयते सर्वत्र। विद्याऽऽदिसाकारभेदः कथमिति ॥ ९ ॥

सत्यमेवोक्तमिति देशिकः परिहरति । विद्याप्राधान्येन विद्यासाकारः । आनन्दप्राधान्येनानन्दसाकारः । उभयप्राधान्येनोभयात्मक[1]साकारो भवति । प्राधान्येनात्र भेद एव भेदो वस्तुतस्त्वभेद एव ॥ १० ॥

परब्रह्मणः साकारनिराकारभेदविरोधपरिहारः

भगवन्नखण्डाद्वैतपरमानन्दलक्षणपरंब्रह्मणः साकारनिराकारौ विरुद्धधर्मौ । विरुद्धोभयात्मकत्वं कथमिति ॥ ११ ॥

सत्यमेवेति गुरुः परिहरति । यथा सर्वगतस्य निराकारस्य महावायोश्च तदात्मकस्य त्वक्पतित्वेन प्रसिद्धस्य साकारस्य महावायुदेवस्य चाभेद एव श्रूयते सर्वत्र यथा पृथिव्यादीनां व्यापक[2]शरीराणां [3]देवशेषाणां च तद्विलक्षणतदभिन्नव्यापकापरिच्छिन्ननिजमूर्त्याकारदेवताः श्रूयन्ते सर्वत्र तद्वत् परब्रह्मणः सार्वात्मिकस्य साकारनिराकारभेदविरोधो नास्त्येव । विविधविचित्रानन्तशक्तेः परब्रह्मणः स्वरूपज्ञानेन विरोधो न विद्यते । तदभावे सत्यनन्तविरोधो विभाति ॥ १२ ॥

अथ च रामकृष्णाद्यवतारेष्वप्यद्वैतपरमानन्दलक्षणपरंब्रह्मणः परमतत्त्वपरमविभवानुसंधानं स्वीयत्वेन श्रूयते सर्वत्र । सर्वपरिपूर्णस्याद्वैतपरमानन्दलक्षणपरब्रह्मणस्तु किं वक्तव्यम् । अन्यथा सर्वपरिपूर्णस्य परंब्रह्मणः परमार्थतः साकारं विना केवलनिराकारत्वं यद्यभिमतं

[1] साकारश्चेति—मु. [2] शरीरिणां—अ २. [3] देवविशे—मु.

तर्हि केवलनिराकारस्य गगनस्येव परंब्रह्मणोऽपि जडत्वमा[1]पद्यते ।
तस्मात् परंब्रह्मणः परमार्थतः साकारनिराकारौ स्वभावसिद्धौ ॥ १३ ॥

साकारत्रयभेदस्य तत्प्रविभक्तस्थूलाद्यंशनिमित्तत्वात् ब्रह्मणो विश्वविश्वाद्य-विकल्पानुज्ञैकरसान्तभेदेन साकारनिराकारत्वप्रसक्तौ विरोधं मत्वा पृच्छति—**भगवन्निति** ॥ ११ ॥ तत्र विरोधाभावे दृष्टान्तद्वयमाचष्टे—**यथेति** । विश्वविश्वाद्य विकल्पानुज्ञैकरसान्तरूपेण **सार्वात्मिकस्येति** । स्वारोपित**विविधविचित्रा-नन्तशक्तेः परब्रह्मणः** साकारसापेक्षनिराकारगतविशेषांशापह्नवसिद्धनिष्प्रति-योगिकब्रह्ममात्र**स्वरूपज्ञानेन** साकारनिराकार**विरोधो न विद्यते** ब्रह्ममात्रस्य निष्प्रतियोगिकनिराकारत्वेन विरोधस्फूर्त्यनवकाशात् ॥ १२ ॥

सकृदेव प्रपन्नाय तवास्मीति च याचते ।
अभयं सर्वभूतेभ्यो ददाम्येतद्व्रतं मम ॥ इति ॥
मत्तः परतरं नान्यत् किंचिदस्ति धनञ्जय ॥

इत्यादिपरमतत्त्वविभवानुसन्धानं **रामकृष्णाद्यवतारेष्वपि श्रूयते** । निष्प्रति-योगिकपूर्णभावमापन्नब्रह्ममात्रस्य **किं वक्तव्यं** यद्भावापत्तितोऽप्यंशावतारा अपि निर्विशेषब्रह्मभावनया अंशांशिभावविकला बभूवुः । साक्षाद्ब्रह्ममात्रस्य निष्प्रति-योगिकत्वेन साकारः तत्सापेक्षनिराकारो वा कथं सेद्धुं पारयति । एवं सर्ववेदान्त-सिद्धान्तार्थे केचन स्वाज्ञाः रामकृष्णादीनां साकारतया परमतत्त्वविभवानुसंधानं श्रूयते अंशस्य साकृतित्वेन अंशिब्रह्मणोऽपि साकृतित्वेन अद्वैतपरमानन्दलक्षण-ब्रह्मत्वमस्तीति किं चित्रमिति मेनिरे । तदानुकूल्येन युक्त्याभासमपि दर्शयन्ति । तथा च स्मृतिः—

यस्य यस्य गृ[ग्र]हे यस्मिन् दृढावेशो भवेत्तराम् ।
तत्तद्ग्रान्त्यनुरोधेन शास्त्रं भवति नान्यथा ॥ इति ॥

[1] पद्यते—अ १, क.

साकृतित्वेन ब्रह्मणो ब्रह्मत्वं, अन्यथा सर्वपरिपूर्णब्रह्मणः परमार्थतः साकारं विना केवलनिराकारत्वं यद्यभिमतं तदा केवलनिराकारगगनवत् परं ब्रह्मापि जडतामियात् । न हि ब्रह्म जडभावं स्पृशति । शिरःप्राण्यादियोगतः साकृतित्वं सच्चिदानन्दानुवृत्त्या निराकृतित्वं च युज्यतं इति केचित् । यस्मादेवं तस्मात् परब्रह्मणः परमार्थतः साकारनिराकारौ स्वभावसिद्धाविति मेनिरे ॥ १३ ॥

आदिनारायणादविद्योदयः

तथाविधस्याद्वैतपरमानन्दलक्षणस्यादिनारायणस्योन्मेषनिमेषाभ्यां मूलाविद्योदयस्थितिलया जायन्ते । कदाचिदात्मारामस्याखिलपरिपूर्णस्यादिनारायणस्य स्वेच्छानुसारेणोन्मेषो जायते । तस्मात् परंब्रह्मणोऽधस्तनपादे सर्वकारणे मूलकारणाव्यक्ताविर्भावो भवति । अव्यक्तान्मूलाऽऽविर्भावो मूलाविद्याऽऽविर्भावश्च । तस्मादेव सच्छब्द वाच्यं ब्रह्माविद्याशबलं भवति । ततो महत् । महतोऽहंकारः । अहंकारात् पञ्चतन्मात्राणि । पञ्चतन्मात्रेभ्यः पञ्चमहाभूतानि । पञ्चमहाभूतेभ्यो ब्रह्मैकपादं व्याप्तमेकमविद्याऽण्डं जायते ॥ १४ ॥

तथा च आकृतिद्वयविशिष्टब्रह्मणः सकाशादेव अव्यक्तादिस्थावरान्तसृष्टिः स्यादित्याह—**तथाविधस्येति** । **तथाविधस्य** साकृतेः । तत्रोन्मेषतः सृष्टिमाचष्टे **कदाचिदिति** । **मूलाशब्देन** माया । **मूलाविद्याशब्देन** तत्कार्यमित्यर्थः । यन्मायातत्कार्याविर्भावहेतुः अक्षराख्यं कूटस्थं वा **तस्मादेव** ॥ १४ ॥

अविद्याऽण्डस्थनारायणमहिमा

तत्र तत्त्वतो गुणातीतशुद्धसत्त्वमयो लीलागृहीतनिरतिशयानन्दलक्षणो मायोपाधिको नारायण आसीत् । स एव नित्यपरिपूर्णः

पादविभूतिर्वैकुण्ठनारायणः । स चानन्तकोटिब्रह्माण्डानामुदयस्थितिलयाद्यखिलकार्यकारणजालपरमकारणभूतो महामायाऽतीतस्तुरीयः परमेश्वरो जयति । तस्मात् स्थूलविराट्स्वरूपो जायते । स सर्वकारणमूल विराट्स्वरूपो भवति । स चानन्तशीर्षा पुरुष अनन्ताक्षिपाणिपादो भवति । अनन्तश्रवणः सर्वमावृत्य तिष्ठति । सर्वव्यापको भवति । सगुणनिर्गुणस्वरूपो भवति । ज्ञानबलैश्वर्यशक्तितेजःस्वरूपो भवति । विविधविचित्रानन्तजगदाकारो भवति । निरतिशयानन्दमयानन्तपरमविभूतिसमष्ट्या [1]विम्वाकारो भवति । निरतिशयनिरङ्कुशसर्वज्ञसर्वशक्तिसर्वनियन्तृत्वाद्यनन्तकल्याणगुणाकारो भवति । वाङ्मनसगोचरानन्तदिव्यतेजोराश्याकारो भवति । समस्ताविद्याऽण्डव्यापको भवति । स चानन्तमहामायाविलासानामधिष्ठा[2]नविशेषनिरतिशयाद्वैतपरमानन्दलक्षणपरंब्रह्मविलासविग्रहो भवति ॥ १९ ॥

अस्यैकैकरोमकूपान्तरेष्वनन्तकोटिब्रह्माण्डानि [3]स्थावरणानि च जायन्ते । तेष्वण्डेषु सर्वेष्वेकैकनारायणावतारो जायते । नारायणाद्धिरण्यगर्भो जायते । नारायणादण्डविराट्स्वरूपो जायते । नारायणादखिललोकस्रष्टृप्रजापतयो जायन्ते । नारायणादेकादशरुद्राश्च जायन्ते । नारायणादखिललोकाश्च जायन्ते । नारायणादिन्द्रो जायते । नारायणात् सर्वे देवाश्च जायन्ते । नारायणाद्द्वादशादित्याः सर्वे वसवः सर्वे ऋषयः सर्वाणि भूतानि सर्वाणि छन्दांसि नारायणादेव

[1] विभवाका—अ २, क. विश्वाका—उ, मु. [2] नावि—अ२. [3] स्थावराणि—उ, मु.

समुत्पद्यन्ते । नारायणात् प्रवर्तन्ते । नारायणे प्रलीयन्ते । अथ नित्योऽक्षरः परमः स्वराट् । ब्रह्मा नारायणः । शिवश्च नारायणः । शक्रश्च नारायणः । दिशश्च नारायणः । विदिशश्च नारायणः । कालश्च नारायणः । कर्माखिलं च नारायणः । मूर्तामूर्तं च नारायणः । कारणात्मकं सर्वं कार्यात्मकं सकलं नारायणः । तदुभयविलक्षणो नारायणः । परंज्योतिः स्वप्रकाशमयो ब्रह्मानन्दमयो नित्यो निर्विकल्पो निरञ्जनो निराख्यातः शुद्धो देव एको नारायणो न द्वितीयोऽस्ति कश्चित् न समोनाधिक इत्यसंशयम् ॥ १६ ॥

स्वोपाधिसत्त्वासत्त्वाभ्यां **सगुणनिर्गुणस्वरूपो भवति** । नारायणस्य स्वाज्ञविकल्पितोपाधियोगायोगतः सर्वज्ञत्वसर्वशक्तिसर्वनियन्तृत्वाद्यनन्तकल्याणगुणवत्त्वं निरतिशयाद्वैतपरमानन्दलक्षणलक्षितत्वं वस्तुतो निष्प्रतियोगिकब्रह्ममात्रत्वं च युज्यत इत्यस्यामुपनिषदि सर्वत्र एवं द्रष्टव्यमित्यर्थः ॥ १५ ॥ य एवंविधो नारायणः **अस्येत्यादि** । स्वेन रूपेण **नित्यः** । न हि नारायणाधिकः समो न्यूनो वाऽस्ति, वस्तुतो नारायणस्य निष्प्रतियोगिकब्रह्ममात्रत्वात् ॥ १६ ॥

एतद्वेदनफलम्

परमार्थतो य एवं वेद सकलबन्धांश्छित्त्वा मृत्युं तीर्त्वा स मुक्तो भवति स मुक्तो भवति । य एवं विदित्वा सदा तमुपास्ते पुरुषः स नारायणो भवति स नारायणो भवतीत्युपनिषत् ॥ १७ ॥

वेदनफलमाह—**य इति** । आवृत्तिः आदरार्था । **इत्युपनिषच्छब्दः** द्वितीयाध्यायसमाप्त्यर्थः ॥

इत्यथर्वणमहानारायणोपनिषदि परंब्रह्मणः साकारनिराकारस्वरूपनिरूपणं नाम द्वितीयोऽध्यायः

तृतीयोऽध्यायः

अविद्याप्रपञ्चो महामायाविलासः

अथ छात्रस्तथेतिहोवाच—भगवन् देशिक परमतत्त्वज्ञ सविलासमहामूलाविद्योदयक्रमः कथितः । तदु प्रपञ्चोत्पत्तिक्रमः कीदृशो भवति विशेषेण कथनीयः । तस्य तत्त्वं वेदितुमिच्छामि ॥ १ ॥

तथेत्युक्त्वा गुरुरित्युवाच—तथाऽनादिसर्वप्रपञ्चो दृश्यते । नित्योऽनित्यो वेति [1]संशयते । प्रपञ्चोऽपि द्विविधः विद्याप्रपञ्चश्चाविद्याप्रपञ्चश्चेति । विद्याप्रपञ्चस्य नित्यत्वं सिद्धमेव नित्यानन्दचिद्विलासात्मकत्वात् अथ च शुद्धबुद्धमुक्तसत्यानन्दस्व[2]रूपत्वाच्च । अविद्याप्रपञ्चस्य [3]नित्यत्वमनित्यत्वं वा कथमिति । [4]प्रवाहतानित्यत्वं वदन्ति केचन । प्रलयादिकं [कस्य] श्रूयमाणत्वादनित्यत्वं वदन्त्यन्ये । उभयं न भवति । पुनः कथमिति । संकोचविकासात्मकमहामाया[5]विलासात्मक एव सर्वोऽप्यविद्याप्रपञ्चः । परमार्थतो न किंचिदस्ति क्षणशून्यानादिमूलाविद्याविलासत्वात् । तत् कथमिति । एकमेवाद्वितीयं ब्रह्म । नेह नानाऽस्ति किंचन । तस्माद्ब्रह्मव्यतिरिक्तं सर्वं बाधितमेव । सत्यमेव परं ब्रह्म सत्यं ज्ञानमनन्तं ब्रह्मेति ॥ २ ॥

शिष्यो गुरुमुखतो मूलाविद्योत्पत्तिक्रमं बुद्ध्वा तत्कार्यप्रपञ्चोत्पत्तिक्रमबुभुत्सया पृच्छतीत्याह—अथेति । किमिति? तथेति ॥ १ ॥ स्वाज्ञानकालमारभ्य

[1] संशय्यते—मु. [2] रूपाच्च—अ २. रूपत्वात्—उ.
[3] नित्यत्वं वा अनित्यत्वं वा—क. [4] प्रवाहतो—मु. [5] विलास एव—अ २, क.

स्वज्ञानावधिकत्वमनादित्वम्। सोऽयमनादिप्रपञ्चः। "विद्यया देवलोकः" इति श्रुत्यनुरोधेन विद्यया प्रकर्षेण योऽश्नते प्रकाशते सोऽयं वैकुण्ठादिविद्याप्रपञ्चः विष्ण्वादेः यावदुपाधिस्थायित्वात् स्वाविद्याविजृंभितमार्त्यप्रपञ्चापेक्षया **विद्याप्रपञ्चस्य नित्यत्वं सिद्धमेव** विष्णोः **नित्यानन्दचिद्विलासात्मकत्वात्** लीलार्थं विष्णुना निर्मितत्वात् **अथ च** परमार्थदृष्ट्या **शुद्धरूपत्वाच्च**। अविद्याप्रपञ्चेयत्तामाह—**अविद्येति**। चित्रपटवत् **संकोचेत्यादि**। ब्रह्मातिरेकेण **परमार्थत** इति। यस्मादेवं **तस्मात्**। यत्तदपवादाधिष्ठानं तत् **सत्यमेव** ॥ २ ॥

ब्रह्मणः अण्डपरिपालकमहाविष्णौ लयः

ततः सविलासमूलाविद्योपसंहारक्रमः कथमिति ॥ ३ ॥

अत्यादरपूर्वकमतिहर्षेण [1]देशिक उपदिशति—चतुर्युगसहस्राणि ब्रह्मणो दिवा भवति। तावता कालेन पुनस्तस्य रात्रिर्भवति। द्वे अहोरात्रे एकं दिनं भवति। तस्मिन्नेकस्मिन् दिने आसत्य[2]लोकानामुदयस्थितिलया जायन्ते। पञ्चदशदिनानि पक्षो भवति। पक्षद्वयं मासो भवति। मासद्वयमृतुर्भवति। ऋतुत्रयमयनं भवति। अयनद्वयं वत्सरो भवति। वत्सरशतं ब्रह्ममानेन ब्रह्मणः परमायुःप्रमाणम्। तावत्कालस्तस्य स्थितिरुच्यते। स्थित्यन्तेऽण्डविराट्पुरुषः स्वांशं हिरण्यगर्भमभ्येति। हिरण्यगर्भः स्वकारणं परमात्मानमण्डपरिपालकनारायणमभ्येति। पुनर्वत्सरशतं तस्य प्रलयो भवति। [3]तथा जीवाः सर्वे प्रकृतौ प्रलीयन्ते। प्रलये सर्वशून्यं भवति ॥ ४ ॥

[1] देशिकोप—अ १, अ २, क. [2] लोकान्त—मु.
[3] तदा—मु.

मूलाविद्योपसंहारक्रमबुभुत्सया पृच्छति—तत इति ॥ ३ ॥ पृष्टो गुरुः अत्यादरपूर्वकम् . . . उपदिशति—किं तत्? चतुर्युगेति । पुनर्वत्सरशतं तस्य चतुर्मुखस्य प्रलयो भवति ॥ ४ ॥

महाविष्णोः आदिविराट्पुरुषे लयः

तस्य ब्रह्मणः स्थितिप्रलयावादिनारायणस्यांशेनावतीर्णस्याण्ड-परिपालकस्य महाविष्णोरहोरात्रिसंज्ञिकौ । ते अहोरात्रे एकं दिनं भवति । एवं दिनपक्षमाससंवत्सरादिभेदाच्च तदीयमानेन शतकोटि-वत्सरकालस्तस्य स्थितिरुच्यते । स्थित्यन्ते स्वांशं [1]महाविराट्पुरुष-मभ्येति । ततः सावरणं ब्रह्माण्डं विनाशमेति । ब्रह्माण्डावरणं विनश्यति [2]तद्धि विष्णोः स्वरूपम् । तस्य तावत्प्रलयो भवति । प्रलये सर्वशून्यं भवति ॥ ५ ॥

शतकोटिवत्सरकालः—शतकोटिवत्सरपरिमितः कालः, शतसंवत्सरः कालो यस्य कोटाविति वेत्यर्थः ॥ ५–६ ॥

आदिविराट्पुरुषस्य आदिनारायणे लयः

अण्डपरिपालकमहाविष्णोः स्थितिप्रलयावादिविराट्पुरुष-स्याहोरात्रि[3]संज्ञिकौ । ते अहोरात्रे एकं दिनं भवति । एवं दिनपक्षमाससंवत्सरादिभेदाच्च तदीयमानेन शतकोटिवत्सरकालस्तस्य स्थितिरुच्यते । स्थित्यन्ते आदिविराट्पुरुषः स्वांशं मायोपाधिक-

[1] 'महा' इति (क) कोशे नास्ति. [2] तस्य—उ.
[3] संज्ञितौ—उ, उ १.

नारायणमभ्येति । तस्य विराट्पुरुषस्य यावत्स्थितिकालस्तावत्प्रलयो भवति । प्रलये सर्वशून्यं भवति ॥ ६ ॥

मायाविलये जीवेशयोः स्वरूपभजनम्

विराट्स्थितिप्रलयौ मूलाविद्याऽण्डपरिपालकस्यादिनारायणस्याहोरात्रिसंज्ञिकौ । ते अहोरात्रे एकं दिनं भवति । एवं दिनपक्षमाससंवत्सरादिभेदाच्च तदीयमानेन शतकोटिवत्सरकालस्तस्य स्थितिरुच्यते । स्थित्यन्ते त्रिपाद्विभूतिनारायणस्येच्छावशान्निमेषो जायते । तस्मान्मूलाविद्याऽण्डस्य सावरणस्य विलयो भवति । ततः सविलासा मूलाविद्या सर्वकार्योपाधिसमन्विता सदसद्विलक्षणाऽनिर्वाच्या लक्षणशून्याऽऽविर्भावतिरोधानात्मिकाऽनाद्यखिलकारणकारणाऽनन्तमहामायाविशेषणविशेषिता परमसूक्ष्ममूलकारणमव्यक्तं विशति । अव्यक्तं विशेद्ब्रह्मणि निरिन्धनो वैश्वानरो यथा । तस्मान्मायोपाधिक आदिनारायणस्तथा स्वस्वरूपं भजति । सर्वे जीवाश्च स्वस्वरूपं भजन्ते । यथा जपाकुसुमसान्निध्याद्रक्तस्फटिकप्रतीतिस्तदभावे शुद्धस्फटिकप्रतीतिः ब्रह्मणोऽपि मायोपाधिवशात् सगुणपरिच्छिन्नादिप्रतीतिरुपाधिविलयान्निर्गुणनिरवयवादिप्रतीतिरित्युपनिषत् ॥ ७ ॥

यस्मादेवं तस्मात् मायोपाधिक इत्यादि । त्रय्यन्तैः यत्स्वमात्रमिति पद्यते तत् त्रिपादिति यदुक्तं न संगच्छते, तस्य स्वेच्छावशात् निमेषो जायते इतीच्छानिमेषा[दि]विकारकलनाविशिष्टत्वात् सविशेषं त्रिपादिति चेत्—न, तदिच्छानिमेषादेः तदाप्तावुपायत्वात् । यथा आनन्दवल्ल्यां भूमानन्दावताराय

सोपानरीत्या सार्वभौमाद्यानन्दतारतम्यं श्रूयते तथा अत्रापि सोपानरीत्या चतुर्मुखाद्यादिनारायणान्तचेतनविशिष्टप्रपञ्चापवादाधिकरणत्वमवगम्यते। वस्तुतः शशविषाणकल्पप्रपञ्चस्य निष्प्रतियोगिकाभावरूपतया आधेयत्वासंभवात् आधेयत्वाभावतः तन्निरूपिताधारत्वासंभवात् त्रिपात् निष्प्रतियोगिकब्रह्ममात्रतया स्वाज्ञादिदृष्टिमोहे सत्यसति सदा अवशिष्यत इति सिद्धम्। इत्युपनिषच्छब्दः तृतीयाध्यायसमाप्त्यर्थः ॥ ७ ॥

इत्यथर्वणमहानारायणोपनिषदि मूलाविद्याप्रळयस्वरूपनिरूपणं नाम तृतीयोऽध्यायः

चतुर्थोऽध्यायः

त्रैपदचैतन्यस्वरूपम्

ॐ ततस्तस्मान्निर्विशेषमतिनिर्मलं भवति। अविद्या[1]पादमतिशुद्धं भवति। शुद्धबोधानन्दलक्षणकैवल्यं भवति। ब्रह्मणः पादचतुष्टयं निर्विशेषं भवति। अखण्डलक्षणाखण्डपरिपूर्णसच्चिदानन्दस्वप्रकाशं भवति। अद्वितीयमनीश्वरं भवति। अखिलकार्यकारणस्वरूपमखण्डचिद्घनानन्दस्वरूपमतिदिव्यमङ्गलाकारं निरतिशयानन्दतेजोराशिविशेषं सर्वपरिपूर्णानन्तचिन्मयस्तम्भाकारं शुद्धबोधानन्दविशेषाकारमनन्तचिद्विलासविभूतिसमष्ट्याकारमद्भुतानन्दाश्चर्यविभूतिविशेषाकारमनन्तपरिपूर्णानन्ददिव्यसौदामिनीनिचयाकारम्। एवमाकारमद्वितीयाखण्डानन्दब्रह्मस्वरूपं निरूपितम् ॥ १ ॥

[1] पार—अ १, अ २.

स्वातिरिक्तसर्वप्रपञ्चापवादाधारतया वस्तुतो निराधारतया च यत्त्रैपदचैतन्यमवशिष्यते तत्स्वरूपं विशदयति ओमिति। ॐ ओङ्कारात्रविद्योतं तुर्यतुर्यात्मकं त्रैपदं ततः तस्मात् स्वाविद्यापादप्रविभक्तस्वाविद्यापादादिपादचतुष्टयापह्नवात् निष्प्रतियोगिकनिर्विशेषं तथा अतिनिर्मलं तदा भवतीव भवति। स्वाज्ञविकल्पितस्वाविद्यापदविभ्रमे सत्यसति निष्प्रतियोगिकनिर्विशेषतया स्वयमवशिष्यत इत्यर्थः। बोधार्थं तदेव विशेषणान्तरेण प्रपञ्चयति—अविद्येत्यादिना। यत्र सद्वितीयेश्वरादिकलना न विद्यते तन्निष्प्रतियोगिकाद्वितीयमित्यर्थः। यत् स्वाज्ञदशायां अखिलकार्यकारणस्वरूपं अनुभूतं तदेव स्वज्ञदशायां अखण्डेति। स्तम्भाकारं स्तम्भवदचलमित्यर्थः। एवं . . . निरूपितं, नातः परं वक्तव्यमवशिष्यते ॥ १ ॥

पादभेदादिकथनं ब्रह्मस्वरूपकथनमेव

अथ छात्रो वदति—भगवन् पादभेदादिकं कथं कथमद्वैतस्वरूपमिति निरूपितम् ॥ २ ॥

देशिकः परिहरति—विरोधो न विद्यते। ब्रह्माद्वैतमेव सत्यम्। तथैवोक्तं च। ब्रह्मभेदो न कथितो ब्रह्मव्यतिरिक्तं न किंचिदस्ति। पादभेदादिकथनं तु ब्रह्मस्वरूपकथनमेव। तदेवोच्यते। पादचतुष्टयात्मकं [1]ब्रह्म तत्रैकमविद्यापादं पादत्रयममृतं भवति। शाखाऽन्तरोपनिषत्स्वरूपमेव निरूपितमेव ॥ ३ ॥

एवं स्थितेऽपि ब्रह्मणोऽद्वितीयत्वासंभवमाशंक्य शिष्यः पृच्छति—अथेति ॥ २ ॥ शिष्यकृताशङ्कां देशिकः परिहरति। तत्रैकमविद्यापादं, तदपेक्षया तत्तुर्यभागप्रविभक्तपादत्रयममृतं भवति। यत्त्वयोक्तं तच्छाखान्तरे नास्तीत्यत्राह—शाखान्तरेति ॥ ३ ॥

[1] ब्रह्मेति त—उ.

उक्तार्थे शाखाऽन्तरसंवादः

तमसस्तु परं ज्योतिः परमानन्दलक्षणम् ।
पादत्रयात्मकं ब्रह्म कैवल्यं परमं शाश्वतमिति ॥ ४ ॥
वेदाहमेतं पुरुषं महान्तमादित्यवर्णं तमसः परस्तात् ।
तमेवं विद्वानमृत इह भवति नान्यः पन्था विद्यतेऽयनाय ॥ ५ ॥
सर्वेषां ज्योतिषां ज्योतिस्तमसः परमुच्यते ।
सर्वस्य धातारमचिन्त्यरूपमादित्यवर्णं परंज्योतिस्तमस उपरि
विभाति ॥ ६ ॥
यदेकमव्यक्तमनन्तरूपं विश्वं पुराणं तमसः परस्तात् ।
तदेवर्तं तदु सत्यमाहुस्तदेव सत्यं तदेव ब्रह्म परमं विशुद्धम् ॥ ७ ॥
कथ्यते तमश्शब्देनाविद्या ॥ ८ ॥
पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि ।
त्रिपादूर्ध्व उदैत् पुरुषः पादोऽस्येहाभवात् पुनः ।
ततो विष्वङ् व्यक्रामत् साशनानशने अभि ॥ ९ ॥
विद्याऽऽनन्दतुरीयाख्यपादत्रयममृतं भवति ।
[1]अवशिष्टमविद्याश्रयमिति ॥ १० ॥

तत् कथमित्यत्र—**तमसस्त्विति । तमसः** चतुश्चतुरंशाढ्यस्याविद्या पदतत्कार्यात् यत् **परं ज्योतिः** तदेव **परमानन्दलक्षणं पादत्रयात्मकं** तुर्यपादगपादत्रयगतहेयांशापह्नवसिद्धं त्रैपदं **ब्रह्म** ॥ ४ ॥ तद्वेदनोपायं वेदनफलं चाह—

[1] अविशि—उ.

वेदाहमिति ॥ ५ ॥ तमसः परस्तात् इत्यंशं विवृणोति—**सर्वेषामिति** । सूर्यादीनां —विश्वविराडोत्रादीनां वा **सर्वेषां**—**ज्योतिषां परं ज्योतिः** । स्वातिरिक्ताविद्यापद-तत्कार्यस्य **तमसः** । स्वातिरिक्तप्रपञ्चस्य **सर्वस्य धातारं** आधारभूतं पोषयितारं वा आधारपोषयितृत्वेनापि **अचिन्त्यरूपं आदित्यवर्णवत् परं ज्योतिः तमसः उपरि विभातीति** विद्यात् ॥ ६ ॥ यत् तमसः परं तदेव ब्रह्मेत्याह—**यदिति** । **ऋत**शब्देन काम्यकर्मफलस्वर्गादिरुच्यते । प्राथमिकसत्यशब्देन समुच्चयानुष्ठान-फलमपरं ब्रह्मोच्यते । द्वितीयसत्यशब्देन निर्विशेषज्ञानफलं परं ब्रह्मोच्यते ॥ ७ ॥ तमःशब्दार्थमाह—**कथ्यत** इति ॥ ८ ॥ पादचतुष्टयसिद्धौ श्रुत्यन्तरसम्मतिमाचष्टे —**पाद** इति । **अस्य** निर्विशेषब्रह्मणः चतुरंशात्मक**विश्वा भूतानि आद्यः पादः** स्वाविद्यापाद इत्यर्थः । विश्वशब्देन स्थावरप्रपञ्च उच्यते । भूतशब्देन तदारो-पाद्यधिष्ठानविश्वविश्वाद्यविकल्पानुज्ञैकरसान्तजङ्गमप्रपञ्च उच्यते । **अस्य** निर्विशेष-ब्रह्मणः **दिवि** द्योतनात्मके स्वे महिम्नि यत् **त्रिपात्** चैतन्यं स्वमात्रमवशिष्यते तत् **अमृतं** सन्मात्रमित्यर्थः । त्रय्यन्तैः स्वमात्रतया पद्यमानत्वात् अस्यामृतत्वं युज्यते । सोऽयं **त्रिपात्पुरुषः** सर्वस्मात् **ऊर्ध्व उदैत्** उदेति, "अथ तत ऊर्ध्व उदेत्य" इति श्रुतेः । **पुनः अस्य** ब्रह्मणः **इह** विद्यमानाविद्यापादं स्वास्युपायतया **अभवात्** अभवत् । स्वास्युपायत्वेन यत्पदं कल्पितं **ततः** तस्मात् **अभि** अभितः अशनेन सह प्राणान् धारयतीति **साशनं** जीवजातं च तद्विपरीतं **अनशनं** ईश्वरचैतन्यं च **साशनानशने** "तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीति" इति श्रुत्यनुरोधेन जीवेश्वरौ भूत्वा स्वाविद्यापदस्य **विष्वक्**ति-र्यक्पराक्प्रत्यग्रूपेण **व्यक्रामत्** विशेषेण आक्रान्तवत् । तत्र साशनो जीवो निरशनेश्वरप्रसादतो जीवेशादिकलनां विहाय सर्वावभासकप्रत्यगभिन्नं ब्रह्मास्मीति श्रुत्याचार्यप्रसादतो ज्ञात्वा तज्ज्ञानसमकालं पराक्सापेक्षप्रत्यक्परभेदैक्यकलना-संभवप्रबोधसिद्धं निष्प्रतियोगिकत्रैपदं ब्रह्म स्वावशेषधिया प्रतिपद्यत इत्यर्थः । यस्मादेवं तस्मात् स्वाविद्यापदकल्पना त्रैपदब्रह्मास्युपायभूतेति भावः ॥ ९ ॥ कथं पुनः स्वाविद्यापादः स्वास्युपायपदं भजतीत्याशङ्क्य स्वाविद्यापादप्रविभक्तस्वा-

विद्यापादः संसारहेतुः तत्र विरक्तस्य तत्प्रविभक्तविद्याऽऽदिपदत्रयज्ञानममृतत्वसाधनं भवतीत्याह --विद्येति ॥ १० ॥

आदिनारायणस्य कीदृशौ उन्मेषनिमेषौ

आत्मारामस्यादिनारायणस्य कीदृशावुन्मेषनिमेषौ तयोः स्वरूपं कथमिति ॥ ११ ॥

गुरुर्वदति—पराग्दृष्टिरुन्मेषः। प्रत्यग्दृष्टिर्निमेषः। प्रत्यग्दृष्ट्या स्वस्वरूपचिन्तनमेव निमेषः। पराग्दृष्ट्या स्वस्वरूपचिन्तनमेवोन्मेषः। यावदुन्मेषकालस्तावन्निमेषकालो भवति। अविद्यायाः स्थितिरुन्मेषकाले। निमेषकाले तस्याः प्रलयो भवति। यथा उन्मेषो जायते तथा चिरंतनातिसूक्ष्मवासनाबलात् पुनरविद्याया उदयो भवति। यथापूर्वमविद्याकार्याणि जायन्ते। कार्यकारणोपाधिभेदाज्जीवेश्वरभेदोऽपि दृश्यते।

कार्योपाधिरयं जीवः कारणोपाधिरीश्वरः।
ईश्वरस्य महामाया तदाज्ञावशवर्तिनी ॥ १२ ॥

यदुन्मेषनिमेषतः स्वाविद्यापदतत्कार्यजातमुत्पादप्रळयौ भजति तदुन्मेषनिमेषकलनां कलयितुं पृच्छतीत्याह—आत्मारामस्येति ॥ ११ ॥ शिष्यप्रश्नोत्तरं गुरुर्वदति। किमिति? पराग्दृष्टिरिति। तूलान्तःकरणवृत्तीनां अनन्तत्वात् मायाया विविधत्वं अनन्तत्वम् ॥ १२ ॥

महामायास्वरूपं तत्तरणोपायश्च

तत्संकल्पानुसारिणी विविधानन्तमहामाया[1]शक्तिसुसेविता अनन्तमहामायाजाल[2]जननमन्दिरा महाविष्णोः क्रीडाशरीररूपिणी

[1] शक्तिः सु—क. [2] जननवन्दिता—उ, अ १, जनमन्दिरा—अ २,

ब्रह्मादीनामगोचरा । एतां महामायां तरन्त्येव ये विष्णुमेव भजन्ति । नान्ये तरन्ति कदाचन विविधोपायैरपि ॥ १३ ॥

तत्तरणोपायवैरळ्यात् संसारोऽनन्तो भवेदित्यत्र—**एतामिति** । **ये विष्णुमेव** सोऽहमिति **भजन्ति** । तथा च स्मृतिः—

दैवी ह्येषा गुणमयी मम माया दुरत्यया ।
मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते ॥

इति ॥ १३ ॥

जीवस्य कार्योपाधित्वम्

अविद्याकार्याण्यन्तःकरणान्यतीत्य कालान्यनन्तानि जायन्ते । ब्रह्मचैतन्यं तेषु प्रतिबिम्बितं भवति । प्रतिबिम्बा एव जीवा इति कथ्यन्ते । अन्तःकरणोपाधिकाः सर्वे जीवा इत्येवं वदन्ति । महाभूतोत्थसूक्ष्माङ्गोपाधिकाः सर्वे जीवा इत्येके वदन्ति । बुद्धिप्रतिबिम्बितचैतन्यं जीवा इत्यपरे मन्यन्ते । एतेषामुपा[1]धीनामत्यन्तभेदो न विद्यते । सर्वपरिपूर्णो नारायणस्त्वनया निजया क्रीडति स्वेच्छया सदा । तद्वदविद्यमानफल्गुविषयसुखाशायाः सर्वे जीवाः प्रधावन्त्यसारसंसारचक्रे । एवमनादिपरम्परा वर्ततेऽनादिसंसारविपरीतभ्रमादित्युपनिषत् ॥ १४ ॥

जीवस्य कार्योपाधित्वं कथमित्यत्र—**अविद्येति** । **अविद्याकार्याणि** अनन्तकोटिवृत्तिविशिष्टतूलान्तःकरणानि अतीत्य अधिकृत्य स्वातिरिक्तकलनां

[1] धिनात्यन्त—क, अ २.

कलयन्तीति कलाः वासनाः ताः एव कालाः विविधवासनाः भवन्ति । काला इत्यत्र **कालानी**ति लिङ्गव्यत्ययः । **अत्यन्तभेदो न विद्यते**—कथं ? **सर्वपरिपूर्ण** इति । विविधविषयतृष्णाऽतृष्णे जीवजातबन्धमोक्षहेतू भवतः । यथा **नारायणः स्वेच्छया क्रीडति,** नारायणेच्छाया अजडात्मगोचरत्वात्, न हि सा तं पराग्भावे योजयितुं पारयति, **तद्वत्** जीवोऽपि इच्छयैव संसरति । तदिच्छाया जडविषयगोचरत्वात् तयाऽऽवृत आभूतसंप्लवं संसरतीत्यर्थः । **इति** शब्दश्चतुर्थाध्यायसमाप्त्यर्थः । **उपनिषच्छब्दः** पूर्वकाण्डसमाप्त्यर्थश्च ॥ १४ ॥

इति अथर्वणमहानारायणमहोपनिषदि महामायाऽतीताखण्डाद्वैतपरमानन्दलक्षणपरब्रह्मणः परमतत्त्वस्वरूपनिरूपणं नाम चतुर्थोऽध्यायः

पूर्वकाण्डः समाप्तः

पञ्चमोऽध्यायः

नष्टाविद्यायाः पुनरुदयः

अथ शिष्यो वदति गुरुं भगवन्तं नमस्कृत्य—भगवन् सर्वात्मना नष्टाया अविद्यायाः पुनरुदयः कथम् ॥ १ ॥

सत्यमेवेति गुरुरिति होवाच । प्रावृट्कालप्रारम्भे यथा मण्डूकादीनां प्रादुर्भावः तद्वत् सर्वात्मना नष्टाया अविद्याया उन्मेषकाले पुनरुदयो भवति ॥ २ ॥

नष्टाविद्यायाः पुनरुदयः कथमिति देशिकं शिष्यः पृच्छतीत्याह-**अथेति** ॥ १–२ ॥

संसारमोक्षोपायजिज्ञासा

भगवन् कथं जीवानामनादिसंसारभ्रमः । तन्निवृत्तिर्वा कथमिति । कथं मोक्षमार्गस्वरूपं च । मोक्षसाधनं कथमिति । को वा मोक्षोपायः । कीदृशं मोक्षस्वरूपम् । का वा सायुज्यमुक्तिः । एतत् सर्वं तत्त्वतः कथनीयमिति ॥ ३ ॥

पुनः शिष्यो गुरुं जीवानां संसारतन्मोक्षौ कथं? इत्याशङ्क्य पृच्छतीत्याह—**भगवन्निति** ॥ ३ ॥

संसारस्वरूपतत्कारणनिरूपणम्

अत्यादरपूर्वकमतिहर्षेण शिष्यं बहूकृत्य गुरुर्वदति—श्रूयतां सावधानेन । कुत्सितानन्तजन्माभ्यस्तात्यन्तोत्कृष्टविविधविचित्रानन्तदुष्कर्मवासनाजालविशेषैर्देहात्मविवेको न जायते । तस्मादेव दृढतरदेहात्मभ्रमो भवति । अहमज्ञः किंचिज्ज्ञोऽहमहं जीवोऽहमत्यन्त[1]दुःखाकरोऽहमनादिसंसारीति भ्रमवासनाबलात् संसार एव प्रवृत्तिः । तन्निवृत्त्युपायः कदाऽपि न विद्यते । मिथ्याभूतान् स्वप्नतुल्यान् विषयभोगाननुभूय विविधानसंख्यानतिदुर्लभान् मनोरथाननवरतमाशास्यमान अतृप्तः सदा परिधावति । विविधविचित्रस्थूलसूक्ष्मोत्कृष्टनिकृष्टानन्तदेहान् परिगृह्य तत्तद्देहविहितविविधविचित्रानेकशुभाशुभप्रारब्धकर्माण्यनुभूय तत्तत्कर्मफलवासनाजालवासितान्तःकरणानां पुनःपुनस्तत्तत्कर्मफलविषयप्रवृत्तिरेव जायते ।

[1] दुःखाकारो—क, मु.

संसारनिवृत्तिमार्ग[1]प्रवृत्तिरपि न जायते। तस्मादनिष्टमेवेष्टमिव भाति। इष्टमेवानिष्टमिव भात्यनादिसंसारविपरीतभ्रमात्। तस्मात् सर्वेषां जीवानामिष्टविषये बुद्धिः सुखबुद्धिर्दुःखबुद्धिर्भवति। परमार्थतस्त्वबाधितब्रह्मसुखविषये प्रवृत्तिरेव न जायते तत्स्वरूपज्ञानाभावात्। तत्किमिति न विद्यते। कथं बन्धः कथं मोक्ष इति विचाराभावाच्च। तत्कथमिति। अज्ञानप्राबल्यात्। कस्मादज्ञानप्राबल्यमिति। भक्तिज्ञानवैराग्यवासनाऽभावाच्च। तदभावः कथमिति। अत्यन्तान्तःकरण[2]मालिन्यविशेषात्॥ ४॥

शिष्यं स्वाभिमुखीकृत्य वक्तुमुपक्रमते। किं तत्? कुत्सितेति। असल्लौकिकवत् देहात्मेति। इष्टमेवानिष्टमिव भाति कुतः? अनादीतिं। ब्रह्मसुखविषये प्रवृत्तिरेव न जायते—कुतः? तत्स्वरूपेति। भगवदनन्यभक्तीति॥ ४॥

सत्सङ्गादन्तःकरणशुद्धिः

अतः संसारतरणोपायः कथमिति॥ ५॥

देशिकस्तमेव कथयति। सकलवेदशास्त्रसिद्धान्तरहस्यजन्मजन्माभ्यस्तात्यन्तोत्कृष्टसुकृतपरिपाकवशात् सद्भिः सङ्गो जायते। तस्माद्विधिनिषेधविवेको भवति। ततः सदाचारप्रवृत्तिर्जायते। सदाचारादखिलदुरितक्षयो भवति। तस्मादन्तःकरणमतिविमलं भवति॥ ६॥

यत एवं अतः॥ ५॥ देशिकस्तमेव कथयति—किं तत्? सकलेति॥ ६–११॥

[1] प्रवृत्तिः कदाऽपि—अ १, मु. [2] मलिनवि—मु, क, अ १, अ २.

सद्गुरुकटाक्षात् तत्त्वज्ञानलाभः

ततः सद्गुरुकटाक्षमन्तःकरणमाकाङ्क्षति। तस्मात् सद्गुरुकटाक्ष-लेशविशेषेण सर्वसिद्धयः सिध्यन्ति । सर्वबन्धाः प्रविनश्यन्ति । श्रेयोविघ्नाः सर्वे प्रलयं यान्ति । सर्वाणि श्रेयांसि स्वयमेवायान्ति । यथा जात्यन्धस्य रूपज्ञानं न विद्यते तथा गुरूपदेशेन विना कल्पकोटिभिस्तत्त्वज्ञानं न विद्यते । तस्मात् सद्गुरुकटाक्षलेशविशेषेणा-चिरादेव तत्त्वज्ञानं भवति ॥ ७ ॥

भगवत्कथाश्रवणध्यानादिभिः हृदये परमात्माविर्भावः

यदा सद्गुरुकटाक्षो भवति तदा भगवत्कथाश्रवणध्यानादौ श्रद्धा जायते । तस्माद्धृदयस्थितानादिदुर्वासनाग्रन्थिविनाशो भवति । ततो हृदयस्थिताः कामाः सर्वे विनश्यन्ति । तस्माद्धृदयपुण्डरीक-कर्णिकायां परमात्माविर्भावो भवति ॥ ८ ॥

भक्तिवैराग्याभ्यां ज्ञानपरिपाकः

ततो दृढतरा वैष्णवी भक्तिर्जायते । ततो वैराग्यमुदेति । वैराग्याद्बुद्धिविज्ञानाविर्भावो भवति । अभ्यासात्तज्ज्ञानं क्रमेण परिपक्वं भवति ॥ ९ ॥

जीवन्मुक्तदशा

पक्वविज्ञानाज्जीवन्मुक्तो भवति। ततः शुभाशुभकर्माणि सर्वाणि सवासनानि नश्यन्ति। ततो दृढतरशुद्धसात्त्विकवासनया भक्त्यतिशयो

भवति । भक्त्यतिशयेन नारायणः सर्वमयः सर्वावस्थासु प्रविभाति । सर्वाणि जगन्ति नारायणमयानि प्रविभान्ति । नारायणव्यतिरिक्तं न किंचिदस्ति । इत्येतद्बुद्ध्या विहरत्युपासकः सर्वत्र ॥ १० ॥

निरन्तरसमाधिपरंपराभिर्जगदीश्वराकाराः सर्वत्र सर्वावस्थासु प्रविभान्ति । अस्य महापुरुषस्य क्वचित्क्वचिदीश्वरसाक्षात्कारो भवति ॥ ११ ॥

देहत्यागानन्तरं उपर्युपरि गमनेन परमानन्दप्राप्तिः

अस्य देहत्यागेच्छा यदा भवति तदा वैकुण्ठपार्षदाः सर्वे समायान्ति । ततो भगवद्ध्यानपूर्वकं हृदयकमले व्यवस्थितमात्मानं स्वमन्तरात्मानं संचिन्त्य सम्यगुपचारैरभ्यर्च्य हंसमन्त्रमुच्चरन् सर्वाणि द्वाराणि संयम्य सम्यङ् मनो निरुध्य चोर्ध्वगेन वायुना सह प्रणवेन प्रणवानुसंधानपूर्वकं शनैः शनैराब्रह्मरन्ध्राद्विनिर्गत्य सोऽहमिति मन्त्रेण द्वादशान्तस्थितपरमात्मानमेकीकृत्य पञ्चोपचारैरभ्यर्च्य पुनः सोऽहमिति मन्त्रेण षोडशान्तस्थितज्ञानात्मानमेकीकृत्य सम्यगुपचारैरभ्यर्च्य प्राकृतपूर्वदेहं परित्यज्य [1]पुरःकल्पितमन्त्रमयशुद्धब्रह्मतेजोमयनिरतिशयानन्दमयमहाविष्णुसारूप्यविग्रहं परिगृह्य सूर्यमण्डला[2]न्तर्गतानन्तदिव्यचरणारविन्दाङ्गुष्ठनिर्गतनिरतिशयानन्दमयामरनदीप्रवाहमाकृष्य भावनयाऽत्र स्नात्वा वस्त्राभरणाद्युपचारैरात्मपूजां विधाय साक्षान्नारायणो भूत्वा ततो गुरुनमस्कारपूर्वकं प्रणवगरुडं

[1] पुनः—अ १, मु. [2] नन्तर्ग—क, अ २.

ध्यात्वा ध्यानेनाविर्भूतमहाप्रणवगरुडं पञ्चोपचारैराराध्य गुर्वनुज्ञया प्रदक्षिणनमस्कारपूर्वकं प्रणवगरुडमारुह्य महाविष्णोः समस्तासाधारण-चिह्नचिह्नितो महाविष्णोः समस्तासाधारणदिव्यभूषणैर्भूषितः सुदर्शन-पुरुषं पुरस्कृत्य विष्वक्सेनपरिपालितो वैकुण्ठपार्षदैः परिवेष्टितो नभोमार्गमाविश्य पार्श्वद्वयस्थितानेकपुण्यलोकानतिक्रम्य तत्रत्यैः पुण्यपुरुषैरभिपूजितः सत्यलोकमाविश्य ब्रह्माणमभ्यर्च्य ब्रह्मणा च सत्यलोकवासिभिः सर्वैरभिपूजितः शैवमीशानकैवल्यमासाद्य शिवं ध्यात्वा शिवमभ्यर्च्य शिवगणैः सर्वैः शिवेन चाभिपूजितो ग्रहर्षि-मण्डलानतिक्रम्य सूर्यसोममण्डले भित्त्वा कीलकनारायणं ध्यात्वा ध्रुवमण्डलस्य दर्शनं कृत्वा भगवन्तं ध्रुवमभिपूज्य ततः शिंशुमारचक्रं विभिद्य शिंशुमारप्रजापतिमभ्यर्च्य चक्रमध्यगतं सर्वाधारं सनातनं महाविष्णुमाराध्य तेन पूजितस्तत उपर्युपरि गत्वा परमानन्दं प्राप ॥ १२ ॥

ततो वैकुण्ठवासिनः सर्वे समायान्ति । तान् सर्वान् सुसंपूज्य तैः सर्वैरभिपूजितश्चोपर्युपरि गत्वा विरजानदीं प्राप्य तत्र स्नात्वा भग-वद्ध्यानपूर्वकं पुनर्निमज्ज्य तत्रापञ्चीकृतभूतोत्थसूक्ष्माङ्गं भोगसाधनं सूक्ष्मशरीरमुत्सृज्य केवलमन्त्रमयदिव्यतेजोमयनिरतिशयानन्दमय-महाविष्णुसारूप्यविग्रहं परिगृह्य तत उन्मज्ज्यात्मपूजां विधाय प्रदक्षिणनमस्कारपूर्वकं ब्रह्ममयवैकुण्ठमाविश्य तत्रत्यान् विशेषेण संपूज्य तन्मध्ये च ब्रह्मानन्दमयानन्तप्राकारप्रासादतोरणविमानोपवनाव-

लिभिर्ज्वलच्छिखरैरुपलक्षितो निरुपमनित्यनिरवद्यनिरतिशयनिरवधिक-ब्रह्मानन्दाचलो विराजते ॥ १३ ॥

तदुपरि ज्वलति निरतिशयानन्ददिव्यतेजोराशिः। तदभ्यन्तर-संस्थाने शुद्धबोधानन्दलक्षणं विभाति। तदन्तराले चिन्मयवेदिका आनन्दवेदिका आनन्दवनविभूषिता। तदभ्यन्तरे अमिततेजोराशिस्त-दुपरि ज्वलति। परममङ्गलासनं विराजते। तत्पद्मकर्णिकायां शुद्धशेषो भोगासनं विराजते। तस्योपरि समासीनमानन्दपरिपालक-मादिनारायणं ध्यात्वा तमीश्वरं विविधोपचारैराराध्य प्रदक्षिण-नमस्कारान् विधाय तदनुज्ञातश्चोपर्युपरि गत्वा पञ्चवैकुण्ठानतीत्याण्ड-विराट्कैवल्यं प्राप्य तं समाराध्योपासकः परमानन्दं प्रापेत्यु-पनिषत् ॥ १४ ॥

यदि स्वातिरिक्तकलनामुमुक्षुः तदा भगवद्भावापत्तिसाधनवेदान्तश्रवणमनन-निदिध्यासनाविर्भूतसम्यज्ज्ञानेन स्वातिरिक्ताविद्यापदतत्कार्यजातमस्ति नास्तीति विभ्रमापह्नवसिद्धं ब्रह्म निष्प्रतियोगिकस्वमात्रमिति तन्मात्रावस्थानलक्षणविकळे-बरकैवल्यरूपेण विद्वानवशिष्यते। यद्येवमधिकारी न भवति तदा स्वातिरेकेण देहादिकं परिकल्प्य तदुपाधिकजीवोऽस्मीत्यात्मानं ज्ञात्वा तदनुरोधेन अस्मात् लोकात् सर्वोर्ध्वप्रदेशे वैकुण्ठासनं ब्रह्म विजयते, स्वोपासनातारतम्येन तत्रैव गत्वा सालोक्यादिचतुर्विधमुक्तिषु स्वाभिमतमुक्तिरेव परमपुरुषार्थः इति यो मन्यते सोऽयं विद्वान् क्रमेण तत्पदमेत्य तत्रत्यवैकुण्ठासननारायणमुखतो निखिलवेदान्त-श्रवणं कृत्वा मननादिप्रादुर्भूतसम्यज्ज्ञानालङ्काराद्वैती भूत्वाऽऽचतुष्पदलय-मत्रोषित्वा अथ चतुष्पदैक्यसमयेऽस्य निर्वासनतया पुनर्भवबीजवैरळ्यात् निष्प्रति-योगिकत्रैपदब्रह्ममात्रावस्थालक्षणविकळेबरकैवल्यं विद्वान् उपैतीत्याह—अस्ये-

त्यादिना । य एवमुपासको भवति अस्येति । ईशानः केवलरूपेण यत्रास्ते तत् ईशानकैवल्यं कैलास इत्यर्थः । तत्रत्यं शिवम् ॥ १२ ॥ ब्रह्मानन्दाचलो विराजते—तत्र प्रविष्टानामचलनदीविमानादिकं सर्वं परोक्षतया निरतिशयनिरवधिकसच्चिदानन्दघनवत् भासत इति । सर्वत्र एवं वेदितव्यम् ॥ १३ ॥ यद्ब्रह्ममयवैकुण्ठं विराजत इत्युक्तं तदुपरि ज्वलति । आनन्दपरिपालकं आनन्दरूपेण सर्वपरिपालकमित्यर्थः । तत्परितोऽवस्थितान् पञ्चवैकुण्ठान् । अण्डोपाधितया विराजत इति अण्डविराट् यद्वैकुण्ठे केवलमास्ते तत् अण्डविराट्कैवल्यम् । अर्वाग्गतवैकुण्ठापेक्षया एतस्य परमानन्दत्वं, सातिशयमित्यर्थः, पुनर्गमनदर्शनात् । इत्युपनिषच्छब्दः पञ्चमाध्यायसमाप्त्यर्थः ॥ १४ ॥

इत्यथर्वणमहानारायणोपनिषदि संसारतरणोपायकथनद्वारा परममोक्षमार्गस्वरूपनिरूपणं नाम पञ्चमोऽध्यायः

षष्ठोऽध्यायः

ब्रह्माण्डस्वरूपावबोधः

तत उपासकः परमानन्दं प्राप । सावरणं ब्रह्माण्डं च भित्त्वा परितः समवलोक्य ब्रह्माण्डस्वरूपं निरीक्ष्य परमार्थतस्तत्स्वरूपं ब्रह्मज्ञानेनावबुध्य समस्तवेदशास्त्रेतिहासपुराणानि [1]समस्तविद्याजालानि ब्रह्मादयः सुराः सर्वे समस्ताः परमर्षयश्चाण्डाभ्यन्तरप्रपञ्चैकदेशमेव वर्णयन्ति । अण्डस्वरूपं न जानन्ति । ब्रह्माण्डाद्बहिः प्रपञ्चज्ञानं न

[1] समस्तावि—उ.

जानन्त्येव । कुतोऽण्डान्तरान्तर्बहिःप्रपञ्चज्ञानं दूरतो मोक्षप्रपञ्चज्ञानमविद्याप्रपञ्चज्ञानं चेति ॥ १ ॥

कथं ब्रह्माण्डस्वरूपमिति ॥ २ ॥

कुक्कुटाण्डाकारं महदादिसमष्ट्याकारमण्डं तपनीयमयं तप्तजाम्बूनदप्रभमुद्यत्कोटिदिवाकराभं चतुर्विधसृष्ट्युपलक्षितं महाभूतैः पञ्चभिरावृतं महदहंकृतितमोभिश्च मूलप्रकृत्या परिवेष्टितम् ॥ ३ ॥

अण्डभित्तिविशालं सपादकोटियोजनप्रमाणम् । एकैकावरणं तथैव ॥ ४ ॥

अण्डप्रमाणं परितोऽयुतद्वयकोटियोजनप्रमाणं महामण्डूकाद्यनन्तशक्तिभिरधिष्ठितं नारायणक्रीडाकन्तुकं परमाणुवद्विष्णुलोमसुसंलग्नमदृष्टाश्रुतविविधविचित्रानन्तविशेषैरुपलक्षितम् ॥ ९ ॥

ततः किमित्याशङ्क्य इतोऽप्यतिशयानन्दाप्तिद्वारा वक्ष्यमाणलक्षणब्रह्माण्डभेदनपूर्वकमूर्ध्वगमनं ब्रह्माण्डयाथात्म्यविवेचनं अविद्यालक्ष्मीदर्शनं विराट्पदप्राप्त्यादिकं भवेदित्याह—**तत इति । अविद्याप्रपञ्चज्ञानं चेति**—अण्डाज्ञाने अण्डबाह्यब्रह्मज्ञानं कुत इत्यर्थः ॥ १ ॥ ब्रह्माण्डेयत्तापरिज्ञानाय पृच्छति—**कथमिति** ॥ २–९ ॥

अनन्तकोटिब्रह्माण्डस्वरूपावबोधः

अस्य ब्रह्माण्डस्य समन्ततः स्थितान्येतादृशान्यनन्तकोटिब्रह्माण्डानि सावरणानि ज्वलन्ति ॥ ६ ॥

चतुर्मुखपञ्चमुखषण्मुखसप्तमुखाष्टमुखादिसंख्याक्रमेण सहस्रावधिमुखान्तैर्नारायणांशैः रजोगुणप्रधानैरेकैकसृष्टिकर्तृभिरधिष्ठितानि

विष्णुमहेश्वराख्यैर्नारायणांशैः सत्त्वतमोगुणप्रधानैरेकैकस्थितिसंहारकर्तृभिरधिष्ठितानि महाजलौघमत्स्यबुद्बुदानन्तसङ्घवद्भ्रमन्ति ॥ ७ ॥

क्रीडासक्तजालककरतलामलकबृन्दवन्महाविष्णोः करतले विलसन्त्यनन्तकोटिब्रह्माण्डानि ॥ ८ ॥

जलयन्त्रस्थघटमालिकाजालवन्महाविष्णोरेकैकरोमकूपान्तरेष्वनन्तकोटिब्रह्माण्डानि सावरणानि भ्रमन्ति ॥ ९ ॥

महाविराट्पदप्राप्तिः

समस्तब्रह्माण्डान्तर्बहिःप्रपञ्चरहस्यं ब्रह्मज्ञानेनावबुध्य विविधविचित्रानन्तपरमविभूतिसमष्टिविशेषान् समवलोक्यात्याश्चर्यामृतसागरे निमज्ज्य निरतिशयानन्दपारावारो भूत्वा समस्तब्रह्माण्डजालानि समुल्लङ्घ्यामितापरिच्छिन्नानन्ततमःसागरमुत्तीर्य मूलाविद्यापुरं दृष्ट्वा विविधविचित्रानन्तमहामायाविशेषैः परिवेष्टितां अनन्तमहामायाशक्तिसमष्ट्याकारां अनन्तदिव्यतेजोज्वालाजालैरलंकृतां अनन्तमहामायाविलासानां परमाधिष्ठानविशेषाकारां शश्वदमितानन्दाचलोपरिविहारिणीं मूलप्रकृतिजननीं अविद्यालक्ष्मीमेवं ध्यात्वा विविधोपचारैराराध्य समस्तब्रह्माण्डसमष्टिजननीं वैष्णवीं महामायां नमस्कृत्य तया चानुज्ञातश्चोपर्युपरि गत्वा महाविराट्पदं प्राप ॥ १० ॥

"ब्रह्मातिरिक्तं न किञ्चिदस्ति" इति ब्रह्मज्ञानेनावबुध्य ॥ १०–११ ॥

महाविराट्स्वरूपं तज्ज्ञानफलं च

महाविराट्स्वरूपं कथमिति ॥ ११ ॥

समस्ताविद्यापादको विराट् ॥ १२ ॥

विश्वतश्चक्षुरुत विश्वतोमुखो विश्वतोहस्त उत विश्वतस्पात् ।
सं बाहुभ्यां नमति सं पतत्रैर्द्यावापृथिवी जनयन् देव एकः ॥१३॥
न संदृशे तिष्ठति रूपमस्य न चक्षुषा पश्यति कश्चनैनम् ।
हृदा मनीषा मनसाऽभिक्लृप्तो य एनं विदुरमृतास्ते
भवन्ति ॥ १४ ॥

मनोवाचामगोचरमादिविराट्स्वरूपं ध्यात्वा विविधोपचारैराराध्य तदनुज्ञातश्चोपर्युपरि गत्वा विविधविचित्रानन्तमूलाविद्याविलासानवलोक्योपासकः परमकौतुकं प्राप ॥ १५ ॥

समस्तशब्देन अविद्यापादप्रविभक्ताविद्यापादादिचतुरंशो गृह्यते, स एवोपाधिः यस्य सोऽयं **समस्ताविद्यापादकः** तद्रूपेण विराजत इति **विराट्** ॥ १२ ॥ तत्स्वरूपं तज्ज्ञानफलं चाह—**विश्वत इति** । मन्त्रद्वयं श्वेताश्वतरोपनिषदि पदशो व्याख्यातम् ॥ १३–१४ ॥ स्वाज्ञदृष्ट्या विश्वरूपं, स्वज्ञदृष्ट्या विश्वातीतत्वेन **मनोवाचामगोचरम्** ॥ १५ ॥

महायोगमायाविलासावलोकनम्

अखण्डपरिपूर्णपरमानन्दलक्षणपरब्रह्मणः समस्तस्वरूपविरोधकारिणी अपरिच्छिन्नतिरस्करिण्याकारा वैष्णवी महायोगमाया मूर्तिमद्भिरनन्तमहामायाजालविशेषैः परिषेविता । तस्याः पुरमतिकौतुकमत्याश्चर्यसागरानन्दलक्षणममृतं भवति । अविद्यासागरप्रतिबिम्बितनित्यवैकुण्ठप्रतिवैकुण्ठमिव विभाति ॥ १६ ॥

उपासकस्तत्पुरं प्राप्य योगमायालक्ष्मीं ध्यात्वा विविधोपचारै-राराध्य तया संपूजितश्चानुज्ञातश्चोपर्युपरि गत्वा अनन्तयोगमाया-विलासानवलोक्योपासकः परमकौतुकं प्राप ॥ १७ ॥

मूलाविद्या कीदृशी ? तदावासस्थानं कीदृशं ? इत्यत आह—**अखण्डेति** । स्वाज्ञानकालस्थायित्वात् **अविद्यासागरेत्यादि** ॥ १६–२३ ॥

पादविभूतिवैकुण्ठे नारायणाराधनम्

तत उपरि पादविभूतिवैकुण्ठपुरमाभाति । अत्याश्चर्या-[1]नन्तविभूतिसमष्ट्याकारं आनन्दरसप्रवाहैरलंकृतं अमिततरङ्गिण्याः प्रावाहैरतिमङ्गलं ब्रह्मतेजोविशेषाकारैः अनन्तब्रह्मवनैः अभितस्ततं अनन्तनित्यमुक्तैः अभिव्याप्तं अनन्तचिन्मयप्रासादजालसंकुलं अनादि-पादविभूतिवैकुण्ठमेवमाभाति। तन्मध्ये च चिदानन्दाचलो विभाति ॥

तदुपरि ज्वलति निरतिशयानन्ददिव्यतेजोराशिः । तदभ्यन्तरे परमानन्दविमानं विभाति । तदभ्यन्तरसंस्थाने चिन्मयासनं विराजते । तत्पद्मकर्णिकायां निरतिशयदिव्यतेजोराश्यन्तरसमासीनं आदिनारायणं ध्यात्वा विविधोपचारैस्तं समाराध्य तेनाभिपूजितस्तदनुज्ञातश्चोपर्युपरि गत्वा सावरणमविद्याऽण्डं च भित्त्वाऽविद्यापादमुल्लङ्घ्य विद्याऽ-विद्ययोः सन्धौ विष्वक्सेनवैकुण्ठपुरमाभाति ॥ १९ ॥

विष्वक्सेनप्रसादेन विद्यामयवैकुण्ठावलोकनम्

अनन्तदिव्यतेजोज्वालाजालैरभितोऽनिशं प्रज्वलन्तं अनन्त-बोधानन्दव्यूहैरभितस्ततं शुद्धबोधविमानावलिभिर्विराजितं अनन्ता-

[1] नन्द—अ १.

नन्दपर्वतैः परमकौतुकमाभाति । तन्मध्ये च कल्याणाचलोपरि शुद्धानन्दविमानं विभाति । तदभ्यन्तरे दिव्यमङ्गलासनं विराजते । तत्पद्मकर्णिकायां ब्रह्मतेजोराश्यभ्यन्तरसमासीनं भगवदनन्तविभूति-विधिनिषेधपरिपालकं सर्वप्रवृत्तिसर्वहेतुनिमित्तकं निरतिशयानन्द-लक्षणमहाविष्णुस्वरूपं अखिलापवर्गपरिपालकं अमितविक्रमं एवंविधं विष्वक्सेनं ध्यात्वा प्रदक्षिणनमस्कारान् विधाय विविधोप-चारैराराध्य तदनुज्ञातश्चोपर्युपरि गत्वा विद्याविभूतिं प्राप्य विद्यामयान् अनन्तवैकुण्ठान् परितोऽवस्थितान् ब्रह्मतेजोमयानव-लोक्योपासकः परमानन्दं प्राप ॥ २० ॥

ब्रह्मविद्यावैकुण्ठद्वारा बोधानन्दविमानप्राप्तिः

विद्यामयान् अनन्तसमुद्रान् अतिक्रम्य ब्रह्मविद्यातरङ्गिणी-मासाद्य तत्र स्नात्वा भगवद्ध्यानपूर्वकं पुनर्निमज्ज्य मन्त्रमयशरीर-मुत्सृज्य विद्याऽऽनन्दमयामृतदिव्यशरीरं परिगृह्य नारायणसारूप्यं प्राप्य आत्मपूजां विधाय ब्रह्ममयवैकुण्ठवासिभिः सर्वैर्नित्यमुक्तैः सुपूजितस्ततो ब्रह्मविद्याप्रवाहैः आनन्दरसनिर्भरैः क्रीडानन्तपर्वतैरनन्तैः अभिव्याप्तं ब्रह्मविद्यामयैः सहस्र[1]प्राकारैः आनन्दामृतमयैः दिव्य-गन्धस्वभावैः चिन्मयैः अनन्तब्रह्मवनैः अतिशोभितमुपासकस्त्वेवंविधं ब्रह्मविद्यावैकुण्ठमाविश्य तदभ्यन्तरस्थितात्यन्तोन्नतबोधानन्दप्रासादा-ग्रस्थितप्रणवविमानोपरिस्थितां अपारब्रह्मविद्यासाम्राज्याधिदेवतां

[1] प्रका—उ.

अमोघनिजमन्दकटाक्षेण अनादिमूलाविद्याप्रलयकरीं अद्वितीयामेकां अनन्तमोक्षसाम्राज्यलक्ष्मीमेवं ध्यात्वा प्रदक्षिणनमस्कारान् विधाय विविधोपचारैराराध्य पुष्पाञ्जलिं समर्प्य स्तुत्वा स्तोत्रविशेषैः तयाऽभिपूजितः तदनुज्ञातश्चोपर्युपरि गत्वा ब्रह्मविद्यातीरे गत्वा बोधानन्दमयाननन्तवैकुण्ठानवलोक्य निरतिशयानन्दं प्राप्य बोधानन्दमयाननन्तसमुद्रानतिक्रम्य गत्वागत्वा ब्रह्मवनेषु परममङ्गलाचलश्रेणिषु ततो बोधानन्दविमानपरंपरासु उपासकः परमानन्दं प्राप ॥ २१ ॥

तुलसीवैकुण्ठप्राप्तिः

ततः श्रीतुलसीवैकुण्ठपुरमाभाति परमकल्याणं अनन्तविभवं अमिततेजोराश्याकारं अनन्तब्रह्मतेजोराशिसमष्ट्याकारं चिदानन्दमयानेकप्राकारविशेषैः परिवेष्टितं अमितबोधानन्दाचलोपरिस्थितं बोधानन्दतरङ्गिण्याः प्रवाहैरतिमङ्गलं निरतिशयानन्दैः अनन्तबृन्दावनैः अतिशोभितं अखिलपवित्राणां परमपवित्रं चिद्रूपैः अनन्तनित्यमुक्तैः अत्यभिव्याप्तं आनन्दमयानन्तविमानजालैः अलंकृतं अमिततेजोराश्यन्तर्गतदिव्यतेजोविशेषम् ॥ २२ ॥

शुद्धबोधानन्दवैकुण्ठप्राप्तिः

उपासकस्त्वेवमाकारं तुलसीवैकुण्ठं प्रविश्य तदन्तर्गतदिव्यविमानोपरिस्थितां सर्वपरिपूर्णस्य महाविष्णोः सर्वाङ्गेषु विहारिणीं निरतिशयसौन्दर्यलावण्याधिदेवतां बोधानन्दमयैरनन्तनित्यपरिजनैः परिषेवितां श्रीसखीं तुलसीमेवं लक्ष्मीं ध्यात्वा प्रदक्षिण-

नमस्कारान् विधाय विविधोपचारैराराध्य स्तुत्वा स्तोत्रविशेषैः तयाऽभिपूजितः तत्रत्यैश्चाभिपूजितः तदनुज्ञातश्चोपर्युपरि गत्वा परमानन्दतरङ्गिण्यास्तीरे गत्वा तत्र परितोऽवस्थितान् शुद्धबोधानन्दमयान् अनन्तवैकुण्ठानवलोक्य निरतिशयानन्दं प्राप्य तत्रत्यैश्चिद्रूपैः पुराणपुरुषैश्चाभिपूजितः ततो गत्वागत्वा ब्रह्मवनेषु दिव्यगन्धानन्दपुष्पवृष्टिभिः समन्वितेषु दिव्यमङ्गलालयेषु निरतिशयानन्दामृतसागरेषु अमिततेजोराश्याकारेषु कल्लोलवनसंकुलेषु ततोऽनन्तशुद्धबोधविमानजालसंकुलानन्दाचलश्रेणिषु उपासकस्तत उपर्युपरि गत्वा विमानपरम्परास्वनन्ततेजःपर्वतराजिष्वेवं क्रमेण प्राप्य विद्याऽऽनन्दमययोः सन्धि तत्र आनन्दतरङ्गिण्याः प्रवाहेषु स्नात्वा बोधानन्दवनं प्राप्य शुद्धबोधपरमानन्दाकारवनं संततामृतपुष्पवृष्टिभिः परिवेष्टितं परमानन्दप्रवाहैरभिव्याप्तं मूर्तिमद्भिः परममङ्गलैः परमकौतुकं अपरिच्छिन्नानन्दसागराकारं क्रीडाऽऽनन्दपर्वतैरभिशोभितं तन्मध्ये च शुद्धबोधानन्दवैकुण्ठं—यदेव ब्रह्मविद्यापादवैकुण्ठं सहस्रानन्दप्राकारैः समुज्ज्वलति—अनन्तानन्दविमानजालसंकुलं अनन्तबोधसौधविशेषैरभितोऽनिशं प्रज्वलन्तं क्रीडाऽनन्तमण्डपविशेषैर्विशेषितं बोधानन्दमयानन्तपरमच्छत्रध्वजचामरवितानतोरणैरलंकृतं परमानन्दव्यूहैर्नित्यमुक्तैरभितस्ततं अनन्तदिव्यतेजःपर्वतसमष्ट्याकारं अपरिच्छिन्नानन्तशुद्धबोधानन्दमण्डलं वाचामगोचरानन्दब्रह्मतेजोराशिमण्डलं अखण्डतेजोमण्डलविशेषं [1]शुद्धानन्दविशेषसमष्टिमण्डलविशेषं अखण्डचिद्घनानन्दविशेषम् ॥

[1] शुद्धविद्यान—अ पां

अखण्डबोधविमाने समस्तमोक्षसाम्राज्यपट्टाभिषेकः

एवंविधं बोधानन्दवैकुण्ठमुपासकः प्रविश्य तत्रत्यैः सर्वैरभिपूजितः । परमानन्दाचलोपर्यखण्डबोधविमानं प्रज्वलति । तदभ्यन्तरे चिन्मयासनं विराजते ॥ २४ ॥

तदुपरि विभात्यखण्डानन्दतेजोमण्डलम् । तदभ्यन्तरसमासीनं आदिनारायणं ध्यात्वा प्रदक्षिणनमस्कारान् विधाय विविधोपचारैः सुसंपूज्य पुष्पाञ्जलिं समर्प्य स्तुत्वा स्तोत्रविशेषैः स्वरूपेणावस्थितमुपासकमवलोक्य तमुपासकं आदिनारायणः स्वसिंहासने सुसंस्थाप्य तद्वैकुण्ठवासिभिः सर्वैः समन्वितः समस्तमोक्षसाम्राज्यपट्टाभिषेकमुद्दिश्य मन्त्रपूतैः उपासकं आनन्दकलशैरभिषिच्य दिव्यमङ्गलमहावाद्यपुरःसरं विविधोपचारैरभ्यर्च्य मूर्तिमद्भिः सर्वैः स्वचिह्नैरलंकृत्य प्रदक्षिणनमस्कारान् विधाय त्वं ब्रह्मासि अहं ब्रह्मास्मि आवयोरन्तरं न विद्यते त्वमेवाहम् अहमेव त्वम् इत्यभिधाय इत्युक्त्वा अदिनारायणस्तिरोदधे तदेत्युपनिषत् ॥ २५ ॥

एवंविधं आनन्दपादालङ्कारभूतं **बोधानन्दवैकुण्ठम्** ॥ २४ ॥ **प्रदक्षिणनमस्कारान् विधाय**—ततो दक्षिणकर्णे प्रत्यक्परचितोरैक्यबोधकं परमार्थतत्त्वमुपदिशति । किं तत्? **त्वं ब्रह्मासीत्यादि** । मदुपासनया यस्त्वं मत्सारूप्यं गतोऽसि स "**त्वं ब्रह्मासि**" इति भगवदुक्तिः । "**अहं ब्रह्मास्मि**" इति शिष्योक्तिः । **आवयोरित्यादि** भगवदुक्तिः । एवं शिष्यमुपदिश्य भगवान् **तिरोदधे** निर्विशेषतां गतवानित्यर्थः । **इत्युपनिषच्छब्दः** षष्ठाध्यायसमाप्त्यर्थः ॥ २५ ॥

इत्यथर्वणमहानारायणोपनिषदि परममोक्षमार्गस्वरूपनिरूपणं नाम षष्ठोऽध्यायः

सप्तमोऽध्यायः

नित्यगरुडारूढस्य ब्रह्मानन्दविभूतिप्राप्तिः

अथोपासकः तदाज्ञया नित्यगरुडमारुह्य वैकुण्ठवासिभिः सर्वैः परिवेष्टितो महासुदर्शनं पुरस्कृत्य विष्वक्सेनपरिपालितश्चोपर्युपरि गत्वा ब्रह्मानन्दविभूतिं प्राप्य सर्वत्रावस्थितान् ब्रह्मानन्दमयान् अनन्तवैकुण्ठान् अवलोक्य निरतिशयानन्दसागरो भूत्वा आत्मारामान् आनन्दविभूतिपुरुषान् अनन्तान् अवलोक्य तान् सर्वानुपचारैः समभ्यर्च्य तैः सर्वैरभिपूजितश्च उपासकस्तत उपर्युपरि गत्वा ब्रह्मानन्दविभूतिं प्राप्य अनन्तदिव्यतेजःपर्वतैरलंकृतान् परमानन्दलहरीवनशोभितान् असंख्याकान् आनन्दसमुद्रान् अतिक्रम्य विविधविचित्रानन्तपरमतत्त्वविभूतिसमष्टिविशेषान् परम[1]कौतुकान् ब्रह्मानन्दविभूतिविशेषानतिक्रम्य उपासकः परमकौतुकं प्राप ॥ १ ॥

शिष्यो भगवतः परमतत्त्वोपदेशं लब्ध्वा तद्रूपसाक्षात्करणाय तुर्यपादमारोहतीत्याह—अथेति ॥ १ ॥

सुदर्शनपुरवर्णनम्

ततः सुदर्शनवैकुण्ठपुरमाभाति नित्यमङ्गलं अनन्तविभवं सहस्रानन्दप्राकारपरिवेष्टितं अयुतकुक्ष्युपलक्षितं अनन्तोत्कटज्वलदर-

[1] कौतुकात्—अ १

मण्डलं निरतिशयदिव्यतेजोमण्डलं [1]बृन्दारकपरमानन्दं शुद्धबुद्धस्वरूपं अनन्तानन्दसौदामिनीपरमविलासं निरतिशयपरमानन्दपारावारं अनन्तैरानन्दपुरुषैश्चिद्रूपैरधिष्ठितम् ॥ २ ॥

स्वाविद्यापादप्रविभक्ताविद्याविद्याऽऽनन्दपादानभिधाय तुर्यपादस्वरूपं प्रकटयति—तत इति । ततः पादत्रयनिरूपणानन्तरं यत्र तुर्यचैतन्यं सुष्ठु दृश्यते तत् सुदर्शनं, तस्य पादत्रयवत् स्वाविद्यावृत्तिभिः कुण्ठनं न भवतीति विकुण्ठः, विकुण्ठ एव वैकुण्ठः, तस्य मुक्तप्राप्यत्वात् पुरमिति व्यपदेश इत्यर्थः । तत्स्वरूपं तु नित्यमङ्गलम् ॥ २ ॥

सुदर्शनमहाचक्रवर्णनम्

तन्मध्ये च सुदर्शनं महाचक्रम् ॥ ३ ॥

चरणं पवित्रं विततं पुराणं येन पूतस्तरति दुष्कृतानि ।
तेन पवित्रेण शुद्धेन पूता अतिपाप्मानमरातिं तरेम ॥ ४ ॥
लोकस्य द्वारमर्चिमत् पवित्रं ज्योतिष्मद्भ्राजमानं महस्वत् ।
अमृतस्य धारा बहुधा दोहमानं चरणं नो लोके
सुधितां दधातु ॥ ५ ॥

अयुतारज्वलन्तं अयुतारसमष्ट्याकारं निरतिशयविक्रमविलासं अनन्तदिव्यायुधदिव्यशक्तिसमष्टिरूपं महाविष्णोः अनर्गलप्रवाहविग्रहं अयुतायुतकोटियोजनविशालं अनन्तज्वालाजालैरलंकृतं समस्तदिव्यमङ्गलनिदानं अनन्तदिव्यतीर्थानां निजमन्दिरमेवं सुदर्शनं महाचक्रं प्रज्वलति ॥ ६ ॥

[1] ब्रह्माकार—क. बृन्दाकार—उ.

तस्य नाभिमण्डलसंस्थाने उपलक्ष्यते निरतिशयानन्ददिव्यतेजोराशिः । तन्मध्ये च सहस्रारचक्रं प्रज्वलति । तदखण्डदिव्यतेजोमण्डलाकारं परमानन्दसौदामिनीनिचयोज्ज्वलम् ॥ ७ ॥

तदभ्यन्तरसंस्थाने षट्छतारचक्रं प्रज्वलति । तच्चामितपरमतेजःपरमविहारसंस्थानविशेषं विज्ञानघनस्वरूपम् ॥ ८ ॥

तदन्तराले त्रिशतारचक्रं विभाति । तच्च परमकल्याणविलासविशेषं अनन्तचिदादित्यसमष्टयाकारम् ॥ ९ ॥

तदभ्यन्तरे शतारचक्रमाभाति । तच्च परमतेजोमण्डलविशेषम् ॥ १० ॥

तन्मध्ये [1]षष्टयरचक्रमाभाति । तच्च ब्रह्मतेजःपरमविलासविशेषम् ॥ ११ ॥

तदभ्यन्तरसंस्थाने षट्कोणचक्रं प्रज्वलति । तच्चापरिच्छिन्नानन्तदिव्यतेजोराश्याकारम् ॥ १२ ॥

"अहं ब्रह्मास्मि", "ब्रह्माहमस्मि", इति यत् स्वात्मतया दर्शनीयं तत् **सुदर्शनं**, तस्य चण्डाविद्याद्वयतत्कार्यासुरजातशिरःकृन्तनशक्तिमत्त्वात् तुरीयं ब्रह्मैव सुदर्शनं **महाचक्रमुच्यते** । यद्वा—तुरीयोपलब्धिसाधनवक्ष्यमाणसुदर्शनमहानारायणम (य?)न्त्रं सुदर्शनचक्रमुच्यते ॥ ३ ॥ सुदर्शनाख्यं तुरीयं, तदधिगमसाधनत्रिपाद्विभूतिमहानारायणसमष्टिव्यष्टिचक्रं चाह—**चरणमित्यादिना** । स्वातिरिक्तस्वाविद्यापदप्रविभक्तापवित्रपरिच्छिन्नस्वाज्ञानकालप्रभवाविद्याविद्याऽऽनन्दपादापवादाधिकरणं तुर्य**चरणं** व्यष्टिसमष्टितुर्यैकरूपं अपवित्रपरिच्छिन्नाविद्याद्वयासंसृष्टत्वात् **पवित्रं विततं**, चिरन्तनत्वात् **पुराणं**, **येन** तुरीयोऽस्मीति

[1] चतुष—उ.

ज्ञानेन स्वाज्ञानाघतः **पूतो** मुमुक्षुः **दुष्कृतानि** आगाम्यादिकर्मस्रोतांसि लीलया **तरति** तथा **तेन पवित्रेण** शुद्धेन तुरीयोऽस्मीति ज्ञानविज्ञानसम्यज्ज्ञानात्मना वयं मुनयः **पूताः** सन्तः **अतिपाप्मानं** अतिपापरूपं **अरातिं** स्वाज्ञानतत्कार्यास्तित्व-भ्रमं **तरेम** ॥ ४ ॥ तत्तुर्यज्ञानं कीदृशं ? इत्यत्र स्वात्मलोकस्य द्वारभूतं, "नान्यः पन्था अयनाय विद्यते" इति श्रुतेः । प्रत्यग्रूपेण **अर्चिमत् पवित्रं** पररूपेण **ज्योतिष्मद्भ्राजमानं** प्रत्यगभिन्नब्रह्मात्मना **महस्वत्** प्रत्यगभिन्नं ब्रह्मास्मीति निर्विकल्पावस्थायां **अमृतस्य** प्रत्यगभिन्नब्रह्मानन्दरसस्य **धारा** धारां **बहुधा दोहमानं** एवं उक्तलक्षणलक्षितं तुर्यचरणं **नो** अस्माकं अस्मिन् **लोके सुधितां** जीवन्मुक्तत्वं **दधातु** ददात्वित्यर्थः ॥ ५ ॥ तुर्यस्वरूपमुक्त्वा समष्टिव्यष्टिचक्र-स्वरूपमाह—**अयुतेति** । **अयुतारज्वलन्तं** अयुतारगर्भितं सत् ज्वलन्तं इति प्रथमार्थे द्वितीया लिङ्गव्यत्ययश्च । अपारस्वरूपानन्दा**नर्गळप्रवाहविग्रहम्** । **एवं** समष्ट्यात्मकं **सुदर्शनम्** ॥ ६–१३ ॥

चक्राभ्यन्तरस्थसुदर्शनपुरुषाराधनम्

तदभ्यन्तरे महानन्दपदं विभाति । तत्कर्णिकायां सूर्येन्दु-वह्निमण्डलानि चिन्मयानि ज्वलन्ति । तत्रोपलक्ष्यते निरतिशयदिव्य-तेजोराशिः ॥ १३ ॥

तदभ्यन्तरसंस्थाने युगपदुदितानन्तकोटिरविप्रकाशः सुदर्शन-पुरुषो विराजते । सुदर्शनपुरुषो महाविष्णुरेव ॥ १४ ॥

महाविष्णोः समस्तासाधारणचिह्नचिह्नितः एवमुपासकः सुदर्शनपुरुषं ध्यात्वा विविधोपचारैराराध्य प्रदक्षिणनमस्कारान् विधाय उपासकस्तेनाभिपूजितः तदनुज्ञातश्च उपर्युपरि गत्वा

परमानन्दमयान् अनन्तवैकुण्ठान् अवलोक्य उपासकः परमानन्दं प्राप ॥ १५ ॥

कोऽयं सुदर्शनपुरुषः इत्यत्र —**सुदर्शनपुरुषो महाविष्णुरेव** ॥ १४–१५ ॥

क्रमेणाद्वैतसंस्थानप्राप्तिः

तत उपरि विविधविचित्रानन्तचिद्विलासविभूतिविशेषानतिक्रम्य अनन्तपरमानन्दविभूतिसमष्टिविशेषान् अनन्तनिरतिशयानन्दसमुद्रानतीत्य उपासकः क्रमेणाद्वैतसंस्थानं प्राप ॥ १६ ॥

कथमद्वैतसंस्थानम् । अखण्डानन्दस्वरूपं अनिर्वाच्यं अमितबोधसागरं अमितानन्दसमुद्रं विजातीयविशेषविवर्जितं सजातीयविशेषविशेषितं निरवयवं निराधारं निर्विकारं निरञ्जनं अनन्तब्रह्मानन्दसमष्टिकन्दं परमचिद्विलाससमष्ट्याकारं निर्मलं निरवद्यं निराश्रयं अतिनिर्मलानन्तकोटिरविप्रकाशैकस्फुलिङ्गं अनन्तोपनिषदर्थस्वरूपं अखिलप्रमाणातीतं मनोवाचामगोचरं नित्यमुक्तस्वरूपं अनाधारं आदिमध्यान्तशून्यं कैवल्यं परमं शान्तं सूक्ष्मात् सूक्ष्मतरं महतो महत्तरं अमितानन्दविशेषं शुद्धबोधानन्दविभूतिविशेषं अनन्तानन्दविभूतिविशेषसमष्टिरूपं अक्षरं अनिर्देश्यं कूटस्थं अचलं ध्रुवं अदिग्देशकालं अन्तर्बहिश्च तत् सर्वं व्याप्य परिपूर्णं परमयोगिभिर्विमृग्यं देशतः कालतो वस्तुतः परिच्छेदरहितं निरन्तराभिनवं नित्यपरिपूर्णं अखण्डानन्दामृतविशेषं शाश्वतं परमं पदं निरतिशयानन्दानन्ततटित्पर्वताकारं अद्वितीयं स्वयंप्रकाशं अनिशं ज्वलति ॥ १७ ॥

परमानन्दलक्षणापरिच्छिन्नानन्तपरंज्योतिः शाश्वतं शश्वद्विभाति ॥

तदभ्यन्तरसंस्थाने अमितानन्दचिद्रूपाचलं अखण्डपरमानन्द-विशेषं बोधानन्दमहोज्ज्वलं नित्यमङ्गलमन्दिरं चिन्मथनाविर्भूत-[1]चित्सारं अनन्ताश्चर्यसागरं अमिततेजोराश्यन्तर्गततेजोविशेषं अनन्तानन्दप्रवाहैरलंकृतं निरतिशयानन्दपारावाराकारं निरुपमनित्य-निरवद्यनिरतिशयनिरवधिकतेजोराशिविशेषं निरतिशयानन्दसहस्र-प्राकारैरलंकृतं शुद्धबोधसौधावलिविशेषैरलंकृतं चिदानन्दमयानन्त-दिव्यारामैः सुशोभितं शश्वदमितपुष्पवृष्टिभिः समन्ततः संततम् ॥ १९ ॥

तदेव त्रिपाद्विभूतिवैकुण्ठस्थानम् । तदेव परमकैवल्यम् । तदेव अबाधितपरमतत्वम् । तदेव अनन्तोपनिषद्विमृग्यम् । तदेव परमयोगिभिर्मुमुक्षुभिः सर्वैराशास्यमानम् । तदेव सद्घनम् । तदेव चिद्घनम् । तदेवानन्दघनम् । तदेव शुद्धबोधघनविशेषं अखण्डानन्द-ब्रह्मचैतन्याधिदेवतास्वरूपम् । सर्वाधिष्ठानं अद्वयपरंब्रह्मविहारमण्डलं निरतिशयानन्दतेजोमण्डलं अद्वैतपरमानन्दलक्षणपरंब्रह्मणः परमा-धिष्ठानमण्डलं निरतिशयपरमानन्दपरममूर्तिविशेषमण्डलं अनन्त-परममूर्तिसमष्टिमण्डलं निरतिशयपरमानन्दलक्षणपरंब्रह्मणः परममूर्ति-परमतत्त्वविलासविशेषमण्डलं बोधानन्दमयानन्तपरमविलासविभूति-विशेषसमष्टिमण्डलं अनन्तचिद्विलासविभूतिविशेषसमष्टिमण्डलं अखण्ड-शुद्धचैतन्यनिजमूर्तिविशेषविग्रहं वाचामगोचरानन्तशुद्धबोधविशेषविग्रहं

[1] सत्सागरं—उ.

अनन्तानन्दसमुद्रसमष्ट्याकारं अनन्तबोधाचलैरनन्तबोधानन्दाचलैरधिष्ठितं निरतिशयानन्दपरममङ्गलविशेषसमष्ट्याकारं अखण्डाद्वैतपरमानन्दलक्षणपरंब्रह्मणः परममूर्तिपरमतेजःपुञ्जपिण्डविशेषं चिद्रूपादित्यमण्डलं द्वात्रिंशद्व्यूहभेदैरधिष्ठितम् । व्यूहभेदाश्च केशवादिचतुर्विंशतिः सुदर्शनादिन्यासमन्त्राः सुदर्शनादियन्त्रोद्धारः अनन्तगरुडविष्वक्सेनाश्च निरतिशयानन्दश्च ॥ २० ॥

गमनागमनादिहेतुस्वातिरिक्तास्तित्वभ्रमो यत्र न विद्यते तदेव **अद्वैतसंस्थानम्** ॥ १६ ॥ **कथं अद्वैतसंस्थानं** स्वरूपमित्यर्थः । निष्प्रतियोगिकाखण्डानन्दस्वरूपम् । अखिलप्रमाणातीतं वेदान्तेतरप्रमाणागम्यत्वात् । **मनोवाचामगोचरं** अमनस्कतया अशब्दत्वात् । **नित्यमुक्तस्वरूपं** मुक्तात्मतया अवशिष्टत्वात् । **अनाधारं** आधेयाभावात् । **आदिमध्यान्तशून्यं** जन्मस्थितिभङ्गवैरळ्यात् । **कैवल्यं** निष्प्रतियोगिकब्रह्ममात्रतया अवस्थितत्वात् ॥ १७–१८ ॥

चिन्मथनाविर्भूतचित्सारं—विश्वविराडोत्रादिचिद्विकल्पितविशेषजातमथनात् विशेषभावविलापनात् तदधिकरणतया यदाविर्भूतं तत् चित्सारं स्वाधेयसापेक्षाधारताऽपह्नवसिद्धं निष्प्रतियोगिकचिन्मात्रमित्यर्थः । निष्प्रतियोगिक**निरुपमेत्यादि** । प्राकारसौधारामपुष्पवृष्ट्यादिविशेषणं सुखप्रतिपत्त्यर्थं, अन्यथा निष्प्रतियोगिकब्रह्ममात्रे प्राकारादिकल्पना अस्ति नास्तीति विभ्रमो वा कथं सेद्धुं पारयति ॥ १९ ॥ यत् स्वाज्ञादिदृष्टिमोहे सत्यसति स्वयं निष्प्रतियोगिकमवशिष्यते **तदेव त्रिपाद्विभूतिवैकुण्ठस्थानम्** । त्रय्यन्तैः निष्प्रतियोगिकब्रह्ममात्रावशेषतया यत् पद्यते ज्ञायते तद्वस्तु त्रिपात् तद्भावापत्तिः विभूतिः त्रिपाद्विभूतिः तस्याः कालत्रयेऽपि अकुण्ठितस्वरूपत्वात् **त्रिपाद्विभूतिवैकुण्ठस्थानं**, यज्जाग्रज्जाग्रदादिचतुष्पञ्चदशकलनाऽपह्नवसिद्धतुर्यतुर्यमिति विख्यातं यदसल्लौकिकाद्यष्टदृष्टिकलनाऽस्पृष्टसत्तासामान्यं यज्जडभूत्यादिभूतिचतुष्टयहेयांशापह्नवसिद्धतुर्यातीतत्रैपदमिति श्रुतं यत् क्षराक्षरकलनाविरळं परमाक्षरमिति ख्यातं यत् सापेक्षद्वैताद्वैतकलना-

विरळं परमाद्वैतविभवं तदेव त्रिपाद्विभूतिवैकुण्ठस्थानम्। स्वाज्ञविकल्पितद्वात्रिंशद्व्यूहभेदा वक्ष्यमाणसुदर्शनं महानारायणयन्त्रं स्वाविद्यापदप्रविभक्ताविद्याऽऽदिपादचतुष्टयं तद्विभातकलनासर्वस्वं च किमाश्रित्य वर्तते इत्यत्र परमार्थदृष्ट्या तन्निष्प्रतियोगिकमपि स्वज्ञदृष्ट्या सर्वं तदाश्रित्य वर्तत इत्याह—**द्वात्रिंशद्व्यूहभेदैरधिष्ठितम्** ॥ २०–२८ ॥

आनन्दव्यूहमध्यस्थं प्रणवविमानम्

आनन्दव्यूहमध्ये सहस्रकोटियोजनायतोन्नतचिन्मयप्रासादं ब्रह्मानन्दमयविमानकोटिभिरतिमङ्गलं अनन्तोपनिषदर्थारामजालसंकुलं सामहंसकूजितैरतिशोभितं आनन्दमयानन्तशिखरैरलंकृतं चिदानन्दरस[1]निर्झरैरभिप्याप्तं अखण्डानन्दतेजोराश्यन्तरस्थितं अनन्तानन्दाश्चर्यसागरम् ॥ २१ ॥

तदभ्यन्तरसंस्थाने अनन्तकोटिरविप्रकाशातिशयप्रकाशं निरतिशयानन्दलक्षणं प्रणवाख्यं विमानं विराजते। शतकोटिशिखरैरानन्दमयैः समुज्ज्वलति ॥ २२ ॥

तदन्तराले बोधानन्दाचलोपर्यष्टाक्षरीमण्टपो विभाति ॥ २३ ॥

तन्मध्ये च चिदानन्दमयवेदिका आनन्दवनविभूषिता ॥ २४ ॥

तदुपरि ज्वलति निरतिशयानन्दतेजोराशिः ॥ २५ ॥

तदभ्यन्तरसंस्थाने अष्टाक्षरीपद्मविभूषितं चिन्मयासनं विराजते ॥ २६ ॥

प्रणवकर्णिकायां सूर्येन्दुवह्निमण्डलानि चिन्मयानि ज्वलन्ति ॥

[1] निर्भरै—क, उ.

अनन्तासनोपरिस्थं समष्टिमहायन्त्रम्

तत्राखण्डानन्दतेजोराश्यन्तर्गतं परममङ्गलाकारमनन्तासनं विराजते ॥ २८ ॥

तस्योपरि च महायन्त्रं प्रज्वलति । निरतिशयब्रह्मानन्दपरममूर्तिमहायन्त्रं समस्तब्रह्मतेजोराशिसमष्टिरूपं चित्स्वरूपं निरञ्जनं परंब्रह्मस्वरूपं परंब्रह्मणः परमरहस्यकैवल्यं महायन्त्रमयपरमवैकुण्ठनारायणयन्त्रं विजयति ॥ २९ ॥

समस्तब्रह्मतेजोराशिसमष्टिरूपं सप्तकोटिमहामन्त्रतदभिमानिदेवतासमष्टिरूपमित्यर्थः । सर्वमन्त्रप्रतिपाद्यदेवतागतनानात्वापाये तद्यन्त्रमेव **चित्स्वरूपम्** । **विजयति** विजयते उपग्रहव्यत्ययः ॥ २९ ॥

व्यष्टियन्त्रस्वरूपम्

तत्स्वरूपं कथमिति । देशिकस्तथेति होवाच—

आदौ षट्कोणचक्रम् । तन्मध्ये षड्दलपद्मम् । तत्कर्णिकायां प्रणव ॐ इति । प्रणवमध्ये नारायणबीजममिति । तत्साध्यगर्भितं —मम सर्वाभीष्टसिद्धिं कुरुकुरु स्वाहेति । तत्पद्मदलेषु विष्णुनृसिंहषडक्षरमन्त्रौ—ॐ नमो विष्णवे, ऐं क्लीं श्रीं ह्रीं [1]क्ष्म्र्यौं फट् । तद्दलकपोलेषु रामकृष्णषडक्षरमन्त्रौ—रां रामाय नमः, क्लीं कृष्णाय नमः । षट्कोणेषु सुदर्शनषडक्षरमन्त्रः—सह[2]स्रार हुं फडिति । षट्कोणकपोलेषु प्रणवयुक्तशिवपञ्चाक्षरमन्त्रः—ॐ नमः शिवायेति ॥३०॥

[1] क्ष्रौं—क, अ १. क्ष्म्रौं—अ २, उ १. क्ष्म्र्यौं—उ. [2] स्रारे—क.

तद्बहिः प्रणवमालायुक्तं वृत्तम् । वृत्ताद्बहिरष्टदलपद्मम् । तेषु दलेषु नारायणनृसिंहाष्टाक्षरमन्त्रौ—ॐ नमो नारायणाय, जयजय नरसिंह । तद्दलसन्धिषु रामकृष्णश्रीकराष्टाक्षरमन्त्राः—ॐ रामाय हुं फट् स्वाहा, क्लीं दामोदराय नमः, उत्तिष्ठ श्रीकर स्वाहा ॥ ३१ ॥

तद्बहिः प्रणवमालायुक्तं वृत्तम् । वृत्ताद्बहिर्नवदलपद्मम् । तेषु दलेषु रामकृष्णहयग्रीवनवाक्षरमन्त्राः—ॐ रामचन्द्राय नम ॐम्, क्लीं कृष्णाय गोविन्दाय क्लीम्, [1]ह्सौं हयग्रीवाय नमो [1]ह्सौम् । तद्दलकपोलेषु दक्षिणामूर्तिनवाक्षरमन्त्रः—ॐ दक्षिणामूर्ति-[2]रतरोम् ॥ ३२ ॥

तद्बहिर्नारायणबीजयुक्तं वृत्तम् । वृत्ताद्बहिर्दशदलपद्मम् । तेषु दलेषु रामकृष्णदशाक्षरमन्त्रौ—हुं जानकीवल्लभाय स्वाहा, गोपीजन-वल्लभाय स्वाहा । तद्दलसन्धिषु नृसिंहमालामन्त्रः—ॐ नमो भगवते श्रीमहानृसिंहाय करालदंष्ट्रवदनाय मम विघ्नान् पचपच स्वाहा ॥ ३३ ॥

तद्बहिर्नृसिंहैकाक्षरयुक्तं वृत्तम्—[3]क्ष्म्र्यौं इत्येकाक्षरम् । वृत्ताद्बहिर्द्वादशदलपद्मम् । तेषु दलेषु नारायणवासुदेवद्वादशाक्षरमन्त्रौ —ॐ नमो भगवते नारायणाय, ॐ नमो भगवते वासुदेवाय ।

१. ह्सौं—अ १, अ २. ल्हौं—मु.
रीश्वरोम्—मु. [3] क्ष्म्र्यौं—अ १.

तद्दलकपोलेषु महाविष्णुरामकृष्णद्वादशाक्षरमन्त्राश्च—ॐ नमो भगवते महाविष्णवे, ॐ ह्रीं भरताग्रज राम क्लीं स्वाहा, श्रीं ह्रीं क्लीं कृष्णाय गोविन्दाय नमः ॥ ३४ ॥

तद्बहिर्जगन्मोहनबीजयुक्तं वृत्तं—क्लीमिति। वृत्ताद्बहिश्चतुर्दशदलपद्मम्। तेषु दलेषु लक्ष्मीनारायणहयग्रीवगोपालदधिवामनमन्त्राश्च—ॐ ह्रीं ह्रीं श्रीं श्रीं लक्ष्मीवासुदेवाय नमः, ॐ नमः सर्वकोटिसर्वविद्याराजाय, क्लीं कृष्णाय गोपालचूडामणये स्वाहा, ॐ नमो भगवते दधिवामनाय। तद्दलसंधिष्वन्नपूर्णेश्वरीमन्त्रः—ह्रीं पद्मावत्यन्नपूर्णे [1]माहेश्वरि स्वाहा ॥ ३५ ॥

तद्बहिः प्रणवमालायुक्तं वृत्तम्। वृत्ताद्बहिः षोडशदलपद्मम्। तेषु दलेषु श्रीकृष्णसुदर्शनषोडशाक्षरमन्त्रौ च—ॐ नमो भगवते रुक्मिणीवल्लभाय स्वाहा, ॐ नमो भगवते महासुदर्शनाय हुं फट्। तद्दलसंधिषु स्वराः सुदर्शनमालामन्त्रश्च—[2]अंआंइंईंउंऊंऋंॠंऌंॡंएंऐंओंऔंअंअः, सुदर्शनमहाचक्राय दीप्तरूपाय सर्वतो मां रक्षरक्ष सहस्रार हुं फट् स्वाहा ॥ ३६ ॥

तद्बहिर्वराहबीजयुक्तं वृत्तं—तद्बुमिति। वृत्ताद्बहिरष्टादशदलपद्मम्। तेषु दलेषु श्रीकृष्णवामनाष्टादशाक्षरमन्त्रौ—क्लीं कृष्णाय गोविन्दाय गोपीजनवल्लभाय स्वाहा, ॐ नमो विष्णवे सुरपतये महाबलाय स्वाहा। तद्दलकपोलेषु गरुडपञ्चाक्षरमन्त्रो गरुडमालामन्त्रश्च

[1] माहेश्वरी—अ १, उ १, क. [2] बिन्दुरहिताः (अ १, अ २, क) कोशेषु.

—क्षिप ॐ स्वाहा, ॐ नमः पक्षिराजाय सर्वविषभूतरक्षःकृत्याऽऽदि-भेदनाय सर्वेष्टसाधकाय स्वाहा ॥ ३७ ॥

तद्बहिर्मायाबीजयुक्तं वृत्तं—ह्रीमिति । वृत्ताद्बहिः पुनरष्टदलपद्मम् । तेषु दलेषु श्रीकृष्णवामनाष्टाक्षरमन्त्रौ—ॐ नमो दामोदराय, ॐ [1]वामनाय नमः ॐम् । तद्दलकपोलेषु नीलकण्ठत्र्यक्षरीगरुडपञ्चाक्षरीमन्त्रौ च—[2]प्रें रीं ठः, नमोऽण्डजाय ॥३८॥

तद्बहिर्मन्मथबीजयुक्तं वृत्तम् । वृत्ताद्बहिश्चतुर्विंशतिदलपद्मम् । तेषु दलेषु शरणागतनारायणमन्त्रौ नारायणहयग्रीवगायत्रीमन्त्रौ च —श्रीमन्नारायणचरणौ शरणं प्रपद्ये, श्रीमते नारायणाय नमः, नारायणाय. विद्महे वासुदेवाय धीमहि तन्नो विष्णुः प्रचोदयात्, वागीश्वराय विद्महे हयग्रीवाय धीमहि तन्नो हंसः प्रचोदयात् । तद्दलकपोलेषु नृसिंहसुदर्शनब्रह्मगायत्रीमन्त्राश्च—वज्रनखाय विद्महे तीक्ष्णदंष्ट्राय धीमहि [3]तन्नः सिंहः प्रचोदयात्, सुदर्शनाय विद्महे हेतिराजाय धीमहि तन्नश्चक्रः प्रचोदयात्, तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि धियो यो नः प्रचोदयात् ॥ ३९ ॥

तद्बहिर्हयग्रीवैकाक्षरयुक्तं वृत्तं—ह्सौमिति । वृत्ताद्बहिर्द्वात्रिंशद्दलपद्मम् । तेषु दलेषु नृसिंहहयग्रीवानुष्टुभमन्त्रौ—

उग्रं वीरं महाविष्णुं ज्वलन्तं सर्वतोमुखम् ।
नृसिंहं भीषणं भद्रं मृत्युमृत्युं नमाम्यहम् ॥

[1] वां वा—अ १, उ. [2] प्रं—अ २, उ. [3] तन्नो नारसिं—अ २. तन्नो नृसिं—मु.

ऋग्यजुःसामरूपाय वेदाहरणकर्मणे ।
प्रणवोद्गीथवपुषे महाश्वशिरसे नमः ॥

तद्दलकपोलेषु रामकृष्णानुष्टुभमन्त्रौ—

रामभद्र महेष्वास रघुवीर नृपोत्तम ।
भो दशास्यान्तकास्माकं रक्षां देहि श्रियं च [1]ते ॥
देवकीसुत गोविन्द वासुदेव जगत्पते ।
देहि मे तनयं कृष्ण त्वामहं शरणं गतः ॥ ४० ॥

तद्बहिः प्रणवसंपुटिताग्निबीजयुक्तं वृत्तम्—ॐ रं ॐ इति । वृत्ताद्बहिः षट्त्रिंशद्दलपद्मम् । तेषु दलेषु हयग्रीवषट्त्रिंशदक्षरमन्त्रः पुनरष्टत्रिंशदक्षरमन्त्रश्च—

हंसः—विश्वोत्तीर्णस्वरूपाय चिन्मयानन्दरूपिणे ।
तुभ्यं नमो हयग्रीव विद्याराजाय विष्णवे—सोहम् ॥

ह्सौं ॐ नमो भगवते हयग्रीवाय सर्ववागीश्वरेश्वराय सर्ववेदमयाय सर्वविद्यां मे देहि स्वाहा । तद्दलकपोलेषु प्रणवादिनमोऽन्ताश्चतुर्थ्यन्ताः केशवादिचतुर्विंशतिमन्त्राश्च । अवशिष्टद्वादशस्थानेषु रामकृष्णगायत्रीद्वयवर्णचतुष्टयमेकैकस्थले—ॐ केशवाय नमः ॐ नारायणाय नमः ॐ माधवाय नमः ॐ गोविन्दाय नमः ॐ विष्णवे नमः ॐ मधुसूदनाय नमः ॐ त्रिविक्रमाय नमः

[1] मे—अ २, मु.

ॐ वामनाय नमः ॐ श्रीधराय नमः ॐ हृषीकेशाय नमः ॐ पद्मनाभाय नमः ॐ दामोदराय नमः ॐ संकर्षणाय नमः ॐ वासुदेवाय नमः ॐ प्रद्युम्नाय नमः ॐ अनिरुद्धाय नमः ॐ पुरुषोत्तमाय नमः ॐ अधोक्षजाय नमः ॐ नरसिंहाय नमः ॐ अच्युताय नमः ॐ जनार्दनाय नमः ॐ उपेन्द्राय नमः ॐ हरये नमः ॐ श्रीकृष्णाय नमः, दाशरथाय विद्महे सीतावल्लभाय धीमहि तन्नो रामः प्रचोदयात्, दामोदराय विद्महे वासुदेवाय धीमहि तन्नः कृष्णः प्रचोदयात् ॥ ४१ ॥

तद्बहिः प्रणवसंपुटिताङ्कुशबीजयुक्तं वृत्तम्—ॐ क्रों ॐ इति। तद्बहिः पुनर्वृत्तम्। तन्मध्ये द्वादशकुक्षिस्थानानि सान्तरालानि। तेषु कौस्तुभवनमालाश्रीवत्ससुदर्शनगरुडपद्मध्वजानन्तशार्ङ्गगदाशङ्ख-नन्दकमन्त्राः प्रणवादिनमोऽन्ताश्चतुर्थ्यन्ताः क्रमेण—ॐ कौस्तुभाय नमः ॐ वनमालायै नमः ॐ श्रीवत्साय नमः ॐ सुदर्शनाय नमः ॐ गरुडाय नमः ॐ पद्माय नमः ॐ ध्वजाय नमः ॐ अनन्ताय नमः ॐ शार्ङ्गाय नमः ॐ गदायै नमः ॐ शङ्खाय नमः ॐ नन्दकाय नमः। तदन्तरालेषु—ॐ विष्वक्सेनाय नमः ॐ आचक्राय स्वाहा ॐ विचक्राय स्वाहा ॐ सुचक्राय स्वाहा ॐ धीचक्राय स्वाहा ॐ [1]संचक्राय स्वाहा ॐ ज्वालाचक्राय स्वाहा ॐ क्रुद्धोल्काय स्वाहा ॐ महोल्काय स्वाहा ॐ वीर्योल्काय स्वाहा

[1] सच्च—क.

ॐ [1]विद्योल्काय स्वाहा ॐ सहस्रोल्काय स्वाहा इति प्रणवादिमन्त्राः ॥ ४२ ॥

तद्बहिः प्रणवसंपुटितगरुडपञ्चाक्षरयुक्तं वृत्तम्—ॐ क्षिप ॐ स्वाहा ॐम् । तच्च द्वादशवज्रैः सान्तरालैरलंकृतम् । तेषु वज्रेषु —ॐ पद्मनिधये नमः ॐ महापद्मनिधये नमः ॐ गरुडनिधये नमः ॐ शङ्खनिधये नमः ॐ मकरनिधये नमः ॐ कच्छपनिधये नमः ॐ विद्यानिधये नमः ॐ परमानन्दनिधये नमः ॐ मोक्षनिधये नमः ॐ लक्ष्मीनिधये नमः ॐ ब्रह्मनिधये नमः ॐ श्रीमुकुन्दनिधये नमः । तत्संधिस्थानेषु—ॐ विद्याकल्पकतरवे नमः ॐ आनन्द-कल्पकतरवे नमः ॐ ब्रह्मकल्पकतरवे नमः ॐ मुक्तिकल्पकतरवे नमः ॐममृतकल्पकतरवे नमः ॐ बोधकल्पकतरवे नमः ॐ विभूतिकल्पकतरवे नमः ॐ वैकुण्ठकल्पकतरवे नमः ॐ वेदकल्प-कतरवे नमः ॐ योगकल्पकतरवे नमः ॐ यज्ञकल्पकतरवे नमः ॐ पद्मकल्पकतरवे नमः । तच्च शिवगायत्रीपरब्रह्ममन्त्राणां वर्णैर्वृत्ताकारेण संवेष्टच—तत्पुरुषाय विद्महे महादेवाय धीमहि तन्नो रुद्रः प्रचोदयात्,

श्रीमन्नारायणो ज्योतिरात्मा नारायणः परः ।
नारायणपरं ब्रह्म नारायण नमोऽस्तु ते ॥ ४३ ॥

तद्बहिः प्रणवसंपुटितश्रीबीजयुक्तं वृत्तम्—ॐ श्रीमोमिति । वृत्ताद्बहिश्चत्वारिंशद्दलपद्मम् । तेषु दलेषु व्याहृतिशिरस्संपुटितवेद-

[1] विद्युल्का—अ १, अ २, द्युल्का—मु.

गायत्रीपादचतुष्टयसूर्याष्टाक्षरीमन्त्रौ—ॐ भूः ॐ भुवः ॐ सुवः ॐ महः ॐ जनः ॐ तपः ॐ सत्यम् ॐ तत्सवितुर्वरेण्यम् ॐ भर्गो देवस्य धीमहि ॐ धियो यो नः प्रचोदयात् ॐ परोरजसे सावदोम् ॐमापो ज्योती रसोऽमृतं ब्रह्म भूर्भुवः सुवरोम्, ॐ घृणिः सूर्य आदित्यः। तद्दलसंधिषु प्रणवश्रीबीजसंपुटितनारायणबीजं सर्वत्र—ॐ श्रीमं श्रीमोम् ॥ ४४ ॥

तद्बहिरष्टशूलाङ्कितभूचक्रम्। चक्रान्तश्चतुर्दिक्षु हंसःसोहंमन्त्रौ प्रणवसंपुटितौ नारायणास्त्रमन्त्रश्च—ॐ हंसः सोहम्, ॐ [1]नमो नारायणाय हुं फट् ॥ ४५ ॥

तद्बहिः प्रणवमालासंयुक्तं वृत्तम्। वृत्ताद्बहिः पञ्चाशद्दल-पद्मम्। तेषु दलेषु मातृकापञ्चाशदक्षरमाला ळकारवर्जा। तद्दलसंधिषु प्रणवश्रीबीजसंपुटितरामकृष्णमालामन्त्रौ—ॐ श्रीमों नमो भगवते रघुनन्दनाय रक्षोघ्नविशदाय मधुरप्रसन्नवदनायामिततेजसे बलाय रामाय विष्णवे नमः श्रीमों, ॐ श्रीं ॐ नमः कृष्णाय देवकीपुत्राय वासुदेवाय निगलच्छेदनाय सर्वलोकाधिपतये सर्वजगन्मोहनाय विष्णवे कामितार्थदाय स्वाहा श्रीमोम् ॥ ४६ ॥

तद्बहिरष्टशूलाङ्कितभूचक्रम्। तेषु प्रणवसंपुटितमहानीलकण्ठ-मन्त्रवर्णानि—ॐमों नमो नीलकण्ठाय ॐ। शूलाग्रेषु लोकपालमन्त्राः प्रणवादिनमोऽन्ताश्चतुर्थ्यन्ताः क्रमेण—ॐमिन्द्राय नमः ॐमग्नये

[1] नं नमो—क, अ २.

नमः ॐ यमाय नमः ॐ निर्ऋतये नमः ॐ वरुणाय नमः ॐ वायवे नमः ॐ सोमाय नमः ॐमीशानाय नमः ॥ ४७ ॥

तद्बहिः प्रणवमालायुक्तं वृत्तत्रयम् । तद्बहिर्भूपुरचतुष्टयं चतुर्द्वारयुतं चक्रकोणच[1]तुष्टयमहावज्रविभूषितम् । तेषु वज्रेषु प्रणवश्रीबीजसंपुटितामृतबीजद्वयम्—ॐ श्रीं [2]ठं वं श्रीमोमिति । बहिर्भूपुरवीथ्याम्—ॐमाधारशक्त्यै नमः ॐ मूलप्रकृत्यै नमः ॐमादिकूर्माय नमः ॐमनन्ताय नमः ॐ पृथिव्यै नमः । मध्यभूपुरवीथ्याम्—ॐ क्षीरसमुद्राय नमः ॐ रत्नद्वीपाय नमः ॐ रत्नमण्डपाय नमः ॐ श्वेतच्छत्राय नमः ॐ कल्पकवृक्षाय नमः ॐ [3]रत्नसिंहासनाय नमः । प्रथमभूपुरवीथ्यां धर्मज्ञानवैराग्यैश्वर्याधर्माज्ञानावैराग्यानैश्वर्यसत्त्वरजस्तमोमायाविद्याऽनन्तपद्माः प्रणवादिनमोन्ताश्चतुर्थ्यन्ताः क्रमेण । बाह्यवृत्तवीथ्यां विमलोत्कर्षिणी[4]ज्ञानाक्रिया-[5]योगाप्रह्वीसत्येशानाः प्रणवादिनमोऽन्ताश्चतुर्थ्यन्ताः क्रमेण । अन्तर्वृत्तवीथ्यां—ओमनुग्रहायै नमः, ॐ नमो भगवते विष्णवे सर्वभूतात्मने वासुदेवाय सर्वात्मसंयोगयोगपीठात्मने नमः । वृत्तावकाशेषु—

बीजं प्राणं च शक्तिं च दृष्टिं वश्यादिकं तथा ।
मन्त्रयन्त्राख्यगायत्रीप्राणस्थापनमेव च ।
भूतदिक्पालबीजानि यन्त्रस्याङ्गानि वै दश ॥

मूलमन्त्रमालामन्त्रकवचदिग्बन्धनमन्त्राश्च ॥ ४८ ॥

[1] तुष्टयं म—उ. तुष्टयमष्टवज्र—अ १. [2] वं वं—क. [3] रक्त—अ १, अ २.
[4] ज्ञान—अ २, उ १. [5] योग—अ २. योगाबह्वी—अ १.

भावनामयसमष्टियन्त्रेयत्तां बुद्ध्वा व्यष्टियन्त्रेयत्तां पृच्छति—तत्स्वरूपमिति । मम . . . कुरु स्वाहेति साध्यनामानि ॥ ३०–४८ ॥

महायन्त्रमहिमा

एवंविधमेतद्यन्त्रं महामन्त्रमयं योगधीरान्तैः परममन्त्रैरलंकृतं षोडशोपचारैरभ्यर्चितं जपहोमादिना साधितमेतद्यन्त्रं शुद्धब्रह्मतेजोमयं सर्वाभयंकरं समस्तदुरितक्षयकरं सर्वाभीष्टसंपादकं सायुज्यमुक्तिप्रदं एतत् परमवैकुण्ठमहानारायणयन्त्रं प्रज्वलति ॥ ४९ ॥

एतद्यन्त्रं तद्गतनानात्वकलनापाये शुद्धब्रह्मतेजोमयं सर्वाभयंकरं सर्वात्मरूपत्वात् स्वभक्तपटलस्य समस्तदुरितक्षयकरम् ॥ ४९ ॥

महायन्त्रोपरिस्थस्य आदिनारायणस्य स्वरूपम्

तस्योपरि च निरतिशयानन्दतेजोराश्यभ्यन्तरसमासीनं वाचामगोचरानन्दतेजोराश्याकारं चित्सारविर्भूतानन्दविग्रहं बोधानन्दस्वरूपं निरतिशयसौन्दर्यपारावारं तुरीयस्वरूपं तुरीयातीतं चाद्वैतपरमानन्दं निरन्तरातितुरीयनिरतिशयसौन्दर्यानन्दपारावारं लावण्यवाहिनीकल्लोलतटिद्भासुरं दिव्यमङ्गलविग्रहं मूर्तिमद्भिः परममङ्गलैरुपसेव्यमानं चिदानन्दमयैरनन्तकोटिरविप्रकाशैरनन्तभूषणैरलंकृतं सुदर्शनपाञ्चजन्यपद्मगदाऽसिशार्ङ्गमुसलपरिघाद्यैश्चिन्मयैरनेकायुधगणैर्मूर्तिमद्भिः सुसेवितं श्रीवत्सकौस्तुभवनमालाऽङ्कितवक्षसं ब्रह्मकल्पवनामृतपुष्पवृष्टिभिः सन्ततमानन्दं ब्रह्मानन्दरसनिर्भरैरसंख्यैरतिमङ्गलं शेषायुतफणाजालविपुलच्छत्रशोभितं तत्फणामण्डलोदर्चिर्मणिद्योति-

तविग्रहं तदङ्गकान्तिनिर्झरैस्ततं निरतिशयब्रह्मगन्धस्वरूपं निरतिशयानन्दब्रह्मगन्धविशेषाकारं अनन्तब्रह्मगन्धाकारसमष्टिविशेषं अनन्तानन्दतुलसीमाल्यैरभिनवं चिदानन्दमयानन्तपुष्पमाल्यैर्विराजमानं तेजःप्रवाहतरङ्गतत्परम्पराभिर्ज्वलन्तं निरतिशयानन्तकान्तिविशेषावर्तैरभितोऽनिशं प्रज्वलन्तं बोधानन्दमयानन्तधूपदीपावलिभिरतिशोभितं निरतिशयानन्दचामरविशेषैः परिसेवितं निरन्तरनिरुपमनिरतिशयोत्कटज्ञानानन्दानन्तगुच्छफलैरलंकृतं चिन्मयानन्ददिव्यविमानच्छत्रध्वजराजिभिर्विराजमानं परममङ्गलानन्तदिव्यतेजोभिर्ज्वलन्तं अनिशं वाचामगोचरानन्ततेजोराश्यन्तर्गतं अर्धमात्रात्मकं तुर्यं ध्वन्यात्मकं तुरीयातीतं अवाच्यं नादबिन्दुकलाऽध्यात्मस्वरूपं चैत्याद्यनन्ताकारेणावस्थितं निर्गुणं निष्क्रियं निर्मलं निरवद्यं निरञ्जनं निराकारं निराश्रयं निरतिशयाद्वैतपरमानन्दलक्षणं आदिनारायणं ध्यायेदित्युपनिषत् ॥ ९० ॥

एवंविधयन्त्राधिकरणचैतन्यस्वरूपमाह—**तस्येति। चित्सारविभूतानन्दविग्रहं**—चिच्छब्देन चेतनप्रपञ्च उच्यते। तत्सारस्तु तद्गतहेयांशापायसिद्धप्रत्यगभिन्नपरमात्मोच्यते। तन्मात्रतया आविर्भूतानन्द एव विग्रहो यस्य तत् तथोक्तम्। **निरतिशयसौन्दर्यपारावारं** विष्ण्वात्मना स्वोपासकभक्तपटलमनोहरदिव्यमङ्गळविग्रहत्वात् स्वोपासकस्वाज्ञानक्षयानुरोधेन **तुरीयस्वरूपं तुरीयातीतं च**। निर्विशेषतुर्यतुर्यातीतस्वरूपे निर्विशेषब्रह्मबोधकवाक्यानामद्वैतपरमानन्दादीनां समन्वयः। भक्तेच्छया स्वीकृतमूर्तिमद्विष्णौ दिव्यमङ्गळविग्रहमित्यादिसविशेषवाक्यानां समन्वयः सर्वत्र द्रष्टव्यः। **उदर्चिः** निरुपमकान्तिः। प्रथमाध्याये पादचतुष्टयात्मकं ब्रह्म प्रतिज्ञातम्—अविद्यापादः सुविद्यापादः आनन्द-

पादः तुर्यपादश्चेति । तत्र तुर्यपादप्रविभक्ततुर्यपादस्तु तुर्यतुरीयं तुर्यातीतं चेति प्रतिपादितं यत् तदेव "चरणं पवित्रं" इत्युपक्रम्य त्रिपाद्विभूतिमहानारायणयन्त्रतदध्यक्षदेवताजाततद्गतविशेषांशापवादाधिकरणं तुर्यचैतन्यं तद्गतविशेषसामान्यासंभवप्रबोधसिद्धं तुर्यातीततया प्रथिततुर्यतुर्यं त्रैपदं ब्रह्ममात्रमवशिष्यते इत्युपसंहरति —**अर्धमात्रात्मकमिति** । तुरीयस्य अर्धमात्रातत्कार्यनादावभासकतया अर्धमात्रात्मकत्वम् । **ध्वन्यात्मकमिति** यदर्धमात्राद्यवाच्यं तदेव तुरीयातीतं तुर्यतुर्यतया लक्षितत्वात् । नादबिन्द्वादिकं तस्मात् भिद्यत इत्यत्र तदतिरेकेण नादादेरभावात् तदेव सर्वमित्याह—**नादबिन्दुकलाऽध्यात्मस्वरूपं चेति** । अनन्ताकारत्वे त्रिगुणत्वं सक्रियत्वं मलवत्त्वं साश्रयत्वं च स्यादित्यत आह—**निर्गुणमिति** । यन्निर्गुणमित्यादिविशेषणबोधितं तदेवादिसर्वकारणत्वात् कार्यसापेक्षकारणतायाः विशेषत्वप्रसक्तौ वस्तुतो यत्र कार्यकारणकलनाजातं नास्त्यरमिति नारं कार्यकारणकलनापह्नवसिद्धौ त्रैपदं अयनं धाम स्वरूपं यस्य सोऽयं **आदिनारायणः** तं परमात्मानं स्वावशेषधिया **ध्यायेत्** । **इत्युपनिषच्छब्दः** सप्तमाध्यायपरिसमाप्त्यर्थः ॥ ९० ॥

इत्यथर्वणमहानारायणोपनिषदि परममोक्षस्वरूपप्रकटनपूर्वकं त्रिपाद्विभूतिपरमवैकुण्ठमहानारायणयन्त्रस्वरूपनिरूपणं नाम सप्तमोऽध्यायः

अष्टमोऽध्यायः

अद्वैते ब्रह्मणि वैकुण्ठादिभेदसत्त्वोपपादनम्

ततः पितामहः परिपृच्छति भगवन्तं महाविष्णुं—**भगवन् शुद्धाद्वैतपरमानन्दलक्षणपरब्रह्मणस्तव कथं विरुद्धवैकुण्ठप्रासादप्राकारविमानाद्यनन्तवस्तुभेदः** ॥ १ ॥

सत्यमेवोक्तमिति भगवान् महाविष्णुः परिहरति । यथा शुद्धसुवर्णस्य कटकमकुटाङ्गदादिभेदः, यथा समुद्रसलिलस्य स्थूल-सूक्ष्मतरङ्गफेनबुद्बुदकरकलवणपाषाणाद्यनन्तवस्तुभेदः, यथा भूमेः पर्वतवृक्षतृणगुल्मलताऽऽद्यनन्तवस्तुभेदः, तथैवाद्वैतपरमानन्दलक्षणपर-ब्रह्मणो मम सर्वाद्वैतमुपपन्नं भवत्येव । मत्स्वरूपमेव सर्वं मद्व्यतिरिक्तमणुमात्रं न विद्यते ॥ २ ॥

यद्यद्वैतोऽसि त्वं तदा वैकुण्ठादिभेदः कथमिति पृच्छतीत्याह—**तत इति** ॥ १ ॥ तत्र दृष्टान्तत्रयमाचष्टे—**यथेति** । तत् कथं? **मत्स्व-रूपमेवेति** ॥ २ ॥

अनन्तवैकुण्ठसत्त्वोपपादनम्

पुनः पितामहः परिपृच्छति—भगवन् परमवैकुण्ठ एव परममोक्षः । परममोक्षस्त्वेक एव श्रूयते सर्वत्र । कथमनन्तवैकुण्ठाश्च अनन्तानन्दसमुद्रादयश्च अनन्तमूर्तयः सन्तीति ॥ ३ ॥

तथेति होवाच भगवान् महाविष्णुः—एकस्मिन्नविद्यापादेऽ-नन्तकोटिब्रह्माण्डानि सावरणानि श्रूयन्ते । तस्मिन्नेकस्मिन्नण्डे बहवो लोकाश्च बहवो वैकुण्ठाश्चानन्तविभूतयश्च सन्त्येव । सर्वाण्डेष्वनन्त-लोकाश्चानन्तवैकुण्ठाः सन्तीति सर्वेषां खल्वभिमतम् । पादत्रयेऽपि किं वक्तव्यम् । निरतिशयानन्दाविर्भावो मोक्ष इति मोक्षलक्षणं पादत्रये वर्तते । तस्मात् पादत्रयं परममोक्षः । पादत्रयं परमवैकुण्ठः । पादत्रयं परमकैवल्यमिति । ततः शुद्धचिदानन्दब्रह्मविलासानन्दा-

श्चानन्तपरमानन्दविभूतयश्चानन्तवैकुण्ठाश्चानन्तपरमानन्दसमुद्रादयः सन्त्येव ॥ ४ ॥

श्रुत्वाऽपि तत्रासंभवमाशंक्य पृच्छतीत्याह —**पुनरिति** ॥ ३ ॥ तत्प्रश्नमङ्गीकृत्य परिहरति—**तथेति** । स्वाविद्यापादप्रविभक्तस्वाविद्यापादे । एवमनन्तकोटिवैकुण्ठालंकृते तत्सूक्ष्मबीजतुर्यांशात्मकविद्यादिपादत्रयेऽपि किं वक्तव्यं अनन्तवैकुण्ठादयः सन्तीति। अविद्यापादगाविद्यापादस्य बंन्धहेतुप्रवृत्तिसाधकत्वं, तदपेक्षया विद्याऽऽदिपादत्रयस्य [अ]तिरिक्तप्रपञ्चनिवृत्तिप्रधानत्वेन मोक्षसाधनज्ञानजनकत्वं स्यादित्याह —**निरतिशयेति** । यस्मात् [अ]विद्याऽऽदिपादत्रयगतविकाराभावतः पादत्रयस्य अजडक्रियाज्ञानेच्छाशक्त्यात्मकज्ञानविज्ञानसम्यज्ज्ञानरूपत्वं [त्वात्] युज्यते ज्ञानादेः मोक्षादिफलकत्वं **तस्मात्** । **पादत्रयं परमकैवल्यमिति**—सन्निहितसाधनस्य फलपर्यवसायित्वेन फलवत्त्वोक्तिः । **अनन्तानन्दसमुद्रादयः सन्त्येवेति** यत्तत्पादचतुष्टयेऽपि समानम्। यत एवं अतः पादचतुष्टयमपि सविशेषमेव । पादचतुष्टयतत्कार्यकलनाऽसंभवप्रबोधसिद्धनिष्प्रतियोगिकब्रह्ममात्रावस्थानलक्षणविकळेबरकैवल्यमेव निष्प्रतियोगिकनिर्विशेषत्रैपदमित्यत्र—

महाप्रळयसंपत्तौ ह्यसत्तां समुपागते ।
अधिष्ठानं परं तत्त्वमेकं सच्छिष्यते महत् ॥

इति श्रुतेः ॥ ४ ॥

परमतत्त्वावबोधेन ब्रह्ममात्रावशेषः

उपासकस्ततोऽभ्येत्यैवंविधं नारायणं ध्यात्वा प्रदक्षिणनमस्कारान् विधाय विविधोपचारैरभ्यर्च्य निरतिशयाद्वैतपरमानन्दलक्षणो भूत्वा तदग्रे सावधानेनोपविश्य अद्वैतयोगमास्थाय सर्वाद्वैतपरमानन्दलक्षणाखण्डामिततेजोराश्याकारं विभाव्योपासकः

स्वयं शुद्धबोधानन्दमयामृतनिरतिशयानन्दतेजोराश्याकारो भूत्वा महावाक्यार्थमनुस्मरन् ब्रह्माहमस्मि अहमस्मि ब्रह्माहमस्मि योऽहमस्मि ब्रह्माहमस्मि अहमेवाहं मां जुहोमि स्वाहा अहं ब्रह्मेति भावनया यथा परमतेजोमहानदीप्रवाहः परमतेजःपारावारे प्रविशति यथा परमतेजःपारावारतरङ्गाः परमतेजःपारावारे प्रविशन्ति तथैव सच्चिदानन्दात्मोपासकः सर्वपरिपूर्णात्मैव रमानन्दलक्षणपरब्रह्मणि नारायणे मयि सच्चिदानन्दात्मकोऽहमजोऽहं परिपूर्णोऽहमस्मीति प्रविवेश तत उपासको निस्तरङ्गाद्वैतापारनिरतिशयसच्चिदानन्दसमुद्रो बभूव ॥ ५ ॥

यस्त्वनेन मार्गेण सम्यगाचरति स नारायणो भवत्यसंशयमेव। अनेन मार्गेण सर्वे मुनयः सिद्धिं गताः। असंख्याताः परमयोगिनश्च सिद्धिं गताः ॥ ६ ॥

एवं देशिकमुखतः परमतत्त्वरहस्यमवबुध्य शिष्यः निर्विशेषब्रह्ममात्रप्रबोधसमकालं तन्मात्रमवशिष्यत इत्याह—**उपासक इति**। "ब्रह्माहमस्मि" इत्याद्यं वाक्यं ब्रह्मण्यनात्मताभ्रान्तिवारकम्। "अहमस्मि ब्रह्माहमस्मि" इति वाक्यं तु आत्मन्यब्रह्मत्वभ्रमवारकम्। "योऽहमस्मि ब्रह्माहमस्मि" इति वाक्यं तु प्रत्यक्परचितोर्भेदः स्वाज्ञविकल्पितः योऽहं जीवोऽस्मीति, स्वज्ञदृष्ट्या ब्रह्माहमस्मीति, परमार्थदृष्ट्या तयोः प्रसक्तभेदैक्यभ्रमो नास्तीति। "अहमेवाहं मां जुहोमि स्वाहा" इति मन्त्रस्तु—**अहमेव** परमात्मा निष्प्रतियोगि**कोऽहं**, ममानात्मापह्नवसिद्धत्वात्। अत एव ब्रह्ममात्राग्नौ प्रत्यक्परविभागैक्यहेतुभूतां अविद्याविद्यारूपां **मां** मायां **जुहोमि** अपह्नवं कृत्वा तदपह्नवसिद्धं ब्रह्म स्वमात्रमिति तन्मात्रतया अवशिष्यत इत्यर्थः। एवं **अहं ब्रह्मेति भावनया**। उपदेशार्थः

प्रवेशशब्दः, न तु ग्रामप्रवेशवत् इत्यत्र—"आप्तिः स्वमात्रावशेषो न हि ग्रामान्तराप्तिवत्" इति नामार्थविवेकोक्तेः । ततः किमित्यत आह—**तत इति** ॥ ९ ॥ मदुक्तार्थं यथावत् यो वेद सोऽपि कृतकृत्यो भवतीत्याह—**यस्त्विति** । भवन्तं प्रति यो मया दर्शितः **अनेनेति** । तस्मात् मदुक्तमार्ग एव श्रेयानित्यर्थः ॥ ६ ॥

सालम्बनिरालम्बयोगभेदः

ततः शिष्यो गुरुं परिपृच्छति—भगवन् सालम्बनिरालम्बयोगौ कथमिति ॥ ७ ॥

सालम्बस्तु करचरणादिमूर्तिविशिष्टं मण्डलाद्यालम्बनं सालम्बयोगः । निरालम्बस्तु समस्तनामरूपकर्मातिदूरतया सर्वकामाद्यन्तःकरणवृत्तिसाक्षितया तदालम्बनशून्यतया च भावनं निरालम्बयोगः ॥ ८ ॥

सालम्बनिरालम्बयोगेयत्तां पृच्छति—**भगवन्निति** ॥ ७ ॥ पृष्टो भगवानेवमाह—**सालम्बस्त्विति** ॥ ८ ॥

निरालम्बयोगाधिकारिलक्षणम्

अथ च निरालम्बयोगाधिकारी कीदृशो भवति ॥ ९ ॥

अमानित्वादिलक्षणोपलक्षितो यः पुरुषः स एव निरालम्बयोगाधिकारी ॥ १० ॥

तत्रान्यतराधिकारी कीदृशः ? इति पृच्छति—**अथेति** ॥ ९ ॥ उत्तरमाह—**अमानित्वादीति** ॥ १० ॥

सर्वाधिकारिको भक्तियोगः

कार्यः कश्चिदस्ति । तस्मात् सर्वेषामधिकारिणामनधिकारिणां च भक्तियोग एव प्रशस्यते । भक्तियोगो निरुपद्रवः ।

भक्तियोगान्मुक्तिः । [1]भक्तिमतामनायासेनाचिरादेव तत्त्वज्ञानं भवति ॥ ११ ॥

तत् कथमिति । भक्तवत्सलः स्वयमेव सर्वेभ्यो मोक्षविघ्नेभ्यो भक्तिनिष्ठान् सर्वान् परिपालयति सर्वाभीष्टान् प्रयच्छति मोक्षं दापयति चतुर्मुखादीनाम् । सर्वेषामपि विना विष्णुभक्त्या कल्पकोटिभिर्मोक्षो न विद्यते । कारणेन विना कार्यं नोदेति । भक्त्या विना ब्रह्मज्ञानं कदाऽपि न जायते । तस्मात्त्वमपि सर्वोपायान् परित्यज्य भक्तिमाश्रय । भक्तिनिष्ठो भव । भक्तिनिष्ठो भव । भक्त्या सर्वसिद्धयः सिध्यन्ति । भक्त्यसाध्यं न किंचिदस्ति ॥ १२ ॥

निरालम्बयोगस्त्वधिकारिविषयः न हि सर्वसाधारणो भवति, तथा चेदनधिकारिणां का गतिः इत्यत्र अधिकार्यनधिकारिणोरपि साधारणोपायभूत-भक्तियोगमेव स्तौति—**कार्य इति** । यस्मात् अधिकार्यनधिकारिणोरपि परम-सुलभोपायतया **कार्यः कश्चिदस्तीति** । किं तत्? इत्यत्र—**तस्मादिति** । स्वाधिकारानुगुण्येन सोऽहं दासोऽहं इति भजनं भक्तिः "स्वस्वरूपानुसंधानं भक्तिरित्यभिधीयते" इति भाष्यकारोक्तेः, सैव योगः । तस्यायासाल्पत्वं फलानल्पत्वं चाह—**भक्तियोग इति** ॥ ११ ॥ **सर्वान् पालयति**—स्वाप्रबोधो हि मोक्षविघ्न इत्यर्थः । **चतुर्मुखादीनां** स्वप्रतिपत्त्येत्यर्थः । **सर्वेषामपि विना विष्णुभक्त्या** ब्रह्मज्ञानानुदयात् तदितरसाधनैः **कल्पकोटिभिः मोक्षो न विद्यते** ॥ १२ ॥

भक्तियोगादनायासेन नारायणभावप्राप्तिः

एवंविधं गुरूपदेशमाकर्ण्य सर्वं परमतत्त्वरहस्यमवबुध्य सर्वसंशयान् विधूय क्षिप्रमेव मोक्षं साधयामीति निश्चित्य ततः

[1] बुद्धिमता —उ, मु.

शिष्यः समुत्थाय प्रदक्षिण[1]नमस्कारं कृत्वा गुरुभ्यो गुरुपूजां विधाय गुर्वनुज्ञया क्रमेण भक्तिनिष्ठो भूत्वा भक्त्यतिशयेन पक्वविज्ञानं प्राप्य तस्मादनायासेन शिष्यः क्षिप्रमेव साक्षान्नारायणो बभूवेत्युपनिषत् ॥ १३ ॥

नारायणयाथात्म्यज्ञानात् **नारायण** एव भवति । **इत्युपनिषच्छब्दः** गुरुशिष्याख्यायिकासमाप्त्यर्थः ॥ १३ ॥

परमरहस्यस्मरणादेर्महिमा

ततः प्रोवाच भगवान् महाविष्णुः चतुर्मुखमवलोक्य—ब्रह्मन् परमतत्त्वरहस्यं ते सर्वं कथितम् । तत्स्मरणमात्रेण मोक्षो भवति । तदनुष्ठानेन सर्वमविदितं विदितं भवति । यत्स्वरूपज्ञानिनः सर्वमविदितं विदितं भवति तत् सर्वं परमरहस्यं कथितम् ॥ १४ ॥

ततः किमित्यत आह—**तत इति** । नातः परं ते वक्तव्यं विद्यते, यद्वक्तव्यं परमतत्त्वरहस्यं तस्य साकल्येनोक्तत्वात् "नातः परं हि वेदितव्यमिति किंचित्" इति हि श्रुतेः ॥ १४ ॥

आदिनारायणैकनिष्ठाविधिः

गुरुः क इति । गुरुः साक्षादादिनारायणः पुरुषः । स आदिनारायणोऽहमेव । तस्मान्मामेकं शरणं व्रज । मद्भक्तिनिष्ठो भव । मदीयोपासनां कुरु । मामेव प्राप्स्यसि । मद्व्यतिरिक्तं सर्वं बाधितम् । मद्व्यतिरिक्तमबाधितं न किंचिदस्ति । निरतिशयानन्द-

[1] नमस्कारान्—अ २.

द्वितीयोऽहमेव । सर्वपरिपूर्णोऽहमेव । सर्वाश्रयोऽहमेव । वाचामगोचरनिराकारपरब्रह्मस्वरूपोऽहमेव । मद्व्यतिरिक्तमणुमात्रं न विद्यते ॥ १५ ॥

येनेदं कथितं स कीदृश इत्याक्षिपति—गुरुः क इति । यस्मादेवं तस्मात् मां निष्प्रतियोगिकैकं ब्रह्मास्मीति शरणं व्रज प्रपत्तिं कुर्वित्यर्थः । यद्येवमधिकारी न भवसि तदा मद्भक्तिनिष्ठो भव । त्वद्व्यतिरिक्ताश्रयणे का हानिरित्यत आह—मद्व्यतिरिक्तमिति । तथा चेत् त्वं कीदृशः इत्यत्र—निरतिशयेति । स्वातिरिक्तसर्वप्रसक्तौ तदाश्रयत्वं, वस्तुतो निराश्रयोऽस्मीत्यर्थः ॥ १५-१६ ॥

महाविष्णुभक्तितः सकलश्रेयःप्राप्तिः

इत्येवं महाविष्णोः परमिममुपदेशं लब्ध्वा पितामहः परमानन्दं प्राप ॥ १६ ॥

विष्णोः कराभिमर्शनेन दिव्यज्ञानं प्राप्य पितामहस्ततः समुत्थाय प्रदक्षिणनमस्कारान् विधाय विविधोपचारैर्महाविष्णुं प्रपूज्य प्राञ्जलिर्भूत्वा विनयेनोपसंगम्य भगवन् भक्तिनिष्ठां मे प्रयच्छ । त्वदभिन्नं मां परिपालय कृपालय ॥ १७ ॥

तथैव साधु साध्विति साधुप्रशंसापूर्वकं महाविष्णुः प्रोवाच—मदुपासकः सर्वोत्कृष्टः [1]स भवति । मदुपासनया सर्वमङ्गलानि भवन्ति । मदुपासनया सर्वं जयति । मदुपासकः सर्ववन्द्यो भवति । मदीयोपासकस्यासाध्यं न किंचिदस्ति । सर्वबन्धाः प्रविनश्यन्ति ।

[1] संभ—अ १, अ २

सद्वृत्तमिव सर्वे देवास्तं सेवन्ते । महाश्रेयांसि च सेवन्ते । मदुपासकस्तस्मान्निरतिशयाद्वैतपरमानन्दलक्षणपरब्रह्म भवति । यो वै मुमुक्षुरनेन मार्गेण सम्यगाचरति स परमानन्दलक्षणपरब्रह्म भवति ॥ १८ ॥

ततः किमित्यत आह—विष्णोरिति ॥ १७ ॥ मदुक्तमार्गानुसरणफलमाह—य इति ॥ १८ ॥

एतदुपनिषदध्ययनादेर्महिमा

यस्तु परमतत्त्वरहस्यार्थवर्णमहानारायणोपनिषदमधीते स सर्वेभ्यः पापेभ्यो मुक्तो भवति ज्ञानाज्ञानकृतेभ्यः पातकेभ्यो मुक्तो भवति महापातकेभ्यः पूतो भवति रहस्यकृतप्रकाशकृतचिरकालात्यन्तकृतेभ्यः सर्वेभ्यः पापेभ्यो मुक्तो भवति । स सकललोकान् जयति । स सकलमन्त्रजपनिष्ठो भवति । स सकलवेदान्तरहस्याधिगतपरमार्थज्ञो भवति । स सकलभोगभुग्भवति । स सकलयोगविद्भवति । स सकलजगत्परिपालको भवति । सोऽद्वैतपरमानन्दलक्षणपरब्रह्म भवति ॥ १९ ॥

इदं परमतत्त्वरहस्यं न वाच्यं गुरुभक्तिविहीनाय । न चाशुश्रूषवे वाच्यं न तपोविहीनाय नास्तिकाय न डाम्भिकाय मद्भक्तिविहीनाय । मात्सर्याङ्कितनवे न वाच्यम् । न वाच्यं मदसूयापराय कृतघ्नाय ॥ २० ॥

इदं परमरहस्यं मद्भक्तेष्वभिधास्यति मद्भक्तिनिष्ठो भूत्वा मामेव प्राप्स्यति ॥ २१ ॥

आवयोर्य इमं संवादमध्येष्यति स नरो ब्रह्मनिष्ठो भवति ॥ २२ ॥

श्रद्धावाननसूयुः शृणुयात् पठति वा य इमं संवादमावयोः स पुरुषो मत्सायुज्यमेति ॥ २३ ॥

ततो महाविष्णुस्तिरोदधे । ततो ब्रह्मा स्वस्थानं जगामेत्युपनिषत् ॥ २४ ॥

एतद्ग्रन्थमर्थतो यः पठति तस्य सा[illegible]विशेषफलमाह—**यस्त्विति** । किं बहुना—**सोऽद्वैतेति** ॥ १९ ॥ शास्त्रसम्प्रदायमाह—**इदमिति** ॥ २०–२१ ॥ **आवयोः संवादनिर्वृत्तशास्त्रजन्यज्ञानविज्ञानसम्यज्ज्ञानसमकालं मत्सायुज्यं** मद्भावं विकळेबरकैवल्यमेति ॥ २२–२३ ॥ ततः किमित्यत्र शास्त्रार्थमुपसंहरति —**तत इति** । उपदेशकार्ये निर्वृत्ते **महाविष्णुस्तिरोदधे** स्वान्वर्थनामा भवति व्यापक एव भवतीत्यर्थः । **ततो ब्रह्मा** कृतकृत्यो भूत्वा **स्वस्थानं जगाम** । **इत्युपनिषच्छब्दौ** अष्टमाध्यायकृत्स्नशास्त्रसमाप्त्यर्थौ ॥ २४ ॥

इत्यथर्वणमहानारायणोपनिषदि परमसायुज्यमुक्तिस्वरूपनिरूपणं नाम अष्टमोऽध्यायः

उत्तरकाण्डः समाप्तः

श्रीवासुदेवेन्द्रशिष्योपनिषद्ब्रह्मयोगिना ।
महानारायणव्याख्या लिखिता ब्रह्मगोचरा ।
महानारायणव्याख्याग्रन्थस्त्वष्टशतं स्मृतः ॥

इति श्रीमदीशाद्यष्टोत्तरशतोपनिषच्छास्त्रविवरणे द्विपञ्चाशत्सङ्ख्यापूरकं त्रिपाद्विभूतिमहानारायणोपनिषद्विवरणं संपूर्णम् ॥

दत्तात्रेयोपनिषत्

भद्रं कर्णेभिः—इति शान्तिः

प्रथमः खण्डः

दत्तात्रेयध्यानम्

ॐ सत्यक्षेत्रे ब्रह्मा नारायणं महासाम्राज्यं किं तारकं तन्नो ब्रूहि भगवन्नित्युक्तः सत्यानन्दचिदात्मकं सात्त्विकं मामकं धामोपास्स्वेत्याह । सदा दत्तोऽहमस्मीति प्रत्येतत्संवदन्ति ये न ते संसारिणो भवन्ति । नारायणेनैवं विवक्षितो ब्रह्मा विश्वरूपधरं विष्णुं नारायणं दत्तात्रेयं ध्यात्वा सद्वदति ॥ १ ॥

दत्तात्रेयब्रह्मविद्यासंवेद्यानन्दविग्रहम् ।
त्रिपान्नारायणाकारं दत्तात्रेयमुपास्महे ॥

इह खलु अथर्वणवेदप्रविभक्तेयं दत्तात्रेयोपनिषत् एकाक्षरादिदत्तात्रेयमन्त्रग्रामप्रकटनव्यग्रा निर्विशेषब्रह्ममात्रपर्यवसन्ना विजयते । अस्याः स्वल्पग्रन्थतो विवरणमारभ्यते । ब्रह्मनारायणसंवादरूपेयमाख्यायिका विद्यास्तुत्यर्था । आख्यायिकामवतारयति—ॐ सत्यक्षेत्र इति । आदौ ओमिति सविशेषं निर्विशेषं वा ब्रह्मोच्यते, "प्रणवो ह्यपरं ब्रह्म प्रणवश्च परः श्रुतः" इति खिलश्रुतेः ।

गङ्गायमुनयोः मध्यविलसितं सत्यक्षेत्रं तत्र **सत्यक्षेत्रे ब्रह्मा** तपः चचार। तपःफलदित्सया प्रसन्नं स्वातिरिक्तं नास्त्यरमपीति ये मन्यन्ते ते नाराः तेषां अयनं विश्रान्तिस्थानभूतं **नारायणं** महांश्चासौ सम्यग्राजत इति सम्राट् च महासम्राट् तद्भावो **महासाम्राज्यस्वरूपं** विधिवत् प्रणम्य हे **भगवन् ततो** गर्भजन्मजरामरणात् **किं तारकं** भवसागरतो भक्तकोटिसन्तारकं **मे ब्रूहीति ब्रह्मणैवमुक्तो** नारायण अनृतदुःखजाड्यग्रासतया **सत्यानन्दचिदात्मकं** विशुद्ध-सत्वसत्वसत्वोपाधिकतया **सात्विकं मामकं धामोपास्स्वेत्याह**। स्वधामोपासना-प्रकारं तत्फलं चाह—**सदेति**। स्वभक्तपटलैः स्वपदप्राप्त्युपायनिष्प्रतियोगिक-ब्रह्ममात्रप्रबोधो येन दत्तः सोऽयं निर्विशेषपरमात्मा दत्त इत्युच्यते। **सदा प्रत्यहं दत्तोऽहमस्मीति** य **एतत् संवदन्ति** न हि ते संसारिणो **भवन्ति** परमात्मैव भवन्तीत्यत्र—

सदा रामोऽहमस्मीति तत्त्वतः प्रवदन्ति ये।
न ते संसारिणो नूनं राम एव न संशयः॥

इति श्रुतेः। **नारायणेनैवं विवक्षितो ब्रह्मा** विराडात्मना **विश्वरूपधरं** स्वाज्ञविक-ल्पितप्रपञ्चसूत्रान्तर्याम्यात्मना **विष्णुं** व्यापनशीलं मुक्तालिविश्रान्तिसीमतया **नारायणं दत्तात्रेयं** अत्रिमुनितपःफलं भगवन्तं निष्प्रतियोगिकब्रह्ममात्रतया **ध्यात्वा** तद्याथात्म्यं स्वमात्रमित्यवगम्य स्वानुभूतार्थं प्रकटयतीत्याह—**विश्वेति**। यत्स्वातिरिक्तासत्प्रपञ्चतत्कार्यापह्नवसिद्धं ब्रह्म तदेव **सत्** निष्प्रतियोगिकसन्मात्र-मिति **वदति**, "पश्यतेहापि सन्मात्रमसदन्यत्", "ब्रह्ममात्रमसदन्यत्" इत्यादिश्रुतेः॥ १॥

दत्तात्रेयतारकैकाक्षरमन्त्रः

दमिति [1]हंसः। दामिति दीर्घम्। तद्बीजं नाम बीजस्थम्। दामित्येकाक्षरं भवति। तदेतत्तारकं भवति। तदेवोपासितव्यं विज्ञेयं

[1] ह्रस्वं—क (पाठान्तरम्).

गर्भादितारणम् । गायत्री छन्दः । सदाशिव ऋषिः । दत्तात्रेयो देवता । वटबीजस्थमिव दत्तबीजस्थं सर्वं जगत् । एतदेवैकाक्षरं व्याख्यातम् ॥ २ ॥

एवं ब्रह्मणो दृढानुभवसन्तुष्टो भगवान् दत्तात्रेयः तारकादिमन्त्रग्राममाचष्टे—दमित्यादि । दमिति हंसः प्रत्यक् । तद्विश्रान्तिस्थानं दीर्घं परं ब्रह्म । तयोरैक्यं दामिति प्रत्यगभिन्नपरमात्मोच्यते । यत् दामित्येकाक्षरं भवति तद्बीजं नाम बीजावभासकतया बीजस्थं ब्रह्मोच्यते । यद्ब्रह्म दामित्युक्तं तत्तारकतया ज्ञेयमित्याह—तदेतदिति । तारकस्य छन्दऋषिदेवता आह—गायत्रीति । दत्तबीजस्य जगत्कारणतामाह—वटबीजस्थमिति ॥ २ ॥

दत्तात्रेयषडक्षरमन्त्रः

व्याख्यास्ये षडक्षरम् । ओमिति प्रथमम् । श्रीमिति द्वितीयम् । [1]ह्रीमिति तृतीयम् । क्लीमिति चतुर्थम् । [2]ग्लौमिति पञ्चमम् । द्रामिति षट्क[ष्ठ]म् । षडक्षरोऽयं भवति । सर्वसंपद्बुद्धिकरी भवति । योगानुभवो भवति । गायत्री छन्दः । सदाशिव ऋषिः । दत्तात्रेयो देवता ॥ ३ ॥

ॐ श्रीं ह्रीं क्लीं ग्लौं द्रां इति षडक्षरोऽयं भवति ॥ ३ ॥

दत्तात्रेयाष्टाक्षरमन्त्रः

द्रमित्युक्त्वा द्रामित्युक्त्वा वा दत्तात्रेयाय नम इत्यष्टाक्षरः । दत्तात्रेयायेति सत्यानन्दचिदात्मकम् । नम इति पूर्णानन्दैकविग्रहम् ।

[1] ह्रा—अ, अ १, अ २, क. [2] ग्ला—क. ग्लो—अ १.

गायत्री छन्दः । सदाशिव ऋषिः । दत्तात्रेयो देवता । दत्तात्रेयायेति कीलकम् । तदेव बीजम् । नमः शक्तिर्भवति ॥ ४ ॥

अष्टाक्षरमनुमुद्धरति—द्रमिति । द्रां दत्तात्रेयाय नमः । ध्यानं तु—दत्तात्रेयायेति । दत्तात्रेयाय सत्यानन्दचिदात्मकं नमः पूर्णानन्दैकविग्रहं इति त्रयोविंशाक्षरमनुर्वाऽयं भवति ॥ ४ ॥

दत्तात्रेयद्वादशाक्षरमन्त्रः

ओमिति प्रथमम् । आमिति द्वितीयम् । ह्रीमिति तृतीयम् । क्रोमिति चतुर्थम् । एहीति तदेव वदेत् । दत्तात्रेयेति स्वाहेति मन्त्रराजोऽयं द्वादशाक्षरः । जगती छन्दः । सदाशिव ऋषिः । दत्तात्रेयो देवता । ओमिति बीजम् । स्वाहेति शक्तिः । संबुद्धिरिति कीलकम् । द्रमिति हृदये । ह्रीं क्लीमिति शीर्षे । एहीति शिखायाम् । दत्तेति कवचे । आत्रेयेति चक्षुषि । स्वाहेत्यस्त्रे । तन्मयो भवति । य एवं वेद ॥ ५ ॥

द्वादशाक्षरमनुमुद्धरति—ओमिति । ॐ आं ह्रीं क्रों एहि दत्तात्रेय स्वाहेति मन्त्रराजोऽयं द्वादशाक्षरः ॥ ५ ॥

दत्तात्रेयषोडशाक्षरमन्त्रः

षोडशाक्षरं व्याख्यास्ये । प्राणं देयम् । मानं देयम् । चक्षुर्देयम् । श्रोत्रं देयम् । षड्दशशिरश्छिनत्ति । षोडशाक्षरमन्त्रो न देयो भवति । अतिसेवापरभक्तगुणवच्छिष्याय वदेत् । ओमिति प्रथमं भवति । ऐमिति द्वितीयम् । क्रोमिति तृतीयम् । क्लीमिति चतुर्थम् ।

[1]क्लूमिति पञ्चमम्। ह्रामिति षष्ठम्। ह्रीमिति सप्तमम्। ह्रूमित्य-
ष्टमम्। सौरिति नवमम्। दत्तात्रेयायेति चतुर्दशम्। स्वाहेति षोडशम्।
गायत्री छन्दः। सदाशिव ऋषिः। दत्तात्रेयो देवता। ॐ बीजम्।
स्वाहा शक्तिः। चतुर्थ्यन्तं कीलकम्। ओमिति हृदये। क्लां क्लीं
क्लूमिति शिखायाम्। सौरिति कवचे। चतुर्थ्यन्तं चक्षुषि।
स्वाहेत्यस्त्रे। यो नित्यमधीयानः सच्चिदानन्दसुखी मोक्षी भवति।
सौरित्यन्ते श्रीवैष्णव इत्युच्यते। तज्जापी विष्णुरूपी भवति ॥ ६ ॥

षोडशाक्षरस्य मन्त्रराजत्वेन अनधिकारिणि अदेयतां अधिकारिणि देयतां वदन् मन्त्रराजमुद्धरति—**षोडशाक्षरमिति**। अनधिकारिणि यदि ते अनुकम्पा तदा तस्मै **प्राणं देयम्**। तत्कृतेऽन्यत्र षड्दशशिरच्छिनत्ति तदुपकाराय तच्छत्रूणां शिरच्छेदनं वा कर्तव्यम्। जात्वप्ययं **षोडशाक्षरमन्त्रो न देयो भवति**। पुनः कस्मै वक्तव्येत्यत्र—**अतिसेवापरेति**। अथ षोडशाक्षरमुद्धरति—**ओमिति**। ॐ ऐं क्रों क्लीं क्लूं ह्रां ह्रीं ह्रूं सौः दत्तात्रेयाय स्वाहेति षोडशाक्षरः। दत्तात्रेयायेति **चतुर्थ्यन्तं कीलकम्**। **यो नित्यमधीयानः सोऽयं सच्चिदानन्दसुखी** ॥ ६ ॥

दत्तात्रेयानुष्टुभमन्त्रः

अनुष्टुपूछन्दो व्याख्यास्ये। सर्वत्र संबुद्धिरिमानीत्युच्यन्ते—

दत्तात्रेय हरे कृष्ण उन्मत्तानन्ददायक।
दिगम्बर मुने बाल पिशाच ज्ञानसागर ॥

इत्युपनिषत्। अनुष्टुप् छन्दः। सदाशिव ऋषिः। दत्तात्रेयो देवता। दत्तात्रेयेति हृदये। हरे कृष्णेति शीर्षे। उन्मत्तानन्देति शिखायाम्।

[1] कू—अ १.

दायक मुन इति कवचे। दिगम्बरेति चक्षुषि। पिशाचज्ञानसागरेत्यस्त्रे। आनुष्टुभोऽयं मयाऽधीतः। अब्रह्मजन्मदोषाश्च प्रणश्यन्ति। सर्वोपकारी मोक्षी भवति। य एवं वेदेत्युपनिषत् ॥ ७ ॥

अनुष्टुभमुद्धरति—**अनुष्टुबिति**। एतदनुष्टुम्मूलमन्त्रजपतः सर्वपापनिवृत्तो भूत्वा स्वाज्ञजनस्वपदप्राप्त्युपायदानेन **सर्वोपकारी** सन् स्वातिरिक्तभ्रमतो **मोक्षी भवति**। **य एवं वेद** स मुक्तो भवतीत्यर्थः। **इत्युपनिषच्छब्दः** पूर्व[प्रथम]खण्डपरिसमाप्त्यर्थः ॥ ७ ॥

इति पूर्वः [प्रथमः] खण्डः

द्वितीयः खण्डः

दत्तात्रेयमालामन्त्रः

ओमिति व्याहरेत्। ॐ नमो भगवते दत्तात्रेयाय स्मरणमात्रसंतुष्टाय महाभयनिवारणाय महाज्ञानप्रदाय चिदानन्दात्मने बालोन्मत्तपिशाचवेषायेति महायोगिनेऽवधूतायेति अनसूयाऽऽनन्दवर्धनायात्रिपुत्रायेति सर्वकामफलप्रदाय ओमिति व्याहरेत्। भवबन्धमोचनायेति ह्रीमिति व्याहरेत्। सकलविभूतिदायेति क्रोमिति व्याहरेत्। साध्याकर्षणायेति सौरिति व्याहरेत्। सर्वमनःक्षोभणायेति श्रीमिति व्याहरेत्। महोमिति व्याहरेत्। चिरंजीविने वषडिति

व्याहरेत्। वशीकुरु वशीकुरु वौषडिति व्याहरेत्। आकर्षयाकर्षय हुमिति व्याहरेत्। विद्वेषय विद्वेषय फडिति व्याहरेत्। उच्चाटयोच्चाटय ठ ठेति व्याहरेत्। स्तम्भय स्तम्भय [1]ख खेति व्याहरेत्। मारय मारय नमः संपन्नाय नमः संपन्नाय स्वाहा पोषय पोषय परमन्त्रपरयन्त्र-परतन्त्रांश्छिन्धि च्छिन्धि ग्रहान्निवारय निवारय व्या[2]धीन्निवारय निवारय दुःखं हरय हरय दरिद्र्यं विद्रावय विद्रावय देहं पोषय पोषय चित्तं तोषय तोष[3]य सर्वमन्त्रसर्वयन्त्रसर्वतन्त्रसर्वपल्लवस्वरूपायेति ॐ नमः शिवायेत्युपनिषत् ॥

मालामनुप्रकटनार्थमुत्तरखण्डः आरभ्यते---ओमिति।

इति द्वितीयः खण्डः

तृतीयः खण्डः

दत्तात्रेयविद्याफलम्

य एवं वेद। अनुष्टुप् छन्दः। सदाशिव ऋषिः। दत्तात्रेयो देवता। ओमिति बीजम्। स्वाहेति शक्तिः। द्रामिति कीलकम्। अष्टमूर्त्यष्टमन्त्रा भवन्ति। यो नित्यमधीते [4]वाय्वग्निसोमादित्य-ब्रह्मविष्णुरुद्रैः पूतो भवति। गायत्र्याः शतसहस्रं [5]जप्तो भवति।

[1] खेखे—अ १, क. [2] व्याधिं नि—अ १.
[3] येति—अ १, मु. [4] स वा—अ, अ १. [5] जप्तं—मु.

महारुद्रशतसहस्रजापी भवति । प्रणवायुतकोटिजप्तो भवति । शतपूर्वान् [1]शतापरान् पुनाति । स पङ्क्तिपावनो भवति । ब्रह्महत्याऽऽदिपातकैर्मुक्तो भवति । गोहत्यादिपातकैर्मुक्तो भवति । तुलापुरुषादिदानैः प्रपापानतः पूतो भवति । अशेषपापान्मुक्तो भवति । [2]अभक्ष्यभक्ष्यपापैर्मुक्तो भवति । सर्वमन्त्रयोगपारीणो भवति । स एव ब्राह्मणो भवति । तस्माच्छिष्यं भक्तं प्रतिगृह्णीयात् । सोऽनन्तफलमश्नुते । स जीवन्मुक्तो भवतीत्याह भगवान्नारायणो ब्रह्माणमित्युपनिषत् ॥

विद्याफलं प्रकटयितुं तृतीयः खण्डः आरभ्यते—**य इति** । किं बहुना, **स एव ब्राह्मणो** ब्रह्मनिष्ठो जीवन्मुक्तो **भवति** । यस्मादेवं **तस्मात्** । यस्मात् इयं ब्रह्मविद्या जीवन्मुक्तत्वहेतुः **तस्मात्** विद्वान् एतामुपनिषदं शासनार्हं **शिष्यं** स्वभजनशीलं **भक्तं** च **प्रतिगृह्णीयात्** ग्रहयेत् । य एवं ग्रहीता ग्राहयिता च **सोऽनन्तफलं** मोक्षमश्नुते । आप्रारब्धक्षयं **स जीवन्मुक्तो भवतीति** नारायणो ब्रह्माणं प्रत्याहेत्यर्थः । **इत्युपनिषच्छब्दः** दत्तात्रेयोपनिषत्समाप्त्यर्थः ।

इति तृतीयः खण्डः

श्रीवासुदेवेन्द्रशिष्योपनिषद्ब्रह्मयोगिना ।
दत्तात्रेयोपनिषदो व्याख्यानं लिखितं लघु ।
दत्तविद्यावृत्तिसङ्ख्या पञ्चपञ्चाशदीरिता ॥

इति श्रीमदीशाद्यष्टोत्तरशतोपनिषच्छास्त्रविवरणे एकोत्तरशतसङ्ख्यापूरकं दत्तात्रेयोपनिषद्विवरणं सम्पूर्णम् ॥

[1] शतोत्तरान्—अ २, क. [2] भक्ष्याभ—अ, मु. अभक्ष्याभ—अ १, क.

नारायणोपनिषत्

सह नाववतु—इति शान्तिः

प्रथमः खण्डः

नारायणात सर्वचेतनाचेतनजन्म

अथ पुरुषो ह वै नारायणोऽकामयत प्रजाः सृजेयेति । नारायणात् प्राणो जायते मनः सर्वेन्द्रियाणि च खं वायुर्ज्योतिरापः पृथिवी विश्वस्य धारिणी । नारायणाद्ब्रह्मा जायते । नारायणाद्रुद्रो जायते । नारायणादिन्द्रो जायते । नारायणात् प्रजापतिः प्रजायते । नारायणाद्वादशादित्या रुद्रा वसवः सर्वाणि छन्दांसि नारायणादेव समुत्पद्यन्ते नारायणात् प्रवर्तन्ते नारायणे प्रलीयन्ते । एतदृग्वेद-शिरोऽधीते ॥

मायातत्कार्यमखिलं यद्बोधाद्यात्यपह्नवम् ।
त्रिपान्नारायणाख्यं तत् कलये स्वात्ममात्रतः ॥

अथ खलु नारायणोपनिषदः कृष्णयजुर्वेदप्रविभक्तत्वेन वक्तव्योपोद्घातादिकं कठवल्ल्यादितुल्यं विज्ञेयम् । ऋगादिचतुर्वेदशिरोरूपेयं नारायणोपनिषत् गुरुशिष्यसंवादाद्याख्यायिकां विना स्वेनैव प्रवृत्तेति यत् तत् विद्यास्तुत्यर्थम् ।

कथं प्रवृत्तेयमुपनिषदित्याकाङ्क्षायामाह—**अथेति**। स्वाविद्यापदतत्कार्यपूरणात् **पुरुषः**। यत्र सूर्यो न रमन्ते तत् नरं स्वाविद्यापदतत्कार्यजातं, तदेव **नारं**, तत् यत्र पर्यवस्यति तद्धि तस्यायनमधिकरणं **नारायण**शब्दार्थः। यद्वा—नास्त्यरमपि अविद्यापदतत्कार्यजातमिति नारं अपह्नवात्मकं, तदपह्नवसिद्धं यद्रूपं सोऽयं **नारायणः**। **हवा** इति निपातौ निष्प्रतियोगिकप्रसिद्धिद्योतकौ भवतः। यः एवं स्वमात्रमवशिष्यते सोऽयं **अथ** स्वाङ्गदृष्टिप्रसक्त्यनन्तरं मूलाबीजांशयोगतः ईश्वरभावमापन्न इव **अकामयत** कामितवान्। किमिति? **प्रजाः सृजेय** उत्पादयेयं **इति**। आदौ ईश्वरभावमापन्ननारायणात् मुख्यप्राणो हिरण्यगर्भो जायते। ततो **मनः** महत्तत्त्वं **सर्वेन्द्रियाणि च** अहङ्कारतत्त्वात्मकानि। च-शब्दात् सत्वादित्रिगुणं मनःश्रोत्राद्यन्तर्बाह्यकरणानि च जायन्ते। ततो **नारायणात् खं वायुः ज्योतिरापः पृथिवी विश्वस्य धारिणी** इति तन्मात्रभूतानि जायन्ते। ततः पञ्चीकृतपञ्चमहाभूतानि च। **नारायणात् ब्रह्मा** चतुराननः सृष्टिकर्ता **जायते**। नारायणात् स्थितिकर्ता विष्णुर्जायते इत्यध्याहार्यम्, सृष्टिसंहारकर्त्रोः सृष्ट्यनुरोधेन स्थितिकर्तुरपि वक्तुं उचितत्वात्। **नारायणाद्रुद्रः** सर्वोपसंहर्ताऽपि **जायते**। **नारायणादिन्द्रो जायते** त्रैलोक्याधिपतिः मघवान्। नारायणात् जायत इति सर्वत्र अनुषज्यते। **प्रजापतिः** दक्षादिनवप्रजापतयः, तथा मित्रादिद्वादशादित्याः भवाद्येकादशरुद्राः धराद्यष्टौ **वसवः** गायत्र्यादि-**सर्वाणि छन्दांसि** च। स्वातिरिक्ततया यद्यत् भाव्यं तत्तत् सर्वं **नारायणादेव समुत्पद्यते**। सृष्टि[स्थिति]काले तस्मादेव स्वे स्वे वर्त्मनि **प्रवर्तन्ते**। एतत्सर्वाणि उक्तानुक्तानि **नारायणे प्रलीयन्ते**। यतः एवं अतः स्वातिरिक्तसर्वारोपाप-वादाधिकरणं नारायण एव, नारायणादतिरिक्तं न किंचिदस्ति इत्यत्र—"ब्रह्मैवेदं सर्वं", "सत्तामात्रं हीदं सर्वं", "मद्व्यतिरिक्तमणुमात्रं न विद्यते", इति श्रुतेः। यः **एतदृग्वेदशिरोऽधीते** स सर्वेश्वरो नारायणो भवति इति **ऋग्वेदमस्तकाभिप्रायः**॥

इति प्रथमः खण्डः

द्वितीयः खण्डः

नारायणस्य सर्वात्मत्वम्

अथ नित्यो नारायणः । ब्रह्मा नारायणः । शिवश्च नारायणः । शक्रश्च नारायणः । कालश्च नारायणः । दिशश्च नारायणः । विदिशश्च नारायणः । ऊर्ध्वं च नारायणः । अधश्च नारायणः । अन्तर्बहिश्च नारायणः । नारायण एवेदं सर्वं यद्भूतं यच्च भव्यम् । निष्कलङ्को निरञ्जनो निर्विकल्पो निराख्यातः शुद्धो देव एको नारायणो न द्वितीयोऽस्ति कश्चित् । य एवं वेद स विष्णुरेव भवति स विष्णुरेव भवति । एतद्यजुर्वेदशिरोऽधीते ॥

कार्यकारणयोरेकत्वाभिप्रायेण शास्त्रतो यद्यत् स्वविकल्पितं तत्तत्कल्पनाहेतुस्वाज्ञानापाये स्वयमेवैतत् सर्वं, स्वव्यतिरिक्तं न किंचिदस्ति, इति ज्ञानसमकालं स्वयमेव अवशिष्यत इति प्रकटनाय इदं यजुर्वेदशिरः प्रवृत्तमित्याह—**अथेति** । ऋग्वेदशिर उक्त्वा **अथ** यजुर्वेदशिर आरभ्यते । अथशब्दस्य आरंभार्थयोगात् स्वकार्यापेक्षया तन्निरूपितकारणभावारूढो **नित्यो नारायणः ब्रह्मा** चतुराननोऽपि **नारायणः** कार्यमात्रस्य कारणानन्यत्वात् । **शिवशक्रादिग्रहणं** निखिलचेतनवर्गोपलक्षणार्थम् । अचेतनकालादिग्रहणं अव्यक्तादिस्थावरान्तोपलक्षणार्थम् । चेतनाचेतनप्रपञ्चोऽयं **नारायण** एवेत्यर्थः । एवं चेतनाचेतनात्मकस्वाविद्यापदतत्कार्यजातान्तर्बहिरन्तराळं च नारायण एव । किं बहुना—यद्यत् भूतादिकालत्रयपरिच्छेद्यं तत् सर्वमिदं नारायण एव, तदतिरिक्तमणुमात्रं न विद्यते इत्यर्थः । सकळङ्कसाञ्जनसविकल्पाविद्यापदतत्कार्यानुकारित्वेन सकळङ्कत्वादि स्यादित्यत आह—**निष्कळङ्क इति** । **निष्कलङ्कः** कळङ्कवत्स्वाविद्यापदस्थूलांशायोगात्, **निरञ्जनः** अञ्जनार्हतत्सूक्ष्मांशायोगात्, **निर्विकल्पः** सर्वविकल्पहेतुतद्बीजांशायोगात्, निराख्यातः आख्यासामान्ययोन्यर्धमात्रांशायोगात् । प्रातिस्विकेन अंशचतुष्टययोगाभावेऽपि युगपत् तद्योगात् अशुद्धता स्यादित्यत

आह—**शुद्ध इति**। अशुद्धाविद्यापदतत्कार्यापह्नवसिद्धत्वात्। तद्रूपेण किं न द्योतते इत्यत आह—**देव इति**। स्वाज्ञानदृशामविद्योतमानोऽपि स्वज्ञदृष्ट्या स्वमात्रतया द्योतमानत्वात्। स्वज्ञादिदृष्ट्यपेक्षया द्योतनाद्योतनत्वेन अनेकता स्यादित्यत आह—**एक इति**। परमार्थदृष्ट्या स्वज्ञस्वाज्ञतदृष्टिविभातद्योतनाद्योतनकलनापह्नवसिद्धात्मनो निष्प्रतियोगिकैकरूपत्वात् उक्तलक्षणलक्षितो **नारायणः** स्वमात्रमवशिष्यते। **न** हि तदतिरेकेण **कश्चिदपि द्वितीयोऽस्तीति**। **यः एवं** यजुर्वेदशिरःप्रतिपाद्यनारायणयाथात्म्यं **वेद स** विद्वान् वेदनसमकालं **विष्णुर्नारायणो** निष्प्रतियोगिकपरमात्मैव **भवति** इति यजुर्वेदमस्तकाभिप्रायः। आवृत्तिरादरार्था॥

इति द्वितीयः खण्डः

तृतीयः खण्डः

नारायणाष्टाक्षरमन्त्रः

ॐमित्यग्रे व्याहरेत्। नम इति पश्चात्। नारायणायेत्युपरिष्टात्। ॐमित्येकाक्षरम्। नम इति द्वे अक्षरे। नारायणायेति पञ्चाक्षराणि। एतद्वै नारायणस्याष्टाक्षरं पदम्। यो ह वै नारायणस्याष्टाक्षरं पदमध्येति अनपब्रुवः सर्वमायुरेति विन्दते प्राजापत्यं रायस्पोषं गौपत्यं ततोऽमृतत्वमश्नुते ततोऽमृतत्वमश्नुत इति। एतत्सामवेदशिरोऽधीते॥

इत्थंभूतनारायणयाथात्म्यज्ञानोपायत्वेन तदष्टाक्षरमुद्धृत्य तत्परायणानां चित्तशुद्धिप्राप्यज्ञानद्वारा अमृतत्वं स्यादिति वक्तुं एतत्सामवेदशिरः प्रवृत्तमित्याह—**ओमिति**। **ओमित्येतद्[दैका]क्षरं** इत्याद्यष्टाक्षरोद्धारः स्पष्टार्थः। **यो ह वै नारायणस्याष्टाक्षरं पदमध्येति**—यस्तु गुरुमुखात् नारायणाष्टाक्षरं गृहीत्वा

कामाकामधिया मन्त्रशास्त्रविधिना यथावत् पुरश्चरणां करोति । **हवा** इति निपातौ श्रुतिस्मृतिप्रसिद्धिद्योतकौ । सोऽयं मन्त्री यदि सकामस्तदा **अनपभ्रुवः** अपकीर्तिरहितः कीर्तिमान् सन् **सर्वमायुरेति** दीर्घायुष्मान् भवति **रायस्पोषं** धनपालत्वं **गौपत्यं** सार्वभौमत्वं देहावसाने **प्राजापत्यं** पदं ब्रह्मलोकं च **विन्दते** लभते । यदि मन्त्री निष्कामः स्यात् तदा **ततः** तदनुष्ठानतः चित्तशुद्धिप्राप्यज्ञानद्वारा मुख्यामृतत्वं विकळेबरकैवल्यं **अश्नुते** । आवृत्तिः निस्संशयार्था । यः एवं **एतत्सामवेदशिरोऽधीते** सोऽपि ज्ञानी भूत्वा अमृतत्वमेतीत्यर्थः ॥

इति तृतीयः खण्डः

चतुर्थः खण्डः

नारायणप्रणवः

प्रत्यगानन्दं ब्रह्म पुरुषं प्रणवस्वरूपम् । अकार उकारो मकार इति । तानेकधा समभवत्तदेतदोमिति यमुक्त्वा मुच्यते योगी जन्मसंसारबन्धनात् । ॐ नमो नारायणायेति मन्त्रोपासको वैकुण्ठभवनं गमिष्यति । तदिदं पुण्डरीकं विज्ञानघनं तस्मात्तटिदाभमात्रम् । ब्रह्मण्यो देवकीपुत्रो ब्रह्मण्यो मधुसूदन [1]इति । सर्वभूतस्थमेकं वै नारायणं कारणपुरुषमकारणं परं ब्रह्मोम् । एतदथर्वशिरोऽधीते ॥

अष्टाक्षरीप्रतिपाद्यं ब्रह्म किमित्याकांक्षायां सगुणनिर्गुणप्रणवार्थरूपम्, तत्र सगुणप्रणवायमानाष्टाक्षर्युपासनया तत्सालोक्यादिमुक्तिः, निर्गुणप्रणवयाथात्म्यज्ञानतः तुर्यतुर्यातिश्च स्यात् इत्येतदर्थप्रकटनाय अथर्वशिरः प्रवृत्तमित्याह—

[1] "ब्रह्मण्यः पुण्डरीकाक्षो ब्रह्मण्यो विष्णुरच्युतः" इत्यधिको मुद्रितकोशे.

प्रत्यगिति । किं तत्प्रणवयाथात्म्यं ? इत्यत्र स्वातिरिक्ताविद्यापदतत्कार्यप्रातिलोम्येन सच्चिदानन्दरूपेण अञ्चतीति **प्रत्यक्**, प्रत्यक् यत्र परागभावसापेक्षप्रत्यक्परविभागैक्यकलनां विहाय निष्प्रतियोगिकब्रह्ममात्रतया नन्दति तत् **प्रत्यगानन्दं**, तन्मात्रतया उपबृंहणात् **ब्रह्म**, **पुरुषं** पूर्णत्वात् "पूर्णमेवावशिष्यते" इति श्रुतेः । प्रत्यगानन्दं ब्रह्म पुरुषं इतिविशेषणविशिष्टं **प्रणवस्वरूपं** प्रणवयाथात्म्यं तुर्यतुर्यमित्यर्थः । तुर्यतुर्यवाचकप्रणवः कत्यवयव इत्यत आह—**अकार उकारो मकार** इति । स्थूलसूक्ष्मबीजार्धमात्रादिना अकारः त्रिश्चतुर्धा भिद्यते । अर्धमात्राऽपि त्रेधा भिद्यते । आहत्य अकाराद्याः पञ्चदशमात्राविशिष्टाः । **तानेकधा समभवत्** इति यत् **तदेतदोमिति** ब्रह्मणोऽभिधानम् । यं प्रणवं प्लुतमात्रतयोच्चार्य योगी जन्मादिसंसारबन्धनान्मुच्यते सोऽयं "ॐ नमो नारायणाय" इति सगुणप्रणवः । तज्जपशीलस्य फलमाह—**ओमिति** । उक्तलक्षणलक्षितसगुणप्रण**वोपासको वैकुण्ठभवनं गमिष्यति** । यद्वैकुण्ठभवनमित्युक्तं वैष्णवं स्थानं **तदिदं** स्वाविद्यापदशरीरस्य हृत्पुण्डरीकस्थानं अजडक्रियाज्ञानेच्छाशक्तिसम्पत्त्या **विज्ञानघनं** यस्मादेवं **तस्मात्** तटिदिव प्रकाशमात्रम् । तदधिष्ठाता परमेश्वरः कीदृशः ? इत्यत आह—**ब्रह्मण्य** इति । स्वातिरिक्ताब्रह्मापह्नवसिद्धं ब्रह्म स्वमात्रमिति ये जानन्ति ते ब्राह्मणाः ब्रह्मविद्वरिष्ठाः त एव दैवं आत्मस्वरूपं यस्य सोऽयं **ब्रह्मण्यः** । कोऽयं इत्यत्र "देवकी ब्रह्मविद्येयं या वेदैरुपगीयते" इति श्रुतेः तस्यामाविर्भूतः प्रकाशितो **देवकीपुत्रः** विद्यावेद्यः परमात्मा । **ब्रह्मण्यो मधुसूदनः** इति मधुकैटभसूदनो वा विष्णुः ब्रह्मण्यः । **इति**शब्दः परमात्मविष्ण्वोरैक्यार्थः । तद्रूपं किं परिच्छिन्नं नेत्याह—**सर्वभूतस्थमिति** । सर्वेषु ब्रह्मादिस्तम्बान्तभूतेषु प्रत्यक्त्वेन स्थितत्वात् । प्रतिभूतसापेक्षतः प्रत्यग्रूपस्य अनेकत्वं स्यादित्यत आह—**एकमिति** । घटशरावाद्यनुगतव्योमवत् प्रतिशरीरानुस्यूतप्रत्यक्तत्त्वस्यैकत्वात् । वैशब्दोऽवधारणार्थः । उक्तलक्षणलक्षितं नारायणचैतन्यमेकमेवेत्यर्थः । स्वाज्ञदृष्टिप्रसक्तकार्यप्रपञ्चसत्त्वे स्वज्ञदृष्टिः तं **कारणपुरुषं मन्यते** । परमार्थदृष्टिस्तु स्वाज्ञादिदृष्टिप्रसक्तकार्यकारणकलनापह्नवसिद्धं **अकारणं परं ब्रह्मो** इति पश्यति । एवं दर्शनसमकालं विद्वान् निर्विशेषब्रह्मैव भवतीत्य-

थर्वशिरोऽधीते । सगुणब्रह्मोपासकस्य सालोक्यादिः फलं, निर्गुणप्रणवयाथात्म्यार्थं तुर्यतुरीयं ब्रह्म निष्प्रतियोगिकस्वमात्रमिति जानतो विदेहकैवल्यमित्यथर्वशिरसोऽभिप्रायः ॥

विद्याऽध्ययनफलम्

प्रातरधीयानो रात्रिकृतं पापं नाशयति । सायमधीयानो दिवसकृतं पापं नाशयति । तत्सायंप्रातरधीयानः पापोऽपापो भवति । माध्यंदिनमादित्याभिमुखोऽधीयानः पञ्चमहापातकोपपातकात् प्रमुच्यते । सर्ववेदपारायणपुण्यं लभते नारायणसायुज्यमवाप्नोति श्रीमन्नारायणसायुज्यमवाप्नोति य एवं वेद ॥

विशिष्टग्रन्थपाठकस्य फलमाह—**प्रातरिति** । प्रातःपठनतो **रात्रिकृतपाप**हानिः भवति । तथा सायाह्नपठनात् **दिवसकृतपाप**हानिः । स्वयं पापकृत्तमोऽपि कालद्वयपठनात् **अपापो** भवति । मध्याह्नसूर्याभिमुख्यपठनात् **पञ्चम**हापातकादिविमुक्तिः । कृत्स्नवेदपारायणफलं सकृन्नारायणोपनिषत्पारायणतो भवेत् । देहावसाने श्रीमन्नारायणसायुज्यमवाप्नोति । य एवं वेद सोऽपि यथोक्तफलभाक् भवति । आवृत्तिः निःसंशयार्था । **इत्युपनिषच्छब्दौ** प्रकृतोपनिषत्समाप्त्यर्थौ ॥

इति चतुर्थः खण्डः

श्रीवासुदेवेन्द्रशिष्योपनिषद्ब्रह्मयोगिना ।
नारायणोपनिषदो व्याख्येयं लिखिता मया ।
एतद्विवरणग्रन्थो दशोत्तरशतं स्मृतः ॥

इति श्रीमदीशाद्यष्टोत्तरशतोपनिषच्छास्त्रविवरणे अष्टादशसङ्ख्यापूरकं नारायणोपनिषद्विवरणं संपूर्णम् ॥

नृसिंहतापिन्युपनिषत्

पूर्वतापिनी

प्रथमोपनिषत्

शान्तिपाठः

भद्रं कर्णेभिः शृणुयाम देवाः । भद्रं पश्येमाक्षभिर्यजत्राः ।
स्थिरैरङ्गैस्तुष्टुवाꣳसस्तनूभिः । व्यशेम देवहितं यदायुः । स्वस्ति न
इन्द्रो वृद्धश्रवाः । स्वस्ति नः पूषा विश्ववेदाः । स्वस्ति नस्तार्क्ष्यो
अरिष्टनेमिः । स्वस्ति नो बृहस्पतिर्दधातु ॥ ॐ शान्तिः शान्तिः शान्तिः ॥

यत्तुर्योङ्काराग्रपरामभूमिस्थिरवरासनम् ।
प्रतियोगिविनिर्मुक्ततुर्यतुर्यमहं महः ॥

इह खलु अथर्वणवेदप्रविभक्तेयं नृसिंहतापनीयोपनिषत् सविशेषनिर्विशेष-ब्रह्ममात्रगोचरतया विजयते । अस्याः स्वल्पग्रन्थतो विवरणमारभ्यते । अस्याः उपोद्घातादिकं मुण्डकादिवत् ऊह्यम् । देवतागणप्रजापतिप्रश्नप्रतिवचनरूपेय-माख्यायिका सविशेषनिर्विशेषब्रह्मविद्यास्तुत्यर्था । विद्याद्वयोपसर्गप्रशमनाय इयं शान्तिः पठ्यते—**भद्रं कर्णेभिरिति** । श्रीनृसिंहोपासकाः **देवाः** वयं उपासक-बाहुळ्यात् **कर्णेभिः** इति बहुवचनं कर्णैः **भद्रं** नृसिंहप्रतिपादकवेदान्तजातं **शृणुयाम** शृणुयास्म तदवगतिहेतुश्रवणं कुर्मः इत्यर्थः । केवलश्रवणतः किं ?

इत्यत आह—**भद्रं पश्येमेति** । नारसिंहीयविद्याश्रवणतो यथाशास्त्रं **यजत्रा** ध्यानयज्ञयजनशीला वयं **अक्षभिः** अक्षिभिः करणैः नारसिंहीयं सकळं निष्कळं वा **भद्रं** रूपं **पश्येम** पश्यास्म । अल्पायुषः तत्सिद्धिः का ? इत्यत आह—**स्थिरैरङ्गैरिति** । भावनावैशिष्ट्यात् **स्थिरैरङ्गैः** प्रणवसावित्र्यादिभिः अङ्गमन्त्रैः वयं नरसिंहं **तुष्टुवांसः तनूभिः** "यों ह वै नृसिंह" इत्यादितनुमन्त्रैः स्तुतिं कुर्वाणाः सन्तो **देवध्यानहितं** नीरोगादिगुणविशिष्टं **आयुः** दीर्घायुष्ट्वं चिरजीवित्वं यच्चिरकालध्यानार्हमायुः **व्यशेम** विशेम । मन्दबुद्धयनुग्रहाय पुनः प्रकारान्तरेण प्रार्थ्यते—**स्वस्ति न** इति । **इन्द्रः** त्रिलोकीपतिः **वृद्धश्रवाः** बृहत्कीर्तिः **नो** अस्माकं अखण्डाकारवृत्तिमन्मनः **स्वस्त्यस्तु** इत्यनुगृह्णातु । **विश्ववेदाः** सर्वज्ञः **पूषा नो** अस्माकं नृसिंहस्मरणं **स्वस्ति** अविच्छिन्नं भवतु इत्यनुगृह्णातु । अरिष्टा अकुण्ठिता नेमिः गतिः यस्य सोऽयं **अरिष्टनेमिः** **तार्क्ष्यः नो** अस्माकं मनो नृसिंहतत्त्वैकतानं **स्वस्ति** स्यादित्यनुगृह्णातु । **बृहस्पतिः नो** अस्माकं करणजालं **स्वस्ति** नृसिंहपर्यवसन्नं **दधातु** ददातु अनुगृह्णातु इति सर्वत्र योज्यम् । विद्याद्वयोपसर्गाध्यात्मिकादितापत्रयनिरसनाय इयं शान्तिः त्रिः पठ्यते—**ॐ शान्तिः शान्तिः शान्तिरिति** ॥

जगत्सृष्टेः प्रजापतिकाममूलत्वम्

आपो वा इदमासन् सलिलमेव । स प्रजापतिरेकः पुष्करपर्णे समभवत् । तस्यान्तर्मनसि कामः समवर्तत इदं सृजेयमिति । तस्माद्यत् पुरुषो मनसाऽभिगच्छति तद्वाचा वदति तत् कर्मणा करोति । तदेषाऽभ्यनूक्ता—

कामस्तदग्रे समवर्ततधि मनसो रेतः प्रथमं यदासीत् ।
सतो बन्धुमसति निरविन्दन् हृदि प्रतीष्या कवयो मनीषा ॥ इति ॥

उपैनं तदुपनमति यत्कामो भवति य एवं वेद ॥ १ ॥

मन्त्रराजस्य दुर्लभत्वप्रदर्शनाय इतिहासमवतारयति—**आपो वा** इति । एतन्मन्त्रार्थो बृहज्जाबालोपनिषदि वर्णितः ।

[स एव झटिति प्रत्यायनार्थं अत्र संयोज्यते—

प्रळयकालीना **आपो** वै प्रसिद्धा अनभिव्यक्तनामरूपं **इदं** अविद्याऽण्डं **आसन् सलिलमेव** । न हि सलिलादतिरिक्तं किंचिदस्ति । तत्र बृहज्जाबाल-मन्त्रद्रष्टा यः **सोऽयं प्रजापतिः एकः पुष्करपर्णे** नारायणनाभिपद्मे **समभवत्** । **तस्य** प्रजापतेः **अन्तः मनसि कामः समवर्त** । किमिति ? इदं अनन्तकोटि-ब्रह्माण्डात्मकं अविद्याऽण्डं **सृजेयमिति** । यस्मात् अयं जगत्स्रष्टुकामो भवति **तस्माद्यत्पुरुषः मनसा** अन्तःकरणेन **अभिगच्छति** निश्चिनोति यन्मनसि स्मृतं **तद्वाचा वदति** यद्वाचोक्तं **तत्** शरीरनिर्वर्त्यकर्मणा **करोति** । ब्राह्मणोक्तेऽर्थे **तदेषा अभ्यनु** पश्चात् **उक्ता** । वक्ष्यमाणाविद्याऽण्डोद्भूतेः **अग्रे** प्राक् **अधिकत्वेन कामोऽभिलाषः समवर्तत** । कामः क्व जातः इत्यत्र **मनसोऽन्तःकरणस्य यत् रेतो** वीर्यं **प्रथमं आसीत्** स कामो भवतीति पूर्वेणान्वयः । न हि संकल्पातिरिक्तं मनोऽस्तीति विचिन्त्यताम्, 'काम जानामि ते रूपं संकल्पात् किल जायसे' इति स्मृतेः । **सतः** चक्षुर्ग्राह्यप्रपञ्चस्य बन्धुरिवोपकारकत्वात् कामो **बन्धुः असति** अचाक्षुषे ब्रह्मणि **निरविन्दन्** निःशेषं अगमन् **कवयो** मनसः ईष्ट इति मनीट् धीः तया **मनीषा हृदि प्रतीष्या** अवलोक्य ॥]

उप समीपे **एनं** कामिनं **उपनमति** प्राप्नोति यस्मिन् गृहक्षेत्रादिविषये कामो यस्य स **यत्कामो भवति य एवं वेद** ॥ १ ॥

सर्वजगतः आनुष्टुभत्वम्

स तपोऽतप्यत । स तपस्तप्त्वा स एवं मन्त्रराजं नारसिंह-मानुष्टुभमपश्यत् । तेन वै सर्वमिदमसृजत यदिदं किंच । तस्मात् सर्वमानुष्टुभमित्याचक्षते यदिदं किंच । अनुष्टुभो वा इमानि भूतानि जायन्ते । अनुष्टुभा जातानि जीवन्ति । अनुष्टुभं प्रयन्त्यभिसं-

विशन्ति । तस्यैषा भवति । अनुष्टुप्प्रथमा भवति । अनुष्टुबुत्तमा भवति । वाग्वा अनुष्टुप् । वाचैव प्रयन्ति । वाचोद्यन्ति । परमा वा एषा छन्दसां यदनुष्टुबिति ॥ २ ॥

सोऽन्तर्मनसि सञ्जातकामः प्रजापतिः **तपोऽतप्यत** । केन प्रकारेण ? इदं सृजेयं इत्यालोचनमकुरुत । **स तपस्तप्त्वा** पर्यालोचनं कृत्वा **स** प्रजापतिः **एतं** वक्ष्यमाणं सप्तकोटि**मन्त्रराजं नारसिंहं** नृसिंहदेवत्वात् **आनुष्टुभमपश्यत्** । **तेन वै** तेनैव **सर्वमिदं** स्वाधापदतत्कार्यजातं **असृजत** । किं तत् सर्वं ? **यदिदं किंच** यत्किंचेदं अनन्तकोटिब्रह्माण्डात्मकं विश्वं असृजत् । यस्मात् एतत् सर्वं अनुष्टुभा सृष्टवान् **तस्मादिदं सर्वं आनुष्टुभमित्याचक्षते** कथयन्ति तदियत्तावित्दः । **यदिदं किंचेति** व्याख्यातम् । सर्वस्यानुष्टुभत्वे को हेतुः ? इत्यत आह—**अनुष्टुभ** इति । **अनुष्टुभो वै** द्वात्रिंशदक्षरात् अभिन्ननिमित्तोपादानात् सर्वज्ञत्वादिलक्षणात् **इमानि** स्थावरजङ्गमानि **भूतानि जायन्ते** यथोक्तानुष्टुभा **जातानि जीवन्ति** प्राणान् धारयन्ति **अनुष्टुभं प्रयन्ति अनु** सम्यक् प्रवेशं कुर्वन्ति । एवमस्तु, अनुष्टुभः मन्त्रराजस्य किं आयातं ? इत्यत आह—**तस्यैषा भवती**ति । **तस्य** मन्त्रराजस्य **एषा** अभिधा अनुष्टुबिति **भवति** । यद्वा—**तस्य** अनुष्टुभः प्रकाशिका **एषा** वक्ष्यमाणा ऋक् **भवति** । इदानीं अनुष्टुप्साम्नः स्वरानाह—**अनुष्टुबिति** । **अनुष्टुप्प्रथमा** आद्यस्वरयुक्ता **भवति** । तथा **अनुष्टुबुत्तमा** अन्त्यस्वरयुक्ता **भवति** । स्वरवती **वाग्वा अनुष्टुप्** । लौकिकादिशब्दरूपिण्या **वाचैव प्रयन्ति** सर्वाणि भूतानि स्थितिनाशावाप्नुवन्ति । तथा **वाचा** इच्छया **उद्यन्ति** उदयं गच्छन्ति । यस्मादेवं वाग्रूपिण्यनुष्टुप् तस्मात् नानागायत्र्यादिछन्दसां **परमैषा अनुष्टुप्** । **इति**शब्दो मन्त्रसमाप्त्यर्थः ॥ २ ॥

मन्त्रराजस्य पादचतुष्टयम्

ससागरां सपर्वतां सप्तद्वीपां वसुन्धरां तत् साम्नः प्रथमं पादं जानीयात् । यक्षगन्धर्वाप्सरोगणसेवितमन्तरिक्षं तत् साम्नो द्वितीयं

पादं जानीयात् । वसुरुद्रादित्यैः सर्वैर्देवैः सेवितं दिवं तत्साम्नस्तृतीयं पादं जानीयात् । ब्रह्मस्वरूपं निरञ्जनं परमं व्योमकं तत्साम्नश्चतुर्थं पादं जानीयात् । यो जानीते सोऽमृतत्वं च गच्छति ॥ ३ ॥

ऋग्यजुःसामाथर्वाणश्चत्वारो वेदाः साङ्गाः सशाखाश्चत्वारः पादा भवन्ति ॥ ४ ॥

चतुष्पादात्मकमन्त्रराजस्याद्यं पादमाह—**सागरामिति** । लवणादिसप्तसागरसहितां **ससागरां** मेर्वादिपर्वतकोटिसहितां **सपर्वतां** जम्ब्वादि**सप्तद्वीप**परिच्छिन्नां **वसुन्धरां** भूलोकाभिधां **तत्साम्नो** मन्त्रराजस्य अष्टाक्षरात्मकं **प्रथमं पादं जानीयात्** । कुबेरानुचराः यक्षाः, देवगायकाः गन्धर्वाः, स्वर्वेश्याः अप्सरसः, तद्विशिष्टं **यक्षगन्धर्वाप्सरोगणसेवितं अन्तरिक्षम्** । अष्टौ **वसवः** एकादश **रुद्राः** द्वादश **आदित्याः** तैः **सर्वैः सेवितं दिवम्** । सत्यादिलक्षण**ब्रह्मस्वरूपं** स्वाज्ञदृष्टिविकल्पितप्रपञ्चे स्वज्ञदृष्ट्या **निरञ्जनं परमं** निरतिशयं **व्योमकं** हृदयाकाशे कं सुखस्वभावम् । एवं चतुष्पादोपासनाफलमेतत्—**यः** उपासकः एवं **जानीते** सोऽयं सालोक्यादिक्रममुक्तिद्वारा मुख्यं **अमृतत्वं च गच्छति** सम्यज्ज्ञानद्वारेत्यर्थः ॥ ३ ॥ अस्य ऋगादयोऽपि पादाः भवन्तीत्याह—**ऋगिति** । शिक्षाऽऽदिषडङ्गसहिताः **साङ्गाः** आश्वलायनकाण्वतैत्तिरीयकौथुमाङ्गिरसाद्यशीत्यधिकशतोत्तरसहस्रशाखासहिताः **सशाखाः** यथाक्रमेण **चत्वारः पादाः भवन्ति** ॥ ४ ॥

ऋषिच्छन्दोदेवतादिप्रश्नः

किं ध्यानं किं दैवतं कान्यङ्गानि कानि दैवतानि किं छन्दः क ऋषिरिति ॥ ५ ॥

ऋषिच्छन्दोदैवतानां मन्त्राङ्गतया श्रुतिः स्वयमेव प्रश्नमवतारयति—**किं ध्यानमिति** । किं ध्यानं चिन्तनं किं दैवतं को वा देवोऽस्य मन्त्राधिष्ठाता

कान्यङ्गानि अङ्गमन्त्राः कियन्तः कानि दैवतानि मन्त्राङ्गाधिष्ठातृदैवतानि किं छन्दः केन छन्दसा युक्तोऽयं मन्त्रः क ऋषिः मन्त्रद्रष्टा कीदृशः इत्येवं देवाः प्रश्नं चक्रुरित्यूह्यम्, उत्तरत्र प्रश्नप्रतिवचनदर्शनात् ॥ ५ ॥

सपादसाङ्गमन्त्रविद्याफलम्

स होवाच प्रजापतिः—स यो ह वै सावित्रस्याष्टाक्षरं पदं श्रियाऽभिषिक्तं तत्साम्नोऽङ्गं वेद श्रिया हैवाभिषिच्यते । सर्वे वेदाः प्रणवादिकास्तं प्रणवं तत्साम्नोऽङ्गं वेद स त्रीन् लोकान् जयति । चतुर्विंशत्यक्षरा महालक्ष्मीर्यजुस्तत्साम्नोऽङ्गं वेद स आयुर्यशः-कीर्तिज्ञानैश्वर्यवान् भवति । तस्मादिदं साङ्गं साम जानीयाद्यो जानीते सोऽमृतत्वं च गच्छति ॥ ६ ॥

प्रश्नोत्तरं क्रमेण प्रजापतिराह—**स होवाचेति** । मन्त्राङ्गादीन् पश्चाद्विवक्षन् मन्त्रराजपादचतुष्टयाङ्गमन्त्रविदः फलमाह—**स य इति** । **स यो ह वै** मन्त्रराजानुष्ठानपरो यः कश्चित् मन्त्रराजाङ्गत्वेन चतुर्थोपनिषद्विद्यमानः **सावित्रोऽष्टाक्षरस्तस्य** घृणिरित्याद्यं **पदं** मन्त्रराजसामगायकेन **श्रिया अभिषिक्तं** श्रीबीजपूर्वकं **तत्साम्नोऽङ्गं वेद**, वेदनफलं तु हस्त्यश्वहिरण्यधनधान्यरूपया **श्रिया हैवाभिषिच्यते** सर्वतः श्रियमाप्नोति । प्रणवस्य मन्त्रराजाङ्गत्वं विवक्षन् स्तौति—**सर्व इति** । ऋग्वेदाद्याः **सर्वे वेदाः प्रणवादिकाः** सर्ववेदानां प्रणवपूर्वकत्वात् "यो वेदादौ स्वरः प्रोक्तः" इति श्रुतेः । **तं प्रणवं तत्साम्नोऽङ्गं वेद सोऽयं** प्रणवाङ्गवित् **त्रीन्** भूरादिलोकान् **जयति** आधिष्ठातृत्वेनाप्नोति । **चतुर्विंशत्यक्षरा महालक्ष्मीः यजुः** यजूरूपत्वेन चतुर्थोपनिषदि वक्ष्यमाणत्वात् **तत्साम्नोऽङ्गं वेद स आयुर्यशःकीर्त्तिज्ञानैश्वर्यवान्** मानुषैश्वर्यसंपन्नः सार्वभौमो भवति । **तस्मादिदं** द्वात्रिंशदक्षरं **साङ्गं साम जानीयात्** । **यो जानीते** इत्यादि समानम् ॥ ६ ॥

साङ्गसामविद्यायां स्त्रीशूद्रयोरनधिकारः

सावित्रीं प्रणवं यजुर्लक्ष्मीं स्त्रीशूद्राय नेच्छन्ति । द्वात्रिंशदक्षरं साम जानीयाद्यो जानीते सोऽमृतत्वं च गच्छति । सावित्रीं लक्ष्मीं यजुः प्रणवं यदि जानीयात् स्त्रीशूद्रः स मृतोऽधो गच्छति तस्मात् सर्वदा नाचष्टे यद्याचष्टे स आचार्यस्तेनैव स मृतोऽधो गच्छति ॥ ७ ॥

अमृतास्तेः सर्वेष्टत्वात् साङ्गसाम्नः सर्वाधिकारे प्राप्ते स्त्रीशूद्रयोरधिकारं व्यावर्तयति—**सावित्रीमिति** । सन्तः सावित्रादिकं स्त्रियश्च शूद्राश्च **स्त्रीशूद्रं** तस्मै दातुं **नेच्छन्ति** स्त्रीशूद्रयोः अनधिकारं मन्यन्ते । इत्थं स्त्रीशूद्रास्पृष्टं **द्वात्रिंशदक्षरं साम जानीयात्** इत्यादि समानम् । स्त्रीशूद्रयोः आचार्याणां दातुमिच्छाऽभावेऽपि येन केनचिदुपायेन स्त्रीशूद्राभ्यां एतत्साम यदि लब्धं तदा तावपि मन्त्रराजमहिम्ना कृतकृत्यौ स्यातां इत्यत्र शिष्याचार्ययोः अधःपतनमेव स्यादित्याह—**सावित्रीमिति** । सावित्र्यादिकं **स्त्रीशूद्रजातिः** उपायान्तरेण यदि **जानीयात्** वेदनमात्रेण **स मृतोऽधो गच्छति** तयोः अत्रैवर्णिकत्वात् । यस्मादेवं **तस्मात्** सावित्रादिकं **सर्वदा** सर्वापद्यपि **नाचष्टे**, न हि सदाचार्यः कथयति । **यद्याचष्टे** तदा स्त्रीशूद्रगुरुः सोऽयं अपकीर्तिभाक् व्याध्यादिना मृतः ततः कुम्भीपाकादिनरकजातमनुभूय ततः सूकरादियोनिं स्थावरभावं वा गच्छति ॥७॥

लोकवेदब्रह्मादिरूपेण सामध्यानम्

स होवाच प्रजापतिः—अग्निर्वै देवा इदं सर्वं विश्वा भूतानि प्राणा वा इन्द्रियाणि पशवोऽन्नममृतं सम्राट् स्वराड्विराट् तत्साम्नः प्रथमं पादं जानीयात् । ऋग्यजुःसामाथर्वरूपः सूर्योऽन्तरादित्ये हिरण्मयः पुरुषस्तत्साम्नो द्वितीयं पादं जानीयात् । य ओषधीनां

प्रभुर्भवति ताराधिपतिः सोमस्तत्साम्नस्तृतीयं पादं जानीयात्। स ब्रह्मा स शिवः स हरिः सेन्द्रः सोऽक्षरः परमः स्वराट् तत्साम्नश्चतुर्थं पादं जानीयाद्यो जानीते सोऽमृतत्वं च गच्छति ॥ ८ ॥

तिष्ठत्वेतत्, किं ध्यानं इत्यादिप्रश्नोत्तरं किं? इत्यत आह—**स हेति**। भूलोकाधारत्वेन **अग्निर्वै** प्रसिद्धः देवाः इन्द्रादयः विविधप्रत्ययगम्यं **इदं** सर्वं सर्वशब्दार्थं **विश्वा** विश्वानि सर्वाणि **भूतानि प्राणाः** पञ्चवृत्त्यारूढाः **वै** प्रसिद्धाः कर्मज्ञानभेदेन दशेन्द्रियाणि ग्राम्यारण्यभेदेन **पशवः** अदनीयं **अन्नं** देवोपभोग्यं **अमृतं** च विशेषज्ञानोपरमणलक्षणस्वापे प्राज्ञात्मना सम्यक् राजत इति **सम्राट्** बाह्यसाधनमनपेक्ष्य तैजसात्मना स्वयमेव राजत इति **स्वराट्** कार्यकारणसंघातमवष्टभ्य विश्वात्मना राजत इति **विराट् तत्साम्नः प्रथमं पादं जानीयात्**। वेदचतुष्टयात्मनः ऋग्यजुस्सामाथर्वणरूपः शोभनगतित्वात् **सूर्यः अन्तरादित्ये हिरण्मयः पुरुषः**, "य एषोऽन्तरादित्ये हिरण्मयः पुरुषो दृश्यते" इत्यादिश्रुतेः। तत्साम्नो द्वितीयं पादं जानीयात्। **य ओषधीनां प्रभुर्भवति ताराणां** नक्षत्राणां **अधिपतिः सोमश्चन्द्रः** तत्साम्नः तृतीयं पादं जानीयात्। यो निर्गुणात्मा नृसिंहः सोऽयं विधिशिवहरीन्द्रभेदात् **स ब्रह्मा स शिवः स हरिः सेन्द्रः सोऽक्षरः** अविनाशित्वात् सर्वोत्कृष्टत्वात् **परमः** विराडादीननपेक्ष्य स्वेन रूपेण राजत इति **स्वराट् तत्साम्नः चतुर्थं पादं** इत्यादि समानम् ॥ ८ ॥

सप्तस्वरसामोद्धारः

उग्रं प्रथमस्याद्यं ज्वलं द्वितीयस्याद्यं नृसिं तृतीयस्याद्यं मृत्यु चतुर्थस्याद्यं साम जानीयाद्यो जानीते सोऽमृतत्वं च गच्छति। तस्मादिदं साम यत्र कुत्रचिन्नाचष्टे यदि दातुमपेक्षते पुत्राय शुश्रूषवे [1]दास्यत्यन्यस्मै [2]शिष्याय वेति स होवाच प्रजापतिः ॥ ९ ॥

[1] दास्यत्व—अ, अ१. [2] वा शिष्याय वा चेति—उ, उ१. शिष्याय वाच्येति—अ, अ१.

लोकवेदब्रह्मादिरूपेण सामध्यानमुक्त्वा अथेदानीं सप्तस्वरं सामोद्गरति—**उग्रमिति** । उग्रमित्यक्षरनिर्देशः **प्रथम**पादस्याद्यं आद्यन्तस्वरयुक्तत्वात्, **ज्वल**मित्यक्षरनिर्देशः **द्वितीय**पादस्याद्यं, **नृसिमि**त्यक्षरनिर्देशः **तृतीय**पादस्य **आद्यं**, तथा **मृत्युमिति चतुर्थ**पादस्य **आद्यं साम जानीयात्** इत्यादि समानम् । यस्मादेतदतिगोप्यं **तस्मादेतत्** यत्र कुत्रापि न प्रकाशयेत् । यदि प्रकाशितुमिच्छा तदा **पुत्राय** शिष्याय वा प्रकाशयेत् इत्याह—**तस्मादिति** । **इति**शब्दः आद्यक्षरसामसमाप्त्यर्थः ॥ ९ ॥

क्षीरोदार्णवसामोद्गारः

क्षीरोदार्णवशायिनं नृकेसरिं योगिध्येयं परमं पदं साम जानीयाद्यो जानीते सोऽमृतत्वं च गच्छति ॥ १० ॥

इदानीं मन्त्रादिदेवतायाथात्म्यप्रकटनाय क्षीरोदार्णवसामोद्गारामृचं पठति—**क्षीरोदेति** । **क्षीरोदार्णवशायिनं** क्षीरसमुद्रशेषतल्पयोगासनारूढं ना चासौ केसरी चेति त्वंतत्पदार्थलक्ष्यम् । यद्वा—नरवपुषं सिंहास्यं व्याविद्धसंसारतत्कार्यैः **योगिभिः ध्येयं** सर्वोत्कृष्टत्वेन यत् पदनीयं तत् **परमं पदं** यथासंप्रदायं **साम जानीयात्** । **यो जानीते सोऽमृतत्वं च गच्छति** ॥ १० ॥

परार्धान्त्यादिज्ञानफलम्

वीरं प्रथमस्याद्यार्धान्त्यं तंस द्वितीयस्याद्यार्धान्त्यं हंभी तृतीयस्याद्यार्धान्त्यं मृत्युं चतुर्थस्याद्यार्धान्त्यं साम जानीयाद्यो जानीते सोऽमृतत्वं च गच्छति । तस्मादिदं साम येन केनचिदाचार्यमुखेन यो जानीते स तेनैव शरीरेण संसारान्मुच्यते मोचयति मुमुक्षुर्भवति । [1]जपात्तेनैव शरीरेण देवतादर्शनं करोति

[1] जपान्तेऽनेनैव—क्रौं जपान्ते तेनैव—उ, उ १.

तस्मादिदमेव मुख्यद्वारं कलौ नान्येषां भवति तस्मादिदं साङ्गं साम जानीयाद्यो जानीते सोऽमृतत्वं च गच्छति ॥ ११ ॥

पदार्धान्त्यादिज्ञानफलमाह—**वीरमिति** । वीरमित्यक्षरनिर्देशः **प्रथमस्याद्यार्धान्त्यं** उक्ताक्षरद्वयप्रथमार्धं अन्त्यं अन्त्यस्वरेण अनुदात्तस्वरेण युक्तं अर्धान्त्यं, परिशेषात् शिष्टं स्वरितस्वरयुक्तं **तंस द्वितीयस्याद्यार्धान्त्यं, हंभी तृतीयस्याद्यार्धान्त्यं मृत्युं चतुर्थस्याद्यार्धान्त्यं साम जानीयात्** इत्यादि समानम् । एतत्साम विशिष्टफलं यस्मा[illegible]ह—**तस्मादिति** । यस्मादेतत् साम पुरुषार्थसाधकं **तस्मादिदं साम येन केनचिदाचार्यमुखेन** न त्वन्येन साधनान्तरेण **यो जानीते सोऽयं** आचार्यमुखोदितसामज्ञानेनैव जन्मादि**संसारान्मुच्यते** । यदि पुरा स्वयं **मुमुक्षुः** तदा स्वयं मुक्तः सन् परानपि **मोचयति** सामराजोपदेशच्छलेन मोचको भवतीत्यर्थः । ज्ञानफलमुक्त्वा जपफलमाह—**जपात्तेनेति** । येन शरीरेण मन्त्रराजप्रश्वरणं कृतं **तेनैव शरीरेण देवतादर्शनं करोति** जाग्रदवस्थायामेव भगवन्तं साक्षात्करोति । यतः एवं अतः इदमेव तत्पदप्रापकं **मुख्यद्वारं** अपिच अस्मिन्नेव जन्मनि देवतादर्शनं **कलौ नान्येषां** मन्त्रराजसामपराङ्मुखानां **भवति** । यतोऽस्मिन्नेव जन्मनि जागरणे देवतादर्शनं भवति अतः **इदं साङ्गं साम जानीयात्** मुमुक्षुर्भवति ॥ ११ ॥

यजुर्वेदवाच्यनृसिंहज्ञानफलम्

ऋतं सत्यं परं ब्रह्म पुरुषं नरकेसरिविग्रहं कृष्णपिङ्गलम् ।
ऊर्ध्वरेतं विरूपाक्षं शंकरं नीललोहितम् ॥
उमापतिः पशुपतिः पिनाकी ह्यमितद्युतिः ।
ईशानः सर्वविद्यानामीश्वरः सर्वभूतानां ब्रह्माधिपतिर्ब्रह्मणोऽधिपतिः॥

यो वै यजुर्वेदवाच्यस्तं हि साम जानीयाद्यो जानीते सोऽमृतत्वं च गच्छति ॥ १२ ॥

इदानीं पुनः देवताध्यानं विवक्षुः तत्साधनभूते ऋचौ पठति—**ऋतमिति** । यदवश्यं भाविकर्मफलं तत् **ऋतं** कालत्रयाबाध्यं **सत्यं** सर्वोत्कृष्टं **परं** परिच्छेदत्रयातीतं **ब्रह्म** शिरःपाण्यादिमन्तं **पुरुषं नृकेसरिविग्रहं** अधऊर्ध्वतो नरसिंहदेहं कण्ठनेत्रयोः **कृष्णपिङ्गळं ऊर्ध्वरेतं** रेतसं **विरूपाक्षं** विषमाक्षं त्र्यक्षत्वात् स्वांशजप्राणिसुखकरत्वात् **शंकरं** करपादतलजिह्वासु **नील-लोहितम्**। यद्वा—कण्ठे नीलं करादिषु लोहितं, अस्मिन् पक्षे कृष्णपिङ्गळम्(?)। एवं कृष्णपिङ्गळनीललोहितदर्शनात् चित्रवर्णो नृसिंहोऽवगम्यते । **उमापतिः** गिरिजापतित्वात् पशूनां जीवानां पतित्वात् **पशु..तः** पिनाको धनुः अस्यास्तीति **पिनाकी** । शार्ङ्गिणः पिनाकित्वं कथं? इत्यत्र नृसिंहस्य सर्वदेवात्मकत्वात् उपपद्यते । अत एवायं **अमितद्युतिः** कोटिसूर्यसमद्युतित्वात् । लौकिकवैदिकभेदेन **सर्वविद्यानामीशानः** सर्वविद्यावेद्यतया स्थातुं शक्तत्वात् । तथा **सर्वभूतानां ईश्वरः** सर्वनियन्तृत्वात् । सर्वविद्याभूतेशितृत्वे हेतुः—**ब्रह्माऽधिपतिः** सर्वात्मकत्वे सति सर्वोत्पादकत्वात् । न केवलं उत्पादकं किंतु **अधिपतिः** स्वातिरिक्तसर्वमधिष्ठाय पालयितृत्वात् । **ब्रह्मणः** चतुराननादेरपि **अधिपतिः** चतुराननादिमधिष्ठाय पालयितृत्वात् । एवं सृष्टिस्थितिसंहारेषु स्वतन्त्रोऽयमित्यर्थः । **यो ह वै यजुर्वेदवाच्यो नृसिंहः तं ईशानाख्यं साम जानीयात्** इत्यादि समानम् ॥ १२ ॥

सामतृतीयावयववेदनफलम्

महा प्रथमान्तार्धस्याद्यं र्वतो द्वितीयान्तार्धस्याद्यं षणं तृतीयान्तार्धस्याद्यं नमा चतुर्थान्तार्धस्याद्यं साम जानीयाद्यो जानीते सोऽमृतत्वं च गच्छति । तस्मादिदं साम सच्चिदानन्दमयं परं ब्रह्म तमेवं विद्वानमृत इह भवति तस्मादिदं साङ्गं साम जानीयाद्यो जानीते सोऽमृतत्वं च गच्छति ॥ १३ ॥

सामतृतीयावयववेदनफलमाह—**महेति** । **महे**त्यक्षरनिर्देशः प्रथमान्तोर्धा स्यात्। यदेतदुक्तमक्षरद्वयं तस्याद्योदात्तं स्वरं जानीयात् इति शेषः। एवं द्वितीयादिषु व्याख्येयम्। एवं **साम जानीयात्** इत्यादि समानम्॥ १३॥

मन्त्रराजसाममाहात्म्यम्

विश्वसृज एतेन वै विश्वमिदमसृजन्त यद्विश्वमसृजन्त तस्माद्विश्वसृजो विश्वमेवानु प्रजायते ब्रह्मणः सलोकतां सार्ष्टितां सायुज्यं यन्ति तस्मादिदं साङ्गं साम जानीयाद्यो जानीते सोऽमृतत्वं च गच्छति॥ १४॥

मन्त्रराजसाम्नो माहात्म्यं किं? इत्यत आह—**विश्वेति**। विश्वं सृजन्तीति **विश्वसृजो** ब्रह्मादेयः **एतेन वै** मन्त्रराजसाम्ना विविधप्रत्ययगम्यं **विश्वमिदं असृजन्त** उत्पादितवन्तः **यद्यस्मात् विश्वं असृजन्त तस्मात् विश्वसृजः** विश्वज्ञानपौष्कल्यात् इदं **विश्वं एनान्** विश्वसृजोऽनु **प्रजायते** प्रकर्षेणोत्पद्यते **ब्रह्मणो** हिरण्यगर्भस्य नृसिंहावतारस्य **सलोकतां** समानलोकतां **सार्ष्टितां** तादात्म्यं **सायुज्यं** सयुग्भावं च यन्ति। **इदं साङ्गं साम जानीयात्** इत्यादि समानम्॥ १४॥

पादचतुष्टयान्त्यस्वरद्वयं तज्ज्ञानफलं च

विष्णुं प्रथमान्त्यं मुखं द्वितीयान्त्यं भद्रं तृतीयान्त्यं म्यहं चतुर्थान्त्यं (साम जानीयाद्यो जानीते सोऽमृतत्वं च गच्छति) योऽसौ वेद यदिदं किंचात्मनि ब्रह्मण्येवानुष्टुभं जानीयाद्यो जानीते सोऽमृतत्वं च गच्छति स्त्री[1]पुंसयोर्वा। य इहैव स्थातुमपेक्षते तस्मै

[1] पुंसोर्वा—अ, अ १, उ.

सर्वैश्वर्यं ददाति । यत्र कुत्रापि म्रियते देहान्ते देवः परमं ब्रह्म तारकं व्याचष्टे येनासावमृतीभूत्वा सोऽमृतत्वं च गच्छति ॥ १५ ॥

मन्त्रराजपादचतुष्टयान्त्यस्वरद्वयतज्ज्ञानफलं चाह—**विष्णुमिति** । **विष्णुमित्याद्यक्षरनिर्देशः प्रथमान्त्यं** प्रथमपादोक्तमक्षरं अन्त्यानुदात्तस्वरयुक्तं प्रथमान्त्यम्। एवं द्वितीयादिपादेषु व्याख्येयम्। **यः** प्रसिद्धोऽसौ साम्नः पादश उक्तः सर्वजगत्साक्षी नृसिंहः वेद जानाति । किं तर्ह्ययं तटस्थः ? इत्यत्र **यदिदं किंच** यत्किंचेदं चेतनाचेतनात्मकं तदसावित्यर्थः । मन्त्रराजोपासकात्मनि **ब्रह्मण्येवानुष्टुभं जानीयात् यो जानीत** इति समानम् । **स्त्रीपुंसयोर्वा** तज्ज्ञानादमृतत्वं भवतीत्युक्त्या ब्राह्मणादीनां तज्ज्ञानतोऽमृतत्वं भवतीति किं वक्तव्यम् । **यः** कश्चन **इह** लोके यशःकीर्तिज्ञानैश्वर्यादिना **स्थातुमपेक्षते तस्मै** अयं मन्त्रराजः **सर्वैश्वर्यं ददाति** । किं तत्फलं जीवतः ? इत्यत्र **यत्र कुत्रापि** यदि **म्रियेत** तदा तत्रैव देवस्तारकात्मा भगवान् नृसिंहः **परमं ब्रह्मतारकं व्याचष्टे** तुर्योङ्काराग्रविद्योतं ब्रह्मप्रणवाख्यं कथयति । तारकत्वमेवोपपादयति—**येनेति** । **येन** तारकोपदेशेन **असावमृतीभूत्वा** जीवन्मुक्तो भूत्वा **सोऽयं** तारकब्रह्मवित् **अमृतत्वं च गच्छति ॥ १५ ॥**

एतद्विद्यामहिमा

तस्मादिदं साममध्यगं जपति तस्मादिदं सामाङ्गं प्रजापतिस्तस्मादिदं सामाङ्गं प्रजापतिर्य एवं वेदेति महोपनिषत् । य एतां महोपनिषदं वेद स कृतपुरश्चरणो महाविष्णुर्भवति महाविष्णुर्भवति ॥ १६ ॥

यतो ज्ञानशून्यानामपि अन्ते ज्ञानं प्रयच्छति तत इदं क्षीरोदार्णवादिसामजातं बुद्धौ निहितं तारकं प्रणवं वा यथासंप्रदायं **साममध्यगं** साम्नो मध्यमो मध्यस्वरः तस्मिन् गतं मध्यगं **जपति** जपेत् । यत इदं साममध्यगं जाप्यं तस्मात् **इदं** उक्तं वक्ष्यमाणं चाङ्गजातं **साम चाङ्गं** चेति वा **प्रजापतिः** ।

वाक्याभ्यासः सामोद्धारसमाप्त्यर्थः । य एवं नृसिंहाराधको वेद जानाति सोऽपि प्रजापतिर्भवतीति महोपनिषत् । य एतामुक्तलक्षणां महोपनिषदं वेद सोऽयं अकृतपुरश्चरणोऽपि कृतपुरश्चरणः सन् महाविष्णुर्भवति । अभ्यासः प्रथमोपनिषत्समाप्त्यर्थः ॥ १६ ॥

इति प्रथमोपनिषत्

द्वितीयोपनिषत्

नारसिंहमन्त्रराजस्य संसारतारकत्वम्

देवा ह वै मृत्योः पाप्मभ्यः संसाराच्च [1]बिभीयुः ते प्रजापतिमुपाधावन् तेभ्य एतं मन्त्रराजं नारसिंहमानुष्टुभं प्रायच्छत् तेन वै ते मृत्युमजयन् पाप्मानं चातरन् संसारं चातरन् तस्माद्यो मृत्योः पाप्मभ्यः संसाराच्च बिभीयात् स एतं मन्त्रराजमानुष्टुभं प्रतिगृह्णीयात् स मृत्युं [2]जयति स पाप्मानं तरति स संसारं तरति ॥१॥

यो जानीते सोऽमृतत्वं च गच्छतीत्यसकृत् यदुक्तं तत् दृढीकर्तुं आख्यायिकामवतारयति—देवा इति । देवाः अभ्यादयः ह्वा इति स्मर्यमाणा मृत्योः मारकात् स्वाज्ञानात् पाप्मभ्यः दुःखहेतुभ्यः घटीयन्त्रवत् उच्चावच-जननीजठरकूपगमनागमनलक्षणसंसाराच्च बिभीयुः भृशं सन्त्रस्ताः । ते देवाः प्रकृतानर्थव्रातनिवृत्त्यर्थं स्वभयत्रातारं प्रजापतिं शास्त्रोक्तविधिना उपाधावन् तत्समीपं गतवन्तः । तेभ्यः स्वसमीपमागतेभ्यः मृत्युपापसंसारभीतेभ्यः एतं

[1] बिभियुः—अ २, क. [2] तरति—अ, अ १, अ २, क.

मन्त्रराजं नारसिंहं आनुष्टुभं प्रायच्छत् दत्तवान् । **तेन वै मन्त्रराजेन ते** प्राजापत्याः देवाः **मृत्युमजयन् पाप्मानं चातरन् संसारं चातरन्** सांसारिक-सुखाद्यसंस्पृष्टाः जीवन्मुक्ताः भवेयुरित्यर्थः । यस्मादेवं **तस्मात् यो मुमुक्षुः** देवतासंघवत् **मृत्योः पाप्मभ्यः संसाराच्च** जन्ममरणादिलक्षणतो **बिभीयात् सोऽयं मुनिः एतं** उक्तलक्षणं **आनुष्टुभं प्रतिगृह्णीयात्** गुरुमुखात् । ग्रहणमात्रतः **स मृत्युं** उक्तलक्षणं **जयति स पाप्मानं संसारं च तरति** अतिक्रामति । प्रथमोपनिषदि प्रजापतेः मन्त्रद्रष्टृत्वेन ऋषित्वं सिद्धं अत्र पुनः देवाचार्यत्वेन दृढीकृतम् ॥ १ ॥

प्रणवपादानां सामपादतादात्म्यम्

तस्य ह वै प्रणवस्य या पूर्वा मात्रा पृथिव्यकारः स ऋग्भिः ऋग्वेदो ब्रह्मा वसवो गायत्री गार्हपत्यः सा प्रथमः पादो भवति । द्वितीयाऽन्तरिक्षं स उकारः स यजुर्भिर्यजुर्वेदो विष्णुः रुद्रास्त्रिष्टुब्दक्षिणाग्निः सा द्वितीयः पादो भवति । तृतीया द्यौः स मकारः स सामभिः सामवेदो रुद्रा आदित्या जगत्याहवनीयः सा तृतीयः पादो भवति । याऽत्रसानेऽस्य चतुर्थ्यर्धमात्रा सा सोमलोक ओंकारः साऽथर्वणैर्मन्त्रैरथर्ववेदः संवर्तकोऽग्निर्मरुतो विराडेकर्षिर्भास्वती स्मृता सा साम्नश्चतुर्थः पादो भवति ॥ २ ॥

कान्यङ्गानि कानि दैवतानि किं छन्दः कः ऋषिः इति प्रश्नोत्तरं विवक्षुः प्रणवस्य मुख्याङ्गत्वात् प्रणवव्याप्तिं सामपादतादात्म्येनाह —**तस्येति** । **तस्य ह वै** सर्वशास्त्रप्रसिद्धत्वेन विद्वत्स्मर्यमाणस्य **प्रणवस्य या पूर्वा मात्रा** प्रसिद्धा **पृथिव्यकारः** अवर्णस्य पृथिवीरूपत्वात् **स ऋग्भिः** पादबद्धैः मन्त्रैः **ऋग्वेदः** ऋचां समूहरूपः **ब्रह्मा** प्रजापतिः अष्टौ **वसवः** चतुर्विंशत्यक्षरविशिष्टगायत्री

छन्दः गार्हपत्योऽग्निः सा आद्या मात्रा प्रथमः पादो भवति । द्वितीया मात्रा तु अन्तरिक्षं तस्य द्वितीयमात्रारूपत्वात् स उकारः स यजुर्भिः अविवक्षित-छन्दस्कैः मन्त्रैः विशेष्टो यजुर्वेदः तद्वाच्यो विष्णुः एकादशसंख्याकाः रुद्राः एकादशवर्णसंख्याविशिष्टत्रिष्टुप्छन्दः दक्षिणाग्निः एवंविशिष्टा सा उकारमात्रा द्वितीयः पादो भवति । तृतीया त्विह मात्रा द्यौः द्युलोकः तदात्मको मकारः गीतिप्रधानैः सामभिः मन्त्रैः सामवेदः तद्वाच्यो रुद्रः द्वादशादित्याश्च द्वादशाक्षरा जगतीछन्दः आहवनीयश्च सा मकारमात्रा तृतीयः पादो भवति । या ब्रह्मविदां प्रसिद्धा अस्य [illegible]वस्य अवसाने चतुर्थ्यर्धमात्रा सा सोमलोकः प्रजापतिः अर्धमात्रायाः पृथगुच्चारयितुमशक्यत्वात् सा मात्रा अथर्वणैर्मन्त्रैः अथर्ववेदः तद्वाच्यः संवर्तकः कालाग्निरुद्रः कर्तुमकर्तुमन्यथाकर्तुं स्वतन्त्रेश्वरः विविधाग्न्यधिष्ठाता एकोनपञ्चाशद्भेदविशिष्टाः मरुतः दशाक्षरात्मकं विराट्छन्दः अथर्वणा नाम प्रसिद्धोऽग्निः इयं च मात्रा भास्वती सर्वापेक्षया भास्वरत्वात् सा उक्तार्धमात्रा सान्नः प्रथमोपनिषदुक्तस्यासीदिति विशेषस्य(?)इदं पदं सर्वत्र संबध्यते । अर्धमात्राऽऽत्मकः चतुर्थः पादो भवति । पादचतुष्टयस्य चतुर्मात्रात्मकत्वमुक्तं, मात्रापादयोरेकत्वं श्रूयते "पादा मात्रा मात्राश्च पादाः" इति ॥ २ ॥

सान्नः अनुष्टुप्त्वम्

अष्टाक्षरः प्रथमः पादो भवत्यष्टाक्षरास्त्रयः पादा भवन्त्येवं द्वात्रिंशदक्षराणि संपद्यन्ते द्वात्रिंशदक्षरा वा अनुष्टुब्भवत्यनुष्टुभा सर्वमिदं सृष्टम् ॥ ३ ॥

अष्टाक्षरः प्रथमः पादो भवति तथा अष्टाक्षरा हि त्रयः पादाः एवं चतुरष्टाक्षराणि मिळित्वा द्वात्रिंशदक्षराणि संपद्यन्ते । द्वात्रिंशदक्षरा वै प्रसिद्धा अनुष्टुप् भवति यथोक्तानुष्टुभा मन्त्रराजेन नारसिंहेन सर्वमिदं अविद्यापद-तत्कार्यजातं सृष्टम् ॥ ३ ॥

साम्नः पञ्चाङ्गानि

तस्य हैतस्य पञ्चाङ्गानि भवन्ति चत्वारः पादाश्चत्वार्यङ्गानि भवन्ति सप्रणवं सर्वं पञ्चमं भवति हृदयाय नमः शिरसे स्वाहा शिखायै वषट् कवचाय हुं अस्त्राय फडिति प्रथमं प्रथमेन [1]युज्यते द्वितीयं द्वितीयेन तृतीयं तृतीयेन चतुर्थं चतुर्थेन पञ्चमं पञ्चमेन व्यतिषजति व्यतिषि[ष]क्ता वा इमे लो[illegible] तस्माद्व्यतिषि[ष]क्तान्यङ्गानि भवन्ति ॥ ४ ॥

तस्य हैतस्य प्रसिद्धस्य साम्नः **पञ्चाङ्गानि भवन्ति** । मन्त्रराजस्य **चत्वारः पादाः चत्वार्यङ्गानि भवन्ति** । प्रणवेन सहितं **सर्वं सप्रणवं** मन्त्रराजस्वरूपं **पञ्चमं भवति** । पञ्चाङ्गानां सर्वमन्त्रसाधारणत्वं दर्शयति—**हृदयाय नमः** इति, सर्वप्राणिहृदयावभासकप्रत्यगर्थाय नमः । शिरोमन्त्रमाह—**शिरसे स्वाहेति** । सर्वप्राण्युत्तमा(ङ्गा)लङ्कारतुर्यचरणाय स्वाज्ञानभस्मीकरणपट्वग्नये स्वाज्ञानाख्यं हविः जुहोमि स्वाहेत्यर्थः । शिखामन्त्रमाह—**शिखायै वषडिति** । स्वात्मदीप्तिः शिखा नृसिंहतनुः तस्यै शिखायै वषट् मत्करणजातस्य तत्तादात्म्यं भूयादित्यर्थः । कवचमन्त्रमाह—**कवचाय हुमिति** । कवचवत् स्वभक्तत्राणनकराय मदरातिवर्गं प्रति हुं हुंकारं कुर्वित्यर्थः । इदानीमस्त्रमन्त्रमाह—**अस्त्राय फडिति** । अप्रतिहतशासनास्त्राय अप्रतिहतकोपप्रसादाय तुभ्यं ये नमस्कुर्वन्ति तेषां स्वाज्ञानतत्कार्यारातिवर्गं फट् फट् उच्चाटयोच्चाटय । **इति** शब्दः पञ्चाङ्गपरिसमाप्त्यर्थः । हृदयादिमन्त्रपादानां कः संबन्धः इत्यत्र हृदयाय नम इति **प्रथमं** मन्त्ररूपं **प्रथमेन** उग्रमित्यादिपादेन **युज्यते** संबध्यते । एवं सर्वेषु मन्त्रपादेषु योजनीयम् । **द्वितीया**ख्यशिरोमन्त्रं ज्वलमित्यादिपादेन **तृतीयं** शिखामन्त्रेण नृसिंहमिति पादेन **चतुर्थं** कवचमन्त्रः मृत्युर्बिभेत्यादिपादेन **पञ्चमो-**

[1] संयु—अ २, क.

ऽस्त्रमन्त्रः पञ्चमेन प्रणवेन उग्रमित्यादिनमाम्यहमित्यन्तेन मन्त्रराजेन व्यतिषजंति विशेषातिशयाभ्यां संबध्नाति । एवं संबन्धे हेतुमाह—व्यतिषि[ष]क्ता इति । विशेषातिशयाभ्यां वै स्मर्यमाणाः भूरादयः इमे लोकाः भोगभूमयः । यस्मादेवं तस्मात् पादैः व्यतिषि[ष]क्तान्यङ्गानि भवन्ति ॥ ४ ॥

ओङ्कारस्य उभयतो न्यासविधिः

ओमित्येतदक्षरमिदं सर्वं तस्मात् प्रत्यक्षरमुभयत ओंकारो भवति । अक्षराणां न्याससमुपदिशन्ति ब्रह्मवादिनः ॥ ५ ॥

इदानीं मन्त्रराजाधारप्रणवं स्तौति—ओमित्येतदक्षरमिति । ओमिति ब्रह्माभिधानं एतदक्षरं वर्णात्मकं विविधप्रत्ययगम्यं इदं चेतनाचेतनात्मकं सर्वम् । "तद्यथा शङ्कुना सर्वाणि पर्णानि संतृण्णानि एवमोङ्कारेण सर्वा वाक् संतृण्णा" इति श्रुतिप्रकटितोङ्कारस्य सर्वव्यापकत्वेन उकारादिहकारान्तं एकैकं अक्षरं प्रति उभयतः आदाववसाने च ओङ्कारो भवति । द्वात्रिंशदक्षरे मन्त्रराजे चतुष्षष्ठ्योङ्कारा भवन्ति । पदशो मन्त्रमुद्धर्तुं प्रतिजानीते—अक्षराणां न्यास-मुपदिशन्ति ब्रह्मवादिनः इति । न्यासं विन्यासमित्यर्थः ॥ ५ ॥

मन्त्रराजस्य पदशोऽक्षरन्यासः

तस्य ह वा उग्रं प्रथमं स्थानं जानीयाद्यो जानीते सोऽमृतत्वं च गच्छति वीरं द्वितीयं स्थानं महाविष्णुं तृतीयं स्थानं ज्वलन्तं चतुर्थं स्थानं सर्वतोमुखं पञ्चमं स्थानं नृसिंहं षष्ठं स्थानं भीषणं सप्तमं स्थानं भद्रमष्टमं स्थानं मृत्युमृत्युं नवमं स्थानं नमामि दशमं स्थानमहमेकादशं स्थानं जानीयाद्यो जानीते सोऽमृतत्वं च गच्छति ॥ ६ ॥

इदानीं अक्षरन्यासः पदशः उच्यते—**तस्येति**। **तस्य ह वै** प्रसिद्ध-स्मर्यमाणस्य **उग्रमिति** पदनिर्देशः **प्रथमं स्थानं** प्रथमं पदं जानीयात् इत्यादि समानम्। **वीरमित्यादिशिष्टपदेषु** एवमेव योजनीयम्। **अहं** एकादशं **स्थानं** जानीयात् यो जानीते इत्याद्युक्तार्थम्॥ ६॥

मन्त्रराजस्यानुष्टुप्त्वोपपत्तिः

एकादशपदा वा अनुष्टुब्भवत्यनुष्टुभा सर्वमिदं सृष्टमनुष्टुभा सर्वमिदमुपसंहृतं तस्मात् सर्वमानुष्टुभं जानीयाद्यो जानीते सोऽमृतत्वं च गच्छति॥ ७॥

इदानीमस्य मन्त्रस्यानुष्टुप्छन्दस्त्वं उपपन्नमित्याह—**एकादशेति**। एकादश-पदान्यस्येति **एकादशपदा वै** प्रसिद्धा **अनुष्टुप् भवति अनुष्टुभा सर्वमिदं सृष्टं उपसंहृतं** च। यस्मादेवं **तस्मात् सर्वं आनुष्टुभं जानीयात्** इत्यादि समानम्॥ ७॥

उग्रपदार्थनिर्वचनम्

देवा ह वै प्रजापतिमब्रुवन्—अथ कस्मादुच्यत उग्रमिति। स होवाच प्रजापतिः—यस्मात् स्वमहिम्ना सर्वान् लोकान् सर्वान् देवान् सर्वानात्मनः सर्वाणि भूतान्युद्बृह्त्यजस्रं सृजति विसृजति वासयत्युद्ब्राह्यत उद्बृह्यते।

स्तुहि श्रुतं गर्तसदं युवानं मृगं न भीममुपहत्नुमुग्रम्।
मृडा जरित्रे [2]सिंह स्तवानो अन्यं ते अस्मन्निवपन्तु सेनाः॥

तस्मादुच्यत उग्रमिति॥ ८॥

[1] दंग्राह्यत उदगृ—अै, अ १, अ २, क, उ १. [2] रुद्र—मु.

उक्तपदवैशद्यार्थं देवप्रश्नमवतारयति—**देवा इति**। **देवा ह वै प्रजापतिमब्रुवन्** इति व्याख्यातम्। कथं? **अथ पृच्छामस्त्वां कस्मादयं भगवान् उग्रपदेनोच्यत** इति। एवं देवैः पृष्टः **स होवाच प्रजापतिः**। किमुक्तवानित्यत्र **यस्मात् स्वमहिम्ना सर्वान् लोकान् देवान्** अग्न्यादीन् **सर्वान् सर्वानात्मनो** जीवान् **सर्वाणि** चेतनाचेतनात्मकानि **भूतानि उद्बृह्णाति** स्वयं सर्वोर्ध्वः सर्वाधारो भूत्वा सर्वान् स्वीकरोति। उक्तार्थं स्वयमेव व्याकरोति—**अजस्रं सृजति विसृजति वासयतीति** कल्पादौ कल्पमध्ये कल्पान्ते च उत्पादयति पालयति उपसंहरति सर्वेषु [illegible]षु निवासं कारयति। उद्ग्राह्यते स्वभक्तकृतभक्त्यनुरोधेन तादात्म्येन स्वीक्रियते। ब्राह्मणोक्तार्थं ऋगप्याह—**स्तुहीति**। हे स्वाज्ञलोक त्वं स्वाज्ञाननिरसनाय वक्ष्यमाणविशेषणविशिष्टं देवं **स्तुहि** स्वात्मतया स्तुतिं कुरु। **श्रुतं** देशिकमुखात् कर्णपथमागतम्। किं तत् परोक्षं? **गर्तसदं** हृदयगर्ते कूपाकारे सीदति तिष्ठतीति गर्तसत् तं गर्तसदं **युवानं** सदा संप्राप्तषोडशवर्षं **मृगं न** मृगवत्पुरुषं **भीमं** भयानकं दंष्ट्राकराळवदनत्वात् हिरण्यकशिपुप्रमुखासुरान्त्रभूषणतो नृत्यन्तं संहारकाले स्वारातिवर्गं विश्वं वा **उपहत्नुं** उपसंहर्तुं अवतीर्णं **उग्रं** स्वावशेषतया सर्वमुद्ग्रसन्तं **मृडा** मृडं स्मृतितः सुखकरं सर्वस्य **जरित्रे** जरणशीलाय कालात्मने नमोऽस्तु हे **सिंह स्तवानः** स्तुवानोऽहं **ते अन्यं** अतिरिक्तं न मे भातु ते तव नरसिंहस्य अन्यं **अस्मत्सकाशात्** सर्वासु दिक्षु पलायतु अस्मत् अस्मत्तः **नरशिरःकरपादाद्यवयवानि** सर्वासु दिक्षु **निवपन्तु** शाल्यादिबीजमिव भूमौ प्रक्षिपन्तु। के ते? रथगजतुरगपदातयः **सेनाः** त्वद्भृत्याः। त्वत्सपर्याप्रतिकूलान्यङ्गानि निवपन्तु त्वत्सपर्याऽनुकूलानि परिपालयन्त्वित्यर्थः। यस्मादेवं **तस्मादुच्यत उग्रमिति** ॥ ८ ॥

वीरपदार्थनिर्वचनम्

अथ कस्मादुच्यते वीरमिति। यस्मात् स्वमहिम्ना सर्वान् लोकान् सर्वान् देवान् सर्वानात्मनः सर्वाणि भूतानि विरमति

विरामयत्यजस्रं सृजति विसृजति वासयति । यतो वीरः कर्मण्यः सुदक्षो युक्तग्रावा जायते देवकामः । तस्मादुच्यते वीरमिति ॥ ९ ॥

उग्रशब्दवत् वीरपदं व्याचष्टे—**अथेति** । **अथ कस्मादुच्यते** इति सर्वत्र समानम् । **यस्मादिति** च समानम् । **विरमति** अन्तर्याम्यादिरूपेण रमणं करोति । **विरामयति** विविधभूतजातं विविधभूतजातैः रतिं कारयति । विरमतिशब्दार्थमाह—**अजस्रमित्यादि** । व्याख्यातम् । स्वोक्तार्थं मन्त्रोऽप्यनुवदति—**यत इति** । **यतः** यस्मात् अयं विविधरतिहेतुः सर्वकर्मसु प्रवीणत्वात् **कर्मण्यः** अत एव **सुदक्षः** शोभनकौशलत्वात् युक्ता नियुता ग्रावाणोऽस्थिप्रदेशा यस्य सोऽयं **युक्तग्रावा** स्वाधीनशरीरेन्द्रियादियुत इत्यर्थः । **जायते** उत्पद्यते देवानां विषये कामोऽनुग्रहो यस्य सः **देवकामः** । **तस्मादुच्यते वीरमिति** ॥ ९ ॥

विष्णुपदार्थनिर्वचनम्

अथ कस्मादुच्यते महाविष्णुमिति । यस्मात् स्वमहिम्ना सर्वान् लोकान् सर्वान् देवान् सर्वानात्मनः सर्वाणि भूतानि व्याप्नोति व्यापयति स्नेहो यथा पललपिण्डं शान्तमूलमोतं प्रोतमनुव्याप्तं व्यतिषिक्तो व्याप्यते व्यापयते ।

यस्मान्न जातः परो अन्यो अस्ति य आविवेश भुवनानि विश्वा ।
प्रजापतिः प्रजया संविदानः त्रीणि ज्योतींषि सचते स षोडशीम् ॥

तस्मादुच्यते महाविष्णुमिति ॥ १० ॥

विष्णुपदं व्याकरोति—**अथेति** । **व्याप्नोति** अन्तर्याम्यात्मना सर्वत्र व्याप्तिं कुरुते स्वोपासकैः **व्यापयति** स्वज्ञानत उपासकानां व्याप्तिं कारयति । व्याप्तावयं दृष्टान्तः—**यथा स्नेहः शान्तमूलं पललपिण्डं** मांसपिण्डं **ओतप्रोतं**

प्राक्प्रत्यगुदग्दक्षिणत अनुप्राप्तं तेन मांसपिण्डेन **व्यतिषिक्तः** संबद्धः **व्याप्यते** व्याप्नोति तेन **व्यापयते** व्यापयति स्वावयवैः व्याप्तिं कारयति । उक्तार्थं मन्त्रोऽप्याचष्टे—**यस्मादिति** । **यस्मात् जातः परोऽन्यः** स्वातिरेकेण **नास्ति यः** परमेश्वरो **विश्वा** विश्वानि तदन्तर्गतचतुर्दशभुवनानि च विश्वविराडोत्रादिरूपेण **आविवेश** प्रविष्टवान् स **प्रजापतिः** सनत्कुमारनारदादिप्रजया एतं स्वातिरिक्तप्रपञ्चं नास्तीति **संविदानः** जानीयात् अग्न्यादित्यचन्द्ररूपेण **त्रीणि ज्योतींषि सचते** उत्पादयति । न केवलं ज्योतींषि, किंतु **स** प्रजापतिः **षोडशीं** प्राणादिनामान्तकलात्मकं तमप्युत्पादितवान् । यस्मादेवं **तस्मादुच्यते महाविष्णुमिति** ॥ १० ॥

ज्वलत्पदार्थनिर्वचनम्

अथ कस्मादुच्यते ज्वलन्तमिति । यस्मात् स्वमहिम्ना सर्वान् लोकान् सर्वान् देवान् सर्वानात्मनः सर्वाणि भूतानि स्वतेजसा ज्वलति ज्वालयति ज्वाल्यते ज्वालयते । सविता प्रसविता दीप्तो दीपयन् दीप्यमानः ज्वलन् ज्वलिता तपन् वितपन् संतपन् रोचनो रोचमानः शोभनः शोभमानः कल्याणः । तस्मादुच्यते ज्वलन्तमिति ॥ ११ ॥

ज्वलन्तमिति पदं व्याचष्टे—**अथेति** । **स्वतेजसा** प्रत्यक्प्रकाशाभिन्नपरप्रकाशेन **ज्वलति** दीप्यते अन्तर्याम्यात्मना **ज्वालयति** विहिताविहितप्रवृत्तिनिवृत्ती प्रकाशयति स्वतेजसा हिरण्यकशिपुप्रभृतीन् **ज्वाल्यते** स्वाज्ञानतत्कार्येन्धनं स्वज्ञानिभिः **ज्वालयते** । स्वोक्तार्थप्रकाशकोऽयं मन्त्रः—**सविता** जगत्प्रसवितृत्वात् **प्रसविता** तज्जनको बीजात्मा **दीप्तः** स्वेन रूपेणेत्यर्थः **दीपयन्** स्वातिरिक्तं तत्संबन्धं विना स्वयं **दीप्यमानः** मूलाधाराग्निरूपेण **ज्वलन्** योगिरूपेण **ज्वलिता** ज्वलनकर्ता स्वभक्तपापं **तपन्** सामान्यतः **वितपन्** विशेषेण तापं

कुर्वन् संतपन् सम्यक् निःशेषं तपन् भस्म कुर्वन् **रोचनः** प्रकाशनः **रोचमानः** प्रकाशं कुर्वाणः **शोभनः** समीचीनः **शोभमानः** शोभां कुर्वाणः **कल्याणः** मङ्गळरूपः । **तस्मादुच्यते ज्वलन्तमिति** ॥ ११ ॥

सर्वतोमुखपदार्थनिर्वचनम्

अथ कस्मादुच्यते सर्वतोमुखमिति । यस्मात् स्वमहिम्ना सर्वान् लोकान् सर्वान् देवान् सर्वानात्मनः सर्वाणि भूतानि स्वयमनिन्द्रियोऽपि सर्वतः पश्यति सर्वतः शृणोति सर्वतो गच्छति सर्वत आदत्ते सर्वगः सर्वगतस्तिष्ठति ।

एकः पुरस्ताद्य इदं बभूव यतो बभूव भुवनस्य गोपाः ।
यमप्येति भुवनं सांपराये नमामि तमहं सर्वतोमुखमिति ॥

तस्मादुच्यते सर्वतोमुखमिति ॥ १२ ॥

सर्वतोमुखपदं व्याचष्टे---**अथेति** । विराड्रूपेण सर्वतोमुखं **निरिन्द्रियोऽपि** ज्ञानकर्मेन्द्रियविरळोऽपि **सर्वतो** रूपाणि **पश्यति** तथा **सर्वतः** शब्दजातं **शृणोति** । शिष्टज्ञानेन्द्रियेन्द्रियार्थानामुपलक्षणमेतत् । तथा **सर्वतो गच्छति सर्वत आदत्ते** पादपाणिव्यापारवान् भवति । पादादिग्रहणं शिष्टकर्मेन्द्रियोपलक्षणार्थम्, "पश्यत्यचक्षुः स शृणोत्यकर्णः", "अपाणिपादो जवनो ग्रहीता", इत्यादिमन्त्रवर्णात् । तथाऽन्तःकरणाभावेऽपि तद्व्यापारमाह—**सर्वग** इति । सर्वं गच्छति जानातीति **सर्वगः** । किं बहुना, **सर्वगतः** विभुत्वात् सर्वासु दिक्षु सर्वरूपेण **तिष्ठति** । इत्यर्थे मन्त्रमाह—**एक इति** । सजातीयादिभेदत्रयवैरळ्यात् आत्मैक एवेत्यर्थः । सोऽयं जगदुत्पत्तेः **पुरस्तात्** पूर्वस्मिन् काले विविधप्रत्ययरूपं विश्वं अनभिव्यक्ततया **बभूव** जगदात्मको बभूव संजातः **भुवनस्य** सचराचरस्य **जगतः गोपाः** गोप्ता विष्णोः स्थितिकारणत्वात् **यमेकं** जगदात्मानं **अप्येति** लयं गच्छति **भुवनं** चेतनाचेतनात्मकं विश्वं **साम्पराये** परलोके विनाशकाले लयं गच्छतीति

पूर्वेण संबन्धः **तमहं नमामि** नमस्करोमि । **इतिशब्दो** मन्त्रसमाप्त्यर्थः । **तस्मादुच्यते सर्वतोमुखमिति** ॥ १२ ॥

नृसिंहपदार्थनिर्वचनम्

अथ कस्मादुच्यते नृसिंहमिति । यस्मात् सर्वेषां भूतानां नावीर्यतमः श्रेष्ठतमश्च सिंहो वीर्यतमः श्रेष्ठतमश्च तस्मान्नृसिंह आसीत् परमेश्वरो जगद्धितं वा एतद्रूपं यदक्षरं भवति ।

प्रतद्विष्णुः स्तवते वीर्याय मृगो न भीमः कुचरो गिरिष्ठाः ।
यस्योरुषु त्रिषु विक्रमणेष्वधिक्षियन्ति भुवनानि विश्वा ॥

तस्मादुच्यते नृसिंहमिति ॥ १३ ॥

नृसिंहपदार्थमाह—**अथेति** । **सर्वेषां भूतानां ना** पुरुषः अतिशयेन **वीर्यतमः श्रेष्ठतमश्च** यथा भवति तथा **सिंहः** केसरी **वीर्यतमः श्रेष्ठतमश्च** अयं चोभयात्मकः । यस्मादेवं **तस्मात्** नाचासौ सिंहश्चेति **नृसिंहः आसीत्** परमेश्वरो नियन्ता **जगद्धितं वा एतद्रूपं** नरसिंहाख्यं क्षरसंबन्धाभावात् **यदक्षरं भवति** । उक्तेऽर्थे मन्त्रमवतारयति—**प्रतद्विष्णुः स्तवत** इति । नृसिंहोपासको वक्ष्यमाणप्रकारेण नृसिंहं प्रकर्षेण **स्तवते** स्तुतिं करोति । स्तुत्यः कीदृशः ? इत्यत्र यो जगज्जन्मस्थितिभङ्गहेतुः सः विष्णुः व्यापनशीलः । किमर्थं अयं भक्तैः स्तूयते ? **वीर्याय** स्वाज्ञाननिरसनार्थं **मृगो न** पुरुषसिंहः **भीमः** स्वाभक्तभीषणाकृतित्वात् कौ पृथिव्युपलक्षितस्वाविद्यापदतत्कार्ये विश्वविराडोत्रादिरूपेण चरतीति **कुचरः गरिष्ठाः** गरिष्ठः सर्वोत्कृष्टत्वात् **यस्य** विष्णोः त्रिविक्रमस्य **उरुषु त्रिसंख्याकेषु विक्रमणेषु अधिक्षियन्ति**—कानि ?—अतलादिसत्यलोकान्तानि **भुवनानि विश्वा** विश्वानि अनन्तकोटिब्रह्माण्डानि **अधिकतया क्षयं** निवासं विनाशं वा गच्छन्ति । **तस्मादुच्यते नृसिंहमिति** ॥ १३ ॥

भीषणपदार्थनिर्वचनम्

अथ कस्मादुच्यते भीषणमिति । यस्माद्भीषणं यस्य रूपं दृष्ट्वा सर्वे लोकाः सर्वे [1]देवाः सर्वाणि भूतानि भीत्या पलायन्ते स्वयं यतः कुतश्च न बिभेति ।

भीषाऽस्माद्वातः पवते भीषोदेति सूर्यः ।
भीषाऽस्मादग्निश्चेन्द्रश्च मृत्युर्धावति पञ्चम इति ॥

तस्मादुच्यते भीषणमिति ॥ १४ ॥

भीषणपदार्थमाह—**अथेति** । यस्य नृसिंहस्य सर्वेन्द्रियकेशश्मश्रुरोमकूपादिद्वारेषु वह्निं वमन्तं असुरराडान्त्रमालालाभहर्षसञ्जातवीराट्टहासबधिरीकृतविश्वं **यद्रूपं दृष्ट्वा सर्वे लोकाः सर्वे** ब्रह्मादयो **देवाः सर्वाणि भूतानि** मां अयं निःशेषं भक्षतीति **भीत्या** सर्वासु दिक्षु **पलायन्ते स्वयं** भीषणो नृसिंहो **यतः-कुतश्चिन्न बिभेति** । उक्तेऽर्थे मन्त्रमाचष्टे—**भीषेति** । **अस्मात्** नरसिंहात् **भीषा** भीत्या **वातः पवते** तथा प्रत्यहं प्रातःकाले **भीषोदेति सूर्यः** सर्वप्राणिबहिःप्राणः **भीषाऽस्मादग्निश्चेन्द्रश्च** तदाज्ञाऽनुवर्ती भवति । सर्वहरोऽपि **मृत्युः** तच्छासनमप्रमादं अनुवर्तते स्वाज्ञप्तकार्ये **धावति पञ्चमः** पञ्चसंख्यापूरकः । इति मन्त्रसमाप्तौ । **तस्मादुच्यते भीषणमिति** ॥ १४ ॥

भद्रपदार्थनिर्वचनम्

अथ कस्मादुच्यते भद्रमिति । यस्मात् स्वयं भद्रो भूत्वा [2]सर्वदा भद्रं ददाति । रोचनो रोचमानः शोभनः शोभमानः कल्याणः ।

भद्रं कर्णेभिः शृणुयाम देवाः भद्रं पश्येमाक्षभिर्यजत्राः ।
स्थिरैरङ्गैस्तुष्टुवाꣳसस्तनूभिर्व्यशेम देवहितं यदायुः ॥

तस्मादुच्यते भद्रमिति ॥ १५ ॥

[1] वेदाः—उ. [2] सर्वतो—अ, अ १.

भद्रपदार्थमाह—**अथेति** । नृसिंहः **स्वयं** प्रह्लादादिभक्तानां **भद्रो** दिव्यमङ्गळरूपो **भूत्वा सर्वदा** नित्यं स्वानन्यभक्तेभ्यः **भद्रं** स्वमात्रावशेष-लक्षणपरममङ्गळं **कैवल्यं ददाति** । उक्तार्थप्रकाशकोऽयं मन्त्रः—**रोचन** इत्यादि, व्याख्यातम् ॥ १५ ॥

मृत्युमृत्युपदार्थनिर्वचनम्

अथ कस्मादुच्यते मृत्युमृत्युमिति । यस्मात् स्वमहिम्ना स्व-भक्तानां स्मृत एव मृत्युमपमृत्युं च मारयति ।

य आत्मदा बलदा यस्य विश्व उपासते प्रशिषं यस्य देवाः ।
यस्य छायामृतं यस्य मृत्युः कस्मै देवाय हविषा विधेम ॥

तस्मादुच्यते मृत्युमृत्युमिति ॥ १६ ॥

मृत्युमृत्युपदार्थमाह—**अथेति** । **यस्मात् स्वमहिम्ना स्वभक्तानां** मार्कण्डेयप्रभृतीनां **स्मृत एव** स्मरणमात्रेण नतु पूजाऽऽदिसापेक्षः **मृत्युः** अवसानकालप्रतीक्षः तं **अपमृत्युः** अकस्मादागतो निवर्तनीयश्च तमपि **चकारात्** नानाव्याधिमपि **मारयति** । उक्तार्थावभासकोऽयं मन्त्रः—**यः** प्रसिद्धो मृत्युमृत्युः नरसिंहः भक्तेभ्यः स्वात्मानं ददातीति **आत्मदाः** स्वानन्यभक्तकरणग्रामस्य स्वाराधनानुरूपबलं प्रयच्छतीति **बलदाः** **यस्य** आत्मबलदस्य मृत्युमृत्योः स्वरूपं **विश्वे** सर्वे देवाः **उपासते** अनवरतमुपासनं कुर्वते **प्रशिषं** आशिष-माशीर्वादं करणग्रामप्रसादं **यस्य देवाः** इन्द्रादयः स्वशासनानुवर्तिनः यस्य प्रशि-षमुपासत इत्यर्थः । **यस्य** मृत्युमृत्योः **छायेवाविनाभावेन** वर्तमानं **अमृतं** देवोपजीवनं मोक्षस्वरूपं वा भक्तानां यः प्रयच्छति **कस्मा** एकस्मै प्रत्यगभिन्न-परमात्मने **देवाय** स्वयं प्रकाशमात्राय स्वाराधनयोग्यहविषा **विधेम** विधास्म सपर्यां करवाम । **तस्मादुच्यते मृत्युमृत्युमिति** ॥ १६ ॥

नमामिपदार्थनिर्वचनम्

अथ कस्मादुच्यते नमामीति । यस्माद्यं सर्वे देवा नमन्ति मुमुक्षवो ब्रह्मवादिनश्च ।

प्रनूनं ब्रह्मणस्पतिर्मन्त्रं वदत्युक्थ्यम् ।
यस्मिन्निन्द्रो वरुणो मित्रो अर्यमा देवा ओकांसि चक्रिरे ॥

तस्मादुच्यते नमामीति ॥ १७ ॥

नमामिपदार्थमाह—**अथेति** । यं प्रसिद्धं नरहरिं **सर्वे देवाः नमन्ति** प्रत्यक्परचितोरैक्यं वा भावयन्ति । के ? **मुमुक्षवो ब्रह्मवादिनश्च,** *"नमस्त्वैक्यं प्रवदेत्"* इति श्रुतेः । उक्तेऽर्थे मन्त्रमवतारयति—**प्रनूनमिति** । प्रकर्षेण नूनं निश्चितं **ब्रह्मणस्पतिः** ब्रह्मणो वेदराशेः पतिः पालयिता प्रजापतिः मननात्मकं **मन्त्रं** सर्वस्य उत्पत्त्यादिकारणत्वात् **उक्थ्यं** प्रजापतिर्वदति प्रणमति च **यस्मिन्** प्रसिद्धे मन्त्रे उक्थ्ये बलाधिष्ठाता **इन्द्रः** त्रिलोकीपतिः सर्वानुग्राहको **मित्रो** रविः अपामधिष्ठाता **वरुणः अर्यमा** कर्मफलाधिष्ठाता **देवा** उक्ता अनुक्ताश्चाग्न्यादयः महावृक्ष इव विहगा **ओकांसि** नीडानि **चक्रिरे** कृतवन्तः । **तस्मादुच्यते नमामीति** ॥ १७ ॥

अहंपदार्थनिर्वचनम्

अथ कस्मादुच्यतेऽहमिति ।

अहमस्मि प्रथमजा ऋतस्य पूर्वं देवेभ्यो अमृतस्य नाभिः ।

यो मा ददाति स इ देवमावाः अहमन्नमन्नमदन्तमद्मि ।

अहं विश्वं भुवनमभ्यभवां सुवर्णज्योतीः ॥

य एवं वेदेति महोपनिषत् ॥ १८ ॥

अहंपदार्थमाह—**अथेति** । अहंशब्दार्थप्रतिपादकमन्त्रमाह—**अहमिति** । अस्मत्प्रत्ययावभासकः प्रेरकः प्रत्यगन्तर्यामी **वा अस्मि** भवामि **प्रथमजा** प्रथमजो हिरण्यगर्भः **ऋतस्य** कर्मफलभूतस्य संसारस्य पूर्वं प्रथमं—केभ्यः ?—स्वाधिष्ठातृभ्यः इन्द्रियेभ्यो देवेभ्यः ब्रह्मज्ञानमन्तरेण **अमृतस्य नाभिः** नाभिरिव कारणभूतः यः कश्चनोपासकः **मा** मां संप्रदायादागतं मन्त्रराजं पुत्राय शिष्याय वा **ददाति** प्रयच्छति **सोऽयं** मम दाता **इत्** इत्थं मद्दानेन **एवं ब्रह्माध्यात्मं** अधिभूतसंप्रदानमेतादृशं **आवाः** अवतीत्यर्थः । अथवा **इदेव** इत्थमेव सच्छिष्यप्रदानेनैव नत्वन्यथा मां मन्त्रराजमवति । **अहं** मन्त्रराजमूर्तिः सर्वतोमुखो नृसिंहः सर्वप्राणिसाधारणतया अदनीयं **अन्नं** स्थावरजङ्गमशरीरभूतम् । यत एवं ततः **अन्नं** सर्वसाधारणं मन्त्रराजं अन्नवदिहामुत्र च सुखकरं **अदन्तं** भक्षयन्तं मन्त्रराजं गुणवत्पुत्रशिष्येभ्योऽप्रयच्छन्तं **अद्मि** स्वयागोपसेचनं जगद्भ्रक्षोदनं मन्त्रराजजपं भ्रमादिना भक्षयामि । यद्वा—मन्त्रराजतज्ज्ञानवैकल्येन केवलान्नमदन्तमद्मि । मम मृत्योरपि मृत्युत्वात् **विश्वं** निखिलं भुवनं चेतनाचेतनात्मकमुपसंहारकाले सर्वदा वा प्रतिपक्षभावमागतं **अभ्यभवां** अभिभवामि तिरस्करोमि विनाशयामीत्यर्थः । उग्रमित्याद्यहमित्यन्ताः **सुवर्णाः ज्योतिरिव** प्रकाशमानत्वात् । **सुवर्णज्योतीः** इतिपक्षे सुवर्णज्योतिरेव सुवर्णज्योतीः । तस्मादुच्यते अहमिति शेषः । **योऽयमुपासकः** उग्राद्यहमित्यन्तपदानि **वेद** स उग्रादिरूपो भवतीति शेषः । **इति**शब्दो द्वितीयोपनिषत्समाप्त्यर्थः । व्याख्याता **महोपनिषत्** ॥ १८ ॥

इति द्वितीयोपनिषत्

तृतीयोपनिषत्

मन्त्रराजस्य शक्तिबीजजिज्ञासा

देवा ह वै प्रजापतिमब्रुवन्—आनुष्टुभस्य **मन्त्रराजस्य नारसिंहस्य शक्तिं बीजं नो ब्रूहि भगव इति** ॥ १ ॥

नृसिंहपदव्याख्यानावसरे "जगद्भितं वा एतद्रूपं यदक्षरं" इत्यत्र *शक्तिबीजयोः सूचितत्वात् मध्ये प्रश्नावसराभावात् इदानीं लब्धावसरा देवास्तं पृच्छन्तीत्याह*—देवा इति । **देवा ह वै प्रजापतिमब्रुवन् इत्युक्तार्थम् । आनुष्टुभस्य मन्त्रराजस्य नारसिंहस्य शक्तिं बीजं नोऽस्मभ्यं ब्रूहि भगव इति ॥ १ ॥**

शक्तिस्वरूपनिरूपणम्

स होवाच प्रजापतिः—माया ह्येषा नारसिंही सर्वमिदं सृजति सर्वमिदं रक्षति सर्वमिदं संहरति तस्मान्मायामेतां शक्तिं विद्याद्य एतां मायां शक्तिं वेद स पाप्मानं तरति स मृत्युं तरति स संसारं तरति सोऽमृतत्वं च गच्छति महतीं श्रियमश्नुते ॥ २ ॥

मीमांसन्ते ब्रह्मवादिनो ह्रस्वा दीर्घा प्लुता चेति । यदि ह्रस्वा भवति सर्वं पाप्मानं दहत्यमृतत्वं च गच्छति यदि दीर्घा भवति महतीं श्रियमाप्नोत्यमृतत्वं च गच्छति यदि प्लुता भवति ज्ञानवान् भवत्यमृतत्वं च गच्छति ॥ ३ ॥

तदेतदृषिणोक्तं निदर्शनं—स ईं पाहि य ऋजीषी तरुत्रः श्रियं लक्ष्मीमौपलामम्बिकां गां षष्ठीं च यामिन्द्रसेनेत्युदाहुः तां विद्यां ब्रह्मयोनिं सरूपामिहायुषे शरणमहं प्रपद्ये ॥ ४ ॥

संबोधितः **स होवाच प्रजापतिः**—व्याख्यातम् । परमार्थदृष्ट्या या मा सा **माया** स्वाज्ञदृष्ट्या वस्तुभूता **वै एषा** नरसिंहस्येयं **नारसिंही** । यद्यपि नृसिंह इत्यत्र ह्रस्व इकारो लोकप्रसिद्धः, तथाऽपि दीर्घस्य मायाकार्यत्वात् मन्त्रराजस्थपदे स दीर्घोऽवगन्तव्यः सामत्वात् । मायैषा नारसिंही **सर्वमिदं सृजति सर्वमिदं रक्षति सर्वमिदं संहरति,** स्पष्टोऽर्थः । यस्मादियं जगज्जन्मादिहेतुः **तस्मात्**

मायां कार्यतः साक्षिवेद्यतया प्रत्यक्षां चतुर्विधपुरुषार्थकारिणीं **शक्तिं विद्यात्**। तज्ज्ञानफलमेतद्रि—यः पुमान् **एतां मायां शक्तिं** स्वातिरिक्ततया नास्तीति **वेद** जानाति **स पाप्मानं तरति** इत्यादि व्याख्यातम्। यथा यथा सत्यत्वेन व्यावहारिकत्वेन प्रातिभासिकत्वेन निष्प्रतियोगिकाभावरूपतया वा जानाति तथा तथा विराड्भावापत्त्यादिकैवल्यान्तश्रियमश्नुते प्राप्नोति ॥ २ ॥ वक्ष्यमाण-प्रकारेण एवं विचारणं कुर्वन्ति नृसिंहपदे। स्वभावतो ह्रस्वा उपलभ्यते, मायायोगतः दीर्घा च, सामत्वात् प्लुताऽप्यवगम्यते। ब्रह्मवादिनां मीमांसाप्रकारः ह्रस्वा वा दीर्घा वा प्लुता[illegible], एकद्वित्रिमात्रा वेति। पक्षत्रयमङ्गीकरोति—**यदीति**। **यदि ह्रस्वा भवति सर्वं पाप्मानं दहति अमृतत्वं च गच्छति**। शिष्टं स्पष्टम्। एवं दृष्टित्रयस्य फलैकदेशवैचित्र्येऽपि मुख्यफलस्यैकरूपत्वात् पर्यायत्रये **क्रमेणापापश्रीज्ञानानि** भिद्यन्ते, अमृतत्वं समानमेव ॥ ३ ॥ यदेवमुक्तं **तदृषिणाऽप्युक्तम्**। किं तत्? मन्त्ररूपं **निदर्शनं**—यो जगज्जन्मादिहेतुः **सोऽयं** मन्त्रराजात्मको नृसिंहः ई ईकारात्मकमायाशक्तिं भक्ताभक्तकथने **पाहि** पालयत्व। **यः** प्रसिद्धः सर्वात्मा **ऋजीषी** ईकाररहितो वस्तुतो निर्मायत्वात् स्वाङ्गदृष्टिप्रसक्तैः कारयोगात् स्वांशजप्राणिपटलं त्रायत इति **तरुत्रः** मन्त्रराजो नृसिंहरूपः **श्रियं** श्रीमन्त्रानुगतां धनधान्यादिरूपिणीं **लक्ष्मीं** लक्ष्मीमन्त्रानुगतां हस्त्यश्वरथादिरूपां —सामान्यविशेषाकारेण श्रीलक्ष्म्योः भेदोऽवगन्तव्यः—उपलस्य हिमवतः इयं **औपला** तां **मेनाऽऽदिरूपां अम्बिकां** भवानीं **गां** गोशब्दवाच्यां यागादिरूपां वा **षष्ठीं च** षट्संख्यापूरणीं चकारात् सावित्र्यादिरूपामपि **यां** प्रसिद्धां **इन्द्रस्य सेना** चतुरङ्गिणीत्याहुः ब्रह्मवादिनः **तामुक्तां** श्रीलक्ष्म्यादिरूपां मन्त्रराजब्रह्म-**विद्याऽऽत्मिकां ब्रह्म** सत्यादिलक्षणं तदेव **योनिः** तत्स्वरूपां **इह** अस्मिन्नेव शरीरे वर्तमानः **आयुषे** आयुःप्राप्त्यर्थं **शरणमहं प्रपद्ये** प्राप्तवानस्मि ॥ ४ ॥

बीजस्वरूपनिरूपणम्

सर्वेषां वा एष भूतानामा[1]काशः परायणं सर्वाणि ह वा इमानि भूतान्याकाशादेव जायन्त आकाशादेव जाता-

[1] काशं—अ १, उ.

नि जीवन्त्याकाशं प्रयन्त्यभिसंविशन्ति तस्मादाकाशं बीजं विद्यात् ॥ ९ ॥

तदेतदृषिणोक्तं निदर्शनं—

हंसः शुचिषद्वसुरन्तरिक्षसद्धोता वेदिषदतिथिर्दुरोणसत् ।
नृषद्वरसदृतसद्व्योमसदब्जा गोजा ऋतजा अद्रिजा ऋतं बृहत् ॥

य एवं वेदेति महोपनिषत् ॥ ६ ॥

शक्तेरियत्तामुक्त्वा बीजेयत्तामाह—**सर्वेषां वेति** । **वै** प्रसिद्धमेतत् **एषः** स्थावरजङ्गमभूतानां **आकाशशब्देन** तदधिष्ठाता ईश्वरः **परायणं** पर्यवसानभूमिः । **सर्वाणि ह वा इमानि** वियदादिभूतभौतिकानि **आकाशशब्दशब्दितेश्वरादेव जायन्ते** । व्याख्यातमन्यत् । यस्मादेवं **तस्मात् आकाशं बीजं विद्यात्** ॥ ९ ॥ उक्तेऽर्थे **तदेतदृषिणोक्तं निदर्शनं** व्याख्यातम् । हंशब्देन तत्पदार्थः सशब्देन त्वंपदार्थः तयोः व्यतिहारोच्चारणं असिपदार्थः इत्यत्र—

हकारः परमेशः स्यात्तत्पदं चेति निश्चितम् ।
सकारः खेचरी प्रोक्तस्त्वंपदं चेति निश्चितम् ।
सकारो ध्यायते जन्तुर्हकारो हि भवेत् ध्रुवम् ॥

इति श्रुतेः । **हंस**शब्देन प्रत्यगभिन्नपरमात्मोच्यते । स एव शुचौ हृदयादिप्रदेशे सीदतीति **शुचिषत्** वस्वात्मना अन्तरिक्षे सीदतीति **अन्तरिक्षसत्** "अग्निर्वै होता" इति श्रुत्या होत्रात्मना त्रेताऽग्निमध्यवर्तिन्यां वेद्यां सीदतीति **वेदिषत्** आतिथ्यकर्मणि पूजनीयोऽज्ञातकुलगोत्रोऽयमतिथिः तद्रूपेण दुरोणेषु यज्ञगर्भेषु सीदतीति **दुरोणसत्** नृषु सीदतीति **नृषत्** वरेषु देवेषु सीदतीति **वरसत्** ऋते अवश्यंभाविकर्मफले सीदतीति **ऋतसत्** व्योम्नि हृदयाकाशादौ सीदतीति **व्योमसत्** शंखमकरादिरूपेण अद्भ्यो जायत इति **अब्जाः** पयोदध्यादिरूपेण गोभ्यो जायत इति **गोजाः** ऋतात् कर्मफलजनकात् कर्मणः सुखदुःखादिरूपेण

जायत इति ऋतजाः अद्रिभ्यः स्थावरादिरूपेण जायत इति अद्रिजाः ऋतं मन्त्रादौ प्रथममुक्तं अक्षरं एतमात्मनो भेदरहितं जगद्बीजमन्त्रराजबीजभूतमपि बृहत् ब्रह्मस्वरूपम् । यः एवं उक्तेन प्रकारेण आकाशं बीजं-वेद । इतिशब्दः तृतीयोपनिषत्समाप्त्यर्थः ॥ ६ ॥

इति तृतीयोपनिषत्

चतुर्थोपनिषत्

अङ्गमन्त्रोपदेशः

देवा ह वै प्रजापतिमब्रुवन्—आनुष्टुभस्य मन्त्रराजस्य नारसिंहस्याङ्गमन्त्रान्नो ब्रूहि भगव इति ॥ १ ॥

स होवाच प्रजापतिः प्रणवं सावित्रीं यजुर्लक्ष्मीं नृसिंहगायत्रीमित्यङ्गानि जानीयाद्यो जानीते सोऽमृतत्वं च गच्छति ॥ २ ॥

कान्यङ्गानि कानि दैवतानीत्यत्र देवप्रश्नानुरूपं उत्तरं दत्तम् । पुनर्विशेषतोऽवगन्तुं इदानीं लब्धावसराः देवाः पृच्छन्ति—देवा ह वा इति । देवा ह वा इत्याद्युक्तार्थम् । अङ्गरूपमन्त्रान् ॥ १ ॥ इदानीं क्रमेण चतुरोऽङ्गमन्त्रानाह—प्रणवमिति । प्रणवादीनि चतुरङ्गमन्त्रनामधेयानि । इत्यनेन प्रकारेण चतुरङ्गानि जानीयात् । यो जानीते इत्याद्युक्तार्थम् ॥ २ ॥

प्रणवस्य ब्रह्मात्मत्वम्

ओमित्येतदक्षरमिदं सर्वं तस्योपव्याख्यानं भूतं भवद्भविष्यदिति सर्वमोंकार एव यच्चान्यत्त्रिकालातीतं तदप्योंकार एव । सर्वं ह्येतद्ब्रह्मायमात्मा ब्रह्म सोऽयमात्मा चतुष्पात् ॥ ३ ॥

सप्रणवं सर्वं पञ्चमं भवतीत्युक्तत्वात् यथासंप्रदायं प्रणवमन्त्र उक्तः। तस्यार्थः पुरा माण्डूक्योपनिषद्विवरणे सम्यक् प्रपञ्चितः। इहापि संक्षेपतया प्रपञ्च्यते—**ओमिति**। **ओमित्येतदक्षरमिदं सर्वं** इति व्याख्यातम्। **तस्य** प्रथमाङ्गस्य सर्वात्मकतया उप सामीप्येनाख्यानं आसमन्तात् कथनं **उपव्याख्यानम्**। **भूतं** अतीतं **भवत्** वर्तमानं **भविष्यत्** अनागतार्थः **ओङ्कार एव** सदसदात्मकतया **यत्** प्रसिद्धं **त्रिकालातीतं तदप्योङ्कारः एव**। **सर्वं ह्येतत् ब्रह्म** अभिधेयात्मना अभिधानप्रपञ्चव्यापकत्वात्। अचेतनप्रपञ्चस्य ब्रह्मत्वमुक्तं न चेतनस्येति शङ्कां शातयति—**अयमात्मा [illegible]ते**। अस्मत्प्रत्ययालम्बनतया **अयं** अनुभूयमानस्त्वंपदार्थः *प्रत्यगात्मोच्यते*। *सत्यज्ञानादिलक्षणं ब्रह्म* तत्पदार्थः। तयोः स्वाज्ञदृष्ट्या भेदः व्यष्टिसमष्ट्युपाधियोगभ्रमात्। स्वज्ञदृष्ट्या उपाधेः मायिकत्वेन मिथ्यात्वात् उपहितचैतन्ययोः अभेद एव। परमार्थदृष्ट्या स्वातिरिक्तसामान्यस्य व्यष्ट्यादेः शशविषाणवत् अवस्तुतया तत्प्रसक्तभेदाभेद-वैरळ्यात् निष्प्रतियोगिकं ब्रह्ममात्रमवशिष्यत इत्यर्थः। स्वाज्ञदृष्ट्या **सोऽयमात्मा** कार्षापणवत् चत्वारः पादाः अस्येति **चतुष्पात्** न गौरिवेत्यर्थः॥ ३॥

प्रणवप्रथमपादनिरूपणम्

जागरितस्थानो बहिःप्रज्ञः सप्ताङ्ग एकोनविंशतिमुखः स्थूल-भुग्वैश्वानरः प्रथमः पादः॥ ४॥

तत् कथं? जागरितं स्थानमस्येति **जागरितस्थानः** चाक्षुषादिगोचरप्रज्ञा यस्येति स **बहिःप्रज्ञः** सप्तसंख्याकानि द्युसूर्यवाय्वाकाशोदकपृथिव्याहवनीया-ख्यानि मुख्याङ्गानि यस्य सोऽयं **सप्ताङ्गः** पञ्चज्ञानकर्मेन्द्रियप्राणान्तःकरण-चतुष्टयभेदैनैकोनविंशतिमुखानि विषयोपलब्धिद्वाराणि अस्येति **एकोनविंशतिमुखः** स्थूलविषयकभोगो यस्य सः **स्थूलभुक्** विश्वश्वासौ नरश्चेति विश्वनरः स एव **वैश्वानरः**। चतुरात्मत्वं उत्तरतापिन्यां स्फुटं अवगम्यते इत्यत्र न प्रपञ्चितम्। **अयमेव प्रथमः पादः॥ ४॥**

प्रणवद्वितीयपादनिरूपणम्

स्वप्नस्थानोऽन्तःप्रज्ञः सप्ताङ्ग एकोनविंशतिमुखः प्रविविक्तभुक् तैजसो द्वितीयः पादः ॥ ५ ॥

इदानीं द्वितीयं पादमाह—**स्वप्नस्थान** इति । जागरितवासनाजन्यस्वप्नस्थानमस्येति **स्वप्नस्थानः** वासनामये अन्तरेव प्रज्ञा यस्य सोऽन्तःप्रज्ञः **सप्ताङ्गः** । **एकोनविंशतिमुखः** इति व्याख्यातम् । प्रविविक्तं सूक्ष्मं वासनाऽनुरूपं भुङ्क्त इति **प्रविविक्तभुक्** [illegible]सान्तःकरणोपाधिकत्वात् **तैजसः** जागरितानन्तर्यात् अयं **द्वितीयः पादः** ॥ ५ ॥

प्रणवतृतीयपादनिरूपणम्

यत्र सुप्तो न कंचन कामं कामयते न कंचन स्वप्नं पश्यति तत् सुषुप्तम् । सुषुप्तस्थान [1]एकीभूतप्रज्ञानघन एवानन्दमयो ह्यानन्दभुक् चेतोमुखः प्राज्ञस्तृतीयः पादः । एष सर्वेश्वर एष सर्वज्ञ एषोऽन्तर्याम्येष योनिः सर्वस्य प्रभवाप्ययौ हि भूतानाम् ॥ ६ ॥

इदानीं तृतीयपादमाह—**यत्रेति** । **यत्र** यस्मिन् काले **सुप्तः** उपरतेन्द्रियग्रामः **किंचन** पुण्यपापहेतुभूतदारपुत्रधनक्षेत्रादिकं **न कामयते न कंचन** शुभाशुभवासनाविशेषस्**वप्नं पश्यति** सुषुप्तेः सर्वकरणोपरमस्थानत्वात् यदेवमुक्तं **तत् सुषुप्तम्** । सुषुप्तं स्थानं अस्येति **सुषुप्तस्थानः** एकीभूतप्रज्ञानघनः बाह्यान्तःकरणप्रज्ञानानां अस्मिन्नेकीभूतत्वात्, अयं एकीभूतप्रज्ञानघन एव **आनन्दमयः** विश्वाद्यपेक्षया अस्यानन्दप्रचुरत्वात् स्वाज्ञानवृत्तिकलि**तानन्दभुक्** आवृत्यावृतचेतोमुखं द्वारं यस्य सः **चेतोमुखः** प्रकृष्टानन्दे स्वाज्ञानवृत्तिकलितबोधो यस्य सोऽयं **प्राज्ञः** । स हि **तृतीयः पादः** । ईश्वरत्वेन इदानीं प्राज्ञं स्तौति—**एष** इति । व्यष्टि-

[1] अयं व्याख्यानुसारी पाठः । आकरकोशदृष्टपाठस्तु—'एकीभूतः प्र' इति.

समष्टिबीजेशयोरेकत्वात् **एष सर्वेश्वरः** सर्वश्वासौ ज्ञश्चेत्येष **सर्वज्ञः एषोऽन्तर्यामी** सर्वनियन्तृत्वात् **सर्वस्य एष योनिः** सर्वकारणत्वात्। योनित्वे अयं हेतुः— **भूतानां** चेतनाचेतनात्मकानां **प्रभवाप्ययौ** उत्पत्तिप्रळयावपि एष एव, प्रत्यगभिन्नब्रह्मात्मना आरोपापवादाधिकरणत्वात् ॥ ६ ॥

प्रणवचतुर्थपादनिरूपणम्

नान्तःप्रज्ञं न बहिःप्रज्ञं नोभयतःप्रज्ञं न प्रज्ञं नाप्रज्ञं न प्रज्ञानघनमदृष्टमव्यवहार्यमग्राह्यमलक्षणमचिन्त्यमव्यपदेश्यमेकात्म[1]-प्रत्ययसारं प्रपञ्चोपशमं शान्तं शिवमद्वैतं चतुर्थं मन्यन्ते स आत्मा स विज्ञेयः ॥ ७ ॥

इदानीं तुर्यपादमाह—**नान्तःप्रज्ञमिति**। **नान्तःप्रज्ञं** वासनावैरळ्यात् **न बहिःप्रज्ञं** बाह्यप्रपञ्चाभावात् **नोभयतःप्रज्ञं** जाग्रत्स्वप्नान्तराळीयबोधाभावात् **न प्रज्ञं** निर्विकल्पबोधाभावात् **नाप्रज्ञं** नबोधाभानरूपत्वात् **न प्रज्ञानघनं** करणग्रामविषयकप्रज्ञानवैरळ्यात् **अदृष्टं** अदृश्यं दृङ्मात्रत्वात् **अव्यवहार्यं** अवाङ्मानसगोचरत्वात् **अग्राह्यं** अचाक्षुषत्वात् **अलक्षणं** लक्षणागम्यत्वात् **अचिन्त्यं** अनिदंवस्तुत्वात् **अव्यपदेश्यं** अनभिधेयत्वात् **एकात्मप्रत्ययसारं** स्वमात्रप्रत्ययगोचरत्वात् **प्रपञ्चोपशमं** तत्प्रळयाधिकरणत्वात् **शान्तं** शान्तस्वातिरिक्तत्वात् **शिवं** चिन्मात्रत्वात् **अद्वैतं** द्वैताभावात् **चतुर्थं** तुर्यत्वात्। ब्रह्मवादिनः नान्तःप्रज्ञं इत्यादिविशेषणविशिष्टं यत्तत् **चतुर्थं मन्यन्ते**। **स** हि परमात्मा **स** एव मुमुक्षुभिः आत्मतया **विज्ञेयः** साक्षात्कर्तव्यः ॥ ७ ॥

सावित्रीगायत्रीमन्त्रस्वरूपम्

अथ सावित्री गायत्र्या [त्री या] यजुषा प्रोक्ता तया सर्वमिदं व्याप्तम्। घृणिरिति द्वे अक्षरे सूर्य इति त्रीणि आदित्य इति त्रीणि।

[1] मैकात्म्यप्र—उ, मु.

एतद्वै सावित्रस्याष्टाक्षरं पदं श्रियाऽभिषिक्तम् । य एवं वेद श्रिया हैवाभिषिच्यते ॥ ८ ॥

तदेतदृचाभ्युक्तं—

ऋचो अक्षरे परमे व्योमन् यस्मिन् देवा अधि विश्वे निषेदुः ।
यस्तन्न वेद किमृचा करिष्यति य इत्तद्विदुस्त इमे
समासत इति ॥ ९ ॥

न ह वा एतस्यर्चा न यजुषा न साम्नाऽर्थोऽस्ति यः सावित्रं वेदेति ॥ १० ॥

चतुष्पादोङ्कारः प्रथमाङ्गत्वेन निर्दिष्टः । इदानीं सवितृदेवताकं गायत्री-छन्दस्कं द्वितीयमङ्गमाह—**अथेति** । अथ प्रथमाङ्गकथनानन्तरं **सावित्री** सवितृदेवताका **गायत्री** गायत्रीछन्दस्का या **यजुषा प्रोक्ता तया** यजुर्वेदोक्तया गायत्र्या **सर्वमिदं व्याप्तम्** । तां निर्दिशति—**घृणिरिति** अक्षरानुकरणार्थः **द्वे अक्षरे, सूर्य** इत्यत्र सूरीय इत्यक्षरत्रयं, **आदित्य इति त्रीण्यक्षराणि । एतद्वै** प्रसिद्धस्य **सावित्रस्याष्टाक्षरं पदं श्रियाऽभिषिक्तम्** । इति **यो वेद** यथोक्तमेवं जानाति तस्यैतत्फलं—**श्रिया हैवाभिषिच्यते** ॥ ८ ॥ यदेवमुक्तं **तदृचा** मन्त्रेणाभ्युक्तम् । पादबद्धाक्षरात्मिका **ऋचः** तदुपलक्षितशब्दराशिः **अक्षरे** सश्रीबीजे **परमे** उत्कृष्टे **व्योमन्** सवित्राकाशे **यस्मिन्** सवितरि सश्रीके अष्टाक्षरे परमे व्योम्नि **विश्वे** सर्वे **देवाः अधिनिषेदुः यः** प्रसिद्धोऽयमुपासकः **तं** अष्टाक्षररूपं सश्रीकं **न वेद** न जानाति यदि तदा **ऋचा** सवितृमन्त्रव्यतिरिक्तेन **किं करिष्यति ये** सश्रीकसावित्रीमन्त्रोपासकाः **इत्** इत्थं सर्वशब्दराशिदेवता-धिष्ठानभूतं अष्टाक्षरं **विदुः** ते सश्रीकमन्त्रोपासकाः **समासते** परिपूर्णमनोरथा वर्तन्ते । **इति**शब्दो मन्त्रसमाप्त्यर्थः ॥ ९ ॥ सवितृमन्त्रज्ञाने वेदत्रयमुपयुज्यत इत्यत आह—**न ह वा इति** । वेदत्रयनिर्वर्त्यप्रयोजनस्य पुरस्तादेव सिद्धत्वात् **यः**

सावित्रं वेद जानाति तस्य वेदत्रयसाध्यप्रयोजनं नह्यस्तीत्यर्थः। **इतिशब्दः** सावित्रमन्त्रसमाप्त्यर्थः ॥ १० ॥

यजुर्लक्ष्मीमन्त्रस्वरूपम्

ओंभूर्लक्ष्मीर्भुवर्लक्ष्मीः स्वर्लक्ष्मीः कालकण्ठी तन्नो महालक्ष्मीः प्रचोदयात् इत्येषा वै महालक्ष्मीर्यजुर्गायत्री चतुर्विंशत्यक्षरा भवति ॥ ११ ॥

गायत्री वा इदं सर्वं यदिदं किंच तस्माद्य एतां महालक्ष्मीं याजुषीं वेद महतीं श्रियमश्नुते ॥ १२ ॥

तृतीयं यजुर्लक्ष्म्याख्यं अङ्गमन्त्रमाह—**ओमिति**। **ओं भूर्भुवःसुवरिति** व्याहृतित्रयं त्रैलोक्यलक्ष्मीद्योतनार्थम्। कालो भगवान् कण्ठोपलक्षितहृदये यस्याः सेयं **कालकण्ठी तत्** तस्मिन्नर्थे व्याहृतित्रयनिष्पन्ने त्रैलोक्यैश्वर्ये **नोऽस्मान् महालक्ष्मीः प्रचोदयात्**। **इतिशब्दो** यजुर्लक्ष्मीमन्त्रसमाप्त्यर्थः। **एषा** प्रत्यक्षतयोक्ता। **वै** प्रसिद्धा। **यजुर्गायत्रीरूपिणी लक्ष्मीः चतुर्विंशत्यक्षरा भवति** ॥ ११ ॥ गायकप्राणान् त्रायत इति **गायत्री वै** प्रसिद्धा **इदं सर्वं, यदिदं किंच** यत्किंचेदं सर्वं गायत्र्यात्मकम्। **एतां** सर्वरूपिणीं **महालक्ष्मीं याजुषीं यो वेद स महतीं श्रियं अश्नुते** ॥ १२ ॥

नृसिंहगायत्रीमन्त्रस्वरूपम्

ॐ नृसिंहाय विद्महे वज्रनखाय धीमहि। तन्नः सिंहः प्रचोदयात् इत्येषा वै नृसिंहगायत्री देवानां वेदानां निदानं भवति य एवं वेद निदानवान् भवति ॥ १३ ॥

इदानीं नृसिंहगायत्रीरूपं चतुर्थमङ्गमाह—**ओमिति**। ये तस्मै **नृसिंहाय** पुरुषसिंहाय इदं सर्वं नृसिंहार्थमिति। **विद्महे** विद्म जानीम **वज्रसमानकठोरनखाय**

वज्रसमनखस्य महौभाग्यमत्तेभभेदनपटुत्वात् तस्मै उक्तविशेषणविशिष्टाय **धीमहि** मम तत्पदध्यानविशिष्टं मनस्तत्प्रवणमस्त्वित्यर्थः । **तत्** तत्र **नृसिंहे** पूजास्तुति-ध्यानादिना **नः** अस्मान् तद्भक्तान् **सिंहः प्रचोदयात्** । **इति** मन्त्रसमाप्तौ । **यैषा** ओमित्यारभ्य प्रचोदयात् इत्यन्ता **वै** प्रसिद्धा सेयं **नृसिंहगायत्री** ऋगादि-चतुर्वेदानां अग्नीन्द्रादिदेवानामपि **निदानं** कारणं **भवति** । **एवं** उक्तप्रकारेण **यो वेद** स विद्वान् **निदानवान् भवति** सर्वकारणभूतो भवति ॥ १३ ॥

ङमन्त्रस्वरूपम्

देवा ह वै प्रजापतिमब्रुवन्—अथ कैर्मन्त्रैः स्तुतो देवः प्रीतो भवति स्वात्मानं दर्शयति [1]तान्नो ब्रूहि भगवन्निति ॥ १४ ॥

स होवाच प्रजापतिः—ॐ यो ह वै नृसिंहो देवो भगवान् यश्च ब्रह्मा भूर्भुवः स्वस्तस्मै वै नमो नमः—१ । (यथा प्रथममन्त्रोक्तावाद्यन्तौ तथा सर्वमन्त्रेषु द्रष्टव्यौ) ... यश्च विष्णुः ... २ । ... यश्च महेश्वरः ... ३ । ... यश्च पुरुषः ... ४ । ... यश्चेश्वरः ... ५ । ... या सरस्वती ... ६ । ... या श्रीः ... ७ । ... या गौरी ... ८ । ... या प्रकृतिः ... ९ । ... या विद्या ... १० । ... यश्चोंकारः ... ११ । ... याश्चतस्रोऽर्धमात्राः ... १२ । ... ये वेदाः साङ्गाः सशाखाः सेतिहासाः ... १३ । ... ये पञ्चाग्नयः ... १४ । ... याः सप्त महाव्याहृतयः ... १५ । ... ये चाष्टौ लोकपालाः ... १६ । ... ये चाष्टौ वसवः ... १७ । ... ये चैकादश रुद्राः ... १८ । ... ये च द्वादशादित्याः ... १९ । ...

[1] तन्नो—अ २, मु.

ये चाष्टौ ग्रहाः ... २० । ... यानि च पञ्च महाभूतानि ... २१ । ...
यश्च कालः ... २२ । ... यश्च मनुः ... २३ । ...
यश्च मृत्युः ... २४ । ... यश्च यमः ... २५ । ...
यश्चान्तकः ... २६ । ... यश्च प्राणः ... २७ । ...
यश्च सूर्यः ... २८ । ... यश्च सोमः ... २९ । ...
यश्च विराट् पुरुषः ... ३० । ... यश्च जीवः ... ३१ । ...
यच्च सर्वम् ... ३२ । इति द्वात्रिंशत् । इति तान् प्रजापतिरब्रवीदेतैर्मन्त्रैर्नित्यं देवं स्तुध्वम् ॥ १५ ॥

[1]ततो देवः प्रीतो भवति स्वात्मानं दर्शयति तस्माद्य एतैर्मन्त्रैर्नित्यं देवं स्तौति स देवं पश्यति सोऽमृतत्वं च गच्छति य एवं वेदेति महोपनिषत् ॥ १६ ॥

अङ्गमन्त्रान् सदेवान् श्रुत्वा अनुमन्त्रान् प्रत्यङ्गभूतान् द्वात्रिंशदक्षरजान् यथावद्विज्ञातुं देवाः पृच्छन्तीत्याह —देवा इति । देवा ह वै प्रजापतिमब्रुवन् इत्यादि स्पष्टोऽर्थः ॥ १४ ॥ यो ह वै नृसिंहो देवो भगवान यश्च ब्रह्मेत्यादि यश्च सर्वमित्यन्तमन्त्रान् पृच्छतः स्वशिष्यान् प्रति प्रजापतिः अब्रवीत् एतैर्मन्त्रैः नित्यं देवं स्तुध्वं यथाशक्ति स्तुतिं कुरुध्वम् ॥ १५ ॥ ततो भवद्भिः कृतस्तोत्रात् देवः प्रीतो भवति स्वात्मानं दर्शयति । यस्मादेवं तस्मात् य एतैर्मन्त्रैः नित्यं देवं स्तौति स देवं स्वात्मत्वेन पश्यति साक्षात्करोति । न केवलमेवं, किं तु देवावलोकनकृत् अमृतत्वं च गच्छति । इतिशब्दः चतुर्थोपनिषत्समाप्त्यर्थः ॥ १६ ॥

इति चतुर्थोपनिषत्

---

[1] तस्य—अ, अ १.

पञ्चमोपनिषत्

देवानां महाचक्रजिज्ञासा

देवा ह वै प्रजापतिमब्रुवन्—आनुष्टुभस्य मन्त्रराजस्य नारसिंहस्य महाचक्रं नाम चक्रं नो ब्रूहि भगव इति सार्वकामिकं मोक्षद्वारं यद्योगिन [1]उपदिशन्ति ॥ १ ॥

किं छन्दः ? क ऋषिः ? इति प्रश्नोत्तरं कण्ठरवेण नोक्तम्। कान्यङ्गानि ? कानि दैवतानि च ? इति प्रश्नोत्तरं प्रथमद्वितीयचतुर्थोपनिषत्सु सम्यगुक्तम्। किं ध्यानं ? किं दैवतं ? इति मन्त्रराजपदतदर्थबीजशक्तिकथनेन प्रथमाद्युपनिषत्सूत्तरं दत्तम्। यद्यपि समाप्तश्चैव शास्त्रार्थः, तथाऽपि प्रधानाङ्गप्रत्यङ्गादिषु महाचक्रस्य मुख्यत्वात् तस्य सामान्यतः प्रसिद्धत्वेऽपि विशेषतोऽप्रसिद्धत्वात् तदधिगमार्थं फलज्ञानार्थं च पञ्चम्युपनिषदारभ्यते—**देवा** इति। **देवा ह वा** इत्यादि व्याख्यातम्। महच्च तच्चक्रं चेति चतुर्विधपुरुषार्थसाधनं यत् तत् **महाचक्रं** सर्वलोकप्रसिद्धितो **नाम चक्रं**, भवादृशां विशेषतः अस्माकं च सामान्यतः चक्रं नृसिंहस्य योगचूडामणेः विशेषतो नाम नामधेयं महाचक्रं **नो ब्रूहि भगव इति** व्याख्यातम्। **सार्वकामिकं** सर्वकामप्रदं **मोक्षद्वारं** विकळेबरकैवल्यप्रापकोपायभूतं **यद्योगिन उपदिशन्तीति** ॥ १ ॥

षडरचक्रदर्शनम्

स होवाच प्रजापतिः—षडरं वा एतत् सुदर्शनं महाचक्रं तस्मात् षडरं भवति षट्पत्रं चक्रं भवति षड्वा ऋतवः ऋतुभिः संमितं भवति मध्ये नाभिर्भवति नाभ्यां वा एते अराः प्रतिष्ठिता मायया

[1] उपवि—अ, अ १.

एतत् सर्वं वेष्टितं भवति नात्मानं माया स्पृशति तस्मान्मायया बहिर्वेष्टितं भवति ॥ २ ॥

एवं देवैः पृष्टः प्रजापतिराह—स हेति । देवैः महाचक्रयाथात्म्यं पृष्टः स होवाच प्रजापतिः । षट्संख्याकान्यराणि यस्मिन् तत् षडरं वै प्रसिद्धं एतत् प्रत्यराक्षरं सहस्रारहुंफडिति सुदर्शनं महाचक्रं तस्मात् सुदर्शनं षडरं भवति । न केवलं षडरं किं तु षट्पत्रं चक्रं भवति । षडरत्वे षट्पत्रत्वे चोपपत्तिः—षड्वा ऋतवः ऋतुभिः संमितं भवति । षण्णां पत्राणां मध्ये नाभिः छिद्रं, सनेमिं पत्रप्रतिष्ठामूलस्य नाभित्वात् । नाभ्यां वा एते अराः प्रतिष्ठिताः प्रतिष्ठानं प्राप्ताः तुर्यया मायया एतत् सारनाभिपत्राक्षरं सुदर्शनं वेष्टितं भवति । मायाग्रस्तं सुदर्शनं इत्यत आह—नात्मानमिति । यत एवं अतो मायया बहिर्वेष्टितं भवति ॥ २ ॥

अष्टारचक्रदर्शनम्

अथाष्टारमष्टपत्रं चक्रं भवत्यष्टाक्षरा वै गायत्री गायत्र्या संमितं भवति बहिर्मायया वेष्टितं भवति क्षेत्रं क्षेत्रं वै मायैषा संपद्यते ॥ ३ ॥

प्रथमचक्रं व्याख्यातम् । अथ प्रथमचक्रप्रदर्शनानन्तरं अष्टारं अष्टपत्रं चक्रं भवति । तत्रोपपत्तिः—अष्टाक्षरा वै प्रसिद्धा गायत्री छन्दोविशेषः गायत्र्या एकैकपादस्य अष्टाक्षरसंमितत्वात् बहिर्मायया वेष्टितं भवति । मायाविन्यासस्थलमाह—क्षेत्रमिति । क्षेत्रं क्षेत्रं वै मायैषा संपद्यते प्रतिक्षेत्रं मायाबीजवेष्टितं भवतीत्यर्थः ॥ ३ ॥

द्वादशारचक्रदर्शनम्

अथ द्वादशारं द्वादशपत्रं चक्रं भवति द्वादशाक्षरा वै जगती जगत्या संमितं भवति बहिर्मायया वेष्टितं भवति ॥ ४ ॥

अथ द्वादशारं द्वादशपत्रं चक्रं भवति । तत्रोपपत्तिः—**द्वादशाक्षरा वै** प्रसिद्धा **जगती** जगदभिन्ना छन्दोविशेषरूपिणी तया **जगत्या संमितं संयुक्तं भवति** पूर्ववत् **बहिर्मायया वेष्टितं भवति** ॥ ४ ॥

षोडशारचक्रदर्शनम्

अथ षोडशारं षोडशपत्रं चक्रं भवति षोडशकलो वै पुरुषः पुरुष एवेदं सर्वं पुरुषेण संमितं भवति मायया बहिर्वेष्टितं भवति ॥ ५ ॥

अथ षोडशारं षोडशपत्रं चक्रं भवति । तत्रोपपत्तिः—प्राणादिनामान्त-षोडशकला यस्य स **षोडशकलो वै** प्रसिद्धः **पुरुषः** स्वेन रूपेण सर्वत्र पूरणात् **पुरुष एवेदं सर्वं** इति **पुरुषेण संमितं भवति** । तथा मायया **बहिर्वेष्टितं भवति** ॥ ५ ॥

द्वात्रिंशदरचक्रदर्शनम्

अथ द्वात्रिंशदरं द्वात्रिंशत्पत्रं चक्रं भवति द्वात्रिंशदक्षरा वा अनुष्टुब्भवत्यनुष्टुभा सर्वमिदं भवति बहिर्मायया वेष्टितं भवति ॥ ६ ॥

अथ द्वात्रिंशदरं द्वात्रिंशत्पत्रं चक्रं भवति । तत्रेयमुपपत्तिः—**द्वात्रिंशदक्षरा** वै प्रसिद्धा **अनुष्टुप्**छन्दोरूपिणी भवति । **अनुष्टुभा** छन्दो-रूपिण्या **सर्वमिदं** संमितं **भवति** बहिर्मायया वेष्टितं भवति ॥ ६ ॥

अवयवदर्शनम्

अरैर्वा एतत् सुबद्धं भवति वेदा वा एते अराः पत्रैर्वा एतत् सर्वतः परिक्रामति छन्दांसि वै पत्राणि ॥ ७ ॥

अवयविदृष्टिमुक्त्वा अवयवदृष्टिमाह—**अरैरिति** । **अरैः वै** प्रसिद्धैः **एतत्** अवयविचक्ररूपं **सुबद्धं भवति** वेदैः जगदिव यतस्ततो **वेदाः** ऋगाद्या **वै**

प्रसिद्धाः एते चक्रस्य बन्धहेतवः अराः । पत्रैरुक्तैर्वै प्रसिद्धैः अवयविचक्ररूपं सर्वतः परिक्रामति छन्दोभिरिव वेदात्माऽऽदित्यः । गायत्र्यादीनि छन्दांसि वै प्रसिद्धानि पत्राणि भ्रमणकारणानि ॥ ७ ॥

महासुदर्शनदर्शनम्

एतत् सुदर्शनं महाचक्रं तस्य मध्ये नाभ्यां तारकं यदक्षरं नारसिंहमेकाक्षरं तद्भवति षट्सु पत्रेषु षडक्षरं सुदर्शनं भवत्यष्टसु पत्रेष्वष्टाक्षरं नारायणं भवति द्वादशसु पत्रेषु द्वादशाक्षरं वासुदेवं भवति षोडशसु पत्रेषु मातृकाद्याः सबिन्दुकाः षोडश स्वरा भवन्ति द्वात्रिंशत्सु पत्रेषु द्वात्रिंशदक्षरं मन्त्रराजं नारसिंहमानुष्टुभं भवति तद्वा एतत् सुदर्शनं नाम चक्रं महाचक्रं सार्वकामिकं मोक्षद्वारमृङ्मयं यजुर्मयं साममयं ब्रह्ममयममृतमयं भवति तस्य पुरस्ताद्वसव आसते रुद्रा दक्षिणत आदित्याः पश्चाद्विश्वेदेवा उत्तरतो ब्रह्मविष्णुमहेश्वरा नाभ्यां सूर्याचन्द्रमसौ पार्श्वयोः ॥ ८ ॥

तदेतदृचाऽभ्युक्तं—

ऋचो अक्षरे परमे व्योमन् यस्मिन् देवा अधि विश्वे निषेदुः ।
यस्तन्न वेद किमृचा करिष्यति य इत्तद्विदुस्त इमे समासते ॥

इति ॥ ९ ॥

यन्मयोक्तं तदेतत् सुदर्शनं महाचक्रं तस्योक्तस्य महाचक्रस्य मध्ये नाभ्यां मध्यकर्णिकायां यदक्षरं नारसिंहं स्वातिरिक्तभ्रमसंतारणात् तत्तारकं प्रणवस्वरूपं भवति नरसिंहदेवताकमेकाक्षरम् । षट्सु पत्रेषु सहस्रारहुं फट् स्वाहेति षडक्षरं सुदर्शनं भवति । तथा अष्टसु पत्रेषु ॐ नमो नारायणाय

इत्यष्टाक्षरं नारायणं भवति । तथा द्वादशसु पत्रेषु ॐ नमो भगवते वासुदेवाय इति द्वादशाक्षरं वासुदेवं भवति । तथा षोडशसु पत्रेषु अकाराद्या मातृका बिन्दुसहिताः सबिन्दुकाः षोडश स्वरा भवन्ति । तथा द्वात्रिंशत्सु पत्रेषु उग्रं वीरमित्यादि द्वात्रिंशदक्षरं मन्त्रराजं नारसिंहमानुष्टुभं भवति । स्पष्टार्थमन्यदुक्तार्थं च । ब्रह्ममयं इत्येतत् ब्रह्मशब्देन अथर्ववेद उच्यते ऋग्यजुस्सामानन्तर्यात् । अमृतमयं सर्वोपनिषन्मयं सत्यादिलक्षणब्रह्ममयं वा, सर्वत्र मयटो विकारार्थत्वात् तादात्म्यं लक्ष्यते । तस्य चक्रराजस्य पुरस्ताद्वसव आसत इत्यादि—स्पष्टोऽर्थः ॥ तत् तस्मिन् महाचक्रे सर्ववेददेवात्मके योऽर्थोऽभिहितः तदेतदर्थजातं ऋचा मन्त्रेण अभ्युक्तं—ऋच इति । अविनाशिनि अक्षरे महाचक्रे अनेकाक्षराधारे । यः तत् परमाक्षरं नारसिंहं न वेदेत्याद्युक्तार्थम् ॥ ९ ॥

महाचक्रवेदनमहिमा

तदेतत् सुदर्शनं महाचक्रं बालो वा युवा वा वेद स महान् भवति स गुरुः सर्वेषां मन्त्राणामुपदेष्टा भवत्यनुष्टुभा होमं कुर्यादनुष्टुभाऽर्चनं कुर्यात्तदेतद्राक्षोघ्नं मृत्युतारकं गुरुणा लब्धं कण्ठे बाहौ शिखायां वा बध्नीत सप्तद्वीपवती भूमिर्दक्षिणार्थं नावकल्पते तस्माच्छ्रद्धया यां कांचिद्वां दद्यात् सा दक्षिणा भवति ॥ १० ॥

तदेतत् सुदर्शनं महाचक्रं बालो वा युवा वा वेद स महाचक्रशरीरो नृसिंहो भवति । स महाचक्रवित् सर्वमन्त्राणामुपदेष्टा गुरुः भवति । मन्त्रराजज्ञाने संशयादिपञ्चदोषनिरसनार्थं जपहोमौ कर्तव्यावित्याह—अनुष्टुभा होमं कुर्यादनुष्टुभाऽर्चनं कुर्यादिति स्पष्टम् । तत् परोक्षप्रभावं एतत् षडक्षरादि-विशेषयुक्तं राक्षोघ्नं तत्कृतोपद्रवनिवारकं मृत्युतारकं मृत्युनिवारकं सुवर्णादि-फलकायां विलिख्य यथावत् प्राणप्रतिष्ठाऽऽदिकं कृत्वा गुरुणा लब्धं दत्तं कण्ठे

बाहौ शिखायां वा बध्नीत बन्धनं कुर्वीत । इदानीमस्य चक्रस्य दातुर्दक्षिणेयत्तां वारयति—सप्तद्वीपवती भूमिः दक्षिणार्थं नावकल्पत इति । यस्मान्नास्ति निष्क्रियः तस्मात् यां कांचित् गां अन्यद्वा श्रद्धया दद्यात् सा दक्षिणा भवति ॥ १० ॥

मन्त्रराजाध्ययनफलम्

देवा ह वै प्रजापतिमब्रुवन्—[illegible]नुष्टुभस्य मन्त्रराजस्य नारसिंहस्य फलं नो ब्रूहि भगव इति ॥ ११ ॥

स होवाच प्रजापतिः य एतं मन्त्रराजं नारसिंहमानुष्टुभं नित्यमधीते सोऽग्निपूतो भवति स वायुपूतो भवति स आदित्यपूतो भवति स सोमपूतो भवति स सत्यपूतो भवति स ब्रह्मपूतो भवति स विष्णुपूतो भवति स रुद्रपूतो भवति स देवपूतो भवति स सर्वपूतो भवति स सर्वपूतो भवति ॥ १२ ॥

य एतं मन्त्रराजं नारसिंहमानुष्टुभं नित्यमधीते स मृत्युं जयति स पाप्मानं तरति स ब्रह्महत्यां तरति स भ्रूणहत्यां तरति स वीरहत्यां तरति स सर्वहत्यां तरति स संसारं तरति स सर्वं तरति स सर्वं तरति ॥ १३ ॥

य एतं मन्त्रराजं नारसिंहमानुष्टुभं नित्यमधीते सोऽग्निं स्तम्भयति स वायुं स्तम्भयति स आदित्यं स्तम्भयति स सोमं स्तम्भयति स उदकं स्तम्भयति स सर्वान् देवान् स्तम्भयति स सर्वान् ग्रहान् स्तम्भयति स विषं स्तम्भयति स विषं स्तम्भयति ॥ १४ ॥

य एतं मन्त्रराजं नारसिंहमानुष्टुभं नित्यमधीते स देवानाकर्षयति स यक्षानाकर्षयति स नागानाकर्षयति स ग्रहानाकर्षयति स मनुष्यानाकर्षयति स सर्वानाकर्षयति स सर्वानाकर्षयति ॥ १५ ॥

य एतं मन्त्रराजं नारसिंहमानुष्टुभं नित्यमधीते स भूर्लोकं जयति स भुवर्लोकं जयति स स्वर्लोकं जयति स महर्लोकं जयति स जनोलोकं जयति स तपोलोकं जयति स सत्यलोकं जयति स सर्वलोकं जयति स सर्वलोकं जयति ॥ १६ ॥

य एतं मन्त्रराजमानुष्टुभं नित्यमधीते सोऽग्निष्टोमेन यजते स उक्थ्येन यजते स षोडशिना यजते स वाजपेयेन यजते सोऽतिरात्रेण यजते सोऽप्तोर्यामेण यजते सोऽश्वमेधेन यजते स सर्वैः क्रतुभिर्यजते स सर्वैः क्रतुभिर्यजते ॥ १७ ॥

य एतं मन्त्रराजं नारसिंहमानुष्टुभं नित्यमधीते स ऋचोऽधीते स यजूंष्यधीते स सामान्यधीते सोऽथर्वणमधीते सोऽङ्गिरसमधीते स शाखा अधीते स पुराणान्यधीते स कल्पानधीते स गाथामधीते स नाराशंसीरधीते स प्रणवमधीते यः प्रणवमधीते स सर्वमधीते स सर्वमधीते ॥ १८ ॥

इदानीं विज्ञातमन्त्रसर्वस्वा देवाः मन्त्रराजज्ञानसामान्यविशेषफलबुभुत्सया प्रजापतिं पृच्छन्तीत्याह—देवा इति ॥ ११ ॥ देवैः पृष्टः स होवाच । किमिति ? नारसिंहमन्त्रराजाध्यापकस्य तदर्थनृसिंहभावापत्त्या अयं निरावृताग्निवाय्वादित्यसत्यब्रह्मविष्णुरुद्रादिवत् नित्यपूतो भवति । तद्भावापत्त्या अपूतदेहादावात्मात्मीयाभिमानवैकल्यान्नित्यपूतत्वं सिद्धमेवेत्यर्थः । अभ्यास आदरार्थोऽवधारणार्थो

वा ॥ १२ ॥ किंच—य इति । स्पष्टोऽर्थः ॥ १३ ॥ नृसिंहभावमापन्नो मन्त्री स्वातिरेकेण नह्यग्न्यादीन् पश्यति । यद्येवं पश्यद्विनोदं कर्तुमिच्छति तदा अग्न्यादीन् लीलया स्तम्भयेदेवेत्यर्थः ॥ १४ ॥ किंच—य इति । यदिच्छेन्मन्त्रराजोपासकस्तदा दूरस्थान् देवादीन् स्वसमीपं आकर्षयत्येवेत्यर्थः ॥ १५ ॥ सर्वलोकात्मके नृसिंहे साक्षात्कृते उपासकेन सर्वे लोका जिता एवेत्यर्थः ॥ १६ ॥ साक्षात्कृतसर्वक्रतुफलनारसिंहेन सर्वे क्रतवः कृता एवेत्यर्थः ॥ १७ ॥ साक्षात्कृतवेदार्थपरमाद्वैतनारसिंहेन ऋगादिसर्वा विद्या ब्रह्मप्रणवान्ता अधीता एव । अथर्वाङ्गिरोभिः दृष्टा अथर्वाङ्गिरसः अथर्ववेदपर्यायाः । "तदैक्षत," "तत्तेजोऽसृजत" इत्यादीनि पुराणानि । अतीतार्थाभिधायिनः कल्पाः "शौनको ह वै महाशालः" इत्यादयः । प्रवृत्तिविषयकशाकल्यादिसंवादरूपाः गाथाः । नारं अविद्यापदतत्कार्यं तदियत्ताप्रकाशका नाराशंस्यः "पुरुषान्न परं किंचित्," "नेह नानाऽस्ति किंचन" इत्यादयः । शिष्टं स्पष्टम् ॥ १८ ॥

मन्त्रराजजापकस्य सर्वोत्कृष्टत्वम्

अनुपनीतशतमेकमेकेनोपनीतेन तत्समसुपनीतशतमेकमेकेन गृहस्थेन तत्समं गृहस्थशतमेकमेकेन वानप्रस्थेन तत्समं वानप्रस्थशतमेकमेकेन यतिना तत्समं यतीनां तु शतं पूर्णमेकमेकेन रुद्रजापकेन तत्समं रुद्रजापकशतमेकमेकेनाथर्वशिरःशिखाऽध्यापकेन तत्समम्अथर्वशिरःशिखाध्यापकशतमेकमेकेन तापनीयोपनिषद्ध्यापकेन तत्समं तापनीयोपनिषद्ध्यापकशतमेकमेकेन मन्त्रराजाध्यापकेन तत्समम् ॥ १९ ॥

विश्वगततारतम्यं मन्त्रराजजापके विश्राम्यतीत्याह—अनुपनीतशतमित्यादि । यो गायत्र्युपदेशसंस्कारशून्यः सोऽनुपनीतः तथाविधानां शतं अनुपनीतशतं एकेन एकसंख्याऽऽक्रान्तोऽयमुपनीतः अनुपनीतशतं एकेनोपनीतेन समं

तुल्यमित्यर्थः । शिष्टं एवं ज्ञातव्यम् । गृहस्थो द्विजन्मा यथावदारादिपरिग्रही नित्यादिकर्मकृत् भवति । सदारोऽदारो वा वनी । यथोक्तवर्णाश्रमानुष्ठाता यतिः ज्ञानगन्धविकल इत्यर्थः । अन्यथा एकेनापि यतिना को वा समः स्यात् । शतरुद्रीयपारायणो **रुद्रजापकः** । उग्रमित्याद्येकादशपदात्मकोऽयं **मन्त्रराजः** तज्जापकः तदर्थपर्यवसन्नः ॥ १९ ॥

मन्त्रराजजापकस्य ब्रह्ममात्रपर्यवसानम्

तद्वा एतत् परं धाम मन्त्रराजाध्यापकस्य यत्र न सूर्यस्तपति यत्र न वायुर्वाति यत्र न चन्द्रमा भाति यत्र न नक्षत्राणि भान्ति यत्र नाग्निर्दहति यत्र न मृत्युः प्रविशति यत्र न दुःखं सदानन्दं परमानन्दं शान्तं शाश्वतं सदाशिवं ब्रह्मादिवन्दितं योगिध्येयं परमं पदं यत्र गत्वा न निवर्तन्ते योगिनः ॥ २० ॥

तदेतदृचाऽभ्युक्तं—

तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः ।
दिवीव चक्षुराततम् ॥
तद्विप्रासो विपन्यवो जागृवांसः समिन्धते । विष्णोर्यत्परमं पदम् ॥
तदेतन्निष्कामस्य भवति तदेतन्निष्कामस्य भवति य एवं वेदेति महोपनिषत् ॥ २१ ॥

तस्यैवं सर्वोत्कर्षतामभिधाय ब्रह्ममात्रपर्यवसन्नतामाह—**तद्वेति** । **यत्र** यत्प्रकाशजडीभूताः **सूर्यादयो** दिवा खद्योतवत् **न भान्ति**, यत्पदं **विमृत्यु** विदुःखं, यत्पदं **गत्वा** कोऽपि **न निवर्तते** "न च पुनरावर्तते" "यद्गत्वा न

निवर्तन्ते तद्धाम परमं मम", इति श्रुतेः स्मृतेश्च, यत् परं पदं ब्रह्मादिभिरपि आत्मत्वेन वन्दितं, यत् स्वावशेषतया परमयोगिध्येयं, यत् स्वातिरिक्तशान्तपदं, यत् सदाशिवपरमानन्दस्वरूपं सदा अवशिष्यते, मन्त्रराजाध्यापकस्य तद्वा एतत् परमं धाम विकळेबरकैवल्यमित्यर्थः ॥ २० ॥ यन्मयोक्तं तदेवर्चा मन्त्रेणाभ्युक्तमित्याह—तदेतदृचाऽभ्युक्तमिति । निष्प्रतियोगिकसच्चिदानन्दमात्रतया यदवशिष्यते तदेतत् विष्णोः व्याप्यसापेक्षव्यापनशीलस्येति षष्ठी "राहोः शिरः" इतिवत् ज्ञेया, परमार्थदृष्ट्या व्याप्यव्यापककलनाविरळं तद्विष्णोः परमं पदं निष्प्रतियोगिकस्वमात्रतया अवगन्तव्यं स्वातिरिक्तास्तिताभ्रान्तिसूदनाः सूरयः विष्णुपदं सदा पश्यन्ति स्वमात्रतया साक्षात्कुर्वन्ति । परिच्छेदप्रसक्तौ दिवीव चक्षुराततं दिवि स्वप्रकाशचिदात्मनि चक्षुरिव आततम् । इवशब्दः आधाराधेयकलनानिरसनार्थः । सूरयः कीदृशाः ? इत्यत्र विप्रासः विप्राः विपन्यवो विमन्यवः अक्रोधा इत्यर्थः । जागृवांसः स्वाज्ञानविरळाः समिन्धते सम्यक् दीपयन्ति अस्मदादीन् प्रकथयन्तीत्यर्थः । तच्छब्दार्थमाह—विष्णोरिति । "तद्विष्णोः परमं पदं" इत्यादिना यदुक्तं तदर्थस्तु निष्कामस्य भवति । आवृत्तिरादरार्था ॥ २१ ॥

इति पञ्चमोपनिषत्

श्रीवासुदेवेन्द्रशिष्योपनिषद्ब्रह्मयोगिना ।
तापनीयोपनिषदो व्याख्येह लिखिता मया ॥

इति श्रीमदीशाद्यष्टोत्तरशतोपनिषच्छास्त्रविवरणे सप्तविंशतिसंख्यापूरकं
नृसिंहपूर्वतापिन्युपनिषद्विवरणं संपूर्णम्

उत्तरतापिनी

प्रथमः खण्डः

देवानां निर्विशेषब्रह्मजिज्ञासा

देवा ह वै प्रजापतिमब्रुवन्—अणोरणीयांसमिममात्मान-मोंकारं नो व्याचक्ष्वेति ॥ १ ॥

नृसिंहोत्तरतापिन्यां तुर्यतुर्यात्मकं महः ।
परमाद्वैतसाम्राज्यं [1]यत् स्यात्तन्मे परा गतिः ॥

मन्त्रराजमहाचक्रोपासनया देवाः विशुद्धान्तरा भूत्वा जाग्रज्जाग्रदादि-चतुष्पञ्चदशकलनाऽपह्नवसिद्धं निष्प्रतियोगिकतुर्यतुर्यं साक्षात्कर्तुमिच्छन्तः सन्तः स्वकीयमादिगुरुं प्रजापतिं तुर्यतुर्यविषयकं प्रश्नं कृतवन्त इत्याह श्रुतिः । अनया आख्यायिकया विशुद्धान्तरमुनीनामेव निर्विशेषब्रह्मावगतिः नान्यथेति द्योत्यते । **देवा ह वा** इति । **देवा ह वै प्रजापतिमब्रुवन्** इत्युक्तार्थम् । किं तत् ? **अणोः** बौद्धप्रत्ययादपि **अणीयांसं** इमं प्रत्यञ्चं **आत्मानं ओङ्कारार्थं** तुर्यतुरीयं **नोऽस्मभ्यं व्याचक्ष्व** कथयस्व **इति** ॥ १ ॥

ब्रह्मात्मैक्योपदेशः

तथेत्योमित्येतदक्षरमिदं सर्वं तस्योपव्याख्यानं भूतं भवद्भ-विष्यदिति सर्वमोंकार एव यच्चान्यत्त्रिकालातीतं तदप्योंकार एव सर्वं ह्येतद्ब्रह्मायमात्मा ब्रह्म ॥ २ ॥

देवैः पृष्टः प्रजापतिः तथेति तत्कृतप्रश्नमुररीकृत्य भगवान् प्रजापतिराह । किमिति ? पूर्वतापिन्यां यदुक्तं ओमित्येतदक्षरमित्यादि तत्राभिधानाभिधेययोरैक्य-

[1] प्रत्यक्षमुपलभ्यते—अ २.

स्यादृष्टचरत्वादिति यथा भवद्भिः पृष्टं तत्तथैवेत्युक्तिः तेषां प्रश्नाङ्गीकारार्था। अभिधानाभिधेययोः एकत्वं यथा भवति तथा प्रतिपादयामीति प्रतिज्ञां करोति—**तथेति**। स्वात्मप्रदानेन स्वोपासकमवति **ओमिति** अक्षरानुकरणार्थः। **एतदुक्तमक्षरं** अभिधानात्मकं विविधप्रत्ययगम्यं **इदं सर्वं** विकारात्मकं जगत् वाचाऽऽरंभणमात्रं, न हि तद्वस्तुपदं भजतीत्यर्थः। **तस्य** ओङ्कारस्य **उपव्याख्यानमित्यादि अयमात्माब्रह्मेत्यन्तमुक्तार्थम्** ॥ २ ॥

ब्रह्मात्मैक्यावगमोपायोक्तिः

तमेतमात्मानमोमिति ब्रह्मणैकीकृत्य ब्रह्म [1]चात्मनोमित्येकीकृत्य तदेकमजरममृतमभयमोमित्यनुभूय तस्मिन्निदं सर्वं त्रिशरीरमारोप्य तन्मयं हि तदेवेति संहरेदोमिति ॥ ३ ॥

तं वा एतं त्रिशरीरमात्मानं त्रिशरीरं परं ब्रह्मानुसंदध्यात् स्थूलत्वात् स्थूलभुक्त्वाच्च सूक्ष्मत्वात् सूक्ष्मभुक्त्वाच्चैक्यादानन्दभोगाच्च ॥ ४ ॥

जगत्कारणं ब्रह्म, नात्मा, तस्य ब्रह्मणोऽन्यत्वेन कारणत्वाप्रतीतेः, तथा अपरोक्षात्माऽपि ब्रह्मणोऽन्यः, ब्रह्मणः परोक्षत्वात्, इत्याशंकायां ब्रह्मात्मनोरेकत्वं सोपायमाह—**तमिति**। तं अन्तःकरणावभासकं प्रत्यञ्चं **एतं** चक्षुरादेरपि प्रवृत्तिनिमित्ततया चक्षुरादिरूपं **आत्मानं ओमिति** अनेनाक्षरेण **ब्रह्मणा एकीकृत्य** सत्यज्ञानादिलक्षणं **ब्रह्म चात्मना** प्रतीचा **ओमित्येकीकृत्य** प्रत्यक्परयोरेकतां विधाय यत्प्रत्यग्ब्रह्मणोरैक्यं **तदेकमजरं** जरादिषड्ऊर्मिवैरळ्यात् **अमृतं** षड्भावविकाराभावात् **अभयं** भीहेतुद्वैताभावात् **ओमिति** ओङ्काराद्यवयवसंजाततत्त्वमस्यहंब्रह्मास्मीतिमहावाक्यार्थानुसन्धानतः प्रत्यक्परचितोरैक्यं **अनुभूय तस्मिन्** ओङ्कारार्थे प्रत्यगभिन्नपरमात्मनि **इदं** उपलभ्यमानं त्रित्वाक्रान्तं सत्वादि-

[1] चात्मानमोमि—ॐ १, अ २, क.

त्रिगुणं जाग्रदाद्यवस्थात्रयं स्थूलादिशरीरत्रयं आध्यात्मिकादितापत्रयं विश्वादिजीवत्रयं विराडादीश्वरत्रयं ओत्रादिव्यष्टिसमष्ट्यैक्योपाधिकचैतन्यत्रयं वा शरीरं यस्य तत् **त्रिशरीरमारोप्य** यद्यत् यस्मिन्नध्यस्तं तत्तत् **तन्मयं** तद्विकारत्वात्, यथा रज्जुसर्पादिः रज्ज्वादिविकारः न हि रज्जुव्यतिरेकेणास्ति तथा ओङ्कारार्थप्रत्यगभिन्नब्रह्माध्यस्तं तद्विकारत्वेन न हि तद्व्यतिरेकेण निरूपयितुं शक्यमित्याह—**तदेवेति** । यत एवं अतः स्वारोपितत्रिशरीरं **संहरेत्** त्रिशरीरं नेत्यनुसंधानं कुर्यात् । संहारप्रकारमाह—**ओमिति** । व्यष्टिसमष्ट्योङ्कारार्थप्रत्यक्परैक्यरूपं वास्तवं रज्जुस्थानीयत्वात्, तदध्यस्तं त्रिशरीरं अवास्तवं सर्पस्थानीयत्वात् ॥ ३ ॥ एवं सूत्रार्थभूतस्य वृत्तिरारभ्यते—**तमिति** । **तं वै ब्रह्मस्वरूपमेव एतं** स्वातिरिक्तान्तःकरणधर्मानात्मनि मन्यमानं स्थूलसूक्ष्मकारणशरीराण्यस्येति स त्रिशरीरः तं **आत्मानं** त्रित्वादिसंख्याविशिष्टं **त्रिशरीरं** तदपवादाधिकरणत्वेन **परं** निरतिशयं स्वारोपितातिशयस्य प्रळयं गतत्वात् तदेव त्रिविधपरिच्छेदशून्यं **ब्रह्मेत्यनुसंदध्यात्** इदमहमस्मीति प्रत्ययावृत्तिं कुर्यात् आ साक्षात्कारमित्यर्थः । तत्रोपपत्तिः—**स्थूलत्वात्** । यथा व्यष्टिस्थूलशरीराभिमानी स्थूलः तथा समष्ट्यभिमानी विराट् तस्मात् स्थूलत्वात् । एवं व्यष्टिसमष्टिस्थूलशरीराभिमानिविश्वविराजोरैक्यं ओतृत्वम् । न केवलं ओतृत्वं, किंत्विदमपीत्याह—**स्थूलभुक्त्वाच्चेति** । व्यष्टिसमष्टिचक्षुरादिग्राह्यरूपादिभोग्यजातं स्थूलं, तद्भोक्तारौ स्थूलभुजौ, तद्भावस्तत्त्वं, तस्मात् **स्थूलभुक्त्वात्** । तथा व्यष्टिसमष्टिस्वप्नस्वापाभिमानिनोरेकत्वं समानमित्याह—**सूक्ष्मत्वात् सूक्ष्मभुक्त्वाच्चैक्यादानन्दभोगाच्च** । यथा विश्वविराजोरैक्यं ओतृत्वं तथा तैजससूत्रयोरैक्यं अनुज्ञातृत्वं, प्राज्ञेश्वरयोरैक्यं अनुज्ञैकरसत्वमित्यर्थः ॥ ४ ॥

ब्रह्मात्मनः चतुष्पात्त्वम्

सोऽयमात्मा चतुष्पात् ॥ ५ ॥

विश्वविराडोत्रादीनां पृथक्पृथक्चतुरात्मत्वप्रपञ्चनोपायतस्तुर्यतुर्य निरूपयति—**सोऽयमिति** । अयमात्मा ब्रह्मेति यस्तुर्यतुर्यः परमात्मा प्रपञ्चितः

सोऽयमात्मा चतुष्पात् व्यष्टिसमष्ट्यात्मकस्वातिरिक्ताविद्यापदस्थूलसूक्ष्माद्यंश-चतुष्टयारोपापवादाधिकरणविश्वविराडोत्राद्यात्मना चत्वारः पादाः अस्येति चतुष्पात् ॥ ९ ॥

विश्वस्य चतुरात्मत्वम्

जागरितस्थानः स्थूलप्रज्ञः सप्ताङ्ग एकोनविंशतिमुखः स्थूल-भुक् चतुरात्मा विश्वो वैश्वानरः प्रथमः पादः ॥ ६ ॥

तत्राद्यं पादमवतारयति—**जागरितेति**। चक्षुरादीन्द्रियैः स्थूलरूपादिग्रहणं जागरणं स्थानं अस्येति **जागरितस्थानः** स्थूलरूपादौ प्रज्ञा यस्येति **स्थूलप्रज्ञः**। **सप्ताङ्ग एकोनविंशतिमुखः स्थूलभुक्** इति व्याख्यातम्। एकैकस्यामवस्थायां स्वाविद्यापदस्थूलांशप्रविभक्तव्यष्ट्यादिस्थूलसूक्ष्मबीजार्धमात्रांशानुयोगतो विश्वविश्व-विश्वतैजसविश्वप्राज्ञविश्वतुर्यभेदेन आत्मानो यस्य स **चतुरात्मा विश्वः** ॥

तस्य चातुर्विध्यं प्रकटयितुं जाग्रदाद्यवस्थायाश्चातुर्विध्यमुच्यते। तद्यथा—जाग्रदवस्थायां यदा प्रमाता स्मरणादिव्यापृतिविरळो भूत्वा केवलचक्षुरादीन्द्रिय-द्वारा रूपादिविषयाननुभवति तदा जागरणे जागरणम्, तदभिमानी विश्वप्रवि-भक्तविश्वो भवति, तत्समष्ट्यभिमानी विराट्प्रविभक्तविराट् भवति, व्यष्टिसमष्ट्यै-क्याभिमानी ओत्रोता भवतीति सर्वत्र एवमेवोह्यम्। यदा चक्षुरादिनैरपेक्ष्येण मनसैव विषयान् गृह्णाति तदा जागरणस्वप्नः, तदभिमानी विश्वप्रविभक्ततैजसो भवति, तदा नेत्रादिव्यापृतिसत्त्वासत्त्वाभ्यां निर्व्यापृतिर्न निद्रातः। चक्षुरादिना मनसा वा रूपादिना [वा] आत्मानं वा न प्रतिपद्यते केवलमचेतन इव तिष्ठति तदा जागरणप्रविभक्तोऽयं स्वापः, तदभिमान्यात्मा विश्वप्रविभक्तप्राज्ञ उच्यते। यदा स्वाचार्योपदेशात् पुण्यपरिपाकद्वारा विशेषसामान्यमलभमानः समाध्यारूढ इव जागरणजागरणादिकलनाभावाभावप्रकाशकः साक्ष्यहमस्मीति भासते तदा जाग्रत्प्रविभक्ततुर्यावस्थोच्यते। तदभिमानी विश्वप्रविभक्ततुरीयो भवति ॥

यथा स्थूलभुक् चतुरात्मा विश्वस्तथा वैश्वानरः ओता चेति। वक्ष्यमाणतैजसाद्यपेक्षया प्राथम्यात् प्रथमः पादः ॥ ६ ॥

तैजसस्य चतुरात्मत्वम्

स्वप्नस्थानः सूक्ष्मप्रज्ञः सप्ताङ्ग एकोनविंशतिमुखः सूक्ष्मभुक् चतुरात्मा तैजसो हिरण्यगर्भो द्वितीयः पादः ॥ ७ ॥

द्वितीयं पादमवतार्य व्याकरोति—**स्वप्नस्थान** इति । **स्वप्नस्थान** इत्यादि **सूक्ष्मभुगित्यन्तं** व्याख्यातम् । तैजससूत्रानुज्ञातॄणां चातुर्विध्यप्रकटनाय स्वप्नावस्थाया अपि चातुर्विध्यमुच्यते ॥

जागरणस्य शरीरेन्द्रियविषयसत्त्वात् चातुर्विध्यमुक्तं, स्वप्नावस्थायास्तदभावात् कथं चातुर्विध्यसिद्धिः ? इति चेत्—न, स्वप्नावस्थायां वासनारूपेण देहेन्द्रियेन्द्रियार्थसत्त्वात् चातुर्विध्यसिद्धिर्युज्यते ॥

चतुरात्मा तैजसो हिरण्यगर्भ इत्यत्र तैजसादेः चातुर्विध्यस्फुरणाय स्वप्नावस्थायाश्चातुर्विध्यमुच्यते । तत् कथम् ?—यदा स्वप्ने मानसव्यापारं विना स्वाप्निकचक्षुरादिना रूपादिविशेषजातमनुभवति तदा स्वप्नजागरणं, तदभिमानी तैजसप्रविभक्तविश्वो भवति, तत्समष्टिस्वप्नजागरणाभिमानी सूत्रविराट्, तद्व्यष्टिसमष्ट्यैक्याभिमानी तु अनुज्ञातृप्रविभक्तोतेति प्रतिपादमेवं ऊह्यम् । यदा स्वप्नावस्थायां स्वप्नजाग्रत्कलनां विहाय स्वाप्निकचक्षुरादिव्यापारं विना केवलमनसैव विषयाननुभवति तदा स्वप्नस्वप्नः, तदभिमानी तैजसप्रविभक्ततैजसो भवति । यदा स्वप्नावस्थाप्रविभक्तजाग्रत्स्वप्नकलनां विहाय स्वाप्निकचक्षुरादिना मनसा वा सामान्यविशेषजातमगृहीत्वा बाह्यरूपादीनात्मानं च विस्मृत्य केवलस्तब्धतयैवावस्थितिः तदा स्वप्नप्रविभक्तसुषुप्तिः, तदभिमानी तैजसप्रविभक्तप्राज्ञो भवति । यदा स्वकृतपुण्यपरिपाकतः स्वप्नप्रविभक्तजाग्रत्स्वप्नस्वापकलनां विहाय स्वान्तर्बाह्यचित्तकल्पिताशेषविशेषकलनाभावाभावप्रकाशकस्वप्नतुर्यतया अवस्थितिः तदा स्वप्नतुर्यावस्था, तदभिमानी तैजसतुरीयो भवति ॥

यथैव तैजसश्चतुरात्मा तथा हिरण्यगर्भोऽनुज्ञाता च चतुरात्मा भवति । इति द्वितीयः पादो व्याख्यातः ॥ ७ ॥

प्राज्ञस्य चतुरात्मत्वम्

यत्र सुप्तो न कंचन कामं कामयते न कंचन स्वप्नं पश्यति तत्सुषुप्तं सुषुप्तस्थान एकीभूतः प्रज्ञानघन एवानन्दमयो ह्यानन्दभुक् चेतोमुखश्चतुरात्मा प्राज्ञ ईश्वरस्तृतीयः पादः ॥ ८ ॥

एष सर्वेश्वर एष सर्वज्ञ एषोऽन्तर्याम्येष योनिः सर्वस्य प्रभवाप्ययौ हि भूतानाम् ॥ ९ ॥

तृतीयं पादमवतार्य व्याकरोति---**यत्रेति** । यत्र सुप्त इत्यादि चेतोमुख इत्यन्तं व्याख्यातम् । **चतुरात्मा प्राज्ञ ईश्वरः** इत्यत्र प्राज्ञबीजानुज्ञैकरसानां चातुर्विध्यप्रकटनाय स्वापावस्थाया अपि चातुर्विध्यमुच्यते ॥

जाग्रत्स्वप्नयोः व्यावहारिकप्रातिभासिककलनानिर्वाहकत्वेन तत्र चातुर्विध्यमुपपद्यते । कथं करणग्रामोपरतिलक्षणस्वापस्य जाग्रदादिविभागानर्हत्वात् चातुर्विध्यसिद्धिः ? इति चेत्---न, स्वापे करणग्रामस्योपरमेऽपि साक्ष्यनुभवस्य नित्यत्वात् सुप्तेरुत्थितस्यैतावन्तं कालं सुखमहमस्वाप्सं न किंचनावेदिषं इति परामर्शो दृश्यते---सुषुप्तावपि जाग्रत्स्वप्ननिर्वाहकस्थूलसूक्ष्मशरीरेन्द्रियविषयाणां बीजरूपेण विद्यमानत्वात्, तदानीमभानेऽपि ततो निर्गमनप्रथमक्षणे जाग्रत्स्वप्नान्यतरस्थानस्य उपलभ्यमानत्वात्, सुषुप्तावपि चातुर्विध्यसिद्धिरविरुद्धा ॥

सुषुप्त्यवस्थायां यदा जाग्रत्स्वप्नयोः अन्यतरस्थानस्थः पुमान् जागरणात् स्वप्नाद्वा सुषुप्तस्थानं जिगमिषुः स्वनेत्रादिना रूपाद्यज्ञानमनुभवति तदेयं सुप्तिप्रविभक्तजाग्रदुच्यते, तद्व्यष्ट्यभिमानी प्राज्ञप्रविभक्तविश्वः, तत्समष्ट्यभिमानी बीजात्मप्रविभक्तविराट्, तदुभयैक्याभिमानी अनुज्ञैकरसोतेत्यादि सर्वत्रैवमूह्यम् । तत्रैव यदोपरतबाह्यरूपाद्यज्ञानः पुमान् जाग्रत्स्वप्नयोः अन्यतरस्थानमवलम्ब्य मनसैव रूपाद्यज्ञानमनुभवति तदा स्वापस्वप्नः, तदभिमान्यात्मा प्राज्ञप्रविभक्ततैजसो भवति । तत्रैव यदा स्वचैतन्यव्याप्ताभिः अज्ञानवृत्तिभिरेव अज्ञानमनुभवन्नपि स्तब्ध इव नानुभवति तदा स्वापप्रविभक्तस्वापः, तदभिमान्यात्मा प्राज्ञप्रविभक्तप्राज्ञ उच्यते ।

तत्रैव यदा स्वापप्रविभक्तजाग्रत्स्वप्नस्वापभावाभावविज्ञातृप्रत्यगानन्दोऽस्मीत्यात्मानमनुभवति तदा स्वापतुरीयावस्था, तदभिमान्यात्मा प्राज्ञप्रविभक्ततुर्य उच्यते ॥

एवं विश्वविराडोत्रादिचातुर्विध्यहेतुजाग्रत्स्वप्नस्वापप्रविभक्तजाग्रदाद्यवस्थाचतुष्टयं अविद्वद्भिरपि पदे पदे अनुभूयते। अत्राविद्वदपेक्षया विदुषो विशेषः उच्यते। ब्रह्मवित् तद्वरो वरीयान् वा—सच्चिदानन्दावरणजडक्रियाज्ञानेच्छाशक्तिपरिणामिनां जाग्रदादिप्रविभक्तजाग्रदादीनां मिथो व्यभिचारित्वादिबहुदोषदुष्टत्वं तदारोपापवादाधिकरणतया तद्भावाभावप्रकाशकतया च विद्यमानतुर्यस्य स्वविकल्पितजाग्रदादिविकारास्पृष्टत्वं श्रुत्याचार्यमुखतो विदितं अवधृतं पुरैव, यतः स्वविकल्पितजाग्रदादिप्रविभक्तजाग्रदादौ आत्मात्मीयाभिमानतो निरावरणप्रत्यक्प्रकाशाभिन्नपरप्रकाशोऽपि तुरीयो न प्रकाशते अतो जाग्रत्प्रविभक्तजागरणादिकं विमलतरनभसि मुमूर्षावस्थाचित्तविकल्पितनानारत्नखचितकनकमयपक्षिपन्नगरथगजतुरगनानाजातिमनुष्यतत्तदुचितनिवासस्थलप्राकारहर्म्यगृहारामालयगोपुरादिजुष्टगन्धर्वनगरवत् मायामात्रं, तत्कल्पनाऽधिकरणं यत्तदेव सत्यं, तदेवाहमस्मीत्यनवरतानुसन्धानतो ब्रह्मविदादिर्भवति। **प्राज्ञ ईश्वरस्तृतीयः पादः** ॥ ८ ॥ तृतीयपादारोपाधारं प्राज्ञादिं स्तौति—**एष** इति। । उक्तार्थमेतत् ॥ ९ ॥

अवस्थात्रयस्य मायामात्रत्वम्

त्रयमप्येतत् सुषुप्तं स्वप्नं मायामात्रं चिदेकरसो ह्ययमात्मा ॥ १० ॥

तुर्यविकल्पितावस्थात्रयतत्कार्यस्य मायामात्रत्वं तदधिकरणतुर्यस्य चिदेकरसत्वं चाह—**त्रयमिति**। व्यष्टिसमष्ट्यात्मकजाग्रदाद्यवस्थात्रयमपि एवं त्रिसंख्याऽऽक्रान्तमेकैकमनेकभेदभिन्नं **एतत् सुषुप्तमुक्तं**, तस्यानात्मापह्नवसिद्धात्ममात्रावरणरूपत्वात्। यत एवं अतः एतत्त्रयमपि सुषुप्तम्। एतत्त्रयस्याप्यात्मावरणांशे सुषुप्तिसाम्यमस्तु, तत्रात्मात्मीयप्रतीतिः कथमित्यत्राह—**स्वप्नं मायामात्रमिति**। स्वावृतिरूपावस्थात्रयतत्कार्येऽपि स्वात्मात्मीयाभिमतिविकारजातं

स्वप्नं स्वप्नतुल्यं प्रातिभासिकमित्यर्थः, तत्प्रतीतिकालमात्रस्थायित्वात्। विचार्यमाणे अवस्थात्रयतत्कार्यजातं तत्रात्मात्मीयाभिमतिमोहो वा एतत्सर्वं **मायामात्रं** परमार्थतः शशविषाणवदवस्तुत्वात्। यः स्वावरणात्मकावस्थात्रयतत्कार्यापह्नव-सिद्धोऽयमात्मा सः **चिदेकरसः** चिन्मात्रत्वात् ॥ १० ॥

तुरीयस्य चतुरात्मत्वम्

अथ तुरीयश्चतुरात्मा तुरीयावसितदृग्देकैकस्योतानुज्ञात्रनुज्ञा-विकल्पैस्त्रयमप्यत्रापि सुषुप्तं स्वप्नं मायामात्रं चिदेकरसो हि ॥ ११ ॥

तस्यैव स्वाज्ञदृष्टिप्रसक्तपादत्रयापेक्षया स्वज्ञदृष्ट्या तुरीयत्वं चतुरात्मत्वं, वस्तुतः सर्वग्रासतुर्यतुर्यत्वं चाह—**अथेति**। **अथ** अवस्थात्रयप्रपञ्चनानन्तरं यद्विदुषोऽविदुषश्च साधारणं इत्युक्तम्। अत्र तु तुर्यप्रपञ्चे विदुष एवाधिकारो नाविदुषः। यत्स्वरूपमविद्वज्जातं न स्पृशति सोऽयं **तुरीयः चतुरात्मा**। व्यष्टिसमष्टिविभागानर्हतुर्यतुरीयेण साकं चतुरात्मत्वं, न स्वतः, तुर्यस्य त्र्यात्मकत्वात् ॥

त्र्यात्मकत्वमपि तुर्यस्य न संभवति। कुतः? जाग्रत्स्वप्नसुषुप्तिषु शरीरेन्द्रियेन्द्रियार्थजातं व्यक्ताव्यक्तबीजरूपेण वर्तत इति जाग्रदादेः चातुर्विध्य-मुक्तम्। अविकल्पतुर्यावस्थाया निर्बीजात्मकत्वात् कथं त्रैविध्यमुच्यते? यद्युच्येत तदा तुर्यश्चतुरात्मेति यथाश्रुतमेव चातुर्विध्यं वक्तव्यमिति चेत्—न तुर्यश्चतुरात्मेति श्रुतौ तावत् सविशेषनिर्विशेषावेकीकृत्य विवक्षितम् ॥

तुरीयमपि निर्विशेषमिति चेत्—न सप्रतियोगिकत्वात्, सप्रतियोगिक-निर्विशेषस्यापि जाग्रदादिविशेषसापेक्षतः सविशेषत्वात्, सप्रतियोगिकनिष्प्रति-योगिकनिर्विशेषयोः सविकल्पाविकल्पकत्वेन तयोर्योगासंभवात्, स्वविकल्पित-साक्ष्यभासकसाक्षिणः साक्ष्यताभावे तत्सापेक्षसाक्षितासंभवात्, सविकल्प-साक्ष्यसद्भावे सविकल्पत्वेन सविशेषत्वं[त्वात्], सत्यस्य सत्यमितिवत् तद्गताविकल्पाविकल्पत्वस्य मुख्यत्वात्, सविशेषनिर्विशेषयोः पृथग्वक्तव्य-

तया त्रैविध्यमेव विवक्षितम् । यदि चातुर्विध्यमेव विवक्षितं स्यात् तयोः मिश्रदोषापत्तेः[त्तिः] तुर्यावस्थाया निर्बीजत्वं यदुक्तं तद्विचिकित्स्यं, तस्याः सबीजत्वात् । व्यष्टिसमष्ट्यात्मकतुर्यावस्थाभागत्रयस्य गुणसाम्यित्वेन साक्ष्युपाधित्वात् गुणसाम्यस्य बीजाज्ञानकारणत्वात् तत्र बीजादिकं पुनर्व्युत्थानार्हतया मूर्च्छितं सद्वर्तत एव, तुर्यबीजपदारूढब्रह्मविद्वरिष्ठस्यापि पुनर्व्युत्थानदर्शनात्, पुनस्तस्यैव निष्प्रतियोगिकनिर्बीजतुर्यतुर्यमात्रपर्यवसन्नस्य व्युत्थानादर्शनाच्च, एवं व्युत्थानस्य संसारदुःखहेतुत्वात् जाग्रज्जाग्रदाद्यनुज्ञैकरसाविकल्पस्यैः समं तुर्यजागरणाद्यविकल्पानुज्ञैकरसान्तस्याप्यात्मावरणत्वे भेदप्रतीतित्वे वास्तवत्वे चाविशेषत्वात् । यस्मादेवं तस्मात्तुर्यावस्थाभागत्रयस्यापि सविशेषत्वेन त्रैविध्यसिद्धिः अविरुद्धा ॥

यथा जाग्रज्जाग्रदाद्यविकल्पानुज्ञैकरसान्तचतुष्पञ्चदशभेदकलना व्यष्टिसमष्टिविभागविशिष्टा तथा तुर्यतुर्योऽपि व्यष्ट्यादिकलनायुक् भवितुमर्हतीति चेत्—न, तुर्यतुर्यस्य निष्प्रतियोगिकाविकल्पाविकल्परूपत्वेन व्यष्टिसमष्ट्यादिविभागकलनाऽपह्नवसिद्धत्वात् ॥

तर्हि जाग्रज्जाग्रदादिचतुष्पञ्चदशकलनाऽऽदिभिः तुर्यतुर्यस्य सामानाधिकरण्यात् अविकल्पाविकल्पता कुतः? इति चेत्—न, तुर्यतुर्याज्ञानविकल्पितजाग्रज्जाग्रदादिचतुष्पञ्चदशकलनानां विकल्पस्य स्फुटत्वेन तद्विकल्पकलनाऽपह्नवसिद्धतुर्यतुर्यस्य अविकल्पाविकल्पत्वस्य सिद्धत्वात् ॥

जाग्रद्विश्वविराडोत्रादेरिव तुर्यस्यापि विकल्पत्वं स्यादिति चेत्—न, व्यावहारिकसत्यतावत् गौणाविकल्पत्वसंभवात् । जाग्रत्स्वप्नसुषुप्तितुरीयं विश्वतैजसप्राज्ञतुरीयं विराट्सूत्रबीजतुरीयं ओत्रनुज्ञात्रनुज्ञैकरसाविकल्प इत्यत्र जाग्रदाद्यवस्थात्रयविशिष्टव्यष्टिसमष्ट्यभिमानिविश्वविराडोत्रादयो मिथो विकल्परूपा एव, तेषामभिधानव्यापारविकल्पदर्शनात् । तदपेक्षया जाग्रद्विश्वविराट्तुर्याणां अभिधानव्यापारयोरेकत्वात् अविकल्पत्वं, जाग्रत्तुर्यं स्वप्नतुर्यं सुषुप्तितुर्यं विश्वतुर्यं तैजसतुरीयं प्राज्ञतुर्यं विराट्तुरीयं सूत्रतुरीयं बीजतुरीयं ओत्रविकल्पः अनुज्ञात्रविकल्पः अनुज्ञैकरसाविकल्प इति च तुर्यजाग्रत्स्वप्नसुषुप्तयः तुर्यविश्वतैजसप्राज्ञाः

तुर्यविराट्सूत्रबीजानि अविकल्पोत्रनुज्ञात्रनुज्ञैकरसा इत्यत्र विकल्परूपजाग्रद्विश्व-विराडोत्रादिविशेषणविशिष्टत्वाद्विकल्पत्वं गौणं सत्यस्य सत्यमितिवत् । आपेक्षिकाविकल्पानां चतुर्विंशतितुर्याणां अयं पारमार्थिकाविकल्पः तुर्यतुर्यः, जाग्रद्विश्वविराडोत्रादिविकल्पानां तुर्यतुर्यपरिसमाप्तत्वात्, सर्ववेदान्तसिद्धान्त-तुर्यतुर्यावगतेः जाग्रज्जाग्रदाद्यविकल्पानुज्ञैकरसान्तविकल्पापह्नवपूर्वकत्वात् ॥

एवं विद्वद्दृष्ट्या जाग्रज्जाग्रदादिचतुष्पञ्चदशकलनाऽपि अविकल्पाविकल्प-तुर्यतुर्यमात्रैव अवशिष्यते । यतस्तुर्यतुर्यो निष्प्रतियोगिकाद्वैतरूपेण अवशिष्यते अतस्तुर्यतुर्ये व्यष्टिसमष्टिविभागकलना अस्ति नास्तीति विभ्रमापह्नवोक्तिरपि न संभवतीति सिद्धा । एतावता प्रसङ्गेन तुर्यतुर्यस्य निष्प्रतियोगिकनिर्विशेषत्वं, तुर्यस्य तु सप्रतियोगिकनिर्विशेषत्वेन सविशेषत्वं, अतोऽयं तुर्यस्त्रैविध्यमर्हति ॥

कथं तुर्यावस्थायास्त्रैविध्यमिति ? उच्यते—बाह्यविषयादिभेदसत्त्वेऽपि 'सर्वं खल्विदं ब्रह्म' 'सत्तामात्रं हीदं सर्वं' इत्यादिश्रुतिशतसिद्धात्मप्रत्ययो विद्वान् नयनादिना अपगतनिखिलरूपादिभेदं गृह्णाति, तदिदं तुर्यजागरणं, तदभिमानी तुर्यविश्वः, तत्समष्ट्यभिमानी तुर्यविराट्, तदुभयैक्याभिमानी त्वविकल्पोते-त्याद्यूह्यम् । 'सत्यमात्मा ब्रह्मैव ब्रह्मात्मैवात्र ह्येव न विचिकित्स्यं' इत्यादिवक्ष्य-माणश्रुत्यनुरोधेन उपरतनेत्रादिव्यापारो विद्वान् ब्रह्मसाक्षात्कारपरिणतमनसैव प्रत्यक्परचितोरैक्यमनुभवति, तदा तुर्यस्वप्नः, तदभिमान्यात्मा तुर्यतैजसो भवति । यदाऽयं विद्वान् "सत्यं ज्ञानमनन्तं ब्रह्म" इत्यादिश्रुतिसिद्धं त्रिपुटीग्रासं ब्रह्माहमस्मीत्यन्तःकरणसरूपविलयनिर्विकल्पकसमाधिपरवशो भूत्वा स्तब्ध इव तिष्ठति तदेयं तुर्यसुषुप्तिः, तदभिमानी तुर्यप्राज्ञो भवतीति ॥

एतावता ग्रन्थेन व्यष्टिसमष्टिविभागानर्हतुर्यतुर्येण सह तुर्यश्चतुरात्मा तुर्यतुर्य विना त्र्यात्मेति व्याख्यातम् । कथं एवमवगम्यते ? इत्यत्र **एकैकस्य तुरीयाव-सितत्वात्** जाग्रद्विश्वविराडोत्रादिकलनायास्तुर्यपर्यवसितत्वात् । तुर्यो जाग्रदाद्य-पवादाधिकरणं, ततः तद्व्यष्टिसमष्टिविभागार्हस्वाधिष्ठेयसापेक्षं स त्रैविध्यमर्हति । तुर्यतुर्यस्य निरधिकरणतया निर्विभागत्वात् तदेव निष्प्रतियोगिकसन्मात्रं, तदतिरिक्तं नास्त्येव यदस्तीति स्वाज्ञदृष्ट्या प्रसक्तं तदा परमार्थदृष्ट्या

तदसत्पदमर्हतीत्यत्र वक्ष्यति हि "पश्यतेहापि सन्मात्रमसदन्यत्" इति । भेदप्रतीतिः जागरणादौ, अभेदप्रतीतिः तुर्ये, भेदाभेदाभावप्रतीतिः तुर्यतुर्ये । कथं एवमवगम्यते ? इत्यत्र **ओतानुज्ञात्रनुज्ञाऽविकल्पैः** । तुर्यविश्वविराडैक्यात्मना द्वैतप्रपञ्चानुगतोऽयमोता भवतीत्येको भेदः । तुर्यतैजससूत्रैक्यात्मना प्रत्यक्परचितोरैक्यमनुजानातीत्यनुज्ञाताऽनुमन्तेति द्वितीयो भेदः । तुर्यप्राज्ञबीजैक्यात्मना ज्ञात्रादित्रिपुटीविरळचिदेकरसदृष्टिरनुज्ञैकरस इति तृतीयो भेदः । व्यष्टिसमष्टितुर्यैक्याविकल्पात्मना सर्वविकल्पापह्नवसिद्धतुर्यतुर्यो अविकल्पाविकल्पतया योऽवशिष्यते पूर्वापेक्षया स चतुर्थो भेदः । तैरोतानुज्ञात्रनुज्ञाऽविकल्पैः चतुर्थश्चतुरात्मेत्यर्थः साधितः । अत्र तुर्यजागरणादित्रयमपि **सुषुप्तं** जाग्रदाद्यवस्थात्रयप्रविभक्तजाग्रदादितदध्यक्षवत् तुर्यावस्थाप्रविभक्तसाध्यक्षतुर्यजागरणादित्रयमपि त्रिसंख्याऽऽक्रान्तं सुषुप्तं, तुर्यतुर्यमात्रावरणरूपत्वात् । यद्यावरणतया त्रयमपि सुषुप्तं तदा तुर्यजाग्रद्विश्वविराडोत्रादिप्रतीतिः कुतः ? इति चेत्—परमार्थदृष्ट्याऽभावेऽपि प्रातिभासिकदृष्ट्या संभवतीत्याह—**स्वप्नं मायामात्रं चिदेकरसो हीत्युक्तार्थम्** ॥ ११ ॥

तुरीयतुर्यादेशः

[1]**अथायमादेशो न स्थूलप्रज्ञं न सूक्ष्मप्रज्ञं नोभयतःप्रज्ञं न प्रज्ञं नाप्रज्ञं न प्रज्ञानघनमदृष्टमव्यवहार्यमग्राह्यमलक्षणमचिन्त्यमव्यपदेश्यमेकात्मप्रत्ययसारं प्रपञ्चोपशमं शिवं शान्तमद्वैतं चतुर्थं मन्यन्ते स आत्मा स विज्ञेय ईश्वरग्रासस्तुर्यतुरीयः** ॥ १२ ॥

उक्तार्थे श्रुतिनिर्दिष्टादेशो भवतीत्याह—**अथेति** । अथशब्दोऽधिकारार्थः । तुर्यपादारूढानां विदुषामेव ईशाद्यष्टोत्तरशतोपनिषद्भिः स्वातिरिक्तजाग्रज्जाग्रदाद्यविकल्पानुज्ञैकरसान्तविशेषजातं नेति नेतीत्यादिश्यत इति **आदेशः** । कोऽयमादेश

[1] अयमात्माऽयमादेशः—अ. अयमादेशः—क. अयमात्मादेशः—अ २.

इत्यत आह—**न स्थूलप्रज्ञमिति** । नेदं तुर्यतुरीयं **स्थूलप्रज्ञं** व्यष्टिसमष्टिजाग्रज्जागरणाभिमानिविश्वविश्वविराड्विराट्तदैक्योत्रोतृकलनाऽभावात् । तथेदं **न सूक्ष्मप्रज्ञं** व्यष्ट्यादिविशिष्टजाग्रत्प्रविभक्तस्वप्नाभिमानितैजससूत्रानुज्ञातृविलक्षणत्वात् । तथेदं **नोभयतःप्रज्ञं** अविद्यायामात्मनि च प्रज्ञानबाह्यजाग्रत्स्वापाभिमानिविश्वप्राज्ञविराड्बीजतदैक्योत्रनुज्ञैकरसकलनावैरळ्यात् । तथेदं **न प्रज्ञं** जाग्रज्जाग्रदादिभावाभावप्रकाशकप्रज्ञाभिमानिविश्वविराट् तुर्यतदैक्योत्रविकल्पबाह्यत्वात्। तथेदं **नाप्रज्ञं** स्वप्नजागरणाभिमानिबहिःप्रज्ञाविरळतैजसविश्वसूत्रविराट्तदैक्यानुज्ञात्रोतृकलनादूरत्वात् । तथेदं **अदृश्यं** स्वप्नस्वप्नाभिमानिचित्तकल्पितदृश्यमोहिततैजसतैजससूत्रसूत्रतदैक्यानुज्ञात्रनुज्ञात्रभावावैरळ्यात् । तथेदं **न प्रज्ञानघनं** स्वप्नस्वापाभिमानिसर्वविषयाभावप्रज्ञानघनतैजसप्राज्ञसूत्रबीजतदैक्यानुज्ञात्रनुज्ञैकरसकलना-मृग्यत्वात् । तथेदं **अव्यवहार्यं** स्वप्नतुर्यावस्थाऽभिमानिस्वप्नजागरणादिभावाभावभासकत्वव्यवहार्यतैजससूत्रतुरीयतदैक्यानुज्ञात्रविकल्पविलक्षणत्वात् । तथेदं **अग्राह्यं** स्वापजागरणाभिमानिस्वाज्ञानवृत्तिग्राह्यप्राज्ञविश्वबीजविराट्तदैक्यानुज्ञैकरसोतृविलक्षणत्वात् । तथेदं **अलक्षणं** स्वापस्वप्नाभिमानिस्वाज्ञानवृत्तिलक्षणवेद्यप्राज्ञतैजसबीजसूत्रतदैक्यानुज्ञैकरसानुज्ञातृभिन्नत्वात् । तथेदं **अचिन्त्यं** न किंचनावेदिषमिति परामर्शचिन्त्यस्वापस्वापाभिमानिप्राज्ञप्राज्ञबीजबीजतदैक्यानुज्ञैकरसानुज्ञैकरसबाह्यत्वात् । तथेदं **अव्यपदेश्यं** स्वापतुर्यावस्थाऽभिमानिस्वापजागरणादिभावाभावसाक्षित्वव्यपदेश्यप्राज्ञबीजतुर्यतदैक्यानुज्ञैकरसाविकल्पत्वकलनाऽस्पृष्टत्वात् । तथेदं **एकात्मप्रत्ययसारं** तुर्यजागरणाभिमानिध्यात्राद्यनेकप्रत्ययसारं तुर्यविश्वविराट्तदैक्याविकल्पोतृत्वकलनाशून्यत्वात् । तथेदं **प्रपञ्चोपशमं** तुर्यस्वप्नाभिमानिकचित्कदाचिदशान्तप्रपञ्चतुर्यतैजससूत्रतदैक्याविकल्पानुज्ञातृगन्धासहत्वात् । तथेदं **शान्तं** तुर्यस्वापाभिमानिगुणसाम्यावस्थाशान्ततुर्यप्राज्ञबीजतदैक्याविकल्पानुज्ञैकरसकलनाभिन्नत्वात् । तथेदं **शिवं** जाग्रज्जाग्रदाद्यविकल्पानुज्ञैकरसान्ताशिवापह्नवसिद्धनिष्प्रतियोगिकतुर्यतुर्यमात्रावशेषलक्षणविक-ळेबरकैवल्यरूपत्वात् । अत एवेदं **अद्वैतं** निष्प्रतियोगिकपरमाद्वैतरूपत्वात् । स्वातिरिक्तसामान्याशिवापह्नवे निरात्मत्वं स्यादित्यत आह—**चतुर्थं मन्यन्त**

इति । स्वातिरिक्तजाग्रज्जाग्रदादिसत्त्वे यत्तदारोपापवादाधिकरणं तत् **चतुर्थं** तुर्यमवशिष्यत इति **मन्यन्ते** विद्वांसः । मन्यन्ते इत्युक्तितोऽधिष्ठेयसापेक्षाधिष्ठानताऽपाये यत्तुर्यमित्यवधृतं तदेव निरधिष्ठानं सत् तुर्यतुर्यतया अवशिष्यत इति द्योत्यते । यतः एवं अतः स्वाज्ञस्वज्ञपरमार्थदशायामपि आत्मैव वर्तते, न हि कदाचित् निरात्मकता सेद्धुं पारयतीत्यर्थः । विश्वविश्वाद्यनेकात्मसु विज्ञेयः कोऽयमात्मेत्यत्र स्वातिरेकेण यदि विश्वादयः सन्ति तदा तेऽप्यनात्मरूपा एव, तत्सर्वापह्नवबोधतो यः स्वमात्रमवशिष्यते **स आत्मा स** एव विद्वद्भिः स्वावशेषतया **विज्ञेयः** । कैरित्यत्राह—**ईश्वरग्रासस्तुर्यतुरीय** इति । स्वाज्ञैः जीवेशतत्कार्यप्रपञ्चतया स्वज्ञैः तद्ग्रासद्वितुर्यैक्यतया परमार्थज्ञैः निष्प्रतियोगिकतुर्यतुर्यतया विज्ञेय इत्यर्थः, "आत्ममात्रमिदं सर्वमात्मनोऽन्यन्न किञ्चन" इति श्रुतेः ॥१२॥

इति प्रथमः खण्डः

द्वितीयः खण्डः

उत्तमाधिकार्यवगतं तुर्यतुर्यम्

तं वा एतमात्मानं जाग्रत्यस्वप्नमसुषुप्तं स्वप्नेऽजाग्रतमसुषुप्तं सुषुप्तेऽजाग्रतमस्वप्नं तुरीयेऽजाग्रतमस्वप्नमसुषुप्तमव्यभिचारिणं नित्यानन्दं सदेकरसं ह्येव ॥ १ ॥

यदुक्तं 'स आत्मा स विज्ञेयः' इति नैतावताऽयमवगन्तुं शक्यः, अधिकारितारतम्यानुरोधेन वक्तुमुचितं भवतीति खण्डिका आरभ्यते—**तमिति** । उत्तमाधिकारिभिः तुर्यतुर्य एव प्रतिपत्तव्यः, मध्यमाधिकारिभिः तुर्यः, कनीयोभिः विश्वविराडोत्रादिः । तस्मात् कनीयोभिः विश्वविराडोत्रादियाथात्म्यमादाव-

वगन्तव्यम्। ततस्ते मध्यमाधिकारिणो भूत्वा तुर्यं ज्ञातुमिच्छन्ति। श्रुत्याचार्यप्रसादेन तुर्ययाथात्म्यं विदित्वा मुख्याधिकारितामवलम्ब्य स्वातिरिक्तजाग्रज्जाग्रदादिचतुष्पञ्चदशकलनाऽपह्नवसिद्धतुर्यतुर्ययाथात्म्यमवगम्य कृतकृत्या भवन्ति। तत्रोत्तमाधिकारिणो यं तुर्यतुर्यं जानन्ति **तं वै** तुर्यतुर्यं **एतं** स्वज्ञदृष्ट्या तुर्यभावमापन्नं स्वयंप्रकाशात्मानं चतुर्धा भिन्न**जाग्रति अस्वप्नमसुषुप्तं** स्वप्नस्वापकलनाशून्यं चतुर्धा भिन्न**स्वप्ने अजाग्रतमसुषुप्तं** जाग्रत्स्वापकलनाविरळं चतुर्धा भिन्न**सुषुप्ते अजाग्रतमस्वप्नं** जाग्रत्स्वप्नव्यापृतिशून्यं त्रिधा विकल्पित**तुरीये अजाग्रतमस्वप्नमसुषुप्तं** जाग्रज्जाग्रदादितुर्यस्वापान्तावस्थाः मिथो व्यभिचारिण्यः तदपेक्षया तुर्यं **अव्यभिचारिणं** जानीयात् तुर्यस्य जाग्रदादिभावाभावप्रकाशकत्वेन सर्वावस्थाऽनुस्यूतत्वात् **नित्यानन्दं** तुर्यतुर्यानन्दपर्यवसन्नत्वात् **सदेकरसं** अखण्डचिदेकरसत्वात्। यद्वा—**नित्यानन्तसदेकरसमिति**। तत्र नित्यश्चासावनन्तश्चेति नित्यानन्तः स चासौ सदेकरसश्चेति नित्यानन्तसदेकरसः तं **एव**कारो नित्यानन्दसदादेः भिदानिवारणार्थः। एवमुक्तलक्षणं तुर्यं तद्गतसापेक्षप्रभवसविशेषताऽपायसिद्धं तुर्यतुर्यं उत्तमाधिकार्यवगच्छेदिति शेषः॥ १॥

तुर्यतुर्यस्य करणग्राह्यवैलक्षण्यम्

चक्षुषो द्रष्टा श्रोत्रस्य द्रष्टा वाचो द्रष्टा मनसो द्रष्टा बुद्धेर्द्रष्टा प्राणस्य द्रष्टा तमसो द्रष्टा सर्वस्य द्रष्टा ततः सर्वस्मादन्यो विलक्षणः॥ २॥

चक्षुरादियोगात् अवस्थायोगाद्वा द्रष्टृत्वमवस्थावत्त्वं च स्यादित्याशङ्क्य तद्वैलक्षण्यमाह—**चक्षुष** इति। **चक्षुषो द्रष्टा,** न हि यो हि द्रष्टा स तेन दृश्येन तद्वान् भवति। तथा **श्रोत्रस्य द्रष्टा**—व्याख्यातम्। चक्षुःश्रोत्रग्रहणं शिष्टज्ञानेन्द्रियोपलक्षणार्थम्। तथा **वाचो द्रष्टेति** कर्मेन्द्रियोपलक्षणार्थम्। तथा संकल्पनिश्चयात्मकवृत्तिमन्मनसो **बुद्धेरपि द्रष्टा**। मनोबुद्धिग्रहणं चित्ताहंकारयोरप्युपलक्षणार्थम्। तथा **प्राणस्य द्रष्टा**। प्राणग्रहणं अपानादिवृत्तिचतुष्टयोप-

लक्षणार्थम्। **तमसः** स्वाज्ञानस्य **द्रष्टा**। किं बहुना—दृश्यादृश्यत्वेन ज्ञाताज्ञातंतया च यद्यत् वर्तते तस्य **सर्वस्यापि द्रष्टा**। यतः स्वातिरिक्तसर्वदृश्यप्रपञ्चस्य द्रष्टा **ततः सर्वस्मादन्यः** व्यतिरिक्तः। बुद्ध्यादिवत् ज्ञातृत्वेन तादात्म्यं स्यादित्यत आह—**विलक्षण** इति। व्यभिचारिण्यपि करणग्रामे तद्द्रष्टा अव्यभिचारी सर्वानुस्यूतत्वात् ॥ २ ॥

तुर्यतुर्यस्य सर्वसाक्षित्वादविक्रियत्वम्

चक्षुषः साक्षी श्रोत्रस्य साक्षी वाचः साक्षी मनसः साक्षी बुद्धेः साक्षी प्राणस्य साक्षी तमसः साक्षी सर्वस्य साक्षी ततोऽविक्रियो महाचैतन्योऽस्मात् सर्वस्मात् प्रियतम आनन्दघनं ह्येवमस्मात् सर्वस्मात् पुरतः सुविभातमेकरसमेवाजरममृतमभयं ब्रह्मैव ॥ ३ ॥

चक्षुषो द्रष्टेत्यादि सर्वस्य द्रष्टेत्यन्तं द्रष्टृपदस्थले साक्षिपदप्रक्षेपेणोत्तरमाह—**चक्षुषःसाक्षीत्यादि सर्वस्य साक्षीत्यन्तम्**। **साक्षी** नाम द्वयोः विवदमानयोः निष्पक्षपाती स्वसंबन्धशून्यतया सर्वद्रष्टेत्यर्थः। यतः सर्वविलक्षणतया सर्वसाक्षी **ततः** तस्मात् दर्शनक्रियया युक्तोऽपि **अविक्रियः**। महच्छब्देन त्रिविधपरिच्छेदशून्यमुच्यते, **महान्** चैतन्यप्रकाशो यस्य सः **महाचैतन्यः** अनुदितानस्तमितप्रकाशत्वात्। स्वस्यैव सर्वस्मात् प्रेमास्पदत्वं दर्शयति—**अस्मादिति**। **अस्मात्** उपलभ्यमानात् पुत्रकळत्रादेरपि **सर्वस्मात् प्रियतमः**, "तदेतत् प्रेयः पुत्रात् प्रेयो वित्तात्" इत्यादिश्रुतेः। स्वात्मस्वरूपं यतः प्रियतमं, ततः **आनन्दघनं**, सातिशयानन्दापह्नवसिद्धनिरतिशयानन्दत्वं आनन्दघनत्वम्। उक्तात्मज्ञानफलमाह—**ह्येवमिति**। **एवं** उक्तप्रकारेण आत्मानं तुर्यतुर्यं जानतः **अस्मात्** स्वातिरिक्तात् अपह्नवतां गतात् **पुरतः** पूर्वमेव स्वमात्रतया भातं **सुविभातं** निस्संशयं भातमित्यर्थः। नित्यानन्दचिदेकरसमेव हि यदुत्तमाधिकारिदृष्ट्या सुविभातं तद्दर्शयति—**एकरसमेवेति**। नित्यानन्दसदादिरूपमप्येकस्वभावमेव। तत्र न हि कश्चन भेदोऽस्ति।

यदुक्तमेकरसमिति श्रुङ्गग्राहिकया तदाह—**अजरमिति** । जराऽऽदिषड्ऊर्म्यास्पद-स्थूलादिशरीरवैरळ्यात् । जराऽऽस्पदशरीराभिमानतो मृतिः स्यादित्यत आह—**अमृतमिति** । **अमरमिति** वा पाठः तयोरेकार्थत्वात् । भावविकारवैरळ्यात् अमृतत्वं सिद्धमित्यर्थः । तथा **अभयं** भयहेतुद्वैताभावात् । **ब्रह्मैव** महाचैतन्या-खण्डानन्दैकरसस्वभावतयोपबृंहणात् त्रिविधपरिच्छेदशून्यं ब्रह्मेत्यर्थः ॥ ३ ॥

मध्यमाधिकारिणां ओङ्कारात्मनोः एकीकरणविधिः

अप्यजयैनं चतुष्पादं मात्राभिरोंकारेण चैकीकुर्यात् ॥ ४ ॥

उत्तमाधिकारिणां आत्मयाथात्म्यं एवं प्रकटयित्वा यथावत् प्रतिपत्तुम-शक्तान् प्रतीदमाह—**अप्यजयेति** । **एनं** मुक्तमात्मानं **चतुष्पादं** अध्यात्मं अधिदैवं च **अजया** स्वाविद्ययाऽपि संभावितभेदं **मात्रा**चतुष्टयसहितं वक्ष्य-माणो**ङ्कारेण** शास्त्रोक्तया बुद्ध्या **एकीकुर्यात्** ॥ ४ ॥

अकारप्रथमपादयोरभेदः

जागरितस्थानश्चतुरात्मा विश्वो वैश्वानरश्चतूरूपोऽकार एव चतूरूपो ह्ययमकारः स्थूलसूक्ष्मबीजसाक्षिभिरकाररूपैराप्तेरादिमत्त्वाद्वा स्थूलत्वात् सूक्ष्मत्वाद्बीजत्वात् साक्षित्वाच्च । आप्नोति ह वा इदं सर्वमादिश्च भवति य एवं वेद ॥ ५ ॥

एवं एकीकरणप्रकारमाह—**जागरितस्थान** इति । व्याख्यातम् । चत्वारि रूपाण्यस्येति **चतूरूपः**, रूप्यते ह्ययमात्मा स्थूलसूक्ष्मबीजसाक्षिभावैः सर्वा-वस्थासु । अत एवायं **चतुरात्मा** । चत्वारि नामधेयान्यप्यत्रैवोक्तानि । चतुरात्माऽपि प्रत्यवस्थं चतुरात्मनि निर्विभागतुर्यतुर्येण साकं षोडशात्मकत्वम् । तत् कथं ? **अकार** एव चतुर्नामधेयः चतूरूपः प्रथमः पादः । चतूरूपस्याकारस्य किं अनुगतं रूपमित्यत्र **चतूरूपं** उदात्तस्वरितानुदात्तज्ञानरूपाणि प्लुतदीर्घह्रस्व-

ज्ञानरूपाणि च नामरूपाणि चत्वारि यस्य स **चतूरूपः हि** यस्मादयम्। कथं? प्रथमपादेन तादात्म्यं प्राप्तः प्रणवमात्रारूपः। तत्राकाररूपो वर्णः केनैवं तादात्म्यं प्रतिपन्नः? इत्यत्र **स्थूलसूक्ष्मबीजसाक्षिभिः**। तत्र **स्थूलं** जागरण-जागरणं, तत्र सर्वविषयवैशद्यात्। जागरणस्वप्नो हि **सूक्ष्मं**, जागरणस्वप्नस्य बाह्येन्द्रियप्रकाशाभावात्। **बीजं** जागरणसुषुप्तं, बाह्यान्तर्व्यापारोपरमात्। **साक्षी** जागरणतुरीयं, अज्ञातात्मनो ज्ञातात्मनो वा बाह्यान्तरार्थज्ञानप्रतीतौ हेतुः तद्भावाभावप्रकाशकत्वम्। एवं स्थूलसूक्ष्मबीजसाक्षिणस्ते। स्थूलाभ्यां प्लुतोदात्ताभ्यां स्थूलस्सन्नकारो विशदप्रकाशवान् सकारकक्रियो जागरणजागरणं, सूक्ष्माभ्यां दीर्घस्वरिताभ्यां अबाह्यार्थप्रकाशवानयं सकारकक्रियो जागरण-स्वप्नस्थानः, बीजाभ्यां ह्रस्वानुदात्ताभ्यां बीजभूतो बाह्यान्तरविषयशून्यो जागरण सुषुप्तस्थानः, स्वाज्ञानसाक्षिभ्यां मानसाकाराभ्यां साक्षी जागरणतुरीयश्च तादात्म्यं नेतव्यः। एवमकारस्य चातुर्विध्यमुक्तं, ततः साम्यान्तरमाह—**आप्तेरिति**। अकारो हि सर्वा वाचमाप्नोति "अकारो वै सर्वा वाक्" इति श्रुतेः अनुभवाच्च। सर्वं वस्तुजातमाप्नोतीत्यात्मा। एवमकारात्मनोरासिसामान्यात् अकारात्मनोरैक्यम्। आप्तितः साम्यमुक्त्वा आदितः साम्यमाह—**आदिमत्त्वाद्वेति**। **यत्पदाकारयोरादिः** प्राथम्यमस्ति स आदिमान्, तद्भावस्तत्त्वं, तस्मात् आदिमत्त्वात्। **वा**शब्देन प्रथममात्रापादयोः चतुरात्मत्वं द्योत्यते। प्रथमपादस्य अवस्थाचतुष्टयेन कथं साम्यमित्यत्र हेतवः सन्तीत्याह—**स्थूलत्वात् सूक्ष्मत्वात् बीजत्वात् साक्षित्वाच्चेति**। यथा जागरणजागरणे स्थूलः प्रथमः पादः तथा प्लुतोदात्तरूपाभ्यां अकारः स्थूलः, तयोः विशदप्रकाशरूपत्वात्, तद्भावः तत्त्वं तस्मात् स्थूलत्वात्। यथा जागरणस्वप्ने मनोविलासार्थप्रकाशे प्रथमः पादः सूक्ष्मः तथा अकारोऽपि दीर्घस्वरिताभ्यां सूक्ष्मः, यथा जागरणस्वापो बाह्यान्तःकरणविरामे स्वाज्ञाने प्रथमः पादो बीजरूपः तथा अकारोऽपि ह्रस्वानुदात्ताभ्यां बीजरूपः, यथा जागरणतुरीये स्वबाह्यान्तर्वृत्त्यप्रतीतिसिद्धे प्रत्यक्प्रकाशे प्रथमः पादः साक्षी तथा अकारोप्युक्तकालत्रययुगाद्ध्यावृत्तो ज्ञानरूपः साक्षी। तथा चोपपन्नं उभयोरपि स्थूलत्वं सूक्ष्मत्वं बीजत्वं साक्षित्वं च साम्यमुक्तम्।

चकारो हेतुचतुष्टयस्यापि उक्तक्रमसंबन्धचतुष्टयार्थः। य एवं प्रथमपादमात्रासामान्यं वेद सोऽयं ह वा इदं सर्वमाप्नोति जगदादिः प्रथमश्च भवति ॥ ५ ॥

उकारद्वितीयपादयोरभेदः

स्वप्नस्थानश्चतुरात्मा तैजसो हिरण्यगर्भश्चतूरूप उकार एव चतूरूपो ह्ययमुकारः स्थूलसूक्ष्मबीजसाक्षिभिरुकाररूपैरुत्कर्षादुभयत्वाद्वा स्थूलत्वात् सूक्ष्मत्वाद्बीजत्वात् साक्षित्वाच्च । उत्कर्षति ह वै ज्ञानसंततिं समानश्च भवति य एवं वेद ॥ ६ ॥

यथा प्रथमपादोऽकारश्च प्रपञ्चितः तथा द्वितीयपादश्चोकारः प्रपञ्च्यते—स्वप्नेति । यथा जागरणस्थानस्य जागरणभेदैः चतुरात्मत्वं, तथा स्वप्नस्थानस्य स्वाप्नदेहेन्द्रियार्थसंबन्धस्वप्नजागरणं स्थूलरूपः, स्वाप्निकमानसार्थप्रकाशः सूक्ष्मस्वप्नस्वप्नः, स्थूलसूक्ष्मार्थप्रकाशविरळं स्वप्नसुषुप्तं बीजं, बाह्यान्तर्विशेषानुपलम्भात् साक्षी स्वप्नतुरीयः, एतैश्चतूरूपैः चतुरात्मत्वम् । उकारो द्वितीयामात्रा, उकारस्य उत्कर्षात् आधिक्यात् । सर्वस्मादधिको ह्ययमात्मा । तथा सर्वस्मादुकारो ह्यधिकः । उभयत्वात् द्वित्वसंख्याऽऽक्रान्तत्वात् स्वप्नस्थानो द्वितीयः पादः। द्वितीयपादोकारसामान्यज्ञानफलमाह—य इति। य एवं वेद स ह वै ज्ञानसन्ततिं लब्ध्वा सार्वभौमेन ईश्वरेण वा समानश्च भवति। व्याख्यातमितरत् ॥६॥

मकारतृतीयपादयोरभेदः

सुषुप्तस्थानश्चतुरात्मा प्राज्ञ ईश्वरश्चतूरूपो मकार एव चतूरूपो ह्ययं मकारः स्थूलसूक्ष्मबीजसाक्षिभिर्मकाररूपैर्मितेरपीतेर्वा स्थूलत्वात् सूक्ष्मत्वाद्बीजत्वात् साक्षित्वाच्च । मिनोति ह वा इदं सर्वमपीतिश्च भवति य एवं वेद ॥ ७ ॥

यथा प्रथमद्वितीयपादावकारोकाराभ्यां अभिन्नौ, एवं तृतीयपादमकारोऽपीत्याह—**सुषुप्तेति** । घटादेरज्ञानं सुषुप्तजागरणं स्थूलं, स्थूलवासनासंवलितघटादेरज्ञानं सूक्ष्मस्वापस्वप्नः, करणग्रामोपरमे सवृत्तिकावरणाज्ञानवृत्तिः शान्तेव यत्र भाति तत् सुषुप्तसुषुप्तं बीजं, पूर्वावस्थाप्रपञ्चभावाभावप्रकाशकसाक्षि सुषुप्ततुरीयं, एवं चतूरूपस्य सत्त्वात् चतुरात्मत्वम् । प्रणवस्य तृतीया मात्रा **मकारः** । यद्यप्यकारादिधर्माः प्लुतादयो मकारे न सन्ति, तथाऽप्यकारस्य सर्ववर्णात्मकत्वात् साकारे मकारे तद्धर्माणां सत्त्वात् तस्याप्यकारादिवच्चतूरूपत्वं अविरुद्धम् । **मितेः** मानरूपत्वात्, साक्षिरूपेण ह्यात्मा मिनोति इदं सर्वम् । **अपीतेः** अप्ययात्, इदं जागरणस्वप्नतत्कार्यजातं सर्वं मकारावच्छिन्नप्राज्ञात्मनि प्रलीयते । **य एवं** सुषुप्तस्थानमकारसामान्यं **वेद** तस्येदं फलं—प्रस्थपरिमितयववत् सचराचरं जगदवगच्छति । **ह वा इदं सर्वं** व्याख्यातम् । **अपीतिश्च भवति** कालाग्निरुद्रवत् स्वातिरिक्तं ग्रसति । कामादीनामप्ययो भवति ॥ ७ ॥

चतुर्थपादप्रपञ्चनम्

मात्राऽमात्राः प्रतिमात्राः कुर्यात् । अथ तुरीय ईश्वरग्रासः स स्वराट् स्वयमीश्वरः स्वप्रकाशश्चतुरात्मोतानुज्ञात्रनुज्ञाविकल्पैः । ओतो ह्ययमात्मा ह्यथैवेदं सर्वमन्तकाले [1]कालाग्निः [2]सूर्योस्रैः । अनुज्ञाता ह्ययमात्मा ह्यस्य सर्वस्य स्वात्मानं ददातीदं सर्वं स्वात्मानमेव करोति यथा तमः सविता । अनुज्ञैकरसो ह्ययमात्मा चिद्रूप एव यथा दाह्यं दग्ध्वाऽग्निः ॥ ८ ॥

पादत्रयं व्याख्याय चतुर्थं पादमाचष्टे—**मात्रेति** । अकारोकारमकाराख्याः **मात्राः**, **अमात्राः** अर्धमात्राः मात्राविशेषवैरळ्यात्, मात्राश्चामात्राश्च **प्रतिमात्राः** प्रत्येकं अकारोकारमकारमात्राः प्लुतादिविशिष्टाः **कुर्यात्** । अयमाशयः—

[1] कालाग्निसू—अ २.
[2] सूर्योस्रैः—अ २, क.

अध्यात्ममधिदैवमधिभूतं च दृग्दृश्यपदार्थौ अवस्थात्रयेऽप्यनुगतौ । तत्र जागरणावस्थायामात्मनो दृश्यबाधार्थौ चतुरवस्थौ साधिभूतौ विश्वशब्दाभिधेयौ वैश्वानरेण तादात्म्यं गतौ ध्यात्वा, वैश्वानरं च स्थूलसूक्ष्मबीजसाक्षिरूप-मकारप्लुतोदात्तदीर्घस्वरितह्रस्वानुदात्तमनोमात्रगम्यत्वेन स्थूलसूक्ष्मबीजसाक्षितां प्रापयित्वा, चतूरूप ओङ्कारार्थे बुद्ध्या तादात्म्यं नीत्वा, स्थूलं सूक्ष्मे सूक्ष्मं बीजे बीजं च साक्षिण्यकारे संहरेत् । एवं स्वप्नस्थानस्थाधिभूतो हिरण्यगर्भः[र्भ], चतुरवस्थः स चतूरूप उ[ओ]कारे, उकारोऽपि स्थूलसूक्ष्मे, सूक्ष्मोऽपि बीजे, बीजं च साक्षिण्युकारे संहरणीयः । एवं सुषुप्तिस्थानस्थाधि-भूतः ईश्वरे, ईश्वरः चतुरवस्थो मकारे, मकारः स्थूलसूक्ष्मे, सूक्ष्मो बीजे, बीजं च मकारे साक्षिणि संहरणीयः । अकारसाक्षिणमुकारसाक्षिणि, उकारसाक्षिणं मकारसाक्षिणि, मकारसाक्षिणं तुर्यसाक्षिण्यमात्रे प्रणवरूपे संहरेत् । एवं प्रतिमात्राः कुर्वतो मात्राः अमात्राः भवन्तीति । **अथ** पूर्वेभ्यो विलक्षणः **तुरीयः** यो मकारमात्राऽभिन्नमीश्वरं ग्रसति स **ईश्वरग्रासः** । य ईश्वरग्रासः **सोऽयं** साधनान्तरमनपेक्ष्य स्वयमेव राजत इति **स्वराट्** सर्वत्र **स्वयमेवेश्वरो** नियन्ता सन् । स्वातिरिक्तमनपेक्ष्य स्वेनैव प्रकाशत इति **स्वप्रकाशः** । अयमपि **चतुरात्मा ओतानुज्ञात्रनुज्ञाऽविकल्पैः** । उक्तार्थमेतत् । ओतत्वं व्याकरोति—**ओतो ह्ययमात्मेति** । व्यष्टिसमष्ट्यात्मकप्रपञ्चारोपाधिकरणविश्वविराडैक्यात्मना स्थूल-प्रपञ्चानुस्यूतत्वात् **अयमात्मा** ओता **ओतो हि** व्यापक एवेत्यर्थः । एवं कृत्स्नस्थूलप्रपञ्चोतत्वे दृष्टान्तमाह—**अथेति** । इदं मूर्तप्रपञ्चजातं **सर्वमन्तकाले** यद्यपीदानीमपि सविता स्वकिरणैः सर्वमिदं व्याप्नोति तथाऽपि प्रपञ्चान्तकाले कालः सर्वविनाशकारी स एवाग्निः पाताळतलमारभ्य यावदविद्याऽण्डभित्तिः तावदिदं सर्वं निर्दहन् स एव **कालाग्निः सूर्यः उल्लैः** किरणैः इदं सर्वं व्याप्नोति, व्याप्य निःशेषं भस्म करोतीत्यर्थः । तुर्यजागराधारमोतात्मानमुक्त्वा तुर्यस्वप्ना-धारमनुज्ञात्रात्मानमाह—**अनुज्ञातेति** । **अयमात्मा** तुर्यतैजससूत्रैक्यात्मना "तत् त्वमसि, अहं ब्रह्मास्मि" इति प्रत्यगभिन्नब्रह्माहमस्मीति आत्मानं अनुंजानातीति **अनुज्ञाता**, पूर्णबोधस्वरूपत्वात् । **अस्य सर्वस्य** स्वातिरिक्त-

प्रपञ्चजातस्य "मद्व्यतिरिक्तमणुमात्रं न विद्यते" इति श्रुतिसिद्धस्वप्रबोधेन स्वात्मानं ददाति। किं बहुना—इदं सर्वं स्वात्मानमेव करोति स्वावशेषं करोतीत्यर्थः। उक्तार्थे दृष्टान्तमाह—यथेति। यथा सविता स्वोदयसमकालं निशि स्वावारकं तमः स्वावशेषं ग्रसति तथा अयमात्मेत्यर्थः। तुर्यसुषुप्तानुज्ञैकस्वरूपं व्याकरोति—अनुज्ञैकरस इति। व्यष्टिसमष्टितुर्यसुषुप्त्यासनतुर्यप्राज्ञबीजैक्यानुज्ञारूपेण व्यष्टिसमष्ट्यात्मकजाग्रज्जाग्रदाद्यविकल्पानुज्ञैकरसान्तकलनायाः अपह्नवानुज्ञां दत्वा स्वयमखण्डैकरसतुर्यतुर्याभिमुखो भवतीति अयमात्मा अनुज्ञैकरसो हि भवतीत्यर्थः। स्वभावतः चिद्रूप एव। चिद्रूपत्वे दृष्टान्तमाह—यथेति। यथा अग्निः स्वदाह्यं काष्ठकरीषादिकं दग्ध्वा भस्मीकृत्य निर्विकल्पोऽवतिष्ठते तथैव स्वात्मबोधेन सर्वमिदं जडं स्वावशेषं कृत्वा स्वस्वरूपेण अवतिष्ठते। तुर्यजाग्रत्स्वप्नसुषुप्तांशेषु तुर्यजागरणस्वप्नांशौ सधूमज्वालावदग्नितुल्यौ, तुर्यसुषुप्तस्तु शराङ्गारवत् निर्विकल्पकतया अवतिष्ठत इत्यर्थः॥ ८॥

तुर्यतुर्यप्रपञ्चनम्

अविकल्पो ह्ययमात्माऽवाङ्मनोगोचरत्वाच्चिद्रू[1]पश्चतूरूप ॐकार एव चतूरूपो ह्ययमोंकार ओतानुज्ञात्रनुज्ञाऽविकल्पैरोंकाररूपैः। आत्मैव नामरूपात्मकं हीदं सर्वं तुरीयत्वात् चिद्रूपत्वाच्च ओतत्वात् अनुज्ञातृत्वात् अनुज्ञात्वात् [2]अविकल्परूपत्वाच्च। अविकल्परूपं हीदं [3]सर्वं नात्र काचन भिदाऽस्ति नैव तत्र काचन भिदाऽस्ति॥ ९॥

तस्मादप्युपरि विद्यमानं अङ्गारादप्युपगताग्निसमानं अवाङ्मनोगोचरत्वात् तुर्यतुर्यं अविकल्पाविकल्पं, सर्वप्रकारस्वातिरिक्तकलनाऽपह्नवसिद्धत्वात्

[1] पश्चात्मरू—अ, अ १. पत्वाच्चतू—

[2] अविकल्पत्वाच्च—अ २, क. [3] सर्वं नैव—अ १, अ २, क.

अविकल्पाविकल्पत्वं निरङ्कुशमित्यर्थः । तत्र हेतुः **चिद्रूपः** चिन्मात्र इत्यर्थः । तत् कथं ? चत्वारि रूपाणि यस्य सः **चतूरूपः** ओतानुज्ञात्रनुज्ञाऽविकल्पैरकारोकारमकारमात्राऽतीतैश्चतूरूपैः प्रणव **एव** नत्वन्यः **हि** यस्मात् **अयं** चतुष्पादात्मस्वरूपः । यत एवं अतो **नामरूपात्मकं हीदं सर्वं** तुर्यतुर्यातिरेकेण मृग्यत्वात् तुर्यतुर्यस्य स्वतः **चिद्रूपत्वात्**, स्वाभ्यस्ताकारादिमात्राभेदानुवृत्त्या स्वाविद्यापदस्थूलांशोतत्वात्, तत्सूक्ष्मांशानुज्ञातृत्वात्, बीजांशानुज्ञात्वात्, तुर्यांशाविकल्परूपत्वात् । **चकारेण** स्वतोऽयमविकल्पाविकल्प इति द्योत्यते । स्वाज्ञदृष्ट्या यत्तदतिरेकेण विकलिपतं **भिदाजातं** स्वज्ञदृष्टा **न हि तत्रास्ति** । स्वज्ञादिदृष्ट्या सत्यत्वेन व्यावहारिकत्वेन प्रातिभासिकत्वेन वा **नैव तत्र** नामरूपकर्मात्मक**भिदा** ओत्रादिभिदा विकल्पो वाऽस्ति ॥ ९ ॥

तुर्यतुर्यादेशः

अथ तस्यायमादेशोऽमात्रश्चतुर्थोऽव्यवहार्यः प्रपञ्चोपशमः शिवोऽद्वैतः । एवमोंकार आत्मैव । संविशत्यात्मनाऽऽत्मानं य एवं वेद ॥

तथा चेत् तदवगतिः कीत्यत आह —**अथेति** । **अथेति** तुर्यपादप्रवेशानन्तर्यार्थः । वस्तुतो यदविकल्पाविकल्पकं तुर्यतुर्यं तत् कदाऽपि उपदेश्यं न भवति । यतः तदोत्रादिकलनाऽस्पृष्टं अतस्तदवगन्तुं न हि शक्यं स्वातिरिक्तज्ञात्राद्यसंभवात् । तथाऽपि **तस्यायमादेशो** वेदेन क्रियते स्वाज्ञारोपितमात्रातदध्यक्षव्यवहारप्रपञ्चापह्नवमुखेन, तदपह्नवसिद्धं तुर्यतुर्यात्मकं निष्प्रतियोगिकस्वमात्रमित्यवगन्तुं शक्यमिति । श्रुतिनिर्दिष्टादेशः कः ? इत्यत्र **अमात्रः** स्थूलसूक्ष्मबीजभावमापन्नाकारादिमात्राप्रपञ्चापह्नवसिद्धत्वात् । **चतुर्थः** तुर्यविश्वविराडोत्रादेरप्यस्य चतुर्थत्वेन तुर्यतुर्यत्वात् । **अव्यवहार्यः** व्यवहार्योंदमंशापह्नवसिद्धत्वात् । **प्रपञ्चोपशमः** जाग्रज्जाग्रदाद्यविकल्पानुज्ञैकरसान्तप्रपञ्चापह्नववृत्तेरप्युपशमसिद्धत्वात् । अत एव **शिवः** परममङ्गळात्मकविकळेबरकैवल्यरूपत्वात् । **अद्वैतः** निखिलवेदार्थपरमाद्वैततया निष्प्रतियोगिकसन्मात्रत्वात् ।

तं शृङ्गग्राहिकया आह—**ओङ्कार** इति। **एवमोङ्कारो** ब्रह्म प्रणवः **आत्मैव** नत्वन्यः अभिधानस्य अभिधेयपर्यवसन्नत्वात्। एतज्ज्ञानफलं महीकरोति—**संविशतीति**। **स्वात्मना** स्वात्मानमेव स्वमात्रमिति **संविशति** अवगच्छति **य एवं वेद** वेदनसमकालं स तदेव भवतीत्यत्र "ब्रह्म वेद ब्रह्मैव भवति" इति श्रुतेः॥ १०॥

मन्दाधिकारिणां मन्त्रराजद्वारा तुरीयावगतिः

एष वीरो नारसिंहेन वानुष्टुभा मन्त्रराजेन तुरीयं विद्यादेष ह्यात्मानं प्रकाशयति सर्वसंहारसमर्थः परिभवासहः प्रभुर्व्याप्तः [1]सदोज्ज्वलोऽविद्यातत्कार्यहीनः स्वात्मबन्धहरः सर्वदा द्वैतरहित आनन्दरूपः सर्वाधिष्ठानसन्मात्रो निरस्ताविद्यातमोमोहोऽहमेवेति। तस्मादेवमेवमात्मानं परं ब्रह्मानुसंदध्यादेष वीरो नृसिंह एवेति॥ ११॥

मध्यमाधिकारिणां उपायोपदेशतो ह्युत्तमपदं प्रविष्टानां परमफलं प्रकटयित्वा मन्दाधिकारिणामपि तत्पदारोहाय परमोपायमाह—**एष** इति। अन्यदेवतोपासकेषु अनेकेषु सत्सु तत्र कश्चिदेष नृसिंहस्य त्रिलोकीकण्टकासुरवक्षःकवाटपाटनपटोरुपासनामहिम्ना तत्तादात्म्यं प्राप्त इव **वीरः**। स्वाज्ञानासुरभेदनोद्युक्तत्वात् वीरत्वमुपपद्यते। सोऽयं **नारसिंहेन वाऽनुष्टुभा मन्त्रराजेन**—वाशब्दः पक्षान्तरे यथावदात्मानमवगन्तुमशक्तः तदा—नारसिंहेन [नरसिंह]दैवतेन अनुष्टुप्छन्दस्केन स्वतन्त्रेण मन्त्रराजेन **तुरीयं विद्यात्** अवगच्छेत्। सत्सु मन्त्रान्तरेषु अयमेव मन्त्रराजः। **एष ह्येव स्वात्मानं** चिन्मात्रतया **प्रकाशयति**। सर्वार्थसाधकेषु मन्त्रान्तरेषु सत्स्वपि किमत्र पक्षपात इत्यत्र **सर्वसंहारसमर्थः** स्वाज्ञानोपसंहारपटुत्वात्, स्वभक्तकृते परप्रयुक्तपरिभवासहः मद्भक्तो वा परैः परिभूयते स्वाज्ञानेन वेति। परिभवासहत्वे हेतुमाह—**प्रभुरिति**। को हि

[1] सर्वदो—उ.

स्वामी समर्थः सन् स्वभृत्यविषये परैः कृतपरिभवं सहते । ततोऽस्य परिभवासहनमुचितमेव । तुरीयेणास्य किमित्यत आह—**व्याप्त** इति । यथा तुरीयो जगदिदं व्याप्य वर्तते तथाऽयं स्वकीयैः पादैः पृथिव्यादिकं व्याप्नुवन् व्याप्त इत्यर्थः । उभयतः साम्यप्रतीत्यर्थमित्याह—**सदोज्ज्वल** इति । यथा तुरीयः स्वयंप्रकाशः अयमपि सदोज्ज्वलत्प्रकाशः । न केवलमिदं साम्यं किन्त्विदमपीत्याह—**अविद्याकार्यहीन** इति । रागद्वेषादीनि अविद्याकार्याणि । आत्मवत्—यथाऽयं तुरीयः स्वात्मनो बन्धमाविद्यकं हरति तथाऽयं मन्त्रराजोऽपि **स्वात्मबन्धहरः** । **सर्वदा** तुर्यवत्—**द्वैतरहितः**, तुर्यवत् **सर्वाधिष्ठानसन्मात्रः** । तत्र हेतुः—**निरस्ताविद्यातमोमोहः** तुर्यवत्तादृशाक्षरत्वात् । एवं साम्यमुक्त्वा इदानीमक्षरार्थसाम्यमाह—**अहमेवेति** । यथाऽयं तुरीयोऽस्मत्प्रत्ययग्राह्यः एवं मन्त्रराजोऽपीत्यर्थः । यस्मादेवं **तस्मात्** नारसिंहेनानुष्टुभा मन्त्रराजेन **इममेवानन्दात्मानं** सर्वस्मात् **परं** उत्कृष्टं परिच्छेदत्रयातीतं **ब्रह्म अनुसंदध्यात्** । एवं कुर्वन्निरुपचरितोऽयमेव **वीरो नृसिंह एव** भवति ॥ ११ ॥

इति द्वितीयः खण्डः

तृतीयः खण्डः

प्रणवमन्त्रराजपादानां तुरीयात्मना ध्यानम्

तस्य ह वै प्रणवस्य या पूर्वा मात्रा सा प्रथमः पादो भवति द्वितीया द्वितीयस्य तृतीया तृतीयस्य चतुर्थ्योतानुज्ञात्रनुज्ञाऽविकल्परूपा तया तुरीयं चतुरात्मानमन्विष्य चतुर्थपादेन च तया तुरीयेणानुचिन्तयन् ग्रसेत् ॥ १ ॥

उत्तमाधिकारिणां निर्विशेषं मध्यमाधिकारिणां सविशेषं च ब्रह्म प्रतिपाद्य पुनः संक्षेपविस्ताराभ्यां मध्यमाधिकारिणं संबोधयितुं खण्डिकेयमारभ्यते—**तस्येति**। ओमित्येतदक्षरमित्यादिना यः प्रणवो वर्णितः **तस्य ह वै प्रणवस्य**। **ह वा** इतिशब्दौ प्रसिद्धिस्मरणार्थौ। येयमकाराख्या **मात्रा सेयं** प्रणवमन्त्रराजयोः **प्रथमः पादो भवति द्वितीया द्वितीयस्य तृतीया तृतीयस्येति**। षष्ठी प्रथमार्था। **द्वितीया** उकारः **तृतीया** मकारः। द्वितीयो द्विसंख्यापूरणः तृतीयः त्रिसंख्यापूरणः। **चतुर्थी** चतुःसंख्यापूरणी। सेयं कीदृशीत्यत्र **ओतानुज्ञात्रनुज्ञाऽविकल्परूपा**। सोभयतश्चतुर्थः पादो भवतीत्यध्याहार्यम्। **तया** चतुर्थ्या **तुरीयं चतुरात्मानं** ओतानुज्ञात्रनुज्ञाऽविकल्पैः चतुर्भेदं आनन्दात्मानं **अन्विष्य** स्वाचार्योपदेशपुरस्सरमित्यर्थः। प्रणवमन्त्रराजयोः **चतुर्थमात्रया पादेन च**—एकैकमात्रापादयोरपि तुरीयेणाभेदार्थौ—**तया** प्रणवतुर्यमात्रया मन्त्रराजतुर्यपादेन च मात्रापादैक्यतो विकल्पेनाचार्योपदेशं **अनुचिन्तयन् प्रसेत्** तुर्यात्मबुद्ध्या सर्वमिदमुपसंहरेत्॥ १॥

प्रथमपादध्यानम्

तस्य ह वा एतस्य प्रणवस्य या पूर्वा मात्रा पृथिव्यकारः
स ऋग्भिर्ऋग्वेदो ब्रह्मा वसवो गायत्री गार्हपत्यः सा प्रथमः पादो
भवति भवति च सर्वेषु पादेषु चतुरात्मा स्थूलसूक्ष्मबीजसाक्षिभिः॥ २॥

इति सूत्रप्रायमुक्तं, तदेव पुनः विवृणोति—**तस्येति**। **तस्य ह वा एतस्य प्रणवस्य या पूर्वा मात्रा**—व्याख्यातमन्यत्। **पृथिवी** सप्तद्वीपवती सागरमेखला। अक्षरस्तु **अकारः**। **सो**ऽक्षरः पृथिव्यात्मकः अकारः। मन्त्रब्राह्मणात्मकः **ऋग्वेदो**ऽप्येतदात्मकः। जगदुत्पादको **ब्रह्मा**ऽस्य देवता भवति। अष्टावस्यादिनक्षत्रान्ता **वसवो**ऽस्याधिदेवताः एतदात्मानः। **गायत्री** चतुर्विंशत्यक्षरात्मिका। **गार्हपत्योऽग्निः**। एवमुक्ता मात्रा **सा** प्रणवमन्त्रराजयोः **प्रथमः पादो भवति**। योऽयमात्मनः प्रथमः पादः प्रणवमात्रारूपः स सर्वोऽपि

चतुरात्मेत्याह—**भवति चेति**। **सर्वेषु पादेषु चतुरात्मा** स्थूलत्वात् सूक्ष्मत्वात् बीजत्वात् साक्षित्वात् **स्थूलसूक्ष्मबीजसाक्षिभिः** चतुरात्मत्वमित्यर्थः ॥ २ ॥

द्वितीयपादध्यानम्

द्वितीयाऽन्तरिक्षं स उकारः स यजुर्भिर्यजुर्वेदो विष्णु[ष्णू]-रुद्राखिष्टुब्दक्षिणाग्निः सा द्वितीयः पादो भवति भवति च सर्वेषु पादेषु चतुरात्मा स्थूलसूक्ष्मबीजसाक्षिभिः॥ ३ ॥

उकाररूपिणी **द्वितीया** मात्रा **अन्तरिक्षं** अन्तरिक्षलोकः **उकाराक्षरः**। **स** एव **यजुर्भिः** अविवक्षितछन्दोभिः मन्त्रब्राह्मणात्मकोऽयं **यजुर्वेदः** अध्वर-प्रकाशकः। जगद्वितकारी **विष्णुः** अस्य देवता **रुद्राः** एकादश इन्द्रियाण्य-स्याधिदैवतानि। **त्रिष्टुप्**छन्दस्तु च[तुश्च]त्वारिंशदक्षरात्मकम्। **दक्षिणाग्निः** प्रसिद्धः। **सा द्वितीयः पादो भवति भवति च सर्वेषु पादेषु चतुरात्मा स्थूलसूक्ष्मबीजसाक्षिभिः** इत्युक्तार्थम् ॥ ३ ॥

तृतीयपादध्यानम्

तृतीया द्यौः स मकारः स सामभिः सामवेदो रुद्र आदित्या जगत्याहवनीयः सा तृतीयः पादो भवति भवति च सर्वेषु पादेषु चतुरात्मा स्थूलसूक्ष्मबीजसाक्षिभिः ॥ ४ ॥

तृतीयसंख्यापूरणी **द्यौः** द्युलोकः तृतीयमात्राऽभिन्नः **सः मकारः**। **स सामभिरिति** [साम]प्रधानैः मन्त्रैः सह सामवेदः गीतिप्रधानो मन्त्रब्राह्मणात्मकः **सामवेदः**। अस्य देवता **रुद्रः** संहारकर्ता। तत्तादात्म्यं प्राप्ताः द्वादशमासात्मकाः **आदित्याः** अस्याधिदैवतम्। तादात्म्यं प्राप्ता **जगती** अष्टाचत्वारिंशदक्षरात्मकं छन्दः। स **आहवनीयः** आहुत्यधिकरणमग्निः। **सा तृतीयः पादो भवति भवति च सर्वेषु पादेषु चतुरात्मा स्थूलसूक्ष्मबीजसाक्षिभिः** इत्युक्तार्थम् ॥४॥

चतुर्थपादध्यानम्

याऽवसानेऽस्य चतुर्थ्यर्धमात्रा सा सोमलोक ॐकारः साऽऽथर्वणैर्मन्त्रैरथर्ववेदः संवर्तकोऽग्निर्मरुतो विराडेकर्षिर्भास्वती स्मृता सा चतुर्थः पादो भवति भवति च सर्वेषु पादेषु चतुरात्मा स्थूल-सूक्ष्मबीजसाक्षिभिः ॥ ९ ॥

मात्रात्रयावसाने या प्रसिद्धा अस्य प्रणवस्य चतुस्संख्यापूरणी **अर्धमात्रा** या मात्राऽतीतरूपा **सा** ह्यर्धमात्रा **सोमलोकः**, सह उमया विद्यया वर्तते य ईश्वरः स सोमः । ओंकारमात्राऽतीतप्रणवो हि ऋगादिसारभूतः । **सा** उक्तार्धमात्रा **आथर्वणैः मन्त्रैः अथर्ववेदः** । आथर्वणमन्त्राः षट्कर्मप्रधानाः अथर्वणा दृष्टाः, तैः सह वर्तमानो मन्त्रब्राह्मणात्मकोऽथर्ववेदः । पाताळमारभ्य त्रिलोकीं शुष्ककरीषवद्यो निर्दहेत् सोयं **संवर्तकोऽग्निः** ईश्वरः । एकोनपञ्चाशत्संख्याकाः **मरुतः** वायवः अस्याधिदैवत्यं प्राप्ताः । **विराट्** दशाक्षरं छन्दः । आथर्वणानां प्रसिद्धोऽयं **एकर्षिः** नामाग्निः । यद्यपि मात्रा भास्वती, तथाऽपीयमन्तर्बहिः-प्रकाशरूपा, ततो विद्वद्भिः **भास्वती स्मृता** शास्त्रोक्त्या साऽवगता । **सा चतुर्थः पादो भवति, भवति च सर्वेषु पादेषु चतुरात्मा स्थूलसूक्ष्मबीज-साक्षिभिः** इत्युक्तार्थम् ॥ ९ ॥

तुर्यतुर्ये सर्वोपसंहारः

मात्राऽमात्राः प्रतिमात्राः कृत्वोतानुज्ञात्रनुज्ञाऽविकल्परूपं चिन्तयन् ग्रसेत् ॥ ६ ॥

मात्राऽमात्राः प्रतिमात्राः कृत्वा चतुर्थमात्रायां मात्रात्रयवत् मात्राचतुष्टयेऽपि मात्रा अमात्राः प्रतिमात्राः विधाय अनन्तरं **ओतानुज्ञात्रनुज्ञाऽविकल्परूपं चिन्तयन्** एकानुविद्धं ध्यायन् **ग्रसेत्** यन्निर्विशेषं ब्रह्म तुर्यतुरीयं तस्मिन्निदं सर्वमुपसंहरेत् ॥ ६ ॥

तुर्यतुर्यावगतिः

ज्ञोऽमृतो हुतसंवित्कः शुद्धः संविष्टो निर्विघ्न इममसुनियमेऽ-
नुभूयेहेदं सर्वं दृष्ट्वा स प्रपञ्चहीनः ॥ ७ ॥

एवमुपसंहारं कुर्वत इदं रूपं भवतीत्याह—**ज्ञ** इति । स्वभावतोऽयं **ज्ञः** सर्वज्ञः **अमृतः** मरणानुकूलोपाध्यभावात् **हुतसंवित्कः** येन स्वात्माग्नौ ध्यात्रादि-संविद्धुता तथाविधः **शुद्धः** अशुद्धिहेत्वविद्याऽभावात् **संविष्टः** सम्यक् स्थिरासने उपविष्टः **निर्विघ्नः** स्थिरासनतः पुनरुत्थानशून्यः **इमं** सच्चिदानन्दात्मानं रेचकपूरककुंभकादिभिः **असुनियमे** प्राणनियमनेन प्राणबन्धनं यन्मनस्तदपि नियमितं भवति तेन मनसा **अनुभूय** तुर्यतुर्यस्वमात्रमिति प्रबोधसिद्धानुभवबलेन **इदं सर्वं** नृसिंहमन्त्रराजप्रणवपादमात्राः तदवान्तरभेदं च **दृष्ट्वा** तुर्यतुर्यातिरिक्तं नेत्यवगम्य **स प्रपञ्चहीनः** तुर्यतुर्यावगतेः प्रपञ्चापह्नवपूर्वकत्वात् ॥ ७ ॥

सकलब्रह्मस्वरूपम्

अथ सकलः साधारोऽमृतमयश्चतुरात्मा ॥ ८ ॥

मन्दो[ध्यमो]त्तमाधिकारिणावेवं संबोध्य इदानीं मन्दप्रज्ञं बुबोधयिषुराह—**अथेति** । अथोत्तममध्यमाधिकारिभ्यां अन्यो मन्दाधिकारी वक्ष्यमाणप्रकारेण संबोधनीयः । तत् कथं ? चतुर्भेदाढ्यजागरितस्थानतत्त्याध्यात्मादिविशिष्टविश्ववि-राडकार-(तद्भेदपर्वतादि)चतुर्भेदेद्रस्वप्नस्थानतत्त्याध्यात्मादिभेदवत्तैजसहिरण्य-गर्भोकार-तथा चतुर्भेदाढ्यसुषुप्तस्थानतत्त्याध्यात्मिकादिभेदवत्प्राज्ञेश्वरमकार-तथा तुरीयस्थानोतानुज्ञात्रनुज्ञाऽविकल्पोङ्कारगर्भितमन्त्रराजपदजातकलाभिः सह वर्तत इति **सकलः** स्वाज्ञादिदृष्टिप्रसक्ताधेयनिरूपिताधारात्मना सह वर्तत इति **साधारः** **अमृतं** ब्रह्म तुर्यतुरीयं तन्मयः तत्प्रायोऽयंमाधारात्मा स **चतुरात्मा** ब्रह्म-विष्णुरुद्रसंवर्ताग्निभेदात् सर्वमयः प्रणवमन्त्रराजाक्षरमयत्वात् । तत्र हेतुश्चतु-रात्मा ॥ ८ ॥

सकलब्रह्मध्यानम्

अथ महापीठे सपरिवारं तमेतं चतुःसप्तात्मानं चतुरात्मानं मूलाग्नावग्निरूपं प्रणवं संदध्यात्। सप्तात्मानं चतुरात्मानमकारं ब्रह्माणं नाभौ सप्तात्मानं चतुरात्मानमुकारं विष्णुं हृदये सप्तात्मानं चतुरात्मानं मकारं रुद्रं भ्रूमध्ये सप्तात्मानं चतुरात्मानं चतुःसप्तात्मानं चतुरात्मानमोंकारं सर्वेश्वरं द्वादशान्ते सप्तात्मानं चतुरात्मानं चतुःसप्तात्मानं चतुरात्मानमानन्दामृतरूपं षोडशान्ते ॥ ९ ॥

सर्वमिदं चापि चतूरूपं जाग्रज्जाग्रदाद्यविकल्पानुज्ञैकरसान्तकलना परमार्थदृष्ट्या यं तुर्यतुर्यं न स्पृशति तादृशं तुर्यतुर्यं ब्रह्म स्वमात्रमित्यज्ञानतः केचित् संसरन्तो हीयन्ते, तेषां चित्तशुद्धिहेतुयोगप्रदर्शनपूर्वकं तुर्यतुर्यमेव निरूपयति—**अथेति**। **अथ** श्रुत्याचार्यप्रसादानन्तरं श्रीनृसिंहनिवासहेतुसुषुम्नाऽन्तर्गत**महापीठे** स्वानन्यभक्तपटलपरिवारेण सह वर्तत इति **सपरिवारम्**। यद्वा—पूर्वोक्तपूजापीठे अङ्गादिद्वात्रिंशद्व्यूहान्तर्गतपरिवारेण सह वर्तत इति सपरिवारं **तं** सकलं साधारं सर्वमयममृतमयमिति चतुरात्मानं **एतं** स्वयंप्रकाशसदानन्दात्मानं **पृथिव्यकार-ऋग्वेदब्रह्मवसुगायत्रीगार्हपत्य**—अन्तरिक्षोकारयजुर्वेदविष्णुरुद्रत्रिष्टुब्दक्षिणाग्नि—द्युमकारसामवेदरुद्रादित्यजगत्याहवनीय—सोमलोक-ओंकाराथर्ववेदसंवर्तकाग्निमरुद्विराडेकर्षिरूपाणि चतुस्सप्तसंख्याऽन्वितानि स्वरूपाणि यस्य तं **चतुस्सप्तात्मानं** स्थूलसूक्ष्मबीजसाक्षिरूपाण्योत्रादीनि वा स्वरूपं यस्य तं **चतुरात्मानं** मूलाधारत्रिकोणगतोऽग्निः **मूलाग्निः** तस्मिन् नृसिंहा**ग्निरूपं प्रणवात्मकं संदध्यात्**। मात्राभेदानां विभागमाह—**सप्तेति**। पृथिव्यादिगार्हपत्यान्ताः सप्तात्मा स्वरूपं यस्य तं **सप्तात्मानं** स्थूलादयः ओत्रादयो वा आत्मा स्वरूपं यस्य तं **चतुरात्मानं** प्रणवाद्यवय**वाकार**मात्रारूपं जगत्स्रष्टारं **ब्रह्माणं नाभौ** अनुसंधानं कुर्यात्। अथान्तरिक्षादिदक्षिणाग्न्यन्तं **सप्तात्मानं चतुरात्मानं** समानं प्रणवद्वितीयमात्रात्मकं **उकारं** सर्वपालकं **विष्णुं हृदये**

अनुसन्दध्यात्। ब्रह्माद्याहवनीयान्तं **सप्तात्मानं चतुरात्मानं** मकारं सर्वोपसंहारकर्तारं **रुद्रं भ्रूमध्ये** अनुसंदध्यात्। सोमलोकाद्येकर्ष्यन्तं **सप्तात्मानं चतुरात्मानं चतुःसप्तात्मानं चतुरात्मानं** उक्तार्थम्। वस्तुतः चतुस्सप्तात्मानं चतुरात्मानं स्वात्मरूपनृसिंहतादात्म्यमापन्नं मूलाधारे ध्यातव्यमुक्तवती श्रुतिः। इदानीं तु मात्राभेदान् सप्त चतुरश्च प्रतिमात्रास्थानभेदान् ध्यातव्यतयोक्त्वा चतुस्सप्तात्मानं चतुरात्मानं चोपपादितं **ओङ्कारार्धमात्रारूपिणं** सप्तात्मानं चतुरात्मानं स्वेन रूपेण चतुस्सप्तात्मानं चतुरात्मानं **सर्वेश्वरं द्वादशान्ते** अनुसंदध्यात्। द्वादशान्तं नाम चुबुकमारभ्य यावत्केशाग्रमिदं मस्तकं तस्यान्त इवान्ते द्वादशान्ते, सहस्रदळपद्मे इत्यर्थः। अकारोकारमकारबिन्दुनादकलाकलातीतात्मकजाग्रत्स्वप्नसुषुप्तितुरीयतुर्यजाग्रत्स्वप्नसुषुप्तितुर्यातीतैश्च **सप्तात्मानं चतुरात्मानं** चत्वार ओतानुज्ञात्रनुज्ञाऽविकल्पात्मानो यस्य तं चतुरात्मानं चत्वारि—जागरितस्थानस्थूलप्रज्ञः सप्ताङ्ग एकोनविंशतिमुखः स्थूलभुग्वैश्वानरः तथा स्वप्नसुषुप्तस्थानभेदौ, नान्तःप्रज्ञं इत्यादि एकात्मप्रत्ययसारपर्यन्तानि—यस्य तं **चतुस्सप्तात्मानं चतुरात्मानं आनन्दामृतरूपं** भ्रूमण्डलादूर्ध्वं **षोडशाङ्गुल**परिमिते देशे सुषुम्नाविलसितषट्चक्राणि भित्त्वा अर्चिरादिमार्गं षोडशाङ्गुलमतीत्य **अन्ते** प्रदेशे सहस्रारमारभ्य षोडशाङ्गुलोपरिप्रदेशे ॥ ९ ॥

सकलध्यानेन तुर्यतुर्यप्राप्तिः

अथानन्दामृतेनैतांश्चतुर्धा संपूज्य तथा ब्रह्माणमेव विष्णुमेव रुद्रमेव विभक्तांस्त्रीनेवाविभक्तान् लिङ्गरूपानेव च संपूज्योपहारैश्चतुर्धा लिङ्गान् संहृत्य तेजसा शरीरत्रयं संव्याप्य तदधिष्ठानमात्मानं संज्वाल्य तत्तेज आत्मचैतन्यरूपं बलमवष्टभ्य गुणैरैक्यं संपाद्य महास्थूलं महासूक्ष्मे महासूक्ष्मं महाकारणे च संहृत्य मात्राभिरोतानुज्ञात्रनुज्ञाऽविकल्परूपं चिन्तयन् ग्रसेत् ॥ १० ॥

अथ एवं सद्बोधानन्दामृतरूपेण **एतान्** अकारोकारमकारार्धमात्रारूढान् ब्रह्मविष्णुरुद्रतुर्यान् मन्त्रराजब्रह्मप्रणवार्थरूपान् स्थूलसूक्ष्मादिमात्रारूढोत्रादिभिः **चतुर्धा संपूज्य** तुर्यंतुर्यनृसिंहातिरिक्तं न किंचिदस्तीति भावनामयीं पूजां कृत्वा, "सोऽहंभावेन पूजयेत्" इति श्रुतेः। जगतः सृष्टिस्थितिसंहारकर्तृ**ब्रह्मविष्णु-रुद्रानेव विभक्तान्** पृथक्पृथगिव स्थितान् नाभिहृदयभ्रूमध्यस्थानान् वस्तुतः **अविभक्तान् त्रीनेव** ब्रह्माद्यभिमानतः परिच्छिन्नान् तुर्यतुर्यनृसिंहानन्दतया ध्यात्वा पुनस्तानेव अपरिच्छिन्ननृसिंहरूपेण ध्यायेदित्यर्थः। अध्यात्ममधिदैवं च विभक्तमविभक्तं च यद्रूपं तदेव ध्येयं न त्वाधिभौतिकमित्यत आह—**लिङ्गेति**। लिङ्ग्यते गम्यते इति **लिङ्गरूपानेव** नत्वन्यान् चकारो विभक्ताविभक्तरूपाणां तदवस्थानां च प्रत्येकं संपूज्येतिपदसंबन्धार्थः। **संपूज्योपहारैः** उपसामीप्येन स्थूलसूक्ष्मबीजसाक्षिभिः उपहारैः **चतुर्धा** संपूज्य स्वात्मानं संदध्यादित्यनुवर्तते। अथैवं स्थैर्यप्राप्त्यनन्तरं **लिङ्गान्** स्वसत्ताहेतुभूतस्थावरजङ्गमान् जागरणस्वप्न-सुषुप्तिस्थानान् अधिभूतात्मना अवस्थितान् स्वप्नवदाध्यात्मिकेन परिदृश्यमानान् स्थूलादिसाक्ष्यन्ततश्चतुर्भेदान् **संहृत्य** अध्यात्मसंहरणं ज्ञात्वा। विमतं दृश्यजातं मत्तो न भिद्यते दृश्यत्वात् स्वप्नदृश्यवत् इति भौतिकप्रपञ्चोऽपि आध्यात्मिकत्वेन अधिगन्तव्यः। आध्यात्मिकोऽपि प्रपञ्चः चतुस्सत्तात्मनृसिंहानुष्टुप्प्रणवार्थरूपो मूलाधारस्थ उपसंहरणीयः इत्येतदर्थमाह—**तेजसेति**। मूलाधारनिर्गततैजसाकारादिरूपेण स्थूलादि**शरीरत्रयं संव्याप्य** मात्रात्रयारूढविश्वविराडोत्रादिपादत्रयेण सम्यग्व्याप्तिं कृत्वा यत् स्वविकल्पितं तस्य त्रिभेदभिन्नस्य स्वाधिष्ठेयस्य तन्निरूपिताधिष्ठानधर्मस्यापि दाहायानन्दात्मानं **संज्वाल्य** इदं सर्वं मद्व्यतिरिक्तं नास्तीति संदीप्य **तत्** आत्मबोधमन्दीपितं **तेजः** ध्यात्रादिप्रकाशरूपम्। तस्य स्वभेदं निवारयति—**आत्मेति**। आत्मनः स्वस्य **चैतन्यस्वरूपं बलं** स्वाविद्यातत्कार्यभस्मीकरणसामर्थ्यं **अवष्टभ्य** सर्वोत्कृष्टब्रह्मविष्ण्वादि**गुणैः** चतुर्भेदभिन्नैः **ऐक्यं सम्पाद्य** आध्यात्मिकाधिदैविकरूपेण तादात्म्यमवगम्य **महास्थूलं** आधिदैविकं चतुर्भेदभिन्नवैराजरूपं चतुर्भेदभिन्नाधिदैविके **महासूक्ष्मे** हिरण्यगर्भे, **महासूक्ष्मं** हिरण्यगर्भं चतुर्भेदभिन्नं **महाकारणे** सर्वोत्पत्तिस्थितिभङ्गाधिकरणे

ईश्वरे महति—**चकारः** संहृत्येतिपदस्य पूर्वत्रापि संबन्धार्थः—**संहृत्य** उपसंहारं कृत्वा अकारादि**मात्राभिः** सह अनन्तरं मात्राकलनातीते तुरीये ओतानुज्ञात्रनुज्ञाऽविकल्परूपे महाकारणं संहृत्य तदपि अविकल्पाविकल्पतुर्यतुर्यपर्यवसितं ध्यायन् **प्रसेत्**। ततः तुर्यतुर्यात्मना स्वयमेव तिष्ठेदित्यर्थः ॥ १० ॥

इति तृतीयः खण्डः

चतुर्थः खण्डः

तुर्यतुर्यस्य स्वमात्रताऽनुसन्धानम्

तं वा एतमात्मानं परमं ब्रह्मोंकारं तुरीयोंकाराग्रविद्योत-
[1]मनुष्टुभा नत्वा प्रसाद्योमिति संहृत्याहमित्यनुसंदध्यात् ॥ १ ॥

षोडशधा विकल्पितब्रह्मप्रणवमात्रापादेयत्तां प्रकटयित्वा अथ नारसिंहानुष्टुभा तादात्म्यं यत् सूत्रितं तत्प्रपञ्चनाय इयं खण्डिका आरभ्यते—**तमिति**। यः परमात्मा प्रणवार्थतयोक्तः **तं** ईश्वरग्रासं **वै** प्रसिद्धं **एतं** प्रत्यञ्चं **आत्मानं** प्रत्यक्परविभागैक्यकलनापायतः **परमं** निरतिशयं **ब्रह्म** परिच्छेदत्रयातीतं **ओङ्कारम्**। किं तदक्षरतया अवस्थितं? तत्राह—**तुरीयोङ्काराग्रविद्योतमिति**। कोऽयं तुरीयोङ्कारः? इत्यत्र अकारोकारमकारापेक्षया अर्धमात्रायाः तुर्योङ्कारत्वम्, तस्यापि तुर्यभागः तदग्रं मात्राकलनाविरळं, तत्रैव तुर्यतुर्यतया विशेषेण द्योत्यत इति तुर्यतुर्यं **अनुष्टुभा** मन्त्रराजेन **नत्वा** तत्र मन्त्रराजस्थनवपदार्थं नरसिंहं नमाम्यहमिति पदद्वयेन नत्वा, भगवन् प्रसन्नो भूत्वा प्रह्लादवत् मामुद्धर इति **प्रसाद्य**। एवं नृसिंहप्रसादं संपाद्य अथ अनन्तरं यद्यत् स्वातिरिक्तवत् भातं

[1] मानुष्टुभं—अ १, अ २, क.

तत्तत् ओं ओङ्काराग्रविद्योततुर्यतुरीयं तदतिरिक्तं न किंचिदस्ति इति संहृत्य अपह्नवं कृत्वा तदपह्नवसिद्धं अहं निष्प्रतियोगिकस्वमात्रं इत्यनुसंदध्यात् ॥ १ ॥

ओमितिशब्दवृत्तिप्रत्ययापह्नवविधिः

अथैत[1]मेवात्मानं परमं ब्रह्मोंकारं तुरीयोंकाराग्रविद्योतमेकादशात्मानं नारसिंहं नत्वोमिति संहरन्ननुसंदध्यात् ॥ २ ॥

अथ अनुसन्धानानन्तरं एतमेवात्मानं परमं ब्रह्मोङ्कारं तुरीयोङ्काराग्रविद्योतं इत्युक्तार्थम्, उग्राद्यहमन्तैकादशात्मानं नारसिंहं नत्वा पूर्ववत् पदद्वयेनेत्यर्थः, ओमितिशब्दवृत्तिप्रत्ययजातमपि संहरन् अनुसंदध्यात् ॥ २ ॥

निर्विशेषब्रह्मानुसन्धानम्

[2]अथैतमेवात्मानं परमं ब्रह्मोंकारं तुरीयोंकाराग्रविद्योतं प्रणवेन संचिन्त्यानुष्टुभा नत्वा सच्चिदानन्दपूर्णात्मसु नवात्मकं सच्चिदानन्दपूर्णात्मानं परमात्मानं परं ब्रह्म संभाव्याहमित्यात्मानमादाय मनसा ब्रह्मणैकीकुर्याद्यदनुष्टुभैव वा ॥ ३ ॥

किमयं एवं कुर्वन् शून्यमात्रपर्यवसायी स्यादित्यत आह—**अथेति** । **अथैतमेवात्मानं परमं ब्रह्मोङ्कारं तुरीयोङ्काराग्रविद्योतं** इत्युक्तार्थम् । **प्रणवेन संचिन्त्य** पूर्ववत् **अनुष्टुभा नत्वा** । उक्तार्थं विशदयति—**सच्चिदिति** । **सच्चिदानन्दपूर्णात्मसु** उग्रमित्याद्येकादशपदेषु उग्रमित्यादिमृत्युमृत्युपदान्तं **नवात्मकं** तत्पदलक्ष्यं, नमामीति पदं एकं त्वंपदलक्ष्यं "जीववाचि नमो नाम" इति श्रुतेः, अहंशब्दस्य तयोरैक्यघटकत्वेन असिपदार्थत्वं युज्यते, एवं प्रत्यक्परैक्यसिद्धं **सच्चिदानन्दपूर्णात्मानं परमात्मानं परं** निर्विशेषं **ब्रह्म संभाव्य**

[1] मेवमात्मा—अ २. [2] अथैवमेतमात्मानं—अ २, क.

अहमित्यात्मानं त्वंपदार्थं **आदाय** नवपदलक्ष्य**ब्रह्मणा** नृसिंहेन ब्रह्माहं, अहं ब्रह्म, इत्यखण्डाकारवृत्तिमन्मनसा **एकीकुर्यात्** स्वाविद्यया अनेकवदाभातं एकतां नयेत्। एवमैक्यसिद्धं ब्रह्म अनुष्टुभैव गम्यमित्याह—**यदिति**। **यत्** एवमुक्तं ब्रह्म तदेकादशपदात्मना **अनुष्टुभैव** अनुसंदध्यादित्यर्थः॥ ३॥

मन्त्रराजस्य ब्रह्मात्मैक्यहेतुत्वम्

एष उ एव नृ, एष हि सर्वत्र सर्वदा सर्वात्मा नृ, सिंहोऽसौ परमेश्वरः असौ हि सर्वत्र सर्वदा सर्वात्मा सन् सर्वमत्ति, नृसिंह एवैकल एष तुरीय एष एवोग्र एष एव वीर एष एव महानेष एव विष्णुरेष एव ज्वलन्नेष एव सर्वतोमुख एष एव नृसिंह एष एव भीषण एष एव भद्र एष एव मृत्युमृत्युरेष एव नमाम्येष एवाहं एवं योगारूढो ब्रह्मण्येवानुष्टुभं संदध्यादोंकार इति॥ ४॥

एवं मन्त्रराजस्य ब्रह्मात्मैक्यहेतुतामाह—**एष** इति। **एष उ एव नृ**—अयमर्थः, योऽस्यामुपनिषदि ईश्वरग्रास इति प्रसिद्ध एष एव हि उग्रमित्यादिनवपदलक्ष्यतत्पदार्थः। एवं नमामीति नृशब्दलक्ष्यं त्वंपदार्थः। एवमनेन वाक्येन महावाक्यार्थो वर्णितः। तत्र हेतुः—**एष** एव **हि सर्वत्र सर्वदा सर्वात्मेति**। नृपदार्थमुपपाद्य सिंहपदार्थमाह—**सिंह** इति। तस्य तत्त्वंपदगतवाच्यार्थमत्तेभकुंभस्थलविदारणपाटववीर्यवत्तमत्वात् सिंहशब्देन तत्पदार्थः परमात्मोच्यते। एवं नृसिंहशब्दलक्ष्यार्थप्रत्यगभिन्नपरमात्मस्वरूपमाह—**असाविति**। **असौ** परमेश्वरः परमात्मा **सर्वत्र सर्वदा** देशकालवस्तुषु सर्वदा **सर्वात्मा सन्** स्वातिरिक्तं **सर्वमत्ति**। एवं स्वातिरिक्तं ग्रसित्वा स्वात्ममात्रतया अवशिष्यत इत्यर्थः। ना चासौ सिंहश्चेति **नृसिंहः**। **एव**कारः तदतिरेकमोहनिरसनार्थः। एक एव **एकलः** स्वद्वितीयाभावात्। यत्रैकस्मिन्नात्मनि स्वातिरिक्तं विलीयते स वा एकलः,

एकब्रह्मावशेषेण यत्र सर्वं विलीयते ।
तद्ब्रह्मैकलमाख्यातं भेदे सत्यपि वस्तुतः ॥

इति स्मृतेः । यः ओङ्कारार्थतयोक्तः **एष** एव **तुरीयः** तुर्योङ्काराग्रविद्योत-तुर्यतुर्यत्वात् । अस्तु नामास्य प्रणवार्थता, कुतः **अनुष्टुप्पदार्थतेत्यत आह**— **एष** इति । **एष** तुर्यतुर्य **एवोग्रः** स्वातिरिक्तजाग्रज्जाग्रदाद्यविकल्पानुज्ञैकरसान्त-चतुष्पञ्चदशकलनोद्ग्रसनात् । **एष एव वीरः** स्वाज्ञदृष्टिप्रसक्तसर्वविरमणहेतुत्वात् । **एष एव महान्** सर्वमहत्त्वात् । **एष एव विष्णुः** निरङ्कुशभूमरूपत्वात् । **एष ज्वलन्** प्रकाशमात्रत्वात् । **एष एव सर्वतोमुखः** महाविराट्स्वरूपत्वात् । **एष एव नृसिंहः** प्रत्यगभिन्नब्रह्मरूपत्वात् । **एष एव भीषणः** स्वाभक्तपटलभीषणा-कृतित्वात् । **एष एव भद्रः** दिव्यमङ्गळविग्रहत्वात् विकळेबरकैवल्यरूपत्वाद्वा । **एष एव मृत्युमृत्युः** मृत्योः स्वाज्ञानस्य मारकत्वात् । **एष एव नमामि** स्वांशजप्राणिपटलनमस्कृतत्वात् प्रत्यगभिन्नरूपत्वाद्वा । **एष एवाहं** अस्मत्प्रत्यया-लम्बनप्रत्यग्रूपत्वात् । **एवं** उक्तप्रकारेण प्रत्यक्परैक्ययोगारूढो विद्वान् **ब्रह्मण्ये-वानुष्टुभं** मन्त्रराजं ब्रह्माप्युपायं **संदध्यात्** । ध्यानसर्वस्वमाह— **ओङ्कार** इति । तुरीयोङ्काराग्रविद्योततुर्यतुर्यं ब्रह्म निष्प्रतियोगिकस्वमात्रमित्यनुसंधानं कुर्यादित्यर्थः । **इति**शब्दः उपदेशप्रकारसमाप्त्यर्थः ॥ ४ ॥

अनुवादकमन्त्रोदाहरणम्

तदेतौ श्लोकौ भवतः—

संस्तभ्य सिंहं स्वसुतान् गुणार्थान् संयोज्य शृङ्गैर्ऋषभस्य हत्वा ।
वश्यां स्फुरन्तीमसतीं निपीड्य संभक्ष्य सिंहेन स एष वीरः ॥५॥
शृङ्गप्रोतान् पदा स्पृष्ट्वा हत्वा तामग्रसत् स्वयम् ।
नत्वा च बहुधा दृष्ट्वा नृसिंहः स्वयमुद्बभौ ॥ इति ॥ ६ ॥

ब्राह्मणोक्तार्थसर्वस्वं वक्ष्यमाणमन्त्राभ्यां स्पष्टयति—**तदेताविति** । **तस्मिन्** उक्तार्थे **एतौ** वक्ष्यमाणौ **श्लोकौ** मन्त्रौ **भवतः** । अहं नृसिंहानुष्टुप्प्रतिपाद्यं

यत्तुर्यतुरीयं ब्रह्म तन्निष्प्रतियोगिकस्वमात्रमिति **संस्तभ्य** सम्यक् सिंहं ब्रह्ममात्रमवगम्य ज्ञात्वा तज्ज्ञानसमकालं तदेव भवामीत्यर्थः । मन्दानां तत्प्रतिपत्त्युपायमाह —**स्वसुतानिति** । स्वस्य तूलान्तःकरणारूढस्य सुता इवान्तःकरणवृत्तिरूपाः बोधाः जागरणजागरणादिचतुष्पञ्चदशकलनाहेतवः तान् **स्वसुतान् गुणार्थान्** सत्वादिगुणानां शब्दादिगुणानां चार्थभूतान् पञ्चीकृतापञ्चीकृततत्कार्यरूपान् गुणार्थान् **ऋषभस्य** श्रेष्ठस्य प्रणवस्य मन्त्रराजस्य च **शृङ्गैः** अकारादिप्रणवमात्राभिः मन्त्रराजपादैश्च स्वसुतान् गुणार्थान् **संरुध्य** तत्र प्रणवमन्त्रराजमात्रापादातिरिक्तबुद्धिं **हत्वा** ब्रह्मातिरिक्तं नेति नेति इति निपात्य अनन्तरं कुटिलामिव दण्डेन वशीकृतां स्वाविद्यादूतिकां **वश्यां** प्रतिक्षणं व्यभिचारिणीं स्वात्मनः सर्वानर्थकारिणीं बुद्धिवृत्तियुवतीं प्रत्यग्ब्रह्मैक्ययोगाभ्यासबलेन सत्पथि वशीकृतां भ्यात्रादिनानात्रिपुटीरूपेण **स्फुरन्तीं** स्वात्मानं श्लाघयन्तीं वस्तुतस्तु **असतीं** कारणतः स्वरूपतो विषयतो वृत्तितश्च शशविषाणवदवस्तुभूतां **निपीड्य** अपह्नवं कृत्वा तदपह्नवसिद्ध्यर्थं **सिंहेन** निष्प्रतियोगिकब्रह्ममात्ररूपेण असद्रूपमायातत्कार्यापह्नवभ्रममपि **संभक्ष्य** स्वात्मावशेषं खादित्वा अपह्नवं कृत्वा **स एष वीरः** एवमपह्नवकृत् सम्यज्ज्ञानी निष्प्रतियोगिकतया स्वयमेव शिष्यत इत्यर्थः ॥ ९ ॥ उक्तार्थं ससाधनमाह—**शृङ्गेति** । अकारादिप्रणवशृङ्गप्रोतान् पूर्वोक्तगुणान् तदर्थांश्च **पदा** तुर्यपादेन **स्पृष्ट्वा** तुर्यपादातिरिक्तं न किंचिदस्तीति निश्चित्य तामपि सकारणां तुर्यपादबुद्धिमपि **हत्वा** अपह्नवं कृत्वा **तां** अपह्नववृत्तिमपि **अग्रसत् स्वयम्** । ग्रसेदिति वक्तव्ये यदग्रसदित्यवादीत् तदविद्यायाः कालत्रयेऽप्यसत्त्वप्रदर्शनार्थं—स्वाविद्यां स्वावशेषतया ग्रसेत् । इत्थं स्वाविद्याऽपह्नवतो **नृसिंहः** परमात्मा **स्वयमुद्बभौ** निरावृतस्वमात्रं विजृंभत इत्यर्थः । तत्र साधनान्युपदिशति—**नत्वेति** । तत्तद्भावानुरोधेन विविधनमस्कारान् विधाय । **च**शब्दात् साधनचतुष्टयसंपत्त्यासादितपारमहंस्यधर्मपूगवदनुष्ठितवेदान्तश्रवणमननिदिध्यासनानि निरन्तरं कुर्यादिति द्योत्यते । तत उग्रं वीरं इत्याद्यनेकविशेषणविशिष्टं निष्प्रतियोगिकैकस्वरूपं स्वमात्रमित्यसकृत् **दृष्ट्वा** दर्शनसमकालं नृसिंहज्ञानी

तन्मात्रतयोद्बभौ । एवं नृसिंहज्ञानी नृसिंह एव भवति, ब्रह्म वेद ब्रह्मैव भवतीत्यर्थः । इतिशब्दो मन्त्रसमाप्त्यर्थः ॥ ६ ॥

इति चतुर्थः खण्डः

पञ्चमः खण्डः

अकारानुष्टुभोस्तादात्म्यम्

अथैष उ एवाकार आप्ततमार्थ आत्मन्येव नृसिंहे देवे ब्रह्मणि वर्तत एष ह्येवाप्ततम एष हि साक्ष्येष ईश्वरोऽतः सर्वगतो न हीदं सर्वमेष हि व्याप्ततम इदं सर्वं यदयमात्मा मायामात्रमेष एवोग्र एष हि व्याप्ततम एष एव वीर एष हि व्याप्ततम एष एव महानेष हि व्याप्ततम एष एव विष्णुरेष हि व्याप्ततम एष एव ज्वलन्नेष हि व्याप्ततम एष एव सर्वतोमुख एष हि व्याप्ततम एष एव नृसिंह एष हि व्याप्ततम एष एव भीषण एष हि व्याप्ततम एष एव भद्र एष हि व्याप्ततम एष एव मृत्युमृत्युरेष हि व्याप्ततम एष एव नमाम्येष हि व्याप्ततम एष एवाहमेष हि व्याप्ततम आत्मैव नृसिंहो देवो ब्रह्म भवति य एवं वेद सोऽकामो निष्काम आप्तकाम आत्मकामो न तस्य प्राणा उत्क्रामन्त्यत्रैव समवलीयन्ते ब्रह्मैव सन् ब्रह्माप्येति ॥ १ ॥

एवं समग्रप्रणवेनानुष्टुप्तादात्म्यमुक्त्वा अथेदानीं मात्राभिरपि तादात्म्यं प्रकटयितुं खण्डिका आरभ्यते—अथेति । अथ ओङ्कारानुष्टुप्तादात्म्यकथना-

नन्तरं एकैकप्रणवावयवेनाकारादिना मन्त्रराजसमन्वय उच्यते। यः प्रणवार्थतया प्रकृतो मन्त्रराजः **एष एवाकारः** न त्वन्यः। मन्त्रराजार्थनृसिंहस्याकारमात्रापरिच्छित्तितोऽत्यल्पता स्यादित्यत आह—**आप्नेति**। **आप्ततमार्थः** अतिशयेन व्याप्तः आप्ततमः सोऽर्थोऽभिधेयज्ञाने प्रयोजनं यस्य सोऽयमाप्ततमार्थः। **अतोऽयं** नाल्पः, अकारस्य सर्ववाग्व्याप्तेः, "अकारो वै सर्वा वाक्" इति श्रुतेः, किंतु असौ मन्त्रराजतुल्यः। यद्वा—आप्ततमस्वरूपः यथा मन्त्रराजो नृसिंहस्वरूपे वर्तते तथाऽयमकारोऽपीत्याह—**आत्मनीति**। अकारोऽयं **आत्मन्येव नृसिंहे देवे ब्रह्मणि वर्तते**। कथमाप्ततमाभिधेयो नृसिंह इत्यत आह—**एष हीति**। हि यस्मात् **एष एव** नृसिंहो नत्वन्यः **आप्ततमः** अतिशयेन व्याप्ततमत्वात्। **एष** आप्ततमो नृसिंहो **हि** यस्मात् सर्व**साक्षी** सर्वत्र आत्मात्मीयाभिमानशून्योऽपि स्वविकल्पितसाक्ष्यपटलसाक्षी द्रष्टा। अकारात्मकोऽयं **ईश्वरो** नियन्ता स्वविकल्पितप्रपञ्चस्येत्यर्थः। अस्मात् नियम्यनियमनहेतोः **सर्वगतः** सर्वव्यापकः। सर्वव्यापकत्वेन सर्वमयत्वं विकारित्वं स्यादित्यत आह—**न हीति**। अकारार्थनृसिंहातिरेकेण न ह्यस्तीत्यत्र अयं हेतुः—यस्मात् अकारात्मकोऽयं नृसिंहो **व्याप्ततमः**। तस्य स्वव्याप्यग्रासत्वात् व्यापकातिरेकेण व्याप्यं नास्तीत्याह—**इदं सर्वं यदयमात्मेति**। **यत्** किंचित् यदि **इदं** प्रतीयते तदा तत् **सर्वं** सोऽयमात्मा नृसिंहः। अतः तत्सर्वं आत्मैवेत्यर्थः। स्वातिरिक्तप्रतीतेः तत्सत्यमेवेत्यत आह—**मायामात्रमिति**। स्वातिरेकेण विविधं प्रतीयमानस्य स्वाज्ञाननिमित्तत्वात् मायामात्रत्वम्। स्वाज्ञानापाये स्वज्ञानतः स्वयमेवेश्वरग्रासस्तुर्यतुर्योऽवशिष्यते। तदवगतये प्रणवाद्यमात्रात्मकाकारमन्त्रगजैकादशपदानामैक्यसिद्ध्यर्थमाह—**एष** इति। एष **एव** नृसिंहात्मको व्याप्ततमोऽकार एव **उग्रः**, एष हि व्याप्ततमः। **एष एव वीरः** इत्यादि समानम्। एवं ज्ञानफलमाह—**य एवं वेदेति**। **यः** कश्चन देवो वा मनुष्यो वा अधिकारी **एवं** उक्तप्रकारेण आप्ततमत्वेन हेतुना सर्वात्मकनृसिंहाक्षराकार एवोग्राद्येकादशपदात्मक इति **वेद** सोऽयं **आत्मैव नृसिंहो देवो ब्रह्म भवति** सर्वोऽप्यात्मज्ञानादात्मैव भवति। एवं ज्ञानिनः को विशेषः? इत्यत आह—**स** इति। **सोऽयं** प्रणवाद्यमात्रानुष्टुबेकादशपदार्थज्ञानी इदं मे स्यात्

इदं मा भूदिति स्वातिरिक्तास्तिताभ्रमहेतुः कामः तद्रहितोऽयं **अकामः** । किं सद्योजातशिशुवत् कामहेत्वप्रविष्ट इत्यत आह—**निष्काम** इति । अविकलेन्द्रियो विविधविषयज्ञोऽपि निर्गतकामः कामप्रवृत्तिनिमित्तवैरळ्यात् । किमयं रोगादिना अभिभूतः कामात् बिभेति तत्राह—**आप्तकाम** इति । स्वात्मातिरेकेण न हि कामः कामनीयार्थो वाऽस्तीति स्वात्ममात्रधिया अयमाप्तकामः । येन केन वा आप्तकामश्चेत् कालान्तरे स्वाभिमतकामक्षयतः पुनः तदाप्तुमिच्छा स्यादित्यत आह—**आत्मकाम** इति । स्वावशेषकामातिरिक्तकामाभावात् । एतादृशस्यापि पारलौकिककामः स्यादित्यत आह—**नेति** । **तस्य** एवं ज्ञानिनः **प्राणाः** मुख्यप्राणसहितेन्द्रियाणि **नोत्क्रामन्ति अत्र ब्रह्मणि एव समवलीयन्ते** । एवं विलीनप्राणो विद्वान् स्वाज्ञस्वज्ञपरमार्थदशायामपि **ब्रह्मैव सन् ब्रह्माप्येति ब्रह्मैव** भवतीत्यर्थः ॥ १ ॥

उकारानुष्टुभोस्तादात्म्यम्

अथैष एवोकार उत्कृष्टतमार्थ आत्मन्येव नृसिंहे देवे ब्रह्मणि वर्तते तस्मादेष सत्यस्वरूपो न ह्यन्यदस्त्यमेयमनात्मप्रकाशमेष हि स्वप्रकाशोऽसङ्गोऽन्यन्न वीक्षत आत्माऽतो नान्यथा प्राप्तिरात्ममात्रं ह्येतदुत्कृष्टमेष एवोग्र एष ह्येवोत्कृष्ट एष एव वीर एष ह्येवोत्कृष्ट एष एव महानेष ह्येवोत्कृष्ट एष एव विष्णुरेष ह्येवोत्कृष्ट एष एव ज्वलन्नेष ह्येवोत्कृष्ट एष एव सर्वतोमुख एष ह्येवोत्कृष्ट एष एव नृसिंह एष ह्येवोत्कृष्ट एष एव भीषण एष ह्येवोत्कृष्ट एष एव भद्र एष ह्येवोत्कृष्ट एष एव मृत्युमृत्युरेष ह्येवोत्कृष्ट एष एव नमाम्येष ह्येवोत्कृष्ट एष एवाहमेष ह्येवोत्कृष्टस्तस्मादात्मानमेवैवं जानीयादात्मैव नृसिंहो देवो ब्रह्म भवति य एवं वेद सोऽकामो निष्काम आप्तकाम

आत्मकामो न तस्य प्राणा उत्क्रामन्त्यत्रैव समवलीयन्ते ब्रह्मैव सन् ब्रह्माप्येति ॥ २ ॥

एवं प्रणवाद्यमात्राऽकारमन्त्रराजपदैक्यं तज्ज्ञानफलं च प्रकटयित्वा अथोकारमन्त्रराजपदैक्यं तज्ज्ञानफलं च प्रकटयति—**अथेति** । **उकारोऽप्येष नृसिंह एव** । उकारस्य नृसिंहत्वे हेतुः—**उत्कृष्टतमार्थः** नृसिंहस्य सर्वोत्कृष्टत्वात् । अकारापेक्षयोकारस्योपरि विद्यमानत्वादुत्कृष्टत्वम् । उकारोऽभिधानं, अभिधेयो नृसिंहः, तयोरभेदात् उत्कृष्टतमार्थत्वं युज्यते । यदुक्तं उत्कृष्टतमार्थत्वं न हि तत्परोक्षं यतोऽयमुकारः **आत्मन्येव नृसिंहे देवे ब्रह्मणि वर्तते** । अत **एष** नृसिंहात्मकोकारः **सत्यस्वरूपः** कालत्रयाबाध्यनृसिंहार्थत्वात् । कथमेतस्य सत्यत्वमित्यत्र **हि** यस्मात् अस्मादुकारस्वरार्थनृसिंहात् **अन्यदमेयं नास्ति** । यद्यन्मेयं तत्तदसत्यं रज्जुसर्पवत् । कथं इदं मेयमित्यत आह—**अनात्मप्रकाशं** जडमित्यर्थः । तथा अयमपि स्यादित्यत आह—**एष हीति** । **हि** यस्मात् **एष** उकारात्मको नृसिंहः **स्वयंप्रकाशः** प्रकाशमात्रत्वात् । अप्रकाशान्तःकरणयोगात् कथं प्रकाशमात्रतेत्यत आह—**असङ्ग** इति । यदि स्वाङ्गदृष्ट्या अन्तःकरणप्रसक्तिः तदा स्वङ्गदृष्ट्या तत्रासङ्गत्वं, परमार्थदृष्ट्या स्वात्मनः **अन्यन्न वीक्षते** अन्यस्यैव मृग्यत्वात् । कोऽन्यन्न वीक्षते इत्यत्र **आत्मा** उकाररूपो नृसिंहः । यतोऽयमन्यन्न वीक्षते **अतः** कारणात् **नान्यथा प्राप्तिः** प्रकाशमात्रातिरिक्तप्रकाशवैरळ्यात् । उक्तार्थं सहेतुकं निगमयति—**आत्ममात्रं ह्येतदिति** । स्वस्य निष्प्रतियोगिकस्वमात्रत्वात् । हि यस्मात् नृसिंहात्मकमुकाररूपं सर्वोत्कृष्टं तस्मात् **एषः** उकारस्वरूपो नृसिंह **एवोग्रः** । तत्रोपपत्तिः—**एष ह्येवोत्कृष्टः** विश्वाधिकत्वात् । **एष एव वीरः** इत्यादि समानम् । यस्मादेवं **तस्मात्** उत्कृष्टतमत्वेन हेतुना सर्वात्मकोकारानुष्टुबेकादशपदात्मकं **आत्मानमेवैवं जानीयात्** । **आत्मैव नृसिंहो देवः** इत्यादि व्याख्यातम् ॥ २ ॥

मकारानुष्टुभोस्तादात्म्यम्

अथैष एव मकारो महाविभूत्यर्थ आत्मन्येव नृसिंहे देवे ब्रह्मणि वर्तते तस्मादयमनल्पोऽभिन्नरूपः स्वप्रकाशो ब्रह्मैवाप्ततम

उत्कृष्टतम एतदेव ब्रह्मापि सर्वज्ञं महामायं महाविभूत्येतदेवोग्रमेतद्धि महाविभूत्येतदेव वीरमेतद्धि महाविभूत्येतदेव महदेतद्धि महाविभूत्येतदेव विष्णवेतद्धि महाविभूत्येतदेव ज्वलदेतद्धि महाविभूत्येतदेव सर्वतोमुखमेतद्धि महाविभूत्येतदेव नृसिंहमेतद्धि महाविभूत्येतदेव भीषणमेतद्धि महाविभूत्येतदेव भद्रमेतद्धि महाविभूत्येतदेव मृत्युमृत्यवेतद्धि महाविभूत्येतदेव नमाम्येतद्धि महाविभूत्येतदेवाहमेतद्धि महाविभूति तस्मादकारोकाराभ्यामिममात्मानमाप्ततममुत्कृष्टतमं चिन्मात्रं सर्वद्रष्टारं सर्वसाक्षिणं सर्वग्रासं सर्वप्रेमास्पदं सच्चिदानन्दमात्रमेकरसं परमेव ब्रह्म मकारेण जानीयादात्मैव नृसिंहो देवः परमेव ब्रह्म भवति य एवं वेद सोऽकामो निष्काम आप्तकाम आत्मकामो न तस्य प्राणा उत्क्रामन्त्यत्रैव समवलीयन्ते ब्रह्मैव सन् ब्रह्माप्येतीहैव प्रजापतिरुवाच प्रजापतिरुवाच ॥ ३ ॥

अकारोकारानुष्टुप्पदैक्यतत्फलवन्मकारानुष्टुबैक्यतज्ज्ञानफलं चाह—**अथेति** । **अथ** उकारव्याप्तिकथनानन्तरं मकारव्याप्तिः । **एष मकारोऽप्युक्तो** नृसिंह एव **महाविभूत्यर्थः** । **आत्मन्येव नृसिंहे देवे ब्रह्मणि वर्तते** यतः तस्मादयं महाविभूत्यर्थः । ततोऽयं मकाराख्यो नृसिंहः प्रत्यगभिन्नः । पराक्सापेक्षप्रत्यगभेदेन अल्पता स्यादित्यत आह—**अनल्प** इति । पराक्प्रपञ्चस्य मृग्यत्वात् अनल्पोऽयमित्यर्थः । तत्र हेतुः—**अभिन्नरूपः** । भेदहेत्वल्पाविद्यावैरळ्यात् अभिन्नत्वमखण्डत्वमुपपद्यते । अत एवायं **स्वप्रकाशः** अजडस्वरूपत्वात् । **ब्रह्मैव** भूमैवायं **आप्ततमः उत्कृष्टतमः** अकारोकारार्थत्वात् । किमेतस्मादप्युत्कृष्टमस्ति ? तत्राह—**एतदिति** । **एतदेव ब्रह्मापि** सर्वस्मादुत्कृष्टं अपरिच्छिन्नत्वात् **सर्वज्ञं** सर्वं स्वातिरिक्तं नेतीति ज्ञातृत्वात् **महामायं**

स्वातिरिक्तप्रपञ्चसर्गस्थितिभङ्गकारिणी महामाया यस्य तत् **महाविभूति** निरुपमैश्वर्यशालित्वात् **एतत्** मकाररूपं **ब्रह्मैवोग्रं एतद्धि महाविभूत्यादि** समानमन्यत्। [एतदिति] नपुंसकत्वं प्रकृतं, तदनुरोधेन उग्रादिपदानां नपुंसकत्वम्। **तस्मात्** यतो मकाररूपं ब्रह्म **अकारोकाराभ्यां इममात्मानं** नृसिंहं **आप्ततमं उत्कृष्टतमं** चैतन्यमात्रतः **चिन्मात्रं सर्वस्य** चक्षुरादेः **द्रष्टारं** अवलोकयितारं स्वसाक्ष्यान्तःकरणवृत्तिजात**साक्षिणं** तुर्यतुर्यात्मना स्वातिरिक्त**सर्वग्रासं सर्वग्रेमास्पदं** सर्वस्यात्मत्वात्, आत्मा हि प्रियतमः, "तदेतत्प्रेयः पुत्रात् प्रेयः" इत्यादिश्रुतेः, **सच्चिदानन्दमात्रमेकरसं परमेव ब्रह्म** प्रणवतृतीयमात्रात्मकेन **मकारेण जानीयात्। आत्मैव नृसिंहः** इत्युक्तार्थम्। शास्त्रार्थमुपसंहरति—**इहेति**। 'ओमित्येतदक्षरं' इत्यारभ्य 'ब्रह्मैव सन् ब्रह्माप्येति' इत्यन्तं **इहैव** देवान् प्रति **प्रजापतिरुक्तवान्**। आवृत्तिरादरार्था प्रकरणसमाप्त्यर्था च ॥ ३ ॥

इति पञ्चमः खण्डः

षष्ठः खण्डः

देवानामनुष्टुभा आसुरजयः

ते देवा इममात्मानं ज्ञातुमैच्छन् तान् हासुरः पाप्मा परिजग्राह। त ऐक्षन्त हन्तैनमासुरं पाप्मानं ग्रसाम इति। एतमेवोंकाराग्रविद्योतं तुरीयतुरीयमात्मानमग्रमनुग्रं वीरमवीरं महान्तममहान्तं विष्णुमविष्णुं ज्वलन्तमज्वलन्तं सर्वतोमुखमसर्वतोमुखं नृसिंहमनृसिंहं भीषणमभीषणं भद्रमभद्रं मृत्युमृत्युममृत्युमृत्युं

नमाम्यनमाम्यहमनहं नृसिंहानुष्टुभैव बुबुधिरे । तेभ्यो हासावासुरः पाप्मा सच्चिदानन्दघनज्योतिरभवत् ॥ १ ॥

स्वात्मप्रतिपत्त्यन्तरायेयत्ताप्रकटनपूर्वकं तन्निरसनं कुर्वन् आशास्त्रसमाप्ति निर्विशेषब्रह्म प्रपञ्चयति । आदौ आख्यायिकामवतारयति—**ते देवा इति** । ये प्रजापतिनोपदिष्टा उपदेक्ष्यमाणाः **ते** अग्नीन्द्रादयो **देवा इममात्मानं** स्वयं-प्रकाशचिद्रूपं देशिकमुखात् **ज्ञातुमैच्छन्** । **तान्** आत्मज्ञानकृतोद्यमान् देवान् **आसुरः पाप्मा** स्वाज्ञानतत्कार्यवृत्तिरूपः **परिजग्राह** किल स्वात्मविस्मृतिपूर्वकं स्वातिरिक्तविषयेच्छामुदपादयदित्यर्थः । ते देवाः आसुरपाप्मना स्पृष्टा अपि **हन्तेति** सानुकम्पं **आसुरं पाप्मानं** अनात्मप्रत्ययरूपं तदपह्नवसिद्धनिष्प्रति-योगिकात्मज्ञानबलेन **ग्रसामः** भक्षयामः नाशयामः **इति ऐक्षन्त** अवलोकितवन्त इत्यर्थः । **इति**शब्दो देवेक्षणानुकरणार्थः । ते देवाः **एतमेव** प्रकृतं **ओङ्काराग्र-विद्योतं तुर्यतुरीयमात्मानमेव** व्याख्यातं अनुष्टुप्पदार्थरूपेण उग्रमित्याद्येकादश-विशेषणविशिष्टं सर्वविशेषापह्नवसिद्धनिष्प्रतियोगिकब्रह्ममात्ररूपेण **अनुग्रं अवीरं** इत्यादि निर्विशेषतया बोध्यं यत्स्वरूपं तदेव **बुबुधिरे** साक्षात्कृतवन्तः । **तेभ्यः** तेषां देवानां यथाव्याख्यातोऽयं **असावासुरः पाप्मा सच्चिदानन्दघनज्योतिर-भवत्** ब्रह्ममात्रस्य निष्प्रतियोगिकतया तदतिरेकेण आसुरपाप्मासंभवात् आसुर पाप्माऽपि ब्रह्मैव बभूवेत्यर्थः ॥ १ ॥

अपक्वकषायस्य अनुष्टुभा आत्मज्ञानप्राप्तिः

तस्मादपक्वकषाय इममेवोंकाराग्रविद्योतं तुरीयतुरीयमात्मानं नृसिंहानुष्टुभैव जानीयात् । तस्यासुरः पाप्मा सच्चिदानन्द-घनज्योतिर्भवति ॥ २ ॥

यस्मादेवं देवैः स्वभावविपरीतभावप्रापकोऽयं आसुरः पाप्मा ब्रह्मातिरिक्तं नेति प्रबोधेन ब्रह्ममात्रपदवीं प्रापितः **तस्मादपक्वकषायः** स्वातिरिक्तास्तिताऽ-

नर्थदृष्टिः इममेव अपरोक्षतया विजृंभितं **ओङ्काराग्रविद्योतं तुर्यतुरीयमात्मानं नृसिंहानुष्टुभैव जानीयात्** । **तस्यासुरः पाप्मा सच्चिदानन्दघनज्योतिरेव भवति** स्वज्ञानेन स्वाज्ञानापाये पुराऽनुभूतस्वाज्ञानतत्कार्यं स्वयमेव भवतीत्यर्थः ॥ २ ॥

प्रणवेन अद्वितीयावगतिः

ते देवा ज्योतिरुत्तितीर्षवो द्वितीयादयमेव पश्यन्त इममेवोंकाराग्रविद्योतं तुरीयतुरीयमात्मानमनुष्टुभाऽन्विष्य प्रणवेनैव तस्मिन्नवस्थिताः तेभ्यस्तज्ज्योतिरस्य सर्वस्य पुरतः सुविभातमविभातमद्वैतमचिन्त्यमलिङ्गं स्वप्रकाशमानन्दघनं शून्यमभवत् । एवंवित्स्वप्रकाशं परमेव ब्रह्म भवति ॥ ३ ॥

कथं तुर्यतुरीयं अविकल्पाविकल्पं ध्यात्रादिविकल्पसत्त्वादित्यत आह—**त** इति। **ते देवाः** ध्यातृध्यानादि**ज्योतिषः** स्वातिरिक्तप्रकाशात् **उत्तितीर्षवः** उत्तरितुमिच्छन्तः । तत्र हेतुः—स्वातिरिक्तध्यात्रादिरूप**द्वितीयादपि भयमेव पश्यन्तः** ध्यानादिव्यापृतावपि संसृतिसमानबुद्धिं कृतवन्तः । तच्छमनाय किं कृतवन्त इत्यत्र—**इममेवोङ्काराग्रविद्योतं तुर्यतुर्यमात्मानं अनुष्टुभा अन्विष्य** षोडशमात्रात्मकतुर्य**प्रणवेनैव** च सम्यगन्विष्य निर्धार्य य एवं निर्धार्य सिद्धोऽर्थः **तस्मिन्** तुर्यतुर्यात्मनि परमाकाशे उपाधिविनिर्मुक्तघटाकाशवत् **अवस्थिताः** तन्मात्रतां गतवन्तः **तेभ्यः तेषां** देवानां पुराऽनुभूततद्व्यात्रादि**ज्योतिः अस्य सर्वस्य** जगतः स्वाज्ञदृष्टिविकल्पितस्य **पुरतः** पुरस्तात् **सुविभातं** ध्यात्रादित्रिपुटिशून्यतया प्रतीतं तथा अस्य जगतः स्थितिकाले प्रळयानन्तरमपि यत् स्वमात्रतया सुविभातं स्वातिरेकेण **अविभातं** स्वमात्रतया भातमित्यपि वक्तुमशक्यतया विभातं अत एव **अद्वैतं** निष्प्रतियोगिकं, निष्प्रतियोगिकमिति चिन्त्यमित्यत्र **अचिन्त्यं**, अचिन्त्यत्वे किं लिङ्गं ? इत्यत्र **अलिङ्गं**, केनाप्यचिह्नितत्वात्, यत् लिङ्गवन्न

तत् ब्रह्म भवितुमर्हति, तथा चेदमदप्रकाशं ब्रह्म इत्यत्र यत् स्वातिरिक्तासत्प्रपञ्चं ग्रसित्वा सन्मात्रतया अवशिष्टं तत् **स्वप्रकाशं** प्रकाशमात्रत्वात्, यत् प्रकाशमात्रं तत् **आनन्दघनं** निरतिशयपरमानन्दस्वरूपम् । तत्र स्वयंप्रकाशत्वादिविशेषता स्यादित्यत आह **शून्यमिति**, स्वयंप्रकाशत्वाद्यशेषविशेषशून्यमित्यर्थः । एवंविदो ध्यात्रादित्रिपुटीज्योतिस्सुविभातमित्यादिसप्तविशेषणप्रतिपाद्यब्रह्मैवाभवदिति भावः । यथा देवपूगो ब्रह्मवेदनसमकालं ब्रह्माभवत् तथाऽन्योपि भवतीत्याह—**एवमिति**। देववत् **एवंवित्** विद्वान् **स्वप्रकाशं परमेव ब्रह्म भवति** ॥ ३ ॥

संन्यासस्य ब्रह्मावगतिसाधनत्वम्

ते देवाः पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च ससाधनेभ्यो व्युत्थाय निरागारा निष्परिग्रहा अशिखा अयज्ञोपवीता अन्धा बधिरा मुग्धाः क्लीबा मूका उन्मत्ता इव परिवर्तमानाः शान्ता दान्ता उपरतास्तितिक्षवः समाहिता आत्मरतय आत्मक्रीडा आत्ममिथुना आत्मानन्दाः प्रणवमेव परं ब्रह्मात्मप्रकाशं शून्यं जानन्तस्तत्रैव परिसमाप्ताः । तस्मात्तद्देवानां व्रतमाचरन्नोंकारे परे ब्रह्मणि पर्यवसितो भवेत् स आत्मन्येवात्मानं परं ब्रह्म पश्यति ॥ ४ ॥

एवं प्रणवमन्त्रराजप्रबोधतो निर्विशेषब्रह्मप्राप्तिरुक्ता । न हि सेयं संसारिभिः स्मर्तुं शक्या । देवानां संसारित्वात् कथं ते तत्पदमर्हन्ति इत्याशङ्क्य प्रजापत्युपदेशोत्तरक्षणमेव देवाः पारिव्राज्यधर्मालंकृताः सन्तः स्वातिरिक्तास्तिताभ्रममुत्सृज्य स्वातिरिक्तभ्रमापह्नवसिद्धब्रह्ममात्रपर्यवसन्ना भवन्तीत्याह—ते देवा इति । ते प्रजापतिशिष्याः देवाः प्रजापतिमुखतः स्वात्मतत्त्वज्ञानमवगम्य परारोपितप्रातिभासिकशरीरादावात्मात्मीयभावविकलाः सन्तः तत्रैव परिसमाप्ता इत्यन्वयः । तत्र केचन अनुत्पन्नसाक्षात्काराः देवाः तत्साक्षात्कारोपायतया अनुत्पन्नपुत्राणामुत्पत्तिप्रार्थना उत्पन्नानां तद्योगक्षेमप्रार्थना च पुत्रैषणा तस्याः

पुत्रैषणायाश्च---चकारात् तत्साधनेषणाऽपि गृह्यते---तथा लोकद्वयसाधक-**वित्तैषणायाश्च** श्रौतस्मार्तकर्मजन्यसुखैषणा लोकैषणा तस्या **लोकैषणायाश्च** एषणात्रयस्यापि साधनानि विविधविषयस्मरणानि तैः सह वर्तमानाः **ससाधनाः** ताभ्यः **ससाधनाभ्यो व्युत्थाय**। तत्र ये स्युः उत्पन्नसाक्षात्काराः **न** हि ते स्वातिरिक्तं पुत्रवित्तादिकं पश्यन्ति नापि स्मरन्ति। ततः तेषां **ससाधनाभ्यः** एषणाभ्यः व्युत्थानं सहजसिद्धम्। ये च तेभ्योऽन्ये मुमुक्षवः श्रुत्याचार्यमुखतः स्वात्मयाथात्म्यावगतिसाधनतया ससाधनाभ्यः पुत्राद्येषणाभ्यः व्युत्थाय पारमहंस्याश्रमे प्रविशन्ति तेषां लक्षणं किं? इत्यत्र—**निरागाराः** सर्पवत् स्वावासार्थं गृहारंभवर्जिताः **निष्परिग्रहाः** देहमात्रधारणेतरपरिग्रहशून्याः सामगमाणवकवत् **अशिखाः** बालवत् **अयज्ञोपवीताः अन्धाः** ब्रह्मातिरिक्तरूपसामान्यमपश्यन्तः, यद्वा—श्रीरामवत् परस्त्रीदर्शनविषयालोचनाविरळाः, **बधिराः** दैत्यगुणगणश्रवणे श्रीकृष्णवद्विषयवार्ताश्रवणशून्याः **मुग्धाः** देवाङ्गनादर्शनेऽपि शुकवद्विषयाभिलाष-शून्याः **क्लीबाः** उर्वशीसंभोगाशारहितार्जुनवत् स्त्रीसामान्योपभोगशून्याः **मूकाः** परनिन्दास्तुतिरहिताः **उन्मत्ताः इव परिवर्तमानाः** नारदवत् भूमण्डलमटन्तः व्यासवत् **शान्ताः** प्रशान्तान्तःकरणत्वात् नारायणवत् **दान्ताः** नियतेन्द्रियत्वात् सनकादिवत् बाह्यान्तर्व्यापृत्युपरताः वसिष्ठादिवत् **तितिक्षवः** क्षमासारत्वात् लक्ष्मणवत् **समाहितमनसः आत्मरतयः** आत्मन्येव न बाह्यदारादौ रतिः येषां ते आत्मन्येव क्रीडा विनोदो न सखीजनेषु येषां ते **आत्मक्रीडाः** आत्मपरमात्मनोः मिथुनं ऐक्यं येषां ते **आत्ममिथुनाः** आत्ममात्रतया नन्दन्तीति **आत्मानन्दाः** प्रजापत्युपदिष्टपञ्चदशमात्रातत्कार्यविरळतुर्यतुर्यप्रणवमेव **परं ब्रह्मात्मप्रकाशं** स्वातिरिक्तकलनाशून्यं **जानन्तः तत्रैव** तुर्यतुरीये निष्प्रतियोगिक-**ब्रह्ममात्रे परिसमाप्ताः** तुर्यतुर्यस्वरूपेण अवशिष्यन्त इत्यर्थः। यथा देवानां *ब्रह्मभावापत्तिहेतुः संन्यासः* तथा अन्येषामपि तुर्यतुरीयाप्तिमिच्छतां सर्वकर्म-संन्यासपुरस्सरं तदवगतिस्तत्फलं च स्यात् नान्यथेत्याह—**तस्मादिति**। **यस्मान्न** हि संन्याससहितज्ञानं विना मुक्तिरस्ति न ह्यनात्तसंन्यासानां प्रणवार्थ-तुर्यतुरीये निष्ठा तद्ध्यानं जपाधिकारो वाऽस्ति **तस्मात् तदेवानां** प्रजापति-

शिष्याणां एषणात्रयसंन्यासलक्षणं व्रतं पारमहंस्यं अनुतिष्ठन्नोङ्कारे तुरीयोङ्काराग्र-विद्योततुर्यतुरीये परे ब्रह्मणि निष्प्रतियोगिकब्रह्ममात्रे पर्यवसितो भवेत् एतावन्तं कालं पारमहंस्यधर्मावलम्बनपूर्वकं प्रणवजपध्यानादिकं कृतमिति न हि तत्र विरतिः कार्या किंतु आदेहपातमनुष्ठेयम्। कुतश्चित् प्रतिबन्धकवशात् यद्यस्मिन् देहे तुर्यतुर्यसाक्षात्कारो न जातः शास्त्रप्रामाण्यात् देहान्तरे वा भविष्यत्येवेत्यव-गन्तव्यम्। एवं ओङ्कारपर्यवसाने पारमहंस्याश्रमावलम्बनतः क्रियमाणे सोऽयं प्रणवचिन्तको मुनिः स्वात्मन्येव स्वात्मना स्वात्मानं परं निरतिशयं ब्रह्म स्वमात्रमिति पश्यति साक्षात्करोतीत्यत्र—

यस्तु द्वादशसाहस्रं प्रणवं जपतेऽन्वहम्।
तस्य द्वादशभिर्मासैः परं ब्रह्म प्रसीदति॥

इति श्रुतेः॥ ४॥

अनुवादकमन्त्रोदाहरणम्

तदेष श्लोकः—

शृङ्गेष्वशृङ्गं संयोज्य सिंहं शृङ्गेषु योजयेत्।
शृङ्गाभ्यां शृङ्गमाबध्य त्रयो देवा उपासते॥ इति ५॥

तत् तस्मिन्नुक्तार्थे एष श्लोको मन्त्रो भवतीत्याह—शृङ्गेष्विति। विश्वविश्वाद्यविकल्पानुञ्जैकरसान्तशृङ्गेषु अशृङ्गं शृङ्गरहितं अविकल्पाविकल्पं तुर्यतुर्यं संयोज्य संबध्य ततः सिंहं चतुष्पदं नृसिंहानुष्टुभं शृङ्गेषु अकारो-कारमकारार्धमात्रारूपेषु योजयेत् पूर्ववद्योजयेत् धियैव संबन्धं कुर्यात्। शृङ्गाभ्यां आततमोत्कृष्टतमरूपाभ्यामकारोकाराभ्यां शृङ्गं महाविभूतिरूपं मकारं—यथा तुर्यबुद्ध्या त्रयमवलोकनीयं तथा मकारधिया अकारोकारावप्य-वलोकनीयौ—आबध्य बुद्ध्या सर्वतोबन्धनं कृत्वा—असङ्गोदासीनस्वभावानां देवानां कर्तृत्वं—त्रयः त्रिसंख्याकाः देवाः अकारोकारमकाराणां अधिष्ठातारोऽ-ध्यात्मं विश्वतैजसप्राज्ञाः अधिभूतं ब्रह्मविष्णुमहेश्वराः अधिदैवं विराड्हिरण्य-

गर्भेश्वराः व्याविद्धाध्यात्माधिभूताधिदैवपरिच्छेदद्योतनात्मका उपासते, कृतकृत्याः सन्तः शृङ्गाशृङ्गसिंहतादात्म्यकरणेनौदासीन्यं भजन्ते, जाग्रदाद्यवस्थामवगच्छन्तीत्यर्थः ॥ ९ ॥

इति षष्ठः खण्डः

सप्तमः खण्डः

तुर्यतुर्यज्ञानाय देवानां प्रश्नः

देवा ह वै प्रजापतिमब्रुवन् भूय एव नो भगवान् विज्ञापयत्विति ॥ १ ॥

एवं प्रजापतिना उपदिष्टात्मतत्त्वाः देवाः कथमयं प्रजापतिः वाङ्मनसातीतमात्मानमुपदिशति, कथं वयं अधिगच्छामः, इति च मन्वानाः पुनः पृष्टवन्तः इति स्वकीयामौत्सुक्योक्तिं परिसमाप्य पुनः देवप्रश्नमवतारयति—देवा इति। देवा ह वै प्रजापतिमब्रुवन्। किमिति? पूर्वमुक्तमपि भूय एव नोऽस्माकं भगवान् तुर्यतुर्ययाथात्म्यं विज्ञापयत्विति ॥ १ ॥

आत्मनः तुर्यतुर्येण एकीकरणोपदेशः

तथेत्यजत्वादमरत्वादजरत्वादमृतत्वादभयत्वादशोकत्वादमोहत्वादनशनायत्वादपिपासत्वादद्वैतत्वाच्चाकारेणममात्मानमन्विष्योदु - त्कृष्टत्वादुदुत्पादकत्वादुदुत्प्रवेष्टृत्वादुदुत्थापयितृत्वादुदुद्रष्टृत्वादुदु - त्कर्तृत्वादुदुत्पथवारकैत्वादुदुद्भासत्वादुदुद्भ्रान्तत्वादुदुत्तीर्णविकृतित्वा-

ओकारेणेममात्मानं परमं ब्रह्म नृसिंहमन्विष्याकारेणेममात्मान-
मुकारपूर्वार्धमाकृष्य सिंहीकृत्योत्तरार्धेन तं सिंहमाकृष्य महत्त्वान्मह-
स्त्वान्मानत्वान्मुक्तत्वान्महादेवत्वान्महेश्वरत्वान्महासत्त्वान्महाचि-
त्त्वान्महानन्दत्वान्महाप्रभुत्वाच्च मकारार्धेनानेनात्मनैकीकुर्यात् ॥ २ ॥

एवं देवैरुक्तः प्रजापतिः **तथेति** तदुक्तमङ्गीकृत्य पुनरपि भवतो विज्ञापयिष्यामि इति वक्ष्यमाणप्रकारेणाह—**अजत्वादित्यादि** हेतुभिः। **अजत्वात्** प्रणवस्य मन्त्रराजस्य च जन्मरहितत्वात्, "ओङ्कारस्य तु नित्यत्वात् नाङ्गसोत्पत्तिरिष्यते" इति वार्तिककारोक्तेः। ओङ्काराग्रतया विद्योतमानतुर्यतुरीयं ब्रह्मैव सत्यं निष्प्रतियोगिकाजत्वात्, यन्नैवं तन्नैवं यथा घटः। एवं वक्ष्यमाणहेतवो यथायोगं व्याख्येयाः। **अमरत्वात्** मरणशून्यत्वात् **अजरत्वात्** जरारहितत्वात्। जनिमृतिजरानिराकरणतः स्थूलशरीरं अकारात्मा न भवतीत्युक्तम्। इदानीं सूक्ष्मशरीरस्य अनात्मत्वमाह—**अमृतत्वादिति** स्वापमहाप्रळयादावपि मरण-शून्यत्वात्। **अभयत्वात्** भीहेतुद्वैताभावात्। **अशोकत्वात्** शोचर्नीयेष्टजना-भावात्। यस्मात् मृतिशोकमोहविशिष्टः सूक्ष्मदेहात्मा अकारात्मनः तद्विलक्षण-त्वात् प्राण एवात्माऽस्तु इत्यत्र **अनशनायत्वात्** प्राणो ह्यशनायाधर्मकः अकारात्मा तु तद्विलक्षणः। तथा **अपिपासत्वात्**। लिङ्गशरीरस्य अनात्मत्वेऽपि सर्वकारणमव्याकृतमकारात्मा स्यादित्यत्र **अद्वैतत्वाच्च** द्वैतधर्मवदज्ञानमव्यक्तं अद्वैताकारात्मनः तद्विलक्षणत्वात्। **चशब्दः** असङ्गत्वादिसमुच्चायकः। अजाद्यात्मना **अकारेण** प्रणवप्रथममात्रारूपेण **इमं** आनन्दात्मानमन्विष्य आचार्योपदेशानुरोधेन अन्वालोचनं कुर्यात्। यथा अजादिहेतुना आत्मनः अकाररूपता तथा उत्कृष्टत्वादिहेतुना उकाररूपता स्यादित्याह—**उत्कृष्टत्वा-दिति**। यतः आत्मनः सर्वस्मादौत्कृष्ट्यम्। सर्वत्र उच्छब्दो निरतिशयोत्कृष्टत्व-द्योतकः, समुच्चयार्थो वा, स्वातिरिक्तप्रपञ्चोत्पादकत्वात्। हेतुचतुष्टय(?)माह—**उत्प्रवेष्टृत्वात्** स्वसृष्टशरीरादावुत्कर्षेण प्रवेशकर्तृत्वात्, शरीरादेः सर्वव्यापृति-कर्तृत्वेन **उत्थापयितृत्वात्, उद्वृष्टृत्वात्** शरीराद्यभिमानोत्कर्षतो विविधावलोक-

यितृत्वात्, समस्तभूतभौतिकादेरुत्कर्षेण **कर्तृत्वात्** **उदुत्पथवारकत्वात्** उन्मार्गनिवारकत्वात्, **उदुद्ग्रासत्वात्** सर्वग्रासेश्वरत्वात्, **उदुद्धान्तत्वात्** जीवरूपेण अतस्मिंस्तद्भावारूढत्वात् **उदुत्तीर्णविकृतित्वाच्च** विकृतिः स्वाज्ञान-तत्कार्यं यत् स्वा[स्व]ज्ञानेन तीर्णं सोऽयं उदुत्तीर्णविकृतिः उकारात्मा तद्भावः तत्त्वं तस्मात् । उक्तहेत्वतिरिक्तहेतुसमुच्चयार्थः चकारः । **एवमुकारेणापि इममात्मानं** स्वप्रकाशं **परमं ब्रह्म नृसिंहमन्विष्याकारेण इममात्मानं उकारपूर्वार्धं** उकारस्योच्यमानस्य पूर्वार्धं पूर्वस्थानं पूर्वभागत्वेनोक्तं अकारं अनुष्टुभश्च पादद्वयार्धं **आकृष्य** अमिहमपि **सिंहीकृत्य** अनुष्टुप्पूर्वार्धेन तादात्म्यं गमयित्वा **उत्तरार्धेन** नृसिंहानुष्टुभ उत्तरपादद्वयरूपेण **तं** अकारात्मकं **सिंहं** सिंहानुष्टुभः प्रथमार्धं **आकृष्य** एकीकृत्य एकत्वमापादयेत् इति वक्ष्यमाणेनान्वयः। यथा अकारोकारावप्यात्मरूपौ तथा मकारोऽपीत्यत्र हेतुमाह—**महत्त्वादिति** । गुणतो वस्तुतश्च **महत्त्वात् महस्त्वात्** अमिततेजोरूपत्वात् **चक्षुरादिवत् मानत्वात्** स्वाविद्यातत्कार्यमुक्तत्वात् देवपरिवृढशंकररूपेण **महादेवत्वात्** सकलनियन्तृत्वेन **महेश्वरत्वात्** स्वातिरिक्तानृतजडदुःखग्रासस्सच्चिदानन्दरूपेण **महासत्त्वात्** **महाचित्त्वात्** **महानन्दत्वात्** स्वातिरिक्तोपसंहारसमर्थत्वेन **महाप्रभुत्वाच्च** । चकारो निरतिशयत्वख्यापनार्थः । **मकारार्धेनानेन** सर्वप्रत्य-गभिन्नेन वस्तुतः तुर्यतुरीयेण **आत्मना एकीकुर्यात्** ॥ २ ॥

एकीकरणफलम्

अशरीरो निरिन्द्रियोऽप्राणोऽतमाः सच्चिदानन्दमात्रः स स्वराड्
भवति य एवं वेद ॥ ३ ॥

एवं कर्तुः फलमाह—**अशरीर** इति । स्थूलशरीराभावात् । **निरिन्द्रियः अप्राणः** लिङ्गशरीरवैरळ्यात् । **अतमाः** कारणाज्ञानाभावात् । अनृतजड-दुःखात्मकस्थूलादिशरीरत्रयापह्नवतः **सच्चिदानन्दमात्रः** निष्प्रतियोगिकत्वात्, "सच्चिदानन्दमात्रोऽहमनुत्पन्नमिदं जगत्" इति श्रुतेः । **य एवं वेद सोऽयं** मुनिः स्वातिरिक्तं ग्रसित्वा स्वमात्रं राजत इति **स्वराट् भवति** ॥ ३ ॥

स्वात्मनः स्वराड्भावः

कस्त्वमिति । अहमिति होवाच । एवमेवेदं सर्वं तस्माद-
हमिति सर्वाभिधानं तस्यादिरयमकारः स एव भवति सर्वं
ह्ययमात्माऽयं हि सर्वान्तरो न हीदं सर्वमहमिति होवाचैव
निरात्मकमात्मैवेदं सर्वं तस्मात् सर्वात्मकेनाकारेण सर्वात्मकमात्मान-
मन्विच्छेत् ॥ ४ ॥

स्वात्मनः स्वराड्भवनरूपाख्यायिकां दर्शयति—**कस्त्वमिति** । पूर्वं असुरशिशुपरित्राणनहेतोः स्तम्भादवतीर्णं स्वावतारकार्यसिद्ध्यनन्तरं भद्रासनारूढं दृष्ट्वा ब्रह्मादयो देवाः अत्यद्भुतदर्शनः **त्वं कः**? इति तैः एवं पृष्टो भगवान् केवलकृपयैव तेषां मन्त्रराजमुपदिशन् तच्चरमपदेन **अहमिति होवाच**। किमिति? **एवमिति** । स्वस्य सर्वात्मकत्वेन सर्वनामान्यवगच्छन् वस्तुतः स्वराडपि युष्मच्छब्दप्रतियोगिनं अस्मच्छब्दं प्रकटितवान्, यत् ब्रह्मादिस्तम्बान्तप्राणिजातेन अहंप्रत्ययाभ्यां व्यवहियते तदेवेत्यर्थः । **एवमेव** अनेन प्रकारेण **इदं सर्वं** उद्भूता-हङ्कारं अनुद्भूताहंकारं च चेतनाचेतनात्मकं **सर्वाभिधानं** अहमित्यनेन शब्देन सर्व-मभिधीयते। प्रकृते किं आयातं इत्यत आह—**तस्येति**। **तस्य** प्रजापत्युच्चारितानुष्टु-बन्ताहंपदस्य **आदिः** प्रथमो वर्णः **अकारः** स एव स्वराड् भवति । अकारस्य सर्ववाग्व्याप्त्या सर्वरूपत्वमस्तु नत्वात्मत्वं इत्यत आह—**सर्वं ह्ययमात्मेति** । आत्मत्वेऽपि प्रत्यक्त्वं कुतः? इत्यत आह—**अयमिति** । हि यस्मात् **अयं सर्वान्तरः** प्रत्यक्तमः इत्यर्थः । एकस्य सर्वरूपत्वं सर्वप्रत्यक्तमत्वं च विरुद्धं इत्यत आह—**न हीति**। हि यस्मात् **इदं** भूतभौतिकप्रपञ्चजातं **न निरात्मकं** किं तु **अहमिति होवाच** न मत्तोऽन्योऽनात्मप्रपञ्चोऽस्ति । यत एवं अतः सर्वात्मत्वं सर्वप्रत्यक्त्वं अविरुद्धमित्यर्थः । इदं सर्वं आत्मा चेति द्वैतापत्तिः स्यादित्यत आह —**आत्मैवेदं सर्वमिति** । रज्वतिरिक्तसर्पाभाववत् मदतिरिक्तसर्वं नास्तीत्यर्थः । उक्तार्थं स्मारयति—**तस्मादिति** । यस्मादकारः सर्वात्मा **तस्मात् सर्वात्म-केनाकारेण** सर्ववागात्मना स्वाज्ञदृष्टिप्रसक्तसर्वात्मकमन्विच्छेत् ॥ ४ ॥

आत्मातिरेकेण ब्रह्मासत्त्वम्

ब्रह्मैवेदं सर्वं सच्चिदानन्दरूपं सच्चिदानन्दरूपमिदं सर्वं सद्धीदं सर्वं सत् सदिति चिद्धीदं सर्वं काशते प्रकाशते चेति ॥ ९ ॥

आत्मातिरेकेण ब्रह्मणः सत्त्वात् कथं सर्वात्मकः आत्मा इत्यत आह—**ब्रह्मैवेदं सर्वमिति** । न हि ब्रह्मातिरेकेण आत्माकारादिरस्तीत्यर्थः । प्रधानवत् ब्रह्म जगत्कारणं इत्यत आह—**सच्चिदानन्दरूपमितीति** । न हि तत् प्रधानवत् जगत्कारणं, किं तु एकमेवाद्वितीयं स्वातिरिक्तजगद्वैरळ्यात्। अनृतजडदुःखात्मक-जगत्प्रतीतौ सत्यां तद्विपरीतब्रह्म नास्तीत्यत आह—**सच्चिदानन्दरूपमिदं सर्वमिति** । यो जगदनृतजडदुःखात्मकं पश्यति तस्य तद्धेतुस्वाज्ञानापाये पूर्वमिदन्त्वेन यदनुभूतं तत् सर्वं सच्चिदानन्दरूपमेव भवतीत्यर्थः । **हि** यस्मात् **सद्धीदं सर्वम्** । तदेव प्रपञ्चयति—**सत्सदिति** । व्यभिचरदपि घटादिवस्तुजातं तद्गतसत्ता न हि व्यभिचरति, इदं सत् इदं सत् इति प्रतीतेः । जगतः सद्रूपता अस्तु, तस्य जडत्वेन चिद्रूपता कुतः ? इत्यत आह—**चिद्धीदं सर्वमिति** । **हि** यस्मात् इदं सर्वं चैतन्यरूपम् । तत्र हेतुः—**काशते प्रकाशते चेति** । यदि सत्ता न प्रतीयेत ततः असदेव स्यात्, सन् घटः प्रतीयते इति प्रतीतेः सार्वजनीनत्वात्। **च**शब्दः समुच्चयार्थः ॥ ९ ॥

सच्चिदानन्दानुभवप्रकाशः

किं सदिति । इदमिदं नेत्यनुभूतिरिति ॥ ६ ॥

कैषेति । इयमियं नेत्यवचनेनैवानुभवन्नुवाच । एवमेव चिदा-नन्दावप्यवचनेनैवानुभवन्नुवाच । सर्वमन्यदिति स परमानन्दस्य ब्रह्मणो नाम ब्रह्मेति तस्यान्त्योऽयं मकारः स एव भवति तस्मान्म-कारेण परमं ब्रह्मान्विच्छेत् ॥ ७ ॥

सत् सत् इति सत्ता व्यवस्थाप्यते, न हि तत्रानुभवो निसर्गो भवितुमर्हति इति मन्वानाः पृच्छन्ति—**किं सत् इति** । यदुक्तं सत् सत् इति तत् किं ? न हि सत् इति वक्तुं शक्यं सत्ताऽनुभवस्य असार्वत्रिकत्वात् सत्तामन्तरेण घटप्रतीतेः । **इतिशब्दः** प्रश्नसमाप्त्यर्थः । उत्तरमाह—**इदमिदं नेत्यनुभूतिरिति** । घटोऽयं पटोऽयं इति द्विधा प्रतीतिः । यद्वा—यदिदं परिदृश्यमानं प्रपञ्चजातं तदिदं न किंतु अनिदंरूपं इत्याचार्योपदेशजैव अनुभूतिः, स्वरूपचैतन्यरूपा सा सत्येति शेषः । **इतीत्युत्तरपरिसमाप्तौ** ॥ ६ ॥ इदानीमनुभूतिं पृच्छन्ति—**कैषेति** । एषा अनुभूतिः भवतोच्यमाना न तावत् जायमाना, तथात्वे घटवदनित्यत्वापत्तेः, प्रतीत्यर्हत्वात् जायमाना वा सा **का** । **इति** प्रश्नसमाप्तौ । प्रश्नोत्तरं प्रजापतिराह—**इयमियं नेति** । यत्र या काचन अनुभूतिः विविधभेदगर्भिणी भवद्भिरनुभूता सा कदाऽपि नेतीति **अवचनेनैव** आकारेङ्गितादिभिः **अनुभवन्** आत्मसाक्षात्कारं कुर्वन् ब्रह्मानन्दाश्रूणि मुञ्चन् निरुत्तरेणोत्तरं **उवाच**, सर्वापह्नवसिद्धब्रह्ममात्रानुभूतेः वाचा वक्तुमशक्यत्वात् । यथा सत्तोक्ता तथा चिदानन्दावपि उक्तवानित्याह—**एवमिति** । यथा सत्ताऽनुभूतिरवचनेनोक्ता **एवमेव चिदानन्दावपि अवचनेनैव अनुभवन्नुवाच** यथा सच्चिदानन्दानवचनेनानुभवन्नुवाच तद्वत् स्वयंप्रकाशत्वादिधर्मान् देवैरपृष्टानप्युक्तवान् इत्याह—**सर्वमिति** । **सर्वमन्यदपि** देवैः पृष्टं अपृष्टं अवचनेनैव आत्मत्वेन अनुभवन्नुवाच । किमिति ? **स** प्रजापतिः **परमानन्दस्य ब्रह्मणो नाम** नामधेयं **ब्रह्मेत्यत्र अन्त्यवर्णो मकारः स एव** परमानन्दब्रह्मरूपो **भवति** । यस्मात् एवं **तस्मात् मकारेण परमं** गुरूपदेशमार्गेण **अन्विच्छेत्** ॥ ७ ॥

ब्रह्मयाथात्म्यनिरूपणम्

किमिदम् । एवमित्यकार इत्येवाहाविचिकित्सन्नकारेणमात्मानमन्विष्य मकारेणानुसंदध्यादुकारेणाविचिकित्सन्नशरीरोऽनिन्द्रियोऽप्राणोऽतमाः सच्चिदानन्दमात्रः स स्वराड् भवति य एवं वेद ॥ ८ ॥

ब्रह्म वा इदं [1]सर्वमत्तृत्वादुग्रत्वाद्वीरत्वान्महत्त्वाद्विष्णुत्वाज्ज्वलत्त्वात् सर्वतोमुखत्वान्नृसिंहत्वाद्भीषणत्वाद्भद्रत्वान्मृत्युमृत्युत्वान्नमामित्वादहंत्वादिति सततं ह्येतद्ब्रह्मोग्रत्वाद्वीरत्वान्महत्त्वाद्विष्णुत्वाज्ज्वलत्त्वात् सर्वतोमुखत्वान्नृसिंहत्वाद्भीषणत्वाद्भद्रत्वान्मृत्युमृत्युत्वान्नमामित्वादहंत्वादिति ॥ ९ ॥

तस्मादकारेण परमं ब्रह्मान्विष्य उकारेण मनआद्यवितारं मनआदिसाक्षिणमन्विच्छेत् ॥ १० ॥

पुनरिदानीं देवाः ब्रह्मयाथात्म्यजिज्ञासवः पृच्छन्ति—**किमिदमिति** । वाङ्मनसातीतं **इदं** ब्रह्मैव अनेकप्रकारेण अवगम्य **किमित्यनेन** प्रकारेण पप्रच्छुरिति शेषः । तैः एवं पृष्टः प्रजापतिः अरे बुद्धिशून्यदेवसमूह इति हीनसंबोधनेन देवान् संबोध्य तत्प्रश्नमङ्गीकुर्वन् **इत्येवमाह** । किमिति ? न हि सच्चिदानन्दमात्रे ब्रह्मणि स्वाज्ञानमन्तरेण कश्चन व्यवहारोऽस्ति । ततो मया पूर्वमविद्याऽतीतवस्त्वपेक्षया मौनेन स्थितं, अविद्याऽपेक्षया तु मकारेण अवगम्यते इत्युक्तम् । यत एवं अतः न पूर्वोत्तरविरोध इत्यनेन प्रकारेण **अविचिकित्सन** अवोचं, अतो मया एवं वाङ्मनसातीतं ब्रह्म अवचनेनोक्तं, तत् कथं इदानीं मकारेण अवगम्यमिति विरुद्धमुक्तमिति संशयं कुर्वन् विद्याऽविद्याविषयतयाऽविरुद्धं उभयमपीत्यर्थः । तस्मात् यतोऽविद्यादशायां अनेकसाधनव्यपेक्षया ब्रह्मावगतिः भवितव्या खलु तत्र त्वंपदार्थशुद्धिकारिणा [**अकारेण**] **इमं** आनन्दात्मानं आचार्यमुखतोऽन्विष्य तत्पदार्थशुद्धिकारिणा **मकारेण** प्रत्यगभिन्नं ब्रह्म **अनुसंदध्यात्** अनुसंधानं कुर्यात् अकारमकारयोः संधानहेतुना **उकारेणाविचिकित्सन्** सन्देहमकुर्वन् । एवं अकारमकारयोः उकारः सन्धिः इति ऐक्यं जानतः फलमाह—**अशरीर** इत्यादि **य एवं वेद** इत्यन्तं व्याख्यातम् ॥ ८ ॥ मकारतो ब्रह्मावलोकनोपपत्तिमाह—**ब्रह्म वा इदं सर्वमिति** । कुतः ?

[1] सर्वं मन्त्वत्वा—अ, अँ १, क.

स्वविकल्पितजगं(त् अत्र ?) [तः अत्तृत्वात्] तत्र हेतुः—**उग्रत्वात्** उद्ग्राह-कत्वात् जगतः सृष्टिस्थितिसंहारकर्तृत्वात् इत्यर्थः। तत्र हेतुः—**वीरत्वात्** जगद्विरमणहेतुत्वात्। प्रौढत्वेन **महत्त्वम्**। तत्र हेतुः—**विष्णुत्वात्**। व्यापका-काशवत् जडता स्यादित्यत आह—**ज्वलत्त्वादिति**। स्वतेजसा दीप्तस्य जडत्वानुपपत्तेः। ज्वलदग्निवत् परिच्छिन्नं स्यात् इत्यत आह—**सर्वतोमुखत्वादिति**। विराट्त्वेऽपि सर्वोपसंहारकता कुतः? इत्यत आह—**नृसिंहत्वात्**। पुरुषत्वे सति सिंहत्वात्। तत्र हेतुः—**भीषणत्वादिति**। सिंहस्य पश्यद्भीतिजनकत्वात्। भीजनकत्वेन अभद्रता स्यादित्यत आह—**भद्रत्वादिति**। मङ्गलैकस्वरूपत्वात्। तथात्वेऽपि संहारकर्तृता कुतः? इत्यत आह—**मृत्युमृत्युत्वादिति**। स्वाज्ञानमेव मृत्युः, तस्यापि मारकत्वात्। स कथं स्थितिकर्ता भवति? अत आह—**नमामित्वादिति**। सर्वनमस्कार्यत्वात्। तथा च जातानुकम्पो भगवान् प्राण्यनुग्रहार्थं स्थितिं करोतीत्यर्थः। किं स्वभेदेन तान् पश्यन् हितं करोतीत्यत आह—**अहन्त्वादिति**। सर्वेषां आत्मरूपत्वादित्यर्थः। **इत्येतैः कारणैः सततं एतद्ब्रह्म** परमानन्दरूपं मकारावगम्यम्। तत्र पूर्वोक्तहेतूनुपन्यस्यति—**उग्रत्वादि-त्याद्यहंत्वादित्यन्तं** व्याख्यातम्। ब्रह्मणोऽनुष्टुबात्मत्वं वक्तुं एकादशपदानि द्वादशधा विभज्य पूर्वं इदानीं च हेतुत्वेनोक्तानि इत्यवगन्तव्यम्॥ ९॥ यस्मादेवं **तस्मात्** त्वंपदार्थाभिधायिना [**अकारेण**] **परमं ब्रह्म अन्विष्य** तत्पदार्थाभिधायिना **मकारेण च मनआद्यवितारं** मनआदिकरणग्रामरक्षितारं **मनआद्यसङ्गोदा-सीनतया** तद्वृत्तिसहस्रभावाभावसाक्षिणं **अन्विच्छेत्**॥ १०॥

ब्रह्मात्मैक्यज्ञानविधानम्

स यदैतत् सर्वमपेक्षते तदैतत् सर्वमस्मिन् प्रविशति स यदा प्रतिबुध्यते तदेतत् सर्वमस्मादेवोत्तिष्ठति॥ ११॥

तदेतत् सर्वं निरूह्य प्रत्यूह्य संपीड्य संज्वाल्य संभक्ष्य स्वात्मानमेवैषां ददाति॥ १२॥

अत्युग्रोऽतिवीरोऽतिमहानतिविष्णुरतिज्वलन्नतिसर्वतोमुखोऽतिनृसिंहोऽतिभीषणोऽतिभद्रोऽतिमृत्युमृत्युरतिनमाम्यत्यहं भूत्वा स्वे महिम्नि सदा समासते ॥ १३ ॥

तस्मादेनमकारार्धेन परेण ब्रह्मणैकीकुर्यादुकारेणाविचिकित्सन्नशरीरो निरिन्द्रियोऽप्राणोऽतमाः सच्चिदानन्दमात्रः स स्वराड् भवति य एवं वेद ॥ १४ ॥

तदेष श्लोकः—

शृङ्गं शृङ्गार्धमाकृष्य शृङ्गेणानेन योजयेत् ।
शृङ्गमेनं परं शृङ्गे तमनेनापि योजयेत् ॥ १५ ॥

सः त्वंपदार्थः तत्पदार्थो वा अध्यात्मं अधिदैवं वा **यदा** यस्मिन् काले एतत् परिदृश्यमानं **सर्वं** स्वापप्रळयाद्यवसर **उपेक्षते तदा** तस्मिन् काले **एतत् सर्वं अस्मिन्नेवात्मनि** रज्जौ सर्पवत् **प्रविशति** । **स यदा प्रतिबुध्यते** नित्यादिप्रळयादिभ्यः उत्थितो भवति **तदैतत्सर्वं अस्मादेवोत्तिष्ठति** ॥ ११ ॥ **तदेतत्सर्वं** निरुह्य निःशेषेण आत्मसाच्चिकीर्षुः वहनं कृत्वा **प्रत्यूह्य** संभूतिवैपरीत्येन वहनं कृत्वा **संपीड्य** सम्यक्परिच्छेदनिर्गमनेन पीडयित्वा **संज्वाल्य** आत्मज्ञानेन सम्यक् पाचयित्वा **संभक्ष्य** स्वावशेषं कवळयित्वा **स्वात्मानं** स्वस्वरूपं **एषां** आत्मवेदिनां स्वज्ञानां **ददाति** ॥ १२ ॥ ब्रह्माभिन्नानुष्टुप्प्रवेशार्थमावृत्तिः स्यादित्यत्र सर्वातीतत्वं विशेष इत्याह—**अत्युग्रः** उग्रोपाधिमतीत्य वर्तमानत्वात् । **अतिवीरः** इत्यादि समानम् । **अत्यहं भूत्वा** अस्मत्प्रत्ययकलनामपि ग्रसित्वा **स्वे महिम्नि** स्वावशेषतया **समासते** पुनरावृत्तिशून्यतया आसनं कुर्वते । प्राप्यस्यैकत्वं प्रापकस्य बहुत्वं, उग्रादिष्वेकवचनत्वेऽपि क्रियापदे बहुवचनमविरुद्धम् ॥ १३ ॥ उक्तार्थं अर्थप्राधान्येन निगमयति—**तस्मादिति** । यस्मात् उग्रादिरूपोऽयमात्मा मुक्तप्राप्यः **तस्मात् एनं** आनन्दात्मानं **अकारार्धेन ब्रह्मणा** एकीकुर्यात् एकतां

नयेत्। उकारेण अविचिकित्सन् अशरीरो निरिन्द्रियोऽप्राणोऽतमाः सच्चिदानन्दमात्रः सः स्वराट् भवति य एवं वेद इत्युक्तार्थम् ॥ १४ ॥ तत् तस्मिन् उक्तार्थे एष श्लोको मन्त्रो भवति। शृङ्गं अकारं शृङ्गार्धं मकारं च आकृष्य अकारमकारघटकेनोकारेण शृङ्गेणानेन योजयेत् तादात्म्यं नयेत्। पुनः शृङ्गं उकाराख्यं एनं अकारमकारयोः संबन्धघटकं मकाराख्ये परे शृङ्गे परे ब्रह्मणि तं मकाराभिधानं शृङ्गं अनेन संबन्धघटकेन अकारेण अपि संयोजयेत् तादात्म्यं नयेत् इत्यर्थः ॥ १५ ॥

इति सप्तमः खण्डः

अष्टमः खण्डः

तुर्यमात्रायाः ओतत्वम्

अथ तुरीयेणोतश्च प्रोतश्च ह्ययमात्मा नृसिंहोऽस्मिन् सर्वमयं सर्वात्माऽयं हि सर्वं नैवातोऽद्वयो ह्ययमात्मैकल एव विकल्पो न हि वस्तु सदयं ह्योत इव सद्घनोऽयं चिद्घन आनन्दघन एवैकरसोऽव्यवहार्यः केन च न द्वितीय ओतश्च प्रोतश्चैष ओंकारः ॥ १ ॥

एवं नैवमिति पृष्ट ओमित्येवाह वाग्वा ओंकारो वागेवेदं सर्वं न ह्यशब्दमिवेहास्ति चिन्मयो ह्ययमोंकारश्चिन्मयमिदं सर्वं तस्मात् परमेश्वर एवैकमेव तद्भवत्येतदमृतमभयमेतद्ब्रह्माभयं ब्रह्माभयं हि वै ब्रह्म भवति य एवं वेदेति रहस्यम् ॥ २ ॥

ब्रह्म विद्यादशायां अकारादिमात्रात्रयेण अवगन्तुं शक्यं इत्युक्त्वा तथा इदानीं तुर्यमात्रयाऽपि तुर्यतुर्यब्रह्म अवगन्तुं शक्यं इति वक्तुं खण्डिकेयमारभ्यते—**अथेति** । **अथ** अकारादिमात्रात्रयकथनानन्तरं तुर्यमात्रयाऽपि तुर्यः प्राप्यते इति शेषः । **तुर्येण** तुर्यमात्रारूपप्रणवेन **ओतश्च प्रोतश्च**—यथा पटः तन्तुभिः ओतः प्रोतः आतानविताना त्मकैः—एवं आङ्पूर्वाद्वेञः क्तप्रत्यये संप्रसारणे ओतः इति रूपं—ओतश्च प्रोतश्चेति चकारद्वयतः तुर्यस्याकारादिचतुर्मात्राव्यापकत्वं द्योत्यते । **हि** यस्मात् **अयमात्मा** त्वंपदार्थो **नृसिंहः**, तस्मिन् तुर्ये **नृसिंहाश्रये सर्वं** भेदजातं विकल्पितं, **अयं** तुरीयः **सर्वात्मा**, तत्र हेतुः—**हि** यस्मात् **अयं** तुरीयः **सर्वं**, सर्वस्य स्वविकल्पितत्वात् । **नैव** तुरीयः सर्वस्मिन् प्रतिष्ठितः, स्वातिरिक्तसर्वस्य अवस्तुत्वात् । यतः स्वातिरिक्तं सर्वं नास्ति **अतोऽद्वयो ह्ययमात्मा** । **हि**शब्दतः सर्वात्मनो न ह्याधेयाधारभावोऽस्तीति द्योत्यते । तत्र हेतुः **एकलः** इति, सर्वविलयाधिकरणत्वात् । एकल एवेत्यवधारणतः स्वातिरिक्तभेदो नास्तीति द्योत्यते । भेदोऽपि दृश्यत इति चेत्—न, भेदस्यासत्त्वात् अधिष्ठानज्ञानविकल्पो हि भेदः न हि वस्तुसत्, भेदस्य अवस्तुत्वेनासत्त्वात् । कुतो विकल्पस्यासत्त्वं ? इत्यत आह—**अयमिति** । अयमुक्तो भेदविकल्पः यस्मात् **ओतः इव** भातः वस्तुतो न ह्योतः, स्वज्ञानावधिकत्वात् । स्वज्ञानतो विकल्पक्षयतः तुर्यस्य सच्चिदानन्दमात्रावशेषतामाह—**सद्घन** इति, सत्तामात्रत्वात् । **अयं** तुरीयः **चिद्घनः** जडसामान्यप्रासाजडत्वात्, **आनन्दघनः** अखण्डानन्दस्वरूपत्वात् । सच्चिदानन्दतो भेदः स्यादित्यत्राह—**एकरस** इति । सच्चिदानन्दानां अखण्डैकरसत्वात् । अत एव केन च वाङ्मनसादिनाऽपि **अव्यवहार्यः** अनिदंस्वरूपत्वेन व्यवहर्तुं अशक्यत्वात् । तत्र हेतुः—**न द्वितीयः** अद्वितीयः द्वितीयवस्तुनो मृग्यत्वात् । पटे तन्तुवत् **ओतश्च प्रोतश्च** । चकारौ कार्यस्य कारणानन्यत्वं अवास्तवत्वं चाहतुः । **एष** तुरीयोङ्कारः ॥ १ ॥ अर्धमात्राप्रणवः कथं निर्विशेषत्वं तुर्योङ्कारत्वं भजतीति पृच्छन्ति—**एवं नेत्यमिति** । सच्चिदानन्दरूपं तद्विपरीतं कथं प्रणवरूपं इति देवैः पृष्टः स प्रजापतिः नित्यानित्यरूपेण उत्तरमुक्तवान् इत्याह—**ओमित्येवा-**

हेति। ओं वाचा मनसा च व्याह्रियमाणं तुरीयं ओङ्कारस्वरूपं निर्विशेषतया सच्चिदानन्दमेकरसं, ततः एवं नैवं "तुर्यं वाचो मनुष्या वदन्ति" इति तुर्योङ्काररूपं उभयमप्यविरुद्धं इत्युक्तवान्। वर्णात्मकोऽयमोङ्कारः न तुर्यरूपः इत्यत आह—**वागिति**। **वाग्वा** वर्णध्वनिरूपिणी वागेव **ओङ्कारः** तुर्यप्रणवः। वाचो नामधेयमात्रत्वं न सर्वानुस्यूतत्वं, तत्राह—**वागेवेदं सर्वमिति**। तत्र **हेतुः नह्यशब्दमिवेहास्ति** हि यस्मात् इह अस्मिन् संसारमण्डले किमपि रूपधेयं कर्मधेयं वा अशब्दमिव नास्ति। किं तु नामधेयमिव। इवशब्दतः तुर्येतरप्रपञ्चस्य अवास्तवत्वं द्योत्यते। वाङ्मात्रस्य तुर्यता कथं? इत्यत आह—**चिन्मयो ह्ययमोङ्कारश्चिन्मयमिदं सर्वमिति**। ओङ्कारः चिन्मयः चिद्रूपः। चिद्रूपस्य जगद्रूपता कुतः? इत्यत्र वस्तुतो मृदतिरिक्तघटाभाववत् चिद्विकल्पितं सर्वं जगच्चिन्मयमेव, न हि चिद्रूपादतिरिक्तमस्ति इत्यत्र—"यथैव मृन्मयः कुंभस्तद्वदेहोऽपि चिन्मयः" इति श्रुतेः। यस्मात् चिदेव सर्वं **तस्मात् परमेश्वर एव** तुर्यः नत्वन्यः कश्चिदस्ति। यतः एवं अतः सच्चिदानन्दरूपं तुर्यचैतन्यं **एकमेव तत् भवति**। अत एव **एतदमृतं** अमरणधर्मित्वात् **अभयं** भयकारणद्वैताभावात् **एतद्ब्रह्म** भूमरूपेण बृंहितत्वात्। तत्प्रसिद्धमित्याह—**अभयं वा** इति। एवं ज्ञानफलमाह—**अभयं ह्येति**। इति उक्तप्रकारेण **रहस्यं** अतिगोप्यमुक्तम्॥ २॥

तुर्यमात्रायाः अनुज्ञातृत्वम्

अनुज्ञाता ह्ययमात्मैष ह्यस्य सर्वस्य स्वात्मानमनुजानाति न हीदं सर्वं स्वत आत्मवि[व]न्न ह्ययमोतो नानुज्ञाताऽसङ्गत्वादविकारित्वादसत्त्वादन्यस्यानुज्ञाता ह्ययमोंकार ओमिति ह्यनुजानाति वाग्वा ओंकारो वागेवेदं सर्वमनुजानाति चिन्मयो ह्ययमोंकारश्चिद्धीदं सर्वं निरात्मकमात्मसात्करोति तस्मात् परमेश्वर एवैकमेव तद्भवत्येतदमृतमभयमेतद्ब्रह्माभयं वै ब्रह्माभयं हि वै ब्रह्म भवति य एवं वेदेति रहस्यम्॥ ३॥

ओतत्वमुक्त्वा तुर्यानुज्ञातृत्वमाह—**अनुज्ञातेति** । व्याख्यातम् । अनुज्ञातृत्वे हेतुः—एष तुरीयः **हि** यस्मात् **अस्य** उपलभ्यमानस्य **सर्वस्य स्वात्मानमनुजानाति** अनुज्ञां प्रयच्छति । **न हीदं सर्वं स्वतः आत्मवि[व]त्**, सर्वस्य स्वात्मसत्ताऽतिरेकेण पृथक् सत्ताऽभावात् । वस्तुतः किं तुर्योऽनुज्ञाता चेत्यतः आह—**नह्ययमिति** । वस्तुतः ओतृत्वानुज्ञातृत्वाभावे हेतुमाचष्टे—**असङ्गत्वादिति** । असङ्गत्वे हेतुः **अविकारित्वात्** विकारवद्धि वागादि [1]तमनुजानाति । एवं असङ्गाविकारित्वाभ्यां स्वतः ओतृत्वानुज्ञातृत्वाभावेऽपि स्वातिरिक्तं वास्तवमस्त्वित्यत्याह—**असत्त्वादिति** । स्वातिरिक्ततया **अन्यस्य** द्वैतस्य शशविषाणवदविद्यमानत्वात् । यथोङ्कारस्योतत्वं तथाऽनुज्ञातृत्वमपीत्याह—**अनुज्ञातेति** । कथं ओंकारस्य अनुज्ञातृत्वं तत्राह—**ओमिति ह्यनुजानातीति** । यस्मादिदं करोमि इत्यादि पृष्टः ओमित्यनुज्ञां ददाति । ओङ्कारस्य स्वार्थचैतन्यरूपेण अनुज्ञातृत्वमित्याह—**चिद्धीदं सर्वं निरात्मकं आत्मसात्करोति** निरात्मकं सत्ताशून्यं आत्मसत्ताप्रदानेन आत्मसात् आत्माधीनं करोति । तदधीनवचन इत्यनुवृत्तौ "विभाषा साति कात्स्न्र्ये" इति सातिप्रत्ययः । यस्मादेवं **तस्मात् परमेश्वर एवैकमेव तत् भवति एतदमृतमभयं एतद्ब्रह्माभयं वै ब्रह्माभयं हि वै ब्रह्म भवति य एवं वेदेति रहस्य**मिति व्याख्यातम् ॥ ३ ॥

तुर्यमात्रायाः अनुज्ञैकरसत्वम्

अनुज्ञैकरसो ह्ययमात्मा प्रज्ञानघन एवायं यस्मात् सर्वस्मात् पुरतः सुविभातोऽतश्चिद्घन एव न ह्ययमोतो नानुज्ञातैतदात्म्यं हीदं सर्वं सदैवानुज्ञैकरसो ह्ययमोंकार ओमिति ह्येवानुजानाति वाग्वा ओंकारो वागेव ह्यनुजानाति चिन्मयो ह्ययमोंकारश्चिदेव ह्यनुज्ञाता तस्मात् परमेश्वर एवैकमेव तद्भवत्येतदमृतमभयमेतद्ब्रह्माभयं वै ब्रह्माभयं हि वै ब्रह्म भवति य एवं वेदेति रहस्यम् ॥ ४ ॥

[1] कमनु—उ १.

कथं ओङ्कारस्य अनुज्ञारूपत्वं इत्यत आह—**अनुज्ञैकरस** इति । तत्र हेत्वर्थं प्रकटयति—**प्रज्ञानघन** इति । तदेवोपपादयति—**यस्मादिति** । **यस्मात्** अस्मात् स्वातिरिक्तात् **सर्वस्मात्** स्वाज्ञादिदृष्ट्या विद्यमानादविद्यमानाद्वा । **पुरत** इति कालत्रयोपलक्षणार्थम् । कालत्रयेऽपि स्वयंप्रकाशात्मना **सुविभातः** । **अतोऽस्मात्** कारणात् **चिद्घन एव** चैतन्यमात्रत्वात् । **नह्ययमोतो नानुज्ञाता** ओतृत्वानुज्ञातृत्वनिराकरणतोऽनुज्ञाऽपि निराकृता स्यादित्यर्थः । स्वातिरेकेण न किंचिदस्ति स्वयमेव सर्वमित्यत्र हेतुमाह—**ऐतदात्म्यं हीदं सर्वमिति** । **ऐतदात्म्यं** इत्यत्र बहुव्रीह्युत्तरं भावप्रत्ययः ष्यङ्, न तु कर्मधारयोत्तरं, एष आत्मा यस्य जगतः तदेतदात्मा तद्भावः ऐतदात्म्यं **इदं सर्वम्** । हेत्वर्थमाह—**सदेवेति** । सद्व्यतिरेकेण असदभावात्, सर्वं सदेव नत्वन्यत् । **अनुज्ञैकरसो ह्ययं ओङ्कारः ओमिति ह्येवानुजानाति** इत्यादि **रहस्यमित्यन्तमुक्तार्थम्** ॥ ४ ॥

तुर्यमात्रायाः अविकल्पत्वम्

अविकल्पो ह्ययमात्माऽद्वितीयत्वादविकल्पो ह्ययमोंकारोऽद्वितीयत्वादेव चिन्मयो ह्ययमोंकारस्तस्मात् परमेश्वर एवैकमेव तद्भवत्यविकल्पोऽपि नात्र काचन भिदाऽस्ति नैव तत्र काचन भिदाऽस्त्यत्र हि भिदामिव मन्यमानः शतधा सहस्रधा भिन्नो मृत्योः स मृत्युमाप्नोति तदेतदद्वयं स्वप्रकाशं महानन्दमात्मैवैतदमृतमभयमेतद्ब्रह्माभयं वै ब्रह्माभयं हि वै ब्रह्म भवति य एवं वेदेति रहस्यम् ॥

इदानीमविकल्पत्वमाह—**अविकल्प** इति । अविकल्पत्वे हेतुः—**अद्वितीयत्वादिति** । ओङ्कारस्याप्यविकल्पत्वमाह—**अविकल्प** इति । स्वाधिष्ठानचैतन्ययोगतः ओङ्कारस्य अद्वितीयत्वमाह—**चिन्मय** इति । वस्तुतः अविकल्पानविकल्पजातमविकल्परूपमित्याह—**अविकल्प** इति । सर्वमविकल्पाविकल्पतुर्यतुरीयमित्यर्थः । कथमेवमित्यत आह—**नात्र काचन भिदाऽस्तीति** ।

नैव तत्र अविकल्पाविकल्पे तुर्यतुर्ये अविकल्पत्वादिधर्मः कोऽप्यस्ति तुर्यतुर्यस्य निष्प्रतियोगिकाविकल्पाविकल्परूपत्वात्। येन येन हेतुना त्वया भेद उच्यते तेन तेन हेतुना मया भेद एव अवगम्यते इत्यत आह—**अत्रेति**। अत्र अस्मिन् अविकल्पाविकल्पे तुर्यतुर्ये तदतिरेकेण जाग्रज्जाग्रदाद्यविकल्पानुज्ञैकरसान्तकलना सत्यत्वेन व्यावहारिकत्वेन प्रातिभासिकत्वेन वा न हि काचन भिदाऽस्ति। चकारतस्तुर्यतुर्यस्य निष्प्रतियोगिकता द्योत्यते। तथाविधे **अत्र** यः कोऽपि **भिदामिव मन्यमानः** आभासतोऽपि मन्वानः **शतधा सहस्रधा भिन्नो** विशकलितमतिर्भूत्वा **सोऽयं जन्तुः मृत्योः** संसारात् पुनः **मृत्युं** संसारं **आप्नोति** प्रतिजन्मायं नीचनीचतरनीचतमयोनिमधिगच्छतीत्यर्थः। **तदेतदद्वयं** अपह्नोतव्यद्वैतकलनाविरळं **स्वप्रकाशं** चिन्मात्रं **महानन्दं** अपरिच्छिन्नानन्दकूटं **आत्मैव** स्वमात्रमेव न त्वन्यत् **एतदमृतमित्यादिरहस्यमित्यन्तं** व्याख्यातम्॥ ५॥

इत्यष्टमः खण्डः

नवमः खण्डः

अद्वयात्मजिज्ञासा

देवा ह वै प्रजापतिमब्रुवन्निममेव नो भगवन्नोंकारमात्मान-मुपदिशेति॥ १॥

एवंरूपनिष्प्रतियोगिकतुर्यतुर्यात्मनि भेदबुद्धिनिमित्तं किमिति तदियत्ताप्रतिपित्सया देवाः पुनः पृष्टवन्तः इत्याह—**देवा इति**। **देवा ह वै प्रजापतिमब्रुवन्** इति व्याख्यातम्। यज्जाग्रज्जाग्रदादिचतुष्पञ्चदशकलनापह्नवसिद्धं

इममेवोङ्काराग्रविद्योतं तुर्यतुर्यं आत्मानमुपदिशेति हे भगवन् नोऽस्मभ्यं कृपया अनुग्रहं कुर्विति यर्थः ॥ १ ॥

अद्वयात्मस्वरूपम्

तथेत्युपद्रष्टाऽनुमन्तैष आत्मा नृसिंहश्चिद्रूप एव । अविकारो ह्युपलब्धः सर्वस्य सर्वत्र न ह्यस्ति द्वैतसिद्धिरात्मैव सिद्धोऽद्वितीयः ॥ २ ॥

निर्विशेषविशेषनिमित्तबुभुत्सुभिः देवैः एवं पृष्टः प्रजापतिः तेषां प्रश्नमङ्गीकृत्य **तथेत्याह** । **उपद्रष्टेति**—स्वसामीप्येन स्वातिरिक्तेयत्तां स्वमात्रतया यः पश्यति सोऽयं **उपद्रष्टा** । कथमयमुपद्रष्टा इत्यत आह—**अनुमन्तेति** । **अनुमन्ता** स्वातिरिक्तं किमपि नेतीत्यनुमोदयितेत्यर्थः । कोऽयमेवंविधः इत्यत्र—योऽयं निष्प्रतियोगिकाविकल्पतया प्रसिद्धः स एष तुर्यतुर्यात्मा **नृसिंहः** स्वातिरिक्तभ्रमासुरहिंसकत्वात् । तस्य सविशेषत्वाशंकायां अयं **चिद्रूप एव** चिन्मात्रत्वात् । उपद्रष्ट्रादित्वे विकारित्वं स्यात् इत्यत आह—**अविकार** इति । स्वातिरिक्तं नेतीत्युपद्रष्टुः अनुमन्तुः सर्वविकारास्पृष्टब्रह्मरूपत्वात् । यद्वा—स्वविकल्पित-**सर्वस्योपलब्धिः** तदियत्तादृष्टिः अविकारः इत्यर्थः, तत्र आत्मात्मीयाभिमानाभावात् । आत्मात्मीयभावास्पदस्वातिरिक्तमेव नास्तीत्याह—**न ह्यीति** । देशकालाद्यवच्छेदेन **सर्वत्र न ह्यस्ति द्वैतसिद्धिः** सर्वस्याद्वैतात्मकत्वात् । द्वैतासिद्धौ न कोऽपि सिद्धिपदं भजतीत्यत आह—**आत्मैवेति** । आत्मसिद्धेः अनात्मापह्नवपूर्वकत्वात् । यतः एवं अतः अयमात्मा निष्प्रतियोगिकाद्वितीयः परमाद्वैतत्वात् ॥ २ ॥

ब्रह्माभिन्ना माया

मायया ह्यन्यदिव । स वा एष आत्मा पर एषैव सर्वम् । तथा हि प्राज्ञे सैषाऽविद्या जगत् सर्वम् । आत्मा परमात्मैव । स्वप्रकाशोऽप्यविषयज्ञानत्वाज्जानन्नेव ह्यन्यत्रान्यन्न विजानात्यनुभूतेः ॥ ३ ॥

एवं चेत् स्वातिरिक्तभेदप्रतीतेः किं मूलं इत्यत आह—**मायया इति**। **मायया** स्वरूपशून्यया **स्वान्यद्वैतमिव**, न वस्तुतः, द्वैतस्य निष्प्रतियोगिकाभावरूपत्वात्। स्वाज्ञदशायां यद्यत् द्वैतजातं विभातं तत्तत्सर्वं **एष परमात्मैव**। **एषैवेत्यत्र** एष एव **सर्वं** आधाराधेययोरैक्यात्, "हरिरेव जगत् जगदेव हरिः" इति स्मृतेः। द्वैतस्य संसारावस्थायामनुभूतत्वात् सत्यता स्यादिति चेत्—न; [1]संसारिस्वापादावदर्शनात्। नहि द्वैतं सत्पदमर्हति। यदुक्तं तदुपपादयति—**तथा हीति**। संसारदशायामपि तथैवोपलभ्यते। सुषुप्त्यवस्थामापन्ने प्राज्ञे न हि द्वैतमुपलभ्यते। द्वैतस्याविद्यमानत्वात् अनुपलब्धिः युक्तेत्यर्थः। तथा सति कथं द्वैतमुत्तिष्ठति इत्यत आह—**सैषेति**। या स्वरूपशून्या **सैषा अविद्या** अहमज्ञः इत्यादिप्रत्यक्षसिद्धा स्वाज्ञानरूपिणी स्वज्ञानावसाना वटबीजसमा कार्यरूपेण चेतनाचेतनात्मकजगद्रूपतया दृश्यते। वस्तुतः इयं अविद्यमानेत्यर्थः। स्वापादावप्यविद्याकार्यानुपलब्धा परमात्मनो भिन्न इत्यत आह—**आत्मा परमात्मैवेति**। "एष सर्वेश्वरः" इति श्रुतितः यदुक्तं प्राज्ञेश्वरयोरैक्यं तदेवोपपादयति—**स्वप्रकाश** इति। यथा स्वप्रकाशोऽपि सर्वेश्वरः प्रळयादौ **अविषयज्ञानत्वात्** स्वाज्ञदृष्ट्या **अन्यत्र अन्यदस्तीति जानन्नपि** स्वदृष्ट्या स्वातिरिक्तं किमपि **न जानाति** तथा स्वयंप्रकाशोऽपि प्राज्ञः स्वापादौ स्वाज्ञानवृत्तिं जानन्नपि स्वप्नादिव्यावृतिहेतुविक्षेपवृत्तिं न जानाति विषयाभावान्न जानातीत्यर्थः। अज्ञस्य ज्ञत्वं कुतः? इत्यत्र विषयाभावेऽपि **अनुभूतेः** सत्त्वात्। अन्यथोत्थितस्य एतावन्तं कालं सुखमहमस्वाप्सं न किंचनावेदिषं इति परामर्शो न स्यात् इत्यभिप्रायः॥ ३॥

मायास्वरूपम्

माया च तमोरूपाऽनुभूतिः। तदेतज्जडं मोहात्मकमनन्तमिदं रूपमस्यास्य व्यञ्जिका नित्यनिवृत्ताऽपि मूढैरात्मैव दृष्टाऽस्य सत्त्वमसत्त्वं च दर्शयति सिद्धत्वासिद्धत्वाभ्यां स्वतन्त्वास्वतन्त्वत्वेन ॥४॥

[1] असंसारि—उ १.

दर्शनादर्शनात्मकमिदं सर्वं यथा जागरणादौ प्रतीयते तथा स्वापादावपि प्रतीयतां आविद्यकाविशेषात् इत्यत आह—**माया चेति**। शक्तिद्वयात्मिकेयं माया स्वापादौ विक्षेपविरळाऽपि आवरणात्मिका (न) **दृश्यते** जागरणादौ विक्षेपवृत्तितया दृश्यत इत्यर्थः। विक्षेपावरणात्मिकेयं कथं आवरणरूपैव इत्यत आह—**अनुभूतिरिति**। स्वापादौ विक्षेपानुभवमन्तरेण आवरणानुभवस्य सिद्धत्वात्। तत्र विप्रतिपन्नस्य किंचिदालम्बनं भवति। **तदेतदृश्यं जडं महामोहात्मकं** स्वाज्ञानावरणं **अनन्तं** आत्मज्ञानस्थायित्वादानन्त्यं आपेक्षिकम्। अत एव एतद्वास्तवमिति चेत्—न; नरविषाणवत् दुर्लभत्वात्। प्रतीयमानत्वे सति कालत्रयेऽप्यविद्यमानत्वं मायातत्कार्यलक्षणमिति संप्रदायविदो वदन्ति। श्रुतिस्तु तन्न सहते कालत्रयासत्त्वमेव महीकरोति "सन्मात्रमसदन्यत्", "ब्रह्ममात्रमसन्नहि", इत्यादि। **इदं रूपं अस्य** मायाकार्यस्य अभिव्यञ्जिका कारणं माया इत्यनुवर्तते। यदिदं मायातत्कार्यमात्मनि वर्तते ततः मुमुक्षुभिः एतन्निवर्तने महान् प्रयत्नः करणीयः। न चासौ क्रियमाणोऽपि सिध्यति। न हि शतक्रतुरप्याकाशं मूर्तीकर्तुं पारयति। न हि पारमहंस्यधर्मपूगवदनुष्ठितवेदान्तश्रवणादिकमपि फलवत् भवितुमर्हति इत्यत आह—**नित्येति**। **नित्यनिवृत्ताऽपि मूढैरात्मैव द्रष्टा**। नहि निष्प्रतियोगिकचिन्मात्रे स्वाविद्यातत्कार्यमस्ति। नहि प्रचण्डमार्तण्डं तमःस्तोमः स्पृशति। ततः सेयं चिन्मात्रान्नित्यनिवृत्तेव निवृत्ता। न हि वस्तुतो विद्यमाना सती निवर्तते, अविद्याया अविद्यमानत्वात् "अविद्यमानैवाविद्या वस्तुतत्त्वविचारिणाम्" इति स्मृतेः। व्यावहारिकादिदृष्ट्या स्वाविद्यानिवृत्तिसत्त्वात् मोक्षोद्योगः सफलो भवितुमर्हति। मूढैरात्मैव द्रष्टेत्यवधृतं, अहं अज्ञो मनुष्यः इत्याद्यनुभवात्। **अस्य** आविद्यकप्रपञ्चस्य **सत्त्वमसत्त्वं च दर्शयति**, व्यावहारिकादिदृष्ट्या सत्त्वं पारमार्थिकदृष्ट्या असत्त्वं, तत् कथं? इत्यत आह—**सिद्धत्वासिद्धत्वाभ्यामिति**। यत्र इदं कार्यं निष्पन्नं इति बुद्धिः जायते तत्र सिद्धत्वेन सत्त्वं दर्शयति। सिद्धत्वासिद्धत्वमपि किं निमित्तं इत्यत आह—**स्वतन्त्रास्वतन्त्रत्वेनेति**। कर्तुमकर्तुमन्यथाकर्तुं सामर्थ्यं स्वतन्त्रत्वं, तद्विपरीतं अस्वातन्त्र्यम् ॥ ४ ॥

मायाकार्यम्

सैषा वटबीजसामान्यवदनेकवटशक्तिरेकैव । तद्यथा वटबीज-सामान्यमेकमनेकान् स्वाव्यतिरिक्तान् वटान् सबीजानुत्पाद्य तत्र तत्र पूर्णं [1]सत्तिष्ठत्येवमेवैषा माया स्वाव्यतिरिक्तानि पूर्णानि क्षेत्राणि दर्शयित्वा जीवेशावाभासेन करोति माया चाविद्या च स्वयमेव भवति ॥ ९ ॥

यस्याः स्वाज्ञस्वज्ञदृष्टिभ्यां मायायाः स्वतन्त्रास्वतन्त्रत्वे भवतः सैषा म वटबीजसामान्यवत् राजसर्षपतुल्यासु वटधानासु मिथो भिन्नासु कार्याक रूपासु वटधानासामान्यमकार्यमेकं तद्वत । अविद्याबीजसामान्यस्वरूपमाह- अनेकेति । अनेकवटशक्तिः सर्वत्र अनेकवटोत्पादनसामर्थ्यं एकैव सर्वत्रैकरू नत्वनेका । तत् तत्र वटबीजशक्तेः ऐक्ये व्यवस्थिते स्वाविद्यायामपि तद्व दृष्टान्तः । यथा दृष्टान्ते वटबीजसामान्यं उक्तं एकं निर्भेदं अनेका अनन्तान् स्वाव्यतिरिक्तान् सबीजान् वटान् उत्पाद्य तत्र तत्र बीजेषु सत् पूर्वभावमेत्य तिष्ठति एवमेवैषा माया स्वाव्यतिरिक्तानि पूर्णानि क्षेत्रा चतुर्विधप्राणिस्थूलसूक्ष्मादिशरीराणि दर्शयित्वा अभिव्यक्तीकृत्य प्राणाधारतां यामकतया जीवेशाद्वाभासेन करोति । न केवलं तावेव करोति, किं तु मा चाविद्या च स्वयमेव भवति ।चकारद्वयं मायाऽविद्याऽतिरेकेण अनेकभिदां सहते ॥ ९ ॥

आत्मत्रैविध्यम्

सैषा चित्रा सुदृढा ब्रह्मङ्कुरा स्वयं गुणभिन्नाऽङ्कुरेष्वपि गुणभिन्ना सर्वत्र ब्रह्मविष्णुशिवरूपिणी चैतन्यदीप्ता तस्मादात्मन एव त्रैविध्यं सर्वत्र योनित्वमपि ॥ ६ ॥

[1] स ति—अ, अ १, क. संति—अ २.

जीवेशावित्र त्रयाद्वैविध्यमस्तु, तथा सति कथं कार्यवैषम्यं इत्यत आह—सैषेति । सर्वभेदशून्यतया योक्ता सैषा एकाऽपि स्वभावानेकशक्तितया चित्रा अनन्तकोटिजन्मनानावासनाभिः सुदृढा बद्धङ्कुरा विविधकार्यरूपेण नानाऽङ्कुराकारा । यदि स्वयं कारणतया ब्रह्मवदेकरूपा तदा कथं चित्रता इत्यत आह—स्वयमिति । गुणसाम्यप्रकृत्यात्मना स्वयमेकाऽपि विविधकल्पाश्रयसत्त्वादि गुणत्रयतो भिन्ना भेदमुपगता स्वयं गुणभिन्ना अङ्कुरेष्वपि कार्येषु गुणभिन्ना गुणैः भेदं नीता । तस्याः प्रधानकार्याण्याह—सर्वत्रेति । सर्वत्र जगतः स्रष्टा ब्रह्मा, तत्पालको विष्णुः, तत्संहारकृच्छिवः; इति प्रधानरूपाणि यस्याः सा ब्रह्मविष्णुशिवरूपिणी । जडप्रकृतेः कार्यहेतुत्वं कुतः ? इत्यत आह—चैतन्यदीप्तेति । अग्निप्रतप्तायःपिण्डवत् स्वाधिष्ठानचैतन्यदीप्ता ब्रह्मादिप्रधानं कार्यवती । यस्मादियं अग्निप्रतप्तायःपिण्डवत् स्वाधिष्ठानचैतन्यदीप्तेत्युक्ता—न ह्ययःपिण्डो दहति किं तु अयःपिण्डतया गृहीतोऽग्निरेव दहति, एवं अयमात्माऽपि अविद्यावशात् अविद्यात्वेन गृहीतः सर्वकार्यक्षमो भवति—तस्मादात्मन एव त्रैविध्यं ब्रह्मविष्णुशिवरूपेण त्रिविधत्वम् । सर्वज्ञेति देशकालवस्तुसर्वस्वोपलक्षणार्थम् । योनित्वं कारणत्वम् । अपिशब्दादुक्तमनुक्तं च व्यवहारजातं आत्मचैतन्यप्रकाशतया क्रियमाणम् ॥ ६ ॥

जीवेशभेदः

अभिमन्ता जीवो नियन्तेश्वरः । सर्वाहंमानी हिरण्य-
गर्भस्त्रिरूप ईश्वरवद्व्यक्तचैतन्यः सर्वगो ह्येष ईश्वरः क्रियाज्ञानात्मा ।
सर्वे सर्वमयं सर्वे जीवाः सर्वमयाः सर्वावस्थासु तथाऽप्यल्पाः ॥७॥

आत्मन एव जीवेशावाभासेन करोतीत्युक्तं, तयोः किं स्वरूपं इत्यत आह—अभिमन्तेति । कार्यकरणसंघाताभिमानी जीवः प्राणानां धारयिता नियम्यः । चराचरात्मकजगतो नियन्ता ईश्वरः । अहंमानी पूर्णाहंभावो निरावृतस्वतत्त्वः हिरण्यगर्भ एवेश्वर इत्याशंक्य नेश्वरोऽयमित्याह—सर्वेति ।

जीववत् सर्वस्मिन् कार्येऽहमित्यभिमानवान् ब्रह्मादिरूपेण त्रिरूपः । किं निमित्तेयमस्मिन्नीश्वरबुद्धिः इत्यत आह—**ईश्वरवद्व्यक्तचैतन्य** इति । यथा साक्षादीश्वरः सच्चिदानन्दात्मा तद्वदयमपीत्यर्थः । किं तु व्यष्ट्यभिमानिजीववदस्य समष्ट्यभिमानित्वात् ईश्वरावरत्वं, ईश्वरस्तु सर्वत्र आत्मात्मीयाभिमतिविरळः, न कदाऽप्ययं जीवकोटौ प्रविशति । यतः एवं अतः अयं हिरण्यगर्भः जीवः ईश्वरश्च इत्युभयथाऽपि वक्तुं शक्यते । इदानीं अस्मिन्नीश्वरगुणमाह—**सर्वग इति** । **हि** यस्मात् **एष** हिरण्यगर्भः सर्वव्यापी अतोऽयं **ईश्वरः** । इदानीमस्य स्वरूपमाह—**क्रियाज्ञानात्मेति** । बाह्यान्तःकरणाभिमानीत्यर्थः । यथा मधुब्राह्मणे आम्नातम्—"इयं पृथिवी सर्वेषां भूतानां मधु अस्यै पृथिव्यै सर्वाणि भूतानि मधु" इत्यादि । तथा **सर्वं सर्वमयं** कार्यं कारणं च अचेतनं, किंतु चेतनमपीत्याह—**सर्व इति** । **सर्वे जीवाः** प्राणानां धारणात् **सर्वमयाः** सर्वात्मकत्वात् । न च जाग्रज्जाग्रदाद्यन्यतमावस्थायामिति मन्तव्यम्, किं तु जाग्रज्जाग्रदादिसर्वावस्थासु । तत्र को वा हिरण्यगर्भः ? के वा जीवाः ? इत्यत आह—**तथाऽपीति** । यद्यपि सर्वे सर्वस्वरूपाः तथाऽपि हिरण्यगर्भेश्वरवत् सर्वकारणकार्यात्मबुद्धिविकलान्तःकरणाभिमानिनः अल्पाः, ईश्वरादेः निरभिमानत्वादनल्पत्वमित्येतदुपपन्नम् ॥ ७ ॥

आत्मनः सृष्टौ प्रवेशः

स वा एष भूतानीन्द्रियाणि विराजं [1]देवताः कोशांश्च सृष्ट्वा प्रविश्यामूढो मूढ इव व्यवहरन्नास्ते मायय्यैव तस्मादद्वय एवायमात्मा सन्मात्रो नित्यः शुद्धो बुद्धः सत्यो मुक्तो निरञ्जनो विभुरद्वयानन्दः परः प्रत्यगेकरसः प्रमाणैरेतैरवगतः ॥ ८ ॥

प्रसक्तानुप्रसक्तं च प्रतिपादितं, प्रकृते तैः यत् पृष्टं तन्निगमयति—**स वा इति** । यो हि जीवेशहिरण्यगर्भादिशब्दाभिधेयः उक्तः **स वा एष** परमात्मैव

[1] देवतां च सृ—अ, अ १, अ २, उ १.

स्वाविद्याव्यष्टिसमष्टिस्थूलाद्यंशावष्टंभतः कार्यकारणात्मकपञ्चीकृतापञ्चीकृतभूतानि क्रियाज्ञानशक्तिरूपाणि बाह्यान्तःकरणसहितानि सूक्ष्मशरीराणि **विराजं** स्थूलभूतेन्द्रियशरीरजातं सावरणाविद्याऽण्डगोळकरूपं तत्रात्मात्मीयाभिमानयोगायोगाभ्यां विश्वविश्वाद्यविकल्पानुञ्जैकरसान्तप्रयोजनकं वागादिकरणकलापाधिष्ठात्र्यग्न्यादिका **देवताः** अन्नादिपञ्चकोशान् प्रत्यगादिप्रकाशावरणप्रयोजकान् **चकारा**दन्यदपि व्यक्ताव्यक्तरूपं **सृष्ट्वा** उत्पाद्य स्वेन रूपेण सर्वत्र प्रविष्टोऽपि स्वोत्पादितेषु **प्रविश्य** स्वयं **अमूढो** निरावृतोऽपि **मूढ इव व्यवहरन्नास्ते** स्वातिरिक्तविश्वोत्पत्त्यादिलीलां कुर्वन् वर्तत इव वर्तते। ईश्वरेणैवं वर्तितत्वात् तद्वास्तवमित्यत आह—**माययैवेति**। न तु वस्तुतः। एवं कल्पनाहेतुमायायाः शशविषाणवदवस्तुत्वात् तत्कार्यकल्पनाया अपि स्वकारणतुल्यत्वाच्च यदेतदुक्तमनुक्तं चैतत्सर्वं यदि प्रसक्तं तदत्यन्ताभावरूपं इत्यत्र—

सिद्धान्तोऽध्यात्मशास्त्राणां सर्वापह्नव एव हि।
नाविद्याऽस्तीह नो माया शान्तं ब्रह्मेदमक्रमम्॥

इति,

मायाऽविद्याऽज्ञानविश्वाभावान्तःकरणादयः।
ब्रह्मातिरिक्तपर्याया ह्यत्यन्ताभावरूपिणः॥

इति श्रुतेः, परमाक्षरोक्तेश्च। यस्मादेवं **तस्मात् अद्वय एवायमात्मा** स्वातिरिक्तानात्मापह्नवसिद्धात्मनो निष्प्रतियोगिकाद्वैतरूपत्वात्। निष्प्रतियोगिकाद्वितीयात्मसिद्धौ किं मानं इत्यत्र श्रुतिरेव मानमित्याह—**सन्मात्र इत्यादि**। **सन्मात्रः** असदपह्नवसिद्धत्वात्। तथा च वक्ष्यति—"सन्मात्रमसदन्यत्" इति। सन्मात्रत्वं आगन्तुकमित्यत आह—**नित्य** इति। प्रच्युत्युपलक्षित-[ता]सत्तावैरळ्यात्, पारमार्थिकनित्य इत्यर्थः। तथा अशुद्धतूलाविद्यावैरळ्यात् **शुद्धः**। जडाविद्यायोगतो जडत्वं स्यादित्यत आह—**बुद्ध इति**। जडमायायोगस्य दुर्लभत्वात् स्वयंप्रकाशः इत्यर्थः। बोधवृत्तियोगादसत्यत्वं स्यादित्यत आह—**सत्य इति**। असत्यवृत्त्यसंभवात् पारमार्थिकसत्य इत्यर्थः। स्वाविद्यातत्कार्यतो बद्ध इत्यत आह—**मुक्त इति**। यदि स्वाज्ञदृष्टिप्रसक्ताऽविद्या स्वज्ञदृष्ट्या मुक्त

इत्यर्थः । तथा **निरञ्जनः** स्वातिरिक्ताञ्जनायोगात् । तथा **विभुः** त्रिपरिच्छेद-शून्यत्वात् । तथा **अद्वयानन्दः** अखण्डानन्दरूपत्वात् । तथा **परः** सर्वस्मात् परत्वेन निरतिशयत्वात् । **प्रत्यगेकरसः** प्रत्यग्रसाभिन्नपररसरूपत्वात् । एवं प्रत्यगेकरसः परमात्मा कथमवगम्यते इत्यत आह—**प्रमाणैरेतैरवगत इति** । प्रमाणभूतेशाद्यष्टोत्तरशतवेदान्तैरेव स्वाङ्गदृष्टिविकल्पितातदपह्नवमुखेनैव अवगतः न विपर्यय इत्यर्थः ॥ ८ ॥

सत्तामात्रं ब्रह्म

सत्तामात्रं हीदं सर्वम् । सदेव पुरस्तात् सिद्धं हि ब्रह्म । न ह्यत्र किंचनानुभूयते । नाविद्याऽनुभवात्मनि स्वप्रकाशे सर्वसाक्षिण्य-विक्रियेऽद्वये । पश्यतेहापि सन्मात्रमसदन्यत् । सत्यं हीत्थं पुरस्तादयोनि स्वात्मस्थमानन्दचिद्घनं सिद्धं ह्यसिद्धम् ॥ ९ ॥

चराचरात्मकप्रपञ्चे सति कथं एवं अवगतः इत्यत आह—**सत्तामात्रं हीदं सर्वमिति** । **इदं** परिदृश्यमानं जगत् **सत्तामात्रं हि** जगतः स्वसत्ताऽतिरिक्त-सत्तावैरळ्यात् । इदं सत्तामात्रमस्तु, ब्रह्मणः किमायातमित्यत आह—**सदेव पुरस्तात् सिद्धं हि ब्रह्मेति** । यस्मात् इदं जगत् उत्पत्तेः पूर्वं सदेकस्वभावं तस्मात् इदं ब्रह्मरूपं इति सिद्धम् । न हि पूर्वं ब्रह्मान्तरेण किंचिदासीत् । न चेदं पूर्वस्वभावं परित्यजति, स्वप्रकृतिवैपरीत्यस्य भावानामदृष्टचरत्वात्,

अजातं जायते यस्मादजातिः प्रकृतिस्ततः ।
प्रकृतेरन्यथाभावो न कथं चिद् भविष्यति ॥

इति श्रीगौडपादाचार्योक्तेः । तर्कसहस्रमपि प्रत्यक्षपराहतमित्यत आह—**न हीति** । **न ह्यत्र** अस्मिन् ब्रह्मणि **किंचन** किंचिदपि द्वैतं तदुज्जीवकप्रत्यक्षादिर्वा **अनुभूयते** । स्वात्मावगत्युपायतया विद्या अङ्गीकार्या इत्यत आह—**नेति** । **स्वानुभूति**-प्रमाणसिद्धे **स्वात्मनि** न हि **स्वाविद्या** तत्कार्यं तत्प्रतियोगिसाधनसंपत्तिर्वा

सहसा प्रभवति। अविद्याया असत्त्वे हेतूनुपन्यस्यति—**स्वप्रकाश** इत्यादि। यत् परप्रकाशापेक्षं यत् साक्ष्यं यत् सक्रियं यत् द्वैतजातं तत्र अविद्या तत्कार्यं वा विलसतु। न हि तत्प्रतियोगिनि साधनान्तरमनपेक्ष्य स्वयंप्रकाशे स्वाङ्गदृष्टि-प्रसक्तसाक्ष्यसत्त्वे तन्निरूपितसर्वसाक्षिणि विक्रियाजातविरळे **परमाद्वये** स्वाविद्या तत्कार्यं असत्प्रपञ्चजातं वा प्रभवति, सन्मात्रातिरिक्ताविद्यातत्कार्यस्य असत्त्वात्। अहो स्वाङ्गलोकाः प्रत्यक्चक्षुषा वस्तुयाथात्म्यं पश्यतेत्याह—**पश्यतेति**। हे देवाः यूयं **पश्यत** प्रत्यक्चक्षुषा अवलोकयत। कदेत्यत्र **इहापि**। पुरा भवदनुभूतसंसारदशायामपि घटोऽस्ति पटोऽस्ति इति यद्यत् अस्तित्वेन अभिमतं तत्तत् **सन्मात्रं** सत्तासामान्यरूपं यत् तद्विपरीतं नेति नेति इत्यवधृतं तत् **असदेव** शशविषाणकल्पम्। यतः एवं अतः निष्प्रतियोगिकसन्मात्रमेव ब्रह्म तदतिरिक्तं न ह्यस्ति। यद्यस्तीति भ्रान्तिः तदा तदसदेव इत्यत्र—

चिन्मात्रमेव चिन्मात्रमखण्डैकरसं रसम्।
सर्ववर्जितचिन्मात्रं ब्रह्ममात्रमसन्न हि॥

इति श्रुतेः। उक्तार्थे हेतुमाह—**सत्यमिति**। हि यस्मात् **इत्थं** अविशेषितघटपटादिभेदजातं सत्तासामान्यमेव सत्यं अनृतघटादिप्रपञ्चापह्नवसिद्धत्वात्। तत् किं सर्वकारणं इत्यत आह—**पुरस्तादयोनीति**। पुरस्तात् प्रपञ्चसृष्टेः प्रागिति कालत्रयोपलक्षणार्थम्। सर्वकालेऽप्येतत् **अयोनि** अकारणं, कार्यसामान्यस्य वस्तुतः शशविषाणवदसत्त्वात् अयोनित्वं निरङ्कुशं इत्यर्थः। अस्त्वेतदयोनि, तदधिकरणं किं इत्यत आह—**स्वात्मस्थमिति**। स्वे महिम्नि स्वात्मन्येव निष्प्रतियोगिकस्वमात्रतया तिष्ठति, न तस्याधिकरणं किंचिदस्तीत्यर्थः। स्वान्यत्र निवासस्थलाभावात् स्वस्मिन् स्वस्थित्या गुरुभारपीडितत्वाच्च बहुळतरदुःखं स्यादित्यत आह—**आनन्दचिद्घनमिति**। भूमब्रह्मणः परिच्छिन्नत्वे मूर्तत्वे च स्यादेव भवदुक्तदोषद्वयं, न हि तदस्ति परिच्छिन्नमूर्तामूर्तकलनाबाह्यत्वात्, सच्चिदानन्दघनं तदित्यर्थः, "सत्यं ज्ञानमनन्तं ब्रह्म" इति श्रुतेः। यदैवं निष्पन्नं तदा अनित्यत्वं स्यादित्यत आह—**सिद्धं ह्यसिद्धमिति**। स्वत एव

सिद्धं साधनान्तरेण असिद्धम् । यतः स्वेनैव निष्पन्नं अतः निष्प्रतियोगिक-नित्यमित्यर्थः । सन्मात्र इति पुँल्लिङ्गत्वेनोपक्रम्य सदित्यादिना नपुंसकत्वेन निर्दिष्टम् । पुँल्लिङ्गतो मन्त्रराजार्थः परमात्मा नृसिंहो विशेष्यते, नपुंसक-लिङ्गतः प्रणवार्थतुर्यतुरीयं ब्रह्म । तयोरपि स्वरूपतः एकत्वात् न विरोधः ॥ ९ ॥

सर्वस्य आत्ममात्रत्वम्

तद्विष्णुरीशानो ब्रह्मान्यदपि सर्वं सर्वगतं सर्वमत एव । शुद्धोऽबाध्यस्वरूपो बुद्धः सुखस्वरूप आत्मा । न ह्येतन्निरात्मकमपि नात्मा पुरतो हि सिद्धः । न हीदं सर्वं कदाचित् । आत्मा हि स्वमहिमस्थो निरपेक्ष एक एव साक्षी स्वप्रकाश ॥ १० ॥

तत् तदेव ब्रह्म मूलाविद्यासूक्ष्मांशयोगतो विष्णुः स्थितिहेतुत्वात् । तद्बीजांशयोगतः ईशानो नियन्ता संहारहेतुत्वात् । तत्स्थूलांशयोगतो ब्रह्मा चतुराननः सृष्टिहेतुत्वात् । अन्यदपि उक्तेभ्यो व्यतिरिक्तं चेतनाचेतनात्मकं सर्वं स्वाज्ञदृष्टिप्रसक्तसर्वगतं सर्वं अत एव यतः सर्वगतं ब्रह्म । निर्विशेषं सर्वगतं सर्वमिति मेरुसर्षपयोरिव वैषम्यं स्यादिति चेत् स्वाज्ञानसत्त्वासत्त्वाभ्यां सर्वमप्युपपन्नं इति मन्तव्यम् । वस्तुतः सर्वदोषवैरळ्यात् शुद्धः । बाधकाज्ञान-सत्त्वात् शुद्धत्वं कथं इत्यत आह—अबाध्यस्वरूप इति । बाधकाज्ञानाभावात् शुद्धत्वं सिद्धमित्यर्थः । शुद्धत्वादेव बुद्धः पूर्णबोधरूपत्वात् । बोधादप्यानन्दरूपो भिद्यत इत्यत्र यो हि बुद्धः स एव सुखस्वरूपः । न हि परमात्मा जीवः इति मन्तव्यः किं तु अहंप्रत्ययगोचरः प्रत्यगेव शुद्धः । इत्यादिना त्वंपदार्थो वर्णितः, किं तेनेष्टसिद्धिः इत्यत आह—न ह्येतन्निरात्मकमपि नात्मेति । इदं शशविषाणादिकं निरात्मत्वेन प्रसिद्धमपि हि यस्मात् एतदात्मा न भवतीति चेन्न; निरात्मकस्या-प्यात्मनि अध्यस्तत्वेन घटवत् दृश्यत्वात् । न ह्यध्यस्तमधिष्ठानातिरिक्तमस्ति ।

अध्यस्तवस्तु अधिष्ठानरूपमित्यर्थः । निरात्मकस्याप्यात्मत्वे हेतुमाह—**पुरतो हि सिद्ध इति** । हि यस्मात् सर्वस्मात् पुरतो निष्पन्नो वर्तते । सिद्धत्वं सदसतामपि समानमित्यत आह—**न हीदं सर्वं कदाचिदिति** । यथा परमात्मा सिद्धः तथा इदं सदसदात्मकं जगत् न हि कालत्रयसिद्धम् । यदादावन्ते च न विद्यते तन्मध्ये भातमपि नास्त्येव । उत्पत्तेः प्राक् प्रळयानन्तरं च जगन्नोपलभ्यते । तत् स्थितिकाले भातमपि न हि तद्विद्यते, "यन्नादौ यच्च नास्त्यन्ते तन्मध्ये भातमप्यसत्" इति स्मृतेः । तथा जगदिव आत्माऽपि नास्तीत्यत आह—**आत्मेति** । **हि** यस्मात् **आत्मा स्वमहिमस्थः** न जडवत् परतन्त्रः । अत एव **निरपेक्षः** परापेक्षाशून्यः पूर्णानन्दरूपत्वात्, न ह्यानन्दाभिव्यक्तिहेतुतया सापेक्षो भवति । यः एवंविधः सः आत्मा **एक एव** स्वद्वितीयहेत्वभावात् । प्रसक्तसाक्ष्यजातापेक्षया अयं **साक्षी**, वस्तुतः साक्षित्वमप्यस्य न तात्त्विकमित्यर्थः । **स्वप्रकाशः** स्वेनैव प्रकाशितत्वात् ॥ १० ॥

आत्मतः सर्वसिद्धिः

किं तन्नित्यम् । आत्माऽत्र ह्येव न विचिकित्स्यम् । एतद्धीदं सर्वं साधयति । द्रष्टा द्रष्टुः साक्ष्यविक्रियः सिद्धो निरवद्यो बाह्याभ्यन्तरवीक्षणात् सुविस्फुटस्तमसः परस्तात् ॥ ११ ॥

इदानीं लब्धावसराः देवाः पृच्छन्ति—**किं तन्नित्यमिति** । तत् पूर्वोक्तं ब्रह्म **किं नित्यत्वधर्मवत्**, किं धर्मधर्मिभेदविशिष्टं, इदमेव सच्चिदानन्दत्वादीनामप्युपलक्षणार्थम् । एवमुक्तः प्रजापतिराह—**आत्मेति** । अनात्मापह्नवसिद्धोऽयं **आत्मा अत्र** अस्मिन् आत्मनि **एव हि** यस्मात् नित्यत्वादिधर्मजातमस्ति नास्तीति वा न **विचिकित्स्यं**, आत्मनो निष्प्रतियोगिकत्वेन निर्धर्मकत्वात् । यद्येवं निर्विशेषः परमात्मा कथं अस्माभिः अवगन्तुं शक्यः इत्यत आह—**एतद्धीति** । हि यस्मात् **एतत्** आत्ममात्रगोचरज्ञानं तत्तच्चित्तशुद्धिसापेक्षं **सर्वं साधयति** । तत् कथं इत्यत्र घटपटादेः **द्रष्टुः** अन्तःकरणविशिष्टस्य **द्रष्टा** अवलोकयिता । एवं द्रष्टृत्वे सुखदुः-

खसंबन्धः स्यादित्यत आह—**साक्षीति** । यथा लौकिकः साक्षी तथाऽयं तद्वत्सुखदुःखरहित इत्यर्थः । साक्षित्वे साक्ष्यगतविक्रिया स्यादित्यत आह—**अविक्रिय** इति । साक्षिणो निरवयवत्वेन विक्रियाशून्यत्वात् । विक्रियाशून्यत्वे स्वस्यासत्त्व स्यादित्यत आह—**सिद्ध इति** । सर्वदा आत्ममात्रतया निष्पन्नत्वात् । जीवोऽपि तथेत्यत आह—**निरविद्य** इति । अविद्यातत्कार्यशून्यत्वात् जीवात्मनोश्चैतन्यस्य तुल्यत्वे को विशेषः इत्यत आह—**बाह्येति** । सर्वत्र सर्वदा सर्वमहमस्मि इति युगपत् **बाह्यान्तरवीक्षणात्** अवलोकनात्, नैवं जीवोऽवलोकयति । एवं जीवदृष्ट्या स्वाविद्याद्वयतत्कार्यकबळिते प्रपञ्चे कथं अयमहमस्मि इत्यात्मा अवगन्तुं शक्यः इत्यत आह—**सुविस्फुट इति** । गोमहिष्यादिभेदवत् अयमात्मा अयं जीवः इति स्फुटं अवगन्तुं शक्यत्वात् । सुविस्पष्ट इति वा पाठान्तरम् । तत्र प्रतीचो विस्पष्टत्वेन प्रतीयमानत्वात् इति नार्थभेदः । तत्र हेतुः—**तमसः परस्तात्** ॥ ११ ॥

देवानां आत्मदर्शनम्

ब्रूतैष दृष्टोऽदृष्टो वेति । दृष्टोऽव्यवहार्योऽप्यल्पः ॥ १२ ॥

स्वाविद्यापदतत्कार्यतमसः परतः विद्यमानं परमात्मानमुद्दिश्य देवान् प्रत्याह भगवान् प्रजापतिः । किमिति ? हे देवाः यूयं **ब्रूत** वदत । किमिति ? मयोपदिष्ट **एषः** आत्मा भवद्भिः यथावत् **दृष्टोऽदृष्टो वेति** । प्रजापतिना एवं पृष्टाः देवाः ऊचुः—**अव्यवहार्योऽपि** सर्वव्यवहारा[न]र्हतया भवदुपदिष्टः आत्मा अस्माभिः **दृष्टः** आत्मतया अवलोकितः । एवंविदितोऽप्यस्मद्बुद्धिविषयतया **अल्पः**, न हि नाल्पोऽपरिच्छिन्नोऽस्माभिः द्रष्टुं शक्यः ॥ १२ ॥

आत्मनः अनल्पत्वनिरूपणम्

नाल्पः साक्ष्यविशेषोऽनन्योऽसुखदुःखोऽद्वयः परमात्मा सर्वज्ञोऽनन्तोऽभिन्नोऽद्वयः । सर्वदा संवित्तिर्मायया नासंवित्तिः स्वप्रकाशे । यूयमेव दृष्टाः ॥ १३ ॥

एवं तेषां विपरीतज्ञानमवलोक्य प्रजापतिः देवान् प्रत्याह—**नाल्प इति**। भवत्कृते मदुपदिष्टात्मा नाल्पः परिच्छेदत्रयातीतत्वात्। तत्र हेतूनुक्तानुक्तान-प्युपन्यस्यति—**साक्षीत्यादिना**। साक्षी भवद्बोद्धा अवलोकनः। तदवलोकने कश्चनातिशयः स्यादित्याह—**अविशेष इति**। साक्ष्यनिरूपितसाक्षिताऽपाये साक्षिणो ब्रह्ममात्रतया निर्विशेषत्वात्। न हि साक्ष्यप्यन्यो भवितुमर्हति। **अनन्यः** भवदव्यतिरिक्तत्वात्। न चैवं संसारधर्मैरित्याह—**असुखदुःख इति**। अन्तःकरणकार्यसुखदुःखबाह्यत्वात्। तत्र हेतुः—**अद्वय इति**। सापेक्षद्वैता-भावात्। निष्प्रतियोगिकाद्वितीयत्वे हेतुः—**परमात्मेति**। पराक्सापेक्षप्रत्यक्कलना-ऽभावात्। मूलबीजांशयोगतः **सर्वज्ञः** सर्ववित्त्वात् "यः सर्वज्ञः सर्ववित्" इति श्रुतेः। यद्वा—मदतिरेकेण सर्वं नेतीति यो ज्ञाता सोऽयं **सर्वज्ञः** परमात्मेत्यर्थः। अत एव **अनन्तः** त्रिविधपरिच्छेदशून्यत्वात्। ततोऽयं **अभिन्नः** भिदागन्धास-हत्वात्। यदुक्तं तदेव निगमयति—**अद्वय इति**। निष्प्रतियोगिकत्वात्। अद्वयत्वादेव **सर्वदा संवित्तिः** कालत्रयेऽपि संविन्मात्ररूपत्वात्। एवमनुभवतः किं न दृश्यते इत्यत आह—**माययेति**। मायया मायानिमित्तः अहमज्ञ इत्यनुभवः। तत्र हेतुमाह—**नासंवित्तिरिति**। न हि संविन्मात्रे स्वाज्ञानं तिष्ठतीत्यर्थः। द्रष्टुर्दृश्ययोगादल्पता स्यादित्यत आह—**यूयमेव दृष्टा इति**। युष्माभिरेव अयमात्मा दृष्ट इति न तु युष्मद्व्यतिरिक्तः॥ १३॥

द्वितीयाभावोपदेशः

किम्। अद्वयेन द्वितीयमेव न यूयमेव॥ १४॥

इदानीमाक्षिपन्ति किं केन प्रकारेण द्रष्टार एव दृश्यस्वरूपाः। उत्तरमाह—**अद्वयेन** अद्वयत्वेन हेतुना दृश्यस्वरूपं किं दृष्टवन्त इति। ननु अनेनैव हेतुना वस्तुनोऽप्यसत्त्वं किमिति स्वीक्रियत इत्यत आह—**द्वितीयमेवेति**। न तु द्वितीयमेव वस्तु नास्ति, न तु वस्त्वपि विद्यते। यद्वा—द्वयत्वोपपादनं द्वितीयमेव, न द्वितीयं, नह्यसति द्वितीये द्वयं भवति, किं तु अद्वयं, यतोऽद्वयं ततो यदुक्तं **यूयमेवेति** सुस्थितं तदिति निगमयति **यूयमेव** व्याख्यातम्॥ १४॥

देवानां संविद्रूपत्वज्ञानम्

ब्रूह्येव भगवन्निति देवा ऊचुः । यूयमेव । दृश्यते चेन्नात्मज्ञाः । असङ्गो ह्ययमात्माऽतो यूयमेव स्वप्रकाशाः । इदं हि तत् संविन्मयत्वाद्यूयमेव ॥ १९ ॥

इदानीमेवं बोध्यमाना अपि अनाद्यविद्यावासनावशादन्यथाभावं प्रतिपन्नाः पृच्छन्ति—**ब्रूह्येव** । कथं? अनेकसंसारधर्मवन्तो वयं तद्विलक्षणब्रह्मस्वरूपा इत्येतद्यथोपपन्नं भवति तथैव हे **भगवन्** अस्माकं **ब्रूहि इति देवा ऊचुः** । पुरोक्तमेव प्रजापतिराह—**यूयमेवेति** । उक्तस्य किं उत्तरं इत्यत आह—**दृश्यते चेन्नात्मज्ञा इति** । भवद्भिः आत्मनो भिन्नैरात्मा **दृश्यते चेत्** ततो भवन्तो **नात्मज्ञाश्च**, करणग्रामागोचरात्मनो करणग्रामविषयतया गृहीतत्वात् युष्माकमज्ञत्वं सिद्धमित्यर्थः । स्वात्माऽपि करणग्रामसङ्ग इत्यत आह—**असङ्गो ह्ययमात्मेति** । हि यस्मात् **अयं** भवतामात्मा स्वभावतोऽसङ्गः भवतां कर्तृत्वादिधर्मविशिष्टतया प्रतीयते । एवंमात्मा अन्यथा दृष्टः । कीदृशाः वयं इत्यत आह—**यूयमेव स्वप्रकाशा इति** । भवतां साधनान्तरनैरपेक्ष्येण करणग्रामवृत्तिसहस्रप्रवृत्तिनिमित्तत्वेन तद्भावाभावप्रकाशकत्वात् । इदं सर्वं संविदेकस्वभावमिति पूर्वं प्रतिज्ञाय इदानीमस्माकं स्वयंप्रकाशत्वं ब्रूषे, तदिदं पूर्वोत्तरविरुद्धं इत्यत आह—**इदं हीति** । यदिदं भवतां स्वप्रकाशत्वं तदेव हि संविद्रूपत्वं, अतो न प्रतिज्ञाहानिः । स्वप्रकाशसंविदोरेकार्थत्वे हेतुमाह—**संविन्मयत्वादिति** । ततः संविद्यसङ्गोदासीनाः **यूयमेव** ॥ १९ ॥

देवानां आत्मतत्त्वज्ञानख्यापनम्

नेति होचुः । हन्तासङ्गा वयमिति होचुः । कथं पश्यन्तीति होवाच । न वयं विद्म इति होचुः । ततो यूयमेव स्वप्रकाशा इति

होवाच । न च संविन्मया एतौ हि । पुरस्तात् सुविभातमव्यवहार्यमेवाद्वयम् । ज्ञातो वैष विज्ञातः । विदितादविदितात् पर इति होचुः ॥ १६ ॥

प्रजापतिनोक्ता एवममन्यन्त । किमिति ? पूर्वं अस्माभिः कर्तृत्वादिकं आत्मनि गृहीतं, इदानीं तत्त्यागपूर्वकं स्वयंप्रकाशतां गताः । तत्रात्मानं वयं जानीम इति आत्मनि कर्तृत्वाभावेऽपि केवलस्वयंप्रकाशताऽङ्गीकारे तत्रासंभवं मन्यमाना आहुः—**नेति** । नास्माकं स्वयंप्रकाशतेति **होचुः** स्वयंप्रकाशताऽभावेऽपि असङ्गत्वं विद्यत इत्याहुः, **हन्त असङ्गा वयमिति होचुः** । एवमुक्तवतो देवान् स्वयंप्रकाशत्वं बुबोधयिषुः प्रजापतिराह—**कथमिति** । भवन्तः स्वात्मानं केन प्रकारेण **पश्यन्तीति होवाच** । प्रजापतिनैवमुक्ता देवा ऊचुः । किमिति ? करणग्रामागोचरं आत्मानं **न वयं विद्मो** जानीमः **इति** । **ततो यूयमेव स्वप्रकाशा इति होवाच** इत्युक्तार्थम् । संविद्विकाराणां अस्माकं कथं संविद्रूपता ? इत्यत आह—**न च संविन्मया इति** । नैव वयं संविद्विकारा इत्यर्थः । कथं एतदवगम्यत इत्यत आह—**एतौ हीति** । धात्वर्थनिर्देशोऽयं न धातुनिर्देशः ईक्षतेरितिवत्, आत्मावगतौ । परमार्थमुपदिशति—**पुरस्तादिति** । स्वातिरिक्तभ्रमतः **पुरस्तादिति** कालत्रयोपलक्षणार्थम् । कालत्रयेऽपि **ब्रह्म** स्वातिरिक्तापह्नवसिद्धं स्वमात्रतया सम्यग्विभातीति **सुविभातम्** । तत् किं व्यवहारार्हं ? नेत्याह—**अव्यवहार्यमेवेति** । निर्विशेषचिन्मात्रावगतेः सर्वव्यवहारापह्नवपूर्वकत्वात् । उक्तार्थे हेतुः—**अद्वयमिति**। निष्प्रतियोगिकाद्वैतरूपत्वात् । एवं देवानां परमार्थतत्त्वमुपदिश्य पुनरिदानीं पृच्छति—**ज्ञातो वा** भवद्भिरात्मेति । **वा**शब्दद्योतितपक्षान्तरमाह—**विज्ञात इति** । **वि**शब्दो निषेधार्थः । न हि भवद्भिः विज्ञात इत्यर्थः । एवं प्रजापतिना पृष्टाः देवाः स्वात्मनः स्वरूपमवगतानवगतकलनाविरळमाहुरित्याह—**विदितादविदितात् पर इति** । ज्ञातादज्ञातादपि व्यतिरिक्तोऽयमात्मा । वयं तदुभयमपि वक्तुमशक्ता **इति होचुः**, "अन्यदेव तद्विदितादथो अविदितादधि" इति श्रुतेः ॥ १६ ॥

ब्रह्मात्मैक्योपदेशः

स होवाच तद्वा एतद्ब्रह्माद्वयं बृहत्त्वान्नित्यं शुद्धं बुद्धं मुक्तं सत्यं सूक्ष्मं परिपूर्णमद्वयं सदानन्दचिन्मात्रमात्मैवाव्यवहार्यं केन च। तदेतदात्मानमोमित्यपश्यन्तः पश्यत। तदेतत् सत्यमात्मा ब्रह्मैव ब्रह्मात्मैवात्र ह्येव न विचिकित्स्यमित्यों सत्यम्। तदेतत् पण्डिता एव पश्यन्ति ॥ १७ ॥

प्रजापतिः अवगतप्रायान् देवान् मन्वानः पुनराह—**स होवाचेति**। किमिति? यदेतन्मया उच्यमानं **तत्** (?) द्वैतमेव भवद्भिरवगतं न हि तत्र संशयोऽस्ति। किं तत्? **ब्रह्म अद्वयं**, तत्र हेतुः—**बृहत्त्वात्** स्वमात्रतयोपबृंहणात्, ब्रह्मेति बृहिधातोरर्थावगमात्, उक्तार्थमेतत् **नित्यं** इत्यादिपदपञ्चकं, **सूक्ष्मं** करणग्रामागोचरत्वात् **परिपूर्णं** परिच्छेदत्रयशून्यत्वात्, **अद्वयं** उक्तार्थं, **सदानन्दचिन्मात्रं** मिथ्यादुःखजाड्यापह्नवसिद्धत्वात् **आत्मैव** अनात्मापह्नवसिद्धं आत्ममात्रं **अव्यवहार्यं** येन केनापि व्यवहर्तुमशक्यत्वात्। अव्यवहार्यतया यदुक्तं तत् **तच्छब्दार्थः**। **एतच्छब्दस्तु** सर्वप्रत्ययसाक्षिणं परामृशति तदेतच्छब्दार्थं प्रत्यगभिन्नपरमात्मानं **ओमिति** तुर्योङ्काराग्रविद्योततुर्यतुरीयं ब्रह्मास्मीति **अपश्यन्तः** अनवलोकयन्तः सन्तः **पश्यत** अवलोकनं कुरुत। **तत्** शास्त्रैकगम्यं **एतत्** मयोक्तं यच्छ्रुत्याचार्योक्तं तदेव **सत्यं** अवितथार्थत्वात्। तदेव व्याकरोति—**सत्यमात्मा ब्रह्मैव ब्रह्मात्मैवेति**। स्वारोपितब्रह्मताऽनात्मताशान्त्यर्थं व्यतिहारेणोपदेशः। एवमात्मनो ब्रह्मत्वे ब्रह्मण आत्मत्वे च न कदाऽपि **विचिकित्स्यं** असंशयितव्यं **इति** अनेन प्रकारेण निश्चित्य तत ॐ ओङ्काराग्रविद्योततुर्यतुरीयं प्रत्यक्परविभागैक्यकलनाविरळं स्वमात्रमवशिष्यते इति यत्तदेव **सत्यम्**। यदेतत्प्रत्यक्परैक्यनिष्पन्नार्थतुर्यतुरीयं निष्प्रतियोगिकस्वमात्रमिति **पण्डिताः** सम्यज्ज्ञानिन **एव पश्यन्ति**। यत् सर्वापह्नवसिद्धब्रह्ममात्रदर्शनं एतद्धि पाण्डित्यं यत् पण्डितावगतिसिद्धम् ॥ १७ ॥

आविद्यकविशेषनिषेधः

एतद्वचशब्दमस्पर्शमरूपमरसमगन्धमवक्तव्यमनादातव्यमगन्तव्यमविसर्जयितव्यमनानन्दयितव्यममन्तव्यमबोद्धव्यमनहंकर्तयितव्यमचेतयितव्यमप्राणयितव्यमनपानयितव्यमव्यानयितव्यमनुदानयितव्यमसमानयितव्यमनिन्द्रियमविषयमकरणमलक्षणमसङ्गमगुणमविक्रियमव्यपदेश्यमसत्त्वमरजस्कमतमस्कममायमभयमप्यौपनिषदमेव सुविभातं सकृद्विभातं पुरतोऽस्मात् सर्वस्मात् सुविभातमद्वयं पश्यत हंसः सोऽहमिति ॥ १८ ॥

तत्र स्वाज्ञसमर्पितविशेषापह्नवमाह— **अशब्दमित्याद्यसमानयितव्यमित्यन्तेन** । सविषयज्ञानेन्द्रियपञ्चककर्मेन्द्रियपञ्चकान्तःकरणचतुष्टयप्राणादिपञ्चककलना अस्ति नास्तीति विभ्रमोऽपि न हि तुर्यतुर्ये विद्यते, तुर्यतुर्यस्य निष्प्रतियोगिकाद्वैतरूपत्वात् । प्रातिस्विकेन निषेधमुक्त्वा युगपन्निषेधमाह—**अनिन्द्रियमित्यादिना** । **अनिन्द्रियं** ज्ञानकर्मेन्द्रियतद्वृत्तिजातवैरळ्यात् । **अविषयं** भूतपञ्चकतत्कार्यभौतिकास्पृष्टत्वात् । **अकरणं** बाह्यान्तःकरणग्रामविवर्जितत्वात् । **अलक्षणं** जहदादिलक्षणागम्यत्वात् । **असङ्गं** देहेन्द्रियादिसंबन्धाभावात् । **अगुणं** सौष्ठवादिगुणवैरळ्यात् । **अविक्रियं** स्वाङ्गचलनादिरूपक्रियावैरळ्यात् । **अव्यपदेश्यं** नामरूपाभावात् । **असत्त्वं अरजस्कं अतमस्कं** इति सत्त्वादित्रिगुणशून्यं निर्गुणत्वात् । **अमायं** अकपटं यथाभूतार्थरूपत्वात् । **अभयं** भयमूलद्वैतासंभवात् । स्वातिरिक्तद्वैतसामान्याभावे **अपि औपनिषदमेव** ईशाद्यष्टोत्तरशतोपनिषदर्थश्रवणादिनिष्पन्नज्ञानैकगम्यत्वात् । स्वेन रूपेण **सुविभातं** स्वमात्रतया भातत्वात् । **सकृद्विभातं** स्वावृतित्रयरहितं सत् सकृच्चरमसाक्षात्कारतया भातत्वात्, पुनः प्रतीत्यन्तरनिरपेक्षमित्यर्थः । अस्य स्वाविद्यापदतत्कार्यस्य **पुरतोऽस्मात् सर्वस्मात् सुविभातम्** । **अद्वयं** उक्तार्थं **पश्यत** । दर्शनप्रकारमाह—**हंसः सोऽहमिति** । हं त्वंपदार्थः, सः तत्पदार्थः, व्यतिहारस्तयोः एकत्वप्रदर्शनार्थः ॥

देवानां अद्वयात्मानुभवनिर्धारणम्

स होवाच किमेष दृष्टो वेति । दृष्टो विदिताविदितात् पर इति होचुः । कैषा । कथमिति होचुः । किं तेन । न किंचनेति होचुः । यूयमेवाश्चर्यरूपा इति होवाच । न चेत्याहुः । ओमित्यनुजानीध्वं ब्रूतैनमिति । ज्ञातोऽज्ञातश्चेति होचुर्न चैवमिति होचुरिति । ब्रूतैवैनमात्मसिद्धमिति होवाच । पश्याम एव भगवो न च वयं पश्यामो नैव वयं वक्तुं शक्नुमो नमस्तेऽस्तु भगवन् प्रसीदेति होचुः । न भेतव्यं पृच्छतेति होवाच । कैषाऽनुज्ञेति । एष एवात्मेति होवाच । ते होचुर्नमस्तुभ्यं वयं त इति । इति ह प्रजापतिर्देवाननुशशासानुशशासेति ॥ १९ ॥

देवान् प्रत्येवमुक्त्वा **स** प्रजापतिः **उवाच ह** किल । किमिति ? **किमेष दृष्टोऽदृष्टो वेति । दृष्टो विदिताविदितात् परः इति होचुः** इत्ययमर्थः केनोपनिषद्विवरणे सम्यक् प्रपञ्चितः । तैरेवमुक्तः प्रजापतिराह—**कैषेति । एषा** स्वात्मसंवित् **क** कुत्र वर्तते । प्रजापतिना एवं बुद्धिपरीक्षार्थं पृष्टाः प्रजापत्यनुग्रहसिद्धस्वानुभूतिं प्रकटयन्तः उत्तरं ददुरित्याह—**कथमिति होचुरिति । कथं** केन प्रकारेण स्वमहिमस्थां संविदमुद्दिश्य तदाधारं पृच्छतीति शेषः । पुनरपि तेषां बुद्धिपरीक्षार्थं प्रजापतिः पृच्छति—**किं तेनेति** । तेन स्वमहिम्नि प्रतिष्ठितेनात्मना साक्षात्कृतेन किं प्रयोजनमिति प्रजापतिना पृष्टा देवाः ब्रह्मभावापत्त्यनन्तरं न किमपि प्रयोजनान्तरं अस्तीत्याहुरित्याह—**न किंचनेति होचुरिति** । तैरेवमुक्तः पुनः प्रजापतिराह—**यूयमेवेति** । हे देवाः **यूयमेव आश्चर्यरूपाः** स्वात्मैवाश्चर्यरूपः, 'आश्चर्यो वक्ता' इत्यादि, "आश्चर्यवत् पश्यति" इत्यादि च श्रुतिस्मृतिप्रकटितपरमात्मैव आश्चर्यरूपः, स एव भवन्त इत्यर्थः । **इति होवाच** प्रजापतिः । तेनैवमुक्ताः तत्त्वंपदार्थभेदमपश्यन्त इवोत्तरमाहुरित्याह—**नचेत्याहु-**

रिति। नैवात्र द्वयमस्ति येन वयं तत्स्वरूपं, किं तु तत्स्वरूपमेवेति। तैरेवमुक्तः पुनराह—**ओमित्यनुजानीध्वमिति**। यदि भवतां एवं परमार्थनिश्चयस्तदा नचेत्येवमादिनकारं परित्यज्य ओमित्येवानुज्ञां भवन्तः कुर्वन्तु। इतः परं भवन्तः स्वानुभवं वदन्त्वित्याह—**ब्रूतेति**। यथा भवद्भिरवगतं तथा निःशङ्कं ब्रूत कथयत। एवं प्रजापतिनोक्ताः स्वाचार्यप्रजापतिहृदयभूमानन्दं जनयितुमेवमाहुः—**ज्ञातोऽज्ञातश्चेति**। यथा भवद्भिरुपदिष्टः तथा अस्माभिरप्यवगतः। न चात्र कर्मकर्तृभावोऽपि अवगत इत्यर्थः। **न चैवं**, वस्तुतस्तु ज्ञातोऽज्ञातोऽपि नैव, विधिनिषेधप्रत्ययगम्यत्वात् **इति होचुः**। तैरेवमुक्तः प्रजापतिराह—**ब्रूतैवैनमात्मसिद्धमिति होवाचेति**। एवं मयोपदिष्टमात्मानमनात्मापह्नवतः आत्ममात्रतया सिद्धमेव ब्रूतेति होवाच। एवं प्रजापतिना आक्षिप्ताः स्वानुभवसर्वस्वं प्रकटयन्तीत्याह—**पश्याम एवेति**। हे **भगवो** भगवन् योऽनात्मापह्नवसिद्धस्वात्मा निष्प्रतियोगिकस्वमात्रमिति **पश्यामः एव**। पुनरेवकारव्यावर्त्यमाहुः—**न च वयं** स्वातिरेकेण **पश्यामः** स्वात्ममात्रदर्शनस्य स्वातिरिक्तदर्शनापह्नवपूर्वकत्वात्। तथाऽपि तत्स्वरूपं वक्तुं शक्यमित्यत्राहुः—**नैवेति**। त्वदुपदिष्टनिष्प्रतियोगिकनिर्विशेषमात्मानं **नैव वयं वक्तुं शक्नुमः**। इतः परं वक्तव्यमवक्तव्यं वा न किंचिदस्तीति मन्वानाः स्वोपदेष्टुः प्रजापतेः नमस्कारं कृतवन्त इत्याह—**नम** इति। **नमस्ते** तुभ्यं स्वाचार्याय पित्रे च **अस्तु** हे **भगवन् प्रसीद प्रसन्नो** भव **इति होचुः**। प्रजापतिरपि सर्वदा तेषु प्रसन्नः सन् पुनस्तेषां बुद्धिदार्ढ्यमवलोकयितुं प्रसीदेति तदुक्तं स्वीकृत्याह—**न भेतव्यं पृच्छतेति होवाचेति**। भवद्भिर्न भेतव्यं भयं न करणीयं, पुनरात्मविषये प्रश्नं पृच्छत। एवमुक्ताः देवाः प्रजापतिमाहुः **कैषाऽनुज्ञेति** पृच्छतेत्येषाऽनुज्ञा स्वात्मव्यतिरिक्ता किं तयेति। प्रजापतिरपि तेषां दृढानुभवमवलोक्य संतुष्ट एवमाह—**एष एवात्मेति होवाचेति**। यो मयोक्तः ओङ्काराग्रविद्योततुर्यतुरीय एष एवाविकल्पाविकल्पात्मा भवद्भिः स्वावशेषतया विदितः। एवं प्रजापतिनोक्ताः देवाः प्रजापतेरानन्दं अभिवर्धयन्त इति **होचुः**—**वयं** भवच्छिष्याः पुत्राश्च, महागुरवे पित्रे च **तुभ्यं नमोऽस्तु**। एवं श्रुतिराह—**प्रजापतिर्देवाननुशशासेति**। व्यष्टिसमष्ट्यात्मक-

प्रणवरूपाविद्यापदतत्कार्यजाग्रज्जाग्रदादिपञ्चदशावस्थातद्व्यष्ट्यारोपापवादाधि-करणविश्वविश्वादितुर्यप्राज्ञान्ततत्समष्ट्यारोपापवादाधिकरणविराड्विराडादितुर्य-बीजान्ततदुभयैक्यारोपापवादाधिकरणोत्रोत्राद्यविकल्पानुङ्गैकरसान्तकलनाप्रपञ्च-नपूर्वकं तदपह्नवसिद्धं तुर्यतुरीयं ब्रह्म अविकल्पाविकल्पं उग्रमित्याद्यहमित्यन्तानुष्टुभैव लभ्यं ब्रह्म स्वमात्रमित्यनेनैव प्रकारेण प्रजापतिः देवाननुशशास । पारमार्थिक-ज्ञानोपदेशेन अनुशासनं कृतवान् । इतिशब्दो विद्यासमाप्त्यर्थः ॥ १९ ॥

उक्तार्थानुवादकमन्त्रः

तदेष श्लोकः—

ओतमोतेन जानीयादनुज्ञातारमान्तरम् ।
अनुज्ञामद्वयं लब्ध्वा उपद्रष्टारमाव्रजेदिति ॥ २० ॥

तत् तत्रोपनिषदर्थे **एष श्लोको** मन्त्रो **भवति** स्वाज्ञदृष्ट्या परिच्छेदप्रसक्तौ **ओतं** सर्वत्र तुर्यतुर्यं ततं **ओतेन** तुरीयोङ्कारेण **जानीयात्** । किं तदोतमात्रं ? तत्राह **अनुज्ञातारं** सर्वसाक्षिणमपि जानीयात् । ततोऽप्यान्तरं प्रत्यगभिन्न-परमात्मानं परागभावसापेक्षप्रत्यग्भावापाये निष्प्रतियोगिकाद्वयं स्वमात्रमिति **अनुज्ञां लब्ध्वा** साक्षात्कृत्य तत **उपद्रष्टारं** तुर्यतुरीयं स्वमात्रमित्याव्रजेत् ॥ २० ॥

इति नवमः खण्डः

तुरीयोङ्कारविद्योतं मन्त्रराजार्थभासुरम् ।
नृसिंहाख्यं त्रिपाद्ब्रह्म हृदये मे विजृंभताम् ॥
श्रीवासुदेवेन्द्रशिष्योपनिषद्ब्रह्मयोगिना ।
तापनीयोपनिषदो व्याख्येह लिखिता मया ।
प्रकृतोपनिषद्व्याख्याग्रन्थस्तु द्विसहस्रयुक् ॥

इति श्रीमदीशाद्यष्टोत्तरशतोपनिषच्छास्त्रविवरणे सप्तविंशतिसङ्ख्यापूरकं नृसिंहोत्तरतापिन्युपनिषद्विवरणं संपूर्णम्

रामतापिन्युपनिषत्

पूर्वतापिनी

भद्रं कर्णेभिः—इति शान्तिः

प्रथमोपनिषत्

रामनामार्थप्रकाशनम्

चिन्मयेऽस्मिन् महाविष्णौ जाते दशरथे हरौ ।
रघोः कुलेऽखिलं राति राजते यो महीस्थितः ॥ १ ॥
स राम इति लोकेषु विद्वद्भिः प्रकटीकृतः ।
राक्षसा येन मरणं यान्ति स्वोद्रेकतोऽथवा ॥ २ ॥
रामनाम भुवि ख्यातमभिरामेण वा पुनः ।
राक्षसान् मर्त्यरूपेण राहुर्मनसिजं यथा ॥ ३ ॥
प्रभाहीनांस्तथा कृत्वा राज्यार्हाणां महीभृताम् ।
धर्ममार्गं चरित्रेण ज्ञानमार्गं च नामतः ॥ ४ ॥
तथा ध्यानेन वैराग्यमैश्वर्यं स्वस्य पूजनात् ।
तथा रात्यस्य रामाख्या भुवि स्यादथ तत्त्वतः ॥ ५ ॥

रमन्ते योगिनोऽनन्ते नित्यानन्दे चिदात्मनि ।
इति रामपदेनासौ परं ब्रह्माभिधीयते ॥ ६ ॥

श्रीरामतापनीयार्थं भक्तध्येयकळेबरम् ।
विकळेबरकैवल्यं श्रीरामब्रह्म मे गतिः ॥

इह खलु अथर्वणवेदप्रविभक्तेयं श्रीरामतापिनीयोपनिषत् पूर्वोत्तरतापिनीभ्यां सोपायसविशेषनिर्विशेषब्रह्मस्वरूपप्रकटनपूर्वकं ब्रह्ममात्रपर्यवसन्ना विजयते । अस्याः स्वल्पग्रन्थतो विवरणमारभ्यते । मुमुक्षूनुपलभ्य अवान्तररूपेण प्रवृत्तेयं पूर्वतापिनीश्रुतिरिति यत्तत् सविशेषब्रह्मविद्यास्तुत्यर्थं आदौ स्वाज्ञस्वज्ञदृष्टिमाश्रित्य रामनामार्थं प्रकाशयति—**चिन्मय** इत्यादिना । **चिन्मये** चिन्मात्रे **हरौ** स्वाज्ञानतत्कार्यहारिणि **विष्णौ** सर्वव्यापके

परित्राणाय साधूनां विनाशाय च दुष्कृताम् ।
धर्मसंस्थापनार्थाय संभवामि युगे युगे ॥

इति स्वप्रतिज्ञापरिपालनार्थं **अस्मिन्** दशरथे कश्यपप्रजापत्यवतारे निष्ठाद्वयपरिपालनाय **जाते** आविर्भूते सत्यथ बाललीलया **रघोः कुले अखिलं** स्वजनवर्गं यो **राति** आनन्दयति **यो महीस्थितः** सन् स्वतेजसा स्वविभूत्या च **राजते** ॥ १ ॥ एवं भूरादिसर्वलोकेषु स एव **रामः** इति **विद्वद्भिः** तद्याथात्म्यज्ञैः **प्रकटीकृतो** भवति । भङ्गयन्तरेण रामनामार्थं निर्दिशति—**राक्षसा** इति । विराधादि**राक्षसा येन मरणं यान्ति स्वोद्रेकतः** स्वपापकृत्यतो **वा** ॥ २ ॥ **पुनः अभिरामेण** सर्वलोकमनोरमणरूपेण वा **रामनाम भुवि ख्यातं** स्यादित्यर्थः । राक्षसा इत्यत्र रेफार्णौ गृह्यते, मरणं यान्ति इत्यत्र मकारः, वर्णद्वययोगे रामो भवति । पुनः प्रकारान्तरेण रामनामोद्धरति—**राक्षसानिति** । यथा **राहुः** चन्द्रं निष्प्रभं करोति ॥ ३ ॥ **तथा** अयं **मर्त्यरूपेण राक्षसान् प्रभाहीनान् कृत्वा** अथ **राज्यार्हाणां महीभृतां** सतां स्वचरित्रेण सर्वप्राणिस्वाश्रमोचित**धर्ममार्गं** उपदिशन् स्वातिरिक्ताश्रयासंभवप्रबोधसिद्धनिष्प्रतियोगिकब्रह्ममात्ररूपे

यो राजते यः स्वे महिम्नि महीयते स राम इति स्वनाम्ना ज्ञानमार्गं प्रकाशयन् ॥ ४ ॥ स्वमूर्तिध्यानेन स्वातिरिक्तपदार्थवैराग्यं जनयन्, स्वपूजनतो ब्रह्माद्यैश्वर्यं दिशन् योऽवतिष्ठते तस्य रामाख्या सर्वत्र रातीति भुवि स्यात्। अस्य रामाख्या कथमित्यत्र राक्षसान् मर्त्यरूपेण राहुः मनसिजं राज्यार्हाणां महीभृतामिति रेफमकारयोजनतो रामाख्या स्यादित्यर्थः । लोकदृष्ट्या एवं नाम प्रकाशयित्वा वस्तुदृष्ट्या अस्य नामार्थं निर्दिशति—**अथेति** ॥ ५ ॥ सर्वापह्नवसिद्धनिष्प्रतियोगिकब्रह्ममात्रपर्यवसानतया मनो युञ्जन्त इति **योगिनः** सम्यज्ज्ञानिनोऽनन्ते परिच्छेदत्रयापह्नवसिद्धे नित्यभूमानन्दे **चिदात्मनि** चिन्मात्रे तन्मात्रावशेषतया **रमन्त इति रामपदेन असौ** भगवान् **परं ब्रह्माभिधीयते**, "राम एव परं ब्रह्म" इति श्रुतेः ॥ ६ ॥

उपासकार्थे निर्विशेषस्य रूपकल्पना

चिन्मयस्याद्वितीयस्य निष्कलस्याशरीरिणः ।
उपासकानां कार्यार्थं ब्रह्मणो रूपकल्पना ॥ ७ ॥
रूपस्थानां देवतानां [1]पुंस्त्र्यङ्गास्त्रादिकल्पना ।
द्विचत्वारिषडष्टानां दश द्वादश षोडश ॥ ८ ॥
अष्टादशामी कथिता हस्ताः शङ्खादिभिर्युताः ।
सहस्रान्तास्तथा तासां वर्णवाहनकल्पना ॥ ९ ॥
शक्तिसेनाकल्पना च ब्रह्मण्येवं हि पञ्चधा ।
कल्पितस्य शरीरस्य तस्य सेनाऽऽदिकल्पना ॥ १० ॥

अनेन मन्त्रेण रामस्य निर्विशेषत्वमवगम्यते, तथाविधस्य सविशेषत्वं कुतः? इत्यत आह—**चिन्मयस्येति**। **चिन्मयस्येत्यादिविशेषणविशिष्टब्रह्मणो**

[1] पुंस्त्वं गात्रादि—अ, १.

निर्विशेषत्वेन विकल्पासहत्वेऽपि भक्तपटलस्वपदास्युपायार्थं **रूपादिविशेषकल्पना**, न स्वत इत्यर्थः ॥ ७ ॥ उपासकस्वपदाप्तिनिमित्तकल्पनां प्रपञ्चयति—**रूपेति** । निर्विशेषब्रह्ममात्रस्वरूपे रामे स्वाज्ञादिदृष्ट्या भेदाभेदरूपेण **तिष्ठन्तीति रूपस्थाः** तासां **देवतानां** सीतारामतदंशभेदेन **द्विचत्वारिंषडष्टानां** सशक्तिकानां **पुंस्त्र्यङ्गास्त्रादिकल्पना** तदधिकरणरामोपासनार्थैव । सीतया सह द्वित्वं, लक्ष्मणादिभिः चतुस्सङ्ख्याविशिष्टत्वं, सुग्रीवविभीषणादिभिः षट्संख्यापूरकत्वं, धृष्टद्यादिसचिवैः अष्टसंख्यापूरकत्वम् । तासां सीतारामांशविकल्पितानां नरवाननरराक्षसभेदेन सेनासङ्ख्या निगद्यते । एकैकस्यामिह सेनाऽधिपा **दश द्वादश षोडश अष्टादश हस्ता** वर्तन्ते इति **कथिताः**, "महापद्मशतं हस्तं" इति गणितशास्त्रप्रसिद्धेः ॥ ८ ॥ कस्याश्चित् देवतायाः **शङ्खादिसङ्ख्याभिः युताः सहस्रान्ताः** परिवाराः सन्ति ॥ ९ ॥ आदौ रामे बहुदेवताकल्पना ततस्तासां **वर्णकल्पना वाहनकल्पना** एकैककार्यनिर्वाहक**शक्तिकल्पना** अगण्य**सेनाकल्पने**त्येवं **ब्रह्मण्येवं** हि रामे **पञ्चधा** कल्पना विकल्पिता । एवं पञ्चधाकल्पना निर्विशेषब्रह्मणो रामस्येत्यत आह—**कल्पितस्येति** । भक्तपटलस्वपदास्युपायतया **कल्पितस्य शरीरस्यैव सेनाऽऽदिकल्पना**, स्वस्य निरुपाधिकत्वेन निर्विकल्पत्वात् ॥ १० ॥

मन्त्रजपयन्त्रपूजयोः रामप्रसादकरत्वम्

ब्रह्मादीनां वाचकोऽयं मन्त्रोऽन्वर्थादिसंज्ञितः ।
जप्तव्यो मन्त्रिणा नैवं विना देवः प्रसीदति ॥ ११ ॥
क्रियाकर्मेज्याकर्तृणामर्थं मन्त्रो वदत्यथ ।
मननात् त्राणना[तारणा]न्मन्त्रः सर्ववाच्यस्य वाचकः ॥ १२ ॥
सोऽभयस्यास्य देवस्य विग्रहो यन्त्रकल्पना ।
विना यन्त्रेण चेत् पूजा देवता न प्रसीदति ॥ १३ ॥

इत्थंभूतरामप्रसादहेतुः कः? इत्याशङ्क्य तद्वाचको मन्त्रः षडक्षरादिः तत्पूजापीठं चेत्याह—ब्रह्मादीनामिति। रामस्य सर्वदेवात्मकत्वेन रामान्वर्थसंज्ञितो मन्त्रो ब्रह्मादीनामपि वाचक एव। यतो मन्त्रानुष्ठानं विना देवो न प्रसीदति अतो मन्त्रिणा मन्त्रैकशरणेन अयं मनुः जप्तव्यो भवति ॥ ११ ॥ मन्त्रार्थं व्युत्पादयति—क्रियेति। क्रिया व्यापारः, द्वितीयान्तोपात्तं कर्म, इज्या यज्ञः, कर्ता यजमानः, तेषां महातात्पर्यं यत्र पर्यवस्यति तमेतमर्थं अयं मन्त्रो वदति मन्त्रार्थस्य प्रत्यगभिन्नब्रह्मणि पर्यवसितत्वात्। अथ सर्ववाच्यवस्तुनो रामचन्द्रस्य यो वाचको भवति स्वमननमात्रतो मन्तारं स्वातिरिक्तास्तित्वभ्रमवारिधेः तारणात् मत्र इति व्युत्पत्तिः युज्यत इत्यर्थः ॥ १२ ॥ इतश्च देवताप्रसादहेतुः देवपूजा इत्याह—स इति। शुद्धाद्वैततया अभयस्यास्य देवस्य यो विग्रहः सोऽयं यन्त्रकल्पनारूपो भवति। यथा यन्त्रपूजया देवता प्रसीदति तथा विग्रहपूजया न प्रसीदतीत्यर्थः ॥ १३ ॥

इति प्रथमोपनिषत्

द्वितीयोपनिषत्

रामबीजस्य सर्वात्मकत्वम्

स्वभूर्ज्योतिर्मयोऽनन्तरूपी स्वेनैव भासते।
जीवत्वेन समो यस्य सृष्टिस्थितिलयस्य च ॥ १ ॥
कारणत्वेन चिच्छक्त्या रजःसत्त्वतमोगुणैः।
यथैव वटबीजस्थः प्राकृतश्च महान् द्रुमः ॥ २ ॥

तथैव रामबीजस्थं जगदेतच्चराचरम् ।
रेफारूपा मूर्तयः स्युः शक्तयस्तिस्र एव चेति ॥ ३ ॥

स्वस्य स्वबीजात्मना सर्वकारणत्वमाह—स्वभूरिति । हेत्वन्तरं विना स्वयमेव भवतीति **स्वभूः** ज्योतिर्मयः प्रकाशमात्रत्वात् "प्रकाशः पर्यवस्यति" इति श्रुतेः । **अनन्तरूपी** स्वाज्ञदृष्ट्या अनेकरूपी सर्वात्मकत्वात् । एवं **स्वेनैव भासते** स्वयंप्रकाशत्वात् । **यस्य सृष्टिस्थितिप्रलयवतः** स्वातिरिक्तप्रपञ्चस्य **जीवत्वेन** कार्योपाधिना ईश्वरोपाधिकारणत्वेन **चिच्छक्त्या** प्रतीचा तद्व्यास्य **रजस्सत्वतमोगुणैर्वा सम** इत्यत्र मानं ओमिति । ओङ्कारस्य अभिधानाभिधेय-रूपेण सर्वसमत्वात् "सम एभिः सर्वैः" इति श्रुतेः । रामरहस्ये वटबीज-दृष्टान्तश्रुतिः व्याख्याता । रां इति रामबीजे रेति व्यञ्जनतो **ब्रह्मेत्युच्यते**, तदुपरि श्रूयमाणाकारतो विष्णुः, मकारतः शिवः इति **रेफारूपाः त्रिमूर्तयः स्युः** । तत्रत्यदीर्घः छान्दसः । सरस्वतीलक्ष्मीगौरीभेदेन क्रियाज्ञानेच्छाभेदेन वा **शक्तयः तिस्र एव चेति** । द्वितीयोपनिषत्समान्यर्थश्च चशब्दः ॥ १–३ ॥

इति द्वितीयोपनिषत्

तृतीयोपनिषत्

सीतारामयोः मन्त्रयन्त्रादिपूज्यत्वम्

सीतारामौ तन्मयावत्र पूज्यौ जातान्याभ्यां भुवनानि द्विसप्त ।
स्थितानि च प्रहितान्येव तेषु ततो रामो मानवो माययाऽधात् ॥ १ ।
जगत्प्राणायात्मनेऽस्मै नमः स्यान्नमस्त्वैक्यं प्रवदेत् प्राग्गुणेनेति ।

भगवत्प्रसादहेतुतया मन्त्रादिरुक्तः, तत्र पूज्यौ कौ ? इत्यत आह— **सीतारामाविति** । **आभ्यां** सीतारामाभ्यां चतुर्दशभुवनोपलक्षितानन्तकोटि-ब्रह्माण्डानि जलाशयबुद्बुदानीव मुहुर्मुहुः जन्मस्थितिभङ्गकलनामनुभवन्ति । **अत्र** यन्त्रे तावेव **तन्मयौ** यन्त्ररूपिणौ **सीतारामौ पूज्यावित्यर्थः** । **ततो** यो रामो **मायया मानवो** भूत्वा समस्तं जगत् **अधात्** अपोषयत् **अस्मै जगत्प्राणाय** जगदात्मने **नमः स्यात्** नमोऽस्तु, आवयोः ऐक्यमस्त्वित्यर्थः । कुतो नमः-शब्दस्त्वैक्यवाचीत्यत आह—"नमस्तु जीवपरयोर्वाच्यार्थत्यागपूर्वकम्" लक्ष्ययोः शुद्धत्वेन ऐक्यमेव वदेत् । केन हेतुनेत्यत्र जीवपरयोः **प्राग्गुणेन** सच्चिदानन्द-रूपेणेत्यर्थः । **इति**शब्दस्तृतीयोपनिषत्समाप्त्यर्थः ॥

इति तृतीयोपनिषत्

चतुर्थोपनिषत्

रामषडक्षरार्थः

जीववाची नमो नाम चात्मा रामेति गीयते ।
तदात्मिका या चतुर्थी तथा चायेति गीयते ॥ १ ॥
मन्त्रोऽयं वाचको रामो वाच्यः स्याद्योग एतयोः ।
फलदश्चैव सर्वेषां साधकानां न संशयः ॥ २ ॥
यथा नामी वाचकेन नाम्नो योऽभिमुखो भवेत् ।
तथा बीजात्मको मन्त्रो मन्त्रिणोऽभिमुखो भवेत् ॥ ३ ॥

[1]बीजशक्तिं न्यसेद्दक्षवामयोः स्तनयोरपि ।
कीलो मध्ये विना भाव्यः स्ववाञ्छाविनियोगवान् ॥ ४ ॥
सर्वेषामेव मन्त्राणामेष साधारणः क्रमः ।
अत्र रामोऽनन्तरूपस्तेजसा वह्निना समः ॥ ५ ॥
[2]स त्वनुष्णगुविश्वश्चेदग्नीषोमात्मकं जगत् ।
उत्पन्नः सीतया भाति चन्द्रश्चन्द्रिकया यथा ॥ ६ ॥
प्रकृत्या सहितः श्यामः पीतवासा जटाधरः ।
द्विभुजः कुण्डली रत्नमाली धीरो धनुर्धरः ॥ ७ ॥
प्रसन्नवदनो जेता धृष्टचष्टकविभूषितः ।
प्रकृत्या परमेश्वर्या जगद्योन्याऽङ्कितोऽङ्कभृत् ॥ ८ ॥
हेमाभया द्विभुजया सर्वालंकृतया चिता ।
श्लिष्टः कमलधारिण्या पुष्टः कोसलजाऽऽत्मजः ॥ ९ ॥
दक्षिणे लक्ष्मणेनाथ सधनुष्पाणिना पुनः ।
हेमाभेनानुजेनैव तथा कोणत्रयं भवेत् ॥ १० ॥
तथैव तस्य मन्त्रस्य यश्चाणुश्च स्वङेन्तया ।
एवं त्रिकोणरूपं स्यात्तं देवा ये समाययुः ॥ ११ ॥

"नमस्त्वैक्यं प्रवदेत्" इत्यत्र तत्त्वंपदलक्ष्ययोः ऐक्यं सूत्रितं, सोपायं तत्प्रपञ्चनाय चतुर्थोपनिषदारभ्यते । तत्रादौ श्रीरामषडक्षरार्थकथनेन प्रत्यक्परैक्यं प्रकटयति—जीवेति । अस्यार्थः रामरहस्ये प्रपञ्चितः ॥ १ ॥ एवं प्रत्यक्परैक्यमुक्त्वा मन्त्रार्थयोः एकत्वानुसन्धानं प्रत्यग्ब्रह्मावगत्युपाय इत्याह—मन्त्र

[1] बीजशक्ती—क. [2] सत्वनुष्णु—क. सत्वनुष्ट्—अ, २.

इति ॥ २ ॥ मन्त्रो मन्त्र्यभिमुखो भवेत् इति सदृष्टान्तमाह—**यथेति** ॥ ३ ॥ मन्त्रानुष्ठानस्य देवताऽऽभिमुख्यहेतुतया बीजादितन्न्यासस्थलं च सर्वमन्त्रसाधारणतयाऽऽह—**बीजेति** ॥ ४ ॥ रामस्य मन्त्रासनत्वं तत्राविर्भवं चाह—**अत्रेति । अत्र मन्त्रे तेजसा वह्निना समः** ॥ ५ ॥ **स तु स** एव **अनुष्णगुः** चन्द्रसमः स्वाभक्तभक्तापेक्षया उष्णानुष्णद्युतित्वे अनुष्णगुरिति वक्तव्ये विसर्गलोपश्छान्दसः । "हरिरेव जगत् जगदेव हरिः हरितो जगतो न हि भिन्नतनुः" इति स्मृत्यनुरोधेन विराड्भावमेत्य **विश्वरूपश्चेत्** इदं **जगत् अग्नीषोमात्मकं** भवति । तत्र प्राण्यदृष्टवशात् जगति सीतया सह उत्पन्नवत् भातीत्याह— **उत्पन्न** इति ॥ ६–७ ॥ **धृष्टयष्टकविभूषितः** धृष्ट्याद्यष्टमन्त्रिभिः परिवृत इत्यर्थः । पार्श्वद्वयस्थितसीतालक्ष्मणाभ्यां स्थितं त्रिकोणवत् भान्तं देवाः स्तुवन्तीत्याह—**प्रकृत्येति** ॥ ८–१० ॥ यथा रामलक्ष्मणसीतास्त्रिकोणवत् स्थिताः तथैव तस्य राममन्त्रस्य पार्श्वद्वये स्वापेक्षया लक्ष्मणस्य कनीयस्त्वेन अणुत्वं "एषोऽणुरात्मा" इति श्रुतेः । **यश्च** राममनुः **अणुश्च** लक्ष्मणमनुः **स्वं** स्वकीयसीतामनुः सर्वे **ङेन्तया** चतुर्थ्यन्तेन युताः एवं मन्त्ररूपेणापि ॥ ११–१४ ॥

देवकृतरामस्तुतिः

स्तुतिं चक्रुश्च जगतः पतिं कल्पतरौ स्थितम् ।
कामरूपाय रामाय नमो मायामयाय च ॥ १२ ॥
नमो वेदादिरूपाय ओङ्काराय नमो नमः ।
रमाधराय रामाय श्रीरामा[1]यात्ममूर्तये ॥ १३ ॥
जानकीदेहभूषाय रक्षोघ्नाय शुभाङ्गिने ।
भद्राय रघुवीराय दशास्यान्तकरूपिणे ॥ १४ ॥

[1] यार्त—उ.

रामभद्र महेष्वास रघुवीर नृपोत्तम ।
भो दशास्यान्तकास्माकं रक्षां देहि श्रियं च ते ॥ १५ ॥
त्वमीश्वर्या दापयाथ संप्रत्याश्वरिमारणम् ।
कुर्विति स्तुत्य देवाद्याः तेन सार्धं सुखं स्थिताः ॥ १६ ॥

रक्षां देहि श्रियं च ते उभे अपि देहीत्यर्थः ॥ १५ ॥ त्वं ईश्वर्या सीतया श्रियं दापय । आशु झटिति नः शत्रुमारणं कुरु ॥ १६ ॥

ऋषिकृतरामस्तुतिः

स्तुवन्त्येवं हि ऋषयस्तदा रावण आसुरः ।
रामपत्नीं वनस्थां यः स्वनिर्वृत्यर्थमाददे ॥ १७ ॥
स रावण इति ख्यातो यद्वा रावाच्च रावणः ।
तद्वच्चाजेनेक्षितुं सीतां रामो लक्ष्मण एव च ॥ १८ ॥
विचेरतुस्तदा भूमौ देवीं संदश्य चासुरम् ।
हत्वा कबन्धं शबरीं गत्वा तस्याज्ञया तया ॥ १९ ॥
पूजितो वायुपुत्रेण भक्तेन च कपीश्वरम् ।
आहूय शंसतां सर्वमाद्यन्तं रामलक्ष्मणौ ॥ २० ॥
स तु रामे शङ्कितः सन् प्रत्ययार्थं च दुन्दुभेः ।
विग्रहं दर्शयामास यो रामस्तमचिक्षिपत् ॥ २१ ॥
सप्तसालान् विभिद्याशु मोदते राघवस्तदा ।
तेन हृष्टः कपीन्द्रोऽसौ सरामस्तस्य पत्तनम् ॥ २२ ॥
जगामागर्जदनुजो वालिनो वेगतो गृहात् ।
तदा वाली निर्जगाम तं वालिनमथाहवे ॥ २३ ॥

निहत्य राघवो राज्ये सुग्रीवं स्थापयेत्ततः ।
हरीनाहूय सुग्रीवस्त्वाह चाशाविदोऽधुना ॥ २४ ॥
आदाय मैथिलीमद्य ददताश्वाशु गच्छत ।
ततस्ततार हनुमानब्धिं लङ्कां समाययौ ॥ २५ ॥
सीतां दृष्ट्वाऽसुरान् हत्वा पुरं दग्ध्वा तथा स्वयम् ।
आगत्य रामेण सह न्यवेदयत तत्त्वतः ॥ २६ ॥
तदा रामः क्रोधरूपी तानाहूयाथ वानरान् ।
तैः सार्धमादायास्त्राणि पुरीं लङ्कां समाययौ ॥ २७ ॥
तां दृष्ट्वा तदधीशेन सार्धं युद्धमकारयत् ।
घटश्रोत्रसहस्राक्षजिद्भ्यां युक्तं तमाहवे ॥ २८ ॥
हत्वा विभीषणं तत्र स्थाप्याथ जनकात्मजाम् ।
आदायाङ्कस्थितां कृत्वा स्वपुरं तैर्जगाम सः ॥ २९ ॥

यथा देवाः स्तुत्वा तत्प्रसादतः स्वाराज्यं ययुः तथा ऋषयोऽपि तत्प्रसादलब्धदिव्यज्ञानेन भाविचर्यां भूतरूपां वा प्रपञ्चयन्तः स्तुवन्तीत्याह— **स्तुवन्तीति** । निर्वृतिः सुखं वैकुण्ठपार्षदत्वप्रभवं तदर्थमाददे इत्यर्थः ॥ १७ ॥ लोकान् रावयति पीडयति कैलासपर्वताक्रान्तो महारवं करोतीति वा **रावणः** । मत्पार्षदप्रवरस्य ब्राह्मणशापप्रभवराक्षसत्वमोचनं कृत्वा अयं स्वपदे स्थापयितव्य इति **तद्व्याजेन** ॥ १८ ॥ **देवीं संदृश्य** अन्विष्य ॥ १९–२९ ॥

पट्टाभिषिक्तरामचन्द्रविभूतिः

ततः सिंहासनस्थः सन् द्विभुजो रघुनन्दनः ।
धनुर्धरः प्रसन्नात्मा सर्वाभरणभूषितः ॥ ३० ॥

मुद्रां ज्ञानमयीं याम्ये वामे तेजःप्रकाशिनीम् ।
धृत्वा व्याख्याननिरतश्चिन्मयः परमेश्वरः ॥ ३१ ॥
उदग्दक्षिणयोः स्वस्य शत्रुघ्नभरतौ ततः ।
हनूमन्तं च श्रोतारमग्रतः स्यात्त्रिकोणगम् ॥ ३२ ॥
भरताधस्तु सुग्रीवं शत्रुघ्नाधो विभीषणम् ।
पश्चिमे लक्ष्मणं तस्य धृतच्छत्रं सचामरम् ॥ ३३ ॥
तदधस्तौ तालवृन्तकरौ त्र्यश्रं पुनर्भवेत् ।
एवं षट्कोणमादौ स्वदीर्घाङ्गैरेष संयुतः ॥ ३४ ॥
द्वितीयं वासुदेवाद्यैराग्नेयादिषु संयुतः ।
तृतीयं वायुसूनुं च सुग्रीवं भरतं तथा ॥ ३५ ॥
विभीषणं लक्ष्मणं च अङ्गदं चारिमर्दनम् ।
जाम्बवन्तं च तैर्युक्तस्ततो धृष्टिर्जयन्तकः ॥ ३६ ॥
विजयश्च सुराष्ट्रश्च राष्ट्रवर्धन एव च ।
अशोको धर्मपालश्च सुमन्त्रश्चैभिरावृतः ॥ ३७ ॥
ततः सहस्रदृग्वह्निर्धर्मर्क्षो वरुणोऽनिलः ।
इन्द्रीशधात्रनन्ताश्च दशभिश्चैभिरावृतः ॥ ३८ ॥
बहिस्तदायुधैः पूज्यो नीलादिभिरलंकृतः ।
वसिष्ठवामदेवादिमुनिभिः समुपासितः ॥ ३९ ॥

पट्टाभिषिक्तरामचन्द्रविभूतिं वक्ष्यमाणयन्त्रदशावरणरूपिणीं प्रपञ्चयति—तत इति ॥ ३०–३३ ॥ शत्रुघ्नभरतपवनजा आद्यत्रिकोणरूपाः सुग्रीवविभीषण-

लक्ष्मणास्तु द्वितीयत्रिकोणरूपाः। शत्रुघ्नभरतपवनजसुग्रीवविभीषणलक्ष्मणालंकृत-राज्याभिषिक्तश्रीरामयन्त्रषट्कोणमध्ये साङ्गं सावरणं सपरिवारं ससीतं रामचन्द्रं भावयेत् । कथमसौ भावनीय इत्यत्र स्वयं षट्कोणमध्यासनो भूत्वा सीताभरतशत्रुघ्नहनूमत्सुग्रीवविभीषणलक्ष्मणैः परिवृतो विजयत इति ध्येयो भवति । षट्कोणेषु **दीर्घाङ्गैरेष संयुतः** इत्यत्र हृदयाद्यङ्गदेवताभिरावृतो ध्येयः ॥ ३४ ॥ **द्वितीयं वासुदेवाद्यैः** इत्यत्र वासुदेवसंकर्षणप्रद्युम्नानिरुद्धैः आवृतो भवति । **तृतीयं वायुसूनुं च** इत्यत्र वायुसून्वादिजाम्बवदन्तैः परिवृतो भवति ॥ ३५ ॥ चतुर्थावरणे धृष्ट्यादिसुमन्त्रान्तैः आवृतो भवति ॥ ३६–३७ ॥ पञ्चमषष्ठयोः इन्द्रादिभिः तदायुधैश्च आवृतो भवति ॥ ३८–३९ ॥

यन्त्रलेखनप्रकारः

एवमुद्देशतः प्रोक्तं निर्देशस्तस्य चाधुना ।
त्रिरेखापुटमालिख्य मध्ये तारद्वयं लिखेत् ॥ ४० ॥
तन्मध्ये बीजमालिख्य तदधः साध्यमालिखेत् ।
द्वितीयान्तं च तस्योर्ध्वं षष्ठचन्तं साधकं तथा ॥ ४१ ॥
कुरु द्वयं च तत्पार्श्वे लिखेद्बीजान्तरे रमाम् ।
तत् सर्वं प्रणवाभ्यां च वेष्टयेच्छुद्धबुद्धिमान् ॥ ४२ ॥
दीर्घभाजी षडश्रेषु लिखेद्बीजं हृदादिभिः ।
कोणपार्श्वे रमामाये तदग्रेऽनङ्गमालिखेत् ॥ ४३ ॥
क्रोधं कोणाग्रान्तरेषु लिख्य मन्त्र्यभितो गिरम् ।
वृत्तत्रयं साष्टपत्रं सरोजे विलिखेत् स्वरान् ॥ ४४ ॥
केसरे चाष्टपत्रे च वर्गाष्टक[1]मथालिखेत् ।
तेषु मालामनोर्वर्णान् विलिखेदूर्मिसंख्यया ॥ ४५ ॥

[1] मधोलि—क.

अन्ते पञ्चाक्षराण्येवं पुनरष्टदलं लिखेत् ।
तेषु नारायणाष्टार्णान् लिख्य तत्केसरे रमाम् ॥ ४६ ॥
तद्बहिर्द्वादशदलं विलिखेद्बादशाक्षरम् ।
अर्थोनमो भगवते वासुदेवाय इत्ययम् ॥ ४७ ॥
आदिक्षान्तान् केसरेषु वृत्ताकारेण संलिखेत् ।
तद्बहिः षोडशदलं लिख्य तत्केसरे [illegible]यम् ॥ ४८ ॥
वर्माख्यनतिसंयुक्तं दलेषु द्वादशाक्षरम् ।
तत्सन्धिष्विरजादीनां मन्त्रान् मन्त्री समालिखेत् ॥ ४९ ॥
ह्रूं स्त्रं भ्रं व्रं लूं अं श्रं ज्रं (च) लिखेत् सम्यक्ततो बहिः ।
द्वात्रिंशारं महापद्मं नादबिन्दुसमायुतम् ॥ ५० ॥
विलिखेन्मन्त्रराजार्णान् तेषु पत्रेषु यत्नतः ।
ध्यायेदष्टवसूनेकादशरुद्रांश्च तत्र वै ॥ ५१ ॥
द्वादशेनांश्च धातारं वषट्कारं च तद्बहिः ।
भूगृहं वज्रशूलाढ्यं रेखात्रयसमन्वितम् ॥ ५२ ॥
द्वारोपेतं च राश्यादिभूषितं फणिसंयुतम् ।
अनन्तो वासुकिश्चैव तक्षः कार्कोटपद्मकः [कौ] ॥ ५३ ॥
महापद्मश्च शङ्खश्च गुलिकोऽष्टौ प्रकीर्तिताः ।
एवं मण्डलमालिख्य तस्य दिक्षु विदिक्षु च ॥ ५४ ॥
नारसिंहं च वाराहं लिखेन्मन्त्रद्वयं तथा ।
कूटो रेफानुग्रहेन्दुनादशक्त्यादिभिर्युतः ॥ ५५ ॥

यो नृसिंहः समाख्यातो ग्रहमारणकर्मणि ।
अन्त्यार्धीशवियद्बिन्दुनादैर्बीजं च सौकरम् ॥ ९६ ॥
हुंकारं चात्र रामस्य

अनुक्तात्माद्यावरणचतुष्टयमत्रैवान्तर्भूयते । एवमहरहः स्वावरणदेवता-तत्परिवारैः उपास्यमानो विजयत इत्यादावुद्देशतः प्रोक्तम् । अधुना तु यन्त्रस्वरूपं निर्दिशति—**निर्देशस्तस्य चाधुनेति** । यन्त्रलेखनप्रकारमाह—**त्रिरेखेति** ॥ ४०–४१ ॥ **तत्सर्वं प्रणवाभ्यां च वेष्टयेच्छुद्धबुद्धिमान्** इत्यत्र न हि प्रणवचतुष्टयं लेखनीयं, मध्ये सम्मुखोन्मुखाभ्यां तारद्वयं लिखेदिति यदुक्तं तदेव अत्र परामृश्यते ॥ ४२ ॥ **लिखेद्बीजं हृदादिभिः** रां नमः इत्यादि ॥ ४३ ॥ **गिरं** ऐं इति ॥ ४४ ॥ न हि "वृत्तत्रयं साष्टपत्रं" "पुनरष्टदळं लिखेत्" इत्यत्र अष्टदळत्रयं भवति, अष्टदळद्वयस्यैव विनियुक्तत्वात् । द्वितीयाष्टदळेषु **तेषु** ॥ ४५–४८ ॥ **इरजादीनां** हनूमदादीनाम् ॥ ४९ ॥ **नादबिन्दुसमायुतं** इत्यत्र मन्त्रराजः प्रतिवर्णं ऊं म्रां इति दीर्घबिन्दुसमायुतो यथा भवति तथा द्वात्रिंशद्दळेषु मन्त्रराजार्णान् विलिखेदित्यर्थः ॥ ५० ॥ तत्केसरेषु लिखित्वा **ध्यायेत्** ॥ ५१ ॥ **द्वादशेनांश्च** द्वादशादित्यान् । वसुरुद्रादित्यनामान्यावरणपूजा-प्रकरणे प्रकाश्यन्ते । **वज्रशूलाढ्यं** वज्रादिशूलान्ताष्टदिक्पालकायुधाढ्यम् । यद्वा—प्रतिद्वारं वज्रशूलाभ्यां आढ्यमिति ॥ ५२–५४ ॥ **कूटः** क्षकारः **रेफश्च अनुग्रहः** औङ्कारश्च **इन्दुः** मकारश्च **नादशक्तिः** यकारश्च, **आदिशब्देन** बिन्दुर्गृह्यते, एतद्विशिष्टं क्ष्म्र्यौं इति निष्पन्नम् ॥ ५५ ॥ **अन्त्यार्धीशो** वराहः तस्य वाचको **वियत्** हकारः **बिन्दुनादाभ्यां** बिन्दूकाराभ्यां युक्तश्चेत् हुमिति **सौकरबीजं** भवति । वराहस्य अन्त्यार्धीशत्वं कथमित्यत्र गुरुभारतोऽन्यविक्रिया-मापन्नाऽर्घिणी वसुमती वराहरूपेण तामुद्धृत्योद्वाहं कृतवान् इत्यन्त्यार्धीशो भूवराह इत्यर्थः । तस्य बीजं हुं इति । शिष्टं रामरहस्योपनिषत्प्रोक्तदशा-वरणयन्त्रव्याख्यानेन व्याख्यातं स्यात् । अनयोरेकरूपत्वात् न विशेषो-ऽस्तीत्यर्थः ॥९६॥

मालामन्त्रोद्धारः

मालामन्त्रोऽधुनेरितः ।
तारो नतिश्च निद्रायाः स्मृतिर्मेदश्च कामिका ॥ ५७ ॥
रुद्रेण संयुता वह्निर्मेधामरविभूषिता ।
[1]दीर्घा क्रूरयुता ह्लादिन्यतो दीर्घसमायुता ॥ ५८ ॥
क्षुधा क्रोधिन्यमोघा च विश्वमप्यथ धात्रया ।
युक्ता दीर्घाज्वालिनी च सुसूक्ष्मा मृत्युरूपिणी ॥ ५९ ॥
सप्रतिष्ठा ह्लादिनी त्वक्क्ष्वेलप्रीतिश्च सामरा ।
ज्योतिस्तीक्ष्णाग्निसंयुक्ता श्वेतानुस्वारसंयुता ॥ ६० ॥
कामिकापञ्चमोलान्तस्तान्तान्तो थान्त इत्यथ ।
स सानन्तो दीर्घयुतो वायुः सूक्ष्मयुतो विषः ॥ ६१ ॥
कामिका कामका रुद्रयुक्ताथोऽथ स्थिरातपा ।
तपिनी दीर्घयुक्ता भूरनलोऽनन्तगोऽनिलः ॥ ६२ ॥
नारायणात्मकः कालः प्राणोम्भो विद्यया युतः ।
पीतारातिस्तथा लान्तो योन्या युक्तस्ततो नतिः ॥ ६३ ॥
सप्तचत्वारिंशद्वर्णगुणान्तः स्वङ्मनुः स्वयम् ।
राज्याभिषिक्तस्य तस्य रामस्योक्तक्रमाल्लिखेत् ॥ ६४ ॥

अथ मालामन्त्रमुद्धरति—**मालामन्त्र** इति । चतुष्षष्टिकलासु सप्तचत्वारिंशत्कलात्मकोऽयं मालामन्त्रः कलाशास्त्रे प्रसिद्धः । एकैकस्याः कलायाः ओमित्याद्येकैको वर्णः संजातः क्रमादेवमूह्यमिति मत्वा उपरतम् । एवं तारादि-

[1] दीर्घ—अ, अ १, क.

नत्यन्तकलाकार्यपूगो मालामनुभवति। स च रामरहस्योक्तः। एवं ॐ नमो भगवते रघुनन्दनाय इत्यादिं प्रथमाष्टदलेषु क्रमाल्लिखित्वा पूजयेदित्यर्थः ॥९७–६४॥

यन्त्रस्तुतिः

इदं सर्वात्मकं यन्त्रं प्रागुक्तमृषिसेवितम्।
सेवकानां मोक्षकरमायुरारोग्यवर्धनम् ॥ ६५ ॥
अपुत्राणां पुत्रदं च बहुना किमनेन वै।
प्राप्नुवन्ति क्षणात् सम्यगत्र धर्मादिकानपि ॥ ६६ ॥
इदं रहस्यं परममीश्वरेणापि दुर्गमम्।
इदं यन्त्रं समाख्यातं न देयं प्राकृते जने ॥ इति ॥ ६७ ॥

उक्तविशेषणविशिष्टं यन्त्रं स्तौति—इदमिति। भजनानुरूपफलदमेतदित्याह—सेवकानामिति। चतुर्विधपुरुषार्थसाधकमेतदेवेत्यर्थः ॥६५–६६॥ एतस्य कैवल्यप्रापकज्ञानसाधनत्वेन यथोक्तसाधनविकलेषु गोपनीयत्वमाह—इदमिति। ईश्वरेण सर्वतन्त्रस्वतन्त्रेण पण्डितेनापि कामनाधिया मुख्यफलमात्तुं दुःशकमित्यर्थः। इतिशब्दस्तुरीयोपनिषत्समाप्त्यर्थः ॥ ६७ ॥

इति चतुर्थोपनिषत्

पञ्चमोपनिषत्

भूतशुद्ध्यादिपीठार्चनान्तपूजा

भूतादिकं शोधयेद्द्वारपूजां कृत्वा पद्माद्यासनस्थः प्रसन्नः।
अर्चाविधावस्य पीठाधरोर्ध्वपार्श्वार्चनं मध्यपद्मार्चनं च ॥१॥

कृत्वा मृदुश्लक्ष्णसुतूलिकायां रत्नासने देशिकमर्चयित्वा ।
शक्तिं चाधाराख्यकां कूर्मनागौ पृथिव्यब्जे स्वासनाधः प्रकल्प्य ॥
विघ्नेशं दुर्गां क्षेत्रपालं च वाणीं बीजादिकांश्चाग्निदेशादिकांश्च ।
पीठस्याङ्घ्रिष्वेष धर्मादिकांश्च नत्वा पूर्वास्तांस्तत्तद्दिक्ष्वर्चयेच्च ॥ ३ ॥
मध्ये क्रमादर्कविध्वग्नितेजांस्युपर्युपर्यादिमैरर्चितानि ।
रजः सत्त्वं तम एतानि वृत्तत्रयं बीजाढ्यं क्रमाद्भावयेच्च ॥ ४ ॥
आशाव्याशास्वप्यथात्मानमन्तरात्मानं वा परमात्मानमन्तः ।
ज्ञानात्मानं चार्चयेत्तस्य दिक्षु मायाविद्ये ये कला[एकल?]
पारतत्त्वे ॥ ५ ॥
संपूजयेद्विमलादीश्च शक्तीः

राज्याभिषिक्तश्रीरामचन्द्रपूजायन्त्रं प्रकटयित्वा तत्पीठावरणपूजां तत्फलं च प्रपञ्चयितुं पञ्चमोपनिषदारभ्यते—**भूतादिकमिति** । **भूतादिकं शोधयेत्** इत्यत्र ब्राह्मे मुहूर्ते मुमुक्षुरुत्थाय दन्तधावनस्नानादिस्वाश्रमोचितकर्म निर्वर्त्याथ यथासंभवं पूजाद्रव्याणि संपाद्य देवगृहं गत्वा प्रदक्षिणनमस्कारान् विधाय देवोद्बोधनार्थं आदौ घण्टानादं कृत्वा पृथ्वी त्वयेति भूशुद्धिं अपसर्पन्त्विति भूतशुद्धिं पृथिव्यादिपञ्चभूतभौतिकानां कारणमात्रावशेषचिन्तनमेव वा भूतशुद्धिं कृत्वा । **आदि**शब्देन कलशशङ्खपूजाऽऽदिकं गृह्यते । आसनमन्त्रस्येत्यादिना कुशाद्यासनमभिमन्त्र्य सोऽहमर्क इति मन्त्रेण देवोभयपार्श्वयोः दीपं संस्थाप्य स्वयं उत्तराभिमुखः पद्माद्यासनमास्थाय प्राणायामादिकं कृत्वा स्ववामभागे कलशं दक्षिणभागे शंखं यथोक्तविधिना अभ्यर्च्य शङ्खोदकेन देवात्मानौ पूजोपकरणानि संप्रोक्ष्य कलशे किंचित् निक्षिप्य तच्छेषं परित्यजेत् । स्वपुरोभागे पाद्यादिपञ्च-पात्राणि चासाद्य गन्धोदकेन पूरयित्वा तत्र सावरणं देवं आवाहनादिभिः अभ्यर्च्य । **द्वारपूजां कृत्वेत्यादिना—अधरभागाय नमः । ऊर्ध्वभागाय नमः । पार्श्वाय नमः** । दक्षिणपार्श्वाय नमः । पश्चिमपार्श्वाय नमः । उत्तरपार्श्वाय नमः ।

पीठमध्यगतकमलाय नमः ॥ १ ॥ पीठदक्षिणभागे देशिकाय नमः । आदिकूर्माय नमः । शेषाय नमः । पृथिव्यै नमः । कमलाय नमः ॥ २ ॥ **विघ्नेशं दुर्गां** इत्यादिना—गं गणपतये नमः । दुं दुर्गायै नमः । क्षं क्षेत्रपालकाय नमः । सं सरस्वत्यै नमः । मूलप्रकृत्यै नमः । क्षीरसमुद्राय नमः । रत्नद्वीपाय नमः । रत्नसिंहासनाय नमः । श्वेतच्छत्राय नमः । रत्नमण्टपाय नमः । कल्पकवृक्षाय नमः । **धर्मादिकांश्चेत्यादिना**—धर्माय नमः । ज्ञानाय नमः । वैराग्याय नमः । ऐश्वर्याय नमः । अधर्माय नमः । अज्ञानाय नमः । अवैराग्याय नमः । अनैश्वर्याय नमः ॥ ३ ॥ अर्काय नमः । सोमाय नमः । अग्नये नमः । **रजस्सत्त्वमित्यादिना**—रजसे नमः । सत्वाय नमः । तमसे नमः ॥ ४ ॥ आत्मने नमः । अन्तरात्मने नमः । परमात्मने नमः । ज्ञानात्मने नमः । मायाविद्या इत्यादिना—मायातत्त्वाय नमः । विद्यातत्त्वाय नमः । एकल[कला?]तत्वाय नमः । परशिवतत्त्वाय नमः । मायायै नमः । विद्यायै नमः । अनन्तायै नमः । पद्मायै नमः । ज्ञानात्मने नमः ॥ ५ ॥ **विमलादीश्च शक्तीः** इत्यादिना—विमलायै नमः । उत्कर्षण्यै नमः । ज्ञानायै नमः । क्रियायै नमः । योगायै नमः । प्रह्वयै नमः । सत्यायै नमः । ईशानायै नमः । मध्ये अनुग्रहायै नमः । ॐ नमो भगवते विष्णवे वासुदेवाय सर्वात्मसंयोगयोगपीठाय नमः इति पीठार्चनं कुर्यात् ॥

भगवद्ध्यानपुरस्सरमावरणपूजा

अभ्यर्चयेद्देवमावाहयेच्च ।
अङ्गव्यूहानिलजाद्यैश्च पूज्य धृष्ट्यादिकैर्लोकपालैस्तदस्त्रैः ॥ ६ ॥
वसिष्ठाद्यैर्मुनिभिर्नीलमुख्यैराराधयेद्राघवं चन्दनाद्यैः ।
मुख्योपहारैर्विविधैश्च पूज्यैस्तस्मै जपादींश्च सम्यक् प्रकल्प्य ॥७॥

अथ भगवद्ध्यानपुरस्सरं आवरणपूजां कुर्यादित्याह—**देवमिति** । **देवमावाहयेच्च** इत्यत्र षट्कोणमध्ये सिंहासनस्थाय द्विभुजाय पार्श्वद्वयस्थित-

धनुर्बाणाय दक्षिणकरधृतज्ञानमुद्राय हनूमदादिव्याख्याननिरताय स्ववामाङ्कालङ्कार-सीताय राज्याभिषिक्तश्रीरामचन्द्राय नमः, षट्कोणमध्ये सीताभरतशत्रुघ्न-हनूमत्सुग्रीवविभीषणलक्ष्मणावृताय श्रीरामाय नमः इति पूजयेत्। षट्कोणेषु रां हृदयाय नमः इत्यादि रः अस्त्राय फट् इत्यन्ताङ्गाद्यञ्चिताय श्रीरामाय नमः इति पूजयेत्। प्रथमाष्टदळमूलेषु आग्नेयादिक्रमेण आत्मान्तरात्मपरमात्मज्ञानात्मभिः पूर्वादिक्रमेण निवृत्तिप्रतिष्ठाविद्याशान्तिभिश्चावृताय श्रीरामाय नमः। प्रथमाष्टदळाग्रेष्वाग्नेयादिक्रमेण वासुदेवसंकर्षणप्रद्युम्नानिरुद्धैः पूर्वादिक्रमेण श्रीकीर्तिपुष्टिरतिभिश्चावृताय श्रीरामाय नमः। द्वितीयाष्टदळमूलेषु पूर्वादिक्रमेण वायुसूनुसुग्रीव-भरतविभीषणलक्ष्मणाङ्गदशत्रुघ्नजाम्बवद्भिः आवृताय श्रीरामाय नमः। द्वितीयाष्टदळाग्रेषु पूर्वादिक्रमेण धृतिजयन्तविजयसुराष्ट्रराष्ट्रवर्धनाशोकधर्मपालसुमन्त्रैरावृताय श्रीरामाय नमः। धृष्ट्यादिकैरित्यादिशब्देन वसिष्ठनीलाद्यावरणानि गृह्यन्ते। तद्यथा—मूले तावदिन्द्रवज्राद्यावरणानन्तरं वसिष्ठनीलाद्यावरणयोः उक्तत्वेऽपि तदपेक्षया अर्थक्रमस्य बलीयस्त्वात् रामरहस्येऽपि अर्थक्रमानुसारेणैव प्रपञ्चितत्वात् अत्रापि तथैव युज्यत इति ॥ ६ ॥ द्वादशदळेषु पूर्वादिक्रमेण वसिष्ठाय नमः। वामदेवाय नमः। इत्यादिवसिष्ठवामदेवजाबालिगौतमभरद्वाज-विश्वामित्रवाल्मीकिनारदसनकसनन्दनसनत्कुमारैः आवृताय श्रीरामाय नमः। षोडशदलेषु नीलनलसुषेणगन्धमादनगवाक्षकिरीटकुण्डलश्रीवत्सकौस्तुभशङ्खचक्रगदापद्मरावृताय श्रीरामाय नमः। द्वात्रिंशद्दलेषु ध्रुवाय नमः इत्यादि ध्रुवसोमापाह्वयानिलानलप्रत्यूषप्रभासैरष्टवसुभिः वीरभद्रशंभुगिरीशाजैकपदाहिर्बुध्न्यपिनाकिभुवनेशकपालिदिक्पतिस्थाणुभर्गैः एकादशरुद्रैः—प्रातिस्विकार्चनायां अजायैकपदे नमः, अहये बुध्न्याय नम इति। वरुणसूर्यवेदाङ्गभान्विन्द्रकविगभस्तिमयहिरण्यरेतादिवाकरमित्रविष्णुभिः धात्रा चावृताय श्रीरामाय नमः। भूपुरान्तः इन्द्राग्नियमनिर्ऋतिवरुणवायुकुबेरेशानैः अष्टदिक्पालकैः ऊर्ध्वाधोभागे धात्रनन्ताभ्यां चावृताय श्रीरामाय नमः। भूपुराद्बहिः वज्रशक्तिदण्डखड्गपाशाङ्कुशगदाशूलपद्मचक्रैरावृताय श्रीरामाय नमः। एवं साङ्गावरणं देवं व्यष्टिसमष्टिभेदेन षोडशोपचारैरभ्यर्च्य तत्सन्निधौ षट्सहस्रसङ्ख्यया

रामतारकमन्त्रं जपित्वा गायत्रीमालालक्ष्मणादिमन्त्रांश्च जपित्वा जपादिकं भगवति समर्प्य ततो देवं हृदय उद्वास्य तन्निवेदितान्नं ब्राह्मणभुक्तावशिष्टं स्वयमपि भुक्त्वा शिष्टकालं भगवन्नामस्मृतितः कालं नयेत् ॥ ७ ॥

भगवत्प्रसादद्वारा मोक्षप्राप्तिः

एवंभूतं जगदाधारभूतं रामं वन्दे सच्चिदानन्दरूपम् ।
गदाऽरिशङ्खाब्जधरं भवारिं स यो ध्यायेन्मोक्षमाप्नोति सर्वः ॥ ८ ॥
विश्वव्यापी राघवो यस्तदानीमन्तर्दधे शङ्खचक्रे गदाब्जे ।
धृत्वा रमासहितः सानुजश्च सपत्तनः सानुगः सर्वलोकी ॥ ९ ॥
तद्भक्ता ये लब्धकामांश्च भुक्त्वा तथा पदं परमं यान्ति ते च ।
इमा ऋचः सर्वकामार्थदाश्च ये ते पठन्त्यमला यान्ति मोक्षम् ॥ १० ॥

एवं कृते झटिति भगवत्प्रसादो भवति, ततः चित्तशुद्धिः, ततो निर्विशेषब्रह्मज्ञानं, तत्समकालं कृतकृत्यो भवतीत्याह—**एवमिति** । स्वोपासकदृष्ट्यपेक्षया **एवंभूतं** यन्त्ररूपेण मूर्तिरूपेण सर्वारोपाधाररूपेण च सिद्धत्वात् **जगदाधारभूतं** वस्तुतः स्वेन रूपेण राजते महीयते इति **रामं वन्दे सच्चिदानन्दरूपं गदाऽरिशङ्खाब्जधरं भवारिं** वा रामं **यो ध्यायेत्** सोऽयं तत्प्रसादलब्धज्ञानद्वारा **मोक्षमाप्नोति** ॥ ८ ॥ स्वोपासकमोक्षदशायां तदुपास्यो रामः केन रूपेण अवशिष्यत इत्यत आह—**विश्वेति** । स्वप्रसादतः स्वोपासकस्वाज्ञाननिवृत्तिसमकालमेव रामचन्द्रो भगवान् स्वकरकलितशङ्खचक्रे **गदाऽब्जे** च उपसंहृत्य **सानुजः सपत्तनोऽयं** निर्विशेषभावं धृत्वा **अन्तर्दधे** ततो व्याप्यविश्वसत्त्वे **विश्वव्यापी** भवति तदभावे तन्मोक्षरूपेण अवशिष्यत इत्यर्थः ॥ ९ ॥ एकस्य मोक्षतो भगवदभावे तद्भक्तानां का गतिरित्याशङ्क्य स्वदृष्ट्या भगवानस्तीत्युपास्य तत्प्रसादतः कृतकृत्याः भवन्तीत्याह—**तद्भक्ता** इति । सर्वार्थसाधकमन्त्रपारायणफलमाह—**इमा** इति ॥ १० ॥

इति पञ्चमोपनिषत्

उत्तरतापिनी

प्रथमः खण्डः

अविमुक्तोपासनम्

बृहस्पतिरुवाच याज्ञवल्क्यम्—यदनु कुरुक्षेत्रं देवानां देवयजनं सर्वेषां भूतानां ब्रह्मसदनम् ॥ १ ॥

अविमुक्तं वै कुरुक्षेत्रं देवानां देवयजनं सर्वेषां भूतानां ब्रह्मसदनम् । तस्माद्यत्र क्वचन गच्छति तदेव मन्येतेतीदं वै कुरुक्षेत्रं देवानां देवयजनं सर्वेषां भूतानां ब्रह्मसदनम् । अत्र हि जन्तोः प्राणेषूत्क्रममाणेषु रुद्रस्तारकं ब्रह्म व्याचष्टे येनासावमृती भूत्वा मोक्षी भवति । तस्मादविमुक्तमेव निषेवेत । अविमुक्तं न विमुञ्चेत् ॥ २ ॥ एवमेवैतद्याज्ञवल्क्य ॥ ३ ॥

पूर्वतापिनीरीत्योपासकानां निर्विशेषब्रह्मावगतये उत्तरतापिन्युपनिषदारभ्यते । बृहस्पतिभरद्वाजात्रियाज्ञवल्क्यप्रश्नप्रतिवचनरूपेयमाख्यायिका निर्विशेषब्रह्मविद्यास्तुत्यर्था । तत्राविमुक्तयाथात्म्यबुभुत्सया याज्ञवल्क्यं प्रति बृहस्पतिरुवाचेत्याह—**बृहस्पतिरिति** ॥ १ ॥ ब्रह्ममात्रज्ञानोत्पत्तेः प्राक् **अविमुक्तं** भ्रूमध्यविलसिततारकलक्ष्यमेव **निषेवेत** सदा अनुसन्धानं कुर्यादिति । शिष्टं जाबालोपनिषद्गतप्रथमखण्डव्याख्यानेनैव व्याख्यातं स्यात् [1] ॥ २–३ ॥

इति प्रथमः खण्डः

---

[1] तच्च व्याख्यानं तारसारोपनिषदः प्रथमखण्डव्याख्याने अस्मिन्नेव संपुटे ७९ पुटे दृश्यताम् .

द्वितीयः खण्डः

रामषडक्षरस्य तारकत्वम्

अथ हैनं भरद्वाजः पप्रच्छ याज्ञवल्क्यं—किं तारकं किं तारयतीति ॥ १ ॥

स होवाच याज्ञवल्क्यः—तारकं दीर्घानलं बिन्दुपूर्वकं दीर्घानलं पुनर्माय नमश्चन्द्राय नमो भद्राय नम इत्येतद्ब्रह्मात्मकाः सच्चिदानन्दाख्या इत्युपासितव्यम् ॥ २ ॥

अकारः प्रथमाक्षरो भवति । उकारो द्वितीयाक्षरो भवति । मकारस्तृतीयाक्षरो भवति । अर्धमात्रश्चतुर्थाक्षरो भवति । बिन्दुः पञ्चमाक्षरो भवति । नादः षष्ठाक्षरो भवति । तारकत्वात्तारको भवति । तदेव तारकं ब्रह्म त्वं विद्धि । तदेवोपासितव्यमिति ज्ञेयम् । गर्भजन्मजरामरणसंसारमहद्भयात् संतारयतीति । तस्मादुच्यते षडक्षरं तारकमिति ॥ ३ ॥

प्रथमखण्डे रुद्रस्तारकं ब्रह्म व्याचष्टे, अविमुक्तमेव प्रत्यञ्चमात्मानमेव निषेवेत, तत् ब्रह्ममात्रज्ञानं न मुञ्चेदिति याज्ञवल्क्योक्तिं बृहस्पतिना साकं भरद्वाजोऽपि निशम्य अविमुक्तशब्दवाच्यतारकेयत्तापरिज्ञानाय भरद्वाजो याज्ञवल्क्यं पृच्छतीत्याह—**अथेति** । किमिति? **किं तारकं किं तारयतीति** ॥ १ ॥ भरद्वाजप्रश्नोत्तरं याज्ञवल्क्यः एवमाह—**तारकमिति** । आदौ **बिन्दुपूर्वकं दीर्घानलं** रामिति ततो **दीर्घानलं** रेति **पुनर्माय नम** इति सर्वं मिळित्वा रां रामाय नमः इति रामषडक्षर उद्भूतो भवति । रां रामेति त्र्यक्षरेण सह **चन्द्राय नमः** इत्यादिपञ्चाक्षरयोजनात् रां रामचन्द्राय नमः रां रामभद्राय नमः इत्यष्टाक्षरो

भवति । इत्येतत् एते ब्रह्मात्मकाः सच्चिदानन्दाख्याः इत्युपासितव्यम् ॥ २ ॥ प्रणवस्य तारकत्वप्रसिद्धेः षडक्षरस्य तारकत्वं कथं ? इत्यत आह—अकार इति यस्मादेवं तस्मात् ॥ ३ ॥

तारकजपफलम्

य एतत्तारकं ब्रह्म ब्राह्मणो नित्यमधीते स पाप्मानं तरति स मृत्युं तरति स ब्रह्महत्यां तरति स भ्रूणहत्यां तरति स वीरहत्यां तरति स सर्वहत्यां तरति स संसारं तरति स सर्वं तरति सोऽविमुक्तमाश्रितो भवति स महान् भवति सोऽमृतत्वं च गच्छति ॥ ४ ॥

तारकजपफलमाह—य इति । तारकार्थज्ञानात् मुख्यामृतत्वमेतीत्यर्थः ॥४॥

रामस्य प्रणवार्थत्वम्

अत्रैते श्लोका भवन्ति—

अकाराक्षरसंभूतः सौमित्रिर्विश्वभावनः ।
उकाराक्षरसंभूतः शत्रुघ्नस्तैजसात्मकः ॥ ५ ॥
प्राज्ञात्मकस्तु भरतो मकाराक्षरसंभवः ।
अर्धमात्रात्मको रामो ब्रह्मानन्दैकविग्रहः ॥ ६ ॥
श्रीरामसांनिध्यवशाज्जगदाधारकारिणी ।
उत्पत्तिस्थितिसंहारकारिणी सर्वदेहिनाम् ॥ ७ ॥
सा सीता भवति ज्ञेया मूलप्रकृतिसंज्ञिका ।
प्रणवत्वात् प्रकृतिरिति वदन्ति ब्रह्मवादिनः ॥ इति ॥ ८ ॥

रामतारकस्य प्रणवत्वे श्रीरामस्य प्रणवार्थत्वं कुतः ? इत्यत्र अस्मिन्नर्थे एते श्लोकाः मन्त्राः भवन्तीत्याह—**अत्रैते श्लोका भवन्तीति**। सौमित्र्यादेः अकाराद्यर्धमात्राऽन्तकलनाऽऽरोपापवादाधिकरणतया विश्वविराडोत्रादिद्वि(?)तुर्याविकल्परूपत्वात् श्रीरामस्य प्रणवार्थत्वमुपपद्यते ॥ ५–६ ॥ तस्य प्रणवार्थत्वमस्तु, प्रणवस्वरूपं किं ? इत्यत आह—**श्रीरामेति** । स्वाधिष्ठेयचित्सामान्यरूपायाः सीतायाः स्वाधिष्ठानसत्तासामान्यश्रीरामाविनाभाविमूलप्रकृतित्वेन प्रकृतत्वात् सीतायाः प्रणवत्वं सिद्धमित्यर्थः ॥ ७–८ ॥

प्रणवतदर्थयाथात्म्यम्

ओमित्येतदक्षरमिदं सर्वं तस्योपव्याख्यानं भूतं भव्यं भविष्यदिति सर्वमोंकार एव । यच्चान्यत्त्रिकालातीतं तदप्योंकार एव । सर्वं ह्येतद्ब्रह्म । अयमात्मा ब्रह्म । सोऽयमात्मा चतुष्पात् ॥ ९ ॥

जागरितस्थानो बहिःप्रज्ञः सप्ताङ्ग एकोनविंशतिमुखः स्थूलभुग्वैश्वानरः प्रथमः पादः ॥ १० ॥

स्वप्नस्थानोऽन्तःप्रज्ञः सप्ताङ्ग एकोनविंशतिमुखः प्रविविक्तभुक् तैजसो द्वितीयः पादः ॥ ११ ॥

यत्र सुप्तो न कंचन कामं कामयते न कंचन स्वप्नं पश्यति तत् सुषुप्तम् । सुषुप्तस्थान एकीभूतः प्रज्ञानघन एवानन्दमयो ह्यानन्दभुक् चेतोमुखः प्राज्ञस्तृतीयः पादः ॥ १२ ॥

एष सर्वेश्वर एष सर्वज्ञ एषोऽन्तर्याम्येष योनिः सर्वस्य प्रभवाप्ययौ हि भूतानाम् ॥ १३ ॥

नान्तःप्रज्ञं न बहिःप्रज्ञं नोभयतःप्रज्ञं न प्रज्ञं नाप्रज्ञं न प्रज्ञानघनमदृश्यमव्यवहार्यमग्राह्यमलक्षणमचिन्त्यमव्यपदेश्यमेकात्म-

प्रत्ययसारं प्रपञ्चोपशमं शान्तं शिवमद्वैतं चतुर्थं मन्यन्ते स आत्मा स विज्ञेयः ॥ १४ ॥

को वा प्रणवः, को वा प्रणवार्थः, इत्याकाङ्क्षायां अभिधानप्रणवाभिधेयतदर्थैकत्वावगतये प्रणवतदर्थयाथात्म्यं प्रकटयति—**ओमिति। स आत्मा स विज्ञेयः** इत्येतत् सर्वं माण्डूक्योपनिषद्व्याख्यानेनैव पदशो व्याख्यातं स्यात् इति मन्तव्यम् ॥ ९–१४ ॥

प्रत्यग्ब्रह्मणोरेकीकरणम्

सदोज्ज्वलोऽविद्यातत्कार्यहीनः स्वात्मबन्धहरः सर्वदा द्वैतरहित आनन्दरूपः सर्वाधिष्ठानसन्मात्रो निरस्ताविद्यातमोमोहोऽहमेवेति संभाव्योऽहम् ॥ १५ ॥

ओं तत् सद्यत् परं ब्रह्म रामचन्द्रश्चिदात्मकः ।
सोऽहमोन्तद्रामभद्रपरंज्योती रसोऽहमोम् ॥ १६ ॥
इत्यात्मानमादाय मनसा ब्रह्मणैकीकुर्यात् ॥ १७ ॥

किमित्ययं विज्ञेयः इत्याकाङ्क्षायां अपरोक्षतया ज्ञातव्यः इत्याह—**सदेति**। प्रत्यग्रूपेण सदोज्ज्वलतीति **सदोज्ज्वलः**। स्वाविद्यातत्कार्यस्वात्मबन्धवतः सदोज्ज्वलत्वं कुत इत्यत आह—**अविद्येति**। वस्तुदृष्ट्या या अविद्यमाना सा अविद्या, तत्कार्यं अनन्तकोटिब्रह्माण्डजातं, तत्कलनाविरळः तद्धीनः, आविद्यकं स्वात्मबन्धं हरतीति तथोक्तः, तस्य सदोज्ज्वलत्प्रत्यक्त्वं उपपद्यते। द्वैतदुःखे सति कथं बन्धप्रासप्रत्यक्त्वमित्यत्र **सर्वदा द्वैतरहित आनन्दरूपः** इति। असत्प्रपञ्चे सति कथमानन्दरूपता इत्यत्र तदपवादाधिष्ठानस्य नित्यानन्दत्वेन सन्मात्रता स्यादित्याह—**सर्वाधिष्ठानसन्मात्र** इति। सन्मात्रस्य इतरव्यवच्छेदकतया स्वाविद्यातमोग्रस्तत्वात् इत्यत्र सन्मात्रस्य निष्प्रतियोगिकत्वेन इतरव्य-

वच्छेदासंभवात् निरस्ताविद्यातमोमोहोऽहमेवेति संभाव्योऽहम् ॥ १५ ॥ ओं तत्सद्यत्परंब्रह्मतया राजमानो महीयमानः स्वभक्तपटलाह्लादनकरो भवामि चिदात्मकः चिन्मात्रः सोऽहमित्यर्थः । यदोङ्कारार्थविश्वविराडोत्रादिभावमापन्नं यत् स्वगतहेयांशापायसिद्धं तद्रामभद्रपरंज्योतीरसोऽहम् ॥ १६ ॥ एवं प्रत्यञ्चमात्मानमादाय मनसा परब्रह्मणा एकीकुर्यात् प्रत्यगभिन्नं ब्रह्मास्मीति भावयेदित्यर्थः ॥ १७ ॥

रामज्ञानान्मुक्तिः

सदा रामोऽहमस्मीति तत्त्वतः प्रवदन्ति ये ।
न ते संसारिणो नूनं राम एव न संशयः ॥ १८ ॥
इत्युपनिषत् । य एवं वेद स मुक्तो भवतीति याज्ञवल्क्यः ॥१९॥

सदा रामोऽहमस्मीति मन्त्रो रामरहस्योपनिषदि व्याख्यातः । रामज्ञानसमकालं रामो भवति ॥ १८ ॥ इत्युपनिषत्—ब्रह्ममात्रपर्यवसानं यो वेद स मुक्तो भवतीत्यर्थः ॥ १९ ॥

इति द्वितीयः खण्डः

तृतीयः खण्डः

बाह्यान्तराविमुक्तयाथात्म्यम्

अथ हैनमत्रिः पप्रच्छ याज्ञवल्क्यं—य एषोऽनन्तोऽव्यक्तपरिपूर्णानन्दैकचिदात्मा तं कथमहं विजानीयामिति ॥ १ ॥

स होवाच याज्ञवल्क्यः—सोऽविमुक्त उपास्यो य एषोऽनन्तोऽव्यक्त आत्मा सोऽविमुक्ते प्रतिष्ठित इति ॥ २ ॥

सोऽविमुक्तः कस्मिन् प्रतिष्ठित इति ॥ ३ ॥

वरणायां नास्यां च मध्ये प्रतिष्ठित इति ॥ ४ ॥

का वै वरणा का च नासीति ॥ ५ ॥

जन्मान्तरकृतान् सर्वान् दोषान् वारयतीति तेन वरणा भवतीति । सर्वानिन्द्रियकृतान् पापान् नाशयतीति तेन नासी भवतीति ॥ ६ ॥

कतमं चास्य स्थानं भवतीति ॥ ७ ॥

भ्रुवोर्घ्राणस्य च यः सन्धिः स एष द्यौर्लोकस्य परस्य च सन्धिर्भवतीति । एतद्वै सन्धिं सन्ध्यां ब्रह्मविद उपासत इति । सोऽविमुक्त उपास्य इति । सोऽविमुक्तं ज्ञानमाचष्टे यो वा एतदेवं वेद ॥ ८ ॥

बाह्यान्तराविमुक्तयाथात्म्यमवगन्तुं याज्ञवल्क्यमत्रिः पृच्छतीत्याह—**अथेति** । एतदपि जाबालोपनिषदि व्याख्यातम् ॥ १–८ ॥

[तच्च व्याख्यानं झटिति प्रत्यायनार्थं अत्र उदाहियते—**अथ ह** बृहस्पति[भारद्वाज]प्रश्ननिर्णयानन्तरं किल **एनं याज्ञवल्क्यं ब्रह्मपुत्रः अत्रिः पप्रच्छ** । किमिति ? यः तारकब्रह्मेत्युक्तः **एषोऽनन्तः** परिच्छेदत्रयविरळोऽव्यक्त **आत्मा तं** उक्तलक्षणमात्मानं **कथमहं विजानीयां** अवगच्छेयं **इति** ॥ १ ॥ अत्रिप्रश्नोत्तरं **स होवाच याज्ञवल्क्यः** बृहस्पतिं प्रति । तारकत्वेन य उक्तः **सोऽविमुक्तः** प्रत्यगभेदेन **उपास्यः** । तत्र हेतुः—भवता पृष्टो **य एषोऽनन्तोऽव्यक्त आत्मा**—व्याख्यातं—**सोऽविमुक्ते** सोपाधिकेश्वरे **प्रतिष्ठित इति** । तस्य निरावृतत्वात् तस्मिन् अव्यक्तोऽनन्तात्मा उपलभ्यते ॥ २ ॥ तदुपलब्धिस्थानं

पृच्छति—**सोऽविमुक्तः कस्मिन् प्रतिष्ठित इति** ॥ ३ ॥ सोऽयमीश्वरः कुत्र सन्निहितः इति पृष्टः उत्तरमाह—**वरणायां नास्यां च मध्ये प्रतिष्ठित इति** । वरणानास्योर्मध्ये प्रतिष्ठित इत्यर्थः । वरणानासीप्रदेशौ श्रुतिर्व्याकरिष्यतीति न व्याख्यातम् ॥ ४ ॥ वरणानासीस्वरूपं पृच्छति—**का वै वरणा का च नासीति** ॥ ५ ॥ तत्र वरणाशब्दार्थमाह—**सर्वानिति** । **सर्वान्** ज्ञानकर्मेन्द्रिय-कृतान् **दोषान् वारयति** निवारयतीति **तेन वरणा भवतीति** । **सर्वानिन्द्रिय-कृतान् पापान्** पापानि **नाशयतीति तेन नासी** नाशी **भवति** । सकारः शकारार्थः ॥ ६ ॥ वरणाया नास्याश्च मध्ये प्रतिष्ठित इत्युक्त्या नासा भ्रूसन्धिः प्रतीयते, तथाऽपि तत्प्रदेशं पृच्छति—**कतमं चास्य स्थानं भवतीति** । **अस्य** अविमुक्तस्येत्यर्थः । सर्वत्रेतिशब्दः प्रश्नपरिसमाप्त्यर्थः ॥ ७ ॥ **भ्रुवोः घ्राणस्य च** यः प्रसिद्धः **सन्धिः स एष** प्रसिद्धः **ब्रह्मकपालस्थानीयद्युलोकस्य** चुबुकावसानस्थानीयस्य च **परस्य** च भूलोकस्यापि **सन्धिः भवति** लोकद्वय-समुच्चयार्थः चकारः । **एतद्वै** एतमेव सन्धीयतेऽस्मिन्नविमुक्तमिति सन्धिः स्वात्मा तं **सन्धिं** स्वात्मानं **सन्ध्यां** भ्रूघ्राणसन्धौ **ब्रह्मविद उपासते** तत्रत्यज्योतिर्लिङ्ग-ध्यानपरा भवन्ति । **सोऽविमुक्त उपास्यः इति** व्याख्यातम् । तज्ज्ञानफलमाह—**यो वा इति** । **यो** वै विद्वानविमुक्तयाथात्म्यं वेद तद्गतहेयांशमपोह्य निर्विशेषात्मानं जानाति स विद्वान् **सोऽविमुक्तं** तत्साक्षात्कारहेतु**ज्ञानमाचष्टे** स्वयमीश्वरभावमेत्य स्वभक्तपटलचरमदशायां तारकज्ञानोपदेशं करोति स्वयं निर्विशेषब्रह्मैव भवतीत्यर्थः ॥ ८ ॥]

मुमूर्षूणां शिवकृतरामतारकोपदेशः

अथ तं प्रत्युवाच—

श्रीरामस्य मनुं काश्यां जजाप वृषभध्वजः ।
मन्वन्तरसहस्रैस्तु जपहोमार्चनादिभिः ॥ ९ ॥
ततः प्रसन्नो भगवान् श्रीरामः प्राह शंकरम् ।
वृणीष्व यदभीष्टं तद्दास्यामि परमेश्वर ॥ इति ॥ १० ॥

अथ सच्चिदानन्दात्मानं श्रीराममीश्वरः पप्रच्छ—

मणिकर्ण्यां मम क्षेत्रे गङ्गायां वा तटे पुनः ।
म्रियते देहि तज्जन्तोर्मुक्तिं नातो वरान्तरम् ॥ इति ॥ ११ ॥

अथ स होवाच श्रीरामः—

क्षेत्रेऽस्मिंस्तव देवेश यत्र कुत्रापि वा मृताः ।
कृमिकीटादयोऽप्याशु मुक्ताः सन्तु मे चान्यथा ॥ १२ ॥
अविमुक्ते तव क्षेत्रे सर्वेषां मुक्तिसिद्धये ।
अहं संनिहितस्तत्र पाषाणप्रतिमाऽऽदिषु ॥ १३ ॥
क्षेत्रेऽस्मिन् योऽर्चयेद्भक्त्या मन्त्रेणानेन मां शिव ।
ब्रह्महत्याऽऽदिपापेभ्यो मोक्षयिष्यामि मा शुचः ॥ १४ ॥
त्वत्तो वा ब्रह्मणो वाऽपि ये लभन्ते षडक्षरम् ।
जीवन्तो मन्त्रसिद्धाः स्युर्मुक्ता मां प्राप्नुवन्ति ते ॥ १५ ॥
मुमूर्षोर्दक्षिणे कर्णे यस्य कस्यापि वा स्वयम् ।
उपदेक्ष्यसि मन्मन्त्रं स मुक्तो भविता शिव ॥ १६ ॥

इति श्रीरामचन्द्रेणोक्तम् ॥

उत्तमाधिकारिणां—"ज्योतिर्लिङ्गं भ्रुवोर्मध्ये नित्यं ध्यायेत् सदा यतिः" इति श्रुतिसिद्धज्योतिर्लिङ्गं प्रत्यग्धातुं अविमुक्तशब्दवाच्यतया प्रतिपाद्य मध्यमाधिकारिणां काशीक्षेत्रमेव अविमुक्तमिति प्रकटयित्वा तत्र ये कळेबरं त्यजन्ति ते परमेश्वरोपदिष्टरामतारकज्ञानतः कृतकृत्या भवन्तीत्येतदर्थं अत्रिं प्रति याज्ञवल्क्य आह—**अथेति** ॥ ९–१० ॥ **पप्रच्छ**—किमिति? **मणिकर्ण्यामिति** । "श्रीरामस्य मनुं काश्यां" मित्यादि यदुक्तं तत् सर्वं काशीषडक्षरस्तुत्यर्थं, अन्यथा

परमेश्वरस्य निरावृतक्रियाज्ञानेच्छाशक्तिमत्त्वेन अवाप्तसमस्तकामत्वात् स्वाङ्गदृष्ट्या शिवरामयोः भेदेऽपि तद्दृष्ट्यैकत्वात् स्वांशजभक्तपटलस्वाज्ञानमोचनस्य स्वज्ञानायत्तत्वात् स्वज्ञानप्रदानस्य स्वायत्तत्वादित्यर्थः ॥ ११–१६ ॥ -

इति तृतीयः खण्डः

चतुर्थः खण्डः

रामसाक्षात्कारप्रदाः मन्त्राः

अथ हैनं भरद्वाजो याज्ञवल्क्यमुवाच—अथ कैर्मन्त्रैः स्तुतः श्रीरामचन्द्रः प्रीतो भवति स्वात्मानं दर्शयति तान्नो ब्रूहि भगवन्निति ॥

स होवाच याज्ञवल्क्यः—पूर्वं सत्यलोके श्रीरामचन्द्रेणैवं शिक्षितो ब्रह्मा पुनरेतया गाथया नमस्करोति—

विश्वरूपधरं विष्णुं नारायणमनामयम् ।
पूर्णानन्दैकविज्ञानं परंब्रह्मस्वरूपिणम् ॥
मनसा संस्मरन् ब्रह्मा तुष्टाव परमेश्वरम् ॥

ॐ यो ह वै श्रीरामचन्द्रः स भगवानद्वैतपरमानन्द आत्मा यत् परं ब्रह्म भूर्भुवः सुवस्तस्मै वै नमो नमः ॥ १ ॥ [ज्ञातव्यौ यथा प्रथममन्त्रोक्तावाद्यन्तौ तथा सर्वमन्त्रेषु] . . . यश्चाखण्डैकरसात्मा . . . ॥ २ ॥ . . . यच्च ब्रह्मानन्दामृतम् . . . ॥ ३ ॥

. . . यत्तारकं ब्रह्म . . . ॥ ४ ॥ . . . यो ब्रह्मा विष्णुर्महेश्वरो यः सर्वदेवात्मा . . . ॥ ५ ॥ . . . ये सर्वे वेदाः साङ्गाः सशाखाः सेतिहासपुराणाः . . . ॥ ६ ॥ . . . यो जीवान्तरात्मा . . . ॥ ७ ॥ . . . यः सर्वभूतान्तरात्मा . . . ॥ ८ ॥ . . . ये देवासुरमनुष्यादिभावाः . . . ॥ ९ ॥ . . . ये मत्स्यकूर्माद्यवतारः . . . ॥ १० ॥ . . . योऽन्तःकरणचतुष्टयात्मा . . . ॥ ११ ॥ . . . यश्च प्राणः . . . ॥ १२ ॥ . . . यश्च यमः . . . ॥ १३ ॥ . . . यश्चान्तकः . . . ॥ १४ ॥ . . . यश्च मृत्युः . . . ॥ १५ ॥ . . . यच्चामृतम् . . . ॥ १६ ॥ . . . यानि च पञ्च महाभूतानि . . . ॥ १७ ॥ . . . यः स्थावरजङ्गमात्मा . . . ॥ १८ ॥ . . . ये पञ्चाग्नयः . . . ॥ १९ ॥ . . . याः सप्त महाव्याहृतयः . . . ॥ २० ॥ . . . या विद्या . . . ॥ २१ ॥ . . . या सरस्वती . . . ॥ २२ ॥ . . . या लक्ष्मीः . . . ॥ २३ ॥ . . . या गौरी . . . ॥ २४ ॥ . . . या जानकी ॥ २५ ॥ . . . यच्च त्रैलोक्यम् . . . ॥ २६ ॥ . . . यः सूर्यः . . . ॥ २७ ॥ . . . यः सोमः . . . ॥ २८ ॥ . . . यानि च नक्षत्राणि . . . ॥ २९ ॥ . . . ये च नव ग्रहाः . . . ॥ ३० ॥ . . . ये चाष्टौ लोकपालाः . . . ॥ ३१ ॥ . . . ये चाष्टौ वसवः . . . ॥ ३२ ॥ . . . ये चैकादश रुद्राः . . . ॥ ३३ ॥ . . . ये च द्वादशादित्याः . . . ॥ ३४ ॥ . . . यच्च भूतं भव्यं भविष्यत् . . . ॥३५॥ . . . यद्ब्रह्माण्डस्य बहिर्व्याप्तम् . . . ॥३६॥

. . . . यो हिरण्यगर्भः . . . ॥ ३७ ॥ . . . या प्रकृतिः . . . ॥ ३८ ॥ . . . यश्चोंकारः . . . ॥ ३९ ॥ . . . याश्चतस्रोऽर्धमात्राः . . . ॥ ४० ॥ . . . यः परमपुरुषः . . . ॥ ४१ ॥ . . . यश्च महेश्वरः . . . ॥ ४२ ॥ . . . यश्च महादेवः . . . ॥ ४३ ॥ . . . य ॐ नमो भगवते वासुदेवाय . . . ॥ ४४ ॥ . . . यो महाविष्णुः . . . ॥ ४५ ॥ . . . यः परमात्मा . . . ॥ ४६ ॥ . . . यो विज्ञानात्मा . . . ॥ ४७ ॥

ॐ यो ह वै श्रीरामचन्द्रः स भगवानद्वैतपरमानन्द आत्मा यः सच्चिदानन्दाद्वैतैकचिदात्मा भूर्भुवः सुवस्तस्मै वै नमो नमः ॥ इति ॥

तान् ब्रह्माऽब्रवीत्—सप्तचत्वारिंशन्मन्त्रैर्नित्यं देवं स्तुध्वम् । ततो देवः प्रीतो भवति । स्वात्मानं दर्शयति । तस्माद्य एतैर्मन्त्रैर्नित्यं देवं स्तौति स देवं पश्यति सोऽमृतत्वं च गच्छतीति महोपनिषत् ॥

श्रीरामसाक्षात्कारोपायबुभुत्सया भरद्वाजो याज्ञवल्क्यं पृच्छतीत्याह—**अथेति** । **उवाच**—किमिति ? **अथेति** । अत्र इतिहासमवतारयति—**पूर्वमिति** । कथं ब्रह्मा श्रीरामचन्द्रं तुष्टावेत्यत्र श्रीरामसार्वात्म्यप्रकटनमन्त्रान् प्रकाशयति—**ओमिति** । **हवा** इति वृत्तानुस्मरणार्थौ निपातौ । **यः** परमार्थदृष्ट्या कैवल्यश्रीस्वरूपेण राजमानो महीयमानो भक्तपटलाह्लादकरश्च भवति सोऽयं षड्गुणैश्वर्यस्वरूपो **भगवान्** द्वैतदुःखग्रासाद्वैतपरमानन्दात्मतया अवशिष्यते यद्याथात्म्यं **परं ब्रह्मेति** विख्यातं यस्तु पुनः स्वाज्ञदृष्ट्या **भूर्भुवःसुवरिति** त्रैलोक्यवपुर्विराट् भवति तस्मै सविशेषनिर्विशेषात्मने नमो नमः । वैशब्दः

सेव्यसेवकयोः उपाधिकृतभेदासंभवैकत्वद्योतकः । इति तान् ब्रह्माऽब्रवीत्—हे देवाः यूयं सप्तचत्वारिंशदिति । यस्मादेवं तस्मात् ॥

इति चतुर्थः खण्डः

पञ्चमः खण्डः

रामषडक्षरमाहात्म्यम्

अथ हैनं भरद्वाजो याज्ञवल्क्यमुपसमेत्योवाच—श्रीराममन्त्रराजस्य माहात्म्यमनुब्रूहीति ॥ १ ॥

स होवाच याज्ञवल्क्यः—

स्वप्रकाशः परंज्योतिः स्वानुभूत्येकचिन्मयः ।
तदेव रामचन्द्रस्य मनोराद्यक्षरः स्मृतः ॥ २ ॥
अखण्डैकरसानन्दस्तारकब्रह्मवाचकः ।
रामायेति सुविज्ञेयः सत्यानन्दचिदात्मकः ॥ ३ ॥
नमःपदं सुविज्ञेयं पूर्णानन्दैकविग्रहम् ।
सदा नमन्ति हृदये सर्वे देवा मुमुक्षवः ॥ ४ ॥ इति ॥

य एतं मन्त्रराजं श्रीरामचन्द्रषडक्षरं नित्यमधीते सोऽग्निपूतो भवति स वायुपूतो भवति स आदित्यपूतो भवति स सोमपूतो भवति स ब्रह्मपूतो भवति स विष्णुपूतो भवति स रुद्रपूतो भवति स सर्वैर्दे-

वैर्ज्ञातो भवति स सर्वक्रतुभिरिष्टवान् भवति तेनेतिहासपुराणानां रुद्राणां शतसहस्राणि जप्तानि फलानि भवन्ति । श्रीरामचन्द्रमनुस्मरणेन गायत्र्याः शतसहस्राणि जप्तानि फलानि भवन्ति । प्रणवानामयुतकोटिजप्तो भवति । दश पूर्वान् दशोत्तरान् पुनाति । स पङ्क्तिपावनो भवति । स [redacted]हान् भवति । सोऽमृतत्वं च गच्छति ॥ ९ ॥

मन्त्रराजार्थं तन्माहात्म्यं तज्ज्ञानफलं च ज्ञातुमिच्छन् भरद्वाजो याज्ञवल्क्यं पृच्छतीत्याह—**अथेति** । मुख्यार्थं सफलं **माहात्म्यमनुब्रूहि** ॥ १ ॥ षडक्षराद्यबीजार्थमाह—**स्वप्रकाश** इति ॥ २ ॥ रामायेति त्र्यक्षरार्थं निगमयति—**अखण्डेति** ॥ ३ ॥ नमःशब्दार्थमाचष्टे—**नमःपदमिति** । विशिष्टार्थस्तु, रां रामायेत्यक्षरचतुष्टयं तत्पदलक्ष्यबोधकं, नमः इत्यक्षरद्वयं त्वंपदलक्ष्यबोधकं, लक्षणासापेक्षलक्ष्यद्वयगतविशेषांशापह्नवसिद्धं निष्प्रतियोगिकब्रह्ममात्रमित्यर्थः । **सर्वे देवा मुमुक्षवश्च** एवमेव **सदा हृदये नमन्ति** ब्रह्ममात्रं स्वावशेषधिया चिन्तयन्ति ॥ ४ ॥ षडक्षरजपान्तराळिकफलमाह—**य इति** । **स सर्वैर्देवैः ब्रह्मविदिति ज्ञातो भवति** । चशब्दात् तारकार्थज्ञानतो मुख्यामृतत्वं विदेहकैवल्यं गच्छतीति द्योत्यते ॥ ९ ॥

मन्त्रराजमाहात्म्यप्रतिपादकश्लोकाः

अत्रैते श्लोका भवन्ति—

गाणपत्येषु शैवेषु शाक्तसौरेष्वभीष्टदः ।
वैष्णवेष्वपि सर्वेषु राममन्त्रः फलाधिकः ॥ ६ ॥
गाणपत्यादिमन्त्रेषु कोटिकोटिगुणाधिकः ।
मन्त्रस्तेष्वप्यनायासफलदोऽयं षडक्षरः ॥ ७ ॥

षडक्षरोऽयं मन्त्रः स्यात् सर्वाघौघनिवारणः ।
मन्त्रराज इति प्रोक्तः सर्वेषामुत्तमोत्तमः ॥ ८ ॥
कृतं दिने यदुरितं पक्षमासर्तुवर्षजम् ।
सर्वं दहति निःशेषं तूलाचलमिवानलः ॥ ९ ॥
ब्रह्महत्यासहस्राणि ज्ञानाज्ञानकृतानि च ।
स्वर्णस्तेयसुरापानगुरुतल्पायुतानि च ॥ १० ॥
कोटिकोटिसहस्राणि उपपातकजान्यपि ।
सर्वाण्यपि प्रणश्यन्ति राममन्त्रानुकीर्तनात् ॥ ११ ॥
भूतप्रेतपिशाचाद्याः कूश्माण्डब्रह्मराक्षसाः ।
दूरादेव प्रधावन्ति राममन्त्रप्रभावतः ॥ १२ ॥
ऐहलौकिकमैश्वर्यं स्वर्गाद्यं पारलौकिकम् ।
कैवल्यं भगवत्त्वं च मन्त्रोऽयं साधयिष्यति ॥ १३ ॥
ग्राम्यारण्यपशुघ्नत्वं संचितं दुरितं च यत् ।
मद्यपानेन यत् पापं तदप्याशु विनाशयेत् ॥ १४ ॥
अभक्ष्यभक्षणोत्पन्नं मिथ्याज्ञानसमुद्भवम् ।
सर्वं विलीयते राममन्त्रस्यास्यैव कीर्तनात् ॥ १५ ॥
श्रोत्रियस्वर्णहरणाद्यच्च पापमुपस्थितम् ।
रत्नादेश्चापहारेण तदप्याशु विनाशयेत् ॥ १६ ॥
ब्राह्मणं क्षत्रियं वैश्यं शूद्रं हत्वा च किल्बिषम् ।
संचिनोति नरो मोहाद्यत्तदपि नाशयेत् ॥ १७ ॥

गत्वाऽपि मातरं मोहादगम्याश्चैव योषितः ।
उपास्यानेन मन्त्रेण रामस्तदपि नाशयेत् ॥ १८ ॥
महापातकपापिष्ठसङ्गत्या संचितं च यत् ।
नाशयेत्तत्कथाश्रवणोपशयनासनभोजनैः ॥ १९ ॥
पितृमातृवधोत्पन्नं बुद्धिपूर्वमघं च यत् ।
तदनुष्ठानमात्रेण सर्वमेतद्विलीयते ॥ २० ॥
यत् प्रयागादितीर्थोक्तप्रायश्चित्तशतैरपि ।
नैवापनोद्यते पापं तदप्याशु विनाशयेत् ॥ २१ ॥
पुण्यक्षेत्रेषु सर्वेषु कुरुक्षेत्रादिषु स्वयम् ।
बुद्धिपूर्वमघं कृत्वा तदप्याशु विनाशयेत् ॥ २२ ॥
कृच्छ्रैस्तप्तपराकाद्यैर्नानाचान्द्रायणैरपि ।
पापं च नापनोद्यं यत् तदप्याशु विनाशयेत् ॥ २३ ॥
आत्मतुल्यसुवर्णादिदानैर्बहुविधैरपि ।
किंचिदप्यपरिक्षीणं तदप्याशु विनाशयेत् ॥ २४ ॥
अवस्थात्रितयेष्वेवं बुद्धिपूर्वमघं च यत् ।
तन्मन्त्रस्मरणेनैव निःशेषं प्रविलीयते ॥ २५ ॥
अवस्थात्रितयेष्वेवं मूलबन्धमघं च यत् ।
तत्तन्मन्त्रोपदेशेन सर्वमेतत् प्रणश्यति ॥ २६ ॥
आब्रह्मबीजदोषाश्च नियमातिक्रमोद्भवाः ।
स्त्रीणां च पुरुषाणां च मन्त्रेणानेन नाशिताः ॥ २७ ॥

येषु येष्वपि देशेषु रामभद्र उपास्यते ।
दुर्भिक्षादिभयं तेषु न भवेत्तु कदाचन ॥ २८ ॥
शान्तः प्रसन्नवदनो नक्रोधो भक्तवत्सलः ।
अनेन सदृशो मन्त्रो जगत्स्वपि न [illegible]गते ॥ २९ ॥
सम्यगाराधितो रामः प्रसीदत्येव सत्वरम् ।
ददात्यायुष्यमैश्वर्यमन्ते बिष्णुपदं च [illegible]त् ॥ ३० ॥

तदेतदृचाऽभ्युक्तम्—

ऋचो अक्षरे परमे व्योमन् यस्मिन् देवा अधि विश्वे निषेदुः ।
यस्तन्न वेद किमृचा करिष्यति य इत्तद्विदुस्त इमे समासते ॥ ३१ ॥
तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः ।
दिवीव चक्षुराततम् ॥ ३२ ॥
तद्विप्रासो विपन्यवो जागृवांसः समिन्धते ।
विष्णोर्यत् परमं पदम् ॥ ३३ ॥
ॐ सत्यमित्युपनिषत् ॥ ३४ ॥

एवमुक्तार्थे एते श्लोकाः मन्त्राः मन्त्रराजमाहात्म्यप्रतिपादका भवन्तीत्याह —**अत्रैते श्लोका भवन्तीति** । मन्त्रराजस्य सकलदेवतामन्त्रतोऽपि वैशिष्ट्यमाह —**गाणपत्येष्विति** । तत्तद्भावानुरोधेन पुरुषार्थचतुष्टयप्रापको मन्त्रराज इत्यर्थः ॥ ६–२९ ॥ शान्त इत्यादिविशेषणविशिष्टो भगवान् तारकानुस्मरणेन आराधितः सन् प्रसीदति, तेन किं स्यादित्यत्र—**ददातीति** । मन्त्रार्थज्ञानपूर्वकं यो जपति तस्यैव विष्णुपदाप्तिः ॥ ३० ॥ विष्णुपदार्थतृष्णया अस्य मन्त्रानादरो भवतीति यत् **तदेतदृचाऽभ्युक्तम्** । **ऋच . . .** इत्ययं मन्त्रः श्वेताश्वतरोपनिषदि

व्याख्यातः ॥ ३१ ॥ **तद्विष्णोः** इति मन्त्रस्तु आरुणिकोपनिषदि व्याख्यातः ॥ ३२–३३ ॥ किं तद्विष्णुपदं ? इत्यत्र—**ओमिति** । ओङ्कारार्थ-तुर्यतुरीयमेवं ब्रह्म **सत्यं**, स्वेतरग्राससत्तासामान्यरूपत्वात् ; तदेव विष्णुपदं स्वमात्रधियैव पद्यमानत्वात् । **इत्युपनिषच्छब्दो** रामोत्तरतापिन्युपनिष-त्समाप्त्यर्थः ॥ ३४ ॥

ते पञ्चमः खण्डः

श्रीवासुदेवेन्द्रशिष्योपनिषद्ब्रह्मयोगिना ।
रामतापिन्युपनिषद्व्याख्यानं लिखितं लघु ।
श्रीरामतापिनीव्याख्याग्रन्थजातं चतुश्शतम् ॥

इति श्रीमदीशाद्यष्टोत्तरशतोपनिषच्छास्त्रविवरणे पञ्चपञ्चाशत्सङ्ख्यापूरकं
श्रीरामतापिन्युपनिषद्विवरणं सम्पूर्णम् ॥

रामरहस्योपनिषत्

भद्रं कर्णेभिः—इति शान्तिः

प्रथमोऽध्यायः

रामस्य ब्रह्मतारकत्वम्

सनकाद्या योगिवर्या अन्ये च ऋषयस्तथा ।
प्रह्लादाद्या विष्णुभक्ता हनूमन्तमथाब्रुवन् ॥ १ ॥
वायुपुत्र महाबाहो किं तत्त्वं ब्रह्मवादिनाम् ।
पुराणे[1]ष्वष्टादशसु स्मृतिष्वष्टादशस्वपि ॥ २ ॥
चतुर्वेदेषु शास्त्रेषु विद्यास्वाध्यात्मिकेषु च ।
सर्वेषु विद्यादानेषु विघ्नसूर्येशशक्तिषु ॥ ३ ॥
एतेषु मध्ये किं तत्त्वं कथय त्वं महाबल ॥ ४ ।

हनूमान् होवाच—

भो योगीन्द्राश्च ऋषयो विष्णुभक्तास्तथैव च ।
शृणुध्वं मामकीं वाचं भवबन्धविनाशिनीम् ॥ ५

[1] षु च काव्येषु—अ २.

एतेषु चैव सर्वेषु तत्त्वं च ब्रह्म तारकम् ।
राम एव परं ब्रह्म राम एव परं तपः ।
राम एव परं तत्त्वं श्रीरामो ब्रह्म तारकम् ॥ ६ ॥

कैवल्यश्रीसारूपेण राजमानं महोऽव्ययम् ।
प्रतियोगिभेदनिर्मुक्तं श्रीरामपदमाश्रये ॥

इह खलु अथर्वणप्रोक्तेयं श्रीरामरहस्योपनिषत् श्रीराममन्त्रयन्त्रसाधनप्रपञ्चनपूर्वकं श्रीरामतत्त्वपर्यवसन्ना विजयते। अस्याः संक्षेपतो विवरणमारभ्यते। सनकादिमुनिवृन्दप्रह्लादादिभागवतकदम्बपवनात्मजप्रश्नप्रतिवचनरूपेयमाख्यायिका विद्यास्तुत्यर्था, जातमात्रेण विदिततत्त्वैः सनकप्रह्लादादिभिरपि इयं पृष्टा परमशिवावतारपवनात्मजेन प्रोक्तेति। आख्यायिकामवतारयति—**सनकाद्या इति** ॥ १ ॥ किमिति ? **वायुपुत्रेति**। वायुपुत्रेत्यादिप्रश्नतो हनूमतः सर्ववित्त्वमवगम्यते ॥ २–४ ॥ तत्कृतप्रश्नोत्तरं **हनूमान् होवाच**। किमिति ? **भो इति**। **भवबन्धविनाशिनीम्**—स्वाज्ञलोकस्य, भवतां कृतार्थत्वात् ॥५॥ **सर्वेषु विद्यादानेषु विघ्नसूर्येशशक्तिभेदेषु एतेषु** वेदशास्त्रपुराणादिषु अर्थतो विचारितेषु सत्सु अथ स्वातिरिक्तकलनाऽपह्नवसिद्धं यद्ब्रह्ममात्रं निष्प्रतियोगिकमवशिष्यते तदेवायमित्याह—**राम एवेति**। स्वातिरिक्तकलनाऽसंभवप्रबोधसिद्धनिष्प्रतियोगिकब्रह्ममात्रतया राजते महीयते इति **राम एव परं** उत्कृष्टं **ब्रह्म** स्वमात्रतया सदोपबृंहणात्, **राम एव परं** उत्कृष्टं **तपः** तन्मात्रज्ञानमित्यर्थः। **राम एव परं तत्त्वं** स्वयाथात्म्यं स्वयमेवेत्यर्थः। प्रत्यगभिन्नब्रह्मरूपेण **श्रीरामो ब्रह्म तारकं** भ्रूमध्यतारकयोगलक्षितत्वात्। यद्वा—श्रीरामस्य ब्रह्मतारकलक्ष्यतुर्यतुरीयरूपत्वात् ब्रह्मतपस्तत्त्वतारकबोध्यं रामाख्यं ब्रह्मैव स्वाज्ञादिदृष्टिमोहे सत्यसति निष्प्रतियोगिकं स्वमात्रमवशिष्यत इत्यर्थः ॥ ६ ॥

रामस्य अङ्गानि वायुपुत्रादीनि

वायुपुत्रेणोक्तास्ते योगीन्द्रा ऋषयो विष्णुभक्ता हनूमन्तं पप्रच्छुः—रामस्याङ्गानि नो ब्रूहीति ॥ ७ ॥

हनूमान् होवाच—वायुपुत्रं विघ्नेशं वाणीं दुर्गां क्षेत्रपालकं सूर्यं चन्द्रं नारायणं नारसिंहं वायुदेवं वाराहं तत्सर्वान् मन्त्रान् सीतां लक्ष्मणं शत्रुघ्नं भरतं विभीषणं सुग्रीवमङ्गदं जाम्बवन्तं प्रणवमेतान् रामस्याङ्गानि जानीथाः । एतान्यङ्गानि विना रामो विघ्नकरो भवति ॥ ८ ॥

एवं वायुपुत्रात् निर्विशेषब्रह्मतत्त्वमवगम्य मुनयो हृष्टाः सन्तः स्वाज्ञलोकानुकम्पया निर्विशेषब्रह्मात्युपायसविशेषं ब्रह्म तदङ्गानि च पृच्छन्तीत्याह—**वायुपुत्रेणेति । पप्रच्छुः**—किमिति ? **रामस्येति ।**

परित्राणाय साधूनां विनाशाय च दुष्कृताम् ।
धर्मसंस्थापनार्थाय संभवामि युगे युगे ॥

इति स्वप्रतिज्ञापालनाय कर्मज्ञानयोगलक्षणनिष्ठाद्वयपरिपालकनारायणरूपेण राजते महीयते इति रामो दाशरथिः स्वेतरदुर्लभसूनृतभाषणतया यः पुरा आसामास तस्य कानि **अङ्गानि** तद्गोचरमन्त्राश्च के तत् सर्वं **नो ब्रूहि इति ॥ ७ ॥ तैः** पृष्टो **हनूमान् होवाच** । तानि कानि इत्यत्र तदाह—**वायुपुत्रमिति** । वायुपुत्रादिजाम्बवदन्ताङ्गदेवतामन्त्रान् त्रेधा अष्टधा षोडशधा वा आदौ जप्त्वा ततो राममन्त्रजपः कार्यः । एवं कृते भगवान् रामः प्रसन्नो भवतीत्यर्थः ॥ ८ ॥

गृहस्थानां रामाङ्गप्रणवाधिकारः

पुनर्वायुपुत्रेणोक्तास्ते हनूमन्तं पप्रच्छुः—आञ्जनेय महाबल विप्राणां गृहस्थानां प्रणवाधिकारः कथं स्यादिति ॥ ९ ॥

स होवाच—श्रीराम एवोवाचेति । येषामेष षडक्षराधिकारो वर्तते तेषां प्रणवाधिकारः स्यान्नान्येषाम् । केवलमकारोकारम-

कारार्धमात्रासहितं प्रणव[1]मूह्य यो राममन्त्रं जपति तस्य शुभकरोऽहं स्याम् । तस्य प्रणवस्याकारस्योकारस्य मकारस्यार्धमात्रायाश्च ऋषिरछन्दो देवता तत्तद्वर्णावर्णावस्थानं स्वरवेदाग्निगुणानुच्चार्यान्वहं [2]प्रणवं मन्त्राद्विगुणं जपत्वा पश्चाद्राममन्त्रं यो जपेत् स रामो भवतीति रामेणोक्तास्तस्माद्रामा[illegible] प्रणवः कथित इति ॥ १० ॥

प्रणवस्यापि रामा[illegible]त्वे परिव्राजकेतराणां प्रणवाधिकारः कथमिति पृच्छन्तीत्याह—**पुनरिति** ॥ ९ ॥ तैः पृष्टो हनूमान् स्वात्मानं प्रति श्रीरामचन्द्रेण यदुक्तं तदेवाह—**स होवाचेति** । **श्रीराम एवोवाचेति**—किमिति ? **येषामिति** । ब्रह्मचारी गृही वानप्रस्थः इत्येतेषां केवलप्राधान्येन प्रणवजपाधिकारो नास्त्येव, षडक्षरादिमन्त्राङ्गत्वेन तज्जपाधिकारोऽस्तीत्याह— **केवलमिति** । **प्रणवमूह्य** चतुर्मात्राकालमुच्चार्य । आद्यन्तप्रणवयोजनपूर्वकं **राममन्त्र**जापकानां श्रीरामपदप्राप्त्युपायशुभप्रापको हनूमान् **अहं स्यां** इत्यर्थः । यो यदि श्रीरामभावापत्तिं वाञ्छति तदाऽयं षडक्षरजपात् पूर्वमेव **तस्य प्रणवस्ये**त्यादि । यस्मादेवं तस्मात् ॥ १० ॥

रामनामजपेन सर्वपापनिवृत्तिः

विभीषण उवाच—

सिंहासने समासीनं रामं पौलस्त्यसूदनम् ।
प्रणम्य दण्डवद्भूमौ पौलस्त्यो वाक्यमब्रवीत् ॥ ११ ॥
रघुनाथ महाबाहो केवलं कथितं त्वया ।
अङ्गानां सुलभं चैव कथनीयं च सौलभम् ॥ १२ ॥

श्रीराम उवाच—अथ पञ्च दण्डकानि पितृघ्नो मातृघ्नो ब्रह्मघ्नो गुरुहननः कोटियतिघ्नोऽनेककृतपापो यो मम षण्णवतिकोटि-

[1] मूह्यं—अ, अ १. [2] प्रणवमन्त्रं द्वि—अ, अ १.

नामानि जपति तेभ्यः पापेभ्यः प्रमुच्यते । स्वयमेव सच्चिदानन्द-स्वरूपो भवेन्न किम् ॥ १३ ॥

कदाचित् रामं सर्वभूतहितकृत् **विभीषण उवाच** । किमिति ? **सिंहासन** इति ॥ ११–१२ ॥ अपापिनां स्वमन्त्रतदङ्गप्रणत्यनुष्ठानतः केवलं त्वदाप्ति-रभिहिता । ब्रह्महत्यादिपातकिनां स्वाप्युपायः कथं ? इत्याशङ्कमानमालक्ष्य विभीषणं प्रति **श्रीराम उवाच** । किमिति ? **अ** ति । कानि तानीत्यत्र— **पितृघ्न** इत्यादि । पित्रादियत्यन्तहननपातकैः नरो दण्ड्यते, तानि **पञ्च दण्डकानि** । यदि तच्छमनार्थी पुरुषः तदा राम रामेति **षण्णवतिकोटिनामजपतो** निष्पापो भूत्वा मद्भावमेतीत्यत्र न हि संशयोऽस्तीत्यर्थः ॥ १३ ॥

रामोपनिषदादिभिरपि सर्वपापशान्तिः

पुनरुवाच विभीषणः—तत्राप्यशक्तोऽयं किं करोति ॥ १४ ॥

स होवाचेमम्—[1]केकसेय पुरश्चरणविधावशक्तो यो ममो-पनिषदं मम गीतां मन्नामसहस्रं मद्विश्वरूपं मदष्टोत्तरशतं राम-शताभिधानं नारदोक्तस्तवराजं हनूमत्प्रोक्तं मन्त्रराजात्मकस्तवं सीतास्तवं च [2]रामषडक्षरीत्यादिभिर्मन्त्रैर्यो मां नित्यं स्तौति मत्सदृशो भवेन्न किं भवेन्न किम् ॥ १५ ॥

मुलभोपायबुभुत्सया **पुनरुवाच** ॥ १४ ॥ अनेनापि पारायणेन पञ्चदण्डकशान्तिद्वारा मद्भावमेतीत्यत्र न हि संशयोऽस्ति । आवृत्तिः अवधारणार्था प्रथमाध्यायसमाप्त्यर्था वा इति ॥ १५ ॥

इति प्रथमोऽध्यायः

[1] कैक—अ, मु. [2] रामषडक्षरी षडक्षरेत्या—अ, क, मु.

द्वितीयोऽध्यायः

एकाक्षररामन्त्रः

सनकाद्या मुनयो हनूमन्तं पप्रच्छुः—आञ्जनेय महाबल तारकब्रह्मणो रामचन्द्रस्य मन्त्रग्रामं नो

हनूमान् होवाच-

वह्निस्थं शयनं विष्णोरर्धचन्द्रविभूषितम् ।
एकाक्षरो मनुः प्रोक्तो मन्त्रराजः सुरद्रुमः ॥ १ ॥
ब्रह्मा मुनिः स्याद्गायत्रं छन्दो रामोऽस्य देवता ।
दीर्घार्धेन्दुयुजाऽङ्गानि कुर्याद्बह्व्यात्मनो मनोः ॥ २ ॥
बीजशक्त्यादिबीजेन इष्टार्थे विनियोजयेत् ।
सरयूतीरमन्दारवेदिकापङ्कजासने ॥ ३ ॥
श्यामं वीरासनासीनं ज्ञानमुद्रोपशोभितम् ।
वामोरुन्यस्ततद्धस्तं सीतालक्ष्मणसंयुतम् ॥ ४ ॥
अवेक्षमाणमात्मानमात्मन्यमिततेजसम् ।
शुद्धस्फटिकसंकाशं केवलं मोक्षकाङ्क्षया ॥ ५ ॥
चिन्तयन् परमात्मानं भानुलक्षं जपेन्मनुम् ।

एकाक्षरादिश्रीराममन्त्रग्रामबुभुत्सया मुनयो हनूमन्तं पृच्छन्तीत्याह—**सनकाद्या इति** । किमिति ? **आञ्जनेयेति** । तैरेवं पृष्टो **हनूमान्** एकाक्षरादि-द्वात्रिंशदक्षरान्तमन्त्रतदवान्तरभेदान् तदङ्गगायत्रीमालामन्त्रान् क्रमेण **होवाच** । आदावेकाक्षरमनुमुद्धरति—**वह्निस्थमिति** । स्वाभिधेये वह्नौ तदभिधानतया

तिष्ठतीति वह्निस्थं ह्रस्वरेफाक्षरं रेति, विष्णोः शयनमिति दीर्घमात्रोच्यते शेषस्य दीर्घाङ्गत्वात्, अर्धेन्दुशब्देन बिन्दुः, आहत्य रामिति ॥ १ ॥ तस्य ऋष्यादिकमाह—ब्रह्मेति । रेफदीर्घार्धेन्दुयुजा रामित्यादिना कराङ्गन्यासौ कुर्यादित्यर्थः ॥ २ ॥ ध्यानं तु—सरयूतीरेति ॥ ३–५ ॥

द्वित्रिचतुरक्षरमन्त्राः

वह्निर्नारायणेनाढ्यो जाठरः केवलोऽपि च ॥ ६ ॥
द्व्यक्षरो मन्त्रराजोऽयं सर्वाभीष्टप्रदस्ततः ।
एकाक्षरोक्तमृष्यादि स्यादाद्येन षडङ्गकम् ॥ ७ ॥
तारमायारमाऽनङ्गवाक्स्वबीजैश्च षड्विधः ।
त्र्यक्षरो मन्त्रराजः स्यात् सर्वाभीष्टफलप्रदः ॥ ८ ॥
द्व्यक्षरश्चन्द्रभद्रान्तो द्विविधश्चतुरक्षरः ।
ऋष्यादि पूर्ववज्ज्ञेयमेतयोश्च विचक्षणैः ॥ ९ ॥

रामद्व्यक्षरमुद्धरति—वह्निरिति । रेफो वह्निः, नारायणेनाकारेण योजितश्चेत् रा इति, जाठरो मकारः केवलोऽपि च ह्रस्वमकारयोजनात् रामेति द्व्यक्षरो भवति ॥ ६–७ ॥ षट्प्रकारतः त्र्यक्षरमुद्धरति—तारेति । ॐ राम, ह्रीं राम, श्रीं राम, क्लीं राम, ऐं राम, रां राम, इति षड्विधः । ऋष्यादिकं एकाक्षरवत् ज्ञेयमित्यर्थः ॥ ८ ॥ द्विधा चतुरक्षरमुद्धरति—द्व्यक्षर इति । रामचन्द्र रामभद्रेति द्विप्रकारः चतुरक्षरः ॥ ९ ॥

पञ्चाक्षरमन्त्रः

सप्रतिष्ठौ रमौ [1]वायू हृत्पञ्चार्णो मनुर्मतः ।
विश्वामित्रऋषिः प्रोक्तः पङ्क्तिश्छन्दोऽस्य देवता ॥ १० ॥

[1] वायौ—अ, मु. वायु—अ १.

रामभद्रो बीज[1]शक्तिप्रथमार्ण[2]नति क्रमात् ।
भ्रूमध्ये हृदि नाभ्यूर्वोः पादयोर्विन्यसेन्मनुम् ॥ ११ ॥
षडङ्गं पूर्ववद्विद्वान् मन्त्रार्णैर्मनुनात्मकम् ।
मध्ये वनं कल्प[illegible]रोर्मूले पुष्पलतासने ॥ १२ ॥
लक्ष्मणेन प्रगु[illegible]मक्ष्णः कोणेन सायकम् ।
अवेक्षमाणं जा[illegible]क्या कृतव्यजनमीश्वरम् ॥ १३ ॥
जटाभारलसच्छीर्षं श्यामं मुनिगणावृतम् ।
लक्ष्मणेन धृतच्छत्रमथवा पुष्पकोपरि ॥ १४ ॥
दशास्यमथनं शान्तं ससुग्रीवविभीषणम् ।
एवं लब्ध्वा जयार्थी तु वर्णलक्षं जपेन्मनुम् ॥ १५ ॥

एकधा पञ्चाक्षरमुद्धरति—**सप्रतिष्ठाविति** । इकारदीर्घबिन्दुभ्यां सह प्रतिष्ठिताविति **सप्रतिष्ठौ** श्रीं श्रीं यं नमः इति पञ्चाक्षरो मनुः ॥१०॥ **बीजशक्ति-प्रथमार्णनतिक्रमात्** रां नम इत्यादि । न्यासस्तु— **भ्रूमध्येति** ॥११–१२॥ **अक्ष्णः** कोणेन अपाङ्गेन लक्ष्मणेन सायकं धनुषि प्रगुणितं **अवेक्षमाणमिति** ॥१३–१५॥

षडक्षरमन्त्रः

स्वकामशक्तिवाग्लक्ष्मीताराद्याः पञ्चवर्णकाः ।
षडक्षरः षड्विधः स्याच्चतुर्वर्गफलप्रदः ॥ १६ ॥
पञ्चाशन्मातृकामन्त्रवर्णप्रत्येकपूर्वकम् ।
लक्ष्मीवाङ्मन्मथादिश्च तारादिः स्यादनेकधा ॥ १७ ॥

[1] शक्तिः—अ, मु. [2] मिति—मु.

श्रीमायामन्मथैकैकं बीजाद्यन्तगतो मनुः ।
चतुर्वर्णः स एव स्यात् षड्वर्णो वाञ्छितप्रदः ॥ १८ ॥
स्वाहाऽन्तो हुंफडन्तो वा नत्यन्तो वा भवेदयम् ।
अष्टाविंशत्युत्तरशतभेदः षड्वर्ण ईरितः ॥ १९ ॥
[1]ब्रह्मा संमोहनः शक्तिर्दक्षिणामूर्त्तिरेव च ।
अगस्त्यश्च शिवः प्रोक्ता मुनयोऽनुष्टुबादिमे ॥ २० ॥
छन्दो गायत्रसंज्ञं च श्रीरामश्चैव देवता ।
अथवा कामबीजादेर्विश्वामित्रो मुनिर्मनोः ॥ २१ ॥
छन्दो देव्यादिगायत्री रामभद्रोऽस्य देवता ।
बीजशक्ती यथापूर्वं षड्वर्णान् विन्यसेत् क्रमात् ॥ २२ ॥
ब्रह्मरन्ध्रे भ्रुवोर्मध्ये हृन्नाभ्यूरुषु पादयोः ।
बीजैः षड्दीर्घयुक्तैर्वा मन्त्राणैर्वा षडङ्गकम् ॥ २३ ॥
कालाम्भोधरकान्तिकान्तमनिशं वीरासनाध्यासितं
मुद्रां ज्ञानमयीं दधानमपरं हस्ताम्बुजं जानुनि ।
सीतां पार्श्वगतां सरोरुहकरां विद्युन्निभां राघवं
पश्यन्तं मुकुटाङ्गदादिविविधाकल्पोज्ज्वलाङ्गं भजे ॥ २४ ॥

अष्टाविंशत्युत्तरशतधा भिन्नषडक्षरमुद्धरति—स्वेति । श्रीं श्रीं यं नमः इति यः पञ्चाक्षरो मनुरुक्तः सोऽयं पञ्चाक्षरः रां क्लीं ह्रीं ऐं श्रीं ॐ इति षड्बीजयोगतः षडक्षरः षड्विधो भवति । प्रातिस्विकेन पञ्चाशद्वर्णयोगतः पञ्चाशद्विधो भवति । लक्ष्मीवाग्गिल्यादिबीजयोगतः सप्तविधो भवति । रां रामायेति चतुरक्षराणि स्वाहा हुं फट् नमः इत्यादियोगतः षडक्षरो भवति । पुनश्च क्षकाराद्यकारान्त-

[1] ब्रह्म—क.

विलोमेन एकपञ्चाशत् अष्टवर्गश्च षट्स्वराश्च आहृत्य अष्टाविंशत्युत्तरशतभेदः षड्वर्ण ईरितः इति । यद्वा—

पञ्चाशद्वर्णकं वर्गं षोडशस्वरसंयुतम् ।
वर्गं वर्णं विलोमेन अष्टाविंशच्छतोत्तरम् ॥

इति ॥ १६–१९ ॥ तद्वेदेन ब्रह्मेति ॥ २०–२४ ॥

१-अष्ट-नवाक्षरमन्त्राः

रामश्च चन्द्रभद्रान्तो ङेन्तो नतियुतो द्विधा ।
सप्ताक्षरो मन्त्रराजः सर्वकामफलप्रदः ॥ २५ ॥
तारादिसहितः सोऽपि द्विविधोऽष्टाक्षरो मतः ।
तारं रामश्चतुर्थ्यन्तं क्रोडास्त्रं वह्नितल्पगा[2] ॥ २६ ॥
अष्टार्णोऽयं परो मन्त्रो ऋष्यादिः स्यात् षडर्णवत् ।
पुनरष्टाक्षरस्याथ राम एव ऋषिः स्मृतः ॥ २७ ॥
गायत्रं छन्द इत्यस्य देवता राम एव च ।
तारं श्रीबीजयुग्मौ च बीजशक्त्या[3]दयो मताः ॥ २८
षडङ्गं च ततः कुर्यान्मन्त्रार्णैरेव बुद्धिमान् ।
तारं श्रीबीजयुग्मं च रामाय नम उच्चरेत् ॥ २९ ॥
ग्लौमों बीजं वदेन्मायां हृद्रामाय पुनश्च ताम् ।
शिवोमाराममन्त्रोऽयं वस्वर्णस्तु वसुप्रदः ॥ ३० ॥
ऋषिः सदाशिवः प्रोक्तो गायत्रं छन्द उच्यते ।
शिवोमारामचन्द्रोऽत्र देवता परिकीर्तितः ॥ ३१ ॥

[1] र्थ्यन्तः—मु. उ. [2] गं—अ १. [3] युतो—अ

दीर्घया माययाऽङ्गानि तारपञ्चार्णयुक्तया ।
रामं त्रिणेत्रं सोमार्धधारिणं शूलिनं परम् ।
भस्मोद्धूलितसर्वाङ्गं कपर्दिनमुपास्महे ॥ ३२ ॥
रामाभिरामां सौन्दर्यसीमां सोमावतंसिकाम् ।
पाशाङ्कुशधनुर्बाणधरां ध्यायेत्त्रिलोचनाम् ॥ ३३ ॥
ध्यायन्नेवं वर्णलक्षं जपतर्पणतत्परः ।
बिल्वपत्रैः फलैः पुष्पैस्तिलाज्यैः पङ्कजैर्हुनेत् ॥ ३४ ॥
स्वयमायान्ति निधयः सिद्धयश्च सुरेप्सिताः ।
पुनरष्टाक्षरस्याथ ब्रह्मगायत्रराघवाः ॥ ३५ ॥
ऋष्यादयस्तु विज्ञेयाः श्रीबीजं मम शक्तिकम् ।
तत्प्रीत्यै विनियोगश्च मन्त्रार्णैरङ्गकल्पना ॥ ३६ ॥
केयूराङ्गदकङ्कणैर्मणिगणैर्विद्योतमानं सदा
रामं पार्वणचन्द्रकोटि[1]सदृशच्छत्रेण वै राजितम् ।
हेमस्तम्भसहस्रषोडशयुते मध्ये महामण्डपे
देवेशं भरतादिभिः परिवृतं रामं भजे श्यामलम् ॥ ३७ ॥
किं मन्त्रैर्बहुभिर्विनश्वरफलैरायाससाध्यैर्वृथा
किंचिल्लोभवितानमात्रविफलैः संसारदुःखावहैः ।
एकः सन्नपि सर्वमन्त्रफलदो लोभादिदोषोज्झितः
श्रीरामः शरणं ममेति सततं मन्त्रोऽयमष्टाक्षरः ॥ ३८ ॥

[1] सदृशं—अ १.

एवमष्टाक्षरः सम्यक् सप्तधा परिकीर्तितः ।
रामसप्ताक्षरो मन्त्र आद्यन्ते तारसंयुतः ॥ ३९ ॥
नवार्णो मन्त्रराजः स्याच्छेषं षड्वर्णवन्न्यसेत् ॥

अथ द्वेधा सप्ताक्षरमुद्धरति—राम इति । रामचन्द्राय नमः रामभद्राय नमः इति द्विधा सप्ताक्षरो भवति । ऋष्यादिकं पूर्ववत् ॥ २५ ॥ अष्टाक्षरमनुं षोडशधा उद्धरति—तारादीति । "तारादि" इत्यादिशब्दतः मायारमाऽनङ्गवाक्स्वबीजानि गृह्यन्ते । तैः योगतः चन्द्रभद्रभेदेन द्विप्रकारो मनुः द्वादशधा भिद्यते । ॐ रामचन्द्राय नमः इत्यादि षट् । ॐ रामभद्राय नमः इत्यादि षट् । आहत्य द्वादश । ऋष्यादिकं पूर्ववत् । पुनः मन्त्रान्तरमाह—तारमिति ॥ २६ ॥ ॐ रामाय हुं फट् स्वाहा श्रीरामाष्टाक्षरान्तरेण उमामहेश्वरबीजयोगतः शिवोमाराममनुर्भवतीत्याह—पुनरिति । ॐ श्रीं श्रीं रामाय नमः, ग्लौं ॐ ह्रीं नमो रामाय ॥ २७–३० ॥ ह्रां ॐ रामाय नम इत्यादि ॥ ३१–३८ ॥ प्रधानतः सप्तधा परिकीर्तितः । एकधा नवार्णमुद्धरति—रामेति । ॐ रामचन्द्राय नमः ॐ इति ॥ ३९ ॥

दश-एकादशाक्षरमन्त्राः

जानकीवल्लभं ङेन्तं वह्निर्जायाहुमादिकम् ॥ ४० ॥
दशाक्षरोऽयं मन्त्रः स्यात् सर्वाभीष्टफलप्रदः ।
दशाक्षरस्य मन्त्रस्य वसिष्ठोऽस्य ऋषिर्विराट् ॥ ४१ ॥
छन्दोऽस्य देवता रामः सीतापाणिपरिग्रहः ।
आद्यो बीजं द्विठः शक्तिः कामेनाङ्गक्रिया मता ॥ ४२ ॥
शिरोललाटभ्रूमध्ये तालुकर्णेषु हृद्यपि ।
नाभ्यूरुजानुपादेषु दशार्णान् विन्यसेन्मनोः ॥ ४३ ॥

अयोध्यानगरे रत्नचित्रे सौवर्णमण्डपे ।
मन्दारपुष्पैराबद्धवितानेतोरणाञ्चिते ॥ ४४ ॥
सिंहासने समासीनं पुष्पकोपरि राघवम् ।
रक्षोभिर्हरिभिर्देवैर्दिव्ययानगतैः शुभैः ॥ ४५ ॥
संस्तूयमानं मुनिभिः प्रह्वैश्च परिसेवितम् ।
सीताऽलंकृतवामाङ्गं लक्ष्मणेनोपसेवितम् ॥ ४६ ॥
श्यामं प्रसन्नवदनं सर्वाभरणभूषितम् ।
ध्यायन्नेवं जपेन्मन्त्रं वर्णलक्षमनन्यधीः ॥ ४७ ॥
रामं ङेन्तं धनुष्पाणयेऽन्तः स्याद्वह्निसुन्दरी ।
दशाक्षरोऽयं मन्त्रः स्यान्मुनिर्ब्रह्मा विराट् स्मृतः ॥ ४८ ॥
छन्दस्तु देवता प्रोक्तो रामो राक्षसमर्दनः ।
शेषं तु पूर्ववत् कुर्याच्चापबाणधरं स्मरेत् ॥ ४९ ॥
तारमायारमाऽनङ्गवाक्स्वबीजैश्च षड्विधः ।
दशार्णो मन्त्रराजः स्याद्रुद्रवर्णात्मको मनुः ॥ ५० ॥
शेषं षडर्णवज्ज्ञेयं न्यासध्यानादिकं बुधैः ।

द्विप्रकारं दशाक्षरमुद्धरति---**जानकीति** । हुं जानकीवल्लभाय स्वाहेति ॥ ४०-४१ ॥ **आद्यो बीजं** हुमिति । **द्विठः शक्तिः** ठः ठः इति । **कामेनाङ्गक्रिया मता** क्लीमित्यादि ॥ ४२-४७ ॥ रामाय धनुष्पाणये स्वाहेति ॥ ४८-४९ ॥ एकादशाक्षरं षोढा उद्धरति—**तारेति** । ॐ रामाय धनुष्पाणये स्वाहा इत्यादि ॥ ५० ॥

द्वादशाक्षरमन्त्रः

द्वादशाक्षरमन्त्रस्य श्रीरामो ऋषिरुच्यते ॥ ९१ ॥
जगती छन्द इत्युक्तं श्रीरामो देवता मतः ।
प्रणवो बीजमित्युक्तः क्लीं शक्तिर्ह्रीं च कीलकम् ॥ ९२ ॥
मन्त्रेणाङ्गानि [illegible]न्यस्य शिष्टं पूर्ववदाचरेत् ।
तारं मायां समुद्धार्य भरताग्रज इत्यपि ॥ ९३ ॥
रामक्लींवह्निजायाऽन्तं मन्त्रोऽयं द्वादशाक्षरः ।
ॐ ह्रद्भगवते रामचन्द्रभद्रौ च ङेयुतौ ॥ ९४ ॥
अर्कार्णो द्विविधोऽप्यस्य ऋषिध्यानादि पूर्ववत् ।
छन्दस्तु जगती चैव मन्त्रार्णैरङ्गकल्पना ॥ ९५ ॥

ॐ ह्रीं भरताग्रज राम क्लीं स्वाहेति ॥९१–९३॥ ॐ नमो भगवते रामचन्द्राय, ॐ नमो भगवते रामभद्राय इति । त्रिप्रकारोऽयं द्वादशाक्षरः ॥९४–९५॥

त्रयोदश-चतुर्दश-पञ्चदशाक्षरमन्त्राः

श्रीरामेति पदं चोक्त्वा जयराम पदं ततः ।
जयद्वयं वदेत् प्राज्ञो रामेति मनुराजकः ॥ ९६ ॥
त्रयोदशार्ण ऋष्यादि पूर्ववत् सर्वकामदः ।
पदद्वयैर्द्विरावृत्तैरङ्गन्यासं दशार्णवत् ॥ ९७ ॥
तारादिसहितः सोऽपि स चतुर्दशवर्णकः ।
त्रयोदशार्णमुच्चार्य पश्चाद्रामेति योजयेत् ॥ ९८ ॥
स वै पञ्चदशार्णस्तु जपतां कल्पभूरुहः ॥

त्रयोदशार्णमुद्धरति—**श्रीरामेति** । श्रीराम जयराम जय जय रामेति ॥ ५६–५७ ॥ **स चतुर्दशवर्णकः** षड्विध इत्यर्थः । षोडशार्णमुद्धरति—**नमश्चेति** । नमः सीतापतये रामाय हन हन हुं फट् स्वाहा इति ॥ ५८–६१ ॥

षोडश-सप्तदशाक्षरमन्त्राः

नमश्च सीतापतये रामायेति हनद्वय[illegible] ॥ ५९ ॥
ततस्तु कवचास्त्रान्तः षोडशाक्षर ई[illegible]तः
तस्यागस्त्यऋषिश्छन्दो बृहती देव[illegible] च सः ॥ ६० ॥
रां बीजं शक्तिरस्त्रं च कीलकं हुमितीरितम् ।
द्विपञ्चत्रिचतुर्वर्णैः सर्वैरङ्गं न्यसेत् क्रमात् ॥ ६१ ॥
तारादिसहितः सोऽपि मन्त्रः सप्तदशाक्षरः ।

सप्तदशाक्षरः षड्विधः ॥ ६२ ॥

अष्टादश-एकोनविंशार्णमन्त्राः

तारं नमो भगवते रामं ङेन्तं महा ततः ॥ ६२ ॥
पुरुषाय पदं पश्चाद्धृदन्तोऽष्टादशाक्षरः ।
विश्वामित्रो मुनिश्छन्दो गायत्रं देवता च सः ॥ ६३ ॥
कामादिसहितः सोऽपि मन्त्र एकोनविंशकः ।

अष्टादशाक्षरः ॐ नमो भगवते रामाय महापुरुषाय नमः ॥ ६३ ॥ **मन्त्र एकोनविंशकः** षड्विधः ॥ ६४ ॥

विंशार्णमन्त्रः

तारं नमो भगवते रामायेति पदं वदेत् ॥ ६४ ॥
सर्वशब्दं समुच्चार्य सौभाग्यं देहि मे वदेत् ।
वह्निजायां ततोच्चार्य मन्त्रो विंशार्णको मतः ॥ ६५ ॥

ॐ नमो भगवते रामाय सर्वसौभाग्यं देहि मे स्वाहा ॥ ६५ ॥

एकविंशार्णमन्त्रः

तारं नमो भगवते रामाय सकलं वदेत् ।
आपन्निवारणा[illegible] वह्निजायां ततो वदेत् ॥ ६६ ॥
एकविंशार्णको [illegible]न्त्रः सर्वाभीष्टफलप्रदः ।

ॐ नमो भगवते रामाय सकलापन्निवारणाय स्वाहा ॥ ६६ ॥

द्वाविंशार्णमन्त्रः

तारं रमां स्वबीजं च ततो दाशरथाय च ॥ ६७ ॥
ततः सीतावल्लभाय सर्वाभीष्टपदं वदेत् ।
ततो दाय हृदन्तोऽयं मन्त्रो द्वाविंशदक्षरः ॥ ६८ ॥

ॐ श्रीं रां दाशरथाय सीतावल्लभाय सर्वाभीष्टदाय नमः ॥ ६७–६८ ॥

त्रयोविंशार्णमन्त्रः

तारं नमो भगवते वीररामाय संवदेत् ।
कलशत्रून् हनद्वन्द्वं वह्निजायां ततो वदेत् ॥ ६९ ॥
त्रयोविंशाक्षरो मन्त्रः सर्वशत्रुनिबर्हणः ।
विश्वामित्रो मुनिः प्रोक्तो गायत्रं छन्द उच्यते ॥ ७० ॥
देवता वीररामोऽसौ बीजाद्याः पूर्ववन्मताः ।
मूलमन्त्रविभागेन न्यासान् कृत्वा विचक्षणः ॥ ७१ ॥

शरं धनुषि संधाय तिष्ठन्तं रावणोन्मुखम् ।
वज्रपाणिरथारूढं रामं ध्यात्वा जपेन्मनुम् ॥ ७२ ॥

ॐ नमो भगवते वीररामाय सकलशत्रून् हन हन स्वाहा ॥ ६९–७२ ॥

चतुर्विंशार्णमन्त्रः

तारं नमो भगवते श्रीरामाय पदं वदेत् ।
तारकब्रह्मणे चोक्त्वा मां तारय पदं वदेत् ॥ ७३ ॥
नमस्तारात्मको मन्त्रश्चतुर्विंशतिवर्णकः ।
बीजादिकं यथापूर्वं सर्वं कुर्यात् षडर्णवत् ॥ ७४ ॥

ॐ नमो भगवते श्रीरामाय तारकब्रह्मणे मां तारय नम ओमिति ॥ ७३–७४ ॥

पञ्चविंश-षड्विंश-सप्तविंशार्णमन्त्राः

कामस्तारो नतिश्चैव ततो भगवतेपदम् ।
रामचन्द्राय चोच्चार्य सकलेति पदं वदेत् ॥ ७५ ॥
जनवश्यकरायेति स्वाहा कामात्मको मनुः ।
सर्ववश्यकरो मन्त्रः पञ्चविंशतिवर्णकः ॥ ७६ ॥
आदौ तारेण संयुक्तो मन्त्रः षड्विंशदक्षरः ।
अन्तेऽपि तारसंयुक्तः सप्तविंशतिवर्णकः ॥ ७७ ॥

क्लीं ॐ नमो भगवते रामचन्द्राय सकलजनवश्यकराय स्वाहा ॥ ७५–७७ ॥

अष्टाविंश-एकोनत्रिंश-त्रिंश-एकत्रिंशार्णमन्त्राः

तारं नमो भगवते रक्षोघ्नविशदाय च ।
सर्वविघ्नान् समुच्चार्य निवारयपदद्वयम् ॥ ७८ ॥

स्वाहाऽन्तो मन्त्रराजोऽयमष्टाविंशतिवर्णकः ।
अन्ते तारेण संयुक्त एकोनत्रिंशदक्षरः ॥ ७९ ॥
आदौ स्वबीजसंयुक्तस्त्रिंशद्वर्णात्मको मनुः ।
अन्तेऽपि तेन संयुक्त एकत्रिंशात्मकः स्मृतः ॥ ८० ॥

ॐ नमो भगवते रक्षोघ्नविशदाय सर्वविघ्नान् निवारय निवारय स्वाहा ॥ ७८–८९ ॥

रामानुष्टुप्

रामभद्र महेष्वास रघुवीर नृपोत्तम ।
भो दशास्यान्तकास्माकं श्रियं दापय देहि मे ॥ ८१ ॥
आनुष्टुभ ऋषी रामश्छन्दोऽनुष्टुप्स देवता ।
रां बीजमस्य यं शक्तिरिष्टार्थे विनियोजयेत् ॥ ८२ ॥
पादं हृदि च विन्यस्य पादं शिरसि विन्यसेत् ।
शिखायां पञ्चभिर्न्यस्य त्रिवर्णैः कवचं न्यसेत् ॥ ८३ ॥
नेत्रयोः पञ्चवर्णैश्च दापयेत्यस्त्रमुच्यते ।
चापबाणधरं श्यामं ससुग्रीवविभीषणम् ॥ ८४ ॥
हत्वा रावणमायान्तं कृतत्रैलोक्यरक्षणम् ।
रामभद्रं हृदि ध्यात्वा दशलक्षं जपेन्मनुम् ॥ ८५ ॥

रामगायत्री

वदेद्दाशरथायेति विद्महेति पदं ततः ।
सीतापदं समुद्धृत्य वल्लभाय ततो वदेत् ॥ ८६ ॥

धीमहीति वदेत्तन्नो रामश्चापि प्रचोदयात् ।
तारादिरेषा गायत्री मुक्तिमेव प्रयच्छति ॥ ८७ ॥
मायाऽऽदिरपि वैदुष्यं रामादिश्च श्रियः पदम् ।
[1]मदनेनापि संयुक्ता संमोहयति मे[illegible]म् ॥ ८८ ॥
पञ्च त्रीणि षडर्णैश्च त्रीणि चत्वारि[illegible]र्णकैः ।
चत्वारि च चतुर्वर्णैरङ्गन्यासं प्रकल्पयेत् ॥ ८९ ॥
बीजध्यानादिकं सर्वं कुर्यात् षड्वर्णवत् क्रमात् ।

दाशरथाय विद्महे सीतावल्लभाय धीमहि । तन्नो रामः प्रचोदयात् इति रामगायत्री । प्रणवादिबीजयोजनफलमाह—तारादिरिति ॥ ८६–८९ ॥

राममालामन्त्रः

तारं नमो भगवते चतुर्थ्या रघुनन्दनम् ॥ ९० ॥
रक्षोघ्नविशदं तद्वन्मधुरेति वदेत्ततः ।
प्रसन्नवदनं ङेन्तं वदेदमिततेजसे ॥ ९१ ॥
बलरामौ चतुर्थ्यन्तौ विष्णुं ङेन्तं नतिस्ततः ।
प्रोक्तो मालामनुः सप्तचत्वारिंशद्भिरक्षरैः ॥ ९२ ॥
ऋषिश्छन्दोदेवताऽऽदि ब्रह्मानुष्टुभराघवाः ।
सप्तर्तुसप्तदशषड्रुद्रसंख्यैः षडङ्गकम् ॥ ९३ ॥
ध्यानं दशाक्षरं प्रोक्तं लक्षमेकं जपेन्मनुम् ।

[1] मदनेन समायुक्ता—उ, मु.

मालामन्त्रमुद्धरति—तारमिति । ॐ नमो भगवते रघुनन्दनाय रक्षोघ्नविशदाय मधुरप्रसन्नवदनाय अमिततेजसे बलाय श्रीरामाय विष्णवे नम इति ॥ ९०–९३ ॥

सीतामन्त्रः

श्रियं सीता चतुर्थ्यन्ता स्वाहान्तोऽयं षडक्षरः ॥ ९४ ॥
जनकोऽस्य ऋषिश्छन्दो गायत्री देवता मनोः ।
सीता भगवती प्रोक्ता श्रीं बीजं नतिशक्तिकम् ॥ ९५ ॥
कीलं सीता चतुर्थ्यन्तमिष्टार्थे विनियोजयेत् ।
दीर्घस्वरयुजाऽऽद्येन षडङ्गानि प्रकल्पयेत् ॥ ९६ ॥
स्वर्णाभामम्बुजकरां रामालोकनतत्पराम् ।
ध्यायेत् षट्कोणमध्यस्थरामाङ्कोपरि संस्थिताम् ॥ ९७ ॥

सीताद्यङ्गमन्त्रानुद्धरति—श्रियमिति । श्रीं सीतायै स्वाहेति ॥ ९४–९५ ॥ श्रामित्यादि दीर्घस्वरयुजा ॥ ९६–९७ ॥

लक्ष्मणमन्त्रः

लकारं तु समुद्धृत्य लक्ष्मणाय नमोऽन्तकः ।
अगस्त्यऋषिरस्याथ गायत्रं छन्द उच्यते ॥ ९८ ॥
लक्ष्मणो देवता प्रोक्तो लं बीजं शक्तिरस्य हि ।
नमस्तु विनियोगो हि पुरुषार्थचतुष्टये ॥ ९९ ॥
दीर्घभाजा स्वबीजेन षडङ्गानि प्रकल्पयेत् ।
द्विभुजं स्वर्णरुचिरतनुं पद्मनिभेक्षणम् ॥ १०० ॥
धनुर्बाणधरं वन्दे रामाराधनतत्परम् ।

लं लक्ष्मणाय नम इति ॥ ९८–१०० ॥

भरतमन्त्रः

भकारं तु समुद्धृत्य भरताय नमोऽन्तकः ॥ १०१ ॥
अगस्त्य ऋषिरस्याथ शेषं पूर्ववदाचरेत् ।
भरतं श्यामलं शान्तं रामसेवापरायणम् ॥ १०२ ॥
धनुर्बाणधरं वीरं कैकेयीतनयं भजे

भं भरताय नमः ॥ १०१–१०२ ॥

शत्रुघ्नमन्त्रः

शं बीजं तु समुद्धृत्य शत्रुघ्नाय नमोऽन्तकः ।
ऋष्यादयो यथापूर्वं विनियोगोऽरिनिग्रहे ॥ १०३ ॥
द्विभुजं स्वर्णवर्णाभं रामसेवापरायणम् ।
लवणासुरहन्तारं सुमित्रातनयं भजे ॥ १०४ ॥

शं शत्रुघ्नाय नमः ॥ १०३–१०४ ॥

हनूमन्मन्त्रः

हं हनूमांश्चतुर्थ्यन्तं हृदन्तो मन्त्रराजकः ।
रामचन्द्र ऋषिः प्रोक्तो योजयेत् पूर्ववत् क्रमात् ॥ १०५ ॥
द्विभुजं स्वर्णवर्णाभं रामसेवापरायणम् ।
मौञ्जीकौपीनसहितं मां ध्यायेद्रामसेवकम् ॥ इति ॥ १०६ ॥

हं हनूमते नमः ॥ १०५–१०६ ॥

इति द्वितीयोऽध्यायः

तृतीयोऽध्यायः

पूजापीठजिज्ञासा

सनकाद्या मुनयो हनूमन्तं पप्रच्छुः—आञ्जनेय महाबल पूर्वोक्तमन्त्राणां पूजापीठमनुब्रूहीति ॥ १ ॥

एकाक्षरादिद्वात्रिंशदक्षरमन्त्राणां पूजापीठप्रकारं पृच्छन्तीत्याह—**सनकाद्या इति** । **पप्रच्छुः**—किमिति ? **आञ्जनेयेति** ॥ १ ॥

एकाक्षरादिनवाक्षरान्तमन्त्रपूजायन्त्रम्

हनूमान् होवाच—आदौ षट्कोणम् । तन्मध्ये रामबीजं सश्रीकम् । तदधोभागे द्वितीयान्तं साध्यम् । बीजोर्ध्वभागे षष्ठ्यन्तं साधकम् । पार्श्वे दृष्टिबीजे । तत्परितो जीवप्राणशक्तिवश्यबीजानि । तत्सर्वं सम्मुखोन्मुखाभ्यां प्रणवाभ्यां वेष्टनम् । अग्नीशासुरवायव्यपुरः-पृष्ठेषु षट्कोणेषु दीर्घभाजि हृदयादिमन्त्राः क्रमेण । रां रीं रूं रैं रौं र इति दीर्घभाजि तद्युक्तहृदयाद्यस्त्रान्तम् । षट्कोणपार्श्वे रमायाबीजे । कोणाग्रे वराहं हुमिति । तद्बीजान्तराले कामबीजम् । परितो वाग्भवम् । ततो वृत्तत्रयं साष्टपत्रम् । तेषु दलेषु [1]स्वरान् षड्वर्गान् । प्रतिदलं मालामनुवर्णषट्कम् । अन्ते पञ्चाक्षरम् । तद्दलकपोलेष्वष्टवर्गान् । पुनरष्टदलपद्मम् । तेषु दलेषु नारायणाष्टाक्षरीमन्त्रः । तद्दलकपोलेषु श्रीबीजम् । ततो वृत्तम् । ततो द्वादशदलम् । तेषु दलेषु वासुदेवद्वादशाक्षरीमन्त्रः । तद्दलकपोलेष्वादिक्षान्तान् । ततो

[1] सर्वान् ष—क. स्वरानष्टव—अ १.

वृत्तम्। ततः षोडशदलम्। तेषु दलेषु हुं फट् नतिसहितराम-द्वादशाक्षरम्। तद्दलकपोलेषु मायाबीजम्। सर्वत्र प्रतिकपोलं द्विरावृत्त्या ह्रं स्त्रं भ्रं त्रं ज्रं अं श्रं ज्रं। ततो वृत्तम्। ततो द्वात्रिंशद्दल-पद्मम्। तेषु दलेषु नृसिंहमन्त्रराजानुष्टुभमन्त्रः। तद्दलकपोलेष्वष्टव-स्वेकादशरुद्रद्वादशादित्यमन्त्राः प्रणवादिनमो[illegible] ताश्चतुर्थ्यन्ताः क्रमेण। तद्बहिर्वषट्कारं परितः। ततो रेखात्रययुक्तं भूपुरम्। द्वादशदिक्षु राश्यादिभूषितम्। अष्टनागैरधिष्ठितम्। चतुर्दिक्षु नारसिंहबीजम्। विदिक्षु वाराहबीजम्। एतत् सर्वात्मकं यन्त्रं सर्वकामप्रदं मोक्षप्रदं च। एकाक्षरादिनवाक्षरान्तानामेतद्यन्त्रं भवति ॥ २ ॥

एकाक्षरादिनवाक्षरान्तानां मन्त्राणां पूजापीठप्रकारमादौ कथयति—**आदाविति**। **आदौ षट्कोणं** विलिख्येति सर्वत्रोह्यम्। **सश्रीकं** श्रीगर्भितमित्यर्थः। **द्वितीयान्तं साध्यं** सर्वाभीष्टसिद्धिदमिति। **षष्ठ्यन्तं साधकं** ममेति। **पार्श्वे** कुरुद्वयलेखनपूर्वकं **हृष्टिबीजे** इं ईं इति। **जीवप्राणशक्तिवश्यबीजानि**—हंस इति **जीव**बीजं, सोऽहमिति **प्राण**बीजं, ह्रीमिति शक्तिबीजं, क्लीमिति वश्यबीजम्। **हृदयाद्यस्त्रान्तं** रां नम इत्यादि रः अस्त्राय फट् इत्यन्तम्। **षट्कोणपार्श्वे रमामायाबीजे** श्रीं ह्रीमिति। **कामबीजं** क्लीमिति। **वाग्भवं** ऐमिति। **अन्ते पञ्चाक्षरं**—सप्तदलेषु द्विचत्वारिंशद्वर्णान् विलिख्य शिष्टाष्टमदले शिष्टपञ्चाक्षरं विलिखेदित्यर्थः। मेषादिराश्यादिना **राश्यादिविभूषितम्। नारसिंहबीजं** क्ष्म्र्यौमिति ॥ २ ॥

आवरणपूजापूर्वकमनुजपः

तद्दशावरणात्मकं भवति। षट्कोणमध्ये साङ्गं राघवं यजेत्। षट्कोणेष्वङ्गैः प्रथमावृतिः। अष्टदलमूले आत्माद्यावरणम्। तदग्रे

वासुदेवाद्यावरणम् । द्वितीयाष्टदलमूले धृष्ट्याद्यावरणम् । तदग्रे हनूमदाद्यावरणम् । द्वादशदलेषु वसिष्ठाद्यावरणम् । षोडशदलेषु नीलाद्यावरणम् । द्वात्रिंशद्दलेषु ध्रुवाद्यावरणम् । भूपुरान्तरिन्द्राद्यावरणम् । तद्बहिर्वज्राद्यायुधम् । एवमभ्यर्च्य मनुं जपेत् ॥ ३ ॥

षट्कोणेषु हृदयाद्यङ्गैः प्रथमावृतिः ॥ ३ ॥

दशाक्षरादिद्वात्रिंशाक्षरान्तमन्त्रपूजायन्त्रम्

अथ दशाक्षरादिद्वात्रिंशदक्षरान्तानां मन्त्राणां पूजापीठमुच्यते —आदौ षट्कोणम् । तन्मध्ये स्वबीजम् । तन्मध्ये साध्यनामानि । एवं कामबीजवेष्टनम् । तं शिष्टेन नवार्णेन वेष्टनम् । षट्कोणेषु षडङ्गान्यग्नीशासुरवायव्यपूर्वपृष्ठेषु । तत्कपोलेषु श्रीमाये । कोणाग्रे क्रोधम् । ततो वृत्तम् । ततोऽष्टदलम् । तेषु दलेषु षट्संख्यया मालामनुवर्णान् । तद्दलकपोलेषु षोडश स्वराः । ततो वृत्तम् । तत्परित आदिक्षान्तम् । तद्बहिर्भूपुरं साष्टशूलाग्रम् । दिक्षु विदिक्षु नारसिंहवाराहे । एतन्महायन्त्रम् । आधारशक्त्यादिवैष्णवपीठम् ॥ ४ ॥

आदौ षट्कोणं लिखित्वेति सर्वत्र समानम् । **मध्ये स्वबीजं** हु[रा]मिति(?) । **मध्ये साध्यनामानि** मम सर्वाभीष्टसिद्धिं कुरुकुरु नम इति एतत् सर्वम् । **क्रोधं** हुमिति । **नारसिंहवाराहे** क्ष्म्र्यौं हुमिति ॥ ४ ॥

यन्त्राराधनपूर्वकमनुजपः

अङ्गैः प्रथमावृतिः । **मध्ये** रामम् । वामभागे सीताम् । तत्पुरतः शार्ङ्गं शरं च । **अष्टदलमूले हनूमदादि द्वितीयावरणम्** ।

धृष्टचादि तृतीयावरणम् । इन्द्रादिभिश्चतुर्थी । वज्रादिभिः पञ्चमी ।
एतद्यन्त्राराधनपूर्वकं दशाक्षरादिमन्त्रं जपेत् ॥ ९ ॥

हृदयादि—अंगैः । द्वितीयावरणं—तदग्रे धृष्टयादितृतीयावरणम् ॥९॥

इति तृतीयोऽध्यायः

चतुर्थोऽध्यायः

श्रीराममन्त्रपुरश्चरणविधिः

सनकाद्या मुनयो हनूमन्तं पप्रच्छुः—श्रीराममन्त्राणां पुरश्चरणविधिमनुब्रूहीति । हनूमान् होवाच—

नित्यं त्रिषवणस्नायी पयोमूलफलादिभुक् ।
अथवा पायसाहारो हविष्यान्नाद एव च ॥ १ ॥
षड्रसैश्च परित्यक्तः स्वाश्रमोक्तविधिं चरन् ।
वनिताऽऽदिषु वाक्कर्ममनोभिर्निःस्पृहः शुचिः ॥ २ ॥
भूमिशायी ब्रह्मचारी निष्कामो गुरुभक्तिमान् ।
स्नानपूजाजपध्यानहोमतर्पणतत्परः ॥ ३ ॥
गुरूपदिष्टमार्गेण ध्यायन् राममनन्यधीः ।
सूर्येन्दुगुरुदीपादिगोब्राह्मणसमीपतः ॥ ४ ॥

श्रीरामसन्निधौ मौनी मन्त्रार्थमनुचिन्तयन् ।
व्याघ्रचर्मासने स्थित्वा स्वस्तिकाद्यासनक्रमात् ॥ ५ ॥
तुलसीपारिजातश्रीवृक्षमूलादिकस्थले ।
पद्माक्षतुलसीकाष्ठरुद्राक्षकृतमालया ॥ ६ ॥
मातृकामालया मन्त्री मनसैव मनुं जपन् ।
अभ्यर्च्य वैष्णवं पीठे जपेदक्षरलक्षकम् ॥ ७ ॥
तर्पयेत्तद्दशांशेन पयसा तद्दशांशतः ।
जुहुयाद्घृतेनैव भोजयेत्तद्दशांशतः ॥ ८ ॥
ततः पुष्पाञ्जलिं मूलमन्त्रेण विधिवच्चरेत् ।
ततः सिद्धमनुर्भूत्वा जीवन्मुक्तो भवेन्मुनिः ॥ ९ ॥

एकाक्षरादिमन्त्राणां पुरश्चरणानियमबुभुत्सया पृच्छन्तीत्याह—**सनकाद्या इति** । **पप्रच्छुः**—किं तत् ? श्रीराममन्त्राणामिति । पुरश्चरणनियमः कीदृशः इत्यत्र—**नित्यमिति** ॥ १–१३ ॥

ऐहिके राममन्त्रविनियोगनिषेधः

अणिमादिभंजत्येनं यूनं वरवधूरिव ।
ऐहिकेषु च कार्येषु महापत्सु च सर्वदा ॥ १० ॥
नैव योज्यो राममन्त्रः केवलं मोक्षसाधकः ।

ऐहिके हनूमत्स्मरणविधिः

ऐहिके समनुप्राप्ते मां स्मरेद्रामसेवकम् ॥ ११ ॥

यो रामं संस्मरेन्नित्यं भक्त्या मनुपरायणः ।
तस्याहमिष्टसंसिद्धयै दीक्षितोऽस्मि मुनीश्वराः ॥ १२ ॥
वाञ्छितार्थं प्रदास्यामि भक्तानां राघवस्य तु ।
सर्वथा जागरूकोऽस्मि रामकार्यधुरंधरः ॥ १३ ॥

इति चतुर्थोऽध्यायः

पञ्चमोऽध्यायः

रामषडक्षरस्य मन्त्रराजत्वम्

सनकाद्या मुनयो हनूमन्तं पप्रच्छुः—श्रीराममन्त्रार्थमनुब्रूहीति हनूमान् होवाच—

सर्वेषु राममन्त्रेषु मन्त्रराजः षडक्षरः ।
एकधा द्विविधा त्रेधा चतुर्धा पञ्चधा तथा ॥ १ ॥
षट्सप्तधाऽष्टधा चैव बहुधाऽयं व्यवस्थितः ।
षडक्षरस्य माहात्म्यं शिवो जानाति तत्त्वतः ॥ २ ॥
श्रीराममन्त्रराजस्य सम्यगर्थोऽयमुच्यते ।
[1]नारायणाष्टाक्षरे च शिवपञ्चाक्षरे तथा ॥ ३ ॥
सार्थकार्णद्वयं रामो रमन्ते यत्र योगिनः ॥

[1] नारायणेत्यादि श्लोकः (अ १, अ २, क) कोशेषु नोपलभ्यते.

मन्त्रार्थबुभुत्सया मुनयः पृच्छन्तीत्याह—सनकाद्या इति । पप्रच्छुः—किं तत्? श्रीरामेति । तत्प्रश्नोत्तरं हनूमान् होवाच । किमित्यत्र—बहूनां राममन्त्राणां मध्ये षडक्षरस्य मन्त्रराजत्वं तारकत्वात्, तारादिबहुबीजयोगतो बहुत्वं चिन्मात्रगोचरत्वं चाह—सर्वेष्विति ॥ १ ॥ पञ्चाशद्वर्णतद्विकृतियोगतो बहुत्वं तदर्थरूपेण ब्रह्ममात्रता चोपपद्यते इति ॥ २–३ ॥

रामबीजार्थः

रकारो वह्निवचनः प्रकाशः पर्यवस्यति ॥ ४ ॥
सच्चिदानन्दरूपोऽस्य परमात्मार्थ उच्यते ।
व्यञ्जनं निष्कलं ब्रह्म प्राणो मायेति च स्वरः ॥ ५ ॥
व्यञ्जनैः स्वरसंयोगं विद्धि तत्प्राणयोजनम् ।
रेफे ज्योतिर्मये तस्मात् कृतमाकारयोजनम ॥ ६ ॥
मकारोऽभ्युदयार्थत्वात् स मायेति च कीर्त्यते ।
[1]सोऽयं बीजं स्वकं यस्मात् समायं ब्रह्म चोच्यते ॥ ७ ॥
सबिन्दुः सोऽपि पुरुषः शिवसूर्येन्दुरूपवान् ।
ज्योतिस्तस्य शिखारूपं नादः सप्रकृतिर्मतः ॥ ८ ॥
प्रकृतिः पुरुषश्चोभौ समायाद्ब्रह्मणः स्मृतौ ।
बिन्दुनादात्मकं बीजं वह्निसोमकलाऽऽत्मकम् ॥ ९ ॥
अग्नीषोमात्मकं रूपं रामबीजे प्रतिष्ठितम् ।
यथैव वटबीजस्थः प्राकृतश्च महान् द्रुमः ॥ १० ॥
तथैव रामबीजस्थं जगदेतच्चराचरम् ।

[1] सोऽहं—उ.

बीजोक्तमुभयार्थत्वं रामनामनि दृश्यते ॥ ११ ॥
बीजं मायाविनिर्मुक्तं परं ब्रह्मेति कीर्त्यते ।

तत्रादौ स्वबीजार्थमाह—**रकार इति** । रेति व्यञ्जनं वह्निवचनं, वह्निगत-हेयांशापाये वह्नेः चिद्वह्नित्वेन प्रकाशमात्रं पर्यवस्यति ॥ ४ ॥ अस्यार्थस्तु **सच्चिदानन्दमात्रः परमात्मेत्यर्थः** । व्यञ्जनस्य निर्विशेषत्वं तत्र स्वरविशेषयोगतः सविशेषत्वं चाह—**व्यञ्जनमिति** ॥ ५ ॥ एतेन किं कृतं स्यादित्यत आह—**रेफ इति** ॥ ६ ॥ तत्र बिन्दुयोजनं अभ्युदयार्थमित्याह—**मकार इति** । समायशब्दार्थमाह—**सोऽयमिति** ॥ ७ ॥ बिन्दुनादयोगतो जगत्कारणतामेतीत्याह—**सबिन्दुरिति** । यो बिन्दुना मनसा सह वर्तत इति **सबिन्दुः सोऽपि पुरुषो** जीवः समष्टिबिन्दुधिकरणशिवसूर्येन्दुरूपवान् भवति । प्रकृतिस्वरूपं तु **तस्य** पुरुषस्य **ज्योतिः** प्रकाश एव **शिखास्वरूपं** "तुरीयं मूर्ध्नि संस्थितं" इति श्रुतेः । मूलादिप्रकृत्या सह वर्तत इति **सप्रकृतिः नादोपाधिकः पुरुषो मतः** ॥ ८ ॥ एवं **प्रकृतिपुरुषौ समायात्** सविशेषात् **ब्रह्मणः** सकाशाद्विकल्पितौ इति **स्मृतौ** ॥ ९ ॥ एवं प्रकृतिपुरुषकलनाकलितं विश्वं रामबीजे प्रतिष्ठितं **इत्यत्र** दृष्टान्तः वटबीजान्तर्गतवटवृक्षवत् रामबीजस्थं जगदित्यर्थः ॥ १० ॥ उपाधियोगतः सविशेषत्वं वस्तुतो निर्विशेषत्वं च स्यादित्यत आह—**बीजोक्तमिति** ॥ ११ ॥

द्व्यक्षरार्थः

मुक्तिदं साधकानां च मकारो मुक्तिदो मतः ॥ १२ ॥
मारूपत्वादतो रामो भुक्तिमुक्तिफलप्रदः ।
आद्यो रा तत्पदार्थः स्यान्मकारस्त्वंपदार्थवान् ॥ १३ ॥
तयोः संयोजनमसीत्यर्थे तत्त्वविदो विदुः ।

एकाक्षरमन्त्रार्थमुक्त्वा त्र्यक्षरार्थमाह—**मुक्तिदमिति** ॥ १२ ॥ रेफ-मकारयोः कामाकामधियां भुक्तिमुक्तिप्रदत्वं युज्यते इत्यर्थः । रामनाम्नो मुक्तिहेतुत्वं कथमित्यत्र प्रत्यगभिन्नब्रह्मवाचकत्वात् तत् युज्यत इत्याह—**अद्य** इति ॥ १३ ॥ रामाक्षराख्यतत्त्वंपदगतवाच्यार्थकलनाऽपवादाधिकरणप्रत्यगभिन्नब्रह्मणः स्वाज्ञादि-दृष्टिप्रसक्तप्रत्यक्परविभागैक्यकलनाऽसंभवसम्यज्ज्ञानतो निष्प्रतियोगिकब्रह्ममात्रतया लक्षितत्वात् रामपदार्थो ब्रह्मैवेत्यर्थः, "रामः सत्यं परं ब्रह्म रामात् किंचिन्न विद्यते" इति स्मृतेः ॥

षडक्षरार्थः

नमस्त्वमर्थो विज्ञेयो रामस्तत्पदमुच्यते ॥ १४ ॥
असीत्यर्थे चतुर्थी स्यादेवं मन्त्रेषु योजयेत् ।

षडक्षरार्थप्रकटनव्याजेन त्र्यक्षरादिसर्वमन्त्रार्थमाह—**नम इति** ॥ १४ ॥ त्र्यक्षरादिमन्त्रजातं त्रेधा विभज्य "तत्त्वमसि" इति महावाक्यार्थयोजनं कर्तव्यमित्यर्थः ॥

राममन्त्रमाहात्म्यम्

तत्त्वमस्यादिवाक्यं तु केवलं मुक्तिदं यतः ॥ १५ ॥
भुक्तिमुक्तिप्रदं चैतत्तस्मादप्यतिरिच्यते ।
मनुष्वेतेषु सर्वेषामधिकारोऽस्ति देहिनाम् ॥ १६ ॥
मुमुक्षूणां विरक्तानां तथा चाश्रमवासिनाम् ।
प्रणवत्वात् सदा ध्येयो यतीनां च विशेषतः ॥
राममन्त्रार्थविज्ञानी जीवन्मुक्तो न संशयः ॥ १७ ॥

"तत्त्वमसि" इत्यादिमहावाक्यापेक्षया अस्य सर्वोत्कृष्टत्वमाह—**तदिति** ॥ १५ ॥ प्राणिमात्रस्य सप्तकोटिमहामन्त्र(त्व)धिकृतत्वेऽपि यतिभिरसे-वितत्वात् राममन्त्रस्य तु प्रणवस्वरूपत्वेन तैरपि ग्राह्यमित्याह—**मनुष्विति** ॥१६॥ मन्त्रार्थज्ञानफलमाह—**राममन्त्रार्थेति** ॥ १७ ॥

विद्याऽध्ययनफलम्

य इमामुपनिषदमधीते सोऽग्निपूतो भवति । स वायुपूतो भवति । सुरापानात् पूतो भवति । स्वर्णस्तेयात् पूतो भवति । ब्रह्महत्यात् पूतो भवति । स राममन्त्राणां कृतपुरश्चरणो रामचन्द्रो भवति ॥ १८ ॥

तदेतदृचाऽभ्युक्तम्—

सदा रामोऽहमस्मीति तत्त्वतः प्रवदन्ति ये ।
न ते संसारिणो नूनं राम एव न संशयः ॥
ॐ सत्यमित्युपनिषत् ॥ १९ ॥

उपनिषत्पारायणफलमाह—य इति ॥ १८ ॥ यदुक्तं तदेतदृचा मन्त्रेणाप्युक्तं भवतीत्याह—**तदेतदृचाऽभ्युक्तमिति** । प्रथमाध्यायादौ "राम एव परं ब्रह्म" इति मन्त्रेण यः परमात्मा निष्प्रतियोगिकस्वमात्रतया अवशिष्यते **तत्त्वतः सोऽयं रामोऽहमस्मीति ये सदा** अनुभूय यथोक्ताधिकारिभ्यः **प्रवदन्ति ते राम एव** भवन्तीत्यत्र **न** हि **संशयोऽस्ति** । **ॐ सत्यमित्यत्र** "श्रीरामो ब्रह्म तारकं" इत्युक्तत्वात् । **इत्युपनिषच्छब्दो** रामरहस्योपनिषत्समाप्त्यर्थः ॥ १९ ॥

इति पञ्चमोऽध्यायः

श्रीवासुदेवेन्द्रशिष्योपनिषद्ब्रह्मयोगिना ।
रामरहस्योपनिषद्व्याख्यानं लिखितं स्फुटम् ॥
रामरहस्योपनिषद्व्याख्यानग्रन्थविस्तरः ।
अष्टाशीत्यधिकेनाब्यद्विशतं परिकीर्तितः ॥

इति श्रीमदीशाद्यष्टोत्तरशतोपनिषच्छास्त्रविवरणे चतुष्पञ्चाशत्सङ्ख्यापूरकं श्रीरामरहस्योपनिषद्विवरणं संपूर्णम्

वासुदेवोपनिषत्

आप्यायन्तु—इति शान्तिः

ऊर्ध्वपुण्ड्रविधिजिज्ञासा

ॐ नमस्कृत्य भगवान् नारदः सर्वेश्वरं वासुदेवं पप्रच्छ—

अधीहि भगवन्नूर्ध्वपुण्ड्रविधिं द्रव्यमन्त्रस्थानादिसहितं मे ब्रूहीति ॥ १ ॥

यत् सर्वहृदयागारं यत्र सर्वं प्रतिष्ठितम् ।
वस्तुतो यन्निराधारं वासुदेवपदं भजे ॥

इह खलु सामवेदप्रविभक्तेयं वासुदेवोपनिषत् ऊर्ध्वपुण्ड्रमाहात्म्यप्रकटनव्यग्रा वैष्णवपदपर्यवसन्ना विजयते । अस्याः स्वल्पग्रन्थतो विवरणमारभ्यते । नारदभगवत्प्रश्नप्रतिवचनरूपेयमाख्यायिका विद्यास्तुत्यर्था । आख्यायिकामवतारयति—ओमिति ॥ १ ॥

गोपीचन्दनस्वरूपम्

तं होवाच भगवान् वासुदेवः—वैकुण्ठस्थानादुत्पन्नं मम प्रीतिकरं मद्भक्तैर्ब्रह्मादिभिर्धारितं विष्णुचन्दनं ममाङ्गे प्रतिदिनमालिप्तं गोपीभिः प्रक्षालनाद्गोपीचन्दनमाख्यातं मदङ्गलेपनं पुण्यं चक्रतीर्था-[1]न्तःस्थितं चक्रसमायुक्तं पीतवर्णं मुक्तिसाधनं भवति ॥ २ ॥

[1] न्तरस्थि—क.

ओङ्कारार्थं वासुदेव प्रणिपत्य ऊर्ध्वपुण्ड्रविधानसर्वस्वमनुब्रूहीति नारदेन पृष्टः तं होवाच भगवान् वासुदेवः । ऊर्ध्वपुण्ड्रद्रव्येयत्तामाह—**वैकुण्ठेति** । मेरुमध्यशृङ्गालङ्कारवैकुण्ठस्थानादुत्पन्नं विष्ण्वाह्लादनदिव्यचन्दनवनस्य वैकुण्ठप्रभवत्वात् **मम** विष्णोः **प्रीतिकरं** मदिच्छातो वैकुण्ठादागतं ततो **ममाङ्गे प्रतिदिनमालिप्तं** अहरहः **गोपीभिः प्रक्षालनादेव गोपीचन्दनमिति** सर्वत्र विख्यातं भवतीत्यर्थः । तस्य मुक्तिसाधनत्वमाह—**मदङ्गेति** । स्वमज्जनहेतोः चक्रेण निर्मितत्वात् **चक्रतीर्थं** भगवदङ्गात् तदन्तः प्रविश्य स्थितं चक्रयोगतः **चक्रसमायुक्तं**, भगवदाप्तेः इदमेव मुख्यसाधनमित्यर्थः ॥ २ ॥

गोपीचन्दनोद्धारधारणयोर्विधानम्

अथ गोपीचन्दनं नमस्कृत्योद्धृत्य—

गोपीचन्दन पापघ्न विष्णुदेहसमुद्भव ।
चक्राङ्कित नमस्तुभ्यं धारणान्मुक्तिदो भव ॥ ३ ॥

इमं मे गङ्गे इति जलमादाय विष्णोर्नुकमिति मर्दयेत् । अतो देवा अवन्तु न इत्येतैर्मन्त्रैर्विष्णुगायत्र्या केशवादिनामभिर्वा धारयेत् ॥ ४ ॥

चक्रतीर्थतो गोपीचन्दनोद्धारप्रकारमाह—**अथेति** ॥ ३ ॥ एवं गोपीचन्दनं यथेष्टं गृहीत्वा देवतागृहे संस्थाप्य किञ्चित् गृहीत्वा **इमं मे गङ्गे इति** । "नारायणाय विद्महे वासुदेवाय धीमहि । तन्नो विष्णुः प्रचोदयात्" इति **विष्णुगायत्र्या केशवादिनामभिर्वा धारयेत्** ॥ ४ ॥

ब्रह्मचार्यादीनां धारणाप्रकारः

ब्रह्मचारी वानप्रस्थो वा ललाटहृदयकण्ठबाहुमूलेषु **वैष्णव**-गायत्र्या कृष्णादिनामभिर्वा धारयेत् ॥

इति त्रिवारमभिमन्त्र्य—

शङ्खचक्रगदापाणे द्वारकानिलयाच्युत ।
गोविन्द पुण्डरीकाक्ष रक्ष मां शरणागतम् ॥

इति ध्यात्वा गृहस्थो ललाटादिद्वादशस्थलेष्वनामिकाङ्गुल्या वैष्णव-गायत्र्या केशवादिनामभिर्वा धारयेत् ॥ ५ ॥

ब्रह्मचारी गृहस्थो वा ललाटहृदयकण्ठबाहुमूलेषु वैष्णवगायत्र्या कृष्णादिनामभिर्वा धारयेत् ॥ ६ ॥

यतिस्तर्जन्या शिरोललाटहृदयेषु प्रणवेनैव धारयेत् ॥ ७ ॥ *

ब्रह्मादीनां धारणाप्रकारमाह—ब्रह्मचारीति । "शङ्खचक्र" इति मन्त्रं, इति त्रिवारमभिमन्त्र्य ॥ ५–७ ॥

त्रिपुण्ड्रस्य त्रिमूर्त्यादिरूपत्वम्

ब्रह्मादयस्त्रयो मूर्तयस्तिस्रो व्याहृतयस्त्रीणि छन्दांसि त्रयोऽग्नय इति ज्योतिष्मन्तस्त्रयः कालास्तिस्रोऽवस्थास्त्रय आत्मानः पुण्ड्रास्त्रय ऊर्ध्वा अकार उकार मकार एतं प्रणवमयोर्ध्वपुण्ड्रस्तदात्मा सदेतदोमिति ॥ ८ ॥

* जेकब्-महाशयसम्पादित-मुम्बैमुद्रितकोशस्थः एतत्प्रकरणपाठः समीचीनतरो भाति. स च पाठक्रम एवं वर्तते—

"गोपीचन्दनपापघ्न" . . . इति प्रार्थयन् "इमं मे" . . . विष्णुगायत्र्या च त्रिवारमभिमन्त्र्य, "शङ्खचक्रगदापाणे" . . . इति मां ध्यात्वा, गृहस्थो ललाटादि . . धारयेत् । ब्रह्मचारी वानप्रस्थो वा ललाट . . . धारयेत । यतिः तर्जन्या . . . धारयेत् ॥

[1] "तानेकधा समभवत्" इत्यधिकः—मु. उ.

ऊर्ध्वपुण्ड्रस्य त्रिमूर्तिव्याहृतिच्छन्दोऽग्निप्रणवादिरूपत्वं चाह—**ब्रह्मादय इति। त्रयः आत्मानः** आत्मा अन्तरात्मा परमात्मा चेति। विराट्सूत्र-बीजात्मानो **ज्योतिष्मन्तः** ॥ ८ ॥

ऊर्द्वपुण्ड्रस्य प्रणवाधिकारिणैव धार्यत्वम्

ऊर्ध्व[1]मुन्नयत इत्योंकाराधिकारी तस्मादूर्ध्वपुण्ड्रं धारयेत् ॥ ९ ॥

ऊर्ध्वपुण्ड्रस्य प्रणवत्वेन प्रणवाधिकारिणैव एतद्धार्यमित्याह—**ऊर्ध्वमिति**। यस्मात् **ऊर्ध्वं उन्नयते** ॥ ९ ॥

तस्य परमहंसेनापि धार्यत्वम्

परमहंसो ललाटे प्रणवेनैकमूर्ध्वपुण्ड्रं वा धारयेत् ॥ १० ॥

अवधूतेनापि एतद्धार्यमित्याह—**परमहंस** इति ॥ १० ॥

वासुदेवध्यानप्रकारः

तत्त्वप्रदीपप्रकाशं स्वात्मानं पश्यन् योगी मत्सायुज्यमवाप्नोति ॥
अथ वा न्यस्तहृदयः पुण्ड्रमध्ये वा हृदयकमलमध्ये वा ॥ १२ ॥
तस्य मध्ये वह्निशिखा अणीयोर्ध्वा व्यवस्थिता ।
नीलतोयदमध्यस्था विद्युल्लेखेव भास्वरा ।
नीवारशूकवत्तन्वी परमात्मा व्यवस्थितः ॥ इति ॥ १३ ॥
अतः पुण्ड्रस्थं हृदयपुण्डरीकेषु तमभ्यसेत् ।
क्रमादेवं स्वमात्मानं भावयेन्मां परं हरिम् ॥ १४ ॥
एकाग्रमनसा यो मां ध्यायते हरिमव्ययम् ।
हृत्पङ्कजे च स्वात्मानं स मुक्तो नात्र संशयः ॥ १५ ॥

[1] ऊर्ध्वमुन्नाय—अ २. ऊर्ध्वमुन्नमय— अ १, क.

मद्रूपमद्वयं ब्रह्म आदिमध्यान्तवर्जितम् ।
स्वप्रभं सच्चिदानन्दं भक्त्या जानाति चाव्ययम् ॥ १६ ॥

प्रत्यगभेदेन मां पश्यतो मद्भावापत्तिः स्यादित्याह—**तत्त्वेति** । **तत्त्वप्रदीपप्रकाशं** परमात्मानं **स्वात्मानं** प्रत्यञ्चं **पश्यन्** योगी **मत्सायुज्यमवाप्नोति** ॥ ११ ॥ एवं द्रष्टुं अशक्तस्य प्रकारान्तरमाह—**अथवेति** । **न्यस्तहृदयः** भगवति विन्यस्तहृदयो योगी **न्यस्तहृदयपुण्डरीकमध्ये वा हृदयकमलमध्ये वा** मां ध्यात्वा मत्सायुज्यमेतीति पूर्वेणान्वयः ॥ १२ ॥ हृदयकमलमध्ये केन रूपेण ध्यातव्यः इत्यत आह—**तस्येति** । **तस्य** हृदयस्य **मध्ये** मूलाधारस्थ**वह्निशिखा** अग्नीया सुसूक्ष्मा ऊर्ध्वा ब्रह्मरन्ध्रान्तं **व्यवस्थिता** नीलमेघमध्यविलसितविद्युल्लेखेव **नीवारशूकवत्तन्वी** योगकाले स्फुरति तस्याः शिखायाः मध्ये ततोऽपि सूक्ष्मतया **परमात्मा** वासुदेवो **व्यवस्थितः** । **इतिशब्दः** मन्त्रसमाप्त्यर्थः ॥ १३ ॥ यतोऽयं सर्वप्रत्यक् **अतः** कारणात् तं सर्वप्राणि**हृदयपुण्डरीकेषु** प्रत्यगभेदेन सन्तं **अभ्यसेत्** अनुसन्धानं कुर्यात् ॥ १४ ॥ ज्ञानफलमाह—**एकाग्रेति** । स्वातिरिक्तास्तिताभ्रमं हरतीति **हरिम्** ॥ १५ ॥ स्वप्रापकज्ञानोपायमाह—**मद्रूपमिति** । स्वानन्यभक्त्या **जानातीति** ज्ञानमुदेति, ज्ञानसमकालं मुक्तो भवति, तस्मात् ब्रह्मज्ञानं प्रति भक्तिः अन्तरङ्गसाधनमित्यर्थः ॥ १६ ॥

वासुदेवस्य सर्वात्मत्वम्

एको विष्णुरनेकेषु जङ्गमस्थावरेषु च ।
अनुस्यूतो वसत्यात्मा भूतेष्वहमवस्थितः ॥ १७ ॥
तैलं तिलेषु काष्ठेषु वह्निः क्षीरे घृतं यथा ।
गन्धः पुष्पेषु भूतेषु तथाऽऽत्माऽवस्थितो ह्यहम् ॥ १८ ॥

स्वस्य सार्वात्म्यं प्रपञ्चयति—**एक** इति ॥ १७ ॥ किं कुण्डबदरजातमिव सर्वभूतेषु तिष्ठसीत्यत आह—**तैलमिति** । घटशरावाद्यसङ्गतया व्योमवत् सर्वं व्याप्य स्थितोऽस्मीत्यर्थः ॥ १८ ॥

वासुदेवध्यानस्थानेषु गोपीचन्दनधारणम्

ब्रह्मरन्ध्रे भ्रुवोर्मध्ये हृदये चिद्रविं हरिम् ।
गोपीचन्दनमालिप्य तत्र ध्यात्वाऽऽप्नुयात् परम् ॥ १९ ॥
ऊर्ध्वदण्डोर्ध्वरेताश्च ऊर्ध्वपुण्ड्रोर्ध्वयोगवान् ।
ऊर्ध्वं पदमवाप्नोति यतिरूर्ध्वचतुष्कवान् ॥ २० ॥
इत्येतन्निश्चितं ज्ञानं मद्भक्त्या सिध्यति स्वयम् ।
नित्यमेकाग्रभक्तिः स्याद्गोपीचन्दनधारणात् ॥ २१ ॥

हंररुपलब्धिस्थानं ध्यानप्रकारं तत्फलं चाह—**ब्रह्मरन्ध्र इति** ॥ १९ ॥ ऊर्ध्वालम्बनो यतिः ऊर्ध्वपदमवाप्नोतीत्याह—**ऊर्ध्वेति** । स्वाविद्यापदतत्कार्यारोपापवादाधिकरणं विश्वाद्यधिकल्पान्तमूर्ध्वं चैतन्यजातमालम्बनदण्डो यस्य सोऽयं ऊर्ध्वदण्डः स चासावूर्ध्वरेताश्च **ऊर्ध्वदण्डोर्ध्वरेता** जितेन्द्रियो ब्रह्मविन्मुनिरित्यर्थः । ऊर्ध्वपुण्ड्रस्य प्रकृतत्वात् ऊर्ध्वं पुण्ड्रं गोपीचन्दनं यस्य सोऽयं ऊर्ध्वपुण्ड्रः स चासावूर्ध्वं ब्रह्म ऊर्ध्वाधःपरिच्छेदविरळमिति येन युज्यते सम्यग्बोधेन सोऽयमूर्ध्वयोगो यस्य सोऽयं **ऊर्ध्वपुण्ड्रोर्ध्वयोगवान्** । एवं पूर्वोक्तोर्ध्वचतुष्कवान् यतिः निष्प्रतियोगिकोर्ध्वं ब्रह्म स्वमात्रधिया पश्यत इति **पदमवाप्नोति** तन्मात्रमवशिष्यते इत्यर्थः ॥ २० ॥ इत्थंभूतं ज्ञानं तद्धेतुभक्तिर्वा केनोपायेन सिध्यतीत्यत आह—**इतीति** ॥ २१ ॥

गोपीचन्दनभस्मनोर्धारणविधिः

ब्राह्मणानां तु सर्वेषां वैदिकानामनुत्तमम् ।
गोपीचन्दनवारिभ्यामूर्ध्वपुण्ड्रं विधीयते ॥ २२ ॥

यो गोपीचन्दनाभावे तुलसीमूलमृत्तिक-
मुमुक्षुर्धारयेन्नित्यमपरोक्षात्मसिद्धये ॥ २३ ॥

अतिरात्राग्निहोत्रभस्माऽग्नेर्भसितमिदंविष्णुस्त्रीणिपदेति मन्त्रै-
र्वैष्णवगायत्र्या प्रणवेनोद्धूलनं कुर्यात् ॥ २४ ॥

एवं विधिना गोपीचन्दनं च धारयेत् ॥ २५ ॥

एतस्य वेदोक्तत्वेन अयं पन्थाः वेदिकैः सेवनीयः इति निगमयति—ब्राह्मणानामिति ॥ २२ ॥ अलाभे किं कर्तव्यं? इत्यत आह—य इति ॥ २३ ॥ "धिक् भस्मरहितं फालं" इति श्रुतिविरोधः स्यात् इत्याशङ्क्य गोपीचन्दन-श्रुतिप्रामाण्यतो गोपीचन्दनं भस्मश्रुतिप्रामाण्यतो गोपीचन्दनोपरि भस्मोद्धूळनं कार्यमित्याह—अतिरात्रेति। "अग्नेर्भस्माऽसि। अग्निरिति भस्म" इत्यादिमन्त्रेण। अनेन श्रुतिद्वयविरोधः परिहृतः स्यादित्यर्थः ॥ २४–२५ ॥

विद्याफलम्

यस्त्वधीते वा स सर्वपातकेभ्यः पूतो भवति पापबुद्धिस्तस्य न जायते स सर्वेषु तीर्थेषु स्नातो भवति स सर्वैर्यज्ञैर्याजितो भवति स सर्वैर्देवैः पूज्यो भवति श्रीमन्नारायणे मय्यचञ्चला भक्तिश्च भवति स सम्यग् ज्ञानं च लब्ध्वा विष्णुसायुज्यमवाप्नोति न च पुनरावर्तते न च पुनरावर्तते ॥ २६ ॥

इत्याह भगवान् वासुदेवः ॥ २७ ॥

एतद्विद्याफलमाह—यस्त्विति। अर्थतो विद्याऽभ्यासिनः पापासंभवमाह—पापबुद्धिरिति। मुख्यफलं तु—स सम्यज्ज्ञानमिति। विष्णुसायुज्यं कैवल्यं अवाप्नोति ॥ २६–२७ ॥

केवलाध्ययनफलम्

यस्त्वेतद्वाऽधीते सोऽप्येवमेव भवतीत्यों सत्यमित्युपनिषत् ॥२८॥

केवलं **यस्त्वधीते सोऽपि क्रमेण एवमेव भवतीति** । स्वाज्ञदशायां यद्यत्साधनानुष्ठानं अनुष्ठितं तत्तदसत्यं तस्य स्वाविद्याकार्यतया कारणतुल्यत्वात्, यत्तदसंभवप्रबोधसिद्धं ओङ्कारार्थं वासुदेवतत्त्वं ब्रह्ममात्रं तदेव **सत्यं** "ब्रह्ममात्रमसन्न हि" इति श्रुतेः । **इत्युपनिषच्छब्दो** वासुदेवोपनिषत्परिसमाप्त्यर्थः ॥

श्रीवासुदेवेन्द्रशिष्योपनिषद्ब्रह्मयोगिनः ।
श्रीवासुदेवोपनिषद्व्याख्यानं लिखितं लघु ।
श्रीवासुदेवोपनिषद्व्याख्याग्रन्थस्तु सप्ततिः ॥

इति श्रीमदीशाद्यष्टोत्तरशतोपनिषच्छास्त्रविवरणे षट्पञ्चाशत्सङ्ख्यापूरकं
वासुदेवोपनिषद्विवरणं संपूर्णम्

हयग्रीवोपनिषत्

भद्रं कर्णेभिः—इति शान्तिः

हयग्रीवमन्त्रमहिमा

नारदो ब्रह्माणमुपसमेत्योवाच—अधीहि भगवन् ब्रह्मविद्यां वरिष्ठां ययाऽचिरात् सर्वपापं व्यपोह्य ब्रह्मविद्यां लब्ध्वैश्वर्यवान् भवति ॥ १ ॥

ब्रह्मोवाच—हयग्रीवदैवत्यान् मन्त्रान् यो वेद स श्रुतिस्मृतीतिहासपुराणानि वेद स सर्वैश्वर्यवान् भवति ॥ २ ॥

स्वाज्ञोऽपि यत्प्रसादेन ज्ञानं तत्फलमाप्नुयात् ।
सोऽयं हयास्यो भगवान् हृदि मे भातु सर्वदा॥

इह खलु अथर्वणवेदप्रविभक्तेयं हयग्रीवोपनिषत् स्वविद्याप्रकटनव्यग्रा ब्रह्ममात्रपर्यवसन्ना विजृंभते । अस्याः संक्षेपतो विवरणमारभ्यते । नारदब्रह्मप्रश्नप्रतिवचनरूपेयमाख्यायिका विद्यास्तुत्यर्था । आख्यायिकामवतारयति—**नारद इति** । किं स उवाचेत्यत्र—अधीहीति । **ब्रह्मविद्यां वरिष्ठां** निर्विशेषब्रह्मणि पर्यवसन्नां, **यया** सविशेषब्रह्मविद्यया मुमुक्षुः **सर्वपापपुण्यविमुक्तो** भूत्वाऽथ स्वातिरिक्तासंभवसिद्धं ब्रह्म निष्प्रतियोगिकस्वमात्रमिति निर्विशेष**ब्रह्मविद्यां लब्ध्वा** स्वातिरिक्तं स्वावशेषतया ग्रसितुं य ईष्टे सोऽयं ईश्वरः तत्सम्बन्धिन्यजडक्रिया-

ज्ञानेच्छाशक्त्यात्मकं ज्ञेयावज्ञानसम्यज्ज्ञानरूपं ऐश्वर्यं तद्वान् भवति तां मे अधीहीति ॥ १ ॥ नारदेनैवं पृष्टो भगवान् ब्रह्मोवाच । किमिति ? वक्ष्यमाण-विद्याफलं प्रकटयति—हयग्रीवेति ॥ २ ॥

हयग्रीवमन्त्रत्रयम्

त एते मन्त्राः—

विश्वोत्तीर्णस्वरूपाय चिन्मयानन्दरूपिणे ।
तुभ्यं नमो हयग्रीव विद्याराजाय विष्णवे स्वाहा स्वाहा नमः ॥ ३ ॥
ऋग्यजुःसामरूपाय वेदाहरणकर्मणे ।
प्रणवोद्गीथवपुषे महाश्वशिरसे नमः स्वाहा स्वाहा नमः ॥ ४ ॥
उद्गीथ प्रणवोद्गीथ सर्ववागीश्वरेश्वर ।
सर्ववेदमयाचिन्त्य सर्वं बोधय बोधय स्वाहा स्वाहा नमः ॥ ५ ॥

ते कीदृशाः इत्यत्र—त एते मन्त्रा इति ॥ ३–५ ॥

मन्त्रत्रयस्य ऋष्यादिध्यानान्तम्

ब्रह्मात्रिरविसवितृभार्गवा ऋषयः । गायत्रीत्रिष्टुबनुष्टुपुच्छन्दांसि। श्रीमान् हयग्रीवः परमात्मा देवतेति । [1]हूलौमिति बीजम् । सोऽहमिति शक्तिः । हूलूमिति कीलकम् । भोगमोक्षयोर्विनियोगः । अकारोकारमकारैरङ्गन्यासः । ध्यानम्—

शङ्खचक्रमहामुद्रापुस्तकाढ्यं चतुर्भुजम् ।
संपूर्णचन्द्रसंकाशं हयग्रीवमुपास्महे ॥ ६ ॥

[1] अस्यामुपनिषदि सर्वत्र एतद्बीजाक्षरस्थ'ल'कारस्थाने 'स'कार उपलभ्यते केषु-चित् कोशेषु । (अ, अ १, अ २, क.) कोशेषु तु लकार एवोपलभ्यते.

मन्त्रत्रयस्य ऋष्यादयः उच्यन्ते—ब्रह्मोत । अकाराकारमकारः द्विरावृत्तैः अङ्गन्यासः ॥ ६ ॥

हयग्रीवतुरीयमनुः

ॐ श्रीमिति द्वे अक्षरे । ह्लौमित्येकाक्षरम् । ॐ नमो भगवत इति सप्ताक्षराणि । हयग्रीवायेति पञ्चाक्षराणि । विष्णव इति त्रीण्यक्षराणि । मह्यं मेधां प्रज्ञामिति षडक्षराणि । प्रयच्छ स्वाहेति पञ्चाक्षराणि । हयग्रीवस्य तुरीयो भवति ॥ ७ ॥

हयग्रीवतुरीयमन्त्रमुद्धरति—ॐ श्रीमिति । ॐ श्रीं ह्लौं ॐ नमो भगवते हयग्रीवाय विष्णवे मह्यं मेधां प्रज्ञां प्रयच्छ स्वाहेति एकोनत्रिंशदक्षरोऽयं मनुः ॥ ७ ॥

हयग्रीवपञ्चममनुः

ॐ श्रीमिति द्वे अक्षरे । ह्लौमित्येकाक्षरम् । ऐमैमैमिति त्रीण्यक्षराणि । क्लीं क्लीमिति द्वे अक्षरे । सौः सौरिति द्वे अक्षरे । ह्रीमित्येकाक्षरम् । ॐ नमो भगवत इति सप्ताक्षराणि । हयग्रीवायेति पञ्चाक्षराणि । मह्यं मेधां प्रज्ञामिति षडक्षराणि । प्रयच्छ स्वाहेति पञ्चाक्षराणि । पञ्चमो मनुर्भवति ॥ ८ ॥

हयग्रीवपञ्चममनुमुद्धरति—ॐ श्रीमिति । ॐ श्रीं ह्लौं ऐं ऐं ऐं क्लीं क्लीं सौः सौः ह्रीं ॐ नमो भगवते हयग्रीवाय मह्यं मेधां प्रज्ञां प्रयच्छ स्वाहेति चतुस्त्रिंशदक्षरोऽयं मनुः ॥ ८ ॥

हयग्रीवैकाक्षरमनुः

हयग्रीवैकाक्षरेण ब्रह्मविद्यां प्रवक्ष्यामि । ब्रह्मा महेश्वराय महेश्वरः संकर्षणाय संकर्षणो नारदाय नारदो व्यासाय व्यासो

लोकेभ्यः प्रायच्छदितिं हकारों लकारोमुकारों त्रयमेकस्वरूपं भवति। हूलौं बीजाक्षरं भवति । बीजाक्षरेण हूलौंरूपेण तज्जापकानां संपत्सारस्वतौ भवतः। तत्स्वरूपज्ञानां वैदेही मुक्तिश्च भवति। दिक्पालानां राज्ञां नागानां किन्नराणामधिपतिर्भवति । हयग्रीवैकाक्षरजपशीलाज्ञया सूर्यादयः स्वतः स्वस्वकर्मणि प्रवर्तन्ते । सर्वेषां बीजानां हयग्रीवैकाक्षरबीजमनुत्तमं मन्त्रराजात्मकं भवति । हूलौं हयग्रीवस्वरूपो भवति ॥ ९॥

षष्ठमेकाक्षरं मनुं ब्रह्मादिपरंपराप्रवृत्तं मन्त्रराजत्वेन सर्वार्थसाधकं तदर्थानुसंधायिनां विकळेबरकैवल्यप्रदमिति स्तौति—**हयग्रीवेति** । वक्ष्यमाणविद्यायाः आचार्यपारंपर्यक्रममाह—**ब्रह्मेति** । हयग्रीवैकाक्षरीविद्यायाः प्रणवमहावाक्यानुकरणतामाह—**हकारोमिति** । **त्रयं** भवति ॥

हकारः परमेशः स्यात्तत्पदं चेति निश्चितम् ।
स[ल]कारः खेचरी प्रोक्तः त्वंपदं चेति निश्चितम् ॥

इति श्रुत्यनुरोधेन हकारस्तत्पदार्थः, स[ल]कारः त्वंपदार्थः, उकारस्तु तत्त्वंपदार्थगतवाच्यार्थत्यागपूर्वकं तत्त्वंपदलक्ष्ययोः परचित्प्रत्यक्चितोः ऐक्यानुवाद्यसिपदार्थो भवति । हकारादिवर्णत्रयोपरि श्रूयमाणः ओङ्कारः तुरीयोङ्काराग्रविद्योततुर्यतुरीयार्थो भवति । एतत्त्रयं मिळित्वा एकस्वरूपं भवति । तदेव विवृणोति—**हूलौमिति** । **हूलौंरूपेण** प्रत्यगभिन्नपरमात्मभावेन **तज्जापकानां** पारमैश्वर्यभावापन्नतया **संपत्सारस्वतौ भवतः** संपदीश्वरत्वं सारस्वतं निर्विशेषब्रह्मविद्यारूपम् । सम्यज्ज्ञानसंपत्सारस्वते भवत इति वक्तव्ये संपत्सारस्वताविति लिङ्गव्यत्ययः । यत्स्वातिरिक्तकलनाऽपह्नवसिद्धनिष्प्रतियोगिकब्रह्ममात्रमवशिष्यते **तत्स्वरूपज्ञानां वैदेही मुक्तिश्च भवति** । यदि सविशेषतया मन्त्रार्थं जानाति तदा **इन्द्रादिदिक्पालानां अधिपतिर्भवति** सर्वेश्वरो भवतीत्यर्थः । अस्य

मन्त्रेण ईश्वरत्वेन सूर्यादिभयहेतुत्वमाह—**हयग्रीवात्**, "भीषाऽस्माद्वातः पवते" इत्यादि श्रुतेः। यतः एवं प्रभाववान् हयग्रीवैकाक्षरमनुः अत एव **सर्वेषामिति**। बीजार्थस्तु **हयग्रीवस्वरूपो भवति** ॥ ९ ॥

वागादिसिद्धिकरः प्रयोगः

अमृतं कुरु कुरु स्वाहा। तज्जापकानां वाक्सिद्धिः श्रीसिद्धिरष्टाङ्गयोगसिद्धिश्च भवति ॥ १० ॥

हयग्रीवैकाक्षरोपासकं **अमृतं कुरु कुरु स्वाहा**। इतश्च **तज्जापकानामिति** ॥ १० ॥

सप्तदशाक्षरमनुः

ह्लौं सकलसाम्राज्येन सिद्धिं कुरु कुरु स्वाहा ॥ ११ ॥

अपरः सप्तदशाक्षरोऽयं मन्त्रः **ह्लौमिति** ॥ ११ ॥

मन्त्रज्ञानफलम्

तानेतान् मन्त्रान् यो वेद अपवित्रः पवित्रो भवति। अब्रह्मचारी सुब्रह्मचारी भवति। अगम्यागमनात् पूतो भवति। पतितसंभाषणात् पूतो भवति। ब्रह्महत्यादिपातकैर्मुक्तो भवति। गृहं गृहपतिरिव देही देहान्ते परमात्मानं प्रविशति ॥ १२ ॥

विश्वोत्तीर्णेतिमन्त्रज्ञानां फलमाह—**तानेतानिति**। मन्त्रार्थज्ञानमुख्यफलमाह—**गृहमिति** ॥ १२ ॥

हयग्रीवमन्त्राणां महावाक्यार्थप्रतिपादकत्वम्

प्रज्ञानं ब्रह्म। अहं ब्रह्मास्मि। तत्त्वमसि। अयमात्मा ब्रह्मेति महावाक्यैः प्रतिपादितमर्थं त एते मन्त्राः प्रतिपादयन्ति ॥ १३ ॥

विश्वोत्तीर्णेत्यादिमन्त्राणां महावाक्यसमन्वयार्थं महावाक्यान्याह—**प्रज्ञानमिति। महावाक्यैः** प्रत्यक्परचितोरेकत्वं **प्रतिपादितम्**। सप्तकोटिमहामन्त्राणां महावाक्यार्थत्वे मानमियं श्रुतिः—

नमस्त्वमर्थो विज्ञेयो रामस्तत्पदमुच्यते।
असीत्यर्थे चतुर्थी स्यादेवं मन्त्रेषु योजयेत्॥

इति॥ १३॥

स्वरव्यञ्जनभेदेन मन्त्रस्य द्विविधत्वम्

स्वरव्यञ्जनभेदेन द्विधायते॥ १४॥

मन्त्रसमुदायस्तु **स्वरव्यञ्जनभेदेन द्विधायते**। स्वरः प्रकृत्यंशः, व्यञ्जनं तु ब्रह्मांशः, "व्यञ्जनैः स्वरसंयोगो विद्धि तत्प्राणयोजनं" इति, "बीजं मायाविनिर्मुक्तं परं ब्रह्मेति कीर्त्यते" इति च श्रुतेः॥ १४॥

अनुमन्त्राः

अथानुमन्त्रान् जपति—

यद्वाग्वदन्त्यविचेतनानि राष्ट्री देवानां निषसाद मन्द्रा।
चतस्र ऊर्जं दुदुहे पयांसि क्व स्विदस्याः परमं जगाम॥ १५॥
गौरीमिमाय सलिलानि तक्षत्येकपदी द्विपदी सा चतुष्पदी।
अष्टापदी नवपदी बभूवुषी सहस्राक्षरा परमे व्योमन्॥ १६॥
ओष्ठापिधाना नकुली दन्तैः परिवृता पविः।
सर्वस्यै वाच ईशाना चारु मामिह वादये॥ १७॥
स शर्वरीरमृतिं बाधमाना [1]बृहन्मिमाय जमदग्निदत्ता।
आ सूर्यस्य दुहिता ततान श्रवो देवेष्वमृतमजुर्याम्॥ १८॥

[1] ब्रह्म—अ १, अ २.

मन्त्रानेवमुक्त्वा अथानुमन्त्रानाह--अथेति ॥ १९-१८ ॥

विद्याफलम्

य इमां ब्रह्मविद्यामेकादश्यां पठेद्धयग्रीवप्रभावेण महापुरुषो भवति। स जीवन्मुक्तो भवति ॥ १९ ॥

एतद्विद्याफलमाह—य इति । **प्रभावेण** प्रसादेन सः **महापुरुषो भवति ॥ १९ ॥**

विद्यां प्रति प्रार्थना

ॐ नमो ब्रह्मणे धारणं मे अस्त्वनिराकरणं धारयिता भूयासं कर्णयोः श्रुतं मा च्योढ्वं ममामुष्यमोमित्युपनिषत् ॥ २० ॥

उक्तामिमां विद्यां प्रणवत्वेन प्रार्थयति—**ओमिति**। "ओमित्येतदक्षरमिदं सर्वम्" इति श्रुतिसिद्धं तुरीयं तुर्यतुरीयं वा ब्रह्मोच्यते। हे तुर्यतुरीय **ब्रह्मणे** तुभ्यं **नमोऽस्तु**। त्वत्प्रसादतो मया देशिकमुखतो यद्यदधीतं **तत्तन्मे हृदि धारणमस्तु। तदनिराकरणं** अविस्मरणं यथा भवति तथा **धारयिता भूयासम्**। यच्छ्रेयःसाधनार्थं **कर्णयोः** कर्णाभ्यां **श्रुतं मा च्योढ्वं** मा विस्मरणमस्तु। किं च **ममामुष्यं** आमुष्मिकं विद्याफलं ओंकारार्थतुर्यतुर्यतया अवस्थानलक्षणं विकळेबरकैवल्यमस्तु । **इति**शब्दः प्रार्थनासमाप्त्यर्थः । **उपनिषच्छब्दः** हयग्रीवोपनिषत्समाप्त्यर्थः ॥ २० ॥

श्रीवासुदेवेन्द्रशिष्येणोपनिषद्ब्रह्मयोगिना ।
हयग्रीवोपनिषदो व्याख्यानं लिखितं स्फुटम् ।
प्रकृतोपनिषद्व्याख्या पञ्चपञ्चाशदीरिता ॥

इति श्रीमदीशाद्यष्टोत्तरशतोपनिषच्छास्त्रविवरणे शतसङ्ख्यापूरकं हयग्रीवोपनिषद्विवरणं संपूर्णम्

नामधेयपदसूची

यत्र पुटसंख्याऽनन्तरं तिर्यग्रेखायाः परं संख्या वर्तते तत्र तावती पदावृत्तिः बोध्या

पदम्	पुटसंख्या	पदम्	पुटसंख्या
अक्रूरः	२४	ईश्वरः	८०, २११, २८९
अगस्त्यः	३९२	उत्तानपादः	३०
अघासुरः	२४	उद्धवः	२४
अङ्गदः	३१६	उपेन्द्रः	८२
अत्रिः	३३१	उलूखलः	२४
अदितिः	२४	ऋक्षः	३१६
अनन्तः	३४, ३६, ३८, ३१८	एलापुत्रकः	३४
अनिरुद्धः	२९, ६७, ७०, ७१	कपीश्वरः	३१४
अब्जयोनिः	६४–२, ७०, ७४	कबन्धः	३१४
अम्बिकेश्वरः	६९	कमलासनः	२३
अष्टाक्षरीमण्डपः	१३७	कर्कोटः	३४, ३७, ३८
आदिनारायणः	९३, १०१, १०७, १२०, १२९–३, १४८	कर्दमः	३०
		कश्यपः	२४
आनन्दतरङ्गिणी	१२८	काद्रवेयः	३०
आनन्दवेदिका	१२०	काम्यवनम्	६९
इन्द्रः	९,१२–२,२३,३२–२,१०२	कार्कोटः	३१८
इन्द्रसेना	२०२	कालिकः	२९, ३४

पदम्	पुटसंख्या
काशी	३३३
कीलकनारायणः	११९
कुमुदवनम्	६९
कुरुक्षेत्रम्	७८–३, ३२६
कुवलयापीडः	२४
कृष्णः	१८–४, २३, ४२, ४३, ४४, ४६, ४८, ९७, ९८, ६२–२, ६३, ६८, ७१
कृष्णमूर्तिः	६७
कृष्णवनम्	६६
केकसेयः	३४८
केशी	९६
कौस्तुभः	७३
कंसः	२४
खदिरवनम्	६९
गङ्गा	३३४
गणेश्वरः	६९
गरुडः	२९–२, ३४
गान्धर्वी	६०, ६३, ६४, ७७
गुळिकः	३४, ३७, ३८, ३१८
गोकुलम्	२३
गोपालः	६३, ६४, ६९–४, ७०, ७१
गोपालपुरी	६४, ६९
गोपालेश्वरः	६६
गोपीजनवल्लभः	४३
गोवर्धनः	९६
गोविन्दः	४३
गौरी	२११
घटश्रोत्रः	३१९
चन्द्रध्वजः	९३, ९९
चाणूरः	९६
चाणूमरल्लः	२४
चिदानन्दमयवेदिका	१३७
चिदानन्दाचलः	१२९
चिन्मयप्रासादः	१३७
चिन्मयवेदिका	१२०
चिन्मयासनम्	१२९, १२९, १३७
जनकः	३६३
जयन्तकः	३१६
जाम्बवान्	८२, ८३, ३१६
तक्षकः	३४, ३६, ३८, ३१८
तालवनम्	६९
तुलसीवैकुण्ठपुरम्	१२७–२
त्रिपाद्विभूतिवैकुण्ठस्थानम्	१३९
त्र्यम्बकः	११
दक्षः	३०
दक्षिणामूर्तिः	३९२
दत्तात्रेयः	१६१–२
दिव्यमङ्गळासनम्	१२६

पदम्	पुटसंख्या
दुन्दुभिः . . .	३१४
दूर्वासाः . . .	९८
दूर्वाशनो मुनिः . .	६०
दूर्वाशी . . .	६०
देवकी . .	२३, ६४
देवदर्शी . . .	८८
धर्मपालः . . .	३१६
धर्मः . . .	३१६
धृष्टिः . . .	३१६
नारदः १६, १८, १९, २९, ३२–२, ६९, ३७९, ३८३, ३८९–२	
नारायणः ६४, ७९, ८४, ९३, १०१, १०३–१२, ११३, १६७	
नासी . . .	३३२
नित्यगरुडः . . .	१३०
नित्यवैकुण्ठम् . .	९२
नीलकण्ठेश्वरः . .	६६
नृसिंहः ९, १९, १९७, २११, २९७, ३१९	
पद्मः . ३४, ३७, ३८, ३१८	
परमपदम् . . .	९३
परमपुरुषः . . .	७०
परममङ्गळासनम् . .	१२०

पदम्	पुटसंख्या
परमानन्दतरङ्गिणी . .	१२८
परमानन्दविमानम् . .	१२९
परमेश्वरः . .	९२, १०२
परमेष्ठी . . .	२, ८६
पादविभूतिवैकुण्ठनारायणः .	१०२
पादविभूतिवैकुण्ठपुरम् .	१२९
पार्थसारथिः . .	९६
पितामहः . .	१४९, १९६
पिनाकी . . .	११
पूतना . . .	९६
पौण्ड्रः . . .	३४
पौण्ड्रकालिकः . .	३८
पौलस्त्यः . . .	३४७
प्रजापतिः ७, ११, १२–३, १३–२, १७९, १८०, २०२, २११, २१३, २६३–२	
प्रणवकर्णिका . .	१३७
प्रणवगरुडः . . .	११९
प्रणवविमानम् . .	१३७
प्रथमभूपुरवीथी . .	१४६
प्रद्युम्नः . २९, ६७, ७०, ७१	
प्रियव्रतः . . .	३०
बहिर्भूपुरवीथी . .	१४६
बहुळवनम् . . .	६५
बाह्यवृत्तवीथी . .	१४६

पदम्	पुटसंख्या
बृन्दा	२९
बृन्दावनम्	६९
बृहत्सेनः	३२–२
बृहद्वनम्	६९
बृहस्पतिः	७८, ३२६
बोधानन्दवनम्	१२८
बोधानन्दवैकुण्ठम्	१२९
ब्रह्मलोकः	७३
ब्रह्मविद्यातरङ्गिणी	१२६
ब्रह्मविद्यापादवैकुण्ठम्	१२८
ब्रह्मविद्यावैकुण्ठम्	१२६
ब्रह्मा १६–२, ३२, ३३, ४०, ६९, ७४, ८०, ८६, १५८, १५९, ३३९, ३९२, ३८३, ३८९	
भद्रवनम्	६९, ६६
भद्रासनम्	१३
भद्रेश्वरः	६६
भरतः ८२, ८४, ३१६–२, ३२८, ३६४	
भरद्वाजः ३२–२, ८०, ८३, ३२७, ३३९, ३३८	
भाण्डीरवनम्	६९
भोगासनम्	१२०
मणिकर्णी	३३४
मथुरा	६९, ६८, ७१, ७२
मथुरामण्डलम्	६९
मधुवनम्	६९
मध्यभूपुरवीथी	१४६
महागरुडः	३३, ३९–२
महानन्दपदम्	१३३
महाविष्णुः ४, ८८, १९०, १९९, १९८, १९४	
महेश्वरः २४, २११, ३८९–२	
मुष्टिकः	२४
मूलाविद्यापुरम्	१२३
मेरुः ६४, ७३,	
यमः	२१२
यमुना	९८
यशोदा	२२
याज्ञवल्क्यः ७८–२, ८०–२, ८३–२, ३२७, ३३१, ३३९, ३३८	
रामः १८–४, २३, ७०, ८४, ३०९, ३१०, ३२८, ३७२	
रामगायत्री	१४२
रामचन्द्रः २१, ३३९, ३६४	
रामभद्रः	३९२
राममूर्तिः	६७
रावणः	३१४

पदम्	पुटसंख्या	पदम्	पुटसंख्या
रुक्मिणी	७१	वीरेश्वरः	६६
रुद्रः	२३–२, ६९, ७४, ७८, ८०	वृन्दा	२९
रुद्रेश्वरः	६९	वृषभध्वजः	३३३
रोहिणी	२४	वैकुण्ठम्	२९
लक्ष्मणः	८२, ८४, ३१४, ३६३	व्यासः	३८९–२
लङ्का	३१९	शङ्खकः	३७, ३८
लोहवनम्	६९	शत्रुघ्नः	८२, ८४, ३१६, ३२८
वटभाण्डीरः	२९	शबरी	३१४
वनवैकुण्ठः	२३	शार्ङ्गम्	७३
वरुणः	३१६	शिशुमारचक्रम्	११९
वसिष्ठः	३१६, ३९९	शिवः	३९२
वसुदेवः	२३	शुद्धबोधानन्दवैकुण्ठम्	१२८
वामदेवः	३१६	शुद्धानन्दविमानम्	१२६
वायुसूनुः	३१६	शेषः	२९
वाली	३१४	शेषनागः	२३
वासुकिः	३४, ३६, ३८, ३१८	श्रीः	२११
वासुदेवः	३०, ९९, ३७९, ३८१	श्रीरामः	८२, ३४९
विजयः	३१६	श्रीवत्सः	७३
विभीषणः	३१६, ३४७, ३४८	श्रीवनम्	६९
विरजानदी	११९	संकर्षणः	२९, ३८९–२
विश्वामित्रः	३९२, ३९८, ३९९	सत्यक्षेत्रम्	१९९
विश्वेश्वरः	६९	सत्यभामा	२४
विष्णुः	९, ८०, २११	सनकाद्याः	३४९, ३६८
विष्वक्सेनः	१२६	सम्मोहनम्	३९२
विष्वक्सेनवैकुण्ठपुरम्	१२९	सरस्वती	२११

पदम्	पुटसंख्या	पदम्	पुटसंख्या
सहस्रदृक् . . .	३१६	सूर्यः . . .	२१२
सहस्राक्षजित् . .	३१५	सूर्यनारायणः . .	९३
सामवेदः . . .	८५	सोमः . . .	२१२
सावित्री . . .	२०८	सौमित्रिः . .	३०, ३२८
सीता ८२, ८४, ३१०, ३२८, ३६३–३		स्थाणुः . . .	३०
सुग्रीवः . .	३१५, ३१६	हनूमान् ८२, ८४, ३१५, ३१६, ३४४, ३४६, ३४९, ३६४, ३६५, ३६८, ३७०	
सुदर्शनम् . .	१३१–२, २१३		
सुदर्शनवैकुण्ठपुरम् . .	१३०		
सुदामा . .	२४, २५	हयग्रीवः . .	३८४–२
सुमन्त्रः . . .	३१६	हरिः . .	१८–८, २३
सुमित्रातनयः . .	३६४	हरिनायकः . . .	८४
सुराष्ट्रः . . .	३१६	हिरण्यगर्भः . १८, २९, १०२, १०५	

विशेषपदसूची

यत्र पुटसंख्याऽनन्तरं तिर्यग्रेखायाः परं संख्या वर्तते तत्र तावती पदावृत्तिः बोध्या

पदम्	पुटसंख्या	पदम्	पुटसंख्या
अकारः	२३८, २९१, २९९	अनन्तकोटिब्रह्माण्डानि	१०२, १२२, १२३
अखण्डबोधविमानम्	१२९	अनन्तमन्त्रः	१४३
अङ्गमन्त्राः	२०५	अनन्तवस्तुभेदः	१४९
अज्ञानप्राबल्यम्	११६	अनन्तासनम्	१३८
अण्डम्	२	अनिलः	३१६
अण्डप्रमाणम्	१२२	अनुज्ञा	३०२
अण्डविराट्	८०	अनुज्ञाता	२८१
अण्डविराट्पुरुषः	१०९	अनुज्ञैकरसः	२८२
अण्डविराट्स्वरूपम्	१०२	अनुष्टुप्	१०, १६३, १७७–२, २१९
अथर्वशिरः	१७१	अन्तकः	२१२
अथर्वाङ्गिरसः	१०	अन्तर्वृत्तवीथी	१४६
अद्वितीयाखण्डानन्दब्रह्मस्वरूपम्	१०८	अन्नपूर्णेश्वरीमन्त्रः	१४०
अद्वैतसंस्थानम्	१३४–२	अपक्वकषायः	२६९
अद्वैतस्वरूपम्	१०९	अब्जकाण्डम्	२९
अनङ्गगायत्री	४७	अभिमन्ता	२८९
अनन्तः	३१६		

पदम्	पुटसङ्ख्या	पदम्	पुटसंख्या
अमृतबीजद्वयम्	१४६	आत्मा २५८, २२९, २९०,	
अयनम्	१०५	२९४–२,२९५,३०२,३३०,३७९	
अर्धमात्रा	१४९, २११	आत्माद्यावरणम्	३६६
अविकल्पः	२८३	आदित्याः	६५, ७४, २११
अविद्या	११०	आदिविराट्पुरुषः	१०६
अविद्याण्डम्	१०१	आदेशः	२४४
अविद्याप्रपञ्चः	१०४	आधारशक्त्यादिवैष्णवपीठम्	३६७
अविद्यापादः ९०,९१, ९७, १०८		आनन्दपादः	९०, ९१
अविद्यालक्ष्मीः	१२३	आनन्दसाकारः	९७, ९९
अविद्याशबळम्	१०१	आनुष्टुभम्	१२–३
अविमुक्तम्	७८–३	आपः	६१
अव्यक्तम्	१०७	इन्द्राद्यावरणम्	३६७
अशोकः	३१६	इन्दुः	३१६
अष्टदळपद्मम्	१३९, १४१	ईशः	३१६
अष्टविधमन्त्रः	८५	ईशानकैवल्यम्	११९
अष्टाक्षरः १६१, २०९, २१४, ३५४		ईश्वरसाक्षात्कारः	११८
अष्टादशदळपद्मम्	१४०	उकारः २४०, २५१, २६१	
अष्टादशाक्षरः	३५८	उग्रः	४, १९२
अष्टार्णः	३५३	उद्भूळनम्	३८१
अष्टाविंशतिवर्णकः	३६१	उन्मेषः १०१, ११२–६	
असङ्गः	२९८	उपद्रष्टा	३०४
अहम्	५, २००	उभयात्मकसाकारः	९७, ९९
अहङ्कारः	१०१	ऊर्ध्वपुण्ड्रम्	३७८, ३८०
आकाशः	६०	ऋग्वेदः	१०, ८०
आत्मस्वरूपम्	८०	ऋग्वेदशिरः	१६७

पदम्	पुटसंख्या
ऋगानुष्टुभी .	३
ऋजीषी . . .	२०२
ऋतुः . . .	१०५
एकत्रिंशात्मकः . .	३६१
एकविंशार्णकः . .	३५९
एकाक्षरः . १३९, १६१	३४९
एकादशरुद्राः . ६५,	१०२
एकोनत्रिंशदक्षरः . .	३६१
एकोनविंशकः . .	३५८
ओङ्कारः २११, २२३, २४३, २५१,	२७९
औपला . . .	२०२
कालः . . .	२१२
किरीटम् . . .	७३
कुण्डलम् . . .	७३
कृष्णगायत्री . .	१४२
कृष्णदशाक्षरमन्त्रः . .	१३९
कृष्णद्वादशाक्षरमन्त्रः .	१४०
कृष्णनवाक्षरमन्त्रः . .	१३९
कृष्णमालामन्त्रः . .	१४५
कृष्णषडक्षरमन्त्रः . .	१३८
कृष्णषोडशाक्षरमन्त्रः .	१४०
कृष्णानुष्टुभमन्त्रः . .	१४२
कृष्णाष्टाक्षरमन्त्रः . १३९,	१४१
कृष्णाष्टादशाक्षरमन्त्रः .	१४०
केयूरः . . .	७३

पदम्	पुटसंख्या
केशवादिचतुर्विंशतिमन्त्राः .	१४२
कौस्तुभमन्त्रः . .	१४३
क्रीडाकन्तुकम् . .	१२२
क्लींकारः . . .	५२
गदा . . .	७३
गदामन्त्रः . . .	१४३
गन्धर्वाः . . .	७४
गरुडपञ्चाक्षरमन्त्रः . १४०,	१४१
गरुडपञ्चाक्षरयुक्तं वृत्तम् .	१४४
गरुडब्रह्मविद्या . ३२,	३३
गरुडमन्त्रः . . .	१४३
गरुडमालामन्त्रः . .	१४०
गायत्री . . १०,	३३
गुरुः . . .	१५९
गोपालमन्त्रः . .	१४०
गोपीचन्दनम् ३७५, ३७६,	३८१
ग्रहाः . . .	२१२
चक्रम् . . २४,	७३
चतुरक्षरः . . .	३५०
चतुरात्मा . . .	२५०
चतुर्थः . . .	२०८
चतुर्दशदळपद्मम् . .	१४०
चतुर्दशवर्णकः . .	३५७
चतुर्भुजः . . .	७३
चतुर्विंशतिदळपद्मम् . .	१४१

पदम्	पुटसंख्या	पदम्	पुटसंख्या
चतुर्विंशतिवर्णकः	३६०	त्रिंशतारचक्रम्	१३२
चतुश्शब्दः	६८	त्रिशरीरम्	२२४
चतुष्पात्	२०५, २२५, ३२९	त्रिष्टुप्	१०
चत्वारिंशद्दळपद्मम्	१४४	त्र्यक्षरः	३९०
छन्दांसि	२१९	दक्षिणामूर्तिनवाक्षरमन्त्रः	१३९
जगती	१०, २१४	दधिवामनमन्त्रः	१४०
जगन्मोहनबीजयुतं वृत्तम्	१४०	दशदळपद्मम्	१३९
जीवः	११३–५, २१२	दशाक्षरः	३९५, ३९६
जीवन्मुक्तः	११७, ३६९, ३७३, ३८९	दशार्णः	३९६
जीवेश्वरभेदः	११२	दिनम्	१०५
तत्त्वज्ञानम्	११७	दिवा	१०५
तन्मात्राणि	७१	दीर्घा	२०२
तरुत्रः	२०२	दुग्धोदधिः	२४
तापसाः	२३	दृष्टः	२९६
तामसी	२३	देवयजनम्	७८–३, ३२६
तारकम्	८०–२, ८१, १६०, ३२७	दैत्याः	२३
तारकं ब्रह्म	७८, ८१	द्रष्टा	२३६
तुरीयः	२३०, २४१, ३८५	द्वात्रिंशदक्षरं साम	१८०
तृणावर्तः	५६	द्वात्रिंशद्दळपद्मम्	१४१
तृतीया	२४८	द्वादशदळपद्मम्	१३९
तेजः	६१	द्वादशमूर्तयः	६७, ७५
तेजोराशिः	१२०, १२५	द्वादशाक्षरः	१६२, ३५७
त्रयोदशार्णः	३५७	द्वादशादित्याः	६५, १०२
त्रयोविंशाक्षरः	३५९	द्वाविंशदक्षरः	३५९
त्रिंशद्वर्णात्मकः	३६१	द्वितीया	२४८

पदम	पुटसंख्या
द्विध.	३८८
द्व्यक्षरः . . .	३९०
धाता . . .	३१६
धृष्टद्याद्यावरणम् . .	३६७
ध्यानयज्ञः . . .	६, ८
ध्रुवाद्यावरणम् . .	३६७
ध्वजमन्त्रः . . .	१४३
नन्दः . . .	२२
नन्दकमन्त्रः . .	१४३
नमामि . .	९, २००
नवदळपद्मम् . .	१३९
नवार्णः . . .	३९९
नागकः . . .	३८
नारसिंहमानुष्टुभम् . .	१७६
नारसिंही माया . .	२०२
नारायणगायत्रीमन्त्रः .	१४१
नारायणद्वादशाक्षरमन्त्रः .	१३९
नारायणबीजम् .	१३८, १४९
नारायणबीजयुक्तं वृत्तम् .	१३९
नारायणमन्त्रः . .	१४१
नारायणाष्टाक्षरमन्त्रः.	१३९, १७०
नारायणास्त्रमन्त्रः . .	१४९
नित्यसाकारः . .	९७–२
निमेषः . .	१०७, ११२–९
नियन्ता . . .	२८९
निरतिशयानन्दतेजोराशिः .	१३७
निराकारः . . .	९९–३
निरालम्बयोगः . .	१९३
निरालम्बयोगाधिकारी .	१९३
निरुपाधिकः . .	९६
निरुपाधिकसाकारः .	९७–२, ९८–२
निष्काम्यां:. .	६४, ६९
नीलकण्ठत्र्यक्षरीमन्त्रः .	१४१
नीलादयः . . .	३१६
नीलाद्यावरणम् . .	३६७
नृसिंहगायत्री . .	२१०
नृसिंहगायत्रीमन्त्रः . .	१४१
नृसिंहमालामन्त्रः . .	१३९
नृसिंहषडक्षरमन्त्रः . .	१३८
नृसिंहानुष्टुभमन्त्रः . .	१४१
नृसिंहाष्टाक्षरमन्त्रः . .	१३९
नृसिंहैकाक्षरयुक्तं वृत्तम् .	१३९
नैष्कर्म्यम् . . .	४६
पक्षः . . .	१०९
पञ्चतन्मात्राणि . .	१०१
पञ्चदशार्णः. . .	३९७
पञ्चपदम् ४९, ४६, ४८, ९९–२, ९७–२	
पञ्चपदमनुः. . .	४८
पञ्चमहाभूतानि . .	१०१

पदम्	पुटसंख्या
पञ्चममनुः . . .	३८९
पञ्चविंशतितर्णकः . .	३६०
पञ्चाग्नयः . . .	२११
पञ्चाङ्गानि. . .	१९०
पञ्चार्णः . . .	३९०
पञ्चाशद्दळपद्मम् . .	१४९
पद्ममन्त्रः . . .	१४३
परब्रह्ममन्त्रः . .	१४४
परब्रह्मस्वरूपम् . .	८०
परमकौतुकम् .	१२४, १२६
परमतत्त्वरहस्यम् . .	८९
परमहंसः . . .	३७८
परमात्मा .	८०, २९६, ३७८
परमात्माविर्भावः . .	११७
परमं धाम . . .	२२१
परं ब्रह्म . . .	८१
पादचतुष्टयम् .	९०, १०८
पादत्रयम् . .	१९०–३
पुरुषः .	८०, २११, ३७१
पूजापीठः . .	३६५, ३६७
पूर्वा मात्रा . . .	२४७
प्रकृतिः . .	२११, ३७१
प्रकृतिस्वरूपम् . .	८०
प्रजापतयः . . .	१०२
प्रणवः . .	१३८, २५१

पदम्	पुटसंख्या
प्रणवमालामन्त्रोक्तं वृत्तम्	१३९–२, १४०, १४५
प्रणवसंपुटिताग्निबीजयुक्तं वृत्तम् . . .	१४२
प्रणवसंपुटिताङ्कुशबीजयुक्तं वृत्तम् . .	१४३
प्रणवादिमन्त्राः . .	१४४
प्रणवाधिकारः . .	३४६
प्रपञ्चहीनः . . .	२५०
प्रपञ्चोत्पत्तिक्रमः . .	१०४
प्रळयः . .	१०५, १०६
प्रवाहतानित्यत्वम् . .	१०४
प्राणः . . .	२१२
प्लुता . . .	२०२
बकः . . .	२४
बीजाक्षरम् . . .	३८६
ब्रह्म १८, २३, ४३, ४५–२, ७१, ८९–८, ९०–१३, १०१, १०४–३, १०९, ११०–२, २३७, २६६, २६७, ३००, ३७९	
ब्रह्मगायत्रीमन्त्रः . .	१४१
ब्रह्मचारी . . .	३७६
ब्रह्मचैतन्यम् .	९८, ११३

पदम्	पुटसंख्या
ब्रह्मजाः	७४
ब्रह्मविद्यासाकारः	९७
ब्रह्मसदनम्	७८–३, ३२६
ब्रह्मसवनम्	९२
ब्रह्माण्डम्	१०६
ब्रह्माण्डस्वरूपम्	१२२
ब्रह्माद्वैतम्	१०८
ब्राह्मणः	९, ४२, ४३
भक्तिनिष्ठा	१८६
भक्तियोगः	१९३
भगवान्	८०
भजनम्	४६
भद्रः	९, १९८
भीषणः	९, १९८
भूगोळचक्रम्	६४
भूचक्रम्	१४९
भूपुरचतुष्टयम्	१४६
भूमिः	६१
भूमिपद्मम्	७३
मकारः	२४०, २९१, २६२
मनः	६१
मनुः	२१२
मनोयज्ञः	७
मन्त्रः	३०८
मन्मथबीजयुक्तं वृत्तम्	१४१
महत्	१०१
महाचक्रम्	२१३
महानारायणयन्त्रम्	१४७
महानीलकण्ठमन्त्रः	१४९
महापद्मः ३४, ३७, ३८,	३१८
महाभूतानि	२१२
महामण्डूकादि	१२२
महामाया ११२, ११३,	१२३
महायन्त्रम् १३८,	३६७
महायन्त्रमयपरमवैकुण्ठनारायण-यन्त्रम्	१३८
महायोगमाया	१२४
महावाक्यार्थः	१९२
महाविराट्पदम्	१२३
महाविराट्पुरुषः	१०६
महाविराट्स्वरूपम्	१२३
महाविष्णुद्वादशाक्षरमन्त्रः	१४०
महाव्याहृतयः	२११
मातृकाक्षरमाला	१४९
माया	२३
मायाबीजयुक्तं वृत्तम्	१४१
माला	७३
मालामन्त्रः	३२०
मासः	१०९

पदम्	पुटसंख्या	पदम्	पुटसंख्या
मुक्तसाकारः	९७–२, ९८	राममालामन्त्रः	१४९
मुनयः	६९	रामषडक्षरमन्त्रः	१३८
मूलाविद्या	९१, १०७	रामसेवकः	३६४
मूलाविद्याविर्भावः	१०१	रामस्याङ्गानि	३४६
मूलाविर्भावः	१०१	रामाङ्गं प्रणवः	३४७
मृत्युः	२१२	रामानुष्टुभमन्त्रः	१४२
मृत्युमृत्युः	९, १९९	रामाष्टाक्षरमन्त्रः	१३९
मेघघोषः	२४	राष्ट्रवर्धनः	३१६
मोक्षः	१९०	रुद्रवर्णात्मकः	३९६
मोक्षस्वरूपम्	११९	रुद्राः	२११
यजुः	१०	लक्ष्मीनारायणमन्त्रः	१४०
यजुर्गायत्री	२१०	लोकपालमन्त्राः	१४९
यजुर्वेदः	८२	लोकपालाः	२११
यजुर्वेदशिरः	१६९	वज्राद्यावरणम्	३६७
यतिः	३८०	वटबीजसामान्यम्	२८८
यन्त्राङ्गानि	१४६	वत्सरः	१०९
रसनम्	४९	वनमालामन्त्रः	१४३
राजसी	२३	वरणा	३३२
रात्रिः	१०९	वराहबीजयुक्तं वृत्तम्	१४०
रामचन्द्रषडक्षरः	३३८	वसवः	६९, ७४, २११
रामदशाक्षरमन्त्रः	१३९	वसिष्ठाद्यावरणम्	३६७
रामद्वादशाक्षरमन्त्रः	१४०	वह्निः	३१६
रामनवाक्षरमन्त्रः	१३९	वानप्रस्थः	३७६
रामबीजम्	३७१	वामनाष्टाक्षरमन्त्रः	१४१
राममन्त्रार्थः	३७०	वामनाष्टादशाक्षरमन्त्रः	१४०

पदम्	पुटसंख्या	पदम्	पुटसंख्या
वायुः	३०, ६१	व्यूहभेदाः	१३६
वासुदेवद्वादशाक्षरमन्त्रः	१३९	शङ्खः	३४, ७३, ३१८
वासुदेवाद्यावरणम्	३६७	शङ्खमन्त्रः	१४३
विद्या	२११	शतारचक्रम्	१३२
विद्याऽऽदीनां भेदः	९२	शरणागतिमन्त्रः	१४१
विद्याऽऽनन्दतुरीयांशाः	९१	शार्ङ्गमन्त्रः	१४३
विद्यापादः	९१	शिवगायत्री	१४४
विद्याप्रपञ्चः	१०४	शिवपञ्चाक्षरमन्त्रः	१३८
विद्यासाकारः	९९	शुद्धबोधानन्दलक्षणम	१२०
विनायकाः	६९, ७४	शुद्धशेषः	१२०
विराट्	१२४	शूद्रः	९
विराट्पुरुषः	२१२	श्रीकराष्टाक्षरमन्त्रः	१३९
विश्वः	७१	श्रीबीजयुक्तं वृत्तम्	१४४
विश्वरूपम्	६९	श्रीवत्समन्त्रः	१४३
विशार्णकः	३५८	षट्कोणचक्रम्	१३२, १३८
विष्णुषडक्षरमन्त्रः	१३८	षट्छतारचक्रम	१३२
वीरः	४, १९४	षट्त्रिंशद्दळपद्मम्	१४२
वेदगायत्रीमन्त्रः	१४९	षड्दळपद्मम्	१३८
वेदाः	२११	षडक्षरः	१६१, ३९१
वैकुण्ठपार्षदाः	११८	षड्विंशाक्षरः	३६०
वैष्णवं धाम	९३	षष्ठ्यरचक्रम्	१३२
वैष्णवभक्तिः	११७	षोडशकलः	२१५
वैष्णवमन्त्रः	९४	षोडशदळपद्मम	१४०
वैष्णवी माया	२३	षोडशाक्षरमन्त्रः	१६२, ३९८
व्यक्ताः	७९	सकाम्याः	६४–२, ६५

पदम्	पृष्ठसंख्या
सत्	२७४
सत्तामात्रम्	२९२
सद्गुरुकटाक्षः	११७
सन्धेर्गविर्भाव	३३२
सप्तचत्वारिंशन्मन्त्राः	३३७
सप्तदशाक्षरः	३९८
सप्तपुर्यः	६४–२
सप्तविंशतिवर्णकः	३६०
सप्ताक्षरः	३१३
सर्वतोमुखः	४, १९६
सविलासमहामूलाविद्योदयक्रमः	१०४
सविलासमूलाविद्योपसंहारक्रमः	१०९
सहस्रारचक्रम्	१३२
साकारः	९९–४, ९६, ९७
साकारनिराकारौ	९९, १००
साक्षी	२३७
साङ्गं साम	१७९, १८३, १८९
सात्विकी	२३
साम	१०, १८१, १८२–३, १८४
सामवेदशिरः	१७०
सायुज्यमुक्तिः	११९
सालम्ब्योगः	१९३
सुदर्शनगायत्रीमन्त्रः	१४१
सुदर्शनपुरुषः	९३, १३३–३
सुदर्शनमन्त्रः	१४३
सुदर्शनम	१४०
सुदर्शनष	१३८
सुदर्शनर्ष	१४०
सुदर्शनमहाचक्रम्	२१६, २१७
सुरभिविद्याः	९२
सुविद्यापादः	९०
सुषुप्तम	२०७, २२८, ३२९
सूक्ष्माष्टाक्षरः	८१
सूर्याष्टाक्षरीमन्त्रः	१४९
सोपाधिकः	९६
सोपाधिकसाकारः	९७–२
सोऽहम्	३०१
सौर्या	६०
संपत्सारस्वतौ	३८६
संसारतरणोपायः	११६
स्थितिः	१०६
स्थूलविराट्स्वरूपम्	१०२
स्वराट्	२७२, २७९, २७८
स्वरूपम्	७४
स्वामी	६३
हनूमदाद्यावरणम्	३६७
हयग्रीवगायत्रीमन्त्रः	१४१
हयग्रीवनवाक्षरमन्त्रः	१३९
हयग्रीवमन्त्रः	१४०
हयग्रीवषट्त्रिंशदक्षरमन्त्रः	१४२

पदम्	पुटसंख्या	पदम्	पुटसंख्या
हयग्रीवानुष्टुभमन्त्रः .	१४१	हैरण्यगर्भः . . .	९७
हयग्रीवाष्टत्रिंशदक्षरमन्त्रः	१४२	हंसः . . .	३०१
हयग्रीवैकाक्षरयुक्तं वृत्तम्	१४१	हंसमन्त्रः . .	११८
हृत्पद्मम् . .	७२	हंसःसोऽहंमन्त्रः .	१४९
हैरण्यः . .	४४	हस्वा . .	२०२

Printed by J. R. Aria at the Vasanta Press, Adyar, Madras.